श्रीहेमचन्द्राचार्यविरचिता

व्युत्पत्तिरत्नाकरकलिता

# ॥ अभिधानचिन्तामणिनाममाला ॥

# Abhidhānacintāmaṇināmamālā

—: संशोधकः सम्पादकश्च :—

गणी श्रीचन्द्रविजयः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ श्रीशङ्खेश्वरपार्श्वनाथाय नमः ॥

॥ अनन्तलब्धिनिधानश्रीगौतमस्वामिने नमः ॥

॥ परमोपास्यश्रीनेमि-विज्ञान-कस्तूर-चन्द्रोदय-अशोक-सोमचन्द्रसूरीश्वरसद्गुरुभ्यो नमः ॥

श्रीनेमि-विज्ञान-कस्तूरसूरिग्रन्थश्रेणिः-१६

## कलिकालसर्वज्ञश्रीहेमचन्द्राचार्यविरचिता

## वाचकश्रीदेवसागरगणिकृतव्युत्पत्तिरत्नाकरकलिता

# ॥ अभिधानचिन्तामणिनाममाला ॥

—: आशीर्वाददातारः :—

परमपूज्याचार्यश्रीविजयचन्द्रोदयसूरीश्वरमहाराजाः

परमपूज्याचार्यश्रीविजयअशोकचन्द्रसूरीश्वरमहाराजाश्च

—: मार्गदर्शकाः :—

परमपूज्याचार्यश्रीविजयसोमचन्द्रसूरीश्वरमहाराजाः

—: संशोधकः सम्पादकश्च :—

व्याकरणाचार्यपरमपूज्याचार्य-

श्रीविजयसोमचन्द्रसूरीश्वरमहाराजानां शिष्यः

गणी श्रीचन्द्रविजयः

—: प्रकाशकः :—

सुरतवर्तिश्रीरांदेररोडजैनसङ्घः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**प्रकाशकः**
**श्री रांदेर रोड जैन संघ.**
श्री शंखेश्वर पार्श्वनाथ जैन देरासर पेढी.
अडाजण पाटीया, रांदेर रोड.
सुरत-३९५००९. फोन : (०२६१) २६८७४८८.

**विमोचनावसरः**
**वि. सं. २०५९ तमे वर्षे आषाढे सुदि १०, बुधवासरः**
सुरतरांदेरमार्गाङ्गणे श्रीसूरिगणचातुर्मासप्रवेशस्य
श्रीमतीसुंदरबेनपानाचंदरामचंदशाह-
श्राविकाआराधनाभवनोद्घाटनप्रसङ्गे
**विमोचनकारः- डॉ. श्रीअरविन्दभाई पानाचंदशाहवर्यः ॥**

ISBN 81-901757-0-X

## —: प्राप्तिस्थानानि :—

| | |
|---|---|
| **(१) श्री नेमि-विज्ञान-कस्तूरसूरीश्वरजी जैन ज्ञानमंदिर.**<br>मेईन रोड, गोपीपुरा, सुरत-३९५ ००१.<br>C/O. अश्विनभाई संघवी. फोन : २४१२८३३.<br>निकेशभाई संघवी. फोन : २४२२६११. | **(२) श्री रांदेर रोड जैन संघ.**<br>श्री शंखेश्वर पार्श्वनाथ जैन देरासर पेढी.<br>अडाजण पाटीया, रांदेर रोड.<br>सुरत-३९५००९. फोन : २६८७४८८. |
| **(३) हर्षदभाई चुनीलाल शाह**<br>भारत ट्रेडींग कुं.<br>१११, टनटनपुरा स्ट्रीट, खोजा गली. मुंबई-४०० ००९.<br>फोन : २३४७६०१३, २५००२१७५. | **(४) श्री अनिलभाई शांतिलाल गांधी**<br>१११, महाकान्त बिल्डींग, आश्रम रोड,<br>वी. अेस. हॉस्पिटल सामे,<br>अमदावाद-३८० ००६. फोन : ६५८४८०७. |
| **(५) भरत ग्राफिक्स**<br>७, न्यु मार्केट, पांजरापोळ,<br>रिलिफ रोड, अमदावाद-३८० ००१<br>फोन : २१३४१७६, २१२४७२३ | **(६) श्री १०८ जैन तीर्थदर्शन भवन ट्रस्ट**<br>श्रीसमवसरण महामंदिर.<br>तळेटी रोड, पालीताणा-३६४ २७०.<br>फोन : ५२४९२. |

**वीर संवत् : २५२६**
**विक्रम संवत् : २०५९**
**इस्वीसन् : २००३**

**(७) जगदीशकुमार बी. जैन**
मु. पो. डुमा, ता. जांबुघोडा.
जि. पंचमहाल, (गुजरात).
फोन : (९५२६७६) २४२१०६

**नेमि संवत् : ५८**
**आवृत्तिः : प्रथमा**
**प्रतयः : १५००**

**मूल्यम् : रू. ६००-००**

**भरत ग्राफिक्स**
७, न्यु मार्केट, पांजरापोळ, रिलिफ रोड,
अमदावाद-३८०००१. फोन : २१३४१७६, २१२४७२३
E-mail : padmavati@satyam.net.in, website:www.padmavati sales.com.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

.. Śaṅkhēśvara pārśvanāthāya Namaḥ ..
.. Anantalabdhinidhāna śrī gautamasvāminē Namaḥ ..
.. Paramōpāsya śrī nēmi-Vijñāna-Kastūra-Candrōdaya-Aśōka-Sōmacandrasūrīśvara sadgurubhyō Namaḥ ..

Śrī nēmi-Vijñāna-Kastūrasūri Book Series No.-16

**Kalikālasarvajña śrī hēmacandrācārya viracitā**
**Vācaka śrī dēvasāgaragaṇi kṛta vyutpattiratnākara kalitā**

# Abhidhānacintāmaṇināmamālā

**With Complements From :**

**Parama pūjy ācārya śrī vijayacandrōdayasūrīśvara mahārājāḥ**
**Parama pūjy ācārya śrī vijayaaśōkacandrasūrīśvara mahārājāḥ śca**

■

**Directions by :**
**Parama pūjy ācārya śrī vijayasōmacandrasūrīśvara mahārājāḥ**

■

**Research & Edited by :**

**Vyākaraṇācārya parama pūjy ācārya śrī**
**vijayasōmacandrasūrīśva mahārājānāṃ Śiṣyaḥ**
**Gaṇi Śrīcandravijayaḥ**

■

**Published by :**

**śrī rāndēra rōaḍ jain saṅghaḥ**
**Surata-395009. Phōna-2687488**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Published by :
Shree Rander Road Jain Sangh
Shree Sankheshwer Parshwanath
Jain Derasar Pedhi
Adajan Patiya, Rander Road,
Surat-395009 (Gujarat) (India)
Ph : 00-91-261-2687488

**ISBN 81-901757-0-X**

Edi.
2003

Book Aviable From Here

(1) Shree NemiVijnanaKastursuriji Jain Jnanamandir.
Main Road, Gopipura, Surat-395001.
(Gujart) (India)
Ashvinbhai Sanghavi. Ph.-2412833.
Nikeshbhai Sanghavi. Ph.-2422611

(2) Shree Randera Road Jain Sangh
Shree Sankheshwar Parswanath Jain Derasar Pedhi.
Adajan Patiya, Rander Road.
Surat-395009 (Gujarat) (India)
Ph : 00-91-261-2687488

(3) Harshadbhai Chunilal Shah
Bharat Trading Company
111, Tantantpura Street, Khoja Gali,
Mumbai-400 009. (Maharashtra)
Ph : 00-91-22-23476013, 25002175.

(4) Shree Anilbhai Shantilal Gandhi
111, Mahakant Building,
Opp. V. S. Hospital, Ashram Road,
Ahmedabad-380006. (Guj.) (India)
Ph : 00-91-79-6584807.

(5) Bharat Graphics
7. New Market, Panjra Pole,
Relief Road, Ahmedabad-380 001
(Guj.) (India)
Ph : 00-91-79-2134176, 2124723

Vikrama Sanvat
2059

(6) Shree 108 Jain Tirthadarsan Bhavan Trust
Shree Samvasran Mahamandir.
Taleti Road, Palitana-364270.
(Guj.) (India)
Ph : 00-91-2848-52492.

(7) Jagadishkumar B. Jain
Po. Duma, Ta. Jambughoda.
Di. Panchamahal, (State-Gujarat) (India)
Ph : 00-91-79-2676-242106

PRICE : Rs. 600-00
US$ : 15
(Including Post Parcle Charge)

Printed at : Bharat Graphics
New Market, Panjara Pole, Relief Road, Ahmedabad-3800001. Ph : 2134176, 2124723
E-mail:padmavati@satyam.net.in, web site: www.padmavati sales.com.

Jain Education International For Private & Personal Use Only www.jainelibrary.org



# આવકાર

આપણે આવકારીએ
અંતરના આહ્લાદથી
એકી અવાજે

## અભિધાન ચિંતામણિ નામમાલા ને...

જેના કર્તા છે, કલિકાલસર્વજ્ઞ **શ્રીહેમચંદ્રાચાર્ય ભગવંત...**
જેના વૃત્તિકાર છે, અચલગચ્છીય **વાચક શ્રી દેવસાગરજી ગણિવર્ય...**

જેના પ્રેરણાદાતા-શુભાશિષદાતા છે–
પ.પૂ.આચાર્ય **શ્રી વિજય ચંદ્રોદયસૂરીશ્વરજી મહારાજ સાહેબ,...**
પ.પૂ.આચાર્ય **શ્રી વિજય અશોકચંદ્રસૂરિજી મ.** આદિ પૂજ્ય ગુરુભગવંતો...

જેના પથદર્શક છે પ.પૂ. આચાર્ય **શ્રી વિજય સોમચંદ્રસૂરીશ્વરજી મ...**

જેના સંશોધનકાર અને સંપાદનકાર છે,
અથાક પરિશ્રમી પૂજ્ય ગણિવર્ય **શ્રી શ્રીચંદ્રવિજયજી મહારાજ સાહેબ...**

જેના આર્થિક સહયોગી છે, શ્રુતજ્ઞાનપ્રેમી જૈનશ્રી સંઘો...
જેના શ્રુતસંરક્ષક છે, શ્રીમહાવીર શ્વે.મૂ.પૂ.જૈન સંઘ. ઓપેરા સોસા., અમદાવાદ...

જેના સુચારુ, સુવાચ્ય મુદ્રણ માટે દિનરાત જોયા વગર મહેનત કરી છે,
**ભરત ગ્રાફિક્સ...** ભરતભાઈ, મહેન્દ્રભાઈ આદિ, અમદાવાદ...
જેના ટાઈપસેટીંગ કરનાર છે, બહેન શ્રી નસીમ...

જેના કલર આઠ પેજ બનાવનાર છે, નેહજ એન્ટરપ્રાઈઝ, મુંબઈ...

જેના સહાયક બન્યા છે, નામી-અનામી અનેક વ્યક્તિઓ...

અમારા શ્રીસંઘના પરમોપકારી ત્રણે પૂજ્ય ગુરુભગવંતોએ અમારા શ્રીસંઘ ઉપર વિશ્વાસ રાખીને સમ્યગ્ જ્ઞાનના પ્રચાર-પ્રસાર માટે પ્રાચીન અર્વાચીન ગ્રંથના પ્રકાશનની સંપૂર્ણ જવાબદારી અમારા શિરે મૂકી છે, તેથી અમે તો આ ગ્રંથના પ્રકાશનમાં માત્ર નિમિત્તરૂપ બન્યા છીએ.

વિ.સં. ૨૦૪૮-૪૯ના અમારા શ્રીસંઘના આંગણે થયેલ ચાતુર્માસ સમયે પૂજ્ય ગણિવર્ય શ્રી શ્રીચંદ્રવિજયજી મ. આદિ પૂજ્યશ્રીના શિષ્યો જ્ઞાનોપાર્જન માટે જે સતત પરિશ્રમ લેતા હતા, તેની ફળશ્રુતિરૂપે આવા ગ્રંથોના પ્રકાશન થઈ રહ્યા છે..... ભવિષ્યમાં થતા રહેશે...

અમારા શ્રીસંઘનું તો પરમસૌભાગ્ય છે કે આ ગ્રંથનું વિમોચન પણ અમારા શ્રીસંઘના આંગણે **સુંદરબા શ્રાવિકા આરાધના ભવન**ના ઉદ્‌ઘાટન અને ચાતુર્માસના પ્રવેશની સાથે થશે.

પ્રાંતે, વિદ્વાનો, બુદ્ધિમંત સુજ્ઞ વાચકો વારંવાર આ ગ્રંથનો ઉપયોગ કરી, મન-વચન-કાયાના યોગોને સ્થિર કરવા દ્વારા શીઘ્ર અયોગી બને તેવી અભ્યર્થના.

**લિ. શ્રી રાંદેર રોડ જૈન સંઘ, સુરત.**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# संशोधकीयं सम्पादकीयं च

सार्धकोटित्रयश्लोकप्रमितसाहित्यसूत्रणसूत्रधार-मनीषिमूर्धन्य-सूरिपुङ्गव-महज्ज्योतिर्धर**कलिकालसर्वज्ञ श्रीहेमचन्द्राचार्य**भगवद्भिरचिता**ऽभिधानचिन्तामणिनाममालाया** अनुपलब्धा **व्युत्पत्तिरत्नाकरटीका** विद्वज्जनवल्लभानां धीमतां करकमलेष्वर्पतामस्माकमतीवातीवानन्दो बोभूयते ॥

एतत्परमानन्दे कारणं किम् ? प्रारम्भतः प्रारभे-

**जिनशासनशणगारपरमपूज्याचार्यभगवच्छ्रीमद्विजयचन्द्रोदयसूरीश्वराणां, परमपूज्यप्रगुरुवराणां, परमपूज्यगुरुवराणां चाऽजस्रं** प्रेरणया कृपया च प्राचीनार्वाचीनतालपत्रकागदपत्रमयानां हस्तलिखितानां पुस्तकानां पठन-लिखनकार्यारम्भः प्रारब्धः ॥

समये समये प्रकाशिताप्रकाशितसुलभदुर्लभग्रन्थानां परिचयाय किञ्चित् संस्कृत-प्राकृतादिसाहित्यैतिह्यं पठितं विलोकितं च ॥

अपि च पूर्वोक्तपूज्यगुरुवराणां सान्निध्येऽमूल्यमौलिकग्रन्थानां मुद्रित-हस्तलिखितग्रन्थानां किञ्चिदत्युपयोगी आवश्यकश्च परिचयः कृतः, तदैव तेषामनुभवप्राचुर्यमज्ञायि, ज्ञातं चाऽस्माकं गुरुवरा गुरुवरा एव ॥

एकदा **जामनगरे** नगरे तत्रभवतां **प्रगुरुवराणां** प्रतिकूलशरीरस्वास्थ्ये जाते **परमपूज्यार्यश्रीमद्विजयचन्द्रोदय-सूरीश्वरमहाराजा** अन्यमुनयश्च तत्राऽऽगताः सन्तः स्थिरताभाजोऽभवन् । तस्मिन्नवसरे **श्रीहेमचन्द्राचार्यज्ञानमन्दिर**सत्काया **अभिधानचिन्तामणिनाममालासहितव्युत्पत्तिरत्नाकरटीकाया** हस्तलिखितकागदप्रतेरेका प्रतिकृतिः (झेरोक्ष) दर्शनाय पठनाय चाऽऽगता । पूज्याचार्यवर्याः प्रतेराद्यन्तभागं पठितवन्तः, आदिभागस्थिताः प्रारम्भिकश्लोकाः पठ्यमाना आसन्। अद्यावधि मनसीयमेव ग्रन्थिरासीद्- यद् एतन्नाममालाया याः काश्चिदपि टीकाः, ताः **श्रीसिद्धहेमचन्द्रशब्दानुशासन-नामव्याकरणम**धिकृत्यैवेति, तदियमपि (**व्युत्पत्तिरत्नाकरटीकाऽपि**) तथैवेति, परं तु यदा- "**श्रीपाणिनीयोक्तिभिः**" इति पङ्क्तिर्दृष्टा पठिता श्रुता च, तदाऽवगतमियं टीका **पाणिनीयव्याकरणा**नुसारिणीति । गुरुवरप्राप्तपाणिनीयव्याकरण-संस्कारोऽहमस्याः टीकायाः संशोधन-सम्पादनकार्येऽल्पे एव समये प्रारब्धे ॥

वस्तुतोऽस्मिन् क्षेत्रेऽनभिज्ञोऽहं संशोधन-सम्पादकार्यं कीदृगस्ति, तत् किञ्चिदपि ज्ञानमयं ग्रन्थः पूर्णो जातस्तदा जातम् ॥

सत्यमेव प्रतिभाति केनचिद् विदुषोक्तमिदं वचनम्- "शिल्पकारस्य शिल्पशास्त्रेण कलाकलिते जिनमन्दिरे क्रियमाणे यावान् परिश्रमो भवति तावानेव, कदाचित् ततोऽप्यधिको वा भवति ग्रन्थमन्दिरं कृतवतः संशोधकस्य सम्पादकस्य च" इति ॥

ईदृगाशयवत्येका पङ्क्तिः स्मृतिपथमागच्छति- "**विद्वानेव विजानाति विद्वज्जनपरिश्रमः**" इति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्युक्त्वा 'मया धाटी पातिता' इति न ज्ञातव्यम्, परं त्वेतट्टीकाकर्तॄणां **वाचकवरश्रीदेवसारगणिवराणां** ज्ञानभक्तिरत्यद्भुता प्रशस्या अनुकरणीया च ॥

ज्ञानस्य सर्जन-संरक्षण-संवर्धनादिसेवया ज्ञानावरणीयादिकर्मणां क्षयः, परम्परया अनन्तज्ञान-दर्शन-चारित्र-तप-वीर्याद्यात्मगुणानां प्राप्तिरर्थाद् मोक्षश्चेत्यपि महान् लाभश्चेत्यलम्, प्रकृतमनुसरामि-

शब्दशास्त्रज्ञानस्य व्याकरणशास्त्रज्ञानस्य वोपलब्ध्यनन्तरं कवित्वशक्तिप्राप्तयेऽनल्पशब्दानां चयनमावश्यकम्, तत्तु कोषद्वारैव, यतो यथा कोषहीनः पुरुषो भूपालश्च प्रजोत्पादनाय प्रजारक्षणाय सर्वथाऽसमर्थो भवति, तथैव कोषहीनो विद्वानप्युत्तमकाव्यरचनां कर्तुं यथावद् रसास्वादनं कर्तुं वा सर्वथाऽसमर्थ एव भवति । यथोक्तम्-

"**नरभूपौ विना कोषं प्रजोत्पादनरक्षयोः । नैव क्षमो यथा तद्वत् कविः काव्यकृतावपि ॥**" [ ] इति ॥

शब्दैर्विनोपयुक्तशब्दचयनव्यस्तः कविरुन्नतोन्नतकल्पनापूर्णां कवितां कर्तुं कदापि न समर्थः, तस्मात् कोषकलनमेव वरं कवीनाम् । अन्यच्च व्याकरण-न्यायादीनां ग्रन्था बहवो यथोपलब्धास्तथैव कोषग्रन्थास्तट्टीकाश्चाप्यनेका दरीदृश्यन्ते, तत्कारणं तु '**तेषां प्रचुरा आवश्यकता**' इत्यहं मन्ये ॥

शब्दज्ञाऽ**मरसिंह**कृत**नामलिङ्गानुशासन**स्याऽपरनामा**मरकोषस्य** प्रागपि विपुलप्रमाणाः कोषा आसन्, ते सर्वे कालकवलिता लुप्तप्राया बभूवेत्यादिकं सर्वमस्मद्गुरुवरलिखितर**त्नाकरोऽनुपमो व्युत्पत्तिरत्नाकर**तो ज्ञातव्यम्, परं तु शास्त्रनभस्युड्डीनं बहुलतयाऽमरकोषस्यैवेति ॥

अमरकोषस्य सन्निधिं प्राप्तुं द्वावेव कोषौ वर्तेते । प्रथमो **यादवप्रकाशाचार्यकृतवैजयन्तीकोषः**, तच्छ्लोकसङ्ख्या-३२१६, द्वितीया **श्रीहेमचन्द्राचार्यकृतेयमभिधानचिन्तामणिनाममाला**, तच्छ्लोकसङ्ख्या-१५४२॥

एकका **हेमचन्द्राचार्याः पाणिनि**मुन्यादिरचितग्रन्थान् प्रति सर्वविषयकग्रन्थान् व्यरचयन्, तत् तारकजिनशासनं प्रति समर्पिततां विनाऽशक्यमिदम् ॥

कान् प्रति के ग्रन्था व्यरचयन् तद् जिज्ञासुविद्वद्भिरन्यतोऽवगन्तव्यम् । विशेषमिदमत्र ज्ञातव्यम्- यथाऽ**मरसिंहेन नामलिङ्गानुशासनं** कृतं तथैव लिङ्गानुशासनरहिताऽ**भिधानचिन्तामणिनाममाला** कृता **तैराचार्यै**रिति ॥

टीकाविषयेऽपि तत्र प्रचलिते द्वे टीके, एका **रायमुकुटकृतपदचन्द्रिका**, द्वितीया **भट्टोजिदीक्षितात्मजभानुजी-दीक्षितकृतरामाश्रमी** अपरनाम**व्याख्यासुधा**, अत्र व्युत्पत्त्यादिकरणैकाऽद्वितीया रत्नाकरसदृशा **व्युत्पत्तिरत्नाकरटीका**। तस्या वैशिष्ट्यं यद्यपि प्रस्तावनातो ज्ञेयम्, तथाऽपि संशोधन-सम्पादनावसरे चमत्कृतिकारा रोमोद्गमा परमानन्दानुभूतिर्यस्मिन् जाता, तल्लिखामि-

**(१) वीतनशब्दविषये**(पृ. २५९, पं ४७)-- "वेति गच्छत्यनयोरपात इति **वीतनौ** । 'वी गत्यादौ'(अ.प.अ.), 'वीपतिभ्यां तनन्'(उणा-४३०)इति तनन्, बाहुलकादगुणत्वं च। पार्श्वशब्दो निकटार्थः क्लीबे, ततः क्लीबलिङ्गप्रथमाद्विवचनं समीचीनम्, पुंलिङ्गप्रथमाद्विवचनं तु लेखकदोषाद् ज्ञेयम् " इति ॥

**(२) राजर्षिशब्दविषये**(पृ. ३१३, पं. १२)-- "राजते सप्ताङ्गेनेति राजा, क्षमादिगुणधारणाद् ऋषिः, आ ईषदृषिरर्षिः, राजा चासावर्षिश्च **राजर्षिः** । 'ओमाङोश्च'६।१।९५॥ इति पररूपत्वम् " इति ॥

**(३) मत्कुणशब्दविषये**(पृ. ३३९, पं. ६)-- "माद्यति हृष्यन्त्यनेन **मत्कुणम्** । पृषोदरादित्वात् साधुः । चतुर्थवर्गा-द्यकवर्गाद्यपञ्चमस्वरमध्यः " इति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**(४) सांयुगीनशब्दविषये**(पृ. ३५०, पं. ४१)— ''संयुगे साधुः **सांयुगीनः** ।'प्रतिजनादिभ्यः खञ्'४।४।९९॥इति खञ्, 'आयनेयी-'७।१।२॥ इत्यादिना खस्य ईनादेशः । प्रतिजनादिपाठादेव संयुगशब्दस्य घञि गुणाभावः '' इति ॥

**(५) भिक्षाशब्दविषये**(पृ. ३६०, पं. २१)— ''भिक्ष्यते **भिक्षा** ।'भिक्ष याच्ञायाम्'(भ्वा.आ.से.), कर्मणि घञ्। ग्रास एव ग्रासमात्रम्, ततः स्वार्थे कनि ग्रासमात्रकम् । यदाहुः- ''मयूराण्डप्रमाणो ग्रासः,'' 'कवउ' इति लोकभाषाप्रसिद्धः, स एव ग्रासमात्रं मूलटीका । ''मात्रं त्ववधृतौ स्वार्थे''[अनेकार्थसङ्ग्रहः२।४३६] इत्यनेकार्थवचनाद् मात्रशब्दोऽत्र स्वार्थवाचकः, न तु 'प्रमाणे द्वयसज्दघ्नञ्मात्रचः'५।२।३७॥ इत्यस्य, सति च तस्मिन् बहुव्रीहिः स्यात्, तस्मिंश्च सति 'टिड्ढाणञ्-'४।१।१५॥ इत्यादिना ङीषि (ङीपि) ग्रासमात्रीति स्यात्, ततः कनि 'केऽणः'७।४।१३॥ इति ह्रस्वत्वे च ग्रासमात्रिकेति स्यात्, न च तदुचितम्, ग्रासमात्रमित्यस्य स्वार्थद्योतकत्वात्, यावन्मात्रमित्यादिवदिति । यद्वा मात्रशब्दोऽयं वृत्तिविषये एव तुल्ये प्रमाणे वर्तते, अत्र ग्रासस्य तुल्यप्रमाणमित्यस्वपदविग्रहे षष्ठीसमासे ग्रासमात्रम्, यथा- 'समुद्रमात्रं न सरोऽस्ति किञ्चन' [ ]इतिवत्, ग्रासमात्रकं कवलप्रमाणमित्यर्थः । यदुक्तम्-

''ग्रासप्रमाणा भिक्षा स्यादग्रं ग्रासचतुष्टयम् । अग्राच्चतुर्गुणं प्राहुर्हन्तकारं द्विजोत्तमाः ॥१॥'' [ ] '' इति ॥

**(६) चम्पाशब्दविषये**(पृ. ४३४, पं. ७)— ''चमति जनदौर्गत्यं **चम्पा**। 'चमु अदने'(भ्वा.प.से.), 'खल्प-शिल्प-'(उणा-३०८)इति बाहुलकात् पे साधुः । यद्वा चणन्त्यस्यां चण्पा । 'चण हिंसादानयोश्च'(भ्वा.प.से.), चकाराद् गतौ, भ्वादौ, घटादिरयम्, णकारस्य 'म्ना (म्नां) धुट्वर्गेऽन्त्योऽपदान्ते'(हैमसू-१।३।३९॥) इत्यनुस्वारानुत्पत्तौ 'चण्पा' इत्येव स्वमते मूलपाठः '' इति ॥

**(७) वितर्दिशब्दविषये**(पृ. ४४८, पं. ५)— '' 'तर्द हिंसायाम्' (भ्वा.प.से.), 'इन् सर्वधातुभ्यः'(उणा-५५७)इतीनि तर्दिः हिंसा, विगता तर्दिः हिंसाऽस्याः **वितर्दिः**, स्त्रीलिङ्गः । द्वे 'चउकी' इति ख्यातायाः । दारुपरिस्कृता चतुरस्रा विश्रान्तिभूः । यन्माघः-

''रतान्तरे यत्र गृहान्तरेषु वितर्दिनिर्यूहविटङ्कनीडः ।
रुतानि शृण्वन् वयसां गणोऽन्ते वासित्वमापस्फुटमङ्गनानाम् ॥१॥''

[शिशुपालवधम्, सर्गः-३, श्लो-५५] इति । वेदी च वास्तुशास्त्रे बहुधा । तथा च वास्तुसुतनाम्नि ग्रन्थे-

''चतुष्कोणा तु या वेदी स्वस्तिका सा सुखाप्तये । विवाहेऽष्टासने यज्ञे राज्ञां देवार्चनादिषु ॥२॥''[ ]

''द्वे देवागारादौ काष्ठादिचतुष्किकायाः प्राङ्गणादिमध्यगताया वा''[ ]इति स्वामी । ''दारूपरि धृता चतुरस्रा विश्रान्तिभूर्वितर्दिरिति भेदः, स्तम्भपीठिकेत्यन्ये''[ ]इति सर्वधरः ।''चतुष्किकादिगृहमध्यस्थचतुः-स्तम्भोपरिवक्र-काष्ठनिर्मिताया वेदिकायाः''[ ]इति कोक्कटादय इत्येवं बहवो भेदा ग्रन्थभूयस्त्वभयान्न लिखिताः'' इति॥

**(८) रसोद्भवशब्दविषये** (पृ. ४८०, पं. ४४)— रसाद् अम्भस उद्भवति **रसोद्भवम्** । अच् । नानाविधत्रसस्थावराणां शरीरेषु सचित्तेष्वचित्तेषु वा उत्पत्तिसद्भावेऽपि पृथिवीकायत्वमेव । तदुक्तं श्रीसूत्रकृदङ्गद्वितीयश्रुतस्कन्धतृतीयाहार-परिज्ञाध्ययनावसाने- ''इहेगतिआ सत्ता णाणविहजोणिया जाव कम्मनियाणेणं तत्थवुक्कमा णाणाविहाणं तसथावराणं [पाणाणं] सरीरेसु सचित्तेसु वा अचित्तेसु वा पुढवित्ताए'' [श्रीमत्सूत्रकृताङ्गम्, द्वितीयः श्रुतस्कन्धः, अध्य-३, सूत्रम्-६१]इत्यादि । वृत्तिश्चाऽस्य- ''इहैके सत्त्वाः प्राणिनः पूर्वं नानाविधयोनिकाः स्वकृतकर्मवशगाः नानाविधत्रसस्थावराणां शरीरेषु सचित्तेषु अचित्तेषु वा पृथिवीत्वेनोत्पद्यन्ते, तद्यथा- सर्पशिरःसु मणयः, करिदन्तेषु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मौक्तित्वेनोत्पद्यन्ते, तद्यथा- सर्पशिरःसु मणयः, करिदन्तेषु मौक्तिकानि, विकलेन्द्रियेष्वपि शुक्त्यादिषु मौक्तिकानि, स्थावरेष्वपि वेण्वादिषु तान्येव''[श्रीमच्छीलाङ्काचार्यविहितविवरणम्, द्वितीयः श्रुतस्कन्धः, अध्य-३, सूत्रम्-६१]इति वचनान्न दुष्टं मौक्तिकानां पृथिवीकायत्वम्'' [ ]इति ॥

(९) **सागरशब्दविषये**(पृ. ४८५, पं. २४)— ''गर्भस्थेऽस्मिन् एतन्मात्रे सपन्त्या गरो दत्तः, ततो गरेण सह सद्यो जातत्वात् सगरः । सगेरणाऽवतारित्वात्, 'तस्येदम्'४।३।१२०॥ इत्यणि **सागरः**''[पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२२९]इति मिश्राः । ''सगरपुत्राणामयं [तैः] खातत्वात्''[स्वोपज्ञटीका४।१०७३]इत्याचार्याः । ''क्षीरोदादिष्वप्युपमया सागरव्यपदेशः''[ ]इति भट्टाः '' इति॥

(१०) **वालुकाशब्दविषये**(पृ. ४९५, पं. ९)— ''वलन्ते **वालुकाः**। 'वल संवरणे'(भ्वा.आ.से), 'कञ्चुकांशुका-' (हैमोणा-४७)इत्युके निपात्यते । वालिका इति तृतीयस्वरमध्योऽपि । यन्महेश्वरः- ''वालिका वालुकावाला-पिंछोलाकर्णभूषणे''[विश्वप्रकाशकोशः, कान्तवर्गः, श्लो-१६६]इति ।सिकतानां पृथिवीकायिकत्वेऽपि नद्यङ्गभूतत्वाद-प्कायावसरे पाठः '' इति॥

(११) **धनञ्जयशब्दविषये**(पृ. ५००, पं. २१)— ''धनं जयति यथेष्टं ददाति **धनञ्जयः**। 'जि जये' (भ्वा.प.अ.), 'संज्ञायां भृतॄवृजि-'३।२।४६॥ इत्यादिना खच्, 'अरुर्द्विषत्-'६।३।६७॥ इति मुम् ॥

''ईश्वराद् ज्ञानमिच्छेच्च धनमिच्छेद् हुताशनात् । आरोग्यं भास्करादिच्छेज्जयमिच्छेज्जनार्दनात् ॥१॥''

[ ]इत्युक्तेश्च । ''धनं जितवान् आयत्तीकृतवान् ततो धनमभिलष्यते''[ ]इत्यागमो वा ॥''

(१२) **जर्णशब्दविषये**(पृ. ५१०, पं. १९)— ''जीर्यति **जर्णः** ।'जॄ वयोहानौ'(क्र्या.प.से.), 'कॄवृजॄनः(कॄवृजॄ)-' (उणा-२९०)इति नः'' इति ॥ (परमपूज्याचार्यश्रीविजयकस्तूरसूरीश्वरमहाराजसम्पादिताभिधानचिन्तामणिकोशे (पृ. २५५) उपाध्यायश्रीहेमचन्द्रविजयसम्पादितसंशोधिताभिचिन्तामणिनाममालायां स्वोपज्ञवृत्तौ (पृ. २४८) च 'जीर्ण' इति दृश्यते) ॥

(१३) **प्रसूनशब्दविषये**(पृ. ५१७, पं. ६)-- ''प्रसूँयते **प्रसूनम्** ।'षूङ् प्राणिप्रसवे' (दि.आ.से.) प्रपूर्वः, 'स्वादय ओदितश्च' (गणसू-३।३।१॥) [इत्योदितत्वात् 'ओदितश्च'८।२।४५॥]इति निष्ठानत्वम् । न्यायादिदर्शने वृक्षः प्राणी प्राणिग्रहणं प्राधान्यादुक्तमिति वा । ''षूङ् प्राणिप्रसवे' (दि.आ.से.), अत्र प्राणिग्रहणमतन्त्रम् । (तेन प्रसूनादयः शब्दाः सिद्ध्यन्ति)। अन्ये तु 'सर्वे भावाः सचेतनाः' इत्यत्राऽपि प्राणित्वमाहुः । तथा च ''प्रसूनं कुसुमम्''[अमरकोषः २।४॥१७॥]इत्यत्र सुभूतिचन्द्रः- 'षूङ् प्राणिप्रसवे' (दि.आ.से) ।क्षपणकमते वृक्षस्याऽपि प्राणित्वम्''[मा.धातुवृत्तिः, दिवादिः, धातुसं-२२]इति माधवः '' इति ॥

(१४) **सुमनःशब्दविषये**(पृ. ५१७, पं. २४)— ''सु प्रीतं मन आभिरिति **सुमनसः** ।प्रादिसमासः ।नित्यबहुवचनान्तत्वाद् बहुवचननिर्देशः । ''भूम्नि स्त्रियां सुमनसः''[ ]इति रत्नकोषः। ''सुमनाः पुष्पमालत्योः स्त्रियामाधारदेवयोः (स्त्रियां ना धीरदेवयोः)'' [मेदिनीकोशः, सान्तवर्गः, श्लो-६७] इति मेदिन्यादिदर्शनादेकत्वमपि। ''पुष्पं सुमनाः कुसुमम्'' [इति] नाममालादर्शनाच्च । ''वेश्या श्मशानसुमना इव वर्जनीया'' [मृच्छ-४।१४]इति शूद्रकप्रयोगः । ''अप्रत्याख्याये दधिसुमनसी'' [ ]इति मनौ छान्दसत्वात् क्लीबत्वम् '' इति ॥

(१५) **शतपदीशब्दविषये**(पृ. ५६०, पं. ६०)— ''शतं बहवः पादा अस्य **शतपदी** ।'कुम्भपद्यादिषु (कुम्भपदीषु) च'५।४।१३९॥'' इति पादस्याऽन्तलोपो ङीष् च। त्रीणि कानसीयालीति ख्यातायाः । अत्र हि सूत्रे मूलटीकायां च पाठविपर्यासो लेखकदोषात् सम्भाव्यते, स च पाठो न शिष्टसम्मतः, यतः कर्णजलौकायास्त्रीन्द्रियत्वसद्भावात्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रज्ञापनादिभिः सह विरोधात्, तथा च प्रज्ञापनासूत्रप्रथमपदत्रीन्द्रियाधिकारः ''गौमी (गोम्ही) हत्थिसोंडा'' [श्रीप्रज्ञापनोपाङ्गम्, त्रीन्द्रियप्रज्ञापना, सू-२८] इत्यादि, ''गोमी (गोम्ही) कर्णशृङ्गालिका, जे यावण्णे तहप्पगारा, ये चाऽपि चान्ये तथा प्रकारास्ते सर्वे त्रीन्द्रिया ज्ञातव्या इति शेषः''[श्रीमलयगिर्याचार्यविरचितविवरणम्, पृ.४२]इति तद्वृत्तिः इति ॥'' (परमपूज्याचार्यश्रीविजयकस्तूरसूरीश्वरमहाराजसम्पादितकोशे पाठविपर्यासो न दृश्यते) ॥

(१६) **झिल्लिकाशब्दविषये**(पृ. ५६३, पं. ५२)— बाहुलकाद् ह्रस्वत्वे **झिल्लिका** ।''झिल्ली वाद्यभेदः, तत्तुल्यशब्दाद् झिल्लीव । कनि, 'केऽणः' ७।४।१३॥ इति ह्रस्वत्वे [टाप्] झिल्लिका''[पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२४३]इति मिश्राः । झिल्लीत्यपि ।

''दूती विद्युदुपासिता सहचरी रात्रिः सहस्थायिनी । दैवज्ञो दिशति स्वनेन जलदः प्रस्तानवेलां शुभाम् ।
वाचं माङ्गलिकीं तनोति तिमिरस्तोमोऽपि झिल्लीरवैर्जातोऽयं दयिताभिसारसमयो मुग्धे ! विमुञ्च त्रपाम्॥१॥
[ ]इति भानुदत्तः'' इति ॥

(१७) **तुङ्गशब्दविषये**(पृ. ६५६, पं. ३७)— ''तुज्यते (तुञ्ज्यते) हिंस्यते **तुङ्गम्** । 'तुजि हिंसायाम्'(भ्वा.प.से.), 'तुजि पालने'(भ्वा.प.से.) वा, अस्माद् घञि, 'चजोः-'७।३।५२॥ इति कुत्वम्, वार्तिककारमते तु न्यङ्क्वादित्वात् कुत्वम्'' इति ॥

(१८) **प्रकाण्डशब्दविषये**(पृ. ६६२, पं. २)— ''**प्रकाण्डं** पुंक्लीबलिङ्गम् । ''अस्त्री प्रकाण्डो विटपे तरुस्कन्ध-प्रशस्तयोः''[ ]इति मेदिनिः । तल्लजादय आविष्टलिङ्गकाः, आविष्टमागृहीतमपरित्यक्तं स्वलिङ्गं यैस्ते आविष्टलिङ्गकाः, लिङ्गान्तरसम्बन्धेऽपि न विशेष्यलिङ्गका इति भावः । यथा- कुमारीतल्लजः, अश्वमतल्लिका। ''अरिर्मधोरैक्षत गोमतल्लिकाम्''[शिशुपालवधम्, सर्गः-१२, श्लो-४१]इति माघः । गोप्रकाण्डमिति, ''दण्डकानध्यवात्तां यौ वीर ! रक्षःप्रकाण्डकौ [भट्टिकाव्यम्, सर्गः-५, श्लो-६]इति भट्टिः । ''अत एव मतल्लिकादीनां रूढिशब्दत्वात् 'प्रशंसावचनैश्च'२।१।६६॥ इति समासः।'' [पदचन्द्रिका, भा-१, कालवर्गः, श्लो-१२९]इति मिश्राः । उपलक्षणत्वादाविष्टवचनाश्च, यथा- तातश्च ते पादाश्च तातपादा इत्याद्यपि सिद्धं ज्ञेयम् '' इति ॥

(१९) **जातिशब्दविषये**(पृ. ६९४, पं. ८)— ''जायतेऽस्यां **जातिः** । 'जनी प्रादुर्भावे' (दि.आ.से.), 'स्त्रियां क्तिन्'३।३।९४॥, 'अनुनासिकस्य-'६।४।१५॥ इति दीर्घः ।गौरयं गौरयमित्यादिसदृशाभिलापज्ञानहेतुर्जातिरित्यर्थः। यदुक्तम्- ''आकृतिग्रहणा जातिर्लिङ्गानां च न सर्वभाक्''[काशिका४।१।६३॥]इति। जातमित्यकारान्तोऽपि क्लीबे ।''जातं जात्योघजन्मसु''[विश्वप्रकाशकोशः, तान्तवर्गः, श्लो-१४]इति महेश्वरः।''जातिः सामान्यम्''[ ]इति तट्टीका '' इति ॥

(२०) **प्रत्याहारशब्दविषये**(पृ. ६९८, पं. ३५)— ''प्रत्याह्रियन्ते संक्षिप्यन्ते वर्णा अत्रेति प्रत्याहारः ।बाहुलकादधिकरणे घञ्, अण् इण् यणादिः ।''[अन्नादिक]विषयेभ्य इन्द्रियाणामाकर्षणं च'' [अम.क्षीर.३।२।१६॥]इति क्षीरस्वामी अर्थद्वयं प्राह।इह त्वाचार्याभिप्रायेणाऽऽद्य एवार्थो ज्ञातव्यः, अपरस्य तु-''प्रत्याहारस्त्विन्द्रियाणां विषयेभ्यः समाहृतिः'' [अभि-, श्लो-८३]इत्यनेन प्रागेव व्याख्यानात् '' इति ॥

(२१) **१५२५तमश्लोकस्याऽवतरणे**(पृ. ६९८, पं. ५२)— ''सङ्ग्रहमाह- सङ्कलय्यार्थकथनं सङ्ग्रहस्तम्-'' इति ॥

अन्यान्यप्युदाहरणानि बहूनि सन्ति, अत्र विस्तरभयान्नोल्लिखितानि ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्ते यथाऽत्यल्पबीजेषु महद्वटवृक्षाः सुप्ताः, हीरक-पद्मराग-मौक्तिकेष्वमूल्यमूल्यं छन्नम्, तथैव शब्देष्वभिलाप्यानिभलाप्यपदार्थानामगाधातलस्पर्शिनी शक्तिश्छन्ना । अत एवोक्तं महाभाष्यकारेण पतञ्जलिना- ''एकः शब्दः सम्यग् ज्ञातः सम्यक् प्रयुक्तः स्वर्गे लोके च कामधुग् भवति'' इति, तेन तच्छक्तेरनुभवो**ऽमरकोषाभिधान-चिन्तामणिनाममालादीनां व्युत्पत्तिरत्नाकरादिटीकानां** च पठने पाठने चिन्तने मनने च ॥

(१) ग्रन्थादावस्मदध्यापकपण्डितप्रवरश्रीविष्णुकान्तझामहोदयरचितशब्द-शक्तिविषयकलेखः ॥

(२) ग्रन्थान्ते शब्द-तदर्थ-श्लोकाङ्क-पृष्ठाङ्क-पङ्क्त्यङ्कसहितसंस्कृतशब्दानामकारादिक्रमः ॥
(अकारादिक्रमेणाऽभिधानचिन्तामणिनाममालानां व्युत्पत्तिरत्नाकरटीकान्तर्गतानां च शब्दानां यावन्तोऽर्थास्तेषां राष्ट्रीयभाषाहिन्द्यामनेकग्रन्थोद्धरणपूर्वकमत्युत्तमसङ्कलनमल्प एव समये प्रकटयिष्यते) ॥

(३) शब्द-श्लोकाङ्क-पृष्ठाङ्क-पङ्क्त्यङ्कसहितगुर्जरशब्दानामकारादिक्रमः ।

(४) टीकान्तर्गतानां शेषनाममालेतराणां पृष्ठाङ्क-पङ्क्त्यङ्कपूर्वकानां श्लोकानां, ग्रन्थेऽस्मिन्नुपयुक्तानां ग्रन्थानां ग्रन्थकाराणां चाऽऽकारादिक्रमो निर्दिष्टोऽस्माभिः ॥

## ऋणस्वीकारः

(१) येऽस्माकं प्रति ''शब्दकोषस्याऽयं परिश्रम एकग्रन्थाद् न विरमेत् परं त्वजस्रमुपयुक्तानां ग्रन्थानां संशोधनं भवेत्, तदैव श्रुतसाधना, सा निरन्तरा प्रचलतु'' इति शुभकामनामिच्छन्तो योगक्षेमकर्तारो जिनशासनोन्नतिकारका **परमपूज्याचार्यश्रीमद्विजयचन्द्रोदयसूरीश्वरमहाराजाः** ॥

(२) क्व जिनशासनधुरावहा भवत्सदृशा महापुरुषाः क्वाऽस्मत्सदृक् पामरजीवस्तथापि येषां शिरीषकुसुमकोमलहृदये 'मनोमन थई गयुं के आ बाळक जिनशासनना नभोमंडळमां प्रकाश पाथरशे' इति वाक्यमस्ति, ते परमकृपालवः **श्रीप्रगुरुदेववर्याः ( परमपूज्याचार्यश्रीमद्विजयाशोकचन्द्रसूरीश्वरमहाराजाः )** ॥

(३) शास्त्र-संशोधन-सम्पादनगहनाटवीस्थितानामस्मत्सदृशानमनभिज्ञानां मार्गदर्शका एतद्ग्रन्थस्य 'साद्यन्तसुचारु-परिमार्जकाः संशोधन-सम्पादनप्रत्यवसरे उपस्थितानां शङ्कानां समस्यानां चर्जुसमाधानकारका विद्वत्ताया भारमवहमाना **अस्मद्गुरुवराः ( परमपूज्याचार्यश्रीमद्विजयसोमचन्द्रसूरीश्वरमहाराजाः )** ॥

(४) आगमसूत्रज्ञातारः सङ्घस्थविराः **परमपूज्यमुनिराजश्रीजम्बूविजयमहाराजाः** ॥

(५) परमपूज्यगणिवर्य**श्रीश्रमणचन्द्रविजयमहाराजाः** ॥

(६) परमपूज्याचार्य**श्रीमद्विजयजयचन्द्रसूरीश्वरमहाराज**सहवर्तिपं.**श्रीस्थूलिभद्र-पुष्पचन्द्र-कैलासचन्द्र-राजचन्द्रविजय- गणिश्रीनिर्मलचन्द्र-कुलचन्द्र-प्रशमचन्द्रविजय-प्र.श्रीकल्याणचन्द्र-कुशलचन्द्रविजय-मुनिश्रीबलभद्र-अमरचन्द्र-प्रकाशचन्द्र-सुधर्मचन्द्र-शशीचन्द्र-जिनेशचन्द्र-समकितचन्द्र-प्रियचन्द्र-सङ्घचन्द्र-सिद्धचन्द्र-श्रेयचन्द्र-श्रुतचन्द्र-संवेगचन्द्र-निर्वेदचन्द्र-निरागचन्द्र-सुयशचन्द्र-ऋषभचन्द्र-संयमचन्द्र-लब्धिचन्द्र-सत्यचन्द्र-सुजसचन्द्र-सुनयचन्द्र-कल्पचन्द्र-भक्तिचन्द्रविजया**दिमुनिवराः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(७) यत्सविधेऽहमभ्यासं कृतवान् ते षड्दर्शनवेत्तारो ज्ञानदातार: **स्व.पण्डितश्रीचन्द्रशेखरजीझामहोदयास्तथा तत्पुत्ररत्ना: पण्डितश्रीविष्णुकान्तजीझामहोदयाश्च** ॥

(८) दुर्लभपुस्तकप्राप्तये सहायकः **श्रावकश्रीकान्तिलाल बी. महेता**श्राद्धवर्यः (11-A हैसाम मार्ग:, कोलकत्ता) तथा **रमेशभाई गाठाणी**श्राद्धवर्यश्च (सेटेलाईट, अमदावाद) ॥

(९) सर्वप्रकारककार्यकरणे तत्परा: **श्रीराजाराम( राजु )लोलम-जगदीश-प्रेमजी**आदय: ॥

(१०) कोम्पयुटररहिते युगेऽप्यतिकठिनकर्कशानां संस्कृत-प्राकृत-गुर्जरग्रन्थरत्नानां मुद्रापकौ श्रमणोपासकौ **श्रीभरतभाई-महेन्द्रभाई** इत्याख्यौ बन्धुबान्धवौ ॥

(११) अक्षरविन्यसनं (एन्ट्री एवं सेटींग) यया सुचारुतया कृतम्, सा **बहेनश्रीनशीम** इत्याख्या ॥

(१२) साक्षात् परम्पराया वा सहायका अभवन्, ते सर्वे ॥

इमं महाग्रन्थं विद्वज्जनानां कोमलकरयुगले निधाय प्रार्थये यदत्र ये केचन दोषा कोम्प्युटरयन्त्रेण दृष्टिदोषेण मतिमान्द्येन वा सञ्जातास्तान् सर्वान् मां सूचयित्वा कृतार्थीकरिष्यन्ति ॥

**गच्छत: स्खलनं क्वापि भवत्येव प्रमादत: । हसन्ति दुर्जनास्तत्र समादधति सज्जना: ॥१॥**

प्रान्ते परमाराध्य-सर्वविघ्नविनाशकाखण्डप्रभावशालि-शान्तिकारक-पञ्चमहालवर्तिडुमामण्डन-**श्रीशान्तिनाथ**प्रभुं **कलिकालसर्वज्ञश्रीहेमचन्द्राचार्य-वाचकवरश्रीदेवसागर-तपोगच्छाधिपशासनसम्राट्श्रीनेमि-विज्ञान-कस्तूर-चन्द्रोदय-अशोक-सोमचन्द्रसूरीश्वर**गुरूंश्च स्मृत्वा नत्वा **मासरस्वतीदेवीं** च ध्यात्वा विरमामीत्यलम् ॥

वि. सं. २०५९, वैशाखे सुद-३,
अक्षयतृतीयायाम्, रविवासरे
श्रीनेमिसूरिज्ञानशाला,
पांजरापोल, अमदावाद ॥

**परमपूज्याचार्यश्रीमद्विजयाशोकचन्द्रसूरीश्वराणां शिष्यवराणां**
**परमपूज्याचार्यश्रीमद्विजयसोमचन्द्रसूरीश्वराणां चरणोपासक:**
***श्रीचन्द्रविजय:***

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# अनारतं प्रचलतु भवतः संशोधनयात्रा

विद्वद्वरिष्ठ**वाचकवरश्रीमद्देवसागरगणि**विरचित**व्युत्पत्तिरत्नाकर**ाख्यवृत्तिविभूषितायाः **अभिधान-चिन्तामणिनाममालायाः** श्रीमता **श्रीचन्द्रविजयगणिवरेण** संशोधितं प्रकाशनमिदं वर्धापयतो मे मनोमीनोऽद्य नितरां निमज्जत्यमन्दानन्दसन्दोहमहोदन्वति ॥

**कलिकालसर्वज्ञश्रीहेमचन्द्राचार्य**भगवद्भिमवतः प्रादुर्भूता श्रुतभागीरथी विभिन्नप्रवाहरूपेण प्रवाहिता अनेकानेकविद्याशाखाः नवपल्लविताः कुर्वन्ती प्रभूतप्रसवान् प्रसवन्ती च विलोक्यते ॥

विद्याशाखायाः कोऽपि प्रदेशस्तेषामाचार्यप्रकाण्डानां मनीषासंस्पर्शविरहितो नैवास्ति ॥

न्याय-व्याकरण-काव्य-कोश-कथा-छन्दोऽलङ्कार-तत्त्वज्ञान-योगप्रभृतिसर्वविषयेषु तैर्विरचितान् प्रौढतमान् ग्रन्थान् विलोक्यावगत्य च तेषां विपश्चिच्चेतश्चमत्कारिचातुर्यं पण्डितंमन्योऽपि को नहि कुर्यान्निजशिरोविधूननम् ॥

तैर्विरचितेषु **१ अभिधानचिन्तामणिनाममाला २ अनेकार्थसङ्ग्रह ३ निघण्टु ४ देशीनाममालाख्येषु** चतुर्षु कोशेषु इयं नाममालैव शेखरायमाणा विद्यते । साऽपि यदि रत्नैरेव नहि किन्तु रत्नाकरेण भूषिता भवेत् तर्हि तु किं कथयितव्यमेव ॥

**'व्युत्पत्तिरत्नाकर'** इत्यन्वर्थनामधारिण्या वृत्तेरस्याः अनेकप्राचीनहस्तलिखितप्रतीनामाधारेण सूक्ष्मपरि-कर्मितमतिभूरिश्रमानवधारितसमयसाध्यं संशोधनं सम्पादनञ्च शब्दशास्त्राभ्यासव्युत्पन्नमतिना गणिवरेण श्रीमता **श्रीचन्द्रविजयेन** विधाय पूर्ववर्तिसंशोधकपुरुषाणां पङ्क्तौ स्वप्रवेशः सम्पादित इत्यस्मत्कृते प्रभूतप्रमोदप्रदम् ॥

**पूज्यपादशासनसम्राट्श्रीमद्विजयनेमिसूरीश्वराणां** नानागुणिमणिरोहणायमाने समुदाये पुरा खलु नानाशास्त्रविशदवैदुष्यविभूषिता नैकविषयकविद्वद्रम्यबहुविधग्रन्थसर्जका अनेके प्राज्ञपुरुषाः समभूवन्, सम्प्रत्यपि **आचार्यश्रीविजयप्रद्युम्नसूरि-श्रीविजयशीलचन्द्रसूरि-श्रीविजयसोमचन्द्रसूरि**प्रभृतयस्तदन्तिषदश्च प्राचीन-प्रतीनामाधारेण मनीषिमनोमोदजनकं संशोधनादिकार्यं संस्कृत-प्राकृत-गुर्जरादिभाषासु लेखादिलिखनञ्च विदधति ॥

**गणिश्रीचन्द्रविजयो**ऽपि सर्वजनसाधारणमितरत्कार्यजातं विमुच्य संशोधनादिकार्येष्वेव दत्तावधानतया प्रयतेतेत्याशास्य विरम्यते ॥

**वि. सं. २०५९,**<br>
**वै. कृष्णा-५**<br>
**श्रीनेमिसूरिज्ञानशाला**<br>
**अमदावाद-पांजरापोल**

—सूरीश्वरगुरुदेवचरणाम्बुजसेविना<br>
**विजयहेमचन्द्रसूरिणा**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# शब्दः

**पार्वतीवल्लभं नत्वा पितरं चन्द्रशेखरम् । पिपासूनां प्रबोधाय किञ्चदुद्धृत्य लिख्यते ॥**

श्रोत्रग्राह्यो गुणः शब्दः । शब्दलक्षणं च श्रोत्रग्राह्यगुणविभाजकधर्मवत्त्वम्, अथवा श्रवणेन्द्रियजन्यलौकिकप्रत्यक्ष-विषयवृत्तिगुणत्वव्याप्यजातिमत्त्वम् । तादृशी जातिश्च शब्दत्वरूपा । शब्दस्त्वाकाशमात्रवृत्तिः, बाह्यैकेन्द्रियग्राह्यो द्विक्षणावस्थायी तृतीयक्षणे नश्यति च । अत एव 'अनित्यः' इति नैयायिकाः ॥

'पृथिव्यादिषु पञ्चसु शब्दस्तिष्ठति' इति साङ्ख्या वेदान्तिनश्चाहुः । स्वतन्त्रास्तु 'भेर्यां शब्दः मृदङ्गे शब्दः' इति व्यवहारात् पृथिव्यामेव शब्दमिच्छन्ति ॥

येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणादीनां सम्प्रत्ययो भवति, स शब्दः ॥

स च शब्दो द्विविधः । बुद्धिहेतुकोऽबुद्धिहेतुकश्च । तत्र अबुद्धिहेतुको मेघादिशब्दः । बुद्धिहेतुकश्च द्विविधः, स्वाभाविकः काल्पनिकश्च । तत्र स्वाभाविको वर्णविशेषानभिव्यञ्जको हसितरुदितादिरूपः प्राणिमात्रसाधारणः । काल्पनिकोऽपि त्रिविधः । वाद्यादिशब्दो गीतिरूपो वर्णात्मकश्च । तत्र भेरीशब्दादिर्वाद्यादिशब्दः । माधवादिरागाभिव्यञ्जकनिषादादिस्वरशब्दो गीतिरूपः । ध्वनिविशेषसहकृतकण्ठताल्वाद्यभिघातजन्यश्च वर्णात्मकः ॥

अन्यत्र चेत्थं विभाग उक्तः । शब्दो द्विविधः, ध्वन्यात्मको वर्णात्मकश्च । तत्राद्यो भेरीमृदङ्गादौ प्रसिद्धः, द्वितीयः संस्कृतभाषादिरूपः ॥

अत्र शाब्दिका आहुः- 'वर्णात्मकश्च शब्दो वस्तुत एकोऽपि तत्तद्वर्णसंस्कारैः प्रतिबिम्बततद्रूपोऽनन्तपदरूपतामिवापन्नः' इति सर्वपदरूपः सर्वार्थाभिधानशक्तिरिति । सा शक्तिर्योगिप्रत्यक्षगम्या नाऽस्मज्ज्ञानगम्या ॥

परा पश्यन्ती मध्यमा वैखरीरितिचत्वारि वाचःपदानि । एकैव नादात्मिका वाङ्मूलाधारादुदिता सती 'परा' इत्युच्यते, सैव हृदयाभिगामिनी 'पश्यन्ती' इत्युच्यते, सैव बुद्धिं गता विवक्षां प्राप्ता 'मध्यमा' इत्युच्यते, अथ यदा सैव वक्त्रे स्थिता ताल्वोष्ठादिव्यापारेण बहिर्निर्गच्छति, तदा 'वैखरी' इत्युच्यते ॥

वर्णात्मकः पुनर्द्विविधः, सार्थको निरर्थकश्च । तत्र सार्थकः शब्दस्त्रिविधः, प्रकृतिः प्रत्ययो निपातश्चेति । निरर्थकं तु कचटतप इत्यादिः ॥

पुनरपि वर्णात्मको द्विविधः, प्रमाणशब्दोऽप्रमाणशब्दश्च । 'प्रमाणशब्दः' इत्यस्यार्थश्च 'शाब्दप्रमितिकरणज्ञानविषयः **शब्दः**' इति । अयमर्थश्च शाब्दबोधं प्रति पदज्ञानस्य करणतामते सङ्गच्छते । प्रमाणशब्द आप्तोपदेशः । तदर्थश्च आप्तो यथादृष्टस्यार्थस्य चिख्यापयिषया प्रयुक्त उपदेष्टा । सोऽपि द्विविधो लौकिको वैदिकश्च । तत्राद्यो लौकिको विधिनिषेधार्थवादभेदेन त्रिविधः । तत्र विधिर्यथा पाकं कुर्यादित्यादिः । निषेधश्च इदमनिष्टं न कुर्यादित्यादिः । अर्थवादस्तु 'अयं ब्राह्मणः स्वमहिम्ना सर्वं जगत् पवित्रं करोति' इत्यादिः । द्वितीयस्तु वैदिकः पञ्चविधः, विधिर्मन्त्रो नामधेयं निषेधोऽर्थवादश्चेति । तत्र लौकिकशब्दः आप्तोक्त एव प्रमाणभूतः । वैदिकस्तु सर्व एव प्रमाणभूतः, परमाप्तेन भगवता प्रणीतत्वात् ॥

अप्रमाणशब्दस्तु 'वह्निना सिञ्चेत्' 'गौरश्वः' 'पुरुषो हस्ती' इत्यादिरूप इति । अप्रमाणशब्दस्तु दोषवत्त्वात् आगमाभास इत्युच्यते ॥

शब्दोत्पत्तिर्द्विविधा । केषाञ्चिन्नैयायिकानां मते वीचीतरङ्गन्यायेन तदुत्पत्तिः । केषाञ्चिन्मते तु कदम्बकोरकन्यायेन तदुत्पत्तिः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्राद्या तदुत्पत्तिर्यथा आद्यया वीच्याऽन्यो महानेकस्तरङ्गो जन्यते । तेन तरङ्गेण च महत्तरं तरङ्गान्तरम् । तद्वद् आद्यशब्देन बहिर्दशदिगवच्छिन्नोऽन्यशब्दस्तेनैव शब्देन जन्यते, तेन चाऽपरस्तद्व्यापकः शब्दः इत्येवं क्रमेण श्रोत्रोत्पन्नः शब्दो गृह्यते । भेरीदण्डाद्यभिघातात् तद्देशावच्छेदेनाऽऽद्यशब्दस्योत्पत्तिः । अनन्तरं तद्बहिर्दशदिगवच्छेदेन प्रथमशब्दात् तद्व्यापको द्वितीयः शब्दः । ततस्तद्बहिर्दशदिगवच्छिन्नस्तृतीयः शब्दो द्वितीयशब्दाद् भवति इत्येवं क्रमेण चतुर्थादिशब्दानामप्युत्पत्तिर्बोध्या ॥

द्वितीया तदुत्पत्तिः, यथा कदम्बपुष्पस्य सर्वावयवेषु युगपत्कोरकाणामुत्पत्तिः, तद्वदाद्यशब्दाद् दशसु दिक्षु दश शब्दा उत्पद्यन्ते तैश्चान्ये दश शब्दा उत्पद्यन्ते, इत्येवं सर्वासु दिक्षु उपरि उपरि शब्दानामुत्पत्तिरित्यलम् ॥

# शक्तिः

पदपदार्थयोः सम्बन्धः । 'इदं पदममुमर्थं बोधयतु' इत्याकारक ईश्वरसङ्केतः । अत्र ईश्वरसङ्केतो नामेश्वरेच्छा । एतत्पदजन्यबोधविषयोऽयमर्थ इत्याकारकेश्वरेच्छा शक्तिः । 'अस्माच्छब्दादयमर्थो बोद्धव्यः' इत्यनादिसङ्केतः । यथा घटाद्यर्थविशेष्यकघटादिपदजन्यबोधविषयत्वप्रकारक ईश्वरसङ्केतः । 'पदपदार्थयोर्वाच्यवाचकभावनियामकं सम्बन्धान्तरं शक्तिः' इति शाब्दिका वदन्ति । 'अविनाभाव एव शक्तिः' इति प्राञ्च अङ्गीचक्रुः ॥

न्यायमते शक्तिस्त्रिविधा, योगः रूढिः योगरूढिश्चेति । तत्राद्या पाचकादिपदेषु, द्वितीया घटादिपदेषु, तृतीया पङ्कजादिपदेषु ॥

अत्र वैयाकरणाः- 'सैषा शक्तिः संयोगादिभिर्नानार्थकशब्देषु नियम्यते' इति । तदुक्तं हरिणा-

**संयोगो विप्रयोगश्च साहचर्यं विरोधिता । अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ॥**
**सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः । शब्दार्थस्यानवच्छेदे विशेषस्मृति हेतवः ॥**

[ ] इति । तदर्थश्च- एते संयोगादयः शब्दार्थस्याऽनवच्छेदे सन्देहे तदपाकरणद्वारेण विशेषस्मृतिहेतवो निर्णयहेतव इति । उपस्थितानामनेकेषामेकतरमात्रार्थतात्पर्यनिर्णयद्वारा तन्मात्रार्थविषयकान्वयबोधजनका इति भावः । 'जात्याकृतिव्यक्तिषु तिसृषु शक्तित्रयम्' इति शाब्दिका मन्यन्ते । 'आकृतावेव शक्तिः' इति पतञ्जलिप्रभृतय आहुः । 'अपोहार्थे शक्तिः' इति बौद्धा मन्यन्ते ॥

अत्रेदं बोध्यम् । प्रथमतः शक्तिग्रहो व्यवहाराद् घटानयनादिरूपाद् भवति । तथा हि- 'घटमानय' इति केनचित् प्रयोजक-वृद्धेन नियुक्तः कश्चन प्रयोज्यवृद्धः तद्वाक्यतोऽर्थं प्रतीत्य घटमानयति । तच्चोपलभमानो बालस्तया क्रियया तस्य प्रयोज्यस्य प्रयत्नमनुमिनोति । तेन च घटानयनगोचरप्रयत्नेन तस्य ज्ञानं घटानयनगोचरमनुमिनोति, स्वप्रयत्ने तेन तथा निश्चयात् । ततस्तद्धेत्वाकाङ्क्षामुपस्थितत्वाच्छब्दमेव कल्पयति । तदनन्तरं घटादिपदानां प्रत्येकमावापोद्वापाभ्यां 'घटपदं घटधीजनकम्' इति कल्पयति । तत आद्यशक्तिग्रहानन्तरमुपमानादिभिः शक्तिग्रहो भवति। अत्रोक्तमभियुक्तैः-

**शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च ।**
**वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ॥** [ ] इति ।

तत्र **व्याकरणाच्छक्तिग्रहः**, यथा 'कर्मणि द्वितीया'( ) 'कर्तरि परस्मैपदम्' इत्यनुशासनात् कर्मत्वादौ द्वितीयादेः शक्तिग्रहः। धातुप्रकृतिप्रत्ययादीनां शक्तिग्रहो व्याकरणाद् भवतीति ॥

**उपमानाच्छक्तिग्रहः**, यथा गवादिपदशक्तिधीसाचिव्येन गोसादृश्यातिदेशवाक्याद् गवयपदवाच्यत्वबोधोत्तरं गवयत्वजात्यवच्छिन्ने गोसादृश्यग्रहात् 'गवयो गवयपदवाच्यः' इत्याकारः । 'गोसदृशो गवयपदवाच्यः' इति सादृश्यज्ञानाद् गवयपदस्य गवये शक्तिग्रहो भवतीति वा ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**कोशादपि शक्तिग्रहः**, यथा 'स्वरव्ययं स्वर्गनाकत्रिदिवत्रिदशालयाः' (  )इत्यादिना नाकादिपदस्य स्वर्गे शक्तिग्रहः। 'गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति' (  )'चूर्णे क्षोदः' (  )इत्यादितश्च कोशाच्छक्तिग्रहः' इति ॥

**आप्तवाक्यादपि शक्तिग्रहः**, यथा 'कोकिलः पिकपदवाच्यः' इत्याद्याप्तवाक्यात् पिकादिपदानां कोकिले शक्तिग्रह इति ॥

**व्यवहारादपि शक्तिग्रहः**, यथा 'घटं नय' 'गामानय' इत्याद्यावापोद्वापाभ्यां पार्श्वस्थबालस्य घटादिपदस्य घटमात्रे शक्तिग्रहो भवतीति ॥

**वाक्यशेषादपि शक्तिग्रहः**, यथा 'यवमयश्चरुर्भवति' इत्यत्र यवपदस्य 'दीर्घशूकविशेषे कङ्गौ वा शक्तिः' इति सन्देहे वाक्यशेषाद् दीर्घशूकविशेषे शक्तिर्निर्णीयते ॥

**क्वचिद् विवरणादपि शक्तिग्रहः** यथा 'घटोऽस्ति' इत्यस्य 'कलशोऽस्ति' इत्यनेन विवरणाद् घटपदस्य कलशे शक्तिग्रह इति ॥

**प्रसिद्धपदस्य सान्निध्यादपि शक्तिग्रहः**, यथा 'इह सहकारतरौ मधुरं पिको रौति इत्यादौ पिकपदस्य मधुरादिप्रसिद्धपदसान्निध्यात् कोकिले शक्तिग्रह इति ॥

**जीयादशोको ज्योतिर्वित् सोमश्चासौ विचक्षणः । श्रमणश्रीचन्द्रादीनां जिनमार्गोपदेशकः ॥**

इति भवदीयः
**विष्णुकान्तः ॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# મહાન જ્યોતિર્ધર
# કલિકાલ સર્વજ્ઞ
# શ્રી હેમચન્દ્રાચાર્ય
# મહારાજા







## વાચકવર
## શ્રી દેવસાગર ગણિ
## મહારાજ સાહેબ

Jain Education International For Private & Personal Use Only www.jainelibrary.org



**શાસનસમ્રાટ્ તપાગચ્છાધિપતિ**
**પરમ પૂજ્ય આચાર્ય ભગવંત**
**શ્રીમદ્વિજય નેમિસૂરીશ્વરજી**
**મહારાજા**

अचिन्त्यचिन्तामणिकल्पशाखिने
विशुद्धसद्ब्रह्मसमाधिशालिने ।
दयार्णवायार्थितदायिने सतां
नमो नमः श्री गुरुनेमिसूरये ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org



વાત્સલ્યવારિધિ, સમયજ્ઞ
પ.પૂ. આચાર્ય ભગવંત
શ્રીમદ્ વિજય
**વિજ્ઞાનસૂરીશ્વરજી**
મહારાજ સાહેબ

*

वात्सल्यवारिधि: शान्त:
समयज्ञो गुणालय: ।
जीयाद् विज्ञानसूरीश:
मुनिमानसहंसराद् ॥

प्राकृतविशारद, धर्मराजा

પ્રાકૃતવિશારદ, ધર્મરાજા
પ.પૂ. આચાર્ય ભગવંત
શ્રીમદ્ વિજય
**કસ્તૂરસૂરીશ્વરજી**
મહારાજ સાહેબ

*

वात्सल्यवारिधि: प्राज्ञो
गीतार्थानां धुरन्धर: ।
धर्मराज: प्रशान्तस्तं
वन्दे कस्तूरसूरिणम् ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org



# આશિષ અંતરના...

## સાધના એક શ્રુત સાધકની..

વર્ષો પૂર્વેની વાત યાદ આવે છે. પૂજ્યપાદ, સિદ્ધાંત મહોદધિ, પ્રાકૃતવિશારદ પ.પૂ. આ. ગુરુભગવંત શ્રીમદ્ વિજય કસ્તૂરસૂરીશ્વરજી મ.સા. અતિ પરિશ્રમથી શ્રી હેમચંદ્રાચાર્ય રચિત 'અભિધાન ચિંતામણિ શબ્દકોશનું ભાષાંતર તૈયાર કર્યું. વિદ્વાનો અને અભ્યાસુઓ માટે શબ્દકોશ અતિ ઉપયોગી બન્યો. સર્વત્ર આદર-માન પામ્યો. પૂજ્ય ગુરુદેવશ્રી વધુ ઉત્સાહિત થયાં- ગ્રંથપૂર્તિ અને ગ્રંથ સમૃદ્ધિ માટે અનેક પ્રાચીન વિદ્વાનો રચિત અન્ય સંસ્કૃત નામમાલા એકાક્ષરી કોશો-શબ્દકોશો વગેરેનો માર્મિક અભ્યાસ કરી એક વધુ 'નવ-સર્જન' કરવાની ભાવના રાખતા હતાં, કે જેથી સંસ્કૃત-પ્રાકૃતગ્રંથો સહેલાઈથી ઉકેલી શકાય. (કારણ કે "શબ્દકોશો એ ગ્રંથ વાંચનના હાથ-પગ ગણાય છે.")

પૂજ્ય ગુરુદેવશ્રીની આ ભાવના સાકાર પામે તે પૂર્વે કાળધર્મ પામી ગયાં. અને તે અપૂર્ણ ભાવનાને પૂર્ણ કરવા, આ. શ્રી વિજય અશોકચંદ્ર સૂરિજીના પટ્ટધર આ. શ્રી વિજય સોમચંદ્ર સૂરિજી ના શિષ્ય, ભાવિના આશાસ્પદ વિદ્વાન ગણિ શ્રીચંદ્ર વિજયજીએ છેલ્લા કેટલાક વર્ષોની પરિશ્રમ સાધના દ્વારા શ્રી અભિધાન ચિંતામણિ નામમાલા ઉપર શ્રી દેવસાગર મુનિ-રચિત નામમાલા વૃત્તિની અસંશોધિત-અપ્રકાશિત હસ્તપ્રત..... જ્ઞાન ભંડારમાંથી મળી આવી. તેના ઉપર તેઓએ સંશોધન+ લિપ્યંતર કર્યું. અને તેમાં અનેક શબ્દકોશો-ગ્રંથો વગેરેનો સમુચિત ઉપયોગ કરી સંશોધન ક્ષેત્રે વિદ્વદ્ સમૂહ માટે એક અપૂર્વ પ્રકાશન ભેટ ધરી રહ્યાં છે-

જેઓએ વ્યાકરણ-ન્યાય-દર્શનશાસ્ત્રનો અભ્યાસ કર્યો છે. અને સંશોધનના ક્ષેત્રે સારો અનુભવ છે- તે આ પરિશ્રમના કાર્યમાં સ્પષ્ટ તરી આવે છે. શબ્દકોશ અંગે તેઓની મહેનત આ એક ગ્રંથથી અટકી ન જાય પરંતુ વધુ ને વધુ ઉપયોગી પ્રાચીન ગ્રંથોના સંશોધન થાય જેથી શ્રુતસાધના અવિરત ચાલુ રહે તે શુભકામના.

આ. વિ. મહોદયસૂરિ-

Jain Education International
For Private & Personal Use Only
www.jainelibrary.org

# અંતરના આશિષ...

વિ.સં. ૨૦૩૩ શ્રાવણ સુદ ૫ ના (મુંબઈ ચોપાટીના ચોમાસામાં)
હજારો કિરણવાળા સૂર્યનું પહેલું કિરણ પૃથ્વી ઉપર પથરાયું
ત્યારે જ બે બાળકો શિરીષ (ઉ. ૫-૧૪) ગિરીશ (ઉ. ૫-૧૨) નો પહેલા જ
વાર સંપર્ક થયો અને મનોમન થઈ ગયું કે ભાવિમાં આ બાળકો
જિનશાસનના નભોમંડળમાં પ્રકાશ પાથરશે.
સમયાન્તરે સંયમનો સ્વીકાર કરી મુનિશ્રમણચંદ્રવિજયજી મુનિ-
શ્રીચંદ્રવિજયજી બન્યા. પૂજ્ય ગુરુ ભગવંતોની કૃપાથી આગળ વધી રહ્યા.

અમારી અંતરની ઈચ્છા એવી ખરી કે બધા સાધુઓ
સંયમ સાધનાની પુષ્ટિ માટે જ્ઞાનોપાર્જન વિશેષ રીતે કરે. તે ભાવનાને
સાકાર કરતા ગણિશ્રી શ્રીચંદ્રવિજયજીએ કલિકાલ સર્વજ્ઞ શ્રી હેમચંદ્રાચાર્ય
વિરચિત અભિધાન ચિંતામણિ નામમાલા ઉપર વિધિપક્ષીય-
મહોપાધ્યાય શ્રી દેવસાગરજી ગણીવર્યે રચેલ 'વ્યુત્પત્તિ રત્નાકર'
ટીકાનું અથાક પરિશ્રમપૂર્વક સંપાદન કર્યું વિદ્વદ્ ભોગ્ય આ ગ્રંથનું
અધ્યયન કરતા કરાવતા ખ્યાતપુરુષો ગ્રંથકાર તથા સંપાદકના
પ્રયત્નને સમજી શકશે

આ એક ગ્રંથના સંપાદનથી સંતોષ ન માનતા હવે પછી પણ
અપ્રકાશિત ગ્રંથોનાં સંપાદનની પરંપરા જાળવી રાખશો અમારા
અંતરના આશિષ તમારી સાથે જ છે

લિ. અશોકવિ.

વિ.સં.-૨૦૫૯ ફા-વ-૮
આદિજિન જન્મ-દીક્ષા-કલ્યાણક
ગિરનાર ધામ મુંબઈ



Jain Education International For Private & Personal Use Only www.jainelibrary.org



# અમે છીએ, તમારી સાથે...

શું સમુદ્રના કિનારે ઊભા રહેવાથી રત્નાકરમાંથી રત્નો મેળવી શકાય?
શું સમુદ્રના પાણીમાં છબછબિયા કરવાથી રત્નાકરમાંથી નિધિ મેળવી શકાય?
શું સમુદ્રમાં ડૂબકી મારવા માત્રથી રત્નાકરમાંથી સમૃદ્ધિ મેળવી શકાય!

ના, ના, ના. સમુદ્રના પેટાળમાં ગયા વગર કે મરજીવા થયા વગર રત્નાકરમાંથી રત્નો ક્યારે પણ મેળવી ન શકાય.....

આ તો અભિધાનચિંતામણિનામમાલા સ્વયં રત્નાકર-સાગર...
તેના ઉપર 'વ્યુત્પત્તિરત્નાકર' ટીકા તો પોતે જ મહાસાગર...

છતાં ય તેમાં ને તેમાં જ વર્ષોથી વ્યસ્ત રહેતા ગણિશ્રી શ્રીચંદ્રવિજય વાસ્તવમાં શ્રી=લક્ષ્મી-જ્ઞાનલક્ષ્મી=શબ્દલક્ષ્મી, તેને પ્રકાશિત કરનાર ચંદ્ર સમાન બની ગયા.....

સંશોધન-સંપાદનના અનુભવી વિદ્વાનો સમજુ શકશે કે અભિધાન-ચિંતામણિ ઉપર પાણિનીયવ્યાકરણના સૂત્રોના આધારે તૈયાર થયેલ આ ટીકાનું સંશોધન બન્ને વ્યાકરણથી વ્યુત્પન્ન વ્યક્તિ સિવાય શક્ય નથી. ગણિશ્રીએ આવા આકર ગ્રંથનું જ પ્રથમ સંપાદન દ્વારા 'બાથ ભીડવી તો સિંહ સાથે' એ લોકોક્તિ ચરિતાર્થ કરી છે.

આવા અનેક અપ્રકાશિત ગ્રંથો ગ્રંથાગારમાંથી બહાર આવવા ગણિશ્રી જેવા વિદ્વાનોની પ્રતીક્ષા કરી રહ્યા છે...
અમારા અંતરના આશિષ આવા ગ્રંથ સંશોધનાદિ કાર્યો માટે સતત શ્રી...ની સાથે જ છે...

વિ.સં.૨૦૫૯, ફા.વ.૮
ગિરનારધામ

લિ. સોમચંદ્ર વિ.

# સમર્પણ



હતો વનમાં, પહોંચાડ્યો ઉપવનમાં

હતો કાંટાની ઝાડીમાં, પહોંચાડ્યો ગુલછંદ બગીચામાં

ભટકતો હતો જંગલમાં, લાવી દીધો મંગલમાં

રખડતો હતો સંસારમાં, લાવી દીધો સંયમમાં

અથડાતો હતો અંધકારમાં, લાવી દીધો પ્રકાશમાં

જેઓશ્રીના ચરણમાં સમર્પિત થતાં જીવન ધન્ય બન્યું,
જન્મ સફળ બન્યો, આત્મામાં જ્ઞાનબિંદુનો પ્રાદુર્ભાવ થયો
તેવા પૂજ્યપાદ ગુરુદેવશ્રીના
(પ.પૂ. આચાર્ય શ્રી વિજય અશોકચંદ્રસૂરીશ્વરજી મહારાજના)
પાવન કરકમળમાં સમર્પણ...

— આપનો શ્રીચંદ્ર

"तुम से पाये फूल तुम्ही पर आज चढाउं"



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# અ નુ પ્ર દા ન

* પ.પૂ. આચાર્ય શ્રી વિજય ચંદ્રોદયસૂરીશ્વરજી મહારાજ સાહેબના સદુપદેશથી
  શ્રી પાર્શ્વનાથ ભગવાનની પેઢી, શ્રી ચિંતામણિ પાર્શ્વનાથ જૈન દેરાસર, મધુમતી નવસારી
  વિ.સં. ૨૦૫૨ ના નવસારી ચાતુર્માસમાં થયેલ ઐતિહાસિક આરાધનાની સ્મૃતિમાં
* શેઠ શ્રી મોતીશા રીલીજીયસ એન્ડ ચેરીટીઝ ટ્રસ્ટ, ભાયખલા, મુંબઈ
  વિ.સં. ૨૦૫૩ ના ભાયખલાના ઐતિહાસિક ચાતુર્માસની સ્મૃતિમાં
* શ્રી ૧૦૮ જૈન તીર્થ દર્શન ભવન ટ્રસ્ટ, શ્રી સમવસરણ મહામંદિર, પાલીતાણા
* શ્રી વલસાડ જૈન શ્વેતામ્બર મહાવીરસ્વામી ભગવાનની પેઢી, વલસાડ
* પ.પૂ.આચાર્ય શ્રી વિજય અશોકચંદ્રસૂરીશ્વરજી મહારાજ સાહેબના સદુપદેશથી
  શ્રી ઘાટકોપર શ્વેતામ્બર મૂર્તિપૂજક જૈન સંઘ, ઘાટકોપર (પશ્ચિમ), મુંબઈ
* શ્રી શાસનસમ્રાટ્ નેમિસૂરિ શ્વે. મૂ. પૂ. તપગચ્છ જૈન સંઘ-તાંબેનગર, મુલુંડ (પશ્ચિમ)
* શ્રી મુલુંડ મુંબઈ-પાલીતાણા છ'રી પાલિત સંઘ સમિતિ-મુંબઈ
* શ્રી નેમિસૂરિ આરાધના ભવન, મોતીપોળ, ગોપીપુરા, સુરત
* ગણિશ્રી શ્રીચંદ્રવિજયજી મહારાજની પ્રેરણાથી
  શ્રી મુનિસુવ્રતસ્વામી શ્વેતામ્બર મૂર્તિપૂજક જૈન સંઘ, રાજેશ પાર્ક, મલાડ (પૂર્વ)
* ગણિશ્રી શ્રમણચંદ્રવિજયજી મ.સા. તથા ગણિશ્રી પ્રશમચંદ્રવિજયજી મ.સા.ની પ્રેરણાથી
  શ્રી શ્વેતામ્બર મૂર્તિપૂજક જૈન સંઘ, શિવ, સાયન, મુંબઈ
* ગણિશ્રી શ્રીચંદ્રવિજયજી મહારાજની પ્રેરણાથી
  શેઠ હઠીસિંહ કેસરીસિંહ ઉપાશ્રય ટ્રસ્ટ, પાંજરાપોળ, રિલીફ રોડ, અમદાવાદ
* શ્રી પ્રેમવર્ધક આરાધના સમિતિ, પાલડી, અમદાવાદ
* પ્રવર્તક શ્રી કલ્યાણચંદ્રવિજયજી મ.સા.ની પ્રેરણાથી
  શ્રી વાસણા આરાધના ભવન, અમદાવાદ
* મુનિશ્રી નિર્વેદચંદ્રવિજયજી મ.સા., મુનિશ્રી નિરાગચંદ્રવિજયજી મ.સા.ની પ્રેરણાથી
  શ્રી ધર્મભક્તિ જૈન શ્વેતામ્બર મૂર્તિપૂજક સંઘ, ફત્તેહપુરા, પાલડી, અમદાવાદ
* ગણિશ્રી શ્રમણચંદ્રવિજયજી, ગણિશ્રી શ્રીચંદ્રવિજયજી, મુનિશ્રી શશીચંદ્રવિજયજીની
  પ્રેરણાથી શ્રી ડુમા જૈન સંઘ, શ્રી શાંતિનાથ જૈન મંદિર, ડુમા (જિલ્લો પંચમહાલ)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# रत्नाकरोऽनुपमो व्युत्पत्तिरत्नाकरः

**क्व हेमप्रोक्तानि वचांसि तानि, क्व सार्थसूत्राणि नु पाणिनीनाम् ? ।**
**व्युपत्तिरेषाऽखिलशब्दसत्का, तथापि किञ्चिद् विलिखामि शक्त्या ॥१॥**

अद्यैषा **व्युत्पत्तिरत्नाकरवृत्तिसमलङ्कृता अभिधानचिन्तामणिनाममाला**रूपा पुष्पमाला विदुषां जिज्ञासूनामभ्यासुकानां च करकमलेष्वर्पतामस्माकमन्तरात्मन्यनुपमा आनन्दानुभूतिरनुभूयते । अस्या नाममालारूपपुष्पमालायाः कैश्चिदपि शब्दपुष्पैरवश्यं पाठकानां कार्याणि काव्यानि कृतयो वा सौरभायन्ते ॥

## अपारो विस्तरो गिराम्

**यदि पत्रायते व्योम, मेलानन्दायतेऽर्णवः । ब्रह्मायते लिपिकरस्तथाप्यन्तः कुतो गिराम् ? ॥१॥**

(व्युत्पत्ति० पृ.२१३, पं.३५), [मेला मषी, तस्या नन्दा भाजनमिति व्याख्या ॥१॥], गगनं पत्रं स्याद्, समुद्रो मषीभाजनं स्यात्, चिरायुर्ब्रह्मा लेखकः स्यात्, तथापि गिरामन्तो न स्यात् । भगवान् **पतञ्जलि**रपि **महाभाष्ये** प्रथमे पस्पशाह्निके आह-

**"एवं हि श्रूयते- बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच, नान्तं जगाम, बृहस्पतिश्च प्रवक्ता इन्द्रश्चाध्येता, दिव्यं वर्षसहस्रमध्ययनकालः, न चान्तं जगाम, किं पुनरद्यत्वे ? यः सर्वथा चिरं जीवति वर्षशतं जीवति"** इति ॥

एतदेवानुभूतिस्वरूपाचार्याः प्रोचुः-

**"इन्द्रादयोऽपि यस्यान्तं, न ययुः शब्दवारिधेः । प्रक्रियान्तस्य कृत्स्नस्य, क्षमो वक्तुं नरः कथम् ? ॥१॥"** इति ॥

क्षीणबलाः, क्षीणायुष्काः क्षीणप्रज्ञाः, क्षीणसत्त्वाः, वयं ज्ञानार्णवस्य बिन्दुमपि ज्ञातुं न शक्नुयामः। कानि कानि दर्शनानि, के के आगमाः, कति कति न्यायशास्त्राणि, विविधानि काव्यानि, अनेकानि व्याकरणानि, भूरि ज्योतिर्ग्रन्थाः, कीदृशं विज्ञानम्, अपाराः वैदिक-स्मृति-श्रुतिग्रन्थाः, आयुर्वेद-भूगोल-खगोलादिविषयकं साहित्यवैपुल्यं च कथमेतेषां सर्वेषां क्षितितले विद्यमानानां ग्रन्थानामवबोधः पारयितुं शक्यः ? ॥

## ज्ञानार्णवे नौकायते कोषः

शब्दकोषबोधमन्तरेण शास्त्रावबोधोऽशक्यप्रायः, अत एव विभिन्नग्रन्थेष्वनेके प्राज्ञाः कोषमाहात्म्यं विशिष्टाभिरुपमाभिर्वर्णयन्ति ॥

तद्यथा-

**"वक्तृत्वं च कवित्वं च, विद्वत्तायाः फलं विदुः । शब्दज्ञानादृते तन्न द्वयमप्युपपद्यते ॥१॥**
**कोशश्चैव महीपानां, कोशश्च विदुषामपि । उपयोगो महानेष, क्लेशस्तेन विना भवेत् ॥२॥** (अभि. स्वो. १।१)
**व्याकरणरहितश्चान्धो, बधिरः कोशवर्जितः । काव्येन रहितः पङ्गुर्मूकस्तर्कविवर्जितः ॥३॥** (काव्यदर्शे दण्डी)
**इदमन्धः तमः कृत्स्नं, जायेत भुवनत्रयम् । यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ॥४॥"** इति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बुद्धिमत्तायाः फलं द्वयं वक्तृत्वं कवित्वं च, परं शब्दज्ञानं विना वक्तृत्वं कवित्वं च कथं संभाव्येत ? ॥१॥

कोशं- निधिं विना राज्ञां राज्यानि न प्रचलन्ति, कोऽपि क्रयविक्रयादिव्यवहारो न भवेत्, यदि कोशः सम्पूर्णस्तर्हि राष्ट्रमपि समृद्धं भवति, तथा शब्दकोषं विना क्वापि शास्त्रेषु प्रवेशो न स्यात्, शास्त्रावबोधोऽपि दुर्गमः स्यात् ॥२॥

शास्त्रावगमे व्याकरणादृते निश्चक्षुष्कः, कोशरहितो बधिरः, यथा बधिरः श्रवणाभावतो विवशो भवति, तथैषोऽपि शब्दप्रयोगे विह्वलो भवति ॥३॥

अत एव शब्दकोशो ज्योतिरूपः, यथा विना ज्योतिस्त्रिभुवनमन्धकारमयं भवति, तथा शब्दज्योतिर्विना भुवन-मण्डलमिदमज्ञानतिमिरव्याप्तं भवेत् ॥४॥ एवं चाऽपारे खलु ज्ञानार्णवे स्वैरविहारं कर्तुं शब्दकोषरूपनौकैव समर्था ॥

## शब्दार्थनिश्चायकः कोषः

अभिलाप्याः शब्दा अनेकाः, तेषां नियतोऽर्थस्तु न संभाव्यते, वक्तुरपेक्षया तेषां शब्दानामर्थानन्त्यात् ॥

महर्षि**भर्तृहरि**राह-

"**प्रतिनियतवासनावशेनैव प्रतिनियताकारोऽर्थः । तत्त्वतस्तु कश्चिदपि नियतो नाभिधीयते ॥१॥** "

(वाक्यपदीयम्-२।१३६) इति ।

उच्चार्यमाणस्य शब्दस्य प्रथममभिधेयार्थः वाच्यार्थ आवश्यकः, तदनु भावार्थः तात्पर्यार्थः, लक्ष्यार्थः व्यङ्ग्यार्थो वाऽवबुध्यते । तदर्थ**मार्षपुरुषा** अष्टावुपाया आहुः-

"**शक्तिग्रहं व्याकरणोपमान-कोशाप्तवाक्याद् व्यवहारतश्च ।**
**वाक्यस्य शेषाद् विवृतेर्वदन्ति, सान्निध्यतः सिद्धपदस्य वृद्धाः ॥१॥**" इति ॥

**(१) व्याकरणम्, (२) उपमानम्, (३) कोशः, (४) आप्तवाक्यम्, (५) व्यवहारः, (६) वाक्यशेषः, (७) विवरणम्, (८) शब्दसान्निध्यं** च, एतेषामर्थप्रत्यायकतासत्त्वेऽपि मुख्यतया कोषः शब्दार्थनिश्चायकः । तथा अध्ययने लिखनादिषु च शब्दवैपुल्यमेवावश्यकम्, तच्च कोषादेव सुलभम् ॥

## कोषपरम्परा

इत्थं च शब्दस्य सम्यक्स्वरूपं, सम्यगर्थावबोधश्च न स्यात् तर्हि महानर्थोऽपि संभाव्येत, सम्यक् प्रयोगे च लाभोऽपि महान् स्यात् । यदुक्तं **भाष्ये**-

"**एकः शब्दः स्वरतो वर्णतो वा, मिथ्याप्रयुक्तो न तमर्थमाह ॥**
**तद् वाग्वज्रं यजमानं हिनस्ति, यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥१॥**" इति ॥

श्रूयते च पुराणे इन्द्रशत्रुर्वृत्र इन्द्रस्योपरि विजयार्थं यज्ञं कृतवान्, इन्द्रशत्रुशब्दे स्वरभेदतः तत्पुरुषसमासस्थाने कर्मधारय-समासेन शत्रोरिन्द्रस्यैव वृद्धिः समजनि, तदेवं शब्दप्रयोगे वर्णादिहीनता न स्यात् तथा प्रयोक्तव्यम् ॥

एवम्- '**एकः शब्दः सम्यग् ज्ञातः, सुष्ठु प्रयुक्तः, स्वर्गे लोके च कामधुग् भवति**' इत्यपि भाष्ये प्रोक्तम् ।

सम्यक् शब्दप्रयोगः, शब्दार्थावबोधश्च कोषादेव सुगमतया भवति । अतः पूर्वमहर्षिभिः शब्दकोशानां सङ्कलनं कृतम् । आदौ **श्रीकश्यपमुनिर्निघण्टु**द्वारा वैदिकशब्दानामर्थसङ्गतिं कृतवान्, पश्चाच्च **निरुक्तकाराः** शब्दार्थसिद्ध्यर्थं **निरुक्तानि** रचितवन्तः । कालान्तरे **निघण्टु-निरुक्तानां** प्रचारोऽवबोधश्च दुर्गमो जातः, ततश्च शब्दानां पर्यायाः सरलतया सुगमतया च ज्ञानगोचरा भवेयुः, कण्ठस्था अपि ते शीघ्रं स्युरिति गद्यरचनां विमुच्य अनुष्टुप्श्लोकैः कोषरचनां कर्तुं समारेभिरे कोषकाराः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## कोषप्रकाराः

ये केचन शब्दकोषा अधुना समुपलभ्यन्ते, तेषामवलोकनतः कोशानां त्रैविध्यं दरीदृश्यते- **(१) एकार्थकनामामाला, (२) अनेकार्थकनाममाला, (३) एकाक्षरनामामाला** चेति ॥

(१) **एकार्थकनाममाला**— एकार्थकानां समानार्थकानां पर्यायवाचिनां शब्दानां सङ्ग्रहो मुख्यतया यत्र भवति, तादृशी नाममाला। यथा पृथ्वीवाचका ये शब्दाः संस्कृतभाषायामुपलभ्यन्ते, तेषां सर्वेषां सङ्ग्रह एकत्रैव भवति ॥

**भागुरेः** त्रिकाण्डः, **वाचस्पतेः** शब्दार्णवः, **विक्रमादित्यस्य** संसारावर्तः, **वररुचे**र्नाममाला, **व्याडे**रुत्पलिनीकोशः, **शाकटायनस्य** आपिशलिरित्यादयः कोशा लुप्तप्रायाः, मात्रोल्लेखरूपेण यत्र तत्र मिलन्ति ॥

अधुना ये वर्तन्ते, तेषां प्राचीनतमोऽध्ययनादिषु प्रसिद्धो**ऽमरसिंह**कृतोऽमरकोष इति प्रथितः, **केशवस्वामि**कृतः शब्दकल्पद्रुमः, महेश्वरकृतो विश्वप्रकाशः, धनञ्जयनाममाला, **अभिधानचिन्तामणिनाममाला, केशवदैवज्ञस्य** कल्पद्रुमः, **अप्पयदीक्षितस्य** नामसङ्ग्रहमालाप्रभृतयोऽनेके कोशा वर्तन्ते ॥

(२) **अनेकार्थनाममाला**— एकाधिकार्थवाचकशब्दानां सङ्ग्रहो यत्र वर्तते एतादृशी नाममाला । यथा गोशब्दः पृथ्वी-धेनू-वाणी-किरण-स्वर्गवाचकः, अतः सोऽनेकार्थवाची । यथा **केशव**कृतो नानार्थार्णवसंक्षेपः, अनेकार्थसङ्ग्रहः, मेदिनी, नानार्थरत्नमाला, **श्रीधरसेन**कृतो विश्वलोचनकोशः, **महिपर**चितोऽनेकार्थतिलकः, **अजयपालस्य** नानार्थसङ्ग्रहः **मङ्खु**स्यानेकार्थकोश इत्यादयो कोशाः सन्ति ॥

हलायुध-वैजयन्ती-शब्दरत्नाकर-शब्दरत्नावलीप्रभृतयस्तु पूर्वोक्तोभयप्रकाराः सन्ति ॥

(३) **एकाक्षरनाममाला**— स्वरमन्तरेण व्यञ्जनानां प्रयोगो दुर्लभः, एवं च मात्रस्वराणां, स्वरयुक्तानां व्यञ्जनानां, संयुक्त-व्यञ्जनानां च सार्थकाणां सङ्ग्रहो यत्रैषा एकाक्षरनामामाला । यद्यपि पूर्वोक्तेषु कोशेष्वपि श्री-भू-गोप्रभृतिशब्दा एकाक्षरात्मका वर्तन्ते एव, तथापि स्वतन्त्रस्तेषां सङ्ग्रहस्वरूपः कोशोऽत्र गण्यते । यथा **धनञ्जय**कृत एकाक्षरीकोशः, **माधव**कृता एकाक्षरशब्दमालादयः ॥

## कोषनिर्माणरीतिः

(१) **प्रथमाक्षरानुसारिकोशाः**— केचन शब्दस्याद्यवर्णमनुसृत्य कोशविभागं कुर्वन्ति, यथा कादयः, खादयः शब्दाः। यथा नानार्थरत्नमाला-मेदिनीकोशादयः ॥

(२) **अन्तिमवर्णानुसारिकोशाः**— केचित् शब्दानामन्त्यवर्णमाश्रित्य कोशं रचयन्ति, कान्ताः, खान्ताः इत्यादयः । यथा विश्वप्रकाश-कोशकल्पतरुप्रभृतयः ॥

(३) **अक्षरसङ्ख्यानुसारिकोशाः**— केऽपि एकस्वर-द्व्यक्षर-त्र्यक्षर-यावत्षडक्षरादिकमाश्रित्य कोशे विभागं कुर्वन्ति । यथा नानार्थरत्नसंक्षेप-शब्दरत्नसमन्वय-हेमचन्द्राचार्यकृतानेकार्थसङ्ग्रहादयः ॥

(४) **लिङ्गानुसारिकोशाः**— पुंल्लिङ्ग-स्त्रीलिङ्ग-नपुंसकलिङ्गानुसारिशब्दानाश्रित्य कोशं रचयन्ति । यथा अमरकोशे तृतीये काण्डे, एवमन्यत्रापि ॥

(५) **विषयानुसारिकोशाः**— येषु येषु विषयेषु ये ये शब्दाः प्रयुज्यन्ते, तान् स्वीकृत्य विषयविभागो यत्र सन्ति, तादृशाः कोशाः।

(६) **पर्यायपरिमाणानुसारिकोशाः**— शब्दानां यावन्तः पर्यायाः, तान् लक्षीकृत्य कोशाः प्रवर्तन्ते ॥

यथा अनेकार्थसमुच्चय-पाइयलच्छीनाममालादयः ॥

अधुना तु विभिन्नप्रकारैः शब्दसङ्ग्रहस्वरूपाः विश्वकोशादयो भवन्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## वरीवर्तन्ते जगति जैनकोशकाराः

विश्ववाङ्मये विविधविषयेषु यथा योगदानं जैनाचार्याणां विदुषां जैनानां च, तथैव कोषसाहित्येऽपि ॥

अद्यत्वे ये जैनकोषा लभ्यन्ते, तेषु महाकवि**धनञ्जय**कृतं कोशचतुष्टयं-

**(१)नाममाला(२)अनेकार्थनाममाला(३)अनेकार्थनिघण्टु(४)एकाक्षरीकोशादि** प्राचीनतमम् ॥

शब्दैः सह शब्दान्तरं संयुज्याभिनवशब्दनिर्माणपद्धतिः, प्राकृतसाहित्ये पाइयलच्छीनाममालाख्यस्य कोशरचना च धनञ्जयकविना प्रथमा प्रारब्धा । श्रीहेमचन्द्राचार्यैरपीयं रचनापरम्परा **अभिधानचिन्तामणिनाममालायां** प्राकृते **'देशीनाममाला'** इत्याख्ये कोशे च स्वीकृता ॥

**श्रीधरसेन-श्रीजिनदेव-श्रीशुभशीलगणी-श्रीपद्मसुन्दर-श्रीभानुचन्द्रगणी-श्रीहर्षकीर्तिसूरि**प्रभृतिभिरपि विविधकोशानां निर्माणं कृतम् ॥

## कलिकालसर्वज्ञश्रीहेमचन्द्राचार्याः

**श्रीहेमचन्द्रसूरीणामपूर्वं वचनामृतम् । जीवातुर्विश्वजीवानां, राजचित्तावनिस्थितम् ॥१॥**

(श्रीप्रभाचन्द्रसूरिः)।

श्रीहेमचन्द्रसूरीणां विद्यमानकालतोऽद्यावधि ये ये विद्वांसः समुत्पन्नाः, ते सर्वे विविधस्तुतिभिरवश्यं स्तुत्यांस्तान् स्वानुभवतो मुक्तकण्ठं स्तुवन्त्येव ॥

अत्रापि श्लोके वर्णितं तत्रभवतामनुपमं वचनपीयूषं जगति सर्वेषां जीवानामाधाररूपम् ॥

आधुनिका विद्वांसोऽप्येकध्वनितः स्वीकृतवन्तः- "**श्रीहेमचन्द्राचार्याः न कस्याश्चित् जातेः समुदायस्य वा कृते स्वजीवितं व्यतीतवन्तः, न वा केवलं संस्कृतसाहित्यसर्जनमेवाहृतम्, किंतु सांस्कृतिक-राजनैतिक-सामाजिकादि-समस्तगतिविधिषु नवीनं दृष्टिकोणं दर्शितवन्तः, ततस्ते गुर्जरराज्यस्यास्मिताया आविष्कर्तार आसन्**" इति ॥

वि. सं. ११४५तमे वर्षे **कार्तिके शुक्लपूर्णिमायां धंधुका**नगरे **चाचदेव**पितुः **पाहिणी**मातुश्च कुक्षौ **चाङ्गदेव**नाम्ना पुत्रोऽजायत । कदाचित् चन्द्रगच्छीय**श्रीदेवचन्द्रसूरि**पास्तत्र समागताः । जिनालयात् प्रत्यागच्छद्भिः पूज्यैर्निजासने उपविष्टो बाल**श्चाङ्गदेवो** दृष्टः, निरीक्ष्य तेषां वदनाम्बुजाच्छब्दा निःसृताः-

"**अयं यदि क्षत्रियकुले जातस्तदा सार्वभौमचक्रवर्ती, यदि वणिग्विप्रकुले जातस्तदा महामात्यः, चेद् दर्शनं (जैनत्वं) प्रतिपद्यते तदा युगप्रधान इव कलिकालेऽपि कृतयुगमवतारयिष्यसि**" इति ॥

जननी**पाहिणी**समक्षं पुत्ररत्नं ययाचे । गुरुनिश्रायां वसन् न्याय-व्याकरण-साहित्यादिग्रन्थान् शीघ्रमधीतवान् । मन्त्रीश्वर**उदयनो** नैपुण्येन पितुः सम्मतिमादाय वि. सं. **११५४**तमेऽब्दे दीक्षां प्रदत्तवान् । **'मुनिसोमचन्द्रः'** इति नाम्ना विश्रुतः । वि. सं. **११६६**तमे वर्षे **वैशाखे सुदि तृतीयायां नागोर**नगरे आचार्यपदं प्राप्य **'श्रीहेमचन्द्राचार्याः'** समभवन्।

**अजारी**ग्रामे भगवतीसरस्वत्या अनुपमा साधना समाराधिता, तस्याः साक्षात्कारं कृतवन्तः ॥

पूर्णविद्वत्तातो महाराज**सिद्धराजजयसिंहं** परमार्हत**कुमारपाल**क्षीतीशं च प्रबुद्ध्य जैनदर्शनानुरागिणौ कृतवन्तः ॥

**शब्दानुशासन-लिङ्गानुशासन-छन्दोनुशासन-काव्यानुशासन-न्याय-योग-कोश-चरित्र-स्तोत्रा**दिग्रन्थानां सपाद-कोटिप्रमाणोपेतं निर्माणं कृत्वा **'कलिकालसर्वज्ञः'** इति श्रुत्या जगति प्रसिद्धिं प्राप्ताः । सिद्धहेमव्याकरणं तु सर्वत्र विश्रुतं व्याकरणेषु च प्रधानं जातम् । यथा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"भ्रातः! संवृणु पाणिनिप्रलपितं, कातन्त्रकन्था वृथा
मा कार्षीः कटु शाकटायनवचः, क्षुद्रेण चान्द्रेण किम् ? ।
किं कण्ठाभरणादिभिर्वठरयत्यात्मानमन्यैरपि
श्रूयन्ते यदि तावदर्थमधुरा, श्रीसिद्धहेमोक्तयः ॥१॥" (प्रबन्धचिन्तामणौ) इति ॥

ये केचन ग्रन्था निर्मिताः, ते स्वपाण्डित्यं प्रदर्शयितुं न, किंतु सर्वजनहितायैव ॥

"क्लृप्तं व्याकरणं नवं विरचितं, छन्दो नवं द्व्याश्रया-
लङ्कारौ प्रथितौ नवौ प्रकटितं, श्रीयोगशास्त्रं नवम् ।
तर्कः सञ्जनितो नवो जिनवरा-दीनां चरित्रं नवं
बद्धं येन न केन केन विधिना, मोहः कृतो दूरतः ॥२॥" इति ॥

## चिन्तामणिनिभाऽभिधानचिन्तमणिनाममाला

तत्रभवतां पूज्यपादानां ग्रन्थेषु कोशसाहित्ये च नाममालेयं शेखरायते । विद्वद्भिः कृतिरेषा स्वोक्तिभिरेवं समादृता- **'अभिधानकोशतः पदार्थनिश्चयः'** इति महाकविवामनकृते काव्यालङ्कारे (१।३।५॥)

"सम्यग्ज्ञाननिधिर्गुणैरनवधिः, श्रीहेमचन्द्रप्रभोः ।
ग्रन्थे व्याकृतिकौशलं विलसति, क्वाऽस्मादृशां तादृशम् ॥"

इत्यनेकार्थसङ्ग्रहवृत्तौ कैरवाकरकौमुद्यां प्रशस्तिश्लोकेषु श्रीमहेन्द्रसूरयः ॥

टीकाकृत् स्वयं टीकाप्रशस्त्यां समस्तवाङ्मयप्रासादस्य ताली(चावी)रूपेणेमां वर्णयति-

"श्रीनाममालां प्रभुहेमनिर्मितां, प्रतीय तालीं समवाङ्मयौकसः" इति॥

(१) **अभिधानचिन्तामणिनाममाला**, (२) **अनेकार्थसङ्ग्रहः**, (३) **निघण्टुः**, (४) **देशीनाममाले**ति कोशचतुष्टयं रचितवन्त आचार्याः ॥ तत्र—

(१) **अनेकार्थसंङ्ग्रहे** सप्त काण्डाः, एक-द्वि-त्रिस्वरीयादिशब्दक्रमेण षट् काण्डाः, सप्तमे चाव्ययानि सन्ति, १८२९पद्यानि वर्तन्ते ॥

(२) **निघण्टुकोशो धन्वन्तरिनिघण्टु-अमरकोषीय**वनौषधिवर्गसदृशो वृक्ष-धान्यादिशब्दानां सङ्ग्रहरूपो ३९६पद्यात्मको वर्तते। कोशचतुष्टये **निघण्टु**रचनाऽन्तिमा कृतेति निघण्टुप्रथमश्लोकेनाऽनुमीयते ॥

"विहितैकार्थनानार्थ-देश्यशब्दसमुच्चयः । निघण्टुशेषं वक्ष्येऽहं, नत्वाऽर्हत्पदपङ्कजम् ॥१॥" इति ॥

(३) **देशीनाममालायां** ३९७८देशीशब्दानां ७८३गाथाभिरकारादिवर्णक्रमतः सङ्कलनं कृतम्, विद्यमानानां सर्वासां भाषाणां मूलमस्यामेवेत्याधुनिका प्राज्ञा गाढं मन्यन्ते, अस्यां च ये शब्दाः प्रकृति-प्रत्ययतो न सिध्यन्ति, एतादृशा रूढा देशीशब्दाः कालान्तरे लोकभाषायां प्रचलिताः, ते समाविष्टाः । तच्च स्वयमेव तस्यास्तृतीयस्यां गाथायामाह-

"जे लक्खणेण ण सिद्धा, ण पसिद्धा सक्कयाहिहाणेसु ।
ण य गउडलक्खणा-सत्तिसंभवा ते इह णिबद्धा ॥१॥" इति ॥

ये शब्दा व्याकरणेन न सिद्धाः, संस्कृताभिधानेषु न प्रसिद्धाः, गौडलक्षणा शक्तिसंभवाश्च न, तेऽस्यां नाममालायां सङ्गृहीताः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**( ४ ) अभिधानचिन्तामणिनाममालायां** च

(१) **अमरकोशात्** सार्द्धगुणाः शब्दा विद्यन्ते, तथा

(२) प्राचीनार्वाचीनशब्दानां समन्वयः कृतः ॥

(३) **अमरकोशे** लिङ्गनिर्देशो मूले एव कृतः, अत्र तु **'लिङ्गं तु ज्ञेयं लिङ्गानुशासनात्'** इति तैरेव दर्शितं यत् **लिङ्गानुशासनाद्** लिङ्गनिर्णयः कार्यः ॥

(४) समानशब्दयोगतः शब्दान्तरविधानशैली अपि स्वीकृता, परं **'कविरूढ्या ज्ञेयोदाहरणावली'** इति स्वोक्त्या ये शब्दाः कविसमयमान्याः प्रयुक्ताः प्रचलिताश्च तेषामेव सिद्धिः, यथा गौरीशब्दपर्यायवाचिशब्दनिर्माणे शिवशब्देन सह कान्ताशब्दयोगतः शिवकान्ता-शिवप्रियादयो भवन्ति, न तथा परिग्रहशब्दसंयोगे शिवपरिग्रहादयः शब्दा मान्याः ॥

(५) प्राकृतापभ्रंशदेश्यशब्दानामपि समावेशः कृतः, यथा लड्डुक-चोटी-गेन्दूकादयः ॥

(६) जैनकोशेष्वयमेव कोशो यत्र नाऽऽद्याक्षरान्त्याक्षर-विषयानुसारादिक्रमतः काण्डाः परिगृहीताः, किंतु जैनत्वरक्षणाय, जैनत्वख्यापनाय च तथाप्रकारेण काण्डविभागः कृतो यथा जैनत्वावबोधोऽपि भवेत्, तद्यथा—

**( १ ) देवाधिदेवकाण्डे** प्रथमे अतीताऽनागतवर्तमानजैनतीर्थङ्करचतुर्विंशतीनामेकादशगणधराणां लाञ्छनातिशयादीनां च नामानि ८६पद्येषु समाविष्टानि ॥

**( २ ) देवकाण्डे** २५०श्लोकेषु देव-देवसम्बन्धि-षडारकादिनामानि गुम्फितानि ॥

**( ३ ) मर्त्यकाण्डे** ५६७श्लोकेषु मनुष्यसम्बन्धिनामानि सङ्गृहीतानि ॥

**( ४ ) तिर्यक्काण्डे** ४२३पद्येषु पृथ्व्यप्-तेजो-वायु-वनस्पत्यादिपञ्चविधैकेन्द्रिय-विकलेन्द्रिय-जलस्थल-खेचरादित्रिविध-पञ्चेन्द्रियादिनामानि गृहीतानि ॥

**( ५ ) नरककाण्डे** सप्तश्लोकेषु नरकसम्बधिनामानि सन्ति ॥

**( ६ ) साधारणकाण्डे** १७८श्लोकेष्ववशिष्टं सर्वमव्ययानि च विद्यन्ते । एवं च १५४२श्लोका वर्तन्ते ॥

## नाममालाया टीकाः

**( १ ) स्वोपज्ञवृत्तिः**- नाममालोपरि स्वयं **श्रीहेमचन्द्राचार्याः तत्त्वाभिधायिन्या**ख्यस्वोपज्ञवृत्तिं निर्माय निजान्तर्गतपदार्थान् प्रदर्शितवन्तः, सार्द्धसप्तसहस्रश्लोकात्मको ग्रन्थो विद्यते, मूलस्य विशदीकरणम् , क्लिष्टपदानामर्थः, मूलानुक्तपदार्थानां विस्तृतीकरणम् , ५६ ग्रन्थकारणां ३१ ग्रन्थानां चोल्लेखः, एवं विविधविषयैर्ग्रन्थः समृद्धो जातः ॥

**( २ ) टीका- कुशलसागर**रचिता ॥

**( ३ ) सारोद्धारः**-खरतरगच्छीय**ज्ञानविमल**शिष्य**श्रीवल्लभगणि**कृतः,**दुर्गपदप्रबोध**नाम्ना विश्रुतः, वि.सं.१६६७तमे वर्षे रचितः ॥ (अस्य संशोधन-सम्पादनकार्यमात्मवल्लभसमुदायवर्त्याचार्यश्रीविजयधर्मधुरन्धरसूरिवरैः क्रियते )॥

**( ४ ) टीका- साधुरत्न**कृता, द्वितीया **चारित्रसिंहगणि**कृता च ॥

**( ५ ) व्युत्पत्तिरत्नाकरा**ख्या वृत्ति**र्वाचकदेवसागरगणि**निर्मितेयम् ॥

**( ६ ) अवचूरिः**- अज्ञातकर्तृका ४५००श्लोकमाना ॥

**( ७ ) बीजकं**- जगद्गुरुहीरविजयसूरि**शिष्यत्रय**रचितम् ॥

**( ८ ) रत्नप्रभा**- पं. **वासुदेवराव**जनार्दनकृता, एवमन्या अपि ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अद्यत्वे नवीनसंस्करणान्यपि विविधानि सन्ति, परं सम्पूर्णा गुर्जरभाषाटीका प्रथमा परमपूज्यप्रगुरुदेवाचार्य-**श्रीविजयकस्तसूरीश्वर**कृता **चन्द्रोदयाभिख्या** ॥

## वाचकश्रीदेवसागरगणिवर्याः

परमवैयाकरणिक-विभिन्नग्रन्थतात्पर्यान्वेषि-वाचक**श्रीदेवसागरगणि**वर्याणां जीवनकवनवृत्तान्तादिकमन्यत्र क्वापि किञ्चिन्नोपलभ्यते । परं वृत्तावस्यां प्रतिकाण्डं श्लोकद्वयेऽन्तिमप्रशस्त्यामचलगच्छेतिहासादिग्रन्थेषु च गच्छ-गुरुपरम्परादिविषयकमेव दृष्टिगोचरं भवति ॥

विधिपक्षेऽचलगच्छे श्रीवीरप्रभोः श्रीसुधर्मस्वामिपरम्परायां विधिपक्षाद्याचार्यार्यरक्षितसूरि(अपरनाम उपाध्याय-विजयचन्द्रविजयः, वि. सं. ११६९)पट्टावल्यां विद्यासिद्धश्रीमेरुतुङ्गसूरिः, तस्य श्रीगुणसागरसूरिः, तस्य श्रीधर्ममूर्तिसूरिः, तस्य श्रीकल्याणसागरसूरिः, तस्य गुणनिधानसूरिः(?), तस्य वाचकश्रीपुण्यचन्द्रः, तस्य वाचकश्रीमाणिक्यचन्द्रः, तस्य वाचक-श्रीविनयचन्द्रः, तस्य वाचकश्रीरविचन्द्रः, तस्य शिष्यो ग्रन्थकृद् **वाचकश्रीदेवसागरगणी** अभूदिति प्रतिद्वयप्रशस्त्यां लभ्यते ॥

प्रत्यन्तरप्रशस्त्यां तु श्रीआर्यरक्षितसूरेः श्रीजयसिंहसूरेः श्रीधर्मघोषसूरेः श्रीमहेन्द्रसूरेः श्रीसिंहप्रभसूरेः श्रीअजितसिंहसूरेः श्रीदेवेन्द्रसिंहसूरेः श्रीधर्मप्रभसूरेः श्रीमहेन्द्रप्रभसूरेः श्रीमेरुतुङ्गसूरेः श्रीजयकीर्तिसूरेः श्रीजयकेसरिसूरेः श्रीसिद्धान्तसमुद्रसूरेः श्रीभावसागरसूरेः श्रीगुणसागरसूरेः श्रीधर्ममूर्तिसूरेः श्रीक्षेमसागरसूरेः वाचकश्रीपुण्यचन्द्रविजयस्य वाचकमाणिक्यचन्द्रस्य वाचकश्रीविनयचन्द्रस्य वाचकश्रीरविचन्द्रस्य शिष्यो **वाचकश्रीदेवसागरगणी** बभूवेति प्राप्यते ॥

वाचकपुण्यचन्द्रविजयानन्तरं सर्वप्रतिषु परम्परा समानैव ॥

प्रतिकाण्डं प्रशस्तिश्लोकेषु च निजगुर्वादीन् प्रशस्तभावतो मुक्तकण्ठं ग्रन्थकृदस्तवीत् ॥

आम्नायद्वये रचनावर्षः वि. सं. १६८६ संवद् दृश्यते, तद्यथा- "**वर्षे षड्वसुतर्कनिक्पतिमिते**" इति ॥

प्रत्यन्तरे मासतिथ्यादिकमपि वर्तते, "**संवद् रसाष्टषट्चन्द्रमिते वर्षे शरदृतौ आश्विनार्जुनसप्तम्याम्**" इति ॥

रचनास्थलमाम्नायद्वये विभिन्नमस्ति, "**हाल्लारदेशे नृपे लाखाख्ये सति भव्यनव्यनगरे चैत्यावलीशालिनि**" इति॥

प्रत्यन्तरे तु "**स्तम्भतीर्थाभिधे पुरि**" इत्युल्लेखोऽस्ति॥

डॉ. शिवप्रसादसम्पादिते '**अचलगच्छ का इतिहास**' नामकग्रन्थे **वाचकदेवसागर**परिचय इत्थं मिलति ॥ गुरुपरम्परा यथावस्थितैव, परं तन्निर्मितग्रन्थत्रयोल्लेखः प्राप्यते ॥

(१) वि. सं. १६७४वर्षे **कपिलकेवलिरासो** रचितः ॥

(२) वि. सं. १६८६वर्षे **व्युत्पत्तिरत्नाकर**वृत्तिर्ग्रथिता ॥

(३) वि. सं. १६७५तमे वर्षे श्री शत्रुञ्जयगिरौ हाथीपोलमध्ये श्रीश्रेयांसनाथचैत्ये या प्रशस्तिरस्ति, तस्यां "**वाचक-श्रीविनयचन्द्रगणिनां शिष्यमु०देवसागरेण विहिता प्रशस्तिः**" इति दृश्यते ॥

तत्र लिखितलेखेन तेषां विद्वत्ताऽनुमीयते ॥

"**यावद्विभाकरनिशाकरभूधरार्य-रत्नाकरध्रुवधराः किल जाग्रतीह ।**
**श्रेयांसनाथजिनमन्दिरमत्र तावन्, नन्दत्वनेकभविकौघनिषेव्यमानम् ॥१॥**" इति ॥

एवं तत्रैव चैत्यान्तरे वि. सं. १६८३वर्षीयशिलालेखेऽपि- "**भट्टारककल्याणसागरसूरिभिः प्रतिष्ठितम्, वाचकदेवसागरगणीनां कृतिरियम्**" इति तेषामुल्लेखः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वाचकशिष्या अपि श्रुतभक्तिमन्त इति ज्ञायन्ते, सुरत(श्रीनेमि-विज्ञान-कस्तूरसूरिज्ञानमन्दिरान्तर्गत)श्रीहुकममुनिजीज्ञानभण्डारे सर्वज्ञशतकस्तबकाख्यो ग्रन्थोऽस्ति, तत्र लिपिकारप्रशस्त्याम्- "**संवत् १७००वर्षे वैशाख सुदि-२, रवौ पण्डित-चक्रवर्तिपण्डितश्रीदेवसागरगणिशिष्यपं.कनकसागरलिखितं स्ववाचनकृते श्रीराजनगरे**" इति पाठोऽस्ति, तत्र यद्यपि गच्छ-शाखादि न लिखितं, तथाप्यनुमानेनैतद्ग्रन्थकारशिष्य एवैष इति ज्ञायते ॥

तथा ग्रन्थकृच्छिष्यान्तर**श्रीउत्तमचन्द्र** आसीत्, वि. सं. १६९५मिते वर्षे तेन **सुनन्दारासो** लिखितः ॥

कपिलकेवलिरासः सुनन्दारासश्च दृष्टिगोचरौ न सञ्जातौ, तत्र कोऽपि विशेषः सम्भाव्येत ॥

**श्रीजयसागराख्यो**ऽपि ग्रन्थकृतां शिष्यः, तस्य **श्रीलक्ष्मीचन्द्रः**, तस्य **लावण्यचन्द्र-कुशलचन्द्रा**वास्ताम् ॥ एतद्ग्रन्थस्य प्रशस्त्यनुसारं -

"**लक्ष्मीचन्द्रबुधस्य मद्गुरुभ्रातुर्जयाब्धेर्मुनेः ।**
**शिष्यस्योत्तमचन्द्रशिष्य-सहजस्यात्यन्तनिर्बन्धतः ॥१॥**"

मुनिलक्ष्मीचन्द्रः गुरोर्गुरुभ्राता, जयसागर उत्तमचन्द्रश्च निजशिष्यौ, सहजचन्द्रस्तु प्रशिष्य इत्यनुमीयते ॥

प्रत्यन्तरे च-

"**तत्पादपङ्कजासक्तद्विरेफो देवसागरः । एनां वृत्तिं शुभां चक्रे, शिष्यवर्गप्रसक्तये ॥१॥**"
"**निर्मितेयं मया टीका, लक्ष्मीचन्द्रवराग्रहात्**" इत्येवमस्ति-

ततश्च शिष्यनामानि नोल्लिखितानि श्रीलक्ष्मीचन्द्रेण च सह ग्रन्थकृत् सम्बन्धो न ज्ञायते । निष्कर्षस्त्वयं श्रीदेवसागरशिष्या अपि गुरुवद् ज्ञानोपासका आसन् ॥

## वैविध्यपूर्णा किल वृत्तिरेषा

वाचकश्रीदेवसागरगणिविरचितास्तिस्रः कृतय एव लभ्यन्ते, तथापि रत्नाकरोऽयं किल रत्नाकर एव, यतो रत्नाकरादस्मादुच्छलन्त्यो व्युत्पत्त्यूर्मयः, तेषां कीर्तिं दिगन्तं प्रापयितुं शक्ताः ॥

वाचकैस्तैर्न केवलं शब्दानां व्युत्पत्तिपद्धतिर्दर्शिता, अपि तु व्युत्पत्तीनां किल रत्नाकरो विनिर्मितः, तस्य पारं लब्धुं कथमस्मादृशाः समर्था भवेयुः? तथापि वृत्तावस्यां का का विशिष्टता, रत्नाकरेऽस्मिन् कानि कानि रत्नानीति तत् किञ्चित् प्रदर्श्यते ॥

(१) **पाणिनिव्याकरणतो व्युत्पत्तिः—** प्रत्येकशब्दानां व्युत्पत्तिः प्रायशो महर्षिपाणिनिकृतव्याकरणतः कृता, एतच्च स्वयमेव ग्रन्थकृद् वृत्त्यादौ वृत्त्यन्ते चाह-

"**वृत्तिं विज्ञमनोरमां विरचये श्रीपाणिनीयोक्तिभिः ।**
**श्रीसूरीश्वरहेमचन्द्ररचितश्रीनामचिन्तामणेः ॥**"

"**सूत्रैः पाणिनिसूत्रितैर्बहुविधग्रन्थांश्च सङ्ख्यावतः ।**
**साक्षीकृत्य यथामति व्यरचयं व्युत्पत्तिरत्नाकरम् ॥**"

(२) **वृत्तिप्रमाणम् —** स्वोपज्ञवृत्तिः सार्द्धसप्तसहस्रप्रमाणैव, परमियं वृत्तिस्तु अष्टादशसहस्रप्रमाणा विपुलाऽस्ति । वृत्त्यन्ते "**ग्रन्थाग्रं १८,००० प्रमाणम्**" इति दृश्यते ॥

(३) **विविधग्रन्थकारोल्लेखः—** वृत्तावस्यामनेककोशकाराणां तद्वृत्तीनां तत्तद्विषयकविभिन्नग्रन्थकृतां चोल्लेखः स्थाने स्थाने प्राचुर्येण कृतः । ग्रन्थकृदेव प्रस्तावनायाः सप्तमे श्लोके तद् दर्शितवान्—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

''**क्षीरस्वामि-महेश-रक्षित-सुभूति-व्याडि-वोपालितस्वामि-न्यास-पुराण-भाष्य-रभस-ग्रन्थांस्तथानेकशः ।**
**सर्वानन्द-निधान-रुद्र-धरणि-स्कन्दर्भुगुर्वादिकान् सद्ग्रन्थानुपजीव्य यत्यत इह ग्रन्थे मया सादरम् ॥ १ ॥**'' इति ॥

( ४ ) **व्याकरणफक्किका—** नाममालायामाद्यश्लोके ''**प्रणिपत्यार्हतः सिद्धसाङ्गशब्दानुशासनः**'' इत्युक्तम्, तत्र '**शब्दानुशासनम्**' इति शब्दः कथं व्युत्पन्नः ? शब्दानामनुशासनं शब्दानुशासनम्, अत्र यदि 'उभयप्राप्तौ कर्मणि' २।३।६६॥ इत्यनेन षष्ठी स्यात् तर्हि 'कर्मणि च'२।२।१४॥ इति सूत्रेण समासप्रतिषेधः स्यात्, ततश्च 'आश्चर्यो गवां दोहोऽगोपेन' इतिवत् समासो न स्यात्, परमत्र तु उभयप्राप्तिरेव न, अतो नाऽत्र तेन सूत्रेण षष्ठी, किंतु 'कर्तृकर्मणोः कृति'२।३।६५॥ इत्यनेन, शेषलक्षणया वा षष्ठी, तेन इध्मप्रव्रश्चनवत् समासो भवत्येवेत्यादिकं 'ननु, न च' इति पाणिनीयप्रक्रियया काशिकाविवरणपञ्जिकानुसारं विशदीकृतम् । एवमन्यत्रापि ॥

( ५ ) **व्याकरणमहत्ता—** '**सिद्धसाङ्गशब्दानुशासनः**' इत्युक्त्या लिङ्गोणादिधातुपाठगणपाठाद्यङ्गसहितं व्याकरणं विरच्य नाममालां निर्मितवन्तो हेमचन्द्राचार्याः । ततश्च शब्दविद्याधीनः सर्वविद्यानामुत्कर्षः । तदुक्तम्—

''**उपासनीयं यत्नेन, शास्त्रं व्याकरणं महत् । प्रदीपभूतं सर्वासां, विद्यानां यदवस्थितम् ॥१॥**'' इति ॥
ग्रन्थकृतामपि व्याकरणप्रौढिमा प्रतिप्रयोगं दरीदृश्यते ॥

( ६ ) **शब्दानां प्रवृत्तिः—** शब्दानां प्रवृत्तिश्चतुर्विधा, त्रिविधा, एकैव वेति मतवैविध्येन विशदीकृतम् । केचिद् जातिशब्दाः, गुणशब्दाः, क्रियाशब्दाः, यादृच्छिकशब्दाश्चेति चतुर्विधत्वम्, निरुक्तकाराः शाकटायनादयश्च त्रैविध्यमेकत्वं वा स्वीकुर्वन्ति। तदाह-

''**नाम च धातुजमाह निरुक्ते, व्याकरणे शकटस्य च तोकम् ।**
**यन्न पदार्थविशेषसमुत्थं, प्रत्ययतः प्रकृतेश्च तदूह्यम् ॥१॥**''

यादृच्छिकशब्दाभावतो जातिगुणक्रियावाचिनस्त्रय एव शब्दाः । अथवा सर्वेषां शब्दानां धातुजत्वादेकैव प्रवृत्तिः, सर्वे क्रियाशब्दाः । डित्थादिशब्दानामपि प्रकृतिप्रत्ययादिद्वारा धातुजत्वं विचार्यम् ॥
आचार्यास्तु— '**रूढयौगिकमिश्राणां, नाम्ना मालां तनोम्यहम्**' इत्युक्तम् । एवं च रूढशब्दाः व्युत्पत्तिरहिता आखण्डलादयः, गुण-क्रिया-सम्बन्धतो यौगिकाः, नीलकण्ठाद्या गुणशब्दाः, स्रष्टा-कर्त्रादयः क्रियाशब्दाः, सम्बन्धस्तु स्व-स्वामीत्याद्यनेकविधो विज्ञेयः । मिश्रास्तु योगयुक्ता रूढिमन्तश्च, परावृत्तिसहाः, परावृत्त्यसहाश्च योगरूढा ज्ञेयाः ॥

( ७ ) **शब्दानां नानार्थत्वम्—** कतिचिच्छब्दा अव्ययादिका वा नानार्थे प्रयुज्यन्ते, तत्सम्बन्धिका विशेषश्लोकाः स्वोपज्ञवृत्तौ न दृश्यन्ते, तेऽत्र दृश्यन्ते । यथा आदिशब्दः क्व क्व प्रयुज्यन्ते, तदुक्तम्-

''**सामीप्येऽथ व्यवस्थायां, प्रकारेऽवयवे तथा । चतुर्ष्वर्थेषु मेधावी, आदिशब्दं प्रचक्षते ॥ १ ॥**''
इति(पृ.३, पं.३०), एवं श्वःशब्दस्य परपदार्थत्वप्रदर्शकः पाणिनीयमतदर्पणस्थश्लोकः-

''**अर्थं परपदस्याऽत्र, श्वशब्दः कालवाच्यपि । अभिधत्ते स्वभावेन, तेनेमौ मङ्गलार्थकौ ॥१॥**''
इति(पृ.-२२, पं.१८), एवम् **ईशब्दः**(पृ.१०६, पं.३५), **पणः**(पृ.२१४, पं.३६)आदि ॥

( ८ ) **व्याकरणान्तराच्छब्दसिद्धिः—** '**श्रीपाणिनीयोक्तिभिः**' इत्यारम्भे उक्तम्, तथापि ये शब्दाः पाणिनिव्याकरणतो न सिद्धाः, तेषां सिद्धहेमव्याकरणोणादितोऽपि साधनिका कृता । यथा **तुम्बुरुशब्दः** ''**तुम्बेरुरुः**'' (हैमोणादि-८१७) (पृ.१२, पं.५८)इत्यनेन, एवं **वेतसः** '**वेतसवाहस-**'(कातन्त्रोणा-३।१४२) (पृ.५२४, पं.२६), **जम्बीरः**, '**गम्भिरादयश्च**'(चान्द्रोणा-३।२९) (पृ.५३२, पं.२)इतीरन् बुगागमश्चेत्यादि ॥

( ९ ) **जैनागमोल्लेखः—** विशिष्टप्रसङ्गेषु जैनागमविषयोऽपि सवृत्तिको विस्तरतो दर्शितः। यथा- ''**वाणीनृतिर्यक्सुरलोकभाषा संवादिनी योजनगामिनी च**''(श्लो-५९)इत्यत्राऽर्हतामेकादशातिशयव्याख्यायां भगवान् अर्धमागधीभाषया देशनां ददाति, तद्दर्शयितुमागमपाठः सवृत्तिको दर्शितः, यथा- ''**भयवं च णं अद्धमागहीए भासाए धम्ममाइक्खइ**''

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(समवायाङ्गसूत्रे, सू-३४)इति, अत्र चाग्रे निशीथचूर्णी-प्राकृतव्याकरणाद्युल्लेखः कृतः(पृ.-१५, पं.६३)। चतुर्दशपूर्वेषु कियन्ति वस्तूनीति निरूपितम्, यथा- "**पूर्वेषु तु दशादीनि वस्तून्यपि सन्ति । यदुक्तम्-**

"**क्रमाद् वस्तूनि विधित्वमाद्ये दश चतुर्दश । अष्टादश तुर्ये हि द्वादश द्वौ च षोडश ॥१॥**

**त्रिंशत्तु विंशतिः पञ्चदश द्वादश वै तथा । त्रयोदश ततस्त्रिंशत् पञ्चविंशतिरन्तिमे ॥२॥**

**उत्पादादिषु पूर्वेषु ह्यन्तर्वर्ती प्रकारतः । अधिकारविशेषस्तु वस्तुविज्ञैः प्रकीर्त्तितम् ॥३॥**" [ ] इति॥

इति(पृ.११५, पं.४८), उल्ब(गर्भप्रथमावस्था)विषये आचाराङ्गवृत्तिः(पृ.२३९, पं.४४)इत्यादि ॥

( १० ) **अर्थसाधकश्लोकाद्युपन्यासः—** तत्तच्छब्दार्थपुष्टिं कर्तुं मनुस्मृत्याद्यनेकग्रन्थानां श्लोकादिप्रामाण्यप्राचुर्यं प्रदर्शितम् ॥ यथा आचार्यशब्दविषये—

"**उपनीय तु यः शिष्यं, वेदमध्यापयेद् द्विजः । साकल्यं सरहस्यं च, तमाचार्यं प्रचक्षते ॥१॥**"

(मनुस्मृतिः २।१४०, श्लो-७७)इति(पृ.२०, पं.१०), एवं **गुरुशब्दः**(पृ.१९, पं.५६)इत्यादि ॥

( ११ ) **भाषाशब्दप्रयोगाः—** स्वोपज्ञवृत्तिकाले मागध्यादिभाषाप्रचारसत्त्वेऽपि गुर्जरभाषाप्रसारो न, ततश्च तत्र भाषाशब्दा संस्कृतशब्दपर्यायरूपतो न लभ्यन्ते, अत्र तु पौष्कल्येन दृष्टिगोचरा भवन्ति, यथा- सब्रह्मचारिणः "**साहमि इति भाषा**"(पं.२१, पं.९)इति, प्रकाशार्थे '**उजुआलु**'(पृ.३२, पं.५८), मृगतृष्णार्थे '**झांझूआ**'(पृ.३२ पं.६६), अपररात्रः '**पाछिली रात्रि**'(पृ.५२, पं.४१), शीकरः '**वाछंटी**'(पृ.६६, पं.६), '**तेडवुं**'(पृ.१२१, पं.४०), '**मजूर**'(पृ.१६२, पं.१४), '**आलसू**'(पृ.१७०, पं.२४), '**भेला जीमवुं**'(पृ.१८७, पं.४७), '**पातली रोटी**'(पृ.१७६, पं.३९), '**मामी**' (पृ.२३१, पं.९), '**डोकरी**'(पृ.२३७, पं.२०), '**साली**'(पृ.२४५, पं.३४), '**दादा**'(पृ.२४६, पं.२२), '**वींटी**' (पृ.२९३, पं.१७)इत्यादिकम् ॥

( १२ ) **योगशास्त्राणामपि निदर्शनम्—** प्राणायामादिशब्दानां सिद्धौ योगशास्त्रग्रन्था अप्युल्लेखिताः । यथा-

"**प्राणायामो गतिच्छेदः, श्वासप्रश्वासयोर्मतः । रेचकः पूरकश्चैव, कुम्भकश्चेति स त्रिधा ॥१॥**"

(योगशास्त्रम्, प्रकाशः-५, श्लो-४)इति(पृ.२१, पं.५६) ॥

( १३ ) **शब्दसाधकश्लोकादिसम्बन्धः—** शब्दानां सिद्धौ विविधा व्युत्पत्त्यः सम्भवन्ति, काश्चित्तु स्वोपज्ञवृत्तौ न लभ्यन्ते, ता अप्यत्र दृश्यन्ते, प्रमाणमपि तत्र दर्शितम् । यथा सुरशब्दव्याख्यायाम्- "**परिग्रहात् सुराः अपरिग्रहाद् दैत्याः,**

"**सुरा परिग्रहाद् देवाः, सुराख्या इति विश्रुताः । अपरिग्रहणात् तस्या दैतेयाश्चासुराः स्मृतास्तथा ॥१॥**"

**रामायणे ।**" सुष्ठु राजन्ते इति विग्रहतः साधितः(पृ.२४, पं.४३)। एवं मार्तण्डः(पृ.२७, पं.६४), मिहिरः(पृ.५३० पं.१), कथं स्ववैद्यौ वडवासुतौ कथ्येते(पृ.७५ पं.३८), कथं कुबेरः(पृ.८१ पं.३९), कथं रुद्रः(पृ.८५, पं.४५),

कथं शङ्करः(पृ.८६, पं.१४), ईश्वरः(पृ.८७, पं.४), नीललोहितश्च(पृ.८७, पं.५५), महादेवः(पृ.८८, पं.१०),

"**महतामपि देवानामहमेव महान् यतः । न तु मत्तो महानन्यो, महादेवस्ततो ह्यहम् ॥१॥**"

(स्कन्दे, पृ.८८, पं.१६) पशुपतिः(पृ.८८, पं.२४), दुर्गा(पृ.९१, पं.३१)इत्यादिकं सुचारुतया दर्शितम् ॥

( १४ ) **अनुक्तशब्दसाधनिका—** नाममालायां ये शब्दा न सङ्गृहीताः, व्यवहारे तु प्रयुज्यन्ते, तेषामपि साधनिकाऽत्र दर्शिता । यथा- देवपर्यायवाचिश्लोके दिवौकस्शब्दो न, तथाप्यत्र साधितः । ग्रन्थकृत् स्वयमेवाह- "**अत्राऽनुक्तमपि दिवौकस इति नाम व्युत्पाद्यते**"(पृ.२५, पं.४९)इति । एवं हाहाशब्दप्रसंगे हूहूशब्दः(पृ.७७, पं.४१), क्रव्यात्प्रयोगे क्रव्याद-शब्दोऽपीति वैयाकरणिकैः साधितः(पृ.७९, पं.५१), तन्त्रमपि(पृ.४०३, पं.२९), अष्टापदोऽपि(पृ.५९१, पं.४८) ॥

( १५ ) **शब्दविशेषार्थः—** शब्दस्य सामान्यतो योऽर्थो भवति, ततो विशेषार्थो यो भवेत्, सोऽपि दर्शितः । यथा- भिक्षुशब्द व्याख्यायाम् (पृ.१९ पं.१७)- **यमनियमव्यवस्थितः कृतकारितानुमोदितपरिहारेण भिक्षत इत्येवंशीलो भिक्षुः ।**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यद्वा नैरुक्ती शब्दव्युत्पत्तिः इत्यादि, तत्र **क्षुद् अष्टप्रकारं कर्म, तां क्षुधं ज्ञानदर्शनचारित्रतपोभिर्भिनत्तीति भिक्षुः । पृषोदरादित्वादिष्टरूपसिद्धिः। द्वे हि शब्दस्य निमित्ते- तद्यथा व्युत्पत्तिनिमित्तं प्रवृत्तिनिमित्तं च। यथा-गोशब्दस्य गमनक्रिया व्युत्पत्तिनिमित्तम्, सास्नादिमत्त्वं प्रवृत्तिनिमित्तम्, अश्वादौ तु न यथोक्तरूपस्य प्रवृत्ति-निमित्तस्य तत्राऽभावात्। एवमत्रापि भिक्षुशब्दस्य द्वे निमित्ते, भिक्षणं व्युत्पत्तिनिमित्तम्, इहपरलोकाशंसाविप्रमुक्ततया यमनियमेषु व्यवस्थितत्वं प्रवृत्तिनिमित्तम्**'' इत्यादि विस्तरतः प्रतिपादितम् ॥

(१६) **शब्दसिद्धौ ग्रन्थाकारान्तराभिप्रायः—** एकशब्दसाधनिकायां येषां यानि मतानि, तेषामुल्लेखः कृतः । यथा-स्वर्गपर्यायेषु(पृ.२४, पं.१) त्रिदिवशब्दव्युत्पत्तौ- ''**त्रयो ब्रह्मविष्णुरुद्रा दीव्यन्त्यत्रेति, त्रिदशा दीव्यन्त्यत्रेति वा त्रिदिवम्**''। अत्र केन सूत्रादिना कप्रत्यय इति विषये सर्वानन्दादयः, क्षीरस्वामी, आचार्याः, राजदेवादयश्च किं मन्यन्ते, वयं मन्यामहे इत्युक्त्या स्वामिप्रायोऽपि दर्श्यते ॥

(१७) **नक्षत्रादिविषयकचर्चा—** विशाखानक्षत्रमेकमेवेति प्रायोवादः । वृत्तिकारस्तु- ''**मिश्रास्तु विशाखे द्वे, अत एव द्वित्वमुचितं 'विशाखे' इति, तथा च रामायणम्-**

**पत्योर्मध्यगतस्तत्र, सुग्रीवः प्लवगेश्वरः । विशाखयोर्मध्यगतः, सम्पूर्ण इव चन्द्रमाः ॥१॥**''

इति (पृ.३८, पं.६०)॥ अत्रैकत्वं द्वित्वं वा जाघटीतीत्यपि चर्चितम् ॥

(१८) **काव्यश्लोकप्राचुर्यम्—** शब्दानां प्रयोगाः काव्येषु कथं प्रयुज्यन्त इति तु प्रायः प्रतिश्लोकं विशदीकृतम् ।

यथा प्रभातार्थकप्रत्यूषशब्दप्रयोगो मेघदूते- ''**प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः**''(पूर्वमेघः, श्लो-३१) (पृ.४८, पं.३८)इति, दुर्दिनप्रयोगे- ''**दुर्दिनेऽप्यभिसारिकाः**''(कुमारसम्भवम् ६।४३)इति(पृ.६५, पं.४७), प्रपातस्त्वतटोभृगुः शब्दत्रिके ''**प्रभुः प्रपातध्वनिमिश्रतूर्यः**''(रघुवंशम् १६।३२)इति(पृ.४६४, पं. ४४), ''**स्तनातटे चन्दनपङ्किलेऽस्याः**''(नैषधे ७।८०)इति(पृ.४६४, पं.४५), ''**कृत्वा पुंवत्पातमुच्चैर्भृगुभ्यः**'' (शिशुपालवधम् ४।२३)इति (पृ.४६४, पं.४७), क्षुद्रकूपार्थकचुण्ढीचूतकादिप्रयोगानप्याह-यथा ''**चुण्ढीमपि महोदधिम्**''(पृ.४७७, पं.३१), ''**चूतकानां रसं पीत्वा, पान्थाः पथि सुखं ययुः**'' (पृ.४७७, पं.३४)इत्यादिकम् ॥

(१९) **कालादिविषयकम्—** प्रभातकालः कः? इत्यादिविषये विष्णुपुराणादिगतश्लोकोल्लेखः । यथा- ''**प्रभातकालो हि सूर्यार्धोदयादारभ्य घटिकाषट्कं यावद्भवति, यद्विष्णुपुराणम्-**

**लेखाप्रभृत्यथादित्ये, त्रिमुहूर्ते गतेऽत्र वै(रवौ) । ज्ञेयः प्रातस्ततः कालो भागश्चाह्नः स पञ्चमः ॥१॥**''

(विष्णुपुराणम्, अंशः-२, अ-८, श्लो-६२)इति(पृ.४८, पं.५२), एवं सन्ध्या-कुतपादिविषये(पृ.४९, पं.१९, ४७), ब्राह्म अहोरात्रं मन्वन्तरादिकं कियत्प्रमाणमेतद्विषये लिङ्गपुराण-ज्योतिषादिकम्(पृ.६१-६२) ॥

(२०) **शब्दलिङ्गवचनादिनिर्देशः—** प्रतिशब्दं प्रायः लिङ्गवचनादिप्रामाण्यं कथितम् । यथा वर्षाशब्दः स्त्रियां बहुत्वे च, तदुक्तम्-

''**आपः सुमनसो वर्षा, अप्सराः सिकताः समाः । एते स्त्रियां बहुत्वे स्युरेकत्वेऽप्युत्तरत्रयम् ॥१॥**''

इति(पृ.५९, पं.५१), एवं दाराशब्दे (पृ.२२७, पं.३), वर्षाभूः (पृ.६२१, पं.४६), वातप्रमीशब्दस्य तु रूपाण्यपि (पृ.५९६, पं.२९)॥

(२१) **मेघादिकविज्ञानम्—** मेघास्त्रिविधा इत्यादिकमपि निरूपितम् । अन्यत्र मेघजीमूतादीनामेकरूपेणैव वर्णितम्, यथा-

''**मेघास्त्रिविधास्तत्र, वह्निजा धूमयोनयः । निःश्वासजास्तु जीमूतास्ते ज्ञेया जीवरूपिणः ॥१॥**''

**यज्ञजास्तु घना घोराः, पुष्करावर्तका[दयः]**'' इति(पृ.६५, पं.२७)॥

(२२) **व्याकरणनियमः—** पद्मनाभशब्दः(पृ.१००, पृ.४०) 'अच् प्रत्यन्ववपूर्वात्-५।४।७५॥ इति सूत्रे अच् इति योगविभागात् साधितः । तत्र नियमितम्- ''**योगविभागस्य हि पूर्वदृष्टमात्रसाधकत्वम्, न तु नाभ्यन्तस्य सर्वत्रैवाच्समासान्त इति**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नियमः, तेन 'प्रजा इवाङ्गादरविन्दनाभेः''(शिशुपालवधम् ३।६५॥ )इत्यादि प्रयोगा । एवं अधीनशब्दविषये ''अस्मास्वधीनं किमु निःस्पृहाणाम्'' इत्यादिषु नियमः(पृ.१६०, पं.१४), श्वपचशब्दे(पृ.४१२, पं.१९) ''अज्विधिः सर्वधातुभ्यः, पठ्यन्ते च पचादयः । अण्बाधनार्थमेव स्यात्, सिद्ध्यन्ति श्वपचादयः ॥१॥''

( २३ ) **व्यवहारिकज्ञानम्**— उपालम्भविषये(पृ.१२७, पं.५) ''**उपालम्भो द्विविधः, गुणाविःकरणपूर्वको, निन्दापूर्वकश्च । आद्यो यथा- महाकुलजस्य भवतः किमुचितमिदम्? । द्वितीयो यथा- बन्धकीसुतस्य तवोचितमेवेदमिति**''। ''**सनिन्द उपालम्भः परिभाषणम्**'' इति ॥

( २४ ) **नीतिः**— ''**अधिक्षिप्तोपि विकृतिं न याति क्वापि सज्जनः**''(पृ.१९३, पं.१०), ''**अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति**''(पृ.२४४, पं.५), ''**तं तु देशं न पश्यामि यत्र भ्राता सहोदरः**''(पृ.२४४, पं.६)॥

''**अपकारिण्यपि प्रायः सौम्याः स्युरुपकारिणः । मारकेभ्योऽपि कल्याणं रसराजः प्रयच्छति ॥१॥**'' (पृ.४७४, पं.४४)॥

''**उपार्जितानामर्थानां, त्याग एव हि रक्षणम् । तडागोदरसंस्थानां, परीवाह इवाम्भसाम् ॥२॥**'' (पृ.४९४, पं.२६)॥

( २५ ) **मूलकाराद् विशेषप्रतिपादनम्**— नाममालाकारेण 'कर्णजलौकस्'(कानखजूरा)शब्दः चतुरिन्द्रियेषु प्रोक्तः, परं स प्राणिविशेषस्त्रीन्द्रिय इति प्रज्ञापनोपाङ्गादिपाठतः साधितम् । श्रीमलयगिरिकृतवृत्तिरपि तत्र प्रदर्शिता (पृ.५६१, पं. २, १०)॥

( २६ ) **ज्ञेयं किञ्चिद्**— मति-बुद्ध्यादीनां पर्यायत्वेऽपि भेदः, यथा-

''**मतिरागामिकी ज्ञेया, बुद्धिस्तत्कालदर्शिनी । प्रज्ञा चातीतकालज्ञा, मेधा कालत्रयात्मिका ॥१॥**''(पृ.१४१,पं.३५)॥

एवं- ''**तत्त्वोल्लेखशालिनी प्रज्ञा प्रतिभा**''(पृ.१५५, पं.२१),

''**दूरादेवार्थसन्दर्शी दीर्घदृष्टिः प्रकीर्तितः**''(पृ.१५५, पं.४०)॥

शृङ्गारादिरसानामपि देवता, यथा-

''**शृङ्गारो विष्णुदेवः स्याद्, वासः प्रथमदैवतः । करुणो यमदेवस्तु स्याद्, रौद्रो रुद्रदैवतः ॥१॥**''(पृ.१३५, पं.३५)

प्रकरणविषये-

''**शास्त्रैकदेशसम्बद्धं, शास्त्रकार्यान्तरस्थितम् । प्राहुः प्रकरणं नाम, शास्त्रभेदं विपश्चितः ॥२॥**''(पृ.११८, पं.१०)

एवं श्राद्धशब्दे(पृ.३६४, पं.३४)। नञर्थे-

''**तत्सादृश्यमभावश्च, तदन्यत्वं तदल्पता । अप्राशस्त्यं विरोधश्च, नञर्थाः षट् प्रकीर्तिताः ॥३॥**''(पृ.६३०, पं.३५).

''**निपाताश्चोपसर्गाश्च, धातवश्चेति ते त्रयः । अनेकार्थाः स्मृताः सर्वे, पाठस्तेषां निदर्शनम् ॥४॥**''(पृ.७०९, पं.३४)

( २७ ) **शब्दरचनाचातुर्यम्**— महिलाशब्दवत् महेलाशब्दोऽपि तद्विषये ।

''**अजयद् द्विषतः प्राज्यनयः परमहेलया । स्वप्नेऽपि मनसि स्पृष्टो, न यः परमहेलया ॥१॥**''(पृ.२२१, पं.५२)

राम्भशब्देऽपि श्लोकार्धम्-

''**श्रीमन्महाहंसनिषेवितत्वाददः सरो, भो न न रोचते मे ॥**

**अत्र सरो रेफसहितो भो भकारो मह्यं रोचते, रम्भ इत्यर्थः अदः दकाररहितो न, दकारसहित इत्यर्थः, भो भकारो दम्भ इत्यर्थः, स तु न रोचते इत्यर्थः**''(पृ.३६१, पं.१२)॥

( २८ ) **प्रयोगनियमाः**— अम्बाशब्दप्रयोगः क्व कथं कार्यः ?(पृ.१५०, पं.१६), सङ्घशब्दः सङ्घातशब्दो वा कथं प्रयोज्यः (पृ.६४९, पं.४४,५१), यौवतं यौवनं वा कथं प्रयोज्यम्(पृ.६५१, पं.१)इत्यादिकमपि सोदाहरणं कथितम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**( २९ ) ज्ञान-विज्ञानवैशिष्ट्यम्—** कामबाणाः पञ्च(पृ.१०८), गीत-गेय-गान-तालादि(पृ.१२९-१३३), मृदङ्गादिवाद्यसम्बन्धि (पृ.१३४), व्यभिचारिभावः, स्थायिभावः(१४६, १४७), रणनन्दी-नाटकनन्दी(पृ.१४८), स्मितविहसितादिकम् (पृ.१३६), रसवतीविषये यवागू-अपूप-पौलि(पोली)-अपूप-मथित(मढो)प्रभृतिकम्(पृ.१७६-१८२), रोगादिसम्बन्धिगलगण्ड-प्रतिश्या-गुदग्रह-मूत्रकृच्छ-भगन्दर इत्यादिकम्(पृ.२०५-२०८), स्त्रीणां लीलादयो दशालङ्काराः(पृ.२२३-२२४), अर्याणी(पृ.२३१), स्वैरिणी(पृ.२३४), पुनर्भू(पृ.२४२), ननान्दा न नन्दति तुष्यति, न नन्दयति भ्रातृजायामिति वा(पृ.२४५), यक्षकर्दमादिधूपविषयकम्(पृ.२८२), काञ्ची-शिञ्जिन्याद्याभरणज्ञानम्(पृ.२९४), पुरुषविषये कः प्राड्विवाकः(पृ.३१५), को वर्षवरः(३१९), सन्धि-विग्रहादिषड्गुणाः(३२२), सामादयश्चत्वार उपायाः(पृ.३२३), युद्धरचना(पृ.३२८), अक्षौहिण्यादि(पृ.३३०), विजयादशम्यां प्रस्थानात् प्राक् करणीयो लोहाभिसारो विधिः(पृ.३४९), वानप्रस्थ-भिक्षुप्रकाराः(पृ.३५७), षट्कर्मा, माणवकः(पृ.३५९), भिक्षा कीदृशी(पृ.३६०), लीलावतीगणिताद्युद्धृतं पौतव-द्रुवय-पाय्यरूपं मानत्रयं सविस्तरं दर्शितम्(पृ.३८५-३८९), सुरा (मद्य)भेदाः(पृ.३९९), भारतवर्षादि(पृ.४२१), नगर-पत्तनादिकम्(पृ.४३२), तोरण-नासा-गोपानसीप्रभृतिवास्तुविषयकम्(पृ.४५०-४५१), स्वस्तिक-नन्द्यावर्तादि(पृ.४५४), धातुविषयकं हिरण्य-गाङ्गेय-जातरूप-जाम्बूनद-रसराज-स्फटिकादिसम्बन्धि(पृ.४७०-४७५) नदीषु आपगा, त्रिपथगा, स्वर्णदी, चन्द्रभागा, तापी(पृ.४९०-४९१), आयुर्वेदौषधिप्रसङ्गे अश्वत्थ-बिभीतक-उदुम्बर-त्रिफलादिसम्बन्धिनः धन्वन्तरिनिघण्टुश्लोकाः(पृ.५२९-५३०), धान्यशाकविशेषाः(पृ.५४१), अश्वजातौ आजानेय-श्रीवत्सक्यादि(पृ.५७२-५७३), मत्स्यभेदाः पाठीन-शकुल-रोहित-शिशुमारादयः(पृ.६१८-६२०), क्षेत्रज्ञ आत्मादिविषयकम्(पृ.६२६), षड्जादयः सप्तस्वराः(पृ.६४४), ध्वनिविषये काकली, काकुः(पृ.६४७-६४८)॥

इत्यादिकं यत्तत्रोक्तम्, अत्राप्युक्तं तन्नेहोक्तम्, यत्तु तत्र नोक्तम्, अत्र चोक्तं तदेव दिङ्मात्रं प्रदर्शितम् । स्वोपज्ञवृत्तितः प्रभूततममिह वृत्तौ प्ररूपितम् । इह तु वृत्तिविषयकं कियदेवोक्तम्, शब्दव्युत्पत्तिजिज्ञासुभिरवश्यं वृत्तिरेषा पठितव्या, यतः **"मार्गज्ञः सह याति किम् ?"**॥

प्रत्यन्तरे सत्यमेवोक्तम् शब्दार्थवर्णने ब्रह्मादयोऽपि न शक्ताः, तर्हि वयं तु कथम् ?

**"स ब्रह्मा चतुराननः स भगवानीशोऽपि पञ्चाननः,**
**स स्कन्दश्च षडाननः स फणिनामीशः सहस्राननः ।**
**यत्पद्यार्थविशेषवर्णनविधौ नेशा वयं तत्र के ?**
**यद् व्याख्यायि तथापि किञ्चिदखिलं तच्चापलं केवलम् ॥१॥"** इति (पृ.७०९, टी.१४) ॥

**( ३० ) सम्पादकीयविशिष्टता—** गणिवर्येण रत्नाकरेऽगाधेऽस्मिन् प्रवेशितुमगाधः परिश्रमः कृतः, सम्पादनशैली कथितैव, परं शब्दसाधनिकायां प्रत्येकसूत्राणां स्थाननिर्देशः, धात्वादिविषये गण-आत्मनेपद-परस्मैपद-सेट्-अनिट्-वेट् आदिकम्, श्लोकादीनां स्थानशोधनेऽपि परिश्रमोऽत्यन्तः कृतः, तथापि येषां स्थानादिनिर्देशो नोपलब्धः, तेषां स्थानादि विद्वद्भिरवश्यं मृग्यं प्रेषणीयं च ॥

**( ३१ ) मुद्रणव्यवस्था—** रत्नाकरोऽयं सुचारुर्दृश्यते, यथोदधिजलं निर्मलं स्वच्छं च वरीवर्तते, तथाऽस्मिन्नपि ग्रन्थे सुचारुता सुपठनयोग्यता पाठशुद्धता च दरीदृश्यते, सोऽखिलः प्रयासः **'भरत ग्राफिक्स'**यन्त्रालयस्य, तत्सञ्चालक**भरतभाई-महेन्द्रभाई**आदीनां ज्ञेयः । सहायकसङ्घादिसंस्थानामपि सहयोगः, सहवर्तिसाधूनां तु सविशेषः ।
**संशोधक-सम्पादकगणिवर्यश्रीचन्द्रविजयेन** यथा रत्नाकरोऽयमुत्तीर्णस्तथा धीमन्तो विद्वांसः पिपठिषवश्छात्राश्चैनमुत्तीर्य, अक्षरसाधनयाऽक्षरं पदं शीघ्रं प्राप्नुयुरिति कामये ॥

वि. सं. २०५९, चैत्रे सुदि-१३, श्रीवीरजन्मकल्याणकदिनम्,
बामहाराजसाध्वीजीश्रीउपशान्तश्रीस्वर्गवासदिवसः,
सुरतपीपलोदवर्तिश्रीमुनिसुव्रतस्वामिसान्निध्ये ॥

पूज्याचार्यश्रीविजयचन्द्रोदयसूरिगुरुबन्धु-
पूज्याचार्यश्रीविजयअशोकचन्द्रसूरिचरणकिङ्करः
**सोमचन्द्रविजयः**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# —: संशोधन-सम्पादनपद्धतिः :—

एतद्ग्रन्थसंशोधने पञ्च प्रतय उपलब्धा, तत्परिचयः संज्ञा च ॥

**प्रतिः— १, संज्ञा-१** **पाटणश्रीहेमचन्द्राचार्यजैनज्ञानमन्दिरस्य,** सटीका, प्रतिसङ्ख्या-१३०१(डाबडा-२६८), पत्राणि-४८१, पङ्क्तयः १४ तः १६, अक्षराः ३६ तः ४६, सुवाच्या, शुद्धाशुद्धमिश्रा, सम्पूर्णा, ले. सं. १८०२ ॥

**प्रतिः— २, संज्ञा-२** **मांडवी( कच्छ )सङ्घभण्डारस्य,** सटीका, पत्राणि-३५०, पङ्क्तयः-२० तः २२, अक्षराः ५०तः ५६, सुवाच्या, शुद्धाशुद्धमिश्रा, सम्पूर्णा, ले. सं. १८७९ ॥

**प्रतिः— ३, संज्ञा-३** **डभोईवर्तिआचार्यश्रीजम्बूसूरिज्ञानमन्दिरस्य,** सटीका, प्रतिसङ्ख्या- ८४/४७५२, पत्राणि-३५०, पङ्क्तयः-१७ तः १९, अक्षराः- ५० तः ५६, सुवाच्या, शुद्धबहुला, सम्पूर्णा, ले. सं. १७८० ॥

**प्रतिः— ४, संज्ञा-४** **वटपद्र( वडोदरा )मुनिराजश्रीहंसविजयजीशास्त्रसङ्ग्रहस्य ( श्रीजैनज्ञानमन्दिरस्य ),** सटीका, प्रतिसङ्ख्या-१३३३, पत्राणि-४५७, पङ्क्तयः-१५, अक्षराः- ४५ तः ४७, सुवाच्या, शुद्धबहुला, सम्पूर्णा, ले. सं.-१८७७ ॥

**प्रतिः— ५, संज्ञा-५** **पाटणश्रीहेमचन्द्राचार्यजैनज्ञानभण्डारस्य ( -मन्दिरस्य ),** प्रतिसङ्ख्या-१३९४०(डाबडा-२९२), पत्राणि-११५ (५७+५८), पङ्क्तयः-२०, अक्षराः- ५२ तः ५४, सुवाच्या, शुद्धाशुद्धमिश्रा, अपूर्णा (प्रतिरियं तिर्यक्काण्डत उपलब्धा), ले.सं. १८०९ ॥

अन्या अपि प्रतयोऽचलगच्छीयसाहित्यमनीषिपरमपूज्याचार्यश्रीविजय**कलाप्रभसागरसूरीश्वरै**र्मुनिराज**श्रीसर्वोदयसागरविजयेन** च प्रदत्ताः, तेषामुपयोगो विषमस्थल एव कृतः, सूरिवरमुनिवराणामयमुपकारो विस्मरणेन न कृतघ्नीभवामि ॥

# —: सङ्केतानि :—

| **सङ्केतः** | **निदर्शनम्** |
|---|---|
| [अम.क्षीर.२।३।१०॥] | अमरकोशस्य द्वितीयकाण्डस्य तृतीयवर्गस्य १०तमश्लोकस्य क्षीरस्वामिकृतामरकोशोद्घाटनटीका **( टीकाया काण्ड-वर्ग-श्लोकसङ्ख्यानिदर्शनम् )** ॥ |
| [अमरकोषः ३।१॥४५॥] | तृतीयकाण्डस्य प्रथमवर्गस्य ४५तमो श्लोकः **( काण्ड-वर्ग-श्लोकसङ्ख्यानिदर्शनम् )**॥ |
| (उणा-३७५) | वैयाकरणश्रीशाकटायनप्रणीतश्रीपाणिनिमुनिसम्मतपञ्चपाद्या उणादिगणस्य सूत्रसङ्ख्या ३७५तमा **( उणादिगणसूत्रसङ्ख्यानिदर्शनम् )**॥ |
| 'ण्वुल्तुचौ ३।१।१३३॥' | श्रीपाणिनीयाष्टाध्याय्यास्तृतीयाध्यायस्य प्रथमपादस्य १३३तमं सूत्रम् **( अध्याय-पाद-सूत्रसङ्ख्यानिदर्शनम् )** ॥ |
| (दशपाद्युणा-५।१५) | दशपाद्युणादिगणस्य ५पादस्य १५तमं सूत्रम् **( पाद-सूत्रनिदर्शनम् )** ॥ |
| (भ्वा.प.से.) | भ्वादितश्चुराद्यन्तधातूनां गणपदादिनिर्देशनम्, तद्यथा- निर्दिष्टधातुर्भ्वादिगणस्थः परस्मैपदी इट्सहित इति ।'आ.' इत्यस्य आत्मनेपदी, 'उ.' इत्यस्य उभयपदी, 'वे.' इत्यस्य वेट् (विकल्पेन इट्), 'अ.' अनिट् (न इट्) इत्यादिकनिदर्शनमप्यत्र ज्ञेयम् ॥ |
| (हैमोणा-३३) | श्रीहेमचन्द्राचार्यप्रणीतोणादिगणस्य ३३सूत्रम् **( सूत्रसङ्ख्यानिदर्शनम् )** ॥ |
| (      ) | वर्तुलान्तर्गतपाठोऽभीष्टः शुद्धो वा ॥ |
| | एवमन्यान्यपि सङ्केतानि विद्वद्भिर्ज्ञेयानि ॥ |
| [      ] | कोष्ठान्तर्गतपाठोऽनुपलब्धः ॥ |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# अनुक्रमणिका


आवकार श्रीरांदेररोड जैन संघ, सुरत ---------- ५

संशोधकीयं सम्पादकीयं च गणिश्रीचन्द्रविजयः ---------- ६

अनारतं प्रचलतु भवतः संशोधनयात्रा प. पू. आचार्यश्रीविजयहेमचन्द्रसूरिमहाराजाः ---------- १३

शब्दः पं.श्रीविष्णुकान्तझामहोदयाः ---------- १४

शक्तिः पं.श्रीविष्णुकान्तझामहोदयाः ---------- १५

रत्नाकरोऽनुपमो व्युत्पत्तिरत्नाकरः पूज्यगुरुदेवाचार्यश्रीविजयसोमचन्द्रसूरीश्वरमहाराजाः ---------- १७

संशोधन-सम्पादनपद्धतिः ---------- ३०

**प्रथमो देवाधिदेवकाण्डः** ---------- १

**द्वितीयो देवकाण्डः** ---------- २३

**तृतीयो मर्त्यकाण्डः** ---------- १५१

**चतुर्थः तिर्यक्काण्डः** ---------- ४१४

एकेन्द्रियेषु पृथ्वीकायः ---------- ४१४

एकेन्द्रियेषु अप्कायः ---------- ४८१

एकेन्द्रियेषु तेजस्कायः ---------- ५००

एकेन्द्रियेषु वायुकायः ---------- ५०६

एकेन्द्रियेषु वनस्पतिकायः ---------- ५०८

द्वीन्द्रियाः ---------- ५५७

त्रीन्द्रियाः ---------- ५५९

चतुरिन्द्रियाः ---------- ५६०

पञ्चेन्द्रियाः, स्थलचर पञ्चेन्द्रियाः ---------- ५६४

पञ्चेन्द्रियाः, खचरपञ्चेन्द्रियाः ---------- ६०३

पञ्चेन्द्रियाः, जलचरपञ्चेन्द्रियः ---------- ६१७

**पञ्चमो नारककाण्डः** ---------- ६२३

**षष्ठः सामान्यकाण्डः** ---------- ६२६

अव्ययानि ---------- ६९९

प्रशस्तिः ---------- ६१०

सार्थशब्दानुक्रमणिका ---------- ६१३

गुजरातीशब्दानुक्रमणिका ---------- ९५४

श्लोकानामकाराद्यनुक्रमणिका ---------- १००५

ग्रन्थानां ग्रन्थकाराणां च नामानि ---------- १०१३

बहुश उपयुक्तग्रन्थानां सूची ---------- १०४५


Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्युत्पत्तिरत्नाकरकलिता

# अभिधानचिन्तामणि-नाममाला

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ श्रीशङ्खेश्वरपार्श्वनाथाय नमः ॥
॥ अनन्तलब्धिनिधानश्रीगौतमस्वामिने नमः ॥
॥ परमोपास्यश्रीनेमि-विज्ञान-कस्तूर-चन्द्रोदय-अशोक-सोमचन्द्रसूरीश्वरसद्गुरुभ्यो नमः ॥

## कलिकालसर्वज्ञश्रीहेमचन्द्राचार्यविरचिता
## वाचकश्रीदेवसागरगणिकृतव्युत्पत्तिरत्नाकरकलिता

# ॥ अभिधानचिन्तामणिनाममाला ॥

## ॥ प्रथमो देवाधिदेवकाण्डः ॥

श्रेयःसन्ततिसिन्धुवृद्धिविलसज्जैवातृकाऽऽभो विभुर्भास्वद्ज्ञानगभस्तिदीप्तिविधुतव्यामोहपूरः प्रभुः ।
सात्वच्छश्वदभीष्टदैवतमणिः संसारसिन्धौ तरिः, **श्रीमन्नाभिनरेन्द्रनन्दनजिनः** श्रेयस्कर स्तात् सदा ॥ १ ॥

जित्वा यो जगतीं जिनश्चतसृभिः सेनाभिरुद्यद्यशा, भुक्त्वा भारतचक्रवर्तिकमलां दुष्टाष्टकर्मद्विषः ।
भित्त्वाष्टप्रवचःप्रसूबलगुणैर्लेभेऽथ सर्वश्रियं, स **श्रीशान्तिजिनाधिपो**ऽस्तु भविनां प्रत्यूहशान्त्यै सताम् ॥ २ ॥

त्यक्त्वा राजीमतीं यः स्वनिहितहृदयामेकपत्नीं सुरूपां,
सिद्धिस्त्रीं भूरिरक्तामपि बहु चकमेऽनेकपत्नीमपीशः ।
लोके ख्यातस्तथाऽपि स्फुरदतिशयवान् ब्रह्मचारीति नाम्ना,
स **श्रीनेमीजिनेन्द्रो** दिशतु शिवसुखं सात्वतां योगिनाथः ॥३॥

कल्याणामृतशेवधेर्भगवतो यस्य क्षणालोकनप्राप्तप्रौढतरप्रसादगुणतो व्यालोऽपि देवेन्द्रताम् ।
लेभे विघ्नतमोवितानतरणिः सम्पल्लतावारिदः, **श्रीवामेयजिनाधिपो**ऽस्तु भविनां श्रेयस्करस्तीर्थकृत् ॥४॥

सान्द्रानन्दनमन्नरेन्द्रविबुधाऽधीशाऽऽलिमौलिप्रभाभास्वद्यत्प्रतिबिम्बदम्भत इवाऽनेकस्वरूपो विभुः ।
उद्धर्तुं जगदेव किं भवमहापङ्कात् कृपावारिधिः, श्रीमच्छासननायकः स तनुतां **श्रीवर्धमानः** श्रियम् ॥ ५ ॥

भक्त्या **श्रीश्रुतदेवतां** सुविशदज्ञानैकहेतुं तथा, श्रीमच्छ्रीगुरुविश्ववन्द्यचरणाऽम्भोजं प्रणम्याऽऽदरात् ।
वृत्तिं विज्ञमनोरमां विरचये **श्रीपाणिनीयोक्तिभिः**, **श्रीसूरीश्वरहेमचन्द्र**रचित**श्रीनामचिन्तामणेः** ॥ ६ ॥

**क्षीरस्वामि-महेश-रक्षित-सुभूति-व्याडि-वोपालितस्वामि-न्यास-पुराण-भाष्य-रभस**-ग्रन्थांस्तथाऽनेकशः ।
**सर्वानन्द-निधान-रुद्र-धरणि-स्कन्दर्भु**गुर्वादिकान् सद्ग्रन्थानुपजीव्य यत्यत इह ग्रन्थे मया सादरम् ॥ ७ ॥

तत्र ग्रन्थारम्भे ग्रन्थकारश्चिकीर्षितस्य ग्रन्थस्याऽविघ्नेन परिसमाप्त्यर्थं शिष्टाचारपरिपालनार्थं च विशिष्टेष्टदेवतानमस्कृतिरूपं मङ्गलमाचरति-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**प्रणिपत्यार्हतः सिद्धसाङ्गशब्दानुशासनः ।**
**रूढयौगिकमिश्राणां नाम्नां मालां तनोम्यहम् ॥१॥**

**अहम्** इति श्रीहेमचन्द्रसूरिः । **नाम्नां मालां तनोमि**, अभिधानचिन्तामणिनाम्नीमिति शेषः । केषां नाम्नां ?, **रूढयौगिकमिश्राणां**, रूढाश्च यौगिकाश्च मिश्राश्च रूढयौगिकमिश्रास्तेषाम् । किं कृत्वा ?, **अर्हतः** श्रीजिनवरेन्द्रान् **प्रणिपत्य** चतुस्त्रिंशदतिशयान् सुरनरेन्द्ररचितपूजां चार्हन्ति तेऽर्हन्तस्तान् प्रणिपत्य भक्तिश्रद्धातिशयपूर्वकं नत्वा । कीदृशोऽहम् ?, **सिद्धसाङ्गशब्दानुशासनः** । अनुशिष्यन्ते संस्क्रियन्ते व्युत्पाद्यन्तेऽनेन शब्दा इत्यनुशासनम् । शब्दानामनुशासनं शब्दानुशासनम् । अत्र केचिद्वदन्ति-'उभयप्राप्तौ कर्मणि'२।३।६६॥ इत्यनेनाऽत्र षष्ठी, ततश्च, 'कर्मणि च'२।२।१४॥ इत्यनेन समासप्रतिषेधेन भवितव्यमिति । एतच्चायुक्तम्, यत्र ह्युभयोः प्राप्तिस्तत्राऽनेन कर्मणि षष्ठी विधीयते । क्व चोभयोः प्राप्तिः? यत्र सामर्थ्यप्राप्तमुभयोः कर्तृकर्मणोरुपादानम् । यथा-'आश्चर्यो गवां दोहोऽशिक्षितेन गोपालकेन' इति । एवं नाम दुर्दोहानां गवामशिक्षितेन गोपालकेन दोह इत्याश्चर्यभूतोऽत्र गवां दोहः प्रतिपादयितुमिष्टः। स च यदि दुर्दोहानां गवामुपादानं क्रियते, अशिक्षितस्य चाऽगोपालकस्य एवं शक्यः प्रतिपादयितुं नान्यथेति सामर्थ्यप्राप्तमुभयोरुपादानम्, शब्दानुशासनमित्यत्र तु शब्दानामिदमनुशासनं नार्थानामित्येतावतोऽर्थस्य विवक्षिततत्वात्। तस्याचार्यस्य कर्तुरुपादानमन्तरेणापि प्रतिपादयितुं शक्यत्वात्, आचार्योपादानमकिञ्चित्करम् । तस्मान्नास्ति द्वयोरपि कर्तृकर्मणोः सामर्थ्यप्राप्तमुपादानम्, ततश्चोभयप्राप्तिरपि नास्त्येव, असत्यां च तस्यां न 'उभयप्राप्तौ कर्मणि' २।३।६६॥ इत्यनेन षष्ठी, किं तर्हि? 'कर्तृकर्मणोः कृति'२।३।६५॥ इत्यनेन, ततश्चेध्मप्रश्चनवत् समासो भविष्यति, अथवा शेषलक्षणैवेयं षष्ठीत्यचोद्यमेतत्''['अथ शब्दानुशासनम्' इत्यत्रत्या काशिका विवरणपञ्जिका]। सिद्धं निष्पन्नं प्रतिष्ठां प्राप्तम्, साङ्गं शब्दानुशासनं व्याकरणं यस्येति सिद्धं विशेषणम्। अङ्गानि लिङ्गोणादिधातुपारायणगणपाठादीनि, एतावता शब्दानुशासनेन सहात्मन एककर्तृत्वं ख्यापितम्, तत् ख्यापनं च परस्पराव्यभिचारिवाक्योपदर्शनार्थम्, शब्दानुशासनस्य च कीर्त्तनं शब्दविद्याधीनः सर्वविद्यानामुत्कर्ष इति ख्यापनार्थम्। तदुक्तम्-

''वक्तृत्वं च कवित्वं च विद्वत्तायाः फलद्वयम् ।
शब्दज्ञानादृते तन्न द्वयमप्युपपद्यते ॥१॥'' [१]इति ॥

पुनः-

''उपासनीयं यत्नेन शास्त्रं व्याकरणं महत् ।
प्रदीपभूतं सर्वासां विद्यानां यदवस्थितम् ॥२॥'' [ ]इति ॥

आचार्याणां मते त्रयी शब्दानां प्रवृत्तिः। केषाञ्चिन्मते-''जातिशब्दाः, गुणशब्दाः, क्रियाशब्दाः, यादृच्छिकशब्दाश्च'' इति चतुष्टयी शब्दानां प्रवृत्तिः । यदुक्तम्-

''नाम च धातुजमाह निरुक्ते व्याकरणे शकटस्य च तोकम् ।
यन्न पदार्थविशेषसमुत्थं प्रत्ययतः प्रकृतेश्च तदूह्यम् ॥३॥'' [ ]

व्याख्या- नाम इति प्रातिपदिकम् । निरुक्तकारो निरुक्ते धातुजमाह, च पुनः व्याकरणे शकटस्य च तोकम् अपत्यमिति शाकटायनोप्याह । एवं सति जातिगुणक्रियावाचित्वात् शब्दानां त्रय्येव प्रवृत्तिः, न चतुष्टयी, यादृच्छिकानामभावात्। अथवा सर्वेऽपि क्रियाशब्दा एव स्युः, सर्वेषां धातुजत्वात्, तत एकैव प्रवृत्तिः, न त्रयी, न चतुष्टयी । अथाऽव्युत्पन्नशब्दानां कथं धातुजत्वावधारणमत आह यन्न इति । पदमर्थः प्रयोजनं यस्य स तथा, प्रकृत्यादिः पदार्थविशेषात् समुत्थः प्रादुर्भावो यस्य तत्, प्रतिपदोक्तप्रत्ययविशेषादनिष्पन्नं डित्थादि, तद् आदेः प्रत्ययात् डीत्यादेर्धातोरूह्यमिति ॥१॥

तत्र रूढशब्दान् व्याचष्टे-

**व्युत्पत्तिरहिताः शब्दा, रूढा आखण्डलादयः ।**

प्रत्ययविभागतया शब्दोच्चारणं **व्युत्पत्तिः**, तया **रहिताः** वर्जिताः शब्दा रूढा ज्ञेयाः । ते के ? इत्याशङ्कायामाह- **आखण्डलादयः**, आखण्डलः शब्द आदिर्येषां ते, आखण्डलप्रभृतयः, आदिशब्दाद् मण्डपादयः। यद्यपि शाकटायनमते रूढा अपि व्युत्पत्तिभाज इति तथापि तेषां शब्दानां व्युत्पत्तिर्वर्णानुपूर्वीविज्ञानमात्रप्रयोजना, न पुनरन्वर्थार्थप्रवृत्तौ कारणमिति रूढा अव्युत्पन्ना एव ॥

अथ यौगिकशब्दान् व्याचष्टे-

**योगोऽन्वयः स तु गुण-क्रिया-सम्बन्धसम्भवः ॥२॥**

शब्दानां परस्परमर्थानुगमनम् **अन्वयः योगः** प्रोच्यते । युज्यते गुणक्रियासम्बन्धेनेति योगः।'युजिर् योगे'(रु.उ.अ.), 'भावे' ३।३।१८॥ घञ्, 'चजोः '७।३।५२॥ इति कुत्वम् । तुः अव्ययं विशेषे । स योगः कीदृशः ?, **गुण-क्रिया-सम्बन्धसम्भवः**, गुणश्च क्रिया च सम्बन्धश्च गुण-क्रिया-सम्बन्धास्तेभ्यः सम्भवः उत्पत्तिर्यस्य सः । गुणो नीलपीतादिः । क्रिया करोत्यादिका । सम्बन्धो वक्ष्यमाणः । यदुक्तम्-''योगो गुणेन क्रियया सम्बन्धेन कृतोऽन्वयः''[ ]इति । शब्दानां परस्परमर्थानुगमनमन्वयः स योग इति तट्टीका ॥२॥

अथ गुणकृतयोगेन शब्दानुदाहरति-

**गुणतो नीलकण्ठाद्याः**

**गुणतः** नीलपीतादिगुणनिबन्धनो येषां योगस्ते **नीलक-**

१. द्र. स्वोपज्ञटीका १।१॥, पृ. १॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**ण्ठाद्याः** शब्दा ज्ञेयाः । नीलः कण्ठोऽस्य नीलकण्ठः शम्भुः, नीलो गुणस्तत्प्राधान्यात् । आदिशब्दात् शितिकण्ठकालकण्ठादयः । वैशेषिकाणां मते संख्याऽपि गुण एव, तेन त्रिनेत्रः, पञ्चेषुः, षण्मुखः, अष्टश्रवा ब्रह्मा, दशशिरा रावण इत्यादयोऽपि सङ्गृहीताः ।

अथ क्रियायोगेन ये यौगिकास्तानुपदर्शयति-

**क्रियातः स्रष्टृसन्निभाः ।**

**क्रिया**करोत्यादिका, तन्निबन्धनो योगो येषां ते **स्रष्टृसन्निभाः** । सृजति इति सर्जनक्रियाप्राधान्यात् स्रष्टा । 'सृज विसर्गे'(दि.आ.अ.), तृच्प्रत्ययः 'अनुदात्तस्य चर्दुपधस्य-' ६।१।५९ ॥इत्यमागमः,' इको यणचि'६।१।७७॥, स्रष्टा सन्निभाः स्रष्टृसन्निभाः । सन्निभग्रहणाद् धाता इत्यादयो द्रष्टव्याः ॥

अथ सम्बन्धलक्षणमाह-

**स्वस्वामित्वादिसम्बन्धः**

स्वम् आत्मीयं वस्तु, स्वामी तत्र प्रभविष्णुः । स्वं च स्वामी च स्वस्वामिनौ, तयोर्भावः स्वस्वामित्वम् । तद् आदिः यस्य स **स्वस्वामित्वादिः,** आदेर्जन्यजनकादिपरिग्रहः ॥

**तत्राहुर्नाम तद्वताम् ॥३॥**

**स्वात् पाल-धन-भुग्-नेतृ-पति-मत्वर्थकादयः ।**

**तत्र** इति स्वस्वामिभावसम्बन्धे पालादयः शब्दाः, **स्वाद्** आत्मीयाद् वस्तुनो भूप्रभृतेरग्रे नियुक्ताः सन्तः **तद्वतां** सम्बन्धवतां स्वामिनां **नाम** अभिधानम् **आहुः** कथयन्ति ॥**३**॥ मतुः तद्धितप्रत्ययः, तस्य अर्थः विशिष्टप्रकृत्यर्थेन सह देवदत्तादेः सम्बन्धः, तदाधारो वा, 'तदस्यास्त्यस्मिन्निति मतुप्' ५।२।९४। इति सूत्रेण मतुप्प्रत्ययविधानात् । मतोरर्थ इवार्थो यस्य स **मत्वर्थकः** तद्धितः मतुपा समानार्थः,' अत इनिठनौ '५।२।११५॥इत्यादिकः। मत्वर्थाव्यभिचाराद् मतुरपि । पालश्च धनं च भुक् च नेता च पतिश्च मत्वर्थकश्च **पालधनभुग्नेतृपति-मत्वर्थकाः, ते आदिः** प्रकारो येषां ते तथा । अत्र आदिशब्दः प्रकारार्थः ।

''सामीप्येऽर्थ व्यवस्थायां प्रकारेऽवयवे तथा ।
चतुष्वर्थेषु मेधावी आदिशब्दं प्रचक्षते ॥१॥ '' [ ]इति।

आदेः पाऽऽदयोऽपि गृह्यन्ते ।**'तत्राहुर्नाम तद्वताम्'** इति उत्तरेष्वप्यनुवर्तनीयम् ॥

क्रमेणोदाहरणान्याह-

**भूपालो[1] भूधनो[2] भूभुग्[3] भूनेता[4] भूपतिस्तथा[5] ॥४॥ भूमांश्चेति[6]**

१ भुवं पालयति रक्षति **भूपालः**। २ भूः धनं यस्य स **भूधनः**। ३ भुवं भुनक्ति अवति **भूभुक्** । ४ भुवो नेता नायकः भूनेता । ५ भुवः पतिः **भूपतिः** । ६ भूरस्यास्ति **भूमान्** । ७ इति शब्दः प्रकारार्थः, तेन **भूपा**दयोऽपि ग्राह्याः । एते सप्त राज्ञो नामवाचकाः ॥

**कविरूढ्या ज्ञेयोदाहरणावली ।**

**रूढिः** परम्पराऽऽयाता प्रसिद्धिः । कवीनां व्यासवाल्मीकिप्रभृतीनां रूढिः **कविरूढिः**, तया ।उदाहरणानामावली श्रेणिः **उदाहरणावली ज्ञेया** ज्ञातव्या । कविरूढ्यैव, न तु कविपरम्पराऽऽयातप्रसिद्ध्यतिक्रमेण । यथा 'कपाली' इत्यादौ स्वस्वामिसम्बन्धे सत्यपि मत्वर्थीय एव भवति, न तु 'कपालपालः, कपालधनः, कपालभुक्, कपालनेता, कपालपतिः' इत्यादि ।

अथ जन्यजनकभावसम्बन्धं दर्शयति-

**जन्यात् कृत्-कर्तृ-सृट्-स्रष्टृ-विधातृ-कर-सू-समाः ॥५॥**

**जन्यात्** कार्याद् अग्रे कृदादयः सप्तशब्दाः, तद्वतां जन्यवतां जनकानां कारणानामभिधानमाहुः ।यथा विश्वं करोति विश्वकृत्, विश्वस्य कर्ता विश्वकर्ता, विश्वं सृजति विश्वसृट्, विश्वस्य स्रष्टा विश्वस्रष्टा, विश्वस्य विधाता विश्वविधाता[3] विश्वं करोति विश्वकरः, विश्वं सूते विश्वसूः । **समा** इति समशब्दोऽत्राऽऽद्यर्थः, तेन विश्वकारकविश्वजनकादयोऽपि । कविरूढ्येत्येव, न तु कविपरम्पराऽतिक्रमेण ।यथा चित्रकृदुच्यते न तथा चित्रसूः इति ॥५॥

**जनकाद् योनि-ज-रुह-जन्म-भू-सूत्यणादयः ।**

**जनकात्** कारणात् परे योन्यादयः सप्त, तद्वतां कारणवतां कार्याणां नामानि[4] आहुः। यथा आत्मयोनिः, आत्मजः, आत्मरुहः, आत्मजन्मा, आत्मभूः, आत्मसूतिः ब्रह्मा । तस्य ह्यात्मैव कारणमिति रूढिः । योनिश्च जश्च रुहश्च जन्म च भूश्च सूतिश्च अण् च **योनि-ज-रुह-जन्म-भू-सूत्यणः,** ते **आदिः** येषां ते तथा । वक्ष्यमाणस्यादिशब्दस्येहापि सम्बन्धात् सम्भवादयो ग्राह्याः । अणादयस्तु 'तस्यापत्यम्'४।१।९२॥ इति सूत्रविहितोऽण्, आदिर्येषां ते तथा । उपगोरपत्यमौपगवः, गर्गस्यापत्यं गार्ग्यः, दितेरपत्यं दैत्यः, भृगोरपत्यं भार्गवः । अत्र हि औपगवादी-नामुपग्वादयो जनका इति रूढिः । अत्रापि कविरूढ्येत्येव, न तु कविरूढ्यतिक्रमेण । यथा आत्मयोनिः तथा आत्मजनकः, आत्मकारकः इत्यादि न भवति ॥

अथ धार्यधारकभावसम्बन्धं दर्शयति-

**धार्याद् ध्वजा-ऽस्त्र-पाण्यऽङ्क-मौलि-भूषण-भृन्निभाः ॥६॥**

**शालि-शेखर-मत्वर्थ-मालि-भर्तृ-धरा अपि ।**

**धार्य**वाचकाद् अग्रे ध्वजादयो धरान्तः धारकनामानि

---

१. ' -प्यथ' इति १॥ २. शेषषष्ठ्या समासः सर्वत्र ।। ३. 'विश्वं सृजति विश्वस्रष्टा, विश्वं विदधाति विश्वविधाता' इति २.४ ॥ ४. 'नाम' इति १॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आहुः। यथा-वृषो ध्वजश्चिह्नं यस्य स वृषध्वजः, शूलमस्त्रमस्य शूलास्त्रः, पिनाकं पाणावस्य पिनाकपाणिः, वृषोऽङ्कश्चिह्नमस्य वृषाङ्कः, चन्द्रो मौलौ शिरस्यस्य चन्द्रमौलिः, शशी भूषणमस्य शशिभूषणः, शूलं बिभर्त्ति शूलभृत् । **निभ**ग्रहणात् वृषलक्ष्मवृष-केतनशूलायुधचन्द्राभरणादयो ग्राह्याः ॥६॥ तथा पिनाकशाली, इन्दुशेखरः, पिनाकं मलते धारयति पिनाकमाली, पिनाकं बिभर्त्ति पिनाकभर्ता, गङ्गाधर इत्यादयः शम्भुवाचकाः । अत्रापि कविरूढ्येत्येव, तेन सत्यपि धार्यधारकभावसम्बन्धे सर्वेभ्यो धार्येभ्यो न ध्वजाद्यर्थाः शब्दाः प्रयोज्याः । तेन न हि भवति [1]वृषध्वजवत् शूलध्वजः, शूलास्त्रवत् चन्द्रास्त्रः, पिनाकपाणिवत् सर्पपाणिः, वृषाङ्कवत् चन्द्राङ्कः, इन्दुमौलिवद् गङ्गामौलिः, शशिभूषणवत् शूलभूषणः, शूलशालिवत् चन्द्रशाली, इन्दुशेखरवद् गङ्गाशेखरः, शूलीवत् शूलवान्, पिनाकमालीवत् सर्पमाली, पिनाकभर्तृवत् चन्द्रभर्ता, गङ्गाधरवत् चन्द्रधर इति ॥

अथ भोज्यभोजकभावसम्बन्धं दर्शयति-

**भोज्याद् भुग-ऽन्धो-व्रत-लिट्-पायि-पा-ऽशा ऽशना-ऽऽदयः ॥७॥**

भुज्यत इति **भोज्यं** भक्ष्यम्, तद्वाचिनः शब्दात् परे भुक्प्रभृतयोऽष्टौ शब्दाः प्रयुक्ताः सन्तस्तद्वतां भोज्यवतां भोक्तृणां नामानिआहुः ।यथा-अमृतंभुञ्जन्तेअमृतभुजः,अमृतमेवान्धओदनं येषांतेअमृतान्धसः,अमृतंव्रतयन्तिवेष्टयन्तीतिअमृतव्रताः,अमृतं लिहन्तिअमृतलिहः,अमृतंपिबन्तिअमृतपायिनः,अमृत पिबन्ति अमृतपाः,अमृतमश्नन्तिअमृताशाः,अमृतमशनंयेषांतेअमृताशनाः सुराः । तेषां हि अमृतं भोज्यमिति प्रसिद्धिः । अत्र **आदि**शब्दः समानार्थभोजनादिशब्दपरिग्रहार्थः ।अत्रापिकविरूढ्येव,नहिभवति यथा-अमृतभुजः तथा अमृतवल्भा इति ॥७॥

पतिकलत्रभावसम्बन्धं दर्शयति-

**पत्युः कान्ता-प्रियतमा-वधू-प्रणयिनी-निभाः ।**

**पति**शब्दाद् धवशब्दाद् अग्रे कान्तादिसदृशाः शब्दाः, तद्वतीनां पतिमतीनां भार्याणां नामानि आहुः । यथा-शिवस्य शम्भोः कान्ता शिवकान्ता, शिवप्रियतमा, शिववधूः, शिव-प्रणयिनी पार्वती। तस्या[2] हि शिवः पतिरिति रूढिः । **निभ**ग्रहणाद् वल्लभा, रमणी, प्रिया, दयिता, प्राणेशा इत्यादयो ग्राह्याः । अत्रापि कविरूढ्येत्येव, तेन न हि भवति यथा शिवकान्ता तथा शिवपरिग्रह इति ॥

**कलत्राद् वर-रमण-प्रणयीश-प्रियादयः ॥८॥**

**कलत्र**वाचिनः शब्दात् परे **वर**प्रभृतयः शब्दाः प्रयुक्ताः सन्तस्तद्वतां वरयितृणां[3] नामानि आहुः । यथा पार्वतीवरः पार्वती-रमणः, पार्वतीप्रणयी, पार्वतीशः, पार्वतीप्रियः । अत्र हि शम्भोः गौरी कलत्रमति रूढिः । **आदि**शब्दाद् वरसमानार्थाः पतिभर्त्रादयो ग्राह्याः । कविरूढ्येत्येव, न हि भवति यथा पार्वतीवरः शिवः तथा गङ्गावर इति ॥८॥

अथ सख्युः सम्बन्धमाह-

**सख्युः सखिसमाः**

**सखि**वाचकात् शब्दात् श्रीकण्ठादेरग्रे **सखिसमाः** सखिसदृगर्थाः शब्दाः, तद्वतां सख्यवतांसखीनां नामानि आहुः। यथा-श्रीकण्ठस्य सखा श्रीकण्ठसखः धनदः, 'राजाहः सखिभ्यष्टच्' ४।५।९१॥ समासान्तः, 'यस्येति च'६।४।१४८॥, एवं मधोः वसन्तस्य सखा मधुसखः कन्दर्पः। समग्रहणात् सुहृदादयो ग्राह्याः, तेन श्रीकण्ठसुहृत्, मधुसुहृद् इत्यादयः । कविरूढ्यैव, न हि भवति यथा श्रीकण्ठसखा धनदः तथा धनदसखा श्रीकण्ठ इति ॥

अथ वाह्यवाहकसम्बन्धं दर्शयति-

**वाह्याद् गामि-याना-ऽऽसनादयः ।**

उह्यते वाह्यम् । 'वह प्रापणे'(भ्वा.उ.अ.), 'ऋहलोर्ण्यत्'३।१।१२४॥, **वाह्याद्** वाह्यवाचिनः शब्दात् परे गामि-प्रभृतयः शब्दाः, तद्वतां वाहयितृणां नामानि आहुः । यथा वृषेण गच्छतीत्येवंशीलो वृषगामी । 'सुप्यजातौ-'३।२।७८॥ इति णिनिः । वृषो यानं वाहनमस्य वृषयानः, वृष आसनमस्य वृषासनः शिवः । तस्य हि वृषो यानमिति रूढिः । **आदेः** वृषभवाहन इत्यादयोऽपि। कविरूढ्यैव, न हि भवति यथा नरवाहनः कुबेरः तथा नरगामी, नरयान इत्यादि॥

अथ [4]ज्ञातिज्ञातेयसम्बन्धमाह-

**ज्ञातेः स्वसृ-दुहित्रा-ऽऽत्मजा-ग्रजा-ऽवरजाऽऽदयः ॥९॥**

**ज्ञातिः** स्वजनः, "स्वो ज्ञातिः स्वजनो बन्धुः" (अभिधानचि. का. ३, श्लो-५६१)इति वक्ष्यमाणत्वात्, ज्ञाति-वाचिनः शब्दाद् अग्रे स्वस्रादयः शब्दाः, तद्वतां ज्ञातेयवतां ज्ञातीनां नामानि आहुः । स्वस्रादीनां ज्ञातिविशेषवाचित्वात् प्रयोगोऽपि ज्ञातिविशेषादेव । यथा यमस्वसा यमुना, हिमवद्दुहिता पार्वती, चन्द्रात्मजो बुधः, गदाग्रज इन्द्रावरजश्च विष्णुः । यमादयो हि कालिन्द्यादीनां भ्रात्रादिज्ञातय इति हि रूढिः । **आदेः** सोदरादयो ग्राह्याः । यथा-कालिन्दीसोदरो यमः । कविरूढ्येत्येव, न हि भवति यथा यमस्वसा यमुना तथा शनिस्वसाऽपि ॥९॥

१.'वृषभ-' इति २॥ २.'तस्यादि' इति १, ३॥ ३.'पतीनां' इति १॥ ४.'अथ ज्ञातेयसम्ब-' इति १॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथाऽऽश्रयाश्रयिभावसम्बन्धं दर्शयति-

**आश्रयात् सद्मपर्याय-शय-वासि-सदाऽऽदयः ।**

**आश्रयो** निवासः, तद्वाचिनः शब्दात् **सद्मपर्यायाः** सद्मैकार्थवाचकाः शब्दाः **शय-वासि-सदाऽऽदयश्च,** तद्वताम् आश्रयवताम् आश्रितानां नामानि आहुः । यथा द्युसद्मानः द्युसदनाः, दिवौकसः, दिवशब्दो वृत्तावदन्तोऽप्यस्ति, द्युवसतयः, दिवाश्रयाः, द्युशयाः, द्युवासिनः, द्युसदो देवाः । द्यौः स्वर्गः, स च तेषामाश्रय इति रूढिः । कविरूढ्येत्येव, न हि भवति यथा द्युसद्मानो देवाः तथा भूमिसद्मानो मनुजा इति ॥

अथ वध्यवधकभावसम्बन्धमाह-

**वध्याद् भिद्-द्वेषि-जिद्-घाति-ध्रुग-ऽरि-ध्वंसि-शासनाः ॥१०॥**
**अप्य-ऽन्तकारि-दमन-दर्पच्छिन्-मथनाऽऽदयः ।**

**वध्यो** घात्यः, तद्वाचिनः शब्दाद् **भिदादयोऽष्टौ,** अन्तकार्यादयोऽपि चत्वारस्तद्वतां घातकानां नामानि आहुः। यथा पुरनामानं दैत्यं भिनत्ति पुरभित्, पुरं द्वेष्टीत्येवंशीलः पुरद्वेषी, पुरं दैत्यं जयति अभिभवति पुरजित्, पुरं हन्तीत्येवंशीलः पुरघाती, पुरं द्रुह्यति पुरध्रुक्, पुरस्य अरिः पुरारिः, पुरं ध्वंसते पुरध्वंसी, पुरं शास्ति पुरशासनः ॥१०॥ पुरान्तं करोति पुरान्तकारी, पुरं दाम्यति पुरदमनः, पुरदर्पच्छित्, पुरमथनः शिवः। महादेवस्य हि पुरो वध्य इति रूढिः । **आदिशब्दात्**[1] पुरदारी, पुरनिहन्ता, पुरकेतुः, पुरसूदनः[2], पुरान्तकः, पुरजयी । **वध्य** इति वधार्हमात्रेऽपि। तेन कालियदमनः कालियारिः, कालियशासनः, कृष्ण इत्यादयोऽप्यूह्याः। कविरूढ्येत्येव, तेन कालियदमनादिवत् कालियघातीति न भवति ॥

उक्ताः स्वस्वामित्वादयः सम्बन्धाः। ते च यथा भिन्नद्रव्याश्रयास्तथैकद्रव्याश्रया अपि भवन्तीति दर्शयितुमाह-

**विवक्षितो हि सम्बन्ध एकतोऽपि पदात् ततः ॥११॥**
**प्राक्प्रदर्शितसम्बन्धिशब्दा योज्या यथोचितम् ।**

**हिः** यस्माद्धेतोः **विवक्षितः सम्बन्धः** विवक्षानिबन्धनो हि सम्बन्धः, **ततः** तस्माद्धेतोः **एकतोऽपि** पदादेकस्मादपि, **पदाद्** वृषादेः सम्बन्धिपदादग्रे ॥११॥ **प्राक्** पूर्वं **प्रदर्शितसम्बन्धिशब्दाः** सम्बन्धान्तरनिबन्धना वाहनादयः शब्दा **यथोचितं** यथायोग्यं **योज्याः** ॥

एतदेव दर्शयति-

**दृश्यते खलु वाह्यत्वे वृषस्य वृषवाहनः ॥१२॥**
**स्वत्वे पुनर्वृषपतिर्धार्यत्वे वृषलाञ्छनः ।**
**अंशोर्धार्यत्वेंऽशुमाली स्वत्वेंऽशुपरिरंशुमान् ॥१३॥**
**वध्यत्वेऽहेरहिरिपुर्भोज्यत्वे चाहिभुक् शिखी ।**

**खलु** इति निश्चये, **वृषस्य वाह्यत्वे** वाह्यवाहकभावसम्बन्धविवक्षायाम्, यथा **वृषवाहनो** महादेवो **दृश्यते** श्रूयते ॥१२॥ तथा **स्वत्वे** स्वस्वामिभावसम्बन्धविवक्षायां **वृषपतिः**। तथा **धार्यत्वे** धार्यधारकभावसम्बन्धविवक्षायां च **वृषलाञ्छनः** इत्यपि। तथा **अंशोः** किरणस्य **धार्यत्वे** धार्यधारकभावसम्बन्धविवक्षायां यथा अंशून् किरणान् मलते धारयति **अंशुमाली** आदित्य इति भवति । तथा **स्वत्वे** स्वस्वामिभावसम्बन्धविवक्षायाम् अंशूनां पतिः **अंशुपतिः**, अंशवः किरणाः सन्त्यस्येति **अंशुमानिति** भवति ॥१३॥ तथा **अहेः** सर्पस्य **वध्यत्वे** वध्यवधकभावसम्बन्धविवक्षायां यथा **अहिरिपुः** मयूरः। तथा **भोज्यत्वे** भोज्यभोजकभावसम्बन्धविवक्षायाम् अहिभुक् इत्यपि भवति ॥

स्वस्वामित्वादिसम्बन्धनिबन्धनां व्युत्पत्तिं प्रदर्श्य पुनर्व्युत्पत्त्यन्तरमाह-

**चिह्नैर्व्यक्तैर्भवेद् व्यक्तेर्जातिशब्दोऽपि वाचकः ॥१४॥**
**तथा ह्यगस्तिपूता दिग् दक्षिणाशा निगद्यते ।**

**व्यक्तैः** प्रकटैर्निःसन्देहैरिति यावत्, **चिह्नैः** विशेषणैः, **जातिशब्दोऽपि** सामान्याभिधाय्यपि, **व्यक्तेः** विशेषस्य, **वाचकः** कथको भवति, नामतां प्राप्नोतीत्यर्थः ॥१४॥ **तथा हि** इत्यादिना उदाहरणं दर्शयति अगस्तिनाम्ना मुनिविशेषेण पूता स्वकीयस्थित्या पवित्रिता या सा **अगस्तिपूता दिग् दक्षिणाशा निगद्यते** अभिधीयते इत्येतद्व्यक्तं चिह्नम् । तेन चिह्नता । अत्र 'दिक्' इति सामान्यशब्दो दक्षिणाशाया इति विशेषस्याभिधायी भवति । एवं सप्तर्षिपूता दिगुत्तराशा, अत्रेर्मुनेर्नेत्रसमुत्थं ज्योतिश्चन्द्र इत्यादयोऽपि ॥

पुनर्व्युत्पत्त्यन्तरमाह-

**अयुग्-विषमशब्दौ त्रि-पञ्च-सप्तादिवाचकौ ॥१५॥**
**त्रिनेत्र-पञ्चेषु-सप्तपलाशादिषु योजयेत् ।**

त्रि-पञ्च-सप्तादीनां स्थाने **अयुग्-विषमशब्दौ त्रिनेत्र-पञ्चेषु-सप्तपलाशादिषु** पदेषु **योजयेत्,** कविरिति शेषः । कीदृशौ अयुग्-विषमशब्दौ ?, **त्रिपञ्चसप्तादिवाचकौ,** त्रयश्च पञ्च च सप्त च त्रिपञ्चसप्त, ते आदिर्येषां ते त्रिपञ्चसप्तादयः, तेषां

१. 'आदेः' इति १.२॥ २. 'पुरनिषूदनः' इति १ प्रतेः टिप्पणी ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्र्यम्बकौ त्रिपञ्चसप्तादिवाचकौ । यथा-त्रीणि नेत्राण्यस्य त्रिनेत्रः, तथा अयुञ्जि नेत्राण्यस्य अयुग्नेत्रः, विषमाणि नेत्राण्यस्य विषमनेत्रः शम्भुः । पञ्च इषवः बाणा अस्य पञ्चेषुः, तथा अयुजः पञ्च इषवोऽस्य अयुगिषुः, विषमाः पञ्च इषवोऽस्य विषमेषुः कामः। यथा सप्तपलाशः तथा अयुक्पलाशः, विषमपलाशश्च । सप्तपलाशो वृक्षः, 'सातवनडें' इति लोकोक्त्या प्रसिद्धः । त्रिपञ्चशब्दादीत्यत्र आदिशब्दाद् नवशक्तिः, अयुग्शक्तिः, विषमशक्तिश्च शम्भुः ॥१५॥ त्रिनेत्रपञ्चेषुसप्तपलाशादिष्वित्यत्र आदिशब्दग्रहणात् त्र्यम्बक-पञ्चशर-सप्तच्छदादिष्वपि बोध्यम् । यथा त्र्यम्बकः तथा अयुगम्बकः, विषमाम्बक इत्यादयोऽपि । यथा पञ्चशरः तथा अयुक्शरः विषमशरश्च कामः । यथा सप्तच्छदः तथा अयुक्छदः, विषमच्छदश्च । एवमन्येषूह्याः ॥

पुनर्व्युत्पत्त्यन्तरमाह-

**गुणशब्दो विरोध्यर्थं नञादिरितरोत्तरः ॥१६॥**
**अभिधत्ते यथा कृष्णः स्यादसितः सितेतरः ।**

गुणो नीलपीतादिः, तद्वाची शब्दो **गुणशब्दः**, 'नञ्' इत्यव्ययमादिर्यस्य स **नञादिः**, नञ्पूर्वक इत्यर्थः। 'इतर' इत्ययं शब्द उत्तरः अग्रे यस्य स **इतरोत्तरः**, इतरशब्दपरश्चेत्यर्थः। विरोधी विपरीतः अर्थः विरोध्यर्थः, तं **विरोध्यर्थम्** ॥१६॥ **अभिधत्ते** अभिपूर्वो दधातिः कथनार्थः, कथयतीत्यर्थः । अत्र **यथा** इति दृष्टान्तार्थेऽव्ययम् । **असितः** न सितोऽसितः, नञ्पूर्वः सितशब्दः। सितादितरः **सितेतरः** । अत्रेतरोत्तरः सितशब्दः **कृष्णार्थः** स्यात्, द्वेऽपि कृष्णवर्णनाम्नी इत्यर्थः । एवम् अकृशः कृशेतरः स्थूलः, अस्थूलः स्थूलेतरश्च कृश इत्यर्थः ॥

पुनर्व्युत्पत्त्यन्तरमाह-

**वार्ध्यादिषु पदे पूर्वे वडवाग्न्यादिषूत्तरे ॥१७॥**

**वार्ध्यादिषु** शब्देषु पूर्वे पूर्वस्मिन्नेव **पदे** वारित्यादौ पर्यायस्यैकार्थवाचकशब्दस्य परिवर्त्तनं व्यतिहारो भवतीति शेषः। यथा वाः पानीयं धीयतेऽत्र इति वार्धिः । 'कर्मण्यधिकरणे च' ३।३।९३॥ इति किः, 'आतो लोप-' ६।४।६४॥ इत्यालोपः। जलधिः, वारिधिः, नीरधिः, अम्बुधिः इत्यादयः । अत्र जलपर्यायाणामेव परावर्त्तो, न तु धीत्यस्य । वार्ध्यादिष्वित्यत्रादिशब्दाद् वार्दोजलदस्तोयद इत्यादय एवमूह्याः । वडवाग्न्यादिषु शब्देषु **उत्तरे** उत्तरस्मिन्नेव अग्न्यादौ पदे पर्यायस्य परिवर्त्तनं भवति । यथा वडवाग्निः, वडवानलः, वडवावह्निः । अत्र अग्न्यादीनां पर्यायाणां परावर्तः, न तु वडवेत्यस्य । वडवाग्न्यादिष्वित्यत्र आदिशब्दात् सरोजम्, सरोरुहम्, सरोरुट्, सरोजन्म इत्यादयः ॥१७॥

**द्वयेऽपि भूभृदाद्येषु पर्यायपरिवर्तनम् ।**

**भूभृदादिषु** शब्देषु **द्वयेऽपि** पूर्वस्मिन् पदे, उत्तरस्मिंश्च पदे **पर्यायपरिवर्तनं** भवति । यथा भूभृत्, उर्वीभृत्, भूधरः, उर्वीधरः पर्वतः । अत्र पूर्वोत्तरयोः पदयोः परिवर्तनम् । भूभृदाद्येष्वित्यत्र **आद्य**शब्दात् सुरपतिः, देवस्वामी, सुरराजः, देवराजः, सुरेश इत्यादयो ज्ञेयाः ॥

**एवं परावृत्तिसहा योगात् स्युरिति यौगिकाः ॥१८॥**

**एवम्** अमुना प्रकारेण पूर्वस्मिन् पदे, उत्तरस्मिन् पदे च पर्यायपरिवर्तनं सहन्ति **परावृत्तिसहाः** । वार्धिवडवाग्न्यादयः शब्दाः **योगाद्** अन्वयात् **स्युः**भवेयुः **इति यौगिकाः** ॥१८॥

मिश्रशब्दानाह-

**मिश्राः पुनः परावृत्त्यसहा गीर्वाणसन्निभाः ।**
**प्रवक्ष्यन्तेऽत्र**

परावृत्तिं पर्यायाणां परावर्तनं न सहन्ते न क्षमन्त इति **परावृत्त्यसहाः** । पूर्वपदे उत्तरपदे च उभयत्र पदे च पर्यायाणां परावृत्तिमसहमाना मिश्राः, प्रोच्यन्त इति शेषः । ते परावृत्त्यसहाः के ?, **गीर्वाणसन्निभाः**। गीरेव बाणौ यस्य स गीर्वाणः । अत्र वाग्बाण इति पूर्वपदपरावृत्तिर्न भवति, तथा गीःशर इत्युत्तरपदपरावृत्तिरपि न भवति, तथा वाक्शर इत्युभयपदपरावृत्तिरपि न भवति । सन्निभा इति, सन्निभग्रहणाद् दशरथकृतान्तप्रभृतयो ज्ञेयाः । **मिश्रा** योगयुक्ता रूढिमन्तश्च । **अत्र** अभिधानचिन्तामणौ, **प्रवक्ष्यन्ते** कथयिष्यन्ते ॥

**लिङ्गं तु ज्ञेयं लिङ्गानुशासनात् ॥१९॥**

**लिङ्गम्** इति सामान्यपदग्रहणात् पुंल्लिङ्गं स्त्रीलिङ्गं नपुंसकलिङ्गं मिश्रलिङ्गं च । **लिङ्गानुशासनात्** श्रीहेमचन्द्राचार्यविरचिताद् **ज्ञेयम्** । अत एव आचार्यैः अमरकोषवैजयन्त्याद्यभिधानमालास्विव अत्र लिङ्गनिर्णयो नोक्तः, तथापीह संविनेयजनानुग्रहार्थं सन्दिग्धलिङ्गानां च नानालिङ्गानां च शब्दानां लिङ्गनिर्णयो वक्ष्यते ॥१९॥

इह मुक्तगतिः, सुरगतिः, मनुजगतिः, तिर्यग्गतिः, नारकगतिरिति जीवानां पञ्च गतयो भवन्तीति । गतिभेदाद् जीवा अपि पञ्चधा भवन्ति । तद्यथा मुक्ताः सुपर्वाणो मनुजास्तिर्यञ्चो नारकाश्चेति । ततोऽभिधास्यमानरूढयौगिकमिश्रशब्दविभागं त्यक्त्वा प्रथमादिकाण्डेषु अभिधास्यमानमुक्तादिनामानुक्रमनिर्देशमाह-

**देवाधिदेवाः प्रथमे काण्डे देवा द्वितीयके ।**
**नरास्तृतीये तिर्यञ्चस्तुर्य एकेन्द्रियादयः ॥२०॥**

१. 'विनो' इति ४॥ २. 'विनेय-' इति १॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**एकेन्द्रियाः पृथिव्यम्बुतेजोवायुमहीरुहः ।**
**कृमिपीलकलूताद्याः स्युर्द्वित्रिचतुरिन्द्रियाः ॥२१॥**
**पञ्चेन्द्रियाश्चेभकेकिमत्स्याद्याः स्थलखाम्बुगाः ।**
**पञ्चेन्द्रिया एव देवा नरा नैरयिका अपि ॥२२॥**
**नारकाः पञ्चमे साङ्गाः षष्ठे साधारणाः स्फुटम् ।**
**प्रस्तोष्यन्तेऽव्ययाश्चात्र**

देवाधिदेवाः सर्वज्ञा वर्तमाना अतीता अनागताश्च । वाच्यवाचकयोरभेदोपचारात् तद्वाचकाः शब्दा अपि देवाधिदेवाः। एवं वक्ष्यमाणदेवादिपदेष्वपि ज्ञेयम् । अत्र '**साङ्गाः**' इति पदं सर्वत्र सम्बन्धनीयम् , तेन **प्रथमे काण्डे** साङ्गाः गणधराद्यङ्गैः सहिताः सर्वश्रेष्ठत्वाद् **देवाधिदेवाः** प्रथमं **प्रस्तोष्यन्ते** प्रक्रंस्यन्ते। **द्वितीये** काण्डे साङ्गाः सोपस्करा **देवाः** प्रस्तोष्यन्ते । **तृतीये** काण्डे साङ्गा **मनुष्याः** प्रस्तोष्यन्ते । चतुर्णां सङ्ख्यापूरणस्तुर्यः, तस्मिन् **तुर्ये,** चतुर्थे इत्यर्थः, साङ्गाः **तिर्यञ्चः** प्रस्तोष्यन्ते । एते च **एकेन्द्रियादयः** ॥२०॥ एकं स्पर्शनरूपमिन्द्रियं येषां ते **एकेन्द्रिया पृथिव्यम्बु-तेजो-वायु-महीरुहः**, पृथिवी च अम्बु च तेजश्च वायुश्च महीरुट् च पृथिव्यम्बुतेजोवायुमहीरुहः, एते पञ्चाप्येकेन्द्रिया इत्यर्थः। तत्र पृथिवीकायोऽनेकविधः, शुद्धपृथिवी शर्करा-वालुकादिः। अप्कायोऽ[1]वश्यायहिमकरकादिः। तेजःकायोऽङ्गा-गादिः । वायुकाय उत्कलिकादिः । वनस्पतिकायः शेवालादिः[2]। **कृमिपीलकलूताद्याः**, कृमिश्च 'सुरमिया' इति प्रसिद्धः, पीलकश्च 'मण्डोका' इति प्रसिद्धः, लूता चेति द्वन्द्वे कृमिपील-कलूताद्याः, लूताशब्दः, स्त्रीलिङ्गः। **स्युः** भवेयुः, **द्वित्रि-चतुरिन्द्रियाः**। इह द्वित्रिचतुर्भ्यः शब्देभ्य इन्द्रियशब्दो योज्यः, ततो द्वे स्पर्शनरसने[3] इन्द्रिये येषां ते द्वीन्द्रियाः, त्रीणि स्पर्श-नरसनघ्राणानि इन्द्रियाणि येषां ते त्रीन्द्रियाः, चत्वारि स्पर्शनर-सनघ्राणनेत्राणीन्द्रियाणि येषां ते चतुरिन्द्रियाः। द्वीन्द्रिया कृम्यादयः, त्रीन्द्रिया पिपीलिकादयः, चतुरिन्द्रिया लूतादयः । पञ्च स्पर्शादीनि श्रोत्रसहितानीन्द्रियाणि येषां ते **पञ्चेन्द्रियाः**। ते च त्रिविधाः, स्थलं च भूः, खं च आकाशम्, अम्बु च जलमिति द्वन्द्वे स्थलखाम्बूनि, स्थलखाम्बुषु गच्छन्ति **स्थलखाम्बुगाः,** स्थलचराः, खचराः, जलचराश्चेत्यर्थः । ते के? इत्याह-इभश्च, केकी च मयूरः, मत्स्यश्च इति इभकेकिमत्स्यास्ते आद्या येषां ते **इभकेकिमत्स्याद्याः**। तत्र स्थलचरा इभादयः, खचरा मयूरादयः, जलचराः मत्स्यादयः । **देवा नरा नारकाश्च पञ्चेन्द्रिया एव,** न तु तिर्यञ्च इव एक-द्वित्रिचतुरिन्द्रिया इति । **एव**कारो निर्धारणार्थः॥**२२**॥पञ्चमे काण्डे साङ्गा **नारकाः** प्रस्तोष्यन्ते । **च** पुनरर्थे। अत्र इति **षष्ठे** काण्डे **साधारणाः** शब्दाः स्वःप्रभृतयः **अव्ययाः** च वक्ष्यन्ते ॥

**त्वन्ताथादी न पूर्वगौ ॥२३॥**

तुरित्यव्ययमन्ते यस्य स त्वन्तः । अथेति शब्द आदि-र्यस्य स अथादिः। त्वन्तश्च अथादिश्च **त्वन्ताथादी, न पूर्वगौ** पूर्वेण न सम्बन्धनीयौ, अग्रिमेण सम्बध्येत इत्यर्थः । "तु विशेषे अवधारणे समुच्चये पादपूर्तौ च[4]"[अनेकार्थसङ्ग्रहः ७।९॥] इत्यनेकार्थः। तुना अव्ययेन पूर्वस्मात् शब्दाद् विशेषो द्योत्यत इति, तुः, पूर्वं शब्दं न यातीत्यर्थः। यथा-"स्यादन्तजिदनन्तः सुविधिस्तु पुष्पदन्तः"[अभि.का-१, श्लो-२९]इति । अत्र तुशब्देन अनन्तजिदन्तशब्दाभ्यां सुविधिपुष्पदन्तशब्दयोर्विशेषो द्योतितः । अथेत्यव्ययमारम्भार्थः । "अथो अथ च सम्प्रश्ने मङ्गलारम्भयोरपि"[विश्वप्रकाशः, अनेकार्थाव्ययपरिच्छेदः, श्लो-२६]इति महेश्वरः। अथशब्देन शब्दान्तरारम्भो द्योत्यते । यथा-"मुक्तिर्मोक्षोऽपवर्गोऽथ मुमुक्षुः श्रमणो यतिः"[अभि. का-१, श्लो-७५]इति । अत्र अथशब्देन 'मुक्तिर्मोक्षऽपवर्गः' इति मोक्षनामसमाप्तिः, मुमुक्षुरित्यादियतिनामप्रारम्भश्च द्योतितः, एवमन्यत्राप्यूह्यम् ॥२३॥

**अर्हन्[1] जिनः[2] पारगतस्[3]त्रिकालवित्[4]**
**क्षीणाष्टकर्मा[5] परमेष्ठ्य[6]धीश्वरः[7] ।**
**शम्भुः[8] स्वयम्भू[9]र्भगवान्[10] जगत्प्रभु-[11]**
**स्तीर्थङ्कर[12]स्तीर्थकरो[13] जिनेश्वरः[14] ॥२४॥**
**स्याद्वाद्य[15]भयद[16]सार्वाः[17] सर्वज्ञः[18] सर्वदर्शि[19]केवलिनौ[20] ।**
**देवाधिदेव[21]बोधिद[22]पुरुषोत्तम[23]वीतरागा[24]प्ताः[25] ॥२५॥**

**१** अर्हति चतुस्त्रिंशदतिशयान्, सुरेन्द्रकृतामशोकाद्यष्ट-महाप्रातिहार्यरूपां पूजामिति वा **अर्हन्** । 'अर्ह योग्यत्वे' (भ्वा.प.से) 'अर्ह मह पूजायां'(भ्वा.प.से.) वा 'अर्हः प्रशंसा-याम्'३।२।१३३॥ इति शतृप्रत्ययः,'उगिदचाम्-'७।१।७०॥ इति नुम् । अर्हन्तौ, अर्हन्तः इत्यादि । अर्ह्यात् सुरनरवरादिसेवामिति। 'अर्ह पूजायाम्'(भ्वा.प.से.) अस्माद् बाहुलकात् 'तृभूवहि-वसिभासि-'(उणा-४०८)इत्यादिना आशिष्यर्थे झचि 'झोऽन्तः' ७।१।३॥ इति अन्तादेशे अर्हन्त इत्यदन्तोऽपि। अर्हन्तीति पचाद्यचि, पृषोदरादित्वाद् मुमागमे 'अर्हम्' इति च अव्ययम् । **२** जयति अभिभवन्ति रागद्वेषादिशत्रूनिति **जिनः**।'जि अभिभवे' (भ्वा.प.अ.), अभिभवार्थोऽयं सकर्मकः । यथोक्तं माधवेन-

"जयतिर्जयाभिभवयोराद्येऽर्थेऽसावकर्मकः ।
उत्कर्षप्राप्तिराद्योऽर्थो द्वितीयेऽर्थे सकर्मकः॥१॥" [मा.धातुवृत्तिः

१. 'ऽनेकविधःहिमकारकादिः' इति २॥ २. 'शेवलादिः' इति १॥ ३. 'रसनेन्द्रिये' इति २॥ ४. 'वा' इति १ प्रतौ ॥ ५. ३.४ प्रतौ नास्ति॥

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

भ्वादिः, धातु सं-३६६]इति । 'इणसिजि(सिञ्जि)भ्यो नक्' (उणा-२८२)इति नक् । यद्वा जयति सर्वोत्कर्षेण वर्तत इति। अनेनैव सूत्रेण नक् । ३ संसारसमुद्रस्य प्रयोजनजातस्य वा पारं पर्यन्तं गतः प्राप्तः **पारगतः** । 'द्वितीया श्रितातीतपतितगतात्यस्त-प्राप्तापन्नैः'२।१।२४॥ इति समासः । ४ अतीतानागतवर्तमानरूपत्रीन् कालान् वेत्ति **त्रिकालवित्** । 'विद ज्ञाने'(अ.प.से.), 'क्विप्'३।२।७६॥ इति क्विप् । ५ क्षीणान्यष्टौ ज्ञानावरणीयादिकर्माण्यस्य क्षीणाष्टकर्मा, नकारान्तः । ६ परमे पदे स्थाने तिष्ठति **परमेष्ठी** । 'ष्ठा गतिनिवृत्तौ'(भ्वा.प.अ.), 'परमे स्थः कित्' (उणा-४५०)इतीनिः, 'आतो लोप इटि च'६।४।६४॥ इत्यालोपः, 'तत्पुरुषे कृति बहुलम्' ६।३।१४॥ इति सप्तम्यलुक्, 'स्थास्थिन्स्थ(स्था)नां षत्वं वक्तव्यम्'(वा-८।३।९७॥)इति षत्वम् । परमेष्ठिनौ, परमेष्ठिनः इत्यादि । ७ जगतामधीष्ट इत्येवंशीलः **अधीश्वरः**। 'ईश ऐश्वर्ये'(अ.आ.से), 'स्थेशभासपिसकसो वरच्'३।२।१७५॥ इति वरच् । ८ शं कल्याणरूपतां भवते प्राप्नोति **शम्भुः**। 'भूङ् प्राप्तौ'(चु.आ.से.), आत्मनेपदी, 'आ धृषाद्वा'(गणसूत्रः)इति न णिच्, मितद्रवादित्वात्(वा-३।२।१८०॥) डुः । शं शाश्वतसुखम्, तत्र भवतीति वा । 'भू सत्तायाम्' (भ्वा.प.से.), मितद्रवादिः । शमयति क्लेशमिति वा। 'शमु उपशमे'(दि.प.से.), हेतुमण्णिजन्तः, 'शमेर्भुन्'( )इति भुन् वा। ''शं सुखं भवत्यस्मादिति व्युत्पत्तिस्त्वपादाने डुप्रत्ययाभावच्चिन्त्या''[मा.धातुवृत्तिः, भ्वादिः, धातुसं-१]इति माधवः । ९ स्वयमित्येतदव्ययमात्मनेत्येतदर्थे, तेन स्वयमात्मना तथा भव्यत्वादिसामग्रीपरिपाकवशात्, न तु परोपदेशात् भवतीति **स्वयम्भूः**। क्विप् । १० भगः त्रैलोक्याधिराजत्वम्, परज्ञानं वा अतिशयेनाऽस्यास्तीति **भगवान्** । 'तदस्यास्त्यस्मिन्-'५।२।९४॥ इत्यतिशयेऽर्थे मतुप्, 'मादुपधायाश्च मतोर्वोऽयवादिभ्यः' ८।२।९॥ इति मस्य वत्वम्, 'उगिदचाम्-'७।१।७०॥ इति नुम्, 'हल्ङ्याब्भ्यः-'६।१।६८॥ इति सुलोपः, 'संयोगान्तस्य लोपः'८।२।२३॥ । ११ जगतां प्रभुः **जगत्प्रभुः** । १२ तीर्यते संसारार्णवोऽनेनेति **तीर्थम्** । 'तॄ प्लवनतरणयोः'(भ्वा.प.से), 'पातॄतुदिवचिरिचिसिचिभ्यस्थक्'(उणा-१६४), 'ॠत इद्धातोः' ७।१।१००॥, 'उरण् रपरः' १।१।५१॥, 'हलि च'८।२।७७॥ इति दीर्घत्वम् । तीर्थं[1] चतुर्विधः सङ्घः, प्रथमगणभृद् वा, तं करोति **तीर्थङ्करः** । 'डुकृञ् करणे'(त.उ.अ.) 'अभयादौ च' ( )इति खच्, 'अरुर्द्विषदजन्तस्य-'६।३।६७॥ इति नुम् (मुम्)। **१३ तीर्थकर** इत्यत्र 'कृञो हेतुताच्छील्यानुलोम्येषु'३।२।२०॥ इति टः । १४ जिनाः सामान्यकेवलिनस्तेषामीश्वरो **जिनेश्वरः** ॥२४॥ **१५** स्याद् अनेकान्तं वदतीत्येवंशीलः **स्याद्वादी** । 'स्यात्' इत्यव्ययमनेकान्तवाचकम्। 'वद व्यक्तायां वाचि' (भ्वा.प.से.) 'सुप्यजातौ-'३।२।७८॥ इति णिनिः, 'अत उपाधायाः' ७।२।११६॥ इति वृद्धिः । स्याद्वादिनौ स्याद्वादिनः इत्यादि । स्याद्वादनं स्याद्वादः, स्याद्वादोऽस्यास्तीति वा । 'अत इनि ठनौ'५।२।११५॥ इतीनिः । यौगिकत्वाद् अनेकान्तवाद्यपि। **१६** अभयं मोक्षः, तं ददाति **अभयदः**, भयम् इहपरलोकादानादि सप्तधा, एतत्प्रतिपक्षतोऽभयं विशिष्टमात्मनः स्वास्थ्यं ददाति वा, निरुपधिपरदुःखहानेच्छत्वात् । 'डुदाञ् दाने'(जु.उ.अ.) 'सुपि' ३।२।८॥ इति योगविभागात् कः, 'आतो लोप इटि च' ६।४।६४॥ इत्यालोपः । **१७** सर्वेभ्यः प्राणिभ्यो हितः **सार्वः**। शैषिकोऽण् । 'तस्मै हितम्'५।१।५॥ इति छप्रत्यये सर्वीयोऽपि। 'जयन्ति ते सदा सन्तः सर्वीया यैरुपमार्जितम्[ ]इत्यादिप्रयोगाः। **१८** सर्वम् अतीतानागतवर्तमानादिकं जानाति **सर्वज्ञः**। 'ज्ञा अवबोधने'(क्र्या.प.अ.), 'आतोऽनुपसर्गे कः' ३।२।३॥, 'आतो लोप इटि च'६।४।६४॥ **१९** सर्वं पश्यतीत्येवंशीलः **सर्वदर्शी** । 'दृशिर् प्रेक्षणे'(भ्वा.प.अ.), 'सुप्यजातौ णिनिस्ताच्छील्ये'३।२।७८॥, 'पुगन्तलघूपधस्य-'७।३।८६॥ इति गुणः। **२०** सर्वथाऽऽवरणविलये चेतनास्वरूपाऽऽविर्भावः, केवलम्, तदस्यास्ति **केवली** । **२१** देवानामप्यधिदेवः **देवाधिदेवः**। **२२** बोधिरर्हत्प्रणीतधर्मप्राप्तिः, तां ददाति **बोधिदः** । ''बोधिर्बोधसमाधौ (बौद्धसमाधौ) चार्हद्धर्माप्तौ च पिप्पले''[अनेकार्थसङ्ग्रहः २।२४०]इत्यनेकार्थः । **२३** पुरुषाणामुत्तमः **पुरुषोत्तमः**। पुरुषेभ्य उत्तमः पुरुषोत्तम इति पञ्चमीयोगविभागात् समासो वा। **२४** विशेषेण इतो गतो रागो अस्मादिति **वीतरागः**। **२५** यथाभूतार्थोपदेष्टृत्वाद् **आप्तः**। पञ्चविंशतिः सामान्य[3]तस्तीर्थङ्कर[4]नाम्नाम् ॥२५॥

**एतस्यामवसर्पिण्यामृषभो[1]ऽजित[2]शम्भवौ[3] ।**
**अभि[4]नन्दनः सुमति[5]स्ततः पद्म[6]प्रभाभिधः ॥२६॥**
**सुपार्श्व[7]श्चन्द्र[8]प्रभश्च सुविधि[9]श्चाथ शीतलः[10] ।**
**श्रेयांसो[11] वासुपूज्य[12]श्च विमलो[13]ऽनन्त[14]तीर्थकृत् ॥२७॥**
**धर्मः[15] शान्तिः[16] कुन्थु[17]ररो[18]मल्लि[19]श्च मुनिसुव्रतः[20] ।**
**नमि[21]र्नेमिः[22] पार्श्वो[23] वीर[24]श्चतुर्विंशतिरर्हताम् ॥२८॥**

**एतस्याम्** इति वर्तमानायां दशकोटाकोटीसागरोपमप्रमाणायाम्, **अवसर्पिण्याम्** कालविशेषे । **१** ऋषति गच्छति परमं[5] पदमिति **ऋषभः** । 'ऋषी गतौ'(तु.प.से.), 'ऋषिवृषिभ्यां किदभच्'[6](उणा-४०३)इत्यभच् । यद्वा ऊर्वोर्वृषभचिह्नं भगवतोऽ-

१. इतोऽग्रे 'च' इति १प्रतौ दृश्यते ॥ २. 'इगुपधेति कः' इति २.३.४ ॥ ३. 'सामान्यतो-' इति १॥ ४. '-तीर्थकर-' इति २.४॥ ५. 'परम-' इति २ ॥ ६. 'ऋषिवृषिभ्यां कित्' (उणा-४०३) इत्युणादिगणे॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भूत्, भगवतो जनयित्र्या च चतुर्दशस्वप्नानामादौ वृषभो दृष्टः, तेन हेतुना **ऋषभः** प्रोच्यते । २ परीषहोपसर्गादिभिर्न जीयते स्मेति **अजितः**। 'जि अभिभवे'(भ्वा.प.अ.), 'निष्ठा' ३।२।१०२॥ इति क्तः । सर्व एव च भगवन्तो यथोक्तस्वरूपा एवेत्यतो विशेषनामार्थमाहगर्भेऽस्मिन् द्यूते राज्ञा भगवज्जननी नै जितेति अजितः[1] । ३ शमिति मान्यमव्ययम्, सुखवाचि कल्याणवाचि च । शं सुखं श्रेयो वा, तस्य भवः सत्ता यस्मिन् स **शम्भवः**। शं सुखं श्रेयो वा, तस्य भव आस्तिर्वा यस्मात् स शंभवः । शंरूपो भवो जन्मास्येति वा । ''भवः सत्तासिजन्मसु रुद्रे श्रेयसि''[अनेकार्थसङ्ग्रहः, २।५२१॥]इत्यनेकार्थः। संभवो दन्त्यादिरपि, तत्र संभवन्ति चतुस्त्रिंशदतिशयगुणा अस्मान्निति संभवः । सर्वेऽपि भगवन्तो यथोक्तस्वरूपा एव, अतो विशेषार्थऽभिधानं तु गर्भस्थेऽस्मिन् भगवति अभ्यधिकसस्यसंभवात् संभवः । ४ अभिनन्द्यन्ते देवेन्द्रादिभिरिति **अभिनन्दनः** ।'टुनदि समृद्धौ'(भ्वा.प.से.), कर्मणि ल्युट् । विशेषार्थस्तु गर्भात् प्रभृत्येवाऽभीक्ष्णं शक्रेन्द्रेणाभिनन्दनाद् अभिनन्दनः । ५ शोभना मतिः अस्य **सुमतिः** । विशेषाभिधाननिबन्धनं तु गर्भस्थेऽर्हति मातुः सुनिश्चिता मतिरासीदिति **सुमतिः** । ६ निष्पङ्कतामङ्गीकृत्य पद्मस्येव प्रभा यस्य स **पद्मप्रभः**। विशेषाभिधाननिबन्धनं तु गर्भस्थे भगवति जनन्याः पद्मशय्याशयनदोहदो देवतया पूरितः। पद्मवर्णश्च भगवानिति पद्मप्रभः ॥२६॥ ७ शोभनानि पार्श्वानि अस्येति **सुपार्श्वः** । विशषार्थस्तु गर्भगते भगवति जनन्यपि शोभनपार्श्वाऽभूदिति सुपार्श्वः । इह सर्वत्र सामान्याभिधानम्, विशेषाभिधानं चाऽधिकृत्याऽन्वर्थाभिधानविस्तरोऽनुक्तोऽपि द्रष्टव्यः । ८ चन्द्रस्येव प्रभा कान्तिरस्य **चन्द्रप्रभः**। गर्भस्थे भगवति मातुश्चन्द्रपानदोहदः। चन्द्रवर्णश्च भगवानिति चन्द्रप्रभः। ९ शोभनो विधिः सर्वत्र कौशल्यमस्य **सुविधिः**। गर्भस्थे भगवति जनन्यपि सर्वविधिषु विशेषेण कुशलाऽभूदिति सुविधिः। १० सकलसत्त्वसन्तापहरणात् सर्वजनाह्लादकत्वाच्च **शीतलः**। गर्भगतेऽस्मिन् पितुः पूर्वोत्पन्नदाहज्वरव्यथा भगवन्मातृकरकमलस्पर्शादुपशान्तेति शीतलः। ११ श्रेयांसौ प्रशस्यौ अंसावस्य **श्रेयान् [ श्रेयांसः ]** । सर्वस्यैव हितकर इति वा श्रेयांसः। अकारान्तत्वं पृषोदरादित्वात् । गर्भस्थे भगवति केनाप्यनाक्रान्तपूर्वा देवताधिष्ठिता शय्या जनन्या आक्रान्तेति, तत्र च श्रेयो जातमिति श्रेयांसः । १२ वसुपूज्यस्य नृपतेरयं **वासुपूज्यः**। 'तस्येदम्' ४।३।१२०॥ इत्यण्। वसूनां देवविशेषाणां पूज्यो वसुपूज्यः, वसुपूज्य एव वासुपूज्यः, 'प्रज्ञादिभ्यश्च' ५।४।३८॥ इत्यण् वा । गर्भस्थे भगवति वासवो देवराजो[2] अभीक्ष्णं भगवन्मातरं पूजयति स्म । वसूनि रत्नानि, तैः कृत्वा भगवद्गृहं च पूरयति स्मेति वासुपूज्यः । १३ विगतो मलो अस्मात्, विमलानि ज्ञानादीन्यस्येति वा **विमलः** । गर्भस्थे भगवति मातुस्तनुर्मतिश्च विमला जातेति वा विमलः । १४ नास्ति गुणानामन्तोऽस्येति **अनन्तः** । अनन्तकर्मांश जयादिति वा। अनन्तानि ज्ञानादीन्यस्येति वा । नास्ति अन्तो विनाशोऽस्येति वा। गर्भस्थे भगवति जनन्या रत्नविचित्रमतिमहाप्रमाणं च दामस्वप्ने दाम दृष्टम्, तस्मादनन्त इति वा । अनन्तजिदेकदेशो वा अनन्तः, भीमो भीमसेन इतिवत्। अनन्तश्चासौ तीर्थकृच्च **अनन्ततीर्थकृत्**। १५ दुर्गतौ प्रपतन्तं सत्त्वसङ्घं[3] धारयति[4] **धर्मः**। 'धृञ् धारणे' (भ्वा.उ.अ.), णिजन्तः, 'अर्ति-स्तु-सु-हु-सृ-धृ-क्षि-क्षु-भा-या-[वा]-पदि-यक्षि-नीभ्यो मन्'(उणा-१३७), 'णेरनिटि'६।४।५१॥ इति णिलोपः। गर्भगते भगवति जननी दानदयादिधर्मपरायणा जातेति वा धर्मः। १६ शान्तियोगात्, तदात्मकत्वात्, तत्कर्तृत्वाद् वा **शान्तिः**। गर्भस्थे भगवति पूर्वोत्पन्नाऽशिवोपशान्तिर्जातेति शान्तिः। १७ कुः पृथिवी, तत्र तिष्ठति **कुन्थुः**। पृषोदरादिः । गर्भस्थे भगवति रत्नानां कुन्थुराशिं दृष्टवतीति कुन्थुः। यद्वा मनोहराभ्युन्नतभूप्रदेशे स्तूपं रत्नविचित्रं माता स्वप्ने दृष्ट्वा जागृता, ततः कुन्थुः । १८-

''सर्वोत्तमे महासत्त्वः कुले य उपजायते ।
तस्याभिवृद्धये वृद्धैरसावर उदाहृतः॥१॥'' [ ]

इति वचनाद् **अरः** । गर्भगते भगवति जनन्या स्वप्नेऽतिप्रमाणः सर्वरत्नमयोऽतिसुन्दरो यस्मादरो दृष्टस्ततोऽर इति । १९ परीषहादिमल्लगणजयान्निरुक्तिवशाद् **मल्लिः**। तथा गर्भगते भगवति जनन्याः सुरभिपञ्चवर्णकुसुमशयनीयदोहदो देवतया पूरितस्तस्माद् मल्लिरिति वा। २० मनुते जगतस्त्रिकालावस्थामिति **मुनिः**। 'मनु अवबोधने'(त.आ.अ.), 'मनेरुच्चोपधायाः[5]'(उणा-५६२) इति इन्, [6]उपधायाश्चोत्वम्। शोभनानि व्रतान्यस्य सुव्रतः। मुनिश्चासौ सुव्रतश्च **मुनिसुव्रतः**। गर्भगते भगवति माता मुनिवच्छोभनव्रता जातेति वा । २१ नमन्ति प्रह्वीभवन्ति परीषहोपसर्गा अमुमिति **नमिः**। 'णमुँ[7] प्रह्वत्वे शब्दे च'(भ्वा.प.अ), 'इन् सर्वधातुभ्यः[8]' (उणा-५५७)इति इन्, 'णो नः' ६।१।६५॥ इति नत्वम् । गर्भस्थे भगवति शत्रुनृपैरपि प्रणतिः कृतेति वा नमिः। परीषहोसर्गादिनामनाद्वा। २२ नयति प्रापयति सन्मार्गदर्शनात् सिद्धिसुखमिति **नेमिः**। 'णीञ् प्रापणे'(भ्वा.उ.अ), 'नियो मिः' (उणा-४८३)इति मिप्रत्ययः, 'सार्वधातुकार्धधातुकयोः-' ७।३।८४॥ इति गुणः । धर्मचक्रस्य नेमिवन्नेमिरिति वा ।

१. 'निर्जितेत्यजितः' इति २॥ २. 'देवराजा' इति १॥ ३. '-सङ्घातं' इति ३॥ ४. '-यतीति' इति ३॥ ५. 'मनेरुच्च' इति मुद्रितोणादिगणे ॥ ६. 'उपाध्याया-' इति २॥ ७. 'णम-' इति मा. धातुवृत्तौ ॥ ८. 'सर्वधातुभ्य इन्' इत्युणादिगणे ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'णमु[1] प्रह्वत्वे शब्दे[च]'(भ्वा.प.अ.) अस्य पृषोदरादित्वाद् वा। 'अरिष्टनेमिपृतनाजमाशुम्'[ ]इति निगमः । 'नेमी' इति नकारान्तोऽपि, यथा 'वन्दे सुव्रतनेमिनौ'[ ]इति प्रयोगः । २३ स्पृशति जानाति ज्ञानेन सर्वमिति **पार्श्वः** । 'स्पृश संस्पर्शने' (तु.प.अ.), पृषोदरादिः। गर्भस्थे भगवति जनन्या शय्यास्थया सान्धकाररजन्यां कृष्णसर्पो दृष्ट इति गर्भानुभावोऽयमिति मत्वा पश्यतीति निरुक्तार्थत्वात् पार्श्वः। पार्श्वनामा यक्ष सेवकोऽस्येति वा। 'अर्शआदिभ्योऽच्' ५।२।१२७॥ पार्श्वनाथस्यैकदेशः पार्श्वो वा, भीमो भीमसेन इति यथा । २४ विशेषेण ईरयति कम्पयति प्रेरयति कर्मशत्रूनिति **वीरः**। विपूर्वः 'ईर गतिकम्पनयोः' (आ.आ.से.), पचाद्यच्। विशिष्टा ईः लक्ष्मीः तपोरूपा, तीर्थकृन्नामकर्मोदयसमुद्भूता वा, तया राजतेऽसौ वीरः । 'राजृ दीप्तौ'(भ्वा.उ.से.),'अन्येभ्योऽपि (अन्येष्वपि )'३।२।१०१॥ इति डः। यद्वा ईरणमीरः, 'ईर गतौ'(अ.आ.से.) भावे घञ्। 'ये गत्यर्थास्ते ज्ञानार्थाः प्राप्त्यर्थाश्च'[ ]इति वचनाद् विशिष्ट ईरो ज्ञानमस्य वीरः। यद्वा विशिष्टा पञ्चत्रिंशद्वाग्गुणोपेता इरा वाणी यस्येति वा। कर्मशत्रुसेनाजेतृत्वाद् दर्शितपराक्रमो वा वीर इव वीरः। यद्वा निरुक्तिवशात् कर्मततिविदारणाद् वा। यदुक्तम्- ''विदारणात् कर्मततेर्विभञ्जनात्, तपः श्रिया विक्रमतस्तथाद्भुतात्। भवत्प्रमोदः किल नाकनायकश्चकार ते 'वीर' इति प्रथाभिधानम्[2] ॥२॥'' [ ]इति.। **अर्हतां** वर्तमानानां **चतुर्विंशतिः** ऋषभादिवीरान्तानां जिनानां नामानीत्यर्थः ॥२८॥

अथ विशेषतो वर्तमानावसर्पिण्यां चतुर्विंशत्यर्हतां मध्ये यस्य यावन्ति नामानि तस्य तावन्त्याह-

**ऋषभो वृषभः**

१ ऋषति परमपदं[3] गच्छति **ऋषभः** । २ वृषति सम्यक् संयमभारमुद्वहति **वृषभः** । 'ऋषी गतौ'(तु.प.से.), 'वृष उद्वहने' 'ऋषिवृषिभ्यां कित्'(उणा-४०३)इत्यभच् । वृषभचिह्नत्वाद् वा । द्वे श्रीऋषभस्य ॥

**श्रेयान् श्रेयांसः**

१ त्रिभुवनस्यापि प्रशस्यतमत्वेन **श्रेयान्**। २ श्रेयांसौ अंसौ अस्य **श्रेयांसः**। पृषोदरादिः। द्वे श्रेयांसस्य॥

**स्यादनन्तजिदनन्तः**।

१ अनन्तान् कर्मांशान् जयति अभिभवति **अनन्तजित्**। 'जि अभिभवे'(भ्वा.प.अ.), 'क्विप्-'३।२।७६॥ इति क्विप्, 'ह्रस्वस्य-'६।१।७१॥ इति तुक्। अनन्तैर्ज्ञानादिभिः जयति, सर्वोत्कर्षेण वर्तत इति वा । 'जि जये'(भ्वा.प.अ.), 'क्विप्-'३।२।७६॥, 'ह्रस्वस्य-'६।१।७१॥ इति तुक्। २ नास्ति अन्तो अस्य **अनन्तः** । द्वे अनन्तनाथस्य ॥

**सुविधिस्तु पुष्पदन्तः**

१ शोभनो विधिः सर्वत्र कौशल्यमस्य **सुविधिः**। २ पुष्पाणि पुष्पकलिकाः, तद्वद् मनोहरदर्शनत्वात् **पुष्पदन्तः**। द्वे सुविधिनाथस्य ॥

**मुनिसुव्रतसुव्रतौ तुल्यौ ॥२९॥**

१ **मुनिसुव्रतः** प्राग् व्याख्यातः (अभि-श्लो-२८)। २ मुनिसुव्रतैकदेशः **सुव्रतः** । यथा सत्यभामा भामेतिवत् । तथा मुनिरपि, भीमो भीमसेन इतिवत् । द्वे मुनिसुव्रतस्य ॥२९॥

**अरिष्टनेमिस्तु नेमिः**

१ रिष्टं शुभम्, न रिष्टम् अरिष्टं अशुभम्, तस्याऽरिष्टस्य प्रध्वंसकत्वाद् नेमिः, चक्रधारे वा **अरिष्टनेमिः**। यद्वा गर्भस्थे भगवति जनन्या रिष्टरत्नमयो माहनेमिर्दृष्ट इति रिष्टनेमिः, नास्ति रिष्टनेमिरन्योऽस्मादिति अरिष्टनेमिः। अपश्चिमादिशब्दवद् नञ्पूर्वत्वे साधुः। अरिष्टनेमिरिकारान्त इन्नन्तश्च। 'मात्रा तस्यारिष्टनेमिरित्याख्यां तत्पिता व्यधात्'[ ]इति । २ नयति वाञ्छितसौख्यमिति **नेमिः**। द्वे नेमिनाथस्य ॥

**वीरश्चरमतीर्थकृत् ।**
**महावीरो वर्धमानो देवार्यो ज्ञातनन्दनः ॥३०॥**

२ चरमः[4] अन्तिमः, पश्चिम इति यावत्, स चासौ तीर्थकृच्च **चरमतीर्थकृत्** । ३ महांश्चासौ वीरश्च **महावीरः**। अन्तरङ्गारिजेतृत्वात्। ४ उत्पत्तेरारभ्य ज्ञानादिभिर्वर्द्धते **वर्द्धमानः**। 'वृधु वृद्धौ'(भ्वा.आ.से.) 'लटः शतृशानचाव प्रथमासमानाधिकरणे'३।२।१२४॥ इति लटः शानच्, 'आने मुक्'७।२।८२॥ इति मुक् । यद्वा गर्भस्थे भगवति सिद्धार्थराजकुलं धनधान्यादिभिर्वर्द्धते इति वर्द्धमानः। ५ आराद् हेयधर्माद् यातः आर्यः, देवश्चासावार्यश्च **देवार्यः**। देवैरर्य्यत अभिगम्यत इति वा। 'ऋ गतौ'(जु.प.अ.), 'ऋहलोर्ण्यत्'३।१।१२४॥, देवानाम् इन्द्रादीनाम् अर्यः, स्वामीति वा, 'अर्यः स्वामिवैश्ययोः' ३।१।१०३॥ इत्युक्तत्वात्। ६ ज्ञातकुलोत्पन्नत्वाद् ज्ञातः सिद्धार्थराजः, तस्य नन्दनः **ज्ञातनन्दनः** । षण्महावीरस्य ॥३०॥

**गणा नवाऽस्यर्षिसङ्घाः**

**अस्य** श्रीमहावीरजिनस्य **ऋषीणां** समूहाः **सङ्घाः गणाः नव**संख्याका अभूवन्[5]। यद्यपि भगवतः श्रीवीरस्यैकादश गणधराः आसंस्तथापि नवानामेव गणभृतां विभिन्ना वाचना अभूवन्, यतोऽकम्पिताचलभ्रात्रोर्मेतार्यप्रभासयोश्च समाना एव वाचना अभवन् इति नवैव गणाः। यत्त्रिषष्टिशलाकापुरुषचरिते-

१. 'णम ' इति मा धातुवृत्तौ ॥ २. 'प्रथमाभि ' इति २॥ ३. 'परमं' इति ३॥ ४. वीरशब्दः पूर्वं व्याख्यातः, अतो द्वितीयो चरमतीर्थकृत् ॥
५. 'अभवन्' इति १॥

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

"श्रीवीरनाथस्य गणधरेष्वेकादशस्वपि ।
द्वयोर्द्वयोर्वाचनयोः साम्यादासन् गणा नव ॥१॥"
[ त्रिषष्ठिशलाका-पर्व, १० । श्लो-१७५ ] इति ॥

**एकादशगणाधिपाः ।**

**इन्द्रभूतिरग्निभूतिर्वायुभूतिश्च गोतमाः ॥३१॥**
**व्यक्तः सुधर्मा मण्डितमौर्यपुत्रावकम्पितः ।**
**अचलभ्राता मेतार्यः प्रभासश्च पृथक्कुलाः ॥३२॥**

श्रीमहावीरस्य **गणाधिपाः** गच्छाधिपाः **एकादश**, तन्नामानि[1] । १ इन्द्रोऽस्य भूयादिति **इन्द्रभूतिः** । 'क्तिच्क्तौ च संज्ञायाम्'३।३।१७४॥ इति क्तिच्, 'तितुत्र-'७।२।९॥ इति इण्निषेधः । २ एवम् अग्निरस्य भूयादिति **अग्निभूतिः** । ३ वायुरस्य भूयादिति **वायुभूतिः** । एते त्रयोऽपि गोतमस्यापत्यानि गौतमाः । 'ऋष्यन्धकवृष्णिकुरुभ्यश्च'४।१।११४॥ इत्यण् । बहुत्वे 'तद्राजस्य बहुषु तेनैवास्त्रियाम्'२।४।६२॥ इत्यणो लुक्, **गोतमाः**, गोतमवंशजा इत्यर्थः ॥३१॥ ४ व्यज्यते गुणैः कृत्वेति **व्यक्तः** । विपूर्वः 'अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु'(रु.प.वे), क्तः, 'चोः कुः'८।२।३०॥ इति जस्य गत्वं, 'खरि च'८।४।५५॥ चर्त्वे ककारः, 'अनिदिताम्-'६।४।२४॥ इति न्लोपः । ५ शोभनो धर्मोऽस्य **सुधर्मा** । 'धर्मादनिच् केवलात्'५।४।१२४॥ इत्यनिच् । सुधर्माणौ, सुधर्माणः इत्यादि । अग्निवैश्यगोत्रजश्च । ६-७ ज्ञानादिगुणैर्मण्ड्यते स्म मण्डितः । 'मडि भूषायाम्'(भ्वा.प.से.), क्तः, 'आर्धधातुकस्येड् वलादेः'७।२।३५॥ इतीट् । मौर्यस्य पुत्रो मौर्यपुत्रः **मण्डितमौर्ययोः पुत्रौ** इति । मण्डितपुत्रोऽपि । एतौ वाशिष्ठकाश्यपगोत्रौ । ८ न कम्पितवान् इति **अकम्पितः** । 'कपि चलने'(भ्वा.आ.से), क्तः, 'आर्धधातुकस्य-'७।२।३५॥ इतीट् । गौतमगोत्रः । ९ अचलस्य भ्राता **अचलभ्राता** । हारितगोत्रः[2] । १० मां लक्ष्मीम् इतः प्राप्तः मेतः, स चासौ आर्यश्च **मेतार्यः** । ११ प्रभासते **प्रभासः** । 'भासृ दीप्तौ'(अ.आ.से.), पचाद्यच् । एतौ कोण्डिन्यौ । पृथग् विभिन्नानि कुलानि येषां ते पृथक्कुलाः ॥३२॥

**केवली चरमो जम्बूस्वामी**

१ **चरमः** अन्तिमः केवली केवलज्ञानवान्, न तु तीर्थङ्करः[3] । ततः परस्यामवसर्पिण्यां केवलिनामसम्भवात् सद्गुणरत्नमयत्वेन जम्बूद्वीपे जम्बूरिव जम्बूः, स चासौ स्वामी च **जम्बूस्वामी** ॥

**अथ प्रभवप्रभुः ।**

**शय्यम्भवो यशोभद्र सम्भूतविजयस्तथा[4] ॥३३॥**
**भद्रबाहुः स्थूलभद्रः श्रुतकेवलिनो हि षट् ।**

१ प्रभवन्ति शास्त्राण्यस्मादिति प्रभवः । प्रकृष्टो ज्ञानादिगुणानां भवः प्राप्तिर्वा यस्य, यस्माद्वा प्रभवः, स चासौ प्रभुश्च **प्रभवप्रभुः** । २ शय्यायां भवति **शय्यम्भवः** । पृषोदरादिः । ३ यशसा भद्रः कल्याणरूपो **यशोभद्रः** । ४ सं सम्यग् भूतः प्राप्तो रागादीनां विजयो येन स **सम्भूतविजयः** ॥३३॥ ५ भद्रौ बाहू अस्य **भद्रबाहुः** । ६ स्थूलमुपचितं भद्रं कल्याणमस्य **स्थूलभद्रः** । एते षडपि श्रुतेन केवलिनः **श्रुतकेवलिनः**, चतुर्दशपूर्वधरत्वात् ॥

**महागिरिसुहस्त्याद्या वज्रान्ता दशपूर्विणः ॥३४॥**

१ प्रसरत्परीषहोपसर्गादिपवनपूरैरकम्प्यमानत्वाद् महागिरिरिव **महागिरिः** । २ दुःकर्मद्रुमोन्मूलने सुहस्तीव **सुहस्ती** । महागिरिसुहस्तिनावाद्यौ येषां ते **महागिरिसुहस्त्याद्याः** । १० परतीर्थिकदर्पाचलदलने वज्र इव वज्रः वज्रस्वामी । सोऽन्ते येषां ते **वज्रान्ताः** । दशभिः पूर्वैः कृत्वा पूर्विणोः **दशपूर्विणः** । दश पूर्वाण्येषाम्, सन्तीति वा । 'अत इनिठनौ'५।२।११५॥ इतीनिः । ततः परं दशपूर्वधराणामसम्भवात् ॥३४॥

**इक्ष्वाकुकुलसम्भूताः स्याद् द्वाविंशतिरर्हताम् ।**
**मुनिसुव्रतनेमी तु हरिवंशसमुद्भवौ ॥३५॥**

इक्ष्वाकुसंज्ञं कुलं वंश **इक्ष्वाकुकुलं**, तत्र **सम्भूताः** उत्पन्नाः **अर्हताम्** ऋषभादीनां **द्वाविंशतिः** । तुशब्दोऽत्र विशेषे । **मुनिसुव्रतनेमी** एतौ हरिवंशसंज्ञके कुले **समुद्भवौ** जातौ ॥३५॥

**नाभिश्च जितशत्रुश्च जितारिरथ संवरः ।**
**मेघो धरः प्रतिष्ठश्च महसेननरेश्वरः[6] ॥३६॥**
**सुग्रीवश्च दृढरथो विष्णुश्च वसुपूज्यराट् ।**
**कृतवर्मा सिंहसेनो भानुश्च विश्वसेनराट् ॥३७॥**
**सूरः सुदर्शनः कुम्भः सुमित्रो विजयस्तथा ।**
**समुद्रविजयश्चाऽश्वसेनः सिद्धार्थ एव च ॥३८॥**

१ नह्यत्यऽन्यायकारिणो हाकारादिभिर्नीतिभिरिति **नाभिः**, चरमकुलकरः । 'णह बन्धने'(दि.उ.अ.), 'नहो भश्च'(उणा-५६५)इतीन्, स च णिद् भोन्तादेश । २ जिताः पराभूताः शत्रवोऽनेनेति **जितशत्रुः** । ३ एवं जिता अरयोऽनेन **जितारिः** । ४ संवृणोतीन्द्रियाणि **संवरः** । 'वृञ् वरणे'(स्वा.उ.से.), पचाद्यच् । ५ निखिलजनमनोदुःखसन्तापहरणाद् मेघ इव **मेघः** । ६ धरति पृथिवीभारमिति **धरः** । 'धृञ् धारणे'(भ्वा.उ.अ.), पचाद्यच् । शत्रुप्रचण्डपवनैरकम्प्यत्वाद् धर इव अद्रिरिव धरः । ७ प्रकर्षेण तिष्ठति धर्मकार्ये इति **प्रतिष्ठः** । ८ महापूज्या सेनाऽस्य

१. 'एतन्नामा ' इति २॥ २. 'हरितगोत्रः' इति २॥ ३. 'तीर्थकरः' इति १.४ ॥ ४. 'ततः' इति २॥ ५. १ महागिरिः, २ सुहस्ती, ३ श्रीगुणसुन्दरः, ४ श्यामार्यः, ५ स्कन्दिलार्यः, ६ रेवतीमित्रः, ७ श्रीधर्मा, ८ भद्रगुप्तः, ९ श्रीगुप्तः, १० वज्रस्वामीति दशपूर्वधराः ॥ ६. 'महासेन ' इति मुद्रिते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

महसेनः । नराणामीश्वरो नरेश्वरः । महसेनश्चासौ नरेश्वरश्च **महसेननरेश्वरः**[1] ॥३६॥ १ शोभना ग्रीवा यस्य स **सुग्रीवः** । १० दृढो रथोऽस्य **दृढरथः** । ११ वेवेष्टि व्याप्नोति बलैः पृथिवीमिति **विष्णुः** । 'विष्लृ व्याप्तौ'(जु.उ.अ.), 'विषेः किच्च'(उणा-३१९)इति नुः । १२ अन्यैर्नृपतिभिर्वसुभिः धनैः कृत्वा पूज्यते वसुपूज्यः । राजतेऽसौ राट् । वसुपूज्यश्चासौ राट् च **वसुपूज्य-राट्** । १३ कृतं वर्माऽनेन **कृतवर्मा**, नकारान्तः । १४ सिंहवत् पराक्रमवती सेनास्य **सिंहसेनः** । १५ धर्मार्थकाममोक्षवर्गेण भाति **भानुः** । 'भा दीप्तौ'(अ.प.अ.), 'दाभाभ्यां नुः'(उणा-३१२) इति नुः । १६ विश्वव्यापिनी सेनाऽस्य विश्वसेनः । स चासौ राट् च **विश्वसेनराट्** ॥३७॥ १७ तेजसा सूर इव **सूरः** । सूरयति(ते) विक्रान्तो भवति सूरः । 'सूर वीर विक्रान्तौ'[2](चु.-आ.से.), चुरादिः, ततोऽच् । १८ शोभनं दर्शनमस्य **सुदर्शनः** । १९ शौर्यौदार्यादिगुणपयसामाधारभूतत्वात् कुम्भ इव **कुम्भः** । २० शोभनानि मित्राण्यस्य **सुमित्रः** । २१ विजयते शत्रूनिति **विजयः** । २२ गाम्भीर्यगुणेन समुद्रस्यापि विजेतेति **समुद्र-विजयः** । २३ अश्वप्रधाना सेनाऽस्य **अश्वसेनः** । २४ सिद्धाः प्रतिष्ठां प्राप्ता अर्था पुरुषार्थाः धर्मादयोऽस्य **सिद्धार्थः** ॥३८॥

**मरुदेवा विजया सेना सिद्धार्था च मङ्गला ।**
**ततः सुसीमा पृथ्वी लक्ष्मणा रामा ततः परम् ॥३९॥**
**नन्दा विष्णुर्जया श्यामा सुयशाः सुव्रताऽचिरा ।**
**श्रीर्देवी प्रभावती च पद्मा वप्रा शिवा तथा ॥४०॥**
**वामा त्रिशला क्रमतः पितरो मातरोऽर्हताम् ।**

१ मरुद्भिर्देवैः दीव्यते स्तूयते **मरुदेवा** । 'दिवु क्रीडादौ'(दि.प.से.), घञ्, पृषोदरादिः । मरुदेवीति ङीबन्तमपि । २ विजयते **विजया** । ३ सह इनेन जितारिस्वामिना वर्तते **सेना** । ४ सिद्धोऽर्थः प्रयोजनं यस्याः सा **सिद्धार्था** । ५ मङ्गं पुण्यं लाति **मङ्गला** । ''मङ्गशब्दोऽमयुद्दिष्टः पुण्यार्थस्याभिधायकः'' [ ]इत्युक्तेः । मङ्गलहेतुत्वाद् वा मङ्गला । ६ शोभना सीमा कुलमर्यादाऽस्याः **सुसीमा** । ७ स्थिरत्वात् पृथिवीव **पृथिवी** । ८ लक्ष्मीः शोभा सम्पद् वाऽस्त्यस्याः **लक्ष्मणा** । ९ धर्मकर्मणि रमते **रामा** । 'रमु क्रीडायाम्'(भ्वा.आ.अ.), ज्वलादित्वाद् णः, ततष्टाप् ॥३९॥ १० नन्दति समृद्धिं प्राप्नोति सत्पुत्रेणेति **नन्दा** । 'टुनदि समृद्धौ'(भ्वा.प.से.), अच् । ११ वेवेष्टि व्याप्नोति सद्गुणैर्जगदिति **विष्णुः** । 'विष्लृ व्याप्तौ'(जु.उ.अ.), 'विषेः किच्'(उणा-३१९)इति नुः, 'रषाभ्यां-'८।४।१॥ इति णत्वम् । १२ जयति सर्वोत्कर्षेण वर्तते **जया** । 'जि जये'(भ्वा.प.अ.), पचाद्यच् । १३ श्यामवर्णत्वात् **श्यामा** । १४ शोभनं यशोऽस्याः **सुयशाः** । १५ पतिव्रतात्वाच्छोभनं व्रतमस्याः **सुव्रता** । १६ न चिरयति उत्सुका भवति धर्मकार्येष्विति **अचिरा** । १७ श्रीरिव **श्रीः** । १८ देवीव **देवी** । कृताभिषेकाद्[3] वा । १९ प्रभाऽस्त्यास्याः **प्रभावती** । 'तदस्यास्त्यस्मिन्-'५।२।९४॥ इति मतुप्, 'मादुपधाया-'८।२।९॥ इति वत्वम्, 'उगितश्च'४।१।६॥ इति ङीप् । २० पद्ममस्त्यस्याः पाणितले सुलक्षणत्वादिति **पद्मा** । अर्श-आदित्वादच् । २१ वपति धर्मबीजं **वप्रा** । 'टुवप् बीजतन्तु-सन्ताने[4]'(भ्वा.उ.आ.), 'ऋज्रेन्द्रा-'(उणा-१८६)इत्यादिना साधुः । २२ शिवहेतुत्वात् **शिवा** ॥४०॥ २३ **वामा** मनोज्ञत्वात् । पाप-कर्मसु प्रतिकुलत्वाद् वा । २४ त्रीणि ज्ञानदर्शनचारित्राणि शलति प्राप्नोति **त्रिशला** । 'शल गतौ'(भ्वा.प.से.), अच्, टाप् । **क्रमतः** अनुक्रमेण चतुर्विंशतितीर्थकृतां **पितरो मातरश्च** ज्ञेयाः ॥

**स्याद् गोमुखो महायक्षस्त्रिमुखो यक्षनायकः ॥४१॥**
**तुम्बुरुः कुसुमश्चापि मातङ्गो विजयोऽजितः ।**
**ब्रह्मा यक्षेट् कुमारः षण्मुखपातालकिन्नराः ॥४२॥**
**गरुडो गन्धर्वो यक्षेट् कुबेरो वरुणोऽपि च ।**
**भृकुटिर्गोमेधः पार्श्वो मातङ्गोऽर्हदुपासकाः ॥४३॥**

१ गोर्मुखमिव मुखमस्य **गोमुखः** । २ महांश्चासौ यक्षश्च **महायक्षः** । ३ त्रीणि मुखान्यस्य **त्रिमुखः** । ४ यक्षाणां नायको **यक्षनायकः** ॥४१॥ ५ तुम्बति अर्दयति विघ्नानिति **तुम्बुरुः** । 'तुबि अर्दने'(भ्वा.प.से.), 'तुम्बेरुरुः'(हैमोणादि-८१७)इत्युरुः, इदित्वान्नुम् । ६ कुस्यति श्लिष्यति पद्मप्रभोपासनायेति **कुसुमः** । 'कुस श्लेषणे'(दि.प.से.), 'कुसेरुलोम्भोण्वामेदाः[5]'(उणा-५४६)इत्युमः । ७ महाबलत्वाद् मातङ्ग इव **मातङ्गः** । ८ विजयते **विजयः** । 'जि जये'(भ्वा.प.अ.), अच् । ९ न केनापि जीयते स्मेति **अजितः** । १० बृंहति वर्धते प्रभावोऽस्मिन्निति **ब्रह्मा** । 'बृहि वृद्धौ'(भ्वा.प.से.), 'बृंहेर्नोऽच्च'(उणा-५८५) मनिन्, नकारस्य चाऽदादेशः । ११ यक्षाणामीशो **यक्षेट्** । १२ कुमारयति क्रीडयति **कुमारः** । 'कुमार क्रीडायाम्'(चु.उ.से.), चुरादिः, अच् । काम्यत इति वा कुमारः । 'कमु कान्तौ'(भ्वा.आ.से.), 'कमेः किदुच्चोप-धायाः'(उणा-४१८)इत्यारप्रत्ययः, उपधायाश्चोत्त्वम् । १३ षड् मुखान्यस्य **षण्मुखः** । १४ पातं रक्षितम् आलम् अनर्थोऽनेन

१. स्वोपज्ञटीकायां 'महासेननरेश्वरः' इति शब्दमाश्रित्य व्युत्पत्तिं कुर्वन्त्याचार्याः ॥ २. 'शूर वीर विक्रान्तौ' इति क्षीरतरङ्गिण्यादौ ॥ ३. '-कात्वाद्वा' इति १ ॥ ४. 'डुवप् बीजसन्ताने' इति क्षीरतरङ्गिण्यादौ ॥ ५. 'कुसेरुम्भोमेदेताः' इत्युणादिगणे ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**पातालः** । १५ किञ्चिन्नरः **किन्नरः** ॥४२॥ १६ प्रचण्डत्वाद् गरुड इव **गरुडः** । १७ गन्धयते अर्दयति विघ्नानिति **गन्धर्वः**। 'गन्ध अर्दने'(चु.आ.से.), 'गन्धेरर्व'( )इत्यर्वः । १८ यक्षाणामीशो **यक्षेट्** । १९ कुत्सितं बेरं शरीरमस्य **कुबेरः** । २० वृणाति ददाति वाञ्छितमिति **वरुणः**। 'वृञ् वरणे' स्वा.उ.अ.), 'कृवृदारिभ्य उनन्'(उणा-३३३) । २१ भृकुटीरिव भीषणत्वाद् **भृकुटिः**। २२ गां मेधते पवित्रीकरोति **गोमेधः**। २३ श्रीवामेयार्हतः सदा पादौ स्पृशति **पार्श्वः**। 'स्पृश संस्पर्शने'(तु.प.अ.), पृषोदरादित्वात् साधुः। श्रीपार्श्वजिनस्य, पार्श्ववर्तित्वाद् वा पार्श्वः। २४ महाबलवत्वाद् मातङ्गो हस्तीव **मातङ्गः**। **अर्हतां** श्रीऋषभजिनादिश्रीवीरान्तानामनुक्रमेण **उपासकाः**, सदा समीपवर्तित्वात् सेवका इत्यर्थः ॥४३॥

**चक्रेश्वर्यजितबला दुरितारिश्च कालिका ।**
**महाकाली श्यामा शान्ता भृकुटिश्च सुतारका ॥४४॥**
**अशोका मानवी चण्डा विदिता चाङ्कुशा तथा ।**
**कन्दर्पा निर्वाणी बला धारिणी धरणप्रिया ॥४५॥**
**नरदत्ताऽथ गान्धार्यम्बिका पद्मावती तथा ।**
**सिद्धायिका चेति जैन्यः क्रमाच्छासनदेवताः ॥४६॥**

१ चक्रस्य ईश्वरी **चक्रेश्वरी**, सदा चक्रधारिणीत्वात् । अप्रतिचक्रेत्यपि ।२ न केनापि बलेन जिता इति **अजितबला**। 'राजदन्तादिषु परम्'२।२।३१॥ इति बलशब्दस्य परनिपातः। पदैकदेशे पदसमुदायोपचाराद् अजिता इत्यपि । ३ दुरितानां पातकानामरिः **दुरितारिः** । ४ काली वर्णेन काल्येव **कालिका**। स्वार्थे कनि, 'केऽणः'७।४।१३॥ इति ह्रस्वत्वम्। ५ महती चासौ काली च **महाकाली** । स्वर्णवर्णाया अपि संज्ञेयम् । ६ **श्यामा** वर्णेन। अस्या अच्युतदेवीत्यप्यन्यन्नाम। ७ शमयति सुपार्श्वजिनसेवकविघ्नमिति **शान्ता**। 'शमु उपशमे'(दि.प.से.), णिजन्तः, 'वा दान्त-शान्त-पूर्ण-दस्त-स्पष्टच्छन्न-ज्ञप्ताः' ७।२।२७॥ इति साधुः, ततष्टाप् । ८ भापकभृकुटित्वात् **भृकुटिः**। ९ शोभना तारकाऽस्याः **सुतारका** ॥४४॥ १० अविद्यमानः शोकोऽस्याः **अशोका**। ११ मानवीव **मानवी**। अभिगम्यदर्शनत्वात्। १२ चण्डते कुप्यति अभक्तेभ्य इति **चण्डा**। 'चडि कोपे' (भ्वा.आ.से.), अच् । चण्डा प्रचण्डत्वाद् वा। १३ विद्यते ज्ञायते लोके **विदिता** । १४ अङ्कुशमायुधरूपमस्त्यस्याः **अङ्कुशा**। अर्शआदित्वाच्, टाप्। १५ 'कम्' इत्यव्ययं कुत्सितार्थे, कं कुत्सितं दृप्यति मोचयति **कन्दर्पा** । 'दृप हर्षणमोचनयोः' (दि.प.अ.), अच्, टाप् । १६ निर्वाति भक्तजनानां दुःखवह्निरनया **निर्वाणी** । निर्पूर्वः 'वा गतिगन्धनयोः'(अ.प.-अ.), क्तः, 'निर्वाणोऽवाते'८।२।५०॥ इति साधुः, गौरादित्वाद् ङीष् । १७ बलमस्त्यास्याः **बला** । अर्शआदित्वादच् । १८ मातुलिङ्गादीन्यवश्यं धरति **धारिणी** । 'धृञ् धरणे'(भ्वा.उ.अ.), 'आवश्यकाधमर्ण्ययोर्णिनिः'३।३।१७०॥ 'ऋन्नेभ्यः'४।१।५॥ इति ङीप् । १९ धरणनाम्न उरगेन्द्रस्य प्रिया **धरणप्रिया**। अदोऽभिधानं वैरोट्या इत्यपि ॥४५॥ २० नरेभ्यो दत्तमभिलषितसौख्यमनया **नरदत्ता**। २१ गां भुवं धारयति **गान्धारी**। पृषोदरादिः। २२ लोकानामम्बेव **अम्बिका**। 'इवे प्रतिकृतौ' ५।३।९६॥ इति कन्, टाप्, 'प्रत्ययस्थात्-'७।३।४४॥ इतीत्वम्। कुष्माण्ड्यपि। २३ पद्मं करेऽस्त्यस्याः **पद्मावती**। 'तदस्यास्ति-' ५।२।९४॥ इति मतुप्, 'मादुपधायाश्च मतोऽर्वोयवादिभ्यः'८।२।९॥ इति मस्य वत्वम्, 'मतौ बह्वचोऽनजिरादीनाम्'६।३।११९॥ इति दीर्घत्वम् 'उगितश्च'४।१।६॥ इति ङीप्। २४ सिद्धानयते **सिद्धायिका** । 'अय गतौ'(भ्वा.आ.से.), ण्वुल्, 'युवोरनाकौ' ७।१।१॥, 'प्रत्ययस्थात्-'७।३।४४॥ इतीत्वम्। जिना देवताः सन्त्यासामिति **जैन्यः** । 'सास्य देवता'४।२।२४॥ इति जिनशब्दादण्, 'टिड्ढाणञ्-'४।१।१५॥ इति ङीप्। एवमेताश्चतुर्विंशतिरपि जिनानां भक्ता **अनुक्रमेण** जिनशासनस्याधिष्ठात्र्यो देवताः **शासनदेवताः** ॥४६॥

**वृषो गजोऽश्वः प्लवगः, क्रौञ्चोऽब्जं स्वस्तिकः शशी।**
**मकरः श्रीवत्सः खड्गी महिषः शूकरस्तथा ॥४७॥**
**श्येनो वज्रं मृगश्छागो नन्द्यावर्तो घटोऽपि च ।**
**कूर्मो नीलोत्पलं शङ्खः फणी सिंहोऽर्हतां ध्वजाः ॥४८॥**

वृषप्रभृतिशब्दानां व्युत्पत्तिस्त्वग्रे वक्ष्यते । एते वृषादयश्चतुर्विंशतिः ऋषभादिजिनेन्द्राणां **ध्वजाः** चिह्नानि । एते च दक्षिणाङ्गविनिवेशिनो लाञ्छनभेदाः । ऊर्वोर्निवेशिनो लाञ्छनभेदा इत्येके। यदुक्तं हरिभद्रसूरिभिः ऋषभादिनामव्याख्याने "ऊर्व्वोर्वृषभलाञ्छनत्वात्, मातुश्चतुर्दशस्वप्नेषु प्रथमं वृषभदर्शनाद्वा वृषभः"[ ]इति ॥४७॥४८॥

---

१. 'भृकुटिरिव' इति १॥ २. 'केनापि बलेन न' इति १॥ ३. 'बलशब्दस्य' इति २.३ नास्ति ॥ ४. 'पूर्वनिपातः' इति २.३॥ ५. 'भापकत्वाद् भृकुटिरिव भृकुटिः' इति १॥ ६. 'वृषभ ' इति २.३.४॥ ७. ' वशिनो' इति २॥ ८. श्रीमदावश्यकसूत्रे द्वितीयेऽध्ययने 'उसभमजिअं च वंदे' इत्यादिप्राकृतश्लोकत्रयस्य व्याख्यां कुर्वद्भिर्हरिभद्रसूरिभिः-

"आसां व्याख्या-इहार्हतां नामानि अन्वर्थमधिकृत्य सामान्यलक्षणतो विशेषलक्षणतश्च वाच्यानि, तत्र सामान्यलक्षणमिदम्-'वृष उद्वहने' समग्रसंयमभारोद्वहनाद् वृषभः, सर्व एव च भगवन्तो यथोक्तस्वरूपा इत्यतो विशेषहेतुप्रतिपादनायाऽऽह-

"ऊरूसु उसभलंछण उसभं सुमिणंमि तेण उसभजिणो ।" पुव्वद्धं । जेण भगवओ दोसुवि ऊरूसु उसभा उप्पराहुत्ता जेणं च मरुदेवाए भगवईए चोद्दसण्हं महासुमिणाणं पढमो उसभो सुमिणे दिट्ठोत्ति, तेण तस्स उसभोति णामं कयं, सेसतित्थगराणं मायरो पढमं गयं तओ वसहं एवं चोद्दस, उसभोत्ति वा वसहोत्ति वा एगट्ठं"[आवश्यकसूत्रम्, पृ.५०१-२]इत्युक्तम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

येषां तीर्थङ्कराणां यादृग्वर्णस्तमाह-

**रक्तौ च पद्मप्रभवासुपूज्यौ**
**शुक्लौ च चन्द्रप्रभपुष्पदन्तौ ।**
**कृष्णौ पुनर्नेमिमुनी विनीलौ**
**श्रीमल्लिपार्श्वौ कनकत्विषोऽन्ये ॥४९॥**

**पद्मप्रभवासुपूज्यौ** जिनौ **रक्तौ** रक्तवर्णौ, **चन्द्रप्रभपुष्पदन्तौ** जिनौ **शुक्लौ** शुक्लवर्णौ, **नेमिमुनी** नेमिश्च मुनिश्च नेमिमुनी अरिष्टनेमिमुनिसुव्रतजिनौ **कृष्णौ** श्यामवर्णौ, **श्रीमल्लिपार्श्वौ** जिनौ **विनीलौ** विशिष्टनीलवर्णौ, **अन्ये** उक्तेभ्यः ऋषभप्रभृतयः षोडशजिनवरेन्द्राः कनकत्विषः कनकस्येव त्विट् कान्तिर्येषां ते **कनकत्विषः**, स्वर्णवर्णा इत्यर्थः ॥४९॥

**उत्सर्पिण्यामतीतायां चतुर्विंशतिरर्हताम् ।**
**केवलज्ञानी निर्वाणी सागरोऽथ महायशाः ॥ ५० ॥**
**विमलः सर्वानुभूतिः श्रीधरो दत्ततीर्थकृत् ।**
**दामोदरः सुतेजाश्च स्वाम्यथो मुनिसुव्रतः ॥५१॥**
**सुमतिः शिवगतिश्चैवाऽस्तागोऽथ निमीश्वरः ।**
**अनिलो यशोधराख्यः कृतार्घोऽथ जिनेश्वरः ॥५२॥**
**शुद्धमतिः शिवकरः स्यन्दनश्चाथ सम्प्रतिः ।**

**अतीतायां** गतायाम् **उत्सर्पिण्यां** दशसागरोपमकोटाकोटिप्रमाणायां कालविशेषे **अर्हतां** तीर्थकृतां केवलज्ञान्यादिसम्प्रतिपर्यन्तानां चतुर्विंशतिः, तत्रमानि । १ केवलज्ञानमस्यास्ति **केवलज्ञानी** । २ निर्वाणं मुक्तिरस्यास्ति **निर्वाणी** । उभयत्र 'अत इनिठनौ'५।२।१५५॥ इतीनिः । ३ ज्ञानागाधजलभरणे गाम्भीर्यगुणेन वा सागर इव **सागरः**। ४ महत् त्रिलोकीव्यापि यशोऽस्य **महायशाः**॥५०॥ ५ विगतो मलोऽस्य **विमलः**। ६ अनुभूतिः स्मृतिव्यतिरिक्तं ज्ञानम्, सर्वत्र सर्वज्ञत्वादनुभूतिरस्य **सर्वानुभूतिः**। ७ मुक्तिश्रियं धरति **श्रीधरः**। पचाद्यच् । ८ दत्तं दानमस्यास्ति दत्तः। अर्शआदित्वादच् । दत्तश्चासौ तीर्थकृच्च **दत्ततीर्थकृत्**। ९ जन्माभिषेकोत्सवे सुरैः क्षिप्तं सुरभिपुष्पदामनिगरणाद् लम्बमानमुदरेऽस्य **दामोदरः**। १० शोभनं जनमनोनयनाह्लादकत्वात् तेजोऽस्य **सुतेजाः** । ११ त्रिजगतामधीशत्वात् **स्वामी** । १२ मुनिश्चासौ सुव्रतश्च **मुनिसुव्रतः**॥५१॥ १३ शोभना मतिरस्याः अस्माद्वा **सुमतिः** । १४ शिवे मोक्षे गतिरस्य **शिवगतिः**। शिवप्रापका गतिर्ज्ञानमस्येति वा गाम्भीर्योद्रेकात् । १५ न विद्यते स्तागो लब्धमध्यताऽस्येति **अस्तागः**। १६ परीषहोपसर्गादीनां नामनाद् निमिः, स चासौ ईश्वरश्च **निमीश्वरः**, तृतीयस्वरादिः । १७ अव्याहतस्वैरगतित्वात्, महाबलवत्त्वाद्वा अनिल इव **अनिलः** । १८ यशांसि धरति **यशोधरः**। अच् । १९ चतुष्षष्टिसुरेन्द्रैः कृतोऽर्घः पूजाऽस्य **कृतार्घः**, रेफकवर्गचतुर्थान्तः। 'अर्घ पूजाविधौ मूल्ये'[अनेकार्थसङ्ग्रहः २।५१] इत्यनेकार्थः। २० जिनश्चासौ ईश्वरश्च **जिनेश्वरः**॥५२॥ २१ शुद्धा निर्मला मतिरस्य **शुद्धमतिः**। २२ शिवं क्षेमं करोति **शिवकरः**। २३ स्यन्दते सरसवचतनपियूषमिति **स्यन्दनः**। 'स्यन्दू प्रस्रवणे' (भ्वा.आ.वे.), नन्द्यादित्वाद् ल्युः । २४ नित्यप्रवृत्तित्वेन ध्यायमानत्वात् **सम्प्रतिः**। अतीतचतुर्विंशतिजिनेन्द्राणां नामानि ॥

**भाविन्यां तु पद्मनाभः शूरदेवः सुपार्श्वकः ॥५३॥**
**स्वयंप्रभश्च सर्वानुभितिर्देवश्रुतोदयौ**
**पेढालः पोट्टिलश्चापि शतकीर्तिश्च सुव्रतः ॥५४॥**
**अममो निष्कषायश्च निष्पुलाकोऽथ निर्ममः ।**
**चित्रगुप्तः समाधिश्च संवरश्च यशोधरः ॥५५॥**
**विजयो मल्लदेवौ चानन्तवीर्यश्च भद्रकृत् ।**

**भाविन्याम्** आगामिन्यामुत्सर्पिण्यां कालविशेषे पद्मनाभादिभद्रकृदन्तानां तीर्थङ्कराणां नामानि । १ यथा पद्मं नाभावस्य, पद्मं नाभिरस्येति वा **पद्मनाभः**। 'नाभे संज्ञायाम्'( )इत्यत्र, 'यस्येति च' ६।४।१४८॥ इतीकारलोपः । २ रागद्वेषादिशत्रुसैन्यं प्रति शूरो विक्रमवान्, स चासौ देवश्च **शूरदेवः**। ३ शोभनौ पार्श्वावस्य सुपार्श्वः, ततः स्वार्थे कनि **सुपार्श्वकः** ॥५३॥ ४ स्वयमात्मनैव, न तु परोपाधिना, प्रकर्षेण भाति **स्वयंप्रभः**। 'आतोऽनुपसर्गे कः'३।२।३॥, 'आतो लोप इटि च'६।४।६४॥ इत्यालोपः। ५ सर्ववित्त्वात् सर्वा निखिलाऽनुभूतिरस्य **सर्वानुभूतिः**। ६ देवेषु श्रुतः प्रतीतो **देवश्रुतः**। ७ उदेति उदयं प्राप्नोति धर्मोऽस्मादिति **उदयः**। उद्पूर्वः 'इण् गतौ'(अ.प.अ.), पचाद्यच्, 'सर्वाधातुक-' ७।४।८४॥ इति गुणः, 'एचोयवायावः' ६।१।७८॥ इत्ययादेशः। ८ पढति तत्त्वमिति **पेढालः**। पृषोदरादिः। ९ जन्मप्रभृत्येव ज्ञानत्रयेण पुटति संश्लिष्यति **पोट्टिलः**। 'स्थण्डिलादयश्च'४।२।१५॥ इति निपातनात् साधुः। १० शतमिति बह्वर्थोपलक्षणम्। शतं बह्व्यः कीर्तयोऽस्य **शतकीर्तिः**। ११ शोभनान्यहिंसादीनि व्रतान्यस्य **सुव्रतः** ॥५४॥ १२ नास्ति ममेति मदीयमेतदिति बुद्धिरस्य **अममः**। मम इति विभक्ति प्रतिरुपकमव्ययं मदीयताबुद्ध्यर्थे। १३ निर्गतः काषयेभ्यो **निःकषायः**। 'निरादयः क्रान्ताद्यर्थे पञ्चम्या'(वा-२।२।१८॥)इति समासः। १४ निश्चितं पोलति ज्ञानयशोभ्यां महान् भवति **निःपुलाकः**। निर्पूर्वः 'पुल महत्त्वे'(भ्वा.प.से.), 'बलाकादयश्च'(उणा-४५४)इति

१. टीकायां ''कृतार्घो रेफकवर्गचतुर्थान्तः'' इत्युक्तत्वात्, 'कृतार्घः' इति, मुद्रिते मूले तथा मु. स्वोपज्ञवृत्तावपि 'कृतार्थ-' इति दृश्यते ॥ २. 'मूल्या' इति २॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कित्याकप्रत्यये साधुः। १५ निःक्रान्तो ममताया **निर्ममः**। १६ चित्राण्याश्चर्यकारीणि गुप्तानि मनोवाक्काय-गुप्तयोऽस्य **चित्रगुप्तः**। चित्रमाश्चर्यकारि गुप्तं सर्वप्राणिरक्षणं यस्येति वा। १७ सम्यगाधीयते मनोऽत्रेति **समाधिः**। सदा समाधियुक्तत्वाद्वा समाधिः । १८ संवृणोति पञ्चेन्द्रियाणि **संवरः**। यद्वा संवरः आश्रवनिरोधोऽस्य संवरः। अर्शआदित्वादच् । १९ यशो धरति **यशोधरः**॥५५॥ २० विजयते सर्वोत्कर्षेण वर्तते जन्मादिकल्याणोत्सवैरिति **विजयः**। २१ कर्मभटानां मल्ल इव **मल्लः** । २२ दीव्यति क्रीडति परमानन्दपदे **देवः**। दीव्यते[1] स्तूयते भक्तजनैरिति वा। २३ अनन्तं वीर्यं बलमस्य **अनन्तवीर्यः**। २४ भद्रं कल्याणं करोति **भद्रकृत्**। भद्रोऽपि ॥

सङ्ग्रहमाह-

**एवं सर्वावसर्पिण्युत्सर्पिणीषु जिनोत्तमाः ॥५६॥**

एवं पूर्वोक्तप्रकारेण **सर्वावसर्पिण्युत्सर्पिणीषु** वर्तमानातीतानागतासु **जिनोत्तमाः** तीर्थङ्कराश्चतुर्विंशतिसंख्याका अवसर्पिण्युत्सर्पिणीकालविशेषेषु, भवन्तीति शेषः ॥५६॥

अत्र चतुस्त्रिंशदतिशयनामानि, तत्रादौ जिनेन्द्राणां चतुरः सहजातिशयानाह-

**तेषां च देहोऽद्भुतरूपगन्धो**
**निरामयः स्वेदमलोज्झितश्च ।**
**श्वा[2]सोऽब्जगन्धो रुधिरामिषं तु**
**गोक्षीरधाराधवलं ह्यवि[3]स्रम् ॥५७॥**
**आहारनीहारविधिस्त्वदृ[4]श्य-**
**श्चत्वार एतेऽतिशयाः सहोत्थाः ।**

१ तच्छब्दस्य पूर्वपरामर्शित्वात् **तेषाम्** इति तीर्थकराणां **देहः** कायः अद्भुतरूपगन्धो भवति ।अद्भुतमाश्चर्यकारि लोकोत्तरं रूपं गन्धश्च यस्य सः **अद्भुतरूपगन्धः**।पुनस्तेषां देहो **निरामयः**, निर्गत आमयेभ्यो रोगेभ्यो निरामयः, रोगरहितो भवति। स्वेदोङ्गजलं मलं स्वेदमलाभ्यामुज्झितः **स्वेदमलोज्झितः** । एष प्रथमः सहजातिशयः । २ बाह्यस्य वायोराचमनं श्वासः। अत्र श्वासशब्द उच्छ्वासस्याप्युपलक्षणम्, तेषां तीर्थकृतां **श्वासः** अब्जस्य पद्मस्येव गन्धोऽस्य **अब्जगन्धः**, कमलपरिमलमञ्जुल इत्यर्थः। इति द्वितीयः सहजाऽतिशयः । ३ रुधिरं चामिषं च **रुधिरामिषम्**। 'द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्' २।४।२॥ इत्येकवद्भावः ।मांसः शोणितं **गोक्षीरधारावद् धवलं** पाण्डुरं भवति[2], **अविस्रं** अनामगन्धीत्यर्थः[3]। इति तृतीयः सहजातिशयः ॥५७॥ ४ आहारणम्[4] **आहारः**[5] अशनं, निहरणं[6] **नीहारः**, मूत्रपुरीषोत्सर्गः, तयोः **विधिः** करणं, न दृश्यत इति **अदृश्यः**, मांसचक्षुषा, न पुनरवध्यादिदर्शनवतौ[7] पुंसां[8]। एषश्चतुर्थः सहजातिशयः। जगतोऽप्यतिशेरते औत्कर्षमाप्नुवन्ति तीर्थकरा एभिरिति **अतिशयाः** । अतिपूर्वः 'शीङ् स्वप्ने'(अ.आ.से), 'एरच्'३।३।५६॥ इत्यच् । **सहोत्थाः** सहजन्मानः ॥

अथ घातिकर्मक्षयोद्भवैकादशातिशयानाह-

**क्षेत्रे स्थि[1]तियोजनमात्रकेऽपि**
**नृदेवतिर्यग्जनकोटिकोटेः ॥५८॥**
**[2]वाणी नृतिर्यक्सुरलोकभाषा-**
**संवादिनी योजनगामिनी च ।**
**भा[3]मण्डलं चारु च मौलिपृष्ठे**
**विडम्बिताहर्पतिमण्डलश्रि ॥५९॥**
**साग्रे च गव्यूतिशतद्वये रु[4]जा**
**वै[5]र[6]तयो मा[7]र्यातिवृ[8]ष्ट्य[9]वृष्टयः ।**
**दुर्भिक्षमन्यस्वकचक्रतो भयं**
**[10]स्यान्नैत एकादश कर्मघातजाः ॥६०॥**

१ योजनप्रमाणेऽपि **क्षेत्रे** समवसरणपृथिव्यां नृणां देवानां तिरश्चां च जनानां कोटिकोटिसंख्यानां **स्थितिः** अवस्थानमिति प्रथमः कर्मक्षयजातोऽतिशयः ॥५८॥ २ **वाणी** भाषा अर्थादर्द्धमागधी । कीदृशी ? **नृतिर्यक्सुरलोकभाषासंवादिनी**[9], नृतिर्यक्सुरलोकभाषया संवदति तत्तद्भाषाभावेन परिणमतीत्येवंशीला या सा तथा । संपूर्वाद् 'वद व्यक्तायाम्'(भ्वा.प.से.), इत्यस्मात् 'सुप्यजातौ णिनिस्ताच्छील्ये'३।२।७८॥ इति णिनिः, 'अत उपधायाः'७।२।११६॥,'ऋन्नेभ्यः-'४।१।५॥ इति ङीप्। भगवद्वाणी अर्द्धमागधीत्याख्या भवति । यत्समवायाङ्ग सूत्रम्- "भयवं च णं अद्धमागहीए भासाए धम्ममाइक्खइ"[समवायाङ्गसूत्रम्, सूत्रम्-३४]इति, तथा च तट्टीका प्राकृतादीनां षण्णां भाषाविशेषाणां मध्ये या मागधीभाषा 'रसोर्लशौ मागध्याम्[10]' (हैमप्राकृतव्या-८।४।८८॥)इत्यादिलक्षणवती, सा असमाश्रित-

१.'दीव्यति' इति १ ॥ २.'भवति' इति १.३ नास्ति ॥ ३. आमः अपक्वमलः, तस्येव गन्धोऽस्य आमगन्धि, न आमगन्धि अनामगन्धि । "विस्रं स्यादामगन्धि यद्" १।५।१२॥ इत्यमरः ॥ ४.'आहारम्' इति २.४ ॥ ५.'आहरः' इति १.३॥ ६.'निहरं' इति २॥ ७.'-वतां' इति २.४॥ ८.'पुसां' इति २.४॥ ९.'नृतिर्यक्सुरलोकभाषासंवादिनी' इति १ प्रतौ नास्ति॥ १०.'मागध्याम्' इति प्राकृतव्याकरणसूत्रे नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वकीयसमग्रलक्षणार्द्धमागधीत्युच्यते ।तथा च श्रीहेमचन्द्राचार्याः स्वोपज्ञप्राकृतव्याकरणे[1]-''अत एत्सौ पुंसि मागध्याम्''[हैमप्राकृतव्या-८ ।४ ।२८७ ॥], ''मागध्यां भाषायां सौ परे अकारस्य एकारो भवति, पुंसि पुंल्लिङ्गविषये । एष मेषः, एशे मेशे । एष पुरुष, एशे पुलिशे[2] । करोमि भदन्त, करेमि भन्ते । अत इति किम् ? णिहिं[3], कली, गिली[4] । पुंसीति किम् ? जलम् । यदपि 'पोराणमद्धमागहभासा निअयं हवइ सुत्तं' [निशीथचूर्णि] इत्यादिना आर्षस्य अर्द्धमागधभाषानियतत्वमाम्नायि प्राचीनैस्तदपि प्रायोऽस्यैव विधानान्न वक्ष्यमाणलक्षणस्य । 'कयरे आगच्छइ, से तारिसे दुक्खसहे[5] जिइन्दिए'[ ]इत्यादि तट्टीका । एवं प्रायः 'अत एत्सौ पुंसि मागध्याम्'(हैमप्राकृतव्या-८ ।४ ।२८७ ॥)इत्येतल्लक्षणोपेता 'रसोर्लशौ मागध्याम्[6]'(हैमप्राकृतव्या-८ ।४ ।२८८ ॥)इत्यादिलक्षणविहीना, प्राकृतभाषालक्षणबहुलार्द्धमागधीत्यर्थः । तथा योजनगामिनी, योजनमेकं गच्छति व्योप्नोतीत्येवंशीला **योजनगामिनी च** इति द्वितीयः । ३ तथा भगवतो **मौलिपृष्ठे** शिरः पश्चिमभागे भानां प्रभाणां मण्डलं **भामण्डलं,** तच्च **विडम्बिताहर्पतिमण्डलश्रि** अधरीकृतवासरपतिबिम्बशोभम्, अत एव **चारु** द्रष्टृजनमनोहरमिति तृतीयः ॥५९॥ ४ **साग्रे** ऊर्ध्वाधोऽपेक्षया पञ्चविंशतियोजनाधिके क्रोशयुगं गव्यूतिः, गव्यूतीनां शतद्वयं गव्यूतिशतद्वयं शतयुग्मम्, तत्र **गव्यूतिशतद्वये**, योजनशते इत्यर्थः । इदमत्र हृदयम्[7]-प्रत्येकं चतुर्दिक्षु पञ्चविशतिपञ्चविंशतियोजनमध्ये, ऊर्ध्वं सार्द्धद्वादशयोजनमध्ये, अधश्च सार्द्धद्वादश योजनमध्ये **रुजा** रोगो ज्वरादिर्न स्यात् । अत्र रुजाशब्दः स्त्रियामाबन्त इति चतुर्थः । ५ तथा 'साग्रे गव्यूतिशतद्वये' इति सर्वत्र योज्यम् । **वैरं** मिथो विरोधो न भवतीति पञ्चमः । ६ तथा धान्याद्युपद्रवकारी **ईतिः** मूषिकादिप्राणिगणो न स्यादिति षष्ठः । ७ तथा **मारिः** औत्पातिकं सर्वगतमरणं न स्यादिति सप्तमः । ८ तथा **अतिवृष्टिः** अतिवर्षणं निरन्तरं वृष्टिर्न स्यादित्यष्टमः । ९ तथा **अवृष्टिः** सर्वथा वृष्ट्यभावो न स्यादिति नवमः । १० **दुर्भिक्षं** भिक्षाणामभावो न स्यादिति दशमः । ११ तथा **अन्यचक्रात् स्वचक्रात्** च भयं न स्यादित्येकादशः । **एते एकादश** अतिशयाः **कर्मघातजाः** कर्मणां ज्ञानावरणीयदर्शनावरणीयमोहनीयान्तरायाख्यानां चतुर्णां घातात् क्षयात् जायन्त इति कर्मघातजाः ॥६०॥

अथैकोनविंशतिदेवकृतातिशयान् व्याकरोति-

**खे धर्मचक्रं चमराः सपाद-**
**पीठं मृगेन्द्रासनमुज्ज्वलं च ।**
**छत्रत्रयं रत्नमयो ध्वजोंऽह्रि[8]-**
**न्यासे च चामिकरपङ्कजानि ॥६१॥**
**वप्रत्रयं चारु चतुर्मुखाङ्गता**
**चैत्यद्रुमोऽधोवदनाश्च कण्टकाः ।**
**द्रुमानतिर्दुन्दुभिनाद उच्चके-**
**र्वातोऽनुकूलः शकुनाः प्रदक्षिणाः ॥६२॥**
**गन्धाम्बुवर्षं बहुवर्णपुष्प-**
**वृष्टिः कचश्मश्रुनखाप्रवृद्धिः ।**
**चतुर्विधामर्त्यनिकायकोटि-**
**र्जघन्यभावादपि पार्श्वदेशे ॥६३॥**
**ऋतूनामिन्द्रियार्थानामनुकूलत्वमित्यमी ।**
**एकोनविंशतिर्दैव्याश्चतुस्त्रिंशच्च मीलिताः ॥६४॥**

१ **खे** आकाशे धर्मप्रकाशं चक्रं **धर्मचक्रं**[9] भवतीति प्रथमो देवकृतातिशयः । २ तथा खे आकाशे **चमराः** चामराणि भवन्तीति द्वितीयो देवकृतातिशयः । ३ तथा खे आकाशे पादपीठेन सह वर्तमानं **सपादपीठं मृगेन्द्रासनं** सिंहासनम् **उज्ज्वलं** निर्मलमच्छाऽऽकाशस्फटिकमयत्वादिति तृतीयः । ४ तथा खे **छत्रत्रयम्** आतपत्रत्रयमिति चतुर्थः । ५ तथा खे **रत्नमयः** रत्नप्रधानं **ध्वजः** इति पञ्चमः । ६ तथा अंह्र्योश्चरणयोर्न्यासः स्थापनम् **अंह्रिन्यासः**, तत्र । अत्र निमित्तम् सप्तमी, तेन पादन्यासनिमित्तं, **चामीकरपङ्कजानि** स्वर्णपद्मानि भवन्ति । अत्र बहुवचननिर्देशात् नवसंख्यानि कमलानि ज्ञेयानीति षष्ठः ॥६१॥ ७ तथा **वप्रत्रयं चारु** समवसरणे चारु मनोहरं रत्नस्वर्णरजतमयं प्राकारत्रयं भवतीति सप्तमः । ८ तथा चत्वारि मुखानि अङ्गानि गात्राणि च यस्य चतुर्मुखाङ्गः, तस्य भाव **चतुर्मुखाङ्गता** भवतीत्यष्टमः । ९ तथा चैत्याभिधानो द्रुमः **चैत्यद्रुमः** अशोकवृक्षः स्यादिति नवमः । १० तथा **अधोमुखाः कण्टकाः** भवन्तीति दशमः । ११ तथा द्रुमाणामानतिः **द्रुमानतिः** इत्येकादशः । १२ तथा **उच्चकैः** उच्चैर्विश्वप्रसरणशीलो **दुन्दुभिनादः** देवदुन्दुभिध्वनिर्भवतीति द्वादशः । १३ तथा **वातः** वायुः **अनुकूलः** भवति सुखकारित्वादिति

१. '' 'अत एत्सौ पुंसि मागध्याम्'४ ।२८७ ॥, मागध्यां भाषायां सौ परे अकारस्य एकारो भवति, पुंसि पुंल्लिङ्गे (एष मेषः) एशे मेशे, एशे पुलिशे, (करोमि भदन्त) करेमि भन्ते, अत इति किम् णिहो, कली, गिली, पुंसीति किम्, जलं । यद्यपि, 'पोराणमद्धमागह भासा निययं हवइ सुत्तं' इत्यादिना आर्षस्य अर्धमागधभाषानियतत्वम् आम्नायि वृद्धैस्तदपि प्रायोऽस्यैव विधानात्, न वक्ष्यमाणलक्षणस्य, कयरे आगच्छइ, से तारिसे दुक्खसहे जिइन्दिए, इत्यादि'' इति स्वोपज्ञप्राकृतव्याकरणे दृश्यते ॥ २. 'एसे पुंसि' इति २ ॥ ''एशे पुलेशे' इति १ ॥ ३. 'गिही' इति १.३ ॥ ४. 'किली, गिली' इति १ ॥ ५. 'दुस्सहे' इति ३ ॥ ६. 'मागध्याम्' इति प्राकृतव्याकरणे नास्ति ॥ ७. 'हद्यम्' इति ३ ॥ ८. ' जोऽङ्घ्रि-' इति मूले ॥ ९. 'धर्मचक्रं' इति २ प्रतौ नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्रयोदशः ।१४ तथा **शकुनाः** पक्षिणः **प्रदक्षिणाः** प्रदक्षिणगतयो भवन्तीति चतुर्दशः ॥६२॥१५ तथा **गन्धाम्बुवर्षं** गन्धोदकवृष्टिरिति पञ्चदशः ।१६ तथा **बहुवर्णपुष्पवृष्टिः** बहुवर्णानां पञ्चवर्णानां पुष्पाणां जानूत्सेधप्रमाणा वृष्टिरिति षोडशः ।१७ तथा **कचश्मश्रुनखाप्रवृद्धिः** कचानां शिरोजानामुपलक्षणत्वाद् लोम्नां च श्मश्रुणः कूर्चस्य नखानां करचरणोद्भवानामप्रवृद्धिः वृद्धिर्न स्यात् इति सप्तदशः ।१८ तथा भवनपत्यादि**चतुर्विधदेवनिकायानां जघन्यतः** अपि भगवत्सविधे **कोटिः** भवतीत्यष्टादशः ॥६३॥१९ तथा **ऋतूनां** वसन्तादीनां सर्वदा कुसुमादिसामग्रीभिः स्पर्शरसगन्धरूपशब्दानाम् **इन्द्रियार्थानाम्** अमनोज्ञानां निरासेन मनोज्ञानां च प्रादुर्भावेन **आनुकूल्यं** भवतीत्येकोनविंशः[1] ।इति देवतानिर्मिता **एकोनविंशतिः** श्रीमदर्हतामतिशयाः ।यदेते ग्रन्थान्तरेष्वन्यथाऽपि दृश्यन्ते तन्मतान्तरमवसेयम् ।एते च सहोत्थैश्चतुर्भिः कर्मघातजैश्चैकादशभिश्च समं **मीलिताः** सन्तश्चतुस्त्रिंशत्संख्या भवन्तीति ॥६४॥

अथ पञ्चत्रिंशतं भगवतो वचनातिशयानाह-

**संस्कारवत्त्वमौदात्त्यमुपचारपरीतता ।**
**मेघगम्भीरघोषत्वं प्रतिनादविधायिता ॥ ६५ ॥**
**दक्षिणत्वमुपनीतरागत्वं च महार्थता ।**
**अव्याहतत्वं शिष्टत्वं संशयानामसंभवः ॥ ६६ ॥**
**निराकृतान्योत्तरत्वं हृदयङ्गमतापि च ।**
**मिथःसाकाङ्क्षता प्रस्तावौचित्यं तत्त्वनिष्ठता ॥ ६७ ॥**
**अप्रकीर्णप्रसृतत्वमस्वश्लाघान्यनिन्दिता ।**
**आभिजात्यमतिस्निग्धमधुरत्वं प्रशस्यता ॥६८॥**
**अमर्मवेधितौदार्यं धर्मार्थप्रतिबद्धता ।**
**कारकाद्यविपर्यासो विभ्रमादिवियुक्तता ॥६९॥**
**चित्रकृत्त्वमद्रुतत्वं[2] तथाऽनतिविलम्बिता ।**
**अनेकजातिवैचित्र्यमारोपितविशेषता ॥७०॥**
**सत्त्वप्रधानता वर्णपदवाक्यविविक्तता ।**
**अव्युच्छित्तिरखेदित्वं पञ्चत्रिंशच्च वाग्गुणाः ॥७१॥**

१ संस्करणं संस्कारः, स विद्यते यस्मिंस्तत्संस्कारवत्, संस्कारवतो भावः **संस्कारवत्त्वम्**, संस्कृतादिलक्षणान्वितत्वमित्यर्थः। २ उदात्तस्य भावः **औदात्त्यम्** उच्चैर्वर्तित्वम् । ३ **उपचारपरीतता** अग्राम्यत्वम् ।४ **मेघगम्भीरघोषत्वं** जलधरस्येव गम्भीरध्वनित्वम्[3] । ५ प्रतिनादं विदधाति **प्रतिनादविधायी**, तस्य भावस्तत्त्वम्, ध्वनेः[4] प्रतिशब्दकर्तृत्वम् ॥६५॥ ६ **दक्षिणत्वं** सरलत्वम् । ७ **उपनीतरागत्वं** ग्राम्यमालवकैशिक्यादिरागोपेतत्वम्। एते सप्तातिशयाः शब्दापेक्षया, अतः परं वक्ष्यमाणा अर्थाश्रयाः ।८ **महार्थता** बृहदभिधेयता, परिपुष्टार्थाभिधायिता वा ।९ **अव्याहतत्वं** पूर्वापरवाक्यार्थविरोधाभाववत्त्वम्। १० **शिष्टत्वम्** अभिलषितप्रवचनोक्तार्थत्वम्, वक्तुः सकलजनशिष्टत्वसूचकत्वं वा ।११ **संशयानामसंभवः** असन्दिग्धपदार्थत्वम्, परिस्फुटार्थप्रतिपादनता वा ॥६६॥ १२ **निराकृतान्योत्तरत्त्वं** [5]परोट्टङ्कितदूषणाविषयता । १३ **हृदयङ्गमता** श्रोतृमनोहरता, दुर्गमस्याप्यर्थस्य परहृदये प्रवेशकरणत्वं वा । १४ **मिथःसाकाङ्क्षता** मिथः परस्परं पदानां वाक्यानां च सापेक्षत्वम्। १५ **प्रस्तावौचित्यं** देशकालाद्युचितत्वम्। १६ **तत्त्वनिष्ठता** विवक्षितजीवाऽजीवादिवस्तुस्वरूपानुकारिता ॥६७॥ १७ **अप्रकीर्णप्रसृतत्वं** शब्दस्य वाऽर्थस्य सुसम्बद्धस्य सतः प्रसरणं, न त्वसम्बद्धस्य। यद्वा अतिविस्तराऽसम्बद्धाधिकारित्वयोरभावः ।१८ **अस्वश्लाघान्यनिन्दिता** स्वकीयोत्कर्षपरनिन्दावियुक्तत्वम्।१९ **आभिजात्यं** वक्तुः प्रतिपाद्यस्यार्थस्य वा भूमिकानुसारिता।२० **अतिस्निग्धमधुरत्वं** [6]क्षीरमधुघृतगुडादिवत् सुखकारित्वम्।२१ **प्रशस्यता** प्रागुक्ताऽसाधारणगुणवत्त्वात् प्राप्तश्लाघता । २२ **अमर्मवेधिता** परमर्माप्रकाशनस्वरूपत्वम् । २३ **औदार्यं** प्रतिपाद्यस्यार्थस्याऽतुच्छत्वम्, [7]गुम्फगुणविशेषो वा । २४ **धर्मार्थप्रतिबद्धता** धर्मार्थोपेतत्वम्। २५ **कारकाद्यविपर्यासः** कारकाणि कर्त्रादीनि, तेषामविपर्यासः, आदिशब्दात् कालवचनलिङ्गादिव्यत्ययानवकाशत्वम् ।२६ **विभ्रमादिवियुक्तता** वक्तुर्मनसो भ्रान्तता विभ्रमः, स आदिर्येषां विक्षेपादीनाम्, स विभ्रमादिर्मनसो दोषस्तेन वियुक्तता रहितत्वम् ॥६७॥ २७ **चित्रकृत्त्वं** श्रोतुर्मनस उत्पादितानुपमकुतुकत्वम्। २८ **अद्रुतत्वं** शैघ्र्यरहितत्वम् । २९ तथाऽ**नतिविलम्बिता** विलम्बरहितत्वम् । ३० **अनेकजातिवैचित्र्यम्** जातयो वर्णनार्हवस्तुस्वरूपवर्णनानि, अनेकाश्च ता जातयश्चानेकजातयः, तत्संश्रयाद् विचित्रत्वम् ।३१ **आरोपितविशेषता** अन्यवचोपेक्षया आहितोत्कर्षत्वम् ॥ ७० ॥ ३२ **सत्त्वप्रधानता** साहसोपेतत्वम्। ३३ **वर्णपदवाक्यविविक्तता** वर्णाश्च पदानि च वाक्यानि च वर्णपदवाक्यानि, तेषां विविक्तता स्पष्टत्वम्। ३४ **अव्युच्छित्तिः** विवक्षितार्थसिद्धिं[8] यावदव्युच्छिन्नप्रमेयत्वम्। ३५ **अखेदित्वं** वक्तुः श्रोतुश्चानायासकर्तृत्वम् ।**पञ्चत्रिंशत्संख्याकाः** अर्हतां वाचां गुणाः वाग्गुणाः पञ्चत्रिंशद्वचनातिशयनामानि ॥७१॥

अथ श्रीमदर्हतामष्टादशशदोषाः न स्युरिति दर्शयति-

१. 'विंशतिः' इति२.४॥ २. 'अद्धुतत्वम्' इति मुद्रितमूले, 'अद्धुतत्वं प्रतीतम्' इति मुद्रितस्वोपज्ञवृत्तौ च ॥ ३. इतोऽग्रे 'निर्घोषत्वम्' इत्यधिकपाठः १ प्रतौ दृश्यते ॥ ४. 'ध्वनैः' इति४ ॥ ५. 'परदर्शित' इति ४ प्रतेष्टिप्पणी ॥ ६. 'क्षीरं' इति२॥ ७. 'गुम्फा-' इति२॥ ८. '-सिद्धं' इति २॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अन्तराया दानलाभवीर्यभोगोपभोगगाः ।**
**हासो रत्यरती भीतिर्जुगुप्सा शोक एव च ॥७२॥**
**कामो मिथ्यात्वमज्ञानं निद्रा चाविरतिस्तथा ।**
**रागो द्वेषश्च नो दोषस्तेषामष्टादशाप्यमी ॥७३॥**

दानं च लाभश्च वीर्यं[1] च भोगश्च उपभोगश्च दानलाभवीर्यभोगोपभोगास्तान् गच्छन्ति ते[2] **दानलाभवीर्यभोगोपभोगगाः** अन्तरायाः, तेन १ दानगतोऽन्तरायः **दानान्तरायः** इति प्रथमः। २ लाभगतोऽन्तरायो **लाभान्तरायः** इति[3] द्वितीयः। ३ वीर्यं शारीरी शक्तिस्तद्गतोऽन्तरायः **वीर्यान्तरायः** इति तृतीयः। ४ भुज्यते भोगः स्रक्चन्दनमाल्यान्नादिस्तद्गतोऽन्तरायः **भोगान्तरायः** चतुर्थः। ५ उपभुज्यते उपभोगः वस्त्रवनितादिस्तद्गतोऽन्तरायः [**उपभोगान्तरायः**] पञ्चमः । ६ **हासो** हास्यमोहनीयमिति षष्ठः। ७ **रतिः** पदार्थानामुपरि प्रीतिरिति सप्तमः। ८ **अरतिः** पदार्थानामुपरि अप्रीतिरित्यष्टमः । ९ **भीतिः** भयमिति नवमः। १० **जुगुप्सा** घृणेति दशमः। ११ **शोको** वैमनस्यम्, चित्तवैधुर्यमिति यावदित्येकादशः ॥७२॥ १२ **कामः** स्मर इति द्वादशः। १३ **मिथ्यात्वं** दर्शनमोह इति त्रयोदशः । १४ **अज्ञानं** जडत्वमिति चतुर्दशः । १५ **निद्रा** संवेश इति पञ्चदशः। १६ **अविरतिः** अप्रत्याख्यानमिति षोडशः । १७ **रागः** सुखाभिज्ञस्य सुखानुस्मृतिपूर्वः, सुखे तत्साधनेऽप्यभिमते विषये गर्ध इति सप्तदशः। १८ **द्वेषो** दोषाभिज्ञस्य दुःखानुस्मृतिपूर्वः, दुःखे तत्साधने वा क्रोध इति अष्टादशः । एवमुक्तविधा **अष्टादश दोषाः, तेषां** श्रीनाभेयाद्यर्हतां **न** भवन्तीति ॥७३॥

**महानन्दोऽमृतं सिद्धिः कैवल्यमपुनर्भवः ।**
**शिवं निःश्रेयसं श्रेयो निर्वाणं ब्रह्म निर्वृतिः ॥७४॥**
**महोदयः सर्वदुःखक्षयो निर्याणमक्षरम् ।**
**मुक्तिर्मोक्षोऽपवर्गः**

१ **महान्** आनन्दोऽत्रेति **महानन्दः** । २ नास्ति मृतं मरणमत्रेति **अमृतम्** । ३ सिद्ध्यति अस्यां[4] **सिद्धिः** । ४ निखिलकर्मक्षयात् केवलस्यात्मनो भावः **कैवल्यम्** । "शरीरेन्द्रियविरहेणात्मनः केवलत्वं कैवल्यम्"[ ]इति मिश्राः। ५ नास्ति पुनर्भवो जन्माऽत्रेति **अपुनर्भवः** । "भवः सत्तासिजन्मसु"[अनेकार्थसङ्ग्रहः २।५२१॥]इत्यनेकार्थः । तत्र गतः सन् न पुनर्भवति उत्पद्यते वा अपुनर्भवः । ६ सदाप्यानन्दमग्नैः शय्यते स्थीयतेऽत्र **शिवम्** । 'शीङ्' स्वप्ने(अ.आ.अ.), 'सर्वनिघृष्व-'(उणा-१५१)इति वे निपात्यते। ७ निश्चितं श्रेयो **निःश्रेयसम्**। 'अचतुरविचतुर-'५।४।७७॥ इत्यादिना साधुः। ८ अतिशयेन प्रशस्यं **श्रेयः** । प्रशस्यशब्दादतिशयेऽर्थे ईयसुनि, 'प्रशस्यस्य श्रः' ५।३।६०॥ इति श्रादेशः । ९ निर्वाति आत्मा अत्रेति **निर्वाणम्**। 'पै ओवै शोषणे'(भ्वा.प.से.), 'वा गतिगन्धनयोः'(अ.प.अ.) अतो वा, निष्ठा, 'निर्वाणोऽवाते'८।२।५०॥ इति साधुः। १० बृंहति वर्धते आनन्दोऽत्रेति **ब्रह्म**, पुंक्लीबलिङ्गः। 'बृहि वृद्धौ' (भ्वा.प.से.), 'बृंहेर्नोऽच्च मनिन्[5]'(उणा-५८५)इति मनिन्, नकारस्य चाऽकारादेशः । ११ निर्व्रियते सुखीभूयते अस्यामिति **निर्वृतिः** । 'वृञ् वरणे'(स्वा.उ.अ.), 'स्त्रियां क्तिन्'३।३।९४॥ ॥७४॥ १२ महान् ज्ञानस्योदयोऽत्रेति **महोदयः** । १३ सर्वदुःखानां जन्मजरादीनां क्षयोऽत्रेति **सर्वदुःखक्षयः**। १४ निर्यान्ति सर्वदुःखानि अत्र **निर्याणम्** । 'या प्रापणे'(अ.प.अ.), 'निष्ठा'३।२।१०२॥, 'संयोगादेरातो धातोः-'८।२।४३॥ इति नत्वम् । १५ न क्षरति चलति आत्मा, अस्मादिति **अक्षरम्** । 'क्षर सञ्चलने'(भ्वा.प.अ.), पचाद्यच् । अश्यते प्राप्यते क्षीणकर्मभिरिति वा । 'अशूङ् व्याप्तौ[6]' (स्वा.आ.वे.), 'अशेः सरन्[7]'(उणा-३५०)इति सरन्, 'व्रश्चभ्रस्ज-' ८।२।३६॥ इत्यादिना षत्वम्, 'षढोः कः सि'८।२।४१॥ इति कत्वम्, 'आदेशप्रत्यययोः'८।३।५९॥ इति षत्वम्, कृष्संयोगे क्षः । १६ मुच्यते सर्वकर्मभिरत्रेति **मुक्तिः**। 'मुच्लृ मोक्षणे'(तु.उ.अ.), 'स्त्रियां क्तिन्'३।३।९४॥ "शरीरेन्द्रियाभ्यामात्मनो मुक्तत्वं मुक्तिः"[ ]इति मिश्राः । १७ मुच्यते सर्वकर्मभिरात्मेति **मोक्षः** । 'मुच्लृ मोक्षणे' (तु.उ.अ.), 'युमुचिभ्यां षः'( )इति षः। मोक्ष्यन्ते अवसानं प्राप्यन्ते सर्वदुःखान्यत्रेति वा। 'मोक्ष अवसाने'(चु.प.से.), चुरादिः, 'एरच्'३।३।५६॥ मोक्षणं मोक्ष इति, भावे घञ् वा । १८ कर्मभिः अपवृज्यतेऽत्रेति **अपवर्गः**। 'वृजी वर्जने'(रु.प.से.), भावे घञ् । अष्टादश मोक्षस्य[8] । शेषश्चात्र-

"निर्वाणे स्याच्छीतीभावः शान्तिर्नैश्चिन्त्यमन्तिकः'
[शेषनाममाला १।१॥]इति ॥

**अथ मुमुक्षुः श्रमणो यतिः ॥७५॥**
**वाचंयमो यती साधुरनगार ऋषिर्मुनिः ।**
**निर्ग्रन्थो भिक्षुः**

१ मोक्तुमिच्छुः **मुमुक्षुः** । 'मुच्लृ मोक्षणे'(तु.उ.अ.), 'धातोः कर्मणः समानकर्तृकात्-'३।१।७॥ इति सन्, 'सन्यङोः' ६।१।९॥ इति द्वित्वं, 'सनाशंसभिक्ष उः'३।२।१६८॥ २ श्राम्यति

---

१. 'वीर्यश्च' इति४॥ २. २प्रतौ नास्ति ॥ ३. ४प्रतौ नास्ति ॥ ४. 'सिद्ध्यन्त्यस्यामिति' इति ४॥ ५. 'बृंहेर्नोऽच्च' इत्येवोणादिगणे ॥ ६. 'अशू व्याप्तौ सङ्घाते च' इति स्वामिसायणौ ॥ ७. 'सरः' इत्युणादिगणे॥ ८. इतोऽग्रे ४प्रतौ 'नामानि' इति दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तपसेति **श्रमणः**। 'श्रमु खेदे तपसि च'(दि.प.से.), नन्द्यादित्वाद् ल्युः। ३ यतते मोक्षाय **यतिः** । संयमयोगेषु यतमानः प्रयत्नवान् वा। 'यती प्रयत्ने'(भ्वा.आ.से.), 'इन् सर्वधातुभ्यः'[1](उणा-५५७)इतीन् ॥७५॥ ४ वाचं यच्छति **वाचंयमः** । 'यमु नियमने'[2](भ्वा.प.अ.), 'वाचंयमपुरन्दरौ च'६।३।६९॥ इति खचि साधुः । ५ यतं यतनमस्यास्तीति **यती** । 'अत इनिठनौ'५।२।११५॥ इतीनिः। ६ उत्तमक्षमादिभिर्गुणविशेषैर्भावितात्मा साध्नोति परमपदमिति **साधुः**। 'साध संसिद्धौ'(स्वा.प.अ.), 'कृ-वा-पा-जि-मि-स्वदि-साध्यशूभ्य' (उणा-१)इत्युण् । ७ नास्ति अगारं गृहमस्य **अनगारः** । ८ ऋषति गच्छति ज्ञानसंसारयोः पारमिति **ऋषिः**। 'ऋषी गतौ' (तु.प.से.), 'इगुपधात् कित्'(उणा-५५९)इतीन् । ऋषति जानाति तत्त्वमिति वा । ९ मन्यते जगतस्त्रिकालावस्थामिति **मुनिः**, पुंस्त्रीलिङ्गः । 'मनु (मन) ज्ञाने'(दि.आ.अ.), 'मनेरुच्चोपधायाः[3]'(उणा-५६२)इतीन्, उपधायाश्चोत्त्वम् । १० निःक्रान्तो ग्रन्थाद् द्रव्यादिति **निर्ग्रन्थः**। 'निरादयः क्रान्ताद्यर्थे पञ्चम्या'(वा-२।२।१८॥)इति समासः । ११ 'भिक्ष याच्ञायाम्' (भ्वा.आ.से.), यमनियमव्यवस्थितः कृतकारित्वानुमोदितपरिहारेण भिक्षते इत्येवंशीलो **भिक्षुः**। 'सनाशंसभिक्ष उः' ३।२।१६८॥ इत्युः प्रत्ययः । यद्वा नैरुक्तीशब्दव्युत्पत्तिः-'क्षुध बुभुक्षायाम्'(दि.प.अ.), क्षुध्यति बुभुक्षते भोक्तुमिच्छति चतुर्गतिकमपि संसारमस्मादिति । सम्पदादित्वात् क्विप् । क्षुद् अष्टप्रकारं कर्म, तां क्षुधं ज्ञानदर्शनचारित्रतपोभिर्भिनत्तीति भिक्षुः। पृषोदरादित्वादिष्टरूपसिद्धिः । द्वे हि शब्दस्य निमित्ते, तद्यथा-व्युत्पत्तिनिमित्तं प्रवृत्तिनिमित्तं च । यथा गोशब्दस्य, तथाहि-गोशब्दस्य व्युत्पत्तिनिमित्तं गमनक्रिया, गच्छति गौरिति व्युत्पत्तेः। तेन च गमनेन एकार्थिसमवायितया यदुपलक्षितं सास्नादिमत्त्वं, तत् प्रवृत्तिनिमित्तम् । तेन गच्छत्यगच्छति वा गोपिण्डे शब्दः प्रवर्त्तते, उभय्यामप्यवस्थायां प्रवृत्तिनिमित्तत्वात् । अश्वादौ तु न प्रवर्त्तते, यथोक्तरूपस्य प्रवृत्तिनिमित्तस्य तत्राभावात्। एवमत्रापि भिक्षुशब्दस्य द्वे निमित्ते। व्युत्पत्तिर्निमित्तं[4] (व्युत्पत्तिनिमित्तं प्रवृत्तिनिमित्तं) च, तत्र भिक्षणं व्युत्पत्तिनिमत्तम्, भिक्षते इत्येवंशीलो भिक्षुरिति व्युत्पत्तेः। तेन च भिक्षणेन एकार्थसमवायितया यदुपक्षितं इहपरलोकाशंसाविप्रमुक्ततया यमनियमेषु व्यवस्थितत्वम्, तत् प्रवृत्तिनिमित्तम्, तेन च भिक्षमाणेऽभिक्षमाणे वा भिक्षौ भिक्षुशब्दः प्रवर्त्तते, उभय्यामप्यवस्थायां प्रवृत्तिनिमित्तसद्भावात् । रक्तपटादौ न प्रवर्तते, नवकोट्यपरिशुद्धान्नभोजितया तेषु यथोक्तरूपस्य प्रवृत्तिनिमित्तस्याभावात् । एवं सर्वत्रोन्नेयम्। एकादश[5] साधोः ॥

**अस्य स्वं तपोयोगशमादयः ॥७६॥**

**अस्य** मुमुक्षोस्तपश्च योगश्च शमश्च **तपोयोगशमाः**, ते **आदिः** येषां ते तथा । आदिशब्दात् क्षान्त्यादयः । **स्वं** द्रव्यमुच्यते। तेन तपोधनः, तपस्वी, योगी, शमभृत्, क्षान्तिमानित्यादियौगिकनामानि भवन्ति ॥७६॥

**मोक्षोपायो योगो ज्ञानश्रद्धानचरणात्मकः ।**

मोक्षस्य उपायः कारणम्, हेतुरिति यावत्, **मोक्षोपायः योगः** उच्यते इत्यन्वयः। कीदृग्योगः ? **ज्ञानश्रद्धानचरणात्मकः**, ज्ञानं यथावस्थिततत्त्वावबोधः, श्रद्धानं च सम्यक्तत्त्वेषु रुचिः, चरणं चारित्रं सावद्ययोगपरित्यागः, तेषां द्वन्द्वे, तानि आत्मा स्वरूपं यस्य स ज्ञानश्रद्धानचरणात्मकः । एकं मोक्षोपायस्य ॥

**अभाषणं पुनर्मौनम्**

१ न भाष्यते **अभाषणम्** । 'भाषृ भाषणे[6]'(भ्वा.अ.से.), ल्युट्। २ मुनेर्भावः कर्म वा **मौनम्**, पुंक्लीबलिङ्गः।'इगन्ताच्च लघुपूर्वात्'५।१।१३१॥ इत्यण् । द्वे मौनव्रतस्य॥

**गुरुर्धर्मोपदेशकः ॥७७॥**

१ गृणाति हिताहिततत्त्वमिति **गुरुः**। 'गॄ शब्दे'(क्र्या.-प.से.), '[7]कृग्रोरुच्च'(उणा-२४)इत्युप्रत्ययः, ऋकारस्य च उकारः, 'उरण् रपरः'१।१।५१॥ २ धर्ममुपदिशति **धर्मोपदेशकः**। 'दिश अतिसर्जने'(तु.प.अ.), 'ण्वुल्तृचौ'३।१।१३३॥ इति ण्वुल् । 'स्यान्निषेकादिकृद् गुरुः'[अमरकोषः२।७।७॥] इत्यमरः । "यन्मनुः-

"निषेकादीनि कर्माणि यः करोति यथाविधि ।
संभावयति चान्नेन[8] स विप्रो गुरुरुच्यते ॥१॥"

[मनुस्मृतिः, २।१४२]।

निषेको गर्भाधानविधिः । आदिशब्दात् पुंसवनसीमन्तोन्नयनजातकर्मनामकरणान्नप्राशनचौडोपनयनादी[नि]"[अम.क्षीर. २।७।७॥]इति क्षीरस्वामी । द्वे धर्मोपदेष्टुः ॥७७॥

**अनुयोगकृदाचार्यः**

१ अनुयोगं व्याख्यां करोति अनुयोगकृत्, व्याख्यानकर्ताऽऽचार्य उच्यत इत्यर्थः । आचर्यते सेव्यते शिष्यैर्विद्यार्थं विनयार्थं वा **आचार्यः**। आङ्पूर्वः 'चर गतौ'(भ्वा.प.से.),

१.'सर्वधातुभ्य इन्' इत्युणादिगणे ॥ २.'यम उपरमे' इति क्षीरतरङ्गिण्यादौ ॥ ३.'मनेरुच्च' इत्येवोणादिगणे ॥ ४.'व्युत्पत्तिप्रवृत्तिनिमित्तं' इति ३.४॥
५.'साधोः एकादश नामानि' इति४ ॥ ६.'भाष व्यक्तायां वाचि' इति क्षिरतरङ्गिण्यादौ ॥ ७.'कृग्रो-' इत्युणादिगणे ॥ ८.'चानेन' इति १.२ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'ऋहलोर्ण्यत्'३।१।१२४॥ ज्ञानदर्शनादिपञ्चविधाचारे साधुरिति, यति वा, 'यस्येति च'३।४।१४८॥ इत्यकारलोपः। आचारान् यातीति व। 'क्वचिद् ड'[1]:'(हैमसू-५।१।१०१॥)इति डः, डित्त्वाट्टिलोपः। आचारानाचष्टे इति, 'तत्करोति तदाचष्टे' (गणसू-)इति णिचि, 'शिक्यास्य-'(हैमोणा-३६४)इति निपात्यते। "आचारान् गृह्णाति ग्राहयति, कर्मण्यणि, पृषोदरादिर्वा"[ ]इति न्यासः। 'मन्त्रव्याख्याकृदाचार्यः'[अमरकोषः २।७।७॥]इत्यमरः। मन्त्रकृद्वेदाध्यापनाद् विशिष्टाऽऽख्याकृत्, उपनयनेन द्विजत्वोपादानात्। यदुक्तम्-

"उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः।
साकल्यं[2] सरहस्यं च तमाचार्यं प्रचक्षते ॥१॥"

[मनुस्मृतिः २।१४०]इति। एकं व्याख्याकर्तुः॥

**उपाध्यायस्तु पाठकः।**

१ उपेत्यागत्याधीयतेऽस्मादिति **उपाध्यायः**। अधिपूर्वः 'इङ् अध्ययने'(अ.आ.अ.), 'इङश्च'३।३।२१॥ इति घञ्, 'अचो ञ्णिति'७।२।११५॥ वृद्धिः, 'एचोऽयवायावः'६।१।७८॥ २ पाठयति **पाठकः**। 'पठ व्यक्तायां वाचि'(भ्वा.प.से.), हेतुमण्णिजन्तः, 'ण्वुल्तृचौ'३।१।१३३॥ इति ण्वुल्। "अध्यापक उपाध्यायः"[हलायुधः, श्लो-२।४००]इति हलायुधः। 'द्वौ समौ'[ ]इति तट्टीका। द्वे उपाध्यायस्य ॥

**अनूचानः प्रवचने साङ्गेऽधीती गणिश्च सः ॥७८॥**

१ अनु उवाचेति **अनूचानः**। 'वच परिभाषणे' (अ.प.अ.), 'उपेयिवाननाश्वाननूचानश्च'३।२।१०९॥ इति निपातनात् साधुः। प्रोच्यते **प्रवचनम्**। 'वच परिभाषणे' (अ.प.अ.), ल्युट्। प्रवचनमागमस्तत्र, **साङ्गे** इत्याचाराङ्गाद्यङ्गयुक्ते अधीतमनेनेति **अधीती**। 'इष्टादिभ्यश्च'५।२।८८॥ इतीनिः। प्रवचनेऽत्र सप्तमी 'क्तस्येन्विषयस्य कर्मण्यपि'(वा-२।३।३६॥)इत्यनेन। २ गण्यते पूज्यतया **गणिः**। 'गण संख्याने' (चु.उ.से), चुरादिः, 'अच इः'(उणा-५७८)इति इः। जैनमते साङ्गसिद्धान्तज्ञातुर्द्वे। शैवमते तु "शिक्षाद्यङ्गषट्कोपेते प्रवचने वेदेऽधीतिनः कृताध्ययनस्य द्वे"[ ]इति मिश्राः ॥७८॥

**शिष्यो विनेयोऽन्तेवासी**

१ शिष्यत उपदिश्यतेऽसाविति **शिष्यः**। 'शासु अनुशिष्टौ'(अ.प.से.), 'एति-स्तु-शास्-वृ-दृ-जुषः क्यप्' ३।१।१०९॥, 'शास इदङ्हलोः'६।४।३४॥ इतीत्वम्। २ विनीयते **विनेयः**। 'णीञ् प्रापणे'(भ्वा.उ.अ.), 'अचो यत्' ३।१।९७॥ इति यत्। ३ अन्ते गुरुसमीपे वस्तुं शीलमस्य **अन्तेवासी**। 'वस निवासे'(भ्वा.प.अ.), 'सुप्यजातौ णिनिस्ताच्छील्ये'३।२।७८॥ इति णिनिः, 'शयवासवासिष्वकालात्'६।३।१८॥ इति सप्तम्यलुक्। प्रत्ययान्तरविषयश्च वसिः शिष्ये प्रयुक्तो दृश्यते। "वसन्निवान्ते विनयेन जिष्णुः" [किरातार्जुनीयम् ३।२४]इति भारविः। वसिः समानार्थधातुप्रयोगोऽप्यत्र दृश्यते। यथा-"इतरेतरानभिभवेन मृगास्तमुपासते गुरुमिवान्तसदः"[किरातार्जुनीयम् ६।३४] इति भारविः। त्रीणि शिष्यस्य। शेषश्चात्र-

"शिष्ये छात्रः"[शेषनाममाला १।२॥]।

गुरुच्छिद्राच्छादनं छत्रम्, तच्छीलमस्य छात्रः। 'छत्रादिभ्यो णः' ४।४।६२॥ इति णः॥

**शैक्षः प्राथमकल्पिकः।**

१ शिक्षा शीलमस्य **शैक्षः**। 'छत्रादिभ्यो णः'४।४।६२॥ इति णः। शिक्षायां भव इति वा। 'तत्र भवः'४।३।५३॥ इत्यण्। शिक्षणं शिक्षा प्रथमोपदेशः तत्साहचर्याद् ग्रन्थोऽपि शिक्षा, तामधीयते तद्वेद वा, 'तदधीते तद्वेद वा'४।२।५९॥ इत्यण् वा। २ प्रथमं कल्पं प्रथमं शिक्षणीयं शास्त्रमधीते **प्राथमकल्पिकः**। उक्थादित्वात् ठक्, 'ठस्येकः'७।३।५०॥, 'किति च'७।२।११८॥ इति वृद्धिः। "कल्पः शास्त्रविधौ[3] न्याये" [मेदिनी, पान्तवर्गः, श्लो-२]इति मेदिनी। द्वे नवीनशिष्यस्य। द्वे प्रथमारब्धवेदानामित्यन्ये ॥

**सतीर्थ्यास्त्वेकगुरवः**

१ तरन्त्यनेन शास्त्राम्भोनिधिमिति तीर्थं गुरुः। 'तॄ प्लवनतरणयोः'(भ्वा.प.से.), 'पातृतुदिवचिरिचिसिचिभ्यस्थक्'[4] (उणा-१६४), 'ॠत इद्धातोः'७।१।१००॥,'उरण् रपरः'१।१।५१॥। समाने तीर्थे गुरौ वसन्ति **सतीर्थ्याः**। 'समाने तीर्थे वासी'[5] ४।४।१०७॥ इति सूत्रेण यत्, 'तीर्थे ये'६।३।८७॥ इति समानस्य सभावः। २ एकः समानो गुरुरेषामिति **एकगुरवः**। द्वे गुरुभ्रातुः॥

**विवेकः पृथगात्मता ॥७९॥**

१ विवेचनं हेयोपादेयज्ञानं **विवेकः**। 'विचिर् पृथग्भावे' (रु.उ.अ.) भावे घञ्, 'चजोः कु घिण्ण्यतोः'७।३।५२॥ इति कुत्वम्। पृथग् भिन्नमात्मा स्वरूपं पृथगात्मा, पृथगात्मनो भावः पृथगात्मता। ग्राह्याग्राह्यज्ञानम्, प्रकृतिपुरुषयोः पृथग्ज्ञानं वा विवेक उच्यते इति भावः। भावानां पृथक्स्वरूपमित्येके। एकं विवेचनस्य ॥७९॥

---

१. हैमसूत्रं 'क्वचित्' इत्येवास्ति ॥ २. 'संकल्पं' इति मनुस्मृतौ ॥ ३. 'शास्त्रे' इति २.३.४ ॥ ४. '-विचि-' इति ३४ ॥ ५. 'समानतीर्थे' इत्यष्टाध्याय्याम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**एकब्रह्मव्रताचारा मिथः सब्रह्मचारिणः ।**

१ तुल्यागमास्तुल्यव्रतास्तुल्याचाराश्च **मिथः** परस्परं **सब्रह्मचारिणः** उच्यन्ते । समाने ब्रह्मण्यागमे गुरुकुले वा व्रतं चरन्तीत्येवंशीलाः सब्रह्मचारिणः। मिश्रास्तु-"ब्रह्म वेदस्तदेकस्माद् गुरोरध्येतुमभिन्नं ब्रह्मचर्याख्यं व्रतमाचरन्ति ये तेऽन्योन्यं सब्रह्मचारिण उच्यन्ते । उपचाराद् ब्रह्माध्ययनार्थम्, तमपि ब्रह्म, तच्चरन्तीति । 'व्रते' ३।२।८०॥ इति णिनिः, 'चरणे ब्रह्मचारिणि' ६।३।८६॥ इति समानस्य सभावः"[ ]इति व्याख्यन्। एकं साधर्मिकस्य । 'साहमि' इति भाषा ॥

**स्यात् पारम्पर्यमाम्नायः सम्प्रदायो गुरुक्रमः ॥८०॥**

१ परम्परायाः गुरुशिष्यप्रशिष्यादिसन्तानरूपायाः भावः **पारम्पर्यम्** । ब्राह्मणादित्वात् ष्यञ् । २ आम्नायते **आम्नायः**। 'म्ना अभ्यासे'(भ्वा.प.अ.), घञ्, 'आतो युक् चिण्कृतोः' ७।३।३३॥ ३ सं सम्यक् प्रदीयते **सम्प्रदायः** । 'डुदाञ् दाने' (जु.उ.अ), भावे घञ्, 'आतो युक् चिण्कृतोः'७।३।३३॥ ४ गुरूणां क्रमो **गुरुक्रमः**। चत्वारि गुरुपरम्परायाः ॥८०॥

**व्रतादानं परिव्रज्या तपस्या नियमस्थितिः।**

१ आदीयते गृह्यते आदानम् । व्रतं शास्त्रविहितो नियमः। व्रतस्यादानं **व्रतादानम्** । २ परिव्रजनं **परिव्रज्या** । 'व्रज गतौ' (भ्वा.प.से.), 'परिचर्या-परिसर्या-मृगयाटाट्यादयश्च'(वा-३।३।१०१॥) इत्यादिशब्दात् साधुः । प्रव्रज्या अपि । ३ तपश्चरणं **तपस्या** । 'कर्मणो रोमन्थ-तपोभ्यां वर्ति-चरोः' ३।१।१५॥ इति क्यङि, 'अ प्रत्ययात्'३।३।१०२॥ इत्यः। ४ नियमे व्रते स्थानं स्थितिः **नियमस्थितिः** । चत्वारि तपस्यायाः॥

**अहिंसा सूनृताऽस्तेयब्रह्माकिञ्चनता यमाः ॥८१॥**

१ हिंसनं हिंसा प्राणवियोगकरणम्, तदभावो **अहिंसा**। २ **सूनृतं** प्रियं सत्यं च वचः । ३ स्तेयम् अदत्तादानं, तदभावः **अस्तेयम्**। ४ **ब्रह्म** इति ब्रह्मचर्यं मैथुनत्यागः । ५ **अकिञ्चनता** परिग्रहत्यागः। यम्यते चित्तमेभिरिति **यमाः** । 'यमु नियमने' (भ्वा.प.अ.) । एकं पञ्चमहाव्रतानाम् ॥

**नियमाः शौचसन्तोषौ स्वाध्यायतपसी अपि ।**
**देवताप्रणिधानं च**

(२) नियम्यते संव्रियते निरुध्यते चित्तमेभिरिति **नियमाः** ।'यमु नियमने[२]'(भ्वा.प.अ.),'यमः समुप-नि-विषु च'३।३।६३॥ इत्यप् । १ शुचेर्भावः कर्म वा **शौचम्**, कायमनसोः शुद्धिः। 'इगन्ताच्च लघुपूर्वात्'५।१।१३१॥ इत्यण्। सन्निहितसाधनादधिकस्यानुपादित्सा **सन्तोषः**। ३ स्वकीयमध्ययनं **स्वाध्यायः**, मोक्षशास्त्राध्ययनं प्रणवजपो वा। आसमन्तादध्ययनमाध्यायः, शोभनं[३] आध्यायः स्वाध्याय इति वा। ४ तप्यते तदिति **तपः**, चान्द्रायणादि । 'तप सन्तापे'(भ्वा.प.अ.), '-असुन्' (उणा-६२८)इत्यसुन् । देवतायाः श्रीअर्हतः प्रणिधानं आत्मनः सर्वतः सम्भेदः **देवताप्रणिधानम्** । शौचादीनां पञ्चानां नामैकं नियमा इति[४] ॥

**करणं पुनरासनम् ॥८२॥**

(३) १ क्रियते मनो वश्यमनेन **करणम्** । 'डुकृञ् करणे'(त.अ.उ.), 'करणाधिकरणयोश्च'३।३।११७॥ इति करणे ल्युट्। २ आस्यतेऽनेनेति **आसनम्** । 'आस उपवेशने' (अ.आ.से.), ल्युट् । द्वावपि क्लीबलिङ्गौ । द्वे पद्मासनाद्यासनस्य ॥८२॥

**प्राणायामः प्राणयामः श्वासप्रश्वासरोधनम् ।**

(४)प्राणस्य मुखनासिकासञ्चारिणो वायोरासमन्ताद्यमनं गतिच्छेदः **प्राणायामः** ।१ एवं प्राणस्य यमनं **प्राणयमः** ।२ बाह्यस्य वायोराचमनं श्वासः,कोष्ठ्यस्य वायोर्निःश्वसनं प्रश्वासः, श्वासप्रश्वासयोः रोधनं गतिच्छेदः श्वासप्रश्वासरोधनम् । यद्योगशास्त्रम्-

"प्राणायामो गतिच्छेदः श्वासप्रश्वासयोर्मतः ।
रेचकः पूरकश्चैव कुम्भकश्चेति स त्रिधा ॥१॥"
[योगशास्त्रम्, प्रकाशः-५, श्लो-४]इति ॥

द्वे श्वासप्रश्वासरोधनस्य ॥

**प्रत्याहारस्त्विन्द्रियाणां विषयेभ्यः समाहृतिः ॥८३॥**

(५) १ **विषयेभ्यः इन्द्रियाणां समाहृतिः**संक्षेपः, तन्नामैकं **प्रत्याहारः**। प्रतीपमाहरणं प्रत्याहारः । प्रत्याङ्पूर्वः 'हृञ् हरणे'(भ्वा.उ.अ.), भावे घञ् । एकमिन्द्रियाणां विषयेभ्यः सङ्कोचनस्य ॥८३॥

**धारणा तु क्वचिद्ध्येये चित्तस्य स्थिरबन्धनम् ।**

(६)१ धारणं **धारणा** । 'धृञ् धारणे'(भ्वा.उ.अ.), णिजन्तः, 'ण्यासश्रन्थो युच्'३।३।१०७॥ इति युच् । स च स्त्रियाम्। **क्वचिद्** इति कस्मिंश्चिद् देवतादौ **ध्यातव्ये चित्तस्य** मनसः **स्थिरबन्धनं** स्थैर्यम्, तस्यैकम् ॥

**ध्यानं तु विषये तस्मिन्नेकप्रत्ययसन्ततिः ॥८४॥**

(७) १ **विषये तस्मिन्** इति, दैवतादौ ध्येये **एकस्य प्रत्ययस्य** ध्येयालम्बनस्य **सन्ततिः** सदृशप्रत्ययः, तस्यैकं **ध्यानम्** इति। ध्यायते इति ध्यानम् । 'ध्यै चिन्तायाम्' (भ्वा.प.अ.), ल्युट् ॥८४॥

---

१. इतोऽग्रे ४प्रतौ 'नामानि' इति दृश्यते ॥ २. 'यम उपरमे' इति क्षीरतरङ्गिण्यादौ ॥ ३. 'शोभमाध्या-' इति ३.४ ॥ ४. 'नियमा इति' इति १.२.४ प्रतिषु न दृश्यते ॥ ५. 'यथा योग-' इति ४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**समाधिस्तु तदेवार्थमात्राभासनरूपकम् ।**

**(८) १** सम्यगाधीयते मनोऽत्रेति **समाधिः** । समाङ्-पूर्वः 'डुधाञ् धारणपोषणयोः'(जु.उ.अ.), 'उपसर्गे घ्नोः किः'३।३।९२॥ इति किः । **तदेव** इति, तच्छब्देन ध्यानं परामृश्यते । ध्यानमेव **अर्थमात्राभासनरूपकं** ध्येयाकारमात्रावलम्बनम्, तस्य नामैकं समाधिरिति ॥

संग्रहमाह-

**एवं योगो यमाद्यङ्गैरष्टभिः सम्मतोऽष्टधा ॥८५॥**

**एवम्** अमुना प्रकारेण पूर्वोक्तैः **अष्टभिः यमाद्यङ्गैः अष्टधा योगः सम्मतः**, योगिनां मान्य इत्यर्थः ॥८५॥

**श्वः[1]श्रेयसं शु[2]भंशि[3]वे क[4]ल्याणं श्वो[5]वसीयसं श्रे[6]यः ।**
**क्षे[7]मं भावु[8]कंभवि[9]कंकु[10]शलम[11]ङ्गलभ[12]द्रम[13]द्रश[14]स्तानि ॥८६॥**

**१** शोभनं श्रेयः **श्वःश्रेयसम्** । 'श्वसो वसीयःश्रेयसः' ५।४।८०॥ इत्यच्समासान्तः । श्व आगामि श्रेयो वा । अत्र श्वःशब्दस्य परपदार्थत्वम्, स्वशक्तिस्वाभाव्यात् । यदुक्तं पाणिनीयमतदर्पणे-

''अर्थं परपदस्यात्र श्वःशब्दः कालवाच्यपि ।
अभिधत्ते स्वभावेन तेनेमौ मङ्गलार्थकौ ॥१॥'' [ ] इति

**२** शोभते **शुभम्** । 'शुभ दीप्तौ'(भ्वा.आ.से.), 'इगुपध-ज्ञा-प्री-किरः कः'३।१।१३५॥ इति कप्रत्ययः । **३** शेतेऽशुभमनेनेति **शिवम्** । 'शीङ् स्वप्ने (अ.आ.अ.), 'शिङो ह्रस्वश्च'(उणा-७०२)इति वः । 'सर्वनिघृष्व-'(उणा-१५१)इति साधुर्वा । शिनोत्यशिवमनेनेति अन्ये । **४** कल्यं नीरुक्त्वम् अणति[1,2] **कल्याणम्** । 'अणं गतौ'(भ्वा.प.से.), 'कर्मण्यण्'३।२।१॥ **५** वसुमच्छब्दादीयसुनि, 'टेः'६।४।१५५॥ इति टिलोपे[3] वसीयः । शोभनं वसीयः **श्वोवसीयसम्** । श्व आगामि श्रेयो वा । 'श्वसो वसीयः श्रेयसः'५।४।८०॥ इत्यच् । **६** अतिशयेन प्रशस्यं **श्रेयः** । 'प्रशस्यस्य श्रः'५।३।६०॥ इति ईयसुनि प्रत्यये परे श्रादेशः । **७** क्षीयते क्लेशोऽनेन, क्षिणोति दुःखमिति वा **क्षेमम्** । पुंक्लीबलिङ्गः । 'क्षि क्षये'(भ्वा.प.अ.), 'क्षि[4] हिंसायाम्'(स्वा.प.अ.) अस्माद्वा, 'अर्ति-स्तु-सु-हु-सृ-धृ-क्षि-क्षु-भा-या-वा-पदि-यक्षिभ्यो मन्'(उणा-१३७)इति मन् । **८** भवनशीलं **भावुकं** । 'लष-पत-पद-स्था-भू-वृष-हनि-कमि-गमि-सृभ्य[5] उकञ्' ३।२।१५४॥, 'अचो ञ्णिति' ७।२।११५॥ सूत्रेण वृद्धिः । **९** भवो भद्राप्तिरस्त्यस्य **भविकम्** । 'अत इनिठनौ'५।२।११५॥ इति ठन्, 'ठस्येकः'७।३।५०॥ । ''भवो भद्राप्तिसत्त्रयोः(-सत्तयोः)'' [[6] ]इत्यजयः । **१०** कुश्यते पुण्यात्मना सम्बध्यते **कुशलम्** । 'कुश श्लेषणे'(दि.प.से.), सौत्रः, वृषादित्वात् कलच् । कुत्सितं श्यतीति पृषोदरादिर्वा । कुशं लाति वा । **११** मङ्ग्यते प्राप्यते हितमनेन **मङ्गलम्** । पुंक्लीबलिङ्ग[7]ः । 'मगि गतौ'(भ्वा.प.से.), 'मङ्गेरलच्'(उणा-७४८) । **१२** भन्दते **भद्रम्** । 'भदि कल्याणे सुखे च'(भ्वा.प.से.) 'ऋज्रेन्द्राग्रवज्र-'(उणा-१८६)इत्यादिना साधुः । भन्दमपि । ''भन्दं भद्रं शिवं तथा''[त्रिकाण्डशेषः१।४।११॥] इति त्रिकाण्डशेषः[9] । भन्द्रमपि । **१३** माद्यति हृष्यति अनेन **मद्रम्** । 'मदी हर्षे'(दि.प.से.), 'स्फायितञ्चि-'(उणा-१७०)इति रक् । **१४** शस्यते स्तूयते **शस्तम्** । 'शंस(शंसु) स्तुतौ'(भ्वा.प.से.), भावे क्तः । चतुर्दश कल्याणस्य[10] । [शेषश्चात्र- ''भद्रे भव्यं काम्यं सुकृतसूनृते'' [शेषनाममाला १।२॥] ॥

**इत्याचार्यश्रीहेमचंद्र विरचितायामभिधानचिन्तामणौ नाममालायां देवाधिदेवकाण्डः प्रथमः ॥**

सर्वाङ्गीणकलाविलासनिलयः कल्पद्रुमाभः कलौ
जाग्रत्सर्वजनीनमञ्जुमहिमो मित्रप्रतापोदयः ।
श्रीमच्छ्रीविधिपक्षगच्छगणभृद् भूभृन्नतांह्रिद्वयः ।
**श्रीकल्याणसमुद्रसूरि**सुगुरुः सूरीन्द्रचूडामणिः ॥१॥

तन्निर्देशविधायिवाचकवरश्रेणीकिरीटोपमा
भास्वत्साधुगुणौघशालिविनयाच्चन्द्राभिधा वाचकाः ।
तच्छिष्या '**रविचन्द्र**' इत्यभिधया तेषां विनेयो व्यधा-
देनं **वाचकदेवसागरगणिर्व्युत्पत्तिरत्नाकरम्** ॥२॥

इति श्रीवाचकवरदेवसागरविरचितायामभिधान-
चिन्तामणिनाममालायां व्युत्पत्ति-
रत्नाकरटीकायां देवाधिदेव-
काण्डः
प्रथमः

१. 'अणिति' इति२॥ २. क्षीरतरङ्गिण्यादौ गतावर्थे अणधातुर्न दृश्यते ॥ ३. 'टिलोपः' इति४॥ ४. १प्रतौ नास्ति ॥ ५. 'हनकमगमशर्भ्यि-' इत्यष्टा-ध्याय्याम् ॥ ६. द्र. रामाश्रमी १।४।२६॥, पृ.६८॥ ७. दुर्गसम्मतोऽयं धातुः, द्र. क्षी.त. पृ.२२९, मा. धातुवृत्तिः, पृ.४३८॥ ८. 'पुंक्ली' इति३.४॥ ९. 'भन्दं भल्लं शिवं तथा' इति त्रिकाण्डशेषे, पृ.२७१॥ १०. इतेऽग्रे ४प्रतौ 'नामानि' इति दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥ द्वितीयो देवकाण्डः ॥

उक्तः प्रथमः काण्डोऽथ पूर्वं द्वितीयस्मिन् काण्डे 'देवाः वक्ष्यन्ते' इति प्रतिज्ञातत्वाद् द्वितीयं देवकाण्डं प्रारभ्यते, तत्र देवनामाश्रयः स्वर्ग इति प्रथमं स्वर्गनामानि प्रोच्यन्ते–

**स्वर्गस्[1]त्रिविष्टपं[2] द्योदिवौ[3][4] भुविस्[5]तविषताविषौ[6][7] नाकः[8] ।**
**गौस्[9]त्रिदिवम्[10]ऊर्ध्वलोकः[11] सुरालयः[12]**

१ ऋज्यते स्थीयतेऽस्मिन्निति अर्गः स्थानम् । 'ऋज गतिस्थानार्जनोपार्जनेषु[1]'(भ्वा.आ.से), 'हलश्च'३।३।१२१॥ इति घञ्, 'चजोः कु घिण्ण्यतोः'७।३।५२॥ इति कुत्वं गकारः । शोभनो अर्गः **स्वर्गः** इति प्रादिसमासः । यद्वा स्वर्यते सुखहेतुतया कथ्यते इति स्वर्गः । 'स्वृ शब्दोपतापयोः'(भ्वा.प.वे.), 'गन् गम्यादेः[2]'(उणा-१२०)इति गन्प्रत्ययः । यद्वा सुः सुकृतम्[3], तेन ऋज्यते प्राप्यते स्वर्गः। कर्मणि घञ् । अर्जनमर्गः । 'अर्ज सर्ज अर्जने[4]'(भ्वा.प.से.), भावे घञि, न्यङ्क्वादित्वात् कुत्वम् । 'शोभनोऽर्गः अर्जनं स्वर्गः'[ ]इति माधवः[5] । २ विशन्ति अस्मिन् सुकृतिन इति विष्टपम्।'विटप-विष्टपविशिपोलपाः[6]'(उणा-४२५) इति विशेः[7] कपन्प्रत्ययः, तस्य तुट् च, 'व्रश्च-'८।२।३६॥ इति षत्वम् । त्रिदशानां विष्टपं लोकः **त्रिविष्टपम्**, पुंक्लीबः। पृषोदरादित्वाद् दशशब्दलोपः । "तृतीयं विष्टपं त्रिविष्टपम् । पूरणप्रत्ययस्तु वृत्तौ गतार्थत्वान्न प्रयुज्यते, त्रिभागवत्"[ ]इति मधुमाधवी ।इहच्छान्दसाः–'विष्टान् पाति विष्टपमिति निरुक्तत्वाद् व्युत्पाद्य त्रिपिष्टपमिति, तृतीयं पिष्टपं त्रिपिष्टपमिति पकारपाठः प्राच्यानां प्रामादिकः' इत्याहुः । तद्युक्तम्-'नभो विष्टपं वृषो गोर्ना पृश्निश्चापि[8] सुरालयः'[9 ]इति, रत्नमालादावपि दर्शनादिति तु कौमुदी । 'विटप-पिष्टपविशिपोलपाः'(उणा-४२५)इत्युणादौ पकारपाठः पठित्वा कपे विशतेरादेः पत्वम्, प्रत्ययस्य तुट्, षत्वादिकार्यम्, पिष्टपं भुवनम्, त्रिपिष्टपं स्वर्ग इति दर्शनात् । "त्रिपिष्टपं त्रिविष्टपं च"[ ]इति तु बृहस्पतिः । तथा च "पिष्टपो विष्टपोऽप्यस्त्री भुवनं च नपुंसकम्"[10 ]इत्यमरमालोक्तेः। "मर्त्यपातालापेक्षया तृतीयं पिष्टपं भुवनं त्रिपिष्टपम्"[ ]इति तु राजदेवः।"तृतीयं विष्टपं त्रिविष्टपम् ।'भूर्भुवःस्वः'[ ]इति श्रुतेः, अत्र मयूरव्यंसकादित्वात् समासे पूरणप्रत्ययलोपः"[अभि.स्वो.टी. श्लो. ८७]इत्याचार्याः। ३ दीव्यन्ति अत्र सुरजना इति **द्यौः**, स्त्रीलिङ्गः। 'दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु' (दि.प.से.) 'दिवेर्ड्योः[10]'( )इति ड्योप्रत्ययः, टिलोपे गोशब्दवद्रूपाणि। यद्वा द्यौति अभिगच्छत्यमुं सुरजन इति द्यौः।'द्यु अभिगमे' (अ.प.अ.), ([11]'द्युगमिभ्यां डोः'(हैमोणा-८६७)इति डोप्रत्ययः। द्योतत इति वा।) 'द्युत दीप्तौ'(भ्वा.आ.से.), बाहुलकाद् 'गमेर्डोः'(उणा-२२५)इत्यतोऽपि डोः ।४ दीव्यन्त्यस्यां देवा इति **द्यौः**।'दिवु क्रीडादौ'(दि.प.से), बाहुलकाद् 'दिवेर्डिविः[12]'( ) इति डिविप्रत्ययः । क्विपि तु 'च्छ्वोः शूड्-'६।४।१९॥ इत्यूट् (-ऊ) स्यात्। पदान्ते 'दिव उत्'६।१।१३१॥ इति उत्वम्, द्युभ्यामित्यादि, स्त्रीलिङ्ग एव ।५ भवत्यस्यां सुखमिति **भुविः**, स्त्रीलिङ्गः। 'भू सत्तायाम्'(भ्वा.प.से.),'भुवः कित्'(उणा-२६९)इतीस्प्रत्ययः। भुविषौ, भुविषः इत्यादि ।"त्रिविष्टपं देवलोको भुविः स्त्री द्योदिवौ स्त्रियाम्"[ ]इति वाचस्पतिः ।६-७ तव्यते गम्यते शुभकर्मवशादत्रेति **तविषः ताविषः** च । 'तव गतौ' इति सौत्रो धातुः, 'तवेर्णिद्वा'(उणा-४८)इति इषप्रत्ययः[13] । णित्पक्षे वृद्धिः। ८ कं सुखम्, न कम् अकं दुःखम्, तन्नास्त्यत्रेति **नाकः**' पुंक्ली.। 'नञोऽस्त्यर्थानां बहुव्रीहिर्वाच्यः, उत्तरपदलोपश्च[14]'(वा-)इति समासोत्तरपदलोपौ,'नभ्राण्नापत्-'६।३।७५॥ इति नञः प्रकृतिभावः । यद्वा **कस्य ब्रह्मणोऽभावोऽकः**, नास्ति **अको** यत्रेति, विद्यमानविरञ्चिरित्यर्थः। न आकाम्यते **अभिलष्यते** नास्तिकैरिति वा ।'नञः कमि(क्रमि)गमि-'(हैमोणा-४)इति डिति अप्रत्यये नाक इति ।९ गच्छन्त्याश्रयन्ति देवास्तामिति **गौः**, पुंस्त्री ।'गम्लृ गतौ'(भ्वा.प.अ.),'गमेर्डोः'(उणा-२२५), प्राधान्येन व्यपदेशा

---

१. 'ऋज गतिस्थानार्जनेषु' इति१.२.४ ॥ २. 'गनाम्यद्योः' इत्युणादिगणे ॥ ३. 'संस्कृतं' इति३.४॥ ४. स्वामिसम्मतोऽयं धातुपाठः, सायणः '-षर्ज-' इत्याह ॥ ५. 'स्वर्गः-वार्तिककारमते न्यङ्क्वादित्वात् कुत्वम्' इत्येव मा.धातुवृत्तौ, धातुसं-१३७, पृ.९८॥ ६. 'विटपविष्टपविशिपोलपाः' इत्युणादिगणे॥ ७. 'विश प्रवेशने'(तु.प.अ.) इति तौदादिकाद्धातोः ॥ ८. 'द्यौश्चापि' इति१॥ ९. द्र. रामाश्रमी १।१।६॥, पृ.५॥ १०. उणादिगणयोर्नास्ति, द्र. रामाश्रमी १।१।६॥, पृ.५॥ ११. कोष्ठान्तर्गपाठस्थाने १ प्रतौ 'मनिप्क्वनिपृविच इति विञ्प्र(च्प्र)त्ययः गुणः । द्योतन्तेऽस्या (-स्यां) देवा इति वा' इति पाठो दृश्यते ॥ १२. "द्यौः-'देवेर्डिविः' इति न्यासे ऊहितसूत्रेण व्युत्पादितम्" इति मा.धातुवृत्तौ दिवादिः, धातुसं-१, पृ.४०॥ १३. वस्तुतः सूत्रात् टिषच्प्रत्ययो भवति, 'अविमह्योष्टिषच्'(उणा-४५)इत्यस्यानुवृत्तेः ॥ १४. 'नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः' इति सिद्धान्तकौमुद्यां बहुव्रीहौ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवन्तीति । १० त्रयः ब्रह्मविष्णुरुद्रा दीव्यन्त्यत्रेति, त्रिदशा दीव्यन्त्यत्रेति वा **त्रिदिवम्**, पुंक्ली. । 'दिवु क्रीडादौ'(दि.प.से.), 'घञर्थे कविधानम्'(वा-३।३।५८॥)इति कः[1] । यद्यपि घञर्थे कविधाने 'स्थास्नापाव्यधिहनियुध्यर्थम्' इति परिगणनं कृतम्, तथापि सम्भवोदाहरणमेतत् । पृषोदरादित्वाद् दशशब्दलोप इति सर्वानन्दादयः । वयं तु मूलविभूजादित्वात् कप्रत्ययमेव युक्तं मन्यामहे, तथा च तत्रैव भाषावृत्तौ 'त्रिदिवः'[भाषावृत्तिः ३।२।५॥]इत्युदाहृतम् । क्षीरस्वामी तु-"तृतीया द्यौर्लोकस्त्रिदिवः, वृत्तिविषये दिवौकस इतिवद् दिवशब्दोऽदन्तः, पूरणार्थाधिक्यं च त्रिशब्दस्य वृत्तौ त्रिभागवत्'[ ]इत्याह । 'तृतीयं दिवं लोकस्त्रिदिवम्'[अभि. स्वोपज्ञटीका, श्लो-८७]इत्याचार्याः । 'त्रिदशा दीव्यन्ति क्रीडन्ति शोभन्ते वा अत्रेति । इगुपधत्वात् के त्रिदिवः' [ ]इति तु राजदेवः । ११ ऊर्ध्वश्चासौ लोकश्च **ऊर्ध्वलोकः** । १२ सुराणामालयः **सुरालयः** । अयं सुरसदनादीनामप्युपलक्षकः[2] । द्वादश स्वर्गस्य[3] । शेषश्चात्र-

"फलोदयो मेरुपृष्ठं वासवावाससैरिकौ ।
दिदिविर्दीदिविर्द्युश्च दिवं च स्वर्गवाचकाः ॥१॥"
[शेषनाममाला २।३॥] । स्वरव्ययेषु वक्ष्यते॥

**तत्सदस्त्वमराः ॥८७॥**

**देवाः सुपर्वसुरनिर्जरदेवतर्भु-**
**बर्हिर्मुखानिमिषदैवतनाकिलेखाः ।**
**वृन्दारकाः सुमनसस्त्रिदशा अमर्त्याः**
**स्वाहास्वधाक्रतुसुधाभुज आदितेयाः ॥८८॥**
**गीर्वाणा मरुतोऽस्वप्ना विबुधा दानवारयः ।**

१ तत्सद इति । तच्छब्देन स्वर्गः परामृश्यते, तच्छब्दस्य पूर्वपरामर्शित्वात् । तत्र स्वर्गे सीदन्ति **तत्सदः** । 'षद्लृ विशरणगत्यवसादनेषु'(भ्वा.प.अ.) 'सत्-सू-द्विष-द्रुह-'३।२।६१॥इत्यादिना क्विप् । यौगिकत्वाद् द्युसद्मान इत्यादयः । २ मरणं मरः । 'मृङ् प्राणत्यागे'(तु.आ.अ.), बहुलवचनाद् भावे 'ऋदोरप्'३।३।५७॥ इत्यप् । मर एषां नास्ति **अमराः** । एतच्च 'नञो जरमर[मित्र]मृताः'६।२।११६॥ इत्यत्र वृत्तौ व्याख्यातम् । नाकवत्समासोत्तरपदलोपौ । न म्रियन्त इत्यमरा वा, पचाद्यच् । अमरशब्दश्चिरस्थायित्वादिलक्षणया देवेषु यौगिको रूढश्च ॥८७॥ ३ दीव्यन्ति द्योतन्त इति **देवाः** । 'दिवु क्रीडादौ'(दि.प.से.), क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते'(परिभाषा-५९)इतीगुपधलक्षणं कं बाधित्वा पचाद्यच्, पचादिगणस्थत्वात् । ४ शोभनममावास्यादिपर्वाऽमीषाम्, शोभनं पर्वचरितमेषां वा **सुपर्वाणः** । शोभनानि पर्वाण्यङ्गुलादिग्रन्थयो येषामिति वा । अविरतत्वाच्छोभनं पर्व उत्सव एषामिति वा । 'सुष्ठु पृणन्ति पालयन्ति' इत्यन्ये । 'पृ पालनपूरणयोः'(क्र्या.प.से.) अस्माद्वन्प्रत्ययः । ५ सुरन्ति ऐश्वर्यमनुभवन्ति **सुराः** । 'सुर[4] प्रसवैश्वर्ययोः'(तु.प.से.), 'इगुपधज्ञाप्रीकिरः कः'३।१।१३५॥ "क्षीरोदोत्था सुरा एषामस्तीति सुराः" इत्यागमः । 'अर्शआदिभ्योऽच्'५।२।१२७॥ सुराः परिग्रहाद्वा सुराः । तथा च रामायणे-

"सुरा परिग्रहाद् देवाः सुराख्या इति विश्रुताः ।
अपरिग्रहणात् तस्या दैतेयाश्चासुराः स्मृतास्तथा ॥१॥"[[5]] इति । सुष्ठु राजन्त इति वा । 'राज्[6] दीप्तौ'(भ्वा.उ.से.), 'अन्येभ्योऽपि-(अन्येष्वपि-)'३।२।१०१॥ इति डः । यद्वा सुन्वन्ति खण्डयन्ति सेवकदुःखमिति वा । 'षुञ् अभिषवे'(स्वा.उ.अ.), अभिषवः स्नपनपीडनस्नान[सुरा]सन्धानादिः । सुन्वन्ति अभिषुन्वन्ति समुद्रमिति वा । 'स्तुसू(सु)धागृधिभ्यः क्रन्'(उणा-१८२)इति क्रन् । भक्तदत्तं सुष्ठु रान्ति आददते वा । 'रा दाने'(अ.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥ ६ सदा युवत्वाद् निरस्ता जरा यैस्ते **निर्जराः** । 'प्रादिभ्यो धातुजस्य'(वा-)इति बहुव्रीहिर्वाच्य उत्तरपदलोपश्च । निर्गता निःक्रान्ता वा जरायाः । 'निरादयः [7]क्रान्ताद्यर्थे पञ्चम्या'(वा-२।२।१८॥)इति समासः । अजरादावेकदेशविकृतस्यानन्यत्वाद्वा जरसादेशः । निर्जरौ, निर्जरसौ इत्यादि । ते हि सर्वदा पञ्चविंशतिवर्षदेशीयाः । तथा च रामायणे-

"श्रियं विन्दति सौमित्रे पञ्चविंशतिवर्षवत् ॥" [ ]इति । ७ देव एव **देवता** । 'देवात्तल्'५।४।२॥ इति स्वार्थे तल्, 'तलन्तं स्त्रियाम्'(लिङ्गानु-१७)स्त्रीत्वाट्टाप् । ८ ऋनामा स्वर्गः, देवमाता वा । तत्र ततो वा भवन्तीति **ऋभवः** । ऋपूर्वाद् भवतेर्मितद्र्वादित्वाद् डुः, उपपदसमासः । रभन्ते पुण्यकर्मसूत्सुका भवन्तीति वा । 'रभ राभस्ये'(भ्वा.आ.अ.), 'रभिप्रथिभ्यामृच्चरस्य (हैमोणा-७३०)इति उप्रत्यय इति वा । ऋभुः, ऋभू, ऋभवः इत्यादि

१. इतः परं 'इत्युदाहृतम्' इत्यन्तपाठस्थाने १प्रतौ "इति केचिदाहुः, तन्न घञर्थे कविधाने 'स्थास्नापाव्यधिहनियुध्यर्थम्'( )इति परिगणनात्, उदाहरणत्वेन व्याख्यानस्य निर्मूलत्वात् । यदपि 'मूलविभुजादित्वात् कप्रत्ययः' इति, तदपि न, अधिकरणव्युत्पत्तिप्रदर्शनस्यासंगतत्वात् । तत्र 'कृत् कर्तरि'३।४।६७॥ वाक्यत्वात् । तस्मात् 'हलश्च'३।३।१२१॥ इति घञ् संज्ञापूर्वकत्वात् न गुण इति व्याख्येयम् । यद्वा ब्राह्मवैष्णवरौद्रभेदेन वा, सात्त्विकराजसतामसभेदेन वा त्रिविधं दीव्यति व्यवहरति प्रकाशते वा । इगुपधत्वात् कः ।" इति पाठो दृश्यते ॥ २. '-लक्षणः' इति२॥ ३. इतोऽग्रे ४प्रतौ 'नामानि' इति दृश्यते ॥ ४. सायणः षोपदेशमाह ॥ ५. द्र. टीकासर्वस्वम्, भा-१, १।१।७॥, पृ.९॥, तत्र 'अपरिग्रहणात् तस्या दैतेया असुरास्तथा' इति दृश्यते, तदेव समुचितः, अत्र छन्दोभङ्गत्वात् ॥ ६. 'राज' इति २ ॥ ७. 'निःक्रा-' इति२.३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भानुवत् । क्विपि, ऋभूः, ऋभुवौ, ऋभुवः इत्यन्ये । ९ बर्हिरग्निर्मुखमेषां **बर्हिर्मुखाः** । 'अग्निमुखा वै देवाः' [ ]इति श्रुतेः । तथा च मनुः-

''अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ॥''

[मनुस्मृतिः ३।७६]इति । १० न निमिषन्ति **अनिमिषाः** । 'मिष निमीलने[1]'( ), 'इगुपध-'३।१।१३५॥ इति कः । ११ देवतैव **दैवतम्**, पुंक्ली. । देवताशब्दात् स्वार्थे प्रज्ञादित्वादण् विशेषविधेः पुंस्त्वम्, रूपभेदात् क्लीबत्वम्, तच्च प्रचुरतरप्रयोगम् । १२ नाकः स्वर्गः आश्रयत्वेन एषामस्तीति **नाकिनः** । 'अत इनिठनौ'५।२।११५॥ इतीनिः । १३ लिख्यन्ते गण्यन्ते ध्यानार्थम्, चित्रादौ वा लिख्यन्ते **लेखाः** । 'लिख अक्षरविन्यासे'(तु.प.से.), 'अकर्तरि च-'३।३।१९॥ इति कर्मणि घञ् । लिखन्ति प्राणिनां शुभाशुभफलं वा । अच् । ग्रीवाहस्तपादतलेषु प्रशस्ता लेखाः सन्त्येषामिति वा[2] । प्रशंसायामर्शआदित्वादच् । १४ प्रशस्तं वृन्दमेषामस्तीति, प्रशंसायां 'शृङ्गवृन्दाभ्यामारकन्'(वा-५।२।१२०॥), **वृन्दारकाः** । १५ सुष्ठु मन्यन्ते **सुमनसः** । 'मनु (मन) ज्ञाने'(दि.आ.अ.), ' -असुन्'(उणा-६२८) । शोभनं मनो येषामिति वा, मलिनसङ्कल्पनाभावात्, सङ्कल्पमात्रेण लब्धसिद्धित्वाद्वा । १६ जन्मसत्ताविनाशाख्याः तिस्रः दशा एषामिति **त्रिदशाः** । न तु नराणामिव बाल्ययौवनवार्धकाख्याः तिस्रो दशाः, निर्जरत्वात् । यद्वा तृतीया यौवनाख्या दशा सदैषामिति त्रिदशाः । त्रिविष्टपवत् त्रिशब्दस्य तृतीयार्थता । ''त्रीन् तापान् दशन्ति । 'दंश दशने' (भ्वा.प.अ.), पचाद्यचि, पृषोदरादित्वान्नकारलोपे त्रिदशाः[3]' [[4]]इति तु राजदेवः । यद्वा त्रिर्दश मानं येषां ते त्रिदशाः[5] । 'बहुव्रीहौ संख्येये डजबहुगणात्'५।४।७३॥ इति डच् । ''त्रिंशद्देवतास्त्रयत्रिंशद्देवतास्त्रिंशदक्षरा विराट्''[ ]इति श्रुतेः । १७ न मर्त्याः **अमर्त्याः** । न म्रियन्त इति वा । 'हसिमृग्रिण्वाऽमि-' (उणा-३६६)इति तन्, ततो 'नवसूरमर्त-'(वा-५।४।३६॥)इति यत् । १८ स्वाहास्वधाक्रतुसुधाभुज इति । भुक्शब्दः स्वाहादिभ्यश्चतुर्भ्यो युज्यते । तेन **स्वाहाभुजः**, **१९ स्वधाभुजः**, **२० क्रतुभुजः**, **२१ सुधाभुजः** । स्वाहां[6] भुञ्जन्त इति । स्वधां[6] भुञ्जन्त इति । क्रतुं[7] भुञ्जन्त इति । सुधां[6] भुञ्जन्त इति । 'भुज पालनाभ्यवहारयोः'(रु.आ.अ.), 'अन्येभ्योऽपि-'३।२।१७८॥ इति क्विप् । यौगिकत्वात् स्वाहाशनाः, स्वधाशनाः, यज्ञाशनाः इत्यादयः । २२ न ददाति सेवकेभ्यो दुःखमिति अदितिः । नञ्पूर्वः 'डुदाञ् दाने'(जु.उ.अ.) 'नञो दाञो डितिः'( )इति डितिः, ततः 'कृदिकारात्-'(ग-४।१।४५॥)इति ङीषि, अदितीति शब्दात् 'स्त्रीभ्यो ढक्' ४।१।१२०॥, ढस्यैयादेशः । [ढस्यैयादेशे **आदितेयाः**] । अङीषन्तात् 'दित्यदित्यादित्य-'४।१।८५॥ इति ण्यः स्यात् । २३ गीरेव निग्रहानुग्रहसमर्था बाणोऽस्त्रमेषां **गीर्बाणाः** । यद्वा गिरं वन्वते याचन्ते स्तुतिप्रियादिति गीर्वाणाः । 'वनु याचने'(त.आ.से. ), 'कर्मण्यण्'३।२।१॥ २४ म्रियन्ते पुण्यक्षयाच्च्यवन्ते **मरुतः** । 'मृङ् प्राणत्यागे'(तु.आ.अ.), 'मृग्रोरुतिः'(उणा-९४)इत्युतिः । २५ नास्ति स्वप्नो निद्रा एषाम् **अस्वप्नाः** । २६ विबुध्यन्ते न स्वपन्तीति, विशिष्टं बुध्यन्ते वा **विबुधाः** । 'बुध अवगमने'(दि.आ.अ.), 'इगुपधज्ञा-'३।१।१३५॥ इति कः । २७ दानवा अरयो एषाम्[8], दानवानामरयो वा **दानवारयः**[9] । यौगिकत्वाद् दनुजद्विषः इत्यादीनि । अत्रानुक्तमपि दिवौकस इति नाम व्युत्पाद्यते । दिवे ओको निवास एषां दिवौकसः । दिवशब्दोऽदन्तोऽप्यस्ति । तथा च त्रिकाण्डशेषः-

''मन्दरः सैरिभः शक्रभवनं खं दिवं नभः ॥''

[त्रिकाण्डशेषः १।१।४॥ ]इति । तथा बुद्धचरिते-

''न शोभते तेन हि नो विना पुरं मरुत्वता वृत्रवधे यथा दिवम् ॥''[बुद्धचरितम् ८।१३]इति । ''हलन्तस्यैव पृषोदरादित्वादुत्वाभावे दिवोकसः''[ ]इति हट्टचन्द्रः । '' 'दिव उत्'६।१।१३१॥ इत्यत्र तु[शब्द-]परविप्रतिषेधादुकारस्य यणादेशे दिवोकसः''[ ]इति तु मैत्रेयः, 'अचः परस्मिन्-'१।१।५७॥ इति स्थानिवत्त्वेनापि नेकारस्य यणादेशः, 'सकृद्गत-' (परि-४१)परिभाषया निरासात्''[ ]इति । गोवर्द्धनस्त्वाह- ''हलन्तस्योत्वाभावः, संज्ञाविषयत्वात्''[ ]इति ।

''स्याद् दिवोका दिवौकाश्च देवे चापीह पक्षिणि''[ ]इति रन्तिदेवः । ''केऽप्युभयमपि, 'कनिन् यु-वृषि-'(उणा-१५४) इत्यत्र बहुलवचनात् । केवलादपि दिवः कनिन्निति वृद्धौ दिवौकसः''[ ]इति तु 'दिव उत्'६।१।१३१॥ इत्यत्र भागवृत्तिः । सप्तविंशतिर्देवस्य । शेषश्चात्रः-

''निलिम्पाः कामरूपाश्च साध्याः शोभाश्चिरायुषः ।
पूजिता मर्त्यमहिताः सुबाला वायुभाः सुराः[10] ॥२॥''

[शेषनाममाला २।४॥]

तथा- ''द्वादशार्का वसवोऽष्टौ विश्वेदेवास्त्रयोदश ।
षट्त्रिंशत्तुषिताश्चैव षष्टिराभास्वरा अपि ॥३॥

१. 'मीलने' इति१.२.३॥ २. २.३.४ प्रतौ नास्ति ॥ ३. 'त्रिदशा' इति १प्रतौ नास्ति ॥ ४. द्र. रामाश्रमी १।१।७॥, पृ.६॥ ५. इतोऽग्रे १प्रतौ 'सुजर्थे' इति दृश्यते ॥ ६. ४प्रतावनुस्वारो न दृश्यते ॥ ७. 'क्रतुषु' इति२.४ ॥ ८. इतोऽग्रे ३प्रतौ 'दानवारयः' इति दृश्यते ॥ ९. ३प्रतौ नास्ति ॥ १०. 'भास्वराः' इति २.४ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

षट्त्रिंशदधिके माहाराजिकाश्च[1] शते उभे ।
रुद्रा एकादशैकोनपञ्चाशद्वायवोऽपरे ॥४॥
चतुर्दश तु वैकुण्ठाः सुशर्माणः[2] पुनर्दश ।
साध्याश्च द्वादशेत्याद्या विज्ञेया गणदेवताः ॥५॥"
[शेषनाममाला २।५-७]

**तेषां यानं विमानः**

**तेषां** देवानां **यानं** ([3]वाहनं देवयानं सुरयानमित्यादि)। विमान्ति वर्तन्तेऽस्मिन् देवा इति **विमानः**, पुंक्ली. । 'मा माने' (अ.प.अ.), नप्रत्ययः । विशिष्टं मानयन्त्यनेनेति करणे घञि वा। व्योमयानमपि । एवं देवयानम्, सुरयानमित्यादियौगिकनामानि, तेषां हि विमानं यानमिति सम्बन्धाद् विमानयानाः, वैमानिकाः, देवा इत्यादिदेवनामानि स्युः ॥

**अन्धः पीयूषममृतं सुधा ॥८९॥**

तेषां देवानाम् **अन्धः** अन्नं भोज्यमाहार इति यावत् । देवान्धः, देवान्नम्, देवभोज्यम्, देवाहार इत्यादि । **१** पीयते **पीयूषम्** । 'पीयि प्रीणने' सौत्रः, 'पीयेरूषन्'(उणा-५१६)। पेयूषमपि । **२** नास्ति मृतं मरणमत्र **अमृतम्** । न म्रियतेऽनेनेति वा ।'तनिमृङ्भ्यां किच्च'(उणा-३६८)इति तन् । "न म्रियत इत्यमृतम्,'मतिबुद्धि[पूजार्थेभ्यश्च]'३।२।१८८॥इत्यत्र चकारस्यानुक्तसमुच्चयार्थत्वाद् वर्तमाने क्तः"[मा.धातुवृत्तिः, तुदादिः, धातुसं-१०७, पृ-४८०]इति माधवः।'अविद्यमानं मृतमनेन'[[4]] इति स्वामी। **३** "सुखेन धीयते **सुधा** ।'धेट् पाने'(भ्वा.प.अ.), 'आतश्चोपसर्गे'३।१।१३६॥इत्यङ् "इति तु पूर्वटीकाकृतः।तदनुचितम्, कर्मण्यङोऽभावात्, द्वितीयभावग्रहणस्य [कार]काधिकारनिवृत्त्यर्थत्वात् । तस्मात् सुष्ठु दधाति पुष्णाति शरीरमिति सुधा ।'डुधाञ् धारणपोषणयोः'(जु.उ.अ.), अस्मात् पचाद्यन्ताट्टाप्"[ ]इति तु वत्सेश्वरः । समुद्रनवनीतमपि । त्रीणि सुधायाः॥८९॥

दैवाश्च श्रीजैनमते भवनपति-व्यन्तर-ज्योतिष्क-वैमानिकभेदाच्चतुर्धा भवन्ति, तत्र भवनपतीनाह-

**असुरा नागास्तडितः सुपर्णका वह्नयोऽनिलाःस्तनिताः।**
**उदधि द्वीपदिशोदश भवनाधीशाः कुमारान्ताः॥९०॥**

**१** एतेऽसुरादयो दशशब्दाः कुमारान्ता ज्ञेयाः । कुमारशब्दोऽन्ते येषां ते कुमारान्ताः, तेन **असुरकुमाराः १**, **नागकुमाराः २**, **तडित्कुमाराः ३**, **सुपर्णकुमाराः ४**, **अग्निकुमाराः ५**, **अनिलकुमाराः ६**, **स्तनितकुमाराः ७**, **उदधिकुमाराः ८**, **द्वीपकुमाराः ९**, **दिक्कुमाराः १०**, एते सर्वेऽपि कुमारवत् कान्तदर्शनाः ([5]अकर्कशशरीरत्वचः मधुरसलीलगमनाः उल्बलवेषभाषाभरणप्रावरणप्रहरणयानवाहनाः शृङ्गाराभिरामाः खेलननिरताश्चेत्यतः) कुमारा इति प्रोच्यन्ते । दशानामसुरकुमारादीनां नामैकं '**भवनाधीशाः**' इति, भवनपतय इत्यर्थः, भवनशब्दोऽत्र प्रथमस्वरादिरावासपर्यायः[6] ॥९०॥

अथ व्यन्तरानाह-

**स्युः पिशाचा भूता यक्षा राक्षसाः किन्नरा अपि ।**
**किंपुरुषा महोरगा गन्धर्वा व्यन्तरा अमी ॥९१॥**

अमी पिशाचादयोऽष्टौ व्यन्तराः प्रोच्यन्ते, विविधेषु गिरिकन्दरान्तरवनविवरादिषु वा प्रतिवसन्तीति **व्यन्तराः**। पृषोदरादित्वात् साधुः। यद्वा[7] चक्रवर्त्यादिसेवाकारित्वाद् विगतमन्तरं विशेषो नरेभ्यो येषां ते व्यन्तराः। वनानां समूहो वानम्, तस्यान्तरे भवन्तीति पृषोदरादित्वाद् मकारागमे 'वानमन्तरा' इत्यपि[8]। अष्टविधपिशाचादीनां नामैकम् ॥९१॥

अथ ज्योतिष्कानाह-

**ज्योतिष्काः पञ्च चन्द्रार्कग्रहनक्षत्रतारकाः ।**

**१** द्योतन्त इति ज्योतींषि विमानानि, तान्यावासतया सन्त्येषामिति **ज्योतिष्काः**।'द्युत दीप्तौ'(भ्वा.आ.से.) 'द्युतेरिसन्नादेश्च जः'(उणा-२६७)इति सूत्रेणेसन्प्रत्ययः, दस्य च जः, ज्योतिःशब्दाद् व्रीह्यादित्वात् ठन्, 'इसु[सु]क्तान्तात् कः' ७।३।५१॥ यद्वा भास्वरशरीरत्वात्, निखिलदिग्मण्डलद्योतनाद् वा ज्योतींषि देवाः, तान्येव ज्योतिष्काः । स्वार्थे कन् । पञ्चेति, पञ्चसंख्या इत्यर्थः, ते च **१ चन्द्राः**, **२ अर्काः**, **३ ग्रहाः**, **४ नक्षत्राणि**, **५ तारकाश्चेति** । चन्द्रादितारकान्तानां नामैकं ज्योतिष्का इति ॥

अथ वैमानिकानाह-

**वैमानिकाः पुनः कल्पभवा द्वादश ते त्वमी ॥९२॥**
**सौधर्मेशानसनत्कुमारमाहेन्द्रब्रह्मलान्तकजाः ।**
**शुक्रसहस्रारानतप्राणतजा आरणाच्युतजाः ॥९३॥**
**कल्पातीता नव ग्रैवेयकाः पञ्च त्वनुत्तराः ।**

**१** विशिष्टपुण्यैर्जन्तुभिर्मान्यन्ते उपभुज्यन्ते विमानानि, तेषु[10] भवा **वैमानिकाः** । अध्यात्मादित्वात् ठक् । ते[11] च द्विधा,

१.'माह-' इति २.४ ॥ २.'सुकर्मणः' इति१ ॥ ३. कोष्ठान्तर्गतपाठः १.२प्रतौ नास्ति ॥ ४. "नास्ति मृतमत्रामृतम्" इति अ. क्षीरस्वामिटीकायाम्, १।१।४८॥, पृ. १६ ॥ ५. कोष्ठान्तर्गतपाठः १प्रतौ नास्ति ॥ ६.'प्रथमस्तरादिवासपर्यायः' इति २ ॥ ७.'यथा' इति १॥ ८.'इति' इति ४ ॥ ९.'तेन' इति १ ॥ १०.'विमानेषु' इति ४प्रतेः टिप्पणी ॥ ११.'वैमानिकाः' इति ४प्रतेः टिप्पणी ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कल्पभवाः कल्पातीताश्च । इन्द्रादिदशतया कल्पनात् कल्पः समुदायः सन्निवेशः, पृथ्वीप्रस्तार इति यावत्, तत्र भवाः कल्पभवाः द्वादश । ते चामी ॥९२॥ १-१२ सुधर्मा देवसभाऽत्रास्तीति **सौधर्मः**।'तदस्मिन्नस्तीति देशे-'४।२।६७॥ इत्यण् । तत्र जाताः **सौधर्मजाः**।ईशानेन्द्रस्य निवासः ऐशानः कल्पः, तत्र जाता **ऐशानजाः**।एवं सनत्कुमारादिकल्पेषु जाताः **सनत्कुमारजाः**, **माहेन्द्रजाः**।ब्रह्मा ब्रह्मलोकः, तत्र[3] जाताः **ब्रह्मजाः**।**लान्तकजाः**, **महाशुक्रजाः**, **सहस्रारजाः**, **आनतजाः**, **प्राणतजाः**, **आरणजाः**, **अच्युतजाः**। सर्वत्र 'जनी प्रादुर्भावे'(दि.आ.से.), अस्मात् 'सप्तम्यां जनेर्डः'३।२।९७॥। अत्र आर्यायां ब्र-प्राक्षरयोः पूर्वौ द्र-तौ ह्रादिसंयोगवर्जनाद् गुरू न भवतः ॥९३॥ सौधर्माद्यच्युतजान्तदेवानां सामान्येनैकं[4] कल्पभवा वैमानिका इति । कल्पानतीताः कल्पातीताः, कल्पानतिक्रम्योपरि स्थिता इत्यर्थः ।अत्र'द्वितीया श्रिता-'२।१।२४॥ इत्यादिना समासः । नवेति नवसंख्याका इत्यर्थः । लोकपुरुषस्य ग्रीवाप्रदेशविनिविष्टा ग्रीवाभरणभूता ग्रैवेयकाः । ग्रीवाशब्दात् 'कुलकुक्षि-'८।२।९६॥ इति ढकञ्[5] । नवग्रैवेयकोद्भवदेवानां[6] सामान्येनैकं कल्पातीता वैमानिका इति । पञ्चेति पञ्चसंख्या अनुत्तराः । नास्त्युत्तर उत्कर्षवान् येभ्यस्तेऽनुत्तराः विजयवैजयन्तजयन्तापराजितसर्वार्थसिद्धनामानः । विजयादिपञ्चानामैकम् ॥

संग्रहमाह

**निकायभेदादेवं स्युर्देवाः किल चतुर्विधाः ॥९४॥**

**एवम्** उक्तप्रकारेण **देवाः** भवनपत्यादयः **चतुर्विधाः** चतुष्प्रकाराः **निकायभेदाद्** निकायो निवास उत्पादस्थानं तद्भेदात् । तथाहि-भवनपतयोऽशीतिसहस्रोत्तरयोजनलक्षपिण्डायां रत्नप्रभायामूर्ध्वमधश्चैकैकं योजनसहस्रमपहाय तिष्ठन्ति । व्यन्तरास्तु तस्या एव रत्नप्रभाया उपरि यत्परित्यक्तं योजनसहस्रमेकं तस्याध ऊर्ध्वं चैकैकं योजनशतं विहाय मध्येऽष्टसु योजनशतेषु जायन्ते । ज्योतिष्कास्तु समभूतलभूभागात् सप्तशतानि नवत्युत्तराणि योजनानामारुह्य दशाधिकयोजनशतपिण्डे नभोदेशे लोकान्तात् किञ्चिन्न्यूने जन्माऽऽसादयन्ति । वैमानिकास्तु रज्जुमध्यार्द्धमधिरुह्याऽमुतः सौधर्मादिकल्पेषु वसन्ति । उक्तस्थानमन्तरेणान्यत्रैषामुत्पादो जन्म नास्तीति । निवासार्थोऽत्र निकायशब्दः सङ्घार्थो वा ॥९४॥

अथ देवविशेषनामान्याह-

**[1]आदित्यः [2]सविता[3]र्यमा [4]खर[5]सहस्रो[6]ष्णांशुरं[7]शू [8]रवि-**
**[9]र्मार्तण्डस्[10]तरणिर्[11]गभस्तिर[12]रुणो [13]भानुर्[14]नभो[15]ऽहर्मणिः ।**
**[16]सूर्यो[17]ऽर्कः [18]किरणो [19]भगो [20]ग्रहपुषः [21]पूषा [22]पतङ्गः [23]खगो,**
**[24]मार्तण्डो [25]यमुना[26]कृतान्तजनकः[27]प्रद्योतनस्[28]तापनः ॥९५॥**

**[29]ब्रध्नो [30]हंसश्[31]चित्रभानुर्[32]विवस्वान्**
**[33]सूरस्[34]त्वष्टा [35]द्वादशात्मा च [36]हेलिः ।**
**[37]मित्रो [38]ध्वान्तारातिर[39]ब्जांशु[40]हस्त-**
**[41]श्चक्रा[42]ब्जा[43]हर्बान्धवः [44]सप्तसप्तिः ॥९६॥**
**[45]दिवा[46]दिना[47]हर्[48]दिवस[49]प्रभा[50]विभा-**
**[51]भासः करः स्यान्[52]मिहिरो [53]विरोचनः ।**
**[54]ग्रहा[55]ब्जिनी[56]गो[57]द्युपतिर्[58]विकर्तनो**
**[59]हरिः [60]शुची[61]नौ गगनाद् [62]ध्वजा[63]ध्वगौ ॥९७॥**
**[64]हरिदश्वो [65]जगत्कर्म[66]साक्षी [67]भास्वान् [68]विभावसुः ।**
**[69]त्रयीतनुर्[70]जगच्चक्षुस्[71]तपनो[72]ऽरुणसारथिः ॥९८॥**

१ अदितेरपत्यम् **आदित्यः**।'दित्यदित्या-'४।१।८५॥ इति ण्यः । इदं रौढिकम् । २ सूते प्रकाशं **सविता** ।'षूङ् प्रसवे[7]'(दि.आ.वे.), तृच् । ३ ऋच्छति अर्यते वा **अर्यमा** । 'ऋ गतौ प्रापणे च[8]'(भ्वा.प.अ.), बाहुलकात् 'श्वन्नुक्षन्-पूषन्-प्लीहन्-क्लेदन्-स्नेहन्-मूर्धन्-मज्जन्-[अर्यमन्]-विश्वप्सन्-परिज्मन्'(उणा- १५७)इति साधुः । ४-६ खराः कठिनाः, सहस्रं च सहस्रसंख्याकाः, उष्णाश्च अंशवो यस्य स खरसहस्रोष्णांशुः, तेन **खरांशुः**, **सहस्रांशुः**, **उष्णांशुः**। यौगिकत्वात् खररश्मिः, दशशतरश्मिः, उष्णरश्मिः, शीतेतररश्मिरित्यादयः । ७ अमते (अमति) गच्छति व्योममार्गेणेति **अंशुः**। 'अम गत्यादौ[9]'(भ्वा.प.से.) 'मृगय्वादयश्च'(उणा-३७)इति कुः, बाहुलकात् शुक्, शतालव्यः । "अथोडुबन्धुश्च भयङ्करं करे महौषधीनष्टकरांशुभे शुभे॥"[ ]इति जानकीहरणयमकात् । ८ रूयते स्तूयते **रविः** ।'रु शब्दे'(अ.प.से.), 'अच इः'(उणा-५७८)इति इः । ९ मृतण्डस्याऽपत्यं **मार्तण्डः** ।'ऋष्यन्धकवृष्णि-कुरुभ्यश्च'४।१।११४॥इत्यण्, णित्त्वाद् वृद्धिः ।

"अण्डे द्विधा[10] कृते चार्त्तं, दृष्ट्वा पितरमब्रवीत् ।
आर्त्तस्त्वं भव माण्डेति, मार्तण्डस्तेन संस्मृतः ॥१॥"[ ]इति।

१० तरन्त्यनेन संसारं तमो वेति **तरणिः** ।'तॄ प्लवनतरणयोः'

---

१. 'सौधर्मे' इति ४प्रतेः टिप्पणी ॥ २. 'ऐशाने' इति ४प्रतेः टिप्पणी ॥ ३. 'ब्रह्मणि' इति ४प्रतेः टिप्पणी ॥ ४. इतोऽग्रे १प्रतौ 'नाम' इति दृश्यते ॥ ५. 'ढक्' इति २.३.४॥ ६. सुदर्शन-सुप्रतिबद्ध मनोरम-सर्वतोभद्र-सुविशाल-सुमनस-सौमनस-प्रियङ्कर-नन्दीकर इति नवग्रैवेयकाः ॥ ७. विग्रहे 'सूते' इत्यभिष्टत्वादत्रादादेः 'प्राणिगर्भविमोचने' इत्यर्थकः षूङ्धातुर्युक्तः ॥ ८. 'गतिप्रापणयोः' इति स्वामिसायणौ ॥ ९. 'अम गत्यादिषु' इति क्षीरतङ्गिण्यादौ ॥ १०. 'द्विधा' इति ३.४ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(भ्वा.प.से.), अर्त्ति-सृ-धृ-धम्यस्यश्यवितृभ्योऽनिः'(उणा-२५९)इत्यनिः, 'सार्वधातुकार्धधातुकयोः'७।३।८४॥ इति गुणः, पुंस्त्रीलिङ्गः । **११** गृध्यते अभिकाङ्क्ष्यते लोकैरिति **गभस्तिः** । 'गृधु अभिकाङ्क्षायाम्'(दि.प.से.) 'गृधेर्गभ् च'(हैमोणादिः ६६१)इत्यस्तिक्प्रत्ययो गृधेर्गभादेशश्च । यद्वा गोशब्दपूर्वादन्तर्भूतण्यर्थात्, 'भस भक्षण(भर्त्सन)दीप्त्योः'(जु.प.से.) अस्मात् 'क्तिच(क्तिच्)क्तौ च संज्ञायाम्'३।३।१७४॥ इति क्तिचीडभावे पृषोदरादित्वाद् गोशब्दस्य अकारः । गां भूमिं बभस्ति दीपयति गभस्तिः । यद्वा गवि स्वर्गे दीप्यते । यद्वा बभस्ति रत्तिकर्माऽत्र। गामुदकं भौमरसलक्षणं बभस्ति अत्तीति गभस्तिः । यद्वा 'गट् च'( )इति भोजसूत्रेण तिप्रत्ययः, धातोर्गडागमश्च । बभस्ति दीप्यत इति गभस्तिरिरिति । **१२** अरुणः सारथिरस्येति **अरुणः**। 'अर्शआदिभ्योऽच्'५।२।१२७॥ इत्यच् । अरुणकान्तित्वाद् वा अरुणः।**१३** भाति दीप्यते **भानुः** ।'भा दीप्तौ'(अ.प.अ.),'दाभाभ्यां नुः'(उणा-३१२)इति नुः । **१४-१५** नभोऽहर्मणिः इति, नभश्च अहश्च नभोऽह्नी, नभोऽहोभ्यां मणिः नभोऽहर्मणिः, तेन नभसि मणिरिव **नभोमणिः**। अह्नो अह्नि वा मणिरिव **अहर्मणिः** । यौगिकत्वाद् व्योमरत्नम्, दिनरत्नमित्यादिः । दिवो मणिरिव द्युमणिः ।दिवि मणिः [इव] "[अम.क्षीर१।३।३१॥]इति तु क्षीरस्वामी । **१६** सरति व्योममार्गेण, सुवति प्रेरयत्यन्धकारं वेति **सूर्यः** ।'सृ गतौ'(भ्वा.प.अ.)अस्मात् कर्तरि क्यप्, उकारोन्तादेशश्च निपात्यते, तत्र रपरत्वे 'हलि च'८।३।७७॥ इति दीर्घः । 'षू प्रेरणे'(तु.प.से.) अस्माद् वा ,'राजसूय-सूर्य-मृषोद्य-रुच्य-कुप्य-कृष्ट-पच्याव्यथाः'३।१।११४॥ इति सूत्रेण साधुः ।सुवति प्रेरयति कर्मणि लोकानिति वा व्युत्पत्तिः । तत्रोदिते लोकानां कर्मसु प्रवृत्तेः सूर एव वा सूर्यः । 'नवसूरयवा'([३] )इत्यादिना यत् । **१७** दैवैर्मानवैश्च अर्च्यते पूज्यते **अर्कः** ।'अर्च पूजायाम्'(भ्वा.प.से.),कृ-दा-धा-रार्चि-कलिभ्यः कः'(उणा-३२०) इति कप्रत्ययः, 'चोः कुः'८।२।३०॥ इति धातोः कवर्गोऽन्तादेशः, ['झरो झरि-'८।४।६५॥इति कलोपः] ।अर्च्यतेऽसाविति, कर्मणि घञ् वा, 'चजोः'-७।३।५२॥इति कुत्वम्।**१८** किरति विक्षिपति तमांसीति **किरणः**।कृणाति तम इति वा ।'कॄ विक्षेपे'(तु.प.से.), तुदादिः, 'कॄ हिंसायाम्'(क्र्या.प.से.), क्र्यादिः, आभ्यां 'कृपॄ(पृ)वृजिमन्दिनिधाञ्भ्यः क्युः'(उणा-२३९)इति क्युः।**१९** भज्यते आश्रीयतेऽनेन कृत्वा आलोको जनैरिति **भगः** । 'भज सेवायाम्'(भ्वा.उ.अ.),करणे घञ्,'चजोः- ७।३।५२॥इति कुत्वम्।

**२०** ग्रहान् पुष्णाति **ग्रहपुषः**।'पुष पुष्टौ'(क्र्या.प.से),मूलविभुजादित्वात् कः । आदित्यो हि सुषुम्णाभिर्नाडिभिर्ग्रहान् पुष्णातीति । यद् व्याडिः-

"सुषुम्णाद्याश्च नाड्योऽस्य पुष्णन्ति सततं ग्रहान् ॥"[४]

इति । **२१** वर्षेण कृत्वा लोकान् पुष्णाति ऋतुभेदात् पूषति वर्धते वा **पूषा** । पूषणौ, पूषणः इत्यादि । 'पुष पुष्टौ'(क्र्या.प.से.), क्र्यादिः, 'पुष पुष्टौ'(भ्वा.प.से), भ्वादिर्वा, 'श्वन्नुक्षन्-पूषन्-'(उणा-१५७)इत्यादिना साधुः । यद् व्याडिः-

"ऋतुभेदात् पुनस्तस्यातिरिच्यन्ते च रश्मयः ।
शतानि द्वादश मधौ त्रयोदश च माधवे ॥२॥
चतुर्दश पुनर्ज्येष्ठे नभोनभस्ययोस्तथा ।
पञ्चदशैव त्वाषाढे षोडशैव तथाश्विने ॥३॥
कार्तिकिके[५] त्वेकादश शतान्येवं तपस्यपि ।
मार्गे च दश सार्द्धानि शतान्येवं च फाल्गुने ॥४॥
[६]पोष एव परं मासि सहस्रं किरणा रवेः ॥"[४] इति।

**२२** पतति गच्छति व्योम्नि **पतङ्गः** ।' पत्लृ गतौ'(भ्वा.प.से.), 'पतेरङ्गच्-'(उणा-११६)इत्यङ्गच् । **२३** खे आकाशे गच्छति **खगः** । 'गम्लृ गतौ'(भ्वा.प.अ.), 'अन्यत्रापि दृश्यते'(वा-३।२।४८॥)इति डः।**२४** मृतमण्डमस्येति मृताण्डः ऋषिस्तस्यापत्यं **मार्ताण्डः**।'ऋष्यन्धकवृष्णि- '४।१।११४॥ इत्यानिाऽण् । 'मृतमण्डमजायत"[ ]इति श्रुतेः ।मार्ताण्डो दीर्घमध्यः ।"अथ मार्तण्डमार्ताण्डौ"[ ]इति नामनिधानम् ।शब्दार्णवे मार्कण्डोऽपि ।**२५-२६** यमुनायाः कृतान्तस्य च जनकः, तेन **यमुनाजनकः**, **कृतान्तजनकः** ।यौगिकत्वात् कालिन्दीसूः, यमसूरित्यादयोऽपि । **२७** प्रद्योतते **प्रद्योतनः** ।'द्युत दीप्तौ'(भ्वा.आ.से.),नन्द्यादित्वाल्ल्युः, 'युवोरनाकौ'७।१।१ ॥इत्यनादेशः ।**२८** तापयत्युष्णतेजोभिरिति **तापनः** ।'तप सन्तापे'(भ्वा.प.अ.) अस्माद् हेतुमण्णिजन्ताद् 'अन्यत्रापि बहुलम्'( )इति युच् ॥९५॥ **२९** बध्नाति तिमिरमिति **ब्रध्नः**।'बन्ध बन्धेन'(क्र्या.प.अ.),'बन्धेर्ब्रधिबुधी च'(उणा-२८५) इति नक्,'अनिदिताम्- '६।४।२४॥इति न्लोपः।**३०** हन्ति तमांसि, हन्ति गच्छति वा विहायसीति **हंसः** ।'हन हिंसागत्योः' (अ.प.अ.), 'वृतृवदिहनिकमिकषियुमुचिभ्यः सः'(उणा-३४२)इति सः। **३१** चित्रा नानाप्रकारा भानवः किरणा अस्येति **चित्रभानुः** ।**३२** विवस्ते विविधप्रकारेणाच्छादयति परतेजांसीति विवँः ।'वस आच्छादने'(अ.आ.से), अस्माद् विपूर्वात् क्विप्।

---

१.'-धम्यश्यवि- 'इत्युणादिगणे ॥ २.'-भ्योऽणिरित्यणिः' इति २ ॥ ३. मूलं मृग्यम् ॥ ४. द्र. स्वोपज्ञटीका. २।९५॥, पृ. २०॥ ५.'चैका- 'इति ३॥ ६. 'पौष' इति १ ॥ ७.'विवस् 'इति ३.४ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विवो रश्मिस्तद्योगात् **विवस्वान्** । 'तदस्यास्त्यस्मिन्-' ५।२।९४॥ इति मतुप्, 'मादुपधायाश्च मतोर्वोऽयवादिभ्यः' ८।२।९॥ इति वत्वम्। यद्वा "विपूर्वो वसिरतिक्रमे । विवसोऽस्यास्ति, विवस्वान्, रात्र्याद्यतिक्रमवानित्यर्थः"[ ]इति तु[1] कौमुदी। **३३** सूते उत्पादयति तेजांसि, सूते[2] (सुवति) प्रेरयत्यन्धकारमिति वा**सूरः**।['षूङ्प्राणिगर्भविमोचने'(अ.आ.से.)] 'सू(षू) प्रेरणे'(तु.प.से.) [वा],'सुसूधागृधिभ्यः क्रन्'(उणा-१८२)इति क्रन् । सूरो[3] दन्त्यादिः, "वारुणीवारुणीभूतसौरभासौरभास्पदम्"[ ]इति दण्डियमकात्।"शवतिगच्छतिशूरः।'शु गतौ'[सौत्रः],'शुसिचिमीभ्यो[4] दीर्घश्च'(उणा-१८३)इति क्रन्, शूरस्तालव्यादिः"[ ]इति तु कलिङ्गः। "शूरति शूरः। 'शूर विक्रान्तौ'(चु.आ.से.) अतः'इगुपधज्ञाप्रीकिरकः'३।१।१३५॥"[ ]इति स्वाम्यपि. तालव्यादिः ।"सुभटे शूरः सूर्ये च दन्त्योऽपि" [[5]]इत्यूष्मविवेकः ।"कुमुदाकरा इवासोढशूरभासः"[सुबन्धुकृतवासवदत्ता, पृ. ६५]इति वासवदत्ताश्लेषादपि तालव्यत्वमायाति । **३४** त्वेषति दीप्यते **त्वष्टा** ।'त्विष दीप्तौ'(भ्वा.उ.अ.), 'नप्तृनेष्टृत्वष्टृक्षत्तृहोतृ[6]पोतृमातृभ्रातृजामातृदुहितृ'(उणा-२५२)एते शब्दानिपात्यन्ते,तृन्तृचोप्रत्यययोर्निरूढाः।'त्विषेर्देवतायामकारश्चोपधायाः'( )इति तृनि उपधाया अत्वमिति वा । **३५** द्वादश आत्मानो रूपाण्यस्य**द्वादशात्मा**, नकारान्तोऽयम्।"द्वादश ह्यादित्याः"[[7]] इति प्रसिद्धिः । **३६** हेलयति क्रीडयति अंशूनिति **हेलिः** ।'हिल क्रीडायाम्[8]'(), णिजन्तादस्माद्'अच इः'(उणा-५७८)इति इः। **३७** मेद्यति **मित्रः**।'ञिमिदा स्नेहने'(दि.प.से.),'अमिचिमिदिशसिभ्यः त्रन्[9]'(उणा-६०३)इति त्रन् ।मित्रो द्वितकारः । **३८** ध्वान्तस्यारातिः **ध्वान्तारातिः** ।यौगिकत्वात् तिमिरारित्यादयः ।

**३९-४०** अब्जानि अंशवश्च हस्ते यस्य स तथा **अब्जहस्तः**, **अंशुहस्तः**।यौगिकत्वात् पद्मपाणिः,गभस्तिपाणिरित्यादयः।**४१-४३** चक्रस्य अब्जस्य अह्नश्च बान्धवः, तेन **चक्रबान्धवः**, चक्रः चक्रवाकपक्षी, **अब्जबान्धवः**, **अहर्बान्धवः** । यौगिकत्वात् चक्रवाकबन्धुः, पद्मबन्धुः, दिनबन्धुरित्यादयः ।**४४** सप्तसंख्याः सप्तयोऽश्वा यस्य स **सप्तसप्तिः**।।९६।।यद्वेदः"सप्तयुजन्ति[10](युञ्जन्ति[11]) रथमेकचक्रम् एकोऽश्वो[12] वहति सप्तनामा"[[13]]इति। **४५-५१** दिवादिभ्यः सप्तभ्यः करशब्दोयोज्यः, तेनदिवाशब्दोऽधिकरणवाची, दिवाऽह्नि करोति प्राणिनश्चेष्टायुक्तानिति **दिवाकरः** । 'दिवाविभानिशाप्रभा-'३।२।२१॥ इत्यादिना टप्रत्ययः । दिनं करोति **दिनकरः** ।'डुकृञ् करणे'(त.उ.अ.).'कृञो हेतुताच्छील्यानुलोम्येषु'३।२।२०॥ इति टः । अहः करोति **अहस्करः** । कृञो धातोः'दिवाविभानिशाप्रभाभास्करान्तानन्तादिबहुनान्दी'३।२।२१॥ इत्यादिनाटप्रत्ययः,'रोऽसुपि'८।२।६९॥इतिअह्नो नकारस्य रेफः, 'खरवसानयोर्विसर्जनीयः'८।३।१५॥, ततः 'अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य'८।३।४६॥इतिसत्वम्।"कस्कादित्वात् सः"[अम.क्षीर. १।२।२९॥]इति तु स्वामी । दिवसं करोति **दिवसकरः** । प्रभाः करोति **प्रभाकरः**।विभाः करोति[14] **विभाकरः** । उभयत्र 'दिवाविभानिशाप्रभा-'३।२।२१॥ इत्यादिना कृञष्टः।भाः करोति**भास्करः**।'भास्करे[15]'३।२।२१॥इतिनिपातनात् सः ।सकारोच्चारणादेव निपातनात् प्रत्ययसन्नियोगेन भाःशब्दस्य सकारो भवति, न विसर्जनीयजिह्वामूलीयावित्यर्थः ।यद्वा 'भास्कर'३।२।२१॥इति निर्देशादनुमितात् कस्कादित्वपाठात् स इत्यर्थो द्रष्टव्यः, तथा च "विसर्गसन्धावुक्तम्, कस्कादित्वात् सः भास्करः"इत्यादि ।यौगिकत्वाद् वासरकृत्, दिनप्रणीरित्यादयः[16] ।

---

१. २.४प्रतौ नास्ति ॥ २. सर्वादर्शेषु स्थितमिदं रूपमदादेः 'षूङ् प्राणिगर्भविमोचने' इत्यस्माद् भवति, वस्तुतस्तु प्रमादोऽयम्, "यत्तु-सूते प्रेरयत्यन्धकारमिति विग्रहं प्रदर्श्य 'षू प्रेरणे'(तु.प.से.)इति धातोरुपन्यसनं मुकुटेन कृतम्, तन्न, उक्तधातोस्तादृशरूपाभावात्"(रामाश्रमी १।३।२८॥, पृ.५१)इति अमरकोषरामश्रम्यामुक्तत्वात् ॥ ३. सूरशब्दव्युत्पत्तिविषये केचन ग्रन्थाः 'षूङ् प्राणिगर्भविमोचने' इति धातुविषये "सुसूधागृधिभ्यः क्रन्'(श्वेत. उ. २।२७)सुरोऽर्कः" इति क्षीरतरङ्गिणी, पृ.१८०॥ "सूरः 'सुसूधागृधिभ्यः' इति क्रन्" 'षूङ् प्राणिगर्भविमोचने' इत्यत्र मा.धातुवृत्तिः, पृ.३३८॥ "उणादौ 'ऋज्यजि-'(उणा-३८८)इति किति रे सूरः" इति 'षूङौक् प्राणिगर्भविमोचने' इत्यत्र धातुपारायणम्, पृ.१८४॥ "सूते तेज इति सूरः, 'ऋज्यजि-'(उणा-३८८)इत्यादिना रक्" इति अभिधानस्वोपज्ञटीका, पृ.२०॥ "षूङौच् प्राणिप्रसवे', सूरः आदित्यः रश्मिश्च" इति 'ऋज्यजि-'(उणा-३८८)इत्यत्र हैमोणादिस्वोपज्ञविवरणम्, पृ.३९६॥ "सुवति प्रेरयति कर्मणि लोकम्, 'षू प्रेरणे'(तु.प.से.). 'सुसूधागृधिभ्यः क्रन्, दन्त्यादिः" इति अमरकोषरामाश्रमीटीका, पृ.५१॥ ४. '-मीनां' इत्युणादिगणे॥ ५. द्र. रामाश्रमी १।३।२८॥, पृ.५१॥ ६. '-त्वष्टृहोतृ-' इत्युणादिगणे ॥ ७. द्र. स्वोपज्ञटीका २।९६॥, पृ.२०॥ ८. हिलधातुः क्रीडार्थे न दृश्यते ॥ ९. सर्वादर्शेषु 'त्रन्' एव दृश्यते, परं क्त्रः प्रत्ययो ज्ञातव्यः, तेन कित्त्वाद् गुणो न ॥ १०. 'युजति' इति१॥ ११. स्वोपज्ञटीकासम्मतो पाठः, पृ.२१॥ १२. '-ऽश्वो' इति स्वोपज्ञटीका, पृ.२१॥ १३. द्र. स्वोपज्ञटीका २।९७॥, पृ.२१॥ १४. 'विभाः करोति' इति १प्रतौ नास्ति । १५. 'भास्कर' इति१ प्रतौ नास्ति ॥ १६. 'दिनमणी-' इति२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**५२** मेहति सिञ्चति **मिहिरः** । 'मिह सेचने'(भ्वा.प.अ.), 'इषि-मदि-मुदि-खिदि-च्छिदि-भिदि-मन्दि-चर्दि[1]-तिमि-मिहि-मुचि-रुचि-रुधि-शुषि-बन्धिभ्यः किरच्'(उणा-५०)इति किरच्, कित्त्वाद् गुणाभावः ।

"आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः॥"[ ]इति श्रुतेः। तथा शाम्बपुराणे-

"मेहेति[2] सेचने धातुर्मेहनान्मिहिरः स्मृतः॥"[ ]इति । हट्टचन्द्रश्च 'मरिं महिं पठित्वा महिरः'[ ]इति प्रथमस्वरादि पठन् 'मिहेरपारणीयतया(-रपाणिनीयतया) मिहिरोऽसाधुः'[ ]इति यदाह, तदसत्, त्रिकाण्डशेषेऽपि "महिरमिहिरपीथाः कालकृत्पद्मपाणिः ॥"[त्रिकाण्डशेषः १।३।१८॥]इति दर्शनात्। क्षीरस्वाम्यादिभिरपि 'मिहिर' इति व्युत्पादनाच्च 'मिहिर' इत्यपि साधुरेव । **५३** विशेषेण रोचत इति **विरोचनः** । 'रुच दीप्तौ' (भ्वा.आ.से.), 'अनुदात्तादेश्च[3]-'३।२।१४९॥ इति युच् । **५४-५७** ग्रहाणामब्जिनीनां गवां द्यूनां च पतिः, तेन ग्रहाणां पतिः **ग्रहपतिः, अब्जिनीपतिः**, गोशब्देन दीधितयस्तासां पतिः **गोपतिः, द्युपतिः**। यौगिकत्वाद् ग्रहेशः, पद्मिनीशः[4], त्विषांपतिरिति। 'दिवस्पतिवदलुकि'[ ]इति कलिङ्गः, 'वाक्यमेव प्रचुरप्रयोगत्वान्निबद्धम्'[ ]इति श्रीधरः। "पत्युस्त्विषामिह महौषधयः कलत्रस्थानम्"[शिशुपालवधम् ४।३४॥]इति माघः । **५८** स्वदुहितुरिच्छायै विश्वकर्मणा विविधं कर्त्तित इति **विकर्त्तनः**[5]। विपूर्वः 'कृती छेदने'(तु.प.से.), 'कृत्यल्युटो बहुलम्'३।३।११३॥ इति बहुलवचनात् कर्मणि ल्युट्, 'युवोरनाकौ'७।१।१॥, 'पुगन्तलघूपधस्य च'७।३।८६॥ इति उपधागुणः । **५९** हरति तमांसि स्वसेवकरोगानिति वा **हरिः** । 'हृञ् हरणे'(भ्वा.उ.अ.), 'अच इः'(उणा-५७८)इति इः, 'सार्वधातुकार्धधातुकयोः[6]' ७।३।८४॥ इति गुणः। 'आरोग्यं भास्करादिच्छेत्'[ ]इत्यागमः। **६०** शोचत्यस्मिन्नुदिते उलूक इति **शुचिः**, तालव्यादिः । 'शुच शोके'(भ्वा.प.से), 'इगुपधात् कित्'(उणा-५५९)इतीन्। **६१** आयन्ति जनास्तमिति **इनः**। 'इण् गतौ'(अ.प.अ.), 'इण्दीङुषवभ्यो नक्[7]'(उणा-२८२)। **६२-६३** गगनाद् ध्वाजाऽध्वगौ, गगनशब्दाद् ध्वजशब्दोऽध्वगशब्दश्च योज्यः, तेन गगने ध्वज इव **गगनध्वजः, गगनाध्वगः** । यौगिकत्वाद् नभःकेतनः, नभःपान्थः इत्यादयः ॥१६॥ **६४** हरितो नीला अश्वा अस्य **हरिदश्वः** । **६५-६६** जगत्कर्मसाक्षी, जगतः कर्मणां च साक्षी, तेन **जगत्साक्षी**, जगत्साक्षिणौ, जगत्साक्षिणः इत्यादि । एवं **कर्मसाक्षी** । **६७** भासः सन्त्यस्य **भास्वान्** । 'तदस्यास्त्यस्मिन्-' ५।२।९४॥ इति मतुप् । यौगिकत्वाद् अंशुमान्, अंशुमालीत्यादयः । **६८** विभा दीप्तिर्वसु धनमस्य **विभावसुः**। **६९** त्रयो वेदाः त्रयी, सा तनुरस्य **त्रयीतनुः** । 'त्रयी तेजोमयो भानुः' [ ]इति स्मृतेः । **७०** जगतां चक्षुः **जगच्चक्षुः**, प्रकाशकत्वात्[8] । **७१** तपतीति **तपनः** । 'तप सन्तापे'(भ्वा.प.-अ.) तप्यते इति वा। 'तप ऐश्वर्यादौ[9]'(दि.आ.अ.), युच्, नन्द्यादिर्वा 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः'३।१।१३४॥ इति ल्युः । "भानुर्हंसः सहस्त्रांशुस्तपनस्तापनो रविः॥"[ ]इति संसारावर्त्तः । **७२** अरुणः सारथिरस्य **अरुणसारथिः** । द्वासप्ततिः सूर्यस्य[10][11] । शेषश्चात्र-

> "सूर्ये वाजीलोकबन्धुर्भानेमिर्भानुकेसरः ।
> सहस्राङ्को दिवापुष्टः कालभृद् रात्रिनाशनः ॥५॥
> पपीः सदागतिः पीतुः सांवत्सररथः कपिः ।
> दृशानः पुष्करो ब्रह्मा बहुरूपश्च कर्णसूः ॥६॥
> वेदोदयः खतिलकः प्रत्यूषाण्डं सुरावृतः ।
> लोकप्रकाशनः पीथो जगद्दीपोऽम्बुतस्करः ॥७॥"
> [शेषनाममाला-२।८-१०॥]॥१८॥

**रोचिरुस्त्ररुचिशोचिरंशुगो-**
**ज्योतिरर्चिरुपधृत्यभीशवः।**
**प्रग्रहः शुचिमरीचिदीप्तयो**
**धाम केतुघृणिरश्मिपृश्नयः ॥९९॥**
**पाददीधितिकरद्युतिद्युतो**
**रुग्विरोककिरणत्विषित्विषः ।**
**भाः प्रभावसुगभस्तिभानवो**
**भा मयूखमहसी छविर्विभा ॥१००॥**

**१** रोचते दीप्यते **रोचिः**, क्लीबलिङ्गः । 'रुच दीप्तौ' (भ्वा.आ.से.), 'अर्चिरुचिशुचिहुसृपिछादिच्छृदिभ्य इस्[12]' (उणा-२६५)इति इस् । रोचिषी, रोचींषी, । **२** वसन्ति रस अस्मिन्निति **उस्त्रः**। 'वस निवासे'(भ्वा.प.अ.), 'स्फायित-

१. '-चन्दि-' इत्युणादिगणे ॥ २. 'मेहति' इति१ ॥ ३. 'अनुदात्तेतश्च' इत्यष्टाध्याय्याम्॥ ४. 'पद्मनीशः' इति१.२॥ ५. 'विकर्तिनः' इति१.२॥ ६. 'सार्वधातुकयोः' इति१.२॥ ७. 'इणसिञ्जिदीङुष्यविभ्यो नक्' इत्युणादिगणे॥ ८. नास्ति २.३.४ प्रतौ॥ ९. 'प्रकाशत्वात्' इति१॥ १०. 'तप ऐश्वर्यादौर्युच्' इति३ ॥ ११. इतोऽग्रे ४प्रतौ 'नामानि' इति दृश्यते ॥ १२. 'अर्चिशुचिहुसृपिछादिछर्दिभ्य इसिः' (२६५) इत्युणादिगणसूत्रस्वरूपम्॥

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

ञ्चिवञ्चिशकिक्षिपिक्षुदिसृपितृपिदृपिवन्दुन्दिश्वितिवृत्यजिनीपदिमदिमुदिखिदिभिदिच्छिदिमन्दिचदिदहिदसिदम्भिवहिंवसिवाशिशीङ्हसिसिधिशुभिभ्यो रक्'(उणा-१७०)इति रक्, कित्त्वात् सम्प्रसारणम्, बाहुलकात् 'शासिवसिघसीनां च'८।३।६०॥ इति षत्वाभावः। वसत्येषु परं तेज इति वा व्युत्पत्तिः। यद्वा उद्पूर्वात् 'स्रु गतौ'(भ्वा.प.अ.) इत्यस्माद् 'उपसर्गे च संज्ञायाम्'३।३।९९॥ इति घञि विधीयमाने उप्रत्ययो बाहुलकाद् भवति, उल्लोपश्च । उत्स्रवन्ति रसा अस्मादिति व्युत्पत्तिः । ३ रोचते **रुचिः**, स्त्रीलिङ्गः। 'रुच दीप्तौ'(भ्वा.आ.से.), 'इगुपधात् कित्'(उणा-५५९)इति इन्प्रत्ययः । ४ शोचतस्तमोधूकौ अत्रेति **शोचिः** । औषधीशरुचिहारकत्वेन शुच्यते औषधीरनेनेति वा शोचिः, क्लीबलिङ्गः । 'शुच शोके'(भ्वा.प.से.), 'अर्चिरुचिशुचि-'(उणा-२६५)इत्यादिना इस् । ५ अमते (अमति) गच्छति **अंशुः**, पुंल्लिङ्गः । 'अम् गतौ'(भ्वा.प.से.), 'मृगय्वादयश्च' (उणा-३७)इति कुः, शप्रत्ययागमश्च । ६ गच्छत्यस्मात् तमः, गीयते स्तूयते वा जनैः **गौः**, पुंस्त्रीलिङ्गः । 'गम्लृ गतौ' (भ्वा.प.अ.), 'गमेर्डोः'(उणा-२२५)इति डोः, 'गोतो णित्' ७।१।९०॥, 'अचो ञ्णिति'७।२।११५॥ इति वृद्धिः । ७ द्योतते दीप्यते **ज्योतिः**, क्लीबलिङ्गः। 'द्युत दीप्तौ'(भ्वा.आ.से.), 'द्युतेरिसन्नादेश्च जः'(उणा-२६७)इति सूत्रेण इसिन्प्रत्ययः धातोरादेश्च जकारः । ज्योतिषी, ज्योतींषि इत्यादि। ८ अर्च्यत इति **अर्चिः**, स्त्रीक्लीबलिङ्गः। 'अर्च पूजायाम्'(भ्वा.प.से.), 'अर्चिरुचिशुचि-'(उणा-२६५)इत्यादिना इस्। अर्चिषौ, अर्चिषः इत्यादि स्त्रियाम् । अर्चिषी, अर्चींषि इत्यादि क्लीबे । ९ उपध्रियतेऽवतिष्ठते रसोऽत्रेति **उपधृतिः**। उपपूर्वः 'धृञ् धारणे' (भ्वा.उ.अ.), 'क्तिच्क्तौ च संज्ञायाम्'३।३।१७४॥ इति क्तिच् । १० अभिव्याप्नुवन्ति जगदिति **अभीशुः**। अभिपूर्वाद् 'अशू व्याप्तौ'(स्वा.आ.वे.)इत्यस्मात् 'भृमृशीङ्चरित्सरितनिधनिमनिमिमस्जिभ्य उः'[2](उणा-७)इत्युप्रत्ययो बाहुलकाद् भवति, धात्ववयवस्य अकारस्य च[3] इकारः। यद्वा अभिपूर्वात् 'ईश ऐश्वर्ये'(अ.आ.से.)इत्यस्मात् पूर्ववदुप्रत्ययः, ईष्टे सूर्यस्तमो हन्तुमेभिरिति व्युत्पत्तेः । पुंल्लिङ्गौ एतौ । "अभीषुः"[4]इति गौडः । ११ प्रगृह्यतेऽनेन रस इति **प्रग्रहः** । 'ग्रह उपादाने' (क्र्या.उ.से.), 'ग्रहवृ[दृ]णि(नि)श्चिगमश्च'३।३।५८॥ इति करणेऽप् । १२ शुच्यते औषधीभिरनेनेति **शुचिः**, पुंल्लिङ्गः। शुचि नैर्मल्यार्थोऽत्र, 'इगुपधात् कित्'(उणा-५५९)इतीन् । १३ म्रियते तमोऽत्रेति **मरीचिः**, पुंस्त्रीलिङ्गः । 'मृङ् प्राणत्यागे' (तु.आ.अ.), 'मृकणिभ्यामीचिः' (उणा-५१०)इतीचिप्रत्ययः। १४ दीप्यतेऽनयेति **दीप्तिः**। 'दीपी दीप्तौ'(दि.आ.से.), 'क्तिन्नवादिभ्यो वक्तव्यः'(वा-३।३।९४॥)इति क्तिन् । १५ धीयते तेजोऽत्रेति **धाम** । 'डुधाञ् धारणपोषणयोः' (जु.उ.अ.), '-मन्'(उणा-५८६)इति मनिन्प्रत्ययः । १६ चाय्यते लोकैः पूज्यत इति **केतुः**। 'चायृ पूजानिशामनयोः'(भ्वा.उ.से.), 'चायः की (किः) च'(उणा-७३)इति तुप्रत्ययः । ([5]१७ घरति **घृणिः**। 'घृ सेचने'(भ्वा.प.अ.), णिप्रत्ययः) । अश्नुते व्याप्नोति जगदिति **रश्मिः**, पुंल्लिङ्गः । 'अशू व्याप्तौ'(स्वा.आ.वे.), 'अशे(अशो) रश्च' (हैमोणा-६८८)इति मिप्रत्ययो रशादेशश्च। यद्वा रशिर्यमनार्थो धातुः, 'नियो मिः'(उणा-४८३)विधीयमानो मिप्रत्ययो बाहुलकाद् भवति। रशनाद् रश्मिरिति, कतिपयप्राणयोगविषय एवायं रषिः (रशिः) भारत्यादिवत्र सर्वत्र बन्धनप्रतीतेः, बध्नात्युदकं बध्यते वा तैरुदकमिति वा व्युत्पत्तेः । १९ स्पृश्यते **पृश्निः**, पुंस्त्रीलिङ्गः । 'स्पृश संस्पर्शने'(तु.प.अ.), 'घृणिपृश्निपार्ष्णितू(चू)र्णिः'(उणा-४९२)इत्यनेन निप्रत्ययो निपातितः । पृष्णिरित्यके। वृष्णिरित्यन्ये । धृष्णोति प्रगल्भते, 'ञिधृषा प्रागल्भ्ये'(स्वा.प.से.), 'वृषिधृषिभ्यां कित्'( )इति निरिप्रत्यये (निप्रत्येय) धृष्णिरित्यपरे ॥९९॥ २० पद्यतेऽनेनेति **पादः**। 'पद गतौ'(दि.आ.अ.), 'पदरुजिविशस्पृशो घञ्'३।३।१६॥ इति घञ्, 'अत उपधायाः'७।३।११६॥ इति वृद्धिः। २१ 'दीधीङ् दीप्तिदेवनयोः'(अ.आ.से.), 'संज्ञायां क्तिन्,' तितुत्र-७।२।९॥ इतीण्निषेधोऽत्र न भवति 'अग्रहादीनामिति[6] तत्रोक्तत्वात्'[मा. धातुवृत्तिः, अदादिः, धातुसं-८४]इति माधवः[7] । धीयते विधीयते प्रेर्यते रसाहरणादिकर्मस्वाऽऽदित्येनेति **दीधितिः**, स्त्रियाम् । 'क्तिच्क्तौ च संज्ञायाम्'३।३।१७४॥ क्तिचि पृषोदरादित्वादेव यथाकथञ्चिद्रूपसिद्धिरुन्नेया । धार्यते वा वर्षार्थमुदकमेभिरादित्येन । तथा च 'अथास्य कर्मरसादानं रश्मिभिश्च रसधारणम्' [निरुक्तम् ७।३।]इति निरुक्तम् ।

"न वासघृतं गर्भं भास्करस्य गभस्तिभिः ।

पीत्वा रसं समुद्राणां द्यौः प्रसूते रसायनम् ॥१॥"[ ]इति रामायणम् । "दीधीते दीप्यते । 'दीधीङ् दीप्तिदेवनयोः' (अ.आ.से.), स्त्रियां क्तिन् (क्तिच्), तितुत्रेष्वग्रहादीनामितीण्निषेधाभावादिट्, 'यीवर्णयोर्दीधीवेव्योः'७।४।५३॥ इति [8]ईकारलोपः"[ ]इति मिश्राः। २२ कीर्यते विक्षिप्यतेऽसौ **करः** । 'कॄ विक्षेपे'(तु.प.से.), 'ॠदोरप्'३।३।५७॥ इत्यप्। २३ द्योततेऽनया रविरिति **द्युतिः**। 'द्युत दीप्तौ'(भ्वा.आ.से.),

---

१. '-वहि-' इति नास्त्युणादिगणे ॥ २. 'भृमृशीतृचरित्सरितनिधनिमिमस्जिभ्य उः' इत्युणादिसूत्रम् ॥ ३. २.४प्रतौ नास्ति ॥ ४. द्र. स्वोपज्ञटीका २।९९॥, पृ.२१ ॥ ५. कोष्ठान्तर्गतपाठस्थाने बहिर्भागे १ प्रतौ "घृणिः ऋ[द्]घृसृकुवृषि[भ्यः] कित्"(हैमोणा-६२५)इति णिः" इति पाठो दृश्यते । अत्र रामाश्रमी द्रष्टव्या, पृ.५३ ॥ ६. 'अग्रहनादिनामिति' इति १.२.३ ॥ ७. मा. धातुवृत्तौ "संज्ञायां क्तिचि, 'तितुत्र-' इतीण्णिषेधो न भवति, 'अग्रहादीनाम्' इति तत्रोक्तत्वात्"[मा. पृ.३८१]इति पाठो दृश्यते ॥ ८. 'इकार-' इति १.२.३ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'इगुपधात् कित्'(उणा-५५९)इतीन् ङीषि द्युती च"[ ]इति कौमुदी । **२४** द्योतनं **द्युत्** । 'द्युत दीप्तौ'(भ्वा.आ.से.), सम्पदादित्वात् क्विप् । **२५** रोचनं **रुक्** । 'रुच दीप्तौ'(भ्वा.आ.से.), सम्पदादित्वात् क्विप् । **२६** विरोचतेऽनेनेति **विरोकः** । 'रुच दीप्तौ'(भ्वा.आ.से.), बाहुलकात् करणे घञ् । **२७** किरति तापमौष्ण्येन, कीर्यते वा आदित्येन दिग्मुखेषु वेति **किरणः** । 'कृ विक्षेपे'(तु.प.से.) तुदादिः, 'कृपृवृजिमन्दिनिधाञ्भ्यः क्युः' (उणा-२३९)इति क्युः, 'ॠत इद्धातोः'७।१।१००॥ इतीकारोऽन्तादेशः, 'उरण् रपरः '१।१।५१॥ यद्वा कृणाति हिनस्ति तमः, हिंस्यते तमोऽनेनेति वा व्युत्पत्तिः 'कृ[ञ्] हिंसायाम्' (क्र्या.उ.से.), प्रत्ययस्तु प्राचीन एव । **२८** त्वेषते **त्विषिः**, स्त्रीलिङ्गः । 'त्विष दीप्तौ'(भ्वा.उ.अ.), 'इगुपधात् कित्'(उणा-५५९)इतीन् । **२९** त्वेषणं **त्विट्** । 'त्विष दीप्तौ'(भ्वा.उ.अ.), सम्पदादित्वात् क्विप् । **३०** भासते **भाः**, पुंस्त्रीलिङ्गः । 'भासृ दीप्तौ'(भ्वा.आ.से.) 'भ्राजभास-'३।२।१७७॥ इत्यादिना क्विप् । भासौ, भासः इत्यादिरूपाणि । **३१** प्रकर्षेण भात्यनया **प्रभा** । 'भा दीप्तौ'(अ.प.अ.) प्रपूर्वः, 'आतश्चोपसर्गे'३।३।१०६॥ इत्यङ् स्त्रीत्वाट्टाप् । **३२** वसति लोकेषु, वसत्यत्र परं तेजो वा **वसुः** । वसति (वस्ते) आच्छादयति लोकानिति वा । 'वस निवासे' (भ्वा.प.अ.), 'वस आच्छादने'(अ.आ.से.) वा, 'शृस्वृ-स्निहि-त्रप्यसि-वसि-हनि-क्लिदि-बन्धि-मनिभ्यश्च'(उणा-१०)इत्युः । **३३** गोशब्दपूर्वादन्तर्भूतण्यर्थाद् 'भस भक्षण(भर्त्सन)दीप्त्योः' (जु.प.से.)इत्यस्मात् 'क्तिच्क्तौ च संज्ञायाम्'३।३।१७४॥ इति क्तिचीडभावे, पृषोदरादित्वाद् गोशब्दस्याकारोऽन्तादेशः । गां भूमिं बभस्ति दीपयति । यद्वा गवि स्वर्गे दीप्यत । यद्वा बभस्तिरत्रात्तिकर्मा[2], गामुदकं भौमरसलक्षणं बभस्ति अत्ति । यद्वा 'गद् च'( )इति सूत्रेण तिप्रत्ययः, धातोर्गडागमश्च । बभस्ति दीप्यत इति **गभस्तिः** । **३४** भातीति **भानुः** । 'भा दीप्तौ'(अ.प.अ.), 'दाभाभ्यां नुः'(उणा-३१२)इति नुः । वस्वादयस्त्रयः पुंसि । **३५** भानं **भा** । 'मृगयेच्छाटाट्या[3]-'(वा-३।३।१०१॥)इत्यादिना 'भा दीप्तौ'(अ.प.अ.)इत्यस्य धातो रूपं निपात्यते । **३६** मिनोति प्रक्षिपति तमांसीति **मयूखः**, कवर्गद्वितीयोपधः । 'डुमिञ् प्रक्षेपणे'(स्वा.उ.अ.), अस्माद्धातोः 'मुहेः खः मूर्च'(उणा-७००)इति सूत्रेण मुहेर्विधीयमानः खप्रत्ययो[4] बाहुलकाद् भवति, ऊडागमश्च । 'खप्रत्ययाधिकारेऽयं रूढः'[ ]इति श्रीभोजः । मयतेर्गत्यर्थो[5](भ्वा.आ.से.) वा, बाहुलकाद् ऊखप्रत्ययः, मयति गच्छति सर्वलोकेष्विति व्युत्पत्तेः । माय प्रमाय गगने ओखति गच्छति मयूखः । 'मा माने'(अ.प.अ.), 'उख नख'(भ्वा.प.से.) इति दण्डको धातुर्गत्यर्थः, पचाद्यच्, पृषोदरादित्वाद् रूपसिद्धिः । यद्वा मिमीते मयूखः । 'माङ् माने'(जु.आ.अ.), 'माङ उखो (ऊखो) मय् च'(उणा-७०३)इत्यूखप्रत्ययो धातोर्मयादेशश्चेति । **३७** मह्यत इति **महः** । 'मह पूजायाम्'(भ्वा.उ.से.), '-असुन्' (उणा-६२८)इत्यसुन् । **३८** छ्यति छिनत्ति तमः, छाद्यते वा तमोऽनयेति **छविः**, स्त्रीलिङ्गः । 'छो छेदने'(दि.प.अ.), 'छर्द[6] संवरणे'(चु.उ.से.), 'कृविघृष्विच्छविस्थविदर्विँ[7]किकिदिर्विः[8]' (उणा-४९६)इति सूत्रेण साधुः । **३९** विभानं **विभा** । विपूर्वः 'भा दीप्तौ'(अ.प.अ.), 'आतश्चोपसर्गे'३।३।१०६॥ इत्यङ् । सामान्येन एकोनचत्वारिंशत किरणस्य ॥१००॥

**प्रकाशस्तेज उद्द्योत आलोको वर्च आतपः ।**

**१** प्रकाशते **प्रकाशः** । 'काशृ दीप्तौ'(भ्वा.आ.से.), घञ् । **२** तेजयति **तेजः** । 'तिज निशाने'(भ्वा.प.से.) णिजन्तादस्मात् '-असुन्'(उणा-६२८)इत्यसुन् । तेजसी, तेजांसि इत्यादि । **३** उद्योतत **उद्द्योतः** । उत्पूर्वः 'द्युत दीप्तौ'(भ्वा.प.से.), घञ् । **४** आलोकते जनोऽनेनेति **आलोकः** । 'लोकृ दर्शने'(भ्वा.आ.से.), करणे घञ् । **५** वर्चते दीप्यते **वर्चः** । 'वर्च दीप्तौ'(भ्वा.आ.से.), '-असुन्'(उणा-६२८)इत्यसुन् । वर्चसी, वर्चांसि इत्यादि । **६** आतपति **आतपः** । 'तप सन्तापे'(भ्वा.प.अ.), आङ्पूर्वः, पचाद्यच् । द्योत इत्यपि । षड् उद्योतस्य । 'उजुआलु' इति भाषा ॥

**मरीचिका मृगतृष्णा**

**१** म्रियतेऽनया मरीचिः । 'मृङ् प्राणत्यागे'(तु.आ.अ.), 'मृकणिभ्यामीचिः'(उणा-५१०)इतीचिः प्रत्ययः, मरीचिरिव **मरीचिका**, प्रथमस्वरादिः । 'इवे प्रतिकृतौ'५।३।९६॥ इति कन्, स्त्रीत्वाट्टाप् । **२** जलाभासत्वाद् मृगाणां तृष्णाऽस्त्यस्यां[9] **मृगतृष्णा** । अर्शआदित्वादच्, ततष्टाप् । मरुदेशे[10] सिकतादौ अर्करश्मयः प्रतिफलिता दूरस्थानां जलत्वेनाभासन्ते, तद्वाचिनामद्वयम् । मरुमरीचिकाऽपि । 'झांझूआ' इति भाषा ॥

**मण्डलं तूपसूर्यकम् ॥१०१॥**

**परिधिः परिवेषश्च**

**१** मण्ड्यते मण्डयते वा **मण्डलम्**, त्रिलिङ्गः । 'मडि भूषायाम्'(भ्वा.प.से.), ण्यन्तो वा । 'कलतृ(स्तृ)पश्च'(उणा-१०४) । इह सूत्रे प्राक्प्रत्ययनिर्देशो मण्डलादिप्रसिद्ध्यर्थः । मण्डं भूषां लात्यादत्ते वा मण्डलम् । 'ला आदाने'(अ.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥, 'आतो लोप इटि च'६।४।६४॥ इत्यालोपः ।

१. १.२ प्रतौ नास्ति ॥ २. '-त्रास्तिकर्मा' इति १, '-त्रास्तिकर्म' इति २॥ ३. 'सिद्धान्तकौमुद्यां-'मृगयाटाटया-' इति दृश्यते ॥ ४. 'ख' इति ३ नास्ति, 'खः' इति १॥ ५. 'मयतिर्गत्यर्थो' इति १.२॥ ६. 'छदि-' इति सायणः ॥ ७. '-दवि' इत्युणादिगणे नास्ति ॥ ८. '-किदीविः' इति१.२॥ ९. '-स्या' इति१॥ १०. '-देश-' इति १॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

२ सूर्यमुपगतं **उपसूर्यकम्**, क्लीबलिङ्गः। स्वार्थे कन्, 'प्रादयश्च' २।२।१८॥ इति प्रादिसमासः । यद्वा समीपे सूर्यस्य प्रतिकृतिः उपसूर्यकम् । 'इवे प्रतिकृतौ'५।३।९६॥ इति कन् **॥१०१॥ ३** परितो धीयते स्थाप्यते **परिधिः**, पुंल्लिङ्गः । 'डुधाञ् धारणपोषणयोः'(जु.उ.अ.) परिपूर्वः, 'उपसर्गे घोः किः'३।३।९२॥ इति किः, 'आतो लोप इटि च'६।४।६४॥ इत्यालोपः । 'कर्तरि किः''[टीकासर्वस्वम् १।३।३१॥]इति तु सर्वानन्दः । ४ परितो विष्यते व्याप्यतेऽनेन **परिवेषः**। परिपूर्वः, 'विष्लृ व्याप्तौ'(जु.-उ.अ.), बाहुलकात् कर्तरि घञ् । परिवेशस्तालव्यान्तोऽपि । तथा च ''पुंल्लिङ्गः परिवेषः स्यात् परिधौ परिवेषणः''[ ]इति मूर्धन्यान्ते रुद्रः[1] । ''वेष्टने परिवेशः स्याद् भानोः सविधमण्डले''[ [2] ]इति तालव्यान्ते रभसः । ''एवं च विशतिवेवेष्ट्योर्घञ्''[ ]इति तु कौमुदी । तथा च ''मण्डलं परिवेषश्च परिधिश्चोपसूर्यकम्''[ [2] ]इति त्रिकाण्डे भागुरिः । ''परिधिर्यज्ञियतरौ(-रोः) शाखायामुपसूर्यके'[अमरकोषः३।३।९७॥]इत्यनेकार्थकाण्डः । ''संमूर्च्छिता रवेरिन्दोश्च किरणाः पवनेन मण्डलीभूतास्ते तु साभ्रे व्योम्नि परिवेशः''[ [3] ]इति वराहः । चत्वारि चन्द्रसूर्यमण्डलस्य ॥

## सूरसूत[1]स्तु काश्यपि[2]: ।
## अनूरु[3]र्विनतासूनु[4]ररुणो[5] गरुडाग्रजः[6] ॥१०२॥

१ सूरस्य सूतः सारथिः **सूरसूतः**। यौगिकत्वाद् रविसारथिरित्यादयः। २ कश्यपस्यापत्यं **काश्यपिः**। 'ऋष्यन्धकवृष्णिकुरुभ्यश्च'४।१।११४॥ इति प्राप्तमणं बाधित्वा 'बाह्वादिभ्यश्च'४।१।९६॥ इति गोत्रे इञ् । **३** न विद्येते ऊरू अस्य **अनूरुः**। 'नञ्'२।२।६॥ इति सूत्रेण तत्पुरुषः, 'नञ्[4]'६।३।७३॥ इति नञो लोपः, 'तस्मान्नुडचि'६।३।७४॥ इति नुडागमः । ४ विनतायाः सूनुः **विनतासूनुः**। यौगिकत्वाद् वैनतेय इत्यादिः। ५ अरुणवर्णत्वाद् **अरुणः**। ६ गरुडस्याग्रजो **गरुडाग्रजः**। षट् सूर्यसारथेः । शेषश्चात्र-

''अरुणे विपुलस्कन्धो महासारथिराश्मनः ॥''

[शेषनाममाला २।११॥]इति **॥१०२॥**

## रेवन्त[1]स्त्वर्करेतोज[2]: प्लवगो[3] हयवाहनः[4] ।

१ रेवति (रेवते) गच्छति हयेनेति **रेवन्तः**। 'रेवृ गतौ'(भ्वा.आ.से.),'जृविशिभ्यां झच(झच्)'(उणा-४०६),बाहुलकादतोऽपि झच्,'झोऽन्तः'७।१।३॥ ।२ अर्कस्य रेतः अर्करेतः, अर्करेतसो जातः **अर्करेतोजः** ।'जनी प्रादुर्भावे'(दि.आ.से.), 'पञ्चम्यामजातौ'३।२।९८॥ इति डः ।**३** प्लवनं प्लवः। 'प्लुङ् गतौ'(भ्वा.आ.अ.),'ऋदोरप्'३।३।५७॥ इत्यप्, गुणः। प्लव उत्पतनम्, तेन गच्छति **प्लवगः** । 'गम्लृ गतौ(भ्वा.प.अ.), 'अन्यत्रापि दृश्यते'(वा-३।२।४८॥) इति डः ।**४** हयो वाहनमस्य **हयवाहनः** । चत्वारि सूर्यपुत्रस्य ॥

## अष्टादश माठराद्याः सवितुः पारिपार्श्विकाः ॥१०३॥

मठति वसति सूर्यसमीप इति **माठरः**। 'मठ मदनिवासयोः'(भ्वा.प.से.), अम्बरवद् अरन्प्रत्ययः, बाहुलकाद् दीर्घः। '' मठरस्यापत्यं माठरः, 'विदादिभ्योऽञ्[5]'४।१।१०४॥''[ [6] ]इति तु स्वामी । परितः पार्श्वं वर्तन्त इति **पारिपार्श्विकाः**। 'परेर्मुखं च[7]'४।४।२९॥ इति चकारात् ठक्, 'ठस्येकः'७।३।५०॥, 'किति च'७।२।११८॥ इति वृद्धिः । सूर्यः कारुणिकः, अतो[8] देवानां यथेष्टं वरमाददात्विति धियाऽष्टादश चन्द्रादयो विघ्नदेवता नामान्तरेण स्थापिताः, ते चामी ''माठरः, पिङ्गलः, दण्डः, राजश्रोथौ, खरद्वारिकौ, कल्माषपक्षिणौ, जातृकारः, कुतापकौ, पिङ्गगजौ, दण्डिपुरुषौ किशोरकौ''[ [9] ]इति । यच्च व्याडिः-

''सुरावृतस्त्वसावष्टादशभिः पारिपार्श्विकैः ।
इन्द्रादयश्चैते देवाः सर्वे नामान्तरैः स्थिताः ॥१॥
तत्र शक्रो वामपार्श्वे दण्डाख्यो दण्डनायकः ।
वह्निस्तु दक्षिणे पार्श्वे पिङ्गलो वामतश्च सः ॥२॥
पूर्वद्वारे गुहहरौ राजश्रोघौ[10] क्रमेण तौ ।
द्वितीये तु धर्माधर्मौ तौ खरद्वारिकौ क्रमात् ॥३॥
तृतीये तु यमताक्ष्यौं क्रमात् कल्माषपक्षिणौ ।
चित्रगुप्तश्च कालश्च रवेर्दक्षिणपार्श्वगौ ॥४॥
प्रथमो जातृकाराख्यो माढराख्यो द्वितीयकः ।
पश्चिमतोऽब्धिवरुणौ तौ प्राप्नुयात् कुतापकौ ॥५॥
उदीच्यां यक्षहेरम्बौ तौ च पिङ्गगजौ क्रमात् ।
प्राच्यां तु रुद्ररेवन्तौ तौ दण्डिपुरुषौ क्रमात् ॥६॥

१. 'समुद्रः' इति २.३॥ २. द्र. टीकासर्वस्वम्, भा-१, १।३।३१॥, पृ.७२॥, रामाश्रमी १।३।३२॥, पृ.५३॥ ३. द्र. पदचन्द्रिका, भा-१, दिग्वर्गः, श्लो-१००, पृ.१३०॥ ४. 'नलोपो नञः' ६।३।७३॥ इत्यष्टाध्याय्याम् ॥ ५. 'दिवादिभ्योऽञ्' इति १॥ ६. अम. क्षीरस्वामिटीकायां तु ''मठरस्यापत्यं माठरः'' इत्येव दृश्यते, अम. क्षीर. १।२।३२॥, पृ.३०॥ ७. 'परिमुखं च' इत्यष्टाध्याय्याम् ॥ ८. इतोऽग्रे १.२प्रतौ '' रः' इति दृश्यते ॥ ९. द्र. स्वोपज्ञटीका २।१०३॥, पृ.२२॥ १०. 'राजश्रौघौ' इति १.२.४॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

आश्विनौ तु पार्श्वद्वये तौ द्वावेव किशोरकौ ।
इत्यष्टादशको वर्गश्चण्डांशोः पारिपार्श्विकाः ॥७॥''

[[1]]इति । 'पासेवाण[2]' इति लोकभाषाप्रसिद्धाः ॥१०३॥

**चन्द्रमाः कुमुदबान्धवो दश-**
**श्वेतवाज्यमृतसूस्तिथिप्रणीः ।**
**कौमुदी-कुमुदिनी-भ-दक्षजा-**
**रोहिणी-द्विज-निशौषधीपतिः ॥१०४॥**
**जैवातृकोऽब्जश्च कलाशशैण-**
**च्छायाभृदिन्दुर्विधुरत्रिदृग्जः ।**
**राजा निशो रत्नकरौ च चन्द्रः**
**सोमोऽमृतश्वेतहिमद्युतिग्लौः ॥१०५॥**

१ चन्द्रं कर्पूरं[3] सादृश्येन माति तुलयति, चन्द्रमाह्लादनं वा माति **चन्द्रमाः** । 'मा माने'(अ.प.अ.) अदादिः, 'मातेश्चन्द्रे मो डिच्च[4]'(उणा-६६७)इत्यसुन्, 'अत्वसन्तस्य चाऽधातोः' ६।४।१४॥ इत्युपधादीर्घः। चन्द्रमसौ, चन्द्रमसः इत्यादि। बाहुलकात् के[वलाद]प्यसुनि माः । अत एव ''माःशब्दो (मास्-शब्दो)ऽपीह चन्द्रे च, सम्मतो बहुदृश्वनाम्''[[5]]इत्युत्पलिनी। यद्वा 'माङ् माने'(जु.आ.अ.), कालं मिमीते परिमाति वा माः । माश्चासौ चन्द्रश्च चन्द्रमाः । ''राजदन्तादिषु परम्[6]'२।२।-३१॥''[ ]इति तु स्वामी । चन्दति आह्लादयति दीप्यते वा चन्द्रमाः । 'चदि आह्लादनदीप्त्योः'(भ्वा.प.से.), 'चन्दे (चन्दो) रमस्'(हैमोणा-९८६)इति रमस् इति हैमोणादिः। २ कुमुदानां बान्धवः **कुमुदबान्धवः** । यौगिकत्वात् कैरवबन्धुरित्यादयः। सुहृदपि बन्धुप्रायत्वाद् बन्धुरेवेति कुमुदसुहृदित्यादयोऽपि । ३-४ दशसंख्या श्वेताश्च वाजिनो यस्य स **दशश्वेतवाजी (श्वेतवाजी)**, इन्नन्तः, दशाश्वः । यद् व्याडिः-

''अश्वास्तु दश चन्द्रस्य यजुश्चन्द्रमसो वृषः ।
सप्तधातुर्हयो वाजी हंसो व्योममृगो नरः ॥१॥
अर्वा चाथ चन्द्रमसःस्थानेऽस्ति त्रिघनाः क्वचित् ।
सप्तधातोः पुनः स्थाने सहरुण्योऽस्ति कुत्रचित् ॥२॥''

[[6]] । **श्वेतवाजी** सिताश्वः । ५ अमृतं सूते **अमृतसूः** । 'षूङ् प्रसवे[9]'(अ.आ.वे.), 'सत्सूद्विषद्रुहदुह-'३।२।६१॥ इत्यादिना क्विप्। यौगिकत्वात् सुधासूरित्यादयोऽपि । ६ तिथीः प्रणयति **तिथिप्रणीः** । 'णीञ् प्रापणे'(भ्वा.उ.अ.), 'सत्सूद्विषद्रुहदुह-' ३।२।६१॥ इत्यादिनैव क्विप् । ६-१४ कौमुद्याः, कुमुदिन्याः, भानाम्, दक्षजानाम्, रोहिण्याः, द्विजानाम्, निशायाः, औषधीनां च पतिः, तेन **कौमुदीपतिः, कुमुदिनीपतिः, भपतिः, दक्षजापतिः, रोहिणीपतिः, द्विजपतिः** । ''सोमो राजा द्विजातीनाम्''[अम.क्षीर. १।२।१५॥]इति क्षीरस्वामी । **निशापतिः, औषधीपतिः**, तासामाप्यायकत्वात् । तथा च-

''नक्षत्रग्रहविप्राणां वीरुधां चाप्यशेषतः ।
सोमं राज्ये ददौ ब्रह्मा यज्ञानां तपसामपि ॥३॥'' [[10]]

इत्यागमः । यौगिकत्वाद् ज्योत्स्नेशः, कुमुद्वतीशः, नक्षत्रेशः, दाक्षायणीशः, रोहिणीशः, द्विजेशः, निशेशः, औषधीशः इत्यादयः ॥१०३॥ १५ जीवत्यनेन सुधावर्षित्वाज्जगदिति **जैवातृकः** । 'जीव प्राणधारणे'(भ्वा.प.से.), 'जीवेरातृकन् वृद्धिश्च'(उणा-८०)इति आतृकन्-वृद्धी । जीवयत्याप्यायकत्वादिति वा । १६ समुद्रात्मजत्वाद् अद्भ्यो जातः **अब्जः** । 'जनी प्रादुर्भावे' (दि.आ.से.), 'पञ्चम्यामजातौ'३।२।९८॥ इति डः, डित्त्वाट्टि-लोपः। समुद्रनवनीतमपि । १७-२० कलाम्, शशमेणम्, छायां च बिभर्त्ति कलाशशैणच्छायाभृत्, तेन कलां बिभर्त्ति **कलाभृत्**। 'डुभृञ् धारणपोषणयोः'(जु.उ.अ.), 'क्विप् च'३।२।७६॥ इति क्विप्, 'ह्रस्वस्य पिति कृति तुक्'६।१।७१॥ इति तुक्। एवं शशं बिभर्त्ति **शशभृत्** । एणं बिभर्त्ति **एणभृत्** । छ्यति तापं छाया। 'छो छेदने'(दि.प.अ.), 'मावा[च्छा]ससिसूभ्यो यः'(उणा-५४९)इति यः। छायां बिभर्ति **छायाभृत्**। यौगिकत्वात् कलानिधिः, शशधरः, मृगलाञ्छनः, छायाङ्कः इत्यादयः । २१ उनत्ति चन्द्रकान्तमणिरनेनेति **इन्दुः**। 'उन्दी क्लेदने'(रु.प.से.), 'उन्देरिच्चादेः'(उणा-१२)इत्युः, आदेश्चेकारः। यद्वा इन्दति ज्योतिष्केषु परमैश्वर्यमनुभवतीति इन्दुः। 'इदि परमैश्वर्ये'(भ्वा.प.से.), बाहुलकाद्'भृमृशीतृचरि-'(उणा-७)इत्यादिना उः । २२ विध्यति ताडयति विरहिणः करैः कृत्वेति **विधुः**।'व्यध ताडने' (दि.प.अ.), 'पृभिदिव्यधिगृधिधिषिधृषिभ्यः कुः[11]'(उणा-२३) इति कुः, कित्त्वात् संप्रसारणम् । विशेषेण धयन्ति सुरा एतमिति वा । 'धेट् पाने'(भ्वा.प.अ.), 'ध[य]ति दीव्यति-'( )इत्यादिना बहुलवचनात् कुः, 'आदेच उपदेशेऽशिति'६।१।४५॥ इत्यात्वम्, 'आतो लोप-'६।४।६४॥ इत्यालोपः। २३ अत्ति तपः स्वाध्या-

---

१. द्र. स्वोपज्ञटीका २।१०३॥, पृ.२२॥ २. 'पासेवण' इति १.२॥ ३. ''चन्द्रं रजतममृतं च, तदिव मीयतेऽसौ चन्द्रमाः इति हरदत्तः'' इति सि. कौ. तत्त्वबोधिनी, पृ.६४१॥ ४. 'चन्द्रे मो डित्' इत्युणादिगणे॥ ५. अत्र 'असिः' इति पाठ्यम्, ''चन्द्रोपपदाद् माङोऽसिः स्यात्, स च डित्'' इति सिद्धान्तकौमुद्यामुणादिसूत्रविवरणात् ॥ ६. द्र. रामाश्रमी १।३।१३॥, पृ.४२॥ ७. 'परत्वम्' इति२॥ ८. द्र. स्वोपज्ञटीका २।१०४॥, पृ.२३॥ ९. विग्रहे 'सूते इत्युक्तत्वाददादेः 'षङ् प्राणिगर्भविमोचने' इति युक्तः ॥ १०. द्र. पदचन्द्रिका, भा-१, दिग्वर्गः, श्लो-८३, पृ.१०८॥ ११. '-धृषिभ्यः' इति मुद्रितोणादिगणे ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

याविति अत्री, अत्रिर्वा । 'अदेस्त्रिनिच्च'(उणा-५०८)इति त्रिनिच् त्रिप् च । अत्रेमुनेर्दृशो नेत्राज्जातो **अत्रिदृग्जः**। 'जनी प्रादुर्भावे'(दि.आ.से.), 'पञ्चम्यामजातौ'३।२।९८॥ इति डः। २४ राजतेऽसौ **राजा** । 'राजृ दीप्तौ'(भ्वा.उ.से.), 'कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिवः'(उणा-१५४)इति कनिन् । २५-२६ '*निशारत्नकरौ*' इति पाठे रत्नं च करश्च रत्नकरौ, *निशायाष्ठ्यन्त*-निशाशब्दाद् रत्नकरौ निशारत्नकरौ इत्येकं पदम्। 'निशो रत्नकरौ' इति पाठे 'निशः' इति पञ्चम्यन्तं पदम्, तेन 'निशः' इति निशाशब्दाद् अग्रे रत्नकरौ शब्दौ योज्यौ। निशाया रत्नं **निशारत्नम्,** अजहल्लिङ्गोऽयम् । **निशाकरः** इत्यत्र 'डुकृञ् करणे'(त.उ.अ.), 'दिवाविभानिशा-'३।२।२१॥ इत्यादिना टः। यौगिकत्वाद् निशामणिः, रजनीकरः। २७ चन्दत्याह्लादयति **चन्द्रः**। 'चदि आह्लादनदीप्त्योः'(भ्वा.प.से.), 'स्फायितञ्चिवञ्चि-'(उणा-१७०) इत्यादिना रक् । पचाद्यचि रेफशून्योऽपि चन्द इति । "हिमांशुश्चन्द्रमाश्चन्दः शशी चन्द्रो हिमद्युतिः"[२]इति शब्दार्णवात् । २८ सुनोति तापं सूतेऽमृतमिति वा **सोमः**। 'षुञ् अभिषवे'(स्वा.-उ.अ.), 'षू प्रेरणे'[३](तु.प.से.)वा, 'अर्त्ति-स्तु-सु-हु-सृ-धृ-क्षि-क्षु-भा-या-[वा]-पदि-यक्षि-नीभ्यो मन्'(उणा-१३७)इति सूत्रेण मन्प्रत्ययः । सूयते वा सोमः । 'षूङ् प्राणिप्रसवे'(दि. आ. वे.)इत्यस्य वा । सूयते जायते वा सोमः । "नवो नवो भवति जायते"[ ]इति श्रुतेः। 'सीमन्सोमन्-'( )इत्यादौ सोमा नकारान्तोऽपि । २९-३१ अमृतं श्वेता हिमाश्च द्युतयो यस्य स तथा **अमृतद्युतिः, श्वेतद्युतिः, हिमद्युतिः**। यौगिकत्वात् सुधांशुः, सितांशुः, शीतांशुः इत्यादयः। "सुधा अमृतयुक्ता अंशवोऽस्येति सुधांशुरित्युपचारात्"[४]इति सर्वानन्दः । ३२ ग्लायति क्षीयते **ग्लौः** । 'ग्लै हर्षक्षये'(भ्वा.प.अ.), 'ग्लानुदिभ्यां डौः'(उणा-२२२)इति डौः, डित्त्वाट्टिलोपः । द्वात्रिंशच्चन्द्रस्य । शेषश्चात्र-

"चन्द्रस्तु मास्तपोराजौ शुभ्रांशुः श्वेतवाहनः ।
जर्णः सृप्रो राजराजो यजतः कृत्तिकाभवः ॥४॥
यज्ञराडोषधीगर्भस्तपमः शयतो[५] बुधः ।
स्यन्दः खसिन्धुः सिन्धूत्थ(:) श्रविष्ठारमणस्तथा ॥५॥
आकाशचमसः पीतुः क्लेदुः पर्वरिचिक्लिदौ ।
परिज्वा युवानो नेमिश्चन्दिरः स्नेहुरेकभूः ॥६॥"
[ शेषनाममाला २।११-१४॥] ॥१०५॥

## षोडशोंऽशः कला

१ षोडशानां पूरणः षोडशः । 'तस्य पूरणे डट्' ५।२।४८॥ कलयति संख्यां **कला** । 'कल क्षेपे'[६](चु.उ.से.), पचाद्यच् । अत्र च षोडशो भाग इति पूरणप्रत्ययान्तनिर्देशादेकादिभागस्य 'कला' इति नामापि सिद्ध्यति । दृश्यते च तत्रापि कलापदनिर्देश इति सादृश्यलक्षणाऽऽश्रीयते । तद्यथा स्वर्वैद्यौ द्वावप्येकाकारत्वाद् वा दस्रौ वोच्येते (नासत्यौ दस्रौ चोच्येते), तथात्राप्येकाकारत्वादेकादिभागोऽपि कलेत्युच्यत इति मन्तव्यम्। एकं कलायाः ॥

## चिह्नं लक्षणं लक्ष्म लाञ्छनम् ।
## अङ्कः कलङ्कोऽभिज्ञानम्

१ चाहयति **चिह्नम्** । 'चह परिकल्कने'(भ्वा.प.से.), [बाहुलकान्नक् उपधाया इत्वं च] । २ लक्ष्यतेऽनेनेति **लक्षणम्**। 'लक्ष दर्शनाङ्कनयोः'(चु.उ.से.), करणे ल्युट् । ३ लक्ष्यतेऽनेनेति **लक्ष्म**। '-मन्'(उणा-५८४)इति मन् । लक्ष्मणमित्यपि, तत्र 'लक्ष्म्या अच्च'(गणसू-५।२।१०॥)इति पठ्यते, पामादित्वाद् नः, ईकारस्यात्वम्। "लक्षेरट् च'(उणा-२८७)इति नः, लक्षणम्, निर्मकारम्"[७]इति तु सुभूतिः । रभसस्तु मकारमध्यं पठति-

"ज्योतिष्मत्यां च सारस्यां क्लीबं तु नामचिह्नयोः ।
स्याल्लक्षे लक्ष्मणः पुंसि सौमित्रौ श्रीमति त्रिषु ॥१॥"

[८]इति । ४ लाञ्छ्यतेऽनेनेति **लाञ्छनम्** । 'लच्छ लाच्छि लक्षणे'[१०](भ्वा.प.से.), करणे ल्युट् । ५ अङ्क्यते लक्ष्यतेऽनेनेति **अङ्कः** । 'अकि लक्षणे'(भ्वा.आ.से.), 'हलश्च'३।३।-१२१॥ इति घञ् । ६ कमात्मानं लङ्कयति[११] हिनं करोति **कलङ्कः** ।'लकि[१२] गतौ''कर्मण्यण्'३।२।१॥ । "कल्यते लक्ष्यतेऽनेन कलङ्कः"[अम.क्षीर. १।२।१७॥]इति तु[१३] स्वामी । किरति सन्देहमिति कलङ्कः । 'कृ विक्षेपे'(तु.प.से.), 'किरोऽङ्को रो लस् (लश्च) च (वा)' (हैमोणा-६२)इत्यङ्कः । ७ अभिज्ञायतेऽनेन **अभिज्ञानम्** । 'ज्ञा अवबोधने'(क्र्या.प.अ.), 'करणाधिकरणयोश्च'३।३।११७॥ इति करणे ल्युट् । सप्त चिह्नस्य ॥

## चन्द्रिका चन्द्रगोलिका ॥१०६॥
## चन्द्रातपः कौमुदी च ज्योत्स्ना

१ चन्द्रोऽस्यामस्तीति **चन्द्रिका** । 'अत इनिठनौ' ५।२।११५॥ इति ठन्। चन्द्रं कायति प्रतिपादयति वा। 'कै शब्दे'

१. 'प्रतिदिवे' इति१.३॥ २. द्र. रामाश्रमी १।३।१३॥, पृ.४३॥, पदचन्द्रिका, भा-१; दिग्वर्गः, श्लो-८१, पृ.१०७॥ ३. 'षूङ् प्राणिगर्भविमोचेन' इत्येव पाठ्यम्, विग्रहे 'सूते' इत्युक्तत्वात् ॥ ४. सर्वानन्दकृतटीकासर्वस्वे तु 'सुधांशुरित्युपचारात्' इत्येव दृश्यते, भा-१, १।३।१३॥, पृ.५९॥ ५. 'शायितो' इति ३, 'शयितो' इति ४॥ ६. 'कल संख्याने'(चु.उ.से.)इति पाठ्यम्, 'कलयति संख्याम्' इति व्युत्पत्तिप्रदर्शनात् ॥ ७. द्र. पदचन्द्रिका, भा-१, दिग्वर्गः, श्लो. ८४, पृ.११०॥ ८. द्र. रामाश्रमी १।३।१७॥, पृ.४४॥ ९. 'लाञ्छत्यने-' इति४॥ १०. क्षीरतरङ्गिण्यादौ धातुपाठे चकाररहित एव पाठो दृश्यते ॥ ११. 'रङ्कयति' इति २.३.४॥ १२. 'रकि' इति २.३.४, वस्तुतस्तु क्षीरतरङ्गिण्यादौ गत्यर्थकलकि(रकि)धातुर्न दृश्यते ॥ १३. ३.४प्रतौ नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(भ्वा.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥, यद्वा चन्द्रमाचष्टे चन्द्रयति, चन्द्रयतीति चन्द्रिका । 'ण्वुल्तृचौ'३।१।१३३॥ इति ण्वुल्, 'युवोरनाकौ'७।१।१॥, 'प्रत्ययस्थात्-'७।३।८८॥ इतीत्वम् । ''चन्द्रिमा इत्यपि''[1]इति वाचस्पतिः, ''चन्द्रिका चन्द्रिमा चार्वी''[2]इति शब्दार्णवात् । २ चन्द्रगोलोऽस्त्यस्यां **चन्द्रगोलिका,** 'अत इनिठनौ'५।२।११५॥ ॥१०६॥ ३ चन्द्रस्यातपः **चन्द्रातपः** । ४ प्रियत्वेन कुमुदानामियं **कौमुदी** । 'तस्येदम्'४।३।१२०॥ इत्यण्, 'टिड्ढाणञ्-'४।१।१५॥ इत्यादिना ङीप् । ५ ज्योतिरस्यामस्तीति **ज्योत्स्ना** । 'ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्मलिनमलीमसाः'५।२।११४॥ इति सूत्रेण ज्योतिष उपधालोपो नश्च प्रत्ययो निपात्यते ॥ पञ्च चन्द्रज्योत्स्नायाः[3] ॥

## बिम्बं[1] तु मण्डलम्[2] ।

१ बध्नाति रश्मिभिर्व्योमेति **बिम्बम्,** पुंक्लीबलिङ्गः। 'बन्ध बन्धने'(क्र्या.प.अ.), 'डीनीबन्धि-'(हैमोणा-३२५) इत्यादिना डिम्बप्रत्ययः । वेति शोभत इति वा । ''वी गतिप्रजनकान्त्यसनादौ'(अ.प.अ.), 'उल्वादयश्च'(उणा-५३५)इति बन्नुमागमहृस्वत्वानि''[ ]इति मिश्राः । ''बिम्बति भातीति बिम्बम्'' [अम.क्षीर. १।२।१६॥]इति स्वामी । बिम्बेति सौत्रो धातुः, पचाद्यच् । २ मण्डं शोभां लातीति **मण्डलम्,** त्रिलिङ्गः। स्त्रियां गौरादित्वाद् ङीषि मण्डली । द्वे चन्द्रमण्डलस्य ॥

## नक्षत्रं[1] तारका[2] ताराज्योतिषी[3][4] भमुडु[5][6] ग्रहः[7] ॥१०७॥ धिष्ण्यमृक्षम्[8][9]

१ नक्षति गच्छति व्योम्नि **नक्षत्रम्,** एकतकारवान् । 'णक्ष गतौ'(भ्वा.प.से.), 'अमिनक्षिकलिभ्योऽत्रः'[4](उणा-३८५) इत्यत्रः। न क्षदति न हिनस्ति प्रभामिति नक्षत्त्रम्, द्वितकारवत्। 'क्षद गतिहिंसयोः'[5], '-ष्ट्रन्'(उणा-५९८)इति ष्ट्रन्, 'खरि च' ८।४।५५॥ इति चर्त्वम्, 'नभ्राण्नपाद्-'६।३।७५॥ इत्यादिना नञः प्रकृतिभावः । न क्षदति प्रभामिति । 'क्षद संवरणे' सौत्रो धातुः, तस्मात् ष्ट्रन् वा । २ तरति **तारका,** त्रिलिङ्गः । 'तॄ प्लवनतरणयोः'(भ्वा.प.से.), 'ण्वल्तृचौ'३।१।१३३॥, 'तारकाज्योतिषि'(वा-७।३।४५॥)इतीत्वाभावः । ''कनीनिकायां नक्षत्रे तारकं तारकापि च''[विश्वप्रकाशकोशः, कान्तवर्गः, श्लो-७१]इति शाश्वतः (विश्वप्रकाशः), ''द्वित्रैर्व्योम्नि पुराणमौक्तिकमणिच्छायैः स्थितं तारकैः''[विद्धशालभञ्जिका ४।२०॥]इति च। ''अन्तिकं व्रजति तारकराजे''[किरातार्जुनीयम्, सर्गः-९, श्लो-१८]इति च भारविरित्यपि । ३ तरन्त्यनया **तारा,** पुंस्त्रीलिङ्गः । 'तॄ प्लवनतरणयोः'(भ्वा.प.से.), भिदादिपाठाद् अङ्, गुणः, दीर्घत्वम्, निपातनात् । ''नक्षत्रे नेत्रमध्ये च तारा स्यात् तार इत्यपि''[6] इति व्याडिः। ४ द्योतते **ज्योतिः**। 'द्युत दीप्तौ'(भ्वा.आ.से.), 'द्युतेरिसन्नादेश्च जः'(उणा-२६७)। ५ भातीति **भम्** । 'भा दीप्तौ'(अ.प.अ.), बाहुलकाद् डप्रत्ययः । भा विद्यतेऽत्रेति वा। 'अर्शआदिभ्योऽच्'५।२।१२७॥ इत्यच् । ६ उद् ऊर्ध्वं डयते **उडुः,** स्त्रीक्लीबलिङ्गः। उद्पूर्वः 'डीङ् विहायसां गतौ'(भ्वा.-आ.से.)अस्माद्धातोर्बाहुलकाद् ,डुप्रत्ययः, उदो दकारलोपश्च। अवतीति वा[7] उडुः। 'अव रक्षणादौ'(भ्वा.प.से.) अस्माद् वा, पृषोदरादित्वात् सिद्धम् । ईड्यते स्तूयत इति वा । 'ईड स्तुतौ' (अ.आ.से.), 'मृगय्वादयश्च'(उणा-३७)इति कुः, आदेशोत्वम्, पञ्चमस्वरादिरयम् । इयर्ति गच्छति खमिति वा उडुः। 'ऋ गतौ' (जु.प.अ.), 'उड् च भे'(हैमोणा-७३८)इति उः, अर्त्तेरुडादेशश्चेति हैमोणादिः । ७ गृह्यत इति **ग्रहः** । 'ग्रह उपादाने' (क्र्या.उ.से.), 'विभाषा ग्रहः'३।१।१४३॥ णो वा, अस्मिन् सूत्रे 'व्यवस्थया' इत्युक्तम्, तद्व्याख्यानं व्यवस्थितविभाषयेत्यर्थः, जलचरेऽभिधेये ण एव भवति, न कदाचिदजित्यर्थः । एवं ज्योतिष्यजेव भवति, न क़दाचिण्ण इत्यर्थः॥१०७॥ ८ धृष्णोति प्रगल्भते निशीति **धिष्ण्यम्** । 'ञिधृषा प्रागल्भ्ये'(स्वा.प.से.), 'मध्यविड्यशिक्याभ्यपर्जन्यवदान्यथोहर्म्यधिष्ण्यपस्त्यागस्त्यपुलस्त्यापत्यकुड्यकुल्याभल्यादयः'( ) ('[8]इति क्यबन्तो निपात्यते)। ९ ऋषति गच्छति **ऋक्षम्** । 'ऋषी गतौ'(तु.प.से.), 'ऋषिवृषि-'(उणा-४०३)इत्यादिना कित् सः[9]। 'षढोः कः सि' ८।२।४१॥ इति कत्वम्, षत्वम् । सामान्येन नव नक्षत्रस्य ॥

अथ विशेषत आह-

## अथाश्विन्य[1]श्वकिनी[2] दस्रदेवता[3] । अश्वयुग्[4]बालिनी[5] च

१. द्र. स्वोपज्ञटीका २।१०७॥, पृ.२४॥ २. द्र. पदचन्द्रिका, भा-१, दिग्वर्गः, श्लो-८३, पृ.१०९॥, रामाश्रमी १।३।१६॥, पृ.४४॥ ३. इतोऽग्रे ३प्रतौ 'उजुआलु इति भाषा' इति दृश्यते ॥ ४. 'अमिनक्षियजिवधिपतिभ्योऽत्रन्' इत्युणादिगणसूत्रम् ॥ ५. 'तृन्तृचौ शंसिक्षदादिभ्यः संज्ञायां चानिटौ'(उणा-२५०)इत्युणादिसूत्रीयो धातुः शकलीकरणे भक्षणे च॥ ६. ''नक्षत्रे चाक्षिमध्ये च तारकं तारकापि च (यथा)'' इति शाश्वते, श्लो-४२०, पृ.३८॥ ७. द्र. पदचन्द्रिका, भाग-१, दिग्वर्गः, श्लो-८८, पृ.११६॥, रामाश्रमी १।३।२१॥, पृ.४७॥ ८. १प्रतौ नास्ति ॥ ९. नैतादृक् सूत्रं दृश्यते ॥ १०. कोष्ठान्तर्गतपाठस्थाने 'इत्युणादौ निपात्यते' इति पाठो दृश्यते ॥ ११. वस्तुतस्तु 'सुत्रश्चिकृत्यृषिभ्यः कित्'(उणा-३४६)इति सः, माधवीयधातुवृत्त्यादौ तथैव दर्शनात् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ अश्वोऽस्या अस्ति **अश्विनी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः, 'ऋन्नेभ्यो ङीप्'४।१।५॥ अश्वरूपयोगादश्विनीति ङीप्, अश्वकर्मिणी अश्विनी अश्वादानात् । २ अज्ञातोऽश्वोऽश्वकः, 'अज्ञाते'५।३।७३॥ इति कः, सोऽस्या **अश्वकिनी** । ३ दस्रौ देवता अस्या **दस्रदेवता** । ४ अश्वं युनक्ति बध्नाति रूपेणेति **अश्वयुक्**, स्त्रीलिङ्गः । 'युजिर् योगे' (रु.उ.अ.), क्विबन्तः 'ऋत्विग्दधृक्-'३।२।५९॥ इत्यादिना । ५ बालाः केशाः सन्त्यस्या **बालिनी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः, 'ऋन्नेभ्यो ङीप्'४।१।५॥ पञ्च अश्विन्याः ॥

**अथ भरणी यमदेवता ॥१०८॥**

१ बिभर्त्ति **भरणी** । 'डुभृञ् धारणपोषणयोः'(जु.उ.अ.), बाहुलकाद् 'अशवदृभ्योऽनिः'([1])इत्यनिः, ततः 'कृदिकारादक्तिनः'(गणसू-४।१।४५॥) वा ङीष् । २ यमो देवताऽस्या **यमदेवता** । द्वे भरण्याः ॥१०८॥

## कृत्तिका बहुलाश्चाग्निदेवाः

१ कृन्तन्ति[2] शुभमिति **कृत्तिकाः** । 'कृती छेदने' (तु.प.से.), 'कृति-भिदि-लतिभ्यः'(उणा-४२७)तिकन् । २ वहन्ति आकाशे **बहुलाः** । 'वह प्रापणे'(भ्वा.उ.अ.), बाहुलकाद् उलप्रत्ययः । एतौ द्वौ स्त्रीलिङ्गौ, नित्यबहुवचनान्तौ । यद् गौडः ''कृत्तिकासु स्त्रियां भूम्नि, बहुलाः'[ ]इति । ३ अग्निर्देवता आसां **अग्निदेवाः** । त्रीणि कृत्तिकाणाम्[3] ॥

**ब्राह्मी तु रोहिणी ।**

१ ब्रह्मा देवताऽस्या **ब्राह्मी** । 'सास्य देवता'४।२।२४॥ इत्यण्, 'नस्तद्धिते'६।४।१४४॥, 'टिड्ढाणञ्-'४।१।१५॥ इत्यादिना ङीप् । २ रोहन्ति कार्याण्यस्यां **रोहिणी** । 'रुह प्रोहे[4]'(), बाहुलकात् 'श्यास्त्याहृञ्विभ्य इनन् (इनच्)'(उणा-२०४) इतीनन् (इतीनच्), गौरादित्वाद् ङीष् । द्वे रोहिण्याः ॥

**मृगशीर्षं मृगशिरो मार्गश्चान्द्रमसं मृगः ॥१०९॥**

१ मृगस्येव शीर्षमस्य **मृगशीर्षम्** । २ मृगस्येव शिरोऽस्य **मृगशिरः**, आकाशे ताराणां तथाकारस्थत्वात्, पुंक्लीबलिङ्गोऽयम् । यद् वाचस्पतिः ''सौम्यं मृगशिरोऽस्त्रियाम्''[5] इति । बोपालिते तु स्त्रीलिङ्गत्वम् । सौम्या मृगशिरा अपि । ३ मृग एव **मार्गः** । 'प्रज्ञादिभ्यश्च'५।४।३८॥ इत्यण् । प्रतीपलक्षणया मृगोऽपि ''मृगशीर्षे हस्तिजातौ मृगः पशुकुरङ्गयोः''[6]इति व्याडिः । ४ चन्द्रमा देवताऽस्येति **चान्द्रमसम्** । 'सास्य देवता'४।२।२४॥ इत्यण् । [५ मृगाकारत्वाद् **मृगः**] । पञ्च मृगशिरसः ॥१०९॥

## इल्वलास्तु मृगशिरःशिरःस्था पञ्चतारकाः ।

१ मृगशिरः शिरस्थाः पञ्चतारकाः 'इल्वलाः' इत्युच्यन्ते । इलन्ति स्वपन्ति गगने **इल्वलाः**, स्त्रीलिङ्गः । 'इल स्वप्ने[7]'(तु.प.से.), 'सानसिवर्णसिपर्णसिततण्डु[8]लाङ्कुशचर्ष(षा)लेल्वपल्वलधिष्ण्यशम्याः(-ल्याः)'(उणा-५४७)इति वलच्प्रत्ययो गुणाभावश्च निपात्यते । ''इल्वन्ति प्रीणयन्ति [इन्वकाः] मरुतो देवता इति[9], इल्वला नक्षत्रमिति श्रुतेः'' [अम. क्षीर. १।२।२४॥]इति तु स्वामी । इन्वन्ति प्रीणयन्ति इन्वका इत्यपि । ''इवि व्याप्तौ'(भ्वा.प.से.), संज्ञायां क्वुन्, क्षिपकादित्वात् 'प्रत्ययस्थात्-'७।३।४४॥ इतीत्वाभावः''[मा. धातुवृत्तिः, भ्वादिः, धातुसं-३७८]इति माधवः । एकं मृगशिरःशिरःस्थपञ्चतारकाणाम् ॥

## आर्द्रा तु कालिनी रौद्री

१ अर्दति हिनस्ति कार्यमिति **आर्द्रा** । 'अर्द हिंसायाम्' (चु.उ.से.), बाहुलकात् 'शुसिचिमिभ्यो दीर्घश्च'(उणा-१८३) इति क्रन्दीर्घौ । २ कालोऽस्यामस्ति **कालिनी** । 'अत इनिठनौ' ५।२।११५॥ इतीनिः, 'ऋन्नेभ्यः-'४।१।५॥ इति ङीष्(ङीप्) । ३ रुद्रो देवताऽस्या **रौद्री** । 'सास्य देवता'४।२।२४॥ इत्यण्, 'टिड्ढाणञ्-'४।१।१५॥ इत्यादिना ङीप् । त्रीणि आर्द्रायाः ॥

**पुनर्वसू तु यामकौ ॥११०॥**

## आदित्यौ च

१ पुनर्वसू अनयोः **पुनर्वसू**, पुंल्लिङ्गः । २ यमके यमले भवौ **यामकौ** ॥११०॥ 'तत्र भवः'४।३।५३॥ इत्यण्, युग्मरूपावित्यर्थः । ३ अदितिर्देवता अनयो **आदित्यौ** । 'दित्यदित्या-'४।१।८५॥ इत्यादिना[10] ण्यः, 'यस्येति च'६।४।१४८॥ एते द्विवचनान्ताः । त्रीणि पुनर्वस्वोः ॥

**पुष्यस्तिष्यः सिध्यश्च गुरुदैवतः ।**

१ पुष्यन्ति सिध्यन्ति अर्था अस्मिन्निति, पुष्णाति साधयति कार्याणि वा **पुष्यः** । 'पुष पुष्टौ'(दि.प.अ. अथवा

---

१. नोपलभ्यत उणादिगणे, तेन 'अर्तिसृधृधम्य-'(उणा-२५९)इत्यादिनाऽनिप्रत्ययो ज्ञेयः ॥ २. 'कृन्तति' इति २॥ ३. 'कृत्तिकायाः' इति २.३.४॥ ४. अयमर्थः क्षीरतरङ्गिण्यादौ न दृश्यते ॥ ५. द्र. स्वोपज्ञटीका २।१०९॥, पृ. २४॥ ६. द्र. पदचन्द्रिका, भा-१, दिग्वर्गः, श्लो-९०, पृ.१२०॥, रामाश्रमी १।३।२३, पृ.४८॥ ७. 'इल स्वप्नक्षेपणयोः' इति क्षीरतरङ्गिण्यादौ ॥ ८. '-पर्णसितण्डु-' इत्युणादिगणे ॥ ९. अम.क्षीर. नास्ति ॥ १०. अत्र 'इति' इति ३ प्रतौ दृश्यते॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्र्या.प.से.), क्र्यादिर्दिवादिर्वा, 'पुष्यसिध्यौ चै नक्षत्रे'३।१।११६॥ इति क्यपि निपातितः । २ पुष्यन्ति अत्र कार्यकर्तार इति **तिष्यः**। 'तुष तुष्टौ'(दि.प.अ.), 'अघ्न्यादयश्च'(उणा-५५१)इति यत्, उपधेत्वं च निपात्यते । 'पुष्यसिध्यौ चै नक्षत्रे'३।१।११६॥ अस्य सूत्रस्य सविधे यत्, स एव तिष्योपीत्युक्तम्, तत् तिष्यशब्दोऽनयोः पर्यायान्तरमप्यस्तीत्येतावदनेन प्रतिपाद्यते, न त्वस्यापि क्यपि निपातनमिति, 'त्विष दीप्तौ'(भ्वा.उ.अ.)इत्यतः 'अघ्न्यादयश्च'(उणा-५५१)इत्यौणादिकयक्प्रत्ययान्तस्य निपातनात् । तथा च "पुष्यस्तिष्ये कलियुगे"[अमरकोषः ३।३।१४७॥] इत्यमरकोषव्याख्याने क्षीरस्वामी "त्वि(त्वो)षति त्विष्यः, 'त्विषे[2] दीप्तौ'(भ्वा.उ.अ.), अघ्न्यादिः"[अम. क्षीर. ३।३।१४७॥] इति। यद्वा 'सूर्यतिष्य-'६।४।१४९॥ इति निपातनात् तिष्योऽपि पुष्यसमानार्थः साधुर्ज्ञेयः इति व्याख्येयमिति कृष्णः । [[3]३ सिध्यन्ति अस्मिन् [**सिध्यः**] । 'पुष्यसिध्यौ नक्षत्रे'३।१।११६॥ इति क्यपि निपातितः] । ४ गुरुर्दैवतमस्य **गुरुदैवतः** । 'सास्य देवता'४।२।२४॥ इत्यण् । चत्वारि पुष्यस्य ॥

### सार्प्यऽश्लेषा

१ सर्पो देवताऽस्याः **सार्पी** । 'सास्य देवता'४।२।२४॥ इत्यण्, 'टिड्ढाणञ्-'४।१।१५॥ इत्यादिना ङीप् । २ न विद्यते श्लेषोऽस्यां जातापत्यस्येति **अश्लेषा**, पुंस्त्रीलिङ्गः । द्वे अश्लेषायाः॥

### मघाः पित्र्याः

१ मङ्घन्ते[4] गच्छन्ति पितरः प्रीतिमास्विति **मघाः**। 'मघि[5] गतौ'(भ्वा.आ.से.)। 'मघाः' इत्ययं नित्यस्त्रीलिङ्गो बहुवचनान्तश्च । २ पितरः देवता आसां **पित्र्याः** । 'वाय्वृतुपित्रुषसो यत्'४।२।३१॥ द्वे मघानाम् ॥

### फल्गुनी योनिदेवता ॥१११॥

१ फलतीति **फल्गुनी**। 'फल निष्पत्तौ'(भ्वा.प.से.), 'फलेर्गुक् च'(उणा-३३६)इति उनन्, गौरादित्वाद् ङीष् । उत्तरत्र 'उत्तरा' इति विशेषणादत्र 'पूर्वा' इति लभ्यते । तेन पूर्वफल्गुनी । शाब्दिकास्तु 'पूर्वफल्गुन्यौ' इति द्विवचनान्तं मन्यन्ते । एकवचनान्तोऽपि दृश्यते, यद्वाचस्पतिः 'पूर्वफल्गुनी योनिदेवता'[6] । २ योनिर्दैवताऽस्या **योनिदेवता** । द्वे पूर्वफल्गुन्याः ॥१११॥

### सा तूत्तरार्यमदेवा

१ सा इति फल्गुनी, उत्तरेति विशेषणविशिष्टा **उत्तरफाल्गुनी** इत्युच्यते । २ अर्यमा देवोऽस्या **अर्यमदेवा** । द्वे उत्तरफल्गुन्याः ॥

### हस्तः सवितृदेवतः ।

१ हसतीति **हस्तः**, पुंस्त्रीलिङ्गः । 'हस(हसे) हसने' (भ्वा.प.से.), 'हसिमृग्रिण्वाऽमिदमितमिमिलू[7]पूधुर्विभ्यस्तन्' (उणा-३६६) । २ सविता देवताऽस्य **सवितृदेवतः**, चतुर्थवर्गतृतीयैकादशस्वरमध्यः। द्वे हस्तस्य ॥

### त्वाष्ट्री चित्रा

१ त्वष्टा देवताऽस्याः **त्वाष्ट्री**। 'सास्य देवता'४।२।२४॥ इत्यण्, 'इको यणचि'६।१।७७॥, 'टिड्ढाणञ्-'४।१।१५॥ इत्यादिना ङीप् । २ चिनोति कार्यं **चित्रा** । 'चिञ् चयने' (स्वा.उ.अ.),'अमिचिमिदिशसि[8]भ्यः क्त्रः'(उणा-६०३)इति क्त्रः । द्वे चित्रायाः ॥

### आनिली स्वातिः

१ अनिलो [9]देवताऽस्या **आनिली** । 'सास्य देवता' ४।२।२४॥ इत्यण्, 'टिड्ढाणञ्-'४।१।१५॥ इत्यादिना ङीप् । २ सुष्ठु अतति गच्छति **स्वातिः**, पुंस्त्रीलिङ्गः। 'अत सातत्यगमने' (भ्वा.प.से.), 'अजा(ज्य)तिभ्याम्-'(उणा-५७०)इतीण्प्रत्ययः, णित्त्वाद् वृद्धिः । द्वे स्वातेः ॥

### विशाखेन्द्राग्निदेवता ॥११२॥ राधा

१ विशाखति व्याप्नोति **विशाखा** । विपूर्वः 'शाखृ व्याप्तौ'(भ्वा.प.से.), पचाद्यच् । विशेषेण श्यति तनूकरोत्यशुभमिति वा । 'शो तनूकरणे'(दि.प.अ.), 'श्यतेरा(रि)च्च वा' (हैमोणा-८५)इति खः । मिश्रास्तु विशाखा द्वे, अत एव द्वित्वमुचितं विशाखे इति, तथा च रामायणम्-

"पत्न्योर्मध्यगतस्तत्र सुग्रीवः प्लवगेश्वरः ।
विशाखयोर्मध्यगतः संपूर्ण इव चन्द्रमाः ॥१॥"[10]इति।

"अत एकत्वं प्रमादात्"[11]इति कौमुदी । "नक्षत्राऽभेदविवक्षायां त्वेकवचनम्"[11]इति सुभूतिः । "एकतारापेक्षया एकवचनम्"[11]इति श्रीभोजः । "छान्दसा अपि भाषायां प्रयुज्यन्त इति [12]विशाखायाश्चैकत्वाद्"[ ]इति सर्वानन्दः[13]।

१. अष्टाध्याय्यां चकारो नास्ति ॥ २. 'त्विषा' इति क्षीरतरङ्गिणी, भ्वादिः, धातुसं-७२८, पृ.१६७॥ ३. सर्वादर्शेषु सिध्यशब्दस्य व्युत्पत्तिप्रदर्शनाभावात् कोष्ठान्तर्गतपाठो रामाश्रम्याः ॥ ४. 'मघन्ते' इति४॥ ५. 'मघ' इति४॥, 'अघि वघि मघि गत्याक्षेपे,' 'मघि कैतवे च' इति स्वामिसायणौ ॥ ६. द्र. स्वोपज्ञटीका २।१११॥, पृ.२५॥ ७. '-ऽमिदमिलू-' इत्युणादिगणे ॥ ८. '-शंसि-' इति१॥ ९. 'देवा' इति२॥ १०. द्र. टीकासर्वस्वम्, भा-१, १।३।२१॥, पृ.६५॥, पदचन्द्रिका, भाग-१, दिग्वर्गः, श्लो-८९, पृ.११८॥ ११. द्र. पदचन्द्रिका, भा-१, दिग्वर्गः, श्लो-८९, पृ.११८॥ १२. 'विशाखायाश्चै-' इति१.२॥ १३. सर्वानन्दकृतटीकासर्वस्वे "विशाखयोश्च (१.२.६२)इत्येकत्वमभीष्टम्, तच्छान्दसम् । केचिद् भाषायामपिच्छान्दसाः प्रयुज्यन्त इति कृत्वा समादधति । अतो 'राधा विशाखा' इत्यपि स्यात्" इति दृश्यते, भा-१, १।३।२१॥, पृ.६५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

''मारुतोऽथ विशाखया''[1]इति वाचस्पतिः । **२** इन्द्राग्नी देवते अस्याः **इन्द्राग्निदेवता** ॥**११२**॥ **३** राध्नोति कार्यमनया **राधा** । 'राध साध संसिद्धौ'(स्वा.प.अ.), 'गुरोश्च हलः' ३।३।१०३॥ इत्यकारः । त्रीणि विशाखायाः ॥

**अनुराधा तु मैत्री**

१ अनुराध्नोति **अनुराधा** । 'राध साध संसिद्धौ' (स्वा.प.अ.), पचाद्यच् । एकदेशविकृतत्वादनूराधेत्यपि । २ मित्रो देवताऽस्याः **मैत्री** । 'सास्य देवता'४।२।२४॥ इत्यण्, 'टिड्ढाणञ्-'४।१।१५॥ इत्यादिना ङीप् । द्वे अनुराधायाः ॥

**ज्येष्ठैन्द्री**

१ अतिशयेन वृद्धा **ज्येष्ठा** । 'वृद्धस्य च'५।३।६२॥ इति ज्यादेशः, ततष्टाप् । २ इन्द्रो देवताऽस्या **ऐन्द्री** । 'सास्य देवता'४।२।२४॥ इत्यण्, 'टिड्ढाणञ्-'४।१।१५॥ इत्यादिना ङीप्। द्वे ज्येष्ठायाः ॥

**मूल आस्रपः ।**

१ मूलति **मूलः**, पुंक्लीबलिङ्गः । 'मूल प्रतिष्ठायाम्'(भ्वा.प.से.), पचाद्यच् । २ अस्रं शोणितं पिबति अस्रपो राक्षसः, अस्रपो देवताऽस्य **आस्रपः**, दन्त्यसमध्यः। द्वे मूलस्य॥

**पूर्वाषाढाऽऽपी**

१ न सहते **अषाढा** । ''नक्षत्रेऽषाढा इत्यव्युत्पन्नम्, मूर्धन्यमध्यवद् ह्रस्वादि[3]''[4]इति 'स्न(श्र)विष्ठा'४।३।३४॥ आदिसूत्रे रक्षितः । ''यद्रोहिणीयोगफलं तदेव सुतावषाढासहिते च चन्द्रे''[4]इति वराहः । २ आपो देवताऽस्या **आपी** । 'सास्य देवता'४।२।२४॥ इत्यण्, 'टिड्ढाणञ्-'४।१।१५॥ इत्यादिना ङीप् । द्वे पूर्वाषाढायाः ॥

**सोत्तरा स्याद् वैश्वी**

१ सा अषाढा सोत्तरा स्यात्, उत्तरया सह वर्तमाना सोत्तरा, **उत्तराषाढा** इत्यर्थः । २ विश्वो देवता अस्या **वैश्वी**। 'सास्य देवता'४।२।२४॥ इत्यण्, 'टिड्ढाणञ्-'४।१।१५॥ इत्यादिना ङीप् । द्वे उत्तराषाढायाः ॥

**श्रवणः पुनः ॥११३॥**

**हरिदेवः**

१ श्रूयतेऽसौ **श्रवणः**, पुंस्त्रीलिङ्गः । 'ल्युट् च' ३।३।११५॥ इति ल्युट् ॥**११३**॥ २ हरिर्विष्णुर्देवोऽस्य **हरिदेवः** । द्वे श्रवणस्य ॥

**श्रविष्ठा तु धनिष्ठा वसुदेवता ।**

१ (श्रवणं श्रवः प्रसिद्धिः । 'श्रु श्रवणे'(भ्वा.प.अ.), 'ऋदोरप्'३।३।५७॥, श्रवोऽस्त्यस्याः मतुप्, अतिशयेन श्रववती **श्रविष्ठा**) । इष्ठन्, 'विन्मतोर्लुक्'५।३।६५॥ इति लुक्। २ एवं 'धन धान्ये'(जु.प.से.), पचाद्यजन्ताद् मतुबादिना अतिशयेन धनवती **धनिष्ठा** । एतौ द्वावपि टवर्गद्वितीयोपधौ । ३ वसवो देवताऽस्या **वसुदेवता**। त्रीणि धनिष्ठायाः[6] ॥

**वारुणी तु शतभिषक्**

१ वरुणो देवताऽस्या **वारुणी** । 'सास्य देवता' ४।२।२४॥ इत्यण् । २ शतं भिषजोऽस्यां **शतभिषक्**, स्त्रीलिङ्गः। शतभिषजौ, शतभिषजः इत्यादि । द्वे शतभिषजः॥

**अजाहिर्बुध्नदेवता ॥११४॥**

**पूर्वोत्तरा भद्रपदा द्वय्यः प्रोष्ठपदाश्च ताः ।**

१ अजोऽजपादः, भीमो भीमसेन इतिवत्, पदैकदेशे पदसमुदायोपचाराद्वा। तथा च अजोऽहिर्बुध्नश्च देवते आसामिति अजाहिर्बुध्नदेवताः, अजाहिर्बुध्नाभ्यामग्रे देवतेति योज्यते ॥**११४**॥ पूर्वाश्च उत्तराश्च पूर्वोत्तराः, पूर्वोत्तरविशिष्टाः, कोऽर्थः?, पूर्वोत्तराभ्यामग्रे भद्रपदा इति योज्यते, ततोऽयमर्थः-**अजदेवताः, पूर्वभद्रपदाः** च एकार्थौ, **अहिर्बुध्नदेवताः, उत्तरभद्रपदाः** च एकार्थौ । वैयाकरणाः पूर्वे भद्रपदे उत्तरे भद्रपदे इति द्वित्वमेव प्राहुः । तथा च ''पूर्वभद्रपदे उत्तरभद्रपदे च द्वे''[ ] इति 'फल्गुनी प्रोष्ठपदानां च'१।२।६०॥ इति सूत्रे उक्तम् । ''भद्रपदा' इति शब्दो ह्रस्वादिः''[ ]इति वर्णविवेकः । ''ग्रहपतिरिव भद्रपदानुगत इति श्लेषः, ततो दीर्घादिपाठः प्रामादिकः''[ ]इति कौमुदी। ''भाद्रपदासु भयं सलिलोत्थम्''[ ]इति ज्योतिर्ग्रन्थे कुलेखकदोषात् । ताः पूर्वभद्रपदा उत्तरभद्रपदाश्च द्वय्यः, द्वौ अवयवौ आसामिति द्वय्यः **प्रोष्ठपदा** उच्यन्ते । प्रवृद्धः ओष्ठौ यस्य स प्रोष्ठः, तस्येव पादावासां प्रोष्ठपदाः । प्रोष्ठौ सारौ वा पादावासामिति प्रोष्ठपदाः । 'सुप्रातसुश्वसुदिवसा(शा)रिकुक्षचतुरश्रे(श्रै)णीपदाजपदप्रोष्ठपदाः'५।४।१२०॥ इति सूत्रेण प्रोष्ठपदाः भद्रपदाश्च निपातिताः । पूर्वे प्रोष्ठपदे द्वे, उत्तरभद्रपदे द्वे समुदायश्चासां चतुःसंख्य इति बहुवचनम् । केचित्तु ''भद्रपदेन युक्तः काल इति प्रयोगात् पुंल्लिङ्गो भद्रपदः''[ ]इत्याहुः । यत्तु कदा पूर्वे प्रोष्ठपदे कदा पूर्वे भद्रपदे इति तत्तारकयोर्द्वित्वादुपपद्यते, 'फल्गुनीप्रोष्ठपदानां च'१।२।६०॥ इति सूत्रेण द्वित्वस्य वा

१. द्र. पदचन्द्रिका, भा-१, दिग्वर्गः, श्लो-८९, पृ.११८॥ २. मूले तथा स्वोपज्ञवृत्तावपि तालव्यशमध्यस्य आश्रयशब्दस्याश्रित्यैव व्युत्पत्तिः कृता ॥ ३. 'मध्यं ह्रस्वादि' इति२, 'मध्यह्रस्वादि' इति१॥ ४. द्र. पदचन्द्रिका, भा-१, कालवर्गः, श्लो-१२०, पृ.१५२॥ ५. कोष्ठान्तर्गतपाठस्थाने २.३.४प्रतिषु ''श्रूयते शुभकर्मण्यतिशयेनेति श्रविष्ठा, 'श्रु श्रवणे' । ऋदोरप्'' इति दृश्यते ॥ ६. 'श्रविष्ठायाः' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बहुत्वविधानात् । "भद्रपदौ भद्रपदः भद्रपदा च"[ ]इति स्वामी। "भद्रपदशब्देन तारकाविशेषाणां समुदाय उच्यते । तिरोहितावयवभेदपक्षे एकवचनम्, प्रोष्ठपदाशब्दस्तद्रिक्तावयवभेदभेदसमुदायमाचष्टे, एतत्पक्षे बहुवचनम्"[ ]इति मैत्रेयः ॥

**रेवती तु पौष्णम्**

१ रेवते गच्छति **रेवती** । 'रेवृ गतौ'(भ्वा.आ.से.), बाहुलकाद् 'भृदृशीङ्यजि-'(उणा-३९०)इत्यादिनाऽतच् । २ पूषा देवताऽस्येति **पौष्णम्** । पूषन्शब्दात् 'सास्य देवता'४।२।२४॥ इत्यण्, 'अल्लोपोऽनः'६।४।१३४॥ इत्युपधालोपः। अयं ज्योतिषि क्लीबे रूढः । द्वे रेवत्याः ॥

**दाक्षायण्यः सर्वाः शशिप्रियाः ॥११५॥**

दक्षस्यापत्यं दाक्षिः । 'अत इञ्'४।१।९५॥ । 'आसुरेरुपसंख्यानम्'(वा-४।१।१९॥)इत्यत्र केचिद्-"आसुरिदाक्ष्योः" [ ]इति, "दाक्षायणी"[ ]इति पारायणम्, उपाध्यायसर्वस्वेऽपि तदेवोद्धृतम्, कलिङ्गादयस्तु तददर्शनात् 'नडादिभ्यः फक्' ४।१।९९॥ [ ]इत्याकुलितवन्तः, गोत्रत्वाभावान्नडादावनाकृतिगणेऽस्याऽपाठात् । सर्वानन्दस्तु-"दक्षस्य प्रजापतेरपत्यानि दाक्षायण्यः, गोत्रत्वमुपचर्य 'गोत्रे कुञ्जादिभ्यश्च्फञ्'४।१।९८॥ इति 'जातेरस्त्रीविषयादयोपधात्'४।१।६३॥ ङीष्"[टीकासर्वस्वम् १।३।२०॥]इत्याह । "दक्षस्यापत्यं दाक्षायणी, 'अत इञ्' ४।१।९५॥ अनन्तरापत्येऽपि द्वैपायनवद् 'यञिञोश्च'४।१।१०१॥ इति फक्"[अम.क्षीर.१।२।२२॥]इति स्वामी । "स्त्रियामासुरिदाक्षिभ्यां श्च्फञ् इत्युपसंख्यायते दाक्षायणीश्रीरिव निर्बभासे नन्दी"[ ]इति स्वामी। "दक्षमयते गच्छति। 'अय गतौ'(भ्वा.-आ.से.), नन्द्यादित्वाद् ल्युः, प्रज्ञाद्यणि दाक्षायणी"[ ]इत्यन्यः। तथा च "दक्षोऽय्यते गम्यते पितृतया आभिरिति ल्युटि, प्रज्ञाद्यणि, ङ्याम्, 'पूर्वपदस्था-'७।३।४४॥ इति णत्वं च"[ ] इति केचित् । सर्वा अश्विन्यादयः सप्तविंशतिरपि दाक्षायण्यः शशिप्रियाश्चन्द्रदाराश्चोच्यन्त इत्यर्थः । "दाक्षायण्यः कीर्तिताश्चन्द्रदाराः"[हलायुधः १।५१॥]इति हलायुधः। द्वे सामान्येन सप्तविंशतिनक्षत्राणाम् ॥११५॥

**राशीनामुदयो लग्नम्**

१ (अश्नुवते अहोरात्रमिति राशयः, पुंसि, तेषाम् । 'अशूङ् व्याप्तौ','अशिपणाय्यो रुडायलुकौ च'(उणा-५७२) इत्युणादिसूत्रेण इण्प्रत्ययः, अशेरुडागमः, वृद्धिः) । लगति निजे साध्ये **लग्नम्**, पुंक्लीबलिङ्गः। 'लगे सङ्गे'(भ्वा.प.से.), बाहुलकाद् नः । लज्जत इति वा । 'ओलस्जी व्रीडने'(तु.आ.से.), 'निष्ठा'३।२।१०२॥ इति क्तः, 'श्वीदितो निष्ठायाम्'७।२।१४॥ इतीण्निषेधः, 'ओदितश्च'८।२।४५॥ इति निष्ठानत्वम्, नत्वस्यासिद्धत्वात् 'चोः कुः'८।२।३०॥ इति कुत्वम् । राशीनां मेषादीनां द्वादशानामुदयः प्राप्तकालता, तस्यैकं लग्नमिति नाम ॥

**मेषप्रभृतयस्तु ते ।**

ते इति राशयः मेषः प्रभृतिराद्यो येषां ते मेषप्रभृतयः। यथा 'मेषो वृषो मिथुनः कर्कटः सिंहः कन्या तुला वृश्चिको धनुर्मकरः कुम्भो मीन' इति । एकं सामान्येन मेषादीनां राशय इति ॥

**आरो वक्रो लोहिताङ्गो मङ्गलोऽङ्गारकः कुजः ॥११६॥**
**आषाढाभूर्नवार्चिश्च**

१ आ समन्तादियर्ति क्रूरत्वं नक्षत्रेष्विति **आरः**। आङ्पूर्वः 'ऋ गतौ'(जु.प.अ.), पचाद्यच्, 'सार्वधातुकार्धधातुकयोः'७।३।८४॥ इति गुणः । २ वञ्चति कुटिलं गच्छति **वक्रः**। 'वञ्चु गतौ'(भ्वा.प.से.), 'स्फायितञ्चिवञ्चि-'(उणा-१७०) इत्यादिना रक्, 'अनिदिताम्-'६।४।२४॥इति न्लोपः। ३ लोहितवर्णानि अङ्गान्यस्य **लोहिताङ्गः**। ४ मङ्गति गच्छति **मङ्गलः**। 'मगि गतौ'(भ्वा.प.से.), 'मङ्गेरलच्'(उणा-७४८) । ५ अङ्गति कुटिलं क्रामति अङ्गारः । 'अगि गतौ'(भ्वा.प.से.), 'अगिमदिमन्दिभ्यः आरन्'(उणा-४१४), ततः स्वार्थे कनि **अङ्गारकः**। "अङ्गानियर्ति पीनत्वादिति तु, 'ऋ गतौ'(जु.प.अ.), 'ण्वुल्तृचौ'३।१।१३३॥ इति ण्वुल्"[ ]इति तु स्वामी । ६ कोः पृथिव्याः जातः **कुजः**। 'जनी प्रादुर्भावे(दि.आ.से.), 'पञ्चम्यामजातौ'३।२।९८॥ इति डः । यौगिकत्वाद् भौमः, अत्र 'शिवादिभ्योऽण्'४।१।११२॥, माहेयः, धरणीसुत इत्यादयः ॥११६॥ ७ आषाढा उत्तराषाढाः, तासु भवति **आषाढाभूः**। 'भू सत्तायाम्'(भ्वा.प.से.), क्विप्। ८ नवं अर्चिषोऽस्य **नवार्चिः**। नवार्चिषौ, नवार्चिषः इत्यादि । अष्टौ मङ्गलस्य । शेषश्चात्र-"भौमे व्योमोल्मुकैकाङ्गौ ॥"[शेषनाममाला २।१४॥] ॥

**बुधः सौम्यः प्रहर्षुलः ।**
**ज्ञः पञ्चार्चिः श्रविष्ठाभूः श्यामाङ्गो रोहिणीसुतः ॥११७॥**

१ बुध्यते **बुधः**। 'बुध अवगमने'(दि.आ.अ.), 'इगुपधज्ञाप्रीकिरः कः' ३।१।१३६॥ २ सोमश्चन्द्रः पितृत्वाद्

१. '-भेदसमुदायव्याचाष्टे' इति३, '-भेदात् समुदायमाचष्टे' इति१॥ २. अत्र पदचन्द्रिका द्रष्टव्या, भा-१, दिग्वर्गः, श्लो-९०, पृ.११९॥ ३. 'भृमृदृशियजि-' इत्युणादिगणे॥ ४. टीकासर्वस्वे "गोत्रे कुञ्जादिभ्यश्च्फञ्'४।१।९८॥ इति" इत्यस्य स्थाने "नडादित्वात् फक्" इति पाठो दृश्यते ॥ ५. कोष्ठान्तर्गतपाठस्थाने २.३.४प्रतिषु "रान्ति ददति फलानीति राशयः, तासाम्, रा ला दाने" इति दृश्यते ॥ ६. क्षीरतरङ्गिण्यादौ ङकारो न दृश्यते ॥ ७. 'व्रीडायाम्' इति३, 'व्रीडे' इति स्वामिसायणौ ॥ ८. नास्ति ३.४प्रत्योः ॥ ९. "अङ्गानियर्ति पीनत्वादङ्गारकः, आरस्तु भौमवत्" इत्येव अम. स्वामिकृतटीकायाम्, पृ.२८॥ १०. ३.४नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

देवताऽस्य **सौम्यः** ।'सोमाट्ट्यण्'८।२।३०॥ ।''गर्गादित्वाद् अपत्ये यञ्''[ ]इति श्रीधरः, परं तदमूलम्, गर्गादौ अस्य पाठाभावात् । यौगिकत्वात् चन्द्रात्मजः, चान्द्रमसायनिरित्यादयः। ३ प्रहृष्यति **प्रहर्षुलः** । 'हृष तुष्टौ'(दि.प.से.), 'हृषेरुलच्' (उणा-९६)इत्युलच् । ४ जानातीति **ज्ञः** । 'ज्ञा अवबोधने' (क्र्या.प.अ.), 'इगुपधज्ञाप्रीकिरः कः'३।१।१३६॥, 'आतोलोप इटि च'६।४।६४॥ इत्यालोपः। ५ पञ्च अर्चिषोऽस्य **पञ्चार्चिः**। पञ्चार्चिषौ इत्यादि । ६ श्रविष्ठासु भवति **श्रविष्ठाभूः** । 'भू सत्तायाम्'(भ्वा.प.से.), क्विप् ।७ श्याममङ्गमस्य **श्यामाङ्गः**। रोहिण्याः सुतो **रोहिणीसुतः** । यौगिकत्वाद् रौहिणेयः । अष्टौ बुधस्य ॥११७॥

**बृहस्पतिः सुराचार्यो जीवश्चित्रशिखण्डिजः ।**
**वाचस्पतिर्द्वादशार्चिर्धिषणः फल्गुनीभवः ॥११८॥**
**गीर्बृहत्योः पतिरुतथ्यानुजाङ्गिरसौ गुरुः ।**

१ बृहतां देवानां गुरुत्वात् पतिः **बृहस्पतिः** ।'तद्-बृहतोः करपत्योश्चौरदेवतयोः सुट् तलोपश्च'(वा-६।१।१५७॥) इति साधुः । बृहताम्पतिरित्यपि षष्ठ्यलुकि । २ सुराणां देवानामाचार्यः **सुराचार्यः** । ३ असुरैर्हतानपि मन्त्रादिना जीवयति **जीवः**।'जीव प्राणधारणे'(भ्वा.प.से.), अस्माद्धेतुमण्णिजन्तात् पचाद्यच् । तथा च रामायणे-

''अनात्तान्नष्टसंज्ञांश्च आहातासून् बृहस्पतिः ।
दिव्याभिर्मन्त्रयुक्ताभिरौषधीभिरजीवयत् ॥१॥''[ ]

इति । ४ ''ऋषयः सप्त धीमद्भिः स्मृताश्चित्रशिखण्डिनः''[ ] इति हारावली[2] । एषोऽङ्गिरा अपि चित्रशिखण्डी, ततो जातः **चित्रशिखण्डिजः**।'जनी प्रादुर्भावे'(दि.आ.से.), 'पञ्चम्यामजातौ'३।२।९८॥ इति डः। सप्तर्षिजोऽपि, 'समुदाये हि प्रवृत्ताः शब्दा अवयवेऽपि वर्तन्ते' इति न्यायात् । ५ वाचो वाण्याः पतिः **वाचस्पतिः**।'पारस्करप्रभृतीनि [च] संज्ञायाम्'६।१।१५७॥ इति साधुः । ६ द्वादश अर्चिषोऽस्य **द्वादशार्चिः**। ७ धृष्णोति प्रगल्भते **धिषणः**।'ञिधृषा प्रागल्भ्ये'(स्वा.प.से.), 'धृषेर्धिष् च संज्ञायाम्'(उणा-२४०)इति क्युः । प्रशस्तधिषणायोगाद् वा धिषणः। अर्शआदित्वादच्, 'यस्येति च'६।४।१४८॥ इत्याकारलोपः। ८ फल्गुन्याम् उत्तरफल्गुन्यां भवति, **फल्गुनीभवः** । 'भू सत्तायाम्'(भ्वा.प.से.), पचाद्यच् ॥११८॥ ९-१० गीर्बृहत्योः पतिरिति । गीश्च बृहती चेति गीर्बृहत्यौ, तयोर्गीर्बृहत्योः पतिः, तेन गिरां पतिः **गीर्पतिः** । 'अहरादीनां पत्यादिषूभयथोपसंख्यानम्'[3](वा-८।२।७०॥)इति रेफस्य रेफादेशः । रेफाभावपक्षे विसर्जनीयोपध्मानीयौ गीःपतिः गीᳶपतिरिति। गीष्पतिरसाधुरिति केचित्।''कस्कादित्वात् साधुः''[ ]इति चान्द्रः।''भ्रातुष्पुत्रादित्वात् षत्वमिष्यते[ ]इति न्यासवचनाद् 'अहरादीनां पत्यादिषु-'(वा-८।२।७०॥)इति रेफः, पक्षे कस्कादिदर्शनात् षत्वम्'[अम.क्षीर.१।२।२५॥]इत्यमरकोषक्षीरस्वामिकृतटीकावचनात् षत्वसद्भावे गीष्पतिरित्यपि । बृहत्या वाण्याः पतिः **बृहतीपतिः** । बृहतीशब्दो वाणीपर्यायः-

''बृहती क्षुद्रवार्ताक्यां छन्दोवस(-सा)नभेदयोः ।
महत्यां वाचि वार्द्धान्याम्''[अनेकार्थसङ्ग्रहः ३।२९५]

इत्यनेकार्थः । ११ उतथ्यः, चतुर्थवर्गद्वितीयान्तस्थाद्यान्तः, ऋषिविशेषस्य नाम, तस्यानुजः **उतथ्यानुजः**, अखण्डपञ्चाक्षरम् । १२ ([4]अगि गतौ(भ्वा.प.से.), 'अङ्गिरसः'( )इत्यसुन्प्रत्ययो निपातितः)। अङ्गिरसोऽपत्यम् **आङ्गिरसः**[5]। 'ऋष्यन्धकवृष्णि-' ४।१।११४॥ इत्यादिनाऽण् । बहुत्वेऽणो(लुकि अङ्गिरसोऽपि), अभेदोपचाराद् अङ्गिरा, अङ्गिरसावित्यादि[6]।''यथापृथाभृगुश्चाङ्गिराश्च भार्गवे, अङ्गिरसो साधुत्वम्''[ ]इति क्षान्तिदेवः । १३ गृणाति हिताऽहितमुपदिशति **गुरुः** ।'गॄ शब्दे'(क्र्या.प.से.), 'कृग्रोरुच्च'(उणा-२४)इति कुः, 'उरण् रपरः'१।१।५१॥ इति रपरत्वम्। त्रयोदश बृहस्पतेः । शेषश्चात्र-

''गीःपतिस्तु महामतिः ।
प्रख्याः प्रचक्षा वाक् वाग्मी गौरो दीदिविगीरथौ ॥''
[शेषनाममाला २।१४-१५॥]॥

**शुक्रो मघाभवः काव्य उशना भार्गवः कविः॥११९॥**
**षोडशार्चिर्दैत्यगुरुर्धिष्ण्यः**

१ शोचति सदा दैत्यनाशेनेति **शुक्रः** । 'शुच शोके' (भ्वा.प.से.), 'ऋज्रेन्द्रा-'(उणा-१८६)इत्यादिना रक्, कित्त्वाद् गुणाभावः ।'' रुद्रस्य शुक्रद्वारेण निर्गतत्वात् शुक्रः''[अम.क्षीर. १।२।२६॥]इति तु स्वामी । यद् वामनपुराणम्-

''इत्येमवमुक्त्वा भगवान् मुमोच, शिश्नेन शुक्रं स च निर्जगाम''[ ]इति । २ मघासु भवति **मघाभवः**। पचाद्यच्। ३ कविरेव **काव्यः**।'चतुर्वर्णादीनां स्वार्थे ष्यञ् वाच्यं[7]' इति ष्यञ्। ''कवेरपत्यं काव्यः,'कुर्वादिभ्यो ण्यः'४।१।१५१॥ इति ण्यः[8]''

१. '-रोष-' इति२॥ २. तस्यां नाऽयं पाठो दृश्यते ॥ ३. 'अहरादीनां पत्यादिषु वा रेफः' इति सि. कौमुद्याम् ॥ ४. कोष्ठान्तर्गतपाठस्थाने १प्रतौ ''अङ्गति इति । 'अङ्गिराः'( )इत्यसिप्रत्ययान्तो निपातितः'' इति दृश्यते ॥ ५. कोष्ठान्तर्गतपाठस्थाने १प्रतौ 'लुक् आङ्गिरसौ अङ्गिरसः'' इति पाठो दृश्यते ॥ ६. '-वित्यपि' इति१॥ ७. 'चतुर्वर्णादीनां स्वार्थ उपसंख्यानम्' इति सि. कौमुद्याम् ॥ ८. 'इति ण्यः' इति अम.क्षीर. नास्ति ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

[अम.क्षीर १।२।२६॥]इति स्वामी । ४ वष्टीति **उशना** ।'वश कान्तौ'(अ.प.से.), 'वशेः कनसिः'(उणा-६७८)इति कनसिः। ग्रह्यादित्वात् संप्रसारणम्, 'ऋदुशनस्पुरुदंसोऽनेहसां च'७।१।७४॥ इत्यनङ् । सम्बोधने तूशनसस्त्रिरूपम्, सान्तं तथा नान्तमथाप्यदन्तमिति विशेषः । ५ 'भ्रस्ज[1] पाके'(तु.उ.अ.), 'प्रथिम्रदिभ्रस्जां सम्प्रसारणं सलोपश्च'(उणा-२८)इति उप्रत्ययः, सम्प्रसारणसलोपौ च, 'न्यङ्क्वादीनां च'७।३।५३॥ इति कुत्वम्, भृगुः। भृगोरपत्यं **भार्गवः** ।'ऋष्यन्धकवृष्णि-'४।१।११४॥ इत्यादिनाऽण्, 'ओर्गुणः' ६।४।१४६॥, 'एचोऽयवायावः'६।१।७८॥, बहुत्वेऽणो लुकि भृगवः । ६ कौति इति **कविः** ।'कु शब्दे' (अ.प.अ.), 'अच इः'(उणा-५७८)इति इः। ''कविस्त्वभेदात्''[अम.क्षीर.१।२।२६॥]इति स्वामी। ''कविजातत्वाद्वा''[अभि.स्वो.टी.२।११९॥]इत्याचार्याः ॥११९॥ ७ षोडश अर्चिषोऽस्य **षोडशार्चिः** । ८ दैत्यानां गुरुः **दैत्यगुरुः**। यौगिकत्वादसुराचार्य इत्यादयः । ९ धृष्णोति प्रगल्भते **धिष्ण्यः** । 'ञिधृषा प्रागल्भ्ये'(स्वा.प.से.), 'मध्यविड्यशिक्यान्यपर्जन्यवदान्य-'( )इत्यादिना साधुः। नव शुक्रस्य। शेषश्चात्र-''शुक्रे भृगुः''[शेषनाममाला २।१५॥] ॥

**शनैश्चरः शनिः ।**
**छायासुतोऽसितः सौरिः सप्तार्ची रेवतीभवः ॥१२०॥**
**मन्दः क्रोडो नीलवासाः**

१ पङ्गुत्वात् शनैश्चरति **शनैश्चरः**।'चर गतिभक्षणयोः' (भ्वा.प.से.), पचाद्यच् । प्रतीकलक्षणया शनैरपि । ''शनैः शनैश्चरे मन्दे''[ ]इति वाचस्पतिः । २ श्यति तनूकरोति दृष्ट्या जनमिति **शनिः**। 'शो तनूकरणे'(दि.प.अ.), ([2]'धूशाशीङो ह्रस्वश्च'(हैमोणा-६७८)इति निः) । ३ छाया सूर्यभार्या, तस्याः सुतः **छायासुतः** । ४ सितः शुक्लः, न सितः **असितः**, कृष्णवर्णाङ्ग इत्यर्थः । ५ सूरस्यापत्यं **सौरिः** ।'अत इञ्'४।१।९५॥, अयं दन्त्यादिः, तालव्यादिश्च । ''सूर्यपर्यायसूरशब्दस्य दन्त्यतालव्यत्वात् सौरोऽपि, 'तस्येदम्'४।३।१२०॥ इत्यण्''[ ]इति स्वामी । ६ सप्तार्चिषोऽस्य **सप्तार्चिः** । ७ रेवत्यां भवति **रेवतीभवः** । पचाद्यच् ॥१२०॥ ८ मन्दगतित्वाद् **मन्दः** । ९ करोति पीडां, क्रामति क्षेत्रं राशिं [च] चिरेणेति वा **क्रोडः**। पृषोदरादित्वात् साधुः । १० नीलं वासो वस्त्रमस्य **नीलवासाः** ।'अत्वसन्तस्य चाऽधातोः'६।४।१४॥। नीलवाससौ, नीलवाससः इत्यादि । दश शनैश्चरस्य । शेषश्चात्र-

''शनौ पङ्गुः श्रुतकर्मा महाग्रहः।
श्रुतश्रवोऽनुजः कालो[3] ब्रह्मण्यश्च यमः स्थिरः॥
क्रूरात्मा च''[शेषनाममाला २।१५-१६॥] ॥

**स्वर्भाणु( नु )स्तु विधुन्तुदः ।**
**तमो राहुः सैंहिकेयो भरणीभूः**

१ स्वराकाशे भाति **स्वर्भानुः**।'भा दीप्तौ'(अ.प.अ.), 'दाभाभ्यां नुः'(उणा-३१२)इति नुः, क्षुभ्नादित्वात् 'पूर्वपदात्' ८।३।१०६॥ इति न णत्वम् । ''स्वर्भानुः''[गणरत्नमहोदधिः, अध्या-२, श्लो-१६२]इति गणरत्नमहोदधौ । आचार्यमते तु तृतीयवर्गपञ्चमान्त एव स्वर्भाणुरिति । २ विधुं चन्द्रं तुदति **विधुन्तुदः**। 'तुद व्यथने'(तु.उ.अ.), 'विध्वरुषोस्तुदः' ३।२।३५॥ इति खश्, खित्त्वात् मुम् । ३ ताम्यति **तमः**।'तमु ग्लानौ'(दि.प.से.), '-असुन्'(उणा-६२८), क्लीबेऽयम् । तमसी, तमांसि इत्यादि। ''तमस्कान्तिवात् तमः''[ ]इति स्वामी। ''तमांसि गुणतिमिरसैंहिकेयाः''[ ]इति त्रिकाण्डशेषे[4]। ''स्वर्भानुस्तु तमो राहुः''[ ]इति पुंस्काण्डरत्नकोषाऽमरमालयोः पुंलिङ्गेऽपि। ४ रहति त्यजति गृहीत्वा चन्द्रार्कौ इति **राहुः** ।'रह त्यागे'(भ्वा.प.से.), 'रहेश्च[5]'( )इत्युण् । ५ सिंहिकाया अपत्यं **सैंहिकेयः** । 'स्त्रीभ्यो ढक्'४।१।१२०॥, ढस्य एयादेशः। ६ भरण्यां भवति **भरणीभूः**, क्विबन्तः । षट् राहोः । अभ्रपिशाचग्रहकल्लोलावपि । शेषश्चात्र-''अथ राहौ स्यादुपराग उपप्लवः''[शेषनाममाला २।१६॥] ॥

**अथाहिकः ॥१२१॥**
**अश्लेषाभूः शिखी केतुः**

१ अहिना संसृष्ट **आहिकः** ।'तेन संसृष्टम्[6]'४।४।२२॥ इति ठक्, 'ठस्येकः'७।३।५०॥, 'किति च'७।२।११८॥ इति वृद्धिः ॥१२१॥ २ अश्लेषायां भवति **अश्लेषाभूः**। क्विप् । ३ शिखाऽस्यास्ति **शिखी**। 'व्रीह्यादिभ्यश्च'५।२।११६॥ इनिः, 'शिखादेर्न ठन्'([7])इति ठनः प्रतिषेधः। ४ चाय्यते निशाम्यतेऽशुभमनेनेति **केतुः**।'चायृ पूजानिशामनयोः'(भ्वा.उ.से.), 'चायः कीचतुः[8]'(उणा-३७)इति तुप्रत्ययः, धातोश्च कीरादेशः, 'सार्वधातुकार्धधातुकयोः'७।३।८४॥ इति गुणः । चत्वारि केतोः । शेषश्चात्र-''केतावूर्ध्वकचः''[शेषनाममाला २।१७॥] ॥

---

१. 'भ्रस्जो' इति १.२.३॥ २. कोष्ठान्तर्गतपाठो २.३.४प्रतिषु नास्ति ॥ ३. 'कोल' इति ४॥ ४. नेदं वचस्त्रिकाण्डशेषे उपलभ्यते॥ ५. 'रहश्च' इति १, एतादृशसूत्रमुणादिगणे न दृश्यते॥ ६. 'संसृष्टे' इत्येवाष्टाध्याय्याम्॥ ७. ''शिखादिभ्य इनिर्वाच्यः इकन् यवखदादिषु'' इति भाष्यम् ५।२।११६॥ । ८. 'चायः किः' इत्युणादिगणे॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**ध्रुव[1]स्तूत्तानपादजः[2] ।**

१ ध्रुवत्वाद् निश्चलत्वाद् **ध्रुवः** । 'ध्रुव गतिस्थैर्ययोः' (तु.प.से.), पचाद्यच्, कुटादित्वाद् ङित्वम् । 'इगुपधज्ञाप्री-' ३।१।१३५॥ इति को वा । ''ध्रु स्थैर्ये'(भ्वा.प.अ.), 'स्रुवः कः'(उणा-२१९)इति बाहुलकादतोऽपि के ध्रुवः''[ ]इति कौमुदी । 'ध्रुवमपायेऽपादानम्'१।४।२४॥ इति निर्देशात् साधुः। २ उत्तानपादान्नृपतेर्जातः **उत्तानपादजः**। 'जनी प्रादुर्भावे' (दि.आ.से.), 'पञ्चम्यामजातौ'३।२।९८॥ इति डः । यौगिकत्वादौत्तनपादिः, अत्र ऋषित्वाद् 'ऋष्यन्धक-'४।१।११४॥ इत्यणि प्राप्ते बाह्वादित्वादिञ् । अणि औत्तानपादोऽपि । द्वे ध्रुवस्य । शेषश्चात्र-''ज्योतीरथग्रहाश्रयौ ध्रुवे''[शेषनाममाला २।१७॥] ॥

**अगस्त्यो[1]ऽगस्तिः[2] पीताब्धि[3]र्वातापिद्विट्[4] घटोद्भवः[5] ॥१२२॥**

**मैत्रावरुणि[6]राग्नेय[7] और्वशेया[8]ग्निमारुतौ[9] ।**

१ अगं विन्ध्यं पर्वतं त्यक्तवानिति **अगस्त्यः** । 'त्यज हानौ'(भ्वा.प.अ.), 'अन्येभ्योऽपि (अन्येष्वपि) दृश्यते' ३।२।१०१॥ इति डः,पारस्करादेराकृतिगणत्वात् सुट् । विन्ध्याख्यमगं स्त्यायतीति वा । 'ष्ट्यै स्त्यै शब्दसंघातयोः'(भ्वा.प.अ.), 'अन्येभ्योऽपि (अन्येष्वपि) दृश्यते'३।२।१०१॥ इति डः। अगं स्तभ्नातीति वा।'स्तन्भु रोधने'(क्र्या.प.से.,सौत्रः) 'अगपुलाभ्यां स्तम्भेर्डित्'(हैमोणा-३६३)इति यः । २ संहतमगमस्यतीति **अगस्तिः**। 'असु क्षेपणे'(दि.प.से.), 'वसेस्तिः'(उणा-६१९) बाहुलकाद् अस्यतेरपि तिः । शकन्ध्वादित्वात् पररूपत्वम् । अगति कुटिलं गच्छतीति वा अगस्तिः । 'अग [कुटिलायां] गतौ'(भ्वा.प.से), बाहुलकाद् अस्तिक् । ''अगस्त्यः कुम्भयोनिरगस्तिः कलसी(शी)सुतः''[[1] ]इति शब्दार्णवः। ''अगस्तिनाऽध्यासितविन्ध्यशृङ्गम्''[भट्टिकाव्यम् १२।७१॥]इति भट्टिः। ३ पीतोऽब्धिरनेन **पीताब्धिः**। ४ वातापिं वातापिनं द्वेष्टीति **वातापिद्विट्**। 'द्विष अप्रीतौ'(दि.उ.अ.), 'सत्सूद्विषद्रुह-'३।२।६१॥ इत्यादिना क्विप् । ५ घटादुद्भवति **घटोद्भवः**। पचाद्यच् ॥१२२॥६ मित्रश्च वरुणश्च मित्रावरुणौ देवर्षी, 'देवताद्वन्द्वे च'६।३।२५॥ इत्यानङ्, तयोरपत्यं **मैत्रावरुणिः**। ऋषिसमुदायस्याऽनृषित्वाद् 'अत इञ्'४।१।९५॥ इति इञ् । यद्यपि मित्रस्य उर्वशीदर्शनाद् रेतश्च्युतं तत्तेन ह्रिया कुम्भे धृतं तत्रायं जातोऽत एव कुम्भसंभवः इति प्रसिद्धस्तथापि सहचाराभेदाध्यवसायादुभयते[2]जोजत्वाच्चोभयापत्यव्यपदेशे[3] मैत्रावरुणिरिति, अत एव भेदविवक्षायां वारुणिरपि । तथा च भारते-

''अद्यापि दक्षिणाशाया वारुणिर्न निवर्तते ॥''[ ]इति ।

तथा च व्याडिः-

''मित्रावरुणयोः सूनुरौर्वशेयश्च वारुणिः ॥''[[1] ]इति ।

[[4]७ अग्नेरपत्यम् **आग्नेयः**, तदंशत्वात् । 'अग्नेर्ढक्'४।२।३२॥ इति ढक्, ढस्य एयादेशः] । ८ उर्वश्या अपत्यम् **और्वशेयः**। 'स्त्रीभ्यो ढक्'४।१।१२०॥, ढस्य एयादेशः । ९ अग्निश्च मरुच्च अग्निमरुतौ, तयोरपत्यम् **आग्निमारुतः** । 'तस्यापत्यम्'४।१।९२॥ इत्यण् । पीताब्ध्यादयो यौगिकाः । नव अगस्त्यस्य । शेषश्चात्र-

''अगस्त्ये विन्ध्यकूटः स्याद् दक्षिणाशारतिर्मुनिः ।
सत्याग्निर्वारुणिः क्राथिस्तपनः कलशीसुतः ॥१॥''

[शेषनाममाला २।१७-१८॥] ॥

**लोपामुद्रा[1] तु तद्भार्या कौषीतकी[2] वरप्रदा[3] ॥१२३॥**

१ तस्यागस्त्यस्य भार्या तद्भार्या । लोपयति योषितां रूपाभिमानमिति । 'लुप लोपे'( [5]) अतो णिजन्तात् पचाद्यच्, 'अजाद्यतष्टाप्'४।१।३॥ लोपा । मुद्रयति[6] स्रष्टुः सृष्टिमिति मुद्रा[7]। लोपा चासौ मुद्रा च **लोपामुद्रा** । पतिशुश्रूषालोपेषु जनेषु न मुदं रातीति वा । कुष्णाति तपसा कृत्वा आत्मानमिति कुषीतकः । 'कुष निःकोषे'(क्र्या.प.से.), 'कुषेः कित्' (हैमोणा-८०)इति ईतकः कुषीतकः ऋषिः, ([8]तस्यापत्यं स्त्री) 'ऋष्यन्धक-'४।१।११४॥ इत्यणि, 'टिड्ढाणञ्'४।१।१५॥ इति ङीप् **कौषीतकी** । ३ वरं प्रददाति **वरप्रदा** । 'आतोऽनुपसर्गे कः'३।२।३॥, ततष्टाप् । त्रीण्यगस्त्यपत्न्याः ॥१२३॥

**मरीचिप्रमुखाः[1] सप्तर्षयश्चित्रशिखण्डिनः ।**

मरीचिः प्रमुखमादिरेषां मरीचिप्रमुखाः, प्रमुखशब्दः प्राथम्ये । यदुक्तम्-

''मरीचिरङ्गिरा अत्रिः पुलस्त्यः पुलहः क्रतुः ।
वशिष्ठश्चेति सप्तैते ज्ञेयाश्चित्रशिखण्डिनः ॥१॥''[[9] ]इति।

१. द्र. रामाश्रमी १।३।२०॥, पृ.४६॥ २. '-भयतो जात-' इति ३॥ ३. '-व्यपदेशः' इति ३॥ ४. सर्वादर्शेषु आग्नेयशब्दस्य व्युत्पत्तिर्न दृश्यते॥ ५. लुपधातुः क्षीरतरङ्गिण्यादौ विमोहनेऽर्थे दृश्यते ॥ ६. 'आमुद्रयति' इति १॥ ७. 'आमुद्रा' इति १॥ ८. कोष्ठान्तर्गतपाठो २.३.४प्रतिषु नास्ति॥ ९. द्र. स्वोपज्ञटीका २।१२४॥, पृ.२८॥, रामाश्रमी १।३।२७॥, पृ.५०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'सप्तर्षयः' इत्यत्र 'दिक्संख्ये संज्ञायाम्'२।१।५०॥ इति समासः। चित्रो विचित्रः शिखण्डश्चूडाविशेषोऽस्त्येषामिति **चित्रशिखण्डिनः** । 'व्रीह्यादिभ्यश्च'५।२।११६॥ इतीनिः । मरीचिप्रमुखाः । सप्तर्षयः प्रत्येकं चित्रशिखण्डिन उच्यन्त इत्यर्थः ॥

**पुष्पदन्तौ पुष्पवन्तावेकोक्त्या शशिभास्करौ ॥१२४॥**

१ पुष्पे इव पुष्पे, दन्ताविव दन्तौ, पुष्पे च ते दन्तौ च **पुष्पदन्तौ** । यद् विश्वदन्तः "रविशशिनौ पुष्पदन्तौ"[1] इति । २ (अथवा[2] पुष्पनं पुष्पः, 'पुष्प विकसने'(दि.प.से.), भावे घञ्), पुष्पो विकासोऽस्त्यनयोरिति **पुष्पवन्तौ** । 'तदस्यास्त्यस्मिन्निति मतुप्'५।२।९४॥ "रविशशिनौ द्वौ संपृक्तावेवोच्येते, न तु पुष्पदन्तः पुष्पवान् वा इन्दुः सूर्यो वा उच्यते" [स्वो.टी., श्लो-१२४]इत्याचार्याः[3] । एकैकाभिधाने एकवचनान्तोऽपि । "'पुष्पवान्' इति मतुबन्तश्चायम्"[ ]इति बृहस्पतिः। (अकारान्तोऽपि[4] पुष्पवन्तशब्दः, 'अव रक्षणे(भ्वा.प.से.),' 'जृ(जू)विशिभ्यां झच्'(उणा-४०६)इति बाहुलकादवतेरपि झच्, 'झोऽन्तः'७।१।३॥ पुष्पस्यावन्ता(न्तौ) विग्रहे शकन्ध्वादिः)। "रविशशिनौ पुष्पवन्ताख्यौ"[5]इति नाममालायाम्, "प्राक् प्रत्यग्धरणीधरशिखरस्थितपुष्पवन्ताभ्याम्"[6]इत्याश्चर्यमञ्जर्यां चाऽदन्तत्वदर्शनान्नित्यद्विवचनश्चायम्, मिलितयोरेवाभिधायकत्वात् तथैव सर्वत्र दर्शनाच्च । शशिभास्करावित्यत्र 'देवताद्वन्द्वे च'६।३।२६॥ इति नानङ्, तत्र 'आनङ् ऋतो द्वन्द्वे' ६।३।२५॥ इत्यतो द्वन्द्वग्रहणेऽनुवर्तमाने पुनर्द्वन्द्वग्रहणेन वेदलोकसहचरितद्वन्द्वग्रहणादस्य तु द्वन्द्वस्याऽतथात्वात् । अत एव "रविचन्द्रावपि नोपलक्षितौ"[घटकर्पर काव्यम्, श्लो-१]इति घटकर्परः[7] । द्वे एकोक्त्या चन्द्रसूर्ययोः ॥१२४॥

**राहुग्रासोऽर्केन्द्वोर्ग्रह उपराग उपप्लवः ।**

१ राहुणा[8] ग्रसनं **राहुग्रासः** । 'ग्रसु अदने'(भ्वा.-आ.से.), भावे घञ् । अर्कश्चेन्दुश्च अर्केन्दू, तयोः कर्मभूतयोर्ग्रहणं ग्रहः । 'ग्रह उपादाने'(क्र्या.उ.से.), 'ग्रहवृद-'३।३।५८॥ इत्यप् । २ उपरज्येते छाद्येते चन्द्रार्कावनेनेति **उपरागः** । 'रञ्ज रागे'(भ्वा.उ.अ.), करणे घञ्, 'चजोः कु घिण्ण्यतोः'७।३।५२॥ इति कुत्वम्, 'घञि च भावकरणयोः'६।४।२७॥इति न्लोपः, 'अत उपधायाः'७।२।११६॥ ३ उपप्लूयतेऽनेन **उपप्लवः** । 'प्लुङ् गतौ'(भ्वा.आ.अ.), 'ऋदोरप्'३।३।५७॥ इत्यप्, 'सार्वधातुकार्धधातुकयोः'७।३।८४॥ इति गुणः। त्रीणि ग्रहणस्य ॥

**उपलिङ्गं त्वरिष्टं स्यादुपसर्ग उपद्रवः ॥१२५॥ अजन्यमीतिरुत्पातः**

१ उपलिङ्ग्यते दोषैर्गम्यते जनोऽत्र **उपलिङ्गम्** । 'लिगि विचित्रीकरणे[9]'(चु.उ.से.), अधिकरणे घञ् । २ नास्ति रिष्टं क्षेममत्र **अरिष्टम्** । ३ उपसृज्यत उपद्रूयते प्रजा अत्रेति **उपसर्गः**। 'सृज विसर्गे'(दि.आ.अ.), अधिकरणे घञ्, 'पुगन्तलघूपधस्य-'७।३।८६॥ इति गुणः, 'चजोः कु घिण्ण्यतोः' ७।३।५२॥ ४ उपद्रूयते प्रजा अत्र **उपद्रवः**। 'द्रु गतौ'(भ्वा.प.अ.), 'ऋदोरप्'३।३।५७॥ ॥**१२५**॥ ५ न जन्यते पुरुषव्यापारेणेति **अजन्यम्** । 'जनी प्रादुर्भावे'(दि.आ.से.), अतो णिजन्तात् 'तकिशसिचतियतिजनिभ्यश्च'(वा-३।१।९७॥)इति यत् । "जने साधु जन्यम्, न जन्यम् अजन्यम्"[ ]इत्यन्ये । पुंक्लीबलिङ्गः। ६ ईयते प्राप्यते दुःखमस्यामिति **ईतिः**, चतुर्थस्वरादिः। 'इण् गतौ'(भ्वा.प.अ.), क्तिन् । ७ उत्पतत्यकस्मादायाति **उत्पातः**। 'पत्लृ गतौ'(भ्वा.प.से), 'ज्वलतिकसन्तेभ्यो णः'३।१।१४०॥ सप्त उपद्रवस्य ॥

**वह्न्युत्पात उपाहितः ।**

१ वह्निना कृत उत्पातः **वह्न्युत्पातः** । शाकपार्थिवादित्वान्मध्यपदलोपः । २ उप आसन्नमहितमस्य **उपाहितः**। "धूमकेत्वाख्य उत्पातः"[ ]इत्येके । द्वे वह्निकृतोपद्रवस्य[10] ॥

**स्यात् कालः समयो दिष्टानेहसौ सर्वमूषकः ॥१२६॥**

१ कल्यतेऽसौ **कालः**। 'कल संख्याने शब्दे च[11]' (भ्वा.आ.से.), कर्मणि घञ्, 'अत उपधायाः'७।२।११६॥ इति वृद्धिः । कालयति क्षिपति सर्वभावानिति वा । 'पचाद्यच्' [ ]इति तु स्वामी । 'कल शब्दसंख्यानयोः'(भ्वा.आ.से.), कलते कालः, 'अकर्तरि च कारके-'३।३।१९॥ इति घञ् वा। २ सम् सम्यक् एति **समयः**, पुंक्लीबलिङ्गः । सम्पूर्वः 'इण् गतौ'(भ्वा.प.अ.), पचाद्यच् । ३ दिश्यते स्मेति **दिष्टः**। 'दिश अतिसर्जने'(तु.प.अ.), 'निष्ठा'३।२।१०२॥इति क्तः, 'व्रश्चभ्रस्ज-'८।२।३६॥ इत्यादिना षत्वम्, ष्टुत्वम्। ४ नाहन्ति गतः सन्निति **अनेहा**, पुंलिङ्गः। 'हन् (हन) हिंसागत्योः' (अ.प.अ.), 'नञो (नञि) हन एह च'(उणा-६६३)इत्यसुन्प्रत्ययः, आहन्स्थाने एहादेशः, 'तस्मान्नुडचि'६।३।७४॥ इति नुट्, 'ऋदुशन-'७।१।९४॥ इत्यादिना चाऽनङ् । न ईहते

१. द्र. स्वोपज्ञटीका २।१२४॥, पृ.२८॥ २. कोष्ठान्तर्गतपाठः १ प्रतावेव दृश्यते, तत्र 'अथवा' इत्यनुपयुक्तः ॥ ३. स्वोपज्ञटीकायां तु "एकयोक्त्या अपृथग्वचनेन रोदसीवच्छशिभास्करावुच्येते ॥ न तु पुष्पदन्तः पुष्पवान् वा इन्दुः सूर्यो वोच्यते" इति पाठो दृश्यते॥ ४. कोष्ठान्तर्गतपठः १ प्रतावेव दृश्यते ॥ ५. द्र. रामाश्रमी १।४।१०॥, पृ.५९॥ ६. अमरकोशामरपदपारिजातटीका १।४।११॥, पृ.७९॥ ७. '-खर्परः' इति १॥ ८. 'राहोः' इति १॥ ९. '-चित्रीकरणे' इति स्वामिसायणौ ॥ १०. इतोऽग्रे ४प्रतौ 'नामानि' इति दृश्यते ॥ ११. 'कल शब्दसंख्यानयोः' इति क्षीरतरङ्गिण्यादौ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चेष्टतेऽनेन आघ्रात इति वा । 'ईह चेष्टायाम्'(भ्वा.आ.से.), नञ्पूर्वः, 'नञ ईहेरेहै(हे)धौ च'(हेमोणा-९७५)इत्यसुन् । अनेहसौ, अनेहसः इत्यादि । ५ सर्वं मूषति **सर्वमूषकः** । 'मूष स्तेये'(भ्वा.प.से.), षष्ठस्वरादिः, 'ण्वुल्तृचौ'३।१।१३३॥ इति ण्वुल् । सामान्यतः पञ्च कालस्य ॥१२६॥

अथ विशेषादाह–

**कालो द्विविधोऽव[1]सर्पिण्युत्स[2]र्पिणीविभेदतः ।**
**सागरकोटिकोटीनां विंशत्या स समाप्यते ॥१२७॥**

कालो द्विविधो द्विभेदः, अवसर्पो भावानां पतत्प्रकर्षता, सोऽस्यामस्तीति **अवसर्पिणी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः, 'ऋन्नेभ्यः-'४।१।५॥ इति ङीप् । उत्सर्पणमुत्सर्पः भावानामेव रोहत्प्रकर्षता, सोऽस्यामस्ति **उत्सर्पिणी** । प्रत्ययः प्राग्वत् । अवसर्पिणी च उत्सर्पिणी च अवसर्पिण्युत्सर्पिण्यौ, तयोर्विभेदतः पार्थि(र्थ)क्यात् कालस्य द्वैविध्यम्, स इति अवसर्पिण्युत्सर्पिणीलक्षणः कालः (सागराणि दशकोटिकोटी-पल्योपमप्रमाणाणि), सागरणां कोटिकोट्यः सागरकोटिकोट्य-स्तासां विंशत्या समाप्यते परिपूर्यते ॥१२७॥

**अवसर्पिण्यां षडरा उत्सर्पिण्यां त एव विपरीताः ।**
**एवं द्वादशभिररैर्विवर्तते का[1]लचक्रमिदम् ॥१२८॥**

षडिति षट् संख्याकाः इय्रति गच्छन्ति सुषमादिनाम-विशेषमिति **अराः** । 'ऋ गतौ'(जु.प.अ.), पचाद्यच्, 'सार्व-धातुकार्धधातुकयोः'७।३।८४॥ । ते च वक्ष्यमाणा एकान्त-सुषमादयः एकान्तदुःषमान्ता अवसर्पिण्यां भवन्ति । त एवेति, एकान्तसुषमादयः षडपि विपरीता इति[3], एकान्तदुःषमाद्या एकान्तसुषमान्ताश्च उत्सर्पिण्यां काले भवन्ति । एवम् उक्तप्रकारेण द्वादशभिररैश्चक्रमिव चक्रम्, कालस्य चक्रं **कालचक्रं** विवर्तते परिभ्रमति ॥१२८॥

**तत्रैका[1]न्तसुषमाऽरश्चतस्रः कोटिकोटयः ।**
**सागराणाम्**

१ तत्रेति । द्वादशारे कालचक्रे शोभनाः समा वर्षा-ण्यस्यां सुषमा । 'सुविनिर्दुर्भ्यः सुपिसूतिसमाः'८।३।८८॥ इति षत्वम् । एकान्तेन सुषमादुःषमानुभावरहिता **एकान्तसुषमा**, सुषमसुषमेत्यर्थः, प्रथमोऽरः । सागराणां सामरोपमाणां चतस्रः इति चतुःसंख्याः कोटीनां कोटयः कोटिकोटयः, चतुःकोटी-कोटीसागरोपमप्रमाण इत्यर्थः । प्रथमारस्यैकम् ॥

**सुषमा तु तिस्रस्तत्कोटिकोटयः ॥१२९॥**

१ शोभनाः समाः वर्षाण्यस्यां **सुषमा** । 'सुविनि-र्दुर्भ्यः-'८।३।८८॥ इति षत्वम् । सुषमाख्यो द्वितीयोऽरः तिस्रस्तत्कोटिकोटयः, त्रिसागरोपमकोटीकोटिप्रमाण इत्यर्थः । एकं द्वितीयारकस्य ॥१२९॥

**सुषमदुः[1]षमा ते द्वे**

दुरिति दुष्टाः समा अस्यां दुःषमा । 'सुविनिर्दुर्भ्यः सुपिसूतिसमाः'८।३।८८॥ इति षत्वम् । सुषमा चासौ दुःषमा च **सुषमदुःषमा** । सुषमाऽनुभावबहुला अल्पदुःषमानुभावेति भावः । तन्नामा तृतीयोऽरः । ते द्वे इति । सागरोपमकोटिकोट्यौ, द्विसागरोपमकोटीकोटिप्रमाण इत्यर्थः । तृतीयारकस्यैकम् ॥

**दुःषमसुषमा पुनः ।**
**सैका सहस्रैर्वर्षाणां द्विचत्वारिंशतोनिता ॥१३०॥**

१ दुष्टा निन्द्याः कृच्छ्ररूपा वा समा वर्षाण्यस्यां दुःषमा । दुःषमा चासौ सुषमा च **दुःषमसुषमा** । दुःषमानुभावबहुला अल्पसुषमानुभावेत्यर्थः[4] । दुःषमसुषमाधिश्चतुर्थोऽरकः[5] । सेति सागरोपमकोटिकोटी[6] एका एकसंख्या द्विचत्वारिंशद्वर्षसहस्रैः ऊनिता हीनीकृतेत्यर्थः । 'ऊन परिहाणे'(चु.उ.से.), चुरादिरदन्तः, निष्ठान्तः । एकं चतुर्थारकस्य[7] ॥१३०॥

**अथ दुः[1]षमैकविंशतिरब्दसहस्राणि**

१ दुष्टा निन्द्याः समा वर्षाण्यस्यां **दुःषमा** । दुःषमा-ख्यः पञ्चमोऽरः, एकविंशतिवर्षसहस्राणि । एकं [8]पञ्चम-दुःषमाभिधारकस्य ।

**तावती तु स्यात् ।**

**एका[1]न्तदुःषमाऽपि हि**

१ एकान्तेन दुःषमा सुषमानुभावरहिता **एकान्तदुःषमा**, दुःषमदुःषमेत्यर्थः । तदाख्यः षष्ठोऽरः, तावतीति दुःषमावदेक-विंशतिवर्षसहस्रप्रमाणेत्यर्थः । एकं [9]षष्ठारकस्य ॥

**एतत्संख्याः परेऽपि विपरीताः ॥१३१॥**

एषैव अवसर्पिण्यरकोक्ता संख्या येषां ते एतत्संख्याः, परेऽपि उत्सर्पिण्यरका अपि, विपरीताः प्रतिलोमवृत्तयः[10] एका-न्तदुःषमा[रा]द्या एकान्तसुषमारपर्यन्ताः स्युरिति । एकान्तसु-षमाद्या एकान्तदुःषमान्ता मूर्धन्यमध्याः स्त्रीलिङ्गाः ॥१३१॥

१. '-मिति' इति २॥ २. कोष्ठान्तर्गतपाठस्थाने १प्रतौ "सागरः सागरोपमं दशकोटिकोटीपल्योपमप्रमाणम्" इति दृश्यते ॥ ३. इतोऽग्रे ३प्रतौ 'भवति' इति ॥ ४. '-भावेत्यर्थः' इति ३॥ ५. '-चतुर्थोऽरः' इति ३॥ ६. '-कोटाकोटी' इति २. ३. ४ ॥ ७. '-रस्य' इति २॥ ८. 'पञ्चमस्य' इत्येव ३॥ ९. '-ष्ठोऽर-' इति २॥ १०. '-प्रवृत्तयः' इति ३॥

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

**प्रथमेऽरत्रये मर्त्यास्त्रिद्व्येकपल्यजीविताः ।**
**त्रिद्व्येकगव्यूतोच्छ्रायास्त्रिद्व्येकदिनभोजनाः ॥१३२॥**
**कल्पद्रुफलसन्तुष्टाः**

प्रथमे आदिमे अवसर्पिण्या अरत्रये मर्त्या मनुजाः त्रिद्व्येकपल्यजीविताः स्युः, त्रीणि द्वे एकं च पल्यं पल्योपमं जीवितं जीवनं येषां ते त्रिद्व्येकपल्यजीविताः, पल्यमिति धान्याधारविशेषः । इह तु तत्प्रतिकृतिरायामविष्कम्भावगाहैर्योजनप्रमाणः प्रदेशः प्रोच्यते, स च कुरुक्षेत्रोद्भवसाप्ताहिकमेषशिश्वङ्गुलप्रमाणबाललेशैः पुनरसंख्यातखण्डीकृतैर्भृतः, उपरि च लोहशकटेनाप्यनयभूतो वर्षशते[1] च गते एकैकवालाग्रापहारेण यावता कालेन निर्लेपः स्यात् तावान् कालः पल्योपममद्धेत्यभिधानम् । कीदृशा नराः ? त्रीणि द्वे एकं च गव्यूतं क्रोश उच्छ्रायो येषां ते त्रिद्व्येकगव्यूतोच्छ्रायाः, पुनस्त्रिद्व्येकदिनभोजनाः त्रिषु द्वयोरेकस्मिंश्च दिने व्यतिक्रान्ते भोजनं येषां ते तथा । तत्र प्रथमेऽरके मर्त्यास्त्रिपल्योपमायुषः, त्रिगव्यूतोन्नताङ्गाश्चतुर्थदिनभोजिनो भवन्ति । द्वितीयेऽरके द्विपल्योपमजीविताः, द्विगव्यूतोन्नतशरीरास्तृतीयदिनभोजिनो भवन्ति, तृतीयेऽरके द्वि(एक)-पल्योपमजीविताः, एकगव्यूतोच्छ्रिताङ्गाः, द्वितीयदिनभोजिनो भवन्ति इति यथाक्रमार्थः ॥१३२॥ ते च कल्पद्रुमाणां फलैः सन्तुष्टा भवन्ति, कल्पवृक्षफलान्याहरन्तीत्यर्थः ॥

**चतुर्थे त्वरके नराः ।**
**पूर्वकोट्यायुषः पञ्चधनुःशतसमुच्छ्रयाः ॥१३३॥**

तुर्ये दुःषमसुषमाभिधेऽरे मनुजाः पूर्वकोट्यायुषो भवन्ति। सप्ततिः कोटिलक्षाः षट्पञ्चाशच्च वर्षकोटिसहस्राः पूर्वम्, तत्कोट्यायुषः, पञ्चधनुःशतानि समुच्छ्रय उच्चत्वं येषां ते तथा ॥१३३॥

**पञ्चमे तु वर्षशतायुषः सप्तकरोच्छ्रयाः ।**

पञ्चमेऽरके मनुजाः वर्षशतमायुर्येषां ते वर्षशतायुषः, सप्त च ते करा हस्ताश्च सप्तकराः, सप्तकरा उच्छ्रयो येषां ते तथा ॥

**षष्ठे पुनः षोडशाब्दायुषो हस्तसमुच्छ्रयाः ॥१३४॥**
**एकान्तदुःखप्रचिताः**

पुनः षष्ठेऽरके मनुष्याः षोडशवर्षायुषः, एकहस्तोन्नताङ्गाः एकान्तदुःखव्याप्ताश्च ॥

**उत्सर्पिण्यामपीदृशाः ।**
**पश्चानुपूर्व्या विज्ञेया अरेषु किल षट्स्वपि ॥१३५॥**

किलेति सत्ये, उत्सर्पिण्यामपि कालविशेषे षट्स्वप्यरकेषु पश्चानुपूर्व्या प्रातिलोम्येन ईदृशा एव मर्त्या विज्ञेयाः, सम्यग्दृग्भिरिति शेषः । तद्यथा उत्सर्पिण्यां[2] दुःषमदुःषमानाम्नि एकविंशतिसहस्रवर्षप्रमाणे प्रथमेऽरके मनुजाः षोडशवर्षायुषः, एकहस्तमानोन्नताङ्गाः स्युः, ततो द्वितीये दुःषमानाम्नि एकविंशतिवर्षसहस्रप्रमितेऽरके मनुजाः वर्षशतायुषः, सप्तहस्तोच्छ्रयाश्च भवन्ति, ततस्तृतीये द्वाचत्वारिंशद्वर्षसहस्रोनैककोटी[3]-कोटिसागरप्रमाणे दुःषमसुषमाभाख्येऽरके मनुजाः पूर्वकोट्यायुषः, पञ्चधनुःशतसमुच्छ्रयाश्च भवन्ति, ततः चतुर्थे द्विसागरोपमकोटी[3]-कोटिप्रमाणे सुषमदुःषमाख्येऽरके मनुजाः एकपल्योपमायुष एकगव्यूतोच्[4]चतनवः, एकस्मिन् दिने गते भोजिनो भवन्ति, ततः पञ्चमे सुषमाभिधेऽरके सागरत्रयप्रमाणे मनुजा द्विपल्योपमायुषो द्विगव्यूतोन्नततनवस्तृतीयदिनभोजिनो भवन्ति, ततः षष्ठे सुषमसुषमानाम्नि चतुःकोटीकोटिसागरप्रमाणे त्रिपल्योपमजीवितास्त्रिगव्यूतोन्नततनवश्चतुर्थदिनभोजिनो भवन्ति मनुजाः ॥१३५॥

**अष्टादश निमेषाः स्युः काष्ठा**

१ पुंसो यावता[5] कालेनाकृत्रिमनेत्रविकाशानन्तरं पक्ष्माकुञ्चनं जायते, स निमेष उच्यते, तेऽष्टादशसंख्याः '**काष्ठा**' इत्युच्यते । "निमेषनिमिषौ कालभेदे नेत्रनिमीलने"[ विश्वलोचनकोशः, षान्तवर्गः, श्लो-२५ ]इति श्रीधरः। काशते काष्ठा। 'काशृ दीप्तौ'(भ्वा.आ.से.), 'हनिकुषिनीरमिकाशिभ्यः क्थन्' (उणा-१५९), 'तितुत्र-'७।२।९॥ नेट्, 'व्रश्च-'८।२।३६॥ आदिना षत्वम्, 'ष्टुना ष्टुः'८।४।४१॥, समूहवाचित्वात् काष्ठेत्येकवचनम् । अष्टादशनिमेषप्रमाणकालस्यैकम् ॥

**काष्ठाद्वयं लवः ।**

१ लुनाति परिच्छिनत्ति कालमिति लवः। 'लूञ् छेदने' (क्र्या.उ.से.), अच्, गुणः । काष्ठाद्वयं षट्त्रिंशन्निमेषा इत्यर्थः, तावत्प्रमाणकालस्यैकम् ॥

**कला तैः पञ्चदशभिः**

१. इतोऽग्रे १.२.४ प्रतिषु 'वर्षशते' इति दृश्यते ॥ २. '-र्पिण्यां' इति ३॥ ३. '-कोटा-' इति २.३.४॥ ४. '-तोच्छ्रत-' इति १॥ ५. 'कालमकृ-' इति २.३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ तैः पञ्चदशभिर्लवैः **कला** । कलयति कालमिति कला। 'कल संख्याने'[1](चु.उ.से.), णिजन्तादस्मात् पचाद्यच्, टाप्। पञ्चदशलवप्रमाणकालस्यैकम् ॥

**लेशस्तद्द्वितयेन च ॥१३६॥**

१ लिश्यतेऽल्पीभवति **लेशः**। 'लिश अल्पीभावे' (दि.आ.अ.), 'भावे'३।३।१८॥ इति घञ् । तस्याः कलायाः द्वितयेन तद्द्वितयेन, कलायुगलेनेत्यर्थः। कलाद्वयप्रमाणकालस्यैकम् ॥१३६॥

**क्षणस्तैः पञ्चदशभिः**

१ तैः पञ्चदशभिर्लेशैः **क्षणः**। क्षणोति क्षणः। 'क्षणु हिंसायाम्'(त.उ.से.), पचाद्यच् । पञ्चदशलेश[2]प्रमाणकालस्यैकम् ॥

**क्षणैः षड्भिश्च नाडिका । सा धारका घटिका च**

१ नलति गन्धति नाला । 'णल गन्धे'(भ्वा.प.से.), ज्वलादित्वाद् णः, नालाशब्दादज्ञाताद्यर्थे कः, 'केऽणः'७।४।१३॥ इति ह्रस्वः, 'प्रत्ययस्थात्-'७।३।४४॥ इतीत्वम्, टाप्, नालिका, डलयोरैक्ये **नाडिका**। 'नड अवस्कन्दने[4]'( )इत्यस्य नाडी"[ ] इति नन्दी । षड्भिः क्षणैः नाडिका, सा नाडिका धारका घटिका चोच्यत इत्यन्वयः । २ धारयति कालं **धारका**। 'धृञ्[5] धारणे'(भ्वा.उ.अ.), णिजन्तादतः 'ण्वुल्तृचौ'३।१।१३३॥ इति ण्वुल्, 'युवोरनाकौ'७।१।१॥, क्षिपकादिगणे पाठात् 'प्रत्ययस्थात्-'७।३।४४॥ इतीत्वं न भवति । ३ घटयति कालं **घटिका** ।'घट चेष्टायाम्'(भ्वा.आ.से.), णिजन्तादस्माद् ण्वुल्, 'प्रत्ययस्थात्-'७।३।४४॥इतीत्वम्। 'घट चेष्टायाम्'(भ्वा.-आ.से.), 'क्वुन् शिल्पिसंज्ञयोः'(उणा-१९०)इति क्वुन् वा । त्रीणि षट्क्षणप्रमाणकालस्य । 'घटी' इति भाषा ॥

**मुहूर्त्तस्तद्द्वयेन च ॥१३७॥**

१ हूर्च्छति **मुहूर्त्तः**, पुंक्लीबलिङ्गः । 'हूर्च्छा कौटिल्ये' (भ्वा.प.से.), बाहुलकाद् 'अञ्जिघृषि(-सि)-'(उणा-३६९) इति क्तः, मुडागमश्च, 'राल्लोपः'६।४।२१॥ छलोपः, 'हलि च' ८।२।७७॥ इति दीर्घः । मुहुर्वारंवारमियर्तीति वा । पृषोदरादित्वात् साधुः । तयोर्घटिकयोर्द्वयं तद्द्वयम्, तेन । एकं घटिकाद्वयप्रमाणकालस्य ॥१३७॥

**त्रिंशता तैरहोरात्रः**

१ तैर्मुहूर्त्तैस्त्रिंशतेति त्रिंशत्संख्याकैः **अहोरात्रः** उच्यते। (अह्ना[6] सहिता रात्रिरिति समासः) (अहश्च रात्रिश्च अनयोः समाहारः), 'अहः सर्वैकदेशसङ्ख्यातपुण्याच्च रात्रेः'५।४।८७॥ इत्यच्, 'यस्येति च'६।४।१४८॥, अह्नो[8] रुत्वविधौ 'रूपरात्ररथन्तरेषूपसंख्यानम्'(वा-८।२।६८॥)इति रुः अहोरात्रः, पुंक्लीबलिङ्गः । "द्वन्द्वे त्वहोरात्राविमौ पुण्यौ"[अम.क्षीर.१।३।१२॥] इति स्वामी । "एवं समाहारे क्लीबमप्यहोरात्रम्, वामनलिङ्गानुशासने 'द्विगुरपि पात्राद्यन्तः'"[वामनीयलिङ्गानुशासनम्, स्वो. टीका,श्लो-१६]इति नपुंसकत्वेन 'अहोरात्रम्, द्विरात्रम्'"[वामनीयलिङ्गानुशासनम्, स्वो.टीका.श्लो-१६]इत्युदाहृतम्"[ ]इति सुभूतिः । ([9]पाणिनीयमते तु परत्वाद् 'रात्राह्नाहाः पुंसि'२।४।२९॥ इति पुंलिङ्ग एवायम्) । एकं त्रिंशन्मुहूर्त्तप्रमाणकालस्य ॥

**तत्राहर्दिवसो दिनम् । दिवं द्युर्वासरो घस्रः**

१ तत्रेति, अहोरात्रमध्ये, न जहाति कालमिति **अहः**। 'ओहाक् त्यागे'(जु.प.अ.), 'नञि जहातेः'(उणा-१५६)इति कनिन्। अंहते गच्छति वा । 'अहि गतौ'(भ्वा.आ.से.), बाहुलकात् 'श्वन्नुक्षन्-'(उणा-१५७)इत्यादिना निपातितः, 'अहन्' ८।२।६८॥ इति नकारस्य रुत्वम् । २ दीव्यति आदित्योऽत्र **दिवसः** । 'दिवु क्रीडादौ'(दि.प.से.), 'दिवादिभ्यः किदसच्[10]' (उणा-४०१)इत्यसच्प्रत्ययः । ३ दीयते क्षयं याति तमोऽत्रेति **दिनम्**, पुंक्लीबलिङ्गः ।'दीङ् क्षये'(दि.आ.अ.), 'इणुसिञ्जिदीङ्घ्याव(-ड्युष्यवि-)भ्यो नक्'(उणा-२८२)इति बाहुलकान्नकि ह्रस्वः । द्यति तमः, निर्व्यापारस्थितिं वा । 'दो अवखण्डने' (दि.प.अ.), औणादिके नकि 'द्यतिस्यति[मा]स्थामित्ति-' ७।४।४०॥ इतीत्वम् । ४ दीव्यन्त्यत्र लोका इति **दिवम्** । 'दिवु क्रीडादौ'(दि.प.से.), 'घञर्थे कविधानम्'(वा-३।३।५८॥)इति

१. 'गतौ सङ्ख्याने च' इति स्वामिसायणौ ॥ २. 'पञ्चदशप्रमाण-' इति ३॥ ३. 'धारिका' इति मूले, स्वोपज्ञटीकायामपि तथैव ॥ ४. क्षीरतरङ्गिण्यां चुरादौ 'नट अवस्यन्दने'(धातुसं-१२, पृ.२९२)इत्यत्र स्वामिनोक्तम् "-नड इति नन्दी-नडः, नाडी प्रणाली" इति॥ ५. सायणसम्मतोऽयं धातुः ॥ ६. २.३ आदर्शस्य पाठः ॥ ७. १आदर्शस्य पाठः । प्रायः देवसागरगणयो मुकुटमतानुसारिणः, तेन २.३ आदर्शस्य पाठो युक्तिसङ्गतः । 'अह्ना सहिता रात्रिः' इति मुकुटकृतसमासस्य रामाश्रम्यां खण्डितत्वात् १ आदर्शस्य पाठोऽपि युक्तिसङ्गतः, द्र. रामाश्रमी १।४।१२॥, पृ.६०॥ ८. 'अह्ना' इति २.३॥ ९. कोष्ठान्तर्गतपाठः २.३.४ प्रतिषु नास्ति॥ १०. 'दिव: कित्' इत्युणादिगणे॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कः। ५ द्यौति गच्छति द्युः, पुंलिङ्गः। 'द्यु अभिगमे'(अ.प.अ.), मितद्र्वादित्वाद् डुः, डित्वाट्टिलोपः । ६ वासयति रविमिति **वासरः**, पुंक्लीबलिङ्गः ।'वस निवासे'(भ्वा.प.अ.), णिजन्तः,शुद्धोऽपि[1] पूर्वार्थे वर्तते, 'अर्त्तिकमिचमिभ्रमिवासिभ्यश्च[2]'(उणा-४१२)इत्यरप्रत्ययः । वासयत्यपनयति[3] शीतादिकं वा[4] । यद्वा वसेः स्वार्थे णिचि अधिकरणेऽरन्, वसत्यस्मिन् सुखेनेति वासरः। यद्वा 'वासृ[5] दीप्तौ'( ), पूर्वस्मादेवसूत्रादरन्, वासते दीप्यत इति वासरः । विपूर्वात् सर्त्तेर्गत्यर्थात् पचाद्यचि वीत्यस्येकारस्याकारः पृषोदरादित्वाद् वासरो दन्त्यमध्यः । ''रविर्मनाग्दर्शितवासरः सरः''[ ]इति जानकीहरणम् । ''वृद्धो वासरसङ्गः''[भट्टिकाव्यम् १३।२॥]इति भट्टिः। वेसरमित्यपि। क्वचिदुणादिवृत्तौ 'वाशि' इति, 'वाशृ शब्दे'(दि.आ.से.)इति पठ्यते, अतो वाशरं तालव्यमध्यमाहुः, तददर्शनम् । ७ घसति अन्धकारमिति **घस्त्रः**। 'घस्लृ अदने'(भ्वा.प.अ.), 'स्फायितञ्चि-'(उणा-१७०) इत्यादिना रक्। दिवाऽव्ययम् । दिवसो हि शिवशासने ब्रह्मणः सुरप्रसवित्रीतनुः । यद्विष्णुपुराणम्-

''सिसृक्षुरन्यदेहस्थः प्रीतिमापुस्ततः सुराः ।
सत्वोद्रिक्ताः समुद्भूता[6] मुखतो ब्रह्मणो द्विजः ॥१॥
त्यक्ता सापि तनुस्तेन स च (सत्त्व)प्रायमभूद् दिनम्।
ततो हि बलिनो रात्रावसुरा देवता दिवा ॥२॥''

[विष्णुपुराणम्, प्रथमांशः, अ. ५,श्लो-३३-३४]इति। सप्त दिवसस्य ॥

दिवसो हि प्रातस्तन[7]१सङ्गव[8]२मध्याह्न३पराह्ण४सायाह्न५-लक्षणैः पञ्चभिर्भागैर्युक्तो भवत्यतः प्रातःकालनामान्याह-

**प्रभातं स्यादहर्मुखम् ॥१३८॥**
**व्युष्टं विभातं प्रत्यूषं कल्यप्रत्युषसी उषः[9] ।**
**काल्यम्**

१ भातुं प्रवृत्तं **प्रभातम्** । 'भा दीप्तौ'(अ.प.अ.), 'आदिकर्मणि क्तः-'३।४।७१॥ । ''प्रपूर्वाद् भातेः बाहुलकात् तन्''[ ]इति तु सर्वधरः । २ अह्नो मुखं प्रारम्भः **अहर्मुखम्** ॥१३८॥ ''मुखमुपाये प्रारम्भे श्रेष्ठे''[अनेकार्थसङ्ग्रहः २।२४॥] इत्यनेकार्थः। ३ विशेषेण उच्छ्यतेऽतिक्रम्यते **व्युष्टम्**। विपूर्वः 'उच्छी विवासे'(तु.प.से.), [क्तः], 'व्रश्च-'८।२।३६॥ इत्यादिना षत्वम्, ष्टुत्वम्। ४ विभातुं प्रवृत्तम् **विभातम्** । विपूर्वः 'भा दीप्तौ'(अ.प.अ.), 'आदिकर्मणि क्तः-'३।४।७१॥। ५ प्रत्यूषति निशां रुजति **प्रत्यूषम्**, पुंक्लीबलिङ्गः ।'ऊष रुजायाम्'(भ्वा.-प.से.), 'इगुपधज्ञाप्रीकिरः कः'३।१।१३५॥ इति कः, दीर्घमध्योऽयम् । ''प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः''[मेघदूतम्, पूर्वमेघः, श्लो-३१]इति मेघः । ६ कलयति संख्यां **कल्यम्** । 'कल संख्याने'(चु.उ.से.), 'अघ्न्यादयश्च'(उणा-५५१)इति यत् । कलासु साधु वा कल्यम् । 'तत्र साधुः' ४।४।९८॥ इति यत् । ७ प्रत्योषत्यर्ककरैरन्धकारमिति **प्रत्युषः**, सकारान्तः, पञ्चमस्वरमध्यः। 'उष दाहे'(भ्वा.प.से.), 'उषेः कित्'(उणा-६७३)इत्यसिः। प्रतिरन्योपसर्गनिवृत्त्यर्थः । ८ ओषति दहत्यन्धकारमिति **उषः**। 'उष दाहे'(भ्वा.प.से.), 'उषेः कित्' (उणा-६७३)इत्यसिः, अयमपि पञ्चमस्वरादिः । ''उषसि सयावकव्यपादलेखा(-रेखा[10])''[किरातार्जुनीयम् ५।४०॥]इति भारविः । ९ काले साधु **काल्यम्** । 'तत्र साधुः'४।४।९८॥ इति यत् । ''काले भवं काल्यम्, 'दिगादिभ्यो यत्'४।३।५४॥'' [माधवीयधातुवृत्तिः, भ्वादिः, धातुसं-३२५]इति माधवः। विभातकालस्य प्रशस्यत्वात् साधुत्वम् । नव प्रभातस्य। शेषश्चात्र- ''व्युष्टे निशात्ययगोसर्गौ''[शेषनाममाला २।१८॥] । प्रभातकालो हि सूर्यार्धोदयादारभ्य घटिकाषट्कं यावद्भवति । यद्विष्णुपुराणम्-

''लेखाप्रभृत्यथादित्ये त्रिमुहूर्त्ते गतेऽत्र वै (रवौ) ।
ज्ञेयः प्रातस्तनः[11] कालो भागश्चाह्नः स पञ्चमः ॥१॥''

[विष्णुपुराणम्,द्वितीयांशः,अ-८, श्लो-६२]इति ।''अर्द्धोदयोऽत्र लेखा''[ ]इति तट्टीका । प्रातः, प्रगे, प्राह्णे, पूर्वेद्युश्चाव्ययानि। गोसो देश्याम्[12] । संस्कृतेऽपीत्येके ॥

**मध्याह्नस्तु दिवामध्यं मध्यन्दिनं च सः॥१३९॥**

१ अह्नो मध्यं **मध्याह्नः** । अहन्शब्दाद् 'राजाहःसखिभ्यष्टच्'५।४।९१॥ इति टच्, 'अह्नोऽह्नः'५।४।८८॥ इत्यह्लादेशः, 'रात्राह्नाहाः पुंसि'२।४।२९॥ इति पुंस्त्वम्, 'संख्याविसायपूर्वस्य-'६।३।११०॥ इति ज्ञापकात् समासः।

---

१. 'वस निवासे'(चु.उ.से.)इति चुरादेरपि ग्रह इत्यर्थः ॥ २. 'अर्त्तिकमिभ्रमिचमिदेविवासिभ्यश्चित्' इत्युणादिगणसूत्रस्वरूपम् ॥ ३. 'विवासयति' इति २.३.४॥ ४. 'वा' इति २.३.४. नास्ति ॥ ५. क्षीरतरङ्गिण्यादावयं धातुर्न दृश्यते ॥ ६. 'समुद्धतो' इति ३॥ ७. 'प्रातस्ततः' इति १, 'प्रातस्तत' इति २.४॥ ८. 'सङ्गत' इति १॥ ९. 'उषः' इत्युणादिगणे ॥ १०. '-सव्यलक्ष्मलेखा' इति १.२॥ ११. 'प्रातःस्मृतस्तत-' इति विष्णुपुराणे, खं-१, पृ. ३०३॥ १२. द्र. श्रीहेमचन्द्राचार्यकृतदेसीसद्दसंगहो, वर्गः-२, श्लो-२७०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

२ दिवा अह्नो मध्यं **दिवामध्यम्** । ३ दिनस्य मध्यं **मध्यन्दिनम्**। 'राजदन्तादिषु परम्'२।२।३१॥ (इति दिनशब्दस्य परनिपातः)। स इति मध्याह्न एव मध्यन्दिनमुच्यत इत्यर्थः । द्वादशघटिकाभ्योऽग्रिमस्त्रिमुहूर्त्तः कालो मध्याह्नस्तन्नामानि त्रीणि ॥१३९॥

## दिनावसानमुत्सूरो विकालसबली अपि ।
## सायम्

१ दिनस्यावसानमन्तः **दिनावसानम्** । २ उत्क्रान्तः सूरोऽस्मिन्निति **उत्सूरः** । ३ विरुद्धः कालो **विकालः** । ४ सह बलिभिरुपहारैर्वर्तते **सबलिः**, पुंलिङ्गः । ५ स्यति दिनं **सायम्** । 'षोऽन्तकर्मणि'(दि.प.अ.), 'श्याद्व्यधास्रुसंस्र्वतीणव-'३।१।१४१॥ इत्यादिना णप्रत्ययः, 'आदेच उपदेशेऽशिति'६।१।४५॥ इत्यात्वम्, 'आतो युक् चिण्कृतोः'७।३।३३॥, सायमिति क्लीबलिङ्गः। गौडस्तु "उत्सूरश्च विकालश्च सबलिश्च सः"[[२] ]इति पुंस्याह। "कर्मणि घञि सायः"[ ] इति तु कौमुदी। मान्ताव्ययं अव्ययवर्गे[अभि., श्लो-१५३१] वक्ष्यते । "सायमिति क्लीबपाठः प्रामादिकः"[ ]इति बृहस्पतिः। पञ्च उत्सूरस्य । 'उसूर[३]' इति भाषा॥

## सन्ध्या तु पितृसूः

१ सं सम्यग् ध्यायन्ति मन्त्रादिकमस्यामिति **सन्ध्या**। सम्पूर्वः 'ध्यै चिन्तायाम्'(भ्वा.प.अ.), 'आतश्चोपसर्गे' ३।१।१३६॥ इत्यङ्, 'अजाद्यतष्टाप्[४]'४।१।३॥ 'सन्धा पितृप्रसूः सन्ध्या'[[५] ]इति शब्दार्णवाद् निर्यकारोऽपि । 'सन्धोच्छलितः' [वासवदत्ता, पृ.१५]इति वासवदत्ता[६]। २ पितॄन् सूते **पितृसूः**। 'षूङ् प्राणिप्रसवे[७]'( ), 'सत्सूद्विषद्रुह-'३।२।६१॥ इत्यादिना क्विप् । सन्ध्या हि[८] ब्रह्मणः पितृप्रसवित्रीतनुः इति प्रसिद्धिः[९]। यद्विष्णुपुराणम्-

"सत्वमात्रात्मिकामेवं (-व) ततोऽन्यां जगृहे तनुम् ।
पितृवन्मन्यमानस्य पितरोऽस्यां च जज्ञिरे
(पितरस्तस्य जज्ञिरे) ॥१॥
उत्ससर्ज पितॄन् सृष्ट्वा ततस्तामपि स प्रभुः।
(उत्सर्ज ततस्तां तु पितॄन् सृष्ट्वापि स प्रभुः।)
सा चोत्सृष्टाऽभवत् सन्ध्या दिननक्तान्तरस्थितिः ॥२॥"

[विष्णुपुराणम्, प्रथमांशः, अ-५, श्लो-३५-३६]। द्वे सन्ध्यायाः ॥

## त्रिसन्ध्यं तूपवैणवम् ॥१४०॥

१ अहरवयवोऽहः शब्दो ग्रामो दग्ध इतिवत्, प्रथमं च तदहश्च प्राह्णः। 'राजाहःसखिभ्यष्टच्'५।४।९१॥, 'अह्नोऽह्नः' ५।४।८८॥ इत्यह्नादेशः, 'रात्राह्नाहाः पुंसि'२।४।२९॥इति पुंस्त्वम्। अह्नः अपरं अपराह्नः। 'पूर्वापर-'२।२।१॥ इत्येकदेशिसमासः, 'अह्नोऽदन्तात्'८।४।७॥इति द्वयोरपि णत्वम् । अह्नो मध्यं मध्याह्नः । एतास्तिस्रः सन्ध्याः समाहृता इति **त्रिसन्ध्यम्**। 'आबन्तो वा'(वा-२।४।३०॥)इति क्लीबत्वम्। 'गोस्त्रियोरुपसर्जनस्य'१।२।४८॥इति ह्रस्वत्वम्। पक्षे त्रिसन्ध्यी[१०]। २उप समीपे वैणवो व्रतदण्डो यत्रेति **उपवैणवम्**। द्वे त्रिकालस्य ॥१४०॥

## श्राद्धकालस्तु कुतपोऽष्टमो भागो दिनस्य यः।

१ श्राद्धं पितृकर्म, तस्य कालः **श्राद्धकालः** । २ कुं पापं तपति[११] **कुतपः**, पुंक्लीबलिङ्गः । 'तप सन्तापे' (भ्वा.प.अ.), पचाद्यच् । कुं भूमिं मध्यन्दिने तपत्यर्कोऽत्रेति वा । कोतन्ति गच्छन्ति पितरः प्रीतिमस्मिन्निति वा कुतपः, पुंक्लीबलिङ्गः। कुतिः सौत्रो धातुः, बाहुलकाद् अपक् । यः दिवसस्याष्टमो भागोंऽशः, स[१२] श्राद्धकालः कुतपश्चोच्यत इत्यर्थः। ([१३]दिनस्य हि पुराणमतोक्तानि रौद्रादीनि भगान्तानि पञ्चदशमुहूर्त्तानि, तन्मध्ये यो गणनाक्रमेणाष्टमो मुहूर्त्तः, स कुतपः प्रोच्यते, तत्प्रयोजनं च श्राद्धे । यत्स्मृतिः- )

"दिवसस्याष्टमे भागे मन्दीभूते दिवाकरे ।
स कालः कुतपो यत्र पितॄणां दत्तमक्षयम् ॥१॥"[[१४] ]इति।

अन्यकर्मण्यष्टमो मुहूर्त्तोऽभिजिदाह्वः, श्राद्धकर्मणि च कुतप इत्यष्टममुहूर्त्तस्यैव नामान्तरम् । द्वे श्राद्धकालस्य ॥

## निशा निशीथिनी रात्रिः शर्वरी क्षणदा क्षपा ॥१४१॥
## त्रियामा यामिनी भौती तमी तमा विभावरी ।
## रजनी वसतिः श्यामा वासतेयी तमस्विनी॥१४२॥
## उषा दोषेन्दुकान्ता

१. कोष्ठान्तर्गतपाठः २.३.४प्रतिषु नास्ति ॥ २. द्र. स्वोपज्ञटीका २।१४०॥, पृ.३१॥ ३. 'असूर' इति३, 'उत्सूर' इति२.४॥ ४. 'प्रज्ञादित्वाट्टाप्' इति३, 'अजादित्वाट्टाप्' इति२.४॥ ५. द्र. रामाश्रमी १।४।३॥, पृ.५६॥ ६. वासवदत्तायां 'सन्ध्योच्छलितः' (सुबन्धुकृतवासवदत्ता, पृ.१५)इति दृश्यते ॥ ७. 'पितॄन् सूते' इति विगृहीतत्वात् 'षूङ् प्राणिगर्भविमोचने' इति पाठ्यम् ॥ ८. ३प्रतौ न दृश्यते ॥ ९. 'प्रसिद्धः' इति२॥ १०. 'त्रिसन्ध्या' इति१, 'त्रिसन्धी इति४॥ ११. 'तापयति' इति१॥ १२. 'भगः' इति ४प्रतेष्टिप्पणी ॥ १३. कोष्ठान्तर्गतपाठः ३प्रतौ न दृश्यते॥ १४. द्र. स्वोपज्ञटीका २।१४१॥, पृ.३१॥, शातातपस्मृतेरुद्धरणमिदम्, द्र. शब्दकल्पद्रुमकोशः, पृ.१४०॥


Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ निशानं **निशा**, सर्वव्यापाराणां तनूकरणम् । निपूर्वात् 'शो तनूकरणे'(दि.प.अ.) अस्माद् 'आतश्चोपसर्गे'३।१।१३६॥ इति भावेऽङ्, तद्योगाद् अर्शआद्यच् । ([1]अथवा नितरां श्यति तनूकरोति व्यापारान् इति निशा । 'आतश्चोपसर्गे'३।१।१३६॥ कः)। यद्वा नेशन्ति[2] समाहितमनस्का भवन्त्यस्यामिति । 'णिश समाधौ'(भ्वा.प.से.), 'इगुपधज्ञा-'३।१।१३५॥ इति कः, अजादित्वाट्टाप्[3] । पृषोदरादित्वाद् निट् इति हलन्तापि। ''गुणसन्धी पुंसि निट् [च] श्यामा तुङ्गी तमा तमी''[[4]]इति नामनिधानम्। २ नियतं शेरते लोका अत्रेति निशीथः ।([5]'शीङ् स्वप्ने (अ.आ.से.), 'निशीथगोपीथा-'(उणा-१६६)इति थक्) । सोऽस्यामस्ति **निशीथिनी** । 'अत इनिठनौ'५।२।११५॥इतीनिः, 'ऋन्नेभ्यः-'४।१।५॥इति ङीप्। ३ राति ददाति जनेभ्यः सुखमिति **रात्रिः** । 'रा ला दाने'(अ.प.अ.), 'राशदिभ्यां त्रिप्'[6](उणा-५०७)इति त्रिप्। यद्वा 'रमु क्रीडायाम्'(भ्वा.आ.अ.), अस्मादन्तर्भूतण्यर्थाद् बाहुलकात् त्रिप्रत्ययः, मकारस्य चाकारः। रमयति भूतानि नक्तञ्चारीणि, उपरमयति[7] दिवाचारीणि [8]स्वव्यापारेभ्य इति वा रात्रिः। 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि रात्री च । ''रात्री रात्रिस्तमस्विनी''[[9]]इति शब्दार्णवः। ४ शृणाति चेष्टाः, रात्रौ हि स्वस्वव्यापारेभ्य उपरमन्ते जना इति। 'शृ हिंसायाम्'(क्र्या.प.से.), 'कृगृशृवृ[ञ]चतिभ्यष्ष्वरच्'[10](उणा-२७९), टित्वात् ङीष् (ङीप्) **शर्वरी**, तालव्यादिः। पृषोदरादित्वाद् दीर्घादिरपि[11]। ''शार्वरी शर्वरी शर्वा (शर्या)''[[12]]इति शब्दार्णवः। शृणाति दिनव्यापारानिति वा । ''शृ हिंसायाम्' (क्र्या.प.से.) अस्माद् 'अन्येभ्योऽपि दृश्यते'३।२।७५॥ इति वनिपि, 'वनो र च'४।१।७॥ ङीप्, रश्चान्तादेशः । ५ क्षणमव्यापारसुखं ददाति **क्षणदा** । 'डुदाञ् दाने'(जु.उ.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥, 'आतो लोप इटि च'६।४।६४॥ इत्यालोपः । ''क्षणमवसरं भोगिनां[13] ददाति''[अम.क्षीर. १।३।४॥] इति स्वामी। ६ ([14]क्षपयति चेष्टां **क्षपा**। 'क्षै क्षये'(भ्वा.प.अ.) अस्माण्ण्यन्ताद् मितः पचाद्यच्)। क्षप्यते सूर्याचारेण, क्षपयति चेष्टा वा क्षपा । 'क्षप प्रेरणे'(चु.उ.से.), पचाद्यच्, भिदादित्वादङ् वा, क्षपा प्रथमस्वरादिः । 'क्षिप प्रेरणे'(दि.प.अ., तु.उ.अ.) इत्यस्य धातोर्यदा, तदा तृतीयस्वरादिरपि ॥१४१॥ ७ आद्यन्तयोरर्द्धयामयोश्चेष्टाकालत्वेन दिनवत्त्वात्, दिनवद् दिनव्यवहाराच्च त्रयो यामा यस्यां सा **त्रियामा** । ८ कार्यानर्हत्वान्निन्दिता यामा अस्यां[15] **यामिनी** । अत्र निन्दायाम् 'अत इनिठनौ'५।२।११५॥ इतीनिः, 'ऋन्नेभ्यः-'४।१।५॥ इति ङीप्। यौगिकत्वाद् यामवती च । ९ भूतानामियं **भौती**। 'तस्येदम्'४।३।१२०॥ इत्यण्, 'टिड्ढाणञ्-'४।१।१५॥ इत्यादिना ङीप्, भूतानां रात्रिचरत्वात् । १० ताम्यन्त्यस्यां चक्रवाकाः[16] **तमी**। 'तमु ग्लानौ'[17](दि.प.से.), 'इन् सर्वधातुभ्यः'(उणा-५५७)इतीन्, 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीष् । ११ पचाद्यचि, टापि **तमा** इत्यपि। तथा च विदग्धमुखमण्डनम्-''हारा महादेवरता तमातः''[[18]]इति। ''तमीत्यमूलम्, तमेत्येव पाठः''[[19]]इति सुजातोकादयः, परं तदयुक्तम्, ''स तमी (तमीं) तमोभिरभिगम्य[त]ताम्''[शिशुपालवधम्, सर्गः-९, श्लो-२३]इति माघदर्शनात् । ''नामनिधाने द्वयोरप्युपादानात् पाठद्वयमेव न्याय्यम्''[ ]इति तु कौमुदी। ''[वयं तु] क्षीरस्वामी(मि)सर्वधरादिभिस्तु तमीतीकारान्तपाठ एव स्वीकृत इति, तमीतीकारान्त एव मूलपाठः[इत्याचक्ष्महे]'' [पदचन्द्रिका, कालवर्गः, श्लो-१०७]इति बृहस्पतिः। १२ वृणाति 'वृञ्(वृ) आच्छादने'[20](क्र्या.उ.से.)इत्यतः पचाद्यजन्तात् 'पिप्पल्यादयश्च'(गणसू-४।१।४१॥)इति ङीप्(ङीष्) वरी। विभानं विभा, प्रभावत्, विभाया वरी आच्छादिका **विभावरी** । यद्वा 'भा दीप्तौ'(अ.प.अ.), नक्षत्रादिभिर्विशेषेण भातीति, 'आतो मनिन्क्वनिब्वनिपश्च'३।२।७४॥ इति क्वनिबन्ताद् 'वनो र च' ४।१।७॥इति ङीप् विभावरी। १३ रजन्ति[21] रागं प्राप्नुवन्ति रागि-

---

१. कोष्ठान्तर्गतपाठः १प्रतावेव दृश्यते ॥ २. 'निशन्ति' इति३, स्वोपज्ञटीकायां 'निशन्ति' इति रूपं दृश्यते, २।१४१॥, पृ.३१॥ ३. 'अजाद्यतष्टाप्' इति१॥ ४. द्र. पदचन्द्रिका, भा-१, कालवर्गः, श्लो-१०५, पृ.१३८॥, रामाश्रमी १।४।४॥, पृ.५६॥ ५. कोष्ठान्तर्गतपाठः २.४ प्रत्योर्न दृश्यते॥ ६. 'त्रिः' इति३.४॥ ७. 'उपरमयन्ति' इति २.३.४॥ ८. १प्रतौ बहिर्भागे 'स्व' इत्यधिकपाठो दृश्यते ॥ ९. द्र. पदचन्द्रिका, भा-१, कालवर्गः, श्लो-१०६, पृ.१३९॥, रामाश्रमी १।४।४॥, पृ.५६॥ १०. '-ष्वरच्' इति१, '-भ्यः ष्वरच्' इत्युणादिगणे ॥ ११. 'दीर्घादिरपि' इति४॥ १२. द्र. टीकासर्वस्वम्, भा-१, १।४।३॥, पृ.७७, पदचन्द्रिका, भा-१, कालवर्गः, श्लो १०६, पृ.१३९, रामाश्रमी १।४।३॥, पृ.५६॥ १३. अम.क्षीर. टीकायां नास्ति, १।३।४॥, पृ.३२॥ १४. कोष्ठान्तर्गतपाठः १प्रतावेव दृश्यते ॥ १५. 'अस्याः' इति २॥ १६. इतोऽग्रे २प्रतौ 'ततः' इति दृश्यते ॥ १७. क्षीरतरङ्गिण्यादौ तमुधातुः काङ्क्षायामर्थे दृश्यते ॥ १८. द्र. टीकासर्वस्वम्, भा-१, १।४।५॥, पृ.७८, पदचन्द्रिका, भाग-१, कालवर्गः, श्लो-१०७, पृ.१४०॥ ''के भूषयन्ति स्तनमण्डलानि कीदृश्युमा चन्द्रमसः कुतःश्रीः। किमाह सीता दशवक्त्रनीता हारा महादेवरता तमातः ॥ (पक्षे-हा राम हा देवर तात मातः)इति पूर्णः श्लोकः, टीकासर्वस्वे 'विभूषणं किं कुचमण्डलीनां....' इति दृश्यते ॥ १९. द्र. पदचन्द्रिका, भा-१, कालवर्गः, श्लो-१०७, पृ.१४०, तत्र 'इति तु जातोकायः' इति दृश्यते ॥ २०. क्षीरतरङ्गिण्यादौ वृञ्धातुराच्छादनेऽर्थे न दृश्यते ॥ २१. 'रंजंति' इति १॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

णोऽत्रेति, रञ्जयति तमसा वा **रजनी** । 'रञ्ज रागे'(भ्वा.उ.अ.), 'क्षिपेः किच्च'(उणा-२६४)इति चकाराद् रञ्जेरप्यनिः, कित्त्वान्नलोपः, 'कृदिकारात्-'(गणसू-४।१।४५॥) इति ङीष्। ङीब-(ङीष)भावे रजनिरपि। **१४** वसत्यस्यां तमः, वसन्त्यस्यां जना वा **वसतिः**। 'वस निवासे'(भ्वा.प.अ.), 'वहिवस्यर्तिभ्यश्चित्[1]'(उणा-५००)इति अतिप्रत्ययः । **१५** श्यायते गच्छति शनैः शनैरिति **श्यामा** । 'श्यैङ् गतौ'(भ्वा.प.अ.), 'इषियुधीन्धिदसिश्याधूसूभ्यो मक्'(उणा-१४२), 'आदेच उपदेशेऽशिति' ६।१।४५॥ इत्यात्वम्, ततष्टाप् । श्यामगुणयोगाद्वा श्यामा । **१६** वसतौ साधुः **वासतेयी** । 'पथ्यतिथिवसतिस्वपतेर्ढञ्'४।४।-१०४॥, 'आयनेयीनीय्[2]-'७।१।२॥ इत्यादिना ढस्य एयादेशः, 'टिड्ढाणञ्-'४।१।१५॥ इत्यादिना ङीप्। **१७** तमोयोगात् **तमस्विनी** । 'अस्मायामेधास्रजो विनिः'५।२।१२१॥ इति विनिः, 'ऋन्नेभ्यो ङीप्'४।१।५॥ ॥**१४२**॥ **१८** ओषति दहति अहःक्लेशमिति **उषा** । 'उष दाहे'(भ्वा.प.से.), 'इगुपधज्ञा-'३।१।१३५॥ इति कः, टाप्। उषेत्यव्ययमपि । **१९** दुष्यत्यस्यां दृष्टिः **दोषा**। 'दुष वैकृत्ये'(दि.प.अ.), पचाद्यच्, 'अजाद्यतष्टाप्'४।१।४॥ । दोषाव्ययमपि । **२०** इन्दोः कान्ता **इन्दुकान्ता** । सामान्येन विंशतिः रात्रेः। शेषश्चात्र-

"निशि चक्रभेदिनी ॥
निषद्वरी निशीथ्या निट् (निड्) घोरा वासरकन्यका ।
शताक्षी राक्षसी याम्या घृतार्चिस्तामसी तमिः ॥१॥
शार्वरी क्षणिनी नक्ता पैशाची वासुरा[3] उमा[4]"[शेषनाममाला २।१८-२०॥] । नक्तमव्ययम् । तुङ्गी[5] देश्याम्, संस्कृतेऽपि॥

### अथ तमिस्रा दर्शयामिनी ।

**१** तमांसि विद्यन्तेऽस्यां **तमिस्रा** । 'ज्योत्स्नातमिस्रा-'५।२।११४॥ इति साधुः, दन्त्यरेफोपधोऽयम् । दर्शस्य यामिनी रात्रिः **दर्शयामिनी**। "तमिस्रा तामसी रात्रिः" [अमरकोषः १।४।५॥]इत्यमरः । "तमिस्रा तु दर्शरात्रिर्ज्योत्स्ना स्यात् पूर्णिमा निशा"[6][ ]इति शब्दार्णवः । "तामसी रात्रिमात्रेऽपि"[ ]इति कौमुदी । एकममावस्यारात्रेः। "अन्धकाररात्रिनामेदम्"[ ]इत्यपरे ॥

### ज्यौत्स्नी तु पूर्णिमारात्रिः

**१** ज्योत्स्ना चन्द्रिकाऽस्त्यस्यां **ज्यौत्स्नी** । 'प्रज्ञादिभ्यश्च' ५।४।३८॥ इत्यण्, 'तद्धितेष्वचामादेः'७।२।११७॥इति वृद्धिः, 'टिड्ढाणञ्-'४।१।१५॥ इत्यादिना ङीप् । पूर्णिमाया रात्रिः पूर्णिमारात्रिः इति षष्ठीतत्पुरुषः । एकं पूर्णिमाया रात्रेः । "उद्योतयुक्ताया रात्रेः"[ ]इत्यपरे । यन्महेश्वरः "ज्यौत्स्नी[7] चन्द्रिकयान्विता[8]"[ ]इति । ज्योत्स्नेत्याबन्तोऽप्ययम्, वृद्धिहीनश्च । "ज्योत्स्ना[9] सचन्द्रनक्षत्ररात्रौ चन्द्रातपेऽपि च"[विश्वप्रकाशकोशः, नान्तवर्गः, श्लो-२२]इति। शाश्वतोऽपि "ज्योत्स्ना ज्योतिष्मती रात्रिर्ज्योत्स्ना चन्द्रमसः प्रभा"[शाश्वतकोशः, श्लो-१९२]इति ॥

### गणरात्रो निशागणः ॥१४३॥

**१** इह गणशब्द एकवचनान्तः। "बहुत्वसंख्यावचनः" [ ]इति 'बहुगण-'१।१।२३॥ इत्यत्रेन्दुमित्रः । रात्रीणां गणो **गणरात्रः**। राजदन्तादित्वात् परनिपातः[10]। 'बहुगणवतु-'१।१।२३॥ इति संख्यात्वे, 'अहःसर्वैकदेश-'५।४।८७॥ इत्यादिनाऽच् गणरात्रः, पुंक्लीबलिङ्गः। "क्लीबत्वमत्र प्रमादः, 'रात्राह्नाहाः पुंसि'२।४।२९॥ इति पुंस्त्वप्राप्तेः"[11][ ]इत्येके। "प्राप्तमपि पुंस्त्वं लोकाश्रयत्वान्न भवति"[ ]इति सर्वानन्दः[12]। "भवति नपुंसकलिङ्गयोगः संख्यापूर्वस्य रात्रिशब्दस्य"[13][ ]इति वररुचिवचनात्, गणशब्दस्य च संख्यात्वात् क्लीबत्वसम्भवात्। "तथा च नपुंसकेऽमरकोषेऽप्युक्तं 'रात्रं प्राक् संख्ययान्वितम्'[अमरकोषः ३।५।२५॥] [ ]इति कौमुदी। अन्येऽप्याहुः "गणानां रात्रीणां समाहार इति द्विगौ कृते समासावयवाः समासान्ता इत्यकारान्तोत्तरपदत्वाभावादकारान्तोत्तरपदो द्विगुः स्त्रियां

१. '-भ्यश्च' इति१.२॥ २. '-नेयीत्या-' इति१॥ ३. 'वासरा' इति४॥ ४. 'उशाः' इति शेषनाममालास्वोपज्ञटीकयोः ॥ ५. द्र. देसीसद्दसंगहो, वर्गः-५, श्लो-४१३॥ ६. द्र. पदचन्द्रिका, भा-१, कालवर्गः, श्लो-१०७, पृ.१४१, तत्र 'ज्योत्स्ना' इत्यस्य स्थाने 'ज्योत्स्नी' इति दृश्यते ॥ ७. 'ज्योत्स्नी' इति३॥ ८. '-काया-' इति२.३॥ ९. 'ज्यौत्स्ना' इति विश्वप्रकाशकोशः, नान्तवर्गः, श्लो-२२, पृ.८७॥ १०. इतोऽग्रे १प्रतौ "गणानां बह्वीनां रात्रीणां समाहारः, गणशब्दस्य संख्यात्वात् 'तद्धितार्थ-'२।१।५१॥ इति द्विगुः, 'अहःसर्वैकदेश-'५।४।८७॥ इत्यच्, 'रात्राह्नाहाः पुंसि' २।४।२९॥ इति पुंस्त्वं तु ना (न), 'संख्यापूर्वारात्रिः'(लि-१३२)इति लिङ्गानुशासनसूत्रेण क्लीबत्वविधानात्, "भवति [न]पुंसकयोगः संख्यापूर्वस्य रात्रशब्दस्य"[ ]इति वररुचिवचनाच्च । "रात्रं प्राक् संख्ययान्वितम्"[अमरकोषः ३।५।२५॥]इति वक्ष्यमाणत्वाच्च । एतेन स्वामिमुकुटयोर्नपुंसकत्वसमर्थनसंभ्रमः परास्तः" इति पाठो दृश्यते, स तु रामश्रम्यनुकरणम्, द्र. रामाश्रमी १।४।६॥, पृ.५७॥ ११. द्र. पदचन्द्रिका, भा-१, कालवर्गः, श्लो-१०८, पृ.१४१॥ १२. सर्वानन्दकृतटीकासर्वस्वे "रात्राह्नाहाः पुंसि'२।४।२९॥ इति पुंस्त्वे प्राप्ते 'लोकाश्रयत्वाल्लिङ्गस्ये'ति नपुंसकता" इति दृश्यते, भा-१, १।४।६॥, पृ.७९॥ १३. द्र. पदचन्द्रिका, भा-१, कालवर्गः, श्लो-१०८, पृ.१४१॥, रामाश्रमी १।४।६॥, पृ.५७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भाष्यते''[ [1] ]इति । ''स्त्रीत्वाभावे 'स नपुंसकम्'२।४।१७॥ इति क्लीबत्वं प्राप्तं बाधित्वानेन पुंस्त्वे प्राप्ते पात्रादित्वात् क्लीबत्वम्''[ [1] ]इति मिश्राः। निशागणो रात्रिसमूह इत्यर्थः । एकं रात्रिसमूहस्य । ''त्रिणि[2] रात्रि, च्यारि रात्रि, दश रात्रि'' इति भाषा ॥१४३॥

**पक्षिणी पक्षतुल्याभ्यामहोभ्यां वेष्टिता निशा ।**

१ वर्तमानदिवसागामिदिवसयोः पक्षयोरिव मध्ये या वर्तमाना रात्रिस्तस्या नामैकं **पक्षिणी** । उभयाह्नी पक्षाविव स्त अस्या इति पक्षिणी। 'अत इनिठनौ'५।२।११५॥ इतीनिः। पक्षशब्दो मासार्द्धदेहाङ्गयोर्वाचकः । अत्र निशेत्युपलक्षणम्, तेनागामिवर्तमाननिशायुक्तो दिवसोऽपि पक्षीत्याहुः॥

**गर्भकं रजनीद्वन्द्वम्**

१ गर्भयति **गर्भकम्** । ण्वुल् । रजन्या रात्रेर्द्वन्द्वं रजनीद्वन्द्वम् । एकं रात्रिद्वयस्य ॥

**प्रदोषो यामिनीमुखम् ॥१४४॥**

१ प्रारब्धा दोषास्मिन्निति **प्रदोषः** । यद्वा 'दुष वैकृत्ये' (दि.प.अ.), अच्, टाप् । प्रारम्भो दोषायाः प्रदोषः, प्रादिसमासो वा । प्रारम्भो दोषाया यत्र इति, 'एकविभक्तिश्च'१।२।४४॥ इत्युपसर्जनत्वे 'गोस्त्रियोरुपसर्जनस्य'१।२।४८॥ इति ह्रस्वत्वम्। दोषाशब्दः स्त्रियाम् । यामिन्या रात्रेर्मुखं प्रारम्भः यामिनीमुखम्। एकं रात्रिमुखस्य । [शेषश्चात्र-''दिनात्ययः प्रदोषे स्यात्''] [शेषनाममाला २।२०]॥१४४॥

**यामः प्रहरः**

१ याति गच्छति **यामः**। 'या प्रापणे'(अ.प.अ.), 'यातेर्मक्[3]'( )इति मक् । यद्वा यच्छति उपरमति रात्रिरहश्चानेनेति यामः। 'यमु उपरमे'(भ्वा.प.अ.), घञ्। २ प्रह्रियते ताड्यतेऽस्मिन् कालसूचकं वाद्यमिति **प्रहरः**। प्रपूर्वः 'हृञ् हरणे'(भ्वा.उ.अ.), 'पुंसि संज्ञायाम्-'३।३।११८॥ इति घः। द्वे प्रहरस्य ॥

**निशीथस्त्वर्धरात्रो महानिशा ।**

१ नियतं शेरते लोका अत्रेति **निशीथः** । 'शीङ् स्वप्ने'(अ.आ.से.), 'निशीथगोपीथावगीथाः'(उणा-१६६)इति थकि[4] प्रत्यये साधुः । अत एव कात्यः ''निशीथं सुप्तजनम्'' [ [5] ]आह। २ अर्द्धं रात्रेः **अर्धरात्रः**। 'अहःसर्वैकदेश-' ५।४।८७॥ इत्यादिनाच् । ३ महती चासौ निशा च **महानिशा**, प्राप्तप्रकर्षकत्वात् । त्रीणि अर्द्धरात्रस्य ॥

**उच्चन्द्रस्त्वपररात्रः**

१ उत्क्रान्तश्चन्द्रोऽस्मिन् **उच्चन्द्रः** । २ रात्रेरपरो भागः **अपररात्रः** । 'अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः'५।४।८७॥ इति एकदेशेऽच्, 'यस्येति च'६।४।१४८॥, 'रात्राह्नाहाः पुंसि' २।४।२९॥ इति पुंस्त्वम् । द्वे पाश्चात्यरात्रेः । 'पाछिली रात्रि[6]' इति भाषा ॥

**तमिस्रं तिमिरं तमः ॥१४५॥**
**ध्वान्तं भूच्छायान्धकारं तमसं समवान्धतः।**

१ तमोऽस्याऽस्ति **तमिस्रम्**[7] स्त्रीक्लीबलिङ्गः, दन्त्यसकारवान् ।'ज्योत्स्नातमिस्रा-'५।२।११४॥ इत्यादिना निपातनात् साधुः । २ तिम्यति **तिमिरम्,** पुंक्लीबलिङ्गः । 'तिम ष्टिम आर्द्रीभावे[8]'(दि.प.से.), 'इषिमदिमुदिखिदिच्छिदिभिदिमे-(मि)दिचदितिमिमिहिमुहिमुचिरुचिरुधिशुषिबधिभ्यः किरच्' (उणा-५१) । ३ ताम्यन्त्यनेन **तमः**। 'तमु ग्लानौ[9]'( ), '-असुन्'(उणा-६२८)इत्यसुन् । तमशब्दोऽकारान्तोऽपि ॥१४५॥ ४ ध्वन्यते सर्वरोगहरतयेति **ध्वान्तम्**। 'ध्वन शब्दे' (भ्वा.प.से), 'क्षुब्धस्वान्तध्वान्तलग्नम्लिष्ट-'७।२।१८॥ इत्यादिना साधुः । पुंक्लीबलिङ्गोऽयम्[10] । ५ भुवः पृथिव्याश्छाया **भूच्छाया,** पुराणे भूगुणश्रुतेः। 'विभाषा सेनासुराच्छाया-' २।४।२५॥ इत्यादिना क्लीबत्वे भूच्छायं च । ६ अन्धं करोति **अन्धकारम्,** पुंक्लीबलिङ्गः । 'डुकृञ् करणे'(त.उ.अ.), 'कर्मण्यण्'३।२।१॥, 'अचो ञ्णिति'७।२।११५॥ इति वृद्धिः। ७-९ समवान्धेभ्यस्तमसमिति योज्यते, सङ्गतं तम इति **सन्तमसम्,** अवगतमवहीनं वा तमः **अवतमसम्,** अन्धं करोति अन्धयति, अन्धयति तदन्धम्, तच्च[11] तमश्च **अन्धतमसम्** 'अवसमन्धेभ्यस्तमसः'५।४।७९॥ इत्यच्समासान्तः। बाहुलकाद् दीर्घत्वे अन्धातमसमित्यपि[12]। अमरस्तु ''ध्वान्ते गाढेऽन्धतमसं क्षीणेऽवतमसं तमः विष्वक्सन्तमसम्''[अमरकोषः१।८।३॥] इति विशेषमाह । नव अन्धकारस्य॥

१. द्र. पदचान्द्रिका, भा-१, कालवर्गः, श्लो-१०८, पृ.१४१॥, २. 'त्रिण' इति४॥ ३. उणादिगणे एतादृशसूत्रं न दृश्यते, अत एवोक्तं रामाश्रम्याम्-''यत्तु-यातेर्मग् इति मग् इति मुकुटेनोक्तम्, तन्न, उक्तसूत्रस्योत्प्रेक्षितत्वेन निर्मूलत्वात्'' इति । तेन 'अर्त्तिस्तु-सु-'(उणा-१३७)इत्यादिना मन्प्रत्ययः पाठ्यः ॥ ४. 'थक्प्र-' इति३॥ ५. द्र. स्वोपज्ञटीका २।१४५॥, पृ.३२॥ ६. 'राति' इति४॥ ७. 'पुंक्ली-' इति४॥ ८. 'आर्द्रभावे' इति१.२॥ ९. क्षीरतरङ्गिण्यादौ तमुधातुः काङ्क्षायामर्थे दृश्यते ॥ १०. '-लिङ्गः' इति३॥ ११. 'तत्तमश्च' इति१॥ १२. ''अन्धातमस. न. कर्म्म. अन्येभ्योऽपीति दीर्घः, निबिडान्धकारे'' इति वाचस्पत्याभिधाने २११तमे पृष्ठे ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शेषश्चात्र-

''ध्वान्ते वृत्रो रजोबलम् ॥
रात्रिरागो नीलपङ्को दिनाण्डं दिनकेसरः ।
खपरागो निशाचर्म वियद्भूतिर्दिगम्बरः॥१॥''
[शेषनाममाला २।२०-२१]॥

## तुल्यनक्तन्दिने काले विषुवद्[1] विषुवं[2] च तत् ॥१४६॥

१ तुल्ये समे नक्तन्दिने यस्मिन् काले स तुल्यनक्तन्दिनः, तत्र । विषुवद् विषुर्नाम मुहूर्तः, सोऽस्यास्ति **विषुवत्**, पुंक्लीबलिङ्गः । यद्वैजयन्ती ''पुरा(पुरी) तन्महिमा हेम विषुवत् कर्म लोम दोः''[1][वैजयन्ती ८।९।३१॥] नृषण्ढलिङ्गः। २ विषुरस्यास्ति **विषुवम्** । विषु साम्येऽव्ययम्, तदस्यास्तीति वा । उभयत्र 'केशाद्वोऽन्यतरस्याम्'५।२।१०९॥ अत्र सूत्रे 'अन्येभ्योऽप्युपसंख्यानम्'(वा-५।२।१०९॥)इत्युपसंख्यानाद् वप्रत्ययः । ''विषुवान् समरात्रिवासरः कालः''[ [2] ] इति पुंस्काण्डे वोपालितः। ''विषुवोऽप्यत्र''[ [2] ]इति लोमादिसूत्रे रक्षितः। तच्च मेषतुलयोः सङ्क्रान्त्योर्भवति। द्वे सदृशरात्रिदिनकालस्य[3] । 'विषुवती' इति भाषा ॥१४६॥

## पञ्चदशाहोरात्रः स्यात् पक्षः[1]

१ पञ्चदशसंख्याका अहोरात्रा अस्मिन्निति पञ्चदशाहोरात्रः । पचति भूतानि **पक्षः** । 'डुपचष् पाके'(भ्वा.उ.अ.), 'वृ(वृ)तृवदिहनिकमिकषियुमुचिभ्यः[4] सः'(उणा-३४२)इति बाहुलकात् सः। ([5]पक्ष्यत इति वा। 'पक्ष परिग्रहे'(चु.उ.से.), कर्मणि घञ्)। क्षपति कालमिति वा। 'क्षप क्षये[6]'( ), पचाद्यच्, पृषोदरादित्वाद् वर्णविपर्ययः। एकं पक्षस्य । 'पखवाडा' इति भाषा ॥

## स बहुलोऽसितः[1] ।

१ स इति पक्षः असितः कृष्णः, बंहते वर्द्धते तमोऽस्मिन्निति **बहुलः** । 'बंहि वृद्धौ'(भ्वा.प.से.), 'बंहेर्नलोपश्च[7]'(उणा-२९)इति उलच् । एकं कृष्णपक्षस्य ।

शेषश्चात्र-

''पक्षः कृष्णः सितो द्वेधा कृष्णो निशाह्वयोऽपरः[8] ।
शुक्लो दिवाह्वयः पूर्वः''[शेषनाममाला २।२२]॥

अथ विशेषेणाह-

## तिथिः[1] पुनः कर्मवाटी[2]

१ अतति सततं गच्छति **तिथिः**, पुंस्त्रीलिङ्गः । 'अत सातत्यगमने'(भ्वा.प.से.), 'ऋतन्यञ्जि-'(उणा-४४२) इत्यादिना इथिन्, पृषोदरादित्वाद्धातोरकारलोपः । तन्यते षष्ठिघटिकाभिरिति वा । 'तनु विस्तारे'(त.उ.से.), 'तनोते(तने)-र्डित्'(हैमोणा-६७४)इतीथिन् । २ कर्मणां कार्याणां वाटी (वाटीव) **कर्मवाटी**, तत्प्रतिबद्धत्वात् तेषाम् । सामान्यतो द्वे तिथेः ॥

अथ विशेषतः प्राह-

## प्रतिपत्[1] पक्षतिः[2] समे ॥१४७॥

१ प्रतिपद्यतेऽङ्गीक्रियते पक्षस्याऽऽद्यतया[9], प्रतिपद्यते वाऽस्यां[10] चन्द्रस्य क्षय उदयो वेति **प्रतिपद्**, स्त्रीलिङ्गः। 'पद गतौ'(दि.आ.अ.), सम्पदादित्वात् क्विप्, दकारान्तः शब्दः। ''प्रतिपद्यत उपक्रम्यते मासादिरनया[11]''[अम.क्षीर. १।३।१॥] इति स्वामी । २ पक्षस्य मूलं प्रारम्भः **पक्षतिः**, स्त्रीलिङ्गः। 'पक्षात् तिः'५।२।२५॥ इति तिप्रत्ययः । 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि पक्षती च । द्वे प्रतिपदः ॥१४७॥

## पञ्चदश्यौ[1] यज्ञकालौ[2] पक्षान्तौ[3] पर्वणी[4] अपि ।

१ पञ्चदशानां तिथीनां पूरण्यौ पञ्चदश्यौ। 'तस्य पूरणे डट्'५।२।४८॥ इति डट्, डित्त्वाट्टिलोपः, टित्त्वात् 'टिड्ढाणञ्-'४।१।१५॥ इत्यादिना ङीप् । २ यज्ञस्य कालौ **यज्ञकालौ**। यच्छ्रुतिः ''दर्शपौर्णमासीभ्यां मृ(मि)ष्टान्नेन यजेत''[ [12] ]इति। ३ पक्षस्यान्तौ प्रान्तौ **पक्षान्तौ** । ४ पूर्यन्ते पितरोऽनयोरिति **पर्वणी** । ([13]'पॄ पालनपूरणयोः'(जु.प.से.), 'स्नामदिपद्यर्त्तिपृशकिभ्यो वनिप्'(उणा-५५२) ) । चत्वारि यागकालस्य ॥

---

१. वैजयन्त्यां तु ''सक्तुः परीतन्महिमा कर्म पर्व च लोम दोः'' इति दृश्यते, ८।९।३१॥, पृ.२२२॥ २. द्र. पदचन्द्रिका, भा-१, कालवर्गः, श्लो-११६, पृ.१४९, रामाश्रमी १।४।१४॥, पृ.६१॥ ३. '-रात्रिकाल-' इति२॥ ४. उणादिगणसूत्रादत्र 'युमुचि' इत्यधिकपाठो दृश्यते ॥ ५. कोष्ठान्तर्गतपाठः १प्रतावेव दृश्यते ॥ ६. क्षीरतरङ्गिण्यादौ क्षयार्थेऽयं धातुर्न दृश्यते ॥ ७. 'बंहि-' इति१.२॥ वस्तुतः 'लङ्घिबंह्योर्नलोपश्च' इत्युणादिगणसूत्रस्वरूपम्, अपरं च अनेन सूत्रेण इसिप्रत्ययः, न तु उलच्, तेन बाहुलकादुलजेव वक्तव्यः, रामाश्रम्यामपि बाहुलकादुलच् कृत्वा बहुलशब्दः साधितः ॥ ८. 'निशाह्वयः परः' इति२.३॥ ९. 'पक्षसाद्यतया' इति३॥ १०. '-द्यतेऽस्यां' इति३॥ ११. 'उपक्रम्यतेऽनया' इति अम.क्षीर. टीका[illegible], पृ.३१॥ १२. द्र. स्वोपज्ञटीका २।१४८॥, पृ.३३॥ १३. कोष्ठान्तर्गतपाठः १प्रतावेव दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**तत्पर्वमूलं भूतेष्टापञ्चदश्योर्यदन्तरम् ॥१४८॥**

१ भूतेष्टा च पञ्चदशी च भूतेष्टापञ्चदश्यौ, तयोर्यदन्तरं तत्, पर्वणोर्मूलं **पर्वमूलम्** इत्युच्यते । भूतेष्टा चतुर्दशी, पञ्चदशीशब्दः पूर्णिमाया अमावास्यायाश्च नामेत्यर्थः ॥१४८॥

**स पर्व सन्धिः प्रतिपत्पञ्चदश्योर्यदन्तरम् ।**

१ प्रतिपत्पञ्चदश्योर्यदन्तरं मध्यम्, स सन्धिः श्लेषः **पर्व** उच्यते । प्रतिपच्च पञ्चदशी च प्रतिपत्पञ्चदश्यौ, तयोः। अत्र पञ्चदशीति द्वयोरपि पूर्णिमामावास्ययोर्ग्रहणमुक्तम् । ''प्रतिपत्पञ्चदश्योस्तु सन्धिः पर्व''[ ]इति दुर्गः। प्राच्यास्तु पर्वसन्धिरिति चतुरक्षरं नामाख्यन्। एकं प्रतिपत्पञ्चदशीसन्धेः ॥

**पूर्णिमा पौर्णमासी**

१ पूरणं पूर्णम्[१] । 'पुरी आप्यायने'(दि.आ.से.), भावे क्तः, 'रदाभ्यां निष्ठातो नः-'८।२।४२॥, ततो[२] 'भावप्रत्यान्तादिमप् वक्तव्यः'(वा-४।४।२०॥)इति मपि, टाप् । (पूर्णेन[३] निर्वृत्ता **पूर्णिमा**) । यद्वा पूरणं पूर्णिः । 'पृ पालनपूरणयोः[४]' (जु.प.से.), 'स्त्रियां क्तिन्'३।३।९४॥, 'ल्वादिभ्यः क्तिन्निष्ठावद्[५]' (वा-३।३।९४॥)इति नत्वम्। पूर्णि[६] मिमीते पूर्णिमा । 'माङ् माने'( ), 'आतोऽनुपसर्गे कः'३।२।३॥''[७] ]इति स्वामी[८]। २ मीयते तिथीनां क्षयो वृद्धिश्चानेनेति, 'मा माने'(अ.प.अ.) अस्मादौणादिकोऽसिप्रत्ययः । माश्चन्द्रः संपूर्णो[९] यस्यां सा **पौर्णमासी** तिथिः । 'सास्मिन् पौर्णमासी'४।२।२१॥ इति निपातनादण् । अथवा पूर्णो माः पूर्णमाः, तस्येयं तिथिः, 'तत्र भवः'४।३।५३॥ इत्यणि पौर्णमासी । यद्वा पूर्णो मासो ([१०]विद्यतेऽस्यामिति। 'पूर्णमासादण् वक्तव्यः') (वा-४।२।३५॥) इत्यण्, 'टिड्ढाणञ्-'४।१।१५॥ इत्यादिना ङीप् । सामान्यतः पूर्णिमाया द्वे ॥

**सा राका पूर्णे निशाकरे ॥१४९॥**

१ सा पौर्णमासी सूर्यास्तानन्तरं वर्तमाना पूर्णे निशाकरे दृष्टे सति **राका** प्रोच्यते । राति ददाति सुखमानन्दं वा राका। 'रा दाने'(अ.प.अ.), 'कृदाधारार्चिकलिभ्यः कन्[११]' (उणा-३२०)इति कन्, अजादित्वाट्टाप्[१२], बाहुलकात् 'केऽणः' ७।४।१३॥ इति न ह्रस्वः । यस्यां पूर्णिमायां सूर्यास्तानन्तरं[१३] पूर्णश्चन्द्र उदेति, तस्या एकम् ॥१४९॥

**कलाहीने त्वनुमतिः**

१ अत्रापि पूर्वस्मात् पादात् सेत्यनुकृष्यते, सा पूर्णिमा उदयकाले[१४] प्रतिपद्योगात् कलया[१५] हीने कलाहीने चन्द्रे **अनुमतिः** उच्यते । अनुमन्यतेऽनुमतिः । 'मनु(मन) ज्ञाने' (दि.आ.अ.), 'स्त्रियां क्तिन्'३।३।९४॥, 'अनुदात्तोपदेश-' ६।४।३७॥ इत्यनुनासिकलोपः । ''चतुर्दशीविद्धा पौर्णमासी अनुमतिः''[ ]इत्यन्ये ॥

**मार्गशीर्ष्याग्रहायणी ।**

१ मृगशीर्षेण चन्द्रयुक्तेन युक्ता पौर्णमासी **मार्गशीर्षी**। 'नक्षत्रेण युक्तः कालः'४।२।३॥ इति तृतीयान्तादण्, 'टिड्ढाणञ्'४।१।१५॥ इत्यादिना ङीप् । २ अग्रे हायनो वर्षमस्या **आग्रहायणी**, मार्गशीर्षादारभ्य वत्सरप्रवृत्तेः । 'आग्रहायण्य[१६]श्वत्थाट्ठक्'४।२।२२॥ इति निर्देशादण्, 'पूर्वपदात् संज्ञायामगः' ८।४।३॥ इति णत्वम् । द्वे मार्गशीर्षीपूर्णिमायाः ॥

**अमाऽमावस्यमावस्या दर्शः सूर्येन्दुसङ्गमः ॥१५०॥**
**अमावास्याऽमावासी च**

१ **अमा** इति अमावास्याशब्दैकदेशोऽयं भीमवत् । न विद्यते माश्चन्द्रमा अस्यामिति वा, पृषोदरादित्वात् । २ अमा सह वसतोऽस्यां चन्द्रार्काविति **अमावसी** । औणादिके अप्रत्यये गौरादित्वाद्[१७] ङीष् । ३ अमा सह वसतोऽस्यां चन्द्रार्काविति

---

१. इतोऽग्रे १प्रतौ 'चन्द्रस्य पूर्तिः' इति दृश्यते ॥ २. इतोऽग्रे १प्रतौ 'पूर्णेन निवृत्ता पूर्णिमा । तेन निवृत्तमित्यर्थे' इति दृश्यते ॥ ३. कोष्ठान्तर्गतपाठः १प्रतौ न दृश्यते ॥ ४. अस्य धातोः स्थाने २.३.४प्रतिषु पूरी आप्यायने' इति दृश्यते ॥ ५. 'ऋल्वादिभ्यः क्तिन्निष्ठावद् वाच्यः' इति १प्रतौ दृश्यते॥ ६. 'पूर्णं' इति२॥ ७. द्र. पदचन्द्रिका, भा-१, कालवर्गः, श्लो-११०, पृ.१४३॥ ८. स्वामिकृतामरकोशटीकायां ''पूर्णिं मिमीते पूर्णिमा, कः'' इति दृश्यते, द्र. १।३।७॥, पृ.३३॥ ९. 'पूर्णो' इति१॥ १०. कोष्ठान्तर्गतपाठस्थाने १प्रतौ '-ऽस्त्यस्यामिति पौर्णमासी। पूर्णमासादण् वक्तव्यः' इति दृश्यते ॥ ११. '-वर्तिभ्यः कन्' इति२.३.४॥ १२. 'अजाद्यतष्टाप्' इति१॥ १३. 'सूर्यास्तानन्तरं' इति १प्रतौ नास्ति ॥ १४. '-कालप्रति-' इति२.३.४॥ १५. 'कलाया' इति३, 'कालया' इति२॥ १६. अत्र १प्रतावेवोट्टङ्किता टिप्पणी दृश्यते, सा चेयम्-''अत्र प्रज्ञाद्यण्, 'पूर्वपदात्-'८।४।३॥ इति णत्वम् । आग्रहायणी पौर्णमासी । तद्योगान्नक्षत्रमपि तथा । यत्तु-'आग्रहाण्यश्वत्थाट्ठक्'४।२।२२॥ इति निर्देशात् स्वार्थेऽण्, गौरादित्वाद् ङीष्, अणन्तादेव ङीपि सिद्धे गौरादिषु पाठोऽस्य पुंवद्भावनिषेधार्थः, तेनाग्रहायणीभार्य इति सिद्ध्यति[ ]इति मुकुटः, तन्न, असिद्धान्तात् । न हि गौरादित्वं पुंवद्भावप्रतिषेधार्थम्, किन्तु ङीप्(ङीष्)विधानार्थम् । न च पाठसामर्थ्यम्, तस्य स्वरभेदार्थत्वात् । न चोदात्तनिवृत्तिस्वरेण तदभावः । पाठ-सामर्थ्यादुदात्तनिवृत्तिस्वरस्यैव बाधसम्भवात् । अस्य गौरादित्वमप्रामाणिक इति सुवचत्वाच्च''[रामाश्रमी १।३।२३॥, पृ.४८]इति व्याख्यासुधाकारः । आचार्या अपि प्रज्ञाद्यणमेवाहुः'' इति ॥ १७. ३.४नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अमावस्या** । 'वस निवासे'(भ्वा.प.अ.), 'अमावस्यदन्यतरस्याम्'३।१।१२२॥ इति वृद्ध्यभावपक्षे ण्यति प्रत्यये रूपं निपातितम् । ४ दृश्यते याज्ञिकैः **दर्शः** । 'दृशिर् प्रेक्षणे' (भ्वा.प.अ.), 'पुंसि संज्ञायां घः प्रायेण'३।३।११८॥ । 'दृश्येते उपलक्ष्येते चन्द्रार्कावत्रेति दर्शः''[1]इत्यन्ये । दृश्यते चन्द्रोऽस्मिन्निति वा विपरीतलक्षणया । ५ सूर्येन्द्वोः सङ्गमोऽत्रेति **सूर्येन्दुसङ्गमः** । व्यधिकरणो बहुब्रीहिः ॥१५०॥ ६ अमा सह वसतोऽस्यां चन्द्रार्काविति **अमावास्या** । 'अमावस्यदन्यतरस्याम्' ३।१।१२२॥इति ण्यति वृद्धिभावपक्षे निपातितम् । ७ अमा सह वसतोऽस्यां चन्द्रार्कौ इति **अमावासी**। औणादिकोऽप्रत्ययः बाहुलकाद् दीर्घता, गौरादित्वाद् ङीष् । ''अमावस्या दर्शोऽमाऽमावसी[2] च''[ ]इति रभसः, ''अप्यमावास्यामावासी चामामास्यप्यमाव(म)सी[3]''[4]इति शब्दार्णवे चानेकरूपता ।

''अमानाम रवे रश्मिश्चन्द्रलोकं प्रतिष्ठितः ।
तत्र सोमो वसत्यस्याममावास्या ततः स्मृता ॥१॥''

[4]इति स्मृतिः । [5]सामान्यतोऽमावास्यायाः सप्त ॥

अथ विशेषेणाह–

**सा नष्टेन्दुः कुहुः[1] कुहूः[2] ।**

१ सा अमावास्या नष्टोऽदृश्य इन्दुरस्यां नष्टेन्दुः, उदयेऽमावास्यायोगान्नष्टचन्द्रकलाऽमावास्या **कुहुः** प्रोच्यते । कुहयते विस्मापयते **कुहुः**। 'कुह विस्मापने'(चु.आ.से.), 'मृगय्वादिभ्यश्च[6]'(उणा-३७)इति कुः । तथा च ''धेनूरुरज्जकुहुसरयुतनुकरेणवः स्त्रियाम्''[7]इति विन्ध्यवासी। २ कुहयते विस्मापयते **कुहूः**, षष्ठस्वरान्तः । 'कुह विस्मपने' (चु.आ.से.), चुरादिः, अतः 'कृकमि(कृषिचमि)तनिधनिसर्जिखर्जिभ्यः कूः'(उणा-८१)इति ''बाहुलकात् कुहेरपि'' [8]इति धातुप्रदीपः । यत्राऽमायां प्रभाते चन्द्रो न दृश्यते, तस्या द्वे ॥

**दृष्टेन्दुस्तु सिनीवाली[1]**

१ अत्रापि सेत्यनुकृष्यम्, साऽमावास्या चतुर्दशीयोगाद् दृष्टचन्द्रा सती **सिनीवाली** । सह एन विष्णुना वर्तते, सा लक्ष्मीस्तद्योगाद् व्रीह्यादित्वादिनिः, सिनी चन्द्रकला, ([10]सा बालाल्पात्रेति गौरादिपाठाद् ङीष् । यद्वा सिनीं) वलति धारयतीति[11] वा । 'वल धारणे[12]'( ), कर्मण्यणि सिनीवाली, ([10]'स्त्रियाः पुंवद्-'६।३।३४॥ इत्यादिना न पुंवत्त्वम्, 'संज्ञापूरण्योश्च'६।३।३८॥ इति निषेधात्)। ''सिनी सिता वाला चन्द्रकलाऽस्त्यस्याम्''[अम.क्षीर. १।३।९॥]इति स्वामी[13]। दृष्टचन्द्रामावस्या एकम् ॥

**भूतेष्टा[1] तु चतुर्दशी[2] ॥१५१॥**

१ भूतानामिष्टा प्रिया **भूतेष्टा** । २ चतुर्दशानां तिथीनां पूरणी **चतुर्दशी** । 'तस्य पूरणे डट्'५।२।४८॥, टित्वात् 'टिड्ढाणञ्-'४।१।१५॥ इत्यादिना ङीप् । चतुर्दश्या द्वे ॥१५१॥

**पक्षौ मासः**

१ तौ शुक्लकृष्णपक्षौ **मासः** स्यात् । मीयतेऽनेन वर्षमिति मासः, पुंक्ली.। 'माङ् माने'(दि.आ.अ.), 'मासः (मः सः[14])'(दशपाद्युणादिः ९।२७॥)इत्युणादिसूत्रेण सप्रत्ययः। 'मासः (मः सः)'(दशपाद्युणादिः ९।२७॥)इति सूत्रे सानुवृत्तौ पुनः सग्रहणं कित्त्वाभावार्थम्, अन्यथा इत्वं स्यात्, अथवा निपातः। माश्चन्द्रस्तस्यायमिति वा । 'तस्येदम्'४।३।१२०॥ इत्यण् । एतच्चान्द्रेण मानेन, सौरादिमानैस्तु मस्यते परिमीयतेऽनेन, असौ वेति मासः। 'मसी[15] परिमाणे'(दि.प.से.), 'हलश्च'३।३।१२१॥ इति घञ् । पृषोदरादित्वाद्धलन्तोऽप्ययम्। ([16]''तौ द्वौ वर्षांशकश्रामो वर्षा(ङ्)गमा अहर्गणः''[17]इति नामनिधानम्)। द्विपक्षोऽपि । सामान्यत एकं मासस्य । शेषश्चात्र–''मासे[18] वर्षांशको भवेत् । वर्षकोशो दिनमलः'' [शेषनाममाला २।२२-२३॥] ॥

अथ विशेषेणाह–

**वत्सरादिर्मार्गशीर्षः सहः सहाः ।**

**आग्रहायणिकश्च[5]**

१ वत्सरस्य वर्षस्यादिः **वत्सरादिः** । २ मृगशिरसा नक्षत्रेण युक्ता पौर्णमासी मार्गशीर्षी। मृगशिरःशब्दाद् 'नक्षत्रेण

१. द्र. पदचन्द्रिका. भा-१, कालवर्गः, श्लो-१११, पृ.१४४॥ २. '-वासी' इति२॥ ३. 'चामामावस्यप्यमावसी' इति३, 'अप्यमावस्यमावासी चामामस्यप्यमामसी' इति रामाश्रम्याम्, १।४।८॥, पृ.५८॥ ४. द्र. टीकासर्वस्वम्, भा-१, ४।४।८॥, पृ.८०॥, पदचन्द्रिका, भा-१, कालवर्गः, श्लो-१११, पृ.१४३॥ ५. 'सामान्येनामा-' इति १.२॥ ६. '-दयश्च' इत्युणादिगणे ॥ ७. '-करणे च' इति१.३, '-करणे चा-' इति४॥ ८. द्र. पदचन्द्रिका, भा-१, कालवर्गः, श्लो-१११, पृ.१४४॥, रामाश्रमी १।४।९॥, पृ.५८॥ ९. द्र. पदचन्द्रिका, भा-१, कालवर्गः, श्लो-१११, पृ.१४४॥ १०. कोष्ठान्तर्गतपाठः १प्रतौ न दृश्यते ॥ ११. 'तां वलति धारयति' इति१॥ १२. क्षीरतरङ्गिण्यादौ वलधातुः धारणेऽर्थे न दृश्यते, परं 'संवरणे सञ्चरणे च' इत्यर्थेऽऽत्मनेपदिनि च दृश्यते॥ १३. इतोऽग्रे १प्रतौ 'पृषोदरादित्वान्न पुंवद्भावः' इति दृश्यते ॥ १४. अग्रिमग्रन्थानुरोधादयं युक्तः, द्र. क्षीरतरङ्गिणी, अदादिः, धातुसं-५५, पृ.१९०॥ १५. 'मसि' इति३, 'मसा' इति२॥ १६. कोष्ठान्तर्गतपाठः १प्रतौ न दृश्यते ॥ १७. द्र. पदचन्द्रिका, भा-१, कालवर्गः, श्लो-११५, पृ.१४८॥ १८. २.३.४प्रतिषु नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

युक्तः कालः'४।२।३॥ इत्यण्, 'अचि-'६।१।६२॥ इति शिरसः शीर्षादेशः । मार्गशीर्षी पौर्णमासी अस्मिन्निति **मार्गशीर्षः** । 'सास्मिन् पौर्णमासीति संज्ञायाम्[1]'४।२।२१॥ इत्यण्, 'यस्येति च'६।४।१४८॥ । **३** सहते (लोको[2]ऽस्मिन् शीतम्)इति **सहः**। 'षह मर्षणे'(भ्वा.आ.से.), पचाद्यच्, 'धात्वादेः षः सः' ६।१।६४॥, अकारान्तोऽयम् । यथा ''सहस्य प्रथमे मासि वाहयेद् दोषसञ्चयम्''[चरकसंहिता अ-७, श्लो-४६]इति चरकः[3] । **४** ''मार्गपौषयोः प्राणिनां बलमुपचीयते''[[4] ]इति वैद्यकम् । ततः सहो बलमुपचितमस्मिन्नस्तीति **सहाः**, पुंसि, सकारान्तः । सहशब्दाद् 'मत्वर्थे मासतन्वोः'४।४।१२८॥ इति यत्, तस्य 'लुगकारेकाररेफाश्च वक्तव्याः'(वा-४।४।१२९॥) इति वा लुक् । अलुक्पक्षे तु सहस्यः पौषे रूढः । ([5]यद्वा सहते लोकः शीतमस्मिन्निति सहाः। असुन्प्रत्ययः)। **५** आग्रहायणीयोगाद् **आग्रहायणिकः** । 'आग्रहायण्यश्वत्थाट्ठक्' ४।२।२२॥ इति ठक्, 'ठस्येकः'७।३।५०॥, 'किति च' ७।२।११८॥ इति वृद्धिः। ज्योत्स्नादित्वादणि 'आग्रहायणोऽपि' इति पुरुषोत्तमः। मार्गोऽपि, मृगशिरा एव मृगः, तथा 'मृगशिरा मृगः'[ ]इति रुद्रकोषात्, तद्युक्ता पौर्णमासी मार्गी, ततः पूर्ववदणि मार्गः । मार्गशीर्षस्य पञ्च ॥

## अथ पौषस्तैषः सहस्यवत् ॥१५२॥

**१** पुष्येण युक्ता पौर्णमासी पौषी। 'नक्षत्रेण युक्तः कालः'४।२।३॥ इत्यण् । सा पौर्णमासी अस्मिन्नस्ति **पौषः**। 'सास्मिन् पौर्णमासीति संज्ञायाम्[6]'४।२।२१॥ इत्यण्। **२** एवं **तैषः** अपि । 'तिष्यपुष्ययोर्नक्षत्राणि यलोपो वाच्यः'(वा-६।४।१४९॥)इत्युभयत्रापि यलोपः। **३** सहते लोकोऽस्मिन् शीतमिति सहः। 'षह मर्षणे'(भ्वा.आ.से.), असुन् । सहसि[7] साधुः **सहस्यः**। 'तत्र साधुः'४।४।९८॥इति यत्। यद्वा सहोऽस्मिन्नस्ति सहस्यः । सहःशब्दाद् 'मत्वर्थे मासतन्वोः' ४।४।१२८॥ यत् । सहस्य इव सहस्यवत्, यथा सहस्यः पौषवाची तथा तैषोऽपीत्यर्थः । पौषस्य त्रीणि ॥१५२॥

## माघस्तपाः

**१** मघया नक्षत्रेण युक्ता पौर्णमासी माघी । सा पौर्णमासी अस्मिन्नस्ति **माघः** । 'सास्मिन्पौर्णमासीति संज्ञायाम्'४।२।२१॥ इत्यण्। **२** तपोऽस्यास्ति **तपाः**, पुंक्लीबलिङ्गः । 'मत्वर्थे मासतन्वोः'४।४।१२८॥ इति यत्, तस्य लुक्। यद्वा तपति तपाः[8]। 'तप सन्तापे'(भ्वा.प.अ.), असुन्। द्वे माघस्य ॥

## फाल्गुनस्तु फाल्गुनिकस्तपस्यवत् ।

**१** फलतीति फल्गुनी ।'फल निष्पत्तौ'(भ्वा.प.से.), 'फलेर्गुक् च'(उणा-३३६)इत्युनन्[9], (''फल्गुन्यौ ह्रस्वादी । फल्गुन्योः काले जात इति 'फल्गुनाषाढाभ्यां टानौ'(वा-४।३।३४॥)इति र(ट) प्रत्यये, अर्जुनेऽपि, ह्रस्वादिः''[[11] ]इति रूपरत्नाकरः)।''फल्गुनस्त्वर्जुने मासे[12] नक्षत्रे फल्गुनी स्मृता'' [[13] ]इति गोवर्धनः। ([10]कातन्त्रोणादौ तु 'पिशुनफाल्गुनौ' (कातन्त्रोणा-१२१)इति वृद्धिं निपात्य फाल्गुनोऽर्जुने दृष्ट इति)। फल्गुनीभिर्युक्ता पौर्णमासी फाल्गुनी। फाल्गुनी पौर्णमासी अस्मिन् **फाल्गुनः** ।'विभाषा फाल्गुनीश्रावणीकार्त्तिकीचैत्रीभ्यः'४।२।२३॥ इति ठगणौ। **२** **फाल्गुनिकः**, अत्र ठक्, 'ठस्येकः'७।३।५०॥ **३** तपसि साधुः **तपस्यः** ।'तत्र साधुः' ४।४।९८॥ इति यत्। त्रीणि फाल्गुनस्य। शेषश्चात्र-''फल्गुनालस्तु[14] फाल्गुने''[शेषनाममाला २।२३॥]॥

## चैत्रो मधुश्चैत्रिकश्च

**१** [15]चित्रानक्षत्रेण युक्ता पौर्णमासी चैत्री । सा पौर्णमासी अस्मिन्नस्ति **चैत्रः** । 'सास्मिन् पौर्णमासीति-' ४।२।२१॥इत्यण् । **२** मन्यते सर्वत्र कामदेवोऽत्र **मधुः**, पुंसि। 'मन ज्ञाने'(दि.आ.अ.), 'फलिपाटिनमिमनिजनां गुक्पटि-

---

१. सूत्रे यत् 'संज्ञायाम्' इति, तत् वृत्तिकृदभिप्रायेण, अत एवोक्तं तत्त्वबोधिन्यां सास्मिन् पौर्णमासीत्यत्र ''वृत्तिकृता तु सूत्रे एव 'संज्ञायाम्' इति प्रक्षिप्तम्'' इति, सिद्धान्तकौमुदीतत्त्वबोधिनीटीका, पृ.२९४॥ २. कोष्ठान्तर्गतपाठः १प्रतौ नास्ति ॥ ३. चरकसंहितायां ''सहस्यप्रथमे चैव हारयेद् दोषसंचयम्''[च-७।४६]इति संयुक्तपाठो दृश्यते, तत्रैव श्रीचक्रपाणिदत्तकृतायुर्वेददीपिकाख्यव्याख्यायां ''हरिचन्द्रेण तु सहशब्दोऽयमकारान्तो मार्गशीर्षवचनस्तस्य सहस्य प्रथमे कार्तिके इति व्याख्यातम्'' इति दृश्यते, चरकसंहिता, पृ.५३॥ ४. द्र. पदचन्द्रिका, भा-१, कालवर्गः, श्लो-११७, पृ.१४९॥ ५. कोष्ठान्तर्गतपाठः २.३.४प्रतिषु न दृश्यते ॥ ६. सूत्रे यद् संज्ञायामिति, तद् वृत्तिकृदभिप्रायेण, तेनाष्टाध्यायां न दृश्यते॥ ७. इतोऽग्रे १प्रतौ 'बले' इति दृश्यते ॥ ८. 'तपति तपाः' इत्यस्य स्थाने १प्रतौ 'तपन्ति अस्मिन् लोका इति तपाः' इति दृश्यते ॥ ९. इतोऽग्रे १प्रतौ 'गौरा[दि]त्वाद् ङीष् ह्रस्वादि' इति दृश्यते ॥ १०. कोष्ठान्तर्गतपाठः १प्रतौ न दृश्यते ॥ ११. द्र. पदचन्द्रिका, भा-१, कालवर्गः, श्लो-११७, पृ.१५०॥ १२. इतोऽग्रे २.४प्रत्योः 'फाल्गुनी चास्य पूर्णिमा' इति पाठो दृश्यते, स तु धरणिकोशस्य पाठः, द्र. रामाश्रमी १।४।१५॥, पृ.६२॥ १३. द्र. पदचन्द्रिका, भा-१, कालवर्गः, श्लो-११७, पृ.१५०, रामाश्रमी १।४।१५॥, पृ.६२॥ १४. 'तु फाल्गुने' इति२.३.४ नास्ति ॥ १५. 'चित्रया' इति१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नाकिधतश्च'(उणा-१८)इति उः, धश्चान्तादेशः । यद्वा मधुर्वसन्तोऽत्रास्तीति मत्वर्थे 'मधोर्ञ च'[1]४।४।१२९॥ इति [ञः], ञस्य वा लुकि मधुः। ३ चैत्री पौर्णमासी अस्मिन्नस्तीति **चैत्रिकः**। 'विभाषा फाल्गुनीश्रावणी(श्रवणा)कार्तिकीचैत्रीभ्यः'४।२।२३॥इति ठक्। चैत्रस्य त्रीणि। शेषश्चात्र "चैत्रे[2] मोहनिकः कामसखश्च फाल्गुनानुजः"[शेषनाममाला २।२३॥]॥

## वैशाखे[1] राध[2]माधवौ[3] ॥१५३॥

१ वैशाखी पौर्णमास्यस्त्यस्मिन् **वैशाखः**। 'सास्मिन् पौर्णमासी-'४।२।२१॥ इत्यण्, तत्र । २ राधया नक्षत्रेण युक्ता पौर्णमासी राधी । सा पौर्णमासी अस्मिन्निति **राधः**। 'सास्मिन् पौर्णमासी-'४।२।२१॥ इत्यण् । ३ पुष्पगतं मध्वत्रास्ति **माधवः**। 'मधोर्ञ च'४।४।१२९॥ इति ञः, 'तद्धितेष्वचामादेः' ७।२।११७॥इत्यादिवृद्धिः, 'ओर्गुणः'६।४।१४६॥। मधुरेव वा। 'प्रज्ञादिभ्यश्च'५।४।३८॥ इत्यण्। वैशाखस्य त्रीणि। "वैशाखे[3] तूच्छरः"[शेषनाममाला २।२४॥]इति शैषिकम् ॥१५३॥

## ज्येष्ठस्तु[1] शुक्रः[2]

१ जयेष्ठया युक्ता पौर्णमासी ज्यैष्ठी। सास्मिन्नस्तीति ज्यैष्ठ इत्यण्द्वयं पूर्ववत् । 'संज्ञापूर्वको विधिरनित्यः' (परि-९४)इति वृद्ध्यभावे **ज्येष्ठः** इत्यपि। "ज्येष्ठो[4] मासे[5] च वृद्धे च ज्येष्ठा च गृहगोधिका"[त्रिकाण्डशेषः ३।३।१०७॥] इति त्रिकाण्डशेषः । वासरैर्वृद्धतमत्वादतिशयेन वृद्धो वा ज्येष्ठः। २ शोचन्ति पान्था[6] अत्रेति **शुक्रः**, पुंन[7]। 'शुच शोके' (भ्वा.प.से.), 'ऋज्रेन्द्राग्र-वज्र-वप्र-कुप्र-चुप्र-क्षुर-खुर-भद्रोग्र-भेर-भेल-शुक्र-तीव्र-वर्णेरमाला[8]:'(उणा-१८६)इति रन्प्रत्ययान्तः साधुः । यद्वा शुक् शोचनमस्त्यत्र शुक्शब्दाद् 'लुगकारेकाररेफाश्च वक्तव्याः'(वा-४।४।१२९॥)इति शुक्रः । ज्येष्ठस्य द्वे । शेषश्चात्र-

"खरकोमलः ज्येष्ठामूलीयः"
[शेषनाममाला २।२४॥]॥

## अथाऽऽषाढ[1]: शुचि[2]: स्यात्

१ [9]आषाढानक्षत्रेण युक्ता पौर्णमासी आषाढी । 'नक्षत्रेण युक्तः कालः'४।२।३॥ इत्यण् । सा पौर्णमास्यस्मिन्नस्ति **आषाढः**। 'सास्मिन् पौर्णमासीति संज्ञायाम्'४।२।२१॥इत्यण् । "नक्षत्रे अषाढा इत्यव्युत्पन्नं मूर्धन्यवद्ध्रस्वादि"[[10] ]इति 'श्रविष्ठा-'४।३।३४॥ आदिसूत्रे रक्षितः। मासे तु पृषोदरादित्वाद् द्वैरुप्यम् । ([11]आषाढाभिराख्यात इति विग्रहे तु अषाढकोऽपि। आख्यातण्यन्तात् 'क्वुन् शिल्पिसंज्ञयोः'(उणा-१९०)।) "स्यादाषाढे त्वषाढकः"[[12] ]इति शब्दार्णवः । "यद् रोहिणीयोगफलं तदेव सुतावषाढासहिते च चन्द्रे"[[10] ]इति वराहोक्तेर्नक्षत्रवाच्यपि ह्रस्वादिरस्ति । आशा दिशो ढौकत इति आशाढः, तालव्यमध्योऽपि । २ शोचन्ति पान्था[13] अत्रेति **शुचिः**, पुंलिङ्गः। 'शुच शोके'(भ्वा.प.से.), 'इगुपधात् कित्'(उणा-५५९)इतीन्, स च कित् । आषाढस्य द्वे ॥

## श्रावणो[1] नभाः[2] ।

## श्रावणिकः[3]

१ ([14]'श्रु श्रवणे'(भ्वा.प.अ.), 'बहुलमन्यत्रापि-' (उणा-२३६)इति युच् । श्रवणं नक्षत्रम्, श्रवणेन युक्ता रात्रिः श्रवणा, सा पौर्णमासी अस्मिन्निति विगृह्य 'विभाषा फाल्गुनीश्रवणाकार्तिकीचैत्रीभ्यः'४।२।२३॥इत्यणि **श्रावणः**, मध्यवकारवान् । "स्त्रीपुंसयोर्ऋक्षभेदे श्रवणं श्रुतिकर्णयोः"[[15] ]इति रभसकोषात्। २ नभसो मेघाः सन्त्यत्रेति **नभाः**, पुंसि)। "न भासनं मेघच्छन्नत्वाद् अस्यास्तीति वा। 'भासृ दीप्तौ'(भ्वा.-आ.से.), क्विबन्तः"[ ]इति स्वामी[16]। सहोवत् सकारान्तः।

"धनुर्धरे त्रिषु नभः क्लीबं व्योम्नि पुमान् घने ।
घ्राणश्रावणवर्षासु बिसतन्तौ पतद्ग्रहे[17] ॥१॥"

---

१. "मधुशब्दान्मत्वर्थे ञः प्रत्ययो भवति, चकाराद्यच्च । उपसंख्यानाल्लुक् च" इति काशिका, भा-३, ४।४।१२९॥, पृ.८०४॥ २. २.४ न दृश्यते ॥ ३. २.३.४प्रतिषु न दृश्यते ॥ ४. 'ज्येष्ठे' इति३॥ ५. त्रिकाण्डशेषे 'मासि' इति दृश्यते ॥ ६. 'पन्था' इति३.४॥ ७. 'पुंनपुंसकः' इति३॥ ८. 'ऋज्रेन्द्राग्रवज्रविप्रकुब्रचुब्रक्षुरखुरभद्रोग्रभेरभेलशुक्रशुक्लगौरवन्त्रेरामालाः' इत्युणादिगणसूत्रम् ॥ ९. 'अषाढया नक्ष-' इति१॥ १०. द्र. पदचन्द्रिका, भा-१, कालवर्गः, श्लो-११९, पृ.१५२॥ ११. कोष्ठान्तर्गतपाठः २.३.४प्रतिषु न दृश्यते ॥ १२. टीकासर्वस्वम्, भा-१, १।४।१६॥, पृ.८६॥, पदचन्द्रिका, भा-१, कालवर्गः, श्लो-११९, पृ.१५२॥, रामाश्रमी १।४।१६॥, पृ.६२॥ १३. 'पन्था' इति३.४॥ १४. कोष्ठान्तर्गतपाठस्थाने १प्रतौ- "श्रूयत इति नक्षत्रम् । 'श्रु श्रवणे'(भ्वा.प.अ.), 'बहुलमन्यत्रापि-'(उणा-२३६)इति युच् । श्रवणेन युक्ता पौर्णमासी श्रवणा । 'लुबविशेषे'४।२।४॥ इति प्राप्तो लुप् यद्यपि 'पौर्णमास्यां नेष्यते' इत्युत्सर्गः, 'विभाषा फाल्गुनी-'४।२।२३॥ इति लिङ्गात्, तथापि श्रवणशब्दादिष्यत एव, तत्रैव सूत्रे 'श्रवणा' इति निर्देशात् 'अबाधकान्यपि निपातनाति' इति श्रावणी' इत्यपि, ततः सा पौर्णमासी अस्मिन्निति विगृह्य 'विभाषा फाल्गुनीश्रवणाकार्तिकीचैत्रीभ्यः'४।२।२३॥ इत्यणि श्रावणः, न बभस्ति मेघच्छन् [-न्नत्वात्] नभाः पुंसि । 'भस दीप्तौ (जु.प.से.), क्विबन्तः" इति पाठो दृश्यते ॥ अत्र रामाश्रमी द्रष्टव्या, १।४।१६॥, पृ.६२॥ १५. टीकासर्वस्वम्, भा-१, १।४।१६॥, पृ.८६॥, पदचन्द्रिका, भा-१, कालवर्गः, श्लो-११९, पृ.१५२॥ १६. अम.क्षीरस्वामिटीकायां "न भासनं मेघच्छन्नत्वादस्त्यस्य नभाः" इति दृश्यते, १।३।१६॥, पृ.३५॥ १७. 'पतद्ग्रहः' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[मेदिनीकोशः, सान्तवर्गः, श्लो-२६-२७]इति मेदिनिः[१]। नभ्यति हिनस्ति पान्थानिति वा नभाः। 'णभ हिंसायाम्'(दि.प.से.), असुन्। ३ श्रावणी पौर्णमास्यस्मिन्नस्ति **श्रावणिकः**। 'विभाषा फाल्गुनीश्रावणी-'४।२।२३॥ इति ठक्, 'ठस्येकः'७।३।५०॥, किति च'७।२।११८॥ इति वृद्धिः । श्रावणस्य त्रीणि ॥

**अथ नभस्यः प्रौष्ठभाद्रपरः पदः ॥१५४॥ भाद्रश्चापि**

१ नभसि अभ्रे[२] साधुः **नभस्यः** । 'तत्र साधुः' ४।४।९८॥ इति यत्। २-३ प्रौष्ठभाद्राभ्यां परः पदशब्दो योज्यः, तेन प्रौष्ठपदी पौर्णमासी अस्मिन् **प्रौष्ठपदः** । एवं **भाद्रपदः** । उभयत्र 'सास्मिन् पौर्णमासी-'४।२।२१॥ इत्यण् ॥१५४॥ ४ भीमभामावद् भद्रया युक्ता पौर्णमासी भाद्री । सास्मिन्नस्तीति **भाद्रः** ।'सास्मिन् पौर्णमासी-'४।२।२१॥ इत्यण् । यद्वा भाद्रशब्दः भाद्रपदैकदेशवाची । चत्वारि भाद्रपदस्य ॥

**आश्विने त्वाश्वयुजैषौ[३]**

१ आश्विनी[४] पौर्णमास्यस्मिन् **आश्विनः** । 'सास्मिन् पौर्णमासीति संज्ञायाम्'४।२।२१॥ इत्यण्, [तत्र]। २ अश्वयुगश्विनी, ततः आश्वयुजी पौर्णमास्यस्मिन्नस्ति **आश्वयुजः**। 'सास्मिन् पौर्णमासी-'४।२।२१॥ इत्यण् । ([५]पृषोदरादित्वाद् वा ह्रस्वादिरपि)। ''आश्विनोऽश्वयुजश्चेषः''[[६]]इत्यमरमालोक्तेः । ३ एषणं इट् यात्रा, सास्मिन् मासे जिगीषूणामस्ति **इषः**, ह्रस्वादिर्मूर्धन्योपधः ।'इष गतौ'(दि.प.से.), 'लुगकार-'(वा-४।४।१२९॥)इत्यकारः । यद्वा इच्छन्ति महोत्सवार्थिनोऽमुमिति ।'इष इच्छायाम्'(तु.प.से.), 'इगुपधज्ञाप्री-'३।१।१३५॥ इति कः । ''ध्वनिमिषेऽनिमेषेक्षणमग्रतः''[शिशुपालवधम् ६।४९॥]इति माघयमकं[७]। त्रीणि आश्विनस्य ॥

**अथ कार्त्तिकः।**

**कार्त्तिकिको बाहुलोर्जौ**

१ कार्त्तिकी पौर्णमास्यस्मिन्नस्ति **कार्त्तिकः** ।'सास्मिन् पौर्णमासी-'४।२।२१॥ इत्यण्। २ 'विभाषा फाल्गुनी[श्रवणा]-कार्त्तिकी-'४।२।२३॥ इत्यादिना ठकि **कार्त्तिकिकः**। ३ बहुलाः कृत्तिकास्ताभिर्युक्ता पौर्णमासी बाहुली। सा पौर्णमास्यस्मिन्नस्ति **बाहुलः** । 'सास्मिन् पौर्णमासी-'४।२।२१॥ इत्यण् । ४ ऊर्जयन्ति बलिनो भवन्ति प्राणिनोऽत्रेति **ऊर्जः** ।'ऊर्ज बलप्राणनयोः'(चु.उ.से.), 'पुंसि संज्ञायां घः-'३।३।११८॥ । ([८]अथवा ऊर्जयति उत्साहयति जिगीषून्, ण्यन्तात् पचाद्यच्) । यद्वा ''ऊर्जमुत्साहमाहुः''[[९]] [इति नाममाला], तदत्र मासि विजिगीषूणामस्ति ऊर्जः, अर्शआदित्वादच् । चत्वारि कार्त्तिकस्य । शेषश्चात्र-''सैरः[१०] कौमुदः''[शेषनाममाला २।२४॥]॥

**द्वौ द्वौ मार्गादिकावृतुः ॥१५५॥**

१ मासाविति शेषः । मार्गादिकाविति, मार्गपौषौ, माघफाल्गुनौ, चैत्रवैशाखौ, ज्येष्ठाषाढौ, श्रावणभाद्रपदौ, आश्विनकार्त्तिकाविति । इयर्त्ति मासद्विकमिति **ऋतुः**, पुंसि। 'ऋ गतौ'(भ्वा.प.अ.), 'अर्तेश्च-'(उणा-७१)इति तुन् (तुः), चाद् गुणाभावः । यत्कात्यः ''आदाय मार्गशीर्षाच्च द्वौ द्वौ मासावृतुर्मतः''[[११]] । सामान्यत एकं ऋतोः ॥१५५॥

अथ विशेषेणाह, तत्र हेमन्ताद्धि वत्सरप्रारम्भस्त[१२]स्तन्नामान्याह-

**हेमन्तः प्रशलो[१३] रौद्रः**

१ हन्ति दुःखं **हेमन्तः**। 'हन्(हन) हिंसागत्योः' (अ.प.अ.), 'हन्तेर्मुट् हि च'(उणा-४०९)इति झच्, हन्तेर्हिरादेशो मुडागमश्च । हिन्वन्ति, वर्धन्ते वा रात्रयोऽत्रेति हेमन्तः। 'हि गतौ वृद्धौ च'(स्वा.प.अ.), पृषोदरादित्वात् साधुः । हिमः अन्तोऽस्येति वा । पृषोदरादिः । हिमेन हन्ति वा । २ प्रकर्षेण शलति[१४] याति दिनमत्रेति **प्रशलः** । 'शल गतौ' (भ्वा.प.से.), पचाद्यच्। ३ रुद्रस्यायं पूजाहेतुत्वाद् **रौद्रः**। 'तस्येदम्'४।३।१२०॥ इत्यण् । मार्गपौषाभ्यां हिमऋतुस्तस्य त्रीणि । ''हिमागमः''[शेषनाममाला २।२५॥]इति शैषिकम्॥

१. 'मेदिनी' इति३॥ २. २.३.४प्रतिषु नास्ति ॥ ३. अत्र ३प्रतौ ''आश्वयुजोऽकारान्तो देववत् इषस्तृतीयस्वरादिः, द्वाभ्यां द्वन्द्वः'' इति टिप्पणीरूपः पाठो दृश्यते ॥ ४. १प्रतौ ''अश्विन्या युक्ता पौर्णमासी आश्विनी' इति टिप्पणीरूपः पाठो दृश्यते ॥ ५. कोष्ठान्तर्गतपाठस्थाने १प्रतौ ''संज्ञापूर्वकत्वाद् वृद्ध्यभावे पृषोदरादित्वाद् वा ह्रस्वादिरपि'' इति पाठो दृश्यते ॥ ६. पदचन्द्रिका, भा-१, कालवर्गः, श्लो-१२०, पृ.१५३॥, रामाश्रमी १।४।१७॥, पृ.६३॥ ७. '-मके' इति१॥ ८. कोष्ठान्तर्गतपाठः २.३.४प्रतिषु न दृश्यते ॥ ९. द्र. टीकासर्वस्वम् भा-१, १।४।१७॥, पृ.८७॥, पदचन्द्रिका, भा-१, कालवर्गः, श्लो-१२०, पृ.१५३॥ १०. 'सौरः' इति२॥ ११. द्र. स्वोपज्ञटीका २।१५५॥, पृ.३५॥ १२. 'ततो नामानाह' इति३, '-भस्तन्नामान्याह' इति२.४॥ १३. मुद्रिताभिधानचिन्तामणौ दन्त्यसमध्यः प्रसलशब्दोऽस्ति, स्वोपज्ञवृत्तिरपि तमाश्रित्यैव ॥ १४. 'शालयति' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अथ शैषशिशिरौ समौ ।**

१ शेषस्यायं पूजाहेतुत्वात् **शैषः** । 'तस्येदम्' ४।३।१२०॥ इत्यण् । २ शीर्यन्तेऽस्मिन् तृणगुल्मवनस्पतीनां तेजांसीति **शिशिरः**, पुंक्लीबलिङ्गः । शशति गच्छति शीघ्रं दिनमत्रेति वा । ([1]शशन्ति धावन्ति पथिका यस्मिन् वा) । 'शॄ हिंसायाम्'(क्र्या.प.से.), 'शश प्लुतगतौ'(भ्वा.प.से.) वा, 'अजिरशिशिरशिथिलस्थिरस्फिरस्थविरखदिराः'(उणा-५३)इति सूत्रेण किरजन्तो निपातितः । माघफाल्गुनाभ्यां शिशिरऋतुस्तस्य द्वयम् ॥

**वसन्त इष्यः सुरभिः पुष्पकालो बलाङ्गकः ॥१५६॥**

१ वसति कामोऽत्र, वसति सुखं वा अत्रेति **वसन्तः**, पुंक्ली[2] । 'वस निवासे'(भ्वा.प.अ.), 'तृभूवहिवसिभासिसाधिगण्डिमण्डिजनिनन्दिभ्यश्च'(उणा-४०८)इति झच्, 'झोऽन्तः' ७।१।३॥ । वस्ते आच्छादयति पत्रपुष्पफलादिर्भुवं वा । 'वस आच्छादने'(अ.आ.से.), 'तृभूवहि-'(उणा-४०८)इत्यनेनैव झच् । २ इषस्य तुल्यः समरात्रिन्दिवत्वाद् **इष्यः**, पुंक्ली.। शाखादित्वाद् यः। यद्वा एषणमिट् पुष्पादिवाञ्छा, तस्यां साधुरिति वा । 'तत्र साधुः'४।४।९८॥ इति यत् । ''वसन्ते त्वस्त्रियामिष्यः''[[3]]इति वाचस्पतिः । ३ सुष्ठु रभन्ते रसयुक्ता भवन्त्यत्रायाते जना[4] इति **सुरभिः**, पुंलिङ्गः । 'रभ राभस्ये'(भ्वा.आ.अ.), 'इन् सर्वधातुभ्यः'(उणा-५५७)इतीन् । सुरैर्भातीति पृषोदरादिर्वा। ४ पुष्पाणां कालः **पुष्पकालः** । ५ बलं वीर्यमङ्गेऽस्माद् **बलाङ्गकः**। 'उरःप्रभृतिभ्यः कप्' ५।४।१५१॥ । चैत्रवैशाखाभ्यां वसन्तस्य पञ्च। शेषश्चात्र-''वसन्ते पिकबान्धवः पुष्पसाधारणश्च''[शेषनाममाला २।२५] ॥१५६॥

**उष्ण उष्णागमो ग्रीष्मो निदाघस्तप ऊष्मकः।**

१ ओषति तापेन लोकानिति **उष्णः**, पञ्चमस्वरादिः। 'उष दाहे'(भ्वा.प.से.), 'इण्सिजिदीङ(ङु)ष्यविभ्यो नक्' (उणा-२८२)इति नक् । २ उष्णस्य घर्मस्यागमोऽत्रेति **उष्णागमः** । ३ गिरति पीडयति प्राणिनः, ग्रसते जलं वा **ग्रीष्मः**। गिरति जलं वा । 'गॄ निगरणे'(तु.प.से.), 'ग्रसु[7] अदने' (भ्वा.आ.से.) वा, 'घर्मसीमभीमग्रीष्म[5]-'([8])इति उणादिसूत्रेण साधुः । ४ निदह्यतेऽत्रेति **निदाघः**, पुंक्ली. । निपूर्वः 'दह भस्मीकरणे'(भ्वा.प.अ.), 'हलश्च'३।३।१२१॥ इति घञ्, 'संज्ञायां मघमेघनिदाघावदाघा-'(गणसू-७।३।५३॥)इति न्यङ्क्वादिपाठात् कुत्वम्। ''दघ घातने पालने च'(स्वा.प.से.), ततो निदघ्यतेऽनेन कृत्वा निदाघः साधुरिति पारायणिकाः'' [[9]]इति सुधाकरस्तदपाणिनीयम् । ५ तपति सन्तापयति **तपः**। 'तप सन्तापे'(भ्वा.प.अ.), पचाद्यच् । ''तपेन वर्षा[:] शरदा हिमागमः''[शिशुपालवधम् १।६६॥]इति माघः । तपः सकारान्तोऽपि। ''तपं(तपश्च) तपसा समम्''[शब्दप्रभेदः, श्लो-३६] इति शब्दप्रभेदः। ६ ओषति **ऊष्मकः**। 'उष दाहे'(भ्वा.प.से.), बाहुलकाद् मनिनि दीर्घत्वं च, यावादिपाठात् कन् । 'ऊष रुजायाम्'(भ्वा.प.से.) अस्माद्वा मनिन् । ''ऊष्मा तापनिदाघयोः''[[10]]इति नन्तो वोपालितः, ततः कन् । 'ऊष रुजायाम्' (भ्वा.प.से.) अस्माद् मकि प्रत्ययेऽदन्तोऽपि ऊष्मशब्दः। ''ऊष्मो घर्मेऽश्रुणि तथा ज्यैष्ठे[11] ऊष्मा स्त्रियां त्विषि''[[12]]इति वोपालितः। ज्येष्ठाषाढाभ्यां ग्रीष्मस्तस्य षट् । [शेषश्चात्र-''ग्रीष्मे तूष्मायणो मतः, आखोरपद्मौ''[शेषनाममाला २।२५-२६॥]] ॥

**वर्षास्तपात्ययः प्रावृण्मेघात् कालागमौ क्षरी ॥१५७॥**

१ व्रियत आच्छाद्यते मेघैर्नभोऽत्रेति **वर्षाः** । 'वृञ् आच्छादने[13]'(क्र्या. उ. से.), 'वृञ्वदि[14]-'(उणा-३४२)इत्यादिना सः। वर्षमस्त्यास्विति वा । अर्शआदित्वादच्। वर्षन्तीति वा। 'पृषु वृषु मृषु सेचने'(भ्वा.प.से.), पचाद्यच्। वर्षणं वा वर्षाः। भावे घञ्। नित्यबहुवचनान्तोऽयम्, स्त्रीलिङ्गश्च ।

''आपः सुमनसो वर्षा अप्सराः सिकताः समाः ।
एते स्त्रियां बहुत्वे स्युरेकत्वेऽप्युत्तरत्रयम् ॥१॥''

[ ]इत्युक्तेः। 'वरिषा'[शब्दप्रभेदः, श्लो-३८]इत्यपि शब्दप्रभेदः। २ तपस्यात्ययो नाशोऽत्र **तपात्ययः** । ३ प्रवर्षन्त्यस्यां मेघाः, प्रकृष्टं वर्षमत्रेति वा **प्रावृट्**, स्त्रीलिङ्गः। 'पृषु वृषु मृषु सेचने' (भ्वा.प.से.), सम्पदादित्वात् क्विप्, 'नहिवृतिवृषि-'

१. कोष्ठान्तर्गतः २.३.४प्रतिषु न दृश्यते ॥ २. 'पुंक्लीबः' इति१ ॥ ३. द्र. स्वोपज्ञटीका २।१५६॥, पृ.३५ ॥ ४. '-न्त्यत्र जना' इति१ ॥ ६. १.२.४प्रतिषु न दृश्यते ॥ ७. 'ग्रस' इति२.४॥ ५. '-भीष्म' इति१ ॥ ८. उणादिगणे 'घर्मः'(उणा-१४६)इति 'ग्रीष्मः'(उणा-१४७)इति च पृथग् दृश्यते ॥ ९. तुलनीया माधवीयधातुवृत्तिः, स्वादिः, धातुसं-२८, पृ.४५८॥ १०. द्र. पदचन्द्रिका, भा-१, कालवर्गः, श्लो-१२१, पृ.१५४॥, रामाश्रमी १।४।१९॥, पृ.६४॥ ११. 'ज्येष्ठे' इति३.४॥ १२. द्र. टीकासर्वस्वम्, भा-१, १।४।१९॥, पृ.८८॥, पदचन्द्रिका, भा-१, कालवर्गः, श्लो-१२१, पृ.१५४॥, रामाश्रमी १।४।१९॥, पृ.६४॥ १३. क्षीरतरङ्गिण्यादौ आच्छादनेऽर्थे वृञ्धातुर्न दृश्यते ॥ १४. उणादिगणे 'वृतृवदि-' इति दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

६।३।११६॥ इत्यादिना दीर्घः । ४-५ मेघशब्दात् परः कालः आगमश्च, तेन **मेघकालः, मेघागमः** यौगिकनामनी । ६ क्षराः मेघाः सन्त्यत्र **क्षरी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः । श्रावणभाद्रपदाभ्यां वर्षाऋतुस्तस्य षट् **॥१५७॥**

## शरद्[1] घनात्ययः[2]

१ शीर्यन्तेऽस्यां[1] पाकेनौषधयः, शृणाति हिनस्ति तापेन वा **शरद्**, स्त्रीलिङ्गः । 'शृ हिंसायाम्'(क्र्या.प.से.), 'शृ-दृ-भसोऽदिः'(उणा-१२७)इति अदिः । भागुरिटापि शरदा टाबन्तोऽपि । ''शरद् भवेच्छरदया प्रावृट् प्रावृषया सह''[[2]]इति विश्वः[3] । २ घनस्यात्ययो नाशोऽत्र **घनात्ययः**। आश्विनकार्त्तिकाभ्यां शरद्, तस्या द्वे॥

## अयनं[1] शिशिराद्यैस्त्रिभिस्त्रिभिः।

१ अयतेऽर्कोऽनेनेति **अयनम्** । 'अय गतौ'(भ्वा.-आ.से.), नन्द्यादित्वाल्ल्युः । त्रिभिस्त्रिभिरिति, शिशिराद्यैस्त्रिभिः ऋतुभिरुत्तरायन(ण)म्, वर्षाद्यैस्त्रिभिर्दक्षिणायनमित्यर्थः, षड्भिर्मासैरयनं पूर्यत इति भावः ॥

अयनस्य प्रमाणमुक्त्वा शब्दार्थं प्रतिपादयन्नाह-

## अयने द्वे गतिरुदग् दक्षिणार्कस्य वत्सरः[1][4]॥१५८॥

१ उदगुत्तरा, दक्षिणाऽपाची याऽर्कस्य गतिस्ते द्वेऽयने उत्तरायनं(णं) दक्षिणायनं च, ते मिलिते **वत्सरः** वर्षं भवति । अत्र अयनं चाऽयनं च अयने, एकशेषः । वसन्ति ऋतवोऽत्र वत्सरः, पुंक्ली. । 'वस निवासे'(भ्वा.प.अ.), 'वसेश्च'(उणा-३५१)इति सरन्[5], 'सः स्यार्धधातुके'७।४।४९॥ इति सस्य तत्वम् **॥१५८॥**

## स[1] संपर्यनूद्[2][3][4]भ्यो वर्षं[5] हायनोऽब्दं[6][7] समाः[8] शरत्[9]।

१ स इति तच्छब्देन पौर्वः वत्सरशब्दः परामृश्यते, ततः सम् परि अनु उद् एतेभ्यो वत्सरो योज्यते । सं समेत्य वसन्ति ऋतवोऽत्र **संवत्सरः**। 'वस निवासे'(भ्वा.प.अ.), संपूर्वः, 'वसेश्च'(उणा-३५१)इति सरन्प्रत्ययः[5] । चकारादनुवत्सरादयः। ('[6]सः(:) स्यार्धधातुके'७।४।४९॥इति सस्य तः, 'वा पदान्तस्य'८।४।५९॥ इति पक्षे सानुनासिको वकारः, पक्षे अनुस्वारः, अनुस्वारपक्षेऽपि वकारस्य दन्त्यौष्ठत्वाद् न मत्वम्)। एवं **२ परिवत्सरः, ३ अनुवत्सरः, ४ उद्वत्सरः** । ''संवत्सरानुवत्सरपरिवत्सरवत्सराः''[[3]]इति शब्दार्णवः। ५ वृणोति छादयति **वर्षम्**, पुंनपुं.[8] । 'वृञ् वरणे'(स्वा.उ.से.), स्वादिः, 'वृञ्वदि[9]-'(उणा-३४२)इत्यादिना सः । ६ भावान् जहाति जिहीते वा **हायनम्**, पुंक्ली.। 'ओहाक् त्यागे'(जु.प.अ.), 'ओहाङ् गतौ'(जु.आ.अ.) वा, 'हश्च व्रीहिकालयोः'३।१।१४८॥ इति ण्युट्। ७ आप्यतेऽधिकमासेनेति **अब्दः**, पुंक्ली.। यदरुणः ''अब्दमसयोदं[10] पुंनके[11] ह्येतत् पठितम्''[ ]इति । 'आप्लृ व्याप्तौ'(स्वा.प.अ.), 'अब्दादयश्च'(उणा-५३८)इति दन्, ह्रस्वत्वं च । आपो ददातीति वा । ८ समन्ति **समाः** । 'षम ष्टम वैक्लव्ये'(भ्वा.प.से.), पचाद्यच् । सह मान्ति वर्तन्ते ऋतव आसु इति वा समाः । स्त्रीलिङ्गः, बहुवचनान्तोऽयम्। यदमरटीका-''स्त्री बहुत्वे समाःशब्दः, यथा ''जीव्यात् सहस्रं समाः''[[12]]। ''वा बहुत्वेयम्''[[13]]इति वामनः । यदुक्तम्-''समासिकतावर्षाप्सुमनोजलौकसः''[वामनीयलिङ्गानुशासनम्, श्लो-२३] । 'समांसमां विजायते'५।२।१२॥ इति निर्देशात्, ''समायां समायाम्''[काशिकावृत्तिः ५।२।१२॥]इति वृत्तिदर्शनाच्चैकत्वमपि दृश्यते''[ ]इति । अत एव भूम्नीति न क्वापि निर्णीतम् । ९ शीर्यते जगदत्रेति **शरत्**, स्त्रीलिङ्गः। 'शृ हिंसायाम्'(क्र्या.प.से.), 'शृदृभसोऽदिः'(उणा-१२७)इति अदिः । नव वर्षस्य । शेषश्चात्र-

''ऋतुवृत्तिर्युगांशकः ।
कालग्रन्थिर्मासमलः संवत् सर्वर्तुशारदः(-दौ) ।
वत्स इड्वत्सर इडावत्सरः परवाणिः(-वत्) ॥१॥''
[शेषनाममला २।२६-२७॥]॥

संवदित्ययं त्वव्ययेषु (श्लो-१५३५) वक्ष्यते। शारद इत्यकारान्तोऽपि, प्रज्ञादित्वादणि । ''समायोषिति शारदः''[[14]]इति रत्नकोषः॥

## भवेत् पैत्रं त्वहोरात्रं मासेन

१ मानुषेण[15] मासेन पितृणामिदं **पैत्रम्** अहोरात्रम्,

---

१. '-ऽब्ध्यां' इति४॥ २. द्र. पदचन्द्रिका, भा-१, कालवर्गः, श्लो-१२२, पृ.१५५॥, रामश्रमी १।४।१९॥, पृ.६४॥ ३. विश्वप्रकाशविश्वलोचनयोरिदं वचनं न दृश्यते ॥ ४. तुलनीयोऽमरकोषः १।४।१३॥ ५. अत्र 'अशेः सरः'(उणा-३५०)इत्यस्य तत्त्वबोधिनीटीका, तत्रैव पं. शीवदत्तविरचिता टिप्पणी च द्रष्टव्या ॥ ६. कोष्ठान्तर्गतपाठः १प्रतौ न दृश्यते ॥ ७. द्र. पदचन्द्रिका, भा-१, कालवर्गः, श्लो-१२३, पृ.१५५॥ ८. 'पुंन' इति १.२.४प्रतिषु नास्ति ॥ ९. 'वृतृवदि-' इत्युणादिगणे ॥ १०. 'अब्दमपयोदं' इति१॥ ११. 'पुंनपुंसके' इति२॥ १२. द्र. अम.क्षीरस्वामिटीका १।३।२०॥, पृ.३५॥ १३. मूलं मृग्यम् ॥ १४. द्र. पदचन्द्रिका, भा-१, कालवर्गः, श्लो-१२३, पृ.१५६॥, रामाश्रमी १।४।२०॥, पृ.६४॥ १५. 'मानुष्येण' इति१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवेदिति क्रियाशेषः, तत्र कृष्णपक्षो दिनम्, शुक्लपक्षो रात्रिः, पितॄणां कव्यपालादीनामिदम्, 'तस्येदम्'४।३।१२०॥ इत्यण्॥

**अब्देन दैवतम्॥१५९॥**

१ मानुषेण अब्देन वर्षेण **दैवतम्** अहोरात्रम्, भवेदिति शेषः, देवतानामिदं दैवतम् । 'तस्येदम्'४।३।१२०॥ इत्यण्, 'यस्येति च'६।४।१४८॥, 'तद्धितेष्वचामादेः'७।२।११७॥, उत्तरायणं देवानामहः, दक्षिणायनं रात्रिः ॥१५९॥

**दैवे युगसहस्रे द्वे ब्राह्मम्**

१ देवानां युगसहस्रद्वयेन **ब्राह्मम्** अहोरात्रम्, स्यादिति शेषः, ब्रह्मण इदं ब्राह्मम्, 'ब्राह्मोऽजातौ'६।४।१७१॥ इत्यणि साधुः । अयमभिप्रायः-मानुषेण चतुर्युगेन देवानामेकं युगम् । लैङ्गे[1] युगमानं यथा-

"पूर्वं कृतयुगं नाम ततस्त्रेताभिधीयते ।
द्वापरश्च कलिश्चैव युगान्येतानि विश्रुताः (सुव्रताः!) ॥१॥
सहस्राणां शतान्यासंश्चतुर्दश च संख्यया ।
चत्वारिंशत्सहस्राणि तथान्यानि कृतं युगम् ॥२॥
तथा दशसहस्राणि[2] वर्षाणां शतसंख्यया ।
अशीतिश्च सहस्राणि कालस्त्रेतायुगस्य वा[3] ॥३॥
सप्तैव नियुतान्याहुर्वर्षाणां मानुषाणि च[4] ।
विंशतिश्च सहस्राणि [कालस्तु द्वापरस्य च ॥४॥
तथा शतसहस्राणि] वर्षाणां शत (त्रीणि) संख्यया ।
षष्टिश्चैव सहस्राणि कालः कलियुगस्य वा[4] ॥५॥
एवं चतुर्युगः काल ऋतु(ऋते) सन्ध्यांशकात् स्मृतः॥"

[लिङ्गपुराणम्, प्रथमखण्डम्, कालमानब्रह्माण्डनिरूपणम्, श्लो-२४-३०॥] ।

ज्योतिषे तु-

"वस्व८श्च[5]७मैत्री[6]२ऋतु६रन्ध्र७मासा१२-
वेदा४रसा६ष्टौ८भुज२वह्नि३वेदाः४ ।
एतानि शून्यत्रयभाजितानि ।
युगाब्दसंख्या[:] परिकीर्त्तिता च (-नि)॥६॥"[7]

एतच्च मानुषमानेन सत्यादीनां मानम्, तदेकेनापि (तदङ्केनापि), यथा सत्यस्य १७२८०००, त्रेतायाः १२९६०००, द्वापरस्य ८६४०००, कलेः ४३२०००, इदानीं च शकाब्दाः १३५३ द्वात्रिंशदब्दाधिकं(-क-)पञ्चवर्षोत्तरचतुःसहस्रवर्षाणि कलिसन्ध्याया भूतानि ४५३२ । तथा च गणितचूडामणौ महितापनीयराजपण्डितश्रीनिवासः-"कलिसन्ध्यायाः स्व(ख)-समयकरकृतवर्षाणि भूतानि ४२६०, तच्च ब्रह्मणो दिनम्"[8] । अयमाशयः-दैवैर्हि षष्ट्यधिकैस्त्रिभिरहोरात्रशतैः दिव्यं वर्षम्, तैर्द्वादशभिः सहस्रैर्लौकिकं चतुर्युगम्, तच्च देवानामेकं युगम्, तत्सहस्रं ब्रह्मणो दिनं भूतानां स्थितिकालः, तावत्येव रात्रि-भूतानां प्रलयकालः । यन्मनुः-

"चत्वार्याहुः सहस्राणां वर्षाणां तु[9] कृतं युगम् ।
तस्य तावच्छती सन्ध्या सन्ध्यांशश्च तथाविधः ॥७॥
इतरेषु ससन्ध्येषु ससन्ध्यांशेषु च त्रिषु ।
एकापायेन वर्तन्ते सहस्राणि शतानि च ॥८॥
यदेतत्परिसंख्यात[10]मादावेव चतुर्युगम् ।
एतद्द्वादशसाहस्रं देवानां युगमुच्यते ॥९॥
दैविकानां युगानां तु सहस्रं परिसंख्यया ।
ब्राह्ममेकमहर्ज्ञेयं तावती रात्रिरुच्यते ॥१०॥"

[मनुस्मृतिः, अ-१, श्लो-६९-७१॥]

इयं च मानुषमानेनैव गणना कृता ॥

**कल्पौ तु ते नृणाम् ।**

ये द्वे दैवे युगसहस्रे ते नृणां **कल्पौ**, एकं स्थितिं कल्पयति, द्वितीयं तु क्षयमिति । अत्रापि स्थितिकालो भूतानां ब्रह्मणो दिनम्, प्रलयकालश्च ब्रह्मणो रात्रिः । तथा च लैङ्गे[11]-

"चतुर्दशसहस्रो वै कल्पश्चैको द्विजोत्तम ! ।
(चतुर्युगसहस्रं वै कल्पश्चैको द्विजोत्तमाः' । )
निशान्ते सृजतो(-ते) लोकान् नश्यन्ति निशि जन्तवः ॥१॥
कोटीनां द्वे सहस्रे तु अष्टौ कोटिशतानि च ।
द्विषष्टिश्च तथा कोट्यो[12] नियुतानि तु सप्ततिः ॥२॥
कल्पस्य सङ्ख्या[13] कथिता कल्पशेषं तु कल्पयेत् ।

१. 'लिङ्ग' इति२॥ २. '-सहस्राणां' इति लिङ्गपुराणे, प्रथमखण्डम्, पृ.४६॥ ३. 'च' इति लिङ्गपुराणे, प्र.खण्डम्, पृ.४६॥ ४. 'तु' इति लिङ्गपुराणे, प्र.खण्डम्, पृ.४६॥ ५. '२' इति२, '८' इति१.४॥ ६. '१७' इति२॥ ७. द्र. टीकासर्वस्वम्, भा-१, १।४।२१॥, पृ.९०॥ तत्र 'वस्वश्विमैत्रा ऋतुरन्ध्र-मासा वेदा रसाष्टा (?) भुजवह्निदेहाः । एतानि शून्यत्रयताडितानि युगाब्दसङ्ख्याः परिकीर्तितानि ॥" इति दृश्यते, पदचन्द्रिकायामपि तथैव, परं तु '-ताडितानि' इत्यस्य '-सङ्ख्याः परि-' इत्यस्य च स्थाने क्रमेण '-भ्राजितानि' 'संख्यापरि-' इति दृश्यते, कालवर्गः, श्लो-१२४, पृ.१५७॥ ८. द्र. टीकासर्वस्वम्, भा-१, १।४।२१॥ पृ.९१॥, पदचन्द्रिका, भा-१, कालवर्ग, श्लो-१२४, पृ.१५७॥ ९. 'तत्' इति मनुस्मृतौ, १।६९॥, पृ.१९॥ १०. 'परिसंस्थान-' इति२॥ ११. 'लिङ्गे' इति२, 'लिङ्गं' इति३॥ १२. 'कोट्या' इति१॥ १३. 'सन्ध्या' इति१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(कल्पान्तसङ्ख्या दिव्या वै कल्पमेवं तु कल्पयेत्।)
कल्पानां वै सहस्रं तु वर्षमेकमजस्य तु ॥३॥
कल्पानामष्टसाहस्रं ब्रह्मणैर्ब्रह्मणो युगम् ।'' [लिङ्गपुराणम्, प्रथमखण्डम्, कालमानब्रह्माण्डनिरूपणम्, श्लो-३६, ३७, ४१, ४२]इति ॥

**मन्वन्तरं तु दिव्यानां युगानामेकसप्ततिः[1] ॥१६०॥**

दिव्यानां युगानामेकसप्ततिः **मन्वन्तरम्**, मनोरन्तरमवकाशो[2]ऽवधिर्वाऽत्रेति मन्वन्तरम्, 'सुप् सुपा'२।१।४॥ इति समासः, तैश्चतुर्दशभिर्मन्वन्तरैर्ब्रह्मणो दिनमित्यर्थः । मन्वन्तरमानं तु लिङ्गपुराणे प्रोक्तम्, तथा हि-

''एवं चतुर्युगाख्यानाम् साधिका ह्येकसप्ततिः ।
कृतत्रेतादियुक्तानां मनोरन्तरमुच्यते ॥१॥
मन्वन्तस्य संख्या च वर्षाग्रेणेह कीर्तिता ।
त्रिंशत्कोट्यस्तु वर्षाणां मानुषेण द्विजोत्तमाः ।
सप्तषष्टिस्तथान्यानि नियुतान्यधिकानि तु ॥२॥
विंशतिश्च सहस्राणि कालो यः साधिकं विना[3] ।
मन्वन्तरस्य संख्यैषा[4] लिङ्गेऽस्मिन् कथिता द्विजाः ॥३॥''

[लिङ्गपुराणम्, खं-१, कालमानब्रह्माण्डनिरूपणम्, श्लो-३०, ३४, ३५]। मनवो ब्रह्मपुत्राश्चतुर्दशैव । तथा च विष्णुपुराणे-

''मनुः स्वायम्भुवो नाम मनुः स्वारोचिषस्तथा[5] ।
औत्तमिस्तामसिश्चैव रैवतश्चाक्षुषस्तथा ॥३॥
षडेते मनवोऽतीताः सप्तमस्तु (साम्प्रतं तु) रवेः सुतः।
वैवस्वतोऽयं यस्यैतत्सप्तमो(-म्) वर्तते युगम् ॥४॥''

[विष्णुपुराणम्, खंडम्-१, तृतीयांशः, अध्य-१, श्लो-६, ७] एकसप्ततिरिति, यद्यपि गणनया सार्द्धयुगेनाधिकानां सा, यथाहुर्नामनिधाने सर्वज्ञश्रीनारायणचरणाः:-

''दैविकानां युगानां तु सहस्रं ब्रह्मणो दिनम् ।
मन्वन्तरं तथैवैकं तस्य भागश्चतुर्दश ॥५॥''[[6] ]

तत्किञ्चिदधिका दिव्ययुगानामेकसप्ततिरिति, तथापि अन्यत्वात् तदिह नोक्तम् । अपरे सप्त मनवः[7]:-

''सावर्णिदक्षसावर्णो ब्रह्मसावर्ण इत्यपि ।
धर्मसावर्णरुद्रस्तु सावर्णौ रोच्यभौत्यवत् ॥६॥''[[6] ]

एते चतुर्दश मनवः ॥१६०॥

**कल्पो युगान्तः कल्पान्तः संहारः प्रलयः क्षयः ।**
**संवर्त्तः परिवर्त्तश्च समसुप्तिर्जिहानकः ॥१६१॥**

१ कल्पते विरुद्धलक्षणया क्षीयते जगदत्रेति **कल्पः**। 'कृपू सामर्थ्ये'(भ्वा.आ.वे.), 'पुंसि संज्ञायाम्-'३।३।११८॥ इति घः, 'कृपो[8] रो लः'८।२।१८॥ इति लत्वम्, 'पुगन्तलघूपधस्य च'७।३।८६॥ इत्युपधायां[9] गुणः । २ युगस्यान्तो **युगान्तः** । ३ कल्पस्य ब्रह्मणो दिनस्यान्तोऽवधिः **कल्पान्तः**। अत्रैकः कल्पः क्षयार्थोऽन्यस्तु ब्रह्मणो दिनार्थः, यत् शाश्वतः- ''कल्पः शास्त्रे विधौ न्याये संवर्ते ब्रह्मणो दिने''[शाश्वतकोषः, श्लो-२०१]इति । ४ संह्रियते क्षीयते जगदत्रेति **संहारः** । 'हृञ् हरणे'(भ्वा.उ.अ.), 'करणाधिकरणयोश्च'३।३।११७॥ इत्यधिकरणे घञ्। ५ प्रलीयतेऽत्रेति **प्रलयः**। 'लीञ् विलयने[10]'( ), 'एरच्'३।३।५६॥इत्यच् । ६ क्षीयते सर्वमत्रेति **क्षयः** । 'क्षि क्षये'(भ्वा.प.अ.), 'एरच्'३।३।५६॥ । ७ संवर्तत उपरमते जगदत्रेति **संवर्त्तः** । 'वृतु वर्त्तने'(भ्वा.आ.से.), 'हलश्च' ३।३।१२१॥ इति घञ् । वृत्तिरत्रावसानार्थः, यथा लोके अयं निवृत्तः, उपरत इत्यर्थ । ८ एवं **परिवर्त्तः** । ९ समा सर्वेषां साधारणा सुप्तिरत्रेति **समसुप्तिः** । १० जिहीते गच्छति जिहानः, स्वार्थे कनि **जिहानकः**[11] । 'ओहाङ् गतौ'(जु.आ.अ.), 'लटः शतृशानचौ-'३।२।१२४॥ इति शतुः (लटः) शानजादेशः । प्रलयकालस्य दश ॥१६१॥

**तत्कालस्तु तदात्वं स्यात्**

१ स चासौ कालश्च **तत्कालः** । २ तदेत्यस्य भावः **तदात्वम्** । द्वे तत्कालस्य । 'तिवाराई[12] ज' इति भाषा[13] ॥

**तज्जं सान्दृष्टिकं फलम् ।**

१ तज्जं तात्कालिकं फलम्, सन्दृष्टं प्रत्यक्षं प्रयोजनमस्य **सान्दृष्टिकम्** । 'तदस्य प्रयोजनम्[14]'५।१।१०९॥ इति ठक्, 'ठस्येकः'७।३।५०॥, 'किति च'७।२।११८॥ इत्यादिवृद्धिः। 'सांसृष्टिकम्' इत्यन्ये । एकं तत्कालफलस्य। 'तुरतफल' इति भाषा ॥

१. तुलनीयोऽमरकोषः १।४।२२॥ २. '-वकाशेऽव-' इति३॥ ३. 'कालोयमधिकं विना' इति लिङ्गपुराणे, खं-१, पृ.४६॥ ४. 'सङ्ख्यैक' इति३॥ ५. ''स्वायम्भुवो मनुः पूर्वं परः स्वारोचिषस्तथा । उत्तमस्तामसश्चैव रैवतश्चाक्षुषस्तथा ॥'' इति विष्णुपुराणे खं-१, पृ.३६१॥ ६. द्र. पदचन्द्रिका, भा-१, कालवर्गः, श्लो-१२४, पृ.१५९॥ ७. 'मानवः' इति१॥ ८. 'कृपे' इति१.२.३॥ ९. '-धागुणः' इति२.४॥ १०. 'लीङ्' इति४, वस्तुतस्तु क्षीरतरङ्गिण्यादौ लीञ्धातुर्विलयनेऽर्थे दृश्यते ॥ ११. वाचस्पत्ये 'जहानकः' इति प्रथमस्वरादिर्दृश्यते, पृ.३०८१॥ १२. 'तिवार' इति२॥ १३. 'भाषायाः' इति३॥ १४. 'प्रयोजनम्' इत्येवाष्टाध्याय्याम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**आ[1]यतिस्तूत्तरः कालः**

१ एष्यति **आयतिः**, स्त्रियाम् । 'इण् गतौ' (अ.प.अ.), । "अयतिश्चायतिः काले"[ ]इति शब्दप्रभेदः[१]। उत्तर आगामी कालः। एकमागामिकालस्य ॥

**उद[1]र्कस्तद्भवं फलम् ॥१६२॥**

१ उदियर्त्ति **उदर्कः**, उदर्च्यते अभिलाषात् स्तूयते उदर्कः। 'अर्च पूजायाम्'(भ्वा.प.से.), कर्मणि घञ्, 'चजोः कु घिण्ण्यतोः'७।३।५२॥ इति कुत्वम् । तस्या आयतेर्भवं तद्भवम् । एकमागामिकालभवफलस्य[२] ॥१६२॥

**व्यो[1]मान्तरि[2](री)क्षं ग[3]गनं घना[4]श्रयो**
**वि[5]हाय आ[6]काशमन[7]न्तपु[8]ष्करे ।**
**अ[9]भ्रं सु[10]रा[11]भ्रो[12]डु[13]मरुत्पथोऽ[14]म्बरं**
**[15]खं [16]द्यो[17]दिवौ वि[18]ष्णुपदं वि[19]यन्न[20]भः ॥१६३॥**

१ व्ययति छादयति क्ष्माम्, वीयते तद्वायुना घनैश्चेति वा, विशेषेण अवति प्राणिनोऽवकाशप्रदानेनेति वा [**व्योम**]। 'व्येञ् संवरणे'(भ्वा.उ.अ.), 'अव रक्षणादौ'(भ्वा.प.से.)वा, 'नामन्सामन्स्तोमन्होमन्प्रोमन्लोमन्व्योमन्घर्मन्पाप्मन्व्येमन्[३]'(उणा-५९०) इत्युणादिसूत्रेण साधुः । विपूर्वादवतेर्व्याप्यर्थत्वादौणादिके '-मनिन्'(उणा-५८४)इति सूत्रेण मनिन्प्रत्यये 'ज्वरत्वरस्त्रि[४]व्यविमवामुपधायाश्च'६।४।२०॥इति (इत्यूठ्), गुण इति वा। व्यवति व्याप्नोति सर्वं जगदिति वा । यद्वा अविर्गत्यर्थः, भावे मन्, अवनं गमनं विविधमस्मिन् विद्यत इति व्युत्पत्तेः। २ अन्तरीक्षते जगदस्मिन्निति **अन्तरीक्षम्**। 'ईक्ष दर्शने'(भ्वा.-आ.से.), घञ् । अन्तर् मध्ये ऋक्षाणि नक्षत्राणि अस्येति, पृषोदरादित्वाद्वा । अन्तरा मध्ये सर्वभूतानां क्षान्तं शान्तं स्थितिं निःक्रियं वा, शान्तं प्रत्यहं विभज्यस्थानकत्वात्। अन्तरा इमे रोदस्यौ क्षयतीति वा। अन्तरा इमे क्षोण्याविति वा। एवमनेकविकल्पमुत्तरपदमन्तरशब्दात् सर्वत्र पृषोदरादित्वात् साधुः इति भाष्यम् । "वेदे तु छान्दसं ह्रस्वत्वम्"[[५]]इति वर्णदेशना। "अन्तरीक्षमन्तरिक्षम्[६]"[शब्दप्र-३]इति शब्दप्रभेदः। ३ गच्छन्त्यनेन देवा इति **गगनम्** । 'गम्लृ गतौ'(भ्वा.प.अ.), 'गमेर्गश्च'(उणा-२३५)इति युच् किच्च, गश्चान्तादेशः । ४ घनानामाश्रयो **घनाश्रयः** । ५ विजहाति सर्वमिति **विहायः**। 'ओहाक् त्यागे'(जु.प.अ.), बाहुलकादसुन्। ६ आ समन्तात् काशन्ते[७] दीप्यन्ते सूर्यादयोऽत्र **आकाशम्**, पुंक्लीबलिङ्गः। 'काशृ दीप्तौ'(भ्वा.आ.से.), 'हलश्च'३।३।१२१॥इति घञ् । न काशत[८] इत्याकाशमिति वा । नञ्पूर्वः 'काशृ दीप्तौ'(भ्वा.-आ.से.), छान्दसो दीर्घः, भावे घञ् । ७ नास्त्यन्तः प्रान्तोऽस्येति **अनन्तम्** । ८ पोषयति भूतान्यवकाशप्रदानेन, उदकदानाद्युपकारेण वा **पुष्करम्** । पुषिरत्रान्तर्भूतण्यर्थः, 'पुषेः किच्च[९]' (उणा-४४४)इति करप्रत्ययः । "पुष्कं वारि राति ददाति[१०]" [अम.क्षीर. १।२।१॥]इति क्षीरस्वामी[११]। 'रा दाने'(अ.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥, 'आतो लोप इटि च'६।४।६४॥ इत्यालोपः। यद्वा वपुरित्युदकनाम, तत्कर्तुं शीलमस्येति । 'कृञो हेतुताच्छील्यानुलोम्येषु'३।२।२०॥ इति टच्, वकारलोपः पुष्करादित्वाद्। पुष्णाति पोषति मेघान् वा । 'पुषेः किच्च[९]' (उणा-४४४)इति करः। ९ अभ्रति स्थैर्यं गच्छति नित्यद्रव्यत्वाद् **अभ्रम्** । 'अभ्र गतौ'(भ्वा.प.से.), पचाद्यच् । न बिभर्त्ति किञ्चिदपीति अभ्रं वा । 'डुभृञ् धारणपोषणयोः' (जु.उ.अ.), "मूलविभुजादित्वात् कः"[ ]इति कौमुदी। न भ्राजत इति वा । 'भ्राजृ दीप्तौ'(भ्वा.आ.से.), "अन्येभ्यो-(ष्व)पि'३।२।१०१॥ इति डः[१२]"[अम.क्षीर. १।२।१॥]इति स्वामी। अभ्राण्यस्य सन्तीति वा अभ्रम्। अर्शआदित्वादच्। "आपो भ्रंश्यत्यस्मादिति अब्भ्रम्, बकारसंयुक्तम्"[ ]इत्येके। 'भ्रंशु अधःपतने'(दि.प.से.), 'अन्येभ्यो(ष्व)ऽपि'३।२।१०१॥ इति डः, डित्त्वाट्टिलोपः। **१०-१३** सुराणां देवानाम्, अभ्राणां मेघानाम्, उडूनां नक्षत्राणाम्, मरुतां वायूनां पन्थाः, तेन **सुरपथः, अभ्रपथः, उडुपथः, मरुत्पथः**, यौगिकत्वाद् देववर्त्म, मेघवर्त्म, नक्षत्रवर्त्म, वायुवर्त्मेत्यादयः। **१४** 'अबि शब्दे' (भ्वा.आ.से.), 'कृश(कृद)रादयश्च'(उणा-७१९)इति अरन्प्रत्ययान्तो निपात्यते। अम्बन्ते शब्दायन्ते[१३]ऽस्मिन् मेघादयः, अम्बते शब्दायते वा स्वयं वायुमेघादिसंसर्गाद्, आकाशगुणो हि शब्दः। अथवा अर्त्तेर्धातोः 'अर्जिदृशिकम्यमिपशिबाधामृ-

१. शब्दप्रभेदे इदं वचो न दृश्यते, 'भाविकालेऽपि चायतिः' इति त्रिकाण्डशेषे, ३।३।१४८॥ २. '-कालभवस्य' इति४॥ ३. 'नामन्सीमन्व्योमन्रोमन्लोमन्पाप्मन्धामन्' इत्युणादिगणे ॥ ४. '-शृ-' इति१.२॥ ५. द्र. टीकासर्वस्वम्, भा-१, १।२।१॥, पृ.५२॥, पदचन्द्रिका, भा-१, व्योमवर्गः, श्लो-६७, पृ.९४॥, रामाश्रमी १।२।१॥ पृ.३७॥ ६. 'अन्तरिक्षमन्तरीक्षम्' इति शब्दभेदप्रकाशे ॥ ७. 'काश्यन्ते' इति२.३.४॥ ८. 'काश्यत' इति२॥ ९. 'पुषः किच्च' इत्युणादिगणे ॥ १०. अम.क्षीर.टीकायां 'ददाति' इत्यस्य स्थाने '(च्यवति)' इति दृश्यते ॥ ११. द्र. पदचन्द्रिका, भा-१, व्योमवर्गः, श्लो-६७, पृ.९४॥ १२. अम.क्षीर.टीकायां 'डः' इत्येव दृश्यते, १।२।१॥, पृ.२२॥ १३. 'अम्बते शब्दायते' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जिपशितुग्धुग्दीर्घहकारश्च'(उणा-२७)इति अमतेर्विधीयमान उप्रत्ययो बुगागमो बाहुलकाद्भवति, तस्मिन् गुणे परत्वरेफमकारश्च अम्बु, अमतेरेव वा तैनैव सूत्रेण उप्रत्ययो बुगागमश्च, उभयत्रापि गच्छन्ति[1] देशाद् देशान्तरं वा, गम्यते वा प्राणिभिरिति अम्बु जलम्, तद् राति ददाति अम्बरो मेघः। 'आतोऽनुपसर्गे कः'३।२।३॥, पृषोदरादित्वादुकारस्याकारः, तद्वद् आकाशमपि **अम्बरम्**, 'लुक्भकाररेफाश्च वक्तव्याः' ( )इति मत्वर्थीयस्य लुक्, तदेव वर्षासु प्राणिभ्य उदकं ददातीति अम्बरम्। अथवा अम्बशब्दे उपपदे राजतेर्धातोः 'अन्येष्वपि दृश्यते'३।२।१०१॥ इति दृशिग्रहणाद् डः । सर्वोपाधिव्यभिचारार्थसिद्धिः, अम्बुवद् राजते स्वच्छस्तिमितसागराम्बुवदाभासते, कल्पितोपमानं चैतत्। यथा-"पुञ्जीकृतमिव ध्वान्तमेतेष्वाभाति किं गजः, सरःशरत्प्रशन्नाम्भो नभः खण्डमिवोर्जितम्"[ ]इत्यादि। **१५** खन्यते हन्यते **खम्**। 'खन खनने[2]'(भ्वा.उ.से.), '-खनेर्मुट् [स] चोदात्तः'(उणा-६९८)इत्यच्, स च डित्, मुडागमस्त्वागमाऽनित्यत्वान्न भवति। **१६** द्योतते रविकिरणसम्बन्धाद् **द्यौः**। 'द्युत दीप्तौ' (भ्वा.आ.से.), बाहुलकाद् डोप्रत्ययः। यद्वा 'द्यु अभिगमने[3]' 'द्युगमिभ्यां डोः'( )इति श्रीभोजः । द्युवन्त्यभिगच्छन्ति स्वं स्वमभिमतं प्रदेशं प्राणिन इति, 'गोतो णित्'७।२।९०॥इति वृद्धिः । **१७ दिव**शब्दस्तु प्राक् स्वर्गनामसु (अभि.श्लो-२।८७)साधितः । **१८** विष्णोः पदं क्रमोऽत्र **विष्णुपदम्**। **१९** वियच्छति न विरमति **वियत्**, क्लीबलिङ्गः। 'यम[4] उपरमे'(भ्वा.प.अ.), विपूर्वः, 'अन्येभ्योऽपि'३।२।७५॥ इति क्विप्, 'क्वौ च गमादीनामनुनासिकलोपो भवतीति वक्तव्यम्' (वा-६।४।४०॥)इत्यनुनासिकलोपः, 'ह्रस्वस्य पिति कृति तुक्'६।१।७१॥ । यद्वा विपूर्वाद् 'यती प्रयत्ने'(भ्वा.आ.से.) अस्मात् क्विप् । विविधं यतन्तेऽस्मिन् प्राणिनः, आकाशे हि सर्वे व्याप्रियन्ते । **२०** 'नह (णह) बन्धने'(दि.उ.अ.), 'नहेर्दिवि भश्च'(उणा-६५०)इत्यसुन्, भश्चान्तादेशः। न बभस्तीति वा। 'भस दीप्तौ'(जु.प.से.), असुन् । नवं नवं भातीति वा **नभः**, क्ली[5]। 'भा दीप्तौ[6]'(अ.प.अ.), पृषोदरादिः। 'अत्यविचमि-'(उणा-३९७)असचि 'नभसम्' इत्यदन्तमपि । विंशतिराकाशस्य । विहायसा भुवश्चाव्यये(अभि.-श्लो-६।१५२६), महाबलिं[7] देश्याम्, अलिङ्गमिति लिङ्गानुशासनवृत्तौ । शैषिकाणि-"[नक्षत्रवर्त्मनि] ग्रहनेमिः नभोऽवटी[8] छायापथः" [शेषनाममाला २।२७-२८॥] ॥१६३॥

**नभ्राट् तडित्वान् मुदिरो घनाघनो-**
**ऽभ्रं धूमयोनिस्तनयित्नुमेघाः ।**
**जीमूतपर्जन्यबलाहका घनो**
**धाराधरो वाहदमुग्धरा जलात् ॥१६४॥**

**१** न भ्राजत इत्येवंशीलो **नभ्राट्** । 'भ्राजृ दीप्तौ' (भ्वा.आ.से.), 'भ्राजभासभाषधूर्विद्युतोर्जि-'३।२।१७७॥ इति क्विप्, 'नभ्राण्नपान्नवेद-'६।३।७५॥ इति सूत्रेण नञः प्रकृतिभावः । **२** तडिद् विद्यतेऽस्य **तडित्वान्** । 'तदस्यास्त्यस्मिन्निति मतुप्'५।२।९४॥, 'झयः'८।२।१०॥इति मतुपो मस्य वः, 'तसौ मत्वर्थे'१।४।१९॥ इति भसंज्ञकत्वाद् 'झलां जशोऽन्ते'८।२।३९॥ इति जश्त्वाभावः । **३** मोदन्तेऽनेन जनाः, मोदयति प्राणिन इति वा **मुदिरः** । 'मुद हर्षे' (भ्वा.आ.से.), 'इषिमदिमुदिखिदिच्छिदिभिदिमेदिचदितिमिमिहिमुहिरुचिरुधिशुषिबधिभ्यः[9] किरच्[10]'(उणा-५१)इति किरच्। **४** हन्ति प्रवासिनः, विरहिणः, दुःकालं वा **घनाघनः**। 'हन हिंसागत्योः'(अ.प.अ.), 'हन्तेर्घत्वं च'(वा-)इत्यचि द्विर्वचनमभ्यासस्यागागमो हस्य घकारः, परस्य 'अभ्यासाच्च' ७।३।५५॥ इति कुत्वम्, आको दीर्घोच्चारणसामर्थ्यान्न ['ह्रस्वः'७।४।५९॥], 'हलादिः शेषः'७।४।६०॥ । **५** अभ्रति गच्छति **अभ्रम्**, क्लीबलिङ्गः । 'अभ्र गतौ' (भ्वा.प.से.), पचाद्यचि"[[11]]इति उपाध्यायसर्वस्वम् । अत एव माघे "-घनमदभ्रमराणि" [शिशुपालवधम् ६।७२]इति यमकम् । "अपो बिभर्त्तीति मूलविभुजादित्वात् के अब्भ्रं बकारवत्[12]"[[11]]इति वैयाकरणाः । "न भ्रश्यन्त्यापोऽस्मादिति, 'अन्येभ्यो(ष्व)ऽपि-'३।२।१०१॥इति डे[13] नभ्रम्"[[11]]इति पौराणिकाः । तदुक्तम्-"न भ्रश्यन्ति यतस्तेभ्यो जलान्यभ्राणि तान्यतः"[[14]]इति । आप्नोति सर्वा दिश इति वा, पृषोदरादित्वात् साधुः । **६** धूमो योनिः कारणमस्य **धूमयोनिः**।

१. 'गच्छति' इति१॥ २. अयं धातुः क्षीरतरङ्गिण्यादौ न दृश्यते, तेन 'खनु अवदारणे' इति पाठ्यम् ॥ ३. 'अभिगमे' इति३॥ ४. 'यमु-' इति१.२॥ ५. 'क्लीबं' इति३॥ ६. 'भर्त्सनदीप्त्योः' इति क्षीरतरङ्गिण्यादौ ॥ ७. द्र. देसोसद्दसंगहे ६।५८३॥, पृ.२२२॥ ८. 'नभोऽटवी' इति१.२.४॥ ९. '-सचि-' इति१.२॥ १०. 'इषिमदिमुदिखिदिच्छिदिभिदिमन्दिचन्दितिमिमिहिमुचिरुचिरुधिबन्धिशुषिभ्यः किरच्' इत्युणादिगणे ॥ ११. द्र. पदचन्द्रिका, भा-१, दिग्वर्गः. श्लो-७४, पृ.१००॥ १२. '-करणः' इति१॥ १३. 'डः' इति३.४॥ १४. द्र. अम.क्षीर. १।२।७॥, पृ.२४॥, पदचन्द्रिका, भा-१, दिग्वर्गः, श्लो-७४, पृ.१००॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

७ स्तनयति गर्जति **स्तनयित्नुः**। 'स्तनगदी[1] देवशब्दे'(चु.उ.से.), चुरादावदन्तः, अतः 'स्तनिकृषिमदिगदिभ्यो णेरित्नुच्'(उणा-३०९), 'आ(अ)यामन्ताल्वाय्ये(य्ये)त्वि(त्न्वि)ष्णुषु'६।४।-५५॥ इति णेरयादेशः । ८ मेहति सिञ्चति महीं **मेघः** । 'मिह सेचने'(भ्वा.प.अ.), पचाद्यच्, 'संज्ञायां मघमेघनिदाघाव-दाघा[र्घाः]'[2](ग-७।३।५॥)इति न्यङ्क्वादिपाठात् कुत्वम् । ९ जीवनं जलं मूतं बद्धमनेन **जीमूतः** । 'मूङ् बन्धने'(भ्वा.-आ.से.), पृषोदरादित्वात् साधुः । जीवनं वारि मुञ्चतीति वा, पृषोदरादिः । ''जीवनस्य [जलस्य] मूतः पुटबन्धः''[अम. क्षीर.१।२।८॥]इति तु[3] स्वामी । १० परिवर्षति गर्जति **पर्य( र्ज )न्यः**। ('[4]पृषु सेचने'(भ्वा.प.से.), 'अन्यप्रत्यये षस्य जः'( )इत्युणादिसूत्रेण पर्जन्यः साधुः, चवर्गतृतीयमध्यः) 'पर्य(र्ज)न्यः'(उणा-३८३)इत्युणादिसूत्रेण साधुः । ११ बलन्ति जीवन्त्यनेन बलाहकाभिर्हीयते गम्यते वा, वारिणो वाहको वा **बलाहकः** । सर्वत्र पृषोदरादित्वाद् रूपसिद्धिः । १२ हन्ति सन्तापम्, हन्यते वायुना वा **घनः** । 'हन हिंसागत्योः'(अ.-प.अ.), बाहुलकात् कर्तरि अप्, 'मूर्तौ घनः'३।३।७७॥ इति घनादेशः । १३ धारां धरति **धाराधरः** । 'धृञ् धारणे' (भ्वा.उ.अ.), पचाद्यच् । १४-१७ वाहश्च दश्च मुक् च धरश्च वाहदमुग्धराः, एते जलशब्दात् पुरो योजिता मेघस्य वाचकाः स्युः, यथा वहनं वाहः, भावे घञ्, जलस्य वाहो **जलवाहः** । जलं वहतीति कर्मण्यणि वा । जलं ददाति **जलदः**। जलं मुञ्चति **जलमुक्**। जलं धरति[5] **जलधरः**। यौगि-कत्वाद् वारिवाहः, वारिदः, वारिमुक्, वारिधरः इत्यादयः । अभ्रशब्दवर्जं सर्वेऽप्यन्ये पुंलिङ्गाः । इन्द्रवंशेन्द्रयोरुपजातिः । सप्तदश मेघस्य । यद्यपि शब्दार्णवे त्रिविधा मेघाः, यथा-

''मेघास्तु त्रिविधास्तत्र वह्निजा धूमयोनयः ।
निःश्वासजास्तु जीमूतास्ते ज्ञेया जीवरूपिणः ॥१॥
यज्ञजास्तु घना घोराः पुष्करावर्त्तका[दयः]॥''[[6] ]इति

तथाऽप्यन्यत्राऽप्यभेदोऽपि दृश्यते, इहाऽपि तथा ।

शेषश्चात्र-

''मेघे तु व्योमधूमो नभोध्वजः ।
गण्डयित्नुर्गदयित्नुर्वामसिर्वारिवाहनः ॥
खतमालोऽपि[7]''[शेषनाममाला २।२८-२९॥]॥१६४॥

## कादम्बिनी[8] मेघमाला[9]

१ कं जलमाददते कादम्बाः मेघास्ते सन्त्यस्यां **कादम्बिनी** । यद्वा कादम्बाः पक्षिणो बलाकावत् मेघमनुधा-वन्ति, तद्योगात्, ज्योत्स्नादित्वादणि कादम्बिनी । ''कदम्ब-विकासः कादम्बः, सोऽस्यास्ति[10] कार्यत्वेन''[अम.क्षीर[11]. १।२।८॥]इति तु स्वामी[12]। मेघमाला मेघघटा, तन्नामैकम् । 'कलाइणि' इति भाषा ॥

## दुर्दिनं[1] मेघजं तमः ।

१ दुष्टं निन्दितं दिनं **दुर्दिनम्** । अत्र दिनमिति अहर्नि-शोपलक्षणम्, तेन रात्रावपि दुर्दिनम्, अत एव मेघान्धकारमात्रे 'दुर्दिनम्[13]'[ ]इति रत्नकोषः, ''दुर्दिनं जलदध्वान्तम्''[[14] ]इति।

''यत्रौषधिप्रकाशेन नक्तं दर्शितसञ्चराः ।
अनभिज्ञा[15]स्तमिस्राणां दुर्दिनेऽप्यभिसारिकाः॥१॥''
[कुमारसंभवम्, सर्गः-६, श्लो-४३]

इति कुमारे रात्रावपि दुर्दिनप्रयोगः । ''यन्नेत्रयोर्दुदिनमित्यत्र त्वसंभवः स्वार्थाविनाभूतपयःप्रवाहं लक्षयन् अश्रुप्रवाहं लक्षयति''[[16] ]इति शृङ्गारप्रकाशः, एवं लक्षितलक्षणया । ''अकरोत् पृथिवी रुहानपि श्रुतशाखारसवाध्यदुर्दिनम् (बाष्प-दूषितान् (-दुर्दिनान्[17])''[रघुवंशम् ८।७०॥]इति रघुः । ''वार्दलं[18] दुर्दिनं मेघ-''[मेदिनीकोश, लान्तवर्गः, श्लो-११९] इति मेदिनिः[19] । मेघाज्जातं मेघजं तमोऽन्धकारं दुर्दिनं प्रोच्यत इत्यन्वयः । एकं मेघजनितान्धकारस्य ॥

## आसारो[1] वेगवान् वर्षः

१ वेगवान् वेगयुक्तो वर्षो वृष्टिः **आसारः** प्रोच्यते। [20]आसरणमासारः । 'सृ गतौ'(भ्वा.प.अ.), 'अकर्तरि च कारके संज्ञायाम्'३।३।१९॥ इति घञ् । धाराणां संभूय जननमासार इत्यर्थः । ''धारासंपातः''[शेषनाममाला २।२९॥]इति शैषिकम्। एकं शीघ्रवृष्टेः ॥

---

१. 'स्तनगद' इति३.४॥ २. 'मघ' इति गणसूत्रे न दृश्यते ॥ ३. ४प्रतौ न दृश्यते ॥ ४. कोष्ठान्तर्गतपाठः २प्रतावेव दृश्यते॥ ५. 'धरतीति' इति३.४॥ ६. द्र. पदचन्द्रिका, भा-१, दिग्वर्गः, श्लो-७५, पृ.१०१॥, रामाश्रमी १।३।८॥, पृ.४०॥ ७. 'अपि' इति १.२.४ प्रतिषु न दृश्यते ॥ ८. तुलनीयोऽमरकोषः १।३।८॥ ९. ३प्रतौ नास्ति ॥ १०. 'सोऽस्याः' इति३॥ ११. अम.क्षीर.टीकायाम्- ''कमाददते कादम्बा मेघास्ते सन्त्यस्यां कादम्बिनी, कदम्बे विकाशो वास्त्यस्याम्'' इति दृश्यते, १।२।८॥, पृ.२४॥ १२. द्र. पदचन्द्रिका, भा-१, दिग्वर्गः, श्लो-७५, पृ.१०१॥ १३. अत्र 'दुर्दिनमिति' इत्यधिकपाठो दृश्यते ॥ १४. द्र. पदचन्द्रिका, भा-१, दिग्वर्गः, श्लो-७९, पृ.१०५॥, रामाश्रमी १।३।१२॥, पृ.४२॥, अमरकोशस्य अमरपदपारिजातटीका, भा-१, १।३।१२॥, पृ.५८॥ १५. 'अनभिज्ञातमिश्रा-' इति३॥ १६. द्र. पदचन्द्रिका, भा-१, दिग्वर्गः, श्लो-८०, पृ.१०६॥ १७. 'दुर्दिनान्' इति रघुवंशे पाठान्तररूपेण दृश्यते॥ १८. 'वार्दभं' इति२.३.४॥ १९. ''बार्दलं दुर्दिने मेलानन्दायां वार्दलः स्मृतः'' इति मेदिन्याम्, पृ.१५३॥ २०. 'आसा-' इति१.३.४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

### वाताऽस्तं वारि शीकरः ॥१६५॥

१ वातेन वायुनाऽस्तं क्षिप्तं वातास्तं वारि जलं **शीकरः** प्रोच्यते । शीकते सिञ्चति शीकरः । 'शीकृ सेचने'(भ्वा.आ.से.), 'ऋच्छेररन्'[१](उणा-४११)इति बाहुलकादरन्। तालव्यादिरयम्, ''शम्बशीकरपांशवः''[[२]]इति तालव्यप्रकरणे ऊष्मविवेकात्। एकं वाताहतजलकणस्य । 'वाछंटी' इति भाषा ॥१६५॥

### वृष्ट्यां वर्षणवर्षे

१ वर्षणं **वृष्टिः** । 'पृषु वृषु मृषु सेचने'(भ्वा.प.से.), 'स्त्रियां क्तिन्'३।३।९४॥, 'तितुत्र-'७।२।९॥ इतीण्निषेधः, तत्र वृष्ट्याम् । २ ''वर्षणाद् वृषभः''[ ]इति भाष्यकारवचनाद् 'ल्युट्‌ च'३।३।११५॥ इति ल्युटि **वर्षणम्** इति साधु । ३ **वर्षम्** इति, 'अज्विधौ भयादीनामुपसंख्यानम्' नपुंसके भावे क्तादिनिवृत्त्यर्थम्'(वा-३।३।५६॥)इत्यच् । पुंक्लीबलिङ्गोऽयम्। यद्वाचस्पतिः '"अथ वृष्टिर्वर्षमस्त्री केचिदिच्छन्ति वर्षणम्''[[३]]इति । वर्षोऽल्पतरो वृष्टिर्महतीति वर्षवृष्ट्योर्भेदोऽत्र नाश्रितः । त्रीणि वृष्टेः ॥

### तद्विघ्ने ग्राहग्रहाववात् ।

१-२ तद्विघ्ने वृष्टिविघ्ने, अवात् परौ ग्राहग्रहौ योज्यौ, 'ग्रह उपादाने'(क्र्या.उ.से.), 'अव (अवे) ग्रहो वर्षप्रतिबन्धे' ३।३।५१॥ इति पक्षे घञि **अवग्राहः**, घञभावपक्षे 'ग्रह-वृत्(दृ)-'३।३।५८॥ इत्यप् **अवग्रहः**[४] । अवग्रहादिदोषेण वृष्टिविघातस्य द्वे ॥

### घनोपलस्तु करकः

१ घनस्य मेघस्य उपलः पाषाणः **घनोपलः** । कृणोति सस्यम्, कीर्यते वा **करकः** त्रिलिङ्गः। 'कृञ् हिंसायाम्' (स्वा.उ.अ.), 'कृञादिभ्यः संज्ञायां वुन्'(उणा-७१३), 'युवोरनाकौ'७।१।१॥, क्षिपकादिपाठात् स्त्रियां टापि 'प्रत्ययस्थात्-'७।३।४४॥ इतीत्वं न । द्वे मेघभवशिलायाः । 'गडा' इति भाषा । शेषश्चात्र-

''अम्बुघनो मेघकफः(-फो) मेघास्थिपुञ्जिका[५] ।
बीजोदकं तोयडिम्भो वर्षाबीजमिरावरम्[६]॥१॥''
[शेषनाममाला २।२९-३०] ॥

### काष्ठाऽऽशा दिग् हरित् ककुप् ॥१६६॥

१ काशते **काष्ठा**, टवर्गद्वितीयोपधोऽयम्[७] । 'काशृ[८] दीप्तौ'(भ्वा.आ.से.), 'हनिकुशिनीवा[९]मिकाशिभ्यः क्थन्'(उणा १५९), 'लशक्वतद्धिते'१।३।८॥, 'व्रश्चभ्रस्ज-'८।२।३६॥ इति षत्वम्, 'तितुत्र-'७।२।९॥ इति नेट्, 'ष्टुना ष्टुः'८।४।४१॥, 'अजाद्यतष्टाप्'४।१।४॥, काशन्ते दीप्यन्त इति व्युत्पत्तिः। २ आ समन्तादश्नुते व्याप्नोति **आशा** । आङ्पूर्वः 'अशूङ् व्याप्तौ[१०]'(स्वा.आ.से), पचाद्यच्, टाप् । आङ्पूर्वः 'शद्लृ शातने'(भ्वा.आ.अ.,तु.आ.अ.) वा, अयमत्र गत्यर्थः, अनेकार्थत्वाद् धातूनाम्, 'अन्येभ्योऽपि-'३।२।१०१॥ इति डः। ३ दिशन्ति तामिति, दिशत्यवकाशं वा **दिक्** । 'दिश अतिसर्जने' (तु.प.अ.), 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजि[११]क्रुञ्चां च'३।२।५९॥ इति क्विन्, कइन एते इतः 'तस्य लोपः'१।३।९॥, ['वेरपृक्तस्य'६।१।६७॥ इति वो लोपः], 'क्विन्प्रत्ययस्य कुः' ८।२।६२॥ । भागुरिमते टापि दिशा[१२] आबन्तोऽपि । ''दिक् तु स्त्रियां दिशा दान्ती ककुब् देववधूः पविः''[[१३]]इति शब्दार्णवः। ४ हरन्ति नयन्त्यनया **हरित्** । 'हृञ् हरणे'(भ्वा.उ.अ.), 'हृसृ[१४]तडि[१५]रुहियुषिभ्य इत्[१६]'(उणा-९७)इतीत् । ५ कं वायुं कु(स्कु)भ्नाति विस्तारयति **ककुप्** । 'कुभ [स्कुम्भु[१७]] विस्तारे,' क्विप्। केन प्रजापतिना विस्तारिता इति वा । सर्वत्र 'क्विब् वचिप्रच्छायतस्तु-'(वा-३।२।१७८॥) इत्यत्र ''प्राक्प्रत्ययनिर्देशादिष्टसिद्धिः''[ ]इत्युक्तेः क्विप्, ''पृषोदरादित्वाद् वा रूपसिद्धिः'' [ ]इति भाष्यम् । 'ककुभा' अपि कश्चित् । एते पञ्चाऽपि स्त्रीलिङ्गाः । पञ्च दिशः ॥१६६॥

''दिगेकैवाऽस्ति, औपाधिकं तु प्राचीत्वादि''[[१८]]इति वैशेषिकमते, परं तन्मतमनादृत्य स्वमतेन दिग्भेदानाह-

---

१. 'ऋच्छेररः' इत्युणादिगणे ॥ २. द्र. रामाश्रमी १।३।११॥, पृ.४२॥, पदचन्द्रिकायां 'शम्ब' इत्यस्य स्थाने 'शश्वत्' इति दृश्यते, दिग्वर्गः, श्लो-७९, पृ.१०५॥ ३. द्र.स्वोपज्ञटीका २।१६६, पृ.३८॥, पदचन्द्रिका, भा-१, दिग्वर्गः, श्लो-७८, पृ.१०५॥, रामाश्रमी १।३।११॥, पृ.४१॥ ४. १प्रतौ नास्ति ॥ ५. '-पु-' इत्यस्य स्थाने १प्रतौ बहिर्भागे 'मि' इति दृश्यते, 'पूञ्जिका' इति३॥ ६. '-मिराभवम्' इति३॥ ७. '-पधेयं' इति३॥ ८. 'कासृ' २.३.४॥ ९. '-वडि-' इति३, '-रमि-' इत्युणादिगणे ॥ १०. 'अशू व्याप्तौ' इति स्वामी, 'अशू व्याप्तौ सङ्घाते च' इति सायणः॥ ११. '-युञ्जि-' इति१.२॥ १२. तदुक्तं भट्टोजिदीक्षितेन सिद्धान्तकौमुद्यां 'अव्ययादाप्सुपः' इति सूत्रव्याख्याने-''वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः । आपं चैव हलन्तानां यथा वाचा निशा दिशा'' इति ॥ १३. द्र. रामाश्रमी १।३।१॥, पृ.३७, पदचन्द्रिका, भा-१, दिग्वर्गः, श्लो-६८, पृ.९५, तत्र पदचन्द्रिकायां 'दिशा दान्ती' इत्यस्य स्थाने 'दिशादन्तः' इति दृश्यते ॥ १४. 'हृसु-' इति४॥ १५. अत्र तडेर्ग्रहणं न कर्तव्यम् 'ताडेर्णिलुक् च'(उणा-९८)इति पृथगुणादिसूत्रविधानात्॥ १६. 'इति' इत्युणादिगणे ॥ १७. सौत्रोऽयं धातुः ॥ १८. द्र. पदचन्द्रिका, भा-१, दिग्वर्गः, श्लो-६८, पृ.९६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## पूर्वा प्राची

१ पूर्वति पूरयति **पूर्वा** । 'पर्व पूर्व पूरणे'(भ्वा.-प.से.), पचाद्यच्, टाप् । 'पूर्व निकेतने'(चु.प.से) अस्माद्वा अच् । २ प्र इति प्रथममञ्चत्युदेति रविरस्यामिति **प्राची** । प्रपूर्वः 'अञ्चु गतिपूजनयोः'(भ्वा.प.से.), प्राथम्येत्र प्रशब्दः, 'ऋत्विग्दधृक्-'३।२।५९॥ इत्यादिना क्विन्, 'अञ्चतेस्त्विष्टः'[1] (वा-४।१।६॥) इति ङीप्[2] । द्वे पूर्वदिशः ॥

## दक्षिणाऽपाची

१ दक्षते शीघ्रं गच्छति रविरस्यां **दक्षिणा** । 'दक्ष गतौ[3]'(भ्वा.आ.से.), आत्मनेपदी, 'द्रुदक्षिभ्यामिनन्[4]'(उणा-२०८), टाप् । २ अपेति मध्याह्ने अञ्चत्यस्यां रविरिति **अपाची** । अपशब्दोऽत्र मध्यवाची । तेन 'अवाची' इत्यपपाठ एव, अवपूर्वोऽञ्चतिरधोमुखीभावे वर्तते, यथाऽमरकोषे-''स्यादवाङ्मुखोऽप्यधोमुखः[5]''[अमरकोषः ३।१।३३॥]इति । ''अवाङ्मुखस्योपरि पुष्पवृष्टिः''[रघुवंशम् २।६०॥]इति रघुः । ''तेन अवाचीत्यधोदिश्येव वर्तते''[[6]]इति कौमुदीकारादयः । ''अवो मध्यार्थः, तेन अवाचीत्यपि क्वापि''[अम.क्षीर.१।२।३॥]इति स्वामी[7] । अपपूर्वः 'अञ्चु गतिपूजनयोः'(भ्वा.प.से), 'ऋत्विग्दधृक्-'३।२।५९॥ इत्यादिना क्विन्, 'अञ्चतेस्त्विष्टः'(वा-४।१।६॥) ङीप् । द्वे दक्षिणादिशः ॥

## प्रतीची तु पश्चिमा । अपरा

१ प्रति पश्चाद् दिनान्ते अञ्चति रविरस्यामिति **प्रतीची** । प्रतिपूर्वः 'अञ्चु गतिपूजनयोः'(भ्वा.प.से.), 'ऋत्विक्-' ३।२।५९॥ आदिना क्विन्, 'अञ्चतेस्त्विष्टः'(वा-४।१।६॥) इति ङीप्, 'अनिदितां हलः-'६।४।२४॥ इति[8] उपधान्लोपः, 'अचः'६।४।१३८॥ इति अकारलोपः, 'चौ'६।३।१३८॥ इति दीर्घः । २ पश्चाद् भवा **पश्चिमा** । 'अग्रपश्चादिमन्[9]'(वा-४।३।२३॥)इतीमन्, 'यचि भम्'१।४।१८॥ इति भसंज्ञा, 'अव्ययानां भमात्रे टिलोपः[10]'(वा-६।४।१४४॥), 'अजाद्यतष्टाप्'४।१।३॥ इति टाप् । ३ न पृणाति रविरेतां चिरमिति **अपरा** । न पिपर्तीति वा । 'पृ पालनपूरणयोः'(जु.प.अ.), पचाद्यच्, टापि । त्रीणि पश्चिमदिशः । शेषश्चात्र-''[[11]अ]परेतरा पूर्वा पूर्वेतराऽपरा'' [शेषनाममाला २।३०॥] ॥

## अथोत्तरोदीची

१ अतिशयेन उत्कृष्टा **उत्तरा** । 'द्विवचनविभज्योपपदेन तरबीयसुनौ'५।३।५७॥ इति तरप्, टाप् । उत्तरत्यस्यामर्क इति वा । उद्पूर्वः 'तृ प्लवनतरणयोः[12]'(भ्वा.प.से.), पचाद्यच्, टाप् । २ उत्क्रान्तो दृष्टिपथमतीतः सूर्योऽञ्चत्यस्यामिति **उदीची** । उद्पूर्वः 'अञ्चु गतिपूजनयोः'(भ्वा.प.से.),'ऋत्विक्-'३।२।५९॥ आदिना क्विन्, 'अञ्चतेस्त्विष्टः'(वा-४।१।६॥)इति ङीप्, 'उद ईत्'६।४।१३९॥ इत्यञ्चतेरकारस्य ईकारः । द्वे उत्तरदिशः । शेषश्चात्र-''[13]यथोत्तरेतराऽपाची तथापाचीतरोत्तरा''[शेषनाममाला २।३१॥] ॥

## विदिक् त्वपदिशं प्रदिक् ॥१६७॥

१ विशिष्टा दिक् **विदिक्** उभयव्यपदेशात् । यदाहुः- ''यान्यासामन्तरालानि विदिशः **प्रदिशश्च** ताः''[[14]] । २ दिशोरिदमन्तरालम् **अपदिशम्** । 'अव्ययं विभक्ति-'२।१।६॥ इत्यादिना अव्ययीभावः, 'अव्ययीभावे शरत्प्रभृतिभ्यष्टच्' ५।४।१०७॥ इति टच्समासान्त इति टच् । ३ प्रकृष्टा दिक् **प्रदिक्** । सामान्यतस्त्रीणि विदिशः ॥१६७॥

## दिश्यं दिग्भववस्तुनि

१ दिक्षु भवं **दिश्यम्** । 'दिगादिभ्यो यत्'४।३।५४॥ इति यत् । सामान्यतो दिग्भववस्तुनामैकम् ॥

अथ विशेषतः[15] प्राह-

## अपागपाचीनम्

१ अप अञ्चतीति **अपाक्** । २ अपागेव **अपाचीनम्** । 'विभाषाञ्चेरदिक्स्त्रियाम्'५।४।८॥ इति खः, खस्येनादेशः । द्वे दक्षिणदिग्भववस्तुनः ॥

---

१. काशिकावृत्त्यादौ 'अञ्चतेश्चोपसंख्यानम्' इति दृश्यते ॥ २. तदुक्तं भट्टोजिदीक्षितेन सिद्धान्तकौमुद्यां स्त्रीप्रत्ययप्रकरणे उगितश्च इत्यत्र-''उगिदचामिति सूत्रेऽज्ग्रहणेन धातोश्चेदुगित्कार्यं तर्ह्यञ्चतेरेवेति नियम्यते । तेनेह न, उखास्रत् । क्विप् । अनिदितामिति नलोपः । पर्णध्वत् । अञ्चतेस्तु स्यादेव । प्राची । प्रतीची ॥'' इति ॥ ३. 'दक्ष वृद्धौ शीघ्रार्थे च' 'दक्ष गतिहिंसनयोः' इति क्षीरतरङ्गिण्याम्, 'दक्ष गतिशासनयोः' 'दक्ष वृद्धौ शीघ्रार्थे च' इति मा.धातुवृत्तौ ॥ ४. -मनिन्' इति३ ॥ ५. ''स्यादवाङप्यधोमुखः'' इत्यमरकोषे, ३।१।३३॥ ६. द्र. पदचन्द्रिका, भाग-१, दिग्वर्गः, श्लो-६९, पृ.९६॥ ७. स्वामिकृतामरकोशटीकायां ''अवो मध्यार्थे । अपाचीति कात्यः, जपादित्वात्, पक्षे वत्वं च । भवार्थे प्राचीनाद्याः'' इति दृश्यते, १।२।३॥, पृ.२३॥ ८. 'इति न्लोपः' इति३ ॥ ९. 'अग्रपश्चाड्डिमच्' इति काशिकावृत्त्यादौ । 'अग्रादिपश्चाड्डिमच्' इति सिद्धान्तकौमुद्याम्, पृ.३०९॥ १०. 'अव्ययानां च सायम्प्रादिकार्थमुपसंख्यानम्' इति काशिकावृत्तौ ॥ ११. 'अपरेतरा पूर्वा' इति पाठः पूर्वाशब्दव्याख्याने उचितः ॥ १२. 'प्लवनपूरणयोः' इति३ ॥ १३. 'यथोत्तरेतराऽपाची' इति पाठो दक्षिणाशब्दव्याख्याने उचितः ॥ १४. द्र. रामाश्रमी १।३।५॥, पृ.३९॥ तत्र ''-प्रदिशो विदिशश्च'' इति पाठो दृश्यते ॥, पदचन्द्रिकायां-''क्लीबे दिगन्तरालानि प्रदिशो विदिशस्तथा'' इति दृश्यते, दिग्वर्गः, श्लो-७३, पृ.९९॥ १५. ४प्रतौ बहिर्भागे 'ऽथ विशेषमाह इति पाठः' इति दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**उदगुदीचीनम् ।**

१ उदञ्चतीति **उदक्** । 'ऋत्विक्-'३।२।५९॥ आदिना क्विन्, 'क्विन्प्रत्ययस्य कुः'८।२।६२॥ । २ उदगेव **उदीचीनम्**। 'विभाषाञ्चेरदिक्स्त्रियाम्'५।४।८॥इति खः, खस्य ईनादेशः, 'उद ईत्'६।४।१३१॥ इति भस्याञ्चतेरस्य ईत् । उत्तरदिगुत्पन्नस्य द्वे ॥

**प्राक् प्राचीनं च समे**

१ प्राञ्चतीति **प्राक्** । 'अञ्चु गतिपूजनयोः'(भ्वा.-प.से.), 'ऋत्विक्-'३।२।५९॥ आदिना क्विन्, 'क्विन्प्रत्ययस्य कुः'८।२।६२॥ २ प्रागेव **प्राचीनम्** । 'विभाषाञ्चेरदिक्स्त्रियाम्' ५।४।८८॥ इति खः । पूर्वदिगुत्पन्नस्य द्वे ॥

**प्रत्यक् तु स्यात् प्रतीचीनम् ॥१६८॥**

१ प्रत्यञ्चतीति **प्रत्यक्** । 'ऋत्विक्-'३।२।५९॥ आदिना क्विन् । २ प्रत्यगेव **प्रतीचीनम्** । 'विभाषाञ्चेरदिक्स्त्रियाम्'५।४।८८॥इति खः, खस्येनादेशः, 'अचः'६।४।१३८॥ इत्यञ्चतेरकारस्य लोपः, 'चौ'६।३।१३८॥इति पूर्वस्याणो दीर्घः। पश्चिमदिग्भवस्तुनो द्वे ॥१६८॥

**तिर्यग्दिशां तु पतय इन्द्राग्नियमनैर्ऋताः ।**
**वरुणो वायुकुबेरावीशानश्च यथाक्रमम् ॥१६९॥**

तिर्यगिति ऊर्ध्वाधोदिग्व्यवच्छेदार्थम् । विदिगिति प्रसिद्ध्या दिगुच्यते । एवं स्वस्वामिसम्बन्धे पूर्वा दिग् ऐन्द्री, ततो विदिग् आग्नेयी, दक्षिणा याम्या, ततो विदिग् नैर्ऋती, पश्चिमा वारुणी, ततो विदिग् वायव्या, उत्तरा कौबेरी, ततो विदिग् ऐशानी इति सिद्धम् । "इन्द्रादीनां च प्राचीपत्यादिवाचकत्व[१]सूचनायाभिधानादिन्द्रादिनामानां ना[२]प्रस्तुताभिधानम्"[[३]]इति कौमुदी । इन्द्रयमवरुणधनदाश्चत्वार एते दिगीशाः, अग्निनैर्ऋतवाय्वीशाना एते चत्वारो विदिगीशा इति हृद्यम् ॥१६९॥

**ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः ।**
**पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः ॥१७०॥**

१ इरावति समुद्रे पर्वते वा भवः **ऐरावतः** । 'तत्र भवः' ४।३।५३॥ इत्यण्, 'तद्धितेष्वचामादेः'७।२।११७॥ इत्यादिवृद्धिः । २ पुण्डरीकवर्णयोगात् **पुण्डरीकः** । 'अर्शआदिभ्योऽच्' ५।२।१२७॥ इत्यच् । ३ वामनाकारत्वाद् **वामनः** । ४ कौ पृथिव्यां मोदत इति **कुमुदः** । 'मुद हर्षे'(भ्वा.आ.से.), मूलविभुजादित्वात् कः । कुमुदं रक्तोत्पलं तत्तुल्यवर्णत्वाद्वा । "कुमुदं कैरवे रक्तपद्मेऽस्त्री"[दान्तवर्गे श्लो-२५]इति मेदिनिः[६] । ५ अञ्जनवर्णत्वाद् **अञ्जनः** । ६ पुष्पवद् दन्ता अस्य **पुष्पदन्तः** । ७ सर्वभूमौ विदितः **सार्वभौमः** । 'तत्र विदितः-'५।१।४३॥ इत्यण्, 'अनुशतिकादीनां च'७।३।२०॥इति उभयपदवृद्धिः। ८ शोभनः प्रतीकोऽङ्गमस्य **सुप्रतीकः** । दिशां धारका गजाः दिग्गजाः । दिक्क्रमेणेति प्रस्तावाल्लभ्यते । "ऐरावतः पुण्डरीकः कुमुदाञ्जनवाहनाः[७]"[[८]]इति भागुरिः क्रममाह। माला तु "ऐरावतः सुप्रतीकः"[[८]]इति क्रममाह । ऐरावतादीनामष्टानां नामैकं दिग्गजा इति ॥१७०॥

इन्द्रादयोऽष्टौ दिक्पालाः, तत्राग्निर्वायुश्च एकेन्द्रियेषु तिर्यक्काण्डे(श्लो-१०९९-११०६)वक्ष्येते[९], शेषानत्रानुक्रमेणाह-

**इन्द्रो हरिर्दुश्च्यवनोऽच्युताग्रजो**
**वज्री बिडौजा मघवान् पुरन्दरः ।**
**प्राचीनबर्हिः पुरुहूतवासवौ**
**संक्रन्दनाऽऽखण्डलमेघवाहनाः ॥१७१॥**
**सुत्रामवास्तोष्पतिदल्मिशक्रा**
**वृषा सुनाशीर( शुनाशीर )सहस्रनेत्रौ।**
**पर्जन्यहर्यश्वऋभुक्षिबाहु-**
**दन्तेयवृद्धश्रवसस्तुराषाट् ॥१७२॥**
**सुरर्षभस्तपस्तक्षो जिष्णुर्वरशतक्रतुः ।**
**कौशिकः पूर्वदिग्देवाऽप्सरःस्वर्गशचीपतिः ॥१७३॥**
**पृतनाषाडुग्रधन्वा मरुत्वान् मघवा**

१ इन्दति परमैश्वर्यमनुभवति **इन्द्रः**। 'इदि परमैश्वर्ये' (भ्वा.प.से.), 'ऋज्रेन्द्राग्रवज्रविप्रकुप्रचुप्रक्षुरखुरभद्रोग्रभेरभेलशुक्रतीव्रवर्णेरमालाः[१०]'(उणा-१८६)इति सूत्रेण रन्प्रत्ययान्तो

---

१. '-वाचकत्वं' इति२.३॥ २. 'नाप्रा-' इति३, 'नामऽप्रस्तु' इति२॥ ३. पदचन्द्रिकायां "पूर्वादीनामिन्द्रादीनाञ्च प्राच्यादि दिशामाधिपत्यादि सूचनायाभिधानान्नाप्रस्तुतत्वोक्तिरिति कौमुदी" इति दृश्यते, दिग्वर्गः, श्लो-७०, पृ.९७॥ ४. तुलनीयोऽमरकोषः १।३।३-४॥ ५. मुद्रितमेदिनीकोषे अवग्रहो न दृश्यते ॥ ६. 'मेदिनी' इति३॥ ७. '-वामनाः' इति स्वोपज्ञटीका ॥ ८. द्र. स्वोपज्ञटीका २।१७०॥, पृ.३९॥ ९. 'वक्ष्यते' इति३.४॥ १०. 'ऋजेन्द्राग्रवज्रविप्रकुब्रचुब्रक्षुरखुरभद्रोग्रभेरभेलशुक्रशुक्लगौरवन्त्रेरामालाः'(उणा-१८६)इत्युणादिगणे ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निपातः । २ हरति दैत्यप्राणान् **हरिः**। 'हृञ् हरणे'(भ्वा.उ.अ.), 'अच इः'(उणा-५७८)इति इः, 'सार्वधातुकार्धधातुकयोः' ७।३।८४॥ इति गुणः । **३** दुःखेन च्यवनं पतनमस्य **दुश्च्यवनः**। श्च्यवनमुनिना एकदा जितत्वात्, दुःसहश्च्यवनोऽस्येति वा, दुःसहं च्यवते परदारेषु रेत इति वा। 'च्युङ् यु(ज्यु)ङ् प्रुङ्[1] प्लुङ् गतौ[2]'(भ्वा.आ.से.), 'चलनशब्दार्थादकर्मकाच्च[3]' ३।२।१४८॥इति युच् इति । ''दुःखेन च्यवते रणाद् वा' इति प्रादिसमासः[4]''[अम.क्षीर.१।१।४४॥]इति तु स्वामी[5]। ४ अच्युतस्याग्रजः **अच्युताग्रजः**। ५ वज्रमस्यास्ति **वज्री** । 'अत इनिठनौ'५।२।११५॥ इतीनिः । **६** वेवेष्टि विट्, 'विष्लृ व्याप्तौ'(जु.उ.अ.), क्विप्, विट् व्यापकमोजो[6]ऽस्य विडौजाः[7] (विडोजाः[8]), पृषोदरादित्वादकारागमे **विडौजाः**, सकारान्तः। विट्सु प्रजासु ओजोऽस्येति वा, पृषोदरादिः । 'विड भेदने[9]' 'इगुपध-'३।१।१३५॥इति कः। ''विडं दैत्यानाँ[10] भेदकमोजोऽस्य''[अम.क्षीर.१।१।४१॥]इति स्वामी। **७** मह्यते पूज्यते जनैरिति मघवान्(मघवा)। 'मह पूजायाम्'(भ्वा.उ.से.,-चु.उ.से.),'श्वन्नुक्षन्पूषन्प्लीहन्क्लेदन्स्नेहन्मूर्धन्मज्जन्नर्यमन्विश्वप्सन्परिज्मन्मातरिश्वन्मघवन्-'(उणा-१५७)इति सूत्रेण कन्नन्तो निपातितः । 'मघवा बहुलम्'६।४।१२८॥इति पक्षे त्रादेशात् सौ दीर्घत्वाभावाद् 'मघवन्' इति । ''हविर्जक्षिति निःशङ्को मखेषु मघवान्''[भट्टिकाव्यम् १८।१९॥]इति भट्टिप्रयोगात्। मघः सौख्यमस्यास्ति **मघवा[न्]**, मतुबन्तोऽपि । मघा देवानां सभा, सास्यास्तीति वा, 'ङ्यापोः संज्ञाछन्दसोर्बहुलम्'६।३।-६३॥इति ह्रस्वः। यद्वा मघ इति अदन्तं देवसभानाम, सोऽस्यास्तीति मघवा[न्]। एवं मघवा, मघवन्, मघवान् इति त्रैरूप्यम्[11]। ८ पुराण्यरीणां दारयति **पुरन्दरः** । 'दॄ विदारणे'(क्र्या.-प.से.), 'पूःसर्वयोर्दारिसहोः'३।२।४१॥ इति खच् । 'वाचंयमपुरन्दरौ च'६।३।६९॥ इति सूत्रेण[12] निपातितः[13]। **९** प्राचीनमुखाः बर्हिषो दर्भा अस्य **प्राचीनबर्हिः** । यदुक्तं विष्णुपुराणे-

''प्राचीनाग्राः कुशास्तस्य पृथिव्यां विश्रुता मुने ।
प्राचीनबर्हिरभवत् ख्यातो भुवि महाबलः ॥१॥''

[विष्णुपुराणम्, प्रथमभागः, प्रथमांशः, अध्याः-१४, श्लो-४] इति । **१०** युद्धे पुरुनाम्ना दैत्येन आहूत इति **पुरुहूतः** । 'ह्वेञ् आह्वाने[14]'(भ्वा.उ.अ), 'निष्ठा'३।२।१०२॥ इति क्तः, संप्रसारणम्, 'हलः'६।४।२॥ इति दीर्घः । ''पुरु प्रचुरं ([15]हूतं यज्ञेष्वाह्वानमस्येति) पुरुहूतः''[अम.क्षीर.१।१।४१॥]इति तु स्वामी[16]। **११** वसूनि रत्नानि बहून्यस्य सन्तीति **वासवः** । ज्योत्स्नादित्वादण्। ''वसोरपत्यं[17] वासवः''[अम.क्षीर.१।१।४२॥]। 'तस्यापत्यम्' ४।१।९२॥ इत्यण्, 'ओर्गुणः'६।४।१४६॥, 'एचोऽयवायावः' ६।१।७८॥ इति तु[18] स्वामी । वसुरेव वा[19] वासवः । प्रज्ञादित्वादण्। वसति स्वर्गे वासव इति वा। 'वस निवासे'(भ्वा.प.अ.), 'मणिवसो(से)र्णित्'(हैमोणा-५१६)इत्यव इति । **१२** संक्रन्दयति दैत्यस्त्रीः, दितिगर्भं संक्रन्दितवानिति वा **संक्रन्दनः** । दारणाद् गर्भस्थमरुतो वा । 'कदि क्रदि आह्वाने रोदने च' (भ्वा.प.से.), 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः'३।१।१३४॥ इति ल्युः । **१३** आखण्डयत्यरीन् **आखण्डलः** । 'खड खडि भेदने'(चु.उ.से.), 'वृषादिभ्यः कलच्[20]'(उणा-१०६)इति कलच्। **१४** महामेघा गजरूपधारिण ऐरावतादयो वाहनमस्य, मेघान् वाहयति वर्षयति वा **मेघवाहनः** । 'वह प्रापणे'(भ्वा.उ.अ.) णिजन्तः, नन्द्यादित्वाल्ल्युः। ''इन्द्रो हि मेघानादिश्य वर्षति''[[21]]इत्यागमः **॥१७१॥** **१५** सुष्ठु त्रायते **सुत्रामा**, नकारान्तः। 'त्रेङ्(त्रैङ्) पालने'(भ्वा.आ.से.), '-मनिन्'(उणा-५८४)इति मन्, 'आदेच उपदेशे-[22]'६।१।४५॥ इत्यात्वम् । शोभनं त्राम बलमस्येति वा। बाहुलकाद् दीर्घत्वे सूत्रामा दीर्घादिरपि।

१. २प्रतौ नास्ति ॥ २. सायणसम्मतमिदं सूत्रम्, मा.धातुवृत्तिः, भ्वादिः, धातुसं-६७२, पृ.२६७॥ ३. '-कर्मकाद् युच्' इत्यष्टाध्याय्याम्॥ ४. अम. क्षीरस्वामिटीकायां 'इति प्रादिसमासः' इति न दृश्यते ॥ ५. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-३९, पृ.६०॥ ६. '-मौजो-' इति१ ॥ ७. 'विडौजः' इति१.३.४॥ ८. ''विडोजा विडौजा अपीति बुद्धबन्धुः'' इति टीकासर्वस्वम्, भा-१, १।१।४१॥, पृ.३२, पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-३६, पृ.५७॥ ९. भेदनेऽर्थे विडधातुर्न दृश्यते, परं 'विड शब्दे' इति, ''अत एव विड शब्दे पिट आक्रोशे इति मल्लः, पर्यट्टकान्तरे विभङ्ग्याह'' इति क्षीरतरङ्गिणी, भ्वादिः, धातुसं-२१६, पृ.५६॥ १०. अम. क्षीरस्वामिटीकायां नास्ति, १।१।४१॥, पृ.१४॥ ११. मघवा इत्यत्रत्या रामाश्रमी द्रष्टव्या, पृ.२२॥ १२. 'सूत्रे' इति३ ॥ १३. 'निपातः' इति२॥ १४. 'आच्छादने' इति१, 'ह्वेञ् स्पर्धायां शब्दे च' इति क्षीरतरङ्गिण्यादौ ॥ १५. कोष्ठान्तर्गतपाठस्थाने १.२.४प्रतिषु 'हूतमाह्वानं यज्ञस्येति' इति दृश्यते॥ १६. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-३६, पृ.५८॥ १७. अम. क्षीरस्वामिटीकायां 'वस्वपत्यं' इति दृश्यते, १।१।४२॥, पृ.१४॥ १८. २प्रतौ नास्ति ॥ १९. १.२.३प्रतिषु नास्ति ॥ २०. 'वृषादिभ्यश्चित्'(उणा-१०६)इत्येवोणादिगणे ॥ २१. द्र. स्वोपज्ञटीका २।२७१॥, पृ.४०॥, अम.क्षीर. १।१।४४॥, पृ.१५॥, पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-३९, पृ.६१॥ २२. 'उपदेश' इति १.२.४प्रतिषु न दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**१६** वास्तोर्गृहक्षेत्रस्य पतिरधिष्ठातृत्वात् **वास्तोष्पतिः** इति । 'द्यावा-पृथिवी-सु(शु)नासीर-मरुत्वदग्नीषोम-वास्तोष्पतिगृहमेधाच्छ च'४।२।३२॥ इति निपातनात् षष्ठ्यलुक्, 'षष्ठ्याः पति-पुत्र-'८।३।५३॥ इत्यादिना षत्वे इण्परत्वान्मूर्धन्यमध्यः। **१७** दलति गिरीन् **दल्मिः** । 'दल विशरणे'(भ्वा.प.से.), 'दल्मिः'(उणा-४८७)इत्यौणादिको निपातः[1]। **१८** शक्नोति चिन्तितं कर्त्तुमिति **शक्रः**। 'शक्लृ शक्तौ'(स्वा.प.अ.), 'स्फायितञ्चिवञ्चि-'(उणा-१७०)इत्यादिना रक् । शक्रं नाम सिंहासनमस्यास्तीति वा । 'अर्शआदिभ्योच्'५।२।१२७॥ **१९** वर्षतीति **वृषा** । 'पृषु वृषु मृषु सेचने'(भ्वा.प.से.), '[कनिन्] युवृषितक्षिराजिधन्विद्युप्रतिदिवः'(उणा-१५४)इति कनिन् 'सर्वनामस्थाने चाऽसम्बुद्धौ'६।४।८॥इति दीर्घः 'हल्ङ्याप्-' ६।१।६८॥इति सुलोपः, 'नलोपः प्रातिपदिकान्तस्य'८।२।७॥ इति न्लोपः[2] । वृषा, वृषाणौ, वृषाणः इत्यादि राजन्वत् । **२०** 'नासृ(णासृ) शब्दे'(भ्वा.आ.से.), बाहुलकादीरन्, नासीरा अग्रेसरास्ते शोभना सुनासीरः, द्विदन्त्यः। तत्र शुनो वायुः शीरः सूर्यस्तावस्य स्त इति, अर्शआदित्वादचि 'अन्येषामपि-' ६।३।१३७॥ इति दीर्घत्वे **शुनाशीरः** इति द्वितालव्योऽपि, एतत्पक्ष एव । ''शौरिशुनाशीरशीतशिवशङ्खाः''[5]इति तालव्यादावूष्मविवेकः । "आशुर्नासीरौ यस्येति, पृषोदरादित्वादाकारलोपे शुनाशीरः''[8]इत्यन्ये। **२१** सहस्रं नेत्राण्यस्य **सहस्रनेत्रः**। ''यत्कौटिल्यः-इन्द्रस्य हि मन्त्रिपर्षदृषीणां वो सहस्रं, स तच्चक्षुस्तस्मादिन्द्रं द्व्यक्षं सहस्राक्षमाहुः''[कौटलीय-अर्थशस्त्रम्, प्रथममन्त्राधिकारः, १० प्रकरणम्, १४ अध्यायः] इति चाणक्यैः । **२२** परिवर्षति गर्जति **पर्जन्यः**। निपातनात् साधुः । **२३** हरयः पिङ्गा अश्वा अस्य **हर्यश्वः** । यच्छालिहोत्रम्-

''त्वक्केशवालरोमाणि सुवर्णाभानि यस्य तु ।
हरिः स वर्णितोऽश्वस्तु पीतकौशेयसप्रभः॥२॥''[11]इति ।

**२४** ऋभवः क्षियन्ति निवसन्त्यत्रेति ऋभुक्षः स्वर्गः। 'क्षि निवासगत्योः'(तु.प.अ.), 'अन्येभ्योऽपि'३।२।१०१॥ डः। सोऽस्याश्रयत्वेनास्तीति, 'अत इनिठनौ'५।२।११५॥ इतीनिः **ऋभुक्षिन्** । प्रथमैकवचने 'पथिमथ्यृभुक्षामात्'७।१।८५॥ ऋभुक्षाः, ऋभुक्षाणौ, ऋभुक्षाणः इत्यादिरूपाणि । ''ऋभुक्षो वज्रः''[12]इति तु धातुपारायणे पूर्णचन्द्रः । सोऽस्यास्तीति ऋभुक्षा । ''ऋभुक्षः स्वर्गवज्रयोः''[13]इति वज्रः (विश्वः)। ''इयर्त्ति ऋभुक्षा वा । 'ऋ गतौ'(जु.प.अ.), 'अर्त्तेर्भुक्षिन्,'( ) इति भुक्षिन्, स च कित्''[ ]इति कौमुदी । ''ऋभून् देवान् क्षियति कार्येषु व्यापारयतीति, पृषोदरादित्वात्''[14]इति तु पञ्जिका । **२५** बहुदन्त्या अपत्यं **बाहुदन्तेयः**। 'स्त्रीभ्यो ढक्' ४।१।१२०॥ ढक्, 'आयनेयी-'७।१।२॥इति ढस्यैयादेशः। **२६** वृद्धेभ्यः शृणोति **वृद्धश्रवाः**। 'श्रु श्रवणे'(भ्वा.प.अ.), '-असुन्'(उणा-६२८)इत्यसुन्, वृद्धोपजीवीत्यर्थः । वृद्धाद् बृहस्पतेः शृणोतीति वा । ''वृद्धे श्रवसी कर्णावस्य''[15]इति तु स्वामी[16] ।'अत्वसोः सौ[17]इति दीर्घः । वृद्धश्रवसौ, वृद्धश्रवसः इत्यादि । **२७** तुरं त्वरितं साहयत्यभिभवत्यरीनिति, तुरं वेगवन्तं सहत इति वा, तुरः त्वरितः सन् परबलानि सहत इति वा **तुराषाट्** । 'षह मर्षणे'(भ्वा.आ.से.), 'छन्दसि सहः'३।२।६३॥ इति ण्विः, 'सहे साडः सः'[18]८।३।५६॥इति षत्वम्, 'अन्येषामपि दृश्यते'६।३।१३७॥ इति दीर्घत्वम् ॥१७२॥ **२८** सुरेषु देवेषु ऋषभो मुख्यः **सुरर्षभः** । 'सप्तमी'२।१।४०॥ इति योगविभागात् समासः । सुरोऽयमृषभ इवेति वा । 'उपमितं व्याघ्रादिभिः-'२।१।५६॥इति समासः । **२९** तपस्तक्ष्णोति इन्द्रपदप्राप्तिशङ्कया **तपस्तक्षः** । 'तक्ष त्वक्ष तनूकरणे[19]' (भ्वा.प.वे.), पचाद्यच् । **३०** जयनशीलः, जयतीत्येवंशीलो वा **जिष्णुः** । 'जि जये'(भ्वा.प.अ.), 'ग्लाजिस्थश्च ग्स्नुः'

---

**१.** 'निपातितः' इति३॥ **२.** 'नलोपः' इति४॥ **३.** 'शोरि-' इति१॥ **४.** '-संखा' इति१.३.४॥ **५.** द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-३६, पृ.५७॥, रामाश्रमी १।१।४१॥, पृ.२२॥ **६.** 'आशू-' इति३॥ **७.** 'नाशीरो' ३.४॥ **८.** द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-३६, पृ.५७॥ **९.** कौटिलीये अर्थशास्त्रे नास्ति, द्र. अधिकारः-१, प्रकरणम्-१०, अध्यायः- १४, पृ.४७॥ **१०.** अधिकोऽयं प्रतिभाति, 'यत्कौटिल्यः' इत्युक्तत्वात्, स्वोपज्ञटीका द्रष्टव्या २।१७२॥, पृ.४०॥ **११.** द्र. टीकासर्वस्वम्, भा-१,।१।१।४३॥, पृ.३३॥, पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-३८, पृ.५९॥, रामाश्रमी १।१।४४॥, पृ.२३॥ **१२.** द्र. टीकासर्वस्वम्, भा-१, १।१।४४॥, पृ.३४॥, पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-३९. पृ.६१॥ **१३.** द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-३९, पृ.६१॥, रामाश्रमी १।१।४३॥, पृ.२३॥ **१४.** द्र. पदचन्द्रिका, भा-१,स्वर्गवर्गः, श्लो-३९, पृ.६१॥ **१५.** द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-३६, पृ.५७॥ **१६.** अम. क्षीरस्वामिटीकायां ''वृद्धे श्रवसि अस्येति वृद्धश्रवाः'' इति दृश्यते, १।१।४१॥, पृ.१४॥ **१७.** 'अत्वसन्तस्य चाऽधातोः' ६।४।१४॥ इत्यष्टाध्याय्याम्॥ **१८.** 'साढः' इति १.२.४॥ **१९.** 'तक्षू त्वक्षू तनूकरणे' इति मा.धातुवृत्त्यादौ ॥

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

३।२।१३९॥ इति कित् स्नुः (ग्स्नुः) । **३१-३२** वराः शतं च क्रतवोऽस्य वरशतक्रतुः, तेन **वरक्रतुः शतक्रतुः** । ''शतं क्रतवः प्रतिमा अभिग्रहविशेषाः कार्त्तिकभवेऽस्याऽऽसन्''[ [1] ] इति सिद्धान्तविदः । **३३** कुशैर्दर्भैश्चरति **कौशिकः** । 'तेन चरति[2]'४।४।८॥ इति ठक् । जातमात्रस्यादित्या कुशैश्छादितत्वात्, यत्पुराणम्-

''जातमात्रोऽथ भगवानादित्या स कुशैर्वृतः ।
तदा प्रभृति देवेशः कौशिकत्वमुपागतः ॥३॥''[ [1] ]

इति[3] । कुशिकस्यापत्यं कौशिक इति वा। 'ऋष्यन्धकवृष्णि-'४।१।११४॥ इत्यण् । **३४-३८** पूर्वदिशः, देवानाम्, अप्सरसाम्, स्वर्गस्य, शच्याश्च पतिः, तेन **पूर्वदिक्पतिः, देवपतिः, अप्सरःपतिः, स्वर्गपतिः, शचीपतिः**, यौगिकत्वात् प्राचीशः, सुरस्त्रीशः, नाकेशः, पौलोमीशः इत्यादयः । त्रिभुवनपतिरपि, यल्लक्ष्यम्-''कपर्दी कैलाशं(-सं) त्रिभुवनपतिः स्वं करिवरम्''[ ]इति ॥**१७३**॥ **३९** पृतनां साहयति **पृतनाषाट्**। 'षह मर्षणे'(भ्वा.आ.से.), णिजन्तः, 'सहो ण्विः'३।२।६३॥इति ण्विः, 'सहे साढः (साडः) सः' ८।३।५६॥ इति सस्य षत्वम् । **४०** उग्रं धनुरस्य **उग्रधन्वा**। 'धनुषश्च'५।४।१३३॥ इति सूत्रेणानङन्तादेशैः[4] । उग्रधन्वानौ, उग्रधन्वानः इत्यादि । **४१** मरुतो देवा अनुचरत्वेनाऽस्ये[5] सन्तीति **मरुत्वान्** । 'तदस्यास्त्यस्मिन्निति मतुप्'५।२।९४॥, 'झयः' ८।२।१०॥इति मस्य वत्वम्, 'तसौ मत्वर्थे'१।४।१९॥इति भसंज्ञकत्वात् पदकार्यजश्त्वाभावः । **४२** मघः सौख्यमस्यास्ति **मघवान् ( मघवा )**। मङ्घते[6] इति वा। 'मघिङ्[7] गतौ'(भ्वा.-आ.से.), 'श्वन्नुक्षन्-'(उणा-१५७)इत्यादिना साधुः, 'मघवा बहुलम्'६।४।१२८॥ इति पक्षे त्रादेशाभावः । मघा महामेघा [8]देवविशेषा वा वश्यत्वेनास्य सन्तीति वा । मह्यते पूज्यते जनैरिति वा । 'मह पूजायाम्'(भ्वा.उ.से,चु.उ.से.), ''पृषोदरादित्वात् साधुः''[ ]इत्युज्ज्वलदत्तः । द्वाचत्वारिंशदिन्द्रस्य । शेषश्चात्र-

''इन्द्रे तु[9] खदिरो[10] नेरी[11] त्रायस्त्रिंशपतिर्जयः ।
गौरावस्कन्दी बन्दीको वराणो देवदुन्दुभिः ॥४॥
[12]किणालातश्च हरिमान् यामनेमि[13]रसन्महाः ।
शपीविर्मिहिरो वज्रदक्षिणो वियुतस्तथा[14] ॥५॥''

[शेषनाममाला २।३१-३३]इति ॥

**अस्य तु ।**

**द्विषः [1]पाकोऽ[2]द्रयो [3]वृत्रः [4]पुलोमा [5]नमुचि[6]र्बलः ॥१७४॥ [7]जम्भः**

१ सर्वनाम्नां पूर्वपरामर्शित्वादस्य ऐन्द्रस्य[15] द्विषः शत्रवः, ते चामी पाकादयः । पात्यात्मानं पिबति वा **पाकः**। 'पा रक्षणे'(अ.प.अ), 'पा पाने'(भ्वा.प.अ.) अतो वा, 'इण्भीकापाशल्यतिमर्चिभ्यः कन्'(उणा-३२३)इति कन् । २ अत्ति अद्यते वा **अद्रिः**[16] । 'अद भक्षणे'(अ.प.अ.), 'अदिशदिभूशुभिभ्यः[17] कित् (क्रिन्)'(उणा-५०५)इति सूत्रेण रिन्प्रत्ययः, स च कित् । ३ वर्तते **वृत्रः**। 'वृतु वर्तने' (भ्वा.आ.से.), 'स्फायितञ्चि-'(उणा-१७०)इत्यादिना रक्। ४ पुते लोमान्यस्य **पुलोमा**, नकारान्तः । पृषोदरादित्वात् पुतशब्दे[18]तकारलोपः । ५ न मुञ्चत्यहङ्कारं **नमुचिः** । 'मुच्लृ मोक्षणे'(तु.उ.अ.), 'इगुपधात् कित्'(उणा-५५९)इतीन्, 'नभ्राण्नपात्-'६।३।७५॥इत्यादिना नञः प्रकृतिभावः । ६ बलति **बलः**। 'बल प्राणने'(भ्वा.प.से.), पचाद्यच् ॥**१७४**॥ ७ जम्भते **जम्भः** । 'जभि गात्रविनामे'(भ्वा.आ.से.), पचाद्यच् । ततो 'वध्याद्-भिद्-द्वेषि-जिद्घाति-'[अभि. श्लो.१०]इति वचनात् पाकद्विट्, अद्रिद्विट्, वृत्रद्विट्, पुलोमद्विट्, नमुचिद्विट्, बलद्विट्, जम्भद्विट्, यौगिकत्वात् पाकशासनः, गोत्रभित्, (अद्रिभित्), वृत्रहा, पुलोमारिः, नमुचिसूदनः, बलारातिः, जम्भभिद् इत्यादिः । [सप्त इन्द्रद्विषः]॥

**प्रिया [1]शची[2]न्द्राणी [3]पौलोमी [4]जयवाहिनी ।**

१ अस्येति पूर्वतोऽनुकृष्यते, प्रिया भार्या, शचते[19] व्यक्तं वक्तीति[20] **शची** । 'शच व्यक्तायां वाचि'(भ्वा.आ.से.),

---

१. द्र.स्वोपज्ञटीका २।१७३॥, पृ.४०॥ २. 'चरति' इत्येवाष्टाध्याय्याम् ॥ ३. इतोऽग्रे १प्रतौ 'वा' इति दृश्यते ॥ ४. '-ङन्तादेशे' इति३.४॥ ५. '-त्वेन सन्तीति' इति१॥ ६. 'मघन्ते' इति३॥ ७. 'अघि वघि मघि गत्याक्षेपे' 'मघि कैतवे च' इति क्षीरतरङ्गिण्यादौ॥ ८. 'दिव-' इति१॥ ९. 'इन्द्रे तु' इति२, ४नास्ति ॥ १०. 'नैरी' इति४॥ ११. 'खदिरो' इति शेषनाममालास्वोपज्ञवृत्त्योः ॥ १२. 'किरणा-' इति३॥ १३. '-नेमी-' इति३॥ १४. 'वियुतोऽपि च' इति३, 'वयुनोऽपि च' इति शेषनाममाला, 'वियुनोऽपि च' इति स्वोपज्ञटीकायाम् ॥ १५. '-न्द्रद्विषः' इति१॥ १६. बहुवचनान्तः 'अद्रयः' इति लक्ष्यीकृत्य व्युत्पत्तिरुचिता ॥ १७. '-शुनि-' इति१॥ १८. 'शब्दस्य' इति४॥ १९. 'शचति' इति२.३.४॥ २०. 'व्यक्तीति' इति२.३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'सर्वधातुभ्य इन्'(उणा-५५७)इतीन् शचिः। 'कृदिकारात्-' (गणसू-४।१।४५॥)इति ङीषि शची, तालव्यादिः । ''सर्वेन्द्रियेषु सचते समवैतीति सचिः। 'षच समवाये'(भ्वा.-आ.से.), 'सर्वधातुभ्य इन्'(उणा-५५७), 'धात्वादेः षः सः' ६।१।६४॥ षस्य सः, 'कृदिकारात्-'(गणसू-४।१।४५॥) ङीषि सची दन्त्यादिरपि''[[1]]इति पञ्जिका। २ इन्द्रस्य स्त्री **इन्द्राणी**। 'इन्द्रवरुणभवशर्वरुद्रमृड-'४।१।४९॥इत्यादिना ङीषानुकौ । 'इन्द्रवरुण-'४।१।४९॥ इति सूत्रे ''अनुकि कर्तव्ये दीर्घाकारमानुकं शास्ति, तद् ज्ञापयति 'यतो विहितं ततोऽन्यत्रापि भवति', तेन कीर्याणी गीर्याणीत्यादि सिद्धं भवति''[[2]]इति धातुपारायणम्[3]। अत एव-

''लेखर्षभोऽप्यथ शची स्यादिन्द्राणी शतावरी ।
चारुधारा महेन्द्राणी शक्राणी जयवाहिनी ॥१॥''[[4]]इति

रभसः । ३ पुलोम्नो मुनेरपत्यं **पौलोमी** । 'बह्वादिभ्यश्च' ४।१।९६॥ इतीञ् । ४ जयं वहतीत्येवंशीला **जयवाहिनी** । चत्वारि इन्द्राण्याः । शेषश्चात्र-

''([5]स्यात् पौलोम्यां तु) शक्राणी चारुरावा[6] शतावरी ।
महेन्द्राणी परिपूर्णसहस्रचन्द्रवती॥२॥''[शेषनाममाला २।३४॥] ॥

**तनयस्तु जयन्तः स्याज्जयदत्तो जयश्च सः॥१७५॥**

१ इन्द्रस्य तनयः पुत्रः **जयन्तः** । जयति सर्वोत्कर्षेण वर्तते, जयत्यभिभवति शत्रून् वा । 'जि जये'(भ्वा.प.अ.), 'जि अभिभवे'(भ्वा.प.अ.) अतो वा, 'हृभृ-(तृभू-)' (उणा-४०८)इत्यादिना झच्, 'झोन्तः'७।१।३॥ झस्यान्तादेशः। केचित्तु '-गण्डिमण्डिजनिनन्दिभ्यश्च'[7](उणा-४०८)इति सूत्रे जनिस्थाने[8] जिं पठित्वा झचमानयन्ति । २ जय एनं देयादिति **जयदत्तः**। 'डुदाञ् दाने'(जु.उ.अ.), 'क्तिच्क्तौ च संज्ञायाम्'३।३।१७४॥ इति क्तप्रत्ययः, 'दो दद् घोः'७।४।४६॥ इति दाञः दथादेशः, 'खरि च'८।४।५५॥ चर्त्वम्, 'तितुत्रतथसिसुरसकसेषु च' ७।२।९॥ इतीण्निषेधः । ३ जयति **जयः** । 'जि जये'(भ्वा.-प.अ.), पचाद्यच् । त्रीणि इन्द्रपुत्रस्य । शेषश्चात्र-

''जयन्ते यागसन्तानः''[शेषनाममाला २।३४॥] ॥१७५॥

**सुता जयन्ती तविषी ताविषी**

१ इन्द्रस्य सुता **जयन्ती** । जयति जयन्ती, गौरादित्वाद् ङीष् । २-३ तवति गच्छति **तविषी, ताविषी**। 'तव गतौ' सौत्रो धातुः, 'तवेर्णिद्वा'(उणा-४८)इति इषप्रत्ययः, गौरादित्वात् ङीष् । णित्पक्षे आद्यचो वृद्धिः। त्रीणि इन्द्रसुतायाः ॥

**उच्चैःश्रवा हयः।**

१ इन्द्रस्य हयः **उच्चैःश्रवाः**[9]। उच्चैः श्रवसी अस्य उच्चैःश्रवाः । उच्चैः शृणोति[10] वा । 'श्रु श्रवणे'(भ्वा.प.अ.), '-असुन्'(उणा-६२८)इत्यसुन्, 'सार्वधातुकार्धधातुकयोः' ७।३।८४॥ इति गुणः, 'अत्वसन्तस्य चाधातोः'६।४।१४॥ इति सौ दीर्घः । 'वा शरि'८।३।३६॥इति पक्षे विसर्गस्य सत्वम्, 'स्तोः श्चुना श्चुः'८।४।४०॥ शकारः[11] । द्वे इन्द्रस्य[12] अश्वस्य । ''वृषाश्वः[13]''[शेषनाममाला २।३४॥]इति शैषिकम् ॥

**मातलिः सारथिः**

१ [14]इन्द्रस्य सारथिः **मातलिः** । धातूनामनेकार्थत्वाद् मानं मतम्, मतं लाति मातलिः । 'ला आदाने'(दि.प.अ.), बहुलवचनात् कर्तरि किः[15], 'आतो लोपः-'६।४।६४॥इत्यालोपः । सूतकर्माणि मतानि, मतानि लाति मतलः, मतलस्यापत्यं मातलिरिति वा । 'अत इञ्'४।१।९५॥ । एकमिन्द्रसारथेः। ''हयंकषः''[शेषनाममाला २।३५॥]इति शैषिकम्॥

**देवनन्दी द्वाःस्थः**

१ इन्द्रस्य द्वाःस्थः । द्वारि तिष्ठतीति द्वाःस्थः द्वारपालः, देवान् नन्दयतीत्येवंशीलः **देवनन्दी** । 'टुणदि (टुनदि) समृद्धौ'(भ्वा.प.से.), 'सुप्यजातौ-३।२।७८॥इति णिनिः। देवनन्दिनौ, देवनन्दिनः इत्यादि। एकमिन्द्रद्वारपालस्य ॥

**गजः पुनः ॥१७६॥**
**ऐरावणोऽभ्रमातङ्गश्चतुर्दन्तोऽर्कसोदरः ।**
**ऐरावतो हस्तिमल्लः श्वेतगजोऽभ्रमुप्रियः ॥१७७॥**

---

१. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-४०, पृ.६१॥, तत्र ''धात्वादेः षः सः, षस्य सः, 'कृदिकारात्-' ङीषि'' इति न दृश्यते ॥ २. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-४०, पृ.६१॥, रामाश्रमी १।१।४५॥, पृ.२३॥ ३. अत्र जिज्ञासुभी रामाश्रमी १।१।४५॥, पृ.२३, तथा सिद्धान्तकौमुद्यां 'इन्द्रवरुण-' इत्यत्रत्या तत्त्वबोधिनीव्याख्या द्रष्टव्या, पृ.१४९॥ ४. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-४०, पृ.६१॥ ५. कोष्ठान्तर्गतपाठः १.२.४प्रतिषु नास्ति ॥ ६. 'चारुधारा' इति शेषनाममालास्वोपज्ञटीकयोः ॥ ७. '-गडि-' इत्युणादिगणे ॥ ८. उणादिगणसूत्रे तु 'जि' एव दृश्यते ॥ ९. ३.४ नास्ति ॥ १०. '-णोतीति' इति३.४॥ ११. तेन 'उच्चैश्श्रवाः' इत्यपि बोध्यम् ॥ १२. 'इन्द्रहयस्य' इति३, 'इन्द्राश्वस्य' इति४॥ १३. 'वृषणश्वो' इति शेषनाममालास्वोपज्ञटीकयोः ॥ १४. 'इन्द्रसारथिः' इति१.२॥ १५. 'क्तिः' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ इन्द्रस्य गजो हस्ती ॥१७६॥ इरा मदिरा, तत्प्रधानं वनं इरावणम्, इरावनम् । 'विभाषौषधि-'८।४।६॥ इति वा णत्वम् । इरावणे भव **ऐरावणः** । 'तत्र भवः'४।३।५३॥ इत्यण् । **२** अभ्रात्मको मातङ्गः **अभ्रमातङ्गः** । शाकपार्थिवादित्वाद् मध्यपदलोपी समासः । अभ्रस्थत्वाद्वा अभ्रमातङ्गः । 'अभ्ररूपः' इत्येके । यत्कात्यः-''ऐरावतं विजानीयान्नागमम्बुदगोचरम्''[1]इति । **३** चत्वारो दन्ता अस्य **चतुर्दन्तः** । **४** अर्कस्य सोदरः **अर्कसोदरः**, द्वयोरपि समुद्रोत्पन्नत्वात् । **५** इराः नीराणि नित्यं विद्यन्तेऽस्मिन्निति इरावान् समुद्रः । ''इराम्भोवाक्सुराभूमिषु''[अनेकार्थसङ्ग्रहः २।३८५]इत्यनेकार्थः । इरावति भवः **ऐरावतः**, पुंनपुंसकः[2] । 'तत्र भवः' ४।३।५३॥ इत्यण् । इरावती कश्यपजा अनपत्या पुलहप्रिया, तया संभृतत्वाद्वा । तथा चागमः-''इरावत्या भृतः पुत्रस्यार्थे[3] ऐरावतस्ततः''[4][5] इति । ''ऐरावत एव ऐरावणः, पृषोदरादित्वात् तस्य णत्वम्''[ ]इति केचित् । **६** हस्तिनां मल्लो **हस्तिमल्लः** । **७** श्वेतश्चासौ गजश्च **श्वेतगजः** । **८** अभ्रतीति अभ्रमुः । 'अभ्र वभ्र मभ्र गतौ'[6](भ्वा.प.से.), 'अभ्रेमुः'(हैमोणा-८००)इत्यमुप्रत्ययः । अभ्रे खे माति, न भ्राम्यति वा मन्थरगामित्वात्, यल्लक्ष्यम्-''अभ्रं वा जघनान्तदोलितकरः''[7] । तस्याः प्रियः **अभ्रमुप्रियः** । अष्ट ऐरावणस्य ।

शेषश्चात्र-

''ऐरावणे मदाम्बरः सदादानो भद्रवेणुः[8]''
[शेषनाममाला २।३५॥] **॥१७७॥**

## वैजयन्तौ[1] तु प्रासादध्वजौ

१ इन्द्रस्य प्रासादो ध्वजश्च, वैजयन्ती पताकास्ति अनयोरिति **वैजयन्तौ** । 'अर्शआदिभ्योऽच्'५।२।१२७॥ ''विजयत इति विजयन्तो विष्णुः । 'जि जये'(भ्वा.प.अ.), 'तृभूवहिवसिभासिसाधिगण्डि[9]मण्डिजिनन्दिभ्यश्च'(उणा-४०८)इति झच्, 'झोऽन्तः'७।१।३॥ । तस्यायं वैजयन्तः''[10]इति स्वामी । इन्द्रप्रासादो वैजयन्तः, ध्वजोऽपि वैजयन्तः प्रोच्यते, वैजयन्तीनामा लघुपताका ध्वजेऽस्ति, तद्योगात् । [एकं इन्द्रगृहस्य, ध्वजस्य च] ॥

## पुर्यमरावती[1] ।

१ इन्द्रस्य पुरी, अमराः सन्त्यस्याम् **अमरावती** । 'तदस्यास्त्यस्मिन्निति मतुप्'५।२।९४॥, 'मादुपधायाश्च मतोर्वोऽयवादिभ्यः'८।२।९॥ इति मस्य वत्वम्, 'मतौ बह्वचोऽनजिरादीनाम्'६।३।११९॥ इति दीर्घः । एकमिन्द्रपुर्याः । ''सुदर्शनम्''[शेषनाममाला २।३५॥]इति शैषिकम् ॥

## सरो नन्दीसरः[1]

१ इन्द्रस्य सरः, नन्दीनाम्ना सरः **नन्दीसरः** । एकमिन्द्रसरसः ॥

## पर्षत् सुधर्मा[1]

१ इन्द्रस्य सभा **सुधर्मा** । शोभनो धर्मोऽस्यामिति सुधर्मा । 'धर्मादनिच् केवलात्'५।४।१२४॥ इत्यनिच् । सुधर्माणौ, सुधर्माणः इत्यादि । ''सुधर्मामिव तां सकौशिकां[11] विन्ध्याटवी (विन्ध्याटवीं) विवेश''[12]इति वासवदत्तायामाबन्तत्वे समासान्तो विधिरनित्यः [12]इत्यनिजभावः । यद्वा 'डाबुभ्याम्-'४।१।१३॥ इति डाप्, नकारान्तपक्षे ऋन्नेभ्यो ङीपि प्राप्ते 'अनो बहुव्रीहेः'४।१।१२॥इति प्रतिषेधः । इन्द्रसभाया एकम् ॥

## नन्दनं[1] वनम् ॥१७८॥

१ इन्द्रस्य वनम्, नन्दयति **नन्दनम्** । 'टुणदि (टुनदि) समृद्धौ'(भ्वा.प.से.), हेतुमण्णिच्, 'नन्दिग्रहिपचादिभ्यः-' ३।१।१३४॥ इति ल्युः, 'युवोरनाकौ'७।१।१॥, 'णेरनिटि' ६।४।५१॥इति णिलोपः । इन्द्रवनस्य एकम् ॥१७८॥

## वृक्षाः कल्पः[1] पारिजातो[2] मन्दारो[3] हरिचन्दनः[4] । सन्तानश्च[5]

१ इन्द्रस्य वृक्षाः पञ्च, तन्नामानि, यथा-कल्पः सङ्कल्प इच्छा, [13]तत्पूरकत्वात् **कल्पः** । ''कल्पः सङ्कल्पितोऽर्थस्तस्य वृक्षः''[14]इत्यन्ये । ''कल्पस्थायी वृक्षः''[14]इत्येके । ''कल्पः सङ्कल्पः, तस्य वृक्षः, जन्यजनकसम्बन्धात् कल्पवृक्षः'' [15]इति माधवी । **२** समुद्रपारे जातः **पारिजातः**, पृषोदरादिः ।

---

**१.** द्र. स्वोपज्ञटीका २।१७७॥, अम.क्षीर. १।१।४६॥, पृ.१५॥ **२.** 'नपुंसकः' इति२॥ **३.** '-स्वार्थे' इति१॥ **४.** 'तत्र' इति४॥ **५.** द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-४१, पृ.६२॥ **६.** 'अभ्र वभ्र बभ्र मभ्र चर गत्यर्थाः' इति क्षीरतरङ्गिण्यादौ ॥ **७.** द्र. स्वोपज्ञटीका २।१७७॥, पृ.४१॥, अम.क्षीर. १।१।४६॥, पृ.१५॥ **८.** 'भद्रविष्णुः' इति२, 'भद्ररेणुः' इति शेषनाममालास्वोपज्ञटीकयोः ॥ **९.** '-गडि-' इत्युणादिगणे ॥ **१०.** द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-४१, पृ.६२॥ **११.** '-शिकी' इति२, '-शिकीं' इति १.३॥ **१२.** द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-४३, पृ.६५॥, टीकासर्वस्वे 'सकौशिकां' इत्यस्य स्थाने ''स्वच्छकौशिकां'' इति दृश्यते, भाग-१, १।१।४८॥, पृ.३७॥ **१३.** 'तत्' इति ३प्रतौ नास्ति॥ **१४.** द्र. पदचन्द्रिका, भाग-१. स्वर्गवर्गः, श्लो-४५, पृ.६७॥ **१५.** द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-४५, पृ.६८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"पारिणः पारवतो[1]ऽब्धेर्जातः पारिजात[2]ः"[अम.क्षीर. १।१।५०॥] इति स्वामी[3]। परिजातो जन्यत्वेनास्यास्ति, अर्शआद्यचि पारिजात इति वा। [4]पारिजातः समुद्रः, तत्र भव इति वा । ३ मन्दते मोदयति **मन्दारः** । 'मद स्तुतिमोदमदस्वप्न[कान्ति]गतिषु' (भ्वा.प.से.) अस्माद्धातोः '[5]अगिमदिमन्दिभ्य आरन्'(उणा-४१४)इत्यारन् । "मन्दा आरा धारा अस्य, सरलत्वात्"[[6]] इति श्रीधरः । ४ चन्दति आह्लादयति चन्दनम् । 'चदि आह्लादनदीप्त्यो[7]ः '(भ्वा.प.से.), नन्द्यादित्वाद् ल्युः । हरेश्चन्दनः **हरिचन्दनः**, पुंनपुंसकलिङ्गः। ५ सम्यक् तनोति फलमिति **सन्तानः** । 'तनु विस्तारे'(तना.उ.से.), संपूर्वः, 'तनोतेर्णडुप-संख्यानम्'(वा-३।१।१४०॥)इति णः, णित्त्वाद् वृद्धिः । "गन्धस्य सम्यक् तानो[8] विस्तारोऽस्य सन्तानः"[[6]]इत्यन्ये । "सम्यक् तन्वन्ति विस्तारयन्ति पुष्पाणि सन्त्यस्मिन्नित्यधिकरणे घञ्"[[6]]इत्यपरे ॥

## धनुर्देवा[1]युधम्

१ इन्द्रस्य धनुः, देवानामायुधं **देवायुधम्** । "मेघ-प्रतिफलिता हि रविरश्मयो धनुराकारेण भासन्ते[10]"[अम.क्षीर. १।२।११॥]इति क्षीरस्वामी । एकमिन्द्रधनुषः ॥

**तदृजु रोहितम् ॥१७९॥**

तद् देवेन्द्रधनुः, अर्जयति यश **ऋजु**[11] । 'अर्ज सर्ज अर्जने'(भ्वा.प.से.), 'अर्जि-दृशि-कम्यमि-पंसि(पशि)-'(उणा-२७)इत्युप्रत्ययः, अर्जेः ऋजिरादेशः । रोहः सञ्जातोऽस्य **रोहितम्,** तारकादित्वादितच् । रोहितवर्णत्वाद्वा। केचित्तु-"ऋजुरोहितम्"[[12]]इति समस्तमिच्छन्ति । तदिन्द्रधनुः ऋजु सरलमवक्रम्, तस्य नामैकम् । ऋजु इदं तूत्पाते भवति ॥१७९॥

## दीर्घर्ज्वै[1]रावतम्

१ तद्देवेन्द्रधनुः दीर्घं ऋजु च दीर्घर्जु, अत्र कर्म-धारयः । इरावति मेघेऽब्धौ वा भवम् **ऐरावतम्** । 'तत्र भवः'४।३।५३॥ इत्यण् । पुंक्लीबलिङ्गः। इदं वर्षासु भवति। प्रलम्बसरलधनुष एकम् ॥

**वज्रं[1] त्वशनि[2]र्ह्रादिनी[3] स्वरुः[4] ।**
**शतकोटिः[5] पविः[6] शम्बो[7] दम्भोलि[8]र्भिदुरं[9] भिदुः[10] ॥१८०॥**
**व्याधामः[11] कुलिशः[12]**

१ वजति यात्येव न प्रतिहन्यते क्वापीति **वज्रम्,** पुंक्ली. । 'वज गतौ'(भ्वा.प.से.), 'ऋज्रेन्द्रा-'(उणा-१८६) इति रक् । "व्रजोऽस्त्री हीरके पवौ"[अमरकोषः ३।३।१८४॥] इत्यनेकार्थः । "अस्त्रियौ वज्रकुलिशौ दम्भोलिरशनिर्द्वयोः" [[13]]इति संसारावर्त्तः । २ अश्नाति शैलान्, अश्यते भुज्यते वा स्वाराज्यमनेनेति **अशनिः**, पुंस्त्री। 'अश भोजने'(क्र्या.प.अ.), 'अर्त्तिसृधूववस्यम्य (अर्त्तिसृधृधम्यम्य)श्यवितृभ्योऽनिः[14]'(उणा-२५९)इत्यनिन्। अश्नुते व्याप्नोत्यरीन् ज्वालाभिरिति वा । "न शनैर्यातीति पृषोदरादित्वात्"[अम.क्षीर. १।१।४७॥]इति स्वामी[15]। "स्त्रीपुंसयोः स्यादशनिश्चञ्चलायां पवावपि"[ ]इति गौडः । " 'वज्राशनिः' इति समुदितं नामाऽस्येत्यपि"[ ]इति केचित्। "वज्राशनिं विदुर्वज्रम्"[त्रिकाण्डशेषः १।१।६१॥]इति [16]त्रिकाण्डशेषात्[17] । "अथ वज्राशनिर्द्वयोः"[[17]]इति नामनिधा-नाच्च । ३ ह्रादत्यव्यक्तं वक्ति अवश्यं **ह्रादिनी** । 'ह्राद अव्यक्ते शब्दे'(भ्वा.आ.से.), आवश्यके णिनिः। ह्रादः स्फूर्जथुरस्त्यस्या इति वा। 'अत इनिठनौ'५।२।११५॥ इतीनौ ह्रादिनी, स्त्रीलिङ्गः। ४ स्वरत्युपतापयति दैत्यानिति **स्वरुः**, पुंसि । 'स्वृ शब्दोपता-पयोः'(भ्वा.प.अ.), 'शृस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्दि-मनिभ्यश्च'(उणा-१०)इति उः । "सु शोभनानि अरूंषि धारा अस्येति वा स्वरुः, सकारान्तः"[अम.क्षीर. १।१।४७॥]इति स्वामी[18]। ५ शतानि दशशतानि कोटयो धारास्येति **शतकोटिः,** पुंसि । "शतं बह्व्यः कोटयोऽस्य"[[19]]इत्यन्ये । ६ पुनाति वैरं **पविः**, पुंसि । 'पूञ् पवने'(क्र्या.उ.से.), 'अच इः'(उणा-५७८)इति इः । हीरकस्य पवित्रत्वोक्तेः । "वज्रोऽस्त्री हीरके

---

१. '-वातो-' इति१॥ २. 'पारिजातकः' इति अम.क्षीर. टीकायाम्, १।१।५०॥, पृ.१६॥ ३. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-४५, पृ.६७॥ ४. 'परि-' इति२॥ ५. 'अङ्गि-' इत्युणादिगणे ॥ ६. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-४५, पृ.६७॥, रामाश्रमी १।१।५०॥, पृ.२६॥ ७. 'चदि ह्लादने दीप्तौ च' इति स्वामी, '-आह्लादने' इति सायणः ॥ ८. '-णस्योप-' इति काशिकावृत्तौ ॥ ९. 'ततो' इति३॥ १०. अम.क्षीरस्वामिटीकायां 'दृश्यन्ते' इति दृश्यते, १।२।११॥, पृ.२५॥ ११. 'ऋजुः' इति३.४॥ १२. द्र. स्वोपज्ञटीका २।१७९॥, पृ.४२॥ १३. द्र. पदचन्द्रिका, स्वर्गवर्गः, श्लो-४२, पृ.६३॥ १४. '-ऽनि' इत्युणादिगणे ॥ १५. अम.क्षीर.टीकायां 'न शनैर्याति वा' इत्येव दृश्यते, १।१।४७॥, पृ.१५॥ १६. त्रिकाण्डशेषे "वज्राशनिर्भिदुर्भिद्रो" इति दृश्यते, १।१।६१॥, पृ.२६६॥ १७. द्र. पदचन्द्रिका, स्वर्गवर्गः, श्लो-४२, पृ.६४॥, रामाश्रमी १।१।४७॥, पृ.२५॥ १८. अम. क्षीरस्वामिटीकायां "शोभनान्यरूंषि धारा अस्येति सान्तो वा" इति दृश्यते, १।१।४७॥, पृ.१४॥. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-४२, पृ.६४॥ १९. द्र. अम.क्षीर. १।१।४७॥, पृ.१५॥, स्वोपज्ञटीका २।१८०॥, पृ.४२॥, पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-४२, पृ.६४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पवौ''[अमरकोषः ३।३।१८४॥]इत्युक्तेर्न सकारान्तत्वाशङ्का । ७ शमयत्यरीन् **शम्बः** । अन्तर्भावितणयर्थात् 'शमेर्बन्'(उणा-५३४)इति बन्। कार्यं कृत्वा शाम्यति तिष्ठतीति वा । शं शुभमस्यास्त्यभेद्यत्वाद्वा। 'कंशंभ्यां बभयुस्तितुतयसः'५।२।१३८॥ इति बः। ''तालव्या अपि दन्त्याश्च शम्बशूकरपांशवः''[[1]] इत्यूष्मविवेकाद् दन्त्यादिरप्ययम् । ८ दभ्नोति खेदयति दानवानिति । दम्भाद् आटोपाल्लीयते श्लेषयतीति वा **दम्भोलिः**, पृषोदरादिः। ''दभ्नोति खेदयति, ओलिप्रत्यये बाहुल्ये दम्भोलिः, पुंसि''[ ]इति स्वामी[2] । ९ भेदनशीलत्वाद् **भिदुरम्**, क्लीबे। 'भिदिर् विदारणे'(रु.उ.अ.), 'विदिभिदिच्छिदेः कुरच्'३।२।१६२॥ ।''कर्मकर्त्तरि चायमिष्यते इत्यत्र चकारः कर्त्तरीत्यनुकर्षणार्थः, तेनाकर्मकर्त्तर्यपि भवति''[[3]]इति वामनाचार्यः । तथा च-''गुरुमत्सरच्छिदुरया''[शिशुपालवधम्, सर्गः-६, श्लो-८]इति माघः। केचित्तु 'भिदिरम्'[ ]इति पठन्ति, तत्र 'इषिमदि-'(उणा-५१)इत्यादिना किरच्। **१०** भिनत्ति पर्वतानिति **भिदुः**, पुंसि । 'भिदिर् विदारणे'(रु.उ.अ.), 'पृभिदिव्यधिगृधिधृषि[4]हृषिभ्यः कुः'(उणा-२३)इति कुः ॥१८०॥ **११** विशेषेण आदधाति भयं दैत्यानामिति **व्याधामः** । 'डुधाञ् धारणपोषणयोः'(जु.उ.अ.), 'अर्त्तीरि-'(हैमोणा-३३८)इति मः। **१२** कुलौ हस्ते शेते **कुलिशः**, पुंक्ली. । 'शीङ् स्वप्ने' (अ.आ.से.), 'अन्यत्रापि दृश्यते'(वा-३।२।४८॥)इति डः, डित्त्वाट्टिलोपः। ''कुलिर्हस्तो भुजादलः''[त्रिकाण्डशेषः २।६।२६॥]इति त्रिकाण्डशेषः । यद्वा कुलिनः पर्वतान् श्यति पक्षच्छेदेन तनूकरोति ।'शो तनूकरणे'(दि.प.अ.), 'अन्यत्रापि दृश्यते'(वा-३।२।४८॥)इति डः ।''कुत्सितं लिशति तक्ष्णोति गिरीन् वा।'लिश श्लेषणे[5]'(तु.प.से.), 'इगुपधज्ञाप्रीकिरः कः' ३।१।१३५॥ इति कः''[[6]]इति स्वामी[7] । द्वादश वज्रस्य ॥

## अस्यार्चिरतिभीः

१ अस्य वज्रस्यार्चिः ज्वाला **अतिभी**[8]: । अतिशयेन बिभेत्यस्याः अतिभीः, स्त्रीलिङ्गः । 'ञिभी भये'(जु.प.अ.), क्विबन्तः । एकं वज्रज्वालायाः ॥

## स्फूर्जथुर्ध्वनिः ।

१ अस्य वज्रस्य ध्वनिः **स्फूर्जथुः**, पुंसि । 'टु[ओ] स्फूर्जा वज्रनिर्घोषे'(भ्वा.प.से.), 'ट्वितोऽथुच्'३।३।८९॥ इत्यथुच् । एकं वज्रध्वनेः ॥

## स्वर्वैद्यावश्विनीपुत्रावश्विनौ वडवासुतौ ॥१८१॥
## नासिक्यावर्कजौ दस्रौ नासत्यावब्धिजौ यमौ ।

१ स्वः स्वर्गस्य वैद्यौ **स्वर्वैद्यौ** । २ वडवारूपिणी संज्ञारूपयोगादश्विनी, तस्याः पुत्रौ **अश्विनीपुत्रौ** । यौगिकत्वाद् आश्विनेयौ ।'स्त्रीभ्यो ढक्'४।१।१२०॥ इति ढक् । ३ अश्वो नित्यं विद्यतेऽनयोः **अश्विनौ** । 'अत इनिठनौ'५।२।११५॥ इतीनिः । ([9]सदारूढावित्यर्थः । अश्विन्यां जाताविति नक्षत्राणि[10]: 'नक्षत्रेभ्यो बहुलम्'४।३।३७॥ इति लुकि 'लुक् तद्धितलुकि' १।२।४९॥ इति ङीपो लुकि अश्विनौ नान्तौ ह्रस्वादी) । ''सदाश्वारूढत्वादश्वयोगादश्विनौ''[[11]]इति तु स्वामी[12] । ४ वडवायाः सुतौ **वडवासुतौ** ॥१८१॥ ५ ''संज्ञानामा सूर्यस्य स्त्री उत्तरकुरौ धृताश्वरूपा तपस्यन्ती आसीत्, रविरपि तत्सङ्गमेच्छुः तुरङ्गरूपी सङ्गमगात्, स च तयान्यपुरुषधिया निरस्तः सन् तन्नासापुटद्वये रेतोऽभ्यषिञ्चत, तत्र तौ जातौ''[ ]इत्याश्चर्यपर्व[13] । अतो ''नासिकाभवत्वेन नासिक्यवर्णसदृशौ **नासिक्यौ** । अश्विन्या नासिकारन्ध्रयो रवे रेतःपातादुत्पन्नौ''[[14]]इति हि प्रसिद्धिः । ६ अर्काज्जातौ **अर्कजौ** । ७ दस्यत उत्क्षिपतो[15] रोगानिति

---

१. द्र. रामाश्रमी १।१।४७॥, पृ.२५॥, अमरकोशस्य मल्लिनाथसूरिकृताऽमरपदपारिजातटीका, भा-१, १।१।४७॥, पृ.३४॥ २. अम.क्षीरस्वामिटीकायां ''दभ्नोति खेदयति दम्भोलिः'' इत्येव दृश्यते, १।१।४७॥, पृ.१५॥ ३. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-४२, पृ.६३॥ ४. '-भृषिभ्यः' इत्येवोणादिगणे दृश्यते ॥ ५. 'लिश अल्पीभावे' अथवा 'लिश गतौ' इति पाठ्यम्, 'लिश श्लेषणे' इत्यास्यादर्शनात् ॥ ६. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-४२, पृ.६३, तत्र ''कुलिनः पर्वतान् श्यति पक्षच्छेदेन तनूकोरोति, कुत्सितं लिशति तक्ष्णोतीति वेति तु स्वामी'' इति दृश्यते ॥ ७. अम. क्षीरस्वामिटीकायां ''कुत्सितं लिक्षति तक्ष्णोत्यरीन् वा'' इत्येव दृश्यते, १।१।४७॥, पृ.१५॥ ८. '-भिरुच्यते' इति३॥ ९. कोष्ठान्तर्गतपाठः १प्रतौ न दृश्यते ॥ १०. २प्रतौ नास्ति ॥ ११. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-४६, पृ.६९॥ १२. अम. क्षीरस्वामिटीकायां ''अश्विनौ सदाश्वाधिरूढौ'' इति दृश्यते, १।१।५१॥, पृ.१६॥ १३. ''संज्ञानामादित्यमहिला उत्तरकुरावश्वरूपधारिणी प्रागासीत्। आदित्योऽपि तत्सङ्गमेच्छुरश्वरूपेण तत्सन्निधिमगमत् । स तयान्यपुंशङ्कया निरस्तः सन् तन्नासापुटद्वये रेतो निषिक्तवान् । तत्र तौ जातावित्याश्चर्यपर्वणि ।'' इति टीकासर्वस्वम्, भा-१, १।१।५१॥, पृ.३८॥, पदचन्द्रिकायां ''संज्ञा च सूर्यस्त्री उत्तरकुरौ धृताश्वरूपा तपस्यन्त्यासीत् । सूर्योऽपि तत्सङ्गमेच्छुस्तुरगरूपी समीपमगात् । स च तयान्यपुरुषधिया निरस्तः सन् तन्नासापुटद्वये रेतो न्यषिञ्चत । तत्र तौ जातावित्याश्चर्यपर्व ॥'' इति दृश्यते, स्वर्गवर्गः, श्लो-४६, पृ.६८॥ १४. द्र. स्वोपज्ञटीका २।१८१॥, पृ.४२॥ १५. '-पतौ रोगाविति' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**दस्रौ** । 'तसु उत्क्षेपे[१], दसु च'(दि.प.से.)इत्यतः 'स्फायितञ्चि-'(उणा-१७०)इति रक् । ८ नासां त्यक्तवन्ताविति **नासत्यौ** । 'त्यज हानौ'(भ्वा.प.अ.), 'अन्येभ्योऽपि (अन्येष्वपि) दृश्यते'(वा-३।२।४८॥)इति डः, डित्त्वाट्टिलोपः, 'ङ्यापोः संज्ञाच्छन्दसोर्बहुलम्'६।३।६३॥ इति नासाशब्दस्य ह्रस्वत्वम् । यद्वा अत एव नासाभवत्वात् सत्सु साधू सत्यौ । 'तत्र साधुः'४।४।९८॥ इति यत् । ''न सत्यौ असत्यौ, पुनर्नञ्समासे 'नभ्राण्नपात्-'६।३।७४॥ इत्यादिना नञः प्रकृतिभावः[२]''[अम.क्षीर. १।१।५१॥]इति तु स्वामी[३]। न असत्सु साधू नासत्यौ इति वा । ९ अब्धेर्जातौ **अब्धिजौ** । 'जनी प्रादुर्भावे'(दि.आ.से.), 'पञ्चम्यामजातौ'३।२।९८॥ इति डः। **१० यमौ** युग्मरूपौ । सर्व एवामी नित्यद्विवचनान्ताः, पुंल्लिङ्गाश्च[४] । यद्यपि ''देव्यां तस्यामजायेतां नासत्यो दस्र एव वै''[३]इति मार्कण्डेयपुराणम्, ''एते वयं वृत्ररिपुस्तथैतौ नासत्यदस्रौ वरुणस्तथा [-थैव]''[५]इति वायुपुराणे[६]। उत्पलिन्यां च-

''वैवस्वतो मनुर्नाम यमौ च यमुनायमौ ।
नासत्यदस्ररेवन्ताः षट्संज्ञायां रवेः सुताः ॥१॥''

[ ]इति व्याडिः, भेदस्तथापि अनयोरेकार्थत्वात्, समानसर्वप्रकारकत्वाच्च अभेदोऽपि, यथा भारते ''उभावेतौ न सोमार्हौ नासत्याविति मे मतिः''[ ] । तथा च माघे ''अनुसस्रतुस्तयोः सुतौ''[शिशुपालवधम्, सर्गः-१३, श्लो-२३]इति । यदा हि[७] नासत्ये उपचाराद् दस्रोऽपि वर्तते, तदा नित्यद्विवचनान्तता, न त्वेकवृत्तिः। यच्च 'नभ्राण्नपात्-'६।३।७६॥ इति सूत्रे नासत्या इत्येकस्मिन्नपि नासत्ये बहुत्वमारोप्य बहुवचनम्, ([८]तच्चारोपित बहुत्वमेकस्मिन्नपि बहुवचनं) भवतीति ज्ञापनार्थम्, तेन गुरुष्वित्याद्युपपन्नं भवति[ ]इति कौमुदी। ''यमजत्वाद् द्वित्वम्''[ ]इत्यन्ये । तथा च भागुरिः ''नासत्यदस्रौ यमजावाश्विनेयौ यमाविति''[ ]। एकत्वमपि, ''दीप्यमानं ततश्चलमश्वासुतविपुलं पुच्छम्''[ ]इति भारतोक्तेः। दश स्ववैद्ययोः । शेषश्चात्र-

''नासिक्ययोस्तु **नासत्यदस्रौ प्रवरवाहनौ** ।
गदान्तकौ यज्ञवहौ''[शेषनाममाला २।३६॥] ॥

## विश्वकर्मा पुनस्त्वष्टा विश्वकृद् देववर्धकिः ॥१८२॥

१ विश्वं करोति **विश्वकर्मा** । 'डुकृञ् करणे'(त.-उ.अ.), '-मनिन्'(उणा-५८४)इति मनिन्[९] । २ त्वक्षति **त्वष्टा**। 'त्वक्ष (त्वक्षू) तनू करणे'(भ्वा.प.से.), 'नप्तृनेष्टृत्वष्टृहोतृपोतृमातृभ्रातृजामातृपितृदुहितृ'(उणा-२५२)अनेन[१०] निपातितः[११] । ३ विश्वंकरोति **विश्वकृत्**, क्विप् । ४ देवानां वर्धकिः **देववर्धकिः** । चत्वारि देवसूत्रधारस्य ॥१८२॥

## स्वःस्वर्गिवध्वोऽप्सरसः स्वर्वेश्यास्तूर्वशीमुखाः[१२] ।

१-२ स्वश्च स्वर्गी च स्वःस्वर्गिणौ, तयोर्वध्वः । द्वन्द्वान्ते श्रूयमाणं वधूपदं प्रत्येकमभिसम्बध्यते, तेन **स्वर्वध्वः**, **स्वर्गिवध्वः** । यौगिकत्वात् स्वर्गस्त्रियः, सुरस्त्रियः । ३ समुद्रप्रभवत्वाददृभ्यः सरन्ति **अप्सरसः** । 'ऋ सृ गतौ'(जु.प.अ.), 'सर्त्तेरसुन्[१३]'(उणा-६७६)इत्यसुन् । अपः सारयन्ति स्खलयन्तीति वा । औणादिकोऽसिप्रत्ययः, पृषोदरादित्वादुपधह्रस्वत्वमपशब्दस्यान्त्याकारलोपश्च । यद्वा आप्यन्ते पुण्यैरित्यप्सरसः। 'आपोऽपाप्ताप्सरोजश्च (-रोब्जाश्च)'(हैमोणा-९६४)इत्यस्[१४], बहुवचनान्तः, स्त्रीलिङ्गोऽयम् । एकवचनेऽपि[१५], 'चयो द्वितीयाः शरि पौष्करसादेरिति वक्तव्यम्'(वा-८।४।४७॥)इति, अत्र वामनाचार्येण 'अप्सराः' इत्युदाहृतत्वात्[१६], ''स्त्रियां बहुष्वप्सरसः स्यादेकत्वेऽप्सरा अपि''[१७]इति शब्दार्णवाच्च । शुंभयाशब्दवद् रूपम्[१८] ।

''सान्द्रबाणपट[१९]संवृतमूर्तेर्दन्तिदन्तशयनीयशयस्य ।
मानिनः कुलवधूरिव रागादप्सरा व्यधितपार्श्वमशून्यम् ॥१॥''[२०]

१. 'उपक्षये' इति स्वामिसायणौ ॥ २. अम. क्षीरस्वामिटीकायां ''न- असत्यावसाधू नासत्यौ, नभ्राण्नपादिति (६।३।७५-७५९) नञ् प्रकृत्या'' इति दृश्यते, १।१।५१॥, पृ.१६॥ ३. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-४६, पृ.६९॥, रामाश्रमी १।१।५२॥, पृ.२७॥, तत्र 'वै' इत्यस्य स्थाने 'च' इति दृश्यते ॥ ४. '-ङ्गाः' इति१.२॥ ५. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-४६, पृ.६९॥ ६. द्र. विष्णुपुराणम्, भा-२, अंशः-५, अध्यायः-१, श्लो-५७, पृ.१३५॥, तत्र ''एते वयं वृत्ररिपुस्तथायं नासत्यदस्रो वरुणस्तथैव ।'' इति दृश्यते ॥ ७. १.२नास्ति ॥ ८. कोष्ठान्तर्गतपाठः १प्रतौ नास्ति ॥ ९. 'मनिप्' इति१.३॥ १०. 'अनेनेति' इति१॥ ११. 'निपातः' इति३॥ १२. ''स्वर्वेश्या उर्वशीमुखाः'' इति मुद्रिताभिधानचिन्तामणौ ॥ १३. 'सर्त्तेरप्पूर्वादसिः' इत्युणादिगणे ॥ १४. 'इत्यसुन्' इति३॥ १५. '-नोऽपि' इति३॥ १६. वामनाचार्यकृतवामनीयलिङ्गानुशासनस्वोपज्ञवृत्तौ ''अप्सरसः देवयोषित् । पृथगुपन्यासात् इयमप्सरा इत्येकवचनमपि'' इति दृश्यते, पृ.१६॥ १७. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-४७, पृ.७०॥, रामाश्रमी १।१।५२॥, पृ.२७॥ १८. इदं चिन्त्यम्, अप्सरश्शब्दस्य सान्तत्वात्॥ १९. '-पट्टसंभृत-' इति३॥ २०. अमरकोषस्यामरपदपारिजातटीका, भा-१, १।१।५३॥, पृ.३७, तत्र '-बाण-' इत्यस्य स्थाने 'काण्ड' इति दृश्यते, पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-४७, पृ.७०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति प्रयोगः । ४ स्वः स्वर्गस्य[1] वेश्याः **स्वर्वेश्याः**। स्वरिति स्वर्गिणोऽप्युपलक्षणम्, तेन देवगणिका इत्यपि । ५ उरून् महतो वष्टि कामयते वशीकरोति वा **उर्वशी,** पञ्चमस्वरादिः। 'वश कान्तौ'(अ.प.से.), पचाद्यचि, गौरादित्वाद् ङीष्, पृषोदरादित्वादुरुशब्दस्योकारलोपः । ऊरू (ऊरूम्) अश्नुते व्याप्नोतीति वा, नारायणोरुद्भवत्वात् । पृषोदरादित्वाद् ह्रस्वत्वे 'इको यणचि'६।१।७७॥ इति यणादेशः । ''पूर्ववदन्यत्''[2]इति स्वामी । एवं ह्रस्वादिस्तालव्यान्त उर्वशीशब्दः । तथा च शतपथे-''उर्वशीहाप्सराः पुरूरवसमैलं चकमे''[2]इति । माघे च-''दधत्युरोजद्वयमुर्वशीतलं भुवो गतेव स्वयमुर्वशी तलम्'' [शिशुपालवधम्-१।८६]। ''ऊरौ उषितेति 'वस निवासे' (भ्वा.प.अ.)इत्यत्र ऊर्वसी दीर्घादिदन्त्यान्ता, पृषोदरादित्वाद् व्युत्पादिता''[2]इति वर्णदेशना[3] । तथा च हरिवंशे-''नारायणोरुं निर्भिद्य संभूता वरवर्णिनी''[4] । मुखशब्देन आद्यर्थेन रम्भामेनकादीनां ग्रहणम् । यद् व्याडिः-

''अथ ब्रह्मणोऽग्निकुण्डात् समुत्पन्ना प्रभावती ।
वेदितलाद् वेदिवती यमात् पुनः सुलोचना ॥२॥
उर्वशी तु हरेः सव्यमूरुं भित्त्वा विनिर्गता ।
रम्भा तु ब्रह्मणो [5]वक्त्राच्चित्रलेखा तु तत्करात् ॥३॥
शिरसस्तु महाचित्ता स्मृता काकलिसा[6] चसा[7] ।
मारीची सूचिका चैव विद्युत्पर्णा तिलोत्तमा ॥४॥
अद्रिका लक्षणा क्षेमा दिव्या रामा मनोरमा ।
हेमा सुगन्धा सुवपुः[8] सुबाहुः सुव्रता सिता ॥५॥
शारद्वती पुण्डरीका सुरसा सूनृतापि च ।
सुवाता कोमला[9] हंसपादी च सुमुखीति च ॥६॥
मेनका[10] सहजन्या च पर्णिनी पुञ्जिकास्थला ।
ऋतुस्थला[11] घृताची च विश्वाचीत्यप्सरःस्त्रियः ॥७॥''

[12] । चत्वारि स्वर्वेश्यायाः ॥

## हाहादयस्तु गन्धर्वा गान्धर्वा देवगायनाः ॥१८३॥

१ गायन् हा इति कुत्सितध्वनिं जहाति हाहाः, पुंसि। 'ओहाक् त्यागे'(जु.प.अ.), विच्प्रत्ययः। क्विबन्तत्वाभावेनाऽधातुत्वाद् द्वितीयाबहुवचने हाहान् इति । टादौ तु 'आतो धातोः'६।४।१४०॥ इति योगविभागादाकारलोपे हाहा इत्यादि । बहुलवचनाद् 'मिथुनेऽसिः'(उणा-६६२)इत्यसौ हाहाः, सकारान्तोऽपि, ''गन्धर्वः प्रीतिहाहसोः''[13]इति संसारावर्त्तात्, ''गन्धर्वो हाहसि प्रोक्तः''[14]इति रत्नकोषाच्च। केचित्तु 'हाहाहूहूः' इति समुदितं नामाहुः। अन्ये तु, ''हहा आदिह्रस्वोऽव्युत्पन्नो, हुहुराद्यन्तर्ह्रस्वोऽपि''[15]इत्याहुः। तथा च ''गीतमाधुर्यसंपन्नौ विख्यातौ च हहाहुहुः''[14]इति व्यासः । ''हंसो हहाहुहू च द्वौ वृषाणश्वश्च तुम्बुरुः''[14]इति शब्दार्णवः । आदिशब्देन हूहूतुम्बुरुविश्वावसुचित्ररथादीनां ग्रहणम् । अत्रानुक्तोऽपि हूहू व्युत्पाद्यते । हू इति कृत्वा ह्वयतीति हूहूः। 'ह्वेञ् स्पर्धायां शब्दे च'(भ्वा.उ.अ.), क्विप्, वच्यादीनां संप्रसारणम्, 'हलः'६।४।२॥इति दीर्घः, 'संप्रसारणाच्च'६।१।१०८॥ इति पररूपत्वम् । शृङ्गारप्रकरणे हाहाहूहूशब्दयोरव्ययत्वमप्युक्तम्। गन्धं सौरभमर्वति **गन्धर्वः**। 'अर्व पर्व मर्व गतौ'[17](भ्वा.प.से.), कर्मण्यण्, शकन्ध्वादित्वात् पररूपत्वम्। गानं[18]धर्म एषामिति, पृषोदरादित्वाद्वा । २ गन्धयन्ते हिंसन्ति दुःखं गन्धर्वाः 'गन्धेरर्चातः(-न्तः)' (हैमोणा-५०८)इति वाः (वः)। गौर्ध्रियते वाक् सप्तमस्वरसंपन्ना तिष्ठत्यत्रेति वा, पृषोदरादिः । गन्धर्वा एव **गान्धर्वाः**। स्वार्थेऽण्। देवानां गायनाः **देवगायनाः** । ''अपि गन्धर्वगान्धर्वाः दिव्यगायनगानवः''[19]इति शब्दार्णवः । त्रीणि देवगन्धर्वस्य ॥१८३॥

## यमः कृतान्तः पितृदक्षिणाशा-

१. 'स्वर्गवेश्याः' इति३॥ २. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-४६, पृ.७०॥ ३. ''वस निवासे' । ऊरावुषितेति पृषोदरादित्वाद् व्युत्पादिते दीर्घादिदन्त्यस इति केचिदिति वर्णदेशना ॥'' इति टीकासर्वस्वम्, भा-१, १।१।५॥, पृ.३९॥ ४. द्र. टीकासर्वस्वम्, भा-१, १।१।५॥, पृ.३९॥, पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-४७, पृ.७०॥ ५. 'वक्त्राचित्र-' इति२.४॥ ६. 'ककलिका' इति१.२.४॥ ७. 'वसा' इति स्वोपज्ञवृत्तौ २।१८३॥, पृ.४३॥ ८. 'सुनपुः' इति१, 'सुतपुः' २.४॥ ९. 'कामला' इति स्वोपज्ञवृत्तौ २।१८३॥, पृ.४३॥ १०. 'मेनिका' इति३॥ ११. '-स्थली' इति३॥ १२. द्र. स्वोपज्ञटीका २।१८३॥, पृ.४३॥ १३. द्र. टीकासर्वस्वम्, भा-१, १।१।५२॥, पृ.३९॥, पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-४७, पृ.७१॥, तयोः 'प्रीति-' इत्यस्य स्थाने 'गीति-' इति दृश्यते, रामाश्रमी १।१।५२॥, पृ.२७॥, तत्र 'प्रीति-' इत्यस्य स्थाने 'वीति-' दृश्यते ॥ १४. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-४७, पृ.७१॥, रामाश्रमी १।१।५२॥, पृ.२७॥ १५. इतोऽग्रे ४प्रतौ 'इत्येके' इति दृश्यते ॥ १६. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-४७, पृ.७१॥ १७. मा. धातुवृत्तौ '-अर्ब पर्ब बर्ब मर्ब-' इति गत्यर्थकाः पवर्गीयान्ता धातवो दृश्यन्ते ॥ १८. 'गानधर्म' इति१॥ १९. द्र. टीकासर्वस्वम्, भा-१, १।१।५२॥, पृ.४०॥, पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-४७, पृ.७२॥, रामाश्रमी १।१।५२॥, पृ.२७॥, तासु टीकासु '-गानवः' इत्यस्य स्थाने '-गातवः' इति दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**प्रेता[5]त् पतिर्दण्ड[6]धरोऽर्कसूनुः[7] ।**
**कीनाश[8]मृत्यू[9] सम[10]वर्तिकालौ[11]**
**शीर्णा[12]ङ्घ्रिर्ह[13]र्य[14]न्तकधर्म[15]राजाः ॥१८४॥**
**यम[16]राजः श्राद्ध[17]देवः शम[18]नो महि[19]षध्वजः ।**
**कालि[20]न्दीसोदरश्चापि**

१ यमयति **यमः** ।'यम[1] उपरमे'(भ्वा.प.अ.), हेतुमण्णिजन्तात् पचाद्यच् । यमलजातत्वाद्वा । २ कृतोऽन्तो विनाशोऽनेन **कृतान्तः** ।'निष्ठा'२।२।३६॥इति सूत्रेण निष्ठान्तकृतशब्दस्य प्राक्प्रयोगः । ३-५ पितृशब्दात्, दक्षिणाशाशब्दात्, प्रेतशब्दाच्च परतः पतिशब्दो योज्यः, तेन **पितृपतिः**, **दक्षिणाशापतिः**, **प्रेतपतिः** । ६ कालाख्यस्य दण्डस्य धरो **दण्डधरः** ।'धृञ् धारणे'(भ्वा.उ.अ.), पचाद्यच् । ७ अर्कस्य सूनुः पुत्रः **अर्कसूनुः** । ८ क्लिश्यति (क्लिश्नाति) लोकान् **कीनाशः** ।'क्लिशू विबाधने[2]'(क्र्या.प.वे.), 'क्लिशेरीच्चोपधायाः शन् लोपश्च लो नाम् च'(उणा-७३४)इति सूत्रेण शन्प्रत्ययः, उपधाया ईत्, लस्य लोपः, नामागमः । कनति दीप्यते वा कीनाशः ।'कन दीप्तौ[3]'(भ्वा.प.से.), 'कनेरिच्चातः' (हैमोणा-५३४)इत्यार्शप्रत्ययः। ९ म्रियतेऽनेन **मृत्युः**, पुंसि । 'मृङ् प्राणत्यागे'(तु.आ.अ.), 'भुजिमृङ्भ्यां युक्त्युकौ'(उणा-३०१)इति त्युक्। **१०** शत्रुमित्रयोः राज्ञि रङ्के च समं वर्तितुं शीलमस्य **समवर्ती** । 'वृतु वर्तने'(भ्वा.आ.से.), 'सुप्यजातौ-'३।२।७८॥इति णिनिः, 'सौ च'६।४।१३॥ इति सौ परे दीर्घः । **११** कलते प्राणिनां धर्माधर्माविति **कालः** ।'कल संख्याने[4]'(भ्वा.आ.से), अतो भौवादिकाद् बहुवचनात् कर्तरि घञ् ।''कलयति क्षिपयत्यायुः''[अम.क्षीर.१।१।५९॥]इति स्वामी[6], पचाद्यच् । १२ शीर्णावङ्घ्री अस्य **शीर्णाङ्घ्रिः** । शनैश्चरेणास्य दृशाऽवलोकितौ पादौ दग्धाविति हि प्रसिद्धिः । **१३** हरति प्राणान् **हरिः**। 'हृञ् हरणे'(भ्वा.उ.अ.), 'अच इः'(उणा-५७८)इति इः । **१४** अन्तं करोति **अन्तकः**।'तत्करोति तदाचष्टे'(गणसू-३।१।२६॥)इति चुरादित्वात् सुबन्ताण्णिजन्ताद् 'ण्वुल्तृचौ'३।१।१३३॥ इति ण्वुल् । **१५** यथापराधदण्डदानाद् धर्मोऽस्यास्ति धर्मः । अर्शआदित्वादच्। धर्मश्चासौ राजा चेति, धर्मप्रधानो वा राजा **धर्मराजः**।'राजाहःसखिभ्यष्टच्'५।४।९१॥ इति टच्, 'नस्तद्धिते'६।४।१४४॥ इति टिलोपः।'धर्मस्य राजा' [अम.क्षीर. १।१।५८॥]इति तु स्वामी **॥१८४॥ १६** यमाः मृत्युप्रभृतयोऽस्य किङ्करास्तेषु राजत इति, यमेन संयमेन राजत इति वा **यमराजः**[6] । 'राजृ दीप्तौ'(भ्वा.उ.से.), पचाद्यच् । यमराडित्यपि । **१७** श्राद्धं पितृक्रिया, तदंशभागित्वात्, पितृपतित्वाद्वा **श्राद्धदेवः** । **१८** शमयतीति **शमनः** ।'**शमु उपशमे**' (दि.प.से.)अस्माण्णिजन्तान्नन्द्यादित्वाद् ल्युः । ''बाहुलकात् कर्तरि ल्युः''[मा.धातुवृत्तौ, दिवादिः, धातुसं-९९]इति माधवः। **१९** महिषो ध्वजोऽस्य **महिषध्वजः**, महिषवाहनत्वात् । **२०** कालिन्द्या यमुनायाः सोदरः **कालिन्दीसोदरः** । विंशतिर्यमस्य। शेषश्चात्र-

''यमे तु यमुनाग्रजः ।
महासत्यः पुराणान्तः कालकूटः ''[ शेषनाममाला २।३६-३७]॥

**धूमो[1]र्णा तस्य वल्लभा ॥१८५॥**

१ तस्य यमस्य वल्लभा स्त्री **धूमोर्णा** । धूमवद् धूसरा ऊर्णा भ्रूमध्यावर्तोऽस्याः धूमोर्णा । ''ऊर्णा भ्रूमध्यगावर्ते मेषादीनां च लोमनि''[अनेकार्थसङ्ग्रहः २।१३१॥] इत्यनेकार्थः । ([7]यमस्य भार्याया नाम एकम्) **॥१८५॥**

**पुरी पुनः संय[1]मनी**

१ यमस्य पुरी, संयम्यन्ते प्राणिनोऽस्यां **संयमनी**। 'यमु नियमने[10]'( )णिजन्तः, 'ल्युट् च'३।३।११५॥ इति ल्युट्, गौरादित्वाद् ङीष् ॥

**प्रतीहारस्तु वैध्य[1]तः ।**

१ यमस्य प्रतीहारः, विध्यतोऽपत्यं **वैध्यतः** ।'तस्यापत्यम्'४।१।९२॥ इत्यण् ॥

**दासौ च[1]ण्डमहा[2]चण्डौ**

१-२ यमस्य दासौ अत्यन्तकोपनत्वात् **चण्डः**, **महाचण्डः** च ॥

१. 'यमु' इति१.२.४॥ २. स्वामिना 'क्लिश उपतापे'(दि.आ.से.)इत्यतोऽपि कीनाशशब्दो व्युत्पादितः, द्र. क्षीरतरङ्गिणी, दिवादिः, धातुसं-५०, पृ.२१८॥ ३. 'कनी दीप्तिकान्तिगतिषु' इति क्षीरतरङ्गिण्यादौ ॥ ४. '-शन्प्र-' इति१॥ ५. 'शब्दसङ्ख्यानयोः' इति क्षीरतरङ्गिण्यादौ ॥ ६. ''कलयत्यायुः कालः'' इति अम.क्षीरस्वामिटीकायाम्, १।१।५९॥, पृ.१९॥ ७. 'शीर्णावङ्घ्री' इति१.३॥ ८. २.३.४प्रतिषु नास्ति ॥ ९. कोष्ठान्तर्गतपाठः ३.४प्रत्योर्नास्ति ॥ १०. 'नियमे' इति३, नियमनेऽर्थे यमुधातुर्न दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**चित्रगुप्त[1]स्तु लेखकः ॥१८६॥**

१ यमस्य लेखकः, चित्रे लिखिते गुप्तः, चित्रमेनं गुप्यादिति वा **चित्रगुप्तः** ॥१८६॥

**स्याद् राक्षसः[1] पुण्यजनो[2] नृचक्षा[3]**
**यात्वा[4]ऽऽशरः[5] कौणपयातुधानौ[6][7] ।**
**रात्रिंचरो[8] रात्रिचरः[9] पलादः[10]**
**कीनाश[11]रक्षो[12]निकसात्मजाश्च[13] ॥१८७॥**
**क्रव्यात्[14] कर्बुर[15]नैर्ऋता[16]वसृक्पः[17]**

१ भीमत्वाद् रक्षति जनं[1] आत्मानमस्मादिति **रक्षः**। 'रक्ष पालने'(भ्वा.प.से.), '-असुन्'(उणा-६२८)इत्यसुन्। रक्ष एव **राक्षसः**। 'प्रज्ञादिभ्यश्च'५।४।३८॥ इति स्वार्थेऽण्। "प्रकृतेर्लिङ्गवचने बाधन्ते स्वार्थिकाः क्वचित्[2]"[ ]इति पुंस्त्वम्। २ भद्रमङ्गलादिवद् विरुद्धलक्षणया पुण्यश्चासौ जनश्च **पुण्यजनः** । ३ नॄन् चष्टे **नृचक्षाः** । 'चक्षिङ् व्यक्तायां वाचि'(अ.आ.से.), '-असुन्'(उणा-६२८)इत्यसुन् । ४ याति गच्छति **यातु**, क्लीबे । 'या प्रापणे'(अ.प.अ.), 'कमिमनिजनिगा[3]पाभायावाहिभ्यश्च तुः'(उणा-७२)इति तुप्रत्ययः । "यातुरर्धर्चादिः"[[4]]इति शबरस्वामी । "[यातु]धानशब्दैकदेशो वा, भीमवत्, तस्मात् पुंस्यपि"[[5]]इति धनपालः, यदाह-"क्रव्यादा यातवो यातुधानाः"[[6]]इति । ५ आशृणाति[7] हिनस्तीति **आशरः** । 'शॄ हिंसायाम्'(क्र्या.प.से.), तालव्यादिः, पचाद्यच् । 'आशिरः' इति पाठे, 'अशेर्णिच्चं'(उणा-५२)इति किरच्, 'ऋत इद्धातोः'७।१।१००॥ [इतीत्], रपरत्वम् । "आशिरो हनुषः शङ्कु(:) क्रव्यादोऽस्रप आशि(श)रः"[[8]] इति संसारावर्त्तः । ६ कुणपः शवस्तद्भक्षणं शीलमस्येति **कौणपः**। 'शीलम्'४।४।६१॥ इत्यण्, 'तद्धितेष्वचामादेः' ७।२।११७॥ इत्यादिवृद्धिः[10] । "कुणपमत्तीति, 'शेषे'४।२।९२॥ इति सूत्रेण शेषार्थेऽण्"[[11]]इति तु कौमुदी । "कुणपा रक्षसां माता, तस्यापत्यं कौणपः"[[12]]इत्यन्ये । ७ यातुसंज्ञां दधाति **यातुधानः**, अन्तस्थादिः। 'डुधाञ् धारणपोषणयोः'(जु.उ.अ.), 'कृत्यल्युटो बहुलम्'३।३।११३॥ इति ल्युट् । यातूनि रक्षांसि दधाति स्वजातिपोषकत्वादिति वा। "यातूनि यातना धीयन्तेऽस्मिन्"[अम.क्षीर. १।१।६०॥]इति तु कौमुदी (स्वामी)। "जातु[13] कदाचिद् रन्ध्रं प्राप्य धानं संनिधानमस्येति "जातुधानः"[शब्दभेदप्रकाशः,श्लो-१९]इति चवर्गतृतीयादिरपि इति पुरुषोत्तमः[14] । ८-९ चरतीति **चरः** । 'चर गतिभक्षणयोः'(भ्वा.प.से.), पचाद्यच्। रात्रौ चरः **रात्रिचरः**[15] । 'सप्तमी' २।१।४०॥ इति योगविभागात् समासः। अथवा रात्रौ[16] चरतीति **रात्रिंचरः** । 'चरतेष्टः[17]'३।२।१६॥ इति टः, 'उपपदमतिङ्' २।२।१९॥ इति समासः, 'रात्रेः कृति विभाषा-'६।३।७२॥ इति मुम्विकल्पः । १० पलं मांसमत्ति **पलादः**। 'अद भक्षणे'(अ.प.अ), 'कर्मण्यण्'३।२।१॥ । ११ कनति दीप्यते **कीनाशः** । 'कन दीप्तौ[18]'(भ्वा.प.से.), 'कनेरीच्चातः'(हैमोणा-५३४)इत्याशः । कीनमा[19]मंमांसमश्नातीति वा । १२ भीमत्वाद् रक्षन्त्यात्मानमस्मादिति **रक्षः**, क्लीबे । 'रक्ष पालने'(भ्वा.प.से.), '-असुन्'(उणा-६२८)इत्यसुन् । १३ नितरां कसति पतिं गच्छति निकसा । 'कस गतौ'(भ्वा.प.से.), पचाद्यच् । तस्या आत्मजो **निकसात्मजः**, दन्त्यसकारवान् । यद्वा निकषा रक्षसां माता, तदात्मजत्वाद् निकषात्मजः, मूर्धन्यमध्यः ॥१८७॥ १४ क्रव्यमत्ति **क्रव्यात्** । 'अद भक्षणे'(अ.प.अ), 'क्रव्ये च'३।२।६९॥इति विंच्[20] (विट्)। क्रव्यादोऽपि । "क्रव्याद इति, मांसवाचककृत्तविकृत्त[21]शब्दे उपपदे कर्मण्यण्, पृषोदरादित्वात् कृत्तविकृत्तशब्दस्य क्रव्यादेशः, 'अदोऽनन्ने'३।२।६८॥ इति सिद्धे 'क्रव्ये च'३।२।६९॥इति

१. 'निजनमात्मा-' इति३॥ २. "स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्तेऽपि"(परि-५।४।२२॥ काशिका)इत्यपि च ॥ ३. '-गाभायाहिभ्यश्च' इत्युणादिगणे ॥ ४. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-५५, पृ.८१॥ ५. द्र. स्वोपज्ञटीका २।१८७॥, पृ.४४॥, तत्र 'तस्मात्' इति नास्ति ॥ ६. द्र. स्वोपज्ञटीका २।१८७॥, पृ.४४॥ ७. 'शृणोति' इति१.४॥ ८. 'अशेर्णित्'(उणा-५२)इत्युणादिगणे ॥ ९. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-५४, पृ.८०॥, तत्र 'आशिरोऽनुशवः-' इति दृश्यते, रामाश्रमी १।१।५९॥, पृ.३१॥ १०. 'इति वृद्धिः' इति३॥ ११. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-५४, पृ.७९॥, तत्र "कुणपमत्तीति शेषेऽणि"(पा.४।२।९२) [-ति] तु कौमुदी" इत्येव दृश्यते॥ १२. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-५४, पृ.७९॥, तत्र 'रक्षसां माता' इत्यस्य स्थाने 'रक्षोमाता' इति दृश्यते ॥ १३. 'जातुः' इति३॥ १४. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-५५, पृ.८१॥ १५. 'रात्रिंचरः' इति२॥ १६. 'रात्रिं' इति३॥ १७. 'चरेष्टः' इत्यष्टाध्याय्याम् ॥ १८. 'कनी दीप्तिकान्तिगतिषु' इति क्षीरतरङ्गिण्यादौ॥ १९. '-मामं मास-' इति३॥ २०. ३प्रतौ नास्ति ॥ २१. '-विकृत्त-' इति २प्रतौ नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्रं वासरूपविधिना प्राप्तस्याऽणो निवृत्त्यर्थम्''[[1]]इति न्यासः[2]। कौमुदीकारादयस्तु-''[3]पृषोदरादित्वात् क्रव्यभावे, कृत्तविकृत्त-रूपपक्वमांसभक्षः क्रव्यादः[4], आममांसभक्षंस्तु[5] क्रव्यात्' [काशिकावृत्तिः ३ ।२ ।६९ ॥]इति जयादित्यानां प्रमादः, ''नैर्ऋतः कर्बुरः क्रव्यात् क्रव्यादोऽस्रप आशरः'[[6]]इति शब्दार्ण-वसंसारावर्त्तादावविशेषेणैव[7] निबन्धादिति हट्टचन्द्रः, [8]सोऽयं चन्द्रे[9] कलङ्को हट्टचन्द्रस्याप्रतिसन्धानदोषात् । शब्दार्णव एव रक्षःपर्याये द्वावेतौ पठित्वापि पुनः कृदध्याये-

''सदान्नादकणादौ च स्यात् क्रव्यादाममांसभुक् ।
क्रव्यादः कृत्तविकृत्तपक्वमांसमांसभुगुच्यते ॥१॥''

[[10]]इत्युक्तेः । तस्माद् राक्षसस्य रूढिरूपे द्वे एते संज्ञे सामान्येन, यौगिकत्वे तु जयादित्ये व्यवस्था''[[11]]इत्याहुः। **१५** कर्बुरवर्णत्वात् **कर्बुरः** । कर्बति गच्छतीति वा । 'कर्ब गतौ'(भ्वा.प.से.), 'वाश्यसि[12]-'(हैमोणा-४२३)इत्युरः । ''कबृ वर्णे'(भ्वा.प.से.), बाहुलकादुरप्रत्ययो रेफोपसृष्टः''[मा. धातुवृत्तिः, भ्वादिः, धातुसं-२५९]इति माधवः । **१६** निर्ऋते-र्दिक्पालस्यापत्यं **नैर्ऋतः** । 'तस्यापत्यम्'४।१।९२॥ इत्यण् । निर्ऋत्यां दिशि भवो विद्यमान इति, 'शेषे'४।२।९२॥ अण् वा । **१७** असृक् पिबति **असृक्पः**। 'पा पाने' (भ्वा.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥, 'आतो लोप इटि च'६।४।६४॥ इत्यालोपः। अमरकोषे तु ''अस्रपः''[अमरकोषः १।१।-५९॥]इति सदन्त्यः। ''न श्रपयति क्रव्यात्वाद् अश्रपः इति, श्रपधातोः पचाद्यचि शतालव्योऽपि[13]''[[14]]इति गोवर्धनीयो-णादि वृत्तिः । 'सुराशीध्वोः'(वा-३।२।८॥) इत्युपसंख्यानाद् आश्रपः इत्यत्र 'गापोष्टक्'३।२।८॥ इति टक् न भवति । सप्तदश राक्षसस्य[15]। शेषश्चात्र-

''पलप्रियः [16]खषापुत्रः कर्बरो नरविष्वणः ।
आशिरो[17] हनुषः शङ्कुर्विधुरो जललोहितः ॥२॥
उद्वरः स्तब्धसंभारो रक्तग्रीवः प्रवाहिकः ।
सन्ध्याबलो रात्रिबलस्त्रिशिराः [18]समितीपदः॥३॥''

[शेषनाममाला २।३७-३९] ॥

**वरुण[1]स्त्वर्णमन्दिर[2]: प्रचेताः[3] ।**
**जलयादः[4,5]पतिपाशिमेघनादा[6,7]**
**जलकान्तारः[8] स्यात् परञ्जनश्च[9] ॥१८८॥**

**१** वृणोति[11] बिभर्ति पाशं **वरुणः** । 'वृञ् वरणे' (स्वा.उ.से.), 'कृ(कॄ)वृदारिभ्यः उनन्'(उणा-३३३)। व्रियत इति वा ।

''वरं वृणन्ति तं देवा वरदश्च वरार्थिनाम् ।
धातुर्वै वरणे[20] प्रोक्तस्तस्माद् वरुणः स्मृतः ॥१॥''

[[21]]इति शाम्बपुराणम् । **२** अर्णवो मन्दिरमस्य **अर्णवमन्दिरः**। **३** प्रकृष्टं चेतोऽस्य **प्रचेताः**, सकारान्तः। यद्वा प्रचेतयति प्रचेताः । 'चिती संज्ञाने'(चु.उ.से.), '-असुन्'(उणा-६२८) इत्यसुन् । **४-५** जलयादसोः पतिः, तेन **जलपतिः, यादःपतिः**। ''यादसांपतिरपि''[अमरकोषः १। १। ६१॥]इत्यमरः[22] । एवं यादसांपतिः, अपांपतिः, सर्वत्र 'तत्पुरुषे कृति-'६।३।१४॥ इत्यलुक् । **६** पाशोऽस्त्यस्य **पाशी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः । यौगिकत्वात् पाशपाणिरित्यादयः । **७** मेघवन्नादोऽस्य

---

**१.** द्र. पदचद्रिका, भा-१, स्वर्गवर्गः, श्लो-५४, पृ.७९॥ **२.** न्यासे- ''कथं तर्हि क्रव्याद इति । यदि वचनं वाऽसरूपविधिबाधनार्थमिति भावः। कृत्तविकृत्तेत्यादिना कृत्तविकृत्तशब्द उपपदेऽण्, कथं क्रव्यादशब्दः सिध्यति, कृत्तविकृत्ताद इति भवितव्यमित्याह-तस्य चेत्यादि । ननु च कृत्तविकृत्तशब्दे उपपदेऽणि कृते तत्र चोपपदस्य क्रव्यभाव इति रूपं भवति, क्रव्यशब्द उपपदेऽणि कृते तदेव, क्वात्र विशेषः, यतः क्रव्यशब्द उपपदेऽण् प्रतिषिध्यते ? इत्यत आह-कृत्तविकृत्त इत्यादि । एतेनार्थभेदं दर्शयति-यो हि कृत्तविकृत्तशब्देन पक्वमांसभक्षः स एव क्रव्याद उच्यते, यस्त्वपक्वमांसभक्षः स क्रव्यादुच्यते'' इति दृश्यते, काशिकावृत्तिः, भा-२, ३।२।६९॥।, पृ.५९०॥ **३.** 'पृषोदरादिपाठात् क्रव्यभावः' इति काशिकावृत्तौ, भा-२, ३।२।६९॥, पृ.५९०॥ **४.** इतोऽग्रे काशिकावृत्तौ 'उच्यते' इति दृश्यते ॥ **५.** काशिकावृत्तौ 'तु' इति नास्ति॥ **६.** द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-५४, पृ.८०॥, रामाश्रमी १।१।६०॥, पृ.३१॥, तत्र ''क्रव्यादोऽस्रप आशरः'' इत्यस्य स्थाने ''कर्बुरो यातुरक्षसी'' इति दृश्यते ॥ **७.** '-र्णवः' इति३॥ **८.** 'सायं चन्द्रे कङ्को' इति२॥ **९.** 'चन्द्रेण' इति३॥ **१०.** द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-५४, पृ.८०॥, रामाश्रमी १।१।५९॥, पृ.३१॥ **११.** द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-५४, पृ.८०॥ **१२.** 'वाससि-' इति१.२.४॥ **१३.** '-व्यादीति' इति३॥ **१४.** द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-५४, पृ.८०॥ **१५.** 'राक्षस्य' इति१.२॥ **१६.** 'खखा-' इति३, 'खसा-' इति शेषनाममालास्वोपज्ञटीकयोः॥ **१७.** 'आशीरो' इति३, 'अशिरो' इति शेषनाममालायाम्॥ **१८.** 'शमि-' इति१.२.४॥ **१९.** 'वृणाति' इति१.२॥ **२०.** 'वरुणे' इति३॥ **२१.** द्र. रामाश्रमी १।१।६१॥, पृ.३१॥, पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-५६, पृ.८१, तत्र 'वृणन्ति' इत्यस्य स्थाने 'वृणोति' इति, 'वै' इत्यस्य च स्थाने 'वृ' इति दृश्यते॥, टीकासर्वस्वेऽपि पूर्वार्धे 'वरं वृणन्त्यमुं-' इति, उत्तरार्धे च 'वृञ्धातुर्वरणे-' इति दृश्यते, भा-१, १।१।६१॥, पृ.४५॥ **२२.** 'यादसांपतिरप्पतिः' इत्यमरकोषे ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मेघनादः** । ८ जलं पानीयमेव कान्तारमस्य **जलकान्तारः**। ९ परं जयति **परञ्जनः**[१] । 'जि जये'(भ्वा.प.अ.), 'जि अभिभवे'(भ्वा.प.अ.) अस्माद्वा, 'वदनगगन-'(हैमोणा-२७५)इत्यादिना निपातनात् साधुः । नव वरुणस्य । शेषश्चात्र-''प्रतीचीशो दुन्दुभ्युद्दामसंवृताः॥''[शेषनाममाला २।३९] ॥१८८॥

**श्रीदः सितोदरकुहेशसखाः पिशाच-**
**कीच्छावसुस्त्रिशिरऐलविलैकपिङ्गाः ।**
**पौलस्त्यवैश्रवणरत्नकराः कुबेर-**
**यक्षौ नृधर्मधनदौ नरवाहनश्च ॥१८९॥**
**कैलासौका यक्षधननिधिकिंपुरुषेश्वरः ।**

१ श्रियं ददाति **श्रीदः**। 'डुदाञ् दाने'(जु.उ.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥,'आतो लोप इटि च'६।४।६४॥ इत्यालोपः । २ सितमुदरमस्य **सितोदरः**, कुष्ठित्वात् । ३ कुहयते विस्मापयते **कुहः** । 'कुह विस्मापने'(चु.आ.से.), 'इगुपधज्ञा-'३।१।१३५॥ इति कः, 'णेरनिटि'६।४।५१॥ इति णिलोपः। ४ ईशस्य रुद्रस्य सखा **ईशसखः** । 'राजाहः-सखिभ्यष्टच्'५।४।९१॥, 'यस्येति च'६।४।१४८॥[२]इत्य-कारलोपः। ५ पिशाचाः सन्त्यस्य **पिशाचकी**। 'पिशाचाच्चेति वक्तव्यम्'(वा-५।२।१२९॥)इतीन् (इनिः), कुक् च। पिशाचकिनौ, पिशाचकिनः इत्यादि । ६ इच्छया वसु द्रव्यमस्य **इच्छावसुः**। ७ त्रीणि शिरांस्यस्य **त्रिशिराः**, सकारान्तः । 'अत्वसन्तस्य चाधातोः'६।४।१४॥ इति सौ दीर्घः । ८ [३]इलविला [४]पुलस्तिभार्याऽस्य पितामही, तस्यापत्यम् अपतनादपत्यमिति कृत्वाऽण्, 'अवृद्धाभ्यो नदीमानुषीभ्यः-'४।१।११३॥ इत्यनेन, **ऐलविलः** । इडविडा मातास्येति, ज्योत्स्नादित्वादणि ऐडविडः। ''डलयोरेकत्वस्मरणादैलविलोऽपि''[अम.क्षीर. १।१।६९॥]इति स्वामी[५] । ''ईड्यतेऽसौ इडविड् विश्रवाः, 'ईडेरविड् ह्रस्वश्च' (हैमोणा-८७९) ([६]इति अविड्, इडविडोऽपत्यम्, ऐडविडः'') [अभि. स्वोपज्ञटीका, श्लो-२।१८९॥] इत्याचार्याः । ''इडविड् धनदमाता''[ ]इत्यन्ये। ९ एकं पिङ्गं नेत्रमस्य **एकपिङ्गः** । [सासूयं] गौरीनिरीक्षणे तत्प्रभावाद् वामे चक्षुषि नष्टे रुद्राननुनयात्[७] ततः [८]पिङ्गं चिह्नं देव्या दत्तमस्येति एकपिङ्गः । अत एव भागुरिणा हर्यक्ष उक्तः। १० पुलस्तेरपत्यं **पौलस्त्यः**। 'गर्गादिभ्यो यञ्'४।१।१०५॥, बहुत्वे प्रत्ययलुकि पुलस्तयः। ११ [१०]पुलस्त्यपुत्रो विश्रवणः (विश्रवाः), तस्यापत्यं **वैश्रवणः** तालव्यशः । 'शिवादिभ्योऽण्'४।१।११२॥ इत्यत्र '[वि]श्रवण-रवणाविति पाठाद् विश्रवसो विश्रवणादेशोऽण् च । १२ रत्नानि करेऽस्य **रत्नकरः** । १३ **कुबेर** इति त्रिचरणोऽष्टदंष्ट्रो जातो-ऽयमर्तः[११] कुत्सितं बेरं कायोऽस्य कुबेरः । ''कुष्ठित्वेन कुत्सित-देहत्वेन कुबेरः''[अम.क्षीर १।१।६८॥]इति स्वामी[१२]। कुत्साया-मत्र कुशब्दः। यतः-

''कुत्सायां क्विति शब्दोऽयं शरीरं [१३]बेरमुच्यते ।
कुबेरः कुशरीरत्वान्नाम्ना तेनैव सोऽङ्कितः ॥२॥''

[[१४]]इति वायुपुराणम् । अथवा 'कुबि छादने[१५]'(भ्वा.प.से., चु.उ.से.), 'कुम्बेर्नलोपश्च'(उणा-५९)इत्येरन् (-क्) । कुबेरो धनच्छादको धनरक्षक इत्यर्थः । १४ यक्ष्यते पूज्यते **यक्षः** । 'यक्ष पूजायाम्'(चु.आ.से.), कर्मणि घञ् । ''इः कामस्तस्ये-वाक्षिणी अस्य''[ ]इत्यन्ये । ई[१६] लक्ष्मीमक्ष्णोति व्याप्नोति यक्षः । 'अक्ष(अक्षू) व्याप्तौ'(भ्वा.प.वे.), पचाद्यच्''[ ]इति तु स्वामी[१७] । १५ नुरिव मनुष्यस्येव धर्म आचारः, श्मश्रुलत्वा-दिर्वास्येति **नृधर्मा** । 'सप्तम्युपमानपूर्वस्य[१८]-'( )इत्यादिना समासः, 'धर्मादनिच्केवलात्'५।४।१२४॥ इत्यनिच्। नृधर्माणौ,

१. 'परञ्जयः' इति१ ॥ २. 'इतीका-' इति२ ॥, वस्तुतस्त्वत्र 'नस्तद्धिते'६।४।१४४॥ इत्यनेन 'अन्' इत्यस्य टेर्लोपो योग्यः॥ ३. 'ईल-' इति१ ॥ ४. 'पुलस्त्य-' इति३ ॥ ५. ''ऐलविलोऽपि, डलयोरेकत्वस्मरणात्'' इति अम.क्षीर.टीकायाम् ॥, द्र.पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-६४, पृ.९०॥ ६. कोष्ठान्तर्गतपाठस्थाने अभि.स्वोपज्ञटीकायाम्-''तस्यापत्यं ऐडविडः'' इति दृश्यते, २।१८९॥, पृ.४४॥ ७. '-नया कृतः' इति२.३.४॥ ८. 'पिङ्गिम-' इति२, 'पिङ्गम-' इति३.४॥ ९. बहुत्वविवक्षायां 'यञञोश्च' इत्यनेन लुक् ॥ १०. 'पुलस्य' इति३ ॥ ११. '-मितः' इति१ ॥ १२. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-६३, पृ.८९॥, अम.क्षीरस्वामिटीकायां ''कुत्सितं वे-बेरं देहोऽस्येति कुवे-बे-रः, कुष्ठित्वात्'' इति दृश्यते, १।१।६८॥, पृ.२१॥ १३. 'वैर-' इति१ ॥ १४. द्र. टीकासर्वस्वम्, भा-१, १।१।६८॥, पृ.५०॥, पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-६३, पृ.८९॥, रामाश्रमी १।१।६८॥, पृ.३५॥ १५. धातुप्रदीपे 'आच्छादने' इत्यर्थे दृश्यते, क्षीरतरङ्गिण्यां तु-''कुबि इति कौशिकः''(चुरादिः, धातुसं-१०३, पृ.३०३)इति मतान्तरेण कुबिधातोरुल्लेखः, तत्र टिप्पणी-''अत्राह सायणः-'स्वामिकाश्यपमैत्रेयादयो बशन्तं पठन्ति' इति । बशन्तं बकारान्तमित्यर्थः। अत्र तु स्वामिमते पकारान्तः पाठः, कौशिकमते तु बान्तः'' इति क्षीर. पृ.३०३॥ १६. 'इं' इति३ ॥ १७. अम.क्षीर.टीकायां न दृश्यते, ''ईं लक्ष्मीम् अक्ष्णोति व्याप्नोतीति तु स्वामी'' इति पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-६४, पृ.९०॥ १८. 'सप्तम्युपमानपूर्वपदस्योपसङ्ख्यानमुत्तरपदलोपश्च' इति टीकासर्वस्वे, भा-१, १।१।६८॥, पृ.५०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नृधर्माणः इत्यादि । **१६** धनं दयते रक्षतीति[१] **धनदः** । 'देङ् त्रैङ् पालने'(भ्वा.आ.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥। **१७** रुद्रदत्तनरयुक्तशिविकावाहनत्वाद् **नरवाहनः** । 'वाहनमाहितात्' ८।४।८॥ इति न णत्वम्, अनाहितवाचित्वात् । नापि 'पूर्वपदात् संज्ञायाम्-'८।४।३॥ इति णत्वम्, क्षुभ्नादेराकृतिगणत्वात् । ॥१८९॥ **१८** केलीनां[२] समूहः कैलम्[३], 'तस्य समूहः' ४।२।३७॥ इत्यण्, ('[४]तद्धितेष्वचामादेः'७।२।११७॥ इत्यादि-वृद्धिः । कैलेन आस्यतेऽत्र कैलासः । 'आस उपवेशने' (अ.आ.अ.), 'हलश्च'३।३।१२१॥ इत्यधिकरणे घञ् । यद्वा केलिः प्रयोजनमस्य कैलः। 'प्रयोजनम्'५।१।१०९॥ इत्यण्[५])। कैलश्चासावासश्चेति, कृष्णसर्पवन्नित्यसमासः । कं जलमिला भूमिः, केलयोः[६] जलभूम्योरास्ते इति केलासः[७], ततःस्वार्थेऽणि। यद्वा "के जले लासो[८] लसनमस्य केलासः[९] स्फटिकः, तस्यायं कैलासोऽद्रिः"[अम.क्षीर.१।१।७०॥]इति स्वामी[१०]। कैलास ओको गृहमस्य **कैलासौकाः**, सकारान्तः। 'अत्वसन्तस्य च-' ६।४।१४॥ इति दीर्घः। **१९-२२** यक्षाणाम्, धनस्य, निधीनाम्, किंपुरुषाणां चेश्वरः, तेन **यक्षेश्वरः, धनेश्वरः, निधीश्वरः, किंपुरुषेश्वरः**, यौगिकत्वाद् गुह्यकेशः, वित्तेशः, निधानेशः, किंनरेशः, राजराजस्तु राज्ञां यक्षाणां राजेति यौगिकत्वाद् गृहीतः । द्वाविंशतिर्धनदस्य । शेषश्चात्र-

"निधनाक्षः महासत्त्वः [स्याद्] प्रमोदितः । रत्नगर्भः उत्तरा-शाधिपतिः सत्यसङ्गरः ॥

धनकेलिः सुप्रसन्नः परिविद्धः"[शेषनाममाला २।४०-४१॥] ॥

## विमानं पुष्पकम्[1]

१ अस्येति शेषः, श्रीदस्य विमानं पुष्यति(पुष्प्यति) **पुष्पकम्**, पुंक्ली. । 'पुष्प विकसने'(दि.प.से.), 'क्वुन् शिल्पिसंज्ञयोः-'(उणा-१९०)इति क्वुन् । "पुष्पस्य तुल्यं पुष्पकम्, 'इवे प्रतिकृतौ'५।३।९६॥इति कन्"[[११]]इति स्वामी[१२]। "विमानं तु पुष्पकोऽस्त्री नगरी त्वलका प्रभा"[[१३]]इति शब्दार्णवः॥

## चैत्ररथं[1] वनम्

१ श्रीदस्य वनं चैत्ररथम् । चित्ररथेन निर्वृत्तं **चैत्ररथम्** । 'तेन निर्वृत्तम्'५।२।७९॥ इत्यण् ॥

## पुरी प्रभा[1] ॥१९०॥

## अलका[2] वस्वोकसारा[3]

१ श्रीदस्य पुरी **प्रभा** । प्रकर्षेण भाति प्रभा । 'भा दीप्तौ'(अ.प.अ.), 'आतश्चोपसर्गे'३।३।१०६॥ इत्यङ्, टाप् ॥१९०॥ २ अलति भूषयति **अलका** । 'अलञ्[१४] भूषण-पर्याप्तिवारणेषु'(भ्वा.उ.से.), 'क्वुन् शिल्पिसंज्ञयोः'(उणा-१९०)इति क्वुन्, 'न यासयोः'७।३।४५॥ इत्यत्र योगविभागात्, 'प्रत्ययस्थात् कात् पूर्वस्य-'७।३।४४॥ इति नेत्वम् । "क्षिपकादित्वान्नेत्वम्[१५]"[अम.क्षीर. १।१।७०॥]इति स्वामी[१६]। "बाहुकान्नेत्वम्"[[१६]]इति कौमुदी । ३ वसुयुक्तानि ओकांसि सारमस्यां **वस्वोकसारा** । पृषोदरादित्वात् सलोपः। त्रीणि धनदनगर्याः । "वसुप्रभा वसुसारा"[शेषनाममाला २।४१॥] शैषिके ॥

## सुतोऽस्य नलकूबरः[1] ।

अस्य श्रीदस्य सुतः **नलकूबरः** । नलकूबरो युगंधरोऽस्येति नलकूबरः[१७]। "पुत्रस्तु नलकूबरः"[[१६]]इति शब्दार्णवादयोऽपि । नलो नडः कुबरं रथावयवोऽस्येति वा। "पुत्रौ तु नलकूबरौ"[[१८]]इति त्रिकाण्डशेषे, तन्मूलं गवेष्यम् ॥

---

१. 'रक्षयतीति' इति४॥ २. 'केवलीनां' इति३॥ ३. 'केवलम्' इति३॥ ४. कोष्ठान्तर्गतपाठः १प्रतौ नास्ति॥ ५. प्रयोजनमित्यनेन तु ठञ् प्रत्ययो भवति, न त्वण् ॥ ६. 'केजलयोः' इति१.२॥ ७. 'कैलासः' इति२.३॥ ८. अम.क्षीर.टीकायां नास्ति॥ ९. 'कैलासः' इति३.४॥ 'केलासः' इत्यत्र 'हलदन्तात्-'६।३।९॥ इति सप्तम्यलुक् ॥ १०. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-६५ पृ.९१॥ तत्र 'स्फटिकः' इत्यस्य स्थाने 'स्फाटिकः' इति दृश्यते ॥ ११. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-६५, पृ.९१॥ १२. अम.क्षीर.टीकायाम्-"पुष्पमिव पुष्पकम्, 'इवे प्रतिकृतौ'५।३।९६॥-२०५१ कन्" इति दृश्यते, १।१।७०॥, पृ.२२॥ १३. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्ग, श्लो-६५, पृ.९१॥, रामाश्रमी १।१।७०॥, पृ.३५॥ १४. "अल' इति सायणादयः । क्षीरस्वामिमते तु आदित्त्वे 'आदितश्च'(७।२।१६॥)इतीण्निषेधे 'अल्तः' । सायणादिमते 'अलितः' इति भेदः । काशकृत्स्नस्तु 'अलञ्'(१।६८९, पृ.११४)इति पठति । तेन अलति अलते इत्युभयं भवति । लकारोत्तरवर्तिन उदात्ताकारस्येत्त्वात् इट्-अलितः । एवमेव कातन्त्रधातुपाठेऽपि पठ्यते" इति क्षीरतरङ्गिण्यां टिप्पणी-७, पृ.८१॥ १५. अम.क्षीर.टीकायाम्-'नेत्वम्' इत्यस्य स्थाने 'इत्वाभावः' इति दृश्यते, १।१।७०॥, पृ.२२॥ १६. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-६५, पृ.९१॥ १७. '-कूबेरः' इति२॥ १८. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-६५, पृ. ९०॥, रामाश्रमी १।१।७०॥, पृ.३५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वित्तं[1] रिक्थं[2] स्वापतेयं[3] राः[4] सारं[5] विभवो[6] वसुः[7] ॥१९१॥**

**द्युम्नं[8] द्रव्यं[9] पृक्थमृक्थं[10] [11] स्वमृक्णं[12] [13] द्रविणं[14] धनम्[15] ।**

**हिरण्यार्थौ[16] [17]**

१ विद्यते लभ्यते **वित्तम्** । 'विद्लृ लाभे'(तु.उ.अ.), 'वित्तो भोगप्रत्ययोः'८।२।५८॥ इति निष्ठान्तो निपातः । **२** रिच्यते विभज्यते **रिक्थम्** । 'रिचिर् विभाजने'[1](रु.उ.अ.), 'पातृतुदि-'(उणा-१६४)इत्यादिना थक् । **३** स्वपतौ साधु **स्वापतेयम्** । 'पथ्यतिथि[वस]स्वपतेर्ढञ्'४।४।१०४॥ इति ढञ्, 'आयेनेयीनीयियः फढखछघाम्'७।१।२॥ ढस्यैयादेशः, 'किति च'७।२।११८॥ इति वृद्धिः, 'यस्येति च'६।४।१४८॥ इतीकारलोपः । **४** राति श्रेयार्थं पात्रेभ्यस्तामिति **राः**, पुंस्त्रीलिङ्गः। 'रा ला दाने'(अ.प.अ.), 'रातेर्डैः'(उणा-२२४)इति डैः, 'चिरव्ययम्'(उणा-२२३)इति नियमात् 'कृन्मेजन्तः'१।१।३९॥ इति नाव्ययत्वम् । ''राः स्मृता स्वर्णवित्तयोः''[विश्वप्रकाशः, रान्तवर्गः, श्लो-१]इति विश्वः। **५** सरति क(का)लान्तरं **सारम्**, क्लीबे । पुंस्यपि धनपालः, यदाह-''सारोऽर्थो द्रविणं धनम्'' [[2]]इति । 'सृ गतौ'(भ्वा.प.अ.), 'सृ स्थिरे'३।३।१७॥ इति घञ्। **६** विभवति **विभवः** । 'भू सत्तायाम्'(भ्वा.प.से.), पचाद्यच्। **७** वस्ते छादयति सर्वदोषान्, वसति पुण्यवतो वेश्मनि वा **वसु**, क्लीबे । 'वस आच्छादने'(अ.आ.से.), 'वस निवासे'(भ्वा.प.अ.) अस्माद्वा 'मृ(शृ)[3]स्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च उः'[4](उणा-१०)इत्युः ॥१९१॥ **८** दिने आम्नायते **द्युम्नम्** । 'म्नाऽभ्यासे'(भ्वा.प.अ.), 'सुपि'३।२।४॥ इति योगविभागात् 'आतोऽनुपसर्गे कः'३।२।३॥ । द्युशब्दो दिनवचनः । 'रास्नासास्नाद्युम्ननिम्न-'[5](उणा-२९५) इत्यादिना 'द्युत दीप्तौ'(भ्वा.आ.से.)इत्यस्मात् धातोः[6] क(न)-प्रत्ययो मकारश्चान्तादेशो निपात्यते । द्योततेऽनेन, यद्वा ''द्यूयते द्युम्नम्, 'द्यु अभिगमने'[7](अ.प.अ.)''[अम.क्षीर. २।९।९०॥] इति क्षीरस्वामी, अत्र[8] धातोर्मगागमः । **९** द्रुः वृक्षस्तत्तुल्यं **द्रव्यम्**। 'द्रोर्भव्ये'[10](हैमसू-७।१।११५॥)इति यः । यदाहुः- ''[द्रुः] अग्रन्थि अजिह्मं दारु उपकल्प्यमानं विशिष्टेष्टरूपं भवति, तथा द्रव्यमपि [वि]नियुज्यमानं विशिष्टेष्टमाल्याद्युपभोगफलं भवतीति द्रव्यमुच्यते[11]''[स्वोपज्ञटीका, श्लो-२।१९२] । **१०** पृणक्ति संयुज्यते **पृक्थम्** । 'पृची सम्पर्के'(क्र्या.प.से.), 'पातृतुदि-'(उणा-१६४)इति बाहुलकात् थक्। **११** ऋच्यते स्तूयते **ऋक्थम्**। 'ऋच स्तुतौ'(तु.प.से.), 'पातृतुदि-'(उणा-१६४)इति बाहुलकात् थक्। **१२** अस्यते क्षिप्यते **स्वम्**, पुंक्ली. । यदमरः-''स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने''[अमरकोषः ३।३।२११॥]इति । स्वनति शब्दायत इति वा। 'स्वन शब्दे'(भ्वा.प.से.), 'अन्येऽभ्योऽपि-'(वा-३।३।१०१॥)इति डः । **१३** ऋच्यते स्तूयते **ऋक्णम्** । 'ऋच स्तुतौ'(तु.प.से.), बाहुलकाद् नक् । **१४** द्रवति **द्रविणम्** । 'द्रु गतौ'(भ्वा.प.अ.), 'द्रुदक्षिभ्यामिनन्'(उणा-२०८) । द्रूयते गम्यतेऽर्थिभिर्वा । **१५** 'धन[12] ध्वन शब्दे'( ), धनति **धनम्**, पचाद्यच्, पुंक्लीबलिङ्गः । धन्यत इति वा वर्षादित्वादन्। धीयते वा धनम् । 'डुधाञ् धारणादौ[13]'(जु.उ.अ.), '[14]कृपृवृजिमन्दिनिधाञ्भ्यः[15] क्युन्[16]'(उणा-२३९)। ''अयं बाहुलकात् केवलादपि''[माध. धातुवृत्तिः, जुहोत्यादिः, धातुसं-१८]इति माधवः । **१६** ह्रियते **हिरण्यम्** । 'हृञ् हरणे'(भ्वा.उ.अ.), 'हर्यतेः कन्यन् हिर्च'(उणा-७२२)इति [17]कन्यन्प्रत्ययो धातोर्हिरादेशश्च । **१७** अर्थ्यते **अर्थः** । 'अर्थ याच्ञायाम्[18]'(चु.आ.से.), कर्मणि घञ् । अर्यते वा । 'ऋ गतौ'(जु.प.अ.), 'उषिकुषिगार्त्तिभ्यस्थन्'(उणा-१६१)इति थन्प्रत्ययः, '[19]सार्वधातुकार्धधातुकयोः'७।३।८४॥ । इति गुणः, 'उरण् रपरः'१।१।५१॥ । सप्तदश द्रव्यस्य ॥

---

१. 'विरेचने' इति क्षीरतरङ्गिण्यादौ ॥ २. द्र. स्वोपज्ञटीका २।१९१॥, पृ.४५॥ ३. '-स्वृ-' इति१.४॥ ४. उणादिगणे नास्ति ॥ ५. उणादिगणे '-द्युम्ननिम्न' इत्यस्य स्थाने 'स्थूणावीणाः' इति दृश्यते ॥ ६. १.२.४प्रतिषु नास्ति॥ ७. 'अभिगमे' इति१.२.३॥ ८. ३प्रतौ नास्ति॥ ९. इतोऽग्रे २ प्रतौ 'द्रवतीति द्रव्यं' इति दृश्यते ॥ 'म्नगागमः' इति४॥ १०. 'द्रव्यं च भाव्ये'५।३।१०४॥ इति पाणिनीयसूत्रम्, 'द्रोश्च'४।३।१६१॥ इत्यनेन यति द्रव्यमित्यपि च ॥ ११. 'द्रोर्भव्ये'(हैमसू-७।१।११५॥)इत्यत्र बृहद्वृत्तिरपि द्रष्टव्या॥ १२. क्षीरतरङ्गिण्यादावस्यादर्शनादत्र 'धन धान्ये'(जु.प.से.)इति युक्तः, अथ च विग्रहे 'धनति' इत्यस्य स्थाने 'दधन्ति' इति प्रयोगो युक्तः॥ १३. 'धारणपोषणयोरित्यादौ' इति३, 'धारणपोषणादौ' इति४॥ १४. 'कृ-' इति१.२॥ १५. '-निधाञः' इत्युणादिगणे ॥ १६. 'क्यन्' इति२, उणादिगणे 'क्युः' इति ॥ १७. 'कन्यप्र-' इति२॥ १८. 'उपयाच्ञायाम्' इति क्षीरतरङ्गिण्यादौ ॥ १९. 'सार्वधातुकयोः' इति१ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**निधानं तु कुनाभिः शेवधिर्निधिः ॥१९२॥**

१ निधीयतेऽस्मिन् मन इति **निधानम्** । 'डुधाञ् धारणपोषणयोः'(जु.उ.अ.), 'करणाधिकरणयोश्च' ३।३।११७॥ इत्यधिकरणे ल्युट् । यद्वा 'कृ(कृ)पृवृजि-'(उणा-२३९)इत्यादिना क्युन् । २ कोः पृथिव्या नाभिरिव **कुनाभिः**, पुंसि । ३ शेते शेवं स्थाप्यं धनम् । 'शीङ् स्वप्ने'(अ.आ.से.), 'इण्शीभ्यां[1] वन्'(उणा-१५०)इति वन् । तत्[2] धीयतेऽत्र **शेवधिः**, पुंसि। 'शेवृ[3] षेवृ ग्लेवृ पेवृ (प्लेवृ) श्लेवृ (म्लेवृ) सेचने[4]'(भ्वा.-आ.से.), तत्र तालव्यादेः शेवृधातोः 'गुरोश्च हलः'३।३।१०३॥ इत्यप्रत्यये शेवा, सा धीयतेऽत्रेति 'कर्मण्यधिकरणे च'३।३।९३॥ इति किः, बाहुलकादापोः ह्रस्वत्वम् । ''शे कल्याणेऽवधिः शेवधिः''[5]इति तु राजदेवः । ''शेफः श्वेतौ शरभः शरारु-शफशूर्माशेवधिश्यामाः''[5]इति तालव्यादावूष्मविवेकात् । ''[6]शेवृधातोः पचाद्यचि शेवः, शेवान् दधाति[7] शेवधिः, बाहुलकात् कर्तरि किः''[टीकासर्वस्वम् १।१।७१॥]इति तु सर्वानन्दः[5] । ४ नियतं धीयते **निधिः**, पुंसि । 'धाञः किः'( )इति किः । चत्वारि सामान्येन निधेः ॥१९२॥

अथ निधिविशेषानाह-

**महापद्मश्च पद्मश्च शङ्खो मकरकच्छपौ ।**
**मुकुन्दकुन्दनीलाश्च चर्चाश्च निधयो नव ॥१९३॥**

१ महापद्माकृतित्वाद् **महापद्मः** । २ पद्माकृतित्वात् **पद्मः**, पुंसि । वाचस्पतिस्तु-''पद्मोऽस्त्रियाम्''[8]इत्याह । ३ शङ्खाकारत्वात् **शङ्खः**। ४ मकराकारत्वाद् **मकरः** ।५ कच्छपाकारत्वात् **कच्छपः** । ६ मुकुन्दवर्णत्वाद् **मुकुन्दः** । ७ कुन्दवर्णत्वात् **कुन्दः** । ८ नीलवर्णत्वाद् **नीलः** । ९ चर्च्यत इति **चर्चाः**[9], पुंसि । एते नवनिधयः । [10]जैनसमये तु नैसर्पाद्या नवनिधयः । यदुक्तं श्रीहेमचन्द्राचार्यैः त्रिषष्टिशलाकापुरुषै[11]चरिते-

''नैसर्पः पाण्डुकश्चाथ पिङ्गलः सर्वरत्नकः ।
महापद्मः कालमहाकालौ माणवशङ्खकौ ॥१॥
तेषामेवाभिधानैस्तु तदधिष्ठायकाः सुराः ।
पल्योपमायुषो नागकुमारास्तन्निवासिनः ॥२॥''

[त्रिषष्टिशलाकापुरुचरितमहाकाव्यम्, पर्व-१, सर्ग-४, श्लो-५७०,५७३]॥१९३॥

**यक्षः पुण्यजनो राजा गुह्यको वटवास्यपि ।**

१ इज्यत इति **यक्षः** । 'यज देवपूजनादौ'(भ्वा.-उ.अ), 'मावावद्यमि-'(हैमोणा-५६४)इति सः । ईं लक्ष्मीमक्ष्णोति वा । 'अक्ष (अक्षू) व्याप्तौ संघाते च'(भ्वा.प.वे.), पचाद्यच् । यक्ष्यते वा जनैः । 'यक्षङ्[12] पूजायाम्'(चु.आ.से.), कर्मणि घञ् । २ पुण्यश्चासौ जनश्च **पुण्यजनः**। ३ राजते **राजा**, नान्तः । 'राजृ दीप्तौ'(भ्वा.उ.से.), 'कनिन्युवृषि-'(उणा-१५४)इति कनिन् । ४ गुह्यं वित्तं करोति[13] **गुह्यकः** । 'डुकृञ् करणे'(क्र्या.उ.अ.), 'अन्येभ्योऽपि'( )इति डः। पात्रापात्रमविचार्यैव गुह्यं गुप्तं कायति वा । 'कै शब्दे'(भ्वा.प.अ.), प्राग्वद् डः । गूहतीति वा गुह्यकः। पृषोदरादिः। ५ वटे वसतीत्येवंशीलो **वटवासी**। 'वस निवासे'(भ्वा.प.अ.), 'सुप्यजातौ णिनिस्ताच्छिल्ये'३।२।७८॥ इति णिनिः । पञ्च यक्षस्य ॥

**किंनरस्तु किंपुरुषस्तुरङ्गवदनो मयुः ॥१९४॥**

१ किञ्चिन्नरोऽश्वमुखत्वात्, कुत्सितो नरो वा **किन्नरः**-(**किंनरः**) । 'किं क्षेपे'२।१।६४॥ इति समासः, 'अनुस्वारस्य ययि परसवर्णः'८।४।५८॥ इति मस्य नत्वम्[14] । २ एवं **किंपुरुषः** अपि । ''कुत्सा च कस्यचिन्नरमुखाश्वकायत्वात्, कस्यचिदश्वमुखनरशरीरत्वात्''[15]इति कौमुदी । ३ तुरङ्गस्येव वदनमस्य **तुरङ्गवदनः** । ४ मयत इति **मयुः**। 'डुमिञ्

१. '-शीङ्-' इति३॥ २. 'तत' इति२॥ ३. मा. धातुवृत्तौ न दृश्यते ॥ ४. 'एवृ शेवृ षेवृ सेवृ केवृ खेवृ ग्लेवृ पेवृ प्लेवृ मेवृ म्लेवृ सेवने' इति क्षीरस्वामी, धातुसं-३३५, पृ.८०॥ ५. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-६६, पृ.९२॥ ६. 'शेवृधातोः पचाद्यचि' इत्यस्य स्थाने टीकासर्वस्वे ''केवृ खेवृ शेवृ सेचने । पचाद्यच् ।'' इति दृश्यते, भा-१, १।१।७१॥, पृ.५१॥ ७. '-तीति' इति टीकासर्वस्वे ॥ ८. द्र. स्वोपज्ञटीका २।१९३॥, पृ.४६॥ ९. 'चर्चः' इति१.३॥ १०. 'जैनमते तु इति वा पाठः' इति ४प्रतेष्टिप्पणी॥ ११. '-पुरुषे चरिते' इति१॥ १२. क्षीरतरङ्गिण्यादौ ङकारो न दृश्यते ॥ १३. '-तीति' इति४॥ १४. वस्तुतस्तु 'मोऽनुस्वारः'८।३।२३॥इत्यनुस्वारे 'वा पदान्तस्य'८।४।५९॥ इत्यनेन परसवर्णे किन्नरः, विकल्पपक्षे किंनरः । अत एव विद्वद्धौरेयपं.श्रीचन्द्रशेखरझासङ्कलितहैमनूतनलघुप्रक्रियायाम्-''कुत्सितो नरः किंनरः, किन्नरः, अश्वमुखत्वात्'' इति (पृ.५३३), तेनात्र 'अनुस्वारस्य ययि परसवर्णः' ८।४।५८॥इत्यस्याप्रवृत्तिः ॥ १५. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-६६, पृ.९१॥, रामाश्रमी १।१।७१॥, पृ.३६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रक्षेपणे'(स्वा.उ.अ.), 'भृतृमृशीचरित्सरितमि(तनि)धनिमिमस्जिभ्य उः'(उणा-७)इत्युः। 'मीनाति-मिनोति दीङां ल्यपि च'६।१।५०॥ इत्यात्वं "बहुलवचनान्न भवति"[१]इत्युणादिवृत्तिः। केचित्तु-पृथगिदं नामचतुष्टयं मन्यते, तदयुक्तम्, अन्यत्रापि सर्वत्र पर्यायदर्शनात्। चत्वारि किन्नरस्य ॥१९४॥

**शंभुः शर्वः स्थाणुरीशान ईशो**
**रुद्रोड्डीशौ वामदेवो वृषाङ्कः ।**
**कण्ठेकालः शङ्करो नीलकण्ठः**
**श्रीकण्ठोग्रौ धूर्जटिर्भीमभर्गौ ॥१९५॥**

**मृत्युञ्जयः पञ्चमुखोऽष्टमूर्त्तिः**
**श्मशानवेश्मा गिरिशो गिरीशः ।**
**षण्ढः कपर्दीश्वर ऊर्ध्वलिङ्ग**
**एकत्रिदृग्भाल दृगेकपादः ॥१९६॥**

**मृडोऽट्टहासी घनवाहनोऽहि-**
**र्बुध्नो विरूपाक्षविषान्तकौ च ॥**
**महाव्रती वह्निहिरण्यरेताः**
**शिवोऽस्थिधन्वा पुरुषास्थिमाली ॥१९७॥**

**स्याद् व्योमकेशः शिपिविष्टभैरवौ**
**दिक्कृत्तिवासा भवनीललोहितौ ।**
**सर्वज्ञनाट्यप्रियखण्डपर्शवौ**
**महापरा देवनटेश्वरा हरः ॥१९८॥**

**पशुप्रमथभूतोमापतिः पिङ्गजटेक्षणः ।**
**पिनाकशूलखट्वाङ्गगङ्गाऽहीन्दुकपालभृत्॥१९९॥**
**गजपूषपुरानङ्गकालान्धकमखाऽसुहृत् ।**

१ शं कल्याणं भवते प्राप्नोति **शंभुः** । 'भूङ्[३] प्राप्तावात्मनेपदी[४]'(चु.आ.से.), 'आधृषाद्वा'(गणसू-)इति न णिच्, 'मितद्र्वादिभ्यश्च'(वा-३।२।१८०॥)इति डुः। ([५]शं सुखं तत्र भवति वा । 'भू सत्तायाम्'(भ्वा.प.से.), अतो 'मितद्र्वादिभ्यश्च'(वा-३।२।१८०॥)इति डुः[६]) । "शं सुखं भवत्यस्मादिति व्युत्पत्तिस्त्वापादाने डुप्रत्ययाभावाच्चिन्त्या" [मा.धातुवृत्तिः, धातु सं-१, पृ.४३]इति माधवः । शमयति क्लेशमिति वा शंभुः । 'शमु उपशमे'(दि.प.से.), हेतुमण्णिच्, 'शमेर्भुन्[७]'( )इति भुन् । २ प्रलयकाले सर्वं शृणातीति **शर्वः**। 'शॄ[८] हिंसायाम्'(क्र्या.प.से.), 'कॄगॄशॄदॄभ्यो वः' (उणा-१५३)इति वः, तालव्यादिः । "अर्व सर्व (षर्व) हिंसायाम्[९]' (भ्वा.प.से.)इत्यतः पचाद्यचि सर्वः, दन्त्यादिरपि"[१०] इत्युपाध्यायसर्वस्वे । अत एव "सर्वस्तु शर्वो भगवान् शंभुः कालिञ्जरः शिवः"[११]इति नामनिधानम्। ३ तिष्ठति शाश्वतं **स्थाणुः** । 'ष्ठा गतिनिवृत्तौ[१२]'(भ्वा.प.अ.), 'स्थो णुः' (उणा-३१८)इति णुः । यद्वा 'स्थासूङः क्विच्च[१३]'( )इति नुः । प्रलयकाले तिष्ठतीति वा । ४ ऐश्वर्यसामर्थ्याद् **ईशानः** । ईष्टे[१४] इत्येवंशीलो वा । 'ईश ऐश्वर्ये'(अ.आ.से.), 'ताच्छील्यवयोवचनशक्तिषु चानश्'३।२।१२९॥ इति चानश्। ५ ईष्टे इति **ईशः** । 'ईश ऐश्वर्ये'(अ.आ.से.), 'इगुपधज्ञाप्रीकिरः कः'३।१।१३५॥ इति कः। ६ रोदयति वैरिस्त्रीरिति **रुद्रः**। 'रुदिर् अश्रुविमोचने' (अ.प.से)अस्माद् हेतुमण्णिजन्ताद् 'रु(रो)देर्णिलुक् च' (उणा-१७९)इति रक्प्रत्ययः, णिलोपश्च । सर्वजगतरुजां हरणात्, रोदनहरणाद् वा रुद्रः । तथा च स्कन्दे-

"रुजः सर्वगता यस्माद् द्रावयामि जगत्यहम् ।
रोदनं हन्मि यस्माच्च रुद्रस्तस्मादहं प्रिय ॥१॥"

[१५]इति । यद्वा रवणं[१६] रुत् शब्दः, उपलक्षणेन ज्ञानम्, रुतं ज्ञानं राति ददाति भक्तेभ्य इति रुद्रः । 'रा दाने'(अ.प.अ.),

१. 'भृमृशीतृचरि-' इत्युणादिगणे ॥ २. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-६६, पृ.९१॥ ३. क्षीरतरङ्गिण्यादौ ङकारानुबन्धो न दृश्यते ॥ ४. '-पदी वा' इति क्षीरतरङ्गिण्याम्, धातुसं-२३२, पृ.३२२॥ ५. कोष्ठान्तर्गतपाठः ३प्रतौ नास्ति ॥ ६. 'घञ्' इति१॥ ७. इदं सूत्रमुणादिगणेऽदर्शनात् 'शमेर्बन्'(उणा-५३४)इत्यस्य परिवर्तनं प्रतिभाति ॥ ८. 'शॄञ्' इति२.४॥ ९. 'अर्व शर्व हिंसायाम्' इति क्षीरतङ्गिणी, भ्वादिः, धातुसं-३८५, पृ.८९॥, 'अर्व शर्व षर्व हिंसायाम्' इति मैत्रेयसायणौ, मा. धातुवृत्तिः, भ्वादिः, धातुसं-३७७, पृ.१५८, धातुप्रदीपः, भ्वादिः, धातुसं-३७३, पृ.४१॥ १०. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-२६, पृ.४५॥ ११. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-२६, पृ.४५॥, रामाश्रमी १।१।३०॥, पृ.१७, तत्र 'कालञ्जरः' इति दृश्यते ॥ १२.'-वृत्योः' इति१॥ १३. 'किच्च' इति४॥ १४. 'इष्टे' इति१.३॥ १५. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-२९, पृ.४९॥ १६. 'रणं' इति१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'आतोऽनुपसर्गे[1] कः'३।२।३॥ इति कः, 'आतो लोप इटि च' ६।४।६४॥ इत्यालोपः । ''ईश्वराद् ज्ञानमिच्छेच्च धनमिच्छेद्धुताशनात्''[ ]इति श्रुतेः । ७ उद्दिशत्यागमविशेषमिति **उड्डीशः** । उद्पूर्वः 'दिश अतिसर्जने'(तु.प.अ.), पृषोदरादित्वाद् डद्वयम् । ८ वामः श्रेष्ठो देवो **वामदेवः** । यद्वा वामः प्रतीपः संसारात्, स चासौ देवश्च वामदेवः । यद्वा लोकाचारविपरीतत्वाद् वामः । 'टुवम[2] उद्गिरणे'(भ्वा.प.से.), घञि 'नोदात्तोपदेश-'७।३।३४॥ इत्यादिना वृद्धिनिषेधे प्राप्ते 'अनाचमेः' ७।३।३४॥ इति 'कम्यमिचमि[3]'(वा-७।३।३४॥)इत्यादिना निषेधः । वामः सुन्दरश्चासौ देवश्चेति वा । ९ वृषोऽङ्कः चिह्नमस्य **वृषाङ्कः** । यौगिकत्वाद् वृषलाञ्छन इत्यादयः । १० कण्ठे कालोऽस्य **कण्ठेकालः** । 'अमूर्धमस्तकात् स्वाङ्गदकामे' ६।३।१२॥ इति सप्तम्या अलुक् । ११ शश्वद्भूतानां शं कल्याणं करोति **शङ्करः** । 'डुकृञ् करणे'(क्र्या.उ.अ.),'कृञो हेतुताच्छील्यानुलोम्येषु'३।२।२०॥ इति टः । तथा च स्कन्दे-

''शं करोमि सदा ध्यानात् परमं यन्निरामयम् ।
भूतानामसकृद् यस्मात् तेनाऽहं शङ्करः स्मृतः ॥२॥''

[[4]]इति । १२ नीलः कण्ठोऽस्य **नीलकण्ठः**, कालकूटभक्षणात् । १३ श्रीः शोभा कण्ठेऽस्य **श्रीकण्ठः** । तदुक्तं महाभारते-

''इन्द्रेण तत् पुरु क्षिप्तं वज्रं श्रीकण्ठकाषिणा ।
दत्त्वा[5] कण्ठं तु तत् पार्थ ! ततः श्रीकण्ठता मम ॥३॥''

[[6]] । १४ उच्यति क्रुधा समवैति, ओषति पुरं दहति वा **उग्रः** । 'उच समवाये'(दि.प.से.), 'उष दाहे'(भ्वा.प.से.) वा, 'ऋज्रेन्द्रेन्द्राग्रोग्र-[7] '(उणा-१८६)इति सूत्रेण रक्प्रत्ययान्तो निपातितः । १५ 'जट झट सङ्घाते'(भ्वा.प.से), 'इन् सर्वधातुभ्यः'(उणा-५५७)इतीन् जटिः । ''जटिर्जटाशीलाशीलिनी''[ ]इति द्विरूपकोषे[8] । धुरस्त्रैलोक्यचिन्तायाः जटिः सङ्घातोऽत्रेति **धूर्जटिः** । ''धूर्गङ्गा जटास्वस्य, पृषोदरादित्वादाकारस्येत्वम्''[[9]]इति स्वामी[10] भ्रान्तः, उक्तरूपेण जटिसाधनात् । ''धूर्भारभूता जटिर्जटास्य''[[9]]इति कौमुदी । ''धूम्रं रूपं च यत् तस्य तेन धूर्जटिरुच्यते''[स्वोपज्ञटीका, श्लो-२।१९५]इत्याचार्याः । १६ बिभेत्यस्माद् भैरवरूपत्वाद् **भीमः** । 'ञिभी भये'(जु.प.अ.), 'भियः षुक्[11] वा'(उणा-१४५)इति सूत्रेण मक्प्रत्ययः । 'भीमादयोऽपादाने'३।४।७४॥ इति वा साधुः । १७ बिभर्त्ति शक्तिं **भर्गः** । 'डुभृञ् धारणपोषणयोः'(जु.उ.अ.), 'स्वृभृभ्यां गः'( )इति गः । भृज्यन्ते कामकालादयोऽनेनेति वा । 'भ्रस्जौ[12] पाके'(तु.उ.अ.), करणे घञ् । भर्जति(भर्जते) वा भर्गः । भर्ज ['ऋजी भृजी भर्जने'(भ्वा.आ.से.), पचाद्यच्,] न्यङ्क्वादित्वात् कुत्वम् । भृज्यते पच्यते जगदत्रेति वा । अधिकरणे घञ् , 'चजोः कु घिण्ण्यतोः'७।३।५२॥ । 'भर्ग्यः' इति पाठे 'ऋहलोर्ण्यत्'३।१।१२४॥, 'चजोः कु घिण्ण्यतोः'७।३।५२॥ इति कुत्वम्, परं बहुभिस्तु 'भर्ग' इति मूलपाठः स्वीकृतः । ॥१९५॥ १८ मृत्युं जयति **मृत्युञ्जयः** । 'जि जये'(भ्वा.प.अ.), 'जि अभिभवे'(भ्वा.प.अ.) अतो वा, 'संज्ञायां भृतवृजिधारिसहितप(तपि)-'३।२।४६॥ इति खच् । १९ पञ्च मुखानि सद्योजात१वामदेव२अघोर३तत्पुरुषे४शानलक्षणान्यस्य **पञ्चमुखः** । २० अष्टौ मूर्त्तयः क्षितिजलपवनहुताशनयजमानाकाशसूर्यचन्द्रलक्षणा अस्येति[14] **अष्टमूर्त्तिः** । २१ श्मशानं वेश्माऽस्य **श्मशानवेश्मा**, नकारान्तः । २२ गिरिरस्यास्ति **गिरिशः** । 'लोमादिपामादि-'५।२।१००॥ इत्यादिना शः । गिरौ शेते इति वा । 'शीङ् स्वप्ने'(अ.आ.से.), गिरौ शेतेर्डः[15] । गिरिं हिमाद्रिं श्यति उपभोगेन[16] तनूकरोति वा[17] । 'शो तनूकरणे'(दि.प.अ.), 'अन्येभ्योऽपि (अन्येष्वपि)'३।२।१०१॥ इति डः, डित्त्वाट्टिलोपः । २३ गिरेरीशः **गिरीशः** । २४ मुनिभिः शापेन पातितलिङ्गत्वात् **षण्ढः** । यदुक्तं वामनपुराणे-

१. '-भ्यः' इति१, '-भ्यः कः' इति२॥ २. 'टुवमु' इति१, 'टुवमुद्गिर-' इति३॥ ३. 'अनाचमिकमिवमीनामिति वक्तव्यम्' इति वार्त्तिकस्वरूपम्॥ ४. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-२५, पृ.४५॥ ५. 'हत्वा' इति३॥ ६. द्र. स्वोपज्ञटीका २।१९५॥, पृ.४७॥ ७. 'ऋज्रेन्द्रेद्राग्रोग्र-' इति१, 'ऋज्रेन्द्राग्र'- इत्युणादिगणे॥ ८. द्वयोर्द्विरूपकोषयोर्न दृश्यते ॥ ''जटिर्जटी, शिला-शिली'' ति द्विरूपकोषः ।'' इति पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-२८, पृ.४७॥ ९. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-२८, पृ.४७॥ १०. अम. क्षीरस्वामिटीकायां ''धूर्गङ्गा जटास्वस्य धूर्जटिरिति निरुक्तम्'' इत्येव दृश्यते, १।१।३३॥, पृ.११॥ ११. 'षुक् च' इति१.२॥ १२. 'सृ-' इति३, 'स्पृ-' इति४॥ १३. क्षीरतरङ्गिण्यादौ ओकारानुबन्धरहितः पाठो दृश्यते॥ १४. 'अस्य' इति३॥ १५. 'गिरौ डश्छन्दसि'(वा-३।२।१५॥)इत्यनेन डप्रत्ययो भवतीत्याशयः ॥ १६. इतोऽग्रे १प्रतौ 'वा' इति दृश्यते॥ १७. १प्रतौ नास्ति॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"ततस्तमृषयो दृष्ट्वा भार्गवाङ्गिरसौ मुने ! ।
क्रोधभाजोऽब्रुवन् सर्वे लिङ्गोऽस्य पततां भुवि ॥४॥"

[[1]]इति । **२५** कपर्दो जटाजूटोऽस्यास्ति **कपर्दी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः । **२६** ईष्ट इत्येवंशीलः **ईश्वरः** । 'ईश ऐश्वर्ये'(अ.प.से.), 'स्थेशभासपिसकसो वरच्' ३।२।१७५॥। यदुक्तं स्कन्दे-

"ईश एवाहमत्यर्थं न च मामीशते परः ।
ददामि[2] च सदैश्वर्यमीश्वरस्तेन कीर्त्तितः ॥५॥"

[[3]]इति । **२७** ऊर्ध्वं लिङ्गमस्य **ऊर्ध्वलिङ्गः** । **२८-२९** एका तिस्रश्च दृशोऽस्य **एकदृक्**, अर्धनारीश्वरमूर्त्तौ महेश्वराङ्गस्य एकदृक्त्वात् । तिस्रो दृशोऽस्य स **त्रिदृक्**, ललाटे नेत्रयोगात्, यौगिकत्वाद् एकनेत्रः, विषमनेत्र[4]ः । **३०** भाले दृगस्य **भालदृक्** । **३१** अर्धनारीश्वरमूर्त्तौ एकः पादोऽस्य **एकपात्** । 'संख्यासुपूर्वस्य'५।४।१४०॥इति पादशब्दान्तलोपः । एकत्रिदृगादीनां त्रयाणां द्वन्द्वः ॥**१९६**॥ **३२** मृडयति[5] सुखयति **मृडः**। 'मृड सुखे[6]'(तु.प.से., क्र्या.प.से.), 'इगुपधज्ञा-'१।१।१३५॥ इति कः । **३३** अट्टः हासोऽस्य **अट्टहासी** । 'अत इनिठनौ' ५।२।११५॥ इतीनिः । **३४** घना मेघा वाहनमस्य **घनवाहनः**। यौगिकत्वाद् अब्दवाहनादयोऽपि । **३५** अहिः शेषनागो बुध्नेऽस्य भूमूर्त्ते[7]: **अहिर्बुध्नः** । पृषोदरादित्वाद् रेफागमः । "द्वाभ्यां पृथक्पदाभ्यां प्रथमैकवचनान्ताभ्यामेकं नाम"[[8]]इत्यन्ये । विभक्त्यन्तरेऽपि, यथा-"अहये बुध्नाय नमो बुध्नये[9] नमोऽस्तु गणपतये"[[8]] । **३६** रविचन्द्राग्निरूपत्वाद् द्विविधरूपाण्यक्षीण्यस्य, त्रित्वाद्वा **विरूपाक्षः**। 'बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् खच् (षच्)'५।४।११३॥ । **३७** विषमन्तयति **विषान्तकः**, समुद्रमथने विषभक्षणात् । **३८** महाव्रतं कापालिकलिङ्गं विद्यतेऽस्य **महाव्रती** । 'अत इनिठनौ'५।२।११५॥। **३९-४०** वह्निहिरण्यशब्दाभ्यां परो रेतःशब्दः, वह्नौ रेतोऽस्य **वह्निरेताः**, सकारान्तः । "देव्या सोढुमशक्यत्वादग्नौ[10] क्षिप्तमस्य[11], अत एव कुमारः पावकिः"[अम.क्षीर. १।१।३३॥]इति स्वामी[2]। हिरण्यं रेतोऽस्य **हिरण्यरेताः**, अग्निमूर्त्तिना ह्यमुना हिरण्यं प्रसूतमिति। **४१** शिवं कल्याणं, तद्योगात् **शिवः** । 'अर्शआदिभ्योऽच्' ५।२।१२७॥ । लोकानां शिवकारित्वाद् वा। शेते वसति प्रलये जगदस्मिन् वा । 'शीङपो ह्रस्वश्च[13] [वा]' (हैमोणा-५०६)इति वः । **४२** अस्थिमयं धनुरस्य **अस्थिधन्वा**, नकारान्तः । 'धनुषश्च'५।४।१३२॥ इति सूत्रेणानङ् । **४३** पुरुषास्थीनि मलते धारयतीत्येवंशीलः **पुरुषास्थिमाली**। 'मल मल्ल धारणे'(भ्वा.आ.से.), 'सुप्यजातौ णिनिस्ताच्छील्ये' ३।२।७८॥ इति णिनिः ॥**१९७**॥ **४४** गङ्गाधरणाय व्योमव्यापी केशोऽस्य **व्योमकेशः** । व्योम द्यौः, के मूर्ध्नि शेतेऽस्येति वा । "शीर्ष्णो द्यौः समवर्त्तत"[ऋ.-१०]इति श्रुतेः[14] ।'अन्येऽभ्योऽपि(अन्येष्वपि) दृश्यते'३।२।१०॥ इति डः। **४५** शिविर्नाम राजा नारायणेन हतः, स चेश्वरस्यात्यन्तं प्रिय इति, तस्यास्थीनि शिरसि धृतानि, अतः पिष्टोऽस्थ्यादिरूपेण शिपिरत्र **शिपिविष्टः**, पृषोदरादित्वात्। शिपिरिन्द्र[15]लुप्त[वात]स्तेन विष्टो व्याप्त इति वा । **४६** बिभर्त्ति कपालम्, बिभेत्यस्मादिति वा **भैरवः**। 'भैरवकैरव-'(हैमोणा-५१९)इत्यादिना निपातनात् साधुः । **४७-४८** दिशः कृत्तिश्च वासोऽस्य **दिग्वासाः**, सकारान्तः, नग्नत्वात्। कृत्तिः चर्म वासोऽस्य **कृत्तिवासाः** सकारान्तः, गजचर्मसं[16]व्यानत्वात्। **४९** भवति विश्वमस्माद् रजोगुणापन्नत्वादिति **भवः** । बाहुलकादपादानेऽप्यच् । विश्वमस्त्यस्मिन्निति वा । 'असु(अस) भुवि'(अ.प.से.) इत्यस्य धातोर्भू[17]रादेशाद् भुवोऽच्[18]। [यद्वा] 'श्रिणीभुवः-'३।३।२४॥ इत्य[त्र] श्रिणीसाहचर्यात् भुवो भौवादिकादेव घञ् । **५०** "जुह्वतो ब्रह्मणो ललाटे स्वेदो जातस्तं महेश्वरं तेजोऽध्यतिष्ठत्, तच्चाग्नौ निपत्य नीलं भूत्वा लोहितं बभूव, ततोऽयं जात इति नीललोहितः"[[19]]इति पौराणिकाः । स्कन्दे-

१. द्र. स्वोपज्ञटीका २।१९६॥, पृ.४७॥, तत्र '-ङ्गिरसौ' इत्यस्य स्थाने '-ङ्गिरसो' इति दृश्यते॥ २. 'ददासि' इति२॥ ३. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-२५, पृ.४५॥ ४. '-नेत्रश्च' इति३॥ ५. अत्र मृडति मृड्नाति वा पाठ्यम्, मृडधातोस्तुदादिक्र्यादित्वात्॥ ६. 'सुखने' इति क्षीरतरङ्गिण्यादौ दृश्यते॥ ७. 'भूमूर्तिः' इति२॥ ८. द्र. स्वोपज्ञटीका २।१९८॥, पृ.४७॥ ९. २प्रतौ नास्ति॥ १०. इतोऽग्रे अम.क्षीर.टीकायां 'हि' इति दृश्यते, १।१।३३॥, पृ.११॥ ११. 'अस्य' इति अम. क्षीर. नास्ति, १।१।३३॥, पृ.११॥ १२. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-२८, पृ.४७॥ १३. 'ह्रस्वेति' इति२.३॥ १४. द्र. स्वोपज्ञटीका २।१९८॥, पृ.४७॥, अम.क्षीर. १।१।३४॥, पृ.१२॥ १५. 'इन्द्रं लुप्त-' इति२॥ १६. 'संख्यान-' इति१॥ १७. 'अस्तेर्भूः' २।४।५२॥ इत्यनेन॥ १८. अत्र 'ऋदोरप्' ३।३।५७॥ इति मनसि निधाय 'अप्' इति पाठ्यम् ॥ १९. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-२८. पृ.४७॥, तत्र 'महेश्वरं' इत्यस्य स्थाने 'माहेश्वरं' इति दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

''नीलं येन समागं (ममाङ्गं) तु रसाक्तं लोहितं त्विषा ।
नीललोहित इत्येव ततोऽयं परिकीर्त्तितः ॥४॥''[[1]]इति वा । ''नीलः कण्ठो लोहिताश्च केशाऽस्येति नीललोहितः[2]''[अम.-क्षीर.१।१।३३॥]इति स्वामी[3]। ५१ सर्वं जानाति **सर्वज्ञः**। 'ज्ञा अवबोधने'(क्र्या.प.अ.), 'इगुपधज्ञा[4]-'३।१।१३५॥ इति कः, 'आतो लोपः-'६।४।६४॥ इत्यालोपः । ५२ नाट्यं प्रियमस्य **नाट्यप्रियः** । ५३ गदासुरवधे खण्डीभूतः पर्शुरस्य **खण्डपर्शुः** । यद्वा खण्डयतीति खण्डः, पचाद्यच् । तादृशः पर्शुरस्य खण्डपर्शुः । ''खण्डपर्शुः पर्शुरामे शङ्करे चूर्णलेपिनि''[विश्वप्रकाशः, शान्तवर्गः, श्लो-३८]इति विश्वः । ५४-५६ महापरा देवनटेश्वराः, देवनटेश्वराः महच्छब्दात् पुरो[5] योज्याः, तेन महांश्चासौ देवश्च **महादेवः**, सर्वदेवानां महनीयत्वात् । तथा च शाम्बपुराणम्-

''पूज्यते यत्सुरैः सर्वैर्महांश्चैव प्रमाणतः ।
धातुर्महति(-र्महेति) पूजायां महादेवस्ततः स्मृतः ॥५॥''

[[6]]इति । स्कन्देऽपि-

''महतामपि देवानामहमेव महान् यतः ।
न तु मत्तो महानन्यो महादेवस्ततो ह्यहम्[7] ॥ ६॥''

[[6]]इति। **महानटः**, नाट्यस्थितिकारित्वात् । महांश्चासावीश्वरश्च **महेश्वरः**। 'सन्महत्परमोत्तमोत्कृष्टाः'२।१।६१॥ इति समासः, 'आन्महतः समानाधिकरणजातीययोः'६।३।४६॥ इत्यात्वम्। ५७ प्रलये कृत्स्नं हरति **हरः** ।'हृञ् हरणे'(भ्वा.उ.अ.), पचाद्यच्। पृषोदरादित्वादीत्वे[8] हीरोऽपि, ''हीरः कपर्दी समीरः''[[10]] इति संसारावर्त्तात् ॥१९८॥ ५८-६१ पशूनाम्, प्रमथानाम्, भूतानाम् , उमायाश्च पतिः, पशूनां सुरनरतिरश्चां पतिः **पशुपतिः**, सुरनरतिरश्चां पशुत्वेनोक्तत्वात्, ''आब्रह्मान्तं लोकाः पशवः'' [[11]]इति स्मृतेः । ''तिर्यग्जातौ पशुः प्रोक्तः सर्वप्राणिनि पुंस्ययम्''[[12]]इति स्वामी । ''पशवः प्रमथास्तेषां पतिः पशुपतिः''[[13]]इति कौमुदी । ''पशुर्मृगादौ छगले प्रमथे च पशुः पुमानयम्''[[14]]इति तालव्यान्ते रभसः । स्कन्दे-

''पालयामि पशून् यस्मात् सृजामि च यदृच्छया ।
तेषां च पतिरेवाहं तस्मात् पशुपतिः स्मृतः ॥७॥''

[[15]]इति । **प्रमथपतिः**, **भूतपतिः**, **उमापतिः**, यौगिकत्वात् पशुनाथः, गणनाथः, भूतनाथः, गौरीनाथः इत्यादयः । ६२-६३ पिङ्गा जटा ईक्षणं च[16] यस्य स तथा **पिङ्गजटः**, **पिङ्गेक्षणः**। ६४-७० पिनाकं च शूलं च खट्वाङ्गं च गङ्गां च अहिं च इन्दुं च कपालं च बिभर्त्ति, तेन **पिनाकभृत्**, **शूलभृत्**, **खट्वाङ्गभृत्**, **गङ्गाभृत्**, **अहिभृत्**, **इन्दुभृत्**, **कपालभृत्**, यौगिकत्वात् पिनाकपाणिः, शूली, खट्वाङ्गधरः, गङ्गाधरः । 'धृञ् धारणे'(भ्वा.उ.अ.), पचाद्यच् । गङ्गाया धरो गङ्गाधरः। अन्यथा तु कर्मण्यण्, 'संज्ञायां भृतवृज(वृजि)'३।२।४६॥ इति सूत्रेण खच् वा स्यात् । उरगभूषणः, शशिभूषणः, कपाली इत्यादयः ॥१९९॥ ७१-७७ गजस्य, पूष्णः, पूरस्य, अनङ्गस्य, कालस्य, अन्धकस्य, मखस्य असुहृद् **गजासुहृत्**, गजासुरहन्तृत्वात् । **पूषासुहृत्**, दक्षाध्वरध्वंसने हि पूष्णो दन्ता महेश्वरेण पातिताः । यद् वामनपुराणम्-

''ततः क्रोधाभिभूतेन पूष्णो वेगेन शंभुना ।
मुष्टिनाऽऽहत्य दशनाः पातिता धरणीतले ॥८॥'' [[17]]

**पुरासुहृत्**, शंभोराग्नेयबाणेन त्रिपुरस्य प्लुष्टत्वात् । **अनङ्गासुहृत्**, शंभोस्तृतीयनेत्राग्निना कामस्य दग्धत्वात् । **कालासुहृत्**, दक्षमखध्वंसे यमस्य जितत्वात् । **अन्धकासुहृत्**, अन्धको हि समरे[18] शूलेन [19]शूलिना प्रोतः । **मखासुहृत्**, दक्षस्य मखो महेश्वरेण विध्वंसितः। यौगिकत्वाद् गजासुरद्वेषी, पूषदन्तहरः, त्रिपुरान्तकः । त्रयाणां पुराणां समाहारः त्रिपुरम्, पात्रादिगणस्थः,

---

१. द्र. टीकासर्वस्वम्, भा-१, १।१।३३॥, पृ.२६॥, पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-२८, पृ.४७॥ २. '-लोहि तु स्वामी' इति१॥ ३. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-२८, पृ.४७, तत्र 'नीललोहितः' इति न दृश्यते, अम. क्षीरस्वामिटीकायां ''नीलः कण्ठे लोहितश्च केशेऽतो नीललोहित इति पुराणम्'' इति दृश्यते १।१।३३॥, पृ.११॥ ४. '-धेति' इति१.२॥ ५. 'परा' इति२॥ ६. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-२७, पृ.४६॥ ७. 'ह्ययम्' इति२॥ ८. '-दरादीत्वे' इति१.४॥ ९. '-दीत्वा' इति२॥ १०. रामाश्रमी १।१।३३॥, पृ.१८॥, तत्र 'शमिरः' इति दृश्यते॥ ११. द्र. स्वोपज्ञटीका २।१९९॥, पृ.४७॥ १२. अम. क्षीरस्वामिटीकायां न दृश्यते, स्वाम्यनुल्लेखेनोद्धृतमिदं वचनं रामाश्रम्यां द्रष्टव्यम्, १।१।३०॥, पृ.१७॥ १३. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-२५, पृ.४४॥ १४. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-२५, पृ.४४॥, रामाश्रमी १।१।३०॥, पृ.१७॥, तत्र 'प्रमथेऽपि पुमानयम्' इति पदचन्द्रिका, 'प्रमथे च पुमानयम्' इति रामाश्रमी॥ १५. टीकासर्वस्वम्, भा-१, १।१।३१॥, पृ.२५॥, पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-२५, पृ.४४॥ १६. १.३प्रत्योर्नास्ति ॥ १७. द्र. स्वोपज्ञटीका २।२००॥, पृ.४८॥ १८. 'समरे शूलिना' इति३॥ १९. 'शुलि-' इति१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्यान्तकः । कामध्वंसी[1], यमजित्, अन्धकारिः, [2]दक्षाध्वरध्वंसकः इत्यादयः । सप्तसप्तिर्महादेवस्य । शेषश्चात्र–

''शङ्करे[3] नन्दिवर्धनः ॥

बहुरूपः सुप्रसादो मिहिराणोऽपराजितः ।
कङ्कटीको गुह्यगुरु[4]र्भगनेत्रान्तकः खरुः ॥८॥

परिणाहो दशबाहुः सुभगोऽ[5]नेकलोचनः ।
गोपालो वरवृद्धोऽहिपर्यङ्कः पांशुच[6-1]न्दनः ॥९॥

कूटकृन्मन्दरमणिर्नवशक्तिर्महाम्बुक[7]: ।
[8]कोणवादी शैलधन्वा विशालाक्षोऽक्षतस्वनः ॥१०॥

उन्मत्तवेषः शबरः सिताङ्गो[6-2] धर्मवाहनः ।
महाकान्तो वह्निनेत्रः स्त्रीदेहार्द्धो नृवेष्टनः ॥११॥

महानादो नि[9]राधारो भूरिरेकादशोत्तमः ।
जोटी[10]झोटीङ्गोऽर्धकूटः समिरौ[11]धूम्रयोगिनौ ॥१२॥

उलन्दो जयतः कालो जटाधरदशाव्ययौ ।
सन्ध्यानाटी रेरिहाणः शङ्कुश्च कपिलाञ्जनः ॥१३॥

जगद्रोणिरर्द्धकालो दिशांप्रियतमोऽतलैः[12] ।
जगत्स्रष्टा कटाटङ्कः कटप्रूहीरहत्करौ[13]: ॥१४॥''
[शेषनाममाला २।४१-४८॥] ॥

## कपर्दोऽस्य जटाजूटः

१ अस्य शंभोः, जटाजूटो जटाबन्धः, 'पर्व पूरणे' (भ्वा.प.से.), संपदादित्वात् क्विप्, 'राल्लोपः'६।४।२१॥ इति वकारलोपः, कस्य गङ्गाजलस्य पूरणेन दापयति शुद्ध्यतीति कपर्दः । 'दैप् शोधने'(भ्वा.प.अ.), 'सुपि'३।२।४॥ इति योगविभागात् कः । ''(कस्य गङ्गाजलस्य पूरः) पूरणमिदं दापयति शुद्ध्यति, पृषोदरादित्वादूकारस्याकारः''[ ]इति त्वन्यैः[14] । के शिरसि पर्दति शब्दायते वा । ''कं शिरः पिपर्त्ति वा[15] कपर्दः, औणादिको दप्रत्ययः[16]''[अम.क्षीर. १।१।३५॥]इति तु स्वामी । जटानां जूटो रचनाविशेषो बन्ध इति यावत् । शिवजटाबन्धनस्यैकम्॥

## खट्वाङ्गस्तु सुखंसुणः ॥२००॥

१ खट्वाया अङ्गमिव सरलत्वेन ईषा सदृशत्वात् [**खट्वाङ्गः**], पुंस्ययम् । क्लीबेऽपि व्याडिः–''खट्वाङ्गं शिवपांशुलम्''[[17]]इति । २ सुष्ठु खं सुखं सुनोति संबध्नाति **सुखंसुणः** । 'भ्रूण-'(हैमोणा-१८६)इत्यादिना णान्तो निपात्यते । महादेवस्य खट्वाङ्गनामायुधविशेषस्य द्वे ॥२००॥

## पिनाकं स्यादाजगवमजकावं च तद्धनुः ।

१ त्रिपुरदाहे शरानलज्वालाजालेन नाकमपि[18] पिहितवानिति **पिनाकम्,** पुंक्ली. । निजभासा पिहितनाको वा । [19]अपिरत्र पिहितार्थवाची पृषोदरादित्वात् पूर्वनिपातोऽकारलोपश्च । यद्वा पातीति पिनाकः ।' पा रक्षणे'(अ.प.अ.), 'पिनाकादयश्च'(उणा-४५५)इति आकः नुमागम इत्वं च निपात्यते । यद्वा पिनष्टि यरीन् पिनाकम् । 'पिष्लृ संचूर्णने' (रु.प.अ.),'पिषेः पिन्पिण्यौ च'(हैमोणा-३६) इति उणादिसूत्रेण आकः ।२ अजगवोऽस्थिविकारस्तस्येदम् **आजगवम्** ।'तस्येदम्' ४।३।१२०॥ इत्यण् । यत्कात्यः-''धनुर्वदन्त्याजगवं पिनाककरगोचरम्''[[20]] ।३ अजका[21]ग्रहणस्थानमस्यास्ति वा **अजकावम्** इति प्रथमवर्गाद्यमध्योऽपि ।'अन्येऽभ्योप्युपसंख्यानम्'(वा-५।२।१०९॥)इति वः ।'गाण्ड्यजकात्[22] संज्ञायाम्'५।२।११०॥ इति को (वो) वा । ''पिनाकोऽजगवं धनुः''[अमरकोषः १।१।३५॥]इति ह्रस्वादिममरः प्राह । ''अजकावा[23]जगावेव भवेदाजगवं तथा, पिनाकेऽजगवं च''[ ]इति शब्दप्रभेदः । यद्वा

---

१. इतोऽग्रे ३प्रतौ 'यमध्वंसी' इति दृश्यते॥ २. 'दक्षाधर-' इति३॥ ३. १.२.४प्रतौ नास्ति॥ ४. '-नग-' इति१.२.४॥ ५. '-नैक-' इति१.२.४॥ ६-१ 'पांसुचन्दनः' ६-२ 'शिताङ्गे' इति शेषनाममालास्वोपज्ञटीकयोः॥ ७. 'महाम्बकः' इति शेषनाममालायाम्॥ ८. 'कौल-' इति३॥ ९. 'नराधारो' इति शेषनाममालास्वोपज्ञटीकयोः॥ १०. 'झोटीगोऽर्ध-' इति२.४, 'जोटी' इति शेषनाममालास्वोपज्ञटीकयोः॥ ११. 'समरो' इति२.३.४॥ १२. '-तमोऽनिलः' इति३, '-तमोऽनलः' इति२॥ १३. '-रकृत्कराः' इति१.२.४॥ १४. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-३०, पृ.४९॥, तत्र ''कस्य जलस्य पूः पूरणमिति 'पृषोदरादित्वात्' (पा.६।३।१०९॥) ऊकारस्य अकार इति तु अन्यः'' इति दृश्यते ॥ १५. अम.क्षीर. टीकायां नास्ति॥ १६. अम.क्षीर. टीकायामस्य स्थाने 'दः' इत्येव दृश्यते, १।१।३५॥, पृ.१२॥ १७. द्र. स्वोपज्ञटीका २।२००॥, पृ.४८॥ १८. 'नामकमपि' इति३॥ १९. 'अपिरपिहि-' इति१.३, 'अपि पिहि-' इति४॥ २०. द्र. स्वोपज्ञटीका २।२०१॥, पृ.४८॥ २१. 'अजंका' इति२॥ २२. '-जगात्' इत्यष्टाध्याय्याम् ॥ २३. '-जवा-' इति१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अजो विष्णुः, को ब्रह्मा, तावत्र स्त इति, 'गाण्ड्यजगात् संज्ञायाम्'५।२।११०॥ इति वः । ''निपातनात् कुत्वम्, अजकावम्''[ ]इति तु भाष्यम्, तन्मते सूत्रेऽपि ककारः, प्रज्ञादित्वादणि, 'अन्येषामपि भाषायां दीर्घत्वं दृश्यते' ६।३।१३७॥ इति दीर्घः । ''धनुस्त्वजगवं [1]पुण्य(युग्य)-मजकावमजाजकम्''[[2]]इति शब्दार्णवः । तस्य महादेवस्य धनुस्तद्धनुः । महादेवधनुषस्त्रीणि ॥

**ब्राह्म्याद्या मातरः सप्त**

१ ब्रह्मादीनां स्वेदान्निर्गतत्वाद् ब्रह्मण इयं **ब्राह्मी**। 'तस्येदम्'४।३।१२०॥ इत्यण्, 'ब्राह्मोऽजातौ'६।४।१७१॥ इति टिलोपः, 'टिड्ढाणञ्-'४।१।१५॥ इति ङीप् । ब्रह्माणीति शैव-प्रसिद्धम् । ब्राह्मी आद्या आसां **ब्राह्म्याद्याः** । मान्ति वर्तन्ते **मातरः**, शंभोः परिकरभूताः । यदुक्तम्-

''स्मृताद्या ब्रह्माणी सिद्धा माहेश्वरी च कौमारी ।
वैष्णव्यथ वाराही चामुण्डा मातरः सप्त ॥१॥''

[[3]] इति । केचित्त्वष्टावाहुः । तदुक्तम्[4]-

''ब्राह्मी माहेश्वरी चेन्द्री[5](चैन्द्री) वाराही वैष्णवी तथा।
कौमारी चाथ चामुण्डा चर्चिकेत्यष्टमातरः ॥२॥''

[[6]]इति । तथा च भट्टस्वामी ''अस्याष्टौ परिवारत्वेन मान्ति वर्त्तन्ते मातरः[7]''[अम.क्षीर.१।१।३५॥] । सर्वधरादयस्तु-चामुण्डाचर्चिकाशब्दावपनीय कौमारीति पठित्वा ''सप्तैव मातरः''[ ]इत्याहुः[8] । 'मातरः' बहुवचनान्त एव, यथा ''तं मातरो देवमनुव्रजन्त्यः''[ ]इति । महादेवस्य हि ब्राह्म्याद्या मातृनाम्न्यः परिवारत्वेन वर्त्तन्ते, तासां सप्तानामेकम् ॥

**प्रमथाः पार्षदा गणाः ॥ २०१ ॥**

१ रुद्रद्वेषिणं प्रमथ्नन्ति **प्रमथाः** । 'मन्थ विलोडने' (क्र्या.प.से.), पचाद्यच् । २ पर्षदि साधवः **पार्षदाः**[9] । णे, 'परिषदो ण्यः'४।४।१०१॥ इति योगविभागात् णः । ''भूताः शिवस्य पार्षदाः''[[10]]इति संसारावर्त्तः । ''स पार्षदैरम्बरमापुपूरत्''[[11]]इति जाम्बवत्यां पाणिनिः । परिषदि साधव इति व्युत्पत्त्या पारिषदा इत्यपि । ३ गण्यन्ते दिव्यपदप्राप्त्येति **गणाः** । 'गण संख्याने'(चु.उ.से.), कर्मणि घञ् । शिवस्य गणनामानि त्रीणि, महादेवस्य 'पासवाण' इति भाषा ॥ २०१॥

**लघिमा वशितेशित्वं प्राकाम्यं महिमाऽणिमा ।**
**यत्रकामावसायित्वं प्राप्तिरैश्वर्यमष्टधा ॥२०२॥**

१ लघोर्भावो **लघिमा**, येन वायोरपि लघुर्भवति । २ वशिनो भावो **वशिता** वशित्वम्, सर्वजीववशीकरणशक्तिः, भूतानि पृथिव्यादीनि, भौतिकानि गोघटादीनि, तेषु वशी स्वतन्त्रो भवति तेषां त्ववश्यः, तत्कारणतन्मात्रपृथिव्यादिपरमाणु-वशीकारात् [12]तत्कार्यवशीकरः, तेन तान् यथावस्थापयति, तथावतिष्ठन्त इत्यर्थः । बृहस्पतिस्तु-''वशिता, यया भूमावपि जलवन्मज्जनोन्मज्जने करोति''[ ]इत्याह । ३ ईष्टे इत्येवंशील ईशी, ईशिनो भाव **ईशित्वम्**, तेषां भूतभौतिकानां विजितमूल-प्रकृतिः सन् य उत्पादो यो विनाशो यच्च [13]यथावदवयवसंस्थानं तेषामीष्टे । ४ प्रकृष्टः कामोऽस्य प्रकामः, तद्भावः **प्राकाम्यम्**, इच्छानभिघातः, नास्य केनापीच्छा प्रतिहन्यते । ५ महतो भावो **महिमा**, अल्पोऽपि नगनगरगगनपरिमाणो भवति । ६ अणोर्भावः **अणिमा**, येन कृत्वा महान् अपि अणुपरिमाणो भवति । ७ यत्र काम इच्छा तत्र आवसतीत्येवंशीलः **यत्र-कामावसायी**, तद्भावस्तत्त्वम्, सत्यसङ्कल्पना, विजितगुणार्थ-तत्त्वो यद्यदर्थतया सङ्कल्पयति तत्तस्मै प्रयोजनाय कल्पते[14], विषमप्यमृतकार्ये सङ्कल्प्य भोजयन् जीवयतीति[15]। ८ प्रापणं **प्राप्तिः**, सर्वे भावा संनिहिता भवन्ति, तद्यथा भूमिष्ठो-ऽप्यङ्गुल्यग्रेण चन्द्रं स्पृशति। इत्यैश्वर्यमष्टधा । महादेवस्याष्टानां लघिमादीनां नामैकम् **'ऐश्वर्यम्'** इति ॥२०२॥

**गौरी काली पार्वती मातृमाता-**
**ऽपर्णा रुद्राण्यम्बिका त्र्यम्बकोमा ।**

१. 'पुण्यमतकावमऽत्तजक-' इति२॥ २. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-३०, पृ.४९॥, रामाश्रमी १।१।१३५॥, पृ.१८॥, ३. द्र. स्वोपज्ञटीका २।२०१॥, पृ.४८॥ ४. ३प्रतौ नास्ति ॥ ५. 'चण्डी' इति३॥ ६. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-३०, पृ.५०॥, रामाश्रमी १।१।३५॥, पृ.१९॥ ७. अस्य स्थाने अम.क्षीर.टीकायां 'मातृनाम्न्यः' इति दृश्यते, १।१।३५॥, पृ.१२॥ ८. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-३०, पृ.५०॥ ९. 'पर्षदाः' इति३॥ १०. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-३०, पृ.५०॥, रामाश्रमी १।१।३५॥, पृ.१९॥, रामाश्रम्यां '-पार्षद्या पार्षदाः' इति दृश्यते ॥ ११. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-३०, पृ.५०॥ १२. 'तत्कार्यावशी-' इति१.२.४॥ १३. 'यदावदवसं-' इति३॥ १४. 'कल्प्यते' इति१.२॥ १५. '-यति' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दुर्गा[10] चण्डी[11] सिंहयाना[12] मृडानी[13]-
कात्यायन्यौ[14] दक्षजा[15]ऽऽर्या[16] कुमारी[17]॥२०३॥
सती[18] शिवा[19] महादेवी[20] शर्वाणी[21] सर्वमङ्गला[22]।
भवानी[23] कृष्णा[24]मैनाकस्वसा[25] मेना[26]द्रिजे[27]श्वरा[28] ॥२०४॥
निशुम्भ[29]शुम्भ[30]महिष[31]मथनी भूतनायिका[32]।

१ गौरवर्णत्वाद् **गौरी** । 'षिद्गौरादिभ्यश्च' ४।१।४१॥ इति गौरादित्वात् ङीष् । तथा च स्कन्दे-

"इच्छामि देवि ! दिव्यं च वपु: कनकसुप्रभम् ।
गौरीति लोके विख्याता भवेयं कमलोद्भवा ॥ १॥"

[[1]]इति । **२** संहारमूर्त्तौ[2] श्यामवर्णत्वात् **काली**। 'जानपदकुण्ड-'४।१।४२॥ इति ङीष् । वर्णस्याविवक्षायां 'काला' इत्यपि । "उमा कात्यायनी दुर्गा काली हैमवतीश्वरी। काला कालिञ्जरी गौरा"[[1]]इति वाचस्पति: । **३** पर्वतस्यापत्यं **पार्वती**। 'तस्यापत्यम्'४।१।९२॥ इत्यण्, 'टिड्ढाणञ्-'४।१।१५॥ इति ङीप्[3] । यद्वा पर्वतोऽभिजनोऽस्या: पार्वती। '[4]सिन्धुतक्षशिलादिभ्योऽणञौ'४।३।९३॥ इति प्रथमान्तादभिजनोपाधिकादस्येत्यर्थे तक्षशिलादित्वादञि ङीष् ( ङीप् ) । "यत्र पूर्वैरुषितं सोऽभिजन:"[ ]इति धातुवृत्ति: । **४** मातॄणां ब्राह्म्यादीनां माता **मातृमाता** । 'न षट्स्वस्रादिभ्य:' ४।१।१०॥ इति न ङीप् । **५** तपस्यन्त्यानया स्वयं शीर्णमपि पर्णं न भुक्तमिति, न विद्यते पर्णमप्याहारोऽस्या **अपर्णा**। जाते[रि]त्यनुवृत्ते: 'पाककर्णपर्ण-'४।१।६४॥ इत्यादिना न ङीष् । **६** रुद्रस्य स्त्री **रुद्राणी** ।'इन्द्रवरुण-'४।१।४९॥ इत्यादिना ङीषानुकौ । **७** जगन्मातृत्वात् अम्बैव **अम्बिका**। संज्ञायां कन्, 'प्रत्ययस्थात् कात् पूर्वस्यात:-'७।३।४४॥ इतीत्वम् । **८** त्रीणि अम्बकानि नेत्राण्यस्या: **त्र्यम्बका** । **९** अवति रक्षति आपद्भ्य **उमा** । 'अव रक्षणादौ'(भ्वा.प.से.), 'अविसिवि[स]शुषिभ्य: कित्' (उणा-१४१)इति मन्प्रत्यये, कित्त्वे[5], 'ज्वरत्वर-'६।४।२०॥ इत्यट्(ठ्)त्वे, बाहुलकात् ह्रस्वत्वे च उमा । ओर्महेश्वरस्य मा लक्ष्मीरिति वा । "उ मेति मात्रा तपसे निषिद्धा"[कुमारसंभवम्, सर्ग:-१, श्लो-२६]इति वा । **१०** 'सर्वे गत्यर्था ज्ञानार्था:' इत्युक्ते: दु:खेन गम्यते ज्ञायतेऽसाविति **दुर्गा**। 'गम्लृ गतौ'(भ्वा.प.अ.), 'अन्येभ्योऽपि (अन्येष्वपि)-'(वा-३।२।४८॥)इति ड:। दु:खेन गन्तुं शक्यतेऽस्यामिति आधारविवक्षायां "सुदुरोर-धिकरणे'(वा-३।२।४८॥) ड:"[माधवीयधातुवृत्तौ भ्वा., पृ.२७८ ]इति माधव: । दुर्गं वनं [6]गिरिर्वा निवासत्वेनास्त्यस्या इति, अर्शआदित्वादचि दुर्गा । दुर्गनामासुरवधाद्वा । तथोक्तम्-

"तत्रैव च वधिष्यामि दुर्गमाख्यं महासुरम् ।
दुर्गादेवीति विख्यातं तन्मे नाम भविष्यति॥२॥"

[[7]]इति मार्कण्डेयपुराणम् । **११** चण्डति **चण्डी,** कोपनत्वात् । 'चडि[8] कोपे'(भ्वा.आ.से.), पचाद्यच्, स्त्रियां 'बाह्वादिभ्यश्च'४।१।४५॥ इति ङीष्[9] । **१२** सिंहो यानमस्या: **सिंहयाना**, यौगिकत्वात् सिंहवाहनाऽपि । **१३** मृडस्य शिवस्य भार्या **मृडानी**[10] ।'इन्द्रवरुण-'४।१।४९॥ इत्यादिना ङीषानुकौ। **१४** कतस्यापत्यं **कात्यायनी** ।'गर्गादिभ्यो यञ्'४।१।१०५॥, तत: 'सर्वत्र' लोहितादिकतन्तेभ्य:'४।१।१८॥ इति ष्फ[11]:, फस्यायनादेश:, षित्त्वात् ङीष् । **१५** दक्षाज्जाता **दक्षजा** । 'जनी प्रादुर्भावे'(दि.आ.से.), 'पञ्चम्यामजातौ'३।२।९८॥ इति ड: । यौगिकत्वाद् दाक्षायणी[12]। **१६** अर्यत इति **आर्या**। 'ऋ गतौ'(जु.पं.अ.), 'ऋहलोर्ण्यत्'३।१।१२४॥ इति ण्यत् । **१७** **कुमारी** अवस्थाभेदात् ॥२०३॥ **१८** **सती** इति प्राग्जन्मनि दक्षपुत्रीत्वे नाम, दक्षजेतिवत् । यद् वामनपुराणम्-

"ब्रह्मंस्त्वयौ[13] समाख्याता मृता दक्षात्मजा सती ।
सा जाता हिमवत्पुत्रीत्येवं मे वक्तुमर्हसि ॥३॥"

[[14]]। **१९** शक्तिशक्तिमतोरभेदोपचारात्, स्वत: श्रेयस्करीत्वाद्वा **शिवा** । "पुंयोगे ङीषि[15] शिवी"[अम.क्षीर.१।१।३७॥]इति च स्वामी[16] । **२०** महादेवस्य भार्या **महादेवी** । **२१** शर्वस्य

---

१. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्ग:, श्लो-३१, पृ.५२॥ २. '-पूर्तौ' इति१॥ ३. 'ङीष्' इति२.३.४॥ ४. 'सिन्धु-' इति ४प्रतौ नास्ति॥ ५. ३प्रतौ नास्ति॥ ६. 'गिरिर्वासो निवा-' इति२॥ ७. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्ग:, श्लो-३२, पृ.५३॥ ८. 'चंडि' इति१॥ ९. 'ङीप्' इति १.३.४॥ १०. 'मृडाणी' इति३॥ ११. 'फ:' इति३॥ १२. '-यनी' इति३॥ १३. 'सया' इति४॥ १४. द्र. स्वोपज्ञटीका २।२०४॥, पृ.४९॥ १५. 'ङीपि' इति३॥ १६. अम.क्षीर.टीकायां "पुंयोगे च शिवस्य स्त्री शिवी" इति दृश्यते, १।१।३७॥, पृ.१३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भार्या **शर्वाणी** । 'इन्द्रवरुण-'४।१।४९॥ इति ङीषानुकौ। **२२** सर्वाणि मङ्गलान्यस्याः **सर्वमङ्गला** । **२३** भवस्य भार्या **भवानी** । 'इन्द्रवरुण-'४।१।४९॥ इति ङीषानुकौ । **२४-२५** कृष्णमैनाकाभ्यामग्रे स्वसा, तेन **कृष्णस्वसा,** ऋकारान्तः, नन्दपुत्रीत्वात्, **मैनाकस्वसा,** मैनाको हिमाचलपुत्रः पर्वतविशेषः, तस्य स्वसा मैनाकस्वसा, ऋकारान्तः । **२६-२७** मेनाद्रिभ्यामग्रे जः शब्दो योज्यते, तेन मेनानाम्नी हिमाचलपत्नी, ततो जाता **मेनजा**, अद्रेर्जाता **अद्रिजा** । **२८** ईष्टे इति **ईश्वरा** । 'ईश ऐश्वर्ये'(अ.आ.से.), 'स्थेशभासपिशकसो वरच्'३।२।१७५॥, अजादित्वाट्टाप्, गङ्गावद् रूपाणि । ईश्वरीति तु 'अश्नोतेराशुकर्मणि वरट्, ईच्चादेः'(उणा-७३५) इति टित्त्वात् ङीप्[१], नदीवत् । "ईश्वरः शङ्करेऽधीशे तत्पत्न्यामीश्वरीश्वरा"[[२]]इति वोपालितः । ईश्वरस्य भार्या वा ईश्वरी ॥२०४॥ **२९-३१** निशुम्भशुम्भमहिषानामग्रे मथनी, तेन [३]निशुम्भं मथति **निशुम्भमथनी, शुम्भमथनी, महिषमथनी** । **३२** भूतानां नायिका **भूतनायिका** । 'प्रत्ययस्थात्-'७।३।४४॥ इतीत्वम्। द्वात्रिंशत् पार्वत्याः । शेषश्चात्र-

"गौतमी कौशिकी कृष्णा तामसी वाभ्रवी जया ।
कालरात्रिर्महामाया भ्रामरी यादवी वरा ॥४॥
बहिर्ध्वजा शूलधरा परमब्रह्मचारिणी ।
अमोघा[४] विन्ध्यनिलया षष्ठी कान्तारवाहिनी[५] ॥५॥
जाङ्गुली बदरीवासा वरदा कृष्णपिङ्गला ।
दृषद्वतीन्द्रभगिनी प्रगल्भा रेवती तथा ॥६॥
महाविद्या सिनीवाली रक्तदन्त्येकपाटला[६] ।
एकपर्णा बहुभुजा नन्दपुत्री महाजया ॥७॥
भद्रकाली महाकाली योगिनी गणनायिका[७] ।
हासा भीमा[८] प्रकूष्माण्डी गण्डिनी[९-१] वारुणी हिमा ॥८॥
अनन्ता विजया क्षेमा मानस्तोका कुहावती ।
वारणी[९-२] च पितृगणा स्कन्दमाता घनाञ्जनी[१०] ॥९॥
गान्धर्वी[११] कर्बरी[९-३] गार्गी सावित्री ब्रह्मचारिणी ।
[१२]कोटिश्रीर्मन्दरावासा[१३] केशी मलयवासिनी ॥१०॥
कालायनी विशालाक्षी किराती गोकुलोद्भवा ।
एकानसी[१४] नारायणी शैला शाकम्भरीश्वरी ॥११॥
[१५]प्रकीर्णकेशी कुण्डा च नीलवस्त्रोग्रचारिणी ।
अष्टादशभुजा पौत्री[१६] शिवदूती यमस्वसा ॥१२॥
सुनन्दा विकचा लम्बा जयन्ती नकुला कुला ।
विलङ्का नन्दिनी नन्दा नन्दयन्ती[१७] निरञ्जना ॥१३॥
कालञ्जरी शतमुखी विकराला करालिका ।
विरजा[१८] पुरला जारी बहुपुत्री कुलेश्वरी ॥१४॥
कैटभी कालदमनी दुर्दुरी[१९] कुलदेवता ।
रौद्री कुण्डा[९-४] महारौद्री कालङ्कमा[२०] महानिशा ॥१५॥
बलदेवस्वसा[२१] पुत्री हीरी[२२] क्षेमङ्करी[९-६] प्रभा ।
मारी हैमवती चापी गोला शिखरवासिनी ॥१६॥"
[शेषनाममाला २।४९-६१॥]॥

## तस्याः सिंहो मनस्तालः

**१** तस्याः पार्वत्याः, सिंहो वाहनम्, मनस्ताडयत्यरीणां मनः कम्पयति **मनस्तालः** । 'तड आघाते' (चु.उ.से.), णिजन्तः, पचाद्यच्। गौर्या वाहनम्, तस्यैकम्॥

## सख्यौ तु विजया जया ॥२०५॥

**१-२** गौर्याः द्वे सख्यौ, एका विजयते **विजया**, [द्वितीया] जयति **जया**। 'जि जये'(भ्वा.प.अ.), पचाद्यच्, टाप् ॥२०६॥

## चामुण्डा चर्चिका चर्ममुण्डा मार्जारकर्णिका । कर्णमोटी महागन्धा भैरवी च कपालिनी ॥२०६॥

**१** चमति अत्ति प्रलये जगदिति **चामुण्डा** । 'चमु अदने'(भ्वा.प.से.),'[पि]चण्डैरण्ड-'(हैमोणा-१७६) इत्यादिना (इत्यत्रादिना) साधुः ।चण्डमुण्डदैत्ययोर्मारणाद्वा।यदुक्तम्-

---

१. 'ङी' इति२, 'ङीष्' इति३.४॥ २. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-३१, पृ.५२॥, रामाश्रमी १।१।३६॥, पृ.२०॥ ३.'निशुंभं मथति' इति २.३प्रतौ नास्ति॥ ४. 'अमौघा' इति१॥ ५. '-वासिनी' इति३॥ ६. '-कन्त्ये-' इति३॥ ७. '-नायका' इति२॥ ८. 'भीष्मा' इति१.२.४॥ ९-१. 'गदिनी' इति, ९-२. 'चारणा' इति, ९-३. 'कर्बुरा' इति, ९-४. 'कुन्द्रा' इति, ९-५. '-ङ्गमा' इति, ९-६. '-ङ्करी' इति च शेषनाममालास्वोपज्ञटीकयोः॥ १०. 'घनाञ्जना' इति३॥ ११. 'गन्धर्वी' इति१.२.४॥ १२. 'काटि' -इति३॥ १३. 'मन्दि-' इति३, 'मदरा-' इति२॥ १४. 'एकानंसा' इति२.४, 'एकानसा' इति३॥ १५. '-कर्ण-' इति१॥ १६. 'पोत्री' इति१.४, 'पैत्री' इति३॥ १७. '-यती' इति१.२॥ १८. '-जा' इति३॥ १९. 'दुदुरी' इति१, 'दर्दुरी' इति३, 'दुर्दरी' इति४॥ २०. 'कल-' इति१॥ २१. '-स्वमा' इति१॥ २२. 'दीरी' इति२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"यस्माच्चण्डं च मुण्डं च गृहीत्वा त्वमुपागता ।
चामुण्डेति ततो लोके ख्याता देवी भविष्यसि॥१॥"

[[1]] । **२** चर्च्यते पूज्यते चर्चा, 'चर्च[2] पूजायाम्' ( ), 'चर्च अध्ययने' (चु.उ.से.), अस्माद्वा भिदादित्वादङ्[3], चर्चैव[4] **चर्चिका**। स्वार्थे कन्, 'प्रत्ययस्थात्-' ७।३।४४॥ इतीत्वम्। **३** चर्म [5]मुण्डेऽस्याः **चर्ममुण्डा** । **४** मार्जारः कर्णिकाऽस्याः **मार्जारकर्णिका** । मार्जारवत् कर्णावस्याः इति वा । **५** दैत्यानां कर्णान् मोटयति उत्पाटयति **कर्णमोटी** । 'मुट[6] प्रमर्दने' ( ), पचाद्यच्, गौरादिः । **६** महान् गन्धोऽस्याः **महागन्धा**, [7]दैत्यास्रविस्रत्वात् । **७** भैरवस्य भार्या **भैरवी** । **८** कपालमस्त्यस्याः **कपालिनी** । 'अत इनिठनौ' ५।२।११५॥ इतीनिः, 'ऋन्नेभ्यो ङीप्[8]'४।१।५॥अष्टौ चामुण्डायाः ॥ शेषश्चात्र-

"चामुण्डायां महाचण्डी[9] चण्डमुण्डाऽपि" [शेषनाममाला २।६२॥] ॥२०६॥

**हेरम्बो[1] गणविघ्नेशः[2,3] पर्शुपाणिर्[4]विनायकः[5] ।**
**द्वैमातुरो[6] गजास्यैकदन्तौ[7,8,10] लम्बोदराखुगौ[9,10] ॥२०७॥**

**१** हे शङ्करे रम्बते लम्बते शैशवे इति **हेरम्बः** । "हे प्रत्यूहे रम्बते शब्दायते"[अम.क्षी. १।१।३८॥]इति तु[11] स्वामी[12]। यद्वा हे शिवसमीपे रम्बते शब्दायते इति वा। 'अबि रबि शब्दने[13]' (भ्वा.आ.से.), पचाद्यच्, 'तत्पुरुषे कृति बहुलम्' ६।३।१४॥ इत्यलुक् । देश्योऽप्ययं बहुशः संस्कृते प्रयुक्तत्वात् निबद्धः । **२-३** गणविघ्नाभ्यामग्रे ईशः, तेन गणानां प्रमथादीनामीशः[14] **गणेशः**, विघ्नानामीशो **विघ्नेशः**, यौगिकत्वात् प्रथमाधिपो, विघ्नराजः इत्यादयः । **४** पर्शुः पाणावस्य **पर्शुपाणिः** । **५** वि इति विघ्नानां नायको **विनायकः**, पदैकदेशे पदसमुदायोपचाराद् विशब्देन विघ्नः प्रोच्यते । विशिष्टानां नायको वा । विगतो नायको नियन्ताऽस्य[15] वा। 'ण्वुल्तृचौ'३।१।१३३॥ इति ण्वुल् । यद् वामनपुराणे-

"नायकेन मया देवि ! विनोद्धूतोऽपि पुत्रकः ।
यस्माज्जातस्ततो नाम्ना भविष्यति विनायकः ॥१॥"

[[16]] इति । अन्येषां विनेतृत्वाद्वा । **६** दुर्गया चामुण्डया च पालितत्वाद् द्वयोर्मात्रोरपत्यं **द्वैमातुरः** ।'मातुरुत्संख्या-सं-भद्र-पूर्वायाः'४।१।११५॥ इत्यण्, 'उरण् रपरः' १।१।५१॥ इति रपरत्वम् ।"शिरोरहितो जातोऽतो हस्तिशिरसि योजित इत्यतो हस्तिन्यापत्यत्वाद् द्वयोरपत्यम्"[ ]इति तु कौमुदी[17] । **७** [18]गजस्येव आस्यमस्येति **गजास्यः** । "समुदाये प्रवृत्ताः शब्दा अवयवेष्वपि वर्त्तन्ते"[ ]इति गजास्यः । गजास्यमिवास्येति वा । उष्ट्रमुखवत्समासोत्तरपदलोपौ। **८** [19]कार्त्तिकेनोत्पाटितैकदन्तत्वाद् एको [20]दक्षिणो दन्तोऽस्य **एकदन्तः** । **९** लम्बमुदरमस्य **लम्बोदरः** । **१०** आखुना गच्छति **आखुगः** । 'गम्लृ गतौ'(भ्वा.प.अ.), 'अन्यत्रापि (अन्येष्वपि) दृश्यते' (वा-३।२।४८॥)इति डः। यौगिकत्वात् [21]मूषिकरथोऽपि । दश गणेशस्य । शेषश्चात्र-

"पृश्निगर्भः पृश्निशृङ्गः(-ङ्गो) द्विशरीरस्त्रिधातुकः।
हस्तिमल्लो विषाणान्तः"[शेषनाममाला २।६२-६३॥]

॥२०७॥

**स्कन्दः[1] स्वामी[2] महासेनः[3] सेनानीः[4] शिखिवाहनः[5] ।**
**षाण्मातुरो[6] ब्रह्मचारी[7] गङ्गोमाकृत्तिकासुतः[8,9,10] ॥ २०८॥**

१. द्र. स्वोपज्ञटीका २।२०६॥, पृ.५०॥ २. क्षीरतरङ्गिण्यादावयं धातुः पूजार्थे न दृश्यते॥ ३. भिदादित्वेनाऽङ्त्वं विचारणीयम्, 'चिन्तिपूजिकथिकुम्बिचर्चश्च'३।३।१०५॥ इत्यनेनाऽसिद्धेः॥ ४. 'चर्चेव' इति३॥ ५. 'मुण्डोऽस्याः' इति२॥ ६. 'मुडि प्रमर्दने'(क्षीरतर., भ्वादिः, धातुसं-२२१, पृ.५७)इत्यत्र स्वामिनोक्तम्-"मुट इति दुर्गः" इति 'मुट आक्षेपप्रमर्दनयोः'(क्षीरतर., तुदादिः, धातुसं-७९, पृ.२५५)इति, 'छुट छेदने'(क्षीरतर., चुरादिः, धातुसं-६६, पृ.२९९)इत्यत्र 'मुट इति दुर्गः' इति चोक्तम्॥ 'मुट आक्षेपप्रमर्दनयोः'(मा. धातुवृत्तिः, तुदादिः, धातुसं-८०, पृ.४७६)इति, 'मुट प्रमर्दने'(मा. धातुवृत्तिः, भ्वादिः, धातुसं-२१८, पृ. ११३)इति, 'मुट सञ्चूर्णने'(मा. धातुवृत्तिः, चुरादिः, धातुसं-६७, पृ.५४५)इति च सायणेनोक्तम्॥ अत्र मोटयतीति विगृहीतत्वात् चुरादेर्ग्रहणं बोध्यम्॥ ७. 'दैत्यास्र-' इति१॥ ८. 'ङीष्' इति२.३.४॥ ९. इतोऽग्रे १.२प्रतौ 'चण्डमुण्डी' इति दृश्यते॥ १०. '-दन्तो' इति१.३॥ ११. ३.४प्रतौ नास्ति ॥ १२. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-३३, पृ.५३॥, अम.क्षीर.टीकायां "प्रत्यूषे हेरम्बते शब्दायते हेरम्ब इति नैरुक्ताः, देशीपदप्रायं तु मन्महे" इति दृश्यते, १।१।३८॥, पृ.१३॥ १३. 'रबि लबि अबि शब्दे' इति क्षीरतरङ्गिण्यादौ ॥ १४. '-मीशाः' इति३॥ १५. '-स्येति' इति४॥ १६. द्र. स्वोपज्ञटीका २।२०७॥, पृ.५०॥ १७. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-३३, पृ.५३॥ १८. 'गजस्य अस्य' इति१, 'गज आस्य-' इति२.४॥ १९. "परशुरामेणोत्पाटितैकदन्तो गणेशः" इति वाचस्पत्यम्, पृ.१४६९॥ २०. 'दक्षिगौ दन्तौऽ-' इति४॥ २१. 'मूषक-' इति१.४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**द्वादशाक्षो[11] महातेजाः[12] कुमारः[13] षण्मुखो[14] गुहः[15] ।
विशाखः[16] शक्तिभृत्[17] क्रौञ्चतारकारिः[18][19] शराग्निभूः[20] ॥२०९॥**

१ स्कन्दति गच्छति शोषयति दैत्यानिति वा **स्कन्दः**। 'स्कन्दिर् गतिशोषणयोः'(भ्वा.प.अ.), पचाद्यच्। तथा च वायुपुराणम्- ''स्कन्दिता दानवगणांस्तेन स्कन्दः प्रतापवान्''[[1]]इति । स्कन्नं शुष्कं रेतोऽस्येति, पृषोदरादिर्वा। २ स्वमस्यास्ति **स्वामी** । '[2]स्वामिन्नैश्वर्ये'५।२।१२६॥ इति साधुः । ३ महती सेनाऽस्य **महासेनः** । ४ सेनां नयति प्रापयति **सेनानीः**। 'णीञ् प्रापणे' (भ्वा.उ.अ.), 'सत्सूद्विषद्रुह-'३।२।६१॥ इत्यादिना क्विप्। ५ शिखी वाहनमस्य **शिखिवाहनः**, यौगिकत्वात् मयूररथः इत्यादयः । ६ षण्णां मातृणामपत्यं **षाण्मातुरः**। 'मातुरुत्संख्या-सं-भद्र-[3]पूर्वायाः'४।१।११५॥ इत्यण्, उत्वम्, रपरत्वं च । ७ ब्रह्म चरतीत्येवंशीलः **ब्रह्मचारी** । 'चर गतिभक्षणयोः' (भ्वा.प.से.), 'सुप्यजातौ णिनिस्ताच्छील्ये'३।२।७८॥ इति णिनिः, 'अत उपधायाः'७।२।११६॥ । ८-१० गङ्गोमाकृत्ति-काभ्योऽग्रे[4] सुतः, तेन **गङ्गासुतः, उमासुतः, कृत्तिकासुतः**, कृत्तिकानां सुत इति समासः, यौगिकत्वाद् गाङ्गेयः[5], पार्वती-नन्दनः बाहुलेयः इत्यादयः ॥२०८॥ ११ द्वादशाऽक्षीण्यस्य **द्वादशाक्षः** । बहुव्रीहौ सक्थ्यक्ष्णोः षच्, 'यस्येति च' ६।४।१४८॥ । षण्मुखत्वाद् द्वादशनेतृत्वम् । १२ महत्ते-जोऽस्य **महातेजाः**, सकारान्तः । १३ कुमारयति क्रीडयति शिखिना कृत्वेति **कुमारः**। 'कुमार क्रीडायाम्'(चु.उ.से.), पचाद्यच् । यदुक्तं वायुपुराणे-''यस्मात् क्रीडति सोत्यर्थं कुमारस्तेन कीर्त्तितः''[[6]]इति । काम्यते अभिलष्यते इति वा । ''कमु कान्तौ'(भ्वा.आ.से.), 'कमेः किदुच्चोपधायाः' (उणा-४१८)इत्यार[न्]प्रत्यये उपधायाश्चोत्वे कुमारः''[[7]]इति तु[8] व्याख्यामृतम् । सदा बालत्वाद्वा । तथा च स्कन्दे-

> ''पुत्रस्ते भविता देवि ! महायोगबलान्वितः ।
> सदा बालोऽथ सुभगो धर्मविधर्मवत्सलः॥१॥''

[[6]] इति नारदवचनात् । षोडशवर्षदेशीयः, न[9] त्वनूढतया कुमार इत्यादर्तव्यः[10], यतोऽनेन देवसेना ऊढा[11] । तथा च वायुपुराणम्[12]-

> ''शतक्रतो रूपवती देवसेनेति या सुता ।
> सा महेन्द्रेण रत्यर्थं भार्यात्वेनोपपादिता ॥२॥''

[[13]]इति ।

''उदीर्णसेनापतये महासेनाय सुव्रत! ॥''[[13]]इति। ब्रह्मचारित्वात् कुत्सितो मारः कामोऽस्येति वा, एकपत्नी-त्वात्। १४ षट् मुखान्यस्य **षण्मुखः**, अग्निपत्नीनां षण्णां स्तनपानत्वात् । १५ गूहति रक्षति सेनां **गुहः** । 'गुहूँ[14] संवरणे' (भ्वा.आ.वे.), 'इगुपधज्ञा-'३।१।१३५॥ इति कः । १६ विशाखानक्षत्रेण युक्तः काल इत्यर्थे 'नक्षत्रेण युक्तः कालः' ४।२।३॥ इति सूत्रेणाऽण्, तस्याणः 'लुबविशेषे'४।२।४॥ इति लुप्, 'लुपि युक्तवद् व्यक्तिवचने'१।२।५१॥ इति प्रकृति [वल्]लिङ्गसंख्ये, ततो विशाखायां जात इत्यर्थे 'सन्धिवेला-' ४।३।१६॥ इति सूत्रेणाऽण्, तस्य '[15]श्रविष्ठाफाल्गुनी' ४।३।१६॥इत्यादिना लुकि'लुक् तद्धितलुकि'१।२।४९॥ इति टापो[16] लुकि **विशाखः** । १७ शक्तिमायुधं बिभर्त्ति **शक्ति-भृत्** । 'डुभृञ् धारणपोषणयोः'(जु.उ.अ.), क्विप्[17], 'ह्रस्वस्य पिति-'६।१।७१॥ इति तुक् । १८-१९ क्रौञ्चतारकाभ्या-मग्रेऽरिः। 'क्रुञ्चुँ[18] गतौ'(भ्वा.प.से.), 'ऋत्विक्-'३।२।५९॥ इत्यादिना क्विन्[19], 'प्रज्ञादिभ्यश्च'५।४।३८॥ इति अण्। क्रौञ्चस्य गिरेरसुरस्य वा अरिः **क्रौञ्चारिः** । अन्धकासुरे हि महेशात् क्रौञ्चमध्ये प्रनष्टेऽनेन क्रोञ्चो दारित इति हि प्रसिद्धिः । ''कैलासे[20] च नदीशे च क्रौञ्चे[21]: क्रौञ्चो[22]ऽभिधीयते''[[23]] बृहद्वादावली । [24]तारक[स्य] दानवस्य अरिः **तारकारिः**। यौगिकत्वात् क्रौञ्चदारणः[25], तारकान्तकः इत्यादयः। **२०-२१**

१. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-३४, पृ.५४॥ २. 'स्वादामि-' इति२.३॥ ३. 'संपूवा-' इति४, '-पूर्वाद्' इति३॥ ४. '-कृत्तिकामग्रे' इति१॥ ५. 'गङ्गेयः' इति३॥ ६. द्र. टीकासर्वस्वम्, भा-१, १।१।४०॥, पृ.३१॥, पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-३५, पृ.५५॥ ७. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-३५, पृ.५५, तत्र 'कमु कान्तौ' इत्यस्य स्थाने 'काम्यत इति' इति दृश्यते॥ ८. ३प्रतौ नास्ति ॥ ९. 'त्वेत्वनू-' इति३॥ १०. '-हर्तव्यः' इति३॥ ११. 'उढा' इति३॥ १२. १प्रतौ 'पुराणम्' इत्येव दृश्यते ॥ १३. द्र. टीकासर्वस्वम्, भा-१, १।१।४०॥, पृ.३१॥, पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-३५, पृ.५५॥, रामाश्रमी १।१।४०॥, पृ.२१॥ १४. 'गुह' इति३॥ १५. 'स्रवि-' इति१.२॥ १६. 'डीपो' इति३॥ १७. 'क्विपि' इति३॥ १८. 'क्रुन्च' इति स्वामी, क्षीरतर., भ्वादिः, धातुसं-११६, पृ.४०॥, 'क्रुञ्च कौटिल्याल्पीभावयोः' इति सायणः, मा. धातुवृत्तिः, भ्वादिः, धातुसं-११६, पृ.८९॥ १९. 'क्विप्' इति३.४॥ २०. 'कैलाशे' इति२॥ २१. इतोऽग्रे २प्रतौ 'क्रौचः' इत्यधिकः पाठो दृश्यते ॥ २२. 'कौञ्चोऽभि-' इति१॥ २३. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-३५, पृ.५६॥, रामाश्रमी १।१।४०॥, पृ.२१॥ तत्र 'बृहद्धारावली' इति दृश्यते ॥ २४. 'तारका-' इति१॥ २५. '-दारुणः' इति२.३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शराग्निभ्यामग्रे भूः, तेन **शरभूः**, **अग्निभूः** । ''पुरा किल तारकोपप्लुतदेवरक्षार्थं शिवेनाग्निरूपं स्वबीजमग्निमुखे क्षिप्तम्, तेनापि कृत्तिकासु क्षिप्तम्, ताश्च [1]दैवात् गर्भसत्रपाः [2]शरवनं(-णं) प्रविश्य प्रसूताः, तेनाग्निभूः''[टीकासर्वस्वम् १।१।३९॥] इति सर्वानन्दः[3] । कौमुद्यां तु-''तारकभीतदेवरक्षाक्षमपुत्रोत्पादाय देव्यां बीजमुत्सिसृक्षू रौद्रो गौरीगर्भजातत्वदपत्यादतिबलाद् देवा भीरव इत्यग्निना ज्ञापितो भूमौ रेतोऽक्षिपत्, देवीशापात् स गर्भोऽग्नावेवाऽभूत्, स च तं गर्भखिन्नो गङ्गायामक्षिपत्, [4]सा च शरवने कुमारमसूत, स च कृत्तिकाभिर्नीत्वा पालित इति, ततोऽयमग्निभवत्वाद् अग्निभूः''[[5]]इत्युक्तम् । यौगिकत्वात् शरजन्मा, अग्निजन्मा इत्यादयः । एकविंशतिः स्वामिकार्तिकेयस्य । शेषश्चात्र-''स्कन्दे तु किरवारकः[6], सिद्धिसेनो वैजयन्तौ[7] बालचर्यो दिगम्बरः''[शेषनाममाला २।६३॥] ॥२०९॥

## भृङ्गी भृङ्गिरिटिर्भृङ्गिरीटिर्नाड्यस्थिविग्रहः ।

१ भृङ्गाः षिङ्गाः क्रीडापात्रत्वात् सन्त्यस्य **भृङ्गी**। 'अत इनिठनौ'५।२।११५॥ इतीनिः । भृङ्गिणौ, भृङ्गिणः इत्यादिरूपाणि । २ भ्रमन् गिरावटति **भृङ्गिरिटिः**, पृषोदरादित्वात्। ३ एवं **भृङ्गिरीटिः**[8] अपि। ४-५ नाड्यस्थिभ्यामग्रे विग्रहः, तेन नाडीशेषो विग्रहोऽस्य **नाडीविग्रहः**, अस्थिशेषो विग्रहोऽस्य **अस्थिविग्रहः**, अन्धकासुरो हि रौद्रेण वर्षसहस्राणि शूलप्रोतो[9] धृतः नाड्यस्थिशरीरशेषश्च दासत्वं[10] प्रपन्नो मुक्तः भृङ्गीगणोऽभूत् इति हि प्रसिद्धिः[11] । पञ्च महादेवस्य भृङ्गीनामा गणस्य । शेषश्चात्र-''चर्मी[12]''[शेषनाममाला २।६४॥] ॥

## कूष्माण्डके केलिकिलः

१ कृष्णाति कूष्माण्डः । 'कुष [13]निष्कोषणे' (क्र्या.प.से.), 'पिचण्डैरण्ड-'(हैमोणा-१७६)इत्यादिना निपातनात् साधुः, ततः स्वार्थे कन्[14] [**कुष्माण्डकः**], तत्र। २ केल्या किलति क्रीडति **केलिकिलः** । 'किल [15]श्वैत्य-क्रीडनयोः'(तु.प.से.), 'इगुपध-'३।१।१३५॥ इति कः। द्वे महादेवस्य कूष्माण्डनाम्नो गणस्य ॥

## नन्दीशे तण्डुर्नन्दिनौ ॥२१०॥

१ नन्दति[16] नन्दिः । 'टुणदि समृद्धौ'(भ्वा.प.से.), 'इन् सर्वधातुभ्यः'(उणा-५५७)इतीन्[17] । नन्दिश्चासौ ईशश्च **नन्दीशः**, तत्र । २ तनोति नृत्यं **तण्डुः**। 'तनु विस्तारे' (तना.उ.से.), 'तनिमनिकणिभ्यो डुः'(हैमोणा-७६५)इति डुः। ३ अवश्यं नन्दति **नन्दी** । 'टुणदि समृद्धौ' (भ्वा.प.से.), आवश्यके णिनिः । नन्दिनौ, नन्दिनः इत्यादि। त्रीणि महादेवस्य नन्दिनाम्नो गणस्य । गणा अन्येऽप्यत्र, यद् व्याडिः-

''महाकालः पुनर्बाणौ[18] लूनबाहुर्वृषाणकः ।
वीरभद्रस्तु [19-1]धीरौजा हेरकस्तु [20]कृतालकः ॥१॥
अथ चण्डो महाचण्डः शशाण्डी कङ्कणप्रियः ।
मज्जनोन्मज्जनौ छागच्छागमेषौ महाघसः ॥२॥
महाकपाल आलापः[19-2] सन्तापनविलापनौ ।
महाकपालि[19-3] ऐलोजः[21] शङ्कुकर्णः खरस्तपः ॥३॥
[22]उल्कामाली महाजम्भः श्वेतपादः खराण्डकः ।
गोपालो ग्रामणीमालुर्घण्टाकर्णकरन्धमौ[23] ॥४॥
[24]कपाली जृम्भको लिम्पः [25]स्थूलः कर्णविकर्णकौ।
लम्बकर्णो महाशीर्षो[26] हस्तिकर्ण[19-4]प्रमर्दकः ॥५॥

---

१. 'दैवान्तर्गर्भ ' इति३ ॥ २. 'शरं वनं' इति१.२॥ ३. द्र. पदचन्द्रिका, भा १, स्वर्गवर्गः, श्लो-३४, पृ.५४॥ सर्वानन्दकृतटीकासर्वस्वे-''पुरा किल तारकोपप्लुतानां देवानां रक्षणाय शिवेन स्वकं दहनरूपं बीजं वह्निमुखे संभृतम् । तेनापि तत् कृत्तिकासु सञ्चारितम् । ताश्च देवागतगर्भभरसत्रपाः शरवणं प्रविश्य प्रसूताः । तेनाग्निभूरित्याख्या तस्य ।'' इति दृश्यते, भा १, १।१।३९॥, पृ.३०॥ ४. 'सा वरवने' इति१॥ ५. द्र. पदचन्द्रिका, भा १, स्वर्गवर्गः, श्लो ३४, पृ.५५॥ तत्र 'तारकभीत-' इत्यस्य स्थाने 'तारकजित ' इति, '-गर्भजातत्वद-' इत्यस्य स्थाने 'गर्भजात्तद-' इति च दृश्यते ॥ ६. 'करत्रीरकः' इति शेषनाममालास्वोपज्ञटीकयोः ॥ ७. 'बैलवतो' इति१॥ ८. '-रिटेरपि' इति१॥ ९. '-प्रेतः' इति३॥ १०. 'दाशत्वं' इति३॥ ११. इतोऽग्रे १प्रतौ 'एवं' इति दृश्यते ॥ १२. 'वर्मी' इति३, 'चमी' इति४॥ १३. 'निःको ' इति३॥ १४. 'कण्' इति३॥ १५. 'शैत्य- ' इति२.३.४, 'श्वैत्येव' इत्येव सायणः, मा. धातुवृत्तिः, तुदादिः, धातुसं-६०, पृ.४७३॥ १६. 'नन्दयति' इति३॥ १७. 'इन्' इत्येव ३॥ १८. 'पुनर्बाणौ' इति३॥ १९-१. 'धीराजो हेरुकस्तु' इति, १९-२. 'आलानः' इति, १९-३. '-कपोल' इति, १९-४. '-कर्णः' इति च स्वोपज्ञवृत्तौ २।२१०॥, पृ.५१॥ २०. 'कृतो-' इति२॥ २१. 'एलौजः' इति३॥ २२. 'उल्क- ' इति३॥ २३.'-न्धसौ' इति२॥ २४. 'कर्णपाली' इति३॥ २५. 'स्थूलकर्ण-' इति३॥ २६. '-शीर्षौ' इति१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्वालाजिह्वो धमधमः संहातः क्षेमकः पुलः[१] ।
भीषको ग्राहकः सिस्तो[२-१] धीरुण्डो मकराननः ॥६॥
पिशिताशी[२-२] महाकुण्डो नखारिरहिलोचनः ।
कूणकुच्छो[३] महाजानुः कोष्टकोटिः शिवङ्करः ॥७॥
वेतालो लोमवेतालस्तामसः सुमहाकपिः ।
उत्तुङ्गो[४] गृध्रजम्बूकः [५]कण्डानककलानकौ ॥८॥
चर्मग्रीवो जलोन्मादो ज्वालावक्त्रो विहुण्डनः ।
हृदयो वर्त्तुलः पाण्डुर्भण्डिरित्यादयोऽपरे ॥ ९ ॥''
[[७]] ॥ २१०॥

**द्रुहिणो विरिञ्चिर्द्रुघणो विरिञ्चिः**
**परमेष्ठ्यजोऽष्टश्रवणः स्वयम्भूः ।**
**कमनः कविः सात्त्विकवेदगर्भौ**
**स्थविरः शतानन्दपितामहौ कः ॥ २११ ॥**
**धाता विधाता विधिवेधसौ ध्रुवः**
**पुराणगो हंसगविश्वरेतसौ ।**
**प्रजापतिर्ब्रह्म चतुर्मुखो भवा-**
**न्तकृज्जगत्कर्तृसरुहासनौ ॥२१२॥**
**शम्भुः शतधृतिः स्रष्टा सुरज्येष्ठो विरिञ्चनः ।**
**हिरण्यगर्भो लोकेशो नाभिपद्मात्मभूरपि ॥२१३॥**

१ द्रुह्यति दानवेभ्यः कामक्रोधादिभ्यो वा **द्रुहिणः**। 'द्रुह जिघांसायाम्'(दि.प.से.), 'द्रुदक्षिभ्यामिनन्'(उणा-२०८)इति बाहुलकादिनन्, गुणाभावोऽपि बाहुलकादेव। २ भूतानि विरचयति **विरिञ्चिः** । 'रच प्रतियत्ने'(चु.उ.से.), पचाद्यच्, पृषोदरादित्वादकारयोरित्वम्, नुमागमश्च । 'रीचं[९] वियोजनसम्पर्चनयोः'(चु.उ.अ.), चुरादिः, 'अच इः'(उणा-५७८)इति इः, पृषोदरादित्वान्नुम्, कुञ्जरवदुपधायाँ[१०] ह्रस्वत्वं 'विरिञ्चिः'[११][ ]इत्यन्ये । विरिङ्क्ते सूते विरिञ्चिः[११]। 'रिचिर् विरेचने'(रु.उ.अ.), रुधादिरुभयपदी वा, पृषोदरादिः। ''विभिर्हंसै रिच्यते उह्यते [वा] विरिञ्चिरिति प्राच्याः'' [अम.क्षीर. १।१।१७॥]इति क्षीरस्वामी[१२] । ३ द्रुर्हन्यतेऽनेन द्रुघणः कुठारः, द्रुघण इव **द्रुघणः**, संसारच्छेदकत्वात् । ''ब्रह्मात्मभूः स्याद् द्रुहिणो द्रुघणश्च पितामहः''[[१३]]इति भागुरिः । ४ विरिङ्क्ते प्रजाः सूते इति **विरिञ्चिः**[१४], पृषोदरादिः। ''विरिञ्चो द्रुघणः सिन्धौ[१५] विरिञ्चिर्द्रुहिणो मतः''[[१६]]इति शब्दार्णवः । ५ परमे पदे तिष्ठति **परमेष्ठी** । 'ष्ठा गति-निवृत्तौ'(भ्वा.प.अ.), '[१७]परमे स्थः कित्'(उणा-४५०)इति इन्(इनिः), 'तत्पुरुषे कृति बहुलम्'६।३।१४॥ इति सप्तम्या अलुक्, 'स्थास्थिन्स्थ(स्थृ)नां चेति वक्तव्यम्'(वा-८।३।९७॥)इति षत्वम् । ६ न जायत इति **अजः**। 'जनी प्रादुर्भावे'(दि.आ.से.), 'अन्येष्वपि दृश्यते'(वा-३।२।१०१॥) इति डः। ७ अष्टौ श्रवणान्यस्य **अष्टश्रवणः**, चतुर्मुखत्वात्। ८ स्वयं भवति **स्वयम्भूः** । 'भुवः संज्ञान्तरयोः' ३।२।१७९॥ इति क्विप्। ९ कामयतेऽभिलषति सुतामिति **कमनः** । 'कमु कान्तौ'(भ्वा.आ.से.), नन्द्यादित्वात् ल्युः। **१०** कवते वेदान् **कविः**। 'कुङ् शब्दे'(तु.आ.से.), 'अच इः'(उणा-५७८)इति इः । **११** सत्त्वानि प्रयोजनमस्य **सात्त्विकः** । 'तदस्य प्रयोजनम्'[१८]५।१।१०९॥ इति ठक्, 'ठस्येकः'७।३।५०॥। **१२** वेदाः गर्भेऽस्य **वेदगर्भः**। **१३** स्थितो यौवनादिति, पुराण-पुरुषत्वाद्वा **स्थविरः** । 'ष्ठा गतिनिवृत्तौ'(भ्वा.प.अ.), 'अजिर-शिशिर-शिथिल-स्थिर-स्फिर-स्थविर-खदिराः'(उणा-५३)इति सूत्रेण किरजन्तो निपातः। **१४** शतमानन्दानामस्य **शतानन्दः** । **१५** पितृणामपि पितेति **पितामहः** । 'पितृव्य-मातुल'४।२।३६॥ इत्यादिना निपातितः। ''स तु पितुः पिता भवति। पितृजननी च तन्मूर्त्ति''[[१९]]इत्यागमः। **१६** कायति[२०] **कः** । 'कै शब्दे'(भ्वा.प.अ.), बाहुलकात् डः। केकिर-वच्छन्दः । तल्लक्षणं चेदम्-''परिकीर्त्तितं केकिरवं सयौ स्यौ''[ ]इति कविशिक्षावृत्तौ ॥२११॥ **१७** दधाति धारयति भूतानि **धाता** । 'डुधाञ् धारणपोषणयोः'(जु.उ.अ.), 'ण्वुल्तृचौ'[२१]३।१।१३३॥ इति तृच् । धातारौ, धातारः इत्यादि। **१८** एवं विदधाति **विधाता,** धातृवत् । **१९** विदधाति सृजति **विधिः**। 'डुधाञ् धारणपोषणयोः'(जु.उ.अ.) 'उणादयो

१. 'पुनः' इति३॥ २-१. 'सिस्नो' इति, २-२. ('-ताहि' इति३) '-ताशो' इति च स्वोपज्ञवृत्तौ २।२१०॥, पृ.५१॥ ३. '-कच्छ' इति३॥ ४. 'उत्तङ्गो' इति२.४॥ ५. 'कण्डात-' इति२॥ ६. '-र्भुण्डि-' इति स्वोपज्ञवृत्तौ २।२१०॥, पृ.५१॥ ७. द्र. स्वोपज्ञटीका २।२१०॥, पृ.५१॥ ८. 'विरञ्चः' इति३॥ ९. क्षीरतरङ्गिण्यादौ ह्रस्वमध्यो दृश्यते ॥ १०. '-धाया ह्रस्व-' इति१॥ ११. 'विरञ्चिः' इति२॥ १२. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-१२, पृ.२८॥ १३. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-१२, पृ.२८॥, रामाश्रमी १।१।१७॥, पृ.१०॥ १४. 'विरिञ्चिः' इति१.२॥ १५. 'सिन्धौ' इति२.४॥ १६. द्र. टीकासर्वस्वम्, भा-१, १।१।१७॥, पृ.१५॥ तत्र 'सञ्जो' इति दृश्यते, पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-१२, पृ.२८॥, रामाश्रमी १।१।१७॥, पृ.१०॥ तत्र 'शिञ्जो' इति दृश्यते ॥ १७. 'परमे कित्' इत्युणादिगणे ॥ १८. 'प्रयोजनम्' इत्येवाष्टाध्याय्याम्॥ १९. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-११, पृ.२७॥, टीकासर्वस्वे ''पितृजननी च तन्मूर्तिरित्यागमः'' इत्येव दृश्यते ॥ २०. '-तीति' इति१॥ २१. अत्र १प्रतौ भ्रष्टः पाठः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बहुलम्'३।३।११३॥ इति बहुलवचनात्, कर्त्तर्यपि 'उपसर्गे घोः किः'३।३।९२॥ इति किः । 'विधं[1] विधाने'(तु.प.से.) अस्माद्वा, 'इगुपधात् कित्'(उणा-५५९)इति किन् (इन्) वा । २० विदधाति **वेधाः**। 'डुधाञ् धारणपोषणयोः'(जु.उ.अ.), 'विधाञो वेध् (वेध) च'(उणा-६६४)इत्यौणादिके असुनि[2] वेधादेशश्च। 'विध विधाने'(तु.प.से.) अस्माद्वा असुन् । वेधसौ, वेधसः इत्यादि । २१ ध्रुवत्वाद् **ध्रुवः** । 'ध्रुव गतिस्थैर्ययोः'(तु.प.से.), 'इगुपधज्ञा-'३।१।१३५॥ इति कः । २२ पुराणानि गायति **पुराणगः**। 'गै शब्दे'(भ्वा.प.अ.), 'अन्यत्रापि-(अन्येष्वपि-)' (वा-३।२।१०१॥)इति डः । २३ हंसेन गच्छति **हंसगः** । 'गम्लृ गतौ'(भ्वा.प.अ.), 'अन्येष्वपि दृश्यते'(वा-३।२।४८॥) इति डः, यौगिकत्वात् शतपत्ररथः[3] । २४ विश्वाय रेतोऽस्य **विश्वरेताः**[4], सकारान्तः । २५ प्रजानां जनानां, प्रजायाः सुताया वा पतिः **प्रजापतिः** । ''प्रजा स्यात् सन्ततौ जने''[ ]इति विश्वः[5] । ''स्वां दुहितरमकामयत''[6]इति श्रुतेः । २६ बृंहन्ति वर्धन्ते[7] चराचराणि भूतान्यत्रेति **ब्रह्मा**, नकारान्तः। 'बृहि वृद्धौ' (भ्वा.प.से.), बृंहेर्मनिन्[8], नलोपः[9], अमागमश्च । तदुक्तम्-

''बृहदस्य शरीरं यदप्रमेयं प्रमाणतः ।
बृहद्विस्तीर्णमित्युक्तं ब्रह्म(ब्रह्मा) तेन[10] स[11] उच्यते ॥१॥''

[12]इति । बृंहयति वर्धयति प्रजा इति णिजन्ताद् मनिन् वा, ब्रह्मा[13] पुंक्लीबलिङ्गः । २७ चत्वारि मुखान्यस्य **चतुर्मुखः**। २८ भवान्तं करोति **भवान्तकृत्** । 'क्विप् च'३।२।७६॥ इति क्विप्, 'ह्रस्वस्य पिति-'६।१।७१॥ इति तुक्। २९ जगतां कर्त्ता **जगत्कर्त्ता**, यौगिकत्वाद् विश्वसृड् इत्यादयः । ३० सरोरुहं कमलमासनमस्य **सरोरुहासनः** ॥२१२॥ ३१ शं सुखम्, तत्र भवति **शम्भुः** । 'भू सत्तायाम्'(भ्वा.प.से.) 'मितद्र्वादिभ्यश्च' (वा-३।२।१८०॥)इति डुः। ३२ शतं धृतीनामस्य **शतधृतिः**। ३३ सृजति प्रजाः **स्रष्टा**। 'सृज विसर्गे'(तु.प.अ.), ['ण्वुल्तृचौ' ३।१।१३३॥ इति तृच्, 'सृजि दृशोर्झल्यमकिति'६।१।५८॥ इत्यम्]। ३४ सुराणां ज्येष्ठः **सुरज्येष्ठः** । ३५ विरिङ्क्त इति **विरिञ्चनः**[14]। नन्द्यादित्वाद् ल्युः । ३६ हिरण्यं गर्भोऽस्य, हिरण्यस्य गर्भो वा **हिरण्यगर्भः**, हिरण्यवर्णब्रह्माण्डप्रभवत्वात्। यत्पुराणम्-

''हिरण्यवर्णमभवद्[15]त्राण्डमुदकेशयम् ।
तत्र यज्ञे स्वयं ब्रह्मा स्वयम्भूर्लोकविश्रुतः[16] ॥२॥''

[17]इति । यद्वा उपचारादत्र हिरण्मयमण्डं हिरण्यम् । तथा च मनुः-''तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्''[मनुस्मृतिः १।९॥] इति, तदस्य गर्भ उत्पत्तिकारणम्, तस्य गर्भोऽयमिति वा, तत्प्रभवत्वाद् हिरण्यगर्भः । ३७ लोकस्य चतुर्दशभुवनस्येशः **लोकेशः**। ३८-४० नाभिपद्मात्मभ्योऽग्रे भूः, तेन **नाभिभूः**, **पद्मभूः**, **आत्मभूः**। 'भुवः संज्ञान्तरयोः'३।२।१७९॥ इति त्रिष्वपि शब्देषु क्विप् । आत्मना भवतीति आत्मभूरित्यनेनैव स्वयम्भूरिति लब्धे स्वभूनिवृत्त्यर्थं स्वयम्भूरित्युक्तम्। यौगिकत्वाद् नाभिजन्मेत्यादयः, कमलयोनिरित्यादयः। चत्वारिंशद् ब्रह्मणः । ''क्षेत्रज्ञः, पुरुषः, सतत्[18]''[शेषनाममाला २।६४॥]इति शैषिकाणि ॥२१३॥

**विष्णुर्जिष्णुजनार्दनौ हरिहृषीकेशाच्युताः केशवो**
**दाशार्हः पुरुषोत्तमोऽब्धिशयनोपेन्द्रावजेन्द्रानुजौ ।**
**विष्वक्सेननरायणौ जलशयो नारायणः श्रीपति-**
**र्दैत्यारिश्च पुराणयज्ञपुरुषस्तार्क्ष्यध्वजोऽधोक्षजः ॥२१४॥**

**गोविन्दषड्बिन्दुमुकुन्दकृष्णा**
**वैकुण्ठपद्मेशयपद्मनाभाः ।**
**वृषाकपिर्माधववासुदेवौ**
**विश्वम्भरः श्रीधरविश्वरूपौ ॥२१५॥**

---

१. 'विधि' इति२॥ २. 'असौ' इति सप्तम्येकवचनं पाठ्यम्, 'मिथुनेऽसि-'(उणा-६२)इत्यतः असोऽनुवृत्तित्वात् ॥ ३. 'शतरथपत्रैः' इति२॥ ४. 'विश्वकरेताः' इति२॥ ५. विश्वलोचनविश्वप्रकाशकोषयोः 'प्रजा सन्तानलोकयोः' इति दृश्यते, वि.लो.पृ.६७, वि.प्र.पृ.३३॥ ६. द्र. स्वोपज्ञटीका २।२१२॥, पृ.५२॥ ७. 'वर्धते' इति१॥ ८. 'बृंहेर्नोऽच्च'(उणा-५८५)इत्यस्य प्रवृत्तत्वेन मनिन् ॥ ९. 'बृंहेः नः अत् च' इति सूत्रसन्धिच्छेदनम्, 'बृहि वृद्धौ' इत्यस्मान्मनिन्, नुमवयवनकारस्याऽकारश्चेत्यर्थः, तेनात्र 'नलोपः अमागमश्च' इत्यस्य स्थाने 'नस्याऽदादेशः' इति सुचारु॥ १०. 'सेनास्य उच्यते' इति३॥ ११. १प्रतौ नास्ति ॥ १२. द्र. टीकासर्वस्वम्, भा-१, १।१।१६॥, पृ.१४॥, पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-११, पृ.२६-२७॥ १३. 'पुंक्लीबः' इति३॥ १४. 'विरञ्च-' इति२.३॥ १५. 'भवदशाण्ड-' इति२, 'भवतत्राण्ड-' इति३॥ १६. '-विश्रुतिः' इति२॥ १७. द्र. स्वोपज्ञटीका २।२१३॥, पृ.५२॥ १८. 'सनत्' इति शेषनाममालास्वोपज्ञटीकयोः, तत्र 'सतत्' इति पाठान्तरं दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[37]दामोदरः [38]शौरिस[39]नातनौ [40]विधुः
[41]पीताम्बरो [42]मार्जजि[43]नौ [44]कुमोदकः।
[45]त्रिविक्रमो [46]जह्नु[47]चतुर्भुजौ [48]पुन-
र्वसुः [49]शतावर्त[50]गदा[51]ग्रजौ स्वभूः ॥२१६॥
[52]मुञ्जकेशि[53]वनमालि[54]पुण्डरी-
काक्ष[55]बभ्रु[56]शशबिन्दु[57]वेधसः ।
[58]पृश्निशृङ्ग[59]धरणीधरा[60]त्मभू-
[61]पाण्डवायनसु[62]वर्णबिन्दवः ॥२१७॥
[63]श्रीवत्सो [64]देवकीसूनु[65]र्गोपीन्द्रो[1] [66]विष्टरश्रवाः ।
[67]सोमसिन्धुर्[68]जगन्नाथो [69]गोवर्धनधरोऽपि च ॥२१८॥
[70]यदुनाथो [71]गदा[72]शार्ङ्ग[73]चक्र[74]श्रीवत्स[75]शङ्खभृत् ।

१ वेवेष्टि विश्वं व्याप्नोति **विष्णुः** । 'विष्लृ व्याप्तौ' (जु.उ.अ.), 'विषेः किच्च'(उणा-३१९)इति नुः, 'रषाभ्याम्-' ८।४।१॥ इति णत्वम् । विशति सर्वभूतानिति[2] वा। 'विश प्रवेशने'(तु.प.अ.), पृषोदरादित्वात् षत्वम् । ''विशेर्धातोः प्रवेशनात्''[[3]]इति भारतम् । **२** जयनशीलो **जिष्णुः** । 'जि जये'(भ्वा.प.अ.), 'ग्लाजिस्थश्च ग्स्नुः' ३।२।१३९॥, गित्त्वाद् न गुणः, 'आदेशप्रत्यययोः'८।३।५९॥ इति षत्वम्, 'रषाभ्याम्-' ८।४।१॥ इति णत्वम् । **३** जनान् अर्दयति **जनार्दनः** । यद्वा जनाः समुद्रमध्यस्थदैत्यभेदास्तेषामर्दनः जनार्दनः । 'अर्द हिंसायाम्'(चु.उ.से.), नन्द्यादित्वाद् ल्युः । **४** हरति पापमिति **हरिः**। 'हृञ् हरणे'(भ्वा.उ.अ.), 'अच इः'(उणा-५७८)इति इः। हरति दैत्यप्राणानिति वा । **५** हृषीकाणामिन्द्रियाणामीशो वशिता **हृषीकेशः** । **६** न च्यवत **अच्युतः** । कदापि कुतोऽपि न च्युतः, निजपदात्, नास्ति च्युतं स्खलनमस्येति वा । **७** प्रशस्ताः केशाः सन्त्यस्य **केशवः** । 'केशाद्[4] वोऽन्यतरस्याम्'५।२।१०९॥ इति वः । यद्वा-

''यस्मात् त्वयैष दुष्टात्मा हतः केशी जनार्दनः ।
तस्मात् केशवनामा[5] त्वं लोके ख्यातो भविष्यसि ॥१॥''

[[6]]इति हरिवंशोक्तेः, हन्त्यर्थाद् वधेः केशिनं हतवानिति। '[7]अन्येभ्योऽपि(अन्येष्वपि) दृश्यते'३।२।१०१॥ इति डः, पृषोदरादित्वात् केशिशब्दस्येकारस्य अकारे नलोपे च कृते केशव इति निष्पन्नम् । **८** दशार्हो वसुदेवः, तस्यापत्यं **दाशार्हः** । 'ऋष्यन्धकवृष्णि-'४।१।११४॥ इत्यादिना अण् । दशार्ह एव वा दाशार्हः । 'प्रज्ञादिभ्यश्च'५।४।३८॥ इत्यण् । **९** पुरुषेभ्य[8] उत्तमः **पुरुषोत्तमः** । 'पञ्चमी'२।१।३७॥ इति योगविभागात् समासः। 'सह सुपा'२।१।४॥ इत्यस्य लक्षणत्वे अध्वगन्तव्यवत् समासो वा। तथा च गीता-

''यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मिं[9] लोके वेदे च प्रथितः पुरुषोत्तमः ॥२॥''

[श्रीमद्भगवद्गीता, अध्या-१५, श्लो-१८], तथा च-''उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतम्''[श्रीमद्भगवद्गीता, अध्या-१५, श्लो-१७]इति । ''षष्ठ्यां तु 'न निर्धारणे'२।२।१०॥ इति समासनिषेधः स्यात् । 'सन्महत्परमोत्तमोत्कृष्टाः'२।१।६१॥ इति कर्मधारये च उत्तमपुरुषः इति । यत्र समुदायो निर्धार्यमाणो निर्धारणो निर्धारहेतुश्चेति त्रयं सन्निहितम्, तत्रैव '[10]न निर्धारणे' २।२।१०॥ इति निषेधः, इह तु सर्वनिकदेशरूपतया ख्यातुं न शक्यत इति नास्ति निषेधः'[[11]]इत्यनुन्यासः[12] । ''शेषषष्ठ्यात्र समासः''[[11]]इति तु कैयटः[13]। पुरुषेषु उत्तम इति वा । **१०**

---

१. 'गोपेन्द्रो' इति२॥, मुद्रितमूलमपि तथैव, 'गोपानामिन्द्रो गोपेन्द्रः' इति स्वोपज्ञटीका, २।२१८, पृ.५३॥ २. '-नीति' इति४॥ ३. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-१३, पृ.२९॥ ४. 'वोतो-' इति३॥ ५. 'नामत्वं लोकख्यातो' इति३॥ ६. द्र. टीकासर्वस्वम्, भा १, १।१।१८॥, पृ.१६॥, पदचन्द्रिका, स्वर्गवर्गः, श्लो-१३, पृ.३१, पदचन्द्रिकायां 'केशवनाम्ना' इति दृश्यते ॥ ७. 'ऽन्यत्रापि इति वा' इति ४प्रतेष्टिप्पणी ॥ ८. 'पुरुषेषु' इति३॥ ९. '-ऽस्मिन् लोके वेदे' इति३॥ १०. ३प्रतौ नास्ति ॥ ११. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-१६, पृ.३५॥ १२. '-नुशासनः' इति४॥ १३. ''अथ कथं पुरुषोत्तम इति । यस्मान्निर्धार्यते, यश्चैकदेशो निर्धार्यते, यश्च निर्धारणहेतुः एतत्त्रितयसंनिधाने सत्येवायं निषेध इति 'द्विवचनविभज्यो-'(५।३।५७॥)इति सूत्रे कैयटः ॥ अन्ये तु-पुरुषेषूत्तम इति निर्धारणसप्तम्याः 'संज्ञायाम्'(२।१।४४॥)इति समासः । न चैवं 'न निर्धारणे'(२।२।१०॥)इति व्यर्थम्, स्वरे भेदात् । सप्तमीसमासे हि 'तत्पुरुषे तुल्यार्थ-'(६।२।२॥)इत्यादिना पूर्वपदप्रकृतिस्वरः, षष्ठीसमासे तु 'समासस्य'(६।१।२२३॥)इत्यन्तोदात्तं स्यात् तच्चानिष्टमित्याहुः । तन्मन्दम्, 'संज्ञायाम्'(२।१।४४॥)इति समासस्य नित्यत्वेन स्वपदविग्रहासंगतिप्रसङ्गात्। तस्मात् कैयटोक्तसमाधानमेव समीचीनमिति नव्याः'' इति सिद्धान्तकौमुदीतत्त्वबोधिनी 'न निर्धारणे' इत्यस्य विषये, पृ.२१४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अब्धौ शयनमस्य **अब्धिशयनः** । ११ इन्द्रमुपगतोऽनुजत्वाद् **उपेन्द्रः**। उपगत इन्द्रोऽस्येति वा । 'कुगतिप्रादयः'२।२।१८॥ इति समासः । "इन्द्रलोकादप्युपरि वर्तमानत्वादुपेन्द्रः"[[1]]इति तु कलिङ्गः । यथा हरिवंशे-

"ममोपरि यथेन्द्रस्त्वं स्थापितो गोभिरीश्वरः ।
उपेन्द्र इति कृष्ण ! त्वां गास्यन्ति दिवि देवताः ॥३॥"

[[2]]इति । १२ न जायत इति **अजः**। 'जनी प्रादुर्भावे' (दि.आ.से.), 'अन्येष्वपि दृश्यते'३।२।१०१॥ इति डः । १३ इन्द्रस्यानुजः **इन्द्रानुजः** । इन्द्रमातुरदितेर्गर्भे[3] बलिनिग्रहार्थं वामन-रूपेणोत्पन्नत्वात् । यन्माघः-

"दीप्तिनिर्जितविरोचनादयं द्यां[4] विरोचनसुतदभीप्सतः ।
आत्मभूरवरजाखिलप्रजः स्वर्पतेरवरजत्वमाययौ ॥४॥"

[शिशुपालवधम्, सर्गः-१४, श्लो-७४]इति । यौगिकत्वाद् वासवावरजादयः । १४ "विष्वग्नानार्थप्रथने स्यात्"[[5]]इति वोपालितः । न्यासेऽपि लोमादिसूत्रे विषुशब्दो नानार्थो निपातो मूर्धन्यान्तो दर्शितः, पामादित्वाद् नप्रत्यये विषुण इति णत्व-दर्शनात् । विष्वगञ्चतीति ([6]'ऋत्विक्'३।२।५९॥ इति) क्विनि, कुत्वे, ['उगितश्च' ४।१।६॥ इति ङीपि] विषुची नाना अञ्चती सेनाऽस्येति **विष्वक्सेनः** । "(विषु सर्वतोऽर्थेऽव्ययम्,) विषु[7] सर्वतोऽञ्चती सेनाऽस्य"[[8]]इति तु पञ्जिकादयः । "पूर्वपदात् संज्ञायामगः'८।४।३॥ इति न णत्वम्, विष्वक्शब्दस्य गकारान्तत्वात्, गकारान्तत्वं च णत्वे कर्तव्ये 'खरि च' ८।४।५५॥ इति चर्त्वस्यासिद्धत्वात्"[[8]]इति कलिङ्गः। विष्व-गिति मूर्धन्यमध्य एव । "विष्वक् विश्वक् स्मृतं विज्ञैर्विषुवं विशुवं तथा"[[9]]इति द्विरूपकोषात् तालव्या मूर्धन्याश्चैते शब्दाः। "शटी च परिवेषः। विश्वक्सेनोऽभ्रेषः प्रतिष्कसः कौशष[10]-विषदौ चै[11]"[[11]]इत्यूष्मविवेकाच्च कदाचित् तालव्यमध्योऽपि । "विश्वक् सर्वव्यापिनी सेनास्य"[ ]इति सुभूतिः[12] । १५ नरा आपो भूतानि वा, तान्ययते **नरायणः** । 'अय गतौ'(भ्वा.-आ.से.), नन्द्यादित्वाद् ल्युः । यदुक्तम्-"आपो नरा इति प्रोक्ताः"[[13]], [तथा "नरा जातानि भूतानि"[[13]]इति]। १६ जले शेते **जलशयः**, पक्षे[14] जलेशयोऽपि । १७ "नराणां समूहो नारम्। 'तस्य समूहः'४।२।३७॥ इत्यण् । तदेवायनं स्थानमस्येति **नारायणः**"[[15]]इति निरुक्तिकारः। "क्वचिन्म-न्वन्तरेऽस्य ऋषेरपत्यत्वमुगपत इति नरस्यापत्यमिति 'नडादिभ्यः फक्'४।१।९९॥ इति फकि नारायणः"[[15]]इति तु वैयाकरणाः।

"आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।
ता[16] यदस्यायनं पूर्वं तेन नारायणः स्मृतः[15] ॥५॥"

[मनुस्मृतिः, अध्या-१, श्लो-१०]इति मन्वादयः । "नरादात्मनो जातान्याकाशादीनि नाराणि कार्याण्ययं कारणात्मा एति व्याप्नोति नारायणः[15] ।

"नराज्जातानि तत्त्वानि नाराणीति[17] ततो विदुः।
तान्येवायतनं तस्य तेन नारायणः स्मृतः॥६॥"

[[15]]इति तु मन्त्रवर्णः । पृषोदरादित्वाद् नरायणोऽपि"[[18]]इति मिश्राः। "अथ नारायणो विष्णुरूर्ध्वकर्मा नरायणः"[[19]]इति शब्दार्णवः । सर्वत्र 'पूर्वपदात् संज्ञायामगः'८।४।३॥ इति णत्वम्।

१. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-१५, पृ.३३॥ २. द्र. टीकासर्वस्वम्, भा-१, १।१।२०॥, पृ.१८॥, तत्र 'त्वां तथा गास्यन्ति देवताः' इति दृश्यते, पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-१५, पृ.३३॥ ३. '-दिते गर्भे' इति १.२॥ ४. माघे 'गां' इति दृश्यते ॥ ५. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-१४, पृ.३२॥, तत्र 'विषु नानार्थे प्रथने स्याद्' इति दृश्यते ॥ ६. कोष्ठान्तर्गतपाठः १.२.३प्रतिषु न दृश्यते ॥ ७. 'विषुती' इति१.४, 'विषुची' इति३॥ ८. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-१५, पृ.३२॥ ९. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-१४, पृ.३३॥, रामाश्रमी १।१।१९॥, पृ.१२॥ १०. 'कौशिष-' इति३॥ ११. "तालव्या मूर्धन्याश्चैते शब्दाः शटी च परिवेषः । विश्वक्सेना भ्रेषः प्रतिष्कशः कोशविशदौ" इदृशमुद्धरणं रामाश्रम्यां दृश्यते, १।१।१९॥, पृ.२२॥ १२. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-१४, पृ.३३, तत्र "विष्वक् सर्वतो व्यापिनी सेनास्य इति विष्वक्सेनः' इति तु सुभूतिः" इति दृश्यते ॥ १३. द्र. स्वोपज्ञटीका २।२१४॥, पृ.५३॥ १४. 'शयवासवासिष्वकालात्'६।३।१८॥ इति विकल्पपक्षे॥ १५. द्र. पदचन्द्रिका, भा-१, कालवर्गः, श्लो-१३, पृ.२९॥ १६. 'तो' इति१.२॥ १७. 'जरा-' इति३॥ १८. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-१३, पृ.३०॥ १९. द्र. टीकासर्वस्वम्, भा-१, १।१।१८॥, पृ.१६॥ तत्र संसारावर्तस्योद्धरणमुक्तम् । रामाश्रमी १।१।१८॥, पृ.११॥, पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-१३, पृ.३०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१८ श्रियः लक्ष्म्याः पतिः **श्रीपतिः**, यौगिकत्वाद् लक्ष्मीनाथ इत्यादयः । **१९** दैत्यानामरिः **दैत्यारिः**। **२०-२१** पुराणयज्ञशब्दाभ्यां पुरुषः, तेन पुराणश्चासौ पुरुषश्च **पुराणपुरुषः**। यज्ञेषु पुरुषः **यज्ञपुरुषः**। **२२** तार्क्ष्यो ध्वजोऽस्य **तार्क्ष्यध्वजः**, यौगिकत्वाद् गरुडाङ्क इत्यादयः । **२३** अक्षमिन्द्रियमधः इन्द्रियं पादौ, ताभ्यां जातः **अधोक्षजः**। 'अन्येभ्योऽपि दृश्यते'(वा-३।२।१०१॥)इति डः । तदुक्तं एकादशे[१]न्द्रियगणने पद्मपुराणे-''पायूपस्थं करौ पादौ''[ [२]] इति । अधोक्षाणां जितेन्द्रियाणां जायते प्रत्यक्षीभवतीति वा। अक्षजं ज्ञानमधोऽस्येति वा । अक्षादिन्द्रियाज्जाता अक्षजाः, प्राणिनस्तेऽधः कक्षा यस्मादिति वा। यद्वा अधो न क्षीयते जात्विति पृषोदरादधोक्षजः। तथा च योगपर्वणि ''अधो न क्षीयते जातु यस्मात् तस्मादधोक्षजः'' [ ]इति । ''अधोऽक्षिभ्यां दृग्भ्यां जात इत्यधोक्षजः''[ ]इति तु पञ्जिका ॥२१४॥ **२४** गां भुवं विन्दति **गोविन्दः** । 'विद्लृ लाभे'(तु.उ.अ.), 'गवादिषु विन्दे[३]: संज्ञायाम्'(वा-३।१।१३८॥) इति शः,'शे मुचादीनाम्' ७।१।५९॥ इति मुम् । ''महावृष्टौ गोवर्धनगिरिमुत्पाट्य गोकुलमनेन रक्षितमिति ब्राह्मणैर्गोष्ठाधिपत्यमस्मै दत्तम्''[ [४]]इति तु[५] सुभूतिः । गां भुवं विन्दति वा गोविन्दः । वराहरूपेणोद्धाराद्वा, गोपत्वाद्वा । **२५** षट् बिन्दवो लाञ्छनभूता अस्य **षड्बिन्दुः** । **२६** मुञ्चति पापिनो **मुकुन्दः** । 'मुच्लृ मोक्षणे'(तु.उ.अ.), 'मुञ्चे[६]र्डुकुन्दकुकुन्दौ[७]' (हैमोणा-२५०)इति डुकुन्दः प्रत्ययः । **२७** कलियुगे कृष्णवर्णत्वात्, कर्षत्यरीनिति वा **कृष्णः** । 'कृष विलेखने' (भ्वा.प.अ.), कृषेर्नक् बाहुलकात् । तथा च संक्षिप्तभारतम्[८]-

''सत्यत्रेताद्वापरयुगेषु सितरक्तपीतवर्णाभः ।
स एव कृष्णःकिल कलिकाले, स एष पुरुषोत्तमो जयति ॥७॥''

[ [९]] [इति] ।

''कृषिर्भूवाचकः शब्दो नश्च निर्वृतिवाचकः ।
तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते ॥८॥''

[ [१०]]इत्यौपनिषदाः । ''कृषिरुत्कृष्टवचनः''[ [१०]]इत्यपि पाठे[११]। उत्कृष्टा निर्वृतिरस्मादिति व्युत्पत्तिः । **२८** चाक्षुषमन्वन्तरे विकुण्ठाया अपत्यं **वैकुण्ठः** । शिवादित्वादण् । विपूर्वात् कुण्ठतेर्धातोः 'गुरोश्च-'३।३।१०३॥ इत्यप्रत्यये वा । विविधा कुण्ठा माया अस्यास्तीति वा । ज्योत्स्नादित्वादणि वैकुण्ठः। विकुण्ठाया अपत्यत्वोक्तिस्तु विष्णुपुराणे-

''चाक्षुषेऽवान्तरे देवो वैकुण्ठः पुरुषोत्तमः ।
विकुण्ठाया मथो जज्ञे वैकुण्ठैर्दैवतैः सह ॥९॥''

[ [१२]]इति । विकुण्ठेरादिवाराह्या अपत्यमिति वा । विकुण्ठितसिंहा[१३]दिवक्त्रो वा, संहितासु तथा दर्शनात् । **२९** पद्मे शेते **पद्मेशयः**[१४]। 'शयवासवासिष्वकालात्'६।३।१८॥ इति सप्तम्या अलुक्। **३०** पद्मं नाभावस्य **पद्मनाभः** । 'नाभेः संज्ञायाम्[१५]' (हैमसू-७।३।१३४॥) इत्यप्, 'यस्येति च'६।४।१४८॥ इतीकारलोपः । पद्मनाभ इत्यत्र ''अच् प्रत्ययपूर्वात् (प्रत्यन्ववपूर्वात्-)' ५।४।७५॥ इत्यत्र 'अच्' इति योगविभागादच्, योगविभागस्य हि [१६]पूर्वदृष्टमात्रसाधकत्वम्, न तु नाभ्यन्तस्य सर्वत्रैवाच्समासान्त इति नियमः, तेन ''प्रजा इवाङ्गादरविन्दनाभेः''[शिशुपालवधम् ३।६५॥]इति माघः, ''नाधारेण विना सृष्टिजन्तूनां तैरपीष्यते'' [ ]इत्यादि प्रयोगाः, उक्तं च-योगविभागादिष्टसिद्धिः''[ ]इति मिश्राः[१७] । **३१** वृषो धर्मः [१८]कपिर्वराहस्ताद्रूप्याद् **वृषाकपिः** । यत्पुराणम्-

---

१. '-न्द्रियाग-' इति२॥ २. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-१६, पृ.३५॥, तत्र 'पद्मपुराणे' इत्यस्य स्थाने 'विष्णुपुराणे' इति दृश्यते ॥ ३. 'विदेः' इति२.३॥ ४. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-१४, पृ.३२॥ ५. ३प्रतौ नास्ति॥ ६. 'मुचेर्-' इति हैमोणादिगणे ॥ ७. '-कुकुण्डाविति' इति३॥ ८. '-भारते' इति३॥ ९. द्र. टीकासर्वस्वम्, भा-१, १।१।१८॥, पृ.१६॥, पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-१३, पृ.३०॥, तयोष्टीकयोरुत्तरार्धः ''कृष्णः किल कलिकाले स एव पुरुषोत्तमो जयति'' इति दृश्यते, स एव युक्तः, छन्दोभङ्गानुपपत्तेः ॥ १०. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-१३, पृ.३०॥ ११. पदचन्द्रिकायामेव श्लोके 'कृषिर्भूवाचकः शब्दः' इत्यस्य स्थानेऽयं पाठो दृश्यते ॥ १२. द्र. टीकासर्वस्वम्, भा-१, १।१।१८॥, पृ. १७॥, स्वोपज्ञटीका २।२१५॥, पृ.५३॥ 'चाक्षुषेऽवान्तरे' इत्यस्य स्थाने टीकासर्वस्वे 'चाक्षुषस्यान्तरे' इति, स्वोपज्ञटीकायां च 'चाक्षुषे चान्तरे' इति दृश्यते ॥ १३. 'सिंहादेववक्त्रो' इति२॥ १४. 'पद्मशयः' इति३॥ १५. पाणिनीयाष्टाध्याय्यामेतादृक् सूत्रं न दृश्यते, प्रायः टीकाकृता सिद्धहेमे 'नाभेर्नाम्नि' ७।३।१३४॥ इत्यत्र 'नाम्नि' इत्यस्य स्थाने 'संज्ञायाम्' इति पाठो मुक्तः, पाणिनीयमते हि नामत्वमेव संज्ञात्वम् ॥ १६. 'पूर्वाचार्येष्वचमात्र-' इति२॥ १७. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-१५, पृ.३३॥, तत्र 'पूर्वदृष्ट-' इत्यस्य स्थाने 'पूर्वाचार्येष्ट-' इति, 'सृष्टिजन्तूनां तैरपीष्यते' इत्यस्य च स्थाने 'सृष्टिरुर्णनाभेरपीष्यते' इति दृश्यते ॥ १८. 'कविव-' इति१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"कपिर्वराहश्रेष्ठश्च धर्मश्च[1] वृष उच्यते ।

तस्माद् वृषाकपिं प्राह काश्यपो मां प्रजापतिः॥१०॥"

[[2]]इति । वृषं[3] दानवमाकम्पितवानिति वा, पृषोदरादित्वात् । **३२** [4]यदोर्ज्येष्ठः पुत्रो मधुस्तद्वंश्यत्वात्, 'तस्यापत्यम्' ४।१।९२॥ इत्यणिति **माधवः** । अन्येऽपि [5]तद्वंश्या **माधवाः**। तथा च- "प्रहित[:] प्रधा(ध)नाय माधवान्"[शिशुपालवधम् १६।५२] इति माघः । माया लक्ष्म्या धव इति वा । **३३** वसुदेवस्यापत्यं **वासुदेवः** । 'ऋष्यन्धकवृष्णिकुरुभ्यश्च' ४।१।११४॥ इत्यण्। तथा च विष्णुपुराणम्-

"सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः ।

ततो वै वासुदेवोऽसौ[6] विद्वद्भिः परिकीर्त्तितः ॥११॥"

[[7]]इति । वासुरित्यपि । तथा च त्रिकाण्डशेषः-"वासुर्नारायणपुनर्वसुविश्वरूपाः" [त्रिकाण्डशेषः १।१।२९॥] । **३४** विश्वं बिभर्त्ति **विश्वम्भरः** ।'डुभृञ् धारणपोषणयोः'(जु.उ.अ.),'संज्ञायां भृ-तृ-वृ-जि-धारि-सहि-तपि-दमः'३।२।४६॥ इति खच्, 'अरुर्द्विषदजन्तस्य'६।३।६७॥ इति मुम् । **३५** श्रियं धरति **श्रीधरः**। 'धृञ् धारणे'(भ्वा.उ.अ.), पचाद्यच् । **३६** विश्वं रूपमस्य **विश्वरूपः॥२१५॥ ३७** शैशवे चापल्यनिषेधाय यशोदया दाम्ना उदरे बद्धत्वाद् दाम उदरेऽस्य **दामोदरः** । गमकत्वाद् वैयधिकरण्येऽपि समासः। **३८** शूरो नाम यादवो वसुदेवपिता, तद्वंशजत्वात् **शौरिः** । बाह्वादेराकृतिगणत्वाद् इञ्। "शर्वः शिवः केशव एव शौरिः"[[8]]इति शकारभेदात् तालव्यादिः ।"षूङ् प्राणिप्रसवे' (दि.आ.वे.), 'सुसूधागृवि(गृधि)भ्यः क्रन्'(उणा-१८२)इति क्रन्, सूरो यादवे दन्त्यवान्"[[9]]इति तु मधुमाधवी। **३९** सना भवः **सनातनः**। 'सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यः'४।३।२३॥ इति ट्युः, तुडागमश्च। **४०** विध्यति दैत्यान् **विधुः** ।'व्यध ताडने'(दि.प.अ.), 'पृभिदिव्यधिगृधिधृषिभ्यः कुः'(उणा-२३)इति कुः । **४१** पीते अम्बरेऽस्य **पीताम्बरः**। **४२** मार्जयति पापं **मार्जः** । 'मृजूष्[10] शुध्दौ[11]'(अ.प.वे.), णिजन्तात् पचाद्यच्। मां लक्ष्मीमर्जयति वा मार्जः[12]। 'अर्ज सर्ज[13][14]अर्जने'(भ्वा.प.से.), पचाद्यच् । **४३** जयति दैत्यानिति **जिनः**। 'जि जये'(भ्वा.प.अ.), 'इण्सिजि(ञि)-[दीङुष्यवि]भ्यो नक्'(उणा-२८२)इति नक्। **४४** कुं भुवं मोदयति **कुमोदकः**। 'मुद हर्षे'(भ्वा.आ.से.), 'ण्वुल्तृचौ' ३।१।१३३॥ इति ण्वुल् । **४५** त्रयो विशिष्टाः क्रमाः [15]सृष्टिस्थितिप्रलयलक्षणाः शक्तयोऽस्य **त्रिविक्रमः** । बलिबन्धनार्थं भूव्योमस्वर्गेषु त्रयो विक्रमाः पादन्यासा अस्येति वा त्रिविक्रमः। **४६** जहाति पादाङ्गुष्ठाद् गङ्गामिति **जह्नुः**। 'ओहाक् त्यागे' (जु.प.अ.), 'जहातेः सन्वदालोपश्च'(उणा-१३८)इति नुः। **४७** चत्वारो भुजा अस्य **चतुर्भुजः**। **४८** पुनर्वस्वोर्जातः **पुनर्वसुः**। 'लुबविशेषे'४।२।४॥ इत्यणो लुप् । **४९** शतमावर्त्ता अस्य **शतावर्त्तः** । **५०** गदस्याग्रजोः **गदाग्रजः** । **५१** स्वतो भवति **स्वभूः**, क्विप् ॥**२१६**॥ **५२** मुञ्जवर्णकेशै[16]युक्तत्वाद् **मुञ्जकेशी**। 'अत इनिठनौ' ५।२।११५॥ इतीनिः । यत्पुराणम्-

"स शूलतेजसाऽऽविष्टो नारायणविभुस्तदा ।

बभूव मुञ्जवर्णश्च ततोऽहं मुञ्जकेशवान्॥१२॥"

[[17]]इति । **५३** वनं वनपुष्पम्, तन्मालाऽस्यास्ति **वनमाली**। 'व्रीह्यादिभ्यश्च '५।२।११६॥ इति इनिः । "सपल्लवपुष्पग्रथिता स्रक् वनमाला"[[18]]इत्येके । "आपादपद्यं या माला वनमालेति[19] सा मता"[[18]]इति तु कलिङ्गः । **५४** अवयवलक्षणया आयतत्वात् पुण्डरीके पुण्डरीकपत्रे इवाक्षिणी यस्य स **पुण्डरीकाक्षः** । पुण्डरीकमक्षि अस्येति वा ।'बहुव्रीहौ सक्थ्यक्ष्णोः [स्वाङ्गात्] षच्[20]'५।४।११३॥,'यस्येति च' ६।४।१४८॥ ।अनेन किल पूर्वं रुद्राय सहस्रपुण्डरीको बलिरुपनीतः[21], तत्र तेन एकं भक्तिं[22] ज्ञातुमपहृतम्, ततोऽनेन स्वचक्षुरेकमुत्पाट्य पुण्डरीकस्थाने [दानं] कृतं, तेन च महिम्नः स्तोत्रे "हरिस्ते साहस्रम्"

१. 'धर्मस्य' इति३॥ २. द्र. स्वोपज्ञटीका २।२१५॥, पृ.५३॥ ३. 'वृषदा-' इति ३॥ ४. 'यदोर्ज्ये-' इति३॥ ५. 'तद्वंश्य-' इति२॥ ६. '-देवोऽस्मै' इति३॥ ७. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-१५, पृ.३३-३४॥, रामाश्रमी १।१।२०॥, पृ.१३॥, तत्रोत्तरार्धः 'अतोऽसौ वासुदेवेति विद्वद्भिः परिपठ्यते' इति पदचन्द्रिकायाम्, 'ततोऽसौ वासुदेवेति विद्वद्भिः परिगीयते' इति रामाश्रम्यां च दृश्यते ॥ ८. 'श्रियंधरः' इति३॥ ९. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-१६, पृ.३४॥ १०. उणादिगणे नास्ति॥ ११. 'मृजुष्' इति२.३॥ १२. 'सिद्धौ' इति१॥, 'मृजू शुद्धौ' इति मा. धातुवृत्तौ, अदादिः, धातुसं-७१, पृ.३७२॥ १३. ३प्रतौ नास्ति॥ १४. 'षर्ज' इति मा. धातुवृत्तिः, भ्वादिः, धातुसं-१३७, पृ.९८॥ १५. 'सृष्ट-' इति३॥ १६. '-केशी-' इति१॥ १७. द्र. स्वोपज्ञटीका २।२१७॥, पृ.५३॥ १८. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-१६, पृ.३५॥ १९. "आपादलम्बिनी माला सर्वर्तुकुसुमोज्ज्वला । मध्ये स्थूलकदम्बाढ्या वनमालेति कीर्तिता" इति वाचस्पत्यम्, पृ.४८४५॥ २०. 'रथच्' इति १॥ २१. '-रूप-' इति३॥ २२. 'भक्ति' इति१.२.३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[शिवमहिम्नस्तोत्रम्-१९] इति पद्ये व्यक्तम् । यद्वा अक्षेषु इन्द्रियेषु दृश्यते, अधिष्ठातृरूपेणानुभूयते इत्यक्षः परमात्मा, 'शेषे'४।२।९२॥ इत्यण्, सर्वेन्द्रियाणामधिष्ठातेत्यर्थः, हृत्पुण्डरीकमध्ये परमात्मस्वरूपेण स्थितत्वात्[१], सर्वेन्द्रियाणामपि इन्द्रिय इति यावत्। तथा च श्रुतिः 'प्राणस्य प्राण उत चक्षुषश्चक्षुः श्रोत्रस्य च[२] श्रोत्रं मनसोऽयं मनो विदुः''[ ]इति । आलौहित्यात् पुण्डरीकं कर्पासमिवाक्षि अस्येति वा। ''कर्पासशब्दस्तु वानरकटिवचनः''[३]इति तु विष्णुपुराणटीकाकाराः । ५५ बिभर्त्ति विश्वम्, जगद्धारं वा **बभ्रुः**। 'डुभृञ् धारणपोषणयोः[४]'(जु.उ.अ.), 'कुर्भ्रश्च'(उणा-२२) इत्युणादिसूत्रेण कुप्रत्ययः, धातोर्द्वित्वं च ।५६ शशाकारा बिन्दवो लाञ्छनमस्य **शशबिन्दुः** ।५७ विधति[५] सृजति **वेधाः** । 'विध विधाने'(तु.प.अ.), '-असुन्'(उणा-६२८)इत्यसुन्, 'अत्वसन्तस्य चाधातोः'६।४।१४॥ इति दीर्घः । वेधसौ, वेधसः इत्यादि । ५८ पृश्निः शृङ्गमस्य **पृश्निशृङ्गः** । ५९ धरणीं धरति **धरणीधरः**। 'धृञ् धारणे'(भ्वा.उ.अ.), पचाद्यच्, यौगिकत्वाद् महीधरादयः। ६० आत्मनो भवति **आत्मभूः** ।'भुवः संज्ञान्तरयोः' ३।२।१७९॥ इति क्विप् । ६१ पाण्डवान् अयते **पाण्डवायनः** ।'अय गतौ' (भ्वा.आ.से.), नन्द्यादित्वाद् ल्युः । ६२ सुवर्णवर्णा[६] बिन्दवो लाञ्छनान्यस्य **सुवर्णबिन्दुः** ॥२१७॥ ६३ श्रीवत्सो हृदि अस्य **श्रीवत्सः**। अर्शआदित्वादच्। महापुरुषलक्षणं श्वेतरोमावर्तविशेषः श्रीवत्सः। वदति महत्त्वमिति **वत्सः** । 'वद व्यक्तायां वाचि' (भ्वा.प.से.), 'वृ(वॄ)तॄवदिहनिकमिकुषिभ्यः सः'(उणा-३४२) इति सप्रत्ययः। ''श्रीयुक्तो वत्सः श्रीवत्सः। क्रुद्धस्य दुर्वाससः पदाघातरूपो[७] रेखाविशेषः श्रीवत्सः''[८]इति रूपपञ्जिका । ''शौरि श्रीवत्सदैत्यारिविष्वक्सेनजनार्दनाः[९]''[१०]इति शब्दार्णवः। [११]श्रीवत्सलाञ्छनोऽपि । ६४ देवस्यापत्यं देवकिः। 'अत इञ्' ४।१।९५॥, संज्ञापूर्वकत्वाद् वृद्ध्यभावः, ततः स्त्रियाम् 'इतो मनुष्यजातेः' ४।१।६५॥ इति ङीष् । 'देवकी'[ ]इति वर्णदेशना। ''देवकीनाचष्टे इति णिजन्ताद् 'अच इः'(उणा-५७८)इति इः, ततो ङीपि देवकीति समाधेयम्''[१२]इति श्रीधरः। 'दैवकी देवकी'[१३]इति द्विरूपकोषश्च[१४] । देवक्याः सूनुः **देवकीसूनुः**। ६५ गोपीनामिन्द्रो **गोपीन्द्रः**। ६६ ''पलाशी विष्टरः स्थिरः''[त्रिकाण्डशेषः२।४।२॥] इति त्रिकाण्डशेषः। तरुः अश्वत्थोऽभिमतः। तथा च ''अश्वत्थः सर्ववृक्षाणाम्''[श्रीमद्भगवद्गीता १०।२६॥]इति गीता । तत्र श्रूयत इति ।'सर्वधातुभ्योऽसुन्'(उणा-६२८), **विष्टरश्रवाः**। विष्टरः कुशमुष्टिरिव श्रवसी कर्णावस्येति वा । विष्टरश्रवसौ, विष्टरश्रवसः इत्यादि । ६७ सोमोऽभिगम्यः सिन्धुरस्य **सोमसिन्धुः** । ६८ जगतां नाथो **जगन्नाथः** । ६९ गोवर्धनं धरति **गोवर्धनधरः**, पचाद्यच् ॥२१८॥ ७० यदूनां नाथो **यदुनाथः**। ७१-७५ गदाशार्ङ्गचक्रश्रीवत्सशङ्खेभ्यः भृत्[१५], तेन **गदाभृत्** । शृङ्गस्य विकारः शार्ङ्गम्, 'अनुदात्तादेश्च'४।३।१४०॥ इत्यत्र, शार्ङ्गं धनुर्बिभर्त्ति **शार्ङ्गभृत्, चक्रभृत्, श्रीवत्सभृत्, शङ्खभृत्,** यौगिकत्वाद् गदाधरः, शार्ङ्गी, चक्रं पाणावस्य चक्रपाणिः ।'प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ'(वा २।२।३६॥) इति परनिपातः । श्रीवत्साङ्कः, शङ्खपाणिः इत्यादयः। पञ्चसप्ततिः कृष्णस्य। शेषश्चात्र-

''नारायणे तीर्थपादः पुण्यश्लोको बलिन्दमः ।
उरुक्रमोरुगायौ[१५] च तमोघ्नः[१६] श्रवणोऽपि च ॥१३॥
उदारधिर्लतापर्णः सुभद्रः[१७] पांशुजालिकः ।
चतुर्व्यूहो नवव्यूहो नवशक्तिः षडङ्गजित् ॥१४॥
द्वादशमूर्त्तिः[१८] शतको दशावतार एकदृक् ।
हिरण्यकेशः[१९] सोमोऽहिस्त्रिधामा त्रिककुत्[२०] त्रिपात् ॥१५॥
मानङ्करः[२१] पराविद्धः पृश्निगर्भोऽपराजितः ।
हिरण्यनाभः श्रीगर्भो वृषोत्साहः सहस्रजित् ॥१६॥

१. 'ग्थितत्वान्' इति२ ॥ २. 'चा' इति४ ॥ ३. द्र. पदचन्द्रिका, भा १, स्वर्गवर्गः, श्लो-१४, पृ.३१-३२ ॥ ४. 'धारण ' इति२ ॥ ५. 'विदधति' इति३ ॥ ६. 'सुवर्णा' इति१ ॥ ७. ' रूपा' इति२ ॥ ८. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-१७, पृ.३६ ॥ ९. ' र्दनः' इति२ ॥ १०. द्र. रामाश्रमी १।१।२२॥, पृ.१३ ॥ ११. ''विधुः श्रीवत्सलाञ्छनः'' इत्यमरकोषः १।१।२२ ॥ १२. द्र. पदचन्द्रिका, भा १, स्वर्गवर्गः, श्लो १६, पृ.३४ ॥ १३. 'देवकी देवकीति च' इति पू.कस्तूरसूरिसम्पादितशब्दभेदप्रकाशे, पृ.२३० ॥ १४. 'शब्दो योज्यः' इति ४प्रतेष्टिप्पणी ॥ १५-१. ' रुगायौ' इति, १५-२. 'उदारधि-' इति च शेषनाममालास्वोपज्ञटीकयोः ॥ १६. 'तमाघः' इति२ ॥ १७. 'समुद्रः' इति३ ॥ १८. 'द्वादशः मूलः' इति३ ॥ १९. 'हिरण्यः केशः' इति३ ॥ २०. 'त्रिकत्रिपात्' इति१,२ ॥ २१. 'पानङ्गरः' इति३ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऊर्ध्वकर्मा यज्ञधरो धर्मनेमिरसंयुतः ।
पुरुषो योगनिद्रालुः खण्डास्यः[1] शलिकाऽजितौ ॥१७॥
कालकण्ठो[2-1] वरारोहः श्रीकरो वायुवाहनः ।
वर्धमानश्च चतुर्दंष्ट्रो नृसिंहवपुरव्ययः ॥१८॥
कपिलो रुद्रकपिलः[2-2] सुषेणः सुमतिञ्जयः[2-3] ।
क्रतुधामा वासुभद्रो बहुरूपो महाक्रम ॥१९॥
विधाता धार एकाङ्गो वृषाक्षः सुवृषोऽक्षजः[3] ।
रन्तिदेवः[4] सिन्धुवृषो[5] जितमन्युर्वृकोदरः ॥२०॥
बहुशृङ्गो रत्नबाहुः पुष्पहासो महातपाः ।
लोकनाभः सूक्ष्मनाभो धर्मनाभः पराक्रमः ॥२१॥
पद्महासो महाहंसः पद्मगर्भः सुरोत्तमः ।
शतवीरो महामायो ब्रह्मनाभः सरीसृपः[6] ॥२२॥
वृन्दाङ्कोऽधोमुखो धन्वी सुधर्मा विश्वभुक् स्थिरः ।
शतानन्दः शरुश्चापि[7] यवनारिः प्रमर्दनः ॥२३॥
ऋक्षनेमिर्लोहिताक्षः[8] एकपाद् द्विपदः कपिः ।
एकशृङ्गो यमकीलः(-ल) आसन्दः शिवकीर्तनः ॥२४॥
शद्रुर्वंशः[9] श्रीवराहः सदायोगी सुयामुनः[10] ॥''
[शेषनाममाला २।६४-७६॥] ॥

**मधु[1]धेनुक[2]चाणूर[3]पूतना[4]यमलार्जुनाः[5] ॥२१९॥**
**कालनेमि[6]हयग्रीव[7]शकटा[8]रिष्ट[9]कैटभाः[10] ।**
**कंस[11]केशि[12]मुराः[13] साल्व[11][14]मैन्द[15]द्विविद[16]राहवः[17] ॥२२०॥**
**हिरण्यकशिपु[18]र्बाणः[19] कालियो[20] नरको[21] बलिः[22] ।**
**शिशुपाल[23]श्चास्य वध्याः**

१ अस्य विष्णोरेते त्रयोविंशतिर्वध्याः, मन्यतेऽत्यर्थं **मधुः** । 'मनु अवबोधने'(त.आ.से.), 'फलि-पाटि-मनि-नमि-जनां गुक्पाटिनाकिधताश्च उर्निच्चे[12]'(उणा-१८)इति सूत्रेण[13] मन्यते-र्धोन्तादेशः, उप्रत्ययश्च । २ धेनुं कायति[14] **धेनुकः** । ३ चणति शब्दायते प्रतिमल्लानिति **चाणूरः** । 'चण[15] शब्दे'(भ्वा.प.से.) । ४ पूनाति **पूतना** । 'पूञ् पवने'(क्र्या.उ.से.), 'पृपूभ्यां कित्' (हैमोणा-२९३)इति तनः, टाप् । ५ यमलरूपावर्जुनवृक्षौ **यमलार्जुनौ** ॥२१९॥ ६ कालस्य नेमिश्चक्रधारेव **कालनेमिः** । ७ हयस्य ग्रीवेव ग्रीवाऽस्य **हयग्रीवः** । ८ शकटाकारत्वात् **शकटः** । ९ नास्ति रिष्टं क्षेममस्मादिति **अरिष्टः** । १० कैतवेन भाति **कैटभः**, पृषोदरादिः । ११ कामयते जयं **कंसः** । 'कमु कान्तौ' (भ्वा.आ.से.), वृ(वॄ)तृवदिहनिकमिकषि[16]युमुचिभ्यः सः'(उणा-३४२)इति सः । १२ केशाः सन्त्यस्य **केशी** । 'अत इनिठनौ' ५।२।११५॥ इतीनिः । १३ मुरति वेष्टयति **मुरः** । 'मुर [सं]-वेष्टने'(तु.प.से.), तुदादिः, 'इगुपधज्ञा-'३।१।१३५॥ इति कः । १४ सल्वा[17] अभिजनोऽस्य **साल्वः** । सलति गच्छति वा । 'सल गतौ'(भ्वा.प.से.), 'सलेर्णिद्वा'(हैमोणा-५१०)इति वः । १५ मया लक्ष्म्या कृत्वा इन्दति परमैश्वर्यमनुभवति मेन्दः[18] । 'प्रज्ञादिभ्यश्च'५।४।३८॥ इत्यणि **मैन्दः**[19] । १६ ['विद ज्ञाने'(अ.प.से.)], 'इगुपध-'३।१।१३५॥ इति कः । द्वयोस्त्रेताद्वापरयोर्विदः **द्विविदः** । १७ रहयति गृहीत्वा[20] सूर्याचन्द्रमसौ इति **राहुः** । 'रहि(रह) त्यागे'(चु.उ.से.), दृ(दॄ)सनिजनिचरिचटिरहिभ्यो उण्[21]'(उणा-३)इति उण् ॥२२०॥ १८ हिरण्येन युक्तः कसि(शि)पुः **हिरण्यकसि(शि)पुः** । १९ बाणयति युद्धाय[22] रिपूनिति **बाणः** । 'बण शब्दे'(भ्वा.प.से.), अस्माण्णिजन्तात् पचाद्यच् । २० के पानीये आलयोऽस्य **कालियः**[23], पृषोदरादिः । २१ नृणाति **नरकः** । 'दृन्(कृ)नृ-'(हैमोणा-२७)इत्यकः । २२ बलति

१. 'खजस्य' इति२, 'षडास्यः' इति३ ॥ २-१. 'कालकुण्ठो' इति, २-२. 'भद्रकपिलः' इति, २-३. 'सुमितिञ्जयः' इति, २-४. 'सुभन्त्रा' इति च शेषनाममालास्वोपज्ञटीकयोः ॥ ३. 'सुवृषोकुजः' इति२ ॥ ४. 'रतिदिवः' इति२, 'रतिदेवः' इति४ ॥ ५. 'सिन्धुः वृषो' इति२ ॥ ६. 'शरीसृपः' इति१.२.४ ॥ ७. 'त्सरु ' इति१ ॥ ८. '-निर्मिलो ' इति३, 'यज्ञनेमिलो' इति शेषनाममालास्वोपज्ञटीकयोः ॥ ९. 'सद्रु-' इति३ ॥ १०. 'सया-' इति३ ॥ ११. 'साल्वः' इति१, 'शाल्वः' इति३ ॥ १२. 'उच्च' इति३, 'उनिच्च' इति१ ॥ १३. 'फलिनमिमनिजनां गुक्पाटिनाकिधतश्च' इत्युणादिगणसूत्रस्वरूपम् ॥ १४. 'कामयति' इति३ ॥ १५. क्षीरतरङ्गिण्यादौ चणधातुः शब्देऽर्थे न दृश्यते, तेनात्र हैमसम्मतः शब्दार्थकः अणरणदण्डात्मकः चणधातुर्बोध्यः, तत्राह- ''महिकणि-'(हैमोणा-४२८)इति णिति ऊरे चाणूरो विष्णुहतो मल्लः'' इति स्वोपज्ञं धातुपारायणम्, भ्वादिः, धातुसं-२७२, पृ.३३ ॥ १६. '-कषिभ्यः सः' इत्युणादिगणे ॥ १७. 'सला' इति३.४, 'सलवा' इति२ ॥ १८. 'मेदः' इति१, 'मैन्दः' इति२.४ ॥ १९. 'मेन्दः' इति३ ॥ २०. अत्र 'देवताद्वन्द्वे च' ६।३।२६ ॥ इत्यानङ् ॥ २१. '-चटिभ्यो ञुण्' इत्युणादिगणे ॥ २२. 'योद्धुं' इति२.३ ॥ १प्रतावपि केनचित् 'योद्धुं रि-' इत्यस्य निष्कापणं कृत्वा ऊर्ध्वभागे 'युद्धाय रि-' इति कृतः ॥ २३. 'कालीयः' इति३ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**बलिः** । 'इन् सर्वधातुभ्यः'(उणा-५५७)। **२३** शिशून् पालयति **शिशुपालः**, पचाद्यच् । नारायणस्य मध्वादीनां त्रयोविंशतिरिपूणां नामानि। यौगिकत्वाद् मधुमथनः, धेनुकध्वंसी[1], चाणूरसूदनः, पूतनादूषणः, यमलार्जुनभञ्जनः, कालनेमिहरः, हयग्रीवरिपुः, शकटारिः, अरिष्टहा, कैटभारिः, कंसजित्, केशिहा, मुरारिः, साल्वारिः, मैन्दमर्दनः[2], द्विविदारिः, राहुमूर्धहरः, हिरण्यकशिपुदारणः, बाणजित्, कालियदमनः, नरकारिः, बलिबन्धनः, शिशुपालनिषूदनः इति विष्णुनामानि भवन्ति ॥

**वैनतेयस्तु वाहनम् ॥२२१॥**

१ अस्य विष्णोर्वाहनं विनताया अपत्यं **वैनतेयः** । 'स्त्रीभ्यो ढक्'४।१।१२०॥ इति ढक् , 'आयनेयी-'७।१।२॥ इत्यादिना ढस्य एयादेशः ॥२२१॥

**शङ्खोऽस्य पाञ्चजन्यः**[1]

१ अस्य विष्णोः शङ्खः **पाञ्चजन्यः** । समुद्रे तिमिरूपधारी पञ्चजननामा असुर आसीत्, तदस्थिभवत्वात् । 'बहिर्देवपञ्चजनेभ्यः-'(वा-४।३।५८॥)इत्युपसंख्यानाद् ञ्यः । यद्वा पञ्चजने पाताले भव इति, 'बहिर्देव-'(वा-४।३।५८॥)इति सूत्रेणैव ञ्यः ॥

**अङ्कः श्रीवत्सः**[1]

१ अस्य विष्णोरङ्कश्चिह्नं **श्रीवत्सः**, महापुरुषलक्षणं श्वेतरोमावर्त्तविशेषः । वदति महत्त्वमिति वा । वदेः 'वृ(वॄ)-तृवदिहनि-'(उणा-३४२)इत्यादिना सः । "श्रिया युक्तो वत्सः[3] श्रीवत्सः[4] । रोमावर्त्तविशेषः श्रीवत्सः[5]" [अभि. स्वोपज्ञटीका-२।२२२॥]इत्याचार्याः॥

**असिस्तु नन्दकः**[1][6] ।

१ विष्णोरसिः खड्गः नन्दयति **नन्दकः**[6] । 'टुणदि समृद्धौ'(भ्वा.प.से.), 'ण्वुल्तृचौ'३।१।१३३॥ इति ण्वुल् ॥

**गदा कौमोदकी**[1]

विष्णोर्गदा [7]देवास्त्रत्वाद् गदति गदा । 'गद व्यक्तायां वाचि' (भ्वा.प.से.), पचाद्यच्, टाप् । कौ पृथिव्यां मोदते सदा जययोगात् **कौमोदकी** । 'मुद हर्षे'(भ्वा.आ.से.), 'बहुलमन्यत्रापि'( )इति[8] वुञ् । "विष्णुः कुमोदकः शौरिः"[[9]]इति कोषान्तरात् [10]कुमोदको विष्णुः, तस्येयमित्यर्थेऽणि कौमोदकी । "संहितासु[11] तु[12] कौपोदकीति पाठः, कूपोदकाज्जातेत्याम्नायात्" [अम. क्षीर. १।१।२८॥]इति स्वामी ॥

**चापं शार्ङ्गं**[1]

१ विष्णोश्चापं धनुः शृणाति शीर्यते वा शृङ्गम् । 'शॄ हिंसायाम्' (क्र्या.प.से.), 'शृणातेर्ह्रस्वश्च'(उणा-१२३)इति गन्प्रत्ययः, स च कित्, मु(नु)डागमश्च, धातोर्ह्रस्वत्वम् । शृङ्गस्य विकारः **शार्ङ्गम्** । 'तस्य विकारः'४।३।१३४॥ इत्यण्, 'तद्धितेष्वचामादेः'७।२।११७॥ इत्यादिवृद्धिः ॥

**चक्रं सुदर्शनः**[1] **॥२२२॥**

१ विष्णोः चक्रं सदा रिपुच्छेदं करोत्यनेन चक्रम्, करोतेः कप्रत्यये, 'कृञादीनां के द्वे स्तः'(वा-६।१।१२॥)इति द्विर्वचनम् । भक्तैः[13] सुखेन दृश्यत इति **सुदर्शनः** । 'दृशिर् प्रेक्षणे' (भ्वा.प.अ.) 'भाषायां शासियुधिदृशिधृषिमृषिभ्यो युज् वक्तव्यः'(वा-३।३।१३०॥)इति खलपवादो[14] युच्, 'युवोरनाकौ' ७।१।१॥, 'पुगन्तलघूपधस्य च'७।३।८६॥ इति गुणः । अभिरामत्वात् शोभनं दर्शनमस्य वा सुदर्शनः, पुंसि । "सुदर्शनोऽस्त्रियां चक्रे"[[15]]इति नामनिधानात् पुंनपुंसकलिङ्गोऽपि । वाचस्पतिरपि "चक्रं सुदर्शनोऽस्त्रियाम्"[[16]]इत्याह ॥२२२॥

**मणिः स्यमन्तको हस्ते**[1]

१ विष्णोर्हस्तस्थो मणिः सीमन्तयति [17]दीप्तिभिर्द्यामिति **स्यमन्तकः** । पृषोदरादिः ॥

**भुजमध्ये तु कौस्तुभः।**

१ भुजमध्यं वक्षस्तत्र, कुं भुवं स्तोभते व्याप्नोति

१. इतोऽग्रे ४प्रतौ 'चाणूरध्वंसी' इति दृश्यते ॥ २. 'मेन्दवर्दनः' इति३.४॥ ३. इतोऽग्रे स्वोपज्ञवृत्तौ 'वक्षोऽनेन' इति दृश्यते, द्र. २।२२२॥, पृ.५५॥ ४. २प्रतौ नास्ति ॥ ५. स्वोपज्ञटीकायां न दृश्यते ॥ ६. 'नन्दनः' इति३॥ ७.'दैवा-' इति१॥ ८. ३प्रतौ नास्ति ॥ ९. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-२३, पृ.४२॥, रामाश्रमी १।१।२८॥, पृ.१६॥ १०. 'कुमु-' १.४॥ ११. इतोऽग्रे क्षीरस्वामिटीकायां 'मेण्ठादौ' इति दृश्यते ॥ १२. क्षीरस्वामिटीकायां नास्ति ॥ १३. 'भक्तेः' इति१.३॥ १४. '-वादौ' इति३॥ १५. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-२३, पृ.४२॥, रामाश्रमी १।१।२८॥, पृ.१६॥ १६. द्र. स्वोपज्ञटीका २।२२२॥, पृ.५५॥ १७. 'दीप्तिभिद्या-' इति १, 'दीप्तिर्भिद्या-' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुस्तुभोऽब्धिः, तस्यायं **कौस्तुभः**। 'स्तुभ[1] स्तम्भे'(भ्वा.आ.से.), 'इगुपधज्ञा-'३।१।१३५॥ इति कः। यद्वा कौ स्तोभते कुस्तुभो विष्णुः, तस्यायमित्यर्थे, 'तस्येदम्' ४।३।१२०॥ इत्यण् वा। "पुंक्लीबोऽयम्" इति गौडः। एकं विष्णुवक्षःस्थमणेः॥

**वसुदेवो भूकश्यपो दुन्दुरानकदुन्दुभिः ॥२२३॥**

१ वसुभी रत्नैर्दीव्यति **वसुदेवः**। 'दीवु क्रीडादौ' (दि.प.से.), पचाद्यच्। वसूनि दीव्यतीति कर्मण्यण् वा। २ भुवि कश्यप इव **भूकश्यपः**, तालव्यान्तस्थाद्यमध्यः। ३ द्विषो दमयति **दुन्दुः**।'दमु उपशमे'(दि.प.से.), पृषोदरादित्वात् साधुः। ४ कृष्णे जाते देवैरानकाः पटहा दुन्दुभयश्चास्य वेश्मनि वादिता इति **आनकदुन्दुभिः**, पृषोदरादित्वाद् रूपसिद्धिः।"आनकदुन्दुभो वसुदेवपिता, तस्यापत्यमित्यर्थे 'अत इञ्'४।१।९५॥"[अम.क्षीर. १।१।२२॥] इति स्वामी[3]। चत्वारि विष्णुपितुः ॥२२३॥

**रामो हली मुसलिसात्वतकामपालाः**
**सङ्कर्षणः प्रियमधुर्बलरौहिणेयौ।**
**रुक्मिप्रलम्बयमुनाभिदनन्ततालल-**
**क्ष्मैककुण्डलसितासितरेवतीशाः॥२२४॥**
**बलदेवो बलभद्रो नीलवस्त्रोऽच्युताग्रजः।**

१ रमयति मोदयति प्रजाः रूपमस्येति वा **रामः**।'रमु क्रीडायाम्'(भ्वा.आ.अ.,),णिजन्तः, 'ज्वलितिकसन्तेभ्यो णः' ३।१।१४०॥ इति णः। २ हलं प्रहरणमस्य **हली**। 'अत इनिठनौ'५।२।११५॥ इतीनिः। यौगिकत्वाद् हलायुधः सीरपाणिः इत्यादयः। ३ 'मुस[4] खण्डने'(दि.प.से.), 'वृषादिभ्यः कलच्[5]' (उणा-१०६)इति कलच् मुसलम्[6], दन्त्यमध्यम्। तथा च 'सर्वस्य द्वे'८।१।१॥ इत्यत्र न्यासः-"[7]विसंविसं मुसलंमुसलं स्यात्"[8]इति षत्वम्। सुरमुसलसुपा इति सकारभेदश्च। तदस्त्यस्य **मुसली**।" 'मुष स्तेये'(क्र्या.प.से.)इत्यतो मूर्धन्यान्तोऽपि" [9]इति वर्णदेशना, तद्योगाद् मुषलीत्यपि। ४ सत्वतोऽपत्यम्, तत्र भवो वा **सात्वतः**। 'उत्सादिभ्योऽञ्'४।१।८६॥ इति अञ्[11]। ५ काममिच्छां भ्रातृजत्वात्, कामं स्मरं वा पालयति वा **कामपालः**। 'पाल रक्षणे'(चु.प.से.), 'पृ पालनपूरणयोः' (जु.प.से.)अस्माद्वा 'कर्मण्यण्'३।२।१॥, रलयोरैक्यम्। ६ सङ्कर्षति संहारमूर्त्तित्वात्, हलेन वेति **सङ्कर्षणः**। गर्भस्य सम्यक् कर्षणाद्वा। तथा च हरिवंशे-"गर्भ[सङ्कर्षणात् सोऽथ लोके] सङ्कर्षणः स्मृतः" [12]इति। 'कृष विलेखने'(भ्वा.प.अ.), नन्द्यादित्वाल्ल्युः। द्वितीयपक्षे 'अर्शआदिभ्योऽच्'५।२।१२७॥ इत्यच्। सङ्कर्षति यमुनामिति वा। ७ प्रियं मधु मद्यमस्य **प्रियमधुः**। ८ बलभद्रैकदेशो **बलः**। बलातिशययोगाद्वा, अर्शआदित्वादच्। ९ रोहिण्या अपत्यं **रौहिणेयः**। 'शुभ्रादिभ्यश्च'४।१।१२३॥ इति ढक्। १०-१२ रुक्मिप्रलम्बयमुनाभ्योऽग्रे भिच्छब्दो योज्यः, तेन रुक्मिणं भिनत्ति **रुक्मिभित्, प्रलम्बभित्, यमुनाभित्,** यौगिकत्वाद् रुक्मिदारुणः,। प्रलम्बं हतवानिति प्रलम्बघ्नः।[13]देवत्वाद् 'अमनुष्यकर्तृके[14] च'३।२।५३॥ इति टक्।"[15]मूलविभुजादित्वात् को वा"[16] इति कौमुदी। १३ अनन्तः शेषः, तन्मूर्त्तित्वाद् **अनन्तः**। १४ तालो वृक्षविशेषः, लक्ष्म चिह्नमस्य **काललक्ष्मा**, नकारान्तः। १५ एकं कुण्डलमस्य **एककुण्डलः**, अर्शआदित्वादच्। १६ सितः शेषमूर्त्तित्वाद्, असितो निलाङ्गत्वात् **सितासितः**। १७ रेवत्या ईशः **रेवतीशः** ॥२२४॥ १८ बलश्चासौ देवश्च **बलदेवः**। बलेन दीव्यतीति पचाद्यच् वा। १९ बलं पराक्रमः, भद्रं श्रेष्ठमस्य **बलभद्रः**। बलेन भद्रो वा। २० नीलं वस्त्रमस्य

१. 'स्तम्भ' इति१, 'स्तभ-' इति४, 'सुभ स्तम्भने' इति३, क्षीरतरङ्गिण्यादौ 'ष्टुभु-' इति दृश्यते॥ २. मुद्रितमूले 'दिन्दु-' इति दृश्यते, स्वोपज्ञटीकापि तमाश्रित्यैव॥ ३. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-१७, पृ.३६॥, क्षीरस्वामिटीकायां 'अनकदुन्दुभो वसुदेवस्य पितेत्येके' इत्येव दृश्यते, १।१।२२॥, पृ.९॥ ४. 'मुष' इति१.४॥ ५. 'वृषादिभ्यश्चित्' इत्युणादिगणे॥ ६. 'मुशलम्' इति३॥ ७. 'विसं मुसलं सुषलं' इति२, 'विसं विशं मुसलं मुखलं' इति३॥ ८. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-१९, पृ.३७॥, तत्र "-इत्यत्र न्यासः-"तथा च विसं विषं मुसलं मुषलमिति षत्वं" स्यादिति" इति दृश्यते॥ ९. न्यासे "इह तर्हि विसंविसं मुसलम्मुसलमित्यत्र 'आदेशप्रत्यययोः' इति षत्वं प्राप्नोति ? अयमप्यदोषः, तदवयवः॥" इति दृश्यते, काशिकावृत्तिः, भा-६, ८।१।१॥, पृ.२१५॥ १०. '-मुशल-' इति३॥ ११. 'अन्' इति३.४॥ १२. द्र. टीकासर्वस्वम्, भा-१, १।१।२४॥, पृ.२०॥, पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-१९, पृ.३७॥ १३. 'दिव-' इति२॥ १४. '-कर्तृकतेति' इति३.४॥ १५. सिद्धान्तकौमुद्यामपि कृदन्ते अमनुष्येति सूत्रे दीक्षितेन "अमनुष्येति किम्। आखुघातः शूद्रः। अथ कथं बलभद्रः, प्रलम्बघ्नः, शत्रुघ्नः, कृतघ्नः इत्यादि। मूलविभुजादित्वात् सिद्धम्॥" इत्युक्तम्, सि.कौमुदी, पृ.५७२॥ १६. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-१८, पृ.३६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**नीलवस्त्रः**। २१ अच्युतस्य विष्णोरग्रजः **अच्युताग्रजः**। एकविंशतिर्बलदेवस्य। "भद्राङ्गः फालो गुप्तचरो बली। प्रलापी भद्रबलिनः[१] पौरः शेषाहिनामभृत् ॥"[शेषनाममाला २।७७॥] इति शैषिकनामानि॥

**मुसलं[1][२] त्वस्य सौनन्दम्**

१ अस्य बलदेवस्य मुसलं[३] सुनन्दाया इदं **सौनन्दम्**। 'तस्येदम्' ४।३।१२०॥ इत्यण्, क्लीबे ॥

**हलं[1] संवर्त्तकाह्वयम् ॥२२५॥**

१ बलभद्रस्य [४]हलमायुधम्, तन्नामैकम्, संवर्त्तयति संहरति शत्रून् **संवर्त्तकम्**, क्लीबे । 'वृतु वर्त्तने'(भ्वा.आ.से.), 'ण्वुल्तृचौ' ३।१।१३३॥ इति ण्वल् ॥२२५॥

**लक्ष्मीः[1] पद्मा[2] रमा[3] या[4] [5]मा[6] ता[7] सा[8] श्रीः[9] कमलेन्दिरा[10][11]। हरिप्रिया[12] पद्मवासा[13] क्षीरोदतनयाऽपि[14] च ॥२२६॥**

१ लक्षयति पश्यति नीतिशालिनमिति **लक्ष्मीः**। 'लक्ष दर्शनाङ्कनयोः'(चु.उ.से.), 'लक्षेर्मुट् च'(उणा-४४०)इतीकारः प्रत्ययो मुडागमश्च, अत एव ङ्यन्तत्वाभावाद् न सुलोपः । '[४]कृदिकारादक्तिनो वा ङीप्'(गणसू-४।१।४५॥)इत्यत्र सावर्ण्यग्रहणाद् ङीबन्तोऽपि''[[६] ]इति मैत्रेयः । तेन लक्ष्मीशब्दस्य नदीवद्रूपाणि भवन्ति[७]'' '[८]कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि लक्ष्मीत्यपि भवतीति दुर्घटे रक्षितः''[ ]इति उज्ज्वलदत्तः। ''[९]लक्ष्मीर्लक्ष्मी हरेः स्त्रियाम्''[शब्दभेदप्रकाशः, श्लो-३४॥]इति शब्दप्रभेदः[१०]। २ पद्ममस्त्यस्य(-स्याः) **पद्मा**। १० एवं **कमला** अपि । उभयोरेवोपादानादन्यकमलपर्यायेणानभिधानं सूचितम् । ३ रमते **रमा**। 'रमु क्रीडायाम्'(भ्वा.आ.अ.), पचाद्यच्, टाप्। ४ या इति पदस्य विश्लेषः कर्त्तव्यः, तेन ई आ इति नामद्वयं भवति। अस्य विष्णोर्भार्या **ई**[११]। ''अः कृष्ण आः स्वयम्भूः'' [ ]इत्यभिधानात्। पुंयोगे ङीषि, 'यस्येति च'६।४।१४८॥ इत्यकारलोपे प्रत्ययमात्रं शिष्यते। ईशब्दस्य नदीशब्दवद्रूपाणि। ५ अटति अतति वा चपलत्वाद् **आ**। 'अट गतौ'(भ्वा.प.से.), 'अत सातत्यगमने' (भ्वा.प.से.) वा अस्माद्धातोः 'क्वचिड्डः'[१२] (हैमसू-५।१।१७१॥)इति डः, डित्त्वाट्टिलोपः, 'अजाद्यतष्टाप्' ४।१।४॥, आशब्दष्टाबन्तो गङ्गावत् । नामद्वयाभ्याम् 'इको यणचि'६।१।७७॥ इति कृते या इति सिद्धम् । सविसर्गोऽपि ईः इति । यद्विश्वशम्भुः-

"ई रमामदिरामोहे महानन्दे शिरोभ्रमे ।
स्त्रीलिङ्गोऽयमुणाद्यन्तो नातोऽस्माल्लोपनं सुपः॥१॥"

[ ] इति ।

"ईर्यौ योऽत्र जसा रूपं स्यादमा रूपमीं शसीः।"[ ]इति। ([१३]यातीति या इत्यखण्डमपि, 'या प्रापणे'(अ.प.अ.)इत्यस्य । तथा च विश्वशम्भुः-"या रमामातृयातृषु"[ ]इति । ६ मीयते संख्यायते पुरुषेषु पुमान् अनयेति **मा**)। 'मा माने'(अ.प.अ.), क्विबन्तः। ७ तनोति सुखं **ता**। 'तनु विस्तारे'(त.उ.से.), 'क्वचिड्डः' (हैमसू-५।१।१७१॥)इति डः, 'अजाद्यतष्टाप्'४।१।४॥। ८ एवं स्यति द्रारिद्र्यं **सा**। 'षोऽन्तकर्मणि'(दि.प.अ.), 'क्वचिड्डः'[१४] (हैमसू-५।१।१७१॥) [१५]इति डः । ९ श्रीयते आश्रीयते सर्वैरिति **श्रीः**। 'श्रिञ् सेवायाम्'(भ्वा.उ.से.), 'क्विब् वचि प्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसंप्रसारणं च'(वा-३।२।१७८॥)इति क्विप् दीर्घत्वं च । यत्तु श्रयन्त्येतामिति श्रीरिति तात्पर्यार्थकथनम्, न विग्रहवाक्यम्, कर्मणि क्विपो विधानात् श्रयन्तीति [१६]कर्त्रर्थतिङम्, तस्यासमानार्थत्वाद् वृत्तिसमानार्थेन हि वाक्येन भवितव्यमिति भाष्योक्तेः । यत्तु दात्यनेन दात्रे[१७] दीयतेऽस्मै दानीयो विप्र इत्यादि, तत्र समानार्थस्यासंभवात् किञ्चित्साम्येनागत्या वाक्यं भवति। श्रयति सुकृतिनमित्येवंशीला वा श्रीः। 'कृदिकारदक्तिनो[१८] वा ङीष्' (गणसू-४।१।४५॥)इत्यत्र सावर्ण्यग्रहणाद् ङीबन्तोऽप्ययम्''

---

१. 'भद्रचलनः' इति शेषनाममालास्वोपज्ञटीकयोः ॥ २. 'मुशलं' इति३॥ ३. 'मुसलमा-' इति१.२॥ ४. 'कृदिकारादक्तिनः' इत्येव गणसूत्रम्॥ ५. 'ङीबि लक्ष्मीत्यपित्यत्र' इति४॥ ६. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-२२, पृ.४१॥ ७. ३प्रतौ नास्ति ॥ ८. 'कृति-' इति३॥ ९. 'लिक्ष्मी लक्ष्मीर्हरेः' इति१.२॥ १०. श्रीशिवदत्तमिश्रसंशोधितशब्दभेदप्रकाशापरनामद्विरूपकोशे 'लक्ष्मिर्लक्ष्मी हरेः प्रिया' इति दृश्यते, श्लो-३४, पृ.४११॥, पूज्यकस्तूरसूरीश्वरसंपादितशब्दभेदप्रकाशे 'लक्ष्मीर्लक्ष्मी हरेः प्रिया' इति दृश्यते, श्लो-३३, पृ.२३३॥ ११. 'ईः' इति२.३॥ १२. 'क्वचित्' ५।१।१७१॥ इति हैमसूत्रम् ॥ १३. कोष्ठान्तर्गतपाठः २प्रतौ नास्ति ॥ १४. 'डः' इति हैमसूत्रे नास्ति ॥ १५. 'इति डः' इति १.२.३प्रतौ नास्ति ॥ १६. 'कत्रर्थः' इति३॥ १७. 'दातु' इति१॥ १८. 'कृदिकारादक्तिनः' इति गणसूत्रम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[[1]]इति मैत्रेयः । तदा नदीवत् । "तां द्रष्टा श्रीमिवायान्तीम्"[[1]] इति प्रयोगः। **१० कमला** इति प्रागेवोक्तम् । काम्यते सर्वैरिति वा कमला। 'कमु कान्तौ'(भ्वा.आ.से.), 'वृषादिभ्यः कलच्[2]' (उणा-१०६)इति बाहुलकात् कलच्, टाप् । **११** इन्दति परमैश्वर्यमनुभवति अनया **इन्दिरा** । 'इदि परमैश्वर्ये'(भ्वा.प.से.), 'इषिमदिमुदि-'(उणा-५१)किरच्प्रत्ययः । "बाहुलकात् किरच्"[मा. धातुवृत्तिः, भ्वादिः, धातुसं-५३]इति माधवः । **१२** हरेर्विष्णोः प्रिया **हरिप्रिया** । **१३** पद्मे वासोऽस्याः, पद्मवासोऽस्या इति वा **पद्मवासा** । **१४** क्षीरोदस्य तनया **क्षीरोदतनया** । चतुर्दश लक्ष्म्याः। शेषश्चात्र-"[3]लक्ष्म्यां तु भर्भरी विष्णुशक्तिः क्षीराब्धिमानुषी"[शेषनाममाला २।७८॥]॥२२७॥

> **[1]मदनो [2]जराभीरु[3]रनङ्ग[4]मन्मथौ**
> **[5]कमनः [6]कलाकेलि[7]रनन्यजो[8]ऽङ्गजः ।**
> **[9]मधुदीप[10]मारौ [11]मधुसारथि[4][12]स्मरौ**
> **[13]विषमायुधो [14]दर्पक[15]काम[16]हृच्छयाः ॥२२७॥**
> **[17]प्रद्युम्नः [18]श्रीनन्दनश्च [19]कन्दर्पः [20]पुष्पकेतनः ।**

१ मदयति हर्षयति मन इति **मदनः**। 'मदी हर्षग्ल-(ग्ले)पनयोः'(भ्वा.प.से.), अस्माण्णिजन्ताद् नन्द्यादित्वाद् ल्युः। २ जरायाः सकाशाद् भीरुः **जराभीरुः**। ३ अविद्यमानमङ्गमस्य **अनङ्गः**। ४ मननं मद् युक्तिजन्यं ज्ञानम्। 'मन ज्ञाने'(दि.आ.अ.), सम्पदादित्वात् क्विप् 'अनुदात्तोपदेश-' ६।४।३७॥ इत्यादिनाऽनुनासिकलोपः, 'ह्रस्वस्य पिति-'६।१।७१॥ इति तुक्। मथ्नाति मथः, 'मन्थ विलोडने'(क्र्या.प.से.), पचाद्यच् । "मतो मथो मन्मथः"[अम.क्षीर. १।१।२५॥]इति स्वामी[5]। मनो मथ्नाति वा, पृषोदरादित्वात् । "माद्यतीति मत्। 'मदी हर्षे'(दि.प.से.), क्विप्। मथ्नातीति मथः। मच्चासौ मथश्च[6] मन्मथः।"[टीकासर्वस्वम् १।१।२५॥]इति सर्वानन्दः[5]। ५ कामयते शृङ्गारं **कमनः**। 'कमु कान्तौ'(भ्वा.आ.से.), अस्माद् वासरूपेणानुदात्तेल्लक्षणो युच् । ६ कलासु केलिरस्य **कलाकेलिः**। ७ न मनसोऽन्यस्माज्जायत इति **अनन्यजः**। न विद्यतेऽन्यद् यस्मात् सोऽनन्यो विष्णुः, "सर्वं विष्णुमयं जगत्" [[7]]इति श्रुतेः[8] । अनन्याद् विष्णोर्जात इति अनन्यजः । ८ अङ्गाज्जायत इति **अङ्गजः**। 'जनी प्रादुर्भावे'(दि.आ.से.), 'पञ्चम्यामजातौ'३।२।९८॥ इति डः । ९ मधौ वसन्ते दीप्यते **मधुदीपः**। 'दीपी दीप्तौ'(दि.आ.से.), पचाद्यच्। **१०** म्रियतेऽनेनेति **मारः**। 'मृङ् प्राणत्यागे'(तु.आ.अ.), करणे घञ्। मारयति विरहिणं वा, पचाद्यच्। **११** मधुर्वसन्तः सारथिरस्य **मधुसारथिः** । **१२** स्मरयति उत्कण्ठयति **स्मरः**। 'स्मृ चिन्तायाम्'(भ्वा.प.अ.)इत्यतो णिजन्तात् पचाद्यच् । स्मर्यते वनिताऽनेन कृत्वा स्मरः। 'पुंसि संज्ञायाम्'३।३।११८॥ इति सूत्रेण घः। **१३** विषमाण्यायुधान्यस्य **विषमायुधः** । **१४** दर्पयति हर्षयति **दर्पकः**। 'दृप हर्षणमोचनयोः[9]'(दि.प.अ.), 'ण्वुल्तृचौ' ५।१।१३३॥ इति ण्वुल्। **१५** कामयत इति[10] **कामः**। 'कमु कान्तौ'(भ्वा.आ.से.), पचाद्यच् । काम्यतेऽनेनेति वा। 'पुंसि संज्ञायाम्-'३।३।११८॥ इति घः। कामोऽभिलाषोऽस्त्यस्य वा, 'अर्शआदिभ्योऽच्'५।२।१२७॥। **१६** हृदि शेते **हृच्छयः**। 'शीङ् स्वप्ने'(अ.आ.से.), पचाद्यच् । यौगिकत्वाद् मनसिशयः ॥२२७॥ **१७** प्रकृष्टं द्युम्नं बलमस्य **प्रद्युम्नः**। **१८** श्रिया लक्ष्म्या नन्दनः **श्रीनन्दनः**,रुक्मिण्याः श्रियोऽवतारत्वात्। **१९** के ब्रह्मणि दृप्तवान्, कं ब्रह्माणं दर्पितवानिति वा **कन्दर्पः**, पृषोदरादिः। 'कम्' अव्ययं कुत्सायाम्, कं कुत्सितो दर्पोऽस्येति वा। **२०** पुष्पाणि केतनमस्य **पुष्पकेतनः** । विंशतिर्मदनस्य। शेषश्चात्र-

> "[11]कामे तु यौवनोद्भेदः शिखिमृत्युर्महोत्सवः ।
> शमान्तकः सर्वधन्वी[12] रागरज्जुः प्रकर्षकः ॥१॥

मनोदाही मथनश्च" [शेषनाममाला २।७८-७९॥]। कन्तुर्देश्याम्, संस्कृतेऽपि ॥

---

१. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-२२, पृ.४१॥ २. 'वृषादिभ्यश्चित्' इत्युणादिगणे ॥ ३. 'लक्ष्म्यां तु' १.२.४प्रतौ नास्ति ॥ ४. '-सारथिः स्मरो' इति२, मुद्रितमूलेऽपि तथैव ॥ ५. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-२०, पृ.३८॥, क्षीरस्वामिटीकायां "मतो मनसो मथः [मथ्नातीति] मन्मथः" इति दृश्यते, १।१।२५॥, पृ.९॥ ६. '-श्चेति' इति टीकासर्वस्वे, भा-१, १।१।२५॥, पृ.२१॥ ७. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-२१, पृ.४०॥ ८. 'श्रुतिः' इति२॥ ९. 'हर्षमोहनयोः' इति क्षीरतरङ्गिण्याम्, दिवादिः, धातुसं-८७, पृ.२२४॥ १०. १प्रतौ नास्ति ॥ ११. 'कामे तु' इति १.२.४प्रतौ नास्ति ॥ १२. 'सर्वधन्वी' इति३, शेषनाममालास्वोपज्ञटीकयोः 'सर्वधन्वी' इति दृश्यते, तत्तु विचारणीयम्, 'वा संज्ञायाम्'५।४।१३३॥ इत्यस्य प्रवृत्तित्वात् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**पुष्पाण्यस्येषुचापास्त्राणि**

१-३ **अस्य** कामस्य **पुष्पाणि** कुसुमानि **इषुचापास्त्राणि** बाणधनुरायुधानि, प्रोच्यन्ते इति शेषः॥

**अरी शम्ब(म्व)रशूर्पकौ ॥२२८॥**

१-२ अस्येति सर्वत्र सम्बध्यते, अस्य कामस्य अरी वैरिणौ **शम्बरः शूर्पकः** च प्रोच्येते । इतो[1] विस्तरार्थः-अस्य कामस्य पुष्पाणि इषुर्बाणः, पुष्पाण्येव चापं धनुः, पुष्पाण्येव वाऽस्त्रमायुधम्, तेन पुष्पेषुः, कुसुमबाणः, पुष्पचापः, कुसुमधन्वा, पुष्पास्त्रः, कुसुमायुधः कामः स्यात्, इषुचापयोः सत्यप्यस्त्रत्वे[2] भेदेन ग्रहणम्, लोके तथाव्यवहारात्। कामस्यारी शम्बरशूर्पकौ। दैत्यानां शं कल्याणं वृणोत्याच्छादयतीति[3], 'शमि धातोः' ३।२।१४॥ इत्यादिना अच्, शम्ब(म्व)रः तालव्यादिः । 'शम्ब-(म्व)रं सलिले पुंसि मृगदैत्यविशेषयोः''[मेदिनी, रान्तवर्गः, श्लो-२१९] इति तालव्यादौ मेदिनिः । तस्यारिः शम्ब(म्व)-रारिः । संवरणं वा संवरः । यद्वा सं सम्यग् वृणोत्याच्छादयति जनानां सुखमिति वा संवरः । सम्पूर्वाद् 'वृञ् आच्छादने[4]' (स्वा.उ.से.)इत्यस्मात् पचाद्यच् ।

''क्लीबं तु सम्ब(म्व)रं नीरबौद्धव्रतविशेषयोः ।
विशेषे पुंसि मत्स्यस्य दैत्यस्य हरिणस्य च ॥१॥''

[[5]]इति दन्त्यादौ रभसः। संवरनाम्नो दैत्यस्यारिः सम्वरारिरिति दन्त्यादिरपि । वर्णदेशनायां[6] पक्षद्वयं दर्शितम्, तस्मात् तालव्यादिरयमित्येव येन केनचिद्व्याख्यातम्, तन्निरस्तम्। शूर्पयति कलयति परवीर्याणि शूर्पकः। 'शूर्प माने'(चु.उ.से.), चुरादिः, 'ण्वुल्तृचौ'३।१।१३३॥ इति ण्वुल्। शूर्पकस्यारिः शूर्पकारिः, तालव्यादिः ॥२२८॥

**केतनं मीनमकरौ**

१-२ कामस्य **मीनमकरौ** केतनं ध्वजः, मीनश्च मकरश्च मीनमकरौ, तेन मीनकेतनः, झषध्वजः, मकरकेतनः, मकरध्वजः । मकरो जलजन्तुविशेषः, कच्छपो वा ॥

**बाणाः पञ्च**

कामबाणाः पञ्च-

''उन्मादस्तापनश्च शोषणः स्तम्भनस्तथा ।
संमोहनश्च कामस्य पञ्च बाणाः प्रकीर्त्तिताः[7] ॥१॥''

[ ]। तेन पञ्चबाणः, विषमेषुः। ''पञ्चेन्द्रियार्थाः बाणा अस्य''[ ]इत्यन्ये ॥

**रतिः प्रिया ।**

१ कामस्य प्रिया **रतिः**, तेन रतिवरः, रतिपतिः॥

**मनःशृङ्गारसङ्कल्पात्मानो योनिः**

१-४ कामस्य **मनःशृङ्गारसङ्कल्पात्मानो योनिः**, मनश्च शृङ्गारश्च सङ्कल्पश्च आत्मा च मनःशृङ्गारसङ्कल्पात्मानः, तेन मनोयोनिः, चेतोभवः, शृङ्गारयोनिः, शृङ्गारजन्मा, सङ्कल्पयोनिः, स्मृतिभूः, आत्मयोनिः, आत्मभूः॥

**सुहृन्मधुः ॥२२९॥**

१ कामस्य सुहृद् मित्रं **मधुः** चैत्रः, तेन मधुसुहृत्, चैत्रसखः ॥२२९॥

**सुतोऽनिरुद्ध ऋष्याङ्क उषेशो ब्रह्मसूश्च सः ।**

१ कामस्य सुतः, रणे केनापि न निरुद्ध इति **अनिरुद्धः**। युद्धे केनापि न निरुध्यते स्मेति वा । २ ऋष्यनामा मृगोऽङ्कश्चिह्न-मस्य **ऋष्याङ्कः**, [8]सप्तमस्वरादिः, मूर्धन्यस्वरो[9]दिमूर्धन्यान्तस्था-द्यमध्यश्चायम्। क्वचिद् 'वृश्यकेतुः (ऋश्यकेतुः)' इति पाठः। ''खड्गायुधोऽनिरुद्धः स्यात् तथा वै वृश्यकेतनः (चैवर्श्यकेतनः)'' [[10]]इति शाम्बपुराणात्। ''एणः कुरङ्गमो वृश्यः सादृश्यश्चानुलोचन (रिश्यः स्यादृश्यश्चारुलोचनः)''[त्रिकाण्डशेषः २।५।६॥]इति पुरुषोत्तमः । क्वचिच्च 'विश्वकेतुः' इति पाठः । तत्र विश्वव्यापी केतुर्ज्योतिरस्येति व्युत्पत्तिः । तथा च ''पताकायां द्युतौ केतुर्ग्रहो-त्पातादिलक्ष्मसु''[[11]]इति रभसः। यौगिकत्वाद् ऋष्यकेतुः । ३ उषा बाणपुत्री, तस्या ईशः **उषेशः**, मूर्धन्यमध्यः । ''उषा बाणस्य पुत्री स्यादनिरुद्धगृहिण्यूषा''[[11]]इत्यजयकोषदर्शनाद् दीर्घादिरपि। ४ ब्रह्मतपः सुवति चालयति, ब्रह्माणं सुवति प्रेरयति वा **ब्रह्मसूः**। 'षू प्रेरणे'(तु.प.से.), 'सत्सूद्विष-'३।२।६१॥ इति क्विप्,

---

१. 'इति' इति१.३॥ २. '-प्यस्त्रभेदे-' इति३.४॥ ३. '-यति' इति३॥ ४. स्वादौ 'वृञ् वरणे' इति स्वामिसायणौ ॥ ५. द्र. टीकासर्वस्वम्, भा-१, १।१।२६॥, पृ.२१॥, पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-२१, पृ.३९॥, रामाश्रमी १।१।२६॥, पृ.१५॥ तासु 'नीर' इत्यस्य स्थाने टीकासर्वस्वे 'नीरे' इति, पदचन्द्रिकारामाश्रम्योः 'नीवौ' इति दृश्यते, तथा सर्वासु टीकासु 'मत्स्यस्य दैत्यस्य' इत्यस्य स्थाने 'दैत्यस्य मत्स्यस्य' इति दृश्यते ॥ ६. '-नाया' इति१॥ ७. 'परिकीर्त्तिताः' इति३॥ ८. १.२प्रतौ न दृश्यते ॥ ९. '-रादिर्मूर्ध-' इति२.४॥ १०. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-२२, पृ.४०॥, रामाश्रमी १।१।२७॥, पृ.१५॥ ११. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-२२, पृ.४०॥, रामाश्रमी १।१।२६-२७॥, पृ.१५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

('अन्येभ्योऽपि'३।२।१७८॥)वा क्विप्। चत्वारि कामपुत्रस्य। केचित्तु "उषेशमन्तरेणान्यानि त्रीणि नामानि कामस्य"[ ]इत्याहुः, तन्मन्दम्, "अनिरुद्धो विश्वकेतु[१]र्ब्रह्मसूरप्युषापतिः"[२]इति बृहदमरकोषात्, "ब्रह्मसूस्त्वनिरुद्धः स्यात्"[२]इति शब्दार्णवाच्च[३] कामपुत्रस्यैव नामानि । "आत्मभूः ब्रह्मसूः कामः" [२]इत्यमरमालायां कामदेवस्यैव नामानि"[ ]इत्यपरे ॥

**[1]गरुडः [2]शाल्मल्य[3]रुणावरजो [4]विष्णुवाहनम् ॥२३०॥**
**[5]सौपर्णेयो [6]वैनतेयः [7]सुपर्णः**
**[8]सर्पाराति[9]र्वज्रिजिद् [10]वज्रतुण्डः ।**
**[11]पक्षिस्वामी [12]काश्यपिः [13]स्वर्णकाय-**
**[14]स्तार्क्ष्यः [15]कामायु[16]र्गरुत्मान् [17]सुधाहृत् ॥२३१॥**

१ गरं विषं हन्ति, गरुद्भिः पक्षैर्डयते वा, गिलति नागान् वा **गरुडः** । 'डीङ् विहायसां[४] गतौ'(भ्वा.आ.से.), पृषोदरादिः । डस्य लत्वे गरुलोऽपि । २ कूलशाल्मलो नामा गरुडस्य राजधानी पर्वतः, शाल्मलस्तु भीमवत् पदैकदेशः, सोऽस्यास्ति **शाल्मली** । 'अत इनिठनौ' ५।२।११५॥ इतीनिः। ३ अरुणस्यावरजः **अरुणावरजः** । ४ विष्णोर्वाहनं **विष्णुवाहनम्** ॥२३०॥ ५ सुपर्णाया अपत्यं **सौपर्णेयः**। 'स्त्रीभ्यो ढक्'४।१।१२०॥ । ६ विनताया अपत्यं **वैनतेयः**। 'स्त्रीभ्यो ढक्'४।१।१२०॥ । ७ शोभनानि सुवर्णमयत्वात् पर्णान्यस्य **सुपर्णः** । ८ सर्पाणामरातिः **सर्पारातिः** । ९ वज्रिणं जितवानिति **वज्रिजित्** । गरुडेन अमृतहरणकाले हि इन्द्रो जित इति प्रसिद्धिः । १० वज्रवत् तुण्डमस्य **वज्रतुण्डः** । ११ पक्षीणां स्वामी **पक्षिस्वामी** । न चात्र 'प्रतिपदविधाना षष्ठी न समस्यते' (वा-२।२।१०॥)इति समासनिषेधः शङ्कनीयम्, यावता शेषलक्षणैवेयम् । न हि 'स्वामी-'२।३।३९॥ इत्यादिसूत्रेण षष्ठी विधीयते, किन्तु सप्तम्यनेन विधीयमाना षष्ठ्या बाधिका मा भूदिति चकारेण षष्ठ्याः प्रतिप्रसवः क्रियते । न तु अपूर्वरूपतया विधानम्, एवंविधविषये च समासः स्यादेव, 'न निर्धारणे' २।२।१०॥ इति ज्ञापकात्, अन्यथा प्रतिपदविहितत्वात् षष्ठ्याः समासो न भविष्यति, किं निषेधेनेति । १२ कश्यपस्यापत्यं **काश्यपिः**। 'अत इञ्' ४।१।९५॥ इति इञ् । १३ स्वर्णरूपः कायोऽस्य **स्वर्णकायः**। १४ 'तृक्ष स्तृक्ष णक्ष गतौ'(भ्वा.प.से.), तृक्षतीति तृक्षः[५]। 'इगुपधज्ञा-' ३।१।१३५॥ इति कः । तृक्षस्य मुनेरपत्यं **तार्क्ष्यः** । 'गर्गादिभ्यो यञ्' ४।१।१०५॥ इति यञ् । एकस्मिन् कल्पे तृक्षस्य मुनेरपत्यमासीत्, बहुवचने 'यञि-(ञ)ञोश्च'२।४।६४॥ इति लुकि तृक्षाः । १५ कामेनेच्छया आयुरस्य **कामायुः** । १६ प्रशस्ता अतिशयिता वा गरुतः[६] पक्षा अस्य सन्तीति **गरुत्मान्** । 'तदस्यास्त्यस्मिन्निति मतुप्' ५।२।९४॥, यवादिपाठाद् 'झयः'८।२।१०॥ इति सूत्रेण मस्य वत्वं न भवति। १७ सुधां हृतवानिति **सुधाहृत्**। सप्तदश गरुडस्य । शेषश्चात्र-

"[७-१]गरुडे तु विषापहः ।
पक्षिसिंहो महापक्षो महावेगो विशालकः ।
[७-२]ऊन्वतीशश्च सुखसूः[८] शिलानीहो[९]ऽहिभुक् च सः॥१॥"
[शेषनाममाला २।८०॥]॥२३१॥

**[1]बुद्धस्तु [2]सुगतो [3]धर्मधातु[4]स्त्रिकालवि[5]ज्जिनः ।**
**[6]बोधिसत्त्वो [7]महाबोधि[8]रार्यः [9]शास्ता [10]तथागतः॥२३२॥**
**[11]पञ्चज्ञानः [12]षडभिज्ञो [13]दशार्हो [14]दशभूमिगः ।**
**चतुस्त्रिंश[15]ज्जातकज्ञो [16]दशपारमिताधरः ॥२३३॥**
**[17]द्वादशाक्षो [18]दशबल[19]स्त्रिकायः [20]श्रीघना[21]ऽद्वयौ ।**
**[22]समन्तभद्रः [23]संगुप्तो [24]दयाकूर्चो [25]विनायकः॥२३४॥**
**[26]मार[27]लोक[28]खजित् [29]धर्मराजो [30]विज्ञानमातृकः ।**
**[31]महामैत्रो [32]मुनीन्द्रश्च**

१ प्रशस्ता बुद्धिरस्य **बुद्धः** । 'अर्शआदिभ्योऽच्' ५।२।१२७॥ इत्यच्[१०] । बुध्यते ध्यायिभिर्वा । 'बुध बोधने' (भ्वा.-प.से.), 'मतिबुद्धिपूजार्थेभ्यश्च'३।२।१८८॥ इति वर्त्तमाने क्तः । बुध्यते जानाति तत्त्वानि वा । 'बुध अवगमने'(दि.-आ.अ.) अस्माद् दैवादिकात् 'मतिबुद्धि-'३।२।१८८॥ इति क्तः । 'इगुपधज्ञा-'३।१।१३५॥ इति कप्रत्यये बुधोऽपि ।

१. '-केतुब्रह्म-' इति३ ॥ २. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-२२, पृ.४०॥, रामाश्रमी १।१।२६-२७॥, पृ.१५॥ ३. इतोऽग्रे ३प्रतौ 'पञ्च' इति दृश्यते ॥ ४. '-यसा' इति४॥ 'विहायसा' इति धातुप्रदीपमा.धातुवृत्त्योः ॥ ५. 'तृक्' इति३॥ ६. 'गुरु-' इति१॥ ७-१. 'गरुडस्तु' इति, ७-२ 'उन्नतीशः' इति च शेषनाममालास्वोपज्ञटीकयोः ॥ ८. 'सुखभूः' इति१, '-तीशः श्रमुखसूः' इति३॥ ९. 'शिलीना-' इति१.२.४॥ १०. १प्रतौ नास्ति॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"अथ बुद्धो जिनो योगी सर्वज्ञः सुगतो बुधः"[1]इति व्याडिः । २ शोभनं गतं ज्ञानमस्य **सुगतः** । सर्वे गत्यर्था ज्ञानार्था इति । सुष्ठु अपुनरावृत्तये गत इति वा । "सुखेन संसाराद् गतः"[ ]इत्यन्ये । ३ धर्मः सत्त्वोद्धरणादिः, तेन अनुविद्धा धातवोऽस्य **धर्मधातुः** । ४ त्रीन् कालान् वेत्ति **त्रिकालवित्** । 'विद ज्ञाने'(अ.प.से.)अस्मात् सम्पदादित्वात् क्विप् । ५ जयति रागद्वेषौ, जिनाति वा **जिनः** । 'जि जये'(भ्वा.प.अ.), 'इण्षि(सि)ञ्जिदिङुषि(ष्यि)विभ्यो नक्' (उणा-२८२)इति नक् । ६ बोधिः सत्त्वमस्य **बोधिसत्त्वः** । यद् व्याडिः-"बोधिः स्वबोधिजं ज्ञानं तन्मयो बोधिसत्त्वकः" [2] । ७ महती बोधिरस्य **महाबोधिः** । ८ अर्यते अभिगम्यते **आर्यः** । 'ऋ गतौ'(जु.प.अ.), 'ऋहलोर्ण्यत्'३।१।१२४॥ इति ण्यत् । आरात् पापेभ्यः कर्मभ्यो यात इति [वा], पृषोदरादिः । ९ शास्ति विनेयान् **शास्ता** । 'शासु अनुशिष्टौ' (अ.प.से.), 'शासकृदादिभ्यः संज्ञायां चानिट् च'[4](उणा-२५०)इति तृन्प्रत्ययः । शास्तरौ, शास्तरः इत्यादि पितृशब्दवत् । अव्युत्पत्तिपक्षे 'अप्तृन्-'६।४।११॥ आदिसूत्रेऽनुपादानाद् न दीर्घः । व्युत्पत्तिपक्षे तु नप्त्रादिग्रहस्य नियमार्थत्वात् । " 'शासेः क्तिचि शिष्टिः'(चान्द्रसूत्रम्)इत्यत्र शास्ता इति प्रत्युदाहरणेऽनौणादिकतृच एव रत्नमतिना दर्शितत्वाद् बुद्धवाचिनोऽपि दीर्घः"[5]इति सुभूतिः । १० तथा इति सत्यं गतं ज्ञानमस्य **तथागतः** । यद्वा "यथागतास्ते मुनयः शिवां गतिं तथागतः सोऽपि ततस्तथागतः"[ ]इति [6]बौद्धागमः । यथा पुनरावृत्तिर्न भवति, तथा तेन प्रकारेण गत इति तथागतः । 'सुप्सुपा'२।१।४॥ इति समासः **॥२३२॥** **११** पञ्चानां [7]विज्ञानवेदनासंज्ञासंस्काररूपलक्षणानां स्कन्धानां ज्ञानमस्य **पञ्चज्ञानः** । **१२** दिव्यं चक्षुः, दिव्यं श्रोत्रम्[8], परचित्तज्ञानम्, पूर्वनिवासानुस्मृतिः, आत्मज्ञानम्, विप (य?)द्गमनकायव्यूहादिलक्षणा ऋद्धिश्चेति षट्, षड् अभिज्ञा आद्यज्ञानशक्तयोऽस्य **षडभिज्ञः** । यद्वा "षट्सु दानशीलक्षान्तिवीर्यध्यानप्रज्ञासु अभिज्ञा आद्यज्ञानमस्येति षडभिज्ञः"[9] इति तु सर्वधरः[11] । दिव्यं चक्षुः, दिव्यं श्रोत्रम्, पूर्वनिवासानुस्मृतिः, परचित्तज्ञानम्, आश्रवक्षयः, ऋद्धिश्चेति षड् अभिज्ञा अस्येति वा । **१३** दशभूमीर्बलानि पारमिता वा अर्हति **दशार्हः** । **१४** दशभूमीर्गच्छति **दशभूमिगः** । यद् व्याडिः-

"भूमयस्तु प्रमुदिता विमला च प्रभाकरी ।
अर्चिष्मती सुदुर्जेयाऽभिमुखी च दुरङ्गमा[12] ॥१॥
अबला माधुमती च धर्ममेघेति च क्रमात् ।"[13]

**१५** चतुस्त्रिंशद् जातकानि व्याघ्रीप्रभृतीनि जानातीति **चतुस्त्रिंशज्जातकज्ञः**, अष्टाक्षरात्मकमखण्डं नाम । चतुस्त्रिंशज्जातकानि त्वमूनि, यद् व्याडिः-

"जातकानि पुनर्व्याघ्री शिविः श्रेष्ठा शशो विशम् ।
हंसो विश्वन्तरः शक्रो मैत्रीबलसुपारगौ ॥२॥
अपुत्रो[14] ब्राह्मणः कुम्भः कल्माषः पिण्डिजातकम् ।
अधिमुह्य(-ह्यं) श्रेष्ठिजातं दमयन्ती महाकपिः ॥३॥
बोधिर्ब्रह्मा महाबोधिर्वानरः शरभो रुरुः[15] ।
क्षान्तिवादी च हस्ती च [16]कुञ्जश्चेत्येवमादयः ॥४॥"

[17] । **१६** दश पारमिताः प्रज्ञाद्या धरति **दशपारमिताधरः** । यद् व्याडिः-

"प्रज्ञा पारमिता तारा वृन्दा[18] च जिनशक्तयः ।
मारीची[19] वतुदुर्वासा मारावी[20] वज्रकाल्यपि ॥५॥"

[21] **॥२३३॥** **१७** द्वादशाऽक्षीण्यस्य **द्वादशाक्षः** । बहुव्रीहौ सक्थ्यक्ष्णोः षच् । **१८** दश बलानि दानशीलक्षान्तिवीर्यध्यानशान्तिबलोपायप्रणिधानलक्षणान्यस्य **दशबलः** ।**१९** त्रयः काया निर्माणाद्या

---

१. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-८, पृ.२४॥, रामाश्रमी १।१।१३॥, पृ.९॥ **२.** '-भिकं' इतिर॥ **३.** द्र. स्वोपज्ञटीका २।२३२॥, पृ.५७॥ **४.** 'तृन्तृचौ शंसिक्षदादिभ्यः संज्ञायां चानिटौ'(उणा-२५०)इत्युणादिगणे ॥ **५.** '-सूत्रेष्वनु-' इति२॥ **६.** द्र. पदचन्द्रिका, भा १, स्वर्गवर्गः, श्लो-९, पृ.२५॥, तत्र '-प्रत्युदाहरणेन औणादिकतृच' इति दृश्यते ॥, रामाश्रमी १।१।१४॥, पृ.९॥ **७.** 'बोद्धा-' इति२,३॥ **८.** 'विज्ञानवेदानां' इति१, 'विज्ञानवेदाना' इति२॥ **९.** 'स्तोत्रम्' इति३॥ **१०.** द्र. टीकासर्वस्वम्, भा-१, १।१।१४॥, पृ.१३॥, पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-९, पृ.२४॥, तत्र ' प्रज्ञासु आद्यं ज्ञान-' इति दृश्यते ॥ **११.** 'तीर्थधरः' इति१॥ **१२.** 'तुरङ्गमा' इति३॥ **१३.** द्र. स्वोपज्ञटीका २।२३३॥, पृ.५७॥, तत्र 'सुदुर्जेया ' इत्यस्य स्थाने 'सुदुर्जया-' इति, 'अबला माधुमती' इत्यस्य च स्थाने 'अचला साधुमती' इति दृश्यते ॥ **१४.** 'अपत्रो' इति२॥ **१५.** 'शरुः' इति१॥ **१६.** 'कुम्भ-' इति३॥ **१७.** द्र. स्वोपज्ञटीका २।२३२॥, पृ.५७॥, तत्र 'कुञ्ज-' इत्यस्य स्थाने 'कुन्थु-' इति दृश्यते ॥ **१८.** 'वृन्दी' इति१॥ **१९.** 'मारीचि' इति३॥ **२०.** 'माराची' इति३॥ **२१.** द्र. स्वोपज्ञटीका २।२३२॥, पृ.५७॥, तत्र "मारीची चतुदुर्वासा मारीचा वज्रकाल्यपि" इत्युत्तरार्धः ॥

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

अस्य **त्रिकायः** । २० श्रिया योगविभूत्या घनो निबिडः, श्रिया घनं[1] इव वर्षिता वा **श्रीघनः** । ज्ञानपुण्यसंभारः श्रीः, तया घनः पूर्ण इति वा । सर्वत्र 'तृतीया'२।१।३०॥ इति योगविभागात् समासः । २१ न विद्यते द्वयं ज्ञानार्थौ, किन्तु एकमेव ज्ञानमस्येति **अद्वयः** । २२ समन्तं सम्पूर्णं भद्रमस्य **समन्तभद्रः** । पृषोदरादित्वात् साधुः । २३ सम्यग् गुप्तः **संगुप्तः**, योगिनामप्यगम्यत्वात् । २४ दया एव कूर्चः, कोष्ठागारो निधिर्वा[2]ऽस्येति **दयाकूर्चः** । यद् व्याडिः– "कोष्ठागारोऽभवत् कूर्चो निधिर्वा तेन तादृशः"[[3]] । २५ विनयति हितमर्थमनुशास्ति **विनायकः** । 'णीञ् प्रापणे' (भ्वा.उ.अ.), 'ण्वुल्तृचौ'३।१।१३३॥ इति ण्वुल् णित्त्वाद् वृद्धिः । २६-२८ मारान् कामक्रोधादीन्, लोकान् भूरादीन्, खानि इन्द्रियाणि जयति, तेन मारं कामं क्लेशं वा जयति **मारजित्** । तपसा लोकं भुवनं जयति **लोकजित्** । लोकान् जनान् जयति उपरमयति संसाराद्वा । खानि इन्द्रियाणि जयति **खजित्** । 'जि जये'(भ्वा.प.अ.), त्रयोऽपि क्विबन्ताः, 'ह्रस्वस्य पिति कृति-'६।१।७१॥ इति तुक् । बौद्धास्तु स्कन्धमारः, क्लेशमारः, मृत्युमारः, देवपुत्रमारश्च इति चतुरो मारानाहुः । २९ धर्मेण राजते **धर्मराजः** । 'राजृ दीप्तौ'(भ्वा.उ.से.), पचाद्यच् । धर्मस्य राजेति वा । 'राजाहःसखिभ्यष्टच्'५।४।९१॥ इति टच्, 'नस्तद्धिते' ६।४।१४४॥ इति टिलोपः[4] । ३० विज्ञानं मातृकाऽस्य **विज्ञानमातृकः** । ३१ महांश्चासौ मैत्रश्च **महामैत्रः** । ३२ मुनिषु इन्द्रः श्रेष्ठो **मुनीन्द्रः**, मुनिस्तु भीमवत् पदैकदेशः । सामान्यतो द्वात्रिंशद् बुद्धस्य । शेषश्चात्र–

"बुद्धे तु भगवान् योगी बुधो विज्ञानदेशनः[5] ॥
महासत्त्वो लोकनाथो बोधिरर्हन् सुनिश्चितः ॥
गुणाब्धिर्विगतद्वन्द्वः" [शेषनाममाला २।८१॥] ॥

**बुद्धाः स्युः सप्त ते त्वमी ॥२३५॥**
**विपश्यी[1] शिखी[2] विश्वभूः[3] क्रकुच्छन्दश्च[4] काञ्चनः[5] ।**
**काश्यपश्च[6]**

१ विशेषेण पश्यति विपश्यं ज्ञानम्, तदस्यास्ति **विपश्यी**, तालव्यान्तस्थाद्यतृतीयस्वरमध्यो व्यञ्जनान्तः । 'अत इनिठनौ'५।२।११५॥ इतीनिः । २ शिखाऽस्यास्ति **शीखी** । 'व्रीह्यादिभ्यश्च'५।२।११६॥ इतीनिः, दण्डिन्वत् । ३ विश्वं भवत्यस्माद् **विश्वभूः**, क्विबन्तः । ४ क्रमेण कौ पृथिव्यां छन्दोऽभिलाषोऽस्य **क्रकुच्छन्दः**, पृषोदरादित्वात् साधुः । ५ काञ्चनवर्णत्वात् **काञ्चनः** । ६ कश्यपस्यापत्यं [**काश्यपः**] । विदादिभ्यो गोत्रापत्येऽञ् । विपश्याद्याः काश्यपान्ताः षड् बुद्धविशेषाः ॥

**सप्तमस्तु शाक्यसिंहो[1]ऽर्कबान्धवः[2] ॥२३६॥**
**तथा राहुलसूः[3] सर्वार्थसिद्धो[4] गोतमान्वयः[5] ।**
**मायाशुद्धोदनसुतो[6] देवदत्ताग्रजश्च सः ॥२३७॥**

१ सप्तानां संख्यापूरणः सप्तमः, 'पञ्चादेर्मः(नान्तादसंख्यादेर्मट्'५।२।४९॥)इति मः । सप्तमो बुद्धः **शाक्यसिंहः** इक्ष्वाकुराजपुत्राः केऽपि पित्रा[6] वनवासाय दत्ताज्ञा गौतमवंशस्य[7] कपिलस्याश्रमे शाकच्छत्रे वसतिं कृतवन्तः शाक्याः"[ ] इत्यागमः। शाकवनवासित्वात् शाक्याः । 'दिगादिभ्यो यत्' ४।३।५४॥ । तथा च सुरानन्दचरिते[8]–

"शाकवृक्षप्रतिछत्रं(-च्छत्रं) वासं यस्माच्च चक्रिरे ।
तस्मादिक्ष्वाकुवंश्यास्ते शाक्या इति भुवि श्रुताः ॥१॥"

[[9]]इति[10] । [11]तद्वंशावतीर्णो मुनिः । शाक्यश्चासौ सिंहश्चेति । तथा यस्तु शाक्यमुनिः, स शाक्यसिंहः, शाक्यः सिंह इवेति । 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे'२।१।५६॥ इति समासः। सिंहादिशब्दा हि उत्तरपदभूताः पूर्वपदस्य श्रेष्ठतां गमयन्ति । शका अभिजनो निवासोऽस्येति वा । **शाक्य** इत्यपि, भीमवत्[12] पदैकदेशः । २ अर्कस्य बान्धवः[13] **अर्कबान्धवः**, सूर्यवंश्यत्वात् ॥२३६॥ ३ राहुलं सूते **राहुलसूः**। 'षूङ् प्राणिगर्भविमोचने'(अ.आ.वे.), 'सत्सूद्विषद्रुह-'३।२।६१॥ इत्यादिना क्विप् । ४ सर्वार्थेषु सिद्धो निष्पन्नः **सर्वार्थसिद्धः**। 'सिद्धशुष्कपक्वबन्धैश्च'२।१।४१॥ इति सप्तमीसमासः।"सर्वोऽर्थः सिद्धोऽस्येति त्रिपदो बहुव्रीहिः" [टीकासर्वस्वम् १।१।१५॥]इति तु सर्वानन्दः[14] । अत एव सिद्धार्थोऽपि । यच्छाश्वतः–"सिद्धार्थौ बुद्धसर्षपौ"[शाश्वतः, श्लो-

१. 'घना' इति३॥ २. '-स्येति' इति१॥ ३. द्र. स्वोपज्ञटीका २।२३४॥, पृ.५८॥ ४. 'लोपः' इति३॥ ५. '-देशः' इति३, '-देशकः' इति४॥ ६. 'पित्र्या' इति३॥ ७. '-वंशयस्य' इति२॥ ८. '-रचिते' इति१.४॥ टीकासर्वस्वेऽभिधानोट्टङ्कनं तु 'सुन्दरानन्दचरिते' इति दृश्यते ॥ ९. द्र. टीकासर्वस्वम् १।१।१५॥, पृ.१४॥, रामाश्रमी १।१।१५॥, पृ.९॥ १०. इतोऽग्रे १प्रतौ 'समासः' इति दृश्यते ॥ ११. 'तद्वंश्याव-' इति२॥ १२. '-वदेकदेशः' इति३॥ १३. '-न्धवो इति' इति१॥ १४. सर्वानन्दकृतटीकासर्वस्वे-"सर्वार्थसिद्ध इति त्रिपदोऽयं बहुव्रीहिः" इति दृश्यते, टीकासर्वे-१।१।१५॥, पृ.१४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

५९८]। ५ गोतमः[1]अन्वयोऽस्य **गोतमान्वयः**, त्रयोदशस्वरादिरयम्। गौतमः[2] इत्यपि। गोतमवंशस्य मुनेरयं शिष्यः गौतमः। 'तस्येदम्' ४।३।१२०॥ इत्यण्। ''गौतमस्यैव शिष्यः''[ ]इति तु माधवी। ६-७ मायाशुद्धोदनाभ्यां अग्रे सुतः, तेन मायाया देव्याः सुतो **मायासुतः**। शुद्ध ओदनोऽस्येति शुद्धोदनः, शकन्ध्वादिः। शुद्धोदनस्य राज्ञः सुतः **शुद्धोदनसुतः**, तालव्यादिः। यौगिकत्वात् शौद्धोदनिः इत्यादि। ८ देवदत्ता प्रजाऽपत्यं यस्य स **देवदत्ताप्रजः**। सप्तमशाक्यसिंहनाम्नो विशेषस्य अष्ट नामानि ॥२३७॥

**असुरा दितिदनुजाः पातालौकः सुरारयः।**
**पूर्वदेवाः शुक्रशिष्याः**

१ अस्यन्ति प्रेरयन्ति युद्धाय[3] दैत्यानिति **असुराः**। 'असु क्षेपणे'(दि.प.से.), 'असेरुरन्'(उणा-४२)इत्युरन्। अविद्यमानाः[4] सुरा एषामिति वा। सुरविरुद्धत्वादनर्थवदिति वा। सुराया अपानाद्वा। प्रज्ञाद्यणि आसुराश्च। २-३ दितिः, दनुश्चा-[5]ऽसुरमातरौ, ताभ्यां जाताः **दितिजाः, दनुजाः** च, यौगिकत्वाद् दैतेयाः, दानवाः इत्यादयः। दनोरपत्यानि दानवाः। 'तस्यापत्यम्'[6] ४।१।९२॥ इत्यण्। ४ पाताले ओकांसि येषां ते **पातालौकसः**, सकारान्तोऽयम्। ५ सुराणामरयः **सुरारयः**। ६ पूर्वे च ते देवाश्च **पूर्वदेवाः**। 'पूर्वापरप्रथम-'२।१।५८॥ इत्यादिना समासः। पूर्वं देवा इति वा। 'सह सुपा'२।१।४॥ इति योगविभागात् समासः। एते हि पूर्वं देवा आसन् अन्यायाद् विदेवत्वाद् भ्रष्टा इति भावः। ७ शुक्रस्य शिष्याः **शुक्रशिष्याः**। सप्त दैत्यस्य॥

**विद्यादेव्यस्तु षोडश ॥२३८॥**

**रोहिणी प्रज्ञप्तिर्वज्रशृङ्खला कुलिशाङ्कुशा।**[7]
**चक्रेश्वरी नरदत्ता काल्यथाऽसौ महापरा ॥२३९॥**
**गौरी गान्धारी सर्वास्त्रमहाज्वाला च मानवी।**
**वैरोट्याऽच्छुप्ता मानसी महामानसिकेति ताः॥२४०॥**

१ रोहत्यवश्यं **रोहिणी**। 'रुह बीजजन्मनि'(भ्वा.-प.अ.), 'आवश्यकाधमर्ण्ययोर्णिनिः' ३।३।१७०॥ इति णिनिः, 'ऋन्नेभ्यो ङीप्' ४।१।५॥ इति ङीप्। २ ([8]प्रकृष्टा ज्ञप्तिरस्याः) **प्रज्ञप्तिः**[9]। [10]रोहिणी प्रज्ञप्तिरित्यत्र पृथक् पृथक् विभक्त्यन्तं पदं ज्ञेयम्, अथवा रोहिणी च प्रज्ञप्तिश्चेति द्वन्द्वे 'रोहिणीप्रज्ञप्ती' इति प्रथमाद्विवचनम्[12], न च प्रज्ञप्तीति ङ्यन्तो नदीवदिति। ३ वज्रमयी शृङ्खलाऽस्याः **वज्रशृङ्खला**। ४ कुलिशमयमङ्कुशमस्याः **कुलिशाङ्कुशा**। ५ चक्रस्य ईश्वरी **चक्रेश्वरी**। ६ नरेषु दत्तमस्याः **नरदत्ता**। ७ कालवर्णत्वात् **काली**। 'जानपदकुण्ड-' ४।१।४२॥ इत्यादिना ङीष्। ८ अथासौ महापरेति, असौ काली महाशब्दपरा, **महाकाली** इत्यर्थः ॥२३९॥ ९ गौरवर्णत्वात् 'षिद्गौरादिभ्यश्च'४।१।४१॥ इति ङीष्। १० गां धारयति[13] **गान्धारी**, पृषोदरादित्वात्। ११ सर्वेषामस्त्राणां महत्यो ज्वाला अस्याः **सर्वास्त्रमहाज्वाला**, सप्ताक्षरमखण्डं नाम। १२ मनोरयं **मानवी**। 'टिड्ढाणञ्-' ४।१।१५॥ इत्यादिना ङीप्। १३ वैरोपशान्त्यै अट्याऽस्या **वैरोट्या**, पृषोदरादित्वात् साधुः। १४ न पापेन छुप्यते स्पृश्यते **अच्छुप्ता**। 'छुप स्पर्शने'(तु.प.अ.), वर्तमाने क्तः। १५ मनसि भवा **मानसी**। १६ मासस्येव मानसिका, महती चासौ मानसिका च **महामानसिका**। रोहिण्यादीनां [14]षोडशानां नामैकं **विद्यादेव्य** इति ॥२४०॥

**वाग् ब्राह्मी भारती गौर्गीर्वाणी भाषा सरस्वती।**
**श्रुतदेवी**

१ वक्त्यनया **वाक्**। 'वच परिभाषणे' (अ.प.अ.), 'क्विब्वचिप्रच्छ्यायत-'(वा-३।२।१७८॥)इति [15]क्विप्दीर्घौ असम्प्रसारणं च। २ ब्रह्मण इयं **ब्राह्मी**। 'ब्राह्मोऽजातौ'६।४।१७१॥ इति टिलोपः, 'टिड्ढाणञ्-'४।१।१५॥ इति ङीप्। ३ भरतानां नटानामियं **भारती**। 'तस्येदम्' ४।३।१२०॥ इत्यणि ङीष् (ङीप्)। ''भरतानां ऋत्विजां स्तुतिलक्षणा तैरवतारित्वात्''[[16]]इति याज्ञिकाः। बिभर्त्ति वा भारती, पृषोदरादिः। ४ गच्छति **गौः**, पुंस्त्री। 'गम्लृ गतौ' (भ्वा.प.अ.), 'गमेर्डोः'(उणा-२२५)इति डोः, 'गोतो णित्' ७।१।९०॥। ५ गृणन्ति उद्गिरन्ति तामिति **गीः**। 'गृ शब्दे' (क्र्या.प.से.), 'गृ निगरणे'(तु.प.से.) वा, सम्पदादित्वात् क्विप्, 'ॠत इद्धातोः'७।१।१००॥, 'उरण् रपरः'१।१।५१॥, 'र्वोरुपधाया दीर्घ इकः'८।२।७६॥। गिरौ, गिरः इत्यादि।

---

१. 'गौतमः' इति२.३॥ २. 'गोतम' इति३॥ ३. 'युद्धाय' इति १प्रतौ नास्ति ॥ ४. '-मानाः' इति३॥ ५. 'दनुजश्चा-' इति१.२॥ ६. 'तस्येदमित्यण्' इति३.४॥ ७. 'प्रज्ञप्ती' इति२॥ ८. कोष्ठान्तर्गतपाठः २.४प्रतौ दृश्यते ॥ ९. इतोऽग्रे २प्रतौ 'प्रज्ञड्यतो नदीवत्' इति दृश्यते ॥ १०. १.२.३नास्ति॥ ११.'रोहिणी' इति २प्रतौ नास्ति ॥ १२. '-बहुवचनम्' इति३॥ १३. '-तीति' इति३॥ १४. 'षोडशानामेकं' इति१.३॥ १५. 'क्विप् दीर्घो असम्प्र-' इति१.२॥ १६. द्र. स्वोपज्ञटीका २।२४१॥, पृ.५९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भागुरि[1]मते टापि गिराऽपि । "ब्रह्मणी वचनं वाचा जल्पितं गदितं गिरा"[[2]]इति शब्दार्णवः । [3]ब्रवणीति 'ब्रवणात्'[ ] इति निरुक्तादेव वृद्ध्यभावः । ६ वण्यते **वाणी**[4] । 'वण शब्दे' (भ्वा.प.से.), घञि, गौरादित्वाद् ङीष् । यद्वा अस्मादेव धातोः 'इञजादिभ्यः[5]'(वा-३।३।१०८॥)इतीञ्, 'कृदिकारादक्तिनः' (गणसू-४।१।४५॥)इति ङीष् । '[6]अण [रण] वण भण शब्दार्थाः[3]'(भ्वा.प.से,), ''इञजादिभ्यः[5]'(वा-३।३।१०८॥) इतीञि, 'सर्वतोऽक्तिन्नर्थादित्येके'(गणसू-४।१।४५॥)इति ङीष्''[मा. धातुवृत्तिः, भ्वादिः, धातुसं-२९७]इति माधवः[7]। ७ भाष्यते **भाषा**। 'भाष व्यक्तायां वाचि'(भ्वा.आ.से.), 'गुरोश्च हलः'३।३।१०३॥ इत्यप्रत्ययः, टाप् । ८ सरतीति सरः ज्ञानम्, तदस्त्यस्यां **सरस्वती** । 'सृ गतौ'(भ्वा.प.अ.), '-असुन्' (उणा-६२८)इत्यसुन्, ततो मतुप्, 'उगितश्च'४।१।६॥ इति ङीप्। प्रसरणमस्त्यस्या इति वा । यद्वा सरोऽस्या आश्रय-त्वेनास्तीति मतुपि सरस्वती । इयं ब्रह्मलोके ब्रह्मसरः समाश्रित्य शापात् नदी भूत्वा लोकमवतीर्णा, अत्र[8] शक्तिशक्तिमतोर-भेदोपचाराद् वचनमपि सरस्वतीशब्दवाच्यम् । ९ श्रुतस्य प्रवचनस्याधिष्ठात्री देवी **श्रुतदेवी** । एते वचःपर्याया अपि । नव सरस्वत्याः । 'वाणी' इति भाषा॥

## वचनं तु व्याहारो भाषितं वचः ॥२४१॥

१ उच्यते तद् **वचनम्** । 'वच परिभाषणे'(अ.प.अ.), 'ल्युट् च'३।३।११५॥ इति ल्युट् । २ व्याह्रियते इति **व्याहारः**। उपसर्गवशाद्धातोरर्थस्यान्यथात्वम्। 'हृञ् हरणे' (भ्वा.उ.अ.), घञ्। ३ भाष्यते **भाषितम्** । कर्मणि क्तः, 'आर्धधातुकस्य-'७।२।३५॥ इति इट् । ४ उच्यते इति **वचः**। 'वच परिभाषणे' (अ.प.अ.), '-असुन्'(उणा-६२८)इत्यसुन् । चत्वारि वचनस्य ॥

शेषश्चात्र-''वचने स्यात् तु जल्पितम् । लपितम्, भणितम्, उदितम्, अभिधानम्, गदितम्, (लपितोदित-भणिताभिधानगदितानि च)''[शेषनाममाला-२८२]इति ॥२४१॥

## सविशेषणमाख्यातं वाक्यम्

प्रयुज्यमानाख्याताऽप्रयुज्यमानाख्यातयोर्नाम एकं **वाक्यम्**। तदाख्यातं प्रयुज्यमानं अप्रयुज्यमानं वा सविशेषणम्, प्रयुज्य-मानैरप्रयुज्यमानैर्वा कर्त्रादिभिर्विशेषणैः सहितं वाक्यमुच्यत इत्यर्थः । प्रयुज्यमानमाख्यातम्, यथा-जिनो वो रक्षतु । अप्रयुज्यमानमाख्यातम्, यथा-विद्या ते स्वम्, अत्रास्तीति गम्यते । अप्रयुज्यमानं विशेषणम्, यथा-प्रविश, अत्र गृहमिति गम्यते । अनयोरर्थात् प्रकरणाद्वा आख्यादेरवगमादप्रयोगाः । आख्यातमित्यत्र चैकत्वस्य विवक्षित्वात्, 'ओदनं पच तव भविष्यति' इत्यादौ वाक्यभेदः। उच्यते वाक्यम् । 'वच परिभाषणे'(अ.प.अ.), 'ऋहलोर्ण्यत्'३।१।१२४॥, 'चजोः कु घिण्ण्यतोः'७।३।५२॥ इति कुत्वम् ॥

## स्त्याद्यन्तकं पदम् ।

स् इत्युत्सृष्टानुबन्धस्य सोर्ग्रहणम्, तिइत्युत्सृष्टानु-बन्धस्य तिपो ग्रहणम्, स च तिश्च स्ती, तावादी येषां प्रत्ययानां ते स्त्यादयः, आदिशब्दः प्रत्येकमभिसम्बध्यते, तेन स्वादयः सुप्पर्यन्ताः, त्यादयस्तिङ्पर्यन्ता गृह्यन्ते, ते अन्ते यस्य तत् स्त्याद्यन्तकम् , पद्यते गम्यतेऽर्थोऽनेनेति **पदम्** । 'पद गतौ'(दि.आ.अ), कर्मणि घञ् ॥

## राद्धसिद्धकृतेभ्योऽन्त आप्तोक्तिः समयागमौ॥२४२॥

**१-३** राद्धसिद्धकृतेभ्यः शब्देभ्योऽन्त इति शब्दो योज्यः, तेन राद्धः सिद्धः अन्तो निश्चयो येन, यस्य वा, स **राद्धान्तः**। सिद्धोऽन्तो निश्चयो येन, यस्य वा **सिद्धान्तः**। कृतोऽन्तो निश्चयो येन, यस्य वा **कृतान्तः**। ''अन्तः स्वरूपे निकटे प्रान्ते निश्चयनाशयोः''[अनेकार्थसङ्ग्रहः २।१५५]इत्यनेकार्थः । ४ वचनमुक्तिः, आप्तास्तु[9] यथाभूतार्थस्योपदेष्टारः । आप्तानामुक्तिः

---

१. तत्सम्बन्धिनीयं कारिका-''वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः । आपं चैव हलन्तानां यथा वाचा निशा दिशा॥'' २. द्र. रामाश्रमी १।६।१॥, पृ.८०॥ ३. 'ब्रह्मणीति ब्राह्मणो ब्रव-' इति२॥ ४. ह्रस्वेकारान्तोऽपि वाणिशब्दः । तथा चोक्तमनेकार्थसङ्ग्रहे-''वाणिरम्बुदे । व्यूतौ मूल्ये सरस्वत्याम्'' [२।१५१॥]। विश्वेऽपि च-''वाणिः स्याद् दूतिभारत्योर्वाणिमूल्ये बलाहके'' [णान्तवर्गः, श्लो-२४] । ''वण्यतेऽसावनया वा, इञ्, वाणिः वाणी'' इति स्वामी, क्षीरतरङ्गिणी, पृ.७१॥ ५. काशिकावृत्त्यादौ 'इणजा-' इति दृश्यते, अयं पाठः भाषावृत्तिसम्मतः, द्र. ३।३।१०८॥, पृ.१३३॥ ६. स्वामिमते नवधात्वात्मकः तथा सायणमते दशधात्वात्मकोऽयं दण्डः॥ ७. मा. धातुवृत्तौ तु-''इञ्वपादिभ्यः' इति इञन्तात् सर्वतोऽक्तिन्नर्थादित्येके इति ङीष्'' इति दृश्यते, भ्वादिः, धातुसं-२९७, पृ.१३१॥ ८. 'अत्र' इति३.४प्रतौ नास्ति ॥ ९. 'आप्तस्तु यथार्थवक्ता' इति तर्कसङ्ग्रहः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**आप्तोक्तिः**। ५ समेति सङ्गच्छतेऽभिमतार्थमनेनेति **समयः**। 'इण् गतौ'(अ.प.अ.), संपूर्वः, 'एरच्'३।३।५६॥ इत्यच्। ६ आगम्यन्ते ज्ञायन्ते जीवादयः पदार्था अनेनेति **आगमः** । 'गम्लृ गतौ' (भ्वा.प.अ.)। सामान्यतः षट् सिद्धान्तस्य ॥२४२॥

**आचाराङ्गं सूत्रकृतं स्थानाङ्गं समवाययुक्।**
**पञ्चमं भगवत्यङ्गं ज्ञाताधर्मकथापि च ॥२४३॥**
**उपासकान्तकृदनुत्तरोपपातिकाद् दशाः ।**
**प्रश्नव्याकरणं चैव विपाकश्रुतमेव च ॥२४४॥**
**इत्येकादश सोपाङ्गान्यङ्गानि**

१ आचरणमाचारः । 'चर गतिभक्षणयोः'(भ्वा.प.से.), 'भावे'३।३।१८॥ इति घञ् । आचर्यते सेव्यतेऽसावित्याचार इति वा, शिष्टाचरितो ज्ञानाद्यासेवनविधिरित्यर्थः, तत्प्रतिपादको ग्रन्थोऽप्याचारः, स चासावङ्गं च **आचाराङ्गम्**। २ सूचनात् सूत्रम्, सूत्रेण स्वसमयपरसमयसूचनेन कृतं **सूत्रकृतम्** । ३ तिष्ठन्त्यस्मिन् प्रतिपाद्यतया जीवादयः पदार्था इति स्थानम् । 'ष्ठा गतिनिवृत्तौ' (भ्वा.प.अ.), 'करणाधिकरणयोश्च'३।३।११७॥ इत्यधिकरणे ल्युट् । एकादिदशान्तसंख्याभेदो वा स्थानम्, तत्प्रतिपादको ग्रन्थोऽपि स्थानम्, तच्च तदङ्गं च **स्थानाङ्गम्** । ४ समवयनं समवायः, एकादिशतान्तसंख्यासमविष्टानां पदार्थानां संग्रहः, तद्धेतुर्ग्रन्थोऽपि समवायः, [१]समवायं युनक्तीति **समवाययुक्**। ५ भगवतीति पूज्याभिधानं व्याख्याप्रज्ञप्तेः पञ्चमाङ्गस्य, भगवती चासावङ्गं च **भगवत्यङ्गम्** । ६ ज्ञातानि उदाहरणानि, तत्प्रधाना [२]धर्मकथा ज्ञाताधर्मकथा, तत्प्रधानः ग्रन्थोऽपि तथा। ज्ञाताधर्मकथा इत्यत्र तकारस्य दीर्घत्वं संज्ञात्वात्''[ ]इति समवायाङ्गवृत्तिकारः ॥२४३॥ ७-९ उपासकाश्च अन्तकृतश्च अनुत्तरोपपातिकाश्चेति समाहारद्वन्द्वः, तस्माद् उपासकान्तकृदनुत्तरोपपातिकाद्दशा इति, उपासकशब्दात्, अन्तकृच्छब्दात्, अनुत्तरोपपातिकशब्दाद् दशा इति शब्दोऽग्रे योज्यते, तत्[३] उपासकदशाः, उपासन्ते सेवन्ते साधूनित्युपासकाः श्रावकास्तद्गतक्रियाकलापप्रतिबद्धा दशाः दशाध्ययनरूपा **उपासकदशाः** । अन्तो विनाशः, स च कर्मणाम्, तत्फलभूतस्य वा संसारस्यान्तं कुर्वन्ति[४] ये तीर्थकरादयः, तेऽन्तकृतः, तेषां दशाः प्रथमवर्गे दशाध्ययनानि इति तत्संख्यया[५] **अन्तकृद्दशाः** । न विद्यते उत्तरः प्रधानोऽस्माद् इत्यनुत्तरः, स चासावुपपातश्च अनुत्तरोपपातः प्रधानं जन्म, सोऽस्त्येषामनुत्तरोपपातिकः सर्वार्थसिद्धादिविमानपञ्चकोपपातिनो[६] देवा इत्यर्थः, तद्वक्तव्यताप्रतिबद्धा दशा दशाऽध्ययनोपलक्षिता **अनुत्तरोपपातिकदशाः** । एषां त्रयाणां ग्रन्थानां नाम बहुवचनान्तम् । १० प्रश्नः पृच्छा, तन्निर्वचनं व्याकरणं प्रश्नव्याकरणम्, तत्प्रतिपादकग्रन्थोऽपि[७] **प्रश्नव्याकरणम्**। ११ विपचनं विपाकः शुभाशुभकर्मपरिणामः, तत्प्रतिपादकं श्रुतं **विपाकश्रुतम्** ॥२४४॥ इत्येकादश प्रवचनपुरुषस्य अङ्गानीव अङ्गानि, कीदृशि ? सहोपाङ्गैरौपपातिकादि[८]भिर्द्वादशभिर्वर्तन्ते यानि तानि सोपाङ्गानि ॥

**द्वादशं पुनः ।**
**दृष्टिवादः**

१ दृष्ट्यो[९] दर्शनानि, तासां वदनं **दृष्टिवादः**, द्वादशस्याङ्गस्य नाम दृष्टिवाद इति । दृष्टिपात इत्यपि । दृष्टीनां पातो यत्रासौ दृष्टिपातः, सप्तनयदृष्टय इहाख्यायन्त इत्यर्थः । तथा चाह-''दृष्टिवादेन दृष्टिपातेन वा सर्वभावप्ररूपणा आख्यायते[१०]''[ ]इति ॥

**द्वादशाङ्गी स्याद् गणिपिटकाह्वया[११] ॥२४५॥**

द्वादशानामाचारादीनां दृष्टिवादान्तानां समाहारो द्वादशाङ्गी । [१२]गुणानां साधूनां वा गणः सङ्घो विद्यतेऽस्य गणी आचार्यः, गणिर्वा साङ्गप्रवचनाध्येता, तस्य प्रवचनमिव सर्वार्थरत्नाधारत्वाद् गणिपिटकं तदाह्वया द्वादशाङ्गी **गणिपिटकम्** उच्यत इत्यर्थः ॥२४५॥

तत्र दृष्टिवादभेदानाह-

**परिकर्मसूत्रपूर्वानुयोगपूर्वगतचूलिका[१३]: पञ्च ।**
**स्युर्दृष्टिवादभेदाः**

१. 'समं' इति१ ॥ २. 'कथा' इति२ ॥ ३. 'तत्र' इति१ ॥ ४. 'कुर्वति' इति४ ॥ ५. 'तत्संख्याया' इति४ ॥ ६. '-पातिको' इति२ ॥ ७. '-पादको ग्रन्थो-' इति३ ॥
८. आदिना राजप्रश्नीय-जीवाभिगम-प्रज्ञापना-जम्बूद्वीपप्रज्ञप्ति चन्द्रप्रज्ञप्ति- सूर्यप्रज्ञप्ति निरयावलिका-कल्पावतंसिका-पुष्पिका-पुष्पचूलिका-वृष्णिदशेति ग्राह्यम् ॥
९. 'दृष्टयोर्दर्श-' इति३.४ ॥ १०. '-न्ते' इति४ ॥ ११. '-ह्वयः' इति३, '-ह्वयाः' इति४ ॥ १२. 'गणा-' इति३ ॥ १३. '-लिका' इति१.३.४ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ परिकर्म च सूत्रं च पूर्वानुयोगश्च पूर्वगतं च चूलिका चेति द्वन्द्वः । सूत्रादिग्रहणयोग्यतासम्पादनसमर्थानि **परिकर्माणि,** गणितपरिकर्मवत् । २ सर्वद्रव्यपर्यायनया[१]द्यर्थसूचनात् **सूत्राणि** । ३ अनुरूपोऽनुकूलो वा योगः **अनुयोगः**। सूत्रस्य निजेन अभिधेयेन सार्द्धमनुरूपः सम्बन्धः, स च मूलप्रथमानुयोगो ([२]गण्डिकानुयोगश्चेति द्विविधः, इह धर्मप्रणयनान् मूलं तावत् तीर्थकराः, तेषां प्रथमसम्यक्त्वावाप्तिलक्षणपूर्वभवादिगोचरोऽनुयोगो) मूलप्रथमानुयोगः, स एव **पूर्वानुयोगः**, स च गण्डिकायोगोऽस्य लक्षणम्, इह शास्त्रे एकवक्तव्यतार्थाधिकारानुगता गण्डिका उच्यन्ते, तासामनुयोगोऽ[३]र्थकथनविधिः गण्डिकानुयोगः । ४ पूर्वाणां गतं ज्ञानमस्मिन् **पूर्वगतम्** । ५ इह दृष्टिवादे परिकर्मसूत्रपूर्वानुयोगोक्तानुक्तार्थसङ्ग्रहपरा ग्रन्थपद्धतयः चूला इव **चूलिकाः**, एताश्चाद्यानां चतुर्णां पूर्वाणां भवन्ति, न शेषाणाम् । एते परिकर्मादयः पञ्चापि दृष्टिवादभेदाः द्वादशाङ्ग्यां द्वादशदृष्टिवादनाम्नोऽङ्गस्य भेदाः प्रकाराः पञ्च भवन्ति ॥

**पूर्वाणि चतुर्दशाऽपि पूर्वगते॥२४६॥**
**उत्पाद[1]पूर्वमग्राय[2]णीयमथ वीर्य[3]तः प्रवादं स्यात् ।**
**अस्ते[4]र्ज्ञा[5]नात् सत्या[6]त् तदात्म[7]नः[8]कर्मणश्च परम्॥२४७॥**
**प्रत्या[9]ख्यानं विद्या[10]प्रवादकल्या[11]णनामधेये च।**
**प्राणा[12]वायं च क्रि[13]या विशालमथ लोक[14]बिन्दुसारमिति ॥२४८॥**

१ एतानि वक्ष्यमाणानि चतुर्दशापि पूर्वाणि पूर्वगते चतुर्थे [४]पूर्वगतनाम्नि दृष्टिवादभेदे भवन्तीति शेषः, तन्नामान्याह– [५]सर्वाङ्गेभ्यः पूर्वं तीर्थकरैरभिहितत्वात् पूर्वाणि ॥२४६॥ तानि यथा–सर्वद्रव्याणां पर्यायाणां चोत्पादप्रज्ञप्तिहेतुः **उत्पादम्** । २ सर्वद्रव्याणां पर्यायाणां सर्वजीवविशेषाणां च अग्रयं परिमाणं वर्ण्यते यत्र तद् **अग्रायणीयम्** । ३ अथ वीर्यतः वीर्यशब्दात् प्रवादम्, तेन वीर्यप्रवादम्, जीवानामजीवानां च सकर्मेतराणां वीर्यं प्रवदति **वीर्यप्रवादम्** । ४ तदिति प्रवादम्, अस्तेर्ज्ञानात् सत्याद् आत्मनः कर्मणः च परम्, अस्तीति नास्तेरप्युपलक्षणम्, ततो यल्लोके यथास्ति तथा वा नास्ति, अथवा स्याद्वाद्यभिप्रायेण तदेवास्ति नास्तीति वा प्रवदति **अस्तिनास्तिप्रवादम्** । ५ मतिज्ञानादिपञ्चकं सप्रभेदं प्रवदतीति **ज्ञानप्रवादम्**। ६ सद्भ्यो हितं सत्यं संयमः, तत् सप्रभेदं सप्रतिपक्षं च यत् प्रवदति तत् **सत्यप्रवादम्** । ७ नयदर्शनैरात्मानं प्रवदति **आत्मप्रवादम्**। ८ ज्ञानावरणाद्यष्टविधकर्मप्रकृतिस्थित्यनुभागप्रदेशादिभेदैरन्यैश्चोत्तरोत्तरभेदैर्भिन्नं प्रवदति **कर्मप्रवादम्** ॥२४७॥ ९ सर्वप्रत्याख्यानस्वरूपं प्रवदति प्रत्याख्यानप्रवादम्, तदेकदेशं **प्रत्याख्यानम्,** भीमवत् । १० विद्यातिशयान् प्रवदति **विद्याप्रवादम्**। ११ कल्याणफलहेतुत्वात् **कल्याणम्**, अवन्ध्यमिति चोच्यते। १२ आयुः प्राणविधानं सर्वं सभेदम्, अन्ये च प्राणा वर्णिता यत्र तत् **प्राणावायम्** । १३ क्रियाः कायिक्यादयः संयमाद्याश्च विशालाः सभेदा यत्र तत् **क्रियाविशालम्** । १४ इहलोके श्रुतलोके वा बिन्दुरिवाक्षरस्य सर्वोत्तमं सर्वाक्षरसंयोगपरिनिष्ठितत्वेन **लोकबिन्दुसारम्** । [६]सार्द्धद्वादशकोटिपदम्, इह पदं तु तथाविधसम्प्रदायगम्यम्[७] । नन्दिसमवायाङ्गवृत्तौ पदपरिमाणविषये किञ्चिदन्यथात्वमपि दृश्यते । पूर्वेषु तु दशादीनि वस्तून्यपि सन्ति । यदुक्तम्–

"क्रमाद् वस्तूनि विधित्वमाद्ये दश चतुर्दश ।
अष्टादश तुर्ये हि द्वादश द्वौ[५] च षोडश ॥१॥
त्रिंशत्तु विंशतिः पञ्चदश द्वादश वै तथा ।
त्रयोदश ततस्त्रिंशत् पञ्चविंशतिरन्तिमे ॥२॥
उत्पादादिषु पूर्वेषु ह्यन्तर्वर्ती प्रकारतः ।
अधिकारविशेषस्तु वस्तुविज्ञैः प्रकीर्त्तितम्॥३॥"[ ]इति॥

**स्वा[1]ध्यायः श्रु[2]तिराम्ना[3]यश्छ[4]न्दो वे[5]दः**

१ सुष्ठु आ समन्ताद् अधीयते **स्वाध्यायः**। 'इङ् अध्ययने'(अ.आ.अ.), अधिपूर्वः, 'इङश्च'३।३।२१॥ इति घञ्, 'अचो ञ्णिति'७।२।११५॥ इति वृद्धिः । २ श्रूयते धर्मोऽनया **श्रुतिः** ।'श्रु श्रवणे'(भ्वा.प.अ.), 'श्रुअञ्जिमिभ्यः करणे[८]'(वा–३।३।९४॥)इति क्तिन्। ३ आम्नायते उपदिश्यते धर्माधर्मावनेनेति

१. '-तया-' इति२॥ २. कोष्ठान्तर्गतपाठः १प्रतौ न दृश्यते ॥ ३. '-ऽर्थः' इति३॥ ४. 'पूर्वे' इति३॥ ५. 'सर्वाङ्गि-' इति३॥ ६. 'सार्द्ध' इति१॥ ७. '-गम्य' इति१॥ ८. अष्टाध्याय्यां 'श्रुयजिस्तुभ्यः करणे' इति वार्तिकस्वरूपं दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**आम्नायः** । 'म्ना अभ्यासे'(भ्वा.प.अ.), करणे घञ्, 'आतो युक् चिण्कृतोः'७।३।३३॥ इति युक्, आङ्पूर्वो म्नायतिरुपदेशार्थः । आमनति उपदिशति इतो वा । 'श्याद्व्यधा-' ३।१।१४१॥ इति णः । ४ छादयति श्रोतुरन्तःकरणमिति **छन्दः**, क्लीबे । 'छर्दि अपवारणे'(चु.उ.से.), '-असुन्'(उणा-६२८) इत्यसुन्, 'इदितो नुम्'७।१।५८॥ इति नुम् । "छन्दति रर्चति कर्मा[2] ततोऽसुन्"[ ]इति भाष्यम्[3] । चन्दति आह्लादयति स्तोत्रैरिति वा । 'चदि आह्लादनदीप्त्योः'(भ्वा.आ.से.), चदे(न्दे)रादेश्च छः'(उणा-६५८)इत्यसुन्निति वा। छन्दसी, छन्दांसि इत्यादि। ५ विदन्त्यनेन धर्मं **वेदः** । 'विद ज्ञाने'(अ.प.से.), बाहुलकात् कर्मणि घञ् । सामान्यतः पञ्च वेदस्य ॥

**त्रयी पुनः ।**

**ऋग्यजुःसामवेदाः स्युः**

१ ऋग्यजुःसामलक्षणास्त्रयोऽवयवा यस्याः सा **त्रयी**। त्रिशब्दात् 'संख्याया अवयवे तयप्'५।२।४२॥ इति तयप्, तस्य 'द्वित्रिभ्यां तयस्या[य]ज्वा'५।२।४३॥ इत्ययजादेशः, 'यस्येति च' ६।४।१४८॥ इतीकारलोपः, 'टिड्ढाणञ्-' ४।१।१५॥ इति ङीष् (ङीप्) । १ ऋच्यन्ते स्तूयन्ते देवा अनयेति **ऋक्**, स्त्रीलिङ्गः। 'ऋच स्तुतौ'(तु.प.से.), 'क्विप्'(वा-३।३।९४॥)इति क्विप्। २ इज्यतेऽनेन **यजुः**, क्लीबे । 'यज देवपूजादौ'(भ्वा.उ.अ.), 'धनर्त्तिचक्षिङ्पूवपितपिजनि-[4]'(उणा-२७४)इत्यादिना उस् । ३ स्यति पापं **साम**, क्लीबे । 'षोऽन्तकर्मणि'(दि.प.अ.), 'नामन्सामन्[5]-'(उणा-५९०)इत्यादिना साधुः। सामनी, सामानि इत्यादि। ऋक् च यजुश्च साम च ऋग्यजुःसामानि, ते च वेदाश्च ऋग्यजुःसामवेदाः, स्युः भवेयुः। एते त्रयो वेदा ऋगाद्याः त्रयी उच्यते इत्यर्थः । एकं वेदत्रय्याः ॥

**अथर्वा तु तदुद्धृतिः ॥२४९॥**

१ न थर्वति कमपि न हिनस्ति **अथर्वा**, पुंसि, नकारान्तः। 'थर्व[6] हिंसायाम्'( ), बाहुलकात् कनिन्। न खर्वति वा । 'खर्व गतौ'(भ्वा.प.से.), बाहुलकात् कनिन्, धातोरादेश्च थः। तेभ्य ऋग्यजुःसामभ्य उद्धृतिः उद्धारः तदुद्धृतिः। एकमथर्वणः ॥२४९॥

**वेदान्तः स्यादुपनिषद्**

१ वेदस्यान्तो निश्चयः **वेदान्तः**। २ उप समीपे ब्रह्मणो निषीदन्त्यनया **उपनिषद्**, स्त्रीलिङ्गः । 'षद्लृ विशरणगत्यवसादनेषु'(भ्वा.प.अ.), 'सत्सूद्विषद्रुह-'३।२।६१॥ इत्यादिना क्विप् । द्वे वेदान्तस्य ॥

**ओङ्कारप्रणवौ समौ ।**

१ अवति [7]पापेभ्यो रक्षति भूतानि 'ओम्' अव्ययम्। 'अव रक्षणादौ'(भ्वा.प.से.), 'अवतेष्टिलोपश्च'(उणा-१३९) इति मन्टिलोपं[8], टिलोपसामर्थ्यात् प्रत्ययस्यैव, अन्यथा हि डिदित्येवोच्येत[9], 'ज्वरत्वर-'६।४।२०॥ इत्यूट्(-ठ्), 'आद्गुणः' ६।१।८७॥, ततो बाहुलकाद् 'वर्णात् कारः'१।२।३५॥ । २ प्रकृष्टो नवः स्तुतिः **प्रणवः** । प्रणूयते वा प्रणवः । 'णु स्तुतौ' (अ.प.अ.), 'ऋदोरप्'३।३।५७॥ इत्यप्, 'उपसर्गादसमासेऽपि' ८।४।१४॥ इति णत्वम् । द्वे ओँकारस्य॥

**शिक्षा कल्पो व्याकरणं छन्दोज्योतिर्निरुक्तयः॥२५०॥**

**षडङ्गानि**

१ अकारादिवर्णानां स्थानकरणप्रयत्नबोधिका अकुविसर्जनीयाः कण्ठ्या इत्यादिका **शिक्षा** । शिक्ष्यते वर्णविशेषोऽनयेति वा। 'शिक्ष [10]विद्योपादाने'(भ्वा.आ.से.), 'गुरोश्च-' ३।३।१०३॥ इत्यकारः, 'अजाद्यतष्टाप्'४।१।४॥, भले इति भाषा। यद् वाचस्पतिः-'शिक्षा वर्णविवेचिका'[ ]। २ कर्मणां सिद्धरूपः प्रयोगः **कल्पः** । अथवा योगक्रियाणामुपदेशः कल्पः। कल्प्यतेऽवगम्यतेऽनेनेति कल्पः । 'कृपू सामर्थ्ये' (भ्वा.आ.वे.), करणे घञ्, 'कृपे(कृपो) रो लः'८।२।१८॥ इति लत्वम् । यद् वाचस्पतिः-

"सिद्धरूपः प्रयोगो यैः कर्मणामवगम्यते ।
ते कल्पा लक्षणार्थानि सूत्राणीति प्रचक्षते॥१॥"[ ]

इति । ३ व्याक्रियन्ते व्याख्यायन्ते शब्दा अनेन **व्याकरणम्**। व्याङ्पूर्वात् करोतेः 'करणाधिकरणयोश्च'३।३।११७॥ इति करणे ल्युट् । यदाह[11]-

१. धातुवृत्त्यादौ चुरादिगणे 'छद' इति दृश्यते ॥ २. 'कर्माणि' इति२॥ ३. 'ऋष्यम्' इति३॥ ४. उणादिगणे तु 'अर्त्तिपृवपियजितनिधनितपिभ्यो नित्'(उणा-२७४)इति सूत्रं दृश्यते ॥ ५. उणादिगणे तु '-सीमन्-' इति दृश्यते, अतः 'साम' इति कथं सिद्धिः?, '-मनिन्'(उणा-५८४)इत्यनेन समाधेयम् ॥ ६. क्षीरतरङ्गिण्यादावयं धातुर्न दृश्यते ॥ ७. 'रक्षति पापेभ्यो भूतानिति' इति२॥ ८. '-वोच्यत' इति२, '-वोच्यते' इति३.४॥ ९. 'आका-' इति१॥ १०. 'विद्या-' इति३॥ ११. '-हुः' इति१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"प्रकृतिप्रत्ययोपाधिनिपातादिविभागशः ।
पदान्वाख्यानकरणं शास्त्रं व्याकरणं विदुः ॥ २॥"

[ ] । ४ छाद्यतेऽनेन प्रस्ताराद् भूरिति **छन्दः** । 'छर्दि[१] अपवारणे'(चु.उ.से.), '-असुन्'(उणा-६२८)इत्यसुन्, 'इदितो नुम्'७।१।५८॥ । ५ ज्योतिषां ग्रहाणां गतिज्ञानहेतुर्ग्रन्थो **ज्योतिषम्** । ६ "वर्णागमो वर्णविपर्ययश्च"[ ]इत्यादिभिर्निर्वचनं **निरुक्तिः** । 'वच परिभाषणे'(अ.प.अ.), 'स्त्रियां क्तिन्'३।३।९४॥, 'गहिज्या-' ६।१।१६॥ इति सम्प्रसारणम् । १ अङ्ग्यते ज्ञायते अमीभिरिति **अङ्गानि**, उपकारकाणीत्यर्थः । शिक्षादीनां षण्णां नामैकं 'षडङ्गम्' इति ॥२५०॥

**धर्मशास्त्रं स्यात् स्मृतिर्धर्मसंहिता ।**

१ धर्मप्रतिपादकं शास्त्रं **धर्मशास्त्रम्** । २ महर्षिभिर्वेदार्थस्मरणं स्मृतिः, तद्योगाद् ग्रन्थोऽपि **स्मृतिः** । ३ धर्मः सन्धीयतेऽस्यां **धर्मसंहिता** । त्रीणि स्मृतेः ॥

**आन्वीक्षिकी तर्कविद्या**

१ प्रत्यक्षागमाभ्यामीक्षितस्य पश्चादीक्षणमन्वीक्षा । 'ईक्ष दर्शनाङ्कनयोः[२]'(अ.आ.से.),'गुरोश्च-'३।३।१०३॥ इत्यकारः । सा प्रयोजनमस्या **आन्वीक्षिकी**। 'तदस्य प्रयोजनम्'५।१।१०९॥ इति ठक्, 'ठस्येकः'७।३।५०॥, 'किति च'७।२।११८॥ इत्यादिवृद्धिः । "आगमप्रतिपादितानां[३] वस्तुतत्त्वानाम् अनु पश्चाद् ईक्षणं परीक्षणमन्वीक्षा, 'तदस्य प्रयोजनम्'५।२।१०९॥ इति ठक्"[ ]इति मिश्राः । २ तर्काः षोडशपदार्थाः प्रमाणादयस्तत्प्रधाना विद्या **तर्कविद्या**। द्वे तर्कविद्यायाः ॥

**मीमांसा तु विचारणा ॥२५१॥**

१ मीमांस्यतेऽनया **मीमांसा** । 'मान विचारणे[४]' (भ्वा.आ.से.), 'मान(न्)बधदाण(न्)शान्भ्यो दीर्घश्चाभ्यासस्य' ३।१।६॥ इति सन्, 'सन्यङोः'६।१।९॥ इति द्वित्वम्, 'अः[५]' प्रत्ययात्'३।३।१०२॥ इत्यः । २ विचार्यतेऽनया **विचारणा**। 'चर गतिभक्षणयोः'(भ्वा.प.से.)अस्माण्णिजन्तात् करणे ल्युट् । द्वे मीमांसायाः ॥२५१॥

**सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।**
**वंशानुवंशचरितं पुराणं पञ्चलक्षणम् ॥२५२॥**

१ सर्जनं **सर्गः** । 'सृज विसर्गे'(दि.आ.अ.), भावे घञ्, 'पुगन्तलघूपधस्य'७।३।८६॥ इति उपधायां[७] गुणः, 'चजोः कु-'७।३।५२॥ इति कुत्वम् । सर्गः सृष्टिः । २ एवं प्रतीपः[८] सर्गः **प्रतिसर्गः** , प्रलय इत्यर्थः । ३ **वंशः** सूर्यवंशादिः । ४ **मन्वन्तराणि** स्वायम्भुवचाक्षुषवैवस्वतादीनि चतुर्दश[९] । ५ वंशादनुवंशो वंशानुवंश सूर्यवंशादिः, तस्य चरितं **वंशानुवंशचरितम्**। १ पूरा पूर्वस्मिन् भूतं **पुराणम्**। 'पूर्वकालैकसर्वजरत्पुराण-' २।१।४९॥ इति निर्देशादेव साधु । "पुराऽनिति प्राणिति पुराणम्" [ ]इति[१०] स्वामी[११]॥ पञ्चसर्गादीनि लक्षणानि चिह्नानि यस्य तत् पञ्चलक्षणम् । पञ्चानां सर्गादीनां लक्षणं शास्त्रं वा । एकं सर्गादिपञ्चोपलक्षितशास्त्रस्य ॥२५२॥

**षडङ्गी वेदाश्चत्वारो मीमांसाऽऽन्वीक्षिकी तथा ।**
**धर्मशास्त्रं पुराणं च विद्या एताश्चतुर्दश ॥२५३॥**

१ षडङ्ग्यादीनां पुराणान्तानां चतुर्दशानां नामैकं **विद्या** इति ॥२५३॥

**सूत्रं सूचनकृत्**

१ सूत्र्यते ग्रथ्यते **सूत्रम्**, पुंक्ली. । 'सूत्र ग्रन्थने[१३]'(भ्वा. उ.से.), घञ् । सूचनाद्वा सूत्रम्, पृषोदरादिः । सूतेऽर्थमिति[१४] वा। 'षूङ् प्रसवे[१५]'(अ.आ.वे.), 'सर्वधातुभ्यः ष्ट्रन्'(उणा-५९८)इति ष्ट्रन्। सूचनं करोति **सूचनकृत्**। एकं सूत्रस्य॥

**भाष्यं सूत्रोक्तार्थप्रपञ्चकम् ।**

---

१. 'छद-' इति धातुवृत्त्यादौ ॥ २. 'ईक्ष दर्शने' क्षीरतरङ्गिण्यादौ ॥ ३. 'प्रतिपादिकानां' इति१ ॥ ४. 'विदा-' इति२ ॥ ५. 'मानेर्जिज्ञासायाम्' इति वार्तिकेन जिज्ञासायां सन् भवति ॥ ६. 'अः' इति१.२.४॥ ७. 'उपधागुणः' इति१.२ ॥ ८. 'प्रतीतः' इति१ ॥ ९. विष्णुपुराणे चतुर्दश मनव उक्तास्तन्नामानि यथा-

"मनुः स्वायम्भुवो नाम मनुः स्वारोचिषस्तथा । औत्तमिस्तामसिश्चैव रैवतश्चाक्षुषस्तथा ॥१॥
एते तु मनवोऽतीताः सप्तमस्तु रवेः सुतः । वैवस्वतोऽयं यस्यैतत् सप्तमं वर्तते युगम् ॥२॥
सावर्णिर्दक्षसावर्णो ब्रह्मसावर्ण इत्यपि । धर्मसावर्णरुद्रस्तु सावर्णो रौच्यभौम्यवत् ॥३॥" इति ॥

१०. इतोऽग्रे १.२प्रतौ 'तु' इति दृश्यते ॥ ११. स्वामिकृतामरकोशोद्घाटने न दृश्यते ॥ १२. 'ह्येता-' इति३.४॥ १३. '-विमोचने' इति स्वामी, '-वेष्टने' इति सायणः ॥ १४. 'सूत्रे-' इति१ ॥ १५. विग्रहे 'सूते' इति विगृहीतत्वात् '-प्राणिगर्भविमोचने' इति युक्तोऽर्थः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ भाष्यते **भाष्यम्** । सूत्रे उक्तमर्थं प्रपञ्चयति विस्तारयति यत्, तत् सूत्रोक्तार्थप्रपञ्चकम् । 'पचि विस्तारे'[1] (चु.उ.से.), 'ण्वुल्तृचौ'३।१।१३३॥ इति ण्वुल् । एकं सूत्रोक्तार्थप्रपञ्चकस्य ॥

## प्रस्तावस्तु[1] प्रकरणम्[2]

१ 'प्रस्तूयते **प्रस्तावः** । 'ष्टुञ् स्तुतौ'(अ.उ.अ.), 'प्रद्रुस्तु(प्रेद्रुस्तुस्रुवः)'३।३।२७॥[इति] घञ् । २ प्रक्रियतेऽस्मिन् **प्रकरणम्** । 'करणाधिकरणयोश्च' ३।३।११७॥ इत्यधिकरणे ल्युट् । तार्किकास्तु

"शास्त्रैकदेशसम्बद्धं शास्त्रकार्यान्तरस्थितम् ।
प्राहुः प्रकरणं नाम शास्त्रभेदं विपश्चितः ॥१॥"

[ ]इति । द्वे प्रकरणस्य ॥

## निरुक्तं[1] पदभञ्जनम्[2] ॥२५४॥

१ वर्णागमादिभिः पदानां निर्वचनं **निरुक्तम्**[2] । 'वच परिभाषणे'(अ.प.अ.), 'स्त्रियां क्तिन्'[3]३।३।९४॥, (भावे क्तः), 'ग्रहिज्या-'६।१।१६॥ इति सम्प्रसारणम् । २ पदानि भज्यन्तेऽत्र **पदभञ्जनम्** । 'भञ्जु (भञ्जो) आमर्दने'(रु.प.अ.), अधिकणे ल्युट् । द्वे निरुक्तस्य ॥ २५४॥

## अवान्तरप्रकरणविश्रामे शीघ्रपाठतः ।
## आह्निकम्[1]

१ अवान्तरप्रकरणानां विश्रामः अवान्तरप्रकरणविश्रामः, तत्र, शीघ्रपाठतः अह्ना निर्वृत्तम् **आह्निकम्** । 'तेन निर्वृत्तम्' ५।१।७९॥ इति ठक् । अवान्तरप्रकरणानां विश्रामो ग्रन्थावयव इत्यर्थः, तन्नामैकमाह्निकम् । एकस्मिन्नेव वासरे पठनार्हमेतत्, नान्यस्मिन् । यदनेकार्थः-

"आह्निकं स्यात् पुनरह्नेर्निर्वर्त्ये[4] नित्यकर्मणि ॥
भोजने ग्रन्थभागे च"[अनेकार्थसङ्ग्रहः २।८९॥] ।

ग्रन्थभागे[5] इति ग्रन्थावयव इत्यर्थः ॥

## अधिकरणं[1] त्वेकन्यायोपपादनम् ॥२५५॥

१ अधिक्रियतेऽस्मिन्निति **अधिकरणम्** । 'करणाधिकरणयोश्च'३।३।११७॥ इत्यधिकरणे ल्युट् । एकं न्यायमुपपादयति एकन्यायोपपादनम् । नन्द्यादित्वात् ल्युः। एकमधिकारस्य ॥२५५॥

## उक्तानुक्तदुरुक्तार्थचिन्ताकारि तु वार्त्तिकम्[1] ।

१ उक्तानामनुक्तानां दुरुक्तानां चार्थानां चिन्तां[6] ज्ञानं करोतीत्येवंशीलं उक्तानुक्तदुरुक्तार्थचिन्ताकारि । 'सुप्यजातौ-' ३।२।७८॥ इति ताच्छील्ये णिनिः । एवंविधं यच्छास्त्रं तन्नामैकं **वार्त्तिकम्** इति । वृत्तिः प्रयोजनमस्य । 'तदस्य प्रयोजनम्' ५।१।१०९॥ इति ठक् ॥

## टीका[1] निरन्तरव्याख्या

१ टीकयति प्रापयत्यर्थमिति **टीका** । 'टीकृ गतौ' (भ्वा.आ.से.), पचाद्यच्, अजादित्वाट्टाप् । सुगमानां दुर्गमानां चार्थानां निरन्तरमन्तराभावेन व्याख्या[7] यस्यां सा, एतादृशो यो ग्रन्थस्तन्नामैकम् ॥

## पञ्जिका[1] पदभञ्जिका ॥२५६॥

१ पञ्च्यन्ते[8] व्यक्तीक्रियन्ते पदार्था अनयेति **पञ्जिका**। 'पचि व्यक्तीकरणे'(भ्वा.आ.से.), 'धात्वर्थनिर्देशे ण्वुल्वाच्यः' (वा-३।३।१०८॥), 'युवोरनाकौ'७।१।१॥, पृषोदरादित्वात् जत्वम् । अर्थाद् विषमाण्येव पदानि भनक्ति पदभञ्जिका । 'भञ्जू(भञ्जो) आमर्दने', 'ण्वुल्तृचौ'३।१।१३३॥ इति ण्वुल् । एवंविधग्रन्थस्य नामैकं पञ्जिकेति ॥२५६॥

## निबन्धवृत्ती[1] अन्वर्थे

१ निबद्धयते विशेषोऽस्मिन् **निबन्धः**। 'बन्ध बन्धने' (क्र्या.प.अ.), अधिकरणे घञ् । २ वर्ततेऽर्थावगमोऽत्रेति **वृत्तिः**। 'वृतु वर्त्तने'(भ्वा.आ.से.), 'स्त्रियां क्तिन्'३।३।९४॥। निबन्ध इति शास्त्रविशेषनाम, वृत्तिरित्यपि शास्त्रविशेषनाम । निबन्धश्च वृत्तिश्च निबन्धवृत्ती । कीदृशौ एते ?, अन्वर्थे, अनुगतो मिलितोऽर्थोऽनयोरिति । अन्वर्थे[9] एतौ द्वावपि शास्त्रविशेषवाचकौ शब्दौ भिन्नौ । यन्माघः-

"अनुत्सूत्रपदन्यासा सद्वृत्तिः सन्निबन्धना[10] ।
शब्दविद्येव[11] नो भाति राजनीतिरपस्पशा ॥१॥"

[शिशुपालवधम् २।११२॥]इति । अत्र हि शब्दविद्याया विशेषणे निबन्धनशब्दो निबन्धस्य पर्यायत्वेन प्रोक्त इति । "द्वेऽपि भिन्ने शास्त्रे ज्ञेये निबन्धनं भाष्यम्"[ ]इति केचित् ॥

---

१. 'विस्तारवचने' इति स्वामिसायणौ ॥ २. '-क्तिः' इति१.३, '-क्तः' इति२॥ ३. सर्वादर्शेष्विदं सूत्रं दृश्यते, ४प्रतौ 'भावे क्तः इति पाठो युक्तः' इत्युट्टङ्किता एका टिप्पणी दृश्यते ॥ ४. '-रहन्नि-' इति४॥ ५. '-भागो' इति२॥ ६. 'चिन्ता' इति१.३॥ ७. 'व्याख्यां' इति१.४॥ ८. 'पच्यन्ते' इति३.४॥ ९. 'अन्वर्थो' इति१॥ १०. 'सद्बन्धना' इति३॥ ११. '-विद्यैव' इति१.२.३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सङ्ग्रहस्तु समाहृतिः ।**

१ सङ्गृह्यते वाच्यविशेषोऽनेन **सङ्ग्रहः** । 'ग्रह-वृद-'३।३।५८॥ इत्यप् । २ समाह्रियन्तेऽर्थविशेषा अनया **समाहृतिः** । 'हृञ् हरणे'(भ्वा.उ.अ.), 'स्त्रियां क्तिन्' ३।३।९४॥ । द्वे सङ्ग्रहस्य ॥

**परिशिष्टपद्धत्यादीन् पथाऽनेन समुन्नयेत् ॥२५७॥**

१ परिशिष्यत इति **परिशिष्टम्** । 'शिष्लृ विशेषणे' (रु.प.अ.), 'निष्ठा'३।२।१०२॥ । २ अनवच्छिन्नक्रमत्वात् पद्धतिरिव **पद्धतिः** । आदिग्रहणाद् उच्छ्वासाङ्कसर्गादयो गृह्यन्ते। अनेन पथा अनेन मार्गेणाऽन्वर्थमार्गेणैव। परिशिष्टश्च[1] पद्धतिश्च परिशिष्टपद्धती, ते आदी येषां ते, तथा, तान्, समुन्नयेद् जानीयात् । परिशिष्टादयो ग्रन्थावयवविशेषा ज्ञेया इत्यर्थः ॥२५७॥

**कारिका तु स्वल्पवृत्तौ बहोरर्थस्य सूचनी ।**

१ पदार्थान् गम्यान् करोति **कारिका** । 'ण्वुल्तृचौ' ३।१।१३३॥, 'प्रत्ययस्थात्-'७।३।४४॥ इतीत्वम् । स्वल्पा चासौ वृत्तिश्च स्वल्पवृत्तिः, तत्र । कीदृशी कारिका ?, बहोरर्थस्य सूचनी । सूचयती सूचनी । 'सूचँ[2] पैशुन्ये' (चु.उ.से.), नन्द्यादित्वात् ल्युः । "कारिका विवृतिः श्लोकैः (विवृतिश्लोके)"[विश्वलोचनकोशः, कान्तवर्गः, श्लो-५४]इति तु[3] श्रीधरः । लघुवृत्तिनामैकं कारिकेति[4] ॥

**कलिन्दिका सर्वविद्या[5]**

१ कलिन्दी भाजनविशेषः, तत्प्रतिकृतिः[6] **कलिन्दिका**। 'इवे प्रतिकृतौ' ५।३।९६॥ इति कः । डलयोरैक्ये कडिन्दिका अपि । सर्वा आन्वीक्षिक्याद्या विद्या अस्यां सर्वविद्या । सर्वविद्यानामैकं कलिन्दिका ॥

**निघण्टुर्नामसङ्ग्रहः ॥२५८॥**

१ नितरां घण्ट्यन्ते एकत्र भाष्यन्ते शब्दा अनेन **निघण्टुः** । 'घटि चेष्टायाम्'(भ्वा.आ.से.), बाहुलकात् 'भृमृ[7]-शीतृचरि-'(उणा-७)इत्यादिना उः । पुंस्ययम्, यद् वैजयन्ती- "नामशास्त्रे निघण्टुः[र्ना]"[वैजयन्तीकोषः ३।६।३१॥] । क्लीबेऽयम् । यद्व्याडिः-

"अर्थान् निघण्टयत्यस्मान्निघण्टुः परिकीर्त्तितः ॥
पुंनपुंसकयोः स स्यात्"[[8]]इति ।

अकारान्तोऽप्ययं रामवत् । यच्चामुण्डः-"इति वर्णनिघण्टोऽयं बीजानां वच्मि किञ्चन"[ ]इति । २ नाम्नां सङ्ग्रहो **नामसङ्ग्रहः** । द्वे नाम कोषस्य। 'नाममाला नाम' इति भाषा ॥२५८॥

**इतिहासः पुरावृत्तम्**

इतिहशब्दः पारम्पर्योपदेशेऽव्ययम्[9] । इतिह आस्तेऽत्रेति। 'आस उपवेशने'(अ.आ.से.), 'हलश्च' ३।३।१२१॥ इति घञ्, **इतिहासः** । यद्वा इति एवमर्थे, ह किलार्थे, इतिह आसीदत्रेति। 'असु भुवि'(अ.प.से.), पचाद्यच् । २ [10]पुरावृत्तोपनिबन्धनप्रायत्वात् **पुरावृत्तम्** । "पुरावृत्तं पूर्वचरितम्"[अम.क्षीर. १।५।४॥]इति तु स्वामी । द्वे नामनी[11] पूर्ववृत्तप्रतिपादकस्य व्यासादिप्रणीतग्रन्थस्य ॥

**प्रवह्लिका प्रहेलिका ।**

१ प्रवल्हते प्राधान्यं भजति **प्रवह्लिका** । 'वर्ह[12] वल्ह परिभाषणहिंसादानेषु'(भ्वा.आ.से.), ण्वुल् । २ प्रहेलयत्यभिप्रायं सूचयति **प्रहेलिका** । 'हिल हावकरणे[13]'(तु.प.से.), ण्वुल्, 'युवोरनाकौ'७।१।१॥, 'प्रत्ययस्थात्-'७।३।४४॥ इतीत्वम् । प्रवल्हतेः 'सर्वधातुभ्य इन्'(उणा-५५७)इतीन्, ततः 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीष्, 'प्रवल्ही' इत्यपि। "प्रहेलिका प्रवल्ही च प्रश्नदूती विपादिका"[[14]]इत्युत्पलिनी।

---

१. '-शिष्टाश्च' इति१॥ २. 'सूचि' इति१.२.३॥ ३. ३नास्ति ॥ ४. 'कारिकोत्यादि' इति२॥ ५. "सर्वविद्या कदम्रिका"[३।६।३१॥]इति वैजयन्ती, पृ.६१॥ ६. '-कृता' इति१.२॥ ७. 'भृस्तृशी-' इति२॥ ८. द्र. स्वोपज्ञटीका २।२५८॥, पृ.६२॥ ९. "पारम्पर्योपदेशे स्यादैतिह्यमितिहाव्ययम्" इत्यमरः, अमरकोशः२।७।१२॥, "इतिह स्यात् सम्प्रदाये" इति हैमः, अभि.चिन्ता. श्लो-१५३७॥ १०. 'पुरोवृ-' इति१॥ ११. 'नाम्नी' इति३॥ १२. स्वामी 'वर्ह इत्येव पठति, सायणो द्वौ ॥ १३. '-भावकरणे' इति सायणः ॥ १४. द्र. रामाश्रमी १।६।६॥, पृ.८४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं हिलेरिनि प्रहेली च । सा प्रहेलिका शाब्दी आर्थी च, शाब्दी[1] यथा-

"पयस्विनीनां धेनूनां[2] ब्राह्मणः प्राप्य विशंतिम् ।
ताभ्योऽष्टादश विक्रीय गृहीत्वैकां गृहं गतः ॥१॥"

[[3]] । आर्थी यथा -

"जंई सासुआइ भणिया पियवासघरंमि दीवयं देसु ।
ता कीस मुद्धडमुही हिययंमि निवेसए दिट्ठिं॥२॥ "

[[3]] । द्वे हियालीति ख्याताया: ॥

## जनश्रुतिः[1] किंवदन्ती[2]

१ जनेभ्यः श्रुतिः **जनश्रुतिः** । जनेभ्यः श्रूयते इति वा। २ किं वदति जनोऽत्रेति **किंवदन्ती** । 'वद व्यक्तायां वाचि'(भ्वा.प.से.), 'भूद्दवहिवासिवर्दि-'(उणा-४०८)इत्यादिना झच्, 'झोऽन्तः'७।१।३॥, गौरादित्वाद् ङीष् "भुवो झच्-(झिर्च्[5])'(उणा-३३०)बाहुलकाद् वदेश्च, ततः किंवदन्तिः"[ ] इति हट्टचन्द्रो ह्रस्वान्तमाह। यद्वा उद्यते[6] कथ्यते सा वदन्तिः कथा 'वद्यवि-'(हैमोणा-६६५)इत्यन्तिप्रत्ययः, कुत्सिता वदन्तिः किंवदन्ती, 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीष्। द्वे सत्यानृतसाधारणलोकवार्त्तायाः[7] ॥

## वार्त्तैतिह्यं[1] पुरातनी ॥२५९॥

१ पुरातनी वार्ता '**ऐतिह्यम्**' उच्यते । 'इतिह' इति निपातसमुदाय उपदेशपारम्पर्ये वर्त्तते । इतिहेत्येव ऐतिह्यम्, भेषजादित्वात् ट्यण्। एकं पुरातनवार्त्तायाः **॥२५९॥**

## वार्त्ता[1] प्रवृत्तिर्[2]वृत्तान्त[3] उदन्तः[4][8]

१ वृत्तिर्लोकवृत्तं विद्यतेऽस्यां **वार्त्ता**। 'प्रज्ञाश्रद्धार्चा-वृत्तिभ्यो: णः'५।२।१०१॥ । २ प्रवर्त्तते जनोऽनया **प्रवृत्तिः**। 'वृतु वर्तने'(भ्वा.आ.से.), 'स्त्रियां क्तिन्'३।३।९४॥ । यद्वा प्रमाणेन वर्त्तनं प्रवृत्तिः । ३ वृत्तस्य चरितस्यान्तोऽत्र **वृत्तान्तः**। ४ उद्यतेऽसौ **उदन्तः**। 'वद व्यक्तायां वाचि'(भ्वा.प.से.), 'सीमन्तहेमन्त-'(हैमोणा-२२२)इत्यादिना साधु । उदत्यर्थ-मन्तोऽस्येति वा। पञ्चमस्वरादिः । चत्वारि सामान्यतो वार्त्तायाः[9]॥

---

१. अष्टौ श्लोकान् कुरुष्वेति पुत्रः पित्रा नियन्त्रितः । सप्त श्लोकाः कृतास्तेन पितुराज्ञा न लङ्घिता ॥ अत्र अष्टिरिति वृत्तनाम, अन्यथा श्लोका-सङ्गतिः ॥ तरुण्यालिङ्गितः कण्ठे नितम्बस्थलमाश्रितः । गुरूणां सन्निधानेऽपि कः कूजति मुहुर्मुहुः॥ अत्र 'पानीयकुम्भः' इत्यर्थे श्लोकसङ्गतिः ॥

वृक्षाग्रवासी न च पक्षिराजस्त्रिनेत्रधारी न च शूलपाणिः ।
त्वग्वस्त्रधारी न च सिद्धयोगी जलं बिभ्रन्न घटो न मेघः ॥

अत्र नालिकेरफलमित्यर्थे श्लोकसङ्गतिः ।

सर्वस्वापहरो न तस्करगणो रक्षो न रक्ताशनः,
सर्पो नैव बिलेशयोऽखिलनिशाचारी न भूतोऽपि च ।
अन्तर्धानपटुर्न सिद्धपुरुषो नाप्याशुगो मारुत-
स्तीक्ष्णास्यो न च सायकस्तमिह ये जानन्ति ते पण्डितः ॥

अत्र 'मत्कुण' इत्यर्थस्वीकारे श्लोकसङ्गतिः ।

पानीयं पातुमिच्छामि त्वत्तः कमललोचने ।
यदि दास्यसि नेच्छामि नो दास्यसि पिबाम्यहम् ॥

अत्र दास्यसि=दातुमिच्छसि इति व्यक्तोऽर्थः, दास्यसि=दासी=असि इति गूढोऽर्थः, अथ च गूढार्थस्वीकारे श्लोकसङ्गतिः।

राघवस्य शरैर्घोरैर्घोररावणमाहवे ।
अत्र क्रियापदं ज्ञातुं मर्यादा दश वार्षिकी ॥

अत्र 'राघव' इति सम्बोधने, 'स्य' इत्यस्य च 'षोऽन्तकर्मणि' इति धातोर्लोट्लकारस्य (आज्ञार्थस्य) मध्यमपुरुषैकवचनस्वीकारे सङ्गतिः।

बिम्बाकारं सुधाकारं कान्तावदनपङ्कजम् ।
अत्र क्रियापदं ज्ञातुं मर्यादा दश वार्षिकी ॥

अत्र 'दश' इत्यस्य 'चुम्ब' इत्यर्थे तथा 'मर्यादा (एका) वार्षिकी' इत्यर्थे श्लोकसङ्गतिः ॥ एवमन्यत्रापि ज्ञेयम् ॥

२. एकोनानां धेनूनां पयस्विनीनामित्यर्थे श्लोकसङ्गतिः ॥ ३. द्र. स्वोपज्ञटीका २।२५९॥, पृ.६२॥ ४. "यदि श्वश्र्वा भणिता प्रियवासगृहे दीपकं देहि । ततः कस्माद् मुग्धमुखि! हृदये निवेशयेः दृष्टिम् ॥" इति संस्कृतच्छाया॥ ५. 'तृभूवहिवसिभासिसाधिगडिमण्डिजिनन्दिभ्यश्च' इत्युणादिगणसूत्रम्, मुद्रितोणादिसूत्रे वदधातोरुल्लेखो न दृश्यते ॥ ६. 'वुक्' इति१॥ ७. 'उत्पद्यते' इति१.२॥ ८. '-लोपोवार्ता-' इति १,'-लोकावार्ता-' इति२॥ ९. तुलनीयोऽमरकोषः १।६।७॥ १०. 'चारि-' इति१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## अथाऽऽह्वयोऽभिधा ।

## गोत्रसंज्ञानामधेयाऽऽख्या-
## ऽऽह्वाऽभिख्याश्च नाम च ॥२६०॥

१ आहूयतेऽनेनेति **आह्वयः** । 'ह्वेञ् स्पर्धायां शब्दे च' (भ्वा.उ.अ.), 'पुंसि संज्ञायाम्'३ ।३ ।११८ ॥ इति घः, बाहुलकाद् 'आदेच उपदेशे-'६ ।१ ।४५ ॥ इत्यात्वाभावः, 'एचोऽयवायावः' ६ ।१ ।७८ ॥ । स्वामी तु बाहुलकात् [1]शप्रत्ययमाह, तदा 'आदेच उपदेशेऽशिति' ६ ।१ ।४५ ॥ इति निषेधादात्वं न । २ अभिधीयतेऽनया **अभिधा** । अभिपूर्वाद् दधातेः 'आतश्चोपसर्गे'३ ।३ ।१०६ ॥ इति सूत्रेणाङ् । ३ गूयते शब्द्यतेऽनेन **गोत्रम्** । 'गुङ् अव्यक्ते शब्दे'(भ्वा.आ.अ.), '[2]गुधृवीपचिवचियमिमनितनिसदिक्ष[3]दिभ्य-स्त्रन्[4]'(उणा-६०६)इति त्रन् । ४ संज्ञायतेऽनया **संज्ञा** । सम्पूर्वाज्जानातेः 'आतश्चोपसर्गे' ३ ।३ ।१०६॥ इत्यङ् । ५ नाम एव **नामधेयम्** । 'नामरूपभाग[5]-'(वा-५ ।४ ।३६ ॥)इति धेयः । ६ आख्यायतेऽनया **आख्या** । [आङ्पूर्वः] 'ख्या प्रकथने'(अ.प.अ.), 'आतश्चोपसर्गे' ३ ।३ ।१०६ ॥ इत्यङ् । [यद्वा] 'चक्षिङ् व्यक्तायां वाचि'(अ.आ.से.), आङ्पूर्वः 'चक्षिङः ख्याञ्' २ ।४ ।५४ ॥ इति ख्यादेशः, 'आतश्चोपसर्गे' ३ ।३ ।१०६ ॥ इत्यङ् । ([6] ७ आहूयतेऽनया **आह्वा**) । ८ अभिख्यायतेऽनया **अभिख्या**, आख्यावत् । ९ नमत्यनेन, नयत्यर्थमिति वा[7] **नाम**, पुंक्ली. । 'णमु प्रह्वत्वे शब्दे च' (भ्वा.प.अ.), 'णीञ् प्रापणे'(भ्वा.प.अ.)इत्यस्य वा, 'नामन्-सामन्स्तोमन्होमन्रोमन्लोमन्व्योमन्विधर्मन्पाप्मन्व्येमन्[8]'(उणा-५९०)इति साधु । नामनी, नामानि इत्यादि । नव नाम्नः ॥२६०॥

## सम्बोधनमामन्त्रणम्

१ सम्बोध्यतेऽनेन **सम्बोधनम्**। 'बुध अवगमने' (भ्वा.प.से.), 'बुध बोधने'(दि.आ.अ.) अस्माद्वा 'करणाधि-करणयोः-'३ ।३ ।११७॥ इति करणे ल्युट् । २ आमन्त्र्यतेऽनेन **आमन्त्रणम्** । 'मत्रि गुप्तभाषणे[9]'(चु.आ.से.), 'करणाधि-करणयोः-'३ ।३ ।११७॥ इति करणे ल्युट् । द्वे आमन्त्रणस्य ॥

## आह्वानं त्वभिमन्त्रणम् ।

## आकारणं हवो हूतिः

१ आहूयतेऽनेन **आह्वानम्** । 'ह्वेञ् स्पर्धायां शब्दे च' (भ्वा.उ.अ.) । २ अभिमन्त्र्यत इति **अभिमन्त्रणम्** । 'मत्रि [गुप्त]भाषणे'(चु.आ.से.), उभयत्र ल्युट् । ३ आकार्यत इति **आकारणम्** ।'ण्यासश्रन्थ-'३ ।३ ।१०७ ॥ इति युच् । आकारयति-राह्वाने वर्तते । तथा च माघः-''अहिंकारयितुं महीभुजा''[[10] ]इति । ४ हवनं **हवः** । 'हु दानादनयोः'(जु.प.अ.), 'ॠदोरप्'३ ।३ ।५७ ॥ ५ ह्वानं **हूतिः** । 'ह्वेञ् स्पर्धायां शब्दे च'(भ्वा.उ.अ.), स्त्रियां क्तिनि, 'ग्रहिज्या-'६ ।१ ।१६ ॥ इति सम्प्रसारणम्, 'हलः'६ ।४ ।२ ॥ इति दीर्घः । पञ्च आकारणस्य । तेडवुं, निहुंतरवुं इत्यादि भाषा। [शेषश्चात्र-''हूतौ हक्कारकाऽऽकारौ''[शेषनाममाला२ ।८३]] ॥

## संहूतिर्बहुभिः कृतौ[11] ॥२६१॥

१ संभूय संयुज्य ह्वानं **संहूतिः**, बहुभिः प्रचुरैः संभूय या हूतिः, तस्या एकम् ॥ २६१ ॥

## उदाहार उपोद्घात उपन्यासश्च वाङ्मुखम् ।

१ उद्धृत्याह्रियते **उदाहारः** । 'हृञ् हरणे'(भ्वा.उ.अ.), भावे घञ् । २ उप समीपे उद्धृत्य हन्यते **उपोद्घातः** । 'हन्(हन) हिंसागत्योः'(अ.प.अ.), 'भावे' ३ ।३ ।१८ ॥ इति घञ्, 'हनस्तोऽचिण्णलोः'७।३ ।३२॥ इति तोन्तादेशः, 'अत उपधायाः'७ ।२ ।११६॥ । यदाहुः-''चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं प्रचक्षते''[ ]इति । ३ उपन्यस्यते इति **उपन्यासः** । उपनिपूर्वः 'असु क्षेपणे'(दि.प.से.), भावे घञ् । ४ वाचो मुखं प्रारम्भः **वाङ्मुखम्** । ''मुखमुपाये प्रारम्भे''[अनेकार्थसंग्रहः २ ।२४ ॥]इत्यनेकार्थः । ''चत्वारि [12]वाक्य-प्रारम्भस्य''[ ]इति कश्चित् परम्, तन्न सङ्गच्छते, आद्यनामद्वयं प्रकृतोपपादकस्य दृष्टान्तादेः, अन्त्यद्वयं तु वचनोपक्रमस्य सर्वत्र तथैव दर्शनात् ॥

## व्यवहारो विवादः स्यात्

१ व्यवहरणं **व्यवहारः** । व्यवपूर्वाद् हरतेर्भावे घञ् ।

---

१. स्वामिकृतटीकायां तु 'घः' इति दृश्यते ॥ २. 'गुधुवी-' इति१.३.४॥ ३. '-क्षुदि-' इति४॥ ४. 'गुधृवीपचिवचियमिसदिक्षदिभ्यस्त्रः' इत्युणादिगणे॥ ५. '-भागभ्यो धेयः' इति३, 'भागरूपनामभ्यो धेयः' इति वार्तिकस्वरूपं दृश्यते ॥ ६. कोष्ठान्तर्गतपाठः १.२.४ न दृश्यते ॥ ७. ३प्रतौ नास्ति ॥ ८. 'नामन्सीमन्व्योमन्रोमन्लोमन्पाप्मन्ध्यामन्' इत्युणादिगणसूत्रम् ॥ ९. 'भाषणे' इति१.२.४॥ १०. द्र. टीकासर्वस्वम्, भा-१, १।६।८॥, पृ.१२१॥, तत्र ''प्रहितः प्रधनाय माधवानहमाकारयितुं महीभुजा'' इति दृश्यते ॥ ११. तुलनीयोऽमरकोषः १।६।८॥ १२. 'वाक्प्रार-' इति३ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यत्स्मृतिः-

"वि नानाऽर्थेऽव सन्देहे हरणं हार उच्यते ।
नाना सन्देहहरणाद् व्यवहारः प्रकीर्त्तितः ॥१॥"

[[1]]इति । २ वदनं वादः, विरुद्धो वादो **विवादः**। द्वे विवादस्य । 'झगडा' इति भाषा ॥

**शपथः शपनं शपः ॥२६२॥**

१ शपन्ति तेन, शपनं वा **शपथः**। 'शप आक्रोशे' (दि.उ.अ.), 'शीङ्शपिरुगमिवन्दिजीविप्राणिभ्योऽथः'[2](उणा-३९३)इत्यथप्रत्ययः । २ शप्यत इति **शपनं** । 'ल्युट् च'३।३।११५॥ इति ल्युट् । ३ शप्यतेऽनेन **शपः** । 'पुंसि संज्ञायां घः'३।३।११८॥ इति घः । त्रीणि शपथस्य । 'सम' इति भाषा ॥२६२॥

**उत्तरं तु प्रतिवचः**

१ उत्तरन्त्यनेन, अस्माद्वा **उत्तरम्** । 'तॄ प्लवन-तरणयोः'(भ्वा.प.से.), 'ऋदोरप्'३।३।५७॥ इत्यप्, बाहुलकात् क्लीबत्वम् । २ प्रतीपं वचः **प्रतिवचः**। 'कुगतिप्रादयः' २।२।१८॥ इति समासः। द्वे उत्तरस्य। 'उतर' इति भाषा॥

**प्रश्नः पृच्छाऽनुयोजनम् ।**
**कथंकथिकता च**

१ [3]प्रच्छनं **प्रश्नः**। 'प्रच्छ ज्ञीप्सायाम्'(तु.प.अ.), 'यजयाचयतविच्छप्रच्छरक्षिभ्यो नङ्'[4]३।३।९०॥ इति भावे नङ्, 'च्छ्वोः शूडनुनासिके च'६।४।१९॥ इति छकारस्य शः, 'प्रश्ने चासन्नकालयोः[5]'३।२।११७॥ इति निर्देशाद् 'ग्रहिज्या-६।१।१६॥ इत्यादिना न सम्प्रसारणम् । २ प्रच्छनं **पृच्छा** । 'प्रच्छ ज्ञीप्सायाम्'(तु.प.अ.), 'षिद्भिदादिभ्योऽङ्'३।३।१०४॥ इत्यङ् भिदादिपाठात् ।३[ अनुयुज्यते] **अनुयोजनम्**अनुयोगः। 'युजिर् योगे' (रु.प.अ.),भावे घञ्, 'चजोः कु घिण्ण्यतोः'७।३।५२॥ इति गत्वम्। ४ कथं कथमिति जल्पोऽस्यामिति **कथंकथिकता**। 'मयूरव्यंसकादयः-'२।१।७२॥ इति सूत्रेण समासे निपातनात् टाप्प्रत्ययलोपे तागमे टाप्प्रत्यये साधु। षडक्षरोऽयमखण्डः गङ्गावत् । चत्वारि प्रश्नस्य ॥

**अथ देवप्रश्नः उपश्रुतिः ॥२६३॥**

१ देवेभ्यः प्रश्नः **देवप्रश्नः**। २ उप समीपे श्रूयत इति **उपश्रुतिः**। 'श्रु श्रवणे'(भ्वा.प.अ.), 'स्त्रियां क्तिन्' ३।३।९४॥। द्वे देवप्रश्नस्य। '[6]आसोईशकुन' इति भाषा ॥२६३॥

**चाटु चटु प्रियप्रायम्**

१-२ चटति **चटु, चाटु** । 'चट भेदने'(चु.उ.से.), 'दृ(दृ)सनिजनिचटिरहिभ्य उण्[7]'(उणा-३)इत्युण्, स च णिद्वा, णित्पक्षे वृद्धिः। "चटु इति बाहुलकाद् उः"[[8]]इति माधवः। ३ प्रियं प्रायेण बाहुल्येनात्र **प्रियप्रायम्**। त्रीणि प्रियवचनस्य॥

**प्रियसत्यं तु सूनृतम् ।**

१ 'इन्द्रो भवान्' इति प्रियं परं न सत्यम्, 'काणो भवान्' इति सत्यम्, न प्रियम्, यद्वचः प्रियं सत्यं च तत् **सूनृतम्** इति प्रोच्यते। सुष्ठु नृत्यति सज्जनमनोऽनेन सूनृतम्। 'नृती गात्रविक्षेपे'(दि.प.से.), 'मूलविभुजादेश्च'(वा-३।२।५॥) इति कः, 'अन्येषामपि दृश्यते'६।३।१३७॥ इति सु इत्यस्य दीर्घत्वम्। "सुष्ठु ऋतं सूनृतम्, पृषोदरादिः"[ ]इत्यन्ये। "अपि ते सखि! वल्लभः असूनृतं दधदपि[9] सूनृतभाषी"[[10]]इति वासवदत्ता विरुद्धालङ्कारदन्त्यश्लेषाद् असून् प्राणान् ऋतं सत्यं दधदपीत्यर्थः। प्रियं सत्यं च यद्वचनम्[11], तस्यैकम् ॥

**सत्यं सम्यक् समीचीनमृतं तथ्यं यथातथम् ॥२६४॥**
**यथास्थितं च सद्भूते**

१ सति साधु, सद्भ्यो हितं वा **सत्यम्** । दिगादित्वाद् यत्[12] । २ अर्थेन सह समञ्चति सङ्गच्छते **सम्यक्** । 'अञ्चु गतिपूजनयोः'(भ्वा.प.से.), 'ऋत्विक्-'३।२।५९॥ आदिना क्विन्, 'समः समि'६।३।९३॥ इति सम्यादेशः। सम्यञ्ची, सम्यञ्चि इत्यादि क्लीबे। पुंसि तु सम्यङ्, सम्यञ्चौ, सम्यञ्चः इत्यादि। शसाद्यचि 'अचः'६।४।१३८॥ इत्यकारलोपे, 'चौ' ६।३।१३८॥ इति दीर्घत्वे समीचः इत्यादि। स्त्रियां 'अञ्चतेश्चोपसंख्यानम्'( )इति ङीपि[13] समीची। ३ सम्यगेव **समीचीनम्**। 'विभाषाञ्चेरदिक्स्त्रियाम्'५।४।८॥ इति खः, 'आयनेयी-' ७।१।२॥ इति खस्य ईनादेशः। ४ इयर्त्ति गच्छति जनमनः-

१. द्र. टीकासर्वस्वम्, भा-१, १।६।९॥, पृ.१२२॥, रामाश्रमी १।६।९॥, पृ.८५॥ २. '-वञ्चि-' इत्युणादिगणे ॥ ३. 'प्रच्छ ज्ञीप्सायां प्रच्छनं प्रश्नः' इति३॥ ४. '-रक्षो नङ्' इत्यष्टाध्याय्याम् ॥ ५. '-काले' इत्यष्टाध्याय्याम् ॥ ६. 'असो-' इति४॥ ७. '-चरिचटिभ्यो जुण्' इत्युणादिगणे॥ ८. मा.धातुवृत्तौ न दृश्यते ॥ ९. 'दधति' इति१॥ १०. द्र. टीकासर्वस्वम्, भा-१, १।६।१९॥, पृ.१२८॥ ११. 'यद्वचः' इति१॥ १२. 'यः' इति३॥ १३. 'ङीपि' इति३॥

प्रत्ययमत्रेति **ऋतम्** । 'ऋ गतौ'(जु.प.अ.), वर्तमाने क्तः । ५ तथाशब्दोऽयमृतपर्यायः, तत्र साधु **तथ्यम्** । 'तत्र साधु[:]' ४।४।९८॥ इति सूत्रेण यत्। ६ यथावत् तथाऽत्र **यथातथम्**। ॥२६४॥ ७ यथावत् स्थितमत्र **यथास्थितम्** । ८ सच्च तद्भूतं च **सद्भूतम्**, तत्र । अष्ट सत्यवचसः ॥

**अलीके तु वितथानृते ।**

१ अलति[1] वारयति सद्रतिमिति[2] **अलीकम्** । 'अलं[3] (-ल)(-लँ)(-लञ्) भूषणपर्याप्तिवारणेषु'(अ.प.से.), 'अलीकादयश्च'(उणा-४६५)इति ईकु(कीकन्)प्रत्यये साधुः, तत्र। २ विगतं तथा सत्यमत्रेति **वितथम्**। ३ न ऋतम् **अनृतम्**। यौगिकत्वाद् न सत्यम् असत्यम्, सत्येतरद् इत्यादि । मृषा मिथ्या च अव्ययेषु [अभि-, श्लो-६।१५३४॥]। त्रीणि असत्यवचसः ॥

**अथ क्लिष्टं सङ्कुलं च परस्परपराहतम् ॥२६५॥**

१ क्लिश्यते[4] **क्लिष्टम्**। 'क्लिश उपतापे'(दि.आ.से.), 'क्लिशू[5] विबाधने'(क्र्या.प.वे.) वा, वर्तमाने क्तः, 'यस्य विभाषा'७।२।१५॥ इतीडभावः। २ सङ्कोलति **सङ्कुलम्** । 'कुल संस्त्याने'(भ्वा.प.से.), 'इगुपधज्ञा'३।१।१३५॥ इति कः । "फलिसङ्कुलतालगुहम्"[ ]इत्यादिभट्टिभाषासमावेशः[6] । परस्परपराहतम् अन्योऽन्यविरुद्धवचनम् । यथा-

"अन्धो मणिमुपाविध्यत् तमनङ्गुलिरावयत्[7]।
तमग्रीवः प्रत्यमुञ्चत् तमजिह्वोऽभ्यपूजयत् ॥१॥"

[[9]] । द्वे 'अणमिलतुं वचन' इति भाषायाः ॥२६५॥

**सान्त्वं सुमधुरम्**

१ सान्त्वयति **सान्त्वम्**। 'सान्त्व सामप्रयोगे' (चु.प.से.), चुरादिः, परस्मैपदी, पचाद्यच् । सुष्ठु मधुरम्, सुतरामतिशयेन वा मधुरं सुमधुरम्। एकमत्यन्तमधुरवचसः॥

**ग्राम्यमश्लीलम्**

१ ग्रसति बुद्ध्यादिगुणानिति ग्रामः, तत्र भवं **ग्राम्यम्**। 'ग्रामाद्यखञौ शेषे'[10]४।२।९४॥ इति यः। २ न श्रियं लाति **अश्लीलम्** । 'ला दाने'(अ.प.अ.), 'आतोऽनुपसर्गे कः' ३।२।३॥, कपिलिकादित्वाल्लत्वम् । न श्रीरस्यास्तीति वा सिध्मादित्वाल्लः, 'कपिलिकादीनामुपसंख्यानम्'(वा-८।२।१८॥) इति श्रीशब्दस्य रस्य लत्वम्, तत्तु अव्रीडाजुगुप्साऽमङ्गल-व्यञ्जकत्वेन त्रेधा । अलङ्कारशास्त्रकृतां तु ग्राम्यमश्लीलं च पृथगेव । द्वे ग्राम्यवचनस्य । 'गमारवचन' इति भाषा ॥

**म्लिष्टमस्फुटम् ।**

१ म्लेच्छति स्म **म्लिष्टम्**। 'म्लेच्छ अव्यक्ते शब्दे' (भ्वा.प.से.), 'निष्ठा'३।२।१०२॥ इति क्तः, 'क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्ध-'७।२।१८॥ इत्यादिना साधुत्वम्। न स्फुटमस्फुटम्, अप्रकटवर्णमित्यर्थः। एकमप्रकटाक्षरवचनस्य॥

**लुप्तवर्णपदं ग्रस्तम्[11]**

१ लुप्ता वर्णाः पदानि च यत्र तद् लुप्तवर्णपदम्। अशक्त्या लुप्तवर्णपदं यद्वचोऽसम्पूर्णमिति यावत्, तद् **ग्रस्तम्**। "लुप्तोच्चारितः वर्णः पदं वा यत्र तद्वाक्यं ग्रस्तम्"[ ]इति तु कौमुदी। ग्रस्यते स्म ग्रस्तम्। 'ग्रसु अदने'(भ्वा.आ.से.), 'निष्ठा'३।२।१०२॥ इति क्तः । अयमत्राशयः अनुच्चारिताक्षर-पदवचननामैकं ग्रस्तम्, कीदृग् ग्रस्तम् ? लुप्ता उच्चरत एव लोपं[12] प्राप्ता वर्णा अक्षराणि पदानि चात्र लुप्तवर्णपदम्, असम्पूर्णोच्चारितमित्यर्थः॥

**अवाच्यं स्यादनक्षरम् ॥२६६॥**

१ न वाच्यम् **अवाच्यम्** । 'वच परिभाषणे'(अ.-प.अ.), 'ऋहलोर्ण्यत्'३।१।१२४॥ इति ण्यत्, 'वचोऽशब्द-संज्ञायाम्'७।३।६७॥ इति न कुत्वम् । २ निन्दितान्यक्षराणि यत्र, तद् **अनक्षरम्** । निपातानामनेकार्थत्वाद् नञोऽत्र निन्दार्थता । द्वे अवाच्यवचनस्य ॥२६६॥

**अम्बूकृतं सथूत्कारम्**

---

१. 'अलयति' इति३॥ २. '-द्रतमि-' इति१॥ ३. " 'अल' इति सायणादयः । क्षीरस्वामिमते तु आदित्वे 'आदितश्च'(७।२।१६॥)इतीण्निषेधे 'अल्तः' । सायणादिमते 'अलितः' इति भेदः । काशकृत्स्नस्तु 'अलञ्'(१।६८९, पृष्ठ.११४)इति पठति । तेन अलति अलते इत्युभयं भवति । लकारोत्तरवर्तिन उदात्ताकारस्येत्वात् इट् अलितः । एवमेव कातन्त्रधातुपाठेऽपि पठ्यते' इति क्षीरतरङ्गिणीटिप्पणी-७, पृ.८१॥ ४. 'क्लिश्यति' इति२॥ ५. 'क्लिशु' इति१.४॥ ६. "कपिसङ्कुलभीमगुहम् इत्यादिभट्टिभाषासमावेशः" इति टीकासर्वस्वे, भा-१, १।६।१९॥, पृ.१२८॥ ७. '-रासदत्' इति स्वोपज्ञटीकायाम्, २।२६५॥, पृ.६४॥ ८. 'अस्तवत्' इति १टिप्पणी ॥ ९. द्र. स्वोपज्ञटीका २।२६५॥, पृ.६४॥, अमरक्षीरस्वामिटीका १।५।१९॥, पृ.४६॥ १०. अष्टाध्याय्यां नास्ति ॥ ११. तुलनीयोऽमरकोषः १।६।२०॥ १२. 'लोपप्राप्ता' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ निष्ठीवसम्पर्काद् अनम्बुनः अम्बुनः करणम् **अम्बूकृतम्** । 'च्वौ-'७।४।२६॥ इति दीर्घः । थूदिति करणं थूत्कारः, तेन सह वर्तमानं **सथूत्कारम्** । एकं थूत्कृतसहितवचसः ॥

### निरस्तं त्वरयोदितम् ।

१ निरस्यते स्मेति **निरस्तम्**। निर्पूर्वाद् 'असु क्षेपणे' (दि.प.से.)अस्मात् क्तः। त्वरया उदितं त्वरयोदितम् । एकं त्वरोक्तवचनस्य ॥

### आम्रेडितं द्विस्त्रिरुक्तम्

१ आम्रेड्यते स्म **आम्रेडितम्** । 'म्रेड्ट म्लेड्ट उन्मादे'(भ्वा.प.से.), 'निष्ठा'३।२।१०२॥, 'आर्धधातुकस्ये-'७।२।३५॥ इतीट् । द्वौ वारौ, त्रीन् वारान् वा उक्तं द्विस्त्रिरुक्तम् । 'द्वित्रिचतुर्भ्यः सुच्' ५।४।१८॥ इति सुच् । एकं द्विवारत्रिवारोक्तवचनस्य ॥

### अबद्धं तु निरर्थकम् ॥२६७॥

१ अनर्थकं समुदायार्थस्य वचनम् **अबद्धम्**। यथा-
''जरद्गवः कम्बलपादुकाभ्यां द्वारि स्थितो गायति मङ्गलानि।
तं ब्राह्मणी पृच्छति पुत्रकामा राजन्नुमायां लशुनस्य कोऽर्थ ?
॥१॥'' इत्यत्र समुदायेन एकार्थो नास्ति । अबद्धं, 'बन्ध बन्धने'(क्र्या.प.अ.), क्तः, 'अनिदिताम्-'६।४।२४॥ इति न्लोपः, 'झषस्तथोः'८।२।४०॥ इति धत्वम्, नञ्समासः। निर्गतोऽर्थो यस्मात्, तद् निरर्थकम् । 'उरःप्रभृतिभ्यः कप्' ५।४।१५१॥ इति कप्समासान्तः । 'अबध्यम्' इति यकारोपधमपि । ''अबध्यमवधार्हे स्यादनर्थकवचस्यपि''[अनेकार्थ-३।४६९, मेदिनी, यान्तवर्गः, श्लो-७१]इति कोषदर्शनात् । एकं निरर्थकवचनस्य ॥२६७॥

### पृष्ठमांसादनं तद् यत् परोक्षे दोषकीर्त्तनम् ।

१ परोक्षेऽप्रत्यक्षे परदोषाणां कीर्त्तनं कथनं यत्, तत् **पृष्ठमांसादनम्** । पृष्ठमांसस्यादनमिव पृष्ठमांसादनम् । एकं परोक्षे दोषकथनस्य ॥

### मिथ्याऽभियोगोऽभ्याख्यानम्

१ शतं द्रव्यं मे धारयसीत्यादिरभियोगः, मिथ्या चासावभियोगश्च **मिथ्याभियोगः**, असत्याक्षेपः। अभ्याख्यायते **अभ्याख्यानम्**। अभिपूर्वः 'ख्या प्रकथने'(अ.प.अ.), अस्माद् ल्युट्। ''अध्ययनत्वराभियोगः, स च दाम्भप्रयुक्तोऽभ्याख्यानम्''[ ]इति सुभूतिवचनमनागमम्, वाक्यप्रक्रमनिबन्धात्। एकमसद्दोषारोपस्य ॥

### सङ्गतं हृदयङ्गमम् ॥२६८॥

१ सङ्गच्छते स्म **सङ्गतम्**। सम्पूर्वः 'गम्लृ गतौ' (भ्वा.प.अ.), कर्त्तरि क्तः, 'अनुदात्तोपदेश-'६।४।३७॥ इति न्लोपः । २ हृदयं गच्छति **हृदयङ्गमम्** । 'गमश्च'३।२।४७॥ इति खच्,'अरुर्द्विषत्-'६।३।६७॥ इति मुम् । द्वे मनःप्रियवचनस्य ॥२६८॥

### परुषं निष्ठुरं रूक्षं विक्रुष्टम्

१ पृणाति पूरयति परं कोपेनेति **परुषम्** । 'पृ पालनपूरणयोः'(जु.प.से.), 'वृहिनिपृकलिवदित्रपिपूरिभ्य उषन्' (उणा-५१५)इत्युषन् । २ निशिते तीक्ष्णे तिष्ठति **निष्ठुरम्** । निपूर्वः 'ष्ठा गतिनिवृत्तौ'(अ.प.अ.), 'मद्गुरादयश्च'(उणा-४१) इति कुरच्, कित्वाद् 'आतो लोप इटि च'६।४।६४॥ इत्यालोपः, 'उपसर्गात् सुनोतिसुवतिस्यतिस्तोभति-'८।३।६५॥ इत्यादिना षत्वम् । ३ रूक्षयति **रूक्षम्** । 'रूक्ष वाक्पारुष्ये'(चु.-उ.से.), अच्। ४ विक्रुश्यते **विक्रुष्टम्**। 'क्रुश आह्वाने रोदने च'(भ्वा.प.अ.), निष्ठा। निकृष्टमपि। चत्वारि कठिनवचनस्य॥

### अथ घोषणा ।

### उच्चैर्घुष्टम्

१ घोषणं **घोषणा**। 'घुष स्तुतौ'( ), घुषेर्ण्यन्ताद्, 'ण्यासश्रन्थ-'३।३।१०७॥ इति युच् । २ उच्चैस्तारं यथा स्यात् तथा घोषणं **उच्चैर्घुष्टम्** । 'घुष स्तुतौ'( ),भावे क्तः, 'घुषिरविशब्देन'७।२।२३॥ इतीडभावः । द्वे बहुजनज्ञापनार्थमुद्घोषणस्य ॥

### वर्णनेडा स्तवः स्तोत्रं स्तुतिर्नुतिः ॥२६९॥

### श्लाघा प्रशंसार्थवादः

१ वर्णनं **वर्णना** । 'वर्ण वर्णक्रियागुणविस्तारेषु' (चु.उ.से.), 'ण्यासश्रन्थ-'३।३।१०७॥ इति युच् । २ ईडनं

१. 'थूत्कारेण' इति ४प्रतेष्टिप्पणी ॥ २. '-वचसः' इति३॥ ३. तुलनीयोऽमरकोषः १।६।१३॥ ४. 'म्रेढ म्लेढ-' इति२, 'म्रेड्ट म्लेट्ट-' इति स्वामी, 'म्रेट्ट म्रेड्ट म्लेट्ट-' इति सायणः, वस्तुतः काशकृत्स्नसम्मतोऽयं धातुपाठः, द्र. क्षीरतरङ्गिणीटिप्पणी-२, पृ.५४॥ ५. '-स्येट्' इति२॥ ६. उणादिगणे तु 'पृनहिकलिभ्य उषच्' इति दृश्यते ॥ ७. 'पारुष्ये' इति क्षीरतरङ्गिण्यादौ ॥ ८. '-श्यति' इति२॥ ९. क्षीरतरङ्गिण्यादौ 'घुषिर् विशब्दने' इति दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**ईडा** । 'ईड स्तुतौ'(अ.आ.से.), 'गुरोश्च हल:'३।३।१०३॥ इत्यङ्[1], टाप् । **३** स्तूयतेऽनेन **स्तवः** । 'ष्टुञ् स्तुतौ' (अ.उ.अ.), 'ऋदोरप्'३।३।५७॥ इत्यप् । **४** स्तूयतेऽनेन **स्तोत्रम्** । 'ष्टुञ् स्तुतौ'(अ.उ.अ.), 'दाम्नीशसु(शस)युयुजस्तु'३।२।१८२॥ इति ष्ट्रन् । **५** स्तूयतेऽनया **स्तुतिः** । 'अजिपिजिस्तुभ्यः करणे'[2](वा-३।३।९४॥)इति क्तिन् । **६** नूयतेऽनया **नुतिः** । 'णु स्तुतौ'(अ.प.अ.), बाहुलकात् करणे क्तिन् **॥२६९॥ ७** श्लाघनं **श्लाघा**। 'श्लाघृ कत्थने'(भ्वा.आ.से.)। **८** प्रशंसनं **प्रशंसा** । 'शंस(शंसु) स्तुतौ'(भ्वा.प.से.), 'षिद्भिदादिभ्योऽङ्'३।३।१०४॥ । **९** अर्थस्य प्रशस्यवदनम् **अर्थवादः** । 'वद (वदि) अभिवादनस्तुत्योः'(भ्वा.आ.से.), भावे घञ्। नव प्रशंसायाः ॥

**सा तु मिथ्या विकत्थनम् ।**

**१** सा वर्णना मिथ्या असत्यार्था **विकत्थनम्** उच्यते। विरुद्धं कत्थनं विकत्थनम् । 'कत्थ श्लाघने'[3](भ्वा.आ.से.), 'ल्युट् च'३।३।११५॥ इति ल्युट्। एकं मिथ्यास्तुतेः ॥

**जनप्रवादः कौलीनं विगानं वचनीयता ॥२७०॥**

**१** जनस्य प्रतीपो वादः **जनप्रवादः** । **२** कुलस्य इदं **कौलीनम्** । 'कुलात् खञ्'[4]४।१।१३९॥ । ग्रन्थकृत्तु "कुलस्य जल्पः"[स्वोपज्ञटीका २।२७०]इति व्युत्पत्तिमाह । **३** विरुद्धं गीयत इति **विगानम्** । 'गै शब्दे'(भ्वा.प.अ.), ल्युट् । **४** वचनीयस्य भावो **वचनीयता** । चत्वारि लोकापवादस्य **॥२७०॥**

**स्यादवर्ण उपक्रोशो वादो निष्पर्यपात् परः।**
**गर्हणा धिक्क्रिया निन्दा कुत्सा क्षेपो जुगुप्सनम् ॥२७१॥**

**१** वर्णः स्तुतिः, तद्विरुद्धः **अवर्णः** । विरुद्धार्थेऽत्र नञ्। **२** उपक्रोशनम् **उपक्रोशः**। 'क्रुश आह्वाने'[5](भ्वा.प.से.), भावे घञ् । **३-५** निरः परेरपाच्च उपसर्गात् परोऽग्रे वादः, तेन **निर्वादः, परिवादः** । 'उपसर्गस्य घञ्यमनुष्ये बहुलम्' ६।३।१२२॥ इति विकल्पेन दीर्घत्वे परीवादोऽपि। अपवदनम् **अपवादः** । **६** गर्हणं **गर्हणा** । 'गर्ह गल्ह कुत्सायाम्' (भ्वा.आ.से.), ल्युट्। गर्होऽपि । **७** धिक्करणं **धिक्क्रिया** । धिक्पूर्वात् कृञः[6] 'कृञः श च'३।३।१००॥ इति भावे शः, शित्त्वाद्[7] भावे यक्, 'रिङ् शयग्लिङ्क्षु'७।४।२८॥ इति रिङादेशः, शप्रत्ययस्तु स्त्रियामेव । **८** निन्दनं **निन्दा** । 'णिदि कुत्सायाम्'(भ्वा.प.से.), भिदादित्वादङ् । **९** कुत्सनं **कुत्सा**। 'कुत्स आक्षेपे'[8](चु.आ.से.), भिदादित्वादङ् । **१०** क्षेपणं **क्षेपः**। 'क्षिप प्रेरणे'(तु.उ.से.), भावे घञ् । द्व्यक्षरोऽयम्, यन्महेश्वरः- "क्षेपो विलम्बे निन्दायाम्"[विश्वप्रकाशकोशः, पान्तवर्गः, श्लो-७], यथा-"आत्मश्लाघां परक्षेपं न काङ्क्षन्ति[9] विचक्षणाः[10]" [[11]]इति । **११** जुगुप्स्यते **जुगुप्सनम्** । 'गुप गोपनकुत्सनयोः' (भ्वा.आ.से.), 'गुप्तिज्किद्भ्यः सन्'३।१।५॥ इति सन्, 'सन्यङोः'६।१।९॥ इति द्वित्वम्, 'ल्युट् च'३।३।११५॥ इति ल्युट् । 'अः(अ) प्रत्ययात्'३।३।१०२॥ इत्यप्रत्यये जुगुप्साऽपि। एकादश निन्दायाः **॥२७१॥**

**आक्रोशाऽभीषङ्गाक्षेपाः शापः**

**१** आक्रोशनम् **आक्रोशः** । 'क्रुश आह्वाने रोदने च'[12] (भ्वा.प.से.), भावे घञ् । **२** अभिषञ्जनं पराभिमुख्येन वाक्ये[13] योजनम् **अभीषङ्गः** । 'षञ्ज सङ्गे'(भ्वा.प.अ.), भावे घञ्, 'चजोः-'७।३।५२॥ इति कुत्वम्, 'उपसर्गस्य घञि-'६।३।१२२॥ इति दीर्घः । **३** आक्षेपणम् **आक्षेपः** । 'क्षिप प्रेरणे'(तु.उ.से.), भावे घञ् । **४** शपनं **शापः** । 'शप आक्रोशे'(भ्वा.उ.अ.), भावे घञ्, 'अत उपधायाः'७।२।११६॥, चत्वारि शापस्य ॥

**स क्षारणा रते ।**

**१** स शापो रते मैथुनविषये **क्षारणा** उच्यते, मैथुनमुद्दिश्य[14] गालीत्यर्थः । स्त्रीनिमित्तं पुंनिमित्तं वा मैथुनं प्रतिय आक्रोश उद्घोषणा, सा क्षारणेति भावः । 'क्षर सञ्चलने' (भ्वा.प.से.), प्रयोजकण्यन्ताद् 'ण्यासश्रन्थ-'३।३।१०७॥ इति

---

१. 'इत्यः' इति२॥ २. वस्तुतस्तु 'श्रुयजिस्तुभ्यः करणे' इति वार्तिकस्वरूपम् ॥ ३. '-श्लाघायाम्' इति क्षीरतरङ्गिण्यादौ ॥ ४. अष्टाध्याय्यां 'कुलात् खः' इति सूत्रं दृश्यते, अतो वृद्ध्यभावः स्यात्, निमित्ताभावात्, तेन "कुलस्यापत्यं कुलीनः, 'कुलात् खः'४।१।१३९॥ इति खः, खस्य ईनादेशः । तस्येदं कौलीनम् । 'तस्येदम्'४।३।१२०॥ इत्यण्, आदिस्वरवृद्धिः" ईदृग्रीत्याऽपि साधनीयम् ॥ ५. '-आह्वाने रोदने च' इति क्षीरतरङ्गिण्यादौ ॥ ६. २.४नास्ति ॥ ७. शित्त्वात् 'तिङ्शित् सार्वधातुकम्'३।४।११३॥ इति सार्वधातुकसंज्ञा, 'सार्वधातुके यक्'३।१।६७॥ इति यक् इत्याशयः ॥ ८. '-अवक्षेपणे' इति क्षीरतरङ्गिण्यादौ ॥ ९. 'काङ्क्षति' इति३.४॥ १०. '-क्षणः' इति३॥ ११. द्र. अनेकार्थसंग्रहकैरवाकरकौमुदीटीका, भा-१, २।२८९॥, पृ.१६९॥ १२. '-रोदने च' इति २.३.४नास्ति ॥ १३. 'वाक्ययो-' इति१॥ १४. '-मुपदिश्य' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

युच् । क्षरणाऽपि, "क्षरणाक्षारणाक्रोशाः साभिशापाभिमैथुनम्"[1] । क्लीबमपि, "नीचमाक्षारणं यः स्यादाक्षेपो मैथुनं प्रति"[2]इति शब्दार्णवात् । नीचमिति पुंविहीनस्य संज्ञा । आक्षारणाऽपि । परपुरुषनिमित्तं स्त्रियाः परस्त्रीनिमित्तं वा पुंस आक्रोशस्य एकम्, अथवा दूषणनामैकम् ॥

**विरुद्धशंसनं गालिः**

१ विरुद्धं शंसनम् अवद्योद्भावनम्, गालयते गुणान् **गालिः**, स्त्रियाम् । 'गल भक्षणे'(चु.आ.से.), इन् । विरुद्धकथननामैकं गालिरिति[2] ॥

**आशीर्मङ्गलशंसनम् ॥२७२॥**

१ आशासनम् **आशीः**, स्त्रीलिङ्गः । आङ्पूर्वः 'शासु इच्छायाम्'(अ.आ.से.) अस्मात् 'क्विप् च'३।२।७६॥ इति क्विप्, 'शास आशासश्च क्वावुपधाया इत्त्वं वाच्यम्[3]'(वा-३।३।१०८॥)इत्याकारस्य इत्त्वम्, 'ससजुषो रुः'८।२।६६॥, 'र्वोरुपधाया-'८।२।७६॥ इति दीर्घः । मङ्गलस्य शंसनं मङ्गलशंसनम् । एकमाशिषः ॥२७२॥

**श्लोकः कीर्त्तिर्यशोऽभिख्या समाज्ञा**

१ श्लोक्यते **श्लोकः** । 'श्लोकृ सङ्घाते'(भ्वा.आ.से.), भावे घञ् । २ कीर्त्यते **कीर्त्तिः** । 'कृत संशब्दने'(चु.-प.से.), 'ऊतियूति[जूति]हेतिसातिकीर्त्तयश्च[4]'३।३।९७॥ इति साधु । ३ अश्नुते व्याप्नोति दिश इति **यशः**, क्लीबे । 'अशूङ्[5] व्याप्तौ'(स्वा.आ.से.), 'अशेर्यश्चादेः(-दिः)[6]'(हैमोणा-९५८)इत्यस् । यद्वा ई लक्ष्मीमश्नुते व्याप्नोति । 'अशूङ् व्याप्तौ'(स्वा.आ.से.), अस्मात् '-असून्'(उणा-६२८)इत्यसुन् । "याति गच्छत्यर्थिजनेषूपकारित्वमिति यशः, पृषोदरादिः"[ ]इति तु भट्टः । ४ अभिख्यानम् **अभिख्या** । 'ख्या प्रकथने'(अ.प.अ.), 'आतश्चोपसर्गे'३।३।१०६॥ इत्यङ्, स च स्त्रियाम् । ५ समैः सर्वैराज्ञायते **समाज्ञा** । 'ज्ञा अवबोधने' (क्र्या.प.से.), 'आतश्चोपसर्गे'३।३।१०६॥ इत्यङ् । "समैः सर्वैर्ज्ञायते, घञर्थे कः 'समज्ञा'"[7]इति पुरुषोत्तमो ह्रस्वमध्यमाह । समाङ्पूर्वो जानातिः ख्यातौ । अत एव "ख्यातो विश्रुतः समाज्ञाते[8]"[ ]इति रत्नकोषः । "ततोऽङि समाज्ञा" [ ]इति तु कौमुदी । "समाख्या"[ ]इति भागुरिः । "अज गत्यादौ'(भ्वा.प.से.), 'समज्या-'३।३।९९॥ इत्यादिना क्यपि, 'क्यपि प्रतिषेधः'(वा-२।४।५६॥)इत्यजेर्न वीभावः, समज्या कीर्त्तिः"[ ]इति तु मैत्रेयः । पञ्च कीर्त्तेः ॥

**रुशती पुनः ।**

**अशुभा वाक्**

१ रुशति हिनस्ति परमिति **रुशती** । 'रुश रिश हिंसायाम्'(तु.प.अ.), 'लटः शतृशानचौ-'३।२।१२४॥ इति शतरि, 'उगितश्च'४।१।६॥ इति ङीष् (ङीप्) 'आच्छीनद्योर्नुम्' ७।१।८०॥ इति विकल्पान्नुमोऽभावः । रुशती हिंस्रेत्यर्थः । आश्रयलिङ्गश्चायम्, तेन रुशन् शब्दः, रुशद् वच इत्यपि, त्रिलिङ्गोऽयमिति हृद्यम् । "रिशती"[ ]इत्येके । अमरस्तु 'उषती[9]'[अमरकोषः १।६।१८॥]इति[10] मूर्धन्यमध्यमाह । "उष दाहे'(भ्वा.प.से.) शतृप्रत्ययः, "आगमशासनमनित्यम्" [परिभाषा-९३।२]इति 'शप्श्यनोर्नित्यम्'७।१।८१॥ इति शतुर्नुमभावः । "उषत्यादेः स्त्रीलिङ्गत्वादेव कामचारात् स्त्रीत्वम्" [टीकासर्वस्वम् १।६।१८॥]इति भट्टः । "स्त्रीनिर्देशः स्त्रियां प्रायः प्रयोगदर्शनात् शत्रन्तत्वप्रदर्शनार्थं च"[ ]इति तु[11] कौमुदी । अशुभा अकल्याणी, निन्दार्था वाग् रुशतीत्यर्थः, यथा-'ब्राह्मणो हन्तव्यः' इति । एकमशुभवाचः ॥

**शुभा कल्या**

१ शुभस्वभावा वाक्, कलासु साधुः **कल्या** । 'तत्र साधुः'४।४।९८॥ इति यत् । अन्तस्थातृतीयप्रथमोपधोऽयम् । एकं शुभवचनस्य ॥

**चर्चरी चर्भटी समे ॥२७३॥**

१ चारु चर्यतेऽनया **चर्चरी** । २ चारु भट्यतेऽनया

१. द्र. रामाश्रमी १।६।१५॥, पृ.८७॥ २. 'इति' इति १.२.४नास्ति ॥ ३. 'आशासः क्वावुपधाया इत्त्वं वाच्यम्' इति वार्तिकस्वरूपं दृश्यते ॥ ४. '-सातिहेति-' इत्यष्टाध्याय्याम् ॥ ५. क्षीरतरङ्गिण्यादौ ङकारानुबन्धो न दृश्यते ॥ ६. अत्र हैमसूत्रग्रहणं विचारणीयम्, पाणिनीये 'अशेर्देवने युट् च'(उणा-६३०)इत्यस्य सत्त्वात् ॥ ७. द्र. टीकासर्वस्वम्, भा-१, १।६।११॥, पृ.१२३॥, तत्र 'घञर्थे कः' इत्यस्य स्थाने 'घञर्थे कविधानं कर्तव्यम्' इति दृश्यते ॥ ८. द्र. टीकासर्वस्वम्, भा-१, १।६।११॥, पृ.१२३॥, तत्र 'ख्यातो' इत्यस्य स्थाने 'प्रख्यातो' इति दृश्यते ॥ ९. १.२.३नास्ति ॥ १०. टीकासर्वस्वसम्मतः पाठः । रामाश्रमीकारस्तु 'रुशती' इति तालव्यमध्यस्वरादिरहितमाह ॥ ११. 'इत्याह मूर्धन्यमध्यं मूर्धन्यान्तं' इति३॥ १२. ४प्रतौ नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**चर्भटी** । उभावपि पृषोदरादित्वात् साधू । 'चर्चरि:' इति तृतीयस्वरान्तोऽपि । चाचरीनाम्नी[1] द्वे । हर्षक्रीडादिवचन-[2]पर्यायावेतौ ॥२७३॥

**य: सनिन्द उपालम्भस्तत्र स्यात् परिभाषणम्[3] ।**

१ उपालम्भो द्विविध:-गुणाविःकरणपूर्वको निन्दापूर्वकश्च। आद्यो यथा-महाकुलजस्य भवतः किमुचितमिदम्। द्वितीयो यथा-बन्धकीसुतस्य तवोचितमेवेदमिति । तयोर्मध्ये य: सनिन्द उपालम्भस्तत्र **परिभाषणम्** । परिभाष्यते तत् परिभाषणम् ।'भाष व्यक्तायां वाचि'(भ्वा.आ.से.), ल्युट्। तथा च भागुरि:-"निन्दापूर्व उपालम्भ: परिभाषणमुच्यते"[[4]]इति । मैवं कृथा इति वाच्यता इत्यर्थे परिभाषणम् । आलापनियमयोरपि पर्यायोऽयम् । यन्महेश्वर:-

"परिभाषणमालापे नियमे परिभाषणम् ।
नन्दोपालम्भवचने परिभाषणमिष्यते ॥१॥"

[विश्वप्रकाशकोश:, णान्तवर्ग:, श्लो-१०६-७]इति । त्रिष्वपि यथा-"बाला इव प्रवर्तन्ते कृतेऽपि परिभाषणे ॥"[[5]]इति ॥

**आपृच्छाऽऽलाप: सम्भाष:**

१ आपृच्छनम् **आपृच्छा** । 'प्रच्छ ज्ञीप्सायाम्' (तु.प.अ.), 'षिद्भिदादिभ्योऽङ्'३।३।१०४॥, 'ग्रहिज्या-' ६।१।१६॥ इति सम्प्रसारणम् । २ आलपनम् **आलाप:** । 'लप परिभाषणे'(भ्वा.प.से.), भावे घञ् । ३ सम्भाषणं **सम्भाष:** । 'भाष व्यक्तायां वाचि'(भ्वा.आ.से.), भावे घञ्। एकवारवचनमालाप:, तस्य त्रीणि॥

**अनुलाप: स्यान्मुहुर्वच: ॥२७४॥**

१ मुहु: असम्भ्रमेण पुन: पुनर्वचनम्, अनुलपनम्[6] **अनुलाप:** ।'लप परिभाषणे[7]'(भ्वा.प.से.), भावे घञ् । एकं पौन:पुन्योक्ते: ॥२७४॥

**अनर्थकं तु प्रलाप:**

१ अनर्थकं प्रयोजनशून्यमुन्मत्तादिवचनं **प्रलाप:** । प्रलपनं प्रलाप: । भावे घञ् ॥

**विलाप: परिदेवनम्[8] ।**

१ विलपनं **विलाप:** । परिदीव्यते **परिदेवनम्** ।'दिवु परिदेवने'(चु.आ.से.), चुरादि:, ल्युट् । २ परिदेवनमनुशोचनम्, तद्वाचकं वचनमपि **परिदेवनम्** । द्वे शोकवचनस्य ॥

**उल्लाप: काकुवाक्**

१ उल्लपनम् **उल्लाप:**। भावे घञ् । कक्यत इति काकु:। 'कक[9] लौल्योपतापयो:'(भ्वा.आ.से.), 'स्वादयँ:[10]' इत्युप्रत्यये दीर्घत्वम्। काक्वा वचनं काकुवाक् । शोकभयादिभिर्ध्वनेर्विकार: काकु: । यदमर:-"काकु: स्त्रियां विकारो य: शोकभीत्यादिभिर्ध्वने:"[अमरकोष:१।६।१२॥]। "ध्वने: शब्दस्य शोकभीत्यादीना यो विकारो विकृति:, सा काकु:"[ ] इति तट्टीका । एकं शोकभयादिभि: शोषितकण्ठवचनस्य ॥

**अन्योऽन्योक्ति: संलापसंकथे ॥२७५॥**

१ अन्योऽन्येन उक्ति: अन्योन्योक्ति: । सम्मुखं लपनं[11] **संलाप:** । "रहसि भाषणं संलाप:"[ ]इति तु कौमुदी। २ संकथनं **संकथा** । 'कथ वाक्यप्रबन्धे'(चु.उ.से.), भिदादित्वादङ् । द्वे अन्योन्यं उक्तिप्रत्युक्त्यो:[12] ॥२७५॥

**विप्रलापो विरुद्धोक्ति:**

१ विरुद्धं प्रलपनं **विप्रलाप:** । भावे घञ् । विरुद्धा उक्ति: विरुद्धोक्ति: । एकं विरुद्धोक्ते: ॥

**अपलापस्तु निह्नव:[13] ।**

१ अपलपनम् **अपलाप:** । भावे घञ् । २ निह्नवनं **निह्नव:**। 'ह्नुङ् अपनयने'(अ.आ.अ.), 'ऋदोरप्'३।३।५७॥ इत्यप्। द्वे अपलापस्य । 'ओलविवुं[14]' इति भाषा ॥

**सुप्रलाप: सुवचनम्[13]**

१ सुष्ठु प्रलपनं **सुप्रलाप:** । सुष्ठूच्यते सुवचनम्। एकं शोभनोक्ते: ॥

**सन्देशवाक् तु वाचिकम् ॥२७६॥**

१ सन्दिश्यतेऽसौ सन्देश:, तस्य वाक् सन्देशवाक्। यया सन्दिष्टोऽर्थ उच्यत इत्यर्थ: । **वाचिकम्** । 'वाचो व्याहृतार्थायाम्[15]'५।४।३५॥ इति ठक्, 'ठस्येक:'७।३।५०॥, 'किति च'७।२।११८॥ इति वृद्धि: । अन्येन अन्योऽन्यस्मै

---

१. 'चाचरि-' इति१.२.४॥ २. 'हर्षक्वाद्यव-' इति१, 'हर्षकाद्यव-' इति२, 'हर्षक्रीडाद्यव-' इति४॥ ३. तुलनीयोऽमरकोष १।६।१४॥ ४. द्र. टीकासर्वस्वम्, भा-१, १।६।१४॥, पृ.१२५॥ ५. द्र. अनेकार्थसङ्ग्रहकैरवाकरकौमुदीटीका, भा-२, ५।१४॥, पृ.४१७॥ ६. 'अनुलेप-' इति२॥ ७. 'रप लप व्यक्तायां वाचि' इति क्षीरतरङ्गिण्यादौ ॥ ८. तुलनीयोऽमरकोष: १।६।१६॥ ९. 'ककि-' इति३, क्षीरतरङ्गिण्यादौ 'कक लौल्ये' इति दृश्यते॥ १०. मूलं मृग्यम्, अथवा बाहुलकादुण् ॥ ११. 'लापनं' इति१॥ १२. 'उक्तप्रत्युक्ते:' इति२, '-क्तो:' इति१॥ १३. तुलनीयोऽमरकोष: १।६।१७॥ १४. 'उलविवउं' इति१.२॥ १५. 'व्याप्तता-' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदाह-त्वयैवं कर्त्तव्यमिति सन्देशस्तस्य एकं वाचिकमिति। "लेखादिनाऽधिगतेऽर्थे मुखस्वरूपं वाचिकम्"[अम.क्षीर. १।५।१८॥]इति क्षीरस्वामी ॥२७६॥

**आज्ञा शिष्टिर्निराङ्‌निभ्यो देशो नियोगशासने । अववादोऽपि**

१ आज्ञापनम् **आज्ञा** । आङ्पूर्वः 'ज्ञा अवबोधने'(क्र्या.प.से.), 'आतश्चोपसर्गे'३।३।१०६॥ इत्यङ्, अनित्यत्वाच्चुरादिणिजभावः । २ शासनं **शिष्टिः** । 'शासु अनुशिष्टौ' (अ.प.से.), 'स्त्रियां क्तिन्'३।३।९४॥, 'शास इदङ्हलोः' ६।४।३४॥ इत्युपधाया इत्वम्, 'तितुत्र-'७।२।९॥ इतीण्निषेधः। ३-५ निराङ्‌निभ्य उपसर्गेभ्योऽग्रे देशः, तेन निःशेषेण समन्ताद् नितरां देशनं **निर्देशः**। 'दिश अतिसर्जने'(तु.प.अ.), भावे घञ् । एवम् **आदेशः**, **निदेशः**[1] । ६ नियोजनं **नियोगः**। 'युजिर् योगे'(रु.उ.अ.), भावे घञ्, 'चजोः-'७।३।५२॥ इति कुत्वम् । ७ शिष्यतेऽनेन **शासनम्** । 'शासु अनुशिष्टौ' (अ.प.से.), 'करणाधिकरणयोश्च'३।३।११७॥ इति करणे ल्युट् । ८ अवनम्य वदनम् **अववादः** । अष्टौ आज्ञायाः ॥

**अथाऽऽहूय प्रेषणं प्रतिशासनम् ॥२७७॥**

१ आहूय आकार्य यत्प्रेषणं मोचनं, तस्य नामैकं **प्रतिशासनम्** । 'शासु अनुशिष्टौ'(अ.प.से.), ल्युट् ॥२७७॥

**संवित् सन्धाऽऽस्थाऽभ्युपायः सम्प्रत्याङ्भ्यः परः श्रवः। अङ्गीकारोऽभ्युपगमः प्रतिज्ञाऽऽगूश्च सङ्गरः॥२७८॥**

१ प्रकृताङ्गीकारः पक्षोक्तिश्चेत्युभया हि प्रतिज्ञा । संवेदनं **संवित्** । 'विद ज्ञाने'(अ.प.से.), सम्पदादित्वात् क्विप्। २ सन्धानं **सन्धा**। 'डुधाञ् धारणपोषणयोः'(जु.उ.अ.), 'आतश्चोपसर्गे'३।३।१०६॥ इत्यङ् । ३ आस्थानम् **आस्था**। 'ष्ठा गतिनिवृत्तौ'(भ्वा.प.अ.), 'आतश्चोपसर्गे' ३।३।१०६॥ इत्यङ् । ४ अभ्युपायनम् **अभ्युपायः** । अभ्युपपूर्वाद् 'इङ् अध्ययने' (अ.आ.अ.)अस्माद् 'इङश्च'३।३।२१॥ इति घञ् । 'अय गतौ' (भ्वा.आ.से.)इत्यस्माद्वा, भावे घञ् । ५-७ सम्प्रत्याङ्भ्य उपसर्गेभ्यः परः श्रवः, तेन **संश्रवः**, **प्रतिश्रवः**, **आश्रवः**। समाङ्प्रतिपूर्वः शृणोतिरङ्गीकारे, तस्माद् 'ॠदोरप्'३।३।५७॥ इत्यप्। एते त्रयस्तालव्यरेफमध्याः । ८ अङ्गीकरणं **अङ्गीकारः** । भावे घञ् । ९ अभ्युपगमनम् **अभ्युपगमः**। भावे घञ्, 'नोदात्तोपदेश-'७।३।३४॥ इति न वृद्धिः । १० प्रतिज्ञानं **प्रतिज्ञा** । 'आतश्चोपसर्गे'३।३।१०६॥ इत्यङ् । ११ आगच्छति पौरुषमनया **आगूः**, स्त्रीलिङ्गः । आङ्पूर्वो 'गम्लृ गतौ'(भ्वा.प.अ.)अस्माद् 'भ्रमेश्च डूः'(उणा-२२६)इति सूत्रे चकारो 'गमेर्डोः'(उणा-२२५)इत्यतो 'गमेः' इत्याकर्षणार्थः । यदा च 'ऊ[ङ्] च गमादीनाम्'(वा-६।४।४०॥)इति क्विप् ऊङ् च, तदा खलपूवत्। "आगूर्यतेऽनया आगूः । 'गुरी उद्यमे'(तु.आ.से. अथवा चु.उ.से.), क्विप्, रेफान्तोऽयम्"[ [2] ]इति लिङ्गसूरिः । १२ सङ्गरणम् **सङ्गरः**। 'गॄ निगरणे'(तु.प.से.), 'ॠदोरप्'३।३।५७॥ इत्यप् । द्वादश प्रतिज्ञायाः । नियमसमाधी[3] अपि ॥२७८॥

**गीतनृत्यवाद्यत्रयं नाट्यं तौर्यत्रिकं च तत् ।**

१-२ गीतनृत्यवाद्यानां त्रयं समुदितं **नाट्यम्**, **तौर्यत्रिकं** चोच्यते । नटस्येदं नाट्यम् । 'छन्दोगौ क्थिवक (छन्दोगौक्थिक) याज्ञिकबह्वृचनटाञ्ञ्यः'४।३।१२९॥, 'यस्येति च'६।४।१४८॥, 'अत उपधायाः'७।२।११६॥ । 'तुरी त्वरायाम्'(जु.प.से.), 'ऋहलोर्ण्यत्'३।१।१२४॥, 'हलि च'८।२।७७॥ इति दीर्घत्वं च। तूर्यं मूरजादिः, तत्र भवं तौर्यं शब्दरूपम् । त्रयोंऽशा अस्य त्रिकम् । 'संख्याया अतिशदन्तायाः कन्'५।१।२२॥ । तौर्येण त्रिकं तौर्यत्रिकम् 'तृतीया'२।१।३०॥ इति योगविभागात् समासः । "तौर्यं च तत् त्रिकं चेति कर्मधारयः"[ ]इति तु पञ्जिका । द्वे समुदितगीतनृत्यवाद्यत्रयस्य॥

**सङ्गीतं प्रेक्षणार्थेऽस्मिन्**

१ अस्मिन्निति गीतनृत्यवाद्यत्रये प्रेक्षणार्थे प्रेक्षणनिमित्तं प्रारब्धे **सङ्गीतम्** उच्यते । सम्भूय गीयतेऽत्रेति सङ्गीतम्। 'गै शब्दे'(भ्वा.प.अ.), वर्तमाने क्तः, 'आदेचः-'६।१।४५॥ इत्यात्वम्, 'घुमास्था-'६।४।६६॥ इतीत्वम् । सभ्यानां प्रेक्षणनिमित्तं प्रारब्धगीतनृत्यवाद्यत्रयस्यैकम् ॥

**शास्त्रोक्ते नाट्यधर्मिका ॥२७९॥**

१ शास्त्रोक्ते[4] भरतादिशास्त्रनिर्दिष्टं गीतनृत्यवाद्यत्रयं तन्नामैकम्, [नाट्यं धर्मोऽस्या] नाट्यधर्मी[5], स्त्रीलिङ्गः।

---

१. 'निर्देशः' इति३.४॥ २. लिङ्गयसूरिकृतामरपदविवृतिटीकायाम्-"आगमनं संवेदनम् आगूः । ऊकारान्तः । आगुरते वा आगूः । 'गूरी उद्यमने'। रेफान्तः स्त्रीलिङ्गः ।" इति दृश्यते, अमरकोषः, भा-१, १।५।५॥, पृ.९४॥ ३. '-साधी' इति१.२॥ ४. '-क्तं' इति२॥ ५. '-धर्मा' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यद्वाचस्पतिः-"नाट्यधर्मी तु स्त्रियाम्"[१] । 'नाट्यधर्मीति पारिभाषिको[२] धर्मीशब्दः । नाट्यधर्म्येव[३] **नाट्यधर्मिका** । स्वार्थे कनि, 'केऽणः'७।४।१३॥ इति ह्रस्वत्वम् ॥२७९॥

अथ गीतादिभेदाननुक्रमेणाह-

## गीतं[1] गानं[2] गेयं[3] गीतिर्गान्धर्वम्[5]

१ गीयत इति **गीतम्** । 'गै शब्दे'(भ्वा.प.अ.), वर्तमाने क्तः, 'आदेच उपदेशेऽशिति'६।१।४५॥ इत्यात्वम्, 'घुमास्था-'६।४।६६॥ इतीत्वम् । २ गीयत इति **गानम्** । 'गै शब्दे'(भ्वा.प.अ.), ल्युट्, 'आदेचः-'६।१।४५॥ इत्यात्वम्। ३ गीयते **गेयम्** । ४ गानं **गीतिः**। 'गै शब्दे'(भ्वा.प.अ.), 'स्त्रियां क्तिन्'३।३।९४॥, 'आदेचः-'६।१।४५॥ इत्यात्वम्, 'घुमास्था-'६।४।६६॥ इतीत्वम् । ५ गन्धर्वैः कृतं **गान्धर्वम्**। कृतेऽर्थेऽण् । "रागगीत्यादिकं गीतम्, प्राविशिक्यादिध्रुवारूपं गानम्, पदस्वरतालावधानात्मकं गान्धर्वम्"[४]इति भैरताद्युक्तो विशेषोऽत्र नाश्रितः । पञ्च गीतस्य ॥

## अथ नर्त्तनम्[1] ।

## नटनं[2] नृत्यं[3] नृत्तं[4] च लास्यं[5] नाट्यं[6] च ताण्डवम्[7] ॥२८०॥

१ नृत्यत इति **नर्त्तनम्** । 'नृती गात्रविक्षेपे'(दि.प.से.), ल्युट्, 'युवोरनाकौ'७।१।१॥, 'उपधाया लघोर्गुणः'। २ [नट्यते **नटनम्** । 'नट नृत्तौ'(भ्वा.प.से.), ल्युट् । ] ३ नृत्यते **नृत्यम्**। 'नृती गात्रविक्षेपे'(दि.प.से.), 'ऋदुपधत्वाच्चाक्लृपिचृतेः' ३।१।११०॥ इति क्यप् । ४ नर्त्तनं **नृत्तम्** । 'नृती गात्रविक्षेपे' (दि.प.से.), भावे क्तः । ५ लस्यते **लास्यम्** । 'लस [६]संश्लेषण-क्रीडनयोः'(भ्वा.प.से.), ऋहलोर्ण्यत्'३।१।१२४॥ । ६ नट्यत इति **नाट्यम्** । 'नट अवस्पन्दने'(चु.उ.से.), 'ऋहलोर्ण्यत्' ३।१।१२४॥ । ७ ताण्ड्येन मुनिना प्रोक्तम्, 'कलापिवैशम्पाय-नान्तेवासिभ्यश्च'४।३।१०४॥ इति णिनिः, 'आपत्यस्य च[७] तद्धितेऽनाति' ६।४।१५१॥ इति यलोपः, ताण्डि[८] नृत्यशास्त्रम्, तदस्यास्तीति, 'अन्येभ्योऽपि दृश्यते'(वा-५।२।१०९॥)इति वः, पृषोदरादित्वा-दिकारस्याकारः **ताण्डवम्** । "तण्डुना मुनिना प्रोक्तं ताण्डवम्" [अम.क्षीर.१।६।१०॥]इति तु स्वामी[९] । "तडिधातोस्ताण्डवम्" [ ]इति तु कौमुदी । पुंक्लीबलिङ्गोऽयम् । नाट्यशास्त्रे [१०]नृत्तलास्यनाट्यताण्डवानां भेदोऽस्ति, स नेहाश्रितः, तथा हि- "अङ्गविक्षेपमात्रं विवाहाभ्युदयादौ नृत्यम्[११]। ललितकरणाङ्ग-हाराभिनय(-यं)[१२]कौशिकीवृत्तिप्रधानं वासकसज्जाचरितं [१३]डौविलिकादिनिबद्धं श्रिष्टत्वाद् लास्यम्। सर्वरसं पञ्चसन्धि चतुर्वृत्ति दशरूपकाश्रयं नटकर्म नाट्यम् । [१४]उद्धतकरणाङ्ग-हारनिर्वर्त्यमारभटीवृत्तिप्रधान(-नं) गीतकासारितकादौ तण्डुना प्रोक्तं ताण्डवम्"[१५]इति ॥२८०॥

विशेषत आह-

## मण्डलेन तु यन्नृत्यं[१६] स्त्रीणां हल्लीसकं[1] हि तत् ।

१ स्त्रीणां यन्मण्डलेन मण्डलाकारेण नृत्यं तत् **हल्लीसकम्** । हेलया लस्यतेऽस्मिन्निति हल्लीसकम्, क्लीबेऽयम्। वाचस्पतिस्तु-"हल्लीसकोऽस्त्रियाम्"[१७] इत्याह । ([१८]घूमरीति भाषा नामैकम्)॥

## पानगोष्ठ्यामुच्चतालम्[1]

१ पानगोष्ठ्याम् आपाने नृत्यम्[१९], उच्चस्तालोऽत्रेति **उच्चतालम्** ॥

## रणे वीरजयन्तिका[1] ॥२८१॥

१ रणे सङ्ग्रामे यद् नृत्यं तन्नामैकं **वीरजयन्तिका**। जयन्ती पताका, जयन्त्येव जयन्तिका, वीराणां जयन्तिका वीरजयन्तिका ॥२८१॥

## स्थानं नाट्यस्य रङ्गः[1] स्यात्

स्थीयतेऽस्मिन् स्थानम्, 'ष्ठा गतिनिवृत्तौ'(भ्वा. प.अ.), 'करणाधिकरणयोः-'३।३।११७॥ इत्यधिकरणे ल्युट् । नाट्यस्य स्थानं प्रदेशः **रङ्गः** उच्यते । रमन्ते जनमनांस्यत्रेति रङ्गः । 'रमु क्रीडायाम्'(भ्वा.आ.अ.), 'गन्गम्यादेः'[२०](उणा-१२०)इति गन्। रज्यत्यस्मिन् जन इति वा । 'रञ्ज रागे'(भ्वा.उ.अ.), घञ् । नृत्यस्थाननामैकम्[२१] ॥

---

१. द्र. स्वोपज्ञटीका २।२७९॥, पृ.६६॥ २. '-भाषको' इति३॥ ३. '-धर्मेव' इति३॥ ४. द्र. स्वोपज्ञटीका २।२८०॥, पृ.६६॥ ५. 'भार-' इति४॥ ६. 'लस श्लेष-' इति१, क्षीरतरङ्गिण्यादौ 'लस श्लेषणक्रीडनयोः' इत्येव दृश्यते ॥ ७. १.३.४नास्ति ॥ ८. 'ताण्डिः' इति३.४॥ ९. स्वामिकृतामरकोशटीकायां "तण्डु(मुनि)ना प्रणीतं ताण्डवम्" इति दृश्यते, अम.क्षीर. १।६।१०॥, पृ.५०॥ १०. 'नृत्य-' इति२.३॥ ११. 'नृत्तम्' इति१॥ १२. 'कौमुदी-' इति२॥ १३. 'गोवलि-' इति३॥ १४. 'उद्धती-' इति२॥ १५. द्र. क्षीरस्वामिकृतटीका १।६।१०॥, पृ.५०॥, स्वोपज्ञटीका २।२८०॥, पृ.६६॥ १६. 'यन्नृत्तं' इति२, तथा मुद्रितकोशे ॥ १७. द्र. स्वोपज्ञटीका २।२८१॥, पृ.६६॥ १८. कोष्ठान्तर्गतपाठः १.३.४नास्ति ॥ १९. 'नृत्तम्' इति१॥ २०. 'गन्गम्यद्योः' इत्युणादिगणसूत्रम् ॥ २१. १.३.४नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**पूर्वरङ्ग उपक्रमः ।**

१ नाट्यस्येत्यत्राप्यनुकृष्यम्, नाट्यस्योपक्रमः प्रारम्भः **पूर्वरङ्गः**, [१]रजत्यस्मिन् जन इति रङ्गः, मण्डपो नाट्यं वा बुद्धिस्थम्, पूर्वो रङ्गे पूर्वरङ्गः प्रत्याहारादिः, रङ्गात् पूर्व इति वा, राजदन्तादित्वात् पूर्वनिपातः । श्रीहर्षस्तु- "रङ्गशब्देन तौर्यत्रिकं ब्रुवन् नाट्ये रङ्गप्रयोगस्य पूर्वतां मन्यमानः पूर्वश्चासौ रङ्गश्च"[२]इति समासममंस्त । गीतनृत्यवाद्यानां त्रयाणां प्रारम्भस्यैकोक्त्या नामैकं पूर्वरङ्गः, उपक्रमो नाम गीतनृत्यवाद्यानां प्रारम्भ इत्यर्थः ॥

**अङ्गहारोऽङ्गविक्षेपः**

१ अङ्गानां हरणं स्थानात् स्थानान्तरनयनम् **अङ्गहारः**। 'हृञ् हरणे'(भ्वा.उ.अ.), भावे घञ् । २ अङ्गानां हार इव, शोभाजनकत्वात्, अथवा हरस्यायं हारः, हरेणाभिनीतत्वात्, अङ्गप्रधानो हारः अङ्गहारः स्थिरहस्तादित्वात् त्रिंशद्भेदः। "वृश्चिकभ्रमरादित्वात् त्रिंशत्प्रकारोऽङ्गुर्या(ल्या)दिविन्यासरूपोऽङ्गहारः" [ ]इति तु कौमुदी । "अङ्गहारस्त्वङ्गहारिर्द्विग्रादिमाम्बिका-[म्बिका]"[३]इति शब्दार्णवः । २ अङ्गानां विक्षेपः **अङ्गविक्षेपः**। द्वे अङ्गहारस्य । 'अङ्गचालन' इति भाषा ॥

**व्यञ्जकोऽभिनयः समौ ॥२८२॥**

१ व्यनक्ति भावान् इति **व्यञ्जकः** । 'अञ्जू [४]व्यक्तिम्रक्षणकान्तिगतिषु'(रु.प.से.)अस्मात् 'ण्वुल्तृचौ'३।१।१३३॥ इति ण्वुल् । २ आभिमुख्यं नीयतेऽर्थोऽनेनेति **अभिनयः** । 'णीञ् प्रापणे'(भ्वा.उ.अ.), 'एरच्'३।३।५६॥ इत्यच् । हृद्गतक्रोधादिभावाभिव्यञ्जकस्य द्वे ॥२८२॥

**स चतुर्विध आहार्यो रचितो भूषणादिना ।**
**वचसा वाचिकोऽङ्गेनाऽऽङ्गिकः सत्त्वेन सात्त्विकः ॥२८३॥**

१ सोऽभिनयः हस्तादिभिः पदार्थसूचकः चतुर्विधः आहार्यादिभेदात् चतुःप्रकारः, तेषु भूषणादिना रचितोऽभिनयः **आहार्यः** । २ वचसा निर्वृत्तो **वाचिकः**। ३ अङ्गेन निर्वृत्तः **आङ्गिकः**, भ्रूविक्षेपादिः । ४ सत्त्वं मनोगुण आशयो वा, तेन निर्वृत्तः **सात्त्विकः** । यदाह-"सत्त्वोत्कटे मनसि ये प्रभवन्ति भावास्ते सात्त्विकाः"[६]इति । त्रिष्वपि अध्यात्मादित्वाट्ठञ्, 'निर्वृत्तेऽक्षु(क्ष)द्युतादिभ्यः'४।४।१९॥ इति योगविभागा[त् ठक् वा] । अभिनयस्य चतुःप्रकारनामानि ॥२८३॥

**स्यान्नाटकं प्रकरणं भाणः प्रहसनं डिमः ।**
**व्यायोगसमवकारौ वीथ्यङ्केहामृगा इति ॥२८४॥**
**अभिनेयः प्रकाराः स्युः**

१ नाटयति नर्त्तयति सामाजिकमनांसीति **नाटकम्**। 'नट नृत्ये[७]'(भ्वा.प.से.), णिजन्तः, 'ण्वुल्तृचौ'३।१।१३३॥ इति ण्वुल्। २ वस्त्वादिकं काव्याभिधेयमात्मशक्योत्पाद्य प्रकुरुते यत्र काव्येन तत् **प्रकरणम्** । 'करणाधिकरणयोश्च'३।३।११७॥ इत्यधिकरणे ल्युट् । ३ भण्यन्ते उक्तिमन्तः क्रियन्ते अप्रविष्टा अपि पात्रविशेषा अत्रेति **भाणः**, पुंक्लीबलिङ्गः । ४ एकस्य बहूनां वा चरितं प्रहस्यते यत्र तत् **प्रहसनम्** । 'हस(हसे) हसने'(भ्वा.प.से.), अधिकरणे ल्युट् । ५ "डमो(डिमो) डिम्बो विद्रवः"[ ]इति पर्यायास्तद्योगादयं **डिमः** । ६ व्यायामे युद्धनियुद्धप्राये युज्यन्ते पुरुषा अत्रेति **व्यायोगः** । 'युजिर् योगे'(रु.उ.अ.), अधिकरणे घञ् । ७ समवक्रियन्ते सङ्घातीक्रियन्ते नेतारोऽत्रेति **समवकारः** । बाहुलकादधिकरणे घञ् । ८ सर्वेषां रसानां लक्षणानां च वीथी श्रेणीव **वीथी** । ९ उत्क्रमेणोन्मुखी सृष्टिर्जीवितं प्राणा यासां उत्सृष्टिकाः शोचन्त्यः[८] स्त्रियः, ताभिरङ्कोऽङ्कनं यस्य स उत्सृष्टिकाङ्कः, तदेकदेशः **अङ्कः**, भीमवत् । १० ईहा चेष्टा मृगस्येव स्त्रीमात्रार्था यत्र स **ईहामृगः** ॥२८४॥ एते नाटकाद्या दश अभिनेयस्य प्रबन्धस्य प्रकारा भेदाः स्युः, एतानि दशरूपकानीत्यर्थः । ([९]नाटकादीनि दशप्रबन्धभेदनामानीति । अत्र अभिनेयशब्दः चतुर्थवर्गपञ्चमैकादशस्वरमध्यः) ॥

**भाषाः षट् संस्कृतादिकाः।**

१ भाष्यन्ते **भाषाः**। 'भाष व्यक्तायां वाचि'(भ्वा.आ.से.), कर्मणि घञ् । षडिति षट् सङ्ख्याः संस्कृतादिकाः संस्कृत१-प्राकृत२मागधी३सौरसेनी४पैशाची५अपभ्रंश६लक्षणाः । संस्कृतादीनां षण्णामेकोक्त्या नामैकं भाषा इति ॥

**भारती सात्वती कैशिक्यारभट्यौ च वृत्तयः ॥२८५॥**

---

१. 'रज्यत्य-' इति२.४॥ २. द्र. स्वोपज्ञटीका २।२८२॥, पृ.६७॥ ३. तुलनीयोऽमरकोषः १।७।१६॥ ४. द्र. रामाश्रमी १।७।१६॥, पृ.९९॥ ५. 'व्यक्ति' इति २.३.४नास्ति ॥ ६. द्र. अमरकोशक्षीरस्वामिटीका १।६।१७॥, पृ.५१॥ ७. 'नृत्तौ' इति क्षीरतरङ्गिण्यादौ॥ ८. 'शोच्यन्त्यः' इति३.४॥ ९. कोष्ठान्तर्गतपाठः ३.४नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ भारती वाणी, तत्प्रधाना वृत्तिरपि **भारती**, तत्र वाचिकाभिनयप्राधान्यात् । २ सदिति प्रत्याख्यानरूपं संवेदनम्, तद् यत्रास्ति तत् सत्वत् मनः, तस्येयं **सात्वती**, सात्विकाभिनये प्राधान्यात् अथवा सत् सत्वं रूपं विद्यते येषां ते सत्वन्तः, तेषामियम्, सत्वं च तत्र परिच्छिद्रान्वेषणोपायप्रतिभानं[1] वैचित्र्योत्प्रेक्षणलक्षणप्रकाशलाघवात्मकम् । ३ केशाः किञ्चिदप्यर्थक्रियाजातमकुर्वन्तो यथा देहशोभोपयोगिनः, तद्वत् सौन्दर्योपयोगो व्यापारः **कैशिकी**, आहार्याभिनयप्राधान्यात् । यद्वा विष्णोः केशेषु बध्यमानेषु भवा कैशिकी । अध्यात्मादित्वाट्ठक् । यदाह-

"विचित्रैरङ्गहारैश्च देवो लीलासमन्वितैः ।
बबन्ध यच्छिखापाशं कैशिकी तत्र निर्मिता ॥१॥"

[[2]]इति । ४ इयर्तीति अराः, भटाः सोत्साहाः अनलसाः, अराश्च ते भटाश्च अरभटाः, तेषामियम् **आरभटी**, [3]आङ्गिकाभिनयप्राधान्यात् । भारत्यादीनामारभट्यान्तानां चतसृणामेकोक्त्या नामैकं **वृत्तयः**। बहुवचनं चात्र चतुरपेक्षया ॥२८५॥

## वाद्यं वादित्रमातोद्यं तूर्यं तूरं स्मरध्वजः ।

१ वादयति ध्वनयति तद्[4] **वाद्यम्** । वदेर्ण्यन्तात् कर्मणि 'अचो यत्'३।१।९७॥ । वदति वा वाद्यम्। 'ऋहलोर्ण्यत्' ३।१।१२४॥ । २ वदति आहन्यमानमिति **वादित्रम्**। 'वद व्यक्तायां वाचि'(भ्वा.प.से.), 'भूव(वा)दिगृभ्यो णित्रन्'(उणा-६१०)इति णित्रन्, णित्त्वाद् वृद्धिः । ३ आ समन्तात् तुद्यते ताड्यत इति **आतोद्यम्** । 'तुद व्यथने'(तु.उ.अ) कर्मणि 'ऋहलोर्ण्यत्' ३।१।१२४॥ । ४ तूर्यत इति **तूर्यम्**, पुंक्ली. । 'तूरी गतित्वरणहिंसनयोः[5]'(दि.आ.से.), 'ऋहलोर्ण्यत्'३।१।१२४॥ । ५ तूर्यत इति **तूरम्** । 'इगुपधज्ञा-'३।१।१३५॥ इति कः । ६ स्मरस्य ध्वज इव **स्मरध्वजः** । षट् सामान्यतो वादित्रस्य ॥

## ततं वीणाप्रभृतिकम्

१ वीणादिकं वाद्यं **ततम्**[6] । 'तनु विस्तारे'(त.उ.से.), 'तनिमृङ्भ्यां किच्च'(उणा-३६८)इति तन्, 'अनुदात्तोपदेश-' ६।४।३७॥ इति न्लोपः । ततं तन्त्र्यादिकं वीणाप्रभृतिरादिर्यस्य तद्वीणाप्रभृतिकम् । सामान्यत एकं तान्तिवाद्यस्य ॥

## तालप्रभृतिकं घनम् ॥२८६॥

१ [7]कास्यमयं वादित्रं तालस्तत्प्रभृतिकं प्रभृतिग्रहणात् [8]कांस्यतालादि । हन्यते **घनम्** । 'हन्(हन) हिंसागत्योः' (अ.प.अ.), घञ्, 'मूर्तौ घनः'३।३।७७॥ इति घनः । एकं तालादेः ॥२८६॥

## वंशादिकं तु शुषिरम्[9]

१ वंशो वेणुस्तदादिकं वादित्रं शुषिः छिद्रमस्त्यस्य **शुषिरम्**। '[10]ऊषशुषिमुष्कमधो रः'५।२।१०७॥ । "शुषीरं शुषिरं शिष्यं शीर्षं तालव्यादयः"[[11]]इति शभेदे[12] । सामान्यतो वेणुवाद्यस्यैकम् ॥

## आनद्धं मुरजादिकम्[13] ।

१ आनह्यते स्म **आनद्धम्** । 'नह(णह)बन्धने' (दि.उ.अ.), भावे क्तः, 'झषस्तथोः-'८।२।४०॥ इति धत्वम्। मुखे चर्मणा यद्बद्धं तदानद्धमित्यर्थः । मुरजादिकमित्यादिशब्दात् पटहादिग्रहः । सामान्यत एकं मढितवाद्यस्य ॥

## वीणा पुनर्घोषवती विपञ्ची कण्ठकूणिका॥२८७॥ वल्लकी

१ वेति प्रजायते स्वरोऽस्यामिति **वीणा** । 'वी गति-प्रजनकान्त्यादिषु[14]'(अ.प.अ.) अस्माद्धातोः 'रास्नासास्ना [स्थूणा]-वीणाः'(उणा-२९५)इत्यनेन नप्रत्यये णत्वे गुणाभावे च रूपम्। २ घोषोऽस्त्यस्यां **घोषवती** । 'तदस्यास्ति'५।२।९४॥ इति मतुप्, '[मादुपधायाश्च] मतोर्वोऽयवादिभ्यः'८।२।९॥ इति मस्य वत्वम्, 'उगितश्च'४।१।६॥ इति ङीष्(ङीप्)। ३ विपञ्चयति विस्तारयति स्वरानिति **विपञ्ची**। 'पचि विस्तारे चलने चे[15]'(चु.प.से.), णिजन्तात् पचाद्यच्, गौरादिः । ४ कण्ठं कूणयते **कण्ठकूणिका**। 'कूण सङ्कोचे'(चु.उ.से.), ण्वुल् ॥२८७॥ ५ वल्लते स्वरोऽस्यां **वल्लकी** । 'वल[16] वल्ल संवरणे[17]'(भ्वा.आ.से.), 'क्वुन् शिल्पिसंज्ञयोरपूर्वस्यापि' (उणा-१९०)इति क्वुन्, गौरादिः। सामान्यतः पञ्च वीणायाः॥

---

१.'-भावनं' इति३॥ २. द्र. स्वोपज्ञटीका २।२८५॥, पृ.६७॥ ३. 'अङ्गिक-' इति२॥ ४. ३नास्ति ॥ ५. '-हिंसयोः' इति१.२॥ ६. इतोऽग्रे २प्रतौ 'तन्त्रीतननात् ततं' इति दृश्यते ॥ ७. 'कांश्य-' इति३.४॥ ८. 'कांश्य-' इति३॥ ९. तुलनीयोऽमरकोषः १।७।४॥ १०. 'ऊष-' इति२.३॥ ११. द्र. टीकासर्वस्वम्, भा-१, १।७।४॥, पृ.१३६॥, तत्र "शिरीषं शुषिरं शिष्यं शीर्षं तालव्यशादयः" इति दृश्यते ॥ १२. 'शब्दप्रभेदः' इति४॥ १३. तुलनीयोऽमरकोषः १।७।४॥ १४. 'वी गतिप्रजनकान्त्यसनखादनेषु' इति धातुपाठस्वरूपम् ॥ १५. 'पचि विस्तारवचने' इति क्षीरतरङ्गिण्यादौ॥ १६. 'वल्ल-' इति१.२॥ १७. '-संवरणे सञ्चरणे च' इति मा.धातुवृत्तिः, 'वल संवरणे' इति क्षीरतरङ्गिणी॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**साऽथ तन्त्रीभिः सप्तभिः परि[1]वादिनी ।**

१ सा वीणा सप्तभिः तन्त्रीभिः स्वरान् परिस्फुटं वदतीत्येवंशीला **परिवादिनी** । सम्पृचादित्वाद् घिनुण् । यद्वा परितो वादः परिवादः, तद्योगाद् 'अत इनिठनौ'५।२।११५॥ इतीनिः, 'ऋन्नेभ्यो ङीष्(ङीप्)'४।१।५॥ । यस्यां वीणायां सप्त तन्त्र्यो भवन्ति, तस्या एकं परिवादिनीति । अन्येऽपि तन्त्रीभेदाद् वीणाभेदाः एकतन्त्र्याद्या एकविंशतितन्त्र्यन्ता ज्ञेयाः ॥

**शिवस्य वीणाऽनाल[1]म्बी**

१ न आलम्बते **अनालम्बी** । 'लबि अवस्रंसने [च]'(भ्वा.आ.से.), पचाद्यच्, गौरादिः ॥

**सरस्वत्यास्तु क[1]च्छपी ॥२८८॥**

१ कच्छपसदृक्त्वात्[1] **कच्छपी** ॥२८८॥

**नारदस्य तु महती**

१ महत्त्वाद् **महती** ।'ऋन्नेभ्यः-'४।१।५॥इति ङीष् (ङीप्)॥

**गणानां तु प्रभा[1]वती ।**

१ गणा ईश्वरसेवकास्तद्वीणा प्रभाऽस्त्यस्यां[2] **प्रभावती**। 'तदस्यास्ति-'५।२।९४॥ इति मतुप्, 'उगितश्च'४।१।६॥ इति ङीप्॥

**विश्वावसोस्तु बृहती**

१ विश्वावसोर्गन्धर्वविशेषस्य वीणा बृहत्त्वाद् **बृहती**॥

**[3]तुम्बुरोस्तु कला[1]वती ॥२८९॥**

१ [3]तुम्बुरोर्देवविशेषस्य वीणा कला रूपमस्त्यस्यां **कलावती** ॥२८९॥

**चण्डालानां तु कटोल[1]वीणा चाण्डा[2]लिका च सा।**

१ कट्यते तन्त्रीभिराव्रियते कटोलः । 'कटे वर्षावरणयोः'(भ्वा.प.से.), 'कटिपटि-'(हैमोणा-४९३) इत्योलः। कटोलाख्या वीणा **कटोलवीणा** । २ चण्डालैः कृता **चाण्डालिका**। ठक् । चण्डालवीणायाः द्वे । 'रबाब' इति भाषा । शैषिकाणि-''वल्लकी काण्डवीणा कुवीणा च[5] डक्कारी किन्नरी [तथा], सारिका खुङ्खुणी''[शेषनाममाला८३-८४॥] । हरादिचण्डालान्तवीणानामानि ॥

**कायः को[1]लम्बकस्तस्याः**

१ तस्याः वीणायाः कायः अलाबुदण्डककुभसमुदायस्तन्त्री[र]हितः **कोलम्बकः**। के मूर्ध्नि अवलम्बन्ते तन्त्र्योऽत्रेति कोलम्बकः । 'लबि अवलम्बने'( ), पृषोदरादिः । कुल्यते सम्यक् स्त्यायतेऽनेन शब्द इति वा। 'कुल संस्त्याने' (भ्वा.प.से.), बाहुलकादम्बकच् । एकं वीणाङ्गनिष्पन्नसमुदायस्य॥

**उप[1]नाहो निबन्धनम् ॥२९०॥**

१ उपनह्यतेऽनेन **उपनाहः** । 'नह(णह) बन्धने' (दि.उ.अ.), 'हलश्च'३।३।१२१॥ इति करणे घञ् । वीणाया निबन्धनं येन चर्मणा क्रियते तन्नाम, 'खूंटी' इति भाषा । प्रान्ते यत्र तन्त्र्यो निबध्यन्ते, तन्नाम वा ॥२९०॥

**दण्डः पुनः प्रवा[1]लः स्यात्**

१ वीणायां[7] दण्डः प्रवलति **प्रवालः**, पुंक्ली. ।'वल वल्ल संवरणे[8]'(भ्वा.प.से.), 'ज्वलितिकसन्तेभ्यो णः' ३।१।१४०॥, कर्मणि घञ् वा ([9]'नालि' इति भाषा )॥

**ककुभस्तु प्रसे[1]वकः ।**

१ कं वातं स्कुभ्नाति **ककुभः** । स्कुभेः सौत्रान्मूलविभुजादित्वात् कः, पृषोदरादित्वात् सलोपः । कक्यते वा ककुभः[11]। 'कक लौल्ये'(भ्वा.आ.से.), 'ककेरुभः'(हैमोणा-३३३)इत्युभः। ''ककुभः प्रसेवक उक्तः'[ ]इति रत्नकोषः। २ ([12]प्रसीव्यत इति प्रसेवः, स्वार्थे के **प्रसेवकः**) ।'सेवृ[13] पेवृ[14] मेवृ सेवने[15]' (भ्वा.आ.से.), दन्त्यादिः, 'क्वुन् संज्ञायामपूर्वस्यापि[16]'(उणा-१९०) इति क्वुन् [वा] । यद्वा 'षिवु तन्तुसन्ताने'(दि.प.से.), 'अकर्त्तरि च कारके-'३।३।१९॥ इति घञन्तात् संज्ञायां कन्, 'हलश्च' ३।३।१२१॥ इति घञन्ताद्वा कन्प्रत्ययो द्रष्टव्यः। वीणाप्रान्ते ककुभप्रसेवकौ वर्त्तेते इत्यन्वयः । वीणादण्डाधःस्थितं शब्दगाम्भीर्याय दारुमयं भाण्डं यच्चर्मणाऽऽच्छाद्यते, तन्नाम्नी द्वे । 'मोरणा[17]' इति भाषा ॥

**मूले वंशशलाका स्यात् कलिका कूणिकाऽपि च ॥२९१॥**

१. 'सदृशत्वात्' इति३॥ २. '-ऽस्त्यस्याः' इति२॥ ३. 'तुम्ब-' इति३.४॥ ४. १.२.४नास्ति ॥ ५. इतोऽग्रे २प्रतौ 'काण्डवीणायाः' इति दृश्यते ॥ ६. तुलनीयोऽमरकोषः १।७।७॥ ७. 'वीणादण्डः' इति१॥ ८. '-संवरणे सञ्चरणे च' इति मा.धातुवृत्तिः, 'वल संवरणे' इति क्षीरतरङ्गिणी ॥ ९. कोष्ठान्तर्गतपाठः १.३.४नास्ति ॥ १०. इतोऽग्रे २प्रतौ 'पुंक्लीः' इति दृश्यते॥ ११. १.३.४नास्ति ॥ १२. कोष्ठान्तर्गतपाठः १.३.४नास्ति ॥ १३. 'एवृ शेवृ षेवृ सेवृ केवृ खेवृ ग्लेवृ पेवृ प्लेवृ म्लेवृ सेवने' इति क्षीरतरङ्गिणी, 'षेवृ गेवृ ग्लेवृ प्लेवृ म्लेवृ सेचने' इति मा.धातुवृत्तिः ॥ १४. ' षेवृ ' इति४॥ १५. ' मेचने' इति२॥ १६. 'क्वुन् शिल्पिसंज्ञयोरपूर्वस्यापि' इत्युणादिगणसूत्रम् ॥ १७. 'मौरणा' इति१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वीणाया मूले या वंशशलाका सा कलयति तन्त्री **कलिका** । 'कल शब्दसंख्यानयोः'(भ्वा.आ.से.) । "संज्ञायां क्वुन् [प्रत्ययः]"[मा.धातुवृत्तिः, भ्वादिः, धातुसं-३२५] इति माधवः । यद्वा 'कल संख्याने[1]'(चु.उ.से.), णिजन्तः, कलयति कलिः । 'अच इः'(उणा-५७८), ततो ङीषि कली, स्वार्थे कन्, 'केऽणः'७।४।१३॥ इति ह्रस्वत्वे टापि कलिका। २ कूणयते तन्त्रीं **कूणिका** । 'कूण शब्दे[2]'(चु.उ.से.), संज्ञायां क्वुन्, 'प्रत्ययस्थात्-'७।३।४४॥ इतीत्वम् । 'खीली' इति भाषा ॥२९१॥

ततनामवाद्यभेदानुक्त्वा घननामवाद्यभेदानाह-

**कालस्य क्रियया मानं तालः**

१ क्रियया आवापनिःक्रमनादिकया कालस्य निमेषादेर्मानं परिच्छेदकं प्रतिष्ठाहेतुस्तन्नामैकं **तालः**, चच्चपुटादिः। यदाह-

"चच्चपुटश्चाचपुटः षट्पितापुत्रकस्तथा ।
उद्घतो वस्तुकश्चापि तालाः पञ्चविधाः स्मृताः॥१॥"

[ ]इति । अयं स्वर इयत्कालं गेयः, इयत्कालं विलम्बितः, इयत्कालं द्रुतम्, इयत्कालं मध्यमिति बोधयितुमीदृशैर्हस्तैरङ्गुल्याकुञ्चनप्रसारणादिक्रियाभिर्नर्त्तितव्यं गातव्यं चेति कालः क्रियायाः प्रमाणमिति । तल्यते प्रतिष्ठीयतेऽनेनेति तालः। 'तल प्रतिष्ठाकरणयोः'(चु.प.से.), चुरादिः, घञ् । हलायुधटीका तु-"कालो निमेषादिः, क्रिया आवापनिःक्रमाह्वयादिका, तयोर्माने परिच्छेदे तालः"[ ]इति भिनत्ति ॥

**साम्यं पुनर्लयः ।**

१ सामान्यतः साम्यं कालक्रिययोः समत्वं तस्यैकं **लयः**। लीयतेऽत्र लयः । 'लीङ् श्लेषणे'(दि.आ.अ.), 'एरच्' ३।३।५६॥ इत्यच् । गानगेययोरन्यूनाधिक्ये श्लिष्टता लयः, स च द्रुतविलम्बितमध्यलक्षणः ॥

अथ विशेषेणाह-

**द्रुतं विलम्बितं मध्यमोघस्तत्त्वं घनं क्रमात्॥२९२॥**

१ द्रवन्ति गच्छन्ति समुदायगतिप्रदर्शनार्थं करादयोऽत्रेति **द्रुतम्** । १ विलम्बन्ते[3] करचरणादयः प्रत्येकं गतिविशेषप्रदर्शनाय अत्रेति **विलम्बितम्** । १ द्रुतविलम्बितयोर्मध्यभवत्वाद् **मध्यम्**। 'अ साम्प्रतिके'४।३।९॥ इति मध्यशब्दादकारप्रत्ययः । एषु यथाक्रममोघादित्रयम् । 'उच समवाये'(दि.प.से.), घञ्, पृषोदरदित्त्वाद् घत्वम्, तत्वम् । करचरणानां तननं तत् । 'तनु विस्तारे'(त.उ.से.), सम्पदादित्वाद् क्विप्, तद्योगाद् 'अन्येभ्योऽपि-'(वा-५।२।१०९॥)इति वः । घनः प्रागुक्तः-(श्लो-२८६) । द्रुतादीनां लयानामोघाद्याः क्रमेण पर्यायाः क्रमाद् अनुक्रमेण ज्ञेयाः। तद्यथा-१ द्रुतलयस्य नाम **ओघः** । २ विलम्बितलयस्य नाम **तत्त्वम्** । १ मध्यलयस्य नाम **घनम्**। भागुरिस्तु घनस्थानेऽनुगतमाह, यत्पाठः-"लम्बितद्रुतमध्यानि [4]तत्त्वौघानुगतानि तु । अभिधानकृतामेष समयः"[[5]] । नाट्ये तु द्रुतादिलयानुसारेण क्रमादोघाद्या वाद्यप्रकाराः ॥२९२॥

घननामवाद्यभेदमुक्त्वा व्यत्ययेन आनद्धनामवाद्यमाह-

**मृदङ्गो मुरजः**

१ मृद् अङ्गमस्य **मृदङ्गः**। मृद्यत इति वा । 'मृद क्षोदे' (क्र्या.प.से.), 'त्रादिभ्यश्च[6]'(उणा-)इत्यौणादिकोऽङ्गच्, बाहुलकाद् गुणाभावः । २ मुरति मुरः चर्मपट्टिकावेष्टनम् । 'मुर वेष्टने[7]' (तु.प.से.), 'इगुपध-'३।१।१३५॥ इति कः। मुरात् संवेष्टनाज्जातो **मुरजः** । ['पञ्चम्याम्-'३।२।९८॥ इति डः] । मुर्व्यते बध्यत इति वा । 'मुर्व बन्धने[8]'(भ्वा.प.से.), 'मुर्वेमुर्चेरजक्[9]'(हैमोणा-१३२)इत्यजक् । सामान्येन द्वे मर्दलस्य ॥

अथ मृदङ्गभेदत्रयनामान्याह-

**सोऽङ्क्यालिङ्ग्यूर्ध्वक इति त्रिधा ।**

१ स इति मृदङ्गः, अङ्कोऽस्त्यस्याम् **अङ्की**, इनन्तः, उत्सङ्गस्थत्वात् । २ आलिङ्गोऽस्यास्ति **आलिङ्गी**, इनन्तः,

१. 'कल गतौ संख्याने च' इति क्षीरतरङ्गिण्यादौ ॥ २. 'सङ्कोचने' इति क्षीरतरङ्गिण्यादौ ॥ ३. 'विलम्बते' इति ॥ ४. 'तत्वोधा' इति१.२.४॥ ५. द्र. स्वोपज्ञटीका २।२९२॥, पृ.६९॥ ६. 'तरत्यादिभ्यश्च'(उणा-११७)इत्युणादिगणसूत्रम्, वस्तुतस्तु 'विडादिभ्यः कित्(उणा-१८)इत्यनेनाऽङ्गच् युक्तः, तेन कित्त्वाद् गुणाभावः सुकरः ॥ ७. 'संवेष्टने' इति क्षीरतरङ्गिणी, 'परिवेष्टने' इति मा.धातुवृत्तिः ॥ ८. 'मुर्वी बन्धने' इति क्षीरतरङ्गिण्यादौ॥ ९. 'मूर्वेर्मुर् च' इति हैमोणादिगणसूत्रम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आलिङ्ग्य वादनात् । ३ ऊर्ध्वीकृत्यैकेन मुखेन वादनाद् ऊर्ध्वं कायति **ऊर्ध्वकः** । अन्ये तु अङ्क्यं यकारोपधमाहुः । तद्यथा–

"सार्धतालत्रयायामचतुर्दशाङ्गुलाननः ।
हरितक्याकृतिः स स्यादङ्क्योङ्के[1] स्थो हि वाद्यते ॥१॥"

[ ] । आलिङ्ग्यमपि यकारोपधमूचुः । यथा–

"चतुरङ्गुलहीनोऽङ्क्यान्[2]मुखे चैकाङ्गुलेन यः ।
यवाकृतिः स आलिङ्ग्य आलिङ्ग्य स हि वाद्यते ॥२॥"[ ]।

"ऊर्ध्वको गोपुच्छवत् स त्रितालोऽष्टाङ्गुलो मुखे ।
धृत्वोर्ध्वं वाद्यतेऽन्येषां वादनादूर्ध्वकम् ॥३॥"

[ ]इति शब्दार्णवः । अङ्के उत्सङ्गे साधुः अङ्क्यः । 'तत्र साधुः' ४।४।९८॥ इति यत् । वाद्यमान आलिङ्ग्यत इति आलिङ्ग्यः। आङ्पूर्वाल्लगेर्गत्यर्थात् कर्मणि ण्यत् । वादनार्थम् ऊर्धं (ऊर्धः सन्) कायति शब्दायते ऊर्धकः । ऊर्धशब्दोऽयम्, [अतो] निर्विकारः। तदुक्तं वर्णदेशनायाम्–"उज्जिहीते उद्गच्छतीति ऊर्धः। उत्पूर्वाद् आदेरुरोहते: (ओहाङः) डप्रत्ययः उदुपसर्गस्य ऊरादेशे नैरुक्ते वकाररहित ऊर्धशब्दः । ([3]यन्त्रपर्याय आश्रयपरे तन्त्रसमवकारोऽव्ययम्, वकारवांश्च)। तथा च भवभूतिः–'ऊर्ध्वं धुनोति वायुः'[ ]इति । उपरि ध्वन्यत इति ऊर्ध्वम् । तन्त्रान्तरे ऊर्ध्व (ऊर्ध्वं)समानार्थ ऊर्ध्वशब्दोऽप्यनव्ययमदन्तोऽस्ति । ऊर्ध्वदेहे भवमौर्ध्वदेहिकमिति अदन्तः, '-पूर्वपदाट्ठञ्'४।३।६०॥ इति जयादित्यः ।

"कुर्वतीरुपलैस्तुङ्गैर्भुवनानीव मूर्ध्वजैः ।
तस्या वनालीरथैंति चित्रनागजमूर्ध्वजैः ॥४॥"

[[4]]इति कीचकवधे यमकाद् वकारवत्त्वमूर्ध्वशब्दस्येति ।

"हरीतक्याकृतिस्त्वङ्क्यो यवमध्यस्तथोर्ध्वकः ।
आलिङ्ग्यश्चैव गोपुच्छो मध्यदक्षिणवामगाः ॥५॥"

[[5]]इति नाट्ये चैते भेदाः ॥

## स्याद् यशः[1]पटहो[2] ढक्का[6]

१ यात्रादौ यशोऽर्थः पटहो **यशःपटहः** । २ ढगित्यव्यक्तं कायति वक्ति **ढक्का** । 'कै शब्दे'(भ्वा.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥ । द्वे 'ढोल' इति ख्यातस्य॥

आनद्धनामवाद्यभेदमुक्त्वा शुषिरनामवाद्यभेदमाह–

## भेरी[1] दुन्दुभि[2]रानकः[3] ॥२९३॥

## पटहः[4]

१ बिभेत्यस्याः शब्दादिति **भेरी** । 'ञिभी भये' (जु.प.से.), 'ऋज्रेन्द्र-'(उणा-१८६)इति रक्, गौरादिः । भेरिस्तृतीयस्वरान्तोऽपि । "रवः प्रगल्भाहतभेरिसम्भवः, प्रकाशयामास समन्ततस्ततः"[ ]इति कुमारदासः। २ दाम्यति अन्यशब्दानिति **दुन्दुभिः**, पुंसि । "भेरी स्त्री दुन्दुभिः पुमान्"[अमरकोषः १।६।६॥]इत्यमरः[7]। 'दमु[8] उपशमे'(दि.प.से.), 'दमेर्दुभिदु(र्दु)म् च'(हैमोणा-६८)इति साधुः । यद्वा दुन्दुशब्देन उभिः पूरणं यत्र स दुन्दुभिः। 'उभ उंभि(उम्भ) पूरणे'(तु.प.से.), औणादिक इः, शकन्ध्वादिः। " 'दुन्द अव्यक्ते शब्दे' उभति औणादिकः"[ ] इति तु कौमुदी। "स्याद् भेर्यां दुन्दुभिः पुंसि"[अमरकोषः ३।३।१३६॥]इत्यनेकार्थः । दुन्दुशब्देन भाति भाययति वा । दुन्दुं शब्दं[9] भाषत इत्यन्ये । ३ आ अनिति अनेन वादितेन योद्धेति **आनकः**, पुंसि । "आनकोऽस्त्रियाम्"[[10]]इति तु वाचस्पतिः। आङ्पूर्वः 'अन प्राणने'(अ.प.से.), 'कृञादिभ्यः संज्ञायां वुन्'(उणा-७१३), 'युवोरनाकौ'७।१।१॥, आ अनिति इति ण्वुल् वा ॥२९३॥ ४ पटच्छब्दं जहाति **पटहः**, पुंक्ली.। पृषोदरादित्वात् तकारलोपः । पटन्ति हर्षं गच्छन्त्यत्रेति वा । 'पट गतौ' (भ्वा.प.से.), 'कृपृकटिकीकटि[11]-'(हैमोणा-५८९)इत्यहः प्रत्ययः। पटे हन्यत इति वा । चत्वारि भेर्याः । अपरे तु आद्ये द्वे भेर्या नाम्नी, तत्रापि भिन्दन्ति भेरी[12] ढक्का कारा काहला मदनभेरी 'बरघू' इति भाषा । दुन्दुभिस्तु भेर्याकारा सङ्कटमुखी

---

१. '-ङ्क्स्थो' इति४॥ २. '-क्योन्मु-' इति४॥ ३. कोष्ठान्तर्गतपाठश्चलितस्तेन टीकासर्वस्वस्थोऽयम् "यस्तूपरिपर्याय आश्रयपरतन्त्रः, स मकारान्तोऽव्ययं वकारवांश्च" इति पाठो युक्तः, टीकासर्वस्वम्, भा-१, १।७।५॥, पृ.१३७॥ ४. द्र. टीकासर्वस्वम्, भा-१, १।७।५॥, पृ.१३८॥, तत्र "कुर्वतीरुपलैस्तुङ्गैर्भुवनं नीचमूर्ध्वजैः । तस्याचलालीरत्वेति चित्रा नागचमूर्ध्वजैः ॥" इति दृश्यते ॥ ५. द्र. अमरकोशक्षीरस्वामिटीका १।६।६॥, पृ.४९॥ ६. द्र. अमरकोश १।७।६॥ ७. 'भेर्यानकदुन्दुभी' इति रामाश्रमीसम्मतः पाठः १।७।६॥, पृ.९४॥ ८. 'दम-' इति१.२.४॥ ९. 'दुन्दुशब्दं' इति१॥ १०. द्र. स्वोपज्ञटीका २।२९३॥, पृ.६९॥ ११. '-कीकटि-' इत्यस्य स्थाने मुद्रितहैमोणादिगणेऽपि '-कीकटि-' इत्येव दृश्यते, तत्तु अशुद्धमेव, तत्स्थाने, अत्रापि च '-पटिमटि-' इत्येव योग्यम् ॥ १२. '-भेरि' इति २.३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नफेरीति[1] भाषा । केचित्त्वग्रेतने द्वे दमामानाम्नी इत्याहुः । वाद्यविशेषाश्चात्र

"अथ दर्दरे कलसीमुखः[2] ।
सूत्रकोणो डमरुकं समौ पणवकङ्किणौ[3] ॥१॥
शृङ्गवाद्ये शृङ्गमुखं हुडुक्कस्तालमर्दलः[4] ।
काहला तु कुहाला स्याच्चण्डकोलाहला च सा ॥२॥
संवेशप्रतिबोधार्थं द्रगडद्रकटावुभौ ।
देवतार्चनतूर्ये तु धूमलो बलिरित्यपि ॥३॥
क्षुण्णकं मृतयात्रायां मङ्गलप्रियवादके[5] ।
रणोद्यमे त्वर्धतूरो वाद्यभेदास्तथाऽपरे ॥४॥
डिण्डिमो झर्झरो[6] मञ्जुस्तिमिला किरिकिञ्चिका ।
लुम्बिका दर्दरी वेध्या कलापूरादयोऽपि च ॥ ५॥"
[शेषनाममाला २।८४-८८॥]इति ॥

## अथ शारिका स्यात् कोणो वीणादिवादनम् ।

१ शृणाति ताडयति वाद्यं **शारिका** । 'शॄ हिंसायाम्' (क्र्या.प.से.), ण्वुल्, 'युवोरनाकौ' ७।१।१॥, टाप्, 'प्रत्ययस्थात्-' ७।३।४४॥ इतीत्वम् । २ कुणति शब्दायते वाद्यमनेन **कोणः**, पुंसि । 'कुण शब्दोपकरणयोः'(तु.प.से.), पचाद्यच् । "द्वयोस्तु कोणो वीणादेर्वादनं शारिका च सा"[7]इति शब्दार्णवे वाचस्पतिः । वीणादिर्वाद्यतेऽनेन[8] वीणादिवादनम् । वदेर्णिजन्तात् करणे ल्युट् । वादित्रवादनोपकरणस्य द्वे । पटहादिवादनोपकरणं दण्डः । वीणादिवादिनी 'शिलाका' इति भाषा ॥

## शृङ्गारहास्यकरुणा रौद्रवीरभयानकाः ॥२९४॥
## बीभत्साद्भुतशान्ताश्च रसाः

१ शृङ्गं रसेषून्नतमत्त्वमियर्त्ति **शृङ्गारः**, पुंक्ली. । 'ऋ गतौ' (जु.प.अ.), पचाद्यच्, 'सार्वधातुका-' ७।३।८४ ॥ इति गुणः । शृङ्गं काममाराति वा । 'रा ला दाने'(अ.प.अ), 'आतोऽनुसर्गे कः' ३।२।३ ॥ । श्रयत्येनं[9] जन इति वा । 'श्रिञ् सेवायाम्'(भ्वा.उ.से.), 'शृङ्गारभृङ्गारौ'(उणा-४१६)इत्यारनि साधुः । २ हासे साधुः **हास्यः** । 'तत्र साधुः' ४।४।९८ ॥ इति यत् । हास एव वा । सामाजिकानां च वर्णागोचरतां गतो हास्यः, [यदाह-] "स्थाय्येवं[10] तु रसो भवेत्"[11] । ३ किरति विक्षिपति लोकचित्तानि **करुणः** । 'कॄ विक्षेपे'(तु.प.से.). 'कॄवृदारिभ्य उनन्'(उणा-३३३), टाप् । ४ रुद्रो देवताऽस्य **रौद्रः** । 'सास्य देवता' ४।२।२४ ॥ इत्यण् । यदुक्तम्-

"शृङ्गारो विष्णुदेवः स्याद् हासः प्रथमदैवतः ।
करुणो यमदेवस्तु स्याद् रौद्रौ[12] रुद्रदैवतः ॥१॥"

[ ]इति । ५ अजति गच्छति सत्त्ववृद्धिमनेनेति **वीरः** । 'अज गतौ क्षेपणे च'(भ्वा.प.से.), 'ऋज्रेन्द्र-'(उणा-१८६)इति रक् 'अजेर्व्यघञपोः' २।४।५६ ॥ इति वी आदेशः । वीरयन्ते विक्रामन्ति जना अनेनेति वा । 'शूर वीर विक्रान्तौ'(चु.आ.से.), चुरादी, करणे घञ् । ६ बिभेत्यस्मादिति **भयानकः** । 'ञिभी भये'(जु.प.अ.), 'आनकः शीङ्भियः'(उणा-३६२)इति सूत्रेण आनकप्रत्ययः **॥२९४॥** ७ बधेर्निन्दायां सन्, 'सन्यङोः' ६।१।९ ॥ इति द्वित्वम्, ['अ प्रत्ययात्' ३।३।१०२ ॥ इत्यः, टाप् बीभत्सा] । बीभत्सा अस्त्यत्र **बीभत्सः** । अर्शआदित्वादच् । ८ 'अत्' इति आश्चर्यार्थेऽव्ययम् , तस्य भवनम् **अद्भुतम्** । 'अदि भुवो डुतन्[13]'(उणा-६७९)इति डुतन् । ९ शाम्यते स्म **शान्तः** । 'वा दान्तशान्तपूर्ण-' ७।२।२७ ॥ इति निपातनात् साधुः । हास्यादयः शब्दाः पुंसि । गौडस्तु-

"शृङ्गारवीरौ बीभत्सं रौद्रं हास्यं भयानकम् ।
करुणा चाद्भुतं शान्तं वात्सल्यं च रसा दश ॥२॥"

[14]इति शृङ्गारवीरौ पुंस्युक्त्वा लिङ्गनिर्णयमाह । ग्रन्थान्तरेषु तु[15] शृङ्गारादीनां लक्षणानि यथा-"प्रोज्ज्वलो धृतिहेतुर्भावः शृङ्गारः । सर्वाभिभाविता रौद्रः । यथा रावणचरितादिदानधर्मयुद्धेषु । जीवानेकपक्षोत्साहकारी रसो वीरः । असम्भावितमर्त्यान्तरिक्षगमनादि[-जो विस्मयोऽद्भुतः । क्रुध्यद्राक्षसादि-]भयजन्यो भयानकः । घृणाकरपूयवसादिजो बीभत्सः" । सामाजिकै रस्यन्ते चर्व्यन्ते रसाः, पुक्ली. । यदाह-

"विभावैरनुभावैश्च मुक्तो वाच्यभिचारिभिः ।
आस्वाद्यत्वात्प्रधानत्वात्स्थाय्येव तु रसो भवेत् ॥३॥"[16]इति ।

---

१. 'नपेरी-' इति२ ॥ २. 'कलशीमुखः' इति शेषनाममालास्वोपज्ञटीकयोः ॥ ३. '-झंकिणौ' इति२, 'किङ्कणो' इति शेषनाममालास्वोपज्ञटीकयोः ॥ ४. '-मर्दकः' इति शेषनाममालास्वोपज्ञटीकयोः ॥ ५. 'माङ्गले प्रियवादिका' इति शेषनाममालास्वोपज्ञटीकयोः ॥ ६. 'मद्रु-' इति३, 'मड्डु-' इति शेषनाममालास्वोपज्ञटीकयोः ॥ ७. द्र. रामाश्रमी १।७।६॥, पृ.९५॥ ८. 'वीणादि वाद्यते' इति१ ॥ ९. 'श्रयन्त्येनं' इति२ ॥ १०. 'स्थाय्यैव' इति१.२॥ ११. द्र. स्वोपज्ञटीका २।२९४॥, पृ.६९॥ १२. 'रौद्रौ' इति२.३, 'रौद्रे' इति४॥ १३. '-डुतच्' इत्युणादिगणे ॥ १४. द्र. स्वोपज्ञटीका २।२९५॥, पृ.७०॥ १५. ३.४नास्ति ॥ १६. अम.क्षीरस्वामिटीका १।६।१७॥, पृ.५१॥, अमरकोषकृष्णमित्रटीका १।७।१७॥, पृ.८२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शृङ्गारादीनां शान्तान्तानामेकोक्त्या नामैकं **रसाः** इति ॥

**भावाः[1] पुनस्त्रिधा ।**

**स्थायिसात्त्विक[2]सञ्चारि[3]प्रभेदैः**

१ भावयन्ति कुर्वन्ति रसानिति **भावाः** । स्वकारणाद् भवन्तीति वा । भावयन्ति व्याप्नुवन्ति सामाजिकमनांसीति वा । "मनोविकारो रत्यादिर्भावः"[ ]इति बृहस्पतिः । यदुक्तं भरतेन-

"नानाभिनयसम्बन्धाद् भावयन्ति रसानिमान् ।
यस्मात्तस्मादमी भावा विज्ञेया नाट्ययोक्तृभिः ॥१॥"

[ [1]]इति । पुनः भावास्त्रिधा त्रिप्रकाराः । १ सामाजिकानां वासनारूपेण तिष्ठन्ति **स्थायिनः** । 'ष्ठा गतिनिवृत्तौ'(भ्वा.-प.अ.), 'नन्दिग्रहिपचादिभ्यः-'३ ।१ ।१३४॥ इति णिनिः, 'आतो युक् चिण्कृतोः' ७ ।३ ।३३ ॥ इति युक् । २ सीदत्यस्मिन् मन इति सत्त्वम्, गुणोत्कर्षात् साधुत्वाच्च प्राणात्मकं वस्तु सत्त्वम्, तत्र[2] भवाः **सात्त्विकाः** । ३ सञ्चरन्ति न सततमवतिष्ठन्त इति **सञ्चारिणः**, व्यभिचारिणः, ते च ते प्रभेदाश्च स्थायिसात्त्विक-प्रभेदाः, तैः स्थायिसात्त्विकसञ्चारिप्रभेदैः । स्थाय्यादीनां त्रयाणां साधारण्येनैकं '**भावाः**' इति ॥

नवभेदम्, प्रथमं स्थायिनं भावं निरूपयति-

**स्याद् रतिः[1] पुनः ॥२९५॥**

**रागो[2]ऽनुरागो[3]ऽनुरतिः[4]**

१ रमणं **रतिः**, परस्परास्थाबन्धः । 'रमु क्रीडायाम्' (भ्वा.आ.अ.), 'स्त्रियां क्तिन्'३ ।३ ।९४॥, 'अनुदात्तोपदेश-' ६ ।४ ।३७॥ इति म्लोपः ॥**२९५॥ २** रञ्जनं **रागः** । रज्यतेऽनेनेति वा । 'रञ्ज रागे'(दि.उ.अ.), भावे करणे वा घञ्, 'घञि च भाव-करणयोः'६ ।४ ।२७॥ इति न्लोपः, 'चजोः-'७ ।३ ।५२॥ इति कुत्वम्, 'अत उपधायाः'७ ।२ ।११६॥ । **३** एवमनुरञ्जनम् **अनुरागः** । ४ अनुरमणम् **अनुरतिः** । चत्वारि रागस्य ॥

**हासस्तु[1] हसनं[2] हसः[3] ।**

**घर्घरो[4] हासिका[5] हास्यम्[6]**

१ हसनं **हासः** । 'हस(हसे) हसने'(भ्वा.प.से.), भावे घञ् । [ **२** हस्यते **हसनम्** । 'हसे हसने'(भ्वा.प.से.), ल्युट् ] । **३** हसनं **हसः** । 'हस(हसे) हसने'(भ्वा.प.से.), 'स्वनहं (ह)-सोर्वा'३ ।३ ।६२॥ इत्यच्(-प्) । ४ घर्घरहेतुत्वाद् **घर्घरः**, सघोषा अव्यक्तवाक् । ५ हसनं **हासिका** । 'धात्वर्थनिर्देशे ण्वुल् वक्तव्यः' (वा-३ ।३ ।१०८॥)इति ण्वुल् । ६ हसनीयं **हास्यम्** । 'ऋहलोर्ण्यत्' ३ ।१ ।१२४॥ । षट् सामान्येन हासस्य[3] ॥

अथ हास्यभेदानाह-

**तत्राद्दष्टदे स्मितम्[1] ॥२९६॥**

**वक्रोष्ठिका[2]**

१ तत्रेति हासे [4]अद्दष्टरदे, न दृष्टा रदा दन्ता यत्र स अद्दष्टरदः, तत्र ।

"ईषद्विकसितैर्दन्तैः कटाक्षैः सौष्ठवान्वितः ।
अलक्षितद्विजद्वारमुत्तमानां स्मितं भवेत् ॥१॥"[ [5]]

इति । 'स्मिङ् ईषद्धसने'(भ्वा.आ.अ.), क्तः [**स्मितम्**]॥२९६॥२ वक्र ओष्ठोऽस्यां वक्रोष्ठी, स्वार्थे के **वक्रोष्ठिका**, स्त्रीक्ली. । यद्गौडः-"स्मिते वक्रोष्ठिका न[6]ना"[ ] द्वे । अद्दष्टदन्तहासस्य[7] ॥

**अथ हसितं[1] किञ्चिद् दृष्टरदाङ्कुरे ।**

१ हस्यते स्म **हसितम्**, किञ्चिद्दृष्टा रदा दन्ता एवाङ्कुरा यस्मिन् सः, तस्मिन् । एकं किञ्चिद्दृष्टदन्तहासस्य ॥

**किञ्चिच्छ्रुते विहसितम्**

१ सशब्दत्वात् किञ्चित् श्रुते हासे **विहसितम्** । यद्भरतः-

"आकुञ्चिताक्षिगण्डं यत् सस्वनं मधुरं तथा ।
कालागतं साऽऽस्यरागं तद्वै विहसितं भवेत् ॥१॥"

[ [8]] । पुनः-

"आकुञ्चितकपोलाक्षं सस्वनं निःस्वनं तथा ।
प्रस्तावोत्थं सानुरागमाहुर्विहसितं बुधाः ॥२॥"

[ [9]]इति । एकं सशब्दनिरन्तरहासस्य ॥

---

१. द्र. अम.क्षीरस्वामिटीका १ ।६ ।२२॥, पृ.५२॥ **२.** 'ततो' इति३॥ **३.** 'हास्यस्य' इति१॥ **४.** 'अद्दष्टि-' इति४॥ **५.** द्र. रामाश्रमी १ ।७ ।३४॥, पृ.१०९॥, टीकासर्वस्वे "ईषद्विकसितैर्गण्डैः कटाक्षैः सौष्ठवान्वितैः । अलक्षितद्विजं धीरमुत्तमानां स्मितं भवेत् ॥" भा-१, १ ।७ ।३४॥, पृ.१६२॥ **६.** पुमान्नेत्यर्थः ॥ ७. 'हास्यस्य' इति२॥ ८. द्र. स्वोपज्ञटीका २ ।२९७॥, पृ.७०॥, टीकासर्वस्वम्, भा-१, १ ।७ ।३५॥, पृ.१६३॥ ९. द्र. रामाश्रमी १ ।७ ।३५॥, पृ.१०९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अट्टहासो महीयसि ॥२९७॥**

१ अट्टेति हसनम् **अट्टहासः**, महाशब्दत्वाद् महीयसि अतिवृद्धे हास्ये । 'खडखडहासे'[1] इति भाषा ॥२९७॥

**अतिहासस्त्वनुस्यूते**

१ अनुस्यूतेऽनवच्छिन्नहासे[2], अतिशयेन हसनम् **अतिहासः**। भावे घञ् । एकं प्रचुरहासस्य ॥

**अपहासोऽकारणात् कृते ।**

१ अकारणात् कारणमन्तरेण कृते हासे, अपकृष्टं हसनम् **अपहासः** ॥

**सोत्प्रासे त्वाच्छुरितकम्**

१ ऊर्ध्वं प्रकर्षेणाऽसनं गमनमुत्प्रासः आधिक्यम् । 'अस गतिदीप्त्यादानेषु'(भ्वा.उ.से.), भावे घञ् । ततः सह्रितः (सहितः) सोत्प्रासः, अधिको महान् हासः । यद्वा उत्प्रास्यते सामर्षोऽन्यः क्रियतेऽनेन उत्प्रास उपहासः, सह उत्प्रासेन वर्त्तते यः स सोत्प्रासः, तस्मिन्, । [3]आच्छुरणम् **आच्छुरितकम्** । 'छुर छेदने'(तु.प.से), भावे क्तः, 'आर्धधातुकस्य-'७।२।३५॥ इतीट्, ततः स्वार्थे कः, आ समन्तादनवच्छिन्नमित्यर्थः, द्वितीयस्वरादिरयम् । एकं मस्करीसहितहासस्य ।।

**हसनं स्फुरदोष्ठके ॥२९८॥**

१ स्फुरन् चलन् ओष्ठो यस्मिन् स्फुरदोष्ठके । हस्यत इति **हसनम्** । 'हस हसने'(  ), ल्युट् । एकं होठफुरकणहासस्य ॥२९८॥

**शोकः शुक् शोचनं खेदः**

१ शोचनं **शोकः** । 'शुच शोके'(भ्वा.प.से.), भावे घञ्, 'चजोः-'७।३।५२॥ इति कुत्वम् । २ शोचनं **शुक्** । सम्पदादित्वात् क्विप्, चान्तोऽयम्, स्त्रीलिङ्गः । ३ शुच्यते **शोचनम्** । ल्युट् । ४ खेदनं **खेदः** । 'खिद दैन्ये'(दि.आ.अ.), भावे घञ् । चत्वारि शोकस्य ॥

**क्रोधो मन्युः क्रुधा रुषा ।**

**क्रुत् कोपः प्रतिघो रोषः रुट् च**

१ क्रोधनं **क्रोधः** । 'क्रुध कोपे'(दि.प.अ.), भावे घञ् । "तीक्ष्ण प्रबोधः क्रोधः"[ ]इति लक्षणम्[4] । २ मन्यते विपरीतलक्षणया **मन्युः**, पुंसि । 'मन ज्ञाने'(दि.आ.अ.), 'यु(य)जिमनिशुन्धिजनिभ्यो युच्'(उणा-३००)इति युच्, बाहुलकान्न अनादेशः । ३ क्रोधनं **क्रुधा** । भिदादित्वादङ्, टाप्। ४ रोषणं **रुषा** । 'रुष रोषे'(दि.प.से.), भिदादित्वादङ्, [टाप्] । "कोपो भामः[5] क्रुधा रुषा"[6]इति शब्दार्णवः। ५ क्रोधनं **क्रुत्**, स्त्रीलिङ्गः। 'क्रुध कोपे'(दि.प.अ.), सम्पदादित्वात् क्विप् । क्रुधौ, क्रुधः इत्यादि । ६ कोपनं **कोपः**। 'कुप कोपे'(दि.प.से.), भावे घञ् । ७ प्रतिहन्यत इति **प्रतिघः** । 'हन्(हन) हिंसागत्योः'(अ.प.अ.), बाहुलकात् 'परौ घः'३।३।८४॥ इत्यप्, घत्वं च । "प्रतिहन्ति, 'अन्यत्रापि-'(वा-३।२।४८॥) डे प्रतिघः, न्यङ्क्वादिः"[ ]इति तु कौमुदी । ८ रोषणं **रोषः** । भावे घञ् । ९ रोषणं **रुट्**। 'रुष रोषे'(दि.प.से.), सम्पदादिः, स्त्रीलिङ्गः । रुषौ, रुषः इत्यादि । नव क्रोधस्य ॥

**उत्साहः प्रगल्भता ॥२९९॥**

**अभियोगोद्यमौ प्रौढिरुद्योगः कियदेतिका ।**

**अध्यवसाय ऊर्जः**

१ उत्सहनम् **उत्साहः** । 'षह मर्षणे'(भ्वा.आ.से.), भावे घञ्। स्थेयान् संरम्भ उत्साहः । २ प्रगल्भस्य भावः **प्रगल्भता ॥२९९॥** ३ अभियोजनम् **अभियोगः** । 'युजिर् योगे'(रु.उ.अ.), भावे घञ् । ४ उद्यमनम् **उद्यमः**, पुंक्ली. । 'यम नियमने[7]'(भ्वा.प.से.), घञि 'उद्यमोपरमौ'(हैमसू-४।३।५७॥)इति साधुः। ५ प्रवहणं **प्रौढिः**। प्रपूर्वाद् 'वह प्रापणे'(भ्वा.उ.अ.), अस्मात् स्त्रियां क्तिनि 'ग्रहिज्या-'६।१।१६॥ इति सम्प्रसारणे 'प्रादूहोढौ(ढो)ढ्ये-'(वा-६।१।८९॥) इति वृद्धिः । ६ उद्योजनम् **उद्योगः**। ७ कियद् एतदित्यभिप्रायोऽस्यां **कियदेतिका** । मयूरव्यंसकादित्वात् साधुः। ८ अध्यवसीयते **अध्यवसायः** । 'षोऽन्तकर्मणि'(दि.प.अ.), भावे घञ्, 'आदेच:-'६।१।४५॥ इत्यात्वम्, 'आतो युक् चिण्कृतोः'७।३।३३॥। ९ ऊर्जनम् **ऊर्जः** । 'ऊर्ज बलप्राणनयोः'(चु.उ.से.), भावे घञ्। नव सामान्येन उद्यमस्य॥

**अथ वीर्यं सोऽतिशयान्वितः ॥३००॥**

१ स उत्साहः सातिशयः प्रकृष्टशक्तिभाग् **वीर्यम्** उच्यते[8]। वीरे साधु वीर्यम् । 'तत्र साधुः'४।४।९८॥ इति यत् । वीर्यते विक्रम्यत इति वा । 'वीर विक्रान्तौ' (चु.आ.अ.), बाहुलकाद् भावे यः । "वीरस्य कर्म"[ ] इत्यन्ये । "अतिशयशक्तिर्वीर्या"[9]इत्यमरमालायां स्त्रीत्वम् । एकमतिशयिताध्यवसायस्य ॥३००॥

१. 'खडखड' इति३॥ २. '-हास्ये' इति४॥ ३. 'अच्छुरणम्' इति१॥ ४. 'लक्षणे' इति२॥ ५. 'भीमः' इति३.४॥ ६. द्र. रामाश्रमी १।७।२६॥, पृ.१०४॥ तत्र "क्रोधो भामः क्रुधा रुषा" इति दृश्यते ॥ ७. '-नियमे' इति३, क्षीरतरङ्गिण्यादौ नियमनार्थकयमधातुर्न दृश्यते ॥ ८. 'उच्यन्ते' इति२॥ ९. रामाश्रमी १।७।२९॥, पृ.१०५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**भयं भीर्भीतिरातङ्क आशङ्का साध्वसं दरः।**
**भिया च**

१ भीतिः **भयम्**। 'ञिभी भये'(जु.प.अ.), ''अज्विधौ भयादीनामुपसंख्यानम्' नपुंसके क्तादिनिवृत्त्यर्थम्'( )इति क्तल्युटौ बाधित्वा अज् भवति। पारायणे तु वासरूपेण क्तोऽपि दर्शितः, तदसत्, क्तल्युट्तुम(मु)न्खलर्थेषु वासरूपविधेः प्रतिषेधात्''[मा. धातुवृत्तिः, जुहोत्यादिः, धातुसं-२]इति माधवः। २ भीतिः **भीः**, स्त्रीलिङ्गः। सम्पदादित्वात् क्विप्। ३ **भीतिः**, 'स्त्रियां क्तिन्' ३।३।९४॥। ४ आतङ्कनम् **आतङ्कः**। 'तकि कृच्छ्रजीवने' (भ्वा.प.से.), भावे घञ्। ५ आशङ्कनम् **आशङ्का**। 'शकि शङ्कायाम्'(भ्वा.आ.से.), भिदादित्वादङ्, टाप्। ६ साधून् अस्यति **साध्वसम्**। 'असु क्षेपणे'(दि.प.से.), पचाद्यच्। ७ दरणं **दरः**, पुंक्ली.। 'दृ भये'(भ्वा.प.से.), 'ऋदोरप्'३।३।५७॥। ८ **भिया**। भिदादित्वादङ्, 'अचि श्नुधातु-'६।४।७७॥ इतीयङ्, टाप्। अष्टौ सामान्येन भयस्य ॥

अथ भयविशेषानाह-

**तच्चाहिभयं भूपतीनां स्वपक्षजम् ॥३०१॥**

१ तच्छब्दस्य पूर्वपरामर्शित्वात् तदिति भयम्, भूपतीनां राज्ञाम्, स्वपक्षाद् राजपुत्रादेर्जातं स्वपक्षजम् **अहिभयम्** इत्युच्यते। अहेरिव गृहस्थिताद् भयम् **अहिभयम्** इत्येकं नाम, 'ग्रासियानुं भय' इति भाषा ॥३०१॥

**अदृष्टं वह्नितोयादेः**

१ वह्नितोयाभ्याम्, आदिशब्दाद् अशनिपिशाचादेर्यद्भयम्, तद् **अदृष्टम्** इति प्रोच्यते ॥

**दृष्टं स्वपरचक्रजम्।**

१ स्वदेशचौराटव्यादिभयं परदेशाद् दाहविलोपादिभयम्, तयोर्नामैकं **दृष्टम्** इति ॥

**भयङ्करं प्रतिभयं भीमं भीष्मं भयानकम् ॥३०२॥**
**भीषणं भैरवं घोरं दारुणं च भयावहम्।**

१ भयं करोति **भयङ्करम्**। 'मेघर्त्तिभयेषु कृञः'३।२।४३॥ इति खच्। २ प्रतिगतं भयेन **प्रतिभयम्**। प्रादिसमासः। ३ बिभेत्यस्माद् **भीमम्**। ४ बिभेत्यस्मादिति **भीष्मम्**। 'ञिभी भये'(जु.प.अ.), उभयत्र 'भियः षुग्वा'(उणा-१४५)इति मक्षुकौ। ''तथा 'भीमादयोऽपादाने'३।४।७४॥ इति भीमभीष्मौ साधू''[ ]इति सर्वधरः। ५ बिभेत्यस्माद् **भयानकम्**। 'आनकः शिङ्भियः'(उणा-३६२)इत्यानकः ॥३०२॥ ६ भीषयति **भीषणम्**। 'ञिभी भये'(जु.प.अ.), अस्माण्णिजन्ताद् नन्द्यादित्वाद् ल्युः। ७ भीरोरिदम् त्रासकृदिति **भैरवम्**। 'तस्येदम्'४।३।१२०॥ इत्यण्। ८ घुरत्यस्माद् **घोरम्**। 'घुर भीमार्य-(र्थ)शब्दयोः'(तु.प.से.), पचाद्यच्। हन्ति वा घोरम्। 'हन्तेर्घुर्च'(उणा-७४२)इति अच्। ''हन्तेर्घुरजादेशश्च''[ ]इति तु कौमुदी। ९ दारयति चित्तमिति **दारुणम्**। 'दॄ विदारणे' (क्र्या.प.से.), 'कृवृदॄदारिभ्य उनन्'(उणा-३३३)इत्युनन्। १० भयमावहति **भयावहम्**। 'वह प्रापणे'(भ्वा.उ.अ.), पचाद्यच्। दश भयङ्करस्य। ''भयङ्करे तु डमरमाभीलं भासुरम्''[शेषनाममाला २।८९॥]शैषिकाणि ॥

**जुगुप्सा तु घृणा**

१ जुगुप्सनं **जुगुप्सा**, चित्तसङ्कोचः। 'गुपू(गुप) कुत्सने'(भ्वा.आ.से.)'गुप्तिज्किद्भ्यः सन्'३।१।५॥, 'सन्यङोः' ६।१।९॥ इति द्वित्वम्, 'अ प्रत्ययात्'३।३।१०२॥ इति अप्रत्ययः तदन्तश्च, स्त्रियां [टाप्]। २ जिघर्ति क्षरति मनोऽनया **घृणा**। 'घृ क्षरणदीप्त्योः'(जु.प.अ.), [बाहुलकान्नक्]। द्वे चित्तसङ्कोचस्य ॥

**अथ स्याद् विस्मयश्चित्रमद्भुतम् ॥३०३॥**
**चोद्याश्चर्ये**

१ विस्मयनं **विस्मयः**। विपूर्वः 'स्मिङ् ईषद्धसने' (भ्वा.आ.अ.), अद्भुतार्थः, दन्त्यमध्यः, 'सात्पदाद्योः'८।३।१११॥ इति षत्वप्रतिषेधः। २ चीयत इति **चित्रम्**। 'चिञ् चयने' (स्वा.उ.अ.), 'अमिचिमिदिशसिभ्यस्त्रन्'(उणा-६०३)इति त्रन्। चित्रयति चित्रमिति वा। चित्रिधातोः पचाद्यच्। ३ अदित्याश्चर्यार्थेऽव्ययम्, तस्य भवनम् **अद्भुतम्**। 'अदि भुवो डुतच्'(उणा-६७९)॥३०३॥ ४ चोद्यत इति **चोद्यम्**। 'चुद प्रेरणे' (चु.उ.से.), 'ऋहलोर्ण्यत्'३।१।१२४॥। ५ आचरणीयम्

१. 'अजेव' इति मा.धातुवृत्तिः, पृ.३८५॥ २. 'ञिभी-' इति१॥ ३. '-यानो भय' इति४॥ ४. '-विलाप-' इति१.२॥ ५. 'हन्तेरच् घुर् च' इत्युणादिगणसूत्रम्॥ ६. ३नास्ति॥ ७. '-वृदारि-' इत्युणादिगणे॥ ८. 'भयङ्करे तु' इति१.२.४नास्ति॥ ९. '-साऽथ' इति१॥ १०. 'गोपने' इति क्षीरतरङ्गिण्यादौ॥ ११. 'षत्वं प्रति-' इति१.४॥ १२. '-शसिभ्यः क्त्रः' इत्युणादिगणे॥ १३. '-डुतच्' इत्युणादिगणे॥ १४. 'सञ्चोदनम्' इति क्षीरतरङ्गिण्यादौ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**आश्चर्यम्** । 'चर गतौ'(भ्वा.आ.से.), '[आश्चर्यम्] अनित्ये' ६।१।१४७॥ इति साधुः । एते पञ्चापि चेतोविस्तारपर्यायाः। पञ्च आश्चर्यस्य, 'तमासा' इति भाषा ॥ ''फुल्लकं मोहो वीक्षम्[1]'' [शेषनाममाला २।८९॥]शैषिकाणि॥

**शमः शान्तिः शमथोपशमावपि ।**

**तृष्णाक्षयः**

१ शमनं **शमः** । 'शमु[2] उपशमे'(दि.प.से.), भावे घञ्, 'नोदात्तोपदेशस्य-'७।३।३४॥ इति वृद्धिनिषेधः । २ शमनं **शान्तिः** । 'शमु उपशमे'(दि.प.से.), 'स्त्रियां क्तिन्'३।३।९४॥, 'अनुनासिकस्य क्विझलोः-'६।४।१५॥ इति दीर्घः, 'तितुत्र-'७।२।९॥ इतीण्निषेधः, 'नश्चापदान्तस्य-'८।३।२४॥ इत्यनुस्वारः, ['अनुस्वारस्य-'८।४।५८॥ इति परसवर्णः] । ३ शमनं **शमथः** । बाहुलकादथच् । ४ उपशमनम् **उपशमः**। घञि 'नोदात्तोपदेश-'७।३।३४॥ इति न वृद्धिः । ६ तृष्णायाः गर्धस्य क्षयः[3] **तृष्णाक्षयः**। शान्तेः पञ्च ॥

अथ स्थायिभावानामुपसंहारमाह-

**स्थायिनोऽमी रसानां कारणं क्रमात् ॥३०४॥**

अमी रत्यादयः शान्तिपर्यन्ताः रसानां शृङ्गारादीनां नवानां क्रमादनुक्रमेण कारणं कारणभूता इत्यर्थः ॥३०४॥

अथाष्टविधं सात्त्विकभावं प्रकटयति-

**स्तम्भो जाड्यम्**

१ स्तम्भनं **स्तम्भः** । 'स्तम्भु रोधने'(सौत्रः क्र्या.प.से.), भावे घञ् । २ जडस्य भावो **जाड्यम्** । 'गुणवचनब्राह्मणादिभ्यः कर्मणि च'५।१।१२४॥ इति ष्यञ्[4]। द्वे विष्टब्धत्वस्य ॥

**स्वेदो घर्मनिदाघौ**

१ स्वेदनं **स्वेदः** । 'ञिष्विदा गात्रप्रक्षरणे'(दि.प.से.), भावे घञ् । २ घरति सिञ्चत्यङ्गं **घर्मः** । 'घृ सेचने' (भ्वा.प.अ.), 'घर्मः'(उणा-१४६)इत्युणादिसूत्रेण निपातः । ३ निदह्यतेऽनेनाङ्गमिति **निदाघः** । 'दह भस्मीकरणे'(भ्वा.प.अ.), घञि, 'संज्ञायां मघमेघानिदाघावदाघा[6]-'(गणसू-७।३।५३॥) इति साधुः । निदघ्यतेऽनेनेति वा। 'दघ घातने पालने च[7]' (स्वा.प.से.), करणे घञ् । त्रीणि प्रस्वेदस्य ॥

**पुलकः पुनः ।**

**रोमाञ्चः कण्टको रोमविकारो रोमहर्षणम् ॥३०५॥**

**रोमोद्गम उद्धुषणमुल्लुकसनमित्यपि[8] ।**

१ पोलति महद् भवत्यङ्गमनेन **पुलकः**, पुंक्ली. । 'पुल महत्त्वे'(भ्वा.प.से.), संज्ञायां क्वुन् । २ रोम्णामञ्चनं **रोमाञ्चः**। 'अञ्चु गतिपूजनयोः'(भ्वा.प.से.), भावे घञ्। ''न क्वादेः[9]'७।३।५९॥ इति योगविभागान्न कुत्वम्''[[10]]इति भाषावृत्तिः। ३ कण्टतीति **कण्टकः**, पुंक्ली. । 'कटि[11] गतौ' (भ्वा.प.से.), संज्ञायां, क्वुन् । कण्टकतुल्यत्वाद् वा । ४ रोमाणि विक्रियन्तेऽनेन[12] **रोमविकारः** । 'डुकृञ् करणे' (त.उ.अ.), करणे घञ् । ५ रोमाणि हृष्यन्त्यनेन **रोमहर्षणम्**। 'हृषु[13] हर्षे'(भ्वा.प.से.), 'करणाधिकरणयोश्च'३।३।११७॥ इति करणे ल्युट् ॥३०५॥ ६ रोमाणि उद्गच्छन्त्यनेन **रोमोद्गमः**। घञ् । ७ उद्धुषति उच्छ्वसित्यङ्गमनेन **उद्धुषणम्** । 'धुषँ[14] कान्तिकरणे'(चु.उ.से.), करणे ल्युट् । ८ उल्लुकसति उच्छ्वसित्यनेनाङ्गमिति **उल्लुकसनम्** । 'उद्धुष उल्लुक[स] उच्छ्वसने[15]' वाक्यकरणीयावेतौ, आद्यस्तुदादौ कुटादिः, कुटादित्वादेवोपधाया लघोः ['गाङ्कुटादिभ्योऽञ्णिन्ङित्' १।२।१॥]इति गुणाभावः । [16]उल्लुकसनमित्यत्र संयुक्तवर्णपरत्वादुकारस्य दीर्घत्वान्न गुणः । एतौ पञ्चमस्वरादी करणार्थल्युडन्तौ । अष्ट रोमाञ्चस्य ॥

**स्वरभेदस्तु कल्लत्वं स्वरे**

१ स्वरस्य भेदः स्वरभेदः स्वरोपघातनामैकम्, 'गलगलुँ[17], स्वरभङ्ग' इत्यादिभाषा, स्वरे स्वरविषये **कल्लत्वम्** अव्यक्तत्वम् । यदाह पथ्यापथ्यकारः-''स्वरभेदः स्वररुजा स्वरघातः स्वरक्षयः स्वरोपघातः''[ ]इत्यादि ॥

---

१. 'वीक्ष्यं' इति४, तथा शेषनाममालास्वोपज्ञटीकयोः ॥ २. 'शम' इति३.४॥ ३. 'क्षयं' इति१॥ ४. 'ष्यन्' इति३.४॥ ५. क्षीरतरङ्गिण्यादौ ञिरहितः पाठः ॥ ६. 'संज्ञायां मेघनिदाघावदाघार्घाः' इति गणसूत्रम् ॥ ७. 'पालने च' इति क्षीरतरङ्गिण्यां नास्ति ॥ ८. 'उल्लकसन-' इत्याचार्याः पठन्ति, स्वोपज्ञटीकाऽपि तमाश्रित्यैव कृता ॥ ९. 'न्यङ्क्वादेः' इति३.४॥ १०. भाषावृत्तौ '' 'न' इति योगविभागान्नेह-रोमाञ्चः, शोच्यम्'' इति दृश्यते, भाषावृत्तिः ७।३।५९॥, पृ.३४५॥ ११. इ ई वा प्रश्लिष्टः स्यात् तर्हि 'कटी' इति, अत्र मा. धातुवृत्तिरवलोकनीया, पृ.१११॥ १२. 'विक्रियतेऽनेनेति' इति१॥ १३. 'हृषु अलीके' इति क्षीरतरङ्गिण्यादौ, ''अलीकमानन्द इति काशकृत्स्नधातुव्याख्यानम् (पृष्ठ.४५)'' इति क्षीरतरङ्गिणीटिप्पणी, पृ.१०२॥, टि-२॥ १४. क्षीरतरङ्गिण्यादौ 'धूष' इति षष्ठस्वरवान् धातुर्दृश्यते ॥ १५. हेमचन्द्राचार्यकृतधातुपारायणतृतीयपरिशिष्टे धातुपारायणे ये लौकिकाः वाक्यकरणीया आगमिकाश्च धातवो न सङ्गृहीतास्ते ग्रन्थान्तरेभ्य उद्धृत्य सम्पादकेन स्थापितास्तत्र ''५ उद्धुषत् ६ उल्लकसत् उच्छ्वसने । उद्धुषति उच्छ्वसति । [रोमोद्गम उद्धुषणमुल्लकसनमित्यपि अ.चि. २।२२०]॥'' इति दृश्यते पृ.३६४॥ १६. 'उल्लक-' इति१.२.४॥ १७. '-गलूं' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**कम्पस्तु वेपथुः ॥३०६॥**

१ कम्पनं **कम्पः** । 'कपि चलने'(भ्वा.आ.से.), भावे घञ्। २ वेपनं **वेपथुः** । 'टुवेपृ कम्पने'(भ्वा.आ.से.), 'ट्वितोऽथुच्'३।३।८९॥, पुंसि । द्वे कम्पस्य ॥३०६॥

**वैवर्ण्यं कालिका**

१ विरुद्धो वर्णो विवर्णः, विवर्णस्य भावो **वैवर्ण्यम्** । २ कालस्य भावः **कालिका** । चौरादित्वाद् वुञ् । कालयतीति वा ।'काले[1] वर्णे'(चु.उ.से.), ण्वुल् । द्वे विरुद्धवर्णस्य[2] । वर्णविपर्यय वर्णपालटु[3] इति भाषा ॥

**अथाश्रु बाष्पो नेत्राम्बु रोदनम् । अस्त्रमस्तुः**

१ अश्नुते व्याप्नोति कण्ठमिति **अश्रु**, क्लीबे ।'अशूङ्[4] व्याप्तौ'(स्वा.आ.वे.), 'अश्र्वादयश्च'(उणा-७०७) निपात्या इति साधु । २ बाधते नेत्रमिति **बाष्पः**, पुंक्ली.। 'बाधृ लोडने' (भ्वा.आ.से.), 'खष्पशिल्पशष्पबाष्परूपतर्पतल्पाः[5]'(उणा-३०८)इति साधु । ३ नेत्रस्याम्बु **नेत्राम्बु** । ४ रुद्यते **रोदनम्**। 'रुदिर् अश्रुविमोचने'(अ.प.से.), 'ल्युट् च'३।३।११५॥ इति ल्युट् ।५ अस्यते **अस्त्रम्** ।'असु क्षेपणे'(दि.प.से.), बाहुलकाद् रक् । ६ अस्यते **अस्तु**, क्लीबे, दन्त्यसः । 'असु क्षेपणे' (दि.प.से.), 'अश्र्वादयश्च[6]'(उणा-७०७)इति साधु । षट् अश्रुणः "लातः(लोतः)"[शेषनाममाला २।८९॥]इति शैषिकम् ॥

**प्रलयस्त्वचेष्टता**

१ प्रलीयते क्रिया अत्र **प्रलयः**। 'लीङ्[7] विलयने' (दि.आ.अ.), अधिकरणे घञ् । २ **अचेष्टता** गतचेतनत्वम्। यदाहुः-"स्तम्भे विचेतनत्वम्, प्रलये गतचेतनत्वम्, अत एव सहसैव निपतनं भुवि भवति, महाभूतशैथिल्यात्"[[8]]। द्वे मूर्च्छायाः ॥

अथोपसंहरति-

**इत्यष्ट सात्त्विकाः ॥३०७॥**

इत्येते पूर्वोक्ता अष्टौ सात्त्विकाः । यदुक्तम्-

"स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभेदोऽथ वेपथुः ।
वैवर्ण्यमश्रुप्रलयावित्यष्टौ सात्त्विका गुणाः ॥१॥"
[[9]]इति ॥

**धृतिः सन्तोषः स्वास्थ्यं स्यात्**

१ धरणं **धृतिः**। 'धृञ् धारणे'(भ्वा.उ.अ.), 'स्त्रियां क्तिन्'३।३।९४॥ । २ सन्तोषणं **सन्तोषः** ।'तुष तुष्टौ' (दि.प.अ.), भावे घञ् । ३ स्वस्थस्य भावः **स्वास्थ्यम्** । त्रीणि सन्तोषस्य ॥

**आध्यानं स्मरणं स्मृतिः ।**

१ आध्यायते **आध्यानम्** । 'ध्यै चिन्तायाम्'(भ्वा.प.अ.), 'ल्युट् च'३।३।११५॥ इति ल्युट् । २ स्मर्यते **स्मरणम्**। 'स्मृ चिन्तायाम्'(भ्वा.प.अ.), ल्युट् । ३ स्मरणं **स्मृतिः**। 'स्त्रियां क्तिन्'३।३।९४॥ । "आध्यानमुत्कण्ठायामपि"[ ]इत्येके । तथा च काशिकायाम्-"आध्यानमुत्कण्ठापूर्वकं स्मरणम्"[[10]] । त्रीणि पूर्वानुभूतचिन्तनस्य ॥

**मतिर्मनीषा बुद्धिर्धीर्धिषणाज्ञप्तिचेतनाः ॥३०८॥ प्रतिभाप्रतिपत्प्रज्ञाप्रेक्षाचिदुपलब्धयः संवित्तिः शेमुषी दृष्टिः**

१ मन्यतेऽनया **मतिः**, अर्थनिश्चयः । 'मन ज्ञाने' (दि.आ.अ.), 'स्त्रियां क्तिन्'३।३।९४॥, 'अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति'६।४।३७॥ इत्यनुनासिकलोपः । २ 'ईष गतिहिंसादानेषु[11]'(भ्वा.आ.से.), 'गुरोश्च' ३।३।१०३॥ इत्यप्रत्ययः । मनसि[12] ईषा **मनीषा** । 'शकन्ध्वादिषु सिद्धयनुगुणं पररूपं वाच्यम्, तच्च क्वचिट्टेः, क्वचिदकारस्य' [ ]इति उक्तेरत्र टेः । ३ बुध्यतेऽनया **बुद्धिः**। 'बुध अवगमने' (दि.आ.अ.), 'स्त्रियां क्तिन्'३।३।९४॥। ४ ध्यायति **धीः** । 'ध्यै चिन्तायाम्'(भ्वा.प.अ.), 'ध्यायतेः सम्प्रसारणं च'(वा-३।२।१७८॥)इति क्विप्, सम्प्रसारणम् । ५ धृष्णुवन्ति प्रगल्भन्तेऽनया **धिषणा**। 'ञिधृषा प्रागल्भ्ये' (स्वा.प.से.), 'धृषेर्धिषच्[13] संज्ञायाम्'(उणा-२४०)इति युच् । प्रगल्भा समर्था रक्षितुं जगद्धर्षप्रदानेनेत्यर्थः । यद्वा स्कन्दस्वामिना पठिताद्

१. धातुप्रदीपे 'वेल कालोपदेशे' इत्यत्र "काल इत्यपि धातुरित्येके" इति (चुरादिः, पृ.१५९, धातुसं-२६२) तथा मा. धातुवृत्तौ " 'काल इत्यपि धातुः' इति मैत्रेयः" इति च दृश्यते (मा.धातुवृत्तिः, पृ.५७०, धातुसं-२६७) ॥ २. '-वचनस्य' इति२॥ ३. '-लटूं' इति४, '-लटवौ' इति३॥ ४. क्षीरतरङ्गिण्यादौ ङकारानुबन्धो न दृश्यते ॥ ५. '-पर्पतल्पाः' इत्युणादिगणे ॥ ६. 'आस्राद-' इति१.२॥ ७. 'लीञ्' इति२.३.४॥, 'लीङ् श्लेषणे' इति क्षीरतरङ्गिण्यादौ ॥ ८. द्र. स्वोपज्ञटीका २।३०७॥, पृ.७२॥, तथा अम.क्षीरस्वामिटीका १।६।३४॥, पृ.५६॥ ९. द्र. टीकासर्वस्वम्, भा-१, १।७।१६॥, पृ.१४५॥, रामाश्रमी १।७।१६॥, पृ.९९॥ १०. अम.क्षीरस्वामिटीका १।६।३०॥, पृ.५४॥ ११. '-हिंसादर्शनेषु' इति क्षीरतरङ्गिण्यादौ॥ १२. 'मनस्' इति१.२.३॥ १३. 'धृषेर्धिष्-' इत्युणादिगणसूत्रम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'धिषि धारणे' इत्यस्मात् क्युः । यद्वा धारयत्यर्थमिति धीः बुद्धिः, धारयति कर्त्तारं प्रदानेनेति धीकर्म, सनोति संभजत इति सनोतेः पचाद्यचि पृषोदरादित्वाद् ह्रस्वत्वे धिषणा, णकारान्तत्वान्मूर्धन्यमध्या, अन्यथा षत्वाभावाद् धिसना । ''धिष शब्दे (जु.प.से.)''[अम.क्षीर. १।४।१॥]इति तु स्वामी । ६ ज्ञपनं **ज्ञप्तिः** । 'ज्ञपेर्मिच्च[1]'(चु.प.से.)इति गौरादित्वात् क्तिन्, 'तितुत्र-'७।२।९॥ इतीण्निषेधः, 'मितां ह्रस्वः'६।४।९२॥ । ६ चेतनं **चेतना** । 'चिती[2] संज्ञाने'(भ्वा.प.से.), ल्युट्, युच् वा ॥३०८॥ ७ प्रतिभानं **प्रतिभा** । 'भा दीप्तौ'(अ.प.अ.), 'आतश्चोपसर्गे'३।३।१०६॥ इत्यङ् । ८ प्रतिपत्तिः **प्रतिपत्** । प्रतिपूर्वः 'पद गतौ'(दि.आ.अ.), सम्पदादित्वात् क्विप् । ९ प्रज्ञानं **प्रज्ञा** । 'ज्ञा अवबोधने'(क्र्या.प.अ.), 'आतश्चोपसर्गे' ३।३।१०६॥ इत्यङ् । १० प्रकर्षेण ईक्ष्यते ज्ञायतेऽनया **प्रेक्षा**। 'ईक्ष दर्शनाङ्कनयोः[3]'(भ्वा.आ.से.), 'आतश्चोपसर्गे'३।३।१०६॥ इत्यङ् । ११ चेतनं **चित्**, स्त्रियाम् । 'चिती संज्ञाने'(भ्वा.प.से.) सम्पदादित्वात् क्विप्। १२ उपलम्भनम् **उपलब्धिः** । 'डुलभष् प्राप्तौ'(भ्वा.आ.अ.), 'स्त्रियां क्तिन्'३।३।९४॥, 'झषस्तथोः-'८।२।४०॥ इति धत्वम् । १३ संवेदनं **संवित्तिः**। 'विद ज्ञाने'(अ.प.से.), 'स्त्रियां क्तिन्'३।३।९४॥ । संवेदनमपि, विदाऽपि । ''प्रज्ञा श्रद्धा धरा ज्ञप्तिः पण्डा संवेदनं विदा''[[4]]इति शब्दार्णवः। १४ शेत इति शं[5]: मोहः संशयो वा, तं मुष्णाति । 'मुष स्तेये'(क्र्या.प.से.), मूलविभुजादित्वात् के, गौरादित्वाद् ङीषि **शेमुषी**, तालव्यादिमूर्धन्यान्ता । ''शमेः क्वसौ एत्वाभ्यासलोपे शेमुषी''[ ]इति तु कौमुदी । १५ दर्शनं **दृष्टिः** । 'दृशिर् प्रेक्षणे'(भ्वा.प.अ.), 'स्त्रियां क्तिन्' ३।३।९४॥ । सामान्येन षोडश बुद्धेः ॥

अथ बुद्धिविशेषनामान्याह-

## सा मेधा[1] धारणक्षमा ॥३०९॥

१ सा मतिर्धारणसमर्था **मेधा** इत्युच्यते । मेधते सङ्गच्छतेऽस्यां सर्वमिति मेधा । 'मेधृ सङ्गमे'(भ्वा.उ.से.), भिदादित्वादङ्, 'गुरोश्च-'३।३।१०३॥ इत्यकारो वा । 'मिद्द मेदृ[6] मेधाहिंसनयोः' (भ्वा.उ.से.), ''भिदादिसूत्रे मेधाशब्दं व्युत्पादयन् न्यासकारो धान्तावाह[7]''[माधवीयधातुवृत्तिः, भ्वादिः, धातुसं-६००]इति माधवः । अन्ये तु-

''मतिरागामिकी ज्ञेया बुद्धिस्तत्कालदर्शिनी ।
प्रज्ञा चातीतकालज्ञा मेधा कालत्रयात्मिका ॥१॥''
[ ]इति भेदं वदन्ति ॥

## पण्डा[1] तत्त्वानुगा

१ तत्त्वानुगामिनी मतिः **पण्डा** उच्यते । पण्यते स्तूयते पण्डा। 'पण व्यवहारे स्तुतौ च'(भ्वा.व्य.आ.,स्तु. पर. से.), 'ञमन्तात् डः' (उणा-१११) ॥

## मोक्षे ज्ञानम्[1]

१ मोक्षविषये मोक्षफला वा मतिः **ज्ञानम्** । मोक्षे इति निमत्तसप्तमी वा, मोक्षनिमित्तमित्यर्थः॥

## विज्ञानमन्यतः[1] ।

१ मोक्षशास्त्रादन्यत्र शास्त्रे शिल्पे च चित्रादौ मतिः **विज्ञानम्** उच्यते[8] । विरूपं ज्ञानं विज्ञानम् । एकं शिल्पशास्त्रे[9]-ग्राहिण्या मतेः ॥

## शुश्रूषा[1] श्रवणं[2] चैव ग्रहणं[3] धारणं[4] तथा॥३१०॥
## ऊहो[5]ऽपोहो[6]ऽर्थविज्ञानं[7] तत्त्वज्ञानं[8] च धीगुणाः ।

१ श्रोतुमिच्छा **शुश्रूषा** ।'श्रु श्रवणे'(भ्वा.प.अ.),'धातोः कर्मणः समानकर्तृकादिच्छायां वा'३।१।७॥ इति सन्,'सन्यङोः' ६।१।८॥ इति द्वित्वम् । २ श्रूयते **श्रवणम्**, ल्युट्। ३ गृह्यते **ग्रहणम्** ।'ग्रह उपादाने'(क्र्या.उ.से.), ल्युट् ।४ धार्यते **धारणम्**, अविस्मरणम् । धारेर्णिजन्ताल्ल्युट् ॥३१०॥ ५ ऊहनम् **ऊहः**, युक्तिगम्यस्तर्कः ।'ऊह वितर्के'(भ्वा.आ.से.), भावे घञ् । ६ अपोहनम् **अपोहः**, असत्पक्षनिराकरणम्[10] । अपपूर्व 'ऊह वितर्के' (भ्वा. आ.से.), भावे घञ् । ७ अर्थस्य यथावस्थिततया विज्ञानम् **अर्थविज्ञानम्** । ८ [11]तत्त्वस्येहेतरभिन्नत्वस्य ज्ञानं **तत्त्वज्ञानम्**। धियो गुणाः धीगुणाः । बुद्धिगुणा अष्ट ॥

## व्रीडा[1] लज्जा[2] मन्दाक्षं[3] ह्रीः[4] त्रपा[5]

१ व्रीडनं **व्रीडा**, पुंस्त्री, चित्तसङ्कोचः ।'व्रीड चोदने' (दि.प.से.), चोदनं लज्जा, 'गुरोश्च-'३।३।१०३॥ इत्यकारः। व्रीड इति पचाद्यचि अदन्तोऽपि ।''व्रीडजात्यमभजन्मधुपासा''[ ]इति माघः। २ लज्जनं **लज्जा** । 'ओलस्जी व्रीडने'(तु.प.से.), 'गुरोश्च-'३।३।१०३॥ इत्यकारः, 'झलां जश् झसि (झशि)'

१. 'ज्ञप मिच्च' इति मा.धातुवृत्तिः, 'ज्ञप मारणतोषणनिशामनेषु मिच्च' इति स्वामी ॥ २. 'चिति-' इति३॥ ३. '-दर्शने' इति क्षीरतरङ्गिण्यादौ ॥ ४. द्र. रामाश्रमी १।५।१॥, पृ.७१॥ ५. 'शेर्मोहः' इति३॥ ६. 'मिधृ मेधृ-' इति३॥ ७. 'धोन्ता-' इति१॥ ८. १.२.४नास्ति ॥ ९. '-शास्त्रे ग्राहि-' इति१॥ १०.'असत्यनिराकरणम्' इति१॥ ११. 'तत्त्वस्य हेतुरभि-' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

८।४।५३॥ इति दत्वम्, 'स्तोः श्चुना श्चुः'८।४।४०॥ । ३ मन्दमक्षं यत्र **मन्दाक्षम्**, स्वोत्थलज्जावशाद्धि चक्षुरञ्चनमिति । ''शूका मन्दाक्षम्''[[1]] इत्येके । ४ ह्रीयते **ह्रीः** । 'ह्री लज्जायाम्'(जु.-प.अ.), सम्पदादित्वात् क्विप्, स्त्रीलिङ्गः । ५ त्रप्यते **त्रपा** । 'त्रपूष् लज्जायाम्'(भ्वा.आ.से.), 'षिद्भिदादिभ्योऽङ्'३।३।-१०४॥ । पञ्च लज्जायाः ॥

**साऽपत्रपाऽन्यतः ॥३११॥**

१ सा लज्जाऽन्यतः परस्माद् यदि स्यात् तदा **अपत्रपा** । अपत्रप्यतेऽपत्रपा । ''ह्रीर्लज्जाऽपत्रपा व्रीडा''[[2]] इति रत्नकोषाद् ह्रीमात्रेऽप्यत्रपा प्रोक्ता। एकं पित्रादिपुरतो जातलज्जायाः ॥३११॥

**जाड्यं मौर्ख्यम्**

१ जडस्य भावः कर्म वा **जाड्यम्** । २ मूर्खस्य भावः कर्म वा **मौर्ख्यम्** । उभयत्र 'गुणवचनब्राह्मणादिभ्यः-'६।१।१२४॥ इति ष्यञ् । द्वे मूर्खत्वस्य ॥

**विषादोऽवसादः सादो विषण्णता[3] ।**

१ विषदनं **विषादः** । २ अवसदनम् **अवसादः**। ३ सदनं **सादः** । त्रिष्वपि 'षद्लृ [4]विशरणगत्यवसादनेषु'(भ्वा.प.अ.), भावे घञ् । ४ [5]विषण्णस्य भावो **विषण्णता**[6] । चत्वारि विषादस्य॥

**मदो मुन्मोहसम्भेदः**

१ मुन्मोहयोः आनन्दसम्मोहयोः सम्भेदः सङ्गमो **मदः**, मत्ततेत्यर्थः । माद्यति मदः । 'मदी हर्षे'(दि.प.से.), 'मदोऽनुपसर्गे'३।३।६७॥ इत्यप् । '' 'व्यधि जपोरनुपसर्गे' ३।३।६१॥ इत्यत्रैव मदिग्रहणकर्त्तव्ये पृथक्सूत्रारम्भकरणाद् 'माद' इत्यपि घञि''[न्यासः ३।३।६७॥]इति न्यासः[7] ॥

**व्याधिस्त्वाधी रुजाकरः ॥३१२॥**

१ रुजां[8] रोगं करोति रुजाकरः, एतादृशो य आधि-र्मनः-पीडा, सा **व्याधिः** उच्यते । व्याधीयत इति व्याधिः । व्याङ्पूर्वः 'डुधाञ् धारणादौ'(जु.उ.अ.), 'उपसर्गे घोः किः' ३।३।९२॥ । एवमाधिः, पुंसि । यदमरः-''पुंस्याधिः'' [अमरकोषः १।७।२८॥]इति ॥३१२॥

**निद्रा प्रमीला शयनं संवेशस्वापसंलयाः ।**
**नन्दीमुखी श्वासहेतिस्तन्द्रा**

१ नियतं द्रान्तीन्द्रियाण्यस्यां **निद्रा** । निपूर्वः 'द्रा कुत्सायां गतौ'(अ.प.अ.), 'आतश्चोपसर्गे'३।३।१०६॥ इत्यङ् । २ प्रमीलन्तीन्द्रियाण्यस्यां **प्रमीला**। 'मील निमीलने'(भ्वा.प.से.), 'गुरोश्च-'३।३।१०३॥ इत्यकारः। ३ शय्यते **शयनम्** । 'शीङ् स्वप्ने'(अ.आ.से.), ल्युट् । ४ संवेशनं **संवेशः** । संपूर्वो 'विश् (विश) प्रवेशने'(तु.प.अ.), निद्रार्थः, भावे घञ् । ५ स्वपनं **स्वापः** । 'ञिष्वप् शये'(अ.प.अ.), भावे घञ् । ६ संलीयन्ते इन्द्रियाण्यत्र **संलयः**। 'लीङ्[9] विलयने'(दि.आ.अ.), 'एरच्'३।३।५६॥ । ७ नन्दीव मुखमस्यां **नन्दीमुखी**, गौरादिः। ८ श्वासा हेतयोऽस्यां **श्वासहेतिः**। एतौ स्वप्नवाचकावित्यन्ये । ९ तन्द्र्यते **तन्द्रा** । 'तन्द्रि सादमोहनयोः'( ), सौत्रः, 'घञर्थे कविधानम्'(वा-३।३।५८॥)इति कः । इन्द्रियाणां तननं द्रात्यस्यां वा । तन्द्रिधातोः सौत्रान्मूर्च्छार्थात् 'तन्त्रेविदिती' इतीनौ ('तन्द्रेरिदीतौ' इति) ह्रस्वेकारप्रत्यये तन्द्रिः, ततो वा ङीषि । ''विभज्य नक्तन्दिवमस्त[10]तन्द्रिणा''[किरातार्जुनीयम् १।९॥]इति भारविः । दीर्घेकारप्रत्यये तन्द्रीः, लक्ष्मीवत् । ''यामेकतस्तव बिभर्त्ति गुरुर्वितन्द्रीः[11]''[रघुवंशम् ५।६६॥]इति रघुः । 'स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच्'३।३।१५८॥इति पाणिनिनिर्देशाद्वा तन्द्रा शब्दः । एवं 'तन्द्रिः तन्द्री तन्द्रीः तन्द्रा' इति रूपचतुष्कम् । नव सामान्येन निद्रायाः । ''तामसी''[शेषनाममाला २।९०॥]इति शैषिकम् ॥

**सुप्तं तु साऽधिका ॥३१३॥**

१ सा निद्रा अधिका साऽतिशया **सुप्तं** प्रोच्यते । स्वपनं[12] सुप्तम् । 'ञिष्वप् शये'(अ.प.अ.), क्तः, सम्प्रसारणम् । ''सुष्वापः सुखसुप्तिका''[शेषनाममाला २।९०॥] इति शैषिके । 'अघोर निद्रा' इति भाषा ॥३१३॥

---

१. द्र. स्वोपज्ञटीका २।३११॥, पृ.७३॥ २. द्र. रामाश्रमी १।७।२३॥, पृ.१०३॥ ३. 'विषन्नता' इति१॥ ४. '-विशरणादौ' इति१.२.३॥ ५. 'निषण्णस्य भावो निषण्णता' इति१॥ ६. 'विषन्नता' इति४॥ ७. न्यासे ''उन्माद इति । अत्रापि 'कुगतिप्रादयः' इति 'व्यधजपोरनुसर्गे' इत्यत्रैव मदिग्रहणे कर्त्तव्ये 'मदोऽनुपसर्गे' इति सूत्रप्रणयनमस्य विधेरनित्यत्वज्ञापनार्थम्, तेन माद इति सिद्धं भवति ॥'' इति दृश्यते, भा-३, ३।३।६७॥, पृ.५५॥, दिवादौ 'मदी हर्षे' इत्यत्र मा.धातुवृत्तिरपि द्रष्टव्या, पृ.४३६॥ ८. 'रुजा' इति४॥ ९. 'लीङ्' इति३, क्षीरतरङ्गिण्यादौ श्लेषणार्थो न दृश्यते॥ १०. '-मस्तु-' इति४॥ ११. '-तन्द्रीः' इति१.२.४॥ रघुवंशकाव्ये मुख्यपाठे 'तामेक-' इति तथा 'विनिद्र-' इति दृश्यते, तत्रैव पाठान्तरे क्रमेण 'याम्' 'वितन्द्रः' इति दृश्यते । एवं '-तन्द्रीः' इत्यस्याभाव एव ॥ १२. 'सुपनम्' इति१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**औत्सुक्यं रणरणकोत्कण्ठे आयल्लकारती । हृल्लेखोत्कलिके च**

१ उत्सुकस्य भावः **औत्सुक्यम्** । 'गुणवचन-' ५।१।१२४॥ इति ष्यञ् । २ अतिशयेन चित्तं रणत्यत्रेति **रणरणकः** । 'अण रण वण भणेत्यादयः शब्दार्थाः'(भ्वा.-प.से.), 'घञर्थे कविधानम्'(वा-३।३।५८॥)इति कः, 'कृञादीनां के द्वे भवतः'( )इति द्विर्वचनम्, संज्ञायां कन्, पृषोदरादित्वाद्[1] हलादिशेषाभावोऽभ्यासाकारश्च । ३ उत्कण्ठनम् **उत्कण्ठा** । 'कठि शोषे'[2](भ्वा.आ.से.), उत्पूर्वाद् 'गुरोश्च-' ३।३।१०३॥ इत्यकारप्रत्ययः । उत्कण्ठ इत्यकारान्तोऽपि । ४ आयत आगच्छतो लकति आस्वादयति **आयल्लकम्** । 'लक आस्वादने'(चु.उ.से.), पचाद्यच्। ५ इयर्त्ति सुखमस्यां **अरतिः**, स्त्रियाम् । 'ऋ गतौ'(जु.प.अ.), 'वहिवस्यर्त्तिभ्यश्चित्'(उणा-५००)इति सूत्रेण अतिप्रत्ययः । न रतिररति वा । ६ हृदयं लिखति **हृल्लेखः** । 'लिख अक्षरविन्यासे'(तु.प.से.), कर्मण्यण्, 'हृदयस्य हृत् लेखयदण्लासेषु'६।३।५०॥ इति हृदादेशः । 'लेख'[3] इत्यणन्तस्य ग्रहणाद् घञन्ते लेखशब्दे उत्तरपदे 'हृदयलेख' इति भवति। ७ उत्कलनम् **उत्कलिका** । संज्ञायां वुन् । सप्त औत्सुक्यस्य । 'ऊतावलि' इति भाषा ॥

**अथाबहित्थाऽऽकारगोपनम् ॥३१४॥**

१ न बहिःस्थं चित्तमस्याम् **अबहित्था**, स्त्रीक्ली. । यत् क्षीरस्वामी-"अबहित्था स्त्रीक्लीबयोः"[ [4] ]। अव(ब)-हीयते गोप्यते आकारोऽत्रेति वा, पृषोदरादिः । आकारस्य भ्रूविकारमुखरागादेर्गोपनम् आच्छादनम् आकारगोपनम्, तस्यैकम् । "[आकारगूहने च] आवकुटिकाऽवकुटारिका[5] गृहजालिका"[शेषनाममाला २।९०॥]शैषिकाणि ॥३१४॥

**शङ्काऽनिष्टोत्प्रेक्षणं स्यात्**

१ अनिष्टस्योत्प्रेक्षणं शङ्कनं सम्भावनमिति यावत् शङ्का ॥

**चापलं त्वनवस्थितिः ।**

१ चपलस्य भावः कर्म वा **चापल्य(ल)म्**[6] । ['हायनान्तयुवादिभ्योऽण्'५।१।१३०॥इत्यण्] । २ अनवस्थानम् **अनवस्थितिः** । 'ष्ठा गतिनिवृत्तौ'(भ्वा.प.अ.) 'स्त्रियां क्तिन्' ३।३।९४॥ 'द्यतिस्यतिमास्थाम्-'७।४।४०॥ इतीत्वम् । द्वे चपलत्वस्य ॥

**आलस्यं तन्द्रा कौसीद्यम्**[8]

१ लसतीति लसः । 'लस श्लेषणक्रीडनयोः'(भ्वा.-प.से.), पचाद्यच् । न लसोऽलसः, अलसस्य भाव **आलस्यम्** । 'न नञ्पूर्वात् तत्पुरुषादचतुरसङ्गतलवणवड(ट)युध-कतरसलसेभ्यः'५।१।१२१॥ इति नञ्पूर्वात् तत्पुरुषादचतुरसङ्ग-तलवणाद्युत्तरपदे भावप्रत्यया न भवन्तीति निषेधश्चतुरादिपर्युदा-सादिह नेति ष्यञ्[9] भवति । २ तन्द्रणं **तन्द्रा** । 'तन्द्रिः साद-मोहनयोः'( ), सौत्रः, भावे घञ् । ३ कुसीदस्य अलसस्य भावः **कौसीद्यम्** । त्रीणि आलस्यस्य[10] ॥

**हर्षश्चित्तप्रसन्नता ॥३१५॥**

**ह्लादः प्रमोदः प्रमदो मुत्प्रीत्यामोदसम्मदाः। आनन्दानन्दथू**

१ हर्षणं **हर्षः** । 'हृषु[11] तुष्टौ'(भ्वा.दि.वा,प.से.), भावे घञ् । "हरिषोऽपि"[ ]इति शब्दप्रभेदः । २ चित्तस्य मनसः प्रसन्नता प्रसादः **चित्तप्रसन्नता** ॥३१५॥ ३ ह्लादनं **ह्लादः** । 'ह्लादी हर्षे'[12](भ्वा.आ.से.), घञ् । ४ प्रमोदनं **प्रमोदः** । 'मुद हर्षे'(भ्वा.आ.से.), भावे घञ् । ५ प्रमदनं **प्रमदः**। 'मदि[13] स्तुतिमोदमदस्वप्नकान्तिगतिषु'(भ्वा.आ.से.), 'प्रमद-सम्मदौ हर्षे'३।३।६८॥ इति निपातितौ । ६ मोदनं **मुद (मुत्)** । 'मुद हर्षे'(भ्वा.आ.से.), सम्पदादित्वात् स्त्रियां क्विप् । ७ प्रीयते मनोऽस्यां **प्रीतिः** । 'प्रीङ् प्रीतौ'(दि.-आ.अ.), 'स्त्रियां क्तिन्'३।३।९४॥ । ८ आमोदनम् **आमोदः** । 'मुद हर्षे'(भ्वा.आ.से.), भावे घञ् । ९ सम्मदनं **सम्मदः** । १० आनन्दनम् **आनन्दः** । 'टुणदिं(टुनदि) समृद्धौ'(भ्वा.-प.से.), भावे घञ् । ११ आनन्दनम् **आनन्दथुः** । 'टुणदि (टुनदि) समृद्धौ'(भ्वा.प.से.), 'ट्वितोऽथुच्'३।३।८९॥ इत्यथुच्, पुंस्ययम् । एकादश हर्षस्य ॥

**गर्वस्त्वहङ्कारोऽवलिप्तता ॥३१६॥**

१. इतोऽग्रे २प्रतौ 'हलादित्वाद्' इति दृश्यते ॥ २. 'कण्ठ विशेषे' इति१॥, 'कण्ठि-' इति२.३॥ ३. 'इत्यणान्त-' इति३॥ ४. अम. क्षीरस्वामिटीकायां न दृश्यते ॥ ५. 'अवकटिका' इति शेषनाममालास्वोपज्ञटीकयोः ॥, 'आवकुठिका' इति४॥ ६. 'चापल्यम्' इति३.४॥ ७. "युवादेरण्'(हैमसू-७।१।६७॥)इत्यण् इति स्वोपज्ञवृत्तौ" इति ४प्रतौ टिप्पणी ॥ ८. 'कौशी-' इति१.४॥ ९. इतोऽग्रे सर्वादर्शेषु 'न' इति दृश्यते, स त्वनावश्यकः, अन्यथाऽनिष्टरूपापत्तिः, अपरश्चात्र माधवीयधातुवृत्तिस्तुलनीया, भ्वादिः, धातसं-४५८, पृ.१७८॥ १०. 'आलसस्य' इति३॥ ११. 'हृष-' इति४, यदि उदिदेव तदा 'अलीके' इत्यर्थो योग्यः, यदि च 'तुष्टौ' इत्येवार्थः स्यात् तर्हि 'हृष' इति धातुर्युक्तः ॥ १२. 'ह्लादी सुखे च' इति क्षीरतरङ्गिण्यादौ॥ १३. 'मद-' इति१.२.३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**दर्पोऽभिमानो ममता मानश्चित्तोन्नतिः स्मयः ।**

१ गर्वणं **गर्वः** । 'कर्व खर्व गर्व दर्पे'[1](भ्वा.प.से.), भावे घञ् । गिरतीव परमिति वा गर्वः । 'गॄ निगरणे'(तु.प.से.), 'कृगॄशॄदृभ्यो वः'(उणा-१५३)इति वः, पुंस्यम्। वैजयन्तीकारस्तु- ''अभिमानस्त्वहङ्कारो गर्वोऽस्त्री[2]''[वैजन्तीकोशः ३।६।१६९॥] इत्याह। २ करणं कारः, अहं प्रधानः कारः **अहङ्कारः** । ३ अवलिप्तस्य भावः **अवलिप्तता** ॥३१५॥ । ४ दर्पणं **दर्पः**। 'दृप हर्षणमोचनयौः[3]'(दि.प.अ.), 'दर्प गर्वे[4]'( )अस्माद्वा भावे घञ् । ५ अभि सर्वतः मानः **अभिमानः** । ६ ममेत्यस्य भावो **ममता** । ७ मत्समो अन्यो नास्तीति मननं **मानः**, पुंक्ली.। ८ चित्तस्य उन्नतिः **चित्तोन्नतिः** । ९ स्मयनं **स्मयः** । 'स्मिङ् ईषद्धसने'(भ्वा.आ.अ.), 'एरच्'३।३।५६॥ । नव गर्वस्य ॥

**स मिथोऽहमहमिका**

१ स गर्वो मिथः परस्परमहं शक्तोऽहं शक्त इत्यस्याम् **अहमहमिका**[5] । मयूरव्यंसकादित्वात् साधुः । अहमिति मान्त-मव्ययमहङ्काराऽर्थे ॥

**या तु सम्भावनाऽऽत्मनि ॥३१७॥**

**दर्पात् साऽऽहोपुरुषिका स्यात्**

१ दर्पाद् गर्वाद् या आत्मनि स्वविषये[6] सम्भावना, तस्या एकम् **आहोपुरुषिका**[7] । अहो अहं पुरुष इत्यस्याम् आहोपुरुषिका, द्वितीयस्वरादिः ॥३१७॥

**अहंपूर्विका पुनः ।**

**अहं पूर्वं अहं पूर्वमिति**

१ अहं पूर्वं[9] इत्यस्याम् **अहंपूर्विका** । स्वार्थे कन्। एवमहंप्रथमिका, अहमग्रिका च । 'हुं पहिलुं[10]' इति भाषा॥

**उग्रत्वं तु चण्डता ॥३१८॥**

१ उग्रस्य भाव **उग्रत्वम्** । २ चण्डस्य भावः **चण्डता**। द्वे उग्रत्वस्य । 'आकरापणउं[11]' इति भाषा ॥३१८॥

**प्रबोधस्तु विनिद्रत्वम्**

१ प्रबोधनं **प्रबोधः** । 'बुध बोधने'(भ्वा.प.से.), भावे घञ् । २ विनिद्रस्य भावो **विनिद्रत्वम्** । द्वे प्रबोधस्य। 'जागवापणउं[12]' इति भाषा ॥

**ग्लानिस्तु बलहीनता ।**

१ ग्लानं **ग्लानिः** । 'ग्लै हर्षक्षये'(भ्वा.प.अ.), 'म्लाग्लाज्याहात्वरिभ्यो निः[13]'( वा-३।३।९४॥), स्त्रीलिङ्गः। बलहीनस्य भावो बलहीनता बलापचयः । एकं बलहीनतायाः॥

**दैन्यं कार्पण्यम्**

१ दीनस्य भावो **दैन्यम्** । 'गुणवचन-'५।१।१२४॥ इति ष्यञ्। एवं कृपणस्य भावः **कार्पण्यम्** । द्वे कृपणत्वस्य॥

**श्रमस्तु क्लमः क्लेशः परिश्रमः ॥३१९॥**

**प्रयासायासव्यायामाः**

१ श्रमणं **श्रमः** । 'श्रमु तपसि[14] खेदे च'(दि.प.से.), भावे घञ्, 'नोदात्तोपदेशस्य-'७।३।३४॥ इति न वृद्धिः । २ क्लमनं **क्लमः** । 'क्लमु ग्लानौ'(दि.प.से.), भावे घञ् । ३ क्लेशनं **क्लेशः** । 'क्लिशू[15] विबाधने'(क्र्या.प.वे.), भावे घञ्। ४ परिश्रमणं **परिश्रमः** । 'श्रमु तपसि[14] खेदे च'(दि.प.से.), भावे घञ् ॥३१९॥ ५ प्रयसनं **प्रयासः** । 'यसु प्रयत्ने'(दि.प.से.), भावे घञ् । ६ एवमायसनम् **आयासः**। 'यसु प्रयत्ने'(दि.प.से.), घञ् । ७ व्यायमनं **व्यायामः** । 'यमु(यम) उपरमे'(भ्वा.प.अ.), घञ् । सप्त श्रमस्य ॥

**उन्मादश्चित्तविप्लवः ।**

१ उन्मदनम् **उन्मादः** । 'मद(मदि) स्तुत्यादौ[16]' (भ्वा.आ.से.), भावे घञ् । २ चित्तस्य विप्लुतिः **चित्तविप्लवः** । 'प्लुङ् गतौ'(भ्वा.आ.अ.), 'ॠदोरप्'३।३।५७॥ । द्वे वातभूतादिदोषात् चित्तानवस्थितेः[17] ॥

**मोहो मौढ्यम्**

१ मोहनं **मोहः** । 'मुह वैचित्ये'(दि.प.से), भावे घञ् । २ मूढस्य[18] भावो **मौढ्यम्** । मोहो नाम मूर्च्छा ।

---

१. मा. धातुवृत्तिसम्मतोऽयं पाठः, 'गर्व खर्व दर्पे' इति क्षीरतरङ्गिणी ॥ २. द्र. स्वोपज्ञटीका २।३१५॥, पृ.७४॥, वैजयन्तीकोशे तु ''-अभिमानोऽहङ्कारो गर्वः स्त्री-'' इति दृश्यते, पृ.७०॥ ३. धातुप्रदीपसम्मतोऽयं धातुपाठः, 'दृप हर्षणमोहनयोः' इति क्षीरतरङ्गिण्यादौ ॥ ४. क्षीरतरङ्गिण्यादावयं धातुर्न दृश्यते ॥ ५. ''अहमहमिका तु सा स्यात् यत् क्रियते स्पर्धनादिकं (स्पर्धयाधिकं) किञ्चित्'' [हलायुधकोशः ४।७८४॥]इति परस्परं गर्वकरणाख्यम्'' इति २प्रतेः टिप्पणी॥ ६. 'विषये' इति१॥ ७. ''गर्वादात्मसम्भावना १ 'खा हुं मांटी' इति भाषा 'यत्र वृथाभिनिवेशस्तामाहोपुरि(रु)षिकां विदुः प्राज्ञाः' [हलायुधकोशः ४।७८४॥]इति हलायुधः, यत्सौन्दर्यलहरी-''पुरस्तादास्तां नः पुरमथितुराहोपुरि(रु)षिका'' इति २प्रतेः टिप्पणी ॥ ८. इतोऽग्रे २प्रतौ 'हुं मांटी इति भाषा' इति दृश्यते ॥ ९. इतोऽग्रे ४प्रतौ 'अहं पूर्वः' इति दृश्यते ॥ १०. 'पहिलउ' इति३, 'पिहिलुं' इतिर॥ ११. 'आकरपणो' इति३॥ १२. '-पणौ' इति४, '-पणुं' इति३॥ १३. 'ग्लाम्लाज्याहाभ्यो निः' इति वार्तिकस्वरूपं दृश्यते ॥ १४. 'खेदे तपसि च' इति१.२.३॥ १५. 'क्लिशु-' इति१.४॥ १६. 'स्तुतौ' इति३.४॥ १७. '-स्थितौ' इति४, '-स्थितः' इतिर॥ १८. 'मोहस्य' इति१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यन्महेश्वरः-''मोहमिच्छन्ति मूर्च्छायामविद्यायां च सूरयः'' [विश्वप्रकाशकोशः, हान्तवर्गः, श्लो-५]इति । मूर्च्छायां यथा- ''अथ मोहपरायणा सती''[ ][1]इत्यादि । अविद्या विपर्ययस्तत्र यथा-''न मुञ्चामः कामानहह गहनो मोहमहिमा''[ ]इत्यादि । द्वे मोहस्य ॥

## चिन्ता ध्यानम्

१ चिन्तनं **चिन्ता**। 'चिति स्मृत्याम्'(चु.प.से.), चुरादौ, 'चिति(चिन्ति)पूजिकथिकुम्बि-'३।३।१०५॥ इत्यादिनाऽङ् । अप्रत्यये[2] कार्ये 'चिन्तिपूजि-'३।३।१०५॥ इत्यङ्-विधानं गुणाभावार्थम्, तत्सामर्थ्याण्णिलोपाभावोऽपि, इति 'चिन्तिय (चिन्तिया)' इत्यपि[3]। इति स्मृतिः क्तिन्नन्ता[4] । २ ध्यायते **ध्यानम्** । 'ध्यै चिन्तायाम्'(भ्वा.प.अ.), ल्युट् । द्वे चिन्तनस्य ॥

## अमर्षः क्रोधसम्भवः ॥३२०॥ गुणो जिगीषोत्साहवान्

१ क्रोधाज्जातो जिगीषोत्साहगुणयुक्तो गुणः **अमर्षः** प्रोच्यते । क्रोधात् सम्भव उत्पत्तिर्यस्य स क्रोधसम्भवः, [जेतुमिच्छा] जिगीषा[5], उत्साह उद्यमस्तौ विद्येते यस्मिन् स जिगीषोत्साहवान् । न मर्षणम् अमर्षः । 'मृष तितिक्षायाम्' (दि.उ.से.), भावे घञ् । अमर्षो ह्रस्वादिः । ''किम[प्य]-मर्षोऽनुनये[6] भृशायते''[किरातार्जुनीयम् ८।५४॥]इति भारविः। 'अन्येषामपि-'(वा-३।२।१०१॥)इति दीर्घत्वे दीर्घादिरपि । ''निरुद्योग(निरुद्योगं) निरामर्षं निर्वीर्यम्[7]''[ ][8]इति विशाखः॥

## त्रासस्त्वाकस्मिकं भयम् ।

१ त्रसनं **त्रासः**,निर्घातादिभ्यश्चित्तचमत्कृतिरूपः।'त्रसी उद्वेगे'(दि.प.से.), भावे घञ् ।अकस्माद् भवमाकस्मिकं भयम्, अत्र भयेन पूर्वापरविचार इति भयाद्भेदः।'उद्रक[9]' इति भाषा॥

## अपस्मारः स्यादावेशः

१ अपस्मरणम् **अपस्मारः** । 'स्मृ चिन्तायाम्' (भ्वा.प.अ.), भावे घञ् ।आवेशनमावेशः ।भावे घञ् ।वाई-नामैकम् 'अपस्मार' इति । धातुवैषम्यादेरावेशः । यदात्रेयः-

''पित्तं रक्तं मरुत् श्लेष्मा उदानः कुपितो भृशम् ।
प्राणः शिरसि संकुप्य कुरुते नष्टचेष्टताम्[10] ॥१॥
प्राणान् नयत्यचेतनत्वं नाडिं चेन्द्रियरोधनात् ।
पतेच्च काष्ठवच्छीघ्रं मुखे लालां विमुञ्चयेत् ॥२॥
कण्ठश्च घुर्घुरायेत फेनमुद्गिरतेऽथवा[11] ।
कम्पेते हस्तपादे च रक्तव्यावर्त्तलोचनः ॥३॥
अपस्मारे तु लिङ्गानि जायन्ते च भिषग्वर ! ।''[ ]इति॥

## निर्वेदः स्वावमाननम् ॥३२१॥

१ निर्वेदनं **निर्वेदः** । 'विद विचारे[12]'(रु.आ.अ.), भावे घञ् । स्वस्यात्मनः अवमाननम् अवगणनम्, तस्य एकम् ॥३२१॥

## आवेगस्तु त्वरिस्तूर्णिः संवेगः सम्भ्रमस्त्वरा ।

१ आवेजनम् **आवेगः** । 'ओविजी भयचलनयोः' (तु.आ.से., रु.प.से.), भावे घञ्, 'चजोः- '७।३।५२॥ इति कुत्वम् । २ त्वरणं **त्वरिः** । 'ञित्वरा सम्भ्रमे'(भ्वा.आ.से.), '-इन्'(उणा-५५७)इति इन् । ३ तूरणं **तूर्णिः** । एतौ स्त्री-लिङ्गौ। 'तूरी गतित्वरणहिंसनयोः'(दि.आ.से.), औणादिको निप्रत्ययः । ४ संवेजनं **संवेगः** । 'ओविजी भयचलनयोः' (तु.आ.से.,रु.प.से.), भावे घञ् । ५ सम्भ्रमणं **सम्भ्रमः** । 'भ्रमु अनवस्थाने'(दि.प.से.), भावे घञ् । ६ त्वरणं **त्वरा**। 'ञित्वरा सम्भ्रमे'(भ्वा.आ.से.), भिदादित्वादङ् । षड् भयादिहेतुना कार्यत्वराकरणस्य । '[13]उतावलि' इति भाषा ॥

## वितर्कः स्यादुन्नयनं परामर्शो विमर्शनम् ॥३२२॥ अध्याहारस्तर्क ऊहः

१ वितर्कणं **वितर्कः** । 'तर्क विचारणे[14]'(चु.प.से.), भावे घञ् । २ उन्नीयत **उन्नयनम्** । 'णीञ् प्रापणे'(भ्वा.उ.अ.), अस्माद् ल्युट् ।३ परामर्शनं **परामर्शः** ।'मृश आमर्शने'(तु.प.अ.), भावे घञ् । ४ विमृश्यते[15] **विमर्शनम्** । ल्युट् ॥३२२॥ ५ अध्याहरणम् **अध्याहारः**।'हृञ् हरणे'(भ्वा.उ.अ.), भावे घञ् । ''न्यूनपदपूरणार्थमधिकपदोपादानमध्याहारः''[ ][16]इति सर्वधरः।

१. द्र. अनेकार्थसङ्ग्रहकैरवाकरकौमुदीटीका, भा-१, २।५८७॥, पृ.३३६॥ २. 'अप्रत्यये' इति१॥ ३. अत्र मा.धातुवृत्तिर्द्रष्टव्या, तत्र हि ''अत्र मैत्रेयः-'अकारे विधातव्येऽङो विधानं गुणाभावार्थम्, तत्सामर्थ्यात् कदाचिण्णिलोपो नास्ति' इति तत्र चिन्तिया इतीयङुदाहर्तव्यः''[मा.धातुवृत्तिः, चुरादिः, धातुसं-२, पृ.५३९]इति दृश्यते ॥ ४. 'इति स्मृतिः क्तिन्नन्ता' इति ग्रन्थः प्रकृतप्रकरणासङ्गतः प्रतिभाति ॥ ५. १.२.३नास्ति ॥ ६. '-नयं' इति१, '-भयं' इति४॥ ७. 'निर्वापम्' इति४॥ ८. द्र. टीकासर्वस्वम्, भा-१, १।७।२६॥, पृ.१५५॥ ९. 'अउद्रक' इति४॥ १०. 'नष्टचेतनाम्' इति३॥ ११. 'यथा' इति१॥ १२. 'विचारणे' इति क्षीरतरङ्गिण्यादौ । '-विस्तारे' इति२॥ १३. 'ऊता-' १.२॥ १४. क्षीरतरङ्गिण्यादौ भाषार्थकतर्कधातुर्दृश्यते ॥ १५. 'विमर्श्यते' इति२.४॥ १६. द्र. टीकासर्वस्वम्, भा-१, १।५।३॥, पृ.१०२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

६ तर्कणं **तर्कः** ।'तर्क विचारणे'(चु.प.से.) ।७ ऊहनम् **ऊहः** । 'ऊह विचारणे[१]'(भ्वा.प.से.), उभयत्र भावे घञ् । सप्त विमर्शनस्य ।'विमासवउं[२]' इति भाषा ॥

### असूयाऽन्यगुणदूषणम् ।

१ असूयनम् **असूया** ।'असु मानसोपतापे[३]', कण्ड्वादिः ।'असूञ् दोषाविःकृतौ'[ ]इत्यन्ये ।'अः(अ) प्रत्ययात्' ३।१।२७॥इत्यप्रत्ययः, बाहुलकाद् यक्[४] । गुणेषु दोषाविष्करणमसूया । अन्यगुणानां दूषणमन्यगुणदूषणम् ॥

**मृतिः संस्था मृत्युकालौ परलोकगमोऽत्ययः ॥३२३॥**
**पञ्चत्वं निधनं नाशो दीर्घनिद्रा निमीलनम् ।**
**दिष्टान्तोऽस्तं कालधर्मोऽवसानम्**

१ मरणं **मृतिः** । ['मृङ् पाणत्यागे'(तु.आ.प.अ.),] 'स्त्रियां क्तिन्'३।३।९४॥ । २ संस्थानं **संस्था** । 'ष्ठा गतिनिवृत्तौ'(भ्वा.प.अ.), 'आतश्चोपसर्गे'३।३।१०६॥ अङ् । ३ मरणं **मृत्युः**, पुंस्त्री । 'मृङ् पाणत्यागे'(तु.आ.प.अ.), 'भुजिमृङ्भ्यां युक्त्युकौ'(उणा-३०१)इति त्युक् । ४ कालयति क्षिपत्यायुः **कालः** । 'कलण् क्षेपणे[५]'(चु.उ.से.), चुरादिः, पचाद्यच् । ५ परलोके गमनं **परलोकगमः** । भावे घञ् । ६ अत्ययनम् **अत्ययः** । अतिपूर्वाद् 'इण् गतौ'(अ.प.अ.), अस्माद् 'एरच्'३।३।५६॥ ॥३२३॥ ७ देहस्तावत् पञ्चभूतारब्धः, मरणे त्वेतस्य पञ्चानामप्यभावः **पञ्चत्वम्**, प्रत्येकं स्वांशसङ्क्रमात् । ८ निवृत्तं[६] धनमत्रेति **निधनम्**, पुंक्ली. । यद्वा निपूर्वः 'डुधाञ् धारणपोषणयोः[७]'(जु.उ.अ.), 'कर्पिवृजिमन्दिनिधाञ्भ्यः क्युन्[८]'(उणा-२३९)इति क्युनि निधनम् । निपूर्वो धनशब्दो मरणार्थ इति सभ्याः । ९ नशनं **नाशः** । 'णश अदर्शने'(चु.प.से.), भावे घञ् । १० दीर्घा चासौ निद्रा च **दीर्घनिद्रा** । ११ निमील्यतेऽस्मिन्निन्द्रियैरिति **निमीलनम्** । 'मील निमीलने[९]'(भ्वा.प.से.), 'करणाधिकरणयोश्च'३।३।११७॥ इत्यधिकरणे ल्युट् । १२ दिष्टस्य कालस्य जीवितावधेरन्तो **दिष्टान्तः** । १३ अस्यते **अस्तम्** । 'असु क्षेपणे'(दि.प.से.), दिवादौ । अस्तंगत्य-'अस्तं च'[१०] १।४।६८॥ इति क्रियायोगे गतित्वाद् अस्तंशब्द[स्य] समासः, ''अस्मादेव निर्देशाद् अस्तंशब्दस्य मान्तत्वम्''[ ]इत्यात्रेयः, ''अव्युत्पन्नोऽव्ययम्''[ ]इति न्यासपदमञ्जर्यादौ[११] । १४ कालो मृत्युद्यू(दू)तः, क्षणत्रुट्याद्यात्मको वा । कालस्य धर्मः **कालधर्मः**, ''कालः संहरति प्रजाः''[हारीतस्मृतिः]इत्युक्तेः[१२] । १५ अवसीयते **अवसानम्** । 'षोऽन्तकर्मणि'(दि.प.अ.), ल्युट् । पञ्चदश मरणस्य ॥

**सा तु सर्वगा ॥३२४॥**
**मरको मारिः**

१ सा मृतिः सर्वगा सकलव्यापिनी, ॥३२४॥ मरणं **मरकः**, पुंक्ली. । यद्गौडः-''मरकोऽस्त्रियाम्''[ ] । 'मृङ् प्राणत्यागे'(तु.आ.प.अ.), संज्ञायां क्वुन् । २ मारणं[१३] **मारिः** । 'मृङ् प्राणत्यागे'(तु.आ.प.अ.), अस्माण्णिजन्तादिन् । द्वे 'मरगी' इति भाषायाः ॥

### त्रयस्त्रिंशदमी स्युर्व्यभिचारिणः ।

अमी पूर्वोक्ता धृत्यादयस्त्रयस्त्रिंशत्संख्याकाः विविधमाभिमुख्येन चरन्ति व्यभिचारिणः ॥

यथोक्तम्-

''धृतिः स्मृतिर्मतिर्व्रीडा विषादो जडता मदः ।
व्याधिर्निद्रौत्सुक्यशङ्काबहित्थाः सुप्तचापले ॥१॥
हर्षालस्ये ग्लानिर्गर्वप्रबोधाः(-धः) श्रम उग्रता ।
दैन्यमुन्मादमोहौ च चिन्तामर्षौ मृतिस्तथा ॥२॥
तर्कावेगावपस्मारोऽसूया निर्वेद एव च ।
त्रासश्चेति त्रयस्त्रिंशद् भावाः स्युर्व्यभिचारिणः ॥३॥
स्थायिनो नव रत्याद्याः स्तम्भाद्या अष्ट सात्त्विकाः ।
भावाः पञ्चाशदित्थं स्युः संयुता व्यभिचारिभिः ॥४॥''[ ]

**स्युः कारणानि कार्याणि सहचारीणि यानि च ॥३२५॥**
**रत्यादेः स्थायिनो लोके तानि चेत् काव्यनाट्ययोः ।**

---

१. 'विस्तारे' इति३, 'विचारणे' इति२, 'ऊह तर्के' इति क्षीरतरङ्गीणी, 'ऊह वितर्के' इति मैत्रेयसायणौ ॥ २. 'विमाशिवो' इति३ ॥ ३. कण्ड्वादिगणे 'उपतापे' इत्येवार्थो दृश्यते ॥ ४. 'यच्' इति३ ॥ ५. 'कल किल पिल क्षेपे' इति क्षीरतरङ्गिणी, 'कल विल क्षेपे' इति मा.धातुवृत्तिः ॥ ६. 'निवृत्त' इति३ ॥ ७. '-धारणादौ' इति१.२.३ ॥ ८. '-निधाञः क्युः' इत्युणादिगणे ॥ ९. 'मील श्मील निमेषणे' इति क्षीरतरङ्गिणी, 'मील श्मील स्मील क्ष्मील निमेषणे' इति मा.धातुवृत्तिः ॥ १०. 'अस्तंगच्छत्यस्तं च' इति३ ॥ ११. माधवीयधातुवृत्तिस्तुलनीया, दिवादिः, धातुसं-१०८, पृ.४३७ ॥ १२. द्र. स्वोपज्ञटीका २।३२४॥, पृ.७५ ॥ १३. 'मरणं' इति१.३ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**विभावा अनुभावाश्च व्यभिचारिण एव च ॥३२६॥**
**व्यक्तः स तैर्विभावाद्यैः स्थायी भावो भवेद् रसः ।**

रत्यादेरिति, 'रागोऽनुरागः'[श्लो-२।२९६॥]इत्यादिनवविधस्य स्थायिभावस्य लोके यानि कारणानि आलम्बनोद्दीपनस्वभावानि ललनोद्यानादीनि स्युः, तानि काव्यनाट्ययोरिति काव्ये नाट्ये च विभावा उच्यन्ते[1], रागादिनवविधस्थायिभावस्य कारणानामालम्बनोद्दीपनस्वभावानां ललनोद्यानादीनां नाम काव्यशास्त्रे नाट्यशास्त्रे विभाव इत्यर्थः । च पुनरेवं कार्याणि कार्यभूतानि कटाक्षभुजक्षेपादीनि अनुभावाः प्रोच्यन्ते । ([2]रागादिनवविधस्थायिभावस्य कारणभूतानामालम्बनोद्दीपनस्वभावानां ललनादीनां कार्यभूतकटाक्षभुजक्षेपादीनां नाम अनुभाव इत्यर्थः। ) तथा सहचारीणि धृत्यादीनि "धृतिः सन्तोषः स्वास्थ्यं स्यात्"(श्लो-२।३०८)इत्यादीनि "मरको मारिः"(श्लो-२।३२५)इत्यन्तानि व्यभिचारिणो व्यभिचारिनामानो भावा उच्यन्ते, तैर्विभावाद्यैर्विभावैः नवविधस्थायिभावस्य कारणभूतैर्ललनादिभिः आद्यशब्दादनुभावैः नवविधस्थायिभावस्य कारणभूतललनादिकस्य कार्यभूतैः कटाक्षादिभिः सात्त्विकैः "स्तम्भो जाड्यं स्वेदो घर्मः"(श्लो-२।३०५॥) इत्यादिरष्टभिः व्यभिचारिभिश्च धृत्यादिमारिपर्यन्तैस्त्रयस्त्रिंशद्भिः व्यक्तः प्रकट[3]ः सभास्थितजनानां वासनारूपेण स्थितः, स स्थायी भावः रसः कथ्यते इत्यर्थः । यदुक्तम्-

"विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः ।
आरोप्यमाण उत्कर्षं स्थायी भावो रसः स्मृतः ॥१॥"

[ ]इति । पूर्वोक्ताः स्थायिभावा रत्यादयो नव विभावानुभावसात्त्विकव्यभिचारिभिः प्रकटीकृताः सन्तो रसाः शृङ्गारादयो नवापि भवन्तीति भावः ॥३२५-३२६॥

**पात्राणि[1] नाट्येऽधिकृताः**

१ नाट्ये नाट्यविषयेऽधिकृता अधिकारिणः **पात्राणि** उच्यन्ते । पान्ति स्वभूमिकामिति पात्राणि । 'पा रक्षणे' (अ.प.अ.), 'दादिभ्यश्छन्दसि[4]'(उणा-६०९)इति सूत्रे[5] बहुलाधिकाराद् भाषायामपि त्रन् ॥

**तत्तद्वेषस्तु भूमिका[1] ॥३२७॥**

१ तेषां तेषां रामरावणादीनां वेषो रूपपरिग्रहस्तद्वेषः रूपान्तरपरिग्रहाधारभूतत्वाद् भूमिप्रतिकृतिः **भूमिका** । 'इवे प्रतिकृतौ'५।३।९६॥ इति कः । एकं पात्राणां रूपान्तरपरिग्रहस्य ॥३२७॥

**शैलूषो[1] भरतः[2] सर्वकेशी[3] भरतपुत्रकः[4] ।**
**धर्मीपुत्रो[5] रङ्गजाया[6]ऽऽजीवो[7] रङ्गावतारकः[8] ॥३२८॥**
**नटः[9] कृशाश्वी[10] शैलाली[11]**

१ शिलूषस्य ऋषेरपत्यं **शैलूषः** । 'ऋष्यन्धकवृष्णि-'४।१।११४॥ इत्यण् । शरति(शलति) वेषान्तरमिति वा । 'का(को)रदू(दू)षाटरूष-'(हैमोणा-५६१)इत्यादिना ऊषान्तो निपातः । २ तां तां भूमिकां बिभर्त्ति **भरतः** । 'डुधाञ् धारणादौ'(जु.उ.अ.), 'भृदृशीङ्यजिपर्विपच्यमिनमितमिहर्येभ्योऽतच्[6]'(उणा-३९०) । ३ सर्वे केशा रूपान्तराण्यस्य **सर्वकेशी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः। ४ भरतस्य पुत्रो **भरतपुत्रकः** । ५ धर्मी द्विधा, नाट्यधर्मी लोकधर्मी च, तस्य पुत्रो **धर्मीपुत्रः**, तदुपजीवकत्वात् । ६-७ रज्यन्ते प्रेक्षकाणां मनांसि यत्रेति रङ्गः। 'रञ्ज रागे'(भ्वा.-दि.उ.अ.), 'हलश्च'३।३।१२१॥ इति घञ्, भावकरणार्था-[7]भावान्न न्लोपः, घित्वात् कुत्वम् । रङ्गश्च जाया च रङ्गजाये, ताभ्यामग्रेऽऽजीवः **रङ्गाजीवः**, **जायाजीवः** । ८ रङ्गत्यस्मिन् प्रेक्षकाणां मनांसि रङ्गम् । 'रगि गतौ'(भ्वा.प.से.), दण्डकधातुः, 'हलश्च'३।३।१२१॥ इति संज्ञायामधिकरणे घञ्। रङ्गेर्वाऽयं-द्रष्टव्यः । रङ्गं नाट्यमवतारयति **रङ्गावतारकः**। 'तृ प्लवनतरणयोः'(भ्वा.प.से.), णिजन्तः, ण्वुल् ॥३२८॥ ९ नटति नृत्यति **नटः**, पुंक्ली. । 'नट नर्तने[8]'(भ्वा.प.से.), पचाद्यच् । १० कृशाश्वेन प्रोक्तं नटशास्त्रं वेत्त्यधीते वा **कृशाश्वी** । 'कर्मन्दकृशाश्वादिनिः'४।३।१११॥ इतीनिः । ११ शिलालिना प्रोक्तं नटसूत्रमधीते **शैलाली** । 'पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः'३।३।११०॥ इति णिनिः । सामान्येन एकादश नटस्य। 'नाटकिया' इति भाषा ॥

१. इतोऽग्रे २प्रतौ-"रागाद्यभिनयसहिताः स्थायिव्यभिचारिलक्षणाश्चित्तवृत्तयः, विभाव्यन्ते विशिष्टतया ज्ञायन्ते यैरिति कृत्वा" इति दृश्यते॥ २. कोष्ठान्तर्गतपाठस्थाने २प्रतौ "स्थायिव्यभिचारिलक्षणं चित्तवृत्तिविशेषं सभ्यजनोऽनुभवन्ननुभाव्यन्ते यैरिति कृत्वा रागादिनवविधस्थायिभावस्य कारणभूतानामालम्बनोद्दीपनस्वभावानां कार्यभूतकटाक्षभुजाक्षेपादीनां इत्यर्थः" इति पाठो दृश्यते॥ ३. 'प्रगटः' इति२॥ ४. अमरकोषे रामाश्रमीकारेण-"-दादिभ्यः ष्ट्रन्-इति मुकुटश्चिन्त्यः, तादृशसूत्रादर्शनात्"[अ.२।७।२४॥]इत्युक्तम्, तत्तु विचारणीयम्, उणादिगणे चतुर्थपादे दर्शनात्, 'दादिभ्यश्छन्दसि' इति सूत्रस्यैव फलितार्थकथनं 'दादिभ्यः ष्ट्रन्' इत्यप्यवधेयम् ॥ ५. ३प्रतौ नास्ति ॥ ६. 'भृमृदृशियजिपर्विपच्यमितमिनमि-' इत्युणादिगणे ॥ ७. '-णार्थो भावा-' इति१.२, '-णार्थ भावा-' इति३॥ ८. 'वर्तने' इति१॥, 'नृत्तौ' इति क्षीरतरङ्गिण्यादौ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**चारणस्तु कुशीलवः ।**

१ चर्यत इति चरणं भ्रमणम्, चरणस्यायं **चारणः**, यतो देशान्तरभ्रमणाज्जीवति । २ कुत्सितं शीलं कुशीलम्, कुशीलं वाति **कुशीलवः** । 'वा गतिगन्धनयोः'(अ.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥ । द्वे चारणस्य । 'बजाणीया गोडीया[1]' इति भाषा ॥

**भ्रभ्रुभ्रूभृपरः कुंशो[2] नटः स्त्रीवेषधारकः ॥३२९॥**

१-४ 'पट पुट[3]'(चु.उ.से.)इति दण्डकात् तस्य कुशिधातोर्भाषणार्थस्यैव विभ्रुवोः (भाषणार्थस्य एरचि, भ्रुवोः) कुंशो भाषणमस्य 'बहुव्रीहौ भ्रकुंशादीनामकारो वक्तव्यः'(वा-६।३।६१॥)इति भ्रूशब्दात् परस्याकारः **भ्रकुंशः** । ''भ्रुवौ कुंशति[4], कर्मण्यण्''[ ]इति कौमुदी । 'इको ह्रस्वोऽङ्यो गालवस्य'६।३।६१॥ इति वा ह्रस्वत्वे **भ्रुकुंशः**, **भ्रूकुंशः**, ऋकारोऽन्तादेशो वा **भृकुंशः**, एतौ तु मन्तान्तराश्रयणेन । यद्वाचस्पतिः-

''स्त्रीभूमिकां तु यः प्राप्तश्चत्वारस्तस्य वाचकाः ।
भ्रकुंशश्च भ्रुकुंशश्च भ्रूकुंशश्च भृकुंशवत् ॥१॥''

[[5] ]इति । ''स्वप्नहिंस्रभ्रकुंशाः(-साः)''[[6] ]इति सभेदाद् दन्त्यान्तोऽपीति ।स्त्रीवेषं धारयति स्त्रीवेषधारकः, ण्वुल् ।स्त्रीवेषधारी यः पुमान् नृत्यति, तन्नामानि चत्वारि ।'भवाईया'इति भाषा ॥३२९॥

**वेश्याऽऽचार्यः पीठमर्दः**

१ वेश्याचार्यो वेश्यानां नृत्तोपाध्यायः पीठं नर्तनस्थलं पादैर्मृद्नाति **पीठमर्दः** ।'मृद क्षोदे'(क्र्या.प.से.), कर्मण्यण् ।एकं वेश्यानां नृत्तोपाध्यायस्य ।वृद्धो नटोऽयमित्यर्थः ।

**सूत्रधारस्तु सूचकः ।**

१ सूत्रं धारयति **सूत्रधारः** । 'धृञ् धारणे'(भ्वा.-उ.अ.), णिजन्तः, पचाद्यच् । सूचयति भाविनमर्थं सूचकः । 'सूचि पैशुन्ये[7]'(चु.उ.से.), 'ण्वुल्तृचौ'३।१।१३३॥ इति ण्वुल् । स्थापकोऽपि । एकं नाट्यविधेरुपदेशकस्य । शैषिकम्-''दीर्घदर्शकः[8]''[शेषनाममाला २।९१॥]॥

**नन्दी तु पाठको नान्द्याः**

१ नन्दत्यवश्यं **नन्दी** । 'टुणदि(टुनदि) समृद्धौ' (भ्वा.प.से.), 'आवश्यकाधमर्ण्ययोर्णिनिः'३।३।१७०॥ ।नन्दनं नन्दः, तत्र भवा नान्दी, तत्प्रयोजनत्वाद् नान्दी पूर्वरङ्गम्, तस्याः पाठकः, द्वादशतूर्यनिर्घोषनाम्नः पाठकोऽध्यापकः, तस्यैकम् ।

''नन्दी भम्भा-मइंग-मद्दल-कडम्ब-झल्लरि-हुडुक्क-कंसाला ।
काहल-तिलिमा-वंसो संखो पणवो य नाडए नन्दी ॥१॥''[ ]

इयं नाटकनन्दी, रणनन्दी त्वियम्-

''डक्का-ढक्का-डमरुय-काहल-बुक(बुक्क)-भेरि-भाणगं पडहो ।
जुगसंख-करडि(डी)-पुग्गय-मद्दल-कंसाल रणनन्दी॥२॥''[ ]॥

**पार्श्वस्थः पारिपार्श्विकः ॥३३०॥**

१ पार्श्वे तिष्ठति[9] **पार्श्वस्थः** । 'आतोऽनुपसर्गे कः' ३।२।३॥ । २ परिपार्श्वे वर्तन्त इति **पारिपार्श्विकः** । 'परेर्मुखं च[11]'४।४।२९॥ इति ठक्, ['ठस्येकः'७।३।५०॥], 'किति च' ७।२।११८॥ इति वृद्धिः । द्वे पार्श्वस्थस्य । 'पासवाण[12]' इति भाषा ॥३३०॥

**वासन्तिकः केलिकिलो[13] वैहासिको विदूषकः ।**
**प्रहासी प्रीतिदश्च**

१ वसन्तेन चरति **वासन्तिकः** । वसन्तादित्वाट्ठक् । २ केल्या किलः[14] **केलिकिलः** । [15]केलीकिलोऽपि । ३ विचित्रो हासो विहासः, तेन चरति **वैहासिकः** । ४ सन्धिं विग्रहेण विग्रहं च सन्धिना विदूषयति **विदूषकः** । 'दुष वैकृत्ये'(दि.प.अ.), णिजन्ताद् ण्वुल् । ५ प्रहसतीत्येवंशीलः **प्रहासी** । 'हस(हसे) हसने'(भ्वा.प.से.), 'सुप्यजातौ-' ३।२।७८॥ इति णिनिः । ६ प्रीतिं ददाति **प्रीतिदः** । 'डुदाञ् दाने'(जु.उ.अ.), 'आतोऽनुपसर्गेकः'३।२।३॥ । षट् क्रीडनीयपात्रस्य । 'रामतीयाल' इति भाषा ॥

**अथ षिड्गः पल्लवको विटः ॥३३१॥**

१ सेटनं सिट् अनादरः ।'षिट अनादरे'(भ्वा.प.से.), राम्पदादित्वात् क्विप् । सिटा गायति गच्छति वा **षिड्गः** । पृषोदरादित्वात् षत्वम् । २ पल्लति चतुरं गच्छति पल्लवः । 'पल्ल गतौ[16]'(भ्वा.प.से.), बाहुलकादवः, ततः स्वार्थे के **पल्लवकः** । पल्लवयति वा । ण्वुत् । ३ वेटति शब्दायते **विटः** ।'विट शब्दे'(भ्वा.प.से.), 'इगुपधज्ञा-'३।१।१३५॥ इति कः, पुंक्ली. ।त्रीणि विटस्य ।'ठींगा' इति भाषा ॥३३१॥

१. 'गुडीया' इति१॥ २. आचार्यैः 'कुंसः' इति शब्दो स्वीकृतः, अमरकोशेऽपि 'कुंसः' एव, द्र. १।७।११॥ ३. 'घटपुट-' इति१.२॥ ४. 'कुशति' इति१.२.४॥ ५. द्र. स्वोपज्ञटीका २।३२९॥, पृ.७६॥, तत्र दन्त्यसकारो दृश्यते ॥ ६. द्र. टीकासर्वस्वम्, भा-१, १।७।११॥, पृ.१४२॥ ७. 'सूच पैशुन्ये' इति क्षीरतरङ्गिण्यादौ ॥ ८. 'बीजदर्शकः' इति शेषनाममालास्वोपज्ञटीकयोः ॥ ९. इतोऽग्रे ३प्रतौ 'वा' इति दृश्यते ॥ १०. इतोऽग्रे ४प्रतौ 'इति' इति दृश्यते ॥ ११. 'परेर्मुख' इति२.४॥, 'परिमुखं च' इत्यष्टाध्याय्याम् ॥ १२. 'पासवण' इति२॥ १३. 'केलिकिलौ' इति१.२.३॥ १४. 'केलः' इति४, 'किलिः' इति१॥ १५. 'केलीकेलो' इति१॥ १६. धातुपारायण एवायं धातुर्दृश्यते, द्र. धातुपारायणम्, धातुसं-४४१, पृ.५७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**पिता त्वा[1]वुकः**

१ अवतीति **आवुकः** । 'अव रक्षणादौ'(भ्वा.प.से.), बाहुलकाद् 'मृ[1]कणिभ्यामु(मू)कोकणौ'(उणा-४७९)इत्युकण्, 'अत उपधायाः'७।२।११६॥ । एकं नाट्योक्तौ पितुः ॥

**आ[1]वुत्तभा[2]वुकौ भगिनीपतौ ।**

१ अवतीति[2] **आवुत्तः** । बाहुलकादुत्तण् । २ भवतीति **भावुकः**। 'भवतेश्चोपसंख्यानम्'( )इति उकण्। भगिन्याः पतिः भगिनीपतिः, तत्र । [3]नाट्योक्तभगिनीपतेः नाम्नी द्वे ॥

**भा[1]वो विद्वान्[4]**

१ भावयतीति **भावः** । 'भवतेश्चोपसंख्यानम्'( ) इति णः । एकं नाट्योक्तौ पण्डितस्य ॥

**युवराजः कुमारो भर्तृ[1]दारकः ॥३३२॥**

१ युवा चासौ राजा च युवराजः । 'राजाहःसखिभ्यष्टच्'५।४।९१॥, 'नस्तद्धिते'६।४।१४४॥ इति टिलोपः । कुमारयति क्रीडयति[5] कुमारः । 'कुमार क्रीडायाम्'(चु.उ.से.), चुरादिः, पचाद्यच् । भर्तुर्दारकः **भर्तृदारकः** । एकं नाट्योक्तौ युवराजकुमारस्य ॥३३२॥

**बाला वा[1]सूः**

१ वसति पितृगृहे, वास्यते प्रीत्या वा **वासूः**। वसतेर्णिन्ताद् बाहुलकादूः । वस्वौ, वस्वः इत्यादि, स्त्रीलिङ्गः[6]। नाट्योक्तौ बाला कुमारी, तस्या एकम् ॥

**मा[1]र्ष आ[2]र्यः**

१ मर्षणात् सहनाद् **मार्षः** । मारिषोऽपि । "मारिषः शाकभीत्यार्ये नाट्योक्तौ पुंसि भाषितः"[[7] ]इति मूर्द्धन्यान्ते रभसः । २ आरात् पापेभ्यो यातो निःसृत[8] **आर्यः**, पृषोदरादिः । [9]अरणीयोऽभिगम्यो वा । द्वे नाट्योक्तौ स्वामिनः ॥

**देवो भट्टारको नृपः ।**

([10]१-२ नाट्योक्तौ यो नृपो राजा, तस्य नाम्नी द्वे। दीव्यतीति **देवः** ।भटति भट्टारः ।'भट भृतौ'(भ्वा.प.से.), आरनि साधुः, स्वार्थे कनि **भट्टारकः**) ॥

**राष्ट्रियो नृपतेः श्या[1]लः**

१ राष्ट्रे भवो **राष्ट्रियः** । राष्ट्रेऽधिकृतो वा । 'राष्ट्रावारपाराद् घखौ'४।२।९३॥ इति भवादौ शैषिकः छोऽपवादो घः, 'आयनेयी-'७।१।२॥ इति घस्येयादेशः, 'यस्येति च'६।४।१४८॥ । नाट्योक्तौ नृपतेर्यः श्यालः, तस्यैकम् । 'शालो[11]' इति भाषा ॥

**दुहिता भर्तृदा[1]रिका ॥३३३॥**

१ नाट्योक्तौ नृपतेर्दुहिता सुता, तन्नामैकम् । भर्तुर्दारिका **भर्तृदारिका** ॥३३३॥

**दे[1]वी कृताभिषेका**

१ दीव्यति **देवी**, श्रीमहादेवी[12] वासवदत्तादिः । कृताभिषेका बद्धपट्टा । नाट्योक्तौ कृताभिषेका राज्ञी, तस्या एकम् ॥

**अन्या भट्टिनी**

१ अन्येति अकृताभिषेका राज्ञी **भट्टिनी** इत्युच्यते । भट्टो नृपोऽस्त्यस्या भट्टिनी । यन्महेश्वरः-"भट्टिनी द्विजभार्यायां नाट्योक्तौ[13] राजयोषिति"[विश्वप्रकाशकोशः, नान्तवर्गः, श्लो-१३१] । एकं[14] नाट्योक्तौ अकृताभिषेकाया राज्ञ्याः ॥

**गणिका[1]ऽज्जुका[15] ।**

१ नाट्ये गणयति ईश्वरानीश्वराविति **गणिका** । 'गण संख्याने'(चु.उ.से.), चुरादिः, ण्वुल् । अर्जयति धनम् **अज्जुका** । 'अर्ज सर्ज अर्जने'(भ्वा.प.से.), बाहुलकात् 'समि कसे[16] डकन्(डुकन्)'(उणा-१८७)इति डुकन्[17], रलोपश्च । "अज्जुकाद्या असत्प्रकृतिप्रत्ययविभागा देशा इत्यपि"[[18] ]इति केचित्। एकं नाट्योक्तौ वेश्यायाः ॥

**नी[1]चाचे[2]टीस[3]खीहूतौ हण्डेह[2]ञ्जेह[3]लाः क्रमात् ॥३३४॥**

१-३ नीचा च चेटी च सखी च नीचाचेटीसख्यः, तासां हूतिरामन्त्रणम्, तस्याम् । क्रमाद् अनुक्रमेण **हण्डे, हञ्जे, हला** ज्ञेयाः। तद्यथा नीचा अधमा, तस्या आह्वानं हण्डे, चेटी दासी, तस्या आह्वानं हञ्जे, सख्या आह्वानं हला इति। एतत्त्रयमप्यव्ययम् । तथा 'हला शकुन्तला'[ ]इत्यादिसखीपर्यायो हलाशब्दस्तु टाबन्तः, "बाला वासूः सखी हला"[[19] ]इति स्त्रीकाण्डे वोपालितः । एकैकं क्रमेण अधमादासीसखीनामाह्वानस्य ॥३३४॥

**अब्र[1]ह्मण्यमवध्योक्तौ[20]**

१ वधं नार्हति अवध्यः, अवध्यस्य उक्तिः अवध्योक्तिः, तत्र[21] । **अब्रह्मण्यं** वर्तते। ब्रह्माणमर्हतीति । अर्थ-

---

१. 'मृग-' इति १.२.४॥ २. इतोऽग्रे २प्रतौ 'भगनी' इति २॥ ३. 'एकं नाट्योक्तौ भगिनीपतेः' इति १.३.४॥ ४. तुलनीयोऽमरकोषः १।७।१२॥ ५. 'क्रीडयन्ति' इति२॥ ६. इतोऽग्रे २प्रतौ 'वासूः षष्ठः स्वरान्तोऽयम्' इति दृश्यते ॥ ७. द्र. रामाश्रमी १।७।१४॥, पृ.९९॥ ८. 'निसृतः' इति३॥ ९. 'आरणीयः' इति१॥ १०. कोष्ठान्तर्गतपाठः १प्रतौ, तथा तत्स्थाने ३.४प्रतौ-"दीव्यति ('दीव्यतीति' इति ३) देव । 'दिवु क्रीडादौ, पचाद्यच् । भटतीति (भट्टतीति इति ३) भट्टारकः । 'वट ('वट' इति ३नास्ति)भट (भट्ट इति ३) परिभाषणे, क्विप्, मठ वासे तारकश्चेति, पृषोदरादित्वात् टुत्वम् । नाट्योक्तो नृपो राजा, तस्य नाम्नी द्वे" इति दृश्यते ॥ ११. 'शालो इति भाषा' इति १.३.४ नास्ति ॥ १२. '-देव्या' इति १.२.४॥ १३. 'नाट्योक्ता' इति १.२.४॥ १४. 'एको' इति१॥ १५. तुलनीयोऽमरकोषः १।७।११॥ १६. 'सम किस' इति ३॥ १७. 'डुकञ्' इति३॥ १८. "अज्जुकाद्या असत्प्रकृतिप्रत्ययविभागा देशीपदप्रायाः" इति स्वोपज्ञटीका २।३३४॥, पृ.७७॥ १९. द्र. रामाश्रमी १।७।१५॥, पृ.९९॥ २०. तुलनीयोऽमरकोषः १।७।१४॥ २१. इतोऽग्रे ४प्रतौ 'अबध्योक्तौ' इति दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दण्डादिभ्यो यः, 'तत्र साधुः'४।४।९८॥ इति वा यत् । ततो नञ्समासः । ''वधानर्हस्य ब्राह्मणस्य पूत्करणे अवधयाचनार्थम्''[ ]इत्येके । एकं वधं नार्हतीति वचसः ॥

**ज्यायसी तु स्वसाऽत्तिका[1] ।**

१ अत्ता मातेव **अत्तिका**। 'इवे प्रतिकृतौ'५।३।९६॥ इति कः, 'प्रत्ययस्थात्-'७।३।४४॥ इतीत्वम् । ''द्वितकारकः पाठः''[ ]इति सर्वधरः । '' 'अन्तिकं निकटे नाट्योक्त्या ज्येष्ठस्य भार्यापि'[ ]इति नानार्थकोषदर्शनाद् द्वितकारः प्रामादिकः''[ ]इति तु कलिङ्गः । वयं तु ''अत्तिका चान्तिका तथा''[[1]]इति द्विरूपकोषाद् द्वितकारः पाठः, तथैकतकारपाठोऽपीत्याचक्ष्महे । एकं नाट्योक्तौ ज्येष्ठभगिन्याः ॥

**भर्त्ताऽऽर्यपुत्रः[1]**

१ नाट्योक्तौ भर्त्ता पतिः, ([2]तन्नामैकम् **आर्यपुत्रः**। आर्यस्य पुत्रः)इति समासः ॥

**माताऽम्बा[1]**

१ नाट्योक्तौ माता जननी, सा **अम्बा** इत्युच्यते । अम्ब्यते शब्द्यते बालैरित्यम्बा । 'अवि(अबि) शब्दने' (भ्वा.आ.से.), कर्मणि घञ् । अमति गच्छति वात्सल्यमिति वा । 'अम् गतौ[3]'(भ्वा.प.से.) 'शम्यमी(शम्यमेः)-'(हैमोणा-३१८)इति बः, टाप् । अम्बत अपत्यं जल्पतीति वा । 'अबि गतौ (शब्दे)'(भ्वा.आ.से.), पचाद्यच् । ननु कथं ''ताते-नाम्बविहीनोऽस्मि बालभावेऽहमम्बया''[ ]इत्यादावनाट्योक्तावप्यम्बादिप्रयोगः, तत्र जातौ कादयस्त्वाहुः । नाट्योक्तौ अज्जुकादय एव प्रयुज्यन्ते, न गणिकामात्रादय इत्ययं नियमः। ननु ''मातः किमप्यसदृशं[4] करुणं वचस्ते[5]''[ ]इति वेणीसंहारादौ मात्रादीनामपि प्रयोगात् तस्मादम्बादीनां नाट्ये प्रायशः प्रयोगाद् विधिरयम् । अज्जुकादीनां त्वन्यत्राऽप्रयोगान्नियमं फलतीति । एतदेवाह शब्दार्णवकारः-

''अथैतेषां [6]रूपकाणामुक्तीर्वक्ष्याम्यशेषतः ।
कासुचिन्नियमस्तत्र विधिरेव च कासुचित् ॥१॥''[ ]इति ॥

**भदन्ताः[1] सौगतादयः ॥३३५॥**

१ नाट्योक्तौ सौगतादयः, सौगत आदिरेषामिति सौगतादयः, आदेर्निर्ग्रन्थादयो **भदन्ताः** प्रोच्यन्ते । भन्दन्ते कल्याणिनो भवन्ति भदन्ताः । 'भदि कल्याणे सुखे च'(भ्वा.-आ.से.), 'भन्देर्नलोपश्च[7]'(उणा-४१०)इत्यतच्[8]' 'सामन्त-(सीमन्त)हेमन्तभदन्त-'(हैमोणा-२२२)इत्यादिना साधुर्वा ॥

**पूज्ये तत्र[1]भवानत्र[2]भवांश्च भग[3]वानपि ।**

१-२ स भवान् **तत्रभवान्**, एष भवान् **अत्रभवान्** । 'इतरे(इतरा)भ्योऽपि दृश्यन्ते'५।३।१४॥इत्यनेन सर्वविभक्त्यन्तेभ्यः किम्सर्वनाम बहुभ्यो द्वयादिभ्यो भवद्दीर्घाऽऽयुरायुष्मच्छब्दयोगे तसिलादयो विहिताः । तेष्वत्रतत्रशब्दविशिष्टो भवच्छब्दः पूज्यतां द्योतयति[ ]इति प्राञ्चः । एवं तु अत्रभवन्त इत्यादौ भवच्छब्दार्थो विवक्षित एव पूजा परमधिका गम्यत इत्येतावत्, न त्वेतद् युक्तम्-''यन्मां विधेयविषये सभवान्नियुङ्क्ते[10] स्नेहस्य तत्फलमसौ प्रणयस्य सारः'' [मालतीमाधवम्, प्रथमोऽङ्कः, श्लो-१०]इति मालतीमाधवे, ''वरवती खलु तत्रभवन्ती शकुन्तला''[ ]इति शाकुन्तले, ''कथमत्रभवान् विश्वामित्रः''[ ]इति अनर्घ्यराघवादिष्वसम्बोध्ये परोक्षेऽपि प्रयोगदर्शनात् । न चात्र कश्चिदवयवानां पृथगर्थो गम्यते, तस्मात् पूज्यतामात्रवचनौ समुदायावेवात्रभवत्तत्रभवच्छब्दौ उदनुबन्धौ प्रकृतिप्रत्ययविभागेन कल्प्यौ[11], उपलक्षणं चैतत्, स भवान् तं भवन्तं ततो भवन्तमित्याद्यपि दृश्यते [ ]इति कृष्णमिश्राः। ३ भगो ज्ञानमस्यास्ति **भगवान्** । त्रीणि पूज्यस्य ॥

**पा[1]दा भट्टा[2]रको दे[3]वः प्रयोज्यः पूज्यनामतः ॥३३६॥**

पादाद्यास्त्रयः शब्दाः पूज्यनामतोऽग्रे योज्याः । यथा-गुरुपादाः, अर्हद्भट्टारकः[12], कुमारपालदेवः, एवमन्येभ्योऽप्येते प्रयोज्याः । ''भरटकः, भट्टः''[शेषनाममाला२।९१॥]इति शैषिके ॥३३६॥

**॥ इत्याचार्यश्रीहेमचन्द्रविरचितायामभिधानचिन्तामणौ नाममालायां[13] देवकाण्डो द्वितीयः ॥**

सर्वाङ्गीणकलाविलासनिलयः कल्पद्रुमाभः कलौ जाग्रत्सर्वजनीनमञ्जुमहिमो मित्रप्रतापोदयः ।
श्रीमच्छ्रीविधिपक्षगच्छगणभृद् भूभृन्नताङ्घ्रिद्वयः **श्रीकल्याणसमुद्रसूरिसुगुरुः** सूरीन्द्रचूडामणिः ॥१॥
तन्निर्देशविधायिवाचकवरश्रेणीकिरीटोपमा भास्वत्साधुगुणौघशालि**विनया**च्चन्द्राभिधावाचकाः ।
तच्छिष्या **रविचन्द्र**इत्यभिधया तेषां विनेयो व्यधादेनं वाचक**देवसागरगणि**र्व्युत्पत्तिरत्नाकरम् ॥२॥

**॥ इति श्रीवाचकवरदेवसागरविरचितायामभिधानचिन्तामणिनाममालायां व्युत्पत्तिरत्नाकरटीकायां देवकाण्डो द्वितीयः॥**

---

१. द्र. टीकासर्वस्वम्, भा-१, १।७।१५॥, पृ.१४४॥, रामाश्रमी १।७।१५॥, पृ.९९॥ २. कोष्ठान्तर्गतपाठस्थाने २प्रतौ ''तस्याभिधानम् आर्यपुत्रः, आर्यस्य पुत्र आर्यपुत्रः'' इति दृश्यते ॥ ३. 'अम गत्यादिषु' इति क्षीरतरङ्गिण्यादौ॥ ४. '-सदृश' इति३॥ ५. 'वचसे' इति२॥ ६. 'रूपकारणा-' इति२॥ ७. 'न्लोपश्च' इति१.२.४॥ ८. 'इत्यतच्' इति १.२नास्ति ॥ ९. १प्रतौ नास्ति ॥ १०. '-न्नियुक्ते' इति२॥ ११. 'कल्पौ' इति३.४॥ १२. अत्र ३प्रतौ-'' 'भट ज्ञाने' धातुः, भटतीति भट्, क्विपि सिद्धे भट् चासौ तारकश्च भट्टारकः, ष्टुभिः ष्टुः इति धातुरत्नाकरे माधवीयवृत्तितोऽपि गृह्यते'' इति टिप्पणी दृश्यते ॥ १३. इतोऽग्रे ३प्रतौ 'देवकाण्डो द्वितीयः' इत्यस्य स्थाने 'द्वितीयः काण्डः समाप्तः' इति दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥ तृतीयो मर्त्यकाण्डः ॥

अथ तृतीयं काण्डं विव्रियते[1], तत्र ''नरस्तृतीये(नरास्तृतीये)''(श्लो-१ ।२० ॥)इति प्रतिज्ञातत्वात् पूर्वं नरनामान्याह–

**मर्त्यः पञ्चजनो भूस्पृक् पुरुषः पूरुषो नरः ।**
**मनुष्यो मानुषो ना विट् मनुजो मानवः पुमान् ॥३३७॥**

१ मर्तो लोकस्तत्र भवो **मर्त्यः**[2] । 'दिगादिभ्यो यत्' ४ ।३ ।५४ ॥ इति यत् । म्रियत इति मर्त्य इति वा । 'मृङ् प्राणत्यागे' (तु.आ.अ.), 'हसिमृग्रिण्वाऽमिदमितमिलू[3]पूधू(धु)र्विभ्यस्तन्' (उणा-३६६)इति तन्, ततः स्वार्थे यत् । २ पञ्चभिः पृथिव्यप्तेजोवाय्वाकाशाख्यैर्महाभूतैर्जन्यते **पञ्चजनः** । 'जनी प्रादुर्भावे' (दि.आ.से.), 'जन जनने'(जु.प.से.) वा, पचाद्यच् । 'पृची सम्पर्के'(अ.आ.से.,रु.प.से.),'कनिन्युवृषि- '(उणा-१५४)इत्यत्र प्राक्प्रत्ययनिर्देशस्याधिकविध्यर्थात् कनिनि बाहुलकाद् ऋकारस्याकारो मकारागमश्च । भोजराजस्तु 'युवृषितक्षिराजिधन्विपचिद्युप्रतिदिवसः कन्'( )इति, तदा 'पचि विस्तारे'(चु.उ.से.) धातुमाह । ''द्व्यादिभ्यो विस्तीर्णाः पञ्चसंख्याः, जायन्ते जनाः, पचाद्यच्, पञ्च च ते जनाश्च पञ्चजनाः''[ ]इति भाष्यम् । ''पञ्चभिर्भूतैर्जाताः[4] पञ्चजनाः''[अ.क्षीरस्वामिटीका२ ।६ ।१ ॥]इति क्षीरस्वामी । ३ भुवं स्पृशति **भूस्पृक्** । 'स्पृश संस्पर्शने'(तु.प.अ.), 'स्पृशोऽनुदके क्विन्'३ ।२ ।५८ ॥, क्विन्प्रत्ययो यस्माद् विहितस्तस्मादन्यत्रापि प्रत्यये पदान्तस्य[5] कुत्वम् । ४ पिपर्ति पालयति पुरत्यग्रे गच्छति वा **पुरुषः** । 'पॄ पालनपूरणयोः'(जु.प.से.), 'पुर अग्रगमने'(तु.प.से.), अस्माद् वा, 'पुरः कुषन्'(उणा-६१४)इति कुषन्, 'उदोष्ठ्यपूर्वस्य'७ ।१ ।१०२ ॥ इति उत्वम्, 'उरण् रपरः'१ ।१ ।५१ ॥ । ५ 'अन्येषामपि[6] दीर्घत्वं दृश्यते'( ) इति दीर्घत्वे **पूरुषः** । ६ नियते विक्षिप्यते कामादिभिरिति **नरः** । 'नॄ[7] विक्षेपे'' ऋदोरप्'३ ।३ ।५७ ॥ इत्यप् । नृणातीति वा । 'नॄ (नॄ) नये'(क्र्या.प.से.), क्र्यादिः, पचाद्यच् । ७ मनोरपत्यं **मनुष्यः** । 'मनोर्जातावञ्यतौ षुक् च'४ ।१ ।१६१ ॥ इति यत्, षुगागमश्च । ८ पूर्ववदञि षुकि च **मानुषः** । स्त्रियां तु 'गवयहय(हयगवय)-' (वा-४ ।१ ।६३ ॥) इत्यादिना ङीषि मानुषी । ९ नयति भारादिकम्, नयत्युन्नतिमात्मानमिति वा **ना** । 'णीञ् प्रापणे'(भ्वा.उ.अ.), 'नयतेर्डिच्च'(उणा-२५७)इति ऋन्, डित्त्वाट्टिलोपः । १० विशत्यनुप्रविशति सर्वकर्मस्वधिकारित्वेनेति **विट्** । 'विश प्रवेशने' (तु.प.अ.), क्विप् । ११ मनोर्जातो **मनुजः** । 'जनी प्रादुर्भावे' (दि.आ.से.), 'पञ्चम्यामजातौ'३ ।२ ।९८ ॥ इति डः । १२ मनोरपत्यं **मानवः** । औपसंख्यानिकोऽत्राऽण् । ''मानवस्तूपसंख्यानात्'' [भाषावृत्तिः ४ ।१ ।१६१ ॥]इति भाषावृत्तिः । मनोरयं मानव इति वा । 'तस्येदम्'४ ।३ ।१२० ॥इत्यण् वा । १३ पुनाति पाति कुलमिति वा **पुमान्** । 'पूञ् पवने'(क्र्या.उ.से.), 'पुनातेर्मसुन् ह्रस्वत्वं च'([8])इति मसुन् । 'पा रक्षणे'(अ.प.अ.), 'पातेर्डुमसुन्'(उणा-६१७)इति डुमसुन् । त्रयोदश मनुष्यस्य । मिश्रास्तु-''मनुष्यमानुषमर्त्यमनुजमानवनरेति नामानि मानुषजातिमात्रस्य, शेषाणि तु मनुष्यजातौ पुरुषस्य''[ ]इत्याहुः ॥३३७॥

**बालः पाकः शिशुर्डिम्भः पोतः शावः स्तनन्धयः ।**
**पृथुकार्भोत्तानशयाः क्षीरकण्ठः कुमारकः ॥३३८॥**

१ बल्यते संव्रियतेऽनिष्टयोगादिति **बालः** । 'बल बल्ल संवरणे[10]'( ), कर्मणि घञ् । बलते बुद्धीन्द्रियदेहादिना, नित्यं वृद्धिं यातीति वा[11] । 'बल वृद्धौ'( ), ज्वलादित्वाण्णः । बलति प्राणिति स्तन्येनेति वा । 'बल प्राणने'(भ्वा.प.से.), ज्वलादित्वाण्णः । २ पान्ति रक्षन्त्येनम्, पिबति स्तन्यं वा **पाकः** । 'पा रक्षणे'(अ.प.अ.), 'पा पाने'(भ्वा.प.अ.), अस्माद् वा । 'इण्भीकापाशल्यतिमर्चिभ्यः कन्'(उणा-३०) । ३ श्यति स्तन्यपानेन[12], तनूकरोति मातरमिति वा **शिशुः** । 'शो तनूकरणे'(दि.प.अ.), '([13]शः कित् सनव)च्च'(उणा-२०)इति उप्रत्ययः, सन्वद्भावाद् द्वित्वम्, 'सन्यतः'७ ।४ ।७९ ॥ इतीत्वम् । ४ डिम्भयति[14] **डिम्भः** । 'डिभि सङ्घे[15]'(चु.उ.से.), चुरादिः, पचाद्यच् । ५ पुनाति गोत्रमिति **पोतः** । 'पूञ् पवने'(क्र्या.उ.से.), 'हसिमृग्रिण्वाऽमिदमि- '(उणा-३६६)इति तन् । ६ श्यति मातरं **शावः** । 'शो तनूकरणे'(दि.प.अ.), 'अशुप्रुषिलटि[16]-'(उणा-१४९)इति बाहुलकाद् वः[17], 'आदेच उपदेशे-'६ ।१ ।४५ ॥ इत्यात्वम् । ७ स्तनं धयति[18] **स्तनन्धयः** ।

१. 'वेव्रि ' इति४. 'विव्रो ' इति३ ॥ २. 'मर्त्यो' इति४ ॥ ३. '-दमिलू-' इति१, तथोणादिगणे ॥ ४. ''-जातः पञ्चजनः'' इति अ.स्वामिकृतटीकायाम्, २ ।६ ।१ ॥, पृ.१३३ ॥ ५. 'पदान्तेस्य' इति१ ॥ ६. ' मपीति' इति४ ॥ ७. क्षीरतरङ्गिण्यादौ विक्षेपार्थकनर्धातुर्न दृश्यते ॥ ८. 'पुनातेर्मक्, असुन् (?) ह्रस्वत्वम्' इति अमरकोषपदचन्द्रिकाटीका, भा-२, ६ ।२५९ ॥, पृ.३३३ ॥ ९. द्र. अमरकोशकृष्णमित्रकृतटीका २ ।६ ।१ ॥, पृ.२०५ ॥ तथा पदचन्द्रिकाटीका, भा-२, ६ ।२५९ ॥, पृ.३३३ ॥ १०. 'वल वल्ल संवरणे सञ्चरणे च' इति मा.धातुवृत्तिः, 'वल संवरणे' इति क्षीरतरङ्गिणी ॥ ११. इतोऽग्रे ४प्रतौ 'बालः' इति दृश्यते ॥ १२. '-पानिनं' इति२ ॥ १३. कोष्ठान्तर्गतपाठः १.२नास्ति, तत्स्थाने ३प्रतौ 'शांसि सरव' इति दृश्यते ॥ १४. '-तीति' इति४ ॥ १५. क्षीरतरङ्गिण्यां चुरादौ 'डपि डिपि सङ्घाते' इत्यत्र स्वाम्याह-''डभि डिभि इति दौर्गाः, डम्भयति डम्भः, डिम्भयति डिम्भः'' इति. क्षीर. धातुसं-१२०, पृ.३०४ ॥ १६. इतोऽग्रे ३प्रतौ '-चटि' इति दृश्यते ॥ १७. 'क्वन्' इत्युणादिगणे ॥ १८. '-तीति' इति४ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'धेट् पाने'(भ्वा.प.अ.), 'नासिकास्तनयोर्ध्माधेटोः'३।२।२९॥ इति खश्, 'अरुर्द्विषदजन्तस्य-'६।३।६७॥ इति मुम् । स्त्री चेत् स्तनन्धयी । यौगिकत्वात् स्तनपोऽपि । ८ प्रथते जन्मना **पृथुकः**। 'प्रथ विस्तारे[1]'(भ्वा.आ.से.), 'अर्भकपृथुकपाका वयसि साधवः[2]'(उणा-७३१)इति साधुः । पृथु कायतीति वा। 'कै शब्दे'(भ्वा.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥। ९ इयर्ति वृद्धिम् **अर्भः** । 'ऋ गतौ'(जु.प.अ.), 'अर्तिगृभ्यां भन्'(उणा-४३२)इति भन् । अर्भति शब्दायते वा। 'अर्भ शब्दे'( ), पचाद्यच्। स्वार्थे कनि अर्भकोऽपि । **१०** उत्तानः शेते **उत्तानशयः** । 'शीङ् स्वप्ने'(अ.आ.से.), 'पार्श्वादौ चः[3]'( )इत्यच् । **१२** क्षीरं कण्ठेऽस्य **क्षीरकण्ठः** । यौगिकत्वात् क्षीरपोऽपि । **१३** कामयते यदपि दृष्टं सदिति **कुमारः** । 'कमु कान्तौ'(भ्वा.आ.से.), णिगन्तः[4] (णिङन्तः) । '[5]कमेरुच्चोपधाया आरन्, स चित्[6]'(उणा-४१८) इति सूत्रेण आरन् धातोरुपधायाश्चोकारः । कुमारयति क्रीडति वा । 'कुमार क्रीडायाम्'(चु.उ.से.), णिजन्तः, पचाद्यच् । कु ईषत्, कुत्सितो[7] मारः कामोऽस्येति वा। स्वार्थे के **कुमारकः**। द्वादश शिशोः ॥३३८॥

## शिशुत्वं शैशवं बाल्यम्

१ शिशोर्भावः **शिशुत्वम्** । 'तस्य भावस्त्वतलौ'५।१।११९॥ । २ शिशोर्भावः **शैशवम्** । 'इगन्ताच्च लघुपूर्वात्'५।१।१३१॥इत्यण् । ३ बालस्य भावः **बाल्यम्** । 'गुणवचन-ब्राह्मणादिभ्यः कर्मणि च'५।१।१२४॥इति ष्यञ् । तच्च षोडश- वर्षपर्यन्तम्, "आषोडशाद् भवेद् बाल्यम्"[ ]इत्युक्तेः । त्रीणि बालभावस्य ॥

## वयःस्थस्तरुणो युवा ।

१ वयसि यौवने तिष्ठति **वयःस्थः** । "वयः पक्षिणि बाल्यादौ वयो यौवनमात्रके"[मेदिनीकोशः, सान्त-वर्गः, श्लो-३२]इति विश्वः (मेदिनी)। वयःशब्दपूर्वात् तिष्ठतेः 'आतोऽनुपसर्गे कः'३।२।३॥, 'आतो लोप इटि च'६।४।६४॥ इत्यालोपः । २ तरति कौमारं **तरुणः**। 'तृ प्लवनतरणयोः' (भ्वा.प.से.), 'कृवृतृ[8]दारिभ्य उनन्'(उणा-३३३) । ३ यौति मिश्रीभवति विषयैः स्त्रिया वा **युवा**। 'यु मिश्रणे'(अ.प.से.), 'कनिन् युवृषितक्षिराजिधन्विद्युप्रतिदिवः'(उणा-१५४)इति कनिन्, 'अचि श्नुधातु-'६।४।७७॥ इत्युवङ् । त्रीणि यूनः॥

## तारुण्यं यौवनम्

१ तरुणस्य भावः कर्म वा **तारुण्यम्** । ब्राह्मणादित्वात् ष्यञ्[9] । २ यूनो भावो **यौवनम्**, पुंक्ली. । 'हायनान्तयुवादिभ्योऽण्'५।१।१३०॥ इत्यण्, 'अन्'६।४।१६७॥ इति प्रकृतिभावान्न टिलोपः । द्वे यौवनस्य ॥

## वृद्धः प्रवयाः स्थविरो जरन् ॥३३९॥
## जरी जीर्णो यातयामो जीनः

१ वर्धते स्म **वृद्धः** । 'वृधु वर्धने[10]'(भ्वा.आ.से.), निष्ठा, 'झषस्तथोः-'८।२।४०॥ इति धत्वम् । २ प्रगतं वयो यौवनमस्य **प्रवयाः**, सकारान्तः । 'अत्वसन्तस्य चाधातोः' ६।४।१४॥ इत्युपधादीर्घः । ३ तिष्ठति विषयाद् व्यावृत्तः सन्निति **स्थविरः** । 'ष्ठा गतिनिवृतौ'(भ्वा.प.अ.), 'अजिरशिशिर-शिथिलस्थिरस्फिरस्थविरखदिराः'(उणा-५३)इति किरचि अवादेशोऽन्त्यस्य निपात्यते । ४ जीर्यते स्म **जरन्**। 'जृष् वयोहानौ'(दि.प.से.), 'जीर्यतेरतृन्'३।२।१०४॥, 'उगिद-चाम्-'७।१।७०॥ इति नुम् । जरन्तौ, जरन्तः इत्यादि ॥३३९॥ ५ जराऽस्यास्ति **जरी** । 'व्रीह्यादिभ्यश्च'५।२।११६॥ इति इनिः । जरिणौ, जरिणः इत्यादि । ६ जीर्यति स्म **जीर्णः** । 'जॄष्[11] वयोहानौ'(दि.प.से.), निष्ठा, 'ॠत ईद्धातोः[12]'७।१।१००॥, 'उरण् रपरः'१।१।५१॥, 'रदाभ्यां निष्ठा-'८।२।४२॥इति नत्वम्, ['हलि च'८।२।७७॥ इति दीर्घत्वम्], 'श्र्युकः किति' ७।४।११॥ इति नेट् । ७ याता यामाः प्रहरा अस्य **यातयामः** । ८ जिनाति स्म **जीनः** । 'ज्या वयोहानौ'(क्र्या.प.अ.), निष्ठा, 'ग्रहिज्या-'६।१।१६॥ इति संप्रसारणम्, 'ल्वादिभ्यश्च'८।२।४४॥ इति निष्ठानत्वम्, 'हलः'६।४।२॥ इति दीर्घत्वम् । अष्ट[13] वृद्धस्य ॥

## अथ विस्रसा जरा ।

---

१. 'प्रथ प्रख्याने' इति क्षीरतरङ्गिण्यादौ ॥ २. उणादिगणसूत्रे नास्ति॥ ३. 'अधिकरणे शेते'३।२।१५॥ इत्यत्र 'पार्श्वादिषूपसंख्यानम्' इति वार्तिकं मनसि निधाय 'पार्श्वादौ च' इत्युक्तम्, वस्तुतः 'उत्तानादिषु कर्तृषु'(वा-३।२।१५॥)इत्यनेन वार्तिकेनाच्प्रत्ययो योग्यः ॥ ४.'णिजन्तः' इति १॥ ५. उणादिगणे 'कमेः किदुच्चोपधायाः' इति सूत्रस्वरूपं दृश्यते ॥ ६. 'स चत्' इति २॥ ७. इतोऽग्रे १प्रतौ 'वा' इति दृश्यते ॥ ८. '-तृ-' इति ३॥ उणादिगणे 'तृ' इत्यस्य नोल्लेखः, स चोचित एव, 'त्रो रश्च लो वा'(उणा-३३४)इति सूत्रस्य विद्यमानत्वात्, अन्यथा 'तरुणः तलुनः' इति रूपद्वयं न भविष्यति ॥ ९. 'ष्यन्' इति ३.४॥ १०. 'वृद्धौ' इति क्षीरतरङ्गिण्यादौ । ११. 'जृ' इति १.२॥ १२. 'ई-' इति १.२.४॥ १३. 'सप्त' इति १.४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ विशेषेण स्रस्यते अधःपात्यतेऽनया **विस्रसा**, द्विदन्त्यः । 'स्रंसु अधःपतने'[1](भ्वा.आ.से.), भिदादित्वादङ् । २ जीर्यत्यनया **जरा** । 'जॄष् वयोहानौ'(दि.प.से.), षित्त्वात् 'षिद्भिदादिभ्योऽङ्'३।३।१०४॥, 'ऋदृशोऽङि गुणः' ७।४।१६॥, टाप् । द्वे जरायाः ॥

**[1]वार्धकं [2]स्थाविरम्**

१ वृद्धस्य भावः कर्म वा **वार्धकम्** । मनोज्ञादित्वाद् वुञ्, 'युवोरनाकौ'७।१।१॥ । २ स्थविरस्य भावः कर्म वा **स्थाविरम्** ।'हायनान्तयुवादिभ्योऽण्'५।१।१३०॥ इति युवादित्वादण्। द्वे वृद्धत्वस्य[2] ॥

**[1]ज्यायान् [2]वर्षीयान् [3]दशमीत्यपि ॥३४०॥**

१ अतिशयेन वृद्धो **ज्यायान्** । वृद्धशब्दादतिशयेऽर्थे [3]ईयसुनि 'वृद्धस्य च'५।३।६२॥ इति वृद्धस्य ज्यादेशः, 'ज्यादादीयसः'६।४।१६०॥ इत्यात्वम् । ज्यायांसौ, ज्यायांसः इत्यादि । २ अतिशयेन वृद्धो **वर्षीयान्** । वृद्धशब्दादतिशयेऽर्थे [4]ईयसुनि 'प्रियस्थिरस्फिरोरुबहुलगुरुवृद्ध-'६।४।१५७॥इत्यादिना वृद्धस्य[5] वर्षादेशः । वर्षीयांसौ इत्यादि । ३ नवतेरूर्ध्वं दशम इत्यवस्थाविशेषः, तद्योगाद् मत्वर्थे 'वयसि पूरणात्'५।२।१३०॥ इतीनिः **दशमी** । दशमिनौ, दशमिनः इत्यादि । दशमीस्थोऽपि।

"इष्टो वयोदशोपेतः पञ्चमी सप्तमीति वा ।
प्रवया दशमीस्थः स्यात् "[[6]]इति भागुरिः ।

त्रीण्यतिवृद्धस्य ॥३४०॥

**[1]विद्वान् [2]सुधीः [3]कवि[4]विचक्षण[5]लब्धवर्णा-**
**[6]ज्ञः [7]प्राप्तरूप[8]कृति[9]कृष्ट्य[10]भिरूपधीराः ।**
**[12]मेधावि[13]कोविद[14]विशारद[15]सूरि[16]दोष-**
**[17]ज्ञाः [18]प्राज्ञ[19]पण्डित[20]मनीषि[21]बुधप्रबुद्धाः ॥३४१॥**
**[22]व्यक्तो [23]विपश्चित् [24]संख्यावान् [25]सन्**

१ वेत्ति जानाति **विद्वान्** । 'विद ज्ञाने'(अ.प.से.), 'लटः शतृशानचौ-'३।२।१२४॥ इति लटः शत्रादेशः, 'विदेः शतुर्वसुः'७।१।३६॥ इति शतुर्वसुरादेशः, 'उगिदचाम्-'७।१।७०॥ इति नुम् । २ सुष्ठु ध्यायति **सुधीः** । 'ध्यै चिन्तायाम्' (भ्वा.प.अ.), 'ध्यायतेः क्विप् सम्प्रसारणं च'(वा-३।२।१८०॥) इति क्विप्सम्प्रसारणे । सुष्ठु दधाति धारयति शास्त्रार्थमिति वा । 'डुधाञ् धारणादौ'(जु.उ.अ.), 'क्विप्' ३।२।७६॥ इति क्विप्, 'घुमास्था-'६।४।६६॥ इतीत्वम् । शोभना धीरस्येति वा। ३ कवते कौति वा धर्माधर्मौ **कविः**। 'कुङ् शब्दे'(भ्वा.-आ.अ.), 'कु शब्दे'(अ.प.अ.) अदादिर्वा, 'अच इः'(उणा- ५७८)इति इः । कबते[7] वर्णयतीति वा । 'कबृ वर्णे'(भ्वा.-आ.से.), 'इन् सर्वधातुभ्यः'(उणा-५५७)इतीन् । स्त्रियां कवी च, कविताऽपि । ४ विचष्टे शास्त्रार्थमिति **विचक्षणः**। 'चक्षिङ् व्यक्तायां वाचि'(अ.आ.से.), 'अनुदात्तेतश्च हलादेः'३।२।१४९॥ इति युच्, 'युवोरनाकौ'७।१।१॥, 'असि अके अने चक्षिङः ख्याञ् नेति वाच्यम्'( )इति ख्याञादेशभावः। ५ लब्धः प्राप्तो वर्णः स्तुतिर्यशो वा अनेन **लब्धवर्णः** । ६ जानाति शास्त्रार्थमिति[8] **ज्ञः** । 'ज्ञा अवबोधने'(क्र्या.प.अ.), 'इगुपधज्ञा-'३।१।१३५॥ इति कः, 'आतो लोप इटि च'६।४।६४॥ इत्यालोपः । ७ प्राप्तं रूपं दर्शनं येन स **प्राप्तरूपः** । ८ प्रशस्तं कृतमस्यास्ति **कृती** । 'अत इनिठनौ'५।२।११५॥ इतीनिः । कृतमत्यन्तमनेन । 'इष्टा-दिभ्यश्च'५।२।८८॥ इतीनिर्वा । "करोतेः क्रियासामान्य-वाचित्वाद् ज्ञानार्थत्वात् कृतं ज्ञानमस्यास्ति कृती ज्ञानी[9]"[[10]]इति तु कलिङ्गः। ९ कर्षति गूढार्थमिति **कृष्टिः** । 'कृष विलेखने' (भ्वा.प.अ.), संज्ञायां तिक् (तिच्), बाहुलकात् कर्तरि क्तिन् वा, पुंस्ययम् । "आकर्षणे स्त्रियां कृष्टिर्भवेन्नरि विपश्चिति" [[11]]इति रन्तिदेवः। १० अभिगतं रूपं येन **अभिरूपः** । ११ दधाति धियं **धीरः** । 'डु धाञ् धारणपोषणयोः'(जु.उ.अ.), 'सुसूधागृधिभ्यः क्रन्'(उणा-१८२), 'घुमास्था-'६।४।६६॥ इतीत्वम् । धियमीरयति प्रेरयति वा । 'ईर गतिप्रेरणयोः[12]' (चु.उ.से.), 'कर्मण्यण्'३।२।१॥ । संशयविपर्ययरहितां धियं[13] रात्यादत्त इति वा । 'रा दाने'(अ.प.अ.), 'आतोऽनुपसर्गे कः' ३।२।३॥, 'आतो लोपः-'६।४।६४॥ इत्यालोपः। १२ मेधा-ऽस्त्यस्य **मेधावी** ।

१. 'स्रंसु अवस्रंसने' इति क्षीरतरङ्गिण्यादौ ॥ २. 'वृद्धस्य' इति १ ॥ ३. 'इय-' इति १.३ ॥ ४. 'इय-' इति १.२.३ ॥ ५. २प्रतौ नास्ति ॥ ६. द्र. स्वोपज्ञटीका ३।३४०॥, पृ. ८० ॥ ७. अत्र वबयोरैक्यं द्रष्टव्यम्, क्षीरतरङ्गिण्यादौ 'कवृ' इति धातोरविद्यमानत्वात् ॥ ८. 'शास्त्रमिति' इति ४ ॥ ९. 'आत (ज्ञात?)' इति १, इतोऽग्रे २प्रतौ 'हि' इति दृश्यते ॥ १०. द्र. पदचन्द्रिका, भा-२, ब्राह्मवर्गः, श्लो-४०२, पृ.४९२ ॥ ११. द्र. रामाश्रमी २।७।६॥, पृ.३२६॥, पदचन्द्रिका, भा-२, ब्राह्मवर्गः, श्लो-४०२, पृ.४९२ ॥ १२. '-प्रैषणयोः' इति३, गतिप्रेरणार्थकेरधातुः क्षीरतरङ्गिणयादौ न दृश्यते ॥ १३. 'धियां' इति ३ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'अस्मायामेधास्रजो विनिः'५।३।१२१॥ इति विनिः । मेधाविनौ, मेधाविनः इत्यादि । **१३** को वेत्त्यभिप्रायमस्य, कस्य ब्रह्मण ओकः स्थानं वेत्तीति वा **कोविदः**। 'विद ज्ञाने'(अ.प.से.), पृषोदरादित्वात् साधुः । कौति शब्दायते धर्माधर्माविति । 'कु शब्दे'(अ.प.अ.), विच्प्रत्ययः । कुशब्देन वेद उच्यते, तस्य विदो ज्ञाता इति वा, पृषोदरादिः । **१४** विशेषेण शारदोऽधृष्टः प्रत्यग्रो[1] वा **विशारदः**। **१५** सुनोति सन्देहम्, सूते सदर्थं वा **सूरिः** । 'षुञ् अभिषवे'(स्वा.उ.अ.), 'षूङ् प्राणिगर्भविमोचने'(अ.आ.वे.) वा, 'सुञो दीर्घश्च'(उणा-२९३)इति [2]रिक्दीर्घौ । षूङ्, 'सुसूधागृवि(धि)भ्यः क्रिन्[3]' (उणा-१८२), 'सामसालसमसूरसूरयः'' [[4]]इति सभेदात् सूरिः दन्त्यादिः । अभिधानमालायां तु इन्नन्तोऽपि, सूरी, सूरिणौ, सूरिणः इति (इत्यादि) । **१६** दोषान् जानाति ज्ञात्वा जह्यादिति **दोषज्ञः**। 'ज्ञा अवबोधने'(क्र्या.प.अ.), 'इगुपधज्ञा-'३।१।१३५॥ इति कः। **१७** प्रज्ञाऽस्त्यस्य **प्राज्ञः** । 'प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः'५।२।१०१॥। प्रज्ञ एव वा । 'प्रज्ञादिभ्यश्च'५।४।३८॥ इत्यण्। **१८** पण्ड्यतेऽनया पण्डा । 'पडि गतौ'(भ्वा.आ.से.), 'गुरोश्च' ३।३।१०३॥ इत्यकारः, ततो ये गत्यर्थास्ते ज्ञानार्था इत्युक्तेः पण्डा बुद्धिः सञ्जाताऽस्य **पण्डितः**। तारकादित्वादितच् । **१९** मनस ईष्टे **मनीषी**, पृषोदरादिः । मनीषाऽस्त्यस्येति वा, [5]शिखादित्वादिन्[6] । यौगिकत्वाद् धीमान्, मतिमानित्याद्याः (मतिमानित्यादयः)। **२०** बुध्यतेऽवगच्छति पदार्थानिति **बुधः**। 'बुध अवगमने'(दि.आ.अ.), 'इगुपध-'३।१।१३५॥ इति कः। **२१** प्रबुध्यते **प्रबुद्धः** । 'बुध अवगमने'(दि.आ.अ.), वर्तमाने क्तः ॥३४१॥ **२२** व्यनक्त्यर्थमिति **व्यक्तः** । विपूर्वः 'अञ्जू [व्यक्ति]म्रक्षणादौ'(रु.प.वे.), वर्तमाने क्तः, 'अनिदिताम्-' ६।४।२४॥ इति न्लोपः। **२३** विशेषेण पश्यंश्चेतयते **विपश्चित्**, पृषोदरादिः । **२४** संख्या विचारणा, तद्युक्तः **संख्यावान्** । यद्वा सं सम्यक् ख्यानं ज्ञानमस्यास्ति संख्यावान् । 'तदस्यास्त्यस्मिन्निति मतुप्' ५।२।९४॥ । **२५** सर्वेषु शान्तिकपौष्टिकादिकर्मसु अस्ति विद्यते **सन्**, विद्यमान इत्यर्थः, अन्ये त्वसत्कल्पाः । 'अस[7] भुवि'(अ.प.से.), शतृप्रत्ययः, अस्ति[8] श्नसोरल्लोपः' ६।४।१११॥, 'उगिदचाम्-'७।१।७०॥ इति नुम् । सन्तौ, सन्तः इत्यादि । पञ्चविंशतिः पण्डितस्य ।

**[1]प्रवीणे तु [2]शिक्षितः ।**

**[3]निष्णातो [4]निपुणो [5]दक्षः [6]कर्म[7]हस्त[8]मुखाः कृतात् ॥३४२॥**

**[9]कुशलश्[10]चतुरो[11]ऽभिज्ञ[12]विज्ञ[13]वैज्ञानिकाः [14]पटुः ।**

**१** प्रकर्षेण वीयते गम्यते **प्रवीणः** । 'वी गतिप्रजनकान्त्यादिषु'(भ्वा.प.अ.), ['घृवीह्वा-'(हैमोणा-१८३)इति णक्], तत्र । **२** शिक्षा सञ्जाताऽस्य **शिक्षितः** । तारकादित्वादितच् । शिक्ष्यते स्मेति वा । 'शिक्ष विद्योपादाने'(भ्वा.आ.से.), निष्ठा, 'आर्धधातुकस्य-'७।२।३५॥ इतीट् । **३** निष्णाति स्म **निष्णातः**। 'ष्णा शौचे'(अ.प.अ.), मुख्यार्थं परित्यज्य निपुणे रूढः, निष्ठा, 'निनदीभ्यां स्नातेः कौशले'८।३।८९॥ इति सस्य षत्वम् । **४** नियतं पुणति शोभनकर्मत्वादिति **निपुणः**। 'पुण कर्मणि शुभे'(तु.प.से.), 'इगुपध-'३।१।१३५॥ इति कः । **५** दक्षते **दक्षः**। 'दक्ष वृद्धौ शैघ्र्ये च'(भ्वा.आ.से.), पचाद्यच् । **६-८** कृतात् कृतशब्दादग्रे कर्महस्तमुखाः शब्दा योज्यन्ते, तेन कृतं कर्माऽनेन **कृतकर्मा**, नान्तः । यौगिकत्वात् कृतकृत्यः, कृतार्थः, कृती च । कृतो वशीकृतो हस्तोऽनेन **कृतहस्तः**। कृतं संस्कृतं[9] मुखमस्य **कृतमुखः** ॥३४२॥ **९** तीक्ष्णान् कुशान् लाति **कुशलः**, ते हि व्युत्पन्नैरादातुं शक्याः । 'ला दाने'(अ.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥। कुश्यति श्लिष्यति[10] वा । 'कुश[11] श्लेषणे'(दि.प.से.), वृषादित्वात् कलच् । **१०** चतते कर्म इति **चतुरः** । 'चतेङ्[12] याचने'(भ्वा.उ.से.), 'मन्दिवाशिमथिचतिचङ्क्यङ्किभ्य उरच्'(उणा-३८) । चत्वारः पुरुषार्थाः सन्त्यस्येति वा । अर्शआदित्वादच् । **११** अभितः सर्वतो जानाति **अभिज्ञः**। 'ज्ञा अवबोधने'(क्र्या.प.अ.), 'इगुपध-'३।१।१३५॥

१. 'प्रत्ययो' इति ४॥ २. वस्तुतस्तु इदं सूत्रं निप्रत्ययस्य विधानं करोत्यतः रिक्प्रत्ययविधानं विचारणीयम् ॥ ३. इदमपि सूत्रं क्रन्करोति, अथ च 'सूङः क्रिः'(उणा-५०४)इत्युणादिक्रिप्रत्ययेन समाधेयम् ॥ ४. द्र. पदचन्द्रिका, भा-२, ब्रह्मवर्गः, श्लो-४०२, पृ.४९२॥, तत्र-''साल-साम-सम-सुर-सूरयः'' इति दृश्यते ॥ ५. 'शिखादिभ्योदिन्' इति १॥ ६. '-दिञ्' इति३ ॥ ७. 'असु' इति १.३॥ ८. अनावश्यकोऽयम्॥ ९. 'संस्कृतमुख-'इति३ ॥ १०. 'श्लिष्यते' इति१ ॥ ११. दुर्गसम्मतोऽयं धातुः, द्र. क्षीरतरङ्गिणी, दिवादिः, धातुसं-११२, पृ.२२९॥ १२. ङकारानुबन्धः क्षीरतरङ्गिण्यादौ न दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति कः। **१२** विशेषेण जानाति **विज्ञः**। **१३** विज्ञानं प्रयोजनमस्य **वैज्ञानिकः**।'तदस्य प्रयोजनम्'५।१।१०१॥ इति ठक्, 'ठस्येकः' ७।३।५०॥, 'किति च'७।२।११८॥ इति वृद्धिः। **१४** पाटयति दाक्ष्यं **पटुः**।'पट[१] विस्तारे'(भ्वा.प.से.), णिजन्तः, 'फलिपाटिनमिमनि-'(उणा-१८)इत्युः, 'णेरनिटि'६।४।५१॥ इति णिलोपः। चतुर्दश प्रवीणस्य ।'सीखिउ[२]' इति भाषा ॥ ''क्षेत्रज्ञः नदीष्णः निष्णः''[शेषनाममाला ३।९२॥]इति शैषिकाणि ॥

## छेको विदग्धे

**१** छ्यति छिनत्ति मुर्खदुष्टचित्तानि **छेकः** । 'छो छेदने'(दि.प.अ.), बाहुलकाद् डेकः । **२** विशेषेण दहति मूर्खचित्तमिति **विदग्धः** । 'दह भस्मीकरणे'(भ्वा.प.अ.), वर्तमाने क्तः, तत्र । द्वे दाक्ष्यातिशययुक्तस्य । [३]छेकोऽवसरज्ञो, द्वासप्ततिकलापण्डित इति च वृद्धाः । छेकः 'प्रयोगज्ञः' इति भाषान्तरम् । ''छेकालः छेकिलः''[शेषनाममाला २।९२॥] शैषिके । छइल्लो देश्याम् ॥

## प्रौढस्तु प्रगल्भः प्रतिभान्वितः ॥३४३॥

**१** प्रौह्यते(प्रोह्यते) स्म **प्रौढः**।'वह प्रापणे'(भ्वा.उ.अ.), निष्ठा, कित्त्वात् सम्प्रसारणम्, 'हो ढः'८।२।३१॥, 'झषस्तथोः-'८।२।४०॥ इति धत्वम्, ष्टुत्वम्, ढलोपः, 'प्रादूहोढौ-(-ढ्यो)-'(वा-६।१।८९॥)इति वृद्धिः। **२** प्रगल्भते **प्रगल्भः**। 'गल्भ धार्ष्ट्ये'(भ्वा.आ.से.), पचाद्यच्।**३** [४]तत्त्वोल्लेखशालिनी प्रज्ञा प्रतिभा, तयान्वितः **प्रतिभान्वितः** । त्रीणि सर्वव्यापारसमर्थस्य ।'पुषतु[५]' इति भाषा ॥३४३॥

## कुशाग्रीयमतिः सूक्ष्मदर्शी

**१** कुशाग्रस्य तुल्या तीक्ष्णत्वात् कुशाग्रीया। 'कुशाग्राच्छः'५।३।१०५॥, 'आयनेयी-'७।१।२॥ इति ईयादेशः। कुशाग्रीया मतिरस्य **कुशाग्रीयमतिः** । **२** सूक्ष्मं पश्यतीत्येवंशीलः **सूक्ष्मदर्शी** । 'दृशिर् प्रेक्षणे'(भ्वा.प.अ.), 'सुप्यजातौ णिनिः-'३।२।७८॥ इति णिनिः । द्वे सूक्ष्मदर्शिनः । 'ऊंडुं[६] विमासै[७]' इति भाषा ॥

## तत्कालधीः पुनः ।

## प्रत्युत्पन्नमतिः

**१** तत्कालमेव धीरस्य **तत्कालधीः** । **२** प्रतीति प्रत्यग्रमुत्पन्ना मतिरस्य **प्रत्युत्पन्नमतिः** । द्वे त्वरितोत्पन्न[८]बुद्धिधनस्य॥

## दूराद् यः पश्येद् दीर्घदर्श्यसौ ॥३४४॥

**१** दूराद् यः पश्येदसौ **दीर्घदर्शी** । दीर्घं पश्यतीत्येवंशीलः दीर्घदर्शी ।'दृशिर् प्रेक्षणे'(भ्वा.प.अ.), 'सुप्यजातौ-'३।२।७८॥ इति णिनिः । दीर्घदृष्टिरपि । यद्धलायुधः- ''दूरादेवार्थसन्दर्शी[९] दीर्घदृष्टिः प्रकीर्तितः''[हलायुधकोशः २।३७६॥] इति । एकं दूरादेवार्थद्रष्टुः ॥३४४॥

## हृदयालुः सहृदयश्चिद्रूपोऽपि

**१** प्रशस्तं हृदयं मनोऽस्य **हृदयालुः** । 'हृदयाच्चालुरन्यतरस्याम्'(वा-५।२।१२२॥)इत्यालुः । **२** सह हृदयेन[१०] मनसा न तु वक्षसा वर्तते स **सहृदयः** । सर्वेऽपि सहृदया एव, परमत्रौचित्याद् हृदयालुसाहचर्याच्च प्रशस्तहृदयसहिते पुंविशेषेऽयं वर्तते ।'सुहृदयः' इति पाठे, शोभनं हृदयमस्येति व्युत्पत्तिः। **३** चिदिति विशिष्टे चैतन्ये वर्तते, चिद् रूपमस्य तन्मयत्वाद् **चिद्रूपः** । त्रीणि वस्तुतत्त्वज्ञानयुक्तस्य ॥

## अथ संस्कृते ।

## व्युत्पन्नप्रहतक्षुण्णाः

**१** शास्त्रादिना संस्क्रियते स्म **संस्कृतः** । 'निष्ठा' ३।२।१०२॥ इति क्तः,'सम्पर्युपेभ्यः[११]-'६।१।१३७॥ इति सुट्। **२** व्युत्पद्यते स्म **व्युत्पन्नः** ।'पद गतौ'(दि.आ.अ.), भावे निष्ठा, 'रदाभ्याम्-'८।२।४२॥ इति नत्वम् । **३** प्रहन्यते स्म **प्रहतः**। 'हन्(हन) हिंसागत्योः'(अ.प.अ.), निष्ठा,'अनुदात्तोपदेश-' ६।४।३७॥ इति न्लोपः ।**४** क्षुद्यते स्म **क्षुण्णः**।'क्षुदिर् सञ्चूर्णने' (रु.उ.अ.), निष्ठा, 'रदाभ्याम्-' ८।२।४२॥ इति नत्वम् । चत्वारि शास्त्रादितत्त्वचतुरस्य ॥

## अन्तर्वाणिस्तु शास्त्रवित् ॥३४५॥

---

१. विस्तारार्थकपटधातुः क्षीरतरङ्गिण्यादौ न दृश्यते ॥ २. 'सीखिउ' इति २, 'सीखियौ' इति ४॥ ३. 'छेकेऽ-' इति२॥ ४. 'तत्त्वोल्लेखः' इति२॥ ५. 'पुषतो' इति३॥ ६. 'उंडुं' इति ३, 'ऊंडूं' इति ४॥ ७. 'विमासइ' इति २.४॥ ८. '-पन्नस्य' इति ३॥ ९. हलायुधे 'दूरार्थानर्थसन्दर्शी' इति दृश्यते, पृ.४४॥ १०. 'हृदये' इति १॥ ११. सिद्धान्तकौमुद्यां दीक्षितेन 'संपरिभ्यां-'६।१।१३७॥ इत्यादिपाठः स्वीकृतः, अत्र तट्टीका तत्त्वबोधिनी-''संपर्युपेभ्यः-' इति वृत्तिस्थपाठं विहाय भाष्यवार्त्तिकानुसारेणाह-संपरिभ्यामिति'' इति, सिद्धान्तकौमुदी, पृ.४७९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ अन्तरन्त:करणे वाणी शास्त्रशरीरभूता अधिदेवभूता[1]वा अस्य **अन्तर्वाणि:** । 'गोस्त्रियो:-'१।२।४८॥ इति ह्रस्वत्वम्[2], 'मातृच(मातृज्)मातृकमातृषु'(वा-६।१।१४॥)इति सामान्यज्ञापकात्, कपोऽनित्यत्वान्न कप् । ''अन्तर्वाण्यस्येति अन्तर्वाणि: [विपश्चित्],'निष्प्रवाणिश्च'५।४।१६०॥इति चकाराद्'नद्युतश्च' ५।४।१५३॥इति कपो निषेध:''[मा.धातुवृत्ति:, भ्वादि:, धातुसं-२९७]इति माधव: । शास्त्रं च न तथा वक्तुं शक्नोति शास्त्रवित् ।'विद ज्ञाने'(अ.प.से.), क्विप् । शास्त्रं वेत्ति न तथा वक्तुं शक्नोति, तस्यैकम् ॥३४५॥

**[1]वागीशो [2]वाक्पतौ**

१ वाचामीशो **वागीश:** । ''प्रधानवचसो मूकान् वागीशानपि कुर्वत:''[ ]इति माघ: । २ वाचां पति: **वाक्पति:**, तत्र। द्वे प्रधानवक्तु: ॥

**[1]वाग्ग्मी [2]वाचोयुक्तिपटु: [3]प्रवाक् ।**
**[4]समुखो [5]वावदूक:**

१ प्रशस्ता वागस्य **वाग्ग्मी** । 'वाचो ग्मिनि:' ५।२।१२४॥ इति ग्मिनि:, तेन द्वयोर्गकारयो: श्रवणं भवति, 'चो: कु:'८।२।३०॥,'झलां जशोन्ते'८।२।३९॥ इति जश्त्वम्। यदि मिनिरित्येवोच्येत तदा 'यरोऽनुनासिके-'८।४।४५॥ इति नित्यमनुनासिक: स्यात्, 'प्रत्यये नित्यमिष्यते' इति वचनात्। ''यो हि सम्यग्भाषते वाग्ग्मीत्येव स[3] भवति''[ ]इति माधवकृष्णपण्डितादय:। २ वाचो युक्तौ पटु: **वाचोयुक्तिपटु:**, षडक्षरमखण्डम्।'वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु'(वा-६।३।२१॥) इति षष्ठ्यलुक् । ३ प्रकृष्टा वागस्य **प्रवाक्**। ४ सह मुखेन वचनेन वर्तते **समुख:**। मुखशब्देनात्र वचनं लक्ष्यते। ५ वावद्यत इत्येवंशीलो **वावदूक:** । वदेर्यङन्तात्'वदेश्च'( )इत्यूक[4]:। पञ्च प्रतिभायुक्तजल्पकस्य ॥

**अथ [1]वदो [2]वक्ता [3]वदावद: ॥३४६॥**

१ वदतीति **वद:** ।'वद व्यक्तायां वाचि'(भ्वा.प.से.), पचाद्यच् । २ वक्तीति **वक्ता** । 'वच परिभाषणे'(अ.प.अ.), 'ण्वुल्तृचौ'३।१।१३३॥इति तृच्, तृन् वा। ३ वदति **वदावद:** ।'वद व्यक्तायां वाचि'(भ्वा.प.से.), पचाद्यच्,'चरिचलिपति-वदीनां द्वित्वमच्याक् चाभ्यासस्य कार्यमनचीति वक्तव्यम्[5]'(वा-६।१।१२॥)इति हलादि:शेषाभाव:।त्रीणि वक्तु: ।'कहणहार'इति भाषा ॥३४६॥

**स्याज्[1]जल्पाकस्तु [2]वाचालो [3]वाचाटो [4]बहुगर्ह्यवाक् ।**

१ जल्पनशीलो **जल्पाक:** ।'जल्प व्यक्तायां वाचि' (भ्वा.प.से.), 'जल्पभिक्षकुट्टलुण्टवृङ: षाकन्'३।२।१५५॥। २-३ कुत्सिता वागस्य **वाचाल:**, [**वाचाट:**] । 'आलजाटौ (आलजाटचौ) बहुभाषिणि'५।२।१२५॥, 'कुत्सित इति वाच्यम्' (वा-५।२।-१२५॥)। ४ बहुर्नि:सारतया गर्ह्या वागस्य **बहुगर्ह्यवाक्**। चत्वारि वाचालस्य।'घणुं[6] असारबोलै[7]' इत्यादि[8] भाषा ॥

**[1]यद्वदो[2]ऽनुत्तरे**

१ यदेव नि:सरति, तदेव वदति **यद्वद:** ।पचाद्यच् । २ नास्ति उत्तरमस्य **अनुत्तर:**, तत्र । द्वे प्रश्नानुरूपोत्तररहितस्य॥

**[1]दुर्वाक् [2]कद्वदे स्यात्**

१ दुर् निन्दितं वक्ति **दुर्वाक्** । दुर् निन्दिता वागस्यास्तीति वा । २ कुत्सितं वदति **कद्वद:** । 'रथवदयोश्च' ६।३।१०२॥ इति को: कत्, तत्र । गर्ह्यवादीत्यपि । ''गर्ह्यवादी तु कद्वद:''[अमरकोष:३।१।३७॥]इत्यमर: । यो निन्दां कुर्वन् वक्ति, तस्य द्वे ॥

**अथा[1]ऽधर: ॥३४७॥**
**[2]हीनवादिनि**

१ अवति गच्छति हीनत्वम् **अधर:** । 'अव रक्षणादौ' (भ्वा.प.से.), 'अवेर्ध(ध्) च वा'(हैमोणा-३९८)इत्यर: ॥३४७॥ २ हीनं वदतीत्येवंशीलो **हीनवादी** ।'वद व्यक्तायां वाचि'(भ्वा.प.से.),'सुप्यजातौ-'३।२।७८॥इति णिनि:,तत्र।द्वे वादे पराजितस्य॥

**[1]एडमूकाऽनेड[2]मूकौ [3]त्ववाक्श्रुतौ ।**

---

१. '-देवता-' इति ३॥ २. वस्तुत: द्रविडप्राणायामोऽयं ह्रस्वान्तवाणिशब्दसत्त्वात्॥ ३. 'संभवति' इति ४॥ ४. ''वदेर्यङन्ताद् 'यजजपदशां यङ:'(३।२।१६६॥)इति बहुवचननिर्देशादन्यतोऽप्यूक इति धातुपारायणम्। 'चेक्रीयीतान्तानां यजिजपिदंशिवदाम्' इत्यूक इति कालापा:'' इति टीकासर्वस्वम्, भा-३, ३।१।३५॥, पृ.१७॥ ५. 'चरिचलिपतिवदीनां वा द्वित्वमच्याक् चाभ्यासस्येति वक्तव्यम्' इति वार्तिकस्वरूपं दृश्यते। 'आगमस्य दीर्घत्वसामर्थ्यादभ्यासह्रस्वो हलादि: शेषश्च न' इति तत्रैव दीक्षित:॥ ६. 'आसार-' इति ३॥ ७. '-बोलइ' इति २.४॥ ८. 'इति' इति १॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ एडो बधिरः, मूकोऽवाक्, एडश्चासौ मूकश्च **एडमूकः** । "कलमूकस्त्ववाक्श्रुतिः[1]"[हलायुधकोशः २।६०९॥] इति हलायुधः । २ अनेडोऽपि अवर्करोऽपि मूकः **अनेडमूकः**। "अन्धो ह्यनेडमूकः स्यात्"[हलायुधकोशः २।६०९॥]इति हलायुधः । "अनेडमूकस्तु जडः"[वैजयन्तीकोषः ५।४।१४॥] इति वैजयन्ती । "शठो ह्यनेडमूकः स्यात्"[ [2] ]इति भागुरिः, तदयमनेकार्थो द्रष्टव्यः । ३ न विद्यते वाक् श्रुतिश्चास्य **अवाक्श्रुतिः**, तत्र । यो बधिरो मूकश्च, तस्य त्रीणि ॥

### रवणः[1] शब्दनस्तुल्यौ[2]

१ रौतीत्येवंशीलो **रवणः** । 'रु शब्दे'(अ.प.अ.), 'चलनशब्दार्थादकर्मकाच्च[3]'३।२।१४८॥ इति युच् । २ शब्दयतीत्येवंशीलः **शब्दनः** । 'शब्द शब्दने[4]'(चु.उ.से.), चुरादिः, 'चलनशब्दार्थात्-'३।२।१४८॥ इति युच् । द्वे शब्दकरस्य । 'सादकरे[5]' इति भाषा ॥

### कुवादकुचरौ[1][2] समौ ॥३४८॥

१ कुत्सितो वादोऽस्य **कुवादः** । २ कुत्सितं चरति **कुचरः** । 'चर गत्यादौ'(भ्वा.प.से.), पचाद्यच् । "कुचरः कुटिलाशयः"[हलायुधकोशः २।३८९॥]इति हलायुधः । द्वे कुवचनकथकस्य ॥३४८॥

### लोहलोऽस्फुटवाक्[1][2]

१ लोहति मुह्यति **लोहलः**। 'लुहः सौत्रः, कत्थनादौ कलच्, बाहुलकाद् गुणः । २ अस्फुटा वागस्य **अस्फुटवाक्**। द्वे अप्रकटवचनवक्तुः । 'तोतला' इति भाषा । "काहलः" [शेषनाममाला ३।९२॥]इति शैषिकम् ॥

### मूकोऽवाक्[1][2]

१ मूयते बध्यते वागभावेनेति **मूकः** । 'मूङ् बन्धने' (भ्वा.आ.से.),'वयतिभवर्तिभ्यां[6] कक्'( ) । २ नास्ति वागस्य **अवाक्** । द्वे मूकस्य । "जडकडौ[7]"[शेषनाममाला ३।९३॥] शैषिके ॥

### असौम्यस्वरोऽस्वरः[1][2] ।

१ न सौम्यः स्वरोऽस्य **असौम्यस्वरः** । २ विपरीतः स्वरोऽस्य **अस्वरः** । अत्र नञ् वैपरीत्ये अनर्थवदिति । द्वे घर्घरस्वरस्य ॥

### वेदिता[1] विदुरो[2] विन्दुः[3]

१ वेत्तीत्येवंशालो **वेदिता** ।'विद ज्ञाने'(अ.प.से.),शीले तृन् । २ वेत्तीत्येवंशीलो **विदुरः** । 'विदिभिदिच्छिदेः कुरच्'३।२।१६२॥ ।३ वेदनशीलो **विन्दुः** ।'विद ज्ञाने'(अ.प.से.), 'विन्दुरिच्छुः'३।२।१६९॥ इति साधुः। त्रीणि ज्ञातुः।'जाणे[8]'इति भाषा॥

### वन्दारुस्त्वभिवादकः[1][2] ॥३४९॥

१ वन्दनशीलो **वन्दारुः** । 'वदि अभिवादनस्तुत्योः' (भ्वा.आ.से.),'शृवन्द्योरारुः'३।२।१७३॥ इत्यारुः । २ अभिवादयते **अभिवादकः** । 'वद व्यक्तायां वाचि'(भ्वा.प.से.), णिजन्तः[9], ण्वुल् । द्वे वन्दनशीलस्य ।'जे नमस्कार करै[10]' इति भाषा ॥३४९॥

### आशंसुराशंसिता[1][2]तरि

१ आशंसत इत्येवंशील **आशंसुः** ।'शंसु इच्छायाम्' (भ्वा.प.से.), अयमाङ्पूर्व एव प्रयुज्यते ।'सनाशंसभिक्ष उः' ३।२।१६८॥ इत्युः । २ आशंसेः 'तृन्'३।२।१३५॥ इति तृनि **आशंसिता**, तत्र । द्वे शिक्षादायकस्य ॥

### कद्वरस्त्वतिकुत्सितः[1][2] ।

१ कटत्यावृणोति **कद्वरः**, तृतीयवर्गाद्यान्तस्थाचतुर्थमध्यः । 'कटे वर्षावरणयोः'(भ्वा.प.से.), 'छित्वरछत्वर-(छत्वर)-'(उणा-२८१)इति वरचि साधुः । कुत्सितं वृणोति कद्वर इत्यन्ये । २ अत्यर्थं कुत्सितः **अतिकुत्सितः**। एकं कटुकभाषिणः॥

### निराकरिष्णुः[1] क्षिप्नुः[2][11] स्यात्

१ निराकरणशीलो **निराकरिष्णुः** । 'डुकृञ् करणे' (त.उ.अ.), 'अलङ्कृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतुवृधुसहचर इष्णुच्'३।२।१३६॥ २ क्षिपतीत्येवंशीलः **क्षिप्नुः**। 'क्षिप प्रेरणे'(तु.उ.अ.), 'त्रसिगृधिधृषिक्षिपेः क्नुः' ३।२।१४०॥। द्वे निराकरणशीलस्य ॥

### विकासी[1][12] तु विकस्वरः[2][13] ॥३५०॥

१. 'कल्ल-' इति हलायुधे॥ २. द्र. स्वोपज्ञटीका ३।३४८॥, पृ.८२॥ ३. '-काद् युच्' इत्यष्टाध्याय्याम्॥ ४. '-उपसर्गादाविष्कारे' इति क्षीरतरङ्गिणी, धातुसं-१६०, पृ.३११॥ ५. 'सादकरै' इति ३॥ ६. '-मयति' इति ४॥ ७. 'जडः कडः' इति १.२.४॥ ८. 'जाणै' इति ३॥ ९. 'णिजन्ताः' इति १.२.४॥ १०. '-करइ' इति २॥ ११. 'क्षिप्णुः' इति २.३॥ १२. 'विकाशी' इति १.३॥ १३. '-श्वरः' इति ३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ विकसनशीलो **विकासी**[1] । 'कस गतौ'(भ्वा.-प.से.), 'वौ कस[2]-'३।२।१४३॥ इति घिनुण्, णित्त्वाद् 'अत उपधायाः' ७।२।११६॥ इति[3] वृद्धिः । "विकासः स्फुटने व्यक्तौ"[[4]]इति दन्त्यान्ते धरणिः । २ विकसनशीलो **विक-स्वरः**। 'कस गतौ'(भ्वा.प.से.), 'स्थेशभासपिसकसो वरच्' ३।२।१७५॥ । द्वे विकसनशीलस्य ॥३५०॥

## [1]दुर्मुखे [2]मुखरा[3]बद्धमुखौ

१ मुखशब्देनात्र वाग् लक्ष्यते, दुष्टं मुखं वागस्य **दुर्मुखः**, तत्र । २ मुखं सर्वस्मिन् वक्तव्येऽस्त्यस्य **मुखरः** । 'खनखमुखकुञ्जेभ्यश्च[5]'(वा-५।२।१०७॥)इति रः । ३ अबद्धम् अनियन्त्रितं मुखं वागस्य **अबद्धमुखः** । त्रीणि विरुद्धभाषिणः। 'लबाड' इति भाषा ॥

## [1]शक्लः [2]प्रियंवदः ।

१ शक्नोति वक्तुं **शक्लः** । 'शक्लृ शक्तौ'(स्वा.-प.अ.), '[6]मूङ्शक्यबि(वि)भ्यः क्लः'(उणा-५४८) । यद्वा 'स्फायितञ्चि-'(उणा-१७०)इति रक्, कपिलिकादित्वाद् लत्वम्। शक्त इति ककारतकारसंयोगवानपि, तदा 'भूङ्पूङ्-शकिभ्यः क्तः'( ) । २ प्रियं वदति **प्रियंवदः**। 'वद व्यक्तायां वाचि'(भ्वा.प.से.), 'प्रियवश(प्रियवशे) वदेः(वदः) खच्' ३।२।३८॥, 'अरुर्द्विषत्-'६।३।६७॥ इति मुम् । द्वे प्रियवादिनः। 'मीठा बोला' इति भाषा ॥

## दानशीलः स [1]वदान्यो [2]वदन्योऽपि

१ स प्रियंवदो दानशीलः सन् **वदान्यः**, प्रोच्यत इति शेषः। वदति सदैव दीयतामिति वदान्यः । 'वदेरान्यः'(उणा-३८४)इत्यान्यः । "दानशीलप्रियवाचौ वदान्यौ पृथक्"[[7]] इत्येके। यन्मुनिः-"शक्लो वदान्यः प्रियवाग् वदान्यो दान-शीलकः"[[7]]इति । २ वदने साधुः **वदन्यः** । 'तत्र साधुः' ४।४।९८॥ इति यत्, 'यस्येति च'६।४।१४८॥ । प्रियवचने दातरि च प्रत्येकं युगपद् नाम्नी द्वे ॥

## अथ [1]बालिशः ॥३५१॥

## [2]मूढो [3]मन्दो [4]यथाजातो [5]बालो [6]मातृमुखो [7]जडः ।
## [8]मूर्खो[9]ऽमेधो[10]वि[11]वर्णा[12]ज्ञा वैधेयो [13]मातृशासितः ॥३५२॥
## [14]देवानांप्रिय[15]जाल्मौ च

१ बलति प्राणिति जनन्येति **बालिशः**। 'बल प्राणने'(भ्वा.प.से.), 'बलेर्णिद्वा'(हैमोणा-५३६)इति इशप्रत्ययः ॥३५१॥ २ मुह्यति स्म **मूढः** । 'मुह वैचित्ये'(दि.प.अ.), निष्ठा, 'हो ढः'८।२।३१॥, 'झषस्तथोः-'८।२।४०॥ इति धत्वम्, 'ष्टुना ष्टुः'८।४।४१॥, 'ढो ढे लोपः'८।३।१३॥, 'ढ्रलोपे पूर्वस्य-'६।३।१११॥ अणो दीर्घः। ३ मन्दोऽलस इव **मन्दः** । ४ यथैव जातस्तथैव स्थितोऽसंस्कृतत्वाद् **यथाजातः**। यथोद्गतोऽपि । ५ बाल इव **बालः** । ६ मातेव मुखमस्य **मातृमुखः** । ७ जलति न तीक्ष्णो भवति **जडः** । 'जल घात्ये' (भ्वा.प.से.), डलयोरैक्ये, पचाद्यच् । ८ मुह्यति शास्त्रव्याख्याने **मूर्खः**। 'मुह वैचित्ये'(दि.प.अ.), 'मुहेः खन् मूर्च'(उणा-७००)इति खन्प्रत्ययः, धातोर्मूरादेशः । ९ नास्ति मेधाऽस्य **अमेधाः**। 'नित्यमसिच्प्रजामेधयोः'५।४।१२२॥ इत्यसिच्, 'अत्वसन्तस्य च-'६।४।१४॥ इति सौ दीर्घः, 'हल्ङ्याप्-'६।१।६८॥ इति सुलोपः। अमेधसौ, अमेधसः इत्यादि । १० विगतः वर्णः वर्णनं श्लाघाऽस्य **विवर्णः**। ११ न जानाति प्रश्नोत्तरे **अज्ञः** । १२ विधाया भोजनस्यापत्यमिव **वैधेयः** । विधाशब्दात् 'स्त्रीभ्यो ढक्'४।१।१२०॥, 'आयनेयी-'७।१।२॥ इत्येयादेशः। अज्ञत्वेन विधातव्यत्वाद् विधेयः, स एव वैधेयः, स्वार्थे प्रज्ञाद्यण्। १३ अज्ञत्वाद् मात्रा शास्यते **मातृशासितः** । 'शासु[8] अनुशिष्टौ' (अ.प.से.), वर्तमाने क्तः ॥३५२॥ १४ देवानां प्रियो **देवानां-प्रियः** । 'देवानांप्रिय इति च मूर्खे[9]'(वा-६।३।२१॥)इति षष्ठ्या-लुक् । "मूर्खा हि निर्विद्यत्वाद् यागादिना पुण्यकर्मणा वा अस्म-त्पदं न हरिष्यन्तीति देवानां विमर्शनाद् देवानांप्रियः"[ ]इति मिश्राः । १५ जलति जडीभवति **जाल्मः** । 'जल घात्ये' (भ्वा.प.से.) बाहुलकान्मकि साधु । "जाल्मोऽसमीक्ष्यकारी स्यात्"[अमरकोषः ३।१।१७॥]इत्यमरः। पञ्चदश मूर्खस्य । "अनेडो नामवर्जितः"[शेषनाममाला ३।९३॥]इति शैषिके ॥

## [1]दीर्घसूत्र[2]श्चिरक्रियः[10] ।

१ अल्पकालसाध्यं यो बहुकालेन करोति स **दीर्घ-सूत्रः**। दीर्घेण चिरेण सूत्रयतीति । 'सूत्र विमोचने[11]'(चु.उ.से.),

---

१. 'विकाशी' इति १.२.३॥ २. 'वौ कष-' इत्यष्टाध्याय्याम् ॥ ३. १.२.४नास्ति ॥ ४. द्र. रामाश्रमी ३।१।३०॥, पृ.४८५॥, तथा पदचन्द्रिका, भा-३, विशेष्यनिघ्नवर्गः, श्लो-३०, पृ.२७॥ ५. 'रप्रकरणे खमुखकुञ्जेभ्य उपसंख्यानम्' इति वार्तिकस्वरूपं दृश्यते ॥ ६. 'मूशिक्य-' इत्युणादिगणे ५०॥ ७. द्र. स्वोपज्ञटीका ३।३५१॥, पृ.८२॥ ८. 'शास' इति ३॥ ९. "देवानाम्प्रिय इत्यत्र च षष्ठ्या अलुग् वक्तव्यः" इति काशिका, भा-५, ६।३।२१॥, पृ.२१०॥ १०. तुलनीयोऽमरकोषः ३।१।१७॥ ११. स्वामिसम्मतोऽयं धातुः, 'वेष्टने' इति सायणः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

णिजन्तः, पचाद्यच् । दीर्घसूत्रीति व्यञ्जनान्तोऽपि[1] । यद्धलायुधः– "दीर्घसूत्री[2] जडक्रियः"[हलायुधकोशः २।३८३॥]इति । "दीर्घं सूत्रयतीत्येवंशीलो दीर्घसूत्री"[ ]इति तट्टीका । "सूत्रण् विमोचने, विमोचनं मोचनाभावो ग्रन्थनमिति यावत्"[(हैम)-धातुपारायणम्, चुरादिः, धातुसं-३३३]इति धातुपारायणम् । णिन्प्रत्ययान्तः । द्वे दीर्घसूत्रस्य । 'ऊंडु विमासइ[3]' इति भाषा ॥

## मन्दः क्रियासु कुण्ठः[1] स्यात्

१ क्रियासु कर्मसु मन्दोऽलसः, कुण्ठति **कुण्ठः** । 'कुठि आलस्ये'(भ्वा.प.से.), पचाद्यच् । कुणति शब्दायते, न तु करोतीति वा । 'कुण शब्दोपकरणयोः'(तु.प.से.), 'कुणे-र्डुण्ठः'( )इति डुण्ठः । एकं कार्येऽलसस्य ॥

## क्रियावान्[1] कर्मसूद्यतः[4] ॥३५३॥

१ क्रियास्त्यस्य **क्रियावान्** । 'तदस्यास्ति-'५।२।९४॥ इति मतुप् । कर्मसु उद्यत उद्यमयुक्तस्तस्यैकम् ॥३५३॥

## कर्मक्षमोऽलङ्कर्मीणः[1][4]

१ कर्मसु क्षमः समर्थः कर्मक्षमः, अलं समर्थः कर्मणे **अलङ्कर्मीणः** । '[5]अषडक्षाशितपङ्ग्वलङ्कर्मालम्पुरुषाऽध्युत्तरपदात् खः'५।४।७॥, खस्येनादेशः, 'नस्तद्धिते'६।४।१४४॥ इति टिलोपः, 'पर्यादयो ग्लानाद्यर्थे चतुर्थ्या'(वा-२।२।१८॥) इति समासः । एकं कर्मसमर्थस्य ॥

## कर्मशूरस्तु[1] कर्मठः[2][4] ।

१ कर्मणि शूरः **कर्मशूरः** । २ कर्मणि घटते **कर्मठः** । 'कर्मणि घटतेऽठच्[6]'५।२।३५॥ । कर्मणि घटते प्रयत्नेन प्रारब्धं कर्म परिसमापयतीति वा व्युत्पत्तिः । प्राक्सूत्रेणाऽठच् । द्वे [7]कर्मशूरस्य ॥

## कर्मशीलः[1] कार्मः[2]

[१ कर्म शीलमस्य **कर्मशीलः** । ] २ नित्यं कर्मसु फलमनपेक्ष्य प्रवृत्तिशीलः **कार्मः** । 'छत्रादिभ्योऽण्'४।४।६२॥ ([8]'कार्मस्ताच्छील्ये'६।४।१७२॥ इति ताच्छील्ये णे टिलोपो निपात्यते, 'नस्तद्धिते'६।४।१४४॥ इत्येव सिद्धे अण्कार्यं ताच्छीलिकेऽपि, अत एव प्राचा णेऽपि क्वचिदित्युक्तम्, तेन) स्त्रियां कार्मी । द्वे कर्मकरणस्वभावस्य ॥

## आयःशूलिक[1]स्तीक्ष्णकर्म[2]कृत् ॥३५४॥

१ तीक्ष्ण उपायोऽयःशूलं तेनाऽन्वेष्टा **आयःशूलि-कः** । 'अयःशूलदण्डाजिनाभ्यां ठक्ठञौ'५।२।७६॥ इति ठक्, 'ठस्येकः'७।३।५०॥, 'किति च'७।२।११८॥ इति वृद्धिः । यो मृदुनोपायेन अन्वेष्टव्यानर्थांस्तीक्ष्णोपायेनान्विच्छति राभसिकः, स एवं कथ्यते, तीक्ष्णोपायेन दण्डेन कार्यकरणपर इत्यर्थः । एकं तीक्ष्णकर्मकर्तुः ॥३५४॥

## सिंहसंहननः[1] स्वङ्गः[2]

१ सिंहस्येव संहननं देहोऽस्य **सिंहसंहननः** । २ शोभनमङ्गमस्य **स्वङ्गः** । द्वे सुरूपशरीरिणः[9] ॥

## स्वतन्त्रो[1] निरवग्रहः[2] ।
## यथाकामी[3] स्वरुचिश्च[4] स्वच्छन्दः[5] स्वैर्य्य[6]पावृतः[7] ॥३५५॥

१ स्वम् आत्मा तन्त्रं प्रधानमस्य **स्वतन्त्रः** । २ निःक्रान्तोऽवग्रहान्नियन्त्रणादिति **निरवग्रहः** । 'निरादयो निःक्रान्ताद्यर्थे पञ्चम्या'(वा-२।२।१८॥)इति समासः । ३ यथा कामयत इच्छति **यथाकामी**, णिन्नन्तः । ४ स्वा आत्मीया रुचिरस्य **स्वरुचिः** । ५ स्व आत्मीयश्छन्दोऽभिप्रायोऽस्य **स्वच्छन्दः** । ६ स्वमीरितुं शीलमस्य **स्वैरी** । 'ईर गतिकम्पनयोः'(अ.आ.से.), 'सुप्यजातौ-'३।२।७८॥ इति णिनिः, 'स्वादीरेरिणोः'(वा-६।१।८९॥)इति वृद्धिः । स्वैरोऽस्यास्तीति वा । ७ अपगतमावृतं नियन्त्रणमस्य **अपावृतः** । सप्त स्वेच्छाचारिणः । 'आपमतीउं[10]' इति भाषा ॥३५५॥

## यदृच्छा[1] स्वैरिता[2] स्वेच्छा[3]

१ या या इच्छा **यदृच्छा**, पृषोदरादिः । २ स्वैरिणो भावः **स्वैरिता** । 'तस्य भावस्त्वतलौ'५।१।११९॥ । ३ स्वस्यात्मन इच्छा **स्वेच्छा** । त्रीणि स्वेच्छायाः ॥

---

१. 'इनन्तोऽपि' इति युक्तः ॥ २. हलायुधकोशे 'दीर्घसूत्रो' इति दृश्यते, तत्रैव 'दीर्घसूत्री' इति पाठान्तरम् ॥ ३. 'उंडो विमासे' इति ३, '-विमासै' इति १॥ ४. तुलनीयोऽमरकोषः ३।१।१८॥ ५. 'अषडक्षाशितङ्गव-' इत्यष्टाध्याय्याम् ॥ ६. '-घटोऽठच्' इत्यष्टाध्याय्याम्॥ ७. 'कर्मकर-' इति४, 'कर्मसूर-' इति १.२॥ ८. कोष्ठान्तर्गतपाठः १.२ नास्ति ॥ ९. 'सुरूपकरणशरी-' इति २॥ १०.'-मती' इति ४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**नाथवान् निघ्नगृह्यकौ ।**
**तन्त्रायत्तवशाधीनच्छन्दवन्तः परात् परे ॥३५६॥**

१ नाथो नियन्ताऽस्त्यस्य **नाथवान्** । 'तदस्यास्ति-' ५।२।९४॥ इति मतुप्, '[मादुपधायाश्च] मतोर्वोऽयवादिभ्यः' ८।२।९॥ इति वत्वम् । २ निहन्यते निगृह्यते **निघ्नः** । 'हन् (हन) हिंसागत्योः'(अ.प.अ.), 'घञर्थे कविधानम्'(वा-३।३।५८॥)इति कः । ३ गृह्यतेऽसौ गृह्यः । 'ग्रह उपादाने' (क्र्या.उ.से.), 'पदास्वैरिबाह्यापक्षे(-क्ष्ये-)षु च'३।१।११९॥इति क्यप्, 'ग्रहिज्या-'६।१।१६॥ इति सम्प्रसारणम्, अनुकम्पायां कन् **गृह्यकः** । ४-९ परशब्दात् परेऽग्रे तन्त्रादयः षड् योज्यन्ते, तेन परस्य तन्त्र आयत्तः **परतन्त्रः**, **परायत्तः** । परस्य वशः **परवशः** । (परस्याधीनः **पराधीनः**) । परस्य छन्दो **परच्छन्दः** । परो नियन्ताऽस्त्यस्य **परवान्** । अस्त्यर्थे मतुप् । नव पराधीनस्य। शेषश्चात्र -"परतन्त्रे वशायत्तावधीनोऽपि" [शेषनाममाला ३।९३॥] । अधिगत इनः प्रभुरनेन, अधि उपरि इनः अस्य वा अधीनः । दिवादौ 'धीङ् आधारे'(दि.आ.अ.)अस्य धातोर्व्याख्याने माधवेन व्याख्यातम्-"धीनः । धीनवान् । न धीनः अधीनः। यस्तु-"अस्मास्वधीनं किमु निःस्पृहाणाम्" [किरातार्जुनीयम् ३।९॥]इत्यादावधीनशब्दः, सोऽव्युत्पन्नः परतन्त्रवचनः। यदाह कैयटकारैः-'वाक्यं वक्तर्यधीनं हि'[ ]इत्युपादाय-'अध्युत्तरपदात् खविधानाद् अव्युत्पन्न आयत्तार्थवृत्तिरधीनशब्दः' [ ]इति"[मा.धातुवृत्तिः, दिवादिगणे धातुसंख्या-७] । "अधीनशब्दो निरुपपदोऽसाधुः उत्तरपदत्वाभावेन खस्याभावः" [ ]इति कलिङ्गः, तदयुक्तम्, अधीनशब्दस्यायत्तपर्यायत्वात्, यथा वाक्यं वक्तर्यधीनमिति ॥३५६॥

**लक्ष्मीवान् लक्ष्मणः श्रीलः**

१ लक्ष्मीः शोभा, सम्पच्च, तद्युक्तो **लक्ष्मीवान्** । २ लक्ष्मीरस्यास्ति **लक्ष्मणः**।'लक्ष्म्या अच्च'(गणसू-५।२।१००॥) इति पामादित्वाद् नः । ३ श्रीरस्यास्ति **श्रीलः**। सिध्मादित्वाल्लः, कपिरि(लि)कादित्वाल्लत्वम्। श्रीमानित्यपि। त्रीणि लक्ष्मीवतः॥

**इभ्य आढ्यो धनीश्वरः ।**
**ऋद्धे**

१ इभं गजमर्हति **इभ्यः** । 'दण्डादिभ्यो यत्'५।१।६६॥ । २ आध्यायन्ति स्मरन्त्येतं तदुपजीविन इति **आढ्यः**। पृषोदरादित्वात् साधु। ३ धनमस्यास्ति **धनी**। अतिशायिने 'अत इनिठनौ'५।२।११५॥ इतीनिः । ४ ईष्ट इत्येवंशील **ईश्वरः**। 'ईश ऐश्वर्ये'(अ.आ.से.), 'स्थेशभासपिसकसो वरच्'३।२।१७५॥ । ५ ऋध्यति स्म **ऋद्धः** । 'ऋधु वृद्धौ' (दि.प.से.), दिवादिः, निष्ठा, तत्र । पञ्च बहुधनिनः ॥

**विभूतिः सम्पत्तिर्लक्ष्मीः श्रीर्ऋद्धिसम्पदः ॥३५७॥**

१ विभवनं **विभूतिः** । 'भू सत्तायाम्'(भ्वा.प.से.), 'भूङ् प्राप्तौ'(चु.आ.से.)अतो वा, 'स्त्रियां क्तिन्'३।३।९४॥। २ सम्पदनं **सम्पत्तिः** ।'पद गतौ'(दि.आ.अ.), 'स्त्रियां क्तिन्' ३।३।९४॥, 'खरि च'८।४।५५॥ इति चर्त्वम् । ३-४ **लक्ष्मीः**, **श्रीः** एतौ प्राग् व्युत्पादितौ[श्लो-२।२२६] । ५ अर्धनम् **ऋद्धिः**। 'ऋधु वृद्धौ'(दि.प.से.), 'स्त्रियां क्तिन्'३।३।९४॥, 'झषस्तथोः-'८।२।४०॥ इति धत्वम्, 'झलां जश्-'८।४।५३॥ इति दत्वम् । ६ सम्पदनं **सम्पत्** । 'सम्पदादिभ्यश्च'(वा-३।३।१०८॥)इति क्विप् । षट् सम्पदः ॥३५७॥

**दरिद्रो दुर्विधो दुःस्थो दुर्गतो निःस्वकीकटौ ।**
**अकिञ्चनः**

१ दरिद्राति **दरिद्रः** । 'दरिद्रा दुर्गतौ'(अ.प.से.), पचाद्यच् । न तु 'श्याद्व्धा-'३।१।१४१॥ इति णः, "दरिद्रातेः सार्वधातुके(आर्धधातुके) लोपः सिद्धश्च प्रत्ययविधौ'(वा-६।४।११४॥)इति णे कर्तव्येऽल्लोपसप्तम्यामल्लोपस्य पूर्वकृतस्य सिद्धत्वादादन्तत्वात् । यद्धातुवृत्तौ-दरिद्र इत्यत्र " 'श्याद्व्यधा-' ३।१।१४१॥ इत्याकारान्तलक्षणस्तु णो न भवति 'दरिद्रातेरार्धधातुके-' इत्यस्य विषयसप्तमीत्वात् प्रागेव प्रत्ययोत्पत्तेराल्लोपात्"[मा. धातुवृत्तौ अदादिगणे, धातुसंख्या-८०]। २ दुष्टा विधा प्रकारो भोजनं वा अस्य **दुर्विधः**।'गोस्त्रियोः-'१।२।४८॥ इति परपदस्य ह्रस्वत्वम् । ३ दुःखेन तिष्ठति **दुःस्थः**।

---

१. कोष्ठान्तर्गतपाठः १.२नास्ति ॥ २. स्वामिसम्मतोऽयं धातुपाठः,'धीङ् आदाने' इति सायणः ॥ ३. 'कैयटः' इति धातुवृत्तौ ॥ ४. द्र. पदचन्द्रिका, भा-३, विशेष्यनिघ्नवर्गः, श्लो-१६, पृ.१४॥ ५. 'भू प्राप्तौ' इति मा.धातुवृत्तिः, 'भू प्राप्तावात्मनेपदी वा' इति क्षीरतरङ्गिणी॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'ष्ठा गतिनिवृत्तौ'(भ्वा.प.अ.), 'आतश्चोपसर्गे-'३।१।१३६॥ कः। ४ दुःखेन गच्छति **दुर्गतः**। दुर्पूर्वो गमिः नैःस्वापत्तिवचनः, ततः कर्तरि क्तः, 'अनुदात्तोपदेश-'६।४।३७॥ इति न्लोपः। ५ निर्गतः स्वाद् धनादिति **निःस्वः**। 'निरादयो निःक्रान्ताद्यर्थे पञ्चम्या'(वा-२।२।१८॥)। ६ ककते **कीकटः**। 'कक लौल्ये'(भ्वा.आ.से.), 'शकादिभ्योऽटन्'(उणा-५२१), पृषोदरादित्वादीत्वम्। ७ नास्ति किञ्चनाऽप्यस्य **अकिञ्चनः**। सप्त दरिद्रस्य। "क्षुद्रो दीनो नीचश्च" [शेषनाममाला ३।९४॥]शैषिकाणि॥

**अधिपस्त्वीशो नेता परिवृढोऽधिभूः ॥३५८॥**
**पतीन्द्रस्वामिनाथार्याः प्रभुर्भर्त्तेश्वरो विभुः।**
**ईशितेनो नायकश्च**

१ अधिपातीति **अधिपः**। 'पा रक्षणे'(अ.प.अ.), मूलविभुजादित्वात् कः। २ ईष्टे इति **ईशः**। 'ईश ऐश्वर्ये'(अ.आ.से.), पचाद्यच्। ३ नयति प्रापयति नियुङ्क्ते इति **नेता**। 'णीञ् प्रापणे'(भ्वा.उ.अ.), 'ण्वुल्तृचौ'३।१।१३३॥ इति तृच्। ४ परिवर्हति परिवृंहति वा **परिवृढः**। 'वृह वृंहि वृद्धौ'(भ्वा.प.से.), 'प्रभौ परिवृढः'७।२।२१॥ इति साधुः। ५ अधि उपरि भवति **अधिभूः**। 'क्विप्-'३।२।७६॥ इति क्विप् ॥३५८॥ ६ पाति रक्षति **पतिः**। 'पा रक्षणे'(अ.प.अ.), 'पातेर्डतिः'(उणा-४९७)इति डतिः। ७ इन्दति परमैश्वर्यमनुभवति **इन्द्रः**। 'इदि परमैश्वर्ये'(भ्वा.प.से.), 'ऋज्रेन्द्र-'(उणा-१८६) इति रक्। ८ स्वं धनमस्यास्ति **स्वामी**। 'स्वामिन्नैश्वर्ये'५।२।१२६॥ इति साधुः। ९ नाथति ईष्टे **नाथः**। 'नाथृ याञ्चोपतापैश्वर्याशीर्षु(-ष्षु)'(भ्वा.-आ.प.से.), पचाद्यच्। १० अर्यते सेव्यते **अर्यः**, प्रथमस्वरादिः। 'ऋ गतौ'(जु.प.अ.), 'अर्यः स्वामिवैश्ययोः'३।१।१०३॥ इति साधुः। ११ प्रभवति समर्थो भवति **प्रभुः**। 'भू सत्तायाम्'(भ्वा.प.से.), 'विप्रसं(सं)भ्यो ड्वसंज्ञायाम्'३।२।१८०॥ इति डुः। १२ बिभर्त्ति पुष्णाति **भर्त्ता**। 'डुभृञ् धारणपोषणयोः'(जु.उ.अ.), 'ण्वुल्तृचौ'३।१।१३३॥ इति तृच्। १३ इष्टे(ईष्टे) इति **ईश्वरः**। 'ईश ऐश्वर्ये'(अ.आ.से.), 'स्थेशभासपिसकसो वरच्'३।२।१७५॥। १४ विभवति **विभुः**। 'विप्रसं(सं)भ्यो ड्वसंज्ञायाम्'३।२।१८०॥ इति डुः। १५ ईष्टे इति **ईशिता**। 'ईश ऐश्वर्ये'(अ.आ.से.), तृन् तृच् वा। १६ एति स्वामित्वम् **इनः**। 'इण् गतौ'(अ.प.अ.), 'इण्षिञ्दीङु[1]षविभ्यो नक्[2]'(उणा-२८२)। १७ नयति मनोऽभीप्सितसुखं **नायकः**। 'णीञ् प्रापणे'(भ्वा.उ.अ.), ण्वुल्। सप्तदश स्वामिनः॥

**नियोज्यः परिचारकः ॥३५९॥**
**डिङ्गरः किङ्करो भृत्यश्चेटो गोप्यः पराचितः।**
**दासः प्रेष्यः परिस्कन्दो भुजिष्यपरिकर्मिणौ ॥३६०॥**
**परान्नः परपिण्डादः परजातः परैधितः।**

१ नियोक्तुं शक्यो **नियोज्यः**। 'युजिर् योगे'(रु.उ.अ.), 'प्रयोज्यनियोज्यौ शक्यार्थे'७।३।६८॥ इति साधुः। २ परिचरति सेवति **परिचारकः**। 'चर गतिभक्षणयोः'(भ्वा.प.से.), ण्वुल्। प्रतिचरोऽपि ॥३५९॥ ३ डिप्यते क्षिप्यते **डिङ्गरः**। 'डिप क्षेपे'(दि.प.से.), अरचि साधुः। ४ किं करोमीत्याज्ञां प्रतीक्षते **किङ्करः**। 'किंयत्तद्बहुष्वज्[3]'(वा-३।२।२१॥)इत्यच्। ५ भरणीयो **भृत्यः**। 'डुभृञ् धारणादौ'(जु.उ.अ.), 'भृञोऽसंज्ञायाम्'३।१।११२॥ इति क्यप्, 'ह्रस्वस्य-'६।१।७१॥ इति तुक्। ६ चेटति **चेटः**। 'चिट परप्रैष्ये'(भ्वा.प.से.), भौवादिकः, पचाद्यच्। ७ गोपनीयो **गोप्यः**। 'गुपू रक्षणे'(भ्वा.प.से.), 'ऋहलोर्ण्यत्'३।१।१२४॥। ८ परैराचीयते बध्यते **पराचितः**। 'चिञ् चयने'(स्वा.उ.अ.), वर्तमाने क्तः। ९ दासते स्वामिने सुखं **दासः**[4]। 'दासृ दाने'(भ्वा.उ.से.), पचाद्यच्। १० प्रेषणीयः **प्रेष्यः**[5]। 'इषु इच्छायाम्'(तु.प.से.), तुदादिः, 'इष गतौ'(दि.प.से.), दिवादिः, 'इष आभीक्ष्ण्ये'(क्र्या.प.से.), क्र्यादिः, त्रयोऽपि लघूपधाः, 'ऋहलोर्ण्यत्'३।१।१२४॥ इति ण्यत्, उपधाया लघोर्गुणे[6] तस्मिन् परे 'प्रादूहोढोढ्येषैष्येषु[7](-षैष्येषु)' (वा-६।१।८९॥)इति वृद्धिः। दुर्गाद्यास्तु- 'ईष उञ्छे[8]'(भ्वा.प.से.), उञ्छ उच्चयनम्, परस्मैपदी, "ईष हिंसादानेषु[9]'(भ्वा.आ.से.), आत्मनेपदी, द्वावपि भ्वादी, आभ्याम् ऋहलोर्ण्यति[10], गुरूपधत्वाद् गुणाभावे, ईष्य इति रूपम्, तस्मिन् परे सति 'आद् गुणः'६।१।८७॥ इति गुण एव भवति, पररूपानुपातिन्या वृद्धेरसम्भवात्, प्रेष्य एकादशस्वरादिः"[ ] इत्याहुः। ११ परिस्कन्द्यते आक्रम्य नियुज्यते **परिस्कन्दः**। 'स्कन्दिर् गतिशोषणयोः'(भ्वा.प.अ.), कर्मणि घञ्। १२ भुङ्क्ते स्वाम्युच्छिष्टं **भुजिष्यः**। 'भुज पालनाभ्यवहारयोः'(रु.प.अ.), 'रुचिभुजिभ्यां किष्यन्'(उणा-६१८)। १३ परितः समन्तात् कर्मास्त्यस्य **परिकर्मी**। शिखादित्वादिनिः। परिकर्मिणौ इत्यादि

१. '-दीङ्-' इति ३.४॥ २. 'इण्सिञ्जिदीङुष्यविभ्यो नक्' इत्युणादिगणसूत्रम्॥ ३. 'किंयत्तद्बहुषु कृञोऽज्विधानम्' इत्यष्टाध्याय्याम्॥ ४. 'दासते सुखं स्वामिने दासः' इति ३॥ ५. 'प्रैष्यः' इति २.३.४॥ ६. 'गुणः' इति १॥ ७. '-होढौ-' इति १.२.४॥ ८. 'ऊञ्छे' इति ३॥ ९. 'गतिहिंसादर्शनेषु' इति क्षीरतरङ्गिण्यादौ॥ १०. '-ण्यदिति' इति ४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥३६०॥ १४ परस्याऽन्नं वृत्तिहेतुरस्य, परस्मादन्नमस्येति वा **परान्नः** । १५ परस्य पिण्डमाजीवनमत्ति **परपिण्डादः** । 'अद भक्षणे'(अ.प.अ), कर्मण्यण् । "पिण्डमाजीवनः"[ ]इति धरणिः। १६ परेण जातः **परजातः** । १७ परैरेध्यते वर्ध्यते **परैधितः**। 'एध वृद्धौ'(भ्वा.आ.से.), वर्तमाने क्तः । 'परान्नाद-यश्चत्वारः परपोषितपर्यायाः' इति हलायुधो विशिनष्टि[1]। सप्तदश सामान्येन किङ्करस्य ॥

## भृतके भृतिभुग् वैतनिकः कर्मकरोऽपि च ॥३६१॥

१ भ्रियते स्म **भृतकः**। 'डुभृञ् धारणादौ'(जु.उ.अ.), निष्ठा, ततः स्वार्थे कन्, तत्र । २ भृतिं वेतनं भुङ्क्ते **भृतिभुक्**। 'भुज पालनाभ्यवहारयोः'(रु.प.अ.), क्विप् । ३ वेतनेन जीवति **वैतनिकः** । 'वेतनादिभ्यो जीवति'४।४।१२॥ इति ठक् । ४ कर्म करोति **कर्मकरः**। 'कर्मणि भृतौ'३।२।२२॥ इति टः। चत्वारि मूल्यं गृहीत्वा कर्मकरस्य। 'मजूर' इति भाषा ॥३६१॥

## स निर्भृतिः कर्मकारो

१ स भृतको निर्वेतनो निर्मूल्यः कर्म कुर्वन् **कर्मकारः** उच्यते । कर्मण्यण् । यो भाटकमन्तरेणैव कर्म करोति, तस्यैकम्, [अ]क्रयक्रीतजन इत्यर्थः । 'बांदो'[2] इति[3] भाषा॥

## भृतिः स्यान्निष्क्रयः पणः ।
## कर्मण्या वेतनं मूल्यं निर्वेशो भरणं विधा ॥३६२॥
## भर्मण्या भर्म भृत्या च

१ भ्रियतेऽनया **भृतिः** । 'स्त्रियां क्तिन्'३।३।९४॥ । २ निःक्र(ष्क्र)यणं **निः(ष्क्र)यः** । 'डुक्रीञ् द्रव्यविनिमये'(क्र्या.उ.अ.), 'एरच्'३।३।५६॥ । ३ पण्यत आभाष्यते **पणः**। 'पण व्यवहारे स्तुतौ'(भ्वा.प.आ.से.), 'नित्यं पणः परिमाणे' ३।३।६६॥ इत्यप्प्रत्यये साधु । ४ कर्मणि साधुः **कर्मण्या** । 'तत्र साधुः'४।४।९८॥ इति यत्, टाप् । ५ वीयते **वेतनम्** । 'वी गत्यादौ'(अ.प.अ.), 'वीपतिपटिभ्यस्तनन्'[4](उणा-४३०) इति तनन्। ६ मूलेन नाम्यं (मूलेनाऽऽनाम्यं) **मूल्यम्**। 'नौवयो-धर्म-'४।४।९१॥ इति यत्। ७ निर्विश्यते भुज्यते **निर्वेशः**। 'विश प्रवेशने'(तु.प.अ.), कर्मणि घञ् । ८ भ्रियतेऽनेन **भरणम्** । 'डुभृञ् धारणादौ'(जु.उ.अ.), 'करणाधिकरणयोश्च'३।३।११७॥ इति करणे ल्युट् । ९ विधीयतेऽनया **विधा** । 'डुधाञ् धारण-पोषणयोः'(जु.उ.अ.), 'आतश्चोपसर्गे'३।३।१०६॥ इत्यङ्, भिदादित्वादङ् वा ॥३६२॥ १० भर्मणि साधुः **भर्मण्या** । 'तत्र साधुः'४।४।९८॥ इति यत्, [टाप्] । ११ भ्रियतेऽनेन **भर्म**, क्लीबे । 'डुभृञ् धारणपोषणयोः'(जु.उ.अ.), '-मनिन्'(उणा-५८४)इति मनिन् । भर्मणी, भर्माणि इत्यादि। १२ भ्रियतेऽनया **भृत्या** । 'भृञोऽसंज्ञायाम्'३।१।११२॥ इति क्यप् । द्वादश मूल्यस्य[5] ॥

## भोगस्तु गणिकाभृतिः ।

१ भुज्यते **भोगः** । 'भुज पालनाभ्यवहारयोः'(रु.प.अ.), घञ्, 'चजोः-'७।३।५२॥ इति कुत्वम्, गणिकाया भृतिर्वेतनं गणिकाभृतिः । एकं वेश्यामूल्यस्य । "भाटिः" [शेषनाममाला ३।९८॥]शैषिकम् ॥

## खलपूः स्याद् बहुकरः

१ खलं स्थानं पुनाति **खलपूः** । "खलं भूस्थान-कल्केषु"[विश्वप्रकाशकोशः, लान्तवर्गः, श्लो-४]इति विश्वः। 'पूञ् पवने'(क्र्या.उ.से.), क्विप् । २ बहु करोति संमार्ष्टि भुवमिति **बहुकरः** । 'डुकृञ् करणे'(त.उ.अ.), 'किंयत्तद्बहुष्वच्'[7] (वा-३।२।२१॥)इत्यच्। ताच्छील्यार्था(र्थ)विवक्षायां तु 'दिवा-विभा-'३।२।२१॥ इति ट एव । स्त्रियां बहुकरी । द्वे संमार्ज-कस्य । 'पूंजई[8] बुहारई[9]' इति भाषा। संमार्जकः बहुधान्यार्जक इत्यपरे । 'धाण्यऊपणई[10]' इति भाषा ।

## भारवाहस्तु भारिकः ॥३६३॥

१ भारं वहति **भारवाहः**[12]। 'वह प्रापणे'(भ्वा.उ.अ.), कर्मण्यण् । २ भारोऽस्त्यस्य **भारिकः** । 'अत इनिठनौ' ५।२।११५॥ इतीनिः[13] (ठक्)। द्वे भारवाहस्य । 'पोटलिया' इति भाषा ॥३६३॥

## वार्त्तावहे वैवधिकः

१ वृत्तिर्जीविकाऽस्त्यस्यां वार्त्ता अन्नाद्यम्, वार्त्ताया वहो **वार्त्तावहः**, तत्र। २ वीवधो भारः, पर्याहारो वा, पर्याहार-स्तृणजलादीनामन्यत आनयनम्, तं वहति **वैवधिकः**। 'विभाषा

१. द्र. हलायुधकोशः २।३५१॥, पृ.४१॥ 'बांदउ' इति २॥ २. 'इत्यादि' इति ३॥ ३. 'वीपतिभ्यां तनन्' इत्युणादिगणे ॥ ५. 'मूलस्य' इति १.२.४॥ ६. तुलनीयोऽमरकोषः ३।१।१७॥ ७. 'किंयत्तद्बहुषु कृञोऽज्विधानम्' इत्यष्टाध्याय्याम् ॥ ८. 'पूंजै' इति १॥ ९. 'बुहारै' इति १.३॥ १०. 'धान्यऊपणै' इति १, 'धान्य उपणइ' इति २॥ ११. तुलनीयोऽमरकोषः ३।१।१५॥ १२. 'भारवाहकः' इति १॥ १३. 'इतीन्' इति २.३.४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विवधवीवधात्[१]'४।४।१७॥ इति ठक्[२]। वीवधिकोऽपि। द्वे वार्त्तावहस्य। 'अधोवाहीयाप्रमुख' इति भाषा॥

**भारे विवधवीवधौ ।**

१ भ्रियते भारः, तत्र। विवध्यते **विवधः**। 'वध संयमने' (चु.उ.से.), घञि, 'जनिवध्योश्च'७।३।३५॥ इति वृद्धिनिषेधः। 'पुंसि संज्ञायाम्'३।३।११८॥ इति घो वा। २ 'उपसर्गस्य घञ्यमनुष्ये बहुलम्'६।३।१२२॥ इति दीर्घत्वे **वीवधः**। त्रीणि भारस्य। पर्याहारार्थेऽप्येतौ। तृणजलान्नादीनामन्यत आनयनं पर्याहारः। तदर्थे यदाह-''विवधो [वीवधो] भारे पर्याहाराध्वनोरपि'' [अनेकार्थसङ्ग्रहः ३।३४१॥]इति॥

**काचः शिक्यं तदालम्बः**

१ कच्यते बध्यतेऽनेन **काचः**। 'कच बन्धने' (भ्वा.-आ.से.), करणे घञ्, 'हलश्च'३।३।१२१॥ इति संज्ञायामिति घञ् वा। २ शक्नोति वोढुं **शिक्यम्**। 'शक्लृ शक्तौ' (स्वा.प.अ.) 'मध्यशिक्य[३]ान्यपर्यन्यवदान्यथोहर्म्यधिष्ण्यपस्त्यागस्त्यपुलस्त्यापत्यसत्यकुड्यकुल्याभल्यादयः'( )इति क्यपि साधुः। स्रंसत इति वा। 'स्रंशेः शिः कुट् किच्च'(उणा-६९४)इति यः (यत्), धातोः शिरादेशः कुडागमश्च। तस्य भारस्यालम्बनं तदालम्बः, यत्र रज्जुपञ्जरे[४] वोढव्यमास्ते। द्वे 'छींका' इति ख्यातस्य॥

**भारयष्टिर्विहङ्गिका ॥३६४॥**

१ भारोद्वहनार्थं चतुर्दण्डिका यष्टिर्भारयष्टिः। ''शिक्याधारः स्कन्दग्राह्यो लगुडः''[[५]]इति द्रविडाः[६]। विहङ्गप्रतिकृतिश्चर्मादिमयी **विहङ्गिका**। या भित्त्यादौ लम्बमाना[७] स्थाप्यते, प्रयाणके च सन्धार्यते। ''स्कन्दचापो विहङ्गिका''[हारावली, पादावधिः, श्लो-६३]इति हारावलीकारः। एकं 'कावडी'[८] इति ख्यातायाः ॥३६४॥

**शूरश्चारभटो वीरो विक्रान्तश्च**

१ शूरयते **शूरः**। 'शूर विक्रान्तौ'(चु.आ.से.), चुरादिः, पचाद्यच्। २ चरणं चारः। चारेण गमनेन[९] भटति युद्धमाकाङ्क्षति **चारभटः**। 'भट[१०] काङ्क्षायाम्'(भ्वा.प.से.), पचाद्यच्। ३ अजति क्षिपति शत्रूनिति **वीरः**। 'अज गतौ क्षेपणे च'(भ्वा.प.से.), 'स्फायि-'(उणा-१७०)इत्यादिना रक्, 'अजेर्व्यघञपोः'२।४।५६॥ इति वी आदेशः। वीरयत इति वा। 'वीर विक्रान्तौ'(चु.आ.से.), चुरादिः, पचाद्यच्। ४ विक्रामति उत्सहते **विक्रान्तः**। 'क्रमु पादविक्षेपे' (भ्वा.प.से.), वर्तमाने क्तः, 'अनुनासिकस्य क्विझलोः-' ६।४।१५॥ इति दीर्घः। चत्वारि शूरस्य[११]॥

**अथ कातरः ।**

**दरितश्चकितो भीतो भीरुर्भीरुकभीलुकाः॥३६५॥**

१ कुं[१२] ईषत् तरति **कातरः**। 'तॄ प्लवनतरणयोः' (भ्वा.प.से.), पचाद्यच्, 'ईषदर्थे च[१३]'६।३।१०५॥ इति कोः कादेशः। कायति वा। 'कै शब्दे'(भ्वा.प.अ.), बाहुलकात् तरच्। स्त्री चेत् कातरा। २ दरो भयं सञ्जातोऽस्य **दरितः**। तारकादित्वादितच्। ३ चकति बिभेति **चकितः**। 'चक प्रतिघाततृप्त्योः'(भ्वा.प.से.), क्तः, 'आर्धधातुकस्य-'७।२।३५॥ इतीट्। ४ बिभेति स्म **भीतः**। 'ञिभी भये'(जु.प.अ.), निष्ठा। ५-७ बिभेतीत्येवंशीलो **भीरुः**, **भीरुकः**, **भीलुकः**। 'ञिभी भये' (जु.प.अ.) 'भियः क्रुक्लुकनौ'३।३।१७४॥; 'क्रुकन्नपि[१४] वाच्यः'(वा-३।२।१७४॥)इति मध्यस्थं रूपम्। सप्त कातरस्य। [शेषश्चात्र-''त्रस्नुः त्रस्तः''[शेषनाममाला ३।९४॥]]॥३६५॥

**विहस्तव्याकुलौ व्यग्रे**

१ विगतौ किङ्कर्तव्यतामूढत्वाद् हस्तावस्य **विहस्तः**। ३ विशेषेण आकुलो **व्याकुलः**। ४ विगतमग्रमालम्बनमस्य **व्यग्रः**, तत्र। त्रीणि कार्याकुलस्य॥

**कान्दिशीको भयद्रुते ।**

१ कां दिशं व्रजामीत्याकुलः **कान्दिशीकः**। पृषोदरादित्वात् साधुः। 'कदि वैक्लव्ये'(भ्वा.आ.से.), भावे घञन्ताद् मत्वर्थे इनिः, कन्दी। 'शीकृ सेचने'(भ्वा.आ.से.), भावे घञ्, शीकः, क्षरणार्थत्वादश्रुपाते वर्तते, वैक्लव्ययुक्तो अश्रुपातः कन्दिशीकः, तद्योगाद् ज्योत्स्नाद्यणि कान्दिशीक इति वा। ''कां दिशं गच्छामीति चिन्तयन् पलायितः कान्दिशीकः, पृषोदरादिः''[टीकासर्वस्वम् ३।१४०॥]इति तु सर्वस्वम्। भयाद् द्रुतः पलायितः भयद्रुतः, तत्र। एकं भयद्रुतस्य॥

**उत्पिञ्जलसमुत्पिञ्जपिञ्जला भृशमाकुले ॥३६६॥**

१ उत्पिञ्जयति **उत्पिञ्जलः**। 'पिजि हिंसादौ' (चु.उ.से.), वृषादित्वात् कलच्। २ समुत्पिञ्जयति **समुत्पिञ्जः**।

१. अष्टाध्याय्यां 'विभाषा विवधात्' इत्येव सूत्रम्, नतु '-विवधवीवधात्', तस्मादिदं कथनं सिद्धान्तकौमुद्यनुसारं फलितार्थमात्रम्॥ २. अत्र ष्टनाभावपक्षे 'ठक्' बोध्यम्, अन्यथाऽऽदिवृद्ध्यभावः स्यात्॥ ३. '-शिक्यो-' इति १.२॥ ४. 'पञ्जरे' इत्येव ४॥ ५. द्र. स्वोपज्ञटीका ३।३६४॥, पृ.८५॥ ६. 'द्रविथाः' इति १॥ ७. 'लम्बनमास्था-' इति ४॥ ८. 'काबडी' इति १.२॥ ९. १प्रतौ नास्ति॥ १०. 'भट आका-' इति ३॥ ११. 'सूर-' इति ३॥ १२. १प्रतौ नास्ति॥ १३. अष्टाध्याय्यां चकारो नास्ति॥ १४. 'क्रुकन्निति' इति ३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पचाद्यच् । ३ पिञ्जयति पिञ्जलः । वृषादित्वात् कलच् । भृशमत्यर्थमाकुले कार्यमूढे । त्रीणि अत्याकुलस्य ॥३६६॥

**महेच्छे तूद्भटोदारोदात्तोदीर्णमहाशयाः ।**
**महामना महात्मा च**

१ महती इच्छा यस्य **महेच्छः**, तत्र । २ उद्भटति[1] उद्भरति **उद्भटः** । 'भट[2] काङ्क्षायाम्'(भ्वा.प.से.), पचाद्यच्। ३ उदत्यर्थमाराति ददाति **उदारः** । 'रा दाने'(अ.प.अ.), 'आतश्चोपसर्गे'३।१।१३६॥ कः। [यद्वा] साधुभिरुदर्यते गम्यते उदारः । 'ऋ गतौ'(जु.प.अ.), कर्मणि घञ् । ४ उत्कर्षेणा-दीयते गम्यते **उदात्तः** । 'डुदाञ् दाने'(जु.उ.अ.), 'ञीतः क्तः'३।२।१८७॥, 'अच उपसर्गात्तः'७।४।४७॥ इति तभावः[3]। ५ उदीर्यते स्म **उदीर्णः** । 'ईर गतौ'(अ.आ.से.), 'निष्ठा' ३।२।१०२॥ इति क्तः, 'रदाभ्याम्-'८।२।४२॥ इति नत्वम्। ६ महानाशयोऽभिप्रायोऽस्य **महाशयः** । ७ महन्मनोऽस्य **महामनाः** । महामनसौ महामनसः[4] इत्यादि। ८ महानात्माऽस्य **महात्मा**, नान्तः। अष्टौ उदारस्य । 'जेहनई[5] मोटी वाञ्छा' इति भाषा । ''महेच्छस्तु महाशयः''[अमरकोषः ३।१।३॥] इत्यमरः। उद्भटाद् भिनत्ति, तेनैद्‌तद्द्वयमुदाराभिलाषे, उद्भटादयश्च षड् येषां महामन इत्येतस्य वाचकाः । यदमरः (यत्स्वामी)- ''उदीर्ण उद्भटोदारावुदात्तश्च महामनाः''[क्षीरस्वामिकृतटीका ३।१।३॥]इति ॥

**कृपणस्तु मितम्पचः ॥३६७॥**
**कीनाशस्तद्धनः क्षुद्रकदर्यदृढमुष्टयः।**
**किम्पचानः**

१ कृप्यते कृपापात्रीक्रियते **कृपणः** । 'कृपू सामर्थ्ये' (भ्वा.आ.से.)अतो बाहुलकाद् युच्, 'कृपादौ तु लत्वं नेष्टम्' इत्यत्रादिशब्दात् 'कृपो रो लः'८।२।१८॥ इति रेफस्य लत्वं न। २ मितं स्तोकं पचति **मितम्पचः**। 'डुपचष् पाके'(भ्वा.उ.अ.), 'मितनखे च'३।२।३४॥ इति खश्, 'अरुर्द्विषत्-'६।३।६७॥ इति मुम्। कलिङ्गस्तु ''किं पचतीति, अचि, किम्पचः, न किम्पचोऽकिम्पचः''[6][ ]इत्याह ॥३६७॥ ३ कनति दीप्यते तृष्णया **कीनाशः**, तालव्यान्तः । 'कन दीप्तौ[7]'(भ्वा.प.से.), 'कनेरीचा-(श्चा)तः'(हैमोणा-५३४)इत्याशः । ४ तदेवाऽनव्ययित्वाद्ध-नमस्य **तद्धनः** । ५ क्षुद्यतेऽल्पत्वात् **क्षुद्रः**। 'क्षुदिर् सञ्चूर्णने' (रु.उ.अ.), 'ऋज्रेन्द्र-'(उणा-१८६)इति रक्, 'स्फायि-' (उणा-१७०)इत्यादिना वा रक् । ६ आत्मधर्मपुत्रदारादिकं पीडयित्वा लोभाद् योऽर्थसञ्चयकारी, स कुत्सितोऽर्यः अर्थपतिः **कदर्यः** । 'कोः कत् तत्पुरुषेऽचि'६।३।१०१॥ इति कोः कदा-देशः । ७ दृढा मुष्टिरस्य **दृढमुष्टिः** । ८ किञ्चित् पचत्यल्पत्वात्, किं कुत्सितं पचति इति [वा **किम्पचानः**] । ताच्छील्यार्थे चानश्, आगमाऽनित्यत्वान्मुग न भवति । 'अपि शाकम्पचानस्य' [ ]इति प्रयोगः। अष्टौ कृपणस्य॥

**दयालुस्तु कृपालुः करुणापरः ॥३६८॥**
**सूरतः**

१ दयत इत्येवंशीलो **दयालुः** । 'दय दानगति-रक्षणहिंसादानेषु'(भ्वा.आ.से.), 'स्पृहिगृहिपतिदयिनिन्द्रातन्द्रा-' ३।२।१५८॥ इत्यालुच् । २ कृपां लाति **कृपालुः**। 'ला दाने'(अ.प.अ.), मितद्र्वादित्वाद् डुः । ''कृपामादत्त इति कृपालुः । 'ला दाने'(अ. प. अ.), मितद्र्वादित्वाद् डुः'' [ ]इत्यात्रेयः । कृपाऽस्त्येति वा । 'कृपाहृदयादालुः'(हैमसू-७।२।४२॥)इत्यालुः। ३ करुणायां[8] परः **करुणापरः** ॥३६८॥ ४ सुष्ठु रमते कृपायां **सूरतः** । 'रमु क्रीडायाम्'(भ्वा.आ.अ.), रमेः[9] क्तौ[10] दीर्घश्चादेः[11]। चत्वारि दयावतः ॥

**अथ दया शूकः कारुण्यं करुणा घृणा ।**
**कृपाऽनुकम्पाऽनुक्रोशः**

१ दयन्तेऽनया **दया**। 'दय दानगति[रक्षण]हिंसा-दानेषु'(भ्वा.आ.से.), 'दय रक्षणे'( ), अस्माद्वा भिदादित्वादङ् टाप् । २ शवन्ति गच्छन्ति परदुःखप्रहाणेच्छामनेन **शूकः**, पुंक्ली.। 'शु गतौ[12]'(भ्वा.प.अ.), 'घुयुहिपितुशोर्दीर्घश्च'(हैमोणा-२४)इति कन् । ३ करुणस्य भावः **कारुण्यम्** । करुणैव वा कारुण्यम् । चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ्, भेषजादित्वात् स्वार्थे यण् वा । ४ किरति चित्तं **करुणा**। 'कॄ विक्षेपे'(तु.प.से.), 'कृवृ[13]तृदारिभ्य उनन्'(उणा-३३३)। ५ घ्रियन्ते[14]ऽनया **घृणा**। 'घृ क्षरणदीप्त्योः' (जु.प.अ.), बाहुलकाण्णः(-न्नक्)। यद्वा 'घृणु दीप्तौ' (त.उ.से.),

१. 'उद्भटयति' इति २॥ २. क्षीरतरङ्गिण्यादौ काङ्क्षार्थकभटधातुर्न दृश्यते ॥ ३. 'त्भावः' इति १, 'तत्भावः' इति ३॥ ४. १.२.३ नास्ति ॥ ५. 'जेहनें' इति १॥ ६. द्र. पदचन्द्रिका, भा-३, विशेष्यनिघ्नवर्गः,श्लो-४८, पृ.४६॥ ७. 'कनी दीप्तिकान्तिगतिषु' इति क्षीरतरङ्गिण्यादौ॥ ८. '-णाया' इति २॥ ९. 'रमोः' इति ३, 'रमः' इति ४॥ १०. 'क्ते' इति २॥ ११. उणादिगणे 'सौ रमेः क्तो दमे पूर्वपदस्य च दीर्घः'(उणा-६९२)इति सूत्रमुपलब्धमेव, तर्हि तस्यात्रानुपलब्धिर्विचारणीया, विस्मृतमिति वा॥ १२. स्वामिसम्मतोऽयं धातुः, यदाह-'शु श्रु गतौ' इति, सायणः 'स्रु गतौ'(मा. धातुवृत्तिः, धातुसं-६६०, पृ.२६१)इत्यत्रापरमतमुट्टङ्क्य ''अपरे पुनः 'शु' इति तालव्यादिमाद्यं पठन्ति'' इत्याह॥ १३. '-तृ-' इत्युणादिगणे नास्ति ॥ १४. 'घ्रियते' इति ३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भिदादेराकृतिगणत्वादङ् । ६ 'क्रप कृपायां गतौ'[1] (भ्वा.आ.से.), 'क्रपेः सम्प्रसारणं च'(ग-३।३।१०४॥)इति भिदादिपाठादङ्, ततष्टाप् [कृपा] । ७ अनकम्पनम् **अनुकम्पा**। 'कपि चलने'(भ्वा.आ.से.), भिदादित्वादङ् । ८ अनुक्रोशन्ति समदुःखा भवन्त्यनेन **अनुक्रोशः** । 'क्रुश आह्वाने'[2](भ्वा.प.अ.), भिदादित्वादङ् । अष्टौ दयायाः ॥

**हिंस्त्रे शरारुघातुकौ ॥३६९॥**

१ हिंसनशीलो **हिंस्त्रः** ।'हिसि हिंसायाम्'(रु.प.से.), 'नमिकम्पिस्म्यजस्(जस)कमि(कम)हिंसि(हिंस)दीपो रः' ३।२।१६७॥, तत्र। २ शृणातीत्येवंशीलः **शरारुः**।'शॄ हिंसायाम्' (क्र्या.प.से.), 'शॄवन्द्योरारुः'३।२।१७३॥ । ३ हन्तीत्येवंशीलो[3] **घातुकः** ।'हन हिंसागत्योः'(अ.प.अ.), 'लषपतपदस्थाभूवृष-हनकमि(कम)गमि(गम)शॄभ्य उकञ्[4]'३।२।१५४॥, 'हो हन्तेः-'७।३।५४॥ इति कुत्वम्, 'हनस्तोऽचिण्णलोः' ७।३।३२॥ इति तकारोऽन्तादेशः । त्रीणि हिंसनशीलस्य ॥३६९॥

**व्यापादनं विशरणं प्रमयः प्रमापणं**
**निर्ग्रन्थनं प्रमथनं कदनं निबर्हणम् ।**
**निस्तर्हणं विशसनं क्षणनं परासनं**
**प्रोज्जासनं प्रशमनं प्रतिघातनं वधः ॥३७०॥**
**प्रवासनोद्वासनघातनिर्वा-**
**सनानि संज्ञप्तिनिशुम्भहिंसाः ।**
**निर्वापणालम्भनिसूदनानि**
**निर्यातनोन्मथसमापनानि ॥३७१॥**
**अपासनं वर्जनमारपिञ्जा**
**निष्कारणक्राथविशारणानि ।**
**स्युः**

१ व्यापाद्यत इति **व्यापादानम्**। व्याङ्पूर्वः 'पद गतौ'(चु.आ.अ.), णिजन्तः, 'ण्यासश्रन्थो[5]-'३।३।१०७॥ इति युच्। अत्राऽहिंसार्था अपि धातव उपसर्गवशाद् हिंसार्था ज्ञेयाः। २ विशीर्यते **विशरणम्** ।'शॄ हिंसायाम्'(क्र्या.प.से.), ल्युट्। ३ प्रमीयते **प्रमयः**, पुंक्ली. । 'मीञ् हिंसायाम्'(क्र्या.उ.अ.), 'एरच्'३।३।५६॥ इत्यच् । ''कदनं प्रमयोऽस्त्रियाम्''[6] इत्यमरशेषः । ४ प्रमाप्यते **प्रमापणम्** । 'मीञ् हिंसायाम्' (क्र्या.उ.अ.), स्वार्थे णिजन्तः, भावे ल्युट्, 'मीनातिमिनोति दीङां ल्यपि च'६।१।५०॥ इत्यात्वम्, 'युवोरनाकौ'७।१।१॥, 'कृत्यचः'८।४।२९॥ इति णत्वम् । ५ निर्ग्रन्थ्यते[7] **निर्ग्रन्थनम्**। 'ग्रन्थ ग्रथ क्रथ क्लथ हिंसार्थाः'( ), घटादेर्ण्यन्ताल्ल्युट् । ''गन्ध अर्दने'(चु.आ.से.), ततो ल्युटि निर्गन्धनम्''[8] इति स्वामी। ६ प्रमथ्यते[9] **प्रमथनम्** ।'मन्थ विलोडने'(भ्वा.प.से., क्र्या.प.से.), ल्युट् । ७ कद्यते **कदनम्** ।'कदि वैक्लव्ये' (भ्वा.आ.से.), कदिः सौत्रो वा, ल्युट्। ८ निबर्ह्यते **निबर्हणम्**। 'बर्ह हिंसायाम्'(चु.उ.से.), चुरादिः, ल्युट् । ९ निर्पूर्वः 'तृह हिंसायाम्'(रु.प.से.), अतो ल्युट्, **निस्तर्हणम्** । १० विशस्यते **विशसनम्** ।'शसुं[10] हिंसायाम्'(भ्वा.प.से.), ल्युट् । ११ 'क्षणु हिंसायाम्'(त.उ.से.), भावे ल्युटि **क्षणनम्**। १२ परास्यते **परासनम्**।'असु क्षेपणे'(चु.प.से.), ल्युट् । १३ 'जसु हिंसायाम्' (चु.उ.से.), चुरादिः, प्रोत्पूर्वः, ल्युटि **प्रोज्जासनम्**। १४ प्रशम्यते **प्रशमनम्** ।'शमु उपशमे'(चु.प.से.), ल्युट् । १५ प्रतिहन्यते **प्रतिघातनम्** । प्रतिपूर्वः 'हन्(हन) हिंसागत्योः' (अ.प.अ.), स्वार्थे णिजन्तः, ततो भावे ल्युटि । १६ हननं **वधः** ।'हनश्च वधः'३।३।७६॥ इति सूत्रेण भावेऽप् हन्ते-र्वधादेशश्च । ''मृदङ्गच्छन्दः, तल्लक्षणम्-त्भौ जौ रो मृदङ्गः'' [छन्दोऽनुशासनम्, अध्या-२, सू-२६१]इति छन्दश्चूडामण्यनु-स्मृतेः । ''आवेदितस्तभजजै रयुतैर्मृदङ्गकः''[ ]इति लक्ष्यम् ॥३७०॥ १७-१८ प्रपूर्वादुत्पूर्वाच्च वसो हिंसायामस्माण्णि-जन्ताद् भावे ल्युटि **प्रवासनम्, उद्वासनम्** । १९ हननं **घातः**[12]। भावे घञ्, 'हो हन्तेः-'७।३।५४॥ इति कुत्वम्[13], 'हनस्तोऽ-चिण्णलोः'७।३।३२॥ इति तान्तादेशः । २० निर्पूर्वाद् वसो हिंसायामस्माण्णिजन्ताद् भावे ल्युटि **निर्वासनम्**। २१ संज्ञपनं **संज्ञप्तिः** ।'मारणतोषणनिशामनेषु ज्ञा'(भ्वा.प.अ.)इति मित्संज्ञा[14], 'मितां ह्रस्वः'६।४।९२॥इति ह्रस्वत्वम् । २२ निशुम्भनं **निशुम्भः**। 'शुभि हिंसायाम्[15]'(भ्वा.प.से.), भावे घञ् । २३ 'हिंसि हिंसायाम्'(रु.प.से.), हिंसनं **हिंसा** । भावे घञ्, [टाप्]। २४ 'पै ओवि(ओवै) शोषणे[16]'(भ्वा.प.अ.) इत्यस्य स्वार्थणिजन्तस्य

१. 'क्रप कृपायाम्' इत्येव क्षीरतरङ्गिणी ॥ २. इतोऽग्रे क्षीरतरङ्गिण्यादौ '-रोदने च' इति दृश्यते ॥ ३. 'हन्तीति शीलो' इति १, 'हन्तीति घातुकः' इति २॥ ४. 'उकन्' इति २.३॥ ५. '-श्रन्थ्यो' इति १.४॥ ६. द्र. स्वोपज्ञटीका ३।३७०, पृ.८६॥ ७. 'निर्ग्रन्थ्यतेनेन' इति ३॥ ८. क्षीरतरङ्गिण्यादावीदृक् सूत्रं न दृश्यते ॥ ९. क्षीरस्वामिकृतामरकोषटीकायां निर्गन्धनशब्दो न दृश्यते॥ १०. 'प्रमथ्यतेनेन' इति ३॥ ११. 'शंसु' इति ३.४॥ १२. 'निहननं निघातः' इति २.३.४॥ १३. 'ह्रस्वत्वम्' इति १॥ १४. मारणादिष्वर्थेषु ज्ञाधातुर्मित्संज्ञको भवतीत्यर्थः ॥ १५. 'शुभ शुन्भ भाषणे हिंसायां च' इति क्षीरतरङ्गिण्यादौ ॥ १६. अत्र क्षीरतरङ्गिणीटिप्पणी द्रष्टव्या, भ्वादिः, धातुसं-६५४, टि-१, पृ.१४१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निर्पूर्वस्य भावे ल्युटि **निर्वापणम्** । २५ आलम्भनम् **आलम्भः** । आङ्पूर्वो लभिर्मारणार्थः, ततो भावे घञ्, 'उपसर्गात् खल्घञोः'७।१।६७॥ इति नुम् । २६ निपूर्वात् 'षूद रक्षणे'[1](भ्वा.आ.से.), अस्माद् भावे ल्युटि **निसूदनम्**। 'सात्पदाद्योः'८।३।१११॥ इति षत्वनिषेधः । अत्रान्तर्वर्तिन्या विभक्त्या सूदनशब्दस्य पदत्वात् सस्य पदादित्व-मतो[2] मूर्धन्यनिषेधः । २७ निर्पूर्वस्य 'यती प्रयत्ने'(भ्वा.आ.से.) इति ण्यन्तस्य भावे ल्युटि **निर्यातनम्** । २८ उत्पूर्वाद् 'मन्थ विलोडन'(भ्वा.प.से.,क्र्या.प.से.)इत्यस्माद् घञि **उन्मन्थः**। २९ संपूर्वस्य 'आप्लृ व्याप्तौ'(स्वा.प.अ.)इत्यस्य भावे ल्युटि **समापनम्** ॥३७१॥ ३० अपपूर्वाद् 'असु क्षेपणे'(दि.प.से.), अस्माल्ल्युटि अपासनम् । ३१ वर्ज्यते[3] **वर्जनम्**। 'वृजी वर्जने' (रु.प.से.), ल्युट्। ३२ 'मृञ्[4] हिंसायाम्'(क्र्या.प.से.) स्वार्थे णिजन्ताद् भावे घञि **मारः** । ३३ 'तुजि पिजि हिंसायाम्[5]' (चु.उ.से.), अस्माच्चुरादिणिजन्ताद् 'एरच्' ३।३।५६॥, **पिञ्जः**। ३४ 'कृ हिंसायाम्'(क्र्या.प.से.), निर्पूर्वः, स्वार्थे णिच्, ततो भावे ल्युटि **निष्कारणम्** । ३५ क्रथनं **क्राथः** । 'क्रथ हिंसायाम्'(भ्वा.प.से.), भावे घञ् । ३६ 'शृ हिंसायाम्' (क्र्या.प.से.), स्वार्थणिजन्ताद् भावे ल्युटि **विशारणम्**। षट्त्रिंशद् मारणस्य ॥

## कर्तने[1] कल्पन[2]वर्धने[3] च छेदश्च[4]

१ कृत्यते **कर्तनम्** । 'कृती छेदने'(तु.प.से.), भावे ल्युट् । २ कल्पते **कल्पनम्**, अन्तस्थातृतीयपवर्गाद्यमध्यः । 'कृपू सामर्थ्ये'(भ्वा.आ.वे.), ल्युट्, 'पुगन्तलघूपधस्य-' ७।३।८६॥ इति गुणः, 'कृपे(कृपो) रो लः'८।२।१८॥ इति लत्वम् । ३ वर्ध्यते **वर्धनम्** । 'वर्ध छेदनपूरणयोः'(चु.उ.से.), ल्युट् । ४ छेदनं **छेदः** । 'छिदिर् द्वैधीकरणे'(रु.उ.अ.), भावे घञ् । चत्वारि छेदनस्य । 'कातरवउ[6]'इति भाषा ॥

## घातोद्यत आततायी[1] ॥३७२॥

१ घातोद्यतो वधोद्युक्तः[7] सन्नद्धः सन् यो वधार्थमुद्यतः, स **आततायी** प्रोच्यते । आतं पलायमानं तयत इत्येवंशीलः आततायी । 'तय गतौ'(भ्वा.आ.से.), 'सुप्यजातौ-'३।२।७८॥ इति णिनिः । घात इत्युपलक्षणम् । यत्स्मृतिः-

''अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः।
क्षेत्रदारहरश्चैव षडेते ह्याततायिनः॥१॥''

[शुक्रनीतिः ३।४२॥]इति । एकं घातोद्यतस्य ॥३७२॥

## स शैर्षच्छेदिकः[1] शीर्षच्छेद्यो[2] यो वधमर्हति ।

१-२ शीर्षच्छेदमर्हति **शैर्षच्छेदिकः, शीर्षच्छेद्यः**। ''शीर्षच्छेदाद्यश्च(-च्च)'५।१।६५॥ इति तदर्हतीत्यर्थे यत्ठकौ। अत[8] एव निर्देशात् प्रत्ययसंनियोगेन शिरसः शीर्षभावश्च[9]'' [माधवीया धातुवृत्तिः, रुधादिः, धातुसं-३]इति माधवः । द्वे वधार्हस्य ॥

## प्रमीत[1] उपसम्पन्नः[2] परेत[3]प्रेत[4]संस्थिताः[5] ॥३७३॥
## नामालेख्ययशःशेषो[6][7][8] व्यापन्नो[9]पगतौ[10] मृतः[11] ।
## परासुः[12]

१ प्रमीयते स्म **प्रमीतः**। 'मीञ् हिंसायाम्'(क्र्या.-उ.अ.), निष्ठा। २ उपसम्पद्यते स्म **उपसम्पन्नः** । 'पद गतौ' (दि.आ.अ.), क्तः, 'रदाभ्याम्-'८।२।४२॥ इति नत्वम्। ३ परं लोकमितः **परेतः** । परैति लोकान्तर इति वा । ४ प्रकर्षेण इतो गतः **प्रेतः**। प्रैति स्म इति वा । ५ संतिष्ठते स्म **संस्थितः**। संपूर्वस्तिष्ठतिर्मरणार्थः ॥३७३॥ ६-८ नामालेख्ययशःशब्देभ्यः परः शेषशब्दो योज्यः, तेन नामैव शेषमस्य **नामशेषः, आलेख्यशेषः, यशःशेषः**। ९ व्यापद्यते स्म **व्यापन्नः** । १० उपगच्छति स्म **उपगतः**। 'गम्लृ गतौ'(भ्वा.प.अ.), निष्ठा, 'अनुदात्तोपदेश-'६।४।३७॥ इति म्लोपः। ११ म्रियते स्म **मृतः**। 'मृङ् प्राणत्यागे'(तु.प.आ.अ.), निष्ठा । १२ परागता असवः प्राणा अस्य **परासुः**, दन्त्यसः। द्वादश परासोः॥

## तदहे दानं तदर्थमौर्ध्वदेहिकम्[1] ॥३७४॥

१ तस्य मृतस्याऽहस्तदहः । 'राजाहःसखिभ्यष्टच्' ५।४।९१॥, 'रात्राह्नाहाः पुंसि'२।४।२९॥ इति पुंस्त्वम्, तत्र। तस्मै इदं तदर्थम्, तमुद्दिश्य दानं पिण्डोदकादि[10], देहोपलक्षणम्। देह-धारणादूर्ध्वं परतः ऊर्ध्वदेहः, राजदन्तादिः। तत्र भवम् [**और्ध्व-देहिकम्**]। ''ऊर्ध्वंदया(मा)च्चोर्ध्वदेहाच्च'(वा-४।३।६०॥) इति ठञ्, 'ठस्येकः'७।३।५०॥, 'किति च[11]'७।२।११८॥ इति वृद्धिः। ''और्ध्वदेहिकम्[12]''[[13]]इति पूर्व-टीकाकाराः । ऊर्ध्वदेहाद् भवम् और्ध्वदेहिकम्, इत्यध्यात्मादित्वाद् ठग् वा । एकदेशविकृतत्वाद्

१. 'षूद क्षरणे' इति क्षीरतराङ्गिण्यादौ ॥ २. '-त्वं मतो' इति १.२.३॥ ३. 'वर्ज्यते इति' इति ४॥ ४. क्षीरतरङ्गिण्यादौ ञकारानुबन्धो न दृश्यते ॥ ५. 'तुजि पिजि (लुजि इत्यधिकः स्वामी) हिंसाबलादाननिकेतनेषु' इति मा.धातुवृत्तिः॥ ६. 'कातरणौ' इति ४, 'कातरवौ' इति ३॥ ७. 'वधो युक्तः' इति २॥ ८. 'अत्र' इति मा.धातुवृत्तिः । ९. 'च' इति मा.धातुवृत्तौ नास्ति॥ १०. '-कादिः' इति १॥ ११. 'किति च' इति१.२.४ नास्ति ॥ १२. 'ऊर्ध्व-' इति १.२॥ १३. द्र. पदचन्द्रिका, भा-२, ब्रह्मवर्गः, श्लो-४२७, पृ.५१५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'ऊर्ध्वदेहिकम्' इति षष्ठस्वरादिरपि। "अनुशतिकादिपाठमताश्रयणे[1]तूभयपदवृद्धौ और्ध्वदैहिकमपि" [अभि. स्वोपज्ञटीका २।३७४]इत्याचार्याः । [एकमौर्ध्वदैहिक-दानस्य] ॥३७४॥

**मृतस्नानमपस्नानम्**

१ मृते स्नानं मृतस्नानम्, अपकृष्टं स्नानम् **अपस्नानम्**। अप इति विरुद्धार्थः । एकं मृतस्नानस्य ॥

**निवापः पितृतर्पणम् ॥**

१ नितरामुप्यते दीयते **निवापः** ।'टुवप् बीजतन्तुसन्ताने[2]' (भ्वा.उ.अ.), निपूर्वोऽयमुपसर्गबलाद् दानार्थोऽपि, भावे घञ् । निवापिरिति-"प्रादेशनं निर्वपणम्"[अमरकोषः २।२।३०॥] इत्युक्तेरन्यत्रापि तत्प्रयोगदर्शनात् । पितृणां तर्पणं पितृतर्पणम् । श्राद्धमपि ।" श्राद्धं निवापे श्राद्धे च श्राद्धं श्रद्धासमन्विते"[विश्वलोचनकोशः, धान्तवर्गः, श्लो-२२]इति श्रीधरः । एकं पितृतर्पणस्य॥

**चितिचित्याचितास्तुल्या**

१ चीयते **चितिः** ।'चिञ् चयने'(स्वा.उ.अ.), क्तिच्। २ चेतव्या **चित्या** । 'चित्याग्निचित्ये च'३।१।१३२॥ इति साधुः। चितैव वा । मर्त्तादित्वाद् यः। ३ चीयते **चिता** ।'चिञ् चयने'(स्वा.उ.अ.) 'ञीतः क्तः'३।२।१८७॥ इति वर्तमाने क्तः। त्रयोऽपि स्त्रियाम् । त्रीणि चितायाः ॥

**ऋजुस्तु प्राञ्जलोऽञ्जसः ॥३७५॥**

१ अर्जयति यश **ऋजुः** ।'अर्ज सर्ज अर्जने'(भ्वा.-प.से.), 'अर्जिदृशिकम्यमिपसि(पशि)बाधामृं[3]ज्पश्तुक्दीर्घो हकारश्च कुः'(उणा-२७)इति कुः, धातो ऋजादेशः। २ प्राज्यत अभिगम्यते **प्राञ्जलः** ।प्रपूर्वः'अञ्जू व्यक्ता(क्त्या)दौ'(रु.प.वे.), वृषादित्वात् कलच् । प्राञ्जलयति अञ्जलिं बध्नाति वा । अच् । अञ्जोऽस्यास्ति **अञ्जसः** ।अर्शआदित्वादच् ।सरलोऽपि ।"सरलः पूतिकाष्ठे स्यादुदारावक्रयोरपि"[विश्वप्रकाशकोशः, लान्तवर्गः, श्लो-५९]इति महेश्वरः ।त्रीणि सरलस्य ॥३७५॥

**दक्षिणे सरलोदारौ[4]**

१ दक्षते परकार्यं शीघ्रं करोति **दक्षिणः**।'दक्ष शैघ्र्ये[5]' (भ्वा.आ.से.), 'द्रुदक्षिभ्यामिनन्'(उणा-२०८), तत्र । २ सरति परेच्छामनुसरति **सरलः** ।'सृ गतौ'(भ्वा.प.अ.), 'मङ्गेरलच्' (उणा-७४८)इति बाहुलकादतोऽपि । ३ उदर्यत अभिगम्यत **उदारः** ।'ऋ गतौ'(जु.प.अ.), कर्मणि घञ् । उदत्यर्थमा एति पर(उद् अत्यर्थम् आ इयर्ति) कार्यं कर्तुमिति वा । पचाद्यच्। त्रीणि दाक्षिण्योपेतस्य ॥

**शठस्तु निकृतोऽनृजुः ।**

१ शठति **शठः** ।'शठ कैतवे च[6]'(भ्वा.प.से.), पचाद्यच् । शाम्यतीति वा ।'शमु[7] उपशमे'(दि.प.से.) 'शमेर्लुक् वा[8]'(हैमोणा-१६५)इति ठः । एकदेशविकृतस्यानन्यत्वात् शण्ठोऽपि । २ निकृणोति हिनस्ति **निकृतः**।'कृञ् हिंसायाम्' (स्वा.उ.अ.), 'ञीतः क्तः'३।२।१८७॥ इति वर्तमाने क्तः। ३ ऋजु विरुद्धो **अनृजुः**। अत्र विरुद्धार्थो[9] नञ् । त्रीणि शठस्य। 'वांकउं[10]' इति भाषा ॥

**क्रूरे नृशंसनिस्त्रिंशपापाः**

१ कृणन्ति (कृन्तति) **क्रूरः**।'कृती छेदने'(तु.प.से.), 'कृतेश्छः क्रू च[11]'(उणा-१७८)इति रक्, धातोः क्रूरादेशश्च, तत्र। २ नॄन् शंसति हिनस्ति[12] **नृशंसः** । 'शंसु हिंसायाम्' (भ्वा.प.से.), पचाद्यच् । ३ निस्त्रिंश इव घातुकत्वाद् **निस्त्रिंशः**। ४ पापमस्यास्ति **पापः** । 'अर्शआदिभ्योऽच्'५।२।१२७॥ । चत्वारि क्रूरस्य ॥

**धूर्तस्तु वञ्चकः ॥३७६॥**

**व्यंसकः कुहको दाण्डाजिनिको मायिजालिकौ ।**

१ धूर्वति हिनस्ति **धूर्तः** ।'धूर्व(धुर्वी) हिंसायाम्' (भ्वा.प.से.), 'हसिमृग्रिण्वामिदमितमिलूपूधुर्विभ्यस्तन्'(उणा-३६६), 'लोपो व्योर्वलि'६।१।६६॥ इति वलोपः । २ वञ्चयते **वञ्चकः** ।'वञ्चु प्रलम्भने'(चु.आ.से.), णिजन्तः, ततो ण्वुल् ॥३७६॥ ३ व्यंसयति च्छलयति **व्यंसकः** । ण्वुल् । विगतावंसावस्येति वा व्यंसः, तत्तुल्यो वा । ४ कुहयते विस्मापयते **कुहकः**। 'कुहण्[13] विस्मापने'(चु.आ.से.), चुरादिः, ण्वुल् । कुहकमिन्द्रजालमस्यास्ति वा ।'अर्शआदिभ्योऽच्' ५।२।१२७॥। ५ दण्डाजिनं दम्भस्तेनाऽन्वेष्टा **दाण्डाजिनिकः**, इकारद्वयमध्यः। 'अयःशूलदण्डाजिनाभ्यां ठक्ठञौ'५।२।७६॥ इति ठञ्,'ठस्येकः' ७।३।५०॥, 'तद्धितेष्वचामादेः' ७।२।११७॥ इति वृद्धिः । ६

१. '-श्रणये तु' इति स्वोपज्ञटीकायाम् ३।३७४॥, पृ.८७॥ २. 'डुवप् तन्तुसन्ताने' इति क्षीरतरङ्गिण्यादौ ॥ ३. '-मृजिपशितुग्धुग्दीर्घहकाराश्च' इत्युणादिगणे ॥ ४. तुलनीयोऽमरकोषः ३।१।८॥ ५.'दक्ष वृद्धौ शीघ्रार्थे च' इति क्षीरतरङ्गिण्यादौ ॥ ६. ४प्रतौ तथा क्षीरतरङ्गिण्यां चकारो नास्ति ॥ ७.'शम' इति ४॥ ८.'च' इति ३॥ ९.'-द्वोऽर्थो' इति १,'-द्धार्थे' इति ३॥ १०.'वांको' इति ३॥ ११.'क्रूश्च' इति ४, 'क्रूरश्च' इति १.२॥ १२. १.२.४ नास्ति ॥ १३. णकारोऽनावश्यकः, हैममते चुरादेर्णकारानुबन्धो वा ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मायाऽस्यास्ति **मायी** । 'व्रीह्यादिभ्यश्च' ५।२।११६॥ इतीनिः । मायाविमायिकावपि । ७ जालेन चरति **जालिकः** । 'तेन चरति'[1] ४।४।८॥ इति ठक् । सप्त धूर्तस्य॥

**माया तु शठता शाठ्यं कुसृतिर्निकृतिश्च सा ॥३७७॥**

१ मात्यनया **माया** । 'मा माने'(अ.प.अ.), 'श्याद्व्यधा-'३।१।१४१॥ इति **णः**, 'आतो युक् चिण्कृतोः' ७।३।३३॥ 'माच्छासस्तिसूभ्यो यः'[2](उणा-५४९)इति यप्रत्ययो वा, टाप्। २ शठस्य भावः **शठता** । 'तस्य भावस्त्वतलौ'५।२।११॥ । ३ शठस्य भावः **शाठ्यम्** । ब्राह्मणादित्वात् ष्यञ्। ४ कुत्सिता सृतिर्हिंसा **कुसृतिः** । ५ निकृष्टा कृतिर्हिंसा **निकृतिः**। माया परवञ्चनबुद्धिः । निकृतिः बकवृत्त्यागलकर्तकानामिवावस्थानम्, अथवा मायाप्रच्छादनार्थं मायान्तरकरणम् । ''निकृतिर्बकवृत्त्या कुक्कुटादिकरणम्, अधिकोपकारकरणेन परच्छलनम्''[ ]इत्यन्ये, इति विशेषोऽत्र नाश्रितः । पञ्च मायायाः ॥३७७॥

**कपटं कैतवं दम्भः कूटं छद्मोपधिश्छलम् ।**
**व्यपदेशो मिषं लक्षं निभं व्याजः**

१ के मूर्ध्नि पट इव छादकं **कपटम्,** पुंक्ली. । ([3]कं ब्रह्माणमपि पटति गच्छति, पचाद्यचि वा) । २ कितवस्य कर्म **कैतवम्** । युवादित्वादण् । ३ दम्भनं **दम्भः** । 'दम्भु दम्भने' (स्वा.प.से.), भावे घञ् । ४ कूटयति दहत्यनेन **कूटम्,** पुंक्ली.। यदमरः-''कूटमस्त्रियाम्''[अमरकोषः २।५।४२॥]। 'कूट दाहे' (चु.उ.से.), णिजन्तः, [अच् घञ् वा] । ५ छाद्यते रूपमनेन **छद्म** । 'छद संवरणे'(चु.उ.से.), '-मनिन्'(उणा-५८४)इति मनिन्, 'इस्मन्त्र[न्]क्विषु च'६।४।९७॥ इति ह्रस्वत्वम् । ६ उप समीपे धीयत **उपधिः** । 'डुधाञ् धारणादौ' (जु.उ.अ.), 'उपसर्गे घोः किः'३।३।९२॥ । ७ छ्यति छिनत्त्यनेन **छलम्** । 'छो छेदने' (दि.प.अ.), पृषोदरादिः । ८ व्यपदिश्यते **व्यपदेशः**। 'दिश अतिसर्जने'(तु.प.अ.), भावे घञ् । ९ मिषति **मिषम्**। 'मिष स्पर्धायाम्'(तु.प.से.), तुदादिः, 'इगुपध-'३।१।१३५॥ इति कः । १० लक्ष्यतेऽनेन **लक्षम्,** पुंक्ली. । 'लक्ष दर्शनाङ्कनयोः' (चु.उ.से.), करणे घञ् । ११ नितरां तदिव भाति **निभम्** । 'भा दीप्तौ'(अ.प.अ.), 'आतश्चोपसर्गे कः'३।१।१३६॥ । १२ व्यजन्ति विक्षिपन्त्यनेन **व्याजः**। 'अज गतौ क्षेपणे च' (भ्वा.प.से.), 'हलश्च'३।३।१२१॥ इति घञ् । व्याजः स्वरूपाच्छादनम्, यथा-''ध्यानव्याजमुपेत्य चिन्तयसि काम्''[नागानन्दनाटकम्, प्रथमोऽङ्कः, श्लो-१]इति। मायादयः कपटादयश्च एकार्था इत्येके। कपटादयः सप्त, व्यपदेशादयश्च पञ्च भिन्नार्था इत्यमरः। तदा कपटादयः सप्त, कपटवाचकाः। तत्रापि च वेषभाषाविपर्ययकरणं कपटम्, कार्षापणतुलादेः परवञ्चनार्थं न्यूनाधिककरणं कूटमिति विशेषोऽत्र नाश्रितः। व्यपदेशादयः पञ्च लोकोक्त्या मिसवाचकाः॥

**अथ कुक्कुटिः ॥३७८॥**
**कुहना दम्भचर्या च**

१ कुक्कुट इवाचरति कुक्कुटति, कुक्कुटनं **कुक्कुटिः**। 'अच इः'(उणा-५७८)इति इः ॥३७८॥ २ कुहयतेऽनया **कुहना**। 'कुहण्[4] विस्मापने'(चु.आ.से.), णिजन्तादस्मात् 'करणाधिकरणयोः-'३।३।११७॥ इति करणे ल्युट् । २ दम्भेन चरणं **दम्भचर्या** 'चर गतिभक्षणयोः'(भ्वा.प.से.), क्यप् । त्रीणि दम्भेन परविस्मापनार्थं मिथ्याकल्पनायाः ॥

**वञ्चनं तु प्रतारणम् ।**
**व्यलीकमभिसन्धानम्[5]**

१ वञ्च्यते **वञ्चनम्** । 'वञ्चु प्रलम्भने'(चु.आ.से.), ल्युट्। २ प्रतार्यते **प्रतारणम्** । 'तॄ प्लवनतरणयोः'(भ्वा.प.से.), [6]अस्माण्णिजन्ताद् भावे ल्युट् । ३ विशिष्टमलीकमत्र **व्यलीकम्** । ४ अभिसन्धीयते **अभिसन्धानम्** । 'डुधाञ् धारणादौ' (जु.उ.अ.), भावे ल्युट् । चत्वारि वञ्चनस्य ॥

**साधौ सभ्यार्यसज्जनाः ॥३७९॥**

१ साधयति परकार्याणि **साधुः**। 'साध संसिद्धौ' (स्वा.प.अ.), 'कृवापाजिमिस्वदिसाध्यशूभ्य[7]उण्'(उणा-१) इत्युण्, तत्र । २ सभायां साधुः **सभ्यः** । 'सभाया यः' ४।४।१०५॥ इति । ३ अर्यते उपजीव्यत्वेन गम्यत **आर्यः**। 'ऋ गतौ'(जु.प.अ.), 'ऋहलोर्ण्यत्'३।१।१२४॥ इति ण्यत्, 'अचो ञ्णिति'७।२।११५॥ इति वृद्धिः । ४ सन् प्रशस्तो जनः **सज्जनः**। चत्वारि सज्जनस्य ॥३७९॥

**दोषैकदृक् पुरोभागी[8]**

१ दोषे एव एकस्मिन् दृग् ज्ञानमस्य **दोषैकदृक्**। २ पुरोऽग्रं सर्पवद् भजतीत्येवंशीलः **पुरोभागी**। 'भज सेवायाम्'

१. अष्टाध्याय्यां 'चरति' इत्येव ॥ २. '-ससिसूभ्यो यः' इत्युणादिगणे ॥ ३. कोष्ठान्तर्गतपाठः १प्रतौ नास्ति ॥ ४. हैममते एव चुरादेर्णकारानुबन्धः॥ ५. मुद्रिताभिधानचिन्तामणौ मूले 'अतिसन्धानम्' इति, स्वोपज्ञटीकाऽपि तमाश्रित्यैव ॥ ६. 'अस्माद् भावे णिजन्ताल्ल्युट्' इति ३॥ ७. '-शूभ्य उण्' इत्युणादिगणे ॥ ८. तुलनीयोऽमरकोषः ३।१।४६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(भ्वा.उ.अ.), 'सम्पृचानुरुधा-'३।२।१४२॥ इति घिनुण्, घित्वात् कुत्वम् । पुरोभागिणौ इत्यादि । [यत्कात्य:-] "दोषैकग्राहिहृदय: पुरोभागीति कथ्यते"[१]इति। द्वे दोषैकग्राहिण: ॥

**कर्णेजपस्तु दुर्जन: ।**

**पिशुन: सूचको नीचो द्विजिह्वो मत्सरी खल: ॥३८०॥**

१ कर्णे जपति सूचयति **कर्णेजप:** । 'जप मानसे च'(भ्वा.प.से.), 'स्तबकर्णयोरमिजपो:'३।२।१३॥ इत्यच्, 'संज्ञायाम्'२।१।४४॥ इति समास:, 'तत्पुरुषे कृति-'६।३।१४॥ इति सप्तम्यलुक्[२]। २ दुष्टो जनो **दुर्जन:** । ३ पिशति(पिंशति) एकदेशेन सूचयति **पिशुन:** । 'पिश अवयवे'(तु.प.से.), तुदादौ मुचादि:, 'पिश: (पिशे:) किच्च'[३](उणा-३७५)इत्युनन्। अपिशुनति वा, पृषोदरादि: । पिशुनयति दुष्टं सूचयति वा । पचाद्यच्। "अपिश्यति खण्डयति"[४]इति भोज: । ४ सूचयति **सूचक:**। 'सूच[५] पैशुन्ये'(चु.उ.से.), ण्वुल् । सीव्यति परगुणा(परगुण)-पटमिति वा । 'षिवु तन्तुसन्ताने'(दि.प.से.), 'सिवेष्टेरू च'[६] (उणा-२८९)इति चङ्, सूच:, तत: स्वार्थे कनि [सूचक:]। ५ निकृष्टमञ्चति गच्छति **नीच:** । 'अञ्चु गतिपूजनयो:'(भ्वा.-प.से.)। ६ द्वे जिह्वे वचनेऽस्य **द्विजिह्व:**।'गोस्त्रियो-'१।२।४८॥ इति ह्रस्वत्वम् । ७ मत्सरोऽस्त्यस्य **मत्सरी** । 'अत इनिठनौ' ५।२।११५॥इतीनि: । ८ खलति सञ्चिनोत्यशुभमिति **खल:** । 'खल सञ्चये'(भ्वा.प.से.), पचाद्यच् । खं शून्यं लातीति वा । 'ला दाने'(अ.प.अ.), 'आतोऽनुपसर्गे क:'३।२।३॥ । खलति स्ववचनविषये चलतीति वा। अच् । खनति साधुहृदयं वा खल:, पुंक्लीबलिङ्ग: । वाच्यलिङ्ग इत्यन्ये । 'खन खनने'[७](भ्वा.उ.से.), 'मृजिखन्याहनिभ्यो डित्'(हैमोणा-४७२)इत्यल:। अष्टौ दुर्जनस्य। "क्षुद्र: प्रखल:"[शेषनाममाला ३।९४॥]शैषिके ॥३८०॥

**व्यसनार्त्तस्तूपरक्त:**

१ दैवी मानुषी च पीडा व्यसनम्, तेन ऋतो व्याप्त: **व्यसनार्त्त:** । 'ऋते च तृतीयासमासे'(वा-६।१।८९॥)इति वृद्धि: । २ उपरज्यते स्म **उपरक्त:** ।'रञ्ज रागे'(भ्वा.प.अ.), निष्ठा । द्वे व्यसनिन: । व्यसनीति भाषा ॥

**चोरस्तु प्रतिरोधक: ।**

**दस्यु: पाटच्चर: स्तेनस्तस्कर: पारिपन्थिक: ॥३८१॥**

**परिमोषिपरास्कन्द्यैकागारिकमलिम्लुचा: ।**

१ चोरयति **चोर:**।'चुर स्तेये'(चु.उ.से.), पचाद्यच्। प्रज्ञाद्यणि चौरोऽपि । २ प्रतिरुणद्धि: **प्रतिरोधक:**। 'रुधिर् आवरणे'(रु.उ.अ.), ण्वुल्[८] । ३ दस्यति उपक्षिपति **दस्यु:**।'दसु उपक्षेपे'[९](दि.प.से.), 'यजिमनिशुन्धिदसिजनिभ्यो युच्' (उणा-३००)। ४ पाटयंश्चरति **पाटच्चर:**, पृषोदरादि: । पटच्चरे जीर्णवस्त्रे भवो वा ।'तत्र भव:'४।३।५३॥ इत्यण् । **'पटच्चौर:'** इत्येके। ५ स्तेनयति **स्तेन:**, पुंक्ली. ।'स्तेन चौर्ये'(चु.उ.से.), पचाद्यच्[१०]। ६ तत्करोति **तस्कर:** । [ 'किंयत्तद्बहुषु ' (वा ३।२।२१॥)इत्यच्] 'तद्बृहतो: करपत्योश्चौरदेवतयो: सुट् तलोपश्च'(गणसू-६।१।१५७॥) । ७ परिपन्थं तिष्ठति, हन्ति वा **पारिपन्थिक:**।'परिपन्थात् तिष्ठति च'[११](हैमसू-६।४।३२॥) इति ठक् ॥३८१॥ ८ परिमुष्णातीत्येवंशील: **परिमोषी** ।'मुष स्तेये'(क्र्या.प.से.), 'सम्पृचानुरुधा-'३।२।१४२॥ इति घिनुण्। ९ परानास्कन्दति **परास्कन्दी** ।'स्कन्दिर् गतिशोषणयो:'[१२](भ्वा.-प.अ.) । १० एकमसहायमगारं प्रयोजनमस्य **ऐकागारिक:**। 'ऐकागारिकश्चौरे'[१३]५।१।११३॥इति ठक् । ११ मलिनं म्लोचति[१४] **मलिम्लुच:**। 'म्लुच स्तेयकरणे'[१५](भ्वा.प.से.), 'इगुपध-' ३।१।१३५॥इति क: । एकादश चौरस्य । "चौरे तु चोरटो रात्रिचर:"[१६][शेषनाममाला ३।९५॥]इति शैषिके ॥

**य: पश्यतो हरेदर्थं स चौर: पश्यतोहर: ॥३८२॥**

१ य: पश्यतो विलोकयतो जनस्य अर्थं द्रव्यं हरेत्, स चौर: **पश्यतोहर:**, उच्यत इति शेष:। पश्यत: हर: पश्यतोहर:। 'वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु'(वा-६।३।२१॥)इति षष्ठ्यलुक् ॥३८२॥

---

१. द्र. स्वोपज्ञटीका ३।३८०॥, पृ.८८॥, तथा अमरकोशक्षीरस्वामिटीका ३।१।४६॥, पृ.२४५॥ २. 'हलदन्तात् सप्तम्या: संज्ञायाम्'६।३।९०॥ इत्यतोऽपि सप्तम्यलुक्, अत एवोक्तं दीक्षितेन सि.कौमुद्याम्-"तत्पुरुषे कृतीति हलदन्तादिति वा ङेरलुक्" इति सि.कौमुदी. पृ.५६८॥ ३. वस्तुत: इदं सूत्रमितन् करोति, न त्वुनन्, अपरं च 'पिश: (पिशे:) किच्च' इत्यस्य ग्रहणं प्रमादमूलकम्, 'क्षुधिपिशिमिथिभ्य: कित्'(उणा-३३५)इत्यस्य विद्यमानत्वात्॥ ४. द्र. स्वोपज्ञटीका ३।३८०॥, पृ.८९॥, अम.क्षीरस्वामिटीका ३।१।४७॥, पृ.२४६॥ ५. 'शूचि' इति १.२, 'सूचि' इति३॥ ६. उणादिगणे तु 'सिवेष्टेर्यू च'(उणा-२८७)इति सूत्रं दृश्यते, कार्यक्षेत्रमपि अन्यदेव, क्लिष्टकल्पनाऽत्र प्रतिभाति ॥ ७. 'खनु अवदारणे' इति क्षीरतरङ्गिण्यादौ ॥ ८. 'ल्युट्' इति३ ॥ ९. क्षीरतरङ्गिण्यादौ उपक्षयार्थ: स्वीकृत: ॥ १०. '-द्यचि' इति ४॥ ११. 'परिपन्थं च तिष्ठति' ४।४।३६॥ इति पाणिनीयाष्टाध्याय्याम् ॥ १२. मा. धातुवृत्तिसम्मतोऽयं धातुपाठ:, क्षीरतरङ्गिण्यां '-शोषणे' इत्येव दृश्यते ॥ १३. 'ऐकागारिकट् चौरे' इत्यष्टाध्याय्याम् ॥ १४. 'म्लोचयति' इति १॥ १५. क्षीरतरङ्गिण्यादौ स्तेयकरणार्थकम्लुचधातुर्न दृश्यते ॥ १६. 'चौरे तु चोरटो रात्रिचर:' इत्यस्य स्थाने १.२.४प्रतिषु 'चोरट: रात्रिचर:' इत्येव दृश्यते, शेषनाममालास्वोपज्ञटीकयो: 'चोरडो' इति दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**चौर्यं तु चौरिका स्तेयम्**

१ चोरस्य भावः कर्म वा **चौर्यम्** । 'गुणवचनब्राह्मणादिभ्यः कर्मणि च'५।१।१२४॥ इति ब्राह्मणादित्वात् ष्यञ् । २ चौरस्य[1] भावः **चौरिका**, स्त्रीक्ली. । मनोज्ञादित्वाद् वुञ् । ३ स्तेनस्य भावः **स्तेयम्** । 'स्तेनाद्यन्नलोपश्च'५।१।१२५॥ इति यन्नलोपौ । त्रीणि चौर्यस्य । 'चोरि[2]' इति भाषा ॥

**लोप्त्रं त्वपहृतं धनम् ।**

१ लुप्यते **लोप्त्रम्** । 'लुप्लृ छेदने'(तु.उ.से.), बाहुलकाद् 'हुयामा-'(उणा-६०७)इति त्रन् । लाद्रमित्यपि हलायुधटीका । एकं चौराऽपहृतद्रव्यस्य ॥

**यद्भविष्यो दैवपरः**

१ यद् भविष्यति तद् भवतु इत्येवमाचष्टे **यद्भविष्यः** । २ **दैवपरः** दैवप्रमाणकः । द्वे दैवप्रमाणकस्य ॥

**अथाऽऽलस्यः शीतकोऽलसः ॥३८३॥**
**मन्दस्तुन्दपरिमृजोऽनुष्णः**

१ आलस्यमस्यास्ति **आलस्यः** । 'अर्शआदिभ्योऽच्' ५।२।१२७॥ । २ शीतं मन्दं करोति **शीतकः** । 'शीतोष्णाभ्यां कारिणि'५।२।७२॥ इति कन्प्रत्ययः । क्रियाविशेषणाद् द्वितीयासमर्थादयं प्रत्ययः । ३ न लसति **अलसः** । 'लस श्लेषणक्रीडनयोः'(भ्वा.प.से.), नञ्पूर्वः, पचाद्यच् ॥३८३॥ ४ मन्दते स्वपितीव **मन्दः** । अत एव मदि जाड्ये इति चान्द्रो धातुः, ततः पचाद्यच् । ५ तुन्दं परिमार्ष्टि **तुन्दपरिमृजः** । 'मृजूष् शुद्धौ' (अ.प.से.), 'तुन्दशोकयोः परिमृजापनुदोः'३।२।५॥ इति कः । ६ न उष्णः **अनुष्णः** । षड् अलसस्य । 'आलसू' इति भाषा॥

**दक्षस्तु पेशलः ।**
**पटूष्णोष्णकसूत्थानचतुराश्च**

१ दक्षते[4] वर्धते लक्ष्म्या कृत्वा **दक्षः** । 'दक्ष वृद्धौ' (भ्वा.आ.से.), पचाद्यच् । दक्षते शीघ्रं करोतीति वा । 'दक्ष शैघ्र्ये[5]'(भ्वा.आ.से.), अच् । २ पिशति(पिंशति) एकदेशेन सर्वं करोति **पेशलः**, तालव्यमध्यः । 'पिश अवयवे'(तु.प.से.), 'वृषादिभ्यश्चित्'(उणा-१०७)इति कलच् । ३ पाटयति **पटुः** । 'पट गतौ'(भ्वा.प.से.), णिजन्तः । 'फलिपाटिनमिमनिजनां गुक्पटिनाक(कि)धता(त)श्च'(उणा-१८)इति उः, पटादेशश्च । ४ उषति(ओषति) दहतीवोष्णः (दहतीति **उष्णः**) । 'उष दाहे'(भ्वा.प.से.), 'इण्षिञ्जिदीङुषविभ्यो नक्[6]'(उणा-२८२)इति नक् । ५ उष्णं क्षिप्रं करोति **उष्णकः** । 'शीतोष्णाभ्यां कारिणि' ५।२।७२॥ इति कन्प्रत्ययः । ६ सुष्ठु उत्थानमुद्योगोऽस्य **सूत्थानः** । ७ चतते कर्म **चतुरः** । 'चतेङ्[7] याचने'(भ्वा.उ.से.), 'मन्दिवाशिमथिचति-'(उणा-३८)इति उरच् । सप्त अविलम्बितकार्यकारिणः, शीघ्रकारिणो वा ॥

**अथ तत्परः ॥३८४॥**
**आसक्तः प्रवणः प्रह्वः प्रसितश्च परायणः।**

१ तत्परमस्य तत्परः, तन्निष्ठः ॥३८४॥ २ आसजति स्म **आसक्तः** । 'षञ्ज सङ्गे'(भ्वा.प.अ.), निष्ठा । ३ प्रकर्षेण वनति संभजते **प्रवणः** । प्रपूर्वः 'वन षण संभक्तौ'(भ्वा.प.से.), पचाद्यच् । ४ प्रह्वयते कार्ये स्पर्धते **प्रह्वः** । 'ह्वेञ्[8] स्पर्धायां शब्दे च'(भ्वा.उ.अ.) । ५ प्रसिनोति स्म **प्रसितः** । प्रपूर्वात् 'षिञ् बन्धने'(स्वा.उ.अ.) अस्माद् निष्ठा । ६ परं कार्य[9]पारमयते प्राप्नोति **परायणः** । 'अय गतौ'(भ्वा.आ.से.), नन्द्यादित्वाद् ल्युः । षट् तत्परस्य ॥

**दातोदारः**

१ ददाति[10] **दाता** । 'डुदाञ् दाने'(जु.उ.अ.), 'ण्वुल्तृचौ'३।१।१३३॥ इति तृच् । २ उदत्यर्थमाराति ददाति **उदारः** । 'रा दाने'(अ.प.अ.), 'आतश्चोपसर्गे कः'३।१।१३६॥। द्वे दातुः।

**स्थूललक्षदानशौण्डौ बहुप्रदे ॥३८५॥**

१ स्थूलं लक्षयत्यालोचयति ददातीति यावत् **स्थूललक्षः** । 'लक्ष दर्शनाङ्कनयोः'(चु.उ.से.), पचाद्यच् । लक्षेर्णिजन्ताद् 'एरच्'३।३।५६॥ इत्यच् वा । निर्यकारोऽयम् । मिश्रास्तु- "दानार्थं स्थूलकूटं (स्थूलं कूटं) प्रचुरद्रव्यं दातुं लक्ष्यमपेक्षणीयमस्य स्थूललक्ष्यः । 'स्थूलं कूटे च[11]'[मेदीनीकोशः, शब्दवर्गः, लान्तवर्गः, श्लो-५६]इति मेदिनिः । लक्ष्यमिति ऋहलोर्ण्यति[12] सयकारोऽयम्"[ ]इत्याहुः । २ दाने दानविषये शौण्डो विख्यातः, प्रसक्तो वा **दानशौण्डः** । 'सप्तमी शौण्डैः'

१. 'चोरस्य' इति १.२॥ २. 'चौरि' इति २.३॥ ३. 'अल-' इति २॥ ४. 'दक्षति' इति १, 'दक्ष्यति' इति ३॥ ५. 'दक्ष वृद्धौ शीघ्रार्थे च' इति क्षीरतरङ्गिण्यादौ ॥ ६. 'इण्सिञ्जिदीङुष्यविभ्यो नक्' इत्युणादिगणसूत्रम् ॥ ७. क्षीरतरङ्गिण्यादौ ङकारानुबन्धो नास्ति ॥ वस्तुतस्तु 'चते चदे याचने च' इति धातुपाठः ॥ ८. 'ह्वेङ्' इति १.३.४॥ ९. 'कार्यं' इति २॥ १०. '-तीति' इति ३॥ ११. 'कुटेऽथ' इति मेदिनीकोशे ॥ १२. 'ण्यदिति' इति ४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

२।१।४०॥ इति समासः । ''शौण्डो मत्तेऽपि[1] विख्यातः'' [मेदिनीकोशः, शब्दवर्गः, डान्तवर्गः, श्लो-२६]इति मेदिनिः । ''शुण्डा मद्यपानस्थानम्, तत्र भवः शौण्डः, इहोपचारात् समर्थ उच्यते''[अम. क्षीरस्वामिटीका ३।१।६॥]इति स्वामी[2] । ३ बहूनि धनानि प्रददाति **बहुप्रदः** । 'प्रे दाज्ञः कर्मणि'[3]३।२।६॥ इति कः, तत्र । त्रीणि बहुप्रदस्य ॥३८५॥

**दानमुत्सर्जनं त्यागः प्रदेशनविसर्जने ।**
**विहायितं वितरणं स्पर्शनं प्रतिपादनम् ॥३८६॥**
**विश्राणनं निर्वपणमपवर्जनमंहतिः ।**

१ दीयते **दानम्** । ल्युट् । २ उत्सृज्यते **उत्सर्जनम्**। 'सृज विसर्गे'(तु.प.अ.), ल्युट् । ३ त्यजनं **त्यागः** । 'त्यज हानौ'(भ्वा.प.अ.),भावे घञ्, 'चजोः कु घिण्ण्यतोः'७।३।५२॥ इति कुत्वम्, 'अत उपधायाः'७।२।११६॥ ४ प्रदिश्यते **प्रदेशनम्** । 'दिश अतिसर्जने'(तु.प.अ.), ल्युट् । प्रादेशनमपि । ५ विसृज्यते **विसर्जनम्** । 'सृज विसर्गे'(तु.प.अ.), ल्युट् । ६ 'हि गतौ वृद्धौ च'(स्वा.प.अ.) अतो णिजन्तात् क्तः [**विहायितम्**] । ७ वितीर्यते **वितरणम्** । विपूर्वः 'तॄ प्लवनतरणयोः' (भ्वा.प.से.), ल्युट् । ८ स्पृश्यते **स्पर्शनम्** । 'स्पृश संस्पर्शने' (तु.प.अ.), ल्युट्, उपधाया लघोर्गुणः । दानं हि उपचारात् पुच्छादौ गवादिकं स्पृष्ट्वा दीयते । ९ प्रतिपाद्यते **प्रतिपादनम्** । 'पद गतौ'(दि.आ.अ.) णिजन्तः, ल्युट् ॥३८६॥ १० विश्राण्यते **विश्राणनम्** । 'श्रण दाने'(चु.उ.अ.), अस्माण्णिजन्ताद् ल्युट्। ११ निरुप्यते **निर्वपणम्**। 'टुवप् (डुवप्) बीजतन्तुसन्ताने[4]' (भ्वा.उ.अ.), ल्युट्। निर्वापणमपि । १२ अपवृज्यते **अपवर्जनम्** । ल्युट्। १३ हन्यते दौर्गत्यमनया **अंहतिः**, स्त्रीलिङ्गः। 'हन् (हन) हिंसागत्योः'(अ.प.अ.), 'हन्तेरंह च'(उणा-५०२, हैमोणा-६५४)इत्यतिः । स्वतः उपसर्गवशाच्च हन्तिर्दानार्थः । '' 'अहि गतौ'(भ्वा.आ.से.), अनेकार्थत्वाद् धातूनां दानार्थत्वादस्मात् क्तिन्, 'तितुत्रथ-'७।२।९॥ इत्यत्र 'अग्रहादीनामिति वक्तव्यम्'( )इतीटि अंहितिः, मध्येऽकारवती''[[5]]इति तु कलिङ्गः । त्रयोदश दानस्य ॥

**अर्थव्ययज्ञः सुकलः**

१ अर्थव्ययं जानाति अर्थव्ययज्ञः दाता भोक्ता च। 'ज्ञा अवबोधने'(क्र्या.प.अ.), 'इगुपध-'३।१।१३४॥ इति कः। शोभना कलाऽस्य **सुकलः**, विख्यातत्वात् । सु अतिशयेन कल्पते शब्द्यते गण्यते वा । 'कल शब्दसङ्ख्यानयोः'(भ्वा.आ.से.), घञ् । यदमरः-''सुकलो दातृभोक्तरि''[अमरकोषः ३।१।८॥]। एकं दातृभोक्तुः ॥

**याचकस्तु वनीपकः ॥३८७॥**
**मार्गणोऽर्थी याचनकस्तर्कुकः**

१ याचते **याचकः**। 'टुयाचृ याच्ञायाम्'(भ्वा.उ.से.), ण्वुल् । २ 'वनु याचने'(त.आ.से.), 'इन् सर्वधातुभ्यः'(उणा-५५७)इतीन्, वनिः, 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि वनी, तां पाति वनिपः, ततः संज्ञायां कन् **वनीपकः**, पवर्गाद्यमध्यः। 'वनीयक' इत्यन्तस्थाद्यमध्योऽपि। ''वनु याचने' (त.आ.से.), वनति याचते वनिः, 'इन् सर्वधातुभ्यः'(उणा-५५७), वनिं याचनामिच्छतीति क्यचि[6] ण्वुल्''[ ]इति मिश्रोज्ज्वलदत्तावप्यन्तस्थाद्यमध्यमेवाहतुः ॥३८७॥ ३ मार्गति अन्विष्यति दातारमर्थं वा **मार्गणः**। 'मार्ग अन्वेषणे'(चु.उ.से.), नन्द्यादित्वाद् ल्युः। ४ असन्निहितोऽर्थोऽस्त्यस्य **अर्थी** । 'अर्थाच्चाऽसन्निहिते'(वा-५।२।१३५॥)इतीनिः । **अर्थयत** इति वा। 'अर्थ वाञ्छायाम्[7]'(चु.आ.से.), ग्रह्यादित्वाद्[8] 'नन्दिग्रहि-' ३।१।१३४॥ इत्यादिना णिनिर्वा । ५ याचते याचनः, नन्द्यादित्वाद् ल्युः, ततः स्वार्थे कनि **याचनकः**। ६ चतते याचते **तर्कुकः**। 'चतेङ्[9] यचने'(भ्वा.उ.से.), पृषोदरादित्वात् साधुः। षड् याचकस्य[10] ॥

**अथार्थनैषणा ।**

**अर्दना प्रणयो याच्ञा याचनाऽध्येषणा सनिः ।३८८ ।**

१ अर्थनम् **अर्थना** । 'अर्थ [उप]याच्ञायाम्'(चु.-आ.से.), भावे ल्युट् । २ एषणम् **एषणा** । 'इषु[11] इच्छायाम्' (तु.प.से.), 'इषोऽनिच्छार्थात्[12]'(वा-३।३।१०७॥)इति युच् । ३ अर्दनम् **अर्दना** । 'अर्द गतौ याचने च'(भ्वा.प.से.), भावे ल्युट् । ४ प्रणयनं **प्रणयः**। प्रपूर्वः 'णीञ् प्रापणे'(भ्वा.उ.अ.), 'एरच्'३।३।५६॥इत्यच् । ५ याचनं **याच्ञा**। 'टुयाचृ याच्ञायाम्' (भ्वा.उ.से.), 'यजयाचयतविच्छ-'३।३।९०॥ इति नङ्, 'स्तोः

१. 'च' इति मेदिन्याम्॥ २. स्वामिकृतामरकोशटीकायां तु-''दाने शौण्डः शक्त उपचारात् शुण्डा हि पानमदस्थानं तत्र भवः शौण्डः'' इति दृश्यते, ३।१।६॥, पृ.२३७॥ ३. अष्टाध्याय्यां 'प्रे दाज्ञः' इत्येव दृश्यते ॥ ४. काशकृत्स्नमतेऽयम् (द्र. क्षीरतरङ्गिणी, पृ.१६७), स्वामिसायणौ 'बीजसन्ताने' इत्येव पठतः ॥ ५. द्र. पदचन्द्रिका, भा-२, ब्रह्मवर्गः, श्लो-४२६, पृ.५१५॥ ६. 'क्यनि' इति३॥ ७. '-उपयाच्ञायाम्' इति क्षीरतरङ्गिण्यादौ॥ ८. 'ग्राह्या-' इति ३.४॥ ९. क्षीरतरङ्गिण्यादौ ङकारानुबन्धो नास्ति ॥ १०. 'याचनकस्य' इति३॥ ११. 'इष' इति मा. धातुवृत्तिः ॥ १२. 'इषेरनिच्छार्थस्य' इति वार्तिकस्वरूपं दृश्यते॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्चुना श्चुः'८।४।४०॥ । ६ याचनं **याचना** । याचेर्णिजन्ताद् बाहुलकाद् 'ण्यासश्रन्थ-'३।३।१०७॥ इति युच् । ७ अध्येषणम् **अध्येषणा** । अधिपूर्वः 'इषु इच्छायाम्'(तु.प.से.), ल्युट् । ८ सन्यते याच्यते **सनिः**, स्त्रियाम् । 'षणु दाने'(तु.उ.से.) 'सन्कंषि-'( )इति इन्, 'इन् सर्वधातुभ्यः'(उणा-५५७)इतीन् वा। वैजयन्ती तु, सनिशब्दं पुंस्यप्याह-'सनिरक्ली स्यात्'[वैजयन्तीकोषः३।६।१२१॥]इति । प्रणयमन्तरेण सर्वेऽपि स्त्रीलिङ्गाः। अष्टौ याचनायाः । ''सनिस्त्वध्येषणा''[अमरकोषः २।७।३२॥]इति गुर्वादेराराधनस्य सत्कारपूर्वकं क्वचिदर्थे नियो-जनमित्यमरः पृथगाह । शेषश्चात्र-''भिक्षणा अभिषस्तिर्मार्गणा च''[शेषनाममाला ३।९५॥] ॥३८८॥

## उत्पतिष्णुस्तूत्पतिता

१ उत्पतति ऊर्ध्वं गच्छतीत्येवंशीलः **उत्पतिष्णुः** । 'पतृ(पत्लृ) पतने'(भ्वा.प.से.), 'अलङ्कृञ्निराकृञ्-'३।२।१३६॥ इत्यादिना इष्णुच् । २ उद् ऊर्ध्वं पतति **उत्पतिता**, तृजन्तः । द्वे उत्पतिष्णोः । 'ऊडवा मतइ' इति भाषा ॥

## अलङ्करिष्णुस्तु मण्डनः ।

१ अलङ्करोतीत्येवंशीलः **अलङ्करिष्णुः** । 'डुकृञ् करणे'(त.उ.अ.), 'अलङ्कृञ्निराकृञ्प्रजनोत्पत-'३।२।१२६॥ इत्यादिना इष्णुच् । २ मण्डयतीत्येवंशीलो **मण्डनः** । 'मडि भूषायाम्'(भ्वा.प.से.), 'क्रुधमण्डार्थेभ्यश्च'३।२।१५१॥ इति युच् । द्वे अलङ्करिष्णोः ॥

## भविष्णुर्भविता भूष्णुः

१ भवति तच्छीलो **भविष्णुः** । 'भू सत्तायाम्'(भ्वा.प.से.), 'भुवश्च वा वाच्यः'[3]३।२।१३८॥इतीष्णुच् । २ भवतीत्येवंशीलो **भविता** । 'तृन्'३।२।१३५॥इति तृन् । ३ भवतीत्येवंशीलो **भूष्णुः**। 'ग्लाजिस्थश्च क्स्नुः'[4]३।२।१३९॥ सूत्रे चाद् 'भुवश्च'३।२।१८॥ इति स्नुः, 'श्र्युकः किति' ७।४।११॥ इत्यत्र गकारप्रश्लेषान्नेट् । त्रीणि भविष्णोः । 'अग्रे हुवणहार'[5] इति भाषा ॥

## समौ वर्तिष्णुर्वर्तनौ ॥३८९॥

१ वर्तत इत्येवंशीलो[6] **वर्तिष्णुः** । 'वृतु वर्तने'(भ्वा.-आ.से.), 'अलङ्कृञ्निराकृञ्-'३।२।१३६॥ इत्यादिना इष्णुच्। २ वर्तत इत्येवंशीलो **वर्तनः** । 'अनुदात्तेतश्च हलादेः'३।२।१४९॥ इति युच् । द्वे वर्तिष्णोः ॥३८९॥

## विसृत्वरो विसृमरः प्रसारी च विसारिणि ।

१ विसरतीत्येवंशीलो **विसृत्वरः** । 'सृ गतौ'(भ्वा.-प.अ.), 'इण्नश्जिसर्त्तिभ्यः क्वरप्'३।२।१६३॥ कित्त्वात् 'ह्रस्वस्य-'६।१।७१॥ इति तुक्। स्त्रियां विसृत्वरी, 'टिड्ढाणञ्-'४।१।१५॥ इति ङीप् । २ विसरतीत्येवंशीलो **विसृमरः**। 'सृ गतौ'(भ्वा.-प.अ), 'सृघस्यदः क्मरच्'३।२।१६०॥ । ३ प्रसरतीत्येवंशीलः **प्रसारी** । 'सृ गतौ'(भ्वा.प.अ.), 'प्रे लपसृ-'३।२।१४५॥ इति घिनुण् । ४ विसरणं विसारः, तद्योगादिनिः **विसारी**, तत्र । चत्वारि प्रसरणशीलस्य ॥

## लज्जाशीलोऽपत्रपिष्णुः

१ लज्जाशीलमस्य **लज्जाशीलः** । २ अपत्रपत इत्येवंशीलः **अपत्रपिष्णुः** । 'अलङ्कृञ्निराकृञ्-'३।२।१३६॥ इत्यादिना इष्णुच् । द्वे लज्जाशीलस्य ॥

## सहिष्णुः क्षमिता क्षमी ॥३९०॥

## तितिक्षुः सहनः क्षन्ता

१ सहत इत्येवंशीलः **सहिष्णुः** । 'अलङ्कृञ्निराकृञ्-'३।२।१३६॥इत्यादिना इष्णुच् । २ क्षमत इत्येवंशीलः **क्षमिता** । 'क्षमूष् सहने'(भ्वा.आ.वे.), 'तृन्'३।२।१३५॥ इति तृन्, 'आर्धधातुकस्य-'७।२।३५॥ इतीट् । ३ क्षमाऽस्याऽस्ति **क्षमी**। शिखादित्वादिनिः । क्षमत इति वा । 'शमित्यष्टाभ्यो घिनुण्'३।२।१४१॥ ॥३९०॥ ४ 'तिज निशाने क्षमायां च' (भ्वा.प.से.), 'गुप्तिज्किद्भ्यः सन्'३।१।५॥, 'सन्यङोः'६।१।९॥ इति द्वित्वम्, 'सन्यतः'७।४।७९॥ इतीत्वम्, 'व्रश्च-'८।२।३६॥ आदिना षत्वम्, 'सनाशंसि(शंस)भिक्ष उः'३।२।१६८॥ **तितिक्षुः**। ५ सहत इत्येवंशीलः **सहनः** । 'षह मर्षणे' (भ्वा.आ.से), 'अनुदात्तेतश्च-'३।२।१४९॥ इति युच् । ६ क्षमत इत्येवंशीलः **क्षन्ता** । 'क्षमूष् सहने'(भ्वा.आ.वे), 'तृन्' ३।२।१३५॥, ऊदित्वादिडभावे[10] रूपं । षट् सहनशीलस्य ॥

## तितिक्षा सहनं क्षमा ।

१ तितिक्ष्यते **तितिक्षा** । 'अः(अ) प्रत्ययात्'३।३।१०२॥ इति अः । २ सह्यते **सहनम्** । 'षह मर्षणे'(भ्वा.आ.से.), भावे ल्युटि । ३ क्षमणं **क्षमा** । 'क्षमूष् सहने'(भ्वा.आ.से.), 'षिद्भिदादिभ्योऽङ्'३।३।१०४॥ । त्रीणि क्षमायाः ॥

---

१. 'इष-' इति मा. धातुवृत्तिः ॥ २. तुलनीयोऽमरकोषः ३।१।२९॥ ३. 'भुवश्च' इत्येवाष्टाध्याय्याम् ॥ ४. 'क्सुः' इति ३.४॥, अत्र 'ग्स्नुः'इत्येव युक्तः, अन्यथा 'स्थास्नुः' इत्यत्र ईत्त्वं स्यात्, अत एवोक्तं सि.कौमुद्याम् '-गिदयं न तु कित्, तेन स्थ ईत्त्वं न' इति सि.कौ. पृ.५८८॥ ५. 'अग्रे हुणहार' इति १.३॥ ६. '-शीलः' इति १.२॥ ७. 'तुलनीयोऽमरकोषः ३।१।३१॥ ८. 'द्वे' इति १.३॥ ९. तुलनीयोऽमरकोषः ३।१।२८॥ १०. 'स्वरतिसृतिसूयतिधूञूदितो वा'७।२।४४॥ इत्यनेन वेट् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**ईर्ष्यालुः कुहनः**

१ ईर्ष्यते[1] **ईर्ष्यालुः** । 'ईर्ष्य असहने[2]'(भ्वा.प.से.), आलुच् । २ कुह्यते विस्मापयते **कुहनः** । 'कुह विस्मापने' (चु.आ.से.), 'अनुदात्तेश्च-'३।२।१४९॥ इति युच्, कुटादित्वाद् गुणाभावः । द्वे ईर्ष्यालोः ॥

**अक्षान्तिरीर्ष्या**[3]

१ न क्षान्तिः **अक्षान्तिः** । २ ईर्ष्यणम् **ईर्ष्या**, परसम्पत्त्यसहनम्, स्त्र्यादेः परदर्शनासहनं वा । 'ईर्ष्य ईर्ष्यायाम्' (भ्वा.प.से.), 'गुरोश्च हलः'३।३।१०३॥ इति अः । '' 'सूर्क्ष्य ईर्क्ष्य ईर्ष्य ईर्ष्यार्थाः'(भ्वा.प.से.), 'गुरोश्च हलः'३।३।१०३॥ इति अप्रत्ययः, ईर्क्ष्या, क्षकारमध्याऽपि''[ ]इति धातुवृत्तिः[4] । द्वे ईर्ष्यायाः । 'अदेखाई' इति भाषा ॥

**क्रोधी तु रोषणः ॥३९१॥**

**अमर्षणः क्रोधनश्च**

१ क्रुध्यति **क्रोधी** । 'क्रुध कोपे'(दि.प.अ.) । कोपी च । २ रुष्यतीत्येवंशीलो[5] **रोषणः** । 'रुष रोषे[6]'(दि.प.से.), 'क्रुधमण्डार्थेभ्यश्च'३।२।१५१॥ इति युच् ॥३९१॥ ३ न मर्षते[7] क्षमते **अमर्षणः** । 'मृष तितिक्षायाम्'(दि.उ.से), नन्द्यादित्वाद् ल्युः 'क्रुधमण्डार्थेभ्यश्च'३।२।१५१॥ इति युच् वा । ४ क्रुध्यति **क्रोधनः** । 'क्रुध कोपे'(दि.प.अ.), 'क्रुधमण्डार्थेभ्यश्च'३।२।-१५१॥इति युच् । चत्वारि कोपवतः ॥

**चण्डस्त्वत्यन्तकोपनः[8] ।**

१ चण्डते **चण्डः** । 'चडि कोपे'(भ्वा.आ.से.), पचाद्यच्, 'इदितो नुम् धातोः'७।१।५८॥ । चणति शब्दायते वा । 'चण शब्दे[9]'(भ्वा.प.से.), 'अमन्ताड्डः'(उणा-१११) । २ 'कुप कोपे'(चु.प.से.), 'क्रुधमण्डार्थेभ्यश्च'३।२।१५१॥ इति युचि कोपनः । द्वेऽतिकोपनस्य ॥

**बुभुक्षितः स्यात् क्षुधितो जिघत्सुरशनायितः ॥३९२॥**

१ भोक्तुमिच्छा बुभुक्षा, सा सञ्जाताऽस्य **बुभुक्षितः** । तारकादित्वादितच् । २ क्षुध्यति[10] स्म **क्षुधितः** । 'क्षुध बुभुक्षायाम्'(दि.प.अ.), निष्ठा । क्षुत् सञ्जाताऽस्येति तारकत्वादितच् वा । ३ अत्तुमिच्छुः[11] **जिघत्सुः** । 'अद भक्षणे'(अ.प.अ.), 'धातोः कर्मणः समानकर्तृकात्-'३।१।७॥ इति सन्, 'लुङ्सनोर्घस्लृ'२।४।३७॥, 'सन्यङोः'६।१।९॥ इति द्वित्वम्, 'सन्यतः' ७।४।७९॥ इतीत्वम्, 'सा[:] स्यार्धधातुके'७।४।४९॥ इति सस्य तत्वम्, 'सनाशंसभिक्ष उः'३।२।१६८॥ । ४ अशनाया सञ्जाताऽस्य **अशनायितः** । तारकादित्वादितच्, 'अशनायोदन्य-[धनाया]बुभुक्षापिपासा-'७।४।३४॥ इति साधुः । चत्वारि बुभुक्षितस्य ॥३९३॥

**बुभुक्षायामशनाया जिघत्सा रोचको रुचिः ।**

१ भोक्तुमिच्छा **बुभुक्षा**, तस्याम् । २ अशनस्येच्छा[12] **अशनाया** । 'अशनायोदन्य[धनाया] बुभुक्षापिपासा-'७।४।३४॥ इति निपातनात् साधुः । ३ अत्तुमिच्छा **जिघत्सा** । 'अद भक्षणे' (अ.प.अ.), 'धातोः कर्मणः-'३।१।७॥ इति सन्, 'लुङ्सनोर्घस्लृ'२।४।३७॥, 'सन्यङो'६।१।९॥ इति द्वित्वम्, 'सन्यतः' ७।४।७९॥इतीत्वम्, 'स[:] स्यार्धधातुके'७।४।४९॥ इति सस्य तत्वम् । ४ रोचनम्, रोचतेऽस्मिन् वा **रोचकः**, पुंक्ली. । ''रोचकोऽस्त्री''[ ]इत्यमरः[13] । 'रुच दीप्तौ'(भ्वा.आ.से.) । ५ रोचनं **रुचिः**, स्त्रीलिङ्ग: । 'इगुपधात् कित्'(उणा-५५९)इतीन् । पञ्च बुभुक्षायाः । ''क्षुधाक्षुधौ''[शेषनाममाला३।१५॥]शैषिके॥

**पिपासुस्तृषितस्तृष्णक्**

१ पातुमिच्छुः **पिपासुः** । 'पा पाने'(भ्वा.प.अ.), 'धातो कर्मणः-'३।१।७॥ इति सन्, 'सन्यङो'६।१।९॥ द्वित्वम्, 'सनाशंसभिक्ष उः'३।२।१६८॥ । पिपासितोऽपि । २ तृष्यति **तृषितः** । 'ञितृषँ[14] पिपासायाम्'(दि.प.से.), ञीत्त्वं वर्तमाने क्तार्थम्, तेन 'ञीतः क्तः'३।२।१८७॥ इति क्तः । तृट् सञ्जाताऽस्येति तारकादिर्वा । तृषितमस्यास्तीत्यर्शआदिभ्योऽचि वा । तर्षितोऽपि । ३ तृष्यतीत्येवंशीलः **तृष्णक्** । 'ञितृषँ पिपासायाम्'(दि.प.से.), 'स्वपितृषोर्नजिङ्[15]'३।२।१७२॥ । तृष्णजौ, तृष्णजः इत्यादि । त्रीणि तृषितस्य ॥

**तृष्णा तर्षोऽपलासिका ॥३९३॥**

**पिपासा तृट् तृषोदन्या धीतिः पाने**

१ तर्षणं **तृष्णा** । 'ञितृष पिपासायाम्'(दि.प.से.), दिवादिः, 'तृषिसुसि(शुषि)रसिभ्यां(भ्यः) कित्'(उणा-२९२)इति नः[16] । २ तर्षणं **तर्षः** । भावे घञ्, उपधागुणः । ३

---

१. इतोऽग्रे ३प्रतौ 'इति' इति दृश्यते ॥ २. 'सूर्क्ष्य ईर्क्ष्य ईर्ष्य ईर्ष्यार्थाः' इति क्षीरतरङ्गिण्यादौ ॥ ३. तुलनीयोऽमरकोषः १।७।२४॥ ४. मा. धातुवृत्तौ-''ईर्ष्या-'गुरोश्च हलः' इत्यकारप्रत्ययः'' इत्येव दृश्यते, मा. धातुवृत्तिः, भ्वादिः, धातुसं-३३२, पृ.१४४॥ ५. 'रुष-' इति१ ॥ ६. 'क्रोधे' इति १.२.३॥ ७. अत्र 'मृष्यते-ति' इति युक्तः, दिवादेर्मृषधातोरुभयपदित्वात् ॥, अथवा चुरादेः 'मृष तितिक्षायाम्' इत्यस्य 'आ धृषाद्वा' इत्यनेन णिजभावपक्षे 'मर्षति' इति युक्तः ॥ ८. तुलनीयोऽमरकोषः३।१।२०॥ ९. 'चण श्रण दाने' इति क्षीरतरङ्गिण्याम्, 'चण शण श्रण दाने च' इति मा. धातुवृत्तौ ॥ १०. 'क्षुध्यते' इति३ ॥ ११. '-मिच्छति' इति१ ॥ १२. 'अशनेच्छा' इति १ ॥ १३. अमरकोषे न दृश्यते ॥ १४. 'ञितृषा' इति १.२.३॥ १५. 'स्वप-' इति३ ॥ १६. 'नप्रत्ययः' इति १, 'नः प्रत्ययः' इति२ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपकृष्टं लसत्यनया **अपलासिका** । 'लस श्लेषणे[1]'(भ्वा.प.से.), ण्वुल् ॥३९३॥ ४ पातुमिच्छा **पिपासा** । ५ तर्षणं **तृट्** । 'ञितृष पिपासायाम्'(दि.प.से.), सम्पदादित्वात् क्विप् । ६ "आपं चैव हलन्तानाम्"[भागुरिकृतकारिका]इति टापि **तृषा** । ७ उदकं पातुमिच्छा **उदन्या** । 'अशनायोदन्य-'७।४।३४॥ इति साधुः । ८ धयनं **धीतिः**। 'धेट् पाने'(भ्वा.प.अ.), 'स्त्रियां क्तिन्' ३।३।९४॥, 'घुमास्था-'६।४।६६॥ इतीत्वम् । ९ पीयते **पानम्**। 'पा पाने'(भ्वा.प.अ.), ल्युट्, तत्र । नव तृष्णायाः ॥

## अथ शोषणम् ।

**रसादानम्**

१ शुष्यते **शोषणम्**। 'शुष्(शुष) शोषणे'(दि.प.अ.), ल्युट् । २ रसानामादानं **रसादानम्** । द्वे शोषणस्य । 'शोषिवउं[2]' इति भाषा ॥

**भक्षकस्तु घस्मरोऽद्मर आशितः ॥३९४॥**

१ भक्षयति **भक्षकः** । 'भक्ष भक्षणे'(चु.प.से.), ण्वुल्, 'क्वुन् शिल्पिसंज्ञयोः-'(उणा-१९०)इति क्वुन् वा । २ घसतीत्येवंशीलः **घस्मरः** । 'घस्लृ[3] अदने'(भ्वा.प.अ.) । ३ अत्तीत्येवंशीलः **अद्मरः** । 'अद भक्षणे'(अ.प.अ.), उभयत्र 'सृघस्यदः क्मरच्'३।२।१६०॥ । ४ आ समन्ताद् अश्नाति **आशितः**। 'अश भोजने'(क्र्या.प.से.) अस्मात् क्तः । आशिरोऽपि। चत्वारि भक्षकस्य। 'खाणहार' इति भाषा॥३९४॥

**भक्तमन्नं कूरमन्धो भिस्सा दीदिविरोदनम्[4] ।**
**अशनं जीवनकं च याजो वाजः प्रसादनम् ॥३९५॥**

१ भज्यते नित्यं सेव्यते **भक्तम्** । 'भज सेवायाम्' (भ्वा.उ.अ.), कर्मणि क्तः । २ अद्यत **अन्नम्** । 'अद भक्षणे' (अ.प.अ.), निष्ठा, 'रदाभ्याम्-'८।२।४२॥इति नत्वम् । अनित्यनेनेति वा । 'अन प्राणने'(अ.प.से.), 'कृवृजि(जृ)सि-' (उणा-२९०)इति नः । ३ कौत्यनेन **कूरम्**, पुंक्ली.। 'कु शब्दे' (अ.प.अ.), बाहुलकाद् रक्दीर्घौ । ४ अद्यते भक्ष्यत **अन्धः**। 'अद भक्षणे'(अ.प.अ.), 'अदेर्नुम् धश्च[5]'(उणा-६४५)इत्यसुन्। अन्धसी, अन्धांसि इत्यादि क्लीबे । अनिति प्राणित्यनेनेति वा। 'अन प्राणने'(अ.प.अ.), असुन्, बाहुलकाद् धः । ५ भ्यस्यते भक्ष्यते **भ्यसः, ( भिस्सा )** । धातूनामनेकार्थत्वाद् भक्षणार्थता। 'भ्यस भये'(भ्वा.आ.से.), 'भ्यसेः सम्प्रसारणं सश्च[6]'( )इति सप्रत्यये भिस्सा । यद्वा 'प्सा भक्षणे[7]'(अ.प.अ.), अभि सर्वतः प्सीयते भक्ष्यते, अभिपूर्वात् 'प्सा भक्षणे'(अ.प.अ.)इत्यस्माद् 'आतश्चोपसर्गे'३।३।१०६॥ अङ्, नैरुक्तोऽभेरादिलोपः[8], पकारस्य च सकारः । ६ दीव्यन्ति क्रीडन्त्यवहरन्ति द्योतयन्त्यनेन **दीदिविः**, पुंसि । "भिस्सा स्त्री दीदिविर्न[9] षण्"[वैजयन्तीकोषः ४।३।७६॥]इति वैजयन्ती स्त्रियामप्याह । न षण् न षण्ढ इत्यर्थः । 'दिवु क्रीडादौ'(दि.प.से.), 'दिवो द्वे दीर्घश्चाभ्यासस्य' (उणा-४६५)इति क्विन्, [द्वित्वादिकं च]" [[10]]इति व्याख्यामृतम्। ७ उनत्ति क्लिद्यति **ओदनम्[11]**। 'उन्दी क्लेदने'(रु.प.से.), 'उन्देर्नलोपश्च'(उणा-२३४)इति युच् । ८ अश्यत इति **अशनम्**। 'अश भोजने'(क्र्या.प.से.), ल्युट् । ९ जीव्यतेऽनेन जीवनम्। 'जीव प्राणधारणे'(भ्वा.प.से.), करणे ल्युट्, स्वार्थे कनि **जीवनकम्** । १० इज्यतेऽनेनेति **याजः** । 'यज देवपूजादौ' (भ्वा.उ.अ.), 'प्रयाजानुयाजौ-'७।३।६२॥ इत्यत्र 'अन्यत्राऽपि स्यात्'( )इति यज्ञाङ्गे घञि 'चजोः कु घिण्ण्यतोः'७।३।५२॥ इति प्राप्तकुत्वस्याभावः। ११ वज्यते संस्क्रियते **वाजः** । 'वज संस्कृतौ[12]'(भ्वा.प.से.), घञ् । १२ प्रसाद्यतेऽनेन **प्रसादनम्**। 'षद्लृ विशरणादौ'(भ्वा.तु.प.अ.), णिजन्तः, ततः करणे ल्युट् । द्वादश कूरस्य ॥३९५॥

**भिस्सटा दग्धिका[13]**

१ कुत्सिता भिस्सा **भिस्सटा**, लक्ष्यानुरोधाट्टे ह्रस्वत्वं च । यथा-ओदनभिस्सटा, ग्रामटी, वधूटीत्यादिषु । २ कुत्सिता दग्धा **दग्धिका** । दहेः क्तः दग्धा, ततः संज्ञयां कन् । दग्धौदनस्य । '[14]ऊखराडि' इति भाषा ॥

## सर्वरसाग्रं मण्डम्

१ सर्वरसानां द्रवद्रव्याणामग्रं मुख्यं मण्डयति **मण्डम्**, पुंक्ली. । 'मडि भूषायाम्'(चु.उ.से.), पचाद्यच् । "सर्वरसाग्रे मण्डमस्त्रियाम्"[अमरकोषः २।९।४९॥]इत्यमरः। श्रीधरोऽपि- "([15]सारे पिच्छायां मण्डोऽस्त्री) पुमानेरण्डभूषयोः[16])।

---

१. 'लस श्लेषणक्रीडनयोः' इति क्षीरतरङ्गिण्यादौ॥ २. 'शोषवो' इति ३, 'शोषवउं' इति ४॥ ३. 'घसृ' इति १.२.३॥ ४. '-दनः' इति २॥ 'भक्तमन्धोऽन्नमोदनोऽस्त्री'[अमरकोषः २।९।४८॥]इत्यमरोक्त्या ओदनशब्दः पुंक्लीबलिङ्गे वर्तते ॥ ५. 'अदेर्नुम्धौ च' इत्युणादिगणे ॥ ६. नैतादृक् सूत्रं दृश्यते, परं तु अस्योल्लेखो रामाश्रमीकारेण मुकुटमतमुट्टङ्क्य कृतः, द्र. रामाश्रमी २।९।४८॥, पृ.४२३॥ ७. धातुपाठोल्लेखोऽत्राऽनावश्यकः, वक्ष्यमाणत्वात् ॥ ८. '-ऽभरादि-' इति २॥ ९. 'दिदि-' इति वैजयन्त्याम् ॥ १०. 'द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-६२१, पृ.७१३॥ ११. 'ओदनः' इति २.३॥ १२. 'वज व्रज गतौ' इति क्षीरतरङ्गिण्यादौ ॥ १३. तुलनीयोऽमरकोषः२।९।४९॥ १४. 'उखं-' इति ३॥ १५. 'कोष्ठान्तर्गतपाठस्थाने विश्वलोचनकोशे 'सारे पिच्छेऽपि मण्डेऽस्त्री' इति पाठो दृश्यते ॥ १६. '-भूषणयोः' इति ३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मण्डा धात्र्य[1]मथो मण्डं शाकभेदे च मस्तुनि ॥१॥"

[विश्वलोचनकोशः, शब्दवर्गः, डान्तवर्गः, श्लो-२१] इति लिङ्गनिर्णयमर्थभेदं चाह । "सारं भक्तादिनिर्यासः, पिच्छा द्रवद्रव्याणामुपरि अत्थोभोगः, मस्तु दधिजम्"[ ]इति तट्टीका। सामान्यत एकं मण्डस्य । मांडउ[2]सावरणतरीवरिइत्यादिकाः पृथक् पृथग्भाषाः ॥

अथ तमेव विशेषादाह-

**अत्र तु ।**

**दधिजे मस्तु**

१ अत्रेति मण्डे, दधिजे दध्युत्पन्ने, मस्यति परिणमते **मस्तु**, क्लीबे । 'मसी परिणामे'(दि.प.से.), 'सितनिगमिमसिसच्यविधाञ्कृ(क्रु)शिभ्यस्तुन्'(उणा-६९) । "दध्नस्तु यदधस्तोयं तन्मस्तु च निगद्यते"[ ]इति धन्वन्तरिः । एकं दधिमूलजस्य । 'दहीनीं आछि[3]' इति भाषा ॥

**भक्तोत्थे निःस्रावाचाममासराः ॥३९६॥**

१ भक्तोत्थे भक्तसमुद्भवे मण्डे निःस्राव्यते **निःस्रावः**। निपूर्वः, 'स्रु गतौ'(भ्वा.प.अ.), अस्माण्णिजन्तात् कर्मण्येरच् । २ आचाम्यते **आचामः** । 'चमु अदने'(भ्वा.प.से.), अस्मादाङ्पूर्वाद् भक्षणार्थत्वात् कर्मणि घञ्, आङ्पूर्वत्वाद् 'नोदात्तोपदेश-'७।३।३४॥ इति वृद्धिनिषेधो न । ३ मस्यति[4] परिणमते **मासरः** ।'मसी परिणामे'(दि.प.से.), णिजन्तादस्माद् 'उञ्छेररन्'( )इति बाहुलकादरन्, णिलोपः । त्रीणि भक्तमण्डस्य । 'उसावण' इति भाषा । ["प्रस्रावः, प्रस्रवः, आच्छोदनम्, आश्रवः"[शेषनाममाला३।९६॥]इति] ॥३९६॥

**श्राणा विलेपी तरला यवागूरुष्णिकाऽपि च ।**

१ श्रायते स्म **श्राणा** ।'श्रा पाके'(अ.प.अ.), निष्ठा, 'संयोगादेरातो धातोर्यण्वतः'८।२।४३॥इति नत्वम् । २ विलिम्पति[5] **विलेपी** ।'लिप उपदेहे'(तु.उ.अ.), पचाद्यच्, गौरादित्वाद् ङीप् (ङीष्) । ३ तरति व्याप्नोति **तरला** ।'तृ प्लवनतरणयोः'(भ्वा.प.से.), 'मङ्गेरलच्'(उणा-७४८)इति बाहुलकादतोऽपि ४ यूयते पिष्प(पिप्प)ल्यादिना, यौति मिश्रीभवति धान्यद्वयेन वा **यवागूः** । 'यु मिश्रणे'(अ.प.से.), 'सु(सृ)युवचिभ्योऽन्युजागूजकृ(क्नु)चः'(उणा-३६१)इत्यागूः प्रत्ययः। ५ उष्णा दग्नेरचिरोद्धृता **उष्णिका**। 'ब्राह्मणकोष्णिके संज्ञायाम्' ५।२।७१॥ कनि उष्णिकेति निपात्यते । पञ्च खीचडीति ख्यातायाः । तथा च पथ्यापथ्यकारः-"खिच्चाख्या तु यवागूः स्यात् कृता तण्डुलशिम्बिजैः"[ ]इति । मदनपालस्तु-

"यवागूः षड्गुणे तोये संसिद्धा तरला द्रवा[6-1] ।
चतुर्गुणाम्बुसंसिद्धा[6-2] विलेपी घनसिक्थका[6-3] ॥१॥
पेया सिक्थान्वितातोये चतुर्दशगणे[6-4] कृता ।"

[मदनपालनिघण्टुः, धान्यकृतान्नादिवर्गः-११, श्लो-९-१०, पृ. २३४]इति विशेषमाह ।तद्गुणाश्च-

"यवागूर्ग्राहिणी तृष्णाज्वरघ्नी बस्तिशोधनी ।
विलेपी दीपनी बल्या हृद्या संग्रहिणी लघुः ॥२॥
व्रणाक्षिरोगिणां पथ्या तर्पणी तृट्ज्वरापहा ।
पेया कु[6-5]क्षिगुदक्लान्तिज्वरस्तम्भातिसारजित् ॥३॥
रुच्याग्निकृल्लघुर्दोषमलस्वेदाभिलोपनी[6-6] ॥"

[मदनपालनिघण्टुः, धान्यकृतान्नादिवर्गः-११, श्लो-११-१३]इति वैद्यकग्रन्थोक्तास्त्वन्ये भेदा ग्रन्थभूयस्त्वभयादत्र नोक्ताः ॥

**सूपः स्यात् प्रहितं सूदः**

१ सुन्वन्त्येनं **सूपः** । 'षुञ् अभिषवे'(स्वा.उ.अ.), 'कुसुयुभ्यश्च'(दशपाद्युणादिगणः७।५॥) पः किद् दीर्घत्वं च धातोः, पुंस्ययम् । क्लीबेऽपि वैजयन्ती, यदाह-"सूपोऽस्त्री प्रहितं सूदः"[वैजयन्तीकोषः ४।३।८६॥]इति । २ प्रकर्षेण हितं **प्रहितम्** । ३ सूद्यते **सूदः** । 'षूद प्रेरणे[7]'(भ्वा.आ.से.), घञ् । त्रीणि सूपस्य । 'दालिपहति[8]' इत्यादि भाषा ॥

**व्यञ्जनं तु घृतादिकम् ॥३९७॥**

१ व्यज्यते रसविशेषाऽत्रेति **व्यञ्जनम्** । 'अञ्जू [व्यक्ति]म्रक्षणादौ'(रु.प.वे.), 'करणाधिकरणयोः-'३।३।११७॥ इत्यधिकरणे ल्युट् । घृतमादि[9] मुख्यं यस्य तद् घृतादिकम् । एकं सामान्यतस्तैलदधिदुग्धतक्रादीनाम् ॥३९७॥

**तुल्यौ तिलान्ने कृसरत्रिसरौ**

१ तिलैर्मिश्रितमन्नं तिलान्नम्, तत्र । क्रियते पर्वणीति **कृसरः** ।'डुकृञ् करणे'(त.उ.अ.) 'कृधूमदिभ्यः कित् सरन्[10]' (उणा-३४३)इति सरन् । २ त्रीन् सरति **त्रिसरः**, पुंस्त्रीलिङ्गौ। क्लीबेऽपि वैजयन्ती, यदाह-"तिलतन्दुलमाषैस्तु कृसरा[11] त्रिसरा

१. 'धात्र्यां' इति ३॥ २. 'मांडो' इति ३॥ ३. 'आछ' इति ३॥ ४. 'मस्यते' इति ३॥ ५. 'विलम्पति' इति ३.४॥ ६-१ 'विदलद्रवा' इति, ६-२ 'चतुर्गुणे तु संसिद्धा' इति, ६-३ '-सिक्थिका' इति, ६-४ '-गुणीकृता' इति, ६-५ 'कुक्षिगद-' इति, ६-६ '-लोमनी' इति च मदनपालनिघण्टौ, पृ.२३४॥ ७. 'षूद क्षरणे' इति क्षीरतरङ्गिण्यादौ ॥ ८. '-पहित' इति ३॥ ९. 'दिकं-' इति ३॥ १०. उणादिसूत्रे नास्ति ॥ ११. 'कृशरा' इति ४, "त्रिसरा कृसरा" इति वैजयन्त्याम् ४।३।७९॥, पृ.१२१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्रयी''[वैजयन्तीकोष ४।३।७९॥]इति ।'सृ गतौ'(भ्वा.-प.अ.), पचाद्यच् । द्वे कीसरीति ख्यातायाः ॥

### अथ पिष्टकः[1]

### पूपो[2]ऽपूपः[3]

१ पिष्टस्य विकारः **पिष्टकः** ।'पिष्टाच्च'४।३।१४७॥, 'संज्ञायां कन्'४।३।१४८॥ इति कन् । २ पिष्टं तण्डुलादिचूर्णं पुनाति **पूपः** ।'पूञ् पवने'[1](क्र्या.उ.से.), 'नीपादयश्च'(कातन्त्रोणा-२।११६)इति पः, स च कित् । यद्वा पूयते पूपः, पुंक्ली.। 'पूयी विशरणे'(भ्वा.आ.से.), 'नीपादयश्च'(कातन्त्रोणा-२।११६)इति पः, 'वलि लोपः'[2]६।१।६६॥ इति यलोपः । ३ आप उप्यन्तेऽत्रेति **अपूपः** । अप्शब्दे उपपदे वपेर्घञर्थे कः, यजादित्वात् सम्प्रसारणम्, 'अन्येषामपि-'६।३।१३७॥ इति दीर्घः। अश्नुत इति वा अपूपः ।'अश भोजने'(क्र्या.प.से.) 'अश ऊपः पश्च'(हैमोणा-३१२)इत्यूपः[3]।''अद्भिरुप्यते''[4] इति नैरुक्ताः। त्रीणि 'पूडा' इति ख्यातस्य ।''पारिशालः[5]'' [शेषनाममाला ३।९६॥]इति शैषिकम् ॥

### पूलिका[1] तु पोलिका[2]पोलि[3]पूपिकाः[4] ॥३९८॥ पूपली[5]

१ पूलति संहतीभवति **पूलिका**, षष्ठस्वरादिः। 'पूल सङ्घाते'(भ्वा.प.से.), ण्वुल्, 'प्रत्ययस्थात्-'७।३।४४॥इतीत्वम्। २ पोलति वर्धते **पोलिका** ।'पुल महत्त्वे'(भ्वा.प.से.), ण्वुल्, 'पुगन्तलघूपधसस्य'७।३।८६॥इति गुणः,'प्रत्ययस्थात्-'७।३।४४॥ इतीत्वम् । ३ पोल्यते वर्ध्यते **पोलिः**।'पुल महत्त्वे'(भ्वा.प.से.),'इन् सर्वधातुभ्यः'(उणा-५५७) ।'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि पोली । ४ ह्रस्वः पूपः **पूपिका** । ह्रस्वार्थे कपि 'केऽणः'७।४।१३॥ इति ह्रस्वत्वम् ॥३९८॥ ६ पूयते **पूपली** । बाहुलकात् कलचि पृषोदरादित्वात्। अग्रेतनात् किञ्चित् स्थूलेयम्। पञ्च पूलिकायाः। रोटीति भाषा॥

### अथेषत्पक्वे स्युरभ्यूषा[1]भ्योष[2]पौलयः[3] ।

१ ईषत्पक्वम् ईषद्भ्रष्टम्, तत्र । अभ्यूष्यते अभिमुखं दह्यते **अभ्यूषः** ।'उष दाहे'(भ्वा.प.से.), घञर्थे कः, नैरुक्तो दीर्घः ।'ऊष रुजायाम्'(भ्वा.प.से.)इत्यतो वा कः, षष्ठस्वरमध्योऽयम् ।''तोक्मो हरितो यवोऽभ्युषः''[6]इति वोपालिताद् ह्रस्वमध्योऽपि । २ अभ्युष्यते पच्यते **अभ्योषः** ।'उष दाहे' (भ्वा.प.से.), 'पुगन्तलघूपधस्य च[7]'७।३।८६॥ इति गुणः । ३ पोलति वर्धते **पौलिः**[8] ।''पुल महत्त्वे(भ्वा.प.से.), इगुपधत्वात् कः[9]।'पुल सङ्घाते'( ) वा, घञर्थे कः पुलः, ततस्तेन निर्वृत्तमित्यर्थे सुतङ्गमादित्वादिञ्, 'तद्धितेष्वचामादेः'७।२।१-१७॥ इति वृद्धिः। त्रीणि मण्डकस्य । 'पातला मांडा, पातली र ोटी' इत्यादिभाषा[10]। सूक्ष्मोऽयम्, यदाह मदनपालः-

(कुकूलकर्परभ्राष्ट्रकट्वागारविपाचिताः)[11] ।
मण्डकाद्या यथापूर्वं गुरवो बृंहणा मताः ॥१॥
मण्डको विश्रुतः[12] सूक्ष्मः कर्प(कर्पू)रादिषु पाचितः ।
स एव किञ्चित्स्थूलस्तु बुधैः पूपलिका मता ॥२॥
अङ्गारकर्कटी सैव विज्ञेयाङ्गारपाचिता ।''

[मदनपालनिघण्टुः, धान्यकृतान्नादिवर्गः-११, श्लो-५०-५२, पृ. २४१]इति । पूलिकाद्याः पञ्च स्थूलमण्डकपर्यायाः, स्थूलरोटी इत्यादिभाषा । अभ्यूषाद्यास्त्रयः सूक्ष्ममण्डकपर्यायाः, 'पातली रोटी, पातला भाण्डा' इत्यादिभाषा । पथ्यापथ्यकारोऽपि तथैव-

''स्युर्मण्डका मण्डलिनः कर्परादिषु पाचिताः ।
महान्तो विश्रुताः सूक्ष्मा लघवो लम्बकाश्च ते ॥२॥
किञ्चित्स्थूला भवेयुश्च तेभ्यः पूपलिकाः स्मृताः ।
सैवाङ्गारेषु संपक्वा वेज्ञेयाङ्गरकर्कटी ॥३॥''[ ]इति।

अङ्गारकर्कटीशब्दो 'रोटओं[13]' इति प्रसिद्धस्य भाषा ॥

### निष्ठानं[1] तु तेमनं[2] स्यात्

१ निरन्तरं स्थीयतेऽत्र भोक्त्रेति **निष्ठानम्** । अधिकरणे ल्युट् । २ तिम्यते आर्द्रीक्रियतेऽन्नमनेनेति **तेमनम्** । 'तिम ष्टिम आर्द्रीभावे'(दि.प.से.), करणे ल्युट् । द्वे तेमनस्य । 'सालणउं[14]' इति भाषा ॥

### करम्भो[1] दधिसक्तवः[15] ॥३९९॥

१ केन जलेन रभति (रभते) शब्दायते **करम्भः** । 'रभ शब्दे[16]'(भ्वा.आ.अ.), पचाद्यच्, 'रभेरशब्लिटोः'७।३।६३॥ इति नुम् । केन जलेन रभ्यते मील्यते वा । कर्मणि घञ्। करोति तृप्तिमिति वा ।'कृकलेरम्भः'(हैमोणा-३३६)इत्यम्भः। करम्ब इति, ''बकारोपधस्तु मिश्रमात्रवचनः''[17]इति सुभूतिः। २ 'षच समवाये'(भ्वा.उ.से.), 'सितनिगमि-'(उणा-६९)इति

---

१. १.२.४ नास्ति ॥ २. 'लोपो व्योर्वलि'६।१।६६॥ इत्यष्टाध्याय्याम् ॥ ३. 'इत्यूः' इति ३॥ ४. द्र. स्वोपज्ञटीका ३।३९८॥, पृ.९२॥ ५. 'पारिशोलः' इति शेषनाममालासवोपज्ञटीकयोः ॥ ६. 'द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-६२०, पृ.७०९॥, रामाश्रमी २।९।४७॥, पृ.४२२॥ ७. 'च' इति १.३ नास्ति ॥ ८. 'पोलिः' इति १॥ ९. '-पधात्' इति १.३॥ १०. 'इति' इति १॥ ११. कोष्ठान्तर्गतपाठस्थाने मदनपालनिघण्टौ ''विकोलकर्कटद्राक्षाकण्टकारिविपाचिताः'' इति दृश्यते, मदनपालनिघण्टुः, पृ.२४१॥ १२. 'सूचितः' इति मदनपालनिघण्टौ ॥ १३. 'रोटो' इति ३॥ १४. '-णो' इति ३, '-णौ' इति ४॥ १५. तुलनीयोऽमरकोषः २।९।४८॥ १६. द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-६२१, पृ.७१२॥ १७. क्षीरतरङ्गिण्यादौ शब्दार्थकरभधातुर्न दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तुन् सक्तुः, दध्युपसिक्ताः सक्तवो **दधिसक्तवः**। 'अन्नेन व्यञ्जनम्' २।१।३४॥ इति समासः। द्वे 'करम्ब' इति ख्यातस्य। "करम्बः" [इति शेषनाममाला ३।९६॥]इति शैषिकम् ॥**३९९**॥

**घृतपूरो घृतवरः पिष्टपूरश्च घार्त्तिकः ।**

१ घृतेन पूर्यते **घृतपूरः**। 'पूरि आप्यायने'(दि.आ.से.), कर्मणि घञ् । २ घृतेन वरो **घृतवरः** । ३ पिष्टेन पूर्यते **पिष्टपूरः**। घञ् । ४ घृतेन संसृष्टो **घार्त्तिकः** । 'संसृष्टम्'[1] ४।४।२२॥ इति ठक् । द्विविधोऽयम्, यन्मदनः-

"क्षीरेण मर्दितं चूर्णं गोधूमानां सुगालितम् ।
विस्तार्य सर्पिषा पक्वं(युक्तं) ततः श्वेताविमिश्रितम् ॥१॥
घृतपूरोऽयमुद्दिष्टः कर्पूरमि(म)रिचान्वितः ।
समिता मर्दिता क्षीरनालिकेरसितादिभिः ॥२॥
अवगाह्य घृते पक्वो(पक्वे) घृतपूरोऽपरः स्मृतः।"

[मदनपालनिघण्टुः, धान्यकृतान्नादिवर्गः-११, श्लो-६२-६४, पृ.२४३]इति । चत्वारि घृतपूरस्य ॥

**चमसी पिष्टवर्त्तिः स्यात्**

१ चम्यत इति **चमसी,** स्त्रीलिङ्गः । 'चमु अदने' (भ्वा.प.से.), 'अत्यविचमितमिरभिलभिनभिपनिपतिभ्योऽसच्'[2] (उणा-३९७), गौरादित्वाद् ङीष्[3]। गौडस्तु "चमसः पिष्टवर्त्तिः स्यात्"[[4] ]इति पुंस्यप्याह । चमस[:] पिष्टम्, "चमसी मुद्गादिभित्रकृता"[स्वोपज्ञोणादिगणसूत्रविवरणम्-५६९, धातुपारायणम्, भ्वादिः, धातुसं-३८०]इति हैमोणादिधातुपारायणयोः। सामान्यतश्चमसीशब्दो वडी ईडरीत्यनयोरपि नाम । "गृध्रसी चमसी मसी"[अमरकोषः ३।५।१०॥]इत्यमरस्त्रीलिङ्गशेषः। "चमसी मसूरादिपिष्टम्"[अम.क्षीरस्वामिटीका ३।५।१०॥]इति क्षीरस्वामी। तेन चमसीशब्दो लोकोक्त्या मसूरमुद्गादिवाचकोऽपि। २ मुद्गादीनां पिष्टस्य वर्त्तिः **पिष्टवर्त्तिः**। द्वे सामान्यतः 'सेवगांठिया' इति ख्यातस्य ॥

**वटकस्त्ववसेकिमः ॥४००॥**

१ वट्यते वेष्ट्यते **वटकः**, पुंन[6]. । 'वट वेष्टने' (भ्वा.प.से.), संज्ञायां क्वुन् । यद्वा वटतीति वटः, ततः स्वार्थे कन् । २ अवसेकेन निर्वृत्तः **अवसेकिमः** ।'भावप्रत्ययान्तान्निवृत्तेऽर्थे इमन् वाच्यः'[7](वा-४।४।२०॥)। द्वे 'वडां'[8] इति ख्यातस्य। यन्मदनः-"मासमुद्गादिपिष्टोत्था वटिकावटकादयः"[9] [मदनपालनिघण्टुः, धान्यकृतान्नादिवर्गः-११,श्लो-८७, पृ.२४७] इति । शेषश्चात्र-

"इण्वैरिका[10] तु वटिका शष्कुली त्वर्धलोटिका ।
पर्पटास्तु मर्मराला घृताण्डी तु घृतोषणी[11] ॥
समिताखण्डाज्यकृतो मोदको लड्डुकश्च सः ।
एलामरिचादियुतः स पुनः सिंहकेसरः ।" [शेषनाममाला ३।९७-९८॥]॥**४००**॥

**भृष्टा यवाः पुनर्धानाः**

१ धीयन्ते प्राणिनो यासां विकारैस्ता **धानाः**, स्त्रियां बहुवचनान्तोऽयम् ।'डुधाञ् धारणादौ'(जु.उ.से.), 'धृ[12](धा)-पृवस्यज्यतिभ्यो नः'(उणा-२८६) । "धाना भृष्टयवादिजाः" [ ]इति मदनः । एकं धाणीति[13] ख्यातायाः ॥

**धानाचूर्णं तु सक्तवः ।**

१ ([14]व्याख्यास्थिता सच्यन्ते **सक्तवः**, पुंक्ली. । एकवचनान्तोऽप्ययम् ।'षचि सेवने'(भ्वा.आ.से.), 'कृसिकमि-' (हैमोणा-७७३)इति तुन् । धानानां चूर्णम्, तस्य नामैकम् )॥

**पृथुकश्चिपिटस्तुल्यः**

१ प्रथते[15] मुसलप्रहारेण विस्तारं गच्छति **पृथुकः**। 'प्रथ विस्तारे[16]'(भ्वा.आ.से.), 'अर्भकपृथुकपाकाः-'(उणा-७३१)इत्युकप्रत्ययसम्प्रसारणगुणाभावा निपात्यन्ते। २ 'निर्बिडच्-'५।२।३२॥इत्यनुवृत्तौ 'इल(इन)च्पिटच्चिकचि च' ५।२।३३॥इति पिटन्प्रत्ययः (पिटच्प्रत्ययः), नेश्च चिरादेशः [**चिपिटः**] । द्वे '[17]पुहुंकिया' इति ख्यातस्य । "भृष्टमुखलक्षोदचिपिटीभूतं तण्डुलम्"[अम.क्षीरस्वामिटीका २।९।४७॥]इति क्षीरस्वामिव्याख्यानादेतौ पहुंआनाम्नी अपि, 'चिपिटा' इति भाषान्तरम् । यत्पथ्यापथ्यकारः-"आर्द्रपक्वं मूलधान्यं निस्तुषं पृथुकाभिधम्" [ ]इति । मदनपालोऽपि-"[18]पक्वार्द्रा व्रीहयः सम्यक्चिपिटाः पृथुका मताः"[मदनपालनिघण्टुः, धान्यकृतान्नादिवर्गः-११, श्लो-१०१, पृ.२५०]इति ॥

---

१. 'संसृष्टे' इत्यष्टाध्याय्याम् ॥ २. '-नभितपिपतिपनिपणिमहिभ्योऽसच्' इत्युणादिगणे॥ ३. 'गौरादित्वाद् ङीष्' इति ३नास्ति ॥ ४. द्र. स्वोपज्ञटीका ३।४००॥, पृ.९३॥ ५. '-भित्त-' इति मुद्रितद्वयोर्ग्रन्थयोः ॥ ६. 'पुंक्ली' इति ३॥ ७. 'भावप्रत्ययान्तादिमप् कत्तव्यः' इति वार्तिकस्वरूपं दृश्यते ॥ ८. 'वडां' इति १.२॥ ९. "कटुका वटिकादयः" इति मदनपालनिघण्टौ, पृ.२४७॥ १०. 'इण्डेरिका' इति शेषनाममालास्वोपज्ञटीकयोः॥ ११. 'घृतौषणी' इति शेषनाममालास्वोपज्ञटीकयोः ॥ १२. 'पृधृ-' इति ४॥ १३. 'धारणीति' इति ३॥ १४. कोष्ठान्तर्गतपाठस्थाने १.२ "सेव्यन्ते-('इति' इत्यधिकः २प्रतौ) सक्तवः, 'षचि सेवने' एकवचनान्तोऽप्यम्" इति दृश्यते ॥ १५. 'प्रथम-' इति १॥ १६. 'प्रथ प्रख्याने' इति क्षीरतरङ्गिण्यादौ ॥ १७. 'पुंहुं-' इति ३॥ १८. 'पाका-' इति ३.४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**लाजाः स्युरक्षता ॥४०१॥**

१ लज्यन्ते भर्त्स्यन्ते **लाजाः**, पुंस्त्रीलिङ्गो बहुवचनान्तश्च । 'लजि भर्त्सने'(भ्वा.प.से.), कर्मणि घञ् । "भृष्टशाल्यादिजा लाजाः"[मदनपालनिघण्टुः, धान्यकृतान्नादिवर्गः-११, श्लो-१०६, पृ.२५०]इति मदनपालः । "लाजाः स्युर्भृष्टधान्येषु"[विश्वप्रकाशकोशः, जान्तवर्गः, श्लो-१०]इति विश्वः । "भृष्टं धान्यं [1]भवेल्लाजाः"[हलायुधकोशः २।५८५॥]इति हलायुधोऽपि, तेन लाजशब्दो भरडुकफूल्यादीनामपि वाचकः । "लाजः स्यादार्द्रतण्डुल-"[विश्वप्रकाशकोशः, जान्तवर्गः, श्लो-१०]इति महेश्वरोकेरेकवचनान्तोऽपि दृश्यते । २ न क्षण्यन्ते **अक्षताः**, पुंक्लीबलिङ्गः । पुंस्ययं बहुवचनान्तः । 'क्षणु हिंसायाम्'(तु.उ.से.), कर्मणि क्तः, 'अनुदात्तोपदेश-'६।४।३७॥ इति णकारलोपः । "अक्षता यवाः"[ ]इति पुराणम्, तन्मते पुंसि । "बहुत्वार्थो विधिः"[ ]इति तट्टीका । एकवचनान्तोऽपि पुंसि दृश्यते, "अक्षतः स्यादहिंसिते षण्ढे लाजेषु कथ्यते[2]" [अनेकार्थसंग्रहः३।२२८॥]इत्यनेकार्थः । द्वे 'आखा' इति ख्यातस्य । शेषश्चात्र-"लाजेषु भरजोद्धूषे[3] खटिका परिचारकः[4]" [शेषनाममाला ३।९९॥] । इह सामान्यतोऽनुक्तान्यपि प्रस्तावादाटानामानि त्रीणि पिष्टकश्चमसश्चूर्ण इति । "पिष्टको नेत्ररोगे स्याद्धान्यादिचमसेऽपि च"[विश्वप्रकाशकोशः, जान्तवर्गः, श्लो-१४०]इति महेश्वरः ॥४०१॥

**गोधूमचूर्णे समिता**

१ गोधूमानां चूर्णः क्षोदो गोधूमचूर्णः, तत्र । समीक्रियते **समिता**, स्त्रीलिङ्गः । कणिकेत्यपि । "गोधूमचूर्णे[5] कणिका[6] स्त्रियां सूक्ष्माग्निमन्थयोः"[विश्वलोचनकोशः, कान्तवर्गः, श्लो-४६]इति श्रीधरः । एकं गोधूमचूर्णस्य ॥

**यवक्षोदे तु चिक्कसः ।**

१ यवानां क्षोदो यवक्षोदः, तत्र । चिक्यते **चिक्कसः**, पुंक्ली. । यदमरलिङ्गशेषः-"युषं चमसचिक्कसौ"[अमरकोषः ३।५।३५॥]इति । 'चिक्क व्यसने[7]'(चु.उ.से.), बाहुलकादसच् । चीयत इति वा, पृषोदरादिः । [एकं यवचूर्णस्य] ॥

**गुड इक्षुरसक्वाथः**

१ गुडति रक्षति[8] **गुडः**, पुंसि । 'गुड रक्षणे'(तु.प.से.), 'इगुपध-'३।३।१३५॥ इति कः, 'घञर्थे-'(वा-३।३।५८॥)इति कर्मणि वा कः । इक्षुरसस्य क्वाथ इव इक्षुरसक्वाथः । क्षारोऽपि । "क्षारः काचे रसे गुडे"[अनेकार्थसङ्ग्रहः २।३९०॥]इत्यनेकार्थः । एकं गुडस्य ॥

**शर्क्करा तु[9] सितोपला ॥४०२॥**

**सिता च**

१ शृणाति रसना वैरस्यं **शर्क्करा** । 'शृ हिंसायाम्' (क्र्या.प.से.), 'शृणातेः करन्[10]'(उणा-४४३), 'सार्वधातुकार्धधातुकयोः'७।३।८४॥ इति गुणः, 'अचो रहाभ्यां द्वे[11]'८।४।४६॥ । २ सितोपलः स्फटिकस्[12]तत्सदृशत्वात् **सितोपला** ॥४०२॥ । ३ सिनोति बध्नाति तृष्णान्धं[13] **सिता** । 'षिञ् बन्धने'(स्वा.उ.अ.), 'अञ्जिघृसिभ्यः[14] क्तः'(उणा-३६९) । त्रीणि शर्क्करायाः ॥

**मधुधूलिस्तु खण्डः**

१ मधुनः क्षौद्रस्य धूलिरिव **मधुधूलिः** । मधुरत्वात् खण्ड्यते **खण्डः**, पुंक्ली. । 'खडि मन्थे'(भ्वा.उ.से.), कर्मणि घञ् । द्वे 'खंड' इति ख्यातस्य ॥

**तद्विकृतिः पुनः ।**

**मत्स्यण्डी फाणितं चापि**

१ तस्य खण्डस्य विकृतिर्विकारः तद्विकृतिः मत्स्यण्डी, चः समुच्चये, फाणितमप्युच्यत इत्यन्वयः । मत्स्याण्डाकारत्वाद् गौरादित्वाद् ङीषि **मत्स्यण्डी**, शकन्ध्वादिः । मुदं स्यन्दत इति, पृषोदरादिर्वा । "मत्स्यान् अमति रुजति मारकत्वाद् मत्स्याण्डी"[[15] ]इति तु वैद्याः[16] । यद्धन्वन्तरिः-"शर्करोक्ता तु मीनाण्डी श्वेता मत्स्याण्डिका सिता"[धन्वन्तरिनिघण्टुः २।१०४॥]इति । "मत्स्यण्डिका[17] खण्डसिता[18] क्रमेण गुणवत्तरा" [[19] ]इति तु वाग्भटः । "मत्स्याण्डी[20] खण्डशर्कराः"[हलायुधकोशः २।३२४॥]इति हलायुधः । "खण्डशर्कराया विकारे

---

१. 'भवेत्' इति हलायुधकोशे नास्ति॥ २. अनेकार्थसंग्रहे नास्ति॥ ३. '-जोद्धूषख-' इति शेषनाममालास्वोपज्ञटीकयोः ॥ ४. 'परिवाचकः' इति १, '-परिवारकाः' इति शेषनाममालास्वोपज्ञटीकयोः ॥ ५. 'चूर्णक-' इति १॥ ६. विश्वलोचनकोशे तु 'कणिकः' इति दृश्यते॥ ७. क्षीरतरङ्गिण्यां 'चक्क चुक्क व्यथने'(चुरादिः, धातुसं-५१)इत्यत्र स्वाम्याह-"चिक्क इति च कौशिकः-चिक्कसं यवपिष्टम्, चिक्कणं सस्नेहम्" इति, पृ.२९७॥ ८. 'रक्ष्यते' इति ३॥ ९. 'च' इति १॥ १०. 'श्रः करन्' इत्युणादिगणे ॥ ११. अस्य विकल्पपक्षे एकककारवती 'शर्करा' इत्यपि भवति ॥ १२. 'स्फु-' इति ३॥ १३. 'तृष्णा' इत्येव ३॥ १४. 'अजि-' इति ४॥ १५. द्र. अमरकोशस्वामिकृतटीका २।९।४३॥, पृ.२०९॥, स्वोपज्ञटीका ३।४०३॥, पृ.९४॥ तयोश्च 'मारकत्वात्' इति पाठो न दृश्यते ॥ १६. 'वैद्यः' इति २॥ १७. 'मत्स-' इति १.२.३॥ १८. '-शिता' इति ३.४॥ १९. द्र. अमरकोषक्षीरस्वामिटीका २।९।४३॥, पृ.२०९॥, स्वोपज्ञटीका ३।४०३॥, पृ.९४॥ २०. 'मत्साण्डी' १.३॥, हलायुधे 'मत्स्यण्डी' इति दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मत्स्याण्डी, सूक्ष्मकणप्रायत्वात्''[ ]इति तट्टीका । सितेऽपि मधुशर्करा १, यवासशर्करा[1] २, पुष्पसंस्कृतशर्करा चेति विशेषा अपि ज्ञेयाः । २ फाण्यते द्रव्यान्तरं गम्यते **फाणितम्**, पुंक्लीबोऽयम् । ''फाणितमस्त्रियाम्''[2]इति वाचस्पतिः । 'फण गतौ'(भ्वा.प.से.), णिजन्तात् क्तः । इक्षुविशेषस्य रसपाके खण्डयोग्ये सारभूता गुटिकाकारा या जायते, सा मत्स्यण्डी शुद्धखण्डः फाणितं खण्डकल्कः[3]''[4]इति तु सुभूतिः । अन्ये तु खण्डस्य श्च्योतः, फाणितं राब इत्यादिभाषा । यद्धन्वन्तरिः-

''विशेषौ द्वौ तु खण्डस्य मत्स्यण्डीफाणितौ स्मृतौ ।
गुडिका चापि मत्स्यण्डी[5] खण्डस्य परिकीर्तिता ॥१॥
फाणितः सद्रवश्चापि विहितो मुनिपुङ्गवैः ।''

[ ]इति । खण्डस्य गुलिका गोलकाकृतिर्मत्स्यण्डी[5] परिकीर्तितेत्यन्वयः। ''गुडः स्याद् गोलके''[विश्वप्रकाशकोशः, डान्तवर्गः, श्लो-१]इति महेश्वरः । गुडस्य गोलकस्य प्रतिकृतिर्गुडिका, अथवा सूक्ष्मो गुडो गुडिका, अतो मत्स्यण्डीशब्देन 'गडीयालीखाण्ड' इत्यप्युच्यत इति । ''फाणितं[6] विकृतिर्गौडी'' [हलायुधकोशः २।३२४॥]इति हलायुधो गुडविकारं फाणितं प्रोक्तवान्। ''फाणितं क्षुद्रगुडकः''[मदनपालनिघण्टुः, इक्षुकादिवर्गः-९, श्लो-१३, पृ.२१५]इति मदनः ॥

## रसालायां[1] तु मार्जिता[2] ॥४०३॥

## शिखरिणी[3]

१ रसमलति **रसाला** । 'अलं भूषणादौ'(भ्वा.प.से.), पचाद्यच्, तत्र । २ मार्ज्यत इति **मार्जिता** । 'मृजूष् शुद्धौ' (अ.प.वे.)। मर्जिताऽपि । ''मज्जिका''[ ]इति वैद्याः । ३ शिखरमस्त्यस्यां **शिखरिणी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः, 'ऋन्नेभ्यो ङीप्'४।१।५॥ । दधिसितामरिचादिकृतं लेह्यम् । यत्सूदशास्त्रम्-

''अर्धाढकं सुचिरपर्युषितस्य दध्नः
खण्डस्य षोडश पलानि शशिप्रभस्य ।
सर्पिः पलं मधु पलं मरिचं द्विकर्षं
शुण्ठ्याः पलार्धमथ चार्धफ(प)लं चतुर्णाम् ॥१॥
श्लक्ष्णे पटे ललनया मृदुपाणिघृष्टा
कर्पूरधूलिसुरभीकृतभाण्डसंस्था ।
एषा वृकोदरकृता सरसा रसाला
याऽऽस्वादिता भगवता मधुसूदनेन ॥२॥''[7] । त्रीणि

शिखरिण्याः ॥

## अथ यूर्[1]यूषो[2] रसः[3]

१ यौतीत्येवंशीलो **यूः**, पुंसि । यद्वैजयन्ती-''यूषोऽस्त्री यूः पुमान् [रसे]''[वैजयन्तीकोषः ४।३।१००॥]इति। 'यु मिश्रणे'(अ.प.से.), भ्राजादित्वात् क्विपि साधुः । २ यूयते मिश्रीक्रियते **यूषः**, पुंक्ली.। 'यु मिश्रणे'(अ.प.से.), 'युमूङ्भ्यो लोपश्च ( पूङ्य्वोर्लोपश्च)'(दश-९।१६)इत्यूषन्। यूषति हिनस्ति रुजमिति वा । 'यूष हिंसायाम्'(भ्वा.प.से.), 'इगुपध-'३।१।१३५॥इति कः । ३ रस्यते आस्वाद्यते **रसः**। 'रस आस्वादे' (चु.उ.से.), घञर्थे कः । त्रीणि मुद्गादिधान्यरसस्य ॥

## दुग्धं[1] तु सोमजम्[2] ।
## गोरसः[3] क्षीरमूधस्यं[4][5] स्तन्यं[6] पुंसवनं[7] पयः[8] ॥४०४॥

१ दुह्यते **दुग्धम्** । 'दुह प्रपूरणे'(अ.उ.अ.), भावे नपुंसके क्तः । २ सोमरसाज्जातं **सोमजम्** । 'जनी प्रादुर्भावे' (दि.आ.से.), 'पञ्चम्यामजातौ'३।२।९८॥ इति डः । ३ गोर्धेनो[8] रसः **गोरसः** । ४ घस्यते **क्षीरम्**, पुंक्ली. । 'घस्लृ अदने' (भ्वा.प.अ.), 'घसेः किच्च'(उणा-४७४)इतीरन्, 'गम्हन्-(गमहन)जनखनघसाम्-'६।४।९८॥ इत्युपधालोपः, 'शासिवसि-'८।३।६०॥ इति षत्वम्, 'खरि च'८।४।५५॥ इति घस्य कः, कषसंयोगे क्षः । ५ ऊधसि भवम् **ऊधस्यम्**, षष्ठस्वरादि। 'शरीरावयवाच्च'४।३।५५॥इति यत् । ६ स्तने[9] भवं **स्तन्यम्**। 'शरीरावयवात्-'४।३।५५॥ इति यत् । ७ पुंभिः सूयतेऽनेन **पुंसवनम्** । 'षूङ् [प्राणिगर्भविमोचने प्राणिप्रसवे' वा], (अ.आ.वे,दि.आ.वे.), करणे ल्युट् । ८ पीयते **पयः** ।'पिबतेरिच्च'( )इत्यसुन् । यद्वा 'पाहाक्भ्यां पयह्यौ च'(हैमोणा-९५३)इत्यस् । अष्टौ दुग्धस्य । शेषश्चात्र-

''दुग्धे योग्यं बालसात्म्यं जीवनीयं रसोत्तमम् ।
रसं[10] गव्यं मधुज्येष्ठं धारोष्णं तु पयोऽमृतम् ॥१॥''

[शेषनाममाला ३।९९-१००॥] ॥४०४॥

---

१. 'यवाशर्करा' इति १॥ २. द्र. स्वोपज्ञटीका ३।४०३॥, पृ.९४॥ ३. '-कल्कलः' इति २, 'खण्डस्कन्धः' इति पदचन्द्रिकायाम् ॥ ४. द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-६१६, पृ.७०४॥ ५. 'मत्साण्डी' इति १.३॥ ६. 'फाणितविकृ-' इति हलायुधकोशे ॥ ७. द्र. अमरकोशक्षीरस्वामिटीका २।९।४४॥, पृ.२०९॥, टीकासर्वस्वम्, भा-३, २।९।४४॥, पृ.१८७॥, पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-६१८, पृ.७०६॥, रामाश्रमी २।९।४४॥, पृ.४२०॥ ८. 'धेन्वा' इति ३॥ ९. 'स्तनेन' इति २॥ १०. 'सरं' इति शेषनाममालास्वोपज्ञटीकयोः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

### पयस्यं घृतदध्यादि

१ पयसो विकारः **पयस्यम्** । 'गोपयसोर्यत्'४।३।-१६०॥ । किं तदित्याह-घृतदध्यादि, आदिना तक्रनवनीतग्रहः । एकं सामान्यतो घृतादेः[1] ॥

### पेयूषोऽभिनवं पयः ।

१ पीयत इदं पीः पानकर्ता । 'पीङ् पाने'(दि.-आ.अ.), 'अन्येभ्योऽपि दृश्यते'३।२।७५॥ इति विच् । 'यूष हिंसायाम्'(भ्वा.प.से.)इत्यत इगुपधत्वात् कः, यूषो नाशयिता । पेर्यूषः **पेयूषः**[2], मूर्धन्यान्तः, पुंसि । वैजयन्ती तु-"आसप्ताहात् तु पेयूषं[3] ततो मोरटमोरके"[वैजयन्तीकोषः३।८।१४६॥]इति क्लीबमाह । पीयूषमित्यपि । वाचस्पतिरपि-"नवप्रसूतगोक्षीरं नवं सप्तदिनावधि पेयूषम्"[[4]]इत्याह। एकं नवप्रसूतगोपयसः ॥

### उभे क्षीरस्य विकृती किलाटी कूर्चिकाऽपि च ॥४०५॥

१ किरति क्षुधं **किलाटी**, पुंस्त्रीलिङ्गः[5] । 'कॄ विक्षेपे'(तु.प.से.), 'किरो लश्च वा'(हैमोणा-१४७)इत्याटः । "किलाटा' इत्याबन्तोऽपि"[ ]इति हलायुधटीका । एकं बलहीति ख्याताया: । २ कूर्चस्तन्मस्तु[6], तदस्त्यस्याः **कूर्चिका** । 'कूचिका' इत्यपि । एकं फेदडीति ख्याताया: । उभे इति किलाटीकूर्चिके क्षीरस्य पयसो विकृती विकारौ ॥

### पायसं परमान्नं च क्षैरेयी

१ पयसि संस्कृतं **पायसम्**, पुंक्ली. । 'संस्कृतं भक्ष्याः(भक्षाः)'४।२।१६॥इत्यण् । २ परमं च तदन्नं च **परमान्नम्** । क्षीरे संस्कृता **क्षैरेयी** । 'क्षीराड्ढञ्'४।२।२०॥ इति ढञ्, 'आयनेयी-'७।१।२॥इति ढस्यैयादेशः, 'टिड्ढाणञ्-'४।१।१५॥ ङीष्(ङीप्) । त्रीणि पायसस्य । 'क्षीरि[7]' इति भाषा॥

### क्षीरजं दधि ।

### गोरसश्च

१ क्षीराज्जातं **क्षीरजम्** । 'जनी प्रादुर्भावे'(दि.-आ.से.), 'पञ्चम्यामजातौ'३।२।९८॥ इति डः। २ दधते बलिष्ठतां **दधि**, क्लीबे। 'दध धारणे'(भ्वा.आ.से.), 'इन् सर्वधातुभ्यः' (उणा-५५७) । ३ गवां रसो **गोरसः** । त्रीणि दध्नः । "श्रीघनं मङ्गल्यम्"[शेषनाममाला ३।१००॥]शैषिके॥

### तदघनं द्रप्सं पत्त्रलमित्यपि ॥४०६॥

१ तद् दधि अघनं घनात् कठिनादन्यद् अघनम्, द्रुतमित्यर्थः । दृप्यतेऽनेन **द्रप्सम्** । 'दृप्(दृप) हर्षविमोचनयोः[8]'(दि.प.अ.), बाहुलकात् सः, तृपदृपयोरनिट्सु पाठः, 'अनुदात्तस्य-'६।१।५९॥इत्यमागमः । "द्रप्सं दधि घनेतरत्" [अमरकोषः २।९।५१॥]इत्यमरः । द्रप्स्यमित्यपि[9] । 'दृप प्रीणने[10]'(दि.प.अ.) 'अर्घ्या(अग्न्या)दयश्च'(उणा-५५१)इति यक्, धातोरमागमः, प्रत्ययस्य च सुडागमः । मदनस्तु-

"दधिस्त्यानं पयः सम्यक् स्त्यानमीषत्तु मन्दकम् ।
तन्मृष्ट(मिष्ट)मम्लमत्यम्लं मधुराम्लमिति स्मृतम् ॥१॥"

[मदनपालनिघण्टुः, पानीयादिवर्गः-८, श्लो-८८ पृ.१९०]इति दध्नो भेदद्वयमाह । तन्मध्ये यो मन्दकमिति द्वितीयो भेदः, स द्रप्समित्यनेन, अन्ये तु "उपरि प्लवमानं घनं दधि[11] द्रप्सं, दध्नस्तरिः"[ ]इत्याहुः । "एतच्च द्रप्सं शरम्"[[12]]इति भागुरिः । "बाणद्रप्सौ शरौ"[[13]]इति दुर्गः । अत्र द्रप्सशब्दः 'थरि' इति लोकख्याताया: पर्यायत्वेनोक्तः । "शरः पुनर्दधिसारे काण्डतेजनयोरपि"[अनेकार्थसङ्ग्रहः२।४४९॥]इत्यनेकार्थे 'दधिसार' इति पर्यायो द्रप्समित्यस्य ज्ञेयः । २ पत्त्रं लाति **पत्त्रलम्** । पत्त्रमस्त्यस्येति सिध्मादित्वाल्लच् वा । द्वे पातलुं दधीति ख्यातस्य ॥४०६॥

### घृतं हविष्यमाज्यं च हविराघारसर्पिषी ।

१ जिघर्ति क्षरति दीपयति बलं वा **घृतम्**, पुंक्ली.। 'घृ क्षरणदीप्त्योः'(जु.प.अ.), 'अञ्जिघृसिभ्यः क्तः'(उणा-३६९) । २ हविषे हितं **हविष्यम्** । हविस्शब्दात् 'उगवादिभ्यो यत्'५।१।२॥ । ३ अनक्ति व्यक्तीभवति क्षरणाच्चलतीति **आज्यम्** । 'अञ्जू [व्यक्ति] म्रक्षणादौ[14]'(रु.प.से.), आङ्पूर्वः 'अञ्जेः संज्ञायाम्'(वा-३।१।१०९॥)इति क्यपि अनुनासिकलोपः । ४ हूयत इदम्,

---

१. इतोऽग्रे ३प्रतौ 'छतादि.' इति दृश्यते ॥ २. अत्र रामाश्रमी द्रष्टव्या २।९।५४॥, पृ.४२५॥ ३. वैजयन्त्यां तु 'पीयूषं' इति दृश्यते पृ.९८॥ ४. द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-६२७, पृ.७१८॥ ५. '-लिङ्गः' इति २.३नास्ति ॥ ६. 'कूर्चकस्त-' इति४॥ ७. 'क्षीर' इति३॥ ८. धातुप्रदीपसम्मतोऽयम्, '-हर्षमोहनयोः' इति स्वामिसायणौ, 'हर्षण-' इति ३॥ ९. 'द्रप्स-' इति १.३॥ १०. 'हर्षमोह(च)नयोः' इति क्षीरतरङ्गिण्यादौ॥ ११. 'घनदधि' इति १, 'घन' इति २प्रतौ नास्ति, ३प्रतौ त्रुटितः पाठो दृश्यते ॥ १२. द्र. अमरकोशक्षीरस्वामिटीका २।९।५१॥, पृ.२११॥ १३. द्र. अमरकोशक्षीरस्वामिटीका २।९।५१॥, पृ.२११॥, रामाश्रमी २।९।५१॥, पृ.२२४॥ १४. 'म्रक्षणादकान्तिगतिषु' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हूयतेऽनेनेति वा **हविः**, क्लीबे । 'हु दानादनयोः'(जु.प.अ.), 'अर्चिरुचिशुचिहुसृपिछादिछृदि-(छर्दि)भ्यः इस्'[1](उणा-२६५)। हविषी, हवींषि इत्यादि । ५ आघारयति दीपयति **आघारः** । 'घृ क्षरणदीप्त्योः'(जु.प.अ.), णिजन्तादतः पचाद्यच् । ६ सर्पति गच्छति यागाद्युपयोगितामिति **सर्पिः**, क्लीबे । 'सृप्लृ गतौ'(भ्वा.प.से.), 'अर्चिरुचिशुचि-'(उणा-२६५)इतीस् । सर्पिषी, सर्पींषि इत्यादि । षड् घृतस्य ॥

## ह्योगोदोहोद्भवं हैयङ्गवीनम्[3]

१ अतीतं दिनं ह्यः, अत्र दिने यो गौः सकाशाद् दोहो दुग्धक्षरणम्, तत उद्धृतं यद् घृतं तद् हैयङ्गवशब्दवाच्यम् । ह्यःशब्दस्य गोदोहशब्देन 'सुप् सुपा'२।१।४॥इति समासः, 'हैयङ्गवीनं संज्ञायाम्'५।२।२३॥इति निपातनात् साधुत्वम्, ह्योगोदोहशब्दस्य हैयङ्ग्वादेशः [**हैयङ्गवीनम्**] । कात्यायनोऽमुं नवनीतपर्यायमाह । तथा च हलायुधः-''दधिसारो नवनीतं ब्रुवते हैयङ्गवीनं च'' [हलायुधकोशः २।२७४॥]इति । एकमेकरात्रपर्युषिताद् दध्न उत्पन्नस्य सद्यस्तप्तघृतस्य ॥

## शरजं पुनः ॥४०७॥

## दधिसारं तक्रसारं नवनीतं नवोद्धृतम् ।

१ शरात् थरीति लोकख्याताज्जातं **शरजम्** । 'पञ्चम्यामजातौ'३।२।९८॥इति डः, तालव्यादि । ''दध्युत्तरो दधिस्नेहो दध्यग्रः कट्वरः शरः[6]''[मदनपालनिघण्टुः, पानीयादिवर्गः-८, श्लो-१०८, पृ.१९३]इति मदनः । ''शरः पुनर्दधिसारे काण्डतेजनयोरपि''[अनेकार्थसङ्ग्रहः२।४४९॥]इत्यनेकार्थः । दन्त्यादिरपि, यदाह-''सरौ दध्यग्रसायकौ''[अनेकार्थसङ्ग्रहः२।४५३॥]इति ॥४०७॥ २ दध्नः सारं **दधिसारम्** । ३ एवं **तक्रसारम्** । ४ मथिताद् दध्नो नवं तत्कालं नीतं **नवनीतम्** । ५ एवं मथिताद् दध्नः तत्कालं नवमुद्धृतं **नवोद्धृतम्** । पञ्च नवनीतस्य ॥

## दण्डाहते कालशेयघोलारिष्टानि गोरसः ॥४०८॥ रसायनम्

१ मन्थदण्डेनाऽऽहतमालोडितं **दण्डाहतम्**, तत्र । २ मन्थपात्रं कलशिस्तत्र भवं **कालशेयम्**, तालव्यमध्यो दन्त्यमध्यश्च । 'दृतिकुक्षिकलसिवस्त्य[स्त्य]हेर्ढक्'[7]४।३।५६॥इति ढक् । ३ हन्यते मथा **घोलम्** । 'हन हिंसागत्योः'(अ.प.अ.), पृषोदरादित्वात् साधुः । ४ नास्ति रिष्टमशुभमस्माद् **अरिष्टम्**, सर्वरोगहत्त्वात् । ५ गोरसं दुग्धम्, तद् विकारात् कार्यकारणभेदाद् लक्षणया घोलमपि **गोरसः** ॥४०८॥ ६ अम्लादीन् रसानयते **रसायनम्** । 'अय गतौ'(भ्वा.आ.से.) । षट् सामान्येन घोलस्य ॥

## अथाऽर्धाम्बूदश्वित्

१ अधर्मम्बु जलं यत्र तद् अर्धाम्बु । उदकेन श्वयति वर्धते **उदश्वित्** । 'टुओश्वि[8] गतिवृद्ध्योः'(भ्वा.प.से.), 'क्विप्-'३।२।७६॥इति क्विप्, 'ह्रस्वस्य पिति-'६।१।७१॥इति तुक्, 'उदकस्योदः संज्ञायाम्'६।३।५७॥इत्युदादेशः, 'उदश्वितोऽन्यतरस्याम्'४।२।१९॥इति निर्देशादसम्प्रसारणम् । उदश्विती, उदश्विन्ति इत्यादि क्लीबे । एकमर्धजलघोलस्य ॥

## श्वेतं समोदकम् ।

१ श्वेतते **श्वेतम्** । 'श्विता[9] वर्णे[10]'(भ्वा.आ.से.) । समं तुल्यमुदकं यत्र समोदकम् । ''श्वेतरसमित्यपि''[ ]इति मदनः । धन्वन्तरिस्तु-''[11]द्विगुणाम्बुश्वेतरसम्''[धन्वन्तरिनिघण्टुः ६।२११]इत्याह । एकं समोदकस्य ॥

## तक्रं पुनः पादजलम्

१ तञ्चति द्रुतं गच्छति **तक्रम्**, पुंक्ली. । 'तञ्चु[12] चञ्चु त्वञ्चु चुञ्च्वित्यादिदण्डको धातुर्गत्यर्थः, 'स्फायितञ्चिवञ्चि-'(उणा-१७०)इति रक्, 'अनिदिताम्-'६।४।२४॥इति न्लोपः, न्यङ्क्वादित्वात् कुत्वम् । ''बाहुलकाच्चस्य कुत्वम्''[[13]]इति माधवः । पादेन तुर्यांशेन जलं यत्र तत् पादजलम् । यन्मदनपालः-''पादोदकं भवेत् तक्रमर्धाम्ब्वन्ये[14] बभाषिरे'' [मदनपालनिघण्टुः, पानीयादिवर्गः-८, श्लो-११२, पृ.१९४] । एकं तक्रस्य । ''कट्वरं सारणम् अर्शो[15]घ्नं परमरसः''[शेषनाममाला ३।१००-१०१॥]शैषिकाणि ॥

## मथितं वारिवर्जितम् ॥४०९॥

१. 'इसिः' इत्युणादिगणे ॥ २. '-गिनाता-' इति३॥ ३. तुलनीयोऽमरकोषः२।९।५२॥ ४. 'गाः' इति १.२॥ ५. '-गवा-' इति ४॥ ६. 'कट्वरः शरः' इत्यस्यस्थाने म-निघण्टौ 'कटुकः सरः' इति दृश्यते, पृ.१९३, श्लो १०८॥ ७. 'ढञ्' इत्यष्टाध्याय्याम् ॥ ८. 'टुओश्विर्' इति १॥ ९. 'श्विताङ्' इति १.२.३॥ १०. 'वर्तने' इति३॥ ११. 'द्विग-' इति १.२॥ १२. 'वन्चु चन्चु तन्चु त्वन्चु म्रुचु म्लुचु गत्यर्थाः' इति क्षीरतरङ्गिणी, 'वञ्चु चञ्चु त्वञ्चु म्रुञ्चु म्लुञ्चु म्रुचु म्लुचु गत्यर्थाः' इति मा. धातुवृत्तिः ॥ १३. मा-धातुवृत्तौ न दृश्यते ॥ १४. 'मर्द्धाम्भोऽन्ये' इति मदनपालनिघण्टौ, पृ.१९४॥ १५. 'आर्शो-' इति३॥

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

१ [मथ्यते स्म **मथितम्**।] 'मन्थ विलोडने'(भ्वा.-क्र्या.प.से.), निष्ठा । वारिवर्जितं जलरहितम्, दध्नो[1] मथनमात्रसाध्यमित्यर्थः । 'मठओ[2]' इत्यादिभाषा । यद्धन्वन्तरिः-

"द्विगुणाम्बु श्वेतरस१मर्धोदकमुदकश्वितम्२ ।
तक्रं त्रिभागाभिन्नं च ३ केवलं मथितं स्मृतम् ॥१॥"

[धन्वन्तरिनिघण्टुः ६।२११॥]इति ॥

## सार्पिष्कं दाधिकं सर्पिर्दधिभ्यां संस्कृतं क्रमात् ।

१ सर्पिषा संस्कृतं **सार्पिष्कम्**। 'संस्कृतम्'४।४।३॥ इति ठक्। १ दध्ना संस्कृतं **दाधिकम्** । 'संस्कृतम्'४।४।३॥ इति ठक् । आद्ये 'इसुसुक्तान्तात् कः'७।३।५१॥, द्वितीये 'ठस्येकः'७।३।५०॥ । सतो गुणस्योत्कर्षाधानं संस्कारः । क्रमेणैकैकं[3] सर्पिःसंस्कृतदधिसंस्कृतयोः ॥

## लवणोदकाभ्यां दकलावणिकम्

१ दकलवणाभ्यां संस्कृतं **दकलावणिकम्** ।'संस्कृतम्'४।४।३॥ इति ठक्, बाहुलकादुत्तरपदवृद्धिः । उदकलावणिकमपि । यद्धलायुधः-"लवणोदकसंसिद्धमुदलावणिकं मतम्" [हलायुधकोशः २।३२२॥]इति । एकं लवणजलसंस्कृतस्य, षीचप्रभृति[4] ॥

## उदश्विति ॥४१०॥

## औदश्वितमौदश्वित्कम्

१ उदश्विति संस्कृतम् **औदश्वितम्**, **औदश्वित्कम्**[5] च । 'उदश्वितोऽन्यतरस्याम्'४।२।१९॥ इति ठक्, तदभावेऽण्। 'इसु[सु]क्तान्तात् कः'७।३।५१॥इति ठस्य कादेशः । द्वे उदश्वित्संस्कृतस्य, अर्धजलार्धघोलसिद्धरब्बादेः ॥४१०॥

## लवणे स्यात् तु लावणम् ।

१ लवणे संस्कृतं **लावणम्** । 'संस्कृतं भक्ष्या-(भक्षाः)'४।२।१६॥ इत्यण्, 'तद्धितेष्वचामादेः'७।२।११७॥। एकं लवणसंस्कृतस्य ॥

## पैठरोख्ये उखासिद्धे

१ पिठरे स्थाल्यां संस्कृतम् **पैठरम्** । 'संस्कृतं भक्षाः[6]'४।२।१६॥ इत्यण् । २ उखायां स्थाल्यां संस्कृतम् **उख्यम्**, पञ्चमस्वरादिः । 'शूलोखाद्यत्'४।२।१७॥ इति यत्। द्वे स्थालीसंस्कृतस्यान्नादेः ॥

## प्रयस्तं तु सुसंस्कृतम् ॥४११॥

१ अत्यन्तपाकादिना प्रयत्नेन साध्यं **प्रयस्तम्**। 'यसु प्रयत्ने'(दि.प.से.), कर्मणि क्तः। सुष्ठु संस्कृतं सुसंस्कृतम्। एकं तैलादिपरिपक्वस्य द्रव्यान्तरयोगात् सुष्ठु संस्कृतस्य व्यञ्जनादेः । 'भलुनीपनुं[7]' इति भाषा ॥४११॥

## पक्वे राद्धं च सिद्धं च

१ पच्यते स्म पक्वम् । 'डुपचष् पाके'(भ्वा.-उ.अ.), निष्ठा, 'पचो वः'८।२।५२॥इति तस्य वत्वम्, तत्र। उत्तरत्र "विनाऽम्बुना"[अभि.श्लो.३।४१२]इति वचनादिहाऽम्बुनेति लभ्यते । राध्यति स्म **राद्धम्** । 'राध साध[8] संसिद्धौ' (स्वा.प.अ.), निष्ठा । २ सिध्यति स्म **सिद्धम्** । 'षिधु संराद्धौ' (दि.प.अ.), निष्ठा । द्वे सिद्धस्यान्नादेः ॥

## भृष्टं पक्वं विनाऽम्बुना ।

१ भृज्यते स्म **भृष्टम्** । 'भ्रस्जो[9] पाके'(तु.उ.अ.), निष्ठा । वारिणा विना पक्वम् । एकमम्बु विना पक्वस्य । 'सेकिया[10]' इति भाषा ॥

## भृष्टामिषं भटित्रं स्याद् भूतिर्भरूटकं च तत् ॥४१२॥

१ भृष्टं यदङ्गारेषु पक्वमामिषं मांसं तद् **भटित्रम्**। भटति पुष्टो भवत्यनेन भटित्रम् । 'भट भृतौ[11]'(भ्वा.प.से.), 'अशित्रादि-'(उणा-६१२)इति इत्रः[12] । २ भवति बलमनया **भूतिः** । ३ बिभर्त्ति बलं **भरूटकम्** । पृषोदरादिः । भृष्टमपि। यद्धलायुधः-"अङ्गारेषु विपक्वं मांसं भूतिर्भरूटकं भृष्टम्" [हलायुधकोशः २।३२३॥]इति । त्रीणि भृष्टामिषस्य ॥४१२॥

## शूल्यं शूलाकृतं मांसम्

१ शूले संस्कृतं **शूल्यम्** । 'शुलोखाद्यत्'४।२।१७॥ इति यत् । २ शूले क्रियते स्म पाकायेति **शूलाकृतम्** । 'शूलात् पाके'५।४।६५॥इति डाच् । लोहादिकृता शलाका

---

१. 'दध्नं' इति३॥ २. 'मठो' इति३॥ ३. '-णैकं' इति३॥ ४. 'षीचप्रभृति' इति २नास्ति ॥ ५. "उदकेन श्वयति वर्धते इत्युदश्वित् । तत्र संस्कृतः औदश्वित्कः, औदश्वितः" इति सि.कौमुद्यां उदश्वितोऽन्यतरस्यामित्यत्र भट्टोजिदीक्षितः, पृ.२९४॥ ६. 'भक्ष्याः' इति १.२.४॥ ७. 'भलौ नीपनूं' इति४॥ ८ '-षाध-' इति क्षीरतरङ्गिणी ॥ ९. 'भ्रस्ज' इति क्षीरतरङ्गिण्यादौ ॥ १०. 'सोकिया' इति३॥ ११. 'गतौ' इति१॥ १२. 'इन्' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शूलम्, करोतिरनेकार्थत्वात् पाके वर्तते, कृतं पक्वमित्यर्थः। "गतिसमासः"[ ]इति मिश्राः । अन्ये तु सामान्यविशेषभावं परिहृत्य अनयोर्भटित्रेणैकार्थतामाहुः। द्वे शूलेन भृष्टामिषस्य ॥

निःक्वाथो रसकः समौ ।

१ **निःक्वाथः** प्रस्तावादामिषस्यैव । २ रसः पिष्ट-मांस[ज]स्तत्तुल्यो **रसकः** । द्वे मांसरसस्य ॥

**प्रणीतमुपसंपन्नम्**

१ प्रकर्षान्नीतं प्रापितं **प्रणीतम्** । २ एवमधिकं संपन्नम् **उपसंपन्नम्,** उपोऽत्राऽऽधिक्ये । द्वे पाकजरूपरसादि-संपन्नस्य व्यञ्जनादेः ॥

**स्निग्धे मसृणचिक्कणे ॥४१३॥**

१ स्निह्यति[2] स्म **स्निग्धः**। 'ष्णिह प्रीतौ'(दि.प.से.), क्तः, तत्र । २ मां लक्ष्मीं शोभां सरति **मसृणम्** । माशब्दे उपपदे सर्त्तेर्बाहुलकान्नक्[3] 'ङ्यापोः संज्ञाछन्दसोः'६।३।६३॥ इति ह्रस्वत्वम्, 'ऋवर्णान्ताच्चे-'(वा-८।४।१॥)इति णत्वम् । "ऋणु गतौ'(त.उ.अ.) संपूर्वात्, तत इगुपधः कः, पृषोदरा-दित्वाद् वर्णविपर्ययः"[4][ ]इति सुभूत्यादयः । ३ चित्यते सम्यग्ज्ञायते **चिक्कणम्** । 'चिती संज्ञाने'(भ्वा.प.से.), 'चितेः कणः कश्च'(उणा-६१५)इति [कणः], तस्य कत्वम् । "चिञ् चयने'(स्वा.उ.अ.), क्विप्, 'ह्रस्वस्य-'६।१।७१॥" [ ]इति तु केचित् । "कणति कणम्, चिच्च तत् कणं च"[ ]इति नैरुक्तम् । "तकारस्य कत्वम्"[ ]इति सुभूत्यादयः । त्रीणि स्निग्धस्य ॥४१३॥

**पिच्छिलं तु विजिविलं विज्जलं विजिलं च तत् ।**

१ पिच्छा भक्तमण्डम्, तद्योगात् पिच्छादित्वादिलच् [**पिच्छिलम्**] । "पिच्छा तु शाल्मलिवेष्टे मण्डे चाश्व-पदामये"[विश्वप्रकाशकोशः, छान्तवर्गः, श्लो-४]इति विश्वः। २ विजते चलति **विजिविलम्,** तृतीयस्वरत्रयः । 'ओविजी भयचलनयोः'(तु.आ.से.), इलप्रत्ययान्तो निपातः । विजि-फिलिमित्यपि[5]। ३ विज् चलं जलं यत्र **विज्जलम्** । ४ विजे-श्चलनार्थाद् 'इगुपधादिभ्य(गुपादिभ्यः) कित्'(उणा-५५६) इतीलचि **विजिलम्** । "विजिनं विजविनं च स्यात् पिच्छिलं विजिलम्"[6][ ]इति वोपालितः । चत्वारि पिच्छिलस्य । 'फिलसणु[7]' इति भाषा ॥

**भावितं तु वासितं स्यात्**

१ भाव्यते मिश्रीक्रियते स्म **भावितम्**। 'भू सत्तायाम्' (भ्वा.प.से.), 'भुवोऽवकल्कने'(चु.उ.से.), णिच्, अवकल्कनं मिश्रीकरणम् । यथा-भावयति दध्ना ओदनम्, सर्पिषा सक्तून् भाव्यते, द्रवद्रव्यैर्मिश्रीक्रियते स्मेति वा । २ वास्यते हिङ्गुजीर-कादिद्रव्यान्तरेण मील्यते, धूपपुष्पादिना अधिवास्यते वा **वासितम्** । 'वास उपसेवायाम्'(चु.उ.से.), क्तः । "भावितं वासितं विदुः"[8][ ]इति मुनिः । द्वे भावितस्य । 'भेलविया, धूपिया, वघारिया, धपूगारिया' इति भाषा ॥

**तुल्ये संमृष्टशोधिते ॥४१४॥**

१ संमृज्यते स्म **संमृष्टम्** । 'मृजूष्[9] शुद्धौ'(अ.प.से.) संपूर्वः, कर्मणि क्तः। २ शोध्यते स्म **शोधितम्**। 'शुध शुद्धौ' (दि.प.अ.), निष्ठा, 'आर्धधातुकस्य-'७।२।३५॥ इतीट् । द्वे केशमक्षिकाद्यपनयनेन शोधितान्नव्यञ्जनादेः ॥४१४॥

**काञ्चिकं काञ्जिकं धान्याम्लारनाले तुषोदकम् ।**
**कुल्माषाभिषुतावन्तिसोमशुक्तानि कुञ्जलम् ॥४१५॥**
**चुक्रं धातुघ्नमुन्नाहं रक्षोघ्नं कुण्डगोलकम् ।**
**महारसं सुवीराम्लं सौवीरम्**

१ कञ्चयति दीपयत्यग्निम्, बध्नाति दोषान् वा **काञ्चिकम्**। 'कचि काचि दीप्तिबन्धनयोः[10]'(भ्वा.आ.से.), 'इन् सर्वधातुभ्यः'(उणा-५५७)इतीन्, इन्नन्तात् 'कृदिकारात्-(गणसू-४।१।४५॥)इति वा ङीष् । संज्ञायां कनि काञ्च्यां पुरि भवमिति वा । ([11]'तत्र भवः'४।३।५३॥ इत्यण् । [12]'काञ्जिकम्'[ ]इति स्वामी[13]) । "कञ्चिकं(काञ्चिकं) काञ्जिकं

१. तुलनीयोऽमरकोषः२।९।४५॥ २. 'स्निह्यते' इति३॥ ३. 'ऋवर्णाच्चेति वक्तव्यम्' इति वार्तिकरूपं दृश्यते ॥ ४. द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-६१९, पृ.७०८॥ ५. '-पल-' इति१, '-पिलि-' इति२॥ ६. द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-६१८, पृ.७०७॥ ७. 'तिसलनौ' इति, तत्रैव च 'फिसलणौ' इति संशोधितपाठः ४प्रतौ दृश्यते ॥ ८ द्र. अम.क्षीरस्वामिटीका २।९।४६॥, पृ.२१०॥, स्वोपज्ञटीका ३।४१४॥, पृ.९६॥, तयोः 'भावितं' इत्यस्य स्थाने 'धूपितं' इति दृश्यते ॥ ९. स्वामिसम्मतोऽयं धातुः, सायणः षकारानुबन्धं न पठति ॥ १०. "सायणस्तु 'कचि काचि दीप्तिबन्धनयोः' इत्येवं पठति । मैत्रेयस्तु काचिं न पपाठ । काञ्चनं काञ्ची इत्युभयत्रान्येषामपि(६।३।१३७)इति दीर्घ-त्वमाह(धातुप्रदीपः, पृ.१९)" इति क्षीरतरङ्गिण्यां युधिष्ठिरमीमांसकेन कृता टिप्पणी, पृ.३७॥, टिप्प-५॥ ११. कोष्ठान्तर्गतपाठः २प्रतौ नास्ति ॥ १२. 'कञ्जि-' इति १.४॥ १३. स्वामिकृतामरकोशटीकायामन्यथा दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वीरम्''[धन्वन्तरिनिघण्टुः ६।२९४]इति धन्वन्तरिः । २ चस्य जत्वे पञ्जिकावत् **काञ्जिकम्** । यद्वा 'अञ्जू व्यक्त्यादौ' (रु.प.से.), 'संज्ञायाम्'३।३।१०९॥इति ण्वुल् । केन जलेन अञ्जिका अभिव्यक्तिरस्य काञ्जिकम् । ३ धान्यमम्लयति **धान्याम्लम्** । 'कर्मण्यण्'३।२।१॥ । ४ आ समन्तादियर्ति आरः । 'ऋ गतौ'(जु.प.अ.), पचाद्यच्, आरः। 'नल (णल) गन्धे'(भ्वा.प.से.) कर्मणि घञ्, नालः। आरो दूरगामी नालो गन्धोऽस्य **आरनालम्** ।अरनालो[1] भक्तं तज्जमारनालं वा । ५ तुषाणामुदकं **तुषोदकम्**। ६ कुल्माषैर्यवादिभिरर्धस्विन्नैर-भिषूयते स्म **कुल्माषाभिषुतम्**, षडक्षरम्। व्यस्तमपि, तेन ''कुल्माषम्'' तुर्यकाण्डे धान्यावसरे व्याख्यास्यते[अभि. श्लो-४।११७५]। अभिपूर्वात् सुनोतेः, सवनार्थात्[2] कर्मणि क्तः, 'उपसर्गात् सुनोति-'८।३।६५॥इति षत्वम्, अभिषुतम् । ७ अवन्तिप्रदेशेषु सूयते **अवन्तिसोमम्**। 'षुञ् अभिषवे'(स्वा.-उ.अ.), 'अर्त्तिस्तु-'(उणा-१३७)इति मन् । ८ शक्नोति निर्मलीकर्तुम्, शोचति निर्मलीभवत्यनेन [वा] **शुक्तम्**। 'शक्लृ शक्तौ'(स्वा.प.अ.), 'शुच शोके'(भ्वा.प.से.)अस्माद्वा, 'पुत-पित्त-'(हैमोणा-२०४)इति साधुः । ९ कुञ्जं लाति **कुञ्जलम्**। कुत्सितं जलमस्येति पृषोदरादिर्वा । कुत्सितं जलं विगतस्वा-भाविकरसत्वात् कुञ्जलम्, नैरुक्तो मकारो वा। ''वृषादित्वात् कुञ्जलम्''[ [3] ]इति सुभूतिः ॥४१५॥ १० चकते तृप्यतेऽनेन **चुक्रम्**, पुंक्ली. । 'चक तृप्तौ'(भ्वा.प.से.), 'चकिरम्योरुच्चोप-धायाः'(उणा-१७१)इति रक् । ११ धातून् हन्ति **धातुघ्नम्**। 'हन्(हन) हिंसागत्योः'(अ.प.अ.), 'अमनुष्यकर्तृके च' ३।२।५३॥इति टक्, कित्त्वाद् 'गमहन-'६।४।९८॥ इत्युपधा-लोपः, 'हो हन्तेः-'७।३।५४॥इति कुत्वम्। १२ उन्नह्यतेऽनेन **उन्नाहम्** । 'नह(णह) बन्धने'(दि.उ.अ.), करणे घञ् । १३ रक्षांसि हन्ति **रक्षोघ्नम्**, तद्योगे भूतादिदोषाभावात् । १४ कुण्डं गुडति रक्षति, लत्वे **कुण्डगोलकम्** । 'गुड रक्षणे(तु.-प.से.), ण्वुल् । १५ महान् रसोऽत्र **महारसम्** । १६ सुवीरेषु अम्लं **सुवीराम्लम्** । १७ सुवीरेषु देशेषु प्रायेण भवं **सौवीरम्**। 'प्रायेण भवे[4]:'४।३।३९॥इत्यण् । सप्तदश[5] काञ्जिकस्य । [शेषश्चात्र-''कुल्माषाभिषुते पुनः गृहाम्बु मधुरा च'' [शेषनाममाला-३।१०१॥] ]॥

**प्रक्षणं पुनः ॥४१६॥**

**तैलं स्नेहोऽभ्यञ्जनं च**

१ म्रक्ष्यतेऽनेनेति[6] **म्रक्षणम्** । 'म्रक्ष म्लेच्छने'(चु.-प.से.), चुरादिः, परस्मैपदी, 'म्रक्ष रोषे'( ), भ्वादावित्येके, करणे ल्युट् ॥४१६॥ २ तिलानां विकारः **तैलम्**, पुंक्ली. । 'तस्य विकारः'४।३।१३४॥ इत्यण् । ३ स्निह्यतेऽनेन **स्नेहः**, पुंक्ली. । 'ष्णिह प्रीतौ'(दि.प.से.), घञ् । ४ अभ्यज्यतेऽनेन **अभ्यञ्जनम्** । 'अञ्जू व्यक्तादौ(व्यक्त्यादौ)'(रु.प.वे.), करणे ल्युट् । चत्वारि तैलस्य ॥

**वेषवार उपस्करः ।**

१ वेषणं वेषो व्याप्तिः, तं वृणीते **वेषवारः** । 'वृञ् वरणे'(स्वा.उ.से.), 'कर्मण्यण्'३।२।१॥ । मिश्रास्तु-''वेसेन वारो वेसवारः''[ ]इति दन्त्यमध्यमाहुः, ''वेसवारः परिसरो मसूरः कुसुमासनः''[ [7] ]इति सभेदात् । २ उपकरोति व्यञ्जनेन समवैति **उपस्करः** । उपपूर्वः करोतिः, ततः पचाद्यच्, 'समवाये च'६।१।१३८॥इति सुट् । शाकाद्युपस्क्रियतेऽनेन उपस्करः, 'पुंसि संज्ञायाम्'३।३।११८॥इति घो वा । द्वे सामान्येन संस्कारार्थं दीयमानहिङ्गुजीरकहरिद्राधान्यकशुण्ठ्यादेः ।

अथ तद्भेदानाह-

**स्यात् तिन्तिडीकं तु चुक्रं वृक्षाम्लं चाऽऽम्लवेतसे[8] ॥४१७॥**

१ तिम्यति आर्द्रीभवति **तिन्तिडीकम्** । 'तिम ष्टिम आर्द्रीभावे[9]'(दि.प.से.), 'अनी(अली)कादयश्च'(उणा-४६५) इति निपातनादीकप्रत्ययः, द्विर्वचनम्, प्रकृतिमकारस्य च डः। २ चकते तृप्यतेऽनेन **चुक्रम्**, पुंक्ली.। 'चक तृप्तौ'(भ्वा.- आ.से.), 'चकिरम्योरुच्चोपधायाः'(उणा-१७१)इति रक्, उपधायाश्चोत्वम् । ३ वृक्षस्यामलं **वृक्षाम्लम्** । ४ अम्ल-(आम्ल)वेतसवृक्षनिर्यास **आम्लवेतसः**, तत्र । चत्वारि आम्लवेतसस्य ॥४१७॥

**हरिद्रा काञ्चनी पीता निशाख्या वरवर्णिनी ।**

१ हरति वर्णान्तरमिति हरिः । 'हृञ् हरणे'(भ्वा.-उ.अ.), 'अच इः'(उणा-५७८)इति इः । हरिं पिङ्गलवर्णं द्राति कुत्सयति **हरिद्रा** । 'द्रा कुत्सायां गतौ'(अ.प.अ.),

१. 'आर-' इति३॥ २. 'सेचना-' इति३॥ ३. द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-६१२, पृ.७००॥, तत्र ''वृषादित्वात्(उ-१।१०८) कुजेः कलन् (च ?) कुञ्जलम्'' इति दृश्यते ॥ ४. 'प्रायभवः' इत्यष्टाध्याय्याम् ॥ ५. इतोऽग्रे ३प्रतौ 'सौवीरस्य' इति पाठो दृश्यते ॥ ६. '-नेन' इति ३॥ ७. द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-६०८, पृ.६९४॥ ८. अत्र टीकाकृतः 'आम्लवेतसः-' इति द्वितीयस्वरादिशब्द इष्टः, अन्यत्र 'अम्लवेतसः इति दृश्यते ॥ ९. 'तिम तीम ष्टिम ष्टीम आर्द्रीभावे' इति क्षीरतरङ्गिणी, 'तिम स्मित ष्टीम आर्द्रीभावे' इति मा. धातुवृत्तिः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'आतोऽनुपसर्गे कः'३।२।३॥ । २ काञ्चनवर्णत्वात् **काञ्चनी**। ३ **पीता** वर्णेन । ४ **निशाख्या** रात्रिपर्यायनामिकेत्यर्थः । ५ वरो वर्णोऽस्या **वरवर्णिनी** । पञ्च हरिद्रायाः ॥

**क्षवः[1] क्षुताभिजननो[2] राजिका[3] राजसर्षपः[4] ॥४१८॥**
**आसुरी[5][1] कृष्णिका[6] चासौ**

१ क्षूयतेऽनेन **क्षवः** ।'टुक्षु शब्दे'(अ.प.से.),'ऋदोरप्'३।३।५७॥। २ क्षुतमभिजनयति **क्षुताभिजननम्( क्षुताभिजननः )** ।'जनी प्रादुर्भावे'(दि.आ.से.), हेतुमण्णिजन्तः, नन्द्यादित्वाद् ल्युः । ३ राजते **राजिका** ।'राजृ दीप्तौ'(भ्वा.उ.से.), ण्वुल् । ४ सर्षपाणां राजा **राजसर्षपः**। 'राजदन्तादिषु परम्'२।२।३१॥ इति पूर्वप्रयोगः ॥४१८॥ ५ आ अस्यते शाकादौ **आसुरी** ।'असु क्षेपणे'(दि.प.से.),'असेरुरन्'(उणा-४२)इत्युरन्, गौरादित्वाद् ङीष् । असुरस्य स्त्रीव वा । **कृष्णिका** [कृष्ण]वर्णेन । षड् 'राई' इति ख्याताया: ॥

**कुस्तुम्बुरु[1] तु धान्यकम्[2] ।**
**धन्या[3] धन्याकं[4] धान्याकम्[5]**

१ कुत्सितं तुम्बति **कुस्तुम्बुरुः**[2], पुंक्ली. । 'तुबि अर्दने'(भ्वा.प.से.), बाहुलकाद् 'मृस्तृ-'( )इत्यादिना उः[3], पारस्करादित्वात् सुट् । ''कुत्सिता तुम्बुरुः औषधीजातिः, तत्फलमपि कुस्तुम्बुरुः''[अभि. स्वोपज्ञटीका३।४१८॥]इत्याचार्याः । २ धान्यमिव **धान्यकम्** ।'इवे प्रतिकृतौ'५।३।९६॥ इति कन् । ३ धने साधुः **धन्या** ।'तत्र साधुः'४।४।९८॥ इति यत् । ४ 'धन धान्ये'(जु.प.से.),'पिनाकादयश्च'(उणा-४५५) इत्याकः, मुगागमो दीर्घत्वं च निपात्यते **धन्याकम्**, ह्रस्वादिः। धन्यमकति यातीति वा । ५ धान्यमकति **धान्याकम्**, द्वितीयस्वरादिः । ''धन्याकं धान्याकं धान्यं कुस्तुम्बुरु धनीयकम्'' [[4]]इति रभसः । पञ्च 'धाणा' इति ख्यातस्य । ''अल्लुका'' [शेषनाममाला३।१०१॥]इति शैषिकम् ॥

**मरिचं[1] कृष्णमूषणम्[2][3] ॥४१९॥**
**कोलकं[4] वेल्लजं[5] धार्मपत्तनं[6] यवनप्रियम्[7] ।**

१ म्रियते व्याकुलीभवति जिह्वाऽनेन **मरिचम्** । 'मृङ् प्राणत्यागे'(तु.आ.प.अ.), 'मृङ इचः'[5]( )इतीचः । २ **कृष्णः** वर्णेन, तैक्ष्ण्यात् कर्षति प्राणानिति वा । ३ ऊषति रुजति **ऊषणम्**, षष्ठस्वरादिः । 'ऊष रुजायाम्'(भ्वा.प.से.), नन्द्यादित्वाल्ल्युः । उषणमिति[6] पञ्चमस्वरादिरपि। ''उषणं स्यादूषणं च''[शब्दभेदप्रकाशापरनामद्विरूपकोशः, श्लो-७]इति शब्दप्रभेदः[7] ॥४१९॥ ४ कोलति संस्त्यायते **कोलकम्** । 'कुल संस्त्याने'(भ्वा.प.से.), 'कृञादिभ्यो वुन्'(उणा-७१३)। ५ वेल्ले वेल्लातटे जायते **वेल्लजम्** । यद्वा 'वेलृ वेल्लृ' (भ्वा.प.से.)इत्यादिदण्डकाद्[8] वेल्लेर्भावे घञ्, वेल्लश्च उलनकटुत्वाद् जनयति वेल्लजम् । 'अन्येष्वपि-'३।२।-१०१॥ इति डः। वेल्लाख्यः शाखीत्येके । ६ धर्मपत्तने भवं **धार्मपत्तनम्** । 'तत्र भवः'४।३।५३॥ इत्यण् । ७ यवनानां प्रियं **यवनप्रियम्** । सप्त मरिचस्य । शेषश्चात्र-''द्वारवृत्तं मरीचं बलितं तथा''[शेषनाममाला३।१०२॥]॥

**शुण्ठी[1] महौषधं[2] विश्वा[3] नागरं[4] विश्वभेषजम्[5] ॥४२०॥**

१ शुण्ठति[9] शोषयति कफमिति **शुण्ठी** । 'शुठि शोषणे'(भ्वा.प.से.), 'इगुपधात् कित्'(उणा-५५९)इतीन्, 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीष्, पचाद्यचि गौरादित्वाद् ङीषिति वा । ''बाहुलकात् किः, शुण्ठिः''[[10]]इति भीमः । ''सधन्याशुण्ठिसैन्धवम्''[[11]]इति वैद्यकम् । २ महच्च तदौषधं च **महौषधम्** । ३ विशति दोषान् विशति बहुरसायनेष्विति **विश्वा**, स्त्रीक्ली. । यदमरः-''स्त्रीनपुंसकयोर्विश्वम्''[अमरकोषः २।९।३८॥]इति । 'विश प्रवेशने' (तु.प.अ.), 'अशि(अशु)प्रुषि-'(उणा-१४९)इति क्वन्[12]। ४ नगराख्ये देशे भवं **नागरम्** । 'तत्र भवः'४।३।५३॥इत्यण् । न गिरति कफमिति वा । 'नभ्राण्नपात्-'६।३।७५॥ इति नञ्प्रकृत्या । ५ विश्वस्य सर्वदोषस्य भेषजं **विश्वभेषजम्**, सर्वदोषजित्त्वात्। पञ्च शुण्ठ्याः ॥४२०॥

**वैदेही[1] पिप्पली[2] कृष्णोपकुल्या[3][4] मागधी[5] कणा[6][13] ।**

---

१. 'असुरी' इति मुद्रिताभिधानचिन्तामणौ, स्वोपज्ञटीकायामपि तथैव ॥ २. '-तुम्बरुः' इति२.३.४॥ ३. 'तुः' इति१॥ ४. द्र. रामाश्रमी २।९।३८॥, पृ.४१६॥, पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-६११, पृ.६९८॥ ४. १प्रतौ नास्ति ३॥ ५. 'उष दाहे'(भ्वा.प.से.), ल्युट्, संज्ञापूर्वकत्वाद् गुणाभावे उषणमिति ॥ ७. पूज्याचार्यश्रीकस्तूरसूरिसम्पादितशब्दभेदप्रकाशे ''दुषणं स्याद् दूषणं च'' इति दृश्यते, अभिधानकोशः, पृ.२३०॥ ८. 'वेल्लृ चेलृ केलृ खेलृ क्ष्वेलृ चलने' इति क्षीरतरङ्गिणी, 'वेलृ चेलृ केलृ खेलृ क्ष्वेलृ वेल्ल चलने' इति मा.धातुवृत्तिः ॥ ९. 'शुण्ठयति' इति३॥ १०. द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-६११, पृ.६९९॥ ११. द्र. रामाश्रमी २।९।३८॥, पृ.४१६॥ १२. 'कनन्' इति३॥ १३. 'कणाः' इति३.४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ विदेहेषु देशेषु भवा **वैदेही** । 'तत्र भवः'४।३।-५३॥ इत्यण्, 'टिड्ढाणञ्-'४।१।१५॥ इति ङीप् । २ पलत्यातुरं **पिप्पली** । 'पल गतौ'(भ्वा.प.से.), 'ऋ(पृ)पलिभ्यां टित् पिप् च पूर्वस्य'(हैमोणा-११)इति अः, गौरादिः । ३ **कृष्णा** वर्णेन। कर्षति कफमिति वा। ४ उपकोलति संस्त्यायति **उपकुल्या** । 'कुल संस्त्याने'(भ्वा.प.से.), 'अघ्न्यादयश्च'(उणा-५५१)इति यक् । कुले प्राणिगणे साधुरिति वा। 'तत्र साधुः' ४।४।९८॥ इति यत् । ५ मगधेषु भवा **मागधी**। 'तत्र भवः' ४।३।५३॥ इत्यण् । ६ कणाः सन्त्यस्यां **कणाः ( कणा )**। 'अर्शआदिभ्योऽच्'५।२।१२७॥ । षट् पिप्पल्याः । शेषश्चात्र-

"पिप्पल्यामूषणा शौण्डी[2] चपला तीक्ष्णतण्डुला ।
उषणा तण्डुलफला कोला च कृष्णतण्डुला ॥१॥"

[शेषनाममाला ३।१०२-१०३॥] ॥

**तन्मूलं ग्रन्थिकं सर्वग्रन्थिकं चटकाशिरः ॥४२१॥**

१ तस्याः पिप्पल्या मूलं तन्मूलम्, ग्रन्थिप्रतिकृतिः **ग्रन्थिकम्** । 'इवे प्रतिकृतौ'५।३।९६॥ इति कन् । २ सर्वे ग्रन्थयोऽत्र **सर्वग्रन्थिकम्** । ३ चटकाशिरोरूपत्वात् **चटकाशिरः** । त्रीणि पिप्पलीमूलस्य ॥४२१॥

**त्रिकटु त्र्यूषणं व्योषम्**

१-२ त्रीणि कटूनि, त्रीणि ऊषणानि च शुण्ठीमरिचपिप्पल्याख्यानि समाहृतानि **त्रिकटु, त्र्यूषणम्** । ३ विशेषेण ओषति दहति **व्योषम्** । 'उष दाहे'(भ्वा.प.से.), पचाद्यच्, 'पुगन्तलघूपधस्य च'७।३।८६॥ इति गुणः । त्रीणि 'त्रिगडू' इति ख्यातस्य ॥

**अजाजी जीरकः कणा[4] ।**

१ अजं छागमजति गन्धोत्कटत्वात् कटुत्वं याति, सर्वभक्षेणापि छागेन न स्वाद्यते **अजाजी**, स्त्रीलिङ्गः । 'अज गतौ क्षेपणे च'(भ्वा.प.से.), 'कर्मण्यण्'३।२।१॥, 'टिड्ढाणञ्-' ४।१।१५॥ इति ङीप्। अजं स्वाभाविकं मन्दाग्नित्वमजति क्षिपतीति वा व्युत्पत्तिः । २ जवते **जीरकः**, पुंक्ली.। 'जु गतौ'( ), सौत्रः, 'जोरी च'(उणा-१८१) रक्, ईअन्तादेशश्च, 'संज्ञायां कन्' ५।३।७५॥ ३ कणति शब्दायते अग्निसंयोगेन **कणा**। 'कण क्वण शब्दे[5]'(भ्वा.प.से.), पचाद्यच्, टाप् । कणाः सन्त्यस्यामिति वा । अर्शआदित्वादच् । त्रीणि जीरकस्य । "जीरे जीरणजरणौ[6]" [शेषनाममाला ३।१०३॥] शैषिके ॥

**सहस्रवेधि वाल्हीकं जतुकं हिङ्गु रामठम् ॥४२२॥**

१ सहस्रमित्यनेकोपलक्षणम्, सहस्रं वेधितुं सुगन्धाक्रान्तं कर्तुं शीलमस्य **सहस्रवेधि**। 'विध विधाने'(तु.प.से.), 'सुप्यजातौ णिनिः-'३।२।७८॥। २ वाल्हीके उदीच्यदेशे भवं **वाल्हीकम्**। 'तत्र भवः'४।३।५३॥ इत्यण् । ३ जतुप्रतिकृति **जतुकम्** । 'इवे प्रतिकृतौ'५।३।९६॥ कन् । ४ हिनोति नासां **हिङ्गु**, पुंक्ली.। 'हि गतौ वृद्धौ च'(स्वा.प.अ.), 'हेर्हिन् च' (हैमोणा-७६०)इति गुन् (गुः) । "हिममिव [7]हिमद्रवत्वं भवक्षीरत्वात्, हिमं गच्छति, मृगय्वादित्वात् कुः, पृषोदरादित्वाद् हिमाकारलोपे धातोष्टिलोपे च हिङ्गु"[[8] ]इत्यन्ये । ५ रमठे उदीच्यदेशे भवं **रामठम्** । 'तत्र भवः'४।३।५३॥ इत्यण्। रमयति रसनामिति वा । 'रमु क्रीडायाम्'(भ्वा.आ.अ.), णिजन्तः[9], ततः[10] 'कमेरठः'(उणा-१००)इति बाहुलकाद् रमेरपि, तत एव मित्त्वेऽपि न ह्रस्वत्वम् । पञ्च हिङ्गोः । [शेषश्चात्र-"हिङ्गौ तु भूतनाशनम्, अगूढगन्धमत्युग्रम्"[शेषनाममाला ३।१०३-१०४॥] ]॥४२२॥

**न्यादः स्वदनं खादनमशनं**
**निघसो वल्भनमभ्यवहारः ।**
**जग्धिर्जक्षणभक्षणलेहाः**
**प्रत्यवसानं घसिराहारः ॥४२३॥**

**प्सानाऽवष्वाणविष्वाणा भोजनं जेमनादने ।**

१ न्यदनं **न्यादः**। निपूर्वः 'अद भक्षणे'(अ.प.अ.), 'नौ ण च'३।३।६०॥ इति अदेर्णप्रत्यये उपधावृद्धिः। २ स्वद्यते **स्वदनम्** । 'स्वद(ष्वद) आस्वादने'(भ्वा.आ.से), ल्युट् । ३ खाद्यते **खादनम्** । 'खादृ भक्षणे'(भ्वा.प.से.), ल्युट् । ४ अश्यत इति **अशनम्** । 'अश भोजने'(क्र्या.प.से.), ल्युट् । ५ न्यदनं **निघसः** । निपूर्वः 'अद भक्षणे'(अ.प.अ.), 'उपसर्गेऽदः'३।३।५९॥ इत्यप्, 'घञपोश्च'२।४।३८॥ इति अदेर्घस्लादेशः। ६ वल्भ्यते[11] **वल्भनम्**। 'वल्भ भोजने'(भ्वा.-आ.से.), ल्युट् । ७ अभ्यवहरणम् **अभ्यवहारः** । अभ्यवपूर्वो

---

१. 'पिच्च' इति२.३.४॥ २. 'शौडी' इति१.२॥ ३. तुलनीयोऽमरकोशः २।९।१११॥ ४. 'कणाः' इति १.३.४॥ ५. 'अण रण वण' इत्यादिदण्डकोऽयं धातुपाठः ॥ ६. 'जीरे जीरणजरणौ' इत्यस्य स्थाने १.२.४.प्रतिषु 'जीरणः जरणः' इति दृश्यते ॥ ७. 'हिमवद्द्रव-' इति२॥ ८. द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-६१३, पृ.७००॥, तत्र 'हिमद्रव्यत्वं भवक्षीरत्वात्' इत्यस्य स्थाने 'हिममिव हिमं द्रवं । त्वग्भवक्षीरत्वात् ।' इति दृश्यते ॥ ९. '-न्तात्' इति३॥ १०. इतः परा 'रमेर्वृद्धिश्च'(इणा-१०१)इत्युणदिसूत्रसत्त्वात् क्लिष्टकल्पना ॥ ११. 'वल्भते' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'हृञ् हरणे'(भ्वा.उ.अ.), भोजनार्थः, 'भावे'३।३।१८॥ घञ्। ८ अदनं **जग्धिः**[1]। 'अद भक्षणे'(अ.प.अ.), 'स्त्रियां क्तिन्' ३।३।९४॥, 'अदो जग्धिर्ल्यप्ति किति'२।४।३६॥ इति जग्धिरादेशः, 'झषस्तथोः-'८।२।४०॥ इति धत्वम्, 'झरो झरि-' ८।४।६५॥ इति धलोपः। ९ जक्ष्यते **जक्षणम्**। 'जक्ष भक्षणे'[2] (अ.प.से.), ल्युट्। १० भक्ष्यते **भक्षणम्**। 'भक्ष भक्षणे'[3] (भ्वा.प.से), ल्युट्। ११ लेहनं **लेहः**। 'लिह आस्वादने' (अ.उ.अ.), 'भावे'३।३।१८॥ घञ्। १२ प्रत्यवसीयते **प्रत्यवसानम्**। 'षोऽन्तकर्मणि'(दि.प.अ.), ल्युट्। १३ घसनं **घसिः**। 'घस्लृ अदने'(भ्वा.प.अ.), 'इन् सर्वधातुभ्यः'[4](उणा-५५७)। १४ आह्रियतेऽस्माद् रस इति **आहारः**। 'हृञ् हरणे' (भ्वा.उ.अ.), 'अकर्तरि च[5] कारके संज्ञायाम्'३।३।१९॥ इत्यपादाने घञ् ॥४२२॥ १५ प्सायते **प्सानम्**। 'प्सा भक्षणे' (भ्वा.प.अ.), ल्युट्। १६ अवष्वणनम् **अवष्वाणः**। 'स्वन शब्दे भोजने च[6]'(भ्वा.प.से), घञ्, 'वेश्च स्वनो भोजने' ८।३।६९॥ इति षत्वम्। १७ एवं विष्वणनं **विष्वाणः**। 'स्वन शब्दे भोजने च'(भ्वा.प.से.), 'भावे'३।३।१८॥ घञ्। ''विष्वणनं सशब्दं भोजनम्[7], तथा च वृत्तौ-'अभ्यवहारक्रियाविशेषोऽभिधीयते यत्र स्वनमस्तीति, सशब्दं भुङ्क्ते इत्यर्थः''[ ] [इति]। पिनाकी तु 'भुञ्जानः किञ्चिच्छब्दं करोति'[ ]इति। काश्यपस्तु भोजनमेवार्थमाह। बोधिन्यासेऽपि पक्षत्रयमपि दर्शितम्''[मा. धातुवृत्तौ भ्वादिगणे, धातुसं-५५७]इति माधवः। १८ भुज्यते **भोजनम्**। 'भुज पालनाभ्यवहारयोः'(रु.प.आ.अ.), ल्युट्। **१९** जिम्यते **जेमनम्**। 'चमु छमु जमु झमु अदने[8]'(भ्वा.प.-से.)इत्यत्र जिमुमपि केचित् पठन्ति, ततो ल्युट्। 'जमु अदने' (भ्वा.प.से.)इत्यस्य जमनं च। जवनमपि, यद्दुर्गः-''जवनं भोजनं क्वचित्''[[10] ]। [२० अद्यते **अदनम्**। 'अद भक्षणे' (अ.प.अ.), ल्युट् ]। विंशतिर्भोजनस्य ॥

## चर्वणं[1] चूर्णनं दन्तैः

१ चर्व्यते **चर्वणम्**। 'चर्व भक्षणे'(भ्वा.प.से.), ल्युट्। ([11]चूर्ण्यते चूर्णनम्, ल्युट्।), दन्तैश्चूर्णनं चर्वणमित्युच्यते[12]॥

## जिह्वाऽऽस्वादस्तु लेहनम्[1] ॥४२४॥

१ जिह्वया आस्वादनं जिह्वाऽऽस्वादः। लिह्यते **लेहनम्**। 'लिह आस्वादने'(अ.उ.अ.), ल्युट् ॥४२४॥

## कल्यवर्तः[1] प्रातराशः[2]

१ कल्ये प्रभाते वर्त्यते **कल्यवर्तः**। 'वृतु वर्तने' (भ्वा.आ.से.), कर्मणि घञ्। २ प्रातरशनं **प्रातराशः**। 'अश भोजने'(क्र्या.प.से.), घञ्। द्वे प्रातराशस्य। 'कलेवा' इति भाषा। ([13]'सीरामण' इति भाषा)॥

## सग्धिस्तु[1] सहभोजनम्[2]।

१ समानस्य जग्धिः **सग्धिः**। 'अद भक्षणे'(अ.-प.अ.), क्तिन्, 'बहुलं छन्दसि'२।४।३९॥ इति घस्लादेशः, 'घसिभसोर्हलि च'६।४।१००॥ इत्युपधालोपः, 'झषस्तथोः-' ८।२।४०॥ इति धत्वम्, तकारस्य धत्वम्, 'झरो झरि सवर्णे' ८।४।६५॥, 'झलां जश् झशि'८।४।५३॥ इति जश्त्वम्[14]। २ **सहभोजनम्**। 'सुप्सुपा'१।४।१०३॥ इति समासः। द्वे सहभोजनस्य। 'भेला जिमवुं' इति भाषा ॥

## ग्रासो[1] गुडेरकः[2] पिण्डो[3] गडोलः[4] कवको[5] गुडः[6] ॥४२५॥ गण्डोलः[7] कवलः[8]

१ ग्रस्यते **ग्रासः**। 'ग्रस(ग्रसु) अदने'(भ्वा.प.से.),

---

१. 'जग्धिः' इत्यत्र इकार उच्चारणार्थः ॥ २. 'जक्ष भक्षहसनयोः' इति क्षीरतरङ्गिण्यादौ ॥ ३. मैत्रेयसम्मतोऽयं धातुपाठः, द्र. धातुप्रदीपः, भ्वादिः, धातुसं-५९५, पृ.६४॥ ४. 'सर्वधातुभ्य इन्' इत्युणादिगणसूत्रस्वरूपम् ॥ ५. 'चेति' इति४॥ ६. 'स्यमु स्वन स्तन ध्वन शब्दे' इति स्वामी, क्षीरतरङ्गिणी, भ्वादिः, धातुसं-५६५, पृ.१२१॥, 'स्यमु स्वन ध्वन शब्दे' इति मैत्रेयसायणौ, धातुप्रदीपः, भ्वादिः, धातुसं-५३७, मा. धातुवृत्तिः, भ्वादिः, धातुसं-५५७, पृ.२०४॥ ७. 'सशब्दभोजनम्' इति मा.धातुवृत्तौ॥ ८. १प्रतौ न दृश्यते ॥ ९. ''इदुपधोऽयमित्येके-जेमनम् जेमः'' इति क्षीरतरङ्गिणी, भ्वादिः, धातुसं- ३१५, पृ.७५॥, तत्रैव ''धातुवृत्तौ स्मृतम् (पृष्ठ.९५)। काशकृत्स्नधातुपाठेऽपि 'जिमु अदने' पठ्यते (२।२२०, पृष्ठ.१९)। अस्यैव 'जिमु' धातो राजस्थान(मारवाडी)भाषायाम् 'जीमना' पदं प्रयुज्यते ॥'' इत्येका टिप्पणी दृश्यते ॥ १०. द्र. स्वोपज्ञटीका३।४२३॥, पृ.९८॥, अम. क्षीरस्वामिटीका २।९।५६॥, पृ.२१२॥ ११. कोष्ठान्तर्गतपाठः १.२ न दृश्यते ॥ १२. इतोऽग्रे बहिर्भागे १प्रतौ ''लोकभाषा चाबवूं २ बे नाम वाटवा नाम २'' इति दृश्यते ॥ १३. कोष्ठान्तर्गतपाठः २प्रतौ दृश्यते, अत्र सुसरलत्वात् स्थापितः ॥ १४. अत्रेयं सग्धिरूपसिद्धिर्नानाशङ्काजनिका, अथ चेयं रीतिरनुसर्त्तव्या, तथा हि-'अद भक्षणे'(अ.प.अ.), 'स्त्रियां क्तिन्'३।३।९४॥ इति क्तिनि, 'बहुलं छन्दसि'२।४।३९॥ इत्यनेन घस्लादेशे 'घसिभसोर्हलि च'६।४।१००॥ इत्युपधालोपे 'झलो झलि'८।२।२६॥ इत्यनेन सलोपे 'झषस्तथोः-'८।२।४०॥ इति तेः तकारस्य धत्वे 'झलां जश् झशि'८।४।५३॥ इति जश्त्वे ग्धिसिद्धम्, अत्र जश्त्वे कर्तव्ये स्थानिवत्त्वं न शङ्क्यम्, 'न पदान्त-'१।१।५८॥ इति सूत्रेण जश्त्वे कर्तव्ये स्थानिवत्त्वनिषेधात्, ततः समानशब्देन सह समासे कृते 'समानस्य च्छन्दसि-'६।३।८४॥ इत्यनेन सभावे कृते सग्धिः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

घञ् । २ गुड्यते गुडेरः । 'गुड रक्षणे'(तु.प.से.), 'पतिकठि-'(उणा-५८)इत्येरक्, स्वार्थे कनि[1] गुडेरकः । ३ पिण्ड्यते **पिण्डः**, पुंस्त्री । "सङ्घातग्रासयोः पिण्डी द्वयोः" [अमरकोष: ४०, ३।३।४४॥]इत्यमरः[2] । 'पिडि सङ्घाते'(भ्वा.आ.से), कर्मणि घञ् । ४ गड्यते **गडोलः**[3] । 'गड[4] सेचने'(भ्वा.प.से.), 'कपिगडिगण्डि-'(उणा-६६)इत्योलन्[5]। ५ कौत्यनेन **कवकः**। 'कु शब्दे'(अ.प.अ.), बाहुलकादकः। ६ गुडति रक्षति जीवं **गुडः**। 'गुड रक्षणे'(तु.प.से.), 'इगुपध-'३।१।१३५॥ इति कः ॥४२५॥ ७ गण्डति वदनैकदेशे भवति **गण्डोलः** । 'गडि वदनैकदेशे'(भ्वा.प.से.), 'कपिगडिगण्डि-'(उणा-६६)इत्योलन्[5] । ८ केन जलेन वलते **कवलः**, पुंक्ली. । वलधातोः[6] पचाद्यच् । " 'कवृ[7] वर्णने' (भ्वा. आ.से.), वृषादित्वात् कलच्"[8][ ]इत्यन्ये । अष्टौ[9] कवलस्य ॥

### तृप्ते त्वाघ्रातसुहिताऽऽशिताः ।

१ तृप्यति स्म **तृप्तः** । 'तृप प्रीणने'(दि.प.वे.), निष्ठा, तत्र । २ आध्रायति स्म **आध्रातः** । 'ध्रै तृप्तौ'(भ्वा.-प.अ.), निष्ठा, 'आदेचः-'६।१।४५॥ इत्यात्वम्। आध्राणोऽपि। ३ सुष्ठु दधाति स्म **सुहितः** । 'डुधाञ् धारणादौ,'(जु.उ.अ.), निष्ठा, 'दधातेर्हिः'७।४।४२॥ । यद्वा 'षह षुह[10] चक्यर्थे[11]' (दि.प.से), चक्यर्थस्तृप्त्यर्थः, ततो निष्ठा, 'धात्वादेः षः सः' ६।४।६४॥। ४ आ अश्नाति स्म **आशितः**। 'अश भोजने' (क्र्या.प.से.), निष्ठा । चत्वारि तृप्तस्य ॥

### तृप्तिः सौहित्यमाध्राणम्

१ तर्पणं **तृप्तिः** । 'तृप प्रीणने'(दि.प.से.), 'स्त्रियां क्तिन्'३।३।९४॥ । २ सुहितस्य भावः **सौहित्यम्** । 'गुणवचन-'५।२।१२४॥ इति ष्यञ् । ३ आध्रायते **आध्राणम्**। 'ध्रै तृप्तौ'(भ्वा.प.अ.), निष्ठा, 'आदेच-'६।१।४५॥ इत्यात्वम्, 'संयोगादेरातोधातोः-'८।२।४३॥ इति नत्वम् । त्रीणि तृप्तेः ॥

### अथ भुक्तसमुज्झिते ॥४२६॥
### फेला पिण्डोलिफेली च

१ [पूर्वं] भुक्तं पश्चात् समुज्झितं संत्यक्तं **भुक्तसमुज्झितम्**, तत्र ॥४२६॥ २ फेल्यते त्यज्यते **फेला** । 'पेलृ फेलृ[12] गतौ'(भ्वा.प.से.), कर्मणि 'गुरोश्च हलः'३।३।१०३॥ इत्यकारः । फेलकोऽपि । ३ पिण्ड्यते **पिण्डोलिः** । 'पिडि सङ्घाते'(भ्वा.आ.से.), बाहुलकादोलिः । ४ फेल्यते **फेलिः**। 'इन् सर्वधातुभ्यः'(उणा-५५७) । चत्वारि 'अइठि' इति ख्यातायाः ॥

### स्वोदरपूरके पुनः ।
### कुक्षिम्भरिरात्मम्भरिरुदरम्भरिरपि

१-२ स्वमात्मीयमेवोदरं पूरयति स्वोदरपूरकः । 'पूर पूरणे'( ), ण्वुल्, तत्र । कुक्षिम्, आत्मानं च बिभर्ति **कुक्षिम्भरिः**[13], **आत्मम्भरिः**, 'फलेग्रहिरात्मम्भरिश्च'३।२।२६॥ इति सूत्रे[14] चकारात् कुक्षिम्भरिः[13] । ३ उदरमेव बिभर्ति **उदरम्भरिः** । त्रीणि स्वीयोदरपूरकस्य ॥

### अथ ॥४२७॥
### आद्यूनः स्यादौदरिको विजिगीषाविवर्जिते[15] ।

॥४२७॥ १ आ ईषद् दीव्यति स्म **आद्यूनः** । आङ्पूर्वः 'दिवु क्रीडादौ'(दि.प.से.), निष्ठा, 'दिवोऽविजिगीषायाम्'८।२।४९॥ इति नत्वम्, 'च्छ्वोः शूट्-'६।४।१९॥ इत्यूट्। २ उदरे प्रसक्त **औदरिकः** । 'उदराट्ठगाद्यूने'५।२।६७॥ इति ठक्, 'ठस्येकः'७।३।५०॥, 'किति च'७।२।११८॥ इति वृद्धिः । विजेतुमिच्छा विजिगीषा, तया विवर्जितः, तत्र । द्वे आद्यूनस्य । 'खाऊकड' इति भाषा ॥

### उदरपिशाचः सर्वान्नीनः सर्वान्नभक्षकः ॥४२८॥

१. 'कन्' इति३॥ २. अयं पाठो रामाश्रमीसम्मतामरकोषे क्षेपकरूपेण दृश्यते, द्र. ३।३।४४॥, पृ.५५५॥ ३. 'गण्डोलः' इति२॥ ४. 'गुड' इति३.४॥ ५. 'कोलच्' इत्युणादिगणे ॥ ६. 'कवृ-' इति३॥ ७. क्षीरतरङ्गिण्यादौ कवृधातोरभावादत्र वबयोरैक्यन्यायेन कबृधातुर्बोध्यः ॥ ८. द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-६२७, पृ.७१९॥ ९. 'अष्टो' इति१.२॥ १०. 'षुहि' इति ३.४॥ ११. 'षुह शक्यर्थे' इति स्वामी, द्र. क्षीरतरङ्गिणी, दिवादिः, धातुसं-१८, पृ.२१०॥, तत्र "षह षुह संभक्तौ इति दुर्गः" इत्याह, 'षुह चक्यर्थे' इति सायणः, द्र. मा. धातुवृत्तिः, दिवादिः, धातुसं-१९, पृ.४०७॥, तत्र "आत्रेयमैत्रेयदुर्गाः 'षह षुह' इति द्वौ धातू पेठुः" इत्याह ॥ १२. 'फेलृ पेलृ' इति२.३.४, 'पेलृ फेलृ शेलृ गतौ' इति स्वामिमैत्रेयौ, क्षीरतरङ्गिणी, भ्वादिः, धातुसं-३६१, पृ.८४॥, धातुप्रदीपः, भ्वादिः, धातुसं-३४८, पृ.३९॥, 'पेलृ शेलृ फेलृ-' इति सायणः, मा. धातुवृत्तिः, भ्वादिः, धातुसं-३५३, पृ.१५०॥ १३. 'कुक्षंभरिः' इति १, "गिरिस्तु कनकाचलः कति न सन्ति चाश्मव्रजाः, किटिस्तु धरणीधरः कति न सन्ति भूदारकाः । मरुत् तु मलयानिलः कति न सन्ति झञ्झानिलाः, प्रभुस्तु विबुधाश्रयः कति न सन्ति कुक्षिम्भराः" इत्यत्र केषाञ्चित्प्रयोगः प्रामादिक एव ॥, द्र. तत्त्वबोधिनी, (सिद्धान्तकौमुदीटीका), पृ.५६९॥ १४. "चात् कुक्षिम्भरिः । चान्द्रास्तु आत्मोदरकुक्षिष्विति पेठुः । ज्योत्स्नाकरम्भरमुदरम्भरयश्चकोरा इति मुरारिः" इति सिद्धान्तकौमुदी, पृ.५६९॥ १५. तुलनीयोऽमरकोषः ३।१।२१॥

१ उदरे पिशाच इव प्रसक्त **उदरपिशाचः** । २ सर्वप्रकारकमन्नं सर्वान्नम्, तदत्ति **सर्वान्नीनः** । 'अनुपदसर्वान्न-' ५।२।९॥ इत्यादिना खः । ३ सर्वान्नं भक्षयिता[1] **सर्वान्नभक्षकः**। 'भक्ष भक्षणे'[2](चु.उ.से.), ण्वुल्। ''सर्वेषां वर्णानां योऽन्नं भुङ्क्ते, स एवमुच्यते''[ ]इति मिश्राः । त्रीणि सर्वान्नीनस्य ॥४२८॥

## शाष्कुलः पिशिताशी

१ शष्कुलीति मांसोपलक्षणम्, तामत्ति **शाष्कुलः**। 'शेषे'४।२।९२॥ इत्यण् । ''शौष्कुलः''[[3]]इति भागुरिः । २ पिशितं मांसमश्नातीत्येवंशीलः **पिशिताशी**, णिन्नन्तः । द्वे मांसभक्षकस्य ॥

## उन्मदिष्णुस्तून्मादसंयुतः ।

१ उन्मादशील **उन्मदिष्णुः** । उत्पूर्वः[4] 'मदी हर्षे' (दि.प.से.), 'अलङ्कृञ्निराकृञ्प्रजनोत्पचोन्मद-'३।२।१३६॥ इत्यादिना इष्णुच् । उन्मादो वातभूतादिदोषाच्चित्तानवस्थितिस्तेन युक्तः । भूताद्याविष्टस्यैकम् ॥

## गृध्नुस्तु गर्धनस्तृष्णग्लिप्सुर्लुब्धोऽभिलाषुकः॥४२९॥ लोलुपो लोलुभः

१ गर्धनशीलो **गृध्नुः** । 'गृधु अभिकाङ्क्षायाम्' (दि.प.से), 'त्रसिगृधिधृषिक्षिपेः क्नुः'३।२।१४०॥ । २ गर्धनशीलो **गर्धनः** ।'गृधु अभिकाङ्क्षायाम्'(दि.प.से.), 'जुचङ्क्रम्य-'३।२।१५०॥ इति युच् । ३ तृष्यति, तच्छीलः **तृष्णक्**। 'ञितृषा[6] पिपासायाम्[7]'(दि.प.से.), 'स्वपितृषोर्नजिङ्'३।२।१७२॥ । तृष्णजौ, तृष्णजः इत्यादि । ४ लब्धुमिच्छुः **लिप्सुः**। 'डुलभष् प्राप्तौ'(भ्वा.आ.अ.), 'धातोः कर्मणः-'३।१।७॥इति सन्, 'सन्यङोः'६।१।९॥इति द्वित्वम्, 'सनि मीमाघुरभलभशक-'७।४।५४॥इति अच इस्, ['खरि च'८।४।५५॥इति भस्य पः], 'सनाशंसभिक्ष उः'३।२।१६८॥ । ५ लुभ्यति स्म **लुब्धः** । 'लुभ गार्ध्ये'(दि.प.से.), निष्ठा, 'झषस्तथोः-'८।२।४०॥इति धत्वम्,'लुभोऽविमोहने'७।२।५४॥ इतीण्निषेधः । ६ अभिलषणशीलो **अभिलाषुकः** ।'लष कान्तौ'(भ्वा.उ.से.), 'लषपतपदस्थाभूवृषहनकमि(-कम)-'३।२।१५४॥इति उकञ्[8] ॥४२९॥ ७-८ भृशं लुम्पति, भृशं लुभ्यतीत्यर्थे यङ्लुगन्तात् पचाद्यच् **लोलुपः, लोलुभः** । एतौ पृथगर्थावित्येके । अष्टौ 'लोभीया' इति ख्यातस्य । शेषश्चात्र-''लिप्सौ लालसलम्पटौ लोलः'' [शेषनाममाला३।९०४॥] ॥

## लोभस्तृष्णा लिप्सा वशः स्पृहा । काङ्क्षाऽऽशंसागर्धवाञ्छाऽऽशेच्छेहातृण्मनोरथाः ॥४३०॥ कामोऽभिलाषः

१ लोभनं **लोभः**। 'लुभ गार्ध्ये'(दि.प.से.), 'भावे' ३।३।१८॥ घञ् । २ तर्षणं **तृष्णा** । 'ञितृषा पिपासायाम्[9]' (दि.प.से.), बाहुलकाद् 'इण्सिजि(सिञ्जि)[दीङुष्ववि]भ्यो नक्'(उणा-२८२)इति नक् । ३ लब्धुमिच्छा **लिप्सा** । 'डुलभष् प्राप्तौ'(भ्वा.आ.अ.), 'धातोः कर्मणः-'३।१।७॥ इति सन्, 'सन्यङोः'६।१।९॥इति द्वित्वम्, 'सनि मीमा-' ७।४।५४॥ इत्यच इस्, 'खरि च'८।४।५५॥ इति भस्य पः, अः(अ) प्रत्ययात्'३।३।१०२॥ इत्यकारः । ४ वशनं **वशः**। 'वश कान्तौ'(अ.प.अ.), 'वशिरण्योश्च'(वा-३।३।५८॥) इत्यप् । ५ स्पृहणं **स्पृहा** । 'स्पृह स्पृहणे[10]'(चु.उ.से.), भिदादित्वादङ् । ६ काङ्क्षणं **काङ्क्षा**। 'काङ्क्ष काङ्क्षणे[11]' (भ्वा.प.से.), अङ् । ७ आशंसनम् **आशंसा** । आङ्पूर्वः 'शंसुरिच्छायाम्[12]'(भ्वा.आ.से.), ततोऽङ् भिदादित्वात् । ८ गर्धनं **गर्धः**। 'गृधु अभिकाङ्क्षायाम्'(दि.प.से), 'भावे' ३।३।१८॥ घञ् । ९ वाञ्छनं **वाञ्छा** । 'वाछि काङ्क्षायाम्[13]'(भ्वा.प.से.), 'गुरोश्च हलः'३।३।१०३॥इत्यकारः । १० आश्यत्यनया[14] **आशा** । आङ्पूर्वः 'शो तनूकरणे'(दि.-प.अ.), 'आदेचः-'६।१।४५॥ इत्यात्वम्, 'आतश्चोपसर्गे' ३।३।१०६॥ इत्यङ् । ११ एषणम् **इच्छा** । 'इषु इच्छायाम्' (तु.प.से.), 'इच्छा'३।३।१०१॥ इति सूत्रेण शप्रत्यये साधुः। १२ ईहनम् **ईहा** । 'ईह चेष्टायाम्'(भ्वा.आ.से.), 'गुरोश्च हलः'३।३।१०३॥ इत्यः । घञि ईहोऽपि । १३ तर्षणं **तृट्**।

---

१. 'भक्षयतीति' इति१॥ २. धातुप्रदीपसम्मतोऽयं धात्वर्थः, द्र. भ्वादिः, धातुसं-५९५, पृ.६४॥ ३. द्र. स्वोपज्ञटीका३।४२९॥, पृ.९९॥ ४. 'उत्पूर्वे' इति३॥ ५. '-पतो-' इति३॥ ६. 'ञितृष' इति३॥ ७. स्वामिसायणौ 'ञितृष पिपासायाम्' इति पठतः ॥ ८. 'उकन्' ३.४॥ ९. 'ञितृष पिपासायाम्' इति स्वामिसायणौ ॥ १०. 'स्पृह ईप्सायाम्' इति क्षीरतरङ्गिण्यादौ ॥ ११. 'काक्षि वाक्षि माक्षि काङ्क्षायाम्' इति मैत्रेयसायणौ, 'काक्षि वाक्षि माक्षि द्राक्षि ध्राक्षि ध्वाक्षि काङ्क्षायाम्' इति स्वामी ॥ १२. 'आङः शसि इच्छायाम्' इति स्वामिसायणौ, 'आङ् शसि इच्छायाम्' इति मैत्रेयः ॥ १३. 'वाछि इच्छायाम्' इति क्षीरतरङ्गिण्यादौ ॥ १४. 'अशत्य-' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'ञितृषा पिपासायाम्'[१](दि.प.से.), भावे क्विप् । १४ मन एव रथो दूरगामित्वाद् यत्र स **मनोरथः** । मनोगवी च ॥४३०॥ १५ कमनं **कामः**, पुंक्ली. । 'कमु कान्तौ'(भ्वा.आ.से.), 'भावे'३।३।१८॥घञ् । १६ अभिलषणम् **अभिलाषः** । 'लष कान्तौ'(भ्वा.उ.से.), 'भावे'३।३।१८॥ घञ् । षोडश लोभस्य । शेषश्चात्र-''लिप्सा तु धनाया, रुचिरीप्सा च[२] कामना''[शेषनाममाला ३।१०४॥]॥

## अभिध्या तु परस्वेहा

१ अभिचारेण ध्यानम् **अभिध्या** । अभिपूर्वः 'ध्यै चिन्तायाम्'(भ्वा.प.से.), 'आतश्चोपसर्गे'३।३।१०६॥ अङ् । परस्वविषया ईहा स्पृहा[३] परस्वेहा । ''परस्वे विषमस्पृहा''[[४]] इत्येके, दोषचिन्तापूर्वं परस्वे लिप्सेत्यर्थः। यत्कात्यः-''विषमप्रार्थनाऽभिध्या''[[४]] । एकं परधनलिप्सायाः ॥

## उद्धतः पुनः । अविनीतः

१ उत्कटं हन्ति गच्छति हिनस्ति वा **उद्धतः** । उत्पूर्वः 'हन्(हन) हिंसागत्योः'(अ.प.अ.), क्तः । २ न विनीतः **अविनीतः** । द्वे अविनीतस्य ॥

## विनीतस्तु निभृतः प्रश्रितोऽपि च ॥४३१॥

१ शास्त्रादिना विनीयते **विनीतः** । 'णीञ् प्रापणे'(भ्वा.उ.अ.), क्तः । २ नितरां भ्रियते **निभृतः** । 'डुभृञ् धारणादौ'(जु.उ.अ.), 'ञीतः क्तः'३।२।१८७॥ । ३ प्रथमं श्रयते सेवते **प्रश्रितः** । 'श्रिञ् सेवायाम्'(भ्वा.उ.से.), 'ञीतः क्त'३।२।१८७॥, 'आदिकर्मणि-'३।४।७१॥ इत्यादिना क्तो वा । त्रीणि विनीतस्य ॥

## विधेये विनयस्थः स्यात्

१ प्रवृत्तिनिवृत्तिविषये विधातुं शक्यो **विधेयः**। 'डुधाञ् धारणादौ'(जु.उ.अ.), 'अचो यत्'३।१।९७॥ इति यत्, 'ईद्यति'६।४।६५॥इति धातोराकारस्येकारः, गुणः, [तत्र]। २ विधिनिषेधे वचनं विनयम्, तत्र तिष्ठति **विनयस्थः** । 'ष्ठा गतिनिवृत्तौ'(भ्वा.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥, 'आतो लोपः-'६।४।६४॥ इत्यालेपः । द्वे विनयग्राहिणः । ''विधेयो विनयग्राही''[अमरकोषः३।१।२४॥]इत्यमरः ॥

## आश्रवो वचनेस्थितः[५] ।

१ आदिष्टं शृणोति **आश्रवः** । 'श्रु श्रवणे'(भ्वा.-प.अ.), पचाद्यच् । **वचनेस्थितः**, 'तत्पुरुषे कृति-'६।३।१४॥ इत्यलुक् । द्वे वचनश्रवणतत्परस्य ॥

## वश्यः प्रणेयः[६]

१ वशमायत्तत्वं[७] गतः प्राप्तो **वश्यः** । 'वशं गतः' ४।४।८६॥ इति सूत्रेण यत् । ''वशमायत्ततायां स्यात्''[विश्वप्रकाशकोशः, शान्तवर्गः, श्लो-१]इति विश्वः । २ प्रकर्षेण नेयः, प्रकर्षेण नेतुं शक्यो वा **प्रणेयः** । 'णीञ् प्रापणे'(भ्वा.उ.अ.), 'अचो यत्'३।१।९७॥, गुणः । द्वे वशंगतस्य[८] । ''विधेयादयः षडेकार्थाः'' [[९]]इत्येके ॥

## धृष्टस्तु वियातो धृष्णुधृष्णजौ ॥४३२॥

१ धृष्णोति प्रगल्भते **धृष्टः** । 'ञिधृषा प्रागल्भ्ये' (स्वा.प.से.), 'ञीतः क्तः'३।२।१८७॥, 'धृषशशी(धृषिशसी) वैजात्ये'७।२।१९॥ इतीडभावः। २ विरुद्धं याति स्म **वियातः**। 'या प्रापणे'(अ.प.अ.), निष्ठा । ३ धर्षणशीलो **धृष्णुः** । 'ञिधृषा प्रागल्भ्ये'(स्वा.प.से), 'त्रसिगृधि-'३।२।१४०॥ इति क्नुः । ४ 'धृषश्चे'[१०]( )इति नजिङि **धृष्णक्**, धृष्णजौ इत्यादि। चत्वारि भयलज्जारहितस्य । 'धीठउ'[११] इति[१२] भाषा ॥४३२॥

## वीक्षापन्नो विलक्षः

१ वीक्षं विस्मयमापन्नो **वीक्षापन्नः** । २ परकीयधर्मशीलादौ विस्मितो **विलक्षः** । विरुद्धं लक्षयत इति वा । 'लक्ष दर्शनाङ्कनयोः'(चु.उ.से.), पचाद्यच् । द्वे विलक्षस्य[१३]। 'विलखू'[१४] इति भाषा ॥

## अथाधृष्टे शालीनशारदौ ।

---

१. 'ञितृष-' इति४, मैत्रेयसम्मतोऽयं धातुपाठः, स्वामिसायणौ 'ञितृष पिपासायाम्' इति पठतः ॥ २. 'तु' इति१.२.४॥ ३. इतोऽग्रे ३प्रतौ 'अभिचारेण ध्यानापरविषया ईहा स्पृहा' इति पाठो दृश्यते ॥ ४. द्र. स्वोपज्ञटीका ३।४३१॥, पृ.९९॥, अम. क्षीरस्वामिटीका ६।१।२५॥, पृ.५३॥ ५. अत्र कैश्चित् 'वचने स्थितः' इति पदच्छेदः कृतः, स विचारणीयः ॥ ६. तुलनीयोऽमरकोष ३।१।२५॥ ७. '-यत्तं' इति४॥ ८. 'वश्यं' इति४॥ ९. द्र. स्वोपज्ञटीका ३।४३२॥, पृ.९९॥ १०. 'स्वपितृषोर्नजिङ्'३।२।१७२॥इत्यत्र '' 'धृषेश्चेति वक्तव्यम्' । धृष्णक्'' इति काशिकावृत्तिः, भा-२, पृ.६७४॥ ११. 'धीठो' इति२, 'धीठौ' इति४॥ १२. 'इत्यादि' इति३॥ १३. 'विलक्षितस्य' इति३॥ १४. 'विलखुं' इति१.२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ न धृष्टः **अधृष्टः**, तत्र । २ श्यतेर्लप्रत्यये शाला, शालायां गृहे प्रवेशमर्हति **शालीनः** । 'शालीनकौपीने-'५।२।२०॥ इत्यादिना खप्रत्यये, प्रवेशशब्दलोपे च निपातितम् । ३ शारदो नव इव सर्वत्र **शारदः**, अस्खलद्गतित्वात् । त्रीण्यधृष्टस्य ॥

## शुभंयुः शुभसंयुक्तः

१ शुभमिति विभक्त्यन्तप्रतिरूपकमव्ययं कल्याणार्थे, शुभमस्यास्ति **शुभंयुः** । 'अहंशुभमोर्युस्'५।२।१४०॥ । ''शुभंयोऽपि''[ ]इति हलायुधटीका। शुभेन संयुक्तः शुभसंयुक्तः । ''कल्याणबुद्धिः''[ ]इति तद्धितढुण्ढ्याम् । एकं शुभयुतस्य ॥

## स्यादहंयुरहंकृतः ॥४३३॥

१ अहमिति मान्तमव्ययमहङ्कारे, अहमस्याऽस्ति **अहंयुः** । 'अहंशुभमोर्युस्'५।२।१४०॥ । २ अहं करोति **अहंकृतः** । द्वे अहंकारिणः । गुमानीति भाषा ॥

## कामुकः कमिता कम्रोऽनुकः कामयिताऽभिकः । कामनः कमरोऽभीकः

१ कमनशीलः **कामुकः** । 'कमु कान्तौ'(भ्वा.आ.से.), 'लषपतपद-'३।२।१५४॥ इत्युकञ्, ञित्त्वाद् वृद्धिः । २ 'आयादय आर्धधातुके वा'३।१।३१॥ इत्यणिङन्तात् तृनि **कमिता** । ३ **कम्रः** । 'नमिकम्पिस्म्यजस्(-जस)-'३।२।१६७॥ इति रः । ४-६-९ अनुकामयत **अनुकः** । अभिकामयत **अभिकः**, **अभीकः** । 'अनुकाभिकाभीकाः-(-भीकः) कमिता'५।२।७४॥ इति सूत्रेण अनुक अभिक अभीक एते त्रयः शब्दाः कन्प्रत्ययान्ता निपात्यन्ते । ५ कमेर्णिङन्तात् तृनि **कामयिता** । ७ णिङन्ताद् 'अनुदात्तादेश्च'४।३।१४०॥ इति युचि **कामनः** । अणिङन्ताद् युचि कमनः । ८ कामयते **कमरः** । कमेरणिङन्ताद् 'अर्तिकमि-'(उणा-४१२)इत्यरन् । नव कामीति ख्यातस्य ॥

## पञ्चभद्रस्तु विप्लुतः ॥४३४॥ व्यसनी

१ पञ्च भद्राणि कल्याणान्यस्य **पञ्चभद्रः**, [अ]भद्रो विपरितलक्षणया भद्रमुखवत् । २ विप्लवते स्म **विप्लुतः** । 'प्लुङ् गतौ'(भ्वा.आ.अ.), निष्ठा ॥४३४॥ ३ द्युतादीनि व्यसनानि सन्त्यस्य **व्यसनी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः । त्रीणि व्यसनिनः ॥

## हर्षमाणस्तु प्रमना हृष्टमानसः । विकुर्वाणः

१ हृष्यतीत्येवंशीलो **हर्षमाणः** । 'हृष तुष्टौ'(दि.प.से), 'ताच्छील्यवयोवचनशक्तिषु चानश्'३।२।१२९॥, 'आने मुक्'७।२।८२॥ इति मुक् । २ प्रकृष्टं मनोऽस्य **प्रमनाः**, सकारान्तः । ३ हृष्टं मानसमस्य **हृष्टमानसः** । ४ हर्षाद् विकारं याति **विकुर्वाणः** । 'डुकृञ् करणे'(त.उ.अ.), 'लटः शतृशानचौ-'३।२।१२४॥ चत्वारि हर्षमाणस्य । 'हर्षपामिउं' इति भाषा ॥

## विचेतास्तु दुरन्तर्विपरो मनाः ॥४३५॥

१ विरुद्धं चेतोऽस्य **विचेताः**, सकारान्तः । २-४ दुरन्तर्विभ्यः परो मनःशब्दो योज्यः, दुष्टम् अन्तर्नीतं विरुद्धं च मनोऽस्य **दुर्मनाः**, **अन्तर्मनाः**, **विमनाः**, त्रयोऽपि सकारान्ताः । चत्वारि दुष्टमनसः ॥४३५॥

## मत्ते शौण्डोत्कटक्षीबाः

१ मद्यपानेन माद्यति स्म **मत्तः** । 'मदी हर्षे'(दि.प.से.), निष्ठा, तत्र । २ शुण्डा मदिरा, तत्र भवः **शौण्डः** । 'तत्र भवः'४।३।५३॥ इत्यण् । शुण्डा पानाऽऽगारम्, तत्र भवो वा । शुण्डाऽस्याऽस्तीति ज्योत्स्नादित्वादण् वा । ३ उद्रिक्त **उत्कटः** । 'सम्प्रोदश्च'५।२।२९॥ इति कटच् । ४ क्षीबते स्म **क्षीबः** । 'क्षीबृ मदे'(भ्वा.आ.से.), 'अनुपसर्गात् फुल्लक्षीबकृशोल्लाघाः'८।२।५५॥ इति निष्ठान्तो निपातः । चत्वारि मत्तस्य । 'छाकिओं' इति भाषा ॥

## उत्कस्तूत्सुक उन्मनाः । उत्कण्ठितः

१ उद्गतं मनोऽस्य **उत्कः** । 'उत्क उन्मनाः' ५।२।८०॥ इति सूत्रेण उत्क इति निपात्यते । उच्छब्दात् साधनक्रियावचनात् कन्प्रत्ययो निपात्यत इत्यर्थः । २ [उद्गतं मनोऽस्य **उत्सुकः**] । ३ उद्गतं मनोऽस्य

---

१. 'मन्त-' इति१.२॥ २. '-कन्' इति३.४॥ ३. 'हृष तुष्टौ' इति धातोर्दिवादित्वाद् 'हृष्यमाणः' इति स्यात्, तेन भौवादिकस्य 'हृषु अलीके' इत्यस्य 'हर्षमाणः' इति बोध्यम् ॥ ४. 'प्रहृष्टं' इति१.२॥ ५. '-पामियौं' इति ३॥ ६. '-लीनं' इति३॥ ७. 'तुलनीयोऽमरकोषः ३।१।२३॥ ८. 'छाकिउं' इति२, 'छाकिउ' इति४॥ ९. 'साधनं' इति२.३॥ १०. ''उद्गतमनस्कवृत्तेरुच्छब्दात् स्वार्थे कन् । उत्क उत्कण्ठितः'' इति सिद्धान्तकौमुद्याम्, पृ.३५५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**उन्मनाः**, सकारान्तः । **३** उत्कण्ठा सञ्जाताऽस्य **उत्कण्ठितः**। 'तदस्य सञ्जातम्'५।२।३६॥ इतीतच् । ''इष्टार्थोद्युक्त उत्सुकः'' [अमरकोषः३।१।९॥]इत्यमरः पृथगाह । चत्वारि उत्सुकस्य॥

**अभिशस्ते तु वाच्यक्षारितदूषिताः ॥४३६॥**

१ अभिशस्यते स्म **अभिस्तः** । 'शंस कथने'( ), निष्ठा, 'अनिदिताम्-'६।४।२४॥ इति न्लोपः, तत्र। **२** वचनीयो **वाच्यः**। 'वच परिभाषणे'(अ.प.अ.), 'ऋहलोर्ण्यत्' ३।१।१२४॥ । **३** क्षार्यते स्वरूपाच्चाल्यते स्म **क्षारितः**। 'क्षर सञ्चलने'(भ्वा.प.से.), णिजन्ताद् निष्ठा, अलीकोत्पन्नपातकव्यपदेशः । आक्षारितोऽपि । **४** दूष्यते स्म **दूषितः** । 'दुष वैकृत्ये'(दि.प.अ.), निष्ठा । मैथुनं प्रतीत्येके । चत्वारि 'दूहव्या' इति ख्यातेः ॥४३६॥

**गुणैः प्रतीते त्वाहतलक्षणः कृतलक्षणः ।**

१ गुणैः सौन्दर्यौदार्यादिभिः, प्रतीतो विख्यातः, तत्र। आहतानि उद्घोषितानि लक्षणान्यस्य **आहतलक्षणः** । **२** कृताः प्रसिद्धा लक्षणरूपा गुणा अस्य **कृतलक्षणः** । द्वे स्वगुणैः प्रसिद्धस्य ॥

**निर्लक्षणस्तु पाण्डुरपृष्ठः**

१ निर्गतो लक्षणेभ्य इति **निर्लक्षणः** । 'निरादयो निःक्रान्ताद्यर्थे[२] पञ्चम्या'(वा-२।२।१८॥)इति समासः । **२** पाण्डुरं निर्लक्षणं पृष्ठमस्य **पाण्डुरपृष्ठः**। द्वे निर्लक्षणनरस्य ॥

**सङ्कसुकोऽस्थिरे ॥४३७॥**

१ सङ्कसति **सङ्कसुकः**, द्विदन्त्यः । सम्पूर्वः 'कस गतौ'(भ्वा.प.से.), 'समि कस उकन्[३]'(उणा-१८७)इत्युकन्[४]। **२ अस्थिरः** चपलः, तत्र । ''अनिश्चितः''[ ]इत्येके। ''सम्यक् कसन्ति पलायन्ते जना अस्मादिति सङ्कसुको दुर्जनः''[ ]इत्युज्ज्वलदत्तः । द्वे अस्थिरस्य ॥

**तुष्णींशीलस्तु तूष्णीकः[५]**

१ [तूष्णीं शीलमस्य **तुष्णींशीलः**]। **२** तूष्णीं भावे[६] शीलमस्य **तूष्णीकः**, तूष्णीम्[७] । 'शीले कन्[८] मलोपश्च'(वा-५।३।७२॥)। द्वे तूष्णींशीलस्य ॥

**विवशोऽनिष्टदुष्टधीः[९] ।**

१ विरुद्धं वष्टि कामयते **विवशः**[१०] । 'वशँ[११] कान्तौ' (अ.प.से.), पचाद्यच् । अनिष्टा दुष्टा च धीर्यस्य स अनिष्टदुष्टधीः । ''विवशोऽरिष्टदुष्टधीः''[अमरकोषः३।१।४४॥] इत्यमरः । ''अरिष्टेन मरणादिचिह्नेन[१२] श्वासादिना दुष्टा धीर्यस्य'' [अम.क्षीर.३।१।४४॥]इति क्षीरस्वामी । एकं दुष्टबुद्धेः[१३] । 'जेहनी[१४] मतिफिरीइ' इति भाषा ॥

**बद्धो निगडितो नद्धः कीलितो यन्त्रितः सितः ॥४३८॥**

**सन्दानितः संयतश्च**

१ बद्ध्यते स्म **बद्धः**। 'बन्ध बन्धने'(क्र्या.प.अ.), निष्ठा । **२** निगड्यते स्म **निगडितः**। 'गड सेचने'(भ्वा.-प.से.), निष्ठा । **३** नह्यते स्म **नद्धः** । 'नह(णह) बन्धने' (दि.उ.अ.), निष्ठा, 'नहो धः'८।२।३४॥, 'झषस्तथोः-' ८।२।४०॥ इति धत्वम् । **४** कील्यते स्म **कीलितः** । 'कील बन्धने'(भ्वा.प.से.), क्तः । **५** यन्त्र्यते स्म **यन्त्रितः** । 'यत्रि बन्धने[१५]'(चु.उ.से.), निष्ठा । **६** सीयते स्म **सितः** । 'षिञ् बन्धने'(स्वा.उ.अ.)॥४३८॥ **७** सन्दान्यते **सन्दानितः** ।'दान आर्जवे छेदने च[१६]'( ), निष्ठा । **८** संयम्यते स्म **संयतः** । 'यमु नियमने[१७]'(भ्वा.प.अ.), निष्ठा, 'अनुदात्तोपदेश-'६।४।-३७॥इति न्लोपः । अष्टौ बद्धस्य ॥

**स्यादुद्दानं तु बन्धनम् ।**

१ उद्दीयत **उद्दानम्** । 'दोऽवखण्डने'(दि.प.अ.), 'देङ् पालने[१८]'(भ्वा.आ.अ.)वा, ल्युट् । **२** बद्ध्यतेऽनेन **बन्धनम्** । 'बन्ध बन्धने'(क्र्या.प.अ.), करणे ल्युट् । द्वे बन्धनस्य ॥

**मनोहतः प्रतिहतः प्रतिबद्धो हतश्च सः[१९] ॥४३९॥**

१. 'निरादयः क्रान्ताद्यर्थे-' इत्यष्टाध्याय्याम् ॥ २. तुलनीयोऽमरकोषः ३।१।४३॥ ३. 'उक' इति३॥ ४. '-कञ्' इति३॥ ५. तुलनीयोऽमरकोषः ३।१।३९॥ ६. 'भवितुं' इति३॥ ७. 'अशुद्धमिदम्, शुद्धं तु 'तूष्णीम्' इति ॥ ८. 'कल्' इति३, मुद्रितवार्त्तिके 'को' इति दृश्यते ॥ ९. 'विवस' इति३॥ १०. 'विवसः' इति२.३॥ ११. 'वस' इति३॥ १२. 'मरणचिह्नेन' इति क्षीरस्वामिकृतटीकायाम् ३।१।४४॥, पृ.२४५॥ १३. '-बुद्धिः' इति३॥ १४. 'जेहनीं' इति१.२॥ १५. 'यत्रि सङ्कोचने' इति क्षीरतरङ्गिणीधातुवृत्ती, '-सङ्कोचे' इति धातुप्रदीपः, चुरादिः, धातुसं-३॥ १६. क्षीरतरङ्गिण्यादौ 'दान अवखण्डने' इति धातुपाठो दृश्यते, 'दान खण्डने' इति सिद्धान्तकौमुद्याम् ॥ १७. 'यम उपरमे' इति क्षीरतरङ्गिण्यादौ ॥ १८. श्रीहेमचन्द्राचार्यसम्मतोऽयं धात्वर्थः, द्र. धातुपारायणम्, भ्वादिः, धातुसं-६०४, क्षीरतरङ्गिण्यादौ 'रक्षणे' इति दृश्यते॥ १९. तुलनीयोऽमरकोषः ३।१।४१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ मनसो हतो **मनोहतः**। २ प्रतिहन्यते स्म **प्रतिहतः**। 'हन्(हन) हिंसागत्योः'(अ.प.अ.), निष्ठा । ३ प्रतिबध्यते स्म **प्रतिबद्धः** । 'बन्ध बन्धने'(क्र्या.प.अ.), निष्ठा । ४ हन्यते स्म **हतः** । चत्वारि मनोहतस्य । 'मनभागु'[1] इति भाषा ॥४३९॥

**प्रतिक्षिप्तोऽधिक्षिप्तः**

१ प्रतिक्षिप्यते स्म **प्रतिक्षिप्तः** । 'क्षिप प्रेरणे'(तु.-उ.अ.), निष्ठा । २ अधिक्षिप्यते स्म **अधिक्षिप्तः** । द्वे निर्भर्त्सितस्य । 'धकाई[2] नाखउ[3]' इति भाषा । यथा-"अधिक्षिप्तोऽपि विकृतिं न याति क्वापि सज्जनः"[[4]] ॥

**अवकृष्टनिष्कासितौ समौ ।**

१ अवकृष्यते दूरीक्रियते स्म **अवकृष्टः** । 'कृष विलेखने'(भ्वा.प.अ,तु.प.अ), निष्ठा । २ निष्कास्यते स्म **निष्कासितः** । 'कस गतौ'(भ्वा.प.से.), ण्यन्तात् क्तः । 'कासृ दीप्तौ[5]'(भ्वा.आ.से.)इत्यस्माद्वा क्तः, दन्त्यसवान् । द्वे निष्कासितस्य ॥

**आत्तगन्धेऽभिभूतः**

१ आत्तो गृहीतो गन्धोऽभिमानोऽस्य **आत्तगन्धः**, तत्र । "गन्धो गर्वो लवोऽपि च"[त्रिकाण्डशेषः३।३।२१७॥] इति त्रिकाण्डशेषः[6] । आत्तगर्व[7] इत्यपि पाठः । २ अभिभूयते स्म **अभिभूतः**, निष्ठान्तः । द्वे 'अहंकार ऊतारिया[8]' इति ख्यातस्य ॥

**अपध्वस्ते न्यक्कृतधिक्कृतौ ॥४४०॥**

१ अपध्वस्यते स्म **अपध्वस्तः**। 'ध्वंस अधःपतने[9]'(भ्वा.आ.से.), निष्ठा, तत्र । २ न्यक्क्रियते स्म **न्यक्कृतः**। असत्कारणादिना धिगिति कृतो **धिक्कृतः** । "आत्तगन्धादयः पञ्चाऽप्येकार्थाः"[[10]]इत्येके । त्रीणि धिक्कृतस्य ॥४४०॥

**निकृतस्तु विप्रकृतः**

१ निक्रियते खलीक्रियते स्म **निकृतः** । २ एवं **विप्रकृतः** न्यायपराजितोऽयम् । द्वे पराभूतस्य ॥

**न्यक्कारस्तु तिरस्क्रिया ।**
**परिभावो विप्रकारः परापर्यभितो भवः ॥४४१॥**
**अत्याकारो निकारश्च**

१ न्यक्करणं **न्यक्कारः** । 'डुकृञ् करणे'(त.उ.अ.), 'भावे'३।३।१८॥ घञ् । २ तिरस्करणं **तिरस्क्रिया** । 'कृञः श च'३।३।१००॥इति शः, शित्त्वाद् भावे यक्[11], 'रिङ्शयग्लिङ्क्षु'७।४।२८॥, ततष्टाप् । ३ परिभवनं **परिभावः** । 'भावे'३।३।१८॥ घञ् । ४ विप्रकरणं **विप्रकारः** । 'भावे' ३।३।१८॥ घञ् । ५-७ परापर्यभितो भवः शब्दो योज्यः, तेन **पराभवः, परिभवः, अभिभवः**॥४४१॥ ८ अत्याकरणम् **अत्याकारः** । निकरणं **निकारः** । नव पराभवस्य॥

**विप्रलब्धस्तु वञ्चितः[12] ।**

१ विप्रलभ्यते स्म **विप्रलब्धः** । 'डुलभष् प्राप्तौ' (भ्वा.आ.अ.), निष्ठा, 'झषस्तथोः-'८।२।४०॥ इति धत्वम्। २ वञ्च्यते स्म **वञ्चितः** । 'वञ्चु प्रलम्भने'(चु.आ.से.), निष्ठा । द्वे वञ्चितस्य । 'ठगिओ[13]' इति भाषा ॥

**स्वप्नक् शयालुर्निद्रालुः[14]**

१ स्वापशीलः **स्वप्नक्**। 'ञिष्वप् शये'(अ.प.अ.), 'स्वपितृषोर्नजिङ्'३।२।१७२॥, स्वप्नजौ, स्वप्नजः इत्यादि । २ शयनशीलः **शयालुः** । 'शीङो वाच्यः'(वा-३।२।१५८) इत्यालुच् । ३ निद्रातीत्येवंशीलो **निद्रालुः** । निपूर्वः 'द्रा कुत्सायां गतौ'(अ.प.अ.), 'स्पृहिगृहिपतिदयि-'३।२।१५८॥ इत्यालुच्, 'शीङः सार्वधातुके गुणः'७।४।२१॥ । त्रीणि निद्रालोः । 'ऊंघिओ[15]' इति भाषा ॥

**घूर्णिते प्रचलायितः ॥४४२॥**

१ घूर्णते स्म **घूर्णितः** । 'घुण घूर्ण भ्रमणे'(भ्वा.-आ.से.), निष्ठा, तत्र । २ **प्रचलति** घूर्णते प्रचलः, प्रचल इवाचरति क्यङन्तात् क्तः **प्रचलायितः**। यद्वा प्रचला निद्राविशेषो यस्यामासीनोऽपि घूर्णते, अप्रचलावान् प्रचलावान् भवति स्म प्रचलायितः । य उपविष्टो निद्रया घूर्णते, तस्य द्वे ॥४४२॥

१. '-भागो' इति३॥ २. 'धका' इति३॥ ३. 'नाखिउ' इति२; 'नांख्यो' इति३, 'नाखिओ' इति४॥ ४. द्र. अनेकार्थसङ्ग्रहानेकार्थकैरवाकरकौमुदीटीका, भा-२, काण्डः-४, श्लो-९८, पृ.३४४॥ ५. क्षीरतरङ्गिण्यादौ दीप्तावर्थेऽयं धातुर्न दृश्यते ॥ ६. तत्र 'गन्धो गर्वे लवेऽपि च' इति दृश्यते, पृ.३४५॥ ७. "आत्तगर्वोऽभिभूतः स्यात्"३।१।४०॥ इत्यमरकोषः ॥ ८. 'उता-' इति३॥ ९. धातुप्रदीपसम्मतोऽयं धात्वर्थः, भ्वादिः, धातुसं-४८५, पृ.५१॥ १०. द्र. स्वोपज्ञटीका३।४४०॥, पृ.१०१॥ ११. 'यङ्' इति३॥ १२. तुलनीयोऽमरकोषः३।१।४१॥ १३. 'ठगिउ' इति२.४॥ १४. तुलनीयोऽमरकोषः ३।१।३३॥ १५. 'उंघीओ' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**निद्राणः शयितः सुप्तः**

१ निद्राति स्म **निद्राणः** । 'द्रा कुत्सायां गतौ'(अ.-प.अ.), निष्ठा, 'संयोगादेरातो धातोः-'८।२।४३॥ इति क्तस्य नत्वम् । २ शेत इति **शयितः** । 'शीङ् स्वप्ने'(अ.आ.से.), 'मतिबुद्धि-'३।२।१८८॥ इत्यत्र चकारस्यानुक्तसमुच्चयार्थत्वाद् वर्तमाने क्तः । ३ स्वपिति **सुप्तः** । 'ञिष्वप् शये'(अ.प.-अ.), 'ञितः क्तः'३।२।१८७॥ इति वर्तमाने क्तः । त्रीणि सुप्तस्य ॥

**जागरूकस्तु जागरी ।**

१ जागरणशीलो **जागरूकः** । 'जागृ निद्राक्षये' (अ.प.से.), 'जागरूकश्च[1]'३।२।१६५॥ इत्यूकः। जागरिताऽपि। २ जागरोऽस्याऽस्ति **जागरी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः । द्वे जागरूकस्य । 'जागता' इति भाषा ॥

**जागर्या स्याज्जागरणं जागरा जागरोऽपि च ॥४४३॥**

१ जागर्यते **जागर्या** । 'परिचर्यापरिसर्यामृगयाटाट्यादयश्च[2]'(वा-३।३।१०१॥)इति साधुः । २ जागर्यते **जागरणम्** । ल्युट्। ३ जागरणं **जागरा** । 'जागर्तेरकारो वा'(वा-३।३।१०१॥)इत्यः । ४ जागरणं **जागरः** । 'भावे'३।३।१८॥ घञ्, 'जाग्रोऽविचिण्णल्ङित्सु'७।३।८५॥ इति गुणः । चत्वारि जागरणस्य ॥४४३॥

**विष्वगञ्चति विष्वद्र्यङ्**

१ विष्वगिति सर्वतोऽर्थेऽव्ययम्, विष्वक् समन्तादञ्चति गच्छति **विष्वद्र्यङ्** । 'अञ्चु गतौ'(भ्वा.प.से.), विष्वक्पूर्वः 'विष्वग्देवयोश्च-'६।३।९२॥ इति टेरद्र्यादेशः, 'ऋत्विग्दधृक्-'३।२।५९॥इत्यादिना क्विन्[3], ['अनिदिताम्-'६।४।२४॥ इति न्लोपः, 'उगिदचाम्-'७।१।७०॥ इति नुम्, 'संयोगान्तस्य लोपः'८।२।२३॥], 'क्विन्प्रत्ययस्य कुः'८।२।६२॥ विश्वद्र्यङिति तालव्यमध्योऽपि । एकं सर्वतो गच्छतः, सर्वपूजकस्य च ॥

**देवद्र्यङ् देवमञ्चति ।**

१ देवमञ्चति गच्छति पूजयति **देवद्र्यङ्** । 'अञ्चु गतिपूजनयोः'(भ्वा.प.से.), देवपूर्वः, 'विष्वग्देवयोश्च'६।३।९२॥ इति टेरद्र्यादेशः, 'ऋत्विक्-'३।२।५९॥ इत्यादिना क्विन्, 'अनिदितां हलः-'६।४।२४॥ इति न्लोपः, 'उगिदचाम्-'७।१।७०॥ इति नुम्, 'संयोगान्तस्य[4] लोपः'८।२।२३॥, 'क्विन्प्रत्ययस्य कुः'८।२।६२॥इति कवर्गोऽन्तादेशः । एकं देवपूजकस्य ॥

**सहाञ्चति तु सध्र्यङ् स्यात्**

१ सहाञ्चतीति **सध्र्यङ्** । 'सहस्य[5] सध्रिः'६।३।९५॥, शेषं प्राग्वत् । एकं 'सहाय' इति ख्यातस्य ॥

**तिर्यङ् पुनस्तिरोऽञ्चति ॥४४४॥**

१ 'तिरसस्तिर्यलोपे[6][7]'६।३।९४॥ इति तिर्यादेशः, शिष्टं प्राग्वत् । एकं तिर्यग्गच्छतः ॥४४४॥

**संशयालुः संशयिता**

१ संशयशीलः **संशयालुः** । सम्पूर्वः 'शीङ् स्वप्ने' (अ.आ.से), 'शीङो वाच्यः'(वा-३।२।१५८॥)इत्यालुः[8] । २ संशयशीलः **संशयिता** । 'तृन्'३।२।१३५॥इति तृन् । द्वे संशयालोः ॥

**गृहयालुर्ग्रहीतरि[9] ।**

१ गृहयत इत्येवंशीलो **गृहयालुः**। 'गृह ग्रहणे'(चु.-आ.से.), चौरादिकोऽदन्तः, 'स्पृहिगृहिदयि-'३।२।१५८॥ इत्यादिना आलुच् । २ गृहयत इत्येवंशीलो **गृहीता** । 'तृन्' ३।२।१३५॥इति तृन् । द्वे गृहयालोः[10] ॥

**पतयालुः पातुकः स्यात्**

१ पतयतीत्येवंशीलः **पतयालुः**। 'पतृ पतने[11]'(चु.-उ.से.), चुरादिः, 'स्पृहिगृहिपतिदयि-'३।२।१५८॥ इत्यालुच्[12]। २ पततीत्येवंशीलः **पातुकः** । 'पतृ पतने[11]'(चु.उ.से.), 'लषपतपदस्थाभूवृषहनकमि(-कम)-'३।२।१५४॥ इत्युकञ् । द्वे पतनशीलस्य ॥

**समौ रोचिष्णुरोचनौ ॥४४५॥**

१ रोचनशीलो **रोचिष्णुः**।'रुच दीप्तौ'(भ्वा.आ.से.),

---

१. अष्टाध्याय्यां चकारो न दृश्यते ॥ २. '-टाट्यानामुपसङ्ख्यानम्' इत्यष्टाध्याय्याम्, वस्तुतस्तु 'जागर्तेरकारो वा' इति वार्तिकस्य विकल्पपक्षे यकि गुणे कृते 'जागर्या' इति सिद्धत्वादस्योल्लेखो विचारणीयः ॥ ३. 'क्विप्' इति१ ॥ ४. '-गान्तलोपः' इति४॥ ५. 'सहस' इति३॥ ६. 'तिरस्त-'इति१.२.४॥ ७. 'तिरि' इति३॥ ८. 'आलुच्' इत्यष्टाध्याय्याम् ॥ ९. तुलनीयोऽमरकोषः ३।१।२७॥ १०. '-यालुः' इति२॥ ११. 'पत गतौ वा' इति स्वामिसायणौ, 'पत गतौ' इति मैत्रेयः ॥ १२. '-लुक्' इति१॥

'अलङ्कृञ्निराकृञ्प्रजनोत्पचोन्पतोन्मदि(-मद)-'३।२।१३६॥ इतीष्णुच् । २ रोचत इत्येवंशीलो **रोचनः** । 'रुच दीप्तौ'(भ्वा.-आ.से.) । द्वे रुचिवतः ॥४४५॥

## दक्षिणार्हस्तु दक्षिण्यो दक्षिणीयः

१ दक्षिणामर्हति **दक्षिणार्हः** । 'अर्ह अर्हणे'[1](भ्वा.-प.से.), पचाद्यच्। २-३ दक्षिणामर्हति **दक्षिण्यः**, **दक्षिणीयः**। 'कडङ्गरदक्षिणाच्छ च'५।१।६९॥ इति द्वितीयान्तादर्हत्यर्थे छ-यतौ, 'आयनेयी-'७।१।२॥ इति छस्येयादेशः, 'यस्येति च' ६।४।१४८॥ । त्रीणि यज्ञदानार्हस्य ॥

## अथ दण्डितः ।

## दापितः साधितः

१ दण्ड्यते स्म **दण्डितः** । 'दण्ड दण्डने'[2](चु.उ.से.), निष्ठा । २ दाप्यते स्म **दापितः** । 'डुदाञ् दाने' (जु.उ.अ.), ण्यन्ताद् 'अर्त्ति[ह्री]व्ली-'७।३।३६॥ इति पुक्, ततो निष्ठा। '' 'दय दाने'[3](भ्वा.आ.से.)इत्यादिधातोर्दायित इति पाठः''[[4] ]इति कलिङ्गपुरुषोत्तमौ। २ साध्यते स्म **साधितः**। 'साध संसिद्धौ'(स्वा.प.अ.), निष्ठा । त्रीणि दण्डितस्य ॥

## अर्च्यस्तु प्रतीक्ष्यः

१ अर्चनीयः **अर्च्यः**। 'अर्च पूजायाम्'(भ्वा.प.से.), 'ऋहलोर्ण्यत्'३।१।१२४॥, यद्वा 'ऋच स्तुतौ'(तु.प.से.), 'ऋहलोर्ण्यत्'३।१।१२४॥, 'यजयाचऋच(रुच)प्रवचर्चश्च'७।-३।६६॥इति कुत्वनिषेधः । अत एव कुत्वनिषेधाद् ज्ञापकाद्द-दुपधलक्षणः क्यबपि न भवति । २ प्रतीक्षणीयो मुख्यत्वात् **प्रतीक्ष्यः** । प्रतिपूर्वः 'ईक्ष दर्शनाङ्कनयोः'[5](भ्वा.आ.से.), 'ऋहलोर्ण्यत्'३।१।१२४॥, ''भक्तिः प्रतीक्ष्येषु[6] कुलोचिता ते'' [रघुवंशम्, सर्गः-५, श्लो-१४]इति रघुः । द्वे पूजायोग्यस्य॥

## पूजितेऽर्हितः[7] ॥४४६॥

## नमस्यितो नमसिताऽपचिताविञ्चितोऽर्चितः ।

१ पूज्यते स्म **पूजितः**। 'पूज पूजायाम्'(चु.प.से.), निष्ठा, तत्र। २ अर्ह्यते स्म **अर्हितः**। 'अर्ह पूजायाम्'(भ्वा.-प.से.), निष्ठा ॥४४६॥ ३-४ नमस्क्रियते स्म[8] **नमस्यितः**, **नमसितः**। 'नमोवरिवश्चित्रङः क्यच्'३।१।१९॥, तस्य क्तप्रत्यये 'क्यस्य विभाषा'६।४।५०॥ इति वा लोपः । ५ अपचाय्यते **अपचितः**। 'चायृ पूजानिशामनयोः'(भ्वा.उ.से.), 'अप-चितश्च'[9]७।२।३०॥इति सूत्रेण क्तप्रत्यये साधुः । 'अपचायि-तोऽपि'[द्र. अमरकोषः ३।१।१०१॥]इत्यमरः । ६ अञ्च्यते स्म **अञ्चितः**। 'अञ्चु गतिपूजनयोः'(भ्वा.प.से.), निष्ठा । ७ अर्च्यते स्म[10] **अर्चितः** । 'मतिबुद्धिपूजा-'३।२।१८८॥ इति क्तः। सप्त पूजितस्य ॥

## पूजाऽर्हणा सपर्याऽर्चा

१ पूजनं **पूजा** । 'पूज पूजायाम्'(चु.प.से.), 'चिन्तिपूजि-'३।३।१०५॥इत्यङ्। २ [अर्हणम्] **अर्हणा**। 'अर्ह पूजायाम्'(भ्वा.प.से.), भावे ल्युट् । ३ सपर्यणं **सपर्या** । 'सपर पूजायाम्'( ), कण्ड्वादिः, ततो यक्[11] । ४ अर्चनम् **अर्चा** । 'अर्च पूजायाम्'(भ्वा.प.से.), भिदा-दित्वादङ् । चत्वारि पूजायाः । ''अपचितिः''[शेषनाममाला ३।१०५॥]शैषिकम् ॥

## उपहारबली समौ ॥४४७॥

१ उपह्रियते देवार्थम् **उपहारः** । 'हृञ् हरणे'(भ्वा.उ.अ.), घञ् । २ बलत्यनेन **बलिः**, पुंस्त्रीलिङ्गः। यदरुणः- ''बलिस्त्वक्सङ्कोचकृता देवताऽर्चनं च[12] द्वयमपि उभयलिङ्गम्[13]'' [ ]इति[14]। ''करोपहारयोः पुंसि बलिः प्राण्यङ्गजे स्त्रियाम्'' [अमरकोषः३।३।१९५॥]इत्यमरः । [बलिः, वलिः], आद्य ओष्ठ्यादिरन्त्यो दन्त्योष्ठ्यादिरिति विशेषो न गणितः । 'बल प्राणने'(भ्वा.प.से.), 'इन् सर्वधातुभ्यः'(उणा-५५७)इतीन् । [15]पूजोपकरणपर्यायावेतौ। ''कुर्वन् सन्ध्याबलिपटहतां शूलिनः श्लाघनीयाम्''[मेघदूतम्, पूर्वमेघः, श्लो-३४]इति कालिदासः। ''उपहारो बलिः स्मृतः''[हलायुधकोशः १।१२८॥]इति हला-युधः । ''देवाग्रे नैवेद्ये द्वौ''[ ]इति तट्टीका । द्वे उपहारस्य। 'ढोवणउं[16]' इति भाषा ॥४४७॥

## विक्लवो विह्वलः[17]

---

१. 'अर्ह पूजायाम्' इति क्षीरतरङ्गिण्यादौ ॥ २. 'दण्ड दण्डनिपातने' इति क्षीरतरङ्गिणीमा.धातुवृत्ती, 'दण्ड निपातने' इति धातुप्रदीपः ॥ ३. 'दय दानगतिरक्षणहिंसादानेषु' इति क्षीरतरङ्गिण्यादौ ॥ ४. द्र. पदचन्द्रिका, भा-३, विशेष्यनिघ्नवर्गः (प्राणिवर्गः), श्लो-४१, पृ.३६॥ ५. 'ईक्ष दर्शने' इति क्षीरतरङ्गिण्यादौ ॥ ६. 'प्रतीक्षेषु' इति२॥ ७. 'पूजितोऽर्हितः' इति४॥ ८. १.२.४प्रतिषु न दृश्यते ॥ ९. 'च' इति ४प्रतौ नास्ति ॥ १०. २.३.४प्रतिषु न दृश्यते ॥ ११. 'युक्' इति३॥ १२. १प्रतौ न दृश्यते ॥ १३. 'लिङ्गिम्' इति१॥ १४. 'अपि' इति३॥ १५. 'पूजापक-' इति१॥ १६. '-वणौ' इति४, '-वणो' इति३॥ १७. तलनीयोऽमरकोषः ३।१।४४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ विक्लवते कातरीभवति **विक्लवः** । 'क्लव कातर्ये'( ), अयं धातुर्गणाऽपरिसमाप्ते[१]र्लौकिकः, पचाद्यच्। २ विरुद्धं ह्वलति[२] चलति **विह्वलः**। 'ह्वल चलने'(भ्वा.प.से.), पचाद्यच् । द्वे विकलेन्द्रियस्य ॥

**स्थूलः पीवा पीनश्च पीवरः ।**

१ तिष्ठत्युपचयेनेति[३] **स्थूलः**। 'ष्ठा गतिनिवृत्तौ'(भ्वा.-प.अ.), 'स्थश्च[४]'(उणा-६८२)इति सूत्रेण रक्[५], ऊकारश्चान्ता-देशः[६], लत्वम् । 'स्थूल परिबृंहणे'(चु.आ.से.)इत्यस्माद्वा, पचाद्यच्। २ प्यायते **पीवा** । 'ओप्यायी वृद्धौ'(भ्वा.आ.से.), 'ध्याप्योः सम्प्रसारणं च'(उणा-५५४)इति क्वनिप्, सम्प्रसारणं च । पीवानौ, पीवानः इत्यादि । ३ प्यायते स्म **पीनः** । '[ओ]-प्यायी वृद्धौ'(भ्वा.आ.से.), निष्ठा, 'प्यायः पी निष्ठायाम्[७]' ६।१।२८॥ इति पीभावः, 'ओदितश्च'८।२।४५॥ इति क्तस्य नत्वम् । ४ प्यायते पिबति वा **पीवरः** । 'ओप्यायी वृद्धौ' (भ्वा.आ.से.), 'पा पाने'(भ्वा.प.अ.) अस्य वा। 'चि(छि)-त्वरछत्वरधीवरपीवर[मीवर]चीवर[तीवरनीवर]गह्वरकट्वर-संयद्वरोपह्वराष्ट्ररचि साधवः[८]'(उणा-२८१)इति सूत्रेण साधुः । 'पीव मीव नीव तीव स्थौल्ये'(भ्वा.प.से.)अस्य वा । 'च-(छ)त्वर-'(उणा-२८१)इत्यादिना वरचि वलि लोपे निपात्यते । चत्वारि स्थूलस्य ॥

**चक्षुष्यः सुभगः**

१ चक्षुषे हितः **चक्षुष्यः**, यं दृष्ट्वा चक्षुः प्रह्लादते। 'शरीरावयवाद्यत्'५।१।६॥ इति यत् । २ शोभनो भगो रूपं श्रीर्वा यस्य स **सुभगः** । द्वे दृष्टिसुखप्रदस्य । 'सोहामणउं[९]' इति भाषा ॥

**द्वेष्योऽक्षिगतः**

१ द्वेषणीयो **द्वेष्यः**। 'द्विष अप्रीतौ'(अ.उ.अ.), 'ऋहलोर्ण्यत्'३।१।१२४॥ । २ अक्षिविषयं गतः **अक्षिगतः**। "अक्षिगतो[१०] यथा किंशारुकादिखेदकृत् तथाऽयमपीत्यर्थः, अक्षिगतशब्दो यथा प्रियो हुतत्वेन (हितत्वेन) व्यपदिश्यते, तथा शत्रुरपि सदा रुषा दृश्यमानत्वादक्षिगतत्वेनेति व्यपदिश्यते"[[११]]इति मिश्राः । द्वे दृष्टिदुःखदाऽप्रियस्य ॥

**अथांसलो बली ॥४४८॥**

**निर्दिग्धो मांसलश्चोपचितः**

१ अंसौ स्कन्धावस्य स्तः **अंसलः** । 'वत्सांसाभ्यां कामबले'५।२।९८॥ इति लच्। २ बलमस्यास्ति **बली**। 'अत इनिठनौ'५।२।११५॥ इतीनिः । बलवानपि ॥४४८॥ ३ निर्देग्धि[१२] स्म **निर्दिग्धः** । 'दिह उपचये'(अ.उ.अ.), निष्ठा। ४ मांसमस्यास्ति **मांसलः** । 'सिध्मादिभ्यश्च'५।२।९७॥ इति लच् । ५ उपचीयते स्म **उपचितः** । 'चिञ् चयने'(स्वा.-उ.अ.), निष्ठा । पञ्च बलवतः ॥

**अथ दुर्बलः कृशः ।**

**क्षामः क्षीणस्तनुश्छातस्तलिनाऽमांसपेलवाः ॥४४९॥**

१ दुर् निन्दितं बलमस्य **दुर्बलः** । २ कृश्यति स्म **कृशः** । 'कृश तनूकरणे'(दि.प.से.), निष्ठा[१३], 'अनुपसर्गात् फुल्लक्षीबकृशोल्लाघाः'८।२।५५॥ इति साधुः । ३ क्षायति स्म **क्षामः** । 'क्षै क्षये'(भ्वा.प.अ.), [निष्ठा], 'क्षायो मः' ८।२।५३॥ इति निष्ठातस्य[१४] मत्वम् । ४ क्षयति स्म **क्षीणः**। 'क्षि क्षये'(भ्वा.प.अ.), 'निष्ठायामण्यदर्थे'६।४।६०॥ इत्यादिना दीर्घः, 'क्षियो दीर्घात्'८।२।४६॥ इति निष्ठानत्वम् । ५ तनोति कार्श्यं **तनुः** । 'तनु विस्तारे'(त.उ.से.), 'भृमृशीतृचरित्सरि-तनि[धनि]मिमस्जिभ्य उः'(उणा-७)इत्युः । ६ छ्यति स्म **छातः**। 'छो छेदने'(दि.प.अ.), निष्ठा, 'आदेचः-'६।१।४५॥ इत्यात्वम्। बाहुल्यात्[१५] तृषिमृषिभ्यां तन् वा । मांसोच्छेदा वा छातः। शात इति तालव्यादिरपि । ७ तनोति कार्श्यं **तलिनः**। बाहुलकादिननि साधुः। ८ अल्पमांसः **अमांसः**। अल्पार्थोऽत्र नञ् । ९ पेलति गच्छति क्षामतां **पेलवः**[१६] । 'पेलृ गतौ[१७]' (भ्वा.प.से.), बाहुलकादवप्रत्ययः। नव दुर्बलस्य ॥४४९॥

**पिचिण्डिलो बृहत्कुक्षिस्तुन्दितुन्दिकतुन्दिलाः ।**

**उदर्युदरिले**

---

१. '-समाप्तो' इति४॥ २. 'ह्वलयति' इति३॥ ३. 'इति' इति ३प्रतौ नास्ति ॥ ४. 'स्थः किच्च' इत्युणादिगणे ॥ ५. ३प्रतौ नास्ति॥ ६. 'उका-' इति२॥ ७. 'निष्ठायाम्' इत्यष्टाध्याय्यां न दृश्यते ॥ ८. '-पह्वराष्ट्ररचि साधवः' इत्युणादिगणसूत्रे न दृश्यते ॥ ९. '-मणो' इति३॥ १०. '-गतौ' इति३॥ ११. 'द्वेष्ये द्वेषार्हे अक्षिगतशब्दः । यथा प्रियः स्नेहाद् हृद्गतत्वेन व्यपदिश्यते, तथा (तथा) शत्रुरपि रुषा सदा दृश्यमानत्वाद् अक्षिगतत्वेनेति अक्षिविषयं गतः अक्षिगतः" इति पदचन्द्रिका, भा-३, विशेष्यनिघ्नवर्गः(प्राणिवर्गः), श्लो-४५, पृ.४१॥ १२. 'निर्दिग्धति' इति३॥ १३. सर्वादर्शेषु दृश्यते, परमत्रानुचितं प्रतिभाति ॥ १४. 'निष्ठान्तस्य' इति३॥ १५. 'बाहुलकात्' इति२॥ १६. 'फेलवः' इति१॥ १७. 'फेलृ' इति१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ पिचिण्डमुदरमतिशयेनाऽस्याऽस्ति **पिचिण्डिलः**। पिच्छादित्वादिलच्। २ बृहत्कुक्षिरस्य **बृहत्कुक्षिः** । ३ तुन्दमतिशयितमुदरमस्यास्ति **तुन्दी** । ४ एवं **तुन्दिकः**[1] । 'तुन्दादिभ्य इलच्च'५।२।११७॥ इति चकाराद् इनिठनौ यथाक्रमम्। ५ तुन्दमतिशयितमुदरमस्यास्ति **तुन्दिलः** । तुन्दादित्वादिलच् । स्वामी तु-'तुन्दिवलिवटेर्भः'५।२।१३९॥ इति भप्रत्यये "तुन्दिभः" [अम.क्षीर.२।७।४४॥]इत्याह । ६ एवम् **उदरी** । ७ तुन्दादित्वाद् **उदरिलः** । उदरिकोऽपि । सप्त 'फांदालु[2]' इति ख्यातस्य ॥

## वि[1]ख्रवि[2]ख्रुवि[3]ग्रा अनासिके ॥४५०॥

१-३ विगता नासिकाऽस्य **विख्रः**, **विखुः**, **विग्रः**। 'खुख्रौ च'( )इति नासिकाशब्दस्य खुख्रावादेशौ, 'वेर्ग्रो वक्तव्यः'(वा-५।४।११९॥)इति ग्रादेशश्च । " 'वेः खुख्रग्रा' ( )इति शाकटायनसूत्रेण खुख्राग्रादेशे 'विखुः, विख्रः, विग्रः' इति रूपत्रयम्''[3][ ]इति मिश्राः । "खरणसो विग्रो विखुर्विनासिकेः[4]''[5][ ]इति रभसः । "विनसा[6] हतबान्धवः''[भट्टिकाव्यम्, सर्गः-५, श्लो-८]इति प्रयोगाद् विनसोऽपि। अनासिकः नासिकारहितः, तत्र । (त्रीणि[7] नासिकारहितस्य। 'नकटा' इति भाषा) ॥४५०॥

## नतनासिकेऽ[1]वनाटोऽ[2]वटीटोऽ[3]भ्रटोऽपि च ।

१-३ नता नम्रीभूता नासिकाऽस्य नतनासिकः । 'गोस्त्रियोरुपसर्जनस्य'१।२।४८॥ इति ह्रस्वत्वम्, तत्र। अवनता नासिकाऽस्य **अवनाटः**, **अवटीटः**, **अवभ्रटः** । 'नत(नते) नासिका[याः संज्ञा]यां टीटन्नाटज्भ्रटचः (टीटञ्नाटज्भ्रटजः)' ५।२।३१॥ अवाद् नासायां नासानमनेऽप्येते स्युः । "एतत्त्रयं नतायां नासिकायां वर्तित्वात् तद्योगादचि लक्षितलक्षणयाऽवनासिके वर्तते[8]''[9][ ]इति मिश्राः । त्रीणि नतनासिकस्य । "चिपिटः''[शेषनाममाला ३।१०५॥]इति शैषिकम् ॥

## खर[1]णास्तु खर[2]णसः

१-२ खरा तीक्ष्णा खरस्य गर्दभस्येव नासिकाऽस्य **खरणाः**। 'खुरखराभ्यां नस् वक्तव्यः[10]'(वा-५।४।११८॥)इति नासिकाया नसादेशः, 'पूर्वपदात् संज्ञायामगः'८।४।३॥ इति णत्वम् । खरणसौ[11], खरणसः इत्यादि । पक्षे 'अच् नासिकायाः-'५।४।११८॥ इत्यच्, नासिकाया नसादेशश्च, 'पूर्वपदात्-'८।४।३॥ इति णत्वे **खरणसः**, अदन्तः । द्वे कठिनतीक्ष्णनासावतः ॥

## नःक्षु[1]द्रः क्षुद्रनासिकः ॥४५१॥

१ नासिकायां क्षुद्रो **नःक्षुद्रः** । 'नस् नासिकायाः क्षुद्रे'(हैमसू-३।२।९९॥)इति नसादेशः । २ क्षुद्रा नासिकाऽस्य **क्षुद्रनासिकः** । द्वे लघुनासिकस्य ॥४५१॥

## खु[1]रणाः स्यात् खु[2]रणसः

१ खुरः पशुशफः, तद्वन्नासिकाऽस्य **खुरणाः** । 'खुरखराभ्यां नस्'(वा-५।४।११८॥)इति नसादेशः । २ अचि

---

१. इतोऽग्रे १प्रतौ 'तुन्दादिकः' इति दृश्यते ॥ २. 'फांदालौ' इति३, 'फांदालुं' इति४॥ ३. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३०५, पृ.३८१॥ ४. '-विनासकः' इति१॥ ५. द्र. टीकासर्वस्वम्, भा-२, २।६।४६॥, पृ.३०३॥, पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३०४, पृ.३८१॥, रामाश्रमी २।६।४६॥, पृ.२७९॥ ६. भट्टिकाव्ये "वि-नासा हत-बान्धवा' इति दृश्यते, तत्रैव जयमङ्गलकृतटीकायाम् "विनासा विगता नासा यस्याः । नासैव नासिकेति '८३४॥ केऽणः७।४।१३॥' इति ह्रस्वत्वे रूपं, तस्या नसादेशस्य विधीयमानत्वादत्र संभव एव नास्ति । विनसेति पाठान्तरम् । तत्र विगता चासौ नासिका च विनासिका । तत इत्थम्भूतलक्षणायां तृतीयायां '२२८॥ पद्दन्नोमास्-६।१।६३॥ ' इत्यादिना नसादेशः । विगतया नासिकयोपालक्षितेत्यर्थः । विगता नासिका अस्या इति बहुव्रीहिणा व्याख्याने अञ्नासिकेत्यादिना अच् नसादेशश्च प्राप्नुतः । तस्य संज्ञाविषयत्वादुपसर्गाच्चेत्यसंज्ञायां विधीयमानो न भवति वेग्रो वक्तव्य इति ग्रादेशो बाधकः ।" (भट्टिकाव्यम्, सर्गः-५, श्लो-८, पृ.८८)इति व्याख्यातम् । "वेग्रो वक्तव्यः' । विगता नासिका यस्य विग्रः । 'ख्यश्च' । विख्यः। कथं तर्हि 'विनसा हतबान्धवा' इति भट्टिः । विगतया नासिकयोपलक्षितेति व्याख्येयम् ।" इति सिद्धान्तकौमुद्यां बहुव्रीहिसमासप्रकरणे ॥ तत्रत्या बालमनोरमाटीका-"वेरेति । वेः परो यो नासिकाशब्दः स ग्रादेशं प्राप्नोतीति भावः । विग्र इति । विगता नासिका यस्येति विग्रहः । प्रकृतवार्तिकेन नासिकाशब्दस्य ग्रादेश इति भावः । विगता नासिका यस्येति विग्रहे नसादेशे टापि च विनसेति भट्टिप्रयोगो न युज्यते । ग्रादेशस्यास्य नसादेशं प्रत्यपवादत्वादित्याक्षिपति-कथं तर्हीति । समाधत्ते-विगतयेति । विगता नासिका विनासिका, प्रादिसमासः । अबहुव्रीहित्वात् न ग्रादेशः । किन्तु टायां 'पद्दन्' इति नसादेशे विनसेति तृतीयान्ते रूपम् । उपलक्षितेत्यध्याहार्यमिति भावः ।' इति वैयाकरणसिद्धान्तकौमुदी, बहुव्रीहिसमासप्रकरणम, पृ.२५९॥ ७. कोष्ठान्तर्गतपाठः १.२.४ न दृश्यते ॥ ८. 'वर्तन्ते' इति१.२॥ ९. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३०३, पृ.३७९॥, तत्र "एतत् त्रयं नतायां नासिकायां वर्तते। तद्योगाद् अचि (पा.५।२।१२७), लक्षितलक्षणया वा नतनासिके वर्तते ॥" इति दृश्यते ॥ १०. 'खुरखराभ्यां च नस् वक्तव्यः' इति महाभाष्यम्, चतुर्थखण्डम्, ५।४।११८॥, पृ.४२०॥, 'खुरखराभ्यां नस् वक्तव्यः' इति काशिका, भा-५, ५।४।११८॥, पृ.४१२॥, 'खुरखराभ्यां वा नस्' इति सिद्धान्तकौमुदी, पृ.२४६॥ ११. 'खरणासौ' इति१, २प्रतौ न दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**खुरणसः** । ''खुरखराभ्यां नस् वक्तव्यः' इति [नस्भावः], 'आदेशान्तरकरणं प्रत्ययनिवृत्त्यर्थम्'[ ]इति[1] कैयटपदमञ्जर्यादौ[2], अत्र वृत्तौ 'अजपीष्यते'[ [3]]इति, तेन, खुरणसः, खरणस इत्यपि भवति''[मा.धातुवृत्तिः, भ्वादिः, धातुसं-४०४]इति माधवः । द्वे विकटनासिकस्य ॥

**उन्नसस्तूग्रनासिकः ।**

१ उन्नता उद्गता वा नासिकाऽस्य **उन्नसः** । 'उपसर्गाच्च'५।४।११९॥इति सूत्रेण अच्, नासिकाया नसादेशश्च। उग्रा उन्नता नासिकाऽस्य उग्रनासिकः । एकमुग्रनासिकस्योच्चनासिकस्य वा ॥

**पङ्गुः श्रोणः**

१ पणते जीवनार्थं स्तौति **पङ्गुः** । 'पन व्यवहारे स्तुतौ च'(भ्वा.आ.से.), 'वलेर्गुक् च'(उणा-१९)इति बाहुलकात् पनेरप्युप्रत्ययो[4] गुगागमश्च निपात्यते । स्त्रियां 'पङ्गोश्च' ४।१।६८॥ इत्यूङि[5] पङ्गूः । २ श्रोणति जङ्घयोः संहतो[6] भवति **श्रोणः** । 'श्रोणृ सङ्घाते'(भ्वा.प.से.), पचाद्यच् । द्वे जङ्घाविकलस्य । ''पङ्गुलः पीठसर्पी''[शेषनाममाला ३।१०५॥] शैषिके ॥

**खलतिस्तु खल्वाट ऐन्द्रलुप्तिकः ॥४५२॥**

**शिपिविष्टो बभ्रुः**

१ खलन्ति सञ्चलन्ति केशा अस्मादिति **खलतिः**। 'खल सञ्चये'(भ्वा.प.से.)अस्य धातोः प्रयोगः, अयं च भीमादिषु पाठाद् 'भीमादयोऽपादाने'३।४।७४॥ इत्यपादानविषयः, अत्रैव पाठादतिप्रत्ययः। धातूनामनेकार्थत्वात् सञ्चलने वृत्तिः। यद्वा 'स्खल सञ्चलने'(भ्वा.प.से.)अस्यैव धातोर्भीमादिषु पाठात् सलोपः । २ **खल्वाटः** । 'खल्वाट-'( )इति सूत्रेण साधुः। खलतोऽपि । ३ इन्द्रलुप्तं केशघ्नम्, तेन चरति **ऐन्द्रलुप्तिकः** । 'तेन चरति'४।४।८॥ इति ठक् ॥४५२॥ ४ शिपिश्चर्म विष्टं दोषव्याप्तमस्य **शिपिविष्टः** । ५ बिभर्ति निःशङ्कतां युद्धादौ **बभ्रुः**। 'डुभृञ् धारणादौ'(जु.उ.अ.), 'कुभ्र(कुर्भ्र)श्च'(उणा-२२)इति भृञः कुप्रत्ययो धातोर्द्वित्वं च । पञ्च खल्वाटस्य ॥

**अथ काणः कनन एकदृक् ।**

१ काणयति निमीलयति नेत्रं **काणः** । 'कण निमीलने'(चु.उ.से.), चुरादिः, पचाद्यच् । २ कनति दीप्यते एकदृशा **कननः**। 'कन दीप्तौ[7]'(भ्वा.प.से.), नन्द्यादित्वाल्ल्युः। ३ एका दृगस्य **एकदृक्** । त्रीणि काणस्य ॥

**पृश्निरल्पतनौ[8]**

१ बालैरप्ययत्नेन स्पृश्यते **पृश्निः**। 'स्पृश संस्पर्शने' (तु.प.अ.), 'घृणिपृश्निपार्ष्णिचूर्णि[9]तूर्णयः[10]'(उणा-४९२)इति निप्रत्ययो, गुणाभावः, सलोपश्च निपात्यते । पृच्छत्यौषधमिति प्रच्छेर्वा निप्रत्यये साधुः। 'च्छ्वोः-'६।४।१९॥इति शत्वे च पृष्टिर्वा। ''पृषेः[11] पृष्णिरित्यन्ये''[ ]इति पुरुषोत्तमः । २ अल्पा तनुरस्य **अल्पतनुः**, तत्र । द्वे लघुशरीरस्य । ([12] ''किरातस्त्वल्पवर्ष्मणि''[शेषनामनाला ३।१०५॥]इति शैषिके)॥

**कुब्जे गडुलः**

१ कु ईषद् उब्जमार्जवमस्य **कुब्जः**। 'उब्ज आर्जवे' (तु.प.से.), शकन्ध्वादिः, पृषोदरादिर्वा, तत्र । न्युब्जोऽपि[13]। यदुक्तं धातुवृत्तौ 'उब्ज आर्जवे'(तु.प.से.), निपूर्वः, ''न्युब्जिताः शेरतेऽस्मिन्निति न्युब्जो रोगविशेषः, 'भुजन्युब्जौ पाण्युपतापयोः'७।३।६१॥ इति घञि कुत्वाभावो निपात्यते''[धातुवृत्तिः, तुदादिगणः, धातुसं-२३]इति। २ गडुः पृष्ठि[14]ग्रन्थिरस्य **गडुलः**। 'सिध्मादिभ्यश्च'५।२।९७॥ इति लच् । द्वे कुब्जस्य। ([15] द्वे 'कूबडा' इति ख्यातस्य) ॥

**कुकरे कुणिः[16] ॥४५३॥**

१ रोगादिभ्रंसित्वात्[17] कुत्सितः करो बाहुरस्य **कुकरः**, तत्र । २ कुण्यते कुत्सितत्वेन शब्द्यते **कुणिः**। 'कुण शब्दे[18]' (तु.प.से.), 'कुण सङ्कोचने[19]'(चु.उ.से.)वा[20], 'इगुपधात्

---

१. ''आदेशप्रत्यययोः प्रसङ्गे केवलादेशविधानार्थं वचनम्'' इति कैयटकृतप्रदीपटीका, चतुर्थखण्डम्, ५।४।११८॥, पृ.४२०॥ २. ''केवलादेशवचनं प्रत्ययनिवृत्त्यर्थम्'' इति हरदत्तमिश्रकृतपदमञ्जरीटीका, भा-५, ५।४।११८॥, पृ.४१२॥ ३. ''पक्षेऽच्प्रत्ययोऽपीष्यते'' इति काशिकावृत्तौ, भा-५, ५।४।११८॥, पृ.४१२॥ ४. '-रप्युप्रत्य-' इति २.३.४॥ ५. 'इत्युङि पङ्गुः' इति ३॥ ६. 'संहतौ' इति १.४॥ ७. 'कनी दीप्तिकान्तिगतिषु' इति क्षीरतरङ्गिण्यादौ॥ ८. तुलनीयोऽमरकोषः २।६।४८॥ ९. इतोऽग्रे ३प्रतौ 'तूर्णि' इति दृश्यते ॥ १०. उणादिगणे 'तूर्णयः' इत्यस्य स्थाने 'भूर्णि' इति दृश्यते ॥ ११. 'पृष्टेः' इति ४॥ १२. कोष्ठान्तर्गतपाठः १.२.४प्रतिषु न दृश्यते ॥ १३. 'न्युब्जेऽपि' इति १॥ १४. 'पृष्ट-' इति ३॥ १५. कोष्ठान्तर्गतपाठः २.४ न दृश्यते, तथा तत्स्थाने १प्रतौ बहिर्भागे 'द्वे कुब्जस्य' इति दृश्यते ॥ १६. तुलनीयोऽमरकोषः २।६।४८॥ १७. '-भ्रंस-' इति३॥ १८. 'कुण शब्दोपकरणयोः' इति क्षीरतरङ्गिण्यादौ ॥ १९. अयं धातुः क्षीरतरङ्गिण्यादौ न दृश्यते, किन्तु माधवीयधातुवृत्तौ चुरादौ 'कूच सङ्कोचने'(चुरादिः, धातुसं-१३३, पृ.५५३)इत्यस्य व्याख्यानावसरे-'अन्ये तु कुणेति ह्रस्वोपधं पठन्ति'' इत्युक्तं सायणेन ॥ २०. 'च' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कित्'(उणा-५५९)इतीन्, ह्रस्वोकारादिरयम् । 'निसर्गतः कूणिपङ्गुपोगण्डाः''[ ][1]इति नाममालायामार्यापाठाद् दीर्घोकारवांश्च। ''कुत्सितः पाणिरस्य''[ ][2]इति नैरुक्ताः । द्वे 'टूंटा' इति ख्यातस्य ॥४५३॥

## निखर्वः खट्टनः खर्वः खर्वशाखश्च वामनः ।

१ नितरां खर्वति **निखर्वः** । 'खर्व गतौ'(भ्वा.-प.से.), पचाद्यच् । २ खट्टयति **खट्टनः**, टवर्गाद्यद्वयमध्यः। 'खट्ट संवरणे'(चु.उ.से.), चुरादिः, नन्द्यादित्वाद् ल्युः । ३ खर्वति प्रकृतपुरुषप्रमाणान्न्यूनतां गच्छति **खर्वः** । 'खर्व गतौ' (भ्वा.प.से.), पचाद्यच् । ४ खर्वा ह्रस्वाः शाखाः करचरणलक्षणा अस्य **खर्वशाखः** । ५ वामयति प्राण्यन्तरप्रमाणाद् विपरीतमाचष्टे **वामनः** । 'तत्करोति-'(गणसू-३।१।२६॥)इति ण्यन्ताद् वामशब्दाद् नन्द्यादित्वाद् ल्युः । वामनशब्दोऽत्र करचरणह्रस्वे देहे वर्तते, ततो वामोऽस्याऽस्ति वामनः, पामादित्वान्न इति वा। स्त्रियां गौरादित्वाद् ङीषि वामनी । पञ्च वामनस्य। ''ह्रस्वः''[शेषनाममाला ३।१०६॥]इति शैषिकम्॥

## अकर्ण एडो बधिरः

१ अविद्यमानौ कर्णावस्य **अकर्णः** । २ एडयति श्रवणायाऽन्तरात्मानं प्रेरयति **एडः** । 'इल प्रेरणे'(चु.उ.से.), चुरादिः, पचाद्यच्, डलयोरैक्यम्[3] । एडः पशुरिवेति वा । आ ईड्यतेऽसाविति वा । आङ्पूर्वः 'ईड स्तुतौ'(अ.आ.से.), पचाद्यच् । ३ बध्यते हितश्रवणाभावात् पीड्यते **बधिरः** । 'बन्ध बन्धने'(क्र्या.प.अ.), 'इषिमदि-'(उणा-५१)इति किरच्। त्रीणि बधिरस्य ॥

## दुश्चर्मा तु द्विनग्नकः ॥४५४॥

## चण्डश्च( वण्डश्च ) शिपिविष्टश्च

१ दुरिति निन्दायाम्, असम्पूर्णत्वाद् दुरिति निन्दितं शेफाग्रस्य चर्माऽस्य **दुश्चर्मा**, नकारान्तः, शैशवे निश्चर्माग्रशिश्नत्वात्, निराच्छादनत्वाच्च । २ द्विर्नग्नो **द्विनग्नकः** ॥४५४॥ ३ चण्डते(वण्डते) पिधत्ते **चण्डः ( वण्डः )** । 'चडिङ् (वडि) वेष्टने'(भ्वा.आ.से.), पचाद्यच् । ४ शिपिश्चर्म विष्टं दोषव्याप्तमस्य **शिपिविष्टः** । चत्वारि दुश्चर्मणः । ''जन्मारभ्य बालवयोवर्ती यौवनादिवयोवर्ती वाऽसम्पूर्णशिश्नः, सम्पूर्णशिश्नश्चैवंविध उच्यते, निश्चर्माग्रशिश्नोऽयम्''[ ]इति केचित्॥

## खोडखोरौ तु खञ्जके ।

१ खोडति गतौ प्रतिहतो भवति **खोडः**, कवर्गद्वितीयादिः। 'खोडृ[4] गतिप्रतीघाते[5]'(भ्वा.प.से.), पचाद्यच् । ''खोटः''[ ]इति शब्दप्रभेदः । २ खोरति **खोरः** । 'खोर (खोरृ) प्रतीघाते[6]'(भ्वा.प.से.), अच् । ३ खञ्जति **खञ्जः**। 'खजि गतिवैकल्ये'(भ्वा.प.से.), अच् । खञ्जः पादस्तद्योगादर्शआद्यचि वा । ततः स्वार्थे कनि **खञ्जकः**, तत्र । ''अथ खञ्जके खोडखोरौ''[[7] ]इति रभसः । त्रीणि खञ्जस्य ॥

## विकलाङ्गस्तु पोगण्डः

१ विकलान्यङ्गान्यस्य **विकलाङ्गः**। २ पूयतेऽपसार्यते **पोगण्डः**। 'पूयी विशरणे'(भ्वा.आ.से.), 'पूयोगादिः' (हैमोणा-१७४)इत्यण्डप्रत्ययः । ''पोगण्डो विकलाङ्गकः'' [[8] ]इति रत्नकोषः। ''पोगण्डो विकलाङ्गः स्यात्''[हलायुधकोशः२।३८८॥]इति हलायुधः। अपकृष्टं गच्छति गमेः 'अमन्ताड्डः'(उणा-१११)पृषोदरादित्वादोत्वे[10] अपोगण्डोऽपि । ''अपोगण्डस्तु शिशुके विकलाङ्गे च भीरुके[11]''[विश्वप्रकाशकोशः, डान्तवर्गः, श्लो-३९]इति विश्वः । द्वे विकलाङ्गस्य। 'हाथपगजेहना लूला' इति भाषा ॥

## ऊर्ध्वज्ञुरूर्ध्वजानुकः ॥४५५॥

## ऊर्ध्वज्ञश्चापि

१ ऊर्ध्व(ऊर्ध्वे) तिष्ठतो यस्य दूरोत्थायिनी जानुनी भवतः स **ऊर्ध्वज्ञुः** । 'ऊर्ध्वाद्विभाषा'५।४।१३०॥ इति जानुनो ज्ञुः । जकारञकारसंयोगवान् पञ्चमस्वरान्तोऽयम् । यन्माघैकादशसर्गः-

---

१. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३०६, पृ.३८३॥, रामाश्रमी २।६।४८॥, पृ.२८०॥, तत्र '-पोगण्डाः' इत्यस्य स्थाने '-पौगण्डाः' इति दृश्यते॥, मल्लिनाथसूरिकृतामरपदपारिजातटीका, भा-१, २।६।४८॥, पृ.३९०॥ २. द्र. स्वोपज्ञटीका ३।४५३॥, पृ.१०४॥ ९ 'गौरादिङीषि' इति१.२॥ ३. '-क्ये' इति३॥ ४. इतोऽग्रे १.२प्रत्योः '४' इति दृश्यते ॥ ५. 'प्रतिघाते' इति ४ हैमसम्मतोऽयम्, यद्वा 'खोलृ' इति बोद्धव्यम्, अत एवोक्तं तस्य व्याख्यानावसरे सायणः ''खोडः खञ्जः, पचाद्यच्, लडयोरभेदः'' इति, मा.धातुवृत्तिः, भ्वादिः, धातुसं-३६०, पृ.१५१॥ ६. 'प्रतिघाते' इति४॥ ७. द्र. टीकासर्वस्वम्, भा-२, २।६।४९॥, पृ.३०७॥, पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३०८, पृ.३८४॥, रामाश्रमी २।६।४९॥, पृ.२८०॥ ८. तुलनीयोऽमरकोषः २।६।४६॥ ९. द्र. टीकासर्वस्वम्, भा-२, २।६।४७॥, पृ.३०२॥, पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३०४, पृ.३८०॥ १०. '-दरादोत्वे' इति३॥ ११. विश्वप्रकाशकोशे '-लाङ्गे च भीरुके' इत्यस्य स्थाने '-लाङ्गेऽतिभीरुके' इति दृश्यते, पृ.४६॥

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

"परिशिथिलितकर्णग्रीवमामीलिताक्षः
क्षणमयमनुभूय स्वप्नमूर्ध्वज्ञुरेव ।
रिरसयिषति भूयः शिष्यमग्रे विकीर्णं
पटुतरचपलौष्ठं(-लोष्ठः) प्रस्फुरत्प्रोथमश्वः ॥१॥"

[शिशुपालवधम्, सर्गः-११, श्लो-११]इति। २ ऊर्ध्वे जानुनी अस्य **ऊर्ध्वजानुकः** ॥४५५॥ ३ व्याकरणान्तरेऽदन्तज्ञादेशे[1] **ऊर्ध्वज्ञः** च । त्रीणि ऊर्ध्वज्ञोः । 'ऊंचा ढौंचणहुइ[2]' तस्येति भाषा ॥

**अथ प्रज्ञुप्रज्ञौ विरलजानुके ।**

१ प्रगते जानुनी अस्य **प्रज्ञुः** । 'प्रसंभ्यां जानुनोर्ज्ञुः' ५।४।१२९॥ । २ व्याकरणान्तरेऽदन्तज्ञादेशे **प्रज्ञः**। 'सम्प्राज्जानुनो(-जानो)र्ज्ञुज्ञौ'(हैमसू-७।३।१५५॥)इति सूत्रम् । एतौ जकारञकारसंयोगीयान्तौ । वातादिदोषाद् विरले जानुनी अस्य विरलजानुकः, तत्र । द्वे विरलजानुकस्य ॥

**संज्ञुसंज्ञौ युतजानौ**

१-२ नित्यं कदाचिद्वा संहते संलग्ने जानुनी अस्य **संज्ञुः**, **संज्ञः** च । एतौ जकारञकारसंयोगीयान्तौ । द्वे युतजानुकस्य ।

"प्रज्ञुः प्रगतजानुः स्यात् प्रज्ञोऽप्यत्रैव दृश्यते ।
संज्ञुः संहतजानौ च भवेत् संज्ञोऽपि तत्र हि ॥१॥
ऊर्ध्वज्ञुरूर्ध्वजानुः स्यादूर्ध्वज्ञोऽप्यूर्ध्वजानुकः ॥" [³]

इति साहसाङ्कः ॥

**वलिनो वलिभः समौ ॥४५६॥**

१ (वलिस्त्वक्सङ्कोचोऽस्त्यस्य **वलिनः**)। 'वल वल्ल संवरणे [सञ्चरणे] च[5]'(भ्वा.आ.से.), '-इन्'(उणा-५५७) इतीन्, वलिर्जराश्लथचर्म, तद्योगात् पामादित्वान्नः वलिनः । २ वलिरस्यास्ति **वलिभः** । 'तुन्दिवलिवटेर्भः'५।२।१३९॥ । द्वे लीलरीवानिति[6] ख्यातस्य[7] ॥४५६॥

**उदग्रदन् दन्तुरः स्यात्**

१ उदग्रा उन्नता दन्ता अस्य **उदग्रदन्** । 'अग्रान्तशुद्धशुभ्र-'५।४।१४५॥ इत्यादिना दन्नादेशः । २ उन्नता दन्ता अस्य **दन्तुरः** । 'दन्त उन्नत उरच्'५।२।१०६॥। द्वे लम्बदन्तवतः ॥

**प्रलम्बाण्डस्तु मुष्करः ।**

१ प्रकर्षेण लम्बावण्डावस्य **प्रलम्बाण्डः** । २ प्रवृद्धौ मुष्कावस्य **मुष्करः** । 'ऊषशुषि[8](सुषि)मुष्कमधो रः' ५।२।१०७॥। द्वे प्रवृद्धवृषणस्य ॥

**अन्धो गताक्षः**

१ अन्धयति दृष्टिमुपसंहरति **अन्धः**। 'अन्ध दृष्ट्युपसंहारे[9]'(चु.उ.से.), चुरादिः, पचाद्यच् । अमति गच्छत्यनेनेति वा। 'अम गतौ[10]'(भ्वा.प.से.), 'स्कन्द्यमिभ्याम्-'(हैमोणा-२५१)इति धः । २ गतेऽक्षिणी यस्य स **गताक्षः** । 'बहुव्रीहौ सक्थ्यक्ष्णोः [स्वाङ्गात्] षच्'५।४।११३॥ । द्वे अन्धस्य । "अनेडमूकः"[शेषनाममाला ३।१०६॥]इति शैषिकम् ॥

**उत्पश्य उन्मुखः**

१ उद् ऊर्ध्वं पश्यति **उत्पश्यः** । 'दृशिर् प्रेक्षणे' (भ्वा.प.अ.), 'पाघ्राध्माधेट्दृशः शः'३।१।१३७॥ इति शः, शित्वात् 'पाघ्राध्मा-'७।३।७८॥ इति पश्यादेशः । २ उद्[11] ऊर्ध्वं मुखमस्य **उन्मुखः** । द्वे ऊर्ध्वं पश्यतः ॥

**अधोमुखस्त्ववाङ् ॥४५७॥**

१ अधःस्थितं मुखमस्य **अधोमुखः**। २ अवाञ्चति **अवाङ्** । अवपूर्वः 'अञ्चु गतिपूजनयोः'(भ्वा.प.से.), 'ऋत्विक्-'३।२।५९॥ आदिना क्विन् । अवाञ्चौ, अवाञ्चः, शसादौ अवाचः, अवाचा इत्यादि । यन्माघः-"कुर्वन्तमित्यभिभरेण न गानवाचः, पुष्पैर्विराममलिनां च न गानवाचः" [शिशुपालवधम्, सर्गः-६, श्लो-७९]इति । अवाचीनोऽपि । "न्युब्जः" [शेषनाममाला ३।१०६॥]इति शैषिकम् । द्वे अधोमुखस्य ॥

**मुण्डस्तु मुण्डितः**

१ मुण्ड्यते **मुण्डः** । 'मुडि खण्डने'(भ्वा.प.से.), घञ् । यद्वा मुण्डनं मुण्डः केशापनयनम्, तद्योगादर्शआदित्वादच् । स्त्रियां मुण्डा । २ मुण्ड्यते स्म **मुण्डितः**। 'मुडि[12] खण्डने'(भ्वा.प.से.), निष्ठा । द्वे मुण्डस्य ॥

---

१. हैमव्याकरणे 'वोर्ध्वात्'७।३।१५५॥ इत्यनेन ज्ञुज्ञौ आदेशौ स्तः ॥ २. 'ऊंचा ढौचण-' इति२, 'ऊंचा ढौंचणा-' इति३॥ ३. द्र. पदचन्द्रिका, भा-१, मनुष्यवर्गः, श्लो-३०५, पृ.३८२॥, रामाश्रमी २।६।४७॥, पृ.२८०॥ ४. कोष्ठान्तर्गतपाठः १.३.४प्रतिषु न दृश्यते ॥ ५. सायणसम्मतोऽयं धातुपाठः, 'वल संवरणे' इत्येव स्वामी, 'वल्ल संवरणे' इत्येव धातुप्रदीपोऽपि ॥ ६. '-त्रिति' इति३॥ ७. 'भाषा' इति१॥ ८. 'उष-' इति३.४॥ ९. स्वामिसम्मतोऽयं धातुपाठः, 'दृष्ट्युपघाते' इति मैत्रेयसायणौ ॥ १०. 'गत्यादिषु' इति युक्तः ॥ ११. 'उद्' इति१.२॥ १२. 'मुंडि' इति१.२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**केशी[1] केशव:[2] केशिको[3]ऽपि च ।**

१ प्रशस्ता: केशा: सन्त्यस्य **केशी** । 'अत इनिठनौ' ५।२।११५॥ इतीनि: । २ केशा अस्य सन्ति **केशव:** । 'केशाद्वोऽन्यतरस्याम्'५।२।१०९॥ इति व: । ३ 'अत इनिठनौ' ५।२।-११५॥ इति ठनौ **केशिक:** । त्रीणि सकेशस्य ॥

**वलिर:[1] केकर:[2]**

१ वलते वेष्टति (वेष्टते) नेत्रं **वलिर:** । 'वल वल्ल संवरणे[1]'(भ्वा.आ.से.), बाहुलकात् 'तिमिरुधि-'( ) इति किरच् । वलिरं वक्रनेत्रम्, तद्योगाद् 'अर्शआदिभ्योऽच्' ५।२।१२७॥ वा । २ के शिरसि करोत्यक्षिणी चलतारकत्वात् **केकर:**, प्रथमस्वरमध्य: । 'कि ज्ञाने'(जु.प.अ.), सौत्रो[2] वा, '[3]किशृवृभ्य:-'(हैमोणा-४३५)इति करप्रत्यये वा । ''टेरे वालिकेकरौ''[[4]]इति रभस: । द्वे वक्रदृष्टिनरस्य ॥

**वृद्धनाभौ तुण्डिल[1]तुण्डिभौ[2][5] ॥४५८॥**

१ वृद्धा नाभिर्यस्य, तत्र । उन्नता नाभि: तुण्डि: । 'तुडि तोडने'(भ्वा.आ.से.), 'इन् सर्वधातुभ्य:'(उणा-५५७) इतीन् । साऽस्याऽस्ति **तुण्डिल**[6]: । सिध्मादित्वाल्ल: । एकदेशविकृतस्यानन्यत्वात् 'तुन्दि(तुण्डि)बलिवटि(वटे:)'५।२।१३९॥ इत्यादिना भे **तुण्डिभ:** । द्वे 'सूंटीयालु[7]' इति ख्यातस्य[8] ॥४५८॥

**आमयाव्य[1]पटु[2]र्ग्लानो[3] ग्लास्नु[4]र्विकृत[5] आतुर:[6] ।**
**व्याधितो[7]ऽभ्यमितो[8]ऽभ्यान्त:[9]**

१ आमयो रोगोऽस्याऽस्ति **आमयावी** । सर्वत्रामयस्योपसङ्ख्यानाद् विनिदीर्घौ । आमयाविनौ, आमयाविन: इत्यादि । २ ''पटुर्दक्षे च नीरोगे''[मेदिनीकोश:, टान्तवर्ग:, श्लो-२०]इति मेदिनि: । तद्विपरीत: **अपटु:** । ३ ग्लायति स्म **ग्लान:** । 'ग्लै हर्षक्षये'(भ्वा.प.अ.), निष्ठा, 'संयोगादेरातोधातो:-'८।२।४३॥ इति नत्वम् । ([9]ग्लानिरस्यास्तीति, अर्शआद्यच् वा) । ४ ग्लानिशीलो **ग्लास्नु:** । 'ग्लाजिस्थश्च क्स्नु:(ग्स्नु:)'३।२।१३९॥ ५ विकरोति स्म **विकृत:** । 'डुकृञ् करणे'(त.उ.अ.), निष्ठा । ६ आतुरयति[10] आतुरत्वादति[11]-त्वरते[12] **आतुर:** । 'तुर त्वरणे'(जु.प.से.), सौत्र:, 'इगुपध-' ३।१।१३५॥ इति क: । ७ व्याधि: सञ्जातोऽस्य **व्याधित:** । 'तदस्य सञ्जातम्-'५।२।३६॥ इतीतच् । रोगितोऽपि । ८ अभितोऽम्यते स्म **अभ्यमित:** । 'अम्(अम) रोगे'(चु.उ.से.), अभिपूर्वात् क्त: । ९ 'रुष्यम्(म)त्वरसंघुषास्वनाम्[13]'७।२।२८॥ वेटि इडभावे **अभ्यान्त:** । 'अनुनासिकस्य क्विझलो: क्ङिति' ६।४।१५॥ इति दीर्घ: । सामान्यत: नव[14] रोगिण: ॥

अथ विशेषेणाह-

**दर्द्रुरोगी[1] तु दर्द्रुण:[2] ॥४५९॥**

१ दरिद्राति वपुरनया दर्द्रु: । 'दरिद्रा दुर्गतौ'(अ.-प.से.), मृगय्वादित्वात् क्वन्तो निपात[15]: । सा चासौ रोगश्च दर्द्रुरोग:, तद्योगाद् [ **दर्द्रुरोगी** ] । 'द्वन्द्वोपताप-'५।२।१२८॥ इत्यादिना इनि: । २ दर्द्रू:[16] षष्ठस्वरान्तोऽपि । यदुज्ज्वलदत्त:- '' 'दरिद्रो(दरिद्रातेर्) यालोपश्च'(उणा-९०)दरिद्राते[17]रू: [18]स्यादिकाराकारयोर्लोपश्च, दर्द्रू: कुष्ठविशेष:''[ ]इति । [19]द्विरेफोऽयम्, तद्योगाद् 'ददर्व्रा ह्रस्वश्च'(गणसू-५।२।१००॥)इति नप्रत्यये ह्रस्वत्वे च **दर्द्रुण:** । ''दरिद्रातेर्यलोप इति पाठाद् [20]रेफेकाराकारलोपे दद्रु:, एकरेफ:, ततो नप्रत्यये दद्रुण: एकरेफ:,''[ ] इत्यन्ये[21] । द्वे दर्द्रुरोगवत: ॥४५९॥

**पामन:[1] कच्छुर[2]स्तुल्यौ**

१ पामाऽस्याऽस्ति **पामन:** । पामादित्वान्न: । पामर इत्येके, द्वावपीति भोज: । २ कच्छूरस्यास्ति **कच्छुर:** । 'कच्छ्वा ह्रस्वश्च'(वा-५।२।१०७)इति र: । द्वे पामवत: ॥

---

१. '-संवरणे सञ्चरणे च' इति सायण:, 'वल्ल संवरणे' इति मैत्रेय:, 'वल संवरणे' इति स्वामी ॥ २. 'सौत्रे' इति३॥ ३. 'किसृ-' इति३॥ ४. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्ग:, श्लो-३०७, पृ.३८४॥, रामाश्रमी २।६।४९॥, पृ.२८०॥ ५. 'वृद्धनाभौ तुण्डिभतुण्डिलौ' इत्यमरकोष: २।६।६१॥ ६. 'तुन्दिल:' इति१॥ ७. '-यालुं' इति१॥ ८. 'भाषा' इति३॥ ९. कोष्ठान्तर्गतपाठ: १प्रतौ न दृश्यते ॥ १०. ण्यन्तत्वादुपधागुणाभावश्चिन्त्य:, इगुपधेति क:, सोऽपि चिन्त्य:, ण्यन्तस्येगुपधत्वाभावात्, अथ च 'आतोरति' इति युक्त: ॥ ११. '-रत्वादिति-' इति२.४॥ १२. '-त्वरिते' इति३॥ १३. '-षास्वरस्वनाम्' इति२॥ १४. 'सप्त' इति१.२.४॥ १५. 'दरिद्रातेर्यालोपश्च'(उणा-९०)इत्यत्र तत्त्वबोधिनी-'' 'दरिद्रा दुर्गतौ ॥ इश्च आश्चेति ॥ भोजदेवस्तु-'यालोप: इति रेफादिकं पदं छित्त्वा द्वेधा व्याख्यातवान्-रिश्च आश्चेति व्याख्याने दद्रू: 'रश्च इश्च आश्च' इति व्याख्याने तु 'अन्त्यबाधेऽन्त्यसदेशस्य-५६२' इति द्वितीयस्यैव रेफस्य लोपाद् दर्द्रुरिति ॥ मृगय्वादित्वात् कुप्रत्यये दर्द्रूरित्यन्ये । 'दर्द्रुणो दर्द्रुरोगी स्यात्'(अमरकोष: २।६।५९॥)इत्यमर: । इत्थं चत्वारि रूपाणि'' इति, सिद्धान्तकौमुदी, पृ.५९९॥ १६. 'दर्द्रु:' इति१॥ १७. '-ते: रू:' इति३॥ १८. 'स्याद-' इति१॥ १९. 'द्वे-' इति१॥ २०. 'रेफ-' इति१॥ २१. ''दरिद्रातेर्यालोपश्च इति पाठाद् रेफेकाराकारलोपे 'दद्रू:' एकरेफा । ततो नप्रत्यये 'दद्रुण:' एकरेफ इत्यन्ये' इति पदचन्द्रिका, भा-२, मनुष्यवर्ग:, श्लो-३१७, पृ.३९६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## सातिसारोऽतिसारकी[१] ।

१ अतिसारोऽतिपुरीषनिसर्गः, सह अतिसारेण वर्तते **सातिसारः** । २ अतिसारोऽत्यस्य **अतिसारकी** । एकदेशविकृतस्यानन्यत्वादतिसारशब्दादपि 'वातातीसाराभ्यां कुक् च' ५।२।१२९॥ इतीनिकुकौ। अतीसारक्यपि। द्वे अतिसाररोगिणः॥

## वातकी वातरोगी स्यात्

१ वातोऽस्यास्ति **वातकी** । 'वातातीसाराभ्यां कुक् च'५।२।१२९॥ इति कुकौ । २ वातरोगोऽस्यास्ति **वातरोगी** । द्वे वातरोगिणः ॥

## श्लेष्मलः श्लेष्मणः कफी ॥४६०॥

१ श्लेष्माऽस्त्यस्य **श्लेष्मलः** । 'सिध्मादिभ्यश्च'५।२।९७॥ इति लः । २ पामादित्वान्नप्रत्यये णत्वे च **श्लेष्मणः**। ३ कफोऽस्यास्ति[२] **कफी** । 'अत इनिठनौ'५।२।११५॥ त्रीणि कफरोगिणः ॥४६०॥

## क्लिन्ननेत्रे चिल्लचुल्लौ पिल्लः

१ क्लिन्नं नेत्रं यस्य स **क्लिन्ननेत्रः** । क्लिन्नं च तन्नेत्रं चेति कर्मधारयो वा, तत्र। २-४ क्लिन्नं चक्षुः **चिल्लम्, चुल्लम्, पिल्लम्** । 'क्लिन्नस्य चिल्लचुल्लपिल्लाश्चक्षुषी[३]'(वा-५।२।३३॥)वक्तव्यात् साधवः । एते क्लिन्ननेत्रे पुरुषे क्लिन्ने नेत्रेऽपि च वर्तन्ते । नेत्रे वर्तमानाः क्लीबलिङ्गाः, पुरुषे वर्तमानाः पुंसि । चत्वारि क्लिन्ननेत्रस्य । 'चीपडी आंखि' इति भाषा ॥

## अथाऽर्शोयुगर्शसः ।

१ 'ऋ गतौ'(जु.प.अ.), 'अर्त्तेर्गुणः शुट् च'(उणा-२४५)इति असुन्प्रत्ययः, शुडागमश्च । अर्शसा युज्यते **अर्शोयुक्** । 'युजिर् योगे'(रु.उ.अ.), क्विप् । २ अर्शोऽस्यास्ति **अर्शसः** । 'अर्शआदिभ्योऽच्'५।२।१२७॥ । द्वे अर्शरोगिणः॥

## मूर्च्छिते मूर्त्तमूर्च्छालौ

१ मूर्च्छा सञ्जाताऽस्य **मूर्च्छितः** । 'तदस्य सञ्जातम्-'५।२।३६॥ इतीतच्, तत्र। २ मूर्च्छति स्म **मूर्त्तः**। 'मूर्च्छा मोहसमुच्छ्राययोः'(भ्वा.प.से.), निष्ठा, 'आदितश्च'७।२।१६॥ इतीट्प्रतिषेधः, 'राल्लोपः'३।४।२१॥ इति छकारलोपः[४], 'न ध्याख्यापृ(पृ)मूर्च्छिमदाम्'८।२।५७॥ इति नत्वाभावः । ३ मूर्च्छाऽस्यास्ति **मूर्च्छालः** । 'प्राणिस्थादातो लजन्यतरस्याम्' ५।२।९५॥ इति लच् । ''सिध्मादिषु 'क्षुद्रजन्तूपतापाच्च' (गणसू-५।२।९७॥)इति लन् (लच्)''[ ]इति मिश्राः। इन्द्रियमनोवैकल्यं मूर्च्छा । यदात्रेयः-

> ''रुणद्धि नाटिकाद्वारं तेन चित्तं विमूर्च्छति[५] ।
> संज्ञानाशो भवेत् तीव्रं निश्चेता जायते नरः ॥१॥
> पतेच्च[६] काष्ठवत्तूर्णं मदो मूर्च्छा निगद्यते ॥'' [ ]इति

''मूर्च्छितं मोहसंप्राप्ते सोच्छ्रयेऽपि दृढेऽपि च''[विश्वलोचनकोशः, तान्तवर्गः, श्लो-१५०]इति श्रीधरः। त्रीणि मूर्च्छितस्य॥

## सिध्मलस्तु किलासिनि ॥४६१॥

१ सिध्म अस्यास्ति **सिध्मलः**। 'सिध्मादिभ्यश्च'५।२।९७॥ इति लच्। २ किलासं सिध्म, तद्योगात् **किलासी**। 'अत इनिठनौ'५।२।११५॥इतीनिः, तत्र[७] । द्वे सिध्मलस्य[८] ॥४६१॥

## पित्तं मायुः

१ पतति स्रंसते **पित्तम्** । पृषोदरादिः । अपिददाति रोगानिति पित्तम्। बाहुलकाद् ''जतन्तात् सूतरपलितोष्ठाः[९](जर्ततातसूतरपलितलोष्ठाः)''(कातन्त्रोणा-२।१३०॥)इति बाहुलकात् कर्तरि क्तः, अप्यकारस्य वष्टीत्यादिना[१०] लोपः, 'अच उपसर्गात्तः'७।४।४७॥ इति दात्रस्तकारादेशः। २ मिनोति प्रक्षिपति मलानि[११] **मायुः**, पुंसि। 'डुमिञ् प्रक्षेपणे'(स्वा.उ.अ.), 'कृवापाजि-'(उणा-१)इत्यण्। द्वे पित्तस्य। शेषश्चात्र-''पित्ते पलाग्निः पललज्वरः[१२] स्यादग्निरेचकः''[शेषनाममाला३।१०६॥] ॥

## कफः श्लेष्मा बलाशः स्नेहभूः खटः ।

१ केन जलेन स्फीतिर्वृद्धिरस्य **कफः** । पृषोदरादिः। कं शिरः फणति गच्छति वा। 'फण गतौ'(भ्वा.प.से.), 'अन्येभ्योऽपि'(वा-३।२।१०१॥)इति डः। २ श्लिष्यति[१३] मांसादिना **श्लेष्मा** । 'श्लिष(श्लिष) आलिङ्गने'(दि.प.अ.), '-मनिन्[१४]' (उणा-५८४)इति मनिन् । 'श्रिषु श्लिषु प्रषु प्लुषु दाहे'(भ्वा.-प.से.)अस्माद् वा मनिन् । श्लेष्माणौ, श्लेष्माणः इत्यादि । ३ बलमश्नाति **बलाशः** । 'अश्(अश) भोजने'(क्र्या.प.से.),

---

१. तुलनीयोऽमरकोषः २।६।५९॥ २. '-स्तीति' इति२॥ ३. 'क्लिन्नस्य चिल् पिल् लश्चास्य चक्षुषी' इति, 'चुल् च' इति च वार्तिकस्वरूपं दृश्यते ॥ ४. 'छकारस्य लोपः' इति३॥ ५. '-च्छते' इति२॥ ६. 'पित्ते च' इति३॥ ७. १.२.४प्रतिषु नास्ति ॥ ८. अस्योपरि २प्रतौ 'कोलीया' इति दृश्यते ॥ ९. 'सूतरतपलि-' इति१.२॥ १०. 'वष्टि भागुरिरल्लोपः' इत्यादिकारिकया ॥ ११. '-निति' इति३॥ १२. 'पलल:' इति३॥ १३. 'श्लिष्यते' इति३॥ १४. '-मन्' इति२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पचाद्यच् । ४ स्नेहाद् भवति **स्नेहभूः** । क्विप् । ५ खटति **खटः**। 'खट काङ्क्षायाम्'(भ्वा.प.से.), पचाद्यच् । पञ्च कफस्य । "सिहानकः[१] खेटः"[शेषनाममाला३।१०७॥]शैषिके ॥

**रोगो रुजा रुगातङ्को मान्द्यं व्याधिरपाटवम् ॥४६२॥**
**आम आमय आकल्पमुपतापो गदः समाः ।**

१ रुजति **रोगः**। 'रुजी रोगे[२]'(तु.प.अ.), 'पदरुजिविशस्पर्शो(पदरुजविशस्पृशो) घञ्'३।३।१६॥ इति कर्तरि घञ् 'चजोः कु घिण्ण्यतोः'७।३।५२॥ इति कुत्वम्। २ रुज्यतेऽनया **रुजा**। 'रुजी रोगे[२]'(तु.प.अ.), भिदादेराकृतिगणत्वादङ् । ३ रुजति देहं **रुक्**, स्त्रीलिङ्गौ । 'रुजो भङ्गे'(तु.प.अ.), 'क्विप्-'३।२।७६॥ इति क्विप्। ४ आतङ्कत्यनेन **आतङ्कः**। 'तकि कृच्छ्रजीवने'(भ्वा.प.से.), घञ् । ५ मन्दस्य भावो **मान्द्यम्**। ६ विविधा आधयो मनःपीडा अस्माद् **व्याधिः** । "विविधान् यः करोत्याधीन् व्याधिः, स हि[३] निरुच्यते"[[४]]इति वाचस्पतिः। विशेषेणाधीयते स्थाप्यते कुपथ्यैरिति वा[५] । 'डुधाञ् धारणादौ' (जु.उ.अ.), 'उपसर्गे घोः किः'३।३।९२॥ । ७ न पाटवम् **अपाटवम्** ॥४६२॥ ८ आमयति रुजति **आमः** । 'अम रोगे' (चु.उ.से.), चुरादिः, पचाद्यच्। अमनं[६] वा। 'भावे'३।३।१८॥ घञ् । "अमोऽपि"[ ]इति शब्दप्रभेदः[७] । ९ आ समन्ताद् मीनाति हिनस्ति देहम् **आमयः** ।'मीञ् हिंसायाम्'(क्र्या.उ.अ.), पचाद्यच्। यद्वा आमयति । 'अम्(अम) रोगे'(चु.उ.से.), ण्यन्तात् पचाद्यचि[८] 'क्यस्य विभाषा'६।४।५०॥ इत्यतो विभाषाग्रहणस्य व्यवस्थितविभाषात्वाद् [न] णिलोपः, संज्ञापूर्वकानित्यवात् [[९]]इत्यन्यः । १० अकलस्य भाव **आकल्यम्** । ११ उपतापयति देहमनसी **उपतापः** । 'तप सन्तापे'(भ्वा.-प.अ.), णिजन्तः, पचाद्यच् । करणे वा घञ् । १२ गदति व्यनक्ति व्यथां[१०] **गदः**। 'गद व्यक्तायां वाचि'(भ्वा.प.से.), पचाद्यच् । सामान्येन द्वादश रोगस्य ॥

अथ विशेषत आह-

**क्षयः शोषो राजयक्ष्मा यक्ष्मा**

१ क्षीयते शरीरमनेन **क्षयः** । 'क्षि क्षये'(भ्वा.-प.अ.), 'एरच्'३।३।५६॥ । क्षीयतेऽस्माद्वा । 'पुंसि संज्ञायाम्-'३।३।११८॥ इति घः । २ शोषयति रसादिधातून् **शोषः** । 'शुष शोषणे'(दि.प.अ.), णिजन्तः, ततोऽच् । ३ यक्ष्यते[११] पूज्यते रोगराजत्वाद् यक्ष्मा। 'यक्ष पूजायाम्'(चु.-उ.से.), '-मनिन्'(उणा-५८४) । राजा चासौ यक्ष्मा च **राजयक्ष्मा** । यक्ष्यते पूज्यते रोगराजत्वाद् **यक्ष्मा**, पुंसि। 'यक्ष पूजायाम्'(चु.उ.से), '-मनिन्'(उणा-५८४)। "जक्ष भक्षहसनयोः'(अ.प.से.)इत्यतो[१२] मनिनि जक्ष्मा"[[१३]]इति पुरुषोत्तमः[१४] । चत्वारि क्षयनस्य ॥

**अथ क्षुत् क्षुतं क्षवः ॥४६३॥**

१ क्षवणं **क्षुत्**, स्त्रीलिङ्गः। 'टुक्षु शब्दे'(अ.प.से.), सम्पदादित्वात् क्विप्, 'ह्रस्वस्य पिति-'६।१।७१॥ इति तुक्। २ क्षूयते[१५] स्म **क्षुतम्** । भावे निष्ठा । ३ क्षूयते **क्षवः**। 'ऋदोरप्'३।३।५७॥ इत्यप् । त्रीणि छिक्कायाः । 'छिक्का' देश्याम्[१६] ॥४६३॥

**कासस्तु क्षवथुः**

१ कास्यते कुत्सितशब्दः क्रियतेऽनेन **कासः**, दन्त्यसः । 'कासृ शब्दकुत्सायाम्'(भ्वा.आ.से.), 'हलश्च' ३।३।१२१॥इति घञ् । कासयतीति पचाद्यच् वा । तालव्यशकारवानपि । "शालूककाशशल्लक्यः"[[१७]]इति द्विशकारे तालव्यभेदात् । "वाराणस्यां भवेत् काशी क्षवथौ ना तृणेऽस्त्रि-याम्"[[१८]]इति तालव्यान्तेषु रभसः । २ क्षौत्यनेन **क्षवथुः**, पुंसि । 'टुक्षु शब्दे'(अ.प.से.), 'ट्वितोऽथुच्'३।३।८९॥ । द्वे 'ऊध्रसं[१९]' इति ख्यातस्य ॥

**पामा खसः कच्छूर्विचर्चिका ।**

१ पान्त्यस्मादात्मानं[२०] **पामा** । 'पा रक्षणे'(अ.प.अ.), '-मनिन्'(उणा-५८४) । स्त्रियाम् पामानौ, पामानः इति, ङीषभावे[२१] । 'डाबुभ्याम्-'४।१।१३॥ इति डापि पामे, पामाः

---

१. 'शिङ्घानकः' इति शेषनाममालास्वोपज्ञटीकयोः ॥ २. 'रुजो भङ्गे' इति स्वामिमैत्रेयसायणाः ॥ ३. 'ह' इति१.२.४॥ ४. द्र. स्वोपज्ञटीका ३।४६२॥, पृ.१०६॥ ५. इतोऽग्रे ३प्रतौ 'व्याधिः' इति दृश्यते ॥ ६. 'आमनं' इति१॥ ७. 'अम आमः प्रकीर्तितः' इति शब्दभेदप्रकाशे, श्लो-२॥ ८. '-द्यच्' इति१.३॥ ९. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३०९, पृ.३८६॥ १०. 'व्यथा' इति२॥ ११. 'यक्षते' इति२॥ १२. इतोऽग्रे ३प्रतौ 'वा' इति दृश्यते ॥ १३. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३०९, पृ.३८६॥, तत्र 'भक्ष-' इत्यस्य स्थाने 'भक्षण-' इति दृश्यते ॥ १४. अत्र ४प्रतौ "ऽत्तीति मनिप्रत्यये यक्ष्मोपि" इत्येका टिप्पणी दृश्यते ॥ १५. इतोऽग्रे ३प्रतौ 'शब्दं' इति दृश्यते॥ १६. इतोऽग्रे १प्रतौ 'त्रीणि छिक्कायाः' इति दृश्यते ॥ १७. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३१०, पृ.३८७॥ १८. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३१०, पृ.३८७॥, रामाश्रमी २।६।५२॥, पृ.२८२॥ १९. 'उध्र-' इति३॥ २०. 'पात्य-' इति४॥ २१. 'मनः' ४।१।११॥ इति स्त्रियां ङीषभावे ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यादि गङ्गावत् । क्लीबे पाम, पामनी, पामानि इत्यादि । "कच्छ्वां [तु] पाम पामा विचर्चिका"[अमरकोषः २।६।-५३॥]इत्यमरः । २ खनति त्वचमिति **खसः** । 'खन खनने[1]' (भ्वा.उ.से.), बाहुलकादसप्रत्यये निपात्यते । ३ कषति हिनस्ति शरीरं **कच्छूः**, स्त्रीलिङ्गः[2] । 'कष हिंसायाम्'(भ्वा.-प.से.), 'कषेश्छ च'(उणा-८४)इत्यूप्रत्ययः, छोऽन्तादेशश्च। ४ विरुद्धं विचर्च्यते शब्द्यते **विचर्चिका** । 'चर्च अध्ययने' (चु.उ.से.), 'रोगाख्यायां ण्वुल् बहुलम्'३।३।१०८॥इति ण्वुल्। चत्वारि पाम्नः ॥

## कण्डूः कण्डूयनं खर्जूः कण्डूया

१ कण्डूयते **कण्डूः** । 'कण्डूञ् गात्रविघर्षणे[3]' (कण्ड्वादिः), ['कण्ड्वादिभ्यो यक्'३।१।२७॥], भावे क्विप्[4], ['अतो लोपः'६।४।४८॥ इत्यल्लोपः'], 'लोपो व्योर्वलि' ६।१।६६॥ । २ ल्युटि[5] **कण्डूयनम्** । ३ खर्जति व्यथते **खर्जूः**, स्त्रीलिङ्गः । खर्जति मार्ष्टि सुखमिति वा खर्जूः। 'खर्ज व्यथने मार्जने च'(भ्वा.प.से.), 'कृषिचमि-'(उणा-८१)इत्यूः । ४ कण्ड्वादियगन्ताद् 'अः(अ) प्रत्ययात्'३।३।-१०२॥इत्यप्रत्यये **कण्डूया**[6] । न्यासः कण्डूतिरपि । चत्वारि 'खाजि' इति[7] ख्यातायाः ॥

## अथ क्षतं व्रणः ॥४६४॥

## अरुरीर्मं क्षणनुश्च

१ क्षण्यते स्म **क्षतम्** । 'क्षण(क्षणु) हिंसायाम्' (त.उ.से.), निष्ठा, 'अनुदात्तोपदेश-'६।४।३७॥ इति ण्लोपः[8] । २ व्रणयति **व्रणः**, पुंक्ली. । 'व्रण गात्रविचूर्णने'(चु.उ.से.), चौरादिकोऽदन्तः, ततोऽच् ॥४६४॥ ३ इयर्त्ति व्यथामनेन **अरुः**, क्लीबे। 'ऋ गतौ'(जु.प.अ.), 'धनर्त्तिचक्षिङ्वपि-[9]' ( )इत्युस् । अरुषी, अरूंषि इत्यादि । ४ ईरयत्यङ्गम् **ईर्मम्**। 'ईर गतिकम्पनयोः'(अ.आ.से.), बाहुलकाद् 'अर्तिस्तुसुहु-' (उणा-१३७)इत्यादिना मन् । वैजयन्तीकारस्तु-"व्रणोऽ-पीर्मोऽपि न स्त्रियाम्[10]"[वैजन्तीकोषः३।७।२१७॥]इति पुंस्य-प्याह । ५ क्षण्यते **क्षणनुः**, पुंसि । 'क्षणु हिंसायाम्' (त.उ.से.), अनुप्रत्ययः[11]। पञ्च व्रणस्य। 'चांदी[12]' इति भाषा॥

## रूढव्रणपदं किणः ।

१ रूढव्रणानां पदं स्थानं रूढव्रणपदम् । कणत्यनेन **किणः**, पुंक्ली.। 'कण आर्तस्वरे'( ), पृषोदरादित्वाद् धातो-रस्येत्वम् । 'किण गतौ'( ), सौत्रो वा, तत 'इगुपध-' ३।१।१३५॥इति कः । एकं रूढव्रणस्थानस्य[13] ॥

## श्लीपदं पादवल्मीकः

१ श्लिष्टं पदं येन **श्लीपदम्**, पृषोदरादिः । २ पादे वल्मीक इव **पादवल्मीकः**, पुंक्ली. । द्वे 'कोडी नगरुं[14] राफु' इति वा ख्यातस्य[15] ॥

## पादस्फोटो विपादिका[16] ॥४६५॥

१ पादस्य स्फोटनं विशरणं **पादस्फोटः** । 'स्फुट भेदने'(चु.उ.से.), घञ्। पादौ स्फोटयतीति, 'कर्मण्यण्-' ३।२।१॥ वा । २ विरुद्धं पद्यते गम्यतेऽनया **विपादिका** । 'पद गतौ'(दि.आ.अ.), 'रोगाख्यायां ण्वुल्-'३।३।१०८॥, टाप्, 'प्रत्ययस्थात्-'७।३।४४॥ इतीत्वम् । द्वे 'व्याऊ' इति ख्यातायाः ॥४६५॥

## स्फोटकः पिटको गण्डः

१ स्फोट[य]ति स्फोटः।'स्फुट भेदने'(चु.उ.से.), पचाद्यच्, ततः कन् [**स्फोटकः**] । विरुद्धः स्फोटो विशरणमस्मात्, '**स्फुटिर्** विशरणे'(भ्वा.प.से.), घञि विस्फोटोऽपि। २ पिटति (पेटति) संहतो भवति **पिटकः**, त्रिलिङ्गः । 'पिट शब्द-सङ्घातयोः'(भ्वा.प.से.),'कृञादिभ्यः [संज्ञायां] वुन्'(उणा-७१३), औणादिकत्वाद् गुणाभावः । क्वुन्नित्येके । स्त्रियां पिटका, क्षिपकादित्वात् 'प्रत्ययस्थात्-'७।३।४४॥ इतीत्वाभावः, पवर्गप्रथमादिः । "विस्फोटा विटका स्त्रियाम्"[17][ ] इत्यमरमालायां वकारादिरपि । ३ गच्छति विकारं **गण्डः** । 'गम्लृ गतौ'(भ्वा.प.अ.), 'ञमन्ताड्डः'(उणा-१११) । त्रीणि 'फोडा' इति ख्यातस्य ॥

---

१. 'खनु अवदारणे' इति क्षीरतरङ्गिण्यादौ ॥ २. १प्रतौ नास्ति, 'स्त्री' इति४॥ ३. 'कण्डूङ् गात्रविकर्षणे' इति१.२.३॥ ४. 'क्यप्' इति४॥ ५. 'ल्युट्' इति३, 'ल्युटिः' इति४॥ ६. इतोऽग्रे १.२.४प्रतिषु 'इति' इति दृश्यते ॥ ७. 'इत्यादि' इति २॥ ८. 'णलोपः' इति ३॥ ९. उणादिगणे 'अर्त्तिपृवपियजि-'(उणा-२७४)इति दृश्यते ॥ १०. 'स्त्रियौ' इति वैजयन्तीकोषे, ३।७।२१७॥, पृ.८८॥ ११. 'अतु-' इति१.२.३॥ १२. 'चांडी' इति३॥ १३. '-व्रणपदस्था-' इति४॥ १४. 'नगरूं' इति २॥ १५. 'व्याख्या-' इति३॥ १६. तुलनीयोऽमरकोषः २।६।५२॥ १७. द्र. टीकासर्वस्वम्, भा-२, २।६।५३॥, पृ.३१२॥, पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३११, पृ.३९०॥, रामाश्रमी २।६।५३॥, पृ.२८३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## पृष्ठग्रन्थिः पुनर्गडुः ।

१ पृष्ठे ग्रन्थिः **पृष्ठग्रन्थिः** । २ गडति वैरूप्यं सिञ्चति **गडुः** । 'गड सेचने'(भ्वा.प.से.), बाहुलकाद् 'मृ(शॄ)-स्वृस्निहि-'(उणा-१०)इत्युः, पुंसि । द्वे पृष्ठग्रन्थेः ॥

## श्वित्रं स्यात् पाण्डुरं कुष्ठम्

१ श्वेतते **श्वित्रम्** । 'श्विताङ्[१] वर्णे[२]'(भ्वा.आ.से.), 'स्फायितञ्चिवञ्चि-'(उणा-१७०)इत्यादिना रक् । २ **पाण्डुरम्** श्वेतम् । ३ कुष्णात्यङ्गं **कुष्ठम्**, पुंक्ली. । 'कुष निःकर्षे[३]'(क्र्या.प.से.), 'हनिकुषिनीरमिकाशिभ्यः क्थः(क्थन्)'(उणा-१५९) । त्रीणि श्वेतकुष्ठस्य ॥

## केशघ्नं त्विन्द्रलुप्तकम् ॥४६६॥

१ केशान् हन्ति **केशघ्नम्**। 'हन्(हन) हिंसागत्योः' (अ.प.अ.), 'अमनुष्यकर्तृके च'३।२।५३॥ इति कर्मणि टक्। २ इन्द्रेण लुप्यते स्म **इन्द्रलुप्तम्** । 'लुप्लृ छेदने' (तु.उ.अ.), निष्ठा, ततः स्वार्थे कन् । द्वे 'खरजूआ' इति ख्यातस्य ॥४६६॥

## सिध्म किलासं त्वक्पुष्पं सिध्मम्

१ सेधति स्म **सिध्म**, क्लीबे । 'षिधु गत्याम्[४]' (भ्वा.प.से.), पामादित्वान्मनिन्[५]।"बाहुलकान्मन्[६]"[मा. धातुवृत्तिः, भ्वादिः, धातुसं-३९]इति माधवः । २ किलति श्वेतते **किलासम्**। 'किल श्वैत्यक्रीडनयोः[७]'(तु.प.से.), 'किलेः कित्' (हैमोणा-५७५)इत्यासः । ३ त्वचः पुष्पमिव **त्वक्पुष्पम्**। "पादस्फोटोऽथ त्वक्पुष्पा किलासं सिध्मनीति[८] वा[९]" [[१०]]इति रभसः । ४ सिध्यति **सिध्मम्** । बाहुलकान्मः, अदन्तोऽयम्, क्लीबलिङ्गः । "सिध्मं शुष्मं कुट्टिमं युग्मं क्लोमम्"[[११]]इति मकारोपधेष्वरुणात् । चत्वारि 'दभूत' इति ख्यातस्य ॥

## कोठस्तु मण्डलम् ।

१ कोठयति छेदयति अङ्गं **कोठः** । 'कुठ छेदने' ( ), सौत्रः, ततोऽच् । कुठ्यते शब्द्यते वा । 'कुठ शब्दे' ( ), घञ् । २ मण्डलाकृतित्वाद् **मण्डलम्**, त्रिलिङ्गः । इवार्थे कनि मण्डलकमपि । द्वे मण्डलनाम्नः कुष्ठभेदस्य ॥

## गलगण्डो गण्डमालः

१ गले गण्डो **गलगण्डः** । २ गण्डान् स्फोटान् मलते **गण्डमालः** । 'मल मल्ल धारणे'(भ्वा.आ.से.), 'कर्मण्यण्'३।२।१॥ । यद्भोजः-

"महान्तं शोथमन्यं[१२] वा हनुमन्या[१३]गलाश्रयम् ।
लम्बन्तं मुष्कवद् दृष्ट्वा गलगण्डं विनिर्दिशेत् ॥१॥"[ ]।

द्वावप्येतौ पुंसि । यच्चरकः-"मेदः कफाच्छोणितसञ्चयो यो, गलस्य मध्ये गलगण्ड एकः । स्याद् गण्डमाला, बहुभिस्तु गण्डैः[१४]"[चरकसंहिता, चिकित्सास्थानम्, अध्या-१२, श्लो-७८-७९]इति लक्षणभेदाद् गण्डमाला भिन्ना, स्त्रीलिङ्गेऽयम्[१५]। द्वे गलगण्डस्य ॥

## रोहिणी तु गलाङ्कुरः ॥४६७॥

१ रोहयत्यवश्यं **रोहिणी** । 'रुह प्ररोहे[१६]'(भ्वा.-प.अ.), आवश्यके णिनिः । २ गलेऽङ्कुरो **गलाङ्कुरः** । द्वे गलाङ्कुरस्य ॥४६७॥

## हिक्का हेक्का च हृल्लासः

१ हिक्कत्यनया **हिक्का** । 'हिक्क अव्यक्ते शब्दे' (भ्वा.उ.से.), अच्, टाप् । २ हेगिति कायति **हेक्का** । 'कै शब्दे'(भ्वा.प.अ.) । ३ हृदयं लसत्यनेन **हृल्लासः** । 'हृदयस्य हृल्लेख:'६।३।५०॥ इति हृदादेशः । त्रीणि 'हिडकी[१७]' इति ख्यातायाः ॥

## प्रतिश्यायस्तु पीनसः[१८] ।

१ प्रतिमुहूर्तं श्यायते स्रवति **प्रतिश्यायः** । 'श्यैङ्

---

१. हैममते ङकारानुबन्धः, पाणिनीयमते त्वनावश्यकः ॥ २. 'वर्गे' इति१ ॥ ३. 'निःकोषणे' इति ४प्रतेष्टिप्पणी ॥ ४. 'षिध गत्याम्' इति सायणः ॥ ५. वस्तुतस्त्विदं विचारणीयम्, पामादित्वान्मनिन्प्रत्ययाविधानात् ॥ ६. 'मनिन्' इति१.३.४॥ ७. 'शैल्य-' इति३॥, "किल श्वैत्ये । श्वैत्यक्रीडनयोरिति मैत्रेयः" इति सायणः, मा. धातुवृत्तिः, तुदादिः, धातुसं-६०॥ ८. 'सिध्मतीति' इति१॥ ९. 'च' इति४॥ १०. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३११, पृ.३८९॥, रामाश्रमी २।६।५३॥, पृ.२८२॥ द्वयोष्टीकयोः 'त्वक्पुष्पी' इति 'सिध्मली च' इति च दृश्यते ॥ ११. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३११, पृ.३८९॥ १२. '-मत्यं' इति३॥ १३. '-मत्या-' इति३॥ १४. चरकसंहितायां-"शोफः कणाच्छोणितसंचयोत्थः । गलस्य पार्श्वे गलगण्ड एकः स्याद् गण्डमाला बहुभिस्तु गण्डैः ॥" इति दृश्यते, चिकित्सास्थानम्, अध्या-१२, श्लो-७८-७९, पृ.४८९॥ १५. '-लिङ्गोऽयं' इति३॥ १६. 'रुह बीजजन्मनि' इति स्वामी, 'रुह जन्मनि प्रादुर्भावे' इति मैत्रेयः, 'रुह बीजजन्मनि प्रादुर्भावे च' इति सायणः ॥ १७. 'हेडकी' इति१, 'हेडिकी' इति२॥ १८. तुलनीयोऽमरकोषः २।६।५१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गतौ'(भ्वा.आ.अ.), 'श्याद्व्यधा-'३।१।१४१॥इति णः[1], 'आदेच उपदेशे-'६।१।४५॥इत्यात्वम्, 'आतो युक्चिण्कृतोः' ७।३।३३॥। 'आतश्चोपसर्गे'३।३।१०६॥इत्यङि प्रतिश्या च। यद्वोपदेवः-

''दोषार्तेऽल्पास्रशुक्रज्वलनबलरुचौ[2] गुल्ममेहप्रतिश्या ।
हिक्काकासातिसारक्षयतमकगलोरोग्रहेषु ग्रहण्याम् ॥१॥''

[ ]इति । २ अपिहिता नासिकाऽनेन, 'उपसर्गाच्च'५।४।११९॥ इत्यनेन नसादेशः, 'वष्टि भागुरिः'[ ]इत्यकारलोपः, 'अन्येषामपि-'६।३।१३७॥ इति दीर्घः पीनसः । पीनं स्यति अन्तं नयतीति वा । 'षोऽन्तकर्मणि'(दि.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥ । आपीनसोऽपि। ''आपीनसः प्रतिश्या स्यात्'' [[3]]इति रभसः । द्वे 'पीनस' इति ख्यातस्य ॥

## शोथस्तु श्वयथुः शोफे

१ शवति विसर्पति **शोथः**, पुंसि । क्लीबेऽपि वैजयन्ती, यदाह-''शोथोऽस्त्री श्वयथुः शोफः[4]''[वैजयन्तीकोषः ४।४।१२२॥][5]इति । 'शु गतौ[6]'(भ्वा.प.अ.), 'उषिकुषि-'(उणा-१६१)इति बाहुलकात् थन् । 'यूथादयश्च' (चान्द्रोणा-२।५९॥)इति थन् वा । २ श्वयत्यनेन **श्वयथुः**, पुंसि । 'टुओश्वि गतिवृद्ध्योः'(भ्वा.प.से.), 'ट्वितोऽथुच्' ३।३।८९॥ । ३ शोषं स्फावयति बहुलीकरोति, शोष्यते[7] तीक्ष्णोपायप्रयोगेणेर्ति[8] वा **शोफः** । पृषोदरादित्वादुभयत्र साधुः, तत्र । त्रीणि शोफस्य । 'सोझउ[9]' इति भाषा ॥

## दुर्नामाऽर्शो गुदाङ्कुरः ॥४६८॥

१ पापरोगाद् दुर् निन्दितं नामाऽस्य **दुर्नाम**, क्लीबे। दुर्नाम्नी दुर्नामनी, दुर्नामानि इत्यादि। २ इयर्त्ति पीडामनेन **अर्शः**, क्लीबे ।'ऋ गतौ'(जु.प.अ.), 'अर्त्तेः व्याधौ शुट् च'(उणा-५३५)इत्यसुन् शुडागमश्च, गुणः । ३ गुदस्याङ्कुरो **गुदाङ्कुरः**। गुदकीलोऽपि । त्रीणि 'हरस' इति ख्यातस्य ॥४६८॥

## छर्दी प्रच्छर्दिका छर्दिर्वमथुर्वमनं वमिः ।

१ छर्दनं **छर्दिः**, स्त्रीक्ली. । 'छर्द वमने'(भ्वा.प.से.), '-इन्'(उणा-५५७)इतीन्, तत्र। २ प्रच्छर्दनं **प्रच्छर्दिका** । 'छर्द वमने'(भ्वा.प.से.), 'रोगाख्यायां ण्वुल्-' ३।३।१०८॥ ३ छृणत्ति, छर्दनं [वा] **छर्दिः**, स्त्रीलिङ्गः । 'छृदिर्[12] दीप्तिदेवनयोः'(रु.उ.से.), रुधादिः, 'अर्चिरुचिशुचि[10]-'(उणा-२६५)इति इस् । छर्दिषौ, छर्दिषः[11] इत्यादि । ४ वमनं **वमथुः** । 'टुवमु[12] उद्गिरणे'(भ्वा.प.से.), 'ट्वितोऽथुच्'३।३।८९॥ । ५ वम्यते **वमनम्** । 'टुवमु[12] उद्गिरणे'(भ्वा.प.से.), ल्युट् । ६ वमनं **वमिः** । 'इक् कृष्यादिभ्यः'(वा-३।३।१०८॥)इतीक्, स्त्रीलिङ्गोऽयम् । यदमरः-''प्रच्छर्दिका वमिश्च स्त्री''[अमरकोषः२।६।५५]इति । ''वमिर्वान्तौ स्त्रियाम्''[ ]इति गौडश्च। वान्तिरपि, वमतिश्च । षड् वान्तेः॥

## गुल्मः स्यादुदरग्रन्थिः

१ गलति शरीरं **गुल्मः**, पुंक्ली. । 'गल अदने' (भ्वा.प.से.), 'गलेरुच्चोपधायाः'( )इति मक् । २ उदरे ग्रन्थिः **उदरग्रन्थिः**। द्वे उदरग्रन्थेः ॥

## उदावर्तो गुदग्रहः ॥४६९॥

१ उद् ऊर्ध्वमावर्तते वायुरत्र **उदावर्तः** । २ गुदे ग्रहणं **गुदग्रहः** ।

''वातविण्मूत्रजृम्भाश्रुक्षवोद्गारवमीन्द्रियैः ।
क्षुत्तृष्णोश्छ्वासनिद्राणां धृत्योदावर्तसम्भवः ॥१॥''

[माधवनिदानम्, उदावर्तानाहनिदानम्-२७, श्लो-१]इति माधवनिदानम् । द्वे कोष्ठबन्धस्य ॥४६९॥

## गतिर्नाडीव्रणे

१ गच्छत्यनया रुधिरं **गतिः**, स्त्रीलिङ्गः[13] । ''गतिं वहन्तीं न शशाक रोद्धुम्''[ ]इति प्रयोगात् । २ नाडीयुक्तं व्रणं नाड्यां वा व्रणं **नाडीव्रणः**, लिङ्गेषु [14]प्रतिपदपाठात् पुंलिङ्ग एव । ''नाडीव्रणः पुमान्''[अमरकोषः२।६।५४॥] इत्यमरः, तत्र । यो व्रणः सदा वहति, तस्य द्वे ॥

## वृद्धिः कुरण्डश्चाण्डवर्धने ।

१ वर्धते अण्डोऽस्यां **वृद्धिः** । 'वृधु वर्धने'(भ्वा.

१. 'गुणः' इति२॥ २. '-बले' इति१॥ ३. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३०९, पृ.३८७॥, रामाश्रमी २।६।५१॥, पृ.२८२॥ ४. 'शोफे' इति४॥ ५. ''शोफोऽस्त्री श्वयथुः शोथः'' इति वैजयन्तीकोषे, ४।४।१२२॥, पृ.१३५॥ ६. 'शु श्रु गतौ' इति स्वाम्येवाह, सायणः 'अपरे पुनः' 'शु' इति तालव्यादिमाद्यं पठन्ति'' इत्याह ॥ ७. 'शोष्यति' इति३॥ ८. '-पायेन रोगेणेति' इति३॥ ९. 'सोजउ' इति४, 'सोजो' इति३॥ १०. 'अर्चिशुचि-' इत्युणादिगणे ॥ ११. १.२.४प्रतिषु नास्ति ॥ १२. केषाञ्चिन्मतेऽयं धातुरुदित्, स्वाम्यादीनां मतेऽनुदिदेव ॥ १३. १प्रतौ नास्ति ॥ १४. 'प्रतिपाद-' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प.आ.), अधिकरणे क्तिन् । २ कुत्सितं रमतेऽनेन **कुरण्डः**। 'रमु क्रीडायाम्'(भ्वा.आ.अ.), 'ञमन्ताड्डः'(उणा-१११) । अण्डस्य वर्धनं वृद्धिः अण्डवर्धनम्, तत्र ।

"अत ऊर्ध्वमण्डवृद्धिर्दृश्यते भिषजांवर[1] ! ।
बाल्यान्मातुः पितुर्दोषाज्जायते वृषणानुगा ॥१॥"

[ ]इत्यात्रेयः । द्वे अण्डवृद्धेः ॥

## अश्मरी स्यान्मूत्रकृच्छ्रे

१ अश्मानं रात्यादत्ते **अश्मरी**। 'रा दाने'(अ.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥, आतो लोपः, गौरादिः । २ मूत्रे कृच्छ्रमस्माद् **मूत्रकृच्छ्रम्,** तत्र । द्वे मूत्रकृच्छ्रस्य । वैद्यशास्त्रेऽनयोर्भेदः-

"पितृमातृकदोषेणाऽथवा मूत्रनिरोधनात् ।
अल्पपथ्याऽभिचारैश्च जायते वाऽश्मरीगदः[2] ॥१॥"

[ ]इत्यादिदर्शनादश्मरीशब्देन 'पाणहिं[3]' इत्युच्यते । मूत्रकृच्छ्रशब्दस्य 'दोषमूत्रा' इति भाषा । यदात्रेयः-

"पित्तप्रकोपनैर्द्रव्यैः कट्वम्ललवणैस्तथा ।
गौरीस्त्रीसेवनेनाऽपि रक्तं चापि प्रवर्तते ॥२॥
मद्यपानेन चोष्णेन श्रमव्यायामपीडिते ।
पित्तं पक्वाशये प्राप्तं करोति मूत्रकृच्छ्रकम् ॥३॥
तेन मूत्रयते[4] कृच्छ्रादुष्णधारा प्रवर्तते ।
मूत्रश्रोत्रं च वहति रक्तं चापि प्रवर्तते ॥४॥"

[ ]इति भेदमनाश्रित्योक्तम्, तथापि भेदद्वयं[5] व्याख्येयम् ॥

## प्रमेहो बहुमूत्रता ॥४७०॥

१ प्रमेहयति मूत्रयति **प्रमेहः** । 'मिह सेचने'(भ्वा. प.अ.), अच् । प्रमेहनं वा । भावे घञ् । मेहोऽपि, दीपप्रदीपवत् । बहुमूत्रस्य भावो बहुमूत्रता । 'तस्य भावस्त्वतलौ' ५।१।११९॥ इति तत्(तल्) । एकं प्रमेहस्य ॥४७०॥

## आनाहस्तु विबन्धः स्यात्[6]

१ आनहनम् **आनाहः**। 'नह(णह) बन्धने'(दि.-उ.अ.), आङ्पूर्वः, 'भावे'३।३।१८॥ घञ्, 'अत उपधायाः' ७।२।११६॥ वृद्धिः । २ विबन्धनं **विबन्धः** । 'बन्ध बन्धने'(क्र्या.प.अ.), 'भावे'३।३।१८॥ घञ् ।

"आमं शकृद् वा निचितं क्रमेण भूयो विबद्धं विगुणानिलेन ।
प्रवर्तमानेन(-मानं न) यथास्वमेनं विकारमानाहमुदाहरन्ति[7] ॥१॥"

[माधवनिदानम्, उदावर्तानाहनिदानम्-२७, श्लो-१७, (सुश्रुतसंहिता, उत्तरतन्त्रम्, अध्या-५६, श्लो-२०-२१॥)]इति माधवनिदानम् । द्वे आनाहस्य । 'बंध आफरउं[8]' इति भाषा ॥

## ग्रहणी रुक्[9]

१ गृह्यतेऽनया **ग्रहणी** । 'गृह्णा[10](ह्ला)तेरनिः[11]'(उणा-७४५)इत्यनिः, ततो ङीप्[12] । 'कृत्यल्युटो बहुलम्'३।३।११३॥ इति वा ल्युट् । ग्रहणी जाठरो[13]ऽग्निः, तच्छैथिल्याद् रुक् रोगः । यन्माधवनिदानम्-

"एकैकशस्सर्वशश्च दोषैरत्यर्थमूर्च्छितैः ।
सा दुष्टा बहुशो भुक्तमाममेव विमुञ्चति ॥१॥
पक्वं वा सरुजं पूतिं[14] मुहुर्बद्धं मुहुर्द्रवम् ।
ग्रहणीरोगमाहुस्तमायुर्वेदविदो जनाः ॥२॥"

[माधवनिदानम्, ग्रहणीरोगनिदानम्-४, श्लो-२-३॥, (सुश्रुतसंहिता, उत्तरतन्त्रम्, अध्या-४०, श्लो-१७१-१७२)]इति । एकं सङ्ग्रहणीरोगस्य ॥

## प्रवाहिका ।

१ प्रकर्षेण वहति स्रवत्यस्या गुदमिति बहुस्रावे[15] प्रवहणं **प्रवाहिका** । 'वह प्रापणे'(भ्वा.उ.अ.), 'रोगाख्यायां ण्वुल् बहुलम्'३।३।१०८॥ । एकं 'मरोडा' इति ख्यातस्य॥

## व्याधिप्रभेदा विद्रधिभगन्दरज्वरादयः ॥४७१॥

विद्रधिश्च भगन्दरश्च ज्वरश्चेति द्वन्द्वे विद्रधिभगन्दरज्वराः, ते आदिर्येषां ते[16] विद्रधिभगन्दरज्वरादयः । व्याधीनां रोगाणां प्रभेदा व्याधिप्रभेदाः । विद्रधिलक्षणं त्वेवं माधवनिदाने-

"त्वग्रक्तमांसमेदांसि प्रदूष्यास्थिसमाश्रितः ।
पृथग्दोषशतं घोरं जनयत्युच्छ्रितो भृशम् ॥१॥
महामूलं सजीवं तं वृत्तं चाऽप्यथवाऽऽयतम् ।
स विद्रधिरिति ख्यातो विज्ञेयः षड्विधश्च सः ॥२॥"

---

१. '-वरे' इति४॥ २. '-मदः' इति४॥ ३. 'पणहि' इति४॥ ४. 'मूर्त-' इति४॥ ५. 'द्वयसं' इति१, 'द्वसं' इति४॥ ६. 'तुलनीयोऽमरकोषः २।६।५५॥ ७. '-दीरयन्ति' इति३॥ ८. '-रौ' इति३॥ ९. तुलनीयोऽमरकोषः २।६।५५॥ अत्र ग्रन्थकृन्मते ग्रहणीप्रवाहिकयोरैक्यं दृश्यते, टीकाकृन्मते भेदो ज्ञायते ॥ १०. 'गृह्ला-' इति१.२.४॥ ११. 'ग्रहेरनिः' इत्युणादिसूत्रम् ॥ १२. 'ङीष्' इति १.२.४॥ १३. 'जठ-' इति३॥ १४. 'पूतं' इति३॥ १५. '-श्रावे' इति३॥ १६. 'विद्रधि-' इति १.२.४प्रतिषु नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[माधवनिदानम्, विद्रधिनिदानम्-४०, श्लो-१-२[1], (सुश्रुतसंहिता, निदानस्थानम्, अध्या-९, श्लो-४-५)]इति । चरके तु दाहप्रकर्षात् संज्ञा, यथोक्तम्-"स वै[2] शीघ्रविदाहित्वाद् विद्रधीत्यभिधीयते"[चरकसंहिता, सूत्रस्थानम्, अध्या-१७, श्लो-९५]इति । स्त्रीलिङ्गोऽयम् । पुंस्यपि वैजयन्ती, यदाह-"विद्रधिर्न षण्"[वैजयन्तीकोष: ४।४।१३७॥]इति । ङीषि विद्रधी, नदीवत् । भगन्दरलक्षणं चेदम्-

"गुदस्य द्व्यङ्गुले क्षेत्रे पार्श्वत: पिटकार्त्तिकृत् ।
भिन्ना भगन्दरो ज्ञेय: स च पञ्चविधो मत: ॥३॥"

[माधवनिदानम्, भगन्दरनिदानम्-४६, श्लो-१]इति माधवनिदानम्। "गुदबस्तिभगं दरणाद् भगन्दर:[3]"[सुश्रुतसंहिता, निदानस्थानम्, सू-३]इति शुश्रुतो निरुक्तवान्। तथा भोजोऽपि-

"भगं परिसमन्ताच्च गुदं बस्तिं तथैव च ।
भगवद् दारयेद् यस्मात् तस्माद् ज्ञेयो[4] भगन्दर:[5] ॥४॥"

[ ]इति । ज्वरयति ज्वर: । 'ज्वर रोगे'(भ्वा.प.से.), अच् । आदिशब्दादर्बुदादय: ॥

**दोषज्ञस्तु[1] भिषग्[2] वैद्य[3] आयुर्वेदी[4] चिकित्सक:[5] ।**
**रोगहार्य[6]गदङ्कार:[7]**

१ दोषान्[6] वातपित्तश्लेष्मलक्षणान् जानाति **दोषज्ञ:**। 'ज्ञा अवबोधने'(क्र्या.प.अ.), 'इगुपध-'३।१।१३५॥ इति क:, 'आतो लोप [इटि]च'६।४।६४॥इत्यालोप: । २ भिषज्यते **भिषक्**। 'भिषज् चिकित्सायाम्,' कण्ड्वादि:, क्विप् । 'भिष् रुग्जये,' सौत्रो वा, 'ऋधिपृथि-'(हैमोणा-८७४)इति किदच्। ३ भिषग्विद्यां वेत्ति **वैद्य:**। 'तदधीते तद्वेद'४।२।५९॥ इत्यण्। ४ आयुर्वेत्तीत्यवंशील **आयुर्वेदी** । 'विद ज्ञाने'(अ.प.से.), 'सुप्यजातौ-'३।२।७८॥ इति णिनि: । आयुर्वेदिकोऽपि । ५ चिकित्सति रोगिणं **चिकित्सक:**। 'किति निवासे रोगापनयने, संशये च[7]'(भ्वा.प.से.) 'गुप्तिज्किद्भ्य:-'३।१।५॥ इति सन्[8], 'सन्यङो:'६।१।९॥ इति द्वित्वम्, 'कुहोश्चु:'७।४।६२॥, 'सन्यत:'७।४।७९॥ इति इत्वम्, ततो ण्वुल् । ६ रोगं हरतीत्येवंशीलो **रोगहारी** । 'हृञ्[9] हरणे'(भ्वा.उ.अ.), 'सुप्यजातौ-'३।२।७८॥ इति णिनि: । ८ अगदमरोगं प्राणिनं करोति **अगदङ्कार:** । 'करे सत्यागदस्य'६।३।७०॥ इति मुम्। सप्त वैद्यस्य ॥

**भेषजं[1] तन्त्र[2]मौषधम्[3] ॥४७२॥**
**भैषज्य[4]मगदो[5] जायु:[6]**

१ भिषज्यत्यनेन **भेषजम्** । 'भिषज् चिकित्सायाम्' (कण्ड्वादि:), अच्, 'अनन्तावसथ-'५।४।२३॥ इति निर्देशाद् गुण:। भिषजो वैद्यस्येदमिति वा। 'तस्येदम्'४।३।१३०॥ इत्यण्। "भेषं रोगं जयति"[[10]]इति दुर्ग:। २ तनोत्यारोग्यं **तन्त्रम्** । 'तनु विस्तारे'(त.उ.से.), 'गुधृवीपचिवचियमिमनितनिसदिक्षदिभ्यस्त्रन्[11]'(उणा-६०६)। तन्त्र्यत इति वा । ([12]'तत्रि कुटुम्बधारणे'(चु.उ.से.), घञ्)। ३ ओषधिरेव **औषधम्**, पुंक्ली.। 'ओषधेरजातौ'५।४।३७॥ इत्यण् ॥४७२॥ ४ भेषजमेव **भैषज्यम्** । 'अनन्तावसथ-'५।४।२३॥ इति स्वार्थे ञ्य: । ५ अविद्यमानो गदोऽत्र **अगद:**। ६ जयति रोगान् **जायु:**, पुंसि। 'जि अभिभवे,' '-जये'(भ्वा.प.अ.) वा, 'कृवापाजिमिस्वदि-'(उणा-१)इत्युण्, णित्त्वाद् वृद्धि:, 'एचोऽयवायाव:' ६।१।७८॥ । षडौषधस्य ॥

---

१. माधवनिदाने-

"त्वग्रक्तमांसमेदांसि संदूष्यास्थिसमाश्रिता: । दोषा: शोथं शनैर्घोरं जनयन्त्युच्छ्रिता भृशम् ॥१॥
महामूलं रुजावन्तं वृत्तं वाऽप्यथवाऽऽयतम् । स विद्रधिरिति ख्यातो विज्ञेय: षड्विधश्च स: ॥२॥"

इति, (माधवनिदानम्, उत्तरार्धम्, विद्रधिनिदानम्, श्लो-१-२, पृ.८०॥)

सुश्रुतसंहितायां च-

"त्वग्रक्तमांसमेदांसि प्रदूष्यास्थिसमाश्रिता: । दोषा: शोफं शने(शनै)र्घोरं जनयन्त्युच्छ्रिता भृशम् ॥१॥
महामूलं रुजावन्तं वृत्तं चाप्यथवाऽऽयतम् । तमाहुर्विद्रधिं धीरा विज्ञेय: स च षड्विध: ॥२॥"

इति दृश्यते (सुश्रुतसंहिता, निदानस्थानम्, अध्या-९, श्लो-४-५, पृ.३०२) ॥ २. 'स वै' इत्यस्य स्थाने चरकसंहितायां 'तत:' इति दृश्यते ॥, चरकसंहिता, सूत्रस्थानम्, अध्या-१७, श्लो-९५, पृ.१०४॥ ३. "वातपित्तश्लेष्मसन्निपातागन्तुनिमित्ता: शतपोनकोष्ट्रग्रीवपरिस्रावीशम्बूकावर्तोन्मार्गिणो यथासंख्यं पञ्च भगन्दरा भवन्ति । ते तु भगगुदबस्तिप्रदेशदारणाच्च 'भगन्दरा:' इत्युच्यन्ते । अभिन्ना: पिटका: भिन्नास्तु भगन्दरा:" इति सुश्रुतसंहिता, निदानस्थानम्, अध्या-४, सू-३, पृ.२८३॥ ४. 'श्रेयो' इति१॥ ५. द्र. माधवनिदानस्य मधुकोशटीका, उत्तरार्द्धम्, भगन्दरनिदानम्, श्लो-१, पृ.१३४॥ ६. 'रोगान्' इति२॥ ७. 'कित निवासे रोगापनयने च' इति स्वामिमैत्रेयसायणा: ॥ ८. 'कितेर्व्याधिप्रतीकारे निग्रहे अपनयने नाशने संशये च' इति वार्तिकेन सन् भवितुं योग्यम् ॥ ९. 'हृ' इति१॥ १०. द्र. अम.क्षीरस्वामिटीका २।६।५०॥, पृ.१४४॥ ११. 'गुधृवीपचिवचियमिसदिक्षदिभ्यस्त्र:' इत्युणादिगणसूत्रम् ॥ १२. कोष्ठान्तर्गतपाठस्थाने १प्रतौ 'तस्येदमित्यणे घञ्' इति दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

### चिकित्सा रुक्प्रतिक्रिया ।

### उपचर्योपचारौ च

१ चिकित्सनं **चिकित्सा**। किते:[१] 'गुप्तिज्किद्भ्यः[२]-' ३।१।५॥ इति सन्नन्ताद् 'अ:(अ) प्रत्ययात्'३।३।१०२॥ इत्यकारप्रत्यये टाप् । २ रुजो रोगस्य प्रतिक्रिया निराकरणं **रुक्प्रतिक्रिया** । ३ उपचरणम् **उपचर्या** । 'परिचर्यापरिसर्यामृगयाटाट्यादयश्च[३]'(वा-३।३।१०१॥)इति साधुः । ४ उपचरणम् **उपचारः** । भावे घञ् । चत्वारि चिकित्सायाः । 'पडीगणुं[४]' इति भाषा ॥

### लङ्घनं त्वपतर्पणम् ॥४७३॥

१ लङ्घ्यतेऽतिक्रम्यते रोगोऽनेन **लङ्घनम्** । 'लघि गतौ'(भ्वा.आ.से.), करणे ल्युट् । 'लघिङ् अभोजने[५]' (भ्वा.आ.से.), 'लघि शोषणे[६]'( )इत्यस्य वा ल्युटि । २ अवतृप्यते **अवतर्पणम्** । 'तृप्(तृप) तृप्तौ'(दि.प.वे.), ल्युट्। द्वे लङ्घनस्य ॥४७३॥

### जाङ्गुलिको विषभिषक्

१ जाङ्गुलीं विषविद्यामधीते **जाङ्गुलिकः** । तदधीते तद्वेत्त्यर्थे[७] वा, वसन्तादित्वाट्ठक्, 'ठस्येकः'७।३।५०॥, 'किति च'७।२।११८॥इति वृद्धिः । २ विषस्य भिषक् **विषभिषक्**। एकं विषवैद्यस्य ॥

### स्वास्थ्ये वार्तमनामयम् ।

### सह्यारोग्ये

१ स्वस्थस्य[८] भावः **स्वास्थ्यम्**, तत्र। २ वृत्तिर्जीवनमत्रास्ति **वार्तम्**। 'प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः'५।२।१०१॥ । स्त्रियां टापि वार्ता। ३ आमयस्य रोगस्याऽभावः **अनामयम्**। ४ सह्यत इति **सह्यम्** । 'षह मर्षणे'(भ्वा.आ.से.), 'शकिसहोश्च'३।१।९९॥इति यत्[९] । ५ अरोगस्य भाव **आरोग्यम्**। 'गुणवचनब्राह्मण-'५।१।१२४॥इति ष्यञ्, तत्र[१०] । पञ्च नीरोगत्वस्य[११] ॥

### पटूल्लाघवार्त्तकल्यास्तु नीरुजि ॥४७४॥

१ पाटयत्यारोग्यं **पटुः**। 'पट विस्तारे'( ), अस्माण्णिजन्तात् 'फलपाटिनमिमनिजनां गुक्पटिनाकिधताश्च उर्निच्च' (उणा-१८)इत्युः। २ उल्लाघते स्म **उल्लाघः** । 'लाघृ सामर्थ्ये' (भ्वा.आ.से.), निष्ठा, 'अनुपसर्गात् फुल्लक्षीबकृशोल्लाघाः' ८।२।५५॥इति साधुः । ३ वृत्तिरस्यास्ति **वार्त्तः** । 'प्रज्ञाश्रद्धार्चा-'५।२।१०१॥ इति णः। ४ कलयत्यारोग्यं **कल्यः** । 'कल[१२] संख्याने[१३]'(चु.उ.से.), यप्रत्ययः। कलासु साधुर्वा । 'तत्र साधुः'४।४।९८॥ इति यत् । ५ निर्गतो रुजो **नीरुक्**। 'निरादयो निःक्रान्ताद्यर्थे[१४] पञ्चम्या'(वा-२।२।१८॥)इति समासः, तत्र[१५] । पञ्च नीरोगस्य । ([१६]'रोगी साजो थयो' इति भाषा) ॥४७४॥

### कुसृत्या विभवाऽन्वेषी पार्श्वकः सन्धिजीवकः ।

१ कुसृत्या मायया, विभवाऽन्वेषी विभवेच्छुरित्यर्थः, पार्श्वमनृजुरुपायो लञ्चादिः, तेनाऽन्वेष्टा **पार्श्वकः** । पार्श्वेनान्विच्छतीत्यनेन पार्श्वशब्दात् तृतीयासमर्थादन्विच्छतीत्यस्मिन्नर्थे कन्प्रत्ययः । स्त्रियां टापि 'प्रत्ययस्थात्-'७।३।४४॥ इतीत्वे पार्श्विका, गङ्गावत् । २ सन्धिना जीवति **सन्धिजीवकः** । 'जीव प्राणधारणे'(भ्वा.प.से.), ण्वुल् । द्वे लञ्चाग्राहकस्य। 'लांचडियां[१७]' इति भाषा ॥

### सत्कृत्याऽलङ्कृतां कन्यां यो ददाति स कूकुदः[१८] ॥४७५॥

१ ब्राह्मे[१९] विवाहे सत्कृत्याऽलङ्कृत[२०]कन्याया दाता, तन्नामैकं **कूकुदः** । कोकते धर्ममादत्त इति । 'कुक वृक आदाने'(भ्वा.आ.से.), ['इगुपध-'३।१।१३५॥ इति कः], ह्रस्वादिर्दीर्घादिश्च[२१], पृषोदरादित्वात् साधुः । ''अव्युत्पन्नोऽयम्'' [ ]इत्यन्ये । यन्मनुः-

---

१. ४प्रतौ नास्ति ॥ २. 'कितेर्व्याधिप्रतीकारे-' इत्यादिना सन् युक्तः ॥ ३. '-टाट्यानामुपसंख्यानम्' इत्यष्टाध्याय्याम् ॥ ४. 'पडिगणू' इति३॥ ५. 'लघि भोजननिवृत्तौ च' इति स्वामी । 'ककिवकि-' इत्यादिदण्डके धातुपाठे सायणेन ''लघि भोजननिवृत्तौ चेति स्वाम्यादयः । लघि शोषण इत्यन्ये।'' इत्युक्तम्, मा. धातुवृत्तिः, भ्वादिः, धातुसं-७७, पृ.८०॥ ६. मैत्रेयसम्मतोऽयं धातुः, धातुप्रदीपः, भ्वादिः, धातुसं-९०, पृ.१४॥ ७. 'तद्वेदेत्यर्थे' इति३॥ ८. 'स्वस्थ्यस्य' इति१.२॥ ९. 'यक्' इति१॥ १०. १प्रतौ नास्ति ॥ ११. 'नीरोगस्य' इति१.२.३॥ १२. 'कल्य' इति२.३॥ १३. चुरादौ 'कल गतौ संख्याने च' इति स्वामिसायणौ, 'कल संख्याने गतौ च' इति मैत्रेयः, भ्वादौ 'कल शब्दसंख्यानयोः' इति स्वामिमैत्रेयसायणाः ॥ १४. 'क्रान्ताद्यर्थे' इत्यष्टाध्याय्याम् ॥ १५. २प्रतौ नास्ति ॥ १६. कोष्ठान्तर्गतपाठः १.२.४प्रतिषु न दृश्यते ॥ १७. 'लाचांडिया' इति२, '-डीया' इति३॥ १८. तुलनीयोऽमरकोषः ३।१।१४॥ १९. 'ब्रह्मेति' इति३॥ २०. '-लङ्कृत्य' इति२.३॥ २१. '-दिदीर्घा-' इति१.२.३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"आच्छाद्य चार्हयित्वा[१] च श्रुतशीलवते स्वयम् ।
आहूय दानं कन्याया ब्राह्मो धर्मः प्रकीर्तितः ॥१॥"
[मनुस्मृतिः, अध्या-३, श्लो-२७]इति । [शेषश्चात्र-"स्यात् कूकुदे तु कूपदः पारिमितः"] ॥४७५॥

## चपलश्चिकुरः

१ चप्यते **चपलः** । 'चप सान्त्वने'(भ्वा.प.से.), वृषादित्वात् कलच् । २ चिनोति चकते वा **चिकुरः** । 'चिञ् चयने'(स्वा.उ.अ.), 'चक तृप्तौ[३] प्रतीघाते च'(भ्वा.-आ.से.)इति वा, 'मद्गुरादयश्च'(उणा-४१)इत्युरचि साधुः । द्वौ वाच्यलिङ्गौ । यल्लक्ष्यम्-"तां वीक्ष्य लीलाचिकुरा[४]मनङ्गः स्वचापसौन्दर्यमदं मुमोच"[कुमारसंभवम्, सर्गः-१,श्लो-४७]। यन्महेश्वरः-"चपलं क्षणिके शीघ्रे चपलं चिकुरे[५] चले[६]" [विश्वप्रकाशकोशः, लान्तवर्गः, श्लो-५५]। चिकुर ईषन्निमीलिताक्ष इति तट्टीका । "चिकुरश्चञ्चले केशे गृहे[७] बभ्रुभुजङ्गयोः"[विश्वप्रकाशकोशः, रान्तवर्गः,श्लो-१२४]इति महेश्वरः। अत्र भुजङ्ग ईषन्निमी[८]लिताक्षः । द्वे चपलस्य । 'चिकणिया[९]' इति भाषा ॥

## नीलीरागस्तु स्थिरसौहृदः ।

१ नील्या[१०] इव स्थिरो रागोऽस्य **नीलीरागः** । स्थिरं चिरस्थायि सौहृदमस्य **स्थिरसौहृदः** । "नीलीरागः स विज्ञेयः स्थिरप्रेमा च यः पुमान्"[हलायुधकोशः२।३७४॥]इति हलायुधः । एकं स्थिरप्रेम्णः ॥

## ततो हरिद्रारागोऽन्यः

१ तत इति, स्थिरसौहृदादन्यः क्षणमात्रानुरागी हरिद्राया इव क्षणिको रागोऽस्य **हरिद्रारागः**[११]। "क्षणमात्रानुरागी च हरिद्राराग उच्यते"[हलायुधकोशः२।३७५॥]इति हलायुधः । एकमस्थिरस्नेहस्य ॥

## सान्द्रस्निग्धस्तु मेदुरः[१२] ॥४७६॥

१ सान्द्रः पीनः, स चासौ स्निग्धः **सान्द्रस्निग्धः** । २ मेद्यतीत्येवंशीलो **मेदुरः** । 'ञिमिदा स्नेहने'(भ्वा.आ.से.), 'भञ्जभासमिदो घुरच्'३।२।१६१॥ । द्वे[१३] निबिडस्नेहस्य ॥४७६॥

## गेहेनर्दी गेहेशूरः पिण्डिशूरः

१ गेहे नर्दतीत्येवंशीलो **गेहेनर्दी** । 'नर्द शब्दे' (भ्वा.प.से.), 'सुप्यजातौ-'३।२।७८॥ इति णिनिः । २ एवं **गेहेशूरः** । 'तत्पुरुषे कृति बहुलम्'६।४।१४॥ इति सप्तम्यलुक्, '[१४]पात्रेसमितादयश्च'२।१।४८॥ इति तत्पुरुषः । ३ पिण्ड्यां शूरः **पिण्डीशूरः** । त्रीणि 'घरसूरा' इति ख्यातस्य ॥

## अस्तिमान् धनी ।

१ अस्तीत्यव्ययं धनवाचकम्, अस्ति धनमस्यास्ति **अस्तिमान्** । 'तदस्यास्ति-'५।२।९४॥ इति मतुप् । अस्तिमन्तौ, अस्मिन्तः इत्यादि । "धनवानस्तिमान् मतः"[हलायुधकोशः २।३६९॥]इति हलायुधः । "द्वावल्पधने[१५]"[ ]इति तट्टीका । २ धनमस्यास्ति **धनी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः । द्वे अल्पधनवतः[१६] । 'आपवर्ती' इति भाषा ॥

## स्वस्थानस्थः परद्वेषी गोष्ठश्वः

१ यः स्वस्थानस्थः परान् द्वेष्टि, स **गोष्ठश्वः** । गोष्ठे श्वेव गोष्ठश्वः । 'अचतुरविचतु-'५।४।७७॥ इति समासः । ([१७]यः स्वस्थाने स्थितः परान् द्वेष्टि, तस्यैकम्) ॥

## अथापदि स्थितः ॥४७७॥

## आपन्नः

१ आपद्यते विपदं गच्छति स्म **आपन्नः**' आङ्पूर्वः 'पद गतौ'(दि.आ.अ.), निष्ठा, 'रदाभ्याम्-'८।२।४२॥ इति नत्वम् । एकमापदं प्राप्तस्य ॥४७७॥

## अथाऽऽपद् विपत्तिर्विपत्

१ आपदनम् **आपत्** । 'पद गतौ'(दि.आ.अ.), सम्पदादित्वात् क्विप् । २ विपदनं **विपत्तिः** । 'स्त्रियां क्तिन्' ३।३।९४॥ । ३ विपदनं[१८] **विपत्** । सम्पदादित्वात् क्विप् । त्रीणि आपदः ॥

## स्निग्धस्तु वत्सलः[१९] ।

१. 'चार्चयित्वा' इति मनुस्मृत्याम् ॥ २. तुलनीयोऽमरकोषः ३।१।४६॥ ३. 'दीप्तौ' इति१॥ ४. '-चतुरा-' इति कुमारसम्भवे, १।४७॥, पृ.१२॥ ५. 'चपलश्चिकुरे' इति विश्वप्रकाशकोशे, लान्तवर्गः, श्लो-५५, पृ.१५३॥ ६. 'बले' इति३॥ ७. 'गृहबभ्रु-' इति विश्वप्रकाशकोशे, रान्तवर्गः, श्लो-१२४, पृ.१३५॥ ८. '-निमि-' इति१॥ ९. '-नीया' इति३॥ १०. 'नीली' इति३॥ ११. 'हरिद्रागः' इति१॥ १२. तुलनीयोऽमरकोषः ३।१।३०॥ १३. 'निव-' इति३॥ १४. 'पात्रेसंमि-' इति१.२॥ १५. इदं विचारणीयम् ॥ १६. इदमपि विचारणीयम् ॥ १७. कोष्ठान्तर्गतपाठः १.२.३प्रतिषु न दृश्यते, ४प्रतावपि बहिर्भागे दृश्यते ॥ १८. 'विपदं' इति१॥ १९. तुलनीयोऽमरकोषः ३।१।१४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ स्निह्यति स्म **स्निग्धः**। 'ष्णिह प्रीतौ'(दि.प.अ.), निष्ठा, 'वा द्रुहमुहस्नुहस्निहाम्'८।२।३३॥ इति घत्वम्, जश्त्वम्। २ वत्सोऽस्याऽस्ति वत्सः। ''वत्सः पुत्रादिवर्षयोः''[मेदिनीकोशः, सान्तवर्गः, श्लो-११]इति मेदिनिः। अत्रादिशब्दः प्रकारार्थः, प्रकारश्च साद्दश्यम्, तच्च स्नेहपात्रत्वमेव। वत्से पुत्रादिस्नेहपात्रे कामोऽभिलाषोऽस्यास्ति **वत्सलः**। 'वत्सांसाभ्यां कामबले'५।२।९८॥ इति लच्। 'स्निग्धो वात्सल्यसंपन्ने चिक्कणेऽप्यभिधीयते''[विश्वलोचनकोशः, धान्तवर्गः, श्लो-२८]इति श्रीधरः। वत्सलः पुत्रादिस्नेहात्मा रतिभेदः, तस्य भावो वात्सल्यम्, तेन संपन्नो वात्सल्यसंपन्न इति। द्वे वत्सलस्य॥

## उपाध्यभ्यागारिकौ तु कुटुम्बव्यापृते नरि ॥४७८॥

१ उपाधीयत इति **उपाधिः**, पुंसि। 'डुधाञ् धारणपोषणयोः'[1](जु.उ.अ.), 'उपसर्गे घोः किः'३।३।९२॥। ''उपाधिं बाधन्ते विविधविधिभिर्बान्धवजनाः''[[2]]इति यथा। २ अभ्यागारमस्यास्ति **अभ्यागारिकः**। 'अत इनिठनौ' ५।२।११५॥ इति ठन्, 'ठस्येकः'७।३।५०॥। ३ कुटुम्बे कलत्रादौ व्यापृतः पोषणोद्युक्तः [**कुटुम्बव्यापृतः**], तत्र। द्वे कुटुम्बपोषणशक्तस्य ॥४७८॥

## जैवातृकस्तु दीर्घायुः

१ जीवति जीवयति वा **जैवातृकः**। 'जीव प्राणधारणे'(भ्वा.प.से.), जीवेरातृकन्, वृद्धिश्च धातोरादेः। २ दीर्घमायुरस्य **दीर्घायुः**। आयुष्मानपि। द्वे चिरंजीविनः॥

## त्रासदायी तु शङ्कुरः।

१ त्रासमुद्वेगं ददाति **त्रासदायी**। २ शङ्कतेऽस्माज्जनः **शङ्कुरः**। 'मन्दिवासि(वाशि)-'(उणा-३८)इति बाहुलकादुरच्। शङ्कुं हृदि कीलकमिव राति ददातीति वा। द्वे त्रासदायिनः। त्रासोऽत्र 'अउद्रक[3]' इति भाषाप्रसिद्धः[4]॥

## अभिपन्नः शरणार्थी

१ अभिमुखं पद्यते स्म **अभिपन्नः**। 'पद गतौ' (भ्वा.आ.अ.), क्तः, 'रदाभ्याम्-'८।२।४२॥ इति नत्वम्। २ शरणमर्थयत इत्येवंशीलः **शरणार्थी**। 'सुप्यजातौ-'३।२।७८॥ इति णिनिः। एकं शरणार्थिनः॥

## कारणिकः परीक्षकः ॥४७९॥

१ करणेन अधिकारिवर्गेण चरति **कारणिकः**। 'तेन चरति[6]'४।४।८॥ इति ठक्। करं(करणं) प्रयोजनमस्येति वा। 'तदस्य प्रयोजनम्[7]'५।१।१०९॥ इति ठक्। २ परीक्षते अवधारयते[8] प्रमाणैरर्थमिति **परीक्षकः**[5]। 'ईक्ष दर्शनाङ्कनयोः[9]' (भ्वा.आ.से.), ण्वुल्। [10]आक्षपटलिकोऽपि। द्वे 'पारखू' इति ख्यातस्य ॥४७९॥

## समर्धुकस्तु वरदः

१ समृध्नोति संवर्धयति **समर्धुकः**। 'ऋधु वृद्धौ' (स्वा.प.से.), उकप्रत्यये निपातितः। समर्धयति समृध्या योजयतीति ण्वुलि निरुकारोऽपि। ''समृध्नोति वर्धते समर्धः, स एव समर्धकः[11]''[अम.क्षीर.३।१।७॥]इति स्वामी[12]। २ वरमभीष्टं ददाति **वरदः**। 'डुदाञ् दाने'(जु.उ.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥। द्वे वरदातुः। 'वाञ्छितदाता' इति भाषा॥

## व्रातीनाः सङ्घजीविनः।

१ नानाजातीया अनियतवृत्तयः शरीरायासजीविनः सङ्घा व्राताः, तत्साहचर्यात् तत्कर्माऽपि व्रातम्, तेन जीवन्ति **व्रातीनाः**। 'व्रातेन जीवति'५।२।२१॥ इति सूत्रेण खञ्[13], 'आयनेयी-'७।१।२॥ इति खस्य ईनादेशः। २ सङ्घेन जीवन्ति[14] **सङ्घजीविनः**। 'जीव प्राणधारणे'(भ्वा.प.से.), ग्राहादित्वाण्णिनिः। द्वे 'वहीतरा पोटलिया मजूर' इति ख्यातस्य॥

## सभ्याः सदस्याः पार्षद्याः सभास्ताराः सभासदः ॥४८०॥

## सामाजिकाः

१ सभायां साधवः **सभ्याः**। 'तत्र साधुः[15]'४।४।९८॥ इति यत्। २ एवं सदसि साधवः **सदस्याः**। ३ पर्षदं समवयन्ति **पार्षद्याः**। 'पर्षदो(परिषदो) ण्यः'४।४।४४॥ इति ण्यः। पारिषद्या अपि। ४ सभामास्तृणन्ति **सभास्ताराः**। 'स्तृञ् (स्तृञ्) आच्छादने'(क्र्या.उ.से.), 'कर्मण्यण्'३।२।१॥।

१. 'धारणादौ' इति१.२.४॥ २. द्र. अनेकार्थकैरवाकरकौमुदीटीका, भा-२, ३।३३५॥, पृ.१४८॥ ३. 'उद्रक' इति३, 'उप्रउद्रक' इति२॥ ४. '-द्धं' इति३॥ ५. 'परीक्षिकः' इति३॥ ६. 'चरति' इत्येवाष्टाध्यायाम्॥ ७. 'प्रयोजनम्' इत्येवाध्याय्याम्॥ ८. '-धार्यति' इति३॥ ९. 'ईक्ष दर्शने' इति स्वामिमैत्रेयसायणाः॥ १०. 'आक्षा-' इति३॥ ११. स्वामिकृतामरकोशटीकायां ''समृध्नोति संवर्धयति समर्धुकः'' इति दृश्यते, अत्र स्वामिना 'समर्धुकः' सोकार एवाभीष्टः, ३।१।७॥, पृ.२३७॥ १२. द्र. पदचन्द्रिका, भा-३, विशेष्यनिघ्नवर्गः (प्राणिवर्गः), श्लो-७, पृ.७॥ १३. 'खन्' इति३.४॥ १४. '-न्तीति' इति३॥ १५. 'सभाया यः' ४।४।१०५॥ इति सूत्रविद्यमानत्वादिदं विचारणीयम्॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

५ सभायां सीदन्ति **सभासदः** । 'षद्लृ विशरणादौ'(भ्वा.-प.अ.), 'सत्सूद्विष-'३।२।६१॥ इति क्विप् ॥४८०॥ ६ समाजं समवयन्ति **सामाजिकाः** । 'समवायाः समवेति (समवायान् समवैति)'४।४।४३॥ इति ठक् । षट् सभायोग्यस्य ॥

**सभा संसत् समाजः परिषत् सदः ।**
**पर्षत् समज्या गोष्ठ्यास्था आस्थानं समितिर्घटा ॥४८१॥**

१ सह भान्त्यस्यां **सभा** । 'भा दीप्तौ'(अ.प.अ.), क्विबन्तः, आकारान्तोऽयम्, सोमपावत् । सन्यते भज्यत इति वा । 'षन्(षण्) संभक्तौ'(भ्वा.प.से.), 'सनेर्डित्'(हैमोणा-३३०)इत्यभः । २ संभूय सीदन्त्यस्यां **संसत्** । 'षद्लृ विशरणादौ'(भ्वा.प.अ.), सम्पदादित्वात् क्विप् । ३ समजन्ति मिलन्त्यस्मिन् **समाजः** । 'अज गतौ क्षेपणे च'(भ्वा.प.से.) । ४ परितः समन्तात् सीदन्त्यस्यां **परिषत्** । 'सत्सूद्विष-'३।२।६१॥ इति क्विप् । ५ सीदन्त्यत्रेति **सदः**, स्त्रीक्लीबयोः । ''स्त्रीनपुंसकयोः सदः''[अमरकोषः२।७।१५॥]इत्यमरः । 'षद्लृ विशरणादौ'(भ्वा.प.अ.), '-असुन्'(उणा-६२८) इत्यसुन् । ६ पृणन्त्येनां **पर्षत्**, स्त्रीलिङ्गः । ७ समजन्त्यस्यां **समज्या** । 'अज गतौ'(भ्वा.प.से.), 'संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः'३।३।९९॥ इति क्यप्, 'अजेः क्यपि वीभावो न इति वाच्यम्'[1](वा-२।४।५६॥) । ८ गावो नानोक्तयस्तिष्ठन्त्यस्यां **गोष्ठी** । 'ष्ठा गतिनिवृत्तौ'(भ्वा.प.अ.), स्थादित्वात् कः, 'अम्बाम्बगोभूमि-'८।३।९७॥ इति षत्वम् । ९ आतिष्ठन्त्यस्याम् **आस्था** । 'आतश्चोपसर्गे-'३।३।१०६॥ अङ् । १० आ स्थीयतेऽस्मिन् **आस्थानम्** । अधिकरणे ल्युट् । स्त्रियामास्थानी । ''आस्थानी क्लीबमास्थानम्''[अमरकोषः२।७।१५॥]इत्यमरः । ११ संयन्त्यस्यां **समितिः** । 'इण् गतौ' (अ.प.अ.), सम्पूर्वः, 'स्त्रियां क्तिन्'३।३।९४॥ । १२ घटन्तेऽस्यां **घटा** । 'घट चेष्टायाम्'(भ्वा.आ.से.), भिदादित्वादङ् । द्वादश सभायाः ॥४८१॥

**सांवत्सरो ज्यौतिषिको मौहूर्तिको निमित्तवित् ।**
**दैवज्ञगणकादेशिज्ञानिकार्तान्तिका अपि ॥४८२॥**
**विप्रश्निकेक्षणिकौ च**

१ संवत्सरः कालोपलक्षणम्, तं वेत्ति **सांवत्सरः** । 'तदधीते तद्वेद'४।२।५९॥ इत्यण् । २ ज्योतिर्ग्रहनक्षत्रादि, तदधिकृत्य कृतो ग्रन्थः, 'अधि[कृत्य] कृते ग्रन्थे'४।३।८७॥, संज्ञापूर्वकत्वाद् वृद्ध्यभावः ज्योतिषम्, तद्वेदेति **ज्यौतिषिकः** । क्रतूक्थादित्वाट्ठक्, 'ठस्येकः'७।३।५०॥, 'किति च'७।२।११८॥ इति वृद्धिः । ३ एवं **मौहूर्त्तिकः** । मौहूर्तोऽपि सांवत्सरवत् । ४ निमित्तं वेत्ति **निमित्तवित्** । 'विद ज्ञाने'(अ.प.से.), क्विप् । ५ दैवं प्राक्कृतं शुभाशुभरूपं कर्म जानाति **दैवज्ञः** । 'ज्ञा अवबोधने'(क्र्या.प.अ.), 'इगुपध-'३।१।१३५॥ इति कः । ६ ग्रहादिसञ्चारं गणयति **गणकः** । 'गण संख्याने' (चु.उ.से.), ण्वुल् । स्त्रियां 'पुंयोगात्-'४।१।४८॥ इति ङीषि गणकी । ७ शुभाशुभमादिशतीत्येवंशील **आदेशी** । 'दिश अतिसर्जने'(तु.प.अ.), 'सुप्यजातौ-'३।२।७८॥ इति णिनिः । ८ कालादिज्ञानमस्त्यस्य **ज्ञानी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः । ९ कृतान्तं दैवं[2] वेत्ति **कार्तान्तिकः** । तद्वेदेति क्रतूक्थादिना ठक् । ''कृतान्तोद्यमसिद्धान्तदैवाकुशलकर्मसु'' [अमरकोषः १।३।६४॥]इति त्रिकाण्डशेषः[3](अमरः) ॥४८२॥ १० विप्रश्नो दैवपृच्छ(प्रच्छ)नमस्त्यस्य **विप्रश्निकः** । 'अत इनिठनौ'५।२।११५॥ । ११ शुभाशुभयोरीक्षणमस्यास्ति[4] **ईक्षणिकः**[5] । 'अत इनिठनौ'५।२।११५॥ । एकादश दैवज्ञस्य । 'जोइसि' इति[6] भाषा । दैवज्ञः विप्रश्निकः ईक्षणिकः, एते त्रयो या[7] स्त्री 'देवाली भोपाली' इति प्रसिद्धा, तन्नामवाचकाः । ''विप्रश्निका त्वीक्षणिका दैवज्ञा''[अमरकोषः२।६।२०॥] इत्यमरः ॥

**सैद्धान्तिकस्तु तान्त्रिकः ।**

१ सिद्धान्तं वेत्ति **सैद्धान्तिकः** । ठक् । २ तन्यते तन्त्र्यते वा तन्त्रम्, पारमेश्वरज्योतिषवैद्यकादि, तद् वेत्ति **तान्त्रिकः** । उक्थादित्वाट्ठक् । द्वे सिद्धान्तवेत्तुः । 'सिद्धांति' इति भाषा ॥

**लेखकेऽक्षरपूर्वाः स्युश्चणजीवकचञ्चवः ॥४८३॥**
**वार्णिको लिपिकरश्च**

१ लिखति **लेखकः** । 'लिख अक्षरविन्यासे'(तु.प.-से.), 'शिल्पिनि ष्टुन्(ष्वुन्)'३।१।१४५॥, तत्र । २-४ अक्षरपूर्वाश्चणादयः, अक्षरेण लक्षणया अक्षरलेखनेन वित्तः **अक्षर-**

१. 'घञपोः प्रतिषेधे क्यप उपसंख्यानं कर्तव्यम्' इति काशिका, भा-२, २।४।५६॥, पृ.२९७॥ २. 'देवं' इति १॥ ३. 'त्रिकाण्डः' इति २॥ ४. '-मस्त्यास्ति' इति १॥ ५. 'ईक्षणः' इति ३॥ ६. 'जोसीति' इति ३॥ ७. 'वा' इति ३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चणः। 'तेन वित्तश्चञ्चुप्चणपौ'[1] ५।२।२६॥। अक्षरैर्जीवति **अक्षरजीवकः**। अक्षरलिखनेन वित्तः **अक्षरचञ्चुः॥४८३॥ ५** वर्णाः शिल्पमस्य **वार्णिकः**। 'शिल्पम्'४।४।५५॥ (हैमसू-६।४।-५७॥)इति ठक्। **६** लिपिं करोति **लिपिकरः**। 'दिवाविभानिशाप्रभा-'३।२।२१॥ इति टः। 'कृञो हेतुताच्छील्य-'३।२।२०॥ इत्यादिना वा। षड् लेखकस्य। "कायस्थः करणः"[शेषनाममाला ३।१०७॥]शैषिके ॥

## अक्षरन्यासे लिपिर्लिविः।

**१** अक्षराणां न्यसनं स्थापनम् अक्षरन्यासः। निपूर्वाद् 'असु क्षेपेणे'(दि.प.से.) अस्माद्भावे घञ्। लिप्यतेऽनया पत्रं **लिपिः**। 'लिप उपदेहे'(तु.उ.अ.), 'इगुपधात् किच्चे'[2](उणा-५५९)इतीन्। **२** " 'दिवाविभाप्रभा-' इत्यादिसूत्रे 'लिवि (लिबि)' इति निर्देशात् पक्षे वकारः(बकारः) इति, तेन 'लिविः **(लिबिः)"[मा.धातुवृत्तिः,** तुदादिः, **धातुसंख्या-१४१]**इति माधवः[3]। "लिविः सौत्रो धातुरत 'इगुपधात् [कि]च्चे'(उणा-५५९)इतीनिर्वा। एतौ पृषोदरादी वा। "इदुपधात् किः"[[4] ] इति व्याख्यामृतम्। "लिखिताक्षरविन्यासे लिपिर्लिवि-(लिबि)रुभे स्त्रियौ"[अमरकोषः२।८।१६॥]इत्यमरः। लेखाऽपि। "लेखा राज्यां लिपावपि"[अनेकार्थसङ्ग्रहः २।२५॥] इत्यनेकार्थः। द्वे लेखनस्य ॥

## मषिधानं मषिकूपी

**१** मषिर्धीयतेऽस्मिन् **मषिधानम्**। 'डुधाञ् धारणादौ' (जु.उ.अ.), अधिकरणे ल्युट्। **२** मषेः कूपीव **मषिकूपी**। मेलानन्दो[5](मेलानन्दो) मसिमणिश्चैतावपि। यद् हारावली-"मेलानन्दो(मेलानन्दो) मसिमणिः"[हारावली, पादावधिः, श्लो-२१२(१२)]इति। द्वे मषीभाजनस्य ॥

## मलिनाम्बु मषी मसी ॥४८४॥

**१** मलिनं च तदम्बु च **मलिनाम्बु**, अञ्जनाक्तत्वात्। **२-३** मषति हिनस्ति औज्ज्वल्यं मषिः, 'मष हिंसायाम्' (भ्वा.प.से.), '-इन्'(उणा-५५७)इतीन्, मस्यति परिणमति मसिः, पुंस्त्रीलिङ्गौ। 'मसी परिणामे'(दि.प.से.), '-इन्' (उणा-५५७)इतीन्, 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि **मषी, मसी** च। मषिर्मसिरिति तृतीयस्वरान्तोऽपि। मेला पत्राञ्जनं चैतावपि। यल्लक्ष्यम्-

"यदि पत्रायते व्योम मेला नन्दायतेर्णवः।
ब्रह्मायते लिपिकरस्तथाप्यन्तः कुतो गिराम् ॥१॥"

[[6] ]इत्यत्र मेला मषी, तस्या नन्दा भाजनमिति व्याख्या। "मेला पत्राञ्जनं मसिः"[हारावली, पादावधिः, श्लो-२१२ (१२)]इति हारावली। त्रीणि मष्याः ॥

इह प्रस्तावादनुक्तान्यपि लेखनीनामानि, तद्यथा लेखनी, ललन्तिका[7], कलमश्च। यद् हारावली-"लेखनीवल्ललन्तिका" [हालावली, पादावधिः, श्लो-२१२(१२)]इति[8]। "कलमो लेखनीचौरशालिलाक्षारसेषु च"[विश्वप्रकाशकोशः, मान्तवर्गः, श्लो-४३]इति[9] महेश्वरः **॥४८४॥**

## कुलिकस्तु कुलश्रेष्ठी

**१** कुलमस्त्यस्य **कुलिकः**। 'अत इनिठनौ'५।२।-११५॥। कुलं कायति 'कुलकः[10]'[अमरकोषः२।१०।५॥] इत्यमरः। **२** कुले वणिग्वृन्दे श्रेष्ठत्वमस्य **कुलश्रेष्ठी**। 'अत इनिठनौ'५।२।११५॥। द्वे कुले श्रेष्ठस्य ॥

## सभिको द्यूतकारकः।

**१** सभा द्यूतशालास्त्यस्य **सभिकः**। 'नौ द्व्यचष्ठन्' ४।४।७॥। "सभाद्यूतं सभागृहम्"[[11]]इति रुद्रः। **२** द्यूतं कारयति **द्यूतकारः**। पचाद्यच्, ततः कन्। द्यूतं करोति द्यूतकारक इति ण्वुल् वा। द्वे 'सहिआ[12]' इति ख्यातस्य। 'कटे[13]' इति भाषान्तरम्। 'सहिकः[14]'[ ]इति हलायुधटीका॥

## कितवो द्यूतकृद् धूर्तोऽक्षधूर्तश्चाक्षदेविनि ॥४८५॥

**१** किं तवाऽस्तीति पणते ब्रूते **कितवः**[15]। पृषोदरादिः। केतति निवसति यत्र तत्रेति वा[16]। 'कित निवासे' (भ्वा.प.से.), बाहुलकादवः, स च कित्। **२** द्यूतं करोति **द्यूतकृत्**। 'क्विप्-'३।२।७६॥, 'ह्रस्वस्य-'६।१।७१॥इति

---

१. 'तेन वित्ते चचुचणौ' इति ३॥ २. 'कित्' इत्युणादिगणे ॥ ३. मा. धातुवृत्तौ-" 'दिवाविभा-' इत्यादौ 'लिपिलिबि' इति निर्देशात् पकारस्य पक्षे बकारः" इति दृश्यते, मा. धातुवृत्तिः, तुदादिः, धातुसं-१४१, पृ.४९२॥ ४. द्र. पदचन्द्रिका, भा-२, क्षत्रवर्गः, श्लो-४७०, पृ.५५४॥ ५. '-नान्दा' इति ३॥ ६. द्र. अनेकार्थकैरवाकरकौमुदीटीका, भा-१, २।४९५॥, पृ.२८२॥ ७. 'लला-' इति ३॥ ८. हारावल्यां "लेखनी वर्णतूलिका" इति दृश्यते, पादावधिः, श्लो-२१२ (१२), पृ.४०६॥ ९. विश्वप्रकाशकोशे "-शालिकाक्षरकेषु च" इति दृश्यते ॥ १०. 'कुलिकः' इति ४॥ ११. 'द्र. पदचन्द्रिका, भा-२, शूद्रवर्गः, श्लो-७२७, पृ.८१७॥ १२. 'सहिया' इति३॥ १३. 'कटि' इति४॥ १४. 'सहितः' इति३॥ १५. 'किंतवः' इति१.२.४॥ १६. इतोऽग्रे ३प्रतौ 'कितवः' इति दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तुक् । ३ धूर्वति हिनस्ति **धूर्तः** । उर्वी तुर्वी धुर्वी हिंसार्थो[1] दण्डकधातुः, 'हसिमृग्रिण्वाऽमि-'(उणा-३६६)इत्यादिना तन्, 'राल्लोपः'६।४।२१॥ इति वलोपः[2] । धावन्ती अर्तिः धूर्तिः, तद्योगाद् धूर्त इति वा । 'प्रज्ञादिभ्यश्च'५।४।३८॥ इति अण्, 'अच्वौ' इति दीर्घः । ४ अक्षेषु धूर्तः **अक्षधूर्तः** । 'सप्तमी शौण्डैः'२।१।४०॥ इति समासः । ५ अक्षैर्दीव्यति विजिगीषते **अक्षदेवी** । 'दिवु क्रीडादौ'(दि.प.से.), ग्रहादित्वाण्णिनिः, तत्र। पञ्च धूर्तस्य । 'जूआरी' इति भाषा ॥४८५॥

## दुरोदरं कैतवं च द्यूतमक्षवती पणः ।

१ दुष्टमासमन्तादुदरमस्य **दुरोदरम्**, पुंक्ली. । २ कितवस्य कर्म **कैतवम्** । युवादित्वादण्[3] । ३ दीव्यते स्म **द्यूतम्**, पुंक्ली. । 'दिवु क्रीडादौ[4]'(दि.प.से.), निष्ठा, 'यस्य विभाषा'७।२।१५॥इति नेट्[5], 'च्छ्वोः शूडनुनासिके-'६।४।-१९॥ इति वकारस्य ऊठ्, 'इको यणचि'६।१।७७॥ इति यणादेशः । ४ अक्षाः पाशका उपायत्वेनाऽत्र सन्तीति **अक्षवती** । 'तदस्यास्ति-'५।२।९४॥ इति मतुपि[6] शब्दशक्तिस्वाभाव्यात् स्त्रीत्वम् । ५ द्यूते यदुत्सृज्यते, स पणः, तद्योगादर्श-आद्यचि **पणः** । पञ्च द्यूतस्य ॥

## पाशकः प्रासकोऽक्षश्च देवनः

१ पाश्यते बध्यतेऽनेन **पाशकः** । पाशेः सौत्रात् तालव्यान्ताद् ण्वुल् । 'पश बन्धने'(चु.उ.से.) णिजन्ताद्वा । २ प्रास्यन्ते क्षिप्यन्तेऽनेन **प्रासकः** ।'असु क्षेपणे'(दि.प.से.), दिवादिः, ण्वुल्। ३ अक्षति व्याप्नोति **अक्षः** । 'अक्ष(अक्षू) व्याप्तौ'(भ्वा.प.वे.), पचाद्यच्[7] । यद्वा 'अशूङ् व्याप्तौ[8]'(स्वा.-आ.वे.), 'अशेर्देवेन'(उणा-३४५)इति[9] सप्रत्ययः, 'व्रश्च-' ८।२।३६॥ आदिना षत्वम्, 'षढोः कः सि'८।२।४१॥ इति कत्वम् । ४ दीव्यन्त्यनेन **देवनः** । ल्युट् । चत्वारि 'पासा' इति ख्यातस्य ॥

## तत्पणो ग्लहः ॥४८६॥

१ तेषु अक्षेषु पणो बन्धो जय्यत्वे स्थापितमित्यर्थः, तत्पणः । "पणोऽक्षेषु ग्लहः"[अमरकोषः२।१०।४५॥]इत्यमरः । पण्यते पणः बन्ध इति तट्टीका । "पणो द्यूतादिषूत्सृष्टे भृतौ मूल्ये धनेऽपि च"[अमरकोषः३।३।४६॥]इत्यमरसिंहानेकार्थः । "द्यूतादावुत्सृष्टं जय्यत्वे[10] स्थापितम्"[अम. क्षीर.३।३।४६॥]इति क्षीरस्वामी। पणोऽप्यस्यार्थे। यच्छाश्वतः-

"ग्लहे माने श्वेतकानां मूल्ये कार्षापणे धने ।
द्यूतादौ कल्पिते चैव बद्धमुष्टौ भृतौ पणः ॥१॥"

[शाश्वतकोशः, श्लो-६८]इति । गृह्यते **ग्लहः** । 'ग्रह उपादाने' (क्र्या.उ.से.), ग्रहेरप् लत्वं च, 'अक्षेषु ग्लहः'३।३।७०॥इति निपातनात् साधुः। एकं द्यूतादौ जय्यत्वे स्थापितस्य ॥४८६॥

## अष्टापदः शारिफलम्[11]

१ अष्टौ पदानि स्थानान्यत्र **अष्टापदः** । 'अष्टनः संज्ञायाम्'६।३।१२५॥ इति दीर्घः । "अष्टापदोऽस्त्री कनके शारीणां फलकेऽपि च[12]"[मेदिनीकोशः, दान्तवर्गः, श्लो-४४] इति मेदिनिः। २ शारीणां फलं फलकं **शारिफलम्** । शारयः फलन्त्यत्रेति[13] वा। पुंक्लीबलिङ्गावेतौ । "फलं हेतुसमुत्थे स्यात् फलके व्युष्टिलाभयोः"[विश्वप्रकाशकोशः, लान्तवर्गः, श्लो-२]इति विश्वः[14] । द्वे खेलनाधारचतुरङ्गफलकादेः ॥

## शारः शारिश्च खेलनी ।

१ शार्यते[15] मार्यते **शारः**, पुंस्त्री. । 'शॄ हिंसायाम्' (क्र्या.प.से.), कर्मणि घञ् । २ शृणन्त्येनां **शारिः**, स्त्रीलिङ्गः। 'शॄ हिंसायाम्'(क्र्या.प.से.), इञ् । शाब्दिकास्तु परिणायेन शारीन् हन्तीति पुंस्यप्युदाहरन्ति । ३ खेल्यतेऽनया **खेलनी**। 'खिलृ[16] क्रीडने[17]'(भ्वा.प.से.), करणे ल्युट्, गौरादिः । त्रीणि शारस्य । 'सारि' इति भाषा ॥

## परिणायस्तु शारीणां नयनं स्यात् समन्ततः ॥४८७॥

१ वामदक्षिणयोः शारीणां परितः समन्तान्नयनं **परिणायः** । 'णीञ् प्रापणे'(भ्वा.उ.अ.), 'परिण्यो(परिन्यो)-र्नीणोः-'३।३।३७॥ द्यूते घञ् । एकं 'शारिनुं चलाविवउं[18]' इति भाषायाः ॥४८७॥

१. 'उर्वी तुर्वी दुर्वी धुर्वी हिंसार्थाः' इति स्वामी, भ्वादिः, धातुसं-३७८, पृ.८८॥, 'उर्वी तुर्वी थुर्वी दुर्वी धुर्वी हिंसार्थाः' इति सायणः, भ्वादिः, धातुसं-१५५॥ २. 'वल्लोपः' इति२.३॥ ३. '-णच्' इति३॥ ४. 'क्रीडने' इति३॥ ५. 'नेट्' इति४॥ ६. 'मतुप्' इति ४॥ ७. 'अच्' इति२.४॥ ८. स्वामिसम्मतोऽयं धात्वर्थः, 'व्याप्तौ सङ्घाते च' इति मैत्रेयसायणौ । अत्र ङकारानुबन्धोऽनावश्यकः ॥ ९. ३प्रतौ नास्ति ॥ १०. 'जय्यते' इति१.२.४॥ ११. तुलनीयोऽमरकोषः २।१०।४६॥ १२. 'फलके च' इति२॥ १३. 'फलत्य-' इति२॥ १४. 'विनिश्वः' इति१.२, 'श्विश्वः' इति३॥ १५. 'शर्यते' इति१, 'शीर्यते' इति२॥ १६. 'खिल' इति३.४॥ १७. क्रीडनेऽर्थे खिलृधातुर्न दृश्यते, परं तु क्षीरतरङ्गिण्यादौ चलनेऽर्थे दण्डात्मको 'खेलृ' धातुर्दृश्यते ॥ १८. '-विवुं' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

### समाह्वयः[1] प्राणिद्यूतम्

१ सं सम्यग् हर्षेणाऽऽहूयन्ते जना अत्र **समाह्वयः**। 'ह्वेञ् आह्वाने'(भ्वा.उ.अ.), 'पुंसि संज्ञायाम्'३।३।११८॥ इति घः । प्राणिभिर्मेषकुक्कुटादिभिर्द्यूतं प्राणिद्यूतम्, तस्यैकम् । ''समाह्वयः स्यात् सङ्ग्रामे द्युते पशुपक्षिणोः[1]''[विश्वप्रकाशकोशः, यान्तवर्गः, श्लो-११०]इति महेश्वरः ॥

### व्यालग्राह्याहितुण्डिकः ।

१ व्यालान् सर्पान् गृह्णातीत्येवंशीलो **व्यालग्राही** । 'ग्रह उपादाने'(क्र्या.उ.से.), 'नन्दिग्रहिपचा-'३।१।१३४॥ इत्यादिना णिनिः । २ अहितुण्डेन दीव्यति **आहितुण्डिकः** । 'तेन दीव्यतिखनति-'४।४।२॥ इति ठक् । अहितुण्डिको ह्रस्वादिरपीति शब्दप्रभेदः । ''व्यालग्राहोऽहितुण्डिकः''[[2] ]इत्यमरमाला[3] । अहेस्तुण्डमस्यायत्तत्वेनास्तीति । 'अत इनिठनौ' ५।२।११५॥ इति ठन्, 'ठस्येकः'७।३।५०॥ । द्वे 'गारुडी' इति ख्यातस्य ॥

### स्यान्मनोजवसस्ताततुल्यः

१ मनो जवति प्रविशति **मनोजवसः**[4] । 'जुः' सौत्रो गतौ, अत्रौणादिको[5]ऽसच्प्रत्ययो बाहुलकात् । मनोजेऽभिलाषे वसतीति वा । 'वस निवासे'(भ्वा.प.अ.), अच् । मनो जवतेऽस्मिन् पिताऽयमिति धावति मनोजव इत्यपि । ''जनः पितृसधर्मा यः स ताताऽर्हो मनोजवः''[[6] ]इति व्याडिः । तातेन पित्रा तुल्यः तातत्तुल्यः । एकं तातसदृशस्य ॥

### शास्ता तु देशकः ॥४८८॥

१ शास्ति[7] **शास्ता** । 'शासु[8] अनुशिष्टौ'(अ.प.से.), 'तृन्'३।२।१३५॥, तृच् वा । २ दिशति **देशकः** । 'दिश अतिसर्जने'(तु.प.अ.), ण्वुल् । शासकः शिक्षकश्च । द्वे शास्तुः । 'सीखावणहार' इति भाषा ॥४८८॥

### सुकृती पुण्यवान् धन्यः

१ सुकृतमस्याऽस्ति **सुकृती** ।'अत इनिठनौ'५।२।११५॥इतीनिः। २ पुण्यमस्यास्ति **पुण्यवान्** । 'तदस्यास्ति-' ५।१।९४॥ इति मतुप् '[मादुपधायाश्च] मतोर्वोऽयवादिभ्यः' ८।२।९॥ इति वत्वम् । ३ धनं लब्ध्वा **धन्यः** । 'धनगणं लब्ध्वा'४।४।८४॥ इति यत् । त्रीणि पुण्यवतः ॥

### मित्रयुर्मित्रवत्सलः ।

१ मित्रं स्नेहाद् याति **मित्रयुः** । 'या प्रापणे'(अ.प.अ.), मृगय्वादित्वात् कुः, 'आतो लोपः-'६।४।६४॥ । मित्रेषु वत्सलो मित्रवत्सलः । एकं मित्रवत्सलस्य ॥

### क्षेमङ्करो रिष्टतातिः शिवतातिः शिवङ्करः ॥४८९॥

१ क्षेमं करोति **क्षेमङ्करः**। 'क्षेमप्रियमद्रेऽण्च'३।२।४४॥ इति खच्, खित्त्वाद् मुम् । अणि क्षेमकरोऽपि[9] । ([10]२ रिष्टे क्षेमता भूयादस्य **रिष्टतातिः**) । ३ शिवस्य करः **शिवतातिः** । 'शिवशमरिष्टस्य करे'४।४।१४३॥ तातिल् । ४ शिवं करोति **शिवङ्करः** । खच् । चत्वारि शुभकारिणः ॥४८९॥

### श्रद्धालुरास्तिकः श्राद्धः

१ श्रद्धानशीलः **श्रद्धालुः** । 'स्पृहिगृहि-'३।२।१५८॥इत्यालुच् । २ अस्ति परलोकः, पुण्यं पापं चेति परलोके[11] मतिरस्य **आस्तिकः** । 'अस्तिनास्तिदिष्टं मतिः'४।४।६०॥ इति ठक् । ३ श्रद्धाऽस्त्यस्य **श्राद्धः** । 'प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः'५।२।१०१॥ । ''श्राद्धं निवापे श्राद्धस्तु त्रिषु श्रद्धासमन्विते''[विश्वलोचनकोशः, धान्तवर्गः, श्लो-२२]इति श्रीधरः। स्त्रियां टापि श्राद्धा, गङ्गावत् । त्रीणि श्रद्धावतः ॥

### नास्तिकस्तद्विपर्यये ।

१ नास्ति परलोके मतिरस्य **नास्तिकः** । 'अस्तिनास्तिदिष्टं मतिः'४।४।६०॥ इति ठक् । तस्य आस्तिकस्य, विपर्ययो वैपरीत्यम्, तत्र । एकं श्रद्धारहितस्य ॥

### वैरङ्गिको विरागार्हः

१ नित्यं विरङ्गमर्हति **वैरङ्गिकः**। 'छेदादिभ्यो नित्यम्' ५।१।६४॥ इति तदर्हतीति विषये विरङ्गाट्ठक् । २ विरागमर्हति **विरागार्हः** । 'अर्ह अर्हणे[12]'(भ्वा.प.से.), पचाद्यच् । द्वे 'विरागी' इति ख्यातस्य ॥

---

१. '-पक्षिभिः' इति विश्वप्रकाशकोशे, यान्तवर्गः, श्लो-११०, पृ.१२३॥ २. द्र. टीकासर्वस्वम्, भा-१, १।८।११॥, पृ.१७२॥, पदचन्द्रिका, भा-१, भोगिवर्गः, श्लो-२२५, पृ.२६६॥, रामाश्रमी १।८।११॥, पृ.११६॥ ३. '-मरनाममाला' इति४॥ ४. 'मनोजवः' इति१.२.३॥ ५. 'अ-णा-' इति१, 'अत्रोणा-' इति२, 'उणा-' इति३॥ ६. द्र. स्वोपज्ञटीका ३।४८८॥, पृ.११२॥ ७. इतोऽग्रे ३प्रतौ 'इति' इति दृश्यते ॥ ८. 'शास्' इति३॥ ९. '-करोऽपि' इति१॥ १०. कोष्ठान्तर्गतपाठः १.२.४प्रतिषु न दृश्यते ॥ ११. अनावश्यकोऽयं प्रतिभाति ॥ १२. 'अर्ह पूजायाम्' इति क्षीरतरङ्गिण्यादौ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वीतदम्भस्त्वकल्कनः ॥४९०॥**

१ विशेषेण इतो गतो दम्भः कपटमस्माद् **वीतदम्भः** । २ नास्ति कल्कनं शाठ्यमस्य **अकल्कनः** । द्वे निःकपटस्य ॥४९०॥

**प्रणाय्योऽसम्मतः**

१ प्रणीयते **प्रणाय्यः** । 'णीञ् प्रापणे'(भ्वा.उ.अ.), 'प्रणाय्योऽसम्मतौ'३।१।१२८॥ इति साधुः । २ न सम्मतः **असम्मतः**। द्वे सामान्येन अनभीष्टस्य । 'चोरादि असोहामणा' इति भाषा ॥

**अन्वेष्टाऽनुपदी**

१ अनु पश्चाद् एषति (इष्यति) गच्छति **अन्वेष्टा**। अनुपूर्वः 'इष गतौ'(दि.प.से.), तृच्, 'पुगन्तलघूप-'७।३।-८६॥ इति गुणः । २ अनुपदमन्वेष्टा **अनुपदी** । 'अनुपद्यन्वेष्टा'५।२।९०॥(हैमसू-७।१।१७०॥)इति सूत्रेण अनुपदीति निपात्यते, अन्वेष्टा चेद् भवति । अनुपदिनौ, अनुपदिनः इत्यादि । द्वे 'पागी' इति ख्यातस्य ॥

**अथ सहः क्षमः । शक्तः प्रभूष्णुः**

१ सहते **सहः** । 'षह मर्षणे'(भ्वा.आ.से.), अच्। २ क्षमते **क्षमः** । 'क्षमूष् सहने'(भ्वा.आ.से.), अच् । ३ शक्नोति **शक्तः**। 'शक्लृ शक्तौ'(स्वा.प.अ.), निष्ठा। ४ प्रभवतीत्येवंशीलः **प्रभूष्णुः** । 'ग्लाजिस्थश्च ग्स्नुः'३।२।१३९॥ अत्र सूत्रे 'चाद् भुवश्च' इति वचनाद् ग्स्नुः, 'श्र्युकः किति:'७।४।-११॥ इत्यत्र गकारप्रश्लेषान्नेट् । प्रभविष्णुरपि। चत्वारि समर्थस्य। ''समर्थः अलम्भूष्णुः''[शैषनाममाला ३।१०८॥]शैषिके ॥

**भूतात्तस्त्वाविष्टः**

१ भूतेन आत्तो गृहीतो **भूतात्तः** । २ आविशति संरभते स्म **आविष्टः** । 'विश प्रवेशने'(तु.प.अ.), निष्ठा। ''प्रेतादिभिर्गृहीतो यः स आविष्टो भ्रमन् बहिः''[हारावली, अर्धश्लोकावधिः, श्लो-६६]इति पुरुषोत्तमः। द्वे भूतपीडितस्य॥

**शिथिलः श्लथः ॥४९१॥**

१ श्रन्थते **शिथिलः**। 'श्रथि शैथिल्ये'(भ्वा.आ.से.), 'अजिरशिशिरशिथिलस्थिरस्फिरस्थविरखदिराः'(उणा-५३)इति सूत्रे किरजन्तः साधुः, रलयोरभेदः । २ श्लथयति **श्लथः** । 'श्लथ शैथिल्ये'( ), अच् । द्वे शिथिलस्य ॥४९१॥

**संवाहकोऽङ्गमर्दः स्यात्**

१ संवाहयत्यङ्गानि **संवाहकः** । 'वह प्रपाणे' (भ्वा.उ.अ.), णिजन्तः, ण्वुल् । २ अङ्गानि मर्दयति **अङ्गमर्दः** । 'मृद मर्दने'(भ्वा.आ.से), पचाद्यच् । द्वे 'मर्दनीया' इति ख्यातस्य ॥

**नष्टबीजस्तु निष्कलः ।**

१ नष्टं विलीनं बीजं रेतोऽस्य **नष्टबीजः** । २ निर्गतं कलं रेतोऽस्य **निःकलः** । द्वे गतवीर्यस्य ॥

**आसीन उपविष्टः स्यात्**

१ आस्ते **आसीनः** । 'आस् (आस) उपवेशने' (अ.आ.से.), 'लटः शतृशानचावप्रथमासमानाधिकरणे'३।२।-१२४॥इति शानच्, 'ईदासः'७।२।८३॥इत्याकारस्येकारः। २ उपविशति स्म **उपविष्टः** । 'विश प्रवेशने'(तु.प.अ.), क्तः। द्वे उपविष्टस्य । 'बइठा' इति भाषा ॥

**ऊर्ध्व ऊर्ध्वन्दमः स्थितः ॥४९२॥**

१ ऊर्दते परिमाति क्रीडति वा **ऊर्ध्वः** । 'ऊर्दङ् (उर्द) माने क्रीडायां च'(भ्वा.आ.से.) 'उर्देर्ध च'(हैमाणा-५०७)इति वः । २ ऊर्ध्वं दाम्यति **ऊर्ध्वन्दमः**। 'दम (दमु) उपशमे'(दि.प.से.), अच् । 'ऊर्ध्वम्' इति मान्तमव्ययम् । ३ तिष्ठति स्म कार्याय **स्थितः** । 'ष्ठा गतिनिवृत्तौ'(भ्वा.-प.अ.), निष्ठा, 'स्थाघ्वोरिच्च'१।२।१७॥ । त्रीणि 'ऊभा' इति ख्यातस्य ॥४९२॥

**अध्वनीनोऽध्वगोऽध्वन्यः पान्थः पथिकदेशिकौ । प्रवासी**

१ अध्वानमलं गच्छति **अध्वनीनः** । 'अध्वनो यत्खौ'५।२।१६॥इति खः, 'आयनेयी-'७।१।२॥इति खस्येनादेशः, 'ये चाभावकर्मणोः'६।४।१६८॥इति प्रकृतिभावान्न टिलोपः । २ अध्वानं गच्छति **अध्वगः** । 'अन्तात्यन्ताध्वदूरपारसर्वानन्तेषु डः'३।२।४८॥ । ३ अध्वानमलं गच्छति

---

१. 'प्राणा-' इति ४॥ २. 'चौरादि' इति१.२॥ ३. 'पगी' इति१.२॥ ४. 'क्षमन्ते' इति १॥ ५. 'संरभते' इति ३॥ ६. 'श्रथ श्लथ क्लथ क्रथ हिंसार्थाः' इत्यत्र श्लथधातुर्मैत्रेयेणैवोक्तत्वाद् हिंसार्थकः ॥ ७. 'बेठा' इति ३॥ ८. 'ऊ-' इति१.४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अध्वन्यः** । 'अध्वनो यत्खौ'५।२।१६॥ इति यत् । ४ पन्थानं नित्यं गच्छति **पान्थः** । 'पथोऽण्(पन्थो ण) नित्यम्'[१]५।१।७६॥ इत्यण् पन्थादेशश्च। स्त्रियां पान्था । ५ पन्थानं याति **पथिकः**। 'पथष्टन्(पथः ष्कन्)'५।१।७५॥ । स्त्रियां पथकी । अदूरविप्रकर्षादनयोः पर्यायत्वम् । ६ देशो देशान्तरमस्त्यस्य **देशिकः**[२]। ७ प्रवसनशीलः **प्रवासी** । 'वस निवासे'(भ्वा.प.अ.), 'सुप्यजातौ-'३।२।७८॥ इति णिनिः । प्रवसति वा प्रवासी । 'प्रेलप-'३।२।१४५॥ इति घिनुण् वा । सप्त पान्थस्य । 'वटाऊ'[३] इति भाषा ॥

**तद्गणो हारिः**

१ तेषां पथिकानां गणः तद्गणः । हार्यन्ते प्राप्यन्तेऽनया **हारिः**, स्त्रीलिङ्गः । 'हृञ् हरणे'(भ्वा.उ.अ.), 'इन् सर्वधातुभ्यः'[४](उणा-५५७) । एकं पथिकौघस्य ॥

**पाथेयं शम्बलं समे ॥४९३॥**

१ पथि मार्गे साधु **पाथेयम्** । 'पथ्यतिथि-'४।४।१०४॥ इत्यादिना ढञ् । २ शाम्यति क्षुदनेन **शम्बलम्**[५], पुंक्ली. । 'शमु उपशमे'(दि.प.से.), [६]कम्बलादित्वात् कलचि साधु । द्वे शम्बलस्य ॥४९३॥

**जङ्घालोऽतिजवः[७]**

१ जङ्घे स्तोऽस्य **जङ्घालः** । सिध्मादित्वाल्लच्, 'प्राणिस्थातो लजन्यतरस्याम्'५।२।९६॥ वा। २ अतिशायी जवोऽस्त्यस्य **अतिजवः** । द्वे 'उतावलु[८] चालइ[९]' इत्यस्य[१०] ॥

**जङ्घाकरिको जाङ्घिकः**

१ जङ्घा एव करो राजदेयभागोऽस्य **जङ्घाकरिकः**[११]। 'अत इनिठनौ'५।२।११५॥, जङ्घेव करी हस्ती यस्येति केचित्। २ जङ्घाभ्यां जीवति **जाङ्घिकः** । 'वेतनादिभ्यो जीवति'४।४।१२॥इति ठक्, 'ठस्येकः'७।३।५०॥, 'किति च'७।२।११८॥इति वृद्धिः । द्वे 'कासीद' इति ख्यातस्य ॥

**जवी । जवनस्त्वरिते**

१ जवोऽस्त्यस्य **जवी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः । २ जवति गच्छति **जवनः** । जुः सौत्रः, 'जुचङ्क्रम्य-'३।२।१५०॥ इति युच् । ३ त्वरते **त्वरितः** । 'ञित्वरा संभ्रमे'(भ्वा.आ.से.), 'ञीतः क्तः'३।२।१८७॥ इति वर्तमाने क्तः, तत्र । त्रीणि वेगवतः ॥

**वेगे रयो रंहस्तरः स्यदः ॥४९४॥**
**जवो वाजः प्रसरश्च**

१ अजति गच्छत्यनेनेति **वेगः** । 'अज गतौ क्षेपणे च'(भ्वा.प.से.), 'गन्गम्याद्योः'[१२](उणा-१२०)इति गन्, 'अजेर्व्यघञपोः'३।४।५६॥ इत्यजेः वीभावः, 'सार्वधातुकार्धधातुकयोः'७।३।८४॥ इति गुणः। विजतेऽनेनेति वा। 'ओविजी[१३] भयचलनयोः'(तु.आ.से.), 'पुंसि संज्ञायां[१४] घः-'३।३।११८॥, तत्र । २ रीयते गच्छत्यनेन **रयः** । 'री गतौ'(क्र्या.प.अ.), अच् । [१५]रीणात्यनेनेति वा । 'री गतिरेषणयोः'(क्र्या.प.अ.), 'एरच्'३।३।५६॥ । ३ रंहते (रंहति) गच्छत्यनेनेति **रंहः**, क्लीबे । 'रहि गतौ'(भ्वा.प.से.), '-असुन्'(उणा-६२८)। रमतेऽनेनेति वा । 'रमेर्हुक् च'[१६](उणा-६५३)इत्यसुन्, हुक् चागम इति वा । ४ तरत्यनेन **तरः**, क्लीबे । 'तॄ प्लवनतरणयोः'(भ्वा.प.से.), '-असुन्'(उणा-६२८) । ५ स्यन्दनं **स्यदः**[१७] । 'स्यदि किञ्चिच्चलने[१८]'( ), 'स्यदो जवे'६।४।२८॥ निपातोऽयं वेगे, दन्त्यान्तस्थाद्यादिः ॥४९४॥ ६ जवनं **जवः**। 'जुङ् गतौ[१९]'(भ्वा.आ.अ.), 'ऋदोरप्'३।३।५७॥ इत्यप् । ७ वजन्त्यनेन **वाजः**। 'वज गतौ'(भ्वा.प.से.), घञ्। ८ प्रसरणं **प्रसरः**। 'सृ गतौ'(भ्वा.प.अ.), बाहुलकादप् । अष्टौ वेगस्य॥

**मन्दगामी तु मन्थरः[२०] ।**

१ मन्दं गच्छति इत्येवंशीलो **मन्दगामी** । 'गम्लृ गतौ'(भ्वा.प.अ.), 'सुप्यजातौ-'३।२।७८॥ इति णिनिः । २ मथ्नाति पादौ **मन्थरः**। 'मन्थ विलोडने'(क्र्या.प.से), बाहुलकाद् 'अर्तिकमिभ्रमि-'(उणा-४१२)इत्यरन् । द्वे मन्दगामिनः। 'हलूइ चालइ[२१]' इति भाषा ॥

---

१. सूत्रस्य णप्रत्ययविधायकत्वादत्र णप्रत्ययो युक्तः ॥ २. 'देशि-' इति१.२॥ ३. 'वटाउ' इति ३॥ ४. 'सर्वधातुभ्य इन्' इत्युणादिगणे ॥ ५. 'शम्बलः' इति१॥ ६. 'शमिकमि-'(हैमोणा-४९९)इति बलः'' इति १प्रतौ बहिर्भागे टिप्पणी ॥ ७. तुलनीयोऽमरकोषः २।८।७३॥ ८. '-वलो' इति३, '-वलौ' इति४॥ ९. 'चलाइ' इति ३॥ १०. 'तस्य' इति १.२॥ ११. '-कारिकः' इति २.३॥ १२. '-म्यद्योः' इत्युणादिगणे ॥ १३. 'विजी' इति१.२.३॥ १४. इतोऽग्रे १प्रतौ 'इति' इति दृश्यते ॥ १५. 'रीणो-' इति१.२॥ १६. 'रमेश्च' इत्येवोणादिगणे ॥ १७. 'स्यन्दः' इति१.२, 'स्यन्दनः' इति ३॥ १८. 'स्यन्दू स्रवणे' इति स्वामिमैत्रेयौ, '-प्रस्रवणे' इति सायणः ॥ १९. नन्दीसम्मतोऽयम्, द्र. क्षीरतरङ्गिणी, धातुसं-६८२, पृ.१५३॥ २०. तुलनीयोऽमरकोषः २।८।७२॥ २१. 'हलूयइ चाले' इति३, 'हलूवइ चालै' इति४॥

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

**कामंगाम्यनुकामीनः**

१ कामं यथेष्टं गच्छतीत्येवंशीलः **कामंगामी** । 'सुप्यजातौ-'३।२।७८॥ इति णिनिः । २ काममिति मान्तमव्ययम्, काममज्ञानम्, कामसदृशम् अनुकामम् । यथार्थेऽव्ययीभावः, ततः 'अवारपारात्यन्तानुकामं गमी'५।२।११॥ इति खः, खस्य ईनः [अनुकामीनः] । द्वे स्वेच्छाचारिणः ॥

**अत्यन्तीनोऽत्यन्तगामिनि ॥४९५॥**

१ अत्यतिगामिसमुच्चये, अन्तस्यात्ययो विक्रमोऽव्ययीभावसमासः । अन्तमतिक्रान्तं वेति प्रादिसमासः । २ अत्यन्तं भृशं गामी **अत्यन्तीनः** । 'अवारपारात्यन्तानुकामं गमी'५।२।११॥इति खः। द्वे अत्यन्तगामिनः । 'घणुं चालई'[3] इति भाषा ॥४९५॥

**सहायोऽभिचरोऽनोश्च जीविगामिचरप्लवाः ।**
**सेवकः**

१ सह अयते **सहायः** । 'अय गतौ'(भ्वा.आ.से.), अच् । २ अभीत्याभिमुख्यार्थेऽव्ययम् । आभिमुख्येन चरति **अभिचरः** । 'चर गतौ'(भ्वा.प.से.), अच् । ३-६ अनूपसर्गात् पुरो जीविगामिचरप्लवा योज्यन्ते । अनु पश्चाज्जीवति **अनुजीवी** । 'जीव प्राणधारणे'(भ्वा.प.से.), ग्रहादित्वाण्णिनिः। अनुगच्छतीति **अनुगामी** । ग्रहादित्वाण्णिनिः । **अनुचरः** । **अनुप्लवः** । ['चर गतौ'(भ्वा.प.से.)], 'प्लुङ् गतौ'(भ्वा.आ.अ.), अच्। ७ सेवति (सेवते) **सेवकः**। 'षिवु[3] सेवायाम्'(भ्वा.आ.से.), ण्वुल् । सप्त सेवकस्य ॥

**अथ सेवा भक्तिः परिचर्य्या प्रसादना ॥४९६॥**
**शुश्रूषाराधनोपास्तिवरिवस्यापरीष्टयः ।**
**उपचारः**

१ सेवनं **सेवा** । 'षिवु सेवायाम्[4]'(भ्वा.आ.से.), भावे घञ् । २ भजनं **भक्तिः**। 'भज सेवायाम्'(भ्वा.उ.अ.), 'स्त्रियां क्तिन्'३।३।९४॥ । ३ परिचरणं **परिचर्या**। 'चर गतौ' (भ्वा.प.से.), 'परिचर्यापरिसर्यामृगयाटाट्या-'(वा-३।३।१०१॥)इति साधुः, परिपूर्वश्चरिः सेवार्थः। ४ प्रसाद्यते **प्रसादना** । 'षद्लृ विशरणादौ'(तु.प.अ.), णिजन्तः, करणे ल्युट् ॥४९६॥ ५ शुश्रूषणं **शुश्रूषा** । 'अ:(अ) प्रत्ययात्'३।३।१०२॥ इत्यकारप्रत्ययः । ६ आराधनम् **आराधना** । 'राध[5] साध संसिद्धौ[6]'(स्वा.प.अ.), ल्युट्। ७ उपासनम् **उपास्तिः**। उपपूर्वः 'असु क्षेपणे'(दि.प.से.), 'स्त्रियां क्तिन्'३।३।९४॥। उपासनाऽपि। ८ वरिवःकरणं **वरिवस्या**। वरिवस्शब्दात् पूजार्थाद् 'नमोवरिवश्चित्रङः[7] क्यच्'३।१।१९॥ इति क्यच्, टाप्। ९ पर्येषणं **परीष्टिः** । 'इषु इच्छायाम्'(तु.प.से.), 'स्त्रियां क्तिन्'३।३।९४॥ । पर्येषणाऽपि । अमरस्तु-"पर्येषणा परीष्टिश्च"[अमरकोषः २।७।३२॥]इति भेदमाह। श्राद्धे द्विजशुश्रूषणमिति तट्टीका । १० उपचरणम् **उपचारः**। 'चर गतौ' (भ्वा.प.से.), भावे घञ् । दश सेवायाः ॥

**पदातिस्तु पत्तिः पद्गः पदातिकः ॥४९७॥**
**पादातिकः पादचारी पदाजिपदिकावपि ।**

१ पादाभ्यामतति गच्छति **पदातिः** । 'अत सातत्यगमने'(भ्वा.प.अ.), 'इञजादिभ्यः[8]'(वा-३।३।१०८॥)इतीञ्, ञित्त्वाद् 'अत उपधायाः'७।२।११६॥ वृद्धिः, 'पादस्य पदाज्यातिगेपहतेषु (पदाज्यातिगोपहतेषु)'६।३।५२॥ इति वा पदादेशः[9] । २ पद्यते गच्छति, पतति वा **पत्तिः**। 'पद गतौ'(दि.आ.अ.), 'पत्लृ पतने'(भ्वा.प.से.)अतो वा, 'क्तिच्क्तौ च संज्ञायाम्'३।३।१७४॥ इति क्तिच्, बाहुलकाद् 'दृवशिभ्यां क्तिन् वा'(चान्द्रोणा-१।८४॥)इति क्तिन् वा । ३ पदाभ्यां गच्छति **पद्गः**। 'गम्लृ गतौ'(भ्वा.प.अ.), 'अन्येभ्योऽपि-'(वा-३।२।१०१॥)इति डः, 'पादस्य पदाज्यति(पदाज्याति)-'६।३।५२॥ इति पदादेशः। ४-५ [10]पादाभ्यामतति **पदातिकः** ॥४९७॥ पदातिरेव **पादातिकः**[11] । 'विनयादिभ्यष्ठक्'५।४।३४॥ इति ठक्। पादातेः स्वार्थे कन् वा । [६ पादाभ्यां चरति **पादचारी**]। ७ पादाभ्यामजति गच्छति **पदाजिः** । 'अज गतौ क्षेपणे च' (भ्वा.प.से.),'इञजादिभ्यः'(वा-३।३।१०८॥)इतीञ्[12],'पादस्य पदाज्य(पदाज्या)तिगोप-'६।३।५२॥इति पदादेशः, अस्मादेव निपातनान्न वीभावः । ८ पादाभ्यां चरति **पदिकः** । 'पर्पादिभ्यष्ठन्[13]'४।४।१०॥ इति ठन् (ष्टन्), 'पर्पादिभ्यष्ठन्'४।४।१०॥

---

१. तुलनीयोऽमरकोषः २।८।७६॥ २. 'घणौ चालै' इति४, 'चाले' इति३॥ ३. 'सिवु इति१.२.३, अत्र 'षेवृ सेवने' इति युक्तः ॥ ४. 'षेवृ सेवने' इति युक्तः ॥ ५. ३प्रतौ नास्ति ॥ ६. मैत्रेयसायणसम्मतोऽयं धातुपाठः, 'राध षाध-' इति स्वामी ॥ ७. '-त्रङ्' इति३.४॥ ८. 'इणजादिभ्यः' इति वार्त्तिकस्वरूपं दृश्यते ॥ ९. १प्रतौ नास्ति ॥ १०. 'पदा-' इति१.३॥ ११. इतोऽग्रे ३प्रतौ 'पादचारी' इति दृश्यते ॥ १२. 'इतीन्' इति३॥ १३. 'पदादिभ्यष्टन्' इति३, '-भ्यः ष्टन्' इत्यष्टाध्याय्याम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यत्र 'पादः पद् च्छ च'[1](गणसू-४।४।१०॥)इति पादाद्बुनि पद्भावः । पादाविकोऽपि । 'अव रक्षणादौ'(भ्वा.प.से.), 'इण्भीकापाशल्यतिमर्चिभ्यः कन्'(उणा-३२३)इक् चागमः पादाविकः । अवनमावः रक्षणम् । पादेनावः पादावः, ततः 'तत्र नियुक्तः'४।४।६९॥ इति ठन् । मूलविभुजादित्वात् के पादातोऽपि । ''पदातिपत्ति[ पादात ]पादाविकपदातयः(-जयः)'' [[2] ]इत्यमरमाला । पादसमानार्थः पच्छब्दोऽप्यत्रास्ति । अष्टौ 'पालिहार'[3] इति ख्यातस्य । [ शेषश्चात्र-''पादातपदगौ समौ'' [शेषनाममाला ३।१०॥] ]॥

## सरः पुरोऽग्रतोऽग्रेभ्यः पुरस्तो गमगामिगाः ॥४९८॥ प्रष्ठः

१-३ पुरःप्रभृतिभ्यस्त्रिभ्यः पुरः सरः शब्दो योज्यते, तेन पुरोऽग्रे सरति **पुरस्सरः** । एवं **अग्रतःसरः, अग्रेसरः** । 'सृ गतौ'(भ्वा.प.अ.), त्रिष्वपि अच् । अग्रेसर इत्यत्र 'तत्पुरुषे कृति-'६।३।१४॥ इति सप्तम्या अलुक् । अत्र न्यासे आत्रेये च ''अग्रे इत्येकारान्तत्वं निपातनात्''[ ]इत्युक्तम् । ''अग्रे सरति अग्रेण वा सरति इत्यादावपि एकारान्तत्वं फलम्''[ ]इति च । एवं च[4] ''सवरुणावरुणाग्रसरं रुचा'' [ ] । ''आयोधनाग्रसरतां त्वयि वीर याते''[ ]इत्यादयः प्रयोगाश्चिन्त्याः स्युः । ४-६ पुरस्तः पुरःशब्दाद् गमादयः त्रयो योज्यन्ते, पुरो गच्छति **पुरोगमः** । 'गमश्च'३।२।४७॥ इति खच् । पुरो गच्छति **पुरोगामी** । ग्रहादित्वाण्णिनिः । पुरो गच्छति **पुरोगः** । 'गम्लृ गतौ'(भ्वा.प.अ.), डप्रत्ययः ॥४९८॥ ७ प्रतिष्ठते **प्रष्ठः** । 'ष्ठा गतिनिवृत्तौ'(भ्वा.प.अ.), 'सुपि स्थः' ३।२।४॥ इति कः, 'आतो लोपः-'६।४।६४॥, 'प्रष्ठोऽग्रगामि-'८।३।९२॥ इति षत्वम् । सप्त अग्रेसरस्य ॥

## अथावेशिकागन्तू प्राघुणोऽभ्यागतोऽतिथिः । प्राघूर्णके

१ आवेशनमावेशोऽन्तःप्रापणम्, तदर्हति **आवे-शिकः** । 'अ(आ)र्हादगोपुच्छ-'५।१।१९॥ इति ठक् । विश्रमाद्यर्थमाविश्यते स्थीयतेऽत्रेति आवेशः । 'विश प्रवेशने' (तु.प.अ.), अधिकरणे घः, 'तदस्य प्रयोजनम्'५।१।१०९॥ इति ठक् वा । आवेशे(अवेशे) अप्रतिवेशे भव आवेशिक इति वा । ''नैकग्रामीणमतिथिं विप्रं साङ्गतिकं तथा''[ मनुस्मृतिः, अध्या-३, श्लो-१०३ ]इति स्मृतेः । अध्यात्मादित्वाट्ठक् । २ आगच्छतीति **आगन्तुः** । 'गम्लृ गतौ'(भ्वा.प.अ.), 'सितनिगमि-'(उणा-६९)इति तुन् । ३ प्राघुणति[8] भ्रमति **प्राघुणः**[9] । 'घुण भ्रमणे'(तु.प.से.), तौदादिकः, 'इगुपध-' ३।१।१३५॥ इति कः, 'अन्येषामपि दृश्यते'६।३।१३७॥ इति दीर्घत्वम्[10] । ४ अभ्यागच्छति अभ्यागम्यते स्म वा **अभ्यागतः** । अभ्याङ्पूर्वो 'गम्लृ गतौ'(भ्वा.प.अ.), निष्ठा, 'अनुदात्तोपदेश-'६।४।३७॥ इति म्लोपः । ५ अतति सततं गच्छति **अतिथिः**, पुंसि । यदमरः-''अतिथिर्ना''[ अमरकोषः २।७।३४॥] । 'अत सातत्यगमने'(भ्वा.प.से.), 'ऋतनि-'(उणा-४४२)इति अतेरिथिन्[11], पृषोदरादिर्वा । ''प्राघुणस्त्वतिथिर्द्वयोः''[ त्रिकाण्डशेषः २।७।९॥]इति त्रिकाण्डशेषात् स्त्रियामतिथिरतिथी च । क्लीबे तु अतिथि[12] ।

''तिथिपर्वोत्सवाः सर्वे त्यक्ता येन महात्मना ।
अतिथिं तं विजानीयाच्छेषमभ्यागतं विदुः ॥१॥''

[[13] ]इति भेदोऽत्र नाश्रितः । आतिथ्योऽपि । ६ प्राघूर्णते **प्राघूर्णकः** । 'घूर्ण घूर्णने'[14](भ्वा.आ.से.), ण्वुल्, तत्र । षडतिथेः । 'पाहुणा' इति भाषा ॥

## अथावेशिकमातिथ्यं चातिथेय्यपि ॥४९९॥

१ अवेशेऽप्रतिवेशे भवम् **आवेशिकम्** । अध्यात्मादित्वाट्ठक् । २ अतिथ्यर्थे वस्तुनि भवम्, अतिथये इदं वा **आतिथ्यम्** । 'अतिथेर्ञ्यः'५।४।२६॥ । ३ अतिथौ साधुः **आतिथेयी**, स्त्रीक्लीबयोः, 'पथ्यतिथिवसतिस्वपतेर्(ढञ्)'४।४।-१०४॥ ढञि, 'आयनेयी-'७।१।२॥ इत्येयादेशः, 'टिड्ढाणञ्-' ४।१।१५॥ इति ङीष्(ङीप्) । त्रीण्यतिथिसत्कारस्य ॥४९९॥

## सूर्योढस्तु स संप्राप्तो यः सूर्येऽस्तंगतेऽतिथिः ।

१ सूर्यप्रकाशव्याप्तः कालोऽपि सूर्यः, तमूढवान् **सूर्योढः** । 'वह प्रपणे'(भ्वा.उ.अ.), निष्ठा, 'हो ढः'८।२।३१॥, 'झषस्तथोः-'८।२।४०॥ इति धत्वम्, ष्टुत्वम्, 'ढो ढे लोपः'८।३।१३॥ । योऽतिथिः प्राघूर्णकः सूर्येऽस्तंगते सङ्गते संप्राप्तः, तस्यैकम् ॥

---

१. 'पादः पच्च' इति गणसूत्रस्वरूपं दृश्यते ॥ २. द्र. पदचन्द्रिका, भा-२, क्षत्रवर्गः, श्लो-५२०, पृ.६०६॥, रामाश्रमी २।८।६७॥, पृ.३७६॥ ३. '-यार' इति२॥ ४. 'न' इति३॥ ५. द्र माधवीयधातुवृत्तिः, भ्वादिः, धातुसं-६५६, पृ.२५६॥ ६. 'प्राघूर्णो-' इति३, 'प्राघुणो-' इति१.२.४॥ ७. '-शक' इति३॥ ८. 'प्राधुर्णति' इति३॥ ९. 'प्राघुर्णः' इति३॥ १०. अत्र दीर्घत्वं विचारणीयम् ॥ ११. 'अथि-' इति३॥ १२. '-थिः' इति३॥ १३. द्र. स्वोपज्ञटीका ३।४९९॥, पृ.११४॥, अम. क्षीरस्वामिटीका २।७।३४॥, पृ.१७०॥, अम. क्षीरस्वामिटीकायां ''अतिथिः स हि विज्ञेयः शेषः प्राघूर्णिकः स्मृतः'' इत्युत्तरार्धो दृश्यते ॥ १४. क्षीरतरङ्गिण्यादौ भ्रमणेऽर्थे दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**पादार्थं पाद्यम्**

१ वारीति पदमुत्तरतः सम्बध्यते, पादार्थं जलं **पाद्यम्** । 'पादार्घाभ्यां च'५।४।२५॥ इति यत्, 'यस्येति च' ६।४।१४८॥ । पादार्थं पादाय चरणाय वारीत्यन्वयः । एकं पादार्थजलस्य ॥

**अर्घार्थमर्घ्यं वारि**

१ अर्घार्थं पूजाविधये वारि जलम् **अर्घ्यम्** । 'पादार्घाभ्यां च'५।४।२५॥ इति यत् । ''अर्घः पूजाविधौ मूल्येऽघं दुःखे व्यसनैनसोः''[अनेकार्थसङ्ग्रहः २।५१॥] इत्येनकार्थः । एकं पूजार्घजलस्य ॥

**अथ गौरवम् ॥५००॥**

**अभ्युत्थानम्**

१ गुरोर्भावो **गौरवम्** । 'इगन्ताच्च लघुपूर्वात्'५।१।-१३१॥ इत्यण् ॥५००॥ २ अभिमुखमुत्थीयते **अभ्युत्थानम्** । 'ष्ठा गतिनिवृत्तौ'(भ्वा.प.अ.), उद्पूर्वः, ल्युट्, 'उदःस्थास्तम्भोः पूर्वस्य'८।४।६१॥ इति पूर्वसवर्णः । द्वेऽभ्युत्थानस्य । 'साहमुं ऊठिवुं'[1] इति भाषा ॥

**व्यथकस्तु स्यान्मर्मस्पृगरुन्तुदः ।**

१ व्यथयति **व्यथकः** । 'व्यथ दुःखसञ्चलनयोः'[2] (भ्वा.आ.से.), क्वुन् । २ मर्माणि स्पृशति **मर्मस्पृक्** । 'स्पृश संस्पर्शने'(तु.प.अ.), 'स्पृशोऽनुदके क्विन्'३।२।५८॥ 'क्विन्प्रत्ययस्य कुः' । ३ 'ऋ गतौ'(तु.प.अ.), 'अर्ति[पृ]वपि-[यजितनिधनि]तपि-'(उणा-२७४)इत्यादिना उसिप्रत्यये[3] अरुः। अरुस्तुदति **अरुन्तुदः**। 'तुद व्यथने'(तु.उ.अ.), 'विध्वरुषोस्तुदः'३।२।३५॥ इति खश्, 'अरुर्द्विषदजन्तस्य' ६।३।६७॥ इति मुम्, 'संयोगान्तस्य लोपः'८।२।२३॥ इत्यरुषसकारलोपः । ''अरुन्तुदः स्याद् व्यथकः''[हलायुधकोशः २।३७१॥]इति हलायुधः। ''मर्मपीडके द्वौ''[ ]इति तट्टीका। त्रीणि मर्मकथकस्य ॥

**ग्रामेयके तु ग्रामीणग्राम्यौ**

१ ग्रामे भवो **ग्रामेयकः** । 'कर्त्रा(कर्त्र्या)दिभ्यो ढकञ्'४।२।९५॥, ढस्यैयादेशः, 'तद्धितेष्वचामादेः'७।२।११७॥ इति वृद्धिः, तत्र । २-३ ग्रामे भवः, ग्रामे जातो ग्रामादागतो वा[4] **ग्रामीणः** । एवं **ग्राम्यः** । 'ग्रामाद्यखञौ शेषे'[5]४।२।९४॥ इति खञ्यौ। ग्रामीन इति तुर्यवर्गपञ्चमान्तोऽपि । यन्महेश्वरो नान्तवर्गे-''ग्रामीनो ग्रामसम्भूते ग्रामीनो मुनिवायसे[6]''[विश्वप्रकाशकोशः, नान्तवर्गः, श्लो-९७]इति । त्रीणि ग्रामीणस्य॥

**लोको जनः प्रजा ॥५०१॥**

१ लोकते पश्यति व्यवहारमिति **लोकः** । 'लोकृ दर्शने'(भ्वा.आ.से.), अच् । लोक्यते वा । घञ् । २ जायतेऽसौ **जनः**। 'जनी प्रादुर्भावे'(दि.आ.से.), भावे कर्मणि घञ्[7], 'जनिवध्योश्च'७।३।३५॥ इति वृद्धिनिषेधः, अच् वा । ३ प्रजायते **प्रजा** । 'अन्येभ्योऽपि-'(वा-३।२।१०१॥)इति डः। त्रीणि लोकस्य ॥५०१॥

**स्यादामुष्यायणोऽमुष्यपुत्रः प्रख्यातवप्तृकः ।**

१ अमुष्यापत्यम् **आमुष्यायणः**। 'नडादिभ्यः फक्' ४।१।९९॥, फस्याऽऽयनादेशः, 'षष्ठ्या अलुक् वाच्यः'[8]( )। २ **अमुष्यपुत्रः** । ३ प्रख्यातो वप्ता पिताऽस्य **प्रख्यातवप्तृकः**। 'नद्यृतश्च'५।४।१५३॥ इति कप्। ''प्रख्यातपितुरुत्पन्न आमुष्यायण इष्यते''[हलायुधकोशः२।३९५॥]इति हलायुधः । ''तपोविद्यादिना प्रसिद्धात् पितुर्जाति आमुष्यायणः''[ ]इति तट्टीका । त्रीणि प्रसिद्धपितुः सुतस्य ॥

**कुल्यः कुलीनोऽभिजातः कौलेयकमहाकुलौ ॥५०२॥**

**जात्यः**

१-४ कुलस्यापत्यं **कुल्यः, कौलेयकः** । 'अपूर्वपदादन्यतरस्यां यड्ढकञौ'४।१।१४०॥ इति यत्-ढकञौ । २ कुलस्यापत्यं **कुलीनः** । 'कुलात् खः'४।१।१३९॥, 'आयनेयी-'७।१।२॥ इति खस्येनादेशः । ३ अभिजायते स्म **अभिजातः** । 'जनी प्रादुर्भावे'(दि.आ.से.), निष्ठा, 'अनुनासिकस्य-'६।४।१५॥इति दीर्घः । अभिजोऽपि । ५ महत् कुलमस्य **महाकुलः** । 'महाकुलादञ्खञौ'४।१।१४१॥ इत्यञि माहाकुलीनो दीर्घादिरपि ॥५०२॥ ([9]६ जातौ साधुः **जात्यः**) । षट् कुलीनस्य ॥

---

१. 'ऊठिवूं' इति४॥ २. 'भयचलनयोः' इति स्वामिमैत्रेयौ, 'भयसञ्चलनयोः' इति सायणः, 'दुःखचलनयोरिति दुर्गः' इति क्षीरतरङ्गिणी, भ्वादिः, धातुसं-५११, पृ.११०॥ ३. 'उस्प्र-' इति३॥ ४. 'ग्रामादागतो वा' २प्रतौ नास्ति ॥ ५. 'शेषे' इत्यष्टाध्याय्यां नास्ति ॥ ६. 'शुनिवायसे' इति विश्वप्रकाशकोशे ॥ ७. 'घञ् कर्मणि' इति१॥ ८. इदं विचारणीयम्, 'आमुष्यायणाऽऽमुष्यपुत्रिकाकुलिकेति च' इति वार्तिकस्य सत्त्वात् ॥ ९. कोष्ठान्तर्गतपाठः १.३.४प्रतिषु नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**गोत्रं तु सन्तानोऽन्ववायोऽभिजनः कुलम् ।**
**अन्वयो जननं वंशः**

१ गवते शब्दायति पूर्वपुरुषान्, गूयते[1] शब्द्यते वा **गोत्रम्**। 'गुङ् शब्दे'(भ्वा.आ.अ.), 'गृधृवी-'(उणा-६०६)इति त्रन् । २ संतन्यतेऽनेन **सन्तानः** । 'तनु विस्तारे'(त.उ.से.), करणे घञ् । सन्ततिश्च, कर्मणि क्तिनि । ३ अनु अवेति **अन्ववायः** । 'इण् गतौ'(अ.प.अ.), अच्, 'सार्वधातुकार्धधातुकयोः'७।३।८४॥ इति गुणः, 'अकः सवर्णे दीर्घः'६।१।१०१॥ । ४ अभिजायन्तेऽत्र **अभिजनः** । 'जनी प्रादुर्भावे' (दि.आ.से.), 'हलश्च'३।३।१२१॥ इति घञ्, 'जनिवध्योश्च' ७।३।३५॥ इति वृद्ध्यभावः । ५ कोलति संस्त्यायति[2] संहतीभवति **कुलम्** । 'कुल संस्त्याने बन्धुषु च'(भ्वा.प.से.), ''संस्त्यानं संघातः''[क्षीरतरङ्गिणी, भ्वादिः, धातुसं-५७९]इति स्वामी । क्वचित्तु सन्ताने इति पठ्यते । सन्तानो विजातीयैरनवच्छिन्नप्रवाहः । बन्धुशब्देन तद्व्यापारः सम्बन्धोऽभिधीयते। 'इगुपध-'३।१।१३५॥ इति कः। ६ अनुयन्ति[3] परस्परं सम्बन्धं गच्छन्त्यत्रेति[4] **अन्वयः** । अनुपूर्वः 'इण् गतौ'(अ.प.अ.), अधिकरणे 'एरच्'३।३।५६॥ । ७ जायन्ते उत्पद्यन्तेऽत्रेति **जननम्** । 'जनी प्रादुर्भावे'(दि.आ.से.), अधिकरणे ल्युट्। ८ वमति उद्गिरति पूर्वपुरुषानिति **वंशः**। 'टुवमं[5] उद्गिरणे'(भ्वा.-प.से.), 'भृवमिकुभ्यः शक्'(चान्द्रोणा-३।५५॥), तालव्यः, 'देशवंशमशकेशपाशकाः'[[6]]इति शभेदात् । अष्टौ कुलस्य ॥

**स्त्री नारी वनिता वधूः ॥५०३॥**
**वशा सीमन्तिनी वामा वर्णिनी महिलाऽबला।**
**योषा योषित्**

१ स्त्यायति पिण्डीभवति पुंसा सह, संहतः कठिनो[7] भवति गर्भोऽस्यां वा **स्त्री** । 'स्त्यै ष्ट्यै शब्दसङ्घातयोः' (भ्वा.प.अ.), 'स्त्यायतेः स्त्रीत्वे ड्रट्[8]'(उणा-६०५)टिलोपः, 'लोपोव्योर्वलि'६।१।६६॥ इति यलोपः, टित्त्वात् 'टिड्ढाणञ्-' ४।१।१५॥ इति ङीष्(ङीप्) । २ नुः नरस्य वा धर्म आचारोऽस्यां नारी। 'नृनरयोर्वृद्धिश्च'(गणसू-४।१।७३॥)इति शार्ङ्गरवादिपाठाद् ङीप्(ङीन्)। 'नृनराभ्यां च'(वा-४।४।४९॥) इत्यञ् वा, 'टिड्ढाणञ्-'४।१।१५॥ इति ङीप्[9] । नुः नरस्य वेयम्, 'तस्येदम्-'४।३।१२०॥ इत्यणि नारीति वा। ३ वनति सम्यग् भजते, वन्यते वा **वनिता**। 'वन षण संभक्तौ' (भ्वा.प.से.), 'रुहेश्च लो वा'( )इति इतच्। ४ बध्नात्यावेष्टयति स्नेहपाशेनेति **वधूः** । 'बन्ध बन्धने'(क्र्या.प.अ.), 'चमितनिबधिभ्य ऊः[10]'(चान्द्रोणा-१।४३॥)। वहति गृहभारम्, उह्यते भर्त्रा वा । 'वहो धश्च'(उणा-८३)इति ऊः, धश्चान्तादेशः ॥५०३॥ ५ वष्टि कामयते **वशा** । 'वश कान्तौ' (अ.प.से), अच् । ६ सीम्नोऽन्तः सीमन्तः केशवेशः, शकन्ध्वादिः । सीमन्तोऽस्त्यस्याः **सीमन्तिनी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः, 'ऋन्नेभ्यो ङीप्(ङीप्)'४।१।५॥। ७ वमत्युद्गिरति प्रातिकूल्यम्, स्नेहं वा **वामा**। 'टुवमं[11] उद्गिरणे' (भ्वा.प.से.), ज्वलादित्वाण्णः, टाप् । वाति गच्छति नरमिति वा वामा । 'वा गतिगन्धनयोः'(अ.प.अ.), बहुलकान्मः । ८ वर्णोऽस्त्यस्य **वर्णिनी**। 'अत इनिठनौ'५।२।११५॥ इतीनिः, 'ऋन्नेभ्यो ङीप्'४।१।५॥ । ९ मह्यते पूज्यते भूषणादिभिः **महिला** । 'मह पूजायाम्'(भ्वा.प.से.), 'सलिकल्यनि-' (उणा-५४)इत्यादिनेलच् । ''महेलाऽपि''[शब्दभेदप्रकाशः, श्लो-४०]इति शब्दप्रभेदः । यल्लक्ष्यम्-

''अजयद् द्विषतः प्राज्यनयः परमहेलया ।
स्वप्नेऽपि मनसि स्पृष्टो न यः परमहेलया ॥१॥''[[12]]।

महस्योत्सवस्य इला भूमिरिव महेलेति । ''प्रसभमिवाङ्गदविह्वला महेला''[ ]इति कप्पिणाभ्युदयादेः[13]। १० अल्पं बलमस्त्यस्या **अबला** । 'अर्शआदिभ्योऽच्'५।२।१२७॥, ततष्टाप्, अल्पार्थोऽत्र नञ् । ११ यौति मिश्रीभवति पुंसा सह **योषा**। 'यु मिश्रणे'(उ.प.से.), 'ऋतन्यञ्जि-'(उणा-४४२)इति षः'' [ ]इति क्षीरस्वामी[14] । उणादिवृत्तौ तु अत्र सूत्रे आसप्रत्ययो दृश्यते, न षः । तेन तु 'यवास' इति सिद्ध्येत्। 'युमाभ्यां सः'(सरस्वतीकण्ठाभरणम् २।३।१४९॥)इति सूत्रेण सो वा। जोषयति परितर्कयति गृहकार्यमिति जोषा । ''चवर्गतृतीयादि-

---

१. 'गूहयते' इति१.२॥ २. '-यते' इति१.३॥ ३. '-यन्ते' इति३॥ ४. 'सम्बम्धन्त्यत्रेति' इति१॥ ५. 'टुवमु' इति१.४॥ ६. द्र.पदचन्द्रिका, भा-२, ब्रह्मवर्गः, श्लो-३९८, पृ.४८७॥, तत्र ''दंश-वंश-मशक-केश-पाशकाः'' इति दृश्यते ॥ ७. 'कठिनौ' इति२.३॥ ८. उणादिगणे सूत्रे नास्ति ॥ ९. 'ङीष्' इति३.४॥ १०. 'कुः' इति४॥ ११. 'टुवमु' इति१॥ १२. द्र. अम.क्षीरस्वामिकृतटीका २।६।२॥, पृ.१३४॥, तत्र 'प्राज्यनयः' इत्यस्य स्थाने 'प्रासनयः' इति दृश्यते ॥ १३. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-२६०, पृ.३३५॥, अमरपदपारिजातटीकायां ''महेलापि । 'अविरलरववारिवाहिनीयं प्रसभमिवाह्वयदाकुलं महेला ।' इति कर्पिणाभ्युदये (१०-१६) ।'' इति व्युत्पादितः, भा-१, २।६।२॥, पृ.२६३॥ १४. अम. क्षीरस्वामिटीकायां ''युष्य(योष)त्यन्यं यौति वा योषा'' इति दृश्यते, २।६।२॥, पृ.१३४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रपीति वर्णदेशना''[[1] ]इति सुभूतिः । 'जुष परितर्कणे[2]'(चु.-उ.से.) । जुषति(जुषते) प्रीणाति वा। 'जुष प्रीतौ[3]'(तु.-आ.से.), तुदादिः, ततोऽच्, टाप् । १२ योषति गच्छति पुरुषं **योषित्** । 'युष भजने' सौत्रः, '[हृ]सृरुहियुषिभ्यः इत्' (उणा-९७)इति इत् । ''योषिताऽपि[4]''[शब्दभेदप्रकाशः, श्लो-३४]इति शब्दप्रभेदः । तत्राजादिपाठाद् भागुरिमते टाप् । ''स्त्री वधूर्योषिता वामा(रामा)''[त्रिकाण्डशेषः२।६।१॥]इति त्रिकाण्डशेषः । सामान्येन द्वादश स्त्रियाः॥

अथ स्त्रीविशेषानाह-

**विशेषास्तु कान्ता[1] भीरु[2]र्नितम्बिनी[3] ॥५०४॥**
**प्रमदा[4] सुन्दरी[5] रामा[6] रमणी[7] ललना[8]ऽङ्गना[9] ।**

१ काम्यते **कान्ता** । कमु कान्तौ'(भ्वा.आ.से.), 'कमेर्णिङ्'३।१।१०॥, 'मतिबुद्धि-'३।२।१८८॥इति वर्तमाने क्तः, 'अनुनासिकस्य क्विझलोः-'६।४।१५॥ इति दीर्घः, टाप्। यद्वा कान्तिः सर्वाङ्गसौन्दर्यमस्त्यस्याः कान्ता । 'अर्शआदिभ्योऽच्'५।२।१२७॥, टाप् । २ बिभेत्येवंशीला **भीरुः** । 'ञिभी भये (जु.प.अ.), 'भियः क्रुक्लुकनौ[5]'३।२।१७४॥। ''भीरुः स्यात् कातरे नार्याम्''[[6] ]इत्यजयः । ''भीरुरार्ये (भीरुरार्त्ते) जने स्त्रियाम्''[[6] ]इति रभसः। भीरुशब्दस्य सुरासुरकिन्नरादिस्त्रीष्वपि वृत्तिरिति 'ऊङुतः'४।१।६६॥इति मनुष्यजातिविहित ऊङ् नास्ति, भीरुशब्दस्ताच्छिलिकः, ''[संज्ञाप्रकाराश्च ताच्छीलिकाः]'' इति भाष्योक्तेः । मनुष्यजातिविवक्षया ऊङि भीरूरित्यपि स्त्रियां भवतीति, 'ऊङुतः'४।१।६६॥ इत्यत्र ''भीरु(भीरू)''[भाषावृत्तिः४।१।६६॥]इति भाषावृत्तावुदाहृतम् । कुतस्त्वं भीरु यत्तेभ्य इत्युपपद्यते, भीरु इति सम्बुद्धावुपपद्यते । ''भीरुरित्यत्र मनुष्यजातिविवक्षा वा, विवक्षा च (मनुष्यजातेर्विवक्षाऽविक्षा च) लक्ष्यानुसारात्[7]'' [[8] ]इति काव्यादर्शे वामनः । ३ पृथुत्वात् प्रशस्तनितम्बयुक्ता **नितम्बिनी** । 'अत इनिठनौ'५।२।११५॥, 'ऋन्नेभ्यो ङीप् (ङीप्)'४।१।५॥ ॥५०४॥ ४ रूपसौभाग्यजनितः प्रकृष्टो मदो गर्वोऽस्याः **प्रमदा** । 'अर्शआदिभ्योऽच्'५।२।१२७॥। ५ सुष्ठु उनत्ति आर्द्रयति जनमन इति **सुन्दरी** । सुपूर्वः 'उन्दी क्लेदने'(रु.प.से.), वासरवद् बाहुलकादरन्, शकन्ध्वादित्वाद् द्वयोरुकारयोरैक्यम् । रूपलावण्यादिसम्पन्ना सुन्दरी, गौरादिः। सुन्दति वा । सुन्दः शोभार्थो हिंसार्थश्च, ततोऽरन् । सुष्ठु आद्रियते वेति पृषोदरादिर्वा । ६ या गीतकलाभी रमते, रमयति वा **रामा** । 'रमु क्रीडायाम्'(भ्वा.आ.अ.), ज्वलादित्वाण्णः । ७ या चातुर्यगुणोपेता रमणं कान्तं रमयति **रमणी**। नन्द्यादित्वाल्ल्युः, गौरादिः । ८ ललति विलसति[9] **ललना**। 'लड विलासे'(भ्वा.प.से.), 'लल वाञ्छायाम्'(भ्वा.प.से.) वा, डलयोरैक्यस्मरणाद् नन्द्यादित्वाल्ल्युः । 'लल ईप्सायाम्[10]'(चु.आ.से.), ण्यन्ताद्युचि वा ललना । प्रशस्तेप्सा तद्योगाद् 'अर्शआदिभ्योऽच्'५।२।१२७॥ वा[11]। ९ प्रशस्तलक्षणानि अङ्गान्यस्या **अङ्गना** । 'अङ्गात् कल्याणे'(गणसू-५।२।१००॥)इति पामादौ[12] पाठान्नः, टाप् । नव स्त्रीणां विशेषनामानि ॥

**स्वगुणेनोपमानेन मनोज्ञादिपदेन च ॥५०५॥**
**विशेषिताङ्गकर्मा स्त्री यथा तरल[1]लोचना ।**
**अलसेक्षणा[2] मृगाक्षी[3] मत्तेभगमना[4]ऽपि च ॥५०६॥**
**वामाक्षी[5] सुस्मिता[6]**

१ अङ्गस्य कर्मणो वेत्यर्थाद् ज्ञायते स्वः स्वकीयश्चासौ गुणश्च स्वगुणस्तेन[13] स्वगुणेन, तद्वाचिना शब्देनेत्यर्थः। अत्र स्वशब्दोपादानात् तरलत्वादीनां गुणानामसाधारणतामाह, तेन मनोज्ञत्वादीनां गुणत्वेऽपि साधारणत्वान्मनोज्ञादिपदेन चेति पृथग् निर्देशः । उपमीयतेऽनेन उपमानं मृगलोचनादिः, करणे ल्युट् । मनोज्ञ आदिर्यस्य तन्मनोज्ञादि, तच्च तत्पदं च[14] मनोज्ञादिपदम्, तेन ॥५०५॥ एभिस्त्रिभिर्विशेषितमङ्गमवयवो लोचनादिः, कर्म च क्रिया गमनादिर्यस्याः सा तथा स्त्री । यथाशब्दः स्वगुणादिक्रमेणाङ्गकर्मोदाहरणोपन्यासार्थः । तरले लोचने यस्याः सा **तरललोचना** । अत्र तरलत्वं लोचनस्याऽसाधारणः स्वकीयो गुणः । २ अलसमीक्षणमालोकनमस्या **अलसेक्षणा** । अत्र ईक्षणलक्षणायाः क्रियाया अलसत्वमसाधारणः स्वगुणः । ३ मृगस्याक्षिणीव अक्षिणी अस्या **मृगाक्षी** । उष्ट्रमुखादित्वादुपमानवाच्यक्षिशब्दस्य बहुव्रीहौ[15] लोपः । अत्र मृगाक्षिलक्षणेनोपमानेनाऽक्षिलक्षणमङ्गं विशेषि-

१. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-२६०, पृ.३३४॥ २. 'तर्कणे' इति१॥ ३. 'जुषी प्रीतिसेवनयोः' इति क्षीतरङ्गिण्यादौ ॥ ४. शब्दभेदप्रकाशे ''योषा स्यात् योषिता सह'' इति दृश्यते ॥ ५. '-लुकनौ' इति४॥ ६. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-२६१, पृ.३३५॥, रामाश्रमी २।६।३॥, पृ.२६२॥ ७. 'लक्षानु-' इति१.२.४॥ ८. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-२६१, पृ.३३६॥ ९. 'वसति' इति१॥ १०. 'ईच्छा-' इति२॥ ११. १प्रतौ नास्ति ॥ १२. 'पामादिपाठा-' इति४॥ १३. '-श्चासौ गुणस्तेन' इति१॥ १४. ३प्रतौ नास्ति ॥ १५. १प्रतौ नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तम् । ४ मत्तेभस्य गमनमिव गमनमस्या **मत्तेभगमना** । अत्रोपमानभूतेन गमनेन स्त्रियां[१] गमनलक्षणा क्रिया विशेषिता ॥५०६॥ ५ वामे मनोज्ञेऽक्षिणी अस्या **वामाक्षी** । बहुव्रीहौ सक्थ्यक्ष्णोः षच्, 'षिद्गौरादिभ्यश्च'४।१।४१॥ इति ङीष् । अत्र वामत्वेनाक्ष्यङ्गं विशेषितम् । ६ शोभनं स्मितम् अदृष्टदन्तहास्यमस्याः **सुस्मिता** । अत्र शोभनत्वेन स्मितक्रिया विशेषिता । एवं वरारोहा, वरवर्णिनी, मत्तगामिनी, प्रतीपदर्शिनीत्येवमादयोऽप्यूह्याः । षट् स्वगुणोपमानमनोज्ञादिपदैर्विशेषिताङ्गकर्मवनितायाः ॥

**अस्याः स्वं मानलीलास्मरादयः ।**
**लीला विलासो विच्छित्तिर्विब्बोकः किलिकिञ्चितम् ॥५०७॥**
**मोटायितं कुट्टमितं ललितं विहृतं तथा ।**
**विभ्रमश्चेत्यलङ्काराः स्त्रीणां स्वाभाविका दश ॥५०८॥**

अस्याः स्त्रियाः मानश्चाभिमानः, लीला शृङ्गारचेष्टाविशेषः, स्मरश्च काम इति द्वन्द्वे मानलीलास्मराः, ते आदिर्येषां ते मानलीलास्मरादयः, आदेर्मनोविलासादयः, स्वं धनमुच्यत इत्यन्वयः । १ अलब्धप्रियसमागया स्वचित्तविनोदार्थं प्रियस्य या वेशगतिदृष्टिहसितभणित्यादेरनुक्तिः[२](-रनुकृतिः) क्रियते, सा **लीला**[३]। लीयते लीला । 'लीङ् श्लेषणे'(दि.आ.अ.), पृषोदरादिः । २ प्रियसमीपगमने यः स्थानासनगमनविलोकितेषु विकारोऽकस्माच्च क्रोधस्मितं [४]चमत्कारमुखविलसनं **विलासः**[५]। विपूर्वः 'लस श्लेषणक्रीडनयोः'(भ्वा.प.से.), भावे घञ्। ३ आभरणविलेपनादीनां कुतश्चित् प्रियापराधादीर्ष्ययाऽनादरेण त्यक्तानां सखीनां प्रयत्नाद् धारणं **विच्छित्तिः**[६] । प्रियेण दत्तं प्रीतिनिबन्धनं स्वल्पमपि भूषणं विच्छित्तिरित्यन्ये । विच्छेदनं विच्छित्तिः, विशिष्टा छित्तिर्भङ्गिरित्यर्थः । 'छिदिर् द्वैधीकरणे'(रु.उ.अ.), 'स्त्रियां क्तिन्'३।३।९४॥ । ४ विवानं विवुः गतिविशेषः । 'वा गतिगन्धनयोः'(अ.प.अ.), 'अपष्ठादयः'( )इति कुः। विवोरोकः स्थानं **विब्बोकः**[७] । पृषोदरादिः। विपरीतं बुक्कणं भाषणं वा । 'बुक्क भाषणे'(भ्वा.प.से.), पृषोदरादिः । अभिमतवस्तुप्राप्तावपि गर्वादनादरः सापराधस्य, स्रक्चन्दनादिना संयमनं ताडनं च विब्वोकः । ५ इष्टजनदर्शनहर्षवशात् शुष्करुदितहसितत्रसितक्रोधश्रमाभिलापानां सङ्करणं **किलिकिञ्चितम्**[९]। किलेति व्याजेन किं[१०] नाम नासञ्चितममतेति (-सञ्चितमत्रेति) [११]किलिकिञ्चितम्, पृषोदरादिः, चतुस्तृतीयस्वरोऽयमकारान्तः । त्रितृतीयस्वरोऽपि [१२]किलकिञ्चितमिति । "क्रोधाश्रुहर्षभीत्यादेः सङ्करः किलिकिञ्चितम्, पृषोदरादिः[१३]"[ ]इति श्रीशेषरामाचार्याः ॥५०७॥ ६ "मोटायितं प्रियं स्मृत्वा साङ्गभङ्गविजृम्भणम्"[[१४]] 'मुट प्रमर्दने'(भ्वा.प.से.), भौवादिकः[१५], 'मुट आक्षेपमर्दनयोः'(तु.प.से.), तौदादिकः, 'पुट मुट सञ्चूर्णने'[१६](चु.उ.से.), चुरादिः, एषां भावे घञि मोटः । मोट इवाचरति मोटायते । मोटायत इति **मोटायितम्**[१७], एकटकारवानयम्, द्विटकारस्त्वपपाठः । प्रियकथासुसङ्गे [१८]भङ्गजृम्भणं कर्णकण्डूयनं च मोटायितमित्यन्ये।

---

१. 'स्त्रिया' इति१.३॥ २. '-रनुक्रियते' इति१, '-रनुच्छितिः क्रियते' इति४॥ ३. "अङ्गैर्वेषैरलङ्कारैः प्रेमभिर्वचनैरपि । प्रीतिप्रयोजितैर्लीलां प्रियस्यानुकृतिं विदुः ॥" इति साहित्यदर्पणः३।१४२॥, "प्रियवाग्भिरलङ्कारैर्मधुरैः प्रीतियोजितैः । प्रियस्यानुकृतिः स्त्रीणां लीला स्यात् तु यथोच्यते॥" इति टीकासर्वस्वे, भा-१, १।७।३२॥, पृ.१६०॥ ४. 'चमन्कोर-' इति१.२.४॥ ५. "यानस्थानासनादीनां मुखनेत्रादिकर्मणाम् । विशेषस्तु विलासः स्यादिष्टसंदर्शनादिना ॥" इति साहित्यदर्पणः३।१४३॥, "स्थानासनगमनानां नेत्रभ्रूकर्मणां चैव । उत्पद्यते विशेषे योऽक्लिष्टः स तु विलासः स्यात् ॥" इति टीकासर्वस्वे, भा-१, १।७।३१॥, पृ.१५९॥ ६. "स्तोकाऽप्याकल्परचना विच्छित्तिः कान्तिपोषकृत् ॥" इति साहित्यदर्पणः३।१४४॥, "माल्याच्छादनभूषणविलेपनानामनादरन्यासः । स्वल्पोऽपि परां शोभां जनयति यः सा तु विच्छित्तिः ॥ मुक्तारत्नादिकमुत्सृत्य बिसकिसलयाद्यनुरागो विच्छित्तिरिति केचित्" इति टीकासर्वस्वे, भा-१, १।७।३२॥, पृ.१६०॥ ७. "बिब्बोकस्त्वतिगर्वेण वस्तुनीष्टेऽप्यनादरः" इति साहित्यदर्पणः, ३।१४५॥, "इष्टानां भावानां प्राप्तावभिमानगर्वसम्भूतः । स्त्रीणामनादरकृतो बिब्बोको नाम स ज्ञेयः" इति टीकासर्वस्वे, भा-१, १।७।३१॥, पृ.१५९॥ ८. '-दिर्वा' इति१॥ ९. "स्मितशुष्करुदितहसितत्रासक्रोधश्रमादीनाम् । साङ्कर्यं किलकिञ्चितमभीष्टतमसङ्गमादिजाद्धर्षात् ॥" इति साहित्यदर्पणः३।१४६॥, "स्मितह-सितरुदितभयरोषदुःखगर्वश्रमाभिलाषाणाम् । सङ्करकरणं हर्षादसकृत् किलिकिञ्चितं ज्ञेयम् ॥" इति टीकासर्वस्वे, भा-१, १।७।३२॥, पृ.१६०॥ १०. 'कं' इति३॥ ११. 'किल-' इति३॥ १२. 'किलि-' इति३॥ १३. ३.४नास्ति ॥ १४. द्र. रामाश्रमी २।७।३२॥, पृ.१०७॥ १५. मैत्रेयसम्मतोऽयं धातुः, धातुप्रदीपः, भ्वादिः, धातुसं-२११, पृ.२६॥, 'मुडि प्रमर्दने' इत्यत्र स्वाम्याह "मुट इति दुर्गः" इति, क्षीरतरङ्गिणी, भ्वादिः, धातुसं-२२१, पृ.५७॥ १६. 'मुट सञ्चूर्णने' इति मैत्रेयसायणौ ॥ १७. "तद्भावभाविते चित्ते वल्लभस्य कथाऽऽदिषु । मोट्टायितमिति प्राहुः कर्णकण्डूयनादिकम्॥" इति साहित्यदर्पणः३।१४७॥, "इष्टजनस्य कथायां लीलाहेलादिदर्शने वापि। तद्भावभावनाकृतमुक्तं मोट्टायितं नाम ॥" इति टीकासर्वस्वे, भा-१, १।७।३२॥, पृ१६०॥ १८. 'भृङ्ग-' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

७ "दुःखोपचारः सौख्येऽपि हर्षात् कुट्टमितं[1] मतम्"[[2]]इति। 'कुट्टण्[3] कुत्सनादौ'(चु.उ.से), चुरादिः, कुट्टेन मितं कुट्टमितम्, पृषोदरादित्वादुत्वम्, द्विपञ्चमस्वरोऽयम्। "कुट्टनं कुट्टः, भावे घञ्, तेन निवृत्तम्(निर्वृत्तम्), भावप्रत्ययान्तादिमन्, ततो ण्यन्ताद् भावे क्तः, [4]कुट्टमितम्, एकपञ्चमस्वरादिरपि। "सुरतेषु गाढपीडने केशस्तनादिग्रहणे च हर्षात् सुखेऽपि दुःखाविष्क्रिया दुःखेऽपि सुखाविष्क्रिया [5]कुट्टमितम्"[ ]इति मिश्राः[6]। ८ 'लल ईप्सायाम्'(चु.आ.से.), 'लल(लड) विलासे'(भ्वा.प.से.) वा, भावे क्तः, डलयोरेकत्वे ललितम्। सुकुमारविधानेन भ्रूनेत्रादिक्रियासविरकरचरणाङ्गन्यासो **ललितम्**[7]। तथा चरणनिपातरणज्झणन्नूपुरमसृणसञ्चरणं रेखाविशेषस्थितत्रिवलिभङ्गिसंस्थानं[8] समुल्लसितभुजमुरःस्थलप्रसारणाद् द्विगुणपृथुकृतं स्तनस्तबकं स्कन्धासक्तैककुण्डलमुल्लसितभ्रूसाचीकृतविलोकितमिति[9]। "प्रियं प्रति भावाविष्कृतं ललितम्"[ ]इत्यन्ये। ९ "वक्तव्याभाषणं व्याजाद् [10]**विहृतं**[11] दर्शितेङ्गितम्"[[12]]। विपूर्वः 'हृञ् हरणे' (भ्वा.उ.अ.), क्तः। १० विभ्रान्तिः [13]**विभ्रमः**[14]। 'भ्रमु चलने' (भ्वा.प.से.), '-अनवस्थाने'(दि.प.से.) वा, भावे घञ्, 'नोदात्तोपदेश-'७।३।३४॥ इति वृद्ध्यभावः। मदरागहर्षजनितो विपर्यासो विभ्रमः। यथाऽनिमित्तमासनादुत्थाय यदन्यत्र गमनं प्रियारब्धकथामाक्षिप्य सख्या सहालापनम्, मुधैव[15] हसितक्रोधौ, पुष्पादीनां याञ्चा, सहसैव तत्परित्यागः, वस्त्राभरणमाल्यानामकारणतः खण्डनं मननं चेति। "योषितां यौवनजो विकारो विभ्रमः"[[16]]इत्येके। अलङ्क्रियत एभिरित्यलङ्काराः, स्त्रीणामिति, न तु पुंसाम्। स्वस्माद् रतिभावाद् हृदयगोचरीभूताद् भवन्ति स्वाभाविकाः, ते च दशसंख्याः स्युरिति ॥५०८॥

**प्रागल्भ्यौदार्यमाधुर्यशोभाधीरत्वकान्तयः।**
**दीप्तिश्चाऽयत्नजाः**

१ प्रगल्भस्य भावः **प्रागल्भ्यम्**, मैथुने निर्भयत्वमित्यर्थः। २ **औदार्यम्** अमर्षेर्ष्याद्यवस्थास्वपि प्रश्रयः। ३ **माधुर्यम्** क्रोधादिष्वपि चेष्टामसृणत्वम्। ४ **शोभा** रूपाद्यैः पुंभोगोपबृंहितैः किञ्चिच्छायान्तरश्रयणम्[17]। ५ **धीरत्वम्** अचापलत्वमविकत्थनं च। ६ **कान्तिः** रूपाद्यैः पुंभोगोपबृंहितैर्मध्याङ्गच्छाया। ७ सैव तीव्रा कान्तिः **दीप्तिः**। यत्नाज्जाता यत्नजाः क्रियात्मानः[18], "इच्छातो यत्नस्ततो देहक्रिया"[[19]] इति हि पदार्थविदः, ततोऽन्येऽयत्नजाः गुणात्मानः। सप्ताऽलङ्कारास्तन्नामानि॥

**भावहावहेलास्त्रयोऽङ्गजाः ॥५०९॥**

१ अन्तर्गतवासनात्मतया वर्तमानं रत्याख्यं भावं भावयन्तीति **भावाः**[20]। ण्यन्ताद् भवतेः पचाद्यच्। भूयन्ते रागिभिरत्रेति अधिकरणे घञ् वा। अङ्गस्याल्पो विकार इत्यर्थः। २ स्वचित्तवृत्तिं परत्र जुह्वती[21] ददती हावयति[22] **हावः**। 'हु दानादनयोः'(जु.प.अ.), ण्यन्तादच्। भ्रूतारकादीनां भूयान् विकार इत्यर्थः। ३ हेलनं **हेला**। 'हिल हावकरणे[23]'(तु.प.से.), भावे घञ्। अङ्गस्य भूयान् विकार इत्यर्थः। प्राग्जन्माभ्यस्तरतिमात्रेण सत्त्वोद्बुधेन[24] अङ्गाद् देहाद् जायन्ते भवन्ति अङ्गजाः त्रयोऽलङ्कारा इति। यद्भरतः-

---

१. "केशस्तनाधरादीनां ग्रहे हर्षेऽपि सम्भ्रमात्। आहुः कुट्टमितं नाम शिरःकरविधूननम्॥" इति साहित्यदर्पणः३।१४९॥, "केशस्तनादिहरणग्रहणेष्वतिहर्षसम्भ्रमोत्पन्नम्। कुट्टमितं विज्ञेयं सुखमपि दुःखोपरागेण॥" इति टीकासर्वस्वे, भा-१, १।७।३२॥, पृ.१६०॥ २. द्र. रामाश्रमी १।७।३२॥, पृ.१०७॥ ३. हैममते णकारानुबन्धः, 'कुट्ट छेदनकुत्सनयोः' इति स्वामी, 'कुट्ट छेदनभर्त्सनयोः' इति मैत्रेयसायणौ॥ ४. 'कुट्टु-' इति४, 'कुट्टि-' इति१.२॥ ५. 'कुट्टि-' इति१, 'कुट्टु-' इति२॥ ६. इतोऽग्रे २प्रतौ 'लल्यते इति ललितम्' इति दृश्यते॥ "सुकुमारतयाऽङ्गानां विन्यासो ललितं भवेत्" इति साहित्यदर्पणः३।१५१॥, "करचरणाङ्गन्यासः सभ्रूनेत्रोष्ठसम्प्रयुक्तस्तु। सुकुमारविधानेन स्त्रीभिः परिकीर्तितं ललितम्॥" इति टीकासर्वस्वे, भा-१, १।७।३१॥, पृ.१५९॥ ७. '-भङ्गसंस्थानं' इति३॥ ९. द्र. पदचन्द्रिका, भा-१, नाट्यवर्गः, श्लो-२०७, पृ.१४५॥ १०. 'विकृतं' इति३॥ ११. "वक्तव्यकालेऽप्यवचो व्रीडया विकृ(हृ)तं मतम्" इति साहित्यदर्पणः३।१५२॥, "प्राप्तानामपि वचसां क्रियया यद् भाषणं ह्रिया स्त्रीभिः। व्याजात्मभावतो वाप्येवं समुदाहृतं विकृतम्॥" इति टीकासर्वस्वे, भा-१, १।७।३२॥, पृ.१६०॥ १२. इतोऽग्रे २प्रतौ 'विह्रियते इति विहृतं' इति दृश्यते॥ १३. "त्वरया हर्षरागादेर्दयितागमनादिषु। अस्थाने भूषणादीनां विन्यासो विभ्रमो मतः॥" इति साहित्यदर्पणः३।१५०॥, "विविधानामर्थानां वागङ्गाहार्यसत्त्वयुक्तानाम्। मदरागहर्षजनितो व्यत्यासो विभ्रमः प्रोक्तः" इति टीकासर्वस्वे, भा-१, १।७।३१॥, पृ.१५९॥ १४. इतोऽग्रे २प्रतौ 'विभ्रमणं विभ्रमः' इति दृश्यते॥ १५. 'मुधेव' इति १.२.४॥ १६. द्र. पदचन्द्रिका, भा-१, नाट्यवर्गः, श्लो-२०७, पृ.२४५॥ १७. '-श्रवणम्' इति२॥ १८. 'क्रियात्मनः' इति३॥ १९. द्र. स्वोपज्ञटीका ३।५०९॥, पृ.११६॥ २०. अत्र बहुत्वं विचारणीयम्॥ २१. 'जुह्वती' इति३.४॥ २२. '-तीति' इति४॥ २३. 'हिव भावकरणे' इति४, '-भावकरणे' इति सायणः॥ २४. '-बुद्धेन' इति१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"अलङ्काराश्च नाट्यज्ञैर्ज्ञेया भावरसाश्रयाः[1] ।
यौवनेऽभ्यधिकाः स्त्रीणां विकारा वक्त्रगात्रजाः ॥१॥
[नाट्यशास्त्रम्, सामान्याभिनयोऽध्यायः-२२, श्लो-४]
देहात्मकं भवेत् सत्त्वं सत्त्वाद् भावः समुत्थितः ।
भावात् समुत्थितो हावो हावाद्धेला समुत्थिता ॥२॥"
[नाट्यशास्त्रम्, सामान्याभिनयोऽध्यायः-२२, श्लो-७]इति ॥५०९॥

## सा कोपना भामि[1]नी स्यात्

१ सा स्त्री कोपना कोपशीला । 'कुप कोपे'(दि.-प.से.), 'क्रुधमण्डार्थेभ्यश्च'३।२।१५१॥ इति युच् । भामते[2]ऽवश्यं **भामिनी** । 'भाम क्रोधे'(भ्वा.आ.से.), आवश्यके णिनिः, 'ऋन्नेभ्यो ङीप्'४।१।५॥ । "कोपना सैव भामिनी" [अमरकोषः २।६।५॥]इत्यमरः । एकं कोपनायाः ॥

## छेका मत्ता च वाणि[1]नी ।

१ छेका अवसरज्ञा, [3]दाक्ष्यातिशययुक्ता वा, मत्ता चोन्मत्ता या स्त्री, तन्नामैकम् । वणत्यवश्यं **वाणिनी** । 'वण शब्दे'(भ्वा.प.से.), आवश्यके णिनिः, तृतीयवर्गपञ्चमतृतीयस्वरमध्यः । यन्महेश्वरः-"वाणिनी नर्तकीमत्तविदग्धवनितासु च"[विश्वप्रकाशकोशः, नान्तवर्गः, श्लो-१२६]इति । चतुर्थवर्गपञ्चमतृतीयस्वरमध्यो "वानिनी[4]"[अमरकोषः३।३।११२॥] इत्यमरः ॥

## क[1]न्या क[2]नी कु[3]मारी च

१ कन्यते काम्यते **कन्या** । 'कनी दीप्तिकान्तिगतिषु'(भ्वा.प.से.), [5]अघ्न्यादित्वाद् यत् । 'कमु कान्तौ' (भ्वा.आ.से.) इत्यतः 'अघ्न्यादयश्च'(उणा-५५१)इति यति मकारस्य नकारे वा कन्या । 'कन्यायाः कनीन च'४।१।११६॥इति निपातनान्न 'वयसि प्रथमे'४।१।२०॥इति ङीप्[6]। २ कनति दीप्यते **कनी**। पचाद्यचि 'वयसि प्रथमे'४।१।२०॥ इति ङीप्[6] । ३ कुमारयति क्रीडयति **कुमारी** । चुरादौ 'कुमार क्रीडायाम्'(चु.उ.से.), अचि 'वयसि प्रथमे'४।१।२०॥ इति ङीप्[7] । कुत्सितो मारोऽस्या वा । काम्यते[8] कुमारी । 'कमु कान्तौ'(भ्वा.आ.से.), 'कमेरुच्चोपधायाः[9]'(उणा-४१८)इत्यारन्प्रत्यये उपधाया उत्वम्, ङीप्[7] । "पुंयोगे न कन्यात्वं निवर्तते[10]"[ ]इत्यन्ये । सामान्यतः त्रीणि कन्यायाः ॥

## गौरी तु न[1]ग्निकाऽर[2]जाः ॥५१०॥

१ गूहयते उपादेयतया शब्द्यते गौरी । 'गुङ् शब्दे' (भ्वा.आ.अ.), 'खुरक्षुर-'(हैमोणा-३९६)इति साधुः । 'ऋज्रेन्द्र-'(उणा-१८६)इत्यादिना वा । लज्जते **नग्निका** । 'ओलस्जी व्रीडे'(तु.आ.से.), क्तः[11],'ओदितश्च'८।२।४५॥ इति निष्ठानत्वम्[12], कुत्वम्, पृषोदरादित्वादादेर्नत्वम्, ततः स्वार्थे कनि इत्वे च नग्निका । केचित्तु ओलज्जीति [13]तवर्गपञ्चमादि पठन्ति । २ नास्ति रजोऽस्या **अरजाः**, सकारन्तः, अप्राप्तर्तुरित्यर्थः। "अष्टवर्षा भवेद् गौरी दशमे नग्निका भवेत्"[[14]]इति स्मार्तो भेदोऽत्र नाश्रितः । द्वे अष्टवर्षकन्यायाः ॥५१०॥

## म[1]ध्यमा तु दृ[2]ष्टरजास्त[3]रुणी यु[4]वतिश्च[5]री ।
## त[6]लुनी दि[7]क्करी

१ बाल्ययौवनयोर्मध्ये भवा वर्तमाना **मध्यमा** । 'मध्यान्मः'४।३।८॥इति मः । बाल्ययौवनयोर्मध्ये मा लक्ष्मीर्यस्या वा । २ दृष्टमनुभूतं रजो यया, यस्या वा **दृष्टरजाः**, प्रथमप्राप्तरजा इत्यर्थः । ३-६ तरति प्लवते युवानमिति **तरुणी, तलुनी** च । 'तृ प्लवनतरणयोः'(भ्वा.प.से.), '[15]कृवृदारिभ्य उनन्'(उणा-३३३)इत्यनुवर्तमाने[16] 'त्रो रश्च लो[17] वा' (उणा-३३४)इति सूत्रेण तरतेरुनन् रश्च वा लत्वम्, 'कपिलिकादीनां संज्ञाच्छन्दसोर्वा [रो] लत्वमापद्यते'( )इति वा लत्वम्, 'वयसि प्रथमे'४।१।२०॥ इति ङीप्[18] । ४ यौति देहेन

---

१. "अलंकाराश्च सत्त्वस्था ज्ञेया भावसमाश्रयाः ।" इति नाट्यशास्त्रे, अध्या-२२, श्लो-४, पृ.२४१॥ २. 'भामयते' इति३, 'भायते' इति४॥ ३. 'दाक्षिण्याति-' इति३॥ ४. केषाञ्चिदमरकोषटीकाकृतां मतेऽयं सम्मतः, अत एवामरपदविवृतिटीकायां "केचिदत्र द्वितीयाक्षरं दन्त्यवर्गपञ्चमं पठन्ति" इत्युक्तम्, भा-२, ३।३।११२॥, पृ.३७९॥ ५. 'आघ्रादि-' इति४॥ ६. 'ङीष्' इति१.३॥ ७. 'ङीष्' इति३॥ ८. १प्रतौ नास्ति ॥ ९. 'कमेः किदुच्चोपधायाः' इत्युणादिगणसूत्रस्वरूपम् ॥ १०. "या तु विवाहसंस्कारेण विना पुरुषेण सम्प्रयुज्यते सा कन्यात्वं न जहाति" इति पदमञ्जरी, काशिकावृत्तिः, भा-३, ४।१।११६॥, पृ.४५९॥ ११. 'श्वीदितो निष्ठायाम्'७।२।१४॥ इतीडभावः॥ १२. 'निष्ठायां नत्वम्' इति४, 'निष्ठायां न' इति३॥ १३. 'वर्ग-' इति१॥ १४. "अष्टवर्षा भवेद् गौरी दशवर्षा तु कन्यका । संप्राप्ते द्वादशे वर्षे कुमारीत्यभिधीयते ॥" इति श्लोकः ॥ १५. 'कृवृ-' इति१.२.४॥ १६. '-वर्तनि' इति३, '-वर्तमानो' इति४॥ १७. 'तलो' इति४॥ १८. 'ङीष्' इति१.३॥ अत्र 'वयसि प्रथमे' इत्यस्य प्रवृत्तिर्विचारणीया, पदमञ्जर्यां 'नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानम्' इत्यत्र "एतयोरवयोऽर्थं ग्रहणम्-इत्येव सिद्धम् ? न सिध्यति, गौरादिपाठान्ङीष् प्राप्नोति । तस्माद् वयस्यवयसि च ङीब्ङीषोर्विकल्पः । क्वचिद् गौरादिपाठात् सिद्धमिति पठ्यते, तद् रूपमात्रसिद्ध्यभिप्रायं द्रष्टव्यम्, स्वरार्थं तूपसंख्यानं कर्तव्यमेव" इत्युक्तत्वात्, भा-३, ४।१।१५॥, पृ.२९९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मिश्रीभवति एकीभवति **युवतिः** । 'यु मिश्रणे'(अ.प.से.), 'कनिन्युवृषि-'(उणा-१५४)इति कनिन्, 'युनस्तिः'४।१।७७॥। स्त्रीसामान्यवाची च युवतिशब्दः । "प्रमदा चेति विज्ञेया युवतिस्तु तथा स्मृता"[1][ ]इति भागुरिः। "प्राग्यौवना युवतिः" [1][ ]इति वात्स्यायनः । 'यौतेः कतिः'( )इति कतिप्रत्ययान्तात् पाक्षिके ङीषि युवती च । ५ चरति **चरी** । 'चर गतिभक्षणयोः'(भ्वा.प.से.), अच्, गौरादिः । ७ दिशमाश्रयं करोति **दिक्करी** । यल्लक्ष्यम्-"परिणतदिक्करिकास्तटीर्बिभर्त्ति" [2][ ]इति । अमरस्तु-"स्यान्मध्यमा दृष्टरजाः"[अमरकोषः २।६।८॥]इति दृष्टरजसं स्त्रियं पार्थिक्येनाह। तथा च लक्ष्यम्-"मध्यमा न विवाह्या स्यात् कुलदोषकरी हि सा"[ ]इति।

"मध्यमः स्यात् स्वरे मध्ये मध्यदेशे च मध्यजे ।
वाच्यवन् मध्यमा प्रोक्ता[3] राकादृष्टरजःस्त्रियोः ॥१॥"

[विश्वप्रकाशकोशः, मान्तवर्गः, श्लो-३५-३६]इति महेश्वरः । सप्त युवतेः । 'युवान स्त्री' इति भाषा ॥

### [1]वर्या [2]पतिंवरा [3]स्वयंवरा ॥५११॥

१ पतिवरणेऽनिरुद्धा **वर्या** । 'वृञ् वरणे'(स्वा.उ.से.), 'अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु'३।१।१०१॥इति साधुः। वरमर्हति वा । दण्डादित्वाद् यो वा । २ पतिं वृणीते **पतिंवरा** । 'वृञ् वरणे'(स्वा.उ.से.), 'संज्ञायां भृतृवृजि-' ३।२।४६॥इत्यादिना खच्, खित्वान्मुम् । ३ एवं **स्वयंवरा** । त्रीणि स्वेच्छाकृतपतिवरणायाः ॥५११॥

### [1]सुवासिनी [2]बधूटी स्याच्चि[3]रिण्टी

१ सुष्ठु वसति **सुवासिनी**। 'वस निवासे'(भ्वा.-प.अ.), ग्रहादित्वाण्णिनिः, 'ऋन्नेभ्यो ङीप्'४।१।५॥ । स्वा ज्ञातयस्तेषु वस्तुं शीलमस्याः स्ववासिनीति द्रविडाः । "स्ववासिन्यां चिरिण्टी स्याद् द्वितीये वयसि स्त्रियाम्"[4][ ]इति रुद्रः । २ बध्नाति कटाक्षैः **बधूटी** । 'बन्ध बन्धने'(क्र्या.-प.अ.), 'बन्धेः'(हैमाणा-१५७)इति किदूटः, 'वयसि प्रथमे' ४।१।२०॥इति ङीप्[5]। वधूशब्दाद् ग्रामटीवत् टप्रत्यये 'वयस्यचरमे-'(वा-४।१।२०॥)इति ङीषि(ङीपि) वा । वध्वटीत्यपीति व्याडिः । ३ पितृकुलस्नेहात् चिरमिटति गच्छति **चिरिण्टी** । चिरमित्युपपदे 'इट गतौ'(भ्वा.प.से.)इत्यत इगुपधात् के पृषोदरादित्वात् चिराकारवाशे(-नाशे) इकारस्य विपर्यये[6] मकारस्य परसवर्णत्वे 'वयसि प्रथमे'४।१।२०॥इति ङीषि(ङीपि) चिरिण्टी । "ऊढाऽनूढा वा पितृगृहस्थिता प्राप्ताऽल्पयौवना चिरण्टी चरिण्टी[7]"[8][ ]इत्येके । हलायुधस्तु "वधूटी च चिरिण्टी च द्वितीयवयसौ स्त्रियाम्"[हलायुधकोशः २।४८४॥]इति भिनत्ति । त्रीणि 'सोहामणी' इति ख्यातायाः ॥

### अथ [1]सधर्मिणी ।

**[2]पत्नी [3]सहचरी [4]पाणिगृहीती [5]गृहिणी [6]गृहाः ॥५१२॥**
**[7]दाराः [8]क्षेत्रं [9]वधूर्[10]भार्या [11]जनी [12]जाया [13]परिग्रहः ।**
**[14]द्वितीयो[15]ढा [16]कलत्रं च**

१ सह धर्मोऽस्त्यस्याः **सधर्मिणी**, पत्या सह यज्ञादिधर्माचरणाधिकारात् । धर्मशीलवर्णादिनिः, 'ऋन्नेभ्यः-'४।१।५॥ इति ङीप् । सहधर्मिणी, सधर्मचारिण्यपि । २ पत्युरुद्वाहविहितयज्ञयोगात् **पत्नी** । 'पत्युर्नो यज्ञसंयोगे'४।१।३३॥ इतीकारस्य नत्वम्, 'ऋन्नेभ्यः-'४।१।५॥ इति ङीप् । ३ सह धर्मं चरति **सहचरी** । 'चर गतौ'(भ्वा.प.से.), अच्, गौरादिः । ४ गृहीतः पाणिरस्याः **पाणिगृहीती** । वाऽऽहिताग्न्यादित्वात् परनिपातः, 'बहुव्रीहेश्चान्तोदात्तात्'४।१।५२॥ इत्यत्र 'पाणिगृहीती भार्यायाम्[9]'(वा-४।१।५२॥)इति ङीष्[10] । ५ गृहमस्त्यस्याः **गृहिणी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः । गेहिनीत्यपि। ६ गृहवासहेतुभूतत्वाद् **गृहाः**, पुंक्लीबलिङ्गैः[11], पुंस्ययं बहुवचनान्त एव ॥५१२॥ ७ दारयन्ति भातृभ्यः पतिं पृथक्कारयन्ति **दाराः** । 'दॄ(दृ) विदारणे'(क्र्या.प.से.), णिजन्तः, 'दारजारौ कर्तरि णिलुक् च'(वा-३।३।२०॥)इति घञ्, अयं पुंलिङ्गो बहुवचनान्तश्च । एकवचनान्तोऽपि दृश्यते, यल्लक्ष्यम्-"धर्मप्रजा-

---

१. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-२६६, पृ.३४३॥ २. द्र. स्वोपज्ञटीका ३।५११॥, पृ.११६॥ ३. 'तूक्ता' इति विश्वप्रकाशकोशे ॥ ४. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-२६७, पृ.३४४॥, रामाश्रमी २।६।९॥, पृ.२६५॥, तत्र 'द्वितीयवयसि' इति दृश्यते ॥ ५. 'ङीष्' इति३॥ ६. 'इटस्येकारस्य रकारे गमने' इत्यर्थः प्रतिभाति ॥ ७. 'चिरिण्टी' इति३॥ ८. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-२६७, पृ.३४३॥, तत्र "चिरिण्टी चिरण्टी' इत्येके" इति दृश्यते ॥ ९. 'पाणिगृहीत्यादीनामर्थविशेषे' इति काशिका, भा-३, ४।१।५२॥, पृ.३५४॥ १०. 'ङीष्' इति १.२.४.॥ ११. 'पुंक्ली' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्पन्ने दारे नान्यं कुर्वीत''[[1]]इति । ''दारा टाबन्ताऽपि[2]''[[3]] इति हट्टचन्द्रः ।

''क्रोडा हावा तथा दारा त्रय एते यथाक्रमम् ।
क्रोडे हारे च दारेषु शब्दः प्रोक्तो मनीषिभिः ॥१॥''

[[3]]इति व्याडिशुभाङ्कौ । पत्न्यादीनामुपचाराद् वृत्तिः । ८ क्षियन्ति[4] निवसन्त्यत्र **क्षेत्रम्** । 'क्षि निवासगत्योः'(तु.प.अ.), ष्ट्रन् । ९ उह्यते भर्त्रेति **वधूः** । 'वह प्रापणे'(भ्वा.उ.अ.), 'वहो धश्च'(उणा-८३)इत्यूः । १० भरणार्हा **भार्या** । 'भृञ् भरणे'(भ्वा.उ.अ.), 'अर्हे कृत्यतृचश्च'३।३।१६९॥ इति ण्यत्। ११ जायतेऽस्यां पतिरिति जनिः । 'जनी प्रादुर्भावे'(दि.आ.-से.), 'इन् सर्वधातुभ्यः'(उणा-५५७)इतीन् । 'कृदिकारात्-' (गणसू-४।१।४५॥)इति ङीषि **जनी** । १२ जायते पति-[5]रस्यामिति **जाया** । 'जनी प्रादुर्भावे'(दि.आ.से.), 'जनेर्यक्' (उणा-५५०)इति यक्, 'जनसन-'६।४।४२॥ इत्यात्वम् । ''आत्मा वै जायते पुत्रः''[ ]इति स्मृतेः । ''जायायास्तद्धि जायात्वं यदस्यां जायते पुमान्[6]''[मनुस्मृतिः, अध्या-९, श्लो-८]इति मनुः । **१३** परिगृह्यते **परिग्रहः** । 'ग्रह उपादाने' (क्र्या.उ.से.), अप् । **१४** द्वयोः पूरणी **द्वितीया** । 'द्वेस्तीयः' ५।२।५४॥ इति तीयः । **१५** उह्यते स्म **ऊढा** । 'वह प्रापणे' (भ्वा.उ.अ.), निष्ठा, 'हो ढः'८।२।३१॥, 'झषस्तथोः-'८।२।-४०॥ इति धत्वम्, ष्टुत्वम्, 'ढो ढे लोपः'८।३।१३॥, 'ढ्रलोपे पूर्वस्य-'६।३।१११॥ इति दीर्घः। **१६** कडति माद्यति कडत्रम्, [लत्वे **कलत्रम्**]। 'कड मदे'(भ्वा.प.से.), बाहुलकादत्रन् । गडयति वा । गडिधातोः 'गडेरादेश्च कः'(उणा-३८६)इत्यत्रन्। षोडश [7]परिणीतस्त्रियाः ॥

## पुरन्ध्री तु कुटुम्बिनी ॥५१३॥

१ पुरं गृहं धरति, हलन्ताद् 'इगुपधात् किः (कित्[8])' (उणा-५५९), पृषोदरादित्वाद् नुमि पुरन्ध्रिः। 'कृदिकारात्-' (गणसू-४।१।४५॥)इति ङीषि **पुरन्ध्री** । पुरन्ध्रिरिति ह्रस्वान्तोऽपि। ''तौ स्नातकैर्बन्धुमता च राज्ञा पुरन्ध्रिभिश्च क्रमशः प्रयुक्तम्''[रघुवंशम्, सर्गः-७, श्लो-२८]इति रघुः। ''पुरं नपुंसकं गेहे''[मेदिनीकोशः, रान्तवर्गः, श्लो-५८]इति मेदिनिः । २ कुटुम्बं पोष्यवर्गः, तद्योगादिनिः **कुटुम्बिनी**, पञ्चमस्वरमध्या । ''कुटुम्बं पोष्यवर्गं च''[[9]]इत्यमरमाला । द्वे पुत्रदुहित्रादिमत्याः पतिमन्त्रार्याः ॥५१३॥

## प्रजावती[1] भ्रातुर्जाया[2]

१ प्रजाऽस्त्यस्याः **प्रजावती** । 'तदस्यास्त्यस्मिन्निति मतुप्' ५।२।९४॥, 'मादुपधायाश्च-'८।२।९॥ इति वत्वम् । **२ भ्रातुर्जाया** इत्यत्र 'ऋतो विद्यायोनिसम्बन्धेभ्यः'६।३।२३॥ इति षष्ठ्यलुक् । ''द्रक्ष्यसि भ्रातृजायाम्''[मेघदूतम्, पूर्वमेघः, श्लो-१०]इत्यत्र तु सप्तमीसमासः । द्वे भ्रातृजायायाः ॥

## सूनो[1] स्नुषा[2] जनी वधूः[3] ।

१ सूनोः पुत्रस्य भार्या, स्नौति अपत्यं वात्सल्यादिति **स्नुषा** । 'स्नु(ष्णु) प्रसवे'(अ.प.से.), 'ऋषिमृषिवृषिस्नुभ्यः सक्[10]'(चान्द्रोणा-३।६४॥)इति सक्, षत्वम् । यद्वा स्नुस्यति स्नुषा। 'स्नुस(ष्णुसु) अदने'(दि.प.से.)। आदान इत्येके । अर्दशन इत्यपरे । इगुपधलक्षणे के टाप्, 'सुषामादिषु च' ८।३।९८॥ इति षत्वम् । ''औणादिकं षत्वम्''[ ]इत्यात्रेयः। **२** जायते[11] लज्जा सन्ततिर्वाऽस्यां **जनी**[12] । 'जनी प्रादुर्भावे' (दि.आ.से.), 'जनिघसिभ्याम्-'(उणा-५६९)इतीण्[13], 'जनिवध्योश्च'७।३।३५॥ इति वृद्ध्यभावः जनिः, 'कृदिकारात्-' (गणसू-४।१।४५॥)इति ङीषि जनी । भार्यामात्रेऽपि जनी। ''जनी सीमन्तिनीवध्वोः''[मेदिनीकोशः, नान्तवर्गः, श्लो-६] इति मेदिनिः । **३** उह्यते भर्त्रेति **वधूः** । 'वहेर्धश्च[14]'(उणा-८३)इत्यूः । वधूटीत्यपि । त्रीणि पुत्रभार्यायाः ॥

## भ्रातृवर्गस्य या जाया यातरस्ताः[1] परस्परम् ॥५१४॥

१ बन्धुवर्गस्य या जायाः पत्न्यः, ताः परस्परं मिथः **यातरः**, प्रोच्यन्त इत्यन्वयः । यतन्ते स्पर्धया कर्मस्विति यातरः। 'यती प्रयत्ने'(भ्वा.आ.से.), 'यतेर्वृद्धिश्च'(उणा-२५४)इति ऋन्[15] स्वस्रादित्वान्न ङीप्, मातृशब्दवत् । 'जेठाणी देवराणी[16]' इति भाषा ॥५१४॥

---

१. द्र. स्वोपज्ञटीका ३।५१३॥, पृ.११७॥ २. '-न्तोऽपि' इति३.४॥ ३. द्र. टीकासर्वस्वम्, भा-२, २।६।६॥, पृ.२६१॥, पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-२६४, पृ.३३९॥, रामाश्रमी २।६।६॥, पृ.२६३॥ तासु ''क्रोडा हारा तथा दारा त्रय एते यथाक्रमम् । क्रोडे हारे च दारेषु शब्दाः प्रोक्ता मनीषिभिः ॥'' इति दृश्यते ॥ ४. 'क्षियन्ते' इति१॥ ५. 'सुतोऽस्या-' इति२॥ ६. 'पुनः' इति मनुस्मृतौ, ९।८॥, पृ.३४१॥ ७. 'परिणत-' इति२॥ ८. चिन्त्यमिदम्, धरतेर्हलन्तत्वेगुपधत्वयोरभावात् ॥ ९. द्र. रामाश्रमी २।६।६॥, पृ.२६३॥, तत्र 'पोष्यवर्गे' इति दृश्यते॥ १०. 'स्नुव्रश्चिकृत्यृषिभ्यः कित्'(उणा-३४६)इत्युणादिगणसूत्रम् ॥ ११. 'जायन्ते' इति१॥ १२. 'जननी' इति३॥ १३. 'इत्यण्' इति२.३.४॥ १४. 'वहो धश्च' इत्युणादिगणसूत्रम् ॥ १५. 'क्रन्' इति४॥ १६. ४प्रतौ नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वीरपत्नी[1] वीरभार्या[2]**[१]

१ वीरः पतिरस्या **वीरपत्नी** । 'नित्यं सपत्न्यादिषु' ४।१।३५॥ इति नोन्तादेशः, 'ऋन्नेभ्यो ङीष्(ङीप्)'४।१।५॥। वीरस्य भार्या वीरभार्या । एकं सुभटपत्न्याः ॥

**कुलस्त्री[1] कुलबालिका[2] ।**

१ कुलस्य स्त्री **कुलस्त्री** । २ कुलस्य बालिका **कुलबालिका** । ''कुलपालिका''[अमरकोषः२।६।७॥]इत्यमरः । द्वे 'कुलवधू' इति ख्याताया: ॥

**प्रेयसी[1] दयिता[2] कान्ता[3] प्राणेशा[4] वल्लभा[5] प्रिया[6] ॥५१५॥**
**हृदयेशा[7] प्राणसमा[8] प्रेष्ठा[9] प्रणयिनी[10] च सा ।**

१ अतिशयेन प्रिया **प्रेयसी** । 'प्रियस्थिरस्फिरोरुबहुल-'६।४।१५७॥ इत्यादिना प्रियस्य प्रादेशः, 'उगितश्च' ४।१।५॥ इति ङीप्[३] । २ नरस्य दयते ईष्टे **दयिता** । 'दय दानादौ'(भ्वा.आ.से.), तृच्, 'आर्धधातुकस्य-'७।२।३५॥ इतीट्। ३ काम्यते **कान्ता** । 'कमु कान्तौ'(भ्वा.आ.से.), क्तः, 'अनुनासिकस्य क्विझलोः-'६।४।१५॥ इति दीर्घः । ४ प्राणान् ईष्टे **प्राणेशा** । 'ईश ऐश्वर्ये'(अ.आ.से.), अच्, टाप्। ५ वल्लते संवृणोत्यन्यत्र भ्रमन् मन इति **वल्लभा** । 'वल्ल संवरणे' (भ्वा.आ.से.), 'रासिवल्लिभ्यां च'(उणा-४०५)इत्यभच्प्रत्ययः। ६ प्रीणाति मनः **प्रिया** । 'प्रीञ् तर्पणे कान्तौ च'(क्र्या.उ.अ.), 'इगुपधज्ञाप्रीकिरः कः'३।१।१३५॥, 'अचि श्नुधातु-'६।४।७७॥ इतीयङ् ॥४१५॥ ७ हृदयस्येष्टे **हृदयेशा** । 'ईश ऐश्वर्ये' (अ.आ.से.), 'इगुपध-'३।१।१३५॥ इति कः । ८ प्राणानां समा तुल्या **प्राणसमा** । ९ अतिशयेन प्रिया **प्रेष्ठा** । 'अतिशायि(य)ने तमबिष्ठनौ'५।३।५५॥इतीष्ठन्, 'प्रियस्थिर-'६।४।१५७॥ इति प्रियस्य प्रादेशः । १० प्रणयः प्रेम, सोऽस्त्यस्याः **प्रणयिनी** । 'अत इनिठनौ'५।२।११५॥, 'ऋन्नेभ्यो ङीप्[४]' ४।१।५॥। प्रेमवतीत्यपि । दश कान्तायाः । 'वाहली[५] स्त्री' इति भाषा ॥

**प्रेयस्याद्याः[1-10] पुंसि पत्यौ भर्ता[11] सेक्ता[12] पतिर्वरः[13][14] ॥५१६॥**
**विवोढा[15] रमणो[16] भोक्ता[17] रुच्यो[18] वरयिता[19] धवः[20] ।**

१ प्रेयस्याद्याः प्रेयसीप्रमुखाः शब्दाः पुंसि पुंलिङ्गे वर्तमानाः सन्तः पत्यौ भर्तरि वर्तन्ते, तद्यथा-**प्रेयान्**, प्रेयांसौ, प्रेयांसः इत्यादि। २ **दयितः** । ३ **कान्तः** । ४ **प्राणेशः**। ५ वल्लभः। ६ प्रियः। ७ हृदयेशः। ८ प्राणसमः। ९ प्रेष्ठ[६]ऽष्टावकारान्ताः । १० **प्रणयी** इन्नन्तः । ११ बिभर्ति प्रियां **भर्ता** । 'डुभृञ् धारणपोषणयोः'(जु.उ.अ.), तृच् । १२ सिञ्चति **सेक्ता** । 'षिचिर्[७] क्षरणे'(तु.उ.अ.), तृच्, 'धात्वादेः षः सः'६।१।६४॥इति षत्वम् (सत्वम्) । १३ पाति रक्षति **पतिः**। 'पा रक्षणे'(अ.प.अ.), 'पातेर्डतिः'(उणा-४९७)। १४ वृणीते वरयति वा **वरः** । 'वृञ्(वृञ्) वरणे'(क्र्या.उ.से.), अच् ॥५१६॥ १५ विशेषेण वहति **विवोढा** । 'वह प्रापणे'(भ्वा.उ.अ.), तृच्, 'सहिवहोरोदवर्णस्य'६।३।११२॥ इत्योत्वम्, 'हो ढः'८।२।३१॥, 'झषस्तथोः-'७।२।४०॥इति धत्वम्, ष्टुत्वम्, 'ढो ढे लोपः'८।३।१३॥[८] । यौगिकत्वात् परिणेता, पाणिग्राहः, उपयन्तेत्यादि । १६ रमते चित्तम्, रमयति वा **रमणः** । 'रमु क्रीडायाम्'(भ्वा.आ.अ.), नन्द्यादित्वाद् ल्युः। १७ भुङ्क्ते कान्तां **भोक्ता** । 'भुज पालनाभ्यवहारयोः' (रुप.अ.), तृच् । १८ रोचते **रुच्यः** । 'रुच दीप्तौ'(भ्वा.-आ.से.), 'राजसूयसूर्य-'३।१।११४॥इत्यादिना साधुः । १९ वरयति **वरयिता** । णिजन्ताद् 'वृञ्(वृञ्) वरणे' (क्र्या.उ.से.), अत[:][९] तृच्, 'आर्धधातुकस्य-'७।२।३५॥ इतीट् । २० धुनाति रतावसरे शरीरमिति **धवः**। 'धूञ् कम्पने'(क्र्या.उ.वे.), अच्। विंशतिर्भर्तुः ॥

**जन्यास्तु[1] तस्य सुहृदः**

१ जनीं[१०] वहन्ति **जन्याः** । 'जनी प्रादुर्भावे'(दि.-आ.से.), 'जनिघसिभ्यामिण्'(उणा-५६९)इतीण्, 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि जनी,[११] तां वहन्ति *जन्याः मातुर्वयस्याः। 'संज्ञायां जन्या'४।४।८२॥इति द्वितीया*न्ताद् जनीशब्दाद् वहत्यर्थे यत्प्रत्ययः संज्ञायाम्। तस्य वरस्य सुहृदो वयस्याः, 'जानीया' इति भाषा । यथा-''प्रत्यासन्नस्त्वरतितरां जन्ययात्राप्रवेशः''[१२]इति ॥

१. 'तुलनीयोऽमरकोषः'२।६।६॥ २. १प्रतौ नास्ति ॥ ३. 'ङीष्' इति३॥ ४. 'ङीष्' इति३.४॥ ५. 'वाल्ही' इति३॥ ६. 'एतावष्टा-' इति१.२.३॥ ७. 'षिच' इति क्षीरतरङ्गिण्यादौ ॥ ८. अत्रेदृशी रूपसिद्धिर्युक्ता, तथा हि 'वह प्रापणे', तृच्, 'हो ढः' इति हस्य ढत्वे, 'झषस्तथोर्धोऽधः' इति तृचः तकारस्य धकारे 'ष्टुना ष्टुः' इति ष्टुत्वेन धस्य ढत्वे 'ढो ढे लोपः' इति ढलोपे, 'सहिवहोरोदवर्णस्य' इति वकारोत्तरस्थिताकारस्य ओकारे 'विवोढा' इति॥ ९. 'आत' इति३, १प्रतौ नास्ति ॥ १०. 'जानीं' इति१.४॥ ११. 'जानी' इति१.४॥ १२. द्र. अनेकार्थकैरवाकरकौमुदीटीका, भा-१, २।३५२॥, पृ.२०४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**विवाहः पाणिपीडनम् ॥५१७॥**

**पाणिग्रहणमुद्वाह उपाद् यामयमावपि ।**

**दारकर्म परिणयः**

१ विवहनं **विवाहः** । विशिष्टोऽग्निसाक्षिको वाहो वहनं स्वीकार इति वा । 'वह प्रापणे'(भ्वा.उ.अ.), घञ् । २ पाणिः पीड्यतेऽस्मिन् **पाणिपीडनम्** । 'पीड पीडने'[1] (चु.उ.से.), ल्युट् अधिकरणे **॥५१७॥** ३ पाणिर्गृह्यतेऽत्र **पाणिग्रहणम्** । 'ग्रह उपादाने'(क्र्या.उ.से.), अधिकरणे ल्युट् । ४ उद्वहनम् **उद्वाहः** । 'वह प्रापणे'(भ्वा.उ.अ.), घञ् । ५-६ उपात् परतो यामयमौ शब्दौ योज्यौ । उपपूर्वो यमिः स्वीकारार्थः, उपयमनम् **उपयामः, उपयमः** । 'यमु नियमने'[2] (भ्वा.प.अ.), आद्ये घञ् । पक्षे 'यमः समुपनिविषु च' ३।३।६३॥ इत्यप् । ७ दाराणां कर्म **दारकर्म** । ८ परिणयनं **परिणयः** । 'णीञ् प्रापणे'(भ्वा.उ.अ.), 'एरच्'३।३।५६॥ इत्यच् । अष्टौ विवाहस्य ॥ शेषश्चात्र-

"[3]जम्बूलमालिकोद्वाहे वरयात्रा तु दौन्दुभी[4] ।
गोपाली वर्णके शान्तियात्रा वरनिमन्त्रणे ॥१॥
स्यादिन्द्राणीमहे हेलिरुलूलुर्मङ्गलध्वनिः ।
**स्यात्तु स्वस्त्ययनं पूर्णकलसे(-शे) मङ्गलाह्निकम्** ॥२॥
**शान्तिके** मङ्गलस्नानं वारि पल्लववारिणा ।
हस्तलेपे[5] तु करणं हस्तबन्धे तु पीडनम् ॥३॥
तच्छेदे समयभ्रंशो[6] धूलिभक्ते तु वार्तिकम् ॥"[ ]इति ।

**जामाता दुहितुःपतिः ॥५१८॥**

१ जायां मिनोति सुवेश्मनि[8] प्रक्षिपति **जामाता** । 'डुमिञ् प्रक्षेपणे[9]'(स्वा.उ.अ.), 'नप्तृनेष्टृत्वष्टृ-'(उणा-२५२)इत्यादिना साधुः । दुहितुः पुत्र्याः पतिः भर्ता दुहितुः-पतिः । 'विभाषा स्वसृपत्योः'६।३।२४॥ वा षष्ठ्यलुक् । एकं जामातुः ॥५१८॥

**उपपतिस्तु जारः स्यात्**

१ उपजातः पतिः **उपपतिः** । २ जीर्यतेऽनेन, जारयति वा **जारः** । 'जॄ[ष्] वयोहानौ'(भ्वा.प.से.), 'दारजारौ कर्तरि णिलुक् च'(वा-३।३।२०॥)इति साधुः । द्वे जारस्य॥

**भुजङ्गो गणिकापतिः ।**

१ भुजाभ्यां नृत्यद्भ्यामिव गच्छति **भुजङ्गः** । 'गमेः सुपि'(वा-३।२।३८॥)इति खच्, 'खच्च डिद् वाच्यः'(वा-३।२।३८॥) । गणिका वेश्या, तस्याः पतिः गणिकापतिः, तस्यैकम् ॥

**जम्पती दम्पती जायापती भार्यापती समाः॥५१९॥**

१-३ जाया च पतिश्च **दम्पती** । एवं **जम्पती** । जायाया जम्भावदम्भावौ वा निपात्यौ, राजदन्तादित्वात्, पक्षे **जायापती** । ४ भार्या च पतिश्च **भार्यापती** । चत्वारोऽप्येते पुंसि द्विवचनान्त एव । 'जम्पतीभ्यां' इति तृतीयाचतुर्थी-पञ्चमीरूपम् । 'जम्पत्योः' इति षष्ठीसप्तम्यो रूपम् । चत्वारि यौगपद्येन स्त्रीपुंसयोः **॥५१९॥**

**यौतकं युतयोर्देयं सुदायो हरणं च तत् ।**

१ यौति युतकं योनिसम्बन्धः । तत्रामर्ष[10], (तत्र भवम्) । ['तत्र भवः'४।३।५३॥ इत्यण्] , । युतयोर्वधूवरयोरिदं वाऽण् **यौतकम्** । युतकमपि । "युतकं युगले युक्ते यौतके संशयेऽपि च"[ [11] ]इति रभसः । युतयोर्वधूवरयोर्देयं दानं परिधापनवस्त्राभरणादि यौतुकमुकारमध्यमपि, "यौतुकं यौतकं च तत्[12]"[ [11] ]इति वाचस्पतेः । २ सुष्ठु दीयते **सुदायः** । 'अकर्तरि च-'३।३।१९॥इति कर्मणि घञ् । दायोऽपि । यच्छाश्वतः- "यौतकादिधनं दायो दायो दानमुदाहृतम्"[शाश्वतकोशः-४५] इति । ३ ह्रियत इति **हरणम्** । 'हृञ् हरणे'(भ्वा.उ.अ.), कर्मणि ल्युट् । "हरणं [13]यौतकद्रव्ये भुजेऽपि हरणं हृतौ"[विश्व-प्रकाशकोशः, णान्तवर्गः, श्लो-४७]इति महेश्वरः । त्रीणि कन्या-दानकाले जामात्रादिभ्यो दीयमानद्रव्यस्य ॥

---

१. 'पीड गहने' इति स्वामी, 'पीड अवगाहने' इति मैत्रेयसायणौ ॥ २. '-नियमे' इति३, 'यम उपरमे' इति स्वामिसायणौ, 'यमु उपरमे' इति मैत्रेयः ॥ ३. 'जाम्बूल-' इति ३, तथा शेषनाममालास्वोपज्ञटीकायोः ॥ ४. 'दोन्दुभी' इति३.४॥ ५. 'हस्ते लेपे' इति१॥ ६. 'समवभ्रंशो' इति शेषनाममालास्वोपज्ञटीकयोः ॥ ७. तुलनीयोऽमरकोषः २।६।३२॥ ८. 'स्ववेश्मनि' इति३॥ ९. 'प्रेक्षणे' इति१॥ १०. 'तत्र मर्ष' इति२॥ ११. द्र. पदचन्द्रिका, भा-२, क्षत्रवर्गः, श्लो-४८२, पृ.५६८॥, रामाश्रमी २।८।२८॥, पृ.३५८॥ १२. 'च तत्' इति २प्रतौ नास्ति ॥ १३. 'यौतुक-' इति विश्वप्रकाशकोशे, णान्तवर्गः, श्लो-४७, पृ.५१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**कृताभिषेका महिषी[1]**

१ श्रीमहादेवीत्वे कृतोऽभिषेकोऽस्याः कृताभिषेका, यथा वासवदत्ता उदायनराजस्य । मह्यते पूज्यतेऽसाविति **महिषी**। 'मह पूजायाम्'(भ्वा.प.से.), 'अविमह्योष्टिषच्' (उणा-५४)इति टिषच्, षित्त्वात् 'षिद्गौरादिभ्यश्च'४।१।४५॥ इति ङीष्। एकं पट्टराज्ञ्याः ॥

**भोगिन्योऽन्या नृपस्त्रियः ॥५२०॥**

१ अन्या अकृताभिषेकाः पद्मावत्याद्याः भोगातिशययुक्तत्वाद् **भोगिन्यः** [2]प्रोच्यन्ते नृपस्त्रिय एव ॥५२०॥

**सैरन्ध्री याऽन्यवेश्मस्था स्वतन्त्रा शिल्पजीविनी ।**

१ या स्त्री अन्यवेश्मस्थाऽपरगृहस्थिता, स्वतन्त्रा स्वायत्ता एकायत्ता न भवतीत्यर्थः । शिल्पं प्रसाधनादिकलाकौशलम्, तेन जीवति या सा **सैरन्ध्री** । ([3]सहचरणमीरणं-(सह ईरमीरणं) धरते सैरन्ध्री), पृषोदरादिः, प्रथमस्वरमध्यः। मिश्रास्तु-''स्वैरं स्वाच्छन्द्यं धरति, मूलविभुजादित्वात् के, पृषोदरादित्वाद् वलोपे [4]इकारनकारौ गौरादिङीषि सैरिन्ध्री[5], सानुस्वारतृतीयस्वरमध्या, दन्त्यादिः''[ ]इत्याहुः । ''सैरिन्ध्री[6] परवेश्मस्थाशिल्पकृत्स्ववशस्त्रियाम्''[[7]]इति दन्त्यादौ रभसः।

''चतुःषष्टिकलाभिज्ञा शीलरूपादिसेविनी ।
प्रसाधनोपचारज्ञा[8] सैरन्ध्री [परिकीर्तिता]॥१॥''[[9]]इति

कात्यः । एकं [विशेषणत्रयवत्याः] ॥

**असिक्न्यन्तःपुरप्रेष्या(-प्रैष्या)**

१ 'षिञ् बन्धने'(स्वा.क्र्या.उ.अ.), 'युसिदृङ्भ्यः (घृसिदूङ्भ्यः) क्तः'(कातन्त्रोणा-२।१२९॥), सिता शुक्लकेशादिमती, नञ्, टापि, ततोऽन्या असिता कृष्णकेशादिमती 'असितपलितयोः प्रतिषेधः'(वा-४।१।३९॥)इति ङीप्नकारप्रतिषेधात्, 'क्न इत्येके'(वा-४।१।३९॥)इति ङीप् [10]क्नश्चान्तादेशः ।अन्तःपुरे प्रैष्या[11] अन्तःपुरप्रैष्या, 'प्रादूहोढोढ्येषैष्येषु'(वा-६।१।८९॥) इति वृद्धिः । एकमन्तःपुरगमनयोग्यस्त्रियाः ॥

**दूतीसञ्चारिके समे[12] ॥५२१॥**

१ दूयते मौखर्यात्, दुनोति वा [13]कार्याकरणाद् **दूती**। 'दुञ् उपतापे[14]'(स्वा.प.अ.), 'दुतनिभ्यां दीर्घश्च'(उणा-३७०) इति क्तः, गौरादिः । २ [15]सञ्चारयति सन्देशं प्रापयति **सञ्चारिका** ।'चर गतौ'(भ्वा.प.से.), णिजन्तादस्माद्[16] ण्वुल्, टाप्, 'प्रत्ययस्थात्-'७।३।४४॥इतीत्वम् ।द्वे दूत्याः ॥५२१॥

**प्रज्ञा प्राज्ञी प्रजानत्याम्**

१-२ प्रकर्षेण जानाति **प्रज्ञा** । 'ज्ञा अवबोधने' (क्र्या.प.अ.), 'इगुपध-'३।१।१३५॥इति कः, टाप् । ततः 'प्रज्ञादिभ्यश्च'५।४।३८॥ इति स्वार्थेऽणि, 'टिड्ढाणञ्-'४।१।-१५॥ इति ङीपि[17] **प्राज्ञी** । प्रकर्षेण जानाति प्रजानती । 'ज्ञा अवबोधने'(क्र्या.प.अ.), 'लटः शतृशानचावप्रथमासमानाधिकरणे'३।२।१२४॥, शित्त्वाद् 'ज्ञाजनोर्जा'७।३।७९॥, तस्याम् । द्वे प्रज्ञावत्याः । 'सुजाण स्त्री' इति भाषा ॥

**प्राज्ञा तु प्रज्ञयाऽन्विता ।**

१ प्रज्ञाऽस्त्यस्याः **प्राज्ञा** । 'प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः'५।२।१०१॥ । प्रज्ञया प्रशस्तबुद्ध्या, अन्विता युक्ता । एकं सुबुद्धिस्त्रियाः ॥

**स्यादाभीरी महाशूद्री[18] जातिपुंयोगयोः समे ॥५२२॥**

१ आभीरजातीया, आभीरस्य स्त्री वा **आभीरी** । अत्रोभयत्र जातिलक्षणः, पुंयोगलक्षणो वा ङीष्[19] । एवं **महाशूद्री**[20] । अत्राऽपि जातिलक्षणः, पुंयोगलक्षणो वा ङीप्(ङीष्) । वैश्यभेद एव आभीरो गवाद्युपजीवी, अन्यत्र महती चासौ शूद्रा च महाशूद्रेत्येव भवति। जातिपुंयोगयोः जातौ[21] पुंयोगे च, समे तुल्ये । द्वे आभीरस्त्रियाः ॥५२२॥

**पुंयुज्याचार्याचार्यानी**

१ पुंसा योगः पुंयुक्, तत्र । स्वतो मन्त्रव्याख्याकृद् **आचार्या**। आचर्यत उपास्यत आचार्या । 'चर गतिभक्षणयोः' (भ्वा.प.से.), 'ऋहलोर्ण्यत्'३।१।१२४॥ । २ आचार्यस्य स्त्री

---

१. तुलनीयोऽमरकोषः २।६।५॥ २. 'उच्यन्ते' इति३॥ ३. कोष्ठान्तर्गतपाठः ३प्रतौ न दृश्यते ॥ ४. 'इकार-' इति१.२॥ ५. 'सैरन्ध्री' इति१.३.४॥ ६. 'सैरन्ध्री' इति१.३॥ ७. टीकासर्वस्वम्, भा-२, २।६।१८॥, पृ.२७४॥, पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-२७६, पृ.३५१॥, रामाश्रमी २।६।१८॥, पृ.२६८॥ ८. '-चाराज्ञा' इति३॥ ९. द्र. अम.क्षीरस्वामिटीका २।६।१८॥, पृ.१३७॥, स्वोपज्ञटीका ३।५२१॥ १०. 'क्न इति' इति१॥ ११. 'प्रेष्या' इति१.२.३॥ १२. तुलनीयोऽमरकोषः २।६।१७॥ १३. 'कार्य-' इति१॥ १४. 'दुदु उपतापे' इति क्षीरतरङ्गिण्यादौ ॥ १५. 'सञ्च-' इति२॥ १६. इतोऽग्रे ३.४प्रत्योः 'णित्' इति दृश्यते ॥ १७. 'ङीषि' इति१.२.४॥ १८. '-शूद्री' इति अभिधानचिन्तामणिस्वोपज्ञटीकयोः॥ १९. 'ङीष्' इति १.२.४॥ २०. '-शूद्री' इति१॥ २१. इतोऽग्रे १प्रतौ 'च' इति दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**आचार्यानी**। 'इन्द्रवरुण-'४।१।४९॥इति ङीषानुकौ, 'आचार्याद्णत्वं च'(वा-४।१।४९॥)इति णत्वनिषेधः । ''आचार्यीति नैच्छन्त्यन्ये, अन्ये त्वाचार्येत्याबन्तं मन्यन्ते, तदर्थं ङीरपि[1] विकल्पनीयः''[सिद्धहेमबृहद्वृत्तिः २।४।६३॥]इति बृहद्वृत्तिः[2]। द्वे आचार्यस्त्रियाः ॥

## मातुलानी तु मातुली[3] ।

१-२ मातुलस्य स्त्री **मातुलानी**।'मातुलोपाध्याययोर्वा'(वा-४।१।४९॥)इति ङीषानुकौ । तदभावपक्षे पुंयोगलक्षणे ङीषि **मातुली** । द्वे 'मामी' इति ख्यातायाः ॥

## उपाध्यायान्युपाध्यायी

१-२ उपाध्यायस्य स्त्री **उपाध्यायानी** । 'मातुलोपाध्याययोर्वा'(वा-४।१।४९॥)इति ङीषानुकौ। तदभावे पुंयोगलक्षणे ङीषि **उपाध्यायी** । मिश्रास्तु-''स्वयं या विद्योपदेशिनी [4]उपेत्याधीयतेऽस्या वा, 'इङश्च'(३।३।२१॥)इत्यत्रापादाने स्त्रियामुपसंख्यानं तदन्ताच्च वा ङीष्[5]'( )इति कात्यायनवचनाद् अपादाने घञन्तात् स्त्रियां वा ङीष् सा उपाध्यायानी उपाध्यायी''[ ]इति च[6] व्याचक्षते । केचित्तु उपाध्यायेत्याबन्तमपीच्छन्ति । विप्रैरुपाध्यायो नाम वेदपाठकः, उपनयकर्ता[7] वोच्यते, तस्य स्त्रीनाम्नी द्वे ॥

## क्षत्रिय्यर्यी च शूद्र्यपि ॥५२३॥

१ क्षत्रियस्य भार्या **क्षत्रियी** । पुंयोगलक्षणो ङीष् । एकं क्षत्रियस्त्रियाः[8] । १ [9]अर्यस्य वैश्यस्य स्त्री **अर्यी**, आद्यस्वरादिरयम् । ''अर्यः स्वामिनि वेश्ये च''[विश्वप्रकाशकोशः, यान्तवर्गः, श्लो-१७]इति महेश्वरः । एकं वैश्यस्त्रियाः। १ शूद्रस्य स्त्री **शूद्री**, तालव्यादिः । उभयत्र पुंयोगलक्षणो ङीष् । एकं शूद्रस्त्रियाः ॥५२३॥

## स्वत आचार्या शूद्रा च

१ स्वतो मन्त्रव्याख्याकृद् **आचार्या** । [10]आचर्यते उपास्यते[11] । 'ऋहलोर्ण्यत्'३।१।१२४॥ । एकं स्वयं [12]वेदपाठिकायाः स्त्रियाः । १ शूद्रजातिः स्त्री **शूद्रा** । 'शूद्राच्चामहत्पूर्वाज्जातिः(शूद्रा चामहत्पूर्वा जातिः)'(वा-४।१।४॥) इति टाप् । एकं शूद्रजातिस्त्रियाः ॥

## क्षत्रिया क्षत्रियाण्यपि ।

१-२ क्षत्रियजातिः स्त्री **क्षत्रिया, क्षत्रियाणी**।'आर्यक्षत्रियाभ्यां वा स्वार्थे'(वा-४।१।४९॥)इति विकल्पेन ङीषानुकौ, तदभावे टाप् । स्वत एवेत्यत्राप्यनुवर्त्यम्, पुंयोगं विना स्त्रीत्यर्थः । ''पुंयोगेऽप्ययं विधिरिति कश्चित्, तन्मते क्षत्रियस्य भार्या क्षत्रियाणी, क्षत्रिया''[सिद्धहेमबृहद्वृत्तिः २।४।६६॥] इत्यपि बृहद्वृत्तिः[13] । द्वे क्षत्रियजातिस्त्रियाः ॥

## उपाध्याय्युपाध्याया स्यात्

१-२ स्वयं या विद्योपदेशिनी उपेत्याधीयतेऽस्या वा[14] । 'इङश्च'३।३।२१॥इत्यत्र 'अपादाने स्त्रियामुपसंख्यानं तदन्ताच्च वा ङीष्'( )इति कात्यायनवचनादपादाने घञन्तात् स्त्रियां वा ङीष्[15], सा **उपाध्यायी, उपाध्याया** च । द्वे उपाध्यायजातिस्त्रियाः ॥

## अर्याऽर्याण्यौ पुनः समे ॥५२४॥

१-२ अत्रापि स्वत एव, पुंयोगं विना अर्यजातिः स्त्री **अर्या, अर्याणी** । 'अर्यक्षत्रियाभ्यां वा'(वा-४।१।४९॥) इति ङीषानुक्, तदभावः, उभावप्याद्यस्वरादी । 'पुंयोगेऽपि विधिरयम्'( )इति कश्चित्, तन्मते अर्यस्य वैश्यस्य भार्या अर्या, अर्याणी, एतावप्याद्यस्वरादी । यत्कृष्णपण्डितः-([16]''अर्याणीति, अर्यो वैश्यः, तज्जातिः स्त्री 'अर्यः) स्वामिवैश्ययोः'३।१।१०॥'' [ ]इति निपातितः[17] । क्षत्रिया बाहुजजातिः । केचिद् दीर्घमार्यशब्दं पठन्ति, तदयुक्तम्[18], यतः ''अर्याणी स्वयमर्या स्यात्''[अमरकोषः २।६।१४॥]इति ह्रस्वमेवाऽमरसिंहः पपाठ । अतः क्षीरस्वाम्यपि 'अर्याणी' [अम.क्षीर. २।६।१४॥]इति प्रतीकमादाय-''अर्यक्षत्रियाभ्यां च

---

१. 'ङीषि' इति१॥ २. सि. बृहद्वृत्तौ ''आचार्यीति नेच्छन्त्यन्ये, उपाध्यायानी, उपाध्यायी, अन्ये तु-मातुला, आचार्या, उपाध्यायेत्यपीच्छन्ति, तदर्थं ङीरपि विकल्पनीयः'' इति दृश्यते, सिद्धहेमशब्दानुशासनम्, भा-१, २।४।६३॥, पृ.३९०॥ ३. तुलनीयोऽमरकोषः २।६।३०॥ ४. 'उपो-' इति१॥ ५. 'ङीषि' इति१.३॥ ६. ३प्रतौ न दृश्यते ॥ ७. '-कर्त्रा' इति४॥ ८. 'क्षत्रियस्त्रियाः' इति१.२नास्ति ॥ ९. 'आर्य-' इति३॥ १०. 'आचा-' इति२.३॥ ११. इतोऽग्रे ३प्रतौ 'आचार्या' इति दृश्यते ॥ १२. 'वेदपाठ-' इति३॥ १३. सि.बृहद्वृत्तौ ''धवयोग एवायं विधिरिति कश्चित्, तन्मते-आर्यस्य भार्या-आर्याणी, आर्या, एवं-क्षत्रियाणी, क्षत्रिया'' इति दृश्यते, सिद्धहेमशब्दानुशासनम्, भा-१, २।४।६६॥, पृ.३९१॥ १४. अनावश्यकोऽयं प्रतिभाति ॥ १५. 'ङीप्' इति १.२.४॥ १६. कोष्ठान्तर्गतपाठस्थाने ३प्रतौ ''अर्या वैश्यजातिः स्त्री आर्यः'' इति दृश्यते ॥ १७. 'निपातः' इति३॥ १८. 'यदुक्तम्' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(वा)'(वा-४।१।४९॥)इति ङीषानुक्तौ, पक्षे टाप्''[अम.क्षीर. २।६।१४॥]इत्युक्त्वा ''योपधाज्जातिलक्षणो ङीष् नास्ति'' [अम.क्षीर.२।६।१४॥]इत्याह । दीर्घपाठे तु आर्यशब्दस्य अजातिवाचित्वादेव ङीषोऽप्राप्तेर्योपधत्वादिपरिहाराभिधानमनर्थकं[1] स्यात्, अर्यशब्दस्य तु जातिवचनत्वादस्त्युपयोग इति ह्रस्वपाठमेव रोचयामहे इति । तथा च द्व्याश्रयटीकाकृत्-

''अर्याणी[2] क्षत्रियाण्यभीः किं शुभचातुर्यात् क्षत्रिया किमर्या[3] ।
इत्यूहाञ्चक्र आत्मसैन्ये धृतवत्सी(वात्सी)वात्स्यायनीपतिः सः ॥१॥'' [(सटीकम्)द्व्याश्रयमहाकाव्यम्, सर्गः-४, श्लो-७७]।

अत्र अर्याणी प्रेक्षापूर्वकारिणी वणिगादिजातिः स्त्री किं क्षत्रियाणी क्षत्रियजातिः स्त्री वर्तते, अभीक[4]त्वादेवमाशङ्का । क्षत्रियाणी ह्यभीः स्यात् । तथा[5] क्षत्रियजातिः स्त्री शुभचातुर्यात् शुभं[6] [7]परिणामहितं यच्चातुर्यं पर्यालोचितकारित्वं तस्माद्धेतोः किमर्या वणिगादिजातिरित्यादि[8]:''[(सटीकम्) द्व्याश्रयमहाकाव्यम्, सर्गः-४, श्लो-७७]इति । वणिगादीनां वैश्यजातावन्तर्भावाद् वैश्यवाची ह्रस्वादिरेव अर्यशब्दो, न दीर्घादिः । ये तु दीर्घादिमार्यशब्दं पठन्ति, स आर्य शब्दो वैश्यवाची व्याख्येयः, न सज्जनसौविदयोः पर्यायवाची, जातेरभावादिति । वैश्यजातिस्त्रीनाम्नी द्वे ॥५२४॥

## दिधिषूस्तु[1] पुनर्भूर्द्विरूढा[2]

१ दधाति पापं **दिधिषूः** । 'अन्दूदृम्भू-'(उणा-९३) इत्यादिना दधातेरुप्रत्यये, सुटि, धात्वन्तस्येत्वे, द्वित्वे, षत्वे च दिधिषूः । 'षष(धिष) शब्दे'(जु.प.से.), षज्यते(धिष्यते) निन्दिततया शब्द्यते वा, पूर्ववदूप्रत्यये द्वित्वे च वा दिधिषूः । ''दीधीङ् दीप्तिदेवनयोः'(अ.आ.से.), दीध्यनं[9] दीधीः दीप्तिः, क्विप्, दीधीं शोभां स्यति नाशयति, पूर्ववदूप्रत्यये, ईकारयोर्ह्रस्वत्वे च दिधिषूः''[10]इत्यन्ये । धृष्णोति वा । 'धृषेर्दिधिषदिधीषौ च'(हैमोणा-८४२)इत्यूः । ''दिधिं धैर्यमिन्द्रियदौर्बल्यात् स्यतीति दिधिषूः''[ ]इत्युज्ज्वलदत्तः । दिधिष्वौ, दिधिष्वः इत्यादि । दीधीषूरिति द्विचतुर्थस्वरोऽपि । **२** पुनर्भवति **पुनर्भूः**, क्विबन्तः। अन्यस्य भूत्वाऽन्यस्य भवतीत्यर्थः। पुनर्भ्वौ, पुनर्भ्वः इत्यादि । द्वौ वारावस्या द्विः ऊढा (द्विरूढा) संस्कृता, ''अक्षता च क्षता चैव पुनर्भूः संस्कृता पुनः'' [याज्ञवल्क्यस्मृतिः, आचाराध्यायः, श्लो-६७]इति । मनुस्त्वन्यथा प्राह-

''ज्येष्ठायां यद्यनूढायां कन्यायामुह्यतेऽनुजा ।
सा चाग्रेदिधिषूर्ज्ञेया पूर्वा तु दिधिषूर्मता ॥१॥''[11]इति ।

तदा ज्येष्ठायां कन्यायामपरिणीतायां लघीयसी कन्या परिणीता, तन्नामैकम् । अग्रेदिधिषूः, पञ्चाक्षरः, षष्ठस्वरान्तोऽपरिणीतज्येष्ठकन्याया नाम वारद्वयपरिणीतस्त्रियाः । 'घरघरणुउं[12]' इति भाषा॥

## अस्या दिधिषूः[1] पतिः[2] ।

१ अस्याः पुनर्भ्वाः पतिस्तन्नामैकं **दिधिषूः** इति । आत्मानो दिधिषूमिच्छति दिधिषूः । 'सुप आत्मनः क्यच्' ३।१।८॥, ततः क्विपि, 'लोपो व्योर्वलि[14]'६।१।६६॥इति यलोपः॥

## स तु द्विजोऽग्रेदिधिषूर्यस्य स्यात् सैव गेहिनी॥५२५॥

१ यस्य द्विजस्य विप्रस्य पुनर्भूरेव गेहिनी गृहिणी, स द्विजः अग्रेऽनन्यभार्यत्वात् प्रधानं दिधिषूर्यस्य सः **अग्रेदिधिषूः** उच्यते, पञ्चाक्षरमखण्डम् । यस्य प्रथमतः स्त्री नास्ति परिणीतस्त्रियं च परिणीतस्तन्नामेत्यर्थः । द्विजस्यैव प्राधान्याद् 'द्विज' इत्युक्तम्, अधिवेदने[15] सामान्येनोक्तेः । ''वर्णेषु सामान्येनासौ क्षत्रियादिष्वप्ययं वर्तते, ''दिधिषूः परपूर्वाग्रेदिधिषूस्तत्पुरपुरन्ध्रिकः''[16]इति सामान्येन नाममालादर्शनात् ॥५२५॥

## ज्येष्ठेऽनूढे परिवेत्ता[1]ऽनुजो दारपरिग्रही ।

१ ज्येष्ठे भ्रातरि अकृतविवाहे सति कनिष्ठो विवाहाद्धेतोः **परिवेत्ता** उच्यते । परिवर्ज्य विन्दति परिवेत्ता। परिपूर्वः 'विद्लृ लाभे'(तु.उ.अ.) अस्मात् तृच् ।
यत्स्मृतिः-

''येऽग्रजेष्वकलत्रेषु कुर्वते दारसङ्ग्रहम् ।
ज्ञेयास्ते परिवेत्तारः परिवित्तिस्तु पूर्वजः ॥१॥''[17] ।

उपलक्षणं चैतत् यथाऽग्निहोत्रादावपि परिवेदनव्यवहारोऽस्ति । एकं [ज्येष्ठेऽकृतविवाहे कृतदारपरिग्रहस्य कनिष्ठस्य] ॥

१. '-र्थकः' इति३॥ २. 'आर्याणी' इति द्व्याश्रये ॥ ३. 'किमार्या' इति द्व्याश्रये ॥ ४. 'आभि-' इति३, 'भीरु-' इति द्व्याश्रयटीका ॥ ५. इतोऽग्रे द्व्याश्रयटीकायां 'क्षत्रिया' इति दृश्यते ॥ ६. 'शुभ-' इति१॥ ७. 'परिणामे' इति द्व्याश्रयटीका ॥ ८. 'इत्यादिः' इत्यस्य स्थाने द्व्याश्रयटीकायां 'स्त्रीति' इति दृश्यते ॥ ९. 'दीधनं' इति३॥ १०. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-२८१, पृ.३५७॥ ११. अयं श्लोको मनुस्मृत्यां न दृश्यते ॥, द्र. अम. क्षीरस्वामिटीका २।६।२३॥, पृ.१३९॥, स्वोपज्ञटीका ३।५२५॥, पृ.११८॥ १२. '-रणू' इति३, '-रणौ' इति४॥ १३. तुलनीयोऽमरकोषः २।६।२३॥ १४. 'लोपेर्वलि' इति३॥ १५. '-वेदेने' इति४॥ १६. द्र. टीकासर्वस्वम्, भा-२, २।६।२३॥, पृ.२७९॥, तत्र ''परपूर्वा स्त्री दिधिषूरग्रेदिधिषु(स्त ! स्तु त)त्पुरन्ध्रीकः'' इति दृश्यते ॥, पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-२८१, पृ.३५८॥, रामाश्रमी २।६।२३॥, पृ.२७१॥ १७. द्र. अम.क्षीरस्वामिटीका २।७।५६॥, पृ.१७५॥, स्वोपज्ञटीका ३।५२६॥, पृ.११९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**तस्य ज्येष्ठः परिविंत्तिः**

१ तस्य परिवेत्तुः ज्येष्ठोऽग्रजः परिवर्ज्य यं विन्दति, स **परिविंत्तिः** । 'क्तिच्क्तौ च संज्ञायाम्'३।३।१७४॥ । एकं [परिवेत्तुर्ज्येष्ठभ्रातुः] ॥

**जाया तु परिवेदिनी ॥५२६॥**

१ तस्य परिवेत्तुः जाया, जायते सुखकारणतां जाया। 'जनी प्रादुर्भावे'(दि.आ.से.), 'जनेर्यक्'(उणा-५५०)इति यक्, 'ये विभाषा'६।४।४३॥ इत्यस्य व्यवस्थितविभाषात्वान्नित्यमात्वम् । परिवर्ज्य विन्दति **परिवेदिनी** । 'विद्लृ लाभे'(तु.-उ.अ.), नन्द्यादित्वाल्ल्युः, 'युवोरनाकौ'७।१।१॥, गौरादिः । एकं [परिवेत्तुर्जाया] ॥५२६॥

**वृषस्यन्ती कामुकी स्यात्**

१ ''वृषो नरो वृषः कामः''[ [1] ]इत्यनेकार्थमञ्जरी । वृषं नरं पुमांसं रत्यर्थमिच्छतीति । ''अश्ववृषयोर्मैथुनेच्छाया-मिष्यते''(वा-७।१।५१॥)इति क्यचसुक्, लटः शत्रन्ताद् ङीपि (ङीपि) **वृषस्यन्ती** । २ कमनशीला[2] **कामुकी** । कामुकशब्दाद् 'जानपद-'४।१।४२॥इत्यादिना ङीष्। द्वे मैथुनाभिलाषिण्याः॥

**इच्छायुक्ता तु कामुका ।**

१ धनगीतनृत्यादाविच्छायुक्ता इच्छावती । कामयतेऽभिलषति **कामुका** । 'कमु कान्तौ'(भ्वा.आ.से.), 'लषपतपद-'३।२।१५४॥ इत्यादिना उकञ्, 'नोदात्तोपदेशस्य-'७।३।३४॥ इत्यादौ 'अनाचमेः' इति 'आचमि(अनाचमि)-कमिवमीनाम्'(वा-७।३।३४॥)इति निषेधाद् वृद्धौ कामुका (कामुक), टाप् । एकमिच्छावत्याः ॥

**कृतसापत्न्यिकाऽध्यूढाऽधिविन्ना**

१ सपत्न्या भावः सापत्न्यम् । कृतं सापत्न्यं सपत्नी-भावोऽस्याः **कृतसापत्न्यिका**[4], तकारनकारान्तःस्थाद्यसंयोगमध्यः। 'उरःप्रभृतिभ्यः कप्'[5]५।४।१५१॥, 'प्रत्ययस्थात्-'७।३।४४॥ इतीत्वम् । मिश्रास्तु-''सपत्न्या भावः सापत्न्यम्। स्त्रियां ष्यञ्, षित्त्वाद् ङीष्, 'हलस्तद्धितस्य'६।४।१५०॥इति यलोपः, सापत्नी, ततः कनि ह्रस्वत्वे च सापत्निका । कृता उत्पादिता सापत्निका यस्याः सा कृतसापत्निका । [तथा] ''सपत्न्या आगतं द्वन्द्वं सापत्नम्[6] । 'तत आगतः'४।३।७४॥ इत्यण्, ततः स्वार्थे कन्, कृतं सापत्नकमस्याः कृतसापत्निका''[ [7] ]इति तु-हट्टचन्द्रः''[ ]इति निर्यकारं पेठुः । २ अधि प्रथममूढा **अध्यूढा** । ''अध्यूढ ईश्वरेऽध्यूढा कृतसापत्न्ययोषिति[8]''[विश्व-लोचनकोशः, ढान्तवर्गः, श्लो-६]इति श्रीधरः । ३ अधिविन्द-त्यस्याम् **अधिविन्ना** । ''प्रागूढा अधिशब्दस्य प्रागर्थत्वात्'' [ [9] ]इति सुभूतिः । अधिपूर्वः 'विद्लृ लाभे'(तु.उ.अ.), 'निष्ठा'३।२।१०२॥ इति क्तः, 'रदाभ्याम्-'८।२।४२॥ इति क्तस्य नत्वम्, पूर्वदकारस्यापि नत्वम्, टाप् । केचित्तु-''अधिपूर्वो विन्दतिरापेक्षिकप्राग्विवहने वर्तते''[ ]इत्याहुः । तन्मते ''अवि-(अधि)विदुरमात्यैराहृतास्तस्य यूनः प्रथमपरिगृहीते श्रीभुवौ राजकन्याः''[रघुवंशम्, सर्गः-१८, श्लो-५३]इति रघुः । त्रीणि सपत्न्याः[10] ॥

**अथ पतिव्रता ॥५२७॥**

**एकपत्नी सुचरित्रा साध्वी सती**

१ पतिर्व्रतमिव सदैवोपास्योऽस्याः **पतिव्रता** । यत्स्मृतिः-''नास्ति स्त्रीणां पृथग् यज्ञो न व्रतम्''[मनुस्मृतिः, अध्या-५, श्लो-१५५]इति ॥५२७॥ २ एकः पतिर्यस्याः सा **एकपत्नी** । 'नित्यं सपत्न्यादिषु'४।१।३५॥ इति नोन्तादेशः, नान्तत्वाद् 'ऋन्नेभ्यः-'४।१।५॥ इति ङीप्। ३ शोभनं चरित्रमस्याः **सुचरित्रा** । ४ नियतैकपतित्वात् प्रशस्ताऽत एव **साध्वी** । 'वोतो गुणवचनात्'४।१।४४॥ इति ङीष्[11]। ङीब-(ङीष)भावे साधुरपि । ५ अस्ति नित्यं भर्तृभक्तेति **सती** । 'अस[12] भुवि'(अ.प.से.), 'लटः शतृशानचौ-'३।२।१२४॥ इति शत्रादेशः, 'ऋन्नेभ्यः[13]-'४।१।५॥ इति ङीप्, 'अस्तिश्नसोर-ल्लोपः[14]'६।४।१११॥इत्यस्तेरकारलोपः। पञ्च सतीति ख्याताया:॥

**असतीत्वरी ।**

**पुंश्चली चर्षणी बन्धक्यविनीता च पांसुला[15] ॥५२८॥**

१. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-२६७, पृ.३४४॥, रामाश्रमी २।६।९॥, पृ.२६५॥, तयोः 'कामः' इत्यस्य स्थाने 'कालः' इति दृश्यते ॥ २. 'काम-' इति३.४॥ ३. '-सापत्निका' इति१.२.३॥ अभिधानचिन्तामणिस्वोपज्ञटीकयोः 'कृतसापत्निका' इति दृश्यते ॥ ४. 'सापत्निका' इति३.४॥ ५. 'क्यप्' इति२.३.४॥ ६. 'सापत्यम्' इति२॥ ७. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-२६५, पृ.३४०॥ ८. '-पत्न्यायोषिति' इति४॥ ९. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-२६५, पृ.३४०॥ १०. 'सपत्न्यः' इति३॥ ११. 'ङीप्' इति१.४॥ १२. 'असु' इति१.२.४॥ १३. 'उगितश्च'४।१।६॥ इत्येव युक्तः ॥ १४. 'श्नसोरल्लोपः' इति सूत्रस्वरूपम् ॥ १५. 'पांशुला' इति३.४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

### स्वैरिणी[8] कुलटा[9]

१ न सती **असती** । २ स्वेच्छया सर्वत्र एति भ्रमति **इत्वरी** । 'इण् गतौ'(अ.प.अ.), 'इण्नश्जिसर्तिभ्यः क्वरप्' ३।२।१६३॥, 'ह्रस्वस्य पिति-'६।१।७१॥ इति तुक्, 'टिड्ढाणञ्-'४।१।१५॥ इति ङीप् । ३ पत्युरन्यं पुमांसं वृत्ताच्चलयति च्यावयति **पुंश्चली** । चलेर्ण्यन्तात् 'कर्मण्यण्'३।२।१॥, 'टिड्ढाणञ्-'४।१।१५॥ इति ङीप् । ४ कर्षति यूनां मनः **चर्षणी**। 'कृष विलेखने'(भ्वा.प.अ.), 'कृषेरादेश्च चः[1]'(उणा-२६१) इत्यनिः, 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीष्, चवर्गप्रथमादिरयम् । ''कर्षति यूनां मन इति धर्षणी । ([2]'कृषेरादेश्च धः[3]'(उणा-२६१)इत्यनिः धातोरादेश्च ध इति । धर्षणीति बहुसम्मतः पाठः''[ [4]]इति मिश्राः । यन्महेश्वरः- ''धर्षणं स्यात् परिभवे रतेऽसत्यां तु धर्षणी''[विश्वप्रकाशकोशः, णान्तवर्गः, श्लो-४६]इति) । ''आवश्यके णिनौ धर्षिणी'' [ [4]]इत्येके । ५ पुरुषान्तरे मनो बध्नाति **बन्धकी** । 'बन्ध बन्धने'(क्र्या.प.अ.), ण्वुल्, गौरादिः । 'क्वुन् शिल्पिसंज्ञयोः' (उणा-१९०)इति क्वुन् वा । ६ न विनीता **अविनीता** । ७ मालिन्यहेतुत्वात् पांसु[5]रत्र पापम्, तद्योगात् 'खनखमुखकुञ्जनगपाण्डुपांसुभ्यश्च[6]'(वा-५।२।१०७॥)इति रः, कपिरि-(ल)कादित्वाद् लत्वम् । सिध्मादित्वाद् वा लच् **पांसुला**[7], दन्त्यान्ता तालव्यान्ता च ॥५२८॥ ८ स्वेन, लक्षणया स्वेच्छया ईरितुं गन्तुं शीलमस्याः **स्वैरिणी** । 'ईर गतौ'(अ.आ.से.), 'सुप्यजातौ णिनिः-'३।२।७८॥ इति णिनिः, 'स्वादीरेरिणोः'(वा-६।१।८९॥)इति वृद्धिः । यत्स्मृतिः-

''पतिं त्यक्त्वा तु या नारी गृहादन्यत्र गच्छति ।
विटैस्तु रमते नित्यं स्वैरिणी सा प्रकीर्त्यते[8] ॥१॥''

[ ]इति। ९ कुलानि गृहाण्यटति शीलं भेत्तुं **कुलटा** । 'अट गतौ'(भ्वा.प.से.), अच्, टाप् । कुत्सितं लटतीत्येके । 'लट बाल्ये'(भ्वा.प.से.), अच् । कोलति वा । 'कुल बन्धुसंस्त्यानयोः[9]'(भ्वा.प.से.), 'शकादिभ्योऽटन्'(उणा-५२१), कुटादित्वान्न गुणः । नव असत्याः ॥ शेषश्चात्र-

''कुलटायां तु[10] दुःशृङ्गी बन्धुदा कलकुणिका[11] ।
धर्षणी लाञ्छनी खण्डशीला मदननालिका ॥१॥''

त्रिलोचना मनोहारी ॥''[शेषनाममाला ३।११२-११३]॥

### याति या प्रियं साऽभिसारिका[1] ।

१ या स्त्री मदनेन मदेन वा श्लिष्टा सती कान्तमभिसरत्यभिसारयति वा, सा **अभिसारिका** । 'सृ गतौ'(भ्वा.प.अ.), ण्वुल्, 'प्रत्ययस्थात्-'७।३।४४॥ इतीत्वम् । ''कान्तार्थिनी तु या याति सङ्केतं साऽभिसारिका''[अमरकोषः २।६।१०॥] इत्यमरः । भरतस्तु-

''हित्वा लज्जाभये श्लिष्टा मदनेन मदेन च[12] ।
अभिसारयते कान्तं सा भवेदभिसारिका ॥१॥''

[नाट्यशास्त्रम्, अध्यायः-२२, श्लो-२०६]इत्याह । कान्ताऽभिलाषीणी या सङ्केतस्थलं व्रजति, तस्या एकम् ॥

### वयस्या[1]लिः[2] सखी[3] सध्रीची[4]

१ वयसा तुल्या **वयस्या** । 'नौवयोधर्म-'४।४।९१॥ इत्यादिना यत् । २ 'अली (अल अलाँ) भूषणादौ'(भ्वा.प.से.), आङ्पूर्वः, आलयति भूषयति । बाहुलकाद् 'जनिघसिभ्यामिण्'(उणा-५६९) । आलीयते विश्वासोऽस्याः [**आलिः**] । आङ्पूर्वाद् 'लीङ् श्लेषणे'(दि.आ.अ.)इत्यतो 'लीङो(वेञो) डिः' (चान्द्रोणा-१।५८॥)इति बाहुलकाद् डिः, टिलोपे च, आलिर्वा। 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि[13] आली । ''निवार्यतामालि ! किमप्ययं बटुः''[कुमारसम्भवम्, सर्गः-५, श्लो-८३]इति कुमारः । ३ समानाख्यायते जनैरिति **सखी** । 'समाने ख्यः-'(उणा-५७६)इति सूत्रेण 'ख्या प्रकथने'(अ.प.अ.) अतो डित्[14], डित्वाट्टिलोपः, 'सख्यशिश्वी-'४।१।६२॥इति ङीष्[15] । ४ सहाञ्चतीति **सध्रीची** । 'अञ्चु गतौ'(भ्वा.प.से.), सहपूर्वः, 'ऋत्विग्दधृक्-'३।२।५९॥ इति क्विन्[16], 'सहस्य सध्रिः'६।३।९५॥ । चत्वारि सख्याः । 'सहेली' इति भाषा ॥

### अशिश्वी[1] तु शिशुं विना ॥५२९॥

१ नास्ति शिशुरस्या **अशिश्वी** । 'सखशिश्वी[ति] भाषायाम्'४।१।६२॥इति साधुः । शिशुं पुत्रदुहितृरूपापत्यं विना रहिता । एकं सन्ततिरहितायाः ॥५२९॥

---

१. २.४ न दृश्यते ॥ २. कोष्ठान्तर्गतपाठः २प्रतौ न दृश्यते ॥ ३. १.४प्रत्योर्न दृश्यते ॥ ४. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-२६८, पृ.३४५॥ ५. 'पांशु-' इति३.४॥ ६. '-पांशुभ्यश्च' इति३.४॥ सिद्धान्तकौमुद्यां 'रप्रकरणे खमुखमुञ्जभ्य उपसंख्यानम्,' तथा 'नगपांसुपाण्डुभ्यश्च' इति पृथक् पृथग् वार्त्तिकस्वरूपं दृश्यते ॥ ७. 'पांशुला' इति३.४॥ ८. 'प्रकीर्तिता' इति३॥ ९. 'कुल संस्त्याने बन्धुषु च'इति स्वामिसायणौ, 'कुल सन्ताने बन्धुषु च' इति मैत्रेयः ॥ १०. 'कुलटायां तु' इति १.२.४प्रतिपु नास्ति ॥ ११. 'बन्धुदा कलकुणिका' इत्यस्य स्थाने १.२.४प्रतिषु 'बन्धुदारिका' इति दृश्यते ॥ १२. ''हित्वा लज्जां समाकृष्टा मदेन मदनेन वा'' इति नाट्यशास्त्रे, अध्या-२२, श्लो-२०६, पृ.२५७॥ १३. 'ङीपि' इति३॥ १४. 'ङीन्' इति१.३॥ १५. 'ङीप्' इति १.४॥ १६. 'क्विप्' इति१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**पतिवत्नी जीवत्पतिः**

१ पतिरस्या अस्ति **पतिवत्नी**। 'तदस्यास्त्यस्मिन्निति मतुप्'५।२।९४॥, 'अन्तर्वत्पतिवतोः-'४।१।३२॥ इति ङीष्[1] नुक् च, अस्मादेव निपातनाद् वत्वम् । २ जीवन् पतिरस्या **जीवत्पतिः** । जीवत्पत्नी अपि । द्वे जीवद्भर्तृकायाः ॥

**विश्वस्ता विधवा समे[2] ।**

१ 'श्वस प्राणने'(अ.प.से.), तालव्यादिः, भावे क्तः, 'आदितश्च'७।२।१६॥ इति चकारादिडभावः । श्वस्तं[3] जीवनम्, तद्विफलं विरुद्धं वाऽस्या **विश्वस्ता** । २ विगतो धवो भर्ताऽस्या **विधवा** । रण्डाऽपि। ([4]'रमु क्रीडायाम्'(भ्वा.आ.अ.), रमते स्वेच्छयेति रण्डा) । द्वे मृतभर्तृकायाः ॥

**निर्वीरा निष्पतिसुता**

१ निर्गतौ वीरौ पतिपुत्रावस्या **निर्वीरा** । अवीराऽपि । निर्गतौ पतिसुतौ भर्तृपुत्रावस्या निष्पतिसुता । ''रहिता पतिपुत्राभ्यां निर्वीरेत्यभिधीयते''[हलायुधकोशः२।४८६]इति हलायुधः ॥

**जीवत्तोका तु जीवसूः ॥५३०॥**

१ जीवत्तोकमपत्यमस्याः **जीवत्तोका** । २ जीवा जीवन्ती सूः प्रसूतिरस्या **जीवसूः** । 'षूङ् प्राणिप्रसवे'(दि.-आ.वे.), 'सत्सूद्विष-'३।२।६१॥ इति क्विप् । जीवस्वौ, जीवस्वः इत्यादि । द्वे जीवत्पुत्रायाः ॥५३०॥

**नश्यत्प्रसूतिका निन्दुः**

१ नश्यन्ती म्रियमाणा प्रसूतिरस्या नश्यत्प्रसूतिका । निन्दत्यात्मानं **निन्दुः** । 'णिदि कुत्सायाम्'(भ्वा.प.से.), बाहुलकाद् 'भृमृशी-'(उणा-७)इत्यादिना उः । निन्दू, निन्दवः इत्यादि धेनुवत् । ''नश्यत्प्रसूतिः कथिता च निन्दुः[5]''[हलायुधकोशः२।४८८॥]इति हलायुधः । एकं मृतवत्सायाः ॥

**सश्मश्रुर्नरमालिनी ।**

१ सह श्मश्रुणा वर्तते सश्मश्रुः । 'मल धारणे'(भ्वा.आ.से.), नरत्वं मलते धारयति **नरमालिनी** । ग्रहादित्वाण्णिनिः । ''पालिः समुत्थितश्मश्रुः सुतुण्डा नरमालिका[6]''[हारावली, पादश्लोकावधिः, श्लो-१३०(३०)]इति पुरुषोत्तमः। एकं सश्मश्र्वाः । ''पालिः''[शेषनाममाला ३।११३॥] शैषिकम् । 'मुखे मूंछि[7]' इति भाषा ॥

**कात्यायनी त्वर्धवृद्धा काषायवसनाऽधवा ॥५३१॥**

१ [8]कत्य(कत)स्यापत्यमिव **कात्यायनी** । यद्वा कात्यायनीव कात्यायनी। तस्यास्तपस्यावस्थायामृषिपत्न्याकारत्वात्[9] त्रिलक्षणेयम् । धर्मप्राधान्यादर्धं वृद्धत्वं यस्याः सा अर्धवृद्धा । कषायेण रक्तं काषायम्, काषायं वसनं यस्याः सा [10]कषायवसना। नास्ति धवो भर्ताऽस्या अधवा, रण्डेत्यर्थः। ''कात्यायन्यर्धवृद्धा [या] काषायवसनाऽधवा''[अमरकोषः २।६।१७॥]इत्यमरः । श्रीधरोऽपि ''गौर्यां कात्यायनीस्त्रियां काषायवस्त्रार्धवृद्धविधवायामपि स्मृता''[विश्वलोचनकोशः, नान्तवर्गः, श्लो-१७१-१७२] । हलायुधस्तु-''अर्धवृद्धा तु या नारी सा कात्यायनिका स्मृता''[हलायुधकोशः२।४८५॥] इत्येकलक्षणात्वादर्द्धयुवतीस्त्रियमाह । कापडिणि[11] नामैकम्। काषायवस्त्रपरिधायिकाया वा ॥५३१॥

**श्रवणा भिक्षुकी मुण्डा**

१ शृणोति **श्रवणा** । 'श्रु श्रवणे'(भ्वा.प.अ.), नन्द्यादित्वाल्ल्युः । श्रमणाऽपि । 'श्रमु तपसि खेदे च'(दि.-प.से.), 'कुमारश्रमणा-'२।१।७०॥ इति शब्दनिर्देशाल्ल्युः। २ भिक्षणशीला[12] भिक्षुः, स्वार्थे कनि ङीषि च **भिक्षुकी** । ३ मुण्ड्यते **मुण्डा** । कर्मणि घञ् । ''भिक्षुणी''[शेषनाममाला ३।११३]इति शैषिकम् । त्रीणि संयतिन्याः । 'सेवडी' इति भाषा ॥

**पोटा तु स्त्रीनृलक्षणा ।**

१ पुट्यते श्लिष्यते[13] क्लिबत्वेन **पोटा** । 'पुट संश्लेषणे[14]'(तु.प.से.), कर्मणि घञ् । स्त्रीनृलक्षणेत्युभयव्यञ्जना नपुंसकाख्या । स्त्री च ना च स्त्रीनरौ, तयोर्लक्षणं यस्यां सा स्त्रीनृलक्षणा । ''पोटा स्त्रीपुंसलक्षणा''[हारावली, पादश्लोकावधिः, श्लो-१३०(३०)]इति पुरुषोत्तमः । ''पुरुषवेष-

१. 'ङीप्' इति३॥ २. तुलनीयोऽमरकोषः २।६।११॥ ३. 'स्वस्तं' इति २.४॥ ४. कोष्ठान्तर्गतपाठः १.२.४प्रतिषु न दृश्यते ॥ ५. 'भिन्दुः' इति हलायुधकोशे २।४८८॥, पृ.५६॥ ६. ''पालिः समुत्थितश्मश्रुमरुण्डोच्चललाटिका'' इति हारावल्याम्, कोषपञ्चकसमेतः 'अमरकोषः,' पृ.४०२॥ ७. 'मुंछि' इति२, 'मुंछइ' इति३॥ ८. 'कात्य-' इति३॥ ९. '-कारयत्वात्' इति३॥ १०. 'कषाय-' इति२॥ ११. 'कापणि' इति१॥ १२. 'भिक्षणाशीलो' इति१॥ १३. 'भ्रिष्यति' इति१, 'श्लेष्यते' इति२॥ १४. 'श्लेषणे' इति२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धारिणी गर्भ एव दास्यं प्राप्ता वा[1]"[सिद्धहेमबृहद्वृत्तिः ३।१।-१११॥]इति बृहद्वृत्तिः। [2]विहन्दलाऽपि । नपुंसकस्त्रीनामैकम्। 'पावई' इति भाषा ॥

### साधारणस्त्री गणिका वेश्या पण्यपणाङ्गना ॥५३२॥
### भुजिष्या लञ्जिका रूपाऽऽजीवा

१ साधरणा चासौ स्त्री च **साधारणस्त्री** । २ गणयति ईश्वरानीश्वरौ **गणिका** । 'गण संख्याने'(चु.उ.से.), 'कृञादिभ्यो [3]वुन्[4]'(चान्द्रोणा-२।२०॥) । गणः कामुकसमूहः, तद्योगाद् 'अत इनिठनौ'५।२।११५॥इति ठन्, 'ठस्येकः'७।३।५०॥ इति वा[5] । ३ वेशो नेपथ्यम्, तेन शोभते **वेश्या** । 'कर्मवेशाद्[6] यत्'५।१।१००॥ इति यत्[7] । तालव्यान्ता । कामिमनसि वेशो निवेशोऽस्त्यस्या वेशा, निर्यकाराऽपि[8] । वेवेष्टि आत्मानमनेनेति वेषो नेपथ्यम्, तेन शोभत इति पूर्ववद् यति वेष्या, मूर्धन्यमध्याऽपि । ४-५ पण्यपणाभ्यामग्रेऽङ्गना योज्यते । पण्येन मूल्येन[9] अङ्गना **पण्याङ्गना** । एवं[10] **पणाङ्गना** ॥५३२॥ ६ भुज्यते कामिभिः **भुजिष्या** । 'भुज पालनाभ्यवहारयोः'(रुप.अ.), 'रुचिभुजिभ्यां किष्यन्'(उणा-६१८)इति किष्यन् । ७ लञ्जति भर्त्सयते **लञ्जिका** । 'लजि भर्त्सने[11]'(भ्वा.प.से.), ण्वुल्, 'प्रत्ययस्थात्-'७।३।४४॥इतीत्वम् । ८ रूपं सौन्दर्यमाजीवो जीविकाऽस्याः **रूपाऽऽजीवा** । अष्टौ वेश्यायाः । शेषश्चात्र-"वेश्यायां तु खगालिका वारवाणिः कामलेखा क्षुद्रा"[शेषनाममाला ३।११३-११४॥] ॥

### वारवधूः पुनः ।
### सा वारमुख्या

१ व्रियते संभज्यते वेश्याजनोऽनेनेति बाहुल्याद् 'अकर्तरि च-'३।३।१९॥ इत्यादिना घञि वारो वेश्याध्यक्षः, तत्प्रतिबद्धा वधूः वारवधूः। साधारणस्त्रीत्वाद् वारस्य, वृन्दस्य वा वधूः वारवधूः । वारयति वृणीते, 'वृञ् वरणे' (स्वा.उ.से.), [12]चुरादिण्यन्तादचि वारा, वारा चासौ वधूश्चेति वा । "वारस्त्रीगणिकावेश्या वारो वेश्यागणः स्मृतः"[[13]]इति नैगमाभिधानम्" [[13]]इति सुभूतिः । वारे[14] सेवाक्रमे नियुक्ता स्त्री वारवधूरिति वा । वारे सेवाक्रमे मुख्या **वारमुख्या**[15] । "राजकुलप्रतिबद्धा वारस्त्री वारमुख्या च" [हलायुधकोशः२।४९०॥]इति हलायुधः। एकं वारवध्वाः । 'ओलगाणी[16] राजपात्र' इति भाषा ॥

### अथ चुन्दी कुट्टनी शम्भली समाः ॥५३३॥

१ चुड्डति **चुन्दी** । 'चुड्ड हावकरणे[17]'(भ्वा.प.से.), भौवादिकः, पृषोदरादित्वाद् धात्वादेः सानुनासिकत्वम्, [18]टवर्गतृतीयस्य चतुर्थवर्गतृतीयत्वं च । देश्योऽयमित्यन्ये । २ कुट्टयति छिनत्ति [19]स्त्रीपुंसवैमत्यं **कुट्टनी** । 'कुट्ट छेदने'(चु.प.से.), 'कृत्यल्युटो बहुलम्'३।३।११३॥इति कर्तरि ल्युट् । ३ शं श्रेयो [20]भलयति (भालयते) आभण्डयति[21] प्रबन्धेन वक्ति[22] **शम्भली** । 'भल आभण्डने'(चु.उ.से.), चुरादिः, ततः पचाद्यचि, गौरादित्वाद् ङीष् । शं रतसुखं भलति (भलते) परिभाषत इति वा। सम्भली दन्त्यादिरित्यन्ये। त्रीणि [23]कुट्टन्याः। 'कुट्टणी' इति भाषा[24] ॥५३३॥

### पोटा वोटा च चेटी च दासी कुटहारिका ।

१ पुटति संश्लिष्यत्यधमेनेति **पोटा** । 'पुट संश्लेषणे[25]' (तु.प.से.), अच् । २ जपादित्वात्[26] पकारस्य वत्वे[27] **वोटा**। ३ चेटति **चेटी**। 'चिट [पर]प्रेष्ये[28]'(भ्वा.प.से.), 'इगुपध-'

---

१. सि. बृहद्वृत्तौ-"पुरुषवेषधारिणी स्त्री पोटा गर्भ एव दास्यं प्राप्ता वा" इति दृश्यते, भा-१, ३।१।१११॥, पृ.४९६॥ २. 'विहण्ड-' इति३॥ ३. 'वुञ्' इति३॥ ४. 'कृञादिभ्यः संज्ञायां वुन्'(उणा-७१३)इत्यत्रोणादिगणे॥ ५. 'इति वा' इति ३प्रतौ न दृश्यते ॥ ६. '-वेश्याद्' इति ३.४, '-वेषाद्' इत्यष्टाध्याय्याम् ॥ ७. 'तन्' इति३॥ ८. '-कारोऽपि' इति१॥ ९. 'मूलेन' इति३॥ १०. ३प्रतौ नास्ति ॥ ११. 'लज लजि भर्त्सने' इति स्वामी, 'लज लजि भर्जने' इति मैत्रेयसायणौ ॥ १२. 'चुरादिः' इति४॥ १३. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-२७७, पृ.३५२॥, तत्र "वारो गणिका वेश्यागणः स्मृतः" इति नैगमाभिधानम्" इति दृश्यते ॥ "स्त्रीवारः स्त्रीगणो वेश्यावारो वेश्यागणः स्मृतः । वेश्या वारस्य मुख्या स्याद् वारमुख्येति शब्दिता ॥' इति निगमाभिधानम्" इति टीकासर्वस्वे, भा-२, २।६।१९॥, पृ.२७५॥ १४. 'वार' इति३॥ १५. इतोऽग्रे ४प्रतौ 'वारमुख्या' इत्यधिकं दृश्यते॥ १६. '-गिणी' इति३॥ १७. स्वामिसम्मतोऽयं धात्वर्थः, 'भावकरणे' इति मैत्रेयसायणौ ॥ १८. 'टवर्गस्य' इति३॥ १९. 'पुंस्त्री-' इति३॥ २०. 'लभ-' इति२॥ २१. 'आभण्डति' इति३॥ २२. 'वक्तिः' इति४॥ २३. 'कुट्टि-' इति१.४॥ २४. 'कुट्टणी इति भाषा' इति ३प्रतौ न दृश्यते ॥ २५. 'श्लेषणे' इति१॥ २६. इतोऽग्रे ३प्रतौ 'वत्वे' इति दृश्यते ॥ २७. ३प्रतौ नास्ति ॥ २८. '-प्रैष्ये' इति३, 'परप्रैष्ये' इति स्वामी, 'परप्रेष्ये' इति मैत्रेयसायणौ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

३।१।१३५॥ इति कः, गौरादिः । ४ दासते[1] दस्यते वा **दासी**। 'दासृ दाने'(स्वा.प.से.), 'दसु उपक्षये[2]'(दि.प.से.), अच्, घञ् वा । ५ कुटं घटं हरति **कुटहारिका** । 'हृञ् हरणे' (भ्वा.उ.अ.), ण्वुल्, 'प्रत्ययस्थात्-'७।३।४४॥ इतीत्वम् । पञ्च दास्याः । ''गणेरुका वडवा कुम्भदासी''[शेषनाममाला ३।११४॥] शैषिकाणि ॥

## नग्ना तु कोटवी

१ **नग्ना**[3] । ''विवस्त्रा योषित् मुक्तकेशीत्यागमः'' [अम.क्षीर.२।६।१७॥]इति क्षीरस्वामी । 'कुट कौटिल्ये' (तु.प.से.) । कुटनं कोटः[4], कोटेन कुटिलतया, मुखादिनमनेन लज्जावशाद् वेति याति **कोटवी** । 'वी गति[व्याप्ति]प्रजनकान्त्यसनखादनेषु'(अ.प.अ.), क्विप् । कौटिल्ययोगाद् 'अन्येभ्योऽपि-'(वा-३।२।१०१॥)इति वप्रत्यये, गौरादित्वाद् ङीष्[5] वा । ''कुट्टनं कोट्टः । 'कुट्ट छेदने'(चु.प.अ.), घञि बाहुलकाद् गुणः । लज्जाभावात् कोट्टं छेदं वेति कामयते, क्विपि, गौरादिङीषि कोट्टवी''[ ]इति रूपरत्नाकरः[6] । द्वे वस्त्ररहितायाः ॥

## वृद्धा पलिक्नी[7]

१ वृद्धा पलिता **पलिक्नी** । 'क्नमेके'(वा-४।१।३९॥)इति साधुः । एकं वृद्धायाः। 'डोकरी' इति भाषा ॥

## अथ रजस्वला ॥५३४॥

**पुष्पवत्यधिरात्रेयी स्त्रीधर्मिणी मलिन्यवीः ।**
**उदक्या ऋतुमती च**

१ रजोऽस्याऽस्ति **रजस्वला** । 'रजःकृष्यासुतिपरिषदो वलच्'५।२।११२॥, 'तसौ मत्वर्थे'१।४।१९॥ इति[8] भत्वात् 'ससजुषोः-'८।२।६६॥ इत्युत्वं न ॥५३४॥ २ पुष्पं रजस्तद्योगान्मतुपि **पुष्पवती** । 'तदस्यास्ति-'५।२।९४॥इति मतुप्, 'उगितश्च'४।१।६॥ इति ङीप्। 'पुष्पिता'[9]इति माला। ३ न धीयते मनोऽस्यां **अधिः** । 'डुधाञ् धारणादौ'(जु.-उ.अ.), 'उपसर्गे घोः किः'३।३।९२॥ इति किः। ४ अत्रेरपत्यं स्त्री **आत्रेयी** । 'इतश्चानिञः'४।१।१२२॥इति ढक्। आत्रेयी प्रजापतिदुहितृत्वात्, यथा अत्रिदुहिताऽगम्या तथा ऋत्ववस्थायामियमपीत्यर्थः । अत्रायते (आत्रायते) इति वा। 'त्रैङ्[10] पालने'(भ्वा.आ.अ.), 'अचो यत्'७।१।९७॥, 'आदेचः-'६।१।४५॥ इत्यात्वम्, 'ईद्यति'६।४।६५॥ इतीत्वं वा। ''अव्युत्पन्नोऽयम्''[[11]]इति शाब्दिकाः । ५ रजः स्त्रीधर्मोऽस्त्यस्याः **स्त्रीधर्मिणी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः, 'ऋन्नेभ्यो ङीप्'४।१।५॥ । ६ मलमस्पृश्यत्वजनकं पापमस्यां **मलिनी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः, 'ऋन्नेभ्यो ङीप्'४।१।५॥ । मलाऽपि । ७ अवति रक्षति लज्जया गोपाद् रज इति **अवीः**[12] । 'अव रक्षणादौ'(भ्वा.प.से.), 'अवितृ(तृ)स्तृतन्त्रिभ्य ईः'(उणा-४३८)इति ईः । लक्ष्मीशब्दवत् । ''अविं स्त्रीधर्मिणीं विद्यात्''[[13]]इति कात्यदर्शनात् । ह्रस्वेकारन्ताऽपि[14] । ''अविर्भूपुष्पवत्योः स्त्री वायुप्राकारभास्सु ना'' [वैजयन्तीकोषः६।५।४॥]इति वैजयन्ती च । ८ चतुर्थेऽहनि स्नानार्थमुजकमर्हति **उदक्या** । उदकात् संज्ञायां यत् । ''ऋतुः स्त्रीकुसुमेऽपि च''[अमरकोषः३।३।६१॥]इति वचनात्, तद्योगान्मतुपि ङीषि(ङीपि) च **ऋतुमती** । नव रजस्वलायाः ॥

## पुष्पहीना तु निष्कला[15] ॥५३५॥

१ पुष्पं स्त्रीधर्मस्तेन हीना, निर्गता कलाऽस्या **निःकला** (**निष्कला**) । निःक्रान्ता (निष्क्रान्ता) कलाभ्योऽशुद्धिभ्यो वा। ''निकला(निष्कला) विगतार्तवा''[अमरकोषः२।६।२१॥] इत्यमरः । यस्या रजो नास्ति, तस्या एकम् ॥५३५॥

## राका तु सरजाः कन्या

१ गुरूणां लज्जां[16] राति ददाति **राका** । 'रा ला

---

१. 'दास्यते दासते' इति३.४॥ २. स्वामिसायणसम्मतोऽयं धात्वर्थः, 'तसु प्रक्षेपे, दसु च' इति मैत्रेयः ॥ ३. 'ओलजी व्रीडे'(तु.आ.से.), क्तः, 'ओदितश्च'८।२।४५॥ इति निष्ठानत्वम्, कुत्वम्, पृषोदरादित्वादादेर्नत्वम् ॥ ४. २प्रतौ नास्ति ॥ ५. 'ङीषि' इति१, 'ङीप्' इति३॥ ६. ''कुट्ट छेदने । कुट्टनं कोट्टः(पा.३।३।१८॥) बाहुलकाद् गुणः । लज्जाभयात् कोट्टं छेदं वेति कामयते। विच् (पा.३।२।७५॥), गौरादित्वात् ङीष् (पा.४।१।४१॥) 'कोट्टवी'-इति रूपरत्नाकरः'' इति पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-२७५, पृ.३५०॥ ७. तुलनीयोऽमरकोषः २।६।१२॥ ८. इतोऽग्रे ४प्रतौ 'मत्वर्थ इति' इति दृश्यते ॥ ९. द्र. अम.क्षीर. २।६।२१॥, पृ.१३८॥, स्वोपज्ञटीका ३।५३५॥, पृ.१२१॥ १०. 'त्रेङ्' इति१.२.३॥ ११. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-२७८, पृ.३५४॥ १२. 'अवी' इति३.४॥ १३. अम.क्षीर. २।६।२॥, पृ.१३८॥, पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-२७८, पृ.३५४॥, रामाश्रमी २।६।२०॥, पृ.२६९॥ १४. '-रान्तोऽपि' इति१॥ १५. 'निःकला' इति१.४॥ १६. 'लज्जा' इति३॥

Jain Education International     For Private & Personal Use Only     www.jainelibrary.org

दाने[1]'(अ.प.अ.), 'कृदाधारार्चिकलिभ्यः कः'(उणा-३२०) इति कः, टाप् । सह रजसा वर्तते सरजाः । ''राका भवेज्जातरजास्तु कन्या''[हलायुधकोश:२।४८८॥]इति हलायुधः । यस्याः कन्याया ऋतुरायाति, तस्या एकम् ॥

**स्त्रीधर्मः पुष्पमार्तवम् ।**
**रजः**

१ स्त्रीणां धर्मः **स्त्रीधर्मः** । २ पुष्पत्यनेन वराङ्गं **पुष्पम्** । पुष्पमिव पुष्पं वा, सुतफलहेतुत्वाद्वा । कुसुममपि । ३ ऋतुः प्राप्तोऽस्या **आर्तवम्** । पुष्पं ऋतोरणीति तस्य प्राप्तमित्यस्मिन् विषयेऽणप्रत्ययः । ऋतुः स्त्रीरजोऽत्रेति वा । ऋतौ गर्भग्रहणकाले भवं वा । 'तत्र भवः'४।२।५३॥ इत्यण्, 'तद्धितेष्वचामादेः'७।२।११७॥ इति वृद्धिः, 'उरण् रपरः'१।१।५१॥ । ४ रज्यत्यनेन **रजः**। 'रञ्ज रागे'(दि.उ.अ.), '-असुन्' (उणा-६२८)इत्यसुन् । असि अके अने घिनुणि च[2], 'रञ्जेर्न्लोपो वाच्यः'( ) । रजसी, रजांसि इत्यादि क्लीबे । चत्वारि रजसः । 'फूल' इति भाषा ॥

**तत्कालस्तु ऋतुः**

१ तस्य रजसः कालः समयः तत्कालः । इयर्त्ति **ऋतुः**, पुंसि । 'ऋ गतौ'(जु.प.अ.), 'अर्तेश्च'(उणा-७१)इति तुन्, किदिति तत्रानुवृत्तेर्न गुणः । एकं पुष्पागमनकालस्य ॥

**सुरतं मोहनं रतम् ॥५३६॥**
**संवेशनं संप्रयोगः संभोगश्च रहो रतिः ।**
**ग्राम्यधर्मो निधुवनं कामकेलिः पशुक्रिया ॥५३७॥**
**व्यवायो मैथुनम्**

१ रम्यते स्म रतम्, शोभनं रतं **सुरतम्** । २ मुह्यन्ति इन्द्रियाण्यत्रेति **मोहनम्** । 'मुह वैचित्ये'(दि.प.से.), 'करणाधिकरणयोश्च'३।३।११७॥ इति ल्युट् । ३ रमणं **रतम्** । 'रमु क्रीडायाम्'(भ्वा.आ.अ.), क्तः, 'अनुदात्तोपदेश-'६।४।३७॥ इति न्लोपः ॥५३६॥ ४ संविशन्त्यङ्गान्यत्रेति **संवेशनम्** । 'विश प्रवेशने'(तु.प.अ.), अधिकरणे ल्युट्। संप्रयोजनं **संप्रयोगः** । 'युजिर् योगे'(रु.उ.अ.), घञि, 'चजोः-'७।३।५२॥ इति कुत्वम् । ६ संभुज्यते सुखमत्रेति **संभोगः**। 'भुज पालनाभ्यवहारयोः'(रु.प.अ.), अधिकरणे घञ्, 'चजोः-' ७।३।५२॥ इति कुत्वम् । ७ रहसि जायमानत्वाद् **रहः**, सकारान्तः । ८ रमणं **रतिः**। 'रमु क्रीडायाम्'(भ्वा.आ.अ.), 'स्त्रियां क्तिन्'३।३।९४॥, 'अनुदात्तोपदेश-'६।४।३७॥ इत्यादिनाऽनुनासिकलोपः । ९ ग्राम्याणामविवेकिनां धर्मो **ग्राम्यधर्मः** । १० निधूयन्तेऽङ्गान्यत्र **निधुवनम्** । 'धूञ् कम्पने' ( ), अधिकरणे ल्युट्, 'अचि श्नुधातु-'६।४।७७॥ इत्युवङ् । ११ कामस्य केलिः **कामकेलिः** । १२ पशूनां क्रिया **पशुक्रिया,** क्रिया चेष्टा । पशुधर्मोऽपि । १३ व्यवायनं **व्यवायः**। विअवपूर्वः 'इण् गतौ'(अ.प.अ.), भावे घञ् । १४ मिथुनस्य स्त्रीपुंसयोः कर्म **मैथुनम्** । चतुर्दश मैथुनस्य ॥

**स्त्रीपुंसौ द्वन्द्वं मिथुनं च तत् ।**

१ स्त्री च पुमांश्च **स्त्रीपुंसौ** । 'अचतुरविचतुर-' ५।४।७७॥ इत्यादिना निपातितः । २ द्वौ द्वाविति **द्वन्द्वम्** । '[द्वन्द्वं] रहस्यमर्यादा-'८।१।१५॥ इति साधुः । ''द्वन्द्वो रहस्ये कलहे द्वन्द्वं मिथुनयुग्मयोः''[विश्वप्रकाशकोशः, वान्तवर्गः, श्लो-२१]इति महेश्वरः । ३ मेथते सङ्गच्छते **मिथुनम्** । 'मिथृङ्[3] मेधाहिंसनयोः सङ्गे च[4]'(भ्वा.उ.से.), बाहुलकादुनन्[5] । त्रीणि द्वन्द्वस्य। 'स्त्रीपुंसयोः युगपन्नाम' इति भाषा ॥

**अन्तर्वत्नी गुर्विणी स्याद् गर्भवत्युदरिण्यपि ॥५३८॥**
**आपन्नसत्त्वा गुर्वी च**

१ लक्षणया[6]ऽन्तरन्तर्वर्ती गर्भोऽस्या **अन्तर्वत्नी** । 'अन्तर्वत्पतिवतो ङीष्[7](ङीप्)'४।१।३२॥ इति ङीप्नुकौ[8] । २ 'गर्वेरत उच्च'(उणा-२१२)इति किनिः[9],अत उत्वं च **गुर्विणी**'' [[10]]इत्युणादिवृत्तौ[11] पुरुषोत्तमः । गुरुं गर्भस्थसत्वमिन्वति

---

१. क्षीरतरङ्गिण्यादौ 'रा दाने', 'ला आदने' इति पृथग् धातुर्दृश्यते ॥ २. अनिदितामित्यत्र 'रञ्जेर्णौ मृगरमण उपसंख्यानं कर्त्तव्यम्' इति, 'घिनुणि च रञ्जेरुपसंख्यानं कर्त्तव्यम्' इति, 'रजक-रजन-रजःसूपसंख्यानं कर्त्तव्यम्' इति च वार्त्तिकस्वरूपाणि, काशिकावृत्तिः, भा-५, ६।४।२४॥, पृ.३७८॥, 'भूरञ्जिभ्यां कित्'(उणा-६५६)इत्युणादिगणसूत्रम् ॥ ३. 'मेथृङ्' इति ३॥ ४. 'मिथृ मेथृ मेधाहिंसनयोः' इति क्षीरतरङ्गिणी, 'मिदृ मेदृ मेधाहिंसनयोः' इति मैत्रेयसायणौ ॥ ५. 'क्षुधिपिशिमिथिभ्यः कित्'(उणा-३३५)इत्युणादिगणसूत्रविद्यमानत्वादिदं विचारणीयम् ॥ ६. 'लक्षणान्त-' इति३॥ ७. 'अन्तर्वत्पतिवतोर्नुक्'४।१।३२॥ इत्यष्टाध्याय्याम् ॥ ८. 'ङीष्-' इति१.२.३॥ ९. 'गर्वेरत उच्च'(उणा-२१२) इत्यनेन इनन्प्रत्ययो विधीयते, न तु किनिः॥ १०. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-२८०, पृ.३५५॥, तत्र 'किनिः' इत्यस्य स्थाने 'इनन्' इत्येव दृश्यते ॥ ११. '-णादौ वृत्तौ' इति १॥

प्रीणयति वा गुर्विणी । 'इर्वि[1] प्रीणने'(भ्वा.प.से.), विच्, छान्दसो[2] वलोपः, 'ऋन्नेभ्यो ङीप्'४।१।५॥, 'पूर्वपदात् संज्ञायाम्-'८।४।३॥ इति इति णः, गौरादिः । ३ गर्भोऽस्त्यस्याः **गर्भवती** । 'तदस्यास्त्यस्मिन्निति मतुप्'५।२।९४॥ ४ उदरमस्त्यस्या **उदरिणी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः, 'ऋन्नेभ्यो ङीप्'४।१।५॥ ॥५३८॥ ५ आपन्नः प्राप्तो गर्भरूपः सत्त्वो जन्तुरनया **आपन्नसत्त्वा** । **६ गुर्वी** । 'वोतो गुणवचनात्' ४।१।४४॥ इति ङीष् । षड् गर्भवत्याः ॥

### श्रद्धालुर्दोहदाऽन्विता ।

१ श्रद्धा स्पृहा, तच्छीला **श्रद्धालुः** । 'स्पृहिगृहि-' ३।२।१५८॥ इत्यादिना आलुच् । २ दोहदो गर्भिण्यभिलाषः, तेनान्विता **दोहदान्विता** । द्वेऽऽम्लपानादिद्रव्यविशेषाभिलाषवत्या गर्भिण्याः ॥

### विजाता च प्रजाता च जाताऽपत्या प्रसूतिका ॥५३९॥

१-२ विजायते स्म **विजाता** । प्रजायते[3] स्म **प्रजाता** । विप्रपूर्वो[4] जनिः गर्भमोचने वर्तते, गर्भस्य कर्मणो धात्वर्थे एव प्रवेशादकर्मकत्वे 'गत्यर्थाकर्मकाच्च[5]-'३।४।७२॥ इत्यादिना कर्तरि क्तः । ३ जातमपत्यमस्या **जाताऽपत्या** । ४ प्रसूते स्मेति प्रसूता, स्वार्थे कनि **प्रसूतिका** । 'सूतकादीनां वा[6]'(वा-७।३।४५॥)इति विकल्पात् प्रसूतकेत्यपि भवति । चत्वारि जाताऽपत्यायाः । 'वियाई' इति भाषा ॥५३९॥

### गर्भस्तु गरभो भ्रूणो दोहदलक्षणं च सः ।

१ गीर्यतेऽसौ **गर्भः** । 'गॄ निगरणे'(तु.प.से.), 'अर्तिगृभ्यां भन्'(उणा-४३२) । २ 'कृस्तृ(-शृ)-'(हैमोणा-३२९) इत्यभचि **गरभः** । ३ भ्रियते कुक्षौ **भ्रूणः** । ४ दोहदो लक्षणं चिह्नमस्य **दोहदलक्षणम्**, क्लीबे, षडक्षरमखण्डम् । ''दोहदलक्षणं गर्भे स्यात् सन्धौ यौवनस्य[7] च''[अनेकार्थसङ्ग्रहः ६।३॥]इत्यनेकार्थः । ''वयःसन्धौ च गर्भे च भवेद् दोहदलक्षणम्''[विश्वलोचनकोशः, णान्तवर्गः, श्लो-११७]इति श्रीधरश्च । चत्वारि गर्भस्य ॥

### गर्भाशयो जरायूल्बे

१ गर्भ आशेतेऽत्र **गर्भाशयः** । 'शीङ् स्वप्ने'(अ.आ.से.), इत्यधिकरणे घः । २ जरामेति **जरायुः**, पुंसि । 'इण् गतौ'(अ.प.अ.), 'किञ्जरयोः श्रिणः'(उणा-४)इत्युण् । ३ उल्लीयते **उल्बम्**, पुंक्ली. । अलत्यावृणोति वा । 'उल्वादयश्च'(उणा-५३५)इति वनि साधुः । त्रीणि गर्भवेष्टनस्य । 'जर' इति भाषा ॥

### कललोल्बे पुनः समे ॥५४०॥

१ कलयति **कललम्**, पुंक्ली. शुक्रशोणितसमवायः। 'कल संख्यानगत्योः'(चु.उ.से.), वृषादित्वात् कलच् । २ उच्यति **उल्बम्**, पुंक्ली.। 'उच समवाये'(दि.प.से.), 'उल्वादिभ्यश्च'(उणा-५३५)इति वप्रत्यये चकारस्य च लकारो गुणाभावश्च निपात्यते । ''उल्बं गर्भप्रथमावस्था''[ ] इत्युणादिः । यदात्रेयः-

''प्रथमेऽहनि रेतश्च संयोगात् कललं च यत् ।
जायते बुद्बुदाकारं शोणितं च दशाहनि ॥१॥''[ ]
''सप्ताहं कललं विन्द्यात् ततः सप्ताहबुद्बुदम् ।
बुद्बुदाज्जायते पेशी पेशीतोऽपि घनं भवेत् ॥२॥''[ ]

इत्याचाराङ्गवृत्तिः । द्वे शुक्रशोणितसमवायस्य ॥५४०॥

### दोहदं दौर्हृदं[8] श्रद्धा लालसा

१ द्वे हृदयेऽत्र **दोहदम्** । पृषोदरादित्वात् साधुः । दोहमिच्छापूरणं ददातीति वा । २ अभिलाषान्तरेण दुष्टं हृत् हृदयं दुर्हृत्, तस्य भावः कर्म वा **दौर्हृदम्**, क्लीबे । युवादित्वादण्, बाहुलकात् 'हृद्भगसिन्धु-'७।३।१९॥ इत्यदिनोत्तरपदस्य न वृद्धिः । ३ श्रद्धानं **श्रद्धा** । ४ भृशं लसनं **लालसा**, पुंस्त्रीलिङ्गः । यदमरः-''सा(सो)ऽत्यर्थं लालसा द्वयोः''[अमरकोषः१।७।२८॥]इति । 'लल ईप्सायाम्'(चु.आ.से.), औणादिकोऽसण्, दन्त्यसः । अमरस्तु दोहदमिच्छा, इच्छाधिक्यं तु लालसामाह । चत्वारि 'डोहला' इति ख्यातस्य ॥

### सूतिमासि तु वैजननः[9]

---

१. 'इवी' इति२॥ २. 'छ-' इति३॥ ३. 'प्रकर्षेण जायते' इति३॥ ४. 'प्रपूर्वो' इति ३.४॥ ५. 'गत्यर्थाकर्मकश्लिष-' इत्यष्टाध्याय्याम्॥ ६. 'सूतकापुत्रिकावृन्दारकाणां वेति वक्तव्यम्' इति वार्तिकस्वरूपम् ॥ ७. 'यौवनेऽपि' इति३॥ ८. 'दौहृदं' इति १.२.३॥ ९. 'विजननं' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ सूतेः प्रसवस्य मासः सूतिमासः, तत्र । "दशमे मासि सूयते"[[1]]इति श्रुतेः[2] ।

"नवमे दशमे मासि[3] प्रबलैः सूतिमारुतैः ।
निःसार्यते बाण इव यन्त्रच्छिद्रेण सज्वरः ॥१॥"

[याज्ञवल्क्यस्मृतिः, प्रायश्चित्ताध्यायः, श्लो-८३]इति स्मृतेश्च । नवमो दशमो वा मासः विजननः, तत्र भवो **वैजननः** । 'तत्र भवः'४।३।५३॥ इत्यण् । "सूति मासौ वैजननः"[हलायुधकोशः:२।४९९॥]इति हलायुधः । एकं नवमस्य दशमस्य वा मासस्य ॥

**विजननं प्रसवः**

१ विजन्यते **विजननम्** । 'जनी प्रादुर्भावे'(दि.आ.से.), ल्युट् । २ प्रसवनं **प्रसवः** । 'षूङ् प्राणिगर्भविमोचने' (अ.आ.वे.), 'ऋदोरप्'३।३।५७॥ इत्यप्, घञोऽपवादः, 'सार्वधातुकार्धधातुकयोः'७।३।८४॥ इति गुणः । द्वे प्रसवस्य । 'जणवउं' इति भाषा ॥

**नन्दनः पुनः ॥५४१॥**

**उद्वहोऽङ्गात्मजः सूनुस्तनयो दारकः सुतः ।**

**पुत्रः**

१ नन्दयति **नन्दनः** । 'टुणदि(टुनदि) समृद्धौ'(भ्वा.प.से.), नन्द्यादित्वाद् ल्युः ॥५४१॥ २ उद्वहति **उद्वहः** । 'वह प्रापणे'(भ्वा.उ.अ.), अच् । ३-४ अङ्गाद् आत्मनश्च जायते **अङ्गजः, आत्मजः** । 'जनी प्रादुर्भावे'(दि.आ.से.), उभयत्र 'पञ्चम्यामजातौ'३।२।९८॥ इति डः । ५ सूयते **सूनुः** । 'षूङ् [प्राणि]प्रसवे'(दि.आ.से.), 'सुवः किच्च[4]'(उणा-३१५) इति नुप्रत्ययः । सूते वा । 'षूङ् प्राणिगर्भविमोचने'(अ.आ.वे.) । सूयते मात्रेति वा । 'षूङ् प्राणिप्रसवे'(दि.आ.से.), सर्वत्र 'सुवः किच्च'(उणा-३१५)इति नुः । ६ तनोति मुदं कुलं वा **तनयः** । 'तनु विस्तारे'(तु.उ.से.), 'वलिमलितनिभ्यः कयन्'(उणा-५३९)इति कयन् । " 'अघ्न्यादयश्च' (उणा-५५१)इति यत्प्रययोऽडागमश्च निपात्यते तनयः"[[5]] इत्यन्ये । ७ दृणाति दारयति वा[6] पित्रोरसातमिति **दारकः** । 'दृ(दॄ) विदारणे'(क्र्या.प.से.), ण्वुल् । ७ सूयते स्मेति **सुतः** । सुनोति, सुवति वा । 'षुञ् अभिषवे'(स्वा.उ.अ.) । ९ पुनाति मातापितराविति **पुत्रः** । 'पूञ्[7] पवने'(क्र्या.उ.से.), 'पुवो (पुवो) ह्रस्वश्च'(उणा-६०४)इति त्रक्, एकतकारोऽयम् । पुतो नरकभेदात् त्रायत इति वा । द्वितकारोऽयम् ॥

"पुन्नाम्नो नरकाद्यस्मात् पितरं[8] त्रायते सुतः ।
तस्मात् पुत्र इति ख्यातः स्वयमेव स्वयम्भुवा ॥१॥"

[मनुस्मृतिः, अध्यायः-९, श्लो-१३८]इति स्मृतेः । नव पुत्रस्य । शेषश्चात्र-"पुत्रे तु कुलधारकः स दायादो द्वितीयश्च ॥" [शेषनाममाला३।११४-११५॥]॥

**दुहितरि स्त्रीत्वे**

१ एते नन्दनादयो दशशब्दाः स्त्रीत्वे वर्तमाना दुहतरि वर्तन्ते, पुत्रीनामानि स्युरित्यर्थः । दोग्धि पितराविति **दुहिता** । 'दुह प्रपूरणे'(अ.उ.अ.), 'नप्तृनेष्टृ-'(उणा-२५२) इत्यादिना साधुः, तत्र । तेन नन्दनादिभ्यष्टापि नन्दना । सूनुवर्जं सर्वेऽप्याबन्ताः । पुत्राद् गौरादित्वाद् ङीषि पुत्री । यद्वा पुत्रशब्दात् शार्ङ्गरवाद्यञो ङीषि(ङीनि) पुत्री । "सुता तु दुहिता पुत्री"[[9]]इति त्रिकाण्डशेषो[10]ऽमरमाला[11] च । ततः कप्रत्यये 'केऽणः'७।४।१३॥ इति ह्रस्वत्वे स्त्रियां पुत्रिका । " 'पुत्रवृन्दारकाणां वोपसंख्यानम्[12]'( )इति पक्षे इकारस्यात्वं पुत्रका, पुत्रिका"[७।३।४५॥ प्रदीपः]इति कैयटः[13] । सूनोस्तु लक्षणाभावात् स्त्रियामपि सूनुरेव [शेषश्चात्र-"पुत्र्यां धीदा समर्धुका देहसंचारिणी"[शेषनाममाला ३।११५॥] ] ॥

**तोकापत्यप्रसूतयः ॥५४२॥**

**तुक् प्रजोभयोः**

१ उभयोः पुत्रे दुहितरि चेत्यर्थः । ([14] तौति हिनस्ति

---

१. द्र. अम.क्षीर. २।७।३९॥, पृ.१४२॥, तत्र 'सूयते' इत्यस्य स्थाने 'सूतवे' इति दृश्यते, स्वोपज्ञटीका ३।५४१॥, पृ.१२३॥, तत्र 'सूते वै' इति दृश्यते ॥ २. 'श्रुतिः' इति३॥ ३. 'वापि' इति याज्ञवल्क्यस्मृत्याम्, तत्रैव पाठान्तरेण 'मासि' इति दृश्यते, याज्ञवल्क्यस्मृतिः, पृ.४५५॥ ४. 'सुवः कित्' इत्युणादिगणे ॥ ५. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-२८५, पृ.२६०॥ ६. १प्रतौ नास्ति ॥ ७. 'पूङ्' इति ३॥ ८. 'त्रायते पितरं' इति मनुस्मृत्याम्, पृ.३६४॥ ९. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-२८५, पृ.३६१॥, रामाश्रमी २।६।२७॥, पृ.२७२॥ १०. त्रिकाण्डशेषे "समदुर्दुहिता पुत्रो द्वितीयः कुलधारकः" इति दृश्यते, २।६।७॥, पृ.२९०॥ ११. '-लायां' इति ३.४॥ १२. काशिकायां 'वा सूतकापुत्रकावृन्दारकाणामुपसंख्यानम्' इति वार्तिकस्वरूपं दृश्यते, भा-६, ७।३।४५॥, पृ.५४॥ १३. कैयटकृतप्रदीपटीकायां " 'पुत्रशब्दाच्छार्ङ्गरवादित्वात् ङीन्प्रत्ययस्ततः स्वार्थे कन् । 'केऽण' इति ह्रस्वः । तस्य पक्षेऽकारो विधीयते ।" इति दृश्यते, तत्रैव पुत्रशब्दादिति प्रतीकमादाय नागेशः "वार्तिके पुत्रकेति अकारमध्यपाठोऽपपाठः, कैयटविरोधात्" इत्याह, व्याकरणमहाभाष्यम्, सप्तमोऽध्यायः, ७।३।४५॥, पृ.२०३॥ १४. कोष्ठान्तर्गतपाठः २प्रतावेव दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दुःखमिति **तोकम्**) । 'तुद व्यथने'(तु.उ.अ.), 'पुंसि संज्ञायां घः-'३।३।११८॥, पृषोदरादित्वाद् दकारस्य कत्वम् । तुद्यतेऽनेन मातागर्भकाले । तुद्यते व्याध्यादिभिरिति वा । यद्वा 'ष्टुञ् स्तुतौ'(अ.उ.अ.), 'कृदाधारार्चिकलिभ्यः कः'(उणा-३२०) इति बाहुलकात् कप्रत्ययः, सकारलोपश्च । स्तूयते आनृण्यादिहेतोर्लोकैः। तथा च हरिश्चन्द्रोपाख्याने-"ऋणमस्मिन्न सति" [ ]इति। यद्वा 'तु' इति सौत्रो धातुर्वृद्ध्यर्थः कप्रत्ययः पूर्ववत्। तूयते वर्द्ध्यते पितृभ्यामिति । २ अपतनमपत् नरकापतनम् । अपति साधु **अपत्यम्** । 'तत्र साधुः'४।४।९८॥ इति यत् । "अपपूर्वात् तनोतेर्नञ्पूर्वात् पततेर्वा । 'अघ्न्यादयश्च'(उणा-५५१)इति यत्प्रत्ययान्तो निपात्यते, तनोतेष्टिलोपः"[ ]इति भाष्यम् । द्वावप्यजहल्लिङ्गौ । ३ प्रसूयतेऽसौ **प्रसूतिः** । कर्मणि क्तिन् ॥५४२॥ ४ तौति हिनस्ति दुःखमिति **तुक्**[1], । 'तु हिंसायाम्'( ), 'तोः किक्'(हैमोणा-८६९)इति किक् । तुकौ, तुकः इत्यादिव्यञ्जनककारान्तः । तोजति हिनस्ति मातापितरौ गर्भवासादिनेति **तुक्** । 'तुज हिंसायाम्'[2](भ्वा.प.से.), क्विप् । तुजौ, तुजः इत्यादिजकारान्तः । चकारान्तोऽप्यस्ति, तुचिर्गत्यर्थ प्रेरणार्थश्च"[ ]इति माधवः । क्विप् । गच्छत्यनेनानृण्यं पितृभ्य इति वा । प्रेर्यते प्रसवकाले वायुना पित्रा वीर्येण कृत्वा । यद्वा 'ष्टुच प्रसादे'(भ्वा.आ.से.), क्विप्, पृषोदरादित्वात् सकारलोपः । प्रसाद्यन्तेऽनेन पितरः पिता वा । तुचौ, तुचः इत्यादि"[ ]इति भाष्यम् । ५ प्रजायते **प्रजा** । 'जनी प्रादुर्भावे'(दि.आ.अ.), 'उपसर्गे च संज्ञायाम्'३।२।९९॥ पञ्चाऽपत्यस्य । शेषश्चात्र-"अपत्ये सन्तानसन्तती"[शेषनाममाला ३।११५॥]॥

**भ्रात्रीयो भ्रातृव्यो भ्रातुरात्मजे ।**

१ भ्रातुरपत्यं **भ्रात्रीयः, भ्रातृव्यः** । 'भ्रातुर्व्यच्च' ४।१।१४४॥ इति छव्यतौ । भ्रातुरात्मजे भ्रातुः पुत्रे । द्वे 'भत्रीजा' इति ख्यातस्य ॥

**स्वस्त्रीयो भागिनेयश्च जामेयः[3] कुतपश्च सः ॥५४३॥**

१ स्वसुर्भगिन्या अपत्यं **स्वस्त्रीयः**, द्विदन्त्यसः। 'श्वसुश्छः'४।१।१४३॥ इति छः, छस्य ईयादेशः । स्त्र्यपत्ये स्वस्त्रीया । २ भगिन्याः पुमपत्यं **भागिनेयः** । 'स्त्रीभ्यो ढक्' ४।१।१२०॥ । स्त्र्यपत्ये भागिनेयी । 'टिड्ढाणञ्-'४।१।१५॥ इत्यादिना ङीप् । ३ या(जा)मेरपत्यं **या(जा)मेयः**, अन्तस्थाद्यादिः[4] । 'इतश्चानिञः'४।१।१२२॥ इति ढक् । ४ कोतति **कुतपः** । कुतिः सौत्रः, 'भुजिकुति-'(हैमोणा-३०५)इति किदपः । चत्वारि 'भाणेजाइ[5]' इति ख्यातस्य ॥५४३॥

**नप्ता पौत्रः पुत्रपुत्रः**

१ नमति पूर्वजेभ्यो, न पतन्ति नरके पूर्वजा अनेन वा **नप्ता** । 'नप्तृनेष्टृत्वष्टृहोतृपोतृमातृभ्रातृजामातृदुहितृ'(उणा-२५२)इति सूत्रेण साधुः । २ पुत्रस्य साक्षादपत्यं **पौत्रः** । 'अनृष्यानन्तर्ये बिदादिभ्योऽञ्'४।१।१०४॥ । ३ पुत्रस्य पुत्रः **पुत्रपुत्रः** । द्वे पुत्रात्मजस्य । 'पोतरा' इति भाषा ॥

**दौहित्रो दुहितुः सुतः ।**

१ दुहितुः साक्षादपत्यं **दौहित्रः** । 'अनृष्यानन्तर्ये बिदादिभ्योऽञ्'४।१।१०४॥ इत्यञ् । एकं पुत्रीसुतस्य । 'दोहीतरा' इति भाषा । शेषश्चात्र-"नप्ता तु दुहितुः पुत्रे" [शेषनाममाला ३।११६॥] । अत एव "नप्ता नप्त्री च पौत्रिका"[[6]]इति रभसः ॥

**प्रतिनप्ता प्रपौत्रः स्यात्**

१ प्रतिजातो[7] नप्तृतः **प्रतिनप्ता** । २ प्रजातः पौत्रात् **प्रपौत्रः**। आदिपुरुषाच्चतुर्थः । द्वे 'पडपोता' इति ख्यातस्य ॥

**तत्पुत्रस्तु परम्परः ॥५४४॥**

१ तस्य प्रपौत्रस्य पुत्रस्तत्पुत्रः । परात् परतरः **परम्परः**, पृषोदरादित्वात् । पराम्पराऽऽस्यास्तीति, 'अर्शआदिभ्योऽच्'५।२।१२७॥ वा । पुंस्ययम् । यन्महेश्वरः-

"परम्परः प्रपौत्रादौ मृगभेदे परम्परः ।
परम्परा परीपाट्यां सन्तानेऽपि वधे क्वचित् ॥१॥"

[विश्वप्रकाशकोशः, रान्तवर्गः, श्लो-२४७]इति । एकं प्रपौत्रपुत्रस्य । 'पडपोतरानुपुत्र[8]' इति भाषा ॥५४४॥

**पैतृष्वसेयः स्यात् पैतृष्वस्त्रीयस्तुक् पितृष्वसुः ।**

१. 'कुक्' इति४॥ २. 'तुज तुजि हिंसायाम्' इति स्वामिमैत्रेयौ ॥ ३. 'यामेयः' इति३॥ ४. इदं विचारणीयम्, 'जामेयः' इति मूलस्य तत्स्वोपज्ञटीकायाश्च विरुद्धत्वात्, अथवा 'वाचकजस' 'वाचकयश' इत्यादिनेवात्रापि समाधेयम् ॥ ५. 'भाणेजा' इति४॥ ६. द्र. टीकासर्वस्वम्, भा-२, २।६।२९॥, पृ.२८५॥, पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-२८७, पृ.३६३॥, रामाश्रमी २।६।२९॥, पृ.२७३॥ ७. '-जातौ' इति४॥ ८. '-नौपुत्र' इति ३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ पितृष्वसुरपत्यं **पैतृष्वसेयः** । 'ढकि लोपः'४।१।-१३३॥, ([1]पितृष्वसुरन्त्यलोपो ढकि), अत एव ढक् । २ पितृष्वसुरपत्यं **पैतृष्वस्रीयः**। 'पितृष्वसुश्छण्'४।१।१३२॥ इति छण्, 'आयनेयी-'७।१।२॥ इति छस्य ईयादेशः । पितुः स्वसा भगिनी पितृष्वसा, तस्याः तुक् अपत्यम् । द्वे 'फूफीआई-भाई'[2] इति ख्यातस्य ॥

## मातृष्वस्रीयस्तुग् मातृष्वसुर्मातृष्वसेयवत् ॥५४५॥

१ मातृष्वसुरपत्यं **मातृष्वस्रीयः** । 'मातृष्वसुश्च' ४।१।१३४॥ इति छण् । २ ढकि **मातृष्वसेयः** । 'मातृ-पितृभ्यां स्वसा'८।३।८४॥ इति षत्वम् । द्वे 'मासीयाई[3]' इति ख्यातस्य भ्रातुः[4] ॥५४५॥

## विमातृजो वैमात्रेयः

१ विरुद्धा माता विमाता, मातुः सपत्नी। प्रादिसमासः। विमातुर्जातो विमातृजः । विमातुरपत्यं **वैमात्रेयः**। शुभ्रादित्वाद् ढक् । एकं विमातृजस्य । 'सपत्नीसुत[5]' इति भाषा ॥

## द्वैमातुरो द्विमातृजः ।

१ द्वयोर्मात्रोरपत्यं **द्वैमातुरः**, पञ्चमस्वरमध्यः । 'मातु-रुत्संख्यासंभद्रपूर्वायाः'४।१।११५॥ इत्यण्, उकारश्चान्तादेशः, 'उरण् रपरः'१।१।५१॥ । द्वाभ्यां मातृभ्यां जातो द्विमातृजः । ([6]बे माता बिचे १ पुत्र नाम, एकं १द्वैमातुरः'॥

## सत्यास्तु तनये सांमातुरवद् भाद्रमातुरः ॥५४६॥

१ सत्याः साध्व्यास्तनये पुत्रे, सङ्गताया मातुरपत्यं **सांमातुरः**। २ एवं **भाद्रमातुरः** । 'मातुरुत्संख्यासंभद्रपूर्वायाः' ४।१।११५॥ इत्युभयत्राऽण्, उकारश्चान्तादेशः, रपरत्वम् । द्वे सतीपुत्रस्य ॥५४६॥

## सौभागिनेयकानीनौ सुभगाकन्ययोः सुतौ ।

१ सुभगायाः पुमपत्यं **सौभागिनेयः** । 'कल्याण्या-दीनामिनङ्'४।१।१२६॥ इति ढक्, इनङन्तादेशश्च, 'हृद्भग-सिन्ध्वन्ते पूर्वपदस्य च'७।३।१९॥ इत्युभयपदवृद्धिः। १ कन्याया अनूढाया अपत्यं **कानीनः** । 'कन्यायाः कनीन च'४।१।११६॥ इत्यण्, कनीनादेशश्च । ''कन्यापुत्रस्तु कानीनः''[हलायुधकोशः २।५०१॥]इति हलायुधः । सुभगाकन्ययोः सुताविति सुभगा-सुतः कन्यासुतश्चेत्यनुक्रमेण योज्यम् ॥

## पौनर्भवपारस्त्रैणेयौ पुनर्भूपरस्त्रियोः ॥५४७॥

१ पुनर्भ्वा अपत्यं **पौनर्भवः** । 'तस्यापत्यम्'४।१।-९२॥ इत्यण् ।

''पुनरक्षतयोनित्वाद् वाह्यते या यथाविधि[7] ।
सा पुनर्भवः सुतस्तस्याः पौनर्भव उदाहृतः ॥१॥''

[ ]इति स्मृतिः । १ परस्त्रिया अपत्यं **पारस्त्रैणेयः**। 'कल्या-ण्यादीनामिनङ्'४।१।१२६॥ इति ढक्, इनङन्तादेशश्च, अनु-शतिकादित्वादुभयपदवृद्धिः[8] । ''पुनर्भूपरस्त्रियोः'' इत्यत्र पूर्व-स्थं सुताविति पदं ग्राह्यम्, तेन पुनर्भूसुतनामैकम् । 'द्वितीय-वारौढस्त्रीसुत' इति भाषा । एकं परस्त्रीसुतस्य ॥५४७॥

## दास्या दासेरदासेयौ

१ दास्या अपत्यं **दासेरः** । 'क्षुद्राभ्यो वा[9]'४।१।-१३१॥ इति ढ्रक्, ढस्यैयादेशः, 'लोपो व्योर्वलि'६।१।६६॥ इति यलोपः । २ पक्षे स्त्रीभ्यो ढकि **दासेयः** । द्वे दासीपुत्रस्य॥

## नाटेरस्तु नटीसुतः ।

१ नट्या अपत्यं **नाटेरः** । 'क्षुद्राभ्यो वा'४।१।-१३१॥ इति ढ्रक् । नाटेयोऽपि । नट्याः सुतो नटीसुतः । एकं नटीसुतस्य ॥

## बन्धुलो बान्धकिनेयः कौलटेरोऽसतीसुतः ॥५४८॥

१ बन्धून् लाति **बन्धुलः** । २ बन्धक्या अपत्यं **बान्धकिनेयः** । 'कल्याण्यादीनामिनङ्'४।१।१२६॥ इति ढक्, इनङन्तादेशश्च। ३ कुलटाया अपत्यं **कौलटेरः** । 'कुलटाया वा'४।१।१२७॥ इति ढ्रक्[10], ढस्यैयादेशः, 'लोपो व्योर्वलि' ६।१।६६॥ इति यलोपः । असत्याः सुतोऽसतीसुतः। त्रीण्य-सतीपुत्रस्य[11] ॥५४८॥

## स तु कौलटिनेयः स्याद् यो भिक्षुकसतीसुतः ।

---

१. कोष्ठान्तर्गतपाठः २प्रतौ नास्ति ॥ २. 'फूईयाई' इति१, 'फूईयाईभाई' इति२, 'पुंफियाईभाई' इति३॥ ३. '-याईभाई' इति४॥ ४. 'भ्रातुः' इति ४प्रतौ नास्ति ॥ ५. अत्र 'सौकरो बेटौ' इति ४प्रतेष्टिप्पणी ॥ ६. कोष्ठान्तर्गतपाठः १प्रतावेव बहिर्भागे दृश्यते ॥ ७. '-विधिः' इति४॥ ८. '-भयवृद्धिः' इति१॥ ९. 'क्षुद्राभ्यो वा'४।१।१३१॥ इत्यष्टाध्याय्याम् ॥ १०. 'कुलटाया वा'४।१।१२७॥ इत्यनेन इनङ् विकल्प्यते, न तु ढ्रक् ॥ ११. '-सुतस्य' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ या भिक्षार्थं कुलानि गृहाण्यटति, न तु जारार्थं[1] सती भिक्षुकी कुलटा, तस्याः पुत्रः **कौलटिनेयः** । 'कल्याण्यादीनामिनङ्'४।१।१२६॥ इति ढक्, इनङन्तादेशश्च । ''कुलं जनपदे गृहे''[विश्वप्रकाशकोशः, लान्तवर्गः, श्लो-१०]इति विश्वः । भिक्षुकी चासौ सती च भिक्षुकसती, तस्याः सुतः, 'पुंवत्कर्मधारये'६।३।४२॥ इति पुंवद्भावः ॥

## द्वावप्येतौ कौलटेयौ

१ एतावसत्या भिक्षुकसत्याश्च सुतौ द्वावपि **कौलटेयौ**, उच्येते इत्यन्वयः । स्त्रीभ्यो ढकि कौलटेयः ॥

## क्षेत्रजो देवरादिजः ॥५४९॥

१ क्षेत्रे जातः **क्षेत्रजः** । 'सप्तम्यां जनेर्डः'३।२।-९७॥ । क्षेत्रशब्दोऽत्र कलत्रवाची । यन्महेश्वरः-''क्षेत्रं शरीरे केदारे सिद्धस्थानकलत्रयोः''[विश्वप्रकाशकोशः, रान्तवर्गः, श्लो-४४]इति । देवरादिभ्यो जातो देवरादिजः । यन्मनुः-

''यस्तल्पजः प्रमीतस्य क्लीबस्य व्याधितस्य वा ।
स्वधर्मेण नियुक्तानां(-यां) स पुत्रः क्षेत्रजः स्मृतः ॥१॥''

[मनुस्मृतिः, अध्यायः-९, श्लो-१६७] । तल्पे कलत्रे जातस्तल्पजः । यन्महेश्वरः-''तल्पं च[2] शयनीये स्यात् तल्पमट्टकलत्रयोः''[विश्वप्रकाशकोशः, पान्तवर्गः, श्लो-८]इति । एकं देवरादिसुतस्य ॥

## स्वजाते त्वौरसोरस्यौ[3]

१-२ स्वस्माज्जातः स्वजातः, तत्र । 'स्वजात' इत्यनेन कुण्डगोलकादिनिरासः । ''उरो वक्षसि च श्रेष्ठे''[मेदिनीकोशः, सान्तवर्गः, श्लो-१९]इति मेदिनिः । उरसा श्रेष्ठेन धर्मप्रधानत्वाद् दशपुत्रेभ्यः श्रेष्ठतया निर्मितो जनितो निर्मितार्थे 'उरसोऽण् च'४।४।९४॥ इत्यण्, चकाराद् यत् **औरसः**, **उरस्यः**। यन्मनुः-

''स्वक्षेत्रे संस्कृतायां तु स्वमुत्पादयेद्धि यम् ।
तमौरसं विजानीयात् पुत्रं प्राथमकल्पिकम्[4] ॥१॥''

[मनुस्मृतिः, अध्यायः-९, श्लो-१६६]इति । द्वे सुजातसुतस्य। 'प्रथमजणिओ[5]' इति भाषा ॥

## मृते भर्तरि जारजः ।

## गोलकः

१ जाराज्जातो जारजः । गुड्यते लज्जावशाद् गोप्यते **गोलकः** । 'गुड रक्षणे'(तु.प.से.), कर्मणि घञि, लत्वे च, ततः स्वार्थे कन् । एकं जारजस्य[6] ॥

## अथाऽमृते कुण्डः

१ अमृते जीवति भर्तरि जारजातस्यैकम्[7] । कु[ण]ड्यते दह्यते कुलमनेन **कुण्डः** । 'कुडि दाहे'(भ्वा.आ.से.), घञ् । यत्स्मृतिः[8]-

''परनार्यां प्रजायेते[9] द्वौ सुतौ कुण्डगोलकौ ।
पत्यौ जीवति कुण्डस्तु मृते भर्तरि गोलकः[10] ॥१॥''

[मनुस्मृतिः, अध्यायः-३, श्लो-१७४]॥

## भ्राता तु स्यात् सहोदरः ॥५५०॥

## समानोदर्यसोदर्य[11]सगर्भसहजा अपि ।

## सोदरश्च

१ भजति भ्राजतेऽनेन वा **भ्राता** । 'भज सेवायाम्' (भ्वा.उ.अ.), 'भ्राजृ दीप्तौ'(भ्वा.आ.से.) वा । 'नप्तृनेष्टृत्वष्टृहोतृपोतृ[12]मातृभ्रातृ[13]जामातृपितृदुहितृ'(उणा-२५२)इति साधुः । २ सह तुल्यमुदरमस्य **सहोदरः** ॥५५०॥ ३ समाने उदरे शयितः **समानोदर्यः** । 'समानोदरे शयित ओच्चो(चो)-दात्तः'४।४।१०८॥ इति यत् । ४ 'सोदराद् यः'४।४।१०९॥, 'विभाषोदरे'६।३।८८॥ इति वा सभावः [14]**सोदर्यः** । ५ समानो गर्भः **सगर्भः** । 'सगर्भ-'४।४।११४॥इति निर्देशात् 'समानस्य'६।३।८४॥ इति योगविभागाद्वा सगर्भः । ''सगर्भ्यः''[अमरकोषः २।६।३४॥]इत्यमरः । तत्र 'सगर्भसयूथ-'४।४।-११४॥ इत्यादिना यत् । छन्दसि सगर्भ्यः[15] । छान्दसोऽप्ययं संज्ञाशब्दत्वाद् विभाषायामपि निबद्धः । ६ सह तुल्ये उदरे

---

१. 'राजार्थं' इति१॥ २. 'तु' इति विश्वप्रकाशकोशे, पृ.१०४॥ ३. तुलनीयोऽमरकोषः २।६।२८॥ ४. 'प्राथि-' इति४, 'प्रथम-' इति मनुस्मृत्याम्, पृ.३६९॥ ५. '-जणिउ' इति२, '-जणियो' इति३, '-जणियौ' इति४॥ ६. 'जारकस्य' इति२, 'जारजातस्य' इति३॥ ७. 'जारस्यैकम्' इति४॥ ८. '-ते:' इति३॥ ९. 'प्रजायते' इति२.३॥ १०. द्र. अम.क्षीर.२।६।३६॥, पृ.१४१॥, स्वोपज्ञटीका३।५५०॥, पृ.१२५॥, मनुस्मृत्याम् ''परदारेषु जायेते द्वौ सुतौ कुण्डगोलकौ । पत्यौ जीवति कुण्डः स्यान्मृते भर्तरि गोलकः ॥'' इति दृश्यते, मनुस्मृतिः, अध्यायः-३, श्लो-१७४, पृ.१११॥ ११. '-सौदर्य-' इति१.३॥ १२. '-पोतृभातृ-' इति३॥ १३. '-मातृ-' इत्युणादिगणे नास्ति ॥ १४. 'सौ-' इति१.४॥ १५. 'सगर्भ्यः' इति३.४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जातः **सहजः** । 'अन्येष्वपि-'३।२।१०१॥ इति डः । सहशब्दस्तुल्यार्थे[1]ऽप्यस्ति । "सह साकल्यसादृश्ययौगपद्यसमृद्धिषु" [विश्वप्रकाशकोशः, द्वितीयपरिच्छेदः, हान्तवर्गः श्लो-७२]इति विश्वः । ७ 'सहस्य सोऽन्यतरस्याम्'( )इति पाक्षिके सभावे **सोदरः** । "अपन्थानं[2] तु गच्छन्तं सोदरोऽपि विमुञ्चति"[अनर्घराघवम्, प्रस्तावना, श्लो-४], "तं तु देशं न पश्यामि यत्र भ्राता सहोदरः"[वाल्मीकिकृत 'रामायणम्,' युद्धकाण्डम्, सर्गः-१०१, श्लो-१४]इति प्रयोगात् । सप्त एकोदरसमुत्पन्नस्य भ्रातुः ॥

**स तु ज्येष्ठः स्यात् पित्र्यः पूर्वजोऽग्रजः ॥५५१॥**

१ स तु भ्राता प्रकृष्टो वृद्धो वा **ज्येष्ठः** । २ पितुरागतः **पित्र्यः** । 'वाय्वृतुपितृषसो यत्'४।२।३१॥ । ३ पूर्वं[3] जातः **पूर्वजः** । 'अन्येष्वपि-'३।२।१०१॥ इति डः । ४ एवमग्रे जातः **अग्रजः** । यौगिकत्वादग्रिमोऽपि । चत्वारि वृद्धभ्रातुः ॥५५१॥

**जघन्यजे यविष्ठः स्यात् कनिष्ठोऽवरजोऽनुजः ।**

**स यवीयान् कनीयांश्च**

१ **जघन्यजः** पश्चाज्जातः, तत्र । २ अतिशयेन युवा **यविष्ठः** । अतिशयेऽर्थे इष्ठन्, 'स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य [च] गुणः'६।४।१५६॥ । ३ अतिशयेन युवाऽल्पो वा **कनिष्ठः** । 'युवाऽल्पयोः कनन्यतरस्याम्'५।३।६४॥ इति कनादेशः । ४ अवरे जातः **अवरजः** । 'सप्तम्यां जनेर्डः'३।२।९७॥ । ५ अनुजातः **अनुजः** । 'जनी प्रादुर्भावे' (दि.आ.से.), 'उपसर्गे च संज्ञायाम्'३।२।९९॥ इति डः[4] । ६ अतिशयेन युवा **यवीयान्** । 'द्विवचनविभज्योपपदे तरबीयसुनौ'५।३।५७॥, 'स्थूलदूर-'६।४।१५६॥ इत्यादिना यणादिपरलोपः, पूर्वस्य च गुणः । ७ 'युवाऽल्पयोः कनन्यतरस्याम्' ५।३।६४॥इति युवशब्दस्य कनादेशे[5] **कनीयान्**, कनीयांसौ इत्यादि । सप्त लघुभ्रातुः । "कन्यसः"[शेषनाममाला ३।११६॥] शैषिकम् ॥

**पितृव्यश्यालमातुलाः ॥५५२॥**

**पितुः पत्न्याश्च मातुश्च भ्रातरः**

१ पितुर्भ्राता **पितृव्यः** । 'पितृव्यमातुलमातामह-' ४।२।३६॥ इति साधुः । १ पत्न्या भ्राता **श्यालः** । उच्छिष्टमधुपर्कवाची श्याशब्दः । श्यां लाति । 'आतोऽनुपसर्गे कः' ३।२।३॥, तालव्यादिः । दन्त्यादिरपि, स्यालयति नर्मवादे वितर्कयति, 'स्याल वितर्के[6]'( ), दन्त्यादिः, "स्यालाल(स्यालसाल)समसूरसूरयः"[[7]]इति सभेदात् । "ततो ण्यन्तात् पचाद्यच्"[न्यासः ४।४।१३३॥]इति 'नाचार्यनाव(राज-)-'६।२।१३३॥ इत्यादि स्वरसूत्रे न्यासः[8] । १ मातुर्भ्राता **मातुलः** । 'पितृव्यमातुलमातामह-'४।२।३६॥ इति साधुः । एकैकं पितृपत्नीमातृभ्रातुः ॥५५२॥

**देवृदेवरौ ।**

**देवा चावरजे पत्युः**

१ पत्युर्भर्तुरवरजे लघुभ्रातरि। दीव्यति **देवा** । 'दिवु क्रीडादौ'(दि.प.से.), 'दिवेर्ऋन्'(चान्द्रोणा-२५६)इति ऋन्। देवरौ, देवरः इत्यादि पितृवत् । "देवे वरे देवरि माधवे च" [ ]इति श्रीहर्षः । २ देवयति[9] **देवरः** । 'देवृ देवने'(भ्वा.आ.से.), बाहुलकाद् '[अर्त्ति]कमिभ्रमि[चमिदेवि]वासिभ्योऽरन्[10]' (उणा-४१२), अदन्तोऽयं रामवत्।३ बाहुलकादनि **देवा**, देवानौ, देवानः इत्यादि राजन्वत् । "देवृदेवरदेवानः"[[11]]इति शब्दार्णवः । त्रीणि भर्तृकनिष्ठभ्रातुः । "ज्येष्ठस्तु श्वशुर एव"[[12]] इति सुभूत्यादयः ॥

**जामिस्तु भगिनी स्वसा ॥५५३॥**

१ जमति अत्तीव **जामिः** । 'जमु अदने'(भ्वा.-प.से.), 'कमिवमि-'(हैमोणा-६१८)इति णिदिः, चवर्गतृतीयादिरयम् । अन्तस्थाद्यादिरपि । 'या प्रापणे'(अ.प.अ.), बाहुलकादतोऽपि मिः । "यामिः स्वसृकुलस्त्रियोः"[[13]]इत्युज्ज्वलदत्तः । २ भगः कल्याणमस्त्यस्या **भगिनी** । यद्वा भगः

---

१. ' -ल्यार्थोऽ-' इति१.२.४॥ २. 'अपथानं' इति१.२.४॥ ३. इतोऽग्रे २प्रतौ 'न' इति दृश्यते ॥ ४. 'घः' इति१ ॥ ५. ' -देशः' इति३ ॥ ६. क्षीरतरङ्गिण्यादावयं धातुर्न दृश्यते ॥ ७. द्र. टीकासर्वस्वम्, भा-२, २।६।३२॥, पृ.२८७॥, पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-२८९, पृ.३६५॥, रामाश्रमी २।६।३२॥, पृ.२७३॥ ८. " 'स्यल वितर्के'-अस्माच्चुरादिणिजन्तात् पचाद्यचि स्यालशब्दोऽन्तोदात्तः" इति न्यासे दृश्यते, काशिका (न्यासः), भा ५, ४।४।१३३॥, पृ.१२१॥ ९. भ्वादित्वादात्मनेपदित्वाच्चेदं विचारणीयम् ॥ १०. '-वासिभ्यश्चित्' इत्युणादिगणे ॥ ११. द्र. टीकासर्वस्वम्, भा-२, २।६।३२॥, पृ.२८७॥, तत्र '-देवानः' इत्यस्य स्थाने '-देवनाः' इति दृश्यते, पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-२९०, पृ.३६६॥, रामाश्रमी २।६।३२॥, पृ.२७३॥ १२. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-२९०, पृ.३६६॥, रामाश्रमी २।६।३॥, पृ.२७३॥ १३. द्र. टीकासर्वस्वम्, भा-४, ३।३।१४०॥, पृ.१२०॥, पदचन्द्रिका, भा-३, नानार्थवर्गः, श्लो-२९६, पृ.२६१॥, रामाश्रमी ३।३।१४२॥, पृ.५८८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रयत्नः पित्रादितो द्रव्यग्रहणेऽस्त्यस्याः । 'अत इनिठनौ'-५।२।११५॥, 'ऋन्नेभ्यो ङीप्'४।१।५॥ । "भग्नी[1]"[शब्दप्रभेदः, श्लो-३०]इति शब्दप्रभेदः । ३ सुष्ठु विवाहानन्तरं पितृगोकुला[2]-दिकमस्यति त्यजति **स्वसा** । सुपूर्वः 'असु क्षेपणे'(दि.प.से.), 'सावसेः'(उणा-६२०) ऋन्, 'न षट्स्वस्रादिभ्यः'४।१।१०॥ इति ङीपो निषेधः । स्वसारौ, स्वसारः इत्यादिः । त्रीणि भगिन्याः । "ज्येष्ठभगिन्यां वीरभवन्ती"[शेषनाममाला ३।-११६॥]शैषिकम् ॥५५३॥

## ननान्दा तु स्वसा पत्युर्ननन्दा नन्दिनीत्यपि ।

१ न नन्दति तुष्यति, न नन्दयति भ्रातृजायामिति वा **ननान्दा** । 'टुणदि(टुनदि) समृद्धौ'(भ्वा.प.से.), 'नञि च नन्देर्दीर्घश्च[3]'(उणा-२५५)इति ऋन्, अकारस्य च दीर्घत्वम्, स्वस्रादिनिपातनान्नलोपाभावः, स्वस्रादित्वादेव न ङीप्। ननान्दरौ, ननान्दरः इत्यादि । 'नभ्राण्नपात्-'६।३।७५॥इति नञ्प्रकृत्या। २ बाहुलकात् कैश्चिद् दीर्घत्वं नेष्यते तदा **ननन्दा** । ३ नन्दति नन्दयति वाऽवश्यं **नन्दिनी** । 'टुणदि(टुनदि) समृद्धौ'(भ्वा.-प.से.), आवश्यके णिनिः, 'ऋन्नेभ्यो ङीप्'४।१।५॥। "ननान्दा तु स्वसा पत्युर्ननन्दा नन्दिनी च सा"[[4]]इति रभसः । त्रीणि ननान्दुः ॥

## पत्यास्तु भगिनी ज्येष्ठा ज्येष्ठश्वश्रूः कुली च सा ॥५५४॥

१ पत्याः स्त्रियाः ज्येष्ठा भगिनी । ज्येष्ठा चासौ श्वश्रूश्च **ज्येष्ठश्वश्रूः** । २ कोलति **कुली** । 'कुल संस्त्याने[5]'(भ्वा.प.से.), 'इगुपध-'३।१।१३५॥इति कः, गौरादिः । द्वे 'वृद्धसाली' इति ख्यातायाः ॥५५४॥

## कनिष्ठा श्यालिका हाली यन्त्रणी केलिकुञ्चिका ।

१ पत्न्याः कनिष्ठा भगिनी । श्यालेव(शाल्येव) **श्यालिका** । स्वार्थे कन्, 'केऽणः'७।४।१३॥इति ह्रस्वः । २ हलति **हाली** । 'हल विलेखने'(भ्वा.प.से.), ज्वलादित्वाण्णः, 'णेऽपि क्वचित्'( )इति ङीप् । २ यन्त्रयति **यन्त्रणी** । 'यत्रि सङ्कोचे'(चु.उ.से.), चुरादिः, नन्द्यादित्वाल्ल्युः । ३ केल्यां कुञ्चति कुटिलीभवति **केलिकुञ्चिका** । 'कुचि कौटिल्याल्पीभावयोः[6]'(भ्वा.प.से.), ण्वुल्, 'प्रत्ययस्थात्-'७।३।४४॥ इतीत्वम्। चत्वारि पत्नीलघुभगिन्याः । 'साली' इति भाषा ॥

## केलिर्द्रवः परीहासः क्रीडा लीला च नर्म च ॥५५५॥
## देवनं कूर्दनं खेला ललनं वर्करोऽपि च ।

१ केलनं **केलिः**, पुंस्त्री । 'किल शैत्य(श्वैत्य)-क्रीडनयोः[7]'(तु.प.से.), '-इन्'(उणा-५५७)इतीन् । २ द्रवति हृदयमनेन **द्रवः**। 'द्रु गतौ'(भ्वा.प.अ.), 'ऋदोरप्'३।३।५७॥। ३ परिहसनं **परीहासः** । परिपूर्वः 'हस(हसे) हसने'(भ्वा.-प.से.), भावे घञि 'उपसर्गस्य घञि-'६।३।१२२॥इति दीर्घः। ४ क्रीडनं **क्रीडा** । 'क्रीड(क्रीड्) विहारे'(भ्वा.प.से.), भावे घञ् । ५ ललनं **लीला** । 'लल विलासे'(भ्वा.प.से.), भिदादित्वादङि निपात्यते । ६ नृणोति(नृणाति) विनयति[8] **नर्म**, क्लीबे । 'नृ नये'(क्र्या.प.से.), '-मन्'(उणा-५८४)इति मन् ॥५५५॥ ७ दीव्यति **देवनम्** । 'दिवु क्रीडादौ'(दि.प.से.), ल्युट् । ८ कूर्द्यते **कूर्दनम्** । 'कूर्द क्रीडायाम्[9]'(भ्वा.आ.से.), ल्युट् । "कुर्दधातोर्ल्युटि 'र्वोरुपधायाः-'८।२।७६॥ इति दीर्घः, 'स्फुर्ज' इति दीर्घानुच्चारणाद्धातोः 'र्वो' इति विधेरनित्यत्वम्" [[10]]इति पूर्णचन्द्रः । "अपरे तु दीर्घत्वमिच्छन्ति"[[10]]इति सुभूतिः । कुर्दनमित्येके । "दीर्घाभावस्तु चिन्त्यः"[अम.क्षीर. २।६।३४॥]इति स्वामी[10]।कोर्दनमित्येके । ९ खेल्यते **खेला** । 'खेलृ चलनगत्योः'(भ्वा.प.से.), 'गुरोश्च हलः'३।३।१०३॥ इत्यः । १० लल्यते **ललनम्** । 'लल विलासे'(भ्वा.प.से.), ल्युट् । ११ वृणोत्यनेन **वर्करः** । 'वृञ् वरणे'(स्वा.उ.से.), 'शृणातेः करन्'( )इति बाहुलाकादतोऽपि। एकादश क्रीडायाः। "क्रीडा खेला कूर्दनं च"[अम.१।७।३३॥]इत्येते त्रयः केलि-परिष्वङ्गकृते रूढा इत्यमरो भिनत्ति । 'कुस्ती' इति भाषा ।

---

१. शब्दप्रभेदे 'भग्नी' इति दृश्यते ॥ २. 'पितृगोत्रकुला-' इति४॥ ३. 'नञि च नन्देः' इत्युणादिगणे ॥ ४. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-२८७, पृ.२६३॥, रामाश्रमी २।६।२९॥, पृ.२७२॥ ५. 'कुल संस्त्याने बन्धुषु च' इति स्वामिसायणौ, 'कुल सन्ताने बन्धुषु च' इति मैत्रेयः ॥ ६. 'कुन्च क्रुन्च('कुञ्च क्रुञ्च' इति सायणः )कौटिल्याल्पीभावयोः' इति मैत्रेयसायणौ, 'कुन्च गतिकौटिल्याल्पीभावयोः' इति स्वामी ॥ ७. 'किल श्वैत्ये' इति सायणः ॥ ८. 'विनमयति' इति३॥ ९. दीर्घमध्योऽयं धातुः क्षीरतरङ्गिण्यादौ न दृश्यते ॥ १०. द्र. पदचन्द्रिका, भा-१, नाट्यवर्गः, श्लो-२०८, पृ.२४८॥, रामाश्रमी१।७।३३॥, पृ.१०८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परं विशेषानाश्रयणत्वादिह केलिपर्यायत्वेन प्रोक्ताः। शेषश्चात्र- "स्यात्तु नर्मणि सुखोत्सवो रागरसो विनोदोऽपि किलोऽपि च"[शेषनाममाला ३।११६-११७॥] ॥

**वप्ता तु जनकस्तातो बीजी जनयिता पिता ॥५५६॥**

१ वपति बीजं **वप्ता** । 'टुवप् बीजतन्तुसन्ताने'[1] (भ्वा.उ.अ.), तृच् । २ जायतेऽस्मात्, जनयतीति वा **जनकः**। 'जनी प्रादुर्भावे'(दि.आ.से.), ण्वुल्, 'जनिवध्योश्च'७।३।३५॥ इति वृद्धिनिषेधः । क्वुन्प्रत्यये वा । ३ तनोति विस्तारयत्यपत्यं **तातः** । 'तनु विस्तारे'(त.उ.से.), 'कु(दु)तनिभ्यां दीर्घश्च'(उणा-३७०)इति क्तप्रत्ययेऽनुनासिकलोपे पूर्वस्य दीर्घः। तनोति कुलं तन्(ततः), ततः स्वार्थेऽणि वा। [ ४ बीजमस्त्यस्य **बीजी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः। ५ जनयति **जनयिता** । 'जनी प्रादुर्भावे'(दि.आ.से.) ण्यन्तात् तृच्।] ६ पाति रक्षति **पिता**। 'पा रक्षणे'(अ.प.अ.), 'नप्तृनेष्टृत्वष्टृ-'(उणा-२५२)इत्यादिना तृचि निपातितः । षट् पितुः। शेषश्चात्र-"वप्यो जनित्रो रेतोधाः"[शेषनाममाला ३।११७॥] ॥५५६॥

**पितामहस्तस्य पिता**

१ तस्येति पितुः पिता **पितामहः** । 'पितृव्यमातुल-'४।२।२६॥ इत्यादिना डामहच्[2] निपात्यते, डित्वाट्टिलोपः । स्त्रियां 'मातरि षिच्च'(वा-४।२।३६॥)इति षित्त्वाद् गौरादिषु पितामहशब्दपाठाद्वा ङीषि पितामही । एकं 'दादा' इति ख्यातस्य ॥

**तत्पिता प्रपितामहः ।**

१ तस्य पितामहस्य पिता तत्पिता । प्रकृष्टः पितामहः **प्रपितामहः** । स्त्रियां प्रपितामही । एकं प्रपितामहस्य। 'पडदादु'[3] इति भाषा ॥

**मातुर्मातामहाद्येवम्**

१ एवम् अमुना प्रकारेण मातुः पिता मातामहः । पूर्ववन्निपातनाद् डामहजादिः । 'नानु'[4] इति भाषा । तत्पिता प्रमातामहः । 'पडनानु'[5] इति भाषा । स्त्रियां प्रमातामहीत्यादि योज्यम् ॥

**माताऽम्बा जननी प्रसूः ॥५५७॥**
**सवित्री जनयित्री च**

१ मान्यते विवेकिभिः, मात्यस्यां गर्भ इति वा **माता**। 'मान पूजायाम्'(भ्वा.आ.से.), 'मा माने'(अ.प.अ.), वा 'नप्तृनेष्ट्-'(उणा-२५२)इति सूत्रेण साधुः, स्वस्रादित्वान्न ङीप्। २ अमति वात्सल्यम् **अम्बा** । 'अम गतौ'[6] (भ्वा.प.से.), 'शम्यमेतिणिद्वः(-र्णिद्वः)'(हैमोणा-३१८)। अम्बते जल्पति वा । 'अबि शब्दने'(भ्वा.आ.से.), अच् । ३ जायतेऽस्यां **जननी** । 'जनी प्रादुर्भावे'(दि.आ.से.), अधिकरणे ल्युट्। जनयतीति कर्तरि वा ल्युट् । ४ प्रसूते **प्रसूः**। 'षूङ् प्राणिगर्भविमोचने'(अ.आ.वे.), अदादिः, 'सत्सूद्विष-'३।२।६१॥ इत्यादिना क्विप् ॥५५७॥ ५ सूते **सवित्री** । 'षूङ् प्राणिगर्भविमोचने'(अ.आ.वे.), तृच्, 'ऋन्नेभ्यो ङीप्'४।१।५॥ । ६ जनयति **जनयित्री** । 'जनी प्रादुर्भावे' (दि.आ.से.), णिजन्तः, तृच्, 'ऋन्नेभ्यो ङीप्'४।१।५॥, 'इको यणचि'६।१।७७॥ । 'या जनित्री त्रिलोक्या'"[[7] ]इति त्वन्तर्भावितण्यर्थत्वात् । "जनित्री"[ ]इति शब्दप्रभेदश्च । "अन्तर्भावितण्यर्थाज्जनेस्तृचि जनित्री"[ ]इति शाब्दिकाः । षड् मातुः । "जानी"[शेषनाममाला ३।११७॥]इति शैषिकम् ॥

**कृमिला तु बहुप्रसूः ।**

१ अपत्यानि भूयस्त्वात् कृमीनिव लाति **कृमिला**। बहून्यपत्यानि प्रसूते बहुप्रसूः । 'सत्सूद्विष-'३।२।६१॥ इति क्विप् । एकं बहुप्रस्वाः ॥

**धात्री तु स्यादुपमाता**

१ धयन्ति तामिति[8] **धात्री** । 'धेट् पाने'(भ्वा.प.अ.), 'धः कर्मणि ष्ट्रन्'३।२।१८१॥ इति ष्ट्रन्, 'आदेचः-'६।१।४५॥ इत्यात्वम्, षित्त्वात् ङीष् । २ उपजाता, उपचरिता वा माता **उपमाता** । द्वे धात्र्याः । 'धावि' इति भाषा ॥

**वीरमाता तु वीरसूः ॥५५८॥**

१ दर्शितपराक्रमा वीराः, तेषां माता वीरमाता । वीरं सूते **वीरसूः** । 'षूङ् प्राणिप्रसवे'(अ.आ.वे.), 'सत्सूद्विष-' ३।२।६१॥ इति क्विप् । एकं वीरमातुः ॥५५८॥

---

१. 'टुवप् बीजसन्ताने' इति क्षीरतरङ्गिण्यादौ ॥ २. '-हच्' इति ३॥ ३. '-दादुं' इति ४, '-दाडो' इति ३॥ ४. 'नानो' इति ३॥ ५. '-नानो' इति ३, '-नानू' इति ४॥ ६. 'अम गत्यादिषु' इति क्षीरतरङ्गिण्यादौ ॥ ७. द्र. अम.क्षीर.२।६।२९॥, पृ.१४०॥, स्वोपज्ञटीका ३।५५८॥, पृ.१२६॥ ८. 'त-' इति २॥ ९. तुलनीयोऽमरकोषः २।६।१६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**श्वश्रू[1]र्माता पतिपत्न्योः**

१ पतिपत्न्योर्माता श्वशुरस्य स्त्री **श्वश्रूः** । 'श्वशुरस्योकाराकारयोर्लोपश्च'(वा-४।१।६८॥)इत्यूङ्, उकाराकारयोर्लोपश्च । पत्युर्माता पत्न्याः श्वश्रूः, पत्न्या माता पत्युः श्वश्रूरिति 'पतिपत्न्योः' इत्युक्तम् ॥

**श्व[1]शुरस्तु तयोः पिता ।**

१ तयोः पतिपत्न्योः पिता **श्वशुरः** । अर्थादन्योऽन्यस्यैव । [शु] आशु अश्नुते व्याप्नोति श्वशुरः । आशु व्याप्त इत्येके । 'शावशेराप्तौ'(उणा-४४)इत्याशुशब्दे(शुशब्दे) उपपदे अश्नुतेरुरन्प्रत्ययो भवति । "शाविति निर्देशसामर्थ्यादाशुशब्दस्यादिलोपश्च निपात्यते"[ ]इति मिश्राः ॥ "आशु इति शु इति च क्षिप्रे नामनी"[निरुक्तम्, अध्यायः-६, पादः-१]निरुक्तत्वात् शुशब्दस्य आश्वर्थः । "शु इति शब्द आश्वर्थवाची"[[1]]इत्युणादिवृत्तिः । पृषोदरादित्वादाकारलोप इत्यन्ये । "श्वश्रूः शिशुश्वशुरः"[[2]]इति शभेदाद् द्वितालव्योऽयम् । एकं श्वशुरस्य ॥

**पि[1]तरस्तु पितुर्वंश्याः**

१ पितुर्वंशे उत्पादकप्रबन्धे भवाः पूर्वपुरुषाः । पान्ति रक्षन्ति **पितरः** । 'पा रक्षणे'(अ.प.अ.), 'नप्तृनेष्टृत्वष्ट्-'(उणा-२५२)इत्यादिना साधुः । एकं पूर्वजानाम् ॥

**मातुर्माता[1]महाः कुले ॥५५९॥**

१ मातुः कुले वंशे भवाः पूर्वपुरुषा **मातामहाः**। 'पितृव्यमातुलमातामहपितामहाः'४।२।३६॥ इति साधुः। एकं 'मुहसाल' इति ख्यातस्य ॥५५९॥

**पि[1]तरौ माता[2]पितरौ मात[3]रपितरौ पिता च माता च ।**

१ माता च पिता च द्वौ पितरावित्यन्वयः । माता च पिता च **पितरौ** । 'पिता मात्रा'१।२।७०॥ इति सूत्रेण एकशेषः । २ माता च पिता च **मातापितरौ** । 'आनङ् ऋतो द्वन्द्वे'६।३।२५॥इत्यानङ्, अभ्यर्हितत्वान्मातृशब्दस्य पूर्वनिपातः । ३ पक्षे 'मातरपितरावुदीचाम्'६।३।३२॥ इति मातुरङन्तनिपाते **मातरपितरौ** इति भागवृत्तिः। "पूर्वोत्तरयो ऋकारस्यारभावो निपातनादन्तत्वे मातरपितराभ्यामिति प्रयोगः"[ ] इति वृद्धन्यासः इति तद्भेदेन द्वैरूप्यं भाषावृत्तौ प्रदर्शितमिति[3]। त्रीण्येकोक्त्या मातापित्रोः ॥

**श्वश्रूश्वशुरौ श्वशुरौ[1]**

१ श्वश्रूश्च श्वशुरश्च **श्वश्रूश्वशुरौ** । २ पक्षे 'श्वशुरः श्वश्र्वा:'१।२।७१॥इति शेषे श्वश्रूशब्दलोपे **श्वशुरौ** । द्वे एकोक्त्या श्वश्रूश्वशुरयोः ॥

**पुत्रौ[1] पुत्रश्च दुहिता च ॥५६०॥[5]**

१ पुत्रश्च दुहिता च **पुत्रौ** । 'भ्रातृपुत्रौ स्वसृदुहितृभ्याम्'१।२।६८॥ इत्येकशेषः । सुतावित्यपि । एकमेकोक्त्या पुत्रीपुत्रयोः ॥५६०॥

**भ्राता च भगिनी चापि भ्रा[1]तरौ**

१ अत्रापि 'भ्रातृपुत्रौ स्वसृदुहितृभ्याम्'१।२।६८॥ इत्येकशेषः । सौदर्यावपि ॥

**अथ बा[1]न्धवः ।**

**स्वो[2] ज्ञातिः[3] स्वजनो[4] बन्धुः[5] सगोत्र[6]श्च**

१ बन्धुरेव प्रज्ञाद्यणि **बान्धवः** । २ सुवति अभीष्टे वस्तुनि **स्वः** । 'षू प्रेरणे'(तु.प.से.), 'उल्वादयश्च'(उणा-५३५)इति वप्रत्यये उकारलोपे च **स्वः** । ३ जानाति छिद्रम्, कुलस्थितिं वा **ज्ञातिः** । 'ज्ञा अवबोधने'(क्र्या.प.अ.), 'क्तिच्क्तौ च संज्ञायाम्'३।३।१७४॥इति क्तिच् । ४ स्व आत्मीयश्चासौ जनश्च **स्वजनः**। ५ बध्नाति स्नेहेन **बन्धुः** । 'बन्ध बन्धने'(क्र्या.प.अ.), 'मृ(शृ)स्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च'(उणा-१०) [इति] उः । ६ समानं गोत्रमस्य **सगोत्रः** । 'ज्योतिर्जनपद-'६।३।८५॥ इत्यादिना समानस्य सभावः। षडपि पुंसि । षड् बन्धोः । गोत्रीति भाषा ॥

**निजः[1] पुनः ॥५६१॥**

**आत्मीयः[2] स्वः[3] स्वकीय[4]श्च**

१ निजातो **निजः** । 'जनी प्रादुर्भावे'(दि.आ.से.),

---

१. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-२८९, पृ.३६५॥ २. द्र पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-२८९, पृ.३६५॥, समाश्रयी २।६।३१॥, पृ.२७३॥
३. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-२९५, पृ.३७०॥ ४. तुलनीयोऽमरकोषः२।६।३७॥ ५. आर्यावृत्तमेतत् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'अन्येष्वपि-'३।२।१०१॥ इति डः ॥५६१॥ २ आत्मनोऽयम् **आत्मीयः** । ३ सुवति अभीष्टे **स्वः** । 'षू प्रेरणे'( ), 'उल्वादयश्च'(उणा-५३५)इति वः । ४ स्वस्याऽयं **स्वकीयः**। 'गहादिभ्यश्च'४।२।१३८॥ इति छः, 'स्वस्य वा'( ) इति कुक्[१] । चत्वारि आत्मीयस्य । 'आपणउ'[२] इति भाषा ॥

## सपिण्डास्तु सनाभयः ।

१ समानं पिण्डदानमेषां **सपिण्डाः** । ([३]'पिण्ड-गन्ध-'( )इति सः), 'वान्यस्मिन्सपिण्डे-'४।१।१६५॥इति निपातनात् सभावः । "सपिण्डता तु पुरुषे सप्तमे विनिवर्तते" [मनुस्मृतिः, अध्यायः-५, श्लो-६०]इति स्मृतिः । तत ऊर्ध्वं सगोत्राः । २ समाना नाभिर्मूलमेषां[५] **सनाभयः**। 'ज्योतिर्जनपद-'६।३।८५॥ इत्यादिना सभावः । नाभिः सप्तमपुरुषाबाधककुलप्रधानमूलपुरुषः । समानो नाभिरेषामिति वा । द्वे सप्तमपुरुषाबाधकज्ञातीनां[६] ॥

## तृतीयाप्रकृतिः पण्डः षण्ढः क्लीबो नपुंसकम् ॥५६२॥

१ स्त्रीपुंसाभ्यां तृतीया प्रकृतिर्लिङ्गमत्र **तृतीयाप्रकृतिः**। स्त्रियां 'संज्ञापूरण्योश्च-'६।३।३८॥ इति न पुंवद्भावः[७]। २ पण्डते गच्छत्युभयव्यञ्जनतां **पण्डः** । 'पडि गतौ'(भ्वा.-आ.से.), पचाद्यच्[८], 'इदितो नुम्-'७।१।५८॥ । पनायति स्तौति स्त्रीपुंसाविति वा । 'पन व्यवहारे स्तुतौ च'(भ्वा.आ.से.), 'ञमन्ताड्डः'(उणा-१११) । पण्डुश्च । ३ शान्तमस्येन्द्रियमिति **षण्ढः** । 'शमु उपशमे'(दि.प.से.), 'शमेर्ढः'(उणा-९९)इति ढः, बाहुलकात् षत्वम् । "शण्ढः"[अम.२।६।३९॥]इत्यमरः। 'शण्डः' इत्यन्ये। 'शण्ठः' इत्यपरे । ४ क्लीबते **क्लीबः** । 'क्लीब(क्लीबृ) अधाष्टर्ये'(भ्वा.आ.से.), अच् । ५ न स्त्री, न पुमानिति **नपुंसकम्** । पृषोदरादिः, 'नभ्राण्नपात्-'६।३।-७५॥इत्यादिना नञः प्रकृतिभावः । न पुंसयति नपुंसकमिति वा । 'पुंसण्[९] अभिमर्दने[१०]'(चु.उ.से.), णिजन्तः, ततो ण्वुल् । एतौ पुंक्लीबलिङ्गौ । अर्थप्राधान्यात्रपुंस इति शब्दोऽपि । "स नपुंसो भवेत्"[[११] ]इति भाष्यात् पुंसि। पञ्च क्लीबस्य । 'पावई[१२]' इति भाषा ॥

## इन्द्रियायतनमङ्गविग्रहौ क्षेत्रगात्रतनुभूघनास्तनूः । मूर्तिमत्करणकायमूर्तयो वेरसंहननदेहसञ्चराः ॥५६३॥ घनो बन्धः पुरं पिण्डो वपुः पुद्गलवर्ष्मणी । कलेवरं शरीरं[१३]:

१ इन्द्रियाणामायतनम् **इन्द्रियायतनम्** । २ अमति गच्छति वृद्धिम् **अङ्गम्**। 'अम गतौ[१४]'(भ्वा.प.से.), 'गन् गम्यादेः(-द्योः)' (उणा-१२०)इति गन् । अङ्गति गच्छति वा । 'अगि गतौ'(भ्वा.प.से.), अच्, 'इदितो नुम्-'७।१।५८॥। ३ विगृह्यते रोगादिभिः **विग्रहः**। 'ग्रह उपादाने'(क्र्या.उ.से.), 'ग्रहवृद्द'३।३।५८॥इत्यप्[१५] । विविधो ग्रहो ज्ञानमत्रेति वा । ४ क्षयत्यवश्यं **क्षेत्रम्** । 'क्षि क्षये'(भ्वा.प.अ.), '-ष्ट्रन्'(उणा-५९८)इति ष्ट्रन् । ५ एति काले गच्छति **गात्रम्** । 'इण् गतौ' (अ.प.अ.), ष्ट्रनि 'बहुलं संज्ञाच्छन्दसोः'( )इति गादेशः । 'गाङ् गतौ'(अ.आ.अ.)इत्यतो वा ष्ट्रन् । गच्छति वा गात्रम् । 'गम्लृ गतौ'(भ्वा.प.अ.), 'गमेरा च'(उणा-६०८, हैमोणा-४५३)इति ष्ट्रन् । ६ तनोति सामर्थ्यं **तनुः**, स्त्रीलिङ्गः । 'तनु विस्तारे'(त.उ.से.), 'भृमृतृधरित्सरितनिमञ्जिशीङ्भ्य उः[१६]' (उणा-७)। ७ भुवा पृथिव्या घनो **भूघनः**। ८ तन्यते **तनूः**। 'तनु विस्तारे'(त.उ.से.), 'कृषिचमितनिधनिसर्जिखर्जिभ्य ऊः' (उणा-८१। "ननुसुतनूमनुपालयानुयान्ती[म्[१७] ]" [शिशुपालवधम्, सर्गः-७, श्लो-१२]इति माघः। "वरतनु संप्रवदन्ति कुक्कुटाः" [ ]इति भारविः ।'ऋ(अर्त्ति)[पृ]वपि-'(उणा-२७४)इत्यादिना सि तनुः सान्ताऽपि। "तनुषे तनुषेकम्" [वासवदत्ता, पृ.१३]इति वासदत्ता । ९ मूर्तिः काठिन्यमस्त्यस्य **मूर्तिमत्** । १० क्रियतेऽनेनेति **करणम्** । करणे ल्युट् ।

---

१. 'तुक्' इति२.३॥ २. '-पणो' इति३, '-पणौ' इति४॥ ३. तुलनीयोऽमरकोषः २।६।३॥ ४. कोष्ठान्तर्गतपाठस्य मूलं मृग्यम् ॥ ५. 'नाभिरेषां' इति ४॥ ६. '-ज्ञातीयानाम्' इति ४॥ ७. " 'न कोपधायाः'(६।३।३७॥)इति 'न' इति योगविभागात् पुंवत्त्वाभावे समास एव 'तृतीयाप्रकृतिः' इत्येके" इति पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-२९७, पृ.३७३॥ ८. '-द्यचि' इति ३॥ ९. णकारानुबन्धो हैममते ॥ १०. 'अभिवर्धने' इति मैत्रेयसायणौ ॥ ११. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-२९७, पृ.३७३॥, रामाश्रमी२।६।३९॥, पृ.२७६॥, तयोः 'नपुंसो' इत्यस्य स्थाने 'नपुंसको' इति दृश्यते ॥ १२. '-ईया' इति ४॥ १३. '-रे' इति ३॥ १४. 'गत्यादिषु' इति क्षीरतरङ्गिण्यादयः ॥ १५. 'इत्यण्' इति ४॥ १६. 'भृमृशीतृचरित्सरितनिधनिमममिज्जिभ्य उः'(उणा-७)इत्युणादिगणे ॥ १७. शिशुपालवधे मूले "ननु सुतनुं परिपालयानुयान्तीम्" इति दृश्यते, ७।१२॥, पृ.१६८॥, तत्र 'परिपालय' इत्यस्य स्थाने "अनुयान्तीमनुगच्छन्तीं सुतनुं शुभाङ्गीं प्रियामनुपालय प्रतीक्षस्व" इति टीकाग्रन्थेन 'अनुपालय' इत्यभीष्टः टीकाकृता ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

११ चीयते सञ्चीयते[1] कललादिरूपेणाऽन्नादिना, उपचीयते वा **कायः**। 'चिञ् चयने'(स्वा.उ.अ.), 'निवासचितिशरीरोप-' ३।३।४१॥ इति घञ्, आदेश्च कः । १२ मूर्च्छत्यनया **मूर्तिः**। 'मूर्च्छा मोहसमुच्छ्राययोः'(भ्वा.प.से.), क्तिन्, 'राल्लोपः' ६।४।२१॥ इति छकारलोपः, 'र्वोरुपधायाः-'८।२।७६॥ इति दीर्घः । १३ वेति प्रजायते **वेरम्**, पुंक्ली. । 'वी गति-[व्याप्ति]प्रजनादौ'(अ.प.अ.), रन्प्रत्यये साधुः । १४ संहन्यन्ते-ऽङ्गान्यत्रेति **संहननम्** ।'हन हिंसागत्योः'(अ.प.अ.), अधिकरणे ल्युट् । १५ दिह्यते उपचीयते धातुभिरिति **देहः**, पुंक्ली.। यदमरः "देहः पुंक्लीबयोः[2]" [अमरकोषः २।६।७१॥]इति । 'दिह उपचये'(अ.उ.अ.), घञ् । १६ सञ्चरन्त्यनेन **सञ्चरः** । 'चर गतिभक्षणयोः'(भ्वा.प.से.), 'गोचरसञ्चरवहव्रजव्यजापणनिगमाश्च'३।३।११९॥ इति साधुः ॥५६३॥ १७ धातुभिर्हन्यते **घनः** ।'हन हिंसागत्योः' (अ.प.अ.) 'मूर्तौ घनः' ३।३।७७॥ इति साधुः । १८ बध्यते पञ्चभिर्भूतैरिति **बन्धः** । 'बन्ध बन्धने' (क्र्या.प.अ.), घञ् । १९ पुरति **पुरम्** ।'पुर अग्रगमने'(तु.प.से.), 'इगुपध'३।१।१३५॥ इति कः । २० धातुभिः पिण्ड्यते **पिण्डः** । 'पिडि सङ्घाते'(भ्वा.अ.से.), कर्मणि घञ्, पुंक्लीबलिङ्गः ।२१ वपति बीजम्, उप्यतेऽन्नादिकमत्र वा **वपुः**, क्लीबलिङ्गः।'टुवप् बीजतन्तुसन्ताने[3]'(भ्वा.उ.अ.), 'धनत्ति-चक्षिङ्प्रुवपि[4]-'(उणा-२७४)इत्यादिना उस् । २२ पूरण-गलनधर्मत्वात् **पुद्गलः**, पृषोदरादिः । पद्यतेऽसौ पुद्गल इत्यलप्रत्यये वा निपात्यते । २३ वर्षति शुक्रादिकम्, वृष्यते स्नानपानादिना वा **वर्ष्म**, क्लीबलिङ्गः। 'वृषु सेचने'(भ्वा.प.से.), '-मनिन्'(उणा-५८४)इति मनिन्, 'पुगन्तलघूपधस्य च'७।३।-८६॥ इति गुणः। २४ कले रेतसि व्रियते उपयुज्यते **कलेवरम्**। कर्मणि घञ्[5], 'तत्पुरुषे कृति-'६।३।१४॥ इत्यलुक् । कडति माद्यति वा । 'कड मदे'(भ्वा.प.से.), 'कडेरेवर-'(हैमोणा-४४५)इत्येवरः, लत्वम् । २५ शीर्यते रोगादिना **शरीरम्**, पुंक्लीबलिङ्गः।'शॄ हिंसायाम्'(क्र्या.प.से.), 'कृशॄपॄकटिपटिशौटिभ्य ईर[न्]'(उणा-४७०) इतीरः । पञ्चविंशतिः शरीरस्य । शेषश्चात्र-"देहे[6] सिनं प्रजनुकश्चतुःशाखं षडङ्गकं व्याधिस्थानं च'[शेषनाममाला ३।११८]॥

## अस्मिन्नजीवे कुणपं[1] शवः[2] ॥५६४॥

## मृतकम्[3]

१ अस्मिन् शरीरेऽजीवे जीवनिर्मुक्ते । कुणति शब्दायते **कुणपम्** । 'कुणँ[7] क्कण शब्दार्थे'(तु.प.से.), 'कुणश्च' ([8])इति कपः । यद्वाऽस्मादेव धातोः घञर्थे कः, कुणः । कुणं शब्दं पाति [रक्षति वा] । धनञ्जयाख्यस्य[9] वायोरन्तःसत्त्वादव्यक्ततमशब्दकरणात् । क्कणतीति, 'क्कणेः संप्रसारणं च' (उणा-४२३)इति कपन्प्रत्यये कुणप इति वा। २ शवति गच्छति संस्कारं **शवः** । 'शव गतौ'(भ्वा.प.से.), अच्, तालव्यादिरयम्, पुंक्लीबलिङ्गोऽयम् । यदमरः-"शवमस्त्रियाम्"[अमरकोषः २।८।११८] । 'शवस्' इति सकारान्तोऽप्यस्ति । तत्र शवसी, शवांसि इत्यादि क्लीबे ॥५६४॥ ३ म्रियते स्मेति[10] मृतम्, स्वार्थे कनि **मृतकम्** । त्रीणि मृतकस्य ॥

## रुण्डकबन्धौ[1][2] त्वपशीर्षे क्रियायुजि ।

१ अपगतं छिन्नत्वात् शीर्षमस्याऽपशीर्षं वपुः, तत्र। क्रियां नर्तनक्रियां युनक्तीति क्रियायुक्, तत्र, नृत्यतीत्यर्थः । रूयते शब्द्यते **रुण्डः**, पुंसि । 'रु शब्दे'(अ.प.से.), 'रुण्ड-पिचण्ड-'( )इति निपात्यते । २ कं शिरो बध्यतेऽत्र **कबन्धः**, पुंक्लीबलिङ्गः[11] । यदमरः-"कबन्धोऽस्त्री"[अमरकोषः २।८।११८॥]इति । 'बन्ध बन्धने'(क्र्या.प.अ.), अधिकरणे घञ् । "युद्धे सहस्रपूरकः कबन्धो नृत्यति"[[12]]इति वार्ता । नर्तकक्रियारहिते तूपचारात् कबन्धप्रयोगः । द्वे शिरोरहितशरीरस्य ॥

## वयांसि[1] तु दशाः[2] प्रायाः[3]

१ अर्थात् शरीरस्य, वयन्ति[13] क्रमेण गच्छन्ति **वयांसि**,

---

१. १प्रतौ नास्ति ॥ २. 'क्लीबपुंसोः' इत्यमरकोषे ॥ ३. 'बीजसन्ताने' इति क्षीरतरङ्गिण्यादयः ॥ ४. 'अर्तिपृवपि-' इत्युणादिगणे ॥ ५. 'घः' इति १.२.४॥ ६. इतोऽग्रे १.२.४ प्रतिष्ववग्रहो दृश्यते ॥ ७. 'कुण शब्दोपकरणयोः' इति क्षीरतरङ्गिण्यादयः ॥ ८. "अस्मिन्नपि क्वणेरेव संप्रसारणं कपंश्च प्रत्ययो विधीयते, न कुणेः । सरस्वतीकण्ठाभरणे(२।२।११२॥) तु कुणेरेव कुणपो निपात्यते" इति क्षीरतरङ्गिण्यां 'कुण शब्दोपकरणयोः' इत्यत्र टिप्पणी, पृ.२५०-२५१, टिप्पणीसङ्ख्या-५॥ ९. '-ख्यवा-' इति १.२॥ १०. 'स्म' इति ३॥ ११. '-ङ्गोऽयम्' इति १॥ १२. द्र. पदचन्द्रिका, भा-२, क्षत्रवर्गः, श्लो-५७२, पृ.६५२॥ १३. इदं विचारणीयम्, वयधातोरात्मनेपदित्वात् ॥

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

बाल्यादीनि । 'वय गतौ'(भ्वा.आ.से.), '-असुन्'(उणा-६२८)इत्यसुन् । २ दश्यन्ते **दशाः**, स्त्रीलिङ्गः । 'दश दीप्तौ' ( ), स्थादित्वात् कः । ३ प्रकर्षेणाऽयन्ते **प्रायाः** । 'अय गतौ'(भ्वा.आ.से.), अच्, पुंलिङ्गः, रामवत् । त्रीणि सामान्येन वयसः ॥

**सामुद्रं देहलक्षणम् ॥५६५॥**

१ समुद्रे शरीरे भवं **सामुद्रम्** । 'तत्र भवः'४।३।५३॥ इत्यण्, क्लीबेऽयम् । "सामुद्रो[1] देहलक्षणे"[विश्वप्रकाशकोशः, रान्तवर्गः, श्लो-२०५]इति **पुंस्यपि** महेश्वरः । देहस्य लक्षणं चक्रध्वजादि देहलक्षणम् । एकं देहलक्षणस्य ॥५६५॥

**एकदेशे प्रतीकोऽङ्गावयवाऽपघना अपि ।**

१ शरीरस्य एकश्चासौ देशश्च एकदेशः, तत्र । प्रत्येति देहं **प्रतीकः** । 'इण् गतौ'(अ.प.अ.), 'सुप्रतिपूर्वादिणः'( ) इति कीकन् । २ अङ्गत्येकदेशत्वम्[2] **अङ्गम्** । 'अगि गतौ' (भ्वा.प.से.), अच् । ३ अवयौति **अवयवः** । अवपूर्वः 'यु मिश्रणे'(अ.प.से.), अच् । ४ अपहन्यतेऽनेनेति **अपघनः** । 'हन हिंसागत्योः'(अ.प.अ.), 'अपघनोऽङ्गम्'३।३।८१॥ इति साधुः । चत्वारि शरीरावयवस्य । "गात्रम्"[शेषनाममाला ३।११८॥]शैषिकम् ॥

**उत्तमाङ्गं शिरो मूर्धा मौलिर्मुण्डं कमस्तके ॥५६६॥**
**वराङ्गं करणत्राणं शीर्षं मस्तिकमित्यपि ।**

१ उत्तमं च तदङ्गं च **उत्तमाङ्गम्** । २ श्रीयते केशैः **शिरः**, क्लीबे । 'श्रिञ् सेवायाम्'(भ्वा.उ.से.), 'श्रियतेः (श्रयतेः) स्वाङ्गे शिरः किच्च'(उणा-६३३)इत्यसुन्, शिरादेशः। देहः श्रितोऽत्रेति वा । शृणातेरुधिरतिशृभ्यः (शृणातेः 'उषिरञ्जिशृभ्यः) कित्'(चान्द्रोणा-३।१०१॥)इत्यसुन् । 'ॠत इद्धातोः'७।१।१००॥ इतीत्वे शिरः"[[3]]इति तु सुभूत्यादयः। कण्ठभूषणकाव्यालङ्कारे [उक्तम्-

"शिरो]वाची शिरोऽदन्तो रजोवाची रजस्तथा ।
निवर्तक शिराद् द्रोणिः (निचकर्त शिरान् द्रौणि)रर्थाः पादरजोपमाः ॥१॥"

[[4]] । तथा "पिण्डं दद्याद् गयाशिरे[5]"[ ]इत्यादिप्रयोगात्। ३ मूर्च्छत्यत्राहताः प्राणिन इति **मूर्धा**, पुंसि । यदमरः-"मूर्धा ना मस्तकोऽस्त्रियाम्"[अमरकोषः २।६।९५॥]इति । 'मूर्छा मोहसमुच्छ्राययोः'(भ्वा.प.से.), 'श्वन्नुक्षन्-'(उणा-१५७) इत्यादिना कनि साधुः । मूर्धानौ, मूधानः इत्यादि । ४ मूयते बध्यते मुकुटादिकमत्रेति **मौलिः**, पुंस्त्रीलिङ्गः । "चूडामुकुटकेशेषु मतो मौलिर्नरस्त्रियोः"[ ]इति माला । 'मूङ् बन्धने'(भ्वा.आ.से.), 'मूधू(धूमू)भ्याम्-'(हैमोणा-७०१) इति लिण्[6] । ५ मुण्यते प्रतिज्ञायते **मुण्डम्**, पुंक्ली. । यद्गौडः-"मुण्डो मूर्धन्यस्त्री[7] स्यात्"[ ]इति । 'मुण् (मुण) प्रतिज्ञाने'(तु.प.से.), 'अमन्ताड्डः-'(उणा-१११) । मुण्ड्यत इति वा । '[8]मुण्ड मुण्डकर्मणि[9] ( ), घञ् । ६ कायति शब्दायते **कम्** । 'कै शब्दे'(भ्वा.प.से.), 'क्वचिड्डः[10]'(हैमसू-५।१।१७१॥)इति डः । ७ मस्यति परिणम्यते मस्तम् । 'मसी परिणामे'(दि.प.से.), बाहुलकात् तन्, ततः स्वार्थे कनि **मस्तकम्**, पुंक्ली. ॥५६६॥ ८ वरमङ्गं **वराङ्गम्** । ९ करणानीन्द्रियाणि त्रायन्तेऽनेनेति **करणत्राणम्** । 'त्रैङ्[11] पालने' (भ्वाआ.अ.), करणे ल्युट्, 'आदेचः-'६।१।४५॥ इत्यात्वम्। १० शीर्यते जरसा, शृणन्ति शत्रव इदं वा **शीर्षम्** । 'शॄ हिंसायाम्'(क्र्या.प.से.), बाहुलकात् षप्रत्यये कित्त्वाद् गुणाभावेत्वरपरत्वदीर्घत्वानि, 'कुमारशीर्षयोर्णिनिः'३।२।५१॥ इति निर्देशादेव वा साधुः । ११ मस्यते[12] **मस्तिकम्**, तृतीयस्वरमध्यः । तिकनि प्रत्यये साधु । एकादश शिरसः ॥

**तज्जाः केशास्तीर्थवाकाश्चिकुराः कुन्तलाः कचाः ॥५६७॥**

**वालाः स्युः**

१ तस्मिन् शिरसि जाताः तज्जाः। 'सप्तम्यां जनेर्डः' ३।२।९७॥ । शिरसिजाः, शिरोजाश्च । के मस्तके शेरते तिष्ठन्ति **केशाः**। 'शीङ् स्वप्ने'(अ.आ.से.), 'अन्येभ्योऽपि-' ३।२।१०१॥ इति डः, 'तत्पुरुषे कृति-'६।३।१४॥ इति सप्तम्यलुक् । क्लिश्यत एभिरिति वा । 'क्लिशू विबाधने'(क्र्या.-प.वे.), 'क्लिशः के च'(हैमोणा-६३०)इति शः । २ तीर्थे उच्यन्ते उपयाच्यन्ते **तीर्थवाकाः** । 'वच परिभाषणे'(अ.प.अ.),

---

१. विश्वप्रकाशकोशे 'सामुद्रं' इत्येव दृश्यते॥ २. 'अग-' इति१.२.३॥ ३. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३५३, पृ.४४०॥ ४. द्र. टीकासर्वस्वम्, भा-२, २।६।९५॥, पृ.३५६॥, तत्र 'विचकर्त शिरान् द्रौणी रथोत्पादरजोपमान्" इति दृश्यते, पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३५३, पृ.४४०॥ ५. 'गवां शि-' इति ३॥ ६. 'ण्वुल्' इति १॥ ७. 'मूर्धनि अस्त्री' इति पदच्छेदः ॥ ८. 'मुण्ड मुण्डने'( ), कर्मणि'.इति३॥ ९. क्षीरतरङ्गिण्यादावयं धातुर्न दृश्यते ॥ १०. 'क्वचित्' इत्येव हैमसूत्रम् ॥ ११. 'त्रेङ्' इति १.२.३॥ १२. 'मस्यति' इति १.२.४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

घञि, 'चजोः-'७।३।५२॥ इति कुत्वम्, 'अत उपधायाः' ७।२।११६॥ इति वृद्धिः । ३ चिन्वन्तो वर्धमानाः **क्षूर्यन्ते छिद्यन्ते चिकुराः** । 'चिञ् चयने'(स्वा.उ.अ.), 'क्षुर छेदने'[1] (तु.प.से.), पृषोदरादिः । चक्यन्ते प्रतिहन्यन्त इति वा । 'चक प्रतीघाते'[2](भ्वा.आ.से.), बाहुलकादुरप्रत्यये निपात्यते । चिहुरास्तु प्राकृते कस्य हादेशात्, संस्कृतेऽपीति हुग्रः(दुर्गः) । यदाहः-"कुन्तला मूर्धजास्त्वस्त्राश्चिकुराश्चिहुराः [कचाः]"[3] इति । ४ कुन्तं कुन्ताग्राकारं लान्ति[4] **कुन्तलाः** । 'ला दाने' (अ.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥ । ५ कच्यन्ते बध्यन्ते **कचाः** । 'कच बन्धने'(भ्वा.प.से.), 'पुंसि संज्ञायाम्-'३।३।११८॥ इति घः, 'न कवर्गादिः'( )इति निषेधात् कुत्वाभावः । कचते युवमनांसि बध्नातीति वा, पचाद्यच् । "कचन्ति आत्मानमित्यर्थेऽच्"[ ]इत्यन्ये ॥५६७॥ ६ वलन्ति वल्यन्ते वा **वालाः** । 'वल वल्ल संवरणे'(भ्वा.-आ.से.), ज्वलादित्वाण्णः, घञि वा । " 'हलश्च'३।३।१२१॥ इति करणे घञ्"[ ]इत्यन्ये । षड् वालानाम् । शेषश्चात्र-"वृजिनः, वेल्लिताग्रः, अस्त्रः[5]"[शेषनाममाला ३।११९॥] ॥

**तत्पराः पाशो रचना भार उच्चयः ।**

**हस्तः पक्षः कलापश्च केशभूयस्त्ववाचकाः ॥५६८॥**

१ तेभ्यः केशादिशब्देभ्यः पराः पाशादयः शब्दा प्रयुक्ताः सन्तः केशभूयस्त्वं वदन्ति, यथा **केशपाशः** । **केशरचना** । **केशभारः** । **केशोच्चयः** । **केशहस्तः** । **केशपक्षः** । **केशकलापः** इति । 'प्रशंसावचनैश्च'२।१।६६॥ इत्यनेन प्रशंसारूढत्वादेभिः **कर्मधारयः** । 'टमर[6]' इति देश्याम् ॥५६८॥

**अलकस्तु कर्करालः खङ्गुरश्चूर्णकुन्तलः ।**

१ अलति[7] भूषयति मुखम् **अलकः** । 'अली भूषणादौ'[8](भ्वा.प.से.), 'संज्ञायाम्[9]-'(उणा-१९०)इति क्वुन्, पुंक्लीबलिङ्गः । २ कर्करत्वेन कठोरत्वेन अलति **कर्करालः** । 'अली भूषणादौ'(भ्वा.प.से.), अच् । ३ खमिन्द्रियं खरयति **खङ्गुरः**, पृषोदरादिः । ४ चूर्णाकारः कुन्तलः **चूर्णकुन्तलः**, कुटिलकेशः । "कर्पूरादिक्षोदश्चूर्णम्, तस्य कुन्तलः चूर्णकुन्तलः, तद्धि तत्र न्यस्यते"[10]इत्यन्ये। चत्वारि वक्रकेशस्य॥

**स तु भाले भ्रमरकः कुरुलो भ्रमरालकः ॥५६९॥**

१ सोऽलक एव प्रलम्बतया ललाटे वर्तमानः कार्ष्ण्यात् चलत्वाच्च भ्रमरप्रतिकृतित्वाद् **भ्रमरकः**, पुंक्लीबलिङ्गः[11] । 'इवे प्रतिकृतौ'५।३।९७॥ इति कः । २ कु ईषल्लुलति **कुरुलः**, पञ्चमस्वरमध्यः, पृषोदरादित्वात् । ३ भ्रमराकृतिरलको **भ्रमरालकः** । त्रीणि भ्रमराकृतिकेशस्य ॥५६९॥

**धम्मिल्लः संयताः केशाः**

१ ऊर्ध्वं मिलति, इगुपधत्वात् के, पृषोदरादित्वाद् **धम्मिल्लः**, मकारद्वयमध्यः । "कुसुमगर्भो मौक्तिक[पद्म]-परागतिलकादिना बहिः संयतो बद्धः केशकलापो धम्मिल्लः"[12]इति सुभूतिः । एकं बद्धकेशस्य । "मौलिजूटकौ" [शेषनाममाला ३।११९॥]शैषिके ॥

**केशवेषे कबरी**

१ केशानां मार्जनविधिविशेषः केशवेषः, तत्र । वेशस्तालव्योऽपि । कं शिरो वृणोत्याच्छादयति **कबरी** । 'जानपद-'४।१।४२॥ इत्यादिना ङीष् । अत एव '-कबर-'४।१।४२॥ इति निर्देशादणं बाधित्वाऽच् । " 'कबृ वर्णे[13]-'(भ्वा.-आ.से.), बाहुलकादरः । -'जानपदकुण्ड-'४।१।४२॥ इत्यादिना [केशवेशे] ङीष्"[मा. धातुवृत्तिः, भ्वादिः, धातुसं-२५९]इति माधवः । एकं केशरचनायाः । "कर्परी[14]"[शेषनाममाला ३।११९॥]शैषिकम् ॥

**अथ ।**

**वेणिः प्रवेणी**

१ वेण्यत अपसार्यते **वेणिः** । 'विणृ गतौ'( ), '-इन्'(उणा-५५७)इति इन् । "वीयत अपसार्यते[15] इति । वीधातोः 'ज्वरित्वरि(वीज्याज्वरि)भ्यो निः'(उणा-४८८)इति

१. 'क्षुर खुर विलेखने' इति स्वामी, 'क्षुर विलेखने' इति मैत्रेयसायणौ ॥ २. 'चक तृप्तौ प्रतीघाते च' इति क्षीरतरङ्गिण्यादयः ॥ ३. द्र. अम.क्षीर.२।६।९५॥, पृ.१५४॥, स्वोपज्ञटीका ३।५६७॥, पृ.१२८॥ ४. 'लाति' इति३॥ ५. '-ऽश्रः' इति स्वोपज्ञटीकायाम्, ३।५६८॥, पृ.१२८॥ ६. 'डमर' इति४॥ ७. 'अलयति' इति३.४॥ ८. क्षीरतरङ्गिण्यां मीमांसकमहोदयकृता टिप्पणी-ऽद्रष्टव्या, पृ.८१॥ ९. 'क्वुन् शिल्पिसंज्ञयोरपूर्वस्यापि'(उणा-१९०)इत्युणादिगणसूत्रम् ॥ १० द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३५४, पृ.४४१॥ ११. 'पुंक्ली.' इति३॥ १२. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३५५, पृ.४४२॥ १३. 'वरणे' इति३॥ १४. 'बर्बरी' इति शेषनाममालास्वोपज्ञटीकयोः ॥ १५. 'अपसर्यते' इति१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निः, नैरुक्ते णत्वे वेणिः''[1]इति सुभूतिः । यद्वा 'वेणृ गतिज्ञानचिन्तानिशामनवादित्रग्रहणेषु'(भ्वा.उ.से.), '-इन्' (उणा-५७७)इतीन् वेणिः । २ अन्योपसर्गनिवृत्त्यर्थं प्रवेणिः। इह ''धरणिर्भरणिः करणिश्रेणिवेणयः''[2]इति स्त्रीप्रकरणे निगमात् स्त्रीत्वम्, 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि वेणी **प्रवेणी** च । द्वे प्रोषितभर्तृकादिधार्यकेशरचनाविशेषस्य । धम्मिल्लाद्यास्त्रयः केशबन्धविशेषाः । यदाह हलायुधः-''तद्बन्धविशेषाः स्युर्वेणी धम्मिल्लकुन्तलकबर्यः'' [हलायुधकोशः २।५३०॥]इति ॥

**शीर्षण्यशिरस्यौ विशदे कचे ॥५७०॥**

१-२ शिरसि भवः **शीर्षण्यः, शिरस्यः**। शरीरावयवाद् यत्, शीर्षन् (शीर्षाद्) 'ये च तद्धिते'६।१।६१॥ इत्यत्र 'वा केशेषु'(वा-६।१।६१॥)इति शीर्षन्नादेशः, 'नस्तद्धिते' ६।४।१४४॥ इति टिलोपः, 'ये चाभावकर्मणोः'६।४।१६८॥ इति प्रकृत्या । द्वे स्वतः स्नानादितो वा निर्मलस्यान्योन्यासंपृक्तकेशस्य ॥५७०॥

**केशेषु वर्त्म सीमन्तः**

१ सिनोति केशाननेनेति **सीमन्तः** । 'सीमन्तहेमन्त-'(हैमोणा-२२२)इत्यन्ते निपात्यते । सीम्नोऽन्त इति शकन्ध्वादिर्वा । ''सीमन्तः कथ्यते स्त्रीणां केशमध्ये तु पद्धतिः''[हलायुधकोशः२।५२९॥]इति हलायुधः । एकं 'सइथौ'[3] इति ख्यातस्य ॥

**पलितं पाण्डुरः कचः ।**

१ पलति न शोभते, याति श्वेतत्वं परिपाकाद्वा **पलितम्**, पुंक्लीबलिङ्गः[4] । 'पल गतौ'(भ्वा.प.से.), बाहुलकादितच् । फलति परिपाकत्वं यातीति वा । 'फल निष्पत्तौ' (भ्वा.प.से.), 'फलेरि[त]जादेश्च पः'(उणा-७१२)। एकं पलितस्य ॥

**चूडा केशी केशपाशी शिखा शिखण्डिका समाः ॥५७१॥**

१ चोद्यते **चूडा** । 'चुद सञ्चोदने'[5](चु.उ.से.), चुरादिः, सञ्चोदनं प्रश्नः प्रेरणा च, भिदादिपाठादङ्, डत्वं दकारस्य, दीर्घत्वं च धातोः । चुड्यत इति वा । 'चुड छेदने'[6](तु.प.से.), भिदादित्वादङि साधुः । २ के शिरसि शेते **केशी** । 'अन्येभ्योऽपि-'३।२।१०१॥ इति डः, गौरादित्वाद् ङीष्[7] । ३ अल्पः केशकलापः **केशपाशी** । अपचये गौरादित्वाद् ङीष् । ४ श्यन्त्येनां **शिखा** । 'शो तनूकरणे' (दि.प.अ.), 'श्यतेरिच्च-'(हैमोणा-८५)इति खः । यद्वा शेते शिरसि शिखा । 'शीङ् स्वप्ने'(अ.आ.से.), 'शीङः खः[8] ह्रस्वश्च'(उणा-७०२)इति खः, टाप् । ५ शिखण्डतुल्या **शिखण्डिका** । 'इवे प्रतिकृतौ'५।३।९६॥ इति कन् । पञ्च सामान्येन चूडायाः । 'चोटली' इति भाषा ॥५७१॥

**सा बालानां काकपक्षः शिखण्डकशिखाण्डकौ।**

१ काकपक्षाकारत्वात् **काकपक्षः** । २ शिरसि खण्ड्यते, शिखिवद् डयते वा शिखण्डः, पृषोदरादिः, स्वार्थे कनि **शिखण्डकः**। ३ शिरो मण्डयति शिखाण्डः, ततः कन् पृषोदरादित्वात् । उभावपि तालव्यादी । ''शिखण्डकशिखाण्डकौ''[ ]इति वाचस्पतिसुभूती । त्रीणि क्षत्रियकुमारणां शिखापञ्चकस्य । ''शिखात्रयस्य''[ ]इत्यन्ये । उक्तं च- ''बालानां तु शिरः कार्यं त्रिशिखं मुण्डमेव वा''[9]इति । अन्ये तु ''सामान्येन चूडायाः''[10]इत्याहुः । ''क्षत्रियकुमाराणामुपनयनकाले कृतानां चूडानाम्''[11]इत्यन्ये ॥

**तुण्डमास्यं मुखं वक्त्रं लपनं वदनानने ॥५७२॥**

१ तुण्डति खण्डयति क्षिप्तद्रव्यं **तुण्डम्** । 'तुडि तोडने'(भ्वा.प.से.), अच् । तुणति कुटिलीभवति वा । 'तुण कौटिल्ये'(तु.प.से.), 'ञमन्ताड्डः'(उणा-१११)। २ अस्यन्ते क्षिप्यन्ते वर्णा अनेनेति **आस्यम्** । अस्यते क्षिप्यतेऽस्मिन् नेत्रादिकं वा[12] । 'असु क्षेपणे'(दि.प.से.), 'कृत्यल्युटो बहुलम्' ३।३।११३॥ इति बाहुलकादधिकरणे 'ऋहलोर्ण्यत्'३।१।१२४॥। ''आस्यन्त्यनेन वर्णानित्यास्यम्''[13]इति मधुमाधवी । ३ प्रजापतिना खातमिति **मुखम्**, पुंक्लीबलिङ्गः ।

१. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३५६, पृ.४४३॥ २. तुलनीयोऽमरकोषः २।६।९८॥ ३. 'सइंथा' इति१, 'सयंथा' इति३॥ ४. 'पुंक्ली' इति ३॥ ५. 'संकोचने' इति ३॥ ६. सायणसम्मतश्चुडधातुः संवरणेऽर्थे दृश्यते, न तु छेदने ॥ ७. 'ङीप्' इति१.४॥ ८. 'शीङो ह्रस्वश्च' इत्युणादिगणे ॥ ९. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३५४, पृ.४४२॥, रामाश्रमी २।६।९६॥, पृ.३०४॥ १०. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३५४, पृ.४४२॥ ११. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३५४, पृ.४४२॥ १२. ३प्रतौ नास्ति ॥ १३. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३४७, पृ.४३२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'खन खनने'[१](भ्वा.उ.से.), '[डित्] खनेर्मुट् चोदात्तश्च' (उणा-६९८)इत्यच्, स च डित्, डित्त्वाट्टिलोपः, मुडागमश्च ।

"[प्राक्] खनो मुडुदात्तश्च ततोऽच्प्रत्ययो भवेत् ।
प्रजासृज(-जा) यतः खातं तस्मादाहुर्मुखं बुधाः ॥१॥"

[२]इति निरुक्तकारः । "मुदितानि खान्यत्रेति पृषोदरादिः" [ ]इत्येके । ४ उच्यतेऽनेनेति **वक्त्रम्** । 'वच परिभाषणे'[३] (अ.प.अ.), 'गुधृवी-'(उणा-६०६)इति त्रन्(त्रः) । ५ लप्यतेऽनेन **लपनम्** । 'लप परिभाषणे'(भ्वा.प.से.), करणे ल्युट् । ६ उद्यतेऽनेनेति **वदनम्** । 'वद व्यक्तायां वाचि' (भ्वा.प.से.), करणे ल्युट् । ७ आ समन्तादननिति श्वसित्यनेन **आननम्** । आङ्पूर्वः 'अन प्राणने'(अ.प.से.), बाहुलकाद् युच् । सप्त मुखविवरस्य । कवयस्तु तदुपलक्षिते समुदाये प्रयुञ्जन्ते[४] (प्रयुञ्जते) । शेषश्चात्र-"मुखे दन्तालयस्तेरं घनं वरं घनोत्तमम्"[शेषनाममाला ३।१२०॥] ॥५७२॥

## भाले गोध्यलिकालीकललाटानि

१ भल्यते परिभाष्यते शुभाशुभमत्रेति **भालम्**, पुंक्लीबलिङ्गः[५] । 'भल निरूपणे'[६](चु.उ.से.), बाहुलकाद् घञ्, तत्र । 'भल भल्ल परिभाषणहिंसादानेषु'(भ्वा.आ.से.) वा, अधिकरणे, घञ् । भलते भालम्, अत एव धातोः 'अकर्तरि च कारके-' ३।३।१९॥ इति घञ् वा । भां दीप्तिं लाति वा, तत्र । २ गावौ[७] नेत्रे समीपे धीयतेऽस्मिन्निति **गोधिः**, स्त्रीलिङ्गः । 'डुधाञ् धारणादौ'(जु.उ.अ.), 'उपसर्गे घोः किः'३।३।९२॥ इति किः । "गोधिभालौ महाशङ्खः"[त्रिकाण्डशेषः२।६।३०॥] इति त्रिकाण्डशेषात् पुंसि च । गुध्यते पटादिना वेष्ट्यत इति वा । 'गुध परिवेष्टने'(दि.प.से.), 'इन् सर्वधातुभ्यः'(उणा-५५७)इतीन् । ३ अल्यते भूष्यते तिलकादिभिः **अलिकम्**, क्लीबे । 'अली भूषणादौ'[८](भ्वा.प.से.), बाहुलकात् 'क्रियः-'(उणा-२०२)इतीकन् । ४ अल्यते भूष्यते **अलीकम्**, क्लीबे । 'अलीकादयश्च'(उणा-४६५)इतीकनि साधुः । "अलिकं ह्रस्वमध्यम्, दीर्घमध्यं च"[९]इति राजदेवः[१०] । ५ ललति विलसति तिलकादिकमत्र । ललति ईप्सति तिलकादिकं वा **ललाटम्** । 'लल विलासे'(भ्वा.प.से.), 'लल ईप्सायाम्' (चु.आ.से.) वा, 'उणादयो बहुलम्'३।३।१॥ इत्याटः [काशिकावृत्तिः, न्यासः ६।२।१७७॥] '-स्वाङ्गं ध्रुवमपर्शु'६।२।-१७७॥ इत्यत्र स्वरसूत्रे जिनेन्द्रः[११] । पञ्च ललाटस्य ॥

## श्रुतौ श्रवः ।

## शब्दाधिष्ठानपैञ्जूषमहानादध्वनिग्रहाः ॥५७३॥
## कर्णः श्रोत्रं श्रवणं च

१ श्रूयतेऽनया **श्रुतिः** । 'श्रु श्रवणे'(भ्वा.प.अ.), 'श्रुयजिस्तुभ्यः करणे'(वा-३।३।९४॥)इति क्तिन्, स्त्रियां ल्युटोऽपवादः, तत्र । २ शृणोति **श्रवः**, क्लीबलिङ्गः[१२] । 'श्रु श्रवणे'(भ्वा.प.अ.), '-असुन्'(उणा-६२८)इत्यसुन् । श्रवसी, श्रवांसि इत्यादि । शब्दोऽधितिष्ठत्यत्र **शब्दाधिष्ठानम्** । 'ष्ठा गतिनिवृत्तौ'(भ्वा.प.अ.), अधिकरणे ल्युट् । ४ पिञ्जूषः कर्णमलः, सोऽत्राऽस्ति **पैञ्जूषः**, पुंक्लीबलिङ्गः[१३] । ज्योत्स्नादित्वादण् । यद्वाचस्पतिः-"श्रवः पैञ्जूषमस्त्रियाम्"[१४] । ५ महान् नादो ध्वनिरत्रेति **महानादः** । ६ ध्वनिर्गृह्यतेऽनेन **ध्वनिग्रहः** । 'ग्रह उपादाने'(क्र्या.उ.से.), 'ग्रहवृदृ-'३।३।-५८॥ इत्यप् । शब्दग्रहोऽपि ॥५७३॥ ७ करोति शब्दज्ञानं **कर्णः** । कीर्यते शब्दोऽस्मिन्, किरत्यनेनेति वा । 'डुकृञ् करणे'(क्र्या.उ.अ.), कृञः '(कपृवृ(कृवृत्)-'(चान्द्रोणा-२९०)इत्यादिना नन् । ८ श्रूयतेऽनेन **श्रोत्रम्** । 'श्रु श्रवणे' (भ्वा.प.अ.), ष्ट्रन् । ९ श्रूयतेऽनेन **श्रवणम्**, [१३]पुंनपुंसकलिङ्गः । करणे ल्युट् । श्रवाऽपि । नव कर्णस्य ॥

## वेष्टनं कर्णशष्कुली ।

१ वेष्ट्यतेऽनेन **वेष्टनम्** । 'वेष्ट वेष्टने'(भ्वा.आ.से.), ल्युट् । शक्नोत्यनया शष्कुली । कर्णस्य शष्कुली **कर्ण-**

---

१. 'खनु अवदारणे' इति क्षीरतरङ्गिण्यादयः ॥ २. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३४७, पृ.४३२॥, रामाश्रमी २।६।८९॥, पृ.३००॥ ३. 'रप लप व्यक्तायां वाचि' इति क्षीरतरङ्गिण्यादयः ॥ ४. 'प्रयुज्यन्ते' इति २॥ ५. 'पुंक्ली.' इति ३॥ ६. 'भल आभण्डने' इति क्षीरतरङ्गिण्यादयः, आभण्डनं निरूपणम् ॥ ७. 'गावो' इति३॥ ८. क्षीरतरङ्गिण्यामस्य धातोष्टिप्पणी द्रष्टव्या, पृ.८१॥, टि.सं-७॥ ९. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३५०, पृ.४३७॥, रामाश्रमी २।६।९२॥, पृ.३०२॥, तयोः 'अलिकं ह्रस्वदीर्घमध्यम्" इति दृश्यते ॥ १०. 'रन्तिदेवः' इति ३॥ ११. तत्कृतन्यासे "दर्शनीयललाट इति । दर्शनीयशब्दः 'उपोत्तमं रिति' इति मध्योदात्तः । 'लल ईप्सायाम्' इत्यस्माद् 'उणादयो बहुलम्' इत्याटप्रत्ययः । तेन ललाटशब्दो मध्योदात्तः ।" इति दृश्यते, काशिकावृत्तिः, भा-५, ६।२।१७७॥, पृ.१६९॥ १२. 'क्लीब' इति३॥ १३. 'पुंक्ली' इति३॥ १४. द्र. स्वोपज्ञटीका ३।५७३॥, पृ.१३०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**शष्कुली**, कर्णपत्रिकेत्यपि[1], कर्णपर्यन्तश्च । द्वे कर्णपर्पट्याः। 'कनफटा'[2] इति भाषा ॥

**पालिस्तु कर्णलतिका**

१ पाल्यते **पालिः**, स्त्रीलिङ्गः । 'पाल रक्षणे' (चु.उ.से.), णिजन्तः, 'अच इः'(उणा-५७८)इति इः । २ कर्णस्य लतेव कर्णलता, सैव **कर्णलतिका** । कर्णलताऽपि। द्वे कर्णपाल्याः । शेषश्चात्र-''कर्णप्रान्तस्तु धारा स्यात् कर्णमूलं तु शीलकम्''[शेषनाममाला ३।१२०॥]॥

**शङ्खो भालश्रवोऽन्तरे ॥५७४॥**

१ शाम्यन्त्यत्राऽऽहते प्राणा इति **शङ्खः**, पुंक्ली. । 'शमु उपशमे'(दि.प.से.), 'शमिमनिभ्यां खः'[3](हैमोणा-८४) । भालश्च श्रवश्च भालश्रवसी, तयोरन्तरं मध्यं भालश्रवोऽन्तरम्, तत्र। यद्वाग्भटः-''अनुकर्णं ललाटान्ते शङ्खौ सद्योविनाशिनौ''[अष्टाङ्गहृदयम्, शारीरस्थानम्, अध्यायः-१, श्लो-३२] । एकं शङ्खस्य । 'लवणा' इति भाषा ॥५७४॥

**चक्षुरक्षीक्षणं नेत्रं नयनं दृष्टिरम्बकम् ।**
**लोचनं दर्शनं दृक् च**

१ चष्टे शुभाशुभं स्फुरणात् **चक्षुः** । 'चक्षिङ् व्यक्तायां वाचि'(अ.आ.से.), 'धनर्त्तिचक्षिङ्पृ(पृ)वर्पि-'[4](उणा-२७४)इत्युस्, बाहुलकाद् न 'चक्षिङः ख्याञ्'२।४।५४॥इति ख्याञादेशः । २ अश्नुते रश्मिभिर्व्याप्नोति रूपवद्द्रव्यम् **अक्षि**, क्लीबलिङ्गौ[5] । 'अशूङ्[6] व्याप्तौ'(स्वा.आ.से.), 'अशेर्नित्'(उणा-४३६)इति क्सिः, 'व्रश्च-'८।२।३६॥आदिना षत्वम्, 'षढोः कः सि'८।२।४१॥ इति कत्वम् । यद्वा ''अक्ष्णोति अक्षि, इः[7]''[अम.क्षीर.२।६।९३॥]इति तु स्वामी। ३ ईक्ष्यतेऽनेन **ईक्षणम्** । 'ईक्ष दर्शनाङ्कनयोः'(भ्वा.आ.से.), करणे ल्युट् । ४ नीयतेऽनेन दृश्यमिति **नेत्रम्**, पुंक्लीबलिङ्गः । 'णीञ् प्रापणे'(भ्वा.उ.से.), 'दामनीशस्(शस)-' ३।२।१८२॥इत्यादिना ष्ट्रन् । ५ नीयते प्राप्यते रूपमनेनेति **नयनम्** । करणे ल्युट् । ६ दृश्यतेऽनया **दृष्टिः** । 'दृशिर् प्रेक्षणे'(भ्वा.प.अ.), 'क्तिन्नपीष्यते'(वा-३।३।९३॥)इति स्त्रियां क्तिन् । ७ अम्बते **अम्बकम्** । 'अबिङ्[8] शब्दने[9]' (भ्वा.आ.से.) । ८ लोच्यतेऽनेनेति **लोचनम्** । 'लोचृ दर्शने' (भ्वा.आ.से.), करणे ल्युटि । विलोचनमपि । ९ दृश्यतेऽनेनेति **दर्शनम्** । करणे ल्युट् । १० पश्यति, दृश्यतेऽनया वा **दृक्**, स्त्रीलिङ्गः । संपदादित्वात् क्विप्, 'क्विन्प्रत्ययो यस्मात् दृष्टः' इति पक्षे 'क्विन्प्रत्ययस्य कुः'८।२।६२॥ इति कुत्वम् । दश नेत्रस्य । शेषश्चात्र-''रूपग्रहो देवदीपः[10] ॥''

**तत्तारा तु कनीनिका ॥५७५॥**

१ तस्य नेत्रस्य, तारयति तमः **तारा**, पुंस्त्री । 'तृ प्लवनतरणयोः'(भ्वा.प.से.), णिच्, अजन्तः । के तारका[11]ऽपि । यच्छ्रीधरः-

''तारको दैत्यभित्कर्णधारयोर्दृशि तारकम् ।
ऋक्षे कनीनिकायां च तारकं तारकाऽपि च ॥१॥''

[विश्वलोचनकोशः, कान्तवर्गः, श्लो-९३]इति । सर्वनाम्नां पूर्वपरामर्शित्वात् तच्छब्दोऽत्राऽक्षिपरामर्शी नक्षत्रव्यवच्छेदार्थः । २ कनति दीप्यते **कनीनिका** । 'कन दीप्तौ'(भ्वा.प.से.), 'कनेरीनकः'(हैमोणा-७३), टाप्, 'प्रत्ययस्थात्-'७।३।४४॥ इतीत्वम् । कनेर्बाहुलकादीनन्, गौरादिः, स्वार्थे कनि 'केऽणः' ७।४।१३॥ इति ह्रस्वत्वे वा । ज्योतिरित्यपि । यदमरः- ''ज्योतिर्भद्योतदृष्टिषु''[अमरकोषः३।३।२३०॥]इति । ''द्योतते[12] ज्योतिः । भं तारका, द्योतः प्रकाशः, दृष्टिः कनानिकामध्यम्। यन्मनुः-''तारा नेत्रविभागः स्यात् ज्योतिस्तत्पञ्चमांशकम्''[[13]] [अम.क्षीर.३।३।२३०॥]'' इति क्षीरस्वामी । द्वे अक्षिपुत्तलिकायाः । 'कीकी' इति भाषा ॥५७५॥

**वामं तु नयनं सौम्यम्**

१ सोमो देवताऽस्य **सौम्यम्** । 'सोमाट् ट्यण्' ४।२।३०॥, णित्त्वाद् वृद्धिः । एकं वामनेत्रस्य ॥

**भानवीयं तु दक्षिणम् ।**

---

१. '-केत्यादि' इति२॥ २. '-फडा' इति१.२॥ ३. 'शमेः खः'(उणा-१०२)इत्युणादिगणसूत्रम् ॥ ४. 'अर्तिपृवपियजितनिधनितपिभ्यो नित्' (उणा-२७४)इत्युणादिगणसूत्रम्, तत्र चक्षिङोऽभावः, 'चक्षेः शिच्च'(उणा-२७६)इति पृथगेवोणादिसूत्रसत्त्वात्, तेन च उसः शित्त्वादार्धधातुके ख्याञ्बाधः, अत एवाग्रे वक्ष्यमाणः-''बाहुलकात् न 'चक्षिङः ख्याञ्' इति ख्याञादेशः'' इति ग्रन्थो व्यर्थः ॥ ५. 'क्लीबः' इति३॥ ६. ङकारानुबन्धोऽनावश्यकः॥ ७. अम.क्षीरस्वामिटीकायाम्-''अक्ष्णोत्यक्षि'' इत्येव दृश्यते, २।६।९३॥, पृ.१५४॥ ८. ङकारानुबन्धोऽनावश्यकः ॥ ९. 'शब्दे' इति१॥ १०. 'दीव-' इति१॥ ११. 'तारिका-' इति३॥ १२. 'ज्योतते' इति अम.क्षीरस्वामिटीकायाम्, ३।३।२३०॥, पृ.३२८॥ १३. द्र. पदचन्द्रिका, भा-३, नानार्थवर्गः, श्लो-३८४, पृ.३२५॥, तत्र 'यन्मनुः' इत्यस्य स्थाने 'यदजयः' इति दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ भानोरिदं **भानवीयम्** । 'वृद्धाच्छः'४।२।११४॥, छस्य ईयादेशः, 'ओर्गुणः'६।४।१४६॥ । एकं दक्षिणनेत्रस्य ॥

**असौम्येऽक्षिण्यनक्षि स्यात्**

१ सोमदेवताकत्वेन लक्षणया सौम्यमविकृतम्, न सौम्यम् **असौम्यम्**, सविकारमित्यर्थः, तत्र । न अक्षि अनक्षि, नञत्र विरोधे, अनर्थवत् । अनक्षिणी, अनक्षीणि इत्यादि क्लीबे । एकं सविकारनेत्रस्य ॥

**ईक्षणं तु निशामनम् ॥५७६॥**

**निभालनं निशमनं निध्यानमवलोकनम् ।**

**दर्शनं द्योतनं निर्वर्णनम्**

१ ईक्ष्यत **ईक्षणम्** । 'ईक्ष दर्शनाङ्कनयोः'(भ्वा.-आ.से.), करणे ल्युट् । २ निशाम्यते **निशामनम्** । 'शमिण्[1] आलोचने'(चु.आ.से.), चुरादिः, भावे ल्युट् ॥५७६॥ ३ निभाल्यते **निभालनम्** । 'भल विलोकने[2]'(   ), ल्युट् । ४ निशाम्यते **निशमनम्** । 'शमोऽदर्शने'(भ्वा.प.से.)इति मित्त्वम्, 'मितां ह्रस्वः'६।४।९२॥ । ५ निध्यायते **निध्यानम्**। निपूर्वो 'ध्यै चिन्तायाम्'(भ्वा.प.से.), ल्युटि 'आदेच उपदेशे-'६।१।४५॥इत्यात्वम् । ६ अवलोक्यत[3] **अवलोकनम्**। 'लोकृ दर्शने'(भ्वा.आ.से.) । ७ दृश्यते **दर्शनम्** । ८ द्योत्यते[4] **द्योतनम्** । ९ निर्वर्ण्यते **निर्वर्णनम्** । 'वर्ण वर्णक्रिया-विस्तारगुणवचनेषु'(चु.उ.से.), सर्वत्र ल्युट् । नव विलोकनस्य । 'जोइवुं[5]' इति भाषा ॥

**अथाऽर्धवीक्षणम् ॥५७७॥**

**अपाङ्गदर्शनं काक्षः कटाक्षोऽक्षिविकूणितम् ।**

१ अर्धं वीक्षणमस्य **अर्धवीक्षणम्** ॥५७७॥ २ अपाङ्गेन दर्शनम् **अपाङ्गदर्शनम्** । ३ ईषद् विकूणितत्वादक्ष्यत्र **काक्षः** । 'का पथ्यक्षयोः'६।३।१०४॥ इति कोः कादेशः, 'बहुव्रीहौ सक्थ्यक्ष्णोः-'५।४।११३॥इति षच्समासान्तः । ४ कटमसदृशमक्ष्यत्र **कटाक्षः** । 'बहुव्रीहौ सक्थ्यक्ष्णोः-'५।४।११३॥ इति षच् । कटस्य कपोलस्याऽक्षि कटाक्ष इति वा। ५ अक्ष्णो विकूणितम् **अक्षिविकूणितम्** । पञ्च कटाक्षस्य ॥

**स्यादुन्मीलनमुन्मेषः**

१ उन्मील्यत **उन्मीलनम्** । 'मील मीलने[6]'(भ्वा.-प.से.), भावे ल्युट् । २ उन्मेषणम् **उन्मेषः** । 'मिष स्पर्द्धायाम्'(तु.प.से.), तुदादिः[7], भावे घञ् । द्वे नेत्रोद्घाटनस्य ॥

**निमेषस्तु निमीलनम् ॥५७८॥**

१ निमेषणं **निमेषः** । 'मिष स्पर्द्धायाम्'(तु.प.से.), तुदादिः, भावे घञ् । २ निमील्यते **निमीलनम्** । 'मील निमीलने[8]'(भ्वा.प.से.), ल्युटि । द्वे नेत्रनिमीलनस्य । 'मीचवउं[9]' इति भाषा ॥५७८॥

**अक्ष्णोर्बाह्यान्तावपाङ्गौ**

१ अक्ष्णोर्नेत्रयोर्बाह्यान्तावपान्तप्रदेशौ अपकृष्टावङ्गाद् **अपाङ्गौ** । यद्वाग्भटः-"नेत्रयोर्बाह्यतोऽपाङ्गौ भ्रुवोः पृच्छान्तयोरधः"[अष्टाङ्गहृदयम्, शारीरस्थानम्, अध्यायः-४, श्लो-३१]इति । एकं नेत्रप्रान्तस्य ॥

**भ्रूरूर्ध्वे रोमपद्धतिः ।**

१ नेत्रयोरूर्ध्वे उपरि रोमपद्धतिः रोमराजिः । भ्राम्यत (भ्रम्यति) **भ्रूः**, स्त्रीलिङ्गः । 'भ्रमु चलने[10]'(भ्वा.प.से.), 'भ्रमेर्डूः[11]'(उणा-२२६)इति डूः ॥

**सकोपभ्रूविकारे स्यात् भ्रभ्रुभ्रूभृपरा कुटिः ॥५७९॥**

१-४ भ्रादिभ्यः चतुर्भ्यः परा कुटिः । भ्रुवः कुटनं [12]कुटिलीकरणं **भ्रकुटिः** । एवं **भ्रुकुटिः**, **भ्रूकुटिः**, **भृकुटिः**। 'अच् भ्र(भ्रु)कुंशा(सा)दीनाम्[13]'(वा-६।३।६१॥)इति पक्षे अकारान्तत्वम् । 'इको ह्रस्वोऽङ्यो गालवस्य'६।३।६१॥इति वा ह्रस्वत्वम् । चत्वारोऽपि स्त्रीलिङ्गः । भृकुटिरिति गौडमताश्रयणेन । यद्गौडः-"अथ भ्रकुटिर्भ्रुकुटिर्भ्रूकुटिभृकुटिः स्त्रियः"[[14] ]इति । चत्वारि सकोपभ्रूविकारस्य । 'त्रिवली' इति भाषा ॥५७९॥

---

१. णकारानुबन्धो हैममते ॥ २. क्षीरतरङ्गिण्यादौ विलोकनार्थको भलधातुर्न दृश्यते ॥ ३. '-लोकते' इति२॥ ४. 'द्योतते' इति३॥ ५. '-वूं' इति४॥ ६. 'मीलने' इति१, 'मील श्मील निमेषणे' इति स्वामी, 'मील स्मील क्ष्मील निमेषणे' इति मैत्रेयः, 'मील श्मील स्मील क्ष्मील निमेषणे' इति सायणः ॥ ७. १.३नास्ति ॥ ८. 'मीलने' इति१, पूर्वत्र टिप्पणी द्रष्टव्या ॥ ९. '-वओ' इति१, '-वउ' इति४, '-चवो' इति३॥ १०. 'चले' इति १, 'लोचने' इति३॥ ११. 'भ्रमेश्च डूः' इत्युणादिगणे ॥ १२. 'कुटिनी-' इति१॥ १३. 'भ्रुकुंसादीनामकारो भवतीति वक्तव्यम्' इति काशिकायां वार्तिकस्वरूपम्; भा-५, ६।३।६१॥, पृ.२६०॥ १४. द्र. स्वोपज्ञटीका ३।५७९॥, पृ.१३१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**कूर्चं[1] कूर्पं[2] भ्रुवोर्मध्ये**

१-२ नासोपरि भ्रुवोर्मध्यं[१] **कूर्चम्, कूर्पं** च । कीर्यते कूर्चम्, पुंक्ली. । ['कूर्चचूर्च-'(हैमोणा-११३)इति चे निपात्यते । कीर्यते कूर्पम्, पुंक्ली. । 'कृ विक्षेपे'(तु.प.से.), 'कृशृपृ(सृ)भ्य ऊर्चान्तस्य'(हैमोणा-२९८)इति पः, ऊर्चान्तादेशः । द्वे भ्रूमध्यस्य ॥

**पक्ष्म[1] स्यान्नेत्ररोम[2]णि ।**

१ पच्यते विस्तीर्यते **पक्ष्म**, पुंक्ली. । 'पचि विस्तारे[२]'( ), 'सात्मन्नात्मन्-'(हैमोणा-९१६)इति मनि निपात्यते । नेत्रस्य रोम **नेत्ररोम**, तत्र । 'पापणि[३]' इति भाषा, तस्य नाम्नी द्वे ॥

**गन्धज्ञा[1] नासिका[2] नासा[3] घ्राणं[4] घोणा[5] विकूणिका[6] ॥५८०॥**

**नक्रं[7] नर्कुटकं[8] शिङ्घिनी[9]**

१ गन्धं जानातीति[४] **गन्धज्ञा** । 'इगुपधज्ञा-[५]'३।१।-१३५॥ इति कः । २ नस्यते कुटिलीक्रियते **नासिका** । नासत इति वा । 'णस कौटिल्ये'(भ्वा.आ.से.), 'णासृङ्[६] शब्दे' (भ्वा.आ.से.) अतो वा, ण्वुल्, टाप्, 'प्रत्ययस्थात्-'७।३।-४४॥ इतीत्वम् । यद्वा नासाशब्दात् संज्ञायां कनि, 'केऽणः' ७।४।१३॥ इति ह्रस्वत्वे, 'प्रत्ययस्थात्-'७।३।४४॥ इतीत्वे नासिका । ३ नासते शब्दायते **नासा** । 'णासृ शब्दे' (भ्वा.आ.से.), पचाद्यच् । ४ जिघ्रत्यनेन **घ्राणम्**, क्लीबे । 'घ्रा गन्धोपादाने'(भ्वा.प.अ.), करणे ल्युट् । ५ घुणति भ्रमति गन्धार्थं **घोणा** । 'घुण भ्रमणे'(भ्वा.प.से.), अच् । ६ विकूणयते **विकूणिका** । 'कूणङ्[६] सङ्कोचने[७]'(चु.उ.से.), ण्वुल् ॥५८०॥ ७ न क्रामति वायुरस्मिन् **नक्रम्** । 'क्रमु पादविक्षेपे'(भ्वा.प.से.), 'नञः क्रमिगमि-'(हैमोणा-४)इति डः। ''डोऽन्यत्रापि दृश्यते'( )इति डः''[मा.धातुवृत्तिः, भ्वादिः, धातुसं-३१०]इति माधवः । 'नभ्राण्नपात्-'६।३।७५॥इत्यादिना नञ्प्रकृत्या, [८]क्लीबलिङ्गोऽयम् । वाचस्पतिस्तु-''नक्रो नासा विकूणिका''[[९]]इति पुंस्याह । ८ नृत्यति पवनोऽत्र नर्कुटम्। 'नर्कुट-कुक्कुटे[१०]-'(हैमोणा-१५५)इत्युटे निपात्यते, स्वार्थे कनि **नर्कुटकम्** । ९ शिङ्घत्यवश्यं **शिङ्घिनी** । 'शिघि आघ्राणे' (भ्वा.प.से.), आवश्यके णिनिः, 'ऋन्नेभ्यो ङीप्'४।१।५॥ । नव नासिकायाः । शेषश्चात्र-''नासा तु गन्धहृत्, नसा गन्धवहा[११] नस्या नासिक्या[१२] गन्धनालिका''[शेषनाममाला ३।१२१॥] ॥

**ओष्ठोऽ[1]धरो[2] रदच्छदः[3] ।**

**दन्तवस्त्रं[4] च**

१ उष्यते दह्यते कट्वम्लोष्णाद्याहारेण **ओष्ठः** । 'उष दाहे'(भ्वा.प.से.), 'उषिकुषिगार्तिभ्यस्थन्'(उणा-१६१), 'पुगन्तलघूपधस्य-'७।३।८६॥ इति गुणः, ष्टुत्वम् । उपरिवर्त्यधोवर्ती चोष्ठः । ''मां विवक्षुरसि किं चलदोष्ठः''[[१३]]इति प्रयोगाद् उत्तरोष्ठ अधरोष्ठ इत्यतोऽपि । २ **अधरः** अप्येवं, धरतीति[१४] धरः, न धरः अधरः, न किञ्चिद्धर्तुं शक्नोतीत्यर्थः । ३ रदा दन्ताः छाद्यन्तेऽनेनेति **रदच्छदः** । 'छद अपवारणे'(चु.उ.से.), 'पुंसि संज्ञायाम्-'३।३।११८॥ इति घः, 'छादेर्घेऽद्व्युपसर्गस्य-' ६।४।९६॥ इति ह्रस्वत्वम् । ४ दन्तानां छादनसामर्थ्याद् वस्त्रमिव **दन्तवस्त्रम्**, पुंक्ली. । चत्वारि ओष्ठस्य । शेषश्चात्र-''ओष्ठे तु दशनोच्छिष्टो रसालेपी च वाग्दलम्''[शेषनाममाला ३।१२२॥] ॥

**तत्प्रान्तौ सृक्कणी**

१ तस्यौष्ठस्य प्रान्तौ तत्प्रान्तौ वामदक्षिणावन्तौ **सृक्कणी** । 'ओष्ठस्य' इति जातावेकवचनम् । सृजतो लालामिति सृक्कणी । 'सृज विसर्गे'(तु.प.से.), बाहुलकात् 'श्वन्नुक्षन्-'(उणा-१५७)इत्यादिना निपातितः । ''सृक्कणी क्लीबे'' [[१५]]इति सुभूतिः । ''प्रान्तावोष्ठस्य सृक्कणी''[[१६]]इति क्लीब[१७]काण्डेऽमरदत्तश्च । '' महासृक्कापशोभितो नृसिंहनखाग्रवत्'' [ ]इति लताश्लेषात्[१८] कद्वयम् । ''स्मितस्य संभावय सृक्वणा

१. '-ध्ये' इति१॥ २. 'पचि व्यक्तीकरणे' इति, 'पचि विस्तारवचने' इति क्षीरतरङ्गिण्यादयः ॥ ३. 'भांपणि' इति३॥ ४. 'जानाति' इति१.२॥ ५. '-धेति' इति१॥ ६. 'ङकारानुबन्धोऽनावश्यकः ॥ ७. 'सङ्कोचे' इति१.२॥ ८. 'क्लीब' इत्येव३॥ ९. द्र. स्वोपज्ञटीका ३।५८१॥, पृ.१३१॥ १०. '-कुर्कुट-'इति२.३॥ ११. '-वाहा'इति४॥ १२. २प्रतौ नास्ति, 'नासिक्यं' इति शेषनाममालास्वोपज्ञटीकयोः ॥ १३. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३४८, पृ.४३३॥, तत्र 'किञ्चिच्च-' इति दृश्यते ॥ १४. 'धरति' इति३॥ १५. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३४९, पृ.४३६॥ १६. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३४९, पृ.४३६॥, रामाश्रमी २।६।९१॥, पृ.३०२॥ १७. 'क्लीबे' इति१॥ १८. '-श्लेष्मा-' इति३. '-विश्लेषा-' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कणान्''[नैषधीयचरितमहाकाव्यम्, सर्गः-९, श्लो-१११]इति श्रीहर्षप्रयोगाद्[1] वकारोपेतत्वं च । ''सृक्के द्वे चैव विज्ञेये चत्वारिंशच्च वक्रजा''[ [2] ]इत्यदन्तम्, क्लीबमपि । सृक्कणी ङीषन्ता[3] च । ''स सृक्कणी प्रान्तमसृक्प्रदिग्धं प्रलेलिहानो हरिणारिरुच्चैः''[ [4] ]इति पाणिने[5]ः । सृक्कणिरितीदन्तमपि । 'क्लीबे वारिशब्दवत्''[ [4] ]इत्युक्तेः । ''सृक्किशब्दो ह्रस्वेकारान्तोऽपि क्लीबे''[ [4] ]इत्यपरे । ''सक्थ्यस्थि दधि सृक्कि तथा वारि स्यात्''[ [4] ]इत्यरुणः । सृक्किणी तृतीयस्वरमध्योऽपि । ''सृक्किण्यां[6] सृक्कि सृक्क च''[ ]इति शब्दप्रभेदः । एकमोष्ठप्रान्तस्य । 'मुहफाड' इति भाषा ॥

### असिकं[1] त्वधः ॥५८१॥

१ अस्यत **असिकम्** । 'असु क्षेपणे'(दि.प.से.), 'क्रिय(क्रिय) इकन्'(उणा-२०२)इति बाहुलकादतोऽपीकन् । एकमधराधोभागस्य ॥५८१॥

### असिकाधस्तु चिबुकम्[1]

१ असिकस्याऽधो भागः असिकाधः । चीब्यते[7] आदत्ते मुखसौन्दर्यं **चिबुकम्** । 'चीवृ आदानसंवर[ण]योः' (भ्वा.उ.से.), मित्र(मृग)य्वादित्वात् कुः, पृषोदरादित्वाद् वर्णविकारः, ततः कन् । चिनोति मुखसौन्दर्यं वा । मित्र(मृग)य्वादित्वात् कुः, नैरुक्तो वर्णागमः, ततः कन् । ''अधस्तादधरोष्ठस्य चिबुः स्यात् चिबुकं तथा''[ [8] ]इति निगमाख्यकोषः । एकमसिकाधोभागस्य ॥

### स्याद् गल्लः[1] सृक्कणः परः ।

१ गल्यतेऽद्यतेऽनेन **गल्लः** । 'गल अदने'(भ्वा.-प.से.), बाहुलकाद् लः । सृक्कणः परः ओष्ठपर्यन्तादग्रे । एकं सृक्कणः परस्य[9] ॥

### गल्लात् परः कपोलश्च[1]

१ कं सुखं पुलति(पोलति) महत्त्वं नयति **कपोलः** । 'पुल महत्त्वे'(भ्वा.प.से.), 'कर्मण्यण्'३।२।१॥ । केन जलेन, मुखवायुना वा पुल्यते । भावे घञ् । कप्यते प्रसाध्यतेऽदनमनेनेति वा । कपिः सौत्रः, 'कपिकण्डिकल्लिभ्य ओलन्'[10] (उणा-६६) । एकं 'गलवा' इति ख्यातस्य ॥

### परो गण्डः[1] कपोलतः ॥५८२॥

१ कपोलतः परे **गण्डः** । गण्डति वदनैकदेशतां गच्छति गण्डः । 'गडि वदनैकदेशे'(भ्वा.प.से.), अच् । कपोलात् परोऽग्रे यत्, तस्यैकम् । त्रयाणामेषां दर्शनेन ज्ञानं[11] लोकाद् ज्ञेयम् । ''गल्लादयस्त्रयोऽप्यल्पविशेषत्वादेकार्थाः''[ [12] ] इत्यपरे ॥५८२॥

### ततो हनुः[1]

१ ततो गण्डात् परो हन्त्याहारं **हनुः**, पुंस्त्री । 'हन् (हन) हिंसागत्योः'(अ.प.अ.), 'शृस्वृस्निहि-'(उणा-१०)इत्यादिना उः । ''यत्र जम्भाख्या दन्ता जायन्ते''[ [13] ]इति सुभूतिः ॥

### श्मश्रु[1] कूर्चम्[2]आस्यलोम[3] च मासुरी[4] ।

१ ''श्मन् मुखम्''[ [13] ]इति श्रुतिः । श्मनि मुखे[14] श्रूयत उपलभ्यते **श्मश्रु**, क्लीबे । 'जत्वा(त्वा)दयश्च'(उणा-५४२) निपातनाद् रुः । श्मन् मुखं श्रयतीति वा । श्मनि मुखैकदेशे शेत इति वा । 'शीङ् स्वप्ने'(अ.आ.से.), 'श्मनः शीङो डित्'(हैमोणा-१०)इति रुः । २ कीर्यते **कूर्चम्**, पुंक्ली. । 'कॄ विक्षेपे'(तु.प.से.), 'कृशृसृभ्य ऊर्चान्तस्य'(हैमोणा-२९८)इति पः । ३ आस्यैकदेशे लोम **आस्यलोम** । ४ मस्यति परिणमते **मासुरी** । 'मसी परिणामे'(दि.प.से.), बाहुलकादुरचि निपात्यते । चत्वारि श्मश्रुणः । 'मूंछि' इति भाषा । ''व्यञ्जनं कोटः''[शेषनाममाला ३।१२२॥]शैषिके ॥

### दाढिका[1] दंष्ट्रिका[2]

१-२ दाढाप्रतिकृतिः **दाढिका** । दंष्ट्राप्रतिकृतिः **दंष्ट्रिका** । उभयत्र 'इवे प्रतिकृतौ'५।३।९६॥ इति कन्, 'केऽणः'७।४।१३॥ इति ह्रस्वत्वम्, 'प्रत्ययस्थात्-'७।३।४४॥ इतीत्वम् । द्राढिकाऽपि । द्वे 'दाढी' इति ख्यातायाः ॥

### दाढा[1] दंष्ट्रा[2] जम्भः[3]

---

१. 'हर्ष-' इति ३॥ २. द्र. पदचन्द्रिका, भा-२, पृ.४३६, टिप्पणी-१७१६॥ ३. '-न्ताच्च' इति १॥ ४. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३४९, पृ.४३६॥ ५. '-निः' इति३॥ ६. '-णां' इति ३॥ ७. 'चीयते' इति३॥ ८. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३४८, पृ.४३४॥ ९. 'परः' इति १॥ १०. 'कपिगडिगण्डिकटिपटिभ्यः कोलच्' इत्युणादिगणे ॥ ११. 'ज्ञातं' इति२॥ १२. द्र. स्वोपज्ञटीका ३।५८२॥, पृ.१३१॥, १३. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३५७, पृ.४४५॥ १४. १.२.४नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ द्यति खण्डयति **दाढा** । 'दोऽवखण्डने'(दि.-प.अ.), बाहुलकाद् ढः, 'आदेचः-'६।१।४५॥ इत्यात्वम् । २ दशत्यनया **दंष्ट्रा** । 'दंश दशने'(भ्वा.प.अ.), 'दाम्नीशस्-(शस)-'३।२।१८२॥ इत्यादिना ष्ट्रन् । अत्र षित्त्वाद् ङीष् प्राप्तः "अनित्यः षितां[1] ङीष्"( )इति ज्ञापकान्न भवति, तेनाऽजादिषु कैश्चिद् दंष्ट्राशब्दः पठ्यते, स न पठनीय इति भावः । ३ जायते[2] **जम्भः** । 'जनी प्रादुर्भावे'(भ्वा.आ.से.), बाहुलकाद् 'हृदलिभ्याम्-'(उणा-४३१)इति भन् । त्रीणि 'दाढ[3]' इति ख्यातायाः ॥

**द्विजा रदाः ॥५८३॥**

**रदना दशना दन्ता दंशखादनमल्लकाः ।**

१ द्विर्जायन्ते **द्विजाः** । 'अन्येष्वपि दृश्यते'३।२।१०१॥ इति डः। २ ([4] रदन्ति विलखन्ति(विलिखन्ति) **रदाः**)॥५८३॥ ३ रद्यते विलिख्यते[5]ऽमीभिरिति **रदनाः** । 'रद विलेखने'(भ्वा.-प.से.), करणे ल्युट् । ४ दश्यतेऽमीभिः **दशनाः** । 'दंश दशने'(भ्वा.प.अ.), ल्युट्, '-मिहपतदश-'३।२।१८२॥ इति न्लोपिनो निर्देशादक्ङित्यपि न्लोपः । " 'दंश दशने'(भ्वा.-प.अ.)इति निर्देशादेव न्लोपः"[ ]इति मिश्राः । ५ दाम्यन्ति कठोरद्रव्यं शमयन्ति **दन्ताः** । 'दमु उपशमे'(दि.प.से.), अतोऽन्तर्भावितण्यर्थाद्'हसिमृग्रिण्वाऽमिदमि-'(उणा-३६६)इति तन् । ६ दृश्यतेऽमीभिः **दंशाः** । करणे घञ् । ७ खादन्त्येभिः **खादनाः** ।'खादृ भक्षणे'(भ्वा.प.से.), करणे ल्युट् । ८ मल्लन्ते धारयन्ति दार्ढ्यं मल्लाः ।'मल्ल धारणे'(भ्वा.आ.से.), अच्, स्वार्थे कनि **मल्लकाः** । सामान्यतोऽष्टौ दन्तस्य । शेषश्चात्र-"दन्ते मुखखरः[6] खरुः दालुः"[शेषनाममाला३।१२२-१२३॥]॥

**राजदन्तौ तु मध्यस्थावुपरिश्रेणिकौ क्वचित् ॥५८४॥**

१ दन्तानां[7] राजानौ **राजदन्तौ** ।'राजदन्तादिषु परम्'२।२।३१॥ । दन्तपङ्क्तेरुपर्यधश्च द्वौ द्वौ मध्यभूतौ । क्वचिदिति मतान्तरे दन्तपङ्क्तेरुपरि, न त्वधस्तात् श्रेणिः पङ्क्तिर्ययोरुपरि-श्रेणिकौ, उपरितनदन्तपङ्क्तेर्मध्यदन्तद्वयनामश्रेणिकावित्यर्थः । वैजयन्ती तु-"मध्यदन्ता राजदन्ता दंष्ट्रा तत्पार्श्वयोर्द्वयोः"[वैजयन्तीकोषः ४।४।८९॥]इति चतुरो राजदन्तानाह ॥५८४॥

**रसज्ञा रसना जिह्वा लोला**

१ रसान् मधुरादीन् जानाति **रसज्ञा** । 'इगुपध-'३।१।१३५॥ इति कः । २ रस[य]त्यास्वादयति **रसना**, स्त्री-[8]क्लीबलिङ्गः । 'रस [आ]स्वादे'(चु.उ.से.), नन्द्यादित्वाद् ल्युः । यद्वा रसेः सौत्राद् 'रसिरुचिरुवृप्रो(-वृञो) युच्'(चान्द्रोणा-२।६७॥)इति रसनम् । "रसनं स्वदने ध्वनौ, जिह्वायां तु न पुंसि स्यात्"[मेदिनीकोशः, नान्तवर्गः, श्लो-१२]इति मेदिनिः । अत एव "पित्तेन दूने रसने सिताऽपि"[नैषधीयचरितमहाकाव्यम्, सर्गः-३, श्लो-९४]इति श्रीहर्षः । "तालव्या अपि दन्त्याश्च"[[9] ]इत्यादौ "जिह्वायां रशना तथा"[ ]इत्युक्तेरियं तालव्यदन्त्यमध्या । "रसनं तु ध्वनौ स्वादे रसज्ञारास्नयोः स्त्रियाम्"[ ]इति रभसः । ३ लिहन्ति रसाननया[10] **जिह्वा** । 'लिहेः पूर्वजिह्वाग्रीवा'([11])इति वन्प्रत्ययः, आदेर्जत्वं निपातनात्, जहातेर्वप्रत्यये द्वित्वेत्वाकारलोपेषु वा जिह्वा । ४ लोलति **लोला** । 'लुल[12]-'( ), अच् । चत्वारि जिह्वायाः । शेषश्चात्र-"जिह्वा तु रसिका रस्ना च रसमातृका रसा काकुर्ललना च"[शेषनाममाला३।१२३॥] ॥

**तालु तु काकुदम्[13] ।**

१ तलति प्रतिष्ठां प्राप्नोति **तालु**, क्लीबे । 'तल प्रतिष्ठायाम्'(चु.उ.से.), बाहुलकादुण्[14] । तरत्याहारोऽत्रेति वा तालु । 'त्रो रश्च लः'(उणा-५)इति तरतेरुण् रेफस्य च ल इति । ताड्यते जिह्वया[15] वा । 'तड आघाते'(चु.उ.से.), चुरादिः, मित्र(मृग)य्वादित्वात् कुः, डलयोरैकत्वस्मरणात्[16] । २ काकुर्जिह्वा, साऽस्मिन् नुद्यते **काकुदम्** । 'नुद(णुद) प्रेरणे'(तु.-प.(उ.)अ.), 'घञर्थे कविधानम्'(वा-३।३।३८॥)इति कः, पृषोदरादित्वान्नो लोपः, पररूपत्वं च । यद्वा ककते जिह्वा अत्रेति । 'कक लौल्ये'(भ्वा.आ.से.), 'ककेर्णिद्वा'(हैमोणा-२४३)इत्युदः । ककुदं निश्श्रेष्टम्, ककुदं शिरस्तत्र भवमित्यणि[17] काकुदं वा । द्वे तालुनः । "वक्त्रदलम्"[शेषनाममाला३।१२३]शैषिकम् ॥

---

१. 'षित्त्वात्' इति३॥ २. 'जायन्ते' इति२॥ ३. 'दाड' इति१॥ ४. कोष्ठान्तर्गतपाठः १.३.४नास्ति ॥ ५. 'विलिख्यते रदनाः' इति३॥ ६. '-खुरः' इति शेषनाममालास्वोपज्ञटीकयोः ॥ ७. 'दन्तानौ' इति३॥ ८. 'स्त्रीक्ली' इत्येव३॥ ९. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३४९, पृ.४३६॥, रामाश्रमी २।६।९१॥, पृ.३०२॥ १०. 'अनया रसान्' इति४॥ ११. 'शेवयह्वजिह्वाग्रीवाप्वामीवाः'(उणा-१५२)इत्युणादिगणे ॥ १२. इतोऽग्रे ४प्रतौ 'श्चैत्य(श्चैत्य)क्रीडनयोः' इति दृश्यते, "भूसूत्रे सुधाकरः-"लुल विलोडने' इति लान्तोऽपि दृश्यते" इति माधवीयधातुवृत्तौ, भ्वादिः, धातुसं-२११, पृ.१११॥ १३. तुलनीयोऽमरकोषः २।६।९१॥ १४. '-दण्' इति३॥ १५. 'जिह्वाया' इति२॥ १६. '-रैक्य-' इति४॥ १७. '-त्यण्' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सुधास्रवा घण्टिका च लम्बिका गलशुण्डिका ॥५८५॥**

१ सुधाममृतं स्रवति **सुधास्रवा**, दन्त्यमध्या । 'स्रु प्रश्रवणे[1]'(भ्वा.प.अ.), अच् । २ घण्टाप्रतिकृतिः **घण्टिका**। 'इवे प्रतिकृतौ'५।३।९६॥ इति कः[2], 'केऽणः'७।४।१३॥ इति ह्रस्वत्वम्, 'प्रत्ययस्थात्-'७।३।४॥ इतीत्वम् । ३ लम्बते **लम्बिका** । 'लबिङ् शब्दे[3]'(भ्वा.आ.से.), ण्वुल् । ४ गलस्य शुण्डा इव **गलशुण्डिका** । चत्वारि गलशुण्ड्याः । 'घांटी[4]' इति भाषा ॥५८५॥

**कन्धरा धमनिर्ग्रीवा शिरोधिश्च शिरोधरा ।**

१ कं शिरो धारयति **कन्धरा**। 'धृञ् धारणे'(भ्वा.-उ.अ.), णिजन्तः, 'संज्ञायां भृतॄवृजिधारि-'३।२।४६॥ इत्यादिना खच्, 'खचि ह्रस्वः'६।४।९४॥ इति ह्रस्वत्वम्, टाप् । २ धम्यतेऽनया **धमनिः**, स्त्रीलिङ्गः । 'धम ध्माने'[सौत्रः], 'अर्तिसृधृधमिभ्यश्च[5]'(उणा-२५९)इत्यनिः । ३ गिरन्त्यनया गृणाति[6] गिरति गृध्नाति[7] वा **ग्रीवा** । 'पूर्वजिह्वाग्रीवा[8]-'(उणा-१५२)इति वन्प्रत्ययः, अचः पर ईकारः, गुणेडागमाभावे यणादेशे च टापि ग्रीवा । उल्वादिव[न्]प्रत्यये पूर्ववत् ग्रीवेति वा । ४ शिरो धीयतेऽस्यां **शिरोधिः**, स्त्रियाम् । 'डुधाञ् धारणादौ'(जु.उ.अ.), 'कर्मण्यधिकरणे च'३।३।९३॥इति किः, 'आतो लोपः-'६।४।६४॥ । ''शिरो धत्ते शिरोधिः [ग्रीवा], बाहुलकात् कर्तरि किः''[मा.धातुवृत्तिः, जुहोत्यादिः, धातुसं-१७]इति माधवः । ५ शिरो धारयति **शिरोधरा** । 'संज्ञायां भृ-'३।२।४६॥इत्यादिना खच्, 'खचि ह्रस्वः'६।४।९४॥, टाप् । पञ्च ग्रीवायाः । 'गाबडि' इति भाषा[9] ॥

**सा त्रिरेखा कम्बुग्रीवा**

१ सा ग्रीवा तिसृभी रेखाभिरङ्किता कम्ब्वाकृतिः ग्रीवा **कम्बुग्रीवा** । ''रेखात्रयाङ्कित[10]ग्रीवा कम्बुग्रीवेति कथ्यते''[हलायुधकोशः२।५१७॥]इति हलायुधः ॥

**अवटुर्घाटा कृकाटिका[11] ॥५८६॥**

१ न वटते (वण्टयति) [न] विभागं याति **अवटुः**, पुंस्त्रीलिङ्गः । नपूर्वाद् 'वट(वटि) विभाजने'( ) अतो 'भृमृ[शी]तृ-'(उणा-७)इत्यादिना उः । २ घटेश्चौरादिकात् कर्तर्यपि टापि **घाटा** । घ्नन्त्यस्यां हिंस्रा इति पृषोदरादिर्वा । ३ कृकं कण्ठमटति **कृकाटिका** । 'अट गतौ'(भ्वा.प.से.), ण्वुल् । त्रीणि ग्रीवापश्चाद्भागस्य । 'मांकडी[12]' इति भाषा । ''शिरःपीठम्''[शेषनाममाला३।१२४॥]शैषिकम् ॥५८६॥

**कृकस्तु कन्धरामध्यम्**

१ क्रियतेऽसौ **कृकः**। 'डुकृञ् करणे'(क्र्या.उ.अ.), 'कृदाधारार्चिकलिभ्यः कन्'(उणा-३२०), बाहुलकात् कलोपगुणयोरभावः । ग्रीवामध्यस्यैकम् । 'मालि' इति भाषा ॥

**कृकपार्श्वौ[13] तु वीतनौ ।**

१ कृकस्य 'नालि' इति प्रसिद्धस्य ग्रीवामध्यस्य पार्श्वौ निकटौ **वीतनौ**, उच्येत इत्यन्वयः । वेति गच्छत्यनयोरपात[14] इति वीतनौ । 'वी गत्यादौ'(अ.प.अ.), 'वीपतिभ्यां तनन्'(उणा-४३०)इति तनन्, बाहुलकादगुणत्वं च । पार्श्वशब्दो निकटार्थः क्लीबे, ततः क्लीबलिङ्गप्रथमाद्विवचनं समीचीनम्, पुंलिङ्गप्रथमाद्विवचनं तु लेखकदोषाद् ज्ञेयम् । एकं नालिपार्श्वयोः ॥

**ग्रीवाधमन्यौ प्राग् नीले**

१ ग्रीवाया धमन्यौ, प्रागित्यव्ययम्, ग्रीवायाः पूर्वभागौ **नीले**, उच्येत इत्यन्वयः । नीलवर्णत्वान्नीले । एकं ग्रीवायाः पूर्वभागनाड्योः ॥

**पश्चान्मन्ये कलम्बिके ॥५८७॥**

१ मन्यतेऽनयोरपान इति **मन्ये**, स्त्रियाम् । 'मनु (मन) ज्ञाने'(दि.आ.अ.), 'संज्ञायां समजनिषदनिपत-'३।३।९९॥ इति क्यप् । यद्वाग्भटः-

''कण्ठनाडीमुभयतः शिरो(सिरा) हनुसमाश्रयाः ।
चतस्रस्तासु नीले द्वे मन्ये द्वे मर्मणी स्मृते ॥१॥''

---

१. 'गतौ' इति क्षीरतरङ्गिण्यादयः ॥ २. 'कन्' इति३॥ ३. 'रबि लबि अबि शब्दे' इति क्षीरतरङ्गिण्यादयः ॥ ४. 'घाती' इति३॥ ५. 'अर्तिसृधृधम्यम्यश्यवितृभ्योऽनिः'(उणा-२५९)इत्युणादिगणे ॥ ६. 'गृह्णाति' इति३॥ ७. 'ग्रथ्नाति' इति४॥ ८. 'शेवयह्वजिह्वाग्रीवाऽऽप्वामीवाः'(उणा-१५२)इत्युणादिगणे ॥ ९. 'ख्याताया:' इति१॥ १०. '-ङ्किता' इति हलायुधे ॥ ११. तुलनीयोऽमरकोषः २।६।८८॥ १२. '-टी' इति१॥ १३. '-श्वे' इति४॥ १४. '-नयोः प्रपात' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[अष्टाङ्गहृदयम्, शारीरस्थानम्, अध्यायः-४, श्लो-२६-२७॥]इति। २ के शिरसि लम्बेते[1] **कलम्बिके** । 'लबिङ् स्रं(स्रं)सने[2]' (भ्वा.आ.से.), ण्वुल् । द्वे ग्रीवापश्चाद्भागनाड्योः ॥५८७॥

## गलो[1] निगरणः[2] कण्ठः[3]

१ गीर्यते भक्ताद्यनेन **गलः** । 'गॄ निगरणे'(तु.प.से.), 'पुंसि संज्ञायाम्-'३।३।११८॥ इति घः, 'अचि विभाषा'८।२।२१॥ इति लत्वम् । गलति गलो वा । 'गल अदने'(भ्वा.प.से.), अच् । २ निगरत्यनेन **निगरणः** । 'गॄ निगरणे'(तु.प.से.) । ३ कणति शब्दायते **कण्ठः** । 'कण शब्दे'(भ्वा.प.से.), दण्डकः, 'कणेष्ठः'(उणा-१०३)इति ठः, बाहुलकात् ठस्येकाभावः । कण्ठः, कण्ठी, कण्ठं च । "समीपगलशब्देषु त्रिषु कण्ठं विदुर्बुधाः"[शाश्वतकोशः, श्लो-४८९]इति शाश्वतः । त्रीणि कण्ठस्य ॥

## काकलकस्तु[1] तन्मणिः ।

१ कु ईषत् कलः काकलः, स्वार्थे कनि **काकलकः**। तस्य कण्ठस्य मणिः तन्मणिः । गलमणेरेकम् ॥

## अंसो[1] भुजशिरः[2] स्कन्धः[3]

१ अमति रुजति भारादिना **अंसः**, पुंक्लीबलिङ्गः[3]। 'अम्(अम) गतिशब्दसंभक्तिषु[4]'(भ्वा.प.से.), 'उद्यमि-'( ) इति सः ('अमेः सन्'(उणा-६९९)इति सन्) । बाहुलकाद् 'वृ[तृ]वदि-'(उणा-३४२)इति वा सः । २ भुजस्य शिरो **भुजशिरः**, सकारान्तः, क्लीबलिङ्गः । भुजशिखरमपि । ३ स्कन्द्यते भारेण **स्कन्धः** । 'स्कन्दिर् गतिशोषणयोः'(भ्वा.-प.अ.), 'स्कन्द्यमिभ्यां-'(हैमोणा-२५१) धः, बाहुलकाद् दलोपः । यद्वा कं शिरो दधाति । 'आतोऽनुपसर्गे कः' ३।२।३॥, पारस्करादित्वात् सुट्[5] । त्रीणि स्कन्धस्य ॥

## जत्रु[1] सन्धिरुरोंऽसगः ॥५८८॥

१ उरोंऽसगो वक्षःस्कन्धगतः सन्धिरन्तरं **जत्रु**, उच्यत इत्यन्वयः । जायते प्रकाशते बाहुरस्माद् जत्रु । 'जनी प्रादुर्भावे' (दि.आ.से.), 'जत्र्वादयश्च'(उणा-५४२)इति रुः, नकारस्य च तकारः, क्लीबेऽयं, तकाररेफसंयोगोपधः । एकं हृत्स्कन्धान्तरस्य ॥५८८॥

## भुजो[1] बाहुः[2] प्रवेष्टो[3] दोर्[4]वाहा[5]

१ भुज्यतेऽनेनेति **भुजः**, पुंस्त्रीलिङ्गः। 'भुज पालनाभ्यव्यवहारयोः'(रु.प.अ.), 'हलश्च'३।३।१२१॥ इति करणे घञ्, 'भुजन्युब्जौ पाण्युपतापयोः'७।३।३१॥ इति निपातनादगुणत्वमकुत्वं च । स्त्रियां टापि भुजा । २ वहन्त्यनेन[6] **बाहुः**, पुंस्त्रीलिङ्गः । 'वह प्रापणे'(भ्वा.उ.अ.), 'वहिरहितलिपंशिभ्यश्च'(कातन्त्रोणा-१।३॥)इत्युण् । ३ प्रकर्षेण वेष्टयति **प्रवेष्टः**, पुंक्लीबलिङ्गः[7] । 'वेष्ट वेष्टने'( ), चुरादि[8]ः, अच् । ४ दाम्यन्त्यनेनेति **दोः**, पुंक्लीबलिङ्गः[9] । 'दमु उपशमे'(दि.प.से.), 'दमेर्डोस्(डोसिः)'(उणा-२२७) । पुंसि शसादौ 'पद्दन्नोमास्-'६।१।६३॥ इत्यादिना दोषन्नादेशः । क्लीबे दोः, दोषी, दोंषि इत्यादि । भागुरिमते दोषाऽपि । "दोर्दोषा च भुजो बाहुः पाणिर्हस्तः करस्तथा"[धनञ्जयनाममाला, श्लो-१०१]इति धनञ्जयनिघण्टुः(-नाममाला)। "बहुदोषो गुरुध्वंसी[10] गोहन्ता जनपीडकः"[विदग्धमुखमण्डनम्, परिच्छेद :-४, श्लो-२३]इति विदग्धमुखमण्डनम् । "दोषः स्याद् दूषणे पापे दोषा रात्रौ भुजेऽपि च"[विश्वप्रकाशकोशः, षान्तवर्गः, श्लो-७]इति महेश्वरः । ५ वहन्त्यनया **वाहा** । 'वह प्रापणे'(भ्वा.उ.अ.), 'हलश्च'३।३।१२१॥ इति करणे घञ् । बाहते प्रयतते[11] वा। 'बाहृ(बाह्) प्रयत्ने'(भ्वा.आ.से.), पचाद्यच् । वाहोऽदन्तोऽपि। "वाहोऽश्वभुजयोः पुमान्"[[12]]इति दामोदरः । "वाहो बाहुरिति स्मृतः"[[12]]इति देशीकोष[13]ः । पञ्च भुजस्य[14] ॥

## अथ भुजकोटरः[1] ।

## दोर्मूलं[2] खण्डिकः[3] कक्षा[4]

१ भुजस्य कोटरो **भुजकोटरः**, पुंक्लीबलिङ्गः । २ दोष्णोर्मूलं **दोर्मूलम्** । ३ खण्डकमस्याऽस्ति **खण्डिकः** । 'अत इनिठनौ'५।२।११५॥ इति ठन्, 'ठस्येकः'७।३।५०॥ । ४ कष्यते स्पर्शेन हिंस्यते **कक्षा**, पुंस्त्रीलिङ्गः । 'कष हिंसायाम्'

---

१. 'लम्बते' इति२॥ २. 'लबि अवस्रंसने च' इति क्षीरतरङ्गिण्यादयः ॥ ३. 'पुंक्ली' इत्येव१॥ ४. 'गत्यादिषु' इति क्षीरतरङ्गिण्यादयः ॥ ५. 'सुक्' इति१॥ ६. '-नेन' इति१॥ ७. 'पुंक्लीब' इति३॥ ८. वेष्टधातुस्तु भ्वादौ वर्तते ॥ ९. 'पुंक्ली' इति३॥ १०. 'गुणध्वंसी' इति विदग्धमुखमण्डने ॥ ११. 'प्रजा यतते' इति३॥ १२. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३३८, पृ.४२४॥, रामाश्रमी २।६।८०॥, पृ.२९६॥ १३. 'देशीये कोषः' इति१, 'देशीय-' इति४॥ १४. 'भुजस्य पञ्च' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(भ्वा.प.से.), बाहुलकाद् 'वृ[तृ]वदि-'(उणा-३४२)इति सः, 'षढोः कः सि'८।२।४१॥इति कत्वम् । ''कक्ष्येति यकारोपधाऽपि''[ ]इत्यमरटीका । चत्वारि कक्षायाः ॥

**पार्श्वं स्यादेतयोरधः ॥५८९॥**

१ एतयोः कक्षयोरधोभागः पर्शूनां पार्श्वस्थ्नां समूहः **पार्श्वम्**, पुंक्लीबलिङ्गः[1] । यदमरः-''पार्श्वमस्त्री''[अमरकोषः २।६।७९॥] 'पर्शोर्(पर्श्वा) णस् वक्तव्यः'(वा-४।२।४३॥)इति णस्, पदत्वाद्[2] गुणो न । एकं 'पसवाडा[3]' इति ख्यातस्य ॥५८९॥

**कफोणिस्तु भुजामध्यं कफणिः कूर्परश्च सः ।**

१ केन सुखेन फणति **कफोणिः**, स्त्रीलिङ्गः । 'फण गतौ'(भ्वा.प.से.), पृषोदरादित्वात् साधुः । कपोणिरिति[4] पवर्गाद्यमध्योऽपि । २ भुजयोर्मध्यं **भुजामध्यम्** । ३ केन सुखेन फणति **कफणिः**, स्त्रीलिङ्गः । 'फण गतौ'(भ्वा.प.से.), 'इन् सर्वधातुभ्यः'(उणा-५५७)इतीन् । ''कफोणिः कफणिर्द्वयोः''[[5]]इति शब्दार्णवः । 'कृदिकारात्-'(गणसू-४।१।४५॥) इति ङीषि कफोणी कफणी च । ४ कुरति छिन्नो भवति **कूर्परः** । 'कुर छेदने[6]'(तु.प.से.), बाहुलकात् शीकरवदरन्, पुक् चागमो दीर्घत्वं च । तदभावे कुर्परः पञ्चमस्वरादिरपि । चत्वारि 'कुहणी[7]' इति ख्यातायाः । शेषश्चात्र-''कफोणौ रत्निपृष्ठकं बाहूपबाहुसन्धिश्च''[शेषनाममाला३।१२४॥] ॥

**अधस्तस्याऽऽमणिबन्धात् स्यात् प्रकोष्ठः कलाचिका ॥५९०॥**

१ तस्य कूर्परस्य आमणिबन्धान्मणिबन्धमवधीकृत्या[8]ऽधोऽधस्तात् **प्रकोष्ठ** इत्यन्वयः । प्रकुष्यते निकृष्यते भुजाभरणमस्मादिति प्रकोष्ठः । 'कुष निःकोषणे[9]'(क्र्या.प.से.), 'रुषि(उषि)तुषिगार्तिभ्यस्थन्'(उणा-१६१) । २ करमञ्चति आचिनोति वा, पृषोदरादित्वात् कलाचिः, स्वार्थे कनि **कलाचिका**, उपबाहुरयम् । द्वे 'कलाई' इति ख्यातायाः ॥५९०॥

**प्रगण्डः कूर्परांसान्तः**

१ प्रकर्षेण गण्डत्येकदेशीभवति **प्रगण्डः** । 'गडि वदनैकदेशे'(भ्वा.प.से.), अच् । कूर्परश्च अंसश्च कूर्परांसौ, तयोरन्तर्मध्यम्, तस्यैकम् । 'कुहणी स्कन्धमध्यम्' इति भाषा॥

**पञ्चशाखः शयः शमः ।**

**हस्तः पाणिः करः**

१ पञ्चाङ्गुल्यः शाखा इव शाखा अस्य **पञ्चशाखः**। २ शेते तिष्ठति सर्वमत्रेति, शेरतेऽस्मिन्नङ्गुलयो वा **शयः** । 'शीङ् स्वप्ने'(अ.आ.से.), 'पुंसि संज्ञायां घः-'३।३।१२१॥इति घः । ३ शाम्यति **शमः** । 'शमु उपशमे'(दि.प.से.), अच् । ''पाणिः शमः शयो हस्तः''[[10]]इत्यमरमाला । ४ हसत्यनेन **हस्तः**, पुंक्लीबलिङ्गः । 'हस(हसे) हसने'(भ्वा.प.से.), 'हसिमृग्रिण्-'(उणा-३६६)इत्यादिना तन् । ५ पण्यते व्यवह्रियतेऽनेनेति **पाणिः**, पुंसि । 'पण व्यवहारे स्तुतौ च' (भ्वा.आ.से.), बाहुलकाद् 'अज्यतिभ्यां च'(उणा-५७०) इतीञ् (इतीण्[11]), 'अशिपणाय्योरितीञ्[12] आयस्य लुक् च[12]' (उणा-५७२)इति वा । ६ कुर्वन्त्यनेन, कीर्यते वा **करः** । 'डुकृञ् करणे'(क्र्या.उ.अ.), 'कृ विक्षेपे[13]'(तु.प.से.) वा[14], 'ॠदोरप्-'३।३।५७॥इत्यप् । षड् हस्तस्य । ''भुजदलः सलः''[शेषनाममाला ३।१२४॥]शैषिके ॥

**अस्यादौ मणिबन्धो मणिश्च सः ॥५९१॥**

१ अस्य पाणेरादौ मूले मणेर्बन्धोऽत्र[15] **मणिबन्धः**, पाणिप्रकोष्ठसन्धिः । २ मणति महार्घतां **मणिः**, पुंस्त्रीलिङ्गः। ''हस्तमूले मणिर्द्वयोः''[ ]इत्युक्तेः । 'मण शब्दे'(भ्वा.प.से.), '-इन्'(उणा-५५७)इति इन् । द्वे पाणिप्रकोष्ठसन्धेः । 'पुहुंचा[16]' इति भाषा ॥५९१॥

**करभोऽस्मादाकनिष्ठम्**

---

१. 'पुंक्लीब' इति३॥ २. 'सिति च'१।४।१६॥ इत्यनेन ॥ ३. '-वाड' इति१॥ ४. 'कफो-' इति१.२.४॥ ५. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३३८, पृ.४२५॥, रामाश्रमी २।६।८०॥, पृ.२९७॥, ''कफोणिस्तु बहुमध्ये कद्मरः कफणिर्द्वयोः'' इति शब्दार्णवः'' इति टीकासर्वस्वे, भा-२, २।६।८०॥, पृ.३४१॥ ६. 'कुर शब्दे', 'क्षुर खुर विलेखने' इति स्वामी, 'कुर शब्दे' 'खुर च्छेदने खण्डने च' इति मैत्रेयः, 'कुर शब्दे', 'खुर च्छेदने' इति सायणः ७. 'कू-' इति१.४॥ ८. 'त्योऽ-' इति१॥ ९. 'निष्कर्षे' इति क्षीरतरङ्गिण्यादयः ॥ १०. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३३९, पृ.४२६॥, रामाश्रमी २।६।८१॥, पृ.२९७॥, रामाश्रम्यां 'शमः' इत्यस्य स्थाने 'समः' इति दृश्यते ॥ ११. '-तीन्' इति३॥ १२. 'अशिपणाय्यो रुडायलुकौ च'(उणा-५७२)इत्युणादिगणे ॥ १३. इतोऽग्रे २प्रतौ 'कृ विकरणे' इति दृश्यते ॥ १४. १प्रतौ नास्ति ॥ १५. '-त्रेति' इति३॥ १६. 'पहुंचा' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ अस्मान्मणिबन्धादाकनिष्ठं कनिष्ठां मर्यादीकृत्य करे भातीति **करभः** । 'भा दीप्तौ'(अ.प.अ.), 'सुपि'३।२।४॥ इति योगविभागात् कः । कीर्यते मुष्टिरनेनेति वा । 'कृ विक्षेपे' (तु.प.से.), 'कृशृगर्दिरासिवल्लिभ्योऽभच्'(कातन्त्रोणा३।-१४३॥) ''मणिबन्धादाकनिष्ठं करस्य करभो बहिः''[अमरकोषः २।६।८१॥]इत्यमरः । एकं करभस्य ॥

**करशाखाङ्गुली समे ।**

**अङ्गुरी च**

१ करस्य शाखा इव **करशाखा** । २ अङ्गति ग्रहणाय गच्छति **अङ्गुलिः** । अगिर्गत्यर्थः, 'ऋतन्यञ्जि-'(उणा-४४२)इति उरिः, 'वालमूललघ्वङ्गुलीनां वा रो लः'[1](वा-८।२।१८॥)इति लत्वम् । करशाखा च अङ्गुलिश्च करशाखाङ्गुली, प्रथमा-द्विवचनम् । 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि अङ्गुली च । ३ ['वालमूल-'(वा-८।२।१८॥)इति विकल्पपक्षे रत्वम्] **अङ्गुरी** । अङ्गुलस्तु प्रकृत्यन्तरं यवमाने । ''अङ्गुलस्तु यवो मतः''[[2] ]इत्यमरदत्तः । ''अङ्गुलो ना यवमानम्'' [[2] ]इति वाचस्पतिः । त्रीण्यङ्गुल्याः ॥

**अङ्गुलोऽङ्गुष्ठः**

१ अङ्गुं[3] शरीरावयवं लाति **अङ्गुलः** । 'आतोऽनुपसर्गे कः'३।२।३॥ । अङ्गुरिति अङ्गुलीशब्दैकदेशानुकरणम् । २ अङ्गौ तिष्ठति **अङ्गुष्ठः** । 'ष्ठा गतिनिवृत्तौ'(भ्वा.प.अ.), 'सुपि स्थः'३।२।४॥ इति कः, 'अम्बाम्बगोभूमि-'८।३।९७॥ इत्यादिना षत्वम्, ष्टुत्वम् । द्वे अङ्गुष्ठस्य ॥

**तर्जनी तु प्रदेशनी[4] ॥५९२॥**

१ तर्ज्यतेऽनया **तर्जनी** । 'तर्ज भर्त्सने'(भ्वा.प.से.), करणे ल्युट् । २ प्रदिश्यतेऽनया **प्रदेशनी** । 'दिश अतिसर्जने'(तु.उ.अ.), करणे ल्युट् । ''प्रदेशिनी''[ ]इत्यन्ये । द्वे तर्जन्याः ॥५९२॥

**ज्येष्ठा तु मध्यमा मध्या**

१ अतिशयेन वृद्धा **ज्येष्ठा** । 'अतिशायि(य)ने तमबिष्ठनौ'५।३।५५॥ इतीष्ठन्, 'वृद्धस्य च'५।३।६२॥इति ज्यादेशः । २ मध्ये भवा **मध्यमा** । 'मध्यान्मः'४।३।८॥इति मः । ३ मध्यभूतत्वाद् **मध्या** । त्रीणि मध्यमायाः ॥

**सावित्री स्यादनामिका ।**

१ सविता [5]देवताऽस्याः **सावित्री** । 'सास्य देवता' ४।२।२४॥ इत्यण् । २ अनया किल ब्रह्मशिरच्छिन्नमतो ब्रह्मवधत्वादस्या नामग्रहणमयोग्यमित्यनामा । 'डाबुभाभ्यामन्यतरस्याम्'४।१।१३॥इति डाप्, ततः कन्, 'केऽणः'७।४।१३॥, 'प्रत्ययस्थात्-' ७।३।४४॥ इतीत्वम् [**अनामिका**] । द्वे अनामिकायाः । 'देव पूजणी' इति भाषा ॥

**कनीनिका तु कनिष्ठा**

१ कनति दीप्यते **कनीनिका** । 'कन दीप्तौ'[6](भ्वा.-प.से.), 'कनेरीनकः'(हैमोणा-७३)इतीनकः । २ पूर्वाङ्गुल्यपेक्षयाऽल्पेति **कनिष्ठा** । द्वे कनिष्ठायाः । 'चिटी' इति भाषा ॥

**अवहस्तो हस्तपृष्ठतः ॥५९३॥**

१ हस्तपृष्ठत इति, हस्तपृष्ठ इत्यर्थः । सप्तम्यर्थेऽत्र तसिल् । अवकृष्टो हस्तः **अवहस्तः** । एकं हस्तपृष्ठस्य ॥५९३॥

**कामाङ्कुशो महाराजः करजो नखरो नखः ।**
**करशूको भुजाकण्टः पुनर्भवपुनर्नवौ ॥५९४॥**

१ कामस्याऽङ्कुश इव **कामाङ्कुशः** । २ महाराज इव शोभनत्वाद् **महाराजः** । ३ कराज्जातः **करजः** । 'पञ्चम्यामजातौ-'३।२।९८॥इति डः । यौगिकत्वात् पाणिजः कररुहादयः । ४ नखं नखत्वं धर्मप्रधानाद् नखपदप्रवृत्तिनिमित्तं राति ददाति प्रतिपादयति **नखरः**, त्रिलिङ्गः, कवर्गद्वितीयमध्यः । ''नखरं त्रिषु''[[7] ]इत्यमरमाला । स्त्रियां टापि नखरा । ५ नास्ति खमिन्द्रियं त्वगरूपमत्रेति **नखः**, पुंक्लीबलिङ्गः[8] । ''नखोऽस्त्री''[अमरकोषः२।६।८३॥]इत्यमरः । 'नभ्राण्नपात्-'६।३।७५॥ इत्यादिना नञः प्रकृतिभावः । न खन्यत इति

१. 'वालमूललघ्वलमङ्गुलीनां वा लो रमापद्यते' इति वार्तिकस्वरूपम् ॥ २. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३४०, पृ.४२६॥, रामाश्रमी २।६।८२॥, पृ.२९८॥ ३. 'अङ्गु' इति१॥ ४. 'प्रदेशिनी' इति मुद्रिताभिधानचिन्तामणिनाममालायाम्, स्वोपज्ञटीकाऽपि तमाश्रित्यैव ॥ ५. 'दै-' इति४॥ ६. 'कनी दीप्तिकान्तिगतिषु' इति क्षीरतरङ्गिण्यादयः ॥ ७. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३४१, पृ.४२७॥, रामाश्रमी २।६।८३॥, पृ.२९८॥ ८. 'पुंक्ली' इत्येव३ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वा । 'अन्येभ्योऽपीति-'३।२।१०१॥ इति डः । नखति गच्छतीति वा । 'णख गतौ'(भ्वा.प.से.), अच् । ६ करस्य शूक इव **करशूकः** । ७ भुजायां कण्ट इव **भुजाकण्टः** । ८ पुनर्भवति[१] **पुनर्भवः** । पचाद्यच् । ९ पुनरपि नवः **पुनर्नवः** । नव नखस्य ॥५९४॥

**प्रदेशिन्यादिभिः सार्धमङ्गुष्ठे वितते सति ।**

**प्रादेशतालगोकर्णवितस्तयो यथाक्रमम् ॥५९५॥**

१ प्रपूर्वः 'दिश अतिसर्जने'(तु.उ.अ.), णिनिः, 'उपसर्गस्य घञि-'६।३।१२२॥ इति बाहुलकाद् दीर्घत्वे प्रादेशिनी तर्जनी, तया सार्धमङ्गुष्ठे वितते प्रसारिते सति **प्रादेशः**, उच्यत इत्यन्वयः । प्रदिश्यते कथ्यतेऽनेन प्रादेशः । 'दिश अतिसर्जने'(तु.उ.अ.) प्रपूर्वः, 'हलश्च'३।३।१२१॥ इति संज्ञायाम्, करणे वा घञ्, 'उपसर्गस्य घञि-'६।३।१२२॥ इति दीर्घत्वम्[२] । प्रदेश आदिस्वरादिरपि । "प्रदेशो देशमात्रे च [स्यात्] तर्जन्यङ्गुष्ठसंमिते"[मेदिनीकोशः, शान्तवर्गः, श्लो-२५] इति मेदिनिः । १ मध्यमायुते अङ्गुष्ठे वितते सति **तालः** इत्युच्यते । तलति प्रदेशापेक्षया प्रकर्षेण तिष्ठति परिमाणमत्रेति तालः । 'तल प्रतिष्ठायाम्'(चु.प.से.), घञ् । १ अनामिकया सार्द्धमङ्गुष्ठे वितते सति **गोकर्णः** उच्यते । गोः कर्णाकृतिः गोकर्णः । गोकर्णप्रमाणत्वाद्वा गोकर्णः। १ कनिष्ठया[३] सार्द्धमङ्गुष्ठे वितते सति **वितस्तिः** उच्यते । वितस्यते प्रदेशाद्यपेक्षयाऽधिकमुत्क्षिप्यते प्रमाणमनेनेति वितस्तिः, पुंस्त्री[४]। "वितस्तिः स्त्री"[५]इति त्वमरमाला । सुभूतिरपि स्त्रीत्वमाह। विपूर्वः 'तसु उत्क्षेपे[६]'(दि.प.से.), बाहुलकाद् 'वसेस्तिः'(उणा-६१९)इति तिः । स एव द्वादशाङ्गुलः । द्वादशाङ्गुलयः प्रमाणमस्य । 'तद्धितार्थ-'२।१।५१॥ इत्यादिना समासे 'द्विगोर्नित्यं लुक्'(वा-५।२।३७)इति मात्रचो लुकि 'तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः'५।४।८६॥ इत्यच् । यथाक्रममित्युक्तक्रमेणैतानि । चत्वारि मानविशेषनामानि ॥५९५॥

**प्रसारिताङ्गुलौ पाणौ चपेटः प्रतलस्तलः ।**

**प्रहस्तस्तालिका तालः**

१ विसृताङ्गुलिपाणौ, चञ्चन् सरन् पिटति संहतो भवति **चपेटः**, पुंस्त्रीलिङ्गः । पृषोदरादिः । "चप्यते सान्त्व्यतेऽनेनेति वा। 'चप सान्त्वने'(भ्वा.प.से.), 'शकादिभ्योऽटन्'(उणा-५२१), बाहुलकादेत्वम्"[७]इति मधुमाधवी । 'चप ताडने'( ), 'चपेरेटः'(हैमोणा-१५८)इत्येटो वा। चपटोऽप्यत्र। "चपटः फाल(स्फार)विपुले चपेटे पर्पटेऽपि च"[मेदिनीकोशः, टान्तवर्गः, श्लो-४०]इति मेदिनिः । "चपेटचपटौ तले"[ ] इत्युज्ज्वलदत्तः । २ प्रकर्षेण तलति प्रतिष्ठते पूर्वापेक्षया **प्रतलः**। 'तल प्रतिष्ठायाम्'(चु.प.से.), अच् । प्रसृतं तलमस्येति वा । ३ तलति **तलः** । 'तल प्रतिष्ठायाम्'(चु.प.से.), अच् । "मेरुसुमेरुवत् तलप्रतलौ"[ ]इति मिश्राः। ४ प्रसृतो हस्तः **प्रहस्तः** । ५ ताडयति **तालिका** । 'तड आघाते'(चु.उ.से.), अस्माण्णिजन्ताद् ण्वुल् । ६ तलति **तालः** । ज्वलादित्वाण्णः। तल एव वेति । प्रज्ञादित्वादण् । षट् चपेटस्य । 'हस्तताली' इति भाषा ॥

**सिंहतलस्तु तौ युतौ ॥५९६॥**

१ तौ प्रसारिताङ्गुलीवामदक्षिणौ पाणी, सिंहस्येव तलः **सिंहतलः**, सिंहो हि मिलिताभ्यां चपेटाभ्यां हन्ति । संहतं लाति, 'आतः-'३।२।३॥ इति कः । 'संहतलः' इत्येके । एकं मिलितद्विहस्तचपेटस्य । 'बिहुं[८] हाथनी[९] भेली चपेट' इति भाषा ॥५९६॥

**संपिण्डिताङ्गुलिः पाणिर्मुष्टिर्मुस्तुर्मुचुट्यपि ।**

**संग्राहश्च**

१ मुष्णाति **मुष्टिः**, पुंस्त्रीलिङ्गः । 'मुष स्तेये'(क्र्या.प.से.), क्तिन् । २ मुस्यति खण्डयति **मुस्तुः**, पुंस्त्रीलिङ्गः। यद्वैजयन्ती-"अक्लीबे मुष्टिमुस्तू द्वौ संग्राहो मुचुटिः स्त्रियाम्"[वैजयन्तीकोषः४।४।७९॥]इति । 'मुस खण्डने'(दि.प.से.), बाहुलकात् तुन् । ३ मुहुः छुटति[१०] मुचुटिः । 'चुट[११] छेदने'(तु.प.से.), पृषोदरादिः । ङीषि **मुचुटी** । मुच्यत इति वा, बाहुलकात् किदुटिः। ४ संगृह्यते **संग्राहः** । 'ग्रह उपादाने'(क्र्या.उ.से.), समिपूर्वः, 'समि मुष्टौ'३।३।३६॥ इति घञ् । चत्वारि मुष्टेः ॥

१. '-तीति' इति४॥ २. '-त्वे' इति२॥ ३. '-ष्ठाया' इति१.३॥ ४. 'पुंक्ली.' इति२॥ ५. द्र. टीकासर्वस्वम्, भा-२, २।६।८४॥, पृ.३४४॥ ६. 'उपक्षये' इति स्वामिसायणौ, 'प्रक्षेपे' इति मैत्रेयः ॥ ७. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३४२, पृ.४६८॥ ८. 'बिंहुं' इति२॥ ९. '-नी' इति४॥ १०. 'चुटति' इति२॥ ११. 'चुट' इति२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अर्धमुष्टिस्तु खटकः**

१ मुष्टेरर्धमर्धमुष्टिः, खटति **खटकः**, कवर्गाद्वितीयादिः । 'खट काङ्क्षायाम्[1]'(भ्वा.प.से.), 'क्वुन् शिल्पिसंज्ञयोः'(उणा-१९०)इति क्वुन् । एकमर्धमुष्टेः । 'टाकर' इति भाषा ॥

**कुब्जितः पुनः ॥५९७॥**

**पाणिः प्रसृतः प्रसृतिः**

१ कुब्जितः कुञ्चिताङ्गुलिः ॥५९७॥ पाणिः, प्रस्रियते स्म **प्रसृतः** । 'सृ गतौ'(भ्वा.प.अ.), 'निष्ठा'३।२।१०२॥ इति क्तः । २ प्रस्रियते **प्रसृतिः** । 'स्त्रियां क्तिन्'३।३।९४॥ । द्वे प्रसृतेः । 'पसली' इति भाषा ॥

**तौ युतौ पुनरञ्जलिः ।**

१ तौ प्रसृतौ वामदक्षिणौ युतौ पार्श्वश्लिष्टौ । अनक्त्यनेन **अञ्जलिः**, पुंसि । 'अञ्जू [व्यक्ति]म्रक्षणादौ'(रु.-प.वे.), 'ऋतन्यञ्जि-'(उणा-४४२)इत्यादिनाऽलिन् । ''अस्यते जलमनेन''[ ]इति नैरुक्तः[2] । नाट्ये तु ''पताकाभ्यां तु हस्ताभ्यां संश्लेषादञ्जलिः स्मृतः''[नाट्यशास्त्रम्, अध्यायः-९, श्लो-१२१]इति । एकं 'धोवा' इति ख्यातस्य । प्रसृतहस्तद्वयपुटार्थोऽप्ययम्, यथा-''इति चापि विधाय दीयतां सलिलस्याञ्जलिरेक एव नौ''[[3]]इति । 'अरध बधावा[4]' इति भाषा । प्रमाणार्थं मुकुलितहस्तयुगेऽपि । यथा-''शतमुखमुपतस्थे प्राञ्जलिः पुष्पधन्वा''[ ]इति । तदा हस्तयोजनमिति भाषा । यन्महेश्वरः-''अञ्जलिं(अञ्जली) कुडवे विन्द्यादञ्जलिः करसंपुटे''[विश्वप्रकाशकोशः, लान्तवर्गः, श्लो-१३६] । कुडवः प्रसृतिः, करसंपुटः प्रसृतपाणिद्वयपुटः, प्रमाणार्थं मुकुलितं हस्तयुगं वा ॥

**प्रसृते तु द्रवाधारे गण्डूषश्चुलुकश्चुलुः[5] ॥५९८॥**

१ गण्डयति(गडयति) **गण्डूषः**, पुंक्लीबलिङ्गः[6] । 'गड[7] सेचने'(भ्वा.प.से.), बाहुलकादूषन्[8] । २ चुलुम्पतीति **चुलुकः**, पुंस्त्रीलिङ्गः । हर्षस्तु-''आस्यपूरणी चुलुका''[ ] इति स्त्रियामाह । चुलुम्पः[9] सौत्रः, 'कञ्चुक-'(हैमोणा-५७) इत्यादिना उकनि[10] निपात्यते । ३ चुलति **चुलुः**, पुंसि । 'भृमृ[शी]तृ-'(उणा-७)इति बाहुलकादुः । कनि चुलुकोऽपि । कीदृशे प्रसृते ?, द्रवाधारे जलाधारभूते । त्रीणि गण्डूषस्य । 'चुलू[11]' इति भाषा ॥५९८॥

**हस्तः प्रमाणिको[12] मध्ये मध्यमाङ्गुलिकूर्परम् ।**

१ मध्यमाङ्गुलिश्च कूर्परश्च मध्यमाङ्गुलिकूर्परौ, तयोर्मध्ये इति[13] ध्यमाङ्गुलिकूर्परम् । 'पारे मध्ये षष्ठ्या वा'२।१।१८॥ इति समासोऽव्ययीभावः । प्रमाणमस्त्यस्य **प्रमाणिकः**। 'अत इनिठनौ'५।२।११५॥ इति ठन्, 'ठस्येकः'७।३।५०॥ । मध्यमाङ्गुलिकूर्परयोर्मध्ये चतुर्विंशत्यङ्गुलप्रमाणवान्[14] हस्त इत्यर्थः । किष्कुरित्यपि । ''किष्कुर्वितस्तौ हस्ते च''[विश्वलोचनकोशः, कान्तवर्गः, श्लो-१०]इति श्रीधरः । 'हस्तश्चतुर्विंशत्यङ्गुलः''[ ]इति तट्टीका ॥

**बद्धमुष्टिरसौ रत्निः**

१ असौ हस्तो बद्धमुष्टिः सन् बद्धो मुष्टिर्यत्र स तादृक्, बद्धया मुष्ट्योपलक्षित इत्यर्थः । 'ऋतनि-'(उणा-४४२)इत्यादिना द्वादशधातुभ्यो द्वादशप्रत्ययाः क्रियन्ते, तत्र । अर्त्तेः कत्निप्रत्ययः, ककार कित्कार्यार्थः, धातोर्यणादेशः **रत्निः**, पुंस्त्रीलिङ्गः । एकं 'मुंडहथ[15]' इति ख्यातस्य ॥

**अरत्निर्निष्कनिष्ठिकः ॥५९९॥**

१ निर्गतः कनिष्ठाया निष्कनिष्ठकः । रत्निसदृशः **अरत्निः** । नञत्र सादृश्ये, ऋतेः सौत्रात् 'पाष्ण्यादयः' (चान्द्रोणा-१।८०॥)इति निः । पुंस्त्रीलिङ्गोऽयम् । 'अर्त्तिः' [ ]इति सुभूतिः । एकं कनिष्ठारहित 'मुंडहथ[16]' इति ख्यातस्य ॥५९९॥

**व्यामव्यायामन्यग्रोधास्तिर्यग्बाहू प्रसारितौ ।**

१ व्यामीयतेऽनेन **व्यामः** । 'व्याङ्पूर्वो 'माङ् माने'

---

१. 'आका-' इति३, 'काङ्क्षे' इति स्वामी ॥ २. द्र. अम.क्षीर.२।६।८५॥, पृ.१५२॥ स्वोपज्ञटीका ३।५९८॥, पृ.१३५॥ ३. द्र. अनेकार्थकैरवाकरकौमुदीटीका, भा-२, ३।६१६॥, पृ.२५७॥ ४. 'अरथ वधावा' इति२॥ ५. 'चलुः' इति मुद्रिताभिधानचिन्तामणिनाममालायाम्, स्वोपज्ञटीकाऽपि तमाश्रित्यैव ॥ ६. '-क्लीबः' इति३॥ ७. 'गडि' इति१.२.४॥ ८. 'गडेश्च'(उणा-५१८)इत्युणादिगणसूत्रम् ॥ ९. 'चुलुपः' इति३॥ १०. '-निति' इति३॥ ११. 'चलू' इति१॥ १२. 'प्रामा-' इति मुद्रिताभिधानचिन्तामणिनाममालायाम् ॥ १३. २प्रतौ नास्ति ॥ १४. '-प्रमाणान्' इति३॥ १५. 'मूड' इति१, '-हाथ' इति३॥ १६. '-हाथ' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(दि.आ.अ.), मूलविभुजादित्वात् कः । २ विशिष्ट आयामोऽत्रेति **व्यायामः** । ३ न्यग् रुणद्धि **न्यग्रोधः** । रुधेः पचाद्यच् । त्रीणि वामाख्यमानस्य ॥ [शेषश्चात्र-''अथ व्यामे वियामः स्याद् बाहुचापस्तनूतलः'' [शेषनाममाला३।१२५॥]]॥

## ऊर्ध्वीकृतभुजापाणिनरमानं तु पौरुषम् ॥६००॥

१ भुजा च पाणी च भुजापाणी, ऊर्ध्वीकृतौ विस्तृतौ भुजापाणी यत्र तदूर्ध्वीकृतभुजापाणिः, नरो मानं यस्य तन्नरमानम्, ऊर्ध्वीकृतभुजापाणि च नरमानं च ऊर्ध्वीकृतभुजापाणिनरमानम् । पुरुषः प्रमाणमस्य **पौरुषम्** । 'पुरुषहस्तिभ्यामण् च'५।२।३८॥ इत्यण् । त्रिलिङ्गोऽयम्, यथा पौरुषं जलम्, पौरुषी यष्टिः, पौरुषः सेतुः। ''पुरुषोर्ध्वमानं पौरुषम्'' [[1]]इत्येके । द्वादशाङ्गुलं तु पौरुषं छायामानम् । एकं पुरुष[2]प्रमाणमानस्य ॥६००॥

## दघ्नद्वयसमात्रास्तु जान्वादेस्तत्तदुन्मिते ।

१ जान्वादेः परतो दघ्नादयः प्रत्ययास्तत्तदुन्मिते वर्तन्ते, तेन तेन जान्वादिना उन्मितं तत्तदुन्मितम्, तत्र । तथा(यथा)-जानुः प्रमाणमस्य जानुदघ्नम्, जानुद्वयसम्, जानुमात्रम् । 'प्रमाणे द्वयसज्दघ्नञ्मात्रचः[3]'५।२।३७॥ । एवं पुरुषदघ्नमित्यादि । स्त्रियां जानुदघ्नी, जानुद्वयसी, जानुमात्रीत्यादि[4] ॥

## रीढकः पृष्ठवंशः स्यात्

१ रिह्यतेऽसौ रीढः, रिहिः सौत्रोऽरिर(अवि)कत्थनादौ, निष्ठा, के **रीढकः** । २ पृष्ठस्य वंशः **पृष्ठवंशः** । द्वे पृष्ठवंशस्य । यद्वाग्भटः-''पृष्ठवंशौ[5](-वंशं) ह्युभयतो यौ सन्धीकटिपार्श्वयोः''[अष्टाङ्गहृदयम्, शारीरस्थानम्, अध्यायः-४, श्लो-१९]इति । '[6]पूंठिनी वाहली[7]' इति भाषा ॥

## पृष्ठं तु चरमं तनोः[8] ॥६०१॥

१ तनोर्देहस्य चरमं पश्चाद्भागः **पृष्ठम्** । पृष्यते सिच्यते केशजलेनेति पृष्ठम् । 'पृषु सेचने'(भ्वा.प.से.), '[तिथ]पृष्ठगूथयूथप्रोथाः'(उणा-१६९)इति थक् । पश्चान्मात्रेऽप्ययमुपचारात् । यन्महेश्वरः-''पृष्ठं चरममात्रे(-गात्रे) स्याद् देहस्याऽवयवान्तरे''[विश्वप्रकाशकोशः, ठान्तवर्गः, श्लो-४] इति । एकं पृष्ठस्य । '[6]पूठि' इति भाषा ॥६०१॥

## पूर्वभाग उपस्थोऽङ्कः क्रोड उत्सङ्ग इत्यपि ।

१ शरीरस्य पूर्वभागः, उपतिष्ठन्तेऽत्र **उपस्थः** । २ अङ्क्यते लक्ष्यते **अङ्कः** ।'अकि लक्षणे'(भ्वा.आ.से.), 'हलश्च' ३।३।१२१॥ इति घञ् । अञ्च्यत इति वा । 'अञ्चु गतिपूजनयोः' (भ्वा.प.से.), 'हलश्च'३।३।१२१॥ इति घञ्, 'चजोः कु-' ७।३।५२॥ । ३ क्रोडति घनीभवति **क्रोडः** । 'क्रुड घनत्वे[9]' (तु.प.से.), अच् । ४ उत्कर्षेण सजन्त्यत्र **उत्सङ्गः** । 'षञ्ज सङ्गे'(भ्वा.प.अ.), 'पुंसि संज्ञायाम्-'३।३।११८॥ इति घः । चत्वारि उत्सङ्गस्य ॥

## क्रोडोरो हृदयस्थानं वक्षो वत्सो भुजान्तरम् ॥६०२॥

१ क्रोडति घनीभवति **क्रोडा**, स्त्रीक्लीबलिङ्गः । यद्गौडः-''स्त्रीनपुंसकयोः क्रोडा वक्षसि स्यात् किरौ पुमान्'' [ ]इति । 'क्रुड घनत्वे[9]'(तु.प.से.), अच्, टाप् । २ इयर्त्ति चलति निःश्वासवायुना **उरः**, क्लीबे । 'ऋ गतौ'(जु.प.अ.), 'अर्तेरुच्च'(उणा-६३४)इत्यसुन्, उत्वं रपरत्वं च । कण्ड्वादौ उरस्यतीति धातोः क्विपि वा । ३ हृदयस्य बुक्कायाः स्थानं **हृदयस्थानम्** । ४ सपत्नीरोषविषयत्वाद् वक्षतीति **वक्षः**, क्लीबे[10] । 'वक्ष रोषे'(भ्वा.प.से.), असुन् । वक्ति सामर्थ्यमिति वा । 'वचेः सक् च[11]'( )इत्यसुनि सगागमे च, षत्वे कुत्वे च वक्ष इति वा । ''वक्ष सङ्घाते(भ्वा.प.से.), अतोऽसुन्'' [[12]]इत्यन्ये । ५ वदति प्रकाशयति सामर्थ्यं **वत्सः**, पुंक्लीबलिङ्गः । 'वद व्यक्तायां वाचि'(भ्वा.प.से.), 'वृ(वृ)तृवदि-' (उणा-३४२)इति सः । ६ भुजयोरन्तरं **भुजान्तरम्** । षड् उरसः । 'छाती' इति भाषा ॥६०२॥

## स्तनान्तरं हृद् हृदयम्

१ स्तनयोरन्तरं **स्तनान्तरम्** । २ हरति मनो **हृद्**, क्लीबे । हृञो 'बहुलम्'(हैमसू-५।१।२॥)इति दुक् । ३ ह्रियते **हृदयम्** । 'वृहोः षुग्दुकौ च'(उणा-५४०)इति[13] यत् (कयन्), दुगागमश्च । त्रीणि स्तनान्तरस्य । ''असहं मर्मचरं गुणाधिष्ठानकं त्रसम्''[शेषनाममाला३।१२५॥]शैषिकम् ॥

## स्तनौ कुचौ पयोधरौ ।

---

१. द्र. स्वोपज्ञटीका ३।६००॥, पृ.१३५॥ २. 'एकं प्रमाणस्य' इत्येव२॥ ३. 'दघ्नद्वयसमात्राः' इति३॥ ४. '-दिना' १.२॥ ५. '-वंशो' इति१.२॥ ६. 'पूं-' इति१.२॥ ७. 'वाहि-' इति३॥ ८. तुलनीयोऽमरकोषः २।६।७८॥ ९. 'क्रुड निमज्जने' इति मैत्रेयः, स्वामिसायणौ तु स्वतन्त्रेण न पठतः ॥ १०. १.३.४ प्रतिषु नास्ति ॥ ११. 'पचिवचिभ्यां सुट् च' इत्युणादिगणे ॥ १२. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३३६, पृ.४२१॥ १३. इतोऽग्रे१.२.४प्रतिषु 'षुक्' इति दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**उरोजौ च**

१ स्तनतः तारुण्योदयं कथयतः **स्तनौ** । 'स्तन(ष्टन)[1] शब्दे'(भ्वा.प.से.), अच् । तनुतो विस्तारयत आत्मानं वा । 'तनु विस्तारे'(त.उ.से.), अच्, पारस्करादित्वात् सुट् । स्तनतः पीयमानाविति वा । २ कुचतः सङ्कुचतः **कुचौ** । 'कुच सङ्कोचे' (तु.प.से.), 'इगुपध-'३।१।१३५॥ इति कः । 'कुच शब्दे तारे' (भ्वा.प.से.), 'कुच सम्पर्कणकौटिल्यप्रतिष्टम्भविलेखनेषु' (भ्वा.प.से.)इत्यतो वा, 'इगुपध-'३।१।१३५॥ इति कः। 'कूच' इति षष्ठस्वरादिरपि । ''कुचकूचौ स्तनोच्चये''[ ] इति शब्दप्रभेदः । ३ पयो दुग्धं धरतः **पयोधरौ** । अच् । धरत इति धरौ, न धरौ अधरौ, पयसः अधरौ पयोऽधरौ इति वा । ४ उरसि जायेते **उरोजौ** । 'सप्तम्यां जनेर्डः'३।२।९७॥ । यौगिकत्वाद् उरसिजवक्षोजादयः । चत्वारि स्तनयोः । ''धरणौ''[शेषनाममाला३।१२६॥]शैषिकम् ॥

**चूचुकं तु स्तनाद् वृन्त-शिखा-मुखाः ॥६०३॥**

१ 'चूचु' इत्यव्यक्तं कायति शिशुना पीयमानमिति **चूचुकम्**, पुंक्ली. । ''चूचुको ना कुचाननम्''[[2]]इति रत्नकोषः। २-४ स्तनशब्दात् परे वृन्तादयः, तेन **स्तनवृन्तम्**, **स्तनशिखा**, **स्तनमुखम्**, स्तनाग्रमित्यर्थः । चत्वारि स्तनाग्रस्य । ''पिप्पलः[3] मेचकः''[शेषनाममाला३।१२६॥]शैषिके ॥६०३॥

**तुन्दं तुन्दिर्गर्भकुक्षी पिचण्डो जठरोदरे ।**

१ तुन्दति **तुन्दम्** । 'तुद व्यथने'(तु.उ.अ.), बाहुलकान्नुम्, 'इगुपध-'३।१।१३५॥ इति कः । तूर्यते पूर्यते वा । 'अब्दादयश्च'(उणा-५३८)इति निपातनात् साधुः । २ तुदत्येनां **तुन्दिः**, स्त्रीलिङ्गः । 'इगुपधात् कित्'(उणा-५५९), बाहुलकान्नुम्[4] । ३ गिरत्याहारं **गर्भः** । 'गॄ निगरणे'(तु.-प.से.), 'अर्त्तिगृ(गॄ)भ्यां भन्'(उणा-४३२) । ४ कुश[5]त्याहारेण संश्लिष्यति[6] **कुक्षिः**, पुंसि । गौडस्तु-''उदरं कुक्षिरक्लीबे''[[7]]इति स्त्रियामप्याह । 'कुश श्लेषणे'([8]), 'कुशः क्सिः'( )इति क्सिः । कुष्णात्याहारं वा । 'कुष निःकोषणे' (क्र्या.प.से.), 'उषकुषि-'( )इति क्सिः । ५ अपचिनोत्याहारं **पिचण्डः** । 'चिञ् चयने'(स्वा.उ.अ.), 'अमन्ताड्डः' (उणा-१११)इति बाहुलकाद् डः, पृषोदरादित्वाद् वर्णागमलोपौ । पिचिण्ड इति तृतीयस्वरद्वयोऽपि । ६ जनयत्यन्नादिना स्वपूरणं **जठरम्**, पुंक्लीबलिङ्गः । यद्गौडः-''उदरे जठरो न स्त्री''[[9]]इति । वैजयन्तीकारस्तु-''जठरं चोदरं न ना''[वैजयन्तीकोषः४।४।६७॥]इति क्लीब एवाह । ''त्रिलिङ्गोऽयम्'' [[9]]इति बुद्धिसागरः । 'जनी प्रादुर्भावे'(दि.आ.से.), 'ऋच्छेररन्[10]'(उणा-४११)इति बाहुलकादरन्, पृषोदरादित्वाद् नस्य ठः । ७ उद् ऋणाति उद्गच्छति वायुरस्माद्[11] **उदरम्**, क्लीबे । ([12]वैजयन्ती तु ''जठरं चोदरं न ना''[वैजयन्तीकोषः४।४।६७॥]इत्याह । ''त्रिलिङ्गोऽयम्''[[9]]इति बुद्धिसागरः) । 'ॠ गतौ'(क्र्या.प.से.), अच् । उदीर्यते वायुनेति वा । 'उदि दृणातेरेरच् (ऊर्जि दृणातेरलचौ) पूर्वपदान्तलोपश्च'(उणा-७१८) । आहारेण उदृणाति उद्गच्छतीति वा । 'ॠ गतौ' (क्र्या.प.से.), अच् । सप्त उदरस्य । ''मलुकः रोमलताधारः'' [शेषनाममाला३।१२६॥]शैषिके ॥

**कालखण्डं कालखञ्जं कालेयं कालकं यकृत्**
**॥६०४॥**

**दक्षिणे**

१ दक्षिण इति, हृदयस्य दक्षिणे पार्श्वे । कालस्य मांसस्य खण्डं **कालखण्डम्**, कृष्णत्वात् । कालं च तत् खण्डं च कालखण्डमिति वा, कृष्णमांसांशः । २ कालमपि भिन्नं सत् खञ्जयति **कालखञ्जम्** । 'खजि गतिवैकल्ये'(भ्वा.प.से.), णिजन्तः, अच् । ३ कु ईषल्लीयते श्लिष्यते हृदयेन **कालेयम्** । 'लीङ् श्लेषे[13]'(दि.आ.अ.), 'अचो यत्'३।१।९७॥इति यत्, 'ईद्यति'६।४।६५॥इतीत् । कलिर्देवताऽस्येति वा । 'कलेर्ढक्[14]'४।२।८॥ । ४ कालमेव **कालकम्** । स्वार्थे कन्। ५ यमनं यमः संयमः, 'तत्करोति-'(ग. )इति क्विप्, तुक्, पृषोदरादित्वान्मलोपः **यकृत्**, क्लीबे । पञ्च 'कलेजा' इति ख्यातस्य ॥६०४॥

---

१. ''ष्टन ध्वनेति क्षीरस्वामी' इति पुरुषकारः (पृष्ट-९०)। अज्दन्त्यपराः सादयः षोपदेशाः (अ. ६।१।६४॥)इति भाष्यवचनात् षोपदेश एवायम् । क्षीरतरङ्गिण्यां कदाचित् पाठभ्रंशो जातः स्यात् ।'' इति क्षीरतरङ्गिण्यां टिप्पणी, पृ.७३, टि-२॥ २. द्र. टीकासर्वस्वम्, भा-२. २।६।७७॥, पृ.३३८॥, पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३३५, पृ.४२१॥, रामाश्रमी २।६।७७॥, पृ.२९५॥, ३. 'पिप्पलः' इति१.२.३॥ ४. इतोऽग्रे ४प्रतौ 'इगुपधेति कः' इति दृश्यते ॥ ५. 'कुश्य-' इति२.४॥ ६. '-ष्यते' इति३॥ ७. द्र. स्वोपज्ञटीका ३।६०४॥, पृ.१३६॥ ८. दुर्गसम्मतोऽयं धातुः, द्र. क्षीरतरङ्गिणी, दिवादिः, धातुसं-११२, पृ.२२९॥ ९. द्र. स्वोपज्ञटीका ३।६०४॥, पृ.१३६॥ १०. 'ऋच्छेररः' इत्युणादिगणे ॥ ११. '-स्मिन्' इति४॥ १२. कोष्ठान्तर्गतपाठः १प्रतौ नास्ति ॥ १३. 'श्लेषणे' इति४, तथा क्षीरतरङ्गिण्यादयः ॥ १४. '-ञ्' इति१.२.४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**तिलकं क्लोम**[1]

१ हृदयस्य दक्षिणे पार्श्वे तिलति स्निह्यति तिलः । 'तिल स्नेहने'(तु.प.से.), 'इगुपध-'३।१।१३५॥ इति कः, ततः कन्, [ **तिलकः** ] । २ क्लवते क्षारद्रव्यं प्राप्य चलति **क्लोम**, क्लीबे । 'च्युङ् छुङ् (छ्युङ्) जुङ् प्रुङ् गतौ'[2](भ्वा.आ.-अ.), 'क्लुङ् इत्येके,' '-मनिन्'(उणा-५८४)इति मनिन् । क्लोममदन्तमपि सिध्मपर्याये उक्तम् । द्वे तिलकस्य । ''ताड्यं क्लपुष्पं[3] क्लोमम्''[शेषनाममाला३।१२६॥]शैषिकाणि ॥

**वामे तु रक्तफेनजः ।**
**पुप्पसः स्यात्**

१ हृदयस्य वामपार्श्वे रक्तफेनाज्जातो **रक्तफेनजः** । २ पुष्पतीति **पुप्पसः** । असचि प्रत्यये निपात्यते । द्वे 'फोफस' इति ख्यातस्य ॥

**अथ प्लीहा गुल्मः**

१ हृदयस्य वामभागे प्लेहति(प्लेहते) अन्तः प्रविशति तीक्ष्णप्रयोगाच्चरति **प्लीहा** । 'प्लिह गतौ'(भ्वा.आ.से.), 'हन्(हन) हिंसागत्योः'(अ.प.अ.) अस्य वा । 'श्वन्नुक्षन्-पूषन्-प्लीहन्-क्लेदन्-स्नेहन्-मूर्धन्-मज्जनर्यमन्-विश्वप्स्यन्-(विश्वप्सन्)-परिज्मन्-मातरिश्वन्-मघवन्'(उणा-१५७)इति कनि साधुः । प्लीहानौ इत्यादि पुंसि । प्लीहा टाबन्ताच्च । ''यकृत् प्लीहे च सम्बद्धे''[4]इति बालकाष्टः(वालकाप्यः) । २ गुड्यते रक्ष्यतेऽस्माद् **गुल्मः**, पुंक्लीबलिङ्गः । 'गुड रक्षणे'(तु.प.से.), 'भीमादयोऽपादाने'३।४।७४॥ इति साधुः । गलत्यायुरिति वा । 'गल अदने'(भ्वा.प.से.), 'गलेरुच्चोपधायाः'( ) इति मक् । द्वे हृदयवामभागस्थगुल्मस्य । 'पीहों'[5] इति भाषा ॥

**अन्त्रं तु पुरीतति ॥६०५॥**

१ अमत्यनेनाऽन्त्रमिति **अन्त्रम्** । 'अम्(अम) गतौ'(भ्वा.प.से.), '-रोगे'(चु.अ.से.) वा, 'अमिचिमिदिशसिभ्यस्त्रन्'[6](उणा-६०३)। अन्तति बध्नाति कालखण्डादीनि वा । 'अति बन्धने'(भ्वा.प.से.), '-ष्ट्रन्'(उणा-५९८)इति ष्ट्रन्, तदा द्वितकारावान् । २ पुरिं(पुरीं) शरीरं तनोति **पुरीतत्** । 'तनु विस्तारे'(तु.उ.से.), 'नहिवृतिवृषि-'६।३।११६॥ इति क्विप् दीर्घत्वं च, 'अनुदात्तोपदेश-'६।४।३७॥ इति न्लोपः[7], 'ह्रस्वस्य-'६।१।७१॥ इति तुक् । क्लीबेऽयम् । वाचस्पतिस्तु-''अन्त्रं पुरीतदस्त्रियाम्''[8]इति पुंस्यप्याह, तत्र । द्वे अन्त्रस्य ॥६०५॥

**रोमावली रोमलता**

१ रोम्णामावली **रोमावली**, नाभेर्निर्गता रोमराजिः । २ रोम्णां लतेव **रोमलता** । द्वे रोमलतायाः ॥

**नाभिः स्यात् तुन्दकूपिका ।**

१ नह्यतेऽत्रायुरिति[9] **नाभिः**, पुस्त्रीलिङ्गः[10] । 'नह(णह) बन्धने'(दि.उ.अ.), 'नहो भश्च'(उणा-५६५)इतीञ्, भोऽन्तादेशः । २ तुन्दे कूपीव **तुन्दकूपिका** । द्वे नाभेः । ''पुतारिका सिरामूलम्''[शेषनाममाला३।१२७॥]शैषिके ॥

**नाभेरधो मूत्रपुटं वस्तिर्मूत्राशयोऽपि च ॥६०६॥**

१ नाभेरधस्तान्नाभिगुह्ययोरन्तरमित्यर्थः। मूत्रस्य पुटमाधारो **मूत्रपुटम्** । २ वसत्यस्यां मूत्रं **वस्तिः** । वस्ते आच्छादयति मूत्राशयपुटं वा । 'वस निवासे'(भ्वा.प.अ.), 'वस आच्छादने'(अ.आ.से.) अतो वा, '**हवसिभ्यां क्तिन्**'(चान्द्रोणा-१।८४॥) पुंस्त्रीलिङ्गोऽयम् । [ ३ मूत्रस्याऽऽशयो **मूत्राशयः** ] ''मूत्राशयपुटो वस्तिः''[11]इति रत्नमाला । त्रीणि 'पेडू' इति ख्यातस्य ॥६०६॥

**मध्योऽवलग्नं विलग्नं मध्यमः**

१ मध्यशरीरे विद्यमानत्वाद् **मध्यः** । 'अः(अ) सांप्रतिके'४।३।९॥इति अप्रत्ययः । मव्यते बध्यते मेखलादिकमत्र वा । 'मव बन्धने'[12](भ्वा.प.से.), 'शिक्यास्य-'( )इति साधुः । २ अवलगति **अवलग्नम्** । 'लगे सङ्गे'(भ्वा.प.से.), 'क्षुब्धस्वान्त-'७।२।१८॥ इति साधुः । ३ विलगति **विलग्नम्**, अतिकृशत्वात् । ४ मां लक्ष्मीं शोभां धत्ते । 'अघ्न्यादयश्च'(उणा-५५१)इति निपातनात् साधुः । मध्ये भवो **मध्यमः** ।

---

१. तुलनीयोऽमरकोषः २।६।६५॥ २. 'च्युङ् छ्युङ् ज्युङ् प्रुङ् प्लुङ् गतौ' इति स्वामी, 'च्युङ् छ्युङ् ज्युङ् झ्युङ् प्रुङ् प्लुङ् गतौ' इति मैत्रेयः, 'च्युङ् ज्युङ् प्रुङ् प्लुङ् गतौ' इति सायणः ॥ ३. 'क्लपुषं' इति शेषनाममालास्वोपज्ञटीकयोः ॥ ४. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३२४, पृ.४०६॥ ५. 'फीहा' इति४॥ ६. '-भ्यः क्त्रः' इत्युणादिगणे ॥ ७. प्रमादोऽयं प्रतिभाति, 'गमादीनाम्-'(वा-६।४।४०॥)इति वार्तिकसत्त्वात्, वस्य झल्त्वाभावाच्च ॥ ८. द्र. स्वोपज्ञटीका ३।६०५॥, पृ.१३६॥, पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३२४, पृ.४०५॥, रामाश्रमी २।६।६६॥, पृ.२८९॥ ९. '-ऽत्र वायुरिति' इति४, 'नह्यते स्नायुभिरिति' इति स्वोपज्ञटीकायाम्, ३।६०६॥, पृ.१३६॥ १०. 'पुंस्त्री' इत्येव३॥ ११. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३३१, पृ.४१६॥, रामाश्रमी २।६।७३॥, पृ.२९३॥ १२. 'बोधने' इति२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'मध्यान्मः'४।३।८॥ शेषे इति मः । एते चत्वारोऽपि पुंक्ली-बलिङ्गाः[1] । चत्वारि देहमध्यस्य ॥

### अथ कटः कटिः ।

### श्रोणिः कलत्रं कटीरं काञ्चीपदं ककुद्मती ॥६०७॥

१ कट्यत आव्रियते **कटः**, पुंक्ली. । 'कटे वर्षा-वरणयोः'(भ्वा.प.से.), 'पुंसि संज्ञायाम्-'३।३।११८॥ इति घः । २ कट्यत आव्रियते **कटिः**, स्त्रीलिङ्गः । 'इन् सर्वधातुभ्यः' (उणा-५५७)इतीन् । 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि कटी । 'कटात् तु श्रोणिवचने'( )इति वा ङीष् । ३ श्रूयते किङ्किणीध्वनिरत्रेति **श्रोणिः**, पुंस्त्रीलिङ्गः । 'श्रु श्रवणे' (भ्वा.प.अ.), 'वहिश्रुसि(श्रिश्रु)युग्लाहात्वरिभ्यो निः'[2](उणा-४९१) । श्रोणति संहतीभवतीति वा । 'श्रोणृ सङ्घाते'(भ्वा.प.से.), '-इः(इन्)'(उणा-५५७)इति इः(इन्) । 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि **श्रोणी** । "श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्याम्"[मेघदूतम्, उत्तरमेघः, श्लो-१९]इति मेघदूतः । "श्रोणीतटं स्पृशति किम्"[ ]इति पूर्वकविप्रयोगश्च । ४ कडति माद्यत्यनेन **कडत्रम् ( कलत्रम् )** । 'कड मदे'(भ्वा.प.से.), 'कडेरत्रन्'( )इत्यत्रन् । ५ कट्यत आव्रियते **कटीरम्** । 'कटे वर्षावरणयोः'(भ्वा.प.से.), बाहुलकाद् 'गभीरगम्भीरौ'(उणा-४७५)इतीरन् । 'कन्तुकृञ्-'( )इत्यादिना ईरन् वा । ६ काञ्च्याः पदं स्थानं **काञ्चीपदम्** । ७ ककुद् वृषांसस्तदाकारत्वाद् मांस-पिण्डोऽपि ककुद्, तद्योगादतिशायने[3] मतुप्, '-अयवादिभ्यः' ८।२।९॥ इति प्रतिषेधाद्, 'झयः'८।२।१०॥ इति वत्वं न, 'उगितश्च' ४।१।६॥ इति ङीप् । ककुद् पार्श्वनिःसृतोंऽसोऽस्या वा **ककु-द्मती** । सप्त कट्याः ॥६०७॥

### नितम्बारोहौ स्त्रीकट्याः पश्चात्

१ स्त्रीकट्याः पश्चाद्भागः, निभृतं तम्यते कामुकै-रिति **नितम्बः** । 'तमु काङ्क्षायाम्'(दि.प.से.) । नितरां तनोति शोभामिति वा । 'तनु विस्तारे'(त.उ.से.), उभयत्र 'उल्वा-दयश्च'(उणा-५३५)इति वः । २ आरुह्यत **आरोहः** । 'रुह प्ररोहे'[4](भ्वा.प.अ.), कर्मणि घञ् । आरोहतीति[5] पचाद्यच् वा । द्वे नितम्बस्य ॥

### जघनमग्रतः ।

१ स्त्रीकट्या अग्रभागः, हन्यते कामुकैरिति **जघनम्**, क्लीबे । 'हन्(हन) हिंसागत्योः'(अ.प.अ.), 'हनो जघ् च' (दशपाद्युणा-२।२८)इति क्युः, धातोर्जघादेशश्च । भृशं हन्यत इति । हनो यङन्तात् पचाद्यचि नैरुक्ते नकारलोपे वा । यन्महेश्वरः-"जघनं तु[6] स्त्रियाः[7] श्रोणिपुरोभागे कटीरके"[विश्व-प्रकाशकोशः, नान्तवर्गः, श्लो-२९] । अमरोऽपि-"क्लीबे तु जघनं पुरः"[अमरकोषः२।६।७४॥]इति । एते त्रयः कटिपर्याया अपि । यद्धलायुधः-"काञ्चीपदं कलत्रं जघनं श्रोणिः ककुद्मती ज्ञेया । आरोहश्च नितम्बः [कटी] कटीरम्"[हला-युधकोशः २।५१२॥]इति ॥

### त्रिकं वंशाऽधः

१ पृष्ठवंशस्याऽधस्तादूर्वोः सन्धौ, त्रिसङ्घट्टः **त्रिकम्** । 'संख्याडतेः[8]-'(हैमसू-६।४।१३०)इति कः । "त्रिका कूपस्य नेमौ स्यात् त्रिकं पृष्ठाधरे त्रये"[अनेकार्थसङ्ग्रहः २।९॥] इत्यनेकार्थः । एकं 'तिग[9]' इति ख्यातस्य ॥

### तत्पार्श्वकूपकौ तु कुकुन्दरे ॥६०८॥

१ तस्य त्रिकस्य पार्श्वगतौ कूपाविव निम्नत्वात्, इवार्थे कनि कूपकौ । स्कुन्द्येते कामिनामनुरागेण(कामिना अनुरागेण) **कुकुन्दरौ ( कुकुन्दरे )** । '[10]स्कुंदिरावरणे'(भ्वा.आ.से.), 'मद्गु-रादयश्च'(उणा-४१)इति कुरच्, सलोपो द्वित्वं निपात्यते । कुं नितम्बभूमिं स्कुन्दत्यावृणोति व्याप्नोति पूर्ववत्साधने वा । क्लीबलिङ्गोऽयम् । भागुरिस्तु-"कुकुन्दरौ समाचष्टे जनो जघन-कूपकौ"[[11]]इति पुंस्यप्याह । नितम्बद्वयस्थौ यौ कूपकौ पृष्ठ-वंशादधोगतौ, तयोर्द्वे । शेषश्चात्र-"कटीकूपौ तूच्चलिङ्गौ रताम्बुके[12]"[शेषनाममाला ३।१२७॥] ॥६०८॥

### पुतौ स्फिजौ कटिप्रोथौ

१. 'पुंक्लीब' इत्येव३॥ २. 'नित्' इत्युणादिगणे ॥ ३. '-यनो' इति३॥ ४. 'रुह बीजजन्मनि' इति स्वामी, 'रुह जन्मनि प्रादुर्भावे' इति मैत्रेयः, 'रुह बीजजन्मनि प्रादुर्भावे च' इति सायणः ॥ ५. '-हति' इति३॥ ६. 'च' इति विश्वप्रकाशकोशे ॥ ७. 'स्त्रियौ' इति२॥ ८. 'सङ्ख्यायाः संज्ञासङ्घसूत्राध्ययनेषु'५।१।५८॥ इति पाणिनीयसूत्रम् ॥ ९. 'तिटा' इति१.२॥ १०. 'स्क-' इति४, 'स्कुदि आप्रवणे' इति क्षीरतरङ्गिण्यादयः ॥ ११. द्र. स्वोपज्ञटीका३।६०८॥, पृ.१३७॥ १२. '-म्बके' इति ३.४, 'रताबुके' इति शेषनाममालास्वोपज्ञटीकयोः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ पूयेते[1] इति **पुतौ**, पुंक्लीबलिङ्गः[2] । 'पुतपित्त-' (हैमोणा-२०४)इति निपातितः । २ स्फायेते **स्फिजौ**, स्त्रीलिङ्गः । 'स्फायी वृद्धौ'(भ्वा.आ.से.), बाहुलकात् क्विपि साधुः । मिश्रास्तु-" 'स्फट स्फिट हिंसायाम्'[3]( )इति स्फे[4]टयतेः चौरादिकात् क्विप्, 'स्फिगपूत-'६।२।१८७॥ इत्यादिना निपातनाट्टकारस्य चकारे स्फिचौ"[[5]]इति चान्तमाहुः । ३ प्रोथयति पर्याप्तं पृष्ठं भवत्यत्र । 'प्रोथृ पर्याप्तौ'(भ्वा.-उ.से.), 'पुंसि संज्ञायाम्-'३।३।११८॥ इति[6] घः, प्रोथः । कट्याः प्रोथौ मांसपिण्डौ **कटिप्रोथौ** । कश्चित्तु कटिरिति प्रोथ इति च पृथगेवाह । "स्त्रियां स्फिचौ कटिप्रोथौ कटीप्रोथौ च पूलकौ"[[7]]इति रभसः । यत् श्रीधरः-"प्रोथः पान्थेऽश्वघोणायामस्त्री ना कटिगर्भयोः"[विश्वलोचनकोशः, थान्तवर्गः, श्लो-११] । कटिरत्र कट्यवयवः, "पृथु प्रोथा तु कुट्टनी"[ ]इति लक्ष्यम् । त्रीणि पुतस्य । 'पूंद' इति भाषा ॥

## वराङ्गं तु च्युतिर्बुलिः ।
## भगोऽपत्यपथो योनिः स्मरान्मन्दिरकूपिके ॥६०९॥
## स्त्रीचिह्नम्[9]

१ वरं प्रशस्यमङ्गं **वराङ्गम्** । २ च्युवन्ते(च्यवन्ते)-ऽस्यां **च्युतिः** । 'च्युङ् गतौ'(भ्वा.आ.अ.), 'स्त्रियां क्तिन्' ३।३।९४॥ । च्युत्यत आसिच्यत इति वा । 'च्युतिर् आसेचने' (भ्वा.प.से.), 'इगुपधात् कित्'(उणा-५५९)इतीन् । ३ बुल्यते निमज्यते शिश्नेनाऽत्रेति **बुलिः**, स्त्रीलिङ्गः । 'बुलर्ण् निमज्जने' ( ), 'इगुपधात् कित्'(उणा-५५९)इतीन् । ४ भज्यते सेव्यते कामुकैरिति **भगः**, पुंक्लीबलिङ्गः । 'भज सेवायाम्'(भ्वा.-उ.अ.), 'खनो घ च'३।३।१२५॥ इति चाद् घः । " 'गोचरसञ्चर-'३।३।११९॥ इत्यादिना चकरात् साधुः"[[8]]इत्यन्ये । ५ अपत्यस्य निःसरणे पन्था **अपत्यपथः** । 'ऋक्पूरब्धूः-' ५।४।७४॥ इत्यप् । ६ यौति शिश्नेन मिश्रीभवति **योनिः**, पुंस्त्रीलिङ्गः[10] । ['यु मिश्रणे'(अ.प.से.),] 'वहिश्रिश्रु[11][श्रु]यु-' (उणा-४९१)इति निः । ङीषि योनी । ७-८ स्मरशब्दान्मन्दिरकूपिकौ शब्दौ योज्यौ, तेन **स्मरमन्दिरम्, स्मरकूपिका** ॥६०९॥ ९ स्त्रियाश्चिह्नं **स्त्रीचिह्नम्** । नव स्मरमन्दिरस्य । ([12]'चूति भोसडी' इति भाषा )॥

## अथ पुंश्चिह्नं मेहनं शेपशेपसी ।
## शिश्नं मेढ्रः कामलता लिङ्गं च

१ पुंसश्चिह्नं **पुंश्चिह्नम्** । २ मेह्यते सिच्यतेऽनेन **मेहनम्** । 'मिह सेचने'(भ्वा.प.अ.), करणे ल्युट् । ३ शेते पतति[13] शुक्रपाते सति **शेपः** । 'शीङ् स्वप्ने'(अ.आ.से.), 'वृङ्शी[ङ्]भ्यां पुट् च'(उणा-६४०)इत्यसुनि **शेपः**, सकारान्तः । केचित्तु "फुट् च"[[14]]इति पठन्ति, तत्पक्षे शेफः । न्यासकृताऽपि '-वनस्पति-'६।२।१४०॥ इत्यादिसूत्रे " 'वृञ्शीभ्यां(वृङ्शीङ्भ्यां) फुट् च'(उणा-६४०)इत्यसुनि फुटि च शेफः"[[15]]इति व्युत्पादितम्[14] । अनुन्यासकृताऽपि तत्रैव सूत्रे "अदन्तोऽप्ययम्"[[14]]इत्युक्तम् । रक्षितेनाऽपि 'षष्ठ्या आक्रोशे' ६।३।२१॥इत्यत्र "शुनःशेपोऽसुनि (शुनःशेपो मुनिः) । शेपोऽदन्तोऽपि"[[14]]इत्युक्तम् । अदन्तत्वे च 'शेपपुच्छलाङ्गूलेषु शुनः'(वा-६।३।२१॥)इति प्रमाणम् । उणादौ तु 'इणशीङ्भ्यां वन्'(उणा-१५०)इति वनि "शेवो मेढ्रः"[ ]इत्युक्तम् । तदेवं शेपशेपसी शेफशेफसी शेवश्चेति पञ्चरूपाणि भवन्ति । ४ शशति प्लुतेन गच्छति **शिश्नम्** । 'शश प्लुतगतौ'[16](भ्वा.-प.से.), 'रास्नासास्ना[17]-'(उणा-२५२)इत्यादिना निपातनान्नक्[18] उपधाया इत्वं च, द्वितालव्यः । "श्मश्रुश्मशानशिशुशिश्नकुशेशयानि"[ ]इति शभेदः । ५ मेहन्ति सिञ्चन्ति[19] मूत्ररेतसी अनेनेति **मेढ्रः**, पुंनपुंसकलिङ्गः । 'मिह सेचने'(भ्वा.प.अ.), 'दाम्नी-'३।२।१८२॥ इति ष्ट्रन्, 'हो ढः'८।२।३१॥ । ६ कामस्य लतेव **कामलता** । ८ लिङ्ग्यतेऽनेन **लिङ्गम्** । 'लिगि विचित्रीकरणे[20]'(चु.उ.से.), करणे घञ् । अष्टौ शिश्नस्य ।

---

१. 'पूयते' इति२.३॥ २. 'पुंक्ली.' इत्येव३॥ ३. 'स्फिट अनादरे' इति स्वामी, 'षट्ट स्फिट चुवि हिंसायाम्' इति मैत्रेयः ॥ ४. 'स्फो-' इति२.३॥ ५. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३३३, पृ.४१७॥ ६. २.३.४ प्रतिषु नास्ति ॥ ७. द्र. टीकासर्वस्वम्, भा-२, २।६।७५॥, पृ.३३५, पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३३३, पृ.४१७॥, रामाश्रमी २।६।७५॥, पृ.२९४॥ ८. स्वामिसम्मतोऽयं धातुपाठः, तत्र णकारानुबन्धो न दृश्यते ॥ ९. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३३४, पृ.४१८॥ १०. 'पुंस्त्री' इत्येव३॥ ११. '-श्रि-' इत्युणादिगणे ॥ १२. कोष्ठान्तर्गतपाठः १.२.४प्रतिषु नास्ति ॥ १३. 'पचति' इति४॥ १४. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३३४, पृ.४१९॥ १५. "शुनःशेप इति । बहुव्रीहिरयम् । तेनात्र पूर्वपदस्य प्रकृतिभावे प्राप्ते वचनम् । उभावाद्युदात्ताविति । तत्र श्वञ्शब्दः 'श्वन्नुक्षन्' इत्यादिना कनिन्प्रत्ययान्तो व्युत्पाद्यते । शेपशब्दो 'वृङ्शीङ्भ्यां रूपस्वाङ्गयोः पुट् च' इत्यसुन्प्रत्ययान्तो व्युत्पाद्यते, तेन द्वावपि तावाद्युदात्तौ ।" इति न्यासः, भा-५, ६।२।१४०॥, पृ.१३०॥ १६. 'प्लुति-' इति१.२॥ १७. 'रास्नासास्नास्थूणावीणाः' इत्युणादिगणसूत्रम् ॥ १८. '-न्नगुण' इति३॥ १९. 'मेहति सिञ्चति' इति४॥ २०. 'चित्रीकरणे' इति क्षीरतरङ्गिण्यादयः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"लङ्कुलं शङ्कु लाङ्गूलं शेफशेफसी[1]"[शेषनाममाला३।१२८॥] शैषिकाणि ॥

. द्वयमप्यदः ॥६१०॥

## गुह्यप्रजननोपस्थाः

१ अद एतद् द्वयं स्त्रीचिह्नम्, पुंश्चिह्नं च ॥६१०॥ एकोक्त्या, गुह्यते **गुह्यम्** । 'गुहू संवरणे'(भ्वा.आ.से.), 'शंसिगुहिदुहिभ्यो वा'(काशिका ६।१।७१॥)इति क्यप् । २ प्रजन्यतेऽनेन **प्रजननम्** । 'जनी प्रादुर्भावे'(दि.आ.से.), करणे ल्युट्। ३ उपतिष्ठते संगच्छते **उपस्थः**, पुंसि । "उपस्थोऽस्त्री"[वैजयन्तीकोष:४।४।६२॥]इति तु[2] वैजयन्ती । "स्थाम्ना-'( )इति कः, उपस्थमर्धर्चादित्वात् क्लीबमपि"[पदचन्द्रिका, मनुष्यवर्गः, श्लो-३३३]इति बृहस्पतिः । त्रीण्येकोक्त्या स्त्रीचिह्नपुंश्चिह्नयोः ॥

## गुह्यमध्यं गुलो मणिः ।

१ गुह्यस्य स्त्रीचिह्नस्य पुंश्चिह्नस्य च यन्मध्यम्, तस्य द्वे । गुलति(गुडति) रक्षति **गुडः( गुलः )** । 'गुड रक्षणे' (तु.प.से.), 'इगुपध-'३।१।१३५॥ इति कः । २ मणति महार्घतां[3] **मणिः**, पुंस्त्रीलिङ्गः । 'मण शब्दे'(भ्वा.प.से.), 'इन् सर्वधातुभ्यः'(उणा-५५७) ॥

## सीवनी तदधःसूत्रम्

१ सीव्यतेऽनया **सीवनी** । 'षिवु तन्तुसन्ताने' (दि.प.से.), करणे ल्युट्, 'छ्विवुषि(सि)व्योर्लुटि-'(स.कं. २।४।१६७॥)इति दीर्घत्वम् । तस्य गुह्यस्याऽधःसूत्रं तदधःसूत्रम्। सीवनी हि जिह्वा शिरोगताऽपि भवति । यद्वाग्भटः-

"षट् कूर्चाः सप्त सीवन्यो मेढ्रजिह्वा[4]शिरोगताः ।
शस्त्रेणैताः[5] परिहरेच्चतस्रो मांसरज्जवः ॥१॥"

[अष्टाङ्गहृदयम्, शारीरस्थानम्, अध्यायः-३, श्लो-१४-१५] इति । द्वे (एकं) ['गुह्यनी नीचेनो दोरो' इति भाषायाः]॥

## स्यादण्डं पेलमण्डकः ॥६११॥
## मुष्कोऽण्डकोशो वृषणः

१ अणत्यत्राऽऽहतः प्राणी **अण्डम्**, क्लीबे । 'अण शब्दे'(भ्वा.प.से.), 'अमन्ताड्डः'(उणा-१११) । वैजयन्ती तु- "अस्त्रियो मुष्ककोशाण्डाः"[वैजन्तीकोष:४।४।६३॥]इति पुंस्यप्याह । 'आण्डः' इति द्वितीयस्वरादिरपि । २ पेलत्यूर्ध्वं गच्छति **पेलः** । 'पेलृ गतौ'(भ्वा.प.से.), अच्, पुंस्ययम् । ३ अण्डमेव **अण्डकः** । "स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्तेऽपि"[ ]इति स्वार्थे के, कनि पुंस्त्वम् ॥६११॥ ४ मुष्णाति गोपयति गुडकद्वयं शुक्रं वा **मुष्कः**, पुंक्लीबलिङ्गः[6] । 'मुष स्तेये'(क्र्या.प.से.), 'सृवृभू[शुषि]मुषि-' (उणा-३२१)इति कः । ५ अण्डयोः कोशः **अण्डकोशः**। कोशकोषावपि[7] । यदनेकार्थः-"कोशः कोष इवाण्डके" [अनेकार्थसङ्ग्रहः२।५३३॥]इति । यथा-"एतच्चराचरं विश्वं ब्रह्मकोशविनिर्मितम्"[[8] ]इति प्रयोगः। ६ वर्षति शुक्रं **वृषणः**, पुंक्लीबलिङ्गः[6] । 'वृषु सेचने'(भ्वा.प.से.), [बाहुलकात्] '[9]कृषिवृषिमण्डि[10]नीधाञ्भ्यः(कृपृवृजिमन्दिनिधाञः) क्युः'(उणा २३९)। षड् वृषणस्य ॥

## अपानं पायुर्गुदं च्युतिः ।
## अधोमर्म शकृद्द्वारं त्रिवलीक-बुली अपि ॥६१२॥

१ "हृदि प्राणो गुदेऽपानः"[ ]इति स्मृतेरपानयोगाद् **अपानम्** । २ पाति रक्षति प्राणान्, पिबन्त्यनेन तैलादिकं वा **पायुः**, पुंसि । 'पा रक्षणे'(अ.प.अ.), 'पा पाने' (भ्वा.प.अ.) वा, 'कृवापाजिमि-'(उणा-१)इत्युण्, 'आतो युक् चिण्कृतोः'७।३।३३॥इति युक् । ३ गुद्यति (गुद्यते) कुञ्चनाकुञ्चनाभ्यां **गुदम्**, पुंक्लीबलिङ्गः[6] । 'गुद क्रीडायाम्'(भ्वा.-आ.से.), इगुपधात् कः । "गूयते हद्यतेऽनेनेति । 'गु पुरीषोत्सर्गे'(तु.प.अ.), 'गुदादयः( )इति निपातनात् साधुः" [[11] ]इत्यन्ये । ४ च्यवते मलोऽस्याः **च्युतिः** । 'च्युङ् गतौ' (भ्वा.आ.अ.), बाहुलकात् स्त्रियां क्तिन् । ५ अधस्तान्मर्माऽस्य **अधोमर्म**, नकारान्तः । ६ शकृतो द्वारं **शकृद्द्वारम्** । ७ तिस्रो वलयोऽत्र **त्रिवलीकम्** । ८ बुल्यतेऽत्रेति **बुलिः**, स्त्रीलिङ्गः । 'बुलण् निमज्जने'( ), 'इगुपधात् कित्'(उणा-५५९)इतीन् । अष्टौ गुदस्य ॥६१२॥

---

१. 'शेपशेपसी' इति३॥ २. ३.४प्रत्योर्नास्ति ॥ ३. '-र्थतां' इति३.४॥ ४. '-जिह्वाः' इति१.२.४॥ ५. अष्टाङ्गहृदये पाठान्तरेण दृश्यते, मूले 'शस्त्रेण ताः' इति, अष्टाङ्गहृदयम्, पृ.३८८॥ ६. 'पुंक्लीब' इत्येव३॥ ७. इतोऽग्रे ३प्रतौ 'इति' इति दृश्यते ॥ ८. द्र. अनेकार्थकैरवाकरकौमुदीटीका, भा-१, २।५३३॥, पृ.३०४॥ ९. 'कृपि-' इति१.२॥ १०. '-मडि-' इति३.४॥ ११. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३३१, पृ.४१५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**विटपं तु महाबीज्यमन्तरा मुष्कवङ्क्षणम् ।**

१ वेटति **विटपम्** । 'विट आक्रोशशब्दयोः[1]'(भ्वा.-प.से.), 'विटपवि(पि)ष्टपविशिपोलपाः'(उणा-४२५)इति कपचि साधुः । २ महाबीजे साधु **महाबीज्यम्** । 'तत्र साधुः' ४।४।९८॥इति यत् । मुष्कं च वङ्क्षणश्च ऊरुसन्धिः मुष्कवङ्क्षणम्, अन्तरा मुष्कवङ्क्षणम्, अन्तरेत्यव्ययं मध्यार्थम्, मुष्कस्य वङ्क्षणस्य मध्यवर्तीत्यर्थः । मुष्कवङ्क्षणमिह क्लीबे द्वितीयैकवचनम् । यद्वाग्भटः-''मुष्कवङ्क्षणयोर्मध्ये विटपं खण्ड(षण्ढ)तारकम्''[अष्टाङ्गहृदयम्, शारीरस्थानम्, अध्यायः-४, श्लो-८]इति । द्वे अण्डमूलस्य ॥

**ऊरुसन्धिर्वङ्क्षणः स्यात्**

१ वस्तेरधस्तादूरुसन्धिः सक्थिमूलसन्धिः, वङ्क्षत्याकाङ्क्षत्यावरणं **वङ्क्षणः**, पुंसि । ''काक्षि वाक्षि माक्षि काङ्क्षायाम्[2]'(भ्वा.प.से.), नन्द्यादित्वाद् ल्युः, पृषोदरादित्वाद् ह्रस्वत्वम् । एकं पेडूनी[3]चइसाथलमूलसन्धेः ॥

**सक्थ्यूरुः**

१ सजते(सज्यते) वस्त्रमत्रेति **सक्थि**। 'षञ्ज सङ्गे'(भ्वा.प.अ.),'असिसञ्जिभ्यां[4] क्थिन्'(उणा-४३४) । २ अर्यते गम्यतेऽनेन **ऊरुः**, पुंस्त्रीलिङ्गः ।'ऋ गतौ'(भ्वा.प.से.), 'अर्तेरुर् च' (हैमोणा-७३६)इत्युः, ऊरादेशश्च धातोः । यद्वा 'ऊर्णोतेर्णु- (नु)[लोप]श्च'(उणा-३०)इति कुः, णु(नु)लोपश्चेति ऊरुर्वा ।अमरस्तु:-''पुमानूरुः''[अमरकोषः२।६।७३॥]इत्याह। एकं (द्वे) 'साथल' इति ख्यातस्य ॥

**तस्य पर्व तु ॥६१३॥**

**जानुर्नलकीलोऽष्ठीवान्**

१ तस्य ऊरोः पर्व ग्रन्थिः ॥६१३॥, जनयति गतिम्, जायतेऽनेनाकुञ्चनादिर्वा **जानुः**, पुंक्लीबलिङ्गः[5] । 'जन जनने'(तु.प.से.), 'जनी प्रादुर्भावे'(दि.आ.से.), 'द्र(दृ)सनिजनिचरिचटिभ्यो ञुण्'(उणा-३) ञुणिति द्व्यनुबन्धविधानसामर्थ्याद् 'जनिवध्योश्च'७।३।३५॥ इति वृद्ध्यभावो न भवति, अर्धर्चादित्वाद् ''जानु जुहोति''[ ]इति श्रुतेश्च । २ नलं कीलयति **नलकीलः** । 'कील बन्धने'(भ्वा.प.से.), अच् । ३ अस्थीन्यत्र सन्ति **अष्ठीवान्**, पुंनपुंसकलिङ्गः । ''अष्ठीवदस्त्रियाम्''[अमरकोषः२।६।७२॥]इत्यमरः । अस्थियोगादतिशायिने मतुपि 'आसन्दीवत्-'८।२।१२॥ आदिसूत्रेणाऽष्ठीभावो मतोर्मस्य वत्वं च । अष्ठीवन्तौ, अष्ठीवन्तः इत्यादि । त्रीणि 'गोडा' इति ख्यातस्य ॥

**पश्चाद्भागोऽस्य मन्दिरः ।**

१ अस्य जानोः पश्चाद्भागः, मन्दते गच्छत्यनेने[6] **मन्दिरः** । 'मदि स्तुत्यादौ'(भ्वा.आ.से.), 'इषिमदि-'(उणा-५१)इति किरच् । यद्वाग्भटः-''जानुनस्त्र्यङ्गुलादूर्ध्वं मन्दिरः स्तम्भशोफकृत्[7]''[अष्टाङ्गहृदयम्, शारीरस्थानम्, अध्यायः-४, श्लो-६] । एकं जानुनः । 'ढांकणी' इति ख्यातायाः[8] ॥

**कपोली त्वग्रिमः**

१ जानोरग्रिमभागः, कपिः मौत्रः, 'कपिगडिपटिभ्य ओलः[9]' (उणा-६६), गौरादिः [**कपोली**] । एकं जानोरग्रिमभागस्य ॥

**जङ्घा प्रसृता नलकिन्यपि ॥६१४॥**

१ जङ्घन्यते कुटिलं गच्छति **जङ्घा** । कौटिल्ययङन्ताद् जङ्घन्यधातोः 'अन्येभ्योऽपि(अन्येष्वपि)-'(३।२।१०१॥)इति डः, 'यङोऽचि च'२।४।७४॥ इति यङो लुक्, टिलोपः। घ्नन्ति गच्छन्त्यनया वा । 'हन्(हन) हिंसागत्योः' (अ.प.अ.), 'हन्तेर्ज[ङ्]घ च'( )इति अचि धातोर्जङ्घादेशश्च। ''जङ्घन्यते जङ्घा, 'हन्(हन) हिंसागत्योः'(अ.प.अ.), अस्माद् यङ्लुगन्तात् पचाद्यचि, 'नासिकोदरो(रौ)ष्ठजङ्घा-' ४।१।५५॥ इति निपातनाट्टिलोपः''[[10]]इत्यात्रेयः। 'कण्ठपृष्ठकटि[11]ग्रीवा-'६।२।११४॥ इत्यत्र तु न्यासे यङ्लुगन्तादेवाऽचि नलोपमुक्त्वा (लोपमुक्त्वा) 'हन्तेर्ज[ङ्]घ् च'( )इत्यचि जङ्घादेशे व्युत्पादितम्[12] । २ सरति स्म गच्छति स्म **प्रसृता**।

---

१. 'विट आक्रोशे' इति स्वामी, 'विट शब्दे' इति मैत्रेयसायणौ ॥ २. मैत्रेयसायणसम्मतोऽयं धातुपाठः, 'काक्षि वाक्षि माक्षि द्राक्षि ध्राक्षि ध्वाक्षि काङ्क्षायाम्' इति स्वामी ॥ ३. 'नींचइं' इति१, 'नीचे' इति३॥ ४. '-षजि-' इति१.२.३॥ ५. 'पुंक्ली.' इत्येव३॥ ६. '-नेति' इति३॥ ७. 'जानुनस्त्र्यङ्गुलादूर्ध्वमाण्यूरुस्तम्भशोफकृत्' इत्यष्टाङ्गहृदये, पृ.४०९॥ ८. 'भाषा' इति३॥ ९. 'कपिगडिगण्डिकटिपटिभ्यः कोलच्' इत्युणादिगणे ॥ १०. द्र. माधवीयधातुवृत्तिः, अदादिः, धातुसं-२, पृ.३१९॥ ११. अष्टाध्याय्यां '-कटि-' इति नास्ति ॥ १२. ''अत्यन्तं हन्ति गच्छतीति हन्तेर्यङ्, द्विर्वचनम्, 'नुगतोऽनुनासिकान्तस्य' इति नुक्, 'अभ्यासाच्च' इति कुत्वम्, जङ्घन्य इति स्थिते पचाद्यच्, 'यङोऽचि च' इति यङो लुक्, टाप्, चित्स्वरेण जङ्घाशब्दोऽन्तोदात्तः । अथ वा-'हन्तेरच् जङ्घ च' इति हन्तेरच्प्रत्यये जङ्घ इत्ययमादेश इत्येवं वा जङ्घाशब्दो व्युत्पाद्यते ।'' इति न्यासः, काशिकावृत्तिः, भा-५, ६।२।११५॥, पृ.१०६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'सृ गतौ'(भ्वा.प.अ.), 'गत्यर्थाकर्मक-'३।४।७२॥ इति कर्तरि क्तः । प्रकृष्टं सृतं गमनमनया वा । ४ नलिके(नलके) विद्यतेऽस्या **नलकिनी**[1] । व्रीह्यादित्वाट्ठन् । सामान्यतः त्रीणि जङ्घायाः ॥६१४॥

### प्रतिजङ्घा त्वग्रजङ्घा

१ जङ्घां प्रतिगता **प्रतिजङ्घा** । २ जङ्घाया अग्रभागः **अग्रजङ्घा** । द्वे जङ्घाग्रभागस्य ॥

### पिण्डिका तु पिचण्डिका ।

१ मांसस्य पिण्डोऽस्त्यस्याः **पिण्डिका** । 'अत इनि-ठनौ'२।५।१०२॥ इति ठन् । २ पिचण्डप्रतिकृतिः **पिचण्डिका**। 'इवे प्रतिकृतौ'५।३।९६॥ इति कन्, 'प्रत्ययस्थात्-'७।३।४४॥ इतीत्वम् । द्वे पिण्डीति ख्यातायाः ॥

### गुल्फस्तु चरणग्रन्थिर्घुटको[2] घुण्टको घुटः ॥६१५॥

१ गलति **गुल्फः** । 'गल अदने'(भ्वा.प.से.), 'गलेश्च[3]'() इति फक्, अत उच्च । २ चरणस्य ग्रन्थिः **चरणग्रन्थिः**। ३ घुट्यते परिवृत्यतेऽनेन **घुटकः** । 'घुट परिवर्तने'(भ्वा.आ.से.), 'क्वुन् शिल्पिसंज्ञयोः-'(उणा-१९०)इति क्वुन् । ४ घुणत्यनेन घुण्टः । 'घुण(घुण) भ्रमणे'(तु.प.से.), 'घटाघाटा-'(हैमोणा-१४१)इति टप्रत्यये साधुः, स्वार्थे कनि **घुण्टकः** । सर्वेऽपि पुंस्त्रीलिङ्गाः[4] । ५ घुटति **घुटः** । 'घुट प्रतीघाते'(तु.प.से.), तुदादिः, 'इगुपध-'३।१।१३५॥ इति कः। पञ्च चरणग्रन्थेः । 'गिरिआ[5]' इति भाषा ॥६१५॥

### चरणः क्रमणः पादः पदोऽह्रिश्चलनः क्रमः ।

१ चरत्येनेन **चरणः**, पुंक्ली.। 'चर गतौ'(भ्वा.प.से.), करणे ल्युट् । २ क्रामन्त्यनेन[6] **क्रमणः** । 'क्रमु पादविक्षेपे' (भ्वा.प.से.), करणे ल्युट् । ३ पद्यतेऽसौ **पादः** । 'पद गतौ' (दि.आ.अ.), 'पदरुजवि[श]स्पृशो घञ्'३।३।१६॥ कर्तरि । पद्यते गम्यतेऽनेनेति । 'हलश्च'३।३।१२१॥ इति घञि वा । ४ पद्यते गम्यतेऽनेनेति **पदः**, पुंक्ली. । 'पद गतौ'(दि.आ.अ.), 'आ[7] खनो घ च'३।३।१२५॥ इति घित्करणादन्यतोऽपि घः । पदमिति क्लीबेऽपि, अत्र च 'अनुदात्तं पदमेकवर्जम्'६।१।१५८॥ इति सामान्यज्ञापकम् । पाद् पद् इति व्यञ्जनदकारान्तावपि । पत् पद्, पदौ, पदः इत्यादि । पात् पाद्, पादौ, पादः इत्यादि । "पद्पादंह्रिश्चरणोऽस्त्री"[8][ ]इति व्याडिः । ५ अंह्यतेऽनेन **अंह्रिः**, पुंसि । 'अहि गतौ'(भ्वा.आ.से.), 'वङ्क्र्यादयश्च'(उणा-५०६) इति क्रिनि साधुः । अंह्र्यादयो घकारश्रुतिकृतोऽपि । "अंहो रंहो द्रुहिणाः संहर्षांह्री च घश्रुतिकृतयः"[9][ ]इति । "पदंघ्रिः" [अमरकोषः२।६।७१॥]इत्यमरश्च । ६ चलन्त्यनेन **चलनः** । 'चल चलने[10]'(भ्वा.तु.प.से.), 'चलनशब्दार्थादकमर्काद् युच्' ३।२।१४८॥ इति युच् । ७ क्रामन्त्यनेन **क्रमः** । 'क्रमु पादविक्षेपे'(भ्वा.प.से.), करणे घञ्, 'नोदात्तोपदेशस्य-'७।३।-३४॥ इति वृद्धिनिषेधः । सप्त[11] चरणस्य ॥

### पादमूलं गोहिरं स्यात्

१ पादयोर्मूलं **पादमूलम्** । २ गुह्यते **गोहिरम्** । 'गुहू संवरणे'(भ्वा.आ.वे.), बाहुलकाद् 'इषिमदि-'(उणा-५१)इति किरचि साधुः । द्वे पादमूलस्य । 'पगतली' इति भाषा ॥

### पार्ष्णिस्तु घुटयोरधः ॥६१६॥

१ पृष्यते सिच्यते प्रक्षालनकाले भूरनेन **पार्ष्णिः**, पुंस्त्रीलिङ्गः[12] । "पार्ष्णिः स्त्रीपुंसयोः पादमूले स्याद् ध्वजिनीकटौ"[13][ ]इति रन्तिदेवः । 'पृषु सेचने'(भ्वा.प.से.), 'घृणिपृष्णि(पृश्नि)पार्ष्णिभूष्णि[14]-'(उणा-४९२)इत्यादिना साधुः। घुटयोः 'गिरिया' इति प्रसिद्धनाम्नोरधस्तात् पश्चाद्भाग इत्यर्थः। एकं 'पानही[15]' इति ख्यातायाः[16] ॥६१६॥

### पादाग्रं प्रपदं

१ पादस्याग्रं **पादाग्रम्** । २ प्रकृष्टं पदं **प्रपदम्** । प्रादिसमासः । प्रगतं पदमस्माद्वा । द्वे पादाग्रस्य ॥

### क्षिप्रं त्वङ्गुष्ठाऽङ्गुलिमध्यतः ।

१ क्षिप्यतेऽनेन **क्षिप्रम्** । 'क्षिप प्रेरणे'(दि.प.अ,तु.

---

१. 'नलि-' इति२.३॥ २. 'घुटि-' इति मुद्रिताभिधानचिन्तामणिनाममालायाम्, स्वोपज्ञटीकापि तमाश्रित्यैव ॥ ३. 'गलश्च' इति२.३॥ ४. अयं ग्रन्थो घुटशब्दविवरणात् पश्चादुचितः ॥ ५. '-या' इति४॥ ६. 'क्रमत्य-' इति३॥ ७. 'आ' इत्यष्टाध्यायां नास्ति ॥ ८. द्र. स्वोपज्ञटीका ३।६१६॥, पृ.१३९॥, तत्र 'पत्पादोंह्रि-' इति दृश्यते ॥ ९. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३२९, पृ.४१२॥, रामाश्रमी २।६।७१॥, पृ.२९२॥ १०. 'चलने' इत्यर्थे चलधातुर्न दृश्यते ॥ ११. 'षट्' इति१.२.४॥ १२. 'पुंस्त्री' इत्येव३॥ १३. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३३०, पृ.४१३॥, रामाश्रमी २।६।७२॥, पृ.२९२॥ १४. '-भूष्णि-' इत्युणादिगणसूत्रे न दृश्यते ॥ १५. '-हीन' इति३॥ १६. 'ख्यातस्य' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उ.अ.), 'स्फायितञ्चि-'(उणा-१७०)इत्यादिना रक् । अङ्गुष्ठश्चाङ्गुलयश्च अङ्गुष्ठाङ्गुलयः, तासां मध्यं अङ्गुष्ठाङ्गुलिमध्यम्, तत्र, सप्तम्यर्थे तसिल् । यद्वाग्भटः-"अङ्गुष्ठाङ्गुलिमध्यस्थं क्षिप्रमाक्षेपमारणम्"[अष्टाङ्गहृदयम्, शारीरस्थानम्, अध्यायः-४, श्लो-३]इति । एकमङ्गुष्ठाङ्गुलिमध्यभागस्य ॥

**कूर्चं[1] क्षिप्रस्योपरि**

१ क्षिप्रस्याङ्गुष्ठाङ्गुलिमध्यस्योपरि द्व्यङ्गुलस्योपरिष्ठात् **कूर्चम्** इत्यन्वयः । यद्वाग्भटः-"तस्योर्ध्वं द्व्यङ्गुले कूर्चः पादभ्रमणकम्पकृत्"[अष्टाङ्गहृदयम्, शारीरस्थानम्, अध्यायः-४, श्लो-४]इति । एकमङ्गुष्ठाङ्गुलिमध्योपरितनभागस्य ॥

**अंह्रिस्कन्धः कूर्चशिरः समे ॥६१७॥**

१ अंह्रेः स्कन्धः **अंह्रिस्कन्धः** । २ कूर्चस्य शिरः **कूर्चशिरः** । यद्वाग्भटः-"गुल्फसन्धेरधः कूर्चशिरःशोफरुजाकरम्"[अष्टाङ्गहृदयम्, शारीरस्थानम्, अध्यायः-४, श्लो-४]इति । द्वे गुल्फसन्धेरधः प्रत्यङ्गस्य ॥६१७॥

**तलहृदयं तु तलं मध्ये पादतलस्य तत् ।**

१ तलस्य हृदयं **तलहृदयम्** । २ तलति **तलम्** । 'तल प्रतिष्ठायाम्'(चु.प.से.), अच् । तच्च पदे तलस्य मध्ये भवति । यद्वाग्भटः-

"मध्ये पादतलस्याहुरभितो मध्यमाङ्गुलिम् ।
तलहृन्नाम रुजया तत्र विद्धस्य पञ्चता ॥१॥"

[अष्टाङ्गहृदयम्, शारीरस्थानम्, अध्यायः-४, श्लो-२-३] । अत्र तलहृदिति पर्यायेणोक्तम् । एकं पादतलमध्यस्य ॥

**तिलकः कालकः पिप्लुर्जडुलस्तिलकालकः ॥६१८॥**

१ तिलप्रतिकृतिः **तिलकः** । 'इवे प्रतिकृतौ'५।३।९६॥ इति तन् । २ काल एव **कालकः** । ३ अपिप्लवते **पिप्लुः**, पुंसि, पृषोदरादिः । ४ जडति **जडुलः** । 'जड घात्ये[2]'(भ्वा.-प.से.), बाहुलकादुलन् । ५ तिल इव कालकः **तिलकालकः** । पञ्च देहस्थकृष्णचिह्नस्य ॥६१८॥

**रसासृग्मांसमेदोऽस्थिमज्ज(मज्जा)शुक्राणि धातवः ।**
**सप्तैव दश वैकेषां रोमत्वक्स्नायुभिः सह ॥६१९॥**

१ दधति शरीरमिति **धातवः**, पुंसि । 'डुधाञ् धारणादौ'(जु.उ.अ.), 'सितनिगमिमसिसिचि(सचि)-'(उणा-६९)इति तुन् । रसो देहधातुः१, असृक्२, मांसः३, मेदो वपाशुद्धमांसस्य स्नेह इत्यर्थः४, अस्थि हड्डम्(५), मज्जा अस्थिमध्यगतमीजिका[3]६, शुक्रं रेतः७, एते सप्त, एवेत्यवधारणे, वा अथवा, एकेषाम् अन्येषां मतेन रोमत्वक्स्नायुभिः सह दश स्युः, एते दशाऽपि धातवः प्रोच्यन्त इत्यर्थः ॥६१९॥

अथ रसादीन् क्रमेणाऽऽह, तत्र प्रथमधातुमाह-

**रस आहारतेजोऽग्निसंभवः षड्रसासवः ।**
**आत्रेयोऽसृक्करो धातुर्घनमूलमहापरः ॥६२०॥**

१ रसयति स्नेहयति **रसः** । 'रस स्नेहे[4]'(चु.उ.से.), अच् । २ आहारस्य तेजो निर्यास **आहारतेजः**, क्लीबे । आहारतेजसी, आहारतेजांसि इत्यादि । ३ अग्नेर्जाठराग्नेः संभवति **अग्निसंभवः**[5], अच् । ४ षण्णां मधुरादीनाम् [रसानाम्] आसवः **षड्रसासवः** । ५ अत्रेरपत्यम्, तज्जन्यत्वाद् **आत्रेयः** । ६ असृक् रक्तं करोति **असृक्करः** । 'डुकृञ् करणे'(त.उ.अ.), 'कृञो हेतुताच्छील्य-'३।२।२०॥ इति टः[6] । ७-९ घनादित्रिभ्यः परो धातुः, तेन **घनधातुः, मूलधातुः, महाधातुः** । नव रसस्य । 'देहधातु' इति भाषा ॥६२०॥

अथ द्वितीयधातुमाह-

**रक्तं रुधिरमाग्नेयं विस्त्रं तेजोभवे रसात् ।**
**शोणितं लोहितमसृग् वासिष्ठं[7] प्राणदाऽऽसुरे ॥६२१॥**
**क्षतजं मांसकार्यस्त्रम्**

१ रक्तवर्णत्वाद् **रक्तम्** । २ रुध्यते चर्मणा शिराभिश्च । रुणद्धि स्रोतांसि वा **रुधिरम्** । 'रुधिर् आवरणे'(रु.उ.अ.), 'इषिमदिमुदिखिदिछिदि(च्छिदि)भिदिमेदितिमिचिमिदितिमिमिहिमुहिमुचिरुधिशुषिबधिभ्यः किरच्[8]'(उणा-५१) । ३ अग्नये हितम् **आग्नेयम्** । 'अग्नेर्ढक्'४।२।३३॥ ४ विस्यति

१. 'पादमध्यस्य' इति१॥ २. घात्येऽर्थे जडधात्वाभावादत्र 'जल घातने' इति युक्तः, तथा च डलयोरैक्याद् जडुलशब्दसिद्धिः ॥ ३. '-मध्यगामंजिका' इति४, '-मींजिका' इति१॥ ४. 'रस आस्वादस्नेहनयोः' इति क्षीरतरङ्गिण्यादयः ॥ ५. 'आहारसंभवः' इति१.२.३॥ ६. 'घः' इति३॥ ७. 'वाशि-' इति१॥ ८. 'इषिमदिमुदिखिदिच्छिदिभिदिमन्दिचन्दितिमिमिहिमुहिमुचिरुचिरुधिबन्धिशुषिभ्यः किरच्' इत्युणादिगणसूत्रम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**विस्रम्**, दन्त्यसकारम् । विसधातोर्बाहुलकात् 'स्फायि-'(उणा-१७०)इत्यादिना रक्। ५-६ रसादिति, रसशब्दात् पुरः तेजोभवे योज्येते[1], तेन **रसतेजः** । रसतेजसी, रसतेजांसि इत्यादि । **रसभवः (रसभवम्)** । ७ शोण्यते **शोणितम्**, तालव्यशम्। 'शोणृ वर्णगत्योः'(भ्वा.प.से.), 'रोहिहृश्यारुहि-'(हैमोणा-२१०)इत्यादिना इतच् । ८ लोहितवर्णत्वाद् **लोहितम्**। ९ न सृजति त्यजति देहं धात्वन्तरं वा **असृक्**, क्लीबे । 'सृज विसर्गे'(तु.प.अ.), 'ऋत्विग्दधृक्-'३।२।५९॥ इत्यादिना क्विन्, झलि पदान्ते च न्यङ्क्वादित्वात् कुत्वम्, नाजादौ(व्रश्चादौ) निपातनस्येष्टफलत्वात् । असृग्भ्याम्, असृग्भिः इत्यादि । ''न सृजति शौचमित्यसृक्''[2]इति तु सुभूतिः । १० वसिष्ठस्येदं[3] **वासिष्ठम्** । 'तस्येदम्'४।३।१२०॥ इत्यण् । ११ प्राणं बलं ददाति **प्राणदम्**। १२ असुराणामिदं प्रियम् **आसुरम्** ॥६२१॥ १३ क्षताज्जायते **क्षतजम्** । १४ मांसं करोति **मांसकारि** । ग्रहादित्वाण्णिनिः । १५ अस्यते क्षिप्यते रोगोपशमनायेति **अस्रम्**, दन्त्यसम् । 'असु क्षेपणे'(दि.प.से.), 'बहुलमन्यत्रापि'( )इति रक्। पञ्चदश रुधिरस्य । ''शोध्यं कीलालम्''[शेषनाममाला ३।१२८॥]शैषिके ॥

अथ तृतीयं धातुमाह-

**मांसं[1] पलल[2]जङ्गले[3] ।**
**रक्तात्तेजो[4]भवे[5] क्रव्यं[6] काश्यपं[7] तरसा[8]मिषे[9] ॥६२२॥**
**मेदस्कृत्[10] पिशितं[11] कीनं[12] पलम्[13]**

१ उपचयापचयौ मन्येते ज्ञायेतेऽत्र **मांसम्**, पुंक्लीबलिङ्गः[4] । 'मनु ज्ञाने'(दि.आ.अ.), 'मनेर्दीर्घश्च'(उणा-३३४) इति सप्रत्ययो दीर्घत्वं च । ''मां स भक्षयिताऽमुत्र''[5]इति नैरुक्ताः । यन्मनुः-

''मां स भक्षयिताऽमुत्र यस्य मांसमिहाऽद्म्यहम् ।
एतन्मांसस्य मांसत्वं प्रवदन्ति मनीषिणः ॥१॥''

[मनुस्मृतिः, अध्यायः-५, श्लो-५५]इति । २ पल्यते रक्ष्यते[6] **पललम्** । 'पल रक्षणे[7]'(चु.उ.से.), वृषादित्वात् कलच् । यद्वा 'पल गतौ'(भ्वा.प.से.), 'कलतृपेश्च(कलस्तृपश्च)'(उणा-१०४)इत्यत्र प्राक्प्रत्ययनिर्देशादन्येभ्योऽपि भवतीति कुण्डलादिवदस्मादपि कलप्रत्ययः । ३ जायते रुधिराद् **जङ्गलम्**, पुंक्लीबलिङ्गः । 'कम्बलादयश्च'( )इति साधुः । ''जङ्गलो निर्जले देशे त्रिलिङ्गः पिशितेऽस्त्रियाम्''[ ]इति गौडः । ४-५ रक्तशब्दात् तेजोभवे शब्दौ योज्यौ, तेन **रक्ततेजः**, **रक्तभवम्**। ६ क्रप्यतेऽनुकम्प्यते **क्रव्यम्** । 'क्रप कृपायां गतौ' (भ्वा.आ.से.), 'पोरदुपधात्'३।१।९८॥ इति यत्, नैरुक्तं पस्य वत्वम् । क्रूयत इति वा । 'क्रुङ् गतौ[9]'(भ्वा.आ.अ.), 'अचो यत्'३।१।९७॥ । ७ कश्यपस्येदं **काश्यपम्**, तालव्यशमध्यम्। ८ तरो बलमस्त्यत्र **तरसम्** । अर्शआदित्वादच् । तरति प्लवतेऽनेनेति वा । तरतेर्दिवसवदसच् । ९ आमिषति समन्तादभिव्यक्तं भवति **आमिषम्**, पुंक्लीबलिङ्गः[8] । 'मिष स्पर्धायाम्'(तु.प.से.), उपसर्गबलादुन्मेषवदभिव्यक्त्यर्थः,'इगुपध-'३।१।१३५॥इति कः । अमति गच्छति पीनत्वमनेनेति वा । 'अम्(अम) गतौ[10]'(भ्वा.प.से.), 'अमेर्दीर्घश्च'(उणा-४६) इति टिषच् ॥६२२॥ १० मेदः करोति **मेदस्कृत्** । ११ पिशति (पिंशति) अवयवीभवति **पिशितम्** । 'पिश अवयवे'(तु.-प.से.), इतच्। ''कपिशितं पिशितं मदनाग्निना''[शिशुपालवधम्, सर्गः-६, श्लो-५]इति माघात् तालव्यमध्यम् । १२ दीप्यतेऽनेन **कीनम्** । 'कन दीप्तौ[11]'(भ्वा.प.से.), पृषोदरादिः । १३ पलति रक्षति देहं **पलम्**, पुंक्ली. । 'पल रक्षणे[12]'(चु.उ.से.), अच् । त्रयोदश सामान्यतो मांसस्य ॥ ''उद्घ[:] समारटं लेपनम्''[शेषनाममाला३।१२८॥]इति शैषिकाणि ॥

अथ मांसविशेषानाह-

**पेश्य[1]स्तु तल्लताः ।**

१ पिशन्ति(पिंशन्ति) **पेशयः** । 'पिश[13] अवयवे'(तु.प.से.), 'इगुपधात् कित्'(उणा-५५९)इतीन्, बाहुलकाद् गुणः, 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीष् [**पेश्यः**]। पेशिस्तृतीयस्वरान्तोऽपि । तस्य मांसस्य लताः तल्लताः । एकं मांसपिण्ड्याः ॥

१. 'योज्यते' इति३॥ २. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३२१, पृ.४०१॥ ३. 'वशि-' इति२.४॥ ४. 'पुंक्ली.' इत्येव३॥ ५. द्र. अम.क्षीर.२।६।६३॥, पृ.१४७॥, स्वोपज्ञटीका ३।६२२॥, पृ.१४०॥ ६. 'रक्षते' इति३.४॥ ७. सायणाऽसम्मतोऽयम् ॥ ८. 'पुंक्ली.' इत्येव३॥ ९. 'च्युङ् ज्युङ्-' इत्यत्र सायणेनोक्तम्-'क्रुङ् इति क्वचित्पठ्यते' इति, माधवीयधातुवृत्तिः, भ्वादिः, धातुसं-६७३, पृ.२६७॥ १०. 'गत्यादिषु' इति क्षीरतरङ्गिण्यादयः॥ ११. 'कनी दीप्तिकान्तिगतिषु' इति क्षीरतरङ्गिण्यादयः ॥ १२. सायणाऽसम्मतोऽयं धातुः ॥ १३. 'पिशि' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**बुक्का हृद् हृदयं वृक्का सुरसं च तदग्रिमम् ॥६२३॥**

१ धातूनामनेकार्थत्वाद् बुक्यते स्वादुत्वेन मृग्यते **बुक्का**, नकारान्तः । 'बुक्क भाषणे(भषणे)'(भ्वा.प.से.,चु.-उ.से.) 'कनिन् युवृषितक्षि-'(उणा-१५४)इति सूत्रे 'अन्येभ्योऽपि' इति वचनात् कन्[1] । बुक्कानौ, **बुक्कानः** इत्यादि । मिश्रास्तु-बुक्यते(बुक्क्यते) मृग्यत इति बुक्का, घञन्तः । स्वमते पुंलिङ्गेऽयम्, मिश्रमते स्त्रीलिङ्गष्टाबन्तः । बुक्कः[2] पुमानपि, "शोणितेषु स्त्रियां बुक्का बुक्कस्तु समयोर्द्वयोः"[2]इति रभसात्। रुद्रकलिङ्गादिभिः-"बुक्क(बुक्का) नान्तम्, क्लीबमव्युत्पन्नम्"[3]इत्युक्तम् । "उरस्यपि च बुक्कायां हृदयं मानसेऽपि च" [त्रिकाण्डशेषः३।३।३२५॥]इति त्रिकाण्डशेषः । भागुरिस्तु-"अग्रमांसं भवेद् बुक्कम्"[4]इत्यदन्तं क्लीबे आह । "बुक्कस्याग्रं सम्मुखीभूतं मांसं बुक्काग्रमांसमित्येकं नाम"[3]इत्येके। २ ह्रियते **हृद्** । 'हृञो बहुलम्'( )इति दुक् । ३ 'वृहोः षुक्दुकौ च'(उणा-५४०)इति यति दुकि च **हृदयम्** । ४ वृक्यते(वृज्यते) आदीयते **वृक्का** । 'निष्कतुर(रु)ष्क-' (हैमोणा-२६)इति के निपात्यते । स्त्रीलिङ्गोऽयम्, टाबन्तः । यद्गौडः-"स्त्रियां वृक्का"[4]इति । वैजयन्तीकारस्तु-"वृक्कौ पार्श्वगतौ गुलौ ([5]वृक्यौ पार्श्वगतौ गुडौ)"[वैजयन्तीकोषः ४।४।११२॥]इत्याह । ५ सुष्ठु रस्यते **सुरसम्** । 'रस आस्वादे' (चु.उ.से.), घञर्थे कः । तदिति मांसम्, अग्रिमं मुख्यम्। "बुक्का अग्रमांसम्, हृदयं च जीवाधारः पद्मम्"[4]इत्यमरः पृथक्पृथगाह । उक्तं च-

"पद्मकोशप्रतीकाशं रुचिरं चाप्यधोमुखम् ।
हृदयं तद्विजानीयाद् विश्वस्यायतनं महत् ॥१॥"

[3]इति । पञ्च प्रधानमांसस्य ॥६२३॥

**शुष्कं वल्लूरमुत्तप्तम्**

१ शुष्कं मांसम्, वल्लते संवृतं भवति **वल्लूरम्**, त्रिलिङ्गः । 'वल वल्ल संवरणे'(भ्वा.आ.से.), 'खर्जिपिञ्जादिभ्य ऊरोलचौ'(उणा-५३०)इत्यूरः । स्त्रियां वल्लूरा टापि । २ उदत्यर्थं तप्तम् **उत्तप्तम्** । उत्तप्यते शोष्यत इति वा । "उत्तप्तं शुष्कमांसे तप्तेऽपि"[6]इति श्रीधरः । द्वे शुष्कमांसस्य ॥

**पूयदूष्ये पुनः समे ।**

१ पूयते दुर्गन्धीभवति **पूयम्**, पुंक्लीबलिङ्गः[7]। 'पूयी विशरणे[8]'(भ्वा.आ.से.), अच् । २ दूष्यते तद् **दूष्यम्** । 'दुष वैकृत्ये'(दि.प.अ.) 'ऋहलोर्ण्यत्'३।१।१२४॥ । द्वे 'परू' इति ख्यातस्य[9] ॥

अथ तुर्यं धातुमाह-

**मेदोऽस्थिकृद् वपा मांसात् तेजो-जे गौतमं वसा ॥६२४॥**

१ मेद्यति स्निह्यति **मेदः**, क्लीबे । 'ञिमिदा स्नेहने'(दि.प.से.), '-असुन्'(उणा-६२८)। मेदसी, मेदांसि इत्यादि। "मेदो घञन्तः"[10]इत्यन्ये । २ अस्थीनि करोति **अस्थिकृत्** । ३ उप्यते **वपा** । 'टुवप् बीजतन्तुसन्ताने' (भ्वा.उ.अ.), भिदादित्वादङ् । वपति शुक्रं तत्प्रभवत्वाद्वा वपा। अचि टाप्। ४-५ मांसशब्दात् तेजोजे योज्ये, तेन **मांसतेजः**, क्लीबे, सकारान्तः, **मांसजम्** । ६ गोतमस्येदं **गौतमम्** । ७ वस्ते आच्छादयति मांसम्, वसति प्राणिषु वा **वसा** । 'वस आच्छादने'(अ.आ.से.), 'वस निवासे' (भ्वा.प.अ.) वा, भिदादित्वादङ्, अच् वा । "शुद्धमांसस्य यः स्नेहः, सा वसा"[11]इति तु वैद्याः । सप्त मेदसः । 'मांसनु[12] चीकट' इति भाषा ॥६२४॥

अथ तद्भेदानाह-

**गोदं तु मस्तकस्नेहो मस्तिष्को मस्तुलुङ्गकः ।**

१ गुध्यते अन्तःशिरो वेष्टयति **गोदम्** । 'गुध परिवेष्टने'(दि.प.से.), अच्, पृषोदरादिः, पुंस्ययम्(क्लीबेऽयम्)। वाचस्पतिस्तु-"गोदोऽस्त्री मस्तुलुङ्गकम्"[13]इति पुंस्यप्याह।

१. ३प्रतौ नास्ति ॥ २. द्र. टीकासर्वस्वम्, भा-२, २।६।६४॥, पृ.३२३॥, तत्र "शोणितान्त्रे स्त्रियां वृक्का बृक्कं तु (समर?) द्वयोः" इति दृश्यते, पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३२२, पृ.४०२॥, रामाश्रमी २।६।६४॥, पृ.२८८॥, तयोः 'बुक्कस्तु समयोर्द्वयोः' इत्यस्य स्थाने 'बुक्कं सुरसमद्वयोः' इति दृश्यते ॥ ३. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३२२, पृ.४०२॥ ४. द्र. स्वोपज्ञटीका ३।६२३॥, पृ.१४०॥ ५. कोष्ठान्तर्गतपाठो मुद्रितवैजयन्तीकोषे दृश्यते, ४।४।११२॥, पृ.१३४॥ ६. श्रीधरकृतविश्वलोचनकोशे तु "उत्तप्तं शुष्के पिशिते संतप्ते च परिप्लुते"[तान्तवर्गः, श्लो-९४, पृ.१३५]इति दृश्यते ॥ ७. 'पुंक्लीब' इत्येव३॥ ८. 'पूयी विशरणे दुर्गन्धे च' इति क्षीरतरङ्गिण्यादयः ॥ ९. इतोऽग्रे ४प्रतौ 'राध इति भाषा' इति दृश्यते ॥ १०. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३२२, पृ.४०२॥ ११. द्र. अम.क्षीर.२।६।६४॥, पृ.१४८॥, स्वोपज्ञटीका ३।६२४॥, पृ.१४०॥ १२. '-नो' इति३, '-नूं' इति४॥ १३. द्र. स्वोपज्ञटीका ३।६२५॥, पृ.१४०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

२ मस्तकस्य स्नेहो **मस्तकस्नेहः** । ३ मस्तकमिष्यति गच्छति **मस्तिष्कः**, पुंक्लीबलिङ्गः[1] । 'इषु(इष) गतौ'(दि.प.से.), पृषोदरादित्वात् साधुः । ४ मस्तकमालिङ्गति मस्तुलुङ्गः, पृषोदरादित्वात्, कनि **मस्तुलुङ्गकः**, द्व्युकारमध्यः । चत्वारि मस्तकमज्जायाः ॥

अथ पञ्चमं धातुमाह-

**अस्थि कुल्यं भारद्वाजं मेदस्तेजश्च मज्जकृत्**
**॥६२५॥**
**मांसपित्तं श्वदयितं कर्करो देहधारकम् ।**
**मेदोजं कीकसं सारः**

१ अस्यते **अस्थि** । 'असु क्षेपणे'(दि.प.से.), 'असिसञ्जिभ्यां क्थिन्'(उणा-४३४) । २ कुले शरीरे साधु **कुल्यम्** । 'तत्र साधुः'४।४।९८॥ इति यत्, पुंक्ली. । ३ भरद्वाजस्येदं **भारद्वाजम्** । 'तस्येदम्'४।३।१२०॥ इत्यण् । ४ मेदसस्तेजो **मेदस्तेजः**, क्लीबे । ५ मज्जानं करोति **मज्जकृत्** ॥६२५॥ ६ मांसस्य पित्तं **मांसपित्तम्** । ७ शुनो[2] दयितमभीष्टं **श्वदयितम्** । ८ करोति मज्जानं **कर्करः**। बाहुलकात् करन्[3] । ९ देहं धारयति **देहधारकम्** । ण्वुल् । १० मेदसो जातं **मेदोजम्** । ११ किं नाम न कसति व्याप्नोति **कीकसम्** । 'कस गतौ'(भ्वा.प.से.), अच्, पृषोदरादित्वात् किमो मलोपदीर्घौ । "कीकसः कृमिजातौ स्यात् पुंसि कुल्ये नपुंसकम्"[मेदिनीकोशः, सान्तवर्गः, श्लो-२१]इति दन्त्यान्ते मेदिने[4]र्दन्त्यान्तमेव कीकसम् । १२ सरति कालान्तरे **सारः** । 'सृ गतौ'(भ्वा.प.अ.), 'सृ स्थिरे'३।३।१७॥ इति घञ् । हड्डं देश्याम्, संस्कृतेऽपि । यद्वैजयन्ती-"अथाऽस्थि कीकसं हड्डुम्[5]" [वैजयन्तीकोष:४।४।१०८॥]इति । द्वादश अस्थ्नः ॥

**करोटिः शिरसोऽस्थनि ॥६२६॥**

१ के मस्तके रोटति चोरयत्यात्मानं **करोटिः**, स्त्रीलिङ्गः । 'रुट लुट स्तेये[6]'(भ्वाप.से.), 'इन् सर्वधातुभ्यः' (उणा-५५७) । कं वायुं रोटति प्रतिहन्ति वा । "हृदयादुत्थितो वायुस्तत्र प्रतिहन्ति याति"[[7]]इति वैद्याः । ङीषि करोटी च । "करोटं क्लीबम्"[[8]]इति स्वामी । एकं शिरोऽस्थ्नः ॥६२६॥

**कपालकर्परौ तुल्यौ**

१ कं शिरः पालयति **कपालम्**, पुंक्लीबलिङ्गः। "कपालोऽस्त्री"[अमरकोष:२।६।६८॥]इत्यमरः । "कपालोऽस्त्री शिरोऽस्थ्नि स्याद् घटादेः शकले व्रजे"[मेदिनीकोशः, लान्तवर्गः, श्लो-७२]इति मेदिनिः । 'पाल रक्षणे' (चु.उ.से.), 'कर्मण्यण्'३।२।१॥ । कल्प्यते शिरोऽस्थ्नि समर्थो भवति **कर्परः**, पुंनपुंसकलिङ्गः[9] । 'कृपू सामर्थ्ये' (भ्वा.आ.से.), बाहुलकादरन्लत्वाभावौ[10] । कूर्परः षष्ठस्वरादिरपि । यन्महेश्वरः-"कूर्परो जानुनि प्रोक्तः कपालेऽपि[11] च कूर्परः"[विश्वप्रकाशकोशः, रान्तवर्गः, श्लो-१३७]इति । खर्परोऽपि । "खर्परस्तस्करे धूर्ते भिक्षुपात्रकपालयोः"[विश्वप्रकाशकोशः, रान्तवर्गः, श्लो-१३८]इति महेश्वरः । कपालकर्परौ घटादीनां खण्डेऽप्युपचाराद् मस्तकार्धवाचकावेतौ । द्वे कपालस्य । 'कोपरी' इति भाषा ॥

**पृष्ठस्याऽस्थ्नि कशेरुका ।**

१ को वायुः शेते तिष्ठत्यत्र **कशेरुका**, स्त्रीक्लीबयोः । 'जत्वा(त्वा)दयः-'(उणा-५४२)इति रुः, ततः स्वार्थे कन् । कं वायुं शृणाति वा । 'शॄ(शृ) हिंसायाम्'(क्र्या.प.से.), 'के श्रोरङ् (श्र एरङ्) चास्य' (उणा-८८)इति कुप्रत्यय(कूप्रत्यय) एरङादेशश्च, ततः स्वार्थे कन्[12] । तालव्यद्वितीयस्वरमध्योऽप्ययं 'कशारुका[13]' इति । एकं पृष्ठास्थ्नः ॥

**शाखाऽस्थनि स्यान्नलकम्**

१ नलति **नलकम्** । 'णल हिंसायाम्[14]'(भ्वा.प.से.), 'कृञादिभ्यः [संज्ञायां] वुन्'(उणा-७१३) । 'नल(णल) बन्धे[15]'(भ्वा.प.से.)इत्यस्य वा । शाखाशब्दोऽत्र भुजपर्यायः । एकं बाह्वस्थ्नः ॥

---

१. 'पुंक्ली.' इत्येव३॥ २. 'शुनोति दयतिम-' इति४॥ ३. 'करच्' इति३॥ ४. 'मेदिनिः' इति२.४॥ ५. 'विड्डं' इति मुद्रितवैजयन्तीकोषे, ४।४।१०८॥, पृ.१३४॥ ६. 'रुटि लुटि स्तेये' इति क्षीरतरङ्गिण्यादयः ॥ ७. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३२७, पृ.४१०॥ ८. अम.क्षीरस्वामिटीकायां न दृश्यते ॥ ९. 'पुंक्ली.' इति३॥ १०. '-भावे' इति३॥ ११. 'कफोणावपि' इति विश्वप्रकाशकोशे, पृ.१३७॥ १२. 'कनि' इति३, 'केऽणः'७।४।१३॥ इत्यनेन ह्रस्वत्वम् ॥ १३. 'कसे-' इति३, '-रूका' इति२॥ १४. 'णल गन्धे' इति क्षीरतरङ्गिण्यादयः ॥ १५. काश्यपसम्मतोऽयमर्थः, द्र. माधवीयधातुवृत्तिः, भ्वादिः, धातुसं-५६५, पृ.२०७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**पार्श्वास्थ्नि वङ्क्रिपर्शुके ॥६२७॥**

१ वङ्कते वक्रीभवति **वङ्क्रिः**, स्त्रीलिङ्गः । 'वकि गतौ'(भ्वा.आ.से.), 'वङ्क्र्यादयश्च'(उणा-५०६)इति निपातनात् साधुः । २ पूरयति मांसम्, पूर्यते मांसादिना वा पर्शुः । 'शुन् शुचौ पुरः'(चान्द्रोणा-१।३८)इति पृधातोः शुन्प्रत्ययो गुणः, स्वार्थे कनि **पर्शुका** । स्पृशति पार्श्वम् । 'स्पृशेः शुन्शुचौ पृ च'[1] (उणा-७०५)इति पृआदेशे गुणे कनि टापि पर्शुका वा । द्वे 'पांशुली' इति ख्याताया: ॥६२७॥

**शरीरास्थि करङ्कः स्यात् कङ्कालमस्थिपञ्जरः ।**

१ कीर्यते श्वादिभिः **करङ्कः** । 'कॄ विक्षेपे'(तु.-प.से.), 'किरोऽङ्को रो लश्च वा'(हैमोणा-६२)इत्यङ्कः । २ कङ्क्यतेऽभिलष्यते **कङ्कालम्**, पुंक्ली. । 'ककिं[2] लौल्ये'(भ्वा.-आ.से.), अतो बाहुलकात् 'कलपिभ्यां(कुणिपीभ्यां) कालन्' (चान्द्रोणा-३।५०॥) । 'कम्' इत्यव्ययम्, शिरः, को वायुः । कं कं वा आलाति कङ्कालः । 'आतः-'३।१।१३६॥इति कः । कं सुखं कलति क्षिपति वा । 'कल पिल[3] विक्षेपे[4]'(चु.उ.से.), 'कर्मण्यण्'३।२।१॥ । कङ्कान् पक्षिणोऽलति पर्याप्तान् करोतीति, पचाद्यचि वा । ३ अस्थ्नां पञ्जरः **अस्थिपञ्जरः** । त्रीणि समुदितशरीरास्थिपञ्जरस्य । 'पांजरी' इति भाषा ॥

अथ षष्ठं धातुमाह–

**मज्जा तु कौशिकः शुक्रकरोऽस्थ्नः स्नेहसम्भवौ ॥६२८॥**

१ मज्जत्यस्थनि **मज्जा**, नकारन्तः, पुंसि । 'टुमस्जो शुद्धौ'(तु.प.अ.), 'श्वन्नुक्षन्-पूषन्-प्लीहन्-क्लेदन्-स्नेहन्-मूर्धन्-मज्जन्-'(उणा-१५६)इति साधुः । वाचस्पतिस्तु-''अप(अथ) मज्जा द्वयोः''[[5]]इत्येनं स्त्रियामप्याह । तदा ''मज्ज्यतेऽनया मज्जा, भिदादित्वात् साधुः[6]''[स्वोपज्ञटीका ३।६२८॥]इत्याचार्या अपि स्त्रियामेवाहुः । ''मज्जोक्ता मज्जया सह''[[7]]इति शब्दप्रभेदः । २ कुशिकस्याऽयं **कौशिकः**, तालव्यमध्यः । ३ शुक्रं करोति **शुक्रकरः** । 'कृञो हेतुताच्छील्य-'३।२।२०॥इति टः । ४-५ अस्थिशब्दात् स्नेहसम्भवौ शब्दौ योज्यौ, तेन **अस्थिस्नेहः**, **अस्थिसम्भवः** । अस्थितेजोऽपि । पञ्चाऽस्थिगत '[8]मीजी' इति ख्याताया: ॥६२८॥

अथ सप्तमधातुमाह–

**शुक्रं रेतो बलं बीजं वीर्यं मज्जसमुद्भवम् ।**
**आनन्दप्रभवं पुंस्त्वमिन्द्रियं किट्टवर्जितम् ॥६२९॥**
**पौरुषं प्रधानधातुः**

१ शोचन्त्यस्मिन् पतिते सति **शुक्रम्** । 'शुच शोके'(भ्वा.प.से.), 'ऋज्रेन्द्र-'(उणा-१८६)इत्यादिना रक् । शोकति गच्छति स्रवति वा । 'शुक गतौ'(भ्वा.प.से.)अस्मात् प्राक्सूत्रेणैव रक् । २ रीणाति(रिणाति) स्रवति **रेतः**, क्लीब-लिङ्गः[9] । 'रीङ्[10] स्रवणे'(दि.आ.अ.), क्र्यादिः[11], [12]दिवादिर्वा । 'स्रुरीभ्यां तुट् च'(उणा-६४१)इत्यसुन्प्रत्यये तुडागमश्च, गुणः । ३ बलति **बलम्** । 'बल प्राणने'(भ्वा.प.से.), अच् । ४ वेति प्रजायतेऽनेन **बीजम्** । 'वी गत्यादौ'(अ.प.अ.), 'वियो जन् (जक्)'(हैमोणा-१२७)इति । वेति प्रजायते गच्छत्यनेना-तृण्यं पितेति व्युत्पत्तिर्वा । बीजिलौकिको वा धातुः । ५ वीरयति[13] विक्रामयत्यनेन **वीर्यम्**, क्लीबे । 'वीर विक्रान्तौ' (चु.उ.से.), चुरादिः, 'अचो यत्'३।१।९७॥ । वीरे साध्विति वा । 'तत्र साधुः'४।४।९८॥इति यत् । ६ मज्ज[त]ः समुद्भवति **मज्जसमुद्भवम्**, अच् । ७ आनन्दात् प्रभवति **आनन्द-प्रभवम्** । अच् । ८ पुंसो भावः **पुंस्त्वम्** । 'तस्य भावस्त्व-तलौ'५।१।११९॥ । ९ इन्द्रस्य पुरुषात्मनो[14] लिङ्गम् **इन्द्रियम्** । 'इन्द्रियमिन्द्रलिङ्ग-'५।२।९३॥ इत्यादिना साधुः । १० किट्टेन मलेन वर्जितं **किट्टवर्जितम्** ॥६२९॥ ११ पुरुषस्य भावः कर्म वा **पौरुषम्** । १२ ([15]प्रधानं चासौ धातुश्च **प्रधानधातुः**) । द्वादश वीर्यस्य ॥

---

१. 'स्पृशेः श्वण्शुनौ पृ च' इत्युणादिगणसूत्रम् ॥ २. लौल्यार्थको धातुस्तु इकारानुबन्धरहितः ॥ ३. 'विल' इति१॥ ४. 'कल किल पिल क्षेपे' इति स्वामी, 'कल पिल क्षेपे' इति मैत्रेयः, 'कल विल क्षेपे' इति सायणः, चुरादित्वाद् विग्रहे 'कालयति' इत्यपि बोध्यम् ॥ ५. द्र. स्वोपज्ञटीका ३।६२८॥, पृ.१४१॥ ६. स्वोपज्ञटीकायां ''मज्जयतेऽनयाऽस्थिनीति भिदाद्यङि मज्जा, स्त्रीलिङ्गः'' इति दृश्यते, ३।६२८॥, पृ.१४१॥ ७. पूज्याचार्य-कस्तूरसूरिमहाराजसम्पादितशब्दभेदप्रकाशे शिवदत्तशास्त्रिसंशोधितद्विरूपकोषद्वये चेदमुद्धरणं न दृश्यते ॥ ८. 'मींं-' इति४॥ ९. 'क्लीबः' इति३॥ १०. 'रीञ्' इति१.२, 'रीङ् श्रवणे' इति धातुप्रदीपः ॥ ११. 'री गतिरेषणयोः' इति क्र्यादिगणधातुपाठः ॥ १२. 'दैवा-' इति४॥ १३. '-यते' इति १.३॥ १४. 'आत्मनो' इत्येव२॥ १५. कोष्ठान्तर्गतपाठस्थाने ३प्रतौ 'प्रधानं श्रेष्ठं धातुः प्रधानधातुः' इति दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उक्ताः सप्तधातवः, यन्मते दशधातवस्तन्मतेऽष्टमधातुमाह-

**लोम रोम तनूरुहम् ।**

१-२ शिरसोऽन्यत्र रोहति **लोम**, क्लीबे । एवं **रोम** । उभयत्र 'रुह जन्मनि प्रादुर्भावे च[1]'(भ्वा.प.अ.), 'नामन्-सामन्(सीमन्)-स्तोमन्-होमन्-रोमन्-लोमन्-व्योमन्-विधर्मन्-पाप्मन्-व्येमन्-साधवः[2]'(उणा-५९०)इति साधुः । कपिरिका(कपिलिका)दित्वाद् लत्वं वा । ३ तन्वां रोहति **तनूरुहम्** । मूलविभुजादित्वात् कः । ह्रस्वान्तोपपदोऽप्ययम् । "व्यानशे तनुरुहाण्यपि हर्षः"[शिशुपालवधम्, सर्गः-१०, श्लो-५०]इति माघः[3] । यौगिकत्वादङ्गरुहादयोऽपि । "विहङ्गराजाङ्गरुहैरिवायतैः[4]"[शिशुपालवधम्, सर्गः-१, श्लो-७] इति माघः । क्लीबेऽयम् । पुंस्यपि केचिन्मन्यन्ते । त्रीणि रोम्णः । शेषश्चात्र-"रोमणि[5] तु त्वग्मलं वालपुत्रकः कूपजो मांसनिर्यासः परित्राणम्"[शेषनाममाला३ ।१२९ ॥] ॥

अथ नवमं धातुमाह-

**त्वक् छविश्छादनी[6] कृत्तिश्चर्माऽजिनमसृग्धरा[7]**

**॥६३०॥**

१ त्वचति संवृणोति देहं **त्वक्** । 'त्वच संवरणे' (तु.प.से.), क्विप् । तनोति वा । 'तनेर्ड्वच्[8]'(हैमोणा-८७२) इति ड्वच् । त्वचोऽपि । यन्महेश्वरः-"त्वचि त्वचः"[9][ ] । तथा प्रक्रियाकौमुद्याम्-"त्वचं गृह्णाति त्वचयति"[ ]इत्यत्र प्रासादकृता व्याख्यातम्-"अकारान्तस्त्वचशब्दोऽयम्, 'सप्यापपाश-'३ ।१ ।२५ ॥ इति[10] सूत्रेऽदन्तग्रहणात्"[प्रक्रियाकौमुदी, भा-२, (उत्तरार्धः), सुब्धातुप्रक्रिया, 'मुण्डमिश्रश्लक्ष्ण-'३ ।१ ।२१ ॥ इत्यत्र प्रासादटीका]इति । "त्वचशब्दस्त्वक्पर्यायः[11]" [सिद्धहेमबृहद्वृत्तिः ३ ।४ ।४२]इति हेमबृहद्वृत्तावपि । "त्वक्त्वचचोचशब्दाः स्युर्वल्के चर्मणि पत्रके"[12][ ]इति धरणिकोषः । २ छ्यन्त्येनां **छविः**, स्त्रीलिङ्गः । 'छो छदने'(दि.प.अ.), 'कृविघृष्वि-'(उणा-४९६)इति साधुः । ३ छाद्यते रुधिराद्यनया **छादनी**[13] । 'छद अपवारणे' (चु.उ.से.)ण्यन्तादस्मात् करणे ल्युट् । ४ कृत्यतेऽसौ **कृत्तिः**[14] । 'कृती छेदने'(तु.प.से.), 'स्त्रियां क्तिन्'३ ।३ ।९४ ॥ । ५ चरत्यनेन **चर्म**, क्लीबे । 'चर गतौ'(भ्वा.प.से.), '-मनिन्' (उणा-५८४)इति मनिन् । ६ अजति[15] गच्छति[16] तदिति **अजिनम्** । 'अज[17] गतौ[18] क्षेपणे च[19]'(भ्वा.प.से.), 'अजेरज्-(-ज) च'(उणा-२०६)इतीनन् (इतीनच्), अजादेशश्च 'अजेर्व्यघञपोः'२ ।४ ।५६ ॥ इति प्राप्तिबाधनार्थम् । ७ असृजो रक्तस्य धरा **असृग्धरा** । असृग् वृणोतीति पचाद्यचि असृग्वरा"[ ]इति तु सर्वधरः । अमरस्तु-"अजिनं चर्मः(चर्म) कृत्तिः[20] स्त्री"[अमरकोषः २ ।७ ।४६ ॥]इति कृत्त्यादीन् त्रीन् मृगयोनित्वात् पृथगाह । अत एव मृगाः "अजिनयोनयः" [अमरकोषः२ ।५ ।८-९ ॥]इत्युक्ताः । वाचस्पतिरपि-

"तत्राजिनं मृगयोनिर्मृगाश्च प्रियकादयः ।
मृगप्रकरणे ते च प्रोक्ता अजिनयोनयः ॥१॥"

[21][ ]इत्याह । तेन कृत्त्यादीनि त्रीणि मृगचर्मनामानि । सप्त चर्मणः ॥६३०॥

अथ दशमं धातुमाह-

**वस्नसा तु स्नसा स्नायुः**

१ वसां[22] न्यस्यति निक्षिपति[23] **वस्नसा** । वस्ते आच्छादयति कायं वा । पृषोदरादिः । यद्वा वस्ते शरीरमाच्छादयति, नकि प्रत्यये[24] वस्नं चर्म, तदसति गच्छति । 'अस गत्यादौ'(भ्वा.उ.से.), मूलविभुजादित्वात् के, शकन्ध्वादित्वात् पररूपत्वे वा वस्नसा । २ स्नस्यति निरस्यति **स्नसा** । 'स्नस

---

१. 'रुह बीजजन्मनि'इति क्षीरतरङ्गिणी, 'रुह जन्मनि प्रादुर्भावे'इति धातुप्रदीपः, 'रुह बीजजन्मनि प्रादुर्भावे च' मा.धातुवृत्तिः ॥ २. 'नामन्सीमन्व्योमन्रोमन्लोमन्पाप्मन्ध्यामन्' इत्युणादिगणसूत्रम् ॥ ३. 'माधवः' इति४ ॥ ४. '-तेः' इति३ ॥ ५. 'रोमाणि' इति२ ॥ ६. '-दिनी' इति१ ॥ ७. '-राः' इति३ ॥ ८. 'तनोतेड्वच्' इति३.४, 'तेनोतेरनश्च वः'(उणा-२२१)इति सूत्रसत्त्वादिदं मन्दम् ॥ ९. महेश्वरकृतप्रकाशकोशे न दृश्यते ॥ १०. 'सत्यापपाश-' ३ ।१ ।२५ ॥ इत्यस्य स्थाने प्रासादटीकायां 'त्वचेति' इत्येव दृश्यते ॥ ११. सिद्धहेमबृहद्वृत्तौ 'त्वचशब्दोऽकारान्तस्त्वक्पर्यायः' इति दृश्यते, ३ ।४ ।४२ ॥, भा-२, पृ.५७ ॥ १२. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३२०, पृ.४०० ॥, रामाश्रमी २ ।६ ।६२ ॥, पृ.२८७ ॥ १३. 'छादिनी' इति१.३.४ ॥ १४. 'कृतिः' इति३.४ ॥ १५. 'अजन्ति' इति२.३, 'अंजति' इति४ ॥ १६. 'गच्छन्ति' इति३ ॥ १७. 'असु' इति१, 'अक्ष' इति२, 'अजि' इति३ ॥ १८. १.२नास्ति ॥ १९. १.२.४प्रतिषु नास्ति ॥, 'अज गतिक्षेपणयोः' इति क्षीरतरङ्गिण्यादयः ॥ २०. 'कृतिः' इति३ ॥ २१. द्र. स्वोपज्ञटीका ३ ।६३१ ॥, पृ.१४२ ॥ २२. 'वसा' इति४ ॥ २३. '-प्यति' इति३ ॥ २४. 'धापॄवस्यज्यतिभ्यो नः'(उणा-२८६)इत्यनेन नप्रत्ययो बोध्यः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निरासे[1]'(दि.प.से.), अच् । ३ स्नायति वेष्टयत्यस्थीनि **स्नायुः**, स्त्रीलिङ्गः । क्लीबेऽपि । वाचस्पतिर्यदाह-"अथ स्नायुर्न ना तन्त्री:"[[2]]इति । 'ष्णै[3] वेष्टने'(भ्वा.प.अ.), बाहुलकात् 'कृ-वापा-'(उणा-१)इत्युण् । त्रीणि स्नायोः । 'नस' इति भाषा । शेषश्चात्र-"अथ स्नसा तन्त्री नखारुस्नावानः[4] सन्धिबन्धनम्[5]"[शेषनाममाला३।१२९-१३०॥] ॥

**नाड्यो[1] धमनयः[2] सिराः[3][6] ।**

१ नडस्यैवैता **नाड्यः**, शौषिर्यात् । नल्यते बध्यते आभिर्वा । 'नल(णल) बन्धने'(भ्वा.प.से.), बाहुलकाद् 'वसिवपि-'(उणा-५६४)इत्यादिना इञ्[7], 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीष् । "नडेर्धञि नाडः[8], गौरा-दित्वाद् ङीष्"[ ]इत्यन्ये[9] । २ धमयन्ति दीपयन्ति जाठराग्निं **धमनयः** । धमेः सौत्राद् दीप्त्यर्थाद्[10] 'अर्त्तिसृधृधमिध्यश्चि[11]' (उणा-२५९)इत्यनिः । 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि धमन्यः । ३ सिन्वन्ति बध्नन्ति कायं **सिराः** । 'षिञ् बन्धने'(स्वा.उ.अ.), बाहुलकात् 'स्फायि-'(उणा-१७०) इत्यादिना रक्, दन्त्यादिरयम् । "उर्वस्याभ्याससिरासालूरकास-सल्लक्य:"[[12]]इति दन्त्यतालव्योष्मभेदात् । देहे शेते तिष्ठति शिरा, शीङो रक् ह्रस्वत्वं चेति तालव्यादिरपि । "शिरो ना पिप्पलीमूले स्याद्धमन्यां च योषिति"[[13]]इति तालव्यादौ रभसः। त्रिविधा हि कायनाडी, एका वायुवाहा, अपरा मूत्र-विडस्थिवाहिनी, अपरा लहरेति ख्याता, अन्याश्चाहारवाहिन्यः। सामान्येन तासां त्रीणि ॥

**कण्डरा[1] तु महास्नायुः[2]**

१ कण्डते माद्यति **कण्डरा** । 'कडि मदे'(भ्वा.-आ.से.), बाहुलकादरन्। २ महती स्नायुः **महास्नायुः**। "स्नायु-सङ्घातः"[[14]]इति वैद्याः । द्वे 'मोटीनस' इति ख्यातायाः । उक्ता दश धातवः ॥

मलं किट्टम्

१ मलते धारयति दौर्गन्ध्यं **मलम्**। मलते धारयति कायं वा । 'मल धारणे'(भ्वा.आ.से.), अच् । मृज्यते वा मलम् । 'मृजिखनि-'(हैमोणा-४७२)इति डिदलः। २ केटति निर्गच्छति **किट्टम्**, पुंक्लीबलिङ्गावेतौ । 'किट गतौ'(भ्वा.प.-से.), 'इगुपध-'३।१।१३५॥इति कः, पृषोदरादित्वाट्टकारागमः॥

"वसा शुक्रमसृङ् मज्जा कर्णविण्मूत्रविण्णखाः[15] ।
श्लेष्माश्रु दूषिका स्वेदो द्वादशैते नृणां मलाः[16] ॥१॥"

[मनुस्मृतिः, अध्यायः-५, श्लो-१३५]इति ।सामान्येन द्वे मलस्य॥

अथ विशेषादाह-

**तदक्षिजम् ॥६३१॥**

**दूषीका[1] दूषिका[2]**

१ तदिति मलम्, अक्षिजं नेत्रसमुद्भवम् **॥६३१॥** दूषयति चक्षुः **दूषीका** । 'दुष वैकृत्ये'(दि.प.अ.), [हेतु-मण्णिच्, 'दोषो णौ'६।४।९०॥इत्युपधाया ऊत्त्वम्,] बाहुल-कात् 'कषिधूखि(दूषि)भ्यामीकन्'(उणा-४५६), यद्वा '-दूषि-भ्यामिकन्'(उणा-४५६)इतीकन् । तवर्गचतुर्थाद्योऽपि '**धूषीका**' इति। २ दूषयति दूषी । अच्, गौरादिः, स्वार्थे कन्, 'केऽणः' ७।३।१३॥ **दूषिका** । द्वे नेत्रमलस्य ॥

**जैह्वं[1] कुलुकम्[2]**

१ जिह्वायां भवं जैह्वम् । 'तत्र भवः'४।३।५३॥ इत्यण् । कोलति संस्त्यायति **कुलुकम्** । 'कुल संस्त्याने'

---

१. 'ष्णसु निरसने' इति क्षीरतरङ्गिणी, मा.धातुवृत्तौ दिवादिगणे सायणेन "ष्णुस निरसने इत्येके । 'मिच्व' इत्यात्रेयमैत्रेयौ उदुपधं चाहतुः । स्वामिकाश्यपौ तु अदुपधममुमेव पठित्वा 'ष्णुस अदर्शने इति द्रमिडाः' इत्युकारोपधं पक्षान्तरमाहतुः" इत्युक्तम्, मा.धातुवृत्तिः, दिवादिः, धातुसं-५, पृ.४०३॥ २. द्र. स्वोपज्ञटीका३।६३१॥, पृ.१४२॥ ३. 'ष्टै' इति३॥ ४. '-श्रावानः' इति३॥ ५. '-बन्धिनम्' इति१॥ ६. 'शिराः' इति३.४॥ ७. 'इन्' इति३.४॥ ८. 'नाडिः' इति१.३॥ ९. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३२३, पृ.४०३॥, तत्र "नडेर्घञ्"(पा.३।३।१९॥)नाडः । गौरादिङीष् (पा.४।१।४१॥) । 'नाडी'-इत्यन्ये" इति दृश्यते ॥ १०. 'दीर्घात्' इति४॥ ११. 'अर्तिसृधृधम्यम्यश्यवितृभ्योऽनिः' इत्युणादिगणसूत्रम् ॥ १२. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३२३, पृ.४०३॥, तत्र 'उर्वस्याद्याः' इति दृश्यते ॥ १३. द्र. टीकासर्वस्वम्, भा-२, २।६।६५॥, पृ.३२५॥, पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३२३, पृ.४०३॥, रामाश्रमी२।६।६५॥, पृ.२८८॥ १४. द्र. स्वोपज्ञटीका३।६३१॥, पृ.१४२॥ १५. '-बिष्कणः' इति३, 'मूत्रविट् घ्राणकर्णविट्' इति मनुस्मृत्याम्, ५।१३५॥, पृ.२०५॥ १६. द्र. टीकासर्वस्वम्, भा-२, २।६।६६॥, पृ.३२६॥, तत्र 'मला नृणाम्' इति दृश्यते, पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३२३, पृ.४०४॥, रामाश्रमी२।६।६५॥, पृ.२८९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(भ्वा.प.से.), 'कञ्चुकांशुक-'(हैमोणा-५७)इत्युकप्रत्यये निपात्यते । द्विपञ्चमस्वरोऽयम् । एकं जिह्वामलस्य ॥

**पिप्पिका**[1] **पुनः ।**

**दन्त्यम्**

१ प्यायते **पिप्पिका** । '[ओ]प्यायी वृद्धौ'(भ्वा.-आ.से.), 'कुशिक-'(हैमोणा-४५)इत्यादिना इकप्रत्यये निपात्यते । दन्त्यं दन्तोद्भवम् । एकं दन्तमलस्य ॥

**कार्णं तु पिञ्जूषः**[2]

१ कर्णयोर्भवं कार्णं मलम्, पिञ्ज्यते **पिञ्जूषः** । 'पिजि वर्णे'(अ.आ.से.), 'कारूषाटरूष-(कोरदूषाटरूष-)'(हैमोणा-५६१)इत्यूषे निपात्यते । एकं कर्णमलस्य ॥

**शिङ्घाणो**[1] **घ्राणसम्भवः ॥६३२॥**

१ शिङ्घ्यते **शिङ्घाणः** । 'शिघि आघ्राणे'(भ्वा.-प.से.), 'लूशिघि(शिङ्घि)धाञ्भ्य आणक्'[2](दशपाद्युणा-३।२७)इत्याणक्[3] । स्वार्थे कनि शिङ्घाणकोऽपि, तालव्यादिः । एकं नासामलस्य ॥६३२॥

**सृणीका**[1] **स्यन्दिनी**[2] **लाला**[3]**ऽऽस्यासवः**[4] **कफकूर्चिका**[5][4] **।**

१ सरति पतति मुखादिति **सृणीका** । 'सृ गतौ'(भ्वा.प.अ.), 'सर्तेर्नुक्(नुम्) च'(उणा-४६३)इतीकन्, दन्त्यादिः । सृणिका ह्रस्वमध्याऽपि । २ स्यन्दतेऽवश्यं **स्यन्दिनी**, दन्त्यचतुर्थान्तस्थाद्यसंयोगादिः । 'स्यदि किञ्चिच्चलने'(भ्वा.आ.से.), आवश्यके णिनिः । ३ लालयति प्रार्थुमिच्छति **लाला** । 'लल ईप्सायाम्'(चु.आ.से.), णिजन्तादच्, टाप् । ४ आस्यं मुखम्, तस्य आसवः **आस्यासवः** । ५ कफस्य कूर्चिकेव[5] **कफकूर्चिका**[6] । पञ्च लालायाः ॥

**मूत्रं**[1] **बस्तिमलं**[2] **मेहः**[3] **प्रस्रावो**[4] **नृजलं**[5] **स्रवः**[6] **॥६३३॥**

१ मूत्रयति प्रस्रवति **मूत्रम्** । 'मूत्र प्रस्रवणे'[7](चु.-उ.से.), चुरादिः, अच्[8] । मुच्यते तद्वा । 'मुच्लृ मोक्षणे'(तु.उ.अ.), 'सिविमुच्योष्टेरू च'[9](उणा-६०२)इति ष्ट्रन् । २ बस्तेर्मलं **बस्तिमलम्** । मिह्यते **मेहः** । 'मिह सेचने'[10](भ्वा.प.अ.), घञ् । ४ प्रस्रूयतेऽनेन **प्रस्रावः**, दन्त्यरेफसंयोगमध्यः । 'स्रु प्रस्रवणे'[11](भ्वा.प.अ.), प्रपूर्वः, 'प्रे[12] द्रुस्तुस्रुवः'३।३।२७॥ इति घञ् । ५ नुर्नरस्य जलं **नृजलम्** । ६ स्रवणं **स्रवः** । 'स्रु प्रस्रवणे'[11](भ्वा.प.अ.), 'ऋदोरप्' ३।३।५७॥ । षट् मूत्रस्य ॥६३३॥

**पुष्पिका**[1] **तु लिङ्गमलम्**

१ पुष्पति **पुष्पिका** । पृषोदरादिः । लिङ्गस्य मलं लिङ्गमलम्, एकम् ।

**विड्**[1] **विष्ठा**[2]**ऽवस्करः**[3] **शकृत्**[4] **।**

**गूथं**[5] **पुरीषं**[6] **शमलो**[7]**च्चारौ**[8] **वर्चस्क**[9]**वर्चसी**[10] **॥६३४॥**

१ विशति पक्वाशये **विट्**, स्त्रीलिङ्गः । वैजयन्ती तु-"उच्चारो विट् न ना"[वैजयन्तीकोषः४।४।११९॥]इति क्लीबेऽप्याह । 'विश[13] प्रवेशने'(तु.प.अ.), क्विप् । अमरस्तु-वेवेष्टि नाडीं मलं वा, 'विष्लृ व्याप्तौ'(जु.प.अ.), विडिति मूर्धन्यषकारान्तमाह, "विष्ठाविषौ स्त्रियाम्[14]"[अमरकोषः २।६।६८॥]इति । २ विशति भूमिम्[15] । बाहुलकाद् '-वमि(रमि)काशि-'(उणा-१५९)इत्यादिना थक्, षत्वम्, कुत्वं (ष्टुत्वं) च **विष्ठा** । विविधप्रकारेणोदरे तिष्ठति वा, 'उपसर्गात्-'८।३।६५॥ इति षत्वे वा विष्ठा । ३ अवकीर्यते **अवस्करः**, घञन्तः । वर्चस्कादित्वात् साधुः । 'वर्चस्केऽवस्करः'६।१।१४८॥ इति सुड् वा । ४ शक्नोति विस्मर्तुं **शकृत्**, क्लीबे । 'उणादयो बहुलम्' ३।३।१॥ इति शकेः ऋत् । ५ गवते शब्दं करोति, गूयते उत्सृज्यते वा **गूथम्**, पुंक्लीबलिङ्गः[16] । 'गुङ्[17] शब्दे'(भ्वा.आ.अ.), 'गु पुरीषोत्सर्गे'(तु.प.अ.) वा, 'तीर्थ-(तिथ)पृष्ठगूथयूथप्रोथाः'(उणा-१६९)इति थक्, दीर्घत्वं च निपातनात् । ६ पिपर्त्ति मलं **पुरीषम्** । 'पृ पालनपूरणयोः'

१. '-सम्भवम्' इति२ ॥ २. " 'आणको लूशिङ्घिधाञ्भ्यः'(दशपाद्युणा-३।२७)शिङ्घाणकः पीनसः." इति क्षीरतरङ्गिणी, भ्वादिः, धातुसं-९६, पृ.३६ ॥, 'आणको लूधूशिङ्घिधाञ्भ्यः'(उणा-३६३)इत्युणादिगणे ॥ ३. 'इत्याणकः' इति२ ॥ ४. '-कूर्चिका' इति मुद्रितमूले, स्वोपज्ञटीकापि तमाश्रित्यैव ॥ ५. 'कुचि-' इति१.२.४॥ ६. '-कुचिका' इति२.४॥ ७. 'प्रश्र-' इति१.२.३॥ ८. इतोऽग्रे ३प्रतौ 'चुरादिः, अच्' इति दृश्यते ॥ ९. '-रूच्च' इति३॥ १०. 'मिह सेचने' इति १प्रतौ नास्ति ॥ ११. 'स्रु गतौ' इति स्वामिसायणौ, 'षु स्रु गतौ' इति मैत्रेयः ॥ १२. 'प्रो' इति३॥ १३. 'अविश्' इति १.२.४॥ १४. 'स्त्रियौ' इत्यमरकोषे ॥ १५. 'भूमि' इति२.३॥ १६. 'पुंक्ली.' इति३॥ १७. 'ओगुङ्' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(जु.प.से.), 'शृपृभ्यां किच्च'(उणा-४६७)इतीषन्, ॠत उत्[1], 'उरण् रपरः'१।१।५१॥ इति रपरत्वम् । ७ शमयति सौगन्ध्यं **शमलम्** । 'शमु उपशमे'(दि.प.से.), 'शकिशमिवहिभ्योऽलः' (कातन्त्रोणा-१।४२)। शाम्यत्युपवासादिना वा । ८ उच्चार्यते प्रेर्यते **उच्चारः** । 'चर गतौ'(भ्वा.प.से.), णिजन्तः, घञ् । ९ वर्चति(वर्चते) दीप्यते बहिः प्रकाश्यते वा वर्चः। 'वर्च दीप्तौ'(भ्वा.आ.से.), '-असुन्'(उणा-६२८), कुत्सायां स्वार्थे वा[2] कनि **वर्चस्कम्**, पुंनपुंसकलिङ्गः। 'सोऽपदादौ'८।३।३८॥ इति विसर्गस्य सत्वम्, 'कुप्वोः-'८।३।३७॥ इत्यस्यापवादः । १० वर्चते दीप्यते **वर्चः** । 'वर्च दीप्तौ'(भ्वा.आ.से.), '-असुन्'(उणा-६२८)। वर्चसी, वर्चांसि इत्यादि क्लीबे । दश विष्ठायाः ॥६३४॥

**वेषो[1] नेपथ्य[2]माकल्पः[3]**

१ वेवेष्टि व्याप्नोत्यङ्गम्, विष्यन्ते व्याप्यन्तेऽनेन प्रेक्षकाणां मनांसि वा [वेषः] ।'विष्लृ व्याप्तौ'(जु.प.से.), अच्, 'हलश्च' ३।३।१२१॥ इति संज्ञायां घो वा । वस्त्राऽलङ्कारमाल्यप्रसाधनैरङ्गशोभा वेषशब्देनोच्यत इत्यर्थः[3]। विशन्ति नेत्रमनांस्यत्रेति, अधिकरणेऽर्थे घञि वेशः तालव्यान्तश्च । २ नयतीति नेः[4], विच्प्रत्ययः, नेः नायकः, तस्य पथः। कामजननादिव्यवहारादनपेते 'धर्मपथ्यर्थ-'४।४।९२॥इत्यादिना यत् **नेपथ्यम्** । नेत्रयोर्नेपथ्यमिति, पृषोदरादित्वाद्वा । ३ आकल्पनम् **आकल्पः** । 'कृपू सामर्थ्ये'(भ्वा.आ.वे.), भावे घञ् । त्रीणि वेषस्य ॥

**परिकर्मा[1]ऽङ्गसंस्क्रिया ।**

१ परि सामस्त्येन मलमार्जनार्थं क्रिया **परिकर्म**, क्लीबे । '-मन्'(उणा-५८४)इति मन् । अङ्गस्य संस्क्रिया स्नानोद्वर्तनादिरङ्गसंस्क्रिया । एकं सामान्येन स्नानोद्वर्तनादेः॥

अथ विशेषादाह-

**उद्वर्तन[1]मुत्सादनम्**

१ उद्वर्त्यतेऽनेन **उद्वर्तनम्** । करणे ल्युट् । २ उत्साद्यतेऽनेन[5] **उत्सादनम्** । 'षद्लृ विशरणगत्यवसादनेषु' (तु.प.अ.), णिजन्तः, ल्युटि । '' 'छद अपवारणे'(चु.उ.से.) इत्यस्माण्णिजन्ताल्ल्युटि [6]उच्छादनमपि''[ ]इत्येके । द्वे 'ऊगटणउं[7]' इति ख्यातस्य ॥

**अङ्गरागो[1] विलेपनम्[2] ॥६३५॥**

१ अङ्गं रज्यतेऽनेन **अङ्गरागः** । 'रञ्ज रागे'(भ्वा.-दि.उ.अ.), करणे घञ्, 'चजोः कु घिण्ण्यतोः'७।३।५२॥ इति कुत्वम्[8], 'घञि च भावकरणयोः'६।४।२७॥ इति न्लोपः । २ विलिप्यतेऽनेनेति **विलेपनम्** । 'लिप उपदेहे'(तु.उ.अ.), ल्युट् । द्वे विलेपनस्य[9] ॥६३५॥

**चर्चिक्यं[1] समालभनं[2] चर्चा[3] स्यात्**

१ चर्चिकायां चर्चने साधु **चर्चिक्यम्** ।'तत्र साधुः' ४।४।९८॥ इति यत्। २ समालभ्यतेऽनेन **समालभनम्** । 'लाभर्ण्[10] प्रेरणे'(चु.उ.से.)इत्यत्र लभणपि ह्रस्वादिरिति सभ्याः। 'लभ लाभ तर्क[11] क्षेपे' इति वोपदेवोऽपि । ततः करणे ल्युट्। ३ चर्च्यतेऽनया **चर्चा** । 'चर्च अध्ययने'(चु.उ.से.), 'चिति-(चिन्ति)पूजिकथि-'३।३।१०५॥ इत्यङ् । त्रीणि सामान्येन चन्दनादितिलकस्य । 'टीलुं[12]' आडिं[13]' [14]प्रभृतिभाषा ॥

**मण्डनं[1] पुनः ।**

**प्रसाधनं[2] प्रतिकर्म[3]**

१ [15]मण्ड्यतेऽनेन **मण्डनम्** । 'मडि भूषायाम्' (भ्वा.प.से.), ल्युट्[16] । तिलकपत्रभङ्ग्यादिः । २ प्रसाध्यतेऽनेन **प्रसाधनम्** । 'साध संसिद्धौ'(रु.प.अ.) । ३ प्रत्यङ्गं कर्म **प्रतिकर्म** । सामान्येन तिलकपत्रभङ्गादिना[17] ललाटगल्लादीनामलक्तकादिना मण्डनस्य त्रीणि । 'मांडणां[18]' इति भाषा ॥

**मार्ष्टिः[1] स्यान्मार्जना[2] मृजा[3] ॥६३६॥**

१ मार्ज्यते **मार्ष्टिः** । 'मृजूष्[19] शुद्धौ'(अ.प.वे.), 'वसेस्तिः'(उणा-६१९)इति बाहुलकात् तिः, 'व्रश्चभ्रस्ज-'

---

१. 'उदोष्ठ्यपूर्वस्य'७।१।१०२॥ इत्यनेन ॥ २. २प्रतौ नास्ति ॥ ३. ३प्रतौ नास्ति ॥ ४. 'निः' इति३॥ ५. 'उत्साद्यतेऽनेन' इति २प्रतौ नास्ति ॥ ६. 'उत्सा-' इति३॥ ७. '-टणुं' इति३॥ ८. 'घत्वम्' इति२॥ ९. 'लेपनस्य' इति१॥ १०. णकारानुबन्धो हैममते ॥ ११. 'नक' इति४॥ १२. 'टीलूं' इति४॥ १३. 'आड' इति३॥ १४. 'प्रमुख-' इति३॥ १५. 'मण्डते' इति३॥ १६. 'ल्युटि' इति४॥ १७. '-भङ्ग्यादिना' इति३॥ १८. '-णा' इति३.४॥ १९. 'मृजुष्' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

८।२।३६॥ इति षत्वम्, 'मृजेर्वृद्धिः'७।२।११४॥ । २ मार्जनं **मार्जना** । मृजेश्चौरादिकाण्णिजन्ताद् 'ण्यासश्रन्थो:-'३।३।१०७॥ इति युच् । मार्जनं क्लीबेऽपीत्यन्ये । यन्महेश्वरः- ''मार्जनं कथितं मार्ष्टौ मार्जनो लोध्रशाखिनि''[विश्वप्रकाशकोशः, नान्तवर्गः, श्लो-८२] । ३ भिदादित्वादङि **मृजा**, स्त्रीलिङ्गः । 'मृजेरजादौ सङ्क्रमे'(महाभाष्यम् १।१।३॥)इति वृद्धौ मार्जा च । घञर्थे के 'मार्जः' इत्यपि । ''वेदिसंमार्जदक्षा[१]''[कुमारसम्भवम्, सर्ग:-१, श्लो-६०] इति कुमारः । त्रीणि प्रोञ्छनादिनाङ्गनिर्मलीकरणमात्रस्य । 'मांजणउं[२]' इति भाषा ॥६३६॥

**वासयोगस्तु चूर्णं स्यात्**

१ वासे सुरभीकरणे युज्यत इति **वासयोगः**। 'युजिर् योग'(रु.उ.अ.), घञ् । २ चूर्ण्यते प्रेर्यते **चूर्णम्**। 'वर्ण चूर्ण प्रेरणे[३]'(चु.प.से.), घञर्थे कः । ''चूर्णं क्षोदे क्षारभेदे चूर्णानि वासयुक्तिषु''[विश्वप्रकाशकोशः, णान्तवर्गः, श्लो-१५]इति महेश्वरः । चूर्णशब्दः प्रायेण बहुवचनान्तः, [४]एकवचनं त्वत्र [५]तस्यानपेक्षणात् । द्वे सामान्येन पदवासादिक्षोदस्य । 'अबीरप्रभृतिसु[६]गन्धचूर्णं' इति भाषा ॥

**पिष्टातः पटवासकः[७] ।**

१ पिष्टेन कुङ्कुमचूर्णादिना अतति गच्छति **पिष्टातः**। 'अत सातत्यगमने'(भ्वा.प.से.), अच्, पुंस्यम् । २ पटो वास्यतेऽनेन पटवासः । 'वास उपसेवायाम्'(चु.उ.से.), चुरादिः, करणे घञ्, कनि **पटवासकः** । येन कुङ्कुमचूर्णादिना पटो वास्यते, तद् गन्धद्रव्यं पटवसः, तस्य द्वे। 'अबीर' इत्यादि भाषा[८] ॥

**गन्धमाल्यादिना यस्तु संस्कारः सोऽधिवासनम् ॥६३७॥**

१ गन्धोपलक्षितं माल्यं पुष्पमाला आदिर्यस्य स गन्धमाल्यादिस्तेन, आदिशब्देन धूपादिः, यः[९] संस्कारस्तिलादीनां गुणाधानम्, स **अधिवासनम्**, उच्यत इत्यन्वयः । ''वास उपसेवायाम्'(चु.उ.से.), चुरादिः । ''णिचोऽनित्यत्वाद् ल्युडपि''[[१०]]इति तु सुभूतिः । ''संस्कारो गन्धमाल्याद्यैर्यः स्यात् तदधिवासनम्''[अमरकोषः२।६।१३४॥] इत्यमरः । ([११]गन्धमाल्यादिना यः संस्कारः तिलादीनां गुणाधानम्, तस्य नाम) एकम् ॥६३७॥

**निर्वेश उपभोगः**

१ निर्वेशनं **निर्वेशः** । निर्पूर्वो विशिरुपभोगार्थे वर्तते, ततो भावे घञ् । २ उपभुक्तिः **उपभोगः** । 'भुज पालनाभ्यवहारयोः'(रु.प.से.), भावे घञ् । उप इति सकृद्योगः, आहारमाल्यादेरुपसेवनमुपभोग इति वा । द्वे उपभोगस्य ॥

**अथ स्नानं सवनमाप्लवः ।**

१ स्नायते **स्नानम्** । 'ष्णा शौचे'(अ.प.अ.), भावे ल्युट् । २ सूयते **सवनम्** । 'षूञ्(षुञ्) अभिषवे'(स्वा.-उ.अ.), ल्युट्। ''सावनमपि''[ ]इति शब्दप्रभेदः । ३ आप्लवनम् **आप्लवः** । [''प्लुङ् गतौ'(भ्वा.आ.से.),''] 'ऋदोरप्'३।३।५७॥ इत्यप् । 'विभाषाङि रुप्लुवोः'३।३।५०॥ इति घञि आप्लावोऽपि । त्रीणि स्नानस्य ॥

**कर्पूरागुरुकक्कोलकस्तूरी चन्दनद्रवैः ॥६३८॥**

**स्याद् यक्षकर्दमो मिश्रैः**

१ कर्पूरं च आगरु च कक्कोलं च कस्तूरी च चन्दनं च 'सूकडि' इति ख्यातमिति द्वन्द्वस्तथा तेषां पिण्डीकृतानां द्रवास्तैर्मिश्रैरेकत्र कृतैः **यक्षकर्दमः** स्यात् । कर्पूरादिभिः समभागैर्यक्षप्रिय[१२]कर्दमो बहुगन्धद्रव्यसाधितानुलेपनभेदो यक्षकर्दमः ।

''कर्पूरागरुकस्तूरीकक्कोलैर्यक्षकर्दमः ।
एतैः पिण्डीकृतैर्यक्षप्रियः पङ्कः स कुङ्कुमैः ॥१॥''

[ ]इत्यागमः ।

---

१. '-संमार्गदक्षा' इति कुमारसम्भवे, १।६०॥, पृ.१६॥ २. '-णुं' इति३, '-णौ' इति४॥ ३. मैत्रेयसायणसम्मतोऽयं धातुपाठः, 'चूर्ण प्रेरणे' इत्येव स्वामी ॥ ४. 'एकं' इति२॥ ५. 'तस्मादनपे-' इति३॥ ६. '-प्रमुख-' इति३॥ ७. तुलनीयोऽमरकोषः२।६।१३९॥ ८. 'इति भाषा' इति१॥ ९. 'यत्' इति१.२॥ १०. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३९२, पृ.४८०॥, तत्र ' 'वास उपसेवायाम्' । चुरादि णिचोऽनित्यत्वे ल्युट्' इति दृश्यते ॥ ११. कोष्ठान्तर्गतपाठः १.२.३प्रतिषु न दृश्यते ॥ १२. '-प्रियः' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"कुङ्कुमागरुकर्पूरकस्तूरीचन्दनानि च[१]।
महासुगन्ध इत्युक्तं नामतो यक्षकर्दमः ॥२॥[२]"
[धन्वन्तरिनिघण्टुः, वर्गः-७, श्लो-४५]इति धन्वन्तरिः ।
"कर्पूरागरुकस्तूरीकक्कोलघुसृणानि च ।
एकीकृतमिदं सर्वं यक्षकर्दम इष्यते ॥३॥"
[[३]]इति व्याडिः ॥

**वर्ति[1]र्गात्रा[2]ऽनुलेपनी[४] ।**

१ वर्तयन्ति श्लक्ष्णीकुर्वन्ति तामिति **वर्तिः** । बाहुलकाद् युजपवादः, ण्यन्तात् क्तिन्, स्त्रीलिङ्गः । यदा च 'अच इः'(उणा-५७८), तदा[५] 'कृदिकारात्-'(गणसू-४।१।४५॥) इति ङीषि वर्ती च । "वर्तिर्गात्रानुलेपन्यां[६] वर्तिर्दीपदशासु च"[विश्वलोचनकोशः, तान्तवर्गः, श्लो-५२]इति श्रीधरः । २ गात्रमनुलिप्यतेऽनया **गात्रानुलेपनी**[४] । करणे ल्युट् । द्वे नटादीनां गात्रमुखादिषु चित्रकरणस्य ॥

**चन्दनागरुकस्तूरीकुङ्कुमैस्तु चतुः[१]समम् ॥६३९॥**

१ चन्दनादीनि चत्वारि समान्यत्रेति[७] **चतुस्समम्, (चतुःसमम्)** । एकं चन्दनागरुकस्तूरीकुङ्कुमानां चतुर्णां[८] समीकृतानाम् ॥६३९॥

**अ[1]गुर्व[2]गरु रा[3]जार्हं लो[4]हं कृ[5]मिजवं[6]शिके[९] ।
अना[7]र्यजं जो[8]ङ्गकं च**

१ लघुनामत्वान्न गुरु **अगुरु** । लघुपर्यायमविद्यमानं गुरु महत् श्लाघ्यमस्मादिति वा अगुरु, पुंक्ली. । २ अगति प्राप्नोति महार्घ्यतामिति[१०] **अगरु**[११], पुंक्ली., प्रथमस्वरद्वयः । 'अग गतौ[१२]'(भ्वा.प.से.), बाहुलकादरुप्रत्ययः । ३ राजानमर्हति **राजार्हम्** । 'अर्ह मर्ह पूजायाम्[१३]'(भ्वा.प.से.), अच् । ४ लूयते **लोहम्**, पुंक्ली. । 'लूञ् छेदने[१४]' (क्र्या.उ.से.), 'लूञो हः'(स.क.२।३।१८२॥)इति हः। रोहतीति वा । 'रुह बीजजन्मनि[१५]'(भ्वा.प.अ.), अच् । ५ कृमिभिर्जन्यते **कृमिजम्** । 'अन्येभ्योऽपि(अन्येष्वपि)-' ३।२।१०१॥ इति डः । कृमिजग्धमित्यपि[१६] । ६ वंशोऽस्याऽस्ति **वंशिकम्**, स्त्रीक्ली. । 'अत इनिठनौ'५।२।११५॥ इति ठन् । "वंशाभं वंशकम्, क्लीबम्, प्रथमस्वरमध्यम्, 'इवे प्रतिकृतौ'५।३।९६॥ इति कन्"[अम. क्षीर.२।६।१२६॥] इति स्वामी[१७] । ७ अनार्यदेशे जातम् **अनार्यजम्** । ८ जोङ्गकगिरिभवत्वाद् **जोङ्गकम्** । जुङ्गति वर्जयति[१८] दौर्गन्ध्यं जोङ्गकं वा । 'जुगि वर्जने'(भ्वा.प.से.), चवर्गादिः, बाहुलकौ वुनुणौ । अष्टौ सामान्येनाऽगुरुकाष्ठस्य । शेषश्चात्र-
"अगुरौ प्रवरं शृङ्गं शीर्षकं मृदुलं लघु[१९] ।
वरद्रुमः परमदः प्रकरं गन्धदारु च ॥१॥"
[शेषनाममाला ३।१३०-१३१॥] ॥

अथाऽगुरुविशेषानाह-

**म[1]ङ्गल्या मल्लिगन्धि यत् ॥६४०॥**

१ यदगुरु मल्लिगन्धि तत्, मङ्गले साधुः **मङ्गल्या** । 'तत्र साधुः'४।३।९८॥ इति यत् । अत्र मल्लिशब्दः केतकीपर्याय इकारान्तः । मल्लेर्विकारोऽवयवो वा पुष्पं मल्लिः । 'पुष्पफलमूलेषु बहुलम्'(वा-४।३।१६६॥)इत्यणो लुक् । मल्लेः पुष्पस्येव गन्धोऽस्य मल्लिगन्धि । 'उपमानाच्च' ५।४।१३७॥ इति गन्धस्येकारोऽन्तादेशः। पुष्पसदृग्गन्धागुरुण[२०]ः। 'केवडीओ[२१] अगर' इति भाषा ॥६४०॥

**का[1]लागुरुः[२२] का[2]कतुण्डः**

१ कालः कृष्णश्चासावगुरुश्च **कालागुरुः** । २

१. १.२.४ प्रतिपु नास्ति ॥ २. द्र. अम.क्षीरस्वामिटीका२।६।१३३॥, पृ.१६१॥, स्वोपज्ञटीका३।६३९॥, पृ.१४३॥, पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३९१, पृ.४७८॥, मल्लिनाथसूरिकृतामरपदपारिजातटीका, भा-१, २।६।१३३॥, पृ.४४६॥, रामाश्रमी २।६।१३३॥, पृ.३२०॥, तासु टीकासु "कर्पूरागरुकस्तूरी कर्पूरं चन्दनं तथा । महासुगन्धमित्युक्तं नामतो यक्षकर्दमः ॥" इति दृश्यते ॥ ३. द्र. टीकासर्वस्वम्, भा-२, २।६।१३३॥, पृ.३८५॥, मल्लिनाथसूरिकृतामरपदपारिजातटीका, भा-१, २।६।१३३॥, पृ.४४६॥, पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३९१, पृ.४७८॥, रामाश्रमी २।६।१३३॥, पृ.३२०॥ ४. '-पिनी' इति३॥ ५. इतोऽग्रे ३प्रतौ 'च' इति दृश्यते ॥ ६.'-पिन्यां' इति३ ॥ ७. 'सामा-' इति१.३॥ ८. २प्रतौ नास्ति ॥ ९. '-वंशके' इति४॥ १०. 'महर्घ-' इति३॥ ११. 'अगुरु' इति१.२.३॥ १२. 'अक अग कुटिलायां गतौ' इति क्षीरतरङ्गिण्यादयः ॥ १३. 'अर्ह पूजायाम्' इत्येव क्षीरतरङ्गिण्यादयः ॥ १४. 'लूङ्' इति३॥ १५. स्वामिमतेऽयं पाठः, 'रुह जन्मनि प्रादुर्भावे' इति मैत्रेयः, 'रुह बीजजन्मनि प्रादुर्भावे च' इति सायणः ॥ १६. '-ग्धिमित्यपि' इति१॥ १७. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३८४, पृ.४७३॥, तत्र "वंश इव 'वंशकम्' । क्लीबम् । "इवे प्रतिकृता" विति कन् (पा-५।३।९६॥)इति तु स्वामी" इति दृश्यते, अम.क्षीरस्वामिटीकायाम् 'वंशाभं वंशकम्, वंशिकेत्येके' इति दृश्यते ॥ १८. 'वर्जति' इति३॥ १९. 'लघुः' इति३॥ २०. '-सदृशगन्धागरुणः' इति२.३॥ २१. '-डीउ' इति२॥ २२. '-गरुः' इति१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

काकतुण्ड इव कृष्णत्वात् **काकतुण्डः** । द्वे कृष्णागुरुणः[1] ॥

**श्रीखण्डं[1] रोहणद्रुमः[2] ।**

**गन्धसारो[3] मलयज[4]श्चन्दने[5]**

१ श्रिया सौरभश्रिया कृत्वाऽन्यद्रुगर्वं खण्डयति **श्रीखण्डम्** । 'खडि भेदने'(चु.उ.से.), णिजन्तः, अच् । २ रोहणाऽद्रेर्द्रुमो **रोहणद्रुमः** । ३ गन्धेन सारो **गन्धसारः**। गन्धो गन्धातिशयवान् सारः स्थिरभागोऽस्येति वा । ४ मलयगिरिभवत्वाद् **मलयजः** । ५ चन्द्यते आह्लाद्यतेऽनेन **चन्दनम्** । 'चदि आह्लादनदीप्त्योः'(भ्वा.प.से.), करणे ल्युट्। चन्दयतीति नन्द्यादित्वाद् ल्युर्वा । पुंक्लीबलिङ्गावेतौ । पञ्च सामान्येन चन्दनस्य । 'सूकडि' इति भाषा । शेषश्चात्र- "चन्दने पुनरेकाङ्गं भद्रश्रीः फलकीत्यपि"[शेषनाममाला ३।१३१॥] ॥

**हरिचन्दने[1] ॥६४१॥**

**तैलपर्णिक[2]गोशीर्षौ[3]**

१ हरेरिन्द्रस्य चन्दनं **हरिचन्दनम्**, पुंक्ली., तत्र । हरिर्मण्डूकस्तदाकारे[2] पर्वते भागे[3] जातत्वाद्वा । हरि कपिलम्, तद्वर्णत्वाद्वा ॥६४१॥ २ तिलपर्णो[4] वृक्षभेदस्ततो जातं **तैलपर्णिकम्** । शैषिकष्ठक् । तैलपर्णोऽद्रिराकारोऽस्त्यस्येति वा । ३ गोः शीर्षं **गोशीर्षम्** । "तदाकारे मलयैकदेशे जातं[5] गोशीर्षम्"[[6]]इति सुभूतिः। पुंस्येतौ । "धवलं सुशीतं चन्दनं तैलपर्णिकं मलयाद्रिदेशजमेव कालताम्रव्यामिश्रवर्णमुत्पलगन्धि गोशीर्षमिति चाणक्यटीका"[[6]]इति माधवी । "अतिसुरभिशीतलतया सदैव सर्पैर्वेष्टितमिति सुरभि च[7] नामाऽस्य"[[6]]इति सुभूत्यादयः । "क्लीबेऽपीमौ" [ ]इति केचित् । त्रीणि [8]बावन्नाचन्दनस्य ॥

**पत्राङ्गं[1] रक्तचन्दनम्[2] ।**

**कुचन्दनं[3] ताम्रसारं[4] रञ्जनं[5] तिलपर्णिका[6] ॥६४२॥**

१ पत्रमेवाङ्गमस्य **पत्राङ्गम्** । पत्रेष्वङ्ग इति वा। "पत्रङ्गमपि दृश्यते"[[6]]इति शाब्दिकाः । "पत्रङ्गमित्यपभ्रंशः[9]"[स्वोपज्ञटीका३।६४२]इत्याचार्याः । २ रक्तं च तच्चन्दनं च **रक्तचन्दनम्** । ३ गन्धहीनत्वात् कुत्सितं चन्दनं **कुचन्दनम्** । ४ ताम्रेष्वरुणेषु सारं **ताम्रसारम्** । ५ रज्यतेऽनेन **रञ्जनम्**। करणे ल्युट् । ६ तिलस्येव[10] पर्णानि पत्राण्यस्यास्तिलपर्णी । 'पाककर्णपर्ण-'४।१।६४॥इति ङीष्। सैव **तिलपर्णिका**। 'केऽणः'७।४।१३॥ इति ह्रस्वत्वम् । "तिलपर्णी नदी आकारोऽस्य तिलपर्णिकः"[ ]इत्यन्ये[11] । षड् 'रतांजणी' इति ख्यातायाः ॥६४२॥

**जातिकोशं[1] जातिफलम्[2]**

१ जातेर्लतायाः कोशं **जातिकोशम्**। जात्या लताया जातीकोशमित्यपि । जातिर्ह्रस्वान्ता, दीर्घान्ता च । 'जातीकोष' इति मूर्धन्योपधोऽपि । जातिरित्यपि नामाऽस्य । "जातिर्जातीफलेऽपि च"[[12]]इति रभसः[13] । कोष इत्यपि । "कोषोऽप्रकृते पेश्यां पात्रे जातिकोषे"[[12]]इत्यपि रभसः । २ जातेः फलं **जातिफलम्** । जातीफलं दीर्घमध्यमपि । फलमपि नामाऽस्य । "फलं लाभे जातिकोषे बाणाग्रे फलकेऽपि च" [[12]]इति रुद्रः । द्वे 'जाइफल' इति ख्यातस्य । ([14]शेषश्चात्र "जातीफले सौमनसं पुटकं मदशौण्डकं कोशफलम्") [शेषनाममाला३।१३२॥] ॥

**कर्पूरो[1] हिमवालुका[2] ।**

**घनसारः[3] सिताभ्र[4]श्च चन्द्रः[5]**

१ कल्पते[15] मुखताम्बुलादिसौरभातिशयकरणायेति **कर्पूरम्**, पुंक्ली[16]. । 'कृपू सामर्थ्ये'(भ्वा.आ.वे.), 'खर्जिपिञ्जादिभ्यश्च-'(उणा-५३०)इति खर्जादित्वादूरः[17] । यद्वा 'क्रपँ[18] कृपायां[19] गतौ'(भ्वा.आ.से.), खर्जादित्वादूरः[17], बाहुलकात् संप्रसारणं च[20] । २ हिमा शीता चासौ वालुका च **हिमवालुका** । रेणुकेत्यपि। "रेणुकावर्णकर्पूरं चन्द्रं भस्महिमाह्वयम्"

---

१. '-गरुणः' इति३॥ २. '-कारे जात-' इति१॥ ३. 'पर्वतभागे' इति२॥ ४. '-पर्णौ' इति४॥ ५. '-शजातं' इति१॥ ६. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३८९, पृ.४७७॥ ७. ३प्रतौ नास्ति ॥ ८. 'बावना-' इति३॥ ९. 'पत्रेष्वङ्गति पत्राङ्गं पतग त्वेतदपभ्रंशः' इति मुद्रितस्वोपज्ञटीकायाम् ३।६४२॥, पृ.१४४॥ १०. '-स्यैव' इति३॥ ११. द्र. स्वोपज्ञटीका३।६४२॥, पृ.१४४॥, तत्र 'तिलपर्णी नदी आकारोऽस्या इत्येके' इति दृश्यते ॥ १२. द्र. टीकासर्वस्वम्, भा-२, मनुष्यवर्गः, श्लो-३९०, पृ.४७८॥, रामाश्रमीर२।६।१३२॥, पृ.३२०॥ १३. ४प्रतौ नास्ति ॥ १४. कोष्ठान्तर्गतपाठः१.२.४प्रतिषु न दृश्यते ॥ १५. 'कल्प्यते' इति१.२.३॥ १६. 'पुंक्लीबः' इति३॥ १७. 'कृपो रो लः' इत्यनेन लत्वप्रसङ्गः, बाहुलकात् तदभावो बोध्यः ॥ १८. 'क्रप कृपायां' इति स्वाम्येव ॥ १९. इतोऽग्रे ४प्रतौ 'च' इति दृश्यते ॥ २०. १प्रतौ नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[त्रिकाण्डशेष:२।६।३९॥]इति त्रिकाण्डशेषः[1] । ३ घनो दृढः सारः स्थिरभागोऽस्य **घनसारः** । घनस्येव सारोऽस्येति वा । ४ सिताभ्रमिव शुक्लत्वात् **सिताभ्रः** । सिता शुक्ला भा द्युतिरस्येति सिताभ इति नीरेफोऽपि । ५ चन्दत्याह्लादयति **चन्द्रः**, पुंक्ली.। 'चदि आह्लादनदीप्त्योः'(भ्वा.प.से.), 'स्फायि-'(उणा-१७०)इति रक् । चन्द्रपर्यायनामाऽपि[2] । पञ्च कर्पूरस्य॥

## अथ मृगनाभिजा ॥६४३॥

**मृगनाभिर्मृगमदः कस्तूरी गन्धधूल्यपि ।**

१ मृगनाभेर्जाता **मृगनाभिजा** । 'पञ्चम्यामजातौ' ३।२।९८॥इति डः ॥६४३॥ २ मृगनाभिजन्यत्वाद् मृगनाभिसाहचर्याद् वा[3] **मृगनाभिः**, स्त्रीलिङ्गः । ''पुंलिङ्गोऽयम्'' [ ]इति मिश्राः । ३ मृगस्य मदो **मृगमदः** । ४ कसति विकसति सौगन्ध्यमस्याः **कस्तूरी** । 'कस गतौ'(भ्वा.प.से.), खर्जूरादित्वादूरच्, तुक् चागमः, गौरादित्वाद् ङीष् । मृगोऽपि । ''मृगनाभिर्मृगमदो मृगः कस्तूरिकाऽपि च''[[4]]इति माधवः । नाभिरित्यपि ।

''मुख्यराट् क्षत्रियो(क्षत्रिये) नाभिः पुंसि प्राण्यङ्गके द्वयोः ।
चक्रमध्ये प्रधाने च स्त्रियां कस्तूरिकामदे[4] ॥१॥''

[[5]]इति रभसात् । मदोऽप्यत्र । ''मदो रेतसि कस्तूर्याम्'' [मेदिनीकोशः, दान्तवर्गः, श्लो-१२]इति मेदिनिः । ५ गन्धप्रधाना धूली **गन्धधूली** । पञ्च कस्तूर्याः ॥

**कश्मीरजन्म घुसृणं वर्णं लोहितचन्दनम् ॥६४४॥**
**वाह्लीकं कुङ्कुमं वह्निशिखं कालेयजागुडे[6] ।**
**सङ्कोचपिशुनं रक्तं धीरं पीतनदीपने ॥६४५॥**

१ कश्मीरदेशे जन्माऽस्य **कश्मीरजन्म** । कश्मीर इत्यपि । केशेः सौत्राद् 'गभीरादयश्च'(चान्द्रोणा-३।२९)इतीरन्, मुडागमश्च । ''कश्मीरावश्यकोः''[[7]]इत्यूष्मभेदात् तालव्यमध्यः । २ घुषते (घुंषते) कान्तिं करोति **घुसृणम्** । 'घुषि कान्तिकरणे'[8](भ्वा.आ.से.), पृषोदरादित्वात् । ''देश्योऽयम्'' [ ]इति क्षीरस्वामी । ३ वर्ण्यते **वर्णम्** । 'वर्ण वर्णक्रियाविस्तारगुणवचनेषु'(चु.उ.से.), अतः कर्मणि घञ् । वर्ण्यमित्यपि। ४ लौहित्यजननाद्[9] लोहितचन्दनमिव **लोहितचन्दनम्** ॥६४४॥ ५ 'बर्ह बह्ल प्राधान्ये'[10](भ्वा.आ.से.), '-इः'(उणा-५७८)इति इः[11] वह्लिः, यावादिभ्यः कनि वह्लिके पश्चिमदेशे भवम्, कच्छादित्वादण्, 'अन्येषामपि-'६।३।१३७॥इति इकारस्य दीर्घत्वे **वाह्लीकम्** इति । वाह्लिकमिति ह्रस्वमध्यमपि। ''वाह्लीकं वाह्लिकं धीरहिङ्गुनोर्नाश्म(नाश्व)देशयोः''[त्रिकाण्डशेषः३।३।-४३॥] इति त्रिकाण्डशेषः । ''वरवाह्लीकम्''[अमरकोषः२।६।-१२४॥]इत्येकं पदम्''[ ]इत्यन्ये[12] । ६ कौति शब्दायते **कुङ्कुमम्**, क्लीबे। वाचस्पतिस्तु पुंस्यप्याह ''निदाघेऽपि कुङ्कुमः सुखः स्यात्''[[13]]इति । 'कु शब्दे'(अ.प.अ.), बाहुलकाद् 'इषिशुषि-'( )इत्यादिना मक्, पृषोदरादिः । ७ वह्निरिव शिखा[14] केशरोऽस्य **वह्निशिखः** । ८ कु ईषल्लीयते श्लिष्यति **कालेयम्**, पृषोदरादिः। ९ जागर्ति मण्डनेषु **जागुडम्**, पृषोदरादिः। १० सङ्कोचस्य पिशुनं सूचकं **सङ्कोचपिशुनम्**, षडक्षरम् । ''सङ्कोचं पिशुनं चेति द्वयमपि''[[15]]इत्यन्ये । तदाऽदो व्याख्यानम् । सङ्कुचति सङ्कोचयति वा सङ्कोचम् । 'कुच सङ्कोचे' (तु.प.से.), अच्[16]। 'पिश अवयवे'(तु.प.से.), 'पिशलशेः[17] किच्च'([18])इत्युनन् पिशुनम्। पिशुनयति सूचयति व्यञ्जयति गलद्द्रव्यान्तरं सौरभ्यात् पचाद्यचि पिशुनं वा । ''सूचकपर्यायश्चाऽस्य नाम''[[19]]इति तु सुभूतिः । ''सङ्कोच-

---

१. त्रिकाण्डशेषे ''रेणुसारस्तु कर्पूरश्चन्द्रभस्म हिमाह्वयः॥ '' इति दृश्यते, २।६।३९॥, पृ.२९३॥ २. '-नामानि' इति३.४॥ ३. ४प्रतौ नास्ति ॥ ४. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३८७, पृ.४७६॥, रामाश्रमी २।६।१२९॥, पृ.३१९॥ ५. द्र. टीकासर्वस्वम्, भा-२, २।६।१२९॥, पृ.३८३॥, तत्र ''सुराट्क्षत्रिययोर्नाभिः पुंसि प्राण्यङ्गके द्वयोः । चक्रमध्ये तु प्रधाने स्त्रियां कस्तूरिकामदे ॥'' इति दृश्यते ॥ ६. '-जांगुले' इति१॥ ७. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३८२, पृ.४७०॥, तत्र 'कश्मीरावश्यायौ' इति दृश्यते ॥ ८. मैत्रेयसायणसम्मतोऽयं धातुपाठः, स्वामिना 'घसि करणे' इत्यत्र दुर्गमतमुट्टङ्क्य ''घुषि कान्तिकरण इति दुर्गः-घंषते'' इत्युक्तम् ॥ ९. '-जननत्वात्' इति४॥ १०. स्वामिसायणसम्मतोऽयं धातुपाठः, 'वल्ह प्राधान्ये' इति मैत्रेयः ॥ ११. अजन्ताद्धातोरिप्रत्ययविधानादत्र '-इः' इत्यस्याऽप्रवृत्तित्वाद् बाहुलकादिप्रत्ययो बोध्यः ॥ १२. 'वरवाह्लीमित्यन्ये' इति१.२॥ १३. द्र. स्वोपज्ञटीका ३।६४५॥, पृ.१४४॥ १४. 'केस-' इति१.२॥ १५. द्र. स्वोपज्ञटीका ३।६४५॥, पृ.१४५॥ १६. तुदादेः 'कुच सङ्कोचे' इत्यस्याऽच्विधानेन कुटादित्वाद् गुणाभावप्रसङ्गादिदं विचारणीयम्, यद्वा भ्वादेः 'बुध सम्पर्चनकौटिल्यप्रतिष्टम्भविलेखनेषु' इत्यस्य ग्रहणं कर्तव्यम् ॥ १७. '-लसेः' इति३॥ १८. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३८२, पृ.४७१॥, तत्र 'पिशिविशेः किच्च' इति दृश्यते ॥ १९. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३८२, पृ.४७१॥, तत्र 'रक्तपर्यायः सूचकपर्यायश्चास्य नाम' इति दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मपि काश्मीरे सङ्कोचो मीनबन्धयोः''[विश्वप्रकाशकोशः, चान्तवर्गः, श्लो-१३] इति महेश्वरः । ''पिशुनो नारदे पुंसि [1]खलसूचकयोस्त्रिषु । पिशुनं कुङ्कुमे क्लीबम्''[विश्वप्रकाशकोशः, नान्तवर्गः, श्लो-८८-८९]इति श्रीधरः । **११** रञ्जनाद् **रक्तम्** । अत एवाऽसृक्संज्ञम् । **१२ धीरं** स्थिररागत्वात् । **१३** पीतयत्यङ्गं **पीतनम्** । 'पीत वर्णे'( ), नन्द्यादित्वाद् ल्युः । पीतो वर्णोऽस्येति, पामादित्वान्नप्रत्यये वा । **१४** दीपयति **दीपनम्** । 'दीपी दीप्तौ'(दि.आ.से.), णिजन्तः, 'ण्यासश्रन्थोः-'३।३।१०७॥इति युच् । चारु इत्यपि । वरमित्यपि । ''काश्मीरं चारु वाह्लीकं सङ्कोचपिशुनं वरम्''[ [2]] इति वाचस्पतिः । चतुर्दश [3]केशरस्य । शेषश्चात्र-

''कुङ्कुमे तु करटं वासनीयकम् ॥
प्रियङ्गु पीतकाबेरं[4] घोरं पुष्परजो वरम् ।
कुसुम्भं च [5]जवापुष्पं कुसुमान्तं च गौरवम् ॥१॥''

[शेषनाममाला३।१३२-१३३॥] ॥

## लवङ्गं देवकुसुमं श्रीसंज्ञम्[6]

**१** लूयते वदनेन छिद्यते **लवङ्गम्** । 'लूञ् छेदने'(क्र्या.उ.से.), बाहुलकात् 'पतेरङ्गच्-'(उणा-११६)इत्यङ्गच् । **२** देवयोग्यकुसुमत्वाद् **देवकुसुमम्** । **३ श्रीसंज्ञम्**, श्रीपर्यायमित्यर्थः । त्रीणि लवङ्गस्य ॥

## अथ कोलकम् ।

## कक्कोलकं कोशफलम्[7]

**१** कोलति संस्त्यायति[8] **कोलकम्** । 'कुल संस्त्याने'(भ्वा.प.से.), 'ज्वलतिकसन्तेभ्यो णः'३।१।१४०॥, ततः स्वार्थे कन् । ण्वुलि वा । **२** ककन्तेऽत्र, संपदादित्वात् क्विप्, 'कक लौल्ये'(भ्वा.प.से.) । कक् च तत् कोलं च कक्कोलम्, ततः स्वार्थे कनि **कक्कोलकम्** । **३** कोशात् फलमस्य **कोशफलम्** । ''[9]कौषफलम्''[अमरकोषः२।६।१२९॥]इत्यमरः । त्रीणि 'मिरिचकङ्कोल' इति ख्यातस्य ॥

## कालीयकं तु जायकम्[10] ॥६४६॥

**१** कालायां भूमौ भवं कालीयम् । कालो वर्णो दृश्यतेऽत्रेति वा, शेषे छः । ततः कन् [**कालीयकम्**] ।

''कालीयकं तु पीतं स्यात् तथा नारायणप्रियम् ।
मालय[11]: स्यात्[12] पीतकाष्ठं चतुर्थं पीतचन्दनम् ॥१॥''

[धन्वन्तरिनिघण्टुः, सर्गः-३, श्लो-८]इति धन्वन्तरिः । ''कालीयकं पीतसारं पीतं नारायणप्रियम्''[मदनपालनिघण्टुः, कर्पूरादिसुगन्धिद्रव्यवर्गस्तृतीयः, श्लो-१२]इति मदनपालः। ''कलिमेतदर्थं कुर्वन्ति कालेयं गन्धद्रव्यम्''[ [13]]इति भोजराजः। ''-अग्निकलिभ्याम्'(वा-४।२।२॥)इति ढक् । ''कालीयकं च कालेयं वर्णकं कान्तिदायकम्''[ [14]]इति व्याडिः''[ ] इति माधवी[15] । क्वचित् 'कालेयकम्' इति पाठः । [कालानुसार्यमपि], कालस्य कृष्णद्रव्यस्यानुसार्थ्य(-सार्यं) सदृशीकरणीयम्, अनुपूर्वो गत्यर्थः सादृश्ये(सादृश्यार्थः), तमन्वेत्यनुबध्नाति''[काव्यादर्शः, परिच्छेदः-२, श्लो-६४]इत्यादिना सादृश्यसूचकप्रत्यये दण्डी । **२** जयति पुष्पान्तरसौरभमभिभवति **जायकम्** । 'जि अभिभवे'(भ्वा.प.से.), ण्वुल् । द्वे मलयागिरीति ख्याताया: ॥६४६॥

## यक्षधूपो बहुरूपः सालवेष्टोऽग्निवल्लभः ।
## सर्जमणिः सर्जरसो रालः सर्वरसोऽपि च ॥६४७॥

**१** यक्षान् धूपयति[16] **यक्षधूपः** । 'कर्मण्यण्'३।२।१॥ । **२** नानाकृतिगन्धत्वाद् **बहुरूपः** । वर्णभेदाद् बहूनि रूपाण्यस्य वा । **३** सालस्य वेष्टो निर्यासः **सालवेष्टः** । **४** अग्नेर्वल्लभः **अग्निवल्लभः** । **५** सर्जस्य तरोर्मणिरिव **सर्जमणिः** । **६** सर्जस्य सालस्य रसो निर्यास **सर्जरसः** । **७** राति प्रीतिं **रालः**, पुंस्त्री[17] । ''न राति ददाति न कष्टमिति नञ्पूर्वाद् रातेर्वृषादित्वात् कलचि [18]अरालः''[ [19]]इति मिश्राः । ''अरालः सर्जवक्रयोः'' [ [20]]इति रभसः । **८** सर्वे रसा अत्र । सर्वेषां रसानुरागोऽत्रेति वा **सर्वरसः** । अष्टौ रालस्य ॥६४७॥

---

१. 'खलु-' इति३॥ २. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३८२, पृ.४७०॥, रामाश्रमी २।६।१२४॥, पृ.३१६॥ ३. 'केस-' इति१॥ ४. 'पीनकोबेरं' इति२॥ ५. 'जपा-' इति३.४॥ ६. तुलनीयोऽमरकोष:२।६।१२५॥ ७. तुलनीयोऽरकोषः २।६।१२९-१३०॥ ८. 'संस्त्याने' इति४॥ ९. 'कोश-' इति१॥ १०. 'जापकम्' इति२.३.४॥ ११. 'कालय' इति३॥ १२. 'मालयः स्यात्' इत्यस्य स्थाने धन्वन्तरिनिघण्टौ 'मलयोत्थं' इति दृश्यते, धन्वन्तरिनिघण्टु:३।८॥, पृ.१३८॥ १३. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३८४, पृ.४७२॥ १४. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३८४, पृ.४७२॥, रामाश्रमी २।६।१२६॥, पृ.३१७॥ १५. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३८४, पृ.४७२॥ १६. 'धूपायति' इति१.४॥ १७. 'पुंक्लीबलिङ्गः' इति स्वोपज्ञटीकायाम् ३।६४८॥, पृ.१४५॥ १८. 'आ-' इति१॥ १९. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३८५, पृ.४७४॥ २०. द्र. टीकासर्वस्वम्, भा-२, २।६।१२७॥ पृ.३८२॥, पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३८५, पृ.४७४॥, रामाश्रमी २।६।१२७॥, पृ.३१८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**धूपो वृकात् कृत्रिमाच्च तुरुष्कः सिल्ह( सिह्ल )पिण्डकौ ।**

१-२ वृकशब्दात् कृत्रिमशब्दाच्च परो धूपः, तेन वृकान् धूपयति **वृकधूपः** । 'धूप दीप्तौ[1]'(चु.उ.से.), चुरादिः, अच् । शीघ्रसञ्चारिगन्धत्वात् कृत्रिमश्चासौ धूपश्च **कृत्रिमधूपः** । ३ तूर्यते हिनस्ति दौर्गन्ध्यं **तुरुष्कः**, पुंस्त्री । 'तुरी-(तूरी) [गति]त्वरणहिंसनयोः[2]'(दि.आ.से.), 'बहुलमन्यत्रापि' (उणा-२७८)इत्युसि प्रत्यये संज्ञायां कनि । ४ सहते सुखोपभोगं **सिल्हकः ( सिल्हः, सिह्लः )**, पृषोदरादिः । ५ पिण्डति (पिण्डते) गच्छति दूरं गन्धोऽस्य **पिण्डकः** । 'पिडि गतौ[3]' (भ्वा.आ.से.), अच्, ततः कन् । ण्वुलि वा। पिण्डोऽपि । "पिण्डो देहांश(स)योरस्त्री निवासे(निवापे) सिल्हके पुमान्" [विश्वलोचनकोशः, डान्तवर्गः, श्लो-१६]इति श्रीधरः । पिण्डितोऽपि[4] । यन्महेश्वरः-"पिण्डितः सिल्हके कवौ[5]" [विश्वप्रकाशकोशः, तान्तवर्गः, श्लो-१०९]इति धन्वन्तरिश्च-"तुरुष्को[6] यावनः कल्कः पिण्याकः पण्डितः(पिण्डितः) कपिः"[धन्वन्तरिनिघण्टुः, सर्गः-३, श्लो-२१]इति । अयं द्रव्यान्तरैः सह पिण्डितः स्वरूपात्र च्यवत इति । पञ्च शिलारसस्य ॥

**पायसस्तु वृक्षधूपः श्रीवासः सरलद्रवः ॥६४८॥**

१ पयसो द्रुमक्षीरस्याऽयं **पायसः** । 'तस्येदम्'४।३।-१२०॥ इत्यण् । दुग्धसमानत्वात् पय एव[7] पायस इति वा। स्वार्थेऽण् । "पायसं परमान्ने स्यात् श्रीवासेऽपि च पायसः" [विश्वप्रकाशकोशः, सान्तवर्गः, श्लो-१९]इति श्रीधरः[8] । वायसोऽपि । "वायसो नाडिजङ्घे स्यात् श्रीवासे चागुरुद्रुमे"[विश्वप्रकाशकोशः, सान्तवर्गः, श्लो-२०]इति महेश्वरः । "सरलद्रवः श्रीपिष्टो दधिक्षीरघृताह्वयः"[[9]]इति तु रभसः । २ वृक्षस्य धूपो **वृक्षधूपः** । वृकधूपोऽपि । वृकोऽपि[10] । "वृकः स्यात् कृत्रिमेऽनेकधूपेति(-धूपेऽपि) सरलद्रवे[11]"[[12]]इति रभसः । धूप्यतेऽनेन धूपः । वृकनामा धूपो वृकधूपः । ३ श्रीणां वासो गृहं **श्रीवासः** । ४ सरलस्य देवदारुद्रुमस्य द्रवो निर्यासः **सरलद्रवः** । चत्वारि कणगूगलीति ख्यातायाः। शेषश्चात्र-"वृक्षधूपे तु श्रीवेष्टो दधिक्षीरघृताह्वयः"[शेषनाममाला३।१-३४॥]इति ॥६४८॥

**स्थनात् स्थानान्तरं गच्छन् धूपो गन्धपिशाचिका[13] ।**

१ एकस्मात् स्थानादन्यस्थाने गच्छन् व्रजन् धूपः **गन्धपिशाचिका** उच्यते । द्वे(एकम्) धूपस्य ॥

**स्थासकस्तु हस्तबिम्बम्**

१ तिष्ठत्यङ्गे **स्थासकः** । तिष्ठतेर्वायसवदसच् स्थासः, ततः कन् । यद्वा स्थानं स्थाः स्थितिः, तया आसयति दीपयति देहं स्थासकः । 'अस गतिदीप्त्यादानेषु'(भ्वा.उ.से.), णिजन्तः, ण्वुल् । २ हस्तस्य बिम्बं **हस्तबिम्बम्**, कुङ्कुमादिरचितम् । द्वे 'हाथा[14]' इति ख्यातस्य ॥

**अलङ्कारस्तु भूषणम् ॥६४९॥**
**परिष्काराऽऽभरणे च**

१ अलङ्क्रियतेऽनेन **अलङ्कारः** । करणे घञ् । कटककेयूरादिः । २ भूष्यतेऽनेन **भूषणम्**, पुंक्ली. । 'भूष अलङ्कारे'(भ्वा.प.से.), करणे ल्युट् ॥६४९॥ ३ परिस्क्रियतेऽनेन **परिस्कारः** । करणे घञ्[15], 'सम्पर्युपेभ्यः करोतेर्भूषणे[16]' ६।१।१३७॥ सुट्, 'परिनिविभ्यः-'८।३।७०॥इति षत्वम् । ४ आ समन्ताद् भ्रियते शोभाऽनेन **आभरणम्** । 'डुभृञ् धारणपोषणयोः'(जु.उ.अ.), ल्युट् । चत्वारि सामान्येन कङ्कणकेयूराद्याभरणस्य ॥

**चूडामणिः शिरोमणिः ।**

१ चूडा शिखा, तत्र स्थितत्वात् चूडाया मणिः **चूडामणिः** । २ शिरसि मणिः **शिरोमणिः** । शिरोरत्नमपि।

---

१. चुरादौ 'पटपुट-' इत्यादिदण्डकोऽयं धातुर्भाषार्थे दृश्यते ॥ २. '-हिंसयोः' इति२, स्वामिसायणसम्मतोऽयं धातुपाठः, 'तूरी त्वरणहिंसयोः' इति मैत्रेयः ॥ ३ 'पिडि सङ्घाते' इति क्षीरतरङ्गिण्यादयः ॥ ४. 'पिण्डतोऽपि' इति३॥ ५. 'पण्डितः सल्लके कवौ' इति विश्वप्रकाशकोशे दृश्यते, तान्तवर्गः, श्लो-१०९, पृ.१०९॥ ६. 'तुरष्को' इति३॥ ७. इतोऽग्रे१.२ प्रत्योः 'वा' इति दृश्यते ॥ ८. श्रीधरकृतविश्वलोचनकोशे 'श्रीवासे पायसः पुंसि परमान्ने तु पायसम्' इति दृश्यते, तेनाऽत्र 'महेश्वरः' इति युक्तः ॥ ९. द्र. टीकासर्वस्वम्, भा-२, २।६।१२८-१२९॥, पृ.३८२॥, पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३८६, पृ.४७५॥, रामाश्रमी २।६।१२८॥, पृ.३१८॥ १०. १प्रतौ नास्ति ॥ ११. '-द्रवः' इति३॥ १२. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३८७, पृ.४७५॥, रामाश्रमी २।६।१२९॥, पृ.३१८॥ १३. '-चका' इति३॥ १४. 'हाता' इति३॥ १५. 'ल्युट्' इति२॥ १६. 'सम्परिभ्यां करोतौ भूषणे'६।१।१३७॥ इत्यष्टाध्याय्याम्, 'सम्पर्युपेभ्यः करोतौ भूषणे' इति काशिकासम्मतः पाठः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

''चूडामणिः शिरोरत्नम्''[अमरकोषः२।६।१०२॥]इत्यमरः । द्वे सामान्येन ताजकुमलमादलियांराखडीति ख्यातस्य मस्तकाभरणस्य ॥

## नायकस्तरलो हारान्तर्मणिः

१ नयति शोभां **नायकः** । 'णीञ् प्रापणे'(भ्वा.-उ.अ.), ण्वुल् । **२** तारं लाति **तरलः** । 'आतः-'३।२।३॥ इति कः, पृषोदरादित्वाद् ह्रस्वत्वम् । तरतीव कान्त्या तरल इति वा । **तरतेर्बाहुलकादलः** । हारस्य अन्तर् मध्ये स्थितो मणिः हारान्तर्मणिः । द्वे हारमध्यस्थमणेः ॥

## मुकुटं पुनः ॥६५०॥

## मौलिः किरीटं कोटीरमुष्णीषम्

१ मोकति मण्डयति **मुकुटम्,** क्लीबेऽयम्। पुंस्यपि वैजयन्ती, [यदाह-''मौलिः कोटीरमुष्णीषं किरीटं मुकुटोऽस्त्रियां[1]:''[वैजयन्तीकोषः४।३।१३५]] । 'मुक मण्डने'( ), 'मुकिलजिभ्यां कुटन्'([2])इति कुटन् । वररुचिपुरुषोत्तमादिमते द्व्युकारं मुकुटम् । मङ्क्ति[3](मङ्क्ते) मण्डयति । 'मकि मण्डने'(भ्वा.आ.से.), 'मकेरुटन्नलोपश्च'([4])इति उटन्नलोपौ इति । न्यासकारो मकुटमेकोकारं[5] प्राह ॥६५०॥ **२** मूयते बध्यते शिरसि **मौलिः,** पुंस्त्री । 'मूङ् बन्धने'(भ्वा.आ.से.), 'मूधूभ्यां लिः'( )इति लिः । **३** किरति विक्षिपति रश्मीन् स्वर्णमयत्वात् **किरीटम्** । 'कॄ विक्षेपे'(तु.प.से.), 'कृतॄकृपेः कीटन्'(चान्द्रोणा-२।३४॥) । ([6]एवं 'तॄ प्लवनादौ'(भ्वा.-प.से.), तिरीटं किरीटतुल्यार्थम्) । **४** कुटति **कोटीरम्** । 'कुट कौटिल्ये'(तु.प.से.), 'कृशॄपॄ(पृ)कटिपटिशौटिभ्य ईरन्'(उणा-४७०)इतीरन्, बाहुलकाद् गुणः । **५** ओषत्यश्रियम् **उष्णीषम्** । 'उष दाहे'(भ्वा.प.से.), 'उषेर्णोऽन्तश्च'(हैमोणा-५५६)इतीषः । किरीटाद्यास्त्रयः पुंक्लीबलिङ्गाः । पञ्च मुकुटस्य । 'मउड' इति भाषा ॥

## पुष्पदाम तु ।

## मूर्ध्नि माल्यं माला स्रक्

१ मूर्ध्नि मूर्धाधिकरणकम् । मल्यते धार्यते शिरसि **माला ( माल्यम् )** । 'मल मल्ल धारणे'(भ्वा.आ.से.), 'ऋहलोर्ण्यत्'३।१।१२४॥, 'अत उपधायाः'७।२।११६॥इति वृद्धिः । मालैव[7] माल्यम्, स्वार्थे ष्यञि वा । **२** मलते शोभामिति, मल्यते धार्यते जनैर्वा **[ माला ]** । 'अकर्तरि च कारके संज्ञायाम्'३।३।१९॥इति, कर्मणि घञ् वा । मां लक्ष्मीं लातीति। 'आतः-'३।२।३॥ इति कः, टाप् । **३** सृजन्ति तां मालिकामिति[8] **स्रक्** । 'सृज विसर्गे'(तु.प.अ.), 'ऋत्विक्-'३।२।-५९॥इत्यादिना कर्मणि क्विन्, 'सृजिदृशोर्झल्यमकिति'६।१।५८॥ इत्यमागमः, 'क्विन्प्रत्ययस्य कुः'८।२।८२॥ । त्रीणि पुष्पस्रजः। 'टोडर' इति भाषा ॥

## गर्भकः केशमध्यगम्[9] ॥६५१॥

१ केशमध्यगतं पुष्पदाम गर्भस्थत्वाद्[10] **गर्भकः** । गर्भ इव गर्भकः । 'इवे प्रतिकृतौ'५।३।९६॥ इति कन् । ''केशमध्ये तु गर्भकः''[हलायुधकोशः२।५५२॥, अमरकोषः २।६।-१३५॥]इति हलायुधः । अत्र पुष्पदामेति पदं ''प्रालम्बमृजुलम्बि यत्''[अभिधानचिन्तामणिनाममाला३।६५२]इत्योऽनुवर्तनीयम्, तेन केशमध्यगं पुष्पदाम गर्भक उच्यत इत्यन्वयः। एकं केशमध्यस्थपुष्पदाम्नः ॥६५१॥

## प्रभ्रष्टकं शिखालम्बि[11]

१ शिखातश्चूडातो लम्बमानं पुष्पदाम, प्रभ्रश्यति स्म प्रभ्रष्टम् । भ्रंशधातोः 'आदिकर्मणि क्तः-'३।४।७१॥, स्वार्थे कनि **प्रभ्रष्टकम्** । एकं चूडायां लम्बमानपुष्पमालायाः ॥

## पुरो न्यस्तं ललामकम्[11] ।

१ लडत्यग्रे ललामम् । 'लल(लड) विलासे'(भ्वा.-प.से.), पृषोदरादिः। पुंक्लीबलिङ्गोऽयम्[12] । अमरस्तु-''ललामं पुच्छपुण्ड्राश्वभूषाप्राधान्यकेतुषु''[अमरकोषः३।३।१४३॥]इति क्लीबमेवाह । लाति शोभां ललामेति ना(मा)न्तोऽप्ययम् ॥ ''कन्याललाम कमनीयमजस्य लिप्सोः''[रघुवंशम्, सर्गः-५,

---

१. द्र. स्वोपज्ञटीका३।६५०॥, पृ.१४६॥, वैजयन्तीकोषे 'मौलिः कोटीर उष्णीषं किरीटं मकुटोऽस्त्रियाम्' इति दृश्यते, ४।३।१३५॥, पृ.१२४॥ २. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३६०, पृ.४४६॥ ३. 'मङ्क्यति' इति३॥ ४. द्र. टीकासर्वस्वम्, भा-२, २।६।१०२॥, पृ.३६१॥, तत्र 'मङ्केः उ-' इति दृश्यते, पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३६०, पृ.४४६॥ ५. '-कार' इति१॥ ६. कोष्ठान्तर्गतपाठः १.२प्रत्योर्न दृश्यते ॥ ७. 'मालेव' इति१, 'माल्यैव' इति३॥ ८. 'मालिका इति' इति१.२.३॥ ९. '-गः' इति३॥ १०. '-स्थाद्' इति३॥ ११. तुलनीयोऽमरकोषः२।६।१३५॥ १२. 'पुंक्ली.' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्लो-६४]इति रघुः । द्वाभ्यामपि स्वार्थकनि **ललामकम्** । एकं मुण्डमालेति ख्यातायाः ॥

### तिर्यग् वक्षसि वैकक्षम्

१ उरसि यदुपवीतवत् तिर्यगनृजु पुष्पदाम क्षिप्तम्, तद् **वैकक्षम्** । विशिष्टः कक्षो भुजमूलमस्माद् विकक्षमुरः, ततो भवार्थेऽण् ॥

### प्रालम्बमृजुलम्बि यत् ॥६५२॥

१ कण्ठादुभयतो वक्षसि लम्बमानं पुष्पदाम, प्रालम्बते **प्रालम्बम्** । प्राङ्पूर्वाल्लबिधातोरच् । ऋजु सरलम् । लम्बि लम्बमानम् । एकम् ॥

### सन्दर्भो रचना गुम्फः श्रन्थनं ग्रन्थनं समाः ।

१ सन्दर्भणं **सन्दर्भः** । 'दृभि दृब्धौ[1]'(तु.प.से.), 'ऋदोरप्'३।३।५७॥ इत्यप्[2] । २ रचनं **रचना** । 'रच प्रतियत्ने[3]'(चु.उ.से.), भावे ल्युट् । ३ गुम्फनं **गुम्फः** । भावे घञ् । ४-५ श्रथ्यते[4] **श्रन्थनम्** । ग्रथ्यते[5] **ग्रन्थनम्** । 'श्रन्थ ग्रन्थ सन्दर्भे'(चु.उ.से.), 'श्रन्थ विमोचनप्रतिहर्षयोः'(क्र्या.-प.से.) वा । उभयत्र 'ण्यासश्रन्थ-'३।३।१०७॥ इति युच् । पञ्च 'गूंथवुं[6]' इति ख्यातस्य । "परिस्यन्दः प्रतियत्नः"[शेषनाममाला३।१३४॥]शैषिके ॥

### तिलके तमालपत्रचित्रपुण्ड्रविशेषकाः ॥६५३॥

१ तेलति **तिलकम्**, पुंक्लीबलिङ्गः[7] । 'तिल गतौ' (भ्वा.प.से.), संज्ञायां क्वुन् । तिलपुष्पाकृतित्वाद् वा, तत्र । २ तमालपत्राकृतिकस्तूर्यादिना ललाटे कृतं **तमालपत्रम्** । तमालोऽपि । "तमालस्तिलके खड्गे"[विश्वप्रकाशकोशः, लान्तवर्गः, श्लो-१०२]इति विश्वः । ३ चित्र्यते **चित्रम्** । 'चित्र चित्रक्रियायाम्[8]'(चु.उ.से.), चुरादिः, घञ् । चित्रकमित्यपि । ४ पुणति पुण्ड्यते वा **पुण्ड्रम्** । 'पुण शुभे कर्मणि'(तु.-प.से.), 'पुड मर्दने[9]'(भ्वा.प.से.), अस्माद् वा । पृषोदरादित्वात् सिद्धिः । ५ विशिनष्टि ललामं **विशेषकः**, पुंक्ली. । 'शिष्लृ विशेषणे'(रु.उ.अ.), ण्वुल् । पञ्च तिलकस्य ॥६५३॥

### आपीडशेखरोत्तंसाऽवतंसाः शिरसः स्रजि ।

१ शिखाक्षिप्ते शिखाधिकरणके वा माल्ये, आपीडयति शिखाम् **आपीडः** । 'पीड अवगाहने[10]'(चु.उ.से.), अच् । २ शेते शिरसि, पृषोदरादित्वात् शिकारस्य खकारे शिलोपे च **शेखरः** । ३-४ उत्तंस्यतेऽनेन **उत्तंसः** । अवतंस्यतेऽनेन **अवतंसः** । 'तसि अलङ्कारे'(चु.उ.से.), करणे घञ् । शेखरादयः पुंक्लीबलिङ्गाः[11] । चत्वारि 'सेहरा' इति ख्यातस्य[12] ॥

### उत्तरौ कर्णपूरेऽपि

१-२ उत्तरौ **उत्तंसावतंसौ** । ३ कर्णं पूरयति **कर्णपूरः**, पुंक्लीबलिङ्गः । यद्[13] हलायुधः-"कर्णपूरेऽपि दृश्येते तथोत्तंसावतंसकौ"[हलायुधकोशः२।५५४॥]इति । वतंसोऽपि । त्रीणि कर्णपूरस्य ॥

### पत्रलेखा तु पत्रतः[14] ॥६५४॥
### भङ्गिवल्लिलताङ्गुल्यः

१ पत्राकृतिर्लेखा **पत्रलेखा** । २-५ पत्रशब्दाद् ॥६५४॥ भङ्ग्यादयो योज्याः, तेन **पत्रभङ्गिः, पत्रवल्लिः, पत्रलता, पत्राङ्गुली**[15] । एवं पत्रमञ्जरी, पत्रवल्लरीत्यादयोऽपि ।

"भुजशिखरस्तनमण्डलकपोलकण्ठेषु विरचिता कुशलैः ।
[16]अनुलेपनेन लेखा निगद्यते पत्रवल्लीति ॥"[हलायुधकोशः २।५४२] [इति] हलायुधः । पञ्च स्त्रीणां कपोलस्तनमण्डलादिषु कस्तूरिकादिरचितपत्रलेखायाः ॥

### पत्रपाश्या ललाटिका[17] ।

१ पाश्यते बध्यते । 'पाश(पश) बन्धने'(चु.-उ.से.), [18]चुरादिण्यन्ताद् 'अचो यत्'३।१।९७॥, पाश्या ।

---

१. 'दृभी ग्रन्थे' इति क्षीरतरङ्गिण्यादयः ॥ २. अत्र घञेव युक्तः, 'ऋदोरप्'३।३।५७॥ इत्यस्याऽविषयत्वात् ॥ ३. 'प्रयत्ने' इति१.२.३॥ ४. 'श्रंथ्यते' इति३॥ ५. 'ग्रंथ्यते' इति३.४॥ ६. 'गूथवुं' इति२, 'गूंथवूं' इति४॥ ७. 'पुंक्लीबः' इति३॥ ८. 'चित्र चैत्रस्य करणे' इति क्षीरतरङ्गिणी, 'चित्र चित्रीकरणे' इति धातुप्रदीपः, 'चित्र चित्रकरणे' इति मा.धातुवृत्तिः ॥ ९. मैत्रेयः 'मुडि खण्डने' इत्यस्मात् परः 'पुडि चेत्येके' इति धातुपाठमाह । क्षीरतङ्गिणीमाधवीयधातुवृत्तिग्रन्थे साक्षाद् रूपेण न दृश्यते ॥ १०. '-गाहे' इति१.३॥, मैत्रेयसायणसम्मतोऽयं धातुपाठः, 'पीड गहने' इति क्षीरस्वामी ॥ ११. 'पुंक्ली.' इति३॥ १२. 'शेखराख्यातस्य' इति३॥ १३. 'यद्वा' इति३॥ १४. 'पत्रकः' इति३॥ १५. १.२.३प्रतिषु न दृश्यते ॥ १६. 'आनु-' इति२॥ १७. तुलनीयोऽमरकोषः२।६।१०३॥ १८. 'चुरादिः' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अल्पविस्तृतत्वात्[१] पत्रमिव पाश्या **पत्रपाश्या** । २ ललाटस्यालङ्करणं **ललाटिका** । 'कर्णललाटात् कनलङ्कारे'४।३।६५॥ इति कन्, टाप्, 'प्रत्ययस्थात्-'७।३।४४॥ इतीत्वम् । "रचिता ललाटपट्टे ललाटिका कथ्यते रेखा"[हलायुधकोशः २।५४१॥]इति हलायुधः । द्वे आडिप्रभृतिललाटमण्डनस्य ॥

## बालपाश्या पारितथ्या[२]

१ बालपाशे केशवृन्दे साधुः **बालपाश्या**, शोभाकरत्वात् । प्राग्घिताद् यत् । २ परितः सर्वतो ज्योतिर्मयत्वात् तथाभूता परितथा, कर्मणि ष्यञ्, पारितथ्यम्, तद्योगादर्शआद्यचि **पारितथ्या** । द्वे सीमन्तस्थितायाः स्वर्णादिरचितपट्टिकायाः । मींढिकायां[३] मुक्ताकृतबांगणु[४][५] स्वर्णचूर्णिकाकृत[६]चउकीमोरडी[७] इत्यादि पृथक्पृथगारभरण इति भाषा अत्र लोकतो ज्ञेयाः ॥

## कर्णिका कर्णभूषणम् ॥६५५॥

१ कर्णस्यालङ्कारः **कर्णिका** । 'कर्णललाटात् कनलङ्कारे'४।३।६५॥ इति तन्, टाप्, इत्वं च । २ कर्णयोर्भूषणं **कर्णभूषणम्** ॥६५५॥

## ताडङ्कस्तु ताडपत्रं कुण्डलं कर्णवेष्टकः ॥

१ ताड्यते कर्णोऽनेन **ताडङ्कः** । 'तड आघाते' (चु.उ.से.), चुरादिः, बाहुलकादङ्कन् । २ ताडपत्रनिर्मितत्वात् **ताडपत्रम्**, तेनाऽपि कर्णभूषाजननात्, तच्च स्वर्णादिकृतमपि वलयित[८]तालपत्राकारत्वात् तालपत्रमुच्यते । ३ कुण्डति[९] संहतं भवति, कुण्डति दहत्यशोभामिति वा **कुण्डलम्**, पुंक्ली.। 'कुडिँ[१०] तुडि सङ्घाते[११]'( ), 'कुडि दाहे' (भ्वा.आ.से.) च, वृषादित्वात् कलच् । ४ कर्णैकदेशे कर्णः, कर्णो वेष्ट्यतेऽनेन **कर्णवेष्टकः** । चत्वारि कुण्डलस्य। शेषश्चात्र-"अथ कुण्डले कर्णादर्शः"[शेषनाममाला ३।१३४-१३५॥]। द्वौ द्वौ भिन्नार्थावित्येके, तदाऽऽद्यौ द्वौ कीलिकासहितौ, 'अकुटौ[१२]' इत्यादिभाषाप्रसिद्धौ, यदि ताडपत्रमयं भूषणम्, तदा [१३]धुंभीति प्रसिद्धिः, यदि रूप्यादिमयम्, तदा 'अकुटा' इति प्रसिद्धिः । अपरौ द्वौ कीलिकाविनिर्मुक्तौ अकुटाभेदावेव 'कुण्डल' इति भाषाप्रसिद्धौ ॥

## उत्क्षिप्तिका तु कर्णान्दुः

१ उत्क्षिप्यते स्म उत्क्षिप्ता, सैव **उत्क्षिप्तिका** । २ कर्णयोरन्द्यते बध्यते **कर्णान्दुः**, स्त्रीलिङ्गः । 'अदि बन्धने' (भ्वा.प.से.), बाहुलकाद् 'भृमृस्वृस्निहिँ[१४]-'(उणा-१०)इत्यादिना उः । वैजयन्ती तु षष्ठस्वरान्तमाह-"अन्दूः"[वैजयन्तीकोषः-६।२।१॥]इत्यपि । द्वे 'गण्ठुडा[१५]' इति ख्यातस्य। कर्णान्दुशब्दो बालिकानामाऽपि । "उत्क्षिप्तिकायां कर्णान्दुः कर्णपाश्यामपि[१६] स्त्रियाम्"[विश्वलोचनकोशः, दान्तवर्गः, श्लो-२०]इति हलायुधः(श्रीधरः) । "कर्णपाशी बालिका"[ ]इति तट्टीका ॥

## वालिका कर्णपृष्ठगा ॥६५६॥

१ वलते **वालिका** । 'वल संवरणे'(भ्वा.आ.से.), 'कृञादिभ्यो वृञ्(वुन्)'(उणा-७१३), 'प्रत्ययस्थात्-' ७।३।४४॥ इतीत्वम् । कर्णपृष्ठं गच्छति कर्णपृष्ठगा । एकं वालिकायाः ॥६५६॥

## ग्रैवेयकं कण्ठभूषा[१७]

१ ग्रीवायाः सर्वं[१८] भूषणं ग्रीवायां भवं **ग्रैवेयकम्** । 'कुलकुक्षिग्रीवाभ्यश्चालङ्कारे[१९]'४।२।९६॥ इति ढकञ् । 'ग्रीवाया अण् च'४।३।५७॥ इति ढञि ग्रैवेयमपि । "सग्रैवेयस्त्वमतिफणितां[२०]"[[२१]]इति राजशेखरः । कण्ठो भूष्यतेऽनया कण्ठभूषा । 'भूष अलङ्कारे'(भ्वा.प.से.), 'गुरोश्च हलः'३।३।१०३॥ इत्यकारः । सामान्येन 'चीडनु[२२]विसरीओमौक्तिकविसरीओकण्ठसिरीमौक्तिकबिसरीओकण्ठसिरीसोनानींचीड[२३]' इत्यादिभाषाप्रसिद्धकण्ठाभरणस्यैकम् ॥

## लम्बमाना ललन्तिका ।

१ लम्बते सा लम्बमाना भूषा । ललति सा ललन्ती, ललन्त्येव **ललन्तिका** । 'ललँ[२४] विलासे'(भ्वा.प.से.), शतृक-

---

१. '-स्तृत्वात्' इति१.२.३॥ २. तुलनीयोऽमरकोषः२।६।१०३॥ ३. इतोऽग्रे ३प्रतौ 'तु' इति दृश्यते ॥ ४. '-कृतं' इति३॥ ५. 'बांगुणं' इति३॥ ६. '-कृत्' इति१.२॥ ७. 'चउकडी' इति२, 'चोकी' इति३॥ ८. 'वलयति-' इति२, 'वलयति-' इति३॥ ९. 'कुडति' इति३॥ १०. 'कडि' इति३॥ ११. ईदृग्धातुपाठः क्षीरतरङ्गिण्यादौ न दृश्यते ॥ १२. '-कोटा' इति३॥ १३. 'धूं-' इति३॥ १४. 'भृमृ' इत्युणादिगणसूत्रे नास्ति ॥ १५. 'कंठोड्य' इति३॥ १६. '-पाल्यामपि' इति विश्वलोचनकोशे, दान्तवर्गः, श्लो-२०, पृ.१७०॥ १७. तुलनीयोऽमरकोषः२।६।१०४॥ १८. 'सर्व-' इति३॥ १९. 'कुलकुक्षिग्रीवाभ्यः श्वास्यलङ्कारेषु'४।२।९६॥ इत्यष्टाध्याय्याम् ॥ २०. '-णिता' इति१.२॥ २१. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३६२, पृ.४४८॥, तत्र 'सग्रैवेयस्त्वमसि फणिना' इति दृश्यते ॥ २२. 'चीडनु' इति१.२॥ २३. 'कंठसिरीओ मौक्तिकविसरीओ' इति१॥ अत्र भाषाविद्भिः शुद्धाशुद्धपाठो विचारणीयः ॥ २४. डलयोरैक्यादत्र 'लड' इति बोध्यम्, विलासार्थकललधातोरभावात् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न्नन्तात् 'तृभूवहिवसि-'(उणा-४०८)इति बाहुलकाद् ललोऽपि-(ललेरपि) झच् षित्त्वं च, षित्त्वात् ङीष्, संज्ञायां कनि 'केऽणः'७।४।१३॥ इति ह्रस्वत्वं च । एकं सामान्येन 'वाडलु[1] हांसली[2]' इत्यादिभाषाप्रसिद्धकिञ्चिल्लम्बमानकण्ठभूषायाः ॥

**प्रालम्बिका कृता हेम्ना**

१ सैव ललन्तिका, स्वर्णरचिता, प्रालम्बते[3] **प्रालम्बिका** । एकं सामान्येन 'कांठलालहकुटंकावलिमालाचंपकुलीचउकी' इत्यादिभाषाप्रसिद्धप्रलम्बमानकण्ठभूषायाः ॥

**उरःसूत्रिका तु मौक्तिकैः ॥६५७॥**

१ सैव ललन्तिका मुक्ताभी रचिता उरसो वक्षसः सूत्रमुरस्सूत्रं सूत्रावली, तत्प्रतिकृतित्वात् कन् **उरस्सूत्रिका** । एकं सामान्येन प्रलम्बमानमौक्तिकरचितकण्ठभूषायाः॥६५७॥

**हारो मुक्तातः प्रालम्बस्त्रक्कलापावलीलताः ।**

१ निर्विशेषेणं[4] हारशब्दो मुक्तावल्यामेव वर्तते[5] । ह्रियते मनोऽनेनेति **हारः**, पुंस्त्री । 'हृञ् हरणे'(भ्वा.उ.अ.), कर्मणि घञ् । भिदादिपाठाद् हाराऽपि । ''हारा मुक्तावली हारः''[[6]] इति रभसः । २-६ मुक्ताशब्दात् परे प्रालम्बादयः, तेन **मुक्ताप्रालम्बः**, **मुक्तास्त्रक्**, **मुक्ताकलापः**, **मुक्तावली**, मुक्तानामावली दीर्घा पङ्क्तिः, सा च ग्रथितैव भूषणप्रकरणात्, **मुक्तालता** । षट् सामान्येन हारस्य ॥

अथ तद्विशेषानाह-

**देवच्छन्दः शतम्**

१ देवैरपि छन्द्यते संव्रियते, 'छद संवरणे[7]'(चु.-प.से.), 'छदि-'(चु.प.से.) च इत्यतः कर्मणि घञ्, **देवच्छन्दः** । देवानामपि छन्दोऽभिप्रायोऽत्रेति वा । शतमित्युत्तरत्र ''पञ्च हारफलं लताः''[अभिधानचिन्तामणिः३।६६०]इत्यतो लता इति सम्बध्यते, तेन शतं लता इति लभ्यते, तेन शतलतिक इत्यर्थः । ''यष्टिर्लता सरः[8] सरिके(सरिरि)त्येकार्थाः''[अम.क्षीर.२।६।१०५॥]इति क्षीरस्वामी । ''अष्टोत्तरशतलतिकोऽयम्''[[9]]इति केचित् । एकं शतलतिकस्य ॥

**साष्टं त्विन्द्रच्छन्दः सहस्रकम् ॥६५८॥**

१ अष्टोत्तरं सहस्रं लताः, इन्द्रस्य छन्दोऽत्रे[10] **इन्द्रच्छन्दः** ॥६५८॥

**तदर्धं विजयच्छन्दः**

१ तस्येन्द्रच्छन्दस्यार्धं चतुरधिकानि, लतानां पञ्चशतानीत्यर्थः, विजयाय छन्दोऽत्र **विजयच्छन्दः** ॥

**हारस्त्वष्टोत्तरं शतम् ।**

१ लतानामष्टोत्तरशतं **हारः** ॥

**अर्धं रश्मिकलापोऽस्य**

१ अस्य हारस्यार्धम्, चतुःपञ्चाशल्लता इत्यर्थः, रश्मीनां कलापो **रश्मिकलापः** ॥

**द्वादश त्वर्धमाणवः ॥६५९॥**

१ द्वादश लता उत्तरस्मादर्धेन माणव इव लघुत्वाद् **अर्धमाणवः** ॥६५९॥

**द्विर्द्वादशार्धगुच्छः स्यात्**

१ द्विगुणिता द्वादश द्विर्द्वादश, चतुर्विंशतिरित्यर्थः, गुच्छस्यार्धम् **अर्धगुच्छः** ॥

**पञ्च हारफलं लताः ।**

१ पञ्च लताः, हारस्य फलमत्र **हारफलम्** ॥

**अर्धहारश्चतुःषष्टिः**

१ चतुःषष्टिर्लताः, अर्ध एकदेशस्तत्कृतो हारोऽत्र **अर्धहारः** । अर्धं हारस्य अर्धहार इति वा[11] ।

**गुच्छमाणवमन्दराः ॥६६०॥**

**अपि गोस्तनगोपुच्छावर्धमर्धं यथोत्तरम् ।**

१ यथोत्तरम्[12], अर्धमर्धम्, यथा अर्धहारस्यार्धं द्वात्रिंशल्लताः, गुह्यछादनात् **गुच्छः** । पृषोदरादिः । गुत्स इत्यपि । ''गुत्सः स्यात् स्तबके स्तम्बे हारभिद्ग्रन्थपर्णयोः''[मेदिनी-

---

१. '-लो' इति३, '-लूं' इति४॥ २. '-डी' इति१॥ ३. '-म्बेति' इति३॥ ४. '-षणं' इति२॥ ५. 'प्रवर्तते' इति३॥ ६. द्र. टीकासर्वस्वम्, भा-२, २।६।१०५॥, पृ.३६४॥, पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३६३, पृ.४४९॥, रामाश्रमी २।६।१०५॥, पृ.३०८॥ ७. मैत्रेयसायणसम्मतोऽयं धातुपाठः, 'छदि संवरणे' इति स्वामी ॥ ८. 'सारः' इति१॥ ९. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३६२, पृ.४४९॥, तत्र '-लतिकेयम्' इति दृश्यते ॥ १०. '-त्रेति' इति३॥ ११. 'भाषा' इति१॥ १२. ३.४प्रत्योर्नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कोशः, सान्तवर्गः, श्लो-३ ]इति दन्त्यान्तेषु मेदिन्यादयः । १ गुच्छार्धं षोडश लताः, अल्पत्वाद् माणव इव **माणवकः** ( **माणवः** ) । १ माणवार्धमष्टौ लताः, मन्द्यते स्तूयते **मन्दरः** । 'मदि स्तुत्यादौ'(भ्वा.आ.से.), अरन्प्रत्ययः ॥६६०॥ १ मन्दरार्धं चतस्रो लताः, गोस्तनवल्लम्बमानो **गोस्तनः** । चतुःसंख्याया गोस्तनसंख्यत्वाद् गोस्तन इति वा। ''चुतस्त्रिंशद्यष्टिको गोस्तनः, अभिमतरसक्षरणाद् गोस्तन इव''[ ]इत्यन्ये । १ गोस्तनस्यार्धं द्वे लते, गोपुच्छाकृतित्वाद् **गोपुच्छः** । अन्ये तु-

''चतुष्षष्टिलतो हारो यष्टिहीनो यथोत्तरम् ।
रश्मिकलापो१ माणवको२ अ(ऽ)हारो३ऽर्धगुच्छकः४ ॥१॥
कलापः५ छन्दो६ मन्दरश्च गुच्छ[1]ः सप्ततियष्टिकः ॥''

[ [2] ]इत्याहुः । एके तु-''द्वात्रिंशल्लतिको गुच्छः, गुह्याच्छादनात्१, चत्वारिंशल्लतो गोस्तनो लम्बमानत्वात्२, गोपुच्छोऽपि३, [3]पञ्चाशल्लतोऽर्धहारः देवच्छन्दार्धत्वात्४, विंशतिलतो माणवकोऽल्पत्वात्५''[अम.क्षीर.२।६।१०५॥]इति प्रोचुः ॥

उपसंहारमाह-

## इति हारा यष्टिभेदात्

इति अमुना प्रकारेण यष्टिभेदात् चतुःषष्टिप्रकारा हाराः ॥

## एकावल्येकयष्टिका ॥६६१॥

## कण्ठिकाऽपि

१ यष्टिर्लता सरिकेत्येकार्थाः **एकावली** । २ एका यष्टिरस्या **एकयष्टिका** ॥६६१॥ ३ कणति कण्ठी । 'कण शब्दे'(भ्वा.प.से.), 'कणेष्ठः'(उणा-१०३)इति ठः, बाहुलकान्न ठस्येकः, कनि, केऽणः'७।४।१३॥इति ह्रस्वत्वे[4] **कण्ठिका** । त्रीणि एकावलीति ख्यातहारभेदस्य ॥

## अथ नक्षत्रमाला तत्संख्यमौक्तिकैः ।

१ नक्षत्राणां सप्तविंशतित्वान्नक्षत्रमालेव **नक्षत्रमाला**, तानि नक्षत्राणि संख्या येषां तानि तत्संख्यानि[5], तानि च मौक्तिकानि, तैः नत्रक्षसंख्यैः, सप्तविंशत्या मौक्तिकैरित्यर्थः ॥

## केयूरमङ्गदं बाहुभूषा

१ के बाहुशीर्षे यौति **केयूरम्** । पृषोदरादिः । के कफोणिशिरसि प्रगण्डे यौति वा । खर्जूरादित्वादूर इति वा, सप्तम्यलुक् । २ अङ्गं प्रगण्डरूपमवयवं दापयति घर्षणाच्छोधयति **अङ्गदम्** । 'दैप् शोधने'(भ्वा.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥ । ''अङ्गदो दोर्भूषा''[ [6] ]इति पुंस्यप्यमरः । ३ बाह्वोर्भूषा **बाहुभूषा** । त्रीणि 'बहिरखा' इति नाम्नः ॥

## अथ करभूषणम् ॥६६२॥

## कटको वलयं पारिहार्यावापौ च कङ्कणम् ।

## हस्तसूत्रं प्रतिसरः

१ करस्य भूषणं **करभूषणम्** । करो भूष्यतेऽनेनेति करणे ल्युट् वा । करं भूषयतीति । 'ण्यासश्रन्थोः-'३।३।१०७॥ इति युचि वा । मण्डनसूत्रेऽप्येतत् । ''क्लीबं स्याद् मण्डने सूत्रे कङ्कणं करभूषणम्''[ [8] ]इति रभसः ॥६६२॥ २ कटति आवृणोति, कटति स्थानान्तरं गच्छति वा **कटकः** । 'कटे वर्षावरणयोः'(भ्वा.प.से.), 'क्वुन् शिल्पिसंज्ञयोः'(उणा-१९०) इति क्वुन् । ३ वलति (वलते) **वलयम्** । 'वल वल्ल संवरणे [सञ्चरणे] च[9]'(भ्वा.आ.से.), 'वलिमलितनिभ्यः कयन्'(उणा-५३९) । ४ परिहर्तुं शक्यते परिहार्यः । 'अचो यत्'३।१।९७॥ इति यत्[10], प्रज्ञाद्यणि **पारिहार्यः** । आदिस्वरादिरप्ययमित्यन्ये । ५ ''आङ्पूर्वो वपिर्न्यासार्थः''[ [11] ]इति स्वामी[12] । आ उप्यते । 'अकर्तरि च-'३।३।१९॥ इति कर्मणि घञि **आवापः** । ६ कं सुखाय, कं सुखं वा यथा स्यात् तथा कणति शब्दायते **कङ्कणम्**। कमिति प्रकृते शब्दे, ''मस्तकेऽपि सुखेऽपि''[मेदिनीकोशः, मान्ताव्ययवर्गः, श्लो-५२]इति मेदिनिः । कलमव्यक्तं मधुरं वा कणतीति पृषोदरादिर्वा । ७ हस्ते सूत्र्यते **हस्तसूत्रम्** । एते सप्तापि पुंनपुंसकलिङ्गाः[13] । ८ प्रतिसरति **प्रतिसरः**, त्रिलिङ्गः।

---

१. 'गुत्सः' इति१ ॥ २. द्र. अम.क्षीरस्वामिकृतटीका२।६।१०५॥, पृ.१५६॥, तत्र ''चतुःषष्टिलतो हारोऽथाष्टहीना यथोत्तरम् । रश्मिः कलापो माणवकोऽर्धगुच्छकः ॥ कलापच्छन्दो मन्दरश्च गुच्छः सप्ततियष्टिकः ।'' इति दृश्यते ॥, स्वोपज्ञटीका३।६६१॥, पृ.१४८॥ ३. 'चतुःपञ्चा-' इति अम.क्षीरस्वामिटीकायाम् ॥ ४. '-त्वं' इति४॥ ५. '-ख्याकानि' इति३॥ ६. अमरकोषे न दृश्यते ॥ ७. '-णः' इति४॥ ८. द्र. टीकासर्वस्वम्, भा-२, २।६।१०८॥, पृ.३६७॥, पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३६६, पृ.४५३॥, रामाश्रमी२।६।१०८॥, पृ.३०९॥ ९. 'वल संवरणे' इति क्षीरतरङ्गिणी, 'वल वल्ल संवरणे' इति धातुप्रदीपः ॥ १०. 'ऋहलोर्ण्यत्'३।१।१२४॥ इत्यनेन ण्यद् युक्तः ॥ ११. स्वामिकृतामरकोशटीकायां न दृश्यते ॥ १२. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३६५, पृ.४५१॥ १३. 'पुंक्ली.' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'सृ गतौ'(भ्वा.प.अ.), अच्। अष्टौ करभूषणस्य । 'कङ्कण-वलय' इति[1] भाषा । केचित्तु कङ्कणादीन् त्रीन् मङ्गल्यसूत्र-वाचकत्वेन पृथगाहु:, तन्मते आद्यानि पञ्च स्वर्णरूप्यमयक-ङ्कणनामानि, अन्तिमानि त्रीणि विवाहमङ्गल्यसूत्रनामानि । यद्विश्वः-"कङ्कणं करभूषायां हस्तसूत्रेऽपि शेखरे"[विश्व-लोचनकोशः, णान्तवर्गः, श्लो-४१]इति ॥

## ऊर्मिका[1] त्वङ्गुलीयकम्[2] ॥६६३॥

१ ऊर्मिस्तरङ्गभेदः आवर्ताख्यस्तत्प्रतिकृतित्वाद् **ऊर्मिका** । 'इवे प्रतिकृतौ'५।३।९६॥ इति कन् । ऊर्मिं प्रशंसां(प्रकाशं) कायतीति । 'आतः-'३।२।३॥इति को वा । "ऊर्मिः स्त्रीपुंसयोर्वाच्या(र्वीच्यां) प्रकाशे वेगभङ्गयोः"[मेदिनी-कोशः, मान्तवर्गः, श्लो-३]इति मेदिनिः । २ अङ्गुलौ भवं विद्यमानम् **अङ्गुलीय[क]म्** । 'जिह्वामूलाङ्गुलेश्छः'४।३।-६२॥ इति छः, ततः कन् । कपिरि(लि)कादित्वाद् अङ्गुरीय-कमपि । पुंलिङ्गेऽप्ययम् । "अथ मैथिल्यभिज्ञानं काकुत्स्थ-स्याङ्गुरीयकः[2]"[भट्टिकाव्यम्, सर्गः-८, श्लो-११८]इति भट्टि-प्रयोगात् । द्वे '[3]वींटी' इति ख्यातायाः ॥६६३॥

## सा साक्षराऽङ्गुलिमुद्रा[1]

१ सा ऊर्मिका साक्षराऽक्षराङ्किता, अङ्गुल्यां मोदते **अङ्गुलिमुद्रा**, पृषोदरादिः । अङ्गुलीं मुद्रयतीति, पचाद्यचि वा। ऊर्मिकाया अङ्गुलिस्थत्वादङ्गुलेर्मुद्रा अङ्गुलिमुद्रा वा । यद्धलायुधः-"कथ्यतेऽङ्गुलिमुद्रा सा या भवेल्लिखिताक्षरा[4]" [हलायुधकोशः२।५५९] । वेदिरपि, यन्महेश्वरः-"वेदिरङ्गु-लमुद्रायां बुधेऽलङ्कृतभूतले"[विश्वप्रकाशकोशः, दान्तवर्गः, श्लो-११]इति । एकं साक्षरोर्मिकायाः ॥

## कटिसूत्रं[1] तु मेखला[2] ।

## कलापो[3] रसना[4](रशना) सारसनं[5] काञ्ची[6] च सप्तकी[7] ॥६६४॥

१ कटेः सूत्रं **कटिसूत्रम्** । २ मेहनस्य मूत्रस्य यत् खमिन्द्रियं भगम्, तस्य माला **मेखला** । "पृषो-दरात्"[[5]]इति माधवी । मीयते प्रक्षिप्यते, डुमिञः 'कल-चादयश्च(कम्बलादयश्च)'(द.पा. ८।११४)इति [कलः], गुणः, प्रत्ययककारस्य खत्वम्, निपातनादिति वा । ३ कल्पते प्रेर्यते **कलापः** । 'कल प्रेरणे[6]'( ), 'कलेरापः'(हैमोणा-२०८) इत्यापः । ४ अश्नुते व्याप्नोति कटीमिति **रशना**[7], स्त्री-क्ली. । " 'अशु(अशू) व्याप्तौ'(स्वा.आ.वे.), 'अशेरश[8] च'(उणा-२३३)इति युः, र[9]शादेशश्च"[[10]]इति माधवी । रसति शब्दायते र[11]सनेति वा । 'रस शब्दे'(भ्वा.प.से.), 'चलनशब्दा[र्था]दकर्मकाद् युच्'३।२।१४८॥ इति युच् । "[12]क्षुभितसिन्धुमनीरशनैः शनैः"[किरातार्जुनीयम्, सर्गः-५, श्लो-११]इति भारवियमकात्, "रसनाबन्धो रतिकलहेषु स दानानुमितिषु[13]"[सुबन्धुकृतवासदत्ता, पृ.५८]इति वास-वदत्ताश्लेषात् तालव्यदन्त्यमध्यरचना । ५ सह आरसनेन ईषद्ध्वनिना वर्तते **सारसनम्** । सारमुत्कृष्टं यथा स्यात् तथा सनति भजते, 'सन(षण) संभक्तौ[14]'(भ्वा.प.से.), अचि वा । "सारसनम् स्त्रीकट्यां वस्त्रग्रन्थनम्"[अम.क्षीर. २।६।१०९॥]इति स्वामी । "मेखलायां सारसनमुरस्त्रे च तनुत्रिणाम्"[[15]]इति दन्त्यादौ रभसः । द्विदन्त्योऽयम् । "साहसिकः सारसनं सारसाः स्रोतसः"[[16]]इति द्विदन्त्य-सभेदात्[17] । ६ कञ्चते दीप्यते, [कञ्च्यते] बध्यते वा काञ्चि । 'कचि दीप्तिबन्धनयोः'(भ्वा.आ.से.), '-इँ[18]:'( )इति इः, 'अन्येभ्योऽपि(अन्येषामपि)-'६।३।१३७॥ इति दीर्घः । "काञ्चिदामपिहितैकरोरुम्[19]"[शिशुपालवधम्, सर्गः-१०, श्लो-८३]इति माघः । 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि **काञ्ची** । "काञ्चीगुणस्थानमनिन्दितायाः"[कुमार-

---

१. 'इत्यादि-' इति१॥ २. '-लीयकः' इति भट्टिकाव्ये, पृ.२२४॥ ३. 'वी ' इति१॥ ४. 'च भवेद् या लिखिताक्षरा' इति हलायुधकोशे, २।५५९॥, पृ.६३॥ ५. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३६६, पृ.४५३॥, तत्र 'पृषोदरादिः' इति दृश्यते ॥ ६. क्षीरतरङ्गिण्यादौ प्रेरणार्थककलधातुर्न दृश्यते ॥ ७. 'रसना' इति३॥ ८. 'रस' इति३॥ ९. 'रसा-' इति३॥ १०. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३६६, पृ.४५४॥ ११. 'रश-' इति३॥ १२. किरातार्जुनीयकाव्ये 'व्यथित-' इति दृश्यते, ५।११॥, पृ.१००॥ १३. वासवदत्तायां 'रशनाबन्धो रतिकलहेषु न दानानुमतिषु' इति दृश्यते, पृ.५८॥ १४. 'वन षण भक्तौ' इति स्वामी, 'वन षण संभक्तौ' इति मैत्रेयसायणौ ॥ १५. द्र. टीकासर्वस्वम्, भा-२, २।६।१०९॥, पृ.३६७॥, पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३६७, पृ.४५४॥, रामाश्रमी२।६।१०९॥, पृ.३१०॥ १६. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३६७, पृ.४५४॥ १७. 'द्विदन्त्यभेदात्' इति३॥ १८. 'सर्वधातुभ्य इन्' इत्युणादिगणसूत्रम् ॥ १९. शिशुपालवधे 'काञ्चिधाम्नि पिहितैकतरोरु' इति दृश्यते, १०।८३॥, पृ.२६०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्भवम्, सर्गः-१, श्लो-३७]इति कुमारः । ७ सपति समवैति **सप्तकी** । 'षप समवाये'(भ्वा.प.से.), बाहुलकाद् 'हसिमृग्रिण्-'(उणा-३६६)इत्यादिना तन्, ततः स्वार्थे कन्, गौरादिः । सप्तकीत्यनेकोपलक्षणम् । सप्तेति बह्व्यः किङ्किण्यः कायन्ति शब्दायन्तेऽस्याम्, मूलविभूजादित्वात् के वा । केचित्तु-

"एकयष्टिर्भवेत् काञ्ची मेखला त्वष्टयष्टिका ।
रशना[1] षोडश ज्ञेया कलापः पञ्चविंशकः ॥१॥"

[[2]]इति पठन्ति, परमिह त्वभेदात् पर्यायता । उत्तरत्र "सा शृङ्खला(शृङ्खलं) पुंस्कटीस्था"[अभिधानचिन्तामणिः ३।६६५] इत्युक्तत्वादत्र "स्त्रीकट्याम्" इति लभ्यते । यदमरः-"स्त्रीकट्यां मेखलाकाञ्चीसप्तकीरशनाः स्त्रियः[3]"[अमरकोषः२।६।१०८॥] इति । सप्त कटिमेखलायाः । शेषश्चात्र-"मेखला तु लालनी[4] कटिमालिका"[शेषनाममाला३।१३५॥]इति ॥६६४॥

## सा [1]शृङ्खलं[5] पुंस्कटीस्था

१ सैव काञ्ची पुंस्कटीस्था, शृङ्गेण अग्रेण स्खलति **शृङ्खलम्**, त्रिलिङ्गः, पृषोदरादिः । शृणाति शैथिल्यं वा[6], 'कलचादयश्च(कम्बलादयश्च)'(द.पा.८।११४॥)इति कलच्प्रत्ययो धातोः शृङ्खादेशश्च[7] निपात्यते, तालव्यादिः । एकं पुंस्कटिस्थमेखलायाः ॥

## [1]किङ्किणी[8] [2]क्षुद्रघण्टिका[9] ।

१ किमिति कणति नैरुक्त इत्वे गौरादिः **किङ्किणी**[10], ह्रस्वद्वीकारवती । निरिकाराऽपि "कङ्कणी"[अम.क्षीर.२।६।-११०॥]इति स्वामी । घण्टैव घण्टिका, स्वार्थे कन्, 'केऽणः[11]' ७।४।१३॥इत्वम् । क्षुद्राऽल्पा घण्टिका **क्षुद्रघण्टिका** । "कङ्कणः स्यात् प्रतिसरः कङ्कणी क्षुद्रघण्टिका"[[12]]इति भागुरिः । द्वे 'घूघरी' इति ख्यातायाः[13] । "घर्घरी[14] [विद्या] विद्यामणिः"[शेषनाममाला३।१३५॥]शैषिके ॥

## [1]नूपुरं तु [2]तुलाकोटिः पादतः [3]कटका[4]ङ्गदे ॥६६५॥ [5]मञ्जीरं [6]हंसकं [7]शिञ्जिनी[15]

१ ऊनं[16] न्यूनं पूरयति **नूपुरम्**, पुंक्लीबलिङ्गः[17] । "मञ्जीरोऽस्त्री स नूपुरः"[[18]]इति रभसः। २ तुलाया दण्डाकृतेर्जङ्घायाः कोटिरग्रमिव **तुलाकोटिः** । "तुला गृहदारुबन्धार्थं पीठिका, तस्याः कोटिरश्रिरिव तुलाकोटिः"[[19]]इत्यन्ये। ३-४ पादशब्दात् कटकाङ्गदे योज्यौ[20], तेन पादस्य कटको वलयः **पादकटकः** । पादस्याऽङ्गदमिव **पादाङ्गदम्** ॥६६५॥ ५ मञ्जति **मञ्जीरम्** । मञ्जेः सौत्राद् 'गम्भीरादयश्च[21]'(चान्द्रोणा-३।२९)इतीरन् । "बाहुलकाद् हिंसे(मञ्जे)रिरन्"[[19]]इति माधवी । मञ्जू शोभनौ पादौ करोति, णिचि, टिलोपे, ततः पूर्ववदीरन्निति वा । मञ्जुं(मञ्जु) मधुरमीरयतीति वा, पृषोदरादिर्वा । ६ हंस इव कायति शब्दायते **हंसकम्** । 'कै शब्दे'(भ्वा.प.अ.), मूलविभुजादित्वात् कः । "मधुरध्वनित्वाद् हंस इवेति इवार्थे कन्"[[22]]इति माधव्यादयः । हंसाकृतिपादकटको हंस इव हंसक इति वा । पुंक्ली. एतौ । ७ शिङ्क्ते अव्यक्तं शब्दं करोति **शिञ्जिनी**[15] । 'शिजि अव्यक्ते शब्दे'(अ.आ.से.), ग्रहादित्वाण्णिनिः । अवान्तरभेदस्त्वेषां भरतोक्तोऽत्र नाश्रितः ॥

"शिञ्जिनी पादकटकस्तुलाकोटिस्तु नूपुरम् ।
मञ्जीरं हंसकं स्त्रीणां चरणाभरणं स्मृतम् ॥१॥"

[हलायुधकोशः२।५६१॥]इति हलायुधवचनात् सामान्यतः [23]जहिडिप्रभृतयोऽप्येभिरुच्यन्ते । सप्त नूपुरस्य । शेषश्चात्र-"नूपुरे तु पादशाला[24] मन्दारं[25] पादनालिका"[शेषनाममाला३।१३६॥]

---

१. 'रसना' इति३॥ २. द्र. टीकासर्वस्वम्, भा-२, २।६।१०९॥, पृ.३६७॥, तत्र "कलापो विंशकस्तथा' इति चतुर्थचरणं दृश्यते॥, पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३६६, पृ.४५४॥, तत्र 'रशना' इत्यस्य स्थाने 'रसना' इति दृश्यते, रामाश्रमी २।६।१०९॥, पृ.३१०॥, तत्र "एका यष्टिर्भवेत् काञ्ची मेखला त्वष्टयष्टिकाः । रसना षोडश ज्ञेयाः कलापः पञ्चविंशकः" इति दृश्यते ॥ ३. 'रशना तथा' इत्यप्यमरकोषे दृश्यते ॥ ४. 'लालना' इति४, 'लालिनी' इति शेषनाममालास्वोपज्ञटीकयोः ॥ ५. '-ला' इति४॥ ६. २प्रतौ नास्ति ॥ ७. 'शृङ्खला-' इति३॥ ८. 'किङ्कणी' इति२.३, तथा मुद्रितमूलेऽपि, स्वोपज्ञटीकाऽपि तमाश्रित्यैव ॥ ९. तुलनीयोऽमरकोषः२।६।११०॥ १०. 'किङ्कणी' इति३॥ ११. 'प्रत्ययस्थात्-' इति युक्तः ॥ १२. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३६८, पृ.४५६॥, रामाश्रमी २।६।११०॥, पृ.३१०॥ १३. 'इति ख्याताया:' इति २प्रतौ नास्ति ॥ १४. २प्रतौ नास्ति ॥ १५. 'शिञ्जनी' इति३॥ १६. १प्रतौ नास्ति ॥ १७. 'पुंक्ली' इति३॥ १८. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो ३६७, पृ.४५५॥, रामाश्रमी २।६।१०९॥, पृ.३१०॥ १९. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३६७, पृ.४५५॥ २०. 'योज्यो' इति२.३॥ २१. 'गभी-' इति१.४॥ २२. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३६८, पृ.४५६॥ २३. 'हेजड-' इति३॥ २४. '-शाली' इति३॥ २५. 'पादशीली मन्दीरं' इति शेषनाममालास्वोपज्ञटीकयोः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[अलङ्कारशेषश्चात्र-''पादाङ्गुलीयके] पादपालिका [पादकीलिका]''[शेषनाममाला३।१३६॥] अपि ॥

**अंशुकं[1] वस्त्रम्[2] अम्बरम्[3] ।**

**सिचयो[4] वसनं[5] चीरा[6]ऽऽच्छादौ[7] सिक्[8] चेल[9]वाससी[10] ॥६६६॥**

**पटः[11] प्रोतः[12]**

१ अंशुभिः सूक्ष्मतन्तुभागैः काशते **अंशुकम्** । 'कासृ(काशृ)दीप्तौ'(भ्वा.आ.से.), 'अन्येष्वपि-'(३।२।-१०१॥)इति डः, डित्त्वाट्टिलोपः । अंशून् तन्तून् कायतीति वा । अश्नुते व्याप्नोत्यङ्गाः(-ङ्गानि) । 'अशूङ् व्याप्तौ'[1] (स्वा.आ.वे.), बाहुलकादुकन्[2] । २ वस्यते आच्छाद्यतेऽनेन **वस्त्रम्,** पुंक्ली. । 'वस आच्छादने'(अ.आ.से.), '-ष्ट्रन्' (उणा-५९८) । ३ अमत्यनेन शोभाम् **अम्बरम्** । 'अम्-(अम) गत्यादौ'(भ्वा.प.से.), अरन्प्रत्यये साधु । ४ सिच्यते **सिचयः** । 'षिचिर् क्षरणे[3]'(तु.उ.अ.), ''बाहुलकात् कयन्[4]'' [मा.धातुवृत्तिः, तुदादिः, धातुसं-१४२]इति माधवः । ५ वस्ते आच्छादयति **वसनम्** । 'वस आच्छादने'(अ.आ.से.), नन्द्यादित्वाद् ल्युः, करणे ल्युटि वा । ६ चीयते तन्तुभिः **चीरम्** । 'चिञ् चयने'(स्वा.उ.अ.), 'शूसिचिमिभ्यो दीर्घश्च क्रन्[5]'(उणा-१८२)इति क्रन्दीर्घौ । ७ आच्छाद्यतेऽनेन **आच्छादः** । 'छद अपवारणे'(चु.उ.से.), णिजन्तः, करणे घञ् । ल्युटि आच्छादनमपि । ८ सिञ्चति सिच्यते वा **सिक्,** स्त्रीलिङ्गः । 'षिचिर्[6] क्षरणे[7]'(तु.उ.से.), क्विप् । सिचौ, सिचः इत्यादि । ९ चेलत्याच्छादयति **चेलम्** । 'चिल निवसने'(तु.प.से.), अच् । चिल्यतेऽनेनेति करणे घञि वा । ''चिलेश्चौरादिकादपि वा''[ [8] ]इति तु सुभूतिः[9]। गौरादिङीषि चेली । १० वस्यते[10]ऽनेन **वासः,** क्लीबे । 'वस आच्छादने'(अ.आ.से.), 'वस्यसि(वस्यगि)भ्यां णित्[11]' (चान्द्रोणा-३।१०२॥)इत्यसुन्, णित्त्वाद् वृद्धिः । वाससी, वासांसि इत्यादि ॥६६६॥ ११ पटते **पटः,** त्रिलिङ्गः । अमरस्तु-''सुचेलकः पटोऽस्त्री''[अमरकोष:२।६।११६] इत्याह । 'पट विस्तारे'(चु.उ.से.), घञर्थे कः, ततः प्रशंसायामर्शआद्यचि पटः। पटेदी(र्दी)प्त्यर्थपक्षे पाटयति दीपयति धारकं पचाद्यचि वा । १२ प्रकर्षेण ऊयते **प्रोतः** । पुंसि गौडः, क्लीबे वाचस्पतिः। 'ऊयीङ्[12] तन्तुसन्ताने' (भ्वा.आ.से.), घञ् । द्वादश सामान्येन वस्त्रस्य । शेषश्चात्र-''वस्त्रे निवसनं वस्नं सत्त्रं कर्पटमित्यपि''[शेषनाममाला३।१३७] ॥

**अञ्चलो[1]ऽस्यान्तः**

१ अस्य वस्त्रस्य प्रान्तः, अञ्चति प्राप्नोति वस्त्रं शोभामिति **अञ्चलः,** पुंक्ली. । 'अञ्चु गतिपूजनयोः'(भ्वा.-प.से.), वृषादित्वात् कलच् । एकं वस्त्रप्रान्तस्य ॥

**वर्तिर्[1]वस्तिश्[2]च तद्दशाः[3] ।**

१ वर्ततेऽञ्चलान्ते **वर्तिः** । 'वृतु वर्तने'(भ्वा.-आ.से.), 'हृपिधृ-'( )इत्यादिना तिः ('हृपिशि-'(दश. उ. १।४७)इतीन्) । २ वस्यते आच्छाद्यतेऽनेन **वस्तिः** । वस्यन्ते छिद्यन्ते आव्रियन्ते । 'वस स्नेहनछेदनावरणेषु[13]' (चु.उ.से.), चुरादिः, ततोऽनित्यण्यन्ताद् 'वसेस्तिः'(उणा-६१९)इति तिः । ३ दश्यते प्रायेण छिद्यते **दशाः** । 'दंश दशने'(भ्वा.प.अ.), भिदादित्वादङ् । पुंस्त्रीलिङ्गोऽयम्, बहुवचनान्तश्च । ''दशा वर्त्यामवस्थायां वस्त्रान्ते भूम्नि पुंस्त्रियोः''[ [14] ]इति रभसः । ''स्त्रियां बहुत्वे वस्त्रस्य दशाः स्युर्वस्त्र(र्वस्त)योर्द्वयोः''[अमरकोष:२।६।११४॥]इत्यमरः । तस्य वस्त्राञ्चलस्य दशास्तद्दशाः । त्रीणि 'दशीआवड' इति ख्यातस्य । ''वस्त्रपेश्यः[15]''[शेषनाममाला३।१३७॥]इति शैषिके[16] ॥

**पत्रोर्णं[1] धौत[2]कौशेयम्[17]**

---

१. 'अशू व्याप्तौ' इति स्वामी, 'अशू व्याप्तौ सङ्घाते च' मैत्रेयसायणौ ॥ २. '-कञ्' इति४॥ ३. 'रक्षणे' इति३, 'षिच क्षरणे' इति क्षीरतरङ्गिण्यादौ ॥ ४. मा. धातुवृत्तौ 'कयनन्तः' इति दृश्यते, तुदादिः, धातुसं-१४२, पृ.४९३॥ ५. 'शुसिचिमीनां दीर्घश्च' इत्युणादिगणसूत्रम् ॥ ६. 'षिचि' इति१॥ ७. 'षिच क्षरणे' इति क्षीरतरङ्गिण्यादौ ॥ ८. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३७३, पृ.४६१॥ ९. २प्रतौ नास्ति॥ १०. 'वसते' इति३॥ ११. 'वस्त्यगिभ्यां णित्'(हैमोणा-९७०)इति हैमोणादिगणसूत्रम्, 'वसेर्णित्'(उणा-६५७)इति पाणिनीयसम्मतोणादिगणे॥ १२. क्षीरतरङ्गिण्यादौ ङकारानुबन्धो न दृश्यते ॥ १३. 'वस स्नेहच्छेदाहरणेषु' इति स्वामी, 'वस स्नेहच्छेदापहरणेषु' इति मैत्रेयः, 'वस स्नेहनच्छेदनापहरणेषु' इति सायणः ॥ १४. द्र. टीकासर्वस्वम्, भा-२, २।६।११४॥, पृ.३७२॥, पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३७२, पृ.४५९॥ तयोष्टीकयोः 'वर्त्यामवस्थायां' इत्यस्य स्थाने 'वताववस्थायां' इति दृश्यते ॥, रामाश्रमी२।६।११४॥, पृ.३१२॥ १५. '-वेश्यः' इति१.४॥ १६. '-कं' इति३॥ १७. तुलनीयोऽमरकोष:२।६।११३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ लकुचवटादीनां पत्रेषु कृमिलालोर्णाकृतं **पत्रोर्णम्** । पृषोदरादिः ॥

"वयन्ति चारुवातानि व्यूयन्ते पटपट्टिकाः ।
वयन्ते चित्रपत्रोर्णं यत्कृते शिल्पिनः सदा ॥१॥"

[ ]इति हलायुधकाव्यम् । मिश्रास्तु-"लकुचवटादिपत्रेषु कृमिभिरूर्णाभिः कृतत्वात् पत्रोर्णम् । पत्रसम्बन्धीनि ऊर्णाऽत्रेति पत्रोर्णम् । पत्रोर्णं कौषे(शे)यमेव धौतं प्रक्षालितं पत्रोर्णाख्यमिति तु सुभूत्यादयः"[[1]]इति प्रोचुः । २ धाव्यते स्मेति धौतम् । 'धावु गतिशुद्ध्योः'(भ्वा.प.से.), भ्वादिरुभयपदी । धौतं च तत् कौशेयं च कृमिकोशोत्थं **धौतकौशेयम्** । [द्वे धौतकौशेयस्य] ॥

**उष्णीषो मूर्धवेष्टनम् ॥६६७॥**

१ ओषत्यश्रियम् **उष्णीषः**, पुंक्ली. । 'उष दाहे' (भ्वा.प.से.), पृषोदरादिः। २ मूर्धा वेष्ट्यतेऽनेन **मूर्धवेष्टनम्**। 'वेष्ट वेष्टने'(भ्वा.आ.से.), करणे ल्युट् । द्वे 'पाघडी' इति ख्यातायाः ॥६६७॥

**तत्स्यादुद्गमनीयं यद्धौतयोर्वस्त्रयोर्युगम् ।**

१ यद्धौतयोः प्रक्षालितयोर्वस्त्रयोर्युगं तद् **उद्गमनीयम्** इत्यन्वयः । शोषणायोद्गमनार्हत्वादुद्गमनीयम् । 'गम्लृ गतौ'(भ्वा.प.अ.), 'तव्यत्तव्यानीयरः'३।१।९६॥ इत्यनीयर् । "उद्गम्यतेऽभिलष्यते"[[2]]इति तु माधवी । "अत्र युगमिति प्रायिकम्, तेनैकमपि, 'धौतेरुद्गमनीयं तु धौतवस्त्रमुदाहृतम्'[[3]] इति मुनिः। [लक्ष्यं च-] "गृहीतवत्युद्गमनीयवस्त्रा"[कुमारसम्भवम्, सर्गः-७, श्लो-११]इति । एकं धौतवस्त्रयुगस्य ॥

**त्वक्फलकृमिरोमभ्यः संभवात् तच्चतुर्विधम् ॥६६८॥**
**क्षौमकार्पासकौशेयराङ्कवादिविभेदतः ।**

तदिति वस्त्रं त्वक्फलकृमिरोमभ्य उपादानकारणेभ्यः संभवादुत्पत्तेः क्षौमकार्पासकौशेयराङ्कवादिविभेदतश्चतुर्विधं चतुःप्रकारम् । त्वग् वल्कलं छल्लिरिति पर्यायाः, तज्जं क्षौमादि । "वाल्कलं[5] क्षौमादि"[अमरकोषः२।६।१११॥]इत्यमरः । "आदिशब्दाद् भाङ्गादि"[अम.क्षीर.२।६।१११॥]इति क्षीरस्वामी । भाङ्गं शणनिष्पन्नं 'त्रापड' इति प्रसिद्धिः[6] । फलं सस्यम्, तज्जं कार्पासादि । कृमिः कीटस्तज्जं कौशेयादि । रोमतनूरुहम्, तज्जं राङ्कवादि ॥

अथैतानि क्रमेणाह-

**क्षौमं दुकूलं दुगूलं स्यात्**

१ क्षुमाऽतसी, तस्या विकारः **क्षौमम्**, पुंक्ली.। 'तस्य विकारः'४।३।१३२॥ इत्यण् । सौत्रवस्त्रादधिकं क्षौति । 'टुक्षु शब्दे'(अ.प.से.), धर्मवन्मन्, बाहुलकाद् वृद्धिः । "क्लीबमाविष्टलिङ्गम्"[ ]इति तु सुभूतिः[7] । स्त्रियां क्षौमी । २-३ दुनोति शत्रुमनांसि, बाहुलकात् 'टुदुञ्[8] उपतापे'(स्वा.प.से.), अस्मात् पिञ्जादित्वादुलच् कुग्[9]गुगागमश्च **दुकूलम्, दुगूलं** च । क्षौमदुकूलशब्दौ सूक्ष्मवस्त्रनाम्नी अपि, अधोतरीत्यादिभाषा । यन्महेश्वरः-"क्षौमं मदे[10] दुकूले स्यादतसीवसनेऽपि च"[विश्वप्रकाशकोशः, मान्तवर्गः, श्लो-६]इति, "दुकूलं [तु] क्षौमे[11] सुक्ष्मांशुकेऽपि च"[विश्वप्रकाशकोशः, लान्तवर्गः, श्लो-११५] इति । त्रीणि सामान्येनाऽतसीत्वग्निष्पन्नस्य वस्त्रस्य ॥

**कार्पासं तु बादरम् ॥६६९॥**

१-२ [12]कर्पासफलस्य विकारः **कार्पासम्** । 'तस्य विकारः'४।३।१३४॥ इत्यण् । एवं बदरस्य विकारो[13] **बादरम्** । कर्पासीबदराभ्यां फले विकारेऽण्, तस्य 'फले लुक्' ४।३।१६३॥ इति लुक्, ततोऽण् । फालमपि । "फालं तु कार्पासं बादरं च तत्"[अमरकोषः२।६।१११॥]इत्यमरः । "फालं [14]सीरोपकरणे कार्पासादिकवाससि"[विश्वप्रकाशकोशः, लान्तवर्गः, श्लो-२०]इति महेश्वरश्च । द्वे सामान्येन कार्पासवस्त्रस्य ॥६६९॥

---

१. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३७१, पृ.४५८॥ २. तुलनीयोऽमरकोषः२।६।११२॥ ३. द्र. स्वोपज्ञटीका३।६६८॥, पृ.१४९॥ ४. 'सुभूतिः' इति४॥ ५. 'वाल्कं' इत्यमरकोषे ॥ ६. '-द्धेः' इति१॥ ७. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३७१, पृ.४५९॥, तत्र "क्षौममिति । सौत्रवस्त्रादिकम् । क्षौति । टुक्षु शब्दे । धर्मवन्(Vo. 1. 1. P. 162) मन् (उ.१।१३९)। क्षोममवृद्धादि क्लीबमाविष्टलिङ्गम्-इति सुभूतिः ।" इति दृश्यते ॥ ८. 'दुञ्' इति२.३, क्षीरतरङ्गिण्यादौ ञकारानुबन्धो न दृश्यते ॥ ९. 'दुक्वोः कुक् च' इत्यनेन ॥ १०. 'क्षौममट्टे' इति विश्वप्रकाशकोशे, पृ.११०॥ ११. 'क्षोमे' इति३॥ १२. 'का-' इति२॥ १३. 'बदरविकारो' इति३॥ १४. 'शिरो-' इति विश्वप्रकाशकोशे, पृ.१५०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## कौशेयं[1] कृमिकोशोत्थम्[2][१]

१ कृमीणामपाननिर्गतसूत्रकृतः कुड्मलाकारः-(कुण्डलाकारः) कोशः, ततः 'कोशाड्ढञ्'४।३।४२॥ इति ढञ् [ **कौशेयम्** ] । कौषेयं मूर्धन्यमध्यममपि । २ कृमिकोशादुत्तिष्ठति **कृमिकोशोत्थम्** । "पट्टश्च कौशेयवाचिनः । पट्टशब्दस्य पुंस्त्वमुक्तम्"[ ]इति लिङ्गानुशासनटीका । द्वे सामान्येन कीटकोत्पन्नवस्त्रस्य ॥

## राङ्कवं[1] मृगरोमजम्[१] ।

१ रङ्कुर्मृगभेदस्ततो जाताद्यर्थे '-अण् च'४।२।१००॥ इत्यण्, **राङ्कवम्** । "पशवोऽपि मृगाः"[अमरकोषः३।३।-२०॥]इति वचनाद् मेषादिरोमजं कम्बलाद्यपि राङ्कवम्"[ ] इति मिश्राः । एकं हरिण्यरोमोत्पन्नस्य ॥

## कम्बलः[1] पुनरूर्णायु[2]राविक[3]ौरभ्र[4]रल्लकाः[5] ॥६७०॥

१ काम्यते **कम्बलः**, पुंस्त्री । 'कमु कान्तौ'(भ्वा.-आ.से.), 'कमेर्बुक् च'(उणादिगणसू-१०६)इति कलच् । कम्पते कम्बलः । 'कपि चलने'(भ्वा.आ.से.), "बाहुलकात् कलन् पकारस्य बत्वम्[३]"[मा.धातुवृत्तिः, भ्वादिगण: धातुसं-२५६]इति माधवः । २ ऊर्णुवन्ति ऊर्णाः । 'ऊर्णुञ् आच्छादाने'(अ.उ.से.), 'ऊर्णोतेर्डः'(उणा-७२५)इति डप्रत्ययः, डित्त्वाट्टिलोपः । ऊर्णाः सन्त्यत्र **ऊर्णायुः**, पुंसि । 'ऊर्णाया युस्[४]'५।२।१२३॥ इति युस्, सित्त्वात् 'सिति च'१।४।१६॥ इति पदत्वाद् 'यस्येति च'६।४।१४८॥ इति लोपो न । ३-४ अविकस्य विकारः **आविकः**। उरभ्रस्य विकारः **औरभ्रः**। उभयत्र 'अवयवे च प्राण्यौ(ण्यो)षधिवृक्षेभ्यः'४।३।१३५॥ इत्यण् । ५ रमणं रत् । 'रमु क्रीडायाम्'(भ्वा.आ.अ.), क्विप्यनुनासिकलोपः । रत् इच्छा[५], तां लाति रल्लः । 'आतोऽनुपसर्गे कः'३।२।३॥, ततः स्वार्थे कनि **रल्लकः** । पञ्च सामान्येन गड्डुरिकादिरोमोत्पन्नवस्त्रस्य ॥६७०॥

## नवं वासोऽनाहतं[1] स्यात् तन्त्रकं[2] निष्प्रवाणि[3] च[६] ।

१ छेदं क्षालनं भोगश्च आहतम्, तद् रहितम् **अनाहतम्** । "अहतं च गृहशय्यासनमुखैर्वासोभिरहतैः प्रियैः" [ ]इति शाब्दिकाः । "अनाहतमस्फुटितम्"[ ] इत्यन्ये । २ "तिर्यग्विततास्तन्तवः तन्त्रम्[७]"[ ]इति न्यासः । ततोऽचिरापहृतमुत्थापितं **तन्त्रकम्** । "तन्त्रादचिरापहृते'५।२।७०॥ इति कन् । ३ प्रोयतेऽस्यामिति प्रवेञोऽधिकरणो ल्युट् प्रवाणी तन्त्रवयनाधारशलाका, सा निर्गता यस्मादिति बहुव्रीहौ **निष्प्रवाणिः** । निपातनात् कबभावः । त्रयोऽपि वाच्यलिङ्गाः । त्रीणि सामान्येन नूतनवस्त्रस्य । 'कोरीपछेडी[८] दोटी' इत्यादिभाषा ॥

## प्रच्छादनं[1] प्रावरणं[2] संव्यानं[3] चोत्तरीयकम्[4] ॥६७१॥

१ प्रच्छाद्यतेऽनेन **प्रच्छादनम्** । 'छद अपवारणे' (चु.उ.से.), णिजन्ताल्ल्युट् । २ प्राव्रियतेऽनेन **प्रावरणम्** । प्राङ्पूर्वः 'वृञ् वरणे'(स्वा.उ.से.), ल्युट् । ३ संवीयतेऽनेन **संव्यानम्** । 'व्येञ् संवरणे'(भ्वा.उ.अ.), ल्युट् । ४ उत्तरस्मिन् ऊर्ध्वदेहभागे भवं विद्यमानम् उत्तरीयम् । 'गहादिभ्यच्छः(-श्च)'४।२।१३८॥, ततः स्वार्थे[९] कन् । चत्वारि समान्येन "दुवटीप्रभृति ओढणुं" इति ख्यातस्य ॥६७१॥

## वैकक्षे[1] प्रावारो[2]त्तरासङ्गौ[3] बृहतिका[4]ऽपि च ।

१ विकक्षायां भवं **वैकक्षम्** । 'तत्र भवः'४।३।-५३॥ इत्यण्, तत्र । तिर्यग्वक्षसि विक्षिप्तवाससीत्यर्थः । २ प्राव्रियतेऽनेन **प्रावारः**, पुंस्ययम्, क्लीबेऽपीति केचित् । 'वृञ् वरणे'(स्वा.उ.से.), 'वृणोतेराच्छादने'३।३।५४॥ इति प्रोपसर्गाद् घञपौ, 'उपसर्गस्य घञि-'६।३।१२२॥ इति दीर्घः । आच्छादनादन्यत्राबेव, अत्रापि बाहुलकात् क्विन्विषये अब् भवति, यथा प्रवरा गौः[१०]"[ ]इति हरदत्तः । ३ उत्तरस्मिन् देहभागे वामपार्श्वे आसज्यते **उत्तरासङ्गः** । आङ्पूर्वः 'षञ्ज सङ्गे'(भ्वा.प.अ.), कर्मणि घञ् । उत्तरस्मिन् ऊर्ध्व-

---

१. तुलनीयोऽमरकोषः २।६।१११॥ २. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३६९, पृ.४५७॥ ३. 'बाहुलकात् कलप्रत्ययः, पकारस्य बकारः' इति माधवीयधातुवृत्तौ, भ्वादिः, धातुसं २५६, पृ.११८॥ ४. "अत्र छन्दसि इति केचिदनुवर्तयन्ति । युक्तं चैतत् । अन्यथा हि 'अहंशुभमो-' ५।२।१४०॥ इत्यत्रैवोर्णाग्रहणं कुर्यात्" इति सिद्धान्तकौमुद्यां भट्टोजिदीक्षितः, तद्धितेषु पाञ्चमिकाः, पृ.३६१॥ ५. 'इच्छां' इति२.३॥ ६. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३७०, पृ.४५७॥ ७. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३७०, पृ.४५८॥, तत्र 'तिर्यग्' इति न दृश्यते ॥ ८. 'पछेवडी' इति३.४॥ ९. १प्रतौ नास्ति ॥ १०. हरदत्तकृतपदमञ्जर्याम् "वृणोतेराच्छादने ॥ अत्राप्याच्छादन इति सामान्येनोक्तावपि पूर्ववद्विशेषप्रतिपत्तिरित्याह-प्रत्ययान्तेन चेदिति । प्रावार इति । पूर्ववद्दीर्घः । प्रवरा गौरिति । प्रशस्तेत्यर्थः ॥" इति दृश्यते, काशिकावृत्तिः, भा-३, ३।३।५४॥, पृ.४८॥, अत्र माधवीयधातुवृत्तिरपि तुलनीया, स्वादिः, धातुसं-८, पृ.४४९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

देहभागे आसज्यत इति वा । उत्तरशब्दो वामपार्श्ववचनोऽपि । यथा-उत्तरे चास्य सौवर्णं लक्ष्मपार्श्वे भविष्यति'' [महा.३।१२७।२१]इति वनपर्वणि जन्तूपाख्याने । ''उत्तरो वामः''[[1] ]इति तट्टीकाकृता विवृतम् । ४ बृहत्येव **बृहतिका** । 'बृहत्या आच्छादने' ५।४।६॥इति कन्, 'केऽणः' ७।४।१३॥ । ''बृहती वसनान्तरे''[मेदिनीकोशः, तान्तवर्गः, श्लो-१३७]इति मेदिनिः । चत्वारि 'उत्तरासण' इति ख्यातस्य ॥

## वराशिः स्थूलशाटः स्यात्

१ वरमावरणमश्नुते व्याप्नोति हिमादिवारणाद् **वराशिः** । 'अशूङ्[2] व्याप्तौ'( ), '-इन्'(उणा-५५७)इतीन्, पुंस्ययम् । ''वराशिर्ना''[[3] ]इति तालव्यान्ते शाब्दिका[4]: । वृणोत्यङ्गमिति इप्रत्यये पृषोदरादित्वाद्वा । ''वरासि[5]: स्यात् खड्गवरो(-रे) वराशिः स्थूलशाटके''[[3] ]इति दन्त्यान्तेषु रभसाद् दन्त्यान्तोऽपि । २ शटति गुरुत्वाद्रुजत्यवसादयति वा शटः । 'शट रुजाविशरणगत्यवसादनेषु'(भ्वा.प.से.), अच्, ततः प्रज्ञाद्यणि शाटः । स्थूलश्चासौ शाटश्च **स्थूलशाटः** । ण्वुलि शाटकोऽपि, त्रिलिङ्गः, यथा शाटकः, शाटिका, शाटकमिति । ''सुचेलकः पटोऽस्त्री ना वराशिः स्थूलशाटकः''[अमरकोषः२।६।११६॥]इत्यमरः । द्वे स्थूलवस्त्रस्य ॥

## परिधानं त्वधोंऽशुकम् ॥६७२॥
## अन्तरीयं निवसनमुपसंव्यानमित्यपि ।

१ परिधीयत इति **परिधानम्** । 'डुधाञ् धारणादौ' (जु.उ.अ.), कर्मणि ल्युट् । २ अधः अंशुकं वस्त्रम् **अधोंऽशुकम्** ॥६७२॥ ३ अन्तरे कायस्य भवम् **अन्तरीयम्**। 'गहादिभ्यश्च'४।२।१३८॥ । ४ निवस्यतेऽनेन **निवसनम्** । 'वस आच्छादने'(अ.आ.से.), करणे ल्युट् । ५ उप व्याप्य संवीयतेऽङ्गमनेन **उपसंव्यानम्** ।'व्येञ् संवरणे'(भ्वा.उ.से.), ल्युट् । सामान्येन पञ्च परिधानवस्त्रस्य । [6]पोतिसूं[7]थणि-फेटियांप्रभृतिभाषा ॥

## तद्ग्रन्थिरुच्चयो नीवी

१ तस्य परिधानस्य ग्रन्थिराग्रन्थनं तद्ग्रन्थिः, उच्चीयते बध्यतेऽनेन **उच्चयः** । 'चिञ् चयने'(स्वा.उ.अ.), 'एरच्'३।३।५६॥ इत्यच् । २ नीयते जघनस्थवस्त्रे नीवि[8]: । 'णीञ्[9] प्रापणे'(भ्वा.उ.अ.), बाहुलकाद् विप्रत्ययः । 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि **नीवी** । 'व्येञ् संवरणे'(भ्वा.उ.अ.) निपूर्वः, '' 'नौ व्यो पलभोप(यलोपः) पूर्वपदस्य(पूर्वस्य) च दीर्घः'(उणा-५७५)इति इकारप्रत्यये डित्त्वाट्टिलोपयलोपयोः पूर्वपददीर्घः नीवी[10]''[मा. धातुवृत्तिः, भ्वादिगणः, धातुसं-७३३]इति माधवः । सारसनमपि । यदमरः-''क्लीबे सारसनम्''[अमरकोषः २।६।१०९॥]। ''स्त्रीकट्यां वस्त्रग्रन्थनम्'[अम.क्षीर.२।६।१०९॥] इति क्षीरस्वामी । अन्येऽपि[11] ''मेखलायां सारसनमुरस्त्रे च तनुत्रिणां अधोवासोग्रन्थने च''[[12] ]इति । स्त्रीकट्यामेव । यत्कात्यः-''नीविराग्रन्थनं नार्या जघनस्थस्य वासस[13]:''[ ] इति । द्वे पाटलीति ख्यातायाः ॥

## वरस्त्र्यर्धोरुकांशुकम् ॥६७३॥
## चण्डातकं चलनकः

१ ऊर्वोः सक्थ्योरर्धाच्छादकं[14] वस्त्रमर्धोरुकांशुकम्, वरस्त्रीणामर्धो रुकांशुकं ([15]वरस्त्र्यर्धोरुकांशुकम्)॥६७३॥ चण्डं तीव्रमतति **चण्डातकम्** । 'अत सातत्यगमने'(भ्वा.प.से.), ण्वुल् । अच्, ततः कन्निति वा । पुंक्लीबलिङ्ग[16]: । २ चलतीत्येवंशीलः चलनः । 'चल चलने[17]'(भ्वा.प.से.), 'चलनशब्दा[र्था]दकर्मकाद्युच्'३।२।१४८॥ । कनि **चलनकः** । ''अर्धोरुकं वरस्त्रीणां वासश्चण्डातकः स्मृतः''[[18] ] इति पुंस्काण्डे वोपालितः । द्वे 'चरणा' इति ख्यातस्य ॥

---

१. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३७५, पृ.४६४॥ २. क्षीरतरङ्गिण्यादौ ङकारानुबन्धो न दृश्यते ॥ ३. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३७४, पृ.४६२-४६३॥, रामाश्रमी२।६।११६॥, पृ.३१३॥ ४. '-कः' इति१.४॥ ५. 'वराशिः' इति३.४॥ ६. 'पोत-' इति३॥ ७. '-सूथ-' इति३.४॥ ८. 'निवी' इति४॥ ९. 'णीङ्' इति३॥ १०. वस्तुतः 'नौव्यो-' इत्यादि सायणेनोक्तं व्याख्यानं 'निविः' इत्यस्य, न तु 'नीवी' इत्यस्य, अतस्तत्र(मा.धातुवृत्तौ) स्थितम् ''नीवी-कृदिकारादक्तिनः इति वा ङीष्'' इत्यग्रिमव्याख्यानमप्यत्र भाव्यम्, द्र. मा. धातुवृत्तिः, भ्वादिः, धातुसं-७३२, पृ.३०३॥ ११. दन्त्यादौ रभसेऽपीत्यर्थः ॥ १२. द्र. टीकासर्वस्वम्, भा-२, २।६।१०९॥, पृ.३१०॥, पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३६७, पृ.४५४॥, रामाश्रमी २।६।१०९॥, पृ.३१०॥ १३. 'वाससि' इति३॥ १४. '-दनं' इति३॥ १५. कोष्ठान्तर्गतपाठः २प्रतौ न दृश्यते ॥ १६. 'पुंक्ली' इति३॥ १७. 'चल कम्पने' इति क्षीरतरङ्गिण्यादौ ॥ १८. द्र. टीकासर्वस्वम्, भा-२, २।६।११९॥, पृ.३७५॥, तत्र 'स्मृतः' इत्यस्य स्थाने 'पुमान्' इति दृश्यते ॥, पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३७७, पृ.४६५॥, रामाश्रमी२।६।११९॥, पृ.३१४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**चलनी[1] त्वितरस्त्रियाः ।**

१ इतरा चासौ स्त्री च इतरस्त्री, तस्या अर्धोरुकं वस्त्रं **चलनी** इत्युच्यत इत्यन्वयः । चलत्यनया चलनी । 'चलनशब्दा[र्था]त्-'३।२।१४८॥ इति युच्, गौरादिः । एकं 'घाघरा' इति ख्यातस्य । यन्महेश्वरः-''चलनी वस्त्रघर्घर्यां चारीभेदेऽपि[1] च क्वचित्''[विश्वप्रकाशकोशः, नान्तवर्गः, श्लो-३९]इति । ''चारीशब्देन गतिविशेषः, वस्त्रघर्घरी बालिका-परिधानविशेषः''[ ]इति तट्टीका ॥

**चोलः[1] कञ्चुलिका[2] कूर्पासकोऽङ्गिका[3] च[4] कञ्चुके[5] ॥६७४॥**

१ चोल्यते अवगुम्फ्यते **चोलः** । 'चुल समुच्छ्राये' (चु.प.से.), घञ् । गौरादित्वाद् ङीषि[2] चोली च । चुलिः सौत्रो वा । २ कञ्चते दीप्यतेऽनया, कञ्च्यते बध्यते वा कञ्चुली । 'कचिङ् दीप्तिबन्धनयोः[3]'(भ्वा.आ.से.), बाहुल-कादुलनि साधुः, ततः कनि **कञ्चुलिका** । अर्थात् स्त्रिया एव, [कं चोलतीति वा ।] ३ कूर्परेऽस्यते क्षिप्यते **कूर्पासः** (**कूर्पासकः**) । ['असु क्षेपणे'(दि.प.से.), घञ्, अच् वा, स्वार्थे कन्,] पृषोदरादिः । कुर्परः(कूर्परः) कफोणिर्जानु च द्वयमस्यते क्षीप्यतेऽत्रेति वा व्युत्पत्तिः । ''कुर्परः(कूर्परः) स्यात् कफोणौ च जान्वपि च पुंस्ययम्''[मेदिनीकोशः, रान्तवर्गः, श्लो-१३७]इति मेदिनिः । ''कु(कू)र्पासस्त्वर्धचोलकः'' [हारावली, पादश्लोकावधिः, श्लो-१९७]इति हारावली । ([4]'कूर्पास' इति षष्ठस्वरादिरपि) । ४ अङ्गस्य प्रतिकृतिः **अङ्गिका** । 'इवे प्रतिकृतौ'५।३।९६॥ इति कन् । ५ कच्यते-(कञ्च्यते) बध्यते **कञ्चुकः**, पुंक्ली. । 'कचि बन्धने[3]'(भ्वा.-आ.से.), बाहुलकादुकप्रत्ययः, तत्र । सप्त कञ्चुलिकायाः । 'चोली चोलणउं[5]' [6]इत्यादिभाषान्तरम् ॥६७४॥

**शाटी[1] चोटी[2]**

१ शाटयति कटीमिति शाटः, तालव्यादिः । 'शाट (शट) रुजाविशरणगत्यवसादनेषु'(भ्वा.प.से.), हेतुमण्णिजन्तात् पचाद्यच् । जातिलक्षणे ङीषि **शाटी**, पुंस्त्रीलिङ्गः । पुंसि स्वार्थे कनि शाटकः । 'शाट(शट) श्लाघायाम्[7]'( ), चुरादिः, संज्ञायां क्वुनि वा । २ चोटत्यल्पीभवति चोटः । 'चुट अल्पीभावे[8]'(भ्वा.प.से.), अच् । पुंस्त्रीलिङ्गः । ङीषि **चोटी** । द्वे 'साडी' इति ख्यातायाः ॥

**अथ नीशारो[1] हिमवातापहांशुके ।**

१ निःशेषेण शीर्यते[9] हिमवातावत्रेति **नीशारः** । 'शृ हिंसायाम्'(क्र्या.प.से.), 'शृणातेर्वायुवर्णनिवृतेषु[10]'(वा-३।३।-२१॥)इति घञ्, 'उपसर्गस्य घञि-'६।३।१२२॥इति दीर्घः । मध्यतालव्योऽयम् । हिमं शीतम्, वातो वायुः, तावपहन्ति तद् हिमवातापहम्, तच्च तदंशुकं च हिमवातापहांशुकम्, तत्र । यल्लक्ष्यम्-''गौरिवाकृतनीशारः[11] प्रायेण शिशिरे कृशः''[काशिकावृत्तिः३।३।२१॥] । ''नीशारस्तु प्रावरणे हिमानिलनिवारणे'' [अमरकोषः२।६।११८॥]इत्यमरः । एकं शीरषलबाइ चाकबाइ[12] इत्यादिभाषाप्रसिद्धस्य ॥ ''द्विखण्डको वरकः''[शेषनाममाला ३।१३८॥]शैषिके ॥

**कच्छा[1] कच्छाटिका[2] कक्षा[3] परिधानाऽपराञ्चले ॥६७५॥**

१ कच्यते बध्यते **कच्छा** । 'कच बन्धने'(भ्वा.आ.-से.), 'कचेः छः(कचेश्छः)'(द.पा.४।६॥)इति छः, ततष्टाप् । २ कच्छैव कच्छाटी, ग्रामटीवधूटीवत् । ततः कनि **कच्छाटिका** । ''कच्छाटी पुंस्त्रियोः''[[13]]इति व्याडिः । ३ कषति गुह्यं **कक्षा** । 'कष हिंसायाम्[14]'(भ्वा.प.से.), 'वृतृवदि-'(उणा-३४२)इति सः । परिधानस्य 'पोतिफेटियां[15]' इति ख्यातस्य अपरः पश्चिमोऽञ्चलः, परिधानस्याऽपराञ्चलः परिधानाऽ-पराञ्चलः, तत्र । त्रीणि[16] 'काछडी' इति ख्यातायाः ॥६७५॥

**कक्षापटस्तु[1] कौपीनम्[2]**

१. 'वारिभेदेऽपि' इति विश्वप्रकाशकोशे, पृ.८८॥ २. 'ङीप्' इति१.३.४॥ ३. 'कचि दीप्तिबन्धनयोः' इति स्वामिमैत्रेयौ, 'कचि काचि दीप्तिबन्धनयोः' इति सायणः ॥ ४. कोष्ठान्तर्गतपाठस्थाने 'कूर्पासोऽपि' इति पाठो युक्तः ॥ ५. '-लणौ' इति३.४॥ ६. 'इति भा-' इति१॥ ७. 'शठ श्लाघायाम्' इत्यत्र स्वामिना 'शट इति नन्दी, शल इति कौशिकः' इत्युक्तम्, क्षीरतरङ्गिणी, चुरादिः, धातुसं-१३९, पृ.३०७॥ ८. 'अल्पीकरणे' इति१, दुर्गसम्मतोऽयं धातुपाठः, द्र. क्षीरतरङ्गिणी, भ्वादिः, धातुसं-२२२, पृ.५७॥, मा. धातुवृत्तिः, भ्वादिः, धातुसं-२१९, पृ.११३॥ ९. 'शीर्यते' इति१.२.३॥ १०. 'शृ वायुवर्णनिवृतेषु' इति वार्तिकस्वरूपं दृश्यते ॥ ११. '-नीसारः' इति१.३.४॥ १२. '-बाहि' इति१.२॥ १३. द्र. स्वोपज्ञटीका३।५७५॥, पृ.१५१॥ १४. 'कष खष शिष-' इत्यादिदण्डकोऽयं धातुः ॥ १५. '-या' इति३.४॥ १६. 'पञ्च' इति१.३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ कक्षायाः कच्छाटिकायाः पटो वासः **कक्षापटः**। ''कक्षापुटः''[ ]इत्येके । २ कूपप्रवेशनमर्हति **कौपीनम्**। 'शालीनकौपीने[1] अधृष्टा-'५।२।२०॥ इति साधुः । द्वे पायूपस्थावरचीवरखण्डस्य । 'कछोटओ[2] तणीओ' इति भाषा ॥

**समौ नक्तक[1]कर्पटौ[3] ।**

१ अज्यते स्म अक्तः स्फुटः, न अक्तं कं सुखमस्मादिति त्रिपदे[4] बहुव्रीहौ शकन्ध्वादित्वात् पररूपत्वे[5] **नक्तकः**। ''लक्यते हीनैरास्वाद्यतेऽनुभूयते, 'रक लक आस्वादने[6]'(चु.-उ.से.), चुरादेर्विकल्पितण्यन्तात् कर्मणि क्तः लक्तः, ततः स्वार्थे कनि लक्तक इत्यपि पाठः''[7]इति मिश्राः । येन द्रवद्रव्यं पूयते, तत्राऽयं रूढः, तत्तुल्ये वस्त्रेऽपि वर्तते । कल्पते[8] कुत्सायै **कर्पटः**, पुंक्ली. । 'कृपू सामर्थ्ये'(भ्वा.-आ.वे.), शकादित्वादटन् । किरत्यवयविनं कर्। 'कृ विक्षेपे' (तु.प.से.), विच् । कर् चासौ पटश्चेति कर्पट इति वा । कर्पटशब्दः सामन्यवस्त्रवाच्यपि । द्वे 'गलणउं[9]' इति ख्यातस्य । ''इमे द्वे मलिनत्वादिदुष्टजीर्णवस्त्रखण्डस्य''[7]इति तु मिश्राः । ''वस्त्रमात्रस्य [इति] केचित्''[7]इति सुभूतिः ॥

**निचोलः[1] प्रच्छदपटो[2] निचुलश्चो[3]त्तरच्छदः[4] ॥६७६॥**

१ निचोल्यते समुच्छ्राय्यतेऽवगुण्ठ्यते वाऽनेन **निचोलः**। 'चुल समुच्छ्राये'(चु.उ.से.), करणे घञ्, पुंसि । ''निचोलनं (निचोलं) तु क्लीबम्''[10]इति रभसात् क्लीबेऽपि । ''स्त्रियां निचोलीत्यपि''[11]इति राजदेवः । २ प्रकर्षेण छाद्यतेऽनेन प्रच्छदः । 'छद अपवारणे'(चु.उ.से.), अस्माण्ण्यन्ताद् घञ्, 'छादेर्घे-'६।४।९६॥ इति ह्रस्वः । प्रच्छदश्चासौ पटश्च **प्रच्छदपटः** । ३ निचोलति **निचुलः**, पुंसि ।'चुल समुच्छ्राये' (चु.उ.से.), 'इगुपध-'३।१।१३५॥ इति कः । गौडस्तु-''निचोलकस्तु निचुलकम्''[12]इति क्लीबमाह । ४ उत्तरं छाद्यतेऽनेन **उत्तरच्छदः** । 'पुंसि संज्ञायाम्'३।३।११८॥ इति घः, 'छादेर्घे-'६।४।९६॥ इति ह्रस्वत्वम् । चत्वारि उत्तरपटस्य । 'उच्छाडखाटपछेडी[13]' इति भाषा ॥६७६॥

**उत्सवेषु सुहृद्भिर्यद् बलादाकृष्य गृह्यते ।**
**वस्त्रमाल्यादि तत् पूर्णपात्रं[1] पूर्णानकं[2] च तत् ॥६७७॥**

१ पूर्णपात्रमस्मिन् **पूर्णपात्रम्** । २ पूर्णं आनकोऽत्र **पूर्णानकम्** ।

''हर्षादुत्सवकाले यदलङ्कराम्बरादिकम् ।
आकृष्य गृह्यते पूर्णपात्रं पूर्णानकं च तत् ॥१॥''

[हारावली, श्लोकावधिः, श्लो-१९]इति हारावली । एते सामान्येन जलादिभृतभाजननाम्नी अपि । यन्महेश्वरः-''पूर्णपात्रं वस्तुपूर्णपात्रे वर्धापकेऽपि च''[विश्वप्रकाशकोशः, रान्तवर्गः, श्लो-२७०]इति । ''उत्सवेषु सुहृद्भिर्यद् बलादाकृष्य गृह्यते वस्त्रमाल्यादि स वर्धापनकः[14]''[अनेकार्थकैरवाकरकौमुदीटीका४।२७२॥]इत्यनेकार्थटीका । ''क्लीबे[15] पूर्णानक(पूर्णानकं) पूर्णपात्रे पटहपात्रयोः''[विश्वलोचनकोशः, कान्तवर्गः, श्लो-२०४]इति श्रीधरः । द्वे पूर्णपात्रस्य। 'वधामणी[16]' इति भाषा ॥६७७॥

**तत्तु स्यादाप्रपदीनं[1] व्याप्नोत्याप्रपदं हि यत् ।**

१ यद् वस्त्रमाल्यादि आप्रपदं पादाग्रं[17] मर्यादीकृत्य व्याप्नोति, न तदतिक्रम्य वर्तते, तद् वस्त्रमाल्यादिकम् **आप्रपदीनं** स्यादित्यन्वयः । प्रगतं पदं प्रपदम्, पादाग्रमित्यर्थः, प्रपदाद् आ इत्याप्रपदम्, तद् व्याप्नोतीति आप्रपदीनम् । 'आप्रपदं व्याप्नोति(प्राप्नोति)'५।२।८॥इति द्वितीयान्तात् खः, खस्य ईनादेशः । ''स्यात् त्रिष्वाप्रपदीनं तत्प्राप्नोत्याप्रपदं हि यत्''[अमरकोषः२।६।११९॥]इत्यमरः । एकं सामान्येन पादाग्रव्यापिवस्त्रादेः ॥

---

१. '-कौपने' इति१.२.३॥ २. '-च्छोटो' इति३, '-च्छोटौ' इति४॥ ३. तुलनीयोऽमरकोषः२।६।११५॥ ४. इतोऽग्रे ३प्रतौ 'च' इति दृश्यते ॥ ५. 'रूपे' इति१॥ ६. यद्यपि क्षीरतरङ्गिण्यां 'रग लग आस्वादने'(चुरादिः, धातुसं-१८७)इत्यत्र टिप्पण्यां मीमांसकमहोदयेन ''चान्द्रधातुपाठे नैवेमौ धातू पठ्येते ।'' इत्युक्तम्, तथापि तत्रैव धातुपाठव्याख्यावसरे स्वामिना ''रक लकेति चन्द्रः'' इत्युक्तमतश्चन्द्रसम्मतोऽयं धातुपाठः ॥ ७. तुलनीया पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३७३, पृ.४६१॥ ८. 'कल्प्यते' इति१.२॥ ९. '-णौ' इति३.४॥ १०. द्र. टीकासर्वस्वम्, भा-२, २।६।११७॥, पृ.३७४॥, तत्र 'निचोला स्यान्निचुलः' इति दृश्यते ॥, पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३७४, पृ.४६३॥, रामाश्रमी२।६।११६॥, पृ.३१३॥, तयोः 'निचोलं तु नपुंसकम्' इति दृश्यते ॥ ११. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो ३७४, पृ.४६३॥, रामाश्रमी२।६।११६॥, पृ.३१३॥ १२. द्र. स्वोपज्ञटीका३।६७६॥, पृ.१५१॥ १३. 'उच्छाडखाडपछेवडी' इति३, 'उच्छावडखाटपछेवडी' इति४॥ १४. 'वर्धापकः' इत्यनेकार्थकैरवाकरकौमुदीटीकायाम्, भा-२, ४।२७२॥, पृ.३९४॥ १५. 'क्लीबं' इति विश्वलोचनकोशे, पृ.३५॥ १६. 'ब-' इति४॥ १७. इतोऽग्रे ४प्रतौ 'अकृत्य' इति दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## चीवरं भिक्षुसङ्घाटी

१ चीयते चीव्यते संव्रियते वा **चीवरम्** । 'चिञ् चयने'(स्वा.उ.अ.), 'चीवृ आदानसंवरणयोः'(भ्वा.उ.से.), '[1]छित्वरचत्वर(छत्वर)धीवरपीवर[मीवर]चीवर[तीवरनीवर]-गह्वरकट्वरसंयद्वरोपष्करा[2]ः'(उणा-२८१)इति साधुः । २ सङ्घट्यते सङ्घाटी । 'घट चेष्टायाम्'(भ्वा.आ.से.), घञ्, गौरादिः । भिक्षूणां सङ्घाटी **भिक्षुसङ्घाटी** । द्वे मुनिजनवस्त्रस्य ॥

## जीर्णवस्त्रं पटच्चरम् ॥६७८॥

१ जीर्णं च तद् वस्त्रं च जीर्णवस्त्रम्। भङ्क्ते पटदिति शब्दं चरति करोति **पटच्चरम्** । पचाद्यच् । पटशब्दाद् 'भूतपूर्वे-'५।३।५३॥ इति चरटि । नैरुक्ते तकारागमे वा । "पटच्चरः पटो जीर्णः"[[3]]इति पुंसि माला । एकं जीर्णवस्त्रस्य ॥६७८॥

## शाणी गोणी छिद्रवस्त्रे

१ शणस्येयं **शाणी** । २ गवा नीयते **गोणी** । 'णीञ् प्रापणे'(भ्वा.उ.अ.), 'अन्येभ्योऽपि(अन्येष्वपि-)' ३।२।१०१॥ इति डः, पृषोदरादित्वाण्णत्वम्, 'जानपद-' ४।१।४२॥ इत्यादिना ङीष् । छिद्रं च तद् वस्त्रं च छिद्रवस्त्रम्, तत्र । द्वे 'छाटी' इति प्रसिद्धायाः ॥

## जलार्द्रा क्लिन्नवाससि ।

१ जलेन आर्द्रा **जलार्द्रा**, स्त्रीलिङ्गः । "आर्द्रवस्त्रं जलार्द्रा[4] स्यात्"[हारावली, पादावधिः, श्लो-१९६]इति हारावली। "श्रीखण्डाम्बुयुतं वस्त्रं जलार्द्रेत्यभिधीयते"[ ]इत्यन्ये। क्लिद्यति[5] स्म क्लिन्नः । 'क्लिदू[6] आर्द्रीभावे[7]'(दि.प.वे.), दिवादौ, पुषादिः, परस्मैपदी, निष्ठा । एकं जलार्द्रवस्त्रस्य ॥

## पर्यस्तिका परिकरः पर्यङ्कश्चावसक्थिका ॥६७९॥

१ पर्यस्यते वेष्ट्यतेऽनया पर्यस्तिः । 'असु क्षेपणे' (दि.प.से.), 'क्तिच्क्तौ च संज्ञायाम्'३।३।१७४॥। स्वार्थे कनि **पर्यस्तिका**। २ परिक्रियते वपुरनेन **परिकरः**। 'डुकृञ् करणे' (त.उ.अ.), 'ऋृदोरप्'३।३।५७॥। 'पुंसि संज्ञायाम्-'३।३।११८॥ इति घो वा । ३ पर्यङ्क्यतेऽसौ **पर्यङ्कः** । 'अङ्क पदे लक्षणे च'(चु.उ.से.), कर्मणि घञ् । परिगतोऽङ्कमिति वा । पल्यङ्कोऽपि । ४ अवनद्धेऽवकृष्टे वा सक्थिनी अस्याम् अवसक्थी। 'बहुव्रीहौ सक्थ्यक्ष्णोः [स्वाङ्गात्] षच्'५।४।११३॥, ततो गौरादित्वाद् ङीष्[8], ततः स्वार्थे कन्[9], 'केऽणः'७।४।१३॥ इति ह्रस्वत्वम् । चत्वारि 'पालठी[10]' इति ख्यातायाः ॥६७९॥

## कुथे वर्णः परिस्तोमः प्रवेणीनवताऽऽस्तराः ।

१ कुथ्यते(कुन्थ्यते) क्लिश्यते **कुथः**, त्रिलिङ्गः । 'कुथ(कुथि) हिंसाक्लेशनयोः[11]'(भ्वा.प.से.), स्थादित्वात् कः, तत्र । २ वर्ण्यते **वर्णः** । 'वर्ण वर्णक्रियाविस्तारगुणवचनेषु' (चु.उ.से.), घञ् । [12]वर्णकम्बलैकदेशो वा, भीमवत् । ३ परिस्तोम्यते प्रस्तीर्यते **परिस्तोमः** । वर्णपरिस्तोम इत्यखण्डमित्यन्ये । ४ प्रवीयते प्रवेणिः, ङीषि **प्रवेणी** । ५ नवं तनोत्यात्मानं **नवतम्** । 'तनु विस्तारे'(त.उ.से), 'अन्येभ्योऽपि (अन्येष्वपि-)'३।२।१०१॥ इति डः। ६ आस्तीर्यते **आस्तरः**। 'स्तृञ् आच्छादने'(क्र्या.उ.से.), 'ऋृदोरप्'३।३।५७॥ आस्तरणमपि । अयं च हस्तिरथप्रावरणादावुपयुज्यते । यद् वाचस्पतिः-

"विनियोगस्त्वस्य हस्तिरथप्रावरणादौ"[[13]] ।

"प्रवेण्यास्तरणं वर्णः परिस्तोमः कुथः कुशः[14] ।<br>
नवतं चेति तुल्यार्थाः प्रच्छदश्चोत्तरच्छदः ॥१॥"

[हलायुधकोशः २।३०८]इति हलायुधः । "नववर्णकम्बले आच्छादनमात्रे च"[ ]इति तट्टीका । षट् सामान्येन गजरथादीनामुपरि झूलिप्रभृतिः, अन्यत्र 'दुलीचाशत्रुंजीयाजभादिविछावणा[15]' इति ख्यातस्य ॥

## अपटी काण्डपटः स्यात् प्रतिसीरा जवन्यपि ॥६८०॥

---

१. 'छित्वरधीवरचत्वर-' इति३.४॥ २. '-कट्वरसंयद्वराः' इत्युणादिगणे ॥ ३. द्र. स्वोपज्ञटीका३।६७८॥, पृ.१५१॥ ४. 'जलार्द्रः' इति हारावल्याम्, पृ.४०६॥ ५. 'क्लिद्यति' इति३॥ ६. 'क्लिदौ' इति१.२.४॥ ७. 'आर्द्र-' इति१.२॥, 'आर्द्रभावे' इति क्षीरतरङ्गिणी ॥ ८. 'ङीप्' इति३॥ ९. 'कनि' इति३॥ १०. 'पलगठी' इति४॥ ११. 'कुथि पुथि लुथि मन्थ हिंसासंक्लेशयोः' इति क्षीरतरङ्गिणी, 'कुथि पुथि लुथि मथि हिंसासंक्लेशनयोः' इति धातुप्रदीपः, 'कुथि पुथि लुथि मथि मन्थ हिंसासङ्क्लेशनयोः' इति माधवीयधातुवृत्तिः ॥ १२. 'वर्णः' इति१.२.४॥ १३. द्र. स्वोपज्ञटीका३।६८०॥, पृ.१५२॥ तत्र '-प्रावरणादौ' इत्यस्य स्थाने '-प्रावरणादिषु' इति दृश्यते ॥ १४. 'कुशः कुथः' इति१.४, 'कुशः कुशः' इति२, 'कुथः कुथा' इति हलायुधकोशे, २।३०८॥, पृ.३७॥ १५. '-वण' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**तिरस्करिणि**

१ प्रावरीतुमयोग्यत्वाद् न पटी **अपटी**, स्त्रियाम् । २ काण्डः कुत्सितः पटः **काण्डपटः** । ३ प्रतिसिनोति प्रतिबध्नाति वेष्टयत्यावृणोति वा **प्रतिसीरा** । 'षिञ् बन्धने'(स्वा.उ.अ.), 'शुसिचिमीनां दीर्घश्च'(उणा-१८३)इति रग्दीर्घौ, टाप् । ''कृत्स्नं कुसुम्भकुसूलौ प्रतिसीरा तस्करासारौ''[१]इत्यूष्मविवेकाद् दन्त-मध्या (दन्त्यमध्या) । ४ जुवन्त्यत्रेति **जवनी** । जुः सौत्रो धातुः, अधिकरणे ल्युट् । स्वार्थे कनि जवनिकाऽपि । ''जवनिकाजवनिकान्तिहृदा तता[२]''[३]इति [४]कप्फिणाभ्युदययमका-दन्तस्थवकारमध्या चवर्गतृतीयादिः । यमनिकेति अन्तस्थादिः पवर्गपञ्चममध्या च । यमयति उपरमयतीति ल्युटि कनि टापि 'प्रत्ययस्थात्-'७।३।४४॥ इतीत्वम् ॥६८०॥ ५ ''तिरोऽन्तर्धानं करोति **तिरस्करिणी**[५]''[६]इति पुरुषोत्तमः । '' 'प्रजोरिनिः' ३।२।१५६॥ इति योगविभागादिनिः''[६]इति पुरुषोत्तमः । ''तिरस्क्रियतेऽनयेति करणे ल्युटि[७] तिरस्करणी[८]''[६]इति तु सुभूतिः । ''तिरोऽन्तर्धौ तिर्यगर्थे''[अमरकोष:३।३।२५६॥] इत्यमरः । पञ्च 'परीछिं[९]' इति प्रसिद्धायाः ॥

**अथोल्लोचो वितानं कदकोऽपि च ।**

**चन्द्रोदये**

१ उद् ऊर्ध्वं लोच्यते दृश्यते, उल्लुच्यते अपनीयते आतपादिरनेन वा **उल्लोचः** । 'लोचृ दर्शने'(भ्वा.आ.से.), 'लुच(लुञ्च) अपनयने'(भ्वा.प.से.) वा । करणे घञ् । ऊर्ध्वं लोचयत्युपरि दीप्यते वा, लोचेश्चौरादिकस्य दीप्त्यर्थस्य पचाद्यचि । २ विशेषेण विशेषाय आतपादिवारणाय वा तन्यत इति घञि **वितानम्**, पुंक्ली. । ३ कुत्सितमकति **कदकः** । 'अक गतौ[१०]'(भ्वा.प.से.), अच् । ४ वस्त्रनिर्मितैश्चन्द्रैरुदयते **चन्द्रोदयः** । 'अय गतौ'(भ्वा.आ.से.), अच् । चन्द्रोदय इवोज्ज्वलो वा, तत्र । चन्द्रातपोऽपि । चत्वारि 'चन्द्रूयां[११]' इति ख्यातस्य ॥

**स्थुलं दूष्ये**

१ स्थुडति संवृणोति **स्थुलम्** । 'स्थुडँ[१२] संवरणे' (तु.प.से.), अच् । २ दुष्यते वेष्टनरूपं विकृतिं प्राप्यते **दूष्यम्** । 'दुष वैकृत्ये'(दि.प.अ.), ण्यन्ताद् 'अचो यत्' ३।१।९७॥, उपधाया दीर्घत्वम्[१३], क्लीबे । यदाह-''त्रिषु दूष्यं[१४] दूषणीये क्लीबे वस्त्रे च तद्गृहे''[मेदिनीकोशः, यान्त-वर्गः, श्लो-३१]इति । तत्र । 'दूष्ये' इति विषयसप्तमी । द्वे दूष्यस्य । 'वस्त्रगृह' इति भाषा ॥

**केणिका पटकुट्यपि ॥६८१॥**

**गुणलयनिकायां स्यात्**

१ किणन्ति गच्छन्त्यत्र[१५] **केणिका** । किणः सौत्रः, ण्वुल् । २ पटानां वस्त्राणां कुटीव **पटकुटी** ॥६८१॥ ३ गुणा लीयन्तेऽस्यां गुणलयिनी । 'लीङ् श्लेषणे'(दि.आ.अ.), कनि **गुणलयनिका**, तत्र । त्रीणि पटकुट्याः, 'रावटी' इत्यादिभाषा । ''दूष्याद्यं वस्त्रवेश्मनि''[अमरकोष:२।६।-१२०॥]इत्यमरः । ''आद्यशब्दात् पटकुटी गुणलयनी स्थुलं च''[अम.क्षीर.२।६।१२०॥]इति क्षीरस्वामी । तथाऽऽह हलायुधोऽपि-''दूष्यं स्थुलं पटकुटी गुणलयनी केणिका च निर्दिष्टा''[हलायुधकोश:२।४५१॥]इति । ''पञ्च वस्त्रगृहे'' [ ]इति तट्टीका ॥

**संस्तरप्रस्तरौ[१६] समौ ।**

१ समन्तात् स्तीर्यते **संस्तरः** । 'स्तृञ् आच्छादने' (क्र्या.उ.से.), 'ऋदोरप्'३।३।५७॥, पल्लवादिरचिता शय्या । २ प्रस्तीर्यत इति **प्रस्तरः** । स्रस्तरोऽपि । स्रंसते[१७]ऽत्रेति स्रस्तरः, बाहुलकादरप्रत्यये निपात्यते । द्वे पल्लवादिरचित-शय्यायाः । 'साथरा' इति भाषा[१८] ॥

**तल्पं शय्या शयनीयं शयनं तलिनं[१९] च तत् ॥६८२॥**

---

१. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३७८, पृ.४६६॥, तत्र ''तस्करासारा'' इति दृश्यते ॥ २. 'तव' इति४॥ ३. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३७८, पृ.४६६॥, तत्र ''जवनिकान्तिकदा तदा'' इति दृश्यते ॥ ४. 'कफिणा-' इति२, 'कर्प्फिण्या-' इति३॥ ५. '-रणी' इति३॥ ६. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३७८, पृ.४६७॥, तत्र 'तिरस्करणी' इति दृश्यते ॥ ७. 'ल्युट्' इति३॥ ८. '-रिणी' इति४॥ ९. 'परियचि' इति३॥ **१०.** 'अक अग कुटिलायां गतौ' इति क्षीरतरङ्गिण्यादौ ॥ **११.** 'चन्द्रूआ' इति१.४॥ **१२.** 'स्थुल' इति२॥ **१३.** 'दोषो णौ'६।४।९॥ इत्यनेन दीर्घत्वं बोध्यम् ॥ सूत्रव्याख्यावसरे भट्टोजिदीक्षितेन 'दुष इति सुवचम्' इत्युक्तं सिद्धान्तकौमुद्यां ण्यन्तप्रक्रियाप्रकरणे, पृ.४९९॥ **१४.** 'दूष्यं त्रिषु' इति मेदिनीकोशे, पृ.११५॥ **१५.** '-त्रेति' इति४॥ **१६.** '-स्रस्तरौ' इति मुद्रितमूले, स्वोपज्ञटीकाऽपि तमाश्रित्यैव ॥ **१७.** '-तो' इति१.२.४॥ **१८.** '-षायाः' इति३॥ **१९.** 'तलिमं' इति२.३, 'तलिमं' इति मुद्रितमूलम्, स्वोपज्ञटीकाऽपि तमाश्रित्य ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ तलत्यस्मिन् **तल्पम्**, पुंक्ली. । "पुंसि"[ ]इति भट्टिः[१] ।

"तास्तया तर्जिताः सर्वा मुखैर्भीमा यथागतम् ।
ययुः सुषुप्सवस्तल्पां[२](तल्पान्) भीमैर्वचनकर्मभिः ॥१॥"

[भट्टिकाव्यम्, सर्गः-८, श्लो-१०१]इति । अमरस्तु-"तल्पं शय्याट्टदारेषु"[अमरकोषः३।३।१३१॥]इति क्लीबमाह। 'तल प्रतिष्ठायाम्'(भ्वा.प.से.), 'खष्पशिल्पशष्पबाष्परूपतर्पतल्पाः[३]' (उणा-३०८)इति सूत्रेण साधुः । तृप्यन्त्यत्रेति वा, अनेनैव सूत्रेण साधुः। २ शय्यतेऽत्रेति **शय्या**। 'शीङ् स्वप्ने'(अ.आ.से.), 'संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः'३।३।९९॥ इति क्यप्, ([४]"अयङ् यि क्ङिति"७।४।२२॥ इत्ययङ्), टाप् । ३ शय्यतेऽत्रेति **शयनीयम्** । 'कृत्यल्युटो बहुलम्'३।३।१३३॥ इत्यधिकरणेऽनीयर् । ४ शय्यतेऽत्रेति **शयनम्** । ५ तल्यतेऽत्रेति **तलिनम्** । 'तल प्रतिष्ठायाम्'(भ्वा.प.से.), बाहुलकाद् 'वेपितुह्योर्ह्रस्वश्च'(उणा-२१०)इतीनन्[५]। पञ्च सामान्येन शय्यामात्रस्य । 'सउडितलाऊ पथरणा[६]' इति भाषा ॥६८२॥

## मञ्चमञ्चकपर्यङ्कपल्यङ्काः खट्वया समाः ।

१ मच्यते(मञ्च्यते) धार्यतेऽनेन **मञ्चः**, पुंक्ली. । 'मचि धारणेच्छा(-णोच्छ्राय-)पूजनेषु'(भ्वा.आ.से.), करणे घञ्। मञ्चतीति पचाद्यच् वा । २ स्वार्थे कनि **मञ्चकः**, पुंक्ली. । ३-४ परि सर्वतो भावेनाऽङ्क्यते चिह्न्यतेऽयमिति, कर्मणि घञ्, 'परेश्च घाङ्कयोः'८।२।२२॥ इति वा लत्वम्, **पर्यङ्क, पल्यङ्कः** । ५ खट्यत आकाङ्क्ष्यते शयनार्थिभिरिति **खट्वा**। 'खट आकाङ्क्षायाम्'(भ्वा.प.से.), 'अशिखटिविशिभ्यः क्वं[७]'(उणा- )इति क्वप्रत्ययः, ततष्टाप् । पञ्च मञ्चकस्य ॥

## उच्छीर्षकमुपाद् धानबर्हौ

१ उदुपरि शीर्षमस्य **उच्छीर्षकम्** । २-३ उपशब्दाद् धानबर्हौ योज्यौ । उपधीयते आरोप्यते शिरोऽत्रेति **उपधानम्** । 'डुधाञ् धारणादौ'(जु.उ.अ.), अधिकरणे ल्युट्। उपबृह्यत उद्यम्यते शिरोऽत्रेति, अधिकरणे घञि **उपबर्हः** । त्रीणि 'ओसीसुं' इति ख्यातस्य ॥

## पाले पतद्ग्रहः ॥६८३॥

## प्रतिग्राहः

१ पाल्यते **पालः**, पुंसि । "[८]पालोऽस्त्री"[वैजयन्तीकोषः४।३।१६०॥]इति तु वैजयन्ती । २ गृह्यतेऽनेन ग्रहः, 'ग्रहवृद-'३।३।५८॥ इत्यपि, पततो ग्रहः **पतद्ग्रहः**। घञि पतद्ग्राहोऽपि॥६८३॥ ३ प्रतिगृह्णाति चर्चितद्रव्यं प्रतिग्रहः । 'ग्रहवृद-'३।३।५८॥इत्यप् । ज्वलादित्वाण्णे **प्रतिग्राहः** अपि । त्रीणि पित्तलादिमयताम्बूलादिप्रक्षेपणभाण्डस्य ॥

## मकुरात्मदर्शाऽऽदर्शास्तु[९] दर्पणे ।

१ मङ्क्ते[१०] मण्डयति **मकुरः** । 'मकि मण्डने'(भ्वा.-आ.से.), 'मकुरदर्दुरौ'(उणा-४०)इति कुरच्नलोपौ, पञ्चमस्वरमध्यः[११] । मुञ्चति ज्योतिरिति मुकुरः, द्व्युकारवांश्च । 'मुच्लृ मोक्षणे'(तु.उ.अ.), कुरचि साधुः। "मङ्कुरः[१२]"[ ]इति स्वामी। २ आत्मा दृश्यतेऽनेन **आत्मदर्शः** । दृशः करणे घञ् । ३ आदृश्यते रूपमत्रेति **आदर्शः** । 'हलश्च'३।३।१२१॥ इत्यधिकरणे घञ् । ४ दर्पयति हर्षयति **दर्पणः** । 'दृप हर्षणमोचनयोः'(दि.प.अ.), णिजन्तः, नन्द्यादित्वाद् ल्युः, 'अट्कुप्वा-'८।४।२॥ आदिना णत्वम् । चत्वारि दर्पणस्य ॥

## स्याद् वेत्रासनमासन्दी

१ वेत्रलताघटितमासनं **वेत्रासनम्** । २ एत्य आसीदन्त्यस्याम् **आसन्दी** । पृषोदरादिः, गौरादिः । "आसन्दी पुंस्त्रीलिङ्गः"[ ]इति हलायुधटीका । आसन्दः आङोऽभावे सन्दोऽपि । द्वे वेत्रासनस्य। 'कदीला सांगूआ[१३]' इति भाषा॥

## विष्टरः पीठमासनम् ॥६८४॥

१ विस्तृणाति भुवं **विष्टरः**, पुंक्ली.। 'स्तृञ् आच्छादने'(क्र्या.उ.से.), 'वृक्षाच्छादनयो(वृक्षासनयो)र्विष्टरः'८।३।-९३॥ इति साधुः । २ पीयत उपवेशनेनाऽन्तर्धीयते **पीठम्**,

---

१. 'भट्टः' इति१॥ २. 'तल्पं' इति भट्टिकाव्ये ॥ ३. '-पर्पतल्पाः' इत्युणादिगणे ॥ ४. कोष्ठान्तर्गतपाठः १.३प्रत्योर्न दृश्यते ॥ ५. 'इतीनन्' इति१.२.४॥ ६. '-रणा' इति३॥ ७. 'अशुप्रुषिलटिकणिखटिविशिभ्यः क्वन्'(उणा-१४९)इत्युणादिगणसूत्रम् ॥ ८. 'वालो-' इति वैजयन्तीकोषे, ४।३।१६०॥, पृ.१२६॥ ९. 'मुकु-' इति मुद्रितमूलम्, स्वोपज्ञटीकाऽपि तमाश्रित्यैव ॥ १०. 'मङ्कयति' इति३, 'मङ्कति' इति२॥ ११. '-ध्यं' इति१॥ १२. अम.क्षीरस्वामिकृतटीकायाम् "मङ्क्यते मण्डयतेऽनेन मु(म)कुरः" इति दृश्यते, २।६।१४०॥, पृ.१६२॥ १३. १.२प्रत्योर्नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्त्रीक्लीबलिङ्गः[१] । पीङो बाहुलकाट्ठक् । पिठति हिनस्ति श्रमं वा । 'पिठ हिंसायाम्'[२](भ्वा.प.से.), 'इगुपध-'३।१।-१३५॥ इति के, 'अन्येभ्योऽपि(अन्येषामपि) दृश्यते'६।३।-१३७॥ इति दीर्घत्वम् । ''विष्टरः पीठमस्त्रियाम्''[त्रिकाण्डशेषः २।६।४१॥]इति त्रिकाण्डशेषः । ३ आस्यत उपविश्यतेऽत्र **आसनम्**, पुंक्ली. । 'आस उपवेशने'(अ.-आ.से.), 'करणाधिकरणयोः-'३।३।११७॥ इति ल्युट् । (त्रीणि[३] आसनस्य) ॥६८४॥

## कसिपुर्भोजनाच्छादौ

१ कसति गच्छति क्लेशोऽनेन **कसिपुः**[४], पुंक्ली. दन्त्यमध्यः । 'कस गतौ'(भ्वा.प.से.), 'कस्यर्तिभ्यामिपुक्' (हैमोणा-७९८)। कशति क्लेशमिति ''कशिपुः''[अमरकोषः ३।३।१३०॥]तालव्यमध्य इत्यमरः । भोजनं चाच्छादश्च भोजनाच्छादौ । एकं युगपद्भोजनाच्छादनयोः ॥

## औशीरं शयनासने ।

१ उश्यत उशीरम् । 'वश कान्तौ'(अ.प.से.), बाहुलकात् कीरन् । प्रज्ञाद्यणि **औशीरम्** । शयनं च आसनं च शयनासने । एकं युगपच्छयनासनयोः ॥

## लाक्षा द्रुमामयो राक्षा रङ्गमाता पलङ्कषा ॥६८५॥
## जतु क्षतघ्ना कृमिजा

१ लक्ष्यते दृश्यत अङ्क्यते वा **लाक्षा** । 'लक्ष दर्शनाङ्कनयोः'(चु.उ.से.), भिदादिपाठादङ् वृद्धिश्च । २ द्रुमस्यामय इव **द्रुमामयः**। ३ राजते **राक्षा**। 'राजृ[५] दीप्तौ'(अ.-उ.से.), बाहुलकाद् 'भृ(वृ)वदि-'(उणा-३४२)इति सः। कपिरि(कपिलि)कादित्वाल्लत्वेऽस्याऽपि धातोर्लाक्षा राक्षा लक्षा (रक्षा) च । ''रक्षा च लाक्षायां रक्षणेऽपि च''[[६]]इति रुद्रभसौ । ४ रङ्गस्य मातेव **रङ्गमाता** । ५ पलं कषन्ति **पलङ्कषा** । 'कष[७] हिंसायाम्'(भ्वा.प.से.), बाहुलकात् खश्, खित्त्वाद् मुम् ॥६८५॥ ६ जायते **जतु**, क्लीबे । 'जनी प्रादुर्भावे'(दि.आ.से.), बाहुलकात्[८] तुक्, आत्वाभावश्च । ७ क्षतं[९] हन्ति **क्षतघ्ना** । स्थादित्वात् कः। ८ कृमिभिर्जन्यते **कृमिजा** । 'अन्येष्वपि-'३।२।१०१॥ इति डः। अष्टौ लाक्षायाः॥

## यावालक्तौ तु तद्रसः ।

१ यूयते मिश्रीभूयतेऽनेन यवः । 'यु मिश्रणे' (अ.प.से.), 'ॠदोरप्'३।३।५७॥ इत्यप्, प्रज्ञाद्यणि **यावः** । बाहुलकाद् घञि वा । कनि यावकोऽपि । २ रञ्जेः कर्मणि क्तप्रत्यये रक्तः । न रक्तः अरक्तः, अत एव रक्तं[१०] इत्यर्थः। कपिरि(कपिलि)कादित्वाल्लत्वे **अलक्तः**, अजादिः । ''अधरेष्वलक्तकः''[शिशुपालवधम्, सर्गः-९, श्लो-४६]इति माघात्[११]। न लक्तो दुर्गन्धित्वाद् न केनाऽप्यास्वादितः, 'रक लक आस्वादने'[१२](चु.उ.से.), क्तप्रत्यये वा । तस्या लाक्षाया रसस्तद्रसः । यद् धनपालः-''तद्रागो यावकोऽलक्तकः स्मृतः'' [[१३]]इति । अमरादयो यावादिभिः सहैकार्थावाहुः । द्वे 'अलता' इति ख्यातस्य ॥

## अञ्जनं कज्जलम्

१ अज्यतेऽनेन **अञ्जनम्** । 'अञ्जू [व्यक्ति]म्रक्षणादौ'(रु.प.वे.), करणे ल्युट् । २ कर्जति व्यथते चक्षुः **कज्जलम्** । 'कर्ज व्यथने'(भ्वा.प.से.), कलचि साधुः । द्वे कज्जलस्य ॥

## दीपः प्रदीपः कज्जलध्वजः ॥६८६॥
## स्नेहप्रियो गृहमणिर्दशाकर्षो दशेन्धनः ।

(स्नेहप्रियो [१४]गृहमणिर्दशाकर्षो[१५])

१ दीप्यतेऽनेन **दीपः** । 'दीपी दीप्तौ'(दि.आ.से.), घञ् । दीपयतीत्यच् वा । २ अन्योपसर्गनिवृत्त्यर्थं **प्रदीपः**, पुंक्ली. । मेरुसुमेरुवद् धात्वर्थानुवर्तकोऽत्र प्रशब्दः । ३ कज्जलं ध्वजोऽस्य **कज्जलध्वजः** ॥६८६॥ ४ स्नेहस्तैलं प्रियमस्य **स्नेहप्रियः** । ५ गृहस्य मणिरिव **गृहमणिः** । ६

---

१. 'स्त्रीक्ली' इति३॥ २. 'पिठ हिंसासंक्लेशनयोः' इति स्वामिसायणौ, 'पिठ हिंसासंक्लेशयोः' इति मैत्रेयः ॥ ३. कोष्ठान्तर्गतपाठः१.२प्रत्योर्न दृश्यते ॥ ४. 'कशि-' इति४॥ ५. 'राज' ३.४॥ ६. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३८३, पृ.४७१॥, तत्र ''रलयोरेकत्र स्मृतेर्वा । 'राक्षा,' 'लाक्षा' । 'रक्षा' च । ''लाक्षायां रक्षणे रक्षा इति रुद्रभसौ'' इति दृश्यते ॥ ७. 'कषखषशिष-' इत्यादिदण्डकोऽयं धातुः ॥ ८. 'फलिपाटिनमिमनिजनां गुक्पटिनाकिधतश्च'(उणा-१८)इत्युणादिगणसूत्रविद्यमानत्वादिदं विचारणीयम् ॥ ९. 'क्षन्ति' इति४॥ १०. 'रक्तक' इति३॥ ११. 'प्रयोगात्' इति१॥ १२. चन्द्रसम्मतोऽयं धातुपाठः, द्र. क्षीरतरङ्गिणी, चुरादिः, धातुसं-१८७, पृ.३१५॥ १३. द्र. स्वोपज्ञटीका३।६८६॥, पृ.१५३॥ १४. 'ग्रह-' इति४॥ १५. '-मणिदशाकर्षौ' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दशां वर्तिकामाकर्षति **दशाकर्षः** । ७ दशैवेन्धनमस्य **दशेन्धनः** । सप्त दीपस्य । 'जोइक्खो' देश्याम् । "दोषातिलकः [इत्यपि], शिखातरुर्दीपवृक्षो ज्योत्स्नावृक्षोऽथ लोचकः" [त्रिकाण्डशेषः २।६।४३॥]इति त्रिकाण्डशेषः[1] ॥

## व्यजनं[1][2] तालवृन्तम्[2]

१ व्यज्यते[3] क्षिप्यते वायुरनेन **व्यञ्जनम् (व्यजनम्)**। 'अज गतौ क्षेपणे च'(भ्वा.प.से.), करणे ल्युट् । 'बहुलं संज्ञाच्छन्दसोः-'(वा-२।४।५४॥)इति न वीभावः । २ तालवृन्तविकारत्वात् तालम्, तालस्य वृन्तं घटधारेव शैत्यजनकत्वात् **तालवृन्तम्** । "वृन्तं प्रसवबन्धे स्याद् घटधाराकुचाग्रयोः"[विश्वप्रकाशकोशः, तान्तवर्गः, श्लो-३१]इति विश्वः । अन्यत्राऽपि [2]व्यजनमुपचारात् । द्वे व्यजनस्य ॥

## तद् धवित्रं[1] मृगचर्मणः ॥६८७॥

१ तद्धि व्यजनं मृगश्चर्मणश्चेद् धूयतेऽग्निरनेन **धवित्रम्** । 'धूञ् कम्पने'(स्वा.क्र्या.चु.उ.वे.), 'अर्त्तिलूधूसूखनसहचर इत्रः'३।२।१८४॥ इतीत्रः । 'धू विधूनने' (तु.प.से.), तुदादिः, 'कुटेः[4] किच्च'(उणा-५२०)इत्यादिज्ञापकाद् 'गाङ्कुटादिभ्योऽञ्णिन्ङित्'१।२।१॥ इत्यस्याऽनित्यत्वाद् गुणः । हरदत्तस्तु ङित्त्वमेवेच्छन् धुवित्रमित्युवङमेवाह[5] । एतच्च यज्ञोपकरणे प्रसिद्धम् ॥

## आलावर्तं[1] तु वस्त्रस्य

१ आरादावर्त्यते **आलावर्तम्** । पृषोदरादिः । वस्त्रस्येत्यर्थाद् व्यजनमेकम् ॥

## कङ्कतः[1] केशमार्जनः[2] ।
## प्रसाधनश्च[3]

१ कङ्कते याति शिरः **कङ्कतः**, त्रिलिङ्गिः । ककिवकि[6]श्वकित्रकिढौकृ[त्रौकृ]ष्वष्केत्यादयो गत्यर्थाः, बाहुलकादतच् । स्त्रियां गौरादित्वात् कङ्कती । स्वार्थे कनि 'केऽणः'७।४।१३॥ इति ह्रस्वः, टाप्, कङ्कतिका । "कङ्कत एव कङ्कतिका, संज्ञायां कनि, टापि, 'प्रत्ययस्थात्-'७।३।४४॥ इतीत्वम्"[मा.धातुवृत्तिः, भ्वादिगणः, धातुसं-७७]इति माधवः। कस्य शिरसोऽङ्का कङ्काः केशाः, शकन्ध्वादित्वात् पररूपत्वम्, कङ्के अतति गच्छति, ([9]'केऽणः'७।४।१३॥इति ह्रस्वत्वे टाप्यतचि वा क्वुन्) । "कङ्कती तु प्रसाधनी"[[7]] इति त्रि(स्त्री)काण्डेऽमरमाला । "कङ्कतं तु प्रसाधनं"[[8]] इति क्लीबकाण्डं च । कङ्कान् दन्तान् तनोतीति, 'अन्येभ्योऽपि(अन्येष्वपि)-'३।२।१०१॥ इति डो वा । २ केशा मार्ज्यन्तेऽनेन **केशमार्जनः** । 'मृजूष् शुद्धौ'(अ.प.से.), करणे ल्युट्। ३ प्रसाध्यन्ते केशा अनेन **प्रसाधनः** । 'साध संसिद्धौ' (स्वा.प.अ.), करणे ल्युट्। "प्रसाधनी कङ्कतिका"[अमरकोषः२।६।१३९॥]इत्यमरः। त्रीणि 'कांकसी' इति ख्याताया: ॥

## अथ बालक्रीडनके[1] गुडो[2] गिरिः[3] ॥६८८॥
## गिरियको[4] गिरिगुडः[5]

१ बालाः क्रीडन्त्यनेन बालक्रीडनम् । 'क्रीड (क्रीडृ) विहारे'(भ्वा.प.से.), नन्द्यादिः, ततः स्वार्थे कनि[10] **बालक्रीडनकम्**, तत्र । २ गुड्यते **गुडः** । 'गुड रक्षणे'(तु.-प.से.), घञ् । गुडतीति इगुपधत्वात् को वा । ३ गीर्यते **गिरिः**, पुंसि । 'गृ निगरणे'(तु.प.से.), 'इक् कृष्यादिभ्यः' (वा-३।३।१०८॥)इतीक् **॥६८८॥ ४-५** गीर्यते **गिरियकः** । गीर्यते[11] गुड्यते च[12] **गिरिगुडः** । द्वावपि पृषोदरादी । भ्रमरकोऽपि, यन्महेश्वरः-"भ्रमरको जले भृङ्गे गिरिके[13] चूर्णकुन्तले" [विश्वप्रकाशकोशः, कान्तवर्गः, श्लो-१८४]इति। यथा-"हेलाहतभ्रमरकभ्रमिमण्डलीभिः"[[14]]इति । पञ्च बालक्रीडनस्य । '[15]लट्टूभ्रमर' इति भाषा ॥

## समौ कन्दुकगेन्दुकौ[1][2] ।

१ कन्द्यत आहूयते क्रीडार्थिभिरिति । 'कदि [क्रदि] क्लदि वैक्लव्ये'(भ्वा.आ.से.), बाहुलकाद् 'भृतृमृ[16]-'(उणा-७)इत्यादिना उः, कन्दुः, ततः स्वार्थे कनि **कन्दुकः**, पुंक्ली.।

---

१. 'त्रिकाण्डः' इति३॥ २. 'व्यञ्ज-' इति१.३.४॥ ३. 'व्यज्ज्यते' इति२॥ ४. 'कुटः' इत्युणादिगणे ॥ ५. द्र. मा.धातुवृत्तिः, तुदादिः, धातुसं-१००, पृ.४७९॥, तत्र " 'कुटेः किच्च' इत्यादिज्ञापकात् कुटादिङित्त्वान्नित्यत्वाद् गुण इति केचिदिति कुटतावुक्तम् । 'विदिभिदि' इति सूत्रे हरदत्तस्तु ङित्त्वमेवेच्छन् धुवित्रम् इत्युवङमेवाह" इति दृश्यते ॥ ६. स्वामी न पठति ॥ ७. सर्वप्रतिषु कोष्ठान्तवर्गतपाठश्चलितो दृश्यते ॥ ८. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-३९७, पृ.४८५॥, रामाश्रमीर२।६।१३९॥, पृ.३२३॥ ९. इतोऽग्रे १प्रतौ 'वा' इति दृश्यते ॥ १०. 'कन्' इति२॥ ११. इतोऽग्रे ३प्रतौ 'च' इति दृश्यते ॥ १२. इतोऽग्रे ३प्रतौ 'गुड्यते' इति दृश्यते ॥ १३. 'गिरिजे' इति विश्वप्रकाशकोशे, पृ.१७॥ १४. द्र. अनेकार्थकैरवाकरकौमुदीटीका, भा-२, ४।२४॥, पृ.३२३॥ १५. 'लट्ट' इति३॥ १६. 'भृमृशीतृ-' इत्युणादिगणे ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कं सुखं दयते[1] ददाति वा । 'दय दानगति[रक्षण]हिंसादानेषु'(भ्वा.आ.से.), मित्रद्वा(मितद्रवा)दित्वात् कुः, ततः स्वार्थे कनि कन्दुकः, पुंक्ली. । २ गच्छन् वर्तुलत्वादिन्दुप्रतिकृतिः **गेन्दुकः** । पृषोदरादिः । "क्रीडास्थाने युवतीभिः सह क्रीडार्थं गेन्दुकादिरपेक्ष्यते[2]"[ ]इति शय्याप्रस्तावेऽस्याऽभिधानमिति नाऽप्रस्तुतोक्तिशङ्का । द्वे 'दडा' इति ख्यातस्य ॥

## राजा राट् पृथिवीशक्रमध्यलोकेशभूभृतः ॥६८९॥
## महीक्षित् पार्थिवो मूर्धाभिषिक्तो भू-प्रजा-नृ-पः ।

१ राजतेऽमात्यादिभिरिति **राजा** । रञ्जयति प्रजां[3] वा । 'राजृ दीप्तौ'(भ्वा.उ.से.), 'रञ्ज रागे'(भ्वा.उ.अ.) वा, 'कनिन् युवृषितक्षिराजिधन्विद्युप्रतिदिवः'(उणा-१५४)इति कनिन् । २ राजतेऽसौ **राट्** । 'राजृ दीप्तौ'(भ्वा.उ.से.), 'सत्सूद्विष-'३।२।६१॥ इति क्विप्, 'व्रश्चभ्रस्ज-'८।२।३६॥ इति षत्वम्, 'झलां जशोऽन्ते-'८।२।३९॥ इति डत्वम्, ['वाऽवसाने'८।४।५६॥ इति विकल्पेन चर्त्वम् राट्-ड्] । ३ पृथिव्यां शक्र इव **पृथिवीशक्रः** । ४ मध्यलोकस्येशो **मध्यलोकेशः** । ५ भुवं बिभर्ति **भूभृत्** । क्विबन्तः ॥६८९॥ ६ महीं क्षितवान् प्राप्तवान्, महीं क्षयत्यधिवसति वा **महीक्षित्** । 'क्षि निवासगत्योः'(तु.प.अ.), क्विप्, 'ह्रस्वस्य-'६।१।७१॥ इति तुक् । ७ पृथिव्या ईश्वरः **पार्थिवः** । 'सर्वभूमिपृथिवीयामणञौ'५।१।४१॥ इत्यनुवृत्तौ 'तस्येश्वरः' ५।१।४२॥ इत्यञ् । ८ मूर्धन्यभिषिच्यते स्म **मूर्धाभिषिक्तः** । 'षिचिर् क्षरणे[4]'(तु.उ.अ.), निष्ठा । मूर्धावसिक्तोऽपि । ९-११ भूप्रजानृभ्यः प इति योज्यते, तेन भुवं पाति **भूपः** । 'पा रक्षणे'(अ.प.अ.), 'आतः-'३।२।३॥ इति कः । प्रजाः पाति रक्षति **प्रजापः** । नॄन्[5] पाति **नृपः** । यौगिकत्वाद् भूपालः, नरपालः, लोकपाल इत्यादयः । एकादश सामान्येन राज्ञः ॥

## मध्यमो मण्डलाधीशः

१ **मध्यमः** सामान्योऽग्रेतनापेक्षया । २ मण्डलस्य देशमात्रस्याऽधीशो **मण्डलाधीशः** । द्वादशराजमण्डलमध्याद् मण्डलमात्रस्याऽधीश इत्यर्थः । "स्यान्मण्डलं द्वादशराजके च देशे च विश्वे (बिम्बे) च कदम्बके च"[विश्वप्रकाशकोशः, लान्तवर्गः, श्लो-८१]इति विश्वः । "नृपोऽन्यो मण्डलेश्वरः" [अमरकोषः२।८।२॥]इत्यमरः । "अन्यो भूम्येकदेशे यो नृपः" [अम.क्षीर.२।८।२॥]इति तट्टीका । "मध्यमो मण्डलेश्वरः" [हलायुधकोशः२।४२२॥]इति हलायुधः । "भूम्येकदेशेश्वरे द्वौ" [ ]इति तट्टीका । द्वे मण्डलीकस्य ॥

## सम्राट् तु शास्ति यो नृपान् ॥६९०॥

१ यः सर्वमण्डलस्येशो राजसूयं च योजयेत्, यो नृपान् शास्ति भृत्यवद् व्यापारेषु नियोजयति, यः सर्वमण्डलस्य द्वादशराजचक्रस्येशः, च पुनः यो राजसूयं यज्ञविशेषमयजत्[6], स **सम्राट्** इत्यर्थः ।

"येनेष्टं राजसूयेन मण्डलस्येश्वरश्च यः ।
शास्ति यश्चाज्ञया[7] राज्ञः स सम्राट् ॥"[अमरकोषः २।८।३॥]इत्यमरः । एकं द्वादशराजमण्डलाधिपते राज्ञः ॥

## चक्रवर्ती सार्वभौमः[8]

१ चक्रे भूमण्डले द्वादशराजमण्डले च वर्तितुं प्रभुत्वलक्षणां वृत्तिं घटां(चेष्टां) कर्तुं शीलमस्य, णिनिः । चक्रे राजसमूहेऽवश्यं स्वामित्वेन वर्तते वा । आवश्यके णिनिः **चक्रवर्ती**[9] । "चक्रवर्ती वल्गणे (चक्रो गणे) चक्रवाके" [विश्वप्रकाशकोशः, रान्तवर्गः, श्लो-४९]इति विश्वः । चक्रेण चक्रायुधरत्नेन वर्तितुं शीलमस्येति वा । २ सर्वभूमेरीश्वरः ([10]समुद्रपरिवृताया भूमेरीश्वरः), 'सर्वभूमि-'५।१।४१॥ इत्यनुवृत्तौ, 'तस्येश्वरः'५।१।४२॥ इत्यण्, 'अनुशतिकादीनां च' ७।३।२०॥ इत्युभयपदवृद्धिः, [ **सार्वभौमः** ] । द्वे चक्रिणः । "अधीश्वरः"[शेषनाममाला३।१३८॥]शैषिकम् ॥

## ते तु द्वादश भारते ॥६९१॥

१ ते चक्रिणो भारते वर्षे द्वादश अवसर्पिणीकाले भवन्ति स्म ॥६९१॥

अथ तान् क्रमेणाऽऽह-

१. 'दयति' इति३.४॥ २. '-क्षतः' इति३॥ ३. 'प्रजामिति' इति३॥ ४. 'षिच क्षरणे' इति क्षीरतरङ्गिण्यादौ ॥ ५. 'नृन्' इति१.२.४॥ ६. '-यजयत्' इति३, '-योजयत्' इति४॥ ७. 'यः स्वाज्ञया' इति३॥ ८. तुलनीयोऽमरकोषः२।८।२॥ ९. इतोऽग्रे ४प्रतौ 'च' इति दृश्यते ॥ १०. कोष्ठान्तर्गतपाठः ३प्रतौ न दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**आर्षभि[1]र्भरत[2]स्तत्र**

१ तेषु च द्वादशचक्रवर्तिषु मध्ये प्रथमो भरतस्तन्नामनी, ऋषभस्याऽऽदिमतीर्थकृतोऽपत्यम् **आर्षभिः** । 'अत इञ्'४।१।९५॥, 'तद्धितेष्वचामादेः'७।२।११७॥ इति ऋकारस्य आकारः, 'उरण् रपरः'१।१।५१॥, 'यस्येति च'६।४।१४८॥। २ बिभर्त्ति षट्खण्डानीति **भरतः** । 'डुभृञ् धारणादौ[1]'(जु.उ.अ.), 'भृ[मृ]दृशीङ्(दृशि)यजिपवि(पर्वि)पच्यमिनमितमिहर्यिभ्योऽतच्[2]'(उणा-३९०)॥

**सगर[1]स्तु सुमित्र[2]भूः ।**

१ सहते सर्वं **सगरः** । 'षह मर्षणे'(भ्वा.आ.से.), बाहुलकादरप्रत्यये निपात्यते । २ सुमित्रविजयाद् भवति **सुमित्रभूः** । द्वे सगरस्य ॥

**मघ[1]वा वैज[2]यिः**

१ मघः सौख्यमस्याऽस्ति **मघवान्**[3] । मघन्ते[4](मङ्खते) शत्रुष्विति वा । 'मघि कैतवे [च]'(भ्वा.आ.से), 'श्वन्नुक्षन्-'(उणा-१५७)इत्यादिना वनिप्रत्यये साधुः[5] । मघवा इन्द्र इव वा । २ विजयस्याऽपत्यं **वैजयिः** । 'अत इञ्'४।१।९५॥, 'यस्येति च'६।४।१४८॥, 'तद्धितेष्वचामादेः'७।२।११७॥ । द्वे मघोनः ॥

**अथाऽश्वसेननृ[1]पनन्दनः ॥६९२॥**

**सनत्[2]कुमारः**

१ अश्वसेननृपस्य नन्दनः **अश्वसेननृपनन्दनः** ॥६९२॥ २ सनदित्यव्ययं रूपवदित्यर्थे, सनद् नित्यं कुमार इव रूपवत्त्वात् **सनत्कुमारः** । द्वे सनत्कुमारस्य ॥

**अथ शा[1]न्तिः कु[1]न्थुर[1]रो जिना अपि ।**

१ **शान्तिः** षोडशो जिनः । १ **कुन्थुः** सप्तदशो जिनः । १ **अरः** अष्टादशो जिनः । एते त्रयो जिनास्तीर्थकृतोऽपि चक्रवर्तिनोऽपि ॥

**सुभू[1]मस्तु कार्त[2]वीर्यः**

१ सुष्ठु जातमात्रेण सुखेन गृहीता भूमिरनेनेति **सुभूमः** । पृषोदरादित्वात् । यत् त्रिषष्टिशलाकापुरुषचरिते-"गृह्णन् भूमिं सुखेनाऽभूत् सुभूमो नामतस्ततः"[त्रिषष्टिशलाकापुरुषचरितमहाकाव्यम्, पर्व-६, सर्गः-४, श्लो-७८] । यद्वा भुवः पृथिव्या मा लक्ष्मीः शोभा वा भूमा, सुष्ठु शोभना भूमा यस्य स सुभूमः । २ कृतवीर्यस्याऽपत्यं **कार्तवीर्यः** । द्वे सुभूमस्य ॥

**पद्म[1]ः पद्मो[2]त्तरात्मजः ॥६९३॥**

१ पद्यते प्राप्नोति[6] निधीनिति **पद्मः** । 'पद[7] गतौ'(दि.आ.अ.), 'अर्तिस्तु-'(उणा-१३७)इति मन् । २ उत्तर उत्कृष्ट आत्मज उत्तरात्मजः, पद्मस्योत्तरात्मजः **पद्मोत्तरात्मजः** । द्वे पद्मस्य ॥६९३॥

**हरि[1]षेणो हरि[2]सुतः**

१ हरेरिन्द्रस्येव सेनाऽस्य **हरिषेणः** । 'एति संज्ञायाम्-'८।३।९९॥ इति षः । २ हरेर्भूपालस्य सुतो **हरिसुतः** । द्वे हरिषेणस्य ॥

**ज[1]यो विजय[2]नन्दनः ।**

१ जयति शत्रूनिति **जयः** । 'जि अभिभवे'(भ्वा.-प.अ.), अच् । २ विजयस्य नन्दनो **विजयनन्दनः** । द्वे जयस्य ॥

**ब्रह्म[1]सूनुर्ब्रह्म[2]दत्तः**

१ ब्रह्मणो भूपालस्य सूनुः पुत्रो **ब्रह्मसूनुः** । २ ब्रह्मा[8] एनं देयादिति **ब्रह्मदत्तः** । 'क्तिच्क्तौ च संज्ञायाम्'३।३।१७४॥ इति क्तच्, 'दो दद्घोः'७।४।४६॥ इति दधादेशः-(ददादेशः), 'खरि च'८।४।५५॥ इति चर्त्वम् । द्वे ब्रह्मदत्तस्य ॥

**सर्वेऽपीक्ष्वाकुवंशजाः ॥६९४॥**

१ सर्वेऽपि भरतादयो द्वादशाऽपि चक्रिण इक्ष्वाकुवंशजाः, इक्ष्वाकोर्वंशे जाता इक्ष्वाकुवंशजाः ॥६९४॥

अथाऽर्धचक्रवर्तिनो[9] नववासुदेवानाह-

**प्राजा[1]पत्यस्त्रि[2]पृष्ठः**

---

१. 'धारणपोषणयोः' इति३॥ २. '-हर्येभ्यो-' इत्युणादिगणे ॥ ३. मूले 'मघवा' इत्युक्तत्वादिदं विचारणीयम् ॥ ४. 'मघते' इति१॥ ५. 'मघि कैतवे च' इत्यत्र स्वामिना "श्वनुक्षन् (उ.१।१५९)इति मघवम् मघवा इन्द्रः" इत्युक्तम्, क्षीरतरङ्गिणी, भ्वादिः, धातुसं-७८, पृ.३२॥ ६. 'व्याप्नोति' इति१॥ ७. 'पदि' इति१.२.३॥ ८. 'ब्रह्म' इति३॥ ९. 'अथार्धचक्रिणो' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ प्रजापते राज्ञोऽपत्यं **प्राजापत्यः**। 'दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः'४।१।८५॥, 'यस्येति च'६।४।१४८॥ इतीकारलोपः, 'तद्धितेष्वचामादेः'७।२।११७॥इति वृद्धिः । २ त्रयो वंशाः पृष्ठे पश्चिमप्रदेशेऽस्य **त्रिपृष्ठः**। शाकपार्थिवादिः । त्रीणि पृष्ठानि वंशा अस्येति वा । यत् श्रीहेमचन्द्राचार्याः-

''दृष्ट्वा वंशत्रयं पृष्ठे त्रिपृष्ठ इति भूपतिः ।
नाम तस्याऽकरोत् सूनोरुत्सवेन महीयसा ॥१॥''

[ त्रिषष्टिशलाकापुरुषचरितमहाकाव्यम्, पर्व-४, सर्गः-१, श्लो-२३४]इति । द्वे त्रिपृष्ठस्य ॥

**अथ द्विपृष्ठो ब्रह्मसम्भवः ।**

१ द्वौ वंशौ पृष्ठे पश्चिमे प्रदेशेऽस्य **द्विपृष्ठः** । शाकपार्थिवादिः । २ ब्रह्मणो राज्ञः सम्भवति **ब्रह्मसम्भवः** । पचाद्यच् । द्वे द्विपृष्ठस्य ॥

**स्वयम्भू रुद्रतनयः**

१ स्वयं भवति **स्वयम्भूः** । क्विप् । २ रुद्रस्य राज्ञस्तनयो **रुद्रतनयः** । द्वे स्वयम्भूराज्ञः ॥

**सोमभूः पुरुषोत्तमः ॥६९५॥**

१ सोमाद् राज्ञो भवति **सोमभूः**, क्वीबन्तः । २ पुरुषेषूत्तमः **पुरुषोत्तमः** । द्वे पुरुषोत्तमस्य ॥६९५॥

**शैवः पुरुषसिंहः**

१ शिवस्य राज्ञोऽपत्यं **शैवः** । 'शिवादिभ्योऽण्' ४।१।११२॥ । २ पुरुषेषु सिंहः **पुरुषसिंहः** । पुरुषः सिंह इवेति वा । 'उपमेयमुपमितं[1] व्याघ्रादिभिः सामान्याप्रयोगे' २।१।५६॥ इति समासः । द्वे पुरुषसिंहस्य ॥

**अथ महाशिरस्समुद्भवः ।**

**स्यात् पुरुषपुण्डरीकः**

१ महाशिरसो नृपतेः समुद्भवति **महाशिरस्समुद्भवः**। २ पुरुषेषु पुण्डरीको व्याघ्र इव **पुरुषपुण्डरीकः** । द्वे पुरुषपुण्डरीकस्य ॥

**दत्तोऽग्निसिंहनन्दनः ॥६९६॥**

१ दीयते स्म **दत्तः** । २ अग्निसिंहस्य नृपतेर्नन्दनः **अग्निसिंहनन्दनः** । द्वे दत्तस्य ॥६९६॥

**नारायणो दाशरथिः[2]**

१ नराणां समूहो नारम्, नारमयते **नारायणः** । 'अय गतौ'(भ्वा.आ.से.), नन्द्यादित्वाद् ल्युः । २ दशरथस्याऽपत्यं[3] **दाशरथिः** । द्वे नारायणस्य ॥

**कृष्णस्तु वसुदेवभूः ।**

१ कृष्णवर्णत्वात् **कृष्णः**[4] । २ वसुदेवाद् नृपतेर्भवति **वसुदेवभूः** । द्वे कृष्णस्य ॥

**वासुदेवा अमी कृष्णा नव**

१ अमी पूर्वोक्ताः प्राजापत्याद्याः कृष्णान्ता **वासुदेवाः** प्रोच्यन्ते । कृष्णा वर्णेन, श्यामा इत्यर्थः । नवेति नवसङ्ख्याकाः ॥

**शुक्ला बलास्त्वमी ॥६९७॥**

१ तुरत्र विशेषे, अमी वक्ष्यमाणा नवेत्येव, बलमस्त्येषां बलाः। 'अर्शआदिभ्योऽच्'५।२।१२७॥ । बलदेवैकदेशा बलाः, बलदेवा इत्यर्थः । शुक्ला वर्णेन ॥६९७॥

अथ तान् क्रमेणाऽऽह-

**अचलो विजयो भद्रः सुप्रभश्च सुदर्शनः ।**

**आनन्दो नन्दनः पद्मो रामः**

१ न चलति सत्त्वाद् **अचलः** । 'चल चलने' (भ्वा.प.से.), अच् । २ विशेषेण जयत्यभिभवत्यरीन् **विजयः**। 'जि अभिभवे'(भ्वा.प.अ.), अच् । ३ भद्रयुक्तत्वाद् **भद्रः** । ४ शोभना प्रभाऽस्य **सुप्रभः** । ५ शोभनं दर्शनमस्य **सुदर्शनः** । ६ आनन्दयति सज्जनानिति **आनन्दः**। 'टुणदि(टुनदि) समृद्धौ' (भ्वा.प.से.), अच् । ७ नन्दयति **नन्दनः** । नन्द्यादित्वाद् ल्युः । ८ [पद्यते **पद्मः**] । ९ रमते **रामः** । 'रमु क्रीडायाम्'(भ्वा.आ.अ.), ज्वलादित्वाण्णः। एते यथाक्रमं त्रिपृष्ठादिवासुदेवानामग्रजाः प्रजापत्यादिसम्भवाः[5]। अचलादिनवबलदेवस्य नामानि ॥

**विष्णुद्विषस्त्वमी ॥६९८॥**

१. अष्टाध्याय्यां सूत्रे 'उपमेयम्' इति न दृश्यते ॥ २. 'दास-' इति३॥ ३. 'दस-' इति३॥ ४. 'कृष्णवर्णः' इति१॥ ५. 'प्रा-' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ अमी वक्ष्यमाणा अश्वग्रीवादयो नव विष्णूनां त्रिपृष्ठादीनां वासुदेवानां यथाक्रमं द्विषः प्रतिपक्षाः, प्रतिवासुदेवा इत्यर्थः ॥६९८॥

अथ तानाह-

**अश्वग्रीवस्तारकश्च मेरको मधुरेव च ।**
**निशुम्भबलिप्रह्लादलङ्केशमगधेश्वराः ॥६९९॥**

१ अश्वस्येव ग्रीवाऽस्य **अश्वग्रीवः**। २ तारयति **तारकः** । ण्वुल् । ३ मां लक्ष्मीमीरयति **मेरकः** । 'ईर[१] गतिकम्पनयोः'(चु.उ.से.), ण्वुल् । ४ मन्यते सर्वमसारमिति **मधुः**, यस्य कैटभो भ्राता । ५ निशुम्भयति शत्रूनिति **निशुम्भः**। 'शुभि[२] हिंसायाम्'(     ), अच् । ६ बलति प्राणिति **बलिः**। 'बल प्राणने'(भ्वा.प.से.), '-इन्'(उणा-५५७)। ७ प्रह्लादते **प्रह्लादः** । पचाद्यच् । ८ लङ्कायां[३] ईशो **लङ्केशः** रावणः[४] । ९ मगधानामीश्वरो **मगधेश्वरः**[५] जरासन्धः । अश्वग्रीवादिनवप्रतिवासुदेवनामानि ॥६९९॥

उपसंहारमाह-

**जिनैः सह त्रिषष्टिः स्युः शलाकापुरुषा अमी ।**

१ जिनैस्तीर्थकृदृषभादिभिः चतुर्विंशत्या सह सार्धममी भरतादयो द्वादश चक्रवर्तिनः, त्रिपृष्ठादयो नव वासुदेवाः, अचलाद्या नव बलदेवाः, अश्वग्रीवाद्याः नव प्रतिवासुदेवाश्चेति सर्वे मीलिताः त्रिषष्टिः शलाकाभूताः पुरुषाः शलाकापुरुषाः, पुरुषेषु जातरेखा इत्यर्थः, स्युर्भवेयुः ॥

**आदिराजः पृथुर्वैन्यः**

१ आदिश्चासौ राजा च **आदिराजः** । 'राजाहःसखिभ्यष्टच्'५।४।९१॥ । २ प्रथते विस्तारं प्राप्नोति यशसेति[६] **पृथुः** । 'प्रथ विस्तारे[७]'(भ्वा.आ.से.), '[८]प्रथिम्रदिभ्रस्जां सम्प्रसारणं सलोपश्च'(उणा-२८)इति कुः । ३ व(वे)नस्याऽपत्यं वैनः । 'शिवादिभ्योऽण्'४।१।११२॥, ततः स्वार्थे यति **वैन्यः** । त्रीणि पृथुनाम्नः ॥

अथाऽन्यमतप्रसिद्धमान्धात्रादिषट्चक्रवर्तिनामान्याह-

**मान्धाता युवनाश्वजः ॥७००॥**

१ मां धास्यति **मान्धाता** । इन्द्रो हि जातमात्रस्याऽस्य मातुरभावाद् मां धास्यतीत्यभिधायाऽमृतश्रावणीमङ्गुलीं समुपायितवानिति प्रसिद्धिः । २ युवनाश्वाज्जातो **युवनाश्वजः** । 'पञ्चम्यामजातौ'३।२।९८॥ इति डः । द्वे मान्धातुः ॥७००॥

**धुन्धुमारः कुवलाश्वः**

१ धुन्धुनामानमसुरं मारयति **धुन्धुमारः**। पचाद्यच्। २ कुवलं यं[१०] कुवलयम्[११], तद्वर्णाः केशा अस्य **कुवलाश्वः** । द्वे धुन्धुमारस्य ॥

**हरिश्चन्द्रस्त्रिशङ्कुजः ।**

१ हरिरश्वश्चन्द्र इवाऽऽह्लादकोऽस्य **हरिश्चन्द्रः** । पारस्करादित्वात् सुट् । २ त्रिशङ्कोर्जातः **त्रिशङ्कुजः** । द्वे हरिश्चन्द्रस्य ॥

**पुरूरवा बौध ऐल [१२]उर्वशीरमणश्च सः ॥७०१॥**

१ पुरु रौति **पुरूरवाः**, सकारान्तः । 'रु शब्दे'(अ.प.से.), 'पुरूरवाः'(उणा-६७१)इति साधुः । २ बुधस्याऽयं **बौधः** । 'तस्येदम्'४।३।१२०॥ इत्यण् । ३ इलाया अपत्यम् **ऐलः** । शिवादित्वादण्[१३] । ४ उर्वश्या रमणः **उर्वशीरमणः** । चत्वारि पुरूरवसः ॥७०१॥

**दौष्यन्तिर्भरतः सर्वंदमः शकुन्तलात्मजः ।**

१ दुष्यन्तस्याऽपत्यं **दौष्यन्तिः**। 'अत इञ्'४।१।९५॥। २ बिभर्ति पृथ्वीं **भरतः** । 'डुभृञ् धारणादौ'(जु.उ.अ.), 'भृ[मृ]दृशीङ्(दृशि)यजि-'(उणा-३९०)इत्यादिनाऽतच् । ३ सर्वान् शत्रून् दमयति **सर्वंदमः** । 'दमु उपशमे'(दि.प.से.), 'संज्ञायां भृतवृजि-'३।२।४६॥ इति खच्, खित्त्वाद् मुम् । सर्वदमनोऽपि । ४ शकुन्तलाया आत्मजः **शकुन्तलात्मजः** । चत्वारि भरतस्य ॥

**हैहयस्तु कार्तवीर्यो दोःसहस्रभृदर्जुनः ॥७०२॥**

१ [१४]हैहयस्याऽपत्यं **हैहयः** । २ कृतवीर्यस्याऽपत्यं **कार्तवीर्यः** । उभयत्र 'ऋष्यन्धकवृष्णि-'४।१।११४॥ इत्यण् ।

१. 'ईर क्षेपे' इति क्षीरतरङ्गिण्यादौ ॥ २. 'शुभ' इति३.४॥ ३. '-यां' इति३॥ ४. १प्रतौ नास्ति ॥ ५. 'मा-' इति१.२॥ ६. 'यशसे' इति१, 'यशसा' इति४॥ ७. 'प्रथ प्रख्याने' इति क्षीरतरङ्गिण्यादौ ॥ ८. 'प्रथ-' इति३॥ ९. '-ली' इति१.२.३॥ १०. ४प्रतौ नास्ति ॥ ११. 'कुवलयं कुवलं' इति३॥ १२. 'ऊ-' इति१.३॥ १३. 'शिवादिभ्योऽण्' इति४॥ १४. 'हे-' इति१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

३ दोष्णां हस्तानां सहस्रं दोःसहस्रम्, दोःसहस्रं बिभर्ति **दोःसहस्रभृत्** । ४ अर्जयति कीर्तिम् **अर्जुनः** । 'अर्ज सर्ज अर्जने'[1](भ्वा.प.से.), णिजन्तादस्माद् 'अर्जेर्णिलुक् च'(उणा-३३८)इत्युनन् । चत्वारि कार्तवीर्यस्य । मान्धात्रादयः षट् लोके चक्रवर्तित्वेन प्रसिद्धाः । यदाहुः-

"मान्धाता धुन्धुमारश्च हरिश्चन्द्रः पुरूरवाः ।
भरतः कार्तवीर्यश्च षडेते चक्रवर्तिनः ॥१॥"[[3] ]इति ॥७०२॥

## कौसल्यानन्दनो[4] दाशरथी रामः

१ कोसलस्य राज्ञोऽपत्यं स्त्री कौसल्या। '[वृद्धेत्]-कोसलाजादाञ् ञ्य[ङ्]'४।१।१७१॥इति ञ्यः । कौसल्याया नन्दनः **कौसल्यानन्दनः**, दन्त्यमध्यः । २ दशरथस्याऽपत्यं **दाशरथिः** । 'अत इञ्'४।१।९५॥ । ३ रमते **रामः** । ज्वलादित्वाण्णः । रामचन्द्रैकदेशो वा । रामभद्रोऽपि । त्रीणि रामचन्द्रस्य ॥

## अस्य तु प्रिया ।

## वैदेही मैथिली[5] सीता जानकी धरणीसुता ॥७०३॥

१ अस्य रामचन्द्रस्य प्रिया भार्या, विदेहस्य राज्ञोऽपत्यं **वैदेही** । 'जनपदशब्दात् क्षत्रियादञ्'४।१।१६८॥, 'टिड्ढाणञ्-'४।१।१५॥ङीष्(ङीप्)। २ मिथिलायां भवा **मैथिली**[6]। 'तत्र भवः'४।३।५३॥ इत्यण्, 'टिड्ढाणञ्-'४।१।१५॥इति ङीष्(ङीप्)। ३ सीता हलरेखा, तद्वत्वात् **सीता** । ४ जनकस्याऽपत्यं **जानकी** । ५ धरण्याः पृथिव्याः सुता **धरणीसुता** । पञ्च सीतायाः ॥७०३॥

## रामपुत्रौ कुशलवावेकयोक्त्या कुशीलवौ ।

१ रामस्य पुत्रौ रामपुत्रौ, कुश्यति **कुशः** । 'कुश श्लेषणे'[7](दि.प.से.), 'इगुपध-'३।१।१३५॥इति कः । कुशनिर्मितत्वाद्वा । २ लुनाति शत्रून् **लवः** । 'लूञ् छेदने' (क्र्या.उ.से.), अच् । द्वावप्येकयोक्त्या एकेन वचसा कुशश्च लवश्च **कुशीलवौ** । राजदन्तादित्वात् साधुः । यच्छ्रीधरः-

"वल्मीकजन्मनि नटे याचके च कुशीलवः ।
एकयोक्त्या मनो(मतौ) रामपुत्रयोस्तु[8] कुशीलवौ ॥१॥"

[विश्वलोचनकोशः, वान्तवर्गः, श्लो-५८-५९]इति । [द्वे] रामसुतयोर्नाम ॥

## सौमित्रिर्लक्ष्मणः

१ सुमित्राया अपत्यं **सौमित्रिः** । 'बाह्वादिभ्यश्च' ४।१।९६॥ इति इञ् । २ लक्ष्मीरस्त्यस्य **लक्ष्मणः** । 'लक्ष्म्या अच्च'(गणसू-५।२।१००)इति नः । द्वे लक्ष्मणस्य ॥

## वाली वालिरिन्द्रसुतश्च सः ॥७०४॥

१ वालाः केशाः सन्त्यस्य **वाली** । 'अत इनिठनौ' ५।२।११५॥इतीनिः । २ वालयति **वालिः** । 'वल संवरणे' (भ्वा.आ.से.), णिजन्तः, 'अच इः'(उणा-५७८)इति इः । ३ इन्द्रस्य सुत **इन्द्रसुतः** । सुग्रीवाग्रजोऽपि । त्रीणि वालिवानरस्य ॥७०४॥

## आदित्यसूनुः सुग्रीवः

१ आदित्यस्य सूनुः **आदित्यसूनुः** । २ शोभना ग्रीवाऽस्य **सुग्रीवः** । द्वे सुग्रीवस्य ॥

## हनुमान् वज्रकङ्कटः ।

## मारुतिः [10]केसरिसुतः आञ्जनेयोऽर्जुनध्वजः ॥७०५॥

१ हनुरस्त्यस्य **हनुमान्** । 'उपसर्गस्य घञ्यमनुष्ये बहुलम्'६।३।१२२॥ इति बाहुलकाद् दीर्घत्वे हनूमानपि । यद्वा 'शरीरावयवादीनां संज्ञायां च (शरादीनां च)'६।३।१२०॥ इति मतौ दीर्घत्वम् । अत्रैव पाठाद् मतुप्(मतुपः) 'संज्ञायाम्' ८।२।११॥इति वत्वं यवादेराकृतिगणत्वान्न भवति[11]। २ वज्रमयः कङ्कटः कवचोऽस्य **वज्रकङ्कटः** । ३ मारुतस्य वायोरपत्यं **मारुतिः** । 'अत इञ्'४।१।९५॥ । ४ [12]केसरिणः कपेः सुतः [13]**केसरिसुतः** । ५ अञ्जनाया अपत्यम् **आञ्जनेयः**। 'स्त्रीभ्यो ढक्'४।१।१२०॥, ढस्यैयादेशः । ६ अर्जुनस्य ध्वजो **अर्जुनध्वजः** । षड् हनुमतः ॥७०५॥

---

१. स्वामिसम्मतोऽयं धातुपाठः, '-षर्ज-' इति मैत्रयसायणौ ॥ २. ३प्रतौ नास्ति ॥ ३. द्र. स्वोपज्ञटीका३।७०३॥, पृ.१५६॥ ४. मुद्रितमूले तालव्यमध्यः कौशल्यानन्दनः शब्दो दृश्यते, स्वोपज्ञटीकाऽपि तमाश्रित्यैव ॥ ५. 'मैथली' इति१.३॥ ६. 'मैथली' इति३॥ ७. दुर्गसम्मतोऽयम्, द्र. क्षीरतरङ्गिणी, दिवादिः, धातुसं-११२, पृ.२२९, मा.धातुवृत्तिः, दिवादिः, धातुसं-११७, पृ.४३२॥ ८. '-योश्च' इति विश्वलोचनकोशे, पृ.३६९॥ ९. 'इन्' इति३.४॥ १०. 'केश-' इति१.३.४॥, मुद्रितमूलेऽपि 'केश-' इति दृश्यते ॥ ११. द्र. मा.धातुवृत्तिः, अदादिः, धातुसं-२, पृ.३२०॥ १२. 'केश-' इति३.४॥ १३. 'केश-' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**पौलस्त्यो रावणो रक्षो-लङ्केशो दशकन्धरः ।**

१ पुलस्तेरपत्यं **पौलस्त्यः** । गर्गादित्वाद् यञ् । पुलस्त्यस्याऽपत्यमिति [वा] । 'ऋष्यन्धकवृष्ण-'४।१।११४॥ इत्यण् । २ विश्रवसोऽपत्यं **रावणः** । 'णश्च विश्रवसो विश-(विश्) लुक् च'(हैमसू-६।१।६५॥)इति णे साधुः । रावयति लोकानिति, नन्द्यादित्वाल्ल्युर्वा । ३-४ रक्षसां लङ्कायाश्च ईशः, तेन रक्षसामीशो **रक्षईशः**, **लङ्केशः** । यौगिकत्वाद् राक्षसेशः, लङ्कापतिः । ५ दश कन्धरा ग्रीवाऽस्य **दशकन्धरः** । पञ्च रावणस्य ॥

**रावणिः शक्रजिन्मेघनादो मन्दोदरीसुतः ॥७०६॥**

१ रावणस्याऽपत्यं **रावणिः**। 'अत इञ्'४।१।९५॥। २ शक्रं जितवान् **शक्रजित्** । 'जि अभिभवे'(भ्वा.प.अ.), क्विप्, 'ह्रस्वस्य-'६।१।७१॥ इति तुक् । ३ मेघस्येव नादोऽस्य **मेघनादः** । ४ मन्दोदर्याः सुतो **मन्दोदरीसुतः** । चत्वारि रावणसुतस्य ॥७०६॥

**अजातशत्रुः शल्यारिर्धर्मपुत्रो युधिष्ठिरः ।**

**कङ्कोऽजमीढः**

१ न जाताः शत्रवोऽस्य **अजातशत्रुः** । २ ([1]शल्यस्य राज्ञोऽरिः) **शल्यारिः** । ३ धर्मस्य पुत्रो **धर्मपुत्रः** । ४ युधि सङ्ग्रामे स्थिरो **युधिष्ठिरः** । 'हलदन्तात् सप्तम्याः संज्ञायाम्' ६।३।९॥ इति सप्तम्यलुक्, 'गवियुधिभ्यां स्थिरः'८।३।९५॥ इति षत्वम् । ५ **कङ्कः** बाह्मणलिङ्गत्वात् । यद्गौडः-''कृतान्ते लोहपृष्ठे च कङ्को बाह्मणलिङ्गिनि''[[2]] इति । युधिष्ठिरो हि विप्रछद्मना विराटावासेऽवात्सीदिति । ६ अजास्त्रिवार्षिका यवा मीढा अस्य, अनेन वा **अजमीढः** । आजमीढ इति द्वितीयस्वरादिरपि । यद्भागवतम्-''संज्ञाश्रिता यदनुभावितभाजमीढ तेनाहमुद्यमुपितः पुरुषेण भूम्ना''[ ]इति । षड् युधिष्ठिरस्य ॥

**भीमस्तु मरुत्पुत्रो वृकोदरः ॥७०७॥**

**कीर्मीर-कीचक-बक-[3]हिडिम्बानां निसूदनः ।**

१ बिभेत्यस्मादिति **भीमः** । 'ञिभी भये'(जु.प.अ.), 'भियः षुक् च (वा)'(उणा-१४५)इति मक् । २ मरुतो वातस्य पुत्रो **मरुत्पुत्रः** । ३ वृको भीमजठराग्निः, स उदरेऽस्य **वृकोदरः** ॥७०७॥ ४-७ किरति विक्षिपति[4] किर्मीरः। 'कृ(कॄ) विक्षेपे'(तु.प.से.), ईरनि साधुः । ''कर्मीरोऽपि'' [शब्दभेदप्रकाशः, श्लो-२४]इति शब्दप्रभेदः । कच्यते बध्यते भीमेन कीचकः । 'कच बन्धने'(भ्वा.आ.से.), क्वुनि साधुः । बक इव शाठ्येन बकः । हिण्डते[5] वनमध्ये हिडिम्बः। 'हिडि गतौ[6]'(भ्वा.आ.से.), 'हिडिविलेः किम्बो नलुक्'(हैमोणा-३२४)इति साधुः । एतेषां चतुर्णां निसूदनः, तेन **किर्मीरनिसूदनः, कीचकनिसूदनः, बकनिसूदनः, हिडिम्बनिसूदनः** । यौगिकत्वात् किर्मीरारित्यादयः । सप्त भीमस्य ॥

**अर्जुनः फाल्गुनः पार्थः सव्यसाची धनञ्जयः॥७०८॥**

**राधावेधी किरीटयैन्द्रिर्जिष्णुः श्वेतहयो नरः ।**

**बृहन्नटो गुडाकेशः सुभद्रेशः कपिध्वजः ॥७०९॥**

**बीभत्सः कर्णजित्**

१ अर्जयति(अर्जति) कीर्तिम् **अर्जुनः** । 'अर्ज सर्ज अर्जने'(भ्वा.प.से.), 'अर्जेर्णिलुक् च'(उणा-३३८)इत्युनन् । २ फलति फल्गुनः । 'फल निष्पत्तौ'(भ्वा.प.से.), 'फलेर्गुक् च'(उणा-३३६)इत्युनन्, स एव **फाल्गुनः** । 'प्रज्ञादिभ्यश्च' ५।४।३८॥इति स्वार्थेऽण् । ३ पृथायाः कुन्तायाः[7] अयं **पार्थः** । 'तस्येदम्'४।३।१२०॥इत्यण् । ४ सव्येनाऽपि सचते[8] बाणान् वर्षतीति **सव्यसाची** । 'षच सेवायाम्[9]'(भ्वा.आ.से.), ग्रहादित्वाण्णिनिः । ५ धनं गोधनं विराटनगरं कौरवेभ्यो जयति **धनञ्जयः** । 'जि अभिभवे'(भ्वा.प.अ.), 'संज्ञायां भृतृवृजिधारिसहितपिदमः'३।२।४६॥ इति खच्, 'अरुर्द्विषत्-'६।३।६७॥ इति मुम् ॥७०८॥ ६ राधां वेध्यविशेषं वेधयति **राधावेधी**। 'वेध(विध) वेधने[10]'( ), ग्रहादित्वाण्णिनिः । ७ किरीट-

---

१. कोष्ठान्तर्गतपाठस्थाने ४प्रतौ 'शल्याऽरयोऽस्य' इति 'ऽथवा शल्यस्य राज्ञोऽरिः शल्यारिः' इति टिप्पणी च दृश्यते ॥ २. द्र. स्वोपज्ञटीका ३।७०७॥, पृ.१५७॥ ३. 'हिड-' इति३॥ ४. 'विक्षिप्यति' इति३॥ ५. 'हिण्डयते' इति२.४॥ ६. 'हिडि गत्यनादरयोः' इति क्षीरतरङ्गिण्यादौ ॥ ७. 'कुन्त्या' इति३॥ ८. 'संचते' इति४, 'सचति' इति२॥ ९. 'षच सेचने' इति क्षीरतरङ्गिण्यादौ, मा. धातुवृत्तावुक्तोदाहरणैः सेवनार्थकोऽपि स्वीकृतः ॥ १०. 'विध वेधने' इत्येवाकरस्थः पाठः । पाठान्तरं तु प्रामादिकमन्थपरम्परायातमिति मल्लिनाथः, नैषधमहाकाव्यटीका, भा-१, ३।१२७॥, पृ.१९१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मस्त्यस्य **किरीटी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः । ८ इन्द्रस्याऽपत्यम् **ऐन्द्रिः** । 'अत इञ्'४।१।९५॥ । ९ जयनशीलो **जिष्णुः** । 'जि जये'(भ्वा.प.अ.), 'ग्लाजिस्थश्च क्स्नुः' ३।२।१३९॥ । १० श्वेता हया अस्य **श्वेतहयः** । ११ नृणाति विक्षिपति शत्रूनिति **नरः** । 'नॄ विक्षेपे[1]'(क्र्या.प.से.), अच् । १२ बृहंश्चासौ नटश्च **बृहन्नटः** । विराटगृहे छद्मना नाट्याचार्योऽसावभूदिति हि प्रसिद्धिः । बृहन्नलोऽपि । यन्महेश्वरः-"बृहन्नलो गुडाकेशे महापोटगले मतः"[विश्वप्रकाशकोशः, लान्तवर्गः, श्लो-१३८]इति । "बृहन्नलानुभावोऽपि अन्तःसरलः"[ ]इति वासवदत्तागद्यम् । १३ गुडा गुडिका, तदाकाराः केशा अस्य **गुडाकेशः** । यद्वा गुडा स्नुही, तदाकाराः केशा अस्य गुडाकेशः । १४ सुभद्राया ईशः पतिः **सुभद्रेशः** । १५ कपिर्ध्वजोऽस्य **कपिध्वजः** ॥७०९॥ १६ बीभत्सते **बीभत्सः** । बीभत्सुरपि । १७ कर्णं जितवान् **कर्णजित्** । यौगिकत्वात् कर्णारिरपि । सप्तदश अर्जुनस्य ॥

शेषश्चात्र-

"अर्जुने विजयश्चित्रयोधी चित्राङ्गसूदनः ।
योगी धन्वा[3] कृष्णपक्षो नन्दिघोषस्तु तद्रथः ॥१॥
ग्रन्थिकस्तु सहदेवो नकुलस्तन्तिपालकः ।
माद्रेयाविमौ कौन्तेया भीमार्जुनयुधिष्ठिराः ॥२॥
द्वयेऽपि पाण्डवेयाः स्युः पाण्डवाः पाण्डवायनाः ।"

[शेषनाममाला ३।१३८-१४०॥] ॥

**तस्य गाण्डीवं गाण्डिवं धनुः ।**

१ तस्याऽर्जुनस्य धनुः, 'गडि वदनैकदेशे'(भ्वा.प.-से.), 'इञजादिभ्यः[4]'(वा-३।३।१०८॥)इतीञ् गाण्डिः, पृषोदरादित्वाद् दीर्घत्वे, 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि [वा] गाण्डी धनुःपर्व, तद्योगात् 'गाण्ड्यजगात् संज्ञायाम्'५।२।११०॥ इति वः **गाण्डीवम्, गाण्डिवं** च, पुंक्लीबलिङ्गौ[5] । यदमरः-"कपिध्वजस्य गाण्डीवगाण्डिवौ पुंनपुंसके[6]"[अमरकोषः२।८।८४॥]इति । "जिष्णोर्धनुषि कोदण्डे गाण्डीवं गाण्डिवं तथा[7]"[शाश्वतकोशः, श्लो-५८९]इति शाश्वतः । "अतो धनुमत्रिऽपि"[[8] ]इति मिश्राः । द्वे अर्जुनधनुषः ॥

**पाञ्चाली द्रौपदी कृष्णा सैरन्ध्री नित्ययौवना ॥७१०॥**

**वेदिजा याज्ञसेनी च**

१ पञ्चालस्य राज्ञोऽपत्यं **पाञ्चाली** । 'जनपदशब्दात् क्षत्रियादञ्'४।१।१६८॥, 'टिड्ढाणञ्-'४।१।१५॥ इति ङीप्[9] । २ द्रुपदस्य राज्ञोऽपत्यं **द्रौपदी** । 'तस्याऽपत्यम्'४।१।९२॥ इत्यण्, 'टिड्ढाणञ्-'४।१।१५॥ इति ङीष्(ङीप्) । ३ कर्षति द्रष्टुर्मनः **कृष्णा** । 'कृष विलेखने'(भ्वा.प.अ.), 'कृषेर्वर्णे'(उणा-२८४)[इति] नक् । ४ विराटनगरे सैरन्ध्रीकर्मकारित्वात् **सैरन्ध्री** । ५ नित्यं[10] यौवनमस्या **नित्ययौवना** ॥७१०॥ ६ यज्ञवेदेर्जाता **वेदिजा** । ७ यज्ञसेनस्याऽपत्यं **याज्ञसेनी** । सप्त द्रौपद्याः ॥

**कर्णश्चम्पाधिपोऽङ्गराट् ।**

**राधा-सूतो-ऽर्कतनयः**

१ किरति विक्षिपति शत्रूनिति **कर्णः** । 'कॄ विक्षेपे'(तु.प.से.), 'कृपॄवृ[11]-'(उणा-२९०)इत्यादिना नन् । २ चम्पापुर्या अधिपः **चम्पाधिपः** । ३ अङ्गानां जनपदस्य[12] राडिति **अङ्गराट्** । ४-६ राधायाः, सूतस्य, अर्कस्य च तनयः, तेन **राधातनयः, सूततनयः, अर्कतनयः** । [यौगिकत्वाद् राधेय इत्यादयः] । षट् कर्णराज्ञः ॥

**कालपृष्ठं तु तद्धनुः ॥७११॥**

१ तस्य कर्णस्य धनुस्तद्धनुः, कालः पृष्ठेऽस्य **कालपृष्ठम्** । यन्महेश्वरः-"कालपृष्ठं भवेत् कर्णचापे कोदण्डमात्रके"[विश्वप्रकाशकोशः, ठान्तवर्गः, श्लो-२१]इति ॥७११॥

**श्रेणिकस्तु भम्भासारः**

१ श्रेणीः कायति **श्रेणिकः** । २ भम्भा जयढक्का, सैव सारमस्य[13] **भम्भासारः** । द्वे श्रेणिकस्य ॥

**हालः स्यात् सातवाहनः ।**

---

१. 'नॄ नये' इति क्षीरतरङ्गिण्यादौ । २. 'कपिध्वजो-' इति३॥ ३. 'धन्वी' इति३॥ ४. भाषावृत्तिसम्मतोऽयं वार्तिकपाठः, 'इणजादिभ्यः' इति काशिकावृत्त्यादौ ॥ ५. '-ङ्गावेतौ' इति३॥ ६. '-सके' पदचन्द्रिकासम्मतपाठः, '-सकौ' इति रामाश्रमीसम्मतपाठः ॥ ७. 'यथा' इति शाश्वतकोशे, पृ.५२॥ ८. द्र. पदचन्द्रिका, भा-२, क्षत्रवर्गः, श्लो-५३८, पृ.६२०॥ ९. 'ङीष्'२.४॥ १०. 'नित्ययौ-' इति३॥ ११. 'कृवृज्-' इत्युणादिगणे ॥ १२. '-पदानां' इति१॥ १३. '-मस्त्यस्य' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ हलति शत्रुहृदयं **हाल:** । 'हल विलेखने'(भ्वा.-प.से.), ज्वलादित्वाण्ण: । २ सातं दत्तं सुखं वाहनमस्य **सातवाहन:** । सालवाहनोऽपि । शालोऽपि, तालव्यादि: । ''शालो हालनृपे मत्स्यप्रभेदे सर्जपादपे''[विश्वप्रकाशकोश:, लान्तवर्ग:, श्लो-१४]इति महेश्वर: । द्वे सालवाहनस्य ॥

**कुमारपालश्चौलुक्यो राजर्षि परमार्हत: ॥७१२॥**

**मृतस्वमोक्ता धर्मात्मा मारिव्यसनवारक: ।**

१ कुमारानिव शिशूनिव प्रजा: पालयति **कुमारपाल:** । 'पाल रक्षणे'(चु.उ.से.), णिजन्तादच्, मयूरव्यंसकादित्वात् समास: । कुं पृथ्वीं मां लक्ष्मीमरमत्यर्थं पालयति वा । २ चुलुकस्याऽपत्यं[१] **चौलुक्य:** । 'गर्गादिभ्यो यञ्'४।१।-१०५॥ । चुलुके भवश्चौलुक्यस्तस्याऽयमिति वा । ३ राजते सप्ताङ्गेनेति राजा, क्षमादिगुणधारणाद् ऋषि:, आ ईषदृषिरर्षि:, राजा चासावर्षिश्च **राजर्षि:** । 'ओमाङोश्च'६।१।९५॥इति पररूपत्वम् । ४ अर्हन् देवताऽस्येति आर्हत: । 'सास्य देवता' ४।२।२४॥इत्यण् । परम: क्षमादिगुणधारणात्, स चाऽसावार्हतश्च **परमार्हत:** ॥७१२॥ ५ मृतस्य स्वं[२] द्रव्यं मृतस्वं निर्वीराद्रविणम्, तद् मुञ्चति न गृह्णाति **मृतस्वमोक्ता** । 'मृच्लृ मोक्षणे' (तु.उ.अ.), तृच् । ६ अहिंसादिलक्षणो धर्म:, स एवाऽऽत्माऽस्य **धर्मात्मा** । ७ मारिं प्राणिवधम्, व्यसनानि मृगयाद्यूतमद्यपानादीनि [च] सर्वथा लोके वारयति निषेधयति **मारिव्यसनवारक:** । 'वर निवारणे'( ), णिजन्त:, ण्वुल्, [३]अष्टाक्षरोऽयम् । सप्त कुमारपालस्य ॥

**राजबीजी राजवंश्य:**

१ राजबीजमस्त्यस्य **राजबीजी** । 'अत इनिठनौ' ५।२।११५॥इतीनि: । २ राजवंशे साधु: **राजवंश्य:** । 'तत्र साधु:'४।४।९८॥इति यत् । द्वे 'राजवी[४]' इति ख्यातस्य ॥

**बीज्यवंश्यौ तु वंशजे ॥७१३॥**

१-२ बीजे साधु: **बीज्य:** । वंशे साधु: **वंश्य:** । उभयत्र 'तत्र साधु:'४।४।९८॥इति यत् । यथा सूर्यबीज्यो राम:, तथा सन्तति: शुद्धवंश्या हि परत्रेह च शर्मणे । ''बीज्यस्तु कुलसम्भव:''[अमरकोश:२।७।२॥]इत्यमर: । द्वे वंशजातस्य ॥७१३॥

**स्वाम्यामात्य: सुहृत्कोशो राष्ट्रदुर्गबलानि च ।**

**राज्याङ्गानि प्रकृतय:[५]**

१ स्वमी राजा, अमात्य: सचिव:, सुहृद् मित्रम्, कोशो भाण्डागार:, राष्ट्रं देश:, दुर्गं कोट:, बलं सैन्यमेतानि सप्त राज्यस्याङ्गानि आरम्भकाणि राज्याङ्गानि, प्रक्रियते आभिरिति **प्रकृतय:** । 'स्त्रियां क्तिन्'३।३।९४॥ । स्वाम्यादीनां सप्त राज्याङ्गानां सामान्येन एकं प्रकृतय इति । यद्रघु:-''अथ वीक्ष्य रघु: प्रतिष्ठितं प्रकृतिष्वात्मजमात्मवत्तया''[रघुवंशम्, सर्ग:-८, श्लो-१०]इति ॥

**पौराणां श्रेणयोऽपि च ॥७१४॥**

१ पुरे भवा पौरा:, एकमुख्य: सजातीयसमूह:[६] श्रेणि:, पौराणां पुरवास्तव्यजनानां श्रेणय: एकमुख्या: सजातीयसमूहा अपि प्रकृतयो राज्याङ्गानीत्येव पुरवास्तव्यलोकोऽपि प्रकृतिरुच्यत इत्यर्थ: । यत्कात्य:-''अमात्याश्च[७] पौराश्च सद्भि: प्रकृतय: स्मृता:''[[८] ]इति । तथा च रघु:-''तथैव सोऽभूदन्वर्थो राजा प्रकृतिरञ्जनात्''[रघुवंशम्, सर्ग:-४, श्लो-१२]इति ॥७१४॥

**तन्त्रं स्वराष्ट्रचिन्ता स्यात्**

१ तन्यते **तन्त्रम्** । 'तनु विस्तारे'(त.उ.से.), 'सर्वधातुभ्य[:] ष्ट्रन्'(उणा-५९८), 'तितुत्र-'७।२।९॥ इतीण्निषेध: । एकं स्वदेशस्य रक्षणपोषणचिन्ताया: ॥

**आवापस्त्वरिचिन्तनम् ।**

१ आ उप्यत इति **आवाप:** । 'टुवप् बीजतन्तुसन्ताने'(भ्वा.उ.अ.), कर्मणि घञ् । सन्ध्यादिषाड्गुण्येन परमण्डलचिन्ता आवाप: । यथा-''परं प्रत्यावाप: फलति कृतसेकस्तरुरिव''[[९] ] । एकं शत्रुचिन्तनस्य ॥

**परिस्पन्द: परिकर: परिवार: परिग्रह: ॥७१५॥**

**परिच्छद: परिबर्हस्तन्त्रोपकरणे अपि ।**

---

१. 'चुल-' इति२.३॥ २. 'स्व-' इति३॥ ३. 'सप्त-' इति१.२.३॥ ४. 'राजबीज' इति१॥ ५. तुलनीयोऽमरकोष:२।८।१८॥ ६. '-तीयानां समूह:' इति३॥ ७. 'अमात्याश्च' इति१॥ ८. द्र. स्वोपज्ञटीका३।७१४॥, पृ.१५८॥ ९. द्र. अनेकार्थकैरवाकरकौमुदीटीका, भा-२, ३।४३०॥, पृ.१८९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ परिस्यन्दते **परिस्यन्दः**, दन्त्यान्तस्थाद्यमध्यः । 'स्यदि किञ्चिच्चलने[1]'( ), पचाद्यच् । २ परिकरोति परिकीर्यते वा **परिकरः** । अच्, घञ् वा । ३ परिवार्यते परिवारयति वा **परिवारः** । घञ्, अच् वा । ४ परिगृह्यते **परिग्रहः** । 'ग्रहवृद-'३।३।५८॥ इत्यप् ॥७१५॥ ५ परिछाद्यतेऽनेन **परिच्छदः** । 'छद अपवारणे'(चु.उ.से.), णिजन्तः, 'पुंसि संज्ञायाम्-'३।३।११८॥ इति घः, 'छादेर्घेऽद्व्युपसर्गस्य'६।४।९६॥ इति ह्रस्वत्वम् । ६ परिबर्हते प्राधान्यं भजति हिनस्ति वा **परिबर्हः**। 'बर्ह [बल्ह] प्राधान्ये'(भ्वा.आ.से.), अच् । परिबृह्यतेऽनेनेति, करणे घञि वा । परिबर्हणमपि । ७ तन्यते **तन्त्रम्** । 'तनु विस्तारे'(तु.उ.से.), 'सर्वधातुभ्यः ष्ट्रन्'(उणा-५९८) । ८ उपक्रियतेऽनेन **उपकरणम्** । करणे ल्युट् । परिजनोऽपि । अष्टौ परिवारस्य ॥

**राजशय्या महाशय्या**

१ राज्ञः शय्या **राजशय्या** । २ महती चासौ शय्या च **महाशय्या** । 'आन्महतः समानाधिकरण-'६।३।४६॥ इत्यात्वम् । द्वे राजशय्यायाः ॥

**भद्रासनं नृपासनम् ॥७१६॥**

१ भद्रं श्रेष्ठं च तदासनं च **भद्रासनम्** । भद्रं श्रेयोरूपं वा आसनम्, भद्रं रूप्यादिमयं वा आसनं भद्रासनम् । २ नृपस्य राज्ञ आसनं **नृपासनम्** । एकं नृपासनस्य ॥७१६॥

**सिंहासनं तु तद्धैमम्[2]**

१ तन्नृपासनं हेम्नो विकारो हैमं सुवर्णरचितम्, सिंहस्याकारः सिंहः, तत्प्रधानमासनं **सिंहासनम्** । "साध्वसजनकत्वात् सिंह इवासनं सिंहासनम्"[ ][3]इत्यन्ये । [4]हैमासनमपि । हलायुधस्तु-"हैमं सिंहासनं राज्ञां स्मृतं भद्रासनं बुधैः"[हलायुधकोशः२।४२३]इत्येकार्थतां नामत्रयं चाह[5] । एकं स्वर्णमयनृपासनस्य ॥

**छत्रमातपवारणम् ।**

१ छाद्यतेऽनेनेति **छत्रम्**, त्रिलिङ्गः। 'छद अपवारणे' (चु.उ.से.), 'सर्वधातुभ्य[:] ष्ट्रन्'(उणा-५९८), 'इस्मन्त्रन्क्विषु च'६।४।९७॥ इति छादेर्ह्रस्वत्वम्, 'नेड् वशि कृति'७।२।८॥ इति नेट् । २ आतपो वार्यतेऽनेनेति **आतपवारणम्** । 'वर निवारणे'( ), णिजन्तः[6], ल्युट् । आतपत्रोष्णवारणादयोऽपि। द्वे छत्रस्य । "नृपलक्ष्म"[शेषनाममाला३।१४१॥]इति शैषिकम्॥

**चामरं बालव्यजनं रोमगुच्छः प्रकीर्णकम् ॥७१७॥**

१ चमर्या इदं **चामरम्** । 'तस्यदेम्'४।३।१२०॥ इत्यण् । २ बालानां व्यजनं **बालव्यजनम्** । ३ रोम्णां गुच्छो **रोमगुच्छः** । ४ प्रकीर्यते विक्षिप्यते स्म **प्रकीर्णकम्**। 'कॄ विक्षेपे'(तु.पअ.), क्तः, 'ॠत इद्धातोः'७।१।१००॥, 'रदाभ्यां निष्ठातो नः-'८।२।४२॥, स्वार्थे कनि प्रकीर्णकम्। चत्वारि चमरस्य(चामरस्य)। "चमरः"[शेषनाममाला३।-१४१॥]शैषिके ॥७१७॥

**स्थगी ताम्बूलकरङ्कः**

१ स्थग्यतेऽनया **स्थगी** । 'स्थग(स्थगे) संवरणे[7]' (भ्वा.प.से.), करणे घञ्[8], गौरादित्वाद् ङीष् । २ ताम्यति[9] ताम्बूलम् । 'तमु काङ्क्षायाम्'(दि.प.से.), दैवादिकः, 'तमेर्बुक् (वृद्धिः) च'(उणादिगणसू-५३०)[10]इति ऊरोलचौ, णित्वाद् वृद्धिः । ताम्बूलस्य करङ्कः **ताम्बूलकरङ्कः** । द्वे ताम्बूलभाजनस्य ॥

**भृङ्गारः कनकालुका[11] ।**

१ भ्रियते **भृङ्गारः** । 'डुभृञ् धारणादौ'(जु.उ.अ.), 'शृङ्गारभृङ्गारौ'(उणा-४१६)इति सूत्रेण आरनि साधुः । २ कनकस्य आलुः कनकालुः, कनकालुरेव **कनकालुका** । स्वार्थे कन् । द्वे 'सुवर्णकलसीया[12]' इति ख्यातस्य । 'भींगार' इत्यादिभाषा ॥

**भद्रकुम्भः पूर्णकुम्भः**

१ भद्राय भद्रार्थं[13] कुम्भः **भद्रकुम्भः** । भद्रः श्रेष्ठ-

---

१. क्षीरतरङ्गिण्यादावेतादृशधातुर्न दृश्यते, यद्वा 'स्यन्दू प्रस्रवणे'(भ्वा.आ.वे.)इत्यस्य ग्रहणं कर्तव्यम् ॥ २. तुलनीयोऽमरकोष:२।८।३१-३२॥ ३. द्र. पदचन्द्रिका, भा-२, क्षत्रवर्गः, श्लो-४८५, पृ.५७१॥ ४. 'हैमा-' इति३॥ ५. 'एकार्थानां नामत्रयमाह' इति४॥ ६. '-न्त' इति३॥ ७. 'ह्रगे ह्लगे ष्ठगे स्थगे संवरणे' इति स्वामी, 'ह्रगे ह्लगे षगे ष्ठगे संवरणे' इति मैत्रेयः, 'ह्रगे ह्लगे षगे ष्ठगे संवरणे' इति सायणः ८. संज्ञापूर्वको विधिरनित्यत्वादुपधावृद्ध्यभावः ॥ ९. 'तम्यति' इति२.३.४॥ १०. अनुपयुक्तोऽयं प्रतिभाति ॥ ११. तुलनीयोऽमरकोष:२।८।३२॥ १२. '-यां' इति१॥ १३. इतोऽग्रे ३प्रतौ 'वा' इति दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्चासौ कुम्भश्चेति वा । २ पूर्णश्चासौ कुम्भश्च **पूर्णकुम्भः** । द्वे 'वरबेहडुं' इति ख्यातस्य ॥

### पादपीठं पदासनम् ॥७१८॥

१ पादयोः पीठं **पादपीठम्** । पदयोरासनं **पदासनम्** । द्वे पादपीठस्य । 'पगमूंकवाना बाजवट पाटला' इत्यादिभाषा ॥७१८॥

### अमात्यः सचिवो मन्त्री धीसखः सामवायिकः ।

१ अमा राज्ञः समीपे, राज्ञा सह वा भवः **अमात्यः**। "अमाऽन्तिकसहार्थयोः"[मेदिनीकोशः, अव्ययवर्गः, श्लो-५०]इति मेदिनिः । 'अव्ययात् त्यप्'४।२।१०४॥ । २ सचनं सचिः । 'षच समवाये[1]'(भ्वा.प.से.), 'इक् कृष्यादिभ्यः'(वा-३।३।१०८॥)इतीक् । सचिं समवायं वाति गच्छति **सचिवः** । 'वा गतिगन्धनयोः'(अ.प.अ.), 'आतोऽनुसर्गे कः'३।२।३॥ । सचिः समवायोऽस्याऽस्ति सचिवः । 'वप्रकरणेऽन्येभ्योऽपि' (वा-५।२।१०९॥)इति वः । सचते बुद्ध्या समवेति वा । 'पलिसचेरिवः'(हैमोणा-५२२)इतीवः । ३ कर्तव्यनिश्चयो मन्त्रस्तद्योगाद् **मन्त्री** । 'अत इनठनौ'५।२।११५॥इतीनिः । मन्त्रयते कर्त्तव्यनिश्चयमवश्यं करोतीति **मन्त्री** । 'मत्रि[2] गुप्तभाषणे'(चु.आ.से.), चुरादिः, ततः आवश्यकेऽर्थे णिनिर्वा । ४ धीया सखा **धीसखः** । 'राजाहःसखिभ्यष्टच्'५।४।९१॥ इति टच्, 'यस्येति च[3]'६।४।१४८॥ । बुद्धिसहायोऽपि । समवायेन चरति **सामवायिकः** । 'तेन चरति[4]'४।४।८॥इति ठक् । पञ्च अमात्यस्य । 'मुंहुता[5]' इति भाषा ॥

### नियोगी कर्मसचिव आयुक्तो व्यापृतश्च सः ॥७१९॥

१ नियोजनं नियोगः । 'युजिर् योगे'(रु.उ.अ.), भावे घञ्, 'चजोः-'७।३।५२॥ इति कुत्वम् । नियोगो 'हुकम' इत्यादिभाषाप्रसिद्धोऽस्याऽस्ति **नियोगी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः । २ कर्मसु सचिवः **कर्मसचिवः**, कर्मसहाय इत्यर्थः । ३ आयुज्यते स्म **आयुक्तः** । ४ व्याप्रियते स्म **व्यापृतः** । "मन्त्रिणः सकाशादन्येऽमात्याद्याः कर्मसहाया नियोगाख्याः[6]"[अम.क्षीर.२।८।४॥]इति क्षीरस्वामी । चत्वारि 'हुजदार' इति ख्यातस्य ॥७१९॥

### द्रष्टा तु व्यवहाराणां प्राड्विवाकोऽक्षदर्शकः ।

१ ऋणा[दाना]दीन्यष्टादश अर्थिप्रत्यर्थिविवादस्थानानि व्यवहारास्तेषां द्रष्टा निर्णयकर्ता, पृच्छति वादिप्रतिवादि-[वाक्यं] प्राट् । 'प्रच्छ ज्ञीप्सायाम्'(तु.प.अ.), 'क्विब्वचिप्रच्छि-'(उणा-२१५)इत्यादिना क्विप्, दीर्घत्वम्, सम्प्रसारणाभावश्च । विविच्य वक्ति विवाकः । 'वच परिभाषणे' (अ.प.अ.), बहुलवचनात् कर्तर्यपि घञ् । प्राट् चासौ विवाकश्च **प्राड्विवाकः** ।

"विवादानुगतं दृष्ट्वा पूर्ववाक्यं प्रयत्नतः ।
विचारयति येनाऽसौ प्राड्विवाकस्ततः स्मृतः ॥१॥"

[[7]]इति स्मृतिः। "पृच्छ्यत इति प्राट् वादिप्रतिवादम् (पृच्छ्यते वादिप्रतिवादिवाक्यमिति प्राट्), प्रच्छेः कर्मणि 'अन्येभ्योऽपि दृश्यते'३।२।१७८॥ इति दृशिग्रहणस्य सर्वोपाधिव्यभिचारार्थत्वात्, 'कृत्यल्युटो बहुलम्'३।३।११३॥इति बहुलवचनाद्वा कर्मणि क्विप्, प्राच्छं विवेचयति विचारयति, 'कर्मण्यण्'३।२।१॥, न्यङ्क्वादित्वात् कुत्वम्"[[8]]इत्यन्ये । २ अक्षान् व्यवहारान् पश्यति **अक्षदर्शकः** । ण्वुल् । "अक्षः कर्षे तुषे चक्रे शकटव्यवहारयोः"[विश्वप्रकाशकोशः, क्षान्तवर्गः, श्लो-२]इति विश्वः । द्वे 'चउवटिया[9]' इति ख्यातस्य । "स्थेयः"[शेषनाममाला३।१४१॥]शैषिके ॥

### महामात्राः प्रधानानि[10]

१ महती मात्रा धनं परिच्छदो वा येषां ते **महामात्राः** । "मात्रा कर्णविभूषायां वित्ते माने परिच्छदे"[मेदिनीकोशः, रान्तवर्गः, श्लो-७५]इति मेदिनिः । २ धीयतेऽत्रेति धानं पदम्, अधिकरणे ल्युट् । प्रकृष्टं धानं पदं पोषणं वा एषामिति **प्रधानानि**, रूपभेदात् क्लीबत्वमेव । "महामात्रैः[11] प्रधानं स्यात्"[[12]]इति पुंस्काण्डे वोपालितात् प्रधानः पुंलिङ्गोऽपि । "प्रधानमाविष्टलिङ्गम्[13]"[स्वोपज्ञटीका, श्लो-३।७२०]इत्याचार्याः ।

---

१. मैत्रेयसायणसम्मतोऽयं धातुपाठः, स्वामी 'षप समवाये' इत्याह ॥ २. 'मन्त्र' इति१.२, 'मन्त्रि' इति३ ॥ ३. 'वा' इति३ ॥ ४. 'चरति' इत्येवाऽष्टाध्याय्याम् ॥ ५. 'मुंहता' इति३ ॥ ६. अम.क्षीरस्वामिटीकायां "ततो मन्त्रिणोऽमात्याः कर्मसहाया नियोग्याख्याः" इति दृश्यते, अम.क्षीर.२।८।४॥, पृ.१७६ ॥ ७. द्र. टीकासर्वस्वम्, भा-३, २।८।५॥, पृ.५४॥, रामाश्रमी२।८।५॥, पृ.३४८॥, तयोः 'दृष्ट्वा' इत्यस्य स्थाने 'प्रष्टा' इति दृश्यते ॥, पदचन्द्रिका, भा-२, क्षत्त्रवर्गः, श्लो-४५९, पृ.५४३ ॥ ८. द्र. पदचन्द्रिका, भा-२, क्षत्त्रवर्गः, श्लो-४५९, पृ.५४३ ॥ ९. '-टीया' इति३.४ ॥ १०. तुलनीयोऽमरकोषः२।८।५ ॥ ११. '-त्राः' इति३ ॥ १२. द्र. पदचन्द्रिका, भा-२, क्षत्त्रवर्गः, श्लो-४५९, पृ.५४२ ॥ १३. स्वोपज्ञटीकायां 'आविष्टलिङ्गोऽयम्' इत्येव दृश्यते, ३।७२०॥, पृ.१५९ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"महामात्रः प्रधानं स्यात्"[हलायुधकोशः२।४२७॥]इति हलायुधः । "पुरोहितामात्यप्रतीहारसेनापतिप्रभृतौ द्वौ"[] इति तट्टीका । द्वे सामान्येनाऽमात्यपुरोहितसेनापत्यादेः ॥

**पुरोधास्तु पुरोहितः ॥७२०॥**

**सौवस्तिकः**

१ पुरोहितेषु दृष्टादृष्टफलेषु कर्मसु धीयते **पुरोधाः**। ([1]पुरोधाज्ञोऽसिः) । पुरोधसौ, पुरोधसः इत्यादि । २ पुरो धीयते हिनोति स्मेति वा **पुरोहितः** । 'डुधाञ् धारणादौ' (जु.उ.अ.), निष्ठा, 'दधातेर्हिः'७।४।४२॥ इति हिरादेशः । 'हि गतौ वृद्धौ च'(स्वा.प.अ.)इत्यतो वा क्तः ॥७२०॥ ३ स्वस्तीत्याह **सौवस्तिकः** । स्वस्तिशब्दात् 'तदाहेति माशब्दादिभ्यष्ठग् वाच्यः[3]'(वा-४।४।१॥)इति ठक्, 'न य्वाभ्यां पदान्ताभ्याम्-'७।३।३॥ इति वृद्धिनेषधे ऐचावागच्छतः । त्रीणि पुरोहितस्य ॥

**अथ द्वारस्थः क्षत्ता स्याद् द्वारपालकः ।**
**दौवारिकः प्रतीहारो वेत्र्युत्सारकदण्डिनः ॥७२१॥**

१ द्वारे तिष्ठति **द्वारस्थः** । 'आतोऽनुसर्गे कः' ३।२।३॥, 'आतो लोप इटि च'६।४।६४॥ इत्यालोपः । २ क्षदति संवृणोति द्वारं **क्षत्ता** । 'क्षद संवरणे' सौत्रः, 'तृन्तृचौ शसिं(शंसि)क्षदादिभ्यः संज्ञायाम्-'(उणा-२५०)इति तृच् । ३ द्वारं पालयति द्वारपालः । पचाद्यच् । कनि **द्वारपालकः** । ४ द्वारे नियुक्तो **दौवारिकः** । 'तत्र नियुक्तः'४।४।६९॥इति ठक्, 'ठस्येकः'७।३।५०॥, 'न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच्'७।३।३॥ । ५ प्रतिह्रियते वार्यतेऽनेन प्रतिहारः । करणे घञ् ।'उपसर्गस्य घञ्यमनुष्ये बहुलम्'६।२।१२२॥इति दीर्घत्वे **प्रतीहारः** । "प्रतिराभिमुख्ये । राज्ञोऽभिमुखं जनान् प्रतिहरति बहिः प्रापयति । 'ज्वलतिकसन्तेभ्यो णः'३।१।१४०॥ इति णः"[ ]एतत्पक्षे प्रतिहारः, तृतीयस्वरवान् ।" 'अन्येषामपि-'६।३।१३७॥इति दीर्घत्वे चतुर्थस्वरमध्योऽपि"[[4]]इत्यन्ये । "प्रतीहारो द्वारमधिकारविषयत्वेनाऽस्याऽस्तीत्यर्शआद्यचि प्रतीहारः"[[5]]इत्येके । ६ वेत्रं वेत्रदण्डोऽस्याऽस्ति **वेत्री** । 'अत इनिठनौ'५।२।११५॥ इतीनिः । वेत्रधरोऽपि । ७ उत्सारयति जनानिति **उत्सारकः** । 'सृ गतौ'(भ्वा.प.अ.), ण्वुल् । ८ दण्डोऽस्त्यस्य[6] **दण्डी** । अष्टौ द्वारपालस्य । शेषश्चात्र-"द्वाःस्थे द्वाःस्थित[7]दर्शकः"[शेषनाममाला ३।१४१॥] । द्वारि स्थितत्वात् द्वाःस्थितः कश्चिज्जनः, तं राज्ञे दर्शयति बोधयति द्वाःस्थितदर्शकः, एकं नाम । "द्वाःस्थितो दर्शकश्चेति नामद्वयम्"[[8]]इत्येके । "स्याद् दर्शयिता प्रतीहारेऽपि दर्शकः" [[9]]इति रुद्रः ॥७२१॥

**रक्षिवर्गेऽनीकस्थः स्यात्**

१ रक्षन्त्यवश्यं रक्षिणः अङ्गरक्षकाः, रक्षिणां वर्गो वृन्दं रक्षिवर्गस्तत्र । अवश्यं रक्षकत्वेन अनीकेन तिष्ठति **अनीकस्थः** । 'सुपि स्थः'३।२।४॥ इति कः । "रक्षिवर्गस्त्वनीकस्थः"[अमरकोषः२।८।६॥]इत्यमरः । "अङ्गरक्षकवृन्दः (अङ्गरक्षकवृन्दे) अनीके तिष्ठत्यनीकस्थः, "राक्ष(राज)शिक्षाविचक्षणो(-विचक्षणे)"[शाश्वतकोशः, श्लो-३४२] वा" [अम.क्षीर.२।८।६॥]इति क्षीरस्वामी । एकमङ्गरक्षकस्य, राजशिक्षाविचक्षणस्य वा ॥

**अध्यक्षाधिकृतौ समौ[10]।**

१ अधिकृतोऽक्षेष्वायमुखेषु **अध्यक्षः** । अध्यक्ष्णोति व्याप्नोति वा । अक्ष(अक्षू) व्याप्तौ सङ्घाते च(भ्वा.प.से.), अच् । अधिकान्यक्षाणीन्द्रियाण्यस्येति वा । २ अधिक्रियत उपरि नियुज्यते[11] स्म **अधिकृतः** । द्वे सामान्येनाऽधिकारिणः । 'ऊपरू[12]' इति भाषा ॥

**पौरोगवः सूदाध्यक्षः**

१ पुरः प्रथमं पाच्यवस्तुषु गौर्नेत्रमस्य पुरोगुः । ([13]'गोस्त्रियोः-'१।२।४८॥ इति ह्रस्वत्वम्, ततः प्रज्ञाद्यणि **पौरोगवः** । [यद्वा] पुरो गौर्जलमस्यां[14] पुरोगुः रसवती),

१. कोष्ठान्तर्गतपाठः २प्रतौ न दृश्यते ॥ २. 'पुरसि च'(उणा-६७०)इत्युणादिगणसूत्रम् ॥ ३. '-माशब्दादिभ्य उपसंख्यानम्' इति काशिकावृत्तौ, भा-३, ४।४।१॥, पृ.७३५॥ ४. द्र. पदचन्द्रिका, भा-२, क्षत्त्रवर्गः, श्लो-४६०, पृ.५४३॥, तत्र 'चतुर्थस्वरमध्योऽपि' इत्यस्य स्थाने 'दीर्घेकारोऽपि' इति दृश्यते॥ ५. द्र. पदचन्द्रिका, भा-२, क्षत्त्रवर्गः, श्लो-४६०, पृ.५४३॥, तत्र 'अर्शआद्यचि' इत्यस्य स्थाने 'अर्शआदित्वादच्' इति तथा तृतीयस्वरवान् प्रतिहारशब्दो दृश्यते ॥ ६. 'दण्डोऽस्य' इति२, 'दण्डोऽस्याऽस्ति' इति३॥ ७. 'द्वाःस्थितिदर्शकः' इति शेषनाममालास्वोपज्ञटीकयोः ॥ ८. द्र. पदचन्द्रिका, भा-२, क्षत्त्रवर्गः, श्लो-४६०, पृ.५४४॥ ९. द्र. रामाश्रमी२।८।६॥, पृ.३४८॥ १०. तुलनीयोऽमरकोषः२।८।६॥ ११. '-ज्यन्ते' इति४॥ १२. 'उपरू' इति३॥ १३. कोष्ठान्तर्गतपाठः २प्रतौ न दृश्यते ॥ १४. '-मस्त्यस्यां' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्यामयमध्यक्षः पौरोगवः । २ सूदानामध्यक्षः **सूदाध्यक्षः** । द्वे रसवत्यधिकारिणः ॥

**सूदस्त्वौदनिको गुणः ॥७२२॥**
**भक्तकारः सूपकारः सूपारालिकवल्लवाः ।**

१ सूदयति तन्दुलादिधान्यम्, सूदति छागादीन् वा **सूदः** । 'सूद क्षणने(क्षरणे)'(चु.उ.से.), अच् । २ [1]ओदन-साधनं शिल्पमस्य **औदनिकः** । 'शिल्पम्'४।४।५५॥ इति ठक् । ओदने नियुक्त इति[2], 'तत्र नियुक्तः'४।४।६९॥इति ठकि वा। ओदने साधुरिति गुडादित्वाट्ठक् वा । एवमान्धसिकोऽपि । ३ गुणयति अभ्यस्यति बन्धनादिकमिति **गुणः** । 'गुण अभ्यसने[3]'(चु.उ.से.), अच् । ४ भक्तं करोति **भक्तकारः** । 'कर्मण्यण्'३।२।१॥ । ५ सुनोति रसमिति, 'प्रकुसृणां(युकुसूनां) किच्च'(चान्द्रोणा-२।८४)इति सुनोतेः पः, ऊट् चोकारस्य, सूपो व्यञ्जनम्, तत्करोति, 'कर्मण्यण्'३।२।१॥ **सूपकारः** । ६ सुनोत्यत्रं **सूपः** । 'षुञ् अभिषवे'(स्वा.उ.अ.), 'कुसुयुभ्यश्च'( )पः, किद् दीर्घत्वं च। ७ अरालं कुटिलं चरति **आरालिकः** । 'चरति'४।४।८॥ इति ठक्[4]। अरालं पण्यमस्येति, 'तदस्य पण्यम्'४।४।५१॥ इति ठग् वा । ८ [5]पत्रपाकपात्रधारणाय लोहघटितं 'वाउली' इति प्रसिद्धम्, वल्लते संवृणोति वल्लः । 'वल्ल संवरणे'(भ्वा.आ.से.), 'हलश्च'३।३।१२१॥इति घञ्, तद्योगाद् 'अन्येभ्योऽपि-'(वा-५।२।१०९)इति वप्रत्यये **वल्लवः** । वल्लिः सौत्रो धातुः प्रीत्यर्थे, ततो घञि वल्लः प्रीतिस्तां वाति प्राप्नोतीति, 'आतः-'३।२।३॥ इति को वा । अष्टौ 'रसोईदार' इति ख्यातस्य॥

**भौरिकः कनकाध्यक्षः[6]**

१ भूरिणि सुवर्णे नियुक्तो **भौरिकः** । 'तत्र नियुक्तः' ४।४।६९॥ इति ठक् । हैरिक इति ऊष्मचतुर्थद्वादशस्वरादिरयमित्यन्ये। २ कनकस्याऽध्यक्षः **कनकाध्यक्षः** । द्वे स्वर्णाधिकारिणः ॥

**रूप्याध्यक्षस्तु नैष्किकः[6] ॥७२३॥**

१ रूप्यस्य 'मुहुरिँ[7] रूपईया' इत्यादिभाषाप्रसिद्धस्य अध्यक्षः **रूप्याध्यक्षः** । २ निष्के दीनारादौ नियुक्तो **नैष्किकः** । 'तत्र नियुक्तः'४।४।६९॥ इति ठक् । टङ्कपतिरपि । द्वे रूप्याधिकारिणः ॥७२३॥

**स्थानाध्यक्षः स्थानिकः स्यात्**

१ स्थानस्य पञ्चानां दशानां वा ग्रामाणां रक्षानियुक्तोऽध्यक्षः **स्थानाध्यक्षः** । २ स्थाने नियुक्तः **स्थानिकः** । 'तत्र नियुक्तः'४।४।६९॥ इति ठक् । द्वे 'थाणदार' इति ख्यातस्य ॥

**शुल्काध्यक्षस्तु शौल्किकः ।**

१ शुल्कस्य मार्गप्रतोल्यादौ प्रावेश्यनिस्सार्यद्रव्येभ्यो राजग्राह्यभागस्याऽध्यक्षः **शुल्काध्यक्षः** । २ शुल्के नियुक्तः **शौल्किकः** । 'तत्र नियुक्तः'४।४।६९॥ इति ठक् । द्वे 'दाणी' इति ख्यातस्य ॥

**शुल्कस्तु घट्टादिदेयम्**

१ शलति प्रतिबन्धोऽनेन **शुल्कः** । 'शल गतौ' (भ्वा.प.से.), 'शुल्कवल्कोल्काः[8]'( )इति निपातः । "शक्तः शुल्कशिखण्डौ शम्या श्रमणः[9] शपथशुल्कौ"[10][ ]इति शभेदात् तालव्यादिः । घट्टतेऽत्रेति घट्टः । 'घट्ट स्खलने[11]'(भ्वा.आ.से.), अधिकरणे घञ् । घट्टो राजग्राह्यग्रहणस्थानादि वर्त्म । "घट्टोऽत्र रक्षार्थं राजदेयभागः[12] शुल्कः"[ ]इति माधवी[13] । घट्टो नदीतटस्थानम्, 'घाट' इति प्रसिद्धो वा, स आदिर्यस्य स घट्टादिः, आदिशब्दाद् गुल्मप्रतोल्यादिः, तत्र दीयते घट्टादिदेयम् । 'अचो यत्'३।१।९७॥ । आदिशब्दाद् गुल्मप्रतोल्यादौ प्रवेश्यनिःसार्यद्रव्येभ्यो राजग्राह्यो[14] भागोऽत्र शुल्कः । यदमरः-"घट्टादिदेयं शुल्कोऽस्त्री । शुल्कशब्दो विवाहाय वराद् ग्राह्यवस्तुवाच्यपि। यदजयः-"शुल्को घट्टे विवाहाय वराद् ग्राह्ये च वस्तुनि" [ ]इति । महेश्वरोऽपि-"शुल्कं घट्टादिदेये स्याज्जामातुर्बन्ध-

१. 'ओदनशि-' इति१॥ २. इतोऽग्रे ४प्रतौ 'वा' इति दृश्यते ॥ ३. 'कुण गुण चामन्त्रणे' इति स्वामी, 'केत ग्राम कुण गुण चामन्त्रणे' इति मैत्रेयः, 'सङ्केत ग्राम कुण गुण चामन्त्रणे' इति सायणः ॥ ४. 'तेन दिव्यति-'४।४।२॥ इत्यतः 'तेन' इत्यनुवृत्तेः कर्मणि ठक् चिन्त्यः ॥ ५. 'पत्र' इति पाठोऽनुपयुक्तः प्रतिभाति ॥ ६. तुलनीयोऽमरकोषः२।८।७॥ ७. 'मुहर' इति३, 'मुहरि' इति४॥ ८. 'शुक्वल्कोल्काः'(उणा-३२२)इत्युणादिगणसूत्रम् ॥ ९. 'श्रवणः' इति१.२.४॥ १०. द्र. पदचन्द्रिका, भा-२, क्षत्त्रवर्गः, श्लो-४८१, पृ.५६७॥ ११. 'घट्ट चलने' इति क्षीरतरङ्गिण्यादौ ॥ १२. '-देयो भागः' इति३॥ १३. द्र. पदचन्द्रिका, भा-२, क्षत्त्रवर्गः, श्लो-४८१, पृ.५६७॥, तत्र "घट्ट स्खलने । घट्टतेऽत्र । घञ् (पा.३।३।१२१॥) । घट्टो राजग्राह्यग्रहणस्थानादिः ।" "घट्टो वर्त्म 'घाटी'ति ख्यातः । तत्र रक्षार्थं राजदेयभागः शुल्कः" इति माधवी ।" इति दृश्यते ॥ १४. इतोऽग्रे ४प्रतौ 'यो' इति दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

केऽपि च"[विश्वप्रकाशकोशः, कान्तवर्गः, श्लो-४३]इति । "जामातुर्बन्धको विवाहाय वराद् ग्राह्यं धनम्"[ ]इति तद्वृत्तिः । तदा लोके 'पडलउं[1]' इति भाषा । यद्रघुः-"स्वं विचिन्त्य च धनुर्दुरानमं पीडितो दुहितृशुल्कसंस्थया"[रघुवंशम्, सर्गः-११, श्लो-३८], "हनूमानपि शृणुत जनकशुल्कं क्षत्रियाः सर्व एते"[ ]इति । एकं 'नदीऊतरणउं[2] दाणभाडओ[3]' इति प्रसिद्धस्य ॥

**धर्माध्यक्षस्तु धार्मिकः ॥७२४॥**

**धर्माधिकरणी च**

१ धर्मस्याऽध्यक्षः **धर्माध्यक्षः** । २ धर्मं चरति **धार्मिकः** । 'धर्मं चरति'४।४।४१॥इति सूत्रेण ठक् ॥७२४॥ ३ धर्मेऽधिकरणमधिकारोऽस्य **धर्माधिकरणी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः । त्रिणि धर्माधिकारिणः ॥

**अथ हट्टाध्यक्षोऽधिकर्मिकः ।**

१ हट्टेष्वध्यक्षो **हट्टाध्यक्षः** । २ अधि उपरि कर्माऽस्य **अधिकर्मिकः** । 'व्रीह्यादिभ्यश्च'५।२।११६॥ इति ठन् । द्वे हट्टाधिकारिणः ॥

**चतुरङ्गबलाध्यक्षः सेनानीर्दण्डनायकः ॥७२५॥**

१ चत्वारि हस्त्यश्वरथपादातिकानि अङ्गानि यस्य तच्चतुरङ्गम्, तच्च तद् बलं सैन्यं च चतुरङ्गबलम्, तस्याऽध्यक्षः **चतुरङ्गबलाध्यक्षः** । २ सेनां नयति **सेनानीः** । 'णीञ् प्रापणे'(भ्वा.उ.अ.), 'सत्सूद्विष-'३।२।६१॥ इति क्विप् । ३ दण्डं सैन्यं नयति **दण्डनायकः** । 'णीञ् प्रापणे'(भ्वा.उ.अ.), ण्वुल् । त्रीणि 'सेलहत' इति ख्यातस्य ॥७२५॥

**स्थायुकोऽधिकृतो ग्रामे[4]**

१ तिष्ठतीत्येवंशीलः **स्थायुकः** । 'ष्ठा गतिनिवृत्तौ' (भ्वा.प.अ.), 'लषपतपदस्था-'३।२।१५४॥ इत्युकञ्, 'आतो युक् चिण्कृतोः'७।३।३३॥ इति युक् । एकस्मिन् ग्रामेऽधिकारीत्यर्थः । 'सांहणा' इति भाषा ॥

**गोपो ग्रामेषु भूरिषु ।**

१ गां भुवं पाति रक्षति **गोपः** । 'पा रक्षणे'(अ.-प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥ । गोपायतीति गोपो वा । 'गुपू रक्षणे'(भ्वा.प.से.), अच् । बहुषु ग्रामेष्वधिकृतोऽधिकारी । "गोपौ भूपालवल्लवौ ग्रामौघगोष्ठाधिकृतौ"[अनेकार्थसङ्ग्रहः २।२८९-२९०]इत्यनेकार्थः । " 'ग्रामौघाधिकृतौ' [ ]इत्यनेकार्थः, ग्रामौघाधिकृतो ग्रामपतिः"[ ]इति तट्टीका । एकं ग्रामवृन्दपतेः ॥

**स्यातामन्तःपुराध्यक्षेऽन्तर्वंशिकाऽऽवरोधिकौ ॥७२६॥**

१ अन्तरिति, तात्स्थ्यलक्षणयाऽन्तराभ्यन्तरस्थो वंशो गृहमन्तर्वंशः, तत्र भवोऽधिकृतत्वाद् विद्यमानः, 'अन्तपूर्वपदाट्ठञ्[5]'४।३।६०॥ इति ठञ्, संज्ञापूर्वकत्वाद् वृद्ध्यभावः । मत्वर्थे ठन् वा । अन्तर्वंशस्य अन्तर्वंशम्, अव्ययीभावः । ताः सन्त्यस्य **अन्तर्वंशिकः** वा । वृद्धिपक्षे आन्तर्वंशिकोऽपि । २ अवरोधे नियुक्तः **आवरोधिकः** । 'तत्र नियुक्तः'४।४।६९॥इति ठक् । आन्तःपुरिकोऽपि । "अन्तःपुरे त्वधिकृतः स्यादन्तर्वंशिको जनः" [अमरकोषः२।८।८॥]इत्यमरः । "[जनः] कुब्जवामनादिसमूहः"[अम.क्षीर.२।८।८॥]इति तट्टीका । द्वे सामान्येन कुब्जवामनादिकान्तःपुराधिकारिणः ॥

[शेषश्चात्र-

"क्षुद्रोपकरणानां स्यादध्यक्षः पारिकर्मिकः ।
पुराध्यक्षे कोट्टपतिः पौरिको दाण्डपाशिकः ॥१॥"

[शेषनाममाला३।१४२॥] ]॥७२६॥

**शुद्धान्तः स्यादन्तःपुरमवरोधोऽवरोधनम् ।**

१ शुद्धाः शुचयः सौविदल्ला अन्तेऽस्य **शुद्धान्तः**, पुंक्ली. । २ अन्तर्गतं पुरस्य गृहस्य **अन्तःपुरम्** । ३ अवरुध्यते **अवरोधः** । कर्मणि घञ् । ४ अवरुध्यते **अवरोधनम्** । कर्मणि ल्युट् । चत्वारि अन्तःपुरस्य ॥

**सौविदल्लाः कञ्चुकिनः स्थापत्याः सौविदाश्च ते[6] ॥७२७॥**

१ सुविदन्तं ([7]विवाहं जानन्तं लान्ति सुविल्ला ऊढाः) स्त्रियः, तत्र भवा विद्यमानाः **सौविदल्लाः** । 'तत्र भवः'४।३।-५३॥ इत्यण् । सुष्ठु विदन्ति जानन्ति अन्तःपुरव्यापारमिति

---

१. 'पडलनुं' इति३, 'पडलौ' इति४॥ २. 'नदीउतरणौ' इति३॥ ३. '-भाडौ' इति३.४॥ ४. तुलनीयोऽमरकोषः२।८।७॥ ५. 'ठञ्' इति३.४॥ ६. तुलनीयोऽमरकोषः २।८।८॥ ७. कोष्ठान्तर्गतपाठस्थाने१.२.४ प्रतिषु "विदल्लाः शण्ढाः" इति दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुविदः पण्डिताः । 'क्विप् च'३।२।७६॥ इति क्विप् । ताननति सातत्येन गच्छति सुविद् भूपालः, तं लाति सुविदल्लमन्तः-पुरम् । 'आतोऽनुपसर्गे कः'३।२।३॥, 'तोर्लि'८।४।६०॥इति लत्वम् । तत्र भवा[1]: सौविदल्ला वा । २ कञ्चुकश्चोलको विनीत-वेषार्थमस्त्येषां **कञ्चुकिनः** । 'अत इनिठनौ'५।२।११५॥ इतीनिः। ३ तिष्ठत्यस्मिन्निति स्थः, घञर्थे कः, स्थश्चासौ पति-श्चेति स्थपतिः, तस्याऽमी, ([2]पूर्वावण्यस्यस्थाप) 'दित्यदित्य-'४।१।८५॥इत्यादिना ण्यः **स्थापत्याः** । बृहस्पतीष्ट्या इष्टवान्, स भूपः स्थपतिः, तस्यामपूर्वावण्य (तस्येमे, पूर्ववण्यः)। "स्थपतिः [एव, 'चतुर्वर्णादीनां स्वार्थ उपसङ्ख्यानम्'(वा-५।१।१२४॥]इति स्वार्थे ष्यञ्"[ ]इत्यन्ये । "कुलस्त्रीर्व्यवस्थया[3] स्थापयन्ति स्थपतयः, स्थपतय एव स्थापत्याः, चातुर्वर्ण्यादित्वात् ष्यञ्"[ ]इत्यन्ये । ४ सु शोभनं वेत्ति, इगुपधत्वात्[4] कः, सुविदो राजा, तस्याऽमी **सौविदाः** । 'प्राग्दीव्यतोऽण्'४।१।८३॥ इत्यण् । चत्वारि अन्तःपुररक्षिणाम्, "कुब्जवामनादीनाम्[5]" [अभि. स्वोपज्ञटीका ३।७२७]इत्याचार्याः[6] ॥७२७॥

**षण्ढे[1] वर्षवरः[2]**

१ **षण्ढः** नपुंसकोऽत एवान्तःपुररक्षकस्तत्र । शण्ढ-स्तालव्यादिष्टवर्गचतुर्थोऽपि । शाम्यति शिश्नाभावात् शण्ढः । ['शमु उपशमे'(दि.प.से.)], 'शमेर्ढः'(उणा-९९)इति ढः । "शण्ढः क्लीबस्तु कञ्चुकी"[[7]]इति तालव्यादौ रभसः । २ वर्षं वीर्यसेकं वृणोत्याच्छादयति **वर्षवरः** । 'वृञ् आच्छादने[8]' (स्वा.उ.से.), अच् । वरति निराकरोति वरः । वर्षस्य रेतः-सेकस्य वरो वर्षवरः ।

"ये त्वल्पसत्त्वाः प्रथमाः क्लीबाश्च स्त्रीस्वभाविनः ।
जात्या न दुष्यः(दुष्टाः) कार्येषु ते वै[9] वर्षवराः स्मृताः ॥१॥"

[[10]]इति । द्वे 'षोजा' इति ख्यातस्य ॥

**शत्रौ[1] प्रतिपक्षः[2] परो[3] रिपुः[4] ।**
**शात्रवः[5] प्रत्यवस्थाता[6] प्रत्यनीको[7]ऽभियात्य[8]री[9] ॥७२८॥**

**दस्युः[10] सपत्नो[11]ऽसहनो[12] विपक्षो[13] ।**
**द्वेषी[14] द्विषन्[15] वैर्य[16]हितो[17] जिघांसुः[18] ॥**
**दुर्हृत्[19] परः[20] पन्थकपन्थिनौ[21] द्विट्[22] ।**
**प्रत्यर्थ्य[23]मित्रा[24]वभिमात्य[25]राती[26] ॥७२९॥**

१ शृणाति हिनस्तीति[11] **शत्रुः** । 'शॄ हिंसायाम्' (क्र्या.प.से.), 'जत्र्वादयश्च'(उणा-५४२)इति साधुः । [यद्वा] शातयतीति[12] शत्रुः । 'शद्लृ शातने'(भ्वा.तु.आ.अ.), 'नृ-(तृ)शदिभ्यां त्रुन्[13]'( )इति त्रुन्, बाहुलकाण्णिलोपो वृद्ध्य-भावश्च, प्रत्ययलक्षणेन णिज्निमित्तम्, तत्त्वम्[14], तत्र । २ प्रति-कूलः पक्षः **प्रतिपक्षः** । ३ पिपर्त्ति रोषमिति **परः** । 'पृ पालनपूरणयोः'(जु.प.अ.), अच्, 'इत्वोत्त्वाभ्यां गुणवृद्धी पूर्व-विप्रतिषेधेन'(वा-७।१।१०२)इत्युत्त्वापवादो गुणः । ४ रपति दोषं व्यक्तीकरोति **रिपुः** । 'रप व्यक्तायां वाचि'(भ्वा.प.से.), 'रपेरिच्चोपधायाः'(उणा-२६)इति कुप्रत्यये उपधाया इत्वम् । ५ शत्रुरेव **शात्रवः** । 'प्रज्ञादिभ्यश्च'५।४।३८॥ इत्यण् । ६ प्रतीपमवतिष्ठतीति[15] **प्रत्यवस्थाता** । तृच् । ७ प्रतीपमनी-कमस्य **प्रत्यनीकः** । ८ अभिमुखं याति **अभियातिः** । 'या प्रापणे'(अ.प.अ.), 'अभेर्यामाभ्याम्'(हैमोणा-६६३)इत्यातिः । "याधातोः क्तिच्"[टीकासर्वस्वम् २।८।१०॥]इति सर्वस्वम्[16] । 'यती प्रयत्ने'(भ्वा.प.से.), निरीकारो[17] वेति चुरादिण्यन्ताद् 'अच इः'(उणा-५७८)इति इर्वा । अभिघातीत्यपि । अभि सर्वतो हन्तुं शीलमस्य अभिघाती । 'हन् (हन) हिंसागत्योः (अ.प.अ.), 'सुप्यजातौ-'३।२।७८॥इति णिनिः । ८ इयर्ति[18] विरोधमिति **अरिः** । 'ऋ गतौ'(जु.प.अ.), 'अच इः'(उणा-५७८)इति इः ॥७२८॥ १० दस्यत्यभिमतार्थमुत्क्षिपति **दस्युः** । 'तसु उत्क्षेपणे[19]'(दि.प.से.), 'दसु च'(दि.प.से.), 'जनिमनितनिदसिभ्यो यु[20]:'(उणा-३००)इति युः, बाहुलकाद्

१. 'भव इत्यण्' इति१, 'भवः' इति२॥ २. कोष्ठान्तर्गतपाठो विचारणीयः ॥ ३. '-स्थाया' इति२.३.४॥ ४. '-धात्' इति१॥ ५. '-दयः' इति स्वोपज्ञटीकायम्, ३।७२७॥, पृ.१६१॥ ६. '-र्यः' इति१.२॥ ७. द्र. पदचन्द्रिका, भा-२, क्षत्त्रवर्गः, श्लो-४६३, पृ.५४६॥ ८. 'वरणे' इति क्षीरतरङ्गिण्यादौ॥ ९. 'च' इति३.४॥ १०. द्र. टीकासर्वस्वम्, भा-३, २।८।९॥, पृ.५८॥, तत्र "ये त्वल्पसाराः प्रखलाः क्लीबाश्च स्त्रीस्वभाविनः । न दुष्टः क्वापि कार्ये च ते वै वर्षवराः स्मृताः ॥" इति दृश्यते ॥ ११. '-स्ति' इति१.२॥ १२. '-यति' इति१॥ १३. 'रुशातिभ्यां क्रुन्' इत्युणादिगणे ॥ १४. द्र. मा. धातुवृत्तिः, भ्वादिः, धातुसं-५८४, पृ.२१९॥ १५. '-ष्ठति' इति१.२॥, 'समवप्रविभ्यः स्थः'१।३।२॥ इत्येनेनाऽऽत्मनेपदित्वादिदं 'अवतिष्ठतीति' रूपं विचारणीयम् ॥ १६. सर्वानन्दकृतटीकासर्वस्वे "यातेः क्तिच् । अभियातिः" इति दृश्यते, भा-३, २।८।१०॥, पृ.६०॥ १७. 'यत निकारोपस्कारयोः' इति चुरादौ क्षीरतरङ्गिण्यादौ ॥ १८. 'इर्यर्ति' इति३, 'इर्यते' इति४॥ १९. 'तसु उपक्षये' इति स्वामिसायणौ, 'तसु प्रक्षेपे' इति मैत्रेयः ॥ २०. 'यजिमनिशुन्धिदसिजनिभ्यो युच्' इत्युणादिगणसूत्रम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

योरनादेशाभावः, अनुनासिकत्व[1]प्रतिज्ञानाद्वा । **११** सपत्नीव सन्तापहेतुत्वात् **सपत्नः** । 'व्यन् सपत्ने'४।१।१४५॥ इति निर्देशादकारः । **१२** न सहते **असहनः** । 'षह मर्षणे'(भ्वा.आ.से), युच् । **१३** विरुद्धः पक्षो **विपक्षः** । ''पक्षो मासार्धके पार्श्वे ग्रहे साध्या(साध्य)विरोधयोः''[ विश्वप्रकाशकोशः, क्षान्तवर्गः, श्लो-५ ]इति मेदिनिः(विश्वः) । **१४** द्वेषणशीलो **द्वेषी** । 'द्विष्-(द्विष) अप्रीतौ'(अ.उ.अ.), सम्पृचादित्वाद् घिनुण् । **१५** द्वेष्टीति **द्विषन्** । 'द्विषोऽमित्रे'३।२।१३१॥ इति शतृप्रत्ययः । द्विषन्तौ, द्विषन्तः इत्यादि । **१६** वीरस्य कर्म वैरं विरोधः, '-वैरमैथुन(नि)कयोः'४।३।१२५॥इति निर्देशादण् । ''युवादित्वादण्''[ ]इत्यन्ये[2], तदयुक्तम्, तत्र पाठादर्शनात् । तद्योगाद् **वैरी** । मत्वर्थे इनिः । **१७** हिताचरणाद् हितः, न हितः **अहितः** । नास्ति हितमस्माद्वा अहितः । **१८** हन्तुमिच्छति जिघांसति, जिघांसतीत्येवंशीलो **जिघांसुः** । 'सनाशंसभिक्ष उः'३।२।१६८॥ **१९** क्रोधेन दुष्टं हृदयमस्य **दुर्हृत्** । 'सुहृत्दुर्हृदौ मित्रामित्रयोः'५।४।१५०॥इति हृदयस्य हृदादेशः । दुर्हृदौ, दुर्हृदः इत्यादि । **२०-२१** परेः परिशब्दात् पन्थिकपन्थिनौ योज्येते, परितः पन्थयति गच्छति **परिपन्थि( न्थ )कः**। 'पथि गतौ'(चु.उ.से.), णिजन्तः, ण्वुल्। परि[3] दोषाख्यानं पन्थयति गच्छति **परिपन्थी** । 'पथि गतौ'(चु.उ.से.)इत्यास्माच्चुरादेर्ग्रहादित्वाण्णिनिः। परिशब्दं प्रकृत्य(प्रकृते) ''दोषाख्याने निरसने पूजांवास्थ्योश्च(पूजाव्याप्त्योश्च) भूषणे''[ मेदिनीकोशः, अव्ययवर्गः, श्लो-६८ ]इति मेदिनिः । **२२** द्वेष्टीति **द्विट्** । 'सत्सूद्विष-'३।२।६१॥ इत्यादिना क्विप् । **२३** प्रतिकूलमवश्यमर्थयते[4] **प्रत्यर्थी** । 'अर्थ याच्ञायाम्'[5](चु.उ.से.), आवश्यके णिनिः । **२४** अमति गच्छति वैरम् **अमित्रः** । 'अम्( अम) गतौ'(भ्वा.प.से.) । अमति (आमयति) रुजतीति वा । 'अम रोगे'(चु.उ.से.), 'अमेर्द्विषि पिच्च'[6](उणा-६१३)इति इत्रन् । मित्रविरुद्ध[7]कर्माचरणाद्वा अमित्रः । ''लोकाश्रयत्वात् पुंस्त्वम्'' [[8]]इत्यन्ये । असुहृदपि । **२५** अभिमाति क्रुध्यति **अभिमातिः** । 'मा माने'(अ.प.अ.), 'क्तिच्क्तौ च संज्ञायाम्'३।३।१७४॥इति क्तिच् । **२६** इयर्ति **अरातिः** । 'ऋ गतौ'(जु.-प.अ.), 'रा दाने'(अ.प.अ.), बाहुलकाद् 'दृरसिभ्यां तिः' ( )इति राधातोरपि तिः । षड्विंशतिः शत्रोः ॥७२९॥

## वैरं विरोधो विद्वेषः[9]

**१** वीरस्येदं कर्म **वैरम्** । 'तस्येदम्'४।३।१२०॥ इत्यण् । **२-३** विरोधनं **विरोधः**[10] । विद्वेषणं **विद्वेषः** । उभयत्र भावे घञ् । त्रीणि वैरस्य ॥

## वयस्यः सवयाः सुहृत् ।
## स्निग्धः सहचरो मित्रं सखा

**१** वयसा तुल्यो **वयस्यः** । 'नौवयो[11]-'४।४।९१॥ इत्यादिना यत् । शब्दशक्तिस्वाभाव्यात् तुल्यवयस्कः[12] प्रियवाचकः । **२** समानं वयोऽस्येति **सवयाः** । 'अत्वसन्तस्य चाधातोः'६।४।१४॥ इति दीर्घः[13] । सवयसौ, सवयसः इत्यादि । **३** सोभनं हृदयमस्य **सुहृत्** । 'सुहृत्दुर्हृदौ मित्रामित्रयोः'५।४।१५०॥इति निपातः । **४** स्निह्यति **स्निग्धः** । 'ष्णिह[14] प्रीतौ' (दि.प.से.), 'मतिबुद्धिपूजार्थेभ्यश्च'३।२।१८८॥इति चकाराद् वर्तमाने क्तः । **५** सहचरतीति **सहचरः** । एवं सहायोऽपि । **६** मेद्यति[15] स्निह्यति **मित्रम्**, क्लीबे । 'ञिमिदा स्नेहने' (दि.प.से.), 'अमिचिमिदिशसिभ्यस्त्रः'[16](उणा-६०३) । ''मित्रमाविष्टलिङ्गम्''[[17]]इति मिश्राः । **७** समानः ख्यायते जनैः समानं ख्यातीति वा **सखा** । 'ख्या प्रकथने'(अ.प.अ.), 'समानः(समाने) ख्यः, स चोदात्तः'(उणा-५७६)इतीण्, स च डित्, 'वेञो डित्-(वातेर्डिच्च)'(उणा-५१२)इत्यनुवृत्तेः डित्त्वाट्टिलोपो यलोपश्च, '-य[ लोपः ]-'(उणा-५७५)इत्यनुवृत्तेः समानस्य सभावः, 'अनङ(अनङ्) सौ'७।१।९३॥ इत्यनङ्[18] । सप्त मित्रस्य[19] ॥

---

१. '-कप्रति-' इति३ ॥ २. '-न्यः' इति१.२॥, द्र. पदचन्द्रिका, भा-२, क्षत्रवर्गः, श्लो-४६४, पृ.५४८॥ ३. 'पर' इति१.२॥ ४. '-ति' इति३.४॥ ५. 'याचनायां' इति४, मैत्रेयसम्मतोऽयं धात्वर्थः, 'उपयाच्ञायाम्' इति स्वामिसायणौ ॥ ६. 'अमेर्द्विपति चित्' इत्युणादिगणे ॥ ७. '-द्धं' इति१.२॥ ८. द्र. पदचन्द्रिका, भा-२, क्षत्रवर्गः, श्लो-४६५, पृ.५४९॥ ९. तुलनीयोऽमरकोषः १।७।२५॥ १०. 'विशेषेण रोधो विरोधः' इति४॥ ११. इतोऽग्रे १प्रतौ 'धर्म' इति दृश्यते ॥ १२. '-बयसः' इति३॥ १३. दीर्घत्वे 'ज्योतिर्जनपद-'६।३।८५॥ इत्येनन समानस्य स इत्यपि बोध्यम् ॥ १४. 'स्निह' इति३॥ १५. 'मिद्यति' इति२.४, 'मिद्यते' इति३॥ १६. '-भ्यः क्त्रः' इत्युणादिगणे ॥ १७. द्र. पदचन्द्रिका, भा-२, क्षत्रवर्गः, श्लो-४६६, पृ.५५०॥ १८. इतोऽग्रे ४प्रतौ 'सखा' इति दृश्यते ॥ १९. 'मित्रस्य सप्त' इति३.४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सख्यं तु सौहृदम्** ॥७३०॥

**सौहार्दं साप्तपदीनमैत्र्यजर्याणि सङ्गतम् ।**

१ सख्युर्भावः कर्म वा **सख्यम्** । 'सख्युर्यः' ५।१।१२६॥ इति यः । २ सुहृदो भावः **सौहृदम्** । युवादित्वादण्, बाहुलकादुत्तरपदस्य न वृद्धिः ॥७३०॥ ३ सुहृदयस्य भावकर्मणी **सौहार्दम्** । 'हायनान्तयुवादिभ्योऽण्' ५।१।१३०॥ इत्यण्, 'हृद्भगसिन्धु-'७।३।१९॥ इत्युभयपद-वृद्धिः, 'हृदयस्य हृल्लेख'६।३।५०॥ इत्यादिना हृदयस्य हृद्भावः। ४ सप्तभिः पदैरवाप्यते **साप्तपदीनम्** । 'साप्तपदीनं सख्यम्'५।२।२२॥इति साधुः । सप्तभिः पदैः क्रमैस्त्या-द्यन्तैर्वाऽवाप्यते[१] साप्तपदीनमिति वा । प्राक् सूत्रेणैव साधुः । सखाऽपि । ५ मित्रस्य[२] भावः कर्म वा मैत्र्यम्, ङीषि **मैत्री**। ६ न जीर्यति **अजर्यम्** । 'जृ[ष्] वयोहानौ' (दि.प.से.), 'अजर्यं सङ्गतम्'३।१।१०५॥ इति सूत्रेण साधुः । ७ सङ्गमनं **सङ्गतम्** । बाहुलकाद् भावे क्तः । सप्त 'मित्राई' इति ख्यातायाः ॥

**आनन्दनं त्वाप्रच्छनं स्यात् सभाजनमित्यपि** ॥७३१॥

१ आनन्द्यते **आनन्दनम्** । 'टुणदि(टुनदि) समृद्धौ' (भ्वा.प.से.), भावे ल्युट् । २ आपृच्छ्यते **आप्रच्छनम्** । भावे ल्युट् । आङ्पूर्वः प्रच्छिरालिङ्गनार्थः । यथा-"आपृच्छ-स्व प्रियसखममुम्"[मेघदूतम्, पूर्वमेघः, श्लो-१२]इति । ३ सभाज्यते **सभाजनम्** । 'सभाज प्रीतिसेवनयोः[३]'(चु.उ.से.), चुरादिः, भावे ल्युट् । "सभाजनायोपगतान् स दिव्यान् मुनीन् पुरस्कृत्य हतस्य शत्रोः"[रघुवंशम्, सर्गः-१४, श्लो-१८]इति रघुः । त्रीणि आलिङ्गनानन्दस्य[४] । आलिङ्ग्य कुशलादि-पृच्छेत्यर्थः । 'मिलवउं[५]' इत्यादिभाषा ॥७३१॥

**विषयानन्तरो राजा शत्रुः**[६]

१ विजिगीषोः राज्ञो विषयाज्जनपदादनन्तरोऽव्यवहितो राजा **शत्रुः** उच्यत इत्यन्वयः । एकं शत्रुराज्ञः ॥

**मित्रमतः परम् ।**

१ अतोऽस्माच्छत्रो राज्ञः परं परभूमिस्थितं विजि-गीषोः राज्ञो **मित्रम्** उच्यत इत्यन्वयः । एकं मित्रराज्ञः ॥

**उदासीनः परतरः**

१ शत्रुमित्रयो राज्ञोर्भूमिभ्यः परतरो बाह्य **उदासीनः** उच्यत इत्यन्वयः । उद्पूर्वादासेः शानच् । एकमुदासीनराज्ञः ॥

**पार्ष्णिग्राहस्तु पृष्ठतः**[७] ॥७३२॥

१ विजिगीषोः राज्ञः पश्चात् स्थितराजनामैकं **पार्ष्णि-ग्राहः** इति । शत्रुजयायोद्यतस्य[८] विजिगीषोस्तच्छत्रुपक्षपातेन यः पार्ष्णिं[९] पश्चात्पदं गृह्णाति यातीति । 'कर्मण्यण्'३।२।१॥ । "सैन्यपृष्ठे पुमान् पार्ष्णिः पश्चात्पदजिगीषयोः"[१०]इति विश्वः । विजिगीषुशत्रुमित्रोदासीनपार्ष्णिग्राहेषु पञ्चस्वेतेषु द्वादशराजक-मण्डलं परिसमाप्तम् । यदुक्तम्-

"अरि१र्मित्र२मरेर्मित्रं३ मित्रमित्रम४तः परम् ।
तथारिमित्रमित्रं५ च विजिगीषोः पुरः स्मृताः ॥१॥
पार्ष्णिग्राह१स्तथाक्रन्द२ आसारौ च तयोः पृथक्३-४।
मध्यमो५ऽथाप्युदासीन६ इति द्वादशराजकम्[११] ॥२॥"[१२] ॥७३२॥

**अनुवृत्तिस्त्वनुरोधः**

१ अनुवर्तनम् **अनुवृत्तिः** । 'वृतु वर्तने'(भ्वा.आ.से.), 'स्त्रियां क्तिन्'३।३।९४॥ । २ अनुरोधनम् **अनुरोधः** । भावे घञ् । द्वे इच्छानुवर्तनस्य । 'मनराखवउं[१३]' इति भाषा ॥

**हेरिको गूढपूरुषः ।**

**प्रणिधिर्यथार्हवर्णोऽवसर्पो मन्त्रविच्चरः** ॥७३३॥

---

१. '-न्तैर्वाप्यते' इति३॥ २. 'मित्र्यस्य' इति४॥ ३. 'सभाज प्रीतिदर्शने' इति स्वामी, 'सभाज प्रीतिदर्शनयोः' इति मैत्रेयसायणौ ॥ ४. '-ङ्गता आनन्दस्य' इति१, '-ङ्गना आनन्दस्य' इति२॥ ५. 'मिलवु' इति३, 'मिलवउ' इति४॥ ६. तुलनीयोऽमरकोषः२।८।९॥ ७. तुलनीयोऽमरकोषः २।८।९-१०॥ ८. 'शत्रुं' इति४॥ ९. 'पार्ष्णिः' इति४॥ १०. द्र. पदचन्द्रिका, भा-२, क्षत्त्रवर्गः, श्लो-४६४, पृ.५४८॥, रामाश्रमी२।८।१०॥, पृ.३५०॥, विश्वप्रकाशविश्वलोचनकोशयोर्न दृश्यते ॥ ११. "राजानस्तु 'अरिर्मित्रमरेर्मित्रं मित्रमित्रमतः परम् । तथारिमित्रमित्रं च विजिगीषोः पुरस्सराः ॥' पञ्चेति शेषः । 'पार्ष्णिग्राहस्ततः पश्चादाक्रन्दस्तदनन्तरम् । आसारावनयोश्चैव विजिगीषोस्तु पृष्ठतः ॥' पार्ष्णिग्राहासारः आक्रन्दासारश्चेत्यर्थः । अत्र चत्वार इति । एवं नव भवन्ति । विजिगीषुर्दशमः । 'अरेश्च विजिगीषोश्च मध्यमो भूम्यनन्तरः । अनुग्रहे संहतयोः समर्थो व्यस्तयोर्वधे । मण्डलाद् बहिरेतेषामुदासीनो बलाधिकः ॥' इति मध्यमोदासीनाभ्यां सह द्वादश वेदितव्याः ॥" इति शिशुपालवधसर्वङ्कषाटीका, शिशुपालवधम्, २।८१॥, पृ.५३॥ १२. द्र. अम.क्षीरस्वामिटीका २।८।१०॥, पृ.१७८॥, स्वोपज्ञटीका३।७३२॥, पृ.१६२॥ १३. '-वौ' इति४, '-वो' इति३॥

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

### वार्तायनः[9] स्पश[10]श्चारः[11]

१ हिनोति परराष्ट्रं गच्छति **हेरिकः** । 'हि गतौ वृद्धौ च'(स्वा.प.अ.), पृषोदरादिः । २ गूढ आवृतः पूरुषो **गूढपूरुषः** । ३ प्रकर्षेण निधीयते स्थाप्यते ज्ञेयमत्रेति[1] **प्रणिधिः** । 'डुधाञ् धारणादौ'(जु.उ.अ.), 'उपसर्गे घोः किः'३।३।९२॥ इति किः । ४ यथार्हं[2] वर्णः प्रकारोऽस्य **यथार्हवर्णः** । यत्र येन प्रकारेणाऽन्तस्तत्त्वं ज्ञातुं शक्यते, तत्र तथाभूतः प्रकारोऽस्येत्यर्थः । "वर्णः स्याद्भेदरूपयोः" [[3]]इति धरणिः । देशकालोचितो वर्ण आकारः, जातिवर्णनं वाऽस्य यथार्हवर्णः। ५ [4]तत्त्वज्ञानार्थमवसर्पत्यधिकं भ्रमति **अवसर्पः** । 'सृप्लृ गतौ'(भ्वा.आ.से.), अच् । "अपकृष्टं[5] सर्पत्यपसर्पः"[[6]]इति तु सुभूतिः । "अवच्छन्नं सर्पत्यपसर्पः"[अम.क्षीर.२।८।१३॥]इति स्वामी[6] । ६ मन्त्रं वेत्तीति[7] **मन्त्रवित्** । क्विबन्तः । ७ चरति जानाति परतत्त्वं[9] **चरः** । 'चर गतौ'(भ्वा.प.से.), अच् ॥७३३॥ ८ वार्तामयते[10] **वार्तायनः** । 'अय गतौ'(भ्वा.आ.से.), नन्द्यादित्वाल्ल्युः । ९ स्पशिः सौत्रस्तालव्यान्तः, स्पशति बाधते परानिति[11] **स्पशः** । पचाद्यच् । 'स्पश बाधनस्पर्शनयोः'[12](भ्वा.उ.से.)इत्यस्य वा पचाद्यचि। १० चर एव[13], 'चर गतौ'(भ्वा.प.से.), अच्, प्रज्ञाद्यणि **चारः** । दश 'हेरू[14]' इति ख्यातस्य ॥

### आप्त[1]प्रत्ययि[2]तौ समौ ।

१ "रागद्वेषविनिर्मुक्त आप्त इत्यभिधीयते"[[15]]इति । आप्यते स्म **आप्तः** । 'आप्लृ व्याप्तौ'(स्वा.प.अ.), कर्मणि क्तः । २ प्रत्ययो विश्वासः सञ्जातोऽस्य **प्रत्ययितः**, त्रिलिङ्गः वाच्यलिङ्गत्वात् । तारकादित्वादितच्प्रत्ययः । "प्रत्ययः शपथे रन्ध्रे विश्वासाधरहेतुषु[16]"[विश्वप्रकाशकोशः, यान्तवर्गः, श्लो-६९]इति विश्वः । द्वे अव्यभिचारिवचनस्य पुंसः ॥

### सत्त्रि[1]णि स्याद् गृह[2]पतिः

१ सीदन्त्यस्मिन्निति सत्त्रं गृहं सदादानं च, तदस्याऽस्ति[17] **सत्त्री** । 'अत इनिठनौ'५।२।११५॥इतीनिः, तत्र । २ गृहस्य पतिः **गृहपतिः** । द्वे गृहपतेः ॥

### दूतः[1] सन्देश[2]हारकः ॥७३४॥

१ दूयतेऽनेन परः यथोक्तवादित्वादिति **दूतः** । 'दुङ्[18](टुदु) उपतापे'(स्वा.प.से.), 'दुतनिभ्यां दीर्घश्च'(उणा-३७०)इति तन् (क्तः) । दवति गच्छति परदेशमिति वा । २ सन्दिश्यतेऽसौ सन्देशः । 'दिश अतिसर्जने'(तु.प.अ.), कर्मणि घञ् । सन्देशो निवेद्यत्वेन वाग्विशेषस्तं हरति **सन्देशहारकः** । 'हृञ् हरणे'(भ्वा.उ.अ.), ण्वुल्। द्वे दूतस्य ॥७३४॥

### सन्धि[1]विग्रह[2]या[3]नान्यास[4]न[5]द्वैधाश्र[6]या अपि ।

### षड्[1] गुणाः

१ एते सन्ध्यादयः षड् गुणाः, गुणशब्दवाच्या इत्यर्थः । तत्र स्वर्णादिदानेन बन्धुभिः प्रीत्युत्पादनं मित्रीकरणं **सन्धिः** । सम्पूर्वाद् दधातेः 'उपसर्गे घोः किः'३।३।९२॥ इति किः । २ विरुद्धं ग्रहणं परमण्डले दाहलुण्टनच्छेदादि[19] **विग्रहः**, निबन्धकाशकूटतूष्णीभेदेन त्रिविधः । ३ उपचितशक्तेः कृतमूलराष्ट्ररक्षस्य शत्रोरवस्कन्दाय गमनं **यानम्** । तच्च विगृह्ययानम्१, [20]सन्धाययानम्२, संभूययानम्३, प्रसङ्गयानम्४, उपेक्ष्ययानम्५ चेति पञ्चविधम् । पश्चात् स्थायिनः शत्रोर्बलद्रव्यजनपदवासादिकं कृत्वा पुरोवर्तिनि शत्रौ या यात्रा, तद् विगृह्ययानम्१, शूराय राज्यग्रहणसमर्थेन शत्रुणा सन्धिसन्धायाऽरेः संमुखं गमनं सन्धाययानम्२, बलवदरिणा सन्धाय संमील्य, तैः सह यातुं केऽरौ(कातरेऽरौ) यद् यानम्, तत् संभूययानम्३ । [21]एकं प्रति कृतयानस्याऽनन्तरोपस्थितानुद्देश्येऽपि यद् यानम्, तत् प्रसङ्गयानम्४ । शत्रौ शत्रोर्बलाधानाय पथि प्रासेषु शत्रुमित्रेषु अपरेषु वा बलिषु शत्रुमुपेक्ष्य यद् यानम्, तदुपेक्ष्ययानम् । ४ नाऽहमिदानीं योद्धुं समर्थ इति कालादिप्रतीक्षणं विजिगीषोर्दुर्गादीन् वर्धयतः स्थितिः **आसनम्** । तदपि विगृह्यासनं

---

१. '-मत्र' इति३.४॥ २. 'यथार्ह-' इति१.३॥ ३. द्र. पदचन्द्रिका, भा-२, क्षत्त्रवर्गः, श्लो-४६७, पृ.५५२॥, रामाश्रमी२।८।१३॥, पृ.३५१॥ ४. 'तत्र' इति१.३॥ ५. '-कष्टं' इति४॥ ६. द्र. पदचन्द्रिका, भा-२, क्षत्त्रवर्गः, श्लो-४६७, पृ.५५२॥ ७. ३प्रतौ नास्ति ॥ ८. 'वेत्ति' इति१.२॥ ९. '-त्त्वमिति' इति३॥ १०. इतोऽग्रे ४प्रतौ 'इति' इति, ३प्रतौ च 'प्राप्नोति' इति दृश्यते ॥ ११. 'परान्' इति१॥ १२. मैत्रेयसायणसम्मतोऽयं धात्वर्थः, 'बाधनस्पाशनयोः' इति स्वामी ॥ १३. इतोऽग्रे ४प्रतौ 'चारः' इति दृश्यते ॥ १४. 'हेरु' इति१.३॥ १५. द्र. पदचन्द्रिका, भा-२, क्षत्त्रवर्गः, श्लो-४६७, पृ.५५२॥ १६. 'विश्वासाचारहेतुषु' इति विश्वप्रकाशकोशे, पृ.१२०॥ १७. '-स्तीति' इति३॥ १८. 'दुञ्' इति१, 'दूङ्' इति४॥ १९. '-दिभिः' इति३॥ २०. 'सन्धान-' इति३॥ २१. 'एकप्रकृत-' इति पदचन्द्रिकायाम्, भा-२, क्षत्त्रवर्गः, श्लो-४७३, पृ.५५७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सन्धायासनादिपूर्ववत् पञ्चविधम् । विग्रहेण शत्रोरवस्कन्दोऽशक्तस्य तद्देशादिकं विनाश्य दुर्गादौ (दुर्गं) प्रविश्याऽवस्थानं विगृह्यासनम्। तुल्यबलत्वादि उद्वे (तुल्यबलत्वाद् युद्धे) क्षीयमाणयोः सन्धिं कृत्वाऽवस्थानं सन्धायासनम् । बलिनः शत्रोर्जये अशक्तस्य दुर्गाश्रयेणाऽपि स्थातुमशक्यत्वाद् बलिना मित्रेण शत्रुणा वा [मिलित्वा]ऽवस्थानं संभूयासनम्[1]। शत्रुमभिगच्छतो मित्रागमनादेरुत्सवस्य च प्रसङ्गेनाऽन्तरा स्थितिः प्रसङ्गासनम् । बलिनमपि शत्रुं दुर्नयादिना नित्यमुपचीयमानमुपेक्ष्य तदपचयाऽपेक्षया स्थितिः उपेक्ष्यासनम् । ५ बलिनोर्वैरिणोर्मध्ये काकाक्षिवदलक्षितस्योभयत्र वाचा स्वसमर्पणं **द्वैधम्**। बलिना सह सन्धिविग्रह इत्यपरम्। शत्रोर्वा मूलप्रकृतिभिः सह सन्धाय शत्रुणा सह विग्रह ऽइति तृतीयम् । शत्रुणैव वा सन्धिविग्रहसमुदायहेतोर्दुर्गाश्रयस्य व्यापार इति चतुर्थमिति चतुर्विधं द्वैधम् । ६ बलवताऽरिणा विद्यमानस्य हीनशक्तेर्यद् बलवद्धर्मविजयिसमाश्रयणम्, तद् **आश्रयः** । तस्यैव बलिनः शत्रोः सेवया, कषादिदानेनाऽऽश्रयणमाश्रय इति द्विविधमाश्रयः[2] । उक्तं च-

''उच्छिद्यमाणो रिपुणा निरुपायप्रतिक्रियः ।
शक्तिहीनः संश्रयते बलिनं धार्मिकं नृपम् ॥१॥''

[[3] ]इति । एते सन्ध्यादयः षड् राज्योपकारका **गुणाः** उच्यन्ते। एकं सन्ध्यादिषण्णाम् ॥

## शक्तयस्तिस्रः प्रभुत्वोत्साहमन्त्रजाः ॥७३५॥

१ (शक्तयः इति,)[4] तिस्र इमाः **शक्तयः** इति शक्तिशब्दवाच्या इति भावः । शक्यते जेतुमाभिरिति शक्तयः । 'शक्लृ शक्तौ'(स्वा.प.अ.), 'स्त्रियां क्तिन्'३।३।९४॥ । ([5]प्रभुत्वोत्साहमन्त्रजाः), तत्र प्रभुत्वसाधकत्वात् कोषदण्डौ **प्रभुत्वशक्तिः** । उक्तं च-''[6]कोषदण्डबलं प्रभुशक्तिः''[कौटिलीयमर्थशास्त्रम्, अधिकरणम्-६, अध्यायः-२, (प्रकरणम्-९७)]इति । २ विक्रमेण स्वशक्त्याविष्करणम् **उत्साहशक्तिः**। उक्तं च-''विक्रमबलमुत्साहशक्तिः''[कौटिलीयमर्थशास्त्रम्, अधिकरणम्-६, अध्यायः-२, (प्रकरणम्-९७)]इति । ३ सन्ध्यादीनां सामादीनां च यथाऽवस्थापनम्, न तु ज्ञानबलं **मन्त्रशक्तिः** । ''पञ्चाङ्ग[मन्त्रो] मन्त्रशक्तिः''[ ]इति माधवी। एषां त्रयाणां प्रभुत्वोत्साहमन्त्राणां नामैकं शक्तिरिति ॥७३५॥

## सामदानभेददण्डा उपायाः

१ प्रियकरणार्थ[7] प्रदानसम्बन्धादिः क्रोधोपशमः[8] सान्त्वनं **साम**, क्लीबे । स्यति वैरमनेनेति साम[9] । 'षोऽन्तकर्मणि' (दि.प.अ.), 'साम सान्त्वप्रयोगे'(चु.उ.से.)इत्यस्य वा । 'नामन्सामन्[10]-'(उणा-५९०)इत्यादिना निपातः, दन्त्यादिः । शमयति विरोधमिति शाम इति तालव्यादिरपि । तच्च पञ्चधा-

''परस्परोपकाराणां दर्शनं[11-1] गुणकीर्तनम् ।
सम्बन्धस्य समाख्यानमायत्याः संप्रकाशनम् ॥१॥
वाचा पेशलया[11-2] साधु तवाऽहमिति चाऽर्पणम् ।
इति सामविधानज्ञैः साम पञ्चविधं स्मृतम् ॥२॥''

[कामन्दकीयनीतिसारः, (उपायविकल्पः), सर्गः-१७, श्लो-४-५]इति । २ स्वधनस्य परेभ्यः प्रतिपादनं **दानम्** ।

''यः समासधवोत्सर्गमुत्तमाधममध्यमान् ।
(यः सम्प्राप्तधनोत्सर्ग उत्तमाधममध्यमः ।)
प्रतिदानं तदा तस्य गृहीतस्याऽनुमोदनम् ॥२॥
द्रव्यादानमपूर्वं च स्वयं प्राह(ग्राह)प्रवर्तनम्[12] ।
देयस्य प्रतिमोक्षश्च दानं पञ्चविधं स्मृतम् ॥३॥''

[कामन्दकीयनीतिसारः, (उपायविकल्पः), सर्गः-१७, श्लो-६-७]इति। ३ शत्रोरमात्यादीनामुपायेन परतो विशेष्या(विश्लिष्या)-ऽऽत्मसात्करणं **भेदः** । स त्रिविधः । तदुक्तम्-

''स्नेहरा[13]गापनयनं संहर्षोत्पादनं तथा ।
संतर्जनं च भेदज्ञैर्भेदस्तु त्रिविधः स्मृतः ॥४॥''

[कामन्दकीयनीतिसारः, (उपायविकल्पः), सर्गः-१७, श्लो-८] इति। राज्ञो द्रोहाय शपथपूर्वकम् 'अमीषामेकमपि(अमीषामैकमत्यं) जातम्' इत्यस्याऽर्थस्य कपटलेखादीनां [राजसदसि प्रक्षेपाद् राज्ञोऽनुयायिषु स्नेहस्य परिजनानां च प्रभौ भक्तेरपनयनमित्येकः । अनुयायिनामेव परस्पराभिभवसञ्जननं]

---

१. 'संभूययानं' इति१.२॥ २. ''तस्यैव वा बलिनः शत्रोः सेवया कोषादिदानेन च आश्रयणम् इति द्विविध आश्रयः'' इति पदचन्द्रिकायाम्, भा-२, क्षत्रवर्गः, श्लो-४७३, पृ.५५८॥ ३. द्र. पदचन्द्रिका, भा-२, क्षत्रवर्गः, श्लो-४७३, पृ.५५८॥ ४. कोष्ठान्तर्गतपाठः३.४प्रत्योर्न दृश्यते ॥ ५. कोष्ठान्तर्गतपाठः१.२विना ॥ ६. कौटिलीयाऽर्थशास्त्रे 'कोश-' इति दृश्यते, पृ.४४८॥ ७. 'प्रियगदार्थं' इति १.२॥ ८. ''प्रियवागर्थप्रदानसंबन्धादिभिः क्रोधोपशमनं सान्त्वनं साम'' इति पदचन्द्रिका, भा-२, क्षत्रवर्गः, श्लो-४७४, पृ.५६०॥ ९. १.२प्रत्योर्नास्ति ॥ १०. 'नामन्सीमन्-'(उणा-५९०)इत्युणादिगणसूत्रम्, अतः 'सातिभ्यां मनिन्मनिणौ'(उणा-५९०)इत्यनेन सामसिद्धिः कार्या ॥ ११-१ 'कीर्तनं' इति, ११-२ 'पैशलया' इति कामन्दकीयनीतिसारे, पृ.१९०॥ १२. ''द्रव्यादानमपूर्वत्वं स्वयं प्र('प्रा' इति३)वर्तनं तथा'' इति३.४॥ १३. '-रोगा-' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संहर्षोत्पादनम् ( सङ्घर्षोत्पादनम् ?)इति द्वितीयम् ( द्वितीयः ) । ४ तेजः[१] दमनं **दण्डः** शास्तिः । 'अमन्ताड्डः'(उणा-१११) । सोऽपि त्रिविधः । तदुक्तम्-

''वधोऽनुग्रहणं[२] चैव परिक्लेशस्तथैव च[३] ।
इति दण्डविधानज्ञैर्दण्डोऽपि त्रिविधः स्मृतः ॥५॥''

[कामन्दकीयनीतिसारः, (उपायविकल्पः), सर्गः-१७, श्लो-९]इति । परिक्लेशो बन्धनताडनादिः । **१** स्वार्थसम्पादनकारणानि **उपायाः** । उपैति एभिः श्रीरित्युपायाः । 'इण् गतौ' (अ.प.अ.), करणे घञ् । एकं सामादिचतुर्णामुपाया इति । केचित्तु-''मायामुपेक्षामिन्द्रजालमिति[४] त्रितयमुपायेष्वन्तर्भाव्य सप्तोपायानाहुः । उक्तं च-

''साम दानं च भेदश्च दण्डश्चेति[५] चतुष्टयम् ।
मायोपेक्षेन्द्रजालं च सप्तोपायाः प्रकीर्तिताः ॥६॥''

[कामन्दकीयनीतिसारः, (उपायविकल्पः), सर्गः-१७, श्लो-३]इति । तत्र मायोपेक्षे दण्ड एवाऽन्तर्भवतः । इन्द्रजालं च भेद इति ग्रन्थकृदभिप्रायः । एतत्पाठक्रमेणैव[६] ''चतुर्थोपायसाध्येति शत्रौ सान्त्वमपि क्रियते (चतुर्थोपायसाध्ये तु रिपौ सान्त्वमपक्रिया)[शिशुपालवधम्, सर्गः-२, श्लो-५४]'' इति माघे दण्डश्चतुर्थोपायत्वेनोक्तः ॥

तत्र प्रथमं सामोपायमाह-

**सा[1]म सान्त्व[2]नम् ।**

**१** स्यति वैरमनेनेति **साम**, प्रियवचनादि, क्लीबे । 'षोऽन्तकर्मणि'(दि.प.अ.), '-सामन्दामन्[७]-'(उणा-५९०)इति साधुः । शमयति विरोधमिति शाम, तालव्यादिरपि । **२** सान्त्व्यतेऽनेन **सान्त्वनम्** । 'सान्त्व सामप्रयोगे'(चु.उ.से.), करणे ल्युट् । सान्त्वमपि । ''साम सान्त्वम्''[अमरकोषः ३।८।२१॥]इत्यमरः । द्वे साम्नः । दानोपायः प्रसिद्धत्वान्नोक्तः ॥

अथ भेदोपायमाह-

**उपजा[1]पः पुनर्भे[2]दः**

**१** उपजपनम् **उपजापः** । 'जप जल्प व्यक्तायां वाचि'(भ्वा.प.से.), भावे घञ् । उपांशु जपनमुपजाप इति वा । **२** संहतयोर्भेदनं **भेदः** । भावे घञ् । द्वे भेदस्य ॥

**द[1]ण्डः स्यात् सा[2]हसं द[3]मः ॥७३६॥**

**१** दण्डनं **दण्डः**, पुंक्ली. । 'दण्ड दण्डने[८]'(चु.उ.-से.), भावे घञ् । **२** सहो बलम्, तत्र भवम्, तेन निर्वृत्तं वा **साहसम्**, क्लीबे । वैजयन्ती तु-''दण्डो दमः साहसोऽस्त्री''[वैजयन्तीकोषः३।७।४६]इति पुंस्यप्याह । **३** दमनं **दमः** । 'दमु उपशमे'(दि.प.से.), भावे घञ्, 'नोदात्तोपदेश-' ७।३।३४॥इति वृद्ध्यभावः । त्रीणि दण्डस्य ॥७३६॥

**प्रा[1]भृतं ढौ[2]कनं ल[3]ञ्चो[4]त्कोचः कौ[5]शलिका[6]मिषे ।**
**उपा[7]च्चारः प्र[8]दानं दा[9]हा[10]रौ ग्रा[11]ह्याय[12]ने अपि ॥७३७॥**

**१** प्रकर्षेण आ समन्ताद् भावेन भ्रियते **प्राभृतम्** । 'ञीतः क्तः'३।२।१८७॥ इति वर्तमाने क्तः । **२** ढौक्यते **ढौकनम्** । 'ढौकृ गतौ'(भ्वा.आ.से.), ल्युट् । लीयते (लायते) प्रच्छन्नं गृह्यते **लञ्चा**, पुंस्त्री । 'ला आदाने[९]'(अ.प.अ.), 'कूर्चभूर्चा(चूर्चा)-'(हैमोणा-११३)इति वप्रत्यये निपात्यते । **४** उत्कुच्यते भाष्यते **उत्कोचः** । उत्कोचयति गुर्वपि कार्यमल्पीकरोति वा । 'कुच शब्दे तारे'(भ्वा.प.से.), 'कुच कौटिल्याल्पीभावयोः[१०]'(भ्वा.प.से.) वा, पचाद्यच् । **५** कुशलं प्रयोजनमस्य **कौशलिकम्** । 'तदस्य प्रयोजनम्[११]'५।१।१०९॥ इति ठक् । **६** आमिषमिव **आमिषम्**, परं प्रतिलोभनात्, पुंक्लीबलिङ्गः[१२] । अमत्यनेन स्वस्थीभावं वा । 'अम् (अम) गतौ'(भ्वा.प.से.), 'अमेर्दीर्घश्च'(उणा-४६)इति टिलोपः (टिषच्) । **७-१२** उपशब्दाच्चारादयः षड् योज्यन्ते । उपचर्यतेऽनेन **उपचारः** । उपप्रदीयते **उपप्रदानम्** । उपदीयते **उपदा** । उपह्रियते **उपहारः** । उपगृह्यते **उपग्राह्यः** । उप समीपेऽयन्ते[१३] [१४]गच्छन्त्यनेन **उपायनम्** । प्रदेशनं च । ''प्राभृतं तु प्रदेशनम् । उपायनमुपग्राह्यमुपहारस्तथोपदा''[अमरकोषः २।८।२७-२८॥]इत्यमरः । ''उपप्रदानमुत्कोच उपदा लञ्चया समाः''[[१५]]इत्यन्ये । ''उपदा प्राभृतं प्रोक्तमुपग्राह्यमुपायनम्[१६]'' [हलायुधकोशः२।४३४]इति हलायुधः । ''चत्वारः समाः''[ ] इति तट्टीका । द्वादश प्राभृतस्य । 'भेटि' इति भाषा ॥७३७॥

**मा[1]योपे[2]क्षेन्द्र[3]जालानि क्षुद्रोपाया इमे त्रयः ।**

---

१. अनावश्यकोऽयम् ॥ २ 'वधोऽर्थ-' इति कामन्दकीयनीतिसारे, पृ.१९०॥ ३ 'वा' इति१.२॥ ४ 'मायोपेक्षेन्द्रजालमिति' इति३.४॥ ५ 'दण्डश्च भेदश्चेति' इति कामन्दकीयनीतिसारे, पृ.१९०॥ ६ 'एतस्यानुक्र-' इति३॥ ७ पूर्वोक्तसामशब्दटिप्पणी द्रष्टव्या ॥ ८ 'दण्ड दण्डनिपातने' इति स्वामिसायणौ, 'दण्ड निपातने' इति मैत्रेयः ॥ ९ 'ला दाने' इति१.२॥ १०. 'कुच सम्पर्चनकौटिल्यप्रतिष्टम्भविलेखनेषु' इति क्षीरतरङ्गिण्यादौ ॥ ११. 'प्रयोजनम्' इत्येवाऽष्टाध्याय्याम् ॥ १२. 'पुंक्ली.' इति३॥ १३. '-यते' इति१॥ १४. 'गच्छत्य-' इति१.३॥ १५. अम.क्षीरस्वामिटीका२।८।२८॥, पृ.१८२॥ १६. इतोऽग्रे १प्रतौ 'प्रदेशम्' इति दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ **माया** रूपपरावर्तनादिका । २ **उपेक्षा** अवधारणम् । ३ **इन्द्रजालं** मन्त्रद्रव्यहस्तप्रयोगादिनाऽसम्भवं[१]वस्तु-दर्शनम्, एतेषां द्वन्द्वे मायोपेक्षेन्द्रजालानि । एकं मायादित्रयाणां **क्षुद्रोपायाः** इति ।

## मृगयाऽक्षाः स्त्रियः पानं वाक्पारुष्याऽर्थदूषणे ॥७३८॥
## दण्डपारुष्यमित्येतद् हेयं व्यसनसप्तकम् ।

१ **मृगया** आखेटकः १। २ **अक्षाः** पाशकास्ते च द्युतोपलक्षणम् २। ३ **स्त्रियः** प्रसिद्धाः ३। ४ **पानं** सुरादेः ४। ५ ([२]वाचा पारुष्यं) **वाक्पारुष्यं** कर्कशवाक्त्वम्[३] ५ । ६ अर्थस्य द्रव्यस्य[४] दूषणम् **अर्थदूषणम्** । तच्चतुर्धा अदानम् १, आदानम् २, विनाशः ३, परित्यागश्च ४ ६ ॥७३८॥ ७ अर्थस्य दण्डेन पारुष्यं **दण्डपारुष्यम्**, तीव्रदण्डतेत्यर्थः[५] ७। एते सप्त व्यसनानि उच्यन्ते । व्यसनानां सप्तकं **व्यसनसप्तकम्** । तच्च राज्ञो हेयं त्याज्यमिति प्रसङ्गात् प्रोक्तम् ॥

## पौरुषं विक्रमः शौर्यं शौण्डीर्यं च पराक्रमः[६] ॥७३९॥

१ पुरुषस्य भावः कर्म वा **पौरुषम्**, भयहेतावपि निर्भयमनस्कतेत्यर्थः । २ विक्रमणं **विक्रमः** । ३ शूरस्य भावः कर्म वा **शौर्यम्** । ४ शौण्डीरस्य भावः कर्म वा **शौण्डीर्यम्** । उभयत्र 'गुणवचनब्राह्मणादिभ्यः कर्मणि च' ५।१।१२४॥ इति ष्यञ् । ५ पराक्रमणं **पराक्रमः[७]** । भावे घञ्। पञ्च पौरुषस्य । 'मांटी पणउं[८]' इति भाषा ॥७३९॥

## यत्कोशदण्डजं तेजः स प्रभावः प्रतापवत् ।

१ कोशो धनम्, दण्डो दमस्तद्धेतुत्वात् सैन्यमपि दण्डस्ताभ्यां जायते यत् **तेजः**, उत्कटत्वमित्यर्थः ।

"अधिक्षेपाऽवमानादेः[९] प्रयुक्तस्य परेण यत् ।
प्राणात्ययेऽप्यसहनं[१०] तत्तेजः समुदाहृतम् ॥१॥"

[नाट्यशास्त्रम्, सामान्याभिनयो नामाध्यायः-२२, श्लो-३९]इति भरतः । २ प्रभवत्यनेन **प्रभावः** । प्रपूर्वाद् भवतेः 'कृत्यल्युटो बहुलम्'३।३।११३॥ इति बाहुल्यात् 'श्रिणि(णी)भुवः-' ३।३।२४॥ इति घञ् । ३ प्रतापयत्यनेन [ **प्रतापः** ] । तत्परम-(तपेर-)न्तर्भावितण्यर्थाद् 'हलश्च[११]'३।३।१२१॥इति घञ् । त्रीणि उत्कटत्वस्य[१२] ॥

## भिया धर्मार्थकामैश्च परीक्षा यां[१३] तु सोपधा ॥७४०॥

१ भिया भयेन, पुनः धर्मार्थकामैर्या परीक्षा परीक्षणम्, सा **उपधा** इत्यन्वयः । उपधीयते समीपे ढौक्यते परीक्षार्थमित्युपधा । 'आतश्चोपसर्गे'३।३।१०६॥इत्यङ् । यत्कौटिल्यः-"उपधाभिः शौचाशौचपरिज्ञानममात्यानाम्" [कौटिलीयमर्थशास्त्रम्, अधिकरणम्-१, अध्यायः-९]इति । एकं धर्मार्थभयोपन्यासेनाऽमात्यानामाशयाऽन्वेषणस्य ॥७४०॥

## तन्मन्त्राद्यषडक्षीणं यत्तृतीयाद्यगोचरः ।

१ तृतीयादीनामगोचरो यद् मन्त्रादि आलोचक्रीडादि, तद् **अषडक्षीणम्** उच्यत इत्यन्वयः । न षड् अक्षीण्यत्र अषडक्षीणम् । 'अषडक्षा-'५।४।७॥इति खः । तृतीयाद्यगोचरोऽजहल्लिङ्गः । द्वौ विना तृतीयादयो[१४] न जानन्ति मन्त्रादिकं यत्, तस्यैकम् ॥

## रहस्याऽऽलोचनं मन्त्रः

१ रहसि एकान्ते आलोच्यते **आलोचनम्** । कर्मणि ल्युट् । २ मन्त्रणं **मन्त्रः** । 'मत्रि[१५] गुप्तभाषणे'(चु.आ.से.), भावे घञ्। पञ्चाङ्गोऽयम्। यत्कात्य(यत्कौटिल्यः)-"कर्मणाऽरम्भोपायः १, पुरुषद्रव्यसम्पत् २, देशकालविभागः ३, विनिपातप्रतीकारः ४, कार्यसिद्धिश्च[१६] ५,"[[१७]]इति पञ्चाङ्गो मन्त्रः"[कौटिलीयमर्थशास्त्रम्, अधिकरणम्-१, प्रकरणम्-१०, अध्यायः-१४] । द्वे मन्त्रस्य ॥

## रहश्छन्नमुपह्वरम् ॥७४१॥
## विविक्तविजनैकान्तनिःशलाकानि केवलम् ।

१ रहन्ति त्यजन्त्येतदिति[१८] **रहः** ।'रह त्यागे'(भ्वा.-प.से.), रहेर्भूते '-असुन्'(उणा-६२८)इत्यसुन् । रमन्तेऽत्रेति

१. '-द्वस्तु-' इति१.२ ॥ २. कोष्ठान्तर्गतपाठः १.२.४प्रतिपु न दृश्यते ॥ ३. 'कर्कशवाक्यम्' इति१ ॥ ४. ४प्रतौ नास्ति ॥ ५. '-दण्डेत्यर्थः' इति३ ॥ ६. '-क्रमम्' इति१.३.४ ॥ ७. '-क्रमम्' इति३ ॥ ८. '-पणउ' इति१, '-पणो' इति३, '-पणौ' इति४ ॥ ९. '-पमानादेः' इति नाट्यशास्त्रे, पृ.२४४ ॥ १०. 'प्रसहनं' इति१.२ ॥ ११. 'बहुलश्च' इति४ ॥ १२. '-कटस्य' इति४ ॥ १३. '-यां' इति३ ॥ १४. '-यादौ' इति३ ॥ १५. 'मंत्रि' इति२.४ ॥ १६. 'च' इति कौटिलीयमर्थशास्त्रे न दृश्यते, पृ.४६ ॥ १७. द्र. स्वोपज्ञटीका३ ।७४१ ॥, पृ.१६४ ॥ १८. 'त्यजन्ति पदिति' इति३ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वा । 'रमेश्च'(उणा-६५३)इत्यनुवृत्तौ 'देशे हलश्च (ह च)' (उणा-६५४)इत्यसुन् हश्चान्तादेशः । ''रहो निधुवनेऽपि स्याद्रहो गुह्ये नपुंसकम्''[[1]]इति रभसः । ''अत एतदनव्ययम्, द्वितीयं त्वव्ययम्''[[2]]इति मिश्राः । २ छाद्यते स्म **छन्नम्** । 'छद अपवारणे'(चु.उ.से.), 'वा दान्तशान्तपूर्णदस्तस्पष्टछन्नज्ञप्ताः'७।२।२७॥इति साधुः । ३ उपह्वरति **उपह्वरम्**, पुंक्लीबे[3] । 'ह्वृ कौटिल्ये'(भ्वा.प.अ.), अच् ॥७४१॥ ४ विविच्यते पृथक् क्रियते स्म **विविक्तम्** । 'विचिर् पृथग्भावे'(रु.उ.अ.), निष्ठा । ५ विगतो जनोऽस्माद् **विजनम्** । ६ एको[4] न तु द्वितीयोऽन्ते समीपेऽत्र **एकान्तम्** । ७ निर्गता शलाका व्यथकोऽत्र **निःशलाकम्** । ८ केव्यते सेव्यते निर्जनत्वात् **केवलम्** । 'केवृ सेवने'(भ्वा.-आ.से.), वृषादित्वात् कलच् । उपांश्वव्ययेषु(अभि.श्लो-१५३८)वक्ष्यते । अष्टौ रहसः । 'छाना' इति भाषा ॥

## गुह्ये[1] रहस्यम्[2]

१ गुह्यत इति **गुह्यम्** । 'गुहू संवरणे'(भ्वा.आ.वे.), 'शंसिगुहिदुहिभ्यः [क्यब्] वा'(वा-३।१।१०९॥)इति क्यप्[6], तत्र । २ रहसि भवं **रहस्यम्** । दिगादित्वाद् यत् । द्वे गोपनीयस्य । 'छानुं[7] राखवउं[8]' इति भाषा ॥

## न्यायस्तु[1] देशरूपं[2] समञ्जसम्[3] ॥७४२॥
## कल्पा[4]ऽभ्रेषौ[5] नयः[6]

१ नीयतमीयतेऽनेनेति **न्यायः** । 'परिन्योर्नीणोः-' ३।३।३७॥इति, 'इण् गतौ'(अ.प.अ.)इत्यस्माद् घञ् । २ धर्मशास्त्रपारगैर्दिश्यते कर्तव्यतया कथ्यते[9] देशः । 'दिश अतिसर्जने'(तु.उ.अ.), 'अकर्तरि च कारके संज्ञायाम्'३।३।-१९॥इति घञ् । देशे[10] रूपं (देशो रूपमस्य) देशरूपम् । दिश्यमानस्योचितस्य[11] रूपं वा। प्रशस्तं देशनं वा देशरूपम् । 'प्रशंसायां रूपप्'५।३।६६॥ । ३ सम्यक् सङ्गतं वा तत्त्वमत्र **समञ्जसम्** । 'ह्रस्वो नपुंसके प्रातिपदिकस्य'१।२।४७॥इति ह्रस्वत्वम् । ''सरसावसमञ्जसं च''[[12]]इति द्विदन्त्येषु सभेदात् समञ्जसं द्विदन्त्यम् ॥७४२॥ ४ कल्पनं **कल्पः** । 'कृपू सामर्थ्ये'(भ्वा.आ.से.), भावे घञ्, 'कृपे(कृपो) रो लः' ८।२।१८॥इति लत्वम् । ५ यथोचिताद् रुपाद् भ्रंशोऽधः-पतनं भ्रेषः[13] । 'भ्रेषु(भ्रेषृ) चलने [च]'(भ्वा.उ.से.), मूर्धन्यान्ताद् घञ् । न भ्रेषः **अभ्रेषः** । ([14]यथोचिताद् भ्रंशो भ्रेषः) । नास्ति भ्रेषोऽस्मिन् **अभ्रेषः** । ६ नयनं **नयः** । 'एरच्' ३।३।५६॥ इत्यच् । ''बाहुलकादच्''[मा.धातुवृत्तिः, भ्वादिगणः, धातुसं-६३०]इति माधवः । नीतिरपि । षट् न्यायस्य ॥

## न्याय्यं[1] तूचितं[2] युक्त[3]साम्प्रते[4] ।
## लभ्यं[5] प्राप्तं[6] भजमाना[7]भिनीतौ[8]पयिकानि[9] च ॥७४३॥

१ न्यायादनपेतं **न्याय्यम्** । 'धर्मपथ्य-'४।४।९२॥ इत्यादिना यत् । २ उच्यते स्म **उचितम्** । 'उच समवाये' (दि.प.से.), 'निष्ठा'३।२।१०२॥ इति क्तः, 'आर्धधातुकस्य-' ७।२।३५॥ इतीट् । ३ युज्यते उपायैः सम्बध्यते **युक्तम्** । 'युजिर् योगे'(रु.उ.अ.), कर्मणि क्तः । ४ सम्प्रति युज्यते **साम्प्रतम्** । शैषिकोऽण्[15] । ५ लभ्यत इति **लभ्यम्** । 'डुलभष् प्राप्तौ'(भ्वा.आ.अ.), 'पोरदुपधात्'३।१।९८॥इति यत् । ६ प्राप्यते स्म **प्राप्तम्** । 'आप्लृ व्याप्तौ'(स्वा.प.अ.), निष्ठा । ७ भजते फलमनुबध्नाति तच्छीलं **भजमानम्** । 'भज सेवायाम्'(भ्वा.उ.अ.), 'ताच्छील्यवयोवचनशक्तिषु चानश्'३।२।१२९॥, 'आने मुक्'७।२।८२॥ । ८ अभिनयति इति (अभिनीयते स्म) **अभिनीतः** । ९ उपयन्त्यनेन उपायः[16], उपय (उपाय) एव **औपयिकम्** । विनयादिषु 'उपायाद् ह्रस्वश्च'(गणसू-५।४।३४॥)इति ठक् । नव युक्तस्य । '[17]युगतुं' इति भाषा ॥७४३॥

## प्रक्रिया[1] त्वधिकारः[2]

१ राजादीनां चामरधूननछत्रधारणादिव्यापारः प्रकर्षाय

---

१. द्र. पदचन्द्रिका, भा-२, क्षत्रवर्गः, श्लो-४७६, पृ.५६३॥, रामाश्रमी २।८।२३॥, पृ.३५६॥ २. द्र. पदचन्द्रिका, भा-२, क्षत्रवर्गः, श्लो-४७६, पृ.५६३॥, तत्र 'अत' इत्यस्य स्थाने 'तत' इति दृश्यते ॥ ३. 'पुंक्ली' इति१॥ ४ 'ह्वर' इति४॥ ५. 'एकैव' इति३॥ ६. भट्टोजिदीक्षितेन 'ह्रस्वस्य पिति कृति तुक्'६।१।७१॥ इत्यस्य व्याख्याने '' 'शंसिदुहिगुहिभ्यो वा' इति काशिका । शस्यम्-शंस्यम् । दुह्यम्-दोह्यम् । 'प्रशस्यस्य श्रः'५।३।६०॥ 'ईडवन्दवृशंसदुहां ण्यतः'६।१।२१४॥ इति सूत्रद्वयबलाच्छंसेः सिद्धम् । इतरयोस्तु मूलं मृग्यम्'' इत्युक्तम्, सिद्धान्तकौमुदी, कृत्यप्रक्रिया, पृ.५५७॥ ७ '-नूं' इति३॥ ८. '-खवुं' इति३, '-खवउ' इति४॥ ९. इतोऽग्रे ३.४प्रत्योः 'इति' इति दृश्यते ॥ १०. 'देशो' इति३॥ ११. '-स्यौचितस्य' इति२.४॥ १२. द्र. पदचन्द्रिका, भा-२, क्षत्रवर्गः, श्लो-४७८, पृ.५६४॥, तत्र 'सरसी च समञ्जसं च' इति दृश्यते ॥ १३. १.२प्रत्योर्नास्ति ॥ १४. कोष्ठान्तर्गतपाठः २प्रतौ न दृश्यते ॥ १५. ' काण्' इति३॥ १६. 'उपयः' इति३.४॥ १७. 'जु-' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्रियते **प्रक्रिया** । 'कृञः श च'३।३।१००॥, 'रिङ्शयङ्-(शयग्)लिङ्क्षु'७।४।२८॥, 'अजाद्यतष्टाप्'४।१।४॥ । अधिक्रियते [1]आधिक्याय सम्पाद्यते **अधिकारः** । घञ् । अधिक्रियते प्रस्तूयते वा । द्वे व्यवस्थापनस्य ॥

**अथ मर्यादा धारणा स्थितिः ।**
**संस्था**

१ मर्या इति सीमार्थेऽव्ययम्, तत्र दीयते **मर्यादा** । २ धार्यतेऽनया **धारणा** । 'ण्यासश्रन्थोर्युच्'३।३।१०७॥ । ३ स्थीयतेऽनया **स्थितिः** । 'ष्ठा गतिनिवृत्तौ'(भ्वा.प.अ.), 'स्त्रियां क्तिन्'३।३।९४॥, 'घुमास्था-'६।४।६६॥इतीत्वम् । ४ संतिष्ठतेऽनया **संस्था** । 'आतश्चोपसर्गे'३।३।१०६॥ इत्यङ् । चत्वारि मर्यादायाः ॥

**अपराधस्तु मन्तुर्व्यलीकं विप्रियाऽऽगसी ॥७४४॥**

१ अपराधनम् **अपराधः** । 'राध संसिद्धौ'(स्वा.-प.अ.), भावे घञ् । २ मन्यते निश्चिनोति व्यवस्थापयत्यकार्यं **मन्तुः**, पुंसि । 'मनु(मन) ज्ञाने'(दि.आ.अ.), 'कमिमनि-'(उणा-७२)इति तुन् । ३ विशेषेण अल्यते वार्यते **व्यलीकम्**, पुंक्ली. । 'अली[2] भूषणपर्याप्तिवारणेषु[3]'(भ्वा.प.से.), 'अलीकादयश्च'(उणा-४६५)इतीकप्रत्यये[4] साधुः । ४ विरुद्धं प्रियं **विप्रियम्** । ५ आ एति गच्छति दुर्वृत्तम् **आगः**, क्लीबे । 'इण् गतौ'(अ.प.अ.), 'इण आगोऽपराधे [च]'(उणा-६५१) इत्यसुन्, धातोरागादेशश्च । यद्वा अगति गच्छति, 'वस्य(वस्त्य)-गिभ्याम्-'(हैमोणा-९७०) असन् । अपराधस्य पञ्च । 'गुनह[5]' इति भाषा ॥७४४॥

**बलिः करो भागधेयः**

१ बलन्त्यनेन **बलिः**, पुंस्त्री[6] । 'बल प्राणने'(भ्वा.प.से.), '-इन्'(उणा-५५७)इतीन् । २ कीर्यते क्रियते वा **करः** । 'कॄ विक्षेपे'(तु.प.से.), 'डुकृञ् करणे'(त.-उ.अ.) अतो वा 'ॠदोरप्'३।३।५७॥इत्यप्[7] । 'कारः' इति द्वितीयस्वरादिरपि । ३ भज्यते भागः, राजग्राह्यः षड्भागः, स एव **भागधेयः**, पुंस्त्री । 'नामरूपभागेभ्यो धेयः'(वा-५।४।३५॥)। "भागधेयी स्त्रियां बलिः"[ ]इति माला[9] । प्रत्येकं स्थावरजङ्गमाद् हिरण्यादानं करः नियोज्योपजीव्यो बलिरित्यवान्तरभेदोऽर्थशास्त्रोक्तोऽत्र नाश्रितः[8] । त्रीणि 'राउलु भाग[10]' इति ख्यातस्य ॥

**द्विपाद्यो द्विगुणो दमः ।**

१ अपराधे सति शास्त्रेण बोधिताद् दण्डाद् द्विगुणो दण्डोऽर्थग्रहणादि **द्विपाद्यः** । द्वौ पादौ परिमाणमस्य द्विपाद्यः । 'पणपादमाषशतात् यत्'५।१।३४॥ इति यत्, पादस्याऽत्र प्राण्यङ्गत्वाभावाद् 'पद्यत्यतदर्थे'६।३।५३॥ इति न पद्भावः । "पादोऽस्त्री चरणे मूले तुरीयांशेऽपि दीधितौ"[विश्व-लोचनकोशः, दान्तवर्गः, श्लो-८]इति श्रीधरः । द्विगुणो दमो दण्डः । एकं द्विगुणदण्डस्य ॥

**वाहिनी पृतना सेना बलं सैन्यमनीकिनी ॥७४५॥**
**कटकं ध्वजिनी तन्त्रं दण्डोऽनीकं पताकिनी ।**
**वरूथिनी चमूश्चक्रं स्कन्धावारः**

१ वाहा अश्वाः सन्त्यस्यां **वाहिनी** । 'अत इनिठनौ' ४।२।११५॥ इतीनिः, 'ॠन्नेभ्यो ङीप्[11]'४।१।५॥ । २ पिपर्ति भूमिम्, प्रियते वा **पृतना** । 'पॄ[12] पालनपूरणयोः'(जु.प.अ.), 'पृङ् व्यायामे'(तु.आ.अ.), 'पृपूभ्यां कित्'(हैमोणा-२९३) इति तन्(तनः) । ३ सिनोति बध्नाति शत्रूनिति **सेना** । 'षिञ् बन्धने'(स्वा.उ.अ.), 'कृ(कॄ)वृजृ-(जॄ)सि-'(उणा-२९०)इति नन् । सह इनेन प्रभुणा वर्तत इति वा । ४ बलति प्राणिति **बलम्** । 'बल प्राणने'(भ्वा.प.से.), अच् । बलति (बलते) धारयति वाद्यम् । 'बल बल्ल संवरणे [सञ्चरणे च[13]]'( ), अच्[14] । ५ सेनैव **सैन्यम्** । चातुर्वर्णादित्वात् स्वार्थे ष्यञ् । ६ अनीकं

---

१. 'अ-' इति१॥ २. 'अलं' इति४॥ ३. सायणसम्मतोऽयं धात्वर्थः, 'अलीं भूषणपर्याप्तिनिवारणेषु' इति स्वामी, 'अलीं वारणपर्याप्तिभूषणेषु' इति मैत्रेयः ॥ ४ 'अलीकादयश्च'(उणा-४६५)इत्यनेन कीकन्प्रत्ययो भवति ॥ ५. 'गुनाह' इति३॥ ६. 'पुंस्त्रीलिङ्गः' इति३॥ ७ 'डुकृञ् करणे'(त.उ.अ.)इत्यतः पचाद्यच् ॥ ८. इतोऽग्रे ३प्रतौ 'प्रत्येकं स्थाला' इत्यधिकपाठो दृश्यते ॥ ९. अम.क्षीर. २।८।२८॥, स्वोपज्ञटीका ३।७४५॥, पृ.१६५॥ १०. '-लभाग' इति३, '-लओ भाग' इति४॥ ११. 'ङीष्' इति२॥ १२. पालनपूरणार्थको ह्रस्वान्तोऽयं पृधातुर्मैत्रेयसम्मतः, 'पॄ' इति स्वामिसायणौ, जिज्ञासुभिर्माधवीयधातुवृत्तिरनुसन्धेया, जुहोत्यादिः, धातुसं-५, पृ.३८७॥ १३. मैत्रेयसायणसम्मतोऽयं धातुपाठः, 'बल संवरणे' इत्येव स्वामी ॥ १४. ३प्रतौ नास्ति ॥

सङ्ग्रामोऽस्त्यस्याम् **अनीकिनी** । 'अत इनिठनौ'४।२।११५॥ इतीनिः, 'ऋन्नेभ्यो ङीप्[1]'४।१।५॥ **॥७४५॥ ७** कटत्यावृणोति पृथिवीमिति **कटकम्,** पुंक्ली. । 'कटे वर्षावरणयोः'(भ्वा.प.से.), क्वुन् । **८** ध्वजाः सन्त्यस्यां **ध्वजिनी** । 'अत इनिठनौ'४।२।११५॥इतीनिः । **९** तन्यते[2] **तन्त्रम्** । 'तनु विस्तारे'(त.उ.से.), 'गुधृवीपचिवचियमिमनितनिसदिक्षदि[3]भ्यस्त्रन्[4]'(उणा-६०६)। **१०** दण्ड्यतेऽनेन **दण्डः**, पुंक्ली. । 'दण्ड दण्डने[5]'(चु.उ.से.), करणे घञ् । **११** [6]अनित्यनेन भीरुरिति **अनीकम्,** पुंक्ली. । 'अन प्राणने'(अ.प.से.), 'अनिहृशिभ्यां[7][कित्] च'(उणा-४५७) इतीकन् । **१२** पताकाः सन्त्यस्यां **पताकिनी** । व्रीह्यादित्वादिनिः । **१३** वरूथो रथगुप्तिरस्त्यस्यां **वरूथिनी** । 'अत इनिठनौ'४।२।११५॥ इतीनिः । **१४** चमत्यत्ति शत्रूनिति **चमूः**, स्त्रीलिङ्गः । 'चमु अदने'(भ्वा.प.से.), 'चमितनिवधिभ्य ऊः[8]'(चान्द्रोणा-१।४३॥)इत्यूः । '' 'कृषिचमितनिरनि(रमि)सर्जि[खर्जि]भ्य ऊः'(उणा-८१)'' [मा.-धातुवृत्तिः, भ्वादिः, धातुसं-३०९]इति माधवः । ''चमुः'' [शब्दभेदप्रकाशः, श्लो-१२]ह्रस्वान्तोऽपीति शब्दप्रभेदः । **१५** करोति जयं **चक्रम्,** पुंक्ली. । 'डुकृञ् करणे'(त.उ.अ.), 'कृञः क्लिदेः क्रसश्च'( )कप्रत्ययः, द्वित्वम् ('घञर्थे कः'(वा-३।३।५८॥)इति कः, 'कृञादीनां के द्वे'(वा-६।१।१२॥) इति द्वित्वम्)। 'चक तृप्तौ'(भ्वा.प.से.) अस्माद् रग् वा । **१६** चतुरङ्गसैन्यस्य प्रधानभूतत्वाद् राजा स्कन्धः, तमावृणोति **स्कन्धावारः** । 'वृञ् आवरणे[9]'(स्वा.उ.से.), 'कर्मण्यण्'३।२।१॥ । शिबिरमित्यन्ये । षोडश सेनायाः ॥

**अस्य तु स्थितिः ॥७४६॥**

**शिबिरम्[1]**

१ अस्य सैन्यस्य स्थितिः सन्निवेशः **शिबिरम्[10]** ॥७४६॥ 'शिबि[11](शिव) गतौ'(भ्वा.प.से.), तालव्यादिः, बाहुलकाद् 'इषि[मदि]मुदि-'(उणा-५१)इत्यादिना किरच् । निवेशोऽपि । यदमरः-''निवेशः शिबिरं शण्ढे''[अमरकोषः २।८।३३॥]। ''निवेश्यते सन्निवेशेन स्थाप्यते निवेशः, सैन्यावासः''[अम.क्षीर.२।८।३४॥]इति क्षीरस्वामी । ''निवेशः शिबिरोद्वाहविन्यासेषु प्रकाशितः[12]''[विश्वप्रकाशकोशः, शान्तवर्गः, श्लो-२४]इति महेश्वरः । एकं सैन्यस्थितेः । '[13]ऊतारा' इति भाषा ॥

**रचना तु स्याद् व्यूहो[1] दण्डादिको युधि ।**

१ युधीति[14] सङ्ग्रामनिमित्तं रचना, अर्थात् सैन्यस्य **व्यूहः** इत्युच्यते, बलद्वयस्य युद्धार्थं देशविशेषे [विभज्य] स्थापनं व्यूह इत्यर्थः । 'ऊह वितर्के'(भ्वा.आ.से.), विपूर्वः, घञ् । कीदृग् व्यूहः ? दण्डादिकः, दण्ड आदिर्यस्य स[17] दण्डादिकः, तेन दण्डः, भोगः, मण्डलः, असंहतश्चेति चत्वारो गृह्यन्ते । यत् कामन्दकिः-

''तिर्यग्वृत्तिस्तु दण्डः स्याद् भोगोऽर्था(न्वा)वृत्तिरेव च ।
मण्डलः सर्वतो वृत्तिः पृथग्वृत्तिरसंहतः[15] ॥१॥''

[[16]]इति । तत्र सैन्यानां दण्डवत्तिर्यगवस्थानं दण्डः । सैन्यानामन्वावृत्तिरन्योन्यानुगत[18]वृत्तिर्भोगः । मण्डलरचनायां वसतां सैन्यानां सर्वतो वृत्तिः सर्पशरीरवद् मण्डलः । स्थितानां गजादिसैन्यानां विजातीयैरमिश्रितानां पृथग्वृत्तिः असंहतः । तत्र प्रदरदृढकासह्यादयः सप्तदश दण्डव्यूहभेदाः । गोमूत्राहिसञ्चारिशकटमकरपताकाः पञ्च भोगभेदाः । सर्वतो भद्रोन्तर्जपश्च मण्डलभेदः । अर्धचन्द्रकोलादयश्चाऽसंहतव्यूहभेदा इति[19] । केचित्तु-

''दण्डो मण्डलभोगौ चाऽप्युत्सन्नश्चाऽचलो दृढः ।
व्यूहास्तेषां विशेषाः स्युश्चक्रव्यूहादयोऽपि च ॥१॥''

[[20]]इति षण्मूलभेदानाहुः । एकं सैन्यरचनायाः ॥

**प्रत्यासारो[1] व्यूहपार्ष्णिः[2][21]**

---

१. 'ङीष्' इति२.४॥ २. इतोऽग्रे ३.४प्रत्योः 'इति' इति दृश्यते ॥ ३.'-क्षुदि-' इति४॥ ४. 'गुधृवीपचिवचियमिसदिक्षदिभ्यस्त्रः'(उणा-६०६)इत्युणादिगणे ॥ ५. 'दण्ड दण्डनिपातने' इति स्वामिसायणौ, 'दण्ड निपातने' इति मैत्रेयः ॥ ६. 'अन-' इति४॥ ७. 'अनिहृषिभ्यां' इत्युणादिगणे ॥ ८. उणादिगणसूत्रे 'रमि' इत्यस्य स्थाने 'धनि' इति दृश्यते ॥ ९. 'वरणे' इति४, 'वृञ् वरणे' इति स्वादौ क्षीरतरङ्गिण्यादयः ॥ १०. १.२प्रत्योर्नास्ति ॥ ११. 'शिबि' इति३॥ १२. 'प्रकीर्त्तितः' इति विश्वप्रकाशकोशे, पृ.१६९॥ १३. 'उ-' इति३॥ १४. 'युध्यति' इति४॥ १५. १प्रतौ नास्ति ॥ १६. कामन्दकीयनीतिसारे ''तिर्यग्वृत्तिश्च दण्डः स्याद् भोगत्वाद्वृत्तिरेव च । प्रदरो दृढकोऽसह्यश्चापो वै तद्विपर्ययः'' इति दृश्यते, सर्गः-१९, श्लो-४३, पृ.२२२॥ १७. द्र. टीकासर्वस्वम्, भा-३, २।८।७९॥, पृ.११७॥, पदचन्द्रिका, भा-२, क्षत्त्रवर्गः, श्लो-५३३, पृ.६१७॥, रामाश्रमी२।८।७९॥, पृ.३८०॥ १८. '-मत्वर्थवृ-' इति३॥ १९. अत्र कामन्दकीयनीतिसारो द्रष्टव्यः, पृ.२२२-२२४॥ २०. द्र. अम.क्षीर.२।८।८०॥, पृ.१९१॥, स्वोपज्ञटीका३।७४७॥, पृ.१६५॥ २१. तुलनीयोऽमरकोषः२।८।७९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ प्रतीपमासरन्त्यस्मात् **प्रत्यासारः** । 'सृ गतौ'(भ्वा.-प.अ.), 'अकर्तरि च कारके-'३।३।१९॥इति घञ् । सैन्यरचनायाः पश्चाद्भाग इत्यर्थः । २ व्यूहस्य सैन्यरचनायाः पार्ष्णिः पश्चाद्भागो **व्यूहपार्ष्णिः** । व्यूहशब्दाभावेऽपि पार्ष्णिरपि । यद्गौडः-''प्रत्यासारे पुमान् पार्ष्णिः''[ ]। महेश्वरोऽपि-''पार्ष्णिः पाश्चात्यभागे स्यात् पादमूलोन्मदस्त्रियोः सेनापृष्ठे च कुम्भ्यां च''[विश्वप्रकाशकोशः, णान्तवर्गः, श्लो-२०-२१]इति । द्वे भग्नसैन्यमेलस्य ॥

**सैन्यपृष्ठे प्रति[1]ग्र[2]हः ॥७४७॥**

१ सैन्यस्य पृष्ठं पश्चाद्भागः सैन्यपृष्ठः, तत्र । यत्र स्थितो राजा स्वसैन्यं प्रतिगृह्णाति, तस्य पश्चाद् धनुःशतद्वयान्तरेण स्थितं [2]भिन्नसङ्क्रान्तमनीकं **प्रतिग्रहः** उच्यते । प्रतिगृह्यतेऽवष्टभ्यते[3]ऽनेन सैन्यं प्रतिग्रहः । 'ग्रह उपादाने' (क्र्या.उ.से.), 'ग्रहवृदृ-'३।३।५८॥ इत्यादिना अप् । ''प्रतिग्रहः स्वीकरणे सैन्यपृष्ठे पतद्ग्रहे[4]''[विश्वप्रकाशकोशः, हान्तवर्गः, श्लो-२४]इति महेश्वरः । एकं सैन्यपृष्ठस्य ॥७४७॥

**एकेभैकरथास्त्र्यश्वाः पत्तिः[1] पञ्चपदातिका[5] ।**

१ एकेभा एकगजयुक्ता, एकरथा एकरथोपेता, त्र्यश्वा अश्वत्रयसहिता, पञ्चपदातिका पञ्चभिः पदातिभिः सहिता, **पत्तिः** सेनांश उच्यत इत्यन्वयः । पद्यतेऽस्यां पत्तिः । 'पद गतौ'(दि.आ.अ.), 'स्त्रियां क्तिन्'३।३।९४॥ । यद्भारतम्[6]-

''एको रथो गजश्चैको नराः पञ्च पदातयः ।
त्रयश्च तुरगास्तद्ज्ञैः पत्तिरित्यभिधीयते ॥१॥''

[[7]]इति । एकं सेनांशस्य ॥

**सेना[1] सेनामुखं[2] गुल्मो[3] वाहिनी[4] पृतना[5] चमूः[6][8] ॥७४८॥**
**अनी[7]किनी च पत्तेः स्यादिभाद्यैस्त्रिगुणैः क्रमात् ।**

१ पत्तेः सम्बन्धिभिरिभरथाश्वपदातिभिः क्रमेण त्रिगुणितैः सेनादीन्यभिधानानि क्रमेण स्युः, तेन पत्ति[:] त्रिगुणा **सेना** १ । २ सेना त्रिगुणा **सेनामुखम्** २ । ३ सेनामुखं त्रिगुणं[9] **गुल्मः** ३ । ४ गुल्मस्त्रिगुणो **वाहिनी** ४ । ५ वाहिनी त्रिगुणा **पृतना** ५ । ६ पृतना त्रिगुणा **चमूः** ६ ॥७४८॥ ७ चमूस्त्रिगुणा **अनीकिनी** ७ । तत्र सेनायां गजाः ३, रथाः ३, अश्वाः ९, पदातयः १५ । सेनामुखे गजाः ९, रथाः ९, अश्वाः २७, पदातयः ४५ । गुल्मे गजाः २७, रथाः २७, अश्वाः ८१, पदातयः १३५ । वाहिन्यां गजाः ८१, रथाः ८१, अश्वाः २४३, पदातयः ४०५ । पृतनायां गजाः २४३, रथाः २४३, अश्वाः ७२९, पदातयः १२१५ । चम्वां गजाः ७२९, रथाः ७२९, अश्वाः २१८७, पदातयः ३६४५ । अनीकिन्यां गजाः २१८७, रथाः २१८७, अश्वाः ६५६१, पदातयः १०९३५, एवमनीकिन्यां सर्वाग्रं २१८७० । अमरादयस्तु-

''एकेभैकरथास्त्र्यश्वाः पत्तिः पञ्चपदातिका ।
पत्त्यङ्गैस्त्रिगुणैः सर्वैः क्रमादाख्या यथोत्तरम् ॥१॥
सेनामुखं गुल्मगणौ वाहिनी पृतना चमूः ।
अनीकिनी (दशगुणामाहुरक्षौहिणीं बुधाः[10]) ॥२॥''

[अमरकोषः २।८।८०-८१॥]इति क्रमेण नामान्याहुः ॥

**दशानीकिन्योऽक्षौ[1]हिणी**

१ दश अनीकिन्यः, दशगुणा[11] अनीकिनी इत्यर्थः, **अक्षौहिणी** उच्यत इति शेषः । अक्षाणां रथकाष्ठानामूहोऽस्यामित्यक्षौहिणी । 'अक्षादूहिण्या(न्या)म्-'(वा-६।१।८९॥)इति वृद्धिः । महाभोगतया सर्वेषामप्यक्षाणामिन्द्रियाणामूहः सविकल्पज्ञानमिति अक्षौहः(अक्षोहः), तद्योगाद् मत्वर्थीयेनौ 'ऋन्नेभ्यो ङीप्'४।१।५॥, 'अकृतव्यूहाः पाणिनीयाद् (पाणिनीयाः)'(परिभाषा-)इति प्रविभज्याव्याख्याने 'अक्षादूहिन्याम्-'(वा-६।१।८९॥)इति वृद्धौ अक्षौहिणीति वा । गणनक्रमेण सप्ततिसहिताष्टशताधिकैकविंशतिसहस्राणि गजाः २१८७०, इयन्त एव रथाः २१८७०, दशोत्तरषट्शताधिकानि पञ्चषष्टिसहस्राण्यश्वाः ६५६१०, पञ्चाशदुत्तरशतत्रयसहितनवसहस्राधिकमेकलक्षं[12] पत्तयः १०९३५० । यदुक्तम्-

१. तुलनीयोऽमरकोषः२।८।७९॥ २ 'भिन्नं' इति३.४॥ ३ '-ष्टभ्यते' इति१.२॥ ४ 'प्रतिग्रहः' इति३, 'प्रतिग्रहे' इति४॥ ५ तुलनीयोऽमरकोषः२।८।८०॥ ६ 'भारते' इति३.४॥ ७ द्र. अम.क्षीर.२।८।८१॥, पृ.१९१॥ ८ 'चमू' इति३॥ ९ 'त्रिगुणितं' इति४॥ १०. कोष्ठान्तर्गतपाठस्थानेऽमरकोषे ''दशानीकिन्योऽक्षोहिण्यथ सम्पदि'' इति दृश्यते ॥ ११. '-गणा' इति१.२॥ १२. 'लक्ष-' इति१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"स्यात् सेनाऽक्षौहिणी नाम खाऽङ्गष्टैकद्विकैर्गजैः २१८७०।
रथै२१८७०श्चैभ्यो हयैस्त्रिघ्नैः६५६१० पञ्चघ्नैश्च पदातिभिः
१०९३५० ॥१॥"[[1] ]इति[2] । [एकमक्षौहिण्याः] ॥

१. द्र. स्वोपज्ञटीका३।७४९॥, पृ.१६६॥ "अक्षौहिण्याः प्रमाणन्तु खाङ्गाष्टैकद्विकैर्गजैः । रथैरेतैर्हयैस्त्रिघ्नैः पञ्चघ्नैश्च पदातिभिः" इति भारते ॥ २. "पत्त्यङ्गैस्त्रिगुणैः सर्वैः क्रमादाख्या यथोत्तरम् ॥८०॥ सेनामुखं गुल्मगणौ वाहिनी पृतना चमूः । अनीकिनीदशानीकिन्यक्षौहिण्यथ संपदि ॥८१॥" इत्यमरकोशः २।८।८०-८१॥
"(वि.) पत्त्यङ्गैरिति-त्रिगुणैः सर्वैः पत्त्यङ्गैर्यथोत्तरमुत्तरोत्तरस्य आख्या नामानि क्रमाद् भवन्ति । सेनाया मुखं सेनामुखम् ।

इभानां च रथानां च त्रितयं नव वाजिनः ।
सेनामुखं स्मृतं यत्र भटानां दश पञ्च च ॥ इति ।

गुड्यते रक्ष्यतेऽस्मात् गुल्मः । 'गुड रक्षायाम्' ।

नवेभानां रथानां च हयानां सप्तविंशतिः ।
गुल्मः प्रोक्तो भटानां तु चत्वारिंशच्च पञ्च च ॥ इति ।

गण्यते संख्यायते गणः । 'गण संख्याने' ।

एकाशीतितुरङ्गाणां रथेभाः सप्तविंशतिः ।
गणः प्रोक्तो भटानां तु शतं त्रिंशच्च पञ्च च ॥ इति ।

वाहाः अश्वाः अस्यां सन्तीति वाहिनी ।

एकाशीतिरथेभस्य भटाः पञ्च चतुःशतम् ।
चत्वारिंशत् त्रयोऽश्वानां द्विशतं वाहिनी मता ॥ इति ।

पृतना पूर्वोक्ता (श्लो.७८) ।

चत्वारिंशत्त्रयो नागा द्विशतं च रथास्तथा ।
पृतना सा सप्तशती हयानां विंशतिर्नव ।
सहस्रं द्विशतं पञ्च दश पद्मा मनीषिभिः ॥

चमूरप्युक्ता (श्लो.७८) ।

द्विसहस्रं शतं सप्ताशीतिर्वाजिकुलस्य च ।
रथाश्चेभाः सप्तशती विंशतिर्नव यत्र सा ॥
त्रिसहस्रं षट्शतकं चत्वारिंशच्च पञ्च च ।
पदातीनां चमूर्ज्ञेया सैन्यसंख्याविचक्षणैः ॥

अनीकिनी पूर्वोक्ता (श्लो.७८) ।

षट्सहस्रं पञ्चशतं षष्टिरेकं तु वाजिनाम् ।
द्विसहस्रं शतं सप्ताशीतिर्गजरथस्य च ॥
यत्रायुतं नवशतं त्रिंशत्पञ्चपदातयः ।
अनीकिन्यभिधेया सा परिज्ञेया मनीषिभिः ॥

दश अनीकिन्यो यस्यां सा दशानीकिनी । सैव अक्षौहिणीत्युच्यते । अक्षाणां रथानां समूहः संघोऽस्यामस्तीति अक्षौहिणी ।

प्रयुतं नवसाहस्रं पञ्चाशत् त्रिशतं भटाः ।
पञ्चाशत् षष्टिसाहस्रं षट्शतीर्दश वाजिनः ॥
एकविंशतिसाहस्रं शतानामष्टसप्ततिः ।
द्विरदाः स्यन्दना यत्र साक्षौहिण्युच्यते बुधैः ॥ इति ।"

इति लिङ्गयसूरिकृताऽमरपदविवृतिः, भा-१, २।८।८०-८१॥, पृ.५३०-५३१॥, मङ्गलकोषे त्वेवमुक्तम् "नवनागसहस्राणि नागे नागे शतं रथाः । रथे रथे शतं चाश्वा अश्वे अश्वे शतं नराः ॥" इति, अन्यत्रोक्तं महाक्षौहिणीप्रमाणं यथा-"खद्वयं निधिवेदाक्षिचन्द्राक्ष्यग्निहिमांशुभिः । महाक्षौहिणिका प्रोक्ता संख्यागणितकोविदैः ॥" इति

**पत्त्यादिसेनाविशेषे गजरथादिसंख्याबोधकचक्रम् ।**

| क्रमिक-संख्या | हैमोक्तसेना-विशेषसंज्ञाः | अमरोक्तसेना-विशेषसंज्ञाः | गजसंख्या | रथसंख्या | अश्वसंख्या (रथाश्वान् विहाय) | पदातिसंख्या | सर्वसंङ्कलनम् |
|---|---|---|---|---|---|---|---|
| १ | पत्तिः | पत्तिः | १ | १ | ३ | ५ | १० |
| २ | सेना | सेनामुखम् | ३ | ३ | ९ | १५ | ३० |
| ३ | सेनामुखम् | गुल्मः | ९ | ९ | २७ | ४५ | ९० |
| ४ | गुल्मः | गणः | २७ | २७ | ८१ | १३५ | २७० |
| ५ | वाहिनी | वाहिनी | ८१ | ८१ | २४३ | ४०५ | ८१० |
| ६ | पृतना | पृतना | २४३ | २४३ | ७२९ | १२१५ | २४३० |
| ७ | चमूः | चमूः | ७२९ | ७२९ | २१८७ | ३६४५ | ७२९० |
| ८ | अनीकिनी | अनीकिनी | २१८७ | २१८७ | ६५६१ | १०९३५ | २१८७० |
| ९ | * | दशानीकिनी (महेश्वरमतेनेदम्) | ६५६१ | ६५६१ | १९६८३ | ३२८०५ | ६५६१० |
| १० | * | अक्षौहिणी (महेश्वरमतेनेदम्) | १९६८३ | १९६८३ | ५९०४९ | ९८४१५ | १९६८३० |
| ११ | अक्षौहिणी | अक्षौहिणी(भानुजिदीक्षितमतेनेदम्) | २१८७० | २१८७० | ६५६१० | १०९३५० | २१८७०० |
| १२ | * | महाक्षौहिणी (महेश्वरव्याख्योक्ता) | १३२१२४९० | १३२१२४९० | ३९६३७४७० | ६६०६२४५० | १३२१२४९०० |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सज्जनं तूपरक्षणम् ॥७४९॥**

१ सज्जन्ते निर्भया भवन्त्यनेन, सत् शोभनं वा जन्यतेऽनेन **सज्जनम्** । 'षस्ज गतौ'(भ्वा.प.से.), 'झलां जश् झशि'८।४।५३॥ इति सस्य दत्वम्, 'स्तोः श्चुना श्चुः'८।४।-४०॥ इति दस्य जः, करणे ल्युट् । २ उपरक्ष्यन्ते[1]ऽनेन **उपरक्षणम्** । 'रक्ष पालने'(भ्वा.प.से.), करणे ल्युट् । द्वे सैन्यप्रगुणीकरणस्य । 'सज्जकरवउं[2]' इति भाषा ॥७४९॥

**वैजयन्ती पुनः केतुः पताका केतनं ध्वजः ।**

१ विजयते जेता विजयन्तः । 'जि जये'(भ्वा.-प.अ.), 'तृभूवसि[3]-'(उणा-४०८)इत्यन्तः । विजयन्तस्येयं **वैजयन्ती** । 'तस्येदम्'४।३।१२०॥ इत्यण्, 'टिड्ढाणञ्-'४।१।१५॥ इति ङीष् (ङीप्)। २ चाय्यते पूज्यते **केतुः**, पुंसि । 'चायृ पूजानिशामनयोः'(भ्वा.उ.से.), 'चायः की(के) च'(हैमोणा-७७८)इत्यनेन[4] तुप्रत्ययः, धातोश्च की(के)इत्यादेशः । ३ पतत्यूर्ध्वं **पताका** । पतेर्गत्यर्थस्य ज्ञानार्थत्वात् पत्यते ज्ञायते योध्यतेऽदोऽनयेति वा । 'शलि-पटिपतिभ्यो नित्'(दशपाद्युणा-३।३३॥)इत्याकः, टाप् । पटाकाऽपि । ४ केत्यते ज्ञायते योधविशेषोऽनेन **केतनम्**, पुंक्ली. । ''द्यामियाय दहतस्य (देहहतस्य?) केतनः''[ ] इति लक्ष्यं च । 'कित ज्ञाने[5]'(जु.प.से.), करणे ल्युट् । ५ ध्वजयति चिह्नयति ज्ञापयति योधविशेषं **ध्वजः**, पुंक्ली. । ''ध्वजमस्त्रियाम्''[अमरकोषः २।८।९९॥]इत्यमरः । 'ध्वज गतौ'(भ्वा.प.से.), अन्तर्भूतण्यर्थात् पचाद्यच्। पञ्च ध्वजस्य ॥

**अस्योच्चूलावचूलाख्यावूर्ध्वाधोमुखकूर्चकौ॥७५०॥**

१ अस्य ध्वजस्य ऊर्ध्वस्थितकूर्चकमानैकं **उच्चूलः**। १ अधोमुखकूर्चकनामैकम् **अवचूलः** । 'ऊर्ध्वाधोमुखकूर्चकौ' [अभि.श्लो-७५०]इति कूर्चकशब्दस्य प्रत्येकमभिसम्बन्धादूर्ध्व-कूर्चक उच्चूलः, अधोमुखकूर्चकोऽवचूल इत्यर्थः ॥७५०॥

**गजो वाजी रथः पत्तिः सेनाङ्गं स्याच्चतुर्विधम् ।**

१ गजो हस्ती १, वाजी तुरङ्गः २, रथः स्यन्दनः ३, पत्तिः पदातिः ४ चतुर्विधं सेनाया अङ्गम् अवयवः स्यादिति, चतुरङ्गा हि सेना, तत्र गजवाजिनौ तुर्यकाण्डे(श्लो-४।१२१७, ४।१२३२-३३)वक्ष्येते । पत्तिः प्रागेवोक्तः(श्लो-३।१४८) ॥

अथ रथनामान्याह-

**युद्धार्थे चक्रवद्याने शताङ्गः स्यन्दनो रथः ॥७५१॥**

१ युद्धं सङ्ग्रामोऽर्थः प्रयोजनमस्य युद्धार्थः, तत्र युद्धप्रयोजने, चक्रवद्याने चक्रयुक्तयाने[6], शतमित्यनेकोपलक्षणम्, शतं बहून्यङ्गान्यवयवा अस्य **शताङ्गः** । २ स्यन्दति(स्यन्दते) चलति **स्यन्दनः**, दन्त्यान्तस्थाद्यादिः । 'स्यदि चलने'( ), 'स्यन्दू प्रस्रवणे[7]'(भ्वा.उ.से) वा 'चलनशब्दा[र्था]कर्म-काद्युच्'३।२।१४८॥, 'अनुदात्तेतश्च हलादेः'३।२।१४९॥ इति युज् वा । ३ रमन्ते[8] क्रीडां कुर्वन्त्यनेन **रथः**, पुंस्त्री[9] । 'रमु क्रीडायाम्'(भ्वा.आ.अ.), 'हनिकुषिनीरमिकाशिभ्यः क्थन्' (उणा-१५९), 'अनुदात्तोपदेश-'६।४।३७॥ इत्यादिना-ऽनुनासिकलोपः । त्रीणि युद्धार्थरथस्य ॥७५१॥

**स क्रीडार्थः पुष्परथः**

१ स इति रथः, क्रीडार्थः क्रीडानिमित्तो न पुनः समरार्थः, असौ पुष्पे यात्रोत्सवादौ मङ्गल्यो रथः **पुष्परथः**, मूर्धन्योपधः । ''क्रीडारथः[11] पुष्परथः''[ ]इति तट्टीका, द्वे नामनी आह । एकं क्रीडारथस्य ।

**देवार्थस्तु मरुद्रथः ।**

१ देवाय अयं देवार्थः । 'चतुर्थी तदर्थ-'२।१।३६॥ इत्यादिना समासः । मरुतां देवानां रथो **मरुद्रथः** । ''देवार्थस्तु देवरथः[12]''[हलायुधकोश:२।४४६]इति हलायुधः । एकं देवनिमित्तरथस्य ।

**योग्यारथो वैनयिकः**

१ योग्यायै[13] शास्त्राभ्यासाय रथो **योग्यारथः** । २

---

१. '-क्ष्यते' इति१॥ २. '-रवो' इति३, '-रवुं' इति४॥ ३. 'तृभूवहिवसि-'(उणा-४०८)इत्युणादिगणे ॥ ४ 'इति' इति४॥ ५. एतत्स्थाने क्षीरस्वामी 'कित ज्ञाने' इति सूत्रं पठति । मैत्रेयश्च 'कि कित ज्ञाने' इति ॥ ६. '-के याने' इति३॥ ७. 'प्रश्र-' इति२.३॥ ८. 'स्रवणे' इति स्वामिमैत्रेयौ ॥ ९. 'रमन्ति' इति१.२॥ १०. 'स्त्रीपुं' इति४॥ ११. 'क्रीडार्थरथः' इति३॥ १२. 'देवतार्थो देवरथः' इति हलायुधकोशे, पृ.५१॥ १३. 'योग्याय' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विनयः शिक्षाप्रयोजनमस्य **वैनयिकः**। 'तदस्य प्रयोजनम्[1]' ५।१।१०९॥ इति ठक्, 'ठस्येकः'७।३।५०॥, 'किति च' ७।२।११८॥ इति वृद्धिः । ''योग्यारथो वैनयिकः''[हलायुधकोशः २।४४५॥]इति हलायुधः । ''द्वौ समौ''[ ]इति तद्व्याख्या । द्वे शास्त्राभ्यासरथस्य ॥

**अध्वरथः पारियानिकः[2]** ॥७५२॥

१ अध्वनि मार्गे गमनाय रथः अध्वरथः । परियानं प्रयोजनमस्य **पारियानिकः[3]** । 'तदस्य प्रयोजनम्'५।१।१०९॥ इति ठक् । अध्वन्योऽपि । ''अध्वन्यः पारियानिकः[4]'' [हलायुधकोशः २।४४५॥]इति हालयुधः । ''द्वौ समौ'' [ ]इति तट्टीका । एकं मार्गरथस्य ॥७५२॥

**कर्णीरथः प्रवहणं डयनं रथगर्भकः ।**

१ कर्णाः सन्त्येषु कर्णिनः स्कन्धाः, तेषु रथः **कर्णीरथः**, पुंस्कन्धवाह्यो रथ इत्यर्थः। 'अन्येषामपि-' ६।२।१३७॥ इति दीर्घः । कर्ण्यां चतुःकाष्ठ्यां स्थितो रथ इति वा । मिश्रास्तु-''कर्णसाध्या क्रिया श्रुतिरुपचारेण कर्णः, तद्योगात् कर्णी, मत्वर्थे इनिः, विशेषणसमासे, 'अन्येषामपि-'६।३।१३७॥ इति दीर्घः, रथस्य श्रुतिमात्रं हि तत्र, न तु परमार्थतो रथत्वम्, स्कन्धस्य कर्णसमीपत्वात् कर्णी स्कन्धः''[[5]]इति व्याख्यन् । ''श्रवश्रूजनानुष्ठितचारुवेषां कर्णीरथस्थां रघुवीरपत्नीम्''[रघुवंशम्, सर्गः-१४, श्लो-१३]इति रघुः । २ प्रोह्यते **प्रवहणम्** । 'वह प्रापणे' (भ्वा.उ.अ.), ल्युट् । 'कृत्यचः'८।४।२९॥ इति णत्वम् । प्रहयनमित्यपि, 'हय गतौ'(भ्वा.प.से.)इत्यस्य । ३ डीयते विहायसा गम्यतेऽनेन **डयनम्** । 'डीङ् विहायसा गतौ[6]' (भ्वा.दि.आ.से.), करणे ल्युट् । ४ रथस्य गर्भ इव **रथगर्भकः** । 'इवे प्रतिकृतौ'५।३।९६॥ इति कन् । चत्वारि पुरुषस्कन्धवाह्यरथस्य । विमानाख्ययानमेतत् । ''स्त्रीवह[7]नार्थमुपरि वस्त्राच्छादितस्य यानविशेषस्य''[ ]इति मिश्राः ॥

**अनस्तु शकटः**

१ अनिति प्राणित्यनेन **अनः**, क्लीबे । 'अन प्राणने'(अ.प.से), '-असुन्'(उणा-६२८)इत्यसुन् । २ शक्नोति भारं वोढुं **शकटः**, त्रिष्वयम् । ''शकटोऽस्त्री'' [अमरकोषः२।८।५२]इत्यमरः ।'शक्लृ शक्तौ'(स्वा.प.अ.), 'शकादिभ्योऽटन्'(उणा-५२१) । द्वे शकटस्य । 'गाडुं[8]' इति भाषा ॥

**अथ स्याद् गन्त्री कम्बलिवाह्यकम्** ॥७५३॥

१ गम्यतेऽनयो **गन्त्री** । गमेः ष्ट्रन्, षित्त्वाद् ङीष्[9] । गन्तृशब्दाद् 'ऋन्नेभ्यः-'४।१।५॥ इति ङीष्(ङीप्) वा । ''गन्त्रीः''[हलायुधकोशः २।४४४]इतीदन्तोऽपीति हलायुधः । ''अष्टौ शकटे''[ ]इति तट्टीका त्वभेदेनाऽऽह । २ कम्बलः सास्ना, तद्योगात् कम्बलिनो वृषास्तैर्वाह्यं वहनीयं कम्बलिवाह्यम्, स्वार्थे कनि **कम्बलिवाह्यकम्** । ''कम्बलो नागराजे[10] स्यात् सास्नाप्रावारयोरपि''[मेदिनकोशः, लान्तवर्गः, श्लो-६७]इति मेदिनिः । द्वे 'वहिलि[11]' इति ख्याताया: ॥७५३॥

**अथ काम्बलवास्त्राद्यास्तैस्तैः परिवृते रथे ।**

१-१ तैस्तैः कम्बलवस्त्रादिभिः परिवृते आच्छादिते रथे, कम्बलेनाऽऽवृतः परिवृतो रथः **काम्बलः** । वस्त्रेण परिवृतो रथः **वास्त्रः** । 'तेन परिवृतः[12]-'४।२।१०॥ इत्यण्, 'तद्धितेष्वचामादेः'७।२।११७॥ इति वृद्धिः । आदिशब्दाद् दौगू(कू)लाद्याः । कम्बलाच्छादितरथनामैकं काम्बलः, वस्त्राच्छादितरथनामैकं वास्त्रः ॥

**स पाण्डुकम्बली यः स्यात् संवीतः पाण्डुकम्बैलः** ॥७५४॥

१ यो रथः पाण्डुकम्बलैः 'दुलीचा' इत्यादिलोकभाषाप्रसिद्धैः[13] संवीतः, तन्नामेकं, पाण्डुना शुक्लेन कम्बलेन संवीतः **पाण्डुकम्बली** । 'पाण्डुकम्बलादिनिः'४।२।११॥। ''स्यात् पाण्डुकम्बलः श्वेतकम्बले च शिलान्तरे''[विश्वप्रकाशकोशः, लान्तवर्गः, श्लो-१५७]इति महेश्वरः । ''पाण्डुकम्बलशब्दो राजाऽऽस्तरणस्य वर्णकम्बलस्य वाचकः'' [काशिकावृत्तिः ४।२।११॥]इति वामनश्च ॥७५४॥

**स तु द्वैपो वैयाघ्रश्च यो वृतो द्वीपिचर्मणा ।**

---

१. 'प्रयोजनम्' इत्येवाष्टाध्याय्याम् ॥ २. '-यानकः' इति१.३॥ ३. '-यानकः' इति३.४॥ ४. '-नकः' इति३॥ ५. द्र. पदचन्द्रिका, भा-२, क्षत्रवर्गः, श्लो-५०६, पृ.५९३॥ ६. स्वामिनैव भ्वादौ 'डीङ् विहायसां गतौ' इति, दिवादौ 'डीङ् गतौ' इति चोक्तम् ॥ ७. 'स्त्रीवा-' इति४॥ ८. 'गाढुं' इति२, 'गाडूं' इति४॥ ९. 'ङीषि' इति३। १०. 'राजभागे' इति३॥ ११. '-ल' इति३॥ १२. 'परिवृतो रथः' इत्यष्टाध्याय्याम् ॥ १३. '-षाया प्रसि-' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१-२ यो रथो द्वीपिनो व्याघ्रस्य चर्मणावृत आच्छादितः, स **वैयाघ्रः** च कथ्यते द्वीपिनो विकारश्चर्म द्वैपम्, व्याघ्रस्य विकारो वैयाघ्रम् । उभयत्र 'प्राणिरजतादिभ्योऽञ्'४।३।१५४॥ इति प्राणिवाचिभ्यो रजतादिभ्यश्च षष्ठ्यन्तेभ्यो यथायोगं विकारावयवयोरर्थयोरञ्, 'न य्वाभ्याम्-'७।३।३॥इति वृद्धिनिषेधे ऐजागमश्च । द्वैपेन परिवृतो रथः वैयाघ्रेण परिवृतो रथ इत्यर्थे 'द्वैपवैयाघ्रादञ्' ४।२।१२॥ इति द्वैपवैयाघ्रशब्दाभ्यां परिवृतो रथ इति विषयेऽञ्, प्राग्दीव्यतीयस्याऽणोऽपवादः । यथाक्रममेकैकम् ॥

## रथाङ्गं रथपादोऽरिं चक्रम्

१ रथस्याऽङ्गं **रथाङ्गम्** । २ रथस्य पादो **रथपादः** । ३ अराः सन्त्यत्रेति **अरि,** क्लीबे । 'अत इनिठनौ' ५।२।११५॥ इतीनिः । अरिणी, अरीणि इत्यादि । ४ क्रियते तदिति **चक्रम्,** पुंक्लीबलिङ्गः । 'कृञः क्लिदेः क्वसश्च (कृञादिनां के द्वे[1])'(वा-६।१।१२॥)कप्रत्ययः, द्वित्वं च । चत्वारि 'पईडां[2]' इति ख्यातस्य ॥

## धारा पुनः प्रधिः ॥७५५॥
## नेमिः

१ ([3]ध्रियत इति) **धारा**, प्रान्तः प्रस्तावाच्चक्रस्य । २ प्रान्ते धीयत इति **प्रधिः**, पुंस्त्री । प्रपूर्वाद् धाञः[4] 'उपसर्गे घोः किः'३।३।९२॥ इति किः ॥७५५॥ ३ नयति रथमिति **नेमिः**, स्त्रीलिङ्गः । 'णीञ् प्रापणे'(भ्वा.उ.अ.), 'नियो मिः'(उणा-४८३)इति मिः । 'सर्वतोऽक्तिन्नर्थात्' (गणसू-४।१।४५॥)इति ङीषि नेमी च । त्रीणि चक्रधारायाः । 'पूंठि[5]' इति भाषा ॥

## अक्षाग्रकीले त्वणयाणी

१ अक्षस्य नाभिक्षेप्यस्य काष्ठस्य 'लोहरि' इति प्रसिद्धस्य अग्रे अन्ते बन्धार्थं कीलः **अक्षाग्रकीलः**, तत्र ।

''अग्रमालम्बने व्राते परिमाणे पलस्य च ।
प्रान्ते पुरस्तादधिके प्रधाने प्रथमोर्ध्वयोः ॥१॥''

[विश्वप्रकाशकोशः, रान्तवर्गः, श्लो-५३]इति महेश्वरः । २-३ अणति शब्दायते **अणिः** । 'अण शब्दे'(भ्वा.प.से.) अस्मादसौ '-इन्'(उणा-५५७, (दशपाद्युणा-१।४६॥)) इत्यौणादिक इन्, स च वा णित् । णित्पक्षे **आणिः** । स्त्रियां ङीषि आणी च । ''अणिरक्षाग्रकीलिका''[हलायुधकोशः२।४४८॥]इति हलायुधः । ''द्वौ समौ''[ ]इति तट्टीका । ''अणिराणिवदक्षाग्रकीले स्यादस्तिसीमयोः'' [विश्वप्रकाशकोशः, णान्तवर्गः, श्लो-२२]इति महेश्वरः । त्रीणि अक्षाग्रकीलस्य । 'विडलि' इति भाषा ॥

## नाभिस्तु पिण्डिका ।

१ नह्यन्तेऽपरे अवयवा अत्रेति **नाभिः**, स्त्रीलिङ्गः । 'नह(णह) बन्धने'(दि.उ.अ.), 'नहेर्भश्च(नहो भश्च)'(उणा-५६५)इतीञ्, भश्चान्तादेशः, उपधावृद्धिः । २ पिण्ड्यन्ते काष्ठान्यत्र पिण्डी । 'पिडि सङ्घाते'(भ्वा.आ.से), अधिकरणे घञ्, गौरादित्वाद् ङीष् । सा च रथचक्रमध्ये मण्डलाकारा यस्यां सर्वाणि काष्ठान्यासज्यन्ते । स्वार्थे कनि, 'केऽणः'७।४।१३॥ इति ह्रस्वत्वे च **पिण्डिका** । ''नाभिश्चक्रस्य पिण्डिका'' [हलायुधकोशः२।४४७॥]इति हलायुधः । ''कप्रत्ययाभावे पिण्डिः''[ ]इति तट्टीका । द्वे नाभेः । 'नाहि' इति भाषा ॥

## युगन्धरं कूबरं स्यात्

१ युगं [6]वोढृस्कन्धकाष्ठं धारयति **युगन्धरम्** । 'धृञ् धारणे'(भ्वा.उ.अ.), 'संज्ञायां भृतॄवृजि-'३।२।४६॥इति खच्, खित्त्वाद् मुम् । २ कवते शब्दायते **कूबरम्** । 'कुङ् शब्दे' (तु.आ.से.), 'कगृशृवृञतिभ्यो वरच्[7]'(उणा-२७९)इति बहुलवचनाद् वरच् दीर्घत्वं च । 'छित्वरच(छ)त्वर-'(उणा-२८१)इति वा वरचि साधुः । पुंक्ली. एतौ[8] । ''कुबरः''[9] [शब्दभेदप्रकाशः, श्लो-३८(४८)]अपीति शब्दप्रभेदः । ''कुं भूमिं वृणोत्याच्छादयति महत्त्वाद्वा । 'वृञ् आच्छादने[10]' (स्वा.उ.से.), अच्, 'अन्येषामपि-'६।३।१३७॥ इति दीर्घे कूबरः''[ ]इत्यन्ये[11] । द्वे 'कांगवा[12]' इति ख्यातस्य ॥

## युगमीशान्तबन्धनम् ॥७५६॥

---

१. 'द्वित्वप्रकरणे कृञादीनामिति वक्तव्यम्' इति सिद्धान्तकौमुद्याम् ॥ २. 'पइडा' इति३, 'पईडां' इति४॥ ३. कोष्ठान्तर्गतपाठः १.२प्रत्योर्नास्ति ॥ ४ 'धाञ्' इति३॥ ५. 'पूठि' इति३.४॥ ६. 'वोढारस्क-' इति३॥ ७ '-भ्यः ष्वरच्' इत्युणादिगणे ॥ ८. 'पुंक्लीबलिङ्गावेतौ' इति३॥ ९. 'कुवरः कूवरस्तथा' इति शब्दभेदप्रकाशे ॥ १०. 'वृञ् वरणे' इति क्षीरतरङ्गिण्यादयः ॥ ११. द्र. पदचन्द्रिका, भा-२, क्षत्त्रवर्गः, श्लो-५११, पृ.५९८॥, तत्र ''महत्त्वात् कुं भूमिं वृणोति आच्छादयति । पचाद्यच् (पा. ३।१।१३४॥) । अन्येषामपीति (पा. ६।३।१३७॥) दीर्घः । 'कूवरः' इत्यन्ये ॥'' इति दृश्यते ॥ १२. 'कागवा' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ युज्यते **युगम्**, पुंक्ली. । भावे घञ् । ''यानाद्यङ्गे युगः पुंसि''[अमरकोषः३।३।२४॥]इत्यमरः । ''युगस्तु रथसीराङ्गः(प्रशस्तरथसाराङ्गम्)''[विश्वलोचनकोशः, गान्तवर्गः, श्लो-२०]इति श्रीधरश्च । ईशान्ते 'ऊध' इति प्रसिद्धस्य, प्रान्ते बन्धनं बन्धोऽस्य ईशान्तबन्धनम् । एकं 'जूसर' इति ख्यातस्य ॥७५६॥

## युगकीलकस्तु[1] शम्या[2]

१ युगस्य कीलको **युगकीलकः**। २ शम्यते **शम्या**। 'शमु उपशमे'(दि.प.से.), 'पोरदुपधात्'३।१।९८॥ इति यत्, टाप् । द्वे 'समिलि[1]' इति ख्यातस्य ॥

## प्रासङ्गस्तु[1] युगान्तरम्[2] ।

१ प्रसज्यते वोढृस्कन्धे **प्रासङ्गः** ।'षञ्ज सङ्गे'(भ्वा.-प.अ.), कर्मणि घञ्, 'चजोः कु घिण्ण्यतोः'७।३।५२॥इति कुत्वम्, 'उपसर्गस्य घञ्यमनुष्ये[2] बहुलम्'६।३।१२२॥इति दीर्घः । २ द्वितीयं[3] युगं **युगान्तरम्** । यत्काष्ठं वत्सानां दमनकाले स्कन्धे आसज्यते । यन्मुनिः-''युगं द्वितीयं प्रासङ्गः'' [[4]]इति । एकं 'पंजाली' इति ख्यातायाः ॥

## अनुकर्षो[1] दार्वधःस्थम्

१ रथस्याऽधःस्थितं दारु, अनुगतेन स्वसम्बन्धेन चक्रेण कृतस्येति(कृष्यत इति) घञ्, **अनुकर्षः** । नकारान्तोऽप्ययम्, ''अनुकर्षा णा(ना)ऽक्षतलधरणदारु''[[5]]इति वोपालितात्[6] । ''अनुकर्षो रथस्याऽधःस्थित(-ते) दारुणि चेष्यते''[विश्वप्रकाशकोशः, षान्तवर्गः, श्लो-२८]इति महेश्वरः । एकं रथाधःस्थितदारुणः ।'पणछि' इति भाषा ॥

## धूर्वी[1] यानमुखं[2] च धूः[3] ॥७५७॥

१ धूर्वति हिनस्ति वोढृन् **धूर्वी** ।'धूर्व(धुर्वी) हिंसायाम्[7]'(भ्वा.प.से.), गौरादिः । २ यानस्य रथादेर्मुखमग्रं **यानमुखम्** । ३ धूर्वति हिनस्ति **धूः**, स्त्रीलिङ्गः ।'धूर्व (धुर्वी) हिंसायाम्[8]'(भ्वा.प.से.), 'भ्राजभास-'३।२।१७७॥इति क्विपि, 'र्वोरुपधायाः-'८।२।७६॥ इति दीर्घः, 'राल्लोपः'६।४।२१॥ इति वलोपः[8] । भागुरिमते टापि धुरा(धूरा) । त्रीणि 'धुरी[9]' इति ख्यातायाः ॥७५७॥

## रथगुप्तिस्तु[1] वरूथः[2]

१ रथस्य गोपनं **रथगुप्तिः** । 'गुपू रक्षणे'(भ्वा.-प.से.), 'स्त्रियां क्तिन्'३।३।९४॥ । २ वृण्वन्ति गुप्त्यर्थं रथमनेनेति **वरूथः** । 'वृञ् वरणे'(स्वा.उ.से.), 'जॄवृ[ञ्]-भ्यामूथन्'(उणा-१६३) । पुंनपुंसकोऽयम्[10] । ''रथगुप्तिर्वरूथो ना''[अमरकोषः२।८।५७॥]इत्यमरः । ''वरूथं रथगोपनम्''[हलायुधकोशः२।४४९॥]इति हलायुधः । ''द्वौ रथसन्नाहे''[ ]इति तट्टीका । द्वे[11] रथसन्नाहस्य । लोहमयी आवृत्तिः, 'खोलीउं[12] रथपाखरिउं[13]' इति भाषा ॥

## रथाङ्गानि त्वपस्कराः[1] ।

१ रथस्याऽङ्गानि अक्षयुगचक्रादीनि, स्वयं कीर्यते यथार्हं स्वस्वस्थाने निक्षिप्यते **अपस्कराः** । 'कॄ विक्षेपे'(तु.प.से.), 'ॠदोरप्'३।३।५७॥इत्यप्, 'अपस्करो रथाङ्गम्'६।१।१४९॥ इति सुटि साधुः । एकं सामान्येन रथाङ्गानाम् । ''चक्रादन्यानि रथस्याऽङ्गानि आरम्भकाणि रथाङ्गान्यपस्कराः''[ ]इति केचित् ॥

## शिबिका[1] याप्ययाने[2]

१ शिवं करोति, 'तत्करोति-'(वा-३।१।२६॥)इति ण्यन्ताद् ण्वुलि[14] 'प्रत्ययस्थात्-'७।३।४४॥ इतीत्वम्, **शिबिका** श्रेयस्करी । सैव वा (शिवैव) शिबिका, 'संज्ञायां कन्'५।३।७५॥ वा । २ याप्यस्य अशक्तस्य यानं **याप्ययानम्**, [तत्र] । द्वे 'पालखी सुखासन[15]' इत्यादेः । ''जम्पानम्''[[16]]इति गौडाः ॥

## अथ दोला[1] प्रेङ्खादिका[2] भवेत् ॥७५८॥

---

१. '-ले' इति३॥ २. '-घ्येषु' इति४॥ ३. '-य' इति४॥ ४. द्र. अम. क्षीर. २।८।५८॥, पृ.१८७॥, स्वोपज्ञटीका ३।७५७॥, पृ.१६७॥ ५. द्र. पदचन्द्रिका, भा-२, क्षत्त्रवर्गः, श्लो-५११, पृ.५९८॥, रामाश्रमी २।८।५७॥, पृ.३७२॥, तयोः 'अनुकर्षा नाक्षतदारु' इति दृश्यते ॥ ६. '-त्वात्' इति३॥ ७. 'उर्वी तुर्वी दुर्वी धुर्वी हिंसार्थाः' इति स्वामी, '-हिंसायाम्' इति मैत्रेयः, 'उर्वी तुर्वी थुर्वी दुर्वी धुर्वी हिंसार्थाः' इति सायणः ॥ ८. दीर्घे कृते वलोपो विचारणीयः, सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धत्वात् ॥ ९. 'धुरा' इति३॥ १०. 'पुंक्ली.' इति४॥ ११. 'द्वौ' इति१॥ १२. '-ओ' इति१॥ १३. १प्रतौ नास्ति, '-रीयो' इति३॥ १४. 'ण्वुल्' इति४॥ १५. '-ण' इति३॥ १६. द्र. स्वोपज्ञटीका ३।७५८॥, पृ.१६७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ दोलयति उत्क्षिपति **दोला** । 'दुल उत्क्षेपे'(चु.-उ.से.), चुरादि:, ततोऽच् । २ प्रेङ्ख्यते प्रेर्यते **प्रेङ्खा** । 'इखि गतौ'(भ्वा.प.से.), घञ्, प्रेङ्खः संहितासाम्यात्, 'गुरोश्च हलः' ३।३।१०३॥ इत्यकारे च प्रेङ्खा[1] । "दोला प्रेङ्खः पुमान् प्रेङ्खा निःश्रे[रधिरोह]णी"[[2]]इति रत्नकोषः । आदिना खट्वा-वाह्यादिदोला । इयं च वलिविधायानदोला (द्विविधा, प्रेङ्खा-दिदोला चेति) । उद्यानादिषु क्रीडार्थं रज्जुमयी, या स्थाना-न्तरसञ्चारणाय दारुदण्डिकापटादिसमुदायारब्धा(-बद्धा) मनुष्य-वाह्या च या, दोलाशब्दस्तत्र वर्तते । सामान्येन 'हीण्डोलउं पालणउं[3]' हीण्डोलाखाटप्रभृतीनां द्वे ॥७५८॥

## वैनीतकं[1] परम्परावाहनं शिबिकादिकम् ।

१ विनीतानामिदं याप्ययानादि वैनीतम् । 'तस्येदम्' ४।३।१२०॥इत्यण्, स्वार्थे कनि **वैनीतकम्,** पुंक्ली.[4] । वोढृभिः परम्परयाऽनुक्रमेण वाह्यते परम्परावाहनम् । वहेर्ण्यन्तात् कर्मणि ल्युट् । [शिबिका आदिरस्य शिबिकादिकम् । एकं परम्परा-वाहनस्य] ॥

## यानं[1] युग्यं[2] पत्रं[3] वाह्यं[4] वह्यं[5] वाहन[6]धोरणे[7] ॥७५९॥

१ [यान्त्यनेन **यानम्** । 'या प्रापणे'(अ.प.अ.), 'करणाधिकरणयोश्च'३।३।११७॥ इति करणे ल्युट्] । २ युज्यते[5] उपयुज्य[ते][6] इदं[7] गमनमिति[8] **युग्यम्** । 'युजिर् योगे'(रु.-उ.अ.), 'युग्यं च पत्रे'३।१।१२१॥ इति क्यपि निपातितः । ३ पतन्त्यनेन[10] **पत्रम्,** पुंक्ली. । 'पत्लृ पतने[11]'(भ्वा.प.अ.), 'दाम्नीशसु(शस)युयुज-'३।२।१८२॥ इति ष्ट्रन् । ४ वाह्यते प्रेर्यते **वाह्यम्** । 'ऋहलोर्ण्यत्'३।१।१२४॥ । ५ उह्यतेऽनेन **वह्यम्** । 'वह प्रापणे'(भ्वा.उ.अ.), 'वह्यं करणम्'३।१।१०२॥ इति[12] निपात्यते । ६ वहन्ति नयन्ति देशाद् देशान्तरं प्रापयन्ति द्रव्यमनेन **वाहनम्** । वहेर्णिजन्तात्[13] करणे[14] ल्युटि । 'वाहन-माहितात्'८।४।८॥ इति निर्देशाद् दीर्घत्वं वा । वाहयन्ति तदिति वा, वहेर्ण्यन्ताल्ल्युटि[15] वा । ७ धोरयति गतिचातुर्यं करोति **धोरणम्** । 'धोर(धोरृ) गतिचातुर्ये'(भ्वा.प.से.), नन्द्या-दित्वाल्ल्युः । सामान्येन सप्त 'प्रवहण' इति ख्यातस्य ॥७५९॥

## नियन्ता[1] प्राजिता[2] यन्ता[3] सूतः[4] सव्येष्ठृ[5]सारथी[6] ।
## दक्षिणस्थ[7]प्रवेतारौ[8] क्षत्ता[9] रथकुटुम्बिकः[10] ॥७६०॥

१ नियच्छति नियन्त्रयत्यश्वान् **नियन्ता** । 'यमु नियमने[16]'(भ्वा.प.अ.), तृच्प्रत्ययः । २ प्राजयति गम-यत्यश्वान् **प्राजिता** । प्रपूर्वाद् 'अज गतिक्षेपणयोः'(भ्वा. प.से.), अस्मात् तृच्, 'वलादेरार्धधातुके विकल्पः'(भाष्य-२।४।५६॥)इत्युक्तेः 'अजेर्व्यघञपोः' २।४।५६॥इति वीभावो न । ३ यच्छतीति **यन्ता** । तृच् । त्रयोऽपि ऋदन्ताः । ४ सवति(सुवति) प्रेर-यत्यश्वान् **सूतः** । 'षू[17] प्रेरणे'(तु.प.से.), 'गत्यर्थादकर्मकाच्च-(गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुह-जीर्यतिभ्यश्च)'३।४।७२॥इत्यादौ चकारस्याऽनुक्तसमुच्चयार्थ-त्वात् कर्तरि क्तः । ५ सव्ये तिष्ठति **सव्येष्ठृ (सव्येष्ठा)** । 'ष्ठा गतिनिवृत्तौ'(भ्वा.प.अ.), 'सव्ये स्थश्छन्दसि'(उणा-२५८)इति ऋन्, ङिच्च (डिच्च), 'स्थास्थिन्स्थृणाम्'(वा-८।३।९७॥)इति वक्तव्यात् षत्वम्, सप्तम्यलुक्[18] । सव्येष्ठारौ सव्येष्ठरः इत्यादिरूपाणि भवन्ति[19] । ६ सारयति गमयत्यश्वा-निति **सारथिः** । 'सृ गतौ'(भ्वा.प.अ.), हेतुमण्णिजन्तात् 'सारेरथिः[20]'(हैमोणा-६७०)इत्यथिप्रत्ययः । "सरथस्याऽपत्यं [सारयति वाहान् वा] सारथिः"[अम.क्षीर. २।८।६०॥]इति स्वामी । ७ दक्षिणे तिष्ठति **दक्षिणस्थः** । 'सुप-'३।२।४॥ इति कः, 'आतो लोप इटि च-'६।४।६४॥ इत्यालोपः । ८ प्राजति **प्रवेता** । 'अज गतिक्षेपणयोः[21]' (भ्वा.प.से.), 'ण्वुल्तृचौ'३।१।१३३॥ इति तृच्, 'वलादावार्धधातुके[22] वेष्यते' (भाष्यम्-२।४।५६॥ )इत्यजेर्वीभावः । ९ क्षदति संवृणोति **क्षत्ता** । 'क्षद संवरणे'( ), 'तृ[न्]तृचौ शंसिक्षदादि-' (उणा-२५०)इति तृच्, क्षदेः सौत्रात् 'नप्तृनेष्टृत्वष्टृ-'(उणा-२५२)आदिना[23] तृज्वा, अनिट्त्वं च । १० रथस्य कुटुम्बी वाहको **रथकुटुम्बिकः** । सादीत्यपि । दश सारथेः ॥७६०॥

---

१. 'प्रेङ्खा च' इति युक्तः प्रतिभाति ॥ २. द्र. टीकासर्वस्वम्, भा-२, २।८।५३॥, पृ.९७॥, पदचन्द्रिका, भा-२, क्षत्रवर्गः, श्लो-५०७, पृ.५९५॥, रामाश्रमी २।८।५३॥, पृ.३७०॥ ३. 'होडोलो पालणो' इति३, 'हींडोलौ पालणौ' इति४॥ ४. 'पुंक्लीबे' इति३.४॥ ५. 'युज्यन्ते' इति४॥ ६. 'उपयुज्यन्ते' इति४॥ ७. 'इह' इति२॥ ८. 'गमने' इति३.४॥ ९. 'इति' इति ३प्रतौ नास्ति ॥ १०. 'पतत्यनेन' इति३.४॥ ११. 'शल हुल पत्लृ गतौ' इति क्षीरतरङ्गिण्यादयः ॥ १२. इतोऽग्रे ४प्रतौ 'तट्टीकायां' इति दृश्यते ॥ १३. 'ण्यन्तात्' इति१, अत्र 'णिजन्तात्' इत्यनुपयुक्तः प्रतिभाति ॥ १४. ४प्रतौ नास्ति ॥ १५. '-ट्' इति४॥ १६. 'यम उपरमे' इति स्वामिसायणौ, 'यमु उपरमे' इति मैत्रेयः ॥ १७. 'षूञ्' इति३.४॥ १८. ४प्रतौ नास्ति ॥ १९. इतोऽग्रे ४प्रतौ 'सप्तम्यलुक्' इति दृश्यते ॥ २०. पाणिनीयसम्मतोणादिगणे 'सर्तेर्णिच्च'(उणा-५२९)इति सूत्रविद्यमानत्वादस्योल्लेखो विचारणीयः ॥ २१. 'गतौ क्षेपणे च' इति१॥ २२. 'चे-' इति४॥ २३. १प्रतौ नास्ति ॥

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

**रथारोहिणि तु रथी**

१ रथेऽवश्यं रोहति **रथरोही** । 'रुह प्ररोहे[१-२]'(भ्वा.-प.अ.), आवश्यके णिनिः, तत्र । २ युद्धार्थो रथोऽस्याऽस्ति **रथी** । 'अत इनिठनौ'५।२।११५॥इतीनिः । "रथिनः स्यन्दनारोहाः"[अमरकोषः२।८।६०॥]इत्यमरः । "रथे योद्धारः" [अम.क्षीर.२।८।६१॥]इति क्षीरस्वामी[२] । "पत्तिः[३] पदातिं रथिनं रथेशः"[रघुवंशम्, सर्गः-७, श्लो-३७]इति रघुः । द्वे रथयोद्धुः ॥

**रथिके रथिरो रथी ।**

१ रथोऽस्याऽस्ति **रथिकः** । 'अत इनिठनौ'५।२।-११५॥इति ठन्, 'ठस्येकः'७।३।५०॥ तत्र । २ रथोऽस्याऽस्ति **रथिरः** । 'मेघारथाभ्यामिरन्निरचौ'(वा-५।२।१०९॥) । ३ रथोऽस्याऽस्ति **रथी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः । त्रीणि रथिनः ॥

**अश्वारोहे त्वश्ववारः सादी च तुरगी च सः ॥७६१॥**

१ अश्वमारोहति **अश्वारोहः** । 'रुह प्ररोहे[४]'(भ्वा.प.-अ.), अच्, तत्र । २ अश्वं वृणोति वारयति वा **अश्ववारः** । 'वृञ् वरणे'(स्वा.उ.से.), 'वर निवारणे'( ) वा[५], अस्माण्णिजन्तात् 'कर्मण्यण्'३।२।१॥ । ३ सादयति श्रमयति **सादी** । 'षद्लृ विशरणादौ[५]'(तु.प.अ.), ग्रहादित्वाण्णिनिः । ४ तुरगोऽस्त्यस्य **तुरगी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः । चत्वारि अश्ववारस्य । 'असवार[६]' इति भाषा ॥७६१॥

**हस्त्यारोहे सादियन्तृमहामात्रनिषादिनः ।**

१ हस्तिनमारोहति **हस्त्यारोहः**, तत्र । २ सीदति **सादी** । ग्रहादित्वाण्णिनिः । ३ यच्छति **यन्ता** । 'यमु नियमने[७]'(भ्वा.प.अ.), 'ण्वुल्तृचौ'३।१।१३३॥ इति तृच् । ४ महती मात्राऽस्य **महामात्रः** । ५ निषीदति **निषादी** । 'षद्लृ विशरणादौ'(तु.प.अ.), [ग्रहादित्वाण्णिनिः], 'अत उपधायाः'७।२।११६॥ । पञ्च हस्त्यारोहयोद्धुः[८] ॥

**आधोरणा हस्तिपका गजाजीवेभपालकाः ॥७६२॥**

१ आधोरयन्ति गतिचातुर्यं कारयन्ति **आधोरणाः** । 'धोर(धोरृ) गतिचातुर्ये'(भ्वा.प.से.), हेतुमण्णिच्, नन्द्यादित्वाल्ल्युः । २ हस्तिनं पान्ति[९] रक्षन्ति[१०] हस्तिपाः । 'पा रक्षणे'(अ.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥ । ततः स्वार्थे कनि[११] **हस्तिपकाः** । ३ गजेभ्यो गजेषु वा आजीवन्ति **गजाजीवाः** । 'जीव प्राणधारणे'(भ्वा.प.से.), अच् । ४ इभं पालयन्ति[१२] **इभपालकाः** । 'पाल रक्षणे'(चु.उ.से.), णिजन्तः, ण्वुल् । मण्ठो[१३] देश्याम् । चत्वारि 'पीलवाण' इति ख्यातस्य ॥७६२॥

**योद्धारस्तु भटा योधाः**

१ युध्यन्ते **योद्धारः** । 'युध संप्रहारे[१४]'(दि.आ.अ.), तृच् । २ भटन्ति धारयन्ति आयुधानि **भटाः** । 'भट भृतौ' (भ्वा.प.से.), अच् । "भटन्ति काङ्क्षन्ति युद्धम्"[अम.क्षीर.२।८।६२॥]इति क्षीरस्वामी । ३ युध्यन्ते **योधाः** । 'युध संप्रहारे[१५]'(दि.आ.अ.), अच् । त्रीणि 'झूझार' इति ख्यातस्य ॥

**सेनारक्षास्तु सैनिकाः ।**

१ सेनां रक्षन्ति पालयन्ति **सेनारक्षाः** । 'रक्ष पालने'(भ्वा.प.से.), 'कर्मण्यण्'३।२।१॥ । २ सेनां रक्षन्ति **सैनिकाः** । 'रक्षति'४।४।३३॥ इत्यर्थे प्राग्वहतीयष्ठक्, 'ठस्येकः'७।३।५०॥, 'किति च'७।२।११८॥ इति वृद्धिः । द्वे 'पाहरू[१६]' इति ख्यातस्य ॥

**सेनायां ये समवेतास्ते सैन्याः सैनिका अपि ॥७६३॥**

१-२ ये हस्त्यश्वादयः सेनायां समवेतास्ते **सैन्याः**, **सैनिकाः** च प्रोच्यन्ते । सेनायां समवेताः[१७] सैन्याः । समवैत्यर्थे '[१८]परिषदो ण्यः'४।४।४४॥ इत्यनुवृत्तौ 'सेनाया वा' ४।४।४५॥ इति ण्यः । ठकि[१९] सैनिकः(सैनिकाः) । द्वे सेनायां ये मिलितास्तेषाम् ॥७६३॥

**ये सहस्रेण योद्धारस्ते साहस्राः सहस्रिणः ।**

---

१-२ 'रुह बीजजन्मनि' इति स्वामी, 'रुह जन्मनि प्रादुर्भावे' इति मैत्रेयः, 'रुह बीजजन्मनि प्रादुर्भावे च' इति सायणः ॥ २. 'स्वामी' इति४॥ ३. 'पत्तिं' इति३॥ ४. १प्रतौ नास्ति ॥ ५. 'विशरणगत्यवसादनेषु' इति३॥ ६. '-वर' इति३॥ ७. 'यमु उपरमे' इति स्वामिमैत्रेयौ, 'यम उपरमे' इति सायणः ॥ ८. '-योद्धस्य' इति३.४॥ ९. 'पाति' इति३॥ १०. 'रक्षति' इति२.३॥ ११. 'कनिः' इति४॥ १२. '-यति' इति३॥ १३. 'मंतो' इति२, द्र. देसीसद्दसंगहो छट्ठो वग्गो, श्लो-५७३, पृ.२१८॥, 'मंठो शठः' इति स्वोपज्ञदेशीशब्दसंग्रहवृत्तिः ॥ १४. 'संहारे' इति१॥ १५. तुलनीयोऽमरकोषः २।८।६१॥ १६. '-रु' इति२.३॥ १७. '-तां' इति३॥ १८. 'पा-' इति१.२.४॥ १९. 'ठञि' इति२.४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ सहस्रसङ्ख्येन गजादिना ये योद्धारस्ते सहस्रं[१] योद्धार: परें सन्त्येषां **साहस्रा:** । 'अण् च'५।२।१०३॥इत्यण् । २ 'तप:सहस्राभ्यां विनिनौ[३]'५।२।१०२॥ इति इनिप्रत्यये **सहस्रिण:** इति। ''बलिनो ये सहस्रेण साहस्रास्ते सहस्रिण:'' [अमरकोष:२।८।६२॥]इत्यमर:। द्वे सहस्रयोधिन: ॥

**छायाकरश्छत्रधार:**

१ छायामातपाभावं करोति **छायाकर:** ।'कृञो हेतु-ताच्छील्यानुलोम्येषु'३।२।२०॥इति ट: । २ छत्रं धरति **छत्र-धार:** । 'कर्मण्यण्'३।२।१॥ । द्वे छत्रधरस्य ॥

**पताकी वैजयन्तिक:[४] ॥७६४॥**

१ (पततीति[५] पताका)। 'पत्लृ पतने[६]'(भ्वा.प.से.), पिनाकादिर्बलाकादिर्वा आकप्रत्यये पताका । साऽस्याऽस्ति **पताकी** । शिखादित्वादिन् व्रीह्यादित्वाद्वा इन् मत्वर्थीय: । २ वैजयन्त्या चरति **वैजयन्तिक:** । 'चरति'४।४।८॥ इति ठक् । द्वे पताकाधरस्य ॥७६४॥

**परिधिस्थ: परिचर:[७]**

१ परिधौ सेनान्ते तिष्ठति[८] **परिधिस्थ:** । 'सुपि-' ३।२।४॥इति क: । २ परित: चरति **परिचर:** । 'चर गतौ' (भ्वा.प.से.), अच् । द्वे 'चउकीदार[९]' इति ख्यातस्य ॥

**आमुक्त: प्रतिमुक्तवत् ।**

**अपिनद्ध:[१०] पिनद्ध:**

१ आमुच्यते स्म **आमुक्त:** ।'मुच्लृ मोक्षणे'(तु.उ.-अ.), निष्ठा । २ प्रतिमुच्यते स्म **प्रतिमुक्त:** । निष्ठा । ३ अपिनह्यते स्म **अपिनद्ध:** ।'नह(णह) बन्धने'(दि.उ.अ.), निष्ठा, 'नहो ध:'८।२।३४॥ । ४ 'वष्टि भागुरिरल्लोपम्-' ( )इति पक्षे **पिनद्ध:** । चत्वारि सज्जीभूतस्य ॥

**अथ सन्नद्धो व्यूढकङ्कट: ॥७६५॥**

**दंशितो वर्मित: सज्ज:**

१ संनह्यते स्म **सन्नद्ध:** । 'नह(णह) बन्धने' (दि.उ.अ.), निष्ठा, 'नहो ध:'८।२।३४॥, 'झषस्तथो:-'८।२।-४०॥इति धत्वम्, 'झलां जश् झशि'८।४।५३॥ । २ व्यूढो धृत: कङ्कटोऽनेनेति **व्यूढकङ्कट:** ॥७६५॥ ३ दश्यते[११] स्म **दंशित:** । ''चुरादौ 'दशिर(दशि) दंशनस्पर्शनयो:[१२]'( ) इत्यत:[१३] क्ते दंशित:''[[१४]]इति मैत्रेय: । दंशनं दंश: । भावे घञ्, तत: 'तत्करोति-'(वा-३।१।२६॥)इति णिजन्तात् क्ते णिलोपे दंशित इति वा । ४ वर्मणा संनह्यत इति **वर्मित:** । 'सत्यापपाश-'३।१।२५॥इत्यादिना णिचि, 'णाविष्ठवत् प्राति-पदिकस्य'(वा-६।४।१५४॥)इतीष्ठवद्भावाट्टिलोप: । वर्म सञ्जातमस्येति, तारकादित्वादितज्वा । ५ निर्भय: सन् शत्रोरभि-मुखं सज्जति गच्छति **सज्ज:** । 'षस्ज[१५] गतौ'(भ्वा.प.से.), अच्, 'झलां जश्-'८।४।५३॥ इति सस्य दत्वे श्चुत्वे । पञ्च सन्नाहयुक्तस्य ॥

**सन्नाहो वर्म कङ्कट: ।**

**जगर: कवचं दंशस्तनुत्रं माठ्युरश्छद: ॥७६६॥**

१ सन्नह्यते **सन्नाह** । 'णह बन्धने'(दि.उ.अ.), कर्मणि घञ्, 'अत उपधाया:'७।२।११६॥ । २ वृणोति देहं **वर्म**, क्लीबे। 'वृञ् आच्छादने[१६]'(चु.उ.से.), '-वरणे'(स्वा.-उ.से.) वा, '-मनिन्'(उणा-५८४)इति मनिन् । ३ कङ्कयति परप्रहरणं व्यर्थतां नयति **कङ्कट:** । ककेर्गत्यर्थाण्ण्यन्ता[त्] 'शकादिभ्योऽटन्'(उणा-५२१)इत्यटन् । कं वायुं कटत्या-वृणोति वा । 'कटे वर्षावरणयो:'(भ्वा.प.से), अच्, पृषोदरादित्वाद् मलोप:[१७] । ४ जागर्ति **जगर:** । 'जागृ निद्राक्षये' (अ.प.से.), अच् । ''पृषोदरादित्वाद् ह्रस्वत्वम्''[अम. क्षीर.२।८।६५॥]इति स्वामी[१८][१९] । ''जगर: कङ्कटो यो[ग:] सन्नाह: स्यादुरश्छद:''[[२०]]इति वोपालित: । ५ कं वातं

१. '-स्र-' इति३.४॥ २. 'परं' इति३ ॥ ३. 'विनीनी' इत्यष्टाध्याय्याम् ॥ ४. तुलनीयोऽमरकोष:२।८।७१॥ ५. कोष्ठान्तर्गतपाठ ३.४प्रत्योर्नास्ति ॥ ६. 'शल हुल पत्लृ गतौ' इति क्षीरतरङ्गिण्यादय: ॥ ७. तुलनीयोऽमरकोष:२।८।६२॥ ८. '-तीति' इति३.४॥ ९. 'चौकी-' इति३.४॥ १०. '-द्धो' इति४॥ ११. 'दंश्यते' इति४॥ १२. 'दसि दर्शनदंशनयो:' इति क्षीरतरङ्गिणीमाधवीयधातुवृत्ती, 'दसि दर्शनहिंसयो:' इति धातुप्रदीप: ॥ १३. 'इत्यन्त:' इति३.४॥ १४. द्र. पदचन्द्रिका, भा-२, क्षत्त्रवर्ग:, श्लो-५१९, पृ.६०५॥ १५. 'षज्ज' इति३.४॥ १६. 'वृञ् आवरणे' इति क्षीरतरङ्गिण्यादय: ॥ १७. अत्र 'मलोप:' इत्यस्य म: मकारस्याऽलोपो लोपाभाव इत्यर्थ: कर्तव्य:, 'मकार:' इति वा पाठो युक्त: ॥ १८. 'क्षीरस्वामी' इति४॥ १९. क्षीरस्वामिकृताऽमरकोशटीकायाम्-''जागर्तेरचि ह्रस्वाज्जगर:'' इत्येव दृश्यते, २।८।६५॥, पृ.१८८॥, द्र. पदचन्द्रिका, भा-२, क्षत्त्रवर्ग, श्लो-५१८, पृ.६०५॥ २०. द्र. टीकासर्वस्वम्, भा-३, २।८।६५॥, पृ.१०६॥, पदचन्द्रिका, भा-२, क्षत्त्रवर्ग:, श्लो-५१८, पृ.६०५॥, रामाश्रमी २।८।६४॥, पृ.३७५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वञ्चयति शरीरसम्बन्धे गमयति **कवचम्**, पुंक्ली. । 'वञ्चु गतौ'(भ्वा.प.से.), मूलविभुजादित्वात् कः । ६ दंश्यते कायेन स्पृश्यते[1] **दंशः** । 'दशि दंशनस्पर्शनयोः'[2](चु.आ.से.), चुरादिः, घञि । ल्युटि दंशनमपि । ७ तनुं त्रायत इति **तनुत्रम्** । 'त्रेङ्(त्रैङ्) पालने'(भ्वा.आ.अ.), 'आतोऽनुपसर्गे कः' ३।२।३॥ । तनुत्राणमपि । ८ माठयति देहं माठिः, स्त्रीलिङ्गः, तृतीयवर्गद्वितीयोपधः । " 'मठ मदनिवासयोश्च'(भ्वा.प.से.), चकारात् स्थौल्ये"[हेमचन्द्राचार्यकृतधातुपारायणम्, भ्वादिः, धातुसं-२१५]इति धातुपारायणम् । भ्वादौ परस्मैपदी, ततो णिच्, 'अच इः'(उणा-५७८)इति इः, 'सर्वतोऽक्तिन्नर्थात्'(गणसू-४।१।४५॥)इति ङीषि **माठी** । ९ उरश्छाद्यतेऽनेन **उरश्छदः** । 'छद अपवारणे' (चु.उ.से.), 'पुंसि संज्ञायाम्-'३।३।११८॥ इति घः, 'छादेर्घे-'६।४।९६॥ इति ह्रस्वः । त्वक्त्रमपि । नव कवचस्य ॥७६६॥

## निचोलकः स्यात् कूर्पासो वारबाणश्च कञ्चुकः ।

१ निचुल्यते निचोलः । चुलिः सौत्रः, ततो घञ्, स्वार्थे कनि **निचोलकः** । न्युपसर्गाभावे चोलकः । यद् हारावली-"चोलको वारबाणः[3] स्यात्"[हारावली, पादावधिः, श्लो-९७]इति । २ कुरति **कूर्पासः**, षष्ठस्वरादिः । 'कुर छेदने'[4](तु.प.से.), पृषोदरादिः । ३ बाणं वारयति **वारबाणः** । मयूरव्यंसकादित्वात् 'कर्मण्यण्'३।२।१॥ । वारमाच्छादकं वानमस्येति वा । 'पूर्वपदात् संज्ञायाम्-'८।४।३॥ इति णत्वम् । "वारबाणस्तु कूर्पासे कवचेऽपि च"[अनेकार्थसङ्ग्रहः ४।८८]इति हैमानेकार्थः । ४ कच्यते बध्यते **कञ्चुकः** । 'कचि काचि दीप्तिबन्धनयोः'[5](भ्वा.आ.से.), बाहुलकादुकप्रत्ययः । "कञ्चुकः कवचे वारबाणे[6] निर्मोकचोलके"[विश्वलोचनकोशः, कान्तवर्गः, श्लो-४३]इति श्रीधरः । कवचे सन्नाहे यथा-"बलानि शूराणि घनाश्च कञ्चुकाः"[ ][7] । वारबाणे नृनिचोले यथा-"अन्तः कञ्चुकिकञ्चुकस्य विशति त्रासादसौ वामनः"[ ] । निर्मोकः सर्पकञ्चुलिका, चोलकः स्त्रीकञ्चुलिका, उभयत्र यथा-

"आभोगिनौ मण्डलिनौ तत्क्षणोन्मुक्तकञ्चुकौ ।
वरमाशीविषौ स्पष्टौ (स्पृष्टौ) न तु तन्व्याः पयोधरौ ॥१॥"

[ ][8]इति । पुंक्ली. एतौ । चत्वारि 'सिलह' इति ख्यातस्य । 'लबाचुंकबाहि'[9] इति भाषान्तरम् ॥

## सारसनं त्वधिकाङ्गं हृदि धार्यं सकञ्चुकैः ॥७६७॥

१ यत् स कञ्चुकैः 'सिलहडगली' इति लोकभाषाप्रसिद्धियुक्तैः[10] हृदि धार्यते तत् सारं बलमादीयते दीप्यते वाऽनेन **सारसनम्** । 'अस गतिदीप्त्यादानेषु'(भ्वा.उ.से.), करणे ल्युट्, शकन्ध्वादित्वात् पररूपत्वम् । "सारसनं मेखलायां[11] वस्त्रे(मेखलायामुरस्त्रे) च[12] तनुत्रिणाम्"[विश्वप्रकाशकोशः, नान्तवर्गः, श्लो-१७२]इति विश्वः । २ अधिकमध्यारूढमङ्गमनेन **अधिकाङ्गम्** । अङ्गादधिकमिति[13] वा । "अधिकमङ्गति"[अम.क्षीर.२।८।६४॥]इति स्वामी । "अधियाङ्गम्"[ ]इति "अन्तस्थाद्यमध्यः"[ ]इत्यन्ये । यन्मुनिः-"अधियाङ्गं सारसनम्"[ ]इति । द्वे सारसनस्य । 'च्यार अहीना' इति भाषा ॥७६७॥

## शिरस्त्राणे तु शीर्षण्यं शिरस्कं शीर्षकं च तत् ।

१ शिरस्त्रायतेऽनेन[14] **शिरस्त्राणम्** । 'त्रेङ् (त्रैङ्) पालने'(भ्वा.आ.अ.), करणे ल्युट्, 'आदेचः-'६।१।४५॥ इत्यात्वम्, तत्र । २ शिरसे[15] हितं **शीर्षण्यम्** । शिरःशब्दात् 'शरीरावयवाद्यत्'५।१।६॥, शीर्षन्[16] '-तद्धिते'६।१।६१॥ इति शिरसः शीर्षन्नादेशः, 'ये चाभावकर्मणोः'६।४।१६८॥ इति प्रकृतिभावः । ३-४ शिरसः शीर्षस्य च प्रतिकृति **शिरस्कम्**, **शीर्षकम्** । 'इवे प्रतिकृतौ'५।३।९६॥ इति । शीर्षे कं सुखमस्माद्वा । शीर्षमारोहति प्रातिपदिकाद्धात्वर्थणिजन्ताद् ण्वुल् । शीर्षोपरिवर्तित्वात् शीर्षकमिवेति वा । खोलमपि । चत्वारि 'टोप' इति ख्यातस्य ॥

## नागोदमुदरत्राणम्

१. ४प्रतौ नास्ति ॥ २. 'दसि दर्शनदंशनयोः' इति स्वामिसायणौ, 'दसि दर्शनहिंसयोः' इति मैत्रेयः ॥ ३. हारावल्याम्-'बाणवारः' इति दृश्यते, पृ.४०६॥ ४. क्षीरतरङ्गिण्यादौ शब्दार्थककुरधातुर्दृश्यते ॥ ५. सायणसम्मतोऽयं धातुपाठः, 'कचि दीप्तिबन्धनयोः' इति स्वामिमैत्रेयौ ॥ ६. 'बाणवारे' इति विश्वलोचनकोशे ॥ ७-८. द्र. अनेकार्थकैरवाकरकौमुदीटीका, भा-२, ३।१४॥, पृ.७॥ ९. 'लबाइ-' इति३.४॥ १०. '-द्धयुक्तैः' इति३॥ ११. इतोऽग्रे ४प्रतौ 'तथा' इति दृश्यते ॥ १२. ४प्रतौ नास्ति ॥ १३. स्वामिकृताऽमरकोषटीकायाम्-"अवि(धि)कमङ्गादधिकाङ्गः" इति दृश्यते, २।८।६४॥, पृ.१८८॥ १४. '-नेति' इति३॥ १५. 'शिरसि' इति१॥ १६. अधिकोऽयं प्रतिभाति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ नह्यते जठरोपरि **नागोदम्** । पृषोदरादित्वात् कुमुदादित्वाद्वा साधुः । २ उदरं त्रायतेऽनेन **उदरत्राणम्** । करणे ल्युट्[1] । द्वे उदरत्राणस्य । 'पेटी' इति भाषा ॥

**जङ्घात्राणं तु मत्कुणम् ॥७६८॥**

१ जङ्घे त्रायतेऽनेन **जङ्घात्राणम्** । करणे ल्युट् । २ माद्यति हृष्यन्त्यनेन **मत्कुणम्** । पृषोदरादित्वात् साधुः[2] । चतुर्थवर्गाद्यकवर्गाद्यपञ्चमस्वरमध्यः । द्वे जङ्घात्राणस्य । 'रागरङ्गावलि[3]' इति भाषा ॥७६८॥

**बाहुत्राणं बाहुलं स्यात्**

१ बाहू त्रायतेऽनेन **बाहुत्राणम्** । २ बाहुं लाति **बाहुलम्** । 'ला आदाने'(अ.प.अ.), 'आतोऽनुपसर्गे कः' ३।२।३॥ । द्वे बाहुत्राणस्य । 'दस्ताना हाथला' इति भाषा ॥

**जालिका त्वङ्गरक्षणी ।**
**जालप्रायाऽऽयसी स्यात्**

१ जालयति अपवारयति शस्त्राघातं **जालिका** । 'जल अपवारणे'(चु.उ.से.), ण्वुल्, टाप्, 'प्रत्ययस्थात्-' ७।३।४४॥ इतीत्वम् । २ अङ्गं रक्ष्यतेऽनया **अङ्गरक्षणी** । 'रक्ष पालने'(भ्वा.प.से.), करणे ल्युट्, गौरादिः । ३ जाल-**प्राया** जालसदृशी । ४ अयसो लोहस्य विकार **आयसी** । 'तस्येदम्'४।३।१२०॥इत्यण्, 'टिड्ढाणञ्'४।१।१५॥इति ङीप् (ङीप्) । चत्वारि 'जरहिं[4]' इति ख्यातायाः ॥

**आयुधीयः शस्त्रजीविनि ॥७६९॥**
**काण्डपृष्ठायुधिकौ च**

१ आयुधेन जीवति **आयुधीयः** । 'आयुधात् छ च[5]'४।४।१४॥इति छः, छस्य ईयादेशः । २ शस्त्रेण जीवति **शस्त्रजीवी** । ग्रहादित्वाण्णिनिः, तत्र ॥७६९॥ ३ काण्डा-नीत्यायुधमात्रोपलक्षणम्, काण्डानि पृष्ठेऽस्य **काण्डपृष्ठः** । यद्वा स्पृष्टं गृहीतं काण्डमनेन । स्पर्शपूर्वकत्वाद् ग्रहणस्य धातूनामेनकार्थत्वाद्वा स्पृशिर्वर्जने पापे (स्पृशिर्वर्तनोपाये) वर्तते । आहिताग्न्यादित्वात् परनिपातः । ४ आयुधेन जीवति **आयुधिकः** । 'आयुधात् छ च'४।४।१४॥ इति चकारात् ठक्[7] (ठन्), 'ठस्येकः'७।३।५०॥, 'किति च'७।२।११८॥, 'यस्येति च'६।४।१४८॥ । चत्वारि सामान्येन आयुधधरस्य । 'तरकसंबंध[8]' इति भाषा ॥

**तुल्यौ प्रासिककौन्तिकौ ।**

१ प्रासः प्रहरणमस्य **प्रासिकः** । २ कुन्तः प्रहरण-मस्य **कौन्तिकः** । उभयत्र 'तदस्य प्रहरणम्'४।४।५७॥ इति ठक् । द्वे भल्लधरस्य ॥

**पारश्वधिकस्तु पारश्वधः परश्वधायुधः ॥७७०॥**

१-२ परश्वधः प्रहरणमस्य **पारश्वधिकः, पारश्वधः** । 'परश्वधाट्ठञ् च'४।४।५८॥ इति ठञ्, चकाराण्णः । ३ परश्वध आयुधमस्य **परश्वधायुधः** । त्रयोऽपि तालव्य-दन्त्यौष्ठ[10]मध्याः । त्रीणि 'फरसीधर' इति ख्यातस्य ॥७७०॥

**स्युर्नैस्त्रिंशिकशाक्तीकयाष्टीकास्तत्तदायुधाः ।**

१ निस्त्रिंशः प्रहरणमस्य **नैस्त्रिंशिकः** । 'तदस्य[9] प्रहरणम्'४।४।५७॥ इति ठक् । २-३ शक्तिः प्रहरणमस्य **शाक्तीकः**, यष्टिः प्रहरणमस्य **याष्टीकः** । 'शक्तियष्ट्योरी-कक्'४।४।५९॥ इतीकक्, उभयत्र 'किति च'७।२।११८॥ इति वृद्धिः । तत्तदायुधं येषां ते तत्तदायुधाः । क्रमेणैकेकं खड्गधरशक्तिधरदण्डधराणाम् ॥

**तूणी धनुर्भृद् धानुष्कः स्यात्**

१ तूणमस्त्यस्य **तूणी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः । एवं निषङ्ग्यपि । २ धनुर्बिभर्त्ति **धनुर्भृत्**, क्विबन्तः । यौगिकत्वाद् धनुर्धरः । ३ धनुः प्रहरणमस्य **धानुष्कः** । 'तदस्य प्रहरणम्'४।४।५७॥ इति ठक्, 'इसु-सुक्तान्तात् कः'७।३।५१॥, 'किति च'७।२।११८॥ इति वृद्धिः । त्रीणि धनुर्धरस्य ॥

**काण्डीरस्तु काण्डवान् ॥७७१॥**

१ काण्डानि बाणाः सन्त्यस्य **काण्डीरः** । 'काण्डा-ण्डादीरन्नीरचौ'५।२।१११॥इति ईरन् । २ काण्डानि सन्त्यस्य **काण्डवान्** । 'तदस्यास्ति-'५।२।११५॥इति मतुप्, 'मादुप-धायाः-'८।२।९॥ इति वत्वम् । द्वे तीरदारस्य ॥७७१॥

---

१. 'करणे ल्युट्' इति ३प्रतौ नास्ति ॥ २. इतोऽग्रे ३.४प्रत्योः 'मदी हर्षे' इति दृश्यते ॥ ३. '-वली' इति३, '-बलि' इति४॥ ४. 'जिरहि' इति१॥ ५. 'भाषायाः' इति३.४॥ ६. ४प्रतौ नास्ति ॥ ७. 'ठः' इति३॥ ८. '-सबंध' इति१.४॥ ९. नाऽस्त्यष्टाध्याय्याम् ॥ १०. '-न्त्योष्ठ-' इति३.४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**कृतहस्तः कृतपुङ्खः सुप्रयुक्तशरो हि यः ।**

१ कृतोऽभ्यस्तो हस्तो यस्य स **कृतहस्तः** । २ साध्यसाधनक्षमत्वात् कृताः पुङ्खा अनेन **कृतपुङ्खः** । ३ सुष्ठु प्रयुक्तो व्यापारितः शरो बाणोऽनेन सुप्रयुक्तशरः । द्वे कृतहस्तस्य । 'भली परिइं बाणमूंकइं' इति भाषा ॥

**शीघ्रवेधी लघुहस्तः**

१ शीघ्रं त्वरितं लक्ष्यं वेधयति शीघ्रवेधी । ग्रहादित्वाण्णिनिः । लघुर्लाघवान्वितो हस्तोऽस्य **लघुहस्तः** । एकं शीघ्रवेधिनः ॥

**अपराद्धेषुस्तु लक्ष्यतः ॥७७२॥**

**च्युतेषुः**

१ अपराद्धा अप्राप्तवेध्या इषवो बाणा अस्य **अपराद्धेषुः** । लक्ष्याच्च्युतो भ्रष्टो बाणः । एकं लक्ष्याद् भ्रष्टबाणस्य ॥७७२॥

**दूरवेधी तु दूरापाती**

१ दूराद् वेधयति लक्ष्यं भिनत्ति **दूरवेधी** । णिनिः । २ दूरादापातयति वेध्यं **दूरापाती** । ग्रहादित्वाण्णिनिः । द्वे दूरवेधिनः ॥

**आयुधं पुनः ।**

**हेतिः प्रहरणं शस्त्रमस्त्रम्**

१ आयुध्यन्तेऽनेन **आयुधम्** । 'युध संप्रहारे' (दि.आ.अ.), 'स्थाम्ना(स्ना)पाव्यधिहनियुध्यर्थं घञर्थे कविधानम्'(वा-३।३।५८॥)। २ हन्यतेऽनया **हेतिः**, स्त्रीलिङ्गः । 'हन्(हन) हिंसागत्योः'(अ.प.अ.), 'ऊतियूति-[जूतिसाति]हेति-'३।३।९७॥ इति साधुः । ३ प्रह्रियतेऽनेन **प्रहरणम्** । 'हृञ् हरणे'(भ्वा.उ.से.), करणे ल्युट् । ४ शस्यतेऽनेन **शस्त्रम्**, स्त्रीक्ली. । 'शसु हिंसायाम्' (भ्वा.उ.से.), 'दाम्नीशसु(शस)युयुज-'३।२।१८२॥ इति ष्ट्रन्। ५ अस्यते क्षिप्यते **अस्त्रम्**। 'असु क्षेपणे'(दि.-प.से.), औणादिकः त्रन् । "शस्त्रास्त्रैर्बहुधा मुक्तैः"[ ] इत्यादिदर्शनात् शस्त्रास्त्रयोः कश्चिदभेदमाह, येन करधृतेन हन्यते तच्छस्त्रं खड्गादि, येन क्षिप्तेन हन्यते तदस्त्रं काण्डादि । पञ्च सामान्येन शस्त्रस्य ॥

**तच्च चतुर्विधम् ॥७७३॥**

तदायुधं पाणिमुक्तादिभेदाच्चतुर्विधं चतुष्प्रकारम् ॥७७३॥
चातुर्विध्यमेव दर्शयति-

**मुक्तं द्विधा पाणियन्त्रमुक्तं शक्तिशरादिकम् ।**

१ मुच्यते स्मेति मुक्तम्, द्विधा द्विप्रकारम्, क्रमाद् यथा-**पाणिमुक्तं** शक्तिप्रभृतिकम्१। २ **यन्त्रमुक्तं** शरादिकम्२॥

**अमुक्तं शस्त्रिकादि स्याद् यष्ट्याद्यं तु द्वयात्मकम् ॥७७४॥**

३ **अमुक्तं** हस्तस्थितमेव, यथा शस्त्रिकादि३। ४ द्वयात्मकमिति, **मुक्तामुक्तात्मकम्**, यथा-यष्ट्याद्यम्४।

"मुक्तामुक्त१ममुक्तं२ करमुक्तं३ यन्त्रमुक्तं४ च ॥
शक्त्यादिपाणिमुक्तं१ स्यादमुक्तं क्षुरिकादिकम्२।
मुक्तामुक्तं च३ यष्ट्यादि यन्त्रमुक्तं शरादिकम्४ ॥१॥"

[हलायुधकोशः २।४६२-३॥]इति हलायुधः ॥७७४॥

**धनुश्चापोऽस्त्रमिष्वासः कोदण्डं धन्व कार्मुकम् ।**

**द्रुणाऽऽसौ**

१ 'धन धान्ये'(जु.प.से.), धातूनामनेकार्थत्वाद् धारणार्थः, धनन्ति दधति (दधन्ति दधाति) शरक्षेपणायेदमिति **धनुः**, पुंक्ली. । 'धनर्त्तिचक्षिङ्पृवपि-'( )इत्युस् । धनुषौ, धनुषः इति पुंसि । धनुषी, धनूंषि इति क्लीबे । 'भृमृतृशी-'(उणा-७)इत्यादिना उप्रत्यये धनुरुकारान्तोऽपि, अयमपि पुंक्ली. । 'कृषिचमितनिधनिसर्जिखर्जिभ्य ऊः' (उणा-८१)इत्यूप्रत्यये धनूः स्त्रीलिङ्गोऽपि । "शराचापौ धनूः स्त्री स्यात्"[त्रिकाण्डशेषः २।८।५०॥]इति त्रिकाण्डशेषः। २ 'चप सान्त्वने'(भ्वा.प.से.), पचाद्यच् । चपो

---

१. 'परिइ' इति१, 'परें' इति४॥ २. 'बां-' इति२॥ ३. 'मुके' इति३, 'मूंकै' इति४॥ ४ 'लक्षतः' इति१.३॥ ५. 'लक्षं' इति३॥ ६. 'घञर्थे कविधानं स्थास्नापाव्यधिहनियुध्यर्थम्' इति वार्तिकस्वरूपम् ॥ ७ 'स्त्रीलिङ्गः' इति२॥ ८. द्र. टीकासर्वस्वम्, भा-३, २।८।८३॥, पृ.१२०॥ ९. '-धमेव' इति४॥ १०. 'मुष्ट्याद्यम्' इति१.२॥ ११. 'क्षुरादिकम्' इति हलायुधकोशे, २।४६३॥, पृ.५३॥, तत्र 'क्षुरकादिकम्' इति पाठान्तरम् ॥ १२. '-ङ्गेऽपि' इति३॥ १३. 'शरावापो धनुः' इति त्रिकाण्डशेषे, पृ.३००॥ १४. द्र. टीकासर्वस्वम्, भा-३, २।८।८३॥, पृ.१२१॥, पदचन्द्रिका, भा-२, क्षत्रवर्गः, श्लो-५३७, पृ.६१९॥, रामाश्रमी २।८।८३॥, पृ.३८२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वंशभेदः, तस्य विकारः **चापः**, पुंक्ली. । 'अवयवे च प्राण्यौ(ण्यो)षधिवृक्षेभ्यः'४।३।१३५॥ इत्यण् । ३ अस्यन्ते बाणा अनेन **अस्त्रम्** । 'असु क्षेपणे'(दि.प.से.), '-ष्ट्रन्' (उणा-५९८)इति ष्ट्रन् । ४ इषून् बाणानस्यति **इष्वासः**। 'कर्मण्यण्'३।२।१॥ । शरासनमपि । ५ कोपाद् दण्डयत्यनेन **कोदण्डम्** । पृषोदरादिः, पुंक्ली. एतौ । ''कौति वायुना शब्दायते, 'कु शब्दे'(अ.प.अ.), 'अन्येभ्योऽपि दृश्यते' ३।२।७५॥इति विच्, कोशब्देन वंशः, स दण्डोऽस्येति वा कोदण्डः'[[1]]इत्यन्ये । ६ धनतीति **धन्व**[2] । धनेर्गत्यर्थात् 'अन्येभ्योऽपि दृश्यन्ते'( )इति क्वनिपि धन्व, क्लीबे । ''धन्वा तु मरुदेशे ना क्लीबे(क्लीबं) चापे स्थलेऽपि च'' [मेदिनीकोशः, नान्तवर्गः, श्लो-७८]इति मेदिनिः । धन्वनी, धन्वानि इत्यादि । ७ कर्मणे प्रभवति **कार्मुकम्** । तस्मै प्रभवति इत्यर्थे 'कर्मण उकञ्'५।१।१०३॥, शकन्ध्वादिः । ८ द्रुणति हिनस्ति **द्रुणम्** । 'द्रुण हिंसायाम्'[3](तु.प.से), 'इगुपध-'३।१।१३५॥इति कः । द्रवति गच्छति शरोऽनेनेति[4] वा । 'द्रु गतौ'(भ्वा.प.अ.), 'द्रोर्वा'(हैमोणा-१८४)इति किद् णः । ९ अस्यन्ते बाणा अनेनेति **आसः**, पुंक्लीबलिङ्गः । 'असु क्षेपणे'(दि.प.से.), 'हलश्च'३।३।१२१॥ इति घञ्, 'अत उपधायाः'७।२।११६॥ । नव धनुषः ॥

## लस्तकोऽस्यान्तः

१ अस्य धनुषोऽन्तर् मध्यं ग्रहणस्थानमिति यावत्, लस्यते करेण श्लिष्यते, लसति श्लिष्यति करोऽत्रेति वा **लस्तकः** । 'लस श्लेषणक्रीडनयोः'(भ्वा.प.से.), कर्मणि क्तः[5], ततः स्वार्थे कन् । 'हसिमृग्रिण्-'(उणा-३६६)इत्यादिना बाहुलकात् तः, ततः कन् वा । ''लस्तकस्तु धनुर्मध्यम्'' [अमरकोषः२।८।८५॥]इत्यमरः । एकं धनुर्मध्यस्य । 'मूंठि' इति भाषा ॥

## अग्रं त्वर्तिरटन्यपि ॥७७५॥

१ अस्य धनुषोऽग्रं कोटिः, अर्यतेऽनया **अर्तिः** । 'ऋ गतौ'(जु.प.अ.) । २ अटत्यनया अटनिः । 'अट गतौ' (भ्वा.प.से.), बाहुलकाद् '-अशव(अश्यवि)तृभ्योऽनिः' (उणा-२५९)इत्यनिः, 'कृदिकारात्-'(गणसू-४।१।४५॥) इति ङीषि **अटनी** । द्वे धनुःप्रान्तस्य ॥७७५॥

## मौर्वी जीवा गुणो गव्या शिञ्जा बाणासनं द्रुणा । शिञ्जिनी ज्या च

१ मूर्वायास्तृणविशेषस्य विकारो **मौर्वी** । 'अवयवे च प्राण्यौ(ण्यो)षधिवृक्षेभ्यः'४।३।१३५॥इत्यण्, 'टिड्ढा-णञ्-'४।१।१५॥इति ङीष्(ङीप्) । ''मूर्वी (मुर्वी) बन्धने'(भ्वा.प.से.), 'गुरोश्च-'३।३।१०३॥ इत्यकारप्रत्ययः मूर्वा, 'तस्य विकारः'४।३।१३४॥इत्यणि ङीषि(ङीपि) च मौर्वी''[माधवीयधातुवृत्तिः, भ्वादिगणः, धातुसं-३७२]इति माधवः[6]। २ जीवत्यनया **जीवा**। 'जीव प्राणधारणे'(भ्वा.-प.से.), बाहुलकाद् घञ् । ३ गुण्यतेऽभ्यस्यते **गुणः** । 'गुण अभ्यासे'[7](चु.उ.से.), घञ् । ४ गोभ्यो बाणेभ्यो हिता **गव्या**, स्त्रीक्ली. । 'उगवादिभ्यो यत्'५।१।२॥ इति यत् । ५ शिङ्क्ते[8]ऽवश्यं शब्दं करोति **शिञ्जा** । 'शिजि[9] अव्यक्ते शब्दे'(अ.आ.से.), पचाद्यच्, 'गुरोश्च हलः'३।३।१०३॥ इत्यकारो वा, ततष्टाप् । ६ बाणा अस्यन्ते[10]ऽनेन **बाणासनम्**। 'असु क्षेपणे'(दि.प.से.), करणे ल्युट् । ७ द्रुणति हिनस्ति **द्रुणा** । 'द्रुण हिंसागतिकौटिल्येषु'(तु.प.से.), इगुपधत्वात् कः, ततष्टाप् । ८ शिङ्क्ते अवश्यं शब्दं करोति **शिञ्जिनी** । 'शिजि अव्यक्ते शब्दे'(अ.आ.से.), तालव्यादिः, आवश्यके णिनिः । ९ जिनाति बलवदपि धनुरबलतां यात्यनया **ज्या** । 'ज्या वयोहानौ'(क्र्या.प.अ.), भिदा-दित्वादङ् टाप् । नव 'पणिछि'[11] इति ख्यातायाः ॥

## गोधा तु तलं ज्याघातवारणम् ॥७७६॥

१ गुध्यते परिवेष्ट्यतेऽनया **गोधा** । 'गुध परिवेष्टने'(दि.प.से.), भिदादित्वादङ् ततष्टाप् । गुध्यति प्रकोष्ठं परिवेष्टयतीति[12], पचाद्यच् वा । गोधा स्त्री, तलं क्लीबम् । ''गोधा तलनिहाकयोः''[मेदिनीकोशः, धान्तवर्गः,

१. द्र. पदचन्द्रिका, भा-२, क्षत्रवर्गः, श्लो-५३७, पृ.६२०॥ २. 'धनतीति धन्व' इति १.२प्रत्योर्नास्ति ॥ ३. 'द्रुण हिंसागतिकौटिल्येषु' इति क्षीरतरङ्गिण्यादयः ॥ ४ '-नेन' इति३॥ ५. आगमशास्त्रस्याऽनित्यत्वान्नेट् ॥ ६. माधवीयधातुवृत्तौ-''मूर्वा-'गुरोश्च' इत्यकारप्रत्ययः । मौर्वी-'तस्य विकारः' इत्यणि ङीप् ।'' इति दृश्यते, भ्वादिः, धातुसं-३७२, पृ.१५६॥ ७ 'कुण गुण चामन्त्रणे' इति क्षीरतरङ्गिणी, 'केत ग्राम कुण गुण चामन्त्रणे' इति धातुप्रदीपः, 'सङ्केत ग्राम कुण गुण चामन्त्रणे' इति माधवीयधातुवृत्तिः ॥ ८ 'शिङ्क्ते' इति३॥ ९ 'शिंजि' इति३॥ १०. 'अस्यते' इति१॥ ११. 'पणछि' इति३॥ १२. '-यति' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्लो-६]इति मेदिनिः । २ तलति शरमोक्षे प्रतिष्ठां कारयति **तलम्**, क्लीबे । "गोधा तला च न नरौ"[वैजयन्तीकोषः ३।७।१५५॥]इति स्त्रियामपि वैजयन्ती । ज्याघातस्य प्रत्यञ्चाकर्षणस्य वारणं ज्याघातवारणं चर्मादिमयं ज्याप्रहार-निवारणम् । द्वे ज्याघात-निवारणस्य ॥७७६॥

**स्थानान्यालीढवैशाखप्रत्यालीढानि मण्डलम् ।**

**समपादं च**

१ बाणमोचनावसरे आलीढादीनां समपादान्तानां पञ्चानां साधारण्येननामैकं **स्थानम्** । १ दक्षिणजङ्घाप्रसारे वामसङ्कोचे **आलीढम्** । २ वितस्त्यन्तरेण[1] स्थिते पादद्वये **वैशाखम्** । ३ तत्रोर्ध्व[स्थ]स्य वामपादप्रसारे दक्षिणपाद-सङ्कोचे **प्रत्यालीढम्** । ४ मण्डलाकृत्या पादद्वयधारणाद् **मण्डलम्** । ५ पादयोः समरूपतया धारणं **समपादम्** । एते सर्वेऽपि क्लीबे । यद्धनुर्वेदः-

"अग्रतो वामपादं तु तीक्ष्णं चैवाऽनुकुञ्चितम् ।
आलीढं तु प्रकर्तव्यं हस्तद्वयसविस्तरम् ॥१॥"

हस्तद्वयसो हस्तप्रमाणो विस्तरो विस्तारो यस्य सः ।

"पादौ सविस्तरौ कार्यौ समहस्तप्रमाणतः ।
वैशाखस्थानके वत्स ! कूटलक्ष्यस्य वेधने ॥२॥"
प्रत्यालीढे तु कर्तव्यः सव्यस्तीक्ष्णोऽनुकुञ्चितः ।
तिर्यग्वामः पुरस्तत्र दूरापाते विशिष्यते[2] ॥३॥
समपादे समौ पादौ[3] निष्कम्पौ च सुसङ्गतौ ।
मण्डले मण्डलाकारौ बाह्यतीक्ष्णौ विशेषतः॥४॥

[[4]]। "स्यात् प्रत्यालीढमालीढमित्यादि स्थानपञ्चकम्"[अमरकोषः २।८।८५॥]इत्यमरः । "षडपि"[ ]इत्येके । यद्भरतः-

"वैष्णवं१ समपादं२ च वैशाखं३ मण्डलं४ तथा ।
प्रत्यालीढ५मथालीढं६ स्थानान्येतानि षड् विदुः ॥५॥"

[नाट्यशास्त्रम्, चारीविधानो नाम दशमोऽध्यायः, श्लो-४८]इति ॥

**वेध्यं तु लक्षं लक्ष्यं शरव्यकम् ॥७७७॥**

१ वेध्य इति **वेध्यम्** । 'व्यध ताडने'(दि.प.अ.), कर्मणि घञ्, 'ग्रहिज्या-'६।१।१६॥ इति सम्प्रसाणम् । २-३ लक्ष्यते वेध्यत्वेन दृश्यत इति[5] चौरादिकाल्लक्षे[6]: कर्मणि घञ् **[लक्षम्]**। 'ऋहलोर्ण्यत्'३।१।१२४॥इति ण्यत्[7], 'अचो यत्' ३।१।९७॥ इति यति 'णेरनिटि'६।४।५१॥ इति णिलोपे वा **लक्ष्यम्** । ४ शरान् व्ययति संवृणोति आत्मनि धारयति वा शरव्यम् । 'व्यञ् संवरणे'(भ्वा.उ.अ.), 'आतोऽनुपसर्गे कः' ३।२।३॥, ततः स्वार्थे कन् **[शरव्यकम्]** । शरुर्हिंस्रः, तस्मै हितं शरव्यमिति वा । 'उगवादिभ्यो यत्'५।१।२॥ इति यत् । शरैर्वीयते छाद्यत इति[5] वा । एते क्लीबलिङ्गाः । वैजयन्ती तु-"वेध्यं[8] शरव्यमनरि"[वैजयन्तीकोषः ३।७।१९४॥] इत्याह । चत्वारि वेध्यस्य । शेषश्चात्र-"वेध्ये निमित्तम्"[शेषनाममाला ३।१४३॥]इति ॥७७७॥

**बाणे पृषत्कविशिखौ खगगार्ध्रपक्षौ**
**काण्डाशुगप्रदरसायकपत्रवाहाः ॥**
**पत्रीष्वजिह्मगशिलीमुखकङ्कपत्र-**
**रोपाः कलम्बशरमार्गणचित्रपुङ्खाः ॥७७८॥**

१ बण्यते शब्द्यते पुङ्खोऽनेनेति[9] **बाणः**, पुंक्ली.।'बण शब्दे'(भ्वा.प.से.), 'हलश्च'३।३।१२१॥ इति घञ्, तत्र । २ पर्षति सिञ्चति असृजा[10] **पृषत्कः**।'पृषु सेचने'(भ्वा.प.से.) अतः[11] शत्रन्तात् कन् । स्पृशन् कषति हिनस्ति, पृषोदरादित्वाद् वा । "पुङ्खादीनां पृथक् षट्कमस्य"[[12]]इति नैरुक्ताः । यद्धनुर्वेदः- "पुङ्खः शरस्तथा शल्यं पक्षस्नायुजतूनि षट्" [[12]]इति । ३ विशेषेण श्यति तनूकरोति **विशिखः** । 'शो तनूकरणे' (दि.प.अ.), 'श्यतेरिच्च वा'(हैमोणा-८५)इति खः । विशिष्टा शिखाऽग्रमस्येति[13] वा । विशदं स्खलतीति, पृषो-दरादिर्वा । ४ खेन आकाशेन गच्छतीति[14][15] । **खगः** ।'अन्ये-भ्योऽपि(अन्येष्वपि)-'(वा-३।२।४८॥)इति डः । ५ गृध्रपक्षस्याऽयं **गार्ध्र-पक्षः** ।'तस्येदम्'४।३।१२०॥इत्यण् । ६ कणति शब्दायतेऽनेनाऽऽहतः सन्निति **काण्डः**, पुंक्ली. । 'कण शब्दे'

१. '-रणे' इति३, '-रण' इति४॥ २. 'विशेष्यते' इति२.३.४॥ ३. 'समपादौ' इति१.४॥ ४. द्र. स्वोपज्ञटीका३।७७७॥, पृ.१७१॥ ५. ४प्रतौ नास्ति ॥ ६. 'चौरादिकं लक्षं' इति३, 'चौरादिकमिति लक्षं' इति४॥ ७. १.२प्रत्योर्नास्ति ॥ ८. वैजयन्तीकोषे "वेध्यं शरव्यं न नरि" इति दृश्यते, ३।७।१९४॥, पृ.८७॥ ९. '-ऽनेन' इति४॥ १०. '-जः' इति३॥ ११. ४प्रतौ नास्ति ॥ १२. द्र. स्वोपज्ञटीका ३।७७८॥, पृ.१७२॥ १३. '-स्य' इति३.४॥ १४. 'गच्छति' इति१॥ १५. इतोऽग्रे १.२प्रत्योः 'वा' इति दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(भ्वा.प.से.), 'अमन्ताड्डः'(उणा-१११)इति डः, 'अनुनासिकस्य-'६।४।१५॥ इति दीर्घः । ७ आशु शीघ्रं गच्छति **आशुगः** ।'अन्येभ्योऽपि(अन्येष्वपि)-'(वा-३।२।४८॥)इति डः । ८ प्रदीर्यतेऽनेन **प्रदरः** । 'दृ विदारणे'(क्र्या.प.से.), 'ॠदोरप्'३।३।५७॥इत्यप् । ९ स्यति अन्तं नयति **सायकः** । 'षोऽन्तकर्मणि'(दि.प.अ.), ण्वुल्, 'आदेचः-'६।१।४५॥ आत्वम्, 'आतो युक् चिण्कृतोः'७।३।३३॥ । १० पत्राणि वहति **पत्रवाहः** ।'कर्मण्यण्'३।२।१॥ । ११ पत्राण्यस्य सन्ति **पत्री** ।'अत इनिठनौ'५।२।११५॥ इतीनिः । १२ इष्यति गच्छति **इषुः**[1], त्रिलिङ्गः ।'इषं[2] गतौ, हिंसायां च'(दि.प.से.), दिवादिः, 'इषेः किच्च'[3](उणा-१३)इत्युः ।''इषुर्द्वयोः''[अमरकोषः२।८।८७॥]इति त्वमरः । ''इष्यते काम्यते शत्रुहननायेति, 'इषु इच्छायाम्'(तु.प.से.)इत्यस्य[4]''[[5]]इत्यन्ये । १३ अजिह्ममकुटिलं गच्छति **अजिह्मगः** ।'अन्येभ्योऽपि (अन्येष्वपि)-'(वा-३।२।४८॥)इति डः । १४ शिलीव मुखमस्य **शिलीमुखः** ।१५ कङ्कस्य पत्राण्यत्रेति **कङ्कपत्रः** ।१६ रोप्यते लक्ष्ये निखन्यते **रोपः** ।'रुप[6][विमोहने]'(दि.प.से.), घञ् । १७ कल्यते क्षिप्यते, कडति माद्यति वा **कलम्बः** ।'कल पिल क्षेपे[7]'(चु.प.से.), 'कड मदे'(भ्वा.प.से.) वा, 'कुणकदिकर्डिगडि(कृकदिकडिकटि)[8]भ्योऽम्बच्'(उणा-५२२) ।के शिरसि कृतसन्धानो लम्बत इति वा । 'लबि अवस्रंसने'(भ्वा.आ.से.), पचाद्यच् । १८ शृणाति शीर्यते वा अनेनेति[9] **शरः**, पुंक्ली. । 'शॄ हिंसायाम्'(क्र्या.प.से.), अच्, करणेऽप् वा, पुंक्ली.[10] ।१९ मार्गयति लक्षं[11] **मार्गणः** । 'मृग अन्वेषणे'(चु.आ.से.), णिजन्तः, नन्द्यादित्वाल्ल्युः । २० चित्रा नानावर्णाः पुङ्खा अस्य **चित्रपुङ्खः** । विंशतिर्बाणस्य ॥ शेषश्चात्र–

''बाणे तु लक्षहा मर्मभेदनः ।
वारश्च वीरशङ्कुश्च कादम्बोऽप्यस्त्रकण्टकः[12]॥''[शेषनाममाला ३।१४३॥] ॥७७८॥

**प्रक्ष्वेदनः[1][13] सर्वलौहो[2] नाराच[3] एषणश्च[4] सः ।**

१ प्रक्ष्वेदते **प्रक्ष्वेदनः**[14], चतुर्थवर्गतृतीयमध्यः । 'ञिक्ष्विदा[15] ञिक्षिदाङ् मोचने चे[16]'(भ्वा.आ.से.), चात् स्नेहने, भ्वादौ द्युतादिरात्मनेपदी, नन्द्यादित्वाद् ल्युः । अन्ये तु– ''प्रकर्षेण क्ष्वेदतेऽव्यक्तं शब्दायते, 'ञिक्ष्विदा अव्यक्ते शब्दे' (भ्वा.आ.से.), नन्द्यादित्वाल्ल्युः, पृषोदरादित्वाड्डुत्वम्, तृतीयवर्गतृतीयमध्यः''[[17]]इत्याहुः । २ लोहस्य विकारो लौहः, सर्वश्चासौ लौहश्च **सर्वलौहः** । ३ नरानाचामति **नाराचः** । आङ्पूर्वः 'चमू(चमु) अदने'(भ्वा.प.से.), 'अन्येभ्योऽपि-' (वा-३।२।१०२॥)इति डः, 'अन्येषामपि-'६।३।१३७॥ इति दीर्घः। नराणां समूहो नारम्, तच्चरति भक्षयतीति वा। नारं नरसमूहमञ्चति गच्छतीति वा । 'अञ्चु गतौ'(भ्वा.प.से.), 'कर्मण्यण्'३।२।१॥ । नरमञ्चति नराची, नराच्येव वा[18], प्रज्ञादित्वात् स्वार्थेऽण् वा। ४ इष्यतेऽनेन **एषणः** । 'इष गतौ'(दि.प.से), ल्युट् । चत्वारि सर्वलोहमयबाणस्य । शेषश्चात्र–''नाराचे लोहनालोऽस्त्रसायकः''[शेषनाममाला ३।१४४॥] ॥

**निरस्तः[1] प्रहितः[2]**

१ निरस्यते स्म **निरस्तः** । निर्पूर्वो 'असु क्षेपणे' (दि.प.से.), क्तः । २ प्रहीयते स्म **प्रहितः** ।'हि गतौ वृद्धौ च[19]'(स्वा.प.अ.), 'निष्ठा'३।२।१०२॥ इति क्तः । ''निरस्तः प्रेषिते शरे[20]''[विश्वलोचनकोशः, तान्तवर्गः, श्लो-१२२]इति श्रीधरः । यथा–''राज्ञा निरस्तैः रिपवो निरस्ताः''[[21]]इति । एकं मुक्तबाणस्य ॥

**बाणे विषाक्ते[1] दिग्ध[2]लिप्तकौ[3] ॥७७९॥**

१ विषेण अक्तो म्रक्षितः पायितः **विषाक्तः**, तत्र बाणे । दिह्यते स्म **दिग्धः** । 'दिह उपलेपे[22]'(अ.उ.अ.),

१. 'इषु' इति४॥ २. 'इष गतौ' इति क्षीरतरङ्गिण्यादयः ॥ ३. 'ईपेः किच्च'(उणा-१३)इत्युणादिगणे ॥ ४. ३प्रतौ नास्ति ॥ ५. द्र. पदचन्द्रिका, भा-२, क्षत्त्रवर्गः, श्लो-५४१, पृ.६२५॥, तत्र ''इष्यते शत्रुहननाय वा । इषु इच्छायाम्-इत्यन्ये'' इति दृश्यते ॥ ६. ३प्रतौ नास्ति ॥ ७. 'कल किल पिल क्षेपे' इति क्षीरतरङ्गिणी, 'कल पिल क्षेपे' इति धातुप्रदीपः, 'कल विल क्षेपे' इति माधवीयधातुवृत्तिः ॥ ८. '-कडिकदि-' इति३॥ ९. 'अनेन' इति४॥ १०. पूर्वमुक्तत्वादयं प्रमादः प्रतिभाति ॥ ११. 'लक्ष्यं' इति१॥ १२. 'कङ्कटः' इति१॥ १३. 'प्रक्ष्वेडनः' इति मुद्रितमूले, स्वोपज्ञटीकाऽपि तमाश्रित्यैव॥ १४. '-डते' इति४॥ १५. १प्रतौ नास्ति ॥ १६. 'ञिक्ष्विदा स्नेहनमोहनयोः' इति क्षीरतरङ्गिणी, ''स्मृतमिदं पुरुषकारे (पृष्ठ-८२)धातुवृत्तौ (पृष्ठ-१३०) च । वस्तुतः पाठोऽयं ग्रन्थकारस्यानभिमतः । यतो हि १।७०५॥, ४।१३४॥ धातुसूत्रव्याख्ययोरस्यास्मरणात्'' इति तत्रत्या टिप्पणी, क्षीर. पृ.१०६. टि-७॥, 'ञिष्विदा स्नेहनमोचनयोः' इति धातुप्रदीपः, 'ञिष्विदा स्नेहस्य मोचने च' इति माधवीयधातुवृत्तिः ॥ १७. द्र. पदचन्द्रिका, भा-२, क्षत्त्रवर्गः, श्लो-५४१, पृ.६२५॥ १८. १प्रतौ नास्ति ॥ १९. 'हि गतौ' इत्येव १.२.३॥ २०. 'प्रेषितशरे' इति विश्वलोचनकोशे, पृ.१४०॥ २१. द्र. अनेकार्थकैरवाकरकौमुदीटीका, भा-२, ३।२६०॥, पृ.११४॥ २२. 'दिह उपचये' इति क्षीरतरङ्गिणीमाधवीयधातुवृत्ती, 'दिह उपतापे' इति धातुप्रदीपः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कर्मणि क्तः, दादेर्घः, 'झषस्तथोः'८।२।४०॥ इति तस्य धः। ''दिग्धं विषाक्तबाणे स्यात्''[विश्वप्रकाशकोशः, धान्तवर्गः, श्लो-१०]इति महेश्वरः । २ लिप्यते स्म लिप्तः । 'लिप उपदेहे'(तु.उ.अ.), कर्मणि क्तः [स्वार्थे कनि **लिप्तकः**]। ''लिप्तं विलेपिते भुक्ते विषाक्तविशिखादिषु''[विश्वलोचनकोशः, तान्तवर्गः, श्लो-५०] इति श्रीधरः। द्वे विषलिप्तबाणस्य॥७७९॥

## बाणमुक्तिर्व्यवच्छेदः[1]

१ बाणस्य धनुर्यन्त्राद् मुष्टिना मोक्षणं बाणमुक्तिः । 'स्त्रियां क्तिन्'३।३।९४॥ । विशेषेण अवच्छिद्यते उत्तेज्यते बाणोऽनेन **व्यवच्छेदः** । करणे घञ् । यद्धनुर्वेदः-

''पश्चाङ्गुलीभिर्युगपत् क्षिप्रश्रेष्ठत्वसिद्धये ।
मोक्षणं यच्च दुर्ज्ञेयं तं व्यवच्छेदमादिशत् ॥१॥''

[[2]] । एकं 'तीरमूंकवउ[3]' इति भाषायाः ॥

## दीप्तिर्वेगस्य तीव्रता ।

१ दीप्यते बाणोऽनया **दीप्तिः** । 'दीपी दीप्तौ'(दि.-आ.से.), 'स्त्रियां क्तिन्'३।३।९४॥ । वेगस्य बाणवेगस्य तीव्रता दुःसहत्वम् । एकं बाणवेगतीव्रतायाः ॥

## क्षुरप्रतद्बालार्धेन्दुतीरीमुख्यास्तु तद्भिदः ॥७८०॥

१ क्षुराभं लोहं प्राति **क्षुरप्रः**।'प्रा पूरणे'(अ.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥ । धारामुखलोहोऽयम् । १ तत् प्रसिद्धं बलमस्य **तद्बलः**, मूषकपुच्छाकृतिरयम् । यदुक्तम्-''मूषकपुच्छाकृतयस्तद्बला दण्डसायकाः''[ ]इति । यथा च हलायुधकाव्यम्-''सर्वाय सङ्गरिणि मुञ्चति कङ्क[4]पत्रं[5] दीप्तं च मोचयति तद्बलमश्वकाये''[ ]इति ।''तद्बलं काण्डविशेष-मर्धलोहं दीप्तं तीव्रवेगमश्वकाये क्षिपति''[ ]इति तट्टीका । १ **अर्धेन्दुः** अर्धेन्दुसदृशमुख[6]लोहत्वात् । १ तीरयति सङ्ग्रामं पारयति **तीरी**, द्विचतुर्थस्वरोऽयम् । तदुक्तम्-''त्रिभागशरजा तीरी शेषाङ्गे लोहसम्भवा''[[8]]इति । मुख्यग्रहणात् दण्डासन१-तोमर२वावल्ल३भल्ल४गरुडा५ऽर्धनाराच६प्रभृतय[7]ः, तस्य बाणस्य भेदो भेदाः तद्भिदः ॥७८०॥

## पक्षो वाजः

१ पक्ष्यते परिगृह्यतेऽसौ **पक्षः** । 'पक्ष परिग्रहे' (भ्वा.प.से.), कर्मणि घञ् । २ वजत्यनेन[9] बाणो **वाजः** ।'वज गतौ'(भ्वा.प.से.), 'हलश्च'३।३।१२१॥ इति घञ्, ञित्त्वाद् 'अत उपधायाः'७।२।११६॥ वृद्धिः । ''[पच्यत इति] पक्षः गृध्रकङ्कपत्रादिः, [वजत्यनेन] वाणे (वाणो) वाजः, छदाऽऽवलिः, पत्रपालीति यावत्''[अभि. स्वोपज्ञटीका-३।७८१॥] इति मूलटीका । ''[10]पत्रपाली भवेद् वाजः''[हलायुधकोशः-२।४६८॥]इति हलायुधः । द्वे बाणपिच्छस्य ॥

## पत्रणा तन्न्यासः

१ पत्रणं **पत्रणा** । ''शराणां पत्ररचना पत्रणा परिकीर्तिता''[हारावली, अर्धश्लोकावधिः, श्लो-१६(११६)] [इति] हारावली । तस्य पक्षस्य शरस्कन्धे न्यसनं न्यासो रचना तन्न्यासः। एकं पत्रणायाः। 'तीरऊपरि [11]पींछरचना' इति भाषा॥

## पुङ्खस्तु कर्तरी ।

१ पुनाति बाणं **पुङ्खः**, पुंक्ली. ।'पूञ्[12] पवने'(क्र्या.-उ.से.), 'पूञः[13] पुन् च'( )इति खः । गुणविन्यासस्थानम् । २ कृत्यते छिद्यतेऽनया **कर्तरी** । 'कृती छेदने'(तु.प.से.), [बाहुलकादरः, ततो ङीष्], काष्ठशृङ्गादिमयी । ''कर्तरी पुङ्ख उच्यते''[हलायुधकोशः२।४६८॥]इति हलायुधः । द्वे पुङ्खस्य । 'बाणना बे [14]डंकासुषालो[15]' इति भाषा ॥

## तूणो निषङ्गस्तूणीर उपासङ्गः शराश्रयः ॥७८१॥

## शरधिः कलापोऽपि

१ तूण्यते पूर्यते शरैः **तूणः**, त्रिषु । स्त्रियां तूणी तूणा वा[16] । 'तूण[17] पूरणे'(चु.आ.से.), चुरादिः, 'एरच्'३।३।-५६॥ इत्यच् ।''[स्त्रियां] तूणेषुधी उपासङ्गः''[[18]]इति रत्नकोषः ।''धिषणा तूणीतूणौ काकिणी द्रुणी''[[19]]इति लिङ्गकारिका च । २ निषज्यन्ते शरा अत्रेति **निषङ्गः** । 'षञ्ज सङ्गे'(भ्वा.प.अ.), अधिकरणे घञ्, 'चजोः-'७।३।५२॥ इति

---

१. '-शेत्' इति२.३.४॥ २. द्र. स्वोपज्ञटीका३।७८०॥, पृ.१७२॥, तत्र 'दुर्ज्ञेयं' इत्यस्य स्थाने 'दुर्जेयं' इति दृश्यते ॥ ३. '-मूक-' इति२, '-कवो' इति३, '-वूं' इति४॥ ४. 'कंच-' इति३॥ ५. '-पत्र-' इति२॥ ६. '-दृशं मुखं' इति३.४॥ ७. द्र. स्वोपज्ञटीका३।७८०॥, पृ.१७२॥ ८. तुलनीयोऽमरकोषः२।८।८७॥ ९. 'बल-' इति३.४॥ १०. 'पत्र-' इति३.४॥ ११. 'पी-' इति१॥ १२. 'पूङ्' इति३॥ १३. 'पूङः' इति३॥ १४. 'डंक-' इति३.४॥ १५. '-सुफाला' इति१॥ १६. इतोऽग्रे ३प्रतौ 'तूण पूरणा वा' इति दृश्यते ॥ १७. 'तृण' इति४॥ १८. द्र. पदचन्द्रिका, भा-२, क्षत्रवर्गः, श्लो-५४१, पृ.६२६॥, रामाश्रमी २।८।८८॥, पृ.३८४॥ १९. द्र. पदचन्द्रिका, भा-२, क्षत्रवर्गः, श्लो-५४१, पृ.६२६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुत्वम्, ['उपसर्गात्-'८।३।६५॥ इति षत्वम्] । **३** तूण्यते पूर्यते **तूणीरः** । 'तूण पूरणे'(चु.आ.से.), चुरादिः, बाहुलकात् 'कृशृपॄ(पृ)कटि-'(उणा- )इत्यादिना ईरन् । **४** उपासज्यन्ते संश्लिष्यन्ते शरा अत्र **उपासङ्गः** । आङ्पूर्वः 'षञ्ज सङ्गे' (भ्वा.प.अ.), अधिकरणे घञ् । **५** शराणामाश्रयः **शराश्रयः ॥७८१॥** **६** शरा धीयन्तेऽत्र **शरधिः**, पुंसि । 'डुधाञ् धारणादौ'(जु.उ.अ.), 'कर्मण्यधिकरणे च'३।३।९३॥इति किः । यौगिकत्वाद् इषुधिः बाणधिरित्यादयः । **७** कल्यन्ते बाणा अनेन **कलापः** । 'कल सङ्ख्याने[1]'(चु.उ.से.), 'कलेरापः' ( )इत्यापः । सप्त 'भाथा[2]' इति ख्यातस्य ॥

## अथ चन्द्रहासः[1]

**करवाल[2]निस्त्रिंश[3]कृपाण[4]खड्गाः[5] ।**
**तर[6]वारि कौक्षेयक[7] मण्डलाग्रा[8]**
**असि[9]र्ऋष्टि[10]रिष्टी[11]**

**१** उद्योतेन चन्द्रं हसति **चन्द्रहासः** । 'हस(हसे) हसने'(भ्वा.प.से.), 'कर्मण्यण्'३।२।१॥ । "चन्द्रवद् हासः प्रभाऽस्येति[3] चन्द्रहासः"[अभि.स्वोपज्ञटीका-३।७८२] इत्याचार्याः । **२** करं वलति[4] वेष्टयति **करवालः** । 'वल वेष्टने'(भ्वा.आ.से.), 'कर्मण्यण्'३।२।१॥ । वलनं वालः, कर[5] वालोऽस्येति वा । करं पालयतीति कर्मण्यणि[6] करपालोऽपि । "विधूतकरपालकः पाल[कः[7]]"[[8] ]इति यमकात् । **३** निर्गतस्त्रिंशतोऽङ्गुलिभ्यो **निस्त्रिंशः** । 'बहुव्रीहौ सङ्ख्येये डजबहुगणात्'५।४।७३॥ इति डच्[9], डित्त्वाट्टिलोपः । **४** कल्पते[10] छेद[11]समर्थो भवति **कृपाणः** । 'कृपू सामर्थ्ये'(भ्वा.आ.वे), 'उणादयो बहुलम्'३।३।१॥ इति कृपेरानक् । यद्वा 'क्रप कृपायां गतौ[12]'(भ्वा.आ.से.), 'युधिकृपेः किच्च[13]'( )इत्यानक् बाहुलकादस्मादपि । अत्र "कृपो रो लः'८।२।१८॥ इति लत्वाभावार्थ[14] कृपिस्थाने क्रपिः[15] पठितव्यः"[ ]इति 'कृपो रो लः'८।२।१८॥ इत्यत्र भाष्यादौ स्थितम् । कृपाणादौ बाहुलकात् सम्प्रसारणम् । यद्वा सर्वे[16] एते कृपाणकृपणकृपादयः 'कृपू सामर्थ्ये'(भ्वा.आ.वे.)इत्यस्यैव, 'लत्वाभावो बहुलवचनात्' ( )इति लत्वसूत्रे[17] उक्तम् । **५** खड्यते[18] भिद्यते परोऽनेनेति **खड्गः[19]** । 'खड खडि भेदने[20]'(चु.उ.से.), 'छापूखडिभ्यः कित्'(उणा-१२१)इति गन् । **६** तरं तरत् प्लवमानं वारि पानीयमत्र **तरवारिः**, पुंसि । **७** 'कुष निःकर्षे'(क्र्या.प.से.), 'प्लुषिशुषिकुषिभ्यः क्सिः'(उणा-४३५), कुक्षिः, कुक्षौ भवो विद्यमानः **कौक्षेयकः** । 'कुलकुक्षि-'४।२।९६॥ इत्यादिना ढकञ्[21] । कुक्षिं रक्षन्त्यस्माद्वा शेषार्थे ढकञि[22] कौक्षेयको वा । **८** मण्डलाकृत्यग्रमस्य **मण्डलाग्रः** । **९** अस्यते क्षिप्यते **असिः**, पुंसि । 'असु क्षेपणे' (दि.प.से.), '-इन्'(उणा-५५७) इतीन्, 'खनिकषि-'(उणा-५७९)इति इन् वा । **१०** ऋषति पाणिं गच्छति **ऋष्टिः**, सप्तमस्वरादिः । 'ऋषि(ऋषी) गतौ' (तु.प.से.), 'क्तिच्क्तौ च(च) संज्ञायाम्'३।३।१७४॥ इति क्तिच् । "शिलाशूलर्ष्टिमुद्गरम्[23]"[ ]इति भट्टिः[24] । **११** हिनस्ति **रिष्टिः** । 'रिष हिंसायाम्'(भ्वा.प.से.), क्तिजन्तः, क्तिजन्तः, पुंस्त्रीलिङ्गावेतौ । एकादश खड्गस्य । शषेश्चात्र-

"असिस्तु सायकः ।
श्रीगर्भो विजयः शास्ता व्यवहारः [प्रजाकरः] ॥
धर्मपालोऽक्षरो देवस्तीक्ष्णकर्मा दुरासदः ।
प्रसङ्गो रुद्रतनयो मनुज्येष्ठः शिवङ्करः ॥१॥
करपालो विशसनस्तीक्ष्णधारो विषाग्रजः ।
धर्मप्रचारो धाराङ्गो धाराधरकरालिकौ[25] ॥२॥
चन्द्रभासाश्च[26] शस्त्रैः[27]"[शेषनाममाला ३।१४४-१४७॥] ॥

---

१. 'कल गतौ संख्याने च' इति स्वामिसायणौ, 'कल संख्याने गतौ च' इति मैत्रेयः ॥ २. 'भोथान' इति३, 'भोथाण' इति४॥ ३. 'इति' इति स्वोपज्ञटीकायां न दृश्यते ॥ ४. 'वलयति' इति३.४॥ ५. 'कर-' इति३॥ ६. '-ण्' इति४॥ ७. 'पालय' इति३॥ ८. द्र. टीकासर्वस्वम्, भा-३, २।८।९०॥, पृ.१२६॥, पदचन्द्रिका, भा-२, क्षत्रवर्गः, श्लो-५४३, पृ.६२७॥ ९. वस्तुतस्त्वत्र बहुव्रीहेरभावादियं सरणिरनुसरणीया-तथा हि- "निरादयः क्रान्ताद्यर्थे पञ्चम्या'(वा-२।२।१८॥)इति समासः, 'संख्यायास्तत्पुरुषस्य-'(वा-५।४।७३॥)इति डच्" इति॥ १०. 'कल्पेते' इति१॥ ११. 'छेदन-' इति३॥ १२. 'क्रप कृपायाम्' इत्येव स्वामी ॥ १३. भ्रष्टं प्रतिभाति, अथ च 'युधिबुधिदृशिभ्यः किच्च'(उणा-२४७)इत्यानच् युक्तः । अत्र 'क्रप कृपायां गतौ'(भ्वादिः, धातुसं-५०६)इत्यत्र भ्वादौ मा. धातुवृत्तिरनुसन्धेया ॥ १४. '-वार्थ' इति२॥ १५. 'कृ-' इति३॥ १६. 'पठन्ति' इति४॥ १७. 'इति सूत्रे' इति४॥ १८. 'खंड्यते' इति३॥ १९. यदि विग्रहे इदित् खडिधातुः पठ्यते, तर्हि 'खड्गः' इत्यत्राऽऽगमशास्त्रस्याऽनित्यत्वान्न नुम् ॥ २०. 'खड खडि भेदे' इति स्वामी, 'खड खडि कडि भेदने' इति मैत्रेयसायणौ ॥ २१. 'ढक्' इति३, 'ढकन्' इति४॥ २२. 'ढकत्रिति' इति३.४॥ २३. 'यष्टि-' इति४॥ २४. 'शक्त्यृष्टिपरिघप्रासगदामुद्गरपाणयः' इति भट्टिकाव्ये, सर्गः-९, श्लो-४, पृ.२२९॥ २५. '-कलालिकौ' इति३॥ २६. '-भासश्च' इति३, शेषनाममालास्वोपज्ञटीकयोश्च ॥ २७. 'शस्त्रज्ञैः' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

### त्सरुरस्य मुष्टिः ॥७८२॥

१ अस्य खड्गस्य मुष्टिर्ग्रहणस्थानम्, त्सरत्यनेन **त्सरुः**, पुंसि । तकारसकारसंयोगादिः । 'त्सर छद्मगतौ'(भ्वा.-प.से.), 'भृमृशीतृचरित्सरि[तनिध]निमिमस्जिभ्यः उः'(उणा-७)इत्युः । खड्गस्येत्युपलक्षणम्, तेनाऽन्यस्याऽपि मुष्टिः त्सरुरुच्यते । यदमरः-"त्सरुः खड्गादिमुष्टौ स्यात्"[अमरकोषः-२।८।९०॥]इति । केकिरवच्छन्दः[1], तल्लक्षणं च छन्दश्चूडामणौ-"स्यौ स्यौ केकिरवम्"[ ] । एकं खड्गमुष्टेः ॥७८२॥

### प्रत्याकारः परीवारः कोशः खड्गपिधानकम् ।

१ प्रतिरूप आकारोऽस्य **प्रत्याकारः**[2] । २ परिव्रियतेऽनेन[3] परिवारः । 'वृञ् आच्छादाने'(चु.उ.से), घञ् । 'उपसर्गस्य घञ्यमनुष्ये बहुलम्'६।३।१२२॥ इति दीर्घः । **परीवारः** । ३ कुश्यते संश्लिष्यते **कोशः**, त्रिलिङ्गः । 'कुश संश्लेषणे'(दि.प.से.)[4], घञ् । ४ खड्गः पिधीयतेऽनेन[5] खड्गपिधानम्[6] । करणे ल्युट्, ततः स्वार्थे कन् **खड्गपिधानकम्** । चत्वारि पडियारस्य ॥

### अड्डनं फलकं चर्म खेटकाऽऽवरणस्फुराः ॥७८३॥

१ अड्ड्यतेऽनेन **अड्डनम्**, तृतीयवर्गतृतीयद्वयमध्यः[7][8] । 'अड्ड अभियोगे'(भ्वा.प.से.), करणे ल्युट् । २ (फलति विशीर्यते घातैः)[9], फलति[10] निष्पद्यते वा प्रहारोऽत्र **फलकम्** । 'ञिफला विशरणे'(भ्वा.प.से.), 'फल निष्पत्तौ'(भ्वा.प.से.) वा, अतः 'कृञादिभ्यः संज्ञायां वुन्'(उणा-७१३), 'युवोरनाकौ'७।१।१॥ । आभ्यामेव पचाद्यचि, ततः स्वार्थे कन् वा[11] । फरकमपि । पुंक्लीबलिङ्गः[12] । ३ चर्ममयत्वात् **चर्म** । चर्मणी, चर्माणि इत्यादि क्लीबे । ६ खेटयति उत्त्रासयति खेटम्, पुंक्ली.[13] । 'किट खिट उत्त्रासे'[14] (भ्वा.प.से.), पचाद्यच्, ततः कन् [**खेटकम्**] । ५ आव्रियते वपुरनेनेति **आवरणम्** । 'वृञ् आवरणे'(चु.उ.से.), करणे ल्युट् । ६ स्फुरति चलति **स्फुरः** । 'स्फुर स्फुल स्फुरणे'[15](तु.प.से.), '-चलने' इत्येके । तुदादौ कुटादिरयमित्येके, तत्पाठबलाच्च ण्वुलि वृद्ध्यभावे, 'गाङ्कुटादि[16]भ्योऽञ्णिन्ङित्'१।२।१॥ इति ङित्त्वात् स्फुरक[17] इत्यपि । षट् 'खेडा'[18] इति ख्यातस्य ॥७८३॥

### अस्य मुष्टिस्तु सङ्ग्राहः

१ अस्य फलकस्य मुष्टिर्ग्रहणस्थानम्, संगृह्यतेऽनेन **सङ्ग्राहः** । सङ्गृह्यतेऽयमिति वा । 'समि मुष्टौ' ३।३।३६॥ इति कर्मणि घञ् । एकं फलकमुष्टेः ॥

### क्षुरी छुरी कृपाणिका ।
### शस्त्र्यसेर्धेनुपुत्र्यौ च

१ क्षुरति विखनति[19] **क्षुरी** । 'क्षुर छेदने'[20](तु.प.से.), पचाद्यच्, ततो गौरादित्वाद् ङीषि, क्षुरिकाऽपि । २ छुरति छिनत्ति **छुरी** । 'छुर छेदने'(तु.प.से.), अच्, गौरादिः, छुरिकाऽपि । ३ 'क्वुन् शिल्पिसंज्ञयोः-'(उणा-१९०)इति क्वुनि, कल्पते कृपाणी, स्वार्थे कनि **कृपाणिका** । ४ शस्यते हिंस्यतेऽनया **शस्त्री** । 'शसु हिंसायाम्'(भ्वा.प.से.), 'दाम्नीशसु(शस)युयुजि(युजि)-'३।२।१८२॥ इति ष्ट्रन्, षित्त्वात् ङीष्[21] । ५-६ असेरित्यसिशब्दात् धेनुपुत्र्यौ सम्बध्येते, चिन्तितार्थप्रदायित्वादसिरूपा धेनुः **असिधेनुः** । असेः पुत्रीव[22] ह्रस्वत्वाद् **असिपुत्री** । षट् छुरिकायाः । शेषश्चात्र-

"अथ क्षुर्यस्त्री कोशशायिका ।
पत्रं च धेनुका"[शेषनाममाला ३।१४७॥] ॥

### पत्रपालस्तु साऽऽयता ॥७८४॥

१ सा क्षुरिका आयता दीर्घा, पत्रेण पालयति रक्षति[23] **पत्रपालः** । अच् । एकं 'लांबी छुरी' इति ख्यातायाः ॥ [शेषश्चात्र-

"पत्रपाले तु हुलमातृका ॥
कुट्टन्ती पत्रफला]" [शेषनाममाला ३।१४७-१४८] ॥७८४॥

### दण्डो यष्टिश्च लगुडः

१. अत्र श्लोके केकिरवच्छन्दः प्रयुक्त इत्याशयः ॥ २. 'प्रतीकारः' इति३ ॥ ३. 'परी-' इति४ ॥ ४. दुर्गसम्मतोऽयं धातुः, द्रः क्षीरतरङ्गिणी, दिवादिः, धातुसं-११२, पृ.२२९ ॥, मा. धातुवृत्तिः, दिवादिः धातुसं-११७, पृ.४३८ ॥ ५. '-नेनेति' इति३.४ ॥ ६. '-नकम्' इति३ ॥ ७. '-वर्गः' इति३ ॥ ८. '-तृतीयमध्यः' इति३.४ ॥ ९. कोष्ठान्तर्गतपाठः १प्रतौ नास्ति ॥ १०. 'निष्पा-' इति४ ॥ ११. १प्रतौ नास्ति ॥ १२. 'पुंक्ली' इति३ ॥ १३. '-क्लीब' इति४ ॥ १४. 'खिट उत्त्रासे' इति स्वामी, 'किट खिट त्रासे' इति मैत्रेयसायणौ ॥ १५. अत्र माधवीयधातुवृत्तिरनुसन्धेया, तुदादिः, धातुसं-९३, पृ.४७७ ॥ १६. 'गाञ्-' इति३ ॥ १७. 'स्फ-' इति१.२ ॥ १८. 'खेडा' इति३, 'खेंडा' इति४ ॥ १९. 'खनति' इति३.४ ॥ २०. 'क्षुर खुर विलेखने' इति स्वामी, 'क्षुर विलेखने' इति मैत्रेयसायणौ ॥ २१. इतोऽग्रे ३.४प्रत्योः 'शस्त्री' इति दृश्यते ॥ २२. 'असिपुत्रीव' इति४ ॥ २३. 'रक्षयति' इति२ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ दाम्यत्यनेन[1] **दण्डः**, पुंक्ली. । 'दमु उपशमे' (दि.प.से.), 'अमन्ताड्डः'(उणा-१११)इति[2] डः । ३ इज्यतेऽनया **यष्टिः**, पुंस्त्री[3] । 'यज देवपूजादौ'(भ्वा.-उ.अ.), क्तिच् । ३ लगति प्रहारोऽनेनेति **लगुडः** । 'लगे सङ्गे'(भ्वा.प.से.), 'लगेरुडः'(हैमोणा-१७७)इत्युडः । त्रीणि यष्टेः । 'लाठी' इति भाषा ॥

## स्यादीली करवालिका[4] ।

१ 'ईर[5] गतौ'(अ.आ.से.), 'सार्वधातुक इत् (सर्वधातुभ्य इन्)'(उणा-५५७)इति इत्(इन्), ततः 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि **ईली**, कपिलिकादिः । ''इली दीर्घादिर्ह्रस्वादिश्च''[6][ ]इत्यन्ये । ईड्यते स्तूयते, 'इगुपधात्[7] किः(कित्)'(उणा-५५९), ततो ङीषि वा । २ अल्पः करवालः **करवालिका** । यद्वा करवालात् कर्मण्यन्ताद् ङीप्[8], ततः कनि, 'केऽणः'७।४।१३॥ इति ह्रस्वत्वे करवालिका । पाल्यतेऽसौ पालिका, 'पाल रक्षणे' (चु.प.से.), संज्ञायां क्वुन्, करेण पालिका करपालिका पकारमध्याऽपि । द्वे एकधारखड्गस्य । एकधारोऽसिस्तुरुष्कायुधम् ॥

## भिन्दिपाले सृगः

१ भिदन्तः पालयति भिन्दिः, भिदेरिन्[9] । ''भिन्दिर्द्वादशतालं तु दशदन्तोऽभिधीयते''[10][11][ ]इति भरतेन तदवच्छिन्नः[12] कालोऽप्युपचारेण भिन्दिः, तं पालयतीति [ **भिन्दिपालः** ] । 'कर्मण्यण्'३।२।१॥ । तावता कालेन लक्षं प्राप्नोतीत्यर्थः । ''भिन्दतः पालयति भिन्दिपालो नाम हस्तक्षेप्यो महाफलो दीर्घदण्ड आयुधविशेषः''[अभि-, स्वोपज्ञटीका ३।७८५॥]इत्याचार्याः । २ सृज्यते **सृगः** । 'सृज विसर्गे'(दि.आ.अ.), घञर्थे कः, न्यङ्क्वादित्वात् कुत्वम् । सरतीति वा सृगः । बाहुलकाद् 'मुदिग्रोग्रन्-' (-र्ग्ग्)-'(उणा-१२१) । '' 'गन्धौ-'( )इति गकि सृगः''[ ]इति तु माधवी[13] । ''भिन्दिपालः सृगस्तुल्यौ'' [अमरकोषः २।८।९१॥] इत्यमरः । ''हस्तक्षेप्यो लगुडः'' [अम.क्षीर.२।८।९२॥]इति[14] तु क्षीरस्वामी । द्वे '[15]बरछी[16]' इति ख्यातस्य ॥

## कुन्ते प्रासः

१ कुं पृथ्वीं तनोति **कुन्तः** । 'अन्येभ्योऽपि-(अन्येष्वपि)-'(वा-३।२।१०१॥)इति डः, पृषोदरादिः । कुत्सितोऽप्रतिक्रियो[17]ऽन्तोऽस्मादिति वा, पृषोदरादिः, तत्र । २ प्रकर्षेण अस्यते क्षिप्यते **प्रासः** । 'असु क्षेपणे'(दि.प.से.), कर्मणि घञ् । ''हस्तधार्यः शङ्कुः''[18][अभि-,स्वोपज्ञटीका-३।७८५]इत्याचार्याः । द्वे '[19]भाला' इति ख्यातस्य ॥

## अथ द्रुघणो घनः ॥७८५॥ मुद्गरः स्यात्

१ द्रुः वृक्षो हन्यतेऽनेन **द्रुघणः** । 'हन्(हन) हिंसागत्योः'(अ.प.अ.), 'करणेऽयोविद्रुषु'३।३।८२॥ इत्यप्-घनादेशौ, अरीहणादिषु पाठात् 'पूर्वपदात्-'८।४।३॥ इति णत्वम् । ''क्षुम्नादेराकृतिगणत्वम्''[20][ ]इत्यन्ये, तेन 'द्रुघनः' इति तुर्यवर्गपञ्चमान्तोऽपि । २ हन्यतेऽनेनेति **घनः** । 'मूर्तौ घनः'३।३।७७॥ इत्यप्घनादेशौ । ''पाद्ये मुस्तेऽम्बुदे सान्द्रे घनः स्याल्लोहमुद्गरः''[शाश्वतकोशः, श्लो- ]इति शाश्वतः ॥७८५॥ ३ मुदं हर्षं गिरति **मुद्गरः**, पुंस्त्री । 'गॄ[21] निगरणे'(तु.प.से.), अच् । मुदं ग्रसतीति, पृषोदरादिर्वा । त्रीणि लोहमुद्गरस्य ॥

## कुठारस्तु परशुः पर्शुपर्श्वधौ । परश्वधः स्वधितिश्च

१ कुठिः सौत्रः, कोठति **कुठारः**, पुंस्त्री । 'तुषिकुठिभ्यां कित्-'(हैमोणा-४०८)इत्यारन् । कुठारन् वृक्षान् इयर्तीति वा । 'ऋ गतौ'(भ्वा.प.अ.), 'कर्मण्यण्'३।२।१॥ ।

१. '-नेनेति' इति४॥ २. 'इति डः' इति ४प्रतौ नास्ति ॥ ३. 'पुंक्ली.' इति१॥ ४. तुलनीयोऽमरकोषः२।८।९१॥ ५. 'इर्' इति३॥ ६. द्र. पदचन्द्रिका, भा-२, क्षत्त्रवर्गः, श्लो-५४५, पृ.६२९॥ ७. '-धत्वात्' इति२.३॥ ८. 'ङीष्' इति१.३॥ ९. 'वका-' इति३॥ १०. 'भिन्दे-' इति३.४॥ ११. द्र. टीकासर्वस्वम्, भा-३, २।८।९२॥, पृ.१२८॥, पदचन्द्रिका, भा-२, क्षत्त्रवर्गः, श्लो-५४५, पृ.६२९॥, रामाश्रमी२।८।९१॥, पृ.३८६॥, तासु टीकासु 'दशदन्तोऽ-' इत्यस्य स्थाने 'दशकुन्तोऽ-' इति दृश्यते ॥ १२. '-न्न-' इति४॥ १३. द्र. पदचन्द्रिका, भा-२, क्षत्त्रवर्गः, श्लो-५४५, पृ.६३०॥, तत्र ''-मुदिग्रोर्गग्गौ-(उणा-१।१२७)इति गकि 'सृग' इति तु माधवी'' इति दृश्यते ॥ १४. ३प्रतौ नास्ति ॥ १५. 'व-' इति ॥ १६. '-छी' इति३॥ १७. '-या-' इति३.४॥ १८. 'शल्यः' इति स्वोपज्ञटीकायाम्, ३।७८५॥, पृ.१७४॥ १९. 'भ-' इति२॥ २०. द्र. पदचन्द्रिका, भा-२, क्षत्त्रवर्गः, श्लो-५४५, पृ.६२९॥ २१. 'गृ' इति१.३.४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

२ परान् शत्रून् शृणाति **परशुः** । 'शॄ हिंसायाम्'(क्र्या.प.से.), 'आङ्पराभ्यां खनिशॄभ्यां डिच्च'(उणा-३३)इत्युः, बाहुलकादुपसर्गस्य ह्रस्वत्वम् । ३ पृणाति **पर्शुः** । 'पृ(पॄ) पालनपूरणयोः'(क्र्या.प.से.), 'प्रः शुः-'(हैमोणा-८२५)इति शुः । ४ पर्शुकाभिर्न धीयते **पर्श्वधः** । स्थादित्वात् कः । ५ परः शत्रुः श्वेव परश्वा, परश्वानं[1] धयति पिबति, 'आतोऽनुपसर्गे कः'३।२।३॥, **परश्वधः** । परान् शृणाति वा परश्वधः । 'परात् श्रो[2] डित्-'(हैमोणा-२५५)इति वधः, तालव्यशवान् । ''परान् शत्रून् स्यति अन्तं नयति परस्वधः, पृषोदरादिः, दन्त्यसकारवान्''[ ]इति माधवी[3] । 'स्वधि विदारणे'( ), तुदादौ, ततो बाहुलकात् क्तिच् **स्वधितिः**, दन्त्यादिः । स्वं धियति धारयति वा । 'धिञ्[4] धारणे' (तु.प.अ.), क्तिच् । परश्वादयः षडपि पुंसि । षट् 'फरसी' इति ख्यातायाः ॥

## परिघः परिघातनः[5] ॥७८६॥

१ परितो हन्यतेऽनेन **परिघः** । हन्तेः 'परौ घः' ३।३।४॥ इत्यप्प्रत्यय[6]घादेशौ । लत्वे पलिघोऽपि । २ परितो घातयति **परिघातनः** । हन्तेर्ण्यन्तात्नन्द्यादित्वाद् ल्युः । द्वे परिघस्य । 'लोहबांधी गेडी' इति भाषा ॥७८६॥

## सर्वला तोमरे

१ सर्वान् लाति **सर्वला**, दन्त्यादिः । 'शर्व[7] गतौ' (भ्वा.प.से.), वृषादित्वात् कलचि शर्वला[8], तालव्यादिरपि । २ तुदन् व्यथन् मारयति **तोमरः**, पृषोदरादिः, पुंक्ली. । ''सर्वला तोमरोऽस्त्रियाम्''[अमरकोषः२।८।९३॥] इत्यमरः, तत्र । द्वे तोमरनाम्नः ॥

## शल्यं शङ्कौ

१ शलत्यन्तर्विशति **शल्यम्**, पुंक्ली. । 'शल गतौ' (भ्वा.प.से.), अघ्न्यादित्वाद् यत् । ''शल्यप्रोतं वीक्ष्य[9] सकुम्भं मुनिपुत्रम्''[रघुवंशम्, सर्गः-९, श्लो-७५]इति रघुः । २ शाम्यत्यनेन **शङ्कुः**, पुंसि । शङ्कतेऽस्मादिति वा । 'खरुशङ्कु-'(उणा-३६)इति स उः । ''पेतुर्बर्हिणदेशीयाः शङ्कवः प्राणहारिणः''[शिशुपालवधम्, सर्गः-१९, श्लो-४५]इति माघः । द्वे[10] 'साल' इति ख्यातस्य[11] ॥

## शूले त्रिशीर्षकम् ।

१ शूलति रुजति **शूलम्**, पुंक्ली. । 'शूल रुजायाम्[12]' (भ्वा.प.से.), पचाद्यच्, तत्र । २ त्रीणि शीर्षाण्यस्य **त्रिशीर्षकम्** । 'उरःप्रभृतिभ्यः कप्'५।४।१५१॥ । द्वे त्रिशूलस्य ॥

## शक्तिपट्टिसदुःस्फोटचक्राद्याः शस्त्रजातयः ॥७८७॥

१ शक्नोति जेतुमनया **शक्तिः** । 'शक्लृ शक्तौ' (स्वा.प.अ.), 'स्त्रियां क्तिन्'३।३।९४॥ । १ पटति शत्रून् **पट्टिसः** । 'पट गतौ'(भ्वा.प.से.), 'पटिवीभ्याम्-'(हैमोणा-५७९)इति टिसः । ''अयं तालव्यान्तः[13]''[[14]]इत्यन्ये । १ दुरिति दुःखं स्फोटयति **दुःस्फोटः** । 'स्फुट विदारणे' (चु.उ.से), चुरादिः, अच् । १ क्रियते प्रहारोऽनेनेति **चक्रम्**, पुंक्ली. । 'कृञः क्लिदेः क्नसश्च'( )कप्रत्ययः, द्वित्वं च[15] । आदेः शतघ्नी-महाशिला-मुषुण्ढी-चिरिका-वराहकर्णक[16]प्रभृतयः ।

शेषश्चात्र-

''अथ शक्तिः कासूर्महाफला ।
अष्टतालाऽऽयता सा च पट्टिसस्तु खुरोपमः ॥
लोहदण्डस्तीक्ष्णधारो दुःस्फोटाराफलौ समौ ।
चक्रं तु वलयप्रायमरसञ्चितमित्यपि ॥१॥
शतघ्नी तु चतुस्ताला लोहकण्टकसञ्चिता ।
अयःकण्टकसंछन्ना शतघ्न्येव महाशिला ॥२॥
मुषुण्ढी स्याद् दारुमयी वृत्तायःकीलसञ्चिता ।
कणयो लोहमात्रोऽथ चिरिका तु हुलाग्रका ॥३॥
वराहकर्णकोऽन्वर्थः फलपत्राग्रके हुलम् ।
मुनयोऽस्त्रशेखरं च''[शेषनाममाला ३।१४८-१५२॥] ॥

## खुरली तु श्रमो योग्याऽभ्यासः

---

१. '-स्थानं' इति३॥ २. 'श्रोत्रेन्द्रियादिति' इति३.४॥ ३. द्र. पदचन्द्रिका, भा-२, क्षत्रवर्गः, श्लो-५४६, पृ.६३१॥, तत्र ''परान् स्यति 'परस्वधः' पृषोदरादिः(पा. ६।३।१०९॥) । दन्त्यसः-इति माधवी'' इति दृश्यते ॥ ४. क्षीरतरङ्गिण्यादौ ञकाररहितः पाठः ॥ ५. तुलनीयोऽमरकोषः २।८।९१॥ ६. '-यः' इति३.४॥ ७. 'सर्व' इति१.४॥ ८. ४प्रतौ नास्ति ॥ ९. रघुवंशे 'वीक्ष्य' इत्यस्य स्थाने 'प्रेक्ष्य' इति, 'वीक्ष्य' इति च पाठान्तरं दृश्यते, पृ.२४३॥ १०. ३प्रतौ नास्ति ॥ ११. इतोऽग्रे ३प्रतौ 'द्वे' इति दृश्यते ॥ १२. स्वामिसम्मतोऽयं धातुपाठः, 'शूल रुजायां सङ्घाते च' इति मैत्रेयसायणौ ॥ १३. 'तालव्यन्तोऽयम्' इति४॥ १४. द्र. स्वोपज्ञटीका ३।७८७॥, पृ.१७४॥, तत्र ''अयं तालव्यं'' इति दृश्यते ॥ १५. ''घञर्थे कः, 'कृञादीनां के द्वे भवतः'(वा-६।१।१२॥)इति द्वित्वम्'' इति युक्तम् ॥ १६. '-र्णका-' इति३.४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ खुरन्ति छिन्दन्त्यस्यां **खुरली** । 'खुर विलेखने'[1] (तु.प.से.), बाहुलकादलप्रत्यये गौरादिः । २ श्राम्यतेऽनेन **श्रमः** । 'श्रमु तपसि खेदे च'(दि.प.से.), घञ्, 'नोदात्तोपदेश-'७।३।३४॥ इति वृद्धिनिषेधः । ३ योगे चित्तैकाग्र्ये साध्वी **योग्या**[2] । 'तत्र साधुः'४।४।९८॥ इति यत् । "पुनः पुनस्तद्युगयुग्विधाता योग्यामुपास्ते नु युवां युयुक्षुः"[नैषधीयचरितम्, सर्गः-३, श्लो-११७]इति हर्षः । ४ शस्त्राणामभ्यसनं **शस्त्राभ्यासः ( अभ्यासः )** । भावे घञ् । चत्वारि शस्त्राभ्यासस्य । 'आखाडा' इति भाषा । "शराभ्यास उपाशनम्" [शेषनाममाला ३।१५२॥]इति शेषः ॥

## तद्भूः खलूरिका ।

१ तस्य श्रमस्य साधनाय भूः तद्भूः, खडयते लक्ष्यं[3] भिद्यतेऽत्र खडूरः । 'खडि खड भेदने'[4](चु.उ.से.), खर्जूरादित्वादूरच्, लत्वे खलूरः, ततः स्वार्थे कन् टापि[5] **खलूरिका** । एकं श्रमसाधनभूमेः ॥

## सर्वाभिसारः सर्वौघः सर्वसंनहनं समाः[6] ॥७८८॥

१ सर्वेण सैन्येन अभिसरणं **सर्वाभिसारः** । 'सृ गतौ' (भ्वा.प.से.), भावे घञ् । २ सर्वेषामोघो वाहनं **सर्वौघः** । ३ सर्वं संनह्यतेऽत्र **सर्वसंनहनम्** । 'णह बन्धने'(दि.उ.अ.), अधिकरणे ल्युट् । त्रीणि सर्वसैन्याभिसरणस्य ॥७८८॥

## लोहाभिसारो दशम्यां विधिर्नीराजनात् परः ।

१ राज्ञां शस्त्रादिना प्रस्थाननाम एकम्, नृपाणां सङ्ग्रामनिर्गमाय यस्मिन् वासरे शस्त्राणि निःसार्यन्ते, तन्नाम इत्यर्थः । अस्त्रभृतां राज्ञां विजयदशम्यां यः शास्त्रोक्तो विधिर्विधानं प्रस्थानात् प्राक् सः । लोहं शस्त्रमभिसार्यतेऽत्रेति **लोहाभिसारः** । मिश्रास्तु-"महानवमी दीक्षायामश्वादीनां नीराजने निर्मञ्छने (निर्मज्जने) सत्युत्तरकालं शस्त्रधारिणां राज्ञां यः शास्त्रोक्तो विधिः प्रस्थानात् प्राक्, स लोहाभिसारः, लोहशस्त्रस्य अभिहारः[7] सर्वतो हरणमत्रेति बहुव्रीहिः, "लोहाभिहारं इत्युक्तो विधिर्नीराजनात् परः" [[8]]इत्यमरमाला । [अन्ये तु-] "लोहाभिसारोऽस्त्रभृताम्" []इति पठित्वा "लोहं शस्त्रमभिसार्यते प्रस्थाप्यतेऽत्र[9]" []इत्याहुः"[ ] [इत्याहुः] । कीदृग् विधिः ?, नीराजनात् परः, नीरस्य शान्त्युदकस्याऽजनं क्षेपोऽत्र नीराजनम्, आरात्रिकेत्यर्थः, मन्त्रोक्त्या अश्वगजवाहनातपत्रतालव्यजनध्वजासिधनुश्छुरिकास्वर्णदण्डदुन्दुभिशङ्खसिंहासनानां निःशेषेण[10] राजनं[11] शोभनं वा नीराजनम्, तस्मात् परोऽग्रिमः । यद् दुर्गः-"लोहाभिसारस्तु विधिः परो नीराजनान्नृपैः । दशम्यां दंशितैः कार्यः"[[12]]इति । भविष्योत्तरपुराणेऽपि-

"जयाभिलाषी नृपतिः प्रतिपत्प्रभृतिक्रमात् ।
[13]लोहाभिसारिकं कर्म कारयेद् यावदष्टमी ॥१॥" [ ]इति॥

## प्रस्थानं गमनं व्रज्याऽभिनिर्याणं प्रयाणकम् ॥७८९॥ यात्रा

१ प्रस्थीयते स्थानाच्चल्यते **प्रस्थानम्**, ल्युट् । २ गम्यते **गमनम्** । ३ व्रजनं **व्रज्या** । 'व्रज गतौ'(भ्वा.-प.से.), 'व्रजयजोर्भावे क्यप्'३।३।९८॥ । ४ अभिनिर्यायते **अभिनिर्याणम्** । 'या प्रापणे'(अ.प.अ.), भावे ल्युट्[14] । ५ ततः स्वार्थे कनि[15] **प्रयाणकम्** ॥७८९॥ ६ यानं **यात्रा** । '[हु]यामाश्रुत(भ)सिभ्यस्त्रन्'(उणा-६०७)इति त्रन् । षट् सामान्येन प्रस्थानस्य । 'चालवउं[16]' इति भाषा॥

## अभिषेणनं तु स्यात् सेनयाऽभिगमो रिपौ ।

१ सेनया सहकारणभूतया वा विजिगीषोः रिपावाभिमुख्येन योऽभिगमः गमनम्, सेनयाऽभियातीत्यर्थे सेनाशब्दात् 'सत्यापपाश-'३।१।२५॥ इत्यादिना णिच्, ततो ल्युटि **अभिषेणनम्**[17] । एकं शत्रूपरि गमनस्य ॥

## स्यात् सुहृद्बलमासारः

१ सुहृदो मित्रस्य बलं सैन्यं सुहृद्बलम्, आसियते

---

१. 'क्षुर खुर विलेखने' इति स्वामी, 'खुर च्छेदने खण्डने च' इति मैत्रेयः, 'खुर छेदने' इति सायणः ॥ २. 'साधुः योग्यः' इति४॥ ३. 'लक्षं' इति२॥ ४. 'खड खडि भेदे' इति स्वामी, 'खड खडि कडि भेदने' इति मैत्रेयसायणौ ॥ ५. 'टाप्' इति४॥ ६. 'समः' इति३॥ ७. '-सारः' इति४॥ ८. द्र. पदचन्द्रिका, भा-२, क्षत्त्रवर्गः, श्लो-५४८, पृ.६३३॥, तत्र 'नीराजनात् परः' इत्यस्य स्थाने 'नीराजनोत्तरः' इति दृश्यते ॥ ९. इतोऽग्रे ४प्रतौ 'इति लोहाभिसारः' इति दृश्यते ॥ १०. '-षणं' इति१॥ ११. १प्रतौ नास्ति ॥ १२. द्र. अम.क्षीर.२।८।९५॥, पृ.१९५॥, स्वोपज्ञटीका३।७८९॥, पृ.१७५॥ १३. 'लौ-' इति२॥ १४. इतोऽग्रे ४प्रतौ 'प्रयायते प्रयाणं' इति दृश्यते ॥ १५. इतोऽग्रे ३प्रतौ 'प्रयायते प्रयाणम्, ततः स्वार्थे कनिः' इति दृश्यते ॥ १६. '-वो' इति३, '-वौ' इति४॥ १७. 'उपसर्गात् सुनोति-'८।३।६५॥ इत्यादिना षत्वं बोध्यम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**आसारः**, अन्वागच्छन्मित्रबलमित्यर्थः । 'सृ गतौ'(भ्वा.-प.अ.), भावे घञ् । एकं मित्रसेन्यस्य ॥

**प्रचक्रं चलितं बलम् ॥७९०॥**

१ प्रस्थितं चक्रं सैन्यं **प्रचक्रम्** । प्रक्रियत इति प्रचक्रम् । कृञो[1] घजर्थे कः, 'कृञादीनां[2] के-'(वा-६।१।१२॥)इति द्वित्वम् । चल्यते स्म चलितम्, प्रयाणकस्थितमित्यर्थः । एकं[4] प्रस्थितसैन्यस्य ॥७९०॥

**प्रसारस्तु प्रसरणं तृणकाष्ठादिहेतवे ।**

१ सैन्याद् बहिः तृणजलाद्यर्थं[5] प्रसरणं[6] **प्रसारः** । भावे घञ् ।

"निरुद्धवीवधाऽऽसारं[7]प्रसाराङ्गा(प्रसारा गा)इव व्रजम् ।
उपरुन्धं तु दाशार्हाः पुरीं माहिष्मतीं द्विषः ॥१॥"

[शिशुपालवधम्, सर्गः-२, श्लो-६४]इति माघः । "अमरस्तु- 'स्यादासारः[8] प्रसरणम्'[अमरकोष:२।८।९६॥]इत्याह, तच्च अर्थशास्त्रेण न संवदति"[अभि-, स्वोपज्ञटीका३।७९१॥]इति श्रीआचार्याः । एकं तृणाद्यर्थं सैन्याद् बहिर्गमनस्य ॥

**अभिक्रमो रणे यानमभीतस्य रिपून् प्रति ॥७९१॥**

१ अभीतस्याऽऽभिमुख्येन अभिभूय रिपून् अरीन् प्रति रणे सङ्ग्रामे यानं गमनम्, तन्नामैकम्, अभिक्रमणम् **अभिक्रमः** । 'क्रमु पादविक्षेपे'(भ्वा.प.से.), भावे घञ्, 'नोदात्तोपदेश-'७।३।३४॥ इति वृद्धिनिषेधः । "अहितान् प्रत्यभीतस्य रणे यानमभिक्रमः"[अमरकोष:२।८।९६॥]इत्यमरः ॥७९१॥

**अभ्यमित्र्योऽभ्यमित्रीयोऽभ्यमित्रीणोऽभ्यरिव्रजन् ।**

१-३ आभिमुख्येनऽमित्रानलङ्गामी **अभ्यमित्र्यः**, **अभ्यमित्रीयः**, **अभ्यमित्रीणः** । 'अभ्यमित्राच्छ च' ५।२।१७॥ इति छः, चकाराद्[9] यत्खौ । त्रीणि भृशं वैरिसंमुखगामिनः ॥

**स्यादुरस्वानुरसिलः[10]**

१ उरसा बलं लक्ष्यते, तदस्याऽस्ति **उरस्वान्** । 'तदस्यास्ति-'५।२।९४॥ इति मतुप्, 'तसौ मत्वर्थे'१।४।१९॥इति भत्वान्न रुत्वम्, 'झयः'[11]८।२।१०॥ इति वत्वम् । पिच्छादित्वादिलचि **उरसिलः** । द्वे 'हीयाबली[12]' इति ख्यातस्य ॥

**ऊर्जस्व्यूर्जस्वलौ समौ ॥७९२॥**

१ ऊर्जो बलं पराक्रमो वा, तदतिशययुक्त **ऊर्जस्वी** । 'अस्मायामेधास्रजो विनिः'५।२।१२१॥ इति विनिः । ऊर्जा[13] बलमस्याऽस्ति **ऊर्जस्वलः** । 'ज्योत्स्नातमिस्रा-'५।२।११४॥ इत्यादिना साधुः । "ऊर्जस्वलः स्यादूर्जस्वी य ऊर्जातिशयान्वितः"[अमरकोष:२।८।७५॥]इत्यमरः । ऊर्जस्वानपि । [द्वौ बलिनः] ॥७९२॥

**सांयुगीनो रणे साधुः[14]**

१ संयुगे साधुः **सांयुगीनः** । 'प्रतिजनादिभ्यः खञ्' ४।४।९९॥ इति खञ्, 'आयनेयी-'७।१।२॥ इत्यादिना खस्य ईनादेशः । प्रतिजनादिपाठादेव संयुगशब्दस्य घञि गुणाभावः । रणे सङ्ग्रामे यः साधुस्तस्यैकम् ॥

**जेता जिष्णुश्च जित्वरः[14] ।**

१ जयनशीलो **जेता** । 'जि जये'(भ्वा.प.अ.), तृन् । २ जयनशीलो **जिष्णुः** । 'ग्लाजिस्थश्च ग्स्नुः'३।२।१३९॥ । ३ जयनशीलो **जित्वरः** । 'इण्नशि(नश्)जिसर्तिभ्यः क्वरप्' ३।२।१६३॥, पित्त्वात् तुक् । त्रीणि जयनशीलस्य । [शेषश्चात्र- "जिष्णौ तु विजयी जैत्रः"] [शेषनाममाला३।१५३॥] ॥

**जय्यो यः शक्यते जेतुम्[15]**

१ जेतुमवश्यं शक्यो **जय्यः** । 'क्षय्यजय्यौ शक्यार्थे' ६।१।८१॥ इति साधुः । यो जेतुं शक्यते, तस्यैकम् ॥

**जेयो जेतव्यमात्रके[15] ॥७९३॥**

१ शक्यार्थादन्यत्र योग्यतामात्रेण, जयनीयो **जेयः** । 'अचो यत्'३।१।९३॥ इति यत् । एकं 'जीपवा योग्य' इति ख्यातस्य ॥७९३॥

**वैतालिका बोधकराः अर्थिकाः सौखसुप्तिकाः ।**

---

१. 'ततो' इति३॥ २. 'कन्' इति३॥ ३. 'तनादीनां' इति३॥ ४. ४प्रतौ नास्ति ॥ ५. '-र्थं-' इति१.२॥ ६. 'प्रसा-' इति३॥ ७. '-सारं' इति२॥ ८. 'प्रसा-' इति१.३॥ ९. 'चात्' इति ४प्रतौ, 'चकारात्' इति ४प्रतौ बहिर्भागे ॥ १०. तुलनीयोऽमरकोष:२।८।७६॥ ११. वस्तुतस्त्वयं प्रमादः प्रतिभाति, मस्य झय्त्वाभावात्, अथ च 'मादुपधायाः-'८।२।९॥ इत्यनेन वत्वं बोध्यम् ॥ १२. '-वली' इति३॥ १३. आकारान्त ऊर्जाशब्दश्चिन्त्यः, मेदिनीवैजयन्तीकोषादौ सान्तस्याऽदन्तस्य च ऊर्जशब्दस्य दर्शनात् ॥ १४. तुलनीयोऽमरकोष:२।८।७७॥ १५. तुलनीयोऽमरकोष:२।८।७४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ विविधो मङ्गलगीतवाद्यादिकृतस्तालः शब्दस्तेन चरन्ति व्यवहरन्तीति **वैतालिकाः** । 'चरति'४।४।८॥ इति ठक्, 'ठस्येकः'७।३।५०॥, 'किति च'७।२।११८॥ इत्याद्यचो वृद्धिः । वितालः शब्दः प्रयोजनमेषामिति वा। 'प्रयोजनम्' ५।१।१०९॥ इति ठक् । २ निशान्तं निवेदयन्तो ये नृपं बोधयन्ति जागरयन्ति ते **बोधकराः** ।'कृञो हेतुताच्छील्यानुलोम्येषु'३।२।२०॥ इति टः। ३ अर्थिन एव **अर्थिकाः** । स्वार्थे कन् । ४ सुखसुप्तं पृच्छन्ति **सौखसुप्तिकाः** । 'पृच्छतौ सुस्नातादिभ्यः'(वा-४।४।१॥)इति ठक् । सौखशायनिक-सौखशय्यिकावपि[1] । अमरस्तु ''वैतालिका बोधकराः'' [अमरकोषः२।८।९७॥]इति राज्ञोऽवसरपाठकानाह । चत्वारि राज्ञां प्रातर्बोधकरस्य ॥

## घाण्टिकाश्चाक्रिकाः

१ घण्टया[2] चरन्ति **घाण्टिकाः** । ''देवताद्यग्रे घण्टाघातेन ये शंसन्ति, ते घाण्टिकाः श्रावकाख्याः'' [अभि-,स्वोपज्ञटीका३।७९४॥, अम.क्षीर.२।८।९८॥]इत्याचार्यस्वामिनौ । चुरादौ घटिर्भाषार्थः, 'गुरोश्च'३।३।१०३॥ इत्यकारः, 'इदितः-'७।१।५८॥ इति नुम्, 'तेन चरति[3]' ४।४।८॥ इति ठक् । ''घण्टा गोष्ठी, तया चरन्ति नैरुक्तो वर्णागमो निरनुनासिको वा''[[4]]इति सर्वस्वम् । ''राज्ञः प्रबोधसमये घण्टाशिल्पास्तु[5] घाण्डिका''[[6]]इति चै । २ चक्रं राष्ट्रं प्रोयजनमेषां **चाक्रिकाः** । 'प्रयोजनम्'[7]५।१।१०९॥ इति ठक् । द्वे घण्टावादकस्य ॥

## सूतो बन्दी मङ्गलपाठकः ॥७९४॥

१ सुनोति **सूतः**[8] । 'षुञ् अभिषवे'(स्वा.उ.अ.) । २ वन्दते स्तौति **बन्दी** । 'वदि अभिवादनस्तुत्योः'(भ्वा.-आ.से.), 'नन्दिग्रहि-'३।१।१३४॥ इति ग्रहादित्वाण्णिनिः । ३ मङ्गलं पठति **मङ्गलपाठकः** । 'पठ व्यक्तायां वाचि' (भ्वा.प.से.), ण्वुल् । त्रीणि मङ्गलपाठकस्य ॥७९४॥

## मागधो मगधः

१-२ मगधेति धातुः कण्ड्वादौ याच्ञार्थः ।
''कमर्थिनः कमुभ्यस्तु (कुषुभ्यन्तु) कं म[ग]ध्यन्तु मागधाः ।
कमिषुध्यन्तु यज्वानो रामेऽरण्यं तुरण्यति ॥१॥''
[[9]]इति श्रीभोजः । मगध्यति याचते मगधः । पचाद्यच् । मगध एव **मागधः**, प्रज्ञादित्वादण् । ''वंशक्रमेण महत्त्ववादिनो राजाद्यग्रतः स्तुतिकृतो मागधाः क्षत्रिया वैश्यजातीया वा मगधदेशोद्भवाः''[[10]]इत्यन्ये । २ अणभावे **मगधः** । ''मागधाः स्तुतिवंशजाः''[[11]]इत्यन्ये । ''सूताद्या मगधान्ता एकार्था इत्येके''[अम.क्षीर.२।८।९८॥]इति क्षीरस्वामी[12] । वंशोदीरणेन यो याचते, तस्य द्वे ॥

## संशप्तका युद्धाऽनिवर्तिनः ।

१ 'शपृ(शप) आक्रोशे'(भ्वा.उ.अ.), भावे क्तः, शप्तं शपथः, सं सम्यक् शप्तं सत्यं येषां ते **संशप्तकाः** । ([13]'शपृ(शप) आक्रोशे'(भ्वा.उ.अ.), भावे क्तः), संशपन्ति पलायमानानिति वा । सशपथं[14] युध्यन्त इति वा । युद्धात्र निवर्तन्ते न पराङ्मुखा भवन्ति युद्धाऽनिवर्तिनः । एकं 'संग्रामिइं[15] जे न भाजइं[16]' इति प्रसिद्धस्य ॥

## नग्नः स्तुतिव्रतः

१ न वस्ते **नग्नः**, पृषोदरादिः । कौपीनमात्रजरद्वस्त्रपरिधानात्, न विद्यन्ते[17] ग्नाः श्रियश्छन्दांसि वा अस्येति वा । 'नभ्राण्नपात्-'६।३।७५॥ इति नञ्प्रकृत्या । २ स्तुतिरेव व्रतमस्य **स्तुतिव्रतः** । ''नग्नो बन्दिनि क्षपणे विवस्त्रेऽप्यभिधेयवत्''[विश्वप्रकाशकोशः, नान्तवर्गः, श्लो-१४]इति महेश्वरः[18] । द्वे कौपीनमात्रजरद्वस्त्रपरिधानमङ्गलपाठकस्य ॥

## तस्य ग्रन्थो भोगावली भवेत् ॥७९५॥

१ तस्य नग्नस्य ग्रन्थः शास्त्रम्, यत्र काव्ये राज्ञो नानाविधाः क्रियाः स्नानभोजनादिकाः कुर्वाणस्य तदनुरूपा गाथादयः, सा **भोगावली** । भोगः सुखम्, तद्धेतुत्वाद् भोगाः

---

१. '-व्य-' इति ३॥ २. 'घण्टाया' इति३॥ ३. 'चरति' इत्येवाऽष्टाध्याय्याम् ॥ ४. टीकासर्वस्वे न दृश्यते ॥ ५. 'घ-' इति२.३॥ ६. द्र. अम.क्षीर.२।८।९८॥, पृ.१९५॥ ७. ४प्रतौ नास्ति ॥ ८. १.२प्रत्योर्नास्ति ॥ ९. द्र. अम.क्षीर.२।८।९८॥, पृ.१९५॥, पदचन्द्रिका, भा-२, क्षत्त्रवर्गः, श्लो-५५१, पृ.६३५॥ १०. द्र. पदचन्द्रिका, भा-२, क्षत्त्रवर्गः, श्लो-५५१, पृ.६३५॥, तत्र 'क्षत्त्रिया वैश्यजातीया' इत्यस्य स्थाने 'क्षत्त्रिया वैश्याज्जाता' इति दृश्यते ॥ ११. द्र. अम.क्षीर.२।८।९८॥, पृ.१९५॥, स्वोपज्ञटीका३।७९५॥, पृ.१७६॥, मङ्खकोपस्योद्धरणमिदम् ॥ १२. अम.क्षीरस्वामिकृतटीकायां ''चत्वार एकार्था इत्येके'' इति दृश्यते, २।८।९८॥, पृ.१९५॥ १३. कोष्ठान्तर्गतपाठः १.२.३प्रतिषु न दृश्यते ॥ १४. 'सशपं' इति१, 'संशपते' इति४॥ १५. 'स-' इति१, 'संग्रामे' इति३, 'संग्रामइ' इति४॥ १६. 'भाजै' इति३॥ १७. इतोऽग्रे ४प्रतौ 'वस्त्राणि न-' इति दृश्यते ॥ १८. महेश्वरकृतविश्वप्रकाशकोशे तु ''नग्नोऽपि च क्षपणके विवस्त्रे चाऽभिधेयवत्'' इति दृश्यते, पृ.८६॥

Jain Education International     For Private & Personal Use Only     www.jainelibrary.org

स्तुतयः, तासामावली भोगावली । ''वैतालिकाः स्फुटपदप्रकटार्थमुच्चैर्भोगावलीं कलगिरोऽवसरेषु पेठुः''[शिशुपालवधम्, सर्गः-५, श्लो-६७]इति माघः ॥७९५॥

**प्राणः स्थाम तरः पराक्रमबलद्युम्नानि शौर्यौजसी ।**
**शुष्मं शुष्म च शक्तिरूर्जसहसी**

१ प्राणित्यनेन **प्राणः** । प्रपूर्वः 'अन प्राणने'(अ.-प.से.), घञि । प्राणनं[1] प्राण इति भावे घञ् वा । २ तिष्ठत्यनेन **स्थाम** । 'ष्ठा गतिनिवृत्तौ'(भ्वा.प.अ.), 'आतो मनिन्क्वनिप्वनिपः[2]'३।२।७४॥ इति मनिप्, ऊणादिको[3] वा मनिन्प्रत्ययः । ३ तरन्त्यनेन आपदं **तरः**, क्लीबलिङ्गावेतौ । 'तॄ प्लवनतरणयोः'(भ्वा.प.से.), '-असुन्'(उणा-६२८)इत्यसुन् । ४ पराक्रम्यतेऽनेन **पराक्रमः** । 'हलश्च'३।३।१२१॥ इति घञ्, 'नोदात्तोपदेश-'७।३।३४॥इति वृद्धिनिषेधः । ५ बलति[4] प्राणित्यनेन **बलम्**, पुंक्ली. । 'बल प्राणने'(भ्वा.-प.से.), घञर्थे कः । ६ दिवि मीयते **द्युम्नम्** । 'द्युस(सु)निभ्यो माडो डित्'(हैमोणा-२६६)इति नः । द्रविणमपि, द्रवत्यनेनाऽरिः द्रविणम् । 'द्रुदक्षिभ्यामिनन्'(उणा-२०८) । ७ शूरस्य भावः **शौर्यम्**, ष्यत्[5] । ८ ओषत्यरीननेनेति **ओजः** । 'उष दाहे'(भ्वा.प.से.), 'उषेर्ज(-र्ज्) च'(हैमोणा-९५९)इत्यसुन् । यद्वा 'उब्ज आर्जवे'(तु.प.से.), 'उब्जेर् [बलं] बलोपश्च'(उणा-६३१)इत्यसुन् बलोपे गुणश्च निपात्यत इति वा । ओजसी, ओजांसि इत्यादि क्लीबे । ९ शुष्यत्यनेनाऽरिः **शुष्मम्**[6] । 'शुष शोषणे'(दि.प.अ.), 'अरिविविशिशुषिभ्यः[7] कित् (अविसिविसिशुषिभ्यः कित्)'(उणा-१४१)इति मन्, अकारान्तोऽयम् । १०[8] '-मनिन्'(उणा-५८४)इति मनिन्प्रत्यये **शुष्म** इति नकारान्तम्[9], क्लीबे । ११ शक्नोत्यनया **शक्तिः** । 'स्त्रियां क्तिन्'३।३।९४॥ १२ ऊर्जनम् **ऊर्जः**, पुंस्त्रीलिङ्गः । 'ऊर्ज बलप्राणनयोः'(चु.उ.से.), भावे घञ् । ऊर्गपि । १३ सहते शत्रुमनेन **सहः**, क्लीबे । 'षह मर्षणे'(भ्वा.आ.से.), '-असुन्'(उणा-६२८) । सहसी, सहांसि इत्यादि । ''दण्डोत्पला मुद्गपर्णी कुमारीनखभेषजे । सहा स्त्री, बले न स्त्री''[ [10] ]इति रभसोऽदन्तमपि । त्रयोदश पराक्रमस्य ॥

**युद्धं तु सङ्ख्यं कलिः ।**
**सङ्ग्रामाहवसम्प्रहारसमरा जन्यं युदायोधनं ॥**
**संस्फोटः कलहो मृधं प्रहरणं संयद्रणो विग्रहः ॥७९६॥**

**द्वन्द्वं समाघातसमाह्वयाभि-**
**सम्पातसंमर्दसमित्प्रघाताः ।**
**आस्कन्दनाजिप्रधनान्यनीक-**
**मभ्यागमश्च प्रविदारणं च ॥७९७॥**

**समुदायः समुदयो राटिः समितिसङ्गरौ ।**
**अभ्यामर्दः सम्परायः समीकं साम्परायिकम्[11] ॥७९८॥**
**आक्रन्दः संयुगं च**

१ ([12]युध्यतेऽत्र **युद्धम्**) । 'युध संप्रहारे'(दि.-आ.अ.), बाहुलकात् क्तः । २ संचक्षते[13]ऽत्र **सङ्ख्यम्**, पुंक्ली. । 'चक्षिङ् व्यक्तायां वाचि'(अ.आ.से.), संपूर्वोऽयं वधार्थः, 'समि[14] ख्यः'३।२।७॥ इति चक्षिङः[15] ख्याञादेशः । संख्याति कथयति शौर्यं कातरत्वं वा । 'ख्या प्रकथने'(अ.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥, 'आतो लोप इटि च[16]'६।४।६४॥इत्यालोपः । ३ कलन्ते स्पर्धमानाः शब्दायन्तेऽत्रेति **कलिः**, पुंसि । 'कल शब्दसङ्ख्यानयोः'(भ्वा.आ.से.), 'कलेरिः'( )इति इः । कलति क्षिपति कातरान् वा । 'कल पिल क्षेपे[17]'(चु.उ.से.), '-इन्'(उणा-५५७)इति इन् । ४ सङ्ग्रामणं **सङ्ग्रामः** । 'सङ्ग्राम युद्धे'(चु.उ.से.), ण्यन्ताद् भावे घञ् । ५ आहूयन्ते योद्धारोऽत्र **आहवः** । 'ह्वेञ् आह्वाने[18]'(भ्वा.उ.अ.), 'आङि[19] युद्धे'३।३।७३॥ अप्, संप्रसारणं च । ६ सम्प्रहरन्ते परस्परं घ्नन्त्यत्र **सम्प्रहारः** । अधिकरणे घञ् । ७ मरणं मरः, सह मरणेन वर्तते **समरः** । समिय्रते सङ्घट्टन्ते[20]ऽत्रेति वा । 'ऋ गतौ'(तु.प.अ.), 'पुंसि

१. ४प्रतौ नास्ति ॥ २. 'आतो मनिन्क्वनिब्वनिपश्च'३।२।७४॥इत्यष्टाध्याय्याम् ॥ ३. 'औ-' इति४॥ ४. 'बलते' इति१.२.३॥ ५. ३.४प्रत्योर्नास्ति ॥ ६. '-पो' इति३॥ ७. ३प्रतौ नास्ति ॥ ८. 'निशि' इति३.४॥ ९. '-न्तः' इति३॥ १०. द्र. पदचन्द्रिका, भा-२, क्षत्त्रवर्गः, श्लो-५५६, पृ.६३८॥, रामाश्रमी २।८।१०२॥, पृ.३९१॥ ११. '-यकम्' इति४॥ १२. कोष्ठान्तर्गतपाठः २प्रतौ नास्ति ॥ १३. '-क्ष्यते' इति३॥ १४. 'सम' इति३॥ १५. '-ख्यङ्' इति३॥ १६. 'इटि च' ४प्रतौ नास्ति ॥ १७. मैत्रेयसम्मतोऽयं धातुपाठः, 'कल किल पिल क्षेपे' इति स्वामी, 'कल विल क्षेपे' इति सायणः, '-आक्षेपे' इति३॥ १८. 'ह्वेञ् स्पर्धायां शब्दे च' इति क्षीरतरङ्गिण्यादयः ॥ १९. 'आङ्' इति३॥ २०. 'संप्रवदन्त्य-' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संज्ञायाम्-'३।३।११८॥ इति घः । पुंनपुंसकोऽयम् । "अस्त्रियां समरानीकरणाः"[अमरकोषः२।८।१०४॥]इत्यमरः । ८ जायते विद्वेषाद् **जन्यम्**, पुंक्ली. । 'जनी प्रादुर्भावे'(दि.आ.से.), 'भव्यगेय-'३।४।६८॥इत्यादिना साधुः । ९ युध्यन्ते[1]ऽस्यां **युत्**, स्त्रियाम् । 'युध सम्प्रहारे'(दि.आ.अ.), सम्पदादित्वात् क्विप् । युधौ, युधः इत्यादि । १० आयुध्यन्तेऽस्मिन् **आयोधनम्** । अधिकरणे ल्युट्, 'युवोरनाकौ'७।१।१॥ । ११ संस्फुटन्ति विशीर्यन्ते कातरहृदयान्यत्र **संस्फोटः** । 'स्फुटिर् विशरणे'(भ्वा.प.से.), अधिकरणे घञ् । 'स्फुट भेदने' (चु.उ.से.) वा । संस्फेट[2] इत्यन्ये । "स्फिट अनादरे[3]" (चु.उ.से.) [अम.क्षीर.२।८।१०६॥]इति स्वामी । "संफेटः" [ ]इति च[4] भरतः[5] । १२ कलं[6] मधुरध्वनिं हन्ति **कलहः** । 'अन्येभ्योऽपि-'(वा-३।२।१०१॥)इति डः । "कलं तु मधुरध्वनौ"[ [7] ]इति धरणिः । कलं हीनबलं हन्तीति वा । 'अन्येभ्योऽपि-' (वा-३।२।१०१॥)इति डः । कलां जहातीति वा । 'ङ्यापोः संज्ञाच्छन्दसि बहुलम्[8]'६।३।६३॥ इति [पूर्वस्य ह्रस्वः] । १३ मर्धति हिनस्ति **मृधम्** । 'मृधि मेधृ मेधा-हिंसनयोः[9]'(भ्वा.उ.से.), 'इगुपध-'३।१।१३५॥इति कः । म्रियन्ते[10]ऽत्रेति मृधं वा । 'मृङ् प्राणत्यागे'(तु.आ.अ.), बाहुलकाद् धक्[11] इति धक् । १४ प्रहरन्तेऽत्रेति **प्रहरणम्** । अधिकरणे ल्युट् । १५ संयतन्ते संयच्छन्ति[12] वा अत्र **संयत्**, क्लीबे[13] । अमरस्तु-"स्त्रियां(स्त्रियः) संयत्-"[अम.२।८।-१०६॥]इत्याह । 'यती प्रयत्ने'(भ्वा.आ.से.), 'यमु नियमने[14]' (भ्वा.प.अ.) वा, संपदादित्वात् क्विप् । १६ रणन्ति दुन्दुभयोऽत्रेति **रणम्**, पुंक्ली. । 'रण शब्दे'(भ्वा.प.से.), 'पुंसि संज्ञायाम्-'३।३।११८॥ इति बाहुलकाद् घः, 'वशिरण्योश्च' (वा-३।३।५८)इति वक्तव्यादप् वा। १७ विगृह्णन्त्यत्र **विग्रहः** । 'ग्रहवृदृ-'३।३।५८॥ इत्यधिकरणेऽपि । ग्रहणं ग्रहो निर्बन्धः, विविधो ग्रहोऽत्रेति 'अव्ययानां च'(वा-२।२।२४॥)इति बहुव्रीहिर्वा ॥७९६॥ १८ द्वौ द्वौ युध्यन्तेऽत्रेति **द्वन्द्वम्**, पृषोदरादित्वात् । "द्वन्द्वं समासकलहयुग्मेषु"[ [15] ]इति श्रीभोजः । १९ सङ्गत्य[16] आघ्नन्ति परस्परमत्र **समाघातः** । 'हन्(हन) हिंसागत्योः'(अ.प.अ.) अधिकरणे घञ्, 'हनस्तोऽचिण्णमुलोः'७।३।३२॥इति तकारोऽन्तादेशः, 'हो हन्तेः-'७।३।५४॥ इति कुत्वम्, 'अत उपधायाः'७।२।११६॥ । २० सम्पृच्छन्ति आह्वयमत्र[17] **समाह्वयः** । २१ अभिमुखं सम्पतन्त्यत्र **अभिसम्पातः** । अधिकरणे घञ् । २२ संमृद्नन्त्यत्र[18] **संमर्दः** । 'मृद क्षोदे'(क्र्या.प.से.), अधिकरणे घञ् । २३ संयन्त्यत्रेति[19] **समित्**, स्त्रीलिङ्गः । 'अण् गतौ'(अ.प.अ.), सम्पदादित्वात् क्विप्, 'ह्रस्वस्य-'६।१।७१॥ इति तुक् । समितौ, समितः इत्यादि । २४ प्रकर्षेण घ्नन्त्यत्र **प्रघातः** । 'हन्(हन) हिंसागत्योः'(अ.प.अ.), अधिकरणे घञ् । २५ आस्कन्द्यन्ते शोष्यन्ते शत्रवोऽत्रेति **आस्कन्दनम्** । 'स्कन्दिर् गतिशोषणयोः[20]'(भ्वा.प.अ.), अधिकरणे ल्युट् । २६ अजन्ति क्षिपन्त्यस्याम्, **आजिः**, स्त्रीलिङ्गः । 'अज गतौ क्षेपणे च' (भ्वा.प.से.), 'अजा(अज्य)तिभ्यामिन्मिण् वृद्धिश्च[21]'(उणा-५७०)इतीन् (इतीण्) । २७ प्रधनति हन्ति **प्रधनम्** । उपर्गबलाद् निधनवद् धनिर्मरणार्थः, पचाद्यच् । प्रदधाति म्रियतेऽत्र, प्रपूर्वाद् धाधः, 'कृपृ(कृपॄ)वृजिमन्दि[नि]धाञ्भ्यः क्युः'(उणा-२३९)इति क्युः[22], अनादेशे प्रधनमिति वा । २८ अनन्ति जीवन्ति सुभटा अनेनेति **अनीकम्**, पुंक्ली. । 'अन प्राणने'(अ.प.से.), 'अनीकादयश्च[23]'( )इतीकन् । अनीकं सैन्यमस्येति वा, अर्शआदित्वादच् । २९ अभ्यागच्छन्त्यत्र **अभ्यागमः** । अधिकरणे घञ् । ३० प्रकर्षेण विदार्यन्ते शत्रवोऽत्र **प्रविदारणम्** । 'दृ(दॄ) विदारणे'(क्र्या.प.से.), णिजन्तः, ततो ल्युट् । ॥७९७॥ ३१ समुदयन्ते मिलन्त्यत्र **समुदायः** । समुत्पूर्वः 'अय गतौ'(भ्वा.आ.से.), 'हलश्च' ३।३।१२१॥ इति घञ् । ३२ समुद्यन्त्यत्रेति[24] **समुदयः** । 'इण् गतौ'(अ.प.अ.), बाहुलकाद् 'एरच्[25]'३।३।५६॥ । ३३ रटन्ति कलहायन्तेऽस्यां **राटिः**, स्त्रीलिङ्गः । 'रट परिभाषणे'

---

१. 'युध्यते-' इति३॥ २. '-स्फोट' इति४॥ ३. 'स्मिट अनादरे' इति मैत्रेयसायणौ ॥ ४. १.२प्रत्योर्नास्ति ॥ ५. "संस्फेट इति युक्तः पाठः, स्फिट अनादरे, भरते तु संफेटः ।" अम. क्षीरस्वामिटीकायाम्, २।८।१०६॥, पृ.१९७॥ ६. 'कलिं' इति४॥ ७. द्र. रामाश्रमी२।८।१०४॥, पृ.३९२॥ ८. 'ङ्यापोः संज्ञाच्छन्दसोर्बहुलम्'६।३।६३॥ इत्यष्टाध्याय्याम् ॥ ९. 'शृधु मृधु उन्दे(उन्दने इति सायणः)' इति स्वामिसायणौ, 'शृधु षृधु मृधु उन्दे' इति मैत्रेयः ॥ १०. 'म्रियते' इति१॥ ११. 'इति धक्' इत्यधिकं प्रतिभाति ॥ १२. 'संयतते संयच्छति' इति१॥ १३. 'नपुंसकं' इति४॥ १४. 'यम उपरमे' इति क्षीरतरङ्गिण्यादयः ॥ १५. द्र. स्वोपज्ञटीका३।७९७॥, पृ.१७७॥, तत्र 'द्वन्द्वं' इति न दृश्यते ॥ १६. 'समागत्य' इति३, 'सं आगत्य' इति४॥ १७. ' यनमत्र' इति१॥ १८. 'संमर्दयत्यत्र' इति३॥ १९. 'समेत्यत्रेति' इति४॥ २०. 'गतिविशो-' इति२॥ २१. फलितार्थकथनमिदं प्रतिभाति, 'अज्यतिभ्यां च'(उणा-५७०)इत्युणादिगणे ॥ २२. 'क्यौ' इति१.२॥ २३. उणादिसूत्रपाठे, 'अनीकादयश्च' इति सूत्रं नास्ति, सिद्धान्तकौमुद्यां चाऽस्य सिद्धिः 'अनिहृषिभ्यां किच्च'(उणा-४५७)इत्युणादिसूत्रेण विहिता ॥ २४. '-दयन्त्यत्रेति' इति२.४, '-दयन्तेऽत्रेति' इति३॥ २५. '-कादच्' इति३.४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(भ्वा.प.से.), 'इञ्(इण)जादिभ्यः'(वा-३।३।१०८॥) इतीञ्[1]। **३४** संयन्त्यस्यां[2] **समितिः**। 'इण् गतौ'(अ.प.अ.), 'स्त्रियां क्तिन्'३।३।९४॥। **३५** सङ्गिरन्ते[3] सङ्गृणन्ति वाऽत्र **सङ्गरः**। 'गॄ निगरणे'(तु.प.से.), ['गॄ शब्दे'(क्र्या.प.से.)वा] 'ॠदोरप्'३।३।५७॥ इत्यप्। **३६** अभ्यामृद्नन्त्यत्र[4] **अभ्यामर्दः**। 'मृद क्षोदे'(क्र्या.प.से.), 'ॠदोरप्[5]'३।३।५७॥। **३७** सम्यक् परान् शत्रून् यान्ति अयन्ते वाऽत्र घञि **सम्परायः**, पुंक्ली.। **३८** समीयन्तेऽत्र **समीकम्**। सम्पूर्वः 'इण् गतौ' (अ.प.अ.)। **३९** सम्परायो मृत्युः प्रयोजनमस्य **साम्परायिकम्**। 'विनयादिभ्यष्ठक्'५।४।३४॥ इति ठक् ॥७९८॥ **४०** आक्रन्दन्ति कातरा अत्र **आक्रन्दः**। '[कदि] क्रदि क्लदि वैक्लव्ये[6]'(भ्वा.आ.से.), 'हलश्च'३।३।१२१॥इत्यधिकरणे घञ्। **४१** संयुज्यन्तेऽत्र **संयुगम्**, पुंक्ली.। 'युजिर् योगे'(रु.उ.अ.), अधिकरणे घञ्। सङ्गता रथयुगा अत्रेति वा। सामान्यत एकचत्वारिंशत् सङ्ग्रामस्य ॥

अथ विशेषत आह-

### अथ नियुद्धं तद्भुजोद्भवम्।

१ नियतं[7] युद्धं **नियुद्धम्**। ''निगृह्य युद्धं नियुद्धमिति वा।''सन्निकृष्टयुद्धं नियुद्धम्''[ ][8]इति सुभूतिः। तदिति युद्धम्, भुजोद्भवं बाहुभिर्जिनितमित्यर्थः। एकं बाहुयुद्धस्य ॥

### पटहाडम्बरौ तुल्यौ

१ पटो हन्यतेऽत्र[10] **पटहः**। 'अन्येभ्योऽपि(अन्येष्वपि-'३।२।१०१॥ इति डः। वाद्यविशेषः। यद् वाचस्पतिः- ''महासमरतूर्ये तु पटहाडम्बरावुभौ''[ ][11]इति। २ आदम्यते **आडम्बरः**, पुंक्ली. एतौ। 'दमुं[12] उपशमे'(दि.प.से.), डमरवद् दस्य डत्वेऽरचि साधुः। द्वे सङ्ग्रामवाद्यस्य ॥

### तुमुलं रणसङ्कुलम् ॥७९९॥

१ ताम्यन्त्यत्रेति **तुमुलम्**। 'तमु ग्लानौ[13]'( ), बाहुलकादुलक्[14], कित्, नैरुक्तस्तकारः। ''तुमुलो व्याकुलो रवः''[हलायुधकोशः१।१३९॥]इति त्रिकाण्डम् (हलायुधः)। ''तु इति सौत्रो धातुर्गत्यर्थः, ततः क्विप्, आगमानित्यत्वान्न तुक्। मुरति संवेष्टयति, इगुपधत्वात्[15] कः, तोर्मुरः तुमुरः, कपिरिकादित्वाल्लत्वम्''[ ][16]इत्यन्ये। रणस्य सङ्कुलं सङ्कीर्णता रणसङ्कुलम्। यद् गौडः-''बिभीतकतरौ पुंसि तुमुलं रणसङ्कुले''[ ]इति। एकं सङ्ग्रामसङ्कीर्णतायाः ॥

### नासीरं त्वग्रयानं स्यात्

१ नासते **नासीरम्**, स्त्रीक्लीबयोः[17]। यद् गौडः- ''न नाग्रयाने नासीरम्''[ ]इति। ''नासीरोऽस्त्री''[वैजयन्तीकोषः३।७।२०३॥]इति वैजयन्ती। 'णासृ शब्दे' (भ्वा.आ.से.), बाहुलकात् 'कृशॄपू(पृ)कटिपटि-'(उणा-४७०)इत्यादिना ईरन्। दन्त्यसकारवान्। ''नासीरसीमनि घनध्वनिरस्य भूयान्''[नैषधीयचरितम्, सर्गः-१३, श्लो-२३] इति श्रीहर्षः। अग्रे यानमस्य अग्रयानम्। एकं 'पेसखानओं[18]' इति ख्यातस्य ॥

### अवमर्दस्तु पीडनम्[19]।

१ अवमर्दनम् **अवमर्दः**। भावे घञ्। २ पीड्यते **पीडनम्**। 'पीड रुजायाम्[20]'(चु.प.से.), ल्युट्। द्वे सङ्ग्रामपीडायाः ॥

### प्रपातस्त्वभ्यवस्कन्दो धाट्यभ्यासादनं च सः ॥८००॥

१ प्रपतनं **प्रपातः**। 'पत्लृ पतने[21]'(भ्वा.प.से.), भावे घञ्। बलादाक्रमणमित्यर्थः। २ अभ्यवस्कन्दम् **अभ्यवस्कन्दः**। अभ्यवपूर्वः 'स्कन्दिर् गतिशोषणयोः' (भ्वा.प.से.), भावे घञ्। ३ धावन्तोऽटन्त्यस्यां धाटिः, पृषोदरादिः, 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि **धाटी**। ४ अभ्यासाद्यत इति **अभ्यासादनम्**। अभ्याङ्पूर्वात् सदेर्ण्यन्ताद् ल्युट्। चत्वारि धाट्याः ॥८००॥

### तद् रात्रौ सौप्तिकम्

१. 'इति घञ्' इति२, 'इतीन्' इति३॥ २. '-स्यामिति' इति३॥ ३. '-न्तो' इति३॥ ४. '-मृदन्ति अत्र' इति३॥ ५. 'अकर्तरि च कारके संज्ञायाम्'३।३।१९॥ इत्यनेन घञ् युक्तः ॥ ६. 'कदि क्रदि क्रद क्लद वैक्लव्ये' इति मैत्रेयः ॥ ७. '-युतं' इति२॥ ८. द्र. पदचन्द्रिका, भा-१, क्षत्त्रवर्गः, श्लो-५६०, पृ.६४३॥ ९. 'बाहुज-' इति३॥ १०. '-त्रेति' इति३.४॥ ११. द्र. स्वोपज्ञटीका३।७९९॥, पृ.१७७॥ १२. 'दम' इति४॥ १३. 'तमु काङ्क्षायाम्' क्षीरतरङ्गिण्यादयः ॥ १४. '-क्' इति१॥ १५. '-धात्' इति१.४॥ १६. द्र. पदचन्द्रिका, भा-२, क्षत्त्रवर्गः, श्लो-५६०, पृ.६४३॥ १७. 'क्लीबस्त्रीलिङ्गः' इति३॥ १८. '-नउं' इति२, '-खानो' इति३, '-खानौ' इति४॥ १९. तुलनीयोऽमरकोषः २।८।१०९॥ २०. 'पीड गहने' इति स्वामी, 'पीड अवगाहने' इति मैत्रेयसायणौ ॥ २१. 'शल हुल पत्लृ गतौ' इति क्षीरतरङ्गिण्यादयः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ तदिति अभ्यासादनम्, रात्रौ निशि, सुप्तेषु भवं **सौप्तिकम्** । अध्यात्मादित्वाद् ठक् । एकं 'रातीवाहा' इति ख्यातस्य ॥

**वीराशंसनं त्वाजिभीष्मभूः ।**

१ वीरा आशंस्यन्तेऽत्र **वीराशंसनम्** । 'शंस स्तुतौ'[1] ( ), अधिकरणे ल्युट्, क्लीबे । "सा वीराशंसनी युद्धभूमिर्याऽतिभयप्रदा"[अमरकोषः२।८।१००॥]इत्यमरः स्त्रियामाह । आजेः सङ्ग्रामस्य भीष्मा अतिभयङ्करा भूर्भूमिः आजिभीष्मभूः । एकं रणक्षेत्रस्य ॥

**नियुद्धभूरक्षवाटः**

१ नियुद्धस्य भुजजातसङ्ग्रामस्य भूः नियुद्धभूः, अक्षौ[2] मल्लानां युद्धव्यवहारः, तस्य वाटः **अक्षवाटः** । एकं 'मल्लखाढा' इति ख्यातस्य ॥

**मोहो मूर्च्छा च कश्मलम् ॥८०१॥**

१ मोहनं **मोहः** । 'मुह वैचित्त्ये'(दि.प.से.), भावे घञ् । २ मूर्च्छनं **मूर्च्छा** । 'मूर्च्छा मोहसमुच्छ्राययोः' (भ्वा.प.से.), 'गुरोश्च हलः'३।३।१०२॥ इत्यप्रत्ययः, 'उपधायाश्च(-यां च)'८।२।७८॥ इति दीर्घत्वम् । ३ कशति गच्छति चिरं न तिष्ठति **कश्मलम्** । 'कश गतौ'(अ.आ.-से.), 'कुटेः क्मरच्[4](क्मलच्)'(चान्द्रोणा-३।४८॥)इति बाहुलकात् क्मरच् (क्मलच्) । "कशिः सौत्रो धातुः"[ ] इति सुभूत्यादयः । शयनशमनशीलं कश्मलं शुंभलं (शृङ्खलं) च"[ [5]]इति शभेदात् तालव्यशम्[6] । सङ्ग्रामे प्रहारात् मोहो वैचित्यं मूर्च्छा मूर्च्छनम्, तयोर्नामैकं कश्मलमिति ॥८०१॥

**वृत्ते भाविनि वा युद्धे पानं स्याद् वीरपाणकम् ।**

१ वृत्ते अङ्गीकृते रणे, भाविनि भविष्यति वा रणे, रणजनितश्रमशान्तये वीराणां यन्मद्यादिपानम्, तद् वीरकर्तृत्वाद् **वीरपाणम्** । 'वा भावकरणयोः'८।४।१०॥इति णत्वम् । वीरपानं वा । "वीरपानं (वीरपाणं) तु यत्पानं वृत्ते भाविनि वा रणे"[अमरकोषः२।८।१०३॥]इत्यमरः । वृत्तशब्दोऽत्र चतुर्थवर्गाद्यद्वयोपधो वृत्तार्थः[7] । "वृत्ते तु वृत्तव्यावृत्तौ"[ [8]] इत्याचार्याः । "वृत्तस्तु वर्तुलेऽतीते मृतेऽधीते[9] दृढे वृते" [विश्वलोचनकोशः, तान्तवर्गः, श्लो-५६]इति श्रीधरः । एकं [वृत्ते भाविनि वा युद्धे यत्पानम्, तस्य] ॥

**पलायनमपयानं संदावद्रवविद्रवाः ॥८०२॥**
**अपक्रमः समुत्प्रेभ्यो द्रावः**

१ पलाय्यते **पलायनम्** । 'अय गतौ'(भ्वा.आ.से.), परापूर्वः, ल्युट्, 'उपसर्गस्यायतौ'८।२।१९॥ इति लत्वम् । २ अपसृत्य यायते **अपयानम्** । अपपूर्वः 'या प्रापणे'(अ.प.अ.), ल्युट् । ३ संदवनं **संदावः** । 'दु गतौ'(भ्वा.प.अ.), 'समि द्रुदुवः[10]'३।३।२३॥इति घञ् । ४-५ द्रवणं **द्रवः** । विद्रवणं **विद्रवः** । 'द्रु गतौ'(भ्वा.प.अ.), 'ऋदोरप्'३।३।५७॥इत्यप् ॥८०२॥ ६ अपावृत्य क्रमणम् **अपक्रमः** । भावे घञ्, 'नोदात्तोपदेश-'७।३।३४॥इति निषेधाद् वृद्ध्यभावः । ७-९ समुत्प्रेभ्यः परः[11] द्रावः, संद्रवणं **संद्रावः** । 'द्रु गतौ'(भ्वा.-प.अ.), 'समि द्रुदुवः[10]'३।३।२३॥ इति घञ् । उद्द्रवणम् **उद्द्रावः** । 'उदि श्रयति-'३।३।४९॥इत्यादिना घञ् । प्रद्रवणं **प्रद्रावः** । 'प्रे द्रुस्तुस्रुवः'३।३।२७॥इति घञ् । नशनमपि, तालव्यमध्यम् । नव पलायनस्य । 'नासवउं[12]' इति भाषा ॥

**अथ विजयो जयः ।**

१-२ विजयनं **विजयः** । जीयते **जयः** । 'जि जये'(भ्वा.प.अ.), 'जि अभिभवे'(भ्वा.प.अ.) वा[13], उभयत्र घञ्[14] । द्वे जयस्य ॥

**पराजयो रणे भङ्गः**

१ पराजयनं **पराजयः** । भावे घञ्[14] । रणे सङ्ग्रामे भङ्गोऽपसरणम्, अन्यत्राऽप्युपचारात् । एकं पराजयस्य ॥

**डमरे डिम्बविप्लवौ ॥८०३॥**

---

१. 'आङः शसि इच्छायाम्'(भ्वा.आ.से.)इति क्षीरतरङ्गिण्यादयः ॥ २. 'अक्षौ' इति१, 'अक्षानां' इति४॥ ३. 'युद्धस्य' इति१॥ ४. 'कुटिकशिकौतिभ्यः प्रत्ययस्य मुट् च'(उणादिगणसूत्रम्-१०६)इत्युणादिगणसूत्रस्वरूपम् ॥ ५. द्र. पदचन्द्रिका, भा-२, क्षत्त्रवर्गः, श्लो-५६३, पृ.६४६॥ ६. '-व्यं शम्' इति३.४॥ ७. '-त्त्यर्थः' इति४॥ ८. स्वोपज्ञटीकायामिदमुद्धरणं न दृश्यते ॥ ९. '-ख्याते' इति विश्वलोचनकोशे, पृ.१२८॥ १०. 'समि युद्रुदुवः' इत्यष्टाध्याय्याम् ॥ ११. ३प्रतौ नास्ति ॥ १२. '-वो' इति३, '-वौ' इति४॥ १३. ३.४प्रत्योर्नास्ति ॥ १४. 'एरच्'३।३।५६॥ इत्यनेनाऽच् युक्तः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ दाम्यति **डमरः** । 'दमु उपशमे'(दि.प.से.), 'दमेर्णिद्वेति[1] दस्य डः-'(हैमोणा-४०२)इत्यरः, तत्र । २ डयन्तेऽस्माद् **डिम्बः**, पुंक्ली.[2] । ३ विप्लवनं **विप्लवः** । 'प्लुङ् गतौ' (भ्वा.आ.अ.), 'ऋदोरप्'३ ।३ ।५७ ॥इत्यप् । त्रीणि विप्लवस्य । 'लूंटि'[3] इति भाषा । आयुधं विना कलहनामान्यमूनि[4]'' [ ]इत्यन्ये । 'वेढि' इति भाषा ॥ ([5]शेषश्चात्र-''स्याच्छृगाली तु विप्लवे''[शेषनाममाला ३ ।१५३ ॥]) ॥८०३॥

## वैरनिर्यातनं वैरशुद्धिर्वैरप्रतिक्रिया ।

१ यतेति धातुरुपकारापकारयोश्चुरादिः निर्पूर्वः, ततो ल्युटि निर्यातनम्, वैरस्य निर्यातनं **वैरनिर्यातनम्** । २ वैरस्य ऋणस्येव शोधनं **वैरशुद्धिः** । ३ वैरस्य प्रतीकरणं **वैरप्रतीकारः( वैरप्रतिक्रिया )** । भावे घञ् । त्रीणि वैरभञ्जनस्य॥

## बलात्कारस्तु प्रसभं हठः

१ ''बलादिति निपातो हठार्थः''[अम.क्षीर.२।-८।११०॥]इति स्वामी, तस्य करणं **बलात्कारः** । २ सभाशब्देनाऽत्र सभासाध्यो युक्तायुक्तविचारो लक्ष्यते, प्रगता सभा विचारोऽस्मात् **प्रसभम्**, क्लीबेऽयम्[6] । वैजयन्ती तु-''प्रसभोऽस्त्री बलात्कारः''[वैजयन्तीकोष३ ।७ ।२०९ ॥] इति पुंस्यप्याह । ''क्लीबे तु प्रसभं हठे''[[7] ]इति वोपालितः । ३ 'हठ प्लुतिसङ्क्कुद्धयोः[8]'(भ्वा.प.से.), सङ्क्कुद्धः बलात्कारः, घञर्थे के **हठः** । मड्डा[9] पियाणा एतौ देश्याम्, यद्देशीमादिषु शब्देष्वनेकार्थेषु मड्डा बलकारे आणासु । मड्डा बलात्कारः आज्ञा च''[ ]इति तट्टीका । एकार्थेषु पादिषु ''बलकारम्मि पिणाओ[10]''[देसीसद्दसंगहो ६ ।५११ ॥]इति । त्रीणि हठस्य ॥

## अथ स्खलितं छलम्[11] ॥८०४॥

१ स्खलनं **स्खलितम्** । 'स्खल स्खलने[12]'(भ्वा.-प.से.), 'निष्ठा'३ ।२ ।१०२ ॥ इति क्तः । २ छ्यति मर्यादां छिनत्ति **छलम्** । 'छो छेदने'(दि.प.अ.), वृषादित्वात् कलचि साधुः । ''छलं[13] तु स्खलिते व्याजे''[विश्वप्रकाशकोशः, लान्तवर्गः, श्लो-१०]इति **महेश्वरः** । ''स्खलितं परस्य वदतः स्वाभिमतार्थान्तरविकल्पोपपादनेन वचनविघातः, यथा-'छलं कूपो नवोदकः' ''[ ]इति षड्दर्शनसमुच्चयः । द्वे 'भूलचूकवरांसु[14]' इति ख्यातस्य ॥८०४॥

## परापर्यभितो भूतो जितो भग्नः पराजितः ।

१ परादिभ्यस्त्रिभ्यो भूतशब्दो योज्यः, तेन पराभूयते स्म **पराभूतः**, **परिभूतः**, **अभिभूतः** । ४ ([15]जीयते स्म **जितः** । 'जि अभिभवे'(भ्वा.प.अ.), 'निष्ठा'३ ।२ ।१०२ ॥ इति क्तः । ५ भज्यते स्म **भग्नः** । 'भञ्जो[16] आमर्दने'(रु.प.अ.), क्तः, 'ओदितश्च'८ ।२ ।४५ ॥ इति निष्ठानत्वम् । ६ पराजीयते स्म **पराजितः** । षट् पराजितस्य । 'जीतीया(हारेलो)' इति भाषा ॥

## पलायितस्तु नष्टः स्याद् गृहीतदिक् तिरोहितः ॥८०५॥

१ परावृत्य अयते स्म **पलायितः** । परापूर्वः 'अय गतौ'(भ्वा.आ.से.), निष्ठा, 'आर्धधातुकस्य-'७ ।२ ।३५ ॥ इत्यादिनेट्[17], 'उपसर्गस्यायतौ'८ ।२ ।१९ ॥इति लत्वम् । २ नश्यति स्म **नष्टः** । 'णशँ[18] (णश) अदर्शने'(दि.प.से.), 'निष्ठा'३ ।२ ।-१०२ ॥ इति क्तः[19], 'व्रश्च-'८ ।२ ।३६ ॥इति षत्वम्[20], ष्टुत्वम् । ३ गृहीता दिक् येन स **गृहीतदिक्**, शकारान्तोऽयम् । ४ तिरोधत्ते स्म **तिरोहितः** । 'डुधाञ् धारणादौ'(जु.उ.अ.), क्तः, 'दधातेर्हिः' ७ ।४ ।४२ ॥ इति धाञो हिरादेशः । चत्वारि नष्टस्य ॥८०५॥

## जिताहवो जितकाशी

१ जितः आहवः सङ्ग्रामोऽनेन **जिताहवः** । २ जितेन काशते रोचते[21] **जितकाशी** । 'काशृ दीप्तौ'(भ्वा.-आ.से.), ग्रहादित्वाण्णिनिः । ''ते[22] बध्यमाना बलिभिर्दानवैर्जितकाशिभिः''[ ]इति पुराणम् । येन सङ्ग्रामो जितस्तस्य द्वे ॥

---

१. हैमोणादिगणसूत्रे 'इति' इति न दृश्यते ॥ २. '-क्लीबः' इति३ ॥ ३. 'लूं-' इति४ ॥ ४. '-मानीत्यन्ये' इति३ ॥ ५. कोष्ठान्तर्गतपाठः १.२.४प्रतिषु न दृश्यते ॥ ६. '-ऽयम्' इति ४प्रतौ नास्ति ॥ ७. द्र. टीकासर्वस्वम्, भा-३, २ ।७ ।१०८ ॥, पृ.१४१ ॥, पदचन्द्रिका, भा-२, क्षत्रवर्गः, श्लो-५६२, पृ.६४५ ॥, रामाश्रमी२ ।८ ।१०८ ॥, पृ.३९३ ॥ ८. 'हठ प्लुतिशङ्कुबन्धनयोः' इति स्वामिमैत्रेयौ, 'हठ प्लुतिशठत्वयोः' इति सायणः ॥ ९. 'बला-' इति१ ॥ १०. 'पिउणा' इति२, 'पियाणओ' इति३ ॥ ११. तुलनीयोऽमरकोषः२ ।८ ।१०८ ॥ १२. '-विद्रावणे' इति४, 'स्खल चलने' इति स्वामी, 'खल स्खल सञ्चलने' इति मैत्रेयः, 'स्खल सञ्चलने' इति सायणः ॥ १३. 'बलन्तु' इति विश्वप्रकाशकोशे दृश्यते, तत्तु प्रमाद एव, पृ.१४९, श्लो-१० ॥ १४. '-वरांसु' इति१, '-वरांसउ' इति४ ॥ १५. कोष्ठान्तर्गतपाठः ४प्रतौ नास्ति ॥ १६. 'भंजू' इति३.४ ॥ १७. 'इतीट्' इति४ ॥ १८. 'नश्' इति४ ॥ १९. 'गत्यर्थाकर्मक-' इत्यादिना कर्तरि क्तो युक्तः ॥ २०. ३प्रतौ नास्ति ॥ २१. 'काशति राजति' इति४ ॥ २२. 'तैः' इति३ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**प्रस्कन्न[1]पतितौ[2] समौ ।**

१ प्रस्कद्यते स्म **प्रस्कन्नः** । 'स्कन्दिर् गतिशोषणयोः'(भ्वा.प.अ.), 'निष्ठा'३।२।१०२॥ इति क्तः, 'रदाभ्याम्-'८।२।४२॥ इति क्तस्य नत्वम्[1] । २ पतति स्म **पतितः** । 'पत्लृ पतने'[2](भ्वा.प.से.), 'निष्ठा'३।२।१०२॥ इति क्तः । द्वे पतितस्य । 'पडिउ' इति भाषा ॥

**चारः[1] कारा[2] गुप्तौ[3]**

१ चरन्त्यत्रेति **चारः** । 'चर गतिभक्षणयोः'(भ्वा.-प.से.), अधिकरणे घञ् । स्वार्थे कनि चारकोऽपि । २ कीर्यते क्रियते वाऽस्यां **कारा** । 'कॄ विक्षेपे'(तु.प.से.), 'डुकृञ् करणे'(त.उ.अ.) वा, भिदादित्वादङि साधुः । ३ गुप्यतेऽस्यां **गुप्तिः** । 'गुपू रक्षणे'(भ्वा.प.से.), 'स्त्रियां क्तिन्' ३।३।९४॥, तत्र । त्रीणि चारस्य । 'बन्दिखानु[3]' इति भाषा ॥

**बन्द्यां ग्रहकः प्रोपतो ग्रहः ॥८०६॥**

१ वन्दते स्तौति भयेनेति **बन्दी**, स्त्रियाम् । 'वदि अभिवादनस्तुत्योः'(भ्वा.आ.से.), पचाद्यचि गौरादिः, हठकृष्टा स्त्री[4], बलवतो हस्ते[5] क्षिप्तो राजपुत्रादिश्च । यदाहुः-''बन्दी स्यात् पणबन्धस्थः''[ [6] ]इति । २ गृह्यते ग्रहः, अच्, ततः स्वार्थे कनि **ग्रहकः** । ३-४ प्रोपोपसर्गाभ्यां ग्रहः **प्रग्रहः**, **उपग्रहः** । चत्वारि 'बान्द' इति ख्यातस्य ॥८०६॥

**चातुर्वर्ण्यं[1] द्विजक्षत्रवैश्यशूद्रा नृणां भिदः ।**

१ द्विजश्च क्षत्रश्च वैश्यश्च शूद्रश्च द्विजक्षत्रवैश्यशूद्रा वक्ष्यमाणा नृणां मनुष्याणां भिदो जातिविशेषाः **चातुर्वर्ण्यम्** उच्यत इत्यन्वयः । वर्ण्यन्ते वेदवाक्येन स्वस्वाचारेषु प्रेर्यन्ते वर्णाः। 'वर्ण चूर्ण प्रेरणे[7]'(चु.उ.से.), कर्मणि घञ्। चत्वार[8] एव वर्णाः चातुर्वर्ण्यम् । '[9]चतुर्वर्णादीनां स्वार्थे ष्यञ् वाच्यः'(वा-५।१।१२४॥)। चतुःशब्दं विनापि 'वर्णः' इत्ययं शब्दो द्विजादीनां वाचकः । ''वर्णो द्विजादौ शुक्लौ'' [विश्वप्रकाशकोशः, णान्तवर्गः, श्लो-१३]इति महेश्वरः । द्विजादिचतुर्वर्णानां नामैकम् ॥

**ब्रह्मचारी[1] गृही[2] वानप्रस्थो[3] भिक्षुरिति[4] क्रमात् ॥८०७॥**

**चत्वार आश्रमाः**

१ क्रमादनुक्रमेण अर्थाद् द्विजातीनां चत्वार **आश्रमाः**, प्रोच्यन्त इत्यन्वयः । आश्रम्यन्ति स्वं स्वं तपश्चरन्त्यत्र आश्रमाः । 'श्रमु तपसि खेदे च'(दि.प.से.), आङ्पूर्वः, 'हलश्च'३।३।१२१॥ इति घञ्, 'नोदात्तोपदेश-'७।३।३४॥ इत्यादिना वृद्ध्यभावः । १ ब्रह्म वेदस्तदध्ययनार्थं यद् व्रतं भिक्षाचरणं मेखलादिधारणं च, तदप्युपचारेण ब्रह्म, तच्चरितुं कर्तुं शीलमस्येति णिनिः **ब्रह्मचारी**, स च चतुर्विधः सवित्र-ब्रह्मचारी, वेदब्रह्मचारी, [10]प्राजापत्यब्रह्मचारी, नैष्ठिकब्रह्मचारी चेति । २ अत्यक्तपञ्चयज्ञो धर्माधर्मार्थकाममोक्षपरः कृतदार-परिग्रह इतराश्रमोपजीवी **गृही** । गृहा दारास्तद्योगादिनिः । सोऽपि वार्तावृत्तिः, शीलनवृत्तिः, यायावरः, घोरसन्नासी, वनवासी, जटाऽजिनवल्कलधारी, वन्याहारभोजी च । ३ वनस्य प्रस्थ एकदेशस्तत्र भवो विद्यमानो वा **वानप्रस्थः** । 'तत्र भवः'४।३।५२॥इत्यण् । सोऽपि साग्निभार्यो निरग्नि-भार्यश्चेति द्विविधः । अस्य च भूशय्याजटाऽजिनधारणवन-वासवन्याहारभोजित्वं चेत्यादिधर्मः, सोऽपि औदुम्बरः, वैखानसः, संप्रतीक्ष्णी, पौर्णमासश्चेति चतुर्विधः, अत्राऽऽश्रमे क्षयितायु[स्तृतीय]भागः, [11]काषायदण्डधरः, सर्वभूतेषु समो ध्यानधारणाव्यसनाध्यापनपरः । ४ भीक्षाशी[लः] **भिक्षुः** । 'भिक्ष याच्ञायाम्'(भ्वा.आ.से.), ('[12]सनाशंसभिक्ष उः'३।२।१६८॥) । सोऽपि कुटीबको बहूदको, हंसः, परमहंसश्चेति चतुर्विधः । ''[13]आश्रमो ब्रह्मचर्यादिचतुष्केऽपि मठेऽपि च'' [विश्वप्रकाशकोशः, मान्तवर्गः, श्लो-४०]इति महेश्वरः । एकं ब्रह्मचर्यादिचतुर्णामाश्रम इति ॥८०७॥

**तत्र वर्णी[1] स्याद् ब्रह्मचारिणि[2] ।**

१ तत्र तेषु चतुर्ष्वाश्रमेषु आद्यवर्णशब्दो ब्रह्मचर्य-पर्यायः, वर्णोऽस्त्यस्य **वर्णी** ।'वर्णाद् ब्रह्मचारिणि'५।२।१३४॥ इति मत्वर्थे इनिः । २ ब्रह्म वेदा ब्रह्म तपो ब्रह्म ज्ञानं च शाश्वतम्, तच्चरत्यर्जयत्यवश्यं **ब्रह्मचारी** । 'चर गतौ'(भ्वा.-

---

१. 'तस्य नः' इति४॥ २. 'शल हुल पत्लृ गतौ' इति क्षीरतरङ्गिण्यादयः ॥ ३. '-नो' इति३, '-नूं' इति४॥ ४. '-ऽस्त्रो' इति१.२.४॥ ५. 'हस्त-' इति१.२॥ ६. द्र. अम.क्षीर.२।८।१२०॥, पृ.१९९॥, स्वोपज्ञटीका३।८०६॥, पृ.१७९॥ ७. मैत्रेयसायणसम्मतोऽयं धातुपाठः, 'वर्ण वर्णने', 'चूर्ण प्रेरणे' इति स्वामी ॥ ८. '-रि' इति३॥ ९. 'चा-' इति३॥ १०. 'प्र-' इति१॥ ११. 'क-' इति४॥ १२. कोष्ठान्तर्गतपाठः ३प्रतौ नास्ति ॥ १३. इतः पूर्वः ३प्रतौ 'अत्र' इति दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प.से.), आवश्यके णिनिः, तत्र । "क्रतौ महाव्रते पश्यन् ब्रह्मचारीत्वरीरतम्"[नैषधीयचरितम्, सर्गः-१७, श्लो-२०३] इति श्रीहर्षः । द्वे ब्रह्मचारिणः ॥

अथ द्वितीयाश्रममाह[1]-

**ज्येष्ठाश्रमी गृहमेधी गृहस्थः स्नातको गृही ॥८०८॥**

१ ज्येष्ठश्चासावाश्रमी च **ज्येष्ठाश्रमी** । २ गृहं कलत्रम्, तेन मेधते[2] संगच्छति **गृहमेधी** । 'मेधृ मेधासङ्गत्योः'[3] (भ्वा.उ.से.), ग्रहादित्वाण्णिनिः । ३ गृहे निष्ठति[4] **गृहस्थः** । 'ष्ठा गतिनिवृत्तौ'(भ्वा.प.अ.), 'सुपि स्थः'३।२।४॥ इति कः । ४ ब्रह्मचर्यं त्यक्त्वा यो गृहाश्रमं गतः स **स्नातकः** । वेदं समाप्य स्नातः[5] स्नातकः । 'स्नाताद् वेदसमाप्तौ'(गणसू-५।४।२९॥, हैमसू-७।३।२२॥)इति कन् । स्नातकश्च त्रिविधः । ब्रह्मचर्याचरणस्य यः शास्त्र[6]बोधितोऽवधिस्तावद् व्रत[:] स्नातक इति । ५ गृहमस्याऽस्ति **गृही** । 'अत इनिठनौ'५।२।११५॥ इतीनिः । पञ्च गृहस्थस्य ॥८०८॥

तृतीयाश्रममाह-

**वैखानसो वानप्रस्थः**

१ विशेषेण खनति कन्दमूलादीनि **वैखानसः** ।'खन खनने[7]'(भ्वा.उ.से.), पृषोदरादित्वात् साधुः । २ प्रतिष्ठन्तेऽत्र प्रस्थः, वनस्य प्रस्थे भवो **वानप्रस्थः** । द्वे वानप्रस्थस्य ॥

तुर्याश्रममाह-

**भिक्षुः सांन्यासिको यतिः ।**
**कर्मन्दी रक्तवसनः परिव्राजकतापसौ ॥८०९॥**
**पाराशरी पारिकाङ्क्षी मस्करी पारिरक्षिकः ।**

१ भिक्षणशीलो **भिक्षुः** । 'भिक्ष याच्ञायाम्' (भ्वा.आ.से.), 'सनाशंसभिक्ष उः'३।२।१६८॥ । २ कर्मणां संन्यसनं प्रक्षेपणं संन्यासः, स प्रयोजनमस्य **सांन्यासिकः** । 'प्रयोजनम्'५।१।१०९॥ इति ठक् । ३ यततेऽपवर्गायेति **यतिः** । 'यती प्रयत्ने'(भ्वा.आ.से.), '-इन्'(उणा-५५७) इतीन् । " 'यमुं[8] उपरमे'(भ्वा.प.अ.), 'यमु नियमने[9]'( ) अतो वा । " 'यमेस्तिक्'( )इति तिकि यतिः"[[10]] इत्यन्ये । ४ कर्मन्देन प्रोक्तं भिक्षुसूत्रं वेत्त्यधीते वा **कर्मन्दी** । 'कर्मन्दकृशाश्वादिनिः'४।३।१११॥ इतीनिः । कर्मन्दिनौ, कर्मन्दिनः इत्यादि । ५ रक्तं वसनमस्य **रक्तवसनः** । ६ परित्यज्य सर्वं संन्यस्य व्रजति **परिव्राजकः** । परिपूर्वः 'व्रज गतौ'(भ्वा.प.से.), ण्वुल् । ७ तपः शीलमस्य **तापसः** । 'तपःसहस्राभ्यां विनणौ[11]'५।२।१०२॥ इत्यण् । [तपस्व्यपि] ॥८०९॥ ८ पराशरस्याऽपत्यं पाराशर्यः, गर्गादित्वाद् यञ् । तेन प्रोक्तं भिक्षुसूत्रमधीते **पाराशरी** । '[पारशर्य]शिलालिभ्याम्[12]-'४।३।११०॥इति णिनिः । ९ पारमस्याऽस्ति पारि ब्रह्मज्ञानम्, तत् काङ्क्षति, ताच्छील्ये णिनिः । परं ब्रह्मज्ञानमवश्यं काङ्क्षति **पारिकाङ्क्षी** । 'काक्षि वाञ्छायाम्[13]'(भ्वा.प.से.), ताच्छील्ये णिनिः, पृषोदरादित्वादादेर्दीर्घत्वम् । १० कर्मनिषेधं कर्तुं शीलमस्य **मस्करी** । 'मस्करमस्करिणौ वेणुपरिव्राजकयोः'६।१।१५४॥इति सुट् वृद्ध्यभाव उपपदस्य ह्रस्वत्वम् । मा[14]करणशीलो मस्करीति वा । "स ह्याह- मा कृषत[15] कर्माणि शान्तिर्वः, श्रेयसीति[16], वर्चस्कादित्वात् साधुः"[अभि-,स्वोपज्ञटीका३।८१०] इत्याचार्याः । ११ परिरक्षा प्रयोजनमस्य **पारिरक्षिकः** । 'प्रयोजनम्'५।१।१०९॥ इति ठक् । एकादश सं[17]न्यासिनः ॥

**स्थाण्डिलः स्थण्डिलशायी यः शेते शण्डिले व्रतात् ॥८१०॥**

१ स्थण्डिल एव शेते **स्थाण्डिलः** । 'स्थण्डिलाच्छयितरि व्रते'४।२।१५॥इत्यण् । २ एवं स्थण्डिले तृणाद्याच्छादितभूभागे शेते [18]**स्थण्डिलशायी** । 'व्रते'३।२।८०॥ इति णिनिः । यो व्रतात् व्रतविशेषात् स्थण्डिले यागार्थमसंस्कृतायां भूमौ शेते, तस्य द्वे ॥८१०॥

**तपःक्लेशसहो दान्तः[19]**

---

१. '-श्रमनामान्याह' इति४॥ २. 'तेऽत्र मेधन्ते' इति४॥ ३. 'मेधृ सङ्गमे च' इति क्षीरतरङ्गिण्यादयः ॥ ४. '-तीति' इति३॥ ५. 'स्नातं' इति४॥ ६. 'शास्त्रे' इति३॥ ७. 'खनु अवदारणे' इति क्षीरतरङ्गिण्यादयः ॥ ८. 'यम' इति स्वामिसायणौ ॥ ९. क्षीरतरङ्गिण्यादौ नियमनार्थकयमुधातुर्न दृश्यते ॥ १०. द्र. पदचन्द्रिका, भा-२, ब्रह्मवर्गः, श्लो-४४०, पृ.५२८॥ ११. 'तपःसहस्राभ्यां विनीनी'५।२।१०२॥, 'अण् च'५।२।१०३॥इत्यष्टाध्याय्याम् ॥ १२. '-निभ्याम्' इति१.३.४॥ १३. 'काक्षि वाक्षि माक्षि द्राक्षि ध्राक्षि ध्वाक्षि काङ्क्षायाम्' इति स्वामी, 'काक्षि वाक्षि माक्षि काङ्क्षायाम्' इति मैत्रेयसायणौ ॥ १४. 'मारक-' इति३॥ १५. 'कृत' इति३॥ १६. 'श्रेयसी' इति२॥ १७. 'सांन्या-' इति३॥ १८. 'स्था-' इति१.२॥ १९. तुलनीयोऽमरकोषः२।७।४२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ 'क्लिश उपतापे'(दि.आ.से.), पचाद्यचि[1] क्लेशः[2]। तपसा[3] क्लेशं सहते **तपःक्लेशसहः** । 'षह मर्षणे'(भ्वा.-आ.से.), अच् । २ दम्यते स्म **दान्तः** । 'दमु उपशमे' (दि.प.से.), [क्तः], 'वा दान्तशान्तपूर्ण-'७।२।२७॥ इत्यादिना साधुः । द्वे कृच्छ्रादनुद्विग्नस्य ॥

**[1]शान्तः [2]श्रान्तो [3]जितेन्द्रियः ।**

१ शाम्यति स्म **शान्तः** । 'शमु उपशमे'(दि.प.से.), क्तः, 'वा दान्तशान्त[4]-'७।२।२७॥ इति साधुः । २ श्राम्यति स्म **श्रान्तः** । 'श्रमु तपसि खेदे च'(दि.प.से.), निष्ठा, 'अनुनासिकस्य-'६।४।१५॥ इति दीर्घः । ३ जितानीन्द्रियाणि येन स **जितेन्द्रियः** । त्रीणि निवृत्तविषयस्य ॥

**[1]अवदानं कर्म शुद्धम्**

१ अवदीयतेऽनेन **अवदानम्** । 'दोऽवखण्डने' (दि.प.अ.), करणे ल्युटि । शुद्धं सोत्कर्षं कर्म चरितम् । ''अवदानं मतमितिवृत्ते कर्मणि खण्डने''[विश्वलोचनकोशः, नान्तवर्गः, श्लो-१६१]इति[5] श्रीधरः । ''नैर्ऋतघ्नमथ मन्त्रवन्मुनेः प्रापदस्त्रमवदानतोषितात्''[रघुवंशम्, सर्गः-११, श्लो-२१]इति रघुः । एकं शुद्धकर्मणः ॥

**[1]ब्राह्मणस्तु [2]त्रयीमुखः ॥८११॥**

**[3]भूदेवो [4]वाडवो [5]विप्रो द्व्यग्राभ्यां [6-7]जातिजन्म[8-9]जाः [10-11]।**

**[12]वर्णज्येष्ठः [13]सूत्रकण्ठः [14]षट्कर्मा [15]मुखसम्भवः ॥८१२॥**

**[16]वेदगर्भः [17]शमीगर्भः [18]सावित्रो [19]मैत्र [20]एतसः ।**

१ ब्रह्मणोऽपत्यं **ब्राह्मणः** । 'तस्याऽपत्यम्'४।१।९२॥ इत्यण्। ब्रह्म वेदस्तदधीते वा। 'तदधीते-'४।२।५९॥ इत्यण् । 'ब्राह्मोऽजातौ'६।४।१७१॥ इत्यत्राऽजातावित्युक्तत्वादन्प्रकृत्या ब्रह्म ज्ञानमणतीति पृषोदरादित्वाद्वा । ब्रह्मा एव वा, अभेदोपचारात् । २ त्रयीति वेदत्रयी मुखेऽस्य[6] **त्रयीमुखः ॥८११॥** ३ भुवि पृथिव्यां[7] देवः **भूदेवः** । भूवो भूम्या देव इवेति वा । ४ वाडव इव[8] वडवाग्निरिवाऽतृप्तत्वाद् **वाडवः** । वडवा ब्राह्मणी, तत्र भव इति वा, शेषेऽण् । '' 'वल संवरणे'(भ्वा.-आ.से.), वलनं वालः, भावे घञ्, वाल इन्द्रियाणां विषयेभ्यः संवरणमित्यर्थः, डलयोरेकत्व[9]स्मरणाद् वाडः, तद्योगाद् 'अन्यत्रापि(अन्येभ्योऽपि) दृश्यते'(वा-५।२।१०९॥) इति वः, वाडवः''[[10]]इति तु व्याख्यामृतम् । ''वडवा कुम्भदास्यश्वा स्त्रीविशेषा द्विजन्मनाम्''[[11]]इति रभसः । ५ विशेषेण प्राति षट्कर्माणि पूरयति **विप्रः** । 'प्रा पूरणे'(अ.प.अ.), 'आतश्च-'३।१।१३६॥इति कः । उप्यते धर्मबीजमत्रेति वा । 'टुवप् बीजसन्ताने[12]'(भ्वा.उ.अ.), 'ऋज्रेन्द्र-'(उणा-१८६) इत्यादिना रकि इत्वे च निपातनम्। विप्र इव ब्रह्मेव वा विप्रः । ''ब्रह्मा विप्रः प्रजापतिः''[अमरकोषः ३।३।११४॥] इत्युक्तेः । ६-११ द्व्यग्राभ्यां परे जातिजन्मजाः, द्वे देहोत्पत्तिसंस्कारोत्पत्तिलक्षणे जातौ[13] जन्मनी वाऽस्य **द्विजातिः**, **द्विजन्मा** च । द्विजातिरित्यत्र जातिपरत्वेनाऽबन्धुपरत्वाज्जात्यन्ताच्छो[14] न भवति । ''मातुरग्रे विजननं द्वितीयं मौञ्जिबन्धनम्'' [मनुस्मृतिः, अध्या-२, श्लो-१६९]इति स्मृतेः[15] । द्विर्जातो **द्विजः** । 'अन्येष्वपि दृश्यते'३।२।१०१॥ इति जनेर्डः । अग्रे प्रथममग्राद् ब्रह्मणो मुखाद् वा जातिर्जन्म वाऽस्य **अग्रजातिः**, **अग्रजन्मा** । अग्रेऽग्राद् वा जातः **अग्रजः** । 'अन्येष्वपि-'३।२।१०१॥इति डः । १२ वर्णानां मध्ये ज्येष्ठो **वर्णज्येष्ठः** । १३ सूत्रं यज्ञोपवीतं कण्ठेऽस्य **सूत्रकण्ठः** । १४ षट् इज्यादीनि कर्माण्यस्य **षट्कर्मा**, नकारान्तः ॥

''इज्याध्ययनदानानि याजनाध्यापने तथा ।
प्रतिग्रहश्च तैर्युक्तः[16] षट्कर्मा विप्र उच्यते ॥१॥''

[[17]]इति स्मृतेः[18] । १५ ब्रह्मणो मुखात् सम्भवति **मुखसम्भवः** ।

---

१. '-च्' इति३.४॥ २. ४प्रतौ नास्ति ॥ ३. '-सि' इति३॥ ४. इतोऽग्रे १प्रतौ '-पूर्णेत्यादिना' इति दृश्यते ॥ ५. ४प्रतौ नास्ति ॥ ६. 'मुखस्य' इति२॥ ७. 'पृथ्व्यां' इति४॥ ८. 'वाडव इव' इति ३प्रतौ नास्ति ॥ ९. '-रैक्य-' इति३॥ १०. द्र. पदचन्द्रिका, भा-२, ब्रह्मवर्गः, श्लो-४००, पृ.४९०॥ ११. टीकासर्वस्वम्, भा-३, २।७।४॥, पृ.४॥, तत्र, ''वडवा कुम्भदास्यश्च स्त्रीविशेषो द्विजाङ्गना'' इति दृश्यते, रामाश्रमी२।७।४॥, पृ.३२५॥, तत्र 'स्त्रीविशेषा' इत्यस्य स्थाने 'स्त्रीविशेषे' इति दृश्यते ॥ १२. 'बीजतन्तुसन्ताने' इति १.२.४, काशकृत्स्नमते च ॥ १३. 'जाति' इति१.३॥ १४. 'जात्यन्ताच्छ बन्धुनि'५।४।९॥ इत्यनेन ॥ १५. 'श्रुतेः' इति३॥, ''मातुरग्रेऽधिजननं द्वितीयं मौञ्जिबन्धने'' इति मनुस्मृत्याम्, पृ.६२॥ १६. 'युतः' इति१॥ १७. ''अध्यापनमध्ययनं यजनं याजनं तथा । दानं प्रतिग्रहं चैव ब्राह्मणानामकल्पयत् ॥'' (मनुस्मृतिः, अध्या-१, श्लो-८८, पृ.२२)इति, ''अध्यापनमध्ययनं यजनं याजनं तथा । दानं प्रतिग्रहश्चैव षट्कर्माण्यग्रजन्मनः ॥'' (मनुस्मृतिः, अध्या-१०, श्लो-७४, पृ.४११)इति च मनुस्मृतिः, ''इज्याध्ययनदानानि वैश्यस्य क्षत्रियस्य च । प्रतिग्रहोऽधिको विप्रे याजनाध्यापने तथा ॥''(याज्ञवल्क्यस्मृतिः, आचाराध्यायः, श्लो-११८, पृ.५२)इति याज्ञवल्क्यस्मृतिः ॥ १८. '-तिः' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पचाद्यच् ॥८१२॥ १६ वेदा गर्भेऽस्य **वेदगर्भः** । १७ शमीगर्भोऽग्निः, स इव घस्मरत्वात् **शमीगर्भः** । १८ सावित्री देवताऽस्येति **सावित्रः** । 'साऽस्य देवता'४।२।२४॥ इत्यण् । सावित्र्यनुवचनं विना मौञ्जीबन्धाभावात् । यन्मनुः-

"तत्र यद् ब्रह्मजन्माऽस्य मौञ्जीबन्धनचिह्नितम् ।
तत्राऽस्य माता सावित्री पिता त्वाचार्य[1] उच्यते ॥२॥"

[मनुस्मृतिः, अध्यायः-२, श्लो-१७०]इति । १९ मित्त्रो देवताऽस्य **मैत्त्रः** । 'साऽस्य देवता'४।२।२४॥ इत्यण् । २० एति गच्छति यत्र तत्राऽपीति **एतसः** । 'इण् गतौ' (अ.प.अ.), 'इणस्तसन्[2]-'(उणा-४२९)इति तसन्प्रत्ययः । विंशतिर्ब्राह्मणस्य ॥

## बटुः पुनर्माणवकः

१ वटति वेष्टयति मौञ्जीमिति **बटुः** । 'वट वेष्टने' (भ्वा.प.से.), 'भृमृस्तृ(भृमृशीतृ)-'(उणा-७)इत्यादिना बाहुलकादुः । २ मनोरपत्यं कुत्सितं मूढं वा माणवः । यत्प्रासादः[3]-

"अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः स्मृतः ।
नकारस्य च मूर्धन्यस्तेन सिद्धयति माणवः ॥१॥"

[वा-४।१।१६१॥] । मणति शब्दायते वा । बाहुलकादवः[4] । स्वार्थे कनि **माणवकः** । द्वे 'बडुआ[5]' इति ख्यातस्य ॥

## भिक्षा स्याद् ग्रासमात्रकम् ॥८१३॥

१ भिक्ष्यते[6] **भिक्षा** । 'भिक्ष याच्ञायाम्'(भ्वा.-आ.से.), कर्मणि घञ् । ग्रास एव ग्रासमात्रम्[7], ततः स्वार्थे कनि[8] ग्रासमात्रकम् । यदाहुः-"मयूराण्डप्रमाणो ग्रासः," 'कवड[9]' इति लोकभाषाप्रसिद्धः, स एव ग्रासमात्रं मूलटीका । "मात्रं त्ववधृतौ स्वार्थे"[अनेकार्थसङ्ग्रहः २।४३६] इत्यनेकार्थवचनाद् मात्रशब्दोऽत्र स्वार्थवाचकः, न तु[10] 'प्रमाणे द्वयसज्दघ्नञ्मात्रचः'५।२।३७॥ इत्यस्य, सति[11] च तस्मिन् बहुव्रीहिः स्यात्, तस्मिंश्च सति 'टिड्ढाणञ्-'४।१।१५॥ इत्यादिना ङीषि(ङीपि) ग्रासमात्रीति स्यात्, ततः कनि 'केऽणः' ७।४।१३॥ इति ह्रस्वत्वे च ग्रासमात्रिकेति स्यात्, न च तदुचितम्[12], ग्रासमात्रमित्यस्य स्वार्थद्योतकत्वात्, यावन्मात्रमित्यादिवदिति । यद्वा मात्रशब्दोऽयं वृत्तिविषये एव तुल्ये[13] प्रमाणे वर्तते, अत्र ग्रासस्य तुल्यप्रमाणमित्यस्वपदविग्रहे षष्ठीसमासे ग्रासमात्रम्, यथा-'समुद्रमात्रं न सरोऽस्ति[14] किञ्चन' [ ]इतिवत्, ग्रासमात्रकं कवलप्रमाणमित्यर्थः । यदुक्तम्-

"ग्रासप्रमाणो[15] भिक्षा स्यादग्रं ग्रासचतुष्टयम् ।
अग्राच्चतुर्गुणं प्राहुर्हन्तकारं[16] द्विजोत्तमाः ॥१॥"

[ ]इति । एकं भिक्षायाः ॥८१३॥

## उपनायस्तूपनयो बटूकरणमानयः ।

१ उपनायनम्[17] **उपनायः**, मौञ्जीबन्धः[18] । यन्मनुः- "गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम्"[मनुस्मृतिः, अध्या-२, श्लो-३६]इति । २ उपनयनम् **उपनयः** । 'णीञ् प्रापणे' (भ्वा.उ.अ.), 'एरच्'३।३।५६॥ इत्यच् । ३ अबटुर्बटुः क्रियतेऽनेन **बटूकरणम्** । अभूततद्भावे 'कृभ्वस्ति-'५।४।-५०॥ इत्यादिना च्विः, 'च्वौ च'७।४।२६॥ इत्युकारस्य दीर्घत्वम् । ४ आनयनम् **आनयः** । 'णीञ् प्रापणे'(भ्वा.उ.अ.), 'एरच्'३।३।५६॥इत्यच् । चत्वारि उपनयनस्य । 'मौञ्जीबन्ध' इति भाषा ॥

## अग्नीन्धनं त्वग्निकार्यमाग्नीध्रा चाऽग्निकारिका ॥८१४॥

१ अग्निरिध्यते[19] दीप्यतेऽस्मिन्निति **अग्नीन्धनम्** । 'ञिइन्धी[20] दीप्तौ'(रु.आ.से.), अधिकरणे ल्युट् । २ अग्नेः कार्यम् **अग्निकार्यम्** । एतावाद्यस्वरादी । ३ अग्निमिन्धे **अग्नीत्**, ऋत्विग्विशेषः, तस्य शरणम् **आग्नीध्रा** । 'ञिइन्धी दीप्तौ'(रु.आ.से), 'अग्नीधः शरणे रञ् घश्च (रण् भं च)' (वा-४।३।१२०॥)इति षष्ठ्यन्ताच्छरणे रञ्(रण्)प्रत्ययः, भं चेति भत्वात् पदत्वाभावाज्जश्त्वं न भवति । शरणं गृहम् । ञि(णि)त्त्वाद् वृद्धिः आग्नीध्रः, ततः टाप् । प्रज्ञादित्वात् स्वार्थेऽणि आग्नीध्रीत्यपि । ४ अग्नेः करणम् **अग्निकारिका** । भावे ण्वुल्[21] । "एते चत्वारोऽपि कवर्गतृतीयचतुर्थवर्गपञ्चममध्याः"[ ]इति केचित् । चत्वारि ऋग्वेदकाण्डेऽग्निविशेषस्य ॥८१४॥

## पालाशो दण्ड आषाढो व्रते[22]

---

१. 'त्वा वां य' इति१.२.४॥ २. '-शन्-' इत्युणादिगणे ॥ ३. 'यत्प्र-' इति१.३.४॥ ४. '-चः' इति४॥ ५. '-डु-' इति२.३॥ ६. '-क्षते' इति४॥ ७. '-त्रकम्' इति३॥ ८. 'कन्' इति४॥ ९. '-वओ' इति१, 'कवो' इति३॥ १०. 'नु' इति३॥ ११. इतोऽग्रे २प्रतौ 'च' इति दृश्यते ॥ १२. इतोऽग्रे ३.४ प्रत्योः 'तद्' इति दृश्यते ॥ १३. 'तुल्य-' इति३॥ १४. '-रोसि' इति२॥ १५. 'ग्रासमात्रो प्रमाणं' इति३, '-णो' इति४॥ १६. 'हूते कारं' इति३॥ १७. '-नयनम्' इति४॥ १८. 'मो-' इति१.२.३॥ १९. '-रीध्यते' इति१.२.४॥ २०. 'इन्धी' इति४॥ २१. १प्रतौ नास्ति ॥ २२. तुलनीयोऽमरकोषः२।७।४५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ व्रते ब्रह्मचर्याश्रमकर्मणि, दण्डो यष्टिः, पलाशस्याऽवयवो विकारो वा **पालाशः** । 'अवयवे च प्राण्यौ-(ण्यो)षधिवृक्षेभ्यः'४।३।१३५॥ इत्यण्। २ आषाढा प्रयोजनमस्य **आषाढः**, मूर्धन्यमध्यः । 'विशाखाषाढा[द]न्(ण्) मन्थदण्ड[यो:]'५।१।११०॥ इत्यण् । द्वे पलाशदण्डस्य ॥

### राम्भस्तु[1] वैणवः[2][१] ।

१ व्रते दण्ड इत्येव, रम्भाया विकारो **राम्भः** । रम्भाशब्दोऽत्र वेणुपर्यायः । 'अवयवे च प्राण्योषधि-'४।३।१३५॥ इत्यण्, वृद्धिमानसौ । 'रम्भः' इत्याद्यस्वरादिरपि । यन्महेश्वरः-

''रम्भो वैणवदण्डके''[विश्वप्रकाशकोशः, भान्तवर्गः, श्लो-२१] इति । यथा-

'अमुष्य सन्तापमुखामनिम्ना तृष्णा प्रशाम्येद् रजसा[२] सहैव ।
श्रीमन्महाहंसनिषेवितत्वाददः सरो भो न न रोचते मे ॥१॥'

[ ]इति[३] । अत्र सरो रेफसहितो भो भकारो मह्यं रोचते, रम्भ इत्यर्थः । अदः दकाररहितो न, दकारसहित इत्यर्थः । भो भकारो दम्भ इत्यर्थः, स तु न रोचत इत्यर्थः[४] । २ वेणोर्विकारो **वैणवः** । प्लक्षादित्वादण् । द्वे वेणुदण्डस्य ॥

### बैल्वः[1] सारस्वतो[2] रौच्यः[3]

१ व्रते दण्ड इत्येव, बिल्वस्य विकारोऽवयवो वा **बैल्वः** । 'बिल्वादिभ्योऽण्'४।३।१३६॥ । २-३ सरस्वत्या विकारः **सारस्वतः** । रुच्यस्य विकारो **रौच्यः** । उभयत्र 'अवयवे च प्राण्यौ(प्राण्यो)षधि-'४।३।१३५॥ इत्यण् । त्रीणि बिल्वदण्डस्य ॥

### पैलवस्त्वौपरोधिकः ॥८१५॥

१ व्रते दण्ड इत्येव पीलोर्विकारः **पैलवः** । 'अवयवे च प्राण्यौ(प्राण्यो)षधि-'४।३।१३५॥ इत्यण् । २ समीपमागच्छतां दुष्टसत्त्वानामुपरोधो निवारणं प्रयोजनमस्य **औपरोधिकः** । पृषोदरादित्वात् साधुः, [५]रेफद्वादश[६]स्वरवान् । द्वे पीलुवृक्षदण्डस्य ॥८१५॥

### आश्वत्थस्तु[1] जितनेमिः[2]

१ अश्वत्थस्य[७] विकारोऽवयवो वा **आश्वत्थः** । [८]प्लक्षादित्वादण् । २ क्षुद्रजन्तुघातेन जिता नेमिरनेन **जितनेमिः** । व्रते एव । द्वे पिप्पलवृक्षदण्डस्य ॥

### औदुम्बर[1] [९]उलूखलः[2] ।

१ व्रते दण्ड इत्येव, उदुम्बरस्य विकारोऽवयवो वा **औदुम्बरः** । 'अवयवे च वृक्षौ(प्राण्यो)षधि-'४।३।१३५॥ इत्यण् । २ उलूखलशब्द उदुम्बरपर्यायः । उलूखलस्य विकारोऽवयवो वा **उलूखलः** । 'अवयवे च प्राण्यौ(प्राण्यो)-षधि-'४।३।१३५॥ इत्यादिनाऽण्, तस्य[१०] 'पुष्पफलमूलेषु बहुलम्[११]'(वा-४।३।१६६॥)इति लुक् । द्वे [१२]उम्बरवृक्षदण्डस्य ॥

''ब्राह्मणो बैल्वपालाशौ क्षत्रियौ(यो)वाटखादिरौ ।
पैलवौदुम्बरौ वैश्यो दण्डानर्हन्ति धर्मतः ॥१॥''

[मनुस्मृतिः, अध्या-२, श्लो-४५]इति मनुः ॥

### जटा[1] सटा[2]

१ जायते तपसि **जटा** । 'जनी प्रादुर्भावे'(दि.-आ.से.), 'जनेरन्त्यलोपश्च[१३]'(उणा-७०८)इति टः । जटतीति[१४], 'जट झट[१५] सङ्घाते'(भ्वा.प.से.)इत्यस्य पचाद्यचि वा । २ सटति **सटा** । 'षट[१६] अवयवे'(भ्वा.प.से.), अच्, टाप् । द्वे तपस्विनां ग्रथितकेशरङ्घातस्य ॥

### वृषी[1] पीठम्

१ ब्रुवन्तः सीदन्त्यस्यां **वृषी** । 'षद्लृ विशरणादौ' (तु.प.अ.), पृषोदरादित्वात्[१७] । वर्षति आसनात् सुखं ददाति वा । 'वृषु सेचने[१८]'(भ्वा.प.से.), 'इगुपध-'३।१।१३५॥ इति कः, ततो[१९] गौरादित्वाद् ङीष्[२०], मूर्धन्यान्तः । दन्त्यान्तोऽपि । ''अतसी वृसी मांसी''[ ]इति दन्त्यान्तेषु चन्द्रगोमी । ''वृषी-(बृषी)''[[२१]]इत्यपि केचित् । पीठं तपस्विनामासनम् । एकं तपस्विनामासनस्य ॥

---

१. तुलनीयोऽमरकोषः२।७।४५॥ २. '-म्येन्द्रजसा' इति३.४॥ ३. १.२.३प्रतिषु नास्ति ॥ ४. ''यथा-अमुष्य मुखामहिम्ना तृष्णाप्रशाम्येद्रजसा सहैव । श्रीमन्महाहंसनिषेवितत्वाददः सरोम्भो न रोचते मे । अत्र सरो रेफसाहितोंम्भो (सहिताम्भो) मह्यं रोचते रंभ इत्यर्थः । अदः दकाररहितः । दंभस्तु न रोचते-इत्यर्थः ।'' इत्यनेकार्थकैरवाकरकौमुदीटीका, भा-१, काण्डः-२, श्लो-३०६, पृ.१७८॥ ५. 'रेफः' इति१.२.३॥ ६. 'त्रयोदश' इति ४प्रतेष्टिप्पणी ॥ ७. '-स्थविका-' इति३॥ ८. 'प्रक्षा-' इति१॥ ९. 'ऊ-' इति३॥ १०. इतोऽग्रे ४प्रतौ 'मूलफलेषु' इति दृश्यते ॥ ११. 'पुष्पमूलेषु बहुलम्' इति वार्तिकस्वरूपं दृश्यते ॥ १२. 'ओ-' इति३॥ १३. 'जनेष्टन् लोपश्च'(उणा-७०८)इत्युणादिगणसूत्रस्वरूपम् ॥ १४. 'जटति' इति३॥ १५. ३.४प्रत्योर्नास्ति ॥ १६. 'षट्' इति३.४॥ १७. '-दरादिः' इति४॥ १८. इतोऽग्रे १प्रतौ 'वा' इति दृश्यते, 'पृषु वृषु मृषु सेचने' इति क्षीरतरङ्गिण्यादयः ॥ १९. ४प्रतौ नास्ति ॥ २०. 'ङीप्' इति१.४॥ २१. द्र. टीकासर्वस्वम्, भा-३, २।७।४६॥, पृ.४०॥, पदचन्द्रिका, भा-२, ब्रह्मवर्गः, श्लो-४४२, पृ.५३०॥, रामाश्रमी २।७।४६॥, पृ.३४२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**कुण्डिका तु कमण्डलुः ॥८१६॥**

१ कुण्डति(कुण्डते) दहति पिपासादिकं कुण्डी । 'कुडि दाहे'(भ्वा.आ.से.), अच्, गौरादिः, ततः[1] स्वार्थे कनि[2] **कुण्डिका** । 'केऽणः'७।४।१३॥ इति ह्रस्वत्वम् । कुण्डीत्यपि । "पतिवन्तीसुते जारात् कुण्डः कुण्डी कमण्डलौ" [विश्वलोचनकोशः, डान्तवर्गः, श्लो-३]इति श्रीधरः । २ मण्डनं मण्डः । 'मडि भूषायाम्'(भ्वा.प.से.), भावे घञ् । कस्य पानीयस्य मण्डः कमण्डः[1], तं लाति **कमण्डलुः**, पुंक्लीं.[3] । "अस्त्री कमण्डलुः"[अमरकोषः२।७।४६॥]इत्यमरः । पृषोदरादित्वात् साधुः । द्वे कमण्डलोः ॥८१६॥

**श्रोत्रियश्छान्दसः**

१ छन्दोऽधीते **श्रोत्रियः** । 'श्रोत्रियंश्छन्दोऽधीते' ५।२।८४॥ इति साधुः, छन्दःशब्दस्य श्रोत्रादेशः । २ छन्दो वेत्त्यधीते वा **छान्दसः** । 'तदधीते तद्वेद'४।२।५९॥ इत्यण् । द्वे 'वेदियां[4]' इति ख्यातस्य ॥

**यष्टा त्वादेष्टा स्यान्मखे व्रती । याजको यजमानश्च**

१ यजत इति **यष्टा** । 'यज देवपूजादौ'(भ्वा.-उ.अ.), 'ण्वुल्तृचौ'३।१।१३३॥ इति तृच्, 'व्रश्च-'८।२।३६॥ इति षत्वम्, 'ष्टुना ष्टुः'८।४।४१॥ । यष्टारौ, यष्टारः इत्यादि । २ मखेऽध्वरविषये ममेष्टसंपादनाय यूयं कर्म कुरुतेति ऋत्विजामादेशको यागस्वामी, आदिशति **आदेष्टा** । 'दिश अतिसर्जने'(तु.प.अ.), तृच् । आदिष्टीति इन्नन्तः पाठो वा । आदिष्टमनेनेति, 'इष्टादे[5]:-'५।२।८८॥ इतीन्प्रत्यये आदिष्टी, तृतीयस्वरमध्यः, आदिष्टिनौ, आदिष्टिनः इत्यादि । ३ व्रतमेणाजिनादिधारणम्, तद्युक्तो **व्रती** । 'अत इनिठनौ'५।२।११५॥ इतीनिः । ४ यजति **याजकः** । ण्वुल् । ५ यजते **यजमानः** । 'यज देवपूजादौ'(भ्वा.उ.अ.), 'पूञ्(पूङ्)यजोः शानन्'३।२।१२८॥, 'आने मुक्'७।२।८२॥ । "यष्टा च यजमानः स्यादादिष्टी दीक्षितो व्रती"[हलायुधकोशः २।४२०॥] इति हलायुधः । ([6]"पञ्च यजमाने"[ ]इति तट्टीका । पञ्च यजमानस्य । यज्ञकर्तुरित्यर्थः ॥

**सोमयाजी तु दीक्षितः ॥८१७॥**

१ सोमेनेष्टवान् **सोमयाजी** । 'करणे यजः'३।२।८५॥ इति भूते णिनिः । सोमपानवत्यध्वरे यजमानः सन् दीक्षित उच्यते । २ 'दीक्ष [7]मौण्ड्येज्योपनयननियमव्रतादेशेषु[8]'(भ्वा.आ.से.)इत्यतः क्तः, [टाप्] । दीक्षा सञ्जाताऽस्येति तारकादित्वादितच् वा । "अन्यत्राऽप्युपचारात्"[[9]]इति कलिङ्गः । अमृतवेल्या यो यजते, तस्य द्वे ॥८१७॥

**इज्याशीलो यायजूकः[10]**

१ इज्या यागो नित्यं तत्कर्ता **इज्याशीलः** । इज्या यजनं शीलमस्येति वा । २ पुनः पुनर्यजनशीलो **यायजूकः** । यजेर्यङन्तात् 'यजजपदशां यङः'३।२।१६६॥ इत्यूकः, 'यस्य हलः'६।४।४९॥ इति यङो लोपः । द्वे नित्यं यागकरणशीलस्य ॥

**यज्वा स्यादासुतीबलः ।**

१ इष्टवानिति **यज्वा** । 'यज देवपूजादौ'(भ्वा.उ.अ.), 'सुयजोर्ङ्वनिप्'३।२।१०३॥, नकारान्तोऽयम् । २ आसुतिः सोमसन्धानमस्त्यस्य **आसुतीबलः** । 'रजःकृष्यासुतिपरिषदो वलच्'५।२।११२॥, 'वले'६।३।११८॥इति सूत्रेण पूर्वस्याऽणो दीर्घः । द्वे दर्शपूर्णमास्यादियज्ञकर्तुः ॥

**सोमपः सोमपीथी स्यात्**

१ सोमममृतवल्लीं पीतवानिति **सोमपः** । 'पा पाने'(भ्वा.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥, 'आतो लोप इटि च'६।४।६४॥ इत्यालोपः । २ पानं पीथः । 'पा पाने'(भ्वा.प.अ.), 'पातृतुदि[11]वचिरिचिसिचिभ्यः थक्'(उणा-१६४) इति थक्, 'घुमास्थागापाजहातिसां[12] हलि'६।४।६६॥इतीत्वम् । सोमस्य पीथोऽस्त्यस्य **सोमपीथी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः । मिश्रास्तु-"सोमः सोमलतारसः पीतो-

१. ४प्रतौ नास्ति ॥ २. 'कन्' इति४॥ ३. 'पुंस्त्री' इति४॥ ४. '-दीया' इति३॥ ५. 'इष्टादिभ्यश्च'५।२।८८॥ इत्यष्टाध्याय्याम् ॥ ६. कोष्ठान्तर्गतपाठः ४प्रतौ नास्ति ॥ ७. 'मौंज्यो-' इति३, 'मौंडे-' इति४॥ ८. मौण्ड्यं वपनम्, इज्या यजनम्, उपनयनं मौर्वीबन्धः, नियमः संयमः, व्रतादेशः संस्कारादेशकथनम्, द्र. क्षीरतरङ्गिणी, भ्वादिः, धातुसं-४०२, पृ.९२॥ ९. द्र. पदचन्द्रिका, भा-२, ब्रह्मवर्गः, श्लो-४०४, पृ.४९५॥ १०. तुलनीयोऽमरकोषः२।७।८॥ ११. '-तुदि-' इति१, '-तुचि-' इति४॥ १२. '-स्थजुहोतीनां' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऽनेनेति, 'इष्टादिभ्यश्च'५।२।८८॥ इतीनिः सोमपीतीति तकारोपधोऽयम्''[१]इत्याहुः ।''सोमपीथी[२] तु सोमपः''[अमरकोषः २।८।९॥]इत्यमरः । ''सर्वदाऽयम्, दीक्षितस्तु तत्कालम्''[अम.रामाश्रमी२।७।९॥]इति तट्टीका, अतः ''सोमयाजी तु दीक्षितः''[अभिधानचिन्तामणिनाममाला ३।८१७॥]इत्यस्माद् भेदः । द्वे सोमपानयज्ञकर्तुः ॥

## स्थपतिर्[1]गीष्पतीष्टिकृत् ॥८१८॥

१ गीष्पतेर्बृहस्पतेरिष्टिं यज्ञं करोति गीष्पतीष्टिकृत् सन् **स्थपतिः** इत्युच्यते । सर्वान् वशे स्थापयतीति स्थपतिः । 'वशतेरतिः(वहिवस्यर्तिभ्यश्चित्)' (उणा-५००)इति बाहुलकात् स्थापेरत्पतिः(स्थापेरप्यतिः) ह्रस्वत्वं च । ''बृहस्पतिसवेनेष्टं येनाऽसौ स्थपतिर्भवेत्''[हलायुधकोशः२।४१८॥] इति हलायुधः । एकं बृहस्पतिनामयागकर्तुः ॥८१८॥

## सर्ववेदास्[1]तु सर्वस्वदक्षिणं यज्ञमिष्टवान् ।

१ सर्वं[३] स्वं द्रव्यं सर्वस्वं सर्वद्रव्यं दक्षिणा यत्र स सर्वस्वदक्षिणो विश्वजिन्नामा यागस्तं य इष्टवान् स **सर्ववेदाः** इत्युच्यत इत्यन्वयः । सर्वस्वं वित्तवान् सर्वस्वं वेदयति लम्भयति ऋत्विज इति वा । लाभार्थस्य विदेर्ण्यन्तादसुन् । सर्ववेदसौ, सर्ववेदसः इत्यादि । एकं सर्वस्वदक्षिणयागकर्तुः[४] ॥

## यजुर्विद[1]ध्वर्युः[2]

१ यजुर्वेदं वेत्ति **यजुर्वित्** । 'विद ज्ञाने'(अ.प.से.), क्विप् । २ अध्वरं याति **अध्वर्युः** । 'या प्रापणे' (अ.प.अ.), 'मृगय्वादयश्च'(उणा-३७)इति कुः, अध्वरशब्दान्तलोपो निपात्यते । अध्वरेण यौतीति, अपष्टादिर्वा[५] । द्वे '[६]यजुर्वेदिया' इति ख्यातस्य ॥

## ऋग्विद्[1] होता[2]

१ ऋजं वेदं वेत्ति **ऋग्विद्** । सम्पदादित्वात् क्विप् । २ जुहोति **होता** । 'हु दानादनयोः'(जु.प.अ.), 'नप्तृनेष्टृत्वष्टृहोतृपोतृ[भ्रातृजा]मातृ-'(उणा-२५२)इत्यादिना साधुः । द्वे ऋग्वेदिनः ॥

## उद्गाता[1] तु सामवित्[2] ॥८१९॥

१ उच्चैर्गायति सामानीति **उद्गाता**, ऋदन्तः । 'गै शब्दे'(भ्वा.प.अ.), तृच् । २ सामवेदं वेत्ति **सामवित्** । 'विद ज्ञाने'(अ.प.से.), क्विप् । यज्ञे हि यजुर्ऋक्सामवेदविदो ब्राह्मणास्तिष्ठन्ति कटादिशाखाभेदेन । यन्माघः-

''सप्तभेदकरकल्पितस्वरं[७] साम सामविदसङ्ग[८]मुज्जगौ ।
तत्र सूनृतगिरश्च सूरयः पुण्यमृग्यजुषमध्यगीषत ॥१॥''

[शिशुपालवधम्, सर्गः-१४, श्लो-२१]इति । [द्वे सामवेदिनः]
॥८१९॥

## यज्ञो[1] यागः[2] सवः[3] सत्रं[4] स्तोमो[5] मन्युर्[6]मखः[7] क्रतुः । संस्तरः[9] सप्ततन्तुश्च[10] वितानं[11] बर्हिर्[12]अध्वरः[13] ॥८२०॥

१ इज्यते हविर्दीयतेऽत्रेति **यज्ञः** । 'यज देवपूजादौ' (भ्वा.उ.अ.), 'यजयाच-'३।३।९०॥इत्यादिना नङ् । २ इज्यतेऽधीयते(इज्यते दीयते)ऽत्रेति **यागः** । अधिकरणे घञ् । यजनं वा यागः । भावे घञ् । ३ सूयते सोमोऽत्र **सवः** । 'षूञ्[९] अभिषवे'(स्वा.उ.अ.), 'ऋदोरप्'३।३।५७॥ । ४ सीदन्त्यत्र देवाः **सत्रम्** । 'षद्लृ विशरणादौ'(भ्वा.प.अ.), 'गुधृवी[१०]पचिवचि[११]यमि[१२]([१३]मनितनि)सदिक्षदिभ्यस्त्रन्[१४]'(उणा- ६०६)इति त्रन्, 'तितुत्र-'७।२।९॥ इतीण्निषेधः । ५ स्तौत्यत्र यजमानः **स्तोमः** । 'ष्टुञ् स्तुतौ'(अ.उ.अ.), 'अर्तिस्तुसुहुधृक्षिक्षुभाया[वा]पदियक्षिनीभ्यो मन्'(उणा-१३७) । ६ मन्यतेऽसौ **मन्युः**, पुंसि । ['मन ज्ञाने'(दि.आ.अ.), 'यजिमनिशुन्धि-' (उणा-३००)इत्यादिना युच्] । ७ मखन्ति स्वभागं गृहीतुमागच्छन्ति देवा अत्रेति **मखः** । 'मख गतौ'(भ्वा.प.से.), 'पुंसि संज्ञायाम्-'३।३।११८॥इति घः । ८ करोति स्वर्गादिफलम्, क्रियते वा फलार्थिभिः **क्रतुः**, पुंसि[१५] । 'कृञः क्रतुः'(उणा-७७)इति सूत्रेण 'डुकृञ् करणे'(त.उ.अ.) अस्माद्धातोः कतुप्रत्ययः, 'लशक्वतद्धिते'१।३।८॥, 'इको यणचि'६।१।७७॥ । क्रीयते सोमोऽत्रेति वा । '' 'क्रीणातेर्डतुच्'( )इति डतुच्''[[१६]]इत्येके । क्रतुशब्दः ससोमके यागेऽन्यत्र

---

१. द्र. पदचन्द्रिका, भा-२, ब्रह्मवर्गः, श्लो-४०५, पृ.४९६॥, तत्र ''सोमः सोमलतारसः । स पीतोऽनेन ।''इष्टादिभ्यश्छ(-श्च ?)'' (पा. ५।२।८८॥)इतीनिः । 'सोमपीती' ॥'' इति दृश्यते ॥ २. क्षीरस्वामिसम्मतोऽयं पाठः, '-पीती' इति पदचन्द्रिकारामाश्रमीसम्मतपाठः ॥ ३. 'सर्व' इति१.४॥ ४. '-यज्ञकर्तुः' इति४॥ ५. द्र. कातन्त्रोणादिगणः १।१६॥ ६. 'ययु-' इति३॥ ७. '-सारं' इति१॥ ८. 'सामवेदविद-' इति३॥ ९. 'षु-' इति१.२॥ १०. '-वि-' इति३, ४प्रतौ नास्ति ॥ ११. इतोऽग्रे ३प्रतौ 'वधि' इति दृश्यते ॥ १२. '-पचिवधियमि-' इति४॥ १३. कोष्ठान्तर्गतपाठ उणादिगणे न दृश्यते ॥ १४. '-स्त्रः' इत्युणादिगणे ॥ १५. इतोऽग्रे ४प्रतौ 'डुकृञ् करणे' इति दृश्यते ॥ १६. द्र. पदचन्द्रिका, भा-२, ब्रह्मवर्गः, श्लो-४१०, पृ.४९९-५००॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तूपचारादिति । ९ संस्तीर्यते दर्भा अत्रेति **संस्तरः** । 'स्तृञ् आच्छादने'(स्वा.उ.अ.), 'पुंसि संज्ञायाम्-'३।३।११८॥ इति घः ।१० पशुबन्धार्थं सप्त तन्तवोऽत्र **सप्ततन्तुः**, पुंसि । यद्वा सप्तङ्ख्यास्तन्तवो भेदा अस्य । यदुक्तम्-''अग्निष्टोमादयः संस्था भेदाः सप्ताऽस्य तन्तवः''[1][ ]इति । सप्तार्चिरग्निस्तन्तु-मूलकारणमस्य सप्ततन्तुः, पृषोदरादिः [वा] । ११ वितन्यत इति **वितानम्**, पुंक्ली. । 'तनु विस्तारे'(त.उ.से.), कर्मणि घञ् । १२ बृंहति वर्धते धर्मोऽत्र **बर्हिः**, क्लीबे । 'बृहि वृद्धौ'(भ्वा.प.से.), 'बंहिबृंहेर्नलुक् च'[2](हैमोणा-९९०) इतीस् । १३ ध्वरति कौटिल्यं करोति ध्वरः, [अच्], न ध्वरः **अध्वरः** । अध्वानं स्वर्मार्गं[3] राति ददाति वा । सामान्येन त्रयोदश यज्ञस्य ॥८२०॥

अथ विशेषानाह-

**अध्ययनं ब्रह्मयज्ञः**

१ अधीयत इति **अध्ययनम्** । 'इङ् अध्ययने' (अ.आ.अ.), कर्मणि ल्युट् । २ ब्रह्मणे यजनं दानं **ब्रह्मयज्ञः** । द्वे ब्रह्मयज्ञस्य ॥

**स्याद् देवयज्ञ आहुतिः ।**

**होमो होत्रं वषट्कारः**

१ देवेभ्यो यजनं[4] दानं **देवयज्ञः** । 'यजयाच-' ३।३।९०॥ इत्यादिना नङ् । २ आहूयतेऽसावग्नौ **आहुतिः** । 'हु दानादनयोः'(जु.प.अ.), 'स्त्रियां क्तिन्'३।३।९४॥ । ३ देवतोद्देशेन हविषोऽग्नौ प्रक्षेपो **होमः** । 'हु दानादनयोः' (जु.प.अ.), 'अर्तिस्तुसुहु-'(उणा-१३७)इत्यादिना भावे मन् । ४ हूयते **होत्रम्** । 'हुयामा-'(उणा-६०७)इत्यादिना त्रन् । ५ वषडिति देवहविर्दानेऽव्ययम्, वषट्करणं **वषट्कारः**, घञ् । पञ्च देवयज्ञस्य ॥

**पितृयज्ञस्तु तर्पणम् ॥८२१॥**

**तच्छ्राद्धं पिण्डदानं च**

१ पितृभ्यो यजनं दानं **पितृयज्ञः** । २ तर्प्यतेऽनेन **तर्पणम्** । 'तृप तृप्तौ'(दि.प.वे.), करणे ल्युट् । मन्त्रपूर्वकं जलदानम्, तर्पणमित्यर्थः । यद् याज्ञवल्क्यः-''स्नात्वा देवान् पितृंश्चैव तर्पयेदर्चयेदथ''[याज्ञवल्क्यस्मृतिः, आचाराध्यायः, श्लो-१००]इति ॥८२१॥ ३ अदनीयस्य तत्स्थानीयस्य[6] वा प्रेतोद्देशेन द्रव्यस्य श्रद्धया त्यागः **श्राद्धम्**, पुंक्ली. ।

यन्मरीचिः-

''प्रेतं पितॄनथोद्दिश्य भोज्यं यत्प्रियमात्मनः ।
श्रद्धया दीयते यत्तु तत् श्राद्धं परिकीर्तितम् ॥१॥''

[ ]इत्यवान्तरभेदोऽत्र नाऽऽश्रितः । ४ पिण्डो दीयतेऽस्मिन् **पिण्डदानम्** । अधिकरणे ल्युट् । चत्वारि यज्ञस्य[7] ॥

**नृयज्ञोऽतिथिपूजनम् ।**

१ नृभ्यो मनुष्येभ्यो यजनं दानं **नृयज्ञः** । २ अतिथीनामासनान्नादिना दानेन पूजनं सपर्या **अतिथिपूजनम्** । द्वे नृयज्ञस्य ॥

**भूतयज्ञो बलिः**

१ भूतेभ्यः काकादिभ्यो यजनं दानं **भूतयज्ञः** । २ बलन्ति प्राणन्त्यनेन **बलिः**, पुंस्त्री । 'बल प्राणने'(भ्वा.-प.से.), '-इन्'(उणा-५५७)इतीन् । द्वे भूतयज्ञस्य ॥

उपसंहारमाह-

**पञ्च महायज्ञा भवन्त्यमी ॥८२२॥**

अमी ब्रह्मयज्ञादयः पञ्च महायज्ञा भवन्ति । यन्मनुः-

''अध्ययनं[8] ब्रह्मयज्ञः१ पितृयज्ञस्तु तर्पणम्२ ।
होमो दैवो३ बलिर्भौतो४ नृयज्ञोऽतिथिपूजनम्५ ॥१॥''

[मनुस्मृतिः, अध्या-३, श्लो-७०]इति[9] ॥८२२॥

**पौर्णमासश्च दर्शश्च यज्ञौ पक्षान्तयोः पृथक् ।**

१-२ पूर्णमास्यां भवः **पौर्णमासः** । पौर्णमास्याः सन्धिवेलादौ पाठादण् । दर्शादिपदसाध्यो यागः कार्य-कारणभेदोपचाराद् दर्शादिपदवाच्यः, पृथग् भिन्नो न तु पर्यायः, पक्षान्तयोः शुक्लकृष्णपक्षप्रान्तयोः, पृथग् भिन्नौ, शुक्लपक्षान्ते पूर्णिमायज्ञः[10] कृष्णपक्षान्तेऽमावसीयज्ञ इत्यर्थः । ''दर्शश्च पौर्णमासश्च यज्ञौ[11-1] पक्षान्तयोः समौ''[11-2] [अमरकोषः २।७।४८॥]इत्यमरः ।

---

१. द्र. स्वोपज्ञटीका३।८२०॥, पृ.१८२॥ २. 'बृंहेर्नलोपश्च'(उणा-२६६)इत्यप्युणादिगणसूत्रम् ॥ ३. 'स्वमार्गं' इति१ ॥ ४. 'जननं' इति३ ॥ ५. '-न्ते' इति२ ॥ ६.'तत्स्थानीयत्स्थानीयस्य' इति३ ॥ ७. 'पितृयज्ञस्य' इति३ ॥ ८. मनुस्मृत्याम् 'अध्यापनं' इति दृश्यते, ''अध्यापनशब्देनाध्ययनमपि गृह्यते । 'जपोऽहुत' इति वक्ष्यमाणत्वात् । अतोऽध्यापनमध्ययनं च ब्रह्मयज्ञः ।'' इति मन्वर्थमुक्तावलीटीका, मनुस्मृतिः, ३।७०॥, पृ.९१॥ ९. ३प्रतौ नास्ति ॥ १०. 'शुक्ल-' इति१ ॥ ११-१. 'यागौ' इति, ११-२. 'पृथक्' इति चाऽमरकोषे ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सौमि[1]की दीक्ष[2]णीयेष्टिः**

१ सोमः प्रयोजनमस्याः **सौमिकी** । 'प्रयोजनम्' ५।१।१०९॥ इति ठक् । २ दीक्षणीयस्य दीक्षार्हस्य इष्टिः **दीक्षणीयेष्टिः** । चन्द्रनिमित्तं यज्ञोऽसौ । दीक्षायोग्यस्य यज्ञनामैकम् ॥

**दीक्षा[1] तु व्रतस[2]ङ्ग्रहः ॥८२३॥**

१ दीक्षणं **दीक्षा** । 'दीक्ष मौण[ड्ये]ज्योपनयन-नियमव्रतादेशेषु'(भ्वा.आ.से.), 'गुरोश्च हलः'३।३।१०३॥ इत्यः । २ व्रतं शा[1]स्त्रतो नियमः, तस्य सङ्ग्रह **व्रतसङ्ग्रहः** । द्वे दीक्षायाः ॥८२३॥

**वृतिः सुगहना कुम्[1]बा**

१ वृतिः कण्टकाद्यावरणम्, ([2]कण्टकानां वस्त्राणां वा,) 'वाडि[3]' इति भाषा, प्रस्तावाद् यज्ञवाटस्य, सा सुगहना निबिडा **कुम्बा** प्रोच्यते । कुम्ब्यते आच्छाद्यतेऽनया कुम्बा । 'कुबि आच्छादने'(चु.प.से.), चुरादिः, परस्मैपदी, 'चिन्ति-पूजिकथि[4]कुम्बि-'३।३।१०५॥ इत्यादिनाऽङ्[5] । एकमन्य-स्पर्शादिदोषवारणाय यज्ञस्थाने कृतवृते[6]ः ॥

**वेदी भूमिः परिष्कृता ।**

१ वेदयति निवासयति द्रव्यजातं वेदिः । 'विद [7]चेतनाख्याननिवासेषु[8]'(चु.आ.से.), चुरादिः, ततो ण्यन्ताद् 'अच इः'(उणा-५७८), 'कृदिकारात्-'(गणसू-४।१।-४५॥)इति ङीष्[9] [**वेदी**]। परिष्कृता यज्ञार्थं पशुबन्धनाय[10] यज्ञिय-पात्रीसादनाय वाऽऽहितसंस्कारा, सा डमरुकाद्याकारा पिण्डिका । एकं योगार्थं भूषितभूमेः ॥

**स्थण्[1]डिलं च[2]त्वरं चाऽन्या**

१ अन्याऽसंस्कृता भूमिः यागार्थमेव, स्थलन्ति तिष्ठन्त्यत्रेति[11] **स्थण्डिलम्** । 'स्थल स्थाने'(भ्वा.प.से.), 'मिथिलादयश्च'(उणा-५७)इति इलचि निपात्यते[12] । २ चतन्तेऽस्मिन्, चत्यते वा **चत्वरम्** । 'चतेङ्[13] याचने'(भ्वा.-उ.से.), 'कृ(कॄ)गॄशॄवृ[ञ्]चतिभ्यः ष्वरच्'(उणा-२७९) । द्वे यागार्थमसंस्कृतभूमेः ॥

**यू[1]पः स्याद् यज्ञकीलकः ॥८२४॥**

१ [14]यूयते पशुरनेनेति[15] **यूपः** । 'युञ्[16] बन्धने'(क्र्या.-उ.अ.), क्र्यादिः । 'कुसुयुभ्यश्च पः किद् दीर्घश्च[17]'( ) इति पः, दीर्घत्वं च । पुंस्ययम् । ''युपोऽस्त्री संस्कृत[:] स्तम्भः''[वैजयन्तीकोषः३।६।१०३॥]इति तु[18] वैजयन्ती । यज्ञे पशुविनाशनाय[19] कीलको यज्ञकीलकः । एकं यज्ञस्तम्भस्य ॥

**च[1]षालो यूपकटके**

१ यज्ञसमाप्तिसूचकपशुबन्धाद्यर्थं यज्ञभूमौ वैल्वः खादिरो वाऽष्टास्रिर्यः (अष्टास्रो यः) स्तम्भ आरोप्यते, स यूपः, तस्य शिरसि वलयाकृतिर्य[20] काष्ठविकारः स **चषालः**, मूर्धन्यमध्यः । चषति समाप्तिसं[21]शयं चषालः, पुंक्लीबलिङ्गः[22] । 'चष भक्षणे'(भ्वा.उ.से.), 'मा(सा)नसि[वर्णसि]पर्णसिल[23]-तण्डुलाङ्कुशचषालोत्र्लधिष्ण्ये(-चषालेल्वलपल्वलधिष्ण्य-शल्याः)'(उणा-५४७)इत्यालच्प्रत्यये निपात्यते । तक्ष्णा घटितो यूपाग्रे[24] कटकाकृतिः । ''यूपमङ्गुलिमिवोदनीनमद्भू(यूपरूप-कमनीनमद्भुजं भू)श्चषालतुलिताङ्गुलीयकम्''[शिशुपाल-वधम्, सर्गः-१४, श्लो-५२]इति माघः । एकं [यूपकटकस्य]॥

**यूप[1]कर्णौ घृतावनौ ।**

१ यूपस्य कर्णौ **यूपकर्णः** । घृतस्य सर्पिषः अवनिः सिञ्चनस्थानं घृतावनिः, तत्र । एकं घृतसिञ्चनस्थानस्य ॥

**यूपाग्रभागे स्यात् त[1]र्म**

१ यूपस्याऽग्रभागः शिरो यूपाग्रभागः, तत्र । तरति प्लवते दूरादभिव्यक्तिं[25] यातीति **तर्म**, क्लीबे । 'तॄ प्लवन-तरणयोः'(भ्वा.प.से.), '-मन्'(उणा-५८४)इति मन् । वाच-स्पतिस्तु-''युपाग्रे तर्म न स्त्रियाम्''[[26]]इति पुंस्यप्याह । तर्माणौ, तर्माणः इत्यादि । एकं यूपाग्रभागस्य ॥

---

१. 'शास्त्रि-' इति१.२॥ २. कोष्ठान्तर्गतपाठः ४प्रतौ नास्ति ॥ ३. 'वाड' इति२॥ ४. '-कुथि-' इति४॥ ५. 'इत्याङ्' इति४॥ ६. '-त्तेः' इति३.४॥ ७. 'चेतना-' इति३.४॥ ८. 'चेतनाख्यानविवादेषु' इति स्वामी, 'वेदनाख्याननिवासेषु' इति मैत्रेयः ॥ ९. 'ङीप्' इति१.२॥ १०. '-नार्थं' इति४॥ ११. '-त्र' इति१॥ १२. '-न्ते' इति४॥ १३. ङकारोऽनावश्यकः, उभयपदित्वस्य विघातकत्वात् ॥ १४. इतः पूर्वे ४प्रतौ 'एकं' इति दृश्यते ॥ १५. '-नेन' इति४॥ १६. 'यूञ्' इति१.३॥ १७. 'कुयुभ्यां च'(उणा-३०७)इत्युणादिगणसूत्रम् ॥ १८. १प्रतौ नास्ति ॥ १९. '-विनाशाय' इति१, '-बन्धनाय विनाशाय इत्यपि' इति३, '-बन्धनाय' इति४॥ २०. २प्रतौ नास्ति ॥ २१. '-सिः' इति२, '-सिं' इति४॥ २२. 'पुंक्ली' इति३॥ २३. '-ल-' इत्युणादिगणसूत्रे नास्ति ॥ २४. 'यूपोग्रे' इति३॥ २५. '-क्तं' इति३.४॥ २६. द्र. स्वोपज्ञटीका ३।८२५॥, पृ.१८३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अरणिर्निर्मन्थदारुणि ॥८२५॥**

१ ऋच्छति प्राणयति (प्रापयति) अग्निम् **अरणिः**, पुंस्त्री । ''अरणिर्द्वयोः''[अमरकोषः२।७।१९॥]इत्यमरः । 'ऋ गतौ प्रापणे च'(भ्वा.प.अ.), 'अर्तिसृधृधमि-[धम्यम्यश्यवितृ]भ्योऽनिः'(उणा-२५९), 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि अरणी च । अग्नेर्निर्मन्थाय दारु काष्ठं निर्मन्थदारु, तत्र । असौ वनस्पतिकायोऽपि यज्ञोपयोगित्वाद् यज्ञाधिकारे पठितः । एकमरण्याः ॥८२५॥

**स्युर्दक्षिणाऽऽहवनीयगार्हपत्यास्त्रयोऽग्नयः ।**

१ ([1]दक्षिणदिशि वर्तमानोऽग्निः **दक्षिणः** । दक्षिणे पार्श्वे स्थाप्यत्वाद् दक्षिणो वा ) । अर्धचन्द्राकृतिरयम् १ । २ आङ्पूर्वाद् जुहोतेः 'कृत्यल्युटो बहुलम्'३।३।११३॥ इत्यधिकरणेऽनीयर् । आहवनमर्हतीति 'प्राक् क्रीताच्छः'५।१।१॥ इति छप्रत्यये वा **आह्वनीयः**, चतुरस्रोऽयम् २। ३ गृहपति-गृ[2]हस्वामी, तेन संयुक्तो नित्यसम्बद्धो **गार्हपत्यः** । 'गृहपतिना संयुक्ते ञ्यः'४।४।९०॥ इति ञ्यः । अयं च सदा रक्षणीयो वर्तुलाकारश्चेति ३। एते त्रयोऽग्नयः ॥

**इदमग्नित्रयं त्रेता**

१ इदमुक्तमग्नित्रयं **त्रेता** उच्यते । त्राणं त्राः सदा सन्धुक्षणम्, तामिताः(तामिता) प्राप्ता[3] त्रेताः (त्रेता) । त्रायन्ते त्रा अग्निहोत्रिण आहुतयश्च, त्रामिता वा त्रेता[4] । [एकं अग्नित्रयस्य] ॥

**प्रणीतः संस्कृतोऽनलः[5] ॥८२६॥**

१ प्रणीयते स्म **प्रणीतः** । संस्कृतो मन्त्रादिना, यथा-'प्रणीते[6] जुहुयाद्द्रव्यम्'[[7] ] । एकं मन्त्रादिसंस्कृताग्नेः ॥८२६॥

**ऋक्[9] सामिधेनी धाय्या च समिदाधीयते यया ।**

१ 'ऋच स्तुतौ'(तु.प.से.), 'अन्येभ्योऽपि दृश्यते[8]' ३।२।१७८॥ इति क्विपि ऋक्, यया ऋचाऽग्नौ समिद् इन्धनमाधीयते क्षिप्यते, सा ऋक् **सामिधेनी** चापरा[10] **धाय्या** उच्यत इत्यन्वयः । समिधामाधानी[11] सामिधेनी । 'समिधामाधाने षेण्यण्(षेण्यण्)'(वा-४।३।१२०॥) । ''तेजो हुताशनसमिन्धनसामिधेनी[12]''[ ]इति मुरारिः । धीयते पुष्यतेऽग्निरनया धाय्या । 'डुधाञ् धारणादौ'(जु.उ.अ.), 'पाय्यसांनाय्यनिकाय्यधाय्या-'३।१।१२९॥ इति साधुः, टाप् । यया ऋचा अग्नाविन्धनं क्षिप्यते, तस्या द्वे ॥

**समिदिन्धनमेधेध्मतर्पणैधांसि**

१ समिध्यते वह्निरनया **समित्**, स्त्रीलिङ्गः[13] । 'ञिइन्धी दीप्तौ'(रु.आ.से.), सम्पदादित्वात् क्विप् । २ इध्यतेऽनेन **इन्धनम्** । 'ञिइन्धी दीप्तौ'(रु.आ.से.), करणे ल्युट् । ३ इध्यतेऽग्निरनेन **एधः** । 'ञिइन्धी दीप्तौ'(रु.आ.से.), 'अवोदैधौद्म-'६।४।२९॥ इति निपात्यते । अकारान्तोऽयम् । यथा-''एधान् हुतासन(शन)वतः स मुनिर्ययाचे''[रघुवंशम्, सर्गः-९, श्लो-८१]इति रघुः । ४ 'इषियुधि-'(उणा-१४२)इति मकि **इध्मम्**, क्लीबे । ''इध्मोऽस्त्री''[वैजयन्तीकोषः-३।६।९६॥]इति वैजयन्ती । ५ तृ[14]प्यतेऽग्निरनेन **तर्पणम्** । 'तृप तृप्तौ'(तु.प.से.), ल्युट् । ६ इध्यतेऽनेन **एधः**, क्लीबे । 'ञिइन्धी दीप्तौ'(रु.आ.से.), औणादिकोऽसुन्, बाहुलकान्नलोपः । एधसी, एधांसि इत्यादि । षडिन्धनस्य ॥

**भस्म तु ॥८२७॥**

**स्याद् भूतिर्भसितं रक्षा क्षारः**

१ भसति तदिति **भस्म**, क्लीबे । 'भस भर्त्सनदीप्त्योः'(जु.प.से.), '-मन्'(उणा-५८४)इति मन् ॥८२७॥ २ भूयतेऽनया **भूतिः** । 'स्त्रियां क्तिन्'३।३।९४॥ । ३ बभस्ति वह्निना **भसितम्** । बाहुलकाद् वर्तमाने क्तः । ४ रक्ष्यतेऽग्निरनयेति[15] **रक्षा** । 'रक्ष पालने'(भ्वा.प.से.), भिदादित्वादङ् । ५ क्षरति **क्षारः** । 'क्षर सञ्चलने'(भ्वा.प.से.), ज्वलादित्वाण्णः । पञ्च भस्मनः ॥

**पात्रं स्रुवादिकम् ।**

---

१. कोष्ठान्तर्गतपाठस्थाने १.२.३प्रतिषु ''दक्षिणाया दिशोऽग्निः दक्षिणाग्निः । सर्वनाम्नो वृत्तिमात्रे पुंवद्भावे दक्षिणाग्निः । दक्षिणपार्श्वे स्थाप्यत्वाद् दक्षिणः । स चासावग्निश्चेति वा ।'' इति दृश्यते, स तु दक्षिणाग्निशब्दं लक्ष्यीकृत्य ॥ २. 'गृहे' इति४॥ ३. 'प्राप्ताः' इति१.२.४॥ ४. 'त्रेताः' इति१.२॥ ५. तुलनीयोऽमरकोषः २।७।२०॥ ६. 'प्रणीयते' इति३॥ ७. द्र. अनेकार्थकैरवाकरकौमुदीटीका, भा-२, ३।२६६॥, पृ.११८॥, तत्र 'द्रव्यम्' इत्यस्य स्थाने 'हव्यम्' इति दृश्यते ॥ ८. ४प्रतौ नास्ति ॥ ९. १.२प्रत्योर्नास्ति ॥ १०. '-रं' इति१.२.४॥ ११. '-ना' इति४॥ १२. '-नीं' इति३॥ १३. '-ङ्गा' इति१.२॥ १४. इतः पूर्वे ३प्रतौ 'तृप्यति' इति दृश्यते ॥ १५. '-या' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ पिबन्त्यनेन **पात्रम्** । 'पा पाने'(भ्वा.प.अ.), '-ष्ट्रन्'(उणा-५९८) । ''पात्रं स्रुवादौ पर्णे[1] च राजमन्त्रिणि चेष्यते''[विश्वप्रकाशकोशः, रान्तवर्गः, श्लो-३६]इति महेश्वरः । सामान्येन स्रुवादियज्ञपात्राणामेकम् ॥

### स्रुवः[1] स्रुक्[2]

१ स्रवत्यस्मात् **स्रुवः**, पुंसि । 'स्रु गतौ'(भ्वा.-प.अ.), 'स्रुवः कच्किचौ (स्रुवः कः)'(उणा-२१९), 'चिक् च'(उणा-२२०)इति कच्किचौ(ककिचौ) प्रत्ययौ, इकारककारानुबन्धावितौ, एतौ भीमादित्वादपादानम्, 'अचि श्नुधातु-'६।४।७७॥ इत्युवङ् । २ स्रवति हविरस्याः **स्रुक्**, स्त्रियाम् । 'स्रु गतौ'(भ्वा.प.अ.), 'चिक् च'(उणा-२२०) इति चिक् । स्रुचौ, स्रुचः इत्यादि । द्वावपि दन्त्यौष्ठाद्यस्वरान्तौ । द्वे 'सरुआ[2]' इति ख्यातस्य ॥

### अधरा सोपभृत्[1]

१ सा स्रुग् अधरा हीना, लघ्वीत्यर्थः । ''अधरो दन्तवसनेऽनूर्ध्वे हीनेऽधरोऽन्यवत्''[विश्वप्रकाशकोशः, रान्तवर्गः, श्लो-९६]इति महेश्वरः । उपाधिकं बिभर्ति **उपभृत्**, स्त्रीलिङ्गः । इयं चक्राकारा । एकं लघुस्रुचः[3] । 'नाह्ना[4] सरूआ' इति भाषा ॥

### जुहूः[1] पुनरुत्तरा ॥८२८॥

१ जुह्वत्यनया **जुहूः**, स्त्रीलिङ्गः । 'हु दानादनयोः' (जु.प.अ.), 'द्युतिगमिजुहोतीनां द्वे च'(वा-३।२।१७८॥)इति क्विप्[5] । जुह्वौ, जुह्वः इत्यादि । चमूवदियं पालाशी बाहुमात्री च। पुनः सा स्रुग् उत्तरा वृद्धा। एकं महत्या स्रुचः ॥८२८॥

### ध्रुवा[1] तु सर्वसंज्ञार्थं यस्यामाज्यं निधीयते ।

१ यस्यां स्रुचि सर्वसंज्ञार्थमाज्यं निधीयते स्थाप्यते, सा **ध्रुवा** । ध्रुवति स्थैर्यं भजति ध्रुवा । 'ध्रुव(ध्रु) स्थैर्ये' (तु.प.से.), अच्, कुटादित्वाद् ङित्त्वे, उवङ्, टाप् । इयं वटपत्राकृतिः । स्रुवादीनां विचारः कात्यायनसूत्राद् ज्ञेयः ॥

### योऽभिमन्त्र्य निहन्येत स स्यात् पशुरुपाकृतः[1] ॥८२९॥

१ योऽभिमन्त्र्य मन्त्रेण पूतीकृत्य निहन्यते, स पशुः **उपाकृतः** इत्युच्यते । उपामन्त्र्य क्रियते निहन्यते स्म उपाकृतः । 'कृञ् हिंसायाम्'(स्वा.उ.अ.), 'निष्ठा'३।२।१०२॥ इति क्तः । ''उपाकृतः पशुरसौ योऽभिमन्त्र्य क्रतौ हतः'' [अमरकोषः२।७।२५॥]इत्यमरः । जीवत्यपि[6] पशावुपाकृत इति दृश्यते, ''यदाऽसावुपाकृतः पलायितः''[[7] ]इति प्रायश्चित्तोपदेशात् ॥८२९॥

### परम्पराकं[1] शसनं[2] प्रोक्षणं[3] च मखे वधः ।

१ परमित्यतिशयार्थेऽव्ययम्, परः श्रेष्ठः आको गतिरस्य **परम्पराकम्** इति बहुव्रीहिः । ''हता हि पशवः परां गतिमवश्यं लभन्ते[8]''[[7] ]इति स्मृतेः[9] । २ शस्यते हिंस्यते **शसनम्**। 'शसु हिंसायाम्'(भ्वा.प.से.), तालव्यादिः, दन्त्यान्तः, भ्वादिः, परस्मैपदी, ल्युट् । ३ प्रकृष्टं सद्गतिजनकमुक्षणमस्य **प्रोक्षणम्** । मखे यज्ञे वधो हिंसा, तस्यास्त्रीणि ॥

### हिंसार्थं कर्माभिचारः[1] स्यात्

१ विपक्षादीनां हिंसार्थं हिंसानिमित्तं कर्म उच्चाटनमारणादि, तस्य एकम् **अभिचारः** इति । अभिभवितुं चरणमभिचारः । 'चर गतौ भक्षणे च'(भ्वा.प.से.), भ्वादिः, परस्मैपदी, भावे घञ् ॥

### यज्ञार्हं तु यज्ञियम्[1] ॥८३०॥

१ यज्ञो नाम क्रियासमुदायः, कश्चित्तदभिव्यङ्ग्यं चाऽप्रकाश्यमित्यर्थः, अपूर्वफलदानसमर्थमदृष्टमित्यर्थः, यज्ञकर्म अर्हति **यज्ञियम्** । अर्हतीत्यर्थे 'यज्ञर्त्वि[ग्]भ्यां खघञौ (घखञौ)'५।१।७१॥ इति घञ् (घः[10])। तच्च त्रिषु यज्ञियो ब्राह्मणः, यज्ञिया भूमिः, यज्ञियं द्रव्यम् । एकं सामान्येन यज्ञयोग्यस्य ॥८३०॥

### हविः[1] सान्नाय्यम्[2]

१ हूयते **हविः**, क्लीबे । 'हु दानादनयोः'(जु.-प.अ.), 'अर्चिरुचिसुचि(शुचि[11])-'(उणा-२६५)इत्यादिना

---

१. 'पर्णेऽपि' इति विश्वप्रकाशकोशे, पृ.१२८॥ २. 'सरूआ' इति३॥ ३. '-वः' इति४॥ ४. 'छोटा' इति४॥ ५. 'जुहोतेर्दीर्घश्च'(वा-३।२।१७८॥)इत्यनेन दीर्घः ॥ ६. 'जीव्य-' इति४॥ ७. द्र. पदचन्द्रिका, भा-२, ब्रह्मवर्गः, श्लो-४२२, पृ.५१२॥, तत्र 'पलायितः' इत्यस्य स्थाने 'पलायते' इति दृश्यते ॥ ८. 'लभते' इति१॥ ९. '-तिः' इति३॥ १०. 'यज्ञर्त्विग्भ्यां तत्कर्मार्हतीत्युपसंख्यानम्'(वा-५।१।७१॥)इत्यपि वार्तिकम् ॥ ११. 'अर्चिशुचिहु-'(उणा-२६५)इत्युणादिगणे ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इस्। २ सन्नीयते वह्निना संयोज्यते **सान्नाय्यम्** । 'णीञ् प्रापणे'(भ्वा.उ.अ.), 'पाय्यसान्नाय्य-'३।१।१२९॥ इत्यादिना साधुः। ''सन्नाय्यमिति दन्त्याद्यस्वरादिरपि''[ ]इति हलायुधटीका । द्वे होतव्यद्रव्यस्य ॥

## आमिक्षा शृतोष्णक्षीरगं दधि । क्षीरशरः पयस्या च

१ ''आङ्पूर्वाद् 'मिहेर्दीर्घश्च'( )इति षः, उपधादीर्घत्वं चेति दीर्घमध्येयम्''[ ]इति पुरुषोत्तमः । ''आङ्पूर्वाद् 'मिष स्पर्धायाम्'(तु.प.से.)इत्यतः 'स्थः व्रश्चिकुडिकुषिभ्यः(स्नुव्रश्चिकृत्यृषिभ्यः) कित्'(उणा-३४६)इति बाहुलकात् किप्रत्यये ह्रस्वमध्येयम्''[ ]इति गोवर्धनः । आमीयते क्षिप्यते दध्यत्रेति **आमिक्षा** वा । शृतं पक्वमुष्णं तप्तं [च] यत् क्षीरं दुग्धम्, तद् गच्छतीति डप्रत्यये शृतोष्णक्षीरगम् । एतादृग् दधि आमिक्षेत्यन्वयः । २ क्षीरस्य शरो मण्डः **क्षीरशरः** । ''शरशब्दोऽत्र दधिसारवाची तालव्यादिः, दन्त्यादिरपि''[ ]इति प्रागेव निर्णीतम् । ३ पयसो विकारः **पयस्या** । 'गोपयसोर्यत्'४।३।१६०॥ इति यत्, टाप्, स्त्रीलिङ्गः । त्रीणि तप्तदुग्धनिहितदधिहव्यविशेषस्य ॥

## तन्मस्तु तु वाजिनम् ॥८३१॥

१ तस्या आमिक्षाया मस्तु मण्डः तन्मस्तु, तत्र । वजति **वाजिनम्** । 'वज गतौ'(भ्वा.प.से.), बाहुलकादिनचि प्रत्यये निपात्यते । एकमामिक्षामण्डस्य ॥८३१॥

## हव्यं सुरेभ्यो दातव्यम्

१ हूयत इदं **हव्यम्** । 'हु दानादनयोः'(जु.प.अ.), 'अचो यत्'३।१।९७॥ । '' 'ओरावश्यके'३।१।१२५॥इति ण्यत्''[मा. धातुवृत्तिः, जुहोत्यादिः, धातुसं-१]इति माधवः । बाहुलकाद् वृद्ध्यभावः । सुरेभ्यो देवेभ्योऽग्निमुखेन दातव्यमोदनमन्नं हव्यमित्यन्वयः । अग्रे स्थितमोदनमिहाऽपि योज्यम् । एकमग्निमुखेन देवेभ्यो दातव्यान्नस्य ॥

## पितृभ्यः कव्यमोदनम् ।

१ ब्राह्मणमुखेन पितृभ्यो दातव्यमन्नमोदनमन्नं **कव्यम्** इत्यन्वयः । कव्यते तृप्तिकारणत्वेन वर्ण्यते कव्यम् । 'कबृ वर्णने'(भ्वा.आ.से.), 'पोरदुपधात्'३।१।९८॥ इति यत् । कूयते शब्द्यत इति वा । 'कु शब्दे'(अ.प.अ.), 'अचो यत्'३।१।९७॥ । एकं ब्राह्मणमुखेन पितृभ्यो दातव्यान्नस्य ॥

## आज्ये तु दधिसंयुक्ते पृषदाज्यं पृषातकम् ॥८३२॥

१-२ दधिसंयुक्ते आज्ये घृते **पृषदाज्यम्, पृषातकम्** एतौ । पर्षति सिञ्चति पृषत्, पृषदाज्यमत्रेति पृषदाज्यम्। पृषच्च तदाज्यं चेति वा । पृषद्भिर्दधिबिन्दुभिः सहितमाज्यं पृषदाज्यमिति वा । दधिषाज्यमित्यपि । ''पृषदाज्यं सदध्याज्ये''[अमरकोषः२।७।२४॥]इत्यमरः । पृषद्भिरङ्क्यते पृषातकम्, पृषोदरादिः । पृषदित्यपि उणादिगणरत्नमहोदधिवृत्त्योः, चतुर्थवर्गाद्यन्तः, क्लीबलिङ्गः, यथा पृषोदरो देवताविशेषः । द्वे दधिमिश्रितघृतस्य ॥८३२॥

## दध्ना तु मधुसम्पृक्ते मधुपर्कं महोदयः ।

१ मधुनः क्षौद्रस्य पर्कः सम्पर्कोऽत्र **मधुपर्कम्** । मधुना पृच्यत इति वा । २ महानुदयोऽस्माद् **महोदयः** । द्वे दधिमिश्रितमधुनः ॥

## हवित्री तु होमकुण्डम्

१ हूयतेऽस्यां **हवित्री** । बाहुलकादित्रः गौरादिः । 'हु दानादनयोः'(जु.प.अ.), 'अर्ति-'(उणा-१३७)इत्यादिना मन्, होमः। होमाय कुण्डं होमकुण्डम् । एकं होमकुण्डस्य॥

## हव्यपाकः पुनश्चरुः ॥८३३॥

१ हव्यस्य पाको **हव्यपाकः** । हव्यं देवार्थमत्र (-मन्नं) पच्यत इति '[अ]कर्तरि च-'३।३।१९॥ इति कर्मणि घञ् । तयोः कर्मधारये वा हव्यपाकः । केचित्तु-

१. 'आदिना' इति ४प्रतौ नास्ति ॥ २. 'सान्नाय्यं हविरुच्यते' इति हलायुधकोशे, २।४१६॥, पृ.४८॥ ३. 'होतद्र-' इति१॥ ४. '-धाया दी-' इति२.३॥ ५. द्र. पदचन्द्रिका, भा-२, ब्रह्मवर्गः, श्लो-४१९, पृ.५०९॥, तत्र ''आङ्पूर्वात् मिह सेचने इत्यतः ''मनेर्दीर्घश्च''(उ०३।६४)इति बाहुलकात् तः, उपाधादीर्घत्वं च दीर्घमध्येयम्-'' इति पुरुषोत्तमः । ''आङ् पूर्वात् मिष स्पर्धायाम् इत्यतः ''स्नुव्रश्चिकृत्यृषिभ्यः कित्''(उ०३।६६) इति बाहुलकात् सप्रत्यये ह्रस्वमध्येयम्'' इति गोवर्धनः'' ६. '-मध्योऽयम्' इति४॥ ७. माधवीयधातुवृत्तौ तु हाव्यशब्दं लक्ष्यीकृत्योक्तं सायणेन, पृ.३८५॥ ८. 'दातव्यमो-' इति३॥ ९. 'ह-' इति१.२॥ १०. 'वर्णे' इति क्षीरतरङ्गिण्यादयः ॥ ११. '-तकः' इति मुद्रितमूले ॥ १२. 'पृपति' इति३.४॥ १३. '-सम्पर्के' इति३॥ १४. '-यं' इति३.४॥ १५. '-दित्र्' इति३॥ १६. ३प्रतौ नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

''पच्यतेऽत्रेति, 'हलश्च'३ ।३ ।१२१ ॥इति घञि पाकं व्युत्पाद्य हव्यपाकः स्थाल्यादिरुच्यते, अन्यत्रौपचारिकः''[ ]इत्याहुः[1] । तदसत्[2], अत्र[3] एव तत्प्रयोगदर्शनात् । ''हेमपात्रे कृतं[4] दोर्भ्यामादानाय (-दधानः[5]) पयश्चरुम्''[रघुवंशम्, सर्गः-१०, श्लो-५१], ''चरोरर्धार्धभागाभ्यां तामयोजयतामुभे''[रघुवंशम्, सर्गः-१०, श्लो-५६]इति कर्मकाण्डे च मुद्गतण्डुलाभ्यां पयसा चरुः श्रपवितव्य इत्यादौ, न तु स्थाल्यादौ तत्प्रयोगो द्रष्टव्यः । मधुमाधव्यामपि-''पचनाय हव्यं चरुरित्यर्थः, यद्वाऽष्टाकपालं चरुं[6] निर्वेशयेदिति, स्थाल्यादौ तु तादर्थ्यादुपचारः''[ ]इत्युक्तम्[7] । २ चरन्त्यस्माद् देवपितृभूतानीति[8] **चरुः** । 'चर गतिभक्षणयोः' (भ्वा.प.से.), 'भृमृशीतॄचरि-'(उणा-७)इत्यादिना उः, पुंसि । द्वे पक्वहव्यान्नस्य । ''द्वे हव्यपचनभाण्डस्य''[ ]इति केचित् । ''चरुर्हव्यान्ने भाण्डे च''[विश्वप्रकाशकोशः, रान्तवर्गः, श्लो-७३]इति महेश्वरः[9] । ''एतौ द्वौ पक्वहोतव्यनाम्नी, ([10]होतव्य-पचनभाण्डनाम्नी) च''[ ]इति केचित् ॥८३३॥

## अमृतं[1] यज्ञशेषे[2] स्यात्

१ अपमृत्युहरत्वादमृतमिव **अमृतम्** । २ यज्ञस्य यच्छेषं घृतादि **यज्ञशेषम्**, तत्र । द्वे यज्ञशेषस्य ॥

## विघसो[1] भुक्तशेषके[2] ।

१ विशेषेण अद्यते भक्ष्यते **विघसः** । 'अद भक्षणे' (अ.प.अ.), 'उपसर्गेऽदः'३ ।३ ।५९ ॥इति कर्मण्यण्, 'घञ-पोश्च'२ ।४ ।३८ ॥ इति घस्लादेशः । २ देवपित्रतिथिगुर्वादि-भुक्तस्य यच्छेषं भुक्तशेषम्, ततः कनि **भुक्तशेषकम्**, तत्र । यन्मनुः-

''विघसाशी भवेन्नित्यं नित्यं चा[11-1]ऽमृतभोजनः ।
विघसो भुक्तशेषः स्याद् यज्ञशिष्टमथाऽमृतम्[11-2] ॥१॥''

[मनुस्मृतिः, अध्या-४, श्लो-२८५]इति । द्वे भुक्तशेषस्य ॥

## यज्ञान्तो[1]ऽवभृथः[2]

१ यज्ञस्याऽन्तः समापनं **यज्ञान्तः** । २ अवहीनं बिभर्ति पोषयति **अवभृथः** । 'अवे भृञः'(उणा-१६०) थक् (क्थन्) । द्वे प्रधानयागे दीक्षितस्य समापको योऽपरो यज्ञो न्यूनाधि-कत्वादिदोषनिरासाय प्रधानयागस्य पूरणाय क्रियते, तस्य ॥

## पूर्तं[1] वाप्यादि

१ पूर्यते पाल्यते वा **पूर्तम्**, पुंक्ली[12] । 'पृ पालन-पूरणयोः'(जु.प.से.), क्तः, 'उदोष्ठ्यपूर्वस्य'७ ।१ ।१०२ ॥ इति उत्त्वम्, 'न ध्याख्यापृमूर्च्छ(मूर्च्छि)मदाम्'८ ।२ ।५७ ॥ इति नत्वनिषेधः । पुंक्लीबलिङ्गः[13] । यन्माला-''पूर्तं ना वा''[ ] इति । वाप्यादीत्यादिशब्दाद् देवकुलादिग्रहः । तदुक्तम्-

''पुष्करिण्यः[14] सभा वापी देवतायतनानि च ।
आरामाश्च विशेषेण पूर्तं कर्म विनिर्दिशेत् ॥१॥''

[[15]]इति । एकं वापीकूपतडागादेः ॥

## इष्टं[1] मखक्रिया ॥८३४॥

१ इज्यते स्म **इष्टम्** । यदाह-

''एकाग्निकर्म हवनं त्रेतायां यच्च हूयते ।
अन्तर्वेद्यां च यद्दानमिष्टं तदभिधीयते ॥१॥''[[16]]इति ।

''इष्टं दाने च यागे च वाञ्छितेऽपि प्रयुज्यते''[[17]]इत्यजयो-ऽपि । एकं यज्ञक्रियायाः ॥८३४॥

## इष्टापूर्तं[1] तदुभयम्

१ इष्टं च पूर्तं च **इष्टापूर्तम्** । राजदन्तादित्वात् साधुः । तत्पूर्तमिष्टं च उभयं तदुभयम् । यद् भागवतम्-

''संप्लवः[18] सर्वभूतानां विक्रमः प्रतिसङ्क्रमः ।
इष्टापूर्तस्य काम्यानां त्रिवर्गस्य च यो विधिः ॥१॥''

[ ]इति । वाप्यादिकर्मयागकर्मणोरेकोक्त्या नामैकम् ॥

---

१. 'इत्याचार्या आहुः' इति४ ॥ २. द्र. रामाश्रमी२ ।७ ।२२ ॥, पृ.३३२ ॥ ३. 'अत' इति१.२ ॥ ४. 'हेमपात्रगतं' इति रघुवंशे, १० ।५१ ॥, पृ.२६१ ॥ ५. '-दानाय' इति३ ॥ ६. 'चरु' इति१, 'चरुर्नि-' इति४ ॥ ७. द्र. पदचन्द्रिका, भा-२, ब्रह्मवर्गः, श्लो-४१९, पृ.५०९ ॥, तत्र ''केचित् तु-पच्यतेऽत्र इति अधिकरणे ''हलश्च''(पा.३ ।३ ।१२१ ॥)इति घञ् । पाकं व्युत्पाद्य 'हव्यपाकेन' स्थाल्यादिरुच्यते । अन्यत्र तु औपचारिकः-इत्याहुः । तदसत् । अत्र एव तत्प्रयोगदर्शनात् । ''हेमपात्रे कृतं दोर्भ्यामाददानः पयश्चरुम्'' । ''चरोरर्धार्धभागाभ्यां तामयोजयतामुभे'' । (रघु. १० । ५१-५६) । कर्मकाण्डे च-''मुद्गतण्डुलाभ्यां पयसा च चरुः श्रपयितव्य'' इत्यादौ । न तु स्थाल्यादौ तत्प्रयोगो दृष्टः । मधुमाधव्याम् अपि-''पचनीये हव्ये चरुरित्यर्थः । यथाष्टाकपालं चरुं निवेशयेदिति । स्थाल्यादौ तु तादर्थ्यादुपचारः''-इत्युक्तम्'' इति दृश्यते ॥ ८. '-तानि' इति३.४ ॥ ९. विश्वप्रकाशकोशे-''चरुर्भाण्डे च हव्यान्ने'' इति दृश्यते, पृ.१३१ ॥ १०. कोष्ठान्तर्गतपाठः १प्रतौ नास्ति ॥ ११-१ मनुस्मृत्याम्-'वा-' इति, ११-२ 'विघसो भुक्तशेषं तु यज्ञशेषं तथाऽमृतम्' इति च दृश्यते, पृ.१३१ ॥ १२. मालामतमुट्टङ्क्य वक्ष्यमाणत्वादत्राऽनुपयुक्तः प्रतिभाति ॥ १३. 'पुंक्ली' इति३.४ ॥ १४. '-ण्या' इति२ ॥ १५. द्र. टीकासर्वस्वम्, भा-३, २ ।७ ।२८ ॥, पृ.२४ ॥, पदचन्द्रिका, भा-२, ब्रह्मवर्गः, श्लो-४२४, पृ.५१४ ॥, रामाश्रमी २ ।७ ।२८ ॥, पृ.३३५ ॥ १६. अम.क्षीर. २ ।७ ।२७ ॥, पृ.१६८ ॥, स्वोपज्ञटीका ३ ।८३४ ॥, पृ.१८५ ॥, रामाश्रमी२ ।७ ।२८ ॥, पृ.३३५ ॥ १७. द्र. पदचन्द्रिका, भा-२, ब्रह्मवर्गः, श्लो-४२४, पृ.५१३ ॥, रामाश्रमी २ ।७ ।२८ ॥, पृ.३३५ ॥ १८. 'संभवः' इति३ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**बर्हिर्मुष्टिस्तु विष्टरः ।**

१ बर्हिषां दर्भाणां मुष्टिः बर्हिर्मुष्टिः । विस्तीर्यते **विष्टरः**, पुंक्ली. । विपूर्वः 'स्तृञ् आच्छादने'(स्वा.उ.अ.), 'ऋदोरप्'३।३।५७॥, 'वेः स्तृञः'( )इति षत्वम् । "विष्टरस्तु महीरुहे आसने कुशमुष्टौ च"[विश्वप्रकाशकोशः, रान्तवर्गः, श्लो-१०६]इति महेश्वरः । एकं दर्भमुष्टेः ॥

**अग्निहोत्र्यग्निचित् चाऽऽहिताग्नौ**

१ अग्निहोत्रमस्याऽस्ति **अग्निहोत्री** । 'अत इनिठनौ' ५।२।११५॥ इतीनिः । २ अग्निं चिनोति स्म **अग्निचित्** । 'चिञ् चयने'(स्वा.उ.अ.), 'अग्नौ चेः'३।२।९१॥इति क्विप् । २ आहितोऽग्निरनेन **आहिताग्निः** । अग्न्याहितोऽपि । त्रीणि अग्निहोत्रिणः ॥

**अथाऽग्निरक्षणम् ॥८३५॥**

**अग्न्याधानमग्निहोत्रम्**

१ अग्नेः रक्षणम् **अग्निरक्षणम्** ॥८३५॥ । २ अग्निराधीयतेऽत्रेति **अग्न्याधानम्** । अधिकरणे ल्युट् । ३ अग्निर्हूयतेऽत्र **अग्निहोत्रम्** । 'हुयामा-'(उणा-६०७)इति त्रन् । त्रीणि अग्निरक्षणस्य ॥

**दर्वी तु घृतलेखनी ।**

१ दृणाति हव्यद्रव्यं दर्विः । 'दॄ(दृ) विदारणे' (क्र्या.प.से.), 'वृदृभ्यां वित् (विन्)'(उणा-४९३)इति वित् । 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि **दर्वी** । घृतं लिख्यतेऽनया घृतलेखनी । 'लिख लिखने'(तु.प.से.), करणे ल्युट्, गौरादित्वाद् ङीष् । एकं दर्व्याः । घृतस्य 'डोई' इति भाषा ॥

**होमाग्निस्तु महाज्वालो महावीरः प्रवर्गवत् ॥८३६॥**

१ होमार्थमग्निः **होमाग्निः** । २ महत्यो ज्वाला अस्य **महाज्वालः** । २ वीरयते वीरः अग्निः, महांश्चासौ वीरश्च **महावीरः** । ३ प्रवृज्यते पापमनेन **प्रवर्गः** । 'वृजी वर्जने'(रु.प.से.), करणे घञ् । चत्वारि होमाग्नेः ॥८३६॥

**होमधूमस्तु निगणः**

१ होमे होमविषये धूमो होमधूमः । नितरां गण्यते **निगणः** । 'गण सङ्ख्याने'(चु.उ.से.), घञर्थे कः । एकं होमधूमस्य ॥

**होमभस्म तु वैष्टुतम् ।**

१ होमविषये भस्म होमभस्म । 'भस भर्त्सन-दीप्त्योः'(जु.प.से.), 'अन्येभ्योऽपि दृश्यते'३।२।७५॥ इति भाषायां मनिन् । विशेषेण स्तूयते स्म विष्टुतो वह्निः, तस्येदं **वैष्टुतम्** । एकं होमभस्मनः ॥

**उपस्पर्शस्त्वाचमनम्**

१ उपस्पृश्यन्तेऽद्भिः खानीन्द्रियाण्यस्मिन् **उपस्पर्शः** । 'स्पृश संस्पर्शने'(तु.प.अ.), अधिकरणे घञ् । यन्मनुः-

"उपस्पृश्य द्विजो नित्यमन्नमद्यात् समाहितः ।
भुक्त्वा चोपस्पृशेत् सम्यगद्भिः खानि च संस्पृशेत् ॥१॥"

[मनुस्मृतिः, अध्या-२, श्लो-५३]इति । "उपस्पर्शः स्पर्शमात्रे स्नानाचमनयोः"[विश्वप्रकाशकोशः, शान्तवर्गः, श्लो-३६]इति महेश्वरः । २ आचम्यतेऽम्भोऽत्रेति **आचमनम्** । 'चमु अदने' (भ्वा.प.से.), अधिकरणे ल्युट् । आचमनं नाम विप्रक्षत्रिय-वैश्यशूद्राणां यथाक्रमं ब्राह्मेण तीर्थेन हृत्कण्ठतालुगामि जल-पानम् । यद् याज्ञवल्क्यः-

"हृत्कण्ठतालुगाभिस्तु यथासङ्ख्यं द्विजातयः ।
शुद्ध्येरन् स्त्री च शूद्रश्च सकृत्स्पृष्टाभिरन्ततः ॥१॥"

[याज्ञवल्क्यस्मृतिः, आचाराध्यायः, श्लो-२१]इति । "हृत्कण्ठ-तालुगाभिरद्भिर्यथाक्रमं द्विजातयः शुद्ध्यन्ति स्त्री च शूद्रश्च अन्ततः अन्तेन तालुना स्पृष्टाभिः"[मिताक्षराटीका, आचाराध्यायः, श्लो-२१]इति तट्टीका । उपस्पर्शनमपि । "आचमनमुपस्पर्शनम्" [हलायुधकोशः २।४०८॥]इति हलायुधः । द्वे आचमनस्य ॥

**घारसेकौ तु सेचने ॥८३७॥**

१ घरणं **घारः** । 'घृ क्षरणदीप्त्योः'(जु.प.अ.), भावे घञ् । २ सेचनं **सेकः** । 'षिचिर्(षिच) क्षरणे'(तु.उ.अ.), भावे घञ्, 'चजोः-'७।३।५२॥ इति कुत्वम् । ३ **सेचनं** घृतादिनाऽग्नेः प्रोक्षणम्, तत्र । त्रीणि अग्निसिञ्चनस्य ॥८३७॥

---

१. 'ङीप्' इति४॥ २. 'अक्षरविन्यासे' इति क्षीरतरङ्गिण्यादयः ॥ ३. 'ङीप्' इति१.२.४॥ ४. '-ऽद्भि' इति२॥ ५. '-श्यते' इति४॥ ६. 'भुक्ते' इति१.२, 'भुक्तो' इति४॥ ७. 'वो-' इति४॥ ८. '-न्ते' इति१॥ ९. 'अनेन' इति३.४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**ब्रह्मासनं[1] ध्यानयोगासने**

१ ब्रह्मणि परमज्योतिषि आसनं लयो **ब्रह्मासनम्** । ध्यानं निरालम्बनं ज्ञानम्, योगः सालम्बनं ज्ञानम् । यद्वा ध्यानं परमात्मचिन्तनम्, योगश्चित्तनिरोधमात्रम् । तयोर्यदासनं स्वस्तिकोर्ध्वपादपपद्मासनादिकम् । ध्यानयोगयोरास्यतेऽनेनेति ध्यानयोगासनम्, तत्र । एकं ध्यानयोगासनस्य ॥

**अथ ब्रह्मवर्चसम्[1] ।**

**वृत्ताध्ययनर्द्धिः**

१ वृत्तं[1] वेदवाक्यस्य परिपालनम्, अध्ययनं व्रतग्रहणपूर्वकं गुरुमुखेन वेदाभ्यसनम्, तयोर्ऋद्धिर्वृत्ताध्ययनर्द्धि **ब्रह्मवर्चसम्** उच्यत इत्यन्वयः । ब्रह्मणस्तपःस्वाध्यायादेर्वर्चः ब्रह्मवर्चसम् । 'ब्रह्महस्तिभ्यां वर्चसः'५।४।७८॥ इत्यच्समासान्तः । ''वृत्ताध्ययनसम्पत्तिरिष्यते ब्रह्मवर्चसम्''[हलायुधकोशः२।३९७॥]इति हलायुधः । एकं चारित्राध्ययनसम्पदः॥

**पाठे[2] स्याद् ब्रह्माञ्जलिरञ्जलिः[1] ॥८३८॥**

१ पाठे वेदपाठे अञ्जलिः प्रणामार्थं[3] मुकुलितं हस्तयुगं **ब्रह्माञ्जलिः** उच्यत इत्यन्वयः । ब्रह्मणे[4] वेदाय अञ्जलिः प्रणामार्थं मुकुलितं हस्तयुगं ब्रह्माञ्जलिः । ''सामवेदपाठे हि स्वरविभागार्थमञ्जलिः, स ब्रह्माञ्जलिः''[ ]इति माधव्यादयः[5] । ''अध्ययनस्यादावन्ते च गुरवे प्रणवोच्चारणपूर्वको योऽञ्जलिः क्रियते, स ब्रह्माञ्जलिः''[ ]इति तु मिश्राः । एकं वेदपाठे कृताञ्जलेः[6] ॥८३८॥

**पाठे तु मुखनिष्क्रान्ता विप्रुषो ब्रह्मबिन्दवः[1] ।**

१ पाठे वेदाध्ययने मुखनिष्क्रान्ता वदनान्निर्गता विप्रुषो जलकणा **ब्रह्मबिन्दवः** प्रोच्यन्ते । ब्रह्मणो वेदस्यैव बिन्दवो जलकणा ब्रह्मबिन्दवः । एकं वेदपाठे मुखनिःसृतजलकणस्य ॥

**साकल्यवचनं पारायणम्[1]**

१ सकलस्य भावः साकल्यम्, साकल्येन सामस्त्येन वचनमध्ययनं साकल्यवचनम् । पारमयन्ते प्राप्नुवन्त्यनेन **पारायणम्** । 'अय गतौ'(भ्वा.आ.से.), करणे ल्युट् । एकं साकल्येन अध्ययनस्य ॥

**कल्पे[1] विधिक्रमौ[7] ॥८३९॥**

१ कर्तव्यतोपदेशः[8] **कल्पः** । कल्पते फलजननाय समर्थो भवति कल्पः । 'कृपू सामर्थ्ये'(भ्वा.आ.से.), पचाद्यच्, 'कृपो रो लः'८।२।१८॥ तत्र । २ विधीयते[9] सम्पाद्यते फलार्थिभिरिति **विधिः** । 'डुधाञ् धारणादौ'(जु.उ.अ.), 'उपसर्गे घोः किः'३।३।९२॥ । ३ क्रम्यते आरभ्यत इति **क्रमः** । 'क्रमु पादविक्षेपे'(भ्वा.प.से.), घञ्, 'नोदात्तोपदेश-'७।३।३४॥ इति न वृद्धिः[10] । ''कल्पवित् कल्पयामास''[रघुवंशम्, सर्गः-१, श्लो-६] ''यथाविधिहुताग्नीनाम्''[रघुवंशम्, सर्गः-१, श्लो-९४]इत्युभयमपि रघुः । त्रीणि विधेः ॥८३९॥

**मूलेऽङ्गुष्ठस्य स्याद् ब्राह्मं[1] तीर्थम्**

१ अङ्गुष्ठस्यादौ मूले तीर्थं **ब्राह्मं** स्यादित्यन्वयः । ब्रह्मा देवताऽस्य ब्राह्मम् । 'साऽस्य देवता'४।२।२४॥इत्यण्, 'साऽस्य देवता'४।२।२४॥ इत्यण्, 'ब्राह्मोऽजातौ'६।४।१७१॥ इति साधु । देवेभ्यस्तीर्यतेऽनेनेति तीर्थम् । 'तॄ प्लवनतरणयोः'(भ्वा.प.से.), 'पातॄतुदि-'(उणा-१६४)इत्यादिना थक् । एकं ब्रह्मतीर्थस्य ॥

**कायं[1] कनिष्ठयोः ।**

१ कनिष्ठयोर्मूले कः प्रजापतिर्देवताऽस्येति[11] **कायम्**, तीर्थम् । 'कस्येत्'४।२।२५॥ इति कशब्दादणप्रत्यय इकारोऽन्तादेशः वृद्ध्यायादेशौ च । कनिष्ठयोरिति[12] द्वित्वम् । अञ्जलिमध्येन प्रजापतिभ्योजल(-ऽञ्जलि-)दानात् । एकं प्रजापतितीर्थस्य ॥

**पित्र्यं[1] तर्जन्यङ्गुष्ठान्तः**

१ तर्जन्यङ्गुष्ठमध्ये पितरो देवताऽस्य **पित्र्यम्**। 'वाय्वृतुपित्रुषसो यत्'४।२।३१॥इति यत् । एकं पितृतीर्थस्य ॥

**दैवतं[1] त्वङ्गुलीमुखे ॥८४०॥**

---

१. '-त्त-' इति४॥ २. इतोऽग्रे १.३.४प्रतिषु 'तु' इति दृश्यते ॥ ३. 'प्रमाणार्थ' इति३॥ ४ '-णो' इति३.४॥ ५. द्र. पदचन्द्रिका, भा-२, ब्रह्मवर्गः, श्लो-४३५, पृ.५२३॥, तत्र ''सामवेदपाठे स्वरविभागार्थं योऽञ्जलिः स 'ब्रह्माञ्जलिः' इति तु माधव्यादयः ॥'' इति दृश्यते ॥ ६. '-ठेऽञ्जलेः' इति१.२॥ ७ तुलनीयोऽमरकोषः २।७।३९॥ ८. '-व्योपदेशः' इति३॥ ९. 'सम्प-' इति३॥ १०. 'वृद्धिनिषेधः' इति१॥ ११. '-स्य' इति४॥ १२. 'इति' इति ३प्रतौ नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ अङ्गुलीनां मुखेऽग्रभागे देवतानामिदं **दैवतम्** । 'तस्येदम्'४।३।१२०॥ इत्यण् । एकं देवतीर्थस्य । यद् याज्ञवल्क्यः-

''कनिष्ठातर्जन्य[1]ङ्गुष्ठमूलान्यग्रं करस्य च ।
प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात् ॥१॥''

[याज्ञवल्क्यस्मृतिः, आचाराध्यायः, श्लो-१९]इति । [शेषश्चात्र-करमध्ये सौम्यं तीर्थम्] ॥८४०॥

## ब्रह्मत्वं तु ब्रह्मभूयं ब्रह्मसायुज्यमित्यपि ।

१ ब्रह्मणो ज्ञानस्य भावो **ब्रह्मत्वम्**, ब्रह्मशब्दोऽत्र ज्ञानपर्यायः । २ ब्रह्मणो भवनं ताद्रूप्यं **ब्रह्मभूयम्** । 'भुवो भावे'३।१।१०७॥ [इति] क्यप् । ३ योजनं युक्, सम्पदादित्वात् क्विप् । युजा सहितः सयुक्, तद्भावः सायुज्यं । 'वोपसर्जनसय'६।३।८२॥ इति सहस्य सभावः । ब्रह्मणा संयुनक्ति आत्मना सम्बध्नाति[2] सयुक् (संयुक्) । 'सत्सूद्विष-' ३।२।६१॥इति क्विप् । तद्भावः सायुज्यमिति(सांयुज्यमिति) वा । यद्वा सह युग् योगोऽस्य[3] सयुक्, तद्भावो वा सायुज्यम्[4] । ब्रह्मणा ज्ञानेन सायुज्यं **ब्रह्मसायुज्यम्**[5] । त्रीणि ब्रह्मत्वस्य । 'ब्रह्मपणउं[6]' इति भाषा ॥

## देवभूयादिकं तद्वत्

१ देवस्य भावो **देवभूयम्** । 'भुवो भावे'३।१।१०७॥ [इति] क्यप् । तेन ब्रह्मभूयशब्देन तुल्यं तद्वत्, भवतीति क्रियाध्याहारो वाक्यत्वात् । स्यादे[7]रिवेत्यनेन भवतीति क्रियासादृश्ये वत्प्रत्ययः[8], इवस्य सादृश्याऽर्थद्योतकत्वात् । देवञ्झ२१०वम्, देवसायुज्यं चेत्यर्थः । आदिशब्दात् स्वर्भूयम्, स्वर्गत्वम्, स्वर्गसायुज्यं च । एकं देवत्वस्य ॥

## अथोपाकरणं श्रुतेः ॥८४१॥
## संस्कारपूर्वग्रहणं स्यात्

१ उपाक्रियतेऽनेन **उपाकरणम्** । करणे ल्युट् । श्रुतेर्वेदस्य ॥८४१॥ संस्कारपूर्वं विधिपूर्वकं ग्रहणम् आदानम्, ''रोहिण्यां छन्दांस्युपाकुर्यात्''[ ][9]इति हि श्रुतेः । एकं वेदपाठारम्भे विशिष्टविधेः ॥

## स्वाध्यायः पुनर्जपः ।

१ स्वस्य वेदस्याऽध्ययनं **स्वाध्यायः** । 'इङ् अध्ययने' (अ.आ.अ.), 'इङश्च'३।३।२१॥इति घञ् । २ जपनं **जपः** । 'व्यधजप(जपोः)-'३।३।६१॥ इत्यप् । द्वे जपस्य ॥

## औपवस्त्रं तूपवासः

१ उपवस्ता प्राप्तोऽस्य **औपवस्त्रम्** । 'उपवस्त्रादिभ्यः'( )इत्यण् । '' 'वसु स्तम्भे'(दि.प.से.), उपपूर्वाद् भावे क्तः, उपवस्तम्''[ ][10]इति मिश्राः । ''उपवस्तस्येदम् औपवस्तम्''[ ]इत्येके । ''उपवस्त्रम्''[ ][11]इत्यन्ये । यत्स्मृतिः-''माषान् मधुमसूरांश्च वर्जयेदौपवस्त्रके''[ ][12] इति । २ उपवसनम् **उपवासः**, पुंक्ली. । 'वस निवासे' (भ्वा.प.अ.), भावे घञ् । उपोषितं च, उपोषणमपि । 'उप दाहे'(भ्वा.प.से.), ''अयमप्यभोजने वर्तते''[ ]इति माधवः । द्वे उपवासस्य ॥

## कृच्छ्रं सान्तपनादिकम्[13] ॥८४२॥

१ सान्तपनं चान्द्रायणं प्राजापत्यादिकं प्रायश्चित्तं **कृच्छ्र**[14]पदवाच्यम् । कृन्तति पापं कृच्छ्रम्, पुंक्लीबलिङ्गः । कृच्छ्रं नाम तपः । 'कृतेश्छक्[15]'(उणा-१७८)इति रक्, छगागमश्च । यद्वा कृच्छ्रयति कृच्छ्रम्, 'तत्करोति-'(गणसू-३।१।२६॥)इति ण्यन्तादच् । यथा-

''गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
एकरात्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतम् ॥१॥''

[मनुस्मृतिः, अध्या-११, श्लो-२१२]इति स्मृतिरपि ।

''त्र्यहं सायं त्र्यहं प्रातस्त्र्यहमद्यादयाचितम् ।
त्र्यहं परं च नाश्नीयात् कृच्छ्रं सान्तपनं[16] स्मृतम्[17] ॥२॥''

[मनुस्मृतिः, अध्या-११, श्लो-२११]इति । आदिग्रहणात् चान्द्रायणादि । ''कृच्छ्रमाख्यातमाभीले [18]पापसान्तपनादिनोः'' [विश्वप्रकाशकोशः, रान्तवर्गः, श्लो-६१]इति महेश्वरः । एकं सान्तपनादितपसः ॥८४२॥

---

१. '-देशिन्य-' इति याज्ञवल्क्यस्मृत्याम्, पृ.९॥ २. 'सम्बध्नाति आत्मना' इति४॥ ३. इतोऽग्रे १प्रतौ 'स' इति दृश्यते ॥ ४. इतोऽग्रे १.२.४प्रतिषु 'वा' इति दृश्यते ॥ ५. समुपसर्गपूर्वकविग्रहप्रदर्शनेन 'ब्रह्मसांयुज्यम्' इत्यपि भवति ॥ ६. '-णो' ३, '-णौ' इति४॥ ७. 'सादे-' इति४॥ ८. 'वन्प्र-' इति३॥ ९. द्र. अम.क्षीर. २।७।४०॥, पृ.१७१॥, स्वोपज्ञटीका ३।८४१॥, पृ.१८६॥ १०. द्र. पदचन्द्रिका, भा-२, ब्रह्मवर्गः, श्लो-४३४, पृ.५२३॥ ११. द्र. स्वोपज्ञटीका ३।८४१॥, पृ.१८६॥ १२. '-स्तके' इति३॥ १३. तुलनीयोऽमरकोषः २।७।५२॥ १४. '-च्छ्रं' इति१॥ १५. 'कृतेश्छः क्रू च'(उणा-१७८)इत्युणादिगणसूत्रम् ॥ १६. 'सान्तपं' इति१.२॥ १७. ''त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितम् । त्र्यहं परं च नाश्नीयात् प्राजापत्यं चरन् द्विजः'' इति मनुस्मृत्याम्, ११।२११॥, पृ.४५८॥ १८. 'तपः-' इति विश्वप्रकाशकोशे, पृ.१३०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**प्रायः संन्यास्यनशने**[१]

१ प्रकर्षेण अयन्ते परलोकमनेनेति **प्रायः**, पुंसि, अकारान्तः । "पुमान् प्रायः"[अमरकोषः२।७।५२॥]इत्यमरः । प्रपूर्वः 'अय गतौ'(भ्वा.आ.से.), करणे घञ् । 'इण् गतौ'(अ.प.अ.) अस्माद् 'एरच्'३।३।५६॥ वा । "प्रायश्चाऽनशने मृत्यौ तुल्यबाहुल्ययोरपि"[विश्वप्रकाशकोशः, यान्तवर्गः, श्लो-९]इति महेश्वरः । यथा-"प्रायोपवेशनमतिर्नृपतिर्बभूव"[२] [रघुवंशम्, सर्गः-८, श्लो-९४]इति[३] । संन्यसनं संन्यासः सर्वत्यागेन मरणाध्यवसायः, सोऽस्त्यस्य संन्यासि । 'अत इनिठनौ'५।२।११५॥ इतीनिः । 'सर्वत्यागेन मरणाध्यवसाययुक्तं[४] संन्यासि च तदनशनं च संन्यास्यनशनम्, तत्र । एकमनशनस्य ॥

**नियमः पुण्यकं व्रतम् ।**

१ नियम्यतेऽत्राद्यत्रेति **नियमः** । 'यमु नियमने'( ), 'यमः समुपनिविषु च'३।३।६३॥ इत्यप् । यत्कर्म [अ]नित्यं कर्तव्यम्, न तु यावज्जीवम्, आगन्तुः कादाचित्कैः कामना (कामनया) समयविशेषादिभिः सहकारिभिः साध्यमुपवासादि, तन्नियमशब्दवाच्यमित्यर्थः । २ पुण्यमेव **पुण्यकम्** । स्वार्थे कन् । ३ व्रियते उपवासाद्यत्रेति **व्रतम्**, पुंक्ली. । 'वृञ् वरणे' (स्वा.उ.से.), बाहुलकात् 'पृषिरञ्जिभ्यां कित्'(उणा-३९१) इत्यतच्, 'इको यणचि'६।१।७७॥ । "वृत्यते वृज्यते सर्वभोगोऽत्र"[ ]इति सुबोधिनीकारः । व्रतेर्धातोः 'पुंसि संज्ञायां घः-'[६]३।३।११८॥इति[७] घ[८]प्रत्ययः, व्रतिश्च वर्जनार्थः । सामान्येन एभिस्त्रिभिरुपवासादिरुच्यत इत्यर्थः । त्रीणि नियमस्य । 'आखडी' इति भाषा । ([९]शेषश्चात्र-"अथ स्यान्नियमे तपः" [शेषनाममाला ३।१५३॥]) ॥

**चरित्रं चरिताचारौ चारित्रचरणे अपि ॥८४३॥**

**वृत्तं शीलं च**

१ चर्यतेऽनेन **चरित्रम्** । 'चर गतौ'(भ्वा.प.से.), 'अर्तिलूधू[सू]खनसहचर इत्रः'३।२।१८४॥ । २ चर्यते स्म **चरितम्** । निष्ठा । ३ आचरणम् **आचारः** । भावे घञ् । ४ चरित्रमेव **चारित्रम्** । प्रज्ञादित्वात् स्वार्थेऽण् । 'चरेर्णिच्च(चरेर्वृत्ते)'(उणा-६११)इति इत्रच् वा । ५ चर्यते **चरणम्** । कर्मणि ल्युट् ॥८४३॥ ६ वर्तनं **वृत्तम्** । भावे निष्ठा । ७ शेते सुखमनेनेति **शीलम्**, पुंक्ली. । 'शिङो धुग्लग्वालङ्वलङ्(धुक्लकलञ्वालनः)'(उणा-४७८)इति लक् । 'शील समाधौ'(भ्वा.प.से.), भावे घञि[१०] वा । सप्त चारित्रस्य ॥

**सर्वैनोध्वंसिजप्येऽघमर्षणम् ।**

१ सर्वैनसां सर्वपापानां[११] ध्वंसि विध्वंसनशीलं यज्जप्यम्, अदैवत्यो[१२] मन्त्रस्तज्जपो वा, त्रिरात्रोपवासादिस्तूपचारात्, सर्वैनोध्वंसिजप्यम्, तत्र । अघं पापं मृष्यते शोध्यतेऽनेन **अघमर्षणम्**, वाच्यलिङ्गम् । करणे ल्युट् । एकं सर्वपापविनाशकजपस्य ॥

**समास्तु पादग्रहणाभिवादनोपसङ्ग्रहाः ॥८४४॥**

१ पादयोरन्तर्ग्रहणं **पादग्रहणम्**, पादस्पर्श इत्यर्थः । २ अभिमुखीकृत्य सम्बोध्य वादनमाशिषो वचनं मह्यमाशिषं देहीति यया क्रियते, अभिपूर्वाद् [१३]वदेर्ण्यन्तात् स्त्रीत्वाविवक्षायां ल्युट्, [**अभिवादनम्**] । ३ उपसङ्ग्रहणम् **उपसङ्ग्रहः** । यन्मनुः-

"विन्यस्तपाणिना कार्यमुपसङ्ग्रहणं गुरोः ।
वामेन वामः स्प्रष्टव्यो दक्षिणेन तु दक्षिणः[१४] ॥१॥"

[मनुस्मृतिः, अध्या-२, श्लो-७२]इति[१५] । "समे तु पादग्रहणमभिवादनमित्युभे"[अमरकोषः २।७।४१॥]इत्यमरः । त्रीणि गुरुपादवन्दनस्य ॥८४४॥

**उपवीतं यज्ञसूत्रं प्रोद्धृते दक्षिणे करे**[१६] **।**

१ उपाधिक्येन वेति शोभते **उपवीतम्**, पुंक्लीबलिङ्गम्[१७] । 'वी गतिप्रजनकान्त्यशन(सन)खादनेषु'(अ.प.अ.), कर्तरि क्तः । २ यज्ञविधिधृतं सूत्रं [**यज्ञसूत्रम्**], ([१८]पवित्रमिति चैकार्थाः) । शाकपार्थिवादिः । दक्षिणे करे प्रोद्धृत इति दक्षिणकराधोनिक्षिप्तसूत्रे इत्यर्थः । "उपवीतं ब्रह्मसूत्रं प्रक्षिप्तं[१९] दक्षिणे करे"[हलायुधकोशः२।४०७॥] इति हलायुधः । यज्ञोपवीतम्, ब्रह्मसूत्रम्, पवित्रमिति चैकार्थाः । द्वे उपवीतस्य ॥

---

१. 'सन्या-' इति३.४॥ २. '-देशन-' इति४॥ ३. द्र. अनेकार्थकैरवाकरकौमुदीटीका, भा-१, २।३६१॥, पृ.२०९॥ ४. '-क्तं-' इति२॥ ५. 'क-' इति३.४॥ ६. ३.४प्रत्योर्नास्ति ॥ ७. ३प्रतौ नास्ति ॥ ८. 'घः' इति४॥ ९. कोष्ठान्तर्गतपाठः १.२.४प्रतिषु न दृश्यते ॥ १०. '-ञ्' इति३॥ ११. 'पापानां' इति४॥ १२. 'शशब्दवत्यो' इति४॥ १३. 'वा-' इति४॥ १४. '-णं' इति४॥ १५. "व्यत्यस्तपाणिना कार्यमुपसंग्रहणं गुरोः । सव्येन सव्यः स्प्रष्टव्यो दक्षिणेन च दक्षिणः" इति मनुस्मृत्याम्, पृ.४३॥ १६. तुलनीयो ऽम कोषः२।७।४९॥ १७. 'पुंक्ली.' इति३.४॥ १८. कोष्ठान्तर्गपाठोऽधिकः प्रतिभाति, अत्राऽसङ्गतत्वादग्रे वक्ष्यमाणत्वाच्च ॥ १९. '-से' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**प्राचीनाऽऽवीतमन्यस्मिन्**

१ अन्यस्मिन् श्राद्धादौ वामकराधोदेशे निहितयज्ञसूत्रे, प्रागेव प्राचीनम्, ( प्राचीनमावीयते स्म **प्राचीनावीतम्**) । 'वी गत्यादौ'( अ.प.अ.), निष्ठा । एकं वामकराधोदेशे निहितयज्ञसूत्रस्य ॥

**निवीतं कण्ठलम्बितम्** ॥८४५॥

१ करद्वये बहिःकृते ऋजुभावेन कण्ठलम्बितं तत्, कण्ठादधोभागेन वीतं गमनस्य **निवीतम्** । नि इति प्रकृतिभावात् । ''पथो (रश्यधो-)भावविन्यासे''[मेदिनीकोषः, अव्ययवर्गः, श्लो-४१]इति मेदिनिः । कण्ठे गले ऋजु सरलं लम्ब्यते स्म कण्ठलम्बितम् । यन्मनुः-

''प्रोद्धृते दक्षिणे पाणावुपवीत्युच्यते द्विजः ।
सव्ये प्राचीनमावीतं(-ती) निवीती कण्ठसज्जने ॥१॥''

[मनुस्मृतिः, अध्या-२, श्लो-६३]इति । एकं 'कण्ठीकरणं' इति ख्यातस्य ॥८४५॥

**प्राचेतसस्तु वाल्मीकिर्वल्मीककुशिनौ कविः ।**
**मैत्रावरुणवाल्मीकौ**

१ प्रचेतसोऽपत्यं **प्राचेतसः** । 'तस्यापत्यम्'४।१।९२॥ इत्यण् । ''ऋष्यन्धकवृष्णि-४।१।११४॥इत्यण्''[ ]इत्येके । २ वल्मीकस्याऽपत्यं **वाल्मीकिः** । 'ब(बा)ह्वादिभ्यश्च'४।१।९६॥ इतीञ् । ३ वल्मीकभवत्वाद् **वल्मीकः**, आद्यस्वरादिः । ४ कुशाः सन्त्यस्य **कुशी** । 'अत इनिठनौ'५।२।११५॥इतीनिः । ५ कवते **कविः** । 'कुङ् शब्दे'(भ्वा.आ.अ.), '-इन्'(उणा-५५७)इतीन् । आदिकविरपि । ६ मित्रावरुणयोरयं **मैत्रावरुणः** । 'तस्येदम्'४।३।१२०॥इत्यण् । मैत्रावरुणिरपि । ७ वल्मीकस्याऽयं **वाल्मीकः**, द्वितीयस्वरादिः । 'तस्येदम्' ४।३।१२०॥ इत्यण् । सप्त वल्मीकर्षेः ॥

**वेदव्यासस्तु माठरः** ॥८४६॥
**द्वैपायनः पाराशर्यः कानीनो बादरायणः ।**
**व्यासः**

१ वेदार्थान् व्यासयति प्रपञ्चयति **वेदव्यासः** । व्याङ्पूर्वो 'असु क्षेपणे'(दि.प.से.), अस्माद्धेतुमण्णिजन्तात् 'कर्मण्यण्'३।२।१॥ । यद्भारते-''वेदार्था भारते न्यस्ताः''[ ] इति । २ मठरस्याऽपत्यं **माठरः** । विदादित्वादञ् । ॥८४६॥ ३ द्वीपस्याऽपत्यं **द्वैपायनः** । नडादित्वात् फक्, फस्यायनादेशः । ४ परान् शृणाति पालयति पराशरः । 'शॄ हिंसायाम्'(क्र्या.प.से.), पचाद्यच् । पराशरस्याऽपत्यं **पाराशर्यः** । ['गर्गादिभ्यो यञ्'४।१।१०५॥ इति यञ्], 'यस्येति च'६।४।१४८॥ इत्यकारलोपः । ५ कन्याया अपत्यं **कानीनः** । 'कन्यायाः कनीन च'४।१।११६॥ इत्यण्, कनीनादेशश्च । ६ बदरस्याऽपत्यं **बादरायणः** । 'नडादिभ्यः फक्'४।१।९९॥ इति फक् । ७ व्यस्यति वेदार्थमिति **व्यासः** । व्याङ्पूर्वः 'असु क्षेपणे'(दि.प.से.), पचाद्यच् । सप्त कृष्णद्वैपायनस्य ॥

**अस्याऽम्बा सत्यवती वासवी गन्धकालिका** ॥८४७॥
**योजनगन्धा दाशेयी शालङ्कायनजा च सा ।**

१ अस्य व्यासस्य, अम्बा जनयित्री **सत्यवती** । सत्यमस्त्यस्याः सत्यवती । 'तदस्याऽस्ति-'५।२।९४॥ इति मतुप्, 'मादुपधायाः-'८।२।९॥ इति वत्वम्, 'उगितश्च'४।१।६॥ इति ङीप् । २ वसोरियं **वासवी** । 'तस्येदम्'४।३।१२०॥ इत्यण्, 'टिड्ढाणञ्-'४।१।१५॥इति ङीप् । ३ गन्धेन युक्ता काली गन्धकाली, ततः कनि, 'केऽणः'७।४।१३॥इति ह्रस्वत्वे **गन्धकालिका** ॥८४७॥ ४ योजनव्यापी गन्धोऽस्याः **योजनगन्धा** । ५ दाशी धीवराङ्गना, तस्या अपत्यं **दाशेयी**। 'स्त्रीभ्यो ढक्'४।१।१२०॥, ढस्य एयादेशः । ६ शालङ्कायनाज्जाता **शालङ्कायनजा**, तालव्यादिः । 'पञ्चम्यामजातौ' ३।२।९८॥ इति डः । षट् कृष्णद्वैपायनमातुः ॥ शेषश्चात्र-''सत्यवत्यां गन्धवती मत्स्योदरी''[शेषनाममाला ३।१५४॥] ॥

**जामदग्न्यस्तु रामः स्याद् भार्गवो रेणुकासुतः** ॥८४८॥

१ जमदग्नेरपत्यं **जामदग्न्यः** । गर्गादित्वाद् यञ् । २ रमतेऽसौ **रामः** । 'रमु क्रीडायाम्'(भ्वा.आ.अ.), ज्वलादित्वाण्णः । परशुरामोऽपि । ३ भृगोरपत्यं **भार्गवः** ।

१. तुलनीयोऽमरकोषः २।७।५०॥ २. 'निहितं' इति३.४॥ ३. '-त्रं' इति३॥ ४. कोष्ठान्तर्गतपाठस्थाने ३प्रतौ 'आवीयते स्म, आवीतम्, प्राचीनं च तदावीतं च प्राचीनावीतम्' इति दृश्यते ॥ ५. 'उद्धृते' इति मनुस्मृत्याम्, २।६३॥, पृ.४२॥ ६. 'प्राचीनआवीती' इति मनुस्मृत्याम्, २।६३॥, पृ.४२॥, 'सव्ये प्राचीनआवीतीति छन्दोऽनुरोधादुक्तम्' इति तट्टीका ॥ ७ '-ठाभरणे' इति३॥ ८. द्र. स्वोपज्ञटीका ३।८४७॥, पृ.१८७॥ ९. 'शृणोति' २.३.४॥ १०. 'व्यसति' इति३॥ ११. 'दासेयी' इति२.३॥ १२. 'वा-' इति४॥ १३. 'सौरभ्यमस्याः' इति३॥ १४. 'यत्' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'ऋष्यन्धकवृष्णि-'४।१।११४॥ इत्यण् । ४ रेणुकायाः सुतो **रेणुकासुतः** । रैणुकेयो[1]ऽपि । चत्वारि परशुरामस्य[2] ॥८४८॥

## नारदस्तु देवब्रह्मा पिशुनः कलिकारकः ।

१ नराणां समूहो नारम् । 'तस्य समूहः'४।२।३७॥ इत्यण् । नारं द्यति खण्डयति कलहरुचित्वाद् **नारदः** । 'दो अवखण्डने'(दि.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥ । २ देवानां ब्रह्मा **देवब्रह्मा**, नकारान्तः । ३ पिशुनयति कथयति[3] **पिशुनः** । 'पिशेः[4] किच्चे[5]'(उणा-३७५)इत्युनन् । ४ कलिं करोति **कलिकारकः** । ण्वुल् । चत्वारि नारदस्य ॥

## वसिष्ठोऽरुन्धतीजानिः

१ वसुमत्तमो **वसिष्ठः**, दन्त्यमध्यः । "वसुमत्तरो वसीयान् । मतुबन्तादित्रीयसुनोः 'विन्मतोर्लुक्'५।३।६५॥ इति मतुपो लुकि '[तुरि]ष्ठेमेयस्सु'६।४।१५४॥ इति वर्तमाने 'टेः'६।४।१५५॥ इति टिलोपः । अस्मादेव लुग्विधानाद-गुणवचनादपि मत्वन्तादिष्ठनीयसुनावनुमीयेते"[मा. धातुवृत्तिः, भ्वादिः, धातुसं-७३०]इति माधवः । २ अरुधन्ती जाया यस्य **अरुन्धतीजानिः** । 'जायाया निङ्'५।४।१३४॥, 'लोपो व्योर्वलि'६।१।६६॥ । द्वे वसिष्ठस्य[6] ॥

## अक्षमाला त्वरुन्धती ॥८४९॥

१ अक्षाणां माला **अक्षमाला** । 'अर्शआदि-भ्योऽच्'५।२।१२७॥ । न क्षमा लातीति वा, आकाशगामि-त्वात् । २ ([7]न रुणद्धि **अरुन्धती** ) । द्वे वशिष्ठ[8]पत्न्याः[9] ।

## त्रिशङ्कुयाजी गाधेयो विश्वामित्रश्च कौशिकः ।

१ त्रिशङ्कुं याजयति[10] **त्रिशङ्कुयाजी** । यजेर्णिजन्ताद् ग्रहादित्वाण्णिनिः । २ गाधेरपत्यं **गाधेयः** । 'इतश्चानिञः' ४।१।१२२॥ इति ठक् । ३ विश्वं मित्रमस्य **विश्वामित्रः**[11] । ४ कुशिकस्याऽपत्यं **कौशिकः** । विदादित्वादञ् । चत्वारि विश्वामित्रस्य ॥

## कुशारणिस्तु दुर्वासाः

१ कुशारणिग्रहणात् **कुशारणिः** । २ दुष्टं वासो-ऽस्य **दुर्वासाः** । 'अत्वसन्तस्य चाधातोः'६।४।१४॥ इति दीर्घः । द्वे 'दुर्वासा' इति ख्यातस्य ॥

## शतानन्दस्तु गौतमः ॥८५०॥

१ शतं बहू[12]नानन्दयत्याह्लादयति **शतानन्दः** । 'टुणदि (टुनदि) समृद्धौ'(भ्वा.प.से.), 'कर्मण्यण्'३।२।१॥ । २ गोतमस्याऽपत्यं **गौतमः** । 'ऋष्यन्धकवृष्णि-'४।१।११४॥ इत्यण् । द्वे गौतमस्य ॥८५०॥

## याज्ञवल्क्यो ब्रह्मरात्रिर्योगेशो[13]ऽपि

१ यज्ञवल्कस्याऽपत्यं **याज्ञवल्क्यः** । गर्गादित्वाद् यञ्[14] । २ ब्रह्मैव[15] रात्रिरस्य **ब्रह्मरात्रिः**, सदा योगनिद्रापर-वशत्वात् । ३ योगस्य[16] ईशः **योगेशः**[17] । योगीशोऽपि । त्रीणि याज्ञवल्क्यस्य[18] ॥

## अथ पाणिनौ ।

## सालातुरीयदाक्षेयौ

१ पणनं पणः स्तुतिः, पणोऽस्याऽस्ति[19] पणी, पणिनो-ऽपत्यं पाणिनः, पाणिनस्याऽपत्यं **पाणिनिः** । 'अत इञ्' ४।१।९५॥, तत्र । २ सलातुर[20] अभिजनो निवासोऽस्य **सालातुरीयः**, दन्तसादिः । सलातुराच्छण्[21] । ३ दाक्ष्या[22] अपत्यं **दाक्षेयः** । 'इतश्चानिञः'४।१।१२२॥ इति ढक् । दाक्षी-पुत्रोऽपि । "दाक्षीपुत्रस्य तन्त्रे ध्रुवमयमभवत् कोऽप्यधीती कपोतः"[नैषधीयचरितम्, सर्गः-१९, श्लो-६१]इति श्रीहर्षः । त्रीणि पाणिनिमुनेः ॥

## गोनर्दीये पतञ्जलिः ॥८५१॥

१ गोनर्दे भवो **गोनर्दीयः** । 'वृद्धाच्छः'४।२।-११४॥ इति छः । २ पततोऽञ्जलिः **पतञ्जलिः** । ([23]द्वे पतञ्जलिमुनेः) ॥८५१॥

## कात्यायनो[24] वररुचिर्मेधाजिच्च पुनर्वसुः ।

---

१. 'रे-' इति१.४॥ २. 'पर्शु-' इति१.२॥ ३. १.२.४प्रतिषु नास्ति ॥ ४. 'पिशिः' इति४॥ ५. इदं सूत्रमितन्प्रत्ययविधानं करोत्यतः 'क्षुधिपिशिमिथिभ्यः कित्'(उणा-३३५)इत्यनेनोनन्प्रत्ययो युक्तः ॥ ६. 'वशि-' इति२.३॥ ७. कोष्ठान्तर्गतपाठः १.२.४प्रतिषु न दृश्यते ॥ ८. 'वसि-' इति४॥ ९. 'अरुन्धत्याः' इति३॥ १०. '-तीति' इति३॥ ११. 'मित्रे चर्षौ'६।३।१३०॥ इति दीर्घः ॥ १२. 'बहूनां' इति३.४॥ १३. 'यागे-' इति१॥ १४. 'यच्' इति४॥ १५. '-ह्मेव' इति२॥ १६. 'या-' इति१.२.४॥ १७. 'या-' इति१॥ १८. '-ल्कस्य' इति१.२.३॥ १९. '-स्तीति' इति४॥ २०. अधुना पाकिस्तानाख्यदेशे 'लाहोर' इति ॥ २१. '-च्छः' इति३॥ २२. 'दाक्षा' इति४॥ २३. कोष्ठान्तर्गतपाठः १.२.४प्रतिषु न दृश्यते ॥ २४. '-ने' इति३.४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ [१]कतस्याऽपत्यं **कात्यः** । गर्गादित्वाद् यञ्[२] । तस्याऽपत्यं **कात्यायनः** । 'यञिञोश्च'४।१।१०१॥ इति फक्, फस्यायनादेशः । २ वरा रुचिरस्य[३] **वररुचिः** । ३ मेधया जयति पण्डितानिति[४] **मेधाजित्** । ४ पुनरपि वसु द्रव्यमस्य **पुनर्वसुः** । पुनर्वस्वोर्जात इति वा । चत्वारि कात्यायनर्षेः ॥

**अथ व्याडि[1]र्विन्ध्य[2]वासी [५]नन्दनी[3]तनयश्च सः ॥८५२॥**

१ विशेषेण आसमन्ताद् अडति उद्यच्छते, डीयते[६] खे चरतीति वा **व्याडिः**, पृषोदरादित्वात्[७] । 'अड उद्यमे' (भ्वा.प.से.), ''अडो वृश्चिकलाङ्गूलम्, तेन तैक्ष्ण्यं[८] लक्ष्यते । विशिष्टोऽडस्तैक्ष्ण्यमस्य व्यडः, तस्याऽपत्यं व्याडिः, 'अत इञ्[९]' ४।१।९५॥, 'स्वागतादीनां च'७।३।७॥ इति ऐजागमप्रतिषेधः (वृद्धिप्रतिषेधैजागमयोर्निषेधः)''[मा.धातुवृत्तिः, भ्वादिः, धातुसं-२४४]इति माधवः । २ विन्ध्ये वसति **विन्ध्यवासी** । 'वस निवासे'(भ्वा.प.अ.), ग्रहादित्वाण्णिनिः । ३ नन्दन्यास्तनयो **नन्दनीतनयः** । नन्दनीशब्दो नन्द्यादित्वाद् ङीषि प्रत्यये साधुः । ''ग्रहादित्वाण्णिनिप्रत्यये नन्दिनीति तृतीयस्वरमध्योऽपि''[ ]इत्यन्ये । त्रीणि व्याडिमुनेः ॥८५२॥

**स्फोटा[1]यने तु कक्षी[2]वान्**

१ स्फोटं शब्दस्फोटमयते **स्फोटायनः** । 'अय गतौ'(भ्वा.आ.से), नन्द्यादित्वाद् ल्युः, तत्र । [१०]स्फोटायनोऽपि (स्फोटनोऽपि) । २ कक्षा उद्योगोऽस्य **कक्षीवान्** । 'आसन्दीवदष्ठीवत्-'८।२।१२॥ इति सूत्रेण साधुः । एकं (द्वे) स्फोटायनस्य ॥

**पालका[1]प्ये करेणु[2]भूः[११] ।**

१ पालकैर्हस्तिचिकित्सकैराप्यते आप्तत्वेन गम्यते **पालकाप्यः** । 'आप्लृ व्याप्तौ'(स्वाप.अ.), 'ऋहलोर्ण्यत्' ३।१।१२४॥ इति ण्यत्, तत्र । २ करेणोर्हस्तिन्या भवति **करेणुभूः**[११] । क्विप् । कारेणवोऽपि[१२] । द्वे पालकाप्यमुनेः ॥

**वात्स्या[1]यने मल्ल[2]नागः [१३]कौट[3]ल्यश्चण[4]कात्मजः ॥८५३॥**

**द्रामि[5]लः पक्षिल[6]स्वामी विष्णु[7]गुप्तो[8]ऽङ्गुलश्च सः ।**

१ वत्सस्याऽपत्यं वात्स्यः । गर्गादित्वाद् यञ्[१४] । वात्स्यस्याऽपत्यं **वात्स्यायनः** । 'यञिञोश्च'४।१।१०१॥इति फक्, तत्र । २ मल्लो नवनन्दच्छेदने[१५] स चासौ नागश्च **मल्लनागः** । 'वृन्दारकनागकुञ्जरैः'२।१।६२॥ इति समासः । ३ कुटो घटः, तं[१६] लान्ति[१७] [१८]कुटलाः कुम्भीधान्याः, तेषामपत्यं [१९]**कौटल्यः** । गर्गादित्वाद् यञ् । ४ चणकस्य ऋषेरात्मजः **चणकात्मजः** । [२०]चाणक्योऽपि ॥८५३॥ ५ द्रमिलदेशे भवो **द्रामिलः** । 'तत्र भवः'४।३।५३॥इत्यण् । ६ प्रशस्तौ पित्रोः पक्षावस्य स्तः पक्षिलः । '-पिच्छादिभ्यश्च[२१]-'५।२।१००॥ इतीलच् । स चासौ स्वामी च **पक्षिलस्वामी** । ७ विष्णुरेनं गुप्यादिति **विष्णुगुप्तः** । 'क्तिच्क्तौ च संज्ञायाम्'३।३।१७४॥ इत्याशिषि क्तच् । ८ अङ्गं[२२] शरीरावयवं लाति **अङ्गुलः** । 'ला दाने'(अ.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥ । अष्टौ वात्स्यायनस्य । एते प्राचेतसाद्याः सर्वेऽपि ऋषिविशेषाः ॥

**क्षतव्रतोऽवकी[1]र्णी स्यात्**

१ क्षतं विलुप्तं व्रतमनेन क्षतव्रतः । अवान्तरे कीर्णं विक्षिप्तं रेतोऽस्त्यस्य **अवकीर्णी** । मत्वर्थे इनिः । ''ब्रह्मचार्यवकीर्णी स्यात् कामतस्तु स्त्रियं व्रजन्''[[२३]]इति स्मृतेः । एकं खण्डितव्रतस्य ऋषेः ॥

**व्रात्यः[1] संस्कारवर्जितः ॥८५४॥**

१ अष्टाचत्वारिंशत् संस्कारहीनः षोडशवर्षादूर्ध्वमकृतव्रतरथो भ्रष्टगायत्रीको दानाद्यकर्ता द्विजो **व्रात्यः** । व्रातो यवादिः, स इवेत्यर्थे 'शाखादिभ्यो यः'५।३।१०३॥ । यद्वा व्रते साधुः कालो व्रत्यः, तत्र भवो व्रात्यः प्रायश्चित्तार्हः । यत्स्मृतिः-

''अत ऊर्ध्वं त्रयोऽप्येते यथाकालमसंस्कृताः ।
सावित्रीपतिता व्रात्या भवन्त्यार्यविगर्हिताः ॥१॥''

[मनुस्मृतिः, अध्या-२, श्लो-३९]इति । ''व्राते वृन्दे साधुः''

---

१. 'का-' इति१.२.४॥ २. 'यत्' इति३.४॥ ३. '-वरस्य' इति२॥ ४. '-नीति' इति३॥ ५. 'नन्दिनी-' इति२.३॥ ६. 'उड्डी-' इति३.४॥ ७. '-दिः' इति४॥ ८. '-क्ष्णं' इति३.४॥ ९. '-ञि' इति१.२.४॥ १०. 'स्फौ-' इति२॥ ११. '-णभूः' इति१॥ १२. 'कैणवोऽपि' इति३॥ १३. 'कौटि-' इति१.३.४॥ १४. '-त्' इति३॥ १५. '-न्दोच्छेदने' इति३॥ १६. 'तां' इति३॥ १७. 'लाति' इति१.३॥ १८. 'कुटि-' इति३॥ १९. 'कौटि-' इति३॥ २०. 'चाणि-' इति४॥ २१. अष्टाध्याय्यां 'च' इति न दृश्यते ॥ २२. 'अङ्गु' इति१.२॥ २३. द्र. अम.क्षीर. २।७।५४॥, पृ.१७५॥, स्वोपज्ञटीका ३।८५४॥, पृ.१८८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[ ]इत्येके । संस्कारोऽत्रोपनयनम्, तेन वर्जितः संस्कारवर्जितः[1] । एकं क्रियाहीनविप्रस्य ॥८५४॥

## शिश्विदानः[1] कृष्णकर्मा

१ श्वेतते **शिश्विदानः** । 'श्विताङ्[2] वर्णे'(भ्वा.आ.से.), 'मुमुचान-'(हैमोणा-२७८)इत्यानप्रत्यये साधुः । अमरस्तु शिश्विदिश्वैत्ये लिटः कानज् वा[3] ('श्विदि शैत्ये'(भ्वा.आ.से.), 'लिटः कान्-'३।२।१०६॥, 'श्विता वर्णे'(भ्वा.आ.से.), 'सम्यानच् स्तुवः'(उणा-२४६)इत्यत आनजित्यनुवृत्तौ 'हुर्छेः सनो लुक् छलोपश्च'(उणा-२४८)इत्यतः सनो लुगित्यनुवृत्तौ 'श्वितेर्दश्च'(उणा-२४९)इत्यानच्प्रत्ययो दत्वं सनो लुक् च) इत्याह । कृष्णं मलिनं कर्म आचारोऽस्य **कृष्णकर्मा**, दुराचार इत्यर्थः । 'शिश्विदानो दुराचारे''[हलायुधकोशः २।४०४॥]इति हलायुधः । एकं दुराचारद्विजस्य ॥

## ब्रह्म[1]बन्धुर्द्विजोऽधमः ।

१ ब्रह्मा बन्धुरिवाऽस्य **ब्रह्मबन्धुः** । द्विजो विप्रः, अधमो गर्ह्य इत्यर्थः । एकमधमविप्रस्य ॥

## नष्टाग्निर्वीरहा[1]

१ नष्ट उच्छिन्नोऽग्निरस्य नष्टाग्निः । वीरोऽग्निः, तं हतवान् **वीरहा** । क्विप् । वीरयति[4] प्रभावन्तं करोति, वीरः पूर्वोक्तोऽग्निः, तं हतवानिति वा । 'शूर वीर विक्रान्तौ' (चु.आ.से.), चुरादिः, ततो ण्यन्तादच् । वीरहणौ, वीरहणः इत्यादि । 'ब्रह्मभ्रूण-'३।२।८७॥ इत्यत्र ब्रह्मादिभ्य एव हन्तेः क्विबिति भूतेः नियमाद् वर्तमानेऽपि क्वचित् क्विप् वा । एकं नष्टाग्निविप्रस्य ॥

## जातिमात्रजीवी द्विजब्रुवः[1] ॥८५५॥

१ जातिरेव जातिमात्रम् । ''मात्रं त्ववधृतौ स्वार्थे'' [अनेकार्थसङ्ग्रहः २।४३६॥]इत्यनेकार्थः । तेन जीवति जातमात्रजीवी । ग्रहादित्वाण्णिनिः । द्विजश्चासौ ब्रुवश्च **द्विजब्रुवः** । 'कुत्सितानि[5] कुत्सनैः'२।१।५३॥ इति कर्मधारयः । ब्राह्मणब्रुवोऽपि । ''जातिमात्रोपजीवी च कथ्यते ब्राह्मणब्रुवः''[हलायुधकोशः२।४०६॥]इति हलायुधः । एकं जातिमात्रजीविद्विजस्य ॥८५५॥

## धर्म[1]ध्वजी लिङ्गवृत्तिः[2]

१ धर्मस्य[6] ध्वजश्चिह्नमस्य **धर्मध्वजी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः । २ लिङ्गेन जटादिधारणेन वृत्तिर्जीवनमस्य **लिङ्गवृत्तिः** । धर्मध्वज इत्यकारान्तोऽपि । यद्धलायुधः[8]-''धर्मध्वजो लिङ्गवृत्तिः''[हलायुधकोशः२।४०५॥] इति हलायुधः[10] ।''[11]''(दाम्भिकवृत्तिद्विजे[12] द्वौ[13]''[ ]इति तट्टीका । द्वे दाम्भिकवृत्तिद्विजस्य[14] ॥

## वेद[1]हीनो निराकृतिः[2] ।

१ वेदेन स्वाध्यायेन हीनो **वेदहीनः** । २ आकृतेर्जातेर्निःक्रान्तो **निराकृतिः** । यत्स्मृतिः-

''अनधीत्य तु यो वेदानन्यत्र कुरुते श्रमम् ।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः[15] ॥१॥''

[मनुस्मृतिः, अध्या-२, श्लो-१६८] । अस्वाध्यायोऽपि । ''अस्वाध्यायो निराकृतिः''[हलायुधकोशः २।४०५॥]इति हलायुधः । द्वेऽनधीतवेदविप्रस्य ॥

## वार्ताशी[1] भोजनार्थं यो गोत्रादि वदति स्वकम् ॥८५६॥

१ यो भोजनार्थं स्वकमात्मीयं गोत्रादि अन्वयादिकं वदति कथयति, सः[16] **वार्ताशी** इत्यन्वयः । सत्रादौ वार्तार्थमाजीविकानिमित्तं[17]मश्नाति वार्ताशी । 'अश भोजने'(क्र्या.प.से.), ग्रहादित्वाण्णिनिः । एकं [यो भोजनार्थं स्वकं गोत्रादि वदति, तस्य] ॥८५६॥

## उच्छिष्ट[1]भोजनो देवनैवेद्यबलिभोजनः ।

१ उच्छिष्टं भोजनमस्य **उच्छिष्टभोजनः** । देवस्य नैवेद्यबलिर्भोजनमस्य[18] देवनैवेद्यबलिभोजनः । एकं 'भरडा' इति ख्यातस्य ॥

## अ[1]जपस्त्वसदध्येता[2]

१ नास्ति जपः स्वाध्यायोऽस्य **अजपः** । असदशोभ-

---

१. ३प्रतौ नास्ति ॥ २. क्षीरतरङ्गिण्यादौ ङकारो न दृश्यते ॥ ३. त्रुटितेनैतद्ग्रन्थेन शिश्विदानशब्दस्याऽन्यप्रकारेणाऽपि सिद्धिर्ज्ञायते, सा कोष्ठान्तर्गतपदचन्द्रिकापाठेन बोध्या ॥ ४. '-यन्ति' इति१ ॥ ५. इतोऽग्रे १प्रतौ 'वा' इति दृश्यते ॥ ६. 'कुत्सनानि' इति१.२.३ ॥ ७. तुलनीयोऽमरकोषः २।७।५४॥ ८. 'ध्वजं' इति४ ॥ ९. ३प्रतौ नास्ति ॥ १०. इतोऽग्रे १.२.३प्रतिषु 'हलायुधः' इति दृश्यते ॥ ११. कोष्ठान्तर्गतपाठस्थाने ४प्रतौ 'वेदान्तिके वृत्तिद्विजे' इति दृश्यते ॥ १२. इतः पूर्वे ३प्रतौ 'द्वौ' इति दृश्यते ॥ १३. ३प्रतौ नास्ति ॥ १४. 'वेदान्तिकवृत्तिद्विजस्य' इति४ ॥ १५. द्र.अम.क्षीर. २।७।५४॥, पृ.१७४॥, स्वोपज्ञटीका ३।८५६॥, पृ.१८९॥, मनुस्मृत्याम्-'अनधीत्य तु यो वेदान्' इत्यस्य स्थाने 'योऽनधीत्य द्विजो वेदम्' इति दृश्यते, २।१६८॥, पृ.६२॥ १६. ३प्रतौ नास्ति ॥ १७. 'वातार्थ...निमित्तं' इति२, 'वातार्थजीविका-' इति४ ॥ १८. '-लिभो-' इति२ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नमधीते **असदध्येता** । 'इङ् अध्ययने'(अ.आ.अ.), तृच् । द्वे असदध्येतुः, अपठनशीलस्य वा ॥

**शाखारण्डोऽन्यशाखकः ॥८५७॥**

१ शाखासु अन्यवेदशाखासु रमते **शाखारण्डः** । 'रमु क्रीडायाम्'(भ्वा.आ.अ.), 'अमन्ताड्डः'(उणा-१११)। स्वशाखया रण्डो विरहितः शाखारण्ड इति वा । २ अन्याः शाखा अस्य अन्यशाखः । अर्शआद्यच् । ततः स्वार्थे कनि **अन्यशाखकः** । अत्र शाखाशब्दः पक्षान्तरे सन्ततिविशेषार्थः । द्वे स्वशाखारहितविप्रस्य ॥८५७॥

**शस्त्राजीवः काण्डस्पृष्टः**

१ शस्त्रेण आयुधेन आजीवति **शस्त्राजीवः** । 'जीव प्राणधारणे'(भ्वा.प.से.), अच् । २ स्पृष्टानि काण्डान्यनेन **काण्डस्पृष्टः** । 'जातिकालसुखादिभ्यः परा निष्ठा वाच्या'(वा-२।२।३६॥) । काण्डोऽधमः, स चासौ स्पृष्टश्चेति काण्डस्पृष्ट इति वा । द्वे शस्त्रजीविद्विजस्य ॥

**गुरुहा नरकीलकः ।**

१ गुरुं हन्ति **गुरुहा** । २ नरेषु कीलक इव **नरकीलकः** । द्वे गुरुहन्तृद्विजस्य ॥

**मलो देवादिपूजायामश्राद्धः**

१ मलते धारयति पापं **मलः** । 'मल धारणे'(भ्वा. आ.से.), अच् । मलमस्याऽस्तीति, अर्शआदित्वादच् वा । देवाद्यर्चनविषयेऽश्राद्धः, श्रद्धावर्जित इत्यर्थः । एकं देवाद्यर्चायां श्रद्धारहितस्य ॥

**अथ मलिम्लुचः ॥८५८॥**

**पञ्चयज्ञपरिभ्रष्टः**

१ मलिनं म्लोचति **मलिम्लुचः** । 'म्लुच (म्लुचु) गतौ'(भ्वा.प.से.), मूलविभुजादित्वात् कः ॥८५८॥ पञ्चभिः ब्रह्मदेवपितृभूतयज्ञैः परिभ्रष्टः पतितः पञ्चयज्ञपरिभ्रष्टः । एकं ब्रह्मादिपञ्चयज्ञपरिभ्रष्टस्य ॥

**निषिद्धैकरुचिः खरुः ।**

१ निषिद्धा एकत्र रुचिरनेन निषिद्धैकरुचिः । खनति खोरति खुरति वा चित्तं **खरुः** । 'खरुशङ्कुपी(पा)-युनीलङ्गुलिगु'(उणा-३६)क्वन्ता निपात्यन्ते । एकमेकवस्तुनि निषिद्धरुचिविप्रस्य ॥

**सुप्ते यस्मिन्नुदेत्यर्कोऽस्तमेति च क्रमेण तौ ॥८५९॥**

**अभ्युदिताऽभिनिर्मुक्तौ**

१ यस्मिन् सुप्तेऽर्क उदेति उदयाद्रिमौलिं गच्छति, सोऽभ्युदितमभ्युदयः सूर्यस्य, तद्योगादर्शआद्यच् **अभ्युदितः**, भुक्ता ब्राह्मणा इत्यादिवत् । १ यस्मिन् सुप्ते निद्राणेऽर्कोऽस्तमेति अस्ताचलं याति, स **अभिनिर्मुक्तः** । सर्वतो भावेन सामान्येन कर्मणा निर्निश्चयेन मुक्तोऽभिनिर्मुक्तः । ''अभिभूय उदितोऽर्कोऽस्य सुप्तस्य अभ्युदितः । अभिभूय निर्मुक्तोऽस्तमितोऽर्कोऽस्य सुप्तस्य अभिनिर्मुक्तः''[अभि-, स्वोपज्ञटीका-२।८५९-८६०]इत्याचार्याः ॥

''सुप्ते यस्मिन्नस्तमेति सुप्ते यस्मिन्नुदेति च ।
अंशुमानभिनिर्मुक्ताभ्युदितौ तौ यथाक्रमम् ॥१॥''

[अमरकोषः २।७।५४-५५॥]इत्यमरः। क्रमेणैकैकम् ॥८५९॥

**वीरोज्झो न जुहोति यः ।**

१ वीरमग्निमुज्झति त्यजति **वीरोज्झः**, चवर्गतृतीयचतुर्थान्तः । 'उज्झ त्यागे'(तु.प.से.), 'कर्मण्यण्'३।२।१॥। न जुहोत्यग्नौ हविःप्रक्षेपं न करोति, तस्यैकम् ॥

**अग्निहोत्रच्छलाद् याच्ञापरो वीरोपजीवकः ॥८६०॥**

१ अग्निहोत्रच्छलादग्निरक्षणमिषात् यो याच्ञापरः प्रार्थनापरः, तस्यैकम् । वीरमग्निमुपजीवति **वीरोपजीवकः** । ण्वुल् ॥८६०॥

**वीरविप्लावको जुह्वद्धनैः शुद्रसमाहृतैः ।**

१ शुद्रेभ्यः समाहृतैः कृतसङ्ग्रहैः जुह्वद्धनैः हूयमानद्रव्यैः यो याच्ञापरः, तस्यैकम् । वीरमग्निं विप्लावयते **वीरविप्लावकः** । 'प्लुङ् गतौ'(भ्वा.आ.अ.), हेतुमण्णिजन्तात् ण्वुल् ॥

अथ षड्दर्शननामानि निरूपयन्नाह-

**स्याद्वादवाद्याऽऽर्हतः स्यात्**

१ स्यादिति विकल्पार्थेऽव्ययम्, स्याद् विकल्पितो वादः स्याद्वादः सदसन्नित्यानित्याभिलाप्यानभिलाप्यरूपैः, तं

---

१. '-षणार्थः' इति३॥ २. ४प्रतौ 'स्व-' इति न दृश्यते ॥ ३. '-वी' इति१.२॥ ४. 'शस्त्रा-' इति४॥ ५. 'नल-' इति१.३.४॥ ६. 'नल-' इति१.२.४॥ ७. 'ब्रह्मा-' इति३.४॥ ८. १प्रतौ नास्ति ॥ ९. मुद्रितस्वोपज्ञटीकायां न दृश्यते ॥ १०. 'च' इत्यमरकोषे ॥ ११. 'उत्सर्गे' इति क्षीरतरङ्गिण्यादयः ॥ १२. '-तृ-' इति१.२॥ १३. 'शूद्रस्य' इति४॥ १४. '-दर्शननामान्याह' इति४॥ १५. '-ल्पेऽर्थे-' इति३॥ १६. '-लाप्यरूपः' इति१.२.४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वदति **स्याद्वादवादी** । 'वद व्यक्तायां वाचि'(भ्वा.प.से.), ग्रहादित्वाण्णिनिः । अनेकान्तवाद्यपि । २ अर्हन् देवताऽस्य **आर्हतः** । 'सास्य देवता'४।२।२४॥ इत्यण् । जैनोऽपि । द्वे जैनदर्शनस्य ॥

**शून्यवादी तु सौगतः ॥८६१॥**

१ शून्यं निराकारं वदति **शून्यवादी** । ग्रहादित्वाण्णिनिः । २ सुगतो देवताऽस्य **सौगतः** । 'सास्य देवता' ४।२।२४॥इत्यण् । द्वे बौद्धदर्शनस्य ॥८६१॥

**नैयायिकस्त्वाक्षपादो यौगः**

१ नीयते[1] प्राप्यते विवक्षितोऽर्थो येनाऽसौ न्यायः । 'इण् गतौ'(अ.प.अ.), करणे घञ् । न्यायः प्रतिज्ञादिपञ्चावयवोपेतं वाक्यादिः, तं वेत्त्यधीते वा **नैयायिकः** । क्रतूक्थादित्वाट्ठक्, 'न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच्' ७।३।३॥ । २ अक्षस्तृतीयं नेत्रं पादेऽस्य अक्षपादः, अक्षपादस्याऽयम् **आक्षपादः** । ३ योगः प्रत्याहारादिरष्टाङ्गः, तं वेत्त्यधीते वा **यौगः** । 'तदधीते तद्वेद'४।२।५९॥ इत्यण् । त्रीणि नैयायिकदर्शनस्य ॥

**साङ्ख्यस्तु कापिलः ।**

१ पञ्चविंशतेस्तत्त्वानां सङ्ख्या, तदधिकृतं शास्त्रं साङ्ख्यम्, तदधीते वेत्ति वा **साङ्ख्यः** । 'तदधीते तद्वेद'४।२।५९॥ इत्यण् । २ कपिलेन प्रोक्तो ग्रन्थः **कापिलः** । 'तेन प्रोक्तम्'४।३।१०१॥ इत्यण् । तं वेत्त्यधीते वा कापिलः । कपिलस्याऽयमिति वा । 'तस्येदम्' ४।३।१२०॥ इत्यण् । द्वे साङ्ख्यदर्शनस्य ॥

**वैशेषिकः स्यादौलूक्यः**

१ नित्यद्रव्यवृत्तयोऽन्त्याः(-त्र) विशेषाः । यदाहं[2] शिवादित्यः-"विशेषास्तु नित्यद्रव्यवृत्तित्वादनन्ता एव"[ ] । ते प्रयोजनमस्य वैशेषिकं[3] शास्त्रम् । 'प्रयोजनम्'५।१।१०९॥ इति ठक्, 'विनयादिभ्यश्च[4]'५।४।३४॥ इति स्वार्थे ठक् वा । तदधीते वेत्ति वा **वैशेषिकः** । 'तदधीते-'४।२।५९॥ इत्यण् । २ उलूकस्याऽपत्यमिव तज्जन्यत्वाद् औलूक्यं शास्त्रम् । गर्गादित्वाद् यञ् । उलूकवेषधारिणा महेश्वरेण प्रणीतमिति हि प्रसिद्धिः । औलूक्ये साधुः **औलूक्यः** । 'तत्र साधुः'४।४।९८॥ इति यत्, 'यस्येति च'६।४।१४८॥ इत्यकारलोपः, 'लोपो व्योर्वलि'६।१।६६॥इति पूर्वयलोपः । द्वे वैशेषिकदर्शनस्य ॥

**बार्हस्पत्यस्तु नास्तिकः ॥८६२॥**

**चार्वाको लौकायतिकश्च**

१ बृहस्पतिना कृतं बार्हस्पत्यं शास्त्रम् । 'पत्यन्तपुरोहितादिभ्यो यक्'५।१।१२८॥ इति यक् । बार्हस्पत्ये साधुः **बार्हस्पत्यः** । 'तत्र साधुः'४।४।९८॥ इति यत् । २ नास्ति परलोके मतिरस्य **नास्तिकः** । 'अस्तिनास्तिदिष्टं मतिः'४।४।६०॥इति ठक्, 'ठस्येकः'७।३।५०॥ ॥८६२॥ ३ चर्वत्यात्मानं **चार्वाकः** । 'चर्व अदने'(भ्वा.प.से.), 'पिनाकादयश्च'(उणा-४५५)इति साधुः । ४ लोकेष्वायतं लोकायतं बृहस्पतिप्रणीतं शास्त्रम् । तद्वेत्त्यधीते वा **लौकायतिकः**। क्रतूक्थादित्वाट्ठक्, 'ठस्येकः'७।३।५०॥ । चत्वारि नास्तिकदर्शनस्य ॥

उपसंहारमाह-

**एते षडपि तार्किकाः ।**

१ एते आर्हतादयः षट्सङ्ख्या अपि, तर्कः प्रयोजनमेषां **तार्किकाः** । 'प्रयोजनम्'५।१।१०९॥ इति ठक् ॥

**क्षत्रं तु क्षत्रियो राजा राजन्यो बाहुसम्भवः ॥८६३॥**

१ क्षदति संवृणोति **क्षत्रम्**, द्वितकारम्, पुंक्लीबलिङ्गम् । 'क्षद संवरणे' [सौत्रोऽयम्], '[6]गुधृवीपचिवचियमि([7]मनितनि)क्षदिभ्यस्त्रन्(-स्त्रः)'(उणा-६०६) । क्षतात् त्रायत इति पृषोदरादित्वाद्वा । २ क्षत्रस्याऽपत्यं **क्षत्रियः** । 'क्षत्राद् घः'४।१।१३८॥ इति घः । क्षतात् त्रायत इति । 'आतः-'३।२।३॥इति कः । नैरुक्ते क्षतशब्दान्ताकारलोपे क्षत्रः, ततो घ इति वा । 'वार्तासंणोपधम्(त्रान्तं सलोपधम्)'(लिङ्गादि-४५८)इति क्लीबत्वमपि । ३ तेजसा प्रभावेन वा राजते दीप्तो भवति **राजा**, नकारान्तः । 'राजृ

१. 'निई-' इति१.२.४॥ २. '-दिह' इति२॥ ३. '-क-' इति२॥ ४. '-भ्यष्ठक्' इत्यष्टाध्याय्याम् ॥ ५. '-द्धेः' इति४॥ ६. 'गृ-' इति१.३.४॥ ७. कोष्ठान्तर्गतपाठ उणादिगणसूत्रे न दृश्यते ॥

Jain Education International
For Private & Personal Use Only
www.jainelibrary.org

दीप्तौ'(भ्वा.उ.से.), 'कनिन् युवृषि-'(उणा-१५४)इति साधुः । "राजा चन्द्रे नृपे शक्रे क्षत्रिये प्रभुयक्षयोः"[विश्वलोचनकोशः, नान्तवर्गः, श्लो-११४]इति श्रीधरः । ४ राज्ञोऽपत्यं **राजन्यः** । क्षत्रियार्थाद् राजशब्दात् 'राजश्वसुराद् यत्'४।१।१३७॥ इति यत्, 'ये चाभावकर्मणोः'६।४।-१६८॥ इति प्रकृतिभावाद् न टिलोपः । 'राज्ञो जातौ-'(वा-४।१।१३७॥)इति यदिति वा । ५ ब्रह्मणो बाहुभ्यां सम्भवति **बाहुसम्भवः** । पचाद्यच् । "बाहू राजन्यः कृतः"[ऋ. वे. १०।९०।१२॥]इति श्रुतिः । पञ्च क्षत्रियस्य ॥८६३॥

**अर्या भूमिस्पृशो वैश्या ऊरव्या ऊरजा विशः ।**

१ अर्यन्ते[2] **अर्याः** । 'ऋ गतौ'(भ्वा.प.से.), 'अर्यः स्वामिवैश्ययोः'३।१।१०३॥ इति साधुः, आद्यस्वरादिः । २ कृष्यादिना भूमिं स्पृशन्ति[3] **भूमिस्पृशः** । 'स्पृश संस्पर्शने' (तु.प.अ.), क्विप् । ३ विशोऽपत्यानि जातयो **वैश्याः** । गर्गादित्वाद् यञ् । विश एव वा, भेषजादित्वाद् यण् । ४ ऊर्वोर्भवा **ऊरव्याः** । 'शरीरावयवाद्यत्'[4]५।१।६॥इति यत्, 'ओर्गुणः'६।४।१४६॥ इति गुणः, 'वान्तो यि प्रत्यये' ६।१।७९॥ इत्यवादेशः । ५ ऊरुभ्यां जाता **ऊरजाः** । 'पञ्चम्यामजातौ'३।२।९८॥ इति डः । ऊर्वोर्जाता इति वा । द्वावपि षष्ठस्वरादी । "ऊरू तदस्य यद्वैश्यः"[ऋ. वे.१०।-९०।१२॥]इति श्रुतिः । ६ विशन्ति **विशः** । 'विश प्रवेशने' (तु.प.अ.), क्विप् । षड् वैश्यस्य ॥

**वाणिज्यं पाशुपाल्यं च कर्षणं चेति वृत्तयः ॥८६४॥**

१ वाणिज्यं वणिक्कर्म१, पाशुपाल्यं पशुपालनाद् वृत्तिः२, कर्षणं हलकर्मकरणम्३, इत्येतेषां त्रयाणां नाम **वृत्तिः** इत्यर्थः । "वृत्तिः प्रवृत्तौ विवृतौ[5] कौशिक्यादिषु वर्तने[6]"[विश्वलोचनकोशः, तान्तवर्गः, श्लो-५६]इति श्रीधरः । "वर्तनं कृष्यादिजीवनम्"[ ]इति तट्टीका । वाणिज्यादीनां त्रयाणमेकोक्त्या नाम एकं[9] वृत्तिरिति ॥८६४॥

**आजीवो जीवनं वार्ता जीविका वृत्तिवेतने ।**

१ आजीवनम् **आजीवः** । भावे घञ् । आजीवन्त्यनेनेति करणे[8] घञ् वा । २ जीवत्यनेन **जीवनम्** । करणे ल्युट् । ३ वर्तनं वृत्तिः, साऽस्त्यस्यां **वार्ता** । 'प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः'५।२।१०१॥ । ४ जीवत्यनया, जीव्यते वाऽनया **जीविका** । 'जीव प्राणधारणे'(भ्वा.प.से.), 'धात्वर्थनिर्देशे ण्वुल् वक्तव्यः'(वा-३।३।१०८॥)इति ण्वुल्, टाप्, 'प्रत्ययस्थात्-'७।३।४४॥ इतीत्वम् । ५ वृत्यतेऽनया **वृत्तिः** । 'वृतु वर्तने'(भ्वा.आ.से.), 'स्त्रियां क्तिन्'३।३।९४॥ । ६ वेति खादत्यनेन **वेतनम्** । 'वी गत्यादौ'(अ.प.अ.), 'वीपतिभ्यां तनन्'(उणा-४३०) । सामान्येन आजीविकायाः षट् ॥

**उञ्छो धान्यकणादानम्**

१ उञ्छनम् **उञ्छः**, पुंक्ली. । 'उञ्छ(उछि) उञ्छने' (भ्वा.तु.प.से.), भावे घञ् । क्षेत्रादिलवनात् पतितानां धान्यकणानामादानमुच्चयो धान्यकणादानम् । "आपणादिकणोपादानं[7] धान्यकणादानम्"[ ]इति भागवतसप्तमस्कन्धटीका । "ईषद्भूच्छत्रकणोद्ग्रहणमुञ्छः"[ ]इति धातुवृत्तिः । एकं 'हूंछा' इति ख्यातस्य ॥

**कणिशाद्यर्जनं शिलम् ॥८६५॥**

१ कणिशं धान्यमञ्जरी, आदिशब्दात् शिम्बादिः, तस्याऽर्जनं ग्रहणम्, शिल्यते **शिलम्** । 'शिल उञ्छे'(तु.-प.से.), कर्मणि घञ् । एकं 'शिलुं'[10] इति ख्यातस्य ॥८६५॥

**ऋतं तद् द्वयम्**

१ तद् द्वयमुञ्छं शिलं च **ऋतम्** उच्यते, निरवद्यत्वात् । "ऋतमुञ्छशिलं ज्ञेयम्"[मनुस्मृतिः, अध्या-४, श्लो-५]इति मनुः । एकं तदुभयस्य ॥

**अनृतं कृषिः**

१ न ऋतम् **अनृतम्**, पापकर्मत्वात् । २ कर्षणं **कृषिः**, स्त्रियाम्[11] । 'कृष[12] विलेखने'(भ्वा.प.अ., तु.उ.अ.), 'इक्[13] कृष्यादिभ्यः'(वा-३।३।१०८॥)इति किदिन् (इक्) । "अनृतं स्यान्मृषाकृष्योः"[विश्वप्रकाशकोशः, तान्तवर्गः, श्लो-७७]इति श्रीधरः । प्रमृतमित्यन्ये । द्वे 'करसण' इति ख्यातस्य ॥

१. 'क्षतः' इति३ ॥ २. 'अर्यतेऽसौ' इति१.२.४॥ ३. '-ति' इति इति१ ॥ ४. 'शरीरावयवाच्च'४।३।५५॥ इत्येव युक्तः ॥ ५. 'निवृत्तौ' इति३ ॥ ६. "वृत्तिः प्रवृत्तौ वृत्तौ च कौशिक्यादिप्रवर्तने" इति विश्वलोचनकोशे, पृ.१२८ ॥ ७. '-क-' इति३ ॥ ८. इतोऽग्रे ४प्रतौ 'ल्युट्' इति दृश्यते ॥ ९. '-नां' इति३ ॥ १०. '-लो' इति३, '-लू' इति४ ॥ ११. इतोऽग्रे १प्रतौ 'क्ति' इति दृश्यते ॥ १२. 'कृषि' इति३ ॥ १३. ३.४प्रत्योर्नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[1]मृतं तु [2]याचितम् ।**

१ **मृतं** निर्जीवमिव । २ याच्यते स्म **याचितम्** । ''मृतं तु याचितं भैक्षम्[१]''[मनुस्मृतिः, अध्या-४, श्लो-५]इति मनुः । ''मृतं तु नित्ययाच्ञा स्यात्''[ ]इति भागवतम् । ''मृत्युयाचितयोर्मृतम्[२]''[विश्वप्रकाशकोशः, तान्तवर्गः, श्लो-४४]इति श्रीधरः । द्वे भिक्षावृत्तेः ॥

**[1]अयाचितं स्याद[2]मृतम्**

१ न याचितम् **अयाचितम्** । २ म्रियते स्म मृतम्, न मृतम् **अमृतम्**, अविनश्वरमित्यर्थः ॥

''अमृतं मोक्षपियूषसलिले हृद्यवस्तुनि ।
अयाचिते यज्ञशेषे [घृते दुग्धेऽतिसुन्दरे] ॥१॥''

[विश्वप्रकाशकोशः, तान्तवर्गः, श्लो-७९-८०]इति श्रीधरः । द्वे अभिक्षितवृत्तेः ॥

**सेवावृत्तिः [1]श्वजीविका ॥८६६॥**

१ वेतनग्रहणेन आज्ञाकरणं सेवा, तया कृत्वा वृत्तिः जीविका सेवावृत्तिः । शुन इव जीविका वृत्तिः **श्वजीविका**, परपिण्डोपजीवित्वादधमेत्यर्थः । एकं सेवावृत्तेः ॥८६६॥

**[1]सत्यानृतं तु [2]वाणिज्यं [3]वणिज्या**

१ किञ्चित् सत्यं किञ्चिदनृतमसत्यं **सत्यानृतम्** । २ वणिजः कर्म **वाणिज्यम्** । 'गुणवचनब्राह्मणादिभ्यः कर्मणि च'५।१।१२४॥ इति ष्यञ् । ३ वणिजः कर्म[३] **वणिज्या**, आद्यस्वरादिः । 'दूतवणिग्भ्यां च[४]'(वा-५।१।-१२६।।)इति यत्। स्त्रीक्लीबलिङ्गः । [यन्मनुः-]

''ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितम् ।
मृतं तु याचितं भैक्षं[५] प्रमृतं[६] कर्षणं स्मृतम् ॥१॥
सत्यानृतं तु वाणिज्यं तेनाऽपि खलु जीव्यते[७] ।
सेवा श्ववृत्तिराख्याता तस्मात् तां परिवर्जयेत् ॥२॥''

[मनुस्मृतिः, अध्या-४, श्लो-५-६]इति । वणिजनामानि त्रीणि॥

**[1]वाणिजो [2]वणिक् ।**

**[3]क्रयविक्रयिकः[4]पण्याजीवा[5]ऽऽपणिक[6]नैगमाः ॥८६७॥**
**[7]वैदेहः [8]सार्थवाहश्च**

१ वणिगेव **वाणिजः** । प्रज्ञादित्वादण् । २ पणायति व्यवहरते[८] **वणिक्** । 'पण व्यवहारे स्तुतौ च' (भ्वा.आ.से.), 'पणेरिच्चा(ज्या)देशश्च वः'(उणा-२२८) इतीज्प्रत्ययः । वणिजौ, वणिजः इत्यादि । ३ क्रयविक्रयेण जीवति **क्रयविक्रयिकः** । '[९]वस्नक्रयविक्रयाट्ठन्[१०]'४।४।१३॥ इति ठन्[११], 'ठस्येकः' ७।३।५०॥ । ४ पण्येन आजीवति **पण्याजीवः** । पचाद्यच् । ५ आपणायतीति **आपणिकः** । 'आङि पणिपनि-'(उणा-२०३)इतीकन्। आपणः प्रयोजनमस्याऽस्तीति वा । 'प्रयोजनम्'५।१।१०९॥ इति ठक् । प्रापणिकोऽपि । ६ निगमे पुरे मार्गे वा भवो **नैगमः** । 'तत्र भवः'४।३।५३॥ इत्यण् ॥८६७॥ ७ विदेहे उपचये भवो **वैदेहः** । ८ सार्थान् सधनान् सरतो वा पान्थान्[११] वहति[१२] **सार्थवाहः** । 'कर्मण्यण्'३।२।१॥ । ''अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु''[अमरकोषः३।३।८६॥]इत्यनेकार्थः । अष्टौ वणिजः ॥

**[1]क्रायकः [2]क्रयिकः [3]क्रयी ।**

१ क्रीणाति **क्रायकः** । 'डुक्रीञ् द्रव्यविनिमये' (क्र्या.उ.अ.), ण्वुल् । २ क्रयेण जीवति **क्रयिकः**, तृतीयस्वरमध्यः । क्रयविक्रयादित्यवसंहतरि गृहीतयोरपीष्टत्वाट्ठञ्[१३], 'ठस्येकः'७।३।५०॥। ३ क्रयोऽस्त्यस्य **क्रयी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः । क्रयिणौ, क्रयिणः इत्यादि । त्रीणि वस्तुग्राहकस्य ॥

**[1-4]क्रेयदे तु विपूर्वास्ते**

१ क्रेयं क्रेतव्यं 'वेचाऊ' इति भाषाप्रसिद्धं[१४] ददाति **क्रेयदः**, तत्र । ते क्रायकादयो विपूर्वाः क्रेयदे क्रेतव्यदायके भवन्ति, यथा २ **विक्रायकः**[१५], ३ **विक्रयिकः**, ४ **विक्रयी** । ''विक्रेता स्याद् विक्रयिकः''[अमरकोषः२।९।७९॥]इत्यमरः । चत्वारि 'वेचणहार' इति ख्यातस्य ॥

---

१. 'भैक्ष्यम्' इति३॥ २. 'मतम्' इति विश्वप्रकाशकोशे, पृ.१२६॥ ३. 'वणिक्कर्म' इति३॥ ४. सिद्धान्तकौमुद्यां 'सख्युर्यः'५।१।१२६॥ इत्यत्र भट्टोजिदीक्षितेन '' 'दूतवणिग्भ्यां च' । दूतस्य भावः कर्म वा दूत्यम् । वणिज्यमिति काशिका । माधवस्तु वणिज्याशब्दः स्वभावात् स्त्रीलिङ्गः । भाव एव चाऽत्र प्रत्ययो न तु कर्मणीत्याह । भाष्ये तु 'दूतवणिग्भ्यां च' इति नास्त्येव'' इत्युक्तम्, तद्धितेषु भावकर्मार्थाः, पृ.३४५॥ ५. 'भैक्ष्यं' इति३॥ ६. 'प्रभृतं' इति४॥ ७. ''तेन चैवापि जीव्यते'' इति मनुस्मृत्याम्, पृ.१३२॥ ८. '-हारते' इति४॥ ९. 'वस्तुक्रियाट्ठन्' इति३॥ १०. '-ठञ्' इति४॥ ११. 'सधनान् पान्थान्' इति१॥ १२. 'सार्थान् वहति' इति४॥ १३. '-ञ्' इति३॥ १४. इतोऽग्रे ४प्रतौ 'क्रेयं' इति दृश्यते ॥ १५. 'विक्रायः' इति१.२, 'विक्रायिकः' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मूल्ये वस्नार्घावक्रयाः ॥८६८॥**

१ [1]पठा(पटा)दीनामुत्पत्तिकारणं हिरण्यं मूलम्, मूलेनाऽऽनाम्यमनभिभवनीयं **मूल्यम्** । 'नौवय-'४।४।९१॥ इति यत् । २ प्राप्तिहेतुत्वं वसत्यत्र **वस्नम्**, पुंक्ली[2] । 'वस निवासे' (भ्वा.प.अ.), 'वधिवसिधापृ(पृ)भ्यो नः'(चान्द्रोणा-२८६) । तवर्गपञ्चमान्तोऽयम्[3] । ३ अर्यते पण्यमत्र **अर्घः** । 'ऋ गतौ' (जु.प.अ.), बाहुलकाद् घः । अर्हतीत्यर्घ इति वा । 'अर्ह पूजायाम्'(भ्वा.प.से.) 'संज्ञायामर्घमेघनिदार्घाः[4]'(गणसू-७।३।५३॥)इति न्यङ्क्वादित्वात् कुत्वम् । अर्घ्यते पण्यमत्रेति वा । अर्घधातोरधिकरणे घञ् । ४ अवक्रीयतेऽनेन **अवक्रयः** । 'डुक्रीञ् द्रव्यविनिमये'(क्र्या.उ.अ.), 'एरच्'३।३।५६॥ इत्यच् । ''वष्टि भागुरिरल्लोपम्-''[भागुरिकृतकारिका]इति वक्रयोऽपि । चत्वारि मूल्यस्य । ''भाटकः''[शेषनाममाला ३।१५४॥] शैषिकम् ॥८६८॥

**मूलद्रव्यं परिपणो नीवी**

१ मूलं लाभकरणं द्रव्यं **मूलद्रव्यम्** । २ परिपण्यते वृद्ध्यर्थं प्रयुज्यते **परिपणः** । 'पण व्यवहारे स्तुतौ च' (भ्वा.आ.से.), 'पुंसि संज्ञायाम्-'३।३।११८॥ इति घः । ३ नीयते वृद्धिमिति **नीवी** । पृषोदरादिः । नीवीव परहस्तेऽर्पणाद् वा । निपूर्वाद् 'वेञ् तन्तुसन्ताने'(भ्वा.उ.अ.) अस्माद् वा, '[नेरीच्]च'(चान्द्रोणा-१।५९॥)इति डिः, 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीष्[5], वे(ने)-र्दीर्घश्च । द्वे मूलद्रव्यस्य । 'नीवी' इति भाषा ॥

**लाभोऽधिकं फलम्[6] ।**

१ मूलधनविक्रयाद् यदधिकं लभ्यते, स **लाभः** । 'डुलभष् प्राप्तौ'(भ्वा.आ.अ.), कर्मणि घञ् । २ फलति **फलम्** । 'फल निष्पत्तौ'(भ्वा.प.से.), अच् । ''फलं हेतुसमुत्थे स्यात् फलके व्युष्टिलाभयोः''[विश्वप्रकाशकोशः, लान्तवर्गः, श्लो-२]इति महेश्वरः । अधिकं मूलद्रव्यादतिरिक्तं निष्पन्नम्, स लाभः फलमित्यन्वयः । द्वे लाभस्य ॥

**परिदानं विनिमयो नैमेयः परिवर्तनम् ॥८६९॥**
**व्यतिहारः परावर्तो वैमेयो निमयोऽपि च ।**

१ परिवर्तनाद् दानं **परिदानम्** । २ विनिमानं **विनिमयः** । 'डुमिञ् प्रक्षेपणे'(स्वा.उ.अ.), 'एरच्' ३।३।५६॥ इत्यच्, 'मीनातिमिनोतिदीङां ल्यपि च'६।१।५०॥ इत्यात्वे प्राप्ते 'निमिमीलियां खलचोरात्वनिषेधः'(वा-३।१।५०॥) । ३ डुमिञः 'अचो यत्'३।१।९७॥ इति यत्, 'इ(ई)द्यति' ६।४।६५॥ इतीत्वम्, गुणः, निमेयः, प्रज्ञाद्यणि **नैमेयः** । निमेये परिवर्तनीये भव इति वा नैमेयः । 'तत्र भवः'४।३।५३॥ इत्यण् । ४ परिवर्त्यते **परिवर्तनम्** । 'वृतु वर्तने'(भ्वा.आ.से.), ल्युट् ॥८६९॥ ५ व्यत्ययेन हरणं **व्यतिहारः** । 'हृञ् हरणे'(भ्वा.उ.अ.), भावे घञ् । ६ परावर्तनं **परावर्तः** । ७ विमी(मे)ये परिवर्तनीये भवो **वैमेयः** । 'तत्र भवः'४।३।५३॥ इत्यण् । ८ निमानं **निमयः** । 'डुमिञ् प्रक्षेपणे'(स्वा.उ.अ.), 'एरच्'३।३।५६॥ । अष्टौ 'पालटवउं[7]' इति ख्यातस्य[8] ॥

**निक्षेपोपनिधी न्यासे**

१ निक्षिप्यते भूतलादाविति **निक्षेपः** । 'क्षिप प्रेरणे' (दि.प.अ., तु.उ.अ.), कर्मणि घञ् । २ उप समीपे निधीयते **उपनिधिः** । 'उपसर्गे घोः किः'३।३।९२॥ ३ न्यस्यते निक्षिप्यते **न्यासः**, तत्र[9] । निपूर्वः 'असु क्षेपणे'(दि.प.से.), कर्मणि घञ् । त्रीणि 'थांपणि' इति ख्यातस्य ॥

''वासनस्थमनाख्याय हस्तेऽन्यस्य यदर्पितम् ।
द्रव्यं तदुपनिधिर्न्यासः प्रकाश्यस्थापितं तु यत्[10] ॥१॥''

[याज्ञवल्क्यस्मृतिः, आचाराध्यायः, श्लो-६५] ।

''निक्षेपः शिल्पिहस्ते तु[11] भाण्डं संस्कर्तुमर्पितम् ।''
[[12]]इति स्मार्तो भेदोऽत्र नाश्रितः ॥

**प्रतिदानं तदर्पणम्[13] ॥८७०॥**

१ प्रतीपं दानं **प्रतिदानम्** । प्रतिपूर्वो ददातिर्न्यासार्थः । तस्य न्यासस्य 'थांपणी[14]' इति ख्यातस्याऽर्पणं तदर्पणम् । 'ऋ गतौ'(जु.प.अ.), णिच्, 'अर्तिह्रीव्लीरीक्नूयी-'७।३।३६॥ इत्यादिना पुक्, 'पुगन्तलघूपध[15]-'७।३।-८६॥ इति गुणः । एकं प्रतिदानस्य । 'थांपणि पाछी देवी' इति भाषा ॥८७०॥

**क्रेतव्यमात्रके क्रेयम्**

१. 'पा-' इति१ ॥ २. 'पुंक्लीबलिङ्गः' इति३ ॥ ३. '-मोऽयम्' इति३ ॥ ४. 'संज्ञायां मेघनिदाघावदाघार्घाः' इति गणसूत्रस्वरूपम् ॥ ५. 'ङीपि' इति१.४ ॥ ६. तुलनीयोऽमरकोषः २।८।८०॥ ७. '-वौ' इति३ ॥ ८. 'भाषा' इति१ ॥ ९. १.२.४प्रतिषु न दृश्यते ॥ १०. याज्ञवल्क्यस्मृत्याम् -''वासनस्थमनाख्याय हस्तेऽन्यस्य यदर्प्यते । द्रव्यं तदौपनिधिकं प्रतिदेयं तथैव तत् ॥'' इति दृश्यते, पृ.२२१॥ ११. '-स्तेषु' इति३ ॥ १२. द्र. अम.क्षीर. २।९।८१॥, पृ.२१८॥, स्वोपज्ञटीका ३।८७०॥, पृ.१९२॥ १३. तुलनीयोऽमरकोषः २।९।८१॥ १४. '-पि-' इति२ ॥ १५. इतोऽग्रे १प्रतौ 'स्य' इति दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ क्रेतव्यमेव क्रेतव्यमात्रम्, ततः स्वार्थे कनि **क्रेतव्यमात्रकम्**, तत्र । यथा क्रेयो गौर्वर्तते, न च क्रय्योऽस्ति । कोऽर्थः ? गौः क्रेतव्यो वर्तते, न च क्रय्यः, क्रयनिमित्तं हट्टे परधान्याम्बरादिवस्तुवत् प्रसारितो नास्तीत्यर्थः । २ क्रेतुं योग्यं **क्रेयम्** । 'डुक्रीञ् द्रव्यविनिमये'(क्र्या.उ.अ.), 'अचो यत्' ३।१।९७॥इति यत्, 'सार्वधातुकार्धधातुकयोः'७।३।८४॥इति गुणः । सामान्यतो द्वे 'वेचाऊ वस्तु' इति ख्यातस्य ॥

## क्रय्यं न्यस्तं क्रयाय यत्[1] ।

१ यत् क्रयाय विक्रयनिमित्तं[2] हट्टे न्यस्तं प्रसारितम्, तत् **क्रय्यम्** इत्युच्यते । क्रयाय प्रसारितं क्रय्यम् । 'डुक्रीञ् द्रव्यविनिमये'(क्र्या.उ.अ.), 'अचो यत्'३।१।९७॥, 'क्रय्यस्तदर्थे'६।१।८२॥ इति साधुः । एकमापणादौ विक्रयाय प्रसारितस्य ॥

## पणितव्यं तु विक्रेयं पण्यम्

१ पण्यते **पणितव्यम्** । 'पण व्यवहारे स्तुतौ च' (भ्वा.आ.से.), 'तव्यत्तव्यानीयरः'३।१।९६॥, 'आर्धधातुकस्य-'७।२।३५॥इतीट् । २ विक्रीयते **विक्रेयम्** । 'अचो यत्'३।१।९७॥ । ३ पण्यते **पण्यम्** । 'अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु'३।१।१०१॥ इति साधुः । "पण्यं क्रय्यादयस्त्रिषु"[अमरकोषः २।९।८२॥]इत्यमरः । त्रीणि '[3]क्रयाण[4]' इति ख्यातस्य ॥

## सत्यापनं पुनः ॥८७१॥
## सत्यङ्कारः सत्याकृतिः

१ अवश्यं मयैतद् विक्रेतव्यमिति सत्यस्य करणं **सत्यापनम्**, पवर्गाद्यमध्यम् । 'सत्यापपाश-'३।१।२५॥ इत्यादिना णिच् । "सत्यापना सत्याकृतिः"[[5] ]इति स्त्रीकाण्डे वोपालितः ॥८७१॥ २ सत्यस्य करणं **सत्यङ्कारः** । 'कारे सत्यागदस्य'६।३।७०॥ इति मुम्[6] । ३ सत्यस्य कृतिः **सत्याकृतिः** । 'सत्यादशपथे'५।४।६६॥ इति[7] डाच् । त्रीणि 'संचकार' इति ख्यातस्य ॥

## तुल्यौ विपणविक्रयौ ।

१ विपणनं **विपणः** । घञर्थे कः । "चुराद्यदन्तादच्"[ ]इत्येके । २ विक्रयणं **विक्रयः** । 'एरच्'३।३।५६॥ इत्यच् । द्वे विक्रयस्य । 'वेचवउं[8]' इति भाषा ॥

## गण्यं गणेयं सङ्ख्येयम्

१ गण्यते **गण्यम्** । 'गण सङ्ख्याने'(चु.उ.से.), णिच्, 'अचो यत्'३।१।९७॥ इति यत्[9], 'णेरनिटि'६।४।५१॥ इति णिलोपः । २ 'गणेरेयः'( )इत्येये **गणेयम्** । "पारंपरार्धं गणितं यदि स्याद् गणेयनिःशेषगुणोऽपि स स्यात्" [नैषधीयचरितम्, सर्गः-३, श्लो-४०]इति श्रीहर्षः । "गणनीयं तु गणेयम्"[[10] ]इति वाचस्पतिः । ३ सङ्ख्यायते **सङ्ख्येयम्** । 'ख्या प्रकथने'(अ.प.अ.), 'अचो यत्'३।१।९७॥, 'ईद्यति'६।४।६५॥इतीत्वम्, 'सार्वधातुका-'७।३।८४॥ इति गुणः । त्रीणि गणनार्हस्य ॥

## सङ्ख्या त्वेकादिका भवेत् ॥८७२॥

१ एत्येकत्वसङ्ख्यामिति एकः । 'इण् गतौ'(अ.प.अ.), 'इण्भीकापाशल्यतिमर्चिभ्यः कन्[11]'(उणा-३२३), 'सार्वधातुका-'७।३।८४॥ इति गुणः । एक आदिरस्या एकादिका, आदिग्रहणाद् द्वौ त्रयः चत्वारः एते वाच्यलिङ्गाः, पञ्च सप्तेत्यादयोऽष्टादशान्ता अलिङ्गाः । यल्लिङ्गानुशासनम्-"नन्ता[12] सङ्ख्या डतिर्युष्मदस्मच्च[13] स्युरलिङ्गकाः[14]" [श्रीहेमचन्द्राचार्यकृतलिङ्गानुशासनम्, अलिङ्गाः, श्लो-४] इति । षष्शब्दस्य रूपविशेषाभावात् लिङ्गनिर्णयो नोक्तः, एकोनविंशतित्रिंशदित्यादयः शतादर्वाक् स्त्रीलिङ्गाः, षष्टिस्तु त्रिलिङ्गनिर्णये पृथग्लिङ्ग उक्तः । अत्र च दशशब्दश्रुतिपर्यन्तं अष्टादश यावदेकादिकाः सङ्ख्याः सङ्ख्येयद्रव्ये वर्तन्ते, तेन सह सामानाधिकरण्येनैव तासां वृत्तिरित्यर्थः । यथा-एको विप्रः, दश विप्रा इति, न तु वैयधिकरण्येन वृत्तिरिति, न तु एको विप्रस्य, दश विप्राणामित्यादि । विंशत्याद्यास्तु सङ्ख्याशब्दा एकत्वे वर्तमानाः सङ्ख्येये सङ्ख्याने च वर्तन्ते । यथा-विंशतिर्घटाः, विंशतिर्घटानाम्, शतं गावः, शतं गवामिति । यदाह वाचस्पतिः-

---

१. 'तत्' इति४॥ २. '-त्त-' इति२॥ ३. 'क-' इति२॥ ४. '-णा' इति३, '-णुं' इति४॥ ५. द्र. टीकासर्वस्वम्, भा-३, २।९।८३॥, पृ.२२२॥, पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-६५४, पृ.७४३॥, रामाश्रमी २।९।८२॥, पृ.४३७॥ ६. 'णमुल्' इति१.२.४॥ ७. 'इत्यादि' इति३॥ ८. '-वो' इति३, '-वौ' इति४॥ ९. 'इति यत्' इति१.२.३प्रतिषु न दृश्यते ॥ १०. द्र. स्वोपज्ञटीका ३।८७२॥, पृ.१९२॥ ११. 'ङकन्' इति४॥ १२. 'नान्ता' इति३.४॥ १३. '-स्माच्च' इति४॥ १४. '-ङ्गिका' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"अष्टादशभ्य एकाद्याः सङ्ख्याः सङ्ख्येयगोचराः ।
ऊनविंशत्यादिकास्तु सर्वाः सङ्ख्येयसङ्ख्ययोः ॥१॥"

[[1]]इति । भाष्यकारोऽपि-"अष्टादशभ्यः सङ्ख्या[2]: सङ्ख्येये वर्तन्ते[3], ततः परं सङ्ख्याने सङ्ख्येये च"[ ]इति[4] । यदा तु भेदविवक्षायां सङ्ख्यान्तरस्याऽर्थेऽभिधेये विंशत्यादयो वर्तन्ते, तदा तत्सामानाधिकरण्यादुपचारेण तेभ्यो द्विवचनबहुवचनेऽपि भवतः, यथा-द्वे विंशती, तिस्रो विंशतय इति । सामानाधिकरण्याभावेऽपि गवां विंशती, गवां विंशतय इति । विंशत्यादिसङ्ख्यासु नवतिमभिवाप्य भिन्नलिङ्गेनाऽपि सामानाधिकरण्ये स्त्रीलिङ्गाः, यथा विंशत्या पुरुषैः कृतम्, विंशतिः कुण्डानि, विंशतिः श्रुतयः, अष्टाविंशति यावत्, एवं त्रिंशच्छ्रुतिरष्टत्रिंशतं यावत् । पङ्क्तिशब्दोऽपि दशसङ्ख्यावाची । "पङ्क्तिर्दशाक्षरच्छन्दोदशसङ्ख्यावलीष्वपि"[ विश्वप्रकाशकोशः, तान्तवर्गः, श्लो-६९ ]इति विश्वः ॥८७२॥

**यथोत्तरं दशगुणं भवेदेको[1] दशा[2]ऽमुतः ।**
**शतं[3] सहस्त्रम[4]युतं[5] लक्ष[6]प्रयुत[7]कोटयः[8] ॥८७३॥**
**अर्बुद[9]मब्जं[10] खर्वं[11] च निखर्वं[12] च महाम्बुजम्[13] ।**
**शङ्कु[14]र्वार्द्धि[15]रन्त्यं[16] मध्यं[17] परार्द्धं[18] चेति नामतः ॥८७४॥**

१ यथोत्तरं यथाग्रं एको दशभिर्गणितः सङ्ख्यातः गुणितोऽभ्यस्तो[5] वा **दश** भवेत् स्यात् । 'गण सङ्ख्याने' (चु.उ.से.)आद्यस्वरादिः । गण्यते गणः । दश गणाः सङ्ख्या यत्र तद् दशगणम्, क्रियाविशेषणमेतत् । "गणः समूहे प्रथमे[6] सङ्ख्यासैन्यप्रभेदयोः"[ विश्वप्रकाशकोशः, णान्तवर्गः, श्लो-२ ]इति महेश्वरः । दशभिर्गुणोऽभ्यासो यस्य तद् दशगुणमिति, पञ्चमस्वरादिरपि गुणशब्द इत्यन्ये[7] । 'कुण गुण[8] आमन्त्रणे'(चु.उ.से.), आमन्त्रणं गूढोक्तिः"[ ]इति माधवः । "गुण अभ्यासे'(    )इत्यस्याऽपि धातोर्गुणशब्दः"[ ]इत्यन्ये । यथोत्तरं दशभिर्गणिता, दश, अमुतः दशतः मानमेषां सङ्ख्येयानामस्य वा सङ्ख्यानमस्य **शतम्** ३ । एवं दश शतानि मानमेषामस्य वा **सहस्त्रम्**, दन्त्यसकारम् ४ । दशसहस्राणि **अयुतम्** ५ । शतादयस्त्रयः पुंक्लीबलिङ्गाः । दशाऽयुतानि **लक्षम्**, स्त्रीक्लीबलिङ्ग[9]:, नियुतमपि लक्षपर्यायः ६ । दश लक्षाणि **प्रयुतम्**, पुंक्ली.७ । दश प्रयुतानि **कोटिः**, स्त्रीलिङ्गः ८ ॥८७३॥ दश कोटयः **अर्बुदम्**, पुंक्ली. ९ । दशाऽर्बुदानि **अब्जम्** १० । दशाऽब्जानि **खर्वम्** ११ । दश खर्वाणि **निखर्वम्** १२ । दश निखर्वाणि **महाम्बुजम्** १३ । दश महाम्बुजानि **शङ्कुः**, पुंस्त्रीलिङ्गः १४ । दश शङ्कवो **वार्द्धिः** समुद्रः, पुंलिङ्गः १५ । दश वार्द्धयः **अन्त्यम्** १६ । दशान्या-(न्त्या)नि **मध्यम्** १७ । दश मध्यानि **परार्द्धम्** इति १८ । यथोक्तम्-

"एकं दश शतमस्मात् सहस्रमयुतं ततः परं लक्षम् ।
प्रयुतं कोटिमथाऽर्बुदमब्जं खर्वं निखर्वं च ॥१॥
तस्मान्महासरोजं शङ्कुं सरितां पतिं ततस्त्वन्त्यम् ।
मध्यं परार्द्धमाहुर्यथोत्तरं दशगुणं तज्ज्ञाः ॥२॥"[[10]]इति ।

[11]इत्थमेकादीनि परार्द्धान्तानि अष्टादशगणितस्थानानि ॥८७४॥

## असङ्ख्यं[1] द्वीपवार्ध्यादि

१ न विद्यते सङ्ख्या गणनमस्य **असङ्ख्यम्** । द्वीपा जम्बूद्वीपादयः, वार्धयोऽब्धयः लवणोदध्यादयः, ते आदिर्यस्य तत् द्वीपवार्ध्यादि, [ आदिग्रहणात् चन्द्राऽर्कादयः ] । यदुक्तम्-"असङ्ख्या द्वीपोदधयः"[[12]]इति । सामान्यत एकं द्वीपवार्ध्यादीनामसङ्ख्यमिति ॥

## पुद्गलाऽऽत्माद्यऽनन्तकम्[1] ।

१ पुतः शरीराद् गलति पुद्गलः, रूपादिमद् द्रव्यम्, परमाणुलक्षणम्, आत्मा जीवः, स आदिर्यस्य तत् पुद्गलात्मादि[13], आदे[14]राकाशप्रदेशादि । नास्त्यन्तोऽस्य[15] अनन्तम्[16], ततः कनि **अनन्तकम्** । "अनन्तं गगनेऽनन्तं भवेदनवधौ त्रिषु" [ विश्वलोचनकोशः, तान्तवर्गः, श्लो-७८ ]इति श्रीधरः । सामान्यत एकं पुद्गलात्मादीनाम् ॥

---

१. द्र. स्वोपज्ञटीका३।८७२॥, पृ.१९२॥ २. '-ख्या' इति३॥ ३. 'वर्तते' इति३॥ ४. '-ङ्गः' इति३॥ ५. 'अभ्यस्तो गुणितो' इति४॥ ६. 'प्रमथे' इति३.४॥ ७. 'इत्येके' इति४॥ ८. 'गुण गण' इति४॥ ९. '-लिङ्गः' इति ३प्रतौ नास्ति ॥ १०. द्र.स्वोपज्ञटीका३।८७४॥, पृ.१९३॥, टीकासर्वस्वम्, भा-३, २।९।८५॥, पृ.२२४॥, "यदाहुः-एकदशशतसहस्राण्युतं प्रयुताख्यलक्षमथ नियुतम् । अर्बुदकोटिन्यर्बुदपद्मं खर्वं निखर्वमिति दशभिः ॥ गुणनान्महाब्दशङ्कू समुद्रमध्यान्तमथ परार्धं च । स्वहतं परार्धममितं तत्स्वहतं संख्येति । प्रयुतसंज्ञं लक्षमर्बुदसंज्ञा कोटिरित्यर्थः" इति क्षीरस्वामिकृतटीका २।९।८४॥, पृ.२१९॥ ११. 'इत्येका-' इति३॥ १२. द्र. स्वोपज्ञटीका ३।८७५॥, पृ.१९३॥, तत्र 'असङ्ख्याता द्वीपसमुद्राः' इति दृश्यते ॥ १३. '-लादि' इति४॥ १४. 'आदिग्रहणादाका-' इति३॥ १५. '-न्तो प्रदेशोऽस्य' इति४॥ १६. ' न्तः' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सांयात्रिकः[1] पोतवणिक्[2][१]**

१ सम्पूर्वाद् यातेः ष्ट्रन्, अजादिपाठाट्टाप्, संयात्रा द्वीपान्तरगमनम् । "तथा [च] सम्पूर्वस्य[२] यातेर्द्वीपान्तरगमने वृत्तिरिति चाणक्यटीका"[३]इति कलिङ्गः । तदस्य 'प्रयोजनम्'५।१।१०९॥ इति ठक् [**सांयात्रिकः**]। "सम्यग् यात्रा संयात्रा, तया व्यवहरतीति ठक्"[३]इति पञ्जिका । पोतेन वहित्रेणोपलक्षितो वणिक् **पोतवणिक्** । ([४]पोतस्य वणिक् पोतवणिगिति वा,) जकारान्तः । एकं सांयात्रिकस्य। 'प्रवहणी वाणीआ' इति भाषा ॥

**यानपात्रं[1] वहित्रकम्[2] ॥८७५॥**
**बोहित्थं[3] वहनं[4] पोतः[5]**

१ जलमार्गे[५] यानाय पात्रं **यानपात्रम्** । २ उह्यतेऽनेन **वहित्रम्** ।'वह प्रापणे'(भ्वा.उ.अ.), 'अशित्रादिभ्यः-'(उणा-६१२)इतीत्रः, स्वार्थे कः[६] ॥८७५॥ ३ बहिस्तिष्ठति **बोहित्थम्**, पृषोदरादिः । ४ उह्यतेऽनेन **वहनम्** । करणे ल्युट् । ५ पूयते पुनाति रक्षति वा **पोतः** । 'पूञ्(पूङ्) पवने' (भ्वा.आ.से.), 'हसिमृग्रिण्वाऽमिदमितमिलूपूधू(धु)र्विभ्यस्तन्'(उणा-३६६) । पञ्च 'वाहण[७]' इति ख्यातस्य ॥

**पोतवाहो[1] नियामकः[2] ।**
**निर्यामः[3]**

१ पोतं वहित्रं वाहयतीति **पोतवाहः** ।'कर्मण्यण्' ३।२।१॥ । २ नियामयति नियच्छति **नियामकः** । निपूर्वः 'यमु(यम) नियमने'(भ्वा.प.अ.), ण्वुल् । ३ **निर्यामः**, निर्पूर्वः । त्रीणि पोतवाहस्य ।'मालिमनिजाम' इनि भाषा ॥

**कर्णधारस्तु[1] नाविकः[2]**

१ कर्णमरित्रं धरति **कर्णधारः** । 'धृञ् धारणे' (भ्वा.उ.अ.), 'कर्मण्यण्'३।२।१॥ । "कर्णः श्रोत्रमरित्रं च" [८]इति दुर्गः[९] । कर्णप्रायं बृहन्तं के निपतन्तं धरतीति वा । २ नावा कृत्वा तरति **नाविकः** । 'नौद्व्यचष्ठन्' ४।४।७॥ इति ठन्[१०] । द्वे कर्णधारस्य । 'नाकूआ खलासि आखरूआ[११]' इति भाषा ॥

**नौस्तु[1] मङ्गिनी[2] ॥८७६॥**
**तरीतरण्यौ[3][4] बेडा[5]**

१ नुद्यते कर्णधारैरिति **नौः**, स्त्रीलिङ्गः ।'नुद (णुद) प्रेरणे'(तु.उ.अ.), 'ग्लानुदिभ्यां डौः'(उणा-२२२), 'टेः' ६।४।१४३॥ इति उद्भागलोपः । २ मङ्गो नौशीर्षमस्त्यस्यां **मङ्गिनी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः, 'ऋन्नेभ्यो ङीप्'४।१।५॥ ॥८७६॥ ३ तरन्त्यनया तरिः । 'तॄ प्लवनतरणयोः'(भ्वा.प.से.), 'अच इः' (उणा-५७८)इति इः, 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि **तरी**, नदीवत् । यद्वा 'अवितॄस्तृतन्त्रिभ्य ईः'(उणा-४३८)इतीप्रत्यये तरी, तर्यौ, तर्यः इत्याद्यपि । ४ तरन्त्यनया तरणिः । '-अश(अश्य)-वितॄभ्योऽनिः'(उणा-२५९)इत्यनिः, 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि **तरणी**, नदीवत् । ५ बिड्यत आक्रुश्यतेऽस्यां **बेडा** ।'बिड आक्रोशे'( ), अधिकरणे घञ् । पञ्च 'बेडी[१२]' इति ख्यातायाः ॥

**अथ द्रोणी[1] काष्ठाम्बुवाहिनी ।**

१ द्रवति गच्छति अम्भोऽस्यां **द्रोणी** । 'द्रु द्रु गतौ'(भ्वा.प.अ.), 'वहिशि(श्रि)श्रुयुद्रूग्लाहात्वरिभ्यो[१३] निः (नित्)'(उणा-४९०)इति निः, द्रोणिः, ततः 'कृदिकारात्-' (गणसू-४।१।४५॥)इति ङीषि द्रोणी । द्रोणिरपि, अत एव- "मरकतमणिद्रोणिसरला-"[१४]इति पूर्वकविप्रयोगः । द्रुणिः पञ्चमस्वरादिरपि । 'द्रुण हिंसायां कौटिल्ये च[१५]'(तु.प.से.), 'इगुपधात् कित्[१६]'(उणा-५५९)इति इः । 'कृदिकारात्-' (गणसू-४।१।४५॥)इति ङीषि द्रोणी[१७] च । "काष्ठाम्बुसेचनी द्रुणिश्च"[१८]इति रूपरत्नाकरः । २ पुनः पुनरम्बु वहति अम्बुवाहिनी । ग्रहादित्वाण्णिनिः । काष्ठघटिता अम्बुवाहिनी **काष्ठाम्बुवाहिनी** । काष्ठमम्बु च[१९] वहति वा । मिश्रास्तु- "काष्ठमुपलक्षणं काष्ठाऽश्मादिमयी जलधारिणी द्रोणी"[२०] इत्याहुः । द्वे द्रोण्याः । 'दुणीया' इति भाषा ॥

**नौकादण्डः[1] क्षेपणी[2] स्यात्[२१]**

---

१. तुलनीयोऽमरकोषः १।१०।१२॥ २. '-र्वाद्' इति४॥ ३. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२४०, पृ.२८६॥ ४. कोष्ठान्तर्गतपाठस्थाने ४प्रतौ 'पोतवणिगिति' इति दृश्यते ॥ ५. '-र्गो' इति३.४॥ ६. 'स्वार्थे कः' इति१.२प्रत्योर्नास्ति ॥ ७. '-न' इति३॥ ८. द्र. रामाश्रमी १।१०।१२॥, पृ.१२४॥ ९. 'दुग्नः' इति४॥ १०. 'ठक्' इति४॥ ११. '-रुआ' इति२.३॥ १२. 'बे-' इति१.२॥ १३. '-युग्ला-' इत्युणादिगणे ॥ १४. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२३९, पृ.२८५॥ १५. 'द्रुण हिंसागतिकौटिल्येषु' इति क्षीरतरङ्गिण्यादयः ॥ १६. 'किः' इति४॥ १७. 'द्रुणी' इति३॥ १८. द्र. रामाश्रमी १।१०।११॥, पृ.१२४॥ १९. १.२प्रत्योर्नास्ति ॥ २०. द्र. अम.क्षीर. १।९।११॥, पृ.६३॥, स्वोपज्ञटीका ३।८७७॥, पृ.१९३॥ २१. तुलनीयोऽमरकोषः १।१०।१३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ क्षिप्यतेऽनया **क्षेपणी** । 'क्षिप प्रेरणे'(दि.प.अ., तु.उ.अ.), 'क्षिपेः किच्च'(उणा-२६४)इत्यनिः, ''आतिदेशिककार्यानित्यत्वाद् गुणाभावाभावे[१] क्षेपणिः, 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि क्षेपणी च''[२] इति माधवी । क्षिप्यतेऽनयेति करणे ल्युट् वा, गौरादिः । नौकायां दण्डः येन नौर्वाह्यतेऽसौ नौकादण्डस्तस्यैकम् ॥

**गुणवृक्षस्तु कूपकः ॥८७७॥**

१ गुणानां रज्जूनां वृक्ष इव **गुणवृक्षः** । २ कूपाकृत्याधारगर्ते कायति स्वपिति **कूपकः** । 'आतोऽनुपसर्गे कः'३।२।३॥ । ''पोतो ध्वजपटाद्याधारः''[ ]इत्येके । गौडस्तु-'जलान्तस्तरून् कूपकानाह[३] । द्वे कूपकस्य । 'कूआथंभ' इति भाषा ॥८७७॥

**पोलिन्दास्त्वन्तरादण्डाः**

१ पोलन्ति महत्त्वं यान्ति **पोलिन्दाः** । 'पुल महत्त्वे'(भ्वा.प.से.), 'कल्यलिपुलि-'(हैमोणा-२४६)इति इन्दक्, बाहुलकाद् गुणः । नौकाया मध्ये दण्डा अन्तरादण्डाः । एकं 'गाभलाँ[४]' इति ख्यातस्य ॥

**स्यान्मङ्गो मङ्गिनीशिरः ।**

१ मङ्गत्यनेन **मङ्गः** । 'मगि गतौ'(भ्वा.पसे.), अच्, पुंस्ययम्[५] । वैजयन्ती तु-''नौशिरो मङ्गमस्त्रियाम्'' [वैजयन्तीकोषः ४।२।१७॥]इति क्लीबेऽप्याह । मङ्गिनी नौः, तस्याः शिर उपरिभागः [मङ्गिनीशिरः] ॥

**अभ्रिस्तु काष्ठकुद्दालः**

१ अभ्रति[६] गच्छति **अभ्रिः**, स्त्रीलिङ्गः । 'अभ्र गतौ'(भ्वा.प.से.), 'सर्वधातुभ्यः इन्'(उणा-५५७), 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि अभ्री च । कुं भुवमुद्दालयति कुद्दालः । 'दल विशरणे'(भ्वा.प.से.), हेतुमण्णिच्, 'कर्मण्यण्'३।२।१॥, शकन्ध्वादिः । काष्ठस्य कुद्दालः काष्ठकुद्दालः । येन निखन्यते भग्नं[७] पोतादि कुथेन पूर्यते, तस्यैकम् ॥

**सेकपात्रं तु सेचनम्[८] ॥८७८॥**

१ सेकाय सेकस्य वा पात्रं सेकपात्रम् । सिच्यतेऽनेन नौजलं **सेचनम्** । 'षिचिर् (षिच) क्षरणे'(तु.उ.अ.), करणे ल्युट् । येन नावो जलमुद्धियते, तस्यैकं क्वचित् । 'नावलाँ[९]' इति भाषा ॥८७८॥

**केनिपातः कोटिपात्रमरित्रं[१०]**

१ के जले निपात्यते **केनिपातः** । कर्मणि घञ्, 'संज्ञायाम्'२।१।४४॥इति समासः, 'तत्पुरुषे कृति-'६।३।१४॥ इत्यलुक् । के निपातोऽस्येति वा । 'हलदन्तात् सप्तम्याः संज्ञायाम्'६।३।९॥ इत्यलुक् । २ कोटिभिः काष्ठाग्रभागैः पाति **कोटिपात्रम्** । ['सर्वधातुभ्यः ष्ट्रन्'(उणा-५९८)इति ष्ट्रन्] । ३ ऋच्छत्यनेन **अरित्रम्** । 'ऋ गतौ'(भ्वा.प.अ.), 'अर्तिलूधूसूखनसहचर इत्रः'३।२।१८४॥, गुणः, [तत्र] । कर्णोऽपि । ''कर्णः श्रोत्रमरित्रं च''[ ]इति दुर्गः । त्रीणि 'आउलाँ[११]' इति ख्यातस्य ॥

**अथोडुपः प्लवः ।**

**कोलो भेलस्तरण्डश्च**

१ उडुर्जलम्, तथा च-''जलहस्तिनीत्यर्थे उडुहस्तिनी सहस्रवर्णम्''[१२]इति हरिप्रबोधः, ''उडव आपः'' [१२]इति भिक्षाकरगुप्तश्च । उडुनि जले, उडुनो जलाद् वा पाति **उडुपः**, पुंक्ली., ह्रस्वादिर्ह्रस्वमध्यः[१३] । 'पा रक्षणे' (अ.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥ । ''उडुपश्चन्द्रभेलयोः''[१४]इति धरणिः, चन्द्रगोमी च । ''अतः पुंस्ययम्, 'ऊदनोर्देशे'६।३।९८॥ इति दीर्घकरणमनोरन्यतोऽपि यथा स्यात्, तेन उत्तरत्यद्भ्यः, उदुपदाद् अपशब्दस्याऽकारस्योत्वे नैरुक्तो वर्णविकारे 'उदूपः' इत्यपि''[१५]इत्युज्ज्वलदत्तः । २ प्लवति(प्लवते) इति **प्लवः**। 'मेवृ प्लु गतौ'( ), अच् । प्लवन्तेऽनेनेति, 'ॠदोरप्'३।३।५७॥ वा । कोलयति घनीभवति **कोलः** । 'कुल संस्त्याने'(भ्वा.प.से.), ज्वलादित्वाण्णः । ४ भिल्यते **भेलः** । भिलिः सौत्रः,

१. 'गुणाभावे' इति४॥ २. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२४१, पृ.२८७॥ ३. द्र. अम.क्षीर. १।९।१२॥, पृ.६३॥, स्वोपज्ञटीका ३।८७७॥, पृ.१९३॥, तयोः 'पोतो' इत्यस्य स्थाने 'पोते' इति दृश्यते ॥ ४. '-भाला' इति२, '-भिला' इति३॥ ५. 'अयम्' ४प्रतौ नास्ति ॥ ६. '-न्ति' इति३॥ ७. '-ग्न-' इति३॥ ८. तुलनीयोऽमरकोषः१।१०।१३॥ ९. '-ला' इति३॥ १०. '-त्रं' इति४॥ ११. '-ला' इति३.४॥ १२. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२३९, पृ.२८४॥ ''ददृशुश्चिरमुडुकरिणीसहस्रमन्तं सुधामदं सकलं'' इत्यत्र हरिप्रबोधे कीर्त्तिमतालङ्कारप्रणीतटीकायाम् 'उडव आप' इति व्याख्यातम् । अतस्ततः पातीत्युडुपः ।'' इति टीकासर्वस्वम्, भा-१, १।१०।११॥, पृ.१८२॥ १३. '-दिह्न' इति३॥ १४. द्र. टीकासर्वस्वम्, भा-१, १।१०।११॥, पृ.१८२॥, तत्र 'उडुपो हेलचन्द्रयोः' इति दृश्यते, पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२३९, पृ.२८४॥, रामाश्रमी १।१०।११॥, पृ.१२४॥ १५. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२३९, पृ.२८४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'कर्मण्यण्'३।२।१॥ । ५ तीर्यतेऽनेन **तरण्डः**, पुंक्ली. । 'तृ प्लवनतरणयोः'(भ्वा.प.से.), 'अण्डन् कृसृभृवृञः' (उणा-१२६)इत्यत्र प्राक्प्रत्ययनिर्देशः शरण्डाद्यर्थः, तेनैतत् सिद्ध्यति । पञ्च 'त्रापाडूं घा' इति ख्यातस्य ॥

## स्यात् तरपण्यमातरः ॥८७९॥

१ तरणं तरः । 'ऋदोरप्'३।३।५७॥ । पणे साधु पण्यं मूल्यम् । तरस्य पण्यं तरपण्यम् । आतरन्त्यनेन **आतरः** । 'ऋदोरप्'३।३।५७॥ । एकं 'तूर' इति ख्यातस्य ॥८७९॥

## वृद्ध्याजीवो द्वैगुणिको वार्धुषिकः कुसीदिकः । वार्धुषिश्च

१ वृद्धिमाजीवति **वृद्ध्याजीवः** । 'कर्मण्यण्' ३।२।१॥ । २ द्विगुणं गृह्णाति **द्वैगुणिकः** । द्विगुणं गृहीतुमेकगुणं गृह्णातीति यावत् । ३ वर्धनं वृद्धिः । 'वृधु वर्धने'(भ्वा.आ.से.), 'स्त्रियां क्तिन्'३।३।९४॥, 'तितुत्र-' ७।२।९॥ इति नेट् । वृद्ध्यर्थं द्रव्यमपि वृद्धिः, तत्प्रयच्छतीति **वार्धुषिकः** । 'प्रयच्छति गर्ह्यम्'४।४।३०॥इति द्वितीयान्ताद् गर्ह्योपाधिकात् प्रयच्छतीत्यर्थे ठक्, 'वृद्धेर्वृधुष्(-षि) भावः' (वा-४।४।३०॥) च । ''वृधुषिः प्रकृत्यन्तरं च''[ ]इति वृत्तिः, वृद्धेर्गर्ह्यत्वमशास्त्रीयत्वेन । ४ कुसीदं वृद्ध्याजीविकां प्रयच्छति **कुसीदिकः**। 'कुसीददशैकादशात् ष्ठन्ष्ठचौ'४।४।३१॥इति ठन्(ष्ठन्)। षित्वात् स्त्रियां ङीषि कुसीदिकी। ५ वृधुष्यां भवो वार्धुषः । तस्याऽपत्यं **वार्धुषिः**। 'अत इञ्'४।१।९५॥ । पञ्च 'व्याजडिओ' इति ख्यातस्य ॥

## कुसीदार्थप्रयोगौ वृद्धिजीवने ॥८८०॥

१ 'कुस श्लेषणे'(दि.प.से.), दन्त्यान्तः, 'कुसेरूलोभोएवोमेदाः (कुसेरूम्भोमेदेताः)'(उणा-५४६)इतीदः, **कुसीदम्** । कुत्सितं सीदन्त्यवसन्ना भवन्त्यनया वा । कुत्सितं सदनं गतिरनया वा । कुत्सितोऽधर्माणः सीदन्त्यनया वा घञ्, कुसीदम् । 'कुसीददशैकादशा-'४।४।३१॥इति निर्देशादशित्यपि सीदादेशः । २ अर्थस्य प्रयोगः पुनः पुनः कलया दानं **अर्थप्रयोगः** । वृद्ध्या कृत्वा जीविका वृद्धिजीवनम्, तत्र। द्वे वृद्धिजीवनस्य । 'दौढी सवाई आजीविका' इत्यादिभाषा ॥८८०॥

## वृद्धिः कलान्तरम्

१ मूलद्रव्यस्य वर्धनं **वृद्धिः** । 'वृधु वृद्धौ'(भ्वा.-प.से.), 'स्त्रियां क्तिन्'३।३।९४॥ । २ मूल द्रव्यस्याऽपरा कला **कलान्तरम्** । ''वृद्धिः कलान्तरं प्रोक्तम्''[हलायुधकोशः२।५७२॥]इति हलायुधः । द्वे 'व्याज' इति ख्यातस्य ॥

## ऋणं तूद्धारः पर्युदञ्चनम् ।

१ अर्यत इति **ऋणम्** । 'ऋ गतौ'(भ्वा.प.अ.), क्तः, 'ऋणमाधमर्ण्ये'८।२।६०॥ इति साधुः । २ उद्ध्रियते गृह्यते **उद्धारः** । 'धृञ् धारणे'(भ्वा.उ.अ.), कर्मणि घञ् । ३ उदञ्च्यते गृह्यते नीयते वा उदञ्चनम् । 'अञ्चु गतिपूजनयोः'(भ्वा.प.से.), कर्मणि ल्युट् । परित उदञ्चनमुत्तमर्णाद् उद्धारत्वेन ग्रहणं **पर्युदञ्चनम्** । त्रीणि ऋणस्य । ''ऊधारि'' इति भाषा ॥

## याच्ञयाप्तं याचितकम्

१ याच्ञया प्रार्थनया आप्तं प्राप्तम्, तन्नामैकं **याचितकम्** इति । याचितेन निर्वृत्तमित्यर्थे 'अपमित्य याचिताभ्यां कक्कनौ'४।४।२१॥ इति कन् । ''अभ्यर्थ्य धत्तः खलु पद्मचन्द्रौ विभूषणं याचितकं कदाचित्''[नैषधीयचरितम्, सर्गः-७, श्लो-५६]इति श्रीहर्षः ॥

## परिवृत्यापमित्यकम् ॥८८१॥

१ परिवृत्या आप्तम् **आपमित्यकम्** इत्यन्वयः । 'मेङ् प्रतिदाने'(भ्वा.आ.अ.), 'उदीचां मेङो (माङो) व्यतिहारे'३।४।१९॥ क्त्वा, 'मयतेरिदन्यतरस्याम्'६।४।७०॥ इतीत्, 'समासेऽनञ्पूर्वे क्त्वो ल्यप्'७।१।३७॥, 'ह्रस्वस्य पिति कृति-'६।१।७१॥इति तुक्, तत आगतेऽर्थे 'अपमित्ययाचिता-'४।४।२१॥ इति कन् । ''निमयादापमित्यकम्''

---

१. '-णि' इति३.४॥ २. 'तरण्डार्थः' इति३॥ ३. द्र.मा.धातुवृत्तिः, भ्वादिः, धातुसं-४९२, पृ.१८८॥ ४. 'कुशी-' इति३॥ ५. 'इन्' इति३॥ ६. '-दिआ' इति४॥ ७. 'संश्ले-' इति४॥ ८. 'दुढी' इति१॥ ९. 'उदगृ-' इति३॥ १०. 'उ-' इति३॥ ११. '-रा' इति१, '-र' इति२॥ १२. तुलनीयोऽमरकोषः २।९।४॥ १३. '-र्थः' इति३॥ १४. 'दत्तः' इति३॥ १५. '-ञ्' इति१, '-न्' इति३.४॥ १६. 'कृति' इति ३प्रतौ न दृश्यते ॥ १७. '-ञ्' इति१.२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[अमरकोषः २।९।४॥]इत्यमरः । "निमयाद्[1] भाण्डपरिवर्तनात्"[अम.क्षीर.२।९।४॥]इति क्षीरस्वामी[2] । एकं 'पालटी लीधुं[3]' इति ख्यातस्य ॥८८१॥

**अधमर्णो ग्राहकः स्यात्**

१ अपचयहेतुत्वादधमृणमस्य **अधमर्णः** । अधमः ऋणेऽधमर्णः, अत एव निर्देशात् सप्तमीसमासः । अधमृणमस्येति बहुव्रीहिर्वा । निष्ठान्तस्य परनिपातोऽत एव निर्देशात् "ऋणेऽधमोऽधमर्णः, राजदन्तादित्वात् परनिपातः[4]" [अभि-, स्वोपज्ञटीका३।८८२॥]इत्याचार्याः । एकं ग्राहकस्य । 'ऋणीया' इति भाषा ॥

**उत्तमर्णस्तु दायकः ।**

१ उपचयहेतुत्वादुत्तममृणमस्य **उत्तमर्णः** । ऋणे उत्तम उत्तमर्णः । "राजदन्तादिः"[अभि-,स्वोपज्ञटीका ३।८८॥] इत्याचार्याः । ददाति दायकः । ण्वुल्, 'आतो युक्-' ७।३।३३॥ इति युक् । एकं दायकस्य ॥

**प्रतिभूर्लग्नकः साक्षी स्थेयः[5]**

१ धनिकाधमर्णयोरन्तरेऽस्तीति **प्रतिभूः** । 'भुवः संज्ञान्तरयोः'३।२।१७९॥ इति क्विप् । अन्तरशब्दोऽत्र न ग्रामाद्यन्तरवचनः[6] । २ लगति लग्नः । 'लगे सङ्गे'(भ्वा.-प.से.), निष्ठा, 'क्षुब्धस्वान्तध्वान्त-'७।२।१८॥ इति साधुः, ततः स्वार्थे कन् **लग्नकः** । ३ साक्षाद् द्रष्टा **साक्षी** । 'साक्षाद् द्रष्टरि-'५।२।९१॥ इतीन् (इतीनिः), 'अव्ययानां भमात्रे टिलोपः'( ) । ४ तिष्ठन्त्यस्मिन् **स्थेयः**, विवादपदनिर्णेता प्रमाणभूतः पुरुषः । चत्वारि साक्षिणः । शेषश्चात्र-

"अथ साक्षिणि स्यान्मध्यस्थः प्राश्निकोऽप्यथः ।
कूटसाक्षी मृषासाक्ष्ये सूची स्याद् दुष्टसाक्षिणि ॥१॥"

[शेषनाममाला ३।१५४-१५५] ॥

**आधिस्तु बन्धकः ॥८८२॥**

१ आधीयतेऽसौ **आधिः** । 'उपसर्गे घोः किः' ३।३।९२॥ । २ बध्यते सम्बध्यते[10] **बन्धकः** । 'बन्ध बन्धने'(क्र्या.प.अ.), 'कृञादिभ्यः [संज्ञायां] वुन्'(उणा-७१३) । यदधमर्णेन उत्तमर्णस्य भूम्यादि आयत्तं क्रियते, तन्नाम्नी द्वे । 'ग्रहणउं[11]' इति भाषा ॥८८२॥

अथ मानविशेषानाह-

**तुलाद्यैः पौतवं मानम्**

१ तुला कांटउं[12]ताकडीघडीत्यादीनि[13] विविधनामानि आद्यानि येषां ते तुलाद्याः, तैर्यन्मीयते तत् **पौतवं** मानमित्यन्वयः । पुनाति पोतुः बहुलवचनाद् भावे 'वसं तुन्(वसेस्तुन्)'(उणा-७५)इति तुन् । पोतोरिदं पौतवम् । 'तस्येदम्' ४।३।१२०॥ इत्यण् । पवर्गाद्यादिः । तुलाज्ञानं शास्त्रान्तराद् ज्ञेयम्, तथापि संक्षेपतः प्रदर्श्यते, यथा-

"ब्रह्मविष्णुमहेशानां त्रिधा प्रोक्ता तुला बुधैः ।
सूक्ष्म१मध्य२बृहत्त्वेन३ लक्ष्यन्ते लक्षणेन ताः[14] ॥१॥
शौल्बद्वयङ्गुलशिक्याऽष्टाङ्गुलियुक्तिजयष्टिका ।
ब्राह्मकण्टकमध्या सा हेमरत्नानि मानकृत् ॥२॥
हस्तखादिरदण्डार्धचर्मकाष्ठादिशिक्यका ।
रसधान्यफलादीनां मानकृद् वैष्णवी[15] तुला ॥३॥
पञ्चहस्ता लोहयष्टिर्मानादौ मानचिह्निता ।
मानकृद् वस्तुभाराणां रौद्री शिक्यविवर्जिता ॥४॥
आपलं ब्रह्मतुलया वैष्णव्या वामणं[16] ततः ।
एकस्थं गुरु तद्रौद्र्या तुलया मानमिष्यते ॥५॥
तासामनेकशो भेदास्तुलानां स्युस्त्रिधा च ते ।
सर्वे[17] स्वलक्षणैर्लक्ष्या दण्डशिक्याऽल्पगौरवैः ॥६॥
सर्वदेवमयी प्रोक्ता तुला धर्ममयी परा ।
कूटं व्यवहरेद् यस्तु तुलायां स क्षयं व्रजेत् ॥७॥"

[ ]इति तुलालक्षणम्, उन्मानमेतत्[18] । एकं पौतवमानस्य[19]। ताकटीप्रभृति, 'तोलउं[20]' इति भाषा ॥

---

१. 'विनिमयाद्' इति क्षीरस्वामिकृतटीकायाम्, २।९।४॥, पृ.२०१॥ २. 'स्वामी' इति४॥ ३. '-धु' इति३॥ ४. 'पूर्वनिपातः' इति स्वोपज्ञटीकायाम्, ३।८८२॥, पृ.१९४॥ ५. मुद्रितस्वोपज्ञटीकायां न दृश्यते ॥ ६. स्वोपज्ञटीकासहिताभिधानचिन्तमणिनाममालायाम्-'प्रतिभूर्लग्नकः' तथा 'साक्षी स्थेयः' इति पृथग्रूपेण दृश्यते, तत्तु भिन्नार्थताप्रतिबोधनाय प्रतिभाति ॥ ७. '-र्ण्य-' इति१.४॥ ८. '-रं' इति३.४॥ ९. '-णी' इति३॥ १०. १प्रतौ नास्ति ॥ ११. '-णो' इति३, '-णुं' इति४॥ १२. '-टो-' इति३॥ १३. '-दिवि-' इति४॥ १४. 'ता' इति४॥ १५. '-श्नवी' इति३॥ १६. '-नं' इति३॥ १७. 'सर्वस्व-' इति४॥ १८. 'एतदुन्मानम्' इति४॥ १९. 'पो-' इति३॥ २०. '-लो' इति३, '-लुं' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**द्रुवयं कुडवादिभिः ।**

१ कुडवप्रमुखैर्यन्मीयते तद् **द्रुवयम्** उच्यते, परिमाणमित्यर्थः । कुडवशब्देन 'पाउलउ'[१] इति [२]प्रसिद्धः[३] । द्रुः वृक्षस्तद्विकारो द्रुवयम् । 'द्रोश्च'४।३।१६१॥ इत्यनुवृत्तौ 'माने वयः'४।३।१६२॥ इति वयः । एकं सामान्येन कुडवादिपरिमाणस्य ॥

**पाय्यं हस्तादिभिः**

१ पीयते(मीयते)ऽनेन **पाय्यम्**। 'पाय्यसांनाय्य-' ३।१।१२९॥ इति साधुः । हस्तादिभिः हस्तप्रभृति[४]भिर्यन्मीयते, तस्यैकम्, प्रमाणाख्यमेतत् । यदमरः-"मानं तुलाङ्गुलिप्रस्थैः"[अमरकोषः२।९।८५॥]इति । "माति मानम्, मीयतेऽनेनेति वा[५-१], तत्र तुलादि उन्मानम्, अङ्गुल्यादि प्रमाणम्, प्रस्थादि परिमाणम् । यदाहुः-

"ऊर्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः ।
आयामस्थं[५-२] प्रमाणं स्यात् संख्या बाह्या[५-३] तु सर्वतः ॥१॥"

[अम.क्षीर.२।९।८५॥]इति क्षीरस्वामी ॥

अथ पौतवमानमाह-

**तत्र स्याद् गुञ्जाः पञ्च माषकः ॥८८३॥**

१ तत्रेति [६]पौतवे माने गुञ्जाः कृष्णलाः पञ्च सङ्ख्याः **माषकः** उच्यते । 'जष [झष शष] वष मष-' (भ्वा.प.से.)इति मूर्धन्यान्तेषु पठ्यते, ततो घञि माषः, ततः कनि माषकः, पुंक्ली[७]. । धान्यकणा दशमाषकः तथा- "द्वे कृष्णले रूप्यमाषे"[ ]इत्यादिदर्शनात् ॥८८३॥

**ते तु षोडश कर्षोऽक्षः**

१ ते माषाः षोडश सङ्ख्याः **कर्षः** स्यात् । कर्षति माषकादाधिक्यं कर्षः, पुंक्ली[८]. । 'कृष विलेखने' (भ्वा.प.अ.), अच् । २ अक्ष्णोति **अक्षः** । 'अक्ष(अक्षू) व्याप्तौ'(भ्वा.प.वे.), अच् । [९]टङ्कगणनायां चत्वारः टङ्काः कर्षः । द्वे कर्षस्य । 'तोला' इति भाषा ॥

**पलं कर्षचतुष्टयम्[१०] ।**

१ पलति **पलम्**, पुंक्ली[११]. । 'पल रक्षणे[१२]'(चु.-उ.से.), अच् । कर्षाणां चतुष्टयं कर्षचतुष्टयम्, चतुर्भिः कर्षैः पलमित्यर्थः । [९]टङ्कगणनायां षोडश टङ्काः पलः । माषकादीनां शास्त्रान्तरोक्तभेदो[१३] [१४]नैश्रिककदेशप्रसिद्धः शास्त्रान्तरादवधार्यः । एकं पलस्य ॥

**विस्तः सुवर्णो हेम्नोऽक्षे**

१ विस्यति विस्यते वा **विस्तः** । 'विस उत्सर्गे[१५]' (दि.प.से.), 'विस प्रेरणे'( )वा[१६], अतो बाहुलकात् 'हसिमृग्रिण्-'(उणा-३६६)इत्यादिना तन्[१७], 'तितुत्र-'७।२।९॥ इतीण्निषेधः, अगुणत्वं च । २ सुवर्णमस्त्यस्य[१८] **सुवर्णः** । 'अर्शआदिभ्योऽच्'५।२।१२७॥, पुंस्ययम् । रुद्रस्तु-"सुवर्णं स्वर्णरि(वि)स्तयोः"[[१९]]इति क्लीबेऽप्याह। हेम्नः सुवर्णस्य, अक्षे कर्षे । 'सुवर्णनां[२०] तोला' इति भाषा । "रूप्यमुक्तावज्रपट्टसूत्रकर्पूरादितौल्ये कर्षसंज्ञा[२१], हेम्नस्तौल्ये सुवर्णसंज्ञा कर्षस्येति[२२] विशेषः"[ ]इति लीलावतीटीका । यत्स्मृतिः- "पञ्चकृष्णलको माषस्ते सुवर्णस्तु षोडश"[ ]इति । तथा च[२३] लीलावतीकारः-

"दशार्धगुञ्जं प्रवदन्ति माषं१ माषाह्वयैः षोडशभिश्च कर्षम्२ ।
कर्षैश्चतुर्भिश्च पलं३ तुलाज्ञाः कर्षं सुवर्णस्य सुवर्णसंज्ञम् ॥१॥"

[लीलावती, परिभाषा, श्लो-४]इति । "पादत्रयं सुकरम्, सुवर्णस्य कर्षं सुवर्णसंज्ञं वदन्ति"[ ]इति तट्टीका । द्वे सुवर्णकर्षस्य ॥

**कुरुविस्तस्तु तत्पले[२४] ॥८८४॥**

१ तस्य सुवर्णस्य पलं तत्पलम्, तत्र । कुरुदेशे प्रसिद्धो विस्तो हेमपलं **कुरुविस्तः** । यन्माला- "पलेन हि सुवर्णस्य कुरुविस्तः"[[२५]]इति । हेम्नः पलं कुरुविस्त इत्यर्थः । एकं हेमपलस्य ॥८८४॥

---

१. 'पाउलवउ' इति१, 'पाउलो' इति३, 'पाइलौ' इति४॥ २. 'भाषाप्र-' इति३॥ ३. '-द्धिः' इति३॥ ४. '-तिर्य-' इति१.२.४॥ ५-१. 'मितिर्मानं मीयतेऽनेन च' इति, ५-२. 'आयामस्तु' इति, ५-३. 'भिन्ना' इति च अम.क्षीरस्वामिकृतटीकायाम्, २।९।८५॥, पृ.२१९॥ ६. 'पो-' इति३॥ ७. '-क्लीबलिङ्गः' इति४॥ ८. '-क्लीबलिङ्गः' इति३, '-क्लीबः' इति४॥ ९. 'टंका-' इति३॥ १०. तुलनीयोऽमरकोषः २।९।८६॥ ११. '-क्लीबः' इति३॥ १२. रक्षणार्थकपलधातुश्चुरादिः, अथ च विग्रहे 'पालयति' इति युक्तः, यद्वा 'पल गतौ'(भ्वा.प.से.)इति ॥ १३. '-भेदौ' इति२.४॥ १४. 'नैक-' इति३, 'नेक-' इति४॥ १५. इतोऽग्रे ३प्रतौ 'विश प्रवेशने' इति दृश्यते ॥ १६. ३प्रतौ नास्ति ॥ १७. 'त्रिन्' इति४॥ १८. '-स्याऽस्ति' इति४॥ १९. द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-६५८, पृ.७४७॥, रामाश्रमी २।९।८६॥, पृ.४३८॥ २०. '-ना' इति३, '-र्णानां' इति४॥ २१. 'कर्षादिसंज्ञा' इति३.४॥ २२. 'इति' इति २प्रतौ नास्ति ॥ २३. ३प्रतौ नास्ति ॥ २४. तुलनीयोऽमरकोषः २।९।८६॥ २५. द्र. अम.क्षीर. २।९।८६॥, पृ.२१९॥, स्वोपज्ञटीका ३।८८४॥, पृ.१९५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुनः पौतवमानमाह–

## तुला[1] पलशतम्

१ 'तुल उन्माने'(चु.उ.से.), चुरादिणिचोऽनित्यत्वाद् 'इगुपध-'३।१।१३५॥ इति कः, टापि **तुला** । तोल्यतेऽनयेति वा । 'चिन्तिपूजि-'३।३।१०५॥ इत्यत्र चकारस्याऽनुक्तसमुच्चयार्थत्वादङ्, '-तुला-'४।४।९१॥ इति निर्देशाद् वा । पलानां शतं पलशतम् । ''तुला स्त्रियां पलशतम्''[अमरकोषः २।९।८७॥]इत्यमरः । एकं पलशतस्य ॥

## तासां विंशत्या भार[1] आचितः[2] ।
## शाकटः[3] शाकटीनश्च[4] शलाटः[5]

१ तासां तुलानां विंशत्या, पलसहस्रद्वयेनेत्यर्थः, पुंसा[2] द्वे पलसहस्रे वोढुं शक्येते, भ्रियतेऽनेनेति **भारः** । करणे घञ् । २ आचीयते स्म **आचितः** । 'चिञ् चयने'(स्वा.उ.अ.), क्तः । ३ शकटेन वाह्यः **शाकटः** । 'शकटादण्' ४।४।८०॥ इत्यण् । ४ शकट्या नीयते **शाकटीनः** । ५ शृणाति शराटः । 'शॄ हिंसायाम्'(क्र्या.प.से.), बाहुलकादाटः, लत्वे **शलाटः** । पञ्च भारस्य ॥

## ते दशाऽऽचितः[1] ॥८८५॥

१ ते भाराः दशेति दशसंख्याकाः **आचितः** । आचीयते स्म आचितः, पुंसि । क्लीबेऽप्ययमित्यन्ये । ''आचितः शकटोन्मेयं पलानामयुतद्वये''[विश्वलोचनकोशः, तान्तवर्गः, श्लो–८५]इति श्रीधरः । ''शकटेन उन्मेयः शकटोन्मेयः, शकटेन वोढुं शक्यो भार इत्यर्थः, पलानामयुतद्वयं दशभाराः''[ ]इति तद्वृत्तिः[3] । एकं दशभारस्य ॥८८५॥

पौतवमानमुक्त्वा द्रुवयमाह–

## चतुर्भिः कुडवैः प्रस्थः[1]

१ कुड्यते भक्ष्यते कुडवः । 'कुड भक्षणे'[4](तु.-प.से.), तौदादिकः, 'कुडेः कवन्'( ) । 'कुडिनुड्यडेरुव'( ) इत्युवे कुडुव इति द्विपञ्चमस्वरोऽपि । कुटप इत्यपि, 'कुटेः कपन्'[5](उणा-४२२)इति कपन् । चतुर्भिः कुडवैः **प्रस्थः** प्रोच्यते । प्रतिष्ठते प्रस्थः, पुंक्लीं[6] । ''प्रस्थोऽस्त्री सानुमानयोः''[अमरकोषः ३।३।८८॥]इत्यमरः । पाइलीनाम एकं प्रस्थः कुडव इति, 'पावलुं[7]' इति लोकप्रसिद्धः । टङ्कगणनायां चतुष्षष्टिटङ्काः कुडव उच्यते, तैश्चतुर्भिः प्रस्थ इत्यन्वयः । चतुष्पञ्चाशदङ्गुलप्रमाणो [8]वेधदैर्घ्यविस्तारैर्भवति, टङ्कगणनायां द्विशतपट्पञ्चाश२५६ट्टङ्काः प्रस्थशब्देनोच्यन्ते । कुडवश्च सार्द्धत्रयोदशाङ्गुलप्रमाणो [9]वेधदैर्घ्यविस्तारैर्भवति ॥

## प्रस्थैश्चतुर्भिराढकः[1] ।

१ चतुर्भिः प्रस्थैः पल्लिकेति लोकप्रसिद्धैः **आढकः** इत्यन्वयः । आढौक्यत इति आढकः, पृषोदरादिः, त्रिलिङ्गः । अस्मिन्नङ्गुलशतद्वयं षोडशाधिकं २१६ वेधदैर्घ्यविस्ताराणां ज्ञेयम्, टङ्कगणनायां चैकसहस्रं चतुर्विंशत्यधिकं १०२४ टङ्काः आढकशब्देनोच्यन्ते । एकं 'माणा' इति ख्यातस्य ॥

## चतुर्भिराढकैर्द्रोणः[1]

१ चतुर्भिराढकैः 'माणउं[10]' इति लोकप्रसिद्धैः **द्रोणः** उच्यते । द्रवति द्रोणः, पुंक्ली । ''अस्त्रियामाढकद्रोणौ'' [अमरकोषः२।९।८८॥]इत्यमरः । 'दु द्रु गतौ'(भ्वा.प.से.), 'कृ(कॄ)वृजृपृ(जॄ)[सि]द्रु-'(उणा-२९०)इति नः । 'सेई' इति भाषा । अस्मिन्नष्टौ शतानि चतुष्षष्ट्यधिकानि अङ्गुलानि ८६४ [11]वेधदैर्घ्यविस्ताराणां ज्ञेयम्, टङ्कगणनायां च षण्णवत्यधिकचत्वारिंशच्छतानि[12] ४०९६ टङ्का द्रोणशब्देनोच्यन्ते ॥

## खारी[1] षोडशभिश्च तैः ॥८८६॥

१ खन्यते **खारी** । 'खन खनने[13]'(भ्वा.उ.से.), 'वङ्क्र्यादयश्च'(उणा–५०६)इति क्रिन् नकारस्यात्वं च निपात्यते खारिः, 'कृदिकारात्-'(गणसू.–४।१।४५॥)इति ङीषि खारी । तैः द्रौणैः 'सेई' इति लोकप्रसिद्धैः षोडशभिः । अस्यां त्रयोदशसहस्राणि अष्टौ शतानि चतुर्विंशत्यधिकान्यङ्गुलानि १३८२४ वेधदैर्घ्यविस्ताराणां ज्ञेयानि,

१. इतोऽग्रे २प्रतौ 'इति' इति दृश्यते ॥ २. 'पुंसां' इति१, इतोऽग्रे ३प्रतौ 'हि' इति दृश्यते ॥ ३. 'साधुः' इति१॥ ४ क्षीरतरङ्गिण्यादौ बाल्यार्थककुडधातुर्दृश्यते ॥ ५ 'उषिकुटिदलिकचिखजिभ्यः कपन्'(उणा-४२२)इत्युणादिगणसूत्रम् ॥ ६ '-क्लीबः' इति४॥ ७ '-यलुं' इति४, '-लुं' इति२ ॥ ८ 'वै-' इति३॥ ९. 'वै-' इति४॥ १०. '-णाउं' इति३.४॥ ११. 'वै-' इति१.३॥ १२. '-त' इति१॥ १३. 'खनु अवदारणे' इति क्षीरतरङ्गिण्यादयः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

टङ्कगणनायां च पञ्चषष्टिसहस्रपञ्चशतषट्त्रिंशट्टङ्काः ६५५३६ खारीशब्देनोच्यन्ते । यदुक्तम्-

''टङ्कः१ कर्षः४ पलं१६ चापि
कुडवं६४ प्रस्थ२५६माढकं१०२४ ॥
द्रोणो ४०९६ द्रोणी १६३८४
खारिके६५५३६ति क्रमादेते चतुर्गुणाः ॥१॥''

[ ]इति । कुडवप्रस्थाढकद्रोण[2]खारीणां प्रमाणं लीलावतीप्रोक्तं प्रोच्यते-

''हस्तोन्मितैर्विस्तृतिदैर्घ्यपिण्डैर्यद् द्वादशास्रं घनहस्तसंज्ञम् ।
धान्यादिके यद् घनहस्तमानं शास्त्रोदिता मागधखारिका सा ॥२॥''
द्रोणस्तु खार्याः खलु षोडशांशः स्यादाढको द्रोणचतुर्थभागः ।
प्रस्थश्चतुर्थोऽह्रिरथाढकस्य[3] प्रस्थांह्रिराद्यैः कुडवः प्रदिष्टः ॥३॥

[लीलावती, परिभाषा, श्लो-७-८] [इति] । ''हस्तेन उन्मितैः हस्तपरिमितैः विस्तारदीर्घत्वपिण्डैर्यद् द्वादशास्रं परितो द्वादशधारं मानं कुण्डकोष्टकाद्यन्तस्य घनहस्त इति संज्ञा भवति, तद्यथा स्पष्टयति घनहस्ते हस्तप्रमाणं दैर्घ्यं हस्तप्रमाणो विस्तारो हस्तप्रमाणः पिण्डश्च, एवंविधं यत् समचतुरस्रम् अधश्चतुरस्रम् उपरिचतुरस्रं पिण्डे[4] चतुररस्रम्, एवं द्वादशास्रं [5]निष्पद्यते, धान्यादौ घनहस्तपरिमितं यन्मानम्, सा शास्त्रे मागधखारिका मागधदेशीया खारिका उदिता, सा लोके कलसिकेति प्रसिद्धा, द्रोणस्तु खलु निश्चयेन एवमुक्तायाः खार्याः षोडशांशो द्रोणो भवति, स च सेतिकेति प्रसिद्धः, सा च तौल्ये मणसंनिहिता भवति, एकं षोडशसेतिकाभिरेका कलसिकेत्यर्थः, द्रोणस्य चतुर्थो भाग आढको भवति, मानकमिति प्रसिद्धम्, आढकस्य चतुर्थोऽह्रिश्चतुर्थः पादो विभागः प्रस्थो भवति, पल्लिकेति प्रसिद्धा, आद्यैर्मुनिभिः प्रस्थांह्रिः प्रस्थचतुर्थांशः कुडवो भवति, तथा चोक्तं श्रीश्रीधराचार्येण-''कुडवमानं सार्द्धं वेधोऽङ्गुलं त्रीणि कुडवे दैर्घ्यविस्तृती कुडवे काष्ठमयमानके सार्द्धमङ्गुलं वेधो भवति, त्रीण्यङ्गुलानि दैर्घ्यं विस्तारश्च''[ ]इति । वक्ष्यमाणखातफलसाधनेन गणनाद् जातानि सार्द्धानि त्रयोदशाङ्गुलानि तानि चतुर्गुणानि[6] प्रस्थमानमङ्गुलानि चतुष्पञ्चाशत् ५४ आढकेऽङ्गुलशतद्वयं षोडशाधिकं २१६ भवति द्रोणेऽष्टौ[7] शतानि चतुष्षष्ट्याधिकान्यङ्गुलानि ८६४ भवन्ति, एवं खार्यां त्रयोदशसहस्राण्यष्टौ शतानि चतुर्विंशत्यधिकान्यङ्गुलानि १३८२४ भवन्ति''[ ]इति तट्टीका ।

अथ पाय्यमानमाह[8]-

## चतुर्विंशत्याऽङ्गुलानां हस्तः[1]

१ अङ्गुलानां चतुर्विंशत्या एको **हस्तः** । अष्टभिर्यवोदरैरेकमङ्गुलं भवति, तैश्चतुर्विंशत्या हस्त इत्यर्थः । एकं [हस्तस्य] ॥

## दण्डश्चतुष्करः[1] ।

१ दाम्यति **दण्डः**, पुंक्ली. । 'ञमन्ताड्डः'(उणा-१११)इति डः । चतुष्करः चतुर्हस्तः । एकं दण्डस्य ॥

## तत्सहस्रौ तु गव्यूतं[1] क्रोशः[2]

१ तेषां दण्डानां द्वौ सहस्रौ तत्सहस्रौ, गवां यूतिरत्र **गव्यूतम्**, पृषोदरादिः । २ क्रुश्यते उच्यतेऽध्वपरिमाणमनेनेति[9] **क्रोशः** । 'क्रुश आह्वाने'(भ्वा.प.अ.), करणे घञ् । यल्लीलावती-

''यवोदरैरङ्गुलमष्टसङ्ख्यैर्हस्तोऽङ्गुलैः षड्गुणितैश्चतुर्भिः ।
हस्तैश्चतुर्भिर्भवतीह दण्डः क्रोशः सहस्रद्वितयेन तेषाम् ॥१॥''

[लीलावती, परिभाषा, श्लो-५]इति । द्वे[10] क्रोशस्य ॥

## तौ द्वौ तु गोरुतम्[1] ॥८८७॥

## गव्या[2] गव्यूत[3]गव्यूती[4]

१ तौ क्रोशौ द्वौ गवां रुतमत्र **गोरुतम्** ॥८८७॥ २ गोभ्यो हिता **गव्या** । 'गोपयसोर्यत्'४।३।१६०॥इति यत् । ३ गवां यूतिरत्रेति **गव्यूतम्**, पृषोदरादिः । ४ गवां यूतिः, **गव्यूतिः**, पुंस्त्री । ''गव्यूतिः स्त्री''[अमरकोषः२।१।१८॥]इति त्वमरः । 'ऊतियूति-'३।३।९७॥ इत्यादिना ऊति(**यूति**)शब्दः साधुः, 'गौर्यूतौ छन्दसि'(६।१।७९॥), 'अध्वपरिमाणे-'(वा-६।१।-७९॥)इत्यवादेशे[11] गव्यूतिः । चत्वारि क्रोशयुगस्य ॥

## चतुष्क्रोशं तु योजनम्[1] ।

१ चत्वारः क्रोशाः समाहृता अत्रेति चतुःक्रोशम् (चतुष्क्रोशम्) । युज्यतेऽनेनेति **योजनम्** । करणे ल्युट् । ([12]युज्यतेऽनेन योजनम्), 'युजिर् योगे'(रु.उ.अ.) । ''स्याद्

---

१. '-गणा' इति१॥ २. '-णो-' इति४॥ ३. '-र्थांश इहाढकस्य' इति लीलावत्याम्, परिभाषा, श्लो-८, पृ.३॥ ४. इतोऽग्रे १प्रतौ 'च' इति दृश्यते ॥ ५. 'निप्पा-' इति३.४॥ ६. '-गणानि' इति१॥ ७. '-णोऽष्टौ' इति४॥ ८. '-य्यमाह' इति२॥ ९. '-नेन' इति४॥ १०. 'द्वौ' इति३॥ ११. '-शः' इति४॥ १२. कोष्ठान्तर्गतपाठः ३.४प्रत्योर्न दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

योजनं क्रोशचतुष्टयेन''[लीलावती, परिभाषा, श्लो-६]इति भास्कराचार्यैः[1] । एकं [योजनस्य] ।

वाणिज्यमुक्त्वाऽथ पाशुपाल्यमाह-

### पाशुपाल्यं जीववृत्तिः

१ पशुपालस्य भावः कर्म वा **पाशुपाल्यम्** । २ जीवपालनाद् वर्तनं **जीववृत्तिः** । 'स्त्रियां क्तिन्'३।३।९४॥ । द्वे जीवपालनाजीविकायाः ॥

### गोमान् गोमी गवीश्वरे ॥८८८॥

१ गावः सन्त्यस्य **गोमान्** । 'तदस्यास्त्यस्मिन्निति मतुप्'५।२।९४॥ 'उगिदचाम्-'७।१।३०॥ इति नुम् । २ गावः सन्त्यस्य **गोमी** । 'ज्योत्स्नातमिस्रा-'५।२।११४॥इति निपातः । गोमिनौ, गोमिनः इत्यादि । ३ गवामीश्वरो **गवीश्वरः**, तत्र । गवेश्वरोऽपि । त्रीणि गोमतः ॥८८८॥

### गोपाले गोधुगाभीरगोपगोसङ्ख्यवल्लवाः

१ गाः पालयति **गोपालः** । 'पाल रक्षणे'(चु.-उ.से.), 'कर्मण्यण्'३।२।१॥, तत्र । २ गाः दोग्धि[2] **गोधुक्** । 'दुह प्रपूरणे'(अ.उ.अ.), 'सत्सूद्विष-'३।२।६१॥ इत्यादिना क्विप्, 'एकाचो बशो-'८।२।३७॥ इति भष्भावः, 'दादेर्धा-तोर्घः'८।२।३२॥, जश्त्वम् । ३ आ समन्ताद् भियं रात्यादत्ते **आभीरः** । 'रा दाने'(अ.प.अ.), 'आतोऽनुपसर्गे कः'३।२।-३॥, 'आतो लोप इटि च[3]'६।४।६४॥ इत्यालोपः । ''आ समन्ताद् अभि अभिमुखमीरयति प्रेरयति आभीरः[4]''[अम. क्षीर.२।९।५७॥]इति स्वामी । ४ गां पाति रक्षति **गोपः** । 'पा रक्षणे'(अ.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥ । ५ गाः[5] सङ्ख्याति **गोसङ्ख्यः** । सम्पूर्वः[6] 'ख्या प्रकथने' (अ.प.अ.), 'प्रे दाज्ञः कर्मणि[7]'३।२।६॥ इति कः । ६ वल्लते संवृणोति **वल्लवः** । 'वल वल्ल संवरणे[8]'(भ्वा.आ.से.), वल्लिः सौत्रो वा, ततो बाहुलकादच्[9] । यद्वा वल्लनं वल्लः, भावे घञ्, तद्योगाद् 'अन्येष्वपि-'(वा-५।२।१०९॥)इति वः[10] । गोदुहोऽपि, मूलविभुजादित्वात् के[11] । ''गोपगोदु-हवल्लवाः''[[12]]इति त्रिकाण्डशेषः[13] । षड् गोपालस्य ॥

### गोविन्दोऽधिकृतो गोषु

१ गां विन्दति **गोविन्दः** । 'विद्लृ लाभे'(तु.-उ.अ.), 'गवादिषु विदेः (विन्देः) संज्ञायाम्'(वा-३।१।-१३८॥)इति खच्, खित्वान्मुम् । ''गोविन्द इन्द्रावरजे गवाध्यक्षे च गीष्पतौ''[विश्वलोचनकोशः, दान्तवर्गः, श्लो-२४]इति श्रीधरः । गोषु अधिकृतः, गोष्वधिकारीत्यर्थः । एकं गवामधिकारिणः ॥

### जावालस्त्वजजीविकः ॥८८९॥

१ अजाः पालयति **जावालः**, पृषोदरादिः । जव-मलति जवालः छागः, तस्याऽयमिति वा । २ अजेभ्यो जीविकाऽस्य **अजजीविकः** । 'गोस्त्रियोः-'१।२।४८॥ इति ह्रस्वत्वम् । द्वे 'एवाल' इति ख्यातस्य ॥८८९॥

### कुटुम्बी कर्षकः क्षेत्री हली कृषिककार्षकौ । कृषीवलोऽपि

१ कुटुम्बमस्त्यस्य **कुटुम्बी** । 'अत इनिठनौ'५।२।-११५॥ । २ कर्षति भुवं **कर्षकः** । 'कृष विलेखने'(भ्वा.-प.अ.), ण्वुल् । ३ क्षेत्रमस्त्यस्य **क्षेत्री** । 'अत इनि-ठनौ'५।२।११५॥ इतीनिः । ४ हलमस्त्यस्य[14] **हली** । 'अत इनिठनौ'५।२।११५॥ । ५ कर्षति भुवं **कृषिकः** । 'कृष[15] विलेखने'(भ्वा.प.अ.), 'वृश्चिकृषोः(-कृष्योः) किकन्'(उणा-१९८) । ६ 'कृषेर्वृद्धिश्छोदीचाम्'(उणा-१९६)इति क्वुनि **कार्षकः** । वृद्ध्यभावपक्षे कृषकोऽपि[16] । ७ कर्षणं कृषिः । 'इक्कृष्यादिभ्यः'(वा-३।३।१०८॥)इतीक्, ततो मत्वर्थे 'रजः-कृष्यासुतिपरिषदो वलच्'५।२।१२२॥, 'वले'६।३।११८॥इति दीर्घः [**कृषीवलः**]. । सप्त 'करसणी' इति ख्यातस्य ॥

### जित्या तु हलिः

---

१. '-र्याः' इति३॥ २. 'गां दोग्धीति' इति३॥ ३. 'इटि च' इति २.३.४प्रतिषु नास्ति ॥ ४. अम.क्षीरस्वामिटीकायाम्-''आ-अभित ईरयति आभीरः'' इत्येव दृश्यते, २।९।५७॥, पृ.२१३॥ ५. 'गां' इति३॥ ६. '-र्वस्य' इति३॥ ७. 'प्रे दाज्ञः' इत्येवाष्टाध्याय्याम् ॥ ८. मैत्रेयसम्मतोऽयं धातुपाठः, 'वल संवरणे' इति स्वामी, 'वल वल्ल संवरणे सञ्चरणे च' इति सायणः ॥ ९. '-दुरच्' इति१॥ १०. 'माधवः' इति१, 'क' इति२, 'डः' इति४॥ ११. 'कः' इति२॥ १२. द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-६३०, पृ.७२१॥, रामाश्रमी २।९।५७॥, पृ.४२७॥ १३. 'त्रिकाण्डशेषे नेदमुद्धरणं दृश्यते ॥ १४. '-स्यास्तीति' इति४॥ १५. 'कृषि' इति३॥ १६. 'कृषि-' इति१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ जीयते निपुणेनेति **जित्या** । 'जि अभिभवे' (भ्वा.प.अ.), 'विपूयविनीयजित्या मुञ्जकल्कहलिषु'३।१।-११७॥ इति क्यपि साधुः । २ हलन्त्यनया **हलिः** । 'हल विलेखने'(भ्वा.प.से.), 'इन् सर्वधातुभ्यः'(उणा-५५७) इतीन् । पुंस्त्रीलिङ्गावेतौ । मालाकारस्तु-''जित्यस्तु हलिसंज्ञकः''[ ]इति पुंस्यप्याह । ''जित्यहली इति पुंसि''[ ]इति गौडः । द्वे महाहलस्य ॥

**सीरस्तु लाङ्गलम् ॥८९०॥**

## गोदारणं हलम्

१ सीयते बध्यते **सीरः**, पुंक्ली.[1] । 'षिञ् बन्धने' (स्वा.उ.अ.), 'शुसिचि-'(उणा-१८३)इति क्रन् दीर्घश्च । ''हलतिग्मकरौ सीरौ''[[2]]इति दन्त्यादौ रभसाद् दन्त्यादिरयम् । २ लङ्गति गच्छति भुवं **लाङ्गलम्** । 'लगि गतौ' (भ्वा.प.से.), '[नहि]लङ्के[3]र्दीर्घश्च'(हैमोणा-४६६)इति कलच् । यद्वा [4]अगिरगिलगिगतीत्यादौ लङ्केर्गत्यर्थात् 'कलम्बादयश्च-(कम्बलादयश्च)'( )इति कलन्प्रत्ययो दीर्घत्वं च निपात्यते ॥८९०॥ ३ गौः भूमिर्दार्यतेऽनेनं[5] **गोदारणम्** । 'दृ(दॄ) विदारणे'(क्र्या.प.से.), णिजन्तः, 'करणाधिकरणयोश्च'३।३।-११७॥इति ल्युट् । गां दृणातीति[6], नन्द्यादित्वाद् ल्युर्वा[7] । ४ हलति भुवं **हलम्**, पुंक्ली. । 'हल विलेखने'(भ्वा.प.से.), अच् । ज्वलादित्वाण्णप्रत्यये हालोऽपि । ''हलो हालो वहः सीता''[[8]]इति विक्रमादित्यः । चत्वारि सामान्येन हलस्य ॥

**ईषासीते तद्दण्डपद्धती ।**

१ ईषति (ईषते) **ईषा** । 'ईष गतिहिंसादानेषु'[9] (भ्वा.आ.से.), 'इगुपध-'३।१।१३५॥ इति कः, 'गुरोश्च हलः'३।३।१०३॥इत्यकारो वा । ''ईषापेषामञ्जूषा''[ ]इति मूर्धन्यान्तेषु इन्द्र(चन्द्र)गोमी । 'ईश ऐश्वर्ये'(अ.आ.से.), अस्याऽपि धातोः 'इगुपध-'३।१।१३५॥ इति कः, 'गुरोश्च हलः'३।३।१०३॥इत्यकारो वा, ईशा तालव्यान्ताऽपि[10] । ''ईशः प्रभौ शङ्करे स्यादीशा लाङ्गलदण्डके''[विश्वप्रकाशकोशः, शान्तवर्गः, श्लो-९]इति महेश्वरः । ''प्रभुशङ्करयोरीशः स्त्रियां लाङ्गलदण्डके''[[2]]इति[11] तालव्यान्ते रुद्ररभसौ च । एकं 'हलनी[12] हाल' इति भाषा । १ स्यति भुवं **सीता**। 'अञ्जि-घृषि(घृसि)भ्यः क्तः'(उणा-३६९), बाहुलकात् 'षोऽन्तकर्मणि'(दि.प.अ.)इत्यतोऽपि क्ते, 'घुमास्थागा-'६।४।६६॥ इतीत्वम्, दन्त्यादिरयम् । ''सीता लाङ्गलरेखा स्याद् व्योमगङ्गा तु जानकी''[[2]]इति[11] दन्त्यादौ रभसात् । ''सीता तु जानकीव्योमगङ्गालाङ्गलवर्त्मसु''[विश्वलोचनकोशः, तान्तवर्गः, श्लो-६६]इति श्रीधरः । 'शो तनूकरणे'(दि.प.अ.), बाहुलकादतोऽपि वा क्तादिः ।

''शीता नभःसरिति लाङ्गलपद्धतौ च ।
सीता दशाननरिपोः सहधर्मिणी वा ।
शीतं[13] स्मृतं हिमगुणेषु तदन्विते च ।
[शीतोऽलसे च बहुवारतरौ च दृष्टः]॥१॥''

[[14]]इति धरणिः । ईषा च सीता चेति द्वन्द्वः । दण्डश्च यष्टिः, पद्धतिश्च मार्गः दण्डपद्धती, तस्य हलस्य दण्डपद्धती तद्दण्डपद्धती । सीता हलस्य रेखा । 'चास' इति भाषा ॥

## निरीषे कुटकम्

१ निःक्रान्ता ईषा अस्माद् निरीषम्, तत्र । कुटति छिनत्ति **कुटकम्** । 'कुट कौटिल्ये'(तु.प.से.), क्वुन् । यद्वा कुटति कुटः । 'इगुपध-'३।१।१३५॥ इति कः, ततः स्वार्थे कन् कुटकम् । यस्याऽग्रे फालो बध्यते, तन्नामैकम् । 'कुली' इति भाषा ॥

**फाले कृषकः[15] कुशिकः फलम् ॥८९१॥**

१ फलति निष्पद्यते कृषिरनेनेति[16] **फालम्** । 'फल निष्पत्तौ'(भ्वा.प.से.), 'हलश्च'३।३।१२१॥ इति करणे घञ्, तत्र । ''फालं सीरो(शिरो)पकरणे कार्पासादिकवाससि'' [विश्वप्रकाशकोशः, लान्तवर्गः, श्लो-२०]इति महेश्वरः । २ कृष्यते भूरनेनेति **कृषकः**[17] । 'क्वुन् शिल्पिसंज्ञयोः'(उणा-

१. 'पुंस्त्री' इति३॥ २. द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-५८७, पृ.६६७॥, रामाश्रमी २।९।१४॥, पृ.४०३॥ ३. '-लगे-' इति३.४॥ ४. '-रगि लगि अगि वगि-' इति स्वामिसायणौ, '-रगि वगि लगि अगि-' इति मैत्रेयः ॥ ५. '-नेति' इति३.४॥ ६. 'दृणाति' इति१॥ ७. 'ल्युट्' इति३.४॥ ८. द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-५८६, पृ.६६७॥, तत्र 'हालः फालवहः सीता' इति दृश्यते ॥ ९. 'गतिहिंसादर्शनेषु' इति क्षीरतरङ्गिण्यादयः ॥ १०. '-न्तोऽपि' इति१॥ ११. टीकासर्वस्वम्, भा-३, २।९।१४॥, पृ.१६१॥ १२. '-र्नी' इति१॥ १३. 'सीतं' इति३॥ १४. टीकासर्वस्वम्, भा-३, २।९।१४॥, पृ.१६२॥, पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-५८७, पृ.६६८॥, रामाश्रमी २।९।१४॥, पृ.४०३॥ १५. '-षिकः' इति३.४॥ १६. '-नेन' इति१॥ १७. '-षिकः' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१९०)इति क्वुन् । स्त्रियां कृषिका । ३ कुष्णाति भूमिं **कुशिकः** । 'कुष निष्कोषणे'(क्र्या.प.से.), किकनि प्रत्यये साधुः । ४ फलति विदारयति भुवं **फलम्** । 'ञिफला विशरणे'(भ्वा.प.से.), अच् । चत्वारि 'लोहकुशी' इति ख्यातायाः ॥८९१॥

## दात्रं लवित्रम्

१ द्यन्ति(दान्ति) लुनन्त्यनेनं **दात्रम्** । 'दैप् शोधने'(भ्वा.प.अ.), 'दाप् लवने'(अ.प.अ.), 'दाम्नी-' ३।२।१८२॥ इति ष्ट्रन् । २ लूयतेऽनेन **लवित्रम्** । 'लूञ् छेदने'(क्र्या.उ.से.), 'अर्त्तिलूधूसूखनसहचर इत्रः'३।२।-१८४॥ । द्वे 'दात्र' इति ख्यातस्य ॥

## तन्मुष्टौ वण्टः

१ तस्य दात्रस्य मुष्टिर्ग्रहणस्थानं तन्मुष्टिः, तत्र । वण्ट्यते विभाज्यते **वण्टः** । 'वटि विभाजने'(चु.उ.से.), कर्मणि घञ् । एकं दात्रमुष्टेः ॥

## मत्यं समीकृतौ ।

१ मतस्य करणं **मत्यम्** । मतशब्दः साम्यार्थः । 'मतजनहलात् करणे(ण-)'४।४।९७॥ इति यत् । असमस्य समीकरणं समीकृतिः, तत्र । एकं 'समार' इति ख्यातस्य ॥

## गोदारणं तु कुद्दालः

१ गौर्दार्यतेऽनेन **गोदारणम्** । 'दॄ विदारणे' (क्र्या.प.से.), अतो णिजन्तात् करणे ल्युट् । कुं भुवमुद्दालयति, कुर्दल्यतेऽनेनेति वा **कुद्दालः** । 'दल विशरणे'(भ्वा.प.से.), पृषोदरादिः । पुंस्ययम् । वैजयन्ती तु-''गोदारणं तु कुद्दालम्''[वैजयन्तीकोषः ३।८।२९॥] इति क्लीबेऽप्याह । द्वे कुद्दालस्य ॥

## खनित्रं त्ववदारणम् ॥८९२॥

१ खन्यतेऽनेन **खनित्रम्** । 'खनु अवदारणे' (भ्वा.उ.से.), 'अर्त्तिलूधू-'३।२।१८४॥इतीत्रः । २ अवदार्यतेऽनेन **अवदारणम्** । 'दॄ विदारणे'(क्र्या.प.से.), णिजन्तात् करणे ल्युट् । सामान्येन द्वे कुद्दालादेः ॥८९२॥

## प्रतोदस्तु प्रवयणं प्राजनं तोत्त्रतोदने ।

१ प्रतुद्यन्ते वोढारोऽनेन **प्रतोदः** । 'तुद व्यथने' (तु.उ.अ.), 'हलश्च'३।३।१२१॥ इति संज्ञायां करणे घञ् । २-३ प्राज्यन्ते प्रेर्यन्तेऽनेन **प्रवयणम्** । 'अज गतौ क्षेपणे च'(भ्वा.प.से.), ल्युटि, 'वा यौ'(यः)'२।४।-५७॥ इति पक्षे वीभावः । व्यभावपक्षे करणे ल्युटि **प्राजनम्** । ४ तुद्यन्तेऽनेन **तोत्त्रम्** । 'तुद व्यथने'(तु.उ.अ.), 'दाम्नीशसु(शस)युज-'३।२।१८२॥ इत्यादिना ष्ट्रन् । ५ तुद्यतेऽनेन **तोदनम्** । 'करणाधिकरणयोः(-योश्च)'३।३।-११७॥इति ल्युट् । पञ्च 'पराणी' इति ख्यातस्य ॥

## योत्रं तु योक्त्रमाबन्धः

१-२ यूयतेऽनेन **योत्रम्** । युज्यतेऽनेन **योक्त्रम्** । 'युञ् बन्धने'(क्र्या.उ.अ.), 'युजिर् योगे'(रु.उ.अ.) च, आभ्यां 'दाम्नीशसु(शस)युयुज-'३।२।१८२॥इति ष्ट्रन् । ३ आबध्यतेऽनेन **आबन्धः**, चर्मरज्जुः । 'बन्ध बन्धने'(क्र्या.-प.अ.), करणे घञ् । त्रीणि 'जोत्र' इति ख्यातस्य ॥

## कोटिशो लोष्टभेदनः ॥८९३॥

१ कोटिमग्रभागं श्यति तनूकरोति **कोटिशः** । 'शो तनूकरणे'(दि.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥ । कोटिरग्रभागः, साऽतिशयिताऽस्तीति लोमादित्वात् शे कोटिश इति वा । 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि कोटीशो दीर्घमध्योऽपि । २ लोष्टान् भिनत्ति **लोष्टभेदनः** । 'भिदिर् विदारणे'(रु.उ.अ.), नन्द्यादित्वाद् ल्युः । भिद्यतेऽनेन भेदनः, लोष्टानां भेदनो लोष्टभेदन इति वा । द्वे 'मोगरी' इति ख्यातायाः ॥८९३॥

## मेधिर्मेथिः खलेवाली खले गोबन्धदारु यत् ।

१ मेधन्ते सङ्गच्छन्ते गावोऽस्यां **मेधिः** । 'मेधृ सङ्गमे'(भ्वा.उ.से.), '-इन्'(उणा-५५७)इतीन् । २ मेथति हिनस्ति **मेथिः** । 'मेथृङ्(मेथृ) मेधाहिंसयोः'(भ्वा.उ.से.),

१. 'ख्यातस्य' इति१ ॥ २. 'द्यति' इति३.४॥ ३. 'लुनाति' इति४, 'लुनाति अनेनेति' इति३ ॥ ४. 'इत्यत्रः' इति३ ॥ ५. 'विभ-' इति३ ॥ ६. '-ष्टौ' इति३ ॥ ७. '-माहार' इति१ ॥ ८. 'गौ दा-' इति१.३ ॥ ९. 'दृ' इति१.२.३ ॥ १०. १प्रतौ नास्ति ॥ ११. 'अवि-' इति३ ॥ १२. '-धारणे' इति४ ॥ १३. 'अवदी-' इति४ ॥ १४. '-लादेः' इति१.२ ॥ १५. 'तोत्र-' इति३.४ ॥ १६. ४प्रतौ नास्ति ॥ १७. 'च' इति१.३.४ ॥ १८. 'पितराणी' इति३, 'पिराणी' इति४ ॥ १९. तुलनीयोऽमरकोषः २।९।१२ ॥ २०. '-ति' इति३.४ ॥ २१. '-ञ्' इति१ ॥ २२. '-हिंसनयोः' इति३, 'मिथृ मेथृ मेधाहिंसनयोः' इति स्वामी, 'मिदृ मेदृ मेधाहिंसयोः('-हिंसनयोः' इति सायणः)' इति मैत्रेयसायणौ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'-इन्'(उणा-५५७)इतीन्। मेथ्यन्ते सङ्गम्यन्तेऽत्रेति [वा]। पुंस्त्रीलिङ्गावेतौ । अमरस्तु-"पुंसि मेधिः"[अमरकोषः २।९।१५॥]इत्याह । ३ खले वलन्ति भ्रमन्ति गावोऽनया **खलेवाली** । 'हलदन्तात्-'६।३।९॥ इति सप्तम्यलुक् । खले धान्यनिष्पन्नवनक्षेत्रे[1] गोबन्धः बलीवर्दबन्धम्[2], तदर्थं दारु काष्ठं यत्। त्रीणि 'मेढी' इति ख्यातायाः ॥

## शूद्रोऽन्त्यवर्णो वृषलः पद्यः पज्जो जघन्यजः ॥८९४॥

१ शोचतीति **शूद्रः** । 'शुच शोके'(भ्वा.प.से.), 'शुचेर्दीर्घश्च[3]'(उणा-१७६)इति रक् दश्चान्तादेशः उपधाया दीर्घत्वं च । शद्यत इति वा । 'शद्लृ शातने'(भ्वा.-आ.अ.), 'शदेश्चात ऊत्वं च'( )इति रक् । शुः पूजितां कृत्वा सुरामुनत्ति क्लेदयति वा, पृषोदरादिः । २ त्रयाणामपेक्षया अन्त्यश्चासौ वर्णश्च **अन्त्यवर्णः** । ३ वर्षति **वृषलः** । 'वृषु सेचने'(भ्वा.प.से.), 'वृषादिभ्यश्चित्[4]'(उणा-१०६) इति कलच् । यद्वा अशुचित्वात् सेक्तव्यः, 'वृषलादयः' ( )इत्यलः, अगुणत्वं च । वृषं धर्मं लुनातीति वा । 'लूञ् छेदने'(क्र्या.उ.से.), 'अन्येभ्योऽपि-'(वा-३।२।१०॥) इति डः । वृषं धर्ममलं[5] व्यर्थं करोतीति वा । "वृषो हि भगवान् धर्मस्तमेष कृतवानलम्"[[6]]इत्यागमः । ४ ब्रह्मणः पादयोर्भवः **पद्यः** । 'शरीरावयवाद्[7]-'४।३।५५॥ इति यत्, 'पादः पत्'६।४।१३०॥ इति पदादेशः । ५ पद्भ्यां जातः **पज्जः**, द्वितीयवर्गतृतीयद्वयान्तः । 'जनी प्रादुर्भावे'(दि.-आ.से), 'पञ्चम्यामजातौ'३।२।९८॥ इति डः । "पद्भ्यां शूद्रोऽजायत"[ऋ. वे. १०।९०।१२॥]इति श्रुतिः । ६ ब्रह्मणो जघन्याङ्गात् पादाज्जातो **जघन्यजः** । "जघन्यं मेहने क्लीबं चरमे गर्हितेऽन्यवत्"[मेदिनीकोशः, यान्तवर्गः, श्लो-८३]इति मेदिनिः । षट् शूद्रस्य ॥८९४॥

अथ मिश्रजातिमाह-

## ते तु मूर्धावसिक्तादारथकृन्मिश्रजातयः ।

ते शूद्राः मूर्धावसिक्तादारभ्य रथकारं यावद् मिश्रा सङ्कीर्णा जातिर्येषां ते मिश्रजातयः, उच्यन्त इति शेष इत्यन्वयः ॥

## क्षत्रियायां द्विजान्मूर्धावसिक्तः

१ द्विजाद् ब्राह्मणात् क्षत्रियायां जातो **मूर्धावसिक्तः** उच्यते । "सूतस्तु क्षत्रियाद् जातः"[अभिधानचिन्तामणिनाममाला३।८९८॥]इत्यतो वक्ष्यमाणाज्जात इति सम्बध्यते, एवमग्रेऽपि व्याख्येयम् । इति प्रथमो भेदः ॥

## विट्स्त्रियां पुनः ॥८९५॥

## अम्बष्ठः

१ विट्स्त्रियां वैश्यजातिस्त्रियां ॥८९५॥ द्विजाज्जातः **अम्बष्ठः** उच्यत इत्यन्वयः । अम्बेव तिष्ठति अम्बष्ठः । 'सुपि स्थः'३।२।४॥ इति कः । उपपदसमासे वृत्तिस्वभावादिवार्थोऽन्तर्भूतः, न्यासे तु "अम्बायां तिष्ठति"[ ] इति व्युदपादि । 'ङ्यापोः संज्ञाच्छन्दसोः'६।३।६३॥ इति पूर्वपदस्य ह्रस्वत्वम्, 'अम्बाम्बगोभूमि-'८।३।९७॥ इत्यादिना स्थः सस्य षत्वम्[8] । इति द्वितीयो भेदः ॥

## अथ पारशवनिषादौ शूद्रयोषिति ।

१ ब्राह्मणात्[9] शूद्रस्त्रियां जातः, परात् पुरुषाद् भिन्नवर्णा स्त्री परस्त्री, तस्याऽपत्यं **पारशवः** । 'परस्त्री परशुं च'(गणसू-४।१।१०४॥)इति शिवादि(बिदादि)पाठादपत्यर्थेऽण्, परशुभावश्च परस्त्रीशब्दस्य । २ निषीदति पापमत्रेति **निषादः** । 'षद्लृ विशरणादौ'(तु.प.अ.), ज्वलादित्वाण्णः[10] । प्राकृतभाषया 'सबारड[11][12]' उच्यत इति तद्धितढूण्ढ्याम् । द्वे ब्राह्मणात् स्त्रियां जातस्य । इति तृतीयो भेदः ॥

## क्षत्रान्माहिष्यो वैश्यायाम्

१ क्षत्राद् वैश्यस्त्रियां जातो **माहिष्यः** उच्यत इत्यन्वयः । महिष्यां साधुर्महिष्यः । 'तत्र साधुः'४।४।९८॥ इति यत्, प्रज्ञाद्यणि माहिष्यः । 'अन्येषामपि-'६।३।१३७॥ इति दीर्घत्वे वा । "माहिष्योऽर्याक्षत्रिययोः"[अमरकोषः २।१०।३॥]इत्यमरः । "स ह्यन्तःपुररक्षिता"[[13]]इति स्मार्ताः । इति तुर्यो भेदः ॥

---

१. 'धान्ये' इति३.४॥ २. '-ने' इति२, '-नार्थं' इति४॥ ३. 'शुचेर्दश्च'(उणा-१७६)इत्युणादिगणसूत्रम् ॥ ४. 'चित्' इति ४प्रतौ नास्ति ॥ ५. 'धर्मम् अलं' इति च्छेदः ॥ ६. द्र. पदचन्द्रिका, भा-२, शूद्रवर्गः, श्लो-६८४, पृ.७७५॥ ७. '-वाद्यत्' इति१.२.३॥ ८. '-ते' इति२.४॥, द्र. अम. क्षीर. २।१०।१॥, पृ.२२५॥, स्वोपज्ञटीका ३।८९४॥, पृ.१९७॥ ९. '-व्या-' इति३॥ १०. द्र. मा.धातुवृत्तिः, भ्वादिः, धातुसं-६५०, पृ.२५१॥ ११. '-णः' इति१.२.४॥ १२. 'रबारट' इति३॥ १३. द्र. अम.क्षीर.२।१०।३॥, पृ.२२६॥, स्वोपज्ञटीका३।८९६॥, पृ.१९८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**उग्र[1]स्तु वृषलस्त्रियाम् ॥८९६॥**

१ वृषलस्त्रियां क्षत्रियाज्जात[1] **उग्रः** उच्यत इत्यन्वयः । उचति (उच्यति) उग्रः । 'उच समवाये'(दि.-प.से.), 'ऋज्रेन्द्राग्र-'(उणा-१८६)इत्यादिना साधुः । "शुद्राक्षत्रिययोरुग्रः"[अमरकोषः २।१०।२॥]इत्यमरः । इति पञ्चमो भेदः ॥८९६॥

**वैश्यात् तु कर[1]णः**

१ वैश्यात् शूद्रायां जातः **करणः** इत्युच्यते । करोति करणः । नन्द्यादित्वाद् ल्युः । "शूद्राविशोस्तु करणः" [अमरकोषः २।१०।२॥]इत्यमरः । इति षष्ठो भेदः ॥

**शूद्रात् त्वायो[1]गवो विशः स्त्रियाम् ।**

१ तुरवधारणे शूद्राद् वैश्यायां जात **आयोगवः** उच्यत इत्यन्वयः । अयोवद् गौरस्य अयोगुः, तस्याऽयम् आयोगवः । 'तस्येदम्'४।३।१२०॥इत्यण् । इति सप्तमो भेदः ॥

**क्षत्रियायां पुनः क्ष[1]त्ता**

१ शूद्रात् क्षत्रियायां जातः **क्षत्ता** प्रोच्यत इत्यन्वयः । क्षदति हिनस्ति द्वाःस्थत्वादिति क्षत्त्रः(क्षत्ता) । 'क्षद स्थैर्ये हिंसायां च'( ), 'तृन्तृचौ शंसि[क्षदादिभ्यः-संज्ञायां चानिटौ]'(उणा-२५०)इति तृच्[2] । द्वाःस्थः "क्षत्ताऽर्याशूद्रयोः सुतः"[अमरकोषः२।१०।३॥]इत्यमरः । वैश्यमाता, शूद्रः पिता, तत्पुत्रः क्षत्तेति कश्चित्[3] । इत्यष्टमो भेदः ॥

**चण्डा[1]लो ब्राह्मणस्त्रियाम् ॥८९७॥**

१ क्षुद्राद् ब्राह्मणस्त्रियां जातः, **चण्डालः** प्रोच्यते । चण्डति(चण्डते) कुप्यति चण्डालः । 'चडि कोपे' (भ्वा.आ.से.), 'पतिचण्डि[4]भ्यामालञ्'(उणा-११४) । चण्डं क्रोधमुखं कर्म अलति पर्याप्नोतीति वा । 'अल भूषणादौ' (भ्वा.प.से.) । प्रज्ञाद्यणि चाण्डालोऽपि । इति नवमो भेदः ।

**वैश्यात् तु मा[1]गधः क्षत्र्याम्**

१ वैश्यात् क्षत्रियायां जातो **मागधः** प्रोच्यते । मगध्यति स्तौति मगधः । 'मगध स्तुतौ' कण्ड्वादिः[5], ततोऽच्, प्रज्ञाद्यणि मागधः । "मागधः क्षत्रियाविशोः" [अमरकोषः २।१०।२॥]इत्यमरः । इति[6] दशमो भेदः ॥

**वैदे[1]हको द्विजस्त्रियाम् ।**

१ वैश्याद् ब्राह्मण्यां जातः, ([7]**वैदेहकः** प्रोच्यते)। [8]वैदेह एव वैदेहकः । स्वार्थे कनि, वणिक्कर्माऽयम्[9] । [इति] एकादशो[10] भेदः ॥

**सू[1]तस्तु क्षत्रियाद् जातः**

१ क्षत्रियाद् ब्राह्मण्यां जातः **सूतः** प्रोच्यते । सुवति प्रेरयत्यश्वान् सूतः । 'षु प्रेरणे'(तु.प.से.), 'हसिमृग्रि-'(उणा-३६६)इति तन्, बाहुलकाद् दीर्घत्वं च । इति[4] द्वादशो[11] भेदः ॥

अथोपसंहारमाह[12]-

**इति द्वादश तद्भिदः ॥८९८॥**

इति पूर्वोक्तप्रकारेण तेषां शूद्राणां भिदो जातिविशेषा, द्वादश ज्ञेयाः ॥८९८॥

**माहिष्येण तु जातः स्यात् करण्यां रथका[1]रकः ।**

१ वैश्यात् क्षत्रिययोः (क्षत्रियाद् वैश्यायां जातः) पुत्रो माहिष्यः, स पिता, वैश्यात् शूद्रायां जाता करणी, सा माता, तयोः पुत्रनामैकं **रथकारकः** तक्षा, माहिष्योऽत्र प्रागुक्तश्चतुर्थजातीयस्तेन, करणी प्रागुक्ता षष्ठजातीया तस्याम्, जात उत्पन्न इत्यर्थः । करणीत्यत्र 'जातीरस्त्रीविषयादयोपधात्'६।१।६३॥ इति ङीष्[13] ॥

**का[1]रुस्तु का[2]री प्र[3]कृतिः शि[4]ल्पी**

१ करोति कर्माणि चित्रलेप्यादिकर्म वा **कारुः** । 'कृवापाजिमि-'(उणा-१)इत्युण् । स्त्रियामूङि कारूः । २ करोति कर्माणि **कारी** । ग्रहादित्वाण्णिनिः । ३ प्रक्रियतेऽनया **प्रकृतिः** । 'स्त्रियां क्तिन्'३।३।९४॥ । ४ शिल्पं कलाकौशलमस्याऽस्ति **शिल्पी** । 'अत इनिठनौ' ५।२।११५॥ इतीनिः ॥

---

१. 'द्विजात्' इति१.४॥ २. 'तृन्' इति३.४॥ ३. अनावश्यकः प्रतिभाति ॥ ४. '-चडि-' इति१॥ ५. 'च-' इति३॥ ६. १.२.४प्रतिषु नास्ति ॥ ७. कोष्ठान्तर्गपाठः १.२.४प्रतिषु न दृश्यते ॥ ८. 'वि-' इति३॥ ९. '-याम्' इति३॥ १०. '-शमो' इति२.३॥ ११. '-शमो' इति३॥ १२. '-संहरति' इति१.२॥ १३. 'ङीप्' इति१.२.४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"तया (तक्षा) च तन्तुवायश्च नापितो रजकस्तथा ।
पञ्चमश्चर्मकारश्च कारवः शिल्पिनो मता ॥१॥"

[ [१] ]इति । चत्वारि सामान्येन 'कारुः' इति ख्यातस्य ॥ 'कारीगर उस्तादविज्ञानी' इति भाषा ॥

**श्रेणिस्तु तद्गणः ॥८९९॥**

१ श्रीयते **श्रेणिः**, पुंस्त्रीलिङ्गः[२] । 'श्रिञ् सेवायाम्' (भ्वा.उ.से.), 'वहिश्रि[श्रु]यु-'(उणा-४९१)इति निः । तेषां कारूणां गणस्तद्गणः । एकं समानजातीयकारुसमूहस्य ॥८९९॥

**शिल्पं कला विज्ञानं च**

१ शील्यते **शिल्पम्** । 'शील समाधौ'(भ्वा.-प.से.), 'शील अभ्यासे[३]'(चु.उ.से.)[४], चुरादिः, 'शिल उञ्छे' (तु.प.से.)इत्यस्माद्वा पप्रत्यये 'खष्पशिल्प-'(उणा-३०८) इत्यादिना साधुः । २ कल्यते **कला** । 'कलण् सङ्ख्यानगत्योः[५]'(चु.उ.से.), चुरादिः, भिदादित्वादङ् । ३ विविधं ज्ञायते **विज्ञानम्** । 'ज्ञा अवबोधने'(क्र्या.प.अ.), कर्मणि ल्युट्[६] । त्रीणि 'विज्ञान' इति ख्यातस्य ॥

**मालाकारस्तु मालिकः ।**
**पुष्पाजीवः**

१ मालां करोति **मालाकारः** । 'कर्मण्यण्'३।२।१॥ । २ मालानिर्माणं शिल्पमस्य **मालिकः** । 'शिल्पम्'४।४।५५॥ इति ठन् । मालाऽस्त्यस्येति[७] व्रीह्यादित्वाट्ठन्[८] वा । ३ पुष्पैराजीवति **पुष्पाजीवः** । 'जीव प्राणधारणे'(भ्वा.प.से.), पचाद्यच् । त्रीणि मालाकारस्य ॥

**पुष्पलावी पुष्पाणामवचायिनी ॥९००॥**

१ पुष्पाणि लुनाति **पुष्पलावी** । 'लूञ् छेदने' (क्र्या.उ.से.), 'कर्मण्यण्'३।२।१॥ 'टिड्ढाणञ्-'४।१।१५॥ इति ङीप्[९] । पुष्पाणां कुसुमानां अवचायिनी । अवपूर्वात् 'चिञ् चयने'(स्वा.उ.अ.) अस्माद् ग्रहादित्वाण्णिनिः, ततः 'ऋन्नेभ्यो ङीप्[१०]'४।१।५॥ । एकं 'मालिनि' इति ख्यातायाः ॥९००॥

**कल्यपालः सुराजीवी शौण्डिको मण्डहारकः ।**
**वारिवासः पानवणिक् ध्वजो ध्वज्याऽऽसुतीवलः ॥९०१॥**

१ कल्यं मद्यं पालयति **कल्यपालः**, अन्तस्था-तृतीयप्रथममध्योऽयम् । 'पाल रक्षणे'(चु.उ.से) णिजन्तादस्मात् 'कर्मण्यण्'३।२।१॥ । २ सुरया जीवति **सुराजीवी** । ग्रहादित्वाण्णिनिः । ३ शुण्डा पानमदस्थानं सुरा वा पण्यमस्य **शौण्डिकः** । 'तदस्य पण्यम्'४।४।५१॥ इति ठक् । ४ मण्डमच्छसुरां हरति मण्डहारः[११] । 'कर्मण्यण्' ३।२।१॥, ततः स्वार्थे कनि[१२] **मण्डहारकः** । ५ वारि पानीयं वासयति **वारिवासः** । 'वस निवासे'(भ्वा.प.अ.), 'कर्मण्यण्'३।२।१॥ । ६ पानस्य वणिक् **पानवणिक्**, जकारान्तः । ७ ध्वजति **ध्वजः** । 'ध्वज गतौ'(भ्वा.प.से.), पचाद्यच् । ८ ध्वजः सुराभाण्डपताकाऽस्त्यस्य **ध्वजी** । 'अत इनिठनौ'५।२।११५॥ । ९ आसुतिर्मद्यसन्धानमस्त्यस्य[१३] **आसुतीवलः** । आङ्पूर्वः 'षुञ् अभिषवे'(स्वा.उ.अ.) अभिषवः स्नपनपीडनस्नानसुरासन्धानादिः, स्त्रियां क्तिनि आसुतिः, ततो 'रजःकृष्यासुतिपरिषदो वलच्'५।२।११२॥, 'वले'६।३।११८॥ इति दीर्घः । नव 'कलाल' इति ख्यातस्य ॥९०१॥

**मद्यं मदिष्ठा मदिरा परिस्रुता ।**
**कश्यं परिस्रुन्मधु कापिशायनम् ॥**
**गन्धोत्तमा कल्यमिरा परिप्लुता ।**
**कादम्बरी स्वादुरसा हलिप्रिया ॥९०२॥**
**शुण्डा हाला हारहूरं प्रसन्ना वारुणी सुरा ।**
**माध्वीकं मदना देवसृष्टा[१४] कापिशमब्धिजा ॥९०३॥**

१ मदे साधु **मद्यम्** । 'तत्र साधुः'४।४।९८॥ इति यत् । माद्यन्त्यनेनेति वा । 'मदी हर्षे'(दि.प.से.), 'गदमदचरयमश्चानुपसर्गे[१५]'३।१।१००॥ इति[१६] यत् । 'कृत्यल्युटो बहुलम्'३।३।११३॥ इति करणेऽपि यत् भवति । २ अतिशयेन मदवती **मदिष्ठा** । 'अतिशायने[१७] तमप्-'५।३।५५॥

१. द्र. पदचन्द्रिका, भा-२, शूद्रवर्गः, श्लो-६८८, पृ.७७७॥, रामाश्रमी २।१०।५॥, पृ.४५३॥ २. 'पुंस्त्री' इति४॥ ३. 'उपधारणे' इति क्षीरतरङ्गिण्यादयः ॥ ४. इतोऽग्रे ३प्रतौ 'वा' इति दृश्यते ॥ ५. 'कल गतौ संख्याने च' इति स्वामिसायणौ, 'कल संख्याने गतौ च' इति मैत्रेयः ॥ ६. 'ल्युटि' इति४॥ ७. इतोऽग्रे ३प्रतौ 'वा' इति दृश्यते ॥ ८. '-ञ्' इति३॥ ९. '-षि' इति२, '-ष्' इति३.४॥ १०. 'ङीष्' इति२.३.४॥ ११. '-रकः' इति३॥ १२. 'कन्' इति४॥ १३. '-नमस्या' इति४॥ १४. '-स्पृष्टा' ३.४॥ १५. '-भ्यः' इत्यष्टाध्यायां न दृश्यते ॥ १६. ३प्रतौ नास्ति ॥ १७. '-यिने' इति३.४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इतीष्ठनि, 'विन्मतोर्लुक्'५।३।६५॥ इति मतुप्लुकि 'टेः' ६।४।१५५॥ इति टिलोपः । ३ माद्यत्यनया **मदिरा** । 'मदी हर्षे'(दि.प.से.), 'इषिमदिमुदि-'(उणा-५१)इत्यादिना किरच् । ४ परिस्रवति स्म **परिस्रुता**, टाबन्तः, दन्त्यरेफपञ्चमस्वरमध्यः । 'स्रु गतौ'(भ्वा.प.अ.), निष्ठा । ५ कशदेशे साधु **कश्यम्** । 'तत्र साधुः'४।४।९८॥ इति यत् । कशिः सौत्रो वा, तालव्यान्तः, 'जनेर्यक्'(उणा-५५०)इति बाहुलकाद् यक् । "मद्याश्वमध्ययोः कश्यम्"[¹]इति रन्तिदेवः । ६ परिस्रवति **परिस्रुत्**, दन्त्यरेफपञ्चमस्वरमध्यः । 'स्रु गतौ' (भ्वा.प.अ.), क्विप्, 'ह्रस्वस्य-'६।१।७१॥ इति तुक् । परिस्रुतौ, परिस्रुतः इत्यादि, स्त्रीलिङ्गः । ७ मन्यते **मधु**, पुंक्ली.[²], । 'मनु अवबोधने'(त.आ.से.), 'फलिपाटिनमिमनिजनां गुक् पटिनाक(नाकि)धता(त)श्च'(उणा-१८)इति मन्यतेर्धोऽन्तादेशः, उप्रत्ययः । ८ कपिश्यां(कापिश्यां) पुर्यां भवं **कापिशायनम्** । 'कपिश्याः(कापिश्याः) फक् (ष्फक्)' ४।२।९९॥ इति फक्(ष्फक्) । ९ गन्धेन उत्तमा श्रेष्ठा **गन्धोत्तमा** । १० कल्यते **कल्यम्**, स्त्रीक्लीबलिङ्गः, अन्तस्थातृतीयप्रथमान्तः, 'अघ्न्यादयश्च'(उणा-५५१)इति यत् । ११ एति भ्राम्यत्यनया **इरा** । 'इण् गतौ'(अ.प.अ.), 'ऋज्रेन्द्र-' (उणा-१८६)इत्यादिना रक् । इः कामस्तं राति दत्ते वा । 'रा दाने'(अ.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥, टाबन्तः । १२ परिप्लवते स्म **परिलुप्ता** । 'प्लुङ् गतौ'(भ्वा.आ.अ.), 'निष्ठा'३।२।१०२॥ इति क्तः । १३ गोमन्थपर्वतकदम्बकोटरे जाता **कादम्बरी**, स्त्रीक्लीबलिङ्गः, पृषोदरादिः । "कदम्बकोटरे जाता नाम्ना कादम्बरी"[³]इत्यागमः । कुत्सितमम्बु यत्र क्षारत्वात् कदम्बुः, समुद्रः, तमियर्तीति वा । पृषोदरादिः । कुत्सिताम्बरस्य नीलवाससः इयं कादम्बरी । 'तस्येदम्'४।३।१२०॥ इत्यण्, 'टिड्ढाणञ्-'४।१।१५॥ इति ङीषि (ङीप्) वा । कदम्बगिरावर्यते वा, तत्र हि यादवैस्त्यक्ता, पृषोदरादिः । अत्र सामान्यविशेषयोरभेदविवक्षेयेत्थं निर्देशः । यद् गौडः- "कादम्बरं मद्यभेदे दध्यग्रे सीधुनि स्त्रियाम्"[ ]इति । १४ स्वादु रसोऽस्याः **स्वादुरसा** । १५ हलिनो भद्रस्य[⁴] प्रिया इष्टा **हलिप्रिया ॥९०२॥** १६ शुनति वैकल्यमनया **शुण्डा**, पुंस्त्रीलिङ्गः । "शुण्डो मद्यम्"[ ]इति पुंसि शाकटायनः । 'शुन गतौ'(तु.प.से.), 'जमन्ताड्डः'(उणा-१११) । १७ हलति विलिखति अङ्गं **हाला** । 'हल विलेखने'(भ्वा.प.से.), ज्वलादित्वाण्णः । जहाति लज्जामनयेति पृषोदरादिर्वा । १८ हरति इन्द्रियाणि **हारहूरम्** । पृषोदरादिः । हारहूरा द्राक्षा, तस्या विकारो हारहूरमिति[⁵] वा । 'तस्य विकारः'४।३।१३४॥ इत्यण् । १९ प्रसीदति अच्छत्वात् **प्रसन्ना** । 'षद्लृ विशरणादौ'(भ्वा.प.अ.), 'निष्ठा' ३।२।१०२॥ इति क्तः, 'रदाभ्याम्-'८।२।४२॥ इति नत्वम् । २० वरुणस्येयं **वारुणी**, समुद्रोत्थत्वात् । २१ सुरति उद्दीप्यते **सुरा** । 'सुरत् (षुर) ऐश्वर्यदीप्त्योः'(तु.प.से.), 'इगुपध-'३।१।१३५॥ इति कः । सूयते परिवास्यते[⁸] वा । 'षुञ् अभिषवे'(स्वा.उ.अ.), 'सुसूधा-'(उणा-१८२)इति क्रन् । सुष्ठु रान्त्याददते[⁹] एतामिति वा । 'रा आदाने[¹⁰]'(अ.प.अ.), 'आतश्चोपसर्गे'३।३।१०६॥ इत्यङ् । २२ माद्यत्यनया **माध्वीकम्** । पृषोदरादिः । मृद्वीकाया विकारो मार्द्वीकमिति[¹¹] अमरक्षीरस्वामिनौ । तथा च तद्वचः-"मधु मार्द्वीकमद्वयोः"[अमरकोषः २।१०।४१॥] इति । २३ मदयति **मदना** । 'मदी हर्षे'(दि.प.से.), नन्द्यादित्वाल्ल्युः । २४ देवैः सृज्यते स्म **देवसृष्टा** । 'सृज विसर्गे'(दि.आ.अ., तु.प.अ.), निष्ठा । २५ कपिशमेव **कापिशम्** । 'प्रज्ञादिभ्यश्च'५।४।३८॥ इत्यण् । २६ अब्धेः समुद्राज्जाता **अब्धिजा** । 'जनी प्रादुर्भावे'(दि.आ.से.), 'पञ्चम्याम्-'३।२।९८॥ इति डः । षड्विंशतिर्मद्यस्य । अथ "गौडी पैष्टी च माध्वी च फलोत्था च सुधा स्मृता"[ ]इति ॥९०३॥

सुराभेदानाह-

**मध्वासवे[1] माधवकः[2]**

१ मधु माक्षिकम्, तन्मिश्रे आसूयते **मध्वासवः** । 'षुञ्[¹²] अभिषवे'(स्वा.उ.अ.), तत्र । २ मधुनो विकारो माधवः । 'तस्य विकारः'४।३।१३४॥ इत्यण्, ततः स्वार्थे

---

१. द्र. पदचन्द्रिका, भा-२, शूद्रवर्गः, श्लो-७२३, पृ.८१३॥, गमाश्रमी २।१०।४०॥, पृ.४६९॥ २. '-क्लीबः' इति३.४॥ ३. द्र. टीकासर्वस्वम्, भा-३, २।१०।३९॥, पृ.२८१॥, तत्र '-टराज्जाता' इति दृश्यते, पदचन्द्रिका, भा-२, शूद्रवर्गः, श्लो-७२२, पृ.८१३॥ ४. ३प्रतौ नास्ति ॥ ५. '-दु' इति३॥ ६. 'बलिभ-' इति३, 'वलभ-' ति४॥ ७. '-रा इति' इति३॥ ८. '-सते' इति४॥ ९. 'रात्यादत्ते' इति३.४॥ १०. 'दाने' इति१॥ ११. 'मार्द्वीयक-' इति३॥ १२. 'पूञ्' इति१.२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कन् । मधुनो विकारः, मधुना कृतो वा **माधवकः** । कुलादित्वाद् वुञ् वा । द्वे मधुमिश्रितस्य ॥

**मैरेये शीधुरासवः ।**

१ मीरायां देशे भवो गौड्याः सुराया विशेषो **मैरेयः** । 'स्त्रीभ्यो ढक्'४।१।१२०॥ । २ शेरतेऽनेनेति **शीधुः** । 'शीङो धुक्-'(उणा-४७८)इति धुक् । पुंनपुंसकौ । ''पुंनपुंसकयोर्दारुजीवातुस्थाणुशीधवः''[त्रिकाण्डशेषः ३।५।८॥]इति त्रिकाण्डशेषः । ३ आसूयते **आसवः** । 'षुञ् अभिषवे' (स्वा.उ.अ.), 'ॠदोरप्'३।३।५७॥ इत्यप् । पक्वरसोऽपि । सुरा चतुर्द्धा । यदुक्तम्-''गौडी पैष्टी माध्वी फलोत्था च''[ ]इति । आत्रेयोऽपि-''गौडी माध्वी तथा पैष्टी निर्यास्या कथिता परा''[ ]इति । तन्मध्ये गुडोत्पन्नायाः सुराया नामानि मैरेय इत्यादित्रीणि । ''मैरेयमासवः शीधुः'' [अमरकोषः २।१०।४१॥]इत्यमरः । ''मीरायां देशे भवो गौड्याः सुराया विशेषो मैरेयः''[अम. क्षीर.२।१०।४१॥]इति क्षीरस्वामी । ''मैरेयो गदितः शीधुः''[ ]इति माला । ''शीधुर्गौडी च मात्सण्डी गुडेन प्रभवास्त्रयः''[ ]इत्यात्रेयो गुडप्रभवायाः सुरायास्त्रीन् भेदानाह । श्रीलिङ्ग[य]सूरयस्तु-''धातकीपुष्पमिश्रगुडसहितधान्याम्बुकृतमद्यनाम मैरेयम्, पक्वेक्षुरसकृतमद्यनाम शीधुः, अपक्वेक्षुरसकृतमद्यनाम आसवः'' [लिङ्गयसूरिकृता अमरपदविवृत्तिः(अमरकोशः, भा-१, २।१०।४१॥]इति त्रीनपि भिनत्ति ॥

**जगलो मेदको मद्यपङ्कः**

१ भृशं गलति स्रवति **जगलः** । गलेर्यङ्लुगन्तादच् । '' 'जक्ष भक्षहसनयोः'(अ.प.से.)इत्यतः वृषादित्वात् कलच्, बाहुलकात् षलोपे जश्त्वे च जगलः''[ ] इति शाब्दिकाः । ''जगलो मदनद्रुमे । मेदके पिष्टमद्ये च''[मेदिनीकोशः, लान्तवर्गः, श्लो-९१-९२]इति चवर्गतृतीयादौ मेदिनिः । २ मेद्यति स्निह्यति **मेदकः** । 'ञिमिदा स्नेहने'(दि.प.से.), ण्वुल् । ३ मद्यस्य पङ्को **मद्यपङ्कः** । मदनपालस्तु-

''प्रसन्ना स्यात् सुरामण्ड१स्तस्मात् कादम्बरी घना२।
जगलस्तदधः प्रोक्तो३ जगलान्मेदको घनः४ ॥१॥''

बुक्कसो(पक्वशो)५ जगलः सारः सुराबीजं तु किण्वकम्६॥ [मदनपालनिघण्टुः, पानीयादिवर्गः-८, मद्यभेदनामगुणाः, श्लो-१७१-१७२]इति भिनत्ति । एषां षण्णां गुणांश्च पृथग् ब्रूते । त्रीणि मद्यपङ्कस्य ॥

**किण्वं तु नग्नहूः ॥९०४॥**

**नग्नहुर्मद्यबीजं च**

१ किणति(कणति) सुराननेनेति **किण्वम्**, क्लीबे । 'कण्(कण) गतौ'(भ्वा.प.से.), ततो बाहुलकादुल्वादित्वाद् वः, उपधायाश्चेत्वम् । किणिः सौत्रो वा, तत उल्वादित्वाद् वः । ''किण्वं पापे सुराबीजे''[विश्वप्रकाशकोशः, वान्तवर्गः, श्लो-१७]इति विश्वः । २ नग्नेन अवस्त्रेण हूयते स्पर्ध्यतेऽनाच्छादनत्वाद् **नग्नहूः** । 'ह्वेञ् स्पर्धायां शब्दे च' (भ्वा.उ.अ.), क्विप्, ऊद् । नग्नहौ, नग्नह्वः इत्यादि। अव्युपन्नोऽमित्यन्ये ॥९०४॥ ३ **नग्नहुः** पञ्चमस्वरान्तः । पुंलिङ्गावेतौ । ४ मद्यस्य बीजं **मद्यबीजम्** । चत्वारि माषदलन्यादिमद्यबीजस्य ॥

**मद्यसन्धानमासुतिः ।**

**आसवोऽभिषवः**

१ मद्यस्य सन्धानं **मद्यसन्धानम्** । २ आसूयत इति **आसुतिः** । 'षुञ् अभिषवे'(स्वा.उ.अ.), 'स्त्रियां क्तिन्' ३।३।९४॥ । ३ आसवनम् **आसवः** । 'ॠदोरप्'३।३।५७॥ । ४ अभिषूयते चिरं क्लेद्यते **अभिषवः** । त्रीणि मद्यसन्धानस्य । 'मद्यनुं अथाणुं' इति भाषा ॥

**मद्यमण्डकारोत्तमौ समौ ॥९०५॥**

१ मद्यस्य मण्डो **मद्यमण्डः** । २ कारेण क्रियावशादुत्तमः **कारोत्तमः** । कारोत्तरोऽपि । ''कारोत्तमः(-त्तरः) सुरामण्डः''[अमरकोषः २।१०।४२॥]इत्यमरः । ''सुरोर्ध्वे स्वच्छो भागः''[ ]इति तट्टीका । द्वे मद्यमण्डस्य ॥९०५॥

**गल्वर्कस्तु चषकः स्यात् सरकश्चानुतर्षणम् ।**

१ गलन्त्यनेन **गल्वर्कः** । 'गल अदने'(भ्वा.-

---

१. ४प्रतौ न दृश्यते ॥ २. '-सीधवः' इति त्रिकाण्डशेषे, पृ.३८८॥ ३. 'पूञ्' इति३॥ ४. '-स्यण्डी' इति२.४॥ ५. 'मिदा' इति१.२॥ ६. 'किण्' इति२.३.४॥ ७. 'किणेः' इति१॥ ८. 'तत्र' इति३, ४प्रतौ नास्ति ॥ ९. '-ति' इति३.४॥ १०. '-नों' इति४॥ ११. '-णुं' इति२, '-णों' इति४॥ १२. 'गल्यन्ते' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प.से.), 'निष्कतुरुष्क-'(हैमोणा-२६)इति कप्रत्यये निपात्यते । २ चष्यते भक्ष्यतेऽनेन **चषकः**, पुंनपुंसकः । ''चषकोऽस्त्री''[अमरकोषः २।१०।४३॥]इत्यमरः । 'चष भक्षणे' (भ्वा.उ.से.), मूर्धन्यान्तः, 'क्वुन् शिल्पिसंज्ञयोः'(उणा-१९०) इति क्वुन् । ३ सरत्यनेन **सरकः** । 'सृ गतौ'(भ्वा.प.अ.), 'कृञादिभ्यः [संज्ञायां] वुन्'(उणा-७१३) पुंक्लीबलिङ्गावेतौ । ''शीधौ च शीधुपाने च चषके सरकोऽस्त्रियाम्''[ ]इति गौडः । ४ अनुतृष्यन्त्यनेन **अनुतर्षणम्** । 'ञितृषा पिपासायाम्' (दि.प.से.), ल्युट् । अनुतर्षोऽपि । ''अनुतर्षश्चषकश्चाऽनुकर्षश्च''[1][ ]इति भागुरिः । ''स्फाटिके पात्रेऽयं रूढः'' [अम.क्षीर.२।१०।४३॥]इति क्षीरस्वामी । चत्वारि मद्यपानपात्रस्य[2] । अमरस्तु-''सरकोऽप्यनुतर्षणम्''[अमरकोषः२।१०।४३॥]इति सरकानुतर्षणशब्दौ सुरापरिवेषणपर्यायावाह, तेन सरकोऽनुतर्षणमेतौ मद्यपरिवेषणस्याऽपि नाम्नी ज्ञेये[3] ॥

## शुण्डा पानमदस्थानम्

१ शुन्यते **शुण्डा** । 'शुन गतौ'(तु.प.से.), 'ञमन्ताड्डः' (उणा-१११) । शुण्डा पानगृहम् । ''शुण्डा पानगृहेऽनेन (मता)''[मेदिनीकोशः, डान्तवर्गः, श्लो-२५]इति तालव्यादौ मेदिनिः । पानमदयोः स्थानमास्पदं कल्यपालगृहैकदेशः । यथा-''शुण्डायां प्रविजृम्भते परिमलः कोऽप्येष शुण्डाकृतः'' [4][ ]इति । एकं मदपानस्थानकस्य, मदस्थानकस्य च ॥

## मधुवारा मधुक्रमाः[5] ॥९०६॥

१ मधुनो वारा अवसरा **मधुवाराः** । २ मधुनः क्रमा **मधुक्रमाः** ॥९०६॥

## सपीतिः सहपानं स्यात्

१ सह सम्भूय पानं **सपीतिः** । 'पा पाने'(भ्वा.प.अ.), 'स्त्रियां क्तिन्'३।३।९४॥, 'घुमास्था-'६।४।६६॥ इतीत्वम् । २ सह पीयते **सहपानम्** । ल्युट् । द्वे सहपानस्य । 'साथिइ[6] पीवउं[7]' इति भाषा ॥

## आपानं पानगोष्ठिका ।

१ आ समन्तात् सम्भूय पिबन्त्यत्र **आपानम्** । 'पा पाने'(भ्वा.प.अ.), अधिकरणे ल्युट् । ''यत्र(अत्र) स्फटि[8]कहर्म्येषु नक्तमापानभूमिषु''[कुमारसम्भवम्, सर्गः-६, श्लो-४२]इति कुमारसम्भवः । २ पानाय कृता गोष्ठी पानगोष्ठी, ततः स्वार्थे कनि[9], 'केऽणः'७।४।१३॥ इति ह्रस्वत्वे[10] **पानगोष्ठिका** । ''पानाय पानस्य वा गोष्ठी आसनबन्धः पानगोष्ठी'' [अभि-,स्वोपज्ञटीका ३।९०७]इत्याचार्याः[11] । द्वे पानगोष्ठ्याः ॥

## उपदंशस्त्ववदंशश्चक्षणं मद्यपाशनम् ॥९०७॥

१ उपदश्यते[12] पानरुचिजननाय **उपदंशः** । 'दंश दशने'(भ्वा.प.अ.), कर्मणि घञ् । २ एवमवदश्यते **अवदंशः** । ३ चक्ष्यते **चक्षणम्** । 'चक्षञ्[13] भक्षणे'( ), कर्मणि ल्युट् । ४ मद्यपस्य अशनं खरविशदमभ्यवहार्यं **मद्यपाशनम्** । चत्वारि उपदंशस्य । 'मद्यनुं[14] चाखवउं[7]' इति भाषा ॥९०७॥

## नाडिन्धमः स्वर्णकारः कलादो मुष्टिकश्च सः ।

१ नाडी वंशादिकृता नलीति ख्याता, तां मुखे विन्यस्य वायुना धमति शब्दयति **नाडिन्धमः** । 'ध्मा शब्दाग्निसंयोगयोः'(भ्वा.प.से.), 'नाडीमुष्ट्योश्च'३।२।३०॥ इति खश्, 'खित्यनव्ययस्य'६।३।६६॥ इति ह्रस्वत्वम् । २ स्वर्णं करोति अलङ्कारादिरूपतयेति **स्वर्णकारः** । 'कर्मण्यण्' ३।२।१॥ । ३ कलां स्वर्णशिल्पमादत्तवान् स्वीकृतवान् मूलविभुजादेराकृतिगणत्वात् कः **कलादः** । कलं स्वर्णकालिकामाद्यति [आ]खण्डयति[15] वा । 'दोऽवखण्डने' (दि.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥ । अत एव कलधौतमपि हेमनाम । ४ मुष्टिं कायति **मुष्टिकः** । 'कै शब्दे' (भ्वा.प.अ.). 'आतोऽनुपसर्गे कः' ३।२।३॥ । चत्वारि स्वर्णकारस्य ॥

---

१. द्र. अम.क्षीर. २।१०।४३॥, पृ.२३५॥, रामाश्रमी २।१०।४३॥, पृ.४७१॥, तयोः ''चषश्चानुतर्षश्च सरकश्च'' इति दृश्यते, पदचन्द्रिका, भा-२, श्लो-७२६, पृ.८१६॥, तत्र ''चषकश्चानुतर्षश्च'' इति दृश्यते ॥ २. 'मद्यपानस्य' इति१॥ ३. 'ज्ञेयं' इति३॥ ४. द्र. अनेकार्थकैरवाकरकौमुदीटीका, भा-१, २।१२५॥, पृ.७७-७८॥ ५. तुलनीयोऽमरकोषः २।१०।४०॥ ६. 'साथि' इति४॥ ७. '-वो' इति३, '-वूं' इति४॥ ८. 'स्फु-' इति३॥ ९. 'कन्' इति४॥ १०. '-त्वं' इति४॥ ११. स्वोपज्ञटीकायाम्-''पानस्य गोष्ठी आसनबन्धः'' इत्येव दृश्यते, ३।९०७॥, पृ.२००॥ १२. '-दंश्यते' इति३.४॥ १३. 'चक्षिङ्' इति३॥ १४. '-नो' इति३, '-नूं' इति४॥ १५. '-डति' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## तैजसावर्तनी मूषा[१]

१ तैजसं स्वर्णादि आवर्त्यतेऽत्रेति **तैजसावर्तनी** । 'वृतु वर्तने'(भ्वा.आ.से.), अधिकरणे ल्युट्, टित्त्वाद् ङीष् (ङीप्)। २ मुष्यते स्वर्णमनयाऽस्यां वा **मूषा** । 'मुष स्तेये' (क्र्या.प.से.), 'गुरोश्च हलः'३।३।१०३॥ इत्यकारप्रत्यये[२] टाप्, 'अन्येषामपि-'६।१।१३७॥ इति दीर्घः । मूयतेऽस्यां मूषेति वा। 'मूङ् बन्धने'(भ्वा.आ.से.), 'मूङ्भ्योलोपश्च(मूङ्य्वोर्लोपश्च)'(तु.दश.उ.९।१७)इत्यूषन् (इत्युषन्) । गौरादिङीषि मूषीत्यपि । ''मूषी मृषत्वोवा मृषा(मूषा त्वावर्तनी मूषी)'' [[३]]इति शब्दान्तरः (शब्दार्णवः)। द्वे 'मूंसी[४]' इति ख्यातायाः॥

## भस्त्रा चर्मप्रसेविका[१] ॥९०८॥

१ बभस्ति दीप्यते[५]ऽग्निरनयेति[६] **भस्त्रा** । 'भस भर्त्सनदीप्त्योः'(जु.प.से.), 'हुयामाश्रु(शु)भसिभ्यस्त्रन्'(उणा-६०७), 'तितुत्र-'७।२।९॥ इतीडभावः[७], अजादित्वाट्टाप् । २ चर्मणा प्रसीव्यते **चर्मप्रसेविका**, पुंस्त्रीलिङ्गः । ''चर्मप्रसेवकोऽपि''[अम.क्षीर.२।१०।३३॥]इति क्षीरस्वाम्युक्तेः[८]॥ धमन्यमपि, मङ्खो यथा-''मुखेनोपधमेदग्निं धमन्यन्तरितेन तु'' [ ] । द्वे 'धमणि' इति ख्यातायाः ॥९०८॥

## आस्फोटनी वेधनिका[१]

१ आस्फोट्यते विद्यतेऽनया **आस्फोटनी** । 'स्फुट हिंसायाम्'([९]), 'स्फुट[१०] स्फोटने'([९]) वा, करणे ल्युट्, गौरादिः । २ विध्यतेऽनया मौक्तिकादि वेधनी । 'विध विधाने'(तु.प.से.), करणे ल्युट्, गौरादिः, ततः स्वार्थे कनि[११] **वेधनिका** । ''वेधनी तु नास्फोटन्यां (लास्फोटन्यां) स्फोटनी वृषदंशिका''[[१२]]इति वाचस्पतिः । द्वे '[१३]शारडी' इति ख्यातायाः ॥

## शाणस्तु निकषः कषः[१४] ।

१ श्यति तनूकरोति **शाणः** । 'शो तनूकरणे'(दि.-प.अ.), बाहुलकाण्णः । 'शण आदाने[१५]'(भ्वा.प.से.) वा, घञन्तः । पुंस्त्रीलिङ्गोऽयम् । यल्लक्ष्यम्-''यस्तत्कण्ठकठोरास्थिशाणायां ते जयस्यसिम्''[ ]इति । २ निकष्यतेऽत्राऽनेन वा **निकषः** । 'कष हिंसायाम्'(भ्वा.प.से.), 'गोचरसञ्चरवहव्रजव्यजापणनिगमाश्च'३।३।११९॥ इति चकाराद् घः ३ एवं **कषः** । त्रीणि 'खुरसाण' इति ख्यातस्य । ''मणिकारादिभाण्डमाह(-हुः)''[अम.क्षीर.२।१०।३२॥]इति क्षीरस्वामी ॥

## संदंशः स्यात् कङ्कमुखः

१ संदश्यतेऽनेन [१६]तप्तस्वर्णादीति[१७] **संदंशः** । 'दंश दशने'(भ्वा.प.अ.), घञ् । २ कङ्कपक्षिण इव मुखमस्य **कङ्कमुखः** । द्वे 'सांडसा[१८]' इति ख्यातस्य ॥

## भ्रमः कुन्दं च यन्त्रकम् ॥९०९॥

१ भ्रमति **भ्रमः** । 'भ्रमु अनवस्थाने'(दि.प.अ.), अच् । भ्रम्यत इति वा । घञन्तः, 'नोदात्तोपदेश-'७।३।३४॥ इति वृद्धिनिषेधः । २ कवते शब्दायते **कुन्दम्**, पुंक्ली.। 'कुङ् शब्दे'(भ्वा.आ.अ.), 'अब्दादयश्च'(उणा-५३८) इति साधुः । ३ यन्त्र्यतेऽनेनेति[१९] यन्त्रम् । 'यत्रि सङ्कोचे' (चु.उ.से.), करणे घञ्, स्वार्थे कनि **यन्त्रकम्** । त्रीणि '[२०]सिंघाडा' इति ख्यातस्य ॥९०९॥

## वैकटिको मणिकारः

१ विकटा मणयः पण्यमस्य **वैकटिकः** । 'तदस्य पण्यम्'४।४।५१॥इति ठक्, 'ठस्येकः'७।३।५०॥, 'किति च' ७।२।११८॥ । २ उत्तेजनान्मणिं करोति **मणिकारः** । 'कर्मण्यण्'३।२।१॥ । द्वे मणिकारस्य । 'जवहरी' इति भाषा ॥

## शौल्विकस्ताम्रकुट्टकः ।

१ शुल्वघटनं शिल्पमस्य **शौल्विकः** । 'शिल्पम्'

---

१. तुलनीयोऽमरकोष २।१०।३३॥ २. 'गुरोश्च हलः' ३।३।१०३॥ इत्यस्य प्रवृत्तिर्विचारणीया, गुरुत्वाभावात् ॥ ३. द्र. टीकासर्वस्वम्, भा-३, २।१०।३४॥, पृ.२७५॥, पदचन्द्रिका, भा-२, शूद्रवर्गः, श्लो-७१६, पृ.८०६॥, तत्र ''मूषा मुषा त्वा-'' इति दृश्यते ॥, रामाश्रमी२।१०।३३॥, पृ.४६६॥, तत्र ''मुषा त्वावर्तनी मुषी'' इति दृश्यते ॥ ४. 'मूसी' इति३, 'मूषी' इति४॥ ५. '-ति' इति३.४॥ ६. 'इति' इति ४प्रतौ नास्ति॥ ७. '-ण्निषेधः' इति४॥ ८. '-स्वाम्युक्तः' इति३, '-स्वामी' इति४॥ ९. 'स्फुट विकसने'(भ्वा.आ.से., तु.प.से.), 'स्फुट भेदने'(चु.उ.से.) इति क्षीरतरङ्गिण्यादयः ॥ १०. 'स्फु-' इति४॥ ११. 'कन्' इति४॥ १२. द्र. पदचन्द्रिका, भा-२, शूद्रवर्गः, श्लो-७१६, पृ.८०७॥, रामाश्रमी २।१०।३३॥ पृ.४६६॥ १३. 'सा-' इति३॥ १४. तुलनीयोऽमरकोषः २।१०।३२॥ १५. 'अदने' इति१.३, 'चण श्रण दाने' इत्यत्र स्वामिनोक्तम्-'शण इत्यपि दुर्गः' इति, 'चण शण श्रण दाने ('च' इत्यधिकः सायणमते)' इति मैत्रेयसायणौ ॥ १६. 'सप्त-' इति१॥ १७. '-दीनि' इति४॥ १८. 'संडासी' इति३॥ १९. 'इति' ४प्रतौ नास्ति ॥ २०. 'सं-' इति३.४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

४।४।५५॥ इति ठक् । २ ताम्रं कुट्टयति **ताम्रकुट्टकः** । 'कुट्ट छेदने'(चु.प.से.), चुरादिः, ण्वुल् । द्वे 'कंसारा' इति ख्यातस्य ॥

## शाङ्खिकः स्यात् काम्बविकः

१-२ शङ्खघटनं शिल्पमस्य **शाङ्खिकः** । कम्बुघटनं शिल्पमस्य **काम्बविकः** । उभयत्र 'शिल्पम्'४।४।५५॥ इति ठक्, 'इसुसुक्तान्तात्-'७।३।५१॥ इति प्राप्तस्य कादेशस्याऽभावो लक्ष्यते । द्वे शङ्खदन्तादिघटकस्य । 'कचहडा' इति भाषा । ''शङ्खवलयादिकृत्''[अम.क्षीर.२।१०।८॥]इति क्षीरस्वामी ॥

## तुन्नवायस्तु सौचिकः[१] ॥९१०॥

१ तुन्नं विद्धं[२] वयति **तुन्नवायः** । 'वेञ् तन्तुसन्ताने'(भ्वा.उ.अ.), 'ह्वावामश्च'३।२।२॥ इति कर्मण्यण्, 'आतो युक्-'७।३।३३॥इति युक् । २ सूचीवानं शिल्पमस्य **सौचिकः** । 'शिल्पम्'४।४।५५॥ इति ठक् । द्वे 'तूणारा सूई' इति ख्यातस्य ॥९१०॥

## कृपाणी कर्तरी कल्पन्यपि

१ कृपाण उक्तः (अभि.चि.श्लो-७८२); ततो गौरादित्वाद् ङीष्[३] [**कृपाणी**] । २ कृत्यतेऽनया **कर्तरी** । 'कृती छेदने'(तु.प.से.), अम्बरवदरन्, ततो गौरादित्वाद् ङीष्[३] । ३ कल्पतेऽनया **कल्पनी** । 'कृपू सामर्थ्ये'(भ्वा.आ.वे.), करणे ल्युट्, गौरादिः । त्रीणि कर्तर्याः ॥

## सूची तु सेवनी ।

१ सूचयति **सूची** । 'सूच[४] पैशुन्ये'(चु.उ.से.), 'इन् सर्वधातुभ्यः'(उणा-५५७), ततः 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीष्[३] । १ सीव्यतेऽनया **सेवनी** । 'षिवु तन्तुसन्ताने'(दि.प.से.), करणे ल्युट्, गौरादिः । द्वे सूच्याः ॥

## सूचिसूत्रं पिप्पलकम्

१ सूचेः सूत्रं **सूचिसूत्रम्** । २ पिप्पलमेव **पिप्पलकम्** । स्वार्थे कन् । ''पिप्पलकं स्तनवृन्ते मतं सीवनसूत्रके''[विश्वप्रकाशकोशः, कान्तवर्गः, श्लो-२०१]इति महेश्वरः[५] । द्वे 'सीवणदोरा' इति ख्यातस्य[६] ॥

## तर्कुः कर्तनसाधनम् ॥९११॥

१ कृत्यते वेष्ट्यते सूत्रमत्र **तर्कुः**, पुंसि । 'कृती वेष्टने'(रु.प.से.), रुधादिः, 'कृतेराद्यन्तविपर्ययश्च'(उणा-१६) इत्युः । २ कृत्यते कर्तनम्, तस्य साधनं **कर्तनसाधनम्** । द्वे 'त्राक[७]' इति ख्यातस्य ॥९११॥

## पिञ्जनं विहननं च तूलस्फोटनकार्मुकम्[८] ।

१ पिञ्ज्यते विहन्यते **पिञ्जनम्** । 'पिजि हिंसायाम्[९]'(चु.उ.से.), ल्युट् । २ विहन्यतेऽनेन **विहननम्** । 'हन् (हन) हिंसागत्योः'(अ.प.अ.), करणे ल्युट् । तूलस्फोटनाय कार्मुकं तूलस्फोटनकार्मुकम्[१०] । द्वे '[११]पीजणां' इति ख्यातस्य ॥

## सेवनं सीवनं स्यूतिः[१२]

१-२ सेव्यते तत्[१३] **सेवनम्** । 'षिवु तन्तुसन्ताने' (दि.प.से.), ल्युट् । 'ष्ठिवुषिवोर्ल्युट्युपधादीर्घो वा'( ) इति पक्षे **सीवनम्** । ३ सेवनं **स्यूतिः** । 'षिवु तन्तुसन्ताने' (दि.प.से.), 'स्त्रियां क्तिन्'३।३।९४॥, 'च्छ्वोः शूट्-'६।४।१९॥ इत्यूठि । त्रीणि 'सीवणउं[१४]' इति ख्यातस्य ॥

## तुल्यौ स्यूतप्रसेवकौ ॥९१२॥

१ सीव्यते स्म **स्यूतः** । 'षिवु तन्तुसन्ताने'(दि.प.से.), 'निष्ठा'३।२।१०२॥ इति क्तः, 'च्छ्वोः शूट्-' ६।४।१९॥ इति ऊठ् । २ प्रसीव्यते **प्रसेवकः** । 'अकर्तरि च कारके संज्ञायाम्'३।३।१९॥ इति घञन्तात् संज्ञायां कन् । ''प्रसेवः कथितो धीरैर्वीणाङ्गस्यूतयोरपि''[विश्वप्रकाशकोशः, वान्तवर्गः, श्लो-५१]इति महेश्वरः । ''स्यूतो वस्त्राद्यावपनम्''[ ]इति तट्टीका । ''प्रसेवसंस्थापितदेववस्त्रैः''[ ]इत्यनेकार्थोदाहरणम् । द्वे सामान्येन वस्त्राद्यावपनस्य । 'छुगचउ[१५], कोथलु[१६]' इत्यादि[१७] भाषा ॥९१२॥

## तन्त्रवायः कुविन्दः स्यात्

---

१. तुलनीयोऽमरकोषः २।१०।६॥ २. 'विरुद्धं' इति४॥ ३. 'ङीप्' इति१॥ ४. 'सूची' इति१.२॥ ५. 'मा-' इति२॥ ६. 'प्रसिद्धस्य' इति२.३॥ ७. 'त्राकला' इति३॥ ८. '-के' इति३॥ ९. 'पिजि हिंसाबलादाननिकेतनेषु' इति चुरादौ क्षीरतरङ्गिण्यादयः ॥ १०. इतोऽग्रे ३प्रतौ 'तत्र' इति दृश्यते ॥ ११. 'पिं-' इति३, 'पीं-' इति४॥ १२. तुलनीयोऽमरकोषः ३।२।५॥ १३. ३प्रतौ नास्ति, इतोऽग्रे ३.४प्रत्योः 'इति' इति दृश्यते ॥ १४. '-णो' इति३, '-णौ' इति४॥ १५. '-चौ' इति३.४॥ १६. '-लो' इति३, '-लौ' इति४॥ १७. 'इति भाषा' इति२.३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ तिर्यक्प्रासारितास्तन्तवस्तन्त्रमित्युच्यन्ते, तन्त्रं वयति **तन्त्रवायः** । 'वेञ् तन्तुसन्ताने'(भ्वा.उ.अ.), 'ह्वावामश्च' ३।२।२॥ इत्यण् । तन्तुवायोऽपि । २ कुं विन्दति **कुविन्दः** । 'विद्लृ लाभे'(तु.उ.अ.), 'गवादिषु विदेः(च विन्देः) संज्ञायाम्'(वा-३।१।१३८॥)इति शः । द्वे 'वणकर' इति ख्यातस्य ॥

### त्रसरः सूत्रवेष्टनम् ।

१ त्रस्यति चलति **त्रसरः** ।'त्रसी उद्वेगे'(दि.प.से.), बाहुलकादरन्। २ सूत्रं वेष्ट्यते वानार्थमत्रेति **सूत्रवेष्टनम्** । 'वेष्ट वेष्टने'(भ्वा.आ.से.), अधिकरणे ल्युट् । द्वे 'अटेरण' इति ख्यातस्य ॥

### वाणिर्व्यूतिः

१ वानं **वाणिः**, स्त्रीलिङ्गः । २ विशेषेण ऊयनं **व्यूतिः** । 'ऊयी[2] तन्तुसन्ताने'(भ्वा.उ.से.), विपूर्वः, 'स्त्रियां क्तिन्'३।३।९४॥, 'लोपो व्योर्वलि'६।१।६६॥ इति यलोपः । द्वे 'वाणउं'[3] इति प्रसिद्धस्य[4] ॥

### वानदण्डो वेमा

१ वानार्थं दण्डो **वानदण्डः** । २ वयन्त्यनेन **वेमा**, पुंक्लीबलिङ्गः[5] । 'वेञ् तन्तुसन्ताने'(भ्वा.उ.अ.), '-मनिन्'(उणा-५८४)इति मनिन् । वेमानौ, वेमानः इत्यादि पुंसि । वेम, वेमनी वेम्नी, वेमानि इत्यादि क्लीबे । द्वे वानदण्डस्य । 'नली वांसणी' इति[6] भाषा ॥

### सूत्राणि तन्तवः ॥९१३॥

१ सीव्यते पट एभिरिति **सूत्राणि**, पुंक्ली.[7] । 'षिवु[8] तन्तुसन्ताने'(दि.प.से.), 'सिविमुच्योष्टेरू च'(उणा-६०२)इति ष्ट्रन्, टेरूकारः । षित्त्वात् स्त्रियां सूत्री । सूत्र्यते पट एभिरिति वा ।'सूत्र ग्रन्थे'[9](चु.उ.से.), कर्मणि घञ् । २ तन्यन्ते **तन्तवः**, पुंसि ।'तनु विस्तारे'(त.उ.से.), 'सितनिगमिमसिसिचि-'(उणा-६९)इत्यादिना तुन् । तन्त्रमपि ॥

''तन्त्रं सिद्धान्ते राष्ट्रे च परच्छन्दप्रधानयोः ।
अगदे कुटुम्बकृत्ये तन्तुवाने परिच्छेदे ॥१॥
श्रुतिशाखान्तरे शास्त्रे करणे द्व्यर्थसाधके[10] ।
इति कर्तव्यता तन्त्वोः ॥''[अनेकार्थसंग्रहः २।४१३-४१४]

इत्यनेकार्थः । द्वे सूत्रस्य ॥९१३॥

### निर्णेजकस्तु रजकः

१ निर्णेनेक्ति क्षालयति **निर्णेजकः** ।'णिजिर् शौचपोषणयोः'(जु.उ.अ.), ण्वुल् । धावकोऽपि । २ रञ्जयति **रजकः** । 'रञ्ज रागे'(भ्वा.उ.अ.), 'शिल्पिनि ष्टुन्(ष्वुन्)' ३।१।१४५॥, 'क्वुन् शिल्पिसंज्ञयोः'(उणा-१९०)इति क्वुन् वा, 'युवोरनाकौ'७।१।१॥, असि अके अने घिनुणि च रञ्जेर्नलोपो वाच्यः[11] । रजकीति तु[12] 'पुंयोगादाख्यायाम्'४।१।४८॥ इति ङीष्, अपुंयोगे तु ङीषा न भाव्यमिति भाष्यकाराभिप्राय इति, एवं तु 'प्रत्ययस्थात्-'७।३।४४॥ इतीत्वे रजिकेति भाव्यम् । द्वे रजकस्य ॥

### पादुकाकृत् तु चर्मकृत् ।

१ पादुकाः पादत्राणानि करोति **पादुकाकृत्** । क्विप्[13], 'ह्रस्वस्य-'६।१।७१॥ इति तुक् । २ चर्म करोति विकारं प्रापयति **चर्मकृत्** । क्विप्, 'ह्रस्वस्य-'६।१।७१॥ इति तुक् । द्वे चर्मकृतः ॥

### उपानत् पादुकाः पादूः पन्नद्धा पादरक्षणम् ॥९१४॥ प्राणहिता

१ उपनह्यति पादमिति **उपानत्** । 'नह(णह) बन्धने'(दि.उ.अ.), उपपूर्वः, क्विप्, 'नहिवृतिवृषि-'६।३।११६॥इत्यादिना दीर्घः, 'नहो धः'८।२।३४॥, 'वाऽवसाने' ८।४।५६॥ । **२-३** पद्यतेऽनया **पादुका** । 'पद गतौ' (दि.आ.अ.), 'लषपतपद-'३।२।१५४॥ इत्यादिना उकञ्, टाप् । अस्मादेव धातोः 'णित् कसिपदि-'(उणा-८५)इति णिदूः । संपद्यर्थे कर्तरीति[14] ऊकारप्रत्ययो णित्त्वाद् वृद्धिः **पादूः** संज्ञायां कनि 'केऽणः'७।४।१३॥इति ह्रस्वत्वे पादुकेति वा, तदभावे पादूः । ४ पदोश्चरणयोर्नद्धा **पन्नद्धा** । ५ पादौ रक्ष्येतेऽनेन **पादरक्षणम्** । 'रक्ष पालने'(भ्वा.प.से.), करणे ल्युट् । पादत्राणमपि ॥९१४॥ ६ प्राणेभ्यो हिता **प्राणहिता** । षडुपानहः । शेषश्चात्र-

---

१. तुलनीयोऽमरकोषः ३।२।२४॥ २. इतोऽग्रे २प्रतौ 'वेञ्' इति दृश्यते ॥ ३. '-णो' इति३॥ ४. 'ख्यातस्य' इति३.४॥ ५. 'पुंक्लीबः' इति३॥ ६. 'इत्यादि' इति४॥ ७. '-क्लीबः' इति३.४॥ ८. 'षिव्' इति३॥ ९. 'सूत्र विमोचने' इति स्वामी, 'सूत्र वेष्टने' इति मैत्रेयसायणौ ॥ १०. '-प्रसाधके' इति३॥ ११. 'रजकरजनरजःसूपसंख्यानं कर्तव्यम्' इति काशिकासम्मतवार्तिकम्, काशिकावृत्तिः, भा-५, ६।४।२४॥, पृ.३७८॥ १२. १.४प्रत्योर्नास्ति ॥ १३. '-पि' इति३.४॥ १४. 'इति' इति ३.४प्रत्योर्नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"पादुकायां [1-1]पदरथी पादजङ्घः पदत्वरा ।
([1-2]पादवीथी पादपेशी) पादपीठी पदायता ॥१॥"
[शेषनाममाला ३।१५५-१५६॥]इति ॥

**अनुपदीना त्वाबद्धाऽनुपदं हि या ।**

१ अनुपदमिति, 'यस्य चायामः'२।१।१६॥ इत्यव्ययीभावः । सैवोपानत्, अनुपदं पादायामप्रमाणा बद्धा **अनुपदीना** ।'अनुपदसर्वा-'५।२।९॥ इत्यादिना खः, खस्येनादेशः । या उपानदनुपदं पदायामेन आबद्धा, साऽनुपदीनेत्यन्वयः । एकं '[3]मोजडी' इति प्रसिद्धायाः[4] ॥

**नध्री वर्ध्री वरत्रा स्यात्**[5]

१ नह्यते बध्यतेऽनयेति[6], **नध्री**, स्त्रीलिङ्गः । 'नह (णह) बन्धने'(दि.उ.अ.), 'दाम्नी-'३।२।१८२॥इति ष्ट्रन्, 'नहो धः'८।२।३४॥ इति धत्वम्, 'झषस्तथोः-'८।२।४०॥ इति धत्वं तकारस्य, 'झलां जश् झशि'८।४।५३॥, षित्त्वात् 'षिद्गौरादिभ्यश्च'४।१।४१॥ इति ङीष् । २ वर्धते दीर्घीभवति चर्मरज्जुत्वाद् **वर्ध्री**, पुंस्त्रीलिङ्गः[7] । 'वृधु वृद्धौ' (भ्वा.आ.से.), 'वृधिवपिभ्यां रन्'(उणा-१८५), 'पुगन्तलघूपधस्य-'७।३।८६॥ इति गुणः, गौरादिः । "वर्ध्र्यां चर्मबन्धे भवा वार्ध्री"[[8]]इति हट्टचन्द्रः । "करशब्दप्रायुक्ता पादुकायामपि वर्ध्रीत्युपचारात् पुंस्ययं रामवत्, स्त्रियां नदीवत्, वर्ध्रा आबन्तोऽपि"[ ]इत्यन्ये । ३ व्रियते **वरत्रा** । 'वृञ् वरणे' (स्वा.उ.से.), 'वृञ् आच्छादने'(चु.उ.से.) वा, 'वृञश्चित्' (उणा-३८७)इत्यत्रन् । त्रीणि 'वाधरी' इति ख्यातायाः ॥

**आरा चर्मप्रभेदिका**[9] **॥९१५॥**

१ [10]ईयर्ति प्रविशति तन्तुरनया **आरा** । 'ऋ गतौ' (जु.प.अ.), भिदादित्वादङ्, वृद्धिश्च । २ चर्म प्रभिनत्ति **चर्मप्रभेदिका** ।'भिदिर् विदारणे'(रु.उ.अ.), ण्वुल्[11], 'प्रत्ययस्थात्-'७।३।४४॥इतीत्वम् ।द्वे'आर'इति ख्यातस्य ॥९१५॥

**कुलालः स्यात् कुम्भकारो दण्डभृच्चक्रजीवकः ।**

१ कुं मृदं लालयति **कुलालः** । 'लल विलासे[12]' (भ्वा.प.से.), ण्यन्तादस्मात् 'कर्मण्यण्'३।२।१॥ । कुलानि गृहाणि अलतीति वा[13] । 'अलञ्[14] भूषणादौ'(भ्वा.प.से.), अच्, अण् वा । कोलति संस्त्यायति व्रातमिति वा । 'कुल संस्त्याने'(भ्वा.प.से.), कालन्प्रत्ययः । २ करणं कारः, कुम्भं(कुम्भस्य) कारः **कुम्भकारः** । 'उपपदम्-'२।२।१९॥ इति समासः । ३ दण्डं बिभर्ति **दण्डभृत्** । 'डुभृञ् धारणे[15]' (जु.उ.अ.), क्विप्, 'ह्रस्वस्य-'६।१।७१॥ इति तुक् । ४ चक्रेण जीवति **चक्रजीवकः** । 'जीव प्राणधारणे'(भ्वा.प.से.), ण्वुल् । चत्वारि कुम्भकारस्य ॥

**शाणाजीवः शस्त्रमार्जो भ्रमासक्तोऽसिधावकः ॥९१६॥**

१ शाणया जीवति **शाणाजीवः** । पचाद्यच् । २ शस्त्राणि मार्ष्टि तेजयति **शस्त्रमार्जः** । 'मृजूष् शुद्धौ'(अ.प.वे.), 'कर्मण्यण्'३।२।१॥, 'मृजेर्वृद्धिः'७।२।११४॥ । ३ भ्रमे आसक्तो **भ्रमासक्तः** ।४ असीन् धावयति शोधयति **असिधावकः** ।'धूञ् कम्पने'(स्वा.उ.वे), णिजन्तः, ण्वुल् । चत्वारि 'तेरमा' इति ख्यातस्य ॥९१६॥

**धूसरश्चाक्रिकस्तैली स्यात्**

१ धुवति धुनोति वा **धूसरः** । 'धूञ् कम्पने' (स्वा.उ.वे.), 'धू विधूनने'(तु.प.से.) वा, 'कृधूमदिभ्यः कित्' (उणा-३५३)[इति] सरन्(सरः) । २ चक्रं पण्यमस्य **चाक्रिकः** । 'तदस्य पण्यम्'४।४।५१॥ इति ठक् । ३ तैलमस्त्यस्य[16] **तैली** । 'अत इनिठनौ'५।२।११५॥ इतीनिः । तिलन्तुदोऽपि । त्रीणि 'घांची' इति ख्यातस्य ॥

**पिण्याकखलौ समौ ।**

---

१-१. 'पाद-' इति, १-२. कोष्ठान्तर्गतपाठस्थाने 'पादवीथी च पेशी च' इति च शेषनाममालास्वोपज्ञटीकयोः ॥ ३. 'मौ-' इति२॥ ४. 'ख्यातायाः' इति४॥ ५. तुलनीयोऽमरकोषः २।१०।३१॥ ६. 'इति' इति १प्रतौ नास्ति ॥। ७. '-लिङ्गः' इति ४प्रतौ नास्ति ॥ ८. द्र टीकासर्वस्वम्, भा-३, २।१०।३२॥, पृ.२७३॥, तत्र "वार्ध्री दीर्घवदादिरिति हड्डचन्द्रः" इति दृश्यते, पदचन्द्रिका, भा-२, शूद्रवर्गः, श्लो-७१४, पृ.८०३॥ ९. तुलनीयोऽमरकोषः २।१०।३४॥ १०. 'ई-' इति१.२.३॥ ११. 'ल्वुल्' इति१.२॥ १२. '-न्यासे' इति३॥ १३. ४प्रतौ नास्ति ॥ १४. अत्र युधिष्ठिरमीमांसकमहोदयेन कृता टिप्पणी द्रष्टव्या, क्षीरतरङ्गिणी, भ्वादिः, धातुसं-३४३, टि-७, पृ.८१॥ १५. 'डुभृञ् धारणपोषणयोः' इति क्षीरतरङ्गिण्यादयः ॥ १६. '-स्यास्ति' इति१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ पिष्यते **पिण्याकः**[१], पुंनपुंसकः । यद्गौडः- ''पिण्याकोऽस्त्री तिलकल्के''[ ] । 'पिष्लृ सञ्चूर्णने'(रु.-प.अ.), 'पिनाकादयश्च'(उणा-४५५)इति साधुः । २ खन्यते **खलः**, पुंक्ली[२] । 'खन खनने[३]'(भ्वा.उ.से.), 'मृजिखन्याहनिभ्यो डित्'(हैमोणा-४७२)इत्यलः । द्वे खलस्य ॥

## रथकृत् स्थपतिस्त्वष्टा काष्ठतट् तक्षवर्धकी ॥९१७॥

१ रथं करोति **रथकृत्** । क्विपि[४], 'ह्रस्वस्य-'६।१।७१॥ इति तुक् । रथकारोऽपि । २ स्थापयति **स्थपतिः** । ३ त्वक्षति तनूकरोति काष्ठमिति **त्वष्टा** । 'तक्ष त्वक्ष (तक्षू त्वक्षू) तनूकरणे'(भ्वा.प.वे.), 'नप्तृनेष्टृ-'(उणा-२५२)इति साधुः । ४ काष्ठं तक्ष्णोति **काष्ठतट्** । 'तक्ष (तक्षू) तनूकरणे'(भ्वा.प.वे.), करणे क्विप्, तक्षतेः संयोगान्तलोपः । काष्ठतक्षौ, काष्ठतक्षः इत्यादि । ५ तक्ष्णोति तनूकरोति **तक्षा** । 'तक्ष(तक्षू) तनूकरणे'(भ्वा.प.वे.), 'कनिन्युवृषितक्षिराजिधन्विप्रतिदिवः'(उणा-१५४)इति कनिनि प्रत्यये साधुः । तक्षाणौ, तक्षाणः इत्यादि । ६ वर्धयति छिनत्ति **वर्धकिः** । 'वृधु छेदने[५]'( ), वर्धतेरकिः, पृषोदरादिर्वा । षट्[६] सूत्रधारस्य ॥९१७॥

## ग्रामायत्तो ग्रामतक्षः

१ ग्रामस्यायत्तो **ग्रामायत्तः** । २ ग्रामस्य तक्षा **ग्रामतक्षः** । 'ग्रामकौटाभ्यां च तक्ष्णः'५।४।९५॥ इति टच्, 'नस्तद्धिते'६।४।१४४॥ इति टिलोपः, सर्वेषां साधारणतक्षेत्यर्थः । एकं ग्रामसूत्रधारस्य ॥

## कौटतक्षोऽनधीनकः[७] ।

१ कुट्यां शालायां भवः कौटः । 'तत्र भवः' ४।३।५३॥ इत्यण् । कौटः स्वतन्त्रः, स[८] चासौ तक्षा च **कौटतक्षः** । 'ग्रामकौटाभ्यां च[९] तक्ष्णः'५।४।९५॥इति टच् । स्वापणशालायां यः कर्म करोति, स्ववशो न कस्यचित् प्रतिबद्ध इत्यर्थः । २ नास्ति अधि उपरि इनः स्वामी अस्येति अनधीनः । स एव **अनधीनकः** । एकं स्ववशसूत्रधारस्य ॥

## वृक्षभित् तक्षणी वासी

१ वृक्षान् भिनत्ति **वृक्षभित्** । 'भिदिर् विदारणे' (रु.उ.अ.), क्विप् । २ तक्ष्यतेऽनया **तक्षणी** । 'तक्ष त्वक्ष (तक्षू त्वक्षू) तनूकरणे'(भ्वा.प.वे.), करणे ल्युट्, गौरादिः । ३ वसति हस्ते वासिः । 'वस निवासे'(भ्वा.प.अ.), 'वसिवपिवदिराजि[१०]-'(उणा-५६४)इत्यादिना इन्, स च णित्, ततः 'कृदिकारात्-'(गणसू-४।१।४५)इति ङीष्[११] **वासी** । त्रयोऽपि स्त्रीलिङ्गाः[१२] । त्रीणि '[१३]वांसोली' इति ख्यातायाः ॥

## क्रकचं करपत्त्रकम् ॥९१८॥

१ क्रशब्दोच्चारणेन [१४]कचति **क्रकचम्**, पुंनपुंसकम् । ''क्रकचोऽस्त्री''[अमरकोषः २।१०।३४॥ ]इत्यमरः । 'कच गतौ (शब्दे)'(भ्वा.आ.से.), अच् । २ करसञ्चार्यं पत्राकारं वस्तु करपत्त्रम्, कनि **करपत्त्रकम्** । करशब्दोच्चारणेन पततीति वा, ष्ट्रन् । द्वे 'करवत' इति ख्यातस्य ॥९१८॥

## स उद्घनो यत्र काष्ठे काष्ठं निक्षिप्य तक्ष्यते ।

१ यस्मिन्[१५] काष्ठेऽन्यत् काष्ठं निक्षिप्य संस्थाप्य तक्ष्यते, तन्नामैकम् **उद्घनः** इति । उद्धन्यते काष्ठमत्र उद्घनः । 'उद्घनोऽत्याध्याने(-त्याधानम्)'३।३।८०॥ इति साधुः । 'खोड' इत्यादिसूत्रधारभाषा । काष्ठमित्युपलक्षणम्, तेन लोहादिरपि, तदा 'अयहरणे[१६]' इति भाषा । यल्लक्ष्यम्- ''लोहोद्घनघनस्कन्धाः''[[१७] ]इति ॥

## वृक्षादनो वृक्षभेदी[१८]

१ वृक्षोऽद्यते छिद्यतेऽनेन **वृक्षादनः** । 'अद भक्षणे' (अ.प.से.), करणे ल्युट् । २ वृक्षान् भिनत्ति **वृक्षभेदी** । ग्रहादित्वाण्णिनिः । द्वे 'कुहाडो[१९]' इति ख्यातस्य ॥

## टङ्कः पाषाणदारकः ॥९१९॥

१. 'पिषेः पिन्पिण्यौ च'(हैमोणा-३६)इत्याकः ॥ २. '-क्लीबलिङ्गः' इति४॥ ३. 'खनु अवदारणे' इति क्षीरतरङ्गिण्यादयः ॥ ४. 'क्विप्' इति३॥ ५. 'वृधु छेदनपूरणयोः' इति क्षीरतरङ्गिण्यादयः ॥ ६. 'पञ्च' इति३॥ ७. तुलनीयोऽमरकोषः २।१०।९॥ ८. ३प्रतौ नास्ति ॥ ९. ३.४प्रत्योर्नास्ति ॥ १०. 'वसिवपियजिराजि-'(उणा-५६८)इत्युणादिगणे ॥ ११. 'ङीषि' इति३॥ १२. '-ङ्गः' इति३॥ १३. 'वं-' इति१, 'वंशो-' इति३॥ १४. 'क्र-' इति४॥ १५. 'यत्र' इति४॥ १६. '-णे' इति३॥ १७. द्र. स्वोपज्ञटीका ३।९१९॥, पृ.२०२॥ १८. तुलनीयोऽमरकोषः२।१०।३४॥ १९. 'कुहा' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ हन्यमानं टमिति शब्दं कायति **टङ्कः** । 'कै शब्दे'(भ्वा.प.अ.), 'आतोऽनुपं-[1]'३।२।३॥ इति कः[2] [अम. क्षीर.२।१०।३४॥]इति क्षीरस्वामी[3] । टङ्क्यतेऽनेन टङ्क इति वा । 'टकि बन्धने'(चु.उ.से.), करणे घञ् । पुंक्लीबलिङ्गोऽयम्[4] । यदमरशेषः-''मोदकस्तण्डकष्टङ्कः''[ ]इति । २ पाषाणं दारयति **पाषाणदारकः** । 'दॄ विदारणे'(क्र्या.-प.से.), णिजन्तः, ण्वुल् । द्वे 'टांकणा' इति ख्यातस्य ॥९१९॥

## व्योकारः कर्मारो लोहकारः

१ '' 'व्यो'इत्यव्ययं लोहबीजवाची''[5]इति श्रीभोजः[6], तत् करोतीति **व्योकारः** । 'कर्मण्यण्'३।२।१॥। ''व्योकारोऽयस्कारो[7] लोहकारः स्यात्''[8]इति रत्नाकरः । विशेषेण ओकं समवायमियर्त्ति[9] व्योकार इति वा । अन्ये तु-''अटव्या करोत्थं यो लोहबीजं ध्मात्वा संस्करोति स व्योकारः''[10]इत्याहुः । २ कर्म इयर्त्ति **कर्मारः** । करोति कर्मारो[11] वा । 'तुषारादयश्च'(उणा-४१९)इत्यारनि साधुः । ३ लोहं करोति **लोहकारः** । 'कर्मण्यण्'३।२।१॥, 'वाहूमो' देश्याम् । त्रीणि लोहकारस्य ॥

## कूटं त्वयोघनः ।

१ कूट्यते हन्यतेऽनेन **कूटम्**, पुंनपुंसकम् । यदमरः-''कूटमस्त्रियाम्''[अमरकोषः ३।३।३७॥] । 'कूट दाहे[12]'(चु.प.से.), घञ् । २ अयो हन्यतेऽनेन **अयोघनः** । 'हन् (हन) हिंसागत्योः'(अ.प.अ.), करणे घञ्, 'हो हन्तेः-'७।३।५४॥ इति कुत्वम् । द्वे लोहघनस्य । अयस्कारभाण्डस्य वा, कुट्टनाधारस्य वा ॥

## व्रश्चनः पत्रपरशुः

१ व्रश्चति[13] छिनत्ति **व्रश्चनः** । '[ओ]व्रश्चू[14] छेदने'(तु.प.वे.), नन्द्यादित्वाल्ल्युः । २ पत्राणां छेदकः, पत्राकारो वा परशुः **पत्रपरशुः** । द्वे नागवल्लीपत्रच्छेदककर्त्तर्योः ॥

## ईषीका तूलिकेषिका ॥९२०॥

१ ईषति **ईषीका** । 'ईष उञ्छे'(भ्वा.प.से.), 'अलीकादयश्च'(उणा-४६५)इति ईकनि साधुः । २ तूल्यते तूलिः । 'तूल निष्कर्षे'(भ्वा.प.से.), 'इगुपधात् कित्'(उणा-५५९)इतीन्, 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीष्, ततः स्वार्थे कन्[15], 'केऽणः'७।४।१३॥ [**तूलिका**] । ३ ईषति **ईषिका** । 'ईष उञ्छे'(भ्वा.प.से.), ण्वुल् । त्रीणि काष्ठलोहादिमयशलाकायाः ॥९२०॥

## भक्ष्यकारः कान्दविकः

१ खरविशदमभ्यहार्यं भक्ष्यम्[16], तत् करोति **भक्ष्यकारः** । 'कर्मण्यण्'३।२।१॥ । २ कन्दुः स्वेदनिका पण्यमस्य **कान्दविकः** । 'तदस्य पण्यम्'४।४।५१॥ इति ठक् । कन्दुना कृतं कान्दवम्, तत् पण्यमस्येति[17] वा । लक्ष्याट्ठकः कादेशो[18] न । द्वे 'कन्दोई' इति ख्यातस्य ॥

## कन्दुस्वेदनिके समे ।

१ [19]कन्दन्त्येनां[20] **कन्दुः**, पुंस्त्री । यदमरः-''कन्दुर्वा नो[21]''[अमरकोषः २।९।३०॥]इति । 'कदि वैक्लव्ये'(भ्वा.-आ.से.), बाहुलकात् 'कृभृमृ[22]-'(उणा-७)इत्यादिना उः । २ स्विद्यतेऽनया स्वेदनी[23] । 'ञिष्विदा गात्रप्रक्षरणे'(दि.-प.से.), करणे ल्युट्, गौरादिः[24] । कनि **स्वेदनिका** । द्वे कान्दविकपाकस्थानस्य ॥

## रङ्गाजीवस्तौलिकिकश्चित्रकृच्च

१ रङ्गा वर्णास्तैराजीवति **रङ्गाजीवः**, अच् । २ तूलिकालिखनं शिल्पमस्य **तौलिकिकः** । 'शिल्पम्'४।४।-५५॥ इति ठक् । ३ चित्रं करोति **चित्रकृत्** । क्विप्[25], 'ह्रस्वस्य-'६।१।७१॥ इति तुक् । 'दिवाविभा-'३।२।२१॥ इति टे चित्रकरोऽपि । त्रीणि चित्रकृतः ॥

---

१. '-पसर्गे कः' इति३.४॥ २. ३.४प्रत्योर्नास्ति ॥ ३. 'स्वामी' इत्येव२.३॥, अम.क्षीरस्वामिटीकायाम्-''हन्यमानः-टंशब्दं कायति'' इत्येव दृश्यते, पृ.२३३॥ ४ 'अयम्' इति ३.४प्रत्योर्नास्ति '॥ ५. द्र. अम.क्षीर.२।१०।७॥, पृ.२२६॥, स्वोपज्ञटीका ३।९२०॥, पृ.२०३॥, तयोः ''व्योरित्ययःपर्यायः'' इति दृश्यते ॥ ६. द्र. पदचन्द्रिका, भा-२, शूद्रवर्गः, श्लो-६९०, पृ.७७९॥, रामाश्रमी २।१०।७॥, पृ.४५४॥ ७. '-करो' इति३॥ ८. 'श्रीधरः' इति१॥, द्र. टीकासर्वस्वम्, भा-३, २।१०।७॥, पृ.२५४॥, तत्र 'रत्नकोशः' इति दृश्यते ॥ ९. '-र्तीति' इति१.३॥ १०. द्र. पदचन्द्रिका, भा-२, शूद्रवर्गः, श्लो-६९०, पृ.७८०॥ ११. ४प्रतौ नास्ति ॥ १२. स्वामिसम्मतोऽयं धात्वर्थः ॥ १३. '-ते' इति३॥ १४. '-श्चूज्' इति१.२.४॥ १५. 'कनि' इति३॥ १६. 'भक्षम्' इति३॥ १७. 'तदस्य पण्यमिति' इति४॥ १८. 'इसुसुक्तान्तात् कः'७।३।५१॥ इत्यनेन १९. 'कद-' इति१॥ २०. '-त्येनां' इति४॥ २१. 'ना कुन्दुर्वा'[२।९।३०॥]इत्यमरकोषे ॥ २२. 'भृमृ-' इत्येवोणादिगणे ॥ २३. '-दिनी' इति३॥ २४. 'गौरादित्वाद् ङीप् (ङीष्)' इति४॥ २५. '-प्' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## अथ तूलिका[1] ॥९२१॥

## कूचिका[2]

१ तूलयति **तूलिका** । 'तूल निष्कर्षे[१]'(चु.उ.से.), ण्वुल्, टाप्, 'प्रत्ययस्थात्-'७।३।४४॥ इतीत्वम् ॥**९२१**॥ २ कूचति **कूचिका** । कूचधातोः ण्वुल्, [टाप्], 'प्रत्ययस्थात्-'७।३।४४॥ इतीत्वम् । द्वे 'पींछी' इति ख्यातायाः ॥

## चित्रम्[1]आलेख्यम्[2]

१ चीयते **चित्रम्** । 'चिञ् चयने'(स्वा.उ.अ.), 'अमिचिमिदि-'(उणा-६०३)इत्यादिना त्रः, स च कित् । २ आलिख्यते[२] **आलेख्यम्** । 'लिख लेखे[३]'(तु.प.से.), 'ऋहलोर्ण्यत्'३।१।१२४॥ । द्वे चित्रस्य ॥

## पलगण्डस्तु[1] लेप्यकृत्[2] ।

१ पलेन मांसेनेव [४]मृदादिना गण्डते(गण्डति) उपलिम्पति **पलगण्डः** । 'गडि उपलेपे[५]'( ), अच् । पलाद्युन्मानप्रकारेण गण्डति उपलिम्पति उपचिनोति वा पलगण्डः । अच् । लेप्यं करोति **लेप्यकृत्** । लेपकोऽपि । द्वे 'छोह' इति ख्यातायाः ॥

## पुस्तं[1] लेप्यादिकर्म स्यात्

१ पुस्यतेऽभिमृद्यते मृदत्र **पुस्तम्**, पुंक्ली. । 'पुंस् (पुंस) अभिमर्दने[६]'(चु.उ.से.), बाहुलकात् तक् । पुस्त्यते आद्रियते वा । 'पुस्तण्[७] आदरे[८]'(चु.उ.से.), कर्मणि घञ् । लेप्यमादिरस्य लेप्यादि, तच्च तत् कर्म च लेप्यादिकर्म। अन्ये तु-''आदिशब्दवर्जं[९] लेप्यकर्म''[ ] इत्येवमाहुः । यन्महेश्वरः-''पुस्तं तु पुस्तके [१०]लेप्यकर्मविज्ञानयोरपि''[विश्वप्रकाशकोशः, तान्तवर्गः, श्लो-२७]इति । ''पुस्तं तु पुस्तके क्लीबं विज्ञाने लेप्यकर्मणि''[विश्वलोचनकोशः, तान्तवर्गः, श्लो-३१]इति श्रीधरः। त्रिष्वर्थेषु यथा-''पुस्तं समस्तं सुदृशा निरस्तं सौभाग्यभूमे भवतो वियोगे''[[११]]। एकं 'गारा' इति ख्यातस्य । लेप्यादीत्यादिग्रहणाद् 'गोमयमुरु[१२]डचूनाप्रभृतिनुं[१३] गारु' इति भाषा॥

## नापितश्[1]चण्डिलः[2] क्षुरी[3] ॥९२२॥

## क्षुरमर्दी[4] दिवाकीर्ति[5]र्मुण्डको[6]ऽन्तावसाय्यपि[7] ।

१ 'पि गतौ[१४]'(तु.प.अ.), क्तप्रत्यये पितः, न पितोऽपितः, न अपितो **नापितः**। सर्वोपगतसर्वात्[१५] (सर्वोपगतत्वात्) । न आप्यते वा नापितः। 'आप्लृ व्याप्तौ' (स्वा.प.अ.), 'नञ्याप इट् च'(उणा-३६७)इति तन्, 'नभ्राड्-'६।३।७५॥ इति नञ्प्रकृत्या। २ चण्डते **चण्डिलः**। 'चडि कोपे'(भ्वा.आ.से.), बाहुलकादिलच् । ३ क्षुरोऽस्त्यस्य **क्षुरी** । 'अत इनिठनौ'५।२।११५॥ ॥**९२२**॥ ४ क्षुरेण मर्दयति **क्षुरमर्दी** । 'मृद क्षोदे'(क्र्या.प.से.), ग्रहादित्वाण्णिनिः । ५ दिवा दिवसे कीर्तिर्व्यापारः [कीर्तनं] [१६]वाऽस्य **दिवाकीर्तिः**, रात्रौ क्षुरकर्मनिषेधात् । ६ मुण्डयति **मुण्डकः** । 'मुडि मोडने[१७]'( ), ण्वुल् । ७ नखादीनामन्तमवस्यति प्रान्तं नयति **अन्तावसायी** । 'षोऽन्तकर्मणि' (दि.प.अ.), ग्रहादित्वाण्णिनिः, 'आदेच-'६।१।४५॥ इत्यात्वम्, 'आतो युक्-'७।३।३३॥ । अन्तावसायिनौ, अन्तावसायिनः इत्यादि । ''ग्रामणीः [१८]भण्डिवाहिकः[१९] क्षौरिकः भाण्डिकः''[शेषनाममाला ३।१५६॥]इति शैषिकाणि । सप्त नापितस्य ॥

## मुण्डनं[1] भद्राकरणं[2] [२०]वपनं[3] परिवापणम्[5] ॥९२३॥

## क्षौरम्[5]

१ मुण्ड्यत इति **मुण्डनम्**। मुडिधातोः कर्मणि ल्युट् । २ भद्रा क्रियते **भद्राकरणम्** । ल्युट्, 'भद्राच्च' (वा-५।४।६७॥)इति डाच् । ३ उप्यते **वपनम्** । 'वपौङ् मुण्डबीजयोः'( ), ल्युट् । ४ परिवाप्यते **परिवापणम्** । 'वपौङ् मुण्डबीजयोः'( ), ल्युट् ॥**९२३**॥ ५ क्षुरस्येदं कर्म **क्षौरम्** । 'तस्येदम्'४।३।१२०॥ इत्यण् । पञ्च मुण्डनस्य ॥

## नाराची[1] त्वेषण्याम्[2]

---

१. '-र्षणे' इति३॥ २. 'आले-' इति१.३॥ ३. 'लेखने' इति३, 'लिख अक्षरविन्यासे' इति क्षीरतरङ्गिण्यादयः ॥ ४. 'मृगा-' इति३॥ ५. क्षीरतरङ्गिण्यादौ उपलेपार्थकगडिधातुर्न दृश्यते ॥ ६. '-वर्धने' इति मैत्रेयसायणौ ॥ ७. णकारानुबन्धो हैममते ॥ ८. 'पुस्त बुस्त आदरानादरयोः' इति क्षीरतरङ्गिण्यादयः ॥ ९. '-ब्दं' इति१॥ १०. 'लेख्य-' इति विश्वप्रकाशकोशे, पृ.५८॥ ११. द्र. अनेकार्थकैरवाकरकौमुदीटीका, भा-१, २।१७६॥, पृ.१०६॥ १२. '-मुर-' इति३.४॥ १३. '-नुं' इति१, '-नों' इति४॥ १४. 'रि पि गतौ' इति क्षीरतरङ्गिण्यादयः ॥ १५. '-सत्त्वात्' इति३॥ १६. 'वा' इति १प्रतौ नास्ति ॥ १७. मोडनार्थकमुडिधातुर्द्रष्टव्यः ॥ १८. 'भा-' इति४ ॥ १९. 'भण्डिवाह-' इति शेषनाममालास्वोपज्ञटीकयोः॥ २०. 'व्य-' इति३ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ नरमञ्चति नराङ् । 'अञ्चु गतिपूजनयोः'(भ्वा.प.से.), 'ऋत्विग्दधृक्-'३।२।५९॥इत्यादिना क्विन् । नराचे[1] इयं **नाराची** । 'तस्येदम्'४।३।१२०॥ इत्यण्, 'टिड्ढाणञ्-' ४।१।१५॥इति ङीष्(ङीप्)। २ इष्यते अन्विष्यते व्रणोऽनयेति **एषणी** । 'इषु इच्छायाम्'(तु.प.से.), करणे ल्युट्, 'इषेरनिच्छार्थात्(-र्थस्य)'(वा-३।३।१०७॥)इति युच् वा, गौरादित्वाद् ङीष्, तत्र । "नाराच्येषणिकायां च"[विश्वप्रकाशकोशः, चान्तवर्गः, श्लो-१४]इति महेश्वरः । "एषणी वैद्यशिलाका[2]"[ ]इति तट्टीका। द्वे वैद्यशिलाकायाः ॥

## देवाजीवस्तु देवलः ।

१ देवान् आजीवति **देवाजीवः** । अच् । देवान् आजीविकार्थं[3] लातवान् गृहीतवान् **देवलः** । 'ला दाने'(अ.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥ । यद्वा 'तेवृ देवृ देवने'(भ्वा.आ.से.) 'अर्तिकमिचमिभ्रमि[4]-'(उणा-४१२)इत्यादिनाऽरः, 'कपिलकादीनां संज्ञाच्छन्दसोः'( )इति लत्वम् । दीव्यतीति वा। वृषादित्वात् कलच् । यदुक्तम्-

"[6]मातापितृविसृष्टानां क्रियामुत्सृत्य याचकः ।
देवार्चनपरोविप्रो वित्तार्थी वत्सरत्रयम् ॥१॥
सवै देवलको नाम हव्यकव्येषु वर्जितः॥"

[ ]इति । द्वे 'पूजारा' इति ख्यातस्य ॥

## मार्दङ्गिको मौरजिकः

१-२ मृदङ्गवादनं शिल्पमस्य **मार्दङ्गिकः** मुरजवादनं शिल्पमस्य **मौरजिकः** । उभयत्र 'शिल्पम्'४।४।५५॥ इति ठक् । द्वे मृदङ्गवादकस्य ॥

## वीणावादस्तु वैणिकः ॥९२४॥

१ वीणां वादयति **वाणीवादः**। 'वदि अभिवादनस्तुत्योः'(भ्वा.आ.से.), णिजन्तः[7], ततः 'कर्मण्यण्' ३।२।१॥ । २ वीणावादनं शिल्पमस्य **वैणिकः** । 'शिल्पम्' ४।४।५५॥ इति ठक् । द्वे वीणावादकस्य[8] ॥९२४॥

## वेणुध्मः स्याद् वैणविकः

१ वेणुं धमति **वेणुध्मः** । 'ध्मा शब्दाग्निसंयोगयोः'(भ्वा.प.से.), 'आतोऽनुसर्गेकः'३।२।३॥, 'आतो लोपः-'६।४।६४॥ २ वेणुवादनं शिल्पमस्य **वैणविकः** । 'शिल्पम्'४।४।५५॥ इति ठक् । द्वे वंशवादकस्य ॥

## पाणिघः पाणिवादकः।

१ पाणी[9] हन्ति **पाणिघः** । 'हन्(हन) हिंसागत्योः'(अ.प.अ.), 'पाणिघताडघौ शिल्पिनि'३।२।५५॥ इति साधुः। २ पाणी वादयति **पाणिवादकः** । 'वद अभिवादनस्तुत्योः'(भ्वा.आ.से.), णिजन्तात्, ण्वुल् । 'तालीवजाडई[10]' इति तन्नाम्नीद्वे ॥

## स्यात् प्रातिहारिको मायाकारः

१ प्रतिहरणं व्याजः प्रयोजनमस्य **प्रातिहारिकः**। 'तदस्य प्रयोजनम्[11]'५।१।१०९॥ इति ठक् । २ मायां करोति **मायाकारः** । 'कर्मण्यण्'३।२।१॥ । द्वे 'इन्द्रजालीया[12]' इति ख्यातस्य । 'मायावी' इति भाषा ॥

## माया तु शाम्बरी ॥९२५॥

१ माति विश्वमस्यां **माया** । 'मा माने' (अ.प.अ.), 'श्याद्व्यधास्रु(स्नु)संश्रु(संस्नु)-'३।१।१४१॥ इत्यादिना णः, 'आतो युक्-'७।३।३३॥ इति युक् । २ शम्बराख्यदैत्यस्येयं[13] **शाम्बरी** । 'तस्येदम्'४।३।१२०॥ इत्यण्, 'टिड्ढाणञ्-'४।१।१५॥ इति ङीष(ङीप्) । द्वे परवञ्चनबुद्धेः ॥९२५॥

## इन्द्रजालं तु कुहकं[14] जालं कुसृतिरित्यपि ।

१ इन्द्रस्य जालम् **इन्द्रजालम्** । २ कुहयते विस्मापयते[15] **कुहकम्** । 'कुहण्[16] विस्मापने'(चु.आ.से.), णिजन्तः, ण्वुल् । कुहुकमपि[17] । ३ जालमिव **जालम्** । ४ कुत्सिता सृतिः हिंसार्थं **कुसृतिः** । चत्वारि 'इन्द्रजाल' इति ख्यातस्य ॥

---

१. '-चस्य' इति४॥ २. '-शलाका' इति४॥ ३. 'जीवि-' इति २.३.४॥ ४. '-भ्रमिचमि-' इत्युणादिगणे ॥ ५. अनेन ग्रन्थेन देवरशब्दो व्युत्पादितवान् सायणः, द्र. मा. धातुवृत्तिः, भ्वादिः, धातुसं-३२७, पृ. १४३॥ ६. 'मातृ-' इति३॥ ७ 'णिजच्' इति४॥ ८. 'वंशवादकस्य' इति१, 'वीणावादस्य-' इति३॥ ९. 'पाणौ' इति१॥ १०. '-वाजडीआ' इति३, '-वजाडी' इति४॥ ११. 'प्रयोजनम्' इत्येवाऽष्टाध्याय्याम्॥ १२. '-लिया' इति१.२॥ १३. 'शम्बरदैत्य-' इति३॥ १४. 'कुहुकम्' इति मूले, स्वोपज्ञटीकाऽपि तमाश्रित्यैव ॥ १५. '-ति' इति३.४॥ १६ णकारानुबन्धो हैममते॥ १७. 'कुह-' इति ३.४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**कौतूहलं तु कुतुकं कौतुकं च कुतूहलम् ॥९२६॥**

१ कुत्सितं तूलयति कुतूहलम्। 'तूल निष्कर्षे' (चु.उ.से.), अच्, पृषोदरादित्वाद् हकारागमः, प्रज्ञाद्यणि **कौतूहलम्** । २ कुर्भूस्तुद्यतेऽनेन, कुत्सितं तन्यते वा **कुतुकम्** । 'निष्कतुरुष्क-'(हैमोणा-२६)इति के[1] साधुः। कुं तुञ्जति (तोजति) वा कुतुकम् । 'तुज हिंसायाम्' (भ्वा.प.से.), मूलविभुजादित्वात् कः, न्यङ्क्वादित्वात् कुत्वम्[2]। ३ प्रज्ञाद्यणि **कौतुकम्** । ४ कुत्सितं तूलयति। अच्, पृषोदरादित्वाद् हकारागमः **कुतूहलम्** । विनोदोऽपि। चत्वारि 'कौतिग[3]' इति ख्यातस्य ॥९२६॥

**व्याधो मृगवधाजीवी लुब्धको मृगयुश्च सः ।**

१ विध्यति **व्याधः** । 'व्यध ताडने'(दि.-प.अ.), 'श्याद्व्यध-'३।१।१४१॥ इत्यादिना णः । २ मृगवधेन आजीवति **मृगवधाजीवी** । ग्रहादित्वाण्णिनिः। ३ लुभ्यति स्म लुब्धः । 'लुभ गार्ध्ये'(दि.प.से.), 'निष्ठा'३।२।१०२॥ इति क्तः, 'लुभो विमोहने'७।२।५४॥ इतीण्णिषेधः, ततः स्वार्थे कनि[4] **लुब्धकः** । ४ मृगान् याति **मृगयुः** । 'या प्रापणे'(अ.प.अ.), 'मृगय्वादयश्च' (उणा-३७)इति कुः। चत्वारि 'आहेडी' इति ख्यातस्य॥

**पापर्द्धिर्मृगयाऽऽखेटो मृगव्याऽऽच्छोदने अपि ॥९२७॥**

१ पापानि ऋध्नुवन्त्यस्यां **पापर्द्धिः**। 'ऋधु वृद्धौ' (स्वा.प.से.), क्तिन् । २ मृग्यन्तेऽन्विष्यन्ते प्राणिनोऽस्यां **मृगया** । 'मृगण्[5] अन्वेषणे'(चु.आ.से.), 'परिचर्यापरिसर्यामृगयाटाट्यादयश्च[6]'(वा-३।३।१०१॥)इति साधुः । ३ आखेट्यन्ते उत्त्रास्यन्ते प्राणिनोऽस्मिन्निति **आखेटः** । 'खिट उत्त्रासे'(भ्वा.प.से.), अधिकरणे घञ्। ४ मृगान् व्ययत्याच्छादयति **मृगव्यम्** । 'व्येञ् संवरणे'(भ्वा.उ.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥ । ५ आचोद्यन्ते प्रेर्यन्ते प्राणिनोऽस्मिन्निति **आच्छोदनम्** । 'चुद प्रेरणे[7]'(चु.उ.से.), पृषोदरादित्वात् [चस्य छत्वम्], स्त्रीक्लीबलिङ्गावेतौ । पञ्च 'आहेडु[8]' इति ख्यातस्य ॥९२७॥

**जालिकस्तु वागुरिकः**

१ जालेन जीवति **जालिकः** । 'तेन जीवति[9]' ४।४।१२॥ इति ठक् । २ वागुरया चरति **वागुरिकः** । 'तेन चरति[10]'४।४।८॥ इति ठक् । द्वे 'वागुरी[11]' इति ख्यातस्य ॥

**वागुरा मृगजालिका ।**

१ वान्ति पतन्ति मृगा अस्यां **वागुरा** । 'वा गतिगन्धनयोः'(अ.प.अ.), 'मद्गुरादयश्च'(उणा-४१)इत्युरचि साधुः । २ मृगाणां ग्रहणाय[12] जालिका **मृगजालिका** । द्वे मृगबन्धनपाशस्य ।

**शुम्बं वटारको रज्जुः शुल्वं तन्त्री वटी गुणः ॥९२८॥**

१ शुनति **शुम्बम्**, स्त्रीक्लीबम् । 'शुन गतौ' (तु.प.से.) । २ वट्यते वेष्ट्यते वटारः । 'वट वेष्टने' (भ्वा.प.से.), आरन्, स्वार्थे कनि **वटारकः** । ३ सृज्यते **रज्जुः**, स्त्रीलिङ्गः । 'सृज विसर्गे'(तु.आ.अ.), 'सृजेरसुम् च'(उणा-१५)इत्युः, स च कित्, सकारलोपश्च, 'इको यणचि'६।१।७७॥, 'झलां जश् झशि'८।४।५३॥ इति जश्त्वे दः, 'स्तोः श्चुना-'८।४।४०॥ इति चुत्वे जः[13] । ४ शलति **शुल्वम्** । 'शल गतौ'(भ्वा.प.से.), 'उल्वादयश्च' (उणा-५३५)इति साधुः । ५ तन्त्रयति धारयति तन्त्रिः। 'तत्रि कुटुम्बधारणे'(चु.उ.से.), 'इन् सर्वधातुभ्यः'(उणा-५५७)इतीन्, ततः[14] 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि[15] **तन्त्री** । ६ वटति वेष्टयति मृगानिति **वटी**, त्रि-(स्त्री)लिङ्गः। 'वट वेष्टने'(भ्वा.प.से.), अच्, ([16]गौरादित्वाद् ङीष्)। ७ गुण्यते अभ्यस्यते **गुणः** । 'गुणण्[17] अभ्यासे[18]' (चु.उ.से.), घजर्थे कः । सप्त 'रांढू[19] मूंजडी' इति[20] ख्यातायाः ॥९२८॥

१. ४प्रतौ नास्ति ॥ २. वस्तुतस्त्विदं चिन्त्यम्, कुत्वे आन्तरतम्याजस्य गत्वप्रसङ्गात् ॥ ३. 'कुतिग' इति१.२, 'कौतग' इति४॥ ४. 'कन्' इति१॥ ५. णकारानुबन्धोऽनावश्यकः, 'मृगणि' इति हैममते ॥ ६. '-टाट्यानामुपसङ्ख्यानम्' इति वार्तिकस्वरूपं दृश्यते, '-टाट्याजागर्याजागराणाम्' इति भाषावृत्तौ, पृ.१३२॥ ७. 'सच्छोदने' इति क्षीरतरङ्गिण्यादयः ॥ ८. '-डो' इति३. '-डूं' इति४॥ ९. 'वेतनादिभ्यो जीवति'४।४।१२॥ इति सूत्रस्वरूपम्, वेतनादिगणे जालशब्दस्योल्लेखः ॥ १०. 'चरति' इत्येवाऽष्टाध्याय्याम् ॥ ११. 'वाग-' इति१.२॥ १२. 'हरणाय' इति४॥ १३. त्रिपाद्यामपि पूर्वं प्रति परशास्त्रस्याऽसिद्धत्वात् सस्य चुत्वेन शः, तस्य जश्त्वेन जः रज्जुरिति सरणी चारुतरा ॥ १४. ४प्रतौ नास्ति ॥ १५. 'ङीष्' इति४॥ १६. कोष्ठागन्तर्गतपाठस्थाने ४प्रतौ 'गौरादिः' इत्येव दृश्यते ॥ १७. णकारानुबन्धोऽनावश्यकः ॥ १८. 'कुण गुण चामन्त्रणे' इति क्षीरतरङ्गिणी, 'केत ग्राम कुण गुण चामन्त्रणे' इति धातुप्रदीपः, 'सङ्केत ग्राम कुण गुण चामन्त्रणे' इति मा.धातुवृत्तिः, 'कुण गुण केतण् आमन्त्रणे' इति हैमः ॥ १९. 'राढु' इति३॥ २०. 'इत्यादि' इति १.२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

### धीवरे[1] दाशकैवर्तौ[2][3]

१ दधाति मत्स्यानिति **धीवरः**। 'डुधाञ् धारणादौ' (जु.उ.अ.), 'छित्वर[छत्वर]धीवरपीवरमीवर्र-'(उणा-२८१)इत्यादिना ट्वरन्(ष्वरन्)प्रत्यये धीवरो निपातितः, तत्र। ध्यायति मत्स्यानिति वा। अनेनैव सूत्रेण निपातितः। टित्वात् (षित्वात्) स्त्रियां ङीषि धीवरी । **२** दशति मत्स्यानिति **दाशः** । 'दंश दशने'(भ्वा.प.अ.), 'दंशेष्टटलावात्वं च[२]' (उणा-६८८)इति टटलौ[३] नकारस्यात्वं च''[ ]इति स्वामी[४] । दाश्यते दीयते मत्स्यमूल्यमस्मै इति, 'दाशृ दाने'(भ्वा.उ.से.), घञि वा। तालव्यान्तोऽयम्। ''शालो हृषे(झषे) धीवर एव दाशः''[५]इति शब्दभेदात्[६]। ''कैवर्तभृत्ययोर्दासौ[७] दासी वाणी च चेटिका''[८]इति दन्त्यान्ते रुद्राद् दन्त्यान्तता च, तथा च- ''ऋत्विजि दाशस्तालव्यो धीवर एवाऽन्त्यदन्त्यः''[९] इत्यूष्मविवेकात् । **३** के पानीये वर्तो वर्तनं जीविकाऽस्येति केवर्तः। 'हलदन्त्या(न्ता)त्-'६।३।९॥ इत्यलुक्, ततः स्वार्थे प्रज्ञाद्यणि **कैवर्त्तः** । ''के जले वर्तते केवर्तः''[ ]इति तु सर्वानन्दः[१०] । 'वृतु वर्तने'(भ्वा.आ.से.), अच् । त्रीणि धीवरस्य । 'माछी[११]' इति भाषा॥

### वडिशं[1] मत्स्यवेधनम्[2][१२] ।

१ वड्यतेऽनेन **वडिशं,** स्त्रीक्लीबलिङ्गः। 'वड आग्रहणे'( ), सौत्रः, 'कुलिकनि-'(हैमोणा-५३४)इति इशः । बलिनो मत्स्यान् श्यति तनूकोरति वडिशमिति वा, डलयोरैक्यात् । ''स्त्रियां वडिशा । अपचये वडिशा(वडिशी)''[१३]इति माधवी । **२** मत्स्या विध्यन्तेऽनेन **मत्स्यवेधनम्** । 'विध विधाने'(तु.प.से.), धातूनामनेकार्थत्वाद् विधेर्भेदनार्थता । स्त्रियामपि ''वडिशी मत्स्यवेधनी[१३] तु''[१४]इति पञ्जिका कौमुद्यादयश्च । द्वे वडिशस्य । 'वणसी कांटउं[१५]' इति भाषा॥

### आनायस्तु[1] मत्स्यजालम्[2]

१ आनयन्ति मत्स्यादिकमनेनेति **आनायः,** पुंसि। 'णीञ् प्रापणे'(भ्वा.उ.अ.), 'जालमानायः'३।३।१२४॥ इति घञि निपात्यते । जलेन सम्बध्यते जालम् । शेषेऽण्। जलतीति जालं वा । 'जल धान्ये'(भ्वा.प.से.), ज्वलादित्वाण्णः । स्त्रीक्लीबलिङ्गोऽयम् । ''अनरे जालम्''[ ] इति माला । ''[आनायः पुंसि] जालं स्याच्छणसूत्रं पवित्रकम्''[अमरकोषः २।१०।१६॥]इत्यमरः । मत्स्यानां जालं **मत्स्यजालम्** । द्वे मत्स्यजालस्य ।

### कुवेणी[1] मत्स्यबन्धनी[2] ॥९२९॥

१ प्रविश्य निर्गमाभावात् कुत्सितं वेणन्ते[१६] मत्स्या अस्यामिति **कुवेणी** । 'वेणृ[१७] निशामनवादित्रादानगमनज्ञानचिन्तासु[१८]'(भ्वा.उ.से.), अच्, गौरादित्वाद् ङीष्, कृष्यादित्वादिकारे 'कृदिकारात्-'(गणसू-४।१।-४५॥)इति ङीषि वा। **२** मत्स्या बध्यन्तेऽस्यां **मत्स्यबन्धनी**। 'बन्ध बन्धने'(क्र्या.प.अ.), अधिकरणे ल्युट्, गौरादिः । मत्स्यकरण्डिका च । ''मत्स्याधानी कुवेणी स्यात्''[अमरकोषः१।१०।१६॥]इत्यमरः । ''मत्स्या आधीयन्ते स्थाप्यन्तेऽस्यां मत्स्याधानी''[१९]इति क्षीरस्वामी[२०]। द्वे मत्स्यबन्धनविशेषस्य ॥९२९॥

### जीवान्तकः[1] शाकुनिकः[2][२१]

---

१. '-मीवर' इति ३.४प्रत्योर्नास्ति ॥ २. 'दंसेष्टटनौ न आ च'(उणा-६८८)इत्युणादिगणसूत्रम्, वस्तुतस्तु-'दंशेश्च'(उणा-६८९)इत्यनेनैव साधुः॥ ३. '-नौ' इति३॥ ४. स्वामिकृतामरकोशटीकायाम्-''द्यति दशति दाश्नोति वा मत्स्यान् दाशः'' इत्येव दृश्यते १।९।१५॥, पृ.६४॥, द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२४२, पृ.२८९॥, तत्र-''दशति मत्स्यान् इति ''दंशेष्टटनौ न आ च''(उ- ५।१०)इति टटनौ नकारस्यात्वं । 'दाशः'- इति स्वामी'' इति दृश्यते ॥ ५. द्र. टीकासर्वस्वम्, भा-१, १।१०।१५॥, पृ.१८५॥, पदचन्द्रिका,भा-१, वारिवर्गः, श्लो-२४२, पृ.२८९॥, रामाश्रमी १।१०।१५॥, पृ.१२६॥ ६. 'भेदात्' इति२॥ ७. 'दाशो' इति३॥ ८. द्र. टीकासर्वस्वम्, भा-१, १।१०।१५॥, पृ.१८५॥, तत्र-''कैवर्तभृत्ययोर्दासो दासी वाशा च चेटिका'' इति दृश्यते, पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२४२, पृ.२८९॥, तत्र-''कैवर्तभृत्ययोर्दासो दासी बाला च चेटका'' इति दृश्यते, रामाश्रमी १।१०।१५॥, तत्र-''कैवर्तभृत्ययोर्दासो दासो बाणा च चेटिका'' इति दृश्यते ॥ ९. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२४२, पृ.२८९॥ १०. सर्वानन्दकृतटीकायां तु- ''कस्य जलस्य ई लक्ष्मीः, तया वर्तो वर्तनमस्येति कैवर्तः । स्वार्थिकोऽण् ।'' इति दृश्यते, भा-१, १।१०।१५॥, पृ.१८५॥ ११. 'माछीगर' इति३॥ १२. तुलनीयोऽमरकोषः१।१०।१६॥ १३. ३प्रतौ नास्ति ॥ १४. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२४४, पृ.२९०॥ १५. '-टो' इति३, '-टौ' इति४॥ १६. 'वेणते' इति१.२॥ १७. 'वेणा' इति३, 'वेणु' इति४॥ १८. 'वेणृ गतिज्ञानचिन्तानिशामनवादित्रग्रहणेषु' इति क्षीरतरङ्गिण्यादयः॥ १९. अम.क्षीरस्वामीकृतटीकायां न दृश्यते ॥ २०. 'स्वामी' इति४॥ २१. तुलयनीयोऽमरकोषः२।१०।१४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ जीवान् कपोतादीनन्तयति **जीवान्तकः** । 'अति अदि बन्धने'(भ्वा.प.से.), ण्वुल्[1]। २ शकुनीन् हन्ति **शाकुनिकः** । 'पक्षिमत्स्यमृगान् हन्ति'४।४।३५॥ इति ठक् । द्वे 'चिडीमार' इति ख्यातस्य ॥

**वैतंसिकस्तु सौनिकः ।**

**मांसिकः कौटिकश्च**

१ वीतंसेन चरति **वैतंसिकः**। 'तेन चरति[2]' ४।४।८॥ इति ठक् । २ सूना प्रयोजनमस्य **सौनिकः** । 'तदस्य प्रयोजनम्[3]'५।१।१०९॥ इति ठक् । ३ मांसं पण्यमस्य **मांसिकः** । 'तदस्य पण्यम्'४।४।५१॥ इति ठक् । ४ कूटः कूटयन्त्रम्, तेन चरति **कौटिकः** । 'तेन चरति'४।४।८॥ इति ठक् । खट्टिकोऽपि । चत्वारि '[4]खाटकी' इति ख्यातस्य ॥

**अथ सूना स्थानं वधस्य यत् ॥९३०॥**

१ सुन्वन्त्यस्यां **सूना** । 'षुञ् अभिषवे'(स्वा.-उ.अ.), 'सुञो दीर्घश्च'(उणा-२९३)इति नः, स च कित्, [धातोर्दीर्घश्च], टाप्। वधस्य यत्स्थानं पशुघातस्थानमित्यर्थः । एकं पशुमारणस्थानस्य[5] ॥९३०॥

**स्याद् बन्धनोपकरणं वीतंसो मृगपक्षिणाम् ।**

१ मृगपक्षिणां बन्धनोपकरणं जालवागुरादि **वीतंसः** इत्यन्वयः। वितन्यते बन्धाय वीतंसः, पुंक्लीबः[6]। 'तनु विस्तारे'(त.उ.से.), बाहुलकात् '-वदि-'(उणा-३४२)इति सः । वितस्यते [7]बध्यतेऽनेनेति वा। तसिः सौत्रो, घञन्तः[8], 'उपसर्गस्य घञि-'६।३।१२२॥ इति उभयत्रापि दीर्घत्वम् । अमरस्तु-"वीतंसस्तूपकरणं बन्धने मृगपक्षिणाम्"[अमरकोषः २।१०।२६॥]इति पुंस्येवाह । एकं वीतंसस्य । सामान्येन 'पांजरुं[9]' इति भाषा[10] ॥

**पाशस्तु बन्धनग्रन्थिः**

१ पाश्यते बध्यतेऽनेनेति **पाशः**। 'पश बन्धने' (चु.उ.से.), चुरादिः, करणे घञ् । पुंनपुंसकोऽयम् । "पाशं कुलिशम्"[श्रीहेचन्द्राचार्यकृतलिङ्गानुशासने, पुंनपुंसकलिङ्गम्, श्लो-३२]इति लिङ्गानुशासनम् । २ मृगादीनां बन्धनाय ग्रन्थिः **बन्धनग्रन्थिः**। द्वे पाशस्य ॥

**अवपातावटौ समौ ॥९३१॥**

१ अवपतन्ति[11] मृगा अत्रेति **अवपातः**। 'पत्लृ पतने[12]'(भ्वा.प.से.), अधिकरणे घञ् । २ अव्यन्तेऽनेन **अवटः** । 'अव रक्षणादौ'(भ्वा.प.से.), 'शकादिभ्योऽटन्' (उणा-५२१)। द्वे मृगादीनां पतनाय कृतगर्तायाः॥९३१॥

**उन्माथः कूटयन्त्रं स्यात्**

१ उर्ध्वपातान्मथ्यतेऽनेनेति **उन्माथः** । 'मन्थ विलोडने'(भ्वा.प.से.,क्र्या.प.से.), करणे घञ्। २ कूटेन छलेन[13] यन्त्र्यतेऽनेन **कूटयन्त्रम्** । 'यत्रि बन्धने[14]'(चु.-उ.से.), करणे घञ् । पाशयन्त्रमित्येके । "उन्माथबद्धगात्रस्य मृगस्येव विचेष्टितम्"[[15]]इति प्रयोगः। द्वे कूटयन्त्रस्य ॥

**विवर्णस्तु पृथग्जनः ।**

**इतरः प्राकृतो नीचः पामरो वर्वरश्च[16] ॥९३२॥**

१ विगतो वर्णो यशोऽस्य[17] **विवर्णः** । "वर्णो द्विजादौ शुक्लादौ स्तुतौ रूपे यशोऽक्षरे[18]"[विश्वप्रकाशकोशः, णान्तवर्गः, श्लो-१३]इति विश्वः। विरुद्धो वर्णोऽस्येति वा, वर्णान्तरालत्वात् । २ जायते जनः । 'जनी प्रादुर्भावे'(दि.आ.से.), पचाद्यच् । घञ्यपि, 'जनिवध्योश्च' ७।३।३५॥इति वृद्धिनिषेधाद्[19] जनः । सज्जनेभ्यः पृथग्भूतो जनः **पृथग्जनः**, [20]विशेषणसमासः । ३ एतीति **इतरः** । 'इण् गतौ'(अ.प.अ.), 'इण्पूभ्यां कित्-'(हैमोणा-४३८) इति तरः । ४ प्रकृतौ भवः[21] **प्राकृतः**[22], गुणासंस्कृतत्वात्।

---

१. '-नान्' इति४॥ २. 'चरति' इत्येवाऽष्टाध्याय्याम्॥ ३. 'प्रयोजनम्' इत्येवाऽष्टाध्याय्याम् ॥ ४. 'खाटि-' इति२.३॥ ५. '-स्थलस्य' इति१.२॥ ६. 'पुंक्ली' इति १.२॥ ७. 'बा-' इति१॥ ८. 'घञ्यन्तः' इति३॥ ९. 'पींजरूं' इति३, 'पींजरुं' इति४॥ १०. 'ख्यातस्य' इति४॥ ११. '-तति' इति२॥ १२. 'शल हुल पत्लृ गतौ' इति क्षीरतरङ्गिण्यादयः ॥ १३. 'छद्मेन' इति३.४॥ १४. 'सङ्कोचने' इति क्षीरतरङ्गिणीमा.धातुवृत्ती, 'सङ्कोचे' इति धातुप्रदीपः ॥ १५. द्र. अनेकार्थकैरवाकरकौमुदीटीका, भा-२, काण्डः-२, श्लो-३०८, पृ.१३७॥ १६. १.३.४प्रतिषु मूलं चलितं दृश्यते ॥ १७. 'यशोऽस्य' इत्यस्य स्थाने ४प्रतौ 'यस्य' इति दृश्यते ॥ १८. 'रूपयशोऽक्षरे' इति विश्वप्रकाशकोशे, पृ.४८॥ १९. 'निषेधात्' इति१॥ २०. 'विशेषेण' इति१.२॥ २१. 'भावः' इति३॥ २२. 'प्राकृतभावः' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'तत्र भवः'४।३।५३॥ इत्यण् । ५ निम्नमञ्चति **नीचः** । ६ पामाः सन्त्यस्य **पामरः**। पामां रातीति वा। ७ वृणोति[1] **वर्वरः** । 'वृञ् वरणे'(स्वा.उ.से.), 'कॄगॄशॄवृञ्चतिभ्यः ष्वरच्'(उणा-२७९)। सप्त पामरस्य ॥९३२॥

**चण्डालेऽन्तावसाय्यन्तेवासिश्वपचबुक्कसाः ।**
**निषादप्लवमातङ्गदिवाकीर्तिजनङ्गमाः[2] ॥९३३॥**

१ चण्डते **चण्डालः** । 'चडि कोपे'(भ्वा.-आ.से.), 'पतिचडि(चण्डि)भ्यामालञ्'(उणा-११४)। चण्डमालं मृषा[3]ऽस्येति वा, तत्र। यद् व्याडिः-"चण्डमालं मृषा यस्येत्यर्थः, शब्दवतां मतः"[ [4] ]इति । 'प्रज्ञादिभ्यश्च' ५।४।३८॥इत्यणि[5] चाण्डालोऽपि । २ अन्तमवस्यति **अन्तावसायी** । 'षोऽन्तकर्मणि'(दि.प.अ.), ग्रहादित्वाण्णिनिः, 'आदेचः-'६।१।४५॥ इत्यात्वम्, 'आतो युक्-' ७।३।३३॥इति युक्। ३ अन्ते दूरे वसति **अन्तेवासी** । 'वस निवासे'(भ्वा.प.अ.), ग्रहादित्वाण्णिनिः, 'शयवासवासिष्वकालात्'६।३।१८॥ इति सप्तम्यलुक् । ४ श्वानं पचति **श्वपचः** । 'डुपचष् पाके'(भ्वा.उ.अ.), पचादिपाठसामर्थ्यात् कर्मोपपदादप्यच् । उक्तं च-
"अज्विधिः सर्वधातुभ्यः पच्यन्ते (पठ्यन्ते) च पचादयः।
अण्बाधनार्थमेव स्यात् सिध्यन्ति श्वपचादयः ॥१॥"
[ ]इति[6] । ५ बुक्कति श्वा इव **बुक्कसः** । 'बुक्क भाषणे[7]'(भ्वा.प.से.), बाहुलकादसच् । बुक्कानस्यतीति वा । 'असु[8] क्षेपणे'(दि.प.से.), अच् । बुक् कुत्सितं कसति गच्छतीति वा। [9]बुत्कस इत्येके, पुक्कस इत्यन्ये, श्वपचो डौम्वो बुक्कसो मृतप इत्यवान्तरभेदोऽत्र नाश्रितः[10] । ६ निषीदति पापमस्मिन्निति **निषादः** । 'षद्लृ विशरणादौ'(भ्वा.तु.प.अ.), अधिकरणे घञ्। ७ प्लवते **प्लवः** । 'प्लुङ् गतौ'(भ्वा.आ.अ.), अच् । ८ मन्यते पापीयान् **मातङ्गः** । 'मनु(मन) ज्ञाने' (दि.आ.अ.), 'मनेर्मत(मत्) मातौ च'(हैमोणा-१००) इत्यङ्गः । मा निषिद्धं तङ्गतीति वा । 'तगि गतौ'(भ्वा. प.से.), अच्। "मतङ्गस्याऽपत्यम्"[ [11] ]इति पौराणिकाः । ९ दीवा कीर्त्यते[12] **दिवाकीर्तिः**, रात्रौ भयदत्वात् । १० जनं गच्छति **जनङ्गमः** । 'गम्लृ गतौ'(भ्वा.प.अ.) 'गमे-(गम)श्च'३।२।४७॥ इति खच्, खित्त्वान्मुम् । दश चण्डालस्य ॥९३३॥

**पुलिन्दा नाहला निष्ट्याः शबरा वरुटा भटाः ।**
**माला भिल्लाः किराताश्च सर्वेऽपि म्लेच्छजातयः ॥९३४॥**

१ पोलन्ति[13] वर्द्धन्ते[13] **पुलिन्दाः**। 'पुल महत्त्वे' (भ्वा.प.से.), 'कुणिपुलोः(-पुल्योः) किदच्[14]'(उणा-५२५) पृषोदरादित्वान्नुमागमः[15] । "पोलन्ति भ्रमन्ति"[ [16] ]इति क्षीरस्वामी । "पुलिन्द्रोऽपि"[ ]इति शब्दप्रभेदः । २ नह्यन्ति वल्कलानि[17] **नाहलाः** । 'णह बन्धने'(दि.उ.अ.), 'णहेर्णित्'(    )इत्यलच् । ३ निर्गता वर्णाश्रमेभ्यो **निष्ट्याः** । 'निरो(निसो)गते त्यप्'(वा-४।२।१०४) इत्यप् । ४ शवन्ति भ्रमन्त्यरण्यं **शबराः** । 'शब गतौ' (भ्वा.प.से.), 'अर्तिकमिभ्रमिचमि-'(उणा-४१२)इत्यादिना बाहुलकादरन् । शबान् रान्त्याददते[18] इति वा । ५ वृणन्ति **वरटाः** । 'शकादिभ्योऽटन्'(उणा-५२१)। ६ भटन्ति **भटाः** । 'भट भृतौ'(भ्वा.प.से.), अच् । ७ मां परलक्ष्मीं लान्तीति[19] **मालाः** । 'ला आदाने[20]'(अ.प.अ.), 'आतोऽनुपसर्गे कः' ३।२।३॥ । मल्यन्ते वा । 'मल

१. '-तीति' इति३॥ २. द्रष्टव्योऽमरकोषः२।१०।१९-२०॥ ३. 'वृ-' इति२॥ ४ द्र. स्वोपज्ञटीका ३।९३३॥, पृ.२०६॥ ५. 'अण्प्रकरणे कुलालवरुडनिषादककर्मारचण्डालमित्रामित्रेभ्यश्छन्दस्युपसंख्यानम्'(काशिका, भा-४, ५।४।३६, पृ.३५०)इति काशिकास्थेन वार्तिकेन छन्दस्यण्विधानाल्लोके तदभावादिदं विचारणीयम्, यद्वा स्वार्थेऽञ् बोध्यम् ॥ ६. द्र. मा.धातुवृत्तिः, भ्वादिः, धातुसं-७१८, पृ.२९०॥ ७. 'भषणे' इति धातुप्रदीपमा.धातुवृत्ती ॥ ८ 'असुच्' इति३॥ ९. 'पु-' इति१॥ "पुत् कुत्सितं कसति पुक्कसः, पुष्कस इत्येके । अवान्तरभेदोऽत्र नाहतः, यतः श्वपचो [श्वपो] डोम्बः[मः] पुक्कसो मृतपः" अम. क्षीरस्वामिटीका२।१०।२०॥, पृ.२२९॥ " 'पुत् कुत्सितं कसति पुष्कस इत्येके, पुक्कस इत्यन्ये' श्वपचो डोम्बो बुक्कसो मृतप इत्यवान्तरभेदोऽत्र नाश्रितः" इति स्वोपज्ञटीका ३।९३३॥, पृ.२०६॥ ११. द्र. अम.क्षीर.२।१०।२०॥, पृ.२९९॥, स्वोपज्ञटीका ३।९३३॥, पृ.२०६॥, पदचन्द्रिका, भा-२, शूद्रवर्गः, श्लो-७०२, पृ.७९१॥ १२. 'कोर्तते' इति१॥ १३. '-ति' इति४॥ १४. 'किन्दच्' इत्युणादिगणे, 'किन्दच्' इत्येव तर्हि 'पृषोदरादित्वान्नुमागमः' इत्यग्रिमग्रन्थोऽप्यनुपयुक्तः ॥ १५. '-गागमः' इति१॥ १६. अम.क्षीरस्वामिकृतटीकायां तु-"पोलति भ्रमति पुलिन्दः" इति दृश्यते, २।१०।२१॥, पृ.२२९॥ १७. '-नीति' इति३॥ १८. 'रान्त्यादत्त' इति४॥ १९. 'लातीति' इति४॥ २०. 'दाने' इति२.३.४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मल्ल धारणे'(भ्वा.आ.से.), कर्मणि घञ् । ८ भिन्दन्ति **भिल्लाः** । 'भिदिर् विदारणे'(रु.उ.अ.), बाहुलकाल्लः । भिदं विदारणं लान्तीति वा। ९ किरन्ति विक्षिपन्ति बाणानिति **किराताः**। 'कॄ विक्षेपे'(तु.प.से.), 'कृवृ-कलि'(हैमोणा-२०९)इत्यातक्[1], 'ऋत इद्धातोः'७।१।१००॥। म्लेच्छन्त्यव्यक्तं वदन्ति **म्लेच्छाः** । 'म्लेच्छ अव्यक्ते शब्दे'[2](भ्वा.प.से., चु.उ.से.), अच् । म्लेच्छानां जातयो म्लेच्छजातयः ॥९३४॥

**इत्याचार्यश्रीहेमचन्द्रविरचितायामभिधानचिन्तामणौ नाममालायां**
**[3]मनुष्यकाण्डस्तृतीयः[4]**

([5]सर्वाङ्गीणकलाविलासनिलयः कल्पद्रुमाभः कलौ ।
जाग्रत्सर्वजनीनमञ्जुमहिमो मित्रप्रतापोदयः ।
श्रीमच्छ्रीविधिपक्षगच्छगणभृद् भूभृन्नताङ्घ्रिद्वयः ।
**श्रीकल्याणसमुद्र[6]सूरिसुगुरुः** सूरीन्द्रचूडामणिः ॥१॥
तन्निर्देशविधायिवाचकवरश्रेणीकिरीटोपमा
भास्वत्साधुगुणौघशालि[7]**विनया**च्चन्द्राभिधा वाचकाः ।
तच्छिष्या '**रविचन्द्र**' इत्यभिधया[8] तेषां विनेयो व्यधा-
देनं वाचक**देवसागरगणि**र्व्युत्पत्तिरत्नाकरम् ॥२॥)

**॥ इति श्रीवाचकवरदेवसागरविरचितयामभिधानचिन्तामणिनाममालायां व्युत्पत्तिरत्नाकरटीकायां मर्त्यकाण्डस्तृतीयः ॥**

---

१. 'इत्यादिनातक्' इति१॥ २. 'अव्यक्तायां वाचि' इति क्षीरतरङ्गिणीधातुप्रदीपौ ॥ ३. 'मर्त्य-' इति३॥ ४. 'नाममालायामभिधानचिन्तामणौ तृतीयष्कांडः' इति२॥ ५. कोष्ठान्तर्गतपाठस्थाने ३प्रतौ "यावद्गङ्गातटे भाति पुरं श्रीपट्टनायकम् । तावज्जैनकथालोके यावत्तिष्ठति पुस्तकम् ॥१॥, श्रीमज्जिनराजाय नमः । सांगानेरनगरेति लिखितोऽयं पं. यशोरूपाकरेण वाच्यमान चिरं जीयात् ॥" इति दृश्यते॥, इतोऽग्रे ५ प्रतिरुपलब्धा॥ ६. '-सागर-' इति२॥ ७. '-शील-' इति५॥ ८. '-धिया' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥ चतुर्थः तिर्यक्काण्डः ॥

## ॥ एकेन्द्रियेषु पृथ्वीकायः ॥

अथ तिर्यक्काण्डं तुर्यं[१] प्रारभ्यते । तत्र पृथिव्यप्तेजोवायुवनस्पतिभेदेनैकेन्द्रियाः स्थावराः, द्वित्रिचतुः-पञ्चेन्द्रियभेदेन त्रसाश्च कृमिप्रभृतयस्तिर्यञ्चो वक्ष्यन्ते, तत्र पृथिवीकायिकानाह[२]-

**[1]भूर्[2]भूमिः [3]पृथिवी [4]पृथ्वी [5]वसुधो[6]र्वी [7]वसुन्धरा ।**
**[8]धात्री [9]धरित्री [10]धरणी [11]विश्वा [12]विश्वम्भरा [13]धरा ॥९३५॥**
**[14]क्षितिः [15]क्षोणी [16]क्षमा[17]ऽनन्ता [18]ज्या [19]कु[20]र्वसुमती [21]मही ।**
**[22]गौर्[23]गोत्रा [24]भूतधात्री [25]क्ष्मा [26]गन्धमाता[27]ऽचला[28]ऽवनिः ॥९३६॥**
**[29]सर्वंसहा [30]रत्नगर्भा [31]जगती [32]मेदिनी [33]रसा ।**
**[34]काश्यपी [35]पर्वताधारा [36]स्थिरे[37]ला [38]रत्न-बीज-[39]सूः ॥९३७॥**
**[40]विपुला सागराच्चाग्रे स्युर्[41]नेमी[42]मेखलाम्[43]बराः ।**

१ भवत्यस्यां[३] सर्वमिति भूः । 'भू सत्तायाम्' (भ्वा.प.से.), बहुलवचनादधिकरणेऽपि क्विप् । सम्पदादित्वाद् वा क्विप् । ङित्सु भुवै भुवे, षष्ठीबहुवचने भुवां भूनाम्, ङौ भुवां भुवि। हे भूः। 'भूर्' इति रेफान्तमव्ययं च । यथा-"द्योतयन् भूर्भुवःस्वः"[[४]]इति । २ भवत्यस्यां सर्वमिति **भूमिः** । 'भू सत्तायाम्'(भ्वा.प.से.)। 'भुवः क्मिन्'(स.क.२।१।२२१॥)इति क्मिन्[५] । अथवा 'भूतेऽपि दृश्यन्ते'३।३।१॥इति वचनाद् भूतेऽपि मिन्प्रत्ययः । 'ऊर्म्मिर्भूमिरश्मयः'(      )इति सूत्रेणैव साधुः"[[६]]इत्यन्ये । 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि[७] भूमी, नदीवत् । ३ प्रथते विस्तारं याति **पृथिवी** । 'प्रथ विस्तारे[८]'(भ्वा.आ.से.), 'प्रथेः षिवन् सम्प्रसारणं च[९]' (उणा-१४८)इति षिवन्, षित्त्वात् ([१०]'षिद्गौरा-'४।४।४१॥ (इति ङीष् । 'षवन्' इति केचित्, "पृथिवी पृथवी पृथ्वी"[ ]इति शब्दार्णवः) । " पृथुनाऽवतारित्वात् पृथवी"[ ]इत्येके । 'प्रथ विस्तारे'(भ्वा.आ.से.), 'प्रथिम्रदिभ्रस्जां सम्प्रसारणं सलोपश्च'(उणा-२८)इति कुप्रत्ययः सम्प्रारणं चेति । ४ पृथुत्वाद् विस्तीर्णत्वात् **पृथ्वी**[११] । पृथुशब्दाद् 'वोतो गुणवचनात्'४।१।४४॥ इति ङीष् । ५ वसु धनं धत्ते **वसुधा** । 'डुधाञ् धारणादौ'(जु.उ.अ.), 'आतोऽनुपसर्गे'३।२।३॥, टाप्प्रत्ययः । ६ विस्तीर्णत्वाद् **उर्वी** । उरुशब्दात् 'वोतो गुणवचनात्'४।१।४४॥ इति ङीष्[१२] । ऊर्णोति आच्छादयति वा । 'ऊर्णुञ् आच्छादने' (अ.उ.से.) अस्माद् 'महति ह्रस्वश्च'(उणा-३१)इत्युप्रत्ययो णु(नु)लोपो ह्रस्वश्चेति[१३] उरुः 'वोतो गुणवचनात्'४।१।४४॥ इति ङीष् । वृणोतेः पृषोदरादित्वाद् वा रूपसिद्धिः । ७ वसूनि धारयति **वसुन्धरा** । 'धृञ् धारणे'(भ्वा.उ.अ.), णिजन्तः, 'संज्ञायां भृतृवृजिधारिसहितप(तपि)दमः'३।२।४६॥ इति खच्, खित्त्वान्मुम्, 'खचि ह्रस्वः'६।४।९४॥ । ८ दधाति विश्वं **धात्री** । 'डुधाञ् धारणादौ'(जु.उ.अ.), औणादिकः '-ष्ट्रन्'(उणा-५९८)इति ष्ट्रन्, षित्त्वात् 'षिद्गौरा-'४।१।४१॥इति ङीष् । ९ धरति विश्वं **धरित्री** । 'धृञ् धारणे'(भ्वा.उ.अ.), 'अशित्रादिभ्य इत्रोत्रौ'(उणा-६१२)इति इत्रप्रत्ययः, गौरादिः । १० ध्रियन्ते प्राणिनोऽस्यां **धरणी** । 'धृञ् धारणे'(भ्वा.उ.अ.), 'अर्त्तिसृधृ-' (उणा-२५९)इत्यादिनाऽनिप्रत्ययः[१४], गौरादित्वाद् ङीष् । विशति सर्वमस्यां **विश्वा** । 'विश प्रवेशने'(तु.प.अ.), 'अशुप्रुषिलटिक[१५]टिकणिखटिवि[१६]शिभ्यः क्वन्'(उणा-१४९)इति क्वन्, अजादित्वाट्टाप् । १२ विश्वं जगद् बिभर्त्ति **विश्वम्भरा** । 'डुभृञ् धारणादौ'(जु.उ.अ.), 'संज्ञायां भृतृवृजि-'३।२।४६॥इति खच् । १३ धरति **धरा** । पचाद्यच् ॥९३५॥ १४ क्षियन्ति[१७] निवसन्त्यस्यां प्राणिनः, क्षयन्ति[१८] क्षायन्ति (क्षायन्ति क्षयन्ति) अपचयं गच्छन्त्यस्यां पदार्था वा, क्षिण(ण्व)न्ति[१९] हिंस्यन्तेऽस्यां पापकृतो वा **क्षितिः** । 'क्षि क्षये'(भ्वा.प.अ.), भूवादिः[२०], 'क्षि निवासगत्योः'

---

१. 'चतुर्थम्' इति३॥ २. '-यकानाह' इति १.२.३, '-यानाह' इति५॥ ३. '-न्त्य-' इति४॥ ४ द्र. अम.क्षीर.१।१।२॥, पृ.७०॥, पदचन्द्रिका, भा-२, भूमिवर्गः, श्लो-२, पृ.२॥ ५. 'भुवः कित्'(उणा-४८५)इति पाणिनीयसम्मतोणादिगणे ॥ ६. द्र. पदचन्द्रिका, भा-२, भूमिवर्गः, श्लो-२, पृ.२॥ ७. 'ङीपि' इति३॥ ८ 'प्रख्याने' इति क्षीरतरङ्गिण्यादयः ॥ ९. इतोऽग्रे ३प्रतौ 'चेति' इति दृश्यते ॥ १०. कोष्ठान्तर्गतपाठः १.२प्रत्योर्न दृश्यते॥ ११. 'पृथिवी' इति३.४.५॥ १२. 'ङीषि' इति४॥ १३. इतोऽग्रे ४प्रतौ 'उप्रत्ययः' इति दृश्यते ॥ १४ '-ये' इति१॥ १५. '-कटि-' इत्युणादिगणे नास्ति ॥ १६. '-वशि-' इति५॥ १७. '-न्ते' इति १.२.३.४॥ १८. 'क्षि-' इति १.३.४.५॥ १९. १.३.४.५प्रतिषु नास्ति ॥ २०. 'भ्वा-' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(तु.प.अ.), तुदादिः, 'क्षै जै सै क्षये[1]'(भ्वा.प.अ.), 'क्षि हिंसायाम्'(स्वा.प.अ.) एतेभ्यः 'वसेस्तिः'(उणा-६१९)इति विधीयमानो वसेस्तिप्रत्ययो बाहुलकाद् भवति, गुणाभावश्च। अथवा[2] 'स्त्रियां क्तिन्'३।३।९४॥, कर्मण्यधिकरणे वा भवति । ''क्षियन्ति ताम्[3]''[ ]इति तु भट्टसर्वधरौ । १५ क्षूयते शब्द्यते स्तूयते स्तोतृभिः, क्षुवन्त्यस्यां भूतानीति वा[4] क्षोणिः । 'टुक्षु शुब्दे'(अ.प.से.), 'वहिश्रिश्रुयुद्रु[5]-'(उणा-४९१)इत्यादिना बाहुलकाद् निः । 'कृदिकारात्-'(गणसू-४।१।४५)इति ङीषि **क्षोणी** । तृतीयस्वरान्तोऽप्ययम् । १६ निरूपिता एव धातव[6]स्तेभ्य औणादिके मनिनि बाहुलकात् **क्षमा** इति रूपसिद्धिः । क्षमते भारमिति वा। 'क्षमूष् सहने'(भ्वा.आ.वे.), अच् । १७ नाऽस्त्यन्तोऽस्या **अनन्ता** । १८ जिनन्ति वयःपरिणामं[7] लभन्तेऽस्यामिति **ज्या** । 'ज्या वयोहानौ'(क्र्या.प.अ.), भिदादित्वादङ्, संज्ञापूर्वकत्वाद् बहुलवचनाद् वा सम्प्रसारणं न भवति[8] । जयतीति वा। 'जि जये'(भ्वा.प.अ.), अघ्न्यादित्वाद् यत् । ''ज्या मौर्वी ज्या वसुन्धरा''[शाश्वतकोशः, श्लो-६२९]इति शाश्वतः। १९ कायति[9] कूयते वा **कुः**। 'कै शब्दे'(भ्वा.प.अ.), 'कूङ् शब्दे'(भ्वा.तु.आ.अ.) वा, मितद्रवादित्वाद् डुः। २० वसूनि सन्त्यस्यां[10] **वसुमती** । 'तदस्याऽस्त्यस्मिन्निति मतुप्'५।२।९४॥, 'उगितश्च'४।१।६॥इति ङीप्[11]। २१ मह्यन्ते[12] भूतान्यस्याम्, मह्यते[13] वा **मही** । 'मह पूजायाम्'(भ्वा.उ.से.), 'पुंसि संज्ञायाम्-'३।३।११८॥इति प्रायोग्रहणाद् घः, गौरादित्वाद् ङीष्[14] । ''महेर्बाहुलकाद् 'अच इः'(उणा-५७८), महिः, ङीषि तु मही''[[15]]इति स्वाम्याद्याः[16] । यद्वा मानेन परिमाणेन[17] स्वगुणेन स्वस्माद् भवनं परिमाणं पातालेन जहात्यतिक्रामति, मानशब्दाज्जहातेश्च महीति, पृषोदरादित्वात् । २२ गीयते स्तूयतेऽसाविति, गायन्त्यस्यां स्थिताविति **गौः** । गच्छन्त्यस्यां भूतानीति वा । 'गाङ् गतौ'(भ्वा.आ.अ.), 'गै शब्दे' (अ.प.अ.), 'गम्लृ गतौ'(भ्वा.प.अ.) वा, एभ्यो 'गमेर्डोः'(उणा-२२५)इति कर्तरि कारकेष्वधिकरणे वा डोप्रत्ययः, 'गोतो णित्'७।१।९०॥ इति च णिद्वद्भावाद् वृद्धिः, गातेः स्तुत्यर्थस्याऽत्र ग्रहणम् । अत्र भाष्यम्- गौरिति पृथिव्या नामधेयम्, यद्दूरं गता भवति, यच्चाऽस्यां भूतानि गच्छन्ति, गातेर्वौकारो नामकरणं[18] इति, अस्य[19] स्कन्दस्वामी दूरं गता भवति, नैरन्तर्येणाऽऽत्मनः सकाशादिव तद्दूरेऽप्युपलब्धिर्गतिक्रियाव्यवहारः, अन्यत्राऽन्यत्र चोपलब्धेर्दूरोपदेशप्रत्ययोत्पत्तिः, रूढ्यर्थसम्बन्धाच्च गमिरत्र नैरन्तर्योपलब्धदूरविशिष्टं गमनमादत्ते, तक्षा परिव्राजक इति यथा[20] । गोरूपधरत्वाद् वा। २३ गोत्राः शैलाः सन्त्यस्यां **गोत्रा** । 'अर्शआदिभ्योऽच्'५।२।१२७॥ । यद्वा[21] 'गु[ङ्] अव्यक्ते शब्दे'(भ्वा.आ.अ.), 'गुधृवीपचिवचियमिमनितनिसदिछदिक्षदिभ्यस्त्रः[22]'(उणा-६०६)इति त्रप्रत्ययः, गुणः, अव्यक्तवाचो मृगपक्ष्यादयोऽस्यामव्यक्तं शब्दं कुर्वन्तीति गोत्रा । यद्वा गोशब्दे उपपदे 'त्रैङ् पालने'(भ्वा.आ.अ.) इत्यस्माद् 'आतोऽनुपसर्गे कः'३।२।३॥, टाप् गास्त्रायते रक्षति यवसोदकवत्तया[23]। यद्वा गोभिरादित्यकिरणैर्वृष्टिप्रदानेन त्रायते रक्षते[24](रक्षति) इति, 'कृत्यल्युटो बहुलम्'३।३।११३॥इति कर्मणि 'आतोऽनुपसर्गे कः'३।२।३॥ । यद्वा गोशब्दात् 'तस्य समूहः'४।२।३७॥ इत्यधिकारे 'खलगोरथात्'४।२।५०॥ इत्यनुवृत्तौ 'इनित्रकट्यचश्च'४।२।५१॥ इति त्रप्रत्ययः । गवां समूहे[25] मत्वर्थीयेऽकारे गोसमूहोऽस्यामस्तीति गोत्रा । गां जलं त्रायत इति वा । २४ भूतानि दधाति धारयति **भूतधात्री** । औणादिकः '-ष्ट्रन्' (उणा-५९८)इति ष्ट्रन्, षित्त्वात् ङीष् । २५ क्षियन्ति[26] निवसन्त्यस्यां प्राणिनः, क्षयन्ति[27] क्षायन्ति(क्षायन्ति क्षयन्ति)

---

१. इदं सूत्रं १.३.४.५प्रतिषु नास्ति ॥ २. 'यद्वा' इति४॥ ३. ''क्षियन्त्येतां क्षितिः'' इति अम.क्षीरस्वामिकृतटीकायाम्, २।१।२॥, पृ.७०॥ ४. २.३.४.५प्रतिषु नास्ति ॥ ५ '-द्रु' इत्युणादिगणसूत्रे नास्ति ॥ ६. क्षितिशब्दव्युत्पत्त्याम् ॥ ७. '-माणं' इति३॥ ८. इतोऽग्रे ४.५प्रत्योः 'इति वा' इति दृश्यते ॥ ९ '-ते' इति५॥ १०. 'अस्यां सन्ति' इति४॥ ११. 'ङीष्' इति३॥ १२. 'मह्यन्ति' इति३, 'मह्यति' इति५॥ १३. '-न्ते' इति३॥ १४. 'ङीप्' इति५॥ १५. अम. स्वामिकृतटीकायाम्-''महति मही'' इत्येव दृश्यते, २।१।३॥, पृ.७०॥ १६. द्र. पदचन्द्रिका, भा-२, भूमिवर्गः, श्लो-३, पृ.५॥ १७. '-णामेन' इति१॥ १८. '-ग्रहण' इति१॥ १९. 'अस्याः' इति३.५॥ २०. 'तथा' इति२॥ २१. 'यथा' इति३॥ २२. '-यमिसदिक्षदिभ्यस्त्रः' इत्युणादिगणे ॥ २३. '-कत्वात्तया' इति४.५॥ २४. 'रक्ष्यते' इति५॥ २५. '-हो' इति३॥ २६. 'न्ते' इति५॥ २७ १प्रतौ नास्ति, 'क्षि-' इति३.४.५॥

अपचयं गच्छन्त्यत्र पदार्था इति च, क्षिणन्ति[1](क्षिण्वन्ति) हिंस्यन्तेऽस्यां पापकृतो वा, [क्ष्मायते] प्राणिजातरूपं भारं विधूनयति वा प्राणिनः स्वकं च काले इति वा **क्ष्मा**[2]। 'क्षि क्षये'(भ्वा.प.अ.), भूवादिः[3], 'क्षि निवासगत्योः' (तु.प.अ.) तुदादिः, 'क्षि हिंसायाम्'(स्वा.प.अ.), क्र्यादिः (स्वादिः), 'क्षै जै सै क्षये'(भ्वा.प.अ.), 'क्षमूष् सहने' (भ्वा.आ.वे.), 'क्ष्मायी विधूनने'(भ्वा.आ.से.), एभ्य औणादिके मनिनि बाहुलकाद् रूपसिद्धिः । २६ गन्धस्य मातेव **गन्धमाता,** भुवो गन्धगुणवत्त्वात् । २७ न चलति **अचला**। 'चल चलने'[4](भ्वा.प.से.), अच् । २८ अवति प्रजाः, अव्यते वा भूपैः **अवनिः** । 'अव रक्षणादौ' (भ्वा.प.से.), धात्वर्थेषु यो योग्यः, स सर्वोऽर्थो बोद्धव्यः[5], 'अर्त्तिसृधृधम्यश्य(म्य)वितरि(तृ)भ्योऽनिः'(उणा-२५९) इत्यनि[6]प्रत्ययः ॥९३६॥ २९ सर्वं सहते **सर्वंसहा**। सर्वपूर्वात्[7] 'षह मर्षणे'(भ्वा.आ.से.), अस्मात् 'पूःसर्वयोर्दारिसहोः'३।२।४१॥ इति खच्, 'अरुर्द्विषदजन्तस्य'६।३।६७॥ इति मुम् । ३० रत्नाति गर्भेऽस्या **रत्नगर्भा**। "रत्नवती"[ [8] ]इति भागुरिः। ३ गच्छन्ति जना वृद्धिक्षयावस्यामिति **जगती** । 'गम्लृ गतौ'(भ्वा.प.अ.), 'वर्तमाने पृषत्बृहन्महज्जगच्छतृवच्च'(उणा-२४१)इत्यनेन सूत्रेणाऽतिप्रत्ययो द्वित्वं टिलोपश्चेति निपात्यते शतृवदित्यतिदेशाद्, 'उगितश्च'४।१।६॥ इति ङीष्[9]। ३२ मेद्यत्यवश्यं **मेदिनी** । 'ञिमिदा स्नेहने'(दि.प.से.), आवश्यके णिनिः, 'ऋन्नेभ्यो ङीप्'४।१।५॥ । "दैत्यमेदोयोगाद् मेदिनी"[ [10] ]इत्यन्ये ।

"मधुकैटभयोरासीन्मेदसा[11] सम्परिप्लुता ।
तेनेयं मेदिनी देवी प्रोच्यते ब्रह्मवेदिभिः ॥१॥"[ [12] ]इति निरुक्तम्।

"अदन्ताद् मेदशब्दाद् 'अत इनिठनौ'५।२।११५॥ इतीनिः [वा]। पृषोदरादित्वात् सलोपः"[ [13] ]इति तु स्वामी[14]। ३३ रस्यते आस्वाद्यते **रसा** । 'रस [आ]स्वादे'[15](चु.उ.से.), घञर्थे कः। रसाः सन्त्यस्यामिति अर्शआदित्वादचि[16] वा। ३४ कश्यपस्येयं **काश्यपी** । 'तस्येदम्'४।३।१२०॥ इत्यण्, 'टिड्ढाणञ्-'४।१।१५॥ इति ङीष्[17] । "भार्गवेण हि पृथिवी जित्वा काश्यपाय[18] दत्ता"[ ]इति प्रसिद्धिः । ३५ पर्वता आधारोऽस्याः **पर्वताधारा** । ३६ तिष्ठति **स्थिरा** । 'ष्ठा गतिनिवृत्तौ'(भ्वा.प.अ.), 'अजिरशिशिरशिथिलस्थिरस्फिरस्थविरखदिराः'(उणा-५३)इति निपातितः । ३७ ईड्यते स्तूयते ईलते वा यजमानो देवान् इन्धे दीप्यतेऽस्यां श्रीर्वा **इला** । 'ईड स्तुतौ'(अ.आ.से.), 'ञिइन्धी दीप्तौ' (रु.आ.से.), अनयोः 'अकर्तरि च कारके संज्ञायाम्' ३।३।१९॥ इति घञ्, पृषोदरादित्वादीडो ह्रस्वत्वम्, इन्धेर्नकारलोपो[19] धकारस्य डकारो[20] गुणाभावश्च। यद्वा 'इण् गतौ'(अ.प.अ.), 'क्रादिभ्यः कित्'(उणा-११२)इति सूत्रे ञमन्तादपि भवतीति वचनाद् डप्रत्ययः, कित्त्वाद् गुणाभावः । गवा समानार्थम् । यद्वा 'इड क्षेपे'( ), 'इल स्वप्नक्षेपणयोः'(तु.प.से.) आभ्याम् 'इगुपधज्ञाप्रीकिरः कः'३।१।१३५॥ इति कः, 'कृत्यल्युटो बहुलम्' ३।३।११३॥ इत्यधिकरणे भवति, क्षिप्यन्तेऽस्यां भावाः, इलन्ति[21] स्वपन्त्य[22]स्यामिति वा, डलयोरेकत्वस्मरणाल्लत्वम् । यद्वा इलेत्यत्र नाम गोनाम वा, इलान्नं गौर्वाऽस्यामस्तीति, अर्शआदित्वादच् । ३८-३९ रत्नबीजसूः, रत्नबीजशब्दाभ्यामग्रे सूः, तेन रत्नानि सूते **रत्नसूः** । बीजानि सूते **बीजसूः** । 'षूङ्(षुञ्) प्राणिगर्भविमोचने'(अ.आ.वे.), 'सत्सूद्विष-'३।२।६१॥ इति क्विप् ॥९३७॥ ४० **विपुला** विशालत्वात्[23]। ४१-४३ सागरादिति[24] सागरशब्दाद् नेमीमेखलाम्बराः स्युः, तेन सागरो नेमिर्मेखला अम्बरं चाऽस्याः **सागरनेमी, सागरमेखला, सागराम्बरा** । यौगिकत्वात् समुद्ररशना[25], समुद्रकाञ्चिः, समुद्रवसनादयोऽपि । चतुश्चत्वारिंशत् सामान्येन पृथिव्याः । शेषश्चात्र-

---

१. १.३.४.५प्रतिषु नास्ति ॥ २. क्षितिशब्दस्य व्युत्पत्तिस्तुलनीया ॥ ३. 'भु-' इति१ ॥ ४. 'कम्पने' इति क्षीरतरङ्गिण्यादयः ॥ ५. 'बोद्धयः' इति३ ॥ ६. '-निः' इति४ ॥ ७. 'सर्वं' इति५ ॥ ८. द्र. स्वोपज्ञटीका ४।९३७॥, पृ.२०७ ॥ ९. 'ङीष्' इति२.३.४ ॥ १०. द्र. अम.क्षीर. २।१।३॥, पृ.७०॥, स्वोपज्ञटीका ४।९३७॥, पृ.२०७ ॥ ११. '-सां' इति१ ॥ १२. द्र. टीकासर्वस्वम्, भा-२, २।१।३॥, पृ.४॥, पदचन्द्रिका, भा-२, भूमिवर्गः, श्लो-३, पृ.४॥, तत्र '-मेदमांसपरिप्लुता' इति, 'ब्रह्मवादिभिः' इति च दृश्यते ॥ १३. अम. क्षीरस्वामिकृतटीकायां न दृश्यते, द्र. पदचन्द्रिका, भा-२, भूमिवर्गः, श्लो-३, पृ.५ ॥ १४. 'क्षीरस्वामी' इति५ ॥ १५. 'आस्वादने' इति४ ॥ १६. '-भ्योऽचि' इति३ ॥ १७. 'ङीषि' इति५ ॥ १८. 'क-' इति१.२.३ ॥ १९. '-पे' इति४ ॥ २०. 'धस्य डो' इति४, 'धकारस्य डकारो' इति तत्रैव टिप्पणी ॥ २१. '-न्ते' इति३, १प्रतौ नास्ति ॥ २२. '-न्ते' इति१.२.३.४ ॥ २३. 'विस्तीर्णत्वात्' इति४, 'विशालत्वात्' इति तत्रैव टिप्पणी ॥ २४. ४.५ प्रत्योर्नास्ति ॥ २५. '-रसना' इति१.३.४.५ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"अथ पृथ्वी महाकान्ता क्षान्ता मेर्वद्रिकर्णिका ।
गोत्रकीला घनश्रेणी मध्यलोका जगद्वहा ॥१॥
देहिनी केलिनी मौलिर्महास्थाल्यम्बरस्थला ॥"
[शेषनाममाला ४।१५७-१५८॥] ॥

**द्यावापृथिव्यौ तु द्यावाभूमी द्यावाक्षमे अपि ॥९३८॥**
**दिवस्पृथिव्यौ रोदस्यौ रोदसी रोदसी च ते ।**

१ द्यौश्च पृथिवी च **द्यावापृथिव्यौ** । 'दिवो द्यावा'६।३।२९॥ इति सूत्रेण दिवो द्यावादेशः । २-३ एवं **द्यावाभूमी द्यावाक्षमे** ॥९३८॥ ४ **दिवस्पृथिव्यौ** इति दन्त्यपवर्गाद्यसप्तमस्वरमध्यः, 'दिवसश्च पृथिव्याम्' ६।३।३०॥ इति सूत्रेण पृथिव्यामुत्तरपदे देवताद्वन्द्वे दिवो दिवसादेशः स्यात्, द्यावा च । दिवःपृथिव्याविति सविसर्गोऽपि[३] । ५ रुदन्त्यनयोः **रोदस्यौ,** स्त्रीलिङ्गो द्विवचनान्तः । 'रुदिर् अश्रुविमोचने'(अ.प.से.), असुन्, गौरादित्वाद् ङीष्, नदीशब्दवद् रूपाणि । ६ अग्रेऽपि **रोदसी** इत्ययं क्लीबलिङ्गो द्विवचनान्तः । तृतीया-चतुर्थीपञ्चमीद्विवचने रोदोभ्यामिति । स्पष्टार्थमत्रोभयो निर्देशः । ७ तृतीयो **'रोदसी'** इत्ययं तृतीयस्वरान्तः, तस्माद् द्विवचनम्, तृतीयाचतुर्थीपञ्चमीद्विवचने रोदसिभ्याम्, षष्ठी-सप्तम्योर्द्विवचने रोदस्योः । यदुत्पलः-"द्यावापृथिव्यो-र्द्विवचने रोदसिशब्द इवर्णान्तादेशः पृषोदरादित्वात्"[३][ ]इति । रोदसीत्यव्ययमपि । सप्त भूमिस्वर्गयोरेकोक्त्या नामानि ॥

**उर्वरा सर्वसस्या भूः**

१ उर्वति हिनस्ति सर्वं[४] दुःखमिति **उर्वरा,** ह्रस्वादिः । 'उर्वी हिंसायाम्'(भ्वा.प.से.), बाहुलका-दरन्प्रत्ययः । उरून् महतो वृणोतीति, पृषोदरादिर्वा । "उर्वति रक्षति, उरुमियर्तीति[५] वा"[६][ ]इति भट्टः । सर्वं सस्यमस्यामिति सर्वसस्या । भूमात्रेऽप्ययम् । एकं सर्व-धान्योत्पत्तियोग्यभुवः ॥

**इरिणं पुनरुषरम्[७] ॥९३९॥**

१ ऋच्छत्यर्यते वा **इरिणम्,** ह्रस्वादिः । 'ऋ गतौ'[८] (भ्वा.प.अ.), 'अर्तेः किदिच्च'(उणा-२०९)इतीनन्, धातो-श्चेदादेशः, रपरत्वम् । २ उषस्य निवास **उषरम्,** पञ्चम-स्वरादिः । 'रोऽश्मादेः'६।२।७९॥इति चातुरर्थिको रः । यद्वा ऊषणमूषः । 'ऊष रूजायाम्'(भ्वा.प.से.), दीर्घादिरदन्तः, ततो घञ्, ऊषस्य निवास ऊषरः(ऊषरम्) । चातुरार्थिक एव रः । ऊषोऽस्याऽस्तीति [वा] । 'ऊषशुषि(सुषि)मुष्क-मधो रः'५।२।१०७॥इति रः । "भवेदूषरमूषरम्"[ ]इति महेश्वरः । द्वे क्षारमृद्भुवः ॥९३९॥

**स्थलं स्थली[१०]**

१ स्थल्यते स्थीयतेऽत्र **स्थलम्**। 'स्थल(ष्ठल) स्थाने'(भ्वा.प.से.) अस्मादधिकरणे 'घञर्थे[११] कविधानम्' (वा-३।३।५८॥)इति घञर्थे कः । "न्यासकृता तु 'कपिष्ठलो गोत्रे'८।३।९१॥ इत्यत्र "पचाद्यच्"[न्यासयुक्त-काशिका८।३।९१॥]इत्युक्तम्, स तु व्युत्पत्तिमात्रम्"[१२][ ] इति स्वामी । स्थलयति स्थलम् । 'स्थल संवरणे[१३]' ( ), अच्। २ **स्थली** भवेदकृत्रिमा चेदिति, 'जानपदकुण्ड-'४।१।४२॥ इत्यादिना ङीषि स्थली । कृत्रिमे तु टाबेव स्थलेति । स्पष्टार्थमुभयलिङ्गनिर्देशः । द्वे सहजोन्नतभुवः ॥

**मरुर्धन्वा**

१ म्रियन्ते तृषा कृत्वाऽत्र, म्रियन्तेऽ[१४]क्रूरप्राणिनो-ऽत्रेति वा **मरुः** । 'मृङ् प्राणत्यागे'(तु.आ.प.अ.), 'भृमृशीतृचरित्सरि[त]नि[धनि]मिमस्जिभ्य उः'(उणा-७) इत्युः । २ धन्व्यते[१५] गम्यते स्थानान्तरमस्मादिति **धन्वा** । धन्विर्गत्यर्थः सौत्रो धातुः, 'कनिन् युवृषिक्षिराजिधन्वि-द्युप्रतिदिवः'(उणा-१५४)इति सूत्रेण साधुः । पुंस्येतौ । यदमरः-"समानौ मरुधन्वानौ[१६]"[अमरकोषः२।१।५॥]इति । धन्वानौ, धन्वानः इत्यादिरूपाणि । द्वे निर्जलभूमेः ॥

**क्षेत्राद्यप्रहतं खिलम् ।**

१. '-स्थली' इति शेषनाममालास्वोपज्ञटीकयोः ॥ २ 'वा' इति४॥ ३. द्र. स्वोपज्ञटीका ४।९३९॥, पृ.२०८॥ ४ 'सर्व-' इति३॥ ५. 'ऊ-' इति१.५॥ ६ अम.क्षीरस्वामिकृतटीकायाम्-"उर्वति क्षुधमुर्वमियर्ति वा (उर्वरा)" । इति दृश्यते, २।१।५॥, पृ.७०॥, द्र. पदचन्द्रिका, भूमिवर्गः, श्लो-४, पृ.३॥ ७ 'ऊषरम्' इत्यभिधाननाममालायाम्, स्वोपज्ञटीकाऽपि तमाश्रित्यैव ॥ ८ 'ऋ गतिप्रापणयोः' इति क्षीरतरङ्गिण्यादयः ॥ ९ ऊषशब्दव्युत्पत्त्यनन्तरमेवाऽयं ग्रन्थो युक्तः ॥ १०. तुलनीयोऽमरकोषः२।१।५॥ ११. '-ज्यर्थे' इति३॥ १२. अम.क्षीरस्वामिकृतटीकायां न दृश्यते ॥ १३. क्षीरतरङ्गिण्यादौ संवरणार्थकस्थलधातुर्न दृश्यते ॥ १४. '-यते' इति३.४॥ १५. 'धन्यते' इति१, 'धन्वते' इति४॥ १६. '-धन्वौ' इति५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ न प्रहन्यते हलादिभिरिति अप्रहतम् । 'हन् (हन) हिंसागत्योः'(अ.प.अ.), 'निष्ठा'३।२।१०२॥। हलादिभिरकृष्टम्, क्षेत्रादीत्यादिशब्देन केदारादीनां ग्रहणम् । खेलन्ति क्रीडन्ति मूषिकाद्या अत्रेति **खिलम्** । 'खेलृधा[1]-तोरधिकरणे[2] घञ्, पृषोदरादेकारस्येत्वम् । खं शून्यं लातीति पृषोदरादिर्वा। खिल्यते उञ्छ्यते वा। 'खिल उञ्छे[3]'( ), घञर्थे को वा । स्त्रियां खिला, उभौ त्रिषु। अमरस्तु-"द्वे खिलाप्रहते समे त्रिषु"[अमरकोषः२।१।५॥] इति द्वे नाम्नी आह । एकमनुत्खेटितक्षेत्रकेदारादिभुवः ॥

**मृन्मृत्तिका[4]**

१ मृद्यत इति **मृत्,** स्त्रीलिङ्गः । 'मृद क्षोदे' (क्र्या.प.से.), सम्पदादित्वात् क्विप्। मृदौ, मृदः इत्यादि-रूपाणि ।२ मृदेव **मृत्तिका** । 'मृदस्तिकन् स्वार्थे[5]'५।४।३९॥ इति तिकन् । द्वे सामान्येन मृत्तिकायाः ।

अथ विशेषादाह-

**सा क्षारोषः**

१ सा मृत्तिका क्षारा **ऊषः[6]** इत्युच्यते । क्षारयते[7] सस्यानि क्षारा । पचाद्यच् । ऊषति[8] रुजति ऊषः[9] । 'ऊष रुजायाम्'(भ्वा.प.से.), दीर्घादिः, 'इगुपध-'३।१।१३५॥ इति कः । एकं क्षारमृदः । 'ऊस[10]' इति भाषा ॥

**मृत्सा मृत्स्ना च[11] सा शुभा ॥९४०॥**

१-२ प्रशस्ता मृत् **मृत्सा, मृत्स्ना** च। 'सस्नौ प्रशंसायाम्'५।४।४०॥ इति सस्नौ स्वार्थे । सा मृत्तिका, शुभा प्रशस्ता । द्वे उत्तममृदः ॥९४०॥

**रुमा लवणखानिः स्यात्**

१ रुवन्त्यस्यां **रुमा** । 'रु शब्दे'(अ.प.से.), मप्रत्ययः, टाप्, गङ्गावत् । व्यञ्जननकारान्तोऽपि। "रुमन्" [ ]इति हलायुधटीका । रुमाणौ, रुमाणः इत्यादि[12], स्त्री-लिङ्गः। [लवणस्य खानिराकारो लवणखानिः] । एकं लवणाकरस्य ॥

**सामुद्रं लवणं हि यत् ।**
**तदक्षीवं वशिरश्च**

१ समुद्रे भवं **सामुद्रम्**। 'तत्र भवः'४।३।५३॥ इत्यण् । "सामुद्रं च समुद्रीयलवणादिषु[13] भेद्यवत्"[विश्व-प्रकाशकोशः, रान्तवर्गः, श्लो-२०६]इति महेश्वरः । २ लुनाति स्वस्थानम्, जाड्यं वा **लवणम्** । 'लूञ् छेदने'(क्र्या.उ.से.), नन्द्यादित्वाल्ल्युः । ३ अक्ष्णोति व्याप्नोति **अक्षीवम्** । 'अक्ष(अक्षू) व्याप्तौ'(भ्वा.प.वे.), चक्वनि प्रत्यये (वनि प्रत्यये) साधुः । ४ उश्यते **वशिरः**, पुंसि । "वशिरं[14] च तत्"[अमरकोषः२।९।४१॥]इति क्लीबेऽयमित्यमरः । 'वश कान्तौ'(अ.प.से.), बाहुलकाद् 'अजिरशिशिर-' इति निपातितः । "वशिरं किणिही[15]सिन्धुलवणेभकणासु च[16]" [विश्वप्रकाशकोशः, रान्तवर्गः, श्लो-१२८]इति महेश्वरः । चत्वारि समुद्रलवणस्य[17] ॥

**सैन्धवं तु नदीभवम् ॥९४१॥**
**माणिमन्थं शीतशिवं**

१ सिन्धुनद्युपलक्षिते[18] देशे भवं **सैन्धवम्**। 'तत्र भवः'४।३।५३॥ इत्यण्[19] । पुंनपुंसकोऽयम्[20] । यदमरः- "सैन्धवोऽस्त्री"[अमरकोषः२।९।४२॥]इति । २ नद्यां भवति **नदीभवम्,** अच् ॥९४१॥ ३ मणिमन्थे गिरौ भवं **माणिमन्थम्** । "माणिबन्धम्, माणिमन्तं च"[[21]] इत्येके । ४ शीतं शिनोति, श्यति वा उष्णवीर्यत्वात् **शीत-शिवम्** । 'शि हिंसायाम्[22]'( ), 'शो तनूकरणे'(दि.प.अ.), 'सर्वनिघृष्वरिष्वलिष्वशिवपद्वप्रह्वेष्वा अतन्त्रे'(उणा-१५१)इति सूत्रेण निपात्यते । चत्वारि सैन्धवलवणस्य ॥

---

१. 'वेल्ल चेल्ल केल्ल खेल्ल क्ष्वेल्ल वेल्ल चलने' इति दण्डकोऽयं धातुः ॥ २. " 'खिल धारणे'( )अस्मादधिकरणे" इति४॥ ३. क्षीरतरङ्गिण्यादौ न दृश्यते ॥ ४. तुलनीयोऽमरकोषः २।१।४॥ ५. 'मृदस्तिकन्' इत्येवाऽष्टाध्याय्याम् ॥ ६. 'उषः' इति१॥ ७. '-ति' इति३॥ ८. 'उ-' इति१.२॥ ९. 'क्षारायाः' इति४.५, 'क्षारायाः मृदः' इति३॥ १०. 'ऊषर' इति३॥ ११. 'तु' इति१.४.५॥ १२. 'इति' इति४॥ १३. 'सा-' इति ३.४.५॥ १४. 'वसिरं' इति१.२॥, अमरकोषे दन्त्यसकारमध्य एव पाठो दृश्यते ॥ १५. 'किण-' इति३.४॥ १६. विश्वप्रकाशकोशे- "-लवणे कुम्भकेषु"(पृ.१३५)इति दृश्यते, तत्तु विचारणीयम्, अत्र विश्वलोचनकोशेऽपि च-"वशिरः सिन्धुलवण-किणिहीभकणार्थकः"[रान्तवर्गः, श्लो-२१३, पृ.३१२]इति दर्शनात् ॥ १७. 'समुद्रसैन्धवलवणस्य' इति३॥ १८. '-तदेशे' इति१॥ १९. 'कच्छादिभ्यश्च'४।२।१३३॥इत्यनेनाऽण् युक्तः ॥ २०. 'पुंक्लीबः' इति४॥ २१. द्र. अम.क्षीर.२।९।४२॥, पृ.२०९॥, तत्र "मणिमन्तं(न्थं) माणिमन्थं" इति दृश्यते॥, स्वोपज्ञटीका ४।९४२॥, पृ.२०८॥ २२. 'शिञ् निशाने' इति युक्तः, क्षीरतरङ्गिण्यादौ हिंसार्थकशिधातोरभावात् ॥

४७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**रौमकं**[1] **तु रुमाभवं**[2] **।**

**वसुकं**[3][१] **वस्तकं तच्च**[२]

१ रुमायामाकरे भवं **रौमकम्** । प्राग्दीव्यतीयेऽणि, स्वार्थिके च कनि । २ रुमायां भवति **रुमाभवम्,** अच् । ३ वसति वसु । 'वस निवासे'(भ्वा.प.अ.), 'मृ(शृ)स्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च'(उणा-१०)इत्युः । वस्वेव **वसुकम्,**[३] पञ्चमस्वरमध्यः । स्वार्थे कन् । "रौमकं वसुकं वसु"[ [४] ]इति माला । ४ वस्तश्छागस्तद्गन्धि **वस्तकम्,** दन्त्यतुर्यवर्गाद्यमध्यः । चत्वारि सामान्येन लवणस्य ॥

**विडपाक्ये**[1][2] **तु कृत्रिमे ॥९४२॥**

१ विलति भिनत्ति मलान् **विडम्** । 'बिले[५] भेदने'(तु.प.से.), 'इगुपध-'३।१।१३५॥इति कः । २ पाके साधु **पाक्यम्** । 'तत्र साधुः'४।४।९८॥ इति यत् । पच्यत इति वा । 'डुपचष् पाके'(भ्वा.उ.अ.), 'ऋहलोर्ण्यत्' ३।१।१२४॥, 'चजोः कु घिण्ण्यतोः'७।३।५२॥इति कुत्वम्, 'अत उपधायाः'७।२।११६॥ । कृत्रिमे कृतके लवणे कल्लराख्य इत्यर्थः । पाक्यविडलवणयोर्भेदेऽपि कृतकत्वादैक्यम् । "कृत्रिमं रचिते प्रोक्तं सिह्लके लवणान्तरे[६]" [विश्वप्रकाशकोशः, मान्तवर्गः, श्लो-४५]इति महेश्वरः । "विडं कृत्रिमकं धूर्त्तं क्षारं द्रावणमासुरम्[७] ।
सुपाक्यं खण्डलवणं कृत्रिमं चेति नामतः ॥१॥"
[धन्वन्तरिनिघण्टुः, शतपुष्पादिर्द्वितीयो वर्गः, श्लो-२८]इति धन्वन्तरिश्च । यथा-"न रोचते भोज्यमकृत्रिमं नृणाम्" [ [८] ]इति । त्रीणि 'विडलवण' इति ख्यातस्य ॥९४२॥

**सौवर्चले**[1]**ऽक्षं**[2] **रुचकं**[3] **दुर्गन्धं**[4] **शूलनाशनम्**[5] **।**

१ सुवर्चलाकरे भवं **सौवर्चलम्।** सुष्ठु वर्चते सुवर्चः । 'वर्च दीप्तौ'(भ्वा.आ.से.), अच् । तस्येदं सौवर्चम्, जठराग्निदीपनम्, तल्लातीति वा । पुंनपुंसकलिङ्गम्,[९] तत्र । २ अक्ष्णोति व्याप्नोति **अक्षम्।** 'अक्ष(अक्षू) व्याप्तौ सङ्घाते च'(भ्वा.प.वे.), [अच्] । ३ रोचतेऽन्नमनेन **रुचकम्** । 'रुच दीप्तौ[१०]'(भ्वा.आ.से.), '- कान्तौ[११]' ( ) वा, बाहुलकात् क्वुन्, कित्त्वाद् गुणाभावः । ४ दुष्टो गन्धोऽस्य **दुर्गन्धम्** । ५ शूलरोगं[१२] नाशयति **शूलनाशनम्।** 'णश अदर्शने'(दि.प.से.), णिजन्तः, नन्द्यादित्वाल्ल्युः । हृद्यगन्धं च । पंच 'सूंचल' इति ख्यातस्य ॥

**कृष्णे तु तत्र तिलकम्**[1]

१ तत्र कृष्णे सौवर्चले, तिलति स्निह्यति **तिलकम्,** पुंक्लीबम्[१३] । 'तिल स्नेहने'(तु.प.से.), बाहुलकाद् 'अन्यत्रापि क्वुन्[१४]'(उणा-१९५)इति क्वुन् । "पूर्वं तु मधुवर्णमगन्धं कृष्णवर्णं तिलकम्"[ ]इत्येके[१५] । यद् वैद्याः-"कृष्णे सौवर्चलगुणा लवणे गन्धवर्जिते"[ ]इति। एकं कृष्णसौवर्चलस्य ॥

**यवक्षारो**[1] **यवाग्रजः**[2] **॥९४३॥**

**यवनालजः**[3] **पाक्यश्च**[4]

१ यवानां क्षारो **यवक्षारः** । २ यवाग्रेभ्यो जातः **यवाग्रजः** । 'पञ्चम्यामजातौ'३।२।९८॥इति डः । दग्ध्वा यवाङ्कुराज्जन्यत इत्यर्थः ॥९४३॥ ३ यवनालेभ्यो जातः **यवनालजः** । ४ पचनीयः **पाक्यः** । 'ऋहलोर्ण्यत्' ३।१।१२४॥ । असौ वनस्पतिकायजातोऽपि क्षारप्रस्तावात् पृथिवीकाये भणितः । एवं स(स्व)र्जिकाक्षारादावप्यूह्यम् । चत्वारि यवक्षारस्य ॥

**पाचनकस्तु**[1] **टङ्कणः**[2][१६] **।**

**मालतीतीरजो**[3] **लोहश्लेष्मणो**[4] **रसशोधनः**[5] **॥९४४॥**

१ पाचयति पाचनः । पचेर्णिजन्ताद् नन्द्यादित्वाद् ल्युः । स्वार्थे कनि **पाचनकः** । २ टङ्कयति लोहं **टङ्कणः** । 'टकि बन्धने'(चु.उ.से.), बाहुलकादणच् । टङ्कनोऽपि । ३ मालत्यास्तीरे जातो **मालतीतीरजः** । ४

१. 'वसु' इति४॥ २. इतोऽग्रे ३प्रतौ 'तच्च' इति दृश्यते ॥ ३. 'कञ्' इति५॥ ४ द्र. अम.क्षीर.२।९।४२॥, पृ.२०९॥, रामाश्रमी २।९।४२॥, पृ.४१९॥, तयोः 'वसुकं' इत्यस्य स्थाने 'वस्तकं' इति दृश्यते ॥, स्वोपज्ञटीका ४।९४२॥, पृ.२०८॥ ५. वबयोरैक्यं बोध्यम् ॥ ६. '-रम्' इति४॥ ७ '-शुरम्' इति१॥ ८. द्र. अनेकार्थकैरवाकरकौमुदीटीका, भा-२, काण्डः-३, श्लो-४५५, पृ.१९९॥ ९. 'पुंक्लीबलिङ्गम्' इति४॥ १०. मैत्रेयसम्मतोऽयं धातुपाठः, 'रुच दीप्तावभिप्रीतौ च' इति स्वामिसायणौ॥ ११. क्षीरतरङ्गिण्यादौ कान्त्यर्थकरुचधातुर्न दृश्यते ॥ १२. 'शूलं' इति१॥ १३. 'पुंक्ली.' इति१.२॥ १४. 'बहुलमन्यत्रापि'(उणा-१९५)इत्युणादिगणसूत्रम् ॥ १५. द्र. अम.क्षीर.२।९।४३॥, पृ.२०९॥, तत्र "पूर्वं तु मधु(र)लवणम् । अगन्धं कृष्णलवणं तिलकमित्येके" इति दृश्यते ॥, स्वोपज्ञटीका ४।९४३॥, पृ.२०९॥ १६. '-नः' इति५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लोहं हेमादि श्लिष्यतेऽनेन **लोहश्लेष्मणः** । 'श्लिष आलिङ्गने'(दि.प.अ.), करणे ल्युट् । ५ रसं शोधयति **रसशोधनः** । 'शुध शुद्धौ'[१](दि.प.अ.), णिजन्तः, नद्यादित्वाल्ल्युः । रसः शोध्यतेऽनेनेति, 'ण्यासश्रन्थ-'३।३।१०७॥ इति युज् वा । पञ्च टङ्कनक्षारस्य । 'सोहगीखार' इति भाषा ॥९४४॥

**समास्तु स्वर्जिकाक्षारकापोतसुखवर्चकाः[२] ।**

१ स्वर्जिकां[३] दग्ध्वा क्षार्यते **स्वर्जिकाक्षारः** । 'क्षर सञ्चलने'(भ्वा.प.से), हेतुमण्णिजन्तः, कर्मणि घञ् । २ कपोतस्याऽयं **कापोतः**, कपोतवर्णत्वात् । 'तस्येदम्' ४।३।१२०॥ इत्यण् । ३ सुखाय वर्चते **सुखवर्च[क]ः** । 'वर्च दीप्तौ'(भ्वा.आ.से.), अच्, स्वार्थे कन् । त्रीणि 'साजीखार' इति ख्यातस्य ॥

**स्वर्जिस्तु स्वर्जिका स्रुग्घ्नी योगवाही सुवर्चिका ॥९४५॥**

१ सुष्ठु अर्ज्यते **स्वर्जिः**, स्त्रीलिङ्गः[४] । 'अर्ज सर्ज[५] अर्जने'(भ्वा.प.से), 'इक्कृष्यादिभ्यः'(वा-३।३।१०८॥) । २ स्वार्थे कनि **स्वर्जिका** । ३ स्रुचो हन्ति[६] **स्रुघ्नी**, दन्त्यरेफपञ्चमस्वरादिः, कवर्गतृतीचतुर्थवर्गपञ्चमान्तश्च । 'हन्(हन) हिंसागत्योः'(अ.प.अ.), 'अमनुष्यकर्तृके च' ३।२।५३॥ इति टक् ।

"क्षारोऽन्यः स्वर्जिकाक्षारः स्वर्जिकाऽथ सुखार्जिका[७] ।
सुवर्चिका सुवर्चोऽथ सुखवर्चः स एव च ॥१॥"

[धन्वन्तरिनिघण्टुः, शतपुष्पादिर्द्वितीयो वर्गः, श्लो-२०]इति धन्वन्तरिभेदेनाऽऽह । ४ योगं वहति **योगवाही** । ५ सुष्ठु वर्चते **सुवर्चिका** । ण्वुल्[८], टाप्, 'प्रत्ययस्थात्-'७।३।४४॥ इतीत्वम् । पञ्च 'साजी' इति ख्यातायाः ॥९४५॥

**भरतान्यैरावतानि विदेहाश्च कुरून् विना ।**
**वर्षाणि कर्मभूम्यः स्युः**

१ बिभ्रति धर्मं **भरतानि** । 'डुभृञ् धारणपोषणयोः'[९] (जु.उ.अ.), 'भृमृदृशीङ्यजिपर्विपच्यमिनमितमिहर्यि(र्ये)[१०]-भ्योऽतच्'(उणा-३९०)इत्यतच् । २ इरावतीनां नदीनां निवासा **ऐरावतानि**[११] । ३ विदिह्यन्ते **विदेहाः** । पञ्चभरतपञ्चैरावतपञ्चविदेहानां कुरून् विना नामैकं **कर्मभूम्यः** । 'कृदिकारादक्तिनः'(गणसू-४।१।४५॥)इति भूमिशब्दाद् ङीष् । तत्रैकं जम्बूद्वीपे१, द्वे धातकीखण्डे३, द्वे च पुष्करवरद्वीपार्धे५ इति पञ्च भरतानि । एवं भरतस्थाने[१२]क्रमेण ऐरावतान्यपि पञ्च । चः समुच्चये । विदेहा अपि पञ्च, ते च विदेहाः द्विविधाः, पूर्वेऽपरे च । कुरून् विनेति, देवकुरूनुत्तरकुरूंश्च वर्जयित्वेत्यर्थः । तेषां हि युग्मोत्पत्तिहेतुत्वेन कर्मभूमित्वम् । कर्मणां शुभाशुभानामुपार्जनभूम्यः कर्मभूम्यः । वर्षाणि द्वीपांशाः कर्मभूम्यः स्युरित्यन्वयः ॥

**शेषाणि फलभूमयः ॥९४६॥**

१ शेषाणीति हैमवत१हरिवर्ष२रम्यकै३रण्य(हैरण्य)वतानि४ चत्वारि वर्षाणि जम्बूद्वीपे, एतन्नामान्येव द्विगुणानि धातकीखण्डे, पुष्करवरद्वीपार्धे च, एवं च विंशतिवर्षाणि देवकुरूत्तरकुरुरूपविदेहांशदशकसहितानि त्रिंशत् **फलभूमयः** स्युरित्यन्वयः । फलभोगाय भूमयः फलभूमयः । त्रिंशदकर्मभूमिनामैकं फलभूमय इति ॥९४६॥

**वर्षं वर्षधराद्र्यङ्कम्[१३]**

१ वृष्यते **वर्षम्**, पुंक्लीबम्[१४] । 'वृषु सेचने'(भ्वा.प.से.), घञ् । २ वर्षधराद्रयो हिमवन्महाहिमवन्निषधनीलरुक्मिशिखरिणः, एते षड् जम्बूद्वीपे, एतन्नामानो द्विगुणा धातकीखण्डे, पुष्करवरद्वीपार्धे च, एवं त्रिंशद् वर्षधराद्रयः, तैरङ्क्यते[१५] चिह्न्यते[१५] तद् **वर्षधराद्र्यङ्कम्** । वर्षं नाम द्वीपांशस्तन्नाम्नी द्वे । लौकिकास्तु नववर्षाण्याहुः, यथा-

"भारतं प्रथमं वर्षं ततः किंपुरुषं स्मृतम् ।
हरिवर्षं तथैवान्यन्मेरोर्दक्षिणतो द्विजः ॥१॥
रम्यकं चोत्तरं वर्षं तस्यैवानु हिरण्मयम् ।
उत्तराः कुरवश्चैव यथा वै भारतं तथा ॥२॥

१. 'शुध शौचे' इति क्षीरतरङ्गिण्यादयः ॥ २. '-र्चिकाः' इति१.३.४.५॥ ३. '-कं' इति५॥ ४ ४प्रतौ नास्ति ॥ ५. 'षर्ज' इति मैत्रेयसायणौ ॥ ६. '-न्तीति' इति५॥ ७ 'सुवर्चिका' इति धन्वन्तरिनिघण्टौ, पृ.१०९॥ ८. '-लि' इति१.२॥ ९. 'धारणादौ' इति१.२, 'धारणपोषणादौ' इति४.५॥ १०. 'भृमृदृशियजि-' इत्युणादिगणे ॥ ११. इतोऽग्रे १.३.४.५प्रतिषु 'पञ्च' इति दृश्यते ॥ १२. '-ने' इति३॥ १३. 'वर्षधराद्यङ्कं' इति मुद्रिताभिधानचिन्तामणिनाममालायाम्, स्वोपज्ञटीकाऽपि तमाश्रित्यैव ॥ १४. 'पुंक्ली' इति१.२॥ १५. '-न्ते' इति३.४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[[1]भद्राश्वं पूर्वतो मेरोः केतुमालं तु पश्चिमे।]
नवसाहस्रमेकैकमेतेषां द्विजसत्तम! ॥३॥
इलावृत्तं च तन्मध्ये तन्मध्ये मेरुरुत्थितः ॥''

[[2]]इति। भारतवर्षार्थस्त्वेवं बार्हस्पते(-पत्ये)-''वनं प्रव्रजता[3] किल ऋषभनाम्ना नृपेण जम्बूद्वीपोऽयं खण्डशो व्युत्पादितः, तत्राऽस्मदादिगोचरखण्डं भरतनाम्ने पुत्राय दत्तम्''[[4]]इति । भरतस्येदं भारतम् ।

''भरताय यतः पित्रा दत्तं प्रव्रजता वनम् ।
तेनेदं भारतं वर्षं प्रोच्यते ब्रह्मवादिभिः ॥४॥''[[4]]

इति व्याडिप्रभृतयः । ''[5]भारतादीनि वर्षाणि जम्बूद्वीपं[6] नव क्रमात्''[[6]]इति वाचस्पतिः । ''वर्षं पृथिव्यंशः''[[7]]इति स्वामी[7]। ''पुंनपुंसकयोर्वर्षं जम्बूद्वीपाम्बुवृष्टिषु''[[8]]इति रुद्रः। ''वर्षोऽस्त्री भारतादौ च जम्बूद्वीपाम्बुवृष्टिषु''[मेदिनीकोशः, षान्तवर्गः, श्लो-२४]इति मेदिनिः । अन्यच्च-

''उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम् ।
वर्षं तद् भारतं नाम भारती यत्र सन्ततिः ॥५॥''[[8]]इति।

## [1]विषयस्तूप[2]वर्तनम् ।
## [3]देशो [4]जनपदो [5]नीवृद् [6]राष्ट्रं [7]निर्गश्च [8]मण्डलम् ॥९४७॥

१ विशेषेण सिनोति **विषयः**। 'षिञ् बन्धने' (स्वा.उ.अ.), अच्। '' 'शीङ् स्वप्ने'(अ.आ.से.), ग्रहादिपाठादणि वृद्ध्यभावे च विशयः''[[10]]इति तालव्यमध्योऽपीति माधवः[11] । २ उपवर्तन्तेऽस्मिन् **उपवर्तनम्**। 'वृतु वर्तने'(भ्वा.आ.से.), बाहुलकाल्ल्युट् । ''उपावर्तनम्''[[12]]इति कात्यः । ३ दिश्यतेऽत्र **देशः** । 'दिश अतिसर्जने'(तु.उ.अ.), 'हलश्च'३।३।१२१॥ इति घञ् । ''दिश्यते देशः''[अम.क्षीर.२।१।९॥]इति[13] भट्टः[14] । ''दिशति तमिति देशः, 'अकर्तरि च कारके-'३।३।१९॥ कर्मणि घञ्[15]''[मा.धातुवृत्तिः, तुदादिः, धातुसं-३]इति माधवः । ४ जनैः पद्यते गम्यतेऽत्रेति **जनपदः** । 'पद गतौ'(चु.आ.अ.), 'पुंसि संज्ञायाम्-'३।३।११८॥इति घः । जनानां पदं स्थानं स्थितिरत्रेति वा। पुंस्त्वं लोकात्। ५ नियमेना-

१. कोष्ठान्तर्गतपाठः स्वोपज्ञटीकातः ४।९४७॥, पृ.२०९॥ २. द्र. स्वोपज्ञटीका ४।९४७॥, पृ.२०९॥, अत्र टीकासर्वस्वव्याख्या-''तथा च विष्णुपुराणं-

''जम्बूप्लक्षाह्वौ द्वीपौ शाल्मलिश्चापरो द्विज ! ।
कुशः क्रौञ्चस्तथा शाकः पुष्करश्चैव सप्तमः॥
एते द्वीपाः समुद्रैस्तु सप्त सप्तभिरावृताः ।
लवणेक्षुसुरासर्पिर्दधिदुग्धजलैः समम् ॥
जम्बुद्वीपः समस्तानामेतेषां मध्यमास्थितः ।
तस्यापि मेरुर्मैत्रेय ! मध्ये कनकपर्वतः ॥
हिमवान् हेमकूटश्च निषधस्तस्य दक्षिणे ।
नीलः श्वेतश्च शृङ्गी च उत्तरे वर्षपर्वताः ॥
भारतं प्रथमं वर्षं तस्यैवानु हिरण्मयम् ।
उत्तराः कुरवश्चैव यथा वै भारतं तथा ॥
नवसाहस्रमेकैकमेतेषां द्विजसत्तम ! ।
इलावृतं तु तन्मध्ये सौवर्णो मेरुरुच्छ्रितः ॥
मेरोश्चतुर्दिशं तत्र नवसाहस्रविस्तृतम् ।
इलावृतं महाभाग ! चत्वारश्चात्र पर्वताः ॥
मेरोः पूर्वेण भद्राश्वं केतुमालं च पश्चिमे ।''

इति । तत्रायं लोकः समुद्रस्योत्तरे कुले हिमालयस्य दक्षिणे भारतं वर्षम् । भरतस्येदं भारतं । 'तस्येदम्'(४.३.१२०)इत्यण्।'' (भा-२, २।१।६॥, पृ.७॥)इति ॥ ३ '-जिता' इति३.४॥ ४. द्र. पदचन्द्रिका, भा-२, भूमिवर्गः, श्लो-६, पृ.८॥ ५ 'भ-' इति३.५॥ ६ 'जम्बु-' इति२॥ ७. क्षीरस्वामिकृतामरकोषटीकायां नोपलभ्यते ॥ ८. द्र. पदचन्द्रिका, भा-२, भूमिवर्गः, श्लो-६, पृ.८-९॥, रामाश्रमी२।१।६॥, पृ.१४४॥, तयोः '-द्वीपाम्बु-' इत्यस्य स्थाने '-द्वीपाब्द-' इति दृश्यते॥ ९ '-द्वीपाब्द-' इति२, मुद्रितमेदिनीकोशे च ॥ १०. माधवीयधातुवृत्तौ तु सायणो विशयीशब्दमुट्टङ्क्य- ''विशयी देशविशेषः-'विशयी देशे' इति ग्रहादिपाठाण्णिनिः, वृद्ध्यभावश्च''[अदादिगणः, धातुसं-२६, पृ.३३९]इत्याह ॥ ११. 'भावः' इति५॥ १२. द्र. अम.क्षीर.२।१।९॥, पृ.७॥, स्वोपज्ञटीका ४।९४७॥, पृ.२१०॥ १३. इतोऽग्रे ३प्रतौ 'तु' इति दृश्यते ॥ १४ 'भट्टिः' इति१॥, द्र. पदचन्द्रिका, भा-२, भूमिवर्गः, श्लो-८, पृ११॥ १५. 'घञ्' इति मा.धातुवृत्तौ, पृ.४६०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऽवश्यतया नियतं वर्तन्ते वसन्ति जना अत्रेति **नीवृत्** । पुंसि बाहुलकात्, सम्पदादित्वात्, 'अन्येभ्योऽपि दृश्यते' ३।२।१७८॥ इति वा अधिकरणे क्विप्, 'वृतु वर्तने'(भ्वा. आ.से.), 'नहिवृतिवृषिव्यधि-'६।३।११६॥ इत्यादिना दीर्घत्वम् । स्त्रीलिङ्गः, तकारान्तः, नीवृतौ, नीवृतः इत्यादिरूपाणि । क्षीरस्वामी तु-"नीवृज्जनपदशब्दौ देशनाम्नी, नियतं वर्तन्ते[1]ऽस्मिन्निति, नीवृत्शब्दं च पुंसि देशो विषय उपवर्तनमित्येते त्रयः स्थानमात्रपर्यायाः"[[2]]इति व्याख्यतं[3] । **६** राजते **राष्ट्रम्** । 'राजृ दीप्तौ'(भ्वा.उ.से.), '-ष्ट्रन्'(उणा-५९८)इति ष्ट्रन् 'व्रश्चभ्रस्ज-'८।२।३६॥इति षत्वम्, 'तितुत्र-' ७।२।९॥इतीण्निषेधः । **७** निर्गम्यतेऽस्मिन्निति **निर्गः**[4] । 'गम्लृ गतौ'(भ्वा.प.अ.), 'निरो देशे'( )इति साधुः[5] । **८** मण्ड्यते **मण्डलम्**, त्रिलिङ्गः । 'मडि भूषायाम्'(भ्वा.-प.से.), 'वृषादिभ्यः कलच्[6]'(उणा-१०६) । अमरस्तु-"निवृज्जनपदो देशविषयौ तूपवर्तनम्"[अमरकोषः२।१।८॥] इति पृथगाह । अष्टौ सामान्यतो[7] देशस्य ॥९४७॥

अथ विशेषत आह-

**आर्यावर्तो जन्मभूमिर्जिनचक्र्यर्धचक्रिणाम् ।**

**पुण्यभूराचारवेदी मध्यं विन्ध्यहिमाऽगयोः ॥९४८॥**

**१** आर्याः[8] साधवो वर्तन्तेऽत्र **आर्यावर्तः** । 'वृतु वर्तने'(भ्वा.आ.से.), 'हलश्च'३।३।१२१॥इति घञ्, 'अन्येषामपि-'६।३।१३७॥इति दीर्घः । आर्या आवर्तन्तेऽत्रेति वा । जिना अवसर्पिण्यामृषभादयश्चतुर्विंशतिः, चक्रिणो भरतादयो द्वादश, अर्धचक्रिणस्त्रिपृष्ठादयोऽश्वग्रीवादयश्च नव, साहचर्यादचलादयो बलदेवा नव, तेषां जन्मभूमिः । **२** पुण्यस्य भूः **पुण्यभूः** । पुण्या वा[9] भूः पुण्यभूः । **३** आचारस्य वेदीव **आचारवेदी** । विन्ध्यहिमाऽगयोर्विन्ध्याद्रिहिमाद्रयोर्मध्यं मध्यभागः[10] आर्यावर्त इत्यन्वयः । यद्व्याडिः-

"आसमुद्राच्च वै पूर्वादासमुद्राच्च पश्चिमात् ।
हिमवद्विन्ध्ययोर्मध्यं[11]मार्यावर्तं विदुर्बुधाः[12] ॥१॥"[[13]]इति ।

आर्यावर्तः पुंसि, द्वौ स्त्रीलिङ्गौ । त्रीणि आर्यदेशस्य ॥९४८॥

**गङ्गायमुनयोर्मध्यमन्तर्वेदिः समस्थली ।**

**१** (गङ्गाया[14] यमुनायाश्च) नद्योर्मध्यं मध्यभूमिः, अन्तर्मध्ये[15] वेदिरिव **अन्तर्वेदिः** । **२** समा चाऽसौ स्थली च **समस्थली** । द्वे गङ्गायमुनयोर्मध्यभूमिदेशस्य[16]॥

**ब्रह्मावर्तः सरस्वत्या दृषद्वत्याश्च मध्यतः ॥९४९॥**

**१** सरस्वत्या दृषद्वत्याश्च नद्या मध्यभूमिदेशनामैकं **ब्रह्मावर्तः** । ब्रह्माणो[17] ब्राह्मणा आवर्तन्तेऽत्र ब्रह्मावर्तः । 'मध्यतः' इति सप्तम्यर्थे तसिल्, तेन सरस्वतीदृषद्वत्योर्मध्ये इत्यर्थः ॥९४९॥

**ब्रह्मवेदिः कुरुक्षेत्रे पञ्चरामह्रदान्तरम् ।**

**१** कुरुक्षेत्रे पञ्चानां[18] रामह्रदानां मध्यगतप्रदेशनामैकं ब्रह्मणो वेदिः **ब्रह्मवेदिः**, स्त्रियाम् ॥

**धर्मक्षेत्रं कुरुक्षेत्रं द्वादशयोजनावधि ॥९५०॥**

**१** धर्मस्य क्षेत्रं **धर्मक्षेत्रम्** । **२** कुरवोऽत्र क्षियन्ति स्म **कुरुक्षेत्रम्** । तच्च द्वादशयोजनावधि भवति । द्वे कुरुक्षेत्रस्य ॥९५०॥

**हिमवद्विन्ध्ययोर्मध्यं यत् प्राग्विनशनादपि ।**

**प्रत्यगेव प्रयागाच्च मध्यदेशः स मध्यमः ॥९५१॥**

**१-२** उत्तरस्यां हिमवान् पर्वतः, दक्षिणस्यां विन्ध्यपर्वतः, तयोर्मध्यम्, विनशनो नाम [सरस्वत्याः अन्तर्धानदेशः], तस्मात् प्राक्, प्रयागः[19] गङ्गायमुनयोः सङ्गमः, तस्मात् प्रत्यगेव[20], एतानवधीकृत्य यो देशः, नाऽत्युत्कृष्टो नाऽप्यनुत्कृष्ट इत्यर्थः, स मध्यदेशः, तन्नाम्नी द्वे **मध्यदेशः**[21], **मध्यमः** इति ॥९५१॥

---

१. 'वर्तते' इति१.५॥ २. अम.क्षीरस्वामिकृतटीकायां न दृश्यते ॥ ३ 'व्याख्यानात्' इति४॥ ४ 'निर्गमः' इति३.४.५॥ ५. "निर्गच्छन्त्यत्रेति निर्गो देशः-'निसो देशे' इति डः। देशादन्यत्र निर्गमनम् इति ल्युड् भवति॥" इति मा.धातुवृत्तिः, भ्वादिः, धातुसं-७०२, पृ.२७८॥ ६ 'वृषादिभ्यश्चित्' इत्युणादिगणसूत्रस्वरूपम् ॥ ७ '-न्येन' इति३॥ ८. इतोऽग्रे १प्रतौ 'च' इति दृश्यते ॥ ९. 'चासौ' इति३॥ १०. 'मध्यम-' इति३॥ ११. '-ध्ये' इति१॥ १२. तुलनीया मनुस्मृतिः, अध्या-२, श्लो-२२॥ १३. द्र. स्वोपज्ञटीका४।९४८॥, पृ.२१०॥ १४. कोष्ठान्तर्गतपाठस्थाने १प्रतौ 'गङ्गायमुनयोः' इति दृश्यते ॥ १५. 'अन्तयोः' इति१॥ १६. '-मध्ये भूमिप्रदेशस्य' इति१॥ १७ 'ब्रह्म-' इति१.३॥ १८ 'पञ्च-' इति१॥ १९ 'प्रयोगः' इति४.५॥ २०. 'एव' इति२.३.४.५प्रतिषु नास्ति॥ २१. इतोऽग्रे ३प्रतौ 'स' इति दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**देशः प्राग्दक्षिणः प्राच्यो[1] नदीं यावच्छरावतीम् ।**

१ पूर्वदक्षिणदेशनामैकं **प्राच्यः** । 'द्युप्राग-प्रागुदक्प्रतीचो यत्'४।२।१०१॥ । शरावतीं नदीं यावत्, प्राग्दक्षिणः प्राक्सहचरितो दक्षिणो देशः प्राच्य इत्यन्वयः । शरावत्याः नद्याः पूर्वोत्तरेण[1] वहन्त्या देशः पूर्वतो दक्षिण-तश्च प्राच्य उच्यत इत्यर्थः ॥

**पश्चिमोत्तरस्तूदीच्यः[1]**

१ शरावत्या अवधे[:] पश्चिमेन सहचरित उत्तरो देशः पश्चिमोत्तर **उदीच्यः** उच्यते[2] इत्यन्वयः । यदुक्तं काशिकायाम्-

"प्रागुदञ्चौ विभजते हंसाः(हंसः) क्षीरोदके यथा ।
विदुषां शब्दसिद्ध्यर्थं सा नः पातु शरावती ॥१॥"

[काशिका१।१।७५॥] । पश्चिमोत्तरदेशनामैकं उदीच्य इति ॥

**प्रत्यन्तो[1] म्लेच्छमण्डलः[3] ॥९५२॥**

१ म्लेच्छानां मण्डलो देशः म्लेच्छमण्डलस्तन्ना-मैकं **प्रत्यन्तः** इति । प्रतिगतोऽन्तो भोटादिदेशः प्रत्यन्तः[4], शिष्टाचाररहितः, कामरूपवङ्गादिर्म्लेच्छः । उक्तं च-

"चातुर्वर्ण्यव्यवस्थानं यस्मिन् देशे न विद्यते ।
तत् म्लेच्छमण्डलं प्राहुरार्यावर्तमतः परम् ॥१॥"[[5]]

इति ॥९५२॥

**पाण्डूदक्कृष्णतो भूमः पाण्डूदक्कृष्णमृत्तिके ।**

१-३ पाण्डूदक्कृष्णशब्देभ्यो भूमशब्दो योज्यः । १ पाण्डुर्भूमिरत्र **पाण्डुभूमः** । १ उदीची[6] भूमिरत्र **उदग्भूमः** । १ कृष्णा भूमिरत्र **कृष्णभूमः** । सर्वत्र 'कृष्णोदक्-पाण्डुसङ्ख्या[पूर्वा]या भूमेरजिष्यते'(वा-५।४।७५॥) इत्यच्, 'यस्येति च'६।४।१४८॥ । पाण्डुमृत्तिकायुक्तदेश-नामैकं पाण्डुभूमः, उदक्मृत्तिकायुक्तदेशनामैकं उदग्भूमः, कृष्णमृत्तिकायुक्तदेशनामैकं कृष्णभूमः । १-३ पाण्डूदक्-कृष्णशब्देभ्यो मृत्तिकाशब्दो योज्यते । १ पाण्डुर्मृत्तिका[7] यत्र स **पाण्डुमृत्तिकाः** । १ उदीची मृत्तिका यत्र स **उदग्मृत्तिकः** । १ कृष्णा मृत्तिका यत्र देशे स **कृष्ण-मृत्तिकः** । हलायुधस्तु-"पाण्डुभूमस्तथा प्रोक्त उदग्भूमश्च पण्डितैः"[हलायुधकोशः२।१६०॥]इति । "पाण्डुमृद्युक्ते द्वौ" [ ]इति तट्टीका च । पाण्डुभूम उदग्भूम इत्येतावेकार्थावाह ॥

**जङ्गलो[1] निर्जलः[2]**

१ जायन्ते स्थलान्यत्र **जङ्गलः**, स्थलप्रायः । 'जनी प्रादुर्भावे'(दि.आ.से.), '[ऋ]जनेर्गोऽन्तश्च'(हैमोणा-४६७) इत्यलः । प्रज्ञाद्यणि जाङ्गलोऽपि । २ निर्गतं जलमस्मादिति **निर्जलः** । द्वे निर्जलस्थानस्य । 'थली' इति भाषा ॥

**अनूपोऽम्बुमान्[1]**

१ अनुगता[8] आपो यत्र स[9] **अनूपः** । 'ऋक्पूर-ब्धूःपथामानक्षे'५।४।७४॥ इत्यप्रत्ययः[10], 'ऊदनोर्देशे'६।३।-९८॥ । अम्बु विद्यते यस्य, यस्मिन् वा अम्बुमान् । 'तदस्यास्ति-'५।२।९४॥ इति मतुप् । एकं सजलस्थानस्य ॥

**कच्छस्तु[1] तद्विधः ॥९५३॥**

१ तद्विधोऽनूपप्रायः सजलो नद्यादेरुपान्तो देशः **कच्छः** । कं जलं छ्यति परिछिनत्ति[11] कच्छः । 'छो छेदने' (दि.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥ । केन जलेन छाद्यत इति छदेरनित्यण्यन्ताद् 'अन्येभ्योऽपि(-ष्वपि)-' ३।२।१०१॥ इति डः, पूर्वस्य तुकि कच्छ इति वा, पुंक्ली. । "[अनूपप्रायं] कच्छम्"[[12]]इति तु माला । "कच्छमनूपम्" [[12]]इति वोपालितः । "स्त्रियां कच्छेत्यपीत्यप्रमाणम्" [[12]]इति पञ्जिका ॥९५३॥

**कुमुद्वान्[1] कुमुदावासः**

१ कुमुदानि सन्त्यत्र, कुमुदानां निवासो वा **कुमुद्वान्** । 'तदस्मिन्नस्तीति देशे तन्नाम्नि'४।२।६७॥, 'कुमुदनडवेतसेभ्यो ड्मतुप्'४।२।८७॥ चातुरर्थिकः[13], 'मादु-पधायाश्च-'८।२।९॥ इति वत्वम् । "कुमुदं च कुमु-च्चापि(कुमुदं कुमुदश्चापि)"[शब्दभेदप्रकाशः, श्लो-३४

---

१. 'पूर्वेणो-' इति१॥ २. ४.५प्रत्योर्नास्ति ॥ ३. '-लम्' इति५॥ ४. इतोऽग्रे १प्रतौ 'इति' इति दृश्यते ॥ ५. द्र. टीकासर्वस्वम्, भा-२, २।१।७॥, पृ.९॥ तत्र- "म्लेच्छदेशः स विज्ञेय आर्यावर्तस्ततः परम्" इत्युत्तरार्धो दृश्यते ॥, पदचन्द्रिका, भा-२, भूमिवर्गः, श्लो-७, पृ.१०॥, रामाश्रमी २।१।७॥, पृ.१४४॥, तयोः 'तत् म्लेच्छमण्डलं' इत्यस्य स्थाने 'तं म्लेच्छविषयं' इति दृश्यते ॥ ६. '-चा' इति४.५॥ ७ 'पाण्डुमृ-' इति२.३॥ ८. इतोऽग्रे ४प्रतौ 'अनुप्राप्ता' इति दृश्यते ॥ ९ १.२.३प्रतिषु नास्ति ॥ १०. 'इत्यपः' इति३॥ ११. 'छिनत्ति' इति४॥ १२. द्र. पदचन्द्रिका, भा-२, श्लो-१०, पृ.१४॥ १३. इतोऽग्रे २प्रतौ 'डित् प्रत्यय इत्यर्थः' इति दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(३५)]इति शब्दप्रभेदोक्तेः कुमुदशब्दाद्[1] वा मतुप् । कुमुदावासः कुमुदप्रायः, रात्रिविकाशि[2]कमलयुक्तस्थानमित्यर्थः, तस्यैकम् ॥

**वेतस्वान् भूरिवेतसः ।**

१ वेतसाः सन्त्यत्र **वेतस्वान्** । 'कुमुदनडवेतसेभ्यो ड्मतुप्'४।२।८७॥ । भूरयो वेतसाः सन्त्यत्र भूरिवेतसः। एकं बहुवेतसयुक्तस्थानस्य ॥

**नडप्रायो नडकीयो नड्वांश्च नड्वलश्च सः ॥९५४॥**

१ **नडप्रायः**, नडबहुल इत्यर्थः। २ नडाः सन्त्यत्र **नडकीयः** । 'नडादीनां कुक् च'४।२।९१॥ इति छः। ३ नडाः सन्त्यत्र **नड्वान्**। 'कुमुदनडवेतसो ड्मतुप्'४।२।८७॥ इति ड्मतुप्, डित्त्वाट्टिलोपः, 'झयः'८।२।१०॥इति वत्वम् । ४ नडाः सन्त्यत्र **नड्वलः** । 'नडशादाड् ड्वलच्'४।२।८८॥ इति ड्वलच्, डित्त्वाट्टिलोपः । नड्वान्, नड्वल एतौ द्वौ तृतीयवर्गतृतीयदन्त्यौष्ठमध्यौ । चत्वारि नलतृणयुक्तस्थानस्य ॥९५४॥

**शाद्वलः शादहरिते[3]**

१ शादाः सन्त्यत्र **शाद्वलः**, चतुर्थवर्गतृतीयदन्त्यौष्ठमध्यः । 'शद्लृ शातने'(भ्वा.तु.प.अ.), ज्वलादित्वाण्णः । "शादः"[4]इति सर्वधरः । "शीयतेऽस्मिन्[5] शादः"[अम.क्षीर.२।१।११॥]इति भट्टः । यत् शाश्वतः- "शष्पकर्दमयोः शादः"[शाश्वतकोशः,श्लो-६६१]इति । "शादैः कृत्वा हरितो देशः शाद्वलः । 'नडशादाड् ड्वलच्'४।२।८८॥ इति तु शष्पवाचिन एव, नान्यतोऽनभिधानात्"[6]इति सर्वानन्दः । "न हि कोटरसंस्थेऽग्नौ तरुर्भवति शाद्वलः"[7]इति लक्ष्यम् । शादेन शष्पेण हरितो नीलः शादहरितः, तत्र । एकं बालतृणयुक्तस्थानस्य[8] ॥

**देशो नद्यम्बुजीवनः[9] ।**

**स्यान्नदीमातृकः**

१ नद्यम्बुभ्यो जीवनं वृत्तिरत्र नद्यम्बुजीवनः, तत्र हि नद्यम्बुभ्यः सस्यनिष्पत्तिः । नदी माताऽस्य **नदीमातृकः**, नद्यम्बुजातसस्यवर्धितत्वात्। 'नद्यृतश्च'५।४।१५३॥ इति कप्। "नद्यम्बुजीवनो देशो नदीमातृक उच्यते" [हलायुधकोशः२।१६१॥]इति हलायुधः । एकं नदीजलनिष्पन्नधान्यसंवर्धितदेशस्य ॥

**देवमातृको वृष्टिजीवनः ॥९५५॥**

१ देवो मेघो माताऽस्येति **देवमातृकः** । 'नद्यृतश्च'५।४।१५३॥ इति कप् । "देवो मेघे सुरे राज्ञि" [मेदिनीकोशः, वान्तवर्गः, श्लो-१२]इति मेदिनिः । वृष्टिर्वर्षणं जीवनं वृत्तिरत्र वृष्टिजीवनः । अनूपाद्या देवमातृकान्ता वाच्यलिङ्गास्तद्युक्तस्थानपर्यायाश्च ज्ञेयाः । एकं वृष्ट्यम्बुजीवनसम्पन्नस्य पालितदेशस्य ॥९५५॥

**प्राग्ज्योतिषाः कामरूपाः**

१ सार्द्धपञ्चभिः प्राग्ज्योतिषमत्र **प्राग्ज्योतिषाः** । २ कामतो रूपमत्र **कामरूपाः** । "प्राग्ज्योतिषे[10] कामरूपम्"[11]इति क्षीरस्वामी । द्वे कामरूपदेशस्य ॥

**मालवाः स्युरवन्तयः ।**

१ मलन्ते धारयन्ति बहुजनानिति **मालवाः**। 'मल मल्ल धारणे'(भ्वा.आ.से.), 'मलेर्णित्'( )इति [12]णिदवप्रत्ययः । २ अव्यन्ते रक्ष्यन्ते **अवन्तयः**, पुंसि । 'अव रक्षणादौ'(भ्वा.प.से.), बाहुलकादन्तिः[13] । द्वे मालवदेशस्य ॥

**त्रैपुरास्तु डाहलाः स्युश्चैद्यास्ते चेदयश्च ते ॥९५६॥**

१ त्रिपुर्या नगर्या अदूर[14]भवाः **त्रैपुराः** । 'अदूर[14]भवश्च'४।२।७०॥ इत्यण् । २ दह्यन्ते **डाहलाः**, पृषोदरादिः । ईश्वरेण [हि] ते त्रिपुरदहनेन दग्धाः। ३ चेदय एव **चैद्याः** । स्वार्थे ष्यञ् । छेद्यन्ते **चेदयः** । 'छेदत्क छेदने'( ), पृषोदरादित्वात्[15], इकारान्तो हरिवत् । चत्वारि त्रिवेदीदेशस्य । 'डाहला' इति भाषा ॥९५६॥

---

१. 'कुमुच्छब्दाद्' इति२.३.४.५॥ २. '-विकासि-' इति २.३॥ ३. तुलनीयोऽमरकोषः २।१।१०॥ ४. द्र. पदचन्द्रिका, भाग-२, भूमिवर्गः, श्लो-९, पृ.१३॥ ५. इतोऽग्रे ३प्रतौ 'इति' इति दृश्यते ॥ ६. द्र. पदचन्द्रिका, भाग-२, भूमिवर्गः, श्लो-९, पृ.१३, तत्र-"शादैर्हरिते देशे 'शाद्वलः' । नड्वलवड्ड्वलच् (पा०४।२।८८॥, ६।४।१४३॥) । "स च शष्प-वाचिन एव, नान्यतः । अभिधानाद्" इति सर्वानन्दः" इति दृश्यते ॥ ७. द्र. अम.क्षीर. २।१।११॥, पृ.७२॥, स्वोपज्ञटीका ४।९५५॥, पृ.२११॥ ८. '-युक्तस्य' इति४॥ ९. '-विनः' इति१॥ १०. '-षां' इति५॥ ११. मूलं मृग्यम् ॥ १२. 'णिदवत्प्र-' इति१॥ १३. '-दतिः' इति४॥ १४. 'अदूरे' इति३.४.५॥ १५. '-दरात्' इति१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वङ्गास्तु हरिकेलीयाः**

१ वङ्गन्ति **वङ्गाः** । 'वगि गतौ'(भ्वा.प.से.), अच् । वङ्ग्यन्त इति वा, घञ् । हलिकेलौ भवा हरिकेलीयाः, छप्रत्ययः । एकं हरिकेलीयदेशस्य ॥

**अङ्गाश्चम्पोपलक्षिताः ।**

१ अङ्गन्ति **अङ्गाः** । 'अगि गतौ'(भ्वा.प.से.), अच् । चम्पया उपलक्षिताश्चम्पोपलक्षिताः । एकमङ्गदेशस्य ॥

**साल्वास्तु कारकुक्षीयाः**

१ सलन्ति **साल्वाः**, दन्त्यद्वितीयस्वरादिः[१] । 'सल(षल) गतौ'(भ्वा.प.से.), 'सलेर्णिद्वा'(उणा-५१०)इति वः । णित्त्वाभावपक्षे[२] सल्वा इत्याद्यस्वरादिरपि । २ करकुक्षेरिमे **कारकुक्षीयाः** । 'वृद्धाच्छः'४।२।११४॥ । द्वे[३] कारकुक्षीयदेशस्य ॥

**मरवस्तु दशेरकाः ॥९५७॥**

१ म्रियते तृषा[४] एष्विति **मरवः**, पुंसि । 'मृङ् प्राणत्यागे'(तु.आ.अ.), 'भृमृशीतृचरित्सरि[त]नि[धनि]मिमस्जिभ्यः उः'(उणा-७)इत्युः । २ दशन्ते(दशन्ति) दशेराः, 'दंश दशने'(भ्वा.प.अ.), 'पतिकठि-'(उणा-५८)इत्येरक्, स्वार्थे कनि **दशेरकाः** । द्वे मरुदेशस्य ॥९५७॥

**जालन्धरस्त्रिगर्ताः स्युः**

१ जालं धारयन्ति[५] **जालन्धराः** । 'धृञ् धारणे'(भ्वा.उ.अ.), 'धारेर्ध च (-धर्च)'(हैमसू-५।१।११३॥) इति खः । २ तिस्रो गर्ता अत्र **त्रिगर्ताः** । द्वे जालन्धरदेशस्य ॥

**तायिकास्तर्जिकाभिधाः ।**

१ तायन्ते **तायिकाः** । २ तर्जयन्ति **तर्जिकाः** । 'तायृ सन्तानपालनयोः'(भ्वा.आ.से.), 'तर्ज भर्त्सने'(चु.-आ.से.), उभयत्र[६] बाहुलकादिकन् । द्वे तायिकदेशस्य ॥

**कश्मीरास्तु[७] माधुमताः सारस्वता विकर्णिकाः ॥९५८॥**

१ कशन्ति **कश्मीराः**[७], आदिस्वरादिः । 'कश शब्दे'( ), तालव्यान्तः, 'कशेर्मुर्क्[८](मुट्) च'(उणा-४७२)इतीरन् । २ मधुमत्या निर्वृत्ता[९] **माधुमताः** । 'तेन निर्वृत्तम्'४।२।६८॥ इति चातुरर्थिकोऽण् । ३ सरस्वती देवता एषां **सारस्वताः** । 'साऽस्य देवता'४।२।२४॥ इत्यण् । ४ विशिष्टाः कर्णिका अत्र **विकर्णिकाः** । चत्वारि कश्मीरदेशस्य[१०] ॥९५८॥

**वाहीकाष्टक्कनामानः**

१ वहन्ति **वाहीकाः** । 'वह प्रापणे'(भ्वा.उ.अ.), 'वहेर्वृद्धिश्च'( )इतीकन् । २ तङ्कन्ति **टक्काः** । 'तकि दौःस्थ्ये[११]'(भ्वा.प.से.), 'निष्कतुरुष्क-'(हैमोणा-६०७)इति कप्रत्यये साधुः[१२] । द्वे 'टाकदेश' इति ख्यातस्य ॥

**वाल्हीका वाल्हिकाह्वयाः ।**

१ वल्हते **वाल्हीकाः**, अन्तस्थातृतीयोष्मचतुर्थतुर्यस्वरमध्यः । 'सृणीकास्तीक-'(हैमोणा-५०)इति ईकप्रत्यये निपात्यते । २ वल्हते वल्हिः । 'इन् सर्वधातुभ्यः'(उणा-५५७)इतीन्, बाहुलकाद् दीर्घत्वे वाल्हयः, स्वार्थे कनि **वाल्हिकाः** । द्वे वालहीकदेशस्य ॥

**तुरुष्कास्तु शाखयः स्युः**

१ तूर्यन्ते **तुरुष्काः**, द्विपञ्चमस्वरो मूर्धन्यकवर्गाद्यान्तश्च[१३] । 'तूरी त्वराहिंसनयोः[१४]'(दि.आ.से.), 'निष्कतुरुष्क-'(हैमोणा-२६)इति के निपात्यते[१५] । २ शाखन्ति **शाखयः** । 'शाखृ श्लाखृ[१६] व्याप्तौ'(भ्वा.प.से.), भ्वादौ तालव्यादी, पृषोदरादित्वाद् दन्त्यादित्वं साधुत्वं च । द्वे तुरुष्कदेशस्य । 'साखिदेश' इति भाषा ॥

**कारूषास्तु वृहद्गृहाः ॥९५९॥**

१ कुर्वन्ते[१७] **कारूषाः** । ऊषनि[१८] साधुः । २ वृहन्ति गृहाणि एषु **वृहद्गृहाः** । द्वे कारूषदेशस्य ॥९५९॥

**लम्पाकास्तु मुरण्डाः स्युः**

---

१. '-दन्त्यस्वरादिः' इति३, 'द्वितीयदन्त्यस्वरादिः' इति४॥ २. 'णित्त्वाभावे' इति४॥ ३. 'एकं' इति१.२.३॥ ४. 'तृषया' इति३.५॥ ५. '-यति' इति३॥ ६. ४प्रतौ नास्ति ॥ ७. 'का-' इति१॥ ८. '-ञ्' इति५॥ ९. '-त्या' इति४॥ १०. 'का-' इति१.५॥ ११. क्षीरतरङ्गिण्यादौ कृच्छ्रजीवनार्थकतकिधातुर्दृश्यते ॥ १२. 'निपात्यते' इति१॥ १३. '-द्यन्तश्च' इति१.४॥ १४. 'गतित्वरणहिंसनयोः' इति स्वामिसायणौ, 'त्वरणहिंसयोः' इति मैत्रेयः ॥ १५. 'साधुः' इति४॥ १६. 'श्लाघृ' इति१.३॥ १७. 'कुर्वते' इति१.२॥ १८. 'उ-' इति१.३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ लम्पन्ति **लम्पाकाः** । 'बलाकादयश्च'(उणा-४५४)इत्याकनि साधुः । २ मोदन्ते[१] **मुरण्डाः** । 'पिचण्ड-'[२] (हैमोणा-१७६)इत्यण्डनि साधुः । द्वे लम्पाकदेशस्य ॥

**सौवीरास्तु कुमालकाः ।**

१ सुवीराणामिमे **सौवीराः** । 'तस्येदम्'४।३।१२०॥ इत्यण् । २ कुं पृथ्वीं मलन्ते[३] कुमालाः । 'मल मल्ल धारणे'(भ्वा.आ.से.), 'कर्मण्यण्'३।२।१॥, स्वार्थे कनि[४] **कुमालकाः** । द्वे सुवीरदेशस्य ॥

**प्रत्यग्रथास्त्वहिच्छत्राः**

१ प्रत्यग् रथा अत्र सन्तीति **प्रत्यग्रथाः**। अर्शआदित्वादच् । २ अहिच्छत्रमस्त्येष्विति **अहिच्छत्राः**। 'अर्शआदिभ्योऽच्'५।२।१२७॥ । द्वे अहिच्छत्रदेशस्य ॥

**कीकटा मगधाह्वयाः ॥९६०॥**

१ ककन्ते[५] **कीकटाः** । 'ककि गतौ'(भ्वा.-आ.से.), 'कपटकीकटा-'(हैमोणा-१४४)इत्यादिनाऽटे[६] निपात्यते । २ मङ्गन्ति शोभां **मगधाः** । 'मगि गतौ' (भ्वा.प.से.), 'मङ्गेर्नलुक्[७] च-'(हैमोणा-२५३)इत्यधः । द्वे मगधदेशस्य ॥९६०॥

**ओण्ड्राः केरलपर्यायाः**

१ ओणन्ति **ओण्ड्राः** । 'ओणृ अपनयने'(भ्वा.प.से.), रनि प्रत्यये पृषोदरादित्वात् साधुः । त्रयोदशस्वरादिः, टवर्गतृतीयरेफान्तश्च । २ किरन्ति **केरलाः**। 'कृ विक्षेपे'(तु.प.से), 'मुरलोरल-'(हैमोणा-४७४)इत्यले निपात्यते । केरलाः पर्यायो नामान्तरं येषां ते केरलपर्यायाः । द्वे उडीयादेशस्य ॥

**कुन्तला उपहालकाः ।**

१ कुणन्ति **कुन्तलाः** । 'कुण शब्दोपकरणयोः' (तु.प.से.), 'मुरल-'(हैमोणा-४७४)इत्यले निपात्यते । २ उप समीपे हालो येषामुपहालाः, त एव **उपहालकाः** । द्वे कुन्तलदेशस्य ।

अत्र प्राग्ज्योतिष१मालव२चेदि३वङ्गाऽ४ङ्ग५मगधाः६ प्राच्याः, मरवः साल्वाश्च[८] प्रतीच्याः, जालन्धर१तायिक२-[९]कश्मीर३वाहीक४वाल्हीक[१०]५तुरुष्क६कारूष७लम्पाक८-सौवीर९प्रत्यग्रथा१० उदीच्याः, औण्ड्राः कुन्तलाश्चाऽपाच्या इति। एते[११] प्राग्ज्योतिषादयः सर्वेऽपि पुंसि बहुवचनान्ताश्च॥

**ग्रामस्तु वसथः सं-नि-प्रति-पर्युपतः परः[१२] ॥९६१॥**

१ ग्रसति बुद्ध्यादिगुणान्, ग्रस्यते भोगिभिर्वा **ग्रामः** । 'ग्रस(ग्रसु) अदने'(भ्वा.आ.से.), 'ग्रसतेरा च' (उणा-१४०)इति मन्, अन्तस्य चाऽऽत्वम् । ग्रामयन्ति निवसन्त्यत्र, 'ग्राम कूटनिकेतने'(चु.उ.से.), चौरादिकः, ततः 'पुंसि संज्ञायाम्'३।३।११८॥इति घः । गम्यते जनैरत्रेति, घञि, पृषोदरादित्वाद् रेफे वा ग्रामः । विप्रादिवर्णभेदप्राकारपरिखादिरहितो बहुजनवसतिर्ग्राम इति नगराद्भेदोऽस्य । "करादिगम्यो ग्रामः"[ ]इत्येके । २ संवसन्ति जना अत्रेति **संवसथः** । 'वस निवासे'(भ्वा.प.अ.), 'उपसर्गे वसोऽथः[१३]'(उणा-३९६)इति सूत्रेण वसोऽथः । ३-६ एवं **निवसथः, प्रतिवसथः, परिवसथः, उपवसथः** । षड् ग्रामस्य ॥९६१॥

**पाटकस्तु तदर्धे स्यात्**

१ तस्य ग्रामस्याऽर्धे, पाटयति **पाटकः** । 'पट दीप्तौ च[१४]'( )इति, चाद् भ्रंशार्थः, णिजन्तः, ण्वुल् । एकं 'पाडा' इति ख्यातस्य ॥

**आघाटस्तु घटोऽवधिः ।**
**अन्तोऽवसानं सीमा च मर्यादाऽपि च सीमनि ॥९६२॥**

१ आघट्यते[१५] जनैरत्र **आघाटः** । 'घट चेष्टायाम्'(भ्वा.आ.से.), अधिकरणे घञ् । २ तिष्ठत्यत्र **घटः** । 'ष्ठा गतिनिवृत्तौ'(भ्वा.प.अ.), पृषोदरादित्वात् । ३ अवधीयते **अवधिः** । 'डुधाञ् धारणादौ'(जु.उ.अ.), 'उपसर्गे घोः किः'३।३।९२॥ । ४ अमत्यनेन **अन्तः** ।

---

१. 'मोदते' इति४॥ २. 'पिचि-' इति१.२.५॥ ३. 'मलते' इति४॥ ४. 'कन्' इति४॥ ५. 'कङ्कते' इति४॥ ६. '-टि' इति४॥ ७. '-मलुक्' इति३॥ ८. 'प्रा-' इति४॥ ९. 'का-' इति१॥ १०. 'वाल्हीकवाहीक-' इति४.५॥ ११. 'एतेऽपि' इति१॥ १२. 'परम्' इति१॥ १३. 'उपसर्गे वसेः' इत्युणादिगणसूत्रस्वरूपम्, 'उपसर्गाद् वसः'(हैमोणा-२३३)इति हैमोणादिगणसूत्रम् ॥ १४. क्षीरतरङ्गिण्यादौ चुरादौ पटपुटइत्यादिदण्डकोऽयं धातुर्भाषार्थकः, 'भासार्थाः' इत्येके, ये भासार्थाः ते दीप्त्यर्थाः ॥ १५. 'आघा-' इति१.३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'अम्(अम) गतौ'(भ्वा.प.से.), 'हसिमृग्रिण्-'(उणा-३६६) इत्यादिना तन् । ५ अवसीयतेऽनेनं[1] **अवसानम्** । 'षोऽन्तकर्मणि'(दि.प.अ.), करणे ल्युट्, 'आदेचः-'६।१।४५॥ इत्यात्वम् । ६ सीयते बध्यते **सीमा** । 'षिञ्[2] बन्धने'(स्वा.उ.अ.), 'सीमन्नामन्(नामन्सीमन्)-'(उणा-५९०) इत्यादिना साधुः, 'डाबुभ्याम्-'४।१।१३॥इति डाप्[3]। सीमे, सीमाः इत्यादि गङ्गावत् ।

''स सस्यायां च सीमायां मनोहर्यां[4] मुनेरपि ।
पृथिव्यां पृथुराष्ट्रायां रम्यायां वर्षसंक्षये ॥१॥''[ ]इति

हरिवंशः । ७ विवादिनां[5] मरिं[6] मरणमासमन्ताद् द्यति[7] खण्डयति **मर्यादा** । 'दोऽवखण्डने'(दि.प.अ.), 'आतः-'३।२।३॥ इति कः । ८ स्यति विवादमिति [**सीमा**], सीमन् स्त्रीलिङ्गः। सीमानौ सीमानः इत्यादि। अष्टौ सीमायाः ॥९६२॥

## ग्रामसीमा तूपशल्यम्

१ ग्रामस्य सीमा ग्रामसीमा ग्रामान्तः । अन्ते चिह्नार्थं शल्यप्रक्षेपादुपगतं[8] शल्यं चिह्नरूपकीलकमत्र **उपशल्यम्** । उपशले समीपे[9] भ्रमणे साध्विति । 'तत्र साधुः' ४।४।९८॥ इति यत् । अत्र ग्राममुपलक्षणम् । तथा च माघः-''शल्यो(शैलो)पशल्यनिपतद्रथनेमिधारा-''[शिशुपालवधम्, सर्गः-५, श्लो-८]इति । अत एव ''उपकण्ठोपशल्ये[10] द्वे''[त्रिकाण्डशेषः२।२।७॥]इति त्रिकाण्डशेषः । उपशल्यते आशु गम्यतेऽत्रेति[11] वा । 'शल गतौ'(भ्वा.प.से.), 'स्थाच्छामा-'(हैमोणा-३५७)इति यः । एकं ग्रामसीमायाः ॥

## मालं[1] ग्रामान्तराऽटवी ।

१ मल्यते भयमत्रेति **मालम्** । 'मल धारणे'(भ्वा.आ.से.), घञन्तः। कनि मालकोऽपि । पुंक्लीबलिङ्गोऽयम् । ग्रामस्यान्तरालेऽटवी ग्रामान्तराऽटवी । ''सद्यः सीरोत्कषणं[12]सुरभि क्षेत्रमारुह्यमालम्''[मेघदूतम्, श्लो-१६]इति मेघदूतः । एकं ग्रामान्तरालाटव्याः ॥

## पर्यन्तभूः परिसरः[1] स्यात्

१ ग्रामस्य पर्यन्तेषु भूः पर्यन्तभूः । परितः सरन्ति सञ्चरन्त्यत्र **परिसरः** । 'सृ गतौ'(भ्वा.प.अ.), 'पुंसि संज्ञायाम्-'३।३।११८॥ इति घः । एकं ग्रामपर्यन्तभुवः । 'गोइरु' इति भाषा ॥

## कर्मान्तस्तु कर्मभूः[1] ॥९६३॥

१ कर्मणामन्तो[13] निष्पत्तिरत्र कर्मान्तः । कर्मार्थं भूः **कर्मभूः** । एकं कार्यार्थभूमेः ॥९६३॥

## गोस्थानं[1] गोष्ठम्[2]

१ गवां स्थानं **गोस्थानम्** । गावस्तिष्ठन्त्यत्र **गोष्ठम्,** क्लीबे । शाब्दिकास्तु-''गोष्ठो भूतपूर्वः''[ ] इति पुंस्यपि प्रयुञ्जते । गोपूर्वात् 'ष्ठा गतिनिवृत्तौ'(भ्वा.प.अ.) अस्माद्धातोः 'घञर्थे कः'(वा-३।३।५८)इत्यधिकरणे कः, 'अम्बाम्बगोभूमिसव्यापद्वित्रिकुश-'८।३।९७॥ इत्यादिना षत्वम् । द्वे गवां स्थानस्य ।

गोनामाधिकारं विहायैतयोरत्र कथनं सामान्येन शयनासनयोः स्थानकमात्रपर्यायत्वाद् गोस्थाननाम्नोः । व्रजं गोकुलमेतावपि । ''व्रजं स्याद् गोकुलं गोष्ठम्''[हलायुधकोशः२।२६२॥]इति हलायुधः । ''नी[14](नि)रुद्धवीवधासारप्रसारां[15] गा इव व्रजम्''[शिशुपालवधम्, सर्गः-२, श्लो-६४]इति माघः । ''सार्गलो[16] द्वारगोवाटं मध्ये गोस्थानसङ्कुलम्''[ ]इति, ''गोष्ठेमेषु गोभ्यो वत्सेभ्यो रक्षौ तद्द्वाविमौ शिशू''[ ]इत्युभयं हरिवंशः ॥

## एतत्तु गौष्ठीनं[17] भूतपूर्वकम् ।

१ एतत्तु गोष्ठं भूतपूर्वं **गौष्ठीनम्**[17] इत्यन्वयः । यत्र गावः प्राग् आसन् तन्नाम्नैकं गौष्ठीनमिति । 'गोष्ठात् खञ्[18] भूतपूर्वे'५।२।१८॥ इति खञ्, खस्येनादेशः, 'तद्धितेष्वचामादेः'७।२।११७॥ ॥

## तदाशितङ्गवीनं[1] स्याद् गावो यत्राऽऽशिताः पुरा ॥९६४॥

१ यत्र पुरा पूर्वं गावः आशिताः तृप्ताः, तत्-

१. '-ऽनेन' इति४.५प्रत्योर्नास्ति ॥ २. 'षिङ्' इति२.५, 'षीञ्' इति३॥ ३. 'टाप्' इति५॥ ४. '-हरा' इति१, '-हर्या' इति३.४.५॥ ५. 'ना' इति३॥ ६. 'मरि' इति१.३॥ ७. 'मा-' इति३॥ ८. '-पादिगतं' इति१॥ ९. '-पे' इति५॥ १०. 'उवशल्योपकण्ठे' इति त्रिकाण्डशेषः२।२।७॥, पृ.२८१॥ ११. 'इति' इति३.४प्रत्योर्नास्ति ॥ १२. '-त्करण-' इति१, '-त्कर्षण-' इति२.४॥ १३. 'कर्मा-' इति५॥ १४. 'नीरुधो' इति३.४॥ १५. '-रां' इति३॥ १६. 'सार्गल-' इति१.२॥ १७ 'गो-' इति१.४॥ १८. 'खन्' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्थानम् **आशितङ्गवीनम्** उच्यते । आशितास्तृप्ता गावोऽस्मिन्निति आशितङ्गवीनम् । 'अषडक्षाशितङ्गु-'५।४।७॥ इति स्वार्थे खः, खित्त्वान्मुम् ॥९६४॥

**क्षेत्रे तु वप्रः केदारः**

१ क्षियन्त्यत्र धान्यानि, क्षीयते हलैर्हिंस्यते वा **क्षेत्रम्** । 'क्षि निवासगत्योः'(तु.प.अ.), 'क्षि हिंसायाम्'(स्वा.प.अ.) वा, 'हुयामा-'(उणा-६०७)इति बाहुलकात् त्रः। क्षीयते शुष्यते धान्यैरत्रेति वा । '-ष्ट्रन्'(उणा-५९८) इति ष्ट्रन् । क्लीबेऽयम् । यद्विश्वः-"क्षेत्रं शरीरे केदारे सिद्धस्थानकलत्रयोः"[ विश्वप्रकाशकोशः, रान्तवर्गः, श्लो-४४] इति, तत्र । २ उप्यन्ते[1] बीजान्यत्र **वप्रः**, पुंनपुंसकः[2]। "पुंनपुंसकयोर्वप्रः"[ अमरकोषः२।९।११॥]इत्यमरः । 'डुवप् बीजतन्तुसन्ताने[3]'(भ्वा.उ.अ.), 'वृधिवपिभ्यां रन्'(उणा-१८५)। ३ के जले सति दारणमस्य, के शिरसि दारणाद् वा **केदारः** । 'हलदन्तात्-'६।३।९॥ इति सप्तम्यलुक् । कद्यते वा केदारः । कदिः सौत्रः, बाहुलकादरनि साधुः, पुंक्ली.। ([4]त्रीणि वप्रस्य । 'क्यारा' इति भाषा) ॥

**सेतौ पाल्याऽऽलिसंवराः ।**

१ सीयते बध्यते **सेतुः**, पुंसि । 'षिञ् बन्धने'(स्वा.उ.अ.), 'सितनिगमिमसिसच्यविधाञ्कुशिभ्यस्तुन्'(उणा-६७) । सिन्वन्ति बध्नन्त्येनं वा, तत्र । २ पलति **पालिः** । 'पल संवरणे[5]'( ), 'कृशृ[6]कुटि-'(हैमोणा-६१९)इति णिदिः । ३ आर्यतेऽनया **आलिः** । 'ऋ गतौ'(जु.प.अ.), आङ्पूर्वः, 'अच इः'(उणा-५७८), कपिरिकादित्वाल्लत्वम् । 'कृदिकारात्-'(गणसू-४।१।४५॥) इति ङीषि[7] आली च । "'इञ(ण)जादिभ्यः'(वा-३।३।१०८॥ )इतीञ्(इतीण्)"[[8] ]इति स्वामी[9] । "आलीयन्ते[10]ऽम्भोत्र"[ ]इति तु भट्टः। ४ संवृणोति जलं **संवरः** । संवृ[11]ञः पचाद्यच् । चत्वारि पाले[12]: ॥

**क्षेत्रं तु शाकस्य शाकशाकटं शाकशाकिनम्**
**॥९६५॥**

१ शाकस्य क्षेत्रं **शाकशाकटम्** । २ एवं शाकस्य क्षेत्रं **शाकशाकिनम्** । भवने क्षेत्रे शाकटशाकिनौ । द्वे शाकक्षेत्रस्य ॥९६५॥

**व्रैहेयं शालेयं षष्टिक्यं कौद्रवीण-मौद्गीने । व्रीह्यादीनां क्षेत्रे**

१ व्रीहीणां क्षेत्रं **व्रैहेयम्** । एवं शालीनां क्षेत्रं **शालेयम्** । 'व्रीहिशाल्योर्ढक्'५।२।२॥ इति ढक्, 'आयनेयीनीयियः फढखछघाम्-'७।१।२॥इति ढस्यैयादेशः, 'किति च'७।२।११८॥ इत्यादिवृद्धिः, 'यस्येति च'६।४।१४८॥ । व्रीहिक्षेत्रनामैकं व्रैहेयम् । शालिक्षेत्रनामैकं शालेयम्[13] । १ षष्टिकानां क्षेत्रं **षष्टिक्यम्** । 'यवयवकषष्टिकाद् यत्' ५।२।३॥, प्रथमस्वरादिरयम् । एकं साठीचोखाक्षेत्रस्य । १-१ [14]कोद्रवाणां क्षेत्रं **कौद्रवीणम्** । मुद्गानां क्षेत्रं **मौद्गीनम्** । उभयत्र 'धान्यानां भवने क्षेत्रे खञ्'५।२।१॥, खस्येनादेशः, 'तद्धितेष्वचामादेः'७।२।११७॥ ॥

**अणव्यं तु स्यादाणवीनमणोः ॥९६६॥**

१-२ 'अण रण व[15]ण भण म[16]ण कण शब्दार्थाः[17]'(भ्वा.प.से.), 'अणश्च'(उणा-८), 'धान्ये नित्'(उणा-९) इत्युप्रत्ययः । अणोः क्षेत्रम् **अणव्यम्**, आणवीयम्[18] । 'विभाषा तिलमाषोमाभङ्गाणुभ्यः'५।२।४॥इति यत्, 'ओर्गुणः'६।४।१४६॥ । **आणवीन**मित्यत्र 'धान्यानां भवने-' ५।२।१॥इति खञ्, खस्येनादेशः, 'तद्धितेष्वचामादेः'७।२।११७॥इति वृद्धिः, 'ओर्गुणः'६।४।१४६॥ । द्वे रालकादिधान्यविशेषक्षेत्रस्य । "अणोरिति रालकादिधान्यक्षेत्रे, अणुः रालकादिधान्यविशेषः"[ ]इति तद्धितढूण्ढी । "सूक्ष्मे [19]व्रीह्यन्तरेऽप्यणुः"[ विश्वलोचनकोशः, णान्तवर्गः, श्लो-१] इति श्रीधरः ॥९६६॥

**भङ्ग्यं भाङ्गीनमौमीनमुम्यं यव्यं यवक्यवत् । तिल्यं तैलीनं माषीणं माष्यं भङ्गादिसम्भवम्**
**॥९६७॥**

१. 'उप्यते' इति१॥ २. '-कम्' इति१॥ ३. 'बीजसन्ताने' इति१, काशकृत्स्नमतेऽयं धातुपाठः, 'डुवप् बीजसन्ताने' इति क्षीरतरङ्गिण्यादयः ॥ ४. कोष्ठान्तर्गतपाठः १.२.४.५प्रतिषु न दृश्यते ॥ ५. क्षीरतरङ्गिण्यादौ संवरणार्थकपलधातुर्न दृश्यते ॥ ६. '-सृ-' इति३.४.५॥ ७. 'ङीष्' इति४॥ ८. अम.क्षीरस्वामिकृतटीकायां न दृश्यते॥ ९. द्र. पदचन्द्रिका, भा-२, भूमिवर्गः, श्लो-१४, पृ.१७॥ १०. '-यतो-' इति५॥ ११. '-ञ्' इति१.५॥ १२. 'पाल्या' इति३॥ १३. इतोऽग्रे ३प्रतौ 'इति' इति दृश्यते ॥ १४. 'कौ-' इति१.४.५॥ १५. ३.४.५प्रतिषु नास्ति ॥ १६. 'मण भण' इति३॥ १७. 'अण रण वण भण ('भण' इति क्षीरस्वामी न पठति) मण कण क्वण व्रण भ्रण ध्वण ('ध्वण' इति मैत्रेयो न पठति) शब्दार्थाः' इति क्षीरतरङ्गिण्यादयः ॥ १८. 'आणवीनम्' इति३॥ १९. 'व्रीह्या-' इति४.५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१-२ भङ्गानां क्षेत्रं **भङ्ग्यम्** । 'विभाषा तिलमाषोमा-'५।२।४॥ इति यत्, पक्षे भङ्गानां क्षेत्रं **भाङ्गीनम्**। 'धान्यनां भवने क्षेत्रे खञ्'५।२।१॥, 'आयनेयी-'७।१।२॥ इति खस्येनादेशः । द्वे [1]सणक्षेत्रस्य ॥

१-२ उमानां क्षेत्रम् **औमीनम्, उम्यम्** । प्राग्वत् खञ्यतौ । द्वे अलसीक्षेत्रस्य ॥

१-२ यवानां क्षेत्रं **यव्यम्**। यवकानां क्षेत्रं **यवक्यम्**। 'यवयवकषष्टिकाद् यत्'५।२।३॥ । द्वे यवक्षेत्रस्य॥

१-२ [2]तेलन्ति **तिलाः** । 'तिल गतौ'(भ्वा.-प.से.), 'तिल स्नेहने'(तु.प.से.), तौदादिकाद्[3] वाऽच् । तिलानां क्षेत्रं **तिल्यम्, तैलीनम्** । 'विभाषा तिलमाषोमा-'५।२।४॥ इति यत्, 'धान्यानां भवने-'५।२।१॥ इति खञ् । द्वे तिलक्षेत्रस्य ॥

१-२ माषाणां क्षेत्रं **माषीणम्, माष्यम्** । प्राग्वत् खञ्यतौ । द्वे माषक्षेत्रस्य । [4]भङ्गा शणधान्यमादिर्येषां तानि भङ्गादीनि, तेषां संभव उत्पत्तिरत्रेति भङ्गादिसंभवम् । ''भङ्गा शणाख्यसस्ये स्यात्''[विश्वलोचनकोशः, गान्तवर्गः, श्लो-१५]इति श्रीधरः। उमाभङ्गेऽपि धान्य एवेष्यते। यद्यपि धान्यत्वमेतयोर्न प्रसिद्धम्, तथापि '[5]सेणसत्तरसंधन्नम्[6]' इति वाक्याद् धान्यत्वं प्रसिद्धमेतयोरिति ॥९६७॥

## सीत्यं हल्यम्

१ सीतया[8] सङ्गतं **सीत्यम्** । 'नौवयोधर्म-'४।४।-९१॥ इति यत्। २ हलेन कृष्टं **हल्यम्** । 'मतजनहलात् करणजल्पकर्षेषु'४।४।९७॥इति यत् । ''हलस्य कर्षः हल्यम्[9], कर्षः कर्षणं कृष्यमाणं वा । 'मतजनहलात्[10]-'४।४।९७॥इत्यादिना यत्''[माधवीयधातुवृत्तिः, भ्वादिः, धातुसं-५६४]इति माधवः[11] । द्वे हलोत्खेटितक्षेत्रस्य ॥

## त्रिहल्यं तु त्रिसीत्यं त्रिगुणाकृतम् ।

## तृतीयाकृतम्

१ त्रयाणां हलानां कर्षः **त्रिहल्यम्** । 'रथसीताहलेभ्यो यद्विधौ तदन्तविधिः'(वा-१।१।७२॥)इति 'मतजनहलात्-'४।४।९७॥इत्यादिना यत् । २ एवं तिसृभिः सीताभिः सङ्गतं **त्रिसीत्यम्,** प्राग्वद् यत् । ३ त्रिगुणं[12] कृष्टं क्षेत्रं **त्रिगुणाकृतम्** । 'सङ्ख्यायाश्च गुणान्तायाः' ५।४।५९॥ इति डाच् । ४ तृतीयवारं क्रियते स्म **तृतीयाकृतम्** । 'कृञो द्वितीयतृतीयशम्बबीजात् कृषौ'५।४।५८॥ इति डाच्। चत्वारि वारत्रयहलखेटितक्षेत्रस्य ॥

## द्विहल्याद्येवं शम्बाकृतं च तत् ॥९६८॥

१ एवम् अमुना प्रकारेण द्विहल्यम्, आदिशब्दाद् द्विसीत्यम्[13], द्विगुणाकृतमित्यादेर्नामैकं **शम्बाकृतम्** इति । शम्बा क्रियते स्म शम्बाकृतम् । 'कृञो द्वितीयतृतीयशम्बबीजात् कृषौ'५।४।५८॥ इति डाच् । शम्बाकृतमनुलोमकृष्टं पुनस्तिर्यक् कृष्यते[14] स्मेत्यर्थः । '' 'शमेर्बन्'(उणा-५३४), शम्बाशब्दोऽनुलोमकृष्टस्य[15] प्रतिलोमकर्षणे वर्तते''[[16]]इति शाब्दिकाः। शम्बा तालव्यादिः । दन्त्यादिरपीति केचित्, ''सरित्सैरिभसम्बाकृतम्[17]-''[[16]] इति[18] दन्त्यादित्वात्। 'समारदीधुं' इति भाषा ॥९६८॥

## बीजाकृतं तूप्तकृष्टम्[19]

१ अबीजं सत् सबीजं सम्पन्नं तथाकृतं **बीजाकृतम्** । 'कृञो[20] द्वितीयतृतीय-'५।४।५८॥ इति डाच् । २ आदावुप्तं पश्चाद् बीजैः सह कृष्टम् **उप्तकृष्टम्** । 'पूर्वकालैकसर्वजरत्पुराण-'२।१।४९॥इति समासः । द्वे [21]बीजोप्तक्षेत्रस्य ॥

## द्रौणिकाऽऽढकिकादयः ।

## स्युर्द्रौणाढकवापादौ

१ [22]द्रोणस्य वापो **द्रौणिकः** । 'तस्य वापः'

---

१. 'श-' इति३॥ २. 'ति-' इति१.३॥ ३. '-कादिना' इति३॥ ४ 'भङ्गाणां' इति१॥ ५. 'मणउत्त-' इति४॥ ६. '-सा-' इति५॥ ७. '-संधान्नम्' इति३॥ ८ 'सीतायाः' इति४.५॥ ९. इतोऽग्रे ४.५प्रत्योः 'कर्ष' इति दृश्यते ॥ १०. 'मतजन-' इति१.२.४.५॥ ११. माधवीयधातुवृत्तौ- ''हलस्य कर्षः हल्यः -कर्षः कर्षणं कृष्यमाणं वा । 'मतजनहलात् करणजल्पकर्षेषु' इति षष्ठ्यन्तात् कर्षेऽर्थे यत्'' इति दृश्यते, मा.धातुवृत्तिः, पृ.२०७॥ १२. '-ण-' इति३॥ १३. '-शी-' इति१॥ १४. '-न्ते' इति४.५॥ १५. इतोऽग्रे ४.५प्रत्योः 'प्रतिलोमकृष्टस्य' इति दृश्यते ॥ १६. द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-५८२, पृ.६६२॥ १७ '-म्ब-' इति४॥ १८. द्र. रामाश्रमी २।९।९॥, पृ.४०१॥ १९. तुलनीयोऽमरकोषः २।९।८॥ २०. 'कृञोटि' इति३॥ २१. 'सबी-' इति१॥ २२. 'द्रौ-' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

५।१।४५॥ इति ठक्, 'ठस्येकः'७।३।५०॥, 'किति च' ७।२।११८॥ । द्रोणशब्देन लोके 'सेई' इति ख्यातिः[१], द्रोणप्रमाणधान्यवपनं यत्र क्षेत्रे, तस्यैकम् । **१** आढकस्य वापः **आढकिकः** । 'तस्य वापः'५।१।४५॥ इति ठक्, 'ठस्येकः'७।३।५०॥ । आढकप्रमाणधान्यवपनं यत्र क्षेत्रे, तत्रामैकम् । आढकशब्देन 'माणउं' इति प्रसिद्धिः । आदिशब्दात् खारी, लोके 'कलसिका' इति प्रसिद्धिः, तत्प्रमाणधान्यवपनं यत्र क्षेत्रे, ([२]स खारिकः) । एवं प्रास्थिकः कौडविकादयोऽप्यूह्याः। द्रोणश्चाढकश्च द्रोणाढकौ। उप्यतेऽस्मिन्निति वापः। 'करणाधिकरणयोश्च'३।३।११७॥ इत्यधिकरणे घञ्। वापः क्षेत्रम् । द्रोणाढकयोर्वापः द्रोणाढकवापः, स आदिर्यस्याऽसौ स तथा । आदिशब्दाद् द्रोणं पचति सम्भवति अवहरति[३] द्रौणिकः कटाहः, सम्भवत्यवहरति पचतीत्यर्थे[४] ठक्, द्रौणिकी स्थाली । द्रोणाद् 'अण् च'५।२।१०३॥ इत्यणि द्रौणी स्थाली। एवमाढकिकः कटाहः, आढकिकी स्थालीत्याद्याः ॥

**खलधानं पुनः खलम्** ॥९६९॥

१ खलन्ति सञ्चीयमानानि धान्यान्यत्र[५] **खलधानम्**, क्लीबे । पृषोदरादिः । **२** खल्यन्ते सञ्चीयन्ते धान्यान्यत्र[६] **खलम्**, त्रिलिङ्गः । 'खल सञ्चये'(भ्वा.प.से.), 'गोचरसञ्चर-'३।३।११९॥ इति साधुः । द्वे 'खलां' इति ख्यातस्य ॥९६९॥

**चूर्णे क्षोदः**[७]

१ चूर्यते स्म **चूर्णम्**, पुंक्ली. । 'चूरी दाहे' (दि.आ.से.), क्तः, तत्र । **२** क्षुद्यते **क्षोदः** । 'क्षुदिर् संपेषणचूर्णनयोः[८]'(रु.उ.अ.[९]), कर्मणि घञ् । द्वे सकर्करधूलेः[१०] । धूलिप्रायोऽयम् । यच्छाश्वतः-''चूर्णानि वासयोगाः स्युश्चूर्णो[११] धूलिः सशार्करः[१२]''[शाश्वतकोशः, श्लो-३८०]इति॥

**अथ रजसि स्युर्धूलीपांसु[१३]रेणवः** ।

१ रज्यते[१४] वस्त्राद्यनेनेति **रजः**, क्लीबे[१५]। 'रञ्ज रागे'(दि.उ.अ.), '-असुन्'(उणा-६२८)इत्यसुन्, असि अके अने घिनुणि च रञ्जेर्नलोपो वाच्यः[१६] । यद्वा 'भूरञ्जिभ्यां कित्'(उणा-६५६)इत्यसुन्, '[१७]रजतरजकरजःसूपसङ्ख्या[१८]नम्'( )इति न्लोपः । रजसी, रजांसि इत्यादिरूपाणि। ''रजेनापि (रजसाऽपि) रजः समम्''[शब्दभेदप्रकाशः, श्लो-३४ (३७)]इति शब्दप्रभेदः। ''रजशब्दोऽकारान्तोऽपि[१९]'' [अनेकार्थकैरवाकरकौमुदीटीका, का-२, श्लो-५७५]इत्यनेकार्थसङ्ग्रहटीका, तत्र । **२** धूयते **धूलिः**, स्त्रियाम् । 'धूञ् कम्पने'(क्र्या.उ.से.), [बाहुलकाल्लिः], 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि **धूली** । **३** पंसयति वस्त्रादिकं **पांसुः**, पुंसि । 'पसि नाशने'(चु.उ.से.), दन्त्यान्तः, 'अर्जिदृशि-'(उणा-२७)इत्यादिना उण्[२०] (कुः)। **४** रीयते **रेणुः**, त्रिषु[२१] । 'री गतौ[२२]'(क्र्या.प.अ.), 'अर्जिवृरीभ्यो णुः'(उणा-३१८)इति णुः[२३] । ''रेणुर्द्वयोः''[अमरकोषः२।८।९८॥]इति त्वमरः । चत्वारि धूलेः ॥

**लोष्टे लोष्टुर्दलिर्लेष्टुः**

१ लुष्यते **लोष्टः**, पुंक्ली.। 'लुष हिंसायाम्' ( ), क्तः[२४] । '''लूञ् छेदने'(क्र्या.उ.से.), इत्यस्मात् क्ते लोष्ट इति निपात्यते''[ ]इत्युज्ज्वलदत्तः,

---

१. 'भाषा' इति१, 'ख्यातः' इति५॥ २. कोष्ठान्तर्गतपाठस्थाने १प्रतौ 'तत्रामैकं' इति दृश्यते ॥ ३. 'अवहरति सम्भवति' इति४॥ ४. '-र्थः' इति४॥ ५. 'धाना-' इति१.२.३॥ ६. 'धाना-' इति१.३॥ ७. तुलनीयोऽमरकोषः २।८।९९॥ ८. 'सम्पेषणे' इत्येव क्षीरतरङ्गिण्यादयः॥ ९. इतोऽग्रे ३प्रतौ 'क्तः' इति दृश्यते ॥ १०. '-लिः' इति३॥ ११. 'स्युः' इति१.२.४.५प्रतिषु नास्ति ॥ १२. ''सशर्करा॥ ३८०(चूर्णो धूलिरुदाहृतः॥३८०)'' इति मुद्रितशाश्वतकोशः, पृ.३४॥ १३. '-पांशु-' इति३.४॥ १४. 'रजते' इति१॥ १५. '-बेऽयम्' इति४.५॥ १६. 'अस्यकेऽने च रञ्जेर्नलोपो वाच्यः' इति सिद्धान्तकौमुद्यां कृदन्तप्रकरणे, पृ.५६४॥ १७. 'रजते-' इति१.२॥ १८. ''भाष्यमते त्विति । तथा च षष्ठे 'रजकरजनरजःसूपसंख्यानम्' इति वार्तिकं प्रत्याख्यातुं भाष्यकृतोक्तम्-'रजकरजनरजःसु कित्त्वात् सिद्धे कित एवैते औणादिकाः' इति । तत्र कैयटः-रजक इति 'क्वुन् शिल्पि-४३९३' इति क्वुन् । रजनमिति 'रञ्जेः क्वुन् ४४४०' इति क्वुन् । रज इति 'भूरञ्जिभ्यां कित् ४८६२' इत्यसुन् प्रत्यय इत्यादि ॥'' इति सिद्धान्तकौमुदीतत्त्वबोधिनीटीका, पृ.५६७॥ १९. 'मुद्रितानेकार्थकैरवाकरकौमुदीटीकायाम्-''रज इत्यकारान्तोऽपि'' इति दृश्यते, भा-१, पृ.३२८॥ २०. 'ऊण्' इति५॥ २१. इदं चिन्त्यम्, 'रेणुर्द्वयोः' इत्यमरकोषे (२।८।९८॥) दर्शनात्, 'रीयते रेणुः, स्त्रीलिङ्गः' इति तु स्वोपज्ञटीका ॥ २२. 'री गतिरेषणयोः' इति क्षीरतरङ्गिण्यादयः ॥ २३. 'णुत्' इति१.३॥ २४ 'लोष्टपलितौ'(उणा-३७२)इति सूत्रसत्त्वादिदं विचारणीयम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र । २ लोष्ट्यते **लोष्टुः**, पुंसि । 'लोष्ट सङ्घाते' (भ्वा.आ.से.), 'भृमृ[शी]तॄ-'(उणा-७)इत्यादिना बाहुलकादुः । ३ दलयति **दलिः** स्त्रियाम् । 'दल विशरणे' (भ्वा.प.से.), 'इन् सर्वधातुभ्यः'[1](उणा-५५७)इतीन्[2] । ४ लिश्यते **लेष्टुः**, पुंसि । 'लिश अल्पीभावे'(दि.आ.अ.), 'ऋत्वादयश्च'[3](चान्द्रोणा-१।२५)इति तुन् । चत्वारि 'ढल' इति ख्यातस्य ॥

**वल्मीकः कृमिपर्वतः** ॥९७०॥

**वम्रीकूटं वामलूरो नाकुः शक्रशिरश्च सः ।**

१ वलन्ते[4] प्राणिनोऽत्र **वल्मीकः**, पुंक्लीबः । "वल्मीकं पुंनपंसकम्"[अमरकोषः२।१।१४॥]इत्यमरः । 'वल संवरणे'[6](भ्वा.आ.से.), 'अलीकादयश्च'(उणा-४६५) इति साधुः । "वहेश्चान्तस्य लत्वे वल्मीकम्"[ ]इत्याहुः । २ कृमीणां पर्वत इव **कृमिपर्वतः** ॥९७०॥ ३ वम्रीणामुपदेहिकानां कूटं शिखरं **वम्रीकूटम्** । ४ वामं वामैर्वा लूयते **वामलूरः** । 'लूञ् छेदने'(क्र्या.उ.से.), 'खर्जिपिञ्जा(ञ्जा)दिभ्यः ऊरोलचौ'(उणा-५३०)इत्यूरः । वम्यते उद्गीर्यत इदमिति वामः, कीटाद्युत्थापिता मृद् । कर्मणि घञ् । लवनं लूः छेदः । वामस्य लूर्वामलूः । वामलू[7] रातीति वामलूर इति वा । 'आतोऽनुपसर्गे कः'३।२।३॥ । ४ न अकति गच्छति **नाकुः**, पुंसि । 'अक [कुटिलायां] गतौ'(भ्वा.प.से.), बाहुलकादुः । नमति खर्वतां प्राप्नोति भूभागोऽनेनेति वा । 'णमु(णम) प्रह्वत्वे शब्दे च[8]'(भ्वा.प.अ.), 'फलिपाटिनमिमनिजनां गुक्पटिनाकिधता(त)श्च' (उणा-१८)इत्युः, नाक्यादेशश्च, उ(इ)कार उच्चारणार्थः । ५ शक्रस्य शिरो मूर्धा **शक्रशिरः**, सकारान्तः । शक्रशिरसी[9], शक्रशिरांसि इत्यादि । षड् वल्मीकस्य ॥

**नगरी पूः पुरी द्रङ्गः पत्तनं पुटभेदनम्** ॥९७१॥

**निवेशनमधिष्ठानं स्थानीयं निगमोऽपि च ।**

१ नगा इव गजाः प्रासादा वा । ते सन्त्यत्रेति **नगरी**, स्त्रीक्लीबे[10] । '[ख]मुखनगपांशु(पांसु)पाण्डुभ्यो रः[11]' (वा-५।२।१०७॥)इति रः, गौरादित्वाद् ङीष् । "नश्यन्त्यस्यां वा नगरी । 'जठर-'(हैमोणा-४०३)इत्यादिना निपातनात् साधुः"[अभि., स्वोपज्ञटीका४।९७१॥]इत्याचार्याः[12] । २ पिपर्त्ति पूरयति वा सर्वकौतुकं **पूः**, स्त्रीलिङ्गः । 'पॄ[13] पालनपूरणयोः'(जु.प.से.), 'भ्राजभास-'३।२।१७७॥ इति क्विप्, 'उदोष्ठ्यपूर्वस्य'७।१।१०२॥, 'उरण् रपरः'१।१।५१॥, 'हलि च[14]'८।२।७७॥ इति दीर्घत्वम् । "पूर्व पर्व [फर्व] मर्व पूरणे'(भ्वा.प.से.), क्विपि राल्लोपे पूः"[मा. धातुवृत्तिः, भ्वादिः, धातुसं-३७३]इति माधवः । ३ "अस्मादेव धातोः 'ऋदोरप्'३।३।५७॥ इत्यप्, पूर्वविप्रतिषेधेन गुणे उत्वम्, गौरादिङीषि[15] **पुरी**"[ ]इति सर्वधरः[16] । "पूर्यतेऽत्रेति, 'पुर अग्रगमने'(तु.प.से.), घञर्थे कः, यद्वा इगुपधलक्षणः कः, ततो गौरादिङीषि पुरी"[17][18]इति स्वामी[19] । "'कॄगॄ-'(उणा-५८२)इत्यादिना इप्रत्यये पुरिरिकारान्तोऽपि"[ ]इति सर्वधरः । त्रिलिङ्गोऽयम् । ४ द्रमन्त्यत्रेति **द्रङ्गः** । 'द्रम गतौ' (भ्वा.प.से), गम्यादेर्ग्मन्[20] । "आद्रङ्गोऽपि"[ ]इति शब्दप्रभेदः । "द्राग:"[ ]इति तु लिङ्गानुशासनवृत्तिः । ५ नाना दिग्भ्यः पतन्ति वणिजोऽत्रेति **पत्तनम्** । 'पत्लृ पतने[21]' (भ्वा.प.से.), 'वि(वी)पतिभ्यां तनन्'(उणा-४३०)इति तनन् । यद्वा पतनं पत् गतिः, तां तनोतीति पचाद्यचीति पत्तनम् । पतस्तनं पत्तनं वा । "तद्वै पत्तनं तच्च पट्टनं पुटभेदनम्"[ [22]]इति वाचस्पतिः । तत्र पटेर्बाहुलकात् तनन्प्रत्ययः ।

---

१. 'सर्वधातुभ्य इन्' इत्युणादिगणसूत्रम् ॥ २. १.२.३.५प्रतिषु नास्ति ॥ ३. 'क्रत्वादयश्च' इत्यपि दृश्यते ॥ ४. '-न्ति' इति३.४.५॥ ५. 'पुंक्ली' इति१.२॥ ६. स्वामिमतेऽयं धातुपाठः, 'वल वल्ल संवरणे' इति मैत्रेयः, 'वल वल्ल संवरणे सञ्चरणे च' इति सायणः ॥ ७. '-लू' इति१॥ ८. २.५प्रत्योर्नास्ति, 'णम प्रह्वत्वे' इति१, स्वामी च, 'णम प्रह्वत्वे शब्दे' ('च' इति मैत्रेयः) इति मैत्रेयसायणौ ॥ ९. ५प्रतौ नास्ति ॥ १०. 'स्त्रीक्लो' इति१.२॥ ११. 'खमुखकुञ्जनगनखपाण्डुपांसुभ्यश्च' इति भाषावृत्तिः, ५।२।१०७॥, पृ.२२९॥ १२. स्वोपज्ञटीकायाम्-"नश्यन्त्यस्यां नगरी स्त्रीक्लीबलिङ्गः, "जठर-" ॥ (उणा-४०३) ॥ इत्यरे निपात्यते" इति दृश्यते, ४।९७१॥, पृ.२१५॥ १३. 'पृ' इति१.३॥ १४. 'वोरुपधाया दीर्घ इकः'८।२।७६॥ इत्यस्य प्रवृत्तिसत्त्वादिदं न युक्तम् ॥ १५. '-ष्' इति३॥ १६. द्र. पदचन्द्रिका, भा-२, पुरवर्गः, श्लो-१९, पृ.२५॥ १७. 'गौरादित्वाद्' इति३॥ १८. अम.क्षीरस्वामिकृतटीकायां पुरीशब्दस्य व्युत्पत्तिर्नास्ति॥ १९. पदचन्द्रिकायाम्-"अस्मादेव धातोः "ऋदोरप्"(पा.३।३।५७॥)। पूर्वविप्रतिषेधेन गुणादुत्वम् (पा.७।१।१०२॥)। गौरादित्वात् (पा.४।१।४१॥) ङीष्, 'पुरी'- इति सर्वधरः । पूर्यते अत्र इति 'पुर मुखगमने' । घञर्थे कः (वा.३।३।५८॥)। ततो गौरादिङीषि (पा.४।१।४१॥) 'पुरी'- इति स्वामी ॥" इति दृश्यते, भा-२, पुरवर्गः, श्लो-१९, पृ.२५॥ २०. 'गन् गम्यद्योः'(उणा-१२०)इत्युणादिगणसूत्रम् ॥ २१. 'गतौ' इति क्षीरतरङ्गिण्यादयः ॥ २२. द्र. पदचन्द्रिका, भा-२, पुरवर्गः, श्लो-१९, पृ.२५॥, रामाश्रमी२।१।२॥, पृ.१४९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"पट्टनं[1] शकटैर्गम्यं घौटकैर्नौभिरेव च ।
नौभिरेव तु यद्गम्यं[2] पत्तनं तत् प्रचक्षते ॥१॥"[ ]

इति स्मार्तो भेदोऽत्र नाऽऽश्रितः । ६ पण्यानां पुटा भिद्यन्तेऽत्र **पुटभेदनम्** । अधिकरणे ल्युट् । "पुटानि भाण्डागाराणि भिद्यन्तेऽत्र"[[3] ]इति तु[4] भट्टः । "पुटैर्विशिष्टगृहप्रकोष्ठादिभिर्भिद्यते [5]विशेष्यत इति पुटभेदनम्"[[3] ]इति पञ्जिका । "पुटा[6] भाण्डवासनानि भिद्यन्तेऽत्र"[अभि., स्वोपज्ञटीका ४।९७१॥]इत्याचार्याः ॥९७१॥ ७ निविशन्तेऽत्र[7] **निवेशनम्** । निपूर्वः 'विश प्रवेशने'(तु.प.अ.), अधिकरणे ल्युट् । ८ अधितिष्ठन्त्यस्मिन्[8] जना इति **अधिष्ठानम्** । ल्युट् ल्युर्वा । ९ स्थितिः, स्थानम्, स्थानाय हितं **स्थानीयम्** । "राजादिभिः स्थीयतेऽत्रेति, 'कृत्यल्युटो बहुलम्'३।३।११३॥ इत्यधिकरणेऽनीयर्"[[3] ]इति तु[9] पञ्जिका । १० नियतं गच्छन्ति वणिजोऽत्रेति **निगमः** । 'गोचरसञ्चर-'३।३।११९॥ इति साधुः । "'ग्रहवृदृनिश्चिगमे(गम)श्च'३।३।५८॥ इत्यादिनाऽधिकरणेऽच्"[[3] ]इति तु सर्वधरः । वाचस्पतिस्तु-

"स्यात् स्थानीयं त्वभिनवो[10] ग्रामो ग्रामशताष्टके ।
तदर्धे तु द्रोणमुखं तच्च कर्बटमस्त्रियाम् ॥२॥
कर्बटार्धे तु कटिकं स्यात् तदर्धे तु कार्बटम्[11-1] ।
तदर्धे पत्तनं तच्च पट्टनं[11-2] पुटभेदनम् ॥३॥
निगमस्तु पत्तनार्धे[12] तदर्धे तु निवेशनम् ।
कर्बटादधमो द्रङ्गः पत्तनादुत्तमश्च सः ॥४॥
उद्रङ्गश्च निवेशश्च स एव द्रङ्ग इत्यपि ।" [[13]]

इति विशेषमाह । केचित्तु-अत्र नगरपत्तनस्थानीयानां भेदमाहुः । "अष्टशतग्रामीयाणां[14] व्यवहारस्थानं पुरम्, तत्र प्रधानभूतं नगरम्, यत्र राजा तत्परिचारकाश्च तिष्ठन्ति तत्पत्तनम्, दुर्गनगरं योजनविस्तीर्णं प्राकारादिवेष्टितं स्थानीयम्"[[3] ]इति जातरूपः । सोमनन्दी त्वेवं नगरलक्षणमाह-

"देवतायतनैश्चित्रैः प्रासादापणवेश्मभिः ।
नगरं दर्शयेद् विद्वान् राजमार्गैश्च शोभनैः ॥५॥"[[3]]

इत्याह । सामान्येन दश नगरस्य ॥

## शाखापुरं तूपपुरम्

१ मूलनगरेऽसंमतो(त)जनौघस्याऽवस्थानार्थं मूलनगरसन्निधौ यदन्यत् पुरं नगरान्तरं क्रियते तन्मूलनगरस्य तरुस्थानीयस्य शाखेव **शाखापुरम्** । श्रीआचार्यास्तु-"शाखा इति, समीपवर्ति पुरं शाखापुरम्[15]"[अभि., स्वोपज्ञटीका ४।९७२॥]इत्याख्यन् । "शाखा वेदविभागे स्यात् पादपाङ्गेति केऽपि च (शाखा वेदविभागोऽपि मध्यं स्यादन्तरेऽपि च)"[शाश्वतकोशः, श्लो-७४६]इति शाश्वतः । २ उप समीपे पुरस्य मूलनगरस्य **उपपुरम्** । 'अव्ययं विभक्ति-'२।१।६॥ इत्यादिना समासः । तथोक्तम्-"शाखानगरमाख्यातं तथोपनगरं बुधैः"[हलायुधकोशः २।२८६॥]इति । द्वे 'पुरा' इति ख्यातस्य । गृह्याऽपि ॥

## खेटः पुरार्धविस्तरः ॥९७२॥

१ खिट्यते **खेटः**, पुंक्ली. । 'खिट उत्त्रासे[16]'(भ्वा.प.से.), घञ् । "खेटस्तु निन्दिते ग्रामभेदे च वसुनन्दके"[विश्वलोचनकोशः, टान्तवर्गः, श्लो-११]इति श्रीधरः । "ग्रामाधानं च खेटकम्"[हलायुधकोशः२।२५८॥]इति हलायुधः । २ पुरस्याऽर्धं विस्तरोऽस्य[17] **पुरार्धविस्तरः** । "विस्तरस्तु प्रपञ्चे स्याद् विस्तारे प्रणयेऽपि च"[विश्वप्रकाशकोशः, रान्तवर्गः, श्लो-११४]इति महेश्वरः । द्वे 'जीर्णखेडउ[18]' इति ख्यातस्य ॥९७२॥

## स्कन्धावारो राजधानी

१ षण्णाममात्यादीनां प्रधानभूतत्वाद् राजास्कन्धस्तमावृणोति[19] **स्कन्धावारः** । 'वृञ् आवरणे[20]'(स्वा.उ.से.), 'कर्मण्यण्'३।२।१॥ । २ राजा नृपो धीयतेऽस्यां **राजधानी**, स्त्रीक्लीबम् । 'डुधाञ् धारणादौ'(जु.उ.अ.), अधिकरणे ल्युट् । कटकोऽपि । "कटकोऽस्त्री राजधान्याम्"[विश्वलोचनकोशः, कान्तवर्गः, श्लो-४४]इति श्रीधरः । द्वे राजाश्रितमूलनगरस्य ॥

## कोट्टदुर्गे पुनः समे ।

१ कुट्यते **कोट्टः**, पुंक्ली. । "कोट्टारघट्टहट्टाश्च"

---

१. 'पत्तनं' इति४॥ २ 'यद्गौम्यं' इति४॥ ३ द्र. पदचन्द्रिका, भा-२, पुरवर्गः, श्लो-१९, पृ.२५-२६॥ ४ १.३प्रत्योर्नास्ति॥ ५. 'विशि-' इति१॥ ६ 'पुडा' इति४॥ ७ '-त्रेति' इति३.५॥ ८ '-न्त्यत्र' इति४॥ ९ ४प्रतौ नास्ति ॥ १०. 'त्वनिगमो' इति३. 'त्वतिलम्बो' इति स्वोपज्ञटीकायाम् ॥ ११-१. 'कार्वटम्' इति, ११-२. 'पत्तनं' इति स्वोपज्ञटीकायाम् ॥ १२. 'तद-' इति-१, 'पट्ट-' इति३.४॥ १३. द्र. स्वोपज्ञटीकायाम्, ४।९७२॥, पृ.२१५॥ १४ 'स्थानीयानां' इति१॥ १५. ४.५प्रत्योर्नास्ति ॥ १६. 'उल्लासे' इति१, स्वामिसम्मतोऽयं धातुपाठः, 'किट खिट त्रासे' इति मैत्रेयसायणौ ॥ १७. इतोऽग्रे ३प्रतौ 'विस्तारो' इति दृश्यते ॥ १८. '-उ' इति२.४, 'खेटौ' इति३॥ १९. '-णीते' इति३॥ २०. 'वरणे' इति क्षीरतरङ्गिण्यादयः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[अमरकोषः३।५।१८॥]इति तु पुंस्यमरलिङ्गशेषः[१] । 'कुट्ट छेदने'(चु.प.से.), पृषोदरादित्वाद् गुणः । २ दुःखेन गम्यतेऽस्मिन् **दुर्गम्** । 'सुदुरोरधिकरणे'(वा-३।२।४८॥) इति डः। द्वे कोट्टस्य । राज्ञो निवासस्थानमेतत् ॥

**गया पूर्गयराजर्षेः**

१ गच्छन्त्यस्यां पुण्यार्थिन इति **गया**। ([२]पृषोदरादित्वात् साधुः) । गयराजर्षेः पुर् नगरी गयेत्यन्वयः। एकं गयराजर्षिपुरः[३] ॥

**कन्यकुब्जं महोदयम् ॥९७३॥**

**कन्याकुब्जं गाधिपुरं कौशं कुशस्थलं च तत् ।**

१ कन्या कुब्जा अत्रेति **कन्यकुब्जम्** । तत्र हि जमदग्निना शापेन नृपतेः कन्या कुब्जीकृतेति प्रसिद्धिः । 'ङ्यापोः संज्ञाछन्दसोर्बहुलम्'६।३।६३॥ इति ह्रस्वत्वम् । २ महानुदयोऽस्य[४] **महोदयम्** । ३ ह्रस्वाभावपक्षे **कन्याकुब्जम्** । एते त्रयः स्त्रीक्लीबलिङ्गाः ॥९७३॥ ४ गाधे राज्ञः पुरं **गाधिपुरम्** । ५ कुशाः सन्त्यत्र **कौशम्** । चातुरर्थिकोऽण् । ६ कुशानां स्थलं **कुशस्थलम्** । षट् केनुजपुरस्य[५] ॥

**काशिर्वराणसी वाराणसी शिवपुरी च सा ॥९७४॥**

१ काशत इति **काशिः**, स्त्रीलिङ्गः । 'काशृ[६] दीप्तौ' (भ्वा.आ.से.), '-इन्'(उणा-५५७)इतीन्। 'कृदिकारात्-' (गणसू-४।१।४५॥)इति ङीषि[७] काशी । अयं तालव्यान्तः । दन्त्यान्तोऽपीत्यन्ये । ३ वरणा च असिश्च वराणसी नद्यौ, तयोरदूरभवा, 'अदूरभवश्च'४।२।७०॥ इत्यणि, 'वृद्धिर्यस्याचामादि:-'१।१।७३॥इति वृद्धौ, पृषोदरादित्वाद् रेफस्या[८]ऽकारस्य दीर्घत्वे णकाराऽऽकारस्य ह्रस्वत्वे च ङीषि **वाराणसी** । २ पृषोदरादित्वाद् ह्रस्वत्वे च **वराणसी** । यद्वा वराणा[९] वीरणाख्यतृणानि सन्त्यस्यां वराणसी[१०] नदी, 'वुञ्छण्क-'४।२।८०॥इत्यादिना तृणादिभ्यः स इति चातुरर्थिकः सः, तस्यां अदूरभवेति वा, देशो वा वराणसः, तत्र भवा वा[११]। ४ शिवस्य पुरी **शिवपुरी** । चत्वारि काश्याः ॥९७४॥

**साकेतं कोसलाऽयोध्या**[१२]

१ सा लक्ष्मीः, कं सुखम्, ताभ्यामितं **साकेतम्** । २ कोसलादेशयोगात् **कोसला**[१३], दन्त्यमध्या । अर्शआदित्वादच्[१४] । ३ न योध्यते परैरिति **अयोध्या** । त्रीणि अयोध्यायाः ॥

**विदेहामिथिले समे ।**

१ विदिह्यते **विदेहा** । 'दिह उपचये'(अ.प.अ.), घञ् । २ मिथ्यते **मिथिला** । 'मिथृ[१५] मेधाहिंसयोः[१६]'(भ्वा.उ.से.), 'मन्थँ[१७] विलोडने'(भ्वा.प.से., क्र्या.प.से.) वा, 'मिथिलादयश्च'(उणा-५७)इतीलचि साधुः। द्वे मिथिलापुरः[१८] ॥

**त्रिपुरी चेदिनगरी**

१ तृतीया पुरी **त्रिपुरी** । मयूरव्यंसकादित्वात्[१९]। त्रयाणां पुराणां समाहारो वा । भाष्यकारवचनात् स्त्रीत्वम् । २ चेदीनां नगरी **चेदिनगरी** । द्वे 'चंदेरी' इति ख्यातायाः ॥

**कौशाम्बी वत्सपत्तनम् ॥९७५॥**

१ कुशाम्बेन निर्वृत्ता **कौशाम्बी** । 'तेन निर्वृत्तम्' ४।२।६८॥इति चातुरर्थिकोऽण्। २ वत्सराजस्य वत्सराजदेशे वा पत्तनं **वत्सपत्तनम्** । एकं (द्वे) वत्सराजनगरस्य ॥९७५॥

**उज्जयनी[२०] स्याद् विशालाऽवन्ती पुष्पकरण्डिनी ।**

१ उत्कर्षेण जयति **उज्जयनी**[२०]। 'जि जये' (भ्वा.प.अ.), नन्द्यादित्वाल्ल्युः । अन्ये तूज्जयनी[२०] नाम राक्षसी देवता वा, तस्या निवास उज्जयनीति[२०] चातुरर्थिकमणमुत्पाद्य तस्य लोपमिच्छन्ति[२१] । २ विशेषेण शालते शोभते[२२] **विशाला** । 'शाल शोभने'(    ), अच् । विशिष्टाः शाला अत्रेति वा । ३ अव्यते **अवन्ती** । ४ पुष्पकरण्डं नाम उद्यानम्, तद्योगात् **पुष्पकरण्डिनी** । 'अत इनिठनौ'५।२।११५॥ । यद्व्याडिः-"उज्जयि(य)न्यां यदुद्यानं तत् स्यात् पुष्पकरण्डकम्"[[२१]]इति । चत्वारि 'उज्जेणी[२३]' इति ख्यातायाः[२४] ॥

---

१. '-विशेषः' इति३॥ २. कोष्ठान्तर्गतपाठस्थाने ४प्रतौ 'पृषोदरादिः' इत्येव दृश्यते ॥ ३. '-र्षेः पुर्याः' इति३॥ ४. 'यस्य स' इति१॥ ५. 'कनौ-' इति३॥ ६. 'कासृ' इति२.३॥ ७. '-ष्' इति३.४॥ ८. '-स्था-' इति१.२॥ ९. 'वा-' इति१.३॥ १०. '-सी' इति१.४॥ ११. १प्रतौ नास्ति॥ १२. '-श-' इति१.२.४॥ १३. '-श-' इति२.५॥ १४. 'आदिभ्योऽच्' इति१.२॥ १५. मैत्रेयसायणमते दान्तोऽयं धातुः ॥ १६. '-सनयोः' इति३॥ १७. 'मन्थि' इति४॥ १८. '-पुर्याः' इति३॥ १९. इतोऽग्रे ३प्रतौ 'साधुः' इति दृश्यते ॥ २०. '-यिनी' इति१.३॥ २१. द्र. स्वोपज्ञटीका ४।९७६॥, पृ.२१६॥ २२. १.२.३.५प्रतिषु नास्ति ॥ २३. 'उजेणी' इति१, 'उजणी' इति२.३॥ २४. '-तस्य' इति१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**पाटलिपुत्रं कुसुमपुरम्**

१ पाटलिभिः पुनाति **पाटलिपुत्रम्**। 'पूञ् पवने' (क्र्या.उ.से.), 'पुवो ह्रस्वश्च'(उणा-६०४)इति त्रन्(क्त्रः)। २ कुसुमबहुलं पुरं **कुसुमपुरम्** । द्वे पाडलीपुरस्य ॥

**चम्पा तु मालिनी ॥९७६॥**

**लोमपादकर्णयोः पूः**

१ चमति जनदौर्गत्यं **चम्पा** । 'चमु अदने' (भ्वा.प.से.), 'खल्पशिल्प-'(उणा-३०८)इति बाहुलकात् पे साधुः। यद्वा चणन्त्यस्यां चण्पा[२] । 'चण हिंसादानयोश्च[३]'(भ्वा.प.से.), चकाराद् गतौ, भ्वादौ, घटादिरयम्, णकारस्य 'म्ना(म्नां) धुट्वर्गेऽन्त्योऽपदान्ते'(हैमसू-१।३।३९॥)इत्यनुस्वारानुत्पत्तौ 'चण्पा' इत्येव स्वमते मूलपाठः। २ मालाः सन्त्यस्यां **मालिनी** ॥९७६॥ ३-४ लोमपादो[४] राजर्षिः, कर्णः कौन्तेयः, तयोः पूः, तेन **लोमपादपुरी, कर्णपुरी**। चत्वारि चम्पानगर्याः[५] ॥

**देवीकोट उमावनम् ।**

**कोटीवर्षं बाणपुरं स्याच्छोणितपुरं च तत् ॥९७७॥**

१ देव्याः कोटः कौटिल्यमत्र **देवीकोटः** । २ उमाया वनम् **उमावनम्**। ३ कोटीभिर्वर्षति[६] **कोटीवर्षम्**। ४ बाणस्य असुरस्य पुरं **बाणपुरम्** । ५ शोणितलिप्तं पुरं **शोणितपुरम्** । पञ्च नगरकोटस्य[७] ॥९७७॥

**मथुरा तु मधूपघ्नं मधुरा**

१ मथति द्रष्टृमनो **मथुरा** । 'मन्थ विलोडने' (भ्वा.प.से.), '[८]मन्दिवासि(वाशि)-'(उणा-३८)इत्युरच् । मथुरायाः पिशाच्या अदूरभवा पुरीत्यन्ये । २ मधोर्दैत्यस्य उपघ्न आश्रयोऽत्र **मधूपघ्नम्** । ३ मधुना राजते **मधुरा** । 'राजृ दीप्तौ'(भ्वा.उ.से.), 'अन्येभ्योऽपि(अन्येष्वपि)-'३।२।१०१॥ इति डः। मधुः अधिष्ठाता अस्याऽस्तीति वा। 'ऊषशुषि(सुषि)[मुष्क]मधु(मधो)-'५।२।१०७॥इति रः। त्रीणि मथुरायाः ॥

**अथ गजाह्वयम् ।**

**स्याद् हास्तिनपुरं हस्तिनीपुरं हस्तिनापुरम् ॥९७८॥**

१ गजस्याऽऽह्वयोऽस्य **गजाह्वयम्** । यद्भारते- "नगरे नागस्याऽऽह्वये"[[९]]इति, "तेन गजपुरं नाम नगरम्" [[९]]इत्यादि । २ हस्तिन्या इदं हास्तिनम्, तच्च तत्पुरं च **हास्तिनपुरम्** । ३ हस्तिन्याः पुरं **हस्तिनीपुरम्** । ४ पृषोदरादित्वादात्वे **हस्तिनापुरम्** । चत्वारि '[१०]हत्थिणापुर[११]' इति ख्यातस्य ॥९७८॥

**ताम्रलिप्तं दामलिप्तं ताम्रलिप्ती तमालिनी ।**

**स्तम्बपूर्विष्णुगृहं च स्यात्**

१ ताम्यद्भिर्लिप्यते **ताम्रलिप्तम्**। 'लिप उपदेहे' (तु.उ.अ.), क्तः। २ दामभिर्लिप्यते छाद्यते **दामलिप्तम्** । ३ **ताम्रलिप्ती** पृषोदरादित्वात् । "ताम्रलिप्ता दामलिप्ता च"[शब्दभेदप्रकाशः, श्लो-४६]इति शब्दप्रभेदः[१२]। ४ तमालाः सन्त्यस्यां **तमालिनी** । 'अत इतिठनौ'५।२।११५॥, 'ऋन्नेभ्यो ङीप्'४।१।५॥ । ५ स्तम्बगहना पूः **स्तम्बपूः** । [१३]समासान्तविधेरनित्यत्वाद् 'ऋक्पूरब्धूःपथामानक्षे'५।४।७४॥ इत्यप्रत्ययाभावः । ६ विष्णोर्गृहं **विष्णुगृहम्** । षट् ताम्रलिप्त्या नगर्याः ॥

**विदर्भा तु कुण्डिनम् ॥ ९७९॥**

१ विशिष्टो दर्भो कुशो वाऽस्यां **विदर्भा** । २ कुण्ड्यते पापमत्र **कुण्डिनम्** । 'कुडि दाहे'(भ्वा.आ.से.), 'बहुलमन्यत्राऽपि-'(उणा-२०७)इतीनच्, कुण्डिनाख्यं पुरं **कुण्डिनम्**। कुण्डिनापुरमित्यपि । द्वे विदर्भायाः ॥ ९७९॥

**द्वारवती द्वारका स्यात्**

१ द्वाराणि सन्त्यस्यां [१४]**द्वारवती** । २ द्वारैः[१५] कायति **द्वारका** । 'कै शब्दे'(भ्वा.प.अ.), 'आतः-' ३।२।३॥ इति कः, क्षिपकादित्वादित्वाभावः । [यद्वा] द्वरतीति द्वारका । 'द्वृ कौटिल्ये[१६]'(भ्वा.प.अ.), ण्वुल् । द्वे द्वारकायाः ॥

---

१. 'पाट-' इति२.३॥ २. 'चम्पा-' इति३॥ ३. 'चण श्रण दाने' इति स्वामी, 'चण शण श्रण दाने' इति मैत्रेयः, '-दाने च' इति सायणः ॥ ४. '-दौ' इति५॥ ५. 'चम्पायाः' इति४॥ ६. इतोऽग्रे ५प्रतौ 'वर्षभिः' इति दृश्यते ॥ ७. '-ट्टस्य' इति४.५॥ ८. 'मन्द-' इति४॥ ९. द्र. स्वोपज्ञटीका ४।९७८॥, पृ.२१६॥ १०. 'हथ-' इति५॥ ११. '-उर' इति४.५॥ १२. पूज्यकस्तूरसूरिसंपादितशब्दभेदप्रकाशे- 'ताम्रलिप्ता दामलिप्ता' इति दृश्यते, अभिधानचिन्तामणिकोशः, पृ. २३४॥ १३. 'ऋक्पूसमा-' इति३॥ १४. 'द्वारा-' इति१॥ १५. 'द्वारे' इति३॥ १६. 'द्वृ वरणे' इति स्वामी, 'द्वृ अनादरे' इति मैत्रेयः, सायणसम्मतोऽयं धातुः, अत्र क्षीरतरङ्गिणीटिप्पणी-२ द्रष्टव्या॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**निषधा**[1] **तु नलस्य पूः ।**

१ नितरां स्यन्ति कर्माण्यस्यां **निषधा**। 'षोऽन्तकर्मणि'(दि.प.अ.), 'नेः स्यतेरधक्'(हैमोणा-२५२)इत्यधक् । नलस्य राज्ञः पूः[१] । नलराजनगर्या एकम् ॥

**प्राकारो**[1] **वरणः**[2] **सालो**[3]

१ प्रकुर्वन्ति तमिति **प्राकारः** । प्रक्रियते वा। घञि, 'उपसर्गस्य घञ्यमनुष्ये बहुलम्'६।३।१२३॥ इति दीर्घत्वम् । यद्वा प्रथमं क्रियते प्राकारः । '[२]सादकारयोः कृत्रिमे'[भा.वा.६।३।१२२॥]इति दीर्घः। २ व्रियते वेष्ट्यतेऽनेन **वरणः**। 'वृञ् वरणे'(स्वा.उ.से.), करणे ल्युट्। वृणोतीति वा। 'सुयुरुवृञो युच्'(उणा-२३२)इति युच्। ३ स्यति पर्यन्तं करोति **सालः**। 'षोऽन्तकर्मणि'(दि.प.अ.), बाहुलकात् कालन्[३]। सल्यत इति वा। 'सल (षल) गतौ' (भ्वा.प.से.), घञि, दन्त्यादिरयम्। ''सालो वरणसर्जयोः'' [[४]]इति रभसः । 'शल गतौ'(भ्वा.प.से.), ततो घञि शालः तालव्यादिरपि । तथा च-

''तालव्यो नृपझषयोः शालो वृक्षे वृतौ द्रुभेदे च ।
तालव्यदन्त्य उक्तस्तथा स्त्रियां वृक्षशाखायाम् ॥ १॥''[[५]]

इत्यूष्मविवेकात्[६] । [तत्र]। त्रीणि भूमिगढनामानि॥

सालस्तु नगरपर्यन्ते भवति अतः कोट्टाद् विशेषः, कोट्टस्तु राज्ञो[७] निवसनस्थानपर्यन्ते भवतीति न पुनरुक्ति[८]दोषः। अन्ये तु कोट्टदुर्गाभ्यां सह त्रीनप्यभेदेनाहुः[८]। वप्रोऽपि । ''वप्रेण पर्यन्तचरोडुचक्रः सुमेरुवप्रोऽन्वहमन्वकारि'' [शिशुपालवधम्, सर्गः-३, श्लो-३७]इति माघः ॥

**चयो**[1] **वप्रोऽस्य**[2] **पीठभूः ॥ ९८० ॥**

१ अस्य प्राकारस्य पीठभूः मूलभूमिः प्राकाराधारः। चीयते **चयः**, चवर्गप्रथमादिः। 'चिञ् चयने'(स्वा.-उ.अ.), कर्मणि 'एरच्'३।३।५६॥। २ उप्यते प्राकारोऽत्र **वप्रः**, पुंक्ली.। 'टुवप् बीजतन्तुसन्ताने[९]'(भ्वा.उ.अ.), 'वृधु(वृधि)वपिभ्यां रन्'(उणा-१८५)इति रन्। द्वे दुर्गनगरे परिखाया उद्धृतमृत्तिकास्तूपस्य त्रिंशद्धस्तप्रमाणस्य मूलबन्धस्य यस्योपरि प्रकारो भवति, तस्य। तथा चाऽर्थशास्त्रम्-''खातादुद्धृतपांसुना[१०] वप्रं कारयेत्, तस्योपरि प्राकारम्''[[११]] इति । तथा च धरणिः-''वप्रश्चावरणे वृन्दे प्राकारमूलबन्धने''[[१२]]इति ॥९८०॥

**प्राकाराग्रं**[1] **कपिशीर्षं**[2]

१ प्राकारस्याऽग्रं **प्राकाराग्रम्** । २ [१३]कपिरिव शीर्षमस्य **कपिशीर्षम्** । द्वे 'कांगरा[१४]' इति ख्यातस्य॥

**क्षौमा**[1]**ऽट्टा**[2]**ऽट्टालका**[3] **समाः ।**

१ क्षुवन्ति शब्दायन्ते योधा अत्रेति **क्षौमम्**, पुंक्ली.। ''[१५]क्षौममस्त्रियाम्''[अमरकोषः२।२।१२॥]इत्यमरः। 'टुक्षु शब्दे'(अ.प.से), 'अर्तिस्तुसुहुसृधृक्षिक्षुभाया[वा]पदियक्षिनीभ्यो मन्'(उणा-१३७)इति मन्, बाहुलकाद् वृद्धिः । ''[१६]क्षौमोऽवृद्ध्यादिः''[ ]इति मिश्राः । २ अट्टन्तेऽत्र **अट्टः**, पुंक्ली. । 'अट्ट हिंसातिक्रमयोः[१७]'(भ्वा.आ.से.) अस्माच्चुरादिण्यन्ताद् 'एरच्'३।३।५६॥। ''- 'गुरोश्च-'३।३।१०३॥ इत्यकारः''[मा.धातुवृत्तिः, भ्वादिः, धातुसं-१५९]इति माधवः। ३ बाहुलकादालप्रत्यये अट्टालः, स्वार्थे कनि **अट्टालकः** । [१८]भुरजनामानि त्रीणि । ''प्राकाराग्रे रणगृहम्[१९]'' [[२०]]इति कौटिल्यः। ''प्राकारेणाऽग्निवर्णेन साट्टालेनोन्नतेन च''[ ]इति भागवतम्। ''प्राकारेण सौवर्णेन अट्टालाः प्राकारोपरि रचितान्युन्नतानि युद्धस्थानानि तत्सहितेन''[ ]इति

---

१. इतोऽग्रे ४.५प्रत्योः 'नलस्य पूः' इति दृश्यते ॥ २. 'स्याद-' इति२.५॥ ३. 'कानन्' इति१॥ ४. द्र. पदचन्द्रिका, भा-२, पुरवर्गः, श्लो-२१, पृ.३०॥, रामाश्रमी २।२।३॥, पृ.१५०॥ ५. '-कः' इति४॥ ६. 'राज्ञा' इति३॥ ७. '-क्त-' इति३.४॥ ८. इतोऽग्रे ४प्रतौ 'भेदेनेति' इति दृश्यते ॥ ९. 'बीजसन्ताने' इति क्षीरतरङ्गिण्यादयः ॥ १०. 'पांशु-' इति१.३॥ ११. कौटिलीये अर्थशास्त्रे-''(१) चतुर्दण्डावकृष्टं परिखायाः षड्दण्डोच्छ्रितमवरुद्धं तद्विगुणविष्कम्भं खाताद् वप्रं कारयेत्, ऊर्ध्वचयं मञ्चपृष्ठं कुम्भकुक्षिकं वा हस्तिभिर्गोभिश्च क्षुण्णं कण्टकिगुल्मविषवल्लीप्रतानवन्तम् । पांसुशेषेण वास्तुच्छिद्रं वा पूरयेत् । (२) वप्रस्योपरि प्राकारं विष्कम्भद्विगुणोत्सेधमैष्टकं द्वादशहस्तादूर्ध्वमोजं युग्मं वा आचतुर्विंशतिहस्तादिति कारयेत् । रथचर्यासञ्चारं तालमूलमुरजकैः कपिशीर्षकैश्चाचिताग्रं पृथुशिलासहितं वा शैलं कारयेत् न त्वेव काष्ठमयम् । अग्निरवहितो हि तस्मिन् वसति।'' इति दृश्यते, कौटिलीयम् अर्थशास्त्रम्, अधि-२ प्रक-१९, अध्या-३, पृ.८६॥ १२. द्र. पदचन्द्रिका, भा-२, पुरवर्गः, श्लो-२१, पृ.२९॥ १३. 'कपे-' इति१.२॥ १४. '-गुरा' इति३॥ १५. 'क्षोम-' इति पदचन्द्रिकारामाश्रमीसम्मतपाठः ॥ १६. 'क्षौ-' इति१.३.४॥ १७. 'अत्ट अतिक्रमहिंसनयोः' इति स्वामी, 'अट्ट अतिक्रमणहिंसयोः' इति मैत्रेयसायणौ ॥ १८. 'बु-' इति१.२॥ १९. '-ग्रेण गृहम्' इति१.३.५॥ २०. द्र. अम.क्षीर.२।२।१२॥, पृ.७६॥, पदचन्द्रिका, भा-२, पुरवर्गः, श्लो-३०, पृ.४४, तत्र-'प्राकाराग्रस्थितस्य रणगृहस्य' इति दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तट्टीका । "प्राकारमण्डपस्योपरि शालाया हर्म्यादिपृष्ठे वातकुटिकायाः"[ [1] ]इति स्वामी । "प्राकारधारणार्थो[2]ऽभ्यन्तरे[3] क्षौमाख्ये"[ [1] ]इति भट्टः। "अट्टेति ख्यातस्य गृहस्य"[ [1] ]इति कोक्कटः[4]। "मण्डपस्योपरि हर्म्यपृष्ठस्य"[ [1] ]इति तु पञ्जिका॥

## पूर्द्वारि[1] गोपुरम्[2]

१ पुरो द्वारं **पूर्द्वारम्**, तत्र । २ गोप्यते **गोपुरम्**। 'गुपू रक्षणे'(भ्वा.प.से.), 'मद्गुरादयश्च'(उणा-४१)इति साधुः। यद्वा बाहुलकाद् गुपेरुरच् । "द्वारमात्रेऽपि[5] गोपुरम्"[अमरकोषः३।३।१८२॥]इत्यनेकार्थः। "गोपुरं च पुरद्वारे द्वारमात्रेऽपि मुस्तके[6]"[विश्वप्रकाशकोशः, रान्तवर्गः, श्लो-१२३]इति **महेश्वरः** । द्वे पूर्द्वारस्य । "कथ्यते गोपुरं पुरद्वारम्"[हलायुधकोशः२।२८८॥]इति हलायुधः। "प्रतोल्यां[7] अन्तराले द्वौ"[ ]इति तट्टीका । 'बारी' इति भाषा ॥

## रथ्या[1]प्रतोली[2]विशिखाः[3] समाः ॥९८१॥

१ रथं वहति **रथ्या** । 'तद्वहति रथयुग-'४।४।७६॥ इति यत् । "हितार्थे 'खलयवमाष-'५।१।७॥ इत्यत्र चकाराद् यत्"[ [8] ]इति तु स्वामी । २ प्रतोलयन्त्यस्यामिति [**प्रतोली**] । प्रतोलयति परिच्छेदयति परात्मीयानिति वा । ण्यन्तात्[9] 'तुलि छेदने'( )इत्यतः 'एरच्' ३।३।५६॥ इत्यच्, गौरादिः । प्रतोल्यत इति वा । 'तुल उन्मादे'(चु.उ.से), घञ्, गौरादिर्वा । ३ विशय्यन्ते प्रकाश्यन्ते द्रव्याण्यस्यामिति । 'शीङः किद् ह्रस्वश्च[10]'(उणा-७०२)इति खन् (खः) **विशिखा** । "विगतशिखा मुण्डितेव जनसम्मर्दाद् विशिखा"[ ]इति [11]तु भट्टः[12] । त्रीणि '[13]पोलि' इति ख्यातायाः ॥९८१॥

## परिकूटं[1] हस्तिनखो[2] नगरद्वारकूटके ।

१ परितः कूट्यते **परिकूटम्**, पुंक्लीः । 'कूट दाहे[14]'(चु.उ.से.), घञ् । २ हस्तिनख इव **हस्तिनखः**। "शनैरनीयन्त रथात्(रयात्) पतन्तो रथाः क्षितिं हस्तिनखादखेदैः"[शिशुपालवधम्, सर्गः-३, श्लो-६८]इति माघः। दुर्गद्वारावतरणार्थः क्रमनिम्नो मृत्कूटोऽपसोपानाख्यः । "हस्तिनखः परकूटम्"[हलायुधकोशः २।२८८॥]इति हलायुधः । "दुर्गद्वारोत्तरणमार्गे द्वौ"[ ] इति तट्टीका। बहिरतटमन्तःसोपानयुक्तं युद्धार्थमित्येके । फिरणी पागेर इत्यादि[15]भाषा। ३ नगरद्वारे प्रतोल्यां कूटो मृत्तिकाराशिः नगरद्वारकूटः, स्वार्थे कनि **नगरद्वारकूटकः**, तत्र । द्वे 'पाज' इति ख्यातायाः ॥

## मुखं[1] निःसरणे[2]

१ गृहादेर्निःस्रियते प्रविश्यते च येन तद् मुखमिव **मुखम्**। खन्यत इति वा मुखम् । 'खनु अवदारणे' (भ्वा.उ.से.), '[16]डित् खनेर्मुट् [स] चोदात्तः'(उणा-६९८) इत्यच्[17], आदेर्मुडागमश्च । मुखति मण्डयति, 'मुख मण्डने' ( ), इगुपधत्वात्[18] के मुखमित्यन्ये[19]। २ निःस्रियतेऽनेन **निःसरणम्** । 'सृ गतौ'(भ्वा.प.अ.), करणे ल्युट्, तत्र। यत् श्रीधरः-"मुखं वक्त्रे निःसरणे"[विश्वलोचनकोशः, खान्तवर्गः, श्लो-४]इति । येन गृहादेर्निःस्रियते प्रविश्यते तन्नाम्नी द्वे । स्वामी तु-"गृहादिद्वारप्रवेशे मुखादिद्वयम्, तथा च 'मुखं स्वाङ्गम्'६।२।१६७॥ इत्यत्र प्राङ्मुखी शालेत्यत्र न्यासे उक्तं शालाया द्वारप्रवेशो मुखमुच्यते[20]"[न्यासः६।२।१६७॥]इत्याह। पञ्जिकादिरप्येवम् । कोक्कटस्तु-"द्वे हट्टमण्डपादेः प्रवेशनिर्गममार्गस्य" [ ]इत्याह[21] ॥

## वाटे[1] प्राचीना[2]ऽऽवेष्टकौ[3] वृतिः[4] ॥ ९८२॥

१ वट्यतेऽनेनेति **वाटः**, त्रिषु । 'वट वेष्टने' (भ्वा.प.से.), करणे घञ्, [तत्र]। २ प्रागेव **प्राचीनम्**। 'विभाषाञ्चेरदिक्स्त्रियाम्'५।४।८॥ इति खः । "[22]प्राचीनमित्येके"[अम.क्षीर.२।२।३॥]इति भट्टः। प्रआङ्पूर्वाच्चिनोतेः 'शुषि(सि)चिमीनां दीर्घश्च'(उणा-१८३)इति क्रनि

१. द्र. पदचन्द्रिका, भा-२, पुरवर्गः, श्लो-३०, पृ.४४॥ २. '-णाऽभ्य-' इति४.५॥ ३. '-र' इति३.४.५॥ ४. 'कोकूटः' इति३॥ ५. 'तु' इत्यमरकोषे ॥ ६. 'गोपुरन्तु पुरद्वारि द्वारमात्रे च मुस्तके' इति विश्वप्रकाशकोशे, पृ.१३५॥ ७. '-ल्यां' इति४॥ ८. अम.क्षीर. न दृश्यते॥ ९. इतोऽग्रे ४प्रतौ, 'तु' इति दृश्यते ॥ १०. 'शीङो ह्रस्वश्च' इत्युणादिगणसूत्रम् ॥ ११. ४प्रतौ नास्ति॥ १२. क्षीरस्वामिकृतामरकोशटीकायाम्-"विगतशिखा मुण्डितेव सन्मताद् विशीर्यते जनसंमर्देन वा विशिखा।" इति दृश्यते, अम.क्षीर.२।२।३॥, पृ.७४॥ १३. 'पौ-' इति१.३॥ १४. 'कूट परिदाहे' इति मैत्रेयः, 'कूट परितापे' इति सायणः ॥ १५. 'इति' इति३.४॥ १६. 'डिति' इति३.४॥ १७. '-चि' इति४॥ १८. 'इगुपधलक्षणत्वात्' इति३.४॥ १९. '-त्येके' इति४॥ २०. "मुखशब्देनात्र द्वारप्रदेशः शालाया उच्यते । स्वाङ्गमद्रवलक्षणमिह गृह्यत इति ॥" इति न्यासे, भा-५, ६।२।१६७॥, पृ.१५९॥ २१. द्र. पदचन्द्रिका, भा-२, पुरवर्गः, श्लो-३७, पृ.५४॥ २२. अम.क्षीरस्वामिकृतटीकायाम् 'प्राचीर-' इति दृश्यते, २।२।३॥, पृ.७४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दीर्घत्वे [1]प्राचीरमेवेति पञ्जिकाद[2]यः । ३ आवेष्टते **आवेष्टकः** । 'वेष्ट वेष्टने'(भ्वा.आ.से.), आङ्पूर्वः, 'ण्वुल्तृचौ'३।१।१३३॥ इति ण्वुल् । ४ व्रियतेऽनया **वृतिः**, स्त्रीलिङ्गः। 'वृञ् वरणे'(स्वा.उ.से), '- आच्छादने'(चु.-उ.से.), 'स्त्रियां क्तिन्'३।३।९४॥ । "वाट इति [3]विषयसप्तमी स्वार्थे कनि वाटिका"[ ]इति हलायुधटीका । चत्वारि कण्टकादीनां 'वाडि' इति ख्याताया: ॥९८२॥

**पदव्येकपदी पद्या पद्धतिर्वर्त्म वर्तनी ।**
**अयनं सरणिर्मार्गोऽध्वा पन्था निगमः सृतिः ॥९८३॥**

१ पदमवति **पदवी** । 'अव रक्षणादौ'(भ्वा.-प.से.), अचि गौरादिः । पदं वाऽस्त्यत्रेति वप्रकरणे 'अन्येभ्योऽपि-'(वा-५।२।१०९॥)इति वः, गौरादिः । "पद्यते गम्यतेऽनया वा । 'पद गतौ'(दि.आ.अ.), 'पद्यटिभ्यामविः'[4]( )इत्यविः, ततः 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि पदवी"[5]इति पञ्जिका। "पदस्य विः पक्षिणी पदविः, ततः 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि पदवी"[5]इति सर्वधरः । २ एकोऽसहायः पदोऽस्याम्[6], गन्तॄणामविरलपादत्वादेकोऽभिन्नः पादोऽस्यां[7] वा **एकपदी** । 'कुम्भपदीषु च'५।४।१३९॥ इति साधुः। ३ पादाय हिता **पद्या**, वितृणत्वात् । 'शरीरावयवाच्च'५।१।६॥ इति यत्। 'पदमस्मिन् दृश्यम्'४।४।-८७॥ इति वा यत्, 'पद्यत्यतदर्थे'६।३।५३॥ इति पदादेशः । पद्यते गम्यते वा। 'ऋहलोर्ण्यत्'३।१।१२४॥, संज्ञापूर्वकत्वाद् वृद्ध्यभावः। ४ पादाभ्यां हन्यते **पद्धतिः**। हन्तेः क्तिन्, 'हिमकाषिहतिषु च'६।३।५४॥ इति पद्भावः, 'झयो होऽन्यतरस्याम्'८।४।६२॥ इति धत्वम् । ५ वर्तन्तेऽनेनेति **वर्त्म**, क्लीबे । 'वृतु वर्तने'(भ्वा.आ.से.), 'उणादयो बहुलम्, भूतेऽपि दृश्यन्ते'( )इति मनिन्प्रत्ययः । ६ वर्तन्तेऽनयेति वर्तनिः। 'वृतु वर्तने'(भ्वा.-आ.से.), 'अदेर्मुट् च'(उणा-२६२), 'वृत्तेश्च'(उणा-२६३)इति मुडागमोऽनिप्रत्ययश्च '''अदिवृतिभ्यां मुट् च' इति वक्तव्ये पृथग्योगकरणात् पक्षे मुड् न भवति, तेन वर्तनिः''[मा.धातुवृत्तिः, भ्वादिः, धातुसं-४९१]इति माधवः । "चकारान्मुट् चेत्येके, तेन[8] वर्त्मनिरित्यपि"[ ] इत्युज्ज्वलदत्तः । तथा च चुल्लिभट्टवृत्तौ-"वर्त्मनिराशि-(निवासि?)वितर्दि[9]पुरन्ध्री"[10]इत्युक्तम् । 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि **वर्तनी** । ७ अयन्तेऽनेन **अयनम्** । 'अय गतौ'(भ्वा.आ.से.), ल्युट्। "ईयतेऽनेन[11]"[12]इति स्वामी। ८ सरन्त्यस्यां[13] **सरणिः**, स्त्रीलिङ्गः। 'सृ गतौ'(भ्वा.प.अ.), 'अर्तिसृधृ-'(उणा-२५९)इत्यादिनाऽनि[14]प्रत्ययः । ङीषि सरणी, दन्त्यादिरयम्, "सरणी (सरणिः) श्रेणिवर्त्मनोः"[15]इति दन्त्यादौ रभसात्[12] । 'शॄ हिंसायाम्'(क्र्या.प.से.), ततः शरणिरित्येके । तथा च- "शुभं[16] शुभे प्रदीप्ते च शरणि[:] पथि वाऽवलौ(वाऽवनौ"[17]इति तालव्यादावजयः[12] । ९ पथिकपादैर्मृज्यते वितृणीक्रियते **मार्गः** । 'मृजूष्[18] शुद्धौ'(अ.प.वे.), कर्मणि घञ् 'चजोः कु घिण्ण्यतोः'७।३।५२॥ इति कुत्वम् । मार्ग्यतेऽनेनेति वा। 'मृग(मार्ग) अन्वेषणे'(चु.उ.से.), 'हलश्च'३।३।१२१॥ इति करणे[19] घञ् । १० अत्ति बलं पथिकानाम्, अत्यते सततं गम्यतेऽनेनेति वा **अध्वा** । 'अद्(अद) भक्षणे'(अ.प.अ.), 'अत सातत्यगमने'(भ्वा.प.से.) वा, 'अदेरतेर्वा ध[20]श्च'( )इति क्वनिप्, धश्चान्तादेशः । अध्वानौ, अध्वानः इत्यादि । ११ पथन्त्यत्र, पथन्ते(पथ्यते)ऽनेनेति वा **पन्थाः**, पुंसि। 'पथे[21] गतौ' (भ्वा.प.से.), 'पथिमथिभ्यामिन्'(चान्द्रोणा-३।८४)इतीन्। पतन्त्यनेनेति वा । 'गमेरिनिः'(उणा-४४६)इत्यनुवर्तमाने 'पते(पत)स्थश्च'(उणा-४५२)इति इनिः प्रत्य[22]यः, थश्चान्तादेशः। "वाटः पथश्च पन्थाश्च (माथश्च)"[त्रिकाण्डशेषः२।१।१९॥]इति त्रिकाण्डशेषात् पथोऽदन्तोऽपि । १२ निगाच्छन्त्यनेनेति[23] **निगमः**, पुंसि। 'गम्लृ गतौ'(भ्वा.प.अ.),

१. 'प्राचीन' इति३.४.५॥ २. द्र. पदचन्द्रिका, भा-२, पुरवर्गः, श्लो-२१, पृ.३०॥ ३. 'विषये' इति४.५॥ ४ '-भ्यो विः' इति३॥ ५. द्र. पदचन्द्रिका, भा-२, भूमिवर्गः, श्लो-१५, पृ.१९॥ ६. '-स्य' इति३॥ ७ 'वास्यां' इति५॥ ८ चकारोऽष्टाध्याय्यां न दृश्यते ॥ ९. १प्रतौ नास्ति॥ १०. '-विति-' इति४.५॥ ११. द्र. पदचन्द्रिका, भा-२, भूमिवर्गः, श्लो-१५, पृ.१९॥ १२. अम.क्षीर. न दृश्यते॥ १३. '-त्र' इति३॥ १४. '-णि-' इति२.४॥ १५. द्र. टीकासर्वस्वम्, भा-२, २।१।१५॥, पृ.१६॥, रामाश्रमी २।१।१५॥, पृ.१४७॥ १६. 'शुभ-' इति४॥ १७. द्र. रामाश्रमी २।१।१५॥, पृ.१४७॥ १८. 'मृजू' इति मैत्रेयसायणौ ॥ १९. 'अधिकरणे' इति३॥ २०. 'अदेर्ध च'(उणा-५५५)इत्युणादिगणसूत्रम् ॥ २१. 'पथि' इति१.३॥ २२. 'निः प्रत्ययः' इति४, 'इनिप्रत्ययः' इति५॥ २३. 'निर्गच्छन्त्यनेन' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'गोचरसञ्चर-'३।३।११९॥ इत्यादिना करणा[1]ऽधिकरणे वा घः । १३ सरन्त्यनया **सृतिः** । 'सृ गतौ'(भ्वा.प.अ.), 'स्त्रियां क्तिन्'३।३।९४॥ त्रयोदश सामन्येन[2] पथः॥ ९८३॥

विशेषादाह-

### सत्पथे स्वतित[3]ः पन्थाः

१ संश्चासौ पन्थाश्च **सत्पथः** । 'ऋक्पूरब्धूः-५।४।७४॥ इत्यः, तत्र । २-३ स्वतितः सूपसर्गादत्युपसर्गाच्च पन्था यो[3]ज्यते, तेन सुः पूजितः पन्थाः **सुपन्थाः**। अतिः पूजितः पन्थाः **अतिपन्थाः** । स्वती पूजायाम्, 'कुगतिप्रादयः'२।२।१८॥इति समासः, 'न[4] पूजनात्'५।४।६९॥ इत्यत्र स्वतिग्रहणाद् 'ऋक्पूरब्धूः-'५।४।७४॥ इत्यादिना प्राप्तसमासान्तनिषेधः । सुपन्थानौ, सुपन्थानः । अतिपन्थानौ, अतिपन्थानः इत्यादि । त्रीणि शोभनमार्गस्य ॥

### अपन्था अपथं समे ।

१-२ न पन्था **अपन्था**। 'पथो विभाषा' ५।४।७२॥ इत्यच्विकल्पः। अचि **अपथम्**। 'अपथं नपुंसकम्' २।४।३०॥इति क्लीबता। द्वे 'ऊ[5]वट' इति ख्यातस्य ॥

### व्यध्वो दुरध्वः कदध्वा विपथं कापथं च सः ॥९८४॥

१ विरुद्धोऽध्वा **व्यध्वः**। 'उपसर्गादध्वनः'५।४।८५॥ इत्यच् । २ दुर्निन्दितोऽध्वा **दुरध्वः** । 'उपसर्गादध्वनः'५।४।८५॥इत्यच् । उभावपि रामवत् । ३ कुत्सितोऽध्वा **कदध्वा** । 'कोः कत्तत्पुरुषेऽचि'६।३।१०१॥ इति कोः कत् । ४ विरुद्धः पन्था **विपथम्**। 'ऋक्पूरब्धूः-' ५।४।७४॥ इत्यप्(इत्यः)। ५ कुत्सितः पन्थाः **कापथम्**[6]। 'ऋक्पूरब्धूः-'५।४।७४॥ इत्युप्(इत्यः), 'का पथ्यक्षयोः' ६।३।१०४॥ इति कोः कादेशः, 'पथः सङ्ख्याव्ययादेः' (वा-२।४।३०॥)इति क्लीबता । अमरस्तु विपथकापथशब्दौ पुंस्याह[7]। [गौडश्च] यदाह-''व्यध्वौ विपथकापथौ''[8]इति । बृहस्पति[9]मिश्रास्तु-''अतिपन्था इत्यादौ 'पथः सङ्ख्याव्ययादेः'(वा-२।४।३०॥)इति न क्लीबत्वम्[10], सङ्ख्यादिपथशब्देनाऽव्यभिचारिसमासान्तेन साहचर्यादव्ययादिपथि[11]शब्दस्याऽपि कृतसमासान्तस्यैव ग्रहणात्, एवं च 'विपथः कापथः' इति पुंल्लिङ्गः पाठः प्रामादिकः''[12]इत्याख्यन् । तथा च-'' -'सङ्ख्याव्ययादेः'(वा-२।४।३०॥)इत्यत्र विपथमेवोदाहृतम्, सङ्ख्याव्ययपूर्वकश्च पथ इति वामनेनाऽपि क्लीबत्वं प्रोक्तम्''[12]इति स्वाम्यादयः । अन्ये तु-''लिङ्गमशिष्यं लोकाश्रयत्वात्''[12] इति समादधते। वयं तु 'पथः सङ्ख्याव्ययादेः'(वा-२।४।३०॥)इत्यत्र कृतसमासान्तपथरूपस्य ग्रहणात्, पथते व्याप्नोतीति 'पथे[13] गतौ'(भ्वा.प.से.)इत्यस्य पचाद्यजन्तपथशब्दे[14]न समासे पुंस्त्वमेवाचक्ष्महे । तथा च त्रिकाण्डशेषः-''वाटः पथश्च मथश्च(माथश्च)''[त्रिकाण्डशेषः२।१।१९॥] इति। अत एव-''सत्पथस्तु सुपन्थाः स्याद् व्यध्वो विपथकापथौ''[15]इति रभसे पुंस्त्वम्[12]। पचाद्यजन्तपथशब्देन कुपथोऽपीत्याहुः । पञ्च कुमार्गस्य ॥९८४॥

### प्रान्तरं दूरशून्योऽध्वा[16]

१ प्रकृष्टमन्तरं व्यवधानमवकाशो वा ग्रामयोरत्रेति **प्रान्तरम्** । दूरं शून्यो दूरशून्यः । 'सुप् सुपा' २।१।४॥ इति समासः। ''दूरश्चासौ शून्यश्चेति दूरशून्यः, छायातरुजलादिवर्जितोऽध्वा''[12]इति तु पञ्जिका । एकं दूरशून्यमार्गस्य ॥

### कान्तारो वर्त्म दुर्गमम् ।

१ चौरकण्टकादिभिर्दुर्गमः पन्थाः कांश्चिन्न तारयति **कान्तारः**। ''पृषोदरादित्वात्[17]''[18]इति सुभूतिः । ''कस्य जलस्य सुखस्य वा[19] अन्तं नाशमियर्त्ति कान्तारः । 'ऋ गतौ'(भ्वा.प.से.), 'कर्मण्यण्'३।२।१॥''[18]इति तु[20] भट्टः[21] । पुंक्लीबोऽयम् । यदमरः-''महारण्यं(-ण्ये) दुर्गपथे कान्तारः पुंनपुंसकः(-म्)''[अमरकोषः३।३।१७२॥] इति । ''कान्तारः प्रान्तरे तुल्यार्थे इत्येके''[18]इति भट्टः। एकं चौराद्युपद्रुतमार्गस्य ॥

---

१. '-णे-' इति१॥ २. ४प्रतौ नास्ति॥ ३. 'यु-' इति३॥ ४ 'नञ्' इति३॥ ५. 'उ-' इति१॥ ६. 'कुपन्था' इति५॥ ७ 'पुंस्यप्याह' इति४॥ ८. द्र. स्वोपज्ञटीका४।९८४॥, पृ.२१८॥ ९. '-तिः' इति३.४॥ १०. 'क्लीबता' इति४॥ ११. '-पथि-' इति३॥ १२. द्र. पदचन्द्रिका, भा-२, भूमिवर्गः, श्लो-१६, पृ.२१॥ १३. 'पथि' इति३॥ १४ 'शब्दस्य' इति३॥ १५. द्र. टीकासर्वस्वम्, भा-२, २।१।१६॥, पृ.१७॥, रामाश्रमी२।१।१६॥, पृ.१४८॥ १६. तुलनीयोऽमरकोषः२।१।१७॥ १७ 'पृषोदरादिः' इति४॥ १८. द्र. पदचन्द्रिका, भा-२, भूमिवर्गः, श्लो-१७, पृ.२२॥ १९. १.३प्रत्योर्नास्ति॥ २०. ४.५प्रत्योर्नास्ति॥ २१. अम.क्षीरस्वामिकृतटीकायाम्-''कस्याम्भसोन्तमृच्छति कान्तारम्'' इति दृश्यते, २।१।१७॥, पृ.७३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सुरुङ्गा[1] तु सन्धिला[2] स्याद् गूढमार्गो भुवोऽन्तरे ॥९८५॥**

१ सरत्यनया **सुरुङ्गा** । 'सृ गतौ'(भ्वा.प.अ.), 'सर्त्तेः सुर्च'(हैमोणा-१०८)इत्युङ्गः । २ सन्धिं लाति **सन्धिला** । सन्धिरपि । भुवो धरित्र्या अन्तरे मध्ये गूढमार्गः छन्नः पन्थाः । द्वे सुरङ्गायाः ॥९८५॥

**चतुष्पथे तु संस्थानं चतुष्कम्**

१ चतुर्णां पथां समाहारः **चतुष्पथम्**। 'ऋक्पूरब्धूः-'५।४।७४॥ इत्यप् (इत्यः), पात्राद्यन्तो द्विगुर्नेबन्तः, 'पथः सङ्ख्याव्ययादेः'(वा-२।४।३०॥)इति क्लीबता, तत्र । २ संतिष्ठन्तेऽत्र **संस्थानम्**। अधिकरणे ल्युट् । ३ चत्वारोऽवयवा अस्य **चतुष्कम्**। त्रीणि 'चउवटो[2]' इति ख्यातस्य ॥

**त्रिपथे[1] त्रिकम् ।**

१ त्रयाणां पथां[3] समाहारः **त्रिपथम्** । 'ऋक्पूरब्धूः-'५।४।७४॥ इत्यप्रत्ययः[4], 'पथः सङ्ख्याव्ययादेः'(वा-२।४।३०॥)इति क्लीबता, तत्र । २ त्रयोऽवयवा अस्य **त्रिकम्** । द्वे 'त्रिवटा' इति ख्यातस्य ॥

**द्विपथं[1] तु चारपथः[2]**

१ द्वौ पन्थानौ समाहृतौ **द्विपथम्**, त्रिपथवत् । २ चाराय पन्थाः **चारपथः** । 'ऋक्पूरब्धूः-'५।४।७४॥ इत्यप्रत्ययः । द्वे '[5]बिवटा' इति ख्यातस्य ॥

**गजाद्यध्वा त्वसङ्कुलः[1] ॥ ९८६ ॥**

**घण्टापथः[2] संसरणं[3] श्रीपथो[4] राजवर्त्म[5] च ।**

**उपनिष्क्रमणं[6] चोपनिष्करं[7] च महापथः[8] ॥९८७॥**

१ **असङ्कुलः** गजादीनामध्वा मार्गो गजाद्यध्वा ॥९८६॥ २ घण्टोपलक्षितानां हस्तिनां मार्गो **घण्टापथः**। 'ऋक्पूरब्धूःपथामानक्षे'५।४।७४॥ इत्यप्रत्ययः समासान्तः[6] । ''दशधन्वन्तरो राजमार्गो घण्टापथः स्मृतः''[[7]]इति चाणक्यः। ३ सम्यक् संभूय वा सरन्त्यत्र अनेन वा **संसरणम्** । 'सृ गतौ'(भ्वा.प.अ.), 'करणाधिकरणयोश्च'३।३।११७॥ इति करणेऽधिकरणे वा ल्युट् । ४ श्रिया उपलक्षितः पन्थाः **श्रीपथः**। 'ऋक्पूरब्धूः-'५।४।७४॥ इत्यः[8] । ५ राजयोग्यं वर्त्म **राजवर्त्म** । ६ उपनिष्क्रम्यतेऽनेनेति[9] **उपनिष्क्रमणम्**। 'क्रमु पादविक्षेपे'(भ्वा.प.से.), करणे ल्युट्, षडक्षरोऽयमखण्डः। ७ उपनिःकीर्यते(उपनिष्कीर्यते) सैन्यमस्मिन् **उपनिष्करम्** । 'कृ विक्षेपे' (तु.प.से.), 'ऋदोरप्'३।३।५७॥ इत्यप् । ८ महांश्चासौ पन्थाश्च **महापथः** । प्राग्वदकारप्रत्ययः समासान्तः । सप्त (अष्टौ) राजमार्गस्य । मिश्रास्तु-''घण्टापथः संसरणमिति नामद्वयं सामान्येन राजपथमात्रस्य तत्संसरणं पुरस्य चेद्भवति तदा उपनिःकिरन्त्याधिक्येन निःसरन्ति सैन्यान्यत्रेति, ['कृ विक्षेपे'(तु.प.से.)], 'ऋदोरप्'३।३।५७॥, उपनिष्करम्, किष्कुश्च पारस्करादीनां [सुटि]। अन्यस्य तु घण्टापथः संसरण एव पुरस्येति स्वामिसर्वधराद्याः, 'बुधैः संसरणं वर्त्म गजादीनामसङ्कुलं पुरस्योपस्करं चोक्तम्[11]' इति हुग्रः(हुग्नः)''[ ]इति व्याख्यन् ॥९८७॥

**विपणिस्तु[1] वणिग्मार्गः[2]**

१ विपणन्तेऽस्यामिति **विपणिः**, स्त्रीलिङ्गः । माघस्तु-''पर्यापतत्क्रयिकलकमगण्यपण्यपूर्णापणं[12] विपणिनो विपणिं विभेजुः[13]''[शिशुपालवधम् ५।२४॥]इति पुंस्यप्याह । 'पण व्यवहारे स्तुतौ च'(भ्वा.आ.से.), 'इन् सर्वधातुभ्यः' (उणा-५५७)इतीन् । 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि विपणी च । ''विपणिस्तु स्त्रियां पण्यवीथ्यामापणपण्ययोः''[विश्वलोचनकोशः, णान्तवर्गः, श्लो-७७] इति श्रीधरः। ''पर्यापतत्क्रयिकेति पद्ये विपणिः पण्यं हट्टो[14] वा विद्यते[15] येषां ते विपणिनः, शिखादित्वादिन्, विपणिं पण्यवीथिकामित्यर्थः । ''आपण आवारिका, विपणिर्हट्टः'' [ ]इति वल्लभेन व्याख्यातमत एव प्रयोगाद् विपणेः पुंस्त्वमपि''[[16]]इति सर्वधरः । [२ वणिजां मार्गो **वणिग्मार्गः**।] पण्यवीथ्यपि । तत्र पण्यानां विक्रेतव्यवस्तूनां

---

१. 'चौ-' इति४.५॥ २. '-टां' इति१॥ ३. 'पथं' इति३॥ ४ 'इत्यप्' इति४॥ ५ 'बे-' इति१॥ ६ '-तिः' इति५॥ ७ द्र. पदचन्द्रिका, भा-२, भूमिवर्गः, श्लो-१८, पृ.२३॥, रामाश्रमी २।१।१८॥, पृ.१४९॥ ८. 'इत्यप्रत्ययः' इति४॥ ९. '-नेन' इति५॥ १०. 'पूर्व-' इति४॥ ११. 'प्रो-' इति५॥ १२. '-णा' इति शिशुपालवधे, ५।२४॥, पृ.१२३॥ १३. 'विपणिर्विभेजुः' इति शिशुपालवधे, ५।२४॥, पृ.१२३॥ १४. 'हट्टे' इति४॥ १५. '-न्ते' इति४॥ १६. द्र. टीकासर्वस्वम्, भा-२, २।२।२॥, पृ.२३॥

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

वीथी गृहद्वारपिण्डिका पण्यवीथीति व्युत्पत्तिः । तथा च शाश्वतः-"आपणः पण्यवीथी च द्वयं वीथीति संज्ञितम्[1]" [शाश्वतकोशः, श्लो-३२५]इति[2] । "आपणः पण्यवीथ्यां च पण्ये च विपणिः स्त्रियाम्"[[2]]इति रभसः । द्वे हट्टमार्गस्य ॥

### स्थानं[1] तु पदमास्पदम्[2][3] ।

१ तिष्ठन्त्यस्मिन् **स्थानम्** । अधिकरणे ल्युट् । २ पद्यतेऽस्मिन्निति **पदम्,** क्लीबे । ३ आ समन्तात् पदम् [**आस्पदम्**], दन्त्यपवर्गाद्यमध्यः । 'आस्पदं प्रतिष्ठायाम्'६।१।१४६॥ इति साधुः। सामान्येन त्रीणि स्थानस्य । 'ठाम' इति भाषा ॥

### श्लेषस्त्रिमार्ग्याः शृङ्गाटम्[1]

१ त्रयाणां मार्गाणां समाहारः त्रिमार्गी, तस्याः त्रिमार्ग्याः, श्लेषो मीलनं **शृङ्गाटम्** इत्युच्यते । शृङ्गं प्राधान्यमटतीति शृङ्गाटम् । 'अट गतौ'(भ्वा.प.से.), 'कर्मण्यण्'३।२।१॥ । "शृङ्गेणाऽटन्त्यत्र[3]"[[3]]इति तु[4] भट्टः[5] । शृङ्गाटवन्मार्गैस्त्रिकोणत्वाद् वा । कप्रत्यये शृङ्गाटकम् । यदाह-"शृङ्गाटकं पथां श्लेषः संस्थानं च चतुष्पथम्" []इति । मार्गत्रयं यत्र मिलति तत्स्थानस्यैकम्[6] ॥

### बहुमार्गी तु चत्वरम्[1] ॥ ९८८॥

१ बहवो मार्गाः समाहृता इति बहुमार्गी । चततेऽस्मिन् **चत्वरम्,** क्लीबे । 'चते गतौ याचने च[7]'(भ्वा.प.से.), 'कृगृशॄ[वृञ्]चतिभ्यष्ष्वरच्(-भ्यः ष्वरच्)'(उणा-२७९)इति ष्वरच् (ष्वरच्) । बहवो मार्गा यत्र मिलन्ति, तत्स्थानस्यैकम्[8] । 'चाचरुं[9]' इति भाषा । शृङ्गाटचत्वरशब्दौ चतुष्पथपर्यायावपि ॥९८८॥

### श्मशानं[1] करवीरं[2] स्यात् पितृप्रेताद् वनं गृहम्[3-6] ।

१ शवानां शयनं **श्मशानम्** । पृषोदरदित्वात् शवशब्दस्य श्मादेशः[10], शयनशब्दस्य शान इत्यादेशः । २ करैर्वीरयन्तेऽत्र **करवीरम्** । 'वीर [विक्रान्तौ'(चु.आ.से.), अच्] । ३-६ पितृप्रेतादिति, समाहारद्वन्द्वो यथासङ्ख्यनिवृत्त्यर्थः, तेन पितृप्रेतशब्दाभ्यां वनं गृहं च योज्यते, तेन **पितृवनम्, पितृगृहम्[11], प्रेतवनम्, प्रेतगृहम्** । षट् श्मशानस्य ॥

### गेहभूर्[1]वास्तु[2]

१ गेहाय भूः **गेहभूः**। २ वसन्त्यत्रेति **वास्तु,** पुंक्लीबम्[12] । "वास्तुरस्त्रियाम्"[अमरकोषः २।२।१९॥], इत्यमरः । 'वस निवासे'(भ्वा.प.अ.), 'वसेः[तुन्'(उणा-७५), 'अगारे] णिच्च'(उणा-७६)इति तुन् । द्वे गृहभूमेः । 'घरनी[13] भूमि' इति भाषा ॥

### गेहं[1] तु गृहं[2] वेश्म[3] निकेतनम्[4] ॥९८९॥
### मन्दिरं[5] सदनं[6] सद्म[7] निकाय्यो[8] भवनं[9] कुटः[10] ।
### आलयो[11] निलयः[12] शाला[13] सभो[14]दवसितं[15] कुलम्[16] ॥९९०॥
### धिष्ण्यमा[17]वसथः[18] स्थानं[19] पस्त्यं[20] संस्त्याय[21] आश्रयः[22]।
### ओको[23] निवास[24] आवासो[25] वसतिः[26] शरणं[27] क्षयः[28] ॥९९१॥
### धामा[29]ऽगारं[30] निशान्तं[31] च

१ केतन्ति निवसन्त्यत्र **गेहम्** । 'कित निवासे' (भ्वा.प.से.), 'कितो गे च'(हैमोणा-५८७)इति हः । यद्वा गां भुवं दिशं वा ईहते कामयत इति गेहम्[14] । 'कर्मण्यण्'३।२।१॥, 'गेहे कः'३।१।१४४॥ इति निर्देशादेकारस्यात्वे कृते 'आद् गुणः'६।१।८७॥ । पुंक्लीबलिङ्गोऽयम् । "गेहो वासः कुटो द्वयोः"[[15]]इति, "गेहमस्त्री शालासभे स्त्रियाम्[16]"[[15]]इति वाचस्पतेश्च । क्लीबलिङ्गस्तु सर्ववचनः । २ गृह्णाति पुरुषोपार्जितं द्रव्यमिति **गृहम्** । गृह्णात्युपादत्ते धान्यादिकं वा[17] । 'ग्रह उपादाने'(क्र्या.उ.से.), 'गेहे कः'३।१।१४४॥ इति कः, कित्त्वात् सम्प्रसारणम् । उपचाराद् दारा गृहाः । पुंक्लीबलिङ्गः[18] । अमरस्तु-"गृहाः पुंसि च भूम्न्येव[19]"[अमरकोषः २।२।५॥]इति विशेषमाह।

---

१. 'विपणिसंज्ञकम्' इति शाश्वतकोशे, पृ.२९॥ २. द्र. पदचन्द्रिका, भा-२, पुरवर्गः, श्लो-२०, पृ.२८॥, रामाश्रमी २।२।२॥, पृ.१५०॥ ३. 'शृङ्गेना-' इति१.२.३.५॥ ४. ४प्रतौ नास्ति॥ ५. अम.क्षीरस्वामिकृतटीकायाम्-'शृङ्गैरटन्ति अस्मिन्' इति दृश्यते २।१।१८॥, पृ.७३॥ ६. 'तत्रामैकम्' इति३॥ ७. 'चते चदे च याचने' इति स्वामी, 'चते चदे याचने' इति मैत्रेयः, 'चते चदे याचने च' इति सायणः ॥ ८. 'तत्र' इति३॥ ९. '-रू' इति१॥ १०. 'शादेशः' इति१.२.५॥ ११. 'पितृगृहम्, पितृवनम्' इति१.२.४.५॥ १२. 'पुंक्ली.' इति१.२॥ १३. '-नीं' इति५॥ १४. 'गेहे' इति१.४.५, 'गेहः' इति३॥ १५. द्र. पदचन्द्रिका, भा-२, पुरवर्गः, श्लो-२२, पृ.३२॥ १६. द्र. रामाश्रमी२।२।४॥, पृ.१५१॥ १७. इतोऽग्रे ३प्रतौ 'गृहं' इति दृश्यते ॥ १८. 'पुंक्ली.' इति४॥ १९. 'भूमौ च' इति१, 'भूम्नि च' इति३.४, 'भूम्नि वा' इति२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दारेषु यथा-"गृहा मुनीनामुटजाङ्गणेषु"[ [1] ]। सद्मनि यथा-"गृहानुपैतुं प्रणयादभीप्सवो भवन्ति नाऽपुण्यवतां मनीषिणः"[ [1] ]इति। ३ विशन्त्यस्मिन्निति **वेश्म,** क्लीबे । 'विश प्रवेशने'(तु.प.अ.), '-मनिन्'(उणा-५८४)इति मनिन् । ४ निकेतन्त्यस्मिन्निति **निकेतनम्** । निकेत्यतेऽस्मिन्निति वा । निपूर्वः 'कित[2] निवासे'(भ्वा.प.से.), अधिकरणे ल्युट् ॥९८९॥ ५ मन्द्यते सुप्यतेऽत्रेति, स्तूयते वा **मन्दिरम्,** स्त्रीक्ली.[3] । 'मदि [स्तुति]मोद[मद]स्वप्नकान्ति[4]गतिषु'(भ्वा.-आ.से.), 'इषिमदिमुदिखिदिछिदिविदि[5](भिदि)मन्दिवन्दि-(चन्दि)तिमि-'(उणा-५१)इत्यादिना किरच् । स्त्रियां टाप्, प्रयोगश्च-"व्रजति[6] पथि मनाङ्(मनाहं?) मन्दिरातस्तवारिः"[ [7] ]इति सुभूतिः । ६ सीदन्त्यत्र **सदनम्** । 'षद्लृ विशरणगत्यवसादनेषु[8]'(भ्वा.तु.प.अ.), अधिकरणे ल्युट् । "'बहुलं छन्दसि'( )इति दीर्घत्वे[9] सादनमपि"[ [10] ]इति पारायणम् । यथा[11]-"न जीवहीनो यमसादनं व्रजेत्"[ [10] ]इति रामायणम् । "नेष्यते[12] यमसादनम्"[ [10] ]इति भारतं च । "सदनं सादनम्"[ [10] ]इति द्विरूपं च । ७ सीदन्त्यस्मिन्निति[13] **सद्म** । 'षद्लृ विशरणादौ'(भ्वा.तु.प.अ.), '-मनिन्'(उणा-५५७)इति मनिन् । सद्मनि, सद्मानि इत्यादि क्लीबे । ८ नितरां चीयते **निकाय्यः** । 'चिञ् चयने'(स्वा.उ.अ.), 'पाय्यसान्नाय्यनिकाय्यधाय्यामानहविर्निवाससामिधेनीषु'३।१।१२९॥ इति साधुः । ९ भवन्ति तिष्ठन्त्यत्र **भवनम्,** पुंक्ली. । 'भू सत्तायाम्'(भ्वा.प.अ.), अधिकरणे ल्युट्[14] । १० कुट्यते **कुटः** । 'कुट छेदने'(चु.आ.से.), घञर्थे कः । कुटति कुटिलीभवति वा । 'इगुपध-' ३।१।१३५॥ इति कः । स्त्रीक्लीबलिङ्गोऽयम्[15] । स्त्रियां [16]गौरादिङीषि कुटी। "इगुपधत्वात् किप्रत्यये कुटिः[17]"[ [18] ]इति भीमसेनः । "लघुकुट्यां कुटीरमिति, ह्रस्वान्तोऽपि स्त्रियां कुटिः, यथा भ्रूकुटिः"[ [18] ]इति पञ्जिका । ११ आलीयतेऽस्मिन्निति **आलयः**। 'लीञ् (लीङ्) श्लेषणे'(दि.आ.अ.), 'पुंसि संज्ञायाम्-'३।३।११९॥ इति घः । १२ एवं निलीयते[19]ऽस्मिन्निति **निलयः** । १३ शलन्त्यत्रेति **शाला** । 'शल गतौ'(भ्वा.प.से.), 'हलश्च'३।३।१२१॥ इति घञ्, 'अत उपधायाः'७।२।११६॥इति वृद्धिः । शलन्ति गच्छन्त्येनमिति, कर्मणि घञ् वा । "लोकाश्रयत्वाल्लिङ्गस्येति स्त्रीत्वम्"[ [18] ]इति स्वामी[20] । "स्त्रियां शाला पुमान् शालो नृपमत्स्यप्रभेदयोः"[ [18] ]इति तालव्यादौ रभसात् । १४ सह मिलिता भान्त्यत्रेति **सभा** । सहपूर्वाद् 'भा दीप्तौ'(अ.प.अ.) अस्माद्[21] 'अन्येभ्योऽपि-'(वा-३।३।१०१॥)इति डः । बाहुलकाद् वा 'आतोऽनुपसर्गे कः'३।२।३॥ इत्यङ् । सम्यग् भातीति वा । "पृषोदरादित्वान्मकारलोपः"[ [18] ]इति स्वामी[20] । १५ उदकं प्रतिहतं वसितमाच्छादितमनेनाऽत्र वा **उदवसितम्** । पृषोदरादित्वादुदादेशे शकन्ध्वादित्वाद् वा । "ऊर्ध्वमवसितम्"[ [18] ]इति तु भट्टः[22] । १६ कोलन्त्यत्रेति **कुलम्** । 'कुल संस्त्याने[23]'(भ्वा.प.से.), 'इगुपधज्ञा-'३।१।१३५॥इति कः, कित्त्वाद् गुणाभावः ॥९९०॥ १७ धृष्णुवन्त्यस्मिन् **धिष्ण्यम्** । 'ञिधृषा प्रागल्भ्ये'(स्वा.प.से.), 'मध्यविड्यशिक्यान्यपर्जन्यवदान्यथो(?)हर्म्यधिष्ण्यपस्त्यागस्त्यपुलस्त्यापत्यसत्यकुड्यकुल्याभल्यादयः'( )इति क्यपि साधुः । १८ आवसन्त्यस्मिन्निति **आवसथः** । 'वस निवासे'(भ्वा.प.अ.), 'उपसर्गे वसेः'(उणा-३९६) इत्यथप्रत्ययः । १९ तिष्ठन्त्यत्रेति[24] **स्थानम्** । 'करणाधिकरणयोश्च'३।३।११७॥ इत्यधिकरणे ल्युट् । २० अपस्त्यायति सङ्घातीभवति **पस्त्यम्** । 'ष्ट्यै स्त्यै शब्दसङ्घातयोः'(भ्वा.प.अ.), पृषोदरादित्वात्[25] । वस(पस)न्त्यस्मिन्निति, पतन्त्यत्रेति[26] वा । उभयत्र 'मध्यविड्य-'( ) इत्यादिना निपातनात् साधुः । वस्त्यमिति वादिरपि, तद्व्याख्या त्वित्थम्[27]- 'वसु स्तम्भे'(दि.प.से.), स्त्रियां क्तिनि वस्तिः, 'तत्र साधुः'(४।४।९८॥)इति यति वस्त्यम् । "'वसेस्तिः'(उणा-६१९)इति तिप्रत्ययः[28] । "बाहुलकाद्

१. द्र. अनेकार्थकैरवाकरकौमुदीटीका, भा-१, २।५८५॥, पृ.३३५॥ २. 'किति' इति३॥ ३. 'स्त्रीक्लीबम्' इति४.५॥ ४. '-कान्ति-' इति मैत्रेयमते ॥ ५. '-चिदि-' इति३॥ ६. 'व्रजंति' इति५॥ ७. द्र. टीकासर्वस्वम्, भा-२, २।२।५॥, पृ.२६॥, पदचन्द्रिका, भा-२, पुरवर्गः, श्लो-२३, पृ.३४॥ ८. 'विशरणादौ' इति४॥ ९. '-त्वं' इति३॥ १०. द्र. पदचन्द्रिका, भा-२, पुरवर्गः, श्लो-२३, पृ.३३॥ ११. 'तथा' इति१॥ १२. '-ति' इति३॥ १३. '-त्यत्रेति' इति४॥ १४. इतोऽग्रे १.२.४.५प्रतिषु 'पुंक्लीबोऽयम्' इति दृश्यते ॥ १५. 'स्त्रीक्ली' इति३॥ १६. 'गौरादिति' इति१॥ १७. 'कुटीः' इति१॥ १८. द्र. पदचन्द्रिका, भा-२, पुरवर्गः, श्लो-२४, पृ.३६॥, तत्र-"इगुपधत्वात्"(उ.४।११९) कौ 'कुटिश्च' इति दृश्यते ॥ १९. '-यन्ते' इति१॥ २०. अम.क्षीर. न दृश्यते ॥ २०. ५प्रतौ नास्ति ॥ २१. अम. क्षीरस्वामिकृतटीकायाम्-"उदवसिनोति स्मोर्ध्वमवसीयते वोदवसितम् ।" इति दृश्यते, २।२।४॥, पृ.७४॥ २३. 'संस्थाने' इति१॥ २४. '-त्यत्रेति' इति१॥ २५. 'पृषोदरादिः' इति४॥ २६. इतोऽग्रे १प्रतौ 'वा' इति दृश्यते॥ २७. 'चेत्थम्' इति३॥ २८. 'तिः' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यत्प्रत्ययोऽपीत्येके''[[1]]इति स्वामी[2]। ''वस्त्यते याच्यते हिंस्यते वा। 'वस्त गन्ध अर्दने'(चु.उ.से.), अस्माच्चुरादिणिजन्ताद् अचो यति वस्त्यम्''[[3]]इति सर्वधरः । ''यद्वा 'ष्ट्यै स्त्यै शब्दसङ्घातयोः'(भ्वा.प.अ.), अवस्त्यायन्ति संहता भवन्ति जना अत्रेति[4], घञर्थे कः, 'वष्टि भागुरिः-' [ ]इत्यकारलोपे वस्त्यम्, एवमपपूर्वात् कप्रत्यये 'वष्टि भागुरिः'[ ]इत्यकारलोपे[5] पस्त्यमित्यपि''[[1]]इति स्वामिकौमुद्यादयः । तथा च-''निशान्तं सदनं पस्त्यमगारं मन्दिरं पुरम्''[[1]]इत्यारभ्य ''सभोदवसितं[6] वस्त्यम्''[[1]]इति वाचस्पतिकोषः । २१ संस्त्यायन्त्यत्रेति **संस्त्यायः** । 'ष्ट्यै स्त्यै शब्दसङ्घातयोः'(भ्वा.प.अ.), अधिकरणे घञ् । २२ आश्रीयतेऽसौ **आश्रयः** । 'श्रिञ् सेवायाम्'(भ्वा.उ.से.), 'एरच्'३।३।५६॥ इत्यच् । २३ उच्यत्यस्मिन्निति **ओकः** । 'उच समवाये'(दि.प.से.), असुन्, न्यङ्क्वादित्वात् कुत्वम्। ओकसी, ओकांसि इत्यादि। ओकोऽदन्तोऽपि, तत्र घञन्तः, स पुंसि । ''ओकः सद्माश्रयश्चौकाः''[अमरकोषः ३।३।-२३३॥]इत्यमरः । २४ निवसन्त्यस्मिन्निति **निवासः** । 'वस निवासे'(भ्वा.प.अ.), अधिकरणे घञ् । २५ एवम् **आवासः** । २६ वसन्त्यस्यां **वसतिः**, स्त्रीलिङ्गः । 'वस निवासे'(भ्वा.प.अ.), 'वहिवस्यर्तिभ्यश्चित्'(उणा-५००)इति सूत्रेण अतिप्रत्ययः । ''वासतेयी च''[ ]इति क्षीरस्वामी । २७ शीर्यते शीताद्यनेनेति **शरणम्** । 'शॄ[9] हिंसायाम्' (क्र्या.प.से.), करणे ल्युट्। २८ क्षियन्त्यस्मिन्निति[10] **क्षयः** । 'क्षि निवासगत्योः'(तु.प.अ.), अच् ॥९९१॥ २९ दधात्याश्रयं **धाम**, क्लीबे । 'डुधाञ् धारणादौ'(जु.उ.अ.), '-मनिन्'(उणा-५८४)इति मनिन्[11] । 'अर्त्तिहि(रि)-' (हैमोणा-३३८)इति मप्रत्यये धाममदन्तमपि[12] । ३० न गीर्यत इति **अगारम्**[13] । 'गॄ निगरणे'(तु.प.से.), बाहुलकाद् घञ् । अगान् वृक्षानियर्त्ति वा । 'ऋ गतौ'(जु.प.अ.), 'कर्मण्यण्'३।२।१॥ । अग्यतेऽस्मिन्निति वा । 'अगि गतौ'(भ्वा.प.से.), आरकि प्रत्यये साधुः । ह्रस्वादिरयम् । दीर्घादिरपि । आगीर्यत इत्यागारमिति । अगारशब्दस्यैव[14] वा 'अन्येषामपि दीर्घः'६।३।१३७॥ इति दीर्घत्वे । ''विन्द्यादगारमागारमपगामापगामपि''[शब्दभेदप्रकाशः, श्लो-२]इति द्विरूपकोषश्च । ३१ निशायामम्यते गम्यते[15] इति **निशान्तम्**। 'अम्(अम) गतौ'(भ्वा.प.से.), क्तः, 'रुष्यमत्वर-' ७।२।२८॥ इति नेट् । निशायां[16] अन्तो विरामोऽत्रेति वा । ''निशाम्यन्त्यत्र[17]''[अम.क्षीर.२।२।५॥]इति भट्टः । 'शमु[18] उपशमे'(दि.प.से.), 'हसिमृग्रिण्-'(उणा-३६६)इत्यादिना बाहुलकात् तन् । सामान्यत एकत्रिंशद् गृहस्य ॥

## कुट्टिमं[1] त्वस्य बद्धभूः ।

१ कुट्यते **कुट्टिमम्,** पुंक्ली.। 'कुट्ट छेदनभर्त्सनयोः'(चु.उ.से.), णिजन्तः, 'एरच्'३।३।५६॥ इत्यच्[19], कुट्टः। कुट्टेन निर्वृत्तं कुट्टिमम् । 'भावप्रत्ययान्ताद् निर्वृत्तेऽर्थे इमनिज् वक्तव्यः[20]'(वा-४।४।२०॥) । अस्य गृहस्य मणिपाषाणादिभिर्बद्धभूः, तस्या एकम् ॥

## चतुःशालं[1] सञ्जवनम्[2]

१ चतस्रः शालाः समाहृता इति[21] **चतुःशालम्** । 'ह्रस्वो नपुंसके प्रातिपदिकस्य'१।२।४७॥ इति ह्रस्वत्वम् । ''पात्रादित्वात् क्लीबत्वमेव, न स्त्रीत्वम्''[[22]]इति सर्वधरादयः । '' 'आबन्तो वा ह्रस्वत्वम्'(वा-२।४।३०॥) इति, स्त्रीत्वपक्षे चतुःशालेत्यपि (चतुःशालीत्यपि)''[[22]]इति पञ्जिका । ''अभिमुखं शालाचतुष्टयं चतुःशालम्''[[22]]इति श्रीधरः । २ सञ्जवन्त्यत्रेति **सञ्जवनम्** । 'जु' इति सौत्र[23]धातुर्गत्यर्थः, ततोऽधिकरणे ल्युट्। ''समन्तादुपर्यधः संयम्यते संयमनमिति पाठोऽपि''[ ]इति टीकासमुच्चयसारः[24] । तत्र 'कृत्यल्युटो बहुलम्'३।३।११३॥ इति कर्मणि ल्युट् । ''सञ्जवनं स्याच्चतुःशालम्''[हलायुधकोशः २।१९२॥]इति हलायुधः । द्वे 'चउशालं[25] गृहं[26]' इति ख्यातस्य॥

---

१. द्र. पदचन्द्रिका, भा-२, पुरवर्गः, श्लो-२३, पृ.३३॥ २. अम. क्षीरस्वामिकृतटीकायां न दृश्यते ॥ ३. १प्रतौ नास्ति॥ ४. 'इत्यलोपे' इति४॥ ५. '-श्च' इति४॥ ६. 'आलयोद्वसितं' इति पदचन्द्रिका, 'कुलोदवसितं पस्त्यम्' इति रामाश्रमी २।२।५॥, पृ.१५१॥ ७. 'समा-' इति३.५॥ ८. '-ये' इति१॥ ९. 'शॄन्' इति५॥ १०. '-न्त्यत्रेति' इति१.२॥ ११. 'मन्निति मन्' इति१.२॥ १२. '-पीति' इति४॥ १३. '-रः' इति१.४.५॥ १४. 'आ-' इति३.५॥ १५. ४.५प्रत्योर्नास्ति ॥ १६. '-यां' इति३॥ १७. अम.क्षीर.टीकायाम्-'अत्र' इत्यस्य स्थाने 'अस्मिन्' इति दृश्यते, पृ.७५॥ १८. 'शम' इति१.३॥ १९. २.३प्रत्योर्नास्ति ॥ २०. 'भावप्रत्ययान्तादिमप् वक्तव्यः' इति वार्तिकस्वरूपं दृश्यते ॥ २१. ४प्रतौ नास्ति ॥ २२. द्र. पदचन्द्रिका, भा-२, पुरवर्गः, श्लो-२४, पृ.३७॥ २३. 'सौत्रो' इति३॥ २४. द्र. पदचन्द्रिका, भा-२, पुरवर्गः, श्लो-२४, पृ.३६॥, तत्र ''समन्ताद् उपर्यश्च संयम्यते 'संयमनम्' । ''कृत्यल्युटो''(पा.३।३।११३॥)इति कर्मणि ल्युट् । 'संयमन'मिति च पाठः इति टीकासमुच्चयसारः ॥'' इति दृश्यते ॥ २५. 'साल-' इति१.२, '-शाला-' इति३॥ २६. १प्रतौ नास्ति॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सौधं तु नृपमन्दिरम् ॥९९२॥**

१ लेपस्य द्रव्यं सुधा, तद्योगाद् ज्योत्स्नादित्वादणि **सौधम्,** क्लीबे । ''सुधया धवलीकृतं सौधम्'' [अभि., स्वोपज्ञटीका ४।९९२॥]इत्याचार्याः । ''सुधाधवलितं सौधम्''[हलायुधकोशः२।२९४॥]इति हलायुधः। सौधमित्यव्युत्पन्नोऽपि राजसदनवाची । अत एव माघे- ''सेना सुधाक्षालितसौधमसम्पदाम्''[शिशुपालवधम्, सर्गः-१२, श्लो-६२)]इति[1] । एकं नृपमन्दिरस्य ॥९९२॥

**उपकारिकोपकार्या**

१ उपकरोति **उपकारिका** । उपपूर्वः 'डुकृञ् करणे'(त.उ.अ.), ण्वुल् । ''उप अधिकं करोति उपकारी । 'कर्मण्यण्'३।२।१॥, स्वार्थे कनि उपकारिका''[[2]] इति तु स्वामी[3] । २ उप अधिकं क्रियते **उपकार्या** । 'ऋहलोर्ण्यत्'३।१।१२४॥ । ''गृहस्थानं स्मृतं राज्ञामुपकार्योपकारिका''[हलायुधकोषः २।२९०॥]इति हलायुधः । ''राज्ञां गृहभेदे पटादिमये द्वौ''[ ]इति तट्टीका । द्वे पटमण्डपादिराजसदनस्य । 'लूगडां[4] प्रमुखनां[5] घर' इति भाषा ॥

**सिंहद्वारं प्रवेशनम् ।**

१ सिंहस्येव[6] द्वारं **सिंहद्वारम्** । २ प्रविश्यतेऽनेन[7] **प्रवेशनम्** । 'विश प्रवेशने'(तु.प.अ.), 'करणाधिकरणयोश्च'३।३।११७॥ इति करणे[8] ल्युट् । गृहादिप्रवेशे प्रथमद्वारस्य द्वे । यदाह राजवल्लभो नगररचनाधिकारे-''सिंहद्वारचतुष्टयं च, खटकीद्वाराणि चाऽष्टौ, तथेति इदं हि गृहादीनां गमनागमनप्रथमद्वारे वर्तते''[ ]इति गृहावसरे उक्तम् ॥

**प्रासादो देवभूपानाम्**

१ गृहमित्युत्तरतः[9] सम्बध्यते । प्रसीदन्ति नयनमनांस्यस्मिन्निति **प्रासादः** । 'षद्लृ विशरणादौ'(भ्वा.-तु.प.अ.), अधिकरणे घञ्, 'उपसर्गस्य घञ्यमनुष्ये-' ६।३।१२२॥ इति दीर्घः । देवानां भूपानां च गृहनामैकम् । ''गृहमिष्टकादिरचितं प्रासादो देवतानरेन्द्राणाम्'' [हलायुधकोशः २।२९३॥]इति हलायुधः । ''सौधं हि राज्ञ एव स्यादिति सौधादस्य विशेषः, प्रासादसौधयोरेकार्थतेति केचित्''[ ]इति स्वामी ॥

**हर्म्यं तु धनिनां गृहम् ॥९९३॥**

१ हरति मनो **हर्म्यम्**। 'हृञ् हरणे'(भ्वा.उ.अ.), 'मध्यविड्यशिक्य[10]-'(    )इत्यादिना निपातनात् साधुः । एकं धनवद्गृहस्य ॥९९३॥

**मठाऽऽवसथ्याऽऽवसथाः स्युश्छात्रव्रतिवेश्मनि ।**

१ मठन्ति निवसन्त्यत्र, मठ्यतेऽत्रेति **मठः,** त्रिलिङ्गः । 'मठ मदनिवासयोः'(भ्वा.प.से), घञर्थे कः । '' 'पुंसि संज्ञायाम्'३।३।११८॥ इति घः''[ ]इति केचित् । २ आवसथ एव **आवसथ्यम्**। 'अनन्तावसथ-'५।४।२३॥ इति ञ्यः । ३ आवसन्त्यत्र **आवसथः** । 'वस निवासे' (भ्वा.प.अ.), 'उपसर्गे वसेः'(उणा-३९६)इत्यथप्रत्ययः[11] । छात्राणां व्रतिनां च वेश्म गृहम्, तस्य त्रीणि॥

**पर्णशालोटजः**

१ पर्णप्रधाना शाला **पर्णशाला**। शाकपार्थिवादिः। ''पर्णमित्युपलक्षणम्, तेन पर्णतृणादेः शाला पर्णशाला''[अभि., स्वोपज्ञटीका-४।९९४]इत्याचार्याः । २ ''उटस्तृणपर्णादिः''[ ]इति देशीकोषः । ततो जायत इति **उटजः,** ह्रस्वादिः । 'पञ्चम्यामजातौ'३।२।९८॥इति डः । पुंक्लीबलिङ्गोऽयम् । ''उटजोऽस्त्रियाम्''[अमरकोषः२।२।-६॥]इत्यमरः । ''वट्यते वेष्ट्यते तृणपर्णादिभिरित्युटजः [मुनिकुटीरः, पुंक्लीबलिङ्गः,] 'उटजादयः'(हैमोणा-१३४) इत्यजे निपात्यते''[अभि.,स्वोपज्ञटीका-४।९९४॥]इत्याचार्याः । द्वे मुनिवेश्मनः ॥

**चैत्यविहारौ जिनसद्मनि ॥९९४॥**

१ चीयत इति चित्योऽग्निः । 'चित्याग्निचित्ये च'३।१।१३२॥ इति साधुः । तस्येदं **चैत्यम्** । 'तस्येदम्' ४।३।१२०॥इत्यण् । २ विहरन्त्यस्मिन्निति **विहारः,** पुंक्ली.। 'हृञ् हरणे'(भ्वा.उ.अ.), अधिकरणे घञ् । अमरस्तु- ''चैत्यमायतनं तुल्ये''[अमरकोषः२।२।७॥]इति, ''बौद्धानां विहारोऽस्त्री''[[12]]इति च चैत्यविहारौ भिन्नार्थावाह[13] । तत्र

१. इतोऽग्रे २.५प्रत्योः 'माघे' इति दृश्यते॥ २. द्र. पदचन्द्रिका, भा-२, पुरवर्गः, श्लो-२८, पृ.४२॥ ३. अम.क्षीरस्वामिटीकायां न दृश्यते॥ ४ '-डां' इति१॥ ५ '-नां' इति१.२॥ ६ '-स्यैव' इति१॥ ७ '-नेति' इति१॥ ८ 'अधिकरणे' इति३॥ ९ '-त्तरः' इति२॥ १०. '-विशिक्य-' इति३॥ ११. '-याः' इति३॥ १२. अमरकोषे न दृश्यते॥ १३. द्र. स्वोपज्ञटीका ४।९९४॥, पृ.२२०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तु क्षीरस्वामी-''चित्याया इदं चैत्यम्, आयतन्तेऽस्मिन्नि-[1] त्यायतनम्, देवकुले महावृक्षोऽध्वगाश्रयः''[अम.क्षीर.२।२।-७॥]इति व्याख्यत्[2] । ''चैत्यमायतने[3] बुद्धबिम्बेऽप्युद्देश्य-पादपे''[[4]]इति रुद्रः । त्रीणि जिनभवनस्य ॥९९४॥

## गर्भागारेऽपवरको वासौकः शयनास्पदम् ।

१ निर्वातत्वाद् गर्भ इवाऽगारं **गर्भागारम्** । यद्वा अगारस्य[5] गर्भो गर्भागारम् । राजदन्तादित्वात् पूर्वनिपातः, तत्र। २ अपवृणोत्याच्छादयति अपवरः । 'वृञ् आच्छादने'[6](स्वा.उ.से.), अच्। ततः स्वार्थे कन्[7] **[अपवरकः]**। ३ वासाय वासमध्ये वा ओको गृहं **वासौकः** । ४ शयनस्य शय्याया आस्पदं **शयनास्पदम्** । चत्वारि 'ओरडा' इति ख्यातस्य ॥

## भाण्डागारं तु कोशः स्यात्

१ भाण्डस्याऽगारं **भाण्डागारम्** । २ कुश्यति भाण्डमत्रेति **कोशः**, पुंक्ली.। 'कुश श्लेषे'( ), अधिकरणे घञ्। ''कूयते मृग्यते[8] इति कोशः''[अम.क्षीर. २।९।९१॥]इति क्षीरस्वामी[9] । कुष्णातेः कोषः, मूर्धन्यान्तोऽपि । ''कोषस्तु कुड्मले पात्रे दिव्ये खड्गपिधानके। जातिकोषेऽर्थसार्थे च[10]''[विश्वप्रकाशकोशः, षान्तवर्गः, श्लो-८]इति महेश्वरः । द्वे 'भंडार[11]' इति ख्यातस्य ॥

## चन्द्रशाला शिरोगृहम् ॥९९५॥

१ चन्द्रेण अदूरवर्तिना शालते **चन्द्रशाला** । 'शाल शोभायाम्'( ), अच्, टाप्। २ शिरसि सौधस्य गृहं **शिरोगृहम्** । ''शाला प्रासादशिखरे चन्द्रशाला प्रकीर्तिता[12]''[हारावली, अर्धश्लोकावधिः, श्लो-२१(१२१)॥] इति पुरुषोत्तमः। द्वे 'मालीयां[13]' इति ख्यातस्य ॥९९५॥

## कुप्यशाला तु सन्धानी

१ कुप्यं ताम्रादि, तस्य शाला **कुप्यशाला** । २ सन्धीयतेऽस्यां **सन्धानी** । 'डुधाञ् धारणादौ'(जु.उ.अ.), अधिकरणे ल्युट्। द्वे कुप्यशालायाः। 'कांसाना प्रभृति-भाजनमूंकवानूं[14][15] ठामं[16]' इति भाषा ॥

## कायमानं तृणौकसि ।

१ कायः शरीरं[17] मानमस्य[18] **कायमानम्** । २ तृणं[19] काष्ठादेरुपलक्षणम्, तेन तृणकाष्ठादिभिर्गृहस्योपरि रचितमोको लभ्यते । द्वे तृणकाष्ठादिभिर्गृहोपरि रचितगृहस्य । '[20]मेडी' इति भाषा । यथा-''योषा सखः स्वपिति रौहिषकायमाने''[ ]इति । कथम्-''कारयते[21] कायमानानि मुञ्चन्त मन्दं मृदुशाद्वलेषु बलान् बलीवर्दान्''[ ]इति चम्पूगद्यम्? उच्यते, सामान्यविशेषयोरभेदेन विवक्षणादित्यदोषः[22] ॥

## होत्रीयं तु हविर्गेहम्

१ जुह्वत्यस्यां होत्रा । 'हुयामा-'(उणा-६०७)इति त्रन् । होत्रैव **होत्रीयम्** । 'होत्रादिभ्यश्छः[23]'५।१।१३५॥ इति छः, छस्य ईयादेशः। २ हविषो होतव्यस्य घृतादेर्गेहं **[हविर्गेहम्]** । द्वे होमगृहस्य॥

## प्राग्वंशः प्राग्हविर्गृहात्[24] ॥९९६॥

१ अग्निशालायां पत्नीशालाख्य आद्यो भागः, तत्रामैकं **प्राग्वंशः**। वंशः कुलं स्थूणा वा[25]। प्राग् वंशोऽत्रेति प्राग्वंशः । हविषो वह्नेर्गृहं[26] हविर्गृहम्, तस्माद् हविर्गृहात् । ''प्रागाद्य आपीतो मधुपर्कपाकसुरभिः प्राग्वंशजन्मानलः''[ ]इति मुरारिः ॥९९६॥

## आथर्वणं शान्तिगृहम्

१ आथर्वणिकानां धर्म आम्नायः सङ्घो[27] वा आथर्वणः । 'आथर्वणिकस्येको(क)लोपश्च'४।३।१३३॥ इत्यण्। सोऽत्राऽस्ति[28] **आथर्वणम्** । 'अर्शआदिभ्योऽच्' ५।२।१२७॥। २ शान्त्यै गृहं **शान्तिगृहम्** । शान्ती-

---

१. 'आयन्ते' इति१ ॥ २. '-न्' इति३ ॥, अम.क्षीरस्वामिकृतटीकायाम्-''चित्याया इदं चैत्यं देवकुले[ल]महावृक्षोध्वगा[वृक्षाद्युपा]श्रयः । आयतन्तेऽस्मिन्नायतनम्'' इति दृश्यते, अम.क्षीर.२।२।७॥, पृ.७५॥ ३. '-नं' इति५॥ ४. द्र. पदचन्द्रिका, भा-२, पुरवर्गः, श्लो-२५, पृ.३८॥, रामाश्रमी २।२।७॥, पृ.१५२॥ ५. 'आ-' इति३ ॥ ६. 'वरणे' इति क्षीरतरङ्गिण्यादयः ॥ ७. 'कनि' इति४॥ ८. अम.क्षीर.टीकायाम्-'शब्द्यते' इति दृश्यते, २।९।९१॥, पृ.२२०॥ ९. 'स्वामी' इति१॥ १०. विश्वप्रकाशकोशे '-सार्थे च' इत्यस्य स्थाने '-सङ्घाते' इति दृश्यते, पृ.१७१॥ ११. 'भण्डागार' इति५॥ १२. हारावल्याम्-'चन्द्रशालेति १ कीर्तिता' इति दृश्यते, पृ.४०२॥ १३. '-या' इति३.४, '-आ' इति५॥ १४. 'मूकि-' इति३॥ १५. '-नुं' इति२, '-नौं' इति३, '-नौं' इति५॥ १६. 'ठांम' इति२॥ १७. '-र-' इति१॥ १८. 'मानस्य' इति५॥ १९. 'तृण-' इति५॥ २०. 'मै-' इति३.४॥ २१. 'कारय' इति३, '-ति' इति५॥ २२. '-दिति दोषः' इति१॥ २३. 'होत्राभ्यश्छः' इत्यष्टाध्याय्याम् ॥ २४. तुलनीयोऽमरकोषः २।७।१६॥ २५. 'च' इति३.४.५॥ २६. 'वह्नि-' इति५॥ २७. ४प्रतौ नास्ति॥ २८. 'अस्ति' इति ५प्रतौ नास्ति॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गृह[क]मपि। यद्वाचस्पतिः-''आथर्वणं शान्तिगृहं शान्तीगृहकमप्यदः''[ [२] ]इति। द्वे शान्तिगृहस्य ॥

**आस्थानगृहमिन्द्रकम् ।**

१ आस्थानाय गृहम् **आस्थानगृहम्** । २ इन्द्रं कायतीव सश्रीकत्वादिति **इन्द्रकम्** । 'कै शब्दे'(भ्वा.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥ । द्वे राजादिआस्थानस्य। [२]'बैसवानुं[३] घर' इति भाषा ॥

**तैलिशाला यन्त्रगृहम्**

१ तैलिनः शाला **तैलिशाला** । २ तिलनिः-पीडनयन्त्रस्य गृहं **यन्त्रगृहम्** । द्वे तैलिगृहस्य॥

**अरिष्टं सूतिकागृहम्[४] ॥९९७॥**

१ मन्त्रादिन्यासेन नाऽस्ति रिष्टमत्र **अरिष्टम्** । न रिष्यते हिंस्रैः कृतरक्षत्वादिति वा । २ सूतिका प्रसूता स्त्री, तयोपलक्षितं गृहं **सूतिकागृहम्** । द्वे 'सूआवडि'गृहस्य ॥९९७॥

**सूदशाला रसवती पाकस्थानं महानसम् ।**

१ सूदानां शाला **सूदशाला**। २ रसाः सन्त्यस्यां **रसवती**। रस आस्वादो[५]ऽस्त्यस्यां वा । ३ पाकाय पाकस्य वा स्थानं **पाकस्थानम्** । अनसा उपकरणसंभारवत्त्वं लक्ष्यते, ततो महच्च तदनश्चेति **महानसम्**[६] । 'अनोऽश्मायःसरसां जातिसंज्ञयोः'५।४।९४॥ इति टच्समासान्तः । चत्वारि 'रसोडा[७]' इति ख्यातस्य[८]॥

**हस्तिशाला तु चतुरम्**

१ हस्तिनां शाला **हस्तिशाला** । २ चत्यते **चतुरम्** । 'चते याचने[९]'(भ्वा.उ.से.), 'मन्दिवाशिमथिचति-'(उणा-३८)इत्यादिना उरच्[१०] । द्वे हस्तिशालायाः ॥

**वाजिशाला तु मन्दुरा[११] ॥ ९९८॥**

१ वाजिनां शाला **वाजिशाला** । २ मन्दन्ते वाजिनोऽस्यां[१२] **मन्दुरा** । 'मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु[१३]'(भ्वा.आ.से.) 'मन्दिवाशिमथिचति-'(उणा-३८) इत्यादिना उरच् । द्वे वाजिशालायाः ॥९९८॥

**सन्दानिनी तु गोशाला**

१ सन्दानं [१४]बन्धनरज्जुरस्त्यस्यां **सन्दानिनी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः, 'ऋन्नेभ्यो ङीप्'४।१।५॥ । २ गवां शाला **गोशाला** । द्वे गोशालायाः ॥

**चित्रशाला तु जालिनी ।**

१ चित्राऽलङ्कृता शाला **चित्रशाला**। २ जालानि सन्त्यस्यां **जालिनी** । 'अत इनिठनौ'५।२।११५॥ । द्वे चित्रशालायाः ॥

**कुम्भशाला पाकपुटी**

१ कुम्भानां घटानां शाला **कुम्भशाला** । २ पाकेन पुटति संश्लिष्यति[१५] **पाकपुटी** । 'पुट संश्लेषे' (तु.प.से.), 'इगुपध-'३।१।१३५॥ इति कः, गौरादिः । द्वे कुम्भकारशालायाः ॥

**तन्तुशाला तु गर्तिका ॥९९९॥**

१ तन्तुवानाय शाला **तन्तुशाला** । २ कुविन्दस्थितये गर्तोऽस्त्यस्यां **गर्तिका** । 'अत इनिठनौ'५।२।११५॥इति ठन्, 'ठस्येकः'७।३।५०॥ । द्वे वणकरशालायाः ॥ ९९९॥

**नापितशाला वपनी शिल्पा खरकुटी च सा ।**

१ नापितस्य शाला **नापितशाला** । २ वपन्त्यस्यां **वपनी** । 'टुवप् बीजोप्त्यौः[१६]'(भ्वा.उ.अ.), 'करणाधिकरणयोश्च'३।३।११७॥ इत्यधिकरणे ल्युट् । ३ शिल्पं विज्ञानमस्त्यस्यां **शिल्पा** । 'अर्शआदिभ्योऽच्'५।२।१२७॥, अन्तस्थातृतीयपवर्गाद्यान्तः टाबन्तः । ४ खरस्य कुटी **खरकुटी** । चत्वारि नापितशालायाः ॥

**आवेशनं शिल्पिशाला[१७]**

१ आविशन्त्यस्मिन्[१८] **आवेशनम्** । 'विश प्रवेशने' (तु.प.अ.), अधिकरणे ल्युट् । २ गृहादन्यत् कारूणां कर्मस्थानं **शिल्पिशाला** । ''शिल्पिनां स्वर्णकारादीनां

---

१. द्र. स्वोपज्ञटीका४।९९७॥, पृ.२२०॥ २. 'बइ-' इति१.२॥ ३ '-नो' इति४॥ ४ तुलनीयोऽमरकोषः२।२।८॥ ५ '-दम-' इति४॥ ६ ३.४.५प्रतिषु नास्ति ॥ ७ '-डां' इति१॥ ८ 'भाषायाः' इति३॥ ९ 'चते चदे च याचने' इति स्वामी, 'चते चदे याचने' इति मैत्रेयः, 'चते याचने च' इति सायणः ॥ १०. 'इत्युरच्' इति१.२॥ ११. तुलनीयोऽमरकोषः २।२।७॥ १२. '-ऽस्यां वाजिनो' इति१.२॥ १२. '-स्वप्नगतिषु' इति२.३.४॥ १४ 'बन्धनं बन्धान-' इति३.५॥ १५ '-ते' इति३॥ १६. 'मुंडवलिप्त्योः' इति१, 'बीजोप्तौ' इति३, 'डुवप् बीजसन्ताने' इति क्षीरतरङ्गिण्यादयः ॥ १७ तुलनीयोऽमरकोषः२।२।७॥ १८ '-न्त्यत्र' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शाला गृहं शिल्पिशाला''[[1]]इति स्वामी[2]। ''कारूणां कर्मस्थानं शिल्पशाला''[ ]इति निरिकार: पाठ इति रुद्र:। द्वे 'कारखानुं[3]' इति ख्यातस्य ॥

**सत्रशाला प्रतिश्रय: ॥ १०००॥**

१ सत्रं सदादानम्, तस्य शाला **सत्रशाला** । २ प्रतिश्रीयते[4] **प्रतिश्रय:** । 'श्रिञ् सेवायाम्'(भ्वा.उ.से.), 'एरच्'३।३।५६॥ । द्वे [5]शत्रूकारशालाया: ॥ १०००॥

**आश्रमस्तु[6] मुनिस्थानम्**

१ आश्राम्यन्ति[7] तपस्यन्त्यस्मिन्निति **आश्रम:**, पुंक्ली.। 'श्रमु तपसि खेदे च'(दि.प.से.), अधिकरणे घञ्, 'नोदात्तोपदेश-'७।३।३४॥ इति वृद्धिनिषेध:। मुनीनां स्थानं मुनिस्थानम्। एकं मुनिस्थानस्य ॥

**उपघ्नस्त्वन्तिकाश्रय: ।**

१ उपहन्यते समीपे प्रतिज्ञायते **उपघ्न:**। 'उपघ्न आश्रये'३।३।८५॥ इत्युपसङ्ख्यानेन उपधालोपो[8] निपात्यते । इहाऽऽश्रयशब्द: प्रत्यासन्नवचन: । २ अन्तिक आसन्न आश्रय: **अन्तिकाश्रय:** । ''छेदादिवोपघ्नतरोर्व्रतत्यौ'' [रघुवंशम्, सर्ग:-१४, श्लो-१]इति रघु: । द्वे 'पाडोसी-गृह' इति ख्यातस्य ॥

**प्रपा पानीयशाला स्यात्**

१ प्रकर्षेण पिबन्त्यस्यां **प्रपा** । 'पा पाने'(भ्वा.-प.अ.), घञर्थे स्थादित्वात् क: । २ पानीयस्य शाला **पानीयशाला**[9]। ''पानीयशालिकाऽपि, स्वार्थे कनि, 'केऽण:' ७।४।१३॥ इति ह्रस्वत्वम्, 'प्रत्ययस्थात्-'७।३।४४॥ इतीत्त्वं च''[ ]इति मिश्रा: । द्वे प्रपाया: ॥

**गञ्जा तु मदिरागृहम्[11] ॥१००१॥**

१ गञ्जन्ति [12]नदन्ति क्षीवा अस्यां **गञ्जा** । 'गजे[13] गजि [गृज] गृजि गुजे[13] युज युजि शब्दार्था:[14]'(भ्वा.प.से.), 'गुरोश्च हल:'३।३।१०३॥ इत्यकारप्रत्यय:, पुंक्ली. । २ मदिराया गृहं **मदिरागृहम्** । द्वे मदिरागृहस्य ॥१००१॥

**पक्कण: शबरावास:**

१ पच्यतेऽस्मिन् **पक्कण:**, पुंक्ली. । अमरस्तु पुंस्येवाह । बाहुलकात् कणप्रत्यय:, पृषोदरादित्वाद् वा । पच्यत इति पक्, 'कृत्यल्युटो बहुलम्'३।३।११३॥ इति कर्मणि क्विप् । पच्यमान: कणो धान्याद्यंशोऽत्रेति पक्कण: । ''पच्यत इति, नान्यत् कर्म कुरुतेऽत्रेति, 'चितेत:(चिते:) कण: कश्च'(उणा-६१५)इति बाहुलकात् पचेरपि कण:, कश्चान्तादेश: पक्कण:''[[15]]इति सुभूति: । ''पक्कणोऽस्त्रियाम्'' [[15]]इति जातरूप: । ''पक्कणं तु नपुंसकम्''[[15]]इति रत्नकोष: । द्विककारमध्योऽयम् । २ शबराणामारण्य-[16]चण्डालानामावास: **शबरावास:** । द्वे भिल्लादिगृहस्य ॥

**घोषस्त्वाभीरपल्लिका ।**

१ घोषन्ति गावोऽत्रेति **घोष:**। 'घुष स्तुतौ (घुषिर् विशब्दने[17]) (चु.उ.से.), अधिकरणे घञ् । २ ''आभीरा घोषा(गोपा:), तेषां पल्लि(पल्ली) गृहम् **आभीरपल्ली**'' [[18]]इति भट्ट:[19] । ''पल्लि: कुटीसमुदाय:''[[18]]इति तु[20] सर्वधर: । ''पतन्ति चरणेन भ्रमणेन जीवन्ति, क्विपि तो भाव:, तेन (पतो गाव:। ता) [21]लीयन्तेऽत्रेति'' बाहुलकाद् डि:, टिलोप:, 'कृदिकारात्-'(गणसू-६।४।१४३॥)इति ङीषि पल्ली । ''पल्ली स्थानम्''[[18]]इति स्वामी । ''पल्ली ग्राम:[22]''[[18]]इति मिश्रा:। ''आभीरपल्लि: ह्रस्वान्ता''[[18]]इति तु[23] पञ्जिका । ''कुटीग्रामकयो: पल्लि:''[शाश्वतकोश:, श्लो-६७८]इति तु[24] शाश्वत: । द्वे घोषस्य ॥

**पण्यशाला निषद्याऽट्टो हट्टो विपणिरापण: ॥१००२॥**

---

१. द्र. पदचन्द्रिका, भा-२, पुरवर्ग:, श्लो-२५, पृ.३८॥ २. अम.क्षीरस्वामिकृतटीकायाम्-''गृहादन्यत् कारूणां कर्मस्थानं, तेन शिल्पशालेति सभ्य: पाठ:'' इत्येव दृश्यते, २।२।७॥, पृ.७५॥ ३. '-खांनुं' इति३, '-नूं' इति४॥ ४ '-ति' इति५॥ ५. 'स-' इति२॥ ६. '-मं तु' इति५॥ ७ 'आश्रम्यन्ते' इति३, 'आश्रम्यन्ति' इति४.५॥ ८. '-शस्य-' इति४॥ ९. '-पिनो' इति४.५॥ १०. ३.४प्रत्योर्नास्ति ॥ ११. तुलनीयोऽमरकोष:२।२।८॥ १२. 'म-' इति४.५॥ १३. ५प्रतौ नास्ति॥ १४ '-गुज युज युजि शब्दार्था:' इत्यस्य स्थाने क्षीरतरङ्गिण्यादौ 'मुज ('मज' इति स्वामी) मुजि शब्दार्था:' इति दृश्यते ॥ १५. द्र. पदचन्द्रिका, भा-२, पुरवर्ग:, श्लो-३८, पृ.५६॥ १६. '-चा-' इति५॥ १७. 'अविशब्दने' इति मैत्रेय: ॥ १८. द्र. पदचन्द्रिका, भा-२, पुरवर्ग:, श्लो-३८, पृ.५६॥ १९. अम.क्षीरस्वामिकृतटीकायाम्-''आबिभ्यत्यभित ईरयन्ति वा गा आभीरा गोपा: । पल्ल्यते पल्लि: गृहालि:'' इति दृश्यते, २।२।२१॥, पृ.७८॥ २०. ३.४प्रत्योर्नास्ति ॥ २१. 'लीयते' इति३॥ २२. '-मम्' इति३॥ २३. ३प्रतौ नास्ति ॥ २४. १.४प्रत्योर्नास्ति॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ पण्यस्य शाला **पण्यशाला** । २ निषीदन्ति क्रयविक्रयाय जना अस्यां **निषद्या,** चतुर्थवर्गतृतीयान्तस्थाद्यान्तः । 'षद्लृ विशरणादौ'(भ्वा.तु.प.अ.), 'संज्ञायां समजनिषद-'३।३।९९॥ इत्यादिना क्यप्[१], 'सदिरप्रतेः'८।३।६६॥ इति षत्वम् । ३ अट्टन्तेऽस्मिन्[२] **अट्टः,** पुंक्ली.। 'अट्ट गतौ'[३](भ्वा.प.से.), घञ्[४] । ४ हटन्ति दीप्यन्तेऽत्र **हट्टः** । 'हट दीप्तौ'[५](भ्वा.प.से.)। ५ विविधं पणायन्त्यस्याम्[७], विपणन्तेऽस्यामिति वा **विपणिः,** स्त्रीलिङ्गः। 'पण व्यवहारे स्तुतौ च'(भ्वा.प.आ.से.), बाहुलकाद् 'अच इः'(उणा-५७८)। ६ एत्य पणायन्तेऽत्र आ समन्तात् पणायन्ते क्रयविक्रयव्यवहारं कुर्वन्त्यत्रेति **आपणः** । 'पण व्यवहारे स्तुतौ च'(भ्वा.प.आ.से.), 'गोचरसञ्चरवहव्रजव्यजापणनिगमाश्च'३।३।११९॥ इति साधुः । षड् हट्टस्य ॥**१००२**॥

## वेश्याश्रयः[1] पुरं[2] वेशः[3]

१ वेश्यानामाश्रयो **वेश्याश्रयः** । २ पुरति **पुरम्** । 'पुर अग्रगमने'(तु.प.से.), 'इगुपध-'३।१।१३५॥ इति कः । ३ विशति यूनां मनोऽत्र, विशति कामुको वाऽत्र **वेशः** । 'विश प्रवेशने'(तु.प.से.), 'हलश्च'३।३।१२१॥ इत्यधिकरणे घञ् । "नेपथ्ये मृगमात्रे च वेशो वेश्यागृहेऽपि च"[ ][८]इति तालव्यान्ते रभसः । "वेविषति व्याप्तुमिच्छन्ति जनमनांसीममिति[९], पूर्ववद् 'हलश्च' ३।३।१२१॥ इति घञि वेषो मूर्धन्यान्तोऽपि"[ ][८]इति पञ्जिका स्वामी च, तत्तु न हृद्यम्, मूर्धन्यान्तेषु सर्वत्र कोषादावनुपात्तत्वात् ।

"गृहमात्रे गणिकायाः सद्मनि वेशो भवेत् तु तालव्यः[१०] ।
तालव्यो मूर्धन्योऽलङ्करणे[११] कथित आचार्यैः ॥"[ ][८]

इत्युष्मविवेकाच्च । त्रीणि वेश्यागृहस्य ॥

## मण्डपस्तु[1] जनाश्रयः[2] ।

१ मण्डनं मण्डो भूषा, तं[१२] पाति **मण्डपः**। मण्डं पिबतीति, केऽवयवार्थं विनैव रूढिलक्षणया मण्डप इति वा। मण्ड्यते जनैरिति वा ।'मडि भूषायाम्'(भ्वा.प.से.), 'उषिकुटिदनि(दलि)कचिखटि(खजि)भ्यः कपन्'(उणा-४२२)इति बाहुलकात् कपन् । "मण्डपोऽस्त्री"[अमरकोषः२।२।९॥] इत्यमरः। २ जनानामाश्रयो **जनाश्रयः**। द्वे मण्डपस्य ॥

## कुड्यं[1] भित्तिः[2]

१ "कवति(कवते) इति **कुड्यम्** । 'कु[ङ्] शब्दे'(भ्वा.आ.अ.), पृषोदरदित्वाट्टवर्गतृतीयवत् कुड्यम्" [ ][१३]इति सर्वधरादयः । "कवतेर्यत् डुक् च"( )इति यत् वा[१४]"[ ][१३]इति[१५] वामनः । "कुड्यां साधुरिति, 'तत्र साधुः'४।४।९८॥ इति यत्, पृषोदरादित्वाड्डत्वम्"[ ]इति[१५] भट्टः। "कौ द्योतते[१६] इति, डप्रकरणे 'अन्यत्रापि-'३।२।१०१॥ डः"[ ][१३]इति सोमनन्दी, एतेन दराकोऽत्र न डकारः"[ ][१३] इति स्वामी[१७]। क्लीबेऽयम् । वाचस्पतिस्तु- "कुड्यमस्त्रियाम्"[ ][१८]इति पुंस्यप्याह । कुले वेश्मनि साधुः, 'तत्र साधुः'४।४।९८॥ इति यति[१९], डलयोरेकत्वस्मरणाद् डत्वे[२०] कुड्यमिति वा । कोलति संस्त्यायति[२१] कुड्यं वा। 'कुल संस्त्याने'(भ्वा.प.से.), 'कुलेर्ड च-' (हैमोणा-३६२)इति किद् यप्रत्ययः इति वा । २ भिद्यते **भित्तिः,** स्त्रियाम् । भिदेः 'भिदा विदारणे'(वा-३।३।१०६॥)इत्यङो[२२] विधानादन्यत्र स्त्रियां क्तिन् । द्वे भित्तेः ॥

## तदेडूकमन्तर्निहितकीकसम्[1] ॥१००३॥

१ तत् कुड्यम् अन्तर्निहितकीकसं मध्यस्थापितास्थि **एडूकम्** इत्युच्यते । "एडयति ईड्यत इति वा एडूकम्। 'ईड स्तुतौ प्रेरणे च[२३]'(अ.आ.से.), 'उलूकादयश्च' (उणा-४८१)इति निपातनात् साधुः"[ ][२४]इति सोमनन्दी । जातरूपस्तु ह्रस्वमध्यमिच्छति[२५] ओकारमध्यं च, एडुकम्[२६], एडोकं च। तथा च[२७] द्विरूपकोषः-"भवेदेडोकमेडूकमेडुकं च"[ ][२८]इत्यादि । कीकसमस्थि एतत् काष्ठादिकठिनद्रव्योपलक्षकम् ॥**१००३**॥

---

१. 'क्विप्' इति३॥ २. 'अट्टते' इति४.५॥ ३. 'अट्ट अतिक्रमण('-क्रम' इति स्वामी)हिंसनयोः ('-हिंसयोः' इति मैत्रेयः)' इति क्षीरतरङ्गिण्यादयः ॥ ४ १प्रतौ नास्ति॥ ५. '-न्ते' इति३.४॥ ६. 'हट्ट' इति४.५॥ ७ '-यत्य-' इति४.५॥ ८ द्र. पदचन्द्रिका, भा-२, पुरवर्गः, श्लो-२०, पृ.२७॥, रामाश्रमी२।२।२॥, पृ.१५०॥ ९. '-सीति' इति४.५॥ १०. ४.५प्रत्योर्नास्ति ॥ ११. '-न्या-' इति१॥ १२. 'तां' इति३॥ १३. द्र. पदचन्द्रिका, भा-२, पुरवर्गः, श्लो-२२, पृ.३१॥ १४ 'कवतेर्यन् डच्च निवाते वा' इति पदचन्द्रिका, पृ.३१॥ १५. इतोऽग्रे ३प्रतौ 'तु' इति दृश्यते॥ १६. '-तेऽत्रे-' इति३॥ १७. अम.क्षीरस्वामिकृतटीकायां न दृश्यते ॥ १८. द्र. स्वोपज्ञटीका ४।१००३॥, पृ.२२२॥ १९. 'यत्' इति१.४॥ २०. 'डति' इति३.४.५॥ २१. '-ते' इति३॥ २२. '-जो' इति३.४.५॥ २३. 'ईड स्तुतौ' इत्येव क्षीरतरङ्गिण्यादयः॥ २४ द्र. पदचन्द्रिका, भा-२, पुरवर्गः, श्लो २२, पृ.३१॥ २५. 'ह्रस्वत्व-' इति५॥ २६. 'एडूकं' इति४.५॥ २७ ५प्रतौ नास्ति॥ २८. द्र. रामाश्रमी२।२।४॥, पृ.१५१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वेदी वितर्दिः**

१ विदन्त्यस्यामिति इञन्तात् 'कृदिकारात्-' (गणसू ४।१।४५॥)इति ङीषि **वेदी,** स्त्रीलिङ्गः । स्वार्थे कनि, 'केऽणः'[2]७।४।१३॥ इति ह्रस्वत्वे च[2] वेदिकाऽपि[2] । २ 'तर्द हिंसायाम्'(भ्वा.प.से.), 'इन् सर्वधातुभ्यः'(उणा-५५७)इतीनि[3] तर्दिः हिंसा, विगता तर्दिः हिंसाऽस्याः **वितर्दिः,** स्त्रीलिङ्गः । द्वे 'चउकी' इति ख्यातायाः । दारुपरिस्कृता चतुरस्रा विश्रान्तिभूः । यन्माघः-

''रतान्तरे यत्र गृहान्तरेषु वितर्दिनिर्यूहविटङ्कनीडः ।
रुतानि शृण्वन् वयसां गणोऽन्ते वासित्वमापस्फुटमङ्गनानाम् ।१।''

[शिशुपालवधम्, सर्गः-३, श्लो-५५]इति । वेदी च वास्तुशास्त्रे बहुधा । तथा च वास्तुसुतनाम्नि ग्रन्थे-

''चतुष्कोणा तु या वेदी स्वस्तिका सा सुखाप्तये ।
विवाहेऽष्टासने यज्ञे राज्ञां देवार्चनादिषु ॥२॥''[ ]

''द्वे देवागारादौ काष्ठादिचतुष्किकायाः प्राङ्गणादिमध्यगताया वा[4]''[[5]]इति स्वामी । ''दारूपरि धृता[6] चतुरस्रा[7] विश्रन्ति-भूर्वितर्दिरिति भेदः, स्तम्भपीठिकेत्यन्ये''[[8]]इति सर्वधरः । ''चतुष्किकादिगृहमध्यस्थचतुःस्तम्भोपरिवक्रकाष्ठनिर्मिताया वेदिकायाः''[[8]]इति कोक्कटादय इत्येवं बहवो भेदा ग्रन्थ-भूयस्त्वभयान्न लिखिताः ॥

## अजिरं प्राङ्गणं चत्वराऽङ्गने ।

१ अजन्त्यस्मिन् **अजिरम्** । 'अज गतौ[9]'(भ्वा.-प.से), 'अजिरशिशिर-'(उणा-५३)इति किरचि साधुः । २ प्र अङ्गन्त्यत्रेति **प्राङ्गनम्** । 'अगि गतौ'(भ्वा.प.से.), अधि-करणे ल्युट् । अङ्गणमिति (अङ्गणमपि) । ''पृषोदरादित्वा-ण्णत्वम्''[[10]]इति स्वामी[11] पञ्जिका च। ''अङ्गनं नान्तम्''[[10]]इति सर्वधरः । तथा च-''अङ्गनदंशनवेतनयलव्यञ्जन-योजनरत्नवितानम्''[[10]]इति नान्तेषु शबरः[12]। ''अङ्गेरनच् (स.क.२।२।१२४॥)''[[10]]इति श्रीभोजः । ''अङ्गनं प्राङ्गणे (प्राङ्गने) याने कामिन्यामङ्गना मता''[विश्वप्रकाशकोशः, नान्तवर्गः, श्लो-७४]इति[13] विश्वः। ३ चत्यत इति **चत्वरम्** । 'चते चदे गतौ च[14]'(भ्वा.उ.से.), 'छित्वरचत्वर[15]-'(उणा-२८१)इति ट्वरचि(ष्वरचि) निपात्यते । उणादिवृत्तौ तु-'छद अपवारणे'(चु.उ.से.)इत्यस्य निपातनमुक्तम् । चत्वारि अङ्गनस्य ॥

## वलजं प्रतीहारो द्वार्द्वारे

१ वल्यतेऽस्मिन् **वलजम्** । 'वल वल्ल संवरणे[16]'(भ्वा.आ.से.), 'वलेर्वेतिश्च वा (वलेर्वोऽन्तश्च वा)'(हैमोणा-१३३)इत्यजः । २ प्रतिहारयन्ति वार-यन्त्यत्रेति अधिकरणे घञि, 'उपसर्गस्य घञि-'६।३।१२२॥ इति दीर्घत्वे **प्रतीहारः** । प्रतिह्रियन्ते रुध्यन्तेऽनेनेति करणे घञि वा । ३ 'द्वृञ्[17] आवरणे[18]'(भ्वा.प.अ.), चुरादिः (णिजन्तः), द्वारयन्त्यावृण्वन्ति पक्षिणोऽस्यामिति । 'द्वृ अनावरणे'( )इति केचित् पठन्ति, तन्मते द्वार्यते अनावृत्तं[19] क्रियते, सम्पदादित्वात् क्विपि **द्वाः,** द्वारौ, द्वारः इत्यादि स्त्रीलिङ्गः । ४ कर्मणि घञि **द्वारम्** । ''शक्ति-स्वाभाव्याद् घञन्तेऽपि क्लीबत्वम्''[[20]]इति स्वामी, तत्र। सामान्येन चत्वारि द्वारस्य ॥

## अथ परिघोऽर्गला ॥१००४॥

१ परिहन्यतेऽनेन **परिघः** । 'परौ[21] घः'३।३।८४॥ इति कः (इत्यप्)। २ अर्ज्यत इति **अर्गला** । 'अर्ज सर्ज अर्जने[22]'(भ्वा.प.से.), वृषादित्वात् कलच्, न्यङ्क्वादित्वात् कुत्वम् । इयर्तीति वा, पृषोदरादित्वाद्वा, त्रिलिङ्गोऽयम् । यद्गौडः-''अर्गला त्रिषु कल्लोले दण्डे चान्तः कपाटयोः'' [ ]इति । अमरस्तु-''अर्गलं न ना''[अमरकोषः२।२।१७॥] इति स्त्रीक्लीबयोराह[23] । ''लघुविवक्षायां ङीषि[24] अर्गलीत्यपि'' [[25]]इति पञ्जिका । टापि अर्गला । ''वार्यर्गलाभङ्ग इव

१. १.४प्रत्योर्नास्ति ॥ २. 'अपि' इति ४.५प्रत्योर्नास्ति ॥ ३. '-निः' इति३॥ ४ 'च' इति३.४.५॥ ५. द्र. पदचन्द्रिका, भा-२, पुरवर्गः, श्लो-३४, पृ.५०॥ ६. 'भृता' इति४॥ ७ 'विश्रान्त-' इति१॥ ८ द्र. पदचन्द्रिका, भा-२, पुरवर्गः, श्लो-३४, पृ.५१॥, तत्र-'भेदः' इत्यस्य स्थाने 'तु भट्टः' इति दृश्यते॥ ९ 'अज गतिक्षेपणयोः' इति क्षीरतरङ्गिण्यादयः ॥ १०. द्र. पदचन्द्रिका, भा-२, पुरवर्गः, श्लो-३१, पृ.४५॥ ११. अम.क्षीर न दृश्यते॥ १२. 'रभसः' इति३॥ १३. 'इत्यादि' इति४॥ १४. 'चते चदे च याचने' इति स्वामी, 'चते चदे याचने' इति मैत्रेयः, 'चते याचने च' इति सायणः ॥ १५. उणादिसूत्रे चत्वरशब्दस्योल्लेखो न दृश्यते, अथ च 'कृगृशृवृञ्चतिभ्यः'(उणा-२७९) इत्युणादिसूत्रेण समाधेयम् ॥ १६. मैत्रेयमतेऽयम्, 'वल संवरणे' इति स्वामी, 'वल वल्ल संवरणे सञ्चरणे च' इति सायणः ॥ १७ 'वृञ्' इति४.५॥ १८. 'द्वृ वरणे' इति स्वामी, अत्रत्या युधिष्ठिरमीमांसकमहोदयकृता टिप्पणी द्रष्टव्या, क्षीर. पृ.१४६॥, 'द्वृ अनादरे' इति मैत्रेयः ॥ १९. '-वृतं' इति१.२॥ २०. द्र. टीकासर्वस्वम्, भा-२, २।२।१६॥, पृ.३८॥ २१. 'परि' इति१.३.४॥ २२. 'सर्जने' इति३.५॥ २३. '-रिति' इति१॥ २४ 'ङीपि' इति१.२.४.५॥ २५. द्र. पदचन्द्रिका, भा-२, पुरवर्गः, श्लो-३५, पृ.५२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रवृत्तः''[ रघुवंशम्, सर्गः-५, श्लो-४५ ]इति रघुः । द्वे 'भोगलि' इति ख्यातायाः[१] ॥१००४॥

**सा$\,$ऽल्पा[1] त्वर्गलिका सूचिः[2]**

१ सा अर्गला अल्पा लघ्वी **अर्गलिका** । २ सूचयति **सूचिः**, स्त्रीलिङ्गः । 'सूची(सूच) पैशुन्ये'(चु.-उ.से.), 'इन् सर्वधातुभ्यः'(उणा-५५७)इतीन्[२] । द्वे 'आगली' इति ख्यातायाः ॥

**कुञ्चिकायां[1] तु कूचिका[2] ।**
**साधारण्य[3]ङ्कुट[4]श्चासौ**

१ कुञ्च्यतेऽनया **कुञ्चिका** । 'कुञ्च कौटिल्याल्पीभावयोः'(भ्वा.प.से.), 'क्वुन् शिल्पिसंज्ञयोः'(उणा-१९०), तत्र । २ कूचति **कूचिका** । 'कूच सङ्कोचे'[३] ( ), ण्वुल् । ३ साधारन्त्यनया[४] **साधारणी** । करणे ल्युट् । ४ अङ्क्यते **अङ्कुटः** । 'अकि गतौ'[५](भ्वा.-प.से.), 'नर्कुटकुक्कुट-'(हैमोणा-१५५)इत्युटे निपात्यते । चत्वारि '[६]उलाला कुंची' इति ख्यातायाः ॥

**द्वारयन्त्रं[1] तु तालकम्[2] ॥१००५॥**

१ द्वारपिधानाय लोहमयं यन्त्रं **द्वारयन्त्रम्** । २ ताड्यतेऽनेन ताडकं । 'तड आघाते'(चु.उ.से.), हेतुमण्णिजन्तः, लत्वे **तालकम्** । द्वे तालकस्य ॥१००५॥

**अस्योद्घाटनयन्त्रं तु ताल्यपि[1] प्रतिताल्यपि[2] ।**

१ अस्य तालकस्य उद्घाटनाय यन्त्रं उद्घाटनयन्त्रम् । ताड्यतेऽनया **ताली** । 'तड आघाते'(चु.उ.से.), करणे घञि गौरादिः । २ एवं **प्रतिताली** । द्वे '[७]कुंची' इति ख्यातायाः ॥

**तिर्यग्द्वारोर्ध्वदारूत्तरङ्गं[1] स्यात्**

१ द्वारस्य ऊर्ध्वमुपरि तिर्यग्निहितं दारु, उत्तरमूर्ध्वं गच्छति **उत्तरङ्गम्** । 'गम्लृ गतौ'(भ्वा.प.अ.), 'गमश्च' ३।२।४७॥ इति खच्, स च डित्, खित्त्वाद् मुम् । ''उत्तरङ्गं मतं तिर्यग् द्वारस्योपरि दारु यत्''[ हलायुधकोशः २।३००॥]इति हलायुधः । एकमुत्तरङ्गस्य ॥

**अररं[1] पुनः ॥१००६॥**
**कपाटो[2]ऽररिः[3] कुवाटः[4]**

१ इयर्त्ति **अररम्**, क्लीबे । 'ऋ गतौ'(जु.प.अ.), 'अर्तिकमि-'(उणा-४१२)इत्यादिना रन्प्रत्ययः । ''स्त्रियामररी''[[८]]इति पञ्जिका । तथा च-''कपाटश्च कवाटश्च त्रिषु स्यादररं न ना''[ ]इति वाचस्पतिः ॥१००६॥ २ प्रविशतां कं वातं शिरो वा पाटयति वा[९] **कपाटम्** । 'पट भेदे'[१०]( ), णिजन्तः, 'कर्मण्यण्'३।२।१॥। ''जपा(जवा)-दित्वाद् वत्वे कवाटमपि''[[८]]इति भट्टः । स्वामी तु-''कं वायुं वटति वेष्टयति, 'वट वेष्टने'(भ्वा.प.से.), 'कर्मण्यण्'३।२।१॥ कवाटम्, कपाटमित्यपि[११] दृश्यते''[[८]]इत्याह । त्रिलिङ्गोऽयम् । स्त्रियां ङीषि(ङीपि) कपाटी कवाटी च । ३ इयर्ति **अररिः**, पुंक्ली. । पुंसि माला, क्लीबेऽरुणः । ''कवाटं[१२] सक्थ्यस्थिनी दधि तथाऽररिः स्यात्''[[८]]इति क्लीबे वामनोऽपि[१३] । ४ कुत्सितं वट्यतेऽनेन **कुवाटः** । 'वट वेष्टने'(भ्वा.प.से.), करणे घञ् । चत्वारि कपाटस्य ॥

**पक्षद्वारं[1] तु पक्षकः[2][१४] ।**

१ पक्षे पार्श्वे द्वारं **पक्षद्वारम्** । २ पक्ष इव **पक्षकः** । 'इवे प्रतिकृतौ'५।३।९६॥ इति कन् । खटक्किकापि[१५], गृहस्य पार्श्वद्वारमेतत् । द्वे गृहपार्श्वद्वारस्य ॥

**प्रच्छन्नमन्तर्द्वारं[1] स्यात्[१४]**

१ सौधादौ[१६] प्रकर्षेण छन्नमावृतं **प्रच्छन्नम्** । अन्तर्मध्ये स्थितं द्वारमन्तर्द्वारम् । ''द्वे गृहाभ्यन्तरे प्रकोष्ठकद्वारस्य''[[१७]]इति कोकटः[१८] । ''गृहाभ्यन्तकोणकादिद्वारं जालकद्वारं वा प्रच्छन्नादिद्वयेनोच्यते''[[१७]]इति स्वामी । कात्यस्तु-''प्रच्छन्नमन्तर्द्वारं यत् पक्षद्वारं तदुच्यते''[[१९]] इत्येकमेवाऽऽख्यत् । एकं गृहमध्यद्वारस्य ॥

---

१. '-तस्य' इति५॥ २ १.२प्रत्योर्नास्ति ॥ ३ १.२.४.५प्रतिषु नास्ति॥ ४ '-रन्त्य-' इति३॥ ५ 'लक्षणे' इति क्षीरतरङ्गिण्यादयः॥ ६. 'कु-' इति१, 'ऊ-' इति४.५॥ ७. 'कूं-' इति४.५॥ ८ द्र. पदचन्द्रिका, भा-२, पुरवर्गः, श्लो-३५, पृ.५२॥, रामाश्रमी२।२।१७॥, पृ१५६॥ ९ अनावश्यकोऽयं प्रतिभाति ॥ १०. क्षीरतरङ्गिण्यादौ भेदार्थकपटधातुर्न दृश्यते ॥ ११. 'अपि' इति ४प्रतौ न दृश्यते॥ १२. १.२प्रत्योर्नास्ति ॥ १३ '-नेऽपि' इति५॥ १४ तुलनीयोऽमरकोषः२।२।१४॥ १५ 'खट्टिकिकाऽपि' इति३॥ १६ '-धादिप्र-' इति१॥ १७ द्र. पदचन्द्रिका, भा-२, पुरवर्गः, श्लो-३२, पृ.४७॥ १८ '-डः' इति१॥ १९ द्र. अम.क्षीर.२।२।१४॥, पृ.७६॥, स्वोपज्ञटीका ४।१००७॥, पृ.२२३॥, रामाश्रमी२।२।१४॥, पृ.१५५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**बहिर्[1]द्वारं तु तोर[2]णम्** ॥१००७॥

१ द्वाराद् बहिरिति **बहिर्द्वारम्** । २ स्तुवन्तो[1] रणन्ति शब्दायन्तेऽत्रेति **तोरणम्** । "पृषोदरादिः"[[2]]इति स्वामी[3] । "मङ्गलार्थं तुरन्ति त्वरयन्त्यत्रेति, अधिकरणे ल्युटि तोरणः"[[2]]इति तु[4] भट्टः[5] । "'तुरी त्वरणहिंसयोः[6]' ( ), द्वे मूलद्वाराद् बहिर्द्वारस्य"[[2]]इति कोक्कटः । "द्वाराग्रनिखातस्तम्भयोरुपनिबद्धनानारत्नवस्त्रादिमयतोरणस्य" [[2]]इति सर्वधरः । तथा च[7]-"दूराल्लक्ष्यं सुरपतिधनुश्चारुणा तोरणेन"[मेघदूतम्, उत्तरमेघः, श्लो-१२]इति मेघः[8] । अत एव-"द्वाराद् बहिःकल्पनाद् बहिर्द्वारं वन्दनमालेति ([9]ख्यातस्य"[[2]]इति) केचित् । द्वाराग्रे स्तम्भोपरि निबद्धं[10] बहिर्द्वारम्, तस्य द्वे । "द्वाराग्रे स्तम्भोपरि रचितं सिंहद्वाराख्यम्"[ ]इति स्वामी[11] । 'बाहिरलौ[12] बारणा' इति भाषा॥

"तोरणं गोपुरं चैव सुधापङ्कानुलेपनम् ।
कारयामास राजेन्द्रो राजेन्द्रस्यासनालयम् ॥१॥"[ ]इति

हरिवंशः ॥१००७॥

**तोरणोर्ध्वे तु मङ्गल्यं दाम वन्दनमा[1]लिका ।**

१ तोरणस्योपरि मङ्गलार्थं सहकारादिपल्लवनिर्मितं दाम माला। वन्दनाय माला **वन्दनमालिका**। एकं वनर-(वन्दन)मालायाः । तोरणोर्ध्वे बहिर्द्वारस्योपरि मङ्गलार्थं सहकारादिपल्लवनिर्मितं दामबन्धनं वन्दनमालिकेत्यन्वयः । तोरणमपि, यद् हलायुधः-"बुधैर्वन्दनमाला च(तु) तोरणं परिकीर्त्यते"[हलायुधकोशः२।३०१॥]इति । "द्वाराग्र[13]-बद्धमाल्यमालायां द्वौ"[ ]इति तट्टीका ।

**स्तम्भादेः स्यादधोदारौ शि[1]ला**

१ "स्तम्भस्याऽधस्तात् स्तम्भाधारदारुणि **शिला**" [[14]]इति भट्टादयः[15] । शिलति शिला । 'शिल उञ्छे' (तु.प.से.), 'इगुपध-'३।१।१३५॥ इति कः, टाप्, तालव्यादिरयम् । "शिल उञ्छे स्त्रियां ग्रावद्वाराधःस्थितदारुणोः"[[14]]इति तालव्यादौ रभसात्[16] । कप्रत्ययान्ताद् गौरादित्वाद् ङीषि[17] 'शिली' इत्यपि । "तल[18]दारु शिली योषिन्नासा दारूर्ध्वमस्य यत्"[[14]]इति वोपालितः[19] । कुम्भीनामैकं शिला [इति] । वास्तुशास्त्रविदो हि- पूर्वं अङ्गणसमानं 'तलगटा' इति शिलाकुट्टप्रसिद्धभाषाकं स्थापयन्ति, तदुपरि कुम्भी, तदुपरि स्तम्भमिति क्रमः, अत्र तु सामान्येन 'स्तम्भादेरधः' इति कथनात् 'तलगटाकुम्भी' इत्युभयं शिलाशब्देन ज्ञेयम् । गौडास्तु-"स्तम्भोर्ध्वे दार्वन्तरस्थापनार्थं यदासज्यते, सा शिला"[[15]]इत्याहुः । तदा भरणा तदुपरि सिरा, तयोर्नाम शिलेति बोध्यम् ॥

**ना[1]सोर्ध्वदारुणि** ॥१००८॥

१ स्तम्भादेरुपरि स्थितं दारु **नासा** । 'णासृ शब्दे'(भ्वा.आ.से.), 'गुरोश्च-'३।३।१०३॥ इत्यकारः, टाप्। "विज्ञेया [20]नासिका नासा नासा दारूर्ध्व(द्वारोर्ध्व)दारु च" [[14]]इति दन्त्यान्तेषु रभसात्[16] । "नासादार्विति चतुरक्षरं नाम"[ ]इत्येके । एकं स्तम्भादीनामुपरि स्थितकाष्ठस्य नासेति । स्तम्भोपरि भरणा, भरणोपरि च शिर इति सूत्रधाराणां क्रमः[21] । सामान्येनोक्तत्वात् तयोर्नाम नासेत्यर्थः । यदुक्तं वास्तुशास्त्रे राजवल्लभमण्डने-

"गेहोदयं तु विभजेन्नवधा षडंशः
स्तम्भोर्ध्वभागसमकं भरणं शिरश्च ।
कुम्भी ह्युदुम्बरसमैकविभागतुल्या
पट्टिश्च तन्त्रियुतोंऽशसमान एव ॥१॥"

[ ]गृहांशान् कृत्वा स्तम्भादीनामप्यंशाः"[ ]इति । "नासा दारूपरि द्वारस्याऽधो दारुशिला स्त्रियाम्"[[22]]इति माला भिनत्ति, तदा नाशाशब्द उत्तरङ्गपर्यायः, शिलाशब्दो देहलीपर्यायः । स्तम्भादीनामुपरिस्थदारुणि[23] द्वारशाखोर्ध्वदारुणि च यथा-"नासा[24] निवेशितसितासितरक्तपीतबिम्बा विशन्ति वसतीर्विहितातिथेया"[[25]]इति ॥१००८॥

---

१. 'स्तुवतो' इति१ ॥ २ द्र. पदचन्द्रिका, भा-२, पुरवर्गः, श्लो-३४, पृ.५१॥ ३ अम.क्षीरस्वामिकृतटीकायां न दृश्यते ॥ ४ ४प्रतौ नास्ति॥ ५ अम.क्षीरस्वामिकृतटीकायाम्-"मङ्गलार्थं तुरन्त्यत्र तोरणं द्वाराग्रे स्तम्भोपरि रचितं सिंहद्वाराख्यं मङ्गलस्रक् तोरणोर्ध्वे भवेद् वन्दनमालिका" इति दृश्यते, पृ.७७॥ ६. '-सनयोः' इति१ ॥ ७ ३प्रतौ नास्ति॥ ८ 'माघः' इति१.४॥ ९ कोष्ठान्तर्गतपाठः ४प्रतौ नास्ति ॥ १०. 'रचितं' इति१ ॥ ११. 'क्षीरस्वामी' इति१.२॥ १२. '-रिला' इति१.२॥ १३. '-ग्र्य-' इति१ ॥ १४ द्र. पदचन्द्रिका, भा-२, पुरवर्गः, श्लो-३१, पृ.४६॥ १५. अम.क्षीरस्वामिकृतटीकायाम्-"स्तम्भादीनामाधारदारु शिलाख्यं" इति दृश्यते, २।२।१४॥, पृ.७६॥ १६. द्र. रामाश्रमी२।२।१३॥, पृ.१५५॥ १७ 'गौरादिङीषि' इति१.२॥ १८. 'तत्र-' इति३.४॥ १९. द्र. अम.क्षीर.२।२।१४॥, पृ.७६॥, स्वोपज्ञटीका४।१००८॥, पृ.२२३॥ २०. 'नाशि-' इति५॥ २१. '-णाक्रमः' इति१ ॥ २२. द्र. अम.क्षीर.२।२।१४॥, पृ.७६॥, स्वोपज्ञटीका४।१००८॥, पृ.२२३॥, पदचन्द्रिका, भाग-२, पुरवर्गः, श्लो-३१, पृ.४६॥ २३. '-रूणि' इति२॥ २४ 'नाशा' इति४.५॥ २५. द्र. अनेकार्थकैरवाकरकौमुदीटीका, भा-२, २।५७१॥, पृ.३२५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**गोपानसी[1] तु वलभीच्छादने वक्रदारुणि[१] ।**

१ गोपान् स्वर्गिण आनासते आह्वयति **गोपानसी**। 'णासृ शब्दे'(भ्वा.आ.से.), अच्, पृषोदरादित्वादुपधाह्रस्वत्वम्, गौरादित्वाद् ङीष्[२] । यद्वा गोपनं गोपः । भावे घञ् । तमानयति प्राणवन्तं करोति । 'अन प्राणने' (अ.प.से.), [३]स्वार्थे णिजन्तादसुनि 'णेः-'६।४।५१॥ इति णिलोपे 'उगितश्च'४।१।६॥ इति ङीपि[४] गोपानसी। 'मदलि वांकियां[५]' अनयोर्नामैकं गोपानसी, वलभी पटलाधारो वंशपञ्जरः 'किडउ' इति ख्यातः छादनं यस्मिंस्तद् वलभीच्छादनम्, तत्र, वक्रदारुणि वक्रकाष्ठे । ''गोपानसी दारु च वक्रसंस्थम्''[हलायुधकोशः२।३०३॥]इति हलायुधः । ''सौधाग्रभागच्छदसि छादने [६]छज्जाख्ये मदले वा गोपानसी''[ ]इति तट्टीका। ह्रस्वान्ताऽपि वलभिः[७] । तथा च- ''तां कस्यांचिद् भवनवलभौ सुप्तपारापतायाम्''[मेघदूतम्, पूर्वमेघः, श्लो-३८]इति मेघदूतः[८] । अगारवर्णिका विष्कम्भदार्वप्यत्रेत्यन्ये । तथा च चरकः-''गोपानसीनामागारवर्णिकागार(केवार्थ)चिन्तकैः''[चरकसंहिता, सूत्रस्थानम्, अध्या-३०, श्लो-५]इति ॥

**गृहावग्रहणी देहल्युम्बरोदुम्बरोम्बुराः ॥१००९॥**

१ गृहमवगृह्यते परिछिद्यतेऽनया **गृहावग्रहणी** । 'ग्रह उपादाने'(क्र्या.उ.से.), करणे ल्युट् । ''अवगृह्यते द्वारशाखे[९]ऽनया[१०]''[अम.क्षीर.२।२।१३॥]इति [११]तु भट्टः । २ देहनं देहः । 'दिह उपचये'(अ.उ.अ.), भावे घञ्। देहं गोमयादिलेपं लातीति **देहली** । 'ला आदाने'(अ.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥ । ३ [१२]उद्यते क्लिद्यते **उम्बरः**, आद्यस्वरमध्यः । 'उन्दी क्लेदने'(रु.प.से.), पृषोदरादित्वात्[१३] साधुः[१४] । ४ अम्बते स्रंसते जनोऽस्मादिति **उदुम्बरः** । 'अबि लबि स्रंसने[१५]'(भ्वा.आ.से.), उत्पूर्वः, वर्णविकारेणाऽकारस्योत्वम्, [१६]उम्बरचि प्रत्यये। ५ पृषोदरादित्वाद् **उम्बुरः**, पवर्गतृतीयपञ्चमस्वरमध्यः । पञ्च '[१७]उम्बरः' इति ख्यातस्य । ''गृहावग्रहणी देहली चेति द्वयं गृहद्वारभूमौ चतुष्काष्ठाधःप्रस्तारदत्तकाष्ठस्य पाषाणस्य च''[[१८]]इति कोक्कटादयः ''द्वारपिण्डिकायाः''[[१८]]इति स्वामिसुभूती । ''द्वाराग्रे स्थानस्य वीथ्याख्यस्य''[[१८]]इति भट्टादिः[१९] ॥१००९॥

**प्रघाणः प्रघणोऽलिन्दो बहिर्द्वारप्रकोष्ठके ।**

१-२ प्रहन्यते गम्यत इति **प्रघाणः**, एवं **प्रघणः**। 'हन्(हन) हिंसागत्योः'(अ.प.अ.), 'अगारैकदेशे प्रघाणः प्रघणश्च (प्रघणः प्रघाणश्च)'३।३।७९॥ इति हन्तेर्घनादेशः, पक्षे वृद्धिश्च निपात्यते । 'हन्तेरत्पूर्वस्य'८।४।२२॥ इति णत्वमित्येके। णत्वं नेत्यपरे, ते हि- ''तत्र 'उपसर्गात्-' ८।४।१४॥ इत्यनुवर्तन्ते[२०] प्रादीनां चोपसर्गता क्रियायोगे, न चेह क्रियायोगोऽस्ति, प्रघन इत्यनेन गृहैकदेशाभिधानात्, तस्मादेतौ नान्तावेव''[[१८]]इत्याहुः । वयं तु- विश्वधरणिमेदिनिवैजयन्त्यादिषु णान्तवर्गदर्शनाण्णत्वं[२१]निपातनादेव णान्ताविमौ- इति ब्रूमहे । ३ अल्यते भूष्यते द्वारमनेनेति[२२] **अलिन्दः**। 'अलञ् भूषणादौ[२३]'(भ्वा.प.से.), बाहुलकात् 'कलिपुलिभ्यां किन्दच्[२४]'(उणा-५२५)इति किन्दच्[२४], ह्रस्वादिरयम् । ''यस्यामलिन्देषु [२५]न चक्रुरेव''[शिशुपालवधम्, सर्गः-३, श्लो-४८]इति माघः । प्रज्ञाद्यणि आलिन्दो दीर्घादिरपि । तथा च-''गृहैकदेशे आलिन्दः प्रघाणः प्रघणस्तथा''[[२६]] इत्यमरमाला । त्रीणि द्वाराग्रनिकटस्थानस्य । 'बारसाली साले[२७]' इति भाषा । ''द्वारप्रकोष्ठाद् बहिर्द्वाराग्रवर्तिचतुष्किकान्तेऽलिन्दकाख्यः[२८]''[अम.क्षीर.२।२।१३॥]इति क्षीरस्वामी, मूलटीका [अभि., स्वोपज्ञटीका४।१०१०॥] च ॥

---

१. तुलनीयोऽमरकोषः२।२।१५॥ २. 'ङीप्' इति२.३.४.५॥ ३. 'स्वार्थ-' इति१.२.४॥ ४ 'ङीषि' इति१.३, 'ङीप्' इति५॥ ५ '-कया' इति३॥ ६ 'छजा' इति३॥ ७ 'वडभिः' इति१.२॥ ८ 'मेघः' इति३॥ ९ '-ख्ये-' इति२॥ १०. '-शाखानयावग्रहणी' इति अम.क्षीर., पृ.७६॥ ११. २प्रतौ नास्ति॥ १२. 'उं-' इति२.३.४॥ १३. '-दिः' इति४॥ १४. ४प्रतौ नास्ति॥ १५. 'रबि लबि अबि शब्दे' इति क्षीरतरङ्गिण्यादयः ॥ १६. 'उंदु' इति१, 'उम्बु' इति४, 'ऊम्ब' इति५॥ १७ 'ऊ-' इति४.५॥ १८. द्र. पदचन्द्रिका, भा-२, पुरवर्गः, श्लो-३१, पृ.४५॥ १९. अम.क्षीरस्वामिकृतटीकायाम्-'द्वाराग्रं गृह्यते यथा- वीथ्याख्येत्येके' इति दृश्यते, २।२।१३॥, पृ.७६॥ २०. '-र्तते' इति४॥ २१. '-त्वं-' इति३.४॥ २२. 'इति' इति ५प्रतौ नास्ति॥ २३. 'भूषादौ' इति३॥, 'अलँ भूषणपर्याप्तिनिवारणेषु' इति स्वामी, 'अलँ वारणपर्याप्तिभूषणेषु' इति मैत्रेयः, 'अल भूषणपर्याप्तिवारणेषु' इति सायणः ॥ २४. 'किदच्' इति३.४.५॥, 'कुणिपुल्योः किन्दच्' इत्युणादिगणसूत्रम् ॥ २५. 'नक्ष-' इति४.५॥ २६. द्र. टीकासर्वस्वम्, भा-२, २।२।१३॥, पृ.३४॥, पदचन्द्रिका, भा-२, पुरवर्गः, श्लो-३०, पृ.४५, रामाश्रमी२।२।१२॥, पृ.१५४॥ २७. 'शाला' इति३, '-ला' इति४॥ २८. '-उपालिन्दकाख्या' इति अम.क्षीर., पृ.७६॥, 'उपालिन्दकाऽऽख्यः' इति स्वोपज्ञटीका ४।१०१०॥, पृ.२२३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## कपोतपाली विटङ्कः

१ कपोतान् पक्षिणः पालयति **कपोतपाली,** स्त्रीलिङ्गः। 'पाल रक्षणे'(चु.प.से.), 'कर्मण्यण्'३।२।१॥, गौरादिः । २ विशिष्टं टङ्क्यत इति **विटङ्कः** । 'टकि छेदने'[१]( ), कर्मणि घञ्, पुंक्लीबलिङ्गः । द्वे 'कइवाली'[२] इति ख्यातायाः । ''वलभ्यधोभागे कृत्रिमं पक्षिस्थानम्''[ ]इति हलायुधटीका । ''पक्षिविश्रामार्थं बहिर्निर्गतं दारु वक्रदार्वाधारैः[३], पक्षिपङ्क्तिर्हि तत्रोत्कीर्यते'' [अभि-, स्वोपज्ञ-टीका ४।१०१०॥]इति मूलटीका ।

''चित्रंसया कृत्रिमपक्षिपङ्क्तेः[४][५] कपोतपालीषु निकेतनानाम् । मार्जारमप्यायतनिश्चलाङ्गं[६] यस्यां जनः कृत्रिममेव मेने ॥'' [शिशुपालवधम्, सर्गः-३, श्लो-५१]इति माघः ॥

## पटलच्छदिषी समे ॥१०१०॥

१ पटयते पटति[७] गमयति स्थगयत्युदकं वा **पटलः,** त्रिषु। 'पट गतौ'(भ्वा.प.से.), वृषादित्वात् कलच् । ''पटं लातीति पटलः[८]''[अम.क्षीर.२।२।१५॥]इति भट्टः। २ 'छाद्यतेऽनेनेति'[९] **छदिः** । 'छद अपवारणे'(चु.उ.से.), चुरादि[१०]ण्यन्तः, 'अर्चिरुचिशुचिहुसृपिछादिछृदि(छर्दि)भ्यः इस्(इसिः)'(उणा-२६५)इतीस्(-सिः), 'इस्मन्त्रिन्क्विषु च' ६।४।९७॥ इति ह्रस्वः । छदिषी, छदींषि इत्यादि क्लीबे। छादिरिति द्वितीयस्वरादिरपि । छादिः, छादिषी, छादींषि इत्यादि[११] । द्वे 'छाजा[१२]' इति[१३] ख्यातस्य । 'पडाल' इति भाषा ॥१०१०॥

## नीव्रं वलीकं तत्प्रान्तः

१ निश्चयेन व्रियते संव्रियतेऽनेन, नीयते जलमनेन वा[१४] **नीव्रम्** । निपूर्वाद् 'वृञ् वरणे'(स्वा.उ.से.)इत्यस्माद् मूलविभुजादित्वात्[१५] कः, पृषोदरादित्वाद् दीर्घः । 'णीञ् प्रापणे'(भ्वा.उ.अ.)इत्यस्य वा, 'खुरक्षुर-'(हैमोणा-३२६) इति निपात्यते वा । २ वलते संवृणोति **वलीकम्,** पुंक्ली. । 'वल वल्ल संवरणे[१६]'(भ्वा.आ.से.), 'अलीकादयश्च'(उणा-४६५)इति साधुः । वलत्यावृणोति कुड्यादिकं वा, अनेनैव साधुः, वलीनि संवलितानि कानि तोयानि यत्र तद् वलीकम्। 'अन्येषामपि-'६।३।१३७॥ इति दीर्घः। द्वे 'नेव' इति[१७] ख्यातस्य । तस्य छदिषः प्रान्तस्तत्प्रान्तः । ''नीव्रं वलीकं पटलान्तमाहुः[१८]''[हलायुधकोशः २।३०३॥] इति हलायुधः ॥

## इन्द्रकोशस्तमङ्गकः ।

१ इन्द्रेण कुश्यतीव **इन्द्रकोशः** । 'कुश[१९] श्लेषे'(दि.प.से.), अच् । २ ताम्यन्ति काङ्क्षन्त्येनं **तमङ्गः** । 'तमु काङ्क्षायाम्'(दि.प.से.), 'वि(बि)डादिभ्यः कित्'(उणा-११८)इत्यङ्गच्, स च कित् । द्वे 'घोडला' इति ख्यातस्य । निर्यूहोऽपि । ''निर्यूहः शेखरे द्वारे निर्यासे नागदन्तके''[विश्वप्रकाशकोशः, हान्तवर्गः, श्लो-१८]इति महेश्वरः । शेखरो गृहादेर्बहिर्निर्गतं दारु । ''रतान्तरे यत्र गृहान्तरेषु वितर्दिनिर्यूहविटङ्कनीडः''[शिशुपालवधम्, सर्गः-३, श्लो-५५]इति माघः । नागदन्तको भित्तिनिखातकीलकः । यथा-''निर्यूहकोल्लम्बिततारहारैः''[[२०] ]इति ॥

## वलभी छदिराधारः

१ वडति वडभी । 'वड आग्रहणे'( ), सौत्रो धातुः, '[२१]कॄगॄशॄशलिगर्दिभ्योऽभच्'(उणा-४०२)इति बाहुलकादभच्, लत्वे[२२] च[२३] **वलभी**। ''वल संवरणे'(भ्वा.-आ.से.), बाहुलकादभचि पिप्पला(पिप्पल्या)दिदर्शनाद् ङीष्''[मा.धातुवृत्तिः, भ्वादिः, धातुसं-३२२]इति माधवः। अयमिकारान्तोऽपि । छदिषो गृहाच्छादनस्य आधारः छदिराधारः। क्वचित् सुधा क्वचित् तृणानि क्वचिन्मृत्तिका तदाधारभूतवंशपञ्जरादिः । ''आच्छादनं स्याद् वलभी[२४] गृहाणाम्''[हलायुधकोशः२।३०३॥]इति हलायुधः । ''वरण्डिकायां[२५] गृहोपरिस्थितभूमिकायां वा वलभी''[ ]इति

---

१. 'बन्धने' इति क्षीरतरङ्गिण्यादयः ॥ २. 'कवाली' इति५॥ ३. '-दार्वाधः' इति३॥ ४ '-पत्त्रि-' इति शिशुपालवधे, पृ.८०॥ ५ '-क्तिः' इति३॥ ६. '-ङ्गां' इति३॥ ७ '-ते' इति३॥ ८. 'पटं लाति पटलं' इति अम.क्षीर., पृ.७६॥ ९. १.२प्रत्योर्नास्ति ॥ १०. '-दिर्ण्य-' इति१.३॥ ११. इतोऽग्रे ४प्रतौ 'क्लीबे' इति दृश्यते ॥ १२. 'छाज' इति१.२॥ १३. 'इत्या-' इति५॥ १४ इतोऽग्रे ५प्रतौ 'पुंक्ली' इति दृश्यते ॥ १५. '-देः' इति४॥ १६. 'वल संवरणे' इति स्वामी, 'वल वल्ल संवरणे' इति मैत्रेयः. 'वल वल्ल संवरणे सञ्चरणे च' इति सायणः ॥ १७ 'इत्या-' इति३॥ १८. '-लात-' इति४.५॥ १९. दुर्गसम्मतोऽयं धातुः, द्र. क्षीर., दिवादिः, धातुसं-११२, पृ.२२९॥, मा. धातुवृत्तिः, दिवादिः, धातुसं-११७, पृ.४३८॥ २०. द्र. अनेकार्थकैरवाकरकौमुदीटीका, भा-२, ३।७५९॥, पृ.३१२॥ २१. 'कृशृशलि-' इत्युणादिगणे ॥ २२. १.२.३प्रतिषु नास्ति॥ २३. स्वामिसम्मतोऽयं धातुपाठः ॥ २४ 'वल्लभी' इति५॥ २५. '-याः' इति४.५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तट्टीका । सामान्येन कडाप्रमुखछज्जनामैकं[1] वलभी[2] । वलभीशब्दो मइडीपर्यायोऽपि[3] । "वलभिः गृहोपरि कुटिः पटलाधारश्च वंशपञ्जरः"[ ]इति लिङ्गानुशासनविवरणम् । "यस्यामसेवन्त नमद्वलीकाः समं वधूभिर्वलभीर्युवानः" [शिशुपालवधम्, सर्गः-३, श्लो-५३]इति माघः । "यस्यां द्वारकायां युवानः वधूभिः समं वलभीरुपरि वसतीर्भेजिरे" [ ]इति तट्टीका । वरण्डीपर्यायोऽप्ययम् ॥

**नागदन्तास्तु दन्तकाः ॥१०११॥**

१ नागस्येव दन्ता **नागदन्ताः** । २ दन्तप्रतिकृतयो **दन्तकाः** । 'इवे प्रतिकृतौ'५।३।९६॥ इति कन्[4] । 'खूंटा' नाम्नी द्वे । निर्यूहोऽपि । "द्वार्यापीडे क्वाथरसे निर्यूहो नागदन्तके"[अमरकोषः ३।३।२३६॥]इत्यमरः । "आपीडो गृहादेर्निःसृतं[5] दारु, नागदन्तको भित्तिस्थः कीलकः"[ ]इति तट्टीका ॥१०११॥

**मत्तालम्बोऽपाश्रयः स्यात् प्रग्रीवो मत्तवारणे ।**

१ मत्तैः प्रमादिभिरालम्ब्यते **मत्तालम्बः** । २ अपाश्रीयते **अपाश्रयः** । ३ प्रसृता ग्रीवोऽत्र **प्रग्रीवः**, पुंक्लीबलिङ्गः[6] । ४ मत्तान् वारयति **मत्तवारणः** । नन्द्यादित्वाल्ल्युः । जनानामुपवेशनार्थस्थानम्, तत्र । मत्तवारणानामानि[7] चत्वारि ॥

**वातायनो गवाक्षश्च जालके**

१ वातस्याऽयनं गमनमनेनेति **वातायनः**, पुंक्लीबलिङ्गः[8] । पुंसि वामनः, क्लीबे माला । २ गवां नयनरश्मीनामक्षीव, यथा अक्ष्णो नयनाद् रश्मयः प्रसरन्ति तथाऽत्राऽपीति भावः । 'अक्ष्णोऽदर्शनात्'५।४।७६॥ इत्यच्समासान्तः, 'अवङ् स्फोटायनस्य'६।१।१२३॥ इति व्यवस्थितविभाषया जालके नित्यमवङ् **गवाक्षः**, पुंसि। प्राणिनि तु गोऽक्षः । "वधूदृगयनं गवाक्षो जालकं वा"[ ]इत्यन्ये। ३ जलति जालम्। 'जल घात्ये[9]'(भ्वा.प.से.), ज्वलादित्वाण्णः, के **जालकः**, तत्र । 'गउख'नामानि त्रीणि ॥

**अथाऽन्नकोष्ठकः ॥१०१२॥**

**कुसूलः**

१ कुष्णाति कोष्ठः, पुंसि । 'कुष निष्कर्षे' (क्र्या.प.से.), 'उषिकुषि-'(उणा-१६१)इति थन्[10], स्वार्थे कनि कोष्ठकः । अन्नस्य कोष्ठकः **अन्नकोष्ठकः** ॥१०१२॥ २ कुस्यति[11] धान्येनेति **कुसूलः** । 'कुस श्लेषे' (दि.प.से.), 'कुसेरूलः'( )इत्यूलः। "कुसीदं च कुसूलं च मध्यदन्त्यमुदाहृतम्"[ ]इति शब्दप्रभेदः । तालव्यमध्योऽपि । धान्यगृहस्य द्वे । 'कोठार' इति भाषा ॥

**अश्रिस्तु कोणोऽणिः कोटिः पाल्यस्त्र इत्यपि ।**

१ आश्रीयत इति **अश्रिः** । आङ्पूर्वात् 'श्रिञ् सेवायाम्'(भ्वा.उ.से.)इत्यस्मात् 'आङि श्रिहनिभ्यां ह्रस्वश्च' (उणा-५७७)इति सूत्रेण इण्प्रत्ययः, स च डित्, आङो ह्रस्वत्वं च। अश्नुत इति वा अश्रिः । 'वङ्क्र्यादयश्च'(उणा-५०६)इति साधुः, स्त्रीलिङ्गः । २ कुणति **कोणः**। 'कुण शब्दोपकरणयोः[13]'(तु.प.से.), पचाद्यच् । ३ अणति[13] **अणिः**, पुंस्त्रीलिङ्गः। 'अण शब्दे'(भ्वा.प.से.), '-इन्' (उणा-५५७) इतीन्प्रत्ययः। ४ कुटति **कोटिः**, स्त्रीलिङ्गः। 'कुट कौटिल्ये' (तु.प.से.), इन् । ५ पलति पालिः। 'पल गतौ'(भ्वा.प.से.), 'कृहृ(शॄ)कुटि-'(हैमोणा-६१९)इति णिदिः, ङ्यां **पाली** । ६ अस्यतेऽस्मिन्निति **अस्रः** । 'असु क्षेपणे'(दि.प.से.), 'स्फायितञ्चि-[14]'(उणा-१७०)इति [बाहुलकाद्] रक्। दन्त्यरेफाद्यस्वरान्तः। 'खूणा'नामानि षट् ॥

**आरोहणं तु सोपानम्**

१ आरुह्यतेऽनेनेति **आरोहणम्** । करणे ल्युट् । २ उपपूर्वादनितेर्भावे घञ्, धातूनामनेकार्थत्वादुपमानमाधिक्येन प्रापणम्, तेन सह वर्तत इति **सोपानम्** । "सह उपानेन ऊर्ध्वगमनेन वर्तते[15] इति सोपानम्"[[16]]इत्यन्ये । "सोपानपथमुत्सृज्य वायुवेग[:] समुद्धतः (समुद्धतः)" [काव्यालङ्कारः २।१।२२॥] "स वायुवेगसमुद्धतोऽपानपथमुत्सृज्य"[ ]इति पदभङ्गेऽश्लीलत्वाद् भेदे दन्त्यादित्वम्, "सौपानसिन्धुसाध्याः सम्बाधसमूहसत्त्राणि"[[16]]इति दन्त्यादावूष्मविवेकाच्च । पाषाणेष्टकादिकृतारोहणमार्गनाम्नी द्वे । 'पाउँड[17] साला' इति भाषा ॥

---

१. '-छज-' इति३.४॥ २. ४प्रतौ नास्ति ॥ ३ 'मइड्डी-' इति१, 'मै-' इति३॥ ४ 'कः' इति१.२॥ ५. 'निसृतं' इति१.२.३॥ ६. 'पुंक्लीबः' इति४॥ ७ '-नां नामा-' इति१॥ ८ 'पुंक्लीबः' इति५॥ ९ 'धान्ये' इति मैत्रेयः, 'घातने' इति सायणः॥ १०. 'घञ्' इति३.५॥ ११. '-ते' इति३॥ १२. 'शब्दप्रकरणे' इति३॥ १३. 'अणिति' इति१॥ १४ '-तञ्चि-' इति १.२.३प्रतिषु नास्ति ॥ १५. १प्रतौ नास्ति॥ १६. द्र. पदचन्द्रिका, भा-२, पुरवर्गः, श्लो-३६, पृ.५३॥ १७ '-डा' इति१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

### नि:श्रेणि[1]स्त्वधिरोह[2]णी ॥१०१३॥

१ निश्चयेन श्रयन्ति प्राकारादिकमनयेति **नि:श्रेणि:**, स्त्रीलिङ्ग: । [१]निर्पूर्वात् 'श्रिञ् सेवायाम्'(भ्वा.उ.से.), अस्माद् 'वहिश्रिञ्(श्रि)युस्तुग्लै(ग्ला)हात्वरिभ्यो नित्'(उणा-४९१)इति सूत्रेण [२]निप्रत्यय: । ''अविसर्जनीयनिःशब्दाद् नियता श्रेणि: पङ्क्तिरत्र''[ [३] ]इति तु स्वामी[४] । ङीषि [५]निश्रेणी वा। २ अधिरुह्यते[६]ऽनयेति **अधिरोहणी**[७] । 'रुह आरोहे'[८](भ्वा.-प.अ.), करणे ल्युट्, ङीप्[९] । दारुवेण्वादिकृताधिरोहण-मार्गस्य द्वे । 'नीसरणी' इति भाषा ॥१०१३॥

### स्थूणा[1] स्तम्भ[2]:

१ तिष्ठत्यनया धाम इति **स्थूणा,** स्त्रीलिङ्ग: । 'ष्ठा गतिनिवृत्तौ'(भ्वा.प.अ.), 'रास्नासास्नास्थूणावीणा:'(उणा-२९५)इति सूत्रेण निपात: । २ स्तम्भ्यते[१०] **स्तम्भ:** । 'स्तम्भुं[११] रोधने' [सौत्र:], कर्मणि घञ् । द्वे स्तम्भस्य ॥

### सालभञ्जी[1] पाञ्चालिका[2] च[१२] पुत्रिका[3] । काष्ठादिघटिता

१ सालं वृक्षं भनक्ति तन्निर्मितत्वात् **सालभञ्जी** । 'भञ्जू[१३](भञ्जो) आमर्दने'(रु.प.अ.), अच्, गौरादि: । २ पञ्च्यते पञ्चाली । 'पचि विस्तारे[१४]'(चु.आ.से.), काल-न्प्रत्यय:, गौरादि: ।. स्वार्थे कनि पञ्चालिका । प्रज्ञाद्यणि **पाञ्चालिका** । पञ्चालदेशे भवा वा[१५] । ३ कृत्रिमा पुत्री **पुत्रिका** । 'पुत्रात् कुत्रिमे(पुत्र कुत्रिमे)'(गणसू-५।४।-२९॥)इति कन् । त्रीणि[१६] 'पूतली' इति ख्याताया: । काष्ठादिघटिता काष्ठदन्तादिमयी ढूलाढूलीनामान्यप्यमूनि । ''पाञ्चालिका पुत्रिका च[१७] वस्त्रदन्तादिभि: कृता''[अमरकोष: २।१०।२९॥]इत्यमर: । ''यया बाला: खेलन्ति''[अम.क्षीर.२।१०।२९॥]इति क्षीरस्वामी । आदे: चर्मादिमय्यपि। ''पाञ्चालीमिथुनं व्यधायि विधिना गौरीगिरीशावपि''[ ]इति खण्डप्रशस्ति: ॥

### लेप्यमयी[1] त्वञ्जलिकारिका ॥१०१४॥

१ लेप्यनिर्मिता पुत्रिका लेप्यमयी। अञ्जलिं करोति **अञ्जलिकारिका** । ण्वुल् । एकं लेप्यमय्या: ॥१०१४॥

### नन्द्यावर्त्तप्रभृतयो[1] विच्छन्दा[2] आढ्यवेश्मनाम् ।

१ आढ्यवेश्मनां धनिनां गृहिणां नन्द्यावर्त्तप्रभृतयो विच्छन्दा रचनाविशेषा: । नन्दयतीति नन्दी, नन्दी आवर्त्तो यस्य स[१८] **नन्द्यावर्त्त:** । नन्द्याविव आवर्त्तोऽस्येति वा । २ विशिष्टं छन्दोऽभिप्रायोऽत्रेति **विच्छन्द:**। ''विशिष्टेच्छा-निर्मितो विच्छन्दक:''[ [१९] ]इति सर्वधर: । ''[उ]छृदिर् दीप्तिदेवनयो:'(रु.उ.से.), ण्वुल्, विच्छर्दक:[२०]'' इत्यन्ये'' [ [१९] ]इति भट्ट: । प्रभृतिग्रहणात् स्वस्तिकसर्वतोभद्राद्या: ।

''स्वस्तिको वर्धमानश्च[२१] नन्द्यावर्त्तादयोऽपि च[२२] ।
विच्छन्दकविशेषा: स्युरमी भूपतिवेश्मनाम् ॥१॥''

[हलायुधकोश: २।३०५॥]इति हलायुध: । ''विच्छन्दकेन सह स्वस्तिकादयो राज्ञां गृहभेदा भवन्ति''[ ]इति तट्टीका। विच्छन्दकमपि राज्ञो गृहविशेषमाह-

''स्वस्तिक: सर्वतोभद्रो रुचको वर्धमानक: ।
नन्द्यावर्त्तादयश्चाऽन्ये द्वाराऽलिन्दादिभेदत: ॥२॥''[ [२३] ]इत्यन्ये॥

### समुद्ग[1] सम्पुट[2]:

१ समुद्गम्यते समुद्गच्छति वा **समुद्ग:**। 'क्वचिड्ड:'( )इति ड: । २ सम्पुट्यते श्लिष्यते **सम्पुट:** । 'पुट संश्लेषे'(तु.प.से.), 'घञर्थे कविधानम्'(वा-३।३।५८॥)इति क:। भूषणाद्यावपनम्। पुटोऽपि । द्वे 'दाबडा' इति ख्यातस्य ॥

### पेटा[1] स्यान्मञ्जूषा[2]

१ पेटति **पेटा** । 'पिट संहतौ[२४]'(भ्वा.प.से.), 'इगुपध-'३।१।१३५॥इति क: । '''पीङ् पाने[२५]'(दि.आ.अ.),

---

१. 'निपू-' इति १.३.५॥ २. 'नि:-' इति३॥ ३. द्र. पदचन्द्रिका, भा-२, पुरवर्ग:, श्लो-३६, पृ.५३॥ ४. अम.क्षीरस्वामिकृतटीकायाम्-''निश्रयति भित्तिं नियता श्रेणि: सोपानपङ्क्तिर्वात्र निश्रेणि:।'' इति दृश्यते, २।२।१८॥, पृ.७७॥ ५. 'नि:श्रे-' इति१.३॥ ६. '-न्ते' इति१॥ ७. '-हिणी' इति१.३.५॥ ८. 'रुह बीजजन्मनि' इति स्वामी, 'रुह जन्मनि प्रादुर्भावे' इति मैत्रेय:, 'रुह बीजजन्मनि प्रादुर्भावे च' इति सायण:॥ ९. 'ङीपि' इति४, 'ङीषि' इति३.५॥ १०. 'स्तभ्यते' इति३, ४प्रतौ नास्ति ॥ ११. '-म्भ' इति१॥ १२. 'तु' इति३॥ १३. 'भंजु' इति१.२॥ १४. चुरादौ 'पचि विस्तारवचने' इति स्वामिसायणौ, 'पचि विस्तारे वचने' इति मैत्रेय:॥ १५. ५प्रतौ नास्ति॥ १६. 'चत्वारि' इति१.३॥ १७. 'स्याद्' इत्यमरकोषे ॥ १८. ४प्रतौ नास्ति ॥ १९. द्र. पदचन्द्रिका, भा-२, पुरवर्ग:, श्लो-२९, पृ.४२॥ २०. '-र्छिक:' इति३॥ २१. '-नाद्याश्च' इति१॥ २२. '-यस्तथा' इति हलायुधकोशे, पृ.३६॥ २३. द्र. टीकासर्वस्वम्, भा-२, २।२।११॥, पृ.३२॥, तत्र-'श्चान्ये' इत्यस्य स्थाने '-श्चापि' इति दृश्यते ॥ २४. 'पिट शब्दसङ्घातयो:' इति क्षीरतरङ्गिण्यादय: ॥ २५. 'पीडने' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अस्मात् पेटा''[ ]इति तु श्रीभोजः । स्त्रीलिङ्गः, पुंसि पेटकोऽपि । 'पीडण् गहने'(   )इत्यस्य 'पेडा' इति तृतीयवर्गतृतीयान्तोऽपि । २ मञ्जु मनोज्ञं कृत्वा वस्त्राद्यैरुष्यतेऽत्रेति **मञ्जूषा** । मञ्जति मञ्जूषा, मञ्जिः सौत्रो धातुः, बाहुलकादूषन् । मज्जत्यस्यां सर्वद्रव्यमिति वा । 'मस्जेर्नुम् च'(उणा-५१७)इत्यूषन् । द्वे 'पेई' इति ख्याताया: ॥

## अथ शोधनी[1] ॥१०१५॥

## संमार्जनी[2] बहुकरी[3] वर्धनी[4] च समूहनी[5] ।

१ शोध्यते निर्मलीक्रियते गृहमनयेति **शोधनी** । 'शुध शुद्धौ'[१](दि.प.अ.), करणे ल्युट् ॥१०१५॥ २ [संमृज्यतेऽनया **संमार्जनी**] । ल्युट्, 'मृजेर्वृद्धिः'७।२।११४॥ इति वृद्धिः। ३ बहु करोति **बहुकरी** । पचाद्यच्, पुंस्त्रीलिङ्गः । ४ वर्धते श्रीरनयेति **वर्धनी** । 'वृधु[२] वृद्धौ'(भ्वा.आ.से.), करणे ल्युट् । ५ समूह्यते रजोऽनयेति **समूहनी**। पञ्च 'बुहारी' इति ख्याताया: ॥

## सङ्करा[1]ऽवकरौ[2] तुल्यौ

१ समूह्य कीर्यते **सङ्करः**। 'कॄ विक्षेपे'(तु.प.से.), 'ॠदोरप्'३।३।५७॥ इत्यप् । ''सङ्कीर्यते संमिश्र्यत इति कर्मणि घञि[३] सङ्कारः''[[४]]इति सुभूत्यादयः, स्वामी[५] च। भट्टस्तु-'' 'ॠदोरप्'३।३।५७॥''[[४]]इत्येवमाह। २ अवकीर्यते निरस्यत **अवकरः** । 'कॄ विक्षेपे'(तु.प.से.), 'ॠदोरप्'३।३।५७॥ । द्वे 'ऊकरडा' इति ख्यातस्य॥

## [६]उदूखलमुलूखलम्[७] ॥ १०१६॥

(उदूखलम्[1], उलूखलम्[2])

१ उदूर्ध्वं खं शून्यं लाति[८], उदूर्ध्वं मुखमस्येति वा[९] पृषोदरादित्वाद् उदूउलू[१०] इत्येतावादेशौ, मुखपक्षे मुखखकारस्य खलादेशः **उदूखलम्, उलूखलम्**। द्वे '[११]ऊखल' इति ख्यातस्य ॥१०१६॥

## प्रस्फोटनं[1] तु

१ प्रस्फोट्यतेऽसारं बहिःक्रियतेऽनेनेति **प्रस्फोटनम्**। 'स्फुट भेदने'(चु.उ.से.), करणे ल्युट्। एकं निर्बुसीकरणस्य । 'ऊपणवउं[१२]' इति भाषा ॥

## पवनम्[1]

१ पूयते **पवनम्** । 'पूञ् पवने'(क्र्या.उ.से.), ल्युट् । एकं तुषादिशोधनस्य । 'झाटकणउं[१३]' इत्यादिभाषा॥

## अवघातस्[1]तु कण्डनम्[2] ।

१ मुसलेनाऽवहननम् **अवघातः**। 'हन हिंसागत्योः'(अ.प.अ.), भावे घञ्, 'हनस्तोऽचिण्णलोः'७।३।३२॥ इति तकारः, 'हो हन्तेः-'७।३।५४॥ इति कुत्वम् । २ कण्ड्यते **कण्डनम्** । 'कडि भेदने'(चु.उ.से), ल्युट्। द्वे 'खांडणउं[१४]' इति ख्यातस्य ॥

## कटः[1] [१५]किलिञ्जः[2]

१ कटत्यावृणोति **कटः**, त्रिषु । 'कटे वर्षावरणयोः'(भ्वा.प.से.), अच् । २ 'किल शै(श्वै)त्यक्रीडनयोः'(तु.प.से.), 'इक् कृष्यादिभ्यः'(वा-३।३।१०८॥) इतीक्[१६]। [१५]किलिः श्वैत्यम्, तज्जनयतीति[१७] [**किलिञ्जः**]। 'अन्येषामपि(अन्येष्वपि) दृश्यते'३।२।१०१॥इति डः, 'तत्पुरुषे कृति-'६।३।१४॥ इत्यलुक् । किलिर्हि छायाजननाच्छै(च्छ्वै)त्यं जनयति । द्वे '[१८]वीरणवंशादिनिर्मितकडा' इति ख्यातस्य ॥

## मुसलो[1]ऽयोग्रम्[2]

१ मुस्यति खण्डयति धान्यादिकमिति **मुसलः** । 'मुस खण्डने'(दि.प.से.), वृषादित्वात् कलच् । मुहुः स्वनं लाति, मुहुर्मुहुर्लसतीति वा, पृषोदरदित्वात्। ''मुषलो मूर्धन्यमध्योऽपि''[ ]इति वर्णदेशना । २ अयो लोहमग्रे मुखेऽस्य **अयोग्रम्**, पुंक्ली. । अयोनिरित्येके[१९] । ''अयोनिर्मुसलोऽस्त्री स्यात्''[वैजयन्तीकोषः ४।३।६५॥]इति वैजयन्ती । द्वे [२०]मुसलस्य ॥

## कण्डोलकः[1] पिटम्[2] ॥१०१७॥

१. 'शौचे' इति क्षीरतरङ्गिण्यादयः ॥ २. 'वृध' इति३॥ ३. 'घञ्' इति४.५॥ ४ द्र. पदचन्द्रिका, भा-२, पुरवर्गः, श्लो-३६, पृ.५४॥ ५. अम.क्षीरस्वामिकृतटीकायां न दृश्यते॥ ६. 'उलू-' इति५॥ ७ तुलनीयोऽमरकोषः२।९।२५॥ ८ इतोऽग्रे ३प्रतौ 'उदूखलः' इति दृश्यते॥ ९. 'च' इति३॥ १०. 'उलु' इति२॥ ११. 'उ-' इति२.३॥ १२. '-वौ' इति३.४॥ १३. '-णों' इति१, '-णौ' इति३.४॥ १४ '-णउ' इति१, '-णा' इति३॥ १५. 'क-' इति१.३॥ १६. 'इति कः' इति३॥ १७. 'तज्जानातीति' इति४.५॥ १८. 'वीरण:-' इति१॥ १९. द्र. अम.क्षीर.२।९।२५॥, पृ.२०५॥, स्वोपज्ञटीका ४।१०१७॥, पृ.२२५॥ २०. 'मुश-' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ कण्ड्यतेऽनेनेति कण्डोलः । 'कडि भेदने' (चु.प.से.), 'पटिकटिकडिभ्य ओलच्'[१](उणा-६६)इत्योलच्, कनि **कण्डोलकः** । २ पेटति[२] संहतो भवति **पिटम्,** पुंक्ली. । 'पिट शब्दसङ्घातयोः'(भ्वा.प.से.), 'इगुपध-' ३।१।१३५॥ इति कः । के ''पिटकोऽपि''[अम.क्षीर. २।९।२६॥]इति स्वामी । द्वे पिटस्य। सूंडला, ओडला छावडी[३]त्यादिभाषा[४] **॥१०१७॥**

## चालनी तितउः

१ चाल्यते तण्डुलादिशोधनायेति **चालनी,** स्त्री-क्लीबम्[५] । 'चल विलसने'(तु.प.से.), णिजन्तः, कर्मणि ल्युट्। चाल्यतेऽनयेति करणे वा ल्युट् । क्लीबे चालनम्। ''चालनी''[त्रिकाण्डशेषः२।९।५॥]इति त्रिकाण्डशेषः। २ तनोति चाल्यं द्रव्यमिति **तितउः,** पुंक्ली.। 'तनु विस्तारे' (त.उ.से.), 'तनोतेर्डउः सन्वच्च'(उणा-७३०)इति डउः प्रत्ययः, सन्वद्भावाद् द्वित्वम्, 'सन्यतः'७।४।७९॥ इतीत्वम्, आद्गुणाभावस्तु डउविधानसामर्थ्याद्, अन्यथा लाघवार्थं डोरित्येव ब्रूयात्, पुंसि भानुवत्, तितऊ, तितावः इत्यादि। क्लीबे तितउनी, तितऊनि इत्यादि । द्वे चालन्याः ॥

## शूर्पं प्रस्फोटनम्

१ शूर्पयति **शूर्पम्** । 'शूर्प माने'(चु.प.से.), अच् । शीर्यतेऽनेनेति वा । 'शॄ हिंसायाम्'(क्र्या.प.से.), 'सुशॄभ्यां नित्-'(उणा-३०६)इति पः, [बाहुलकादुत्वम्], दीर्घश्च, तालव्यादिरयम्, ''-किंशारुशूर्पांशुकम्''[६]इति शभेदात् । केचित्तु सर्त्तेरपि दन्त्यादि सूर्पमिच्छन्ति । २ प्रस्फोट्यतेऽसारं बहिःक्रियतेऽनेन **प्रस्फोटनम्** । 'स्फुट-(स्फुटिर्) विशरणे'(भ्वा.प.से.), करणे ल्युट्, नन्द्यादि-ल्युर्वा[७]। द्वे शूर्पस्य[८] । 'सूपडुं[९][१०]' इति भाषा ॥

## अथाऽन्तिका ।

## चुल्ल्यश्मन्तकमुद्धानं स्यादधिश्रयणी च सा ॥१०१८॥

१ अन्तोऽस्त्यस्या **अन्तिका** । 'अत इनिठनौ' ५।२।११५॥इति ठन् । 'अन्ती' इत्यपि । ''अन्त्यधिश्रयणी भवेत्''[११]इति माला । २ चुल्लति **चुल्ली** । 'चुल चुल्ल हावकरणे[१२]'(भ्वा.प.से.), 'इन् सर्वधातुभ्यः'(उणा-५५७)इतीन्[१३], 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि चुल्ल्यपि[१४] । चुल्लिस्तृतीयस्वरान्ताऽपि[१५] । ३ अश्मनोऽप्यन्तमत्रेति अश्मन्तम्, शकन्ध्वादिः, तालव्यमध्यः, [के **अश्मन्तकम्**]। ''असूनां प्राणिप्राणानामन्तोऽत्रेति अस्वन्त इति दन्त्यसकार-वकारसंयोगमध्य एव''[१६]इति व्याख्यामृतम् । ४ उदुपरि निधीयते निवेश्यते[१७] पाकार्थं स्थाल्यादिकमत्रेति **उद्धानम्** । उद्पूर्वः 'डुधाञ् धारणादौ'(जु.उ.अ.), अधिकरणे ल्युट् । ''ध्मा शब्दाग्निसंयोगयोः (भ्वा.प.अ.)इत्यतः उद्ध्मायतेऽत्रेति उद्ध्मानम्[१८]''[१६]इति तु रक्षितः[१९] । ५ अधिश्रि(श्री)यतेऽस्याम् **अधिश्रयणी** । अधिपूर्वः 'श्रि(श्री)ञ् पाके'(क्र्या.उ.अ.), अधिकरणे ल्युट्, 'टिड्ढाणञ्-'४।१।१५॥ इति ङीष्[२०](ङीप्) । ''अधिपूर्वोऽयं धातुः स्थाल्यारोपणे वर्तते''[१६]इति कलिङ्गादयः। ''न हि भिक्षुकाः सन्तीति स्थाल्यामधिश्रीयन्ते[२१]''[१६] इति कातन्त्रपञ्जिका[२२] । पञ्च 'चूल्हा[२३]' इति ख्यातस्य[२४] **॥१०१८॥**

## स्थाल्युखा पिठरं कुण्डं चरुः कुम्भी

१ स्थलति तिष्ठति जलादिकमत्रेति **स्थाली,** स्त्रीक्ली. । 'स्थल(ष्ठल) स्थाने'(भ्वा.प.से.), 'ज्वलति-कसन्तेभ्योऽणः'३।१।१४०॥ इति णः, 'धात्वादेः षः सः' ६।१।६४॥, गौरादिः। स्थावति (स्थालीति) स्था(ष्ठा)-धातोः 'स्थावतिमृजे वालट्वालञानीयरः([२५]स्थाचतिमृजे-रालज्वालजालीयचः)'(उणा-११३)इत्यालचि वा स्थाली ।

---

१. 'कपिगडिगण्डिकटिपटिभ्यः कोलच्' इत्युणादिगणसूत्रम्, सूत्रे कडिधातोरभावाद् बाहुलकात् कोलच्प्रत्ययो ज्ञेयः ॥ २. 'पि-' इति३॥ ३. 'छाव-' इति१॥ ४ '-षायाः' इति४॥ ५. 'स्त्रीक्ली' इति१.२॥ ६. द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-५९९, पृ.६८१॥, रामाश्रमी २।९।२६॥, पृ.४०९॥ ७. '-त्वाल्ल्युर्वा' इति१.३॥ ८. 'सू-' इति५॥ ९. 'सु-' इति१॥ १०. '-डउं' इति१, '-डौ' इति३, '-डूं' इति४॥ ११. द्र. अम.क्षीर.२।९।२९॥, पृ.२०६॥, स्वोपज्ञटीका४।१०१८॥, पृ.२२५॥ १२. 'चुल्ल हावकरणे' इति स्वामिमैत्रेयौ, 'चुल्ल भावकरणे' इति सायणः ॥ १३. '-नि' इति३॥ १४. 'अपि' इत्यधिकः प्रतिभाति १५. '-न्तोऽपि' इति१.३॥ १६. द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-६०२, पृ.६८६॥ १७. 'निवि-' इति४॥ १८. '-तम्' इति१॥ १९. ४.५प्रत्योः 'तु रक्षितः' इत्यस्य स्थाने 'सुरक्षितः' इति दृश्यते ॥, मैत्रेयरक्षितकृतधातुप्रदीपे 'ध्मा शब्दाग्निसंयोगयोः' इति धातुव्याख्याने-''उद्ध्मानकम्- अधिकरणल्युडन्तात् कः'' इति दृश्यते, भ्वादिः, धातुसं-६२३, पृ.६७॥ २०. 'ङीषि' इति४॥ २१. '-श्रि-' इति३.४.५॥ २२. 'पञ्जिका' इत्येव१॥ २३. '-ल्ही' इति३.४॥ २४. '-तायाः' इति३॥ २५. कोष्ठान्तर्गतपाठः शुद्धः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तिष्ठत्यन्नमत्रेति वा। 'ष्ठा गतिनिवृत्तौ'(भ्वा.प.अ.), 'स्फायितञ्चि-'(उणा-१७०)इत्यादिना रः, गौरादिः, कपिलिकादित्वाल्लत्वम् । स्थान(ल)मपि । "स्थानं (स्थालं) भोजनभेदेऽपि स्थाली स्यात् पाटलोखयोः"[मेदिनीकोशः, लान्तवर्गः, श्लो-५५]इति मेदिनिः । २ ओखति **उखा** । 'उख गतौ'(भ्वा.प.से.), 'इगुपध-'३।१।१३५॥ इति कः। ३ पिठति(पेठति) पिठ्यतेऽत्र वा **पिठरम्** । 'पिठ अवयवे'[1] (भ्वा.प.से.), बाहुलकादरन् । "पच्यतेऽस्मिन् वा, 'अजिरशिशिर-'(उणा-५३)इति बाहुलकात् साधुः"[ ]इति [2]प्रासादः। त्रिलिङ्गोऽयम् । "पिठरः पुंसि"[ ]इति मालाऽमरश्च । "उखायां पिठरं क्लीबम्"[ ]इति तु गौडः । स्त्रियां तु लक्ष्यम्-"जठरपिठरी दुःपूरेयं करोति विडम्बनाम्" [ ]इति। ४ कुण्ड्यते दह्यतेऽत्र **कुण्डम्**। 'कुडि दाहे' (भ्वा.प.से.), दाहस्य पाकार्थत्वात्, अधिकरणे घञ् । [यद्वा] कुणति शब्दायते कुण्डम् । 'कुण[3] शब्दोपकरणयोः'(तु.प.से.), 'ञमन्ताड्डः'(उणा-१११), त्रिलिङ्गः । "कुण्डी कमण्डलौ कुण्डे जाराद् जीवत्पतेः सूतेऽपि च"[मेदिनीकोशः, डान्तवर्गः, श्लो-४]इति मेदिनि[4]ः । पुंनपुंसकयोर्दुर्गः। ५ चरति याति क्लेदमनेनेति **चरुः**, पुंसि । 'चर गतिभक्षणयोः[5]'(भ्वा.प.से.), 'भृमृशीतृ[6]चरित्सरि[तनिध]निमिमस्जिभ्य उः'(उणा-७)इत्युः। ६ कायति[7] शब्दायतेऽम्भसीति **कुम्भी**। पृषोदरादिः। अयं तृतीयस्वरान्तोऽपि । षड् 'हांडी' इति ख्यातायाः ॥

### घटः पुनः ।
### कुटः कुम्भः करीरश्च कलशः कलसो निपः ॥१०१९॥

१ घटते[8] चेष्टते **घटः**, पुंस्त्रीलिङ्गः। 'घट चेष्टायाम्'(भ्वा.आ.से.), अच् । २ कुटति **कुटः**, पुंक्ली. । 'कुट कौटिल्ये'(तु.प.से.), 'इगुपध-'३।१।१३५॥ इति कः। ३ कायत्यम्भसा भ्रियमाणः **कुम्भः[9]**, पुंस्त्रीलिङ्गः । 'कै शब्दे' (भ्वा.प.अ.)। कैः पानीयैरुम्भ्यते पूर्यते वा । उभयत्र पृषोदरादित्वात् । ४ कीर्यते **करीरः**, पुंक्ली. । 'कॄ विक्षेपे' (तु.प.से.), 'कॄशॄपॄ(पॄ)कटिपटिशौटिभ्य ईरन्'(उणा-४७०) इतीरन्[10] । अमरस्तु-"वंशाङ्कुरे करीरोऽस्त्री तरुभेदे घटे च ना" [अमरकोषः३।३।१७३॥]इति पुंस्याह। ५ कलते[11] सङ्ख्याति शब्दायते वा **कलशः**, त्रिलिङ्गः[12] । 'कल सङ्ख्यानगत्योः'(चु.उ.से.), 'कलेष्टित्'(हैमोणा-५३२)इत्यशः[13] । तालव्यान्तोऽयम् । "तालव्या अपि दन्त्याश्च शशशूकरपांशवः । कलशः[14] शम्बलश्चैव जिह्वायां रशना[15] तथा ॥१।"[[16]] इति शभेदात्[17]। "पृषोदरादित्वाद् दन्त्यसकारवानपि"[[16]] इति सुभूत्यादयः । ६ केन जलेन लिस्यते[18] (लस्यते) श्लिष्यते पूर्यते वा **कलसः[19]** । 'लस श्लेषणक्रीडनयोः'(भ्वा.प.से.), घञर्थे कः, केन लसति क्रीडति[20] वा, पचाद्यच् । स्त्रियां गौरादिः कलसिस्तृतीयस्वरान्तोऽपि । ७ नियतं पिबन्त्यस्माद्[21] **निपः** । 'पा पाने'(भ्वा.प.अ.), घञर्थे कः, 'आतो लोपः-'६।४।६४॥, पुंक्लीबलिङ्गोऽयम् । "निपोऽस्त्रियाम्"[ ]इति गौडः। सप्त घटस्य ॥१०१९॥

### हसन्यङ्गारात् शकटीधानीपात्र्यो हसन्तिका ।

१ हसत्यङ्गारैः **हसनी** । 'हस(हसे) हसने'(भ्वा.-प.से.), [22]बहुलवचनात् कर्तरि ल्युट् । २-४ अङ्गारादिति, अङ्गारशब्दात् शकटी धानी पात्री एते त्रयो योज्यन्ते, तेन **अङ्गारशकटी, अङ्गारधानी, अङ्गारपात्री** । ५ ज्वलदङ्गारैर्हसतीवेति **हसन्तिका** । हसेर्बाहुलकाद् 'भुवो झिः (झिच्)' (उणा-३३०), शत्रन्तादुगिल्लक्षणो ङीष्, ततः स्वार्थे कनि **हसन्तिका** । पञ्च 'शगडी[23]' इति ख्यातायाः ॥

### भ्राष्ट्रोऽम्बरीषम्

१ भृज्यते कलायादिकमत्र **भ्राष्ट्रः** । 'भ्रस्जो (भ्रस्ज) पाके'(तु.उ.अ.), 'भ्रस्जिगमिनमिहनिविष्य(विश्य)-शां वृद्धिश्च ष्ट्रन्[24]'(उणा-५९९)इति ष्ट्रन्वृद्धी । २ " 'अबि

---

१. 'पिठ हिंसासंक्लेशनयोः' इति क्षीरतरङ्गिण्यादयः ॥ २. 'प्र-' इति३॥ ३. 'कुणी' इति१॥ ४. "कुण्डी कमण्डलौ जारात् पतिवत्नीसुते पुमान्" इति मेदिनीकोशे, पृ.४०॥ ५. 'गतौ भक्षणे च' इति३॥ ६. '-ह-' इति ३.४.५॥ ७ '-ते' इति३॥ ८ 'घटयते' इति२॥ ९. 'कुम्भं' इति४.५॥ १०. ४प्रतौ नास्ति ॥ ११. '-ति' इति४.५॥ १२. १प्रतौ नास्ति॥ १३. '-सः' इति५॥ १४. 'कम्बलः' इति१॥ १५. 'रसना' इति१.५॥ १६. द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-६०४, पृ.६९०, रामाश्रमीरे।९।३१॥, पृ.४१३॥, तत्र 'शश-' इत्यस्य स्थाने 'शम्ब-' इति दृश्यते ॥ १७ 'शब्दभेदात्' इति३॥ १८. 'लिश्यते' इति१॥ १९. '-शः' इति१.२.४.५॥ २०. '-ते' इति३॥ २१. '-स्यां' इति३॥ २२. 'बाहुलक-' इति१॥ २३. 'शकडी' इति१, 'त्रा-' इति२, 'स-' इति३॥ २४. सूत्रे न दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रबि लबि शब्दे[1]'(भ्वा.आ.से.), **अम्बरीषम्**-[भ्राष्टमम्बरीषम्] इति निपात्यते''[मा.धातुवृत्तिः, भ्वादिः, धातुसं-२५७]इति माधवः। ''अम्बेः 'शिरीषादयः[2]' (चान्द्रोणा-३।६०॥)इतीषन्, अम्बरिरित्यादेशश्च[3] । पच्यतेऽस्मिन्निति वा । पचतेरम्बरीषं निपात्यते''[ ]इति दशपाद्याम्[4] । ''[5]पचेरम्बादेश ईषप्रत्ययो[6] रगागमश्च निपात्यते''[[7] ]इति व्याख्यामृतम्। ''अम्बरीषपुरुषोषरौषधम्''[[8] ]इति षभेदाद् मूर्धन्यान्तोऽयम् । पुंक्लीबलिङ्गावेतौ । ''क्लीबेऽम्बरीषं भ्राष्ट्रो ना''[अमरकोषः २।९।३०॥] इति त्वमरः । द्वे 'भाठी' इति ख्यातायाः ॥

**ऋचीषमृजीषं पिष्टपाकभृत् ॥१०२०॥**

१ ऋच्यते स्तूयते **ऋचीषम्** । 'ऋच स्तुतौ' (तु.प.से.), बाहुलकाद् 'अर्जे ऋजि(ऋच्) ईषन् कित्[9]' (उणा-४६८)इति ईषन्प्रत्ययः । २ अर्ज्यते रसोऽनेनेति **ऋजीषम्**, चवर्गतृतीय[चतुर्थ]स्वरमध्यः[10] । 'अर्ज सर्ज अर्जने'(भ्वा.प.से.), 'अर्जे ऋज् च-'(उणा-४६८)इतीषन्प्रत्ययः, धातोश्च ऋजादेशः। द्वावपि क्लीबलिङ्गौ । पिष्टकृतस्य भक्ष्यस्य पाकं पचनं बिभर्ति पिष्टपाकभृत् । द्वे 'तवा' इति ख्यातस्य ॥१०२०॥

**कम्बिर्दर्विः खजाका**

१ काम्यत इति **कम्बिः** । 'कमु कान्तौ'(भ्वा.-आ.से.), 'कृशॄजागृभ्यो क्विन्'( )इति कमेरपि बाहुलकाद् विन् । २ दृणाति **दर्विः** । 'दृ(दॄ) विदारणे'(क्र्या.-प.से.), 'विदृभ्यां विन्'(उणा-४९३)इति विन्, स्त्रीलिङ्गावेतौ । 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि कम्बी दर्वी च । ३ खजति मथ्नाति **खजाका**, कवर्गद्वितीयादिः। 'खजि(खज) मन्थे'(भ्वा.प.से.), 'खजेराकः'(उणा-५४३)इत्याकः, टाप् । त्रीणि 'कडछी[11]' इति ख्यातायाः ॥

**अथ स्यात् तर्दूर्दारुहस्तकः[12] ।**

१ तरति पाक्येष्विति **तर्दूः**, स्त्रीलिङ्गः । 'तॄ प्लवनतरणयोः'(भ्वा.प.से.), 'त्रो दुक् (दुट्) च'(उणा-८९) इत्यूप्रत्ययः, दुगागमश्च । २ हस्तप्रतिकृतिर्हस्तकः । दारुणो हस्तको **दारुहस्तकः** । ''परवेषणभाण्डम्''[अभि-, स्वोपज्ञटीका४।१०२१॥]इति मूलटीका, उणादिश्च[13]। ''दर्वी तर्दूश्च खजिका कथ्यते दारुहस्तकः''[हलायुधकोशः२।३१२॥]इति हलायुधः । द्वे 'चाटूआ[14]' इति ख्यातस्य ॥

**वार्धान्यां तु गलन्त्यालूः कर्करी करकः**

१ वाः पानीयं धीयतेऽस्यां **वार्धानी** । 'डुधाञ्[15] धारणादौ'(जु.उ.अ.), 'करणाधिकरणयोश्च'३।३।११७॥ इत्यधिकरणे ल्युट्, टित्वात् ङीप्[16], तस्याम् । वर्धनीत्यपि। ''वर्धनं छेदने वृद्धौ वार्धान्यां स्यात्तु वर्धनी[17]''[विश्वप्रकाशकोशः, नान्तवर्गः, श्लो-७७]इति महेश्वरः । २ गल[18](ड)त्यम्भोऽस्यां **गलन्ती** । 'गड सेचने'(भ्वा.प.से.), बाहुलकाद् झचि 'झोऽन्तः'७।१।३॥, डलयोरैक्याल्लत्वम्, 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि गलन्ती । स्वार्थे कनि 'केऽणः'७।४।१३॥इति ह्रस्वत्वे[19] गलन्तिका । ''गलति स्रवतीति शत्रन्ताद् ङीषि(ङीपि), कनि 'केऽणः' ७।४।१३॥ इति ह्रस्वत्वम्''[[20] ]इति सर्वधरः । ३ अडत्यनया **आलूः**, स्त्रियाम् । 'अड उद्यमे'(भ्वा.प.से.), अस्मादारुः (णिदूः)। '' 'ऋ गतौ'(जु.प.अ.), बाहुलकादुण्, वृद्धिः, रेफस्य लत्वे आलुरिति ह्रस्वान्तः''[[20] ]इति सर्वस्वम् । ४ किरति क्षरति जलं **कर्करी** । 'कॄ विक्षेपे' (तु.प.से.), बाहुलकात् करन्प्रत्ययः, गुणः, गौरादिः । ''कर्कः सौत्रः 'असुरवदरन्' ''[[20] ]इति सुभूत्यादयः । ५ किरत्यम्बु **करकः**, अस्त्रियाम् । 'कॄ विक्षेपे'(तु.प.से.), 'कृञादिभ्यः [संज्ञायां] वुन्'(उणा-७१३)। पञ्च 'करवा[21]' इति ख्यातस्य ॥

**अथ सः ॥१०२१॥**

**नालिकेरजः करङ्कः**

१ स करङ्कः ॥१०२१॥ नालिकेरफलाज्जातो नालिकेरजः **करङ्कः** इत्यन्वयः । किरत्यम्भः करङ्कः । 'कॄ विक्षेपे'(तु.प.से.), 'किरोऽङ्का-'(उणा-६२)इत्यङ्कः । एकं '[22]डूंघा' इति प्रसिद्धस्य ॥

---

१. 'शब्दने' इति३॥, 'रबि लबि अबि शब्दे' इति क्षीरतरङ्गिण्यादयः ॥ २. '-यश्च' इति४॥ ३. 'अम्बर् इत्यादेशश्च' इति युक्तः ॥ ४. ''पचन्त्यस्मिन् अम्बरीषम्-भ्राष्ट्रम्'' इति दशपाद्युणादिवृत्तिसंग्रहः, श्रीविट्ठलाचार्यकृता वृत्तिः, पृ.२३६॥ ५. 'पञ्चे-' इति१.५॥ ६. '-ये' इति१॥ ७. द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-६०३, पृ.६८७॥ ८. द्र. रामाश्रमी २।९।३०॥, पृ.४१२॥ ९. 'अर्जे ऋज् च' इत्युणादिगणसूत्रस्वरूपम् ॥ १०. '-तृतीयमध्यः' इति१.२॥ ११. 'कुट-' इति३॥ १२. तुलनीयोऽमरकोषः २।९।३४॥ १३. '-दिकश्च' इति१॥ १४. '-चुया' इति३॥ १५. 'डुभृञ्' इति१॥ १६. 'ङीष्' इति२.३.४.५॥ १७. '-वारिधान्यां तु वर्धनी' इति विश्वप्रकाशकोशे, पृ.९१॥ १८. 'गलन्त्य-' इति१.२॥ १९. इतोऽग्रे ४प्रतौ 'च' इति दृश्यते ॥ २०. द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-६०४, पृ.६८९॥ २१. 'करा-' इति१॥ २२. 'डू-' इति५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

### तुल्यौ कटाहकर्परौ ।

१ कटत्यावृणोति **कटाहः**, त्रिलिङ्गः। 'कटे वर्षा-वरणयोः'(भ्वा.प.से.), 'वृकटि-'(हैमोणा-५९१)इत्याहच् । २ कीर्यते **कर्परः**, पुंसि । क्लीबेऽपीति केचित् । 'कॄ विक्षेपे'(तु.प.से.), पृषोदरादिः । द्वे 'कडाह'[१] इति ख्यातस्य । एतौ घटादिखण्डेऽपि, तदा 'ठीकरी' इत्यादि-भाषा[२] । ''कटाहो घृततैलादिपाकपात्रेऽपि कर्परे[३]''[विश्वप्रकाशकोशः, हान्तवर्गः, श्लो-१६]इति, ''कर्परः स्यात् कपाले च शास्त्रभेदकटाहयोः''[विश्वप्रकाशकोशः, रान्तवर्गः, श्लो-१३७]इत्युभयं महेश्वरः ॥

### मणिकोऽलिञ्जरः

१ मणति ग[४]भीरत्वाद् जलार्पणे शब्दायते मणिः । 'अण रण वण व्रण[५] बण भण भ्रण मण धण ध्वण ध्रण कण क्वण चण शब्दे[६]'(भ्वा.प.से.)इत्यस्मान्मणेः[७] शब्दार्थाद् 'इन्-'(उणा-५५७)इति सूत्रेण इन् मणिः, मणिः[८] प्रकारो **मणिकः** । स्थूलादित्वात् कन्[९] । मणिरेव मणिको यावादित्वात् कन् वा, संज्ञायां वा कन् । मणिरित्यपि। ''अलिञ्जरं मणिं विन्द्यान्मेहनावयवे(-वो) मणिः''[शाश्वतकोशः, श्लो-२३]इति । २ अलनमलिः । 'अल[१०] भूषणपर्याप्तिवारणेषु[११]'(भ्वा.प.से.)इत्यतः कृष्यादि-त्वादिक्[१२]। अलिं सामर्थ्यतां जरयति दुर्वहत्वात्, पचादि[१३]-पाठसामर्थ्यादच्, 'तत्पुरुषे कृति-'६।३।१४॥ इत्यलुक्, पुंक्लीबलिङ्गावेतौ । द्वे 'माणि[१४]' इति ख्यातायाः ॥

### गर्गरीकलश्यौ तु मन्थनी ॥१०२२॥

१ गिरति दधि **गर्गरी** । 'गॄ निगरणे'(तु.प.से.), 'ऋतष्टित्'(हैमोणा-९)इत्यः, सन्वद् द्वित्वं च[१५] । २ कल्यते कलशिः । 'कल सङ्ख्याने'(भ्वा.आ.से.), बाहुलकादशिः। 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि[१६] **कलशी** । कस्याऽम्भसो राशिरत्रेति, पृषोदरादिर्वा । तृतीयस्वरान्तो-ऽप्ययम् । ''कलशिमुदधिगुर्वीं[१७] बल्लवा लोडयन्ति''[शिशुपालवधम्, सर्गः-११, श्लो-८]इति माघः । ३ मथ्यते दध्यस्यां **मन्थनी** । अधिकरणे ल्युट् । अन्ये तु-''वार्धानी-प्रभृतयः पूर्वोक्ताः पञ्च, गर्गर्याद्यास्त्रयश्चैकार्थाः[१८]''[ ]इत्याहुः । त्रीणि 'विलोणा[१९] गोली' इति ख्यातायाः ॥१०२२॥

### वैशाखः खजको मन्था मन्थानो मन्थदण्डकः । मन्थः क्षुब्धः

१ विशिष्टा शाखा विशाखा, विशाखा प्रयोजन-मस्य **वैशाखः** । 'विशाखाषाढादण्मन्थदण्ड[योः]'५।१।-११०॥इत्यण् । विशाखस्याऽयमिति वा। विशिष्टाः शाखा अस्य विशाखः, ततः स्वार्थेऽण् वा । २ खजति मथ्नाति **खजकः** । 'खज मन्थे'(भ्वा.प.से.), 'क्वुन् शिल्पिसंज्ञयोः'(उणा-१९०)इति क्वुन् । खजाकोऽपि, खजोऽपि[२०] । ३ मथ्यतेऽनेनेति **मन्थाः** । 'मन्थ[२१] विलोडने' (भ्वा.क्र्या.प.से.), 'पथिमथि(मन्थि)भ्यामिन्'(हैमोणा-९२६)इतीन्, 'इतो-ऽत्सर्वनामस्थाने'७।१।८६॥, 'थो न्थः'७।१।८७॥ । मन्थानौ, मन्थानः इत्यादि । ४ मन्थ्नाति **मन्थानः**। 'मन्थ विलोडने'(क्र्या.प.से.), चानश्[२२]। ५ मन्थनाय दण्डो मन्थदण्डः[२३], स्वार्थे कनि **मन्थदण्डकः**। ६ मथ्यतेऽनेनेति **मन्थः** । 'पुंसि संज्ञा-याम्-'३।३।११८॥ इति घः । ७ क्षुभ्नाति **क्षुब्धः** । 'क्षुभ सञ्चलने'(क्र्या.प.से.), 'क्षुब्धस्वान्त-'७।२।१८॥ इति साधुः । सप्त मन्थानदण्डस्य ॥

### अस्य विष्कम्भो मञ्जीरः कुटरोऽपि च ॥१०२३॥

१ अस्य मन्थस्य **विष्कम्भः** । विष्कभ्नाति बध्नाति विष्कम्भः दण्डकटकः, यस्मिन् बध्वा मन्थ आकृष्यते । दण्डकरोटकमित्यन्ये । २ मञ्जिः सौत्रः, बाहुलकात् 'कृशॄपॄ(पृ)कटिपटिशौटिभ्यः ईरन्'(उणा-४७०) इतीरन् **मञ्जीरः**। ३ कुटति **कुटरः**। 'कुट कौटिल्ये'

---

१. 'कटा-' इति३॥ २. 'इति ख्यातस्य' इति१॥ ३. 'च खर्परे' इति विश्वप्रकाशकोशे, पृ.१८०॥ ४. 'गम्भी-' इति४॥ ५. 'व्रण वण' इति१॥ ६. 'अण रण वण ('भण' इत्यधिको मैत्रेयसायणमते) मण कण क्वण व्रण भ्रण ध्वण ('ध्वण' इति मैत्रेयमते न) शब्दार्थाः' इति क्षीरतरङ्गिण्यादयः ॥ ७. '-णिः' इति१॥ ८. '-णिप्र-' इति३॥ ९. '-दिकन्' इति३॥ १०. 'अलं' इति स्वामी, 'अलं' इति मैत्रेयः, 'अल' इति सायणः ॥ ११. 'वारणपर्याप्तिभूषणेषु' इति मैत्रेयः ॥ १२. इतोऽग्रे ४प्रतौ '-प्रत्ययः' इति दृश्यते ॥ १३. 'यवादि-' इति ३.४.५॥ १४. '-ण' इति३॥ १५. इतोऽग्रे ३प्रतौ 'वक्तव्यं' इति दृश्यते॥ १६. 'ङीपि' इति३॥ १७. 'गुर्वी' इति२.४॥ १८. 'गर्गाद्या-' इति१.३, 'गर्गर्यादय-' इति४॥ १९. 'विलोवणा' इति३.५॥ २०. 'खजोऽपि' इति ४.५प्रत्योर्नास्ति ॥ २१. 'मथि' इति३॥ २२. 'ताच्छील्यवयो-'३।२।१२९॥ इत्यनेन ताच्छील्ये शानच्, यद्वा बाहुलकात् 'सम्यानच्स्तुवः' इत्यनेनाऽऽनच् ॥ २३. ३प्रतौ नास्ति॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(तु.प.से.), बाहुलकाद् 'ऋच्छेररन्'(उणा-४११)इत्यरन्, कुटादित्वाद् गुणाभावः। कुटर्क इति वा। त्रीणि विष्कम्भस्य । 'मांकडी' इति भाषा ॥१०२३॥

## शालाजीरो वर्धमानः शरावः

१ शालायां जीर्यते **शालाजीरः** । पृषोदरादिः । २ वर्धते क्रमेण विस्तीर्णो भवति **वर्धमानः** । 'वृधु वृद्धौ' (भ्वा.आ.से.), 'ताच्छील्यवयोवचनशक्तिषु चानश्'३।२।१२९॥, 'आने मुक्'७।२।८२॥ । स्वार्थे कनि वर्धमानकमपि। "भ्रमयत्यचिरं(-त्युचितं) विदर्भजाननीराजनवर्धमानकम्"[नैषधीयचरितम्, सर्गः-२, श्लो-२६]इति श्रीहर्षः। ३ शृणन्ति[१] हिंसन्ति शराः । 'शॄ हिंसायाम्'(क्र्या.प.से.), अच् । शराः हिंसकाः कीटकादयस्तेभ्योऽवति **शरावः** । 'अव रक्षणादौ'(भ्वा.प.से.), पचाद्यच्, मूलविभुजादित्वात् को वा । पुंक्लीबलिङ्गावेतौ । "शफरशरीर(शराव)श्रोणीशृणां-(शूलां)शुकशारिकाशम्बा"[ ][२]इति शभेदात् तालव्यादिः, दन्त्यादिश्च । त्रीणि 'शरावला[३]' इति ख्यातस्य ॥

## [४]कोशिका पुनः ।
## मल्लिका चषकः कंसः पारी स्यात् पानभाजनम् ॥ १०२४॥

१ तैलेन कुश्यति श्लिष्यति [४]**कोशिका** । 'कुश श्लेषे[५]'( ), ण्वुल् । २ मल्लते **मल्लिका** । 'मल मल्ल धारणे'(भ्वा.आ.से.), 'संज्ञायाम्'३।३।१०९॥ इति स्त्रियां ण्वुल् । ३ चषत्यनेन **चषकः** । 'चष भक्षणे'(भ्वा.उ.से.), 'क्वुन् शिल्पिसंज्ञयोः'(उणा-१९०)इति क्वुन् । ४ काम्यते **कंसः** । 'कमु कान्तौ'(भ्वा.आ.से.), 'वृतॄवदि-'(उणा-३४२)इति सः । पुंक्लीबलिङ्गावेतौ[६]। ५ पारयति[७] **पारी** । 'पार तीर कर्मसमाप्तौ'(चु.उ.से.), णिजन्तः, अच्, गौरादिः। ६ पानस्य भाजनं **पानभाजनम्** । षट् समान्येन लोटीप्रभृतिभाजनस्य । "कोशिका मल्लिका प्रोक्ता"[हलायुधकोशः २।३१६॥]इति हलायुधः । "तैलाधारपात्रे द्वौ । तैलेन कुश्यति[८] श्लिष्यति कौशिका (कोशिका) । मल्लते तैलं धारयति मल्लिका, ण्वुलन्तौ"[ ]इति तट्टीका । कोशिका[९] मल्लिका एतौ शब्दौ तैलभाजननाम्नी आह ॥ १०२४॥

## कुतूश्चर्मस्नेहपात्रम्

१ कुत्सितं तन्यते **कुतूः**, स्त्रीलिङ्गः। 'तनु विस्तारे' (त.उ.से.), 'भ्रमेर्डूः[१०]'(उणा-२२६)इति बाहुलकादतोऽपि डूः । कौति शब्दायते वा । 'कुङ्(कु) शब्दे'(अ.प.अ.) बाहुलकात् 'तनिगृध्योः(नृतिशृध्योः) कुः'(उणा-९१)इति कुः, तुगागमश्च[११], सवर्णदीर्घत्वे कुतूः । चर्मणः स्नेहस्य तैलादेः[१२] पात्रं **चर्मस्नेहपात्रम्** । एकं 'कूडा' इति ख्यातस्य ॥

## कुतुपस्तु तदल्पकम् ।

१ तत् चर्मस्नेहपात्रम्, ह्रस्वा कुतूः **कुतुपः**, द्विपञ्चमस्वरः । 'कुत्वा डुपच्'५।३।८९॥ इति डुपच् । "अमू ते वक्षोजावमृतरसमाणिक्यकुतुपौ"[ ]इति लहरी । पुंल्लिङ्गोऽयम् । एकं 'कुडी' इति ख्यातायाः ॥

## दृतिः खल्लः

१ द्रियते **दृतिः**, पुंसि । 'दृ विदारणे'(क्र्या.प.से.), 'दृणातेर्ह्रस्वश्च'(उणा ६२३)इति तिः [दृतिः]। खलति **खल्लः**, पुंसि । "खल्लं[१३] क्लीबम्"[वैजयन्तीकोषः ४।३।६०॥]इति वैजयन्ती । 'भिल्लाच्छभल्ल-'(हैमोणा-४६४)इति ले निपात्यते । एकं दृतेः । 'दईडुं[१४]' इति[१५] भाषा ॥

## चर्ममयी त्वालूः करकपात्रिका ॥१०२५॥

१ करकवत् पिबन्त्यनया करकपात्री, स्वार्थे कनि **करकपात्रिका** । चर्ममयी तु आलूः 'करवा' इति प्रसिद्धिः । एकं 'छागला[१६]' इति ख्यातस्य ॥१०२५॥

## सर्वमावपनं भाण्डम्

१ आ उप्यते स्थाप्यते द्रव्यमत्रेति **आवपनम्** । 'टु(डु)वप् बीजतन्तुसन्ताने[१७]'(भ्वा.उ.अ.), अधिकरणे ल्युट्। २ भाण्डत्याधेयं[१८] **भाण्डम्** । 'भडि परिभाषणे'(भ्वा.-आ.से.), अच्, पृषोदरादिदीर्घता । भामतेऽस्मादिति वा ।

---

१. 'शृण्वन्ति' इति३॥ २. द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-६०५, पृ.६९१॥ ३. '-लां' इति१.२॥ ४. 'कौ-' इति५॥ ५. 'श्लेषणे' इति१.३॥, दुर्गसम्मतोऽयं धातुपाठः ॥ ६. 'एतौ' इति ४प्रतौ नास्ति ॥ ७ '-तीति' इति३॥ ८ '-ते' इति३॥ ९. 'कौ-' इति१.३॥ १०. 'भ्रमेश्च डूः' इत्युणादिगणसूत्रस्वरूपम् ॥ ११. 'तुमा-' इति३॥ १२. '-दिः' इति३॥ १३. 'खल्वं' इति वैजयन्तीकोषे, पृ.११९॥ १४. 'दीवडूं' इति३, '-डु' इति१.२॥ १५. 'इत्यादि-' इति३.५॥ १६. '-ल' इति१.२.५॥ १७ 'बीजसन्ताने' इति१, क्षीरतरङ्गिण्यादयश्च ॥ १८. भडिधातोरात्मनेपदित्वाद् 'भण्डते' इति युक्तः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'भाम क्रोधे'(भ्वा.आ.से.), 'अमन्ताड्डः'(उणा-१११)। यद्वा 'भण शब्दे'(भ्वा.प.से.), 'अमन्ताड्डः'(उणा-१११) । '''पुच्छभाण्डचिवराण्णिङ्'३।१।२०॥ इति निर्देशाद् दीर्घत्वम्[१]''[मा.धातुवृत्तिः, भ्वादिः, धातुसं-२९७]इति माधवः। द्वे सामान्येन[२] भाजनमात्रस्य ॥ यन्मुनिः[३]-''उष्ट्रिकादि तु यद्भाण्डं सर्वमावपनं विदुः''[[४]]इति । अत्र उष्ट्रिका 'झाबउ'[५] इति लोकभाषाप्रसिद्धः, तत्प्रभृतीत्यर्थः ॥

**पात्राऽमत्रे तु भाजनम् ।**

१ पाति आधेयम्, पीयते वाऽस्मादिति[६] **पात्रम्** । त्रिलिङ्गम् । यदमरशेषः-''त्रिषु पात्री पुटी वाटी पेटी'' [अमरकोषः३।५।४२॥]इत्यादि । 'पा रक्षणे'(अ.प.अ.), 'पा पाने'(भ्वा.प.अ.) वा । 'ष्ट्रन्'(उणा-५९८)इति ष्ट्रन्। २ अमत्याधेयमत्रेति **अमत्रम्** । 'अम गतिशब्दसंभक्तिषु[७]'(भ्वा.प.से.), 'अमिनक्षियजिवधिपतिभ्योऽत्रन्'(उणा-३८५) इत्यत्रन् । ३ भाज्यतेऽस्मिन्नाधेयमिति **भाजनम्** । 'भज (भाज) पृथक्कर्मणि'(चु.उ.से), चुरादिः, ततोऽधिकरणे ल्युट् । त्रीणि सामान्येन 'भाणां'[८] इति ख्यातस्य । अमरस्तु आवपनादीन् पश्चाऽप्येकार्थानाह ॥

**तद् विशालं पुनः स्थालम्**

तद् भाजनं विस्तीर्णम्, स्थलति **स्थालम्,** स्त्रीक्ली. । 'स्थल[९] स्थाने'(भ्वा.प.से.), [१०]ज्वलादित्वाण्णः । ''आहाराय प्रेतराजस्य रूप्य[११]स्थालानीव स्थापितानि स्म भान्ति[१२]''[शिशुपालवधम्, सर्गः-१८, श्लो-६७]इति माघः । एकं 'थाल' इति ख्यातस्य ॥

**स्यात् पिधानमुदञ्चनम् ॥१०२६॥**

१ पिधीयतेऽनेन **पिधानम्** । 'डुधाञ् धारणादौ' (जु.उ.अ.), अपिपूर्वः, करणे ल्युट् । २ उदच्यते[१३]ऽनेन **उदञ्चनम्**। 'अञ्चु गतिपूजनयोः'(भ्वा.प.से.), करणे ल्युट्। द्वे 'ढांकणुं[१४]' इति ख्यातस्य ॥१०२६॥

**शैलोऽद्रिः शिखरी शिलोच्चयगिरी गोत्रोऽचलः सानुमान्**
**ग्रावा पर्वतभुध्रभूधरधराहार्या नगः**

१ शिलानामयं **शैलः** । 'तस्येदम्'४।३।१२०॥ इत्यण् । शिलाः सन्त्यत्रेति वा[१५] । ज्योत्स्नादित्वादण् । २ अद्यते फलमूलादिकमत्र, अद्यते वज्रेणेति वा **अद्रिः** । 'अद भक्षणे'(अ.प.अ.), 'अदिशदि[१६]भूशुभिभ्यः कित् (क्रिन्)' (उणा-५०५)इति रिन्प्रत्ययः । ३ शिखराणि सन्त्यत्र **शिखरी** । 'अत अनिठनौ'५।२।११५॥ इतीनिः । ४ उच्चीयते वृद्धिं नीयते उच्चयः कूटम् । उत्पूर्वः 'चिञ् चयने' (स्वा.उ.अ.), 'एरच्'३।३।५६॥ इत्यच् । शिलानामुच्चयः **शिलोच्चयः** । ५ गृणाति गिरति वा **गिरिः** । 'गॄ शब्दे' (क्र्या.प.से.), 'गॄ निगरणे'(तु.प.से.) वा, 'इक् कृष्यादिभ्यः'(वा-३।३।१०८॥)इतीक् । यद्वा 'कॄगॄशॄ[१७]पॄकटिभिदिछिदिभ्यश्च'(उणा-५८२)इति इः, 'ॠत इद्धातोः' ७।१।१००॥ इतीत्वरपरत्वे । ६ गां भुवं त्रायते **गोत्रः** । 'त्रैङ्[१८] पालने' (भ्वा.आ.अ.), 'आदेचः-'६।१।४५॥ इत्यात्वे, 'आतोऽनुपसर्गे कः'३।२।३॥ । 'गुङ् अव्यक्ते शब्दे'(भ्वा.आ.अ.), 'गुधृवीपचिवचियमिमनितनिसदिक्षदिभ्यस्त्रन्[१९]'(उणा-६०६)इति त्रन्प्रत्ययः । ''गवते सर्वतोऽपि निर्झरादिपतनजन्यमव्यक्तं शब्दं करोति गोत्रः''[ ]इति भाष्यम्। ७ चलति चलः, न चलः **अचलः**। 'चल चलने'( ), अच् । ८ सानूनि सन्त्यस्य **सानुमान्** । 'तदस्यास्त्यस्मिन्निति मतुप्'५।२।९४॥ ९ गृह्णाति **ग्रावा** । 'ग्रहेरा च'(हैमोणा-९०५)इति वन् । गिरति गृणाति वा[२०], 'अन्येभ्योऽपि-'३।२।१७८॥ इति क्विप्, प्रकृतेर्ग्रावन् इत्यादेश इति वा । ग्रावाणौ, ग्रावाणः इत्यादि। १० पर्वाणि भागाः सन्त्यत्र **पर्वतः** । 'तप्पर्वमरुद्भ्याम्'(वा-५।२।१२२॥)इति तप् । पर्व्यते पूर्यते शिलाभिरिति वा । 'पर्व पूरणे'(भ्वा.प.से.), 'भृ[मृ]दृशीङ्(दृशि)यजिपर्वि[२१]पच्यमिनमितमि[२२]हर्यि(हर्ये)भ्योऽतच्'(उणा-३९०) इत्यतच् । ११

१. '-पुच्छभाण्ड' इति निर्देशाद् दीर्घः' इति मा.धातुवृत्तौ, पृ.१३१॥ २. १प्रतौ नास्ति ॥ ३. '-मनुः' इति३॥ ४. द्र. अम.क्षीर.२।९।३३॥, पृ.२०७॥ ५. '-वउ' इति३॥ ६. इतोऽग्रे १.२.५प्रतिषु 'वा' इति दृश्यते ॥ ७. 'गत्यादिषु' इति क्षीरतरङ्गिण्यादयः ॥ ८. '-णां' इति३॥ ९. 'ष्ठल' इति मैत्रेयसायणौ ॥ १०. 'ज्वा-' इति३॥ ११. 'रौप्य-' इति शिशुपालवधे, पृ.४६२॥ १२. 'भाति' इति३॥ १३. '-ञ्चते' इति४॥ १४. '-णो' इति३, '-णौ' इति४, '-णउं' इति५॥ १५. ४प्रतौ नास्ति ॥ १६. '-सदि-' इति३॥ १७. '-तॄ-' इति१॥ १८. 'त्रेङ्' इति१.२॥ १९. '-यमिसदिक्षदिभ्यस्त्रः' इत्युणादिगणसूत्रे ॥ २०. १प्रतौ नास्ति ॥ २१. '-पर्व-' इति१.३॥ २२. '-तमिनमि-' इत्युणादिगणसूत्रे ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भुवं धरति **भूध्रः** । 'धृञ् धारणे'(भ्वा.उ.अ.), मूलविभुजादित्वात् कः, 'इको यणचि'६।१।७७॥ कित्त्वाद् गुणाभावः। यौगिकत्वात् कुध्रमहीध्रादयः । १२ भुवं धरति **भूधरः** । 'धृञ् धारणे'(भ्वा.उ.अ.), यौगिकत्वाद् महीधरभूभृदादयः । १३ धरति **धरः**। पचाद्यच् । ध्रियते पृथिव्येति वा । 'ऋदोरप्'३।३।५७॥। १४ हर्तुं देशान्तरं नेतुमशक्यः **अहार्यः**। 'हृञ् हरणे'(भ्वा.उ.अ.), 'ऋहलोर्ण्यत्'३।१।१२४॥ । १५ न गच्छति स्थावरत्वादिति **नगः** । 'गम्लृ गतौ'(भ्वा.प.अ.), 'अन्यत्रापि(अन्येष्वपि) दृश्यते'३।२।१०१॥ इति डः, 'नभ्राण्नपात्-'६।३।७५॥ इनि नञ्प्रकृत्या, 'नगोऽप्राणिष्वन्यतरस्याम्'६।३।७७॥ इति नञः[१] प्रकृतिभावो वा । अगोऽपि। सामान्येन पञ्चदश पर्वतस्य । शेषश्चात्र-"गिरौ प्रपापी[२] कुट्टार[३] उर्वङ्गः कन्दराकरः"[शेषनाममाला४।१५८॥]इति ॥

अथ विशेषादाह-

**अथोदयः**[1] **पूर्वाद्रिः**[2]

१ उदयन्ति[४] ग्रहा अस्मादिति **उदयः** । 'इण् गतौ'(अ.प.अ.), 'एरच्'३।३।५६॥ २ पूर्वश्चाऽसावद्रिश्च **पूर्वाद्रिः**। द्वे उदयाद्रेः ॥

**चरमाद्रिरस्तः**[1,2]

१ चरमः पश्चिमोऽद्रिः **चरमाद्रिः** । २ अस्तयति ग्रहादीनामनुपलक्ष्यं[५] करोति **अस्तः** । नामधातोर्णिजन्तादच् । अस्तं ग्रहादीनामदर्शनमत्राऽस्तीति, अर्शआदित्वादच् वा। "अव्ययानां भमात्रे टिलोपे अस्तः"[६ ]इति स्वामी[७] । द्वे अस्ताद्रेः ।

**उदगद्रिस्त्वद्रिराट् मेनकाप्राणेशो हिमवान् हिमालयहिमप्रस्थौ भवानीगुरुः ॥१०२७॥**

१ उदङ् उत्तरोऽद्रिः **उदगद्रिः** । २ अद्रीणां राट् **अद्रिराट्**। ३ मेनकायाः प्राणेशो वल्लभः **मेनकाप्राणेशः** । ४ हिमं प्रभूतमत्राऽस्ति **हिमवान्** । भूम्नि मतुप् । ५ हिमस्याऽऽलयो **हिमालयः** । ६ हिमं प्रस्थेऽस्य **हिमप्रस्थः** । ७ भवान्याः[९] पार्वत्या गुरुः पिता **भवानीगुरुः**। सप्त हिमाचलस्य ॥१०२७॥

**हिरण्यनाभो[१०] मैनाकः सुनाभश्च तदात्मजः ।**

१ हिरण्यं नाभावस्य **हिरण्यनाभः**। 'नाभेः संज्ञायाम्'( )इत्यच्समासान्तः[११], 'यस्येति च'६।४।१४८॥ । २ मेनकाया अपत्यं **मैनाकः** । पृषोदरादिः । ३ शोभना नाभिरस्य **सुनाभः** । 'नाभेः संज्ञायाम्'( )इत्यच्समासान्तः[११] । तस्य हिमालयस्याऽऽत्मजः तदात्मजः । त्रीणि हिमालयसुतस्य ॥

**रजताद्रिस्तु कैलासोऽष्टापदः स्फटिकाचलः ॥१०२८॥**

१ रजतमयोऽद्रिः **रजताद्रिः** । २ कं जलम् इला भूमिः, तयोरास्ते **कैलासः**[१२] । के लसनमस्येति वा केलासः, स्फटिकम्, तस्याऽयं कैलासः। किलासो धनदः, तस्यायमिति[१३] वा। 'तस्येदम्'४।३।१२०॥ इत्यण् । "केलिः प्रयोजनमस्य कैलः । 'चुडादिभ्य उपसङ्ख्यानम्'( ) इत्यण् । आस्यतेऽस्मिन्निति आसः । 'आस उपवेशने'(अ.आ.से.), 'हलश्च'३।३।१२१॥ इत्यधिकरणे घञ् । कैलश्चाऽसावाऽऽसश्चेति 'विशेषणं विशेष्येण'२।१।५७॥ इति संज्ञात्वाल्लोहितशाल्यादिवत् समासः [नित्यम्]"[मा.धातुवृत्तिः, अदादिः, धातुसं-१४]इति माधवः । ३ अष्टौ पदान्यस्य **अष्टापदः** । 'अष्टनः संज्ञायाम्'६।३।१२५॥ इति दीर्घः । ४ स्फटिकमयोऽचलः[१४] **स्फटिकाचलः** । चत्वारि कैलासस्य । शेषश्चात्र- "कैलासे धनदावासो हराद्रिर्हिमवद्धसः"[शेषनाममाला४।१५९॥] ॥१०२८॥

**क्रौञ्चः क्रुञ्चः**

१ क्रुञ्चति क्रुञ्चः । 'क्रुञ्च गतौ[१५]'(भ्वा.प.से.), अच्, प्रज्ञाद्यणि **क्रौञ्चः** । २ प्रज्ञाद्यणभावे **क्रुञ्चः** । कौञ्चोऽपि। द्वे क्रौञ्चाद्रेः ॥

**अथ मलय आषाढो दक्षिणाचलः ।**

---

१. 'नभ्र-' इति१.२॥ २. 'प्रतापी-' इति१.३.४॥ ३. 'कुट्टीर' इति४.५॥ ४. 'उद-' इति१.३.४॥ ५. '-लब्धिं' इति१.२, '-लक्षं' इति३॥ ६. द्र. पदचन्द्रिका, भा-२, शैलवर्गः, श्लो-४०, पृ.५९॥ ७. अम.क्षीरस्वामिकृतटीकायाम्-"अस्यत्यर्कादीनस्यते वास्तः ।" इति दृश्यते, २।३।२॥, पृ.७८॥ ८. ३.४.५प्रतिषु नास्ति॥ ९. 'हिमालयस्य' इति१.२॥ १०. '-भौ' इति१.३॥ ११. 'अच् प्रत्यन्वव-'५।४।७५॥ इत्यत्र 'अच्' इति योगविभागादजिति युक्तः ॥ १२. '-शः' इति३.४॥ १३. 'धनदस्यायमिति' ५॥ १४. 'स्फु-' इति३॥ १५. स्वामिमतेऽयं पाठः, 'कुञ्च क्रुञ्च ('कुन्च क्रुन्च' इति धातुप्रदीपे) कौटिल्याल्पीभावयोः' इति मैत्रेयसायणौ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ मलते[१] धारयति चन्दनानि **मलयः**, पुंक्ली. । 'मल मल्ल धारणे'(भ्वा.आ.से.), 'वलिमलि-'(उणा-५३९) इति कयन् । २ आषाढासु जातः **आषाढः** । 'श्रविष्ठाषाढा-'(हैमसू-६।३।१०५॥)इत्यत्र मतान्तराश्रितोऽण् । ३ दक्षिणाश्चाऽसावचलश्च **दक्षिणाचलः** । त्रीणि मलयाद्रेः। "मलयश्चन्दनगिरिः"[शेषनाममाला४।१५९॥]इति शैषिके ॥

**स्यान्माल्यवान् प्रस्रवणः**

१ माल्यं पुष्पदाम, तदाकारताऽस्त्यस्य **माल्यवान्**। 'तदस्यास्त्यस्मिन्निति मतुप्'५।२।९४॥ । २ प्रस्रवति निर्झरैः[२] **प्रस्रवणः** । 'स्रु गतौ'(भ्वा.प.अ.), नन्द्यादित्वाल्ल्युः । द्वे माल्यवतः ॥

**विन्ध्यस्तु जलवालकः ॥ १०२९॥**

१ आदित्यगमनविरोधेन विरुद्धं[३] ध्यायन्त्यत्रेति **विन्ध्यः**, पृषोदरादिः[४] । विशेषेण इन्ध्यते[५](इध्यते) दीप्यत इति वा । 'ञिइन्धी दीप्तौ'(रु.आ.से.), पृषोदरादिः । "विन्ध्यति[६](विध्यति) विन्ध्यः । 'व्यध ताडने'(दि.प.अ.) अघ्न्यादित्वात् साधुः"[ ]इत्येके । २ जलेन वाडते आप्लावयति[७] **जलवालकः** । 'वाडृ आप्लवने[८]'(भ्वा.आ.से.) । द्वे विन्ध्याद्रेः ॥१०२९॥

**शत्रुञ्जयो विमलाद्रिः**

१ शत्रून् जयति **शत्रुञ्जयः**। 'जि अभिभवे'(भ्वा.प.अ.), 'संज्ञायां भृतॄव्र(वृ)जिधारिसहितपिदमः'३।२।४६॥ इति खच्, 'खित्यनव्ययस्य'६।३।६६॥ इति मुम्[९] । २ विमलश्चाऽसावद्रिश्च **विमलाद्रिः** । द्वे शत्रुञ्जयाद्रेः ॥

**इन्द्रकीलस्तु मन्दरः ।**

१ इन्द्रेण कील्यते **इन्द्रकीलः** । 'कील बन्धने'(भ्वा.प.से.), घञ् । २ मन्द्यते स्तूयते जनैरिति **मन्दरः** । 'मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु'(भ्वा.आ.से.), भौवादिकः, बाहुलकादरन् । मन्दं रातीति वा । 'रा दाने[१०]'(अ.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥ । द्वे मन्दराद्रेः॥

**सुवेलः स्यात् त्रिमुकुटस्त्रिकूटस्त्रिककुच्च सः ॥१०३०॥**

१ शोभना वेलाऽस्य **सुवेलः**, आसन्नसमुद्रत्वात् । 'गोस्त्रियोरुपसर्जनस्य'१।२।४८॥इति ह्रस्वः । २ त्रयो मुकुटभूताः कूटा अस्य **त्रि[मुकुटः** । ३ त्रीणि कूटान्यस्य **त्रि]कूटः** । ३ ककुदं चूडा, त्रीणि ककुदाकाराणि शिखराण्यस्य **त्रिककुत्** । 'त्रिककुत् पर्वते' ५।४।१४७॥ इत्यन्तलोपात् साधुः । त्रिककुदौ, त्रिककुदः[११] इत्यादि । चत्वारि त्रिकूटाद्रेः ॥१०३०॥

**उज्जयन्तो रैवतकः**

१ उदत्यर्थं जयति सर्वोत्कर्षेण वर्तते **उज्जयन्तः** । 'जि जये'(भ्वा.प.अ.), 'तृभू-'(उणा-४०८)इत्यन्तच्[१२][१३] । २ वन्यते स्मेति वतः, राया सुवर्णेन वतो[१४] रैवतः, स्वार्थे कनि **रैवतकः** । रैवताः सन्त्यत्रेति वा[११], चातुरर्थिकोऽण्, अरीहणादित्वात् । द्वे 'गिरनारि[१५]' इति ख्यातस्य ॥

**सुदारुः पारियात्रकः[१६] ।**

१ शोभनानि दारूण्यत्र **सुदारुः** । २ परितो यात्रायां भवः **पारियात्रकः**[१६], स्वारोहत्वात् । "पारियात्रया दृश्यत इति शेषेऽणि पारियात्रः, ततः स्वार्थे कन्"[ ] इति पुरुषोत्तमः। पारियात्रकोऽन्तस्थातृतीयः । तथा च- "भुङ्क्ते महीमत्र विधाय यात्रां ससह्य विन्ध्याचलपारियात्राम्" [[१७]] इति अन्त्ययमके[१८] वराहः। द्वे सवालक्षपर्वतस्य ॥

**लोकालोकश्चक्रवालः[१९]**

१ अन्तर्लोक्यत इति लोकः, बहिस्तु सूर्यकिरणास्पर्शनान्न लोक्यत इत्यलोकः । 'लोकृ दर्शने'(भ्वा.आ.से.), कर्मणि घञन्तौ । लोकश्चाऽसावलोकश्चेति **लोकालोकः** । "प्रकाशश्चाऽन्धकारश्च[२०] लोकालोक इवाऽचलः"[रघुवंशम्,

---

१. '-ति' इति३.५॥ २. 'प्रश्र-' इति१.२.३॥ ३. १प्रतौ नास्ति ॥ ४. इतोऽग्रे ३.५प्रत्योः 'वि' इति दृश्यते ॥ ५. 'इन्धते' इति३॥ ६. '-ते' इति५॥ ७ 'आप्लवते' इति३॥ ८ 'आप्लाव्ये' इति क्षीरतरङ्गिण्यादयः ॥ ९ 'नुम्' इति३॥ १०. 'रा ला दाने' इति१.२.३॥ ११. १.२.४.५प्रतिषु नास्ति ॥ १२. 'इत्यतच्' इति१.३.४.५॥ १३. वस्तुतः 'तृभू-'(उणा-४०८)इत्यनेन झच्, 'झोऽन्तः'७।२।३॥ इत्यनेन झस्याऽन्तादेशः ॥ १४ 'रै-' इति१.२.३॥ १५. '-र' इति३॥ १६. '-त्रिकः' इति१.३.४.५॥ १७ "लब्धे महान् सम्यगवाप्य यात्रां ससह्यविन्ध्याचलपारियात्राम्" इति टीकासर्वस्वम्, भा-२, २।३।३॥, पृ.४६॥, द्र. पदचन्द्रिका, भा-२, शैलवर्गः, श्लो-४१, पृ.६०॥ १८. 'अत्र' इति३॥ १९. तुलनीयोऽमरकोषः२।३।२॥ २०. '-श्चाप्रकाशश्च' इति रघुवंशे, पृ.२४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्गः-१, श्लो-६८]इति कालिदासः । १ चक्राकारेण वलति वाडते वा **चक्रवालः** । ''चक्रं भूमिचक्रं वडते वेष्टयति[१] चक्रवाडः, कर्मण्यणि पृषोदरादिः''[[२]]इति स्वामी[३] । ''चक्रं भूमण्डलं वलते वेष्टयति''[[३]]इति तु सर्वधरः । ''चक्राकारेण वाडते, 'वाडृ आप्लाव्ये'(भ्वा.आ.से.)''[[३]]इति तु भट्टः । प्राकारवत् साब्धिद्वीपां महीमावेष्ट्य स्थितस्य गिरेर्लोकालोकाख्यस्य ॥

## अथ मेरुः[1] कर्णिकाचलः[2] ॥१०३१॥

## रत्नसानुः[3] सुमेरुः[4] स्वः[5]-स्वर्गि[6]-काञ्चनतो[7] गिरिः ।

१ मान्त्यमरा अत्र, मीयते सूर्येन्दुभ्यां वा **मेरुः** । 'मा माने'(अ.प.अ.), 'माङ् माने'(दि.आ.अ.) अस्माद्वा, 'मापो रुरीच(रुरीच्च[४])'( )इति सूत्रेण रुप्रत्ययः, धातोरीकारान्तादेशः[५], [गुणः] । मिनोति क्षिपति उच्चत्वाद् ज्योतींषीति वा । 'डुमिञ् प्रक्षेपणे'(स्वा.उ.अ.), बाहुलकाद् रुः । २ जम्बूद्वीपपद्मस्य[६][७] कर्णिकाभूतोऽचलः **कर्णिकाचलः** ॥१०३१॥ ३ रत्नानि सानुष्वस्य **रत्नसानुः** । ४ **सुमेरुः** मेरोरभिन्नार्थः, इन्द्रमहेन्द्रवत् । ५-७ स्वःस्वर्गिकाञ्चनशब्देभ्यो गिरिः, स्वः गिरिः **स्वर्गिरिः** । स्वर्गिणां देवानां गिरिः **स्वर्गिगिरिः** । काञ्चनस्य गिरिः **काञ्चनगिरिः** । सर्वाद्रि[८]नामानि पुंसि । सप्त मेरोः ॥

## शृङ्गं[1] तु शिखरं[2] कूटम्[3]

१ शीर्यते[९] निघातेन[१०] शृणाति हिनस्ति पतदिति वा **शृङ्गम्**, पुंक्ली. । 'शॄ हिंसायाम्'(क्र्या.प.से.), 'शृणातेर्ह्रस्वश्च'(उणा-१२३)इति गन् कित्त्वं नुट् च उपसंख्यानात् । २ ([११]शिखाऽस्याऽस्तीति **शिखरम्**) । 'शिखाया ह्रस्वश्च'(वा- )इति रः । ''शिखां रातीति वा । 'रा दाने'(अ.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥, 'ङ्यापोः संज्ञाछन्दसि(-सोर्)[१२]बहुलम्'६।३।६३॥ इति ह्रस्वः''[ ]इति स्वामी[१३] । शाखति व्याप्नोति वा । 'शाखृ व्याप्तौ[१४]'(भ्वा.प.से.), 'शाखेरिदेतौ चातः'(हैमोणा-४००)इत्यरः । पुंक्लीबलिङ्गोऽयम् ।

''शिखरं शैलवृक्षाग्रपुलकेषु न योषिति ।
पक्वदाडिमबीजाभमाणिक्यशकलेऽपि च ॥१॥''[[१५]]इति ।

३ कूट्यते दह्यतेऽर्कदावाभ्यामिति **कूटम्**, पुंक्ली. । 'कूट दाहे'(चु.उ.से.), घञ् । त्रीणि 'टूकं[१६]' इति ख्यातस्य ॥

## प्रपातस्[1]त्वतटो[2] भृगुः[3][१७] ॥१०३२॥

१ प्रकर्षेण पतन्त्यस्मात् **प्रपातः** । 'पत्लृ पतने[१८]'(भ्वा.प.से.), 'अकर्तरि च कारके संज्ञायाम्'३।३।१९॥ इति घञ् । २ अविद्यमानस्तटः, आलम्बनस्थानं समभूभागो वाऽत्र **अतटः** । ३ दवार्ककरैर्भृज्यते **भृगुः**, पुंसि । 'भ्रस्जो(भस्ज) पाके'(तु.उ.अ.), 'प्रथिम्रदिभ्रस्जां सम्प्रसारणं सलोपश्च'(उणा-२८)इत्युप्रत्ययः[१९], न्यङ्क्वादित्वात् कुत्वम् । त्रीणि 'झांप' इति ख्यातायाः । ''स धातुरागारुणयाननेमिः[२०] प्रभुः[२१] प्रपातध्वनिमिश्रतूर्यः[२२]''[रघुवंशम्, सर्गः-१६, श्लो-३२]इति रघुः । ''स्तनातटे[२३] चन्दनपङ्किलेऽस्या जातस्य यावद्युवमानसानाम्''[नैषधीयचरितम्, सर्गः-७, श्लो-८०]इति श्रीहर्षः । ''कृत्वा पुंवत्पातमुच्चैर्भृगुभ्यः'' [शिशुपालवधम्, सर्गः-४, श्लो-२३]इति माघः ॥१०३२॥

## मेखला[1] मध्यभागोऽद्रेर्नितम्बः[2] कटकश्च[3] सः ।

१ अद्रेर्मध्यभागो **मेखला** । मिनोति मेखला । 'डुमिञ् प्रक्षेपणे'(स्वा.उ.अ.), 'मिञः(मिगः) खलश्चेच्च[२४]' (हैमोणा-४९७)इति खलः, अजादित्वाट्टाप् । २ नितरां तन्यते **नितम्बः**, पुंसि । 'तनु विस्तारे'(तु.उ.से.), 'वलि[नि]तनिभ्यां बः'(हैमोणा-३१७)इति बः । ३ कट्यते वृक्षादि-

---

१. 'वेष्टति' इति३॥ २. द्र. पदचन्द्रिका, भा-२, शैलवर्गः, श्लो-४०, पृ.५८॥ ३. अम.क्षीरस्वामिकृतटीकायाम्-''चक्राकारेण वलते वा चक्रवाडः, वाडृ आप्लाव्ये, आवेष्ट्य द्वीपान् स्थितो ह्यसौ ।'' इति दृश्यते, २।३।२॥, पृ.७८॥ ४. 'मिपिभ्यां नः' इत्युणादिगणसूत्रस्वरूपम्॥ ५. '-रो-' इति२.४॥ ६. '-पे' इति१॥ ७. '-पद्मक-' इति४॥ ८. 'सर्वाणि ना-' ३.४॥ ९. '-न्ते' इति४॥ १०. 'निपा-' इति१॥ ११. कोष्ठान्तर्गतपाठः १.४प्रत्योर्नास्ति ॥ १२. 'संज्ञायां' इति१॥ १३. द्र. पदचन्द्रिका, भा-२, शैलवर्गः, श्लो-४२, पृ.६२॥, तत्र-''शिखां रातीति ''ङ्यापो'' (पा.३।६।६३॥)इति ह्रस्व इति स्वामी'' इति दृश्यते ॥, अम.क्षीरस्वामिकृतटीकायाम्-''शिखास्यास्ति शिखरं, शिखाया ह्रस्वश्चेति रः (वा० ?)'' इति दृश्यते, २।३।४॥, पृ.७९॥ १४. 'दीप्तौ' इति४॥, 'शाखृ श्लाखृ व्याप्तौ' इति क्षीरतरङ्गिण्यादयः ॥ १५. तुलनीया अमी कोशाः, अनेकार्थसङ्ग्रहः ३।६०४॥, भा-२, पृ.२५२॥, विश्वलोचनकोशः, रान्तवर्गः, श्लो-२२७-२२८, पृ.३१४॥, विश्वप्रकाशकोशः, रान्तवर्गः, श्लो-१०४-१०५, पृ.१३३॥, मेदिनीकोशः, रान्तवर्गः, श्लो-२२६, पृ.१३९॥ १६. 'कूट' इति३॥ १७. तुलनीयोऽमरकोषः२।३।४॥ १८. 'शल हुल पत्लृ गतौ' इति क्षीरतरङ्गिण्यादयः ॥ १९. 'इत्या-' इति३॥ २०. 'धातुभेदारुण-' इति रघुवंशे, पृ.४०९॥ २१. 'प्रभुं' इति३.४.५॥ २२. 'प्रपातः' इति३॥, 'प्रयाण-' इति रघुवंशे, पृ.४०९॥ २३. मल्लिनाथसम्मतोऽयं पाठः, 'स्तनावटे' इति नारायणसम्मतपाठः ॥ २४. 'खलश्च' इति३.४.५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भिराश्रियते[1] **कटकः**, पुंक्ली. । 'कटे वर्षावरणयोः'(भ्वा.-प.से.), 'क्वुन् शिल्पिसंज्ञयोः'(उणा-१९०)इति क्वुन् । त्रीणि पर्वतमध्यभागस्य ॥

## दरी[1] स्यात् कन्दरः[2]

१ दृणाति **दरी** । 'दॄ विदारणे'(क्र्या.प.से.), अच्, गौरादिः । दीर्यत इति[2] वा । 'ॠदोरप्'३।३।५७॥ । २ कुत्सितं दृणाति **कन्दरः**, त्रिषु । 'क्रदि कदि[3] क्लदि आह्वाने रोदने[4] च'(भ्वा.प.से.), बाहुलकादरः । ''यद्वा कन्दं वैक्लव्यं राति भीरूणाम्''[मा.धातुवृत्तिः, भ्वादिः, धातुसं-६०]इति माधवः । ''स्त्रियां गौरादिङीषि[5] कन्दरी''[ ]इति स्वामी । ''पचादौ दरट् इति पाठात्''[ ]इति तु भट्टः । कमिति[6] मान्ताव्ययं[7] जलवाचि. जलेन दीर्यते कन्दरः । कन्दाः सन्त्यत्र वा । अश्मादित्वाद्[8] रः । स्त्रियां टापि कन्दराऽपि । ''[काञ्चन]कन्दरासु तरुणीरिह न याति(नयति) रविः'' [शिशुपालवधम्, सर्गः-४, श्लो-६७]इति माघः । ''ङीषि[9] कन्दरी चेत्यपि''[ ]इति पञ्जिका । द्वे गुफायाः । ''द्वे सजलस्य निर्जलस्य कृत्रिमस्य गृहाकारगिरिनिम्नप्रदेशस्य'' [पदचन्द्रिका, भा २, शैलवर्गः, श्लो-६४]इति मिश्राः ॥

## अखातबिले तु गह्वरं[1] गुहा[2] ॥१०३३॥

१ अखातमकृतकं यद् बिलम्, तत्र । गाह्यते **गह्वरम्** । 'गाहू विलोडने'(भ्वा.आ.से.), 'गह्वरछित्वर-[11]'(उणा-२८१)इत्यादिना ट्वरचि(ष्ट्वरचि) ह्रस्वो निपात्यते । उणादिवृत्तौ तु गाधतेर्निपातनमुक्तम् । गां भुवं ह्वरति कुटिलां करोति गतिं ह्वरयति कुटिलयति वा । 'ह्वृ कौटिल्ये'(भ्वा. प.अ.), अचि[12], पृषोदरादित्वाद् वा । गह्वाः[13] सन्त्यत्रेति, अश्मादित्वाद्[14] वा रः । पुंक्लीबलिङ्गोऽयम् । ''गह्वरं क्लीबमेव[15], गह्वरागह्वरीति तूपचारात्'' [[10] ]इति तु[16] पञ्जिका । २ गुह्यतेऽनया[17] **गुहा** । 'गुहू संवरणे'(भ्वा.प.से.), भिदादित्वादङ् । '''गिर्योषध्योः' (गणसू-३।३।१०४॥)[इति] अङ्''[मा.धातुवृत्तिः, भ्वादिः, धातु-सं-६२३]इति तु[18] माधवः । द्वे अखातबिलस्य । ''गुहा पाषाणसन्धिः स्यात् कन्दरः कन्दरा दरी''[हलायुधकोशः२।१६७॥]इति हलायुधः । ''अकृत्रिमपाषाणछिद्रे पञ्च''[ ]इति तट्टीका । गुहया[19] सह एकार्था इत्याह । ''गह्वरं तु[20] गुहादम्भनिकुञ्जगहनेष्वपि''[विश्वप्रकाशकोशः, रान्तवर्गः, श्लो-१५५]इति महेश्वरः ॥१०३३॥

## द्रोणी[1] तु शैलयोः सन्धिः

१ द्रवन्त्यस्यां **द्रोणी** । 'द्रु गतौ'(भ्वा.प.अ.), 'कृवृजॄषु(जॄ)सिद्रुपन्यति(न्यनि)स्वपिभ्यो नित्[21]'(उणा-२९०)इति नः, गौरादित्वाद् ङीष् । 'द्रुण हिंसागतिकौटिल्येषु'(तु.प.से.), इगुपधलक्षणः कः, गौरादित्वाद् ङीषिति वा । ''नानारण्यपशुव्रातसङ्कुलद्रोण्यलङ्कृतः[22]''[ ]इति भागवतम् । शैलयोः पर्वतद्वयस्य सन्धिः सन्धानम् । एकं पर्वतसन्धेः ॥

## पादाः[1] पर्यन्तपर्वताः[23] ।

१ पद्यते गम्यत एभिरिति **पादाः** । 'पद गतौ' (दि.आ.अ.), 'हलश्च'३।३।१२१॥ इति घञ् । पादा इवाऽधःस्थत्वाद् धारणाच्च वा । ''पादा इवाऽभिबभुरावलयो रथानाम्''[शिशुपालवधम्, सर्गः-५, श्लो-२०]इति माघः । पर्यन्तपर्वताः मुख्यशैलान्ते क्षुद्रपर्वताः । एकं मूलाद्रिसमीपस्थलघ्वद्रेः ॥

## दन्तकास्तु[1] बहिस्तिर्यक्प्रदेशा निर्गता गिरेः ।१०३४।

१ दन्तप्रतिकृतयो **दन्तकाः** । 'इवे प्रतिकृतौ' ५।३।९६॥ इति कन् । गिरेः पर्वतस्य बहिस्तिर्यक् च निर्गताः प्रदेशाः । एकं पर्वतदन्तकानाम्[24] ॥१०३४॥

## अधित्यकोर्ध्वभूमिः[1] स्यात्

१ अद्रेः उपरितनी भूमिः **अधित्यका** । 'उपाधिभ्यां त्यकन्नासन्नाधिरूढयोः'५।२।३४॥इति त्यकन्, 'न यासयोः' ७।३।४५॥ इत्यत्र त्यकन[25] उपसङ्ख्यानान्नेत्त्वम् । एकं पर्वतोपरितनभूमेः ॥

---

१. '-येते' इति४॥ २. ४प्रतौ नास्ति॥ ३. 'कदि क्रदि' इति क्षीरतरङ्गिण्यादयः ॥ ४ ३प्रतौ नास्ति ॥ ५ '-दिः ङीपि' इति३॥ ६. 'कि-' इति५॥ ७ 'मान्तो-' इति४.५॥ ८ 'अस्मा-' इति१.२.४.५॥ ९ 'ङीषि' इति१.२॥ १०. द्र. पदचन्द्रिका, भा-२, शैलवर्गः, श्लो-४४, पृ.६४॥ ११. 'छित्वरछत्वर-' इत्युणादिगणसूत्रे ॥ १२. 'अच्' इति३॥ १३. 'गु-' इति३.४.५॥ १४ 'अस्मा-' इति१.३.४.५॥ १५. 'क्लीबलिङ्गमेव' इति१॥ १६. ३प्रतौ नास्ति ॥ १७ 'गृ-' इति३.४॥ १८. ४प्रतौ नास्ति ॥ १९. 'गुहाया' इति३॥ २०. 'गह्वरस्तु' इति विश्वप्रकाशकोशे, पृ.१३७॥ २१. 'निः' इति४॥ २२. '-तं' इति३॥ २३. तुलनीयोऽमरकोषः२।३।७॥ २४ 'पर्वतकानाम्' इति४.५॥ २५. '-न्' इति३.४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अधोभूमिरुपत्यका[1] ।**

१ पर्वतस्याऽऽसन्ना अधोभूमिः **उपत्यका** । अत्राऽपि 'उपाधिभ्यां त्यकन्नासन्नाधिरूढयोः'५।२।३४॥ इति त्यकन् । '' 'अद्रेः'[अमरकोषः२।३।४॥]इत्यस्य सम्बन्धिमात्रोपलब्धकत्वादन्यत्राऽपि, ''समुद्रोपत्यका [हैमी] पर्वताधित्यका पुरी''[भट्टिकाव्यम्, सर्गः-५, श्लो-८९]इति भट्टिः'' [[१]]इति स्वाम्यादयः । एकमद्रिसमीपे आसन्नाधोभूमेः ॥

**स्नुः[1] प्रस्थं[2] सानुः[3]**

१ स्नौत्यम्भोऽस्मादिति **स्नुः**, पुंसि । 'ष्णु[२] प्रस्रवणे[३]' (अ.प.अ.), मितद्र्वादित्वाड्डुः । २ प्रतिष्ठन्तेऽस्मिन् समभूभागत्वादिति **प्रस्थम्** । 'ष्ठा गतिनिवृत्तौ'(भ्वा.प.अ.), 'घञर्थे कविधानम्'(वा-३।३।१०८॥)इति कः, 'आतो लोप इटि च'६।४।६४॥ इत्यालोपः । ३ सनोति ददाति सुखम्, सन्यते सेव्यते वा **सानुः[४]** । 'षणु दाने'(त.उ.से.), 'वन षण संभक्तौ[५]'(भ्वा.प.से.) वा, 'दृसनिजनि-'(उणा-३)इत्यादिना उण्(ञुण्) । पुंक्लीबलिङ्गावेतौ । ''प्रस्थः सानुरस्त्रियाम्'' [अमरकोष २।३।५॥]इत्यमरः । ''सानुः प्रस्थम्''[हलायुधकोशः२।१६६॥]इति हलायुधः । ''पर्वतस्य समभूदेशे द्वौ''[ ]इति तट्टीका । त्रीणि पर्वतसमभूभागस्य ॥

**अश्मा[1] तु पाषाणः[2] प्रस्तरो[3] दृषद्[4] ॥१०३५॥**

**ग्रावा[5] शिलो[6]पलः[7]**

१ अश्नुते व्याप्नोति **अश्मा,** पुंसि । 'अशूङ् व्याप्तौ'(स्वा.आ.से.), '-मनिन्'(उणा-५८४)इति मनिन् । २ पार्श्वं षनति[६] व्याप्नोति **पाषाणः** । 'वन षण[७] संभक्तौ' (भ्वा.प.से.), 'कर्मण्यण्'३।२।१॥, पृषोदरादिः । पषति बाधते पादाविति वा । 'पष बाधने'( ), 'पषेर्णित्'( ) इत्यानच् । मूर्धन्यमध्योऽयम् । ''संहर्ष[८]पाषाणपुरीषदूषिका निषेधदुःषेधमृषानुषङ्गिणः''[[९]]इत्यूष्मविवेकात् । ३ प्रस्तृणोति आच्छादयति **प्रस्तरः** । 'स्तृञ् आच्छादने'(स्वा.उ.अ.), अच् । ४ दृणाति दीर्यते वा **दृषद्,** स्त्रीलिङ्गः । 'शृदृभसोऽदिः'(उणा-१२७) इत्यनुवृत्तौ 'दृणातेः सुग्(षुग्) ह्रस्वश्च' (उणा-१२७)इत्यदिप्रत्ययः इति सुग्(षुग्) ह्रस्वत्वं च । दृषद् दान्ता मूर्धन्यमध्या । ''कषायकूष्माण्डमहिषो वृषभव्योषदृषद्[१०]ः''[[९]][११]इत्यूष्मविवेकात् । '' 'शरद्-दरद्-दृषद्दशेः' ( )इति दृशेरित्प्रत्ययः, इकारस्य चाऽकारः, तकारस्य दत्वं च निपात्यते, तेन दृशदिति [१२]चान्द्रोणादिसाधनात् तालव्यमध्याऽपि[१३]''[[१४]]इति सर्वधरः ॥१०३५॥ ५ गिरति **ग्रावा,** पुंसि । 'गॄ निगरणे'(तु.प.से.), प्राग्वत् (श्लो-१०२७) । ६ शिलति **शिला,** तालव्यादिः । 'शिल उञ्छे'(तु.प.से.), 'इगुपध-'३।१।१३५॥इति कः, भिदादित्वादङ्[१५] । ७ उप समीपे लाति **उपलः,** पुंक्ली. । 'ला दाने'(अ.प.अ.), 'आतः-' ३।२।३॥ इति कः । उप्यत इति वा । 'तृपिवपि-'(हैमोणा-४६८)इति किदलः । सप्त पाषाणस्य ॥

**गण्डशैलाः[1] स्थूलोपलाश्च्युताः ।**

१ भूकम्पादिना पर्वताच्च्युता गलिताः स्थूला महान्त उपलाः प्रस्तरा **गण्डशैलाः** प्रोच्यन्ते । ''गण्डः कपोले पिटके''[विश्वप्रकाशकोशः, डान्तवर्गः, श्लो-८]इति विश्वः । शैलानां गण्डा इव गण्डशैलाः । राजदन्तादिः । 'स्थूलोपलाः' इत्युपलग्रहणमुपलक्षणम्, तेन ''-लीलां दधौ राजतगण्डशैलाः'' [शिशुपालवधम्, सर्गः-४, श्लो-१३]इति माघप्रयोग उपपद्यते । ''चेलुश्चण्डा(-श्चण्डं) गण्डशैला इवेभाः''[शिशुपालवधम्, सर्गः-४, श्लो-६]इत्यपि माघः । एकं 'गंडा[१६]' इति ख्यातस्य ॥

**स्याद्आकरः[1] खनिः[2] खानि[3]र्गञ्जा[4]**

१ आकीर्यन्ते धातवोऽत्रेति **आकरः** । 'कॄ विक्षेपे' (तु.प.से.), 'पुंसि संज्ञायाम्-'३।३।११९॥ इति घः । २ खन्यते धातुलाभायेति **खनिः** । 'खन खनने[१७]'(भ्वा.उ.से.), 'खनिकृष्यज्ज्यमि(कष्यज्यसि)-'(उणा ५७९)इति इः । ङीषि खनी । ''धृतगम्भीरखनीखनीलिम''[नैषधीयचरितम्, सर्गः-२, श्लो-२५]इति नैषधः[१८] । ३ 'इञजादिभ्यः'(वा-३।३।१०८॥)इतीञि[१९] **खानिः,** ञित्त्वाद् 'अत उपधायाः' ७।२।११६॥ इति वृद्धिः । स्त्रीलिङ्गावेतौ । ''आकरस्तु

---

१. अम.क्षीरस्वामिकृतटीकायां न दृश्यते ॥ २. 'स्नु' इति३॥ ३. 'प्रश्र-' इति१.३॥ ४. १.३.४.५प्रतिषु नास्ति ॥ ५. 'भक्तौ' इति स्वामी ॥ ६. इतोऽग्रे ४प्रतौ 'वा' इति दृश्यते ॥ ७. 'षन' इति४॥ ८. 'संहर्षण-' इति१॥ ९. द्र. पदचन्द्रिका, भा-२, शैलवर्गः, श्लो-४२, पृ.६१॥ १०. '-द्' इति१.४॥ ११. द्र. रामाश्रमी २।३।४॥, पृ.१६०॥ १२. 'चन्द्रो-' इति३॥ १३. '-ध्योऽपि' इति३॥ १४. १प्रतौ नास्ति ॥ १५. '-लः' इति३॥ १६. 'गं-' इति१, 'गि-' इति४॥ १७. 'खनु अवदारणे' इति क्षीरतरङ्गिण्यादयः ॥ १८. 'माघः' इति३॥ १९. '-निः' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

खनिः खानिः''[ ]इति द्विरूपकोषः[1] । ४ गञ्जन्ति[2] शब्दायन्तेऽस्यां **गञ्जा**, पुंस्त्रीलिङ्गः । 'गजि शब्दे'(भ्वा.प.से.), अच् । चत्वारि 'आगर' इति ख्यातस्य ॥

## धातुस्तु गैरिकम् ॥१०३६॥

१ दधाति शोभामिति **धातुः**, पुंसि । 'डुधाञ् धारणादौ'(जु.उ.अ.), 'सितनिगमिमसिसि(स)च्यवि-'(उणा-६९)इति तुन् । २ गिरौ भवं **गैरिकम्** । अध्यात्मादित्वाट्ठञ् । गिरिकं भवमिति वा । तत्र गिरिकादण् शेषे, क्लीबेऽयम् । पुंस्यपीति गौडशेषः । द्वे 'सोनागेरू'[3] इति ख्यातस्य[4] । ''उच्यते गैरिकं[5] धातुः''[हलायुधकोशः२।१७०॥]इति हलायुधः । ''रागद्रव्ये द्वौ''[ ]इति तट्टीका । अमरस्तु-''धातुर्मनःशिलाद्यद्रेः''[अमरकोषः२।३।८॥]इति मनःशिलादिगिरिसम्भवं सर्वं सामान्येन धातुशब्देनाऽऽह । यदाहुः-

''सुवर्णरूप्यताम्राणि हरितालं मनःशिला ।
गैरिकाञ्जनकासीसलोहसीसाः सहिङ्गुलाः ॥१॥
गन्धकोऽभ्रकमित्याद्या धातवो गिरिसम्भवाः॥''[[6] ]इति ।

ततो धातुशब्देन विशेषण[7]प्रसिद्धिः[8] ॥१०३६॥

## शुक्लधातौ पाकशुक्ला कठिनी खटिनी खटी ।

१ शुक्लश्चाऽसौ धातुश्च **शुक्लधातुः**, तत्र । २ पाके शुक्ला **पाकशुक्ला** । ३ कठन्त्यनया **कठिनी** । 'कठ[9] कृच्छ्रजीवने'(भ्वा.प.से.), बाहुलकादिनच् । ४ खट आकाङ्क्षोऽ[10]स्त्यस्याः **खटिनी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः । ५ खटति **खटी** । 'खट आकाङ्क्षायाम्'(भ्वा.प.से.), अचि, गौरादिः । कखटीत्यपि । पञ्च 'खडी' इति ख्यातायाः ॥

## लोहं कालायसं शस्त्रं पिण्डं पारशवं घनम् ॥१०३७॥
## गिरिसारं शिलासारं तीक्ष्ण-कृष्णामिषे अयः ।

१ लुनाति छिनत्ति **लोहम्**, पुंक्लीबलिङ्गोऽयम्[11] । ''लोहोऽस्त्री''[अमरकोषः२।९।९८॥]इत्यमरः। 'लूञ् छेदने'(क्र्या.उ.से.), 'लूञो(लूगो) हः'(हैमोणा-५८६)इति हः । 'लुह कत्थनादौ'( )वा, ततोऽच् । २ कालं च[12] तदयश्च **कालायसम्** । 'अनोऽश्यामःसरसां जातिसंज्ञयोः'५।४।९४॥ इति टच्समासान्तः। ३ शस्यतेऽनेन **शस्त्रम्** । 'शसु हिंसायाम्'(भ्वा.प.से.), 'दाम्नीशसु(शस)युयुज-'३।१।१८२॥ इति ष्ट्रन् । ४ पिण्ड्यते[13] इति **पिण्डम्** । 'पिडि सङ्घाते'(भ्वा.आ.से.), घञ् । ५ परशवे इदं परशव्यम्, तस्य विकारः **पारशवम्**, अस्त्रियाम् । '[14]कंसीयपरशव्ययोर्यञञौ लुक् च'४।३।१६८॥ इत्यञ्, यतो लुक् । गौडस्तु-''शूद्रायां विप्रतनये पारस्त्रैणेयशस्त्रयोः, भवेत् पारशवः पुंसि''[ ]इति। षण्ढे त्वरुणः। ६ हन्यते **घनम्** । 'हन हिंसागत्योः'(अ.प.अ.) ॥१०३७॥ ७ गिरेः सारः श्रेष्ठः स्थिरभागो वा **गिरिसारम्** । ८ शिलाया अश्मनः सारं **शिलासारम्** । यत्स्मृतिः[15]:-''अश्मभ्यो(अश्मनो) लोहमुत्थितम्''[मनुस्मृतिः, अध्या-९, श्लो-३२१]। एतौ क्लीबे, पुंस्यप्यमरः । ९ तेजयति तेज्यते [वा] **तीक्ष्णम्** । 'तिज निशाने क्षमायां च'(भ्वा.प.से.), 'तिजेर्दीर्घश्च कस्नः[16]'(उणा-२९८)इति क्स्नः । १० कृष्णेन द्रव्येण आमिषति[17] स्पर्धते **कृष्णामिषम्**। 'मिष स्पर्धायाम्'(तु.प.से.), 'इगुपध-'३।१।१३५॥ इति कः। ११ एति द्रवीभावमिति **अयः**। 'इण् गतौ'(अ.प.अ.), 'इणोऽनागसी[18]'(उणा-६३७)इत्यसुन्। ''एति [19]गच्छत्यङ्गुलीयकादिरूपेण शरीरं ऋक्थक्रयसंविभागादिना पुरुषात् पुरुषान्तरं गच्छत्यनेन धर्मदानादीनित्ययः''[ ] इति भाष्यम् । अयसी, अयांसि इत्यादि क्लीबे । एकादश लोहस्य ॥ [शेषश्चात्र- ''स्याल्लोहे धीनधीवरे'' [शेषनाममाला४।१५९।] ]॥

## सिंहानधूर्तमण्डूरसरणान्यस्य किट्टके ॥१०३८॥

१ अस्य लोहस्य ध्मायमानस्य किट्टके मले, हिनस्ति पाण्डुरोगमिति **सिंहानम्** । पृषोदरादिः । शिङ्घाण इत्यपि । शिङ्घ्यत इति । 'शिघि आघ्राणे'(भ्वा.प.से.) अस्माद् 'आनक(आणको) लूञ्शिघि(लूशिङ्घि)धाञ्भ्यः'

---

१. ''खनिरेव मता खानिः इति द्विरूपकोशः'' इति पदचन्द्रिकारामाश्रम्यौ, भा-२, शैलवर्गः, श्लो-४५, पृ.६५॥, २।३।७॥, पृ.१६१॥ २. '-न्ते' इति३॥ ३. '-रुं' इति३॥ ४. '-तायाः' इति४॥ ५. '-के' इति३.५, '-क-' इति४॥ ६. द्र. अम.क्षीर.२।३।८॥, पृ.७९-८०॥, पदचन्द्रिका, भा-२, शैलवर्गः, श्लो-४६, पृ.६६॥, रामाश्रमी२।३।७॥, पृ.१६२॥ ७. '-षेण-' इति१.३॥ ८. '-द्धः' इति५॥ ९. 'कठि' इति१.२॥ १०. '-क्षको-' इति२॥ ११. 'अयम्' इति ४प्रतौ नास्ति॥ १२. ३प्रतौ नास्ति ॥ १३. 'पिड्यते' इति५॥ १४. 'कंशी-' इति३.४॥ १५. '-तेः' इति१॥ १६ 'क्स्नः' इत्युणादिगणसूत्रे नास्ति ॥ १७. '-ते' इति५॥ १८. 'इण आगसि'(उणा-६३७)इत्युणादिगणसूत्रम् ॥ १९. 'गच्छन्त्य-' इति३.४.५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(उणा-३६३)इत्यान(ण)कः, पृषोदरादित्वात् कलोपः । "शिङ्घानं पृषोदरादिः"[[१]]इति स्वामी । २ धूर्वति हिनस्ति **धूर्तम्**[२]। 'धूर्वी(धुर्वी) हिंसायाम्'(भ्वा.प.से.), 'हसिमृग्रिण्वाऽमिदमितमिलूपूधूर्विभ्य(धुर्वि)भ्यस्तन्'[३](उणा-३६६)। ३ मण्डयति कामलादिरोगखण्डनात् पुरुषमिति **मण्डूरम्** । 'मडि भूषायाम्'(चु.उ.से.), खर्जूरादित्वादूरच् । ४ सरत्यनेन **सरणम्** । 'सृ गतौ'(भ्वा.प.अ.), 'करणाधिकरणयोः-'३।३।११७॥ इति करणे ल्युट् । चत्वारि 'लोहकिट्टी' इति ख्यातायाः ॥१०३८॥

**सर्वं च तैजसं लोहम्**[1]

१ तेजोऽस्त्यस्य तैजसम् । ज्योत्स्नादित्वादण् । तेजसो विकार इति वा[४] । 'तस्य विकारः'४।३।१३४॥ इत्यण् वा। रोहति **लोहम्**, अस्त्रियाम् । 'रुह प्ररोहे'[५] (भ्वा.प.अ.)। सुवर्णादीनां तैजसां धाम्नां (धातूनां) विकाराणामेकोक्त्या नामैकं लोहमिति[६] । यदाहुः-

"सुवर्णं रजतं ताम्रं रीतिः काश्यं[७] तथा त्रपुः[८] ।
सीसं च धीवरं चैव ह्यष्टौ लोहानि चक्षते[९] ॥१॥"[[१०]]इति ।

शस्त्रं तु विशेषाल्लोहमिति ।

"लोहस्तु शस्त्रके लोहं जोङ्गके सर्वतैजसे[११]"[विश्वप्रकाशकोशः, हान्तवर्गः, श्लो-६]इति महेश्वरः ॥

**विकारस्त्वयसः कुशी**[1][१२] ।

१ अयसो लोहस्य विकारः फालाख्यः[१३] **कुशी** । कुं भूमिं श्यति तनूकरोति कुशी । 'शो तनूकरणे'(दि.प.अ.), 'अन्येभ्योऽपि-'(वा-३।२।१०१)इति डः, 'जानपदकुण्ड-'४।१।४२॥ इत्यादिना ङीष्[१४] । "कुशो[१५] दर्भः कुशी फालः"[शाश्वतकोशः, श्लो-३३७]इति शाश्वतः कुश्यति श्लिष्यति[१६] वा। 'कुश[१७] श्लेषे'(दि.प.से.), 'इगुपध-'३।१।१३५॥ इति कः, 'जानपद-'४।१।४२॥ इत्यादिना ङीष्[१८]। एकं कुश्याः । 'फाल' इति भाषा ॥

**ताम्रं[1] म्लेच्छमुखं[2] शुल्वं[3] रक्तं[4] द्व्यष्टमुदुम्बरम्[5][6]॥१०३९॥**
**म्लेच्छ[7]शावर[8]भेदाख्यं मर्कटास्यं[9] कनीयसम्[10] ।**
**ब्रह्मवर्धनं[11] वरिष्ठम्[12]**

१ ताम्यतेऽग्निना[१९] **ताम्रम्** । 'तमु ग्लानौ'[२०]( ), 'अमितम्योर्दीर्घश्च'(उणा-१७३)इति रक्। 'तमु काङ्क्षायाम्' (दि.प.से.)इत्यस्य वा । ताम्रं वर्णेन वा । २ म्लेच्छदेशे[२१] मुखमुत्पत्तिरस्य **म्लेच्छमुखम्**, समुदितं नाम । ३ शलति द्रवति **शुल्वम्** । 'शल गतौ'(भ्वा.प.से.), 'उल्वादयश्च' (उणा-५३५)इति वनि साधुः । ४ **रक्तं** वर्णेन । ५ द्वे हेमरूप्ये अश्नुते व्याप्नोति, ततोऽपि तद्द्रवनादिति **द्व्यष्टम्**। द्विपूर्वाद् 'अशूङ्[२२] व्याप्तौ'[२३](स्वा.आ.से.), अस्माद् गत्यर्थादकर्मकाच्चेत्यादौ ('गत्यर्थाकर्मक-'३।४।७२॥ इत्यादौ), चकारात् कर्तरि क्तः, 'व्रश्च-'३।२।३६॥ इति षत्वम्, ष्टुत्वम् । ६ उल्लङ्घितमम्बरमनेन[२४] **उदुम्बरम्** । पृषोदरादिः। मेदिन्यादौ तु टवर्गतृतीयमध्योऽयम् । "वृक्षभेदे टवर्गतृतीयमध्य एव"[[२५]]इति सुभूतिसर्वधरादयः । "उदुम्बरं(औदम्बरं) भवेत् ताम्रे फलादौ यज्ञशाखिनः[२६]"[[२७]] इत्यजयादौ त्वौदुम्बरमौकारादिवत्, उदुम्बर इति प्रकृते । "ताम्रे तु स्यान्नपुंसकम्"[मेदिनीकोशः, रान्तवर्गः, श्लो-२५०] इति मेदिन्यादिः ॥१०३९॥ ७-८ म्लेच्छशावरभेदेन आख्यानामाऽस्येति म्लेच्छशावरभेदाख्यम्, तेन **म्लेच्छम्**, **शावरम्**[२३] चेत्यर्थः । ९ मर्कटास्यवर्णत्वाद् **मर्कटास्यम्** । १० कनति दीप्यते **कनीयसम्** । 'कन दीप्तौ'[२८](भ्वा.प.से.), बाहुलकादनीयसः। ११ ब्रह्मज्ञानं वर्धयति पवित्रत्वादिति **ब्रह्मवर्धनम्** । 'वृधु[२९] वृद्धौ'(भ्वा.आ.से.), नन्द्यादित्वाल्ल्युः । १२ अतिशयेन वरं **वरिष्ठम्** । अतिशायने[३०] इष्ठन् । कालिका[३१]निवृत्तं तत्स्वर्णमेव । द्वादश ताम्रस्य । "पवित्रं कांस्यं[३२] च"[शेषनाममाला४।१६०॥]इति शैषिके ॥

---

१. अम.क्षीरस्वामिकृतटीकायाम्-"हिनस्ति सिंहानं ध्मायमानस्यायसो मलः" इति दृश्यते, २।९।९८॥, पृ.२२२॥ २. 'र्नः' इति४॥ ३. ४प्रतौ तथा उणादिगणसूत्रे नास्ति ॥ ४. अधिकोऽयं प्रतिभाति ॥ ५. 'रुह बीजजन्मनि' इति स्वामी, 'रुह जन्मनि प्रादुर्भावे' इति मैत्रेयः, 'रुह बीजजन्मनि प्रादुर्भावे च' इति सायणः ॥ ६. इतोऽग्रे १प्रतौ 'हलायुधः' इति दृश्यते ॥ ७. 'काश्यं' इति१.२, 'कांश्यं' इति४, 'कांश्यां' इति३॥ ८. 'त्रपुं' इति१, 'त्रपु' इति२॥ ९. 'वक्ष्यते' इति५॥ १०. द्र. अम.क्षीर.२।९।९९॥, पृ.२२२॥, स्वोपज्ञटीका४।१०३९॥, पृ.२३१॥ ११. '-तेजसे' इति३॥ १२. 'कुसी' इति१.२.५॥, तुलनीयोऽमरकोषः२।९।९९॥ १३. 'फ-' इति४.५॥ १४. 'षि' इति३॥ १५. ४प्रतौ नास्ति॥ १६. '-ते' इति५॥ १७. दुर्गसम्मतोऽयं धातुः, क्षीरतरङ्गिणी, दिवादिः, धातुसं-११२, पृ.२२९॥ १८. 'ङीप्' इति२.४.५॥ १९. इतोऽग्रे ५प्रतौ 'वा' इति दृश्यते ॥ २०. क्षीरतरङ्गिण्यादौ ग्लानार्थकतमुधातुर्न दृश्यते ॥ २१. '-शो' इति१.२.४॥ २२. क्षीरतरङ्गिण्यादौ ङकारो न दृश्यते ॥ २३. 'अशू व्याप्तौ संघाते च' मैत्रेयसायणौ ॥ २४. '-तमनेन' इति१॥ २५. द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-६६१, पृ.७५९॥ २६. द्र. रामाश्रमी२।९।९७॥, पृ.४४४॥ २७. 'शाम्ब-' इति१.४.५॥ २८. 'कनी दीप्तिकान्तिगतिषु' इति क्षीरतरङ्गिण्यादयः॥ २९. 'वृध' इति३॥ ३०. '-शयेन' इति१, '-शायिने' इति३॥ ३१. '-क-' इति१॥ ३२. 'काश्यं' इति१.२, 'काग्यां' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सीसं तु सीसपत्रकम्[१] ॥१०४०॥**

**नागं गण्डूपदभवं वप्रं सिन्दूरकारणम् ।**

**वर्ध्रं स्वर्णारियोगेष्टे यवनेष्टं सुवर्णकम् ॥१०४१॥**

१ सिनोति बध्नाति [२]पारतमिति **सीसम्,** क्लीबे । वैजयन्ती तु-"सीसोऽस्त्री"[वैजयन्तीकोषः३।२।२९॥]इति पुंस्यप्याह । 'षिञ् बन्धने'(स्वा.उ.अ.), 'षिञः सक् दीर्घत्वं च'( )इति सक्दीर्घत्वे[३] । २ सीसं च तत् पत्रं च[४] सीसपत्रम्[५]। स्वार्थे कनि **सीसपत्रकम्** ॥१०४०॥ ३ न गच्छति द्रव्यत्वादिति **नागम्,** क्लीबे । अमरस्तु पुंस्यप्याह । 'नभ्राण्नपात्-'६।३।७५॥ इति साधुः । ४ गण्डूपदेभ्यो भवति **गण्डूपदभवम्** । अच् । ५ उप्यते **वप्रम्** । 'टु(डु)वप् बीजतन्तुसन्ताने[६]'(भ्वा.उ.अ.), 'ऋज्रेन्द्र-'(उणा-१८६)इति साधुः । वर्णोत्कर्षे बीजत्वादुप्यत इति व्युत्पत्तिः । ६ सिन्दूरस्य कारणं **सिन्दूरकारणम्** । ७ वर्धते **वर्ध्रम्,** अस्त्रियाम्। "वर्ध्रो ना"[ ]इति तु माला । 'वृधु वृद्धौ'(भ्वा.आ.से.), 'ऋज्रेन्द्र-'(उणा-१८६)इति साधुः । ८ स्वर्णस्याऽरिः **स्वर्णारिः**, पुंसि । ९ हेम्नो वर्णोत्कर्षार्थ[७]-योगे[८] श्रेष्ठे इष्टं **योगेष्टम्** । स्वर्णारिश्च योगेष्टं च स्वर्णारियोगेष्टे, अत्रेतरयोगद्वन्द्वाद् द्विवचनम् । १० यवनानामिष्टं **यवनेष्टम्,** क्लीबे । ११ सुवर्णं करोति कायति[९] वा **सुवर्णकम्** । 'बहुलमन्यत्राऽपि-'( )इति डः । एकादश सीसस्य । शेषश्चात्र

"सीसके तु महाबलम्, वातपट्टं[१०] समोलूकं कृष्णं च त्रपुबन्धकम्"[शेषनाममाला ४।१६०॥]इति ॥१०४१॥

**वङ्गं त्रपु स्वर्णजनागजीवने**
**मृद्वङ्गरङ्गे गुरुपत्रपिच्चटे ।**
**स्याच्चक्रसंज्ञं तमरं च नागजं**
**कस्तीरमालीनसिंहले अपि ॥१०४२॥**

१ वङ्गति द्रवत्वं गच्छति **वङ्गम्** । 'वगि गतौ'(भ्वा.प.से.), पचाद्यच् । २ त्रपते[१२] इवाऽग्नेराशु[१३] द्रवणादिति **त्रपु**[१४] क्लीबे[१५] । 'त्रपूष् लज्जायाम्'(भ्वा.आ.वे.), 'मृ(शृ)स्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च[१६]'(उणा-१०)इत्युप्रत्ययः । उसन्तोऽप्ययम्, त्रपुः, त्रपुषी, त्रपूंषि इत्यादि[१७] । ३ स्वर्णाज्जायते **स्वर्णजम्** । 'पञ्चम्यामजातौ' ३।२।९८॥ इति डः । ४ नागं जीवयति **नागजीवनम्**। 'जीव प्राणने[१८]'(भ्वा.प.से.), हेतुमण्णिजन्तः, नन्द्यादित्वाल्ल्युः । ५ मृदु कोमलमङ्गमस्य **मृद्वङ्गम्** । ६ रज्यतेऽनेनेति **रङ्गम्** । 'रञ्ज रागे'(भ्वा.दि.उ.अ.), करणे घञ्, 'चजोः-'७।३।५२॥इति कुत्वम् । रङ्गतीति[१९] । 'रगि गतौ'(भ्वा.प.से.), अज्वा । ७ गुरु पत्रमस्य **गुरुपत्रम्** । ८ पिच्यते(पिच्च्यते) कुट्टयते **पिच्चटम्** । 'पिच्च[२०] कुट्टने'(चु.उ.से.), '[२१]शकादिभ्योऽटन्'(उणा-५२१)। ९ चक्रस्य संज्ञाऽस्य **चक्रसंज्ञम्**। १० ताम्यत्यग्निसम्पर्कात् **तमरम्** । 'तमु[२२] ग्लानौ'( ), अरन्प्रत्ययः । ११ नागाज्जायते **नागजम्**। १२ कसति **कस्तीरम्** । 'कस गतौ'(भ्वा.प.से.), 'जम्बीराभीर-'(हैमोणा-४२२)इति निपात्यते। १३ आलीयते स्म[२३] **आलीनम्** । 'लीञ् विलयने'( ), क्तः, 'ओदितः'८।२।४५॥ इति निष्ठानत्वम्। १४ सिंहलदेशोद्भवात् **सिंहलम्** । चतुर्दश वङ्गस्य । 'तरूउं[२४] कथीर' इत्यादिभाषा । शेषश्चाऽत्र-

"त्रपुणि श्वेतरूप्यं स्यात् शठं[२५] सलवणं रजः ।
परासं मधुकं ज्येष्ठं घनं च मुखभूषणम् ॥१॥"
[शेषनाममाला४।१६१॥]इति ॥१०४२॥

**स्याद् रूप्यं कलधौततारजतश्वेतानि दुर्वर्णकं**
**खर्जूरं च हिमांशुहंसकुमुदाभिख्यम्**

१ रूप्यति **रूप्यम्** । 'रूप विमोहने[२६]'( ), 'शिक्याऽऽस्य-'(हैमोणा-३६४)इति निपात्यते । २ कलं मनोज्ञं धौतं **कलधौतम्**। ([२७]३ तारयति **तारम्**) । ४ रज्यते

---

१. '-के' इति५॥ २ 'पारं-' इति३, 'पारि-' इति४॥ ३ ३प्रतौ नास्ति ॥ ४ ३.५प्रत्योः नास्ति॥ ५ २प्रतौ नास्ति ॥ ६ 'बीजसन्ताने' इति१, क्षीरतरङ्गिण्यादयश्च ॥ ७ '-र्थं' इति१.३॥ ८ '-ग-' इति१.५॥ ९ 'कारयति' इति१॥ १०. 'चीनपट्टं' इति१, 'चीनपिष्टं' इति३॥ ११. 'त्रपुः' इति१.३.४॥ १२. 'त्रप्यते' इति४.५॥ १३. '-रशुद्धवर्णादिति' इति५॥ १४ 'त्रपुः' इति३॥ १५. 'क्लीबलिङ्गः' इति३॥ १६. ४प्रतौ नास्ति ॥ १७ '-दौ' इति१॥ १८. 'प्राणधारणे' इति३, क्षीरतरङ्गिण्यादयश्च ॥ १९. इतोऽग्रे ३प्रतौ 'वा' इति दृश्यते ॥ २०. 'पिच्छ' इति मैत्रेयसायणौ ॥ २१. 'शक्या-' इति३॥ २२. क्षीरतरङ्गिण्यादौ ग्लानार्थकतमुधातुर्न दृश्यते, अपि तु काङ्क्षार्थकः ॥ २३. 'स्मेति' इति३॥ २४ '-रुउं' इति१, 'तुरुऔ' इति३, '-उ' इति५॥ २५. 'शण्ठं' इति२.४.५॥ २६. 'रूप रूपक्रियायाम्' इति क्षीरतरङ्गिण्यादयः ॥ २७ कोष्ठान्तर्गतपाठः २.३.४.५प्रतिषु न दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हेम्ना **रजतम्**, पुंक्ली.। 'रञ्ज रागे'(भ्वा.उ.अ.), 'पृषिरञ्जिभ्यां कित्'(उणा-३९१)इत्यतच्[1], रजतं रजकः रजः-सूपसङ्ख्यानान्नलोपः[2] । ५ श्वेतते **श्वेतम्** । 'श्वितादृ[3] वर्णे[4]' (भ्वा.आ.से.), अच् । सिताद्यपि । ६ सुवर्णापेक्षया दुर् निन्दितो वर्णोऽस्य दुर्वर्णम्। [स्वार्थे कनि **दुर्वर्णकम्**]। ७ खर्जति **खर्जूरम्** । 'खर्ज व्यथने'(भ्वा.प.से.), 'खर्जिपिञ्जादिभ्य ऊरोलचौ'(उणा-५३०)इत्यूरच्[5] । ८-१० हिमांशुहंसकुमुदानामभिख्या यस्य तत् तथा **चन्द्राह्वयम्, हंसाह्वयम्, कुमुदाह्वयम्** इत्यर्थः। दश रूप्यस्य। शेषश्चात्र-

"रजते त्रापुषं वङ्गं जीवनं वसु[6] भीरुकम् ।
शुभ्रं सौम्यं च साध्यं[7] च रूप्रं भीरु जवीयसम् ॥१॥"
[शेषनाममाला ४।१६२॥] ॥

**सुवर्णं पुनः ।**

**स्वर्णं हेम हिरण्यहाटकवसून्यष्टापदं काञ्चनं**
**कल्याणं कनकं महारजन[8]रैगाङ्गेयरुक्माण्यपि ॥१०४३॥**
**कलधौतलोहोत्तमवह्निबीजा-**
**न्यपि गारुडं गैरिकजातरूपे ।**
**तपनीयचामीकरचन्द्रभर्मा-**
**ऽर्जुननिष्ककार्तस्वरकर्बुराणि ॥१०४४॥**
**जाम्बूनदं शातकुम्भं रजतं भूरि भूत्तमम् ।**

१ शोभनो वर्णोऽस्य **सुवर्णम्**। पृषोदरादित्वादुकारलोपे **स्वर्णम्** । यद्वा सुष्ठु ऋणोति ऋच्छति प्राप्नोति दीप्तिमिति[9] स्वर्णम्। 'ऋणु गतौ'(त.उ.से.), पचाद्यच्, 'पुगन्तलघूपधस्य-'७।३।८६॥ इति गुणः । शोभनमर्णो जलमस्येति वा । नैरुक्ते सकारलोपे वा स्वर्णम्[10]। 'भूवादयः-'[11]१।३।१॥ इतिवद् वकारागमे सुवर्णमित्यन्ये। पुंक्लीबलिङ्गावेतौ । ३ हिनोति **हेम** । 'हि गतौ वृद्धौ च' (स्वा.प.अ.)अस्माद्धातोः 'नामन्सा(सी)मन्हेमन्रोमन्व्योमन्विधर्मन्पाप्मन्[12]'(उणा-५९०)इति मन्नन्तं निपात्यते। "हिनोति गच्छत्यनेन सुगतिं पात्रे दत्तेन पुरुषो गम्यते वा तदर्थिभिः गच्छति वा स्वयं कटकादिरूपां विभूतिं गच्छति वाणिज्यादिना प्रतिदिनं वर्धति ताम्राद्युपरि लेपनाद् वर्धते[13]" [ ]इति सुबोधिनीकारः । अथवा हितमापदि, निहितं वा भूम्यादौ, दधातेर्मनिनि हिरादेशो निपात्यते । हेम, हेमनीत्यादि क्लीबे । 'क्षि(क्षु)हिभ्याम्-'(हैमोणा-३४१)इति मप्रत्यये[14] हेमशब्दोऽकारान्तोऽपि । पुंक्लीबलिङ्गः। ४ ह्रियते **हिरण्यम्** । 'हृञ् हरणे'(भ्वा.उ.अ.)अस्माद् 'हर्यतेः कन्यन्[15] हिर् च (हिरच्)'(उणा-७२२)इति विधीयमानः कन्यन्प्रत्ययो हिरादेशश्च बाहुलकाद् ह्रियते चौरैर्यत्नेन रक्ष्य[16]-माणमपि शिल्पिभिर्वा पत्राङ्कुरकादिभिरपदिशायां[17] राज्ञा वोपधि[18]ग्रहात्[19] ह्रियते जनाज्जनमिति वा संव्यवहारार्थं द्रव्यस्वभावत्वान्नैकत्राऽवस्थायित्वं तस्य[20], अथवा ह्रिधातुजं रूपं हिनोते रमतेश्च[21] धातुद्वयात् समुदितात् कन्यन्प्रत्ययो बाहुलकाद् रूपसिद्धिश्च, हितं च तदापदि दुर्भिक्षादौ रमयति सर्वदा सर्वमिति। अथवा हर्यतेः प्रेरणाक[22]र्मणः[23] हर्यतेः कन्यन् हिरच्[24] यथाप्राप्तरूपम्, 'हर्य गतौ'(भ्वा.प.से.)इत्यस्य[25] । ५ हटति दीप्यते **हाटकम्**। 'हट दीप्तौ'(भ्वा.प.से.), 'संज्ञायां च'३।३।१०९॥इति ण्वुल् । हाटकाकरभवत्वाद्वा । क्लीबेऽयम् । पुंस्यपि वाचस्पतिः, यदाह "हाटकाकरसंभूतं पलाशकुसुमच्छवी"[[26]]इति, "हाटकमस्त्रियाम्"[[26]]इति । ६ वसत्याकरे[27] **वसु**, क्लीबे। 'वस[28] निवासे'(भ्वा.प.अ.), 'मृ(शृ)स्वृस्निहित्रप्यसिवसि-'(उणा-१०)इत्यादिना उः । ७ अष्टौ लोहाः पदान्युत्पत्तिस्थानान्यस्य, अष्टसु लोहेषु पदं प्रतिष्ठाऽस्येति [वा] **अष्टापदम्** । 'अष्टनः संज्ञायाम्-'६।३।१२५॥ इति दीर्घः । "अष्टापदोऽस्त्रियाम्"[अमरकोषः २।९।९५॥]इत्यमरः । ८ काञ्चते[29] दीप्यत इति **काञ्चनम्**। 'कचि काचि दीप्तिबन्धनयोः[30]'(भ्वा.आ.से.), नन्द्यादित्वा-

१. इतोऽग्रे १प्रतौ 'रजत इति' इति दृश्यते ॥ २. अत्र सिद्धान्तकौमुद्याः 'अस्यकेऽने च रञ्जेर्नलोपो वाच्यः' इति वार्तिकस्था तत्त्वबोधिनीव्याख्या द्रष्टव्या, पृ.५६५॥ ३. क्षीरतरङ्गिण्यादौ ङकारानुबन्धो न दृश्यते ॥ ४ 'वर्णने' इति१॥ ५ 'त्रा' इति१॥ ६. 'चसु' इति१.२.४॥ ७ 'सौ-' इति१, 'शोध्यं' इति शेषनाममालास्वोपज्ञटीकयोः ॥ ८ '-रजत-' इति१.२.३॥ ९ 'दीप्त-' इति३॥ १०. 'सु-' इति५॥ ११. 'भु-' इति३॥ १२. 'नामन्सीमन्व्योमन्रोमन्लोमन्पाप्मन्धामन्'(उणा-५९०)इत्युणादिगणसूत्रस्वरूपम् ॥ १३. ' नात्' इति३॥ १४. '-य-' इति२॥ १५. 'न्यकन्' इति४॥ १६. 'रक्ष-' इति५॥ १७ '-पि-' इति३.४.५॥ १८. 'चो-' इति१॥ १९. '-ग्रहणाद्' इति५॥ २०. 'तस्या' इति५॥ २१. 'रमेश्च' इति५॥ २२. '-णात् क-' इति१॥ २३. '-णाः' इति५॥ २४ 'हिर् च' इति२.४॥ २५. '-स्या' इति५॥ २६. द्र. स्वोपज्ञटीका ४।१०४४॥, पृ.२३२॥ २७ '-कारे' इति५॥ २८ 'वसु' इति४.५॥ २९. 'काञ्च्यते' इति३॥ ३०. '-देवनयोः' इति१, 'दिप्त-' इति५, सायणमतेऽयं धातुपाठः, 'कचि दीप्तिबन्धनयोः' इति स्वामिमैत्रेयौ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ल्ल्युः, पृषोदरादित्वाद् वा दीर्घत्वम् । द्वितीयस्मादेव धातोः ''अनुदात्तेत्वाद् युच्''[मा.धातुवृत्तिः, भ्वादिः, धातुसं-१०४] इति माधवः । काञ्चनस्य[1] विकारः काञ्चनमिति वा । 'प्राणिरजतादिभ्योऽञ्'४।३।१५४॥ इत्यञ्, 'नित्यं वृद्धशरादिभ्यः'४।३।१४४॥ इति मयटोऽपवादः । ९ कल्यते **कल्याणम्** । श्रेयोनामसु(श्लो-८६) व्याकृतम् । १० **कनकम्**, कनति दीप्यत इति । 'कनी दीप्तिकान्तिगतिषु' (भ्वा.प.से.), 'कृञादिभ्यः[2] संज्ञायाम्-'(उणा-७१३)इति वुन्[3], 'क्वुन् शिल्पिसंज्ञयोः'(उणा-१९०)इति क्वुन् वा । ११ महच्च तद् रजनं च **महारजनम्**[4], तुर्यवर्गपञ्चमान्तः । 'आन्महतः समानाधिकरणजातीयेषु(-जातीययोः)'६।३।४६॥ इत्याकारोऽन्तादेशः । ''महारजनमित्युक्तं[5] शातकुम्भकुसुम्भयोः''[विश्वप्रकाशकोशः, नान्तवर्गः, श्लो-२०५]इति महेश्वरस्तवर्गपञ्चमान्तेषु पपाठ । १२ रीयते(रायते) उदारैरिति **राः** । राति ददाति जनेभ्यः सुखं वा । 'रा दाने'(अ.प.से.), 'रातेर्डैः'(उणा-२२४) इति डैः । ''राद्वयोर्विभवे स्वर्णे''[[6]]इति रुद्रः । ''राः स्मृता (स्मृतः) स्वर्णवित्तयोः''[विश्वप्रकाशकोशः, रान्तवर्गः, श्लो-१]इति तु[7] विश्वः । रायौ, रायः इत्यादि । १३ गङ्गायां भवं **गाङ्गेयम्** । शुभ्रादित्वाड्ढक् । यदग्निना रौद्रं बीजं गङ्गायां क्रमितं तेन सा कुमारं सूतवती, तदुल्वं च सुवर्णमभूदिति । ''यं गर्भं[8] सुषुवे गङ्गा[9] पावकाद् दीप्ततेजसम् ।
तद्वृत्तं(तदुल्वं) पर्वते न्यस्तं हिरण्यं समपद्यत[10] ॥१॥''
[[11]]इति वायुपुराणम् । १४ रोचते **रुक्मम्** । 'रुच दीप्तौ' (भ्वा.आ.से.), 'युजिरुचितिजां[12] कुश्च मक्[13]'(उणा-१४३) इति सूत्रेण कवर्गोऽन्तादेशः, मगागमश्च(मक्प्रत्ययश्च) ॥१०४३॥ १५ कलं सुवर्णकालिका[14] तद्धौतमस्मिन् **कलधौतम्** । १६ लोहेषूत्तमं **लोहोत्तमम्** । १७ वह्नेर्बीजं **वह्निबीजम्** । यदाहुः-''अग्नेरपत्यं प्रथमं सुवर्णम्''[[15]] इति । १८ गरुडस्येदं **गारुडम्** । १९ गिरौ जातं **गैरिकम्** । २० जातं व्यक्तं[16] रूपं[17] सौन्दर्यमस्य[18], प्रशस्तमुत्पन्नं वाऽस्य **जातरूपम्** । 'प्रशंसायां रूपप्'५।३।६६॥ ''जातं व्यक्तौघजन्मसु''[मेदिनीकोशः, तान्तवर्गः, श्लो-१८]इति मेदिनिः । अकृतकरूपमित्यर्थः । यद्वा 'जनी प्रादुर्भावे'(दि.आ.से.), निष्ठातकारः[19], 'जनसनखनाम्-' ६।४।४२॥इत्यात्वं जातः । 'रुच[20] दीप्तौ'(भ्वा.आ.से.), 'खष्पशिल्पशष्पबाष्परूपतर्प(पर्प)तल्पाः'(उणा-३०८)इति पप्रत्ययान्तो निपातितः[21], निपातनादुकारस्य च[22] दीर्घः, चकारलोपः । रोचते रूपम् । अनाहार्यतया जातं रूपमस्य जातरूपम्[23] । तथा च रामायणे श्रीस्कन्दोत्पत्तौ-''इह [24]हैमवते भागे[25] गर्भोऽयं संनिवेश्यतां इत्यतः परिनिक्षिप्तमाने गर्भे तु तेजोभिरभिरञ्जितः सर्वं[26] पर्वतसन्नद्धं[27] सौवर्णं जातमित्यतः जातरूपमिति ख्यातं तदा प्रभृतिराघवः''[ ] इत्यादि । २१ तपनं दाहमर्हति[28] **तपनीयम्** । २२ चमीकर[29] आकारभेदः, तत्र भवं **चामीकरम्** । २३ चन्दत्याह्लादयति **चन्द्रम्**, पुंक्लीबम्[30] । 'चदि आह्लादनदीप्त्योः'(भ्वा.प.से.), 'स्फायितञ्चि-'(उणा-१७०)इति रक् । २४ ([31]भ्रियत इति) **भर्म** इति, 'डुभृञ् धारणादौ'(जु.उ.अ.), मनिन् । भ्रियते धार्यतेऽङ्गुल्यादिभिः, धार्यते आपन्निवारणार्थं वा, पोषयत्यनेन [32]कुटुम्बमिति वा । हरतेर्वा मनिनि 'हृग्रहोर्भश्छन्दसि'( ) इति भकारः । हिरण्येन गरति धातुजेन समानार्थम् । भर्मणी, भर्माणि इत्यादि क्लीबे । अयमदन्तोऽपि ज्ञानवत् भर्मं, भर्मे, भर्माणि इत्यादि । २५ अर्ज्यते पुण्यवद्भिः **अर्जुनम्** । 'अर्ज सर्ज[33] अर्जने'(भ्वा.प.से.), 'अर्जेर्णिलुक् च'(उणा-३३८)इत्युनन् । २६ निषीदति मनोऽत्र **निष्कः**, पुंक्ली. । ''निष्कोऽस्त्री''[अमरकोषः३।३।१४॥]इत्यमरः । 'षद्लृ विशरणादौ[34]'(भ्वा.प.से.), 'नौ[35] सदेर्डिच्च'(उणा-३२५)इति कनि[36] । ''[37]निःशेषेण काम्यते''[अम.क्षी२.३।३।

---

१. 'काञ्चस्य' इति४॥ २. 'कृना-' इति१.२.४.५॥ ३. 'वुञ्' इति३॥ ४ '-तं' इति१॥ ५. '-मुद्दिष्टं' इति विश्वप्रकाशकोशे, पृ.१०२॥ ६. द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-६६२, पृ.७५३॥, रामाश्रमी२।९।९१॥, पृ.४४१॥ ७. १.४प्रत्योर्नास्ति ॥ ८. 'गर्भे' इति१॥ ९. 'गङ्गाया' इति१॥ १०. 'समु-' इति४॥ ११. द्र. टीकासर्वस्वम्, भा-३, २।९।९५॥, पृ.२३३॥, पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-६६६, पृ.७५६॥, रामाश्रमी२।९।९४॥, पृ.४४२॥ १२. '-तेजां' इति३॥ १३. उणादिगणसूत्रे न दृश्यते ॥ १४. '-कलिका' इति१.३॥ १५. द्र. स्वोपज्ञटीका४।१०४४॥, पृ.२३२॥ १६. '-क्त-' इति२.३॥ १७. 'रूपमस्य' इति३॥ १८. ३प्रतौ नास्ति ॥ १९. '-नकारः' इति३॥ २०. '-चृ' इति३॥ २१. 'निपातः' इति४॥ २२. १.४प्रत्योर्नास्ति ॥ २३. 'जातम्' इति५॥ २४. 'हि-' इति१॥ २५. इतोऽग्रे ४.५प्रत्योः 'स' इति दृश्यते ॥ २६. 'सर्वपर्वते' इति३॥ २७. '-सन्निधं' इति३॥ २८. '-ते' इति३॥ २९. 'चा-' इति३॥ ३०. '-क्ली' इति१.२, '-क्लीबः' इति३॥ ३१. कोष्ठान्तर्गतपाठः १.३.४.५प्रतिषु न दृश्यते ॥ ३२. 'कुट-' इति१.३.५॥ ३३. 'पर्ज' इति मैत्रेयसायणौ ॥ ३४. 'विशरणगत्यवसादनेषु' इति१॥ ३५. ३.४प्रत्योर्नास्ति ॥ ३६. 'कः' इति १.२.४.५॥ ३७. 'निशे-' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१४॥]इति क्षीरस्वामी । **२७** कृतस्वरनाम्नि आकरे भवं **कार्तस्वरम्** । 'तत्र भवः'४।३।५३॥ इत्यण् । **२८** कर्बति तैजसमध्ये दीप्यति[1](दृप्यति) **कर्बुरम्** । 'कर्व खर्व गर्व दर्पे'[2](भ्वा.प.से.), 'मद्गुरादयश्च'(उणा-४१)इति कुरचि साधुः ॥**१०४४**॥ **२९** जम्बूद्वीपे जम्बूफलरसोत्थनद्यां जातं **जाम्बूनदम्** । 'तत्र जातः'४।३।२५॥ इत्यण् । यत्पुराणम्-"सुदर्शनो नाम जम्बूद्रुमः, यदन्तिकोऽयं जम्बूद्वीपः, तत्-फलरसेन जम्बूर्नाम नदी वृत्ता, तत्संस्पर्शनाद् मृत्तिकाऽपि सुवर्णं भवति। पुनः पुराणेषु-

"[3]तीरमृत् तद्रसं प्राप्य मुखवायुविशेषिता ।
जाम्बूनदाख्यं भवति सुवर्णं [4]सिद्धभूषणम् ॥१॥"

[[5]]इति । तत्र जाम्बूनदं नाम सुवर्णमनलप्रभावादेवा-ऽलङ्कारमुत्तमं जायते पापनाशनमिति । **३०** शतकुम्भगिरौ भवं **शातकुम्भम्**। 'तत्र भवः'४।३।५३॥ इत्यण् । "अनु-शतिकादित्वादुभयपदवृद्धौ शातकौम्भमित्यपि[6]"[अम.क्षीर. २।९।९४॥]इति स्वामी[7] । **३१** रज्यत इति **रजतम्** । 'रञ्ज रागे'(भ्वा.उ.अ.), 'पृषिरञ्जिभ्यां कित्'(उणा-३९१) इत्यतच्, रजतरजकरजःसूपसङ्ख्यानान्नलोपः । **३२** भव-त्याकरे **भूरि**, क्लीबेऽयम्[8] । वाचस्पतिस्तु-"भूरिरष्टा-पदोऽस्त्रियाम्"[[9]]इति पुंस्यप्याह । 'भू सत्तायाम्'(भ्वा. प.से.), 'अदिशदिभू[10]शुभिभ्यः कित् (क्रिन्)'(उणा-५०५) इति रि(क्रि)न्प्रत्ययः । **३३** भुवि[11] पृथिव्यामुत्तमं **भूत्तमम्** । त्रयस्त्रिंशत् सुवर्णस्य । शेषश्चात्र-

"सुवर्णं लोभनं शुक्रं तारजीवनमौजसम्[12] ।
दाक्षायणं रक्तवर्णं श्रीमत्कुम्भं शिलोद्भवम् ॥२॥
वैणवं तु कर्णिकारच्छायं वेणुतटीभवम् ।"

[शेषनाममाला४।१६३-१६४॥]इति ॥

## हिरण्य[1]कोशा[2]कुप्या[3]नि हेम्नि रूप्ये कृताकृते ॥१०४५॥

**१** जिहीते भाग्यवन्तमिति **हिरण्यम्** । 'ओहाङ् गतौ'(तु.आ.अ.), 'हो हिर्च'(चान्द्रोणा-२।११६॥)इत्यन्य-(ण्य)प्रत्ययः, धातोर्हिरादेशः। **२** कूयते शब्द्यते **कोशः**। कुष्यते निःकृष्यते आयस्थानेभ्यः कोष इत्येके[13] । उभावपि प्राग्वत् साधू[14] । 'कूङ् शब्दे'(तु.आ.से.), 'कोर्वा'(हैमोणा-५२९)इति शः । "बाहुलकात् सः"[ ]इति बृहस्पतिः । 'कुष निःकर्षे'(क्र्या.प.से.) अतः[15] कर्मणि घञि[16] वा । **३** न कुप्यम् **अकुप्यम्**। त्रीणि सामान्येन द्रम्माभरणाद्युत्कृ-ष्टधनस्य । हिरण्यमकुप्यम्, कृताकृते इति घटिते अघटिते च, हेम्नि सुवर्णे रूप्ये रूपानाम्नि । यथा "हिरण्यमेवार्जय निःफला(निष्फला) कला"[[17]]इति। "विजित्य यः प्राज्य-मयच्छदुत्तरान् कुरूनकुप्यं वसु वासवोपमः"[किरातार्जुनी-यम्, सर्गः-१, श्लो-३५]इति किरातः[18] । तथा चाऽऽवश्यक-सूत्रम्-"हिरण्णसुवण्णप्पमाणाइक्कमे"[ ]इति । "हिरण्यं रजतं घटितमघटितं वाऽनेकप्रकारं, द्रम्मादिसुवर्णं प्रतीतमेव, तदपि घटिताघटितम्"[ ]इति तट्टीका ॥**१०४५**॥

## कुप्यं[1] तु तद्द्वयादन्यत्

**१** गोपाय्यते तदिति **कुप्यम्** । 'गुपू[19] रक्षणे' (भ्वा.प.से.), 'राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टा(ष्ट)-[पच्या]व्यथाः'३।१।११४॥ इति साधुः । एकं स्थाल-कच्चोलकादिधनस्य । तद्द्वयात् घटिताघटितहेमरूप्याभ्या-मन्यत् ताम्रादिकं धनं कुप्यमिति । "अकुप्यं हेम-रूप्याख्यं[20] कुप्यमन्यद् धनं भवेत्"[हलायुधकोशः१।८१॥] इति हलायुधः ॥

## रूप्यं[1] तु द्वयमाहतम् ।

**१** रूपमाहन्यतेऽस्य **रूप्यम्** । रूपशब्दाद् 'रूपा-दाहतप्रशंसयोर्यप्'५।२।१२०॥ इति यप् । एकं सामान्येन दीनारप्रभृतेर्नाणकस्य । रूप्यमिति लोके '[21]मुहुर' इति । एवमाहतरूप्योत्पन्नो[22] लोके '[23]रूपईया[24]', आहतताम्रोत्पन्नो लोके 'पईसा' इत्यादिज्ञेयम् । द्वयमिति कुप्याकुप्यम्,

---

१. 'दीयते' इति३॥ २. मैत्रेयसायणसम्मतोऽयं धातुपाठः, 'गर्व खर्व दर्पे' इति स्वामी ॥ ३. 'तीरं' इति३॥ ४ 'सिद्ध-' इति१.५॥ ५. द्र. स्वोपज्ञटीका४।१०४५॥, पृ.२३२॥, पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-६६७, पृ.७५७॥, तत्र- "तीरमृत् तत्र संप्राप्य सुखवायुविशोषिता" इति पूर्वार्धश्लोको दृश्यते॥ ६. द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-६६६, पृ.७५६॥ ७ अम.क्षीरस्वामिकृतटीकायाम् "अनुशतिकादित्वात् (७।३।२०/१४३८)उभयपदवृद्धिः, शातकुम्भमित्येके" इति दृश्यते, पृ.२२१॥ ८ '-ऽयम्' इति ४प्रतौ नास्ति॥ ९. द्र. स्वोपज्ञटीका ४।१०४५॥, पृ.२३२॥ १०. '-सदि-' इति१.३.४॥ ११. 'भुवः' इति१॥ १२. '-मोजसम्' इति३॥ १३. 'इत्यन्ये' इति४॥ १४ 'साधुः' इति१॥ १५. ३प्रतौ नास्ति ॥ १६. 'घनि' इति५॥ १७ द्र. अनेकार्थकैरवाकरकौमुदीटीका, भा-२, ३।५०५॥, पृ.२१७॥ १८. 'भारविः' इति३॥ १९. 'गुपु' इति१.३॥ २०. '-रूपाख्यं' इति२, '-रूप्याध्यां' इति३, 'रूप्यहेमाख्यं' इति हलायुधकोशे, पृ.१०॥ २१. 'म-' इति३॥ २२. '-त्रौ' इति१, '-त्तौ' इति४॥ २३. 'रु-' इति४॥ २४. '-इया' इति१.५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आहतं ताडितं[1] रूप्यमुच्यत इत्यन्वयः । ''रूप्यं स्यादाहत(-ते) स्वर्णरजते रजतेऽपि च''[विश्वप्रकाशकोशः, यान्तवर्गः, श्लो-३८]इति महेश्वरः । यथा- ''मणिरूप्यादिविज्ञानं तद्विदां नानुमानिकम् ।''[2]इति अन्तस्थाद्यान्तोऽयम्, पवर्गाद्यान्तमपि । ''रूपं स्वभावे सौन्दर्ये नाणके[3] पशुशब्दयोः''[विश्वप्रकाशकोशः, पान्तवर्गः, श्लो-१]इति महेश्वरः ॥

सामान्येन हेमनामान्युक्त्वा, अथ विशेषतः प्राह[4]-

**अलङ्कारसुवर्णं तु शृङ्गीकनकमायुधम् ॥१०४६॥**

१ अलङ्काराय सुवर्णम् **अलङ्कारसुवर्णम्** । २ ''शृङ्गी अलङ्काररचनाविशेषः, तदर्थं कनकं **शृङ्गीकनकम्**'' [5]इति[6] स्वामी । ''स्त्री शृङ्गी मण्डलस्वर्णम्[7]''[8]इति रत्नकोषः । ''भूषणं कनकं[9] शृङ्गी[10]''[ ]इति नाममाला च । अतः शृङ्ग्यपि नामाऽस्य । शृङ्गिर्ह्रस्वान्ता च । [तथा च बाणः ]''वर्षपर्वतसमूहमिवाऽन्तःस्थितापरिमाणशृङ्गिहेमकूटं राजकुलम्''[कादम्बरी PP360-61]इति । 'सर्वतोऽक्तिन्नर्थात्'(गणसू-४।१।४५॥)इति ङीषि[11] शृङ्गी । यन्महेश्वरः-''शृङ्गी विषया(विषायाम्)मृषभे स्वर्णमीनविशेषयोः''[विश्वप्रकाशकोशः, गान्तवर्गः, श्लो-२२]इति । ''गौरादित्वाद् ङीषि, स्वर्णविशेषोऽलङ्कारमकरिका''[ ]इति तट्टीका । ३ आयुधमिव **आयुधम्** । त्रीणि 'कुंदन' इति ख्यातस्य ॥१०४६॥

**रजतं च सुवर्णं च संश्लिष्टे घनगोलकः ।**

१ घनश्चाऽसौ गोलकश्च **घनगोलकः**, पुंक्ली. । ''तारहेम्नी तु संश्लिष्टे[12] घनगोलकमस्त्रियाम्''[13]इति वाचस्पतिः। संश्लिष्टे इति, मिलिते । एकं रूप्यहेम्नोर्मिलितयोः ॥

**पित्तलाऽऽरे**

१ पित्तं लाति **पित्तला**, स्त्रीक्ली.[14] । 'ला दाने[15]' (अ.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३[16]॥ । २ आ इयर्ति **आरः**, पुंसि, तत्र । वाचस्पतिस्तु-''पित्तलं त्वारमस्त्रियाम्''[ ]इति क्लीबेऽप्याह । द्वे सामान्यतः पित्तलस्य ॥

अथ तद्विशेषानाह[17]-

**अथाऽऽरकूटः कपिलोहं सुवर्णकम् ॥१०४७॥**
**रिरी रीरी च रीतिश्च पीतलोहं सुलोहकम् ।**

१ अर्यत इत्यारः । 'ऋ सृ गतौ'(जु.प.अ.), भावे घञ् । आरस्य कूटः **आरकूटः**, पुंक्ली.[18] । अमरक्षीरस्वामिनौ त्वमुम्-''रीतिः स्त्रियामारकूटो न स्त्रियाम्'' [अमरकोषः२।९।९७॥]इति पित्तलाख्यमाहतुः । २ कपि[19]वर्णं लोहं **कपिलोहम्** । ३ सुवर्णप्रतिकृतिः **सुवर्णकम्** । 'इवे प्रतिकृतौ'५।३।९६॥ इति कन् ॥१०४७॥ ४-५ रीयते द्रवति **रिरी, रीरी** च । 'खुरक्षुर[20]-'(हैमोणा-३९६) इति रे[21] निपात्यते । ६ रिणन्त्येनां **रीतिः** । 'री गतिरेषणयोः'(क्र्या.प.अ.), स्त्रियां क्तिः । ७ पीतवर्णं लोहं **पीतलोहम्** । ८ शोभनं लोहं सुलोहम्, स्वार्थे कनि **सुलोहकम्** । अष्टौ हेमाभपित्तलस्य ॥

**ब्राह्मी तु राज्ञी कपिला ब्रह्मरीतिर्महेश्वरी ॥१०४८॥**

१ ब्रह्मण इयं **ब्राह्मी** । 'ब्राह्मोऽजातौ'६।४।१७१॥इति साधुः । २ राजत इति **राज्ञी**, प्राग्वत् । ३ **कपिला** वर्णेन । ४ ब्रह्मणो रीतिः **ब्रह्मरीतिः** । ५ महती चाऽसावीश्वरी च **महेश्वरी** । यदाह धन्वन्तरिः-

''राजरीतिः स्मृता राज्ञी राजपत्नी[22-1] महेश्वरी ।
ब्राह्मणी[22-2] ब्रह्मरीतिश्च कपिला पिङ्गलाऽपि च ॥१॥''

[धन्वन्तरिनिघण्टुः सुवर्णादिः षष्ठो वर्गः, श्लो-१८-१९]इति। पञ्च पीतरक्तपित्तलस्य । 'सरतलउ[23]' इत्यादिभाषा[24] ॥१०४८॥

**कांस्ये विद्युत्प्रियं घोषः प्रकाशं वङ्गशुल्वजम्।**

---

१. '-त-' इति१॥ २. द्र. अनेकार्थकैरवाकरकौमुदीटीका, भा-१, २।३७०॥, पृ.२१४॥ ३. 'नामके' इति विश्वप्रकाशकोशे, पृ.१०३॥ ४ 'आह' इति१॥ ५. द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-६६८, पृ.७५८॥, तत्र 'अलङ्काररचनाविशेषः' इत्यस्य स्थाने 'अलंकारमकरिका' इति दृश्यते ॥ ६. इतोऽग्रे १प्रतौ 'त्रा' इति दृश्यते ॥ ७ 'कनक-' इति४॥ ८. द्र. टीकासर्वस्वम्, भा-३, २।९।९६॥, पृ.२३४॥, रामाश्रमी२।९।९६॥, पृ.४४३॥ ९ '-क ' इति४.५॥ १०. '-ङ्गी-' इति१॥ ११. 'ङीष्' इति१, 'ङीः' इति२, 'ङीप्' इति३॥ १२. 'संसृष्टे' इति१॥ १३. द्र. स्वोपज्ञटीका४।१०७॥, पृ.२३३॥ १४. ४प्रतौ नास्ति॥ १५. 'ला दाने' इति १.२.३.५प्रतिषु नास्ति॥ १६. इतोऽग्रे ४प्रतौ 'स्त्रीक्ली' इति दृश्यते ॥ १७. '-दाह' इति३॥ १८. '-क्लीबः' इति४॥ १९. 'कपिलो' इति१॥ २०. 'क्षुरखुर-' इति३॥ २१. १.३.४प्रतिषु नास्ति ॥ २२-१. '-पुत्री' इति, २२-२. 'ब्रह्माणी' इति च धन्वन्तरिनिघण्टौ, पृ.२७३॥ २३. '-लौ' इति३॥ २४ 'इति भाषा' इति५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**घण्टाशब्दमसुराह्वं रवणं लोहजं मलम् ।१०४९।**

१ कंसायेदं द्रव्यं कंसीयम्, तस्य विकारः **कांस्यम्** । 'कंसीयपरशव्ययोर्यञञौ'[1]-'४।३।१६८॥ इति यञ् छस्य लुक् च । कंसमेव वा, भेषजादित्वात्ष्यण्, तस्मिन्[2]। २ विद्युतः प्रियं **विद्युत्प्रियम्** । ३ घोषति **घोषः**[3] । 'घुष शब्दे'[4](भ्वा.प.से.), अच् । ४ प्रकाशते[5] चाकचिक्येनेति[6] **प्रकाशम्** । 'कासृ(काशृ) दीप्तौ'(भ्वा.आ.से.), अच् । ५ वङ्गशुल्वाभ्यां जायत इति वङ्गजं शुल्वजं (**वङ्गशुल्वजम्**) । ६ घण्टाया इव (शब्दोऽस्य[7], घण्टायां) शब्दोऽस्येति वा **घण्टाशब्दम्**। ७ असुरस्य कंसनाम्न आह्वाऽस्य **असुराह्वम्**[8], कंसमित्यर्थः । ८ रौति **रवणम्** । 'रु शब्दे'(अ.प.से.), नन्द्यादित्वाल्ल्युः । ९ लोहाभ्यां जायते **लोहजम्** । अतो द्विलोहकं च । १० मलोऽस्त्यस्य **मलम्** । अर्शआदित्वादच् । दश [9]कंसस्य ॥१०४९॥

**सौराष्ट्रके पञ्चलोहम्**

१ सुराष्ट्रायां भवं सौराष्ट्रम्। स्वार्थे कनि **सौराष्ट्रकम्**, तत्र । २ पञ्चेति ताम्र१रीति२त्रपु३सीसक४-कालायस५लक्षणानि लोहान्यस्मिन् **पञ्चलोहम्** । द्वे 'भंगारकासी'[10] इति ख्यातायाः । "कास्यं[11] सौराष्ट्रकं तथा" [हलायुधकोशः२।१७०॥]इति हलायुधो न भिनत्ति[12] ।

धन्वन्तरिरपि-

"कांस्यं द्विलोहजं घोषं प्रकाशं कंसकं बलम् ।
अन्यलोहं पट्टलोहं (वट्टलोहं) पञ्चलोहं च नीलिका[13]॥१॥"

[धन्वन्तरिनिघण्टुः, सुवर्णादिः षष्ठो वर्गः, श्लो-२२]इति। तथा[14] श्रीहेमचन्द्रसूरयोऽपि स्त्रीक्लीबलिङ्गे[15] स्वोपज्ञलिङ्गानुशासनटीकायाम्- "कांसी[16] कास्यं सौराष्ट्रिका, अर्थप्राधान्यात् सौराष्ट्रकमित्यपि स्त्रियां माला षण्ढे रूढिः" [लिङ्गानुशासनम्[17], (तस्य) अवचूरिः, स्त्रीक्लीबलिङ्गाः, श्लो-४]इति ॥

**वर्तलोहं तु वर्तकम् ।**

१ वर्त्यत आवर्त्यते वर्तम्, तच्च तल्लोहं च **वर्तलोहम्** । २ वर्तते [18]आवर्तते **वर्तकम्** । 'वृतु वर्तने' (भ्वा.आ.से.), ण्वुल् । द्वे अतिशुद्धकांस्याः । 'वटलोह' इति भाषा[19] ॥

**पारदः पारतः सूतो हरबीजं रसश्चलम्(-लः) ॥१०५०॥**

१ पारं संसारपार्श्वं ददाति **पारदः**। 'आतोऽनुपसर्गे कः'३।२।३॥ । २ मुक्तिदत्वात् पारं संसारपार्श्वं (-पारं) तनोति **पारतः** । 'तनु विस्तारे'(त.उ.से.), 'अन्येभ्योऽपि दृश्यते'(वा-३।२।१०१॥)इति डः। पुंक्लीबलिङ्गावेतौ । ३ सूते हेमायुषी **सूतः** । 'षूङ् प्रसवे' (अ.आ.वे.), 'हसिमृग्रिण्-'(उणा-३६६)इत्यादिना बाहुलकात् तन् । यत्सूक्तम्-

"अपकारिण्यपि प्रायः सौम्याः स्युरुपकारिणः ।
मारकेभ्योऽपि कल्याणं [20]रसराजः प्रयच्छति ॥१॥"

[]इति । शिवप्रसूतत्वाद्वा सूतः । स्वार्थे कनि सूतकः, पुंक्ली. । "सूतकं जन्मनि क्लीबे न स्त्रियां पारदेऽपि च" []इति गौडः । ४ हरस्य बीजं **हरबीजम्** । ५ रस्यत आस्वाद्यते[21] रसायनार्थिभिरिति **रसः** । 'रस आस्वादे'[22](चु.उ.से.), घञर्थे कः । ६ **चलः** अस्थिरत्वात् । "चपलः[23]" [अमरकोशः२।९।९९॥]अपीत्यमरः। षट् पारदस्य॥१०५०॥

**अभ्रकं स्वच्छपत्रं खमेघाख्यं गिरिजामले ।**

१ अभ्रप्रतिकृतित्वाद् **अभ्रकम्** । 'इवे प्रतिकृतौ'

---

१. '-यञन्तौ' इति३॥ २. 'तत्र' इति३॥ ३. '-षम्' इति१॥ ४. 'घुषिर् शब्दार्थः' इति भ्वादौ स्वामिमैत्रेयौ, '-अविशब्दने' इति च सायणः, 'घुषिर् विशब्दने' इति चुरादौ स्वामिसायणौ, '-अविशब्दने' इति मैत्रेयः ॥ ५. '-श्यते' इति१॥ ६. 'चिचिक्यते' इति१॥ ७. कोष्ठान्तर्गतपाठः १.४.५प्रतिषु न दृश्यते ॥ ८. '-ह्वां' इति५॥ ९. 'कंश-' इति३.४॥ १०. '-रङ्कासी' इति१, '-कांशी' इति३॥ ११. 'कांस्यां' इति५॥ १२. 'भवति' इति१॥ १३. "कास्यं लोहं निजं घोषं प्रकाशं कांस्यकं बलम् । घोषपुष्पं च पठितं शब्दैः पर्यायवाचकैः ॥२२॥" इति धन्वन्तरिनिघण्टौ, पृ.२७४॥, अत्र टीकास्थश्लोके 'पट्टलोहं (वट्टलोहं) पञ्चलोहं नीलिका' इति वर्तलोहपर्यायः, द्र. धन्वन्तरिनिघण्टुः, पृ.२७६, श्लो-३०॥ १४. इतोऽग्रे १प्रतौ 'च' इति दृश्यते ॥ १५. '-ङ्गो' इति१॥ १६. ५प्रतौ नास्ति ॥ १७. लिङ्गानुशासनावचूर्यम्-"कास्यी, कांस्यं सौराष्ट्रिका, अर्थप्राधान्यात् सौराष्ट्रिका सौराष्ट्रिकमपि" इति दृश्यते, श्रीसिद्धहेमचन्द्रशब्दानुशासनम्, भा-३, परिशिष्टम्-१, पृ.४५॥ १८. 'व्या ' इति३॥ १९. ३प्रतौ नास्ति ॥ २०. 'रत-' इति३॥ २१. ३प्रतौ नास्ति ॥ २२. '-दने' इति३॥, 'रस आस्वादनस्नेहनयोः' इति क्षीरतरङ्गिण्यादयः ॥ २३. '-ले' इति५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

५।३।९६॥ इति कन् । 'अभ्र गतौ'(भ्वा.प.से.)इतो वा 'क्वुन् शिल्पिसंज्ञयोः'(उणा-१९०)इति क्वुन् वा । २ स्वच्छानि पत्राण्यस्य **स्वच्छपत्रम्** । ३-४ खस्य गगनस्य मेघस्याऽम्बुदस्य च आख्या नामाऽस्य **खमेघाख्यम्,** तेन खं गगनं मेघमम्बुदमित्यादिसिद्धम्[१] । ५ गिरिजाया: पार्वत्या मलं **गिरिजामलम्** । यद्वा गिरेर्जातं गिरिजम् । अमते-र्वृषादित्वात् कलचि अमलम् । गिरिजं च तदमलं च गिरिजामलम्, पञ्चाक्षरमखण्डम्, [तत्र] । अमलमपि । "गिरिजं गिरिजाबीजममलं गवलध्वजम्"[[३]]इति वाचस्पतिः । पञ्चाऽभ्रकस्य । 'भोडल आभूआं[४]' इति भाषा ॥

## स्रोतोञ्जनं तु कापोतं सौवीरं कृष्णयामुने ॥१०५१॥

१ अज्यते (अज्यते) नयनमनेनेति अञ्जनम् । यमुना स्रोतसो जातत्वात् स्रोतसोऽञ्जनं **स्रोतोञ्जनम्,** दन्त्यसवत्[५], चतुरक्षरोऽयम् । २ कपोतवर्णत्वात्[६] कपोतस्येदं **कापोतम्** । 'तस्येदम्'४।३।१२०॥ इत्यण् । ३ सुवीरदेशे भवं **सौवीरम्** । 'तत्र भवः'४।३।५३॥ इत्यण् । ४ **कृष्णं** वर्णेन । मेचकमपि यद्धन्वन्तरिः-

"अञ्जनं मेचकं कृष्णं सौवीरं स्यात्[७-१] सुवीरजम्[८] ।
कापोतं[७-२] यामुनं तच्च स्रोतोञ्जनमुदाहृतम् ॥१॥"

[धन्वन्तरिनिघण्टुः, चन्दनादिस्तृतीयो वर्गः, श्लो-१३६] इति । ५ यमुनास्रोतसो जातत्वाद् **यामुनम्** । एतत्पञ्चसु मध्ये यत् सौवीरं तत्पार्वतीयम्, तथाऽप्यल्पभेदः, अभेदगणनया[९] पर्यायता । उक्तं च माधवेन-

"सुवीरजं पार्वतेयं[१०] सौवीरं नीलमञ्जनम् ।
स्रोतोऽञ्जनं नदीजं च कृष्णं स्रोतोऽञ्जनार्थिनाम् ॥२॥"

[[११]]इति । पञ्च 'सुरमा' इति ख्यातस्य ॥१०५१॥

## अथ तुत्थं शिखिग्रीवं तुत्थाञ्जनमयूरके ।

१ तुष्यते रज्यतेऽनेनेति **तुत्थम्** । 'तुत्थ आवरणे[१२]'(चु.उ.से.), चुरादिर्णिजन्तादेरच्[१३] । तुदत्यक्षिरोगानिति वा । 'तुद व्यथने'(तु.उ.अ.), 'पातृतुदि-'(उणा-१६४)इति क्थः(थक्) । २ शिखिनौ मयूरस्य ग्रीवाभत्वादभेदोपचारादर्शआद्यचि[१४] **शिखिग्रीवम्** । ३ तुत्थं च तदञ्जनं च **तुत्थाञ्जनम्** । ४ मयूरप्रतिकृतित्वाद्[१५] **मयूरकम्** । 'इवे प्रतिकृतौ'५।३।९६॥इति कन् । चत्वारि 'मोरथूथा' इति ख्यातस्य ॥

## मूषातुत्थं कांस्यनीलं हेमतारं वितुन्नकम् ॥१०५२॥

१ मूषाया[१६] तुत्थं **मूषातुत्थम्** । २ कांस्यवन्नीलं **कांस्यनीलम्** । ३ हेमवत्तारं **हेमतारम्** । ४ वितुद्यते स्म वितुन्नम् । 'तुद व्यथने' (तु.उ.अ.), निष्ठा, स्वार्थे कनि **वितुन्नकम्** । चत्वारि थूथाविशेषस्य ॥१०५२॥

## स्यात्तु कर्परिकातुत्थममृतासङ्गमञ्जनम् ।

१ कल्पते[१७] समर्थीभवति रोगान् जेतुमिति कर्परी । 'कृपू सामर्थ्ये'(भ्वा.आ.से.), अरनि साधुः । कर्परिकालक्षणं तुत्थं **कर्परिकातुत्थम्,** षडक्षरोऽयमखण्डः । २ अमृतमासज्यतेऽनेन **अमृतासङ्गम्** । 'षञ्ज सङ्गे'(भ्वा.-प.अ.), करणे घञ्[१८], घित्वात् कुत्वम् । ३ अज्यते (अज्यते) चक्षुरनेन **अञ्जनम्** । 'अञ्जू [व्यक्ति]म्रक्षणादौ' (रु.प.से), करणे ल्युट् । त्रीणि 'खापरिया[१९]' इत्याह्वस्य[२०] ।

## रसगर्भं तार्क्ष्यशैलं तुत्थे दार्वीरसोद्भवे ॥१०५३॥

१ दार्वी दारुहरिद्रा, तस्या रसः क्वाथः, तदुद्भवे तुत्थे रसो गर्भेऽस्य **रसगर्भम्** । २ तार्क्ष्यशैले[२१] भवं **तार्क्ष्यशैलम्** । तुत्थरसाञ्जनमपि । यदमरः-"द(दा)र्विका क्वाथोद्भवं तुत्थरसाञ्जनं रसगर्भं तार्क्ष्यशैलम्"[अमरकोषः २।९।१०१-१०२॥]इति । धन्वन्तरिरपि-

"रसाञ्जनं तार्क्ष्यशैलं रसजातं[२२] रसोद्भवम् ।
रसगर्भं रसाग्रं(रसाग्र्यं) च दार्वीक्वाथसमुद्भवम् ॥१॥"

[धन्वन्तरिनिघण्टुः, चन्दनादिस्तृतीयो वर्गः, श्लो-१४२] इति । द्वे रसवत्याः ॥१०५३॥

---

१. '-द इ-' इति॰ ॥ २. 'प्रसि-' इति३ ॥ ३. द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-६७२, पृ.७६२॥, रामाश्रमी २।९।१००॥, पृ.४४५॥ ४ '-यां' इति२, 'भूंआ' इति३ ॥ ५. 'दन्त्यशब्दवत्' इति३ ॥ ६. ४.५प्रत्योर्नास्ति ॥ ७-१. 'च' इति, ७-२. 'कपोतं यामुनेयं च स्रोतोजं सारितं तथा' इति धन्वन्तरिनिघण्टौ दृश्यते, पृ.१७३॥ ८ 'कुबेरजम्' इति१ ॥ ९ '-णना' इति१.३॥ १०. '-तीयं' इति३ ॥ ११. द्र. पदचन्द्रिका, भा-२. वैश्यवर्गः, श्लो-६७२, पृ.७६२॥ १२. मैत्रेयसायणसम्मतोऽयं धातुपाठः ॥ १३. '-दिः' इति३ ॥ १४ '-नाद्यचि' इति३ ॥ १५. '-प्रकृ-' इति१ ॥ १६. '-या' इति३ ॥ १७. '-न्ते' इति४ ॥ १८. '-ञि' ति१ ॥ १९. '-आ' इति४ ॥ २०. '-ह्वयस्य' इति५, 'ख्यातस्य' इति३ ॥ २१. 'ता-' इति३, 'लक्ष्मीशैले' इति२ ॥ २२. 'रसाज्जातं' इति१, '-नान्तं' इति३ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**पुष्पाञ्जनं रीतिपुष्पं पौष्पकं पुष्पकेतु च ।**

१ पुष्परूपमञ्जनं **पुष्पाञ्जनम्** । २ रीतेधर्माय[1]मानायाः पुष्पाभं मलं **रीतिपुष्पम्** । तथा च योगशतकव्याख्याने सनातनः-''रीतिकायाः ध्मातमलाया (ध्मायमानाया) यदुत्पद्यते मलम्, तत् पुष्पाञ्जनम्''[2]इति । ३ पुष्पमिव पुष्पम्, पुष्पप्रतिकृतित्वात् पुष्पकम्, स्वार्थेऽणि **पौष्पकम्** । ४ पुष्पं केतुरस्य **पुष्पकेतु**[3], क्लीबे । उदन्तनपुंसकेषु ''पुष्पकेतु कुसुमाञ्जनम्''[4]इति रुद्रश्च । स्वाम्यपि-''फल्गुकाकेन्दुकेतु स्यादित्युदन्तनपुंसके पुष्पकेतु''[5] इत्याह[6] । चत्वारि 'षापरिया फूल' इत्याह्वस्य[7] ॥

**माक्षिकं तु कदम्बः[8] स्याच्चक्रनामाऽजनामकः ॥१०५४॥**

१ माक्षिकं मधु, तद्वर्णं[9] **माक्षिकम्** । २ कदम्बकु[10]सुमाकारत्वात् **कदम्बः**[11] । ३ चक्रस्य नामाऽस्य **चक्रनामा** । ४ अजस्य विष्णोर्नामाऽस्य **अजनामकः** । अत एव वैष्णवोऽपि । चत्वारि 'सोवनमषी[12]' इत्याख्यातायाः[13] ॥१०५४॥

**ताप्यो नदीजः कामारिस्तारारिर्विटमाक्षिकः ।**

१ ताप्यां साधुः **ताप्यः** । 'तत्र साधुः'४।४।९८॥ इति यत् । २ तापीनद्या जातो **नदीजः** । ३ कामस्याऽरिः **कामारिः** । ४ तारस्याऽरिः **तारारिः** । ५ विटाह्वयो माक्षिको **विटमाक्षिकः** । पञ्च 'विटमाषी' इति ख्यातायाः ॥

**सौराष्ट्री पार्वती काक्षी कालिका पर्पटी सती ॥१०५५॥**

**आढकी तुवरी कंसोद्भवा काच्छी मृदाह्वया ।**

१ सुराष्ट्रायां भवा **सौराष्ट्री** । २ पर्वते भवा **पार्वती** । ३ कक्षे भवा **काक्षी** । ४ कालयति वस्त्रं **कालिका**, ण्वुल् । ५ पिपर्ति **पर्पटी** । 'शकादिभ्योऽटन्' (उणा-५२१), पृषोदरादिः । ६ अस्ति **सती**, साध्वीनामसु (श्लो-५२८) ॥१०५५॥ ७ आढौकते **आढकी** । ८ तूयते[14] **तुवरी**, धान्यनामसु(श्लो-११७५) । ९ कंसादुद्भवति **कंसोद्भवा** । १० कच्छदेशे भवा **काच्छी** । ११ मृद आह्वयोऽस्या **मृदाह्वया**, तेन मृत्तिका, मृत्सा, मृत्स्ना अपि ।

यद्धन्वन्तरिः-

''सौराष्ट्री चा[15]ऽमृता सङ्गा कक्षी[16-1] काच्छी[16-2] सुराष्ट्रजा ।
अजिता तुवरी त्वन्या[16-3] मृत्सा मृत्स्ना मृतालिका[16-4] ॥१॥''

[धन्वन्तरिनिघण्टुः, चन्दनादिस्तृतीयो वर्गः, श्लो-१०१]इति । एकादश 'सोरठी' इत्याख्यायाः[17] । 'फिटकडी' इति भाषा॥

**कासीसं धातुकासीसं खेचरं धातुशेखरम् ॥१०५६॥**

१ कसति **कासीसम्** । 'कस गतौ'(भ्वा.प. से.), 'तलिकसिभ्यामीसण्'(हैमोणा-५७६) । २ धातुरूपं[18] कासीसं **धातुकासीसम्** । ३ खे चरति[19] **खेचरम्** । 'चरेष्टः'३।२।१६॥ । ४ धातुषु शेखरमिव **धातुशेखरम्** । चत्वारि 'हीराकसीस' इत्याख्यातायाः[20] ॥ १०५६॥

**द्वितीयं पुष्पकासीसं कंसकं नयनौषधम् ।**

१ पुष्परूपं कासीसं **पुष्पकासीसम्** । २ कंस्ते[21] रञ्जयति **कंसकम्** । 'क्वुन् शिल्पिसंज्ञयोः'(उणा-१९०) । ३ नयनस्यौषधं **नयनौषधम्** । त्रीणि[22] कंशी[23]सविशेषस्य ॥

**गन्धाश्मा शुल्वपामाकुष्ठारिर्गन्धिकगन्धकौ ॥१०५७॥**

**सौगन्धिकः शुकपुच्छः**

१ गन्धयुक्तोऽश्मा **गन्धाश्मा**, नकारान्तः । २-४ शुल्वस्य पामायाः कुष्ठस्य च अरिः, तेन **शुल्वारिः**, **पामारिः**, **कुष्ठारिः**[24] । ५ गन्धोऽस्त्यस्य **गन्धिकः** । 'अत

१. 'रीतोर्ध्मा' इति३, 'रीतिर्ध्मा' इति५॥ २. द्र. टीकासर्वस्वम्, भा-३, २।९।१०३॥, पृ.२४०॥, पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-६७५, पृ.७६५॥ ३. '-तुः' इति४॥ ४. इतोऽग्रे ३प्रतौ 'इष्यते' इति दृश्यते ॥ ५. द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो ६७५, पृ.७६५॥ ६. अम.क्षीरस्वामिकृतटीकायां न दृश्यते ॥ ७ '-ह्वयस्य' इति३, 'इति ख्यातस्य' इति४॥ ८. '-म्बकः' इति३॥ ९. '-र्णत्वाद्' इति३॥ १०. '-म्बं' इति५॥ ११. '-म्बकः' इति१.५॥ १२. '-मषी' इति१.२॥ १३. '-ख्यायाः' इति१.२.५॥ १४. '-न्ते' इति२॥ १५. 'वाऽ-' इति४॥ १६-१. 'काङ्क्षी' इति, १६-२. 'काक्षी' इति, १६-३. 'स्तुत्या' इति, १६-४. 'मृतालकम्' इति च धन्वन्तरिनिघण्टौ, पृ.१६४॥ १७. '-ख्यातायाः' इति३॥ १८. '-प-' इति३॥ १९. '-तीति' इति३॥ २०. '-ख्यायाः' इति१.२.३॥ २१. 'कस्ते' इति१.३.४॥, 'कसि गतिशासनयोः' इति स्वामिसायणौ, 'कसि गतिनिशानयोः' इति मैत्रेयः, कंस्ते कंसाते कंसते इत्यादि वर्तमाने, अनिदित्सान्तपक्षे 'कस्ते' इत्यादि द्रष्टव्यम् ॥ २२. १.३.४.५प्रतिषु नास्ति ॥ २३. 'कशी-' इति४॥ २४. ५प्रतौ नास्ति॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इनिठनौ'५।२।११५॥ इति ठन् । ६ गन्धयोगादर्शआद्यचि, यावादित्वात् कनि **गन्धकः** ॥१०५७॥ ७ सुगन्धो विपरीतलक्षणया[१] प्रयोजनमस्य **सौगन्धिकः** । विनयादित्वाट्ठक् । गन्धोऽपि । ''आमोदलेशयोर्गन्धः स गन्धिनि च गन्धकः''[२][३]इति रभसः । ८ शुकपुच्छवर्णत्वात् **शुकपुच्छः** । अष्टौ गन्धकस्य ॥

## हरितालं तु पिञ्जरम् ।
## बिडालकं विस्रगन्धिः खर्जूरं वंशपत्रकम् ॥१०५८॥
## आलपीतनतालानि गोदन्तं नटमण्डनम् ।
## वङ्गारिर्लोमहृच्च

१ हरेः पीतवर्णस्य तालं प्रतिष्ठाऽस्याऽत्रेति वा **हरितालम्**। हरितालमलति भूषयति वा । 'अलं[६] भूषणादौ'(भ्वा.प.से.), अच्। २ पिञ्जति **पिञ्जरम्** । 'पिजि हिंसायाम्'(   ), बाहुलकादरन् । ३ बिडालनेत्रप्रतिकृतिः **बिडालकम्** । 'इवे प्रतिकृतौ'५।३।९६॥ इति कन् । ४ विस्रस्य क्वथितस्येव गन्धोऽस्य [७]**विस्रगन्धिः**[८] । ५ खर्जति **खर्जूरम्** । 'खर्ज व्यथने'(भ्वा.प.से.), 'खर्जपिञ्जादिभ्य ऊरोलचौ'(उणा-५३०)। ६ वंशपत्राद् भवं **वंशपत्रकम्** ॥१०५८॥ ७ अलयन्ति भूषयन्त्यनेन **आलम्** । 'अलञ् भूषणादौ'(भ्वा.प.से.), ण्यन्तादेरच् । आ समन्ताल्लाति शोभामिति वा । 'आतश्चोपसर्गे' ३।१।१३६॥ इति कः । ८ पीतयति **पीतनम्** । पीतयतेर्ण्यन्ताद् ल्युः । पीतं वर्णं नयतीति वा । 'अन्येभ्योऽपि-'(वा-३।२।१०१॥)इति डः। ९ **तालं** हरितालैकदेशो भीमवत् । ताडयतीति वा। 'तड आघाते' (चु.उ.से.), णिजन्तः, अच्। १० गोदन्तसदृक्त्वाद् **गोदन्तम्** । गोपित्तं[९] च । ११ नटानां मण्डनं **नटमण्डनम्** । १२ वङ्गस्याऽरिः **वङ्गारिः** । १३ लोमानि हरति[१०] **लोमहृत्** । क्विपि 'ह्रस्वस्य पिति-'६।१।७१॥ इति तुक् । त्रयोदश हरितालस्य। ''आलं च तालं गौरं[११] च पिञ्जरं विस्रगन्धकम्''[१२]इति शेषः ॥

## अथ मनोगुप्ता मनःशिला ॥१०५९॥
## करवीरा नागमाता रोचनी रसनेत्रिका ।
## नेपाली कुनटी गोला मनोह्वा नागजिह्विका ॥१०६०॥

१ मनोऽभिधा गुप्ता **मनोगुप्ता** । २ मनसो वाच्या शिला **मनःशिला** । शिलाऽपि ॥१०५९॥ ३ करे विशेषेण ईर्यते **करवीरा** । विपूर्वः 'ईर गतिप्रेरणयोः'[१३] (अ.आ.से.), घञर्थे कः । ४ नागस्य माता **नागमाता** । ५ रोचते **रोचनी** । 'रुच दीप्तौ'[१४](भ्वा.आ.से.), नन्द्यादित्वाल्ल्युः, गौरादिः । ६ रसस्य नेत्री रसनेत्री । स्वार्थे[१५] कनि **रसनेत्रिका** । ७ नेपालदेशोद्भवत्वादभेदेन[१६] **नेपाली** । नैपाल्यपि । ८ कौ पृथिव्यां नटति **कुनटी** । 'नट अवस्पन्दने'(चु.प.से.), अच्, गौरादिः । ९ गां दीप्तिं लाति **गोला** । ([१७]गुडतीति वा) । 'गुड रक्षणे'(तु.प.से.), अच्, डलयोरेकत्वस्मरणात् । १० मनःशब्देन ह्वयते[१८] आह्वयते[१९] **मनोह्वा** । 'ह्वेञ् आह्वाने'[२०](भ्वा.उ.से.), 'आतः-'३।१।१३६॥इति कः[२१] । ११ नागजिह्वा[२२]प्रतिकृतिः **नागजिह्विका** । 'इवे प्रतिकृतौ'५।३।९६॥ इति कन्, 'प्रत्ययस्थात्-'७।३।४४॥ इतीत्वम् । एकादश मनःशिलायाः[२३] ॥१०६०॥

## सिन्दूरं नागजं नागरक्तं शृङ्गारभूषणम् ।
## चीनपिष्टम्

१ स्यन्दते **सिन्दूरम्** । 'स्यदि किञ्चिच्चलने'

---

१. '-णाया' इति५॥ २. '-न्धिकः' इति३॥ ३. द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-६७४, पृ.७६४॥, रामाश्रमी२।९।१०२॥, पृ.४४९॥, तयोः ''-स सुगन्धः सुगन्धिकः ('सुगन्धकः' इति रामाश्रमी)'' इति दृश्यते ॥ ४ 'विश्र-' इति३॥ ५. '-न्धि' इति१.५॥ ६. 'अलञ्' इति३, 'अलीं' इति स्वामी, 'अलं' इति मैत्रेयः, 'अल' इति सायणः ७ 'विश्र-' इति३॥ ८. '-न्धि' इति१.२॥ ९. '-तं' इति३॥ १०. '-तीति' इति१॥ ११. 'गौरवं' इति२॥ १२. शेषनाममालास्वोपज्ञटीकयोर्न दृश्यते ॥ १३. 'ईर गतौ' इति स्वामी, 'ईर गतौ कम्पने च' इति मैत्रेयसायणौ ॥ १४. 'रुच दीप्तावभिप्रीतौ च' इति स्वामिसायणौ ॥ १५. १.२.३.५प्रतिषु न दृश्यते ॥ १६. 'नेपालदेशोद्भवा' इत्येव४.५॥ १७. कोष्ठान्तर्गतपाठः ४प्रतौ नास्ति ॥ १८. 'आहू-' इति१.३॥ १९. 'आह्व-' इति२.३॥ २०. 'ह्वेञ् स्पर्धायां शब्दे च' इति क्षीरतरङ्गिण्यादयः ॥ २१. विग्रहागत 'मनः'शब्दस्योपसर्गत्वाभावेन, उपसर्गे प्रवर्तमानस्य 'आतश्चोपसर्गे' इत्यस्याऽत्राऽप्रवृत्या 'कविधौ सर्वत्र संप्रसारणिभ्यो डः'(वा-३।२।४८॥)इति वार्तिकेनाऽत्र डप्रत्यय उचितः॥ २२. '-ह्विका-' इति३॥ २३. इतोऽग्रे ३प्रतौ 'इत्याख्यायाः' इति दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(भ्वा.आ.से.), ('स्यन्दू प्रस्रवणे'(भ्वा.आ.से.)), 'स्यदेः सम्प्रसारणं च'(उणा-६८)इत्यूरन् । "खर्जादित्वादूरच्[१], बाहुलकात् सम्प्रसारणं च"[ ]इति [२]केचित् । २ नागात् सीसकाज्जायते **नागजम्** । ३ नागेन रज्यते **नागरक्तम्** । ४ शृङ्गारस्य भूषणं **शृङ्गारभूषणम्**। शृङ्गारमपि । ५ चीनस्य नागस्य[३] पिष्टं **चीनपिष्टम्** । पञ्च सिन्दूरस्य ॥

## हंसपादकुरुविन्दे तु हिङ्गुलः ॥१०६१॥

१ हंसपाद इव रक्तो **हंसपादः**। २ कुरुं[४] विन्दति **कुरुविन्दः** । 'विद्लृ लाभे'(तु.उ.अ.), 'गवादिषु विदेः[५] संज्ञायाम्'( )इति शः। ३ हिनोति **हिङ्गुलः,** पुंसि । वाचस्पतिस्तु-"हिङ्गुलस्त्वस्त्रियाम्"[[६]]इति क्लीबेऽप्याह । 'हि गतौ वृद्धौ च'(स्वा.प.अ.), पृषोदरादिः । अयं पञ्चमस्वरान्तोऽपि[७] हिङ्गुलुरिति[८] भानुवत् । त्रीणि हिङ्गुलोः ॥१०६१॥

## शिलाजतु स्याद् गिरिजमर्थ्यं गैरेयमश्मजम् ।

१ शिलातः स्रवज्जत्वाकृति **शिलाजतु** । शिलाया जत्विवेति वा शिलाजतु, क्लीबे । २ गिरेर्जातं **गिरिजम्** । ३ अर्थ्यते रसायनार्थिभिरिति **अर्थ्यम्** । 'अर्थ मूल्ये[९]'(चु.आ.से), 'ऋहलोर्ण्यत्'३।१।१२४॥ । अर्थादनपेतमिति वा । 'धर्मपथ्यर्थ-'४।४।९२॥ इत्यादिना यत् । "अर्थ्यं शिलाजतुर्थ्यो(-न्यर्थे) बुधे न्याय्येऽपि[१०] वाच्यवत्"[विश्वप्रकाशकोशः यान्तवर्गः, श्लो-२३]इति महेश्वरः । ४ गिरौ भवं **गैरेयम्** । 'नद्यादिभ्यो ढक्'४।२।९७॥। ५ अश्मनो जायते **अश्मजम्**। पञ्च शिलाजतुनः॥

## क्षारः काचः[११]

१ क्षरति गलति **क्षारः** । 'क्षर सञ्चलने'(भ्वा.प.से.), [१२]ज्वलादित्वाण्णः । २ [१३]कच्यते बध्यते **काचः** । 'कच बन्धे[१४]'(भ्वा.आ.से.), घञ् । द्वे काचस्य॥

## कुलाली तु स्याच्चक्षुष्या कुलत्थिका ॥१०६२॥

१ कुलमलति **कुलाली**। 'अल[१५] भूषणादौ'(भ्वा.प.से.), 'कर्मण्यण्'३।२।१॥, 'टिड्ढाणञ्-'४।१।१५॥ इति ङीप्[१६]। २ चक्षुषे हिता **चक्षुष्या** । 'शरीरावयवाच्च(-वाद्यत्)' ५।१।६॥ इति यत् । ३ कुले तिष्ठति कुलत्था, पृषोदरादिः । कुलत्थाप्रतिकृतिः **कुलत्थिका** । 'इवे प्रतिकृतौ'५।३।९६॥इति कन्, 'प्रत्ययस्थात्-'७।३।४४॥ इतीत्वम् । यद्वा[१७] कुले तिष्ठतीति, 'सुपि स्थः'३।२।४॥इति कः, 'पुंयोगात्-'४।१।४८॥ इति ङीषि[१८], ततः कन् ।

"चक्षुष्या दृक्प्रसादा च सैव चोक्ता कुलत्थिका ।
कुलाली लोचनहिता कुम्भकारी मलापहा ॥१॥"

[धन्वन्तरिनिघण्टुः, चन्दनादिस्तृतीयो वर्गः, श्लो-१४०]इति धन्वन्तरिः । त्रीणि 'चवडे[१९]' इति ख्यातायाः ॥१०६२॥

## बोलो गन्धरसः प्राणः पिण्डो गोपरसः शशः ।

१ बल्यते(बोल्यते) **बोलः** । 'बुल निमज्जने[२०]'(चु.प.से.), कर्मणि घञ् । वातीति वा । 'वा गतिगन्धनयोः'(अ.प.अ.), [२१]पिञ्छादित्वादूलच् । २ गन्धप्रधानो रसः **गन्धरसः** । "राजदन्तादित्वाद् रसगन्धोऽपि" [[२२]]इति स्वामी । ३ प्राणित्यनेन **प्राणः** । 'अन प्राणने' (अ.प.से.), बाहुलकादच् । ४ पिण्ड्यते द्रव्यान्तरैः[२३] **पिण्डः** । 'पिडि सङ्घाते'(भ्वा.आ.से.), घञ् । पिण्डसह[२४]त्वाद्वा । पिष्ट इत्येके । ५ गां पाति रसोऽस्य **गोपरसः**। गोप इति, रस इत्यपि भीमवत् । ६ शशति **शशः** । 'शश [२५]प्लुतिगतौ'(भ्वा.प.से.), अच् । षट् बीजाबोलस्य ॥

## रत्नं वसु मणिः

१ रमते मनोऽत्रेति **रत्नम्** । 'रमु क्रीडायाम्' (भ्वा.आ.अ.), 'रमेस्त च'(उणा-२९४)इति नप्रत्ययः, मस्य च तः । रत्नमष्टविधं हीरकादि । [यद् वाचस्पतिः-]

"हीरकं मौक्तिकं स्वर्णं रजतं चन्दनानि च ।
शङ्खश्चर्म च रत्नं(वस्त्रं) चेत्यष्टौ रत्नस्य जातयः ॥१॥"

[[२६]]इति । २ वसति लक्ष्मीरत्रेति **वसु,** क्लीबे । 'वस[२७] निवासे'(भ्वा.प.अ.), 'मृ(शृ)स्वृस्निहित्रप्यसिवसिहनि-

---

१. '-न्' इति४॥ २. 'का-' इति१॥ ३. ४.५प्रत्योर्नास्ति ॥ ४. 'कुरु' इति१.५॥ ५. 'विन्देः' इति१.४॥ ६. द्र. स्वोपज्ञटीका ४।१०६१॥, पृ.२३५॥ ७. '-प्यं' इति४॥ ८. '-रित्यपि' इति४.५॥ ९. 'अर्थ उपयाच्ञायाम्' इति क्षीरतरङ्गिण्यादयः ॥ १०. 'न्याय्ये तु' इति विश्वप्रकाशकोशे, पृ.११६॥ ११. तुलनीयोऽमरकोषः २।९।९९॥ १२. 'ज्वा-' इति३॥ १३. 'का-' इति४॥ १४. 'बन्धने' इति क्षीरतरङ्गिण्यादयः ॥ १५. 'अली' इति१.२॥ १६. 'ङीष्' इति४॥ १७. 'यदा' इति१.३.४.५॥ १८. 'ङीपि' इति३.४॥ १९. '-वेड' इति५॥ २०. स्वामिसम्मतोऽयं धातुपाठः ॥ २१. 'प-' इति३॥ २२. द्र. पदचन्द्रिका, भाग-२, वैश्यवर्गः, श्लो-६७६, पृ.७६६॥ २३. '-रं' इति३॥ २४. '-सं-' इति४॥ २५. 'प्लुत-' इति३, मैत्रेयसायणौ च ॥ २६. द्र. स्वोपज्ञटीका४।१०६३॥, पृ.२३५॥ २७. 'वसु' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्लिदिबन्धिमनिभ्यश्च'(उणा-१०)इत्युः । ३ मणति वदति महार्घतां[१] **मणिः**, पुंस्त्रीलिङ्गः[२] । 'मण शब्दे'(भ्वा.प.से.), '-इन्'(उणा-५५७)इतीन्प्रत्ययः । 'कृदिकारात्-'(गणसू४।-१।४५॥)इति ङीपि[३] 'मणी' इत्यपि । ''नृपनीलमणीगृहत्विषाम्''[नैषधीयचरितम्, सर्गः-२, श्लो-७५]इति श्रीहर्षः । मणिकः[४], माणिक्यमेतावपि । त्रीणि सामान्येन रत्नस्य ॥

अथ तद्विशेषानाह-

## तत्र वैडूर्यं वालवायजम् ॥१०६३॥

१ तत्र तेषु रत्नेषु, विदूरात्[५] प्रभवति **वैडूर्यम्** । 'विदूरात् ञ्यः'४।३।८४॥ इति ञ्यः । विडूरग्रामे ह्रदः संस्क्रियमाणं मणितया, ततः प्रथमं भवति । तृतीयवर्गतृतीयषष्ठस्वरमध्यः, स्वमते असौ वालवाये भवति, विडूरे तु संस्क्रियत इति चेत्, सत्यम्, वालवायस्याऽपि विडूरमिति संज्ञा । अथवा पृषोदरादित्वाद् वालवायस्य विडूर इत्यादेशः, एतौ मध्यटवर्गीयौ । ''वैडूर्यमणिशाद्वलौ''[ ]इति रुद्रटः । तवर्गतृतीयमध्योऽप्ययमित्यन्ये । ''ज्ञैयौ मध्यतवर्गीयौ वैदूर्यमणिशाद्वलौ[६][७]''[शब्दभेदप्रकाशः, श्लो ५०(४२)]इति शब्दप्रभेदः[८] । ''विदूरमणिदीधितिः[९]''[ ]इति काव्यकल्पलताश्लेषसिद्धिप्रताने तृतीये, उद्दिष्टवर्णनस्तबकस्तृतीयः । ''[१०]विदूरमणि वैडूर्यम्, पक्षे विशेषेण दूरमत्यर्थं मणिः''[ ]इति तट्टीका । श्याम-वर्णमेतत् । २ वालवायाद्रेर्जातं **वालवायजम्** । ''विदूरभवमुत्कृष्टं निकृष्टं वालवायजम्''[[११]]इति भेदोऽत्र नाऽऽश्रितः । द्वे वैडूर्यमणेः ॥१०६३॥

## मरकतं त्वश्मगर्भं गारुत्मतं हरिन्मणिः ।

१ मरकं तरन्त्यनेन[१२] **मरकतम्** । 'तॄ प्लवनतरणयोः'(भ्वा.प.से.), 'अन्येष्वऽपि[१३] दृश्यते[१४]'(वा-३।२।१०१॥)इति डः । २ अश्मनो गर्भः[१५] **अश्मगर्भम्**, अश्मयोनिरित्यर्थः । ३ गरुत्मत इदं जातं विषं हन्तुं **गारुत्मतम्** । शैषिकोऽण् । ४ हरिन्नीलवर्णो मणिः **हरिन्मणिः**, नीलवर्णोऽयम् । चत्वारि मरकतमणेः ॥

## पद्मरागे लोहितकलक्ष्मीपुष्पाऽरुणोपलाः ॥१०६४॥

१ पद्मस्येव रागोऽस्य **पद्मरागः**, तत्र, पुंक्लीबलिङ्गोऽयम् । ''पद्मराग [इव] रागो लौहित्यमस्त्यस्येति, 'सप्तम्युपमानपूर्वस्योत्तरपदलोपौ'(वा-२।२।२४॥) इति समासोत्तरपदलोपौ''[ ]इति बृहस्पतिः । २ लोहित एव **लोहितकः** । 'लोहितान्मणौ'५।४।३०॥ इति स्वार्थे कन् । ३ लक्ष्म्याः पुष्पमिव **लक्ष्मीपुष्पम्** । ४ अरुणः शोण उपलः **अरुणोपलः** । शोणरत्नमपि । चत्वारि 'लालि' इति ख्यातायाः ॥१०६४॥

## नीलमणिस्त्विन्द्रनीलः

१ नीलवर्णो मणिः **नीलमणिः** । २ मणीनामिन्द्रो नीलश्च मणिः **इन्द्रनीलः**, पुंक्ली. । ''इन्द्रनीलं महानीलम्'' [वैजयन्तीकोषः३।२।४०॥]इति क्लीबे वैजयन्ती । द्वे इन्द्रनीलमणेः । 'पाचि[१६]' इति भाषा ॥

## सूचीमुखं तु हीरकः ।
## वरारकं रत्नमुख्यं वज्रपर्यायनाम च ॥१०६५॥

१ सूच्या इव मुखमस्य **सूचीमुखम्** । २ हरति मनो हीरः । बाहुलकात् 'जोरी च रक्[१७]'(उणा-१८१) इति ईकारोऽन्तादेशो[१८] रक्प्रत्ययश्च । स्वार्थे कनि **हीरकः**, पुंसि । वाचस्पतिस्तु-''अथाऽस्त्री हीरकः''[[१९]]इति क्लीबेऽप्याह । ३ वराः प्रशस्या[२०] अरका अस्मिन् **वरारकम्** । ४ रत्नेषु मुख्यं **रत्नमुख्यम्** । ५ वज्रपर्याया दम्भोलिप्रभृतयो नामाऽस्य **वज्रपर्यायनाम**, तेन वज्रम्, दम्भोलिरित्यादि । ''हीरकं भिदुरं वज्रं सूचिवक्त्रं वरारकम्[२१]'' [मदनपालनिघण्टुः, सुवर्णादिवर्गश्चतुर्थः, श्लो-५५]इति मदनः । पञ्च हीरकस्य ॥१०६५॥

## विराटजो राजपट्टो राजावर्तः

१ विराटदेशे जातो **विराटजः** । 'सप्तम्यां जनेर्डः' ३।२।९७॥ । वैराटोऽपि । २ पट्टेन राजते **राजपट्टः** ।

१. '-र्थतां' इति४.५॥ २. 'पुंस्त्री' इति४॥ ३. 'ङीपि' इति४॥ ४. 'मा-' इति५॥ ५. 'विडू-' इति२.३.४.५॥ ६. 'वैडू-' इति१.२.४.५॥ ७. '-सा-' इति५॥ ८. पूज्यकस्तूरसूरिमहाराजसम्पादितशब्दभेदप्रकाशे तु ''वैडूर्यमणि-शाड्वलौ'' इति दृश्यते, अभिधानचिन्तामणिकोशः, पृ.२३४॥, श्लो-५०॥ ९. '-धतिः' इति३.५॥ १०. 'विडू-' इति३॥ ११. द्र. स्वोपज्ञटीका४।१०६३॥, पृ.२२५॥ १२. '-नेति' इति१.२॥ १३. '-भ्यो-' इति१.३॥ १४. ४प्रतौ नास्ति ॥ १५. 'गर्भोऽस्य' इति३॥ १६. '-च' इति३॥ १७. 'जोरी च' इत्येवोणादिगणसूत्रम् ॥ १८. '-रा-' इति१.३॥ १९. द्र. स्वोपज्ञटीका ४।१०६५॥, पृ.२३६॥ २०. '-स्ता' इति३॥ २१. 'वरार्धकम्' इति मदनपालनिघण्टौ, पृ,१११, श्लो-५५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

राजदन्तादिः । ३ आवर्ते राजते **राजावर्तः** । 'राजदन्तादिषु परम्'२।२।३१॥ । त्रीणि विराटजमणेः ॥

## अथ विद्रुमः ।

**रक्ताङ्को रक्तकन्दश्च प्रवालं हेमकन्दलः ॥ १०६६ ॥**

१ विशिष्टो द्रुमो **विद्रुमः**, पुंसि । विद्रवत्यब्धौ वा । बाहुलकान्मः । २ रक्तोऽङ्कोऽस्य **रक्ताङ्कः** । ३ रक्तश्चासौ कन्दश्चेति **रक्तकन्दः** । ४ प्रवलति **प्रवालम्**, पुंक्ली. । 'वल संवरणे'(भ्वा.आ.से.), '[१]ज्वलितिकसन्तेभ्यो णः'३।१।१४०॥ । प्रवते समुद्रे वा । 'प्लुङ् (पुङ्) गतौ'(भ्वा.आ.से.), अच् । ५ हेम्नः कन्दल इव **हेमकन्दलः** । पञ्च प्रवालस्य ॥१०६६॥

**सूर्यकान्तः सूर्यमणिः सूर्याश्मा दहनोपलः ।**

१ सूर्यस्य कान्तो वल्लभः **सूर्यकान्तः** । २ सूर्यप्रियो मणिः **सूर्यमणिः** । ३ सूर्यस्य अश्मा **सूर्याश्मा**, नकारान्तः । ४ दहनजनक उपलः **दहनोपलः** । ''अग्निमणिः''[ ]इति क्षीरस्वामी । चत्वारि सूर्यकान्तस्य ॥

**चन्द्रकान्तश्चन्द्रमणिश्चान्द्रश्चन्द्रोपलश्च सः ॥१०६७॥**

१ चन्द्रस्य कान्तः **चन्द्रकान्तः** । २ चन्द्रस्य मणिः **चन्द्रमणिः** । ३ चन्द्रस्यायं **चान्द्रः** । ४ चन्द्रस्योपलः **चन्द्रोपलः** । चत्वारि चन्द्रकान्तस्य ॥१०६७॥

सूर्यकान्तचन्द्रकान्तौ कस्याऽश्मनो भवतः? इत्याह-

**क्षीरतैलस्फटिकाभ्यामन्यौ खस्फटिकाविमौ ।**

१ [३]क्षीरधवलः स्फटिकः **क्षीरस्फटिकः** । [४]तैलकान्तः स्फटिकः **तैलस्फटिकः** । ताभ्यामन्यौ भिन्नवर्णाविमौ सूर्यकान्तेन्दुकान्तौ द्वावप्याकाशस्फटिकाख्यावित्यर्थः । क्षीरस्फटिकः १ तैलस्फटिकः २ आकाशस्फटिकः ३, एते त्रयः स्फटिकभेदाः, तन्मध्यात् तृतीयभेदस्य आकाशस्फटिकस्य सूर्यकान्तचन्द्रकान्तौ द्वौ भेदौ । यद्वाचस्पतिः-

''स्फटिकास्तु त्रयस्तेषामाकाशस्फटिको वरः[५] ।
द्वौ क्षीरतैलस्फटिकावाकाशस्फटिकस्य तु ॥१॥
द्वौ भेदौ सूर्यकान्तश्च चन्द्रकान्तश्च तत्र च॥''[[६] ]इति ।

**शुक्तिजं मौक्तिकं मुक्ता मुक्ताफलं रसोद्भवम् ॥१०६८॥**

१ शुक्तेर्जायते **शुक्तिजम्** । शुक्तिरुपलक्षणम्, हस्तिमस्तकाद्युद्भवमपि[७] । यदाह-

''हस्तिमस्तकदन्तौ तु दंष्ट्रा शुनवराहयोः ।
मेघो भुजङ्गमो वेणुर्मत्स्यो मौक्तिकयोनयः ॥१॥''

[[९] ]इति । २ मुच्यन्ते शुभस्थलेष्विति मुक्ताः । 'मुच्लृ मोक्षणे'(तु.उ.अ.), 'क्तिच्क्तौ च संज्ञायाम्'३।३।१७४॥ इति क्तच्[१०] । मुक्ता एव **मौक्तिकम्** । 'विनयादिभ्यष्ठक्'५।४।३४॥ इति स्वार्थे ठक् । 'स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्तेऽपि'[ ]इति षण्ढत्वम् । ३ मुच्यते[११] शुक्तिभिः **मुक्ता** । ४ मुक्ताफलमिव **मुक्ताफलम्** । ५ रसाद् अम्भस उद्भवति **रसोद्भवम्** । अच् । नानाविधत्रसस्थावराणां शरीरेषु सचित्तेष्वचित्तेषु वा उत्पत्तिसद्भावेऽपि पृथिवीकायत्वमेव । तदुक्तं श्रीसूत्रकृद[१२]द्वितीयश्रुतस्कन्ध-तृतीयाहारपरिज्ञाध्ययनावसाने- ''इहेगतिआ सत्ता णाणाविह[१३]जोणिया जाव कम्मनियाणेणं तत्थवुक्कमा णाणाविहाणं [१४]तसथावराणं [पाणाणं] सरीरेसु सचित्तेसु वा अचित्तेसु वा पुढवित्ताए''[श्रीमत्सूत्रकृताङ्गम्, द्वितीयः श्रुतस्कन्धः, अध्य-३, सूत्रम्-६१]इत्यादि । वृत्तिश्चाऽस्य- ''इहैके सत्त्वाः प्राणिनः पूर्वं नानाविधयोनिकाः स्वकृतकर्मवशगाः नानाविधत्रसस्थावराणां शरीरेषु सचित्तेषु अचित्तेषु वा पृथिवीत्वेनोत्पद्यन्ते, तद्यथा- सर्पशिरःसु मणयः, करिदन्तेषु[१५] मौक्तिकानि, विकलेन्द्रियेष्वपि शुक्त्यादिषु मौक्तिकानि, स्थावरेष्वपि वेण्वादिषु तान्येव''[श्रीमच्छीलाङ्काचार्यविहितविवरणम्, द्वितीयः श्रुतस्कन्धः, अध्य-३, सूत्रम्-६१]इति वचनात्र दृष्टं मौक्तिकानां पृथिवीकायत्वम्[१६]'' [ ]इति ॥१०६८॥

**॥ समाप्तः पृथ्वीकायः ॥**

---

१. 'ज्वल-' इति१.२॥ २. '-स्फु-' इति३॥ ३. 'क्षीरः' इति३॥ ४ 'तैलः' इति३॥ ५. '-रम्' इति४.५॥ ६. द्र. स्वोपज्ञटीका ४।१०६८॥, पृ.२३६॥ ७ '-वति' इति३॥ ८. 'मस्तक-' इति१॥ ९. द्र. स्वोपज्ञटीका ४।१०६८॥, पृ.२३६॥ १०. 'क्तिच्' इति२.३.४॥ ११. 'मु-' इति३.४॥ १२. '-क्ते' इति४॥ १३. '-हा' इति१॥ १४ 'तसाणं' इति३॥ १५. '-मस्तकेषु' इति१॥ १६. '-कायिकत्वम्' इति१, '-कायकत्वम्' इति२.५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥ एकेन्द्रियेषु अप्कायः ॥

अथाऽप्कायानाह[1]-

**नीरं वारि जलं दकं कमुदकं पानीयमम्भः कुशं।**
**तोयं जीवनजीवनीयसलिलार्णांस्यम्बु[2]-**
**वाः शं(सं)वरम् ।**
**क्षीरं पुष्करमेघपुष्पकमलान्यापः पयःपाथसी**
**कीलालं भुवनं वनं घनरसो यादोनिवासोऽमृतम्**
**॥१०६९॥**
**कुलीनसं कबन्धं च[3] प्राणदं सर्वतोमुखम् ।**

१ नीयते नयति वा **नीरम्** । 'णीञ् प्रापणे' (भ्वा.उ.से.), 'स्फायितञ्चि-'(उणा-१७०)इत्यादिना रक् । नीर्ते इति वा । निपूर्वाद् 'ईरक्[4] गतौ'(अ.आ.से.), अस्माद् 'इगुपध-'३।१।१३५॥ इति कः । निम्नमीर्ते इति पृषोदरादिर्वा[5] । "निर्गत उद्गतो रोऽग्निरस्मादिति वा । 'ढ्रलोपे पूर्वस्य-'६।३।१११॥ इति दीर्घत्वे नीरम्"[6]इति स्वामी[7] । "नीम्नमीर्ते [इति[8]] नीरम्, निशब्दोऽयं वृत्तौ निम्नवचनः, तस्मिन्नुपपदे 'कर्मण्यण्'३।२।१॥ इत्यण्[9], इगुपधलक्षणः[10] कः, इत्यात्रेयः"[मा.धातुवृत्तिः, अदादिः, धातुसं-११]इति माधवः । २ निम्नोन्नतिं[11] वारयति **वारि**, क्लीबे । 'वृञ् वरणे'(चु.उ.से.), णिजन्तः, 'वसिरपिजपिराजिव्रजिध्वजिसहितनिरदिवारिभ्यः इञ्[12]'('वसिवपियजिराजिव्रजिसदिहनिवाशिवादिवारिभ्य इञ्') (उणा-५६४)इतीञ् । ३ जडति जाड्यं गच्छति **जलम्** । 'जड स्तम्भे[13]'( ), अच् । "जलयत्यन्तर्गतं वस्त्वपवारयति वा जलम् । 'जल अपवारणे'(चु.उ.से.), चुरादिः, ततः पचाद्यचि जलम्"[14]इति सर्वानन्दः[15] । "जडत्वाद् जलम् डलयोरैक्याल्लत्वम्"[14] इति तु कलिङ्गः। "जडं च स जडात्मा पटुर्भवान्"[KA. 11.185]इति दण्डी । " 'जल धान्ये[16]'(भ्वा.प.से.), धान्यं जडत्वमतैक्ष्ण्यमित्यर्थः"[ ]इति वृत्तिः । जडति शीतं भवति । यद्वा जायत इति जः[17] । 'अन्येष्वपि दृश्यते' ३।२।१०१॥ इति डो निरुपदादपि जनेर्भवति। [जैः] जातैः[18] प्राणिभिर्लायते[19] आदीयते इति जलम् । 'ला दाने' (अ.प.अ.), 'घञर्थे कविधानम्'(वा-३।३।५८॥)इति कः"[ ]इति भाष्यम् । ४ द्यति तृष्णामिति **दकम्** । 'दोऽवखण्डने'(दि.प.अ.), 'कीचक-'(हैमोणा-३३)इत्यके निपात्यते, क्वुनि वा । "दगम्"[शब्दभेदप्रकाशः, श्लो-४२(५२)]इति शब्दप्रभेदः[20] । ५ कायति शब्दायते **कम्** । 'कै शब्दे'(भ्वा.प.अ.), बाहुलकाद् डः । ६ उनत्ति **उदकम्** । 'उन्दी क्लेदने'(रु.प.से.), क्वुनि साधुः । [यद्वा] 'उदकम्-'(उणा-१९७)इत्युणादिसूत्रेण निपात्यते । "उत्पूर्वादञ्चतेर्वा (न्लोपेऽयं[21] निपात्यते[22] इत्युणादिसूत्रवृत्तिः" [23]इति) भाष्यम् । "उदकसमानार्थ उदशब्दोऽप्यस्ति तथा चाऽसंज्ञायामसन्नोदं प्रसन्नोदम्"[ ]इति कैयटः । ७ पीयते **पानीयम्** । 'पा पाने'(भ्वा.प.अ.), 'तव्यत्तव्यानीयरः' ३।१।९६॥ इत्यनीयर्, क्लीबेऽयम् । ८ **अम्भः** इति । 'आप्लृ व्याप्तौ'(स्वा.प.अ.), 'उदके नुम्भौ(मुम्भौ) च'

---

१. '-यमाह' इति३॥ २. '-र्णा' इति२.३.४॥ ३. 'स्यात्' इति१॥ ४ ककारानुबन्धो हैममते ॥ ५. '-दित्वाद्वा' इति४॥ ६. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो २३२, पृ.२७६॥ ७ अम.क्षीरस्वामिकृतटीकायाम्-"नयति नीरम् ।" इत्येव दृश्यते १।९।४॥, पृ.६१॥ ८ इतोऽग्रे ३प्रतौ 'वा' इति दृश्यते॥ ९ '-ण्यणि' इति४॥ १०. '-पधेति' इति१॥ ११. '-ति' इति३.४.५॥ १२. १.३.४.५प्रतिषु नास्ति ॥ १३. क्षीरतरङ्गिण्यादौ न दृश्यते ॥ १४ द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२३१, पृ.२७४॥ १५. सर्वानन्दकृतटीकासर्वस्वे-"जलम् । 'जल धान्ये' । पचादिः ।" इति दृश्यते, भा-१, १।१०।३॥, पृ.१७७॥ १६. "जल घात्ये । घात्यं जडत्वम्, अतैक्ष्ण्यमित्यर्थः।" इति स्वामी, भ्वादिः, धातुसं-५७०, पृ.१२२॥ 'जल धान्ये' इति मैत्रेयः, 'जल धान्ये' इति काशकृत्स्नीये(पृ.१०६) चान्द्रे (१।५६३) च पाठः । आर्द्रीकरणं च तदर्थः इति कन्नडटीकातोऽवगम्यते । 'जल घातने' इति सायणः ॥ १७ 'जडः' इति१, 'जलं' इति३॥ १८. 'जायते' इति१॥ १९. '-लीयते' इति३.४.५॥ २०. पूज्यकस्तूरसूरिमहाराजसम्पादितशब्दभेदप्रकाशे-'उदके स्यादुदं समम्' इति दृश्यते, अभिधानचिन्तामणिकोशः, पृ.२३४॥, शिवदत्तशास्त्रिसम्पादितद्विरूपकोषापरनामशब्दभेदप्रकाशे-'उदके स्याद्दकं तथा' इति दृश्यते, अमरकोषः, पृ.४११॥ २१. कोष्ठान्तर्गतपाठः ४प्रतौ न दृश्यते॥ २२. इतोऽग्रे ५प्रतौ 'क्वुनि' इति दृश्यते॥ २३. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२३१, पृ.२७५॥, तत्र-"तथा च-"प्रसोन्नदम्"-इति असंज्ञायामपि उदशब्दः प्रयुज्यते-इति कज्जटः (पा. ६।३।५७॥)" इति दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(उणा-६४९)इत्यत्राऽऽपो ह्रस्वोऽसुन्निति च वर्तते । व्याप्नोति सर्वमित्यम्भः । तथा चाथर्वणीश्रुतिः "सर्वं वा इदमम्मयं आपो वा इदं सर्वम्"[ ]इत्यादिरनुवाकश्चेति भाष्यम् । अमतीति अम्भ इति वा । 'अम्(अम) गतौ'(भ्वा.प.से.), 'अमेर्भुक् च[1]'( )इत्यसुन्, भुगागमश्च । "'अभि कत्थने[2]'(भ्वा.आ.से.), '-असुन्'(उणा-६२८) इत्यसुन्"[[3]]इति माधवः । ९ कुं भुवं श्यति तनूकरोति **कुशम्** । 'शो तनूकरणे'(दि.प.अ.), 'अन्येष्वपि दृश्यते'( )इति डः । कुश्यति श्लिष्यति वा । 'कुश श्लेषे'(दि.प.से.), 'इगुपध-'३।१।१३५॥ इति कः । १० तायते[4] पालयति **तोयम्** । 'तायृ सन्तानपालनयोः'(भ्वा.आ.से.), अचि, पृषोदरादित्वादोत्वम् । तवतेर्[5]वृद्धिकर्मणः[6], 'अघ्न्यादयश्च'(उणा-५५१)इति यत्प्रत्ययो निपातितो द्रष्टव्यः । तवति वर्धते वर्षास्विति[7] भाष्यम्[8] । ११ जीव्यतेऽनेनं[9] **जीवनम्** । 'जीव प्राणधारणे'(भ्वा.प.से.), करणे ल्युट् । १२ एवं[10] **जीवनीयम्** । बाहुलकात् करणेऽप्यनीयर् । १३ (सलति[11] निम्नमिति) **सलिलम्** इति, दन्त्यादिः[12] । 'सल (षल) गतौ'(भ्वा.प.से.), '[13]सलिकल्यनिमहिभडिभण्डिचण्डि[14]शण्डितुण्डिपिण्डि[15]कुकिभूभ्य इलच्'(उणा-५४)। "सलति गच्छति, निम्नं देशं गम्यते प्राणिभिर्वा"[ ]इति भाष्यम्। 'सृ गतौ'(भ्वा.प.अ.), बाहुलकादिलच् वा । रलयोरैक्त्व[16]स्मरणात् 'सरिरं सरिलं[17] सलिलम्'[[18]]इति वाचस्पतिः । १४ ऋच्छति अर्यते वा **अर्णः**, क्लीबे । 'ऋ गतौ' (भ्वा.प.अ.), 'उदके नुट् च'(उणा-६३६)इत्यसुन्, नुडागमश्च । 'ऋणोतीति वा। 'ऋणु गतौ'(त.उ.से.), '-असुन्' (उणा-६२८)इत्यसुन्। अर्णसी, अर्णांसि इत्यादि । १५ अमति गच्छति देशाद् देशान्तरमिति **अम्बु**, क्लीबे। 'अम्(अम) गतौ'(भ्वा.प.से), 'कम्यमिभ्यां बुः'(हैमोणा-७९९) इति बुः । अम्बतीति[19] (अम्बत इति) वा । 'अबि लबि स्रंसने[20]'(भ्वा.आ.से.), 'भृमृतृशीच[रि]त्सरि-'(उणा-७) इत्यादिना बाहुलकादतोऽप्युप्रत्ययः । १६ निम्नोन्नतं वारयति **वाः** । 'वृञ् वरणे'(चु.उ.से.), णिजन्तः, तदन्तात् क्विप्, 'णेरनिटि'६।४।५१॥ इति णिलोपः, हल्ङ्यादिलोपः, रेफस्य विसर्जनीयः । वार्शब्दः क्लीबे । "वारि पतन्ति नदन्ति मयूराः"[ ]इति घटकर्परः । "वार्शब्दः स्त्रीलिङ्गः"[ ] इति[21] तु कलिङ्गः। "पूर्वोत्तरयोः साहचर्यात् स्त्रीक्लीबयोर्वार्" [[22]]इति तु पञ्जिका । "वाः स्त्र्यापो बहुषु स्त्रियाम्" [ ]इत्यमरमाला स्त्रियाम् । वारौ, वारः इत्यादिरूपाणि । १७ **संवरम्** इति । संपूर्वाद् वृणोतेः 'ग्रहवृदृनिश्चिगमश्च' ३।३।५८॥ इत्यप् । संव्रियते मेघैरिति । यद्वा पचाद्यच् । संवृणोति हि भूमिम् । पृषोदरादित्वात् सस्य शत्वे शम्बरं तालव्याद्यपि । यद्वा शम्बो वज्रम्[23], तद्वानिन्द्रः, मत्वर्थीयस्य लुक्, 'रा दाने'(अ.प.अ.), शम्बेन[24] इन्द्रेण दीयत इति शम्बरः[25] । 'घञर्थे कविधानम्'(वा-३।३।५८॥)इत्यस्योपलक्षणार्थत्वात् कः। शम्बतीति वा[26] । "शम्ब संवरणे[27]" ( ), 'संब च[27]'( ), 'ऋच्छेररन्[28]'(उणा-४११)इति बाहुलकादरन्, तस्मादयं दन्त्यादिस्तालव्यादिश्च"[[29]]इति सर्वधरः, पञ्जिका च । १८ **क्षीरम्** इति । 'घस्लृ अदने' (भ्वा.प.अ.), 'घसेश्चिच्च[30]'(उणा-४७४)इतीरन्, चकारात् 'क्विप् च' इत्यनुवर्तते, 'गमहनजन-'६।४।९८॥ इत्युपधालोपः, 'खरि च'८।४।५५॥ इति घकारस्य ककारः[31], 'शासिवसि[घसी]नां च'८।३।६०॥ इति षत्वम् । अदन्ति तदिति

---

१. 'अमेर्हुक् च'(उणा-६५२)इत्यस्य परिवर्तितसूत्रं प्रतिभाति ॥ २ 'कथने' इति३, 'अभि रभि शब्दे-इति दुर्गः' क्षीरतरङ्गिण्याम् ॥ ३ माधवीयधातुवृत्तौ 'रेभृ शब्दे'(भ्वादिः, धातुसं-२६४, पृ.११९)इत्यत्र "अम्भः-असुन्" इति दृश्यते ॥ ४. ' ति' इति३.४.५॥ ५. 'भ-' इति३.४.५॥ ६. "तु ('तुरुस्तुशम्यमः सार्वधातुके'७।३।९५॥)इति सौत्रो धातुः (अ.प.अ.) गतिवृद्धिहिंसासु । अयं च लुग्विकरण इति स्मरन्ति ॥" सिद्धान्तकौमुदी, अदादिः, पृ.४५६॥ ७ 'निप्र-' इति५॥ ८ इतोऽग्रे ४प्रतौ 'वा' इति दृश्यते ॥ ९. ४प्रतौ नास्ति ॥ १०. '-नेति' इति१॥ ११. कोष्ठान्तर्गतपाठः १.३प्रत्योर्नास्ति ॥ १२. १.३प्रत्योर्नास्ति ॥ १३. 'सल-' इति४॥ १४. उणादिगणसूत्रे न दृश्यते ॥ १५. '-पिण्डितुण्डि-' इत्युणादिगणसूत्रे ॥ १६. '-क्य-' इति४.५॥ १७ 'सलिलं' इति३.५॥ १८. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२३०, पृ.२७४॥, रामाश्रमी१।१०।३॥, पृ.११९॥, तयोः "सरिलं सलिरं सलिलम्" इति दृश्यते ॥ १९. 'अवतीति' इति२, 'अवितीति' इति३॥ २०. 'रबि लबि अबि शब्दे' 'लबि अवस्रंसने च' इति क्षीरतरङ्गिण्यादयः ॥ २१. १.४प्रत्योर्नास्ति ॥ २२. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२३१, पृ.२७४॥ २३. '-ज्रः' इति३॥ २४ 'शब्बे-' इति१.४॥ २५. '-रम्' इति३॥ २६. ५प्रतौ नास्ति ॥ २७ चुरादिगणे 'साम्ब संबन्धे' इति स्वामी, 'षम्ब सम्बन्धे' 'शम्ब च' इति मैत्रेयः, 'षम्ब सम्बन्धने' इति सायणः ॥ २८. '-ररः' इत्युणादिगणसूत्रे ॥ २९. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२३२, पृ.२७४॥ ३०. 'घसेः किच्च' इत्युणादिगणसूत्रम् ॥ ३१. 'घस्य कः' इति४॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्षीरम् । 'क्षर सञ्चलने'(भ्वा.प.से.), अस्माद् बाहलकादीरन्प्रत्ययष्टिलोपश्च[1] । क्षरति हि तन्मेघात् । यद्वा 'क्षि निवासगत्योः'(तु.प.अ.), 'सुविसिक्षिभ्यां दीर्घश्च[2]'(उणा-१८३)इति रक्(क्रन्)। **१९** पुष्णाति तृप्तिं **पुष्करम्** । 'पुष पुष्टौ'(क्र्या.प.से.), 'पुषः कित्'(उणा-४४४)इति करच् (करन्)। **२०** मेघानां पुष्पं प्रसवो **मेघपुष्पम्** । **२१** काम्यत इति **कमलम्** । 'कमु कान्तौ'(भ्वा.आ.से.), वृषादित्वात् कलच् । **२२** आप्नुवन्ति व्याप्नुवन्ति **आपः** । 'आप्लृ व्याप्तौ'(स्वा.प.अ.), 'आप्नोतेर्ह्रस्वश्च'(उणा-२१६) इति क्विप्, अप्, 'अप्तृ-'६।४।११॥ आदिसूत्रेण दीर्घत्वे आपः, स्त्रियां बहुवचनान्तः । आप्नोतेरसुनि आपसिति सकारान्तोऽपि क्लीबे । ''आपोभिर्मार्जनं कृत्वा''[ [3] ]इति स्मृतेः[4] । **२३** पीयत इति **पयः** । 'पा पाने'(भ्वा.प.अ.), 'पिबतेरी(-रि) च'(दशपा.९।५०)इत्यसुन् । 'पीङ् पाने' (दि.आ.अ.) अस्माद् वाऽसुन् । 'पय गतौ'(भ्वा.आ.से.) अस्माद् वाऽसुन् । **२४** पीयते **पाथः**, क्लीबे एतौ । 'पा पाने'(भ्वा.प.अ.), 'उदके थुट् च'(उणा-६४३)इत्यसुन्, [थुट् च], । '''पिबतेरसुन्[5]'( )इत्यसुन्प्रत्ययः थुगागमश्च'' [मा.धातुवृत्तिः, भ्वादिः, धातुसं-६४७]इति माधवः । पाथसी, पाथांसि, इत्यादि क्लीबे । **२५** कीला(कीलां) ज्वाला(ज्वालां) अलति[6] वारयति **कीलालम्** । 'अलज्[7] भूषणादौ'(भ्वा.प.से.), 'कर्मण्यण्'३।२।१॥ । कील्यते बध्यते सेतुभिरिति वा । 'कील बन्धे[8]'(भ्वा.प.से.), बाहुलकात् कालन् । **२६ भुवनम्** इति । 'भू सत्तायाम्' (भ्वा.प.से.), 'भूसूधूभ्रस्जिभ्यश्छन्दसि'(उणा-२३८)इति क्युन्प्रत्ययः, उवङादेशः । भवन्त्यनेन सर्वे पदार्था इति भुवनम् । **२७** वन्यते सेव्यते **वनम्** । 'पुंसि संज्ञायां घः प्रायेण'३।३।११८॥ इति घः । ''वानम्''[ [9] ]इत्युज्ज्वलदत्तः ।

**२८** घनस्य रसो **घनरसः**, पुंसि । ''पुंस्त्वं प्रमादात्''[ [10] ] इति कलिङ्गः । ''क्लीबे घनरसम्''[ [10] ]इति माला । तथा च-''अप्स्वपि शम्बरपिप्पलकुश[11]कमलकाण्डविषवनपयांसि । घनरसमम्बु क्षीरं घृतममृतं[12] जीवनं[13] भुवनम्[14]''[ [10] ]इति रत्नकोषः[15], तदयुक्तम्, ''पुंल्लिङ्गः स्याद् घनरसः सान्द्रनिर्यासनिरयोः''[ [10] ]इति रभसात्[15], ''अम्भोर्णस्तोयं नीरं च नारं घनरसः पुमान्''[ [10] ]इति शब्दार्णवाच्च[15] । **२९** यादसां निवासो **यादोनिवासः** । **३०** नास्ति मरणमस्मादिति **अमृतम्** ॥१०६९॥ **३०** कौ लीनं श्लिष्टं श्यति **कुलीनसम्** । **३१** कं सुखं वायुं शरीरं वा बध्नाति **कबन्धनम्** । 'बन्ध[16] बन्धने'(क्र्या.प.अ.), 'कर्मण्यण्'३।२।१॥ । वासवदत्तायाम्-''सरसि नृत्यत्कबन्धे[17]''[ ], माघे च ''[18]चलितोद्धतकबन्धसम्पदः''[शिशुपालवधम्, सर्गः-१६, श्लो-६७]इति प्रयोगात् कबन्धमित्यखण्ड[19] नाम । ''कं१ बन्धम्२ इति द्वे नाम्नी''[ ]इत्येके । तन्मतेऽत्र कशब्दोऽदन्तः, '' ''नीरं वारि जलं दकं कम्''(श्लो-१०६९)इत्यत्र कमिति मान्तमव्ययम् । मकारमध्यं कमन्धम्''[ ]इत्यपरे । **३२** प्राणान् ददाति **प्राणदम्** । 'आतोऽनुपसर्गे कः' ३।२।३॥ । **३३** समविषमच[20]लनात् सर्वतो मुखान्यस्य **सर्वतोमुखम्**। सर्वदिग्वृत्तेर्वा । चतुस्त्रिंशज्जलस्य। शेषश्चात्र-

''जले दिव्यमिरा सेव्यं कृपीटं घृतमङ्कुरम् ।
विषं पिप्पलपातालमलि[21]नानि च कम्बलम् ॥१॥
पावनं षट्रसं चापि पल्लूरं तु [22]सितं पयः ।
किट्टिमं तदतिक्षारं शालूकं पङ्कगन्धिकम् ॥२॥
अन्धं तु कलुषं तोयमतिस्वच्छं तु काचिमम् ॥''

[शेषनाममाला४।१६४-१६६॥]इति । घृतमिति 'घृ क्षरणदीप्त्योः'(जु.प.अ.), 'अञ्जिघृसिभ्यः क्तः'(उणा-३६९) । यद्वा 'गत्यर्थाद[23]कर्मकात्-'३।४।७२॥ इत्यादिना

१. '-लोपो चेति' इति१॥ २. 'शुसिचिमीनां दीर्घश्च' इत्युणादिगणसूत्रम् ॥ ३. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२३१, पृ.२७३॥ ४. '-तिः' इति३॥ ५. 'पातेरसुन्' इति मा.धातुवृत्तौ, पृ.२४६॥ ६. 'अलयति' इति१॥ ७. क्षीरतरङ्गिण्यामस्य धातोष्टीप्पणी द्रष्टव्या, भ्वादिः, धातुसं-३४३, पृ.८१॥ ८ 'बन्धने' इति३॥ ९ द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२३१, पृ.२७५॥, तत्र-'बनम्' इति दृश्यते ॥ ''यत्तु-भुवनवद् बाहुलकात् क्युनि 'अनुदात्तोपदेश-'(६।४।३७)इत्यादिना नलोपे वनम्-इत्युज्ज्वलदत्तः-इति मुकुटः। तन्न। 'अनुदात्तोपदेश-'(६।४।३७) इत्यनुनासिकलोपस्य क्ङिति झलि विधानात् क्युनि तदप्रसङ्गात् । अन्यथा वन्यत इत्यादावपि प्रसङ्गात्'' इति रामाश्रमी२।१०।३॥, पृ.१२०॥ १०. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२३३, पृ.२७७॥ ११. '-कुसुम-' इति३॥ १२. '-त-' इति३॥ १३. 'संजी-' इति३॥ १४. '-न-' इति१.३.५॥ १५. रामाश्रमी१।१०।५॥, पृ.१२१॥ १६. 'बध' इति३.५॥ १७ '-न्धः' इति३॥ १८. 'व-' इति१.२.४॥, '-द्धत-' इत्यस्य स्थाने शिशुपालवधे '-र्ध्व-' इति दृश्यते, पृ.४२०॥ १९. '-ण्ड-' इति १.४॥ २०. '-व-' इति१.२॥ २१. '-नलि-' इति शेषनाममालास्वोपज्ञटीकयोः ॥ २२. 'शि-' इति५॥ २३. '-द-' इत्यष्टाध्याय्यां न दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कर्तरि क्तः । जिघर्ति क्षरति मेघात्, पर्वतादिभ्यो[१] वा । "दीप्यते वा[२]"[ ]इति भाष्यम्। विषमिति । 'विष्लृ व्याप्तौ'(जु.उ.अ.), 'विषेर्व्याप्तिकर्मणि-'(दशपा-९।२०) इति कप्रत्ययः । वेवेष्टि व्याप्नोति सर्वमिति । यद्वा विपूर्वात् 'ष्णा शौचे'(अ.प.अ.)इत्यस्माद् 'अन्येष्वपि दृश्यते'३।२।१०१॥ इति जनेर्विधीयमानो डो बाहुलकाद् भवति, णाकारलोपोऽपि बाहुलकादेव । विशेषेण स्नात्यनेनेति विषम् । तद्धि प्रथमं शौचसाधनम् । विपूर्वात् सेवतेर्वा पूर्ववड्डप्रत्ययः । "तद्धि स्नानपाना[३]वगाहनार्थिभिः सेव्यते"[ ]इति भाष्यम् ॥

## अस्थाघाऽस्थागमस्ताघमगाधं चाऽतलस्पृशि ॥१०७०॥

१ तिष्ठति जनोऽत्र स्थाघम्, न स्थाघम् **अस्थाघम्,** कवर्गचतुर्थान्तः । २ स्थग्यते स्थागम्, न स्थागम् **अस्थागम्,** कवर्गतृतीयान्तः । ३ तिष्ठति स्ताघम्, न स्ताघम् **अस्ताघम्,** दन्त्यतुर्यवर्गाद्यमध्यः[४], कवर्गचतुर्थान्तः। त्रयोऽपि पृषोदरादित्वात् साधवः । ४ नास्ति गाधः प्रतिष्ठाप्रकर्षस्थितिरत्रेति **अगाधम्** । 'गाधृ[५] प्रतिष्ठालिप्सयोः' (भ्वा.आ.से.), पचाद्यचि, 'नञोऽस्त्यर्थानाम्-'(वा-२।२। २४॥)इति समासः । ५ नास्ति तलेऽधः स्पृक् स्पर्शोऽस्येति **अतलस्पृक्,** व्यञ्जनशकारान्तः[६]। पञ्चाऽपि वाच्यलिङ्गाः । पञ्च अस्थाघजलस्य ॥१०७०॥

## निम्नं गभीरं गम्भीरम्[७]

१ निकृष्टो म्नाऽभ्यासः सलिलस्याऽत्रेति **निम्नम्**। नीचभावमभ्यस्यतीति वा । 'म्ना अभ्यासे'(भ्वा.प.अ.), 'घञर्थे कः'(वा-३।३।५८॥), 'सुपि-'३।२।४॥इति योगविभागाद् 'आतोऽनुपसर्गे कः'३।२।३॥ वा । २-३ जलजन्तवो गच्छन्त्यत्रेति **गभीरम्, गम्भीरम्** च । 'गम्लृ गतौ' (भ्वा.प.अ.), 'गाङ् गतौ'(भ्वा.आ.अ.), 'गाधृ प्रतिष्ठालिप्सयोः'(भ्वा.आ.से.)इत्यस्य वा, 'गभीरगम्भीरौ'(उणा-४७५)इतीरनि साधू । त्रीणि गम्भीरजलस्य[९] । 'ऊंडु[१०]' इति भाषा । "अ[११]स्थाघादयोऽष्टावेकार्थाः"[ ]इत्येके ।

## उत्तानं तद्विलक्षणम् ।

१ ऊर्ध्वं तन्यत इति **उत्तानम्** । 'तनु विस्तारे' (त.उ.से.), घञन्तः । ततो गम्भीराद् विलक्षणमन्यत् । "उत्तानं स्यादगम्भीरे तथा सु[१२]प्तोन्मुखेऽन्यवत्"[विश्वप्रकाशकोशः, नान्तवर्गः, श्लो-५५]इति महेश्वरः । "गम्भीरमुन्नतमध्यम्"[ ]इति तट्टीका । 'छी[१३]लर' इति भाषायां[१४] एकम् ॥

## अच्छं प्रसन्ने

१ न छ्यति दृष्टिमिति **अच्छम्** । 'छो छेदने'(दि. प.अ.), 'सुपि-'३।२।४॥ इति कः । अद्यत इति वा । 'तुदिमदि-'(हैमोणा-१२४)इति छक्। न छाद्यत इति[१५] वा। 'छद अपवारणे'(चु.उ.से.), 'अन्येष्वपि-'३।२।१०१॥ इति डः। २ प्रसीदति स्म **प्रसन्नम्** । 'षद्लृ वि[१६]शरणादौ'(भ्वा. तु.प.अ.), 'निष्ठा'३।२।१०२॥, तत्र[१७] । द्वे निर्मलजलस्य॥

## अनच्छं स्यादाविलं कलुषं च तत् ॥१०७१॥

१ न अच्छम् **अनच्छम्** । २ आ समन्ताद् विलति भिनत्ति दृष्टिमिति **आविलम्** । 'विल भेदने'(तु. प.से.), 'इगुपध-'३।१।१३५॥ इति कः । ३ कल्यते **कलुषम्** । 'कल[१८]ण् सङ्ख्याने'( ), 'पृ(पॄ)कलिभ्यामुषच्[१९]'(दशपा-९।१५॥)। गम्भीराद्याः कलुषान्ता वाच्यलिङ्गाः। त्रीणि 'डो[२०]हुलूं[२१] पाणी' इति ख्यातस्य॥१०७१॥

## अवश्यायस्तु तुहिनं प्रालेयं मिहिका हिमम् । स्यान्नीहारस्तुषारश्च

१ अवश्यते (अवश्यायते) **अवश्यायः** । 'श्यै[२२]ङ् गतौ'(भ्वा.आ.अ.), 'श्याद्व्यधाश्रु(स्रु) '३।१।१४१॥ इति णः। २ तोहयति (तोहति) अर्दयति **तुहिनम्** । 'तुहिर् दुहिर् उहिर्[२३] अर्दने[२४]'(भ्वा.प.से.), 'वेपितुह्योर्[र्ह्रस्व]श्च' (उणा-२१०)इतीनन्, स च कित्, धातोर्ह्रस्वत्वं च । ३ प्रलीयते सर्वमत्रेति प्रलयो हिमवान्, प्रलयादागतं **प्रालेयम्**।

---

१. '-दिति' इति१॥ २. 'च' इति३॥ ३. '-ता-' इति१॥ ४. '-ध्यं' इति५॥ ५. '-धृङ्' इति३॥ ६. '-स-' इति४॥ ७. तुलनीयोऽमरकोषः१।१०।१५॥ ८. १प्रतौ नास्ति, 'चत्वारि' इति३.४.५॥ ९. 'जलस्य' इति३॥ १०. 'ऊंडूं' इति४, 'उंडू' इति३॥ ११. 'अस्ता-' इति१.४.५॥ १२. 'सुतो-' इति३॥ १३. 'छा-' इति१.२॥ १४ 'भाषा' इति१.५॥ १५. ४प्रतौ नास्ति॥ १६. 'विस-' इति१॥ १७ १.२.४.५प्रतिषु नास्ति ॥ १८. 'कल' इति४, हैममते णकानुबन्धश्चुरादेः ॥ १९. 'पृनहिकलिभ्य उषच्'(उणा-५।१५)इति (पञ्चपादी) उणादिगणसूत्रम् ॥ २०. 'ड-' इति१, 'डु-' इति२॥ २१. '-लु' इति२.५॥ २२. 'श्ये-' इति१.३.५॥ २३. ३प्रतौ नास्ति ॥ २४. सायणसम्मतोऽयं धातुपाठः, 'तुहिर् उहिर् अर्दने' इति स्वामी, 'तुहिर् दुहिर् अर्दने' इति मैत्रेयः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'तत आगतः'४।३।७४॥ इत्यण्, 'केकयमित्रयुप्रलयानां यादेरियः'७।३।२॥इतीयादेशः। ४ मेहति **मिहिका**। 'मिह सेचने'(भ्वा.प.अ.), बाहुलकादिकन्। धूममहिषी-धूमिका-धूमरी इत्यपि। ५ हिनोति वर्धते जलमनेनेति **हिमम्**। 'हि गतौ वृद्धौ च'(स्वा.प.अ.), बाहुलकान्मक्। हन्ति सत्त्वानिति वा। 'हन्(हन) हिंसागत्योः'(अ.प.अ.), 'हन्तेर्हि च'(उणा-१४४)इति मक्। ६ निह्रियते **नीहारः**। 'हृञ् हरणे'(भ्वा.उ.अ.), घञन्तः, 'उपसर्गस्य घञि-'६।३।१२२॥ इति दीर्घः। ७ तुष्[1]यन्त्यनेन **तुषारः**। 'तुष तुष्टौ'(दि.प.अ.), 'तुषारादयश्च'(उणा-४१९)इत्यारनि साधुः। एते त्रयोऽप्यस्त्रियाम्। सप्त हिमस्य॥

**हिमानी तु महद्धिमम् ॥१०७२॥**

१ महद्धिमं **हिमानी**। 'हिमारण्ययोर्महत्त्वे'(वा-४।१।४९॥)इति ङीषानुकौ। एकं हिमसंहतेः ॥१०७२॥

**पारावारः सागरोऽवारपारो**
**ऽकूपारोदध्यर्णवा वीचिमाली।**
**यादः-स्त्रोतो-वा-नदीशः सरस्वान्**
**सिन्धूदन्वन्तौ मितद्रुः समुद्रः ॥१०७३॥**
**आकरो मकराद् रत्नाज्जलाद् निधि-धि-राशयः।**

१ पारमापिपर्ति पारापारः, 'पृ पालनपूरणयोः'(जु.प.से.), 'कर्मण्यण्'३।२।१॥, जपादित्वाद् वत्वे **पारावारः**। पारमावृणोति वा। पारमिवाऽवारमर्वा[क्] कूलमस्य दुस्तरत्वादिति वा। पारमपां न राति दत्त इति पृषोदरादित्वाद् वा। २ "गर्भस्थेऽस्मिन् एतन्मात्रे सपत्न्या गरो दत्तः, ततो गरेण सह सद्यो जातत्वात् सगरः। सगेणऽवतारित्वात्, 'तस्येदम्'४।३।१२०॥ इत्यणि **सागरः**" [पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२२९]इति मिश्राः। "सगरपुत्राणामयं [तैः] खातत्वात्"[स्वोपज्ञटीका४।१०७३] इत्याचार्याः। "क्षीरोदादिष्वप्युपमया सागरव्यपदेशः"[[2]] इति भट्टाः। ३ [3]अवारमिव पारं पारतटमस्य **अवारपारः**। ४ अकुत्सितं पारमस्य **अकूपारः**। 'अन्येषामपि-'६।३।१३७॥ इति दीर्घः। "न कुं पृथ्वीं पिपर्ति पूरयति मर्यादापालनादित्यकूपारः"[अम.क्षीर.१।९।१॥] इति स्वामी[4]। "अविद्यमानाः कुः पृथिवी पारेऽस्य"[[5]] इति त्वन्ये। "न कुं पृथिवीं पृणोति कर्मण्यणि 'अन्येषामपि-'[6]६।३।१३७॥ इति दीर्घत्वेऽकूपारः"[ ]इत्येके[7]। ५ उदकानि धीयन्तेऽत्रेति, **उदधिः**[8]। 'करणाधिकरणयोश्च' ३।३।११७॥ इति कर्मण्युपपदेऽधिकरणेऽर्थे किप्रत्ययः, 'पेषंवासवाहनधिषु च'६।३।५८॥ इति उदकस्योदादेशः। "असंज्ञायामप्युदादेशे उदधिर्घट इत्यपि"[[9]]इति भट्टः। ६ अर्णांसि सन्त्यत्रेति **अर्णवः**। 'अर्णसः सलोपश्च'[10](वा-५।२।१०९॥)इति वप्रत्ययः। ७ वीचीस्तरङ्गान् मलते धारयति **वीचिमाली**। 'मल धारणे'(भ्वा.आ.से.), ग्रहादित्वाण्णिनिः। ८-११ यादसां स्रोतसां[11] वारां नदीनां च ईशः, तेन **यादईशः, स्रोतईशः** दन्त्यसादिः, **वारीशः, नदीशः**। यौगिकत्वाद् यादःपतिरित्यादयः। १२ सरांसि जलप्रसरणानि, सरांसि जलानि वा सन्त्यस्येति **सरस्वान्**। "सरो नीरे तडागे च"[ ]इति रुद्रः[12]। भूम्नि मतुप्, 'तसौ मत्वर्थे'१।४।१९॥इति भसंज्ञा, तेन न पदकार्यम्। सरस्वन्तौ इत्यादि। १३ स्यन्दत्यापोऽत्रेति **सिन्धुः**[13], पुंसि स्त्रियां[14] च। "सरित्सागरयोः सिन्धुः स्मृतः स्त्रीपुंसयोरसौ"[ ]। गौडस्तु-"नदो गजमदः सिन्धुर्देशो ना सरित स्त्रियाम्"[ ]इत्याह। 'स्यन्दू प्रस्रवणे'[15](भ्वा.आ.से.), 'स्यन्देः संप्रसारणं धश्च'(उणा-११)इत्युप्रत्ययः। १४ उदकानि सन्त्यत्र **उदन्वान्**। 'उदन्वानुदधौ च'८।२।१३॥ इति साधुः। उदन्वन्तौ, उदन्वन्तः इत्यादि। १५ मितं समर्यादं द्रवति गच्छति **मितद्रुः**। 'दु द्रु गतौ'(भ्वा.प.अ.), 'मितद्र्वादिभ्यश्च'(वा-३।२।१८०॥)इति डुः। १६ चन्द्रोदये आपः सम्यगुन्दन्ति क्लिद्यन्त्य[16]त्रेति **समुद्रः**। सम्पूर्वाद् 'उन्दी क्लेदने'

१. 'तुष-' इति१.३.५॥ २. अम.क्षीरस्वामिटीकायां न दृश्यते ॥ ३. 'आ-' इति५॥ ४ अम.क्षीरस्वामिकृतटीकायाम्-"न कुं पृणाति मर्यादापालनादकूपारः।" इति दृश्यते, पृ.६१॥ ५. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२२९, पृ.२७२॥ ६. '-पि' इति५॥ ७. पदचन्द्रिकायाम्-"न कुं पृथ्वीं वृणोति। अणि (पा.३।२।१)पूर्ववद् दीर्घे "अकूवार" इत्यन्ये।" इति दृश्यते, वारिवर्गः, श्लो-२२९, पृ.२७२॥ ८. १.३.४.५प्रतिषु नास्ति ॥ ९. 'णा-' इति३॥ १०. 'अर्णसो लोपश्च' इति वार्तिकस्वरूपं दृश्यते ॥ ११. 'श्रो-' इति१.३.४.५॥ १२. द्र. रामाश्रमी१।१०।१॥, पृ.११९॥ १३. 'साधुः' इति३.५॥ १४. 'संज्ञा' इति१॥ १५. 'प्रश्र-' इति३, 'श्रवणं' इति स्वामिमैत्रेयौ॥ १६. '-द्यत्य-' इति३.४, '-द्यतेऽ-' इति१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(रु.प.से.) अस्मात् 'स्फायितञ्चि-'(उणा-११३)इत्यादिना रक्[1], 'अनिदितां हलः-'६।४।२४॥ इति न्लोपः । उक्तं च वायुपुराणे-"आपां चैव समुन्देन[2] स समुद्र इति स्मृतः" [[3]]इति । "मुद्रा मर्यादा, तया सह वर्तते"[[3]]इति तु पञ्जिका । "सम् सम्यग् उद् गतौ रोऽग्निः"[[3]]इति तु कौमुदी। मुदं रान्ति ददति[4] तानि मुद्राणि रत्नानि, मुत्पूर्वाद् रातेः 'आतोऽनुपसर्गे कः'३।२।३॥, तैः सह वर्तत इति वा ॥१०७३॥ **१७-१८** मकरशब्दाद् रत्नशब्दाच्चाऽग्रे आकरो योज्यः । मकराणामाकर उत्पत्तिस्थानं **मकराकरः**, मकरालयोऽपि । रत्नानामाकरो **रत्नाकरः**, रत्नराशिरपि । **१९-२१** जलशब्दादग्रे निध्यादयो योज्याः, तेन **जलनिधिः** । जलनिधेश्चा[5]न्योपसर्गनिवृत्त्यर्थमुपादानम् । **जलधिः**, **जलराशिः** । यौगिकत्वाद् [वारिनिधिः, वारिधिः,] वारिरशिरित्यादयः । एकविंशतिः[6] समुद्रस्य । शेषश्चात्र-

"समुद्रे तु महाकच्छो दारदो धरणीप्लवः[7] ।
महीप्रावार उर्वङ्गस्तिमिकोशो महाशयः ॥१॥"

[शेषनाममाला ४।१६७॥]॥

## द्वीपान्तरा असङ्ख्यास्ते ।

ते समुद्राः, द्वीपान्यन्तरे[8] येषां ते द्वीपान्तराः, असङ्ख्याः सङ्ख्यारहिताः ॥

## सप्तैवेति तु लौकिकाः ॥१०७४॥

तु पुनः, लौकिका मिथ्यादृष्टयो गतानुगतिकाः सप्तैव समुद्रा इति प्राहुः ॥१०७४॥

तानाह-

## लवणक्षीरदध्याज्यसुरेक्षुस्वादुवारयः ।

लौकिकसप्तसमुद्राणां नामानि, लवणं क्षीरं दधि आज्यं सुरा इक्षुरसं स्वादु च वारि येषां ते तथा, **१ लवणवारिः** लवण[9]समुद्रः १, **२ क्षीरवारिः** क्षीरसमुद्रः २, **३ दधिवारिः** दध्युदसमुद्रः ३, **४ आज्यवारिः** घृतोदसमुद्रः ४, **५ सुरावारिः** सुरोदसमुद्रः ५, **६ इक्षुवारिः** [10]इक्षूदसमुद्रः ६, **७ स्वादुवारिः** [11]स्वादूदसमुद्रः ७। यदाहुः-

"लावणो१ रसमयः२ सुरोदकः३
सार्पिषो४ दधिजलः५ पयःपयाः ६ ।
स्वादुवारि७रुदधिश्च सप्तमस्तान्
परीत्य त इमे व्यवस्थिताः ॥१॥"[[12]]इति ॥

## तरङ्गे भङ्गवीच्यूर्म्युत्कलिकाः

१ तरति ऊर्ध्वं तिर्यक् प्लवते **तरङ्गः** । 'तॄ प्लवनतरणयोः'(भ्वा.प.से.), 'त्रादिभ्यश्च[13]'(उणा-११७) इत्युङ्गच् । तरन् गच्छतीति वा, पृषोदरादिः, तत्र । २ भज्यते वायुना **भङ्गः** । 'भञ्जो[14] आमर्दने'(रु.प.अ.), भावे घञ्, 'चजोः-'७।३।५२॥इति कुत्वम् । **३** वाति गच्छतीति **वीचिः** । 'वा गतिगन्धनयोः'(अ.प.अ.), 'वातेः कित्'(उणा- )इतीचिः[15], 'आतो लोपः-'६।४।६४॥ इत्यालोपः । [16]विस्मयं चिनोतीति पृषोदरादिर्वा । ऊयते जलैरिति वा । 'वेञ् तन्तुसन्ताने'(भ्वा.उ.अ.), 'वेञो डित् (डिच्च)' (उणा-५१२)इतीचिः, स्त्रियाम् । ४ ऋच्छत्यूर्ध्वं तिर्यक् चेति[17] **ऊर्मिः**, अस्त्रियाम्, दीर्घादिः । 'ऋ गतौ'(भ्वा.प.अ.), 'अर्तेरूच्च'(उणा-४८४)इति मिप्रत्ययः । "ऊर्मिः स्त्रीपुंसयोः"[ ]इति गौडः । **५** उत्कलते **उत्कलिका** । 'कल सङ्ख्याने[18]'(भ्वा.आ.से), क्वुन् । पञ्च तरङ्गस्य ॥

## महति त्विह ॥१०७५॥

## लहर्युल्लोलकल्लोलाः

१ इह तरङ्गे महति वृद्धे ॥१०७५॥ जलं हरति लहरिः, पृषोदरादित्वात्, 'कृदिकारात्-'(गणसू-४।१।४५॥ ) इति ङीषि[19] **लहरी** । २ उद् ऊर्ध्वं लोलति **उल्लोलः**। 'लुल विलोलने[20]'( ), अच् । उल्लालयति उन्मादयति

१. '-दिरक्' इति१, 'इति रक्' इति४॥ २. '-दन्ते' इति३, 'सुनन्देन' इति५॥ ३. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२२९, पृ.२७१॥ ४. 'ददाति' इति३.५॥ ५. '-धि-' इति२.५॥ ६. '-ति' इति१.२.३॥ ७. '-धरः' इति१॥ ८. '-रं' इति१, '-रा' इति३॥ ९. '-णोदधिःस-' इति१, '-णोदस-' इति२॥ १०. 'इक्षु-' इति१.५, 'इक्षो-' इति४॥ ११. 'स्वादु-' इति१, 'स्वादूदश-' इति५॥ १२. द्र. स्वोपज्ञटीका४।१०७५॥, पृ.२३९॥ १३. 'इञजादिभ्यश्च' इति३, 'तरत्यादिभ्यश्च' इत्युणादिगणसूत्रम् ॥ १४. '-ञ्जू' इति३॥ १५. '-चः' इति५॥ १६. 'विश्म-' इति१.३॥ १७. 'वेति' इति१.३॥ १८. भ्वादेरभिहितत्वात् 'शब्दसङ्ख्यानयोः' इति युक्तः ॥ १९. '-पि' इति३॥ २०. मा. धातुवृत्तौ भ्वादौ 'लुट विलोडने' इत्यत्र सायणेनोक्तम्-"भूसूत्रे सुधाकरः-"लुल विलोडने' इति लान्तोऽपि दृश्यते, "लोलद्भुजाकारबृहत्तरङ्गम्" [शिशुपालवधम्, सर्गः-३, श्लो-७२]इति माघः । डलयोरेकत्वस्मरणमिति वा प्रतिविधेयम्" इति" इति, धातुसं-२१२, पृ.१११॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जलमिति वा । 'लोड़ उन्मादे'(भ्वा.प.से.), अच्, डलयोरेकत्वस्मरणाल्लत्वम्[1] । "लोलयति लोलः, पचाद्यच्, उद्गतश्चाऽसौ लोलश्चेति उल्लोलः"[[2]]इति स्वामी[3]। ३ कल्ल्यते **कल्लोलः**। 'कल्ल[4] अव्यक्ते शब्दे'(भ्वा.आ.से.), अतो बाहुलकादोलच् । "किशोरादित्वाद्वा ओरप्रत्ययः, कपिरि(कपिल)कादित्वाल्लत्वम्"[मा.धातुवृत्तिः, भ्वादिः, धातुसं-३२६]इति माधवः । त्रीणि महातरङ्गस्य ॥

### आवर्तः पयसां भ्रमः ।
### तालूरो बोलकश्चाऽसौ

१ आवर्तते मण्डलेन परिभ्रमति **आवर्तः** । 'वृतु वर्तने'(भ्वा.प.से.), भावे घञ् । २ तलति **तालूरः** । 'तल प्रतिष्ठायाम्'(चु.उ.से.), बाहुलकादूरण्[6] । ३ बोलयति अन्तर्निमज्जयति **बोलकः**। 'बुलण् निमज्जने'(चु.उ.से.), ण्वुल् । पयसामम्भसां भ्रमो मण्डलेन भ्रमणम्, तस्य त्रीणि ॥

### वेला स्याद् वृद्धिरम्भसः ॥१०७६॥

१ वेलति चलति **वेला** । 'वेलृ चलने'(भ्वा.प.से.), अच् । एकं वेलायाः ॥१०७६॥

### डिण्डीरोऽब्धिकफः फेनः

१ डयते जलाघातैरिति **डिण्डीरः** । 'डीङ् विहायसा[7] गतौ'(भ्वा.आ.से.), 'जम्बीराभीर-'(हैमोणा-४२२)इति डीङो डित्, ईरो द्वित्वम्, पूर्वस्य नोन्तत्वं च निपात्यते । डिण्डीति शब्दमीरयतीति वा । 'ईर गतौ'(अ.आ.से.), 'इगुपध-'३।१।१३५॥ इति कः । " 'हिडि गत्यनादरयोः'(भ्वा.आ.से.), 'कृशॄपॄकटिपटिशौटिभ्य ईरन्'(उणा-४७०)इति बहुलवचनादीरनि 'हिण्डीरः' "[ ]इति मिश्राः । "गम्भीरादित्वादीरच्"[ ]इत्यपरे । "हिण्डीमिति[8] शब्दमीरयतीति 'कर्मण्यण्'३।२।१॥"[ ]इत्यन्ये । स्वामी तु-"पिण्डीरो दण्डी(दिण्डी)रश्च"[[9]]इति पवर्गप्रथमतवर्गतृतीयादिरूपद्वयमाह । २ अब्धेः कफ इवाऽऽधिक्येन बहिः प्रसरा[10]दिति **अब्धिकफः**, सागरमलाख्यः, नद्यादौ तूपचारात्[11]। ३ स्फायत इति **फेनः** । 'स्फायी वृद्धौ'(भ्वा.आ.से.), 'फेनमीनौ साधू[12]'(उणा-२८३)इति सूत्रेण साधू । त्रीणि फेनस्य ॥

### बुद्बुदस्थासकौ समौ ।

१ बुन्दति **बुद्बुदः** । २ तिष्ठत्यङ्गे **स्थासकः**। पृषोदरादिः । द्वे 'पंपोटा[13]' इत्याह्वस्य[14] । एतौ हि घृततैलदुग्धतक्रादीनां झागनाम्नी, पट्टोर्णादीनां फूमतां नाम्नी अपि। यल्लिङ्गानुशासनटीका-"बुद्बुदः जलादिसंस्थानविशेषः"[लिङ्गानुशासनम्, पुंल्लिङ्गस्याऽवचूरिः, श्लो-१०,]। "स्थासको गन्धचर्यायां[15] जलादेरपि बुद्बुदे[16]:"[ ]विश्वलोचनकोशः, कान्तवर्गः, श्लो-१७२]इति श्रीधरः । एवमुभयत्र उभयोरादिशब्दात् 'झागफूंदा[17]' इत्यनयो[18]र्नाम्नी ॥

"वर्ध्राबद्धा धौरितेन प्रयातामश्वीयानामुच्चकैरुच्छलन्तः[19] ।
रौक्मा रेजुः स्थासका मूर्तिभाजो दर्पस्यैव व्याप्तदेहस्य शेषाः ॥१॥"
[शिशुपालवधम्, सर्गः-१८, श्लो-५]इति माघाष्टादशसर्गे ॥

### मर्यादा कूलभूः

१ मर्येति सीमार्थेऽव्ययम्, मर्या[20] ददाति **मर्यादा** । कूलस्य समुद्रतटस्य भूः कूलभूः । एकं समुद्रतटभुवः। 'समुद्रसीम' इति भाषा ॥

### कूलं प्रपातः कच्छरोधसी ॥१०७७॥
### तटं तीरं प्रतीरं च

१ कूलत्यावृणोति **कूलम्** । 'कूल आवरणे'(भ्वा.प.से.), 'इगुपध-'३।१।१३५॥ इति कः । २ प्रपतन्त्यस्मिन् जलानि **प्रपातः**। 'पत्लृ पतने[21]'(भ्वा.प.से.),

---

१. '-क्य-' इति५॥ २. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२३४, पृ.२७८॥ ३. अम. क्षीरस्वामि कृतटीकायाम्-"ऊर्ध्वं लोलः [लोलयति] उल्लोलः ।" इति दृश्यते, १।९।६॥, पृ.६२॥ ४. 'कल' इति३॥ ५. अनित्यण्यन्तत्वादिदं रूपम् ॥ ६. '-च्' इति५॥ ७. '-सां' इति१.३, स्वामी च ॥ ८. '-हिण्डीति' इति३॥ ९. अम.क्षीरस्वामिकृतटीकायाम्- "डिण्डीति शब्दमीरयति डिण्डीरः, दादिर्वा डि(दि)ण्डिमवत् ।" इति दृश्यते, २।९।१०५॥, पृ.२२३॥ १०. '-सा-' इति१॥ ११. इतोऽग्रे ४प्रतौ 'इति' इति दृश्यते ॥ १२. उणादिगणसूत्रे न दृश्यते ॥ १३. '-ट' इति१.२॥ १४. '-ह्वयस्य' इति३, 'ख्यातस्य' इति५॥ १५. '-वर्यायां' इति४, 'गन्धवज्रायां' इति विश्वलोचनकोशे, पृ.३०॥ १६. '-दे' इति३॥ १७. '-दाना' इति१॥ १८. '-त-' इति१॥ १९. '-च्चलन्तः' इति शिशुपालवधे, पृ.४४६॥ २०. '-र्या' इति१॥ २१. 'शल हुल पत्लृ गतौ' इति क्षीरतरङ्गिण्यादयः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अधिकरणे घञ्[१] । ३ कच्यते बध्यते **कच्छः** । 'कच बन्धे[२]'(भ्वा.आ.से.), 'कचेश्छः'(दशपा-४।६॥)इति छः । ४ रुणद्धीति **रोधः,** क्लीबे । 'रुधिर् आवरणे'(रु.उ.अ.), असुन् । रोधसी, रोधांसि इत्यादि । रोध इत्यदन्तोऽपि । "रोधः प्रोक्तश्च रोधसि"[ [३] ]इति संसारावर्तात् ॥१०७७॥ ५ तटत्युच्छ्रायं[४] गच्छति **तटम्,** त्रिषु । 'तट उच्छ्राये' (भ्वा.प.से.), '-आघाते[५]'(चु.उ.से.) वा, अच् । ६ तीर्यते तरणकर्म समाप्यतेऽनेन, अत्र वा **तीरम्** । 'पार तीर कर्मसमाप्तौ'(चु.उ.से.), चुरादि[६]ण्यन्ताद् 'एरच्'३।३।५६॥ । ७ **प्रतीरम्** इत्यन्योपसर्गनिवृत्त्यर्थम्, दीपप्रदीपवत् । सप्त सामान्येन नद्यादितटस्य ॥

अथ तटविशेषानाह-

**पुलिनं[1] तज्जलोज्झितम् ।**
**सैकतं[2] च**

१ तत् तटं जलेन परित्यक्तम्, पोलति महत्त्वं याति **पुलिनम्,** अस्त्रियाम् । "'पुल महत्त्वे'(भ्वा.प.से.), 'व्रजेः(वृजेः)[७] किच्च'(उणा-२०५)इति चकारादिनच्"[ [८] ] इति स्वामी । "बहुलमन्यत्रापि'(उणा-२०७)इति इन[च्], किच्च"[ [८] ]इति तु सर्वधरः । 'तलिपुलिभ्यां च[९]'(उणा-२११)इतीनन् वा । त्रिकाण्डशेषे तु- "पुलिनं द्वीपमुच्यते"[ [१०] ]इत्युक्तम् । एकं जलादचिरोत्थित[११]स्य [तटस्य] । "जलमध्यस्य उच्छ्रिततटस्य"[ [८] ]इति तु[१२] पञ्जिका । तेन जलेन बद्धा सिता (सिता बद्धा) सिकता । "पृषोदरादित्वाद् वर्णविपर्ययः, ततष्टाप् सिकता"[धातुप्रदीपः, भ्वादिः, धातुसं-५६७]इति धातुप्रदीपः[१३] । सिकताः सन्त्यत्रेति **सैकतम्** । 'सिकताशर्कराभ्यां च'५।२।१०४॥ इति मत्वर्थीयोऽण् । "तदस्मिन्नस्तीति देशे तन्नाम्नीत्यर्थे[१४] 'शङ्कु (सङ्क)लादिभ्यश्च'४।२।७५॥ इत्यत्रापि सैकतमिति सिद्ध्यति"[ [८] ]इति कलिङ्गः । "तोयोज्झितं[१५] तत्पुलिनं सैकतं सिकतामयम्[१६]"[अमरकोषः२।१०।९॥]इत्यमरो भिनत्ति ॥

**अन्तरीपं[1] तु द्वीपम[2]न्तर्जले तटम् ॥१०७८॥**

१ अन्तर्गता आपोऽस्मिन्निति **अन्तरीपम्,** क्लीबे । 'ऋक्पूरब्धूः-'५।४।७४॥ इत्यादिना समासान्तोऽप्रत्ययः[१७], 'द्व्यन्तरुपसर्गेभ्योऽप ईत्'६।३।९७॥ । २ द्विर्गता आपोऽस्मिन्निति **द्वीपम्** । 'ऋक्पूरब्धूः-'५।४।७४॥ इत्यप्रत्ययः, 'द्व्यन्तरुपसर्गेभ्योऽप ईत्'६।३।९७॥ । "द्वीपोऽस्त्रियाम्" [अमरकोषः२।१०।८॥]इत्यमरः । जलस्य अन्तरिति अन्तर्जलम्, तत्र । द्वे जलमध्यगततटस्य ॥१०७८॥

**तत्परं पारम्[1]**

१ समुद्रस्य तत् तटं परं परत्र स्थितं तन्नामैकं **पारम्** इति । पार्यते समाप्यते क्रियाऽत्रेति पारमस्त्रियाम् । 'पार तीर कर्मसमाप्तौ'(चु.उ.से.) चुरादि[१८]ण्यन्ताद् 'एरच्' ३।३।५६॥ । "पारं परतटे प्रान्ते"[विश्वप्रकाशकोशः, रान्तवर्गः, श्लो-१६]इति महेश्वरः ॥

**अवारं[1] त्ववार्क्**

१ समुद्रादेरर्वाक् पार्श्वे तटम् उरवार नाम एकम् **अवारम्** इति । अवार्यते गम्यत इदमिति, अवपूर्वादर्त्तेर्घञ् । "अर्धर्चादित्वाद् द्वयमप्यस्त्रियाम्"[ [१९] ]इति स्वामी । "न वार् विद्यतेऽस्येत्यवारम्"[अम.क्षीर. १।९।८॥, स्वोपज्ञटीका४।१०७९॥]इत्यन्ये[२०] ॥

**पात्रं तदन्तरम्[२१] ।**

१ तयोः पारावारयोरन्तरं[२२] मध्यं मध्यप्रवाहस्तन्नामैकं **पात्रम्** इति । पिबन्त्यनेन पात्रम्, त्रिलिङ्गम्[२३] । 'पा पाने' (भ्वा.प.अ.), 'सर्वधातुभ्य[:] ष्ट्रन्'(उणा-५९८)इति ष्ट्रन्, 'दीर्घादाचार्याणाम्'८।४।५२॥ इति द्वित्वनिषेधः ॥

**नदी[1] हिरण्यवर्णा[2] स्याद् रोधोवक्रा[3] तरङ्गिणी[4]**
**॥१०७९॥**

१. '-ञ्' इति१॥ २. 'बन्धने' इति क्षीरतरङ्गिण्यादयः ॥ ३. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२३५, पृ.२८०॥, गमाश्रमी १।१०।७॥, पृ.१२२॥ ४. '-यां' इति५॥ ५. क्षीरतरङ्गिण्यां चुरादौ 'तड आघाते'(पृ.२९५, धातुसं-३८)इत्यत्र स्वामिनोक्तम्-"तट इत्येके तात ताडय ताटकाम्, ताटकः" इति ॥ ६. '-दिः' इति३॥ ७. इतोऽग्रे ५प्रतौ, 'तिः' इति दृश्यते ॥ ८. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२३७, पृ.२८१॥ ९. 'वा' इति४॥ १०. त्रिकाण्डशेषे वचनमिदं नोपलभ्यते ॥ ११. '-ज्झि-' इति२॥ १२. २प्रतौ नास्ति ॥ १३. द्र. टीकासर्वस्वम्, भा-१, १।१०।९॥, पृ.१८१॥, धातुप्रदीपे-"पृषोदरादित्वात् सिकताः" इत्येव दृश्यते, पृ.६२॥ १४. '-र्थं' इति१, '-र्थ' इति२॥ १५. '-त्थितं' इत्यमरकोषे ॥ १६. '-तायामयम्' इति३॥ १७. '-ऽप-' इति३.४.५॥ १८. '-दिः' इति३॥ १९. अम.क्षीरस्वामिकृतटीकायां न दृश्यते॥, द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२३६, पृ.२८०॥ २०. 'अन्ये' इति ३प्रतौ नास्ति ॥ २१. तुलनीयोऽमरकोषः२।१०।८॥ २२. '-र-' इति१.४॥ २३. '-ङ्गः' इति३॥

**सिन्धुः[5] शैवलिनी[6] वहा[7] च ह्रदिनी[8]**
**स्रोतस्विनी[9] निम्नगा[10]**
**स्रोतो[11] निर्झरिणी[12] सरिच्च[13] तटिनी[14]**
**कूलङ्कषा[15] वाहिनी[16] ।**
**कर्षूर्[17] द्वीपवती[18] समुद्रदयिता[19]-**
**धून्यौ[20] स्रवन्तीसर-[21]**
**स्वत्यौ[22] पर्वतजाऽऽपगा[24] जलधिगा[25]**
**कुल्या[26] च जम्बालिनी[27] ॥१०८०॥**

१ नदत्यव्यक्तं शब्दायते स्रोतस्तरसादिति[१] **नदी** । 'नद(णद) अव्यक्ते शब्दे'(भ्वा.प.से.), नदट् पचादिः, ततः टित्त्वाद् 'टिड्ढाणञ् '४।१।१५॥ इति ङीप्[२] । २ **हिरण्यवर्णा** इति, हिरण्यशब्दो निरुक्तः, हर्यतेः कन्यनि हिरादेशश्च । वर्ण इति, 'वृञ् वरणे'(स्वा.उ.से.), 'ऋज्रेन्द्राग्र-'(उणा-१८६) इत्यादिना रन्प्रत्ययान्तो निपातितः[३] । वृणोति व्रियते वा वर्णः[४], श्वेतादिः, हिरण्यकान्त इष्टो वर्णो यासाम्, ताः । यद्वा हिता घर्मादौ रमणीया मनःप्रह्लादजनयित्र्यो हिरण्यवर्णा[५], पृषोदरादिः । हिरण्येन वर्ण्यते पूज्यत इति वा । ३ रोधोभिस्तटैर्वक्रा **रोधोवक्रा** । ४ तरङ्गाः सन्त्यस्यां[६] **तरङ्गिणी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः, 'ऋन्नेभ्यो ङीप्[७]'४।१।५॥ ॥१०७९॥ ५ स्यन्दते **सिन्धुः**, पुंस्त्रीलिङ्गः[८] । 'स्यन्दू प्रस्रवणे[९]'(भ्वा.आ.वे.), 'स्यन्दतेः सम्प्रसारणं धश्च'(उणा-११)इति उः । ६ शैवलानि सन्त्यस्यां **शैवलिनी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः, 'ऋन्नेभ्यः-'४।१।५॥ इति[१०] ङीप्[११] । ७ वहति **वहा** । अच्, टाप् । ८ ह्रदाः सन्त्यस्यां **ह्रदिनी** । 'अत इनिठनौ'५।२।११५॥[१२], 'ऋन्नेभ्यो ङीप्[१३]' ४।१।५॥ । ''ह्लादिनीति दीर्घादिरपि''[ ]इति[१४] केचित् । ९ स्रोतांसि सन्त्यस्यां[१५] **स्रोतस्विनी**, दन्त्यसादिः[१६] । 'अस्मायामेधास्रजो विनिः'५।२।१२१॥, 'तसौ मत्वर्थे'१।४।१९॥ इति भत्वान्न रुत्वादिकार्यम् । १० निम्नं गच्छति **निम्नगा** । 'गमेश्च (गमश्च)'३।२।४७॥ इति डः[१७] । ११ स्रवति निम्नं देशं गच्छति **स्रोतः**[१८], क्लीबे । 'स्रु गतौ'(भ्वा.प.अ.), 'स्रुरीभ्यां तुट् च'(उणा-६४१)इत्यसुन् । स्रोतसी, स्रोतांसि इत्यादि । १२ निर्झरोऽस्त्यस्या **निर्झरिणी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः । १३ सरति गच्छति **सरित्**, स्त्रीलिङ्गः । 'सृ गतौ'(भ्वा.प.से.), 'हृसृरुहि-'(उणा-९७, हैमोणा-८८७)इति इत् । 'सर्तेरित्'( )इतीद्वा । १४ तटानि सन्त्यस्याः **तटिनी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः, 'ऋन्नेभ्यो ङीप्[१९]'४।१।५॥ । १५ कूलानि कषति भिनत्ति **कूलङ्कषा** । 'कष हिंसायाम्[२०]'(भ्वा.प.आ.से.), 'सर्वकूलाभ्रकरीषेषु कषः'३।२।४२॥ इति खच्, 'अरुर्द्विषत्-'६।३।६७॥ इति मुम् । १६ वहत्यवश्यं **वाहिनी** । 'वह प्रापणे'(भ्वा.उ.अ.), आवश्यके णिनिः । १७ कर्षति रोधसी **कर्षूः**, स्त्रियाम् । 'कृष[२१] विलेखने'(भ्वा.प.अ.), 'कृषिचमितनिधनिसर्जिखर्जिभ्य ऊः'(उणा-८१)इत्यूः । १८ द्वीपमस्त्यस्या **द्वीपवती** । तदस्यास्त्यस्मिन्नस्तीति[२२] मतुप् । १९ समद्रस्य दयिता **समुद्रदयिता** । २० धुनाति तटतरून् **धूनी** । 'धूञ् कम्पने'(क्र्या.उ.वे.), ह्रस्वान्तो दीर्घान्तोऽपि । ''बाहुलकान्नुक्, गौरादित्वाद् ङीष्[२३]''[पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२५७]इति मिश्राः । ''धूशीङोर्ह्रस्वश्च (धूशाशीङो ह्रस्वश्च)' (हैमोणा-६७८)इति निः'' [अभि.स्वोपज्ञ-टीका४।१०८०]इति श्रीआचार्याः[२४] । २१ स्रवति **स्रवन्ती**, दन्त्यसादिः । 'स्रु गतौ'(भ्वा.प.अ.), 'तृभूवहिवसिभासिसाधिगण्डि(गडि)मण्डिजनि(जि)नन्दिभ्यश्च'(उणा-४०८) इति बाहुलकाद् झच्, 'झोऽन्तः'७।१।३॥, गौरादिः । अस्मादेव धातोः ''शत्रन्ताद् ङीप्''[ ]इति भाष्यम् । २२ सरः प्रसरणमस्त्यस्याः **सरस्वती** । 'तदस्यास्ति-'५।२।९४॥ इति मतुप्, 'मादुपधायाः-'८।२।९॥ इति वत्वम् । २३ पर्वताज्जाता **पर्वतजा** । 'जनी प्रादुर्भावे'(दि.आ.से.), 'अन्ये-

१. 'श्रो-' इति३॥ २. 'ङीष्' इति२.४.५॥ ३. 'निपातः' इति१, 'निपात्यते' इति४॥ ४. 'वरणः' इति१॥ ५. '-र्णाः' इति४॥ ६. '-स्याः' इति४.५॥ ७. '-ष्' इति२.४, '-षि' इति५॥ ८. 'पुंस्त्री' इति३॥ ९. 'प्रश्र-' इति२.३, 'स्रवणे' इति स्वामिमैत्रेयौ ॥ १०. १.४प्रत्योर्नास्ति ॥ ११. '-ष्' इति२॥ १२. इतोऽग्रे ३प्रतौ 'इतीनौ' इति दृश्यते ॥ १३. 'ङीष्' इति२.४.५॥ १४. १.२.४.५प्रतिषु नास्ति ॥ १५. '-स्यां' इति३॥ १६. 'दन्त्यादिः' इति३॥ १७. अयुक्तः प्रतिभाति, 'गमश्च'३।२।४७॥ इत्यनेन खच्प्रत्ययविधानात्, अथ च 'अन्येष्वपि दृश्यते'३।२।१०१॥ इत्यनेन डः, डित्त्वाट्टिलोपः ॥ १८. 'श्रो-' इति३॥ १९. 'ङीष्' इति१.३, 'ङीपि' इति५॥ २०. 'कष' ('खष' इत्यधिकः सायणमते) शिष' इति दण्डात्मको धातुः परस्मैपदी, मैत्रेयमते 'कष हिंसायाम्' इति पृथगपि धातुर्दृश्यते, स उभयपदी ॥ २१. 'कृषि' इति५॥ २२. '-त्यस्मिन्निति' इति३, '-स्त्यस्मिन् वास्तीति' इति४॥ २३. 'ङीप्' इति३॥ २४. 'आ-' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ष्वपि-'३।२।१०१॥ इति डः । २४ अपां समूह आपम् । 'तस्य समूहः'४।२।३७॥इत्यण् । आपेन गच्छति **आपगा** । आपं जलसमूहस्तद्योगादर्शआद्यचि आपः समुद्रः, तं गच्छतीति वा । 'गम्लृ गतौ'(भ्वा.प.अ.), 'अन्यत्राऽपि-'(वा-३।२।४८॥)इति गमेर्डः, दीर्घादिरयम् । ''शिखरिणामिव सागरमापगाः''[रघुवंशम्, सर्गः-९, श्लो-१७]इति रघुः । ''अपगच्छतीति, 'अन्येभ्योऽपि(अन्येष्वपि)-'३।२।१०१॥ इति डः[१], अपगा ह्रस्वादिरपि''[ [२] ]इति सोमनन्दी । ''आपः सन्त्यत्रेति[३] भूम्नि अर्शआद्यचि अपः समुद्रस्तं गच्छतीति डप्रत्यये अपगा ह्रस्वादिरपि[२]''[ ]इति पञ्जिका । अत एव-''विपुल[पुलिना] रेत(वेत)स्वत्योऽपगाः कति शीलिताः'' [ [५] ]इति योगेश्वरः[४] । तथा च-''विन्ध्यादगारमागारमपगामापगामपि''[शब्दभेदप्रकाशः, श्लो-२]इति द्विरूपकोषः । अप्सम्बन्धिना वेगेन गच्छतीति वा[६] आपगा[७] । आ अपगच्छतीति वा । २५ जलधिं गच्छति **जलधिगा** । २६ कोलति जलैः संस्त्यायति **कुल्या** । 'कुल संस्त्याने[८]'(भ्वा.प.से.), 'अघ्न्यादयश्च'(उणा-५५१)इति यक् । कुले प्राणिगणे साधुरिति 'तत्र साधुः'४।४।९८॥ इति । यथा-''कुलिशनिर्वचने कूल(कुल)शातनः[९]''[ [१०] ] । ''मेघस्य पर्वतस्य वा समुत्थिताः प्रदेशाः कुलानीव, तेषां शातनः''[ ]इत्युक्तेः[११] । मेघस्य पर्वतस्य वा समुत्थिते प्रदेशे कुले भवन्ति कुल्याः । क्षीरस्वामी तु कुलशब्देन पर्वतान् पठति । ''पक्षच्छेदनं तनूकरोतीति[१२] कुलिश इत्युक्तत्वात् कुले पर्वते साधुः कुल्या''[ ]इति भाष्यम् । २७ जम्बालोऽस्त्यस्याम्[१३] **जम्बालिनी** । 'अत इनिठनौ'५।२।११५॥इतीनिः । सप्तविंशतिः सामान्येन नद्याः ॥१०८०॥

अथ नदीविशेषानाह-

**गङ्गा[1] त्रिपथगा[2] भागीरथी[3] त्रिदशदीर्घिका[4] ।**
**त्रिस्रोता[5] जाह्नवी[6] मन्दाकिनी[7] भीष्म[8]कुमारसूः[9] ॥१०८१॥**

**सरिद्वरा[10] विष्णुपदी[11] सिद्ध[12]-स्वः[13]-स्वर्गि[14]-खापगा[15] ।**
**ऋषिकुल्या[16] हैमवती[17] स्वर्वापी[18] हरशेखरा[19] ॥१०८२॥**

१ गच्छति जलधिमिति **गङ्गा** । 'गम्लृ गतौ'(भ्वा.प.अ.), 'गन् गम्यादेः(-द्योः)'(उणा-१२०)इति गन्, गङ्गा । ''ब्रह्मलोकात् गां गतेति, 'अन्येभ्योऽपि (अन्येष्वपि)-'३।२।१०१॥ इति डप्रत्यये पृषोदरादिः''[ [१४] ]इति पञ्जिका । २ त्रीन् पथो गच्छति **त्रिपथगा** । 'गमेश्च (गमश्च)'३।२।४७॥ इति डः[१५] । त्रिपथेन गच्छतीति वा । तथा च भारते-

''क्षितौ तारयते मर्त्यान् नागांस्तारयतेऽप्यधः ।
दिवि तारयते[१६] देवांस्तेन त्रिपथगा स्मृता ॥१॥''[ [१७] ]इति ।

त्रिमार्गगाऽपि । ३ भगीरथस्येयं **भागीरथी** । भगीरथेनेमं लोकमवतारिता । 'शेषे'४।२।९२॥ इत्यण्, 'तस्येदम्' ४।३।१२०॥ इत्यण् वा, 'टिड्ढाणञ्-'४।१।१५॥ इति ङीप्[१८] । ४ त्रिदशानां देवानां दीर्घिका **त्रिदशदीर्घिका** । ५ त्रिभिः स्रोतोभिर्ब्रह्मलोकात् प्रभवतीति[१९] **त्रिस्रोताः**, स्त्रीलिङ्गः[२०] । त्रिस्रोतसौ इत्यादि । ६ ''जह्नुना सगरपुत्रेणा[२१]ऽवतारितत्वाद् जह्नोरियं **जाह्नवी**''[स्वोपज्ञटीका४।१०८१] इत्याचार्याः । ''जह्नुना राजर्षिणा यज्ञवाटं[२२] प्लावयन्तीयं[२३] पीता पश्चादुज्झिता सुतात्वेन प्रतिपन्नेति जह्नुतनया[२४], जाह्नवी''[पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२५८]इति मिश्राः । जह्नुकन्याऽपि । ७ मन्दमकति गच्छति **मन्दाकिनी** । 'अक अग कुटिलायां गतौ'(भ्वा.प.से.), ग्रहादित्वाण्णिनिः, 'ऋन्नेभ्यो ङीप्[२५]'४।१।५॥ मन्दाका औषधिविशेषाः सन्त्यस्यामिति वा । 'अत इनिठनौ'५।२।११५॥ इतीनिः । 'खजेराकः'(उणा-४५३)इत्यत्र बहुलवचनाद्

---

१. 'डे' इति१.२.३॥ २. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२५८, पृ.३०९॥ ३. '-त्यत्र' इति१.२॥ ४. '-दे ' इति५॥ ५. द्र. टीकासर्वस्वम्, भा-१, १।१०।२९॥, पृ.१९८॥, तत्र 'शीलिताः' इत्यस्य स्थाने 'सेविताः' इति दृश्यते ॥ ६. १प्रतौ नास्ति ॥ ७. 'अ-' इति२॥ ८. 'कुल संस्त्याने ('सन्ताने' इति मैत्रेयः) बन्धुषु च' इति क्षीरतरङ्गिण्यादयः ॥ ९. '-ने' इति१, '-सनः' इति२, '-शतेन' इति३॥ १०. मूलं मृग्यम् ॥ ११. 'इत्येके' इति१॥ १२. 'तत्क-' इति३, 'करोति' इति४॥ १३. '-स्या' इति१॥ १४. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२५८, पृ.३१०॥ १५. 'अन्येष्वपि-'३।२।१०१॥ इत्यनेन डप्रत्ययविधानं युक्तम्, 'गमश्च'३।२।४७॥ इत्यनेन खच्प्रत्ययविधानात् ॥ १६. '-ति' इति५॥ १७. द्र. टीकासर्वस्वम्, भा-१, १।१०।३०॥, पृ.१९८॥, पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२५९, पृ.३१०॥ १८. 'ङीष्' इति२.५॥ १९. 'भ-' इति४॥ २०. '-ङ्गाः' इति३॥ २१. 'सा-' इति१, 'सगरात्मजेना-' इति स्वोपज्ञटीकायाम्, पृ.२४०॥ २२. '-वाटकं' इति५॥ २३. '-यतीयं' इति४.५॥ २४. '-ह्नुतया' इति१.३.४.५॥ २५. 'ङीष्' इति२.४.५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मन्दतेरप्याके मन्दाकानि [१]स्रोतांसि सन्त्यस्यामिति वा । "मन्दनाम्नः सरसोऽकति मन्दाकिनी"[ [२] ]इति कौमुदी । ८ शान्तनोर्महिषी भूत्वा भीष्मनाम[३] कुमारं[४] सूतवती **भीष्मसूः** । 'षूङ् प्राणिप्रसवे'(अ.आ.अ.), 'सत्सूद्विषद्रुह-[५]'३।२।६१॥ इति क्विप् । ९ एवं कुमारं सूते **कुमारसूः**, स्त्रीलिङ्गावेतौ । चमूशब्दवद् रूपाणि ॥१०८१॥ १० सरितां वरा **सरिद्वरा** । ११ विष्णुपादार्घसम्भूत[६]त्वाद् विष्णुपदाद् भवति **विष्णुपदी** । भवतीत्यर्थेऽण्, संज्ञापूर्वकत्वाद् वृद्ध्यभावः । 'कुम्भपदीषु च'५।४।१३९॥ इति वा[७] साधुः । १२-१५ सिद्धादिभ्यश्चतुर्भ्य आपगाशब्दो योज्यते, तेन **सिद्धापगा, स्वरापगा, ([८]स्वर्ग्यापगा, खापगा)**। "स्वर्णदी, वाप्रकरणे 'गिरिनद्यादीनामुपसङ्ख्यानम्'"(वा० ८।४।१०॥)[ ]इति पूर्वटीकाकृतः, वयं तु तत्र गिरिनदी वक्रनदी वक्रनितम्बा इत्युदाहरणत्रयमेव दृष्टवन्तस्तेन स्वर्णदीत्यत्र 'पूर्वपदात् संज्ञायाम्-'८।४।३॥ इति नित्यमेव णत्वमिति कौमुद्युक्तमेव पश्यामः[९] । "यत्तु पुरुषोत्तमेन-"[स्वर्णदी] स्वर्नदी"[भाषावृत्तिः८।४।१०॥] इति [१०]भाषावृत्तावुदाहृतम्, तदमूलम्, कातन्त्रादिव्याकरणेषु स्वर्णदीति नित्यणत्वदर्शनात्"[पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-४४]इति मिश्राः[११] । १६ ऋषीणां कुल्या **ऋषिकुल्या** । १७ हिमवतः प्रभवति **हैमवती** । १८ स्वः स्वर्गे वापी **स्वर्वापी** । १९ हरस्य शेखरोऽनयेति[१२] **हरशेखरा** । एकोनविंशतिर्गङ्गायाः ॥१०८२॥

## यमुना यमभगिनी कालिन्दी सूर्यजा यमा ।

१ यच्छति[१३] सद्गतिमिति **यमुना** । 'यमु नियमने' (    ), 'यमु(यम) उपरमे'(भ्वा.प.अ.) अतो वा । 'अर्जि(अजि)यमिशीङ्भ्यं[१४] उनन्'(उणा-३४१)इत्युनन्, 'अजाद्यतष्टाप्'४।१।४॥ । २ यमस्य भगिनी **यमभगिनी**। यौगिकत्वाद् यमुन(यम)स्वसादयः । ३ कलिन्दाद्रेरियं **कालिन्दी** । 'तस्येदम्'४।३।१२०॥ इत्यण् । कालियं नागं दयते[१५] रक्षतीति पृषोदरादिर्वा । कलिन्दतनयाऽपि। ४ सूर्याज्जाता **सूर्यजा**। 'अन्येष्वपि-'३।२।१०१॥ इति डः। ५ यमेन यमलेन जातत्वाद् **यमा,** द्वितीयस्वरान्तः। पञ्च यमुनायाः ॥

## रेवेन्दुजा पूर्वगङ्गा नर्मदा मेकलाद्रिजा ॥१०८३॥

१ रेवते गच्छति **रेवा** । 'रेवृ प्लवगतौ'(भ्वा.आ.से.), अच्, टाप्। "रेव्यतेऽसाविति कर्मणि 'गुरोश्च हलः' ३।३।१०३॥ इत्यकारान्ताट्टाप्"[ [१६] ]इति सर्वधरः । २ इन्दोर्जाता **इन्दुजा** । "सोमवंशोद्भवत्वादुपचारात् सोमेन पुरूरवसाऽवतारित्वात् [वा] सोमोद्भवा"[पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-३६०]इति तु[१७] मिश्राः । ३ [पूर्वं गङ्गा **पूर्वगङ्गा**]। ४ नर्म क्रीडाम्, स्वर्गाख्यं सुखं वा ददाति **नर्मदा** । ५ मेकलाद्रेर्जाता **मेकलाद्रिजा** । मेकलनाम्न ऋषेः कन्यका मेकलकन्यकाऽपि । मेकलो विन्ध्यस्तत्प्रभवत्वाद्वा । मेकलः कमध्यः, खमध्योऽपि । तथा च महाकविप्रयोगः-"यन्मेखला भवति मेखलशैलपुत्री"[ [१८] ]इति पञ्जिकासर्वधरादयः[१६] । पञ्च रेवायाः ॥१०८३॥

## गोदा गोदावरी

१ गां भुवं द्यति पयःपूरेण[१९] **गोदा** । 'दोऽवखण्डने'(दि.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥ । गोदन्ते क्रीडन्त्यस्यामिति वा । 'गुद क्रीडायाम्'(भ्वा.आ.से.), अच् । २ पयःपूरेण गां पृथ्वीं द्यति[२०] **गोदावरी** । 'दोऽवखण्डने'(दि.प.अ.), 'आतो मनिप्(न्)क्वनिब्वनिपश्च' ३।२।७४॥ इति वनिप्, 'वनो र च'४।१।७॥ इति ङीप्[२१], रश्चान्तादेशः । द्वे गोदावर्याः ॥

## तापी तपनी तपनात्मजा ।

१ तापयति तापिः । तपेर्ण्यन्ताद् 'अच इः' (उणा-५७८)इति इः, ङीषि **तापी**। २ तपति **तपनी** । 'तप सन्तापे'(भ्वा.प.अ.), नन्द्यादित्वाल्ल्युः[२२] । ३ तपनस्याऽऽत्मजा **तपनात्मजा** । त्रीणि ताप्याः ॥

## शुतुद्रिस्तु शतद्रुः स्यात्

---

१. 'श्रो-' इति३॥ २. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-४४, पृ.६६॥ ३. '-मानं' इति१.२॥ ४. '-रकं' इति३॥ ५. '-द्रुह-' इति ४प्रतौ नास्ति ॥ ६. '-भा(पा)दाभ्यां सम्भू-' इति३॥ ७. ४प्रतौ नास्ति ॥ ८. कोष्ठान्तर्गतपाठः १.२प्रत्योर्नास्ति ॥ ९. 'वक्ष्यामः' इति३॥ १०. 'विभा-' इति३.४.५॥ ११. इतोऽग्रे १.२प्रत्योः 'स्वर्ग्यापगा, खापगा' इति दृश्यते ॥ १२. '-या' इति१.२॥ १३. इतोऽग्रे १प्रतौ 'प्रयच्छति' इति दृश्यते ॥ १४. '-भ्यश्च' इत्युणादिगणे ॥ १५. '-ति' इति३.५॥ १६. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२६०, पृ.३११॥ १७. ३.४प्रत्योर्नास्ति ॥ १८. द्र. टीकासर्वस्वम्, भा-१, १।१०।३२॥, पृ.१९९॥ १९. '-रणेति' इति१.२.४.५॥ २०. 'द्यन्ति' इति४.५॥ २१. 'ङीष्' इति१.२.५॥ २२. इतोऽग्रे १.२.५प्रतिषु 'गौरादित्वाद् ङीष्' इति दृश्यते, नन्द्यादित्वाल्ल्युटः टित्त्वात् 'टिड्ढाणञ्-'४।१।१५॥इत्यादिना ङीप् बोध्यम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ शुः पूजितमाशु वा तुदति **शुतुद्रिः**[1] । एतदजानन्तः 'शुतुद्रुः' इत्युदन्तं पठन्ति, तन्मन्दम्, "मे गङ्गे[2] यमुने [सरस्वति] शुतुद्री"[ऋ.वे.१०-७५-५]इतीकारान्तत्वादस्य पृषोदरादिः । २ पुत्रशोकसन्तप्तो वशिष्ठः कण्ठे शिलां बद्ध्वा नद्यामस्यां प्रविष्टोऽत इयं भीत्या शतधा द्रुतेति, 'दु द्रु गतौ'(भ्वा.प.अ.), 'हरितपी(मि) तयोर्द्रुवः'(उणा-३४), 'शते च'(उणा-३५)इत्युप्रत्ययः, स च डित् **शतद्रुः** । "शतद्रुरेव, पृषोदरादित्वादादिवर्णविकारे शुतुद्रुः (शुतद्रुः)"[ ]इति स्वामी[4] । "शितं तीक्ष्णं द्रुता शितद्रुः" [[3]]इति कौमुदी तृतीयस्वरादिमाह। स्त्रीलिङ्गावेतौ, उभावपि तालव्यादी । द्वे शितलुंजनद्याः ॥

**कावेरी त्वर्धजाह्नवी ॥१०८४॥**

१ कव्यते वर्ण्यते **कावेरी** । 'कवृ वर्णे'(भ्वा.आ.से.), णिच्च, 'मृणिचा(मूलेरा)दयश्च'(उणा-६१)इत्येरक्, गौरादित्वाद् ङीष् । कस्य जलस्य बेरं शरीरम्, ततः 'तस्येदम्'४।३।१२०॥ अणि वा । २ अर्धं जाह्नव्या **अर्धजाह्नवी** । द्वे कावेरीनद्याः ॥१०८४॥

**करतोया सदानीरा**[5]

१ गौरीविवाहसमये शङ्करकरगलितसम्प्रदानतोयप्रभवत्वात् करस्य तोयं करतोयम्, तदत्राऽस्ति, अर्शआदित्वादच्[6] **करतोया** । २ अरजस्वलत्वात् सदा नीरं यस्याः[7] सा **सदानीरा** । तथा च स्मृतिः-

"प्रथमं कर्कटा[8] देवी त्र्यहं गङ्गा रजस्वला ।
सर्वा रक्तवहा नद्यः करतोयाम्बुवाहिनी ॥१॥" [[9]]

इति[10] । गौरीविवाहे हरहस्तात् प्रदानतोयाद् जातनद्याः द्वे ॥

**चन्द्रभागा तु चन्द्रका**[11] ।

१ चन्द्रेण भागतो न्यस्ता **चन्द्रभागा** । चन्द्रभागनामा गिरिः, ततः प्रभवतीत्यर्थेऽणि चान्द्रभागी[12] । 'चन्द्रभागाद्वा नद्याम् (चन्द्रभागान्नद्याम्, चन्द्रभागा नद्याम्)' (गणसू-४।१।४५॥)इति बह्वादिषु[13] ङीपो (ङीषो) विकल्पविधानसामर्थ्यात् पक्षे टाप् । ङीपौ न भवत एव (ङीषैव ङीप्कार्यसिद्धेर्ङीप् न भवत्येव), रूपस्वरयोरविशेषात् । चन्द्रभागा (चान्द्रभागा) चान्द्रभागी च । शब्दार्णवे चोक्तम्-

"तापी तु तपति सत्या (तपती सैत्या) चान्द्रभागी तु चान्द्रिका ।
चन्द्रभागा शारदी तु कश्मीरेषु सरस्वती ॥१॥"[[14]]इति ।

संज्ञापूर्वकत्वाद् वृद्ध्यभावे ह्रस्वादिरपि चन्द्रभागाशब्दः । केचित्तु-"चन्द्रभागा नद्याम्"[[15]]इति टाबन्तमेव पठन्ति । "चन्द्रभागा चान्द्रभागा चान्द्रभागी च सा मता । चन्द्रभागी च सैवोक्ता"[[15]]इति द्विरूपकोषः[16] । २ चन्द्रं कायति **चन्द्रका**, आद्यस्वरमध्या । 'कै शब्दे'(भ्वा.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥ । द्वे चन्द्रभागा[17]नद्याः ॥

**वासिष्ठी गोमती तुल्ये**

१ वसिष्ठस्येयं **वासिष्ठी**, दन्त्यसवती । गौतम्यपि। २ गावो जलानि सन्त्यस्यां **गोमती** । द्वे गोमत्याः ॥

**ब्रह्मपुत्री सरस्वती ॥१०८५॥**

१ ब्रह्मणः पुत्री **ब्रह्मपुत्री** । २ सरः प्रसरणम्[18]स्त्यस्यां **सरस्वती** । द्वे सरस्वत्याः ॥१०८५॥

**विपाट् विपाशा**

१ पुत्रशोकादेव पाशं बद्ध्वा प्रविष्टं वसिष्ठं[19] पाशच्छेदाद् विपाशितवती विमुक्तपाशं कृतवतीति **विपाट्**, स्त्रीलिङ्गः । 'सत्यापपाश-'३।१।२५॥ इत्यादिना 'पाशाद् विमोचने'( )इति णिच्, [पचाद्यच्] । २ टापि **विपाशा** । विपाशयति संसारान् मोचयति स्रोतेनेति वा। द्वे विपाशायाः ॥

**आर्जुनी तु बाहुदा सैतवाहिनी** ।

---

१. '-त-' इति१॥ २. 'गङ्ग-' इति३.५॥ ३. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२६१, पृ.३२१॥ ४. अम.क्षीरस्वामिकृतटीकायां न दृश्यते ॥ ५. तुलनीयोऽमरकोषः२।१०।३३॥ ६. 'अर्शाद्यचि' इति३॥ ७. '-स्यां' इति१॥ ८. '-टी' इति१.२॥ ९. द्र. टीकासर्वस्वम्, भा-१, वारिवर्गः, श्लो-३२, पृ.१९९॥, पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२६०, पृ.३१२॥, रामाश्रमी१।१०।३॥, पृ.१३४॥, तासु 'कर्कटा' इत्यस्य स्थाने 'कर्कटे' इति दृश्यते ॥ १०. याज्ञवल्क्यस्मृतिबालम्भट्टीटीकायामस्य स्मृतिवचनस्य दर्शनादस्या जलस्य सदा पेयतया 'सदानीरा' इत्यन्वर्थं नामेति बोध्यम् । अत एव 'सदातोया' इत्यपि नाम ॥ ११. '-न्द्रिका' इति२.३.५॥ १२. इतोऽग्रे २प्रतौ 'इत्यपि' इति दृश्यते ॥ १३. 'बा-' इति३॥ १४. द्र. टीकासर्वस्वम्, भा-१, १।१०।३४॥, पृ.२००॥, पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२६२, पृ.३१॥, रामाश्रमी१।१०।३४॥, पृ.१३५॥ १५. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२६२, पृ.३१४॥ १६. रामाश्रमी १।१०।३४॥, पृ.१३५॥ १७. '-गा-' इति५॥ १८. 'प्रश-' इति५॥ १९. 'वशि-' इति२.३॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ अर्जुनस्येयम् **आर्जुनी** । २ बाहुभिर्दीर्यते **बाहुदा** । 'दॄ विदारणे'(क्र्या.प.से.), 'अन्येष्वपि दृश्यते' ३।२।१०१॥ इति डः । ''बाहुदेन[1] कार्तवीर्यार्जुनेनाऽवतारिता''[[2]]इत्यन्ये । लिखितनाम्न ऋषेश्छिन्नस्य बाहोः (छिन्नबाहोः) बाहुदानाद् वा बाहुदा । ३ ''सितैव सैती, सैती चाऽसौ वाहिनी[3] नदी चेति **सैतवाहिनी**'' [[4]]इति सर्वधरः । ''सैकतं वहतीत्यावश्यके णिनिः, पृषोदरात्[5]''[[4]]इति तु स्वामी[6] । ''सितवाहाः श्वेताश्वास्तद्योगात् सितवाही श्वेतवाहनः कार्तवीर्यस्तेनाऽवतारित्वात् सैतवाहिनी''[[4]]इति पञ्जिका । त्रीणि आर्जुन्याः ॥

## वैतरणी[1] नरकस्था[2]

१ विगततरणौ व्यर्के पाताले भवा **वैतरणी** । 'तत्र भवः'४।३।५३॥ इत्यण् । विगततरणिर्विनौका वा, स्वार्थेऽण् । विरुद्धं तरणं वितरणम्, तद् यस्याऽस्ति, ज्योत्स्नादित्वादणि वैतरणी वा। विरणेन दानेन तीर्यत इति शेषेऽणि वा वैतरणी । २ नरके तिष्ठतीति[7] **नरकस्था** । 'आतोऽनुपसर्गे कः'३।२।३॥। द्वे वैतरण्याः॥ [शेषश्चात्र-]

''मुरुन्दला[8] तु मुरुला[9][10] सुरुवेला[11] तु[10] नन्दनी[12] ।
चर्मण्वती रितिनदी[13][14] सम्भेदः सिन्धुसङ्गमः ॥१॥''

[शेषनाममाला४।१६॥।] ॥

### स्रोतोऽम्भःसरणं[1] स्वतः ॥१०८६॥

१ स्रवति निम्नं देशं **स्रोतः,** क्लीबे । 'स्रु गतौ'(भ्वा.प.अ.), 'स्रुरीभ्यां तुट् च'(उणा-६४१)इत्यसुन् । ''स्रोतः सद्यःसकलसलिलं सिल्हकम्''[[15]]इति दन्त्यादिषूष्मविवेकात् । स्वत आत्मनाऽकृत्रिममित्यर्थः[16][17] । अम्भसो जलस्य सरणं[18] गमनमम्भस्सरणम् । [एकमकृत्रिमजलवहनस्य] । 'रेलउ[19]' इति भाषा ॥१०८६॥

## प्रवाहः[1] पुनरोघः[2] स्याद् वेणी[3] धारा[4] रयश्च[5] सः ।

१ प्रवहत्यनेन[20] **प्रवाहः** । करणे घञ् । ''प्रवाहो व्यवहारे स्यादपि स्रोतसि वारिणः''[विश्वप्रकाशकोशः, हान्तवर्गः, श्लो-१५]इति महेश्वरः । २ वहति **ओघः** । 'वह प्रापणे'(भ्वा.उ.अ.), न्यङ्क्वादित्वादचि कृतघत्वो[21] निपात्यते । ३ वेति **वेणी**। 'वी गत्यादौ'(अ.प.अ.)। ४ ध्रियते जलमनया **धारा** । भिदादित्वादङि साधु, गुणो दीर्घत्वं च । ''द्रवद्रव्यप्रपातनं धारा''[[22]]इति न्यासे । खड्गधारादावुपमानात् प्रयोगः । ५ रयते[23] गच्छति **रयः** । 'रय गतौ'(भ्वा.आ.से.), असुन् । पञ्च प्रवाहस्य ॥

## घट्टस्[1]तीर्थो[2]ऽवतारे[3]

१ घट्टन्ते चलन्त्यनेन **घट्टः** । 'घट्ट चलने'(भ्वा.आ.से.), करणे घञ् । २ तरन्त्यनेनेति[24][25] **तीर्थः,** पुंक्ली.। 'तॄ प्लवनतरणयोः'(भ्वा.प.से.), 'पातॄतुदिवचिरिचि-'(उणा-१६४)इति थक्, 'ॠत इद्धातोः'७।१।१००॥, 'उरण् रपरः' १।१।५१॥इति रपरत्वम् । ३ अवतरन्त्यनेन[26], अवतरन्त्यत्रेति वा **अवतारः** । 'तॄ प्लवनतरणयोः'(भ्वा.प.से.), 'अवे तॄस्त्रोर्घञ्'३।३।५१॥, तत्र । त्रीणि नद्याद्यव[27]तरणमार्गस्य । 'आरु[28]' इति भाषा॥

### अम्बुवृद्धौ पूरः[1] प्लवोऽपि[2] च ॥१०८७॥

१ अम्बुनो जलस्य वृद्धिराधिक्यमम्बुवृद्धिस्तत्र । पूरयति अम्भसा कूलयोर्वृद्धिं **पूरः** । 'पूरी आप्यायने' (दि.आ.से.), अच् । २ प्लवन्तेऽत्र **प्लवः** । 'प्लुङ् गतौ'(भ्वा.आ.अ.), अत्र । द्वे वारिपूरस्य ॥१०८७॥

## पुटभेदास्[1]तु वक्राणि[2]

१ पुटं तृणादिसङ्घातं भिन्दन्ति **पुटभेदाः** । 'पुट संश्लेषणे'(तु.प.से.), इगुपधकप्रत्ययान्तः । 'भिदिर् विदारणे' (रु.उ.अ.), अण्[29] । पुटं संश्लिष्टं[30] भिन्दन्तीति वा । अत्रा-

---

१. 'ब-' इति१.२.४॥ २. द्र. अम.क्षीर.१।९।३३॥, पृ.६७॥, स्वोपज्ञटीका४।१०८६॥, पृ.२४१॥ ३. इतोऽग्रे २.३प्रत्योः 'च' इति दृश्यते ॥ ४ द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२६०, पृ.३१२॥ ५. '-दिः' इति३.४॥ ६. अम.क्षीरस्वामिकृतटीकायाम्-''सितैव सैती (वाहिनी), यन्माला- मन्तव्या बाहुदार्जुनी ।'' इति दृश्यते, १।९।३३॥, पृ.६७॥ ७. '-ष्ठति' इति४॥ ८. 'सु-' इति२.३.४॥ ९. 'मु-' इति३॥ १०. इतोऽग्रे २प्रतौ 'तु' इति दृश्यते॥ ११. 'सु-' इति१.३॥ १२. 'नन्दिनी' इति३॥ १३. 'रन्त-' इति३॥ १४. ''मुरुन्दला तु मुरला सुरवेला सुनन्दिनी । चर्मण्वती रन्तिनदी'' इति शेषनाममालास्वोपज्ञटीकयोः ॥ १५. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२३९, पृ.२८५॥, रामाश्रमी १।१०।११॥, पृ.१२४॥ १६. '-नो-' इति३.५॥ १७. '-कृतकमित्यर्थः' इति३॥ १८. 'श-' इति५॥ १९. 'रेलौ' इति३, 'रि-' इति५॥ २०. '-न्यतेऽनेन' इति३॥ २१. '-घञो' इति३॥ २२. द्र. माधवीयधातुवृत्तिः, भ्वादिः, धातुसं-६२९, पृ.२३४॥ २३. '-ति' इति३.५॥ २४. 'ती-' इति४.५॥ २५. '-नेन' इति३॥ २६. '-रत्यनेन' इति३॥ २७. '-द्यप्रव-' इति३॥ २८. '-रउ' इति३, '-रुं' इति५॥ २९. 'अच्' इति४.५॥ ३०. 'संश्लूषं' इति१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऽप्यण्। २ वञ्चन्ति[१] कुटिलं गच्छन्ति **वक्राणि** । 'वञ्चु कौटिल्ये[२]'(भ्वा.प.से.), 'स्फायितञ्चि-'(उणा-१७०)इति[३] रक्, न्यङ्क्वादित्वात् कुत्वम् । ''पुटभेदो नदीवक्रे [४]नगरातोद्ययोरपि''[विश्वप्रकाशकोशः, दान्तवर्गः, श्लो-४१] ''वक्रः [स्यात्] कुटिले क्रूरे पुटभेदे शनैश्चरे''[विश्वप्रकाशकोशः, रान्तवर्गः, श्लो-५२]इति महेश्वरः। द्वितीयवर्गप्रथमादिः चक्रमित्यपि ॥

''चक्रं गणे चक्रवाके चक्रं सैन्यरथाङ्गयोः ।
ग्रामजाले कुलास्य भाण्डे राष्ट्रास्त्रयोरपि ॥१॥
अम्भसामपि चाऽवर्ते''[विश्वप्रकाशकोशः, रान्तवर्गः, श्लो-४९-५०]इति महेश्वरः । नदीवङ्कनाम्नी द्वे । 'नद्यन्तः- पानीयागमनमार्ग' इति भाषा ॥

**भ्रमास्तु[1] जलनिर्गमाः ।**

१ भ्राम्यन्ति जलान्येभिरिति **भ्रमाः** । 'भ्रमु अनवस्थाने'(दि.प.से.), '-चलने'(भ्वा.प.से.) वा, करणे घञ्, मान्तत्वान्न वृद्धिः । ''भ्रमोऽम्बुनिर्गमे भ्रान्तौ कुन्दाख्ये शिल्पियन्त्रके''[विश्वप्रकाशकोशः, मान्तवर्गः, श्लो-३]इति महेश्वरः । यथा-''भ्रमागतैरम्बुभिरम्बुराशिः'' [शिशुपालवधम्, सर्गः-३, श्लो-३८]इति । जलानि निर्गच्छन्त्येभिरिति जलनिर्गमाः । 'ग्रहवृद-'३।३।५८॥ इत्यादिनाऽप्। एकं सामान्येन जलनिर्गमनमार्गस्य[५] ॥

**परीवाहा[1] जलोच्छ्वासा[2]ः**

१ जलं प्रवृद्धं परिवहति[६] यैर्निर्गममार्गैस्ते परिवाहाः। 'उपसर्गस्य घञि-'६।३।१२२॥ इति दीर्घत्वे **परीवाहाः** । यल्लक्ष्यम्-

''उपार्जितानामर्थानां त्याग एव हि रक्षणम् ।
तडागोदरसंस्थानां परीवाह इवाऽम्भसाम् ॥१॥''

[पञ्चतन्त्रम् १।३॥]इति । २ जलं प्रवृद्धं उच्छ्वसिति यैस्ते **जलोच्छ्वासाः**। येन कृत्वा प्रवृद्धं जलं निस्सरति[७], तन्नाम्नी द्वे । '[८]ओगान' इति भाषा ॥

**कूपकास्तु[1] विदारका[2]ः[९] ॥१०८८॥**

१ कूपप्रतिकृतयः **कूपकाः** । 'इवे प्रतिकृतौ' ५।३।९६॥ इति कन् । ''कुत्सिताः कूपा इति कूपकाः'' [[१०]]इति सर्वधरः । कुत्सितेऽर्थे कः । यत्कात्यः-''विवरान् कूपकानाहुः''[[११]] । २ विदारयन्ति क्ष्मां **विदारकाः** । 'दॄ विदारणे'(क्र्या.प.से.), ण्वुल् । द्वे शुष्कनद्यादौ जलार्थं गर्तायाः, '[१२]वेरा' इत्यादिभाषा[१३] ॥१०८८॥

**प्रणाली[1] जलमार्गे**

१ नल्यते[१४] बध्यते नाली[१५] । 'नल(णल) बन्धने[१६]' (भ्वा.प.से.), कर्मणि घञ्[१७], प्रपूर्वः, 'उपसर्गा[त्]-'८।४।-१४॥ आदिना णत्वम्, गौरादि[१८]ङीषि **प्रणाली[१५]**, त्रिलिङ्गः । जलनिर्गममार्गो मकरमुखादिः, तत्र । एकं परनालाह्वस्य ॥

**अथ पानं[1] कुल्या[2] च सारणि[3]ः ।**

१ पीयते वृक्षादिभिरनेनेति **पानम्**। 'पा पाने' (भ्वा.प.अ.), करणे ल्युट् । २ कोलति संस्त्याय[१९]त्यम्भसा **कुल्या** । 'कुल संस्त्याने [बन्धुषु च]'(भ्वा.प.से.), 'अघ्न्यादयश्च'(उणा-५५१)इति यक्[२०] । कुले प्राणिगणे साधुर्वा । 'तत्र साधुः'४।४।९८॥ इति यत् । ३ सरति जलमनया सरणिः । 'सृ गतौ'(भ्वा.प.अ.), 'अर्तिसृधृधमिभ्यश्च(अर्तिसृधृधम्यम्यश्यवितृभ्योऽनिः)'(उणा-२५९) इत्यनिः[२१], बाहुलकाद् दीर्घत्वे **सारणिः**, स्त्रीलिङ्गः । त्रीणि 'नीक' इत्याह्वायाः[२२] । ([२३]''नीका''[शेषनाममाला४।१६९॥] इति शैषिकम्) ॥

**सिकता[1] वालुका[2]ः**

१ ''केन जलेन सिता बद्धाः, पृषोदरादित्वाद् वर्णविपर्ययादिः, ततष्टापि **सिकता**''[[२४]]इति धातुप्रदीपः ।

---

१. 'वञ्चति' इति४॥ २. 'वञ्चु चञ्चु' इत्यादिदण्डकोऽयं धातुर्गत्यर्थकः ॥ ३. 'इत्यादिना' इति३॥ ४ 'पतनाद्यो-' इति विश्वप्रकाशकोशे, पृ.८१॥ ५. 'जलमार्गस्य' इति३॥ ६. 'वहति' इति१॥ ७ '-न्ति' इति१॥ ८. 'उ-' इति२, 'उपगीत' इति३॥ ९. तुलनीयोऽमरकोषः १।१०।१०॥ १०. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२३८, पृ.२८३॥, तत्र 'कूपा इति' इत्यस्य स्थाने 'विवराः' इति दृश्यते ॥ ११. द्र. अम.क्षीर.२।९।१०॥, पृ.६२॥, स्वोपज्ञटीका ४।१०८८॥, पृ.२४२॥ १२. 'वै-' इति २.५॥ १३. 'इति भाषा' इति८॥ १४ 'प्रन-' इति३॥ १५. 'प्रना-' इति३॥ १६. 'गन्धे' इति स्वामिमैत्रेयौ, 'गन्धने' इति सायणः, मा.धातुवृत्तौ काश्यपमतमुट्टङ्क्य-''बन्धने इति काश्यपः'' इत्युक्तम्, भ्वादिः, धातुसं-५६५, पृ.२०७॥ १७ '-ञ्' इति४॥ १८. '-दिः' इति३॥ १९.'-ते' इति२॥ २०. '-त्' इति३॥ २१. '-णिः' इति१॥ २२. '-ह्वयाः' इति३॥ २३. कोष्ठान्तर्गतपाठस्थाने ३प्रतौ ''निका तु सारणाविति शेषः'' इति दृश्यते ॥ २४ द्र. टीकासर्वस्वम्, भा-१, १।१०।९॥, पृ.१८१॥, पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२३७, पृ.२८१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यद्वा सिक्यन्ते सिकताः । सिकिः सौत्रः, 'पृषिरञ्जिभ्यां कित्'(उणा-३९१)इत्यतच्, बाहुलकात् स्त्रीलिङ्गो बहुवचनान्तश्च । यल्लिङ्गानुशासनम्-''वा तु जलौकाऽप्सरसः सिकताः सुमनाः समाः''[लिङ्गानुशासनम्, स्त्रीलिङ्गाः, श्लो-९]। २ वलन्ते **वालुकाः** । 'वल संवरणे[1]'(भ्वा.आ.से.), 'कञ्चुकांशुका-'(हैमोणा-५७)इत्युके निपात्यते । वालिका इति तृतीयस्वरमध्योऽपि[2] । यन्महेश्वरः-''वालिका वालुकावालापिंछोलाकर्णभूषणे''[विश्वप्रकाशकोशः, कान्तवर्गः, श्लो-१६६]इति । सिकतानां पृथिवीकायिकत्वेऽपि[3] नद्यङ्गभूतत्वादप्कायावसरे पाठः। द्वे 'वेलू' इति ख्यातायाः॥

### बिन्दौ पृषत्पृषतविप्रुषः ॥१०८९॥

१ बिन्दति **बिन्दुः**, पुंसि। 'बिदि अवयवे'(भ्वा.प.से.), 'शृमृ(स्वृ)स्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च'(उणा-१०)इति चकारादुप्रत्ययः । ''([4]अस्मादेव धातोर्बाहुलकादुप्रत्ययः।) अत्र मैत्रेयः 'बिन्दुरिच्छुः'३।२।१६९॥ इति सूत्रं बशादि पठन् बिन्दुशब्दं व्युत्पादयन् (व्युदपादयत्), वृत्तौ तु वि(वे)त्तेरेव तत्र पाठः''[मा.धातुवृत्तिः, भ्वादिः, धातुसं-५४]इति माधवः। तत्र। २ पर्षति सिञ्चति **पृषत्**, क्लीबे। 'पृषु वृषु मृषु सेचने'(भ्वा.प.से.), 'वर्तमाने पृषद्बृहन्महज्जगच्छतृवच्च'(उणा-२४१)इति साधुः । ३ पर्षति सिञ्चति **पृषतः** । 'पृषिरञ्जिभ्यां कित्'(उणा-३९१)इत्यतच्, पुंस्ययम् । ४ विरुद्धं प्लु(प्रु)ष्यतेऽनया **विप्रुट्**, स्त्रीलिङ्गः । 'प्रुष प्लुष स्नेहसेचनं[6]पूरणेषु[7]'(क्र्या.प.से.), सम्पदादित्वात् क्विप् । विप्रुषौ, विप्रुषः इत्यादि । ''पृषन्ति बिन्दुपृषताः पुमांसो विप्रुषः स्त्रियः[8]''[अमरकोषः १।१०।६॥]इत्यमरः । तदव्याख्याने[9] तु पृषन्तीति बहुत्वं तान्तत्वाभिव्यक्तये, तदनुरोधाद् विप्रुष इत्युत्तरत्राऽपि''[[10]]इति स्वाम्यादयः[11] । ''ननु बहुत्वमतन्त्रम्, 'पृषन् मृगे पुमान् बिन्दौ न द्वयोः पृषतोऽपि ना' ''[मेदिनीकोशः, तान्तवर्गः, श्लो-१३६]इति मेदिन्यादेः[12], ''पृषन्तिबिन्दुपृषताः''[अमरकोषः१।१०।६॥]इति त्रिभिर्द्वन्द्वः''[[10]]इत्यन्ये, तन्मते पृषन्तिरितीकारान्तः शब्दः, तथा च-''पयःपृषन्तिभिः स्पृष्टा वान्ति वाताः शनैः शनैः''[[10]]इति जाम्बु(म्ब)वतीविजयमहाकाव्यम्''[पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२३४]इति मिश्राः । चत्वारि जलबिन्दोः ॥१०८९॥

### जम्बालेचकिलौ[13] पङ्कः कर्दमश्च निषद्वरः । शादः

१ ''जलेन वलते **जम्बालः**। 'कर्मण्यण्'३।२।१॥, पृषोदरादिः''[ ]इति स्वामी[14]। जमति ग्रसते[15] धूलमिति[16] वा । ''चमु छमु जमु झमु अदने'(भ्वा.प.से.), 'शीङो रुकनकवत्त्रवालन्[17](शीङो धुक्लक्कलञ्वालनः)'(उणा-४७८)इति बाहुलकादतोऽपि बालन्[17]''[[18]]इति सर्वधरः । पुंक्लीबलिङ्गोऽयम्[19] । २ अञ्चतीति **इचकिलः**[20] । 'अञ्चु गतिपूजनयोः'(भ्वा.प.से.), बाहुलकादिले निपात्यते । तृतीयस्वरादिः[21], चवर्गाद्यप्रथमस्वरद्वितीयवर्णः, । यदुक्तवान् कविशिक्षाश्लेषसिद्धिप्रताने तृतीयेऽद्भुतविधिस्तबके चतुर्थेऽमरचन्द्रः-''प्रावृण्मासाविव शोभिताविचकिलमालया स्त्रीति कीदृशौ प्रावृण्मासौ? इचकिलमालया शोभिताविव, पक्षे स्त्री, कीदृशी[22]? विचलिकमालया केतकीमालया शोभिता''[ ]इति । ३ पञ्च्यते विस्तार्यते जलेनेति **पङ्कः** । 'पचि विस्तारे'(चु.उ.से.), 'पचि व्यक्तीकरणे'(भ्वा.आ.से.), करणे[23] घञ्, अस्त्रियाम् । ४ कर्दति कुत्सितं शब्दं करोति **कर्दमः** । 'कर्द कुत्सिते शब्दे'(भ्वा.प.से.), 'कर्दिकडेरमः[24]'(दशपाद्युणा-७।४०)इत्यमः । ५ निषीदन्ति निमज्जन्ति प्राणिनोऽत्रेति **निषद्वरः** । 'षद्लृ विशरणादौ'(भ्वा.तु.प.अ.), 'नौ सदेष्ट्वरच्[25]'(उणा-२८०)इति ष्ट्वरच्,

---

१. स्वामिमतेऽयम्, 'वल वल्ल संवरणे' इति मैत्रेयः, 'वल वल्ल संवरणे सञ्चरणे च' इति सायणः॥ २. '-मध्यस्वरोऽपि' इति१॥ ३. '-य-' इति१.४.५॥ ४ कोष्ठान्तर्गतपाठः ३प्रतौ न दृश्यते ॥ ५. द्र. धातुप्रदीपः, भ्वादिः, धातुसं-५२, पृ.१०॥ ६. '-मोचन-' इति मैत्रेयः, '-सेवन-' इति सायणः ॥ ७ '-पूरणगतेषु' इति१॥ ८ 'स्त्रियाम्' इति३.४.५॥ ९ '-नं' इति१.२.३॥ १०. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२३४, पृ.२७९॥ ११. अम.क्षीरस्वामिकृतटीकायाम्-''विगतः प्रोषो दाहोऽस्या विप्रुट्'' इत्येव दृश्यते, १।९।६॥, पृ.६२॥ १२. '-दयः' इति३॥ १३. टीकाकृताम्- 'इचिकिलः' शब्दोऽभीष्टः, **पूज्याचार्यश्रीविजयकस्तूरसूरीश्वरमहाराजकृतचन्द्रोदयाभिधगूर्जरभाषाटीकायाम्-** ''जम्बालः (पु.न.), चिकिलः, पङ्कः (पु.न.)'' इति दृश्यते, ४।१०९०॥, पृ.२४८॥, स्वोपज्ञटीकायामपि तथैव दृश्यते ॥ १४. अम.क्षीर. टीकायाम्- 'जमति ग्रसते जम्बालः' इत्येव दृश्यते, १।९।९॥, पृ.६२॥ १५. '-ति' इति५॥ १६. 'धूल-' इति१॥ १७ '-ञ्' इति३॥ १८. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२३७, पृ.२८२॥ १९. 'पुंक्लीः' इति३॥ २०. 'इचि-' इति५॥ २१. '-दिचवर्गादि-' इति३॥ २२. '-कृ' इति१.२॥ २३. ३प्रतौ नास्ति॥ २४ '-कडोरमः' इति दशपाद्युणादिगणे ॥ २५ 'नौ सदेः' इत्येवोणादिगणे ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'सदिरप्रतेः'[१]८।३।६६॥ इति षत्वम् । निषीदन्ति[२] वृणोतीति[३] अचि वा । ६ शीयन्ते[४] छिन्ना भवन्ति **शादः** । 'शद्लृ शातने'(भ्वा.तु.आ.अ.), 'ज्वलितिकसन्तेभ्यो णः'३।१।१४०॥ । ''श्यति तनूकरोति पादौ, 'शाशमि[५](शपि)भ्यां ददा(द)नौ'(उणा-५३७)इति दप्रत्यये शादः'' [[६] ]इति स्वामी[७] । ''शादशाद्वलपलालशालयः''[[६] ]इत्यूष्मविवेकात् तालव्यादिः । चिक्खल्लो[८] देश्याम्, संस्कृतेऽपि । षट्[९] पङ्कस्य ॥

**हिरण्यबाहुस्तु[1] शोणः[2]**

१ हिरण्यं वहति[१०] **हिरण्यबाहुः** । 'वह प्रापणे' (भ्वा.उ.अ.), 'वहिरहितलियसिभ्यश्च'( )इत्युण्[११]-प्रत्ययः । ''हिरण्यं वहतीति, कर्मण्यणि हिरण्यवाहः''[[१२]] इति माधवी । ''हिरण्यं वाहावस्य''[[१२]]इति स्वामी[१३] । २ शोणति **शोणः** । 'शोणृ वर्णगत्योः'(भ्वा.प.से.), अच् । द्वे द्रहविशेषस्य ॥

**नदे[1] पुनर्वहः[2] ॥१०९०॥**

**भिद्य[3] उद्ध्यः[4] सरस्वांश्च[5]**

१ नदति **नदः** । 'णद अव्यक्ते शब्दे'(भ्वा.प.से.), अच्, तत्र । २ वहति **वहः** । अच् **॥१०९०॥** ३ भिनत्ति कूलानि **भिद्यः** । ४ उज्झत्युकमिति **उद्ध्यः** । 'उज्झ त्यागे[१४]'(तु.प.से), 'भिद्योद्ध्यौ नदे कर्तरि[१५]'३।१।११५॥ इति निपातनात् साधू । ५ सरः प्रसरणमस्त्यस्य[१६] **सरस्वान्,** तान्तः । पञ्च सामान्येन 'वाहला' इत्याख्यस्य[१७] ॥

**द्रहोऽगाधजलो[1][2] ह्रदः[3] ।**

१ द्रुह्यति **द्रहः** । 'द्रुह द्रोहे[१८]'(दि.प.से.), अचि, पृषोदरादिः । २ अगाधमन्तलस्पर्शि[१९] जलमत्र **अगाधजलः** । ३ ह्रादन्त्यव्यक्तं शब्दं कुर्वन्त्यत्र **ह्रदः** । 'ह्राद अव्यक्ते शब्दे'(भ्वा.आ.से.), 'हलश्च'३।३।१२१॥ इति घञ्, पृषोदरादित्वाद् ह्रस्वत्वम् । त्रीणि द्रहस्य ॥

**कूपः[1] स्यादुदपानोऽन्धुः[2][3] प्रहिः[4]**

१ कौति शब्दायते प्रतिशब्देनेति **कूपः,** अस्त्रियाम् । 'कु शब्दे'(अ.प.से.), 'कुसुयुभ्यश्च'(दशपाद्युणा-७।५)इति पो दीर्घत्वं च[२०] । कुत्सिता आपोऽत्रेति पृषोदरादिर्वा । २ उदकं पिबन्त्यस्मिन्[२१] **उदपानम्,** अस्त्रियाम् । अधिकरणे ल्युट्[२२], 'उदकस्योदः संज्ञायाम्'६।३।५७॥ । ३ अम्यते गम्यते **अन्धुः** । 'अम(अम) गत्यादौ[२३]' (भ्वा.प.से.), 'अर्जिदृशिकम्यमियसि(पशि)बाधामृजिभ्यः[२४] कुः(-मृजिपशितुग्धुग्दीर्घहकाराश्च)'(उणा-२७)इति कुः, नुक्, धुगागमश्च । अनन्ति जीवन्त्यनेनेति वा । 'अन प्राणने'(अ.प.से.), मित्रद्र्वादित्वात् कुः, भक्षान्तादेशः । ४ प्रह्रियते जलमस्मादिति **प्रहिः** । 'प्र(प्रे) हरतेः कूपे'(उणा-५७४)इत्यनेन हृञ इः डिच्च, डित्त्वाट्टिलोपः, पुंस्येतौ । ''पुंस्येवान्धुप्रही[२५] कूप उदपानं तु पुंसि वा''[अमरकोषः १।१०।२६॥]इत्यमरः । चत्वारि कूपस्य ॥

**नेमी[1] तु त्रिका[2] ॥१०९१॥**

१ नीयते जलमनया नेमिः । 'णीञ् प्रापणे' (भ्वा.उ.अ.), 'नियो मिः'(उणा-४८३)इति मिः, 'कृदिकारात् '(गणम् ४।१।४५॥)इति ङीषि **नेमी** । २ तस्य कूपस्यान्ते रज्ज्वादिधारणार्थं त्र्यस्त्रं[२६] दारु **त्रिका** । त्रिस्रोऽणयोऽस्या इति त्रिशब्दात्, '[सङ्ख्यायाः] संज्ञासङ्घसूत्राध्ययनेषु'५।१।५८॥ इति कन्, टाप् । ''त्रिका कूपस्य नेमौ स्यात्''[विश्वलोचनकोशः, कान्तवर्गः, श्लो-१४]इति श्रीधरः[२७] । ''नेमिस्त्रिकायां[२८] कूपस्य''[विश्वप्रकाशकोशः, मान्तवर्गः, श्लो-२७]इति महेश्वरः । द्वे कूपस्याऽन्ते रज्ज्वादिधारणार्थं त्र्यस्रदारुणः । 'भ्रमण[२९]' इति भाषा **॥१०९१॥**

**नान्दीमुखो[1] नान्दीपटो[2] वीनाहो[3] मुखबन्धनेः[३०] ।**

१ नान्द्यां[३१] इव मुखमस्य **नान्दीमुखः** । २ नान्दीव पटो **नान्दीपटः** । ३ विशेषेण नह्यते कूपमुखमनेनेति

१. '-तिः' इति१.३॥ २. '-न्ति' इति१.४॥ ३. इतोऽग्रे १प्रतौ 'वा' इति दृश्यते ॥ ४. '-यते' इति५॥ ५. 'शो-' इति१.२.४.५॥ ६. द्र. पदचन्द्रिका, भा-१, वरिवर्गः, श्लो-२३७, पृ.२८२॥ ७. अम.क्षीरस्वामिकृतटीकायाम्-''शीयन्तेऽस्मिञ्शादः'' इत्येव दृश्यते. १।९।९॥, पृ.६२॥ ८. 'विस्कल्लो' इति स्वोपज्ञटीकायाम् ॥ ९. 'त्रीणि' इति४॥ १०. '-न्ति' इति१॥ ११. 'इत्यण्प्र-' इति३, 'इत्युप्र-' इति५॥ १२. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२६१, पृ.३१३॥ १३. अम.क्षीरस्वामिकृतटीकायां हिरण्यवाहशब्दमाश्रित्य ''हिरण्यं वहति (हिरण्यवाह)'' इति व्युत्पत्तिर्दृश्यते, १।९।३४॥, पृ.६७॥ १४. 'उत्सर्गे' इति क्षीरतरङ्गिण्यादयः॥ १५. 'कर्तरि' इत्यष्टाध्याय्यां न दृश्यते ॥ १६. 'प्रश-' इति४.५॥ १७. 'ख्यातस्य' इति१.३॥ १८. 'जिघांसायाम्' इति क्षीरतरङ्गिण्यादयः ॥ १९. '-मन्त-' इति४.५॥ २०. ५प्रतौ नास्ति ॥ २१. '-बत्य-' इति५॥ २२. '-टि' इति१.२॥ २३. 'गतौ' इति३॥ २४. '-धि-' इति३॥ २५. '-न्धुः प्रहिः' इत्यमरकोषे ॥ २६. '-स्र-' इति२.५॥ २७. 'सर्वधरः' इति३॥ २८. इतोऽग्रे ३प्रतौ 'च' इति दृश्यते ॥ २९. 'भ्र-' इति१.३॥ ३०. '-नम्' इति५॥ ३१. इतोऽग्रे १प्रतौ 'मुग्ध' इति दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वीनाहः** । 'नह(णह) बन्धने'(दि.उ.अ.), करणे घञ्, 'उपसर्गस्य घञि-'६।३।१२२॥ इति दीर्घः । ''वीनाहमस्त्रियाम्''[1][ ]इति वैजयन्ती[2] । ४ कूपस्य मुखं बध्यतेऽनेन[3] **मुखबन्धनम्** । 'बन्ध बन्धने'(क्र्या.प.अ.), करणे ल्युट्, तत्र । कूपस्य ऊर्ध्वे इष्टकादिभिर्मुखबन्धनस्य त्रीणि । 'कूपकंठ' इति भाषा ॥

## आहावस्तु निपानं स्यादुपकूपे

१ आहूयते पानाय पशवोऽत्र **आहावः,** द्वितीयस्वरादिः । 'ह्वेञ् आह्वाने[4]'(भ्वा.उ.अ.), '[5]निपानमाहावः'३।३।७४॥ इति घञि साधुः । २ नियतं पिबन्त्यत्र **निपानम्** । करणे ल्युट्, अस्त्रियाम् । कूपस्य समीपे शिलादिबद्धं पशुपानार्थं कूपोद्धृताम्बुस्थानम् उपकूपम्, तत्र । ''स्थिरतुरङ्गमभूमि निपानवन्मृगवयोगवयोपचितं वनम्''[रघुवंशम्, सर्गः-९, श्लो-५३]इति रघुः । द्वे 'अवाहडु[6]' इति ख्यातस्य[7] ॥

## अथ दीर्घिका ॥१०९२॥

## वापी स्यात्

१ दीर्घैव **दीर्घिका** । 'संज्ञायां कन्'५।३।७५॥, 'प्रत्ययस्थात्-'७।३।४४॥ इतीत्वम् ॥१०९२॥ २ उप्यतेऽस्यां पद्मादिकमिति वापिः । 'टुवप् बीजतन्तुसन्ताने[9]'(भ्वा.उ.अ.), 'घसिरपिपजिवाजि[10]वपिध्वजि(वसिवपिवदिराजिव्रजिध्वजि)-'(दशपाद्युणा-१।५३)इत्या[दि]नेञ्, [वृद्धिः], 'कृदिकारात्-'(गणसू-४।१।४५॥)इति **वापी**। वापिरपि। ''वाप्यां वापिरपि स्मृता''[11]]इति द्विरूपकोषः । द्वे वाप्याः । 'वावि[12]' इति भाषा ॥

## क्षुद्रकूपे तु चुरी चुण्डी च चूतकः ।

१ क्षुद्रश्चासौ कूपश्च क्षुद्रकूपः, तत्र । चोरति चुरिः । 'चुर स्तेये'(चु.उ.से.), 'इगुपधात् कित्'(उणा-५५९)इतीन्, ङीषि **चुरी** । २ चमन्त्याचमन्त्यस्यां चुण्डिः । 'चमेरुच्चातः'(हैमोणा-६३२)इति ढिः, ङीषि **चुण्डी** ।

''अदृष्टातिशयो नित्या[13]नुभूतबहु मन्यते ।
मन्यते रोहिषस्तुष्यश्चुण्डीमपि महोदधिम् ॥१॥''[ ]इति

प्रयोगः । ३ श्चोतति **चूतकः** । 'श्चुतिर् क्षरणे'(भ्वा.प.से.), 'कीचक-'(हैमोणा-३३)इत्यादिनाऽके साधुः । यथा-''चूतकानां रसं पीत्वा पान्थाः पथि सुखं ययुः''[14]] इत्यत्र चूतकानां कूपानामाम्राणां चेत्यर्थः । मालाकारस्तु-''चुण्डीविवरोत्साश्च''[ ]इति चुण्डीशब्देन वेरकनामान्याह । त्रीणि लघुकूपस्य ॥

## उद्घाटकं घटीयन्त्रम्

१ उद्घाटयति[15] प्रकाशयत्यम्भ[16] **उद्घाटकम्** । घटेर्णिजन्ताद् ण्वुल् । उद्घाटनमपि । ''ऊर्ध्वं हन्यतेऽनेन उद्घाटनम्''[17]]इति कौटिल्यः । २ घट्यो यन्त्र्यन्तेऽत्रेति **घटीयन्त्रम्** । 'यत्रि बन्धने[18]'(चु.उ.से.), करणे घञ् । ''येन कूपादेर्जलमूर्ध्वं वाह्यते''[अभि.स्वोपज्ञटीका४।१०९३]इति मूलवृत्तौ । सामान्येनोक्तत्वात् 'चडसघडि[19]माल[20]' इत्यादेर्द्वे ।

## पादावर्तोऽरघट्टकः ॥१०९३॥

१ पादाभ्यामावर्त्यते भ्राम्यते **पादावर्तः** । 'वृतु वर्तने'(भ्वा.आ.से.), घञ् । २ अरान् घट्टयति, अरा घट्ट्यन्तेऽत्र वा अरघट्टः । 'घट्ट चलने'(भ्वा.आ.से,चु.उ.से.), अच्, घञ् वा । स्वार्थे कनि **अरघट्टकः** । द्वे अरघट्ट[21]स्य ॥१०९३॥

## अखातं तु देवखातम्

१ खायत इदमिति खातम् । 'खनु अवदारणे'(भ्वा.उ.से.), कर्मणि क्तः, 'जनसनखनाम्-'६।४।४२॥ इत्यात्वम् । न खातम् **अखातम्,** कवर्गद्वितीयमध्यम् । २ देवैः खातं **देवखातम्**। ''अपौरुषेयं देवखातम्, अत्र देवपदमकृत्रिमत्वप्रदर्शनार्थं[22] निर्निमित्तं स्वतः सिद्धमिति

१. वैजयन्तीकोषे- ''पीनाहस्तु स्त्रियां'' इति दृश्यते, ४।२।८॥, पृ.११२॥ २. द्र. स्वोपज्ञटीका४।१०९२॥, पृ.२४३॥ ३. '-नेति' इति१॥ ४ 'ह्वेञ् स्वर्धायां शब्दे च' इति क्षीरतरङ्गिण्यादयः ॥ ५. 'निपात-' इति१.३॥ ६. '-डु' इति१.२॥ ७. 'आह्वस्य' इति४॥ ८. '-क' इति५॥ ९. 'बीजसन्ताने' इति१, 'डुवप् बीजसन्ताने' इति क्षीरतरङ्गिण्यादयः ॥ १०. '-वजि-' इति१, '-वाजिवजि-' इति३॥ ११. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२५६, पृ.३०७॥, रामाश्रमी१।१०।२८॥, पृ.१३३॥ १२. 'वावडी' इति४॥ १३. '-त्यां' इति१.३॥ १४. द्र. अनेकार्थकैरवाकरकौमुदीटीका, भा-२, ३।३९॥, पृ.१८॥ १५. '-न्ति' इति१॥ १६. '-न्त्य-' इति१॥ १७. द्र. अम.क्षीर.२।१०।२८॥, पृ.२३१॥, स्वोपज्ञटीका४।१०९३॥, पृ.२४३॥ १८. 'सङ्कोचने' इति क्षीरतरङ्गिण्यादयः ॥ १९. '-घड-' इति३॥ २०. '-ला' इति१, '-लि' इति४॥ २१. '-हट्ट-' इति१.२.५॥ २२. '-र्थनिमि-' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[या]वत्''[ ][1]इति पञ्जिकादयः[2] । ''अखातो देवखातकः'' [ ][1]इति पुंस्काण्डेऽमरदत्तात्[3] पुंस्यपि, ''अखातः''[ ]इति तु स्वामी[4]। द्वे कुण्डस्य। कुण्डमपि । ''कुण्डं देवजलाधारे'' [विश्वलोचनकोशः, डान्तवर्गः, श्लो-४]इति श्रीधरः[5] ।

''नदीषु देवखातेषु प्रातः स्नायाद् दिने दिने ।
तदभावे तडागे वा वाह्ये स्नानं समाचरेत्[6] ॥१॥''[ ]

इति विष्णुः। ''द्वे देवद्वारस्थजलाशयस्य''[ ][7]इति तु[8] मिश्राः॥

**पुष्करिण्यां[1] तु खातकम्[2] ।**

१ पुष्करं जलम्, तदेतस्यामस्तीति **पुष्करिणी** । 'पुष्करादिभ्यो देशे'५।२।१३५॥ इतीनिः, 'ऋन्नेभ्यो ङीप्[9]' ४।१।५॥ । वर्तुला पुष्करावती चेयम्[10] । ''समचतुरस्रा[11] पुष्करिणी''[पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२५५]इति मिश्राः । २ खन्यते खातम्, ह्रस्वं खातं **खातकम्** । 'यावादिभ्यः कन्'५।४।२९॥ । द्वे पुष्करिण्याः ॥

**पद्माकरस्[1]तडागः[2] स्यात् कासारः[3] सरसी[4] सरः[5] ॥१०९४॥**

१ पद्मानामाकर उत्पत्तिस्थानं **पद्माकरः** । ''क्वचित् पद्मशून्येऽपि, योग्यतया''[ ][12]इति तु सुभूतिः । २ तड्यते[13] आहन्यते **तडागः**, पुंक्ली. । 'तड आघाते'(चु.प.से.), 'तडागादयश्च'( )इत्यनेनाऽऽकप्रत्यये कस्य गत्वे च, निपातनात् 'तडेरागः'(हैमोणा-९७)इत्यागो वा । ''पिनाकादित्वादाकप्रत्यये तडाक इति केचित्''[ ][12]इति सर्वानन्दः । एतौ तृतीयवर्गतृतीयमध्यौ । ''तटमकति तटाकः'' [ ][12]टमध्य इत्यन्ये । ३ कासति(कासते) वाताहततरङ्गैः शब्दायते **कासारः** । 'कासृ शब्दे'(भ्वा.आ.से.), 'तुषारादयश्च'(उणा-४१९)इत्यारन् । ''कं जलमासरत्यत्रेति [वा], 'सृ गतौ'(भ्वा.प.अ.), बाहुलकादधिकरणे घञ्'' [ ][14]इति तु भट्टः[12] । कासन्ते बकादयोऽत्रेति वा, आरन्नेव प्रत्ययः । सरति जलमस्यां **सरसी** । 'सृ गतौ'(भ्वा.प.अ.), असुन्, गौरादित्वाद् ङीषि । ''सरसीः परिशीलितुं मया''[नैषधीयचरितम्, सर्गः-२, श्लो-४०]इति श्रीहर्षः । ५ सरन्ति जलान्यत्रेति **सरः**, क्लीबे । 'सृ गतौ'(भ्वा.प.अ.), असुन् । मिश्रास्तु-''कासारस्त्वल्पसरसि सरसी तु महासरः''[ ][15]इति विशेषमाह । पञ्च सरसः । 'तलाव' इति भाषा ॥१०९४॥

**वेशन्तः[1] पल्वलोऽल्पं[2] तत्**

१ विशन्त्यत्र भेकमहिषादय इति **वेशन्तः** । 'विश प्रवेशने'(तु.प.अ.), 'जृविशिभ्यां झच्'(उणा-४०६), 'झोऽन्तः'७।१।३॥ । ''वर्षास्वगाधजलः ग्रीष्मेऽल्पजलः शुष्यति वा वेशन्तः''[पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२५६]इति मिश्राः । २ पलति गच्छति **पल्वलः** । 'पल गतौ'(भ्वा.प.से.), 'साधसिवर्णसितन्दुलाङ्कुशवर्षेषुलपल्वलधिष्ण्यशल्याः (सानसिवर्णसिपर्णसितण्डुलाङ्कुशचषालेल्वलपल्वलधिष्ण्यशल्याः)'(उणा-५४७)इति वलच् । अस्त्रियामयम् । तल्लो देश्याम्, संस्कृतेऽपि । तत् सरोऽल्पं लघु[16] । द्वे लघुतटाकस्य[17] ॥

**परिखा[1] खेयखातिके[2][3] ।**

१ परितः खन्यते **परिखा** । 'खनु अवदारणे' (भ्वा.उ.से.), 'अन्येभ्योऽपि-'(वा-३।२।१०१॥)इति डः। २ खन्यते **खेयम्** । 'ई च खनः'३।१।१११॥ इति यत् । ३ खातैव[18] **खातिका** । स्वार्थे कनि, 'प्रत्ययस्थात्-' ७।४।४४॥ इतीत्वम् । दुर्गवेष्टनहेतुरियम् । त्रीणि 'खाई' इति ख्यातायाः॥

**स्यादालवालम्[1]आ[19]वालम्[2]आवापः[3] स्थानकं च सः ॥१०९५॥**

१ आलूयते तरुसेकार्थं खन्यते **आलवालम्**,

१. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२५५, पृ.३०५॥ २. 'सिद्धमिति तु पञ्जिकादयः' इति१, 'सिद्धमिति वदन्ति' ('वदति' इति२) पञ्जिकादयः इति२.३॥ ३. रामाश्रमी१।१०।२८॥, पृ.१३२॥ ४. अम.क्षीरस्वामिकृतटीकायाम्-''नागादिकुण्डमकृत्रिममाखातामत्येके'' इति दृश्यते, १।९।२७॥, पृ.६६॥ ५. 'सर्वधरः' इति३॥ ६. ''नदीषु देवखातेषु तडागेषु सरःसु च । स्नानं समाचरेन्नित्यं गर्तप्रस्रवणेषु च ॥'' इति मनुस्मृत्याम्, ४।२०३॥, पृ.१६७॥ ७. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२५५, पृ.३०५॥, तत्राऽग्रे-''इत्यन्ये कोक्कटादयः'' इति दृश्यते ॥ ८. ४प्रतौ नास्ति ॥ ९. 'ङीष्' इति२.३॥ १०. 'वे-' इति३॥ ११. 'समा-' इति पदचन्द्रिकायाम् ॥ १२. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२५५, पृ.३०६-३०७॥ १३. 'ता-' इति३॥ १४. अम.क्षीरस्वामिकृतटीकायाम्-''कमासरत्यत्र कासारः'' इत्येव दृश्यते, १।९।२८॥, पृ.६६॥ १५. द्र. स्वोपज्ञटीका ४।१०९४॥, पृ.२४३॥ १६. 'लघुः' इति३.४.५॥ १७. '-डा-' इति५॥ १८. '-तेव' इति३॥ १९. '-ल आ-' इति३.५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अस्त्रियाम् । अमरस्तु-"स्यादालवालम्"[अमरकोषः१।१०।२९॥]इति क्लीबे प्राह । 'लूञ् छेदने'(क्र्या.उ.से.), आङ्पूर्वः 'स्थाचतिसृजो(मृजे)रालज्वालञानीयरः(-लीयचः)'(उणा-११३)इति बाहुलकादतोऽप्यालञ्(-च्)। "आ समन्ताज्जललवमालाति इति मूलविभुजादित्वात् कः"[[1]]इति स्वामी[2]। "आलिं सेतुं वलते धत्ते, कर्मण्यणि पृषोदरादिः"[[3]]इति पञ्जिका । दीर्घादिरेवायम् । "शाखा दिशो जलधिमण्डलमालवालम्[4]"[[4]]इति प्रयोगः । "अलवालगोधिषु(-रोधिषु?) पयःसु बिभ्रतः सपलाशिराशिमिव मूलसन्ततिम्"[[5]]इति माघे[5] ह्रस्वादिश्च । अपशब्द एवायमित्येके । २ आवलते बहिरनियमादम्भोऽत्रेति **आवालम्,** क्लीबे। व्याडिस्तु "आवालो जलपिण्डलः"[[6]]इति पुंस्यप्याह । 'वल वल्ल संवरणे'(भ्वा.आ.से.), आङ्पूर्वः, 'हलश्च'३।३।१२१॥ इति घञ् । ३ आ उप्यतेऽम्भोऽत्रेति **आवापः** । "आङ्पूर्वो वपिर्न्यासार्थः"[[2]]इति कलिङ्गः, घञ् । वृक्षसेकार्थं द्रवतो[7]ऽम्भसो यत् स्थानकं स्थानं स आलवाल इत्यन्वयः। यदुक्तम्-"आलवालं विदुर्धीरा धारणं द्रवतोऽम्भसः"[[8]]इति । "आवाल आलवालः स्यादावापः स्थानकं तथा"[हलायुधकोशः२।१८५॥]इति हलायुधः । त्रीणि 'थाणुं[9]' इति ख्यातस्य[10] ॥१०९५॥

### आधारस्त्वम्भसां बन्धः

१ आध्रियते जलादिकमत्रेति **आधारः** । 'धृञ् धारणे'(भ्वा.उ.अ.), अधिकरणे घञ्, 'आ(अ)ध्यायन्याय-'३।३।१२२॥ इत्यादिना आङ्पूर्वात् 'धृञ्[11] अनवस्थाने[12] (अवस्थाने)' इत्यस्य घञि[13] निपातनाद् वा । "आधारश्चाधिकरणेऽआ(प्या)लवालेऽम्बुधारणे"[विश्वप्रकाशकोशः, रान्तवर्गः, श्लो-१६७]इति महेश्वरः । यथा-"समुद्रः प्रलयोन्मुद्रः किमाधारेण धार्यते"[[14]]इति । क्षेत्रादिसेकार्थं यत्राम्भः सञ्चीयते, सोऽम्भसां बन्धः । एकं जलबन्धस्य ॥

### निर्झरस्तु झरः सरिः । उत्सः स्रवः प्रस्रवणम्

१ निर्झीर्यति[15] जलमत्र **निर्झरः** । 'झॄष् वयोहानौ' (दि.प.से.), अच्। अन्योपसर्गनिवृत्त्यर्थं[16] निर उपादानम् । निर्झरन्त्य[17]नेनेति, 'ॠदोरप्'३।३।५७॥ । २ एवं **झरः** । "षित्त्वादङि झरा, 'अच इः'(उणा-५७८)झरिः, ततो ङीषि झरी च"[[18]]इति स्वाम्यादयः । निरभावे झरः । ३ सरति **सरिः,** स्त्रीलिङ्गः । 'सृ गतौ'(भ्वा.प.अ.), 'अच इः'(उणा-५७८)इति इः। ४ उनत्ति **उत्सः,** पुंसि । "उत्सस्त्वस्त्री"[[19]]इति वाचस्पतिः । 'उन्दी क्लेदने'(रु.प.से.), 'उद्यमि-(उन्दिगुधि-)(उणा-३४८)' इति सः । ५ स्रवति **स्रवः** । 'स्रु गतौ'(भ्वा.प.अ.), अच् । ६ प्रस्रवन्त्यनेन[20] गिरयः **प्रस्रवणम्** । करणे ल्युट्[21] । षट् निर्झरस्य ॥

### जलाधारा जलाशयाः ॥१०९६॥

१ जलान्याध्रियन्तेऽत्र **जलाधाराः**। 'अध्यायन्याय-'३।३।१२२॥ इत्यादिना घञन्तः[22] । यद्वा जलानामाधारा जलाधाराः । सामान्येन वाप्यादयः । २ जलमाशयो हृदयमेषां **जलाशयाः** । जलमाशेते एषु वा । 'पुंसि संज्ञायाम्-'३।३।११८॥ इति घः । द्वे सामान्येन सर्ववाप्यादिजलस्थानस्य ॥१०९६॥

॥ समाप्तोऽप्कायः ॥

---

१. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२५७, पृ.३०८॥ २. अम.क्षीरस्वामिकृतटीकायाम्-"(आधारः) क्षेत्रादिसेकार्थं यत्र संचीयतेऽम्भः । वृक्षसेकार्थं तले द्रवतोऽम्भसः स्थानं, यदाहुः- आलवालं विदुर्धीरा धारणं द्रवतोऽम्भसः, मुनिश्च अपां धारणमाधारस्तदल्पं चालवालकम्, आलूयते खन्यते-आलवालम् ।" इति दृश्यते, १।९।२९॥, पृ.६६॥ ३. '-रात्' इति३॥ ४. द्र. टीकासर्वस्वम्, भा-१, १।१०।२८॥, पृ.१९७॥, तत्र- "मूलं फणाः फणिपतेर्गहनं च मध्यं शाखा दिशो जलधिमण्डलमालवालम्" इति दृश्यते ॥ ५. माघकृतशिशुपालवधकाव्ये- "विपुलालवालभृतवारिदर्पणप्रतिमागतैरभिविरेजुरात्मभिः । यदुपान्तिकेषु दधतो महीरुहः सपलाशराशिमिव मूलसंहतिम् ॥" इति दृश्यते, सर्गः-१३, श्लो-५७, पृ.३२८॥ ६. द्र. स्वोपज्ञटीका४।१०९५॥, पृ.२४३॥, तत्र- '-पिण्डलः' इत्यस्य स्थाने '-पिण्डिलः' इति दृश्यते ॥ ७. '-वन्तोऽ-' इति१.५॥ ८. द्र. अम.क्षीर.१।९।२९॥, पृ.६६॥, स्वोपज्ञटीका४।१०९५॥, पृ.२४४॥ ९. '-णु' इति३॥ १०. 'भाषा' इति२॥ ११. 'धृञ्' इति१.५॥ १२. 'धृञ् धारणे अनवस्थाने वा' इति४॥, 'स्थाने' इति क्षीरतरङ्गिणी ॥ १३. 'घञिति' इति१॥ १४. द्र. अनेकार्थकैरवाकरकौमुदीटीका, भा-२, ३।५१५॥, पृ.२२१॥ १५. '-ते' इति१.४॥ १६. 'निरु-' इति३॥ १७. '-रत्य-' इति४॥ १८. द्र. पदचन्द्रिका, भा-२, शैलवर्गः, श्लो-४३, पृ.६४॥ १९. द्र. स्वोपज्ञटीका४।१०९६॥, पृ.२४४॥ २०. '-नेति' इति१॥ २१. '-टि' इति१.२.५॥ २२. 'घप्रत्यये' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥ एकेन्द्रियेषु तेजस्काय: ॥

अथ तेजस्कायमाह-

**[1]वह्निर्[2]बृहद्भानु-[3]हिरण्यरेतसौ**
**[4]धनञ्जयो [5]हव्यह[6]विर्[7]हुताशन: ।**
**[8]कृपीटयोनिर्[9]दमुना [10]विरोचना-**
**[11]ऽऽशुशुक्षणी [12]छागरथ[13]स्तनूनपात् ॥१०९७॥**
**[14]कृशानु-[15]वैश्वानर-[16]वीतिहोत्रा:**
**[17]वृषाकपि: [18]पावक-[19]चित्रभानू ।**
**[20]अप्पित्त-[21]धूमध्वज-[22]कृष्णवर्त्मा-**
**[23]ऽर्चिष्मत्-[24]शमीगर्भ-[25]तमोघ्न-[26]शुक्रा: ॥१०९८॥**
**[27]शोचिष्केश: [28]शुचि-[29]हुतवहो-[30]षर्बुधा: [31]सप्त[32]मन्त्र-**
**[33]ज्वालाजिह्वो [34]ज्वलन-[35]शिखिनौ [36]जागृवि[37]र्जातवेदा: ।**
**[38]बर्हि:शुष्मा[39]ऽनिलसख-[40]वसू [41]रोहिताश्वा[42]ऽऽश्रयाशौ**
**[43]बर्हिर्ज्योति[44]र्दहन-[45]बहुलौ [46]हव्यवाहो[47]ऽनलो[48]ऽग्नि:**
**॥१०९९॥**
**[49]विभावसु: [50]सप्तो-[51]दर्चि:**

१ वहति हव्यमिति, वहति तेजो वा[1] **वह्नि:** । 'वह प्रापणे'(भ्वा.उ.अ.), 'वहिश्रिश्र्युश्रु(श्रिश्रुयु)[ग्ला]-हात्वरिभ्यो नित्'(उणा-४९१)इति निप्रत्यय: । २ बृहन्तो भानवोऽस्य **बृहद्भानु:** । ३ हिरण्यं रेतोऽस्य **हिरण्यरेता:**, सकारान्त: । यत्स्मृति:-''अग्नेरपत्यं प्रथमं सुवर्णम्''[[2]]इति । ४ धनं जयति यथेष्टं ददाति **धनञ्जय:** । 'जि जये'(भ्वा.प.अ.), 'संज्ञायां भृतॄवृजि-'३।२।४६॥ इत्यादिना खच्, 'अरुर्द्विषत्-'६।३।६७॥ इति मुम् ॥

''ईश्वराद् ज्ञानमिच्छेच्च धनमिच्छेद् हुताशनात् ।
आरोग्यं भास्करादिच्छेज्जयमिच्छेज्जनार्दनात् ॥१॥''[[4]]

इत्युक्तेश्च । ''धनं जितवान् आयत्तीकृतवान् ततो धनमभिलष्यते''[ ]इत्यागमो वा । **५-७** हव्यं हविर्हुतं चा[5]ऽश्नाति **हव्याशन:**, **हविरशन:**, **हुताशन:** । [यौगिकत्वाद् हव्यभुग् इत्यादय:] । ८ कृपीटं जलयोनिरस्य **कृपीटयोनि:** । ''अद्भ्योऽग्निर्ब्रह्मत: क्षत्रमश्मनो लोहमुत्थितम्''[मनुस्मृति:, अध्या-९, श्लो-३२१]इति मनु: । यथा-''कृपीटयोनेरुदियाय तेज:''[ ] । ''कृपीटमुदरे नीरे''[विश्वलोचनकोश:, टान्तवर्ग:, श्लो-४१]इति श्रीधर[6]: । कृपीटस्याम्भसो योनि:, मेघानां धूमजत्वात्, ''अग्नौ प्रास्ताहुति: सम्यगादित्यमुपतिष्ठते''[ ]इत्युक्ते: । ९ दाम्यति **दमुना:**, सकारान्त: । 'दमु[7] उपशमे'(दि.प.से.), अतोऽन्तर्भावितण्यर्थाद् 'दमेरुनस्(-सि:)' (उणा-६७४)इत्युनस्(-सि:) । दमूना इति दीर्घमध्योऽपि[8] । ''दमुना दमूना: प्राचीनवर्हि[:शुचिबर्हि]षौ''[[9]]इति नामनिधानात् । **१०** विरोचते **विरोचन:** । 'रुच दीप्तौ[10]'(भ्वा.आ.से.), नन्द्यादित्वाल्ल्यु: । **११** आशो[11]ष्टुमिच्छति, आङ्पूर्वात् शुष्यते: सन्नन्ताद् 'आङि शुषे: सन् (सनश्)छन्दसि' (उणा-२६०)इति अनि:, भाषायां च दृश्यते,[12] द्विपञ्चमस्वरमध्य: । शुचेर्ज्वलति[13]कर्मण:, क्विपि, शुक् दीप्ति:, क्षणिर्हिंसार्थ:, 'इन् सर्वधातुभ्य:'(उणा-५५७)इतीन्[14], सनोतेर्वा इन्, आशु शुचा दीप्त्यो[15] क्षणिता हिंसिता तमसां सञ्चिता संभक्ता वा पाकदाहप्रकाशनादे: स्वव्यापारस्य । यद्वा आङ्पूर्वाद् शुषे[16](शुचे)रन्तर्भूतण्यर्थत्वात् सनि आशुशुक्ष इति स्थिते 'आङि शुषे: सन:-'(उणा-२६०)इति विहितो निप्रत्ययो बाहुलकाद् शुचे[16]रपि भवति,

---

१. १.३प्रत्योर्नास्ति ॥ २. द्र. अम.क्षीर.१।१।५५॥, पृ.१८॥, स्वोपज्ञटीका४।१०९७॥, पृ.२४४॥, टीकासर्वस्वम्, भा-१, १।१।५५॥, पृ.४२॥, पदचन्द्रिका, भा-१, स्वर्गवर्ग:, श्लो-५०, पृ.७५॥ ३. '-व्र-' इति२.४.५॥ ४ द्र. पदचन्द्रिका, भा-१, स्वर्गवर्ग:, श्लो-४८, पृ.७२॥ ५. 'वा-' इति५॥ ६ 'सर्वधर:' इति३॥ ७ 'दम' इति३॥ ८ इतोऽग्रे ३प्रतौ 'च' इति दृश्यते ॥ ९. द्र. पदचन्द्रिका, भाग-१, स्वर्गवर्ग:, श्लो-५१, पृ.७५॥, रामाश्रमी१।१।५६॥, पृ.२९॥ १०. 'रुच दीप्तावभिप्रीतौ('-प्रीत्यां' इति मैत्रेय:) च' इति क्षीरतरङ्गिण्यादय: ॥ ११. 'अ-' इति४.५॥ १२. ''यद्यप्ययं छान्दस: शब्दस्तथापि कवयो भाषायामपि प्रयुञ्जते । यथा- 'मन्त्रपूतानि हवींषि प्रतिगृह्णात्येतत् प्रीत्याशुशुक्षणि:' इति बाण:(काद०४४)। अत एवाह श्वेतवनवासी 'भाषायामपि कवय: प्रयुञ्जते बाहुलकात्'(पृ.९१)इति । प्रक्रियाकौमुदीटीकाकृदपि 'भाषायामपीति केचित्'(भा-२, पृ.६०४)इत्याह । 'बाहुलकाल्लोकेऽपि'(पृ.५१)इति नारायण:।'' इति दशपाद्युणादिवृत्तिसंग्रहे टिप्पणी, पृ.५ टि.३॥ १३. '-लिति' इति१.४॥ १४ '-नि' इति३॥ १५. '-प्त्यो:' इति१॥ १६. 'युचे-' इति१.२॥

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

आङि शुचि:[1](उणा-२६०)इत्येव तत्र पाठः, आशुशोचयिषा आदीपयितुमिच्छा, तस्याः कर्ता आशुशुक्षणिः आदिदीपयिषुरित्यर्थः''[ ]इति भाष्यम्[2] । १२ छागो रथोऽस्य **छागरथः** । १३ तनूं[3] न पातयति देहधर्तृत्वात् **तनूनपात्** । 'नभ्राण्नपात्-'६।३।७५॥ इति सूत्रे निपातितः । ''अत इन्धनं विना क्षणमपि तन्वाः शरीरस्य नपात् तति रक्षणमस्य (न रक्षणमस्य)''[[4]]इति कलिङ्गः। तकारान्तोऽयम्। यन्महेश्वरः-''तनूनपात् तकारान्तोऽयं न तवर्गतृतीयभाक्''[ ] इति । तनूनपातौ, तनूनपातः इत्यादि । शत्रन्तोऽयमित्येके । तनूनपान्, तनूनपन्तौ[5] इत्यादि । ''आगमशासनानित्यत्वाद् मुगभावः(नुमभावः)''[ ]इत्येके। ''तनूं न पातयति देहवर्तित्वात्[6]''[अम.क्षीर.१।१।५३॥]इति तु[7] स्वामी । ''तन्वा ऊनं पातीति[9] वा । ''तनूं न पद्यतीति[10] दान्तः'' [[8]]इति तु रामदासटीका ॥१०९७॥ १४ कृश्यति दाह्याभावे **कृशानुः** । 'कृश तनूकरणे'(दि.प.से.), दिवादिः, ([11]ऋतन्यञ्जिवन्यञ्ज्यर्पिमद्यत्यङ्गिकुयुकृशिभ्यः कत्निज्यतुजलिजिष्ठुजिष्ठजिसन्स्यनिथिनुल्यसासानुकः)''(उणा-४४२) इत्यानुक्[12] । ''कृशोऽप्यनिति वर्धते कृशानुः''[अम.क्षीर.१।१।५४॥]इति स्वामी । ''वैश्यः किंशारूदश्वित् कुशलं कृशानुश्च''[ ]इति मध्यतालव्यवान् । १५ विश्वानरस्याऽपत्यं **वैश्वानरः**। बिदादित्वादञ्। बहुत्वे लुकि विश्वानराः । १६ वीतयोऽश्वा होत्रं हव्यमस्य **वीतिहोत्रः** । 'वी गत्यादौ'(अ.प.अ.), कर्मणि क्तिन् । ''वीतयोऽश्वा होत्रं हवनमस्येत्यागमः''[अम.क्षीर.१।१।५३॥]इति तु स्वामी । १७ वृषेण धर्मेणाऽकति **वृषाकपिः** । पृषोदरादिः । वृषेण तेजसा आकम्पत इति वा । 'इन् सर्वधातुभ्यः'(उणा-५५७)। १८ पुनाति **पावकः** । 'पूञ् पवने'(क्र्या.उ.से.), ण्वुल् । १९ चित्रा नानारूपा भानवः[13] कान्तयोऽत्र **चित्रभानुः** । २० अपां पित्तं सारम् **अप्पित्तम्**[14] । बाहुलकात् षष्ठ्यलुकि अपांपित्तमित्यपि । ''सोऽङ्घ्रिपाङ्गैरपां पित्तं मेघातः सर्वरी नयेत्''[[15]]इति । २१ धूमो ध्वजोऽस्य **धूमध्वजः** । २२ कृष्णो धूम्रः वर्त्म

---

१. 'शुचि-' इति१.२॥ २. ''निरुक्तकारस्तु 'आ इत्याकार उपसर्गः पुरस्तात् । चिकीर्षितज उत्तरः, आशुशोचयिषुरिति'[६।१]इत्यादिना आङ्पूर्वाच्छुचेर्निरवोचत । नारायणश्वेतवनवासिनावपि पञ्चपाद्यां 'शुच' धातुमेवाधीयाते । देवराजस्तु आशुशुक्षणिशब्दव्याख्याने 'आङि शुषेः सनः' इति विहितोऽनिः प्रत्ययो बाहुलकाच्छुचेरपि भवति । 'आङि शुचेः' इत्येव वा तत्र पाठः' इत्याह (पृ.४२६)। शुचेरिति पाठे शुचधातोरुदात्तत्वादिट् प्राप्तः स बाहुलकात् प्रतिविधातव्यः'' इति दशपादुणादिवृत्तिसंग्रहे टिप्पणी, पृ.५, टि-३॥, ''आशुशुक्षणिः ॥१॥ ''त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि । त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः''। (ऋ०२।१।१)। त्वमग्ने द्युभिरहोभिस्त्वमाशुशुक्षणिः। आशु इति च शु इति च क्षिप्रनामनी भवतः। क्षणिरुत्तरः क्षणोतेः आशु शुचा क्षणोतीति वा सनोती ति वा ।

शुक् शोचतेः । पञ्चम्यर्थे वा प्रथमा । तथाहि वाक्य-संयोगः आ इति आकार उपसर्गः पुरस्ताच्चिकीर्षितज उत्तरः आशु शोचयिषुरिति। शुचिः शोचतेर्ज्वलति-कर्मणः । अयमपीतरः शुचिरेतस्मादेव, निष्षिक्तमस्मात्पापकमिति नैरुक्ताः ।

आशुशुक्षणिः अनवगतमेतत् । आशु शुचा सनिता, क्षणिता वा इत्यवगमः। तथा च निगमः- त्वमग्ने! ..........शुचिः। गृत्समदस्येयमार्षम् । जगती। हे भगवन् अग्ने! त्वं द्युभिः-अहोभिः। आशुशुक्षणिः-आशु शुचा क्षणिः-क्षमोतेः हिंसार्थात् । सनोतेर्वा सम्भजनार्थात् । मध्यमं 'शु' इत्येतदक्षरं शुचेः दीप्त्यर्थस्य । आशु-क्षिप्रं, शुचा-दीप्त्या, क्षणोति-हिनस्ति इति आशुशुक्षणिः अथवा आशु शुचा सनोति सम्भजतीति वा। शुक् कस्मात् ? शोचतेः । अयमेको निर्वचनविधिः । अथापरः- पञ्चम्याः अर्थे प्रथमा वा । तथा हि पञ्चमीत्वेन विपरिणतम्यास्य शब्दस्य वाक्ये संगतिर्भवति। त्वमद्भ्यः त्वमश्मनस्परि त्वं वनेभ्यः इत्यादीनि बहूनि पदानि पञ्चम्यन्तान्येव एव । तस्मानदनेनापि पञ्चम्यन्तेन भवितव्यमित्यभिप्रायः । पुरस्तात् 'आ' इत्याकारः एषः उपसर्गः। उत्तरः-अनन्तरः शुशुक्षुणिरिति चतुरक्षरः शब्दः, चिकीर्षितजः चिकीर्षितादर्थाज्जातः सन्नन्तात् धातोरित्यर्थः । यः आ शुशोचयिषुः-आदिदीपयिषुः भवति स आ शुशुक्षणिः-यजमान इत्यर्थः। तस्मात् त्वमग्ने जायसे। अद्भ्यः वैद्युतात्मना जायसे। अश्मनः परि परस्पराभिघाताज्जायसे । वनेभ्यः-दारुभ्यः । ओषधीभ्यः-शरादिभ्यः । नृणां-मनुष्याणां पते जायसे-अभिव्यज्यसे। शुचिः दीप्तः ।

शुचिः कस्मात् ? ज्वलत्यर्थात् शोचतेः । अयमपीतरः शुचिः लौकिकः शब्दः एतस्मादेव शोचतेः सम्पद्यते इति वैयाकरणाः मन्यन्ते। नैरुक्ताश्च निःपूर्वात् सिञ्चतेर्मन्यन्ते । यस्मात् पापमस्मात् निष्षिक्तं भवति । अन्यस्मिन् सिक्तमित्यर्थः।'' इति निरुक्तम्, ६।१॥, पृ.२५३॥ ३. 'तनून्' इति३॥ ४ द्र.पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-४८, पृ.७३॥ ५. '-पातौ' इति१.३॥ ६ '-धर्तृ-' इति३॥ ७ ३.४प्रत्योर्नास्ति ॥ ८ द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-४८-४९, पृ.७३-७४॥ ९ 'पातय-' इति३॥ १०. इतोऽग्रे १प्रतौ 'तु' इति दृश्यते ॥ ११. हस्तप्रतिस्थस्योणादिगणसूत्रस्य पाठोऽतीवाशुद्धत्वात् कोष्ठान्तर्गतपाठः शुद्धः स्थापितः ॥ १२. 'इति नुक्' इति४॥ १३. इतोऽग्रे ४प्रतौ 'हि' इति दृश्यते ॥ १४. इतोऽग्रे ३प्रतौ 'अधूः' इति दृश्यते ॥ १५. द्र. टीकासर्वस्वम्, भा-१, १।१।५६॥, पृ.४२॥, पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-५१, पृ.७६॥, तयोः 'मेघातः' इत्यस्य स्थाने क्रमशः '-मिन्धानः' इति, -'मिन्धयन्' इति दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मार्गोऽस्य **कृष्णवर्त्मा**, नकारान्तः। २३ अर्चींषि विद्यन्तेऽस्मिन् **अर्चिष्मान्** । 'तदस्यास्ति-'५।२।९४॥ इति मतुप्। २४ शम्या गर्भः **शमीगर्भः** । यत्कालिदासः-"शमीमिवाभ्यन्तरलीनपावकाम्"[रघुवंशम्, सर्गः-३, श्लो-९]इति। २५ तमो हन्ति **तमोघ्नः**। २६ शोचयति जलदर्शनेन **शुक्रः**। 'शुच शोके'(भ्वा.प.से.), 'ऋज्रेन्द्र-'(उणा-१८६)इति निपातितः । "शुक्रं रेतोऽस्याऽस्तीत्यर्शआद्यचि शुक्रः[1]" [अम.क्षीर.१।१।५६॥]इति स्वामी[2]। ॥१०९८॥ २७ शोचींषि ज्वलाः केशा अस्य **शोचिष्केशः** । 'नित्यं समासेऽनुत्तरपदस्थस्य'८।३।४५॥ इति षत्वम् । २८ शोचयति शोधयति **शुचिः** । 'शुचि शुद्धौ[3]'( ), अन्तर्भावितण्यर्थः[4], 'इन् सर्वधातुभ्यः'(उणा-५५७)इतीन् । २९ हुतं वहति[5] **हुतवहः** । अच् । ३० "उषः प्रभाते सन्ध्यायाम्"[विश्वप्रकाशकोशः, सान्तवर्गः, श्लो-३६]इति विश्वः। उषसि सन्ध्यायां बुध्यते **उषर्बुधः** । 'बुध बोधने' ( ), 'इगुपध-'३।१।१३५॥ इति कः, 'अहरादीनां पत्यादिषु-'(वा-८।२।७०॥) उभयत्राऽप्यादिशब्दः प्रकारे वा रेफो वा इति व्यवस्थितविभाषया नित्यं रः । ३१-३३ सप्तमन्त्रज्वालाशब्देभ्योऽग्रे जिह्वः, तेन सप्त जिह्वाऽस्य **सप्तजिह्वः** । यदाहुः-

"भवति हिरण्या कनका रक्ता कृष्णा वसुप्रभा चान्या[6] ।
अतिरिक्ता बहुरूपेति सप्त सप्तार्चिषो जिह्वाः ॥१॥"[ ]

[इति] मार्कण्डेयपुराणोक्ताः । मन्त्र एव जिह्वाऽस्य **मन्त्रजिह्वः**। ज्वाला जिह्वाऽस्य **ज्वालाजिह्वः**[7]। ३४ ज्वलतीत्येवंशीलो **ज्वलनः**। 'ज्वल दीप्तौ'(भ्वा.प.से.), ताच्छील्ये 'जुचङ्क्रम्य-'३।२।१५०॥ इत्यादिना कर्तरि युच्। ३५ शिखाः सन्त्यस्य[8] **शिखी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः। ३६ जागर्ति वायुना **जागृविः** । 'जागृ निद्राक्षये' (अ.प.से.), 'कृगृशृजागृभ्यः क्विन्(जॄशॄस्तृजागृभ्यः क्विन्)' (उणा-४९२), 'जाग्रः-'७।३।८५॥ इति गुणोऽवीति[9] पर्युदासात्र भवति[10], तृतीयस्वरान्तोऽयम्, हरिवत् । ३७ जाता वेदा अस्माद्[11] **जातवेदाः** । पृषोदरादिः। "जाता वेदास्त्वदर्थं चेज्जातवेदास्ततो ह्यसि"[[12]]इति भारते । "जातं वेत्तीति 'गतिकारकयोः पूर्वपदप्रकृतिस्वरत्वं च'(उणा-६६६) इत्यसिः"[पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-४८]इति मिश्राः। जातवेदसौ इत्यादि । ३८ बर्हिर्दर्भः शुष्म बलमस्येति **बर्हिःशुष्मा**, नकारान्तः, अखण्डश्चतुरक्षरः। द्वे नाम्नी इत्येके, तद्यथा, बृंहतीति बर्हिः, सकारान्तः, पुंसि। 'बृहि[13] वृद्धौ'(भ्वा.प.से.), 'बृहेर्नलोपश्च'(उणा-२६६)इतीस्[14] । "बर्हिरुक्तो बृहद्भानुर्वीतिहोत्रो धनञ्जयः"[[15]]इत्यमरमालापुंस्काण्डे पाठात्। बर्हिषौ, बर्हिषः[16] इत्यादि । नन्द(भट्ट)स्वामी त्वाह-"बर्हिः शुष्मेति व्यस्तं समस्तं नाम, बर्हते बर्हिः, यथा- बर्हिर्मुखा देवाः, बर्हिर्दर्भः शुष्म बलमस्येति, यथा- शुक्रो वैश्वानरो बर्हिः वह्निः शुष्मा तनूनपात्[17]'[[15]]इति शब्दार्णवात्"[[15]]इति । कौमुदीकारस्तु-"शब्दार्णवादेव बर्हिः सान्तः, वह्निरिदन्तः, शुष्मेति नान्तः पृथक्"[[15]] इत्याह। ३९ अनिलो वायुः सखाऽस्येति **अनिलसखः** । 'राजाहःसखिभ्यष्टच्'५।४।९१॥, 'यस्येति च'६।४।१४८॥। ४० वसन्ति देवा अस्मिन् **वसुः**। 'वस[18] निवासे'(भ्वा.प.अ.), 'मृ(शृ)स्वृस्निहित्रप्यसि-'(उणा-१०)इत्युः। ४१ लोहितवर्णः[19] अश्वोऽस्य **रोहिताश्वः** । तथा च शालिहोत्रः-

"वरुणस्त्वसितानश्वान् कुबेरः कुमुदोपमान् ।
हुताशनः[20] किंशुकाभान् वायुर्बभ्रांस्तथाऽवृणोत् ॥१॥"

[[21]]इति। [यद्वा] रोहिताख्यो मृगोऽश्वो वाहनमस्य रोहिताश्वः। ४२ आश्रयमाधारमश्नाति **आश्रयाशः**[22] । 'अश भोजने'(क्र्या.प.से.), अच् । "आशेरतेऽत्रेति आशय आधारस्तमश्नाति आशयाशः[23]"[अम.क्षीर.१।१।५४॥]इति तु स्वामी। ४३ बर्हिषो दर्भात्[24] ज्योतिरस्य **बर्हिर्ज्योतिः**। ४४ दहति **दहनः** । नन्द्यादित्वाल्ल्युः। ४५ बंहते वर्धते **बहुलः**। 'बहि वृद्धौ'(भ्वा.आ.से.), ['स्थावङ्कि-'(हैमोणा-

१. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-५१, पृ.७५॥ २. अम.क्षीरस्वामिकृतटीकायाम्- "शुक्रं तेजोऽस्त्यस्य शुक्रः, अर्शआदित्वादच् ।" इति दृश्यते, पृ.१८॥ ३. 'ईशुचिर् पूतीभावे' इति क्षीरतरङ्गिण्यादयः ॥ ४ '-र्थात्' इति३॥ ५. ' तीति' इति१॥ ६. 'वा-' इति५॥ ७ 'ज्वाल-' इति३॥ ८. '-त्र' इति४॥ ९. '-चीति' इति४.५॥ १०. '-तीति' इति४॥ ११. '-न्' इति१॥ १२. द्र. टीकासर्वस्वम्, भा-१, १।१।५३॥, पृ.४१॥, पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-४८, पृ.७२॥ १३. '-ह' इति३॥ १४. '-न्' इति३॥ १५. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-४९, पृ.७३॥ १६. १.२.४.५प्रतिषु नास्ति ॥ १७. द्र. रामाश्रमी१।१।५४॥, पृ.२८॥ १८. 'वसु' इति४.५॥ १९. इतोऽग्रे १प्रतौ 'रोहित' इति दृश्यते ॥ २०. '-सनः' इति५॥ २१. द्र. टीकासर्वस्वम्, भा-१, १।१।५५॥, पृ.४१॥, पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-५०, पृ.७४॥, रामाश्रमी१।१।५५॥, पृ.२८॥ २२. '-सः' इति१.३.५॥ २३. '-सः' इति३॥ २४. '-न' इति१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

४८६)इत्युलो नलुक् च]। ४६ हव्यं वहति **हव्यवाहः**। 'कर्मण्यण्'३।२।१॥ । 'हव्यपुरुषपुरीषेषु न्युट् (हव्यपुरीषपुरीष्येषु ञ्युट्)'३।२।६५॥ इति न्युटि(ञ्युटि) हव्यवाहनोऽपि । ४७ अनिति प्राणिति जनोऽनेनेति **अनलः**। 'अन प्राणने'(अ.प.से.), वृषादित्वात् कलच् । ४८ अगत्यूर्ध्वं गच्छति **अग्निः** । 'अगि रगि लगि गत्यर्थाः' (भ्वा.प.से.), 'अङ्गेर्नलोपश्च'(उणा-४९०)इति निः ॥१०-९९॥ ४९ विभैव वसु धनमस्य **विभावसुः** । ५०-५१ सप्त ऊर्ध्वाश्च अर्चिषोऽस्य **सप्तार्चिः, उदर्चिः**, उदर्चिषौ इत्यादि । पुंस्येतौ । अप्पित्तं वर्जं सर्वेऽपि पुंसि । एकपञ्चाशद् वह्नेः । शेषश्चात्र-

"वमिर्दीप्रः समन्तभुक् ।
पर्परीकः पविर्धासिः पृथुर्घसुरिराशिरः ॥
जुहुराणः पृदाकुश्च कुषाकुर्हवनो हविः ।
घृतार्चिर्नाचिकेतश्च पृष्ठो वञ्चतिरञ्जितिः ॥१॥
भुजिर्भरथः पीथः [च] स्वनिः पवनवाहनः॥"

[शेषनाममाला ४।१६९-१७१॥]इति ॥

**स्वाहाऽग्नायी प्रियाऽस्य च ।**

१ सुष्ठु आहूयन्ते देवा अनयेति **स्वाहा**। पृषोदरादिः। सुष्ठु आह ब्रूते देवान् ऋत्विगनयेति वा । स्वाहेत्यव्ययमपि । २ अग्नेर्भार्या **अग्नायी** । 'वृषाकप्यग्निकुसितकुसीदानामुदात्तः'४।१।३७॥ इति ङीष्, ऐकारान्तादेशश्च, प्रथमस्वरादिरयम्, नदीवत् । अस्य वह्नेः प्रिया प्रेयसी, तस्या द्वे ॥

**और्वः संवर्तकोऽब्ध्यग्निर्वाडवो वडवामुखः ॥११००॥**

१ उर्वस्य ऋषेरपत्यम् **और्वः** । विदादित्वादञ्, बहुत्वे लुकि उर्वाः । "वरुणभयान्मात्रा ऊर्वोर्गोपितत्वादित्यन्ये"[अम.क्षीर.१।१।५६॥]इति स्वामी । दिधीचिसूनोः पिप्पलादस्य उरूद्भवत्वादिति वा । "उर्वेण किलाऽपो(ऽयो)निजपुत्रार्थिना ऊरुमर्थितस्तत्र ज्वालामयः पुरुषो जातः, तस्य च समुद्र आधार आसीत्"[ ]इति श्रुतिः । २ संवर्तयति **संवर्तकः** । ण्वुल् । ३ अब्धेरग्निः **अब्ध्यग्निः** । ४ वडवाया अपत्यं **वाडवेयः (वाडवः)** । 'वाडवेयो वृषे'(हैमसू-६।१।८५॥)इति नियमात् 'स्त्रीभ्यो ढक्'४।१।१२०॥ इति ढक् न भवति । वडवामुखभवत्वाद् वा । 'तत्र भवः'४।३।५३॥ इत्यण् । ५ वडवाया इव मुखमस्य **वडवामुखः**। पञ्च वडवानलस्य ॥११००॥

**दवो दावो वनवह्निः**

१ दवति **दवः** । 'दु द्रु गतौ'(भ्वा.प.अ.), पचाद्यच् । "'दुन्योरनुपसर्गे'३।१।१४२॥ इति णविधौ दुनोतिरेव वृत्तौ गृहीतः । पदमञ्जर्यां [च] नयतिना साहचर्यात् सानुबन्धकस्य दुनोतेरिह ग्रहणमित्युक्तम्" [मा.धातुवृत्तिः, भ्वादिः, धातुसं-६६४]इति माधवः । २ दुनोति वनानि **दावः** । 'टुदुञ् उपतापे'(स्वा.प.अ.), 'दुन्योरनुपसर्गे'३।१।१४२॥ इति णः । ३ वनस्य वह्निः **वनवह्निः** । त्रीणि दवाग्नेः ॥

**मेघवह्निरिरम्मदः ।**

१ मेघस्य वह्निः **मेघवह्निः** । २ इरया जलेन माद्यति **इरम्मदः**, ह्रस्वादिः । 'उग्रम्पश्येरम्मदपाणिन्धमाश्च' ३।२।३७॥ इति साधुः । द्वे मेघाग्नेः ॥

**छागणस्तु करीषाग्निः**

१ छागणस्याऽयं **छागणः**। 'तस्येदम्'४।३।१२०॥ इत्यण्। २ करीषस्याऽग्निः **करीषाग्निः** । द्वे छागणाग्नेः॥

**कुकूलस्तु तुषानलः ॥११०१॥**

१ कूयते **कुकूलः**, अस्त्रियाम् । षण्ढेऽरुणः, लक्ष्यं च-"कैली कुकूलं बलात्"[ ]इति । २ तुषाणामनलः **तुषानलः** । द्वे 'तुस' अग्नेः ॥११०१॥

**सन्तापः संज्वरः**

१. 'ल्युटि' इति३॥ २. अत्र रामश्रमीटीकाकारः- "हव्यं वाहयति । ण्यन्ताद् वहेः(भ्वा.उ.अ.)ल्युः(३।१।१३४)। यत्तु स्वामी- 'हव्यं वाहयति' इति विगृह्य 'हव्यपुरीषपुरीष्येषु ञ्युट्'(३।२।६५)-इत्याह । तन्न । उदाहृतपाठस्यानुपलम्भात् । 'काव्यपुरीषपुरीष्येषु-' इति पाठस्योपलम्भात् । 'वहश्च'(३।२।६४)इत्यनुवृत्तेर्ण्यन्तादसंभवाच्च । मुकुटोऽपि-'वाहयति' इति विगृह्य 'हव्येऽनन्तःपादम्'३।२।६६॥ इति वहेर्ञ्युट्-इत्याह । तदपि न । ञ्युटश्छान्दसत्वात् । 'वहश्च'३।२।६४॥ इत्यनुवृत्तेर्ण्यन्तादसंभवाच्च ।" इति॥ ३. इतोऽग्रे ३प्रतौ 'नामानि' इति दृश्यते ॥ ४. '-रो-' इति२.४॥ ५. 'उ-' इति१.३॥ ६. 'क्षीरस्वामी' इति४॥, द्र. स्वोपज्ञटीका४।११००॥, पृ.२४५॥ ७. 'ऊ-' इति५॥ ८. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-५१, पृ.७६॥ ९. 'विधौ' इति४॥ १०. इतोऽग्रे ३.४.५प्रतिषु 'ग्रहणं' इति दृश्यते ॥ ११. मा.धातुवृत्तौ 'उक्तम्' इति दृश्यते ॥ १२. 'टुदु' इति क्षीरतरङ्गिण्यादयः ॥ १३. '-णि' इति४॥ १४. '-सा' इति३॥

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

१ सन्तपनं **सन्तापः**। ([1]'तप सन्तापे'(भ्वा.प.अ.), भावे घञ्। सन्तापयतीति पचाद्यच् वा। २ संज्वरयति **संज्वरः**। 'ज्वर रोगे'(भ्वा.प.से.), णिजन्तः, अच्। द्वे अग्नितापस्य ॥

## बाष्प ऊष्मा

१ बाधते नेत्रमिति **बाष्पः,** अस्त्रियाम्। 'खल्प-शिल्पशष्पबाष्परूपतल्पतर्पाः(-पर्पतल्पाः)'(उणा-३०८) इति साधुः । २ ऊषति रुजति **ऊष्मा,** पुंसि । '[2]ऊष रुजायाम्'(भ्वा.प.से.), '-मनिन्'(उणा-५८४)इति मनिन् । 'उष दाहे'(भ्वा.प.से.), अतो वा मनिन्, बाहुलकाद् दीर्घत्वम् । ऊष्माणौ, ऊष्माणः इत्यादि । द्वे बाष्पस्य॥

## जिह्वाः स्युरर्चिषः ।

१ अग्नेः अर्चिषः ज्वाला जिह्वाः स्युरित्यन्वयः । लेढि हव्यमाभिरिति **जिह्वाः**। 'लिह आस्वादने'(अ.उ.अ.), 'लिहेर्जिह च'(हैमोणा-५१३)इति वः, टाप् । सप्तजिह्वाः प्रागुक्ताः(श्लो-१०९९), तासामेकम् ॥

## हेतिः कीला शिखा ज्वालाऽर्चिः

१ हिनोति इतस्ततो गच्छति **हेतिः,** स्त्रियाम् । 'हि गतौ'(स्वा.प.अ.), 'ऊतियूतिजूतिसातिहेति-'३।३।९७॥ इत्यादिना साधुः । २ कीलति बध्नाति गन्तुं न ददाति **कीला,** पुंस्त्री । ''[3]वह्नेर्द्वयोर्ज्वालकीलौ''[अमरकोषः१।१।५७॥]इत्यमरः । 'कील बन्धने'(भ्वा.प.से.), 'इगुपध-'३।१।१३५॥ इति कः, घञ् वा[4], टाप् । ३ शेते **शिखा** । 'शीङ् स्वप्ने'(अ.आ.से.), 'शीङ् कित् ह्रस्वश्च[5]'(उणा-७०२)इति खः । ४ ज्वलति[6] **ज्वाला** । 'ज्वल दीप्तौ'(भ्वा.प.से.), 'ज्वलितिकसन्तेभ्यो णः'३।१।१४०॥, टाप् । ५ अर्च्यते **अर्चिः,** स्त्रीक्ली.। 'अर्च[7] पूजायाम्'(भ्वा.प.से.), 'अर्चिरुचिशुचिहुसृपिछादिछृर्दि(छर्दि)भ्यः इस् (इसिः)'(उणा-२६५)इतीस् (इतीसिः) । अर्चिषौ, अर्चिषः इत्यादि स्त्रियाम् । अर्चिषी, अर्चीषि इत्यादि क्लीबे । तृतीयस्वरान्तोऽप्यर्चिः। ''रजनिधमनिकाकिण्यर्चिशुण्ठ्यः पुरन्ध्रिः''[[8]] इति ङीष्विषये[9] वाचस्पतिः । अत्र केचिदमरकोषव्याख्यातारः प्राहुः- ''प्रक्रमाद् वह्नेर्लाभे 'वह्नेर्द्वयोः'[अमरकोषः१।१।५७॥]इति वह्नेर्नियमार्थं ज्वालादिपञ्चकमग्नेर्ज्वालायाम्, नाऽन्यस्य''[[8]]इति, तदनुचितम्, ''ज्वालाभासो[ र्]नपुंस्यर्चिः''[अमरकोषः३।३।२३०॥]इति नानार्थे द्युतिमात्रे पाठात् । ''हेतिः स्यादायुधज्वालासूर्यतेजस्सु योषिति''[मेदिनीकोशः, तान्तवर्गः, श्लो-७६]इति हेतेः सूर्यतेजसि च दर्शनादयं तु ज्वालाकीलयोर्नियमार्थमित्याहुः, तदप्यसत्, शिखाया अपि वह्न्यर्चिर्मात्रवृत्तेः, ''शिखाज्वालाबर्हिचूडालाङ्गलक्यग्रमात्रके''[मेदिनीकोशः, खान्तवर्गः, श्लो-६]इति कोषदर्शनात् । अन्ये तु पञ्चैव वाचकानि[10], अर्चिषः, वह्नेरिति तु तेजोमात्रवाचिकाऽप्यर्चिः विशेषेणाऽग्निद्युतौ वर्तते, धातुरिति गैरिक इत्येतत् सूचनार्थमिति । पञ्च वह्निज्वालायाः ॥

## झलक्का महत्यसौ ॥११०२॥

१ असौ ज्वाला महती वृद्धा, झलक्कायति **झलक्का,** कवर्गाद्यद्वयान्तष्टाबन्तः । 'निष्कतुरुष्क-'(हैमोणा-२६)इति ते साधुः । एकं महाज्वालायाः ॥११०२॥

## स्फुलिङ्गोऽग्निकणः

१ स्फूत्कारेण [11]लिङ्गति **स्फुलिङ्गः** । '[12]लिगि गत्यर्थः'(भ्वा.प.से.), अच्, पृषोदरादित्वाद् तलोपो (कारपदतकारयोर्लोपो) ह्रस्वत्वं च । ''स्फुलिं गच्छतीति खचि, स च डित्''[[13]]इति त्वन्ये । ''स्फुशब्द एव स्फुत्कारवृत्तिः''[[13]]इति तु कलिङ्गः । स्फुलति[14] सञ्चिनोतीति वा । 'स्फुल सञ्चये[15]'(तु.प.से.), तुदादिः, बाहुलकादिङ्गच्, त्रिलिङ्गः । स्फुलिङ्गजातावपि स्फुलिङ्गः, अजादिपाठाद् न ङीष्[16] । कन्दरावत् । अग्नेः कणोऽग्निकणः । एकं 'तिणखा' इति ख्यातस्य ॥

## अलातज्वालोल्का

१ अलति दीप्त्या मण्डयति[17] [18]अलातम् । अलन्ति वारयन्त्येतद् वा। 'अलङ्[19] भूषणादौ'(भ्वा.प.से.), बाहुलकादातच्। अलातस्य '[20]ऊंबाड' इति ख्यातस्य ज्वाला

---

१. कोष्ठान्तर्गतपाठः १.२.३.५प्रतिषु नास्ति ॥ २. 'उ-' इति३॥ ३. 'वह्नि-' इति३॥ ४. ५प्रतौ नास्ति ॥ ५. 'शीङो ह्रस्वश्च' इत्युणादिगणसूत्रम्॥ ६. '-लिति' इति२॥ ७. 'अर्चि' इति५॥ ८. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-५२, पृ.७६-७७॥ ९. 'ङीषि' इति३॥ १०. 'वाचि-' इति१.२.५॥ ११. 'ल-' इति२.३.४.५॥ १२. 'ल-' इति३.४॥ १३. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-५२, पृ.७७॥ १४. '-लन्ति' इति४, 'स्फुलिङ्गति' इति५॥ १५. 'सञ्चलनेये' इति१, 'चलने' इति स्वामी, 'सञ्चलने' इति मैत्रेयसायणौ ॥ १६. 'ङीप्' इति३॥ १७. 'मण्डति' इति३॥ १८. 'आ-' इति४॥ १९. क्षीरतरङ्गिण्यामस्य धातोष्टिप्पणी द्रष्टव्या, टि-७, पृ.८१॥ २०. 'उं-' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अलातज्वाला, ओलति **उल्का**। 'उल दाहे'( ), सौत्रः। उष्यति वा। 'शकवल्कोल्काः'(उणा-३२२)इति साधुः। पञ्चमस्वरादिः। वह्नेर्निर्गतत्रुटितज्वालेयमित्यर्थः। एकं 'उंबाडनी झाल[1]' इति ख्यातस्य[2]॥

**अलातमुल्मुकम्।**

१ अलति **अलातम्**। २ ज्वलति **उल्मुकम्**। '''उष दाहे'(भ्वा.प.से.)इत्यस्य मुके निपातनादुल्मुकम्''[ ]इत्युज्ज्वलदत्तः[3]। अर्धदग्धं[4] काष्ठं। द्वे '[5]ऊंबाड' इति ख्यातस्य॥

**धूमः स्याद् वायुवाहोऽग्निवाहो दहनकेतनम् ॥११०३॥**
**अम्भस्सूः करमालश्च स्तरीर्जीमूतवाह्यपि।**

१ धुनाति **धूमः**। 'धूञ् कम्पने'(क्र्या.उ.वे.), 'इषियुधी[न्]धि-'(उणा-१४२)इति मक्। २ वायुना उह्यते **वायुवाहः**। 'वह प्रापणे'(भ्वा.उ.अ.), कर्मणि घञ्। ३ एवम् **अग्निवाहः**। ४ दहनस्य केतनं ध्वजो **दहनकेतनम्** ॥११०३॥ ५ अम्भः सूते धूमजत्वात् मेघानामिति **अम्भस्सूः**। 'षूङ् प्रसवे[11]'(अ.आ.से.), 'सत्सूद्विष-'३।२।६१॥ इति क्विप्। ६ कीर्यते वायुना **करमालः**। पृषोदरादिः। ७ स्तृणोत्याच्छादयति खं **स्तरीः**, स्त्रियाम्। 'स्तृञ् आच्छादने'(स्वा.उ.अ.), 'अवितृस्तृतन्त्रिभ्य ईः'(उणा-४३८)। ८ जीमूतं वहति **जीमूतवाही**। ग्रहादित्वाण्णिनिः। अष्टौ धूमस्य॥

**तडिदैरावती विद्युच्चला शम्पाऽचिरप्रभा ॥११०४॥**
**आकालिकी शतह्रदा चञ्चला चपलाऽशनिः।**
**सौदामनी क्षणिका च ह्लादिनी जलवालिका ॥११०५॥**

१ ताडयति **तडित्**, स्त्रियाम्। 'तड आघाते'(चु.प.से.), 'ताडेर्णिलुक् च'(उणा-९८)इतीत्[12] (इतीतिः)। २ इरावतो मेघस्येयम् **ऐरावती**। इरावति समुद्रे भवेति वा। मेघानां राजा ऐरावतः, तस्येयं वा। ३ विद्योतते **विद्युत्**, स्त्रियाम्। 'द्युत दीप्तौ'(भ्वा.आ.से.), 'भ्राजभास[13]-'३।२।१७७॥ इति क्विप्। ४ चलति **चला**, अच्। ५ भीषणत्वात् शं कल्याणं पिबति **शम्पा**। 'पा पाने'(भ्वा.प.अ.), 'आतः-'३।२।३॥ इति कः। शाम्यतीति वा। 'शमु[14] उपशमे'(दि.प.से.), बाहुलकात् पः। शं सुखं नेत्रयोः पिबतीति वा, प्राग्वत् कः। सं पिबति नेत्रयोर्जलमिति सम्पा दन्त्यादिरपि। शम्बेति प्राच्याः। ६ न चिरं प्रभाऽस्या, **अचिरप्रभा**। ''क्षण[15]प्रभा''[अमरकोषः १।३।९॥]इत्यमरः ॥११०४॥ ७ आकालं यावद् भवति **आकालिकी**। बाहुलकाट्ठकि, 'टिड्ढाणञ्-'४।१।१५॥ इति ङीप्[16]। ८ शतह्रदोऽब्धिरस्त्यस्याः **शतह्रदा**। वाडवाग्निज्योतिष्ट्वात् अर्शआदित्वादच्[17]। शतधा ह्लादत इति पृषोदरादिर्वा। ९ चञ्चनं चञ्चः। 'चञ्चु गतौ[18]'(भ्वा.प.से.), घञर्थे कः। चञ्चं लाति **चञ्चला**। १० चोपति **चपला**। 'चुप मन्दायां गतौ'(भ्वा.प.से.), 'चुपेरच्चो(च्चो)पधायाः'(उणा-१०८)इति कलच्। ११ अस्थिरत्वादश्नुते तेजसा कृत्वेति **अशनिः**, अक्लीबे। 'अशूङ्[19] व्याप्तौ'(स्वा.आ.वे.), '-अशव(-अश्यवि-)तृभ्योऽनिः'(उणा-२५९) इत्यनिः। १२ ''श्वेतद्विपः सुदामा''[त्रिकाण्डशेषः१।१।६१॥]इति त्रिकाण्डशेषे ऐरावतपर्यायौ, तेन [20]एकदिक् **सौदामि(म)नी**। अणि[21]। '''अन्'६।४।६७॥इति प्रकृतिभावाट्टिलोपाल्लोपौ न भवतः[22]''[काशिकावृत्तिः, न्यासः ४।३।११२॥]इति न्यासः[23]। ''सौदामनी सुदाम्नाऽद्रिणा एकदिक्''[अम.क्षीर.१।२।१०॥]इति तु स्वामी। ''सुदाम्नीत्वशनिर्विद्युदिति[24] सकोषे (स्वकोषे) सौदामनीत्यसाधुः''[[23]]इति हट्टचन्द्रः। सौदामिनीति मध्येकारवानपपाठः। तथा च हरिप्रबोधे-

''खेऽभ्रं जगाम काञ्चनसरसमसौदामनीलातधामधाम्नाम्।
कुवलयमिव हि सरजमसौदामिनीलधामास्तम् ॥१॥

१. 'वह्नि-' इति१.२.४.५॥ २. '-लो-' इति३॥ ३. 'उ-' इति१, 'ओ-' इति३, 'ऊं-' इति४॥ ४ '-डीझाल' इति३॥ ५. 'इत्याख्यस्य' इति२.५॥ ६. तुलनीयोऽमरकोषः२।९।३०॥ ७ 'इति चोज्ज्व-' इति४॥ ८. '-श्रे' इति१, '-श्च-' इति४.५॥ ९. '-ष्ठे' इति१॥ १०. 'ऊ-' इति१, 'अं-' इति३॥ ११. 'प्राणिगर्भविमोचने' इति क्षीरतरङ्गिण्यादयः॥ १२. '-न्' इति१, '-ञ्' इति३.४.५॥ १३. 'भ्रासभ्राज-' इति३॥ १४. 'शम' इति१.२.३॥ १५. 'क्षणिक-' इति१॥ १६. 'ङीष्' इति१.४.५॥ १७. '-आद्यचि' इति४॥ १८. 'गतौ मन्दायां' इति३॥ १९. क्षीरतरङ्गिण्यादौ ङकारानुबन्धो न दृश्यते॥ २०. 'एका' इति३॥ २१. 'तेनैकदिक्'४।३।११२॥ इत्यनेन॥ २२. '-टिलोपाद्यभावः' इति न्यासे, भा-३, पृ.६९७॥ २३. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-७७, पृ.१०२॥ २४. इतोऽग्रे १.४.५प्रतिषु ''स्वामी सुसाम्नी त्वशनिर्विद्युदिति'' इति दृश्यते॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

([1]"खेऽभ्रं जगाम काञ्चन सरसमसौदामनीलताधामास्तम् । कुवलयमिव सरजस्सरसमसौ दाम नीलताधामास्तम् ॥१॥") इति यमकितम् । **१३** क्षणोऽस्त्यस्याः **क्षणिका** । 'अत इनिठनौ'५।२।११५॥ इति ठन्। **१४** ह्रदतेऽवश्यं **ह्रादिनी**। 'ह्राद अव्यक्ते शब्दे'(भ्वा.आ.से.), आवश्यके णिनिः, 'ऋन्नेभ्यो ङीप्[2]'४।१।५॥ । **१५** जलेन वलति प्राणिति **जलवालिका** । 'वल प्राणने'(भ्वा.प.से.), ण्वुल्[3]। पञ्चदश विद्युतः ॥११०५॥

॥ समाप्तोऽयं तेजस्कायः ॥

# ॥ एकेन्द्रियेषु वायुकायः ॥

अथ वायुकायमाह–

**वायुः[1] समीर[2]-समिरौ[3] पवना[4]ऽऽशुगौ[5] नभः-**
**श्वासो[6] नभस्वद[7]निल[8]श्वसनाः[9] समीरणः[10] ।**
**वातो[11]ऽहिकान्त[12]पवमान[13]मरुत्[14]प्रकम्पनाः[15]**
**[4]कम्पाक्[16]नित्यगति[17]गन्धवह[18]प्रभञ्जनाः[19] ॥११०६॥**
**मातरिश्वा[20] जगत्प्राणः[21] पृषदश्वो[22] महाबलः[23]**
**मारुतः[24] स्पर्शनो[25] दैत्यदेवः[26]**

**१** वाति **वायुः**। 'वा गतिगन्धनयोः'(अ.प.अ.), 'कृवापाजिमि[5]-'(उणा-१)इत्युण्, 'आतो युक्-'७।३।३३॥ । वायतीति वा । 'पै ओवै[6] शोषणे'(भ्वा.प.अ.), 'कृवापा-'(उणा-१)इत्युण् । **२** सम्यगीरयति[7] **समीरः** । 'ईर गतिकम्पनयोः'( ), पचाद्यच् । "सम्यगीरयति प्रेरयति" [[8]]इति[9] कौमुदी । **३** एकदेश[10]विकृतस्याऽनन्यत्वात् **समिरः** । समेति वा । 'इण् गतौ'(अ.प.अ.), बाहुलकाद् रक्, कित्त्वाद् गुणाभावः । **४** पुनाति **पवनः**। 'पूञ् पवने'(क्र्या.उ.से.), 'बहुलमन्यत्रापि'(उणा-२३६)इति युच् । **५** आशु शीघ्रं गच्छति[11] **आशुगः** । 'गम्लृ गतौ'(भ्वा.प.अ.), 'अन्यत्रापि-'३।२।१०१॥इति डः । **६** नभसः श्वास इव **नभःश्वासः,** तालव्यदन्त्यौष्ठ्यमध्यः। **७** नभोऽस्त्यस्य **नभस्वान्** । 'तदस्यास्ति-'५।२।९४॥इति मतुप्, 'तसौ मत्वर्थे'१।४।१९॥ इति भसंज्ञकत्वान्न रुत्वम् । वायुर्हि नभःस्वामी, तथा च वायुपुराणं[12] "शब्दाकाशबलानां च [13]वायुरीशस्तथाकृतः"[[14]]इति । **८** अनन्त्यनेनेति **अनिलः**। 'अन प्राणने'(अ.प.से.), 'सलिकल्यनि-'(उणा-५४)इतीलच्। न निलतीति वा । **९** श्वसन्त्यनेन **श्वसनः,** तालव्यदन्त्योष्ठ्यादिः दन्त्यसमध्यः । 'श्वस प्राणने'(अ.प.से.), नन्द्यादित्वाल्ल्युः । **१०** सम्यगीरयति **समीरणः** । 'ईर गतिकम्पनयोः[15]'(चु.उ.से.), 'चलनशब्दार्थात्-'३।२।१४८॥ इति युच् । सम्यगीर्ते वा । 'ईर गतौ'(अ.आ.से.), 'अनुदात्तेतः-'३।२।१४९॥ इति युच् । "ण्यन्तान्नन्द्यादित्वेन ल्युः"[ ]इत्यात्रेयः[16] । **११** वाति **वातः** । 'वा[17] गत्यादौ'(अ.प.अ.), 'हसिमृग्रिण्वामिदमि[18]तमिलूपूधू(धु) र्विभ्यस्तन्'(उणा-३६६) । बाहुलकात् 'वसेस्तिः'(उणा-३१९)इति तिप्रत्यये वातिरपि ।

"वायुर्मरुत्वान् श्वसनः पवनो मरुतोऽनिलः ।
नभस्वान् क्षिपणुर्वातिः शुषिरो नघटो[19] वहः ॥"[[20]]इति

साहसाङ्कः । **१२** अहिभिः सर्पैः काम्यते **अहिकान्तः** । **१३** पवतेऽसौ **पवमानः** । 'पूङ्[21] पवने'(भ्वा.आ.से.), 'पूङ्यजोः शानन्[22]'३।२।१२८॥, 'आने मुक्'७।२।८२॥इति मुक् । **१४** म्रियतेऽनेन [23]क्रुद्धेन **मरुत्** । 'मुङ् प्राणत्यागे'(तु.आ.अ.), 'मृग्रोरुतिः'(उणा-९४)इत्युतिः। मरुत इत्यदन्तोऽपि । "मारुतः स्पर्शनः प्राणः समीरो मरुतो मरुत्" [[24]]इति विक्रमादित्यः । "मरुतेऽपि हलन्तता"[ ] इति शब्दप्रभेदः । **१५** प्रकम्पयति[25] **प्रकम्पनः** । 'कपि चलने'(भ्वा.आ.से.), णिजन्तः, 'ण्यासश्रन्थ-'३।३।१०७॥

१. कोष्ठान्तर्गतपाठः पदचन्द्रिकासम्मतः, "खेऽन्तं जगाम काञ्चनसरसमसौदामनीलताधामास्तम् । कुवलयमिव सरजस्सरसमसौदामनीलताधामास्तम्॥" इति टीकासर्वस्वे, भा-१, १।३।८॥, पृ.५६॥ २. 'ङीष्' इति१॥ ३. '-लि' इति३.४॥ ४ 'कम्पाक-' इति मूलम्॥ ५. '-जिमि-' इति १.२.४.५प्रतिषु नास्ति ॥ ६. 'ओपै वै' इति१.२.४.५॥ ७ '-तीति' इति३॥ ८. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो ५७, पृ.८२॥ ९. इतोऽग्रे ३प्रतौ 'तु' इति दृश्यते॥ १०. 'एका-' इति२॥ ११. '-तीति' इति४॥ १२. '-णे' इति२.३॥ १३. 'वायुशरीर ' इति५॥ १४. द्र. टीकासर्वस्वम्, भाग-१, १।१।६२॥, पृ.४६॥, पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-५८, पृ.८३॥ १५. चुरादेः क्षेपार्थकेरथानुर्युक्तः॥ १६. द्र. माधवीयधातुवृत्तिः, अदादिः, धातुसं ११, पृ.३२९॥ १७. 'वी' इति३.४॥ १८. '-तमि-' इत्युणादिगणसूत्रे नास्ति ॥ १९. 'नपटरो' इति१॥ २०. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-५८, पृ.८२॥, रामाश्रमी १।१।६२॥, पृ.३२॥ २१. '-ञ्' इति३॥ २२. 'न्' इति१॥ २३. 'रु-' इति३॥ २४ ' तः' इति५॥ २५. '-ते' इति१.३॥, 'निगरणचलनार्थेभ्यश्च'१।३।८७॥ इति ण्यन्तात् परस्मैपदम् ॥

इति युच् । १६ कम्पोऽङ्कश्चिह्नमस्य **कम्पाङ्कः**। १७ नित्यं गतिरस्य **नित्यगतिः** । सदागतिरपि । १८ गन्धस्य वहो **गन्धवहः** । 'अकारादनुपपदात् सोपपदो भवति विप्रतिषेधेन'(वा-३।२।१॥)इत्यस्य [1]प्रायिकत्वाद् पचाद्यचि 'वह' इति व्युत्पाद्य[2] पश्चाद् गन्धेन सह समासः । कर्मण्यणि 'गन्धवाहः''[अमरकोषः१।१।६२॥]अपीत्यमरः । १९ प्रकृष्टमुच्छ्रितं भनक्ति **प्रभञ्जनः**। 'भञ्जो आमर्दने'(रु.प.अ.), नन्द्यादित्वाल्ल्युः ॥११०६॥ २० मातरि अन्तरिक्षे श्वयति **मातरिश्वा**। मातरीति सप्तम्यन्तप्रतिरूपकमव्ययम्। 'टुओश्वि गतिवृद्ध्योः'(भ्वा.प.से.), 'श्वन्नुक्षन्पूषन्प्लीहन्क्लेदन्स्नेहन्मूर्धन्मज्जन्नर्यमन्विश्वप्सन्परिज्मन्मातरिश्वन्मघवन्'(उणा-१५७) इति साधुः। मातरिश्वानौ, मातरिश्वानः इत्यादि। २१ जगतां प्राणो **जगत्प्राणः** । ''मारुतः श्वसनः प्राणः समीरो मरुतो जगत्''[ ][3]इति संसारावर्ताद् जगदिति प्राण इति पृथगपि[4]। तत्र 'द्युतिगमिजुहोतीनां द्वे च'(वा-३।२।१७८॥)इति क्विपि[5] द्वित्वे, 'गमः क्वौ'६।४।४०॥इति म्लोपे[6] तुकि जगत्, जगतौ, जगतः इत्यादि, तदा 'वर्तमाने पृषद्बृह[न्मह]ज्जगच्छतृवत्'(उणा-२४१)इति नास्ति[7] । २२ पृषन्मृगविशेषोऽश्वोऽस्य **पृषदश्वः** । ''पृषन्त्यम्बुकणा अश्वा अस्य'' [ ][8]इत्येके । पृषन्मृगविशेषः, स एव पिङ्गलोऽश्वोऽस्येति वा, ''वायुर्बभ्रूंस्तथावृणोत्''[ ]इत्यागमात् । ''पृषन्मृग एवाऽश्वोऽस्य''[अम.क्षीर.१।१।६२॥]इति स्वामी[9] । २३ महद् बलमस्य **महाबलः** । २४ मरुदेव **मारुतः** । 'प्रज्ञादिभ्यश्च'५।४।३८॥इत्यण् । २५ स्पृशति **स्पर्शनः** । 'स्पृश संस्पर्शने'(तु.प.अ.), नन्द्यादित्वाल्ल्युः । '' 'बहुलमन्यत्राऽपि'(उणा-२३६)इत्यौणादिको युच्''[टीकासर्वस्वम् १।१।६१॥]इति सर्वानन्दः[10] । २६ दैत्यानां देवो **दैत्यदेवः** । सर्वेऽपि पुंसि । षड्विंशतिर्वायोः । शेषश्चात्र-

''वायौ सुरालयः प्राणः सम्भृतो जलभूषणः ।
शुचिर्वहो लोलघटः[11] पश्चिमोत्तरदिक्पतिः ॥१॥
अङ्कतिः क्षिपणुर्मर्को[12] ध्वजप्रहरणश्चलः ।
शीतलो जलकान्तारो मेघारिः सृमरोऽपि च ॥२॥''
[शेषनाममाला४।१७१-१७३॥] ॥

## झञ्झा स वृष्टियुक् ॥११०७॥

१ झमति **झञ्झा,** स्त्रीलिङ्गः, चवर्गचतुर्थद्वयः। 'झमु अदने'(भ्वा.प.से.), 'झमेर्ञ्झः'(हैमोणा-१३७)इति ञ्झः । स वायुः वृष्टियुग् वर्षेण सहितः। एकं सवृष्टिवायोः ॥११०७॥

## प्राणो नासाग्रहृन्नाभिपादाङ्गुष्ठान्तगोचरः ।

१ प्रकर्षेण आनयति **प्राणः** । 'अन प्राणने'(अ.प.से.), 'अन्येभ्योऽपि-'३।२।१०१॥ इति डः । प्रसरणेन[13] अनित्यनेनेति वा, घञन्तः । नासाग्रं हृद् हृदयं नाभिः पादाङ्गुष्ठान्तश्च गोचरो यस्य स तथा । एकं नासाग्रहृदयनाभिपादाङ्गुष्ठान्तर्वर्तिवायोः ॥

## अपानः पवनो मन्थापृष्ठपृष्ठान्तपार्ष्णिगः ॥११०८।

१ मूत्रपुरीषगर्भादीनपानयति **अपानः** । अपसरणेन अनित्यनेनेति वा। 'अन प्राणने'(अ.प.से.), करणे घञ् । मन्थे ग्रीवापश्चाद्भागौ१, पृष्ठं ग्रीवाधोभागः२, पृष्ठान्तः गुदः३, पार्ष्णी पादपश्चाद्भागौ४, एषु गच्छति यः स तथा । ईदृशः पवनो वात अपान इत्यन्वयः । ग्रीवापश्चाद्भाग१पृष्ठ२गुद३पार्ष्णि४वर्तिवायोरेकम् ॥११०८॥

## समानः सन्धिहृन्नाभिषु

१ अशित[14]पीताहारपरिणति[15]भेदं रसं तत्र तत्र स्थाने समनुरूपमासमन्ततो नयति **समानः,** पुंक्ली. । 'णीञ् प्रापणे'(भ्वा.उ.अ.), बाहुलकाड्डः । समन्तादनित्यनेनेति वा, घञन्तः[16] । सन्धयश्च सर्वसन्धानानि हृदयं च नाभिश्चेति द्वन्द्वः, तेषु अवस्थानमस्येति । एकं सर्वसन्धि१हृदय२नाभि३वर्तिवायोः ॥

## उदानो हृच्छिरोऽन्तरे ।

१ रसादीनूर्ध्वं समन्ततो नयति **उदानः**। ऊर्ध्वे-

---

१. 'प्रादिपदिक-' इति१॥ २. '-पादयति य' इति१॥ ३. द्र. टीकासर्वस्वम्, भा-१, १।१।६२॥, पृ.४६॥, पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-५७, पृ.८२-८३॥ ४. ' गिति' इति१.३.४.५॥ ५. '-प्' इति१॥ ६. 'मलो-' इति१.४॥ ७. यदा 'वर्तमाने पृषद्-'(उणा-२४१)इत्यतिः, तदा 'उगिदचाम्-'७।१।७०॥ इति नुम्, जगन्, जगन्तौ इति ॥ ८. द्र. अम.क्षीर.१।१।६२॥, पृ.१९॥, स्वोपज्ञटीका४।११०७॥, पृ.२४७॥ ९. अम.क्षीरस्वामिकृतटीकायाम्- ''पृषन्मृगविशेषोश्वोस्य पृषदश्वः'' इति दृश्यते, पृ.१९॥ १०. '-णन्दः' इति३॥, सर्वानन्दकृतटीकायाम्- 'औणादिको' इति न दृश्यते, पृ.४६॥, द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-५६, पृ.८२॥ ११. '-घण्टः' इति१, शेषनाममालास्वोपज्ञटीकयोश्च, '-ट्टः' इति३.४॥ १२. 'अन्तकिः क्षिपणो मर्को' इति२.४.५॥ १३. '-रेण' इति१॥ १४. 'असि-' इति१.२.३॥ १५. ' त-' इति१.५॥ १६. '-ज्यन्तः' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नाऽनेन अनिति वा, घञन्तः[1] । हृच्छिरोऽन्तरे इति । हृदये शिरसि अनयोरन्तरे च कण्ठे तालुनि भ्रूमध्ये स्थानमस्येति[2] । एकं हृच्छिरोऽन्तर्वर्तिवायोः[3] ॥

**सर्वत्वग्वृत्तिको व्यानः**

१ सर्वस्यां त्वचि वृत्तिरस्येति सर्वत्वग्वृत्तिकः । व्यानयति व्याप्नोति **व्यानः** । व्याप्त्याऽनित्यनेन[4] वा, घञन्तः । एकं सर्वत्वग्वृत्तिवायोः ।

उपसंहारमाह–

**इत्यङ्गे पञ्च वायवः ॥११०९॥**

इति समाप्तौ, अङ्गे शरीरे प्राणादयः पञ्च वायवः स्युः । यदुक्तम्–

''हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः ।
उदानः कण्ठदेशस्थो व्यानः सर्वशरीरगः ॥१॥''[5][ ]इति ॥११०९॥

॥ समाप्तोऽयं वायुकायः ॥

# ॥ एकेन्द्रियेषु वनस्पतिकायः ॥

अथ वनस्पतिकायमाह–

**अरण्यमटवी सत्त्रं वार्क्ष च गहनं झषः ।**
**कान्तारं विपिनं कक्षः स्यात् षण्डं काननं वनम् ॥१११०॥**
**दवो दावः**

१ अर्यते गम्यते वनत्वेन श्वापदैरिदमिति **अरण्यम्**, अस्त्रियाम् । 'ऋ गतौ'(भ्वा.प.से.), 'अर्तेर्नित्'(उणा-३८२)इत्यन्यः[6] प्रत्ययः । इय्रति भ्राम्यन्त्यत्र[7] मृगादयो वा । प्राक् सूत्रेणैवाऽन्यः । महत्त्वविवक्षायां तु अरण्यानी । 'हिमारण्ययोर्महत्त्वे'(वा-४।१।४९॥)इति ङीषानुकौ[9] । २ अटन्त्यस्यामटविः । 'अट गतौ'(भ्वा.प.से.), 'पद्यटविभ्यामविः' ( )इत्यविः, 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि[10] **अटवी** । यद्वा अटन्त्यटाः, पचाद्यच् । अटाः वयः पक्षिणोऽत्रेत्यटविः । प्राग्वत् ङीष्[11] । संज्ञाशब्दत्वाद्[12] 'अनुपसर्जनात्'४।१।१४॥ इति स्त्रीप्रत्यय[13]निषेधः । ३ सीदन्त्यत्रेति **सत्त्रम्** । 'षद्लृ विशरणादौ'(भ्वा.तु.प.अ.), 'गुधृवी-'(उणा-६०६)इति त्रन् । ४ वृक्षाः सन्त्यत्र **वार्क्षम्** । ज्योत्स्नादित्वादण् । ५ गाह्यते मृगयादिभिरिति **गहनम्** । 'गाहू विलोडने'(भ्वा.आ.से.), 'बहुलमन्यत्रापि'(उणा-२३६)इति ल्युटि[14](युचि), पृषोदरादित्वाद्[15] ह्रस्वत्वम् । ६ झषति हिनस्ति[16] **झषः** । 'झष[17] हिंसायाम्'(भ्वा.प.से.), पचाद्यचि[18] । ७ काम्यते **कान्तारम्**, अस्त्रियाम् । 'कमु कान्तौ'(भ्वा.आ.से.), 'द्वारशृङ्गार-'(हैमोणा-४११)इत्यारे निपात्यते । 'तुषारादयश्च'(उणा-४१९)इत्यारनि वा । ८ वेपन्ते भयेनाऽत्र **विपिनम्** । 'टुवेपृ कम्पने'(भ्वा.प.से.), 'वेपितुह्योर्ह्रस्वश्च'(उणा-२१०)इतीनन् । ९ कषति **कक्षः** । 'कष हिंसायाम्'(भ्वा.प.से.), 'मावावदि-'(हैमोणा-५६४)इति सः । १० सन्यते सेव्यते **षण्डम्**, अस्त्रियाम् । 'षन (षण) संभक्तौ'(भ्वा.प.से.), 'ञमन्ताड्डः'(उणा-१११), बाहुलकात्र सत्वम् । सनोति ददाति सुखमिति । 'षणु दाने'(क्र्या.उ.से.), 'ञमन्ताड्डः'(उणा-१११), बाहुलकाद् 'धात्वादेः षः सः'६।१।६४॥इति सत्वं न षण्डः । ''षण्डः स्मृतौ[19] बलीवर्दे षण्डं तु कानने भवेत्''[20][ ]इति मूर्धन्यादावर्जयः[21] । 'शडि रुजायां सन्धाने (सङ्घाते) च'(भ्वा.आ.से.)इति, अतो घञि 'शण्ड' इति तालव्यादिरपि ।

''तालव्यो मूर्धन्योऽब्जादिकदम्बे च षण्डशब्दोऽयम् ।
मूर्धन्य एव वृषभे पूर्वाचार्यैर्विनिर्दिष्टः[22] ॥१॥''[21][ ]॥

इत्यूष्मविवेकः । ११ कनति दीप्यते[23] कानयति वा **काननम्** । 'कनी दीप्तिकान्तिगतिषु'(भ्वा.प.से.), नन्द्यादित्वाल्ल्युः[24], बाहुल्याद् दीर्घत्वम् । केन जलेन अननं जीवनमस्येति वा । १२ वनति संभजति[25] जनानिति **वनम्** । 'वन षण सम्भक्तौ[26]'(भ्वा.प.से.), 'ष्टन[27] वन शब्दे[28]'(भ्वा.प.से.) वा अच् । वन्यते सेव्यते वा । घञर्थे[29] कः । गौरादिङीषि[30]

१. '-न्ताड्डः' इति३, '-न्ता' इति४.५॥ २. इतोऽग्रे १प्रतौ 'वा' इति दृश्यते ॥ ३. '-ऽन्तव-' इति१.३॥ ४. '-नेति' इति१.४॥ ५. श्लोकोऽयममरकोषे प्रक्षिप्तः, २७-२८, पृ.३२॥ ६. '-न्यप्र-' इति१॥ ७. 'भ्राम-' इति५॥ ८. 'ङीबा-' इति३॥ ९. '-षौ' इति४॥ १०. '-ष्' इति१, '-पि' इति३॥ ११. '-प्' इति३॥ १२. '-ब्दकत्वाद्' इति१॥ १३. '-या-' इति१.२॥ १४. '-टिः' इति३॥ १५. '-दिः' इति३॥ १६. '-स्तीति' इति४॥ १७. इतोऽग्रे ४प्रतौ 'झष' इति, ५प्रतौ 'झिष' इति दृश्यते॥, 'कष-' इत्यादिदण्डकोऽयं धातुः ॥ १८. '-च्' इति१.२॥ १९. '-तौ' इति४.५॥ २०. द्र. टीकासर्वस्वम्, भा-१, १।१०।४२॥, पृ.२०६॥ २१. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२७०, पृ.३२२॥, रामाश्रमी१।१०।४२॥, पृ.१३८॥ २२. '-ष्टत्वात्' इति४.५॥ २३. '-ति' इति५॥ २४. '-दिल्युः' इति१॥ २५. '-ते' इति१.२॥ २६. 'भक्तौ' इति३, क्षीरतरङ्गिणी च॥ २७. 'षन' इति१॥ २८. 'स्तन ध्वन शब्दे' इति क्षीरतरङ्गिणी ॥ २९. '-ज्य-' इति५॥ ३०. '-पि' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वनी । ''स्ववनी संप्रवदत्यिकाऽपि का''[नैषधीयचरितम्, सर्गः-२, श्लो-४५]इति श्रीहर्षः । अमरक्षीरस्वामिनौ तु ''वृक्षबहुलं स्थानम्''[अम.क्षीर.२।४।१॥]इति व्याख्याय काननवनयोररण्यान्येकार्थतामाहतुः ॥१११०॥ १३ दुनोति जनानिति **दवः** । 'दुञ्[2] उपतापे'(स्वा.प.से.), 'दुन्योरनुपसर्गे' ३।१।१४२॥ इत्यप्[3] । १४ ज्वलादित्वाण्णे[4] **दावः** । चतुर्दश वनस्य । 'वेडि' इति भाषा ॥

### प्रस्तारस्तु तृणाटव्यां झषोऽपि च ।

१ प्रस्तीर्यते[5] **प्रस्तारः** । 'स्तृञ् आच्छादने'(स्वा. उ.अ.), 'प्रे स्त्रोऽयज्ञे'३।३।३२॥ इति घञ् । २ तृणबहुलाऽटवी **तृणाटवी,** तस्याम् । ३ झषति हिनस्ति **झषः** । अच् । त्रीणि तृणबहुलाटव्याः ॥

### अपोपाभ्यां वनं वेलमारामः कृत्रिमे वने ॥११११॥

१-२ अपोपाभ्याग्रे[6] वनम्, अपावृतं वनम् **अपवनम्**। उप समीपे वनम् **उपवनम्** । ३ वेलति **वेलम्** । 'वेलृ गतौ'(भ्वा.प.से.), अच् । ४ आरमन्त्यत्र **आरामः** । 'रमु क्रीडायाम्'(भ्वा.आ.अ.), 'हलश्च'३।३।१२१॥ इति घञ् । कृत्रिमे उत्पादिते वने वृक्षसमूहे । चत्वारि बाग[7]-वाडीत्यादिख्यातायाः ॥११११॥

### निष्कुटस्तु गृहारामः

१ कुटाद् गृहान्निर्गतः **निष्कुटः** । गृहस्याऽऽरामो **गृहारामः** । एकं गृहवाटिकायाः ॥

### बाह्यारामस्तु पौरकः ।

१ पुरस्याऽयं पौरः। स्वार्थे कनि **पौरकः** । एकं नगरबाह्यारामस्य ॥

### आक्रीडः पुरुद्यानम्

१ आक्रीडन्त्यत्र **आक्रीडः,** पुंक्ली.। अमरमालायां तु[8] क्लीबत्वमेव, यथा ''ज्ञेयमाक्रीडमुद्यानम्''[[9]]इति । २ उद्यान्त्यत्र **उद्यानम्** । 'या प्रापणे'(अ.प.अ.), ल्युट्, अस्त्रीलिङ्गः । पुष्पादिमद्वृक्षसङ्कुलमुत्सवादौ बहुजनभोग्यं राज्ञा[10] लोकैः सह साधारणं वनम्, तन्नाम्नी द्वे ॥

### राज्ञां त्वन्तःपुरोचितम् ॥१११२॥

### तदेव प्रमदवनम्

१ तदेवोद्यानं राज्ञामन्तःपुरयुक्तं विज्ञेयं **प्रमदवनम्**। प्रमदानां वनमिति विग्रहे 'ङ्यापोः संज्ञाछन्दसोर्बहुलम्'६।३।६३॥इति ह्रस्वः। [ह्रस्वाभावोऽपि]। ''अन्तःप्रविष्टः प्रमदावनम्''[भट्टिकाव्यम्, सर्गः-९, श्लो-८२]इति भट्टः । अन्तःपुरेण सह गृहसमीपवनं[11] यत्र राजा रमते, तस्यैकं प्रमदवनमिति ॥१११२॥

### अमात्यादेस्तु निष्कुटे । वाटी पुष्पाद् वृक्षाच्चासौ

१ अमात्यादेः आदिशब्दाद् गणिकासार्थवाहादेर्निष्कुटे गृहारामे **वाटी,** त्रिलिङ्गः । ''वाटस्तु वर्त्मनि वृत्तौ वाटी स्याद् गृहनिष्कुटे''[विश्वलोचनकोशः, टान्तवर्गः, श्लो-२७]इति श्रीधरः । २-३ पुष्पात् पुष्पशब्दात्, वृक्षाद् वृक्षशब्दाच्च पुनरसौ वाटीशब्दो योज्यते, तेन **पुष्पवाटी, वृक्षवाटी** । ''अन्येषां[12] विभववतां च पुष्पवाटी''[हलायुधकोशः२।२१३॥]इति हलायुधः । महतां[13]-वेश्याप्रभृति[14]वाडी[15]नामानि त्रीणि ॥

### क्षुद्रारामः प्रसीदिका ॥१११३॥

१ क्षुद्रश्चासावारामश्च क्षुद्रारामः । प्रसीदति मनोऽस्यां **प्रसीदिका,** पृषोदरादिः । एकं लघुवाटिकायाः ॥१११३॥

### वृक्षोऽगः शिखरी च शाखिफलदावद्रिर्हरिद्रुर्द्रुमो जर्णो[16] द्रुर्विटपी कुठः क्षितिरुहः कारस्करो विष्टरः ।

---

१. '-न्यै-' इति१.२॥ २. 'दुदु' इति क्षीरतरङ्गिण्यादयः ॥ ३. ''दुनोतीति दावः । नीसाहचर्यात् सानुबन्धकाद् दुनोतेरेव णः । दवतेस्तु पचाद्यच्। दवः।'' इति 'दुन्योरनुपसर्गे'३।१।१४२॥इत्यत्र सिद्धान्तकौमुदी, कृत्प्रक्रिया, पृ.५६५॥, अथ चेदं विचारणीयम् ॥ ४. '-न्ते' इति५॥ ५. 'अग्रे' इति १.२.४.५प्रतिषु नास्ति ॥ ६. सायणसम्मतोऽयं धातुपाठः ॥ ७. 'बागि-' इति१॥ ८. १.३प्रत्योर्नास्ति ॥ ९. द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-४९, पृ.६९॥, रामाश्रमीर।४।३॥, पृ.१६३॥ १०. '-ज्ञां' इति३॥ ११. '-ने' इति१.२॥ १२. इतोऽग्रे १प्रतौ 'पुष्पं' इति दृश्यते ॥ १३. '-हंता' इति१, 'मुहंता' इति२॥ १४. '-त-' इति१, '-तीनां' इति३॥ १५. '-वाडि-' इति२.३॥ १६. 'जी-' इति२.३॥, मूल-स्वोपज्ञटीका-चन्द्रोदयाभिधगूर्जरभाषाटीकासु 'जीर्णः' इति शब्दो दृश्यते, तत्तु विचारणीयः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**नन्द्यावर्त[16]करालिकौ[17] तरु[18]र्वसू[19] पर्णी[20] पुलाक्यं[21]ह्रिप:[22]**
**साला[23]ऽनोकह[24]-गच्छ[25]-पादप[26]-नगा[27]**
**रूक्षा[28]ऽगमौ[29] पुष्पद:[30] ॥१११४॥**

१ वृश्च्यते छिद्यते **वृक्ष:** । '[ओ]व्रश्चू छेदने' (तु.प.से.), 'व्रश्चे: सक्'( )इति सक् । यद्वा 'दृशि(स्नु)-व्रश्चि-'(उणा-३४६)इत्यादिना क्स:, 'स्को: संयोगाद्योः-' ८।२।२९॥ इति सलोप:। वृक्षति(वृक्षते) आवृणोति सूर्यातपमिति वा । 'वृक्ष आवरणे[1]'(भ्वा.आ.से.), पचाद्यच्। २ न गच्छतीति **अग:** । 'अन्येभ्यो(अन्यत्रा)ऽपि-'(वा-३।२।४८॥)इति ड:। ३ शिखरं शिरोऽस्याऽस्ति **शिखरी,** कवर्गद्वितीयमध्य: । 'अत अनिठनौ'५।२।११५॥ इतीनि: । ४ शाखा: सन्त्यस्य **शाखी** । व्रीह्यादित्वादिनि:। ५ फलं ददाति **फलद:** । 'आतोऽनुपसर्गे क:'३।२।३॥, 'आतो लोप इटि च'६।४।६४॥ । ६ अद्यते **अद्रि:** । 'अद भक्षणे'(अ.प.अ.), 'अदिशदि-'(उणा-५०५)इति क्रिन् । ७ हरिवर्णं[2] द्रवति **हरिद्रु:** । 'द्रु गतौ'(भ्वा.प.अ.), 'मितद्रवादिभ्यश्च' (वा-३।२।१८०॥)इति डु: । ८ द्रुरिति पदमस्याऽस्ति द्रु:[3] शाखा, तद्योगाद् **द्रुम:** । 'द्युद्रुभ्यां म:'५।२।१०८॥ इति म:। ९ जीर्यति[4] **जीर्ण:** । 'जॄ वयोहानौ'(क्र्या.प.से.), 'कृवृजॄनः-(कृवृजॄ-)' (उणा-२९०)इति न: । १० द्रवन्ति गच्छन्ति पथिका: पक्षिणश्चाऽमुमिति **द्रु:** । 'द्रु गतौ'(भ्वा.प.अ.), मितद्रवादित्वाड्डु: । ११ विटप: शाखाविस्तार:, तद्योगाद् **विटपी** । 'अत इनिठनौ'५।२।११५॥इतीनि: । १२ कोठति **कुठ:** । 'कुठि:' सौत्रो धातु:, 'इगुपध-'३।१।१३५॥ इति क: । कौ तिष्ठतीति[5] कुठ:, पृषोदरादिर्वा । कौति शब्दायतेऽत्र पक्षीति, 'कणेष्ठ:'(उणा-१०३)इति बाहुलकादतोऽपि ठ:, कुटादित्वाद् ङित्त्वे गुणाभाव:, बाहुलकात् ठस्य न इकादेश इति वा । तृतीयवर्गद्वितीयान्तोऽयम् । यथा- कुठान् वृक्षानियर्त्ति कुठार: । १३ क्षितौ रोहति **क्षितिरुह:** । 'रुह बीजजन्मनि प्रादुर्भावे [च][10]' (भ्वा.प.अ.), मूलविभुजादित्वात् क:। यौगिकत्वात् कुजमहीरुहादय: । १४ कारं करोति **कारस्कर:** । पारस्करादित्वात् साधु:। १५ विशेषेण स्तृणाति **विष्टर:** । 'वृक्षासन-'८।३।९३॥ इति साधु: । विपूर्वात् 'स्तृञ् आच्छादने'(क्र्या.उ.से.), अस्मात् पचाद्यच्, 'व[:] स्त्र:'(हैमसू-२।३।२३॥)इति षत्वम् । १६ नन्दी आवर्तोऽस्य **नन्द्यावर्त:**। १७ करालमुच्चं शिखरमस्त्यस्य **करालिक:** । 'अत इनिठनौ'५।२।११५॥ इति ठन्[11], 'ठस्येक:' ७।३।५०॥। १८ तरन्त्यातपमनेन पथिका:, तरन्ति यान्तीमं[12] पुष्पफलार्थिनो वा **तरु:** । 'तॄ प्लवनतरणयो:'(भ्वा.प.से.), 'भृमृशी-[13]'(उणा-७)इत्यु:। १९ वसन्ति पक्षिणोऽत्रेति **वसु:** । 'शॄस्वृस्निहि-'(उणा-१०)इत्यु: । २० पर्णानि सन्त्यस्य **पर्णी** । 'अत इनिठनौ'५।२।११५॥ इतीनि:[14] । पलाशी च । २१ पोलति पुलो विस्तारस्तमकति **पुलाकी** । 'अक [कुटिलायां] गतौ'(भ्वा.प.से.), ग्रहादित्वाण्णिनि: । २२ अंह्रिभिर्मूलै: रसं पिबन्ति **अंह्रिप:** । 'पा पाने'(भ्वा.प.अ.), 'सुपि-'३।२।४॥ इति योगविभागात् क: । यौगिकत्वात् चरणपोऽपीति केचित् । २३ सल्यते गम्यतेऽसौ **साल:,** दन्त्यादि: । 'सल(षल) गतौ'(भ्वा.प.से.), 'अकर्तरि च कारके संज्ञायाम्'३।३।१९॥ इति घञ् । सलति वायुना चलतीति वा । '[15]ज्वलितिकसन्तेभ्यो ण:'३।१।१४०॥ । "पुंसि भूरुहमात्रेऽपि सालो[16] वरणसर्जयो:[17]"[[18]]इति दन्त्यादौ रभसात्। २४ अनित्यम्भोभि: **अनोकह:** । 'अन प्राणने'(अ.प.से.), 'अनेरोकह:'(हैमोणा-५९५)इत्योकहप्रत्यय:। अनस: **शकटस्य अकं[19] गमनं[20] हन्तीति** वा । 'अन्येष्वपि-'३।२।१०१॥ इति ड: । २५ गम्यते **गच्छ:** । २६ पादैर्मूलै: पिबति रसमिति **पादप:** । 'सुपि-'३।२।४॥ इति क: । २७ न गच्छति **नग:** । 'नगोऽप्राणिषु-'६।३।७७॥ इति[21] नञ्प्रकृत्या[22] । २८ रूक्षयति **रूक्ष:** । २९ न गच्छति **अगम:**।

१. 'वरणे' इति क्षीरतरङ्गिण्यादय: ॥ २. 'हरि' इति२.४॥ ३. समुदाये वृत्ता: शब्दा अवयवेष्वपि वर्तन्ते इति न्यायादत्र द्रु: शाखार्थक: ॥ ४ १.३.४.५प्रतिषु नास्ति ॥ ५. '-ते' इति१॥ ६. 'जी-' इति४॥ ७. 'तिष्ठति' इति३.४॥ ८. कुटादित्वोक्ति: प्रामादिकी, आदादिकस्य 'कौति' इति रूपसंभवात्, तौदादिकस्य 'कुवते' इति रूपस्य संभवात्, अत्र रामाश्रमी अनुसन्धेया २।४।५॥, पृ.१६४। ९. 'बीजप्रा-' इति१.२.४.५॥ १०. 'रुह बीजजन्मनि' इति क्षीरतरङ्गिणी, 'रुह जन्मनि प्रादुर्भावे' इति धातुप्रदीप: ॥ ११. 'इन्' इति१॥ १२. 'यातीमं' इति३.४॥ १३. '-दृ-' इत्युणादिगणसूत्रे नास्ति ॥ १४. '-नि' इति३॥ १५. 'ज्वल-' इति१.३॥ १६. 'शा-' इति२॥ १७. 'वरु-' इति१॥ १८. द्र. पदचन्द्रिका, भा-२, वनौषधिवर्ग:, श्लो-५१, पृ.७३॥, रामाश्रमी१।४।५॥, पृ.१६४॥ १९. 'अङ्कं' इति३.४.५॥ २०. 'गहनं' इति२॥ २१. इतोऽग्रे ३.४.५प्रतिषु 'नभ्राडिति' इति दृश्यते ॥ २२. 'प्रकृत्या' इति३.४.५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पचाद्यचि । ३० पुष्पाणि ददाति **पुष्पदः** । 'आतोऽनुपसर्गे कः'३।२।३॥ । सर्वेऽपि शब्दा इमे पुंसि । त्रिंशद् वृक्षस्य ॥ शेषश्चात्र-

''वृक्षे त्वारोहकः स्कन्धी[2] सीमिको[3] हरितच्छदः ।
ऊरुर्जन्तुर्वह्निभूश्च''[शेषनाममाला४।१७३-१७४॥]इति ॥

॥१११४॥

## कुञ्ज[1]-निकुञ्ज[2]-कुडङ्गाः[3] स्थाने वृक्षैर्वृतान्तरे ।

१ कवन्तेऽस्मिन् **कुञ्जः** । 'कुङ् शब्दे'(भ्वा. आ.अ.), 'कुवः कुब(कुब्)कुनौ[6] च'(हैमोणा-१२९)इति जः। '[7]कुञ्जतीति, कुजिरावरणार्थो वा, अच् । ''कौ जायत इति, 'सप्तम्यां जनेर्डः'३।२।९७॥, पृषोदरादित्वाद् मकारागमः''[[8]]इत्यन्ये । २ निकुञ्जन्त्यत्र **निकुञ्जः** । 'कुजि अव्यक्ते शब्दे'(भ्वा.प.से.), 'हलश्च'३।३।१२१॥इति घञ्। ([9]एवं निकुञ्जः), पुंक्लीबौ[10] । यदमरः- ''कुञ्जनिकुञ्जौ वा क्लीबे''[अमरकोषः२।३।८॥]इति । ३ कुडति **कुडङ्गः**, पुंसि । 'कुड शब्दे'( ), 'पतितमि-'(हैमोणा ९८) इत्यङ्गच्, कुटादित्वान्न गुणः । वृक्षैर्वृतान्तरे आच्छादिते[11]मध्ये स्थाने । त्रीणि कुञ्जस्य ॥

## पुष्पैस्तु फलवान् वृक्षो वानस्पत्यः[1]

१ पुष्पैर्हेतुभूतैः फलवान् वृक्षः, वनस्पतौ भवो **वानस्पत्यः** । 'दित्यदित्या-'४।१।८५॥इति ण्यः । वनस्पतिरेव वानस्पत्यः, भेषजादित्वाद् यण् वा । पुष्पाज्जातैः फलैर्लक्षिताम्रजम्ब्वादिवृक्षस्य नामैकं वानस्पत्य इति । पुष्पफलयुक्तोऽसौ । ''वानस्पत्याः स्मृता वृक्षा ये पुष्पन्ति फलन्ति च''[हलायुधकोशः२।१७९॥]इति हलायुधः ॥

## विना तु तैः ॥१११५॥

## फलवान् वनस्पतिः[1] स्यात्

१ तैः पुष्पैर्विना ॥१११५॥ फलवान् वृक्षो **वनस्पतिः**[12] । पारस्करादित्वात् सुट्, तृतीयस्वरान्तो हरिवत् । ''फलन्ति[13] ये विना पुष्पं तान् वदन्ति वनस्पतीन्''[हलायुधकोशः२।१७९॥]इति हलायुधः । एकं पुष्परहितफलान्वितपनसोदुम्बरादिवृक्षस्य । ''वनस्पतिर्ना द्रुमात्रे''[मेदिनीकोशः, तान्तवर्गः, श्लो-२१८]इति मेदिनिर्द्रुमात्रेऽप्याह ॥

## फलावन्ध्यः[1] फलेग्रहिः ।

१ फलैरवन्ध्यः फलावन्ध्यः, ऋतुप्राप्तौ फलानि गृह्णाति धारयति[14] **फलेग्रहिः**। 'फलेग्रहिरात्मंभरिश्च'३।२।२६॥इतीन्, एकारश्च, निपातनाद् ग्रहिर्धारणार्थः, स्वीकारार्थश्च, तत्र धारणार्थे वृक्ष एव रूढिः, स्वीकारार्थे तु- ''फलेग्रहीन् हंसि[15] वनस्पतीनाम्''[भट्टिकाव्यम्, सर्गः-२, श्लो-३३]इति भट्टिः[16] । एकं सफलवृक्षस्य फलेग्रहिरिति। ''द्वेऽपि नाम्नी''[ ]इति मिश्राः ॥

## फलबन्ध्यस्त्ववकेशी[1]

१ बन्धनं बन्धः, बन्धे फलावष्टम्भे साधुरिति, दिगादित्वाद् यति बन्ध्यः, फलैर्बन्ध्यः फलबन्ध्यः, अत्यन्तफलहीन इत्यर्थः । ''केशो योनिः''[ ]इति भारतटीका। स च ऋतुकृतो विशेषः । अवध्वस्तः केशो योनिः अवकेशः। प्रादिसमासः[17] । तद्योगादिनिः **[ अवकेशी ]** । ''अवध्वस्तः केशोऽवकेशः छिन्नकेशः, तद्धर्मो नैःफल्यं, धर्मधर्मिणोरभेदोप[18]चारादेतदप्यवकेशः, तद्योगादिनिः''[पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-५३]इति तु मिश्राः। अवश्यं क्लेशयति पुष्पमित्यावश्यके णिनिः। पृषोदरादित्वाद् वर्णलोपे वा अवकेशी । नास्ति बकोऽप्यत्रेति अबकं शून्यम्, तदीष्टे अवकेशीति वा, ग्रहादित्वाण्णिनिः । एकमफलवृक्षस्य ॥

## फलवान्[1] फलिनः[2] फली[3] ॥१११६॥

१ फलमस्त्यस्य **फलवान्**। 'तदस्यास्तीति मतुप्' ५।२।९४॥। २ फलमस्त्यस्य **फलिनः**, अदन्तः। 'फलबर्हाभ्यामिनन्'(वा-५।२।१२२॥)। ३ फलमस्त्यस्य **फली**। 'अत इनिठनौ'५।२।११५॥ इतीनिः[19] । त्रीणि सफलवृक्षस्य ॥१११६॥

## ओषधिः[1] स्यादौषधिश्च[2] फलपाकावसानिका ।

१-२ ओषति **ओषधिः**। 'उष दाहे'(भ्वा.प.से.),

१. '-च्' इति१.२॥ २. '-न्धो' इति४.५॥ ३. 'सा-' इति२.४॥ ४ 'उ-' इति शेषनाममालास्वोपज्ञटीकयोः॥ ५. '-जनु-' इति२.४.५॥ ६ 'कुञ्जो' इति३, 'कृनौ' इति४॥ ७. 'कुज-' इति३॥ ८ द्र. पदचन्द्रिका, भा-२, शैलवर्गः, श्लो-४६, पृ.६७॥ ९ कोष्ठान्तर्गतपाठः १.२.३प्रतिषु न दृश्यते ॥ १०. 'पुंक्ली.' इति३॥ ११. '-ते' इति३॥ १२. इतोऽग्रे १.२.३प्रतिषु 'वनस्पतिः स्यात्' इति दृश्यते ॥ १३. 'फलति' इति१॥ १४ १प्रतौ नास्ति॥ १५. 'हंसी' इति३॥ १६. 'भेदः' इति३॥ १७ '-से' इति४॥ १८. '-भेदात् तद-' इति१.२॥ १९. '-नि' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'उषेरधिः'(हैमोणा-६७५)इत्यधिः। उषः प्लोषे पर्वतेषु रात्रौ ज्वलनाद् दीप्तिर्वा धीयतेऽत्र, 'कर्मण्यधिकरणे च'३।३।९३॥इति किः। त्रयोदशस्वरादिरयम्। 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि ओषधी। बाहुलकाद् वृद्धौ वा **औषधिः,** चतुर्दशस्वरादिः। एतौ मूर्धन्यमध्यौ, स्त्रीलिङ्गौ च। फलस्य पाकोऽवसानमस्याः फलपाकावसाना। स्वार्थे कनि, 'प्रत्ययस्थात्-'७।३।४४॥इतीत्त्वे फलपाकावसानिका। ''फलपाकावसानास्तु बुधैरौषधयः स्मृताः''[हलायुधकोशः२।१८०॥]इति हलायुधः। द्वे ओषध्याः॥

## क्षुपो[1] ह्रस्वशिफाशाखः

१ क्षुभ्यति विचलति[२] **क्षुपः**। 'क्षुभ सञ्चलने'(दि.प.से), 'इगुपधज्ञाप्रीकिरः कः'[३]३।१।१३५॥, पृषोदरादित्वाद् भस्य पः। क्षौति दह्यमान इति वा। 'टुक्षु शब्दे'(अ.प.से.), 'क्षुचुपिपूभ्यः कित्'(हैमोणा-३०१)इति पः। ह्रस्वा लघ्व्यः शिफा जटाः शाखाश्च यस्य स तथा। ''क्षुपो ह्रस्वशिखः(शिफा)शाखी''[हलायुधकोशः२।१७८॥] इति हलायुधः। एकं लघुवृक्षस्य॥

## प्रततिर्[1]व्रततिर्[2]लता[3] ॥१११७॥ वल्ली[4]

१-२ प्रकृष्टा ततिरस्याः **प्रततिः**। प्रतनोति विस्तृता[४] स्यादिति प्रततिर्वा। तनोतेरुणादौ 'कृति-'(उणा-४२७)इति तनेः[५] क्तिन्[६]। जपादित्वाद् वत्वे **व्रततिः**। ''व्रजन्तीं[७] ततिरस्या वा, व्रतत्यादिसिद्ध्यर्थं[८] व्रतधातुरुज्ञये'' []इति भोजः। वृणोतीति, पृषोदरादिर्वा, स्त्रीलिङ्गौ। 'कृदिकारात्'(गणसू-४।१।४५॥)इति ङीषि व्रतती च। ''व्रततीततीरिव''[शिशुपालवधम्, सर्गः-१, श्लो-५]इति माघः। ''व्रततीशब्दोऽव्युत्पन्न एव क्तिनि तु ङीष्[९] न स्यात्''[[१०]]इति सर्वधरो भ्रान्तः। ''प्रततिर्व्रततिस्तथा'' [हलायुधकोशः२।१८०॥]इति हलायुधः। ३ ''उणादौ '[११]कृदिभिदिलतेः(-लतिभ्यः) क्तिन्'(उणा-४२७)इति सूत्रपाठाल्लतिः[१२] सौत्रो धातुर्वेष्टनार्थः। लतति वेष्टयति **लता**। पचाद्यचि[१३], टाप्''[[१०]]इति सुभूतिः। लात्यादत्ते शोभामिति वा। 'ला दाने'(अ.प.अ.), 'पृषिरञ्जि-'(हैमोणा-२०८)इति किदतः[१४] ॥१११७॥ ४ वल्लति (वल्लते) संवृणोति **वल्ली**। 'वल[१५] वल्ल संवरणे[१६]'(भ्वा.आ.से.), पचाद्यचि, गौरादित्वाद् ङीषि[१७]। ''अस्मादेव धातोः '-इन्'(उणा-५५७)इतीनि[१८], 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि[१९] वल्ली''[ ]इति माधवः[२०]। वल्लि-र्ह्रस्वान्ता च। 'वल्लेरिः(वल्लेः)-'(दशपाद्युणा-१।५२)इति इः (इन्)। ''हिरण्मयोर्वीरुहवल्लितन्तुभिः''[शिशुपालवधम्, सर्गः-१, श्लो-७]इति माघः। वेल्लधातोरिनि[२१] वेल्लिरित्यपि। अत एव ''वल्ली तु वेल्लिः सरणा''[[१०]]इति वाचस्पतिः। चत्वारि सामान्येन लतायाः॥

## अस्यां तु प्रतानिन्यां[1] गुल्मिन्य्[2]उलप[3]वीरुधः[4]।

१ अस्यामिति लतायाम्, शाखापत्रप्रचयः[२२] प्रतानः, तद्युक्ता लता **प्रतानिनी,** तस्याम्। २ गुल्मः प्रतानोऽस्त्यस्यां **गुल्मिनी**। 'अत इनिठनौ'५।२।११५॥इतीनिः। ३ वलते वेष्टते **उलपः**। 'वल संवरणे'(भ्वा.आ.से.), '-वेष्टने'( ) वा, 'विटपादयः'[२३]( )इति वलेरपः, वस्योत्त्वं च। यद्वा उल्यते उलपः। ''उलः सौत्रो दीप्त्यर्थः, आवरणार्थो वा, ततोऽपो बाहुलकाद्। 'विटपादयश्च'[२४]( )इत्यत्तेरपः, बाहुल्यादुत्वं रपरत्वं [लत्वं] च''[[२५]] इति तु सुभूतिः। ''उलपो नाम तृणभिद्[२६] गुल्मिन्युलपौ''[[२५]]इति रभसः। ४ विरुणद्धि **वीरुत्,** स्त्रियाम्। 'रुधिर् आवरणे'(रु.उ.अ.), सम्पदादित्वात् क्विप्, 'नहिवृति-'६।३।११६॥ इति दीर्घः। विरोहति विरुहः

---

१. '-रौ' इति१.२.४॥ २ 'चलति' इति१.२॥ ३ '-धेति कः' इति४॥ ४ 'विस्तरा' इति४॥ ५ 'तनोः' इति३, 'तनोतेः' इति५॥ ६. अत्रेदं विचारणीयम्, 'कृति-'(उणा-४२७)इत्यनेन तिकन्प्रत्ययविधानात्॥ ७ 'व्रजती' इति३॥ ८ '-द्ध्यार्थं' इति४॥ ९ 'ङीप्' इति१.२.३॥, 'ङीषि' इति४॥ १०. द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-५५, पृ.७७॥ ११. 'क्ष-' इति३॥ १२. '-लातेः' इति५॥ १३ '-च्' इति३॥ १४ '-दितः' इति५॥ १५ ५प्रतौ नास्ति॥ १६. मैत्रेयसम्मतोऽयं पाठः, 'वल संवरणे' इति स्वामी, 'वल वल्ल संवरणे सञ्चरणे च' इति सायणः॥ १७ 'ङीष्' इति१.२॥ १८. '-निः' इति४॥ १९. 'ङीपि' इति३॥ २०. सायणकृतमाधवीयधातुवृत्तौ ''वल्लिः, वल्ली इति कृदिकारत्वाद्वा ङीष्'' इति दृश्यते, भ्वादिः, धातुसं-३२२, पृ.१४१॥ २१. '-नि' इति१॥ २२. '-याः' इति३.४.५॥ २३. स्वामिसम्मतपाठः॥ २४. 'विटपपिष्टपविशिपोलपाः'(उणा-४२५)इत्युणादिगणसूत्रम्॥ २५. द्र. पदचन्द्रिका, भाग-२, वनौषधिवर्गः, श्लो-५५, पृ.७८॥ २६. '-भृद्-' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्वौ[1] धोऽन्तादेशः. 'अन्येषामपि-'६।३।१३७॥इति दीर्घः, धराकान्तोऽयम् । यत्कात्यः-''वीरुत् स्वपर्ण[2]जटिला प्रतानशतगामिनी''[3]इति । लता प्रताननीत्यखण्डमपि । यदमरः-''लताप्रतानिनी वीरुद्गुल्मिन्युलपः''[अमरकोषः २।४।९॥]इति । हलायुधस्तु-''लता प्रतानिनी वल्ली प्रततिर्व्रततिस्तथा''[हलायुधकोशः२।१८०॥]इत्यभेदेनाऽऽह । ''पञ्च वल्ल्याम्''[ ]इति तट्टीका । चत्वारि विस्तार[4]वत्या वल्ल्याः[5] ॥

## स्यात् प्ररोहो[1]ऽङ्कुरो[2]ऽङ्कूरो[3] रोहश्च[4]

१ प्ररोहति **प्ररोहः** । 'रुह बीजजन्मनि प्रादुर्भावे [च][6]'(भ्वा.प.अ.), अच् । २-३ अङ्क्यते लक्ष्यतेऽनेनेति **अङ्कुरः** । 'अकि लक्षणे'(भ्वा.आ.से.), 'मन्दिवाशि[7]-'(उणा-३८)इत्युरच् । खर्जूरादित्वादूरप्रत्यये **अङ्कूरः**, पुंस्येतौ । क्लीबेऽपि । वैजयन्ती यदाह-''स्यादङ्कुरोऽङ्कुरोऽस्त्रियाम्(-यौ)''[वैजयन्तीकोषः३।३।१०॥]इति । ४ रोहति **रोहः** । अच् । चत्वारि अङ्कुरस्य ॥

### स तु पर्वणः ॥१११८॥

## समुत्थितः स्याद् बलिशम्[1]

१ स तु अङ्कुरः पर्वणः ग्रन्थेः[8] समुत्थितः, बलति प्राणिति **बलिशम्** । 'बल प्राणने'(भ्वा.प.से.), 'बलेर्णिद्वा'(हैमोणा-५३६)इतीशः । एकं ग्रन्थ्युत्पन्नाङ्कुरस्य ॥१११८॥

## शिखा[1]शाखा[2]लताः[3] समाः ।

१ शेते **शिखा** । 'शीङ् स्वप्ने'(अ.आ.से.), 'शीङो निद् ह्रस्वश्च'(दशपाद्युणा-३।५५॥, पञ्चपाद्युणा-७०२)इति खन् । २ शेतेऽस्यां पक्षी **शाखा** । पक्षे 'वृक्षावयवे आ च'(दशपाद्युणा३।५५॥)इति खन्प्रत्ययः, आकारश्चान्तादेशः। शाखति व्याप्नोति वा । 'शाखृ व्याप्तौ'(भ्वा.प.से.), अच्। शाख्यते वृक्षोऽनयेति, 'गुरुश्च'३।३।१०३॥ इत्यकारो वा । ''श्यति शिखा शाखा च । 'शो तनूकरणे'(दि.प.अ.), 'श्यतेरिच्चे[9] वा'(हैमोणा-८५)इति खे[10] साधू[11]''[अभि-, स्वोपज्ञटीका४।१११९॥]इत्याचार्याः । ३ लता प्रागुक्ता [अभि.श्लो.१११७] । 'समाः' इति लिङ्गार्थाभ्यां तुल्या इत्यर्थः। त्रीणि शाखायाः। 'डाल' इति भाषा॥

## साला[1] शाला[2] स्कन्धशाखा[3]

१ सीयते **साला** । 'षोऽन्तकर्मणि'(दि.प.उ.), बाहुलकाल्लः । २ शीयते श्यन्त्येनां वा **शाला** । 'शीङ् स्वप्ने'(अ.आ.से.), 'शो तनूकरणे'(दि.प.अ.) वा, ['शामाश्या-'(हैमोणा-४६२)इति लः] । शलतीति वा । 'शल गतौ'(भ्वाप.से.), ज्वलादित्वाण्णः । ३ स्कन्धाद् निःसृता शाखा **स्कन्धशाखा** । त्रीणि वृक्षशाखायाः ॥

### स्कन्धः[1] प्रकाण्डमस्तकम् ॥१११९॥

१ स्कन्द्यते आरुह्यते **स्कन्धः**। उणादौ स्कन्दिर्धातोः 'स्कन्देरच् स्वाङ्गे'(उणा-६४६)इत्यच्प्रत्ययो धश्चान्तादेशः[12] । ''कं शिरो दधातीति वा । 'आतोऽनुपसर्गे कः'३।२।३॥, पारस्करादित्वात् सुट्''[13]इति टीकासारे[14][15] । ''स्कन्धाधिरूढोज्ज्वलनीलकण्ठानुर्वीरुहः श्लिष्टतनूनहीन्द्रैः''[शिशुपालवधम्, सर्गः-४, श्लो-७]इति माघः। प्रकाण्डस्य वृक्षजङ्घाया मस्तकं शिरः [प्रकाण्डमस्तकम्]। ''प्रघाणः स्कन्ध उच्यते''[हलायुधकोशः २।१८२॥]इति हलायुधः। ''द्वौ समौ''[ ]इति तट्टीका । एकं वृक्षस्कन्धस्य ॥१११९॥

## मूलाच्छाखावधिर्गण्डिः प्रकाण्डः[1]

१ मूलतः स्कन्धशाखामवधीकृत्य गण्डिः गण्डिका पर्वेत्यर्थः, सा **प्रकण्ड** इत्यन्वयः । 'प्रकाण्डवरण्डादयश्च[16]'( )इति डः, दीर्घत्वं च[17] । प्रकाम्यत इति वा । 'कमु कान्तौ'(भ्वा.आ.से.), 'क्वादिभ्यः कित्'(उणा-११२)इति डो

---

१. 'क्वो' इति३.४.५॥ २. '-र्णि-' इति३.५॥ ३ द्र. अम.क्षीर.२।४।९॥, पृ.८१॥ ४. 'विस्त-' इति४॥ ५. 'विस्तारवल्ल्याः' इति१, 'वल्याः' इति४॥ ६. 'रुह बीजजन्मनि' इति स्वामी, 'रुह जन्मनि प्रादुर्भावे' इति मैत्रेयः ७ '-वशि-' इति३.४.५॥ ८. '-न्थे' इति१.४, '-न्थिः' इति५॥ ९. '-च्चा' इति१.२, '-रच्चो' इति५॥ १०. 'खो' इति३.५॥ ११. '-धुः' इति३॥ १२. 'स्कन्देश्च स्वाङ्गे'(उणा-६४६, दशपाद्युणा-९।६७)इत्युणादिगणसूत्रम्, स्कन्देर्धातोरसुन् प्रत्ययो भवति स्वाङ्गेऽभिधेये धश्चान्तादेश इति तदर्थः ॥ १३. द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-५६, पृ.७९॥ १४. 'तट्टी-' इति१॥ १५. '-कारः' इति३॥ १६. 'प्रकरणे वरण्डादयश्च' इति१.२॥, इदं सूत्रमुणादिगणे न दृश्यते, 'प्रकाण्डः' इत्यत्र 'क्वादिभ्यः कित्'(उणा-११२, (५।८)इत्यनेन, 'वरण्डः' इत्यत्र 'अण्डन् कृसृभृवृजः' इत्यनेन च समाधेयम् ॥ १७. १प्रतौ नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दीर्घत्वं च, अस्त्रियामयम् । अमरस्तु-"अस्त्री प्रकाण्डः स्कन्धः स्यात्"[अमरकोषः२।४।१०॥]इति प्रकाण्डस्कन्धौ तुल्यार्थावाह । "स्कन्धादधः[1] प्रकाण्डः स्यात्"[हलायुधकोशः २।१८२॥]इति हलायुधः । "स्कन्धादधोभागे[2] जङ्घाख्ये[3]"[ ] इति तट्टीका । काण्डोऽपि । यथा-"आरभ्य काण्डात् तरुमुच्छिन्नत्ति"[[4] ] । एकं वृक्षजङ्घायाः। गोलीति भाषा ॥

### अथ जटा शिफा ।

१ जयति **जटा**। 'जट झट सङ्घाते'(भ्वा.प.से.), अच् । जटनं वा । भिदादित्वादङ् । २ शेते[5] **शिफा** । शीङः फक् ह्रस्वश्च बाहुलकात् । शीयते ज्ञायते वा । 'शिञ् निशामने'(स्वा.उ.अ.), 'हलश्च'३।३।१२१॥ इति चकारात्[6] फक् । "पादो मूलं जटा शिफा"[हलायुधकोशः२।१८२॥]इति हलायुधः । "चत्वारः[7] समाः"[ ]इति तट्टीका । द्वे जटायाः । 'जड' इति भाषा ॥

### प्रकाण्डरहिते स्तम्बो विटपो गुल्म इत्यपि ॥११२०॥

१ प्रकाण्डो गण्डिका, पर्वेत्यर्थः, तद्रहिते उद्भिद[8]विशेषे, तिष्ठति **स्तम्बः**, पुंसि । 'स्थः स्तोऽम्बच्-'(उणा-५३६)इत्यम्बच्प्रत्ययः, स्थः स्तादेशः । २ विशन्त्यत्र पक्षिणो **विटपः** । 'विश प्रवेशने'(तु.प.अ.), 'विटपविष्टपविशिपोलपाः'(उणा-४२५)इति कपचि[9] (कपनि) साधुः । ३ गुडति **गुल्मः** । 'गुड वेष्टने[10]'( ), बाहुलकाद् धर्मवन्मन्प्रत्ययः, डलयोरेकत्वस्मरणाद् [लत्वम्] । अस्त्रियामेतौ । "अप्रकाण्डे स्तम्बगुल्मौ"[अमरकोषः२।४।९॥]इत्यमरः । "प्रकाण्डो गण्डिस्तद्रहित उद्भिदविशेषस्तृणसङ्घातस्तम्बः"[ ] इति तट्टीका । 'थूंबडा छूंटा' इत्यादिभाषा । त्रीणि थुडस्थूल[11] हुइ डालिर्न भवति, तस्य ॥११२०॥

### शिरोनामाग्रं शिखरम्

१ शेते स्वाङ्गोपरि तिष्ठति शिरः । 'शीङ् स्वप्ने[12]'(अ.आ.से.), 'शीङः किच्च[13]'(उणा- )इत्यसुन् शिरादेशः । शिरोनामाऽस्य वृक्षप्रान्तस्य **शिरोनाम**[14] शिरःपर्यायमित्यर्थः । २ अङ्गति (अगति) **अग्रम्** । 'अक अग कुटिलायां गतौ'(भ्वा.प.से.), 'ऋज्रेन्द्राग्रवज्रविप्रकुप्र(कुब्र)चुप्र(चुब्र)क्षुरखुरभद्रोग्रभेरभेलशुक्रतीव्रवर्णे(त्रे)र(रा)मालाः'(उणा-१८६)इति रन् । ३ शाखति **शिखरम्**, पुंक्लीबम् । "शिखरं वा ना"[अमरकोषः२।४।१२॥] इत्यमरः। त्रीणि वृक्षशिरसः । 'टेचूआं[15]' इति भाषा ॥

### मूलं बुध्नोऽङ्घ्रिनाम च ।

१ मूलति **मूलम्**, पुंक्ली. । 'मूल रोहणे[16]'(चु.उ.से.), 'मूल प्रतिष्ठायाम्'(भ्वा.प.से.) वा, 'इगुपध-' ३।१।१३५॥ इति कः । २ बध्नाति[17] **बुध्नः**, चतुर्थवर्गचतुर्थपञ्चमान्तः । 'बन्ध बन्धने'(क्र्या.प.अ.), 'बन्धेर्ब्रधिबुधी[18] च'(उणा-२८५)इति नक् बुधादेशः । बुध्यतेऽनेनेति वा । 'बुध अवगमने'(दि.आ.अ.), "उष्णवत्राक्" [ ]इति तु सुभूतिः । तथा च-"निवेश्य बुध्ने चरणौ स्मिताननास्तरुं समारोढुमथोपचक्रमुः"[[19] ]इति राजशेखरः । २ अंहेश्चरणस्य नामाऽस्य **अंह्रिनाम**[20] । त्रीणि मूलस्य ॥

### सारो मज्जि

१ सरति कालान्तरमिति **सारः** । 'सृ गतौ'(भ्वा.प.अ.), 'सृ स्थिरे'३।३।१७॥ इति घञ् । २ मज्जति **मज्जा**, नकारान्तः, पुंसि, । 'टुमस्जो शुद्धौ'(तु.प.अ.), मस्जेः कनिन्[21] जशत्वचुत्वे[22][23] [तत्र]। "मस्जेः 'श्वन्नुक्षन्-तक्षन्[24]-'(उणा-१५७)इत्यादिना निपातितः"[[25] ]इत्यन्ये । मज्जानौ, मज्जानः इत्यादि । मज्जा टाबन्तोऽपि[26] । "लज्जा-

---

१ '-दयः' इति५॥ २ 'जटा-' इति३॥ ३ '-ख्यो' इति५॥ ४ द्र. अनेकार्थकैरवाकरकौमुदीटीका, भा-१, २।१०९॥, पृ.६९॥ ५. 'शीयते' इति ३.४.५॥ ६ १प्रतौ नास्ति ॥ ७ '-रि' इति१॥ ८ 'उद्भेद-' इति३॥ ९ 'कपिच' इति१.५॥ १०. 'गुड वेष्टने' इति मैत्रेयसायणौ॥ ११. 'थ-' इति१.२॥ १२. 'शीङ् स्वप्ने' इति १.२.३.५प्रतिषु नास्ति ॥ १३. 'श्रयतेः स्वाङ्गे शिरः किच्च'(उणा-६३३) इत्युणादिगणसूत्रं श्रिञ्धातुग्राहकम्, अत्र टीकाकृता शीङ्धातुं लक्ष्यीकृत्याऽविद्यमानेन 'शीङः किच्च' इत्यनेन शिरःशब्दो व्युत्पादितः ॥ १४ शिरोनामानि श्लो-५६६॥ १५. '-या' इति२॥ १६. 'रोहे' इति३॥ १७ 'बु-' इति४॥ १८. '-बुधिबुधौ' इति४॥ १९ द्र. टीकासर्वस्वम्, भा-२, २।४।१२॥, पृ.६३॥, तत्र-"निवेश्य बुध्ने चरणं स्मितानना भुजेन काण्डं कलयावलम्ब्य च" इति दृश्यते, पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-५८, पृ.८१॥, तत्र- 'तरुं समारोढुमथोपचक्रमुः' इति न दृश्यते ॥ २०. अंह्रिनामानि श्लो ६१६॥ २१. 'श्वन्नुक्षन्-'(उणा-१५७)इत्यनेन ॥ २२. 'जश्त्वे' इति४॥ २३. त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धमतः 'चुत्वजश्त्वे' इति युक्तम् २४. '-पूषन्-' इत्युणादिगणसूत्रे ॥ २५. द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-५८, पृ.८२॥ २६. '-न्ताऽपि' इति१.४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वत् [राजवद्] मज्जामांससारास्थिसारयोः[१]''[[२]]इति त्रिकाण्डशेषे भागुरिः । एतौ मध्यछल्ली[३]पर्यायौ । द्वे मौंजीति[४] ख्याताया: ॥

**त्वचि[1] छल्ली[2] चोचं[3] वल्कं[4] च वल्कलम्[5] ॥११२१॥**

१ त्वचयति (त्वचति) आवृणोति तरुमिति **त्वक्,** स्त्रीलिङ्गः। 'त्वच संवरणे'(तु.प.से.), क्विप्, तस्यां त्वचि[५]। त्वचेति टाबन्तोऽपि[६] । ''त्वच इत्यदन्तोऽपीति पुंसि''[ ] इति हलायुधटीका । २ छाद्यतेऽनया[७], छ[द]यत्येनां वा **छल्ली** । पृषोदरादिः । ३ चम्यते **चोचम्** । 'चमेर्डोचडञ्चौ'(हैमोणा-१२२)इति डोचः । ४ वलति (वलते) **वल्कम्** । 'वल संवरणे[८]'(भ्वा.आ.से.), 'शुक्ल(शुक)-वल्कोल्काः'(उणा ३२२)इति के साधुः । ५ अस्मादेव धातोः 'वलेः कलच्'(स.क.२।३।११५॥)इति कलचि **वल्कलम्,** पुंक्लीबलिङ्गावेतौ । पञ्च त्वचः ॥११२१॥

**स्थाणौ[1] तु ध्रुवकः[2] शङ्कुः[3]**

१ वृक्षछेदेऽपि[९] तिष्ठति **स्थाणुः,** पुंक्ली.। 'स्थासूङः कित्[१०]'(उणा  )इति णुः । ''धेन्वादित्वाण्णुः णत्वं च''[[११]]इति तु[१२] सुभूतिः । तत्र[१३] । २ ध्रुवः प्रागुक्तः (श्लो-२१२), स्वार्थे कनि **ध्रुवकः** । ३ शङ्कतेऽस्मात् **शङ्कुः,** पुंसि । 'शकि शङ्कायाम्'(भ्वा.आ.से.), 'खरुशङ्कु-'(उणा-३६)इति कौ साधुः । त्रीणि '[१४]ठूंठा' इति ख्यातस्य ॥

**काष्ठे[1] दलिक[2]-दारुणी[2] ।**

१ काशतेऽग्निना दीप्यते **काष्ठम्** । 'कासृ (काशृ) दीप्तौ'(भ्वा.आ.से.), 'हनिकुषिनीरमिकाशिभ्यः[१५]क्थन्'(उणा-१५९), 'तितुत्र-'७।२।९॥ इति नेट्[१६], 'व्रश्च-'८।२।३६॥आदिना षत्वम्, तत्र। २ दल्यते **दलिकम्** । 'दल विशरणे'(भ्वा.प.से.), बाहुलकादिलच् । ३ दृणाति दीर्यते वा **दारु,** पुंक्ली. । 'दॄ विदारणे'(क्र्या.प.से.), '[१७]दॄसनिजनि-'(उणा-३)इत्यादिना उण् । त्रीणि काष्ठस्य ॥

**निष्कुहः[1] कोटरः[2]**

१ निश्चयेन कुहयति (कुहयते) विस्मयं जनयति **निष्कुहः** । [१८]निर्पूर्वः 'कुह विस्मापने'(चु.आ.से.), 'इगुपध-'३।१।१३५॥ इति कः[१९], '[२०]इदुपधस्य-'८।३।४१॥ इत्यादिना षत्वम्। तृतीयवर्गाद्यान्तोऽपि निष्कुट इति । ''निष्कुटः कोटरः स्मृतः''[हलायुधकोशः२।१८२॥]इति हलायुधः । ''निष्कुहश्च''[ ]इति तट्टीका । २ कुटति **कोटरः,** पुंक्ली.। 'कुट कौटिल्ये'(तु.प.से.), 'ऋच्छेररः'(उणा-४११)इति बाहुलकादन्यतोऽप्यरः, 'गाङ्कुटादिभ्योऽञ्णिन्[न्]ङित्'१।२।१॥ इत्यस्याऽनित्यत्वादरे गुणः । द्वे कोटरस्य । 'वृक्षपोलारि[२१]' इति भाषा ॥

**मञ्जा[1] मञ्जरि[2]र्वल्लरि[3]श्च सा ॥११२२॥**

१ मञ्जति **मञ्जा** । मञ्जिः सौत्रः, 'गुरोश्च हलः' ३।३।१०३॥[२२]इत्यप्रत्ययः । २ मञ्जुं[२३] रातीति[२४] **मञ्जरिः,** पृषोदरादिर्वा। चुतादेर्नवोभिद्[२५] । ३ वल्लति (वल्लते) आवृणोति तरुमिति **वल्लरिः** । बाहुलकादरिः । ''वल्लन्ते वल्लाः, इयर्तीत्यरिः । 'अच इः'(उणा-५७८)इति इः। वल्लानामरिर्वल्लरिः। शकन्ध्वादिः''[[२६]]इत्यन्ये । '''वल वल्ल संवरणे[२७]'(भ्वा.आ.से.), बाहुलकादरप्रत्यये पिप्प-(पिप्प-)ल्यादिदर्शनाद् ङीषि ([२८]वल्लरीति तुर्यस्वरान्तोऽयम्)''[मा.धातुवृत्तिः, भ्वादिः, धातुसं-३२२]इति माधवः । ''अभिनवनिर्गता आयता सुकुमारा सकुसुमा च मञ्जरिः, यथा[२९]- चूतमञ्जरिः कदलीमञ्जरिः, वल्लरिः पुनरकुसुमैव, यथा- तालवल्लरिः, अतो[३०] लतामात्रेऽपि मञ्जरिः 'नववञ्जुलमञ्जरीसनाथकरम्''[काव्यप्रकाशः१।२।३॥]इति काव्यप्रकाशः । त्रीणि मञ्जर्याः ॥११२२॥

**पत्रं[1] पलाशं[2] छदनं[3] बर्हं[4] पर्णं[5] छदं[6] दलम्[7] ।**

१ पतति पाके[३१] **पत्त्रम्,** अस्त्रियाम् । 'पत्लृ

---

१. द्र. रामाश्रमी२।४।१२॥, पृ.१६८॥ २. द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-५८, पृ.८२॥ ३. '-वली' इति१॥ ४. 'मी-' इति१.५॥ ५. १.२.३प्रतिषु नास्ति ॥ ६. '-न्ताऽपि' इति२.५॥ ७. '-येति' इति ३.५॥ ८. स्वामिसम्मतोऽयं पाठः ॥ ९. '-छेदने' इति३॥ १०. 'स्थो णुः'(उणा-३१७)इत्युणादिगणसूत्रम् ॥ ११. द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-५४, पृ.७५॥, रामाश्रमी२।४।८॥, पृ.१६५॥ १२. ४प्रतौ नास्ति ॥ १३. १.३.४.५प्रतिषु नास्ति ॥ १४. 'ठुं-' इति३॥ १५. 'स्थ-' इति३.५॥ १६. 'इण् न' इति४॥ १७. '-श-' इति३, '-सि-' इति५॥ १८. 'निर-' इति३॥ १९. पचाद्यजेव युक्तः, कुहेश्चुरादावदन्तत्वात् ॥ २०. 'इगु-' इति१.२.५॥ २१. '-र' इति३॥ २२. 'इत्यकार-' इति४॥ २३. '-ञ्जुं' इति३.४॥ २४. 'राति' इति४॥ २५. 'चुतादिर्नवोद्भेदः' इति३.४.५॥ २६. द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-५९, पृ.८४॥ २७. मैत्रेयसम्मतोऽयं पाठः ॥ २८. कोष्ठान्तर्गतपाठो मा.धातुवृत्तौ न दृश्यते ॥ २९. 'तथा' इति१॥ ३०. 'एते' इति३॥ ३१. 'पाके' इति१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पतने[1]'(भ्वा.प.से.), '-ष्ट्रन्'(उणा-५९८)इति ष्ट्रन् । प्रज्ञाद्यणि पात्त्रमपि । यन्महेश्वरः-"पात्त्रं स्रुवादौ[2] पर्णे च[3] राजमन्त्रिणि चेष्यते"[विश्वप्रकाशकोशः, रान्तवर्गः, श्लो-३६] यथा-"पात्त्रैरेव भवेत् तरोरपि यतश्छायापि निश्छिद्रकः"[[4]]इति । अयं द्वितकार एकतकारश्च, धातुप्रत्ययभेदात् । २ पलति गच्छति, पलति (पालयति) रक्षति जलादेर्वा **पलाशम्** । 'पल गतौ'(भ्वा.प.से.), '-रक्षणे[5]' (चु.प.से.) वा, 'पलेराशः'(हैमोणा-५३३)इत्याशः । पलमश्नुते व्याप्नोति वा । "'कर्मण्यण्'३।२।१॥ । "नवपलाशपलाशवनं पुरः"[शिशुपालवधम्, सर्गः-६, श्लो-२]इति माघयमकात् तालव्यशम्[6] । ३ छदति तरुमिति[7] **छदनम्** । 'छद अपवारणे'(चु.उ.से.), 'आधृषाद् वा' (गणसू-३।१।२५॥)इति णिजभावपक्षे[8] ल्युः । ४ बर्हते **बर्हम्,** पुंक्ली.। 'बर्ह प्राधान्ये[9]'(भ्वा.आ.से.), अच् । ५ पिपर्ति पूरयति **पर्णम्** । 'पॄ[10] पलानपूरणयोः'(जु.प.से.), 'कृपॄवृषिधाञ्भ्यो नः[11]'( ) । ६ छाद्यते[12]ऽनेनेति छादेर्ण्यन्तात् 'पुंसि संज्ञायाम्'३।३।११९॥ इति घे 'छादेर्घे-' ६।४।९६॥ इति ह्रस्वत्वे **छदम्** । ७ दलति विकसति[13] **दलम्** । 'दल विशरणे'(भ्वा.प.से.), अच् । पुंक्ली. एतौ । सप्त सामान्येन पत्त्रस्य ॥

**नवे तस्मिन्[14] किसलयं[1] किसलं[2] पल्लवः[3] ।**

१ तस्मिन् पत्त्रे नवे, किञ्चित् सलति **किसलयम्,** पृषोदरादिः। विकसति लीयमानं वा, पृषोदरादिः। "किसलयैः सलयैः"[रघुवंशम्, सर्गः-९, श्लो-३५]इति रघुयमकाद् दन्त्यसः । २ किञ्चित् सलति **किसलम्,** पृषोदरादिः । ३ पतति पत् । सम्पदादित्वात् क्विप् । तस्य लवोऽल्पत्वात् **पल्लवः,** पुंक्लीबे[15] । 'पल्ल गतौ' ([16])इत्यस्य वाऽवप्रत्यये । त्रीणि नवपत्त्रस्य[17] ॥

एतदपि विशेषत आह-

**अत्र तु ॥११२३॥**

**नवे प्रवालः[1]**

१ अत्रेति पल्लवे नवे, प्रवलति **प्रवालः,** पुंक्ली.। 'वल प्राणने'(भ्वा.प.से.), ज्वलादित्वाण्णः । एकं नूतनपत्त्राङ्कुरस्य । 'कूंपल' इति भाषा ॥११२३॥

एतदपि विशेषत आह-

**अस्य कोशी[1] शुङ्गा[2]**

१ अस्य प्रवालस्य, कुश्यति **कोशी** । 'कुश श्लेषे[18]'(दि.प.से.), 'इगुपध-'३।१।१३५॥ इति कः, गौरादिः । २ शाम्यति **शुङ्गा** । 'शमुं[19] उपशमे'(दि.प.से.), 'कमितमि-'(हैमोणा-१०७)इति डिदुङ्गः, पुंस्त्रीलिङ्गोऽयम्[20] । यद्वाग्भटः- "वटप्ररोहैः शुङ्गैर्वेति तथा पिष्ट्वा मनः-शिला[21] तद्वदार्द्रया वटशुङ्गया[22]"[ ]इति । कन्दलमपि, त्रिलिङ्गः । द्वे प्रवालनवाङ्कुरस्य ॥

**माढिर्[1]दलस्नसा ।**

१ मह्यतेऽनया **माढिः,** स्त्रीलिङ्गः । 'मह पूजायाम्'(भ्वा.उ.से.), 'स्त्रियां क्तिन्'३।३।९४॥ बाहुलकात् करणेऽपि, 'हो ढः'८।२।३१॥, 'झषस्तथोः'८।२।४०॥ धत्वम्, ष्टुत्वम्, 'ढ्रलोपे पूर्वस्य दीर्घोऽणः'६।३।१११॥ । दलस्य पत्त्रस्य स्नसा दलस्नसा, स्त्रियाम् । एकं 'पत्रनी नस' इति भाषायाः[23] ॥

**विस्तार[1]-विटपौ[2] तुल्यौ**

१ विस्तारयति तरुमिति विस्तारः । पचाद्यच् । असंज्ञात्वात् 'छन्दोनाम्नि च'८।३।९४॥ इति न षत्वम् । विस्तृतिर्वा। 'स्तृञ् आच्छादने'(स्वा.उ.अ.), 'प्रथने वावशब्दे'३।३।३३॥इति घञ्। [24]विट्यते वेष्ट्यतेऽनेने[25] **विटपः**। 'विट आक्रोशे'(भ्वा.प.से.), 'विटपविष्टप-'(उणा-४२५)इति कपे साधुः। 'वट वेष्टने'(भ्वा.प.से.)अतो 'विटपादयश्च'( )इत्यपप्रत्ययः[26], उपधाया इत्त्वं च ।

१. 'शल हुल पत्लृ गतौ' इति क्षीरतरङ्गिण्यादयः ॥ २. 'सुवर्णादौ' इति४॥ ३. 'पर्णेऽपि' इति विश्वप्रकाशकोशे, पृ.१२८॥ ४ द्र. अनेकार्थकैरवाकरकौमुदीटीका, भा-१, २।४२७॥, पृ.२४५॥ ५. स्वामिसम्मतोऽयं धातुपाठः ॥ ६. '-शः' इति३.४.५॥ ७ 'इति' इति ४.५प्रत्योर्नास्ति ॥ ८. '-वे' इति१॥ ९. मैत्रेयसम्मतोऽयं धातुपाठः, 'बर्ह बल्ह प्राधान्ये' इति स्वामिसायणौ ॥ १०. 'पृ' इति१.३.५॥ ११. 'धापॄवस्यज्यतिभ्यो नः'(उणा-३८६)इत्युणादिगणसूत्रम् ॥ १२. 'छदते-' इति३॥ १३. '-शति' इति३॥ १४. 'किश-' इति३.४॥ १५. 'पुंक्ली.' इति१.२॥ १६. हैमसम्मतोऽयं पाठः, द्र. स्वोपज्ञटीका४।११२३॥, पृ.२५१॥ १७ '-पत्रस्य' इति३.४॥ १८. दुर्गमतेऽयं धातुपाठः ॥ १९. 'शम' इति१॥ २०. '-लिङ्ग :' इति३, 'पुंस्त्री' इति४॥ २१. '-लामिति' इति४॥ २२. 'वटः' इति१॥ २३. 'भाषा' इति१॥ २४. 'व-' इति१.३.४.५॥ २५. '-नेति' इति२॥ २६. 'इत्यप्प्र-' इति१.३॥

"मरकतमयमेदिनीषु भानोस्तरुविटपान्तरपातिनो मयूखाः" [शिशुपालवधम्, सर्गः-४, श्लो-५६]इति माघः । शाखाप्रतिशाखामध्यभागो वृक्षविस्तारस्तस्यैकम् ॥

**प्रसूनं कुसुमं सुमम् ॥११२४॥**

**पुष्पं सूनं सुमनसः प्रसवश्च मणीवकम् ।**

१ प्रसूयते[1] **प्रसूनम्** । 'षूङ् प्राणिप्रसवे'(दि.आ.से.) प्रपूर्वः, 'स्वादय ओदितश्च[2]'(गणसू-३।३।१॥) [इत्योदित्वात् 'ओदितश्च'८।२।४५॥]इति निष्ठानत्वम् । न्यायादिदर्शने वृक्षः प्राणी प्राणिग्रहणं प्राधान्यादुक्तमिति वा[3] । "'षूङ् प्राणिप्रसवे'(दि.आ.से.), अत्र प्राणिग्रहणमतन्त्रम् । (तेन[4] प्रसूनादयः शब्दाः सिद्ध्यन्ति[5]) । अन्ये तु 'सर्वे[6] भावाः सचेतनाः' इत्यत्राऽपि प्राणित्वमाहुः । तथा च "प्रसूनं कुसुमम्[7]"[अमरकोषः२।४।१७॥]इत्यत्र सुभूतिचन्द्रः-'षूङ् प्राणिप्रसवे'(दि.आ.से.) । क्षपणकमते वृक्षस्याऽपि प्राणित्वम्[8]"[मा.धातुवृत्तिः, दिवादिः, धातुसं-२२]इति माधवः । २ कुस्यति **कुसुमम्,** पुंक्ली. । यद्गौडः-"अस्त्रियां कुसुमम्"[ ]। 'कुस श्लेषे[9]'(दि.प.से.), दन्त्यसवान्. 'कुसवसोः(कुसेरूलोम्भो-)-'(उणा-५४६)इत्युमः । ३ सुष्ठु माति **सुमम्** । 'मा माने'(अ.प.अ.), बाहुलकाद् डः । सूते फलमिति वा । बाहुलकान्मक् ॥११२४॥ ४ पुष्पति विकसति **पुष्पं,** क्लीबे । वाचस्पतिस्तु-"पुष्पोऽस्त्री"[[10]]इति पुंस्यप्याह । 'पुष्प विकसने'(दि.प.से.), अच् । ५ सूयते स्म **सूनम्** । निष्ठा, 'ओदितश्च'८।२।४५॥ इति नत्वम् । ६ सुप्रीतं मन आभिरिति[11] **सुमनसः** । प्रादिसमासः । नित्यबहुवचनान्तत्वाद् बहुवचननिर्देशः । "भूम्नि स्त्रियां सुमनसः"[[12]]इति रत्नकोषः। "सुमनाः पुष्पमालत्योः स्त्रियामाधारदेवयोः (स्त्रियां ना धीरदेवयोः)"[मेदिनीकोशः, सान्तवर्गः, श्लो-६७]इति मेदिन्यादिदर्शनादेकत्वमपि । "पुष्पं सुमनाः कुसुमम्"[[12]] इति नाममालादर्शनाच्च । "वेश्या श्मशानसुमना इव वर्जनीया"[मृच्छ-४।१४]इति शूद्रक[13]प्रयोगः[14] । "अप्रत्याख्याये दधिसुमनसी"[ ]इति मनौ[15] छान्दसत्वात्[16] क्लीबत्वम् । ७ प्रसूयते **प्रसवः** । 'षूङ् प्राणिप्रसवे'(दि.आ.से.), 'ऋदोरप्'३।३।५७॥ । ८ मणति शब्दायते भ्रमरैरिति **मणीवकम्** । 'मण शब्दे'(भ्वा.प.से.), पृषोदरादिः । अष्टौ पुष्पस्य ॥

**जालक-क्षारकौ तुल्यौ**

१ जलति सस्यं जालम् । 'जल धान्ये[17]'( ), ज्वलादित्वाण्णः । ततः स्वार्थे कनि **जालकम्,** क्लीबे । जालमपि । २ क्षरति सञ्चिनोति पुष्पादिकं **क्षारकः,** पुंक्ली. । 'क्षर सञ्चलने'(भ्वा.प.से.), ण्वुल् । द्वे नवकलिकावृन्दस्य॥

**कलिकायां तु कोरकः ॥११२५॥**

१ कलयति कलिः । 'कल सङ्ख्याने[18]'(चु.उ.से.), 'अच इः'(उणा-५७८), ततो ङीषि कली, स्वार्थे कनि 'केऽणः'७।४।१३॥ इति ह्रस्वत्वे **कलिका,** [तत्र] । अस्मादेव धातोः "संज्ञयां क्वुन्"[मा.धातुवृत्तौ, भ्वादिः, धातुसं-३२५]इति माधवः । २ कोरति भृङ्गैः **कोरकः,** पुंक्ली. । 'कुर शब्दे'(तु.प.से.), 'कृञादिभ्यः[19] संज्ञायां वुन्'(उणा-७१३) । "कोरकोऽस्त्री कुड्मलोऽपि[20]"[मेदिनीकोशः, कान्तवर्गः, श्लो-७५]इति मेदिनिः । कोरोऽपि । अविकसितपुष्पपर्यायौ । द्वे कल्याः ॥११२५॥

**कुड्मले मुकुलम्**

१ कुट्यते छिद्यते मधुपैरिति **कुड्मलः,** [तत्र] । 'कुट कौटिल्ये'(तु.प.से.), '[21]कुटशिधिभ्यां (कुटिकुषिभ्यां) क्मलन्'(दशपाद्युणा-८।१२०)इति क्मलन् । व्यञ्जनतृतीयवर्गाद्यपवर्गपञ्चममध्यः । "व्यञ्जनतृतीयवर्गतृतीयमध्यः"[ ]इति हलायुधटीका । "'कुडत् बाल्ये च' ( ), चकाराद् घसने, घसनं भक्षणम्, 'घनत्वम्' [ ]इत्यन्ये, घनत्वं सान्द्रत्वम्"[ ]इति धातुपारायणमित्य-

१. 'प्रसूते' इति२॥ २ गणसूत्रे चकारो न दृश्यते ॥ ३ १प्रतौ नास्ति॥ ४ कोष्ठान्तर्गतपाठस्थाने मा.धातुवृत्तौ- "तेन प्रसूनास्तरव इति भवति" इति दृश्यते॥, पृ.४०९॥, धातुसं--२२॥ ५ '-न्ते' इति३॥ ६ 'सर्व-' इति३॥ ७ इतोऽग्रे मा.धातुवृत्तौ 'सुमम्' इति ॥ ८ 'प्राण-' इति३॥ ९ 'श्लेषणे' इति४॥ १०. द्र. स्वोपज्ञटीका४।११२५॥, पृ.२५१॥ ११. 'ए-' इति३॥ १२. द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-६२, पृ.९०॥, रामाश्रमी२।४।१७॥, पृ.१७१॥ १३ 'शूद्रकः' इति५॥ १४ 'शूद्रकाव्यप्रयोगः' इति३॥ १५ '-नो' इति३॥ १६. '-सिकत्वात्' इति३॥ १७ काशकृत्स्नीयचान्द्रसम्मतोऽयं धातुपाठः ॥ १८. अत्र 'कलयति' इति विग्रहेण चुरादित्वं ज्ञायते, अग्रेतनेन भ्वादिगणस्थितेन माधवोद्धरणेन भ्वादित्वमपि ज्ञायते ॥ १९. 'कृञा-' इति१.२॥ २०. मेदिनीकोशे '-ऽपि' इत्यस्य स्थाने 'स्यात्' इति दृश्यते, पृ.७॥ २१. 'कुटसि-' इति१, 'कुटिसि-' इति३॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्यायम्[१]। २ मुञ्चति कलिकात्वं **मुकुलम्**[२] । '[३]मुञ्च त्यागे' ( ), 'मुञ्चेरलच् कत्वमुत्वं च'( ) कत्वे[४]ऽकारस्योत्वे च रूपम्। अस्त्रियामेतौ। दुर्गादयस्त्ववान्तरभेदं न मन्यन्ते[५], यदाहुः-''मुकुलाख्या तु कलिका कुड्मलं जालकं तथा। क्षारकं कोरकं च''[[६]]इति । द्वे ईषद्विकसितकलिकायाः॥

**गुञ्छे गुच्छस्तबकगुत्सकाः। गुलुञ्छः**

१ गूयते **गुञ्छः** । 'गुङ् शब्दे'(भ्वा.आ.अ.), ([७]'गुलुञ्छ-'(हैमोणा-१२६)इति छे निपात्यते, तत्र) । २ गूयत इति **गुच्छः** । 'शस्यादिभ्यश्छक्'( )इति छक् । ''पुष्पादिस्तबके गुच्छो मुक्ताहारकलापयोः''[[८]] इति[९] चवर्गान्ते रन्तिदेवः । स्वार्थे कनि गुच्छकोऽपि । ३ स्तूयते **स्तबकः,** पुंक्ली. । 'ष्टुञ् स्तुतौ'(अ.उ.अ.), 'कृञादिभ्यः [संज्ञायां] वुन्'(उणा-७१३)। स्थाधातोः ''तस्थोऽम्बजबकौ च[१०]'(उणा-५३६)इत्यबकप्रत्ययः प्रकृतेरातस्तादेशः स्तबकः''[[६]]इति मधुमाधवी । ४ बहुभिः पुष्पैः फलैर्वा सम्बाधः पल्लवग्रन्थिः गुत्सः । 'गुध परिवेष्टने'(दि.प.से.), 'उन्धिगुधिकुधि(कुषि)भ्यः सक्' (उणा-३४८)इति सक्''[[८]]इति पारायणगोवर्धनौ । ''स्तबके हारभेदे च गुत्से[११]: स्तम्बेऽपि कीर्तितः''[[८]] इति[९] दन्त्यान्तेषु रुद्रः। कनि **गुत्सकः** । ५ गुड्यत इति **गुलुञ्छः**, सानुस्वारमध्यः, ([७]'गुलुञ्छ[पिलि]पिञ्छ-' (हैमोणा-१२६)इति छे निपात्यते), पुंस्ययम् । क्लीबेऽपि[१२], [यदाह] वाचस्पतिः-''गुलुञ्छोऽस्त्री''[[१३]]इति । गुलुञ्छु-लुञ्छी[१४] अपि । पञ्च गुच्छस्य ॥

**अथ रजः पौष्पं परागः**

१ पुष्पस्येदं पौष्पं रजः **परागः** इत्युच्यते । परा गच्छति पतति परागः । डप्रत्ययः । एकं पुष्परजसः ॥

**अथ रसो मधु ॥११२६॥ मकरन्दो मरन्दश्च**

१ अथेति, पुष्पाणां रसः, मन्यते बहुभृङ्गैरिति **मधु,** क्लीबे[१५] । ''पुंस्यपि''[ ]इति हलायुधटीका । 'मन ज्ञाने'(दि.आ.अ.), 'फलिपाटि-'(उणा-१८)इत्युः, धोऽन्तादेशश्च ॥११२६॥ २-३ मकरो[१६] ध्वजत्वेना[१७]ऽस्याऽस्तीति, अर्शआद्यचि मकरः कामः, तमन्दति बध्नाति धारयति कामजनकत्वाद् मधुनः **मकरन्दः** । 'अदि बन्धने'(भ्वा. प.से.), 'कर्मण्यण्'३।२।१॥, 'गतिकारकोपपदानाम्-' (वा-२।२।१९॥)इत्युक्तेः सुबुत्पत्तेः प्राक् समासेऽध्ययनवत् पररूपत्वम्[१८] । मङ्क्यते मण्ड्यतेऽनेन पुष्पं मकरन्द इति पृषोदरादिर्वा । **मरन्द** इति निपातनात् । मकलन्दोऽपि । त्रीणि पुष्परसस्य ॥

**वृन्तं प्रसवबन्धनम्[१९] ।**

१ पुष्पफलपत्राणि येन धार्यन्ते[२०] (वार्यन्ते) तद् वृणोति **वृन्तम्** । 'वृञ् वरणे'(स्वा.उ.से), 'वृणोतेर्नुक् च'( )इति तः किन्नुक् च, बाहुल्यान्न णत्वम्[२१] । प्रसूयते प्रसवः । 'ॠदोरप्'३।३।५७॥ । प्रसवौ पुष्पफले[२२] बध्यतेऽनेन, ल्युट्[२३] बन्धनम् । प्रसवानां बन्धनं प्रसवबन्धनम् । एकं पुष्पफलवृन्तस्य ॥

**प्रबुद्धोज्जृम्भफुल्लानि व्याकोशं विकचं स्मितम् ॥११२७॥**

**उन्मिषितं विकसितं दलितं स्फुटितं स्फुटम् ॥**

**प्रफुल्लोत्फुल्लसम्फुल्लोच्छ्वसितानि विजृम्भितम् ॥११२८॥**

**स्मेरं विनिद्रमुन्निद्रविमुद्रहसितानि च ।**

१ प्रबुध्यते **प्रबुद्धम्** । 'बुध(बुधिर्) बोधने'(भ्वा. प.से.), निष्ठा, । २ उज्जृम्भते **उज्जृम्भम्** । 'जृभि गात्रविनामे[२४]'(भ्वा.आ.से.), घञि । उद्गता जृम्भाऽस्येति वा । ३ फलति विशीर्यते **फुल्लम्** । 'ञिफला विशरणे' (भ्वा.प.से.), विशरणं विकाशः, 'ञीतः क्तः'३।२।१८७॥,

---

१. '-स्याम्' इति५॥ २. '-लः' इति१.२.३॥ ३. 'मुचे-' इति३॥ ४ '-त्वम्' इति३॥ ५ '-ते' इति१॥ ६. द्र.अम.क्षीर.२।४।१६॥, पृ.८३॥, स्वोपज्ञटीका४।११२६॥, पृ.२५१॥ ७ कोष्ठान्तर्गतपाठः १.३.४.५प्रतिषु न दृश्यते ॥ ८. द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-६२, पृ.८९॥ ९. रामाश्रमी२।४।१६॥, पृ.१७०॥ १०. 'स्थः स्तोऽम्बजबकौ'(उणा-५३६)इत्युणादिगणसूत्रम् ॥ ११. 'गुच्छः' इति५॥ १२. '-ऽपि' इति ३.४.५प्रतिषु नास्ति ॥ १३. द्र. स्वोपज्ञटीका४।११२६॥, पृ.२५१॥ १४. '-लुञ्छी' इति ३.४.५प्रतिषु नास्ति ॥ १५. '-बम्' इति४॥ १६. '-र-' इति४.५॥ १७. 'ध्वजेना-' इति३॥ १८. 'परत्वम्' इति२॥ १९. तुलनीयोऽमरकोषः२।४।१५॥ २०. 'धार्यते' इति१.३॥ २१. णत्वं प्रति परसवर्णस्याऽसिद्धत्वादिदं चिन्त्यम् ॥ २२. '-लैः' इति५॥ २३. '-टि' इति१.२.३॥ २४. 'जृम्भे' इति२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'आदितश्च'७।२।१६॥ इतीडभावः, [1]निष्ठातस्य[2] 'अनुपसर्गात् फुल्लक्षीबकृशोल्लाघाः'८।२।५५॥ इति लत्वम् । ४ व्यावृत्तो[3] निवृत्तः कोशोऽस्मादिति **व्याकोशम्**, तालव्यशम् । व्याकोषमिति मूर्धन्यान्तमपि "कोषविषादौ च" [[4]]इत्यूष्मविवेकात् । ५ विकचति विकसति **विकचम्** । 'कच बन्धने'(भ्वा.प.से.), अच्, विशब्दो विश्लेषद्योतकोऽव्ययानामनेकार्थत्वात् । ६ स्मयति **स्मितम्** । 'स्मिङ्[6] ईषद्धसने[7]' (भ्वा.आ.अ.), क्तः ॥११२७॥ ७ उन्मिषति स्म **उन्मिषितम्** । 'मिष स्पर्धायाम्'(तु.प.से.), निष्ठा । ८ विकसति स्म **विकसितम्** । 'कस गतौ[8]'(भ्वा.प.से.), निष्ठा । ९ दलति स्म **दलितम्** । १० स्फुटति स्म **स्फुटितम्** । 'स्फुट विकसने[9]'(तु.प.से.), निष्ठा । ११ स्फुटति **स्फुटम्** । 'इगुपध-'३।१।१३५॥ इति कः । १२ ([10]**प्रफुल्लः** तु फुल्ल) इति साधनात् पश्चात्प्रोपसर्गयोगात्[11] । प्रफुल्लतीति वा । 'फुल्ल विकसने'(भ्वा.प.से.), प्रपूर्वः, पचाद्यच् । उपसर्गप्रतिरूपको वा प्रशब्दः, यथा प्रदत्तमित्यत्र । १३-१४ एवम् **उत्फुल्ल-सम्फुल्ल**शब्दौ द्वावपि । 'उत्फुल्लसम्फुल्लयोः-'(वा-८।२।५५॥)इत्युपसङ्ख्यानाल्लत्वम् । १५ उच्छ्वसिति स्म **उच्छ्वसितम्** । १६ विजृम्भते स्म **विजृम्भितम्** ॥११२८॥ १७ स्मयनशीलं **स्मेरम्** । 'स्मिङ्[1] ईषद्धसने'(भ्वा.आ.अ.), 'नमिकम्पिस्म्यजस्-'३।२।१६७॥ इति र[12]: । १८ विगतनिद्रं **विनिद्रम्** । १९ उत्क्रान्तनिद्रं **उन्निद्रम्** । २० विगता मुद्रा सङ्कोचोऽस्य **विमुद्रम्** । २१ हसति स्म **हसितम्** । 'हस(हसे) हसने[13]'(भ्वा.प.से.), निष्ठा । एकविंशतिः स्मेरस्य ॥

## सङ्कुचितं[1] तु निद्राणं मीलितं[3] मुद्रितं[4] च तत् ॥११२९॥

१ सङ्को(कु)चति स्म **सङ्कुचितम्** । 'कुच सङ्कोचने[14]'(तु.प.से.), निष्ठा । २ निद्राति स्म **निद्राणम्** । 'द्रा कुत्सायां गतौ'(अ.प.अ.), निष्ठा । ३ [15]मीलति स्म **मीलितम्** । 'मील निमीलने[16]'(भ्वा.प.से.), निष्ठा[17] । ४ मुद्र्यते स्म **मुद्रितम्** । 'मुद्र सङ्कोचे[18]'( ) । चत्वारि सङ्कुचितस्य ॥११२९॥

## फलं[1] तु सस्यम्[2]

१ फलति निष्पद्यते[19] **फलम्**, पुंक्ली. । 'फल निष्पत्तौ'(भ्वा.प.से.), अच् । केचिदेनं क्लीब एव[20] पठन्ति । २ ससति (सस्ति) स्वपिति **सस्यम्** । 'षस स्वप्ने' (अ.प.से.), 'माच्छाससिसू[21]भ्यो यः'(उणा-५४९, दशपाद्युणा-८।१२॥) 'तकिससि(शसि)चति-'(वा-३।१।९७॥) इत्यादिनोपसङ्ख्यानात् क्यपि वा, द्विदन्त्यसम् । "स्रंसनं सीसकं स्रस्तं साध्वसं सस्यम्"[[22]]इत्यूष्मविवेकात्[23] । 'शसु हिंसायाम्'(भ्वा.प.से.)इत्यस्य "तालव्यादिरपि"[[22]]इति वर्णदेशना[24] । "वृक्षादीनां फलं सस्यम्"[अमरकोषः२।४।१५॥]इत्यमरः । द्वे सामान्येन वृक्षादिफलस्य ॥

## तच्छुष्कं वानम्[1]

१ तत् फलं शुष्कम्, वायति स्म **वानम्** । 'पै[25] ओवै शोषणे[26]'(भ्वा.प.अ.), निष्ठा, 'ओदितश्च'८।२।४५॥ इति नत्वम् । "आवानमपि"[ ]इति हलायुधटीका । एकं शुष्कफलस्य ॥

## आमं शलाटु[1] च ।

१ तत्फलमामपक्वं, आमयति आमम्, अच् । शलति **शलाटु**[27], तालव्यादिः, वाच्यलिङ्गः । 'शल चलनसंवरणयोः'(भ्वा.प.से.), 'शलेराटुः'(हैमोणा-७६३) इत्याटुः । "आर्द्रत्वात् श(स)लिलमटतीति, मृगय्वादित्वात् कुः, श(स)लिलस्य[28] शलादेशः"[[29]]इत्यन्ये । "शौटीरशाटकशकटाः शिपिविष्टशाखोटाशोकशटीशटितं शलाटुः"[[29]]इत्युष्मभेदात् । शलाटु वाने त्रिषु । "शलाटुः

---

१. '-न्तस्य' इति३॥ २. निष्ठातकारस्येत्यर्थः ॥ ३ '-तो' इति३॥ ४ द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-५३, पृ.७५॥, तत्र-'कोशविशदौ च' इति दृश्यते ॥ ५ १प्रतौ नास्ति ॥ ६ 'ष्मिङ्' इति मैत्रेयसायणौ ॥ ७ '-विहसने' इति३॥ ८ 'गत्यादानेषु' इति१, १.२प्रत्योर्नास्ति, 'विकशने' इति३॥ ९. '-सितं' इति३॥ १०. कोष्ठान्तर्गतपाठस्थाने २.३.४.५प्रतिषु 'प्रफुल्लसंफुल्ल' इति दृश्यते॥ ११. '-र्गेभ्यो योगात्' इति३.४.५॥ १२. 'र' इति३.४.५॥ १३. धातुपाठः १.२.३.५प्रतिषु नास्ति ॥ १४ '-कोचे' इति३.४.५॥ १५. 'मि-' इति२॥ १६. 'निमेषणे' इति क्षीरतरङ्गिण्यादयः ॥ १७ १प्रतौ नास्ति ॥ १८. १.२.४.५प्रतिषु न दृश्यते ॥ १९. '-ति' इति५॥ २०. 'एवं' इति३॥ २१. पञ्चपाद्युणादिगणसूत्रे '-सू-' इति न दृश्यते ॥ २२. द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-६१, पृ.८७॥, "स्रंसनं सीसकं सस्यं स्रस्तं सास्ना च साध्वसम्" इति दृश्यते ॥ २३. '-च्च' इति४॥ २४ द्र. टीकासर्वस्वम्, भा-२, २।४।१५॥, पृ६६॥ २५. १.२.४.५प्रतिषु न दृश्यते ॥ २६. 'विशो-' इति१.२.५, 'विशे-' इति४॥ २७ '-टुः' इति४॥ २८. '-लमस्य' इति४॥ २९. द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-६१, पृ.८७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कर्कटी, शलाटवो माषा:, शलाटूनि फलानि, वाना हरीतकी, वानो मुद्गः, वानमाम्रम्[1] । "शलाटु कोमलं प्रोक्तम्" [हलायुधकोश:२।१८९॥]इति हलायुध:। एकमामफलस्य ॥

**ग्रन्थि: पर्व परु:**

१ ग्रथ्नाति संधत्ते **ग्रन्थि:**, पुंसि[2] । 'ग्रन्थ सन्दर्भे' (क्र्या.प.से.), '-इन्'(उणा-५५७)इतीन् । "खनिकषि-' (उणा-५७९)इति इन्"[ ]इत्येके । "ग्रन्थ इत्यदन्तोऽपि" [ ]इति हलायुधटीका । २ पृणाति **पर्व**, क्लीबे । 'स्नामदि-'(हैमोणा-९०४)इति वनिप्। पर्वणी, पर्वाणि इत्यादि[3]। ३ पृणाति **परु:** । 'पृ पालनपूरणयो:'(जु.प.से.), 'धनर्त्तिचक्षि-(अर्तिपृवपि)-'(उणा-२७४)इत्युसि:[4] । परुषी, परूंषि इत्यादि क्लीबे । त्रीणि वृक्षग्रन्थे:। 'परवं'[5] इति भाषा ॥

**बीजकोशी शिम्बा शमी शिमि: ॥११३०॥**

**शिम्बिश्च**

१ कुश्यन्त्यस्यां[6] कोशी, बीजानां कोशीव पिधायकत्वात् **बीजकोशी**। कोश्यपि[7] । २ शर्धते[8]ऽनया **शिम्बा**। पृषोदरादि: । 'डीनीबन्धि-'(हैमोणा-३२५)इति औणादिको वा डिम्ब: । "'षम ष्टम वैक्लव्ये'[9](भ्वा.प.से), 'उल्वादयश्च'(उणा-५३५)इति वन्, उपधाया इत्वं च निपात्यते, सिम्बा दन्त्यादि:"[पदचन्द्रिका, भा-२, वैश्यवर्ग:, श्लो-५९६]इति मिश्रा: । ३ शाम्यति पाकेनेति **शमी** । पचाद्यचि[10] गौरादि: । "'शमुँ[11] उपशमे'(दि.प.से.), 'इन् सर्वधातुभ्य:'(उणा-५५७)इतीन् शमि:, तत: पिप्प(प्प)लादिदर्शनाद् ङीषि शमी"[[12]]इति माधव: । ४ शमयति **शिमि:** । 'अच इ:'(उणा-५७८), पृषोदरादित्वादित्वम्[13] ॥११३०॥ ५ शिनोति **शिम्बि:** । स्त्रियामेते । पञ्च फलीति ख्यातायाः ॥

**पिप्पलोऽश्वत्थ: श्रीवृक्ष: कुञ्जराशन: ।**

**कृष्णावासो बोधितरु:**

१ दर्शनादेव पाति **पिप्पल:**, पवर्गाद्यद्वयमध्य: । 'पा रक्षणे'(अ.प.अ.), 'कम्बलादयश्च'[14](दशपाद्युणा-८। ११४॥)इति कलप्रत्यये द्वित्वमभ्यासस्येत्वं पुगागम: । मूलमस्य पिप्पलेन जलेन सन्त:[15] प्रायेण सिञ्चन्तीति[16] तद्योगाद् वा[17] पिप्पल: । "पिप्पलं सलिले वस्त्रच्छेदभेदे[18] च ना तरौ"[मेदिनीकोश:, लान्तवर्ग:, श्लो-१११]इति मेदिनि: । पिप्पलानि[19] देश्यां पत्त्राणि, तानि सन्त्यस्य[20] वेति[21], अर्शआदित्वादचि वा । "ह्योतीतेऽनागतेऽह्नि श्व:[22]" [अमरकोष:३।४।२२॥]इति[23] वक्ष्यते, तत्र 'श्व:' इति पदमागामिचिरकालोपलक्षकम्, कथमन्यथा 'परश्व:' इति प्रयोग: स्यात् । शाल्मलिवृक्षाद्यपेक्षया न श्वश्चिरं तिष्ठतीति, 'सुपि-'३।२।४॥ इति क:, पृषोदरादित्वात् सस्य तत्वे **अश्वत्थ:** । यद्वा "आप: प्रजाहितं शीतमश्वत्थं पवनं विषम्"[[24]]इति मालादर्शनादश्वत्थं[25] जलम्, एतन्मूलेभ्यश्छिद्रेभ्यो बहुजलश्रुतेरश्वत्थयोगादश्वत्थ: । सदा चलदलत्वेनाऽश्व इव तिष्ठतीति वा । ग्रीष्मे[26] प्रायेणाऽस्य मूलं धर्मार्थं जलैर्जनेन सिच्यति इति, तज्जलयोगाद्[27] वा अश्वत्थ: । पृषोदरादि: । ३ श्रिया युक्तो वृक्ष: **श्रीवृक्ष:** । ४ कुञ्जरैर्हस्तिभिरश्यते[28] भुज्यते[29] **कुञ्जराशन:** । 'अश भोजने'(क्र्या.प.से.), कर्मणि ल्युट्, अवयवलक्षणयाऽवयव्यपि कुञ्जराशन: । ५ कृष्णस्या[30]ऽऽवास: **कृष्णावास:** । ६ एतन्मूले बुद्धेन भगवता बोधि: साक्षात्कृत इति साहचर्याद् वृक्षोऽपि बोधि: । बुध्यते सर्वमितीन्प्रत्यये बोधि: । स चाऽसौ तरुश्च **बोधितरु:** । बोधिनामा वा तरु- र्बोधितरु: । बोधिरपि । "पिप्पलो बोधिरश्वत्थ:"[ ]इति रत्नकोष: । षट् पिप्पलस्य । हेमनिघण्टुश्चात्र[31][32]-

"पिप्पले[33] बोधिरश्वत्थ: श्रीवृक्षश्चलपत्त्रक: ।
मङ्गल्य: केशवावास: श्यामलो द्विरदाशन: ॥१॥"
[निघण्टुशेष:, प्रथमो वृक्षकाण्ड:, श्लो-१९२७-२८ (३८-३९)]इति ॥

---

१. '-मात्रम्' इति५॥ २. १प्रतौ नास्ति ॥ ३. इतोऽग्रे ३प्रतौ 'क्लीबे' इति दृश्यते ॥ ४ '-सि' इति३.४.५॥ ५ '-बत' इति५॥ ६. 'कुस्य-' इति१, 'कुश-' इति३॥ ७ 'का-' इति५॥ ८. '-ती' इति३॥ ९ 'वैष्ट-' इति३, 'अवै-' इति स्वामी ॥ १०. '-चि:' इति४॥ ११. 'शम' इति३॥ १२. सायणकृतमा.धातुवृत्तौ-"शमी- शमशब्दात् पिप्पल्यादित्वान्ङीष् ।" इति दृश्यते, दिवादि: धातुसं-९९, पृ.४३४॥ १३. '-दित्वम्' इति३॥ १४ 'कम्बा-' इति४॥ १५. 'सत:' इति४॥ १६. '-तीति' इति१.२.५॥ १७ ४.५प्रत्योर्नास्ति ॥ १८. 'वस्त्रे छेदे भेदे' इति४॥ १९. '-ल्यानि' इति३, '-ल्यादि-' इति५॥ २०. '-स्या' इति५॥ २१. ३प्रतौ नास्ति ॥ २२. "ह्य: स्यादतीतेऽह्नी श्व एष्यति"(अभि-६।१५४१)इत्यभिधानचिन्तामणिनाममालायाम् ॥ २३. 'इत्यन्ये' इति१॥ २४ द्र. पदचन्द्रिका, भाग-२, वनौषधिवर्ग:, श्लो-६६-६७, पृ.९५॥, रामाश्रमी२।४।२०-२१॥, पृ.१७३॥ २५. '-च्चाऽश्वत्थं' इति४॥ २६. १प्रतौ नास्ति ॥ २७ '-प्रयोगाद्' इति१॥ २८. '-स्यते' इति३॥ २९. 'मु(भु)ज्यते' इति३॥ ३०. '-स्य' इति५॥ ३१. 'है-' इति१.२॥ ३२. '-घण्टुश्चात्र' इति१॥ ३३. '-लो' इति१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## प्लक्षस्तु पर्कटी जटी ॥११३१॥

१ प्लक्षति अधोगच्छतीति **प्लक्षः**। 'प्लक्ष गतौ' ( ), अच्। प्लोषत्यशिवमिति वा। 'प्लुष(प्लुषु) दाहे' (भ्वा.प.से.), 'प्लुषः प्लुष् च (प्लुषेः प्लष् च)'(हैमोणा-५६६)इति सः। प्रक्षरति निर्यासमिति वा । 'क्षर सञ्चलने' (भ्वा.प.से.), 'अन्येष्वपि[१]-'३।२।१०१॥इति डः, टिलोपः, कपिरि(लि)कादित्वाल्लत्वम् । २ पर्कटाख्यं फलमस्त्यस्य **पर्कटी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः[२] । यद्वाचस्पतिः-''फलं त्वेतस्य पर्कटम्''[[३]]इति । पृच्छ्यते (पृच्यते)ऽश्वत्थसादृश्येनेति पर्कटीति, अकारान्ताद् ङ्यामीदन्तो[४] वा । पृषोदरादिः । ''पर्कटी नूतनफले पूगादेः प्लक्षपादपे''[मेदिनीकोशः, टान्तवर्गः, श्लो-४७]इति टान्ते मेदिनिः । पर्कटीति नान्तोऽयम् । ''ईदन्तोऽप्यस्ति''[अम.क्षीर.२।४।३२॥]इति स्वामी । ''विज्ञेया पर्कटी प्लक्षः प्लक्षः पिप्पलपादपः''[शाश्वतकोशः, श्लो-५२६]इति । ३ जटा प्रागुक्ता (श्लो-८१६, ११२०), तद्योगाद् **जटी,** पुंसि । शिखादित्वादिन्[५] । जटिनौ, जटिनः इत्यादि । ''जट झट[६] सङ्घाते'(भ्वा.प.से.), 'इन् सर्वधातुभ्यः'(उणा-५५७)इतीन्[७], ङीषि, जटी''[ ]इति सर्वधरः । ''गर्दभाण्डे जटीप्लक्षौ''[[८]] इति रुद्रः[९] । त्रीणि 'पींपरडी[१०][११]' इति ख्यातायाः ॥११३१॥

## न्यग्रोधस्तु बाहुपात् स्याद् वटो वैश्रवणालयः ।

१ न्यग् निम्नं रुणद्धीति **न्यग्रोधः** । पचाद्यच् । न्यग् रोहतीति, पृषोदरादिर्वा । २ बहवः पादा अवरोहा अस्य **बहुपात्**। 'सङ्ख्यासुपूर्वस्य'५।४।१४०॥इति पादस्याऽकारलोपः। ३ वटति वेष्टयति मूलैरिति **वटः,** त्रिषु। 'वट वेष्टने'(भ्वा.प.से.), अच् । ४ वैश्रवणस्य यक्षस्याऽऽलयो **वैश्रवणालयः**। यदुक्तम्-''वटे वटे[१२] वैश्रवणः[१३]''[[१४]]इति । चत्वारि वटस्य ॥

## उदुम्बरो जन्तुफलो मशकी हेमदुग्धकः ॥११३२॥

१ उल्लङ्घितमम्बरमनेन क्षीरमयत्वेन छिन्न[१५] उच्चैरतिशयेन अम्बते[१६] स्रंसते[१७] **उदुम्बरः,** द्विपञ्चमस्वरः। 'अबि लबि स्रंसने[१८]'(भ्वा.आ.से.), उदुपपदे वर्णविकारेणाऽकारस्योत्वमित्यन्ये । 'अबि शब्दे'(भ्वा.आ.से.), अबन्धुत्वं[१९] चेत्युदुम्बरः । मेदिन्यादौ तु वृक्षभेदेऽप्युडुम्बर इति [२०]टवर्गतृतीयमध्य एवेति ।

''[२१]उडुम्बरस्तु [२२]देहल्यां वृक्षभेदे च पण्डके ।
कुष्ठभेदेऽपि च पुमांस्ताम्रेऽपि[२३] स्यान्नपुंसकम् ॥१॥''

[मेदिनीकोशः, रान्तवर्गः, श्लो-२४९-२५०]इति मेदिनीविश्वादयः[२४] । ''वृक्षभेदे तवर्गतृतीयमध्य एव''[[२५]]इति सुभूतिसर्वधरौ । २ क्षुद्रजन्तुत्वाज्जन्तवः कृमयो [२६]मशका वा, तद्युक्तानि फलान्यस्य **जन्तुफलः** । ३ मशकाः सन्त्यस्य[२७] **मशकी**। 'अत इनिठनौ'५।२।११५॥इतीनिः। ४ हेमवर्णक्षीरत्वाद् **हेमदुग्धकः** । चत्वारि [२८]ऊम्बरवृक्षस्य ॥११३२॥

## काकोदुम्बरिका फल्गुर्मलयूर्जघनेफला[२९] ।

१ काकप्रिय उदुम्बरः काकोदुम्बरः, गौरादिः, [३०]ततः 'संज्ञायां कन्[३१]'५।३।७५॥, 'केऽणः'७।४।१३॥ इति ह्रस्वत्वं[३२] **काकोदुम्बरिका**। २ फलति निष्पद्यते **फल्गुः** । 'फल निष्पत्तौ'(भ्वा.प.से.), 'फलिपाटि-'(उणा-१८) इत्यादिना उप्रत्ययो [३३]गुगागमश्च, स्त्रीलिङ्गः । ''[३४]फल्गुवसारेऽभिधेयवद् नदीभेदे मलय्वां स्त्री''[मेदिनीकोशः, गान्तवर्गः, श्लो-१०-११]इति मेदिनिः । ३ [३५]मलं श्वित्रं

---

१. '-भ्योऽपि' इति४॥ २. '-नि' इति५॥ ३. द्र. स्वोपज्ञटीका४।११३१॥, पृ.२५३॥ ४ 'पर्कटः' इत्यत्र बाहुलकात् कटप्रत्ययः, गौरादित्वाद् ङीषीतीदन्तता ५. '-च्' इति१, '-ञ्' इति३॥ ६. १.२.३प्रतिषु न दृश्यते ॥ ७ '-ञ्' इति३॥ ८. द्र. टीकासर्वस्वम्, भा-२, २।४।३२॥, पृ.८७॥, पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-७८, पृ.१०९॥, रामाश्रमी२।४।३२॥, पृ.१७८॥ ९. 'सर्वधरः' इति४॥ १०. 'पी-' इति३॥ ११. '-रिडी' इति१.२॥ १२. ५प्रतौ नास्ति ॥ १३. '-मणः' इति३॥ १४. द्र. स्वोपज्ञटीका४।११३२॥, पृ.२५३॥ १५. '-त्रं' इति४॥ १६. 'अम्बते' इति१.४.५॥ १७ '-ति' इति१.२.४॥ १८. 'रबि लबि अबि शब्दे' इति क्षीरतरङ्गिण्यादयः ॥ १९. '-न्धत्वं' इति१.३, '-न्धात्वं' इति४॥ २०. 'तृतीयटवर्ग-' इति४॥ २१. मेदिनीकोशे तु तवर्गतृतीयमध्यः 'उदुम्बर-' इति दृश्यते, पृ.१४०॥ २२. 'देहि-' इति३॥ २३. मेदिनीकोशे 'तु' इति दृश्यते ॥ २४ ''उदुम्बरो जन्तुफले देहल्यां लघुमेढ्रके । उदुम्बरं तु कुष्ठभेदे ताम्रेऽपि स्यादुदुम्बरम्॥'' इति विश्वलोचनकोश, रान्तवर्गः, श्लो-२५३, पृ.३१८॥ २५. द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-६८, पृ.९६॥ २६. 'मस-' इति५॥ २७ '-त्र' इति४॥ २८. 'उदुम्ब-' इति३॥ २९. तुलनीयोऽमरकोषः२।४।६१॥ ३०. 'तत्' इति५॥ ३१. '-नि' इति३॥ ३२. '-त्वे' इति३॥ ३३. 'यु-' इति४, 'पु-' इति५॥ ३४ 'फलावसरे-' इति१, 'फलववसारे' इति३, 'फलवदसारे' इति४, 'फलवत्सारे' इति५॥ ३५. 'फ-' इति५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यावयते **मलयूः** । 'यु जुगुप्सायाम्'(चु.आ.से.), बाहुलकात् 'क्विप् वचि-'(वा-३।२।१७८॥)इत्यादिना क्विप्-दीर्घत्वे। मलात् पापाद् युनाति वा, क्विबन्तः। ''मलं पापे च किट्टे च वर्चस्के कृपणे मले''[[1]]इति धरणिः[2]। ४ जघने जघनतुल्येऽधोभागे फलतीति **जघनेफला**। पचाद्यच्, 'अमूर्धस्तक-'६।३।१२॥ इत्यादिना सप्तम्यलुक्, बहुव्रीहिर्वा[3]। सर्वे[4] स्त्रियाम्। ''फल्गुः''[मङ्खकोशः,श्लो-११८] पुंस्यपि इति मङ्खः। चत्वारि '[6]कालूंबरी' इति ख्यातायाः॥

## आम्रश्चूतः सहकारः

१ अम्यतेऽभिलष्यते[7] **आम्रः** । 'अम गत्यादौ'(भ्वा.प.से.), 'अमितम्योर्दीर्घश्च'(उणा-१७३)इति रग्दीर्घत्वे[8] । ''प्रथमस्वरादिरम्र इत्यपि''[ ]इति हलायुधटीका[9]। २ श्चोतति रसं चूष्यते वा **चूतः** । 'श्चुतिर् क्षरणे'(भ्वा.प.से.), 'चूष पाने'(भ्वा.प.से.) वा, अनयोः पृषोदरादित्वात् । ३ सहकारयति सङ्गमयति स्त्रीपुंसाविति **सहकारः**। अच्। त्रीण्याम्रस्य । अमरस्तु-''आम्रश्चूतो रसालोऽसौ सहकारोऽतिसौरभः''[अमरकोषः२।४।३३॥]इति भिनत्ति ॥

## सप्तपर्णस्त्वयुक्छदः ॥११३३॥

१ प्रतिपर्व सप्त पर्णान्यस्य[10] **सप्तपर्णः**। २ अयुञ्जि विषमाणि छदान्यस्य **अयुक्छदः** । द्वे 'सादडीयु[11]' इति ख्यातस्य ॥११३३॥

## शिग्रुः शोभाञ्जनोऽक्षीव-तीक्ष्णगन्धक-मोचकाः ।

१ शिनोति तैक्ष्ण्यात् [12]**शिग्रुः**, पुंक्ली.। 'शीञ् निशाने[13]'( ), 'जम्ब्वा(त्वा)दयश्च'(उणा-५४२)इति शीञो[14] रुक् गकारागमो ह्रस्वत्वं चेति[15] । ''श्वेतशौण्डदशाशूद्रशिग्रवः''[[16]]इति शभेदात् तालव्यादिः । २ शोभां जनयति **शोभाञ्जनः** । पृषोदरादिः । शोभामनक्तीति । 'अञ्जू [व्यक्ति]म्रक्षणादौ'(रु.प.से.)इत्यस्य पचाद्यचि। ''तरुणीजन इवाऽधिगतशोभाञ्जनो वसन्तसमयः प्रादुरासीत्''[[16]]इत्याश्चर्यमञ्जरीति, अतोऽयं तालव्यादिः । ''दन्त्यादिरपि''[[16]]इत्यन्ये । ३ न क्षीवन्तेऽनेन **अक्षीवः**, आद्यस्वरादिः । 'क्षीवृ मदे'(भ्वा.आ.से.), करणे घञ् । ''आङ्पूर्वात् 'क्षीवृ मदे'(भ्वा.आ.से.) अतः करणे घञि दीर्घादिरपि, (गन्ध-)काक्षीरेति रान्तोऽयम्''[ ]इत्यन्ये । ४ तीक्ष्णस्तीव्रो गन्धोऽस्य **तीक्ष्णगन्धकः** । 'उरःप्रभृतिभ्यः कप्'५।४।१५१॥ इति कप्[17]। ५ मुञ्चति[18] गन्धं **मोचकः** । 'मुच्लृ मोक्षणे'(तु.प.अ.), ण्वुल् । मोचयति रोगादि[19] दुर्गन्धत्वात् पार्श्वं मोचयतीति वा[20], पचाद्यचि मोचः, ततः[21] कनि मोचकः । अक्षीवादीनां त्रयाणामितरेतरद्वन्द्वः[22] । पञ्च 'सिरघूसुहींजणुं[23]' इति ख्यातस्य ॥

## श्वेतेऽत्र श्वेतमरिचः

१ अत्र शिग्रौ श्वेते[21] श्वेतानि मरिचतुल्यान्यस्य **श्वेतमरिचः** । एकं श्वेतशिग्रोः ॥

## पुन्नागः सुरपर्णिका ॥११३४॥

१ पूजितः पुमान् **पुन्नागः**, स इव प्राधान्यात् । २ सुरप्रियाणि पर्णानि सन्त्यस्यां **सुरपर्णिका**, टाबन्तः । द्वे पुन्नागवृक्षस्य ॥११३४॥

## बकुलः केसरः[24]

१ कविभिरुच्यते वर्ण्यते **बकुलः** । 'वच परिभाषणे'(अ.प.अ.), बाहुलकादुलच् । बङ्क्यते पुष्पैर्वा । 'वकिङ् कौटिल्ये'( ) अतो वा उलच् । २ केसराः सन्त्यस्य[25] **केसरः**[26], दन्त्यमध्यः। अर्शआदित्वादच् । ''सवितृकिसलयकेसरसभाः[27]''[[28]]इत्यूष्मविवेकात् । [29]वउलसिरीनाम्नी द्वे । यद् धन्वन्तरिः-

---

१. द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-१०७, पृ.१४८॥, रामाश्रमी२।४।६१॥, पृ.१९०॥ २. '-णेः' इति१॥ ३. '-हेर्वा' इति३॥ ४ 'सर्वेऽपि' इति३॥ ५. 'अमरः' इति१॥, ''काकोदुम्बरिकायां ना फल्गुरिङ्गं नरीङ्गिते'' इति मङ्खकोशे, पृ.९॥ ६. 'कालुं-' इति३, 'कागूं-' इति४॥ ७. '-क्षते' इति४॥ ८. '-त्वं' इति१॥ ९. '-कारः' इति३॥ १०. 'पत्राण्यस्य' इति१.२॥ ११. '-उ' इति१.३, '-यु' इति२॥ १२. 'शी-' इति३॥ १३. 'निशामने' इति४॥ १४. 'शीङो' इति३.४॥ १५. ''शृ हिंसायां क्रैं० । शृणातेरकारोऽन्त्यस्य निपात्यते तकारश्चागमः । शृणातीति शत्रुः-अरिः । कर्त्ता । अस्यैव इकारो गश्च निपात्यते । शृणातीति शिग्रुः-वृक्षः । कर्ता ।'' इति माणिक्यदेवविरचिता दशपाद्युणादिगणवृत्तिः, १।१५८॥, पृ.६४॥ १६. द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-७७, पृ.१०६-१०७॥ १७. 'क्विप्' इति३॥ १८. '-न्ति' इति३॥ १९. '-देर्दु-' इति३.४॥ २०. १.३.४.५प्रतिषु न दृश्यते ॥ २१. ४प्रतौ नास्ति ॥ २२. '-न्द्वे' इति४॥ २३. '-जणु' इति२, '-जणइ' इति३, '-जणौ' इति४, '-जणउ' इति५॥ २४. '-शरः' इति३.४॥ २५. '-त्र' इति४॥ २६. '-शरः' इति३॥ २७. '-शर-' इति४॥ २८. द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-११०, पृ.१५०॥ २९. 'वउली-' इति१, 'विउलस-' इति४, 'बउलशि-' इति५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"बकुलः[1] शीधुगन्धश्च[2] मद्यगन्धो विशारदः ।
मधुगन्धो गूढपुष्पः शिम्बी केसरक[3]स्तथा[4] ॥"
[धन्वन्तरिनिघण्टुः, आम्रादिः पञ्चमो वर्गः, श्लो-१४२]इति ॥

## अशोकः कङ्केल्लिः

१ एतद्वने तपस्यन्ती गौरी मनोरथप्राप्त्या नष्टशोका बभूवेत्यागमः[5] । नास्ति शोकोऽस्मादिति **अशोकः** । अश्नुत इति वा । पृषोदरादिः । २ कं जलं[6] केलति गच्छति **कङ्केल्लिः** । 'केलृ गतौ[7]'(भ्वा.प.से), पृषोदरादिः । "स्त्रियां त्वशोके कङ्केल्लिः"[[8] ]इत्यमरः (अमरशेषः) । द्वे अशोकतरोः ॥

## ककुभोऽर्जुनः ।

१ ककत इति **ककुभः** । 'कक लौल्ये'(भ्वा.आ.से.), बाहुलकादुभः । ककुभो व्यापकत्वादस्य सन्तीति, अर्शआदित्वादचि वा । कं पत्रगतं जलं क्षुभ्नाति विस्तारयति, क्षुभेः सौत्रादिगुपधः कः[9], पृषोदरादित्वात् षकारलोपे ककुभ इति वा । २ अर्ज्यते **अर्जुनः** । 'अर्ज सर्ज[10] अर्जने' (भ्वा.प.से.), उनन् । शौक्ल्याद् वा । द्वे अर्जुनवृक्षस्य ॥

## मालूरः श्रीफलो बिल्वः

१ मलते भक्षणार्थं जनोऽमुमिति **मालूरः** । 'मल मल्ल[11] धारणे'(भ्वा.आ.से.), '[12]खर्जिपिञ्जिभ्यामूरोलचौ'(उणा-५३०)इति बाहुलकादूरः, ह्रस्वस्य दीर्घता चेति । मां लक्ष्मीं लातीति वा । पूर्ववदूरच्, आकारलोपः । २ श्रीदानि[13] फलान्यस्य, श्रीयुक्तानि फलान्यस्येति[14] वा **श्रीफलः** । ३ कण्टकितत्वाद् बिलति भिनत्ति **बिल्वः** । 'बिल भेदने' (तु.प.से.), उल्वादित्वाद् वः । त्रीणि बिल्वस्य ॥

## किङ्किरातः कुरण्टकः ॥११३५॥

१ किं कुत्सितं किरति **किङ्किरातः** । 'कॄ विक्षेपे'(तु.प.से.), 'कृवृकालि-'(हैमोणा-२०९)इत्यातक् । २ कुर्यते[15] छिद्यते[15] कुर् । 'कुर[16] छेदने[17]'(तु.प.से.), क्विबन्तः, बाहुलकादण्टः[18] **कुरण्टकः,** निरुकारमध्यः"[[19] ]इति मधुमाधवी । 'रुटि स्तेये'(भ्वा.प.से.), कुपूर्वः, क्वुनि[20] कुरुण्टकः, सोकारमध्योऽपि । सामान्ये[21]ऽम्लानकमात्रेऽपि कुरण्टकः । "वर्णपुष्पमलिनान्तकस्तथा[22], किङ्किरातमुदितं कुरण्टकम्"[हलायुधकोशः२।२०७॥]इति हलायुधः । कुरण्टकः पीतपुष्पः । यदमरः-"तत्र शोणे कुरवक[23]स्तत्र पीते कुरण्टकः[24]"[अमरकोषः२।४।७४॥]इति । 'पीतकांटसेलीउं'[25][26] तस्य द्वे ॥११३५॥

## त्रिपत्रकः पलाशः स्यात् किंशुको ब्रह्मपादपः ।

१ त्रीणि पत्राण्यस्य **त्रिपत्रकः** । २ विस्तृतत्वात् पवित्रत्वाच्च प्रशस्तानि पलाशानि पर्णान्यस्य **पलाशः** । अर्शआदित्वादच् । ३ शुकतुण्डाभपुष्पत्वात् किमस्य पुष्पं शुक इति वितर्कात् **किंशुकः** । किञ्चित् शुको नील इति वा । ४ ब्रह्मणः पादपो **ब्रह्मपादपः**[27] । चत्वारि 'खाखर[28]' इति ख्यातस्य ॥

## तृणराजस्तलस्तालः

१ तृणानां राजा **तृणराजः** । 'राजाहःसखिभ्यष्टच्'५।४।९१॥, 'नस्तद्धिते'६।४।१४४॥ । तृणद्रुमध्ये[29] मुख्यत्वात् तृणराजत्वम् । २ तलति[30] प्रतिबिम्बति[31] प्रतिष्ठते[32] **तलः** । 'तल प्रतिष्ठायाम्'(चु.उ.से.), अच् । ३ प्रज्ञाद्यणि **तालः** । त्रीणि ताडस्य ॥

## रम्भा मोचा कदल्यपि ॥११३६॥

१ रभते[33]ऽनया **रम्भा** । 'रभ राभस्ये'(भ्वा.आ.अ.), 'घञर्थे कः'(वा-३।३।५८॥), 'रभेरशब्लिटोः'

---

१. '-लाः' इति४.५॥ २ '-गाधश्च' इति४॥ ३ 'केश-' इति३.४॥ ४ 'शीर्षकेशरकस्तथा' इति धन्वन्तरिनिघण्टौ, पृ.२६५॥ ५. '-मोऽस्ति' इति४॥ ६. 'मलं' इति४.५॥ ७ क्षीरतरङ्गिण्यादौ 'वेलृ चेलृ-' इत्यादिदण्डकोऽयं धातुश्चलनेऽर्थे दृश्यते ॥ ८ द्र. स्वोपज्ञटीका, ४।११३५॥, पृ.२५३॥ ९ '-धकः' इति२.३॥ १०. 'षर्ज' इति मैत्रेयसायणौ ॥ ११. १.२.३.५प्रतिषु न दृश्यते ॥ १२. 'खर्जिपिञ्जादिभ्य-'(उणा-५३०)इत्युणादिगणे ॥ १३. 'श्रीपदानि' इति३॥ १४ 'इति' इति ४प्रतौ नास्ति ॥ १५. '-ति' इति३॥ १६. 'कुर्' इति१.३.५॥ १७ 'शब्दे' इति क्षीरतरङ्गिण्यादयः ॥ १८. '-डः' इति४॥ १९ द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-१२०, पृ.१६४॥ २०. 'कु-' इति२, 'क्रु-' इति४॥ २१. '-न्येन' इति१.२.४.५॥ २२. 'वर्णपुष्पममलानकं तथा' इति हलायुधकोशे, पृ.२५॥ २३. 'कुरु-' इति३.५॥ २४ '-कम्' इति१.३॥ २५. '-कं-' इति३.५॥ २६. '-यौ' इति३॥ २७ '-पादः' इति२॥ २८. 'खाख' इति२॥ २९. 'तृणमध्ये द्रु-' इति४॥ ३०. '-न्ति' इति३॥ ३१. '-ते' इति१॥ ३२. १प्रतौ नास्ति ॥ ३३ 'रम्भ-' इति३.४.५॥, 'अभि रभि शब्दे' इति दुर्गसम्मतपाठः, तस्य 'रम्भते' इति रूपम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

७।१।६३॥ इति नुम् । रमतेऽस्यां वा । 'रमु क्रीडायाम्' (अ.आ.अ.) बाहुलकाद् 'दृदलिभ्यां भः'(उणा-४३१) इति भः । २ त्वचं मुञ्चति **मोचा** । 'मुच्लृ मोक्षणे' (तु.उ.अ.), पचाद्यच्। ३ केन वायुना दल्यत इति **कदली** । 'दल विशरणे'(भ्वा.प.से.), 'घञर्थे कः'(वा-३।३।५८॥), गौरादिः। कद्यते वा । 'कद स्थैर्ये'( ), वृषादित्वात् कलच्, गौरादिः । त्रीणि कदल्याः ॥११३६॥

**करवीरो हयमारः**

१ कृणोति हिनस्ति करः । 'कृञ् हिंसायाम्' (स्वा.उ.अ.), अच् । स वीर इव मारकत्वात् **करवीरः**। २ हयानुपभुक्तो मारयति **हयमारः** । पचाद्यच् । द्वे 'कणयर' इति ख्यातस्य ॥

**कुटजो गिरिमल्लिका ।**

१ कुट्यति **कुटजः** । 'कुट कौटिल्ये'(तु.प.से.), 'कुटेरजः'(हैमोणा-१३०), कुटादित्वान्न गुणः । कुटतो जायत इति वा । 'पञ्चम्यामजातौ'३।२।९८॥ इति डः। २ गिरिणा मल्ल्यते[1] धार्यते वा **गिरिमल्लिका** । 'मल मल्ल धारणे'(भ्वा.आ.से.), क्वुन् । गिरौ मल्लीव वा । इवार्थे कन् । द्वे 'कुडउ'[2] इति ख्यातस्य ॥

**विदुलो वेतसः शीतो वानीरो वञ्जुलो रथः ॥११३७॥**

१ वेत्ति स्वरक्षां जलप्लवेऽपि[3] विद्यते वा **विदुलः** । 'विद ज्ञाने'(अ.प.से.), बाहुलकादुलच् । २ वेति जलप्लवतां गच्छति **वेतसः**, पुंस्त्री. । यत् क्षीरस्वामी[4]-"वेतसी तु द्वयोः"[ ]इति[5] । 'वी गत्यादौ'(अ.प.अ.), 'वेतसवाहसपनसा'(कातन्त्रोणा-३।१४२॥)इत्यसा-[न्त]निपातनादेव तुक् । अस्मादेव धातोः 'वियस्तुट् च[6]' (दशपाद्युणा-९।४५॥)इत्यसच् । ३ शीतलत्वात् **शीतः** । वीर्येण लेपाद् दाहशमनाद् वा । "वेतसे बहुवारे ना गुणे शीतं हिमं त्रिषु"[7]इति रभसः । शीतं क्लीबलिङ्गमपि[9]। "शीतं तुषारवानीरबहुवारद्रुमेषु च"[8]इत्यजयः[10]। ४ वनति भजतेऽम्बु[11] **वानीरः** । 'वन षण[12] सम्भक्तौ[13]'(भ्वा.प.से.), बाहुलकादीरन्दीर्घौ । आवरकत्वाद् विकल्पितं नीरमस्माद् वा[14] वानीरः। ५ वजति **वञ्जुलः** । 'वज गतौ' (भ्वा.प.से.), उलप्रत्यये साधुः। ६ रमन्तेऽत्रेति **रथः**। 'रमु क्रीडायाम्'(भ्वा.आ.अ.), 'हनिकुषिनीरमि[15][काशि]भ्यस्थक् (क्थन्)'(उणा-१५९)इति थक् (क्थन्)। "रथे (रथः) स्यन्दनवानीरौ"[8]इत्यजयः[10] । षट् वेतसस्य॥११३७॥

**कर्कन्धुः कुवली कोलिर्बदरी**

१ कर्कस्य अन्धुरिव **कर्कन्धुः**[16], पुंस्त्रीलिङ्गः[17], ह्रस्वान्तः । [कर्कन्धूरपि], कर्कं लोहितवर्णं धत्ते कर्कन्धूः[18] । कर्कपूर्वाद् धाञः 'अन्धूर्दृन्भूर्जम्बूःकफेलूःकर्कन्धूर्दिधिषूर्निपात्यौ[19]'(उणा-९३)इति सूत्रेण कूप्रत्यये साधुः । "कर्कं कर्कशं कठोरं कण्टकं धत्ते"[20]इत्यन्ये । "कर्कन्धूफलमुच्चिनोति शबरी"[20]इति भवभूतिप्रयोगः । २ कौति **कुवली**, त्रिषु । 'कोर्वा'(हैमोणा-४६९)इति किदलः । कौ भूमौ वलतीति वा । ३ कुलति (कोलति) संस्त्यायति[21] घनीभवति **कोलिः** । 'कुल संस्त्याने[22]'(भ्वा.प.से.), '-इन्'(उणा-५५७)इतीन् । कु(को)लति पक्षिभिर्वा[23] घनीभवतीति व्युत्पत्तिर्वा । स्त्रियामयं ङीषि कोली । बदरीणां फले अण्[24]लुकौ[25] 'लुक्तद्धितलुकि'१।२।४९॥इति स्त्रीप्रत्ययस्य[26] लुकि कुवलं कोलं बदरमिति । बदति स्थिरीभवति छिन्नस्याऽपि प्ररोहणादिति **बदरी**, पुंस्त्री । 'बद स्थैर्ये'(भ्वा.प.से.), 'दिविभ्रमिवासि-'( )इत्यादिनाऽरः। "बाहुलकादरन्"[मा.धातुवृत्तिः, भ्वादिः, धातुसं-४३]इति माधवः । गौरादित्वाद् ङीष् । चत्वारि बदर्याः ॥

---

१. 'मल्यते' इति१.३॥ २. '-जउ' इति४.५, '-जो' इति३॥ ३. '-ऽति' इति५॥ ४ 'स्वामी' इति४॥ ५. '-ति' इति१॥ ६. अम.क्षीरस्वामिटीकायाम्- "वेत्यम्भो(वेत्यम्भो ?)ऽनुवर्तते वितस्यते वा वेतसः ।" इति दृश्यते, २।४।२९॥, पृ.८७॥ ७ 'वा' इति३.४.५॥ ८ द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-७६, पृ.१०६॥, रामाश्रमी२।४।३०॥, पृ.१७६॥ ९. '-बमपि' इति१.४॥ १०. द्र. टीकासर्वस्वम्, भा-२, २।४।३०॥, पृ.८४॥ ११. '-ति' इति५॥ १२. '-न' इति४.५॥ १३. 'भक्तौ' इति स्वामी ॥ १४ १.३प्रत्योर्नास्ति ॥ १५. '-णीञ्' इति१.२.४.५॥ १६. '-न्धूः' इति४॥ १७ 'पुंस्त्री' इति४॥ १८. '-न्धुः' इति१॥ १९. 'अन्दूदृन्भूजम्बूकफेलूकर्कन्धूदिधिषूः' इत्युणादिगणसूत्रम् ॥ २०. द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-८२, पृ.११४॥ २१. '-ते' इति२.३॥ २२. 'कुल संस्त्याने('सन्ताने' इति मैत्रेयः) बन्धुषु च' इति क्षीरतरङ्गिण्यादयः ॥ २३. 'पक्षिर्वा' इति१.३.४.५॥ २४ 'अणुणु-' इति१, 'अण-' इति२.३॥ २५. 'अवयवे च प्राण्योषधिवृक्षेभ्यः'४।३।१३५॥ इत्यण्, 'फले लुक्'४।३।१६३॥इति लुक् ॥ २६. '-त्ययलु-' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

### अथ हलिप्रियः ।

### नीपः कदम्बः

१ एतत्क(को)टरोद्भूतत्वान्मदिरास्वादनेन बल[१]भद्रप्रियत्वाद् हलिनः प्रियो **हलिप्रियः** । सुराधिवासितत्वात् । नयति वश्यतां चित्तं मुदं सुखं वा नीयतेऽसाविति **नीपः** । 'णीञ् प्रापणे'(भ्वा.उ.अ.), 'नीपादयश्च' (कान्तत्रोणा-२।११६॥)इति बाहुलकात् पः । २ कद्यते **कदम्बः** । 'कद स्थैर्ये'(        ), 'कदेर्णिद्वा'(हैमोणा-३२२)इत्यम्बच्[२] । कदेर्हिंसार्थात् कदति हिनस्ति वियोगिनमिति वा कदम्बः । "कदं वर्षाकालं वाति बोधयति वा । 'वा गतिगन्धनयोः'(अ.प.अ.), कप्रत्यये बाहुलकाद् द्वितीयाया अलुकि कदम्बः"[[३]]इति टीकान्तरम् । पक्षे [४]कादम्बः । त्रीणि कदम्बवृक्षस्य ॥

### सालस्तु सर्जः

१ सीयते **सालः** । 'षिञ् बन्धने'(स्वा.उ.अ.), पृषोदरादिः । अतिसारत्वादतिशायने, अर्शआद्यचि रलयोरेकत्वस्मरणात् साल इति वा । "सल्यते गम्यतेऽसौ सालः । 'सल(षल) गतौ'(भ्वा.प.से.), कर्मणि घञ्"[[५]]इति सर्वधरः । दन्त्यादिरयम् । "पुंसि भूरुहमात्रेऽपि सालो वरणसर्जयोः"[[६]]इति[७] दन्त्यादौ रभसः । २ सृजति सर्जति वा **सर्जः** । 'सृज विसर्गे'(तु.प.अ.), अच् । 'अर्ज सर्ज[८] अर्जने' (भ्वा.प.से.)अतो वाऽच् । द्वे 'साग[९]' इति ख्यातस्य । 'सण' इति भाषान्तरम् । यदमरः- "साले[१०] तु सर्जकार्श्याश्वकर्णकाः सस्यसंवरः"[अमरकोषः२।४।४४॥]इति ॥

### अरिष्टस्तु फेनिलः ॥११३८॥

१ नास्ति रिष्टमशुभमस्मादिति **अरिष्टः**, रक्षाहेतुः । २ फेना सन्त्यस्य[११] **फेनिलः** । 'फेनादिलच्-' ५।२।९९॥ इत्यलच् । द्वे अरिष्टस्य ॥११३८॥

### निम्बोऽरिष्टः पिचुमन्दः

१ नयति रोगानुपशममिति **निम्बः** । 'णीञ् प्रापणे' (भ्वा.उ.अ.), 'उल्वादयश्च'(उणा-५३५)इति बन् नुम् ह्रस्वत्वे । २ सेव्यमानादस्मान्नास्त्यरिष्टमशुभमिति **अरिष्टः** । अत एव सर्वतोभद्र इति नामान्तरमस्य । पिचुं कुष्ठभेदं मन्दयति **पिचुमन्दः** । अच् । "पिचुर्ना कुष्ठभेदेऽपि[१२]" [मेदिनीकोशः, चान्तवर्गः, श्लो-७]इति मेदिनिः । पिचुं कुष्ठभेदं मर्दयतीति पिचुमर्द इत्यपि । त्रीणि निम्बस्य ॥

### समौ पिचुल-झाबुकौ[१३] ।

१ पिचुं तूलं[१४] लाति **पिचुलः** । "पिचुः स्यात् तूलकर्षयोः"[[१५]]इति धरणिः । २ 'झा' इत्यव्यक्तानुकरणम्, तं वाति गच्छति, मितद्र्वादित्वाद् डौ झाबुः[१६] प्रवहज्जलम्[१७], तत्[स]न्निधानात् तत् कायति । 'आतोऽनुपसर्गे कः'३।२।३॥ इति के[१८] **झाबुकः** । "झाबुकः पिचुलः प्रोक्तः"[हलायुधकोशः२।१९५॥]इति हलायुधः । "झाबुकोऽपभ्रंशः[१९]"[अम.क्षीर.२।४।४०॥]इति स्वामी । द्वे अनुपदेश[२०]जातस्य 'झाउ[२१]' इति ख्यातस्य[२२] । 'झाब[२३]' इति भाषान्तरम् ॥

### कर्पासस्तु बादरः स्यात् पिचव्यः

१ करोति शोभां[२४] **कर्पासः**, पुंक्लीबः[२५] । 'डुकृञ् करणे'(त.उ.अ.), 'कृञः[२६] पासण्'(उणा-७२३)इति पासण्[२७] । २ बदति स्थैर्यं **बादरः** । बाहुलकादरन्दीर्घौ[२८] । ३ पिचुभ्यो हितः **पिचव्यः** । पिचुशब्दाद् 'उगवादिभ्यो यत्'५।१।२॥ इति यत्प्रत्ययः, 'ओर्गुणः'६।४।१४६॥, 'वान्तो यि प्रत्यये'६।१।७९॥ इत्यवादेशः । त्रीणि 'कपास' इति ख्यातस्य ॥

### तूलकं पिचुः ॥११३९॥

१ तूल्यते तूलम् । 'तूल निष्कर्षे'(भ्वा.प.से.),

---

१. 'बलि-' इति१.४.५॥ २ '-क्' इति३॥ ३ द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-८८, पृ.१२३॥ ४ 'क-' इति५॥ ५. द्र. पदचन्द्रिका, भा २, वनौषधिवर्गः, श्लो-९०, पृ.१२६॥ ६ द्र. रामाश्रमी२।४।४४॥, पृ.१८४॥ ७ ३प्रतौ नास्ति ॥ ८ 'षर्ज' इति मैत्रेयसायणौ ॥ ९ '-गर' इति३॥ १०. 'सालस्तु' इति३॥ ११. '-त्र' इति४॥ १२. 'च' इति मेदिनीकोशे, पृ.२७॥ १३. तुलनीयोऽमरकोषः२।४।४०॥ १४. ४.५प्रत्योर्नास्ति ॥ १५. द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-८६, पृ.१२०॥, रामाश्रमी२।४।४०॥, पृ१८१॥ १६. 'बु' इति५॥ १७ '-हणं' इति३॥ १८. ३प्रतौ नास्ति॥ १९ अम.क्षीरस्वामिकृतटीकायाम्-"ध्यायतेर्झावुकोऽपभ्रष्टः।" इति दृश्यते, पृ.९०॥ २०. '-शे' इति१.२॥ २१. '-उ' इति१.२.३॥ २२. 'भाषा' इति३॥ २३. '-बा' इति१, '-बक' इति५॥ २४ ५प्रतौ नास्ति ॥ २५. 'पुंक्ली.' इति१.२॥ २६. 'कृञ्' इति३॥ २७ 'पासञ्' इति दशपाद्युणादिगणसूत्रे ९।१०२॥, 'पासः' इति पञ्चपाद्याम् ॥ २८. '-र्घो' इति५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावे घञ् । स्वार्थे कनि **तूलकम्**, पुंक्लीः । २ पच्यते **पिचुः**, पुंसि, निरस्थीकृतकर्पासः । 'पचेरिच्चातः'(हैमोणा-७३५)इत्युः । पिचयतीति वा । 'पिचि गतौ'( ), बाहुलकादुः । लोढियारू[1]नाम्नी[2] द्वे ॥११३९॥

## आरग्वधः[1] कृतमाले[2]

१ आ समन्ताद् रुजं वधति छिनत्ति । 'वध छेदन-सेवनपूरणेषु'( ), पृषोदरादित्वाद् **आरग्वधः**, दीर्घादिश्चतुःस्वरः । त्रिस्वरो[3] ह्रस्वादिरपि । "आरग्वधोऽथ तमाले (सम्पाकः) कृतमालस्तथाऽर्ग्वधः"[[4] ]इति रत्नकोषः। आरङ्गयत्यारजो मलाः, तेषां वधोऽत्रेति वा । २ कृतमती-सारं मलते धारयति **कृतमालः**[5] । 'मल धारणे'(भ्वा. आ.से.), 'कर्मण्यण्'३।२।१॥, तत्र । किरमालानाम्नी द्वे॥

## वृषो[1] वासा[2]-ऽऽटरूषके[3] ।

१ वृष्यते[6] पीयते **वृषः** । 'वृष पाने'( ), 'घञर्थे कः'(वा-३।३।५८॥)। वर्षति मधुपुष्पमस्येति वा । 'वृषु सेचने'(भ्वा.प.से.), 'इगुपध-'५।३।१३५॥ इति कः । मूर्धन्यमध्यः । "वृषः स्याद् वासके[7] धर्मे सौर-भेये च शुक्रले"[विश्वप्रकाशकोशः, षान्तवर्गः, श्लो-१] इति मूर्धन्यान्ते विश्वात् । २ वस्ते आच्छादयति **वासा**। "वासो गृहेऽप्यवस्थाने वासा स्यादाटरूषके"[[8] ]इति रुद्रः। "वाश्यते शब्द्यत इति । 'वाशृ शब्दे'(दि.आ.से.), 'गुरोश्च हलः'३।३।१०३॥ इत्यकारः, ततष्टाप् । "उश्यते काम्यते[9] कासरोगिभिः[10]"[[11] ]इति स्वामी[12] । "दशा कशा[13] वाशा पेशी"[ ]इति लिङ्गकारिकादर्शनात् तालव्यान्तः" [पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-१४९]इति बृह-स्पतिः । ३ आ समन्तादटन्तीति[14] आटाः । आटान् गच्छतो[15] जन्तून् रुषति (रोषति) हिनस्ति दूरगत[16]काण्ड-त्वात् **आटरूषकः**, [मूलविभुजादिः] । यद्वा आटाश्चला जन्तवः, तैः सह रूषति मिश्रीभवति घनतरकाण्डपत्र-त्वेन, ततस्तेषां द्रुतमनिर्गमत्वाद् आटरूषः । 'रूष मिश्रणे' ( ), 'इगुपध-'५।३।१३५॥ इति कः । आटरूषो दीर्घाकारोकारवान्, "वृषो वासाटरूषकः"[[8] ]इति माध-वात् । ह्रस्वादिः[17], ह्रस्वोकारवांश्च । "वेद्यमाताटरूषकः[18]" सिंहास्यो वाजिदन्तकः"[[8] ]इति रभसात् । ह्रस्वमध्य-पक्षे त्वाद्या व्युत्पत्तिः। त्रीणि 'अरडूसा' इति ख्यातस्य॥

## करञ्जस्तु[1] नक्तमालः[2]

१ कं सुखं[19] जलं वा रञ्जयति **करञ्जः** । 'रञ्ज रागे'(भ्वा.उ.अ.), 'कर्मण्यण्'३।२।१॥ । सानुस्वार-मध्यः । '-त्यजरजे-'[20]३।२।१४२॥ इति निर्देशादकिङ्-त्यनि(-णि) नलोपः, णिलोपस्य स्थानिवत्त्वान्नोपधा-वृद्धिः[21] । "ततो निरनुस्वारमध्योऽपि करजः"[ ]इति मिश्राः । करोति करञ्ज इति वा । 'कृञो(कृगो)ऽञ्जः' (हैमोणा-१३६)। २ नक्तं रात्रिमलति[22] भूषयति भूता-श्रयत्वादलति वारयति वा **नक्तमालः**। द्वे करञ्जस्य ॥

## स्नुहि[1]र्वज्रो[2] महातरुः[3] ॥११४०॥

१ स्नुह्यति उद्वमति क्षीरमिति **स्नुहिः** । 'स्नुह (ष्णुह) उद्गिरणे'(दि.प.से.), 'इगुपधात् कित्'(उणा-५५९)इतीन् । "ङीषि स्नुही"[[23] ]इति माधवी । अत एव धातोः 'वा द्रुहमुहस्नुह-'८।२।३३॥ इति कुत्वे स्नु-गित्यपि । स्त्रियां भागुरिमते टापि स्नुहाऽपि[24] । "स्नुहा स्नुक् स्नुड्"[[23] ]इत्यमरदत्तः । २ वज्र इव **वज्रः**, भेदकत्वात् । "वज्रः स्त्री स्नुक् स्नुही गुडा"[क्षीर-स्वामिसम्मतामरकोषः२।४।१०६॥]इति स्वामी । "वज्र-द्रुमः"[ ]इत्यमरः । ३ महांश्चासौ तरुश्च **महातरुः** । त्रीणि 'थोहरि[25]' इति ख्यातस्य[27] ॥११४०॥

## महाकालस्तु[1] किम्पाके[2]

---

१. 'लोढी-' इति३, 'लोटि-' इति५॥ २. '-या' इति१, '-यारु' इति३॥ ३. '-रह-' इति१.२॥ ४. द्र. टीकासर्वस्वम्, भा-२, २।४।२४॥, पृ.७७॥, पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-६९, पृ.९८॥, रामाश्रमी२।४।२३॥, पृ.१७४॥ ५. '-मलः' इति३॥ ६. 'वृषते' इति१॥ ७. '-वे' इति३॥ ८. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-१४९, पृ.१९४॥, रामाश्रमी२।४।१०३॥ ९. 'काश्यते' इति१, 'काश्यति' इति५॥ १०. 'काश-' इति५॥ ११. द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-१४९, पृ.१९४॥ १२. अम.क्षीर.टीकायां न दृश्यते ॥ १३. 'वशाकशा' इति४.५॥ १४. '-टतीति' इति२॥ १५. '-न्तो' इति४.५॥ १६. '-ति-' इति३॥ १७. '-दि' इति१.२॥ १८. '-रू-' इति१.३.५॥ १९. 'मुखं' इति१॥ २०. '-त्यजिरजि-' इति३॥ २१. णिलोपस्य स्थानिवत्त्वाद् णिनिमित्तवृद्धिरपि दुर्वारात् संज्ञापूर्वकत्वान्न वृद्धिरिति समाधेयम् ॥ २२. '-लयति' इति३॥ २३. द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-१५१, पृ.१९७॥ २४. ४.५प्रत्योर्नास्ति ॥ २५. '-मरः' इति१॥, द्र. रामाश्रमी२।४।१०५॥, पृ.२१०॥ २६. '-र' इति३॥ २७. '-तायाः' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ महान् कालो मृत्युरस्माद् **महाकालः** । २ कुत्सितः प्राणहरः पाकोऽस्य विषवृक्षत्वात् **किम्पाकः**, तत्र । द्वे किम्पाकस्य । 'कयंजणं'[1] इति भाषा[2] ॥

**मन्दारः पारिभद्रके ।**

१ **मन्दारः** प्रागुक्तः (अभि.श्लो-१७९)। २ पारिं[3] प्राप्तं पारं भद्रमस्य पारिभद्रः । यद्वा परितो भद्रमस्य परिभद्रः । प्रज्ञाद्यणि परिभद्रः[4] । पारं निष्ठां प्राप्तं[5] भद्रमस्य वा । स्वार्थे कनि **पारिभद्रकः**, तत्र । द्वे मन्दारस्य[6] ॥

**मधूकस्तु मधुष्ठीलो गुडपुष्पो मधुद्रुमः ॥११४१॥**

१ मदयति **मधूकः** । पृषोदरादिः । मह्यते जनैर्वा । 'मह रक्षणे'( ), उलूकादित्वादूको धकारश्चान्तादेशः । मधुशब्दाद् यावादित्वात् कनि मधुको ह्रस्वमध्योऽपि । २ मधु ष्ठीवती **मधुष्ठीलः** । 'ष्ठिवु निरसने'(भ्वा.प.से.), 'इगुपध-'३।१।१३५॥इति कः, पृषोदरादित्वाल्लत्वम्, 'र्वोरुपधाया दीर्घः-'८।२।७६॥ इति दीर्घः । ३ गुड इव स्वादु पुष्पमस्य **गुडपुष्पः** । ४ मधुवत् पुष्पं माधुर्यान्मधुनामा द्रुमो **मधुद्रुमः** । चत्वारि मधूकस्य ॥११४१॥

**पीलुः सिनो गुडफलः**

१ पीयते माधुर्यादिति **पीलुः**, पुंसि । 'पीङ् पाने'(दि.आ.अ.), 'पीङः कित्'(हैमोणा-८२१)इति लुः। पीलति प्रतिष्टभ्नाति वा। 'पील प्रतिष्टम्भे'(भ्वा.प.से.), मृगय्वादित्वात् कुः। पीड्यत इति वा। मृगय्वादिः। २ सिनोति **सिनः** । 'षिञ् बन्धने'(स्वा.उ.अ.), 'इण्नसि-(इण्सि-)' (उणा-२८२)इति नक् । ३ गुडवन्मधुरं फलमस्य **गुडफलः** । त्रीणि पीलोः । 'जालि' इति भाषा ॥

**गुग्गुलुस्तु पलङ्कषः ।**

१ गोजति सुखम्, 'गुज स्तेये'(भ्वा.प.से.), क्विप् । गुग् व्याधिस्तस्माद् गुडति रक्षति, बाहुलकात् 'भृमृ-'(उणा-७)इत्युः, **गुग्गुलुः**, पुंसि, भानुवत् । "घृतपायसगुग्गुलैरपि"[9][ ]इति मौद्गल्यायनादेरदन्तोऽपि। "गुग्गुलौ गुग्गुलोऽपि स्यात्"[ ]इति महेश्वरः। २ पलं मांसं कषति **पलङ्कषः** । पृषोदरादिः । द्वे गुग्गुलोः ॥

**राजादनः पियालः स्यात्**

१ राजभिरद्यते माधुर्यादिति **राजादनः**, पुंक्ली. । कर्मणि ल्युट् । राजातनमित्यपि । ५ पीयते रसोऽस्य[11] **पियालः** । 'पीङ् पाने'(दि.आ.अ.), बाहुलकात् कालन् । प्रियाल इति पवर्गाद्यरेफतृतीयस्वरादिरपि । यच्चम्पूग्रन्थम्-"प्रियालपनसाराणि यौवनानीव वनानि"[ ]इति यदमरः-"राजादने[12] प्रियालः[13] स्यात् सन्नकद्रुर्धनुष्पटः" [अमरकोषः२।४।३५॥]इति । "राजादनः प्रियालद्रौ[14] क्षीरिकायां त्रिपत्रके"[अनेकार्थसङ्ग्रहः४।१८९॥]इत्यनेकार्थः । "[15]प्रियालद्रुश्चारवृक्षः, क्षीरिका मधुरालफलः"[अनेकार्थकैरवाकरकौमुदीटीका४।१८९॥]इति तट्टीका । एवमत्र राजादनः पियालश्च द्वौ शब्दौ चारोलीनाम्नी[16] । चारो देश्याम् । यद्देशी- "चारो पियाल गुत्तीच्छासुं"[देसीसद्दसंगहे तइओ वग्गो, श्लो-३०७] । "चारो पियालवृक्षः, बन्धनस्थाम्, इच्छा चेति त्र्यर्थः"[स्वोपज्ञदेशीशब्दसंग्रहवृत्तिः, तृतीयो वर्गः, श्लो-३०७]इति तट्टीका । द्वे 'चारोली' इति ख्यातायाः । इहाऽनुक्तान्यपि प्रस्तावाद् रांइणिनामानि[17] श्रीहेमचन्द्रसूरिकृतनिघण्टुशेषोक्तानि ज्ञेयानि । तद्यथा-

"राजादने१ तु राजन्या२ क्षीरिका३ प्रियदर्शनः४ ।
कपिप्रियो५ दृढस्कन्धो६ मधुरालफलो७ नृपः८ ॥१॥"[ ]इति॥

**तिनिशस्तु रथद्रुमः ॥११४२॥**

१ "अतिक्रान्तो निशाश्चिरकालस्थायित्वात् **तिनिशः** । पृषोदरादिः"[अम.क्षीर.२।४।२६॥]इति स्वामी[18]। तेजनं तिक्, क्विबन्तः । [20]लिश्यति (लिश्यते) अल्पीभवति लिशः । 'लिश अल्पीभावे'[21](दि.आ.अ.), इगुपधात्[22] कः । तिजा लिशस्तिलिश(-स्तिनिशः) इति वा । पृषोदरादित्वाज्जलोपः । "आशादशोर्वशीकाशीतिनिशेश-

---

१. '-णुं' इति१, '-णु' इति२॥ २. 'ख्यातस्य' इति३॥ ३. '-र' इति१, '-रं' इति२॥ ४. '-भाद्रः' इति५॥ ५. '-प्त-' इति३, 'प्रान्तं' इति५॥ ६. '-रकस्य' इति३॥ ७. '-त्वे' इति३॥ ८. '-मृ-' इति२.४.५॥ ९. द्र. टीकासर्वस्वम्, भा-२, २।४।३४॥, पृ.८९॥, पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो ८०, पृ.११२॥, तयोः-"तस्मात् पूज्याश्च मान्याश्च घृतपायसगुग्गुलैः" इति दृश्यते ॥ १०. २प्रतौ नास्ति ॥ ११. '-नः' इति३.४.५॥ १२. '-पि-' इति२.५॥ १३. 'प्रियालः' इति स्वामिसम्मतपाठः ॥ १४. 'पि-' इत्यनेकार्थसङ्ग्रहे, भा-२, पृ.३६९॥ १५. 'पि-' इति१.२.५, अनेकार्थकैरवाकरकौमुदीटीकायां च, भा-२, पृ.३६९॥ १६. '-म्न द्वे' इति५॥, इतोऽग्रे ३प्रतौ 'चारौलीकस्याः' इति॥ १७. 'राई-' इति३॥ १८. अम.क्षीरस्वामिटीकायाम्-"अतिक्रान्तो निशास्तिनिशः, चिरकालित्वात् ।" इति दृश्यते ॥ १९. द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-७२, पृ.१०१॥ २०. 'ले-' इति२, 'लिश-' इति३॥ २१. अयं धातुपाठः १.२.४.५प्रतिषु न दृश्यते ॥ २२. '-भत्वात्' इति२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिष्कशः''[१]इत्यूष्मभेदात्[२] तालव्यान्तः । २ रथहेतुर्द्रुमो[३] **रथद्रुमः** । द्वे[४] तिनिशस्य[५] ॥११४२॥

## नागरङ्गस्तु नारङ्गः

१ नागा रज्यन्तेऽत्रेति, 'हलश्च'३।३।१२१॥ इति घञि[६] **नागरङ्गः**। ''नागः सीसकम्, तज्जत्वान्नागः सिन्दूरम्, तस्येव रङ्गोऽस्य''[अम.क्षीर.२।४।३८॥]इति स्वामी[७] । २ नृणाति **नारङ्गः**। बाहुलकादङ्गः, स च णित् । नार्यङ्गोऽपि । द्वे नारङ्गस्य ॥

## इङ्गुदी तापसद्रुमः ।

१ इङ्गनमिङ्गो[८] गतिः । 'इगि गतौ'(भ्वा.प.से.), घञ्। तं दयत इति, आल्लक्षणः कः, अकारस्य नैरुक्त उकारः, गौरादित्वाद् ङीष्[९] [**इङ्गुदी**], त्रिलिङ्गोऽयम् । अमरस्तु-''इङ्गुदी द्वयोः[१०]''[अमरकोषः२।४।४५-४६॥] इत्याह। २ तपस्विजनोपभोग्यफलवल्कलोपयुक्तत्वात् तापसानां द्रुमः **तापसद्रुमः** । ''तापसा हि वनेऽस्य तैलमुपभुञ्जन्ते''[११]इति प्रसिद्धिः। द्वे 'हींगोरी'[१२] इति ख्यातस्य ॥

## काश्मरी भद्रपर्णी श्रीपर्णी

१ काशते दीप्यते **काश्मरी** । 'कासृ(काशृ) दीप्तौ'(भ्वा.आ.से.), पृषोदरादिः । कृशति तनूकरोतीति[१३], पृषोदरादिर्वा । काश्मीरीत्यपि । २-३ भद्राणि श्रीयुक्तानि च पर्णान्यस्याः[१४] **भद्रपर्णी, श्रीपर्णी** । 'पाककर्णपर्णपुष्पफलवालोत्तरपदाच्च'४।१।६४॥ इति ङीष् । त्रीणि '[१५]सिविनि' इति ख्यातायाः ॥

## अम्लिका तु तिन्तिडी ॥११४३॥

१ अम्लरसयोगाद् **अम्लिका** । 'अन्येषामपि-' ६।३।१३७॥ इति दीर्घत्वे अम्लीकेत्यपि । ''अम्लीका[१६] चाम्लिका चिञ्चा तिन्तिडीका च तिन्तिला''[१७]इति चन्द्रः[१८] । अम्ब्लिकेत्यपि[१९] बकारलकारसंयोगमध्यः । २ तिम्यति **तिन्तिडी**। 'तिम आर्द्रीभावे'(दि.प.से.), 'विहड-'(हैमोणा-१७२)इतीडे[२०] निपात्यते । तिम्यत्यार्द्रीभवति मुखमनेनेति, 'अलीकादयश्च'(उणा-४६५)इत्यत्र तिमेष्टिमेर्वा[२१] ईकन्[२२] तित्वं मत्वं (द्वित्वं नत्वं) डत्वं च निपातनात् तिन्तिडीको वृक्षः। ''तिन्तिडा''[ ]इति शब्दार्णवः । ''तिन्तिडी त्व[म्]लिका चिञ्चा तिन्तिडीका कपिप्रिया''[१७]इति वाचस्पतिः[१८] । द्वे 'आम्बिली'[२३] इति ख्यातायाः ॥११४३॥

## शेलुः श्लेष्मातकः

१ शिलति रोगानिति **शेलुः** । 'शिल उञ्छे' (तु.प.से.), बाहुलकादुः । 'शेलृ गतौ'(भ्वा.प.से.), 'कृवापा-'(उणा-१)इति बाहुलकादुण् वा । तालव्यादिरयम्, पुंसि । 'सेलृ (षेलृ) गतौ'(भ्वा.प.से.)इत्यस्य सेलुर्दन्त्यादिरपि । २ श्लेष्माणं लाति श्लेष्मातकः (शेलुः)। मृगय्वादित्वात् कुः, लकारस्युकारयो(लकारष्मकारयो)र्लोपश्च निपात्यते। श्लेष्माणमततीति शीतवीर्यत्वादिति[२४] [**श्लेष्मातकः**]। कर्मण्यणि वा[२५] । द्वे '[२६]गूंदी' इति ख्यातायाः ॥

## पीतसालस्तु प्रियकोऽसनः ।

१ पीतवर्णः सालः **पीतसालः** । पीतः[२७] सारोऽस्येति, रलयोरेकत्वे वा । २ प्रीणाति **प्रियकः** । 'प्रीञ् तर्पणे[२८]'(क्र्या.उ.अ.), 'इगुपध-'३।१।१३५॥ इति कः, ततः स्वार्थे कन्। ३ अस्यति क्षिपति रुजमिति **असनः**। 'असु क्षेपणे[२९]'(दि.प.से.), नन्द्यादित्वाल्ल्युः, ह्रस्वादिरयम् । ''प्रियको जीवकोऽसनः''[३०]इति[३१] रत्नकोषः । प्रज्ञाद्यणि आसनोऽपीति । ''पीठेभस्कन्धयोः क्लीबमासनं ना तु[३२] जीवके[३३]''[३०]इति[३१][३४] रुद्ररभसादयः । अशनस्तालव्यमध्योऽपि,

---

१. द्र. पदचन्द्रिका, भा २, वनौषधिवर्गः, श्लो-७२, पृ.१०१॥ २. '-ष्मविवेकभे-' इति१॥ ३. '-तुद्रुमो' इति४॥ ४. 'त्रीणि' इति१.२.३॥ ५. 'तिणि-' इति१.२.४.५॥ ६. '-ञ्' इति३॥ ७. अम.क्षीरस्वामिटीकायाम्- ''नागस्य सिन्दूरस्येव रङ्गोऽस्य नागरङ्गः, नागन्छति सहसा रङ्गोऽस्य वा ।'' इति दृश्यते, पृ.९०॥, द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-८४, पृ.११७॥ ८. '-मिगो' इति१.२॥ ९. '-प' इति३॥ १०. 'द्वयोः, इङ्गुदी' इत्यमरकोषे ॥ ११. द्र. अम.क्षीर.२।४।४६॥, पृ.९२॥, स्वोपज्ञटीका ४।११४३॥, पृ.२५६॥ १२. 'हिं-' इति१, 'ही-' इति५॥ १३. '-रोति' इति४.५॥ १४. 'फला-' इति३.४.५॥ १५. 'सेव-' इति१, 'विसि-' इति४, 'शि-' इति३॥ १६. 'अम्लि-' इति३॥ १७. द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-८९, पृ.१२५॥ १८. रामाश्रमी२।४।४३॥, पृ.१८३॥ १९. 'आ-' इति४.५॥ २०. 'इति' इति१॥, 'विहड-' इत्यादिना अडप्रत्ययान्ता निपात्यन्ते, 'इत्यडे' इति पाठ्यं वा । २१. 'इ-' इति३॥ २२. इतोऽग्रे १प्रतौ 'तिकन्' इति दृश्यते ॥ २३. '-म्ब-' इति५॥ २४. इतोऽग्रे १प्रतौ 'वा' इति दृश्यते ॥ २५. अनुपयुक्तः॥ २६. 'गुं-' इति१, 'गु-' इति३॥ २७. '-तसा-' इति१.३॥ २८. मैत्रेयसम्मतोऽयं पाठः, 'प्रीञ् तर्पणे कान्तौ च' इति स्वामिसायणौ ॥ २९. 'क्षेपे' इति३॥ ३०. द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-९०, पृ.१२६॥ ३१. द्र. रामाश्रमी२।४।४४॥, पृ.१८३॥ ३२. 'नु' इति३.४.५॥ ३३. '-कः' इति५॥ ३४. द्र. टीकासर्वस्वम्, भा-२, २।४।४४॥, पृ.१००॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

''विकसितकन्दलदशनैर्यो वमति दरीमुखैश्च कन्दलदशनैः'' [ ]इति[2] वृन्दावनयमकात्। त्रीणि '[3]बीया' इति ख्यातस्य ॥

**पाटलिः पाटला**

१ पाटयति दौर्गन्ध्यं **पाटलिः**, पुंस्त्री. । 'ऋतनि-'(उणा-४४२)इत्यादिना [4]बहुलवचनादलिञ् । २ पाटं [5]विशरणं लाति **पाटला** । 'आतोऽनुपसर्गे कः'३।२।३।, टाप्। द्वे पाटले: ॥

**भूर्जो बहुत्वक्को मृदुच्छदः ॥११४४॥**

१ ऊर्जनमूर्जः, [6]भूरूर्जनमस्य[7] (भूरूर्जोऽस्य) **भूर्जः**। २ बहवः त्वचोऽस्य **बहुत्वक्कः** । 'उरःप्रभृतिभ्यः कप्' ५।४।१५१॥ । ३ मृदूनि छदान्यस्य **मृदुच्छदः** । त्रीणि भोजपत्त्रस्य ॥११४४॥

**द्रुमोत्पलः कर्णिकारे**

१ द्रुमे उत्पलाकारं पुष्पमस्य **द्रुमोत्पलः** । 'सप्तमी-' इति योगविभागात् समासः । २ [8]कर्णिमधोलम्बिनीं शाखां करोति, 'कर्मण्यण्'३।२।१॥, **कर्णिकारः**, तत्र । '[9]कणियार[10]' नाम्नी द्वे ॥

**निचुले हिज्जलेज्जलौ ।**

१ निचोल्यते समुच्छ्रीयते **निचुलः** । 'चुल समुच्छ्राये'(चु.प.से.), 'घञर्थे कः'(वा-३।३।५८॥)। निचिनोति पत्त्रशाखादिसञ्चयं करोति । 'कृषे(हृषे)रुलच्'(उणा-९६) इति बाहुलकादतोऽप्युलचि, पृषोदरादिर्वा निचुलः, तत्र । २ हिनोति **हिज्जलः** । पृषोदरादि[11]: । ३ जलमेति **इज्जलः** । 'इण् गतौ'(अ.प.अ.), 'अन्येभ्योऽपि[12] दृश्यते'३।२।१७८॥ इति क्विप्, तुक् । इद् गच्छत् जलमस्य, राजदन्तादित्वाद् जलशब्दस्य परनिपातः । ''निचुलेज्जलहिज्जलाः''[[13]]इति रभसः । त्रीणि जलवेतसविशेषस्य । 'नेत्र' इति भाषा ॥

**धात्री शिवा चाऽऽमलकी**

१ धीयते धार्यते शिरसि **धात्री** । 'डुधाञ् धारणादौ'(जु.उ.अ.), 'धः कर्मणि ष्ट्रन्'३।२।१८१॥ इति ष्ट्रन्, षित्त्वात् ङीष् । २ शिवं कल्याणं करोति **शिवा**। शेरते गुणा अस्यां वा। 'शीङ् स्वप्ने'(अ.आ.से.), 'सर्वनिघृष्व-'(उणा-१५१)इति साधुः । ३ आमल्यते [14]भैषज्याय ध्रियते। 'मल मल्ल धारणे'(भ्वा.आ.से.), 'कृञादिभ्यः [संज्ञायां] वुन्'(उणा-७१३), गौरादित्वाद् ङीषि **आमलकी,** त्रिलिङ्गी[15] । अत एव धातोः ''क्वुन्[16] शिल्पिसंज्ञयो-'(उणा-१९०)इत्याङ्पूर्वस्याऽपि क्वुनि[17] गौरादित्वाद् ङीष्[17]'[मा.धातुवृत्तिः, भ्वादिः, धातुसं-३२३]इति[18] माधवः। त्रीणि 'आमली[19]' इति ख्यातायाः ॥

**कलिरक्षो बिभीतकः ॥११४५॥**

१ कल्यते **कलिः**, पुंसि । 'कल सङ्ख्याने' ( ), '-इन्'(उणा-५५७)इतीन् । कलिहेतुत्वाद् वा कलिः । २ अक्ष्णोति व्याप्नोति **अक्षः**, पुंसि । 'अक्ष (अक्षू) व्याप्तौ [सङ्घाते च]'(भ्वा.प.वे.), अच् । अश्नुते वा । 'अशेर्देवने'(उणा-३४५)इति सः, कत्वं षत्वं च । ३ भीतं भयम्, विगतरोगभयं करोतीति, बिभीतेर्नामधातोर्ण्यन्तात् 'कृञादिभ्यः [संज्ञायां] वुन्'(उणा-७१३) [**बिभीतकः**] । भीतं भयम्, विगतं रोगभीतमस्माद्वेति कपि वा । भूताश्रयत्वाद् विशेषेण भीतमस्मादिति कपि वा । [20]बिभेत्यस्मादिति पृषोदरादिर्वा, त्रिलिङ्गोऽयम् । ''त्रिलिङ्गस्तु बिभीतकः''[अमरकोषः२।४।५८॥]इत्यमरः । त्रीणि [21]बिभीतकस्य ॥११४५॥

**हरीतक्यभया पथ्या**

१ हरिणा वर्णेन इतो मिलितः हरीतः, ततः संज्ञायां कनि, [22]गौरादित्वाद् ङीप्[23] **हरीतकी,** त्रिलिङ्ग[24]: । हरति रोगानिति वा । 'हरुहि-'(हैमोणा-७९)इतीतकः । २ नास्ति रोगभयमस्या **अभया** । ३ पथि साधु **पथ्या** । 'तत्र साधु[:]'४।४।९८॥ इति यत् । पथो वैद्यव्यवहारादनपेता वा । 'धर्मपथ्य-'४।४।९२॥ इति यत् । त्रीणि हरीतक्याः॥

---

१. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-९०, पृ.१२६॥ २. द्र. टीकासर्वस्वम्, भा-२, २।४।४४॥, पृ.१००॥ ३. 'वी-' इति३॥ ४. 'बा-' इति३॥ ५. 'विस-' इति१॥ ६. 'भुवः' इति३.४.५॥ ७. इतोऽग्रे ३प्रतौ 'भूरूर्जनमस्य' इति दृश्यते ॥ ८. 'कर्णमध्ये' इति३॥ ९. 'कण-' इति४॥ १०. 'सुगंधकर्णियार' इति १प्रतेष्टिप्पणी ॥ ११. '-दिर्वा' इति१॥ १२. इतोऽग्रे १.३.४.५प्रतिषु 'इति' इति दृश्यते ॥ १३. द्र. टीकासर्वस्वम्, भा-२, २।४।६१॥, पृ.११६॥, पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-१०७, पृ.१४७॥, रामाश्रमी२।४।६१॥, पृ.१९०॥ १४. 'भे-' इति१.३॥ १५. '-ङ्गे' इति१॥ १६. 'क्विन्' इति४॥ १७. '-प्' इति३॥, मा.धातुवृत्तौ ''क्वुन् शिल्पिसंज्ञयोरपूर्वस्यापि' इति क्वुनि गौरादित्वाड्ङीष् ॥'' इति दृश्यते, पृ.१४१, धातुसं-३२३॥ १८. इतोऽग्रे ४.५प्रत्योः 'णे' इति दृश्यते ॥ १९. '-लकी' इति३॥ २०. 'बिभ्ये-' इति३॥ २१. 'ब-' इति५॥ २२. 'गौरादिङी-' इति१.२॥ २३. '-षि' इति१.२.३॥ २४. १प्रतौ नास्ति ॥ २५. '-क्' इति१.२.४.५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

### त्रि[1]फला तत्फलत्रयम् ।

१ तेषामामलकीबिभीतकहरीतकीनां फलत्रयं तत्फलत्रयम्, त्रीणि फलानि समाहृतानि **त्रिफला** । अजादित्वाट्टाप् । फलत्रयमित्यपि ।
"फलोत्तमा१ फलश्रेष्ठा२ त्रिफला च३ फलत्रयम्[१]४।
फलत्रिकं[२]५ वरा ज्ञेया६ पथ्या१ धात्री२ बीभीतकैः३ ॥१॥"
[ ]इति पथ्यापथ्यकारः । वरेत्याबन्तोऽपि । "त्रिफलायां वरा प्रोक्ता"[विश्वप्रकाशकोशः, रान्तवर्गः, श्लो-८]इति **महेश्वरः** ॥

### तापि[1]ञ्छस्तु तमा[2]लः स्यात्

१ तापिनः छादयति **तापिञ्छः**, सानुस्वारमध्यः । 'छद अपवारणे'(चु.उ.से.), 'अन्येष्वपि-'३।२।१०१॥ इति डः। शीतच्छायकत्वात् तापं छ्यति वा । 'छो छेदने'(दि.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥। 'तत्पुरुषे कृति-'६।३।१४॥ इत्यमोऽलुकि[३] पृषोदरादिर्वा । अयं निरनुस्वारमध्योऽपि। तथा च कविकल्पलतायाम्- "रविमिव तापिच्छविराजितं वनम्"[ [४] ]इति । २ ताम्यति **तमालः**, अस्त्रियाम् । 'तमु ग्लानौ[५]'(दि.प.से), 'तमिविशि-'(उणा-११५) इति कालन् । द्वे तमालस्य ॥

### चम्प[1]को हेमपुष्प[2]कः ॥११४६॥

१ चम्यतेऽद्यतेऽलिभिरिति **चम्पकः**। 'चमु अदने[६]'(भ्वा.प.से.), 'कृञादिभ्यः [संज्ञायां] वुन्[७]'(उणा-७१३), बाहुलकात् पुगागमः। चम्पाको दीर्घमध्योऽपि । २ हेमवर्णं पुष्पमस्य **हेमपुष्पकः** । द्वे चम्पकस्य ॥११४६॥

### निर्गु[1]ण्डी सिन्दु[2]वारे

१ निःशेषेण वर्ण्यते गुण्ड्यते (गुण्ड्यते वर्ण्यते) **निर्गुण्डी** । गुडिरपरिपठितोऽपि भ्वादेराकृतिगणत्वाद् द्रष्टव्यः, ततः 'कर्मण्यण्'३।२।१॥ । निःक्रान्ता गुण्डा द्वेष्टादिति वा । निर्गुण्टी टान्ताऽपि[८], ठान्ताऽपि च । २ स्यन्दं वृणोति[९] [१०]**सिन्दुवारः**। पृषोदरादिः, तत्र । द्वे संभालूतिवनीत्यादि भाषायाः ॥

### अति[1]मुक्तके माध[2]वी ल[3]ता ।
### वास[4]न्ती च

१ अतिक्रान्तो[११] मुक्तां[१२] मौक्तिकं शौभ्र्यादिति[१३] अतिमुक्तः, ततः स्वार्थे कनि **अतिमुक्तकः** । अतिक्रान्तो मुक्तान् विरक्तानिति वा, तत्र । २ मधौ चैत्रे माधवे वा पुष्पति (पुष्प्यति) **माधवी** । 'कालात् साधुपुष्प्यत्(पुष्प्यत्)पच्यमाने[षु]'४।३।४३॥ इति शैषिकोऽण् । ३ **लता** प्राग्वत्, (श्लो-१११७, १११९)। "वैशाखे माधवः कृष्णे माधवी चातिमुक्तके"[ [१४] ]इति रन्तिदेवः । "अतिमुक्तकच्छन्नमण्डप एव लतामण्डप उच्यते"[ [१५] ]इति सुभूतिः । 'माधवीलता' इत्यखण्डं पञ्चाक्षरात्मकमपि । यथा-"स्मृतये[१६] न च माधवीलतायै न हि [१७]कृप्यन्त्यपि संस्थितिः कृतस्य"[ [१५] ]इति व्योषः । ४ वसन्ते पुष्पति (पुष्प्यति) **वासन्ती** । 'सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्'४।३।१६॥ इति सप्तम्यन्ताच्छैषिकोऽण् । [१८]अमीतानामानि चत्वारि ॥

### औ[1]ड्रपुष्पं तु ज[2]पा

१ [आ] ईषदुनत्ति आर्द्रीभवति [१९]उड्रम् । आङ्पूर्वः 'उन्दी क्लेदने'(रु.प.से.), अतः 'स्फायितञ्चि-'उणा-१७०)इत्यादिना रक्, नैरुक्तं दस्य डत्वम् । उण्ड्रदेशे भवत्वाद् वा । उण्ड्रं पुष्पमस्य **औड्रपुष्पम्** । २ जपति **जपा** । 'जप व्यक्तायां वाचि'(भ्वा.प.से.), अच् । जपादित्वाद् वत्वे जवाऽपि । यद्वा 'जु गतौ' [सौत्रः], जवति शीघ्रं म्लायति, पचाद्यचि । "जवायां तु जपा स्त्रियाम्"[ [२०] ]इति **धर्मदासः** । जपायोगात् तरुरपि जपा, अत एव वृक्षप्रस्तावे "पुष्पमपि जपा"[ ]इत्युक्तम् । "औड्रपुष्पेऽपि वृक्षेऽपि जपाशब्दः प्रकीर्तितः"[ [२१] ]इति त्रिकाण्डशेषः । 'जासूनाम्नी' द्वे ।

### जा[1]तिस्तु माल[2]ती ॥११४७॥

१ जायते प्रीतिरनयेति **जातिः** । 'जनी प्रादुर्भावे'(दि.आ.से.), बाहुल्यात् कर्तर्यपि[२२] क्तिच्, 'जनसन-'

---

१. '-त्रिकम्' इति१.३॥ २. '-त्रयं' इति३॥ ३. '-क्' इति३॥ ४. द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-११४, पृ.१५५॥ ५. 'तमु काङ्क्षायाम्' इति क्षीरतरङ्गिण्यादयः ॥ ६. 'चमु छमु जमु झमु अदने' इति क्षीरतरङ्गिण्यादयः ॥ ७. '-ञ्' इति३॥ ८. '-न्तोऽपि' इति१, ३प्रतौ नास्ति ॥ ९. 'वृणाति' इति४॥, '-तीति' इति१॥ १०. 'स्यन्दु-' इति१.२॥ ११. '-न्तं' इति३॥ १२. ३प्रतौ नास्ति ॥ १३. 'शौभ्रा-' इति३॥ १४. द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-११८, पृ.१६१॥, रामाश्रमीर।४।७२॥, पृ.१९५॥ १५. द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-११८, पृ.१६१॥ १६. '-ता' इति४.५॥ १७. 'हृ-' इति२॥ १८. 'अमीना-' इति४.५॥ १९. 'औ-' इति४.५॥ २०. द्र. टीकासर्वस्वम्, भा-२, २।४।७६॥, पृ.१३०॥, पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-१२२, पृ.१६६॥, रामाश्रमीर।४।७६॥, पृ.१९७॥ २१. त्रिकाण्डशेषे न दृश्यते ॥ २२. अपिना करणेऽपि क्तिच्, अत्र 'अनया' इति करणार्थकत्वात् करणे क्तिच् बोध्यम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

६।४।४२॥ इत्यात्वम् । 'कृदिकारात्-'(गणसू-४।१।४५॥) इति ङीषि जाती च । २ मलते सौरभ्यं **मालती** । ''मल धारणे'(भ्वा.आ.से.), बाहुलकादतचि, गौरादिः, निपातनादुपधादीर्घत्वे[1] मालती''[ ]इति पारायणम् । ''मां लक्ष्मीं लाति मालो विष्णुस्तमेति(स्तमतति) कर्मण्यणि, वृद्धौ, 'ङ्यापोः-'६।३।६३॥इति ह्रस्वत्वे मालती''[[2]] इत्यन्ये । द्वे जाइवृक्षस्य ॥११४७॥

## मल्लिका स्याद् विचकिलः

१ मल्ल्यते ध्रियते शिरसि मल्लिः । 'मल मल्ल[3] धारणे'(भ्वा.आ.से.), 'इन् सर्वधातुभ्यः'(उणा-५५७)इतीन्। ततः स्वार्थे कन्[4] **मल्लिका** । अस्मादेव धातोः-'' 'संज्ञायाम्-'( )इति स्त्रियां ण्वुल्'[मा.धातुवृत्तिः, भ्वादिः, धातुसं-३२३]इति माधवः। २ विच्यते **विचकिलः** । 'स्थण्डिलकपिल[5]-'(हैमोणा-४८४)इतीले निपात्यते । चवर्गाद्यप्रथमस्वरमध्योऽयम् । यत्कविशिक्षा-''प्रावृण्मासाविव शोभिता विचकिलमालया स्त्री''[ ]इति । यदमरः-''तृणशून्यं तु मल्लिका भूपदी शीतभीरुश्च''[अमरकोषः २।४।६९-७०॥]इति । अन्ये विचकिलशब्दं वनकेवडीनाम प्राहुः । यदमरः-''द्विपुटाऽसौ विचकिलं सैवास्फोटा वनोद्भवा''[ ]इति। महेश्वरोऽपि-''स्मृतो [6]विचकिलो मल्लीप्रभेदे मदनेऽपि च''[विश्वप्रकाशकोशः, लान्तवर्गः, श्लो-१३८]इति । [7]केवडीनाम्नी द्वे ॥

## सप्तला नवमालिका[8] ।

१ सप्त मनोबुद्धीन्द्रियाणि च लाति **सप्तला** । 'ला दाने[9]'(अ.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥ २ नवा[10] स्तुत्या माला अस्या **नवमालिका** । 'अत इनिठनौ'५।२।११५॥ इति ठन् । नेमाली[11]नाम्नी द्वे ॥

## मागधी यूथिका

१ मगधदेशे भवा **मागधी** । २ यूथं पुष्पवृन्दमस्त्यस्याः **यूथिका**[12] । 'अत अनिठनौ'५।२।११५॥ इति ठन्, 'ठस्येकः'७।३।५०॥ । '''[13]यूथादयश्च'(चान्द्रोणा-२।५९)इति यौतेः थकन्, दीर्घत्वे, ङीषादौ वा, यौतीति यूथिका'' [ ]इत्यन्ये[14] । जूहीनाम्नी द्वे ॥

## सा तु पीता स्यात् हेमपुष्पिका[15] ॥११४८॥

१ सा यूथिका पीता पीतपुष्पा हेमवर्णं पुष्पमस्या **हेमपुष्पिका** । हेमपुष्पप्रतिकृतित्वाद्[16] वा । एकं पीतयूथिकायाः ॥११४८॥

## प्रियङ्गुः फलिनी श्यामा

१ प्रियं गच्छति **प्रियङ्गुः**, स्त्रीलिङ्गः। मित्रय्वादौ निपातितः । प्रीणातीति बाहुलकादङ्गुचि वा । २ फलमस्त्यस्याः **फलिनी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः । ३ श्यामो वर्णोऽस्त्यस्याः **श्यामा** । अर्शआदित्वादच् । त्रीणि प्रियङ्गोः ॥

## बन्धूके[17] बन्धुजीवकः ।

१ बध्नाति चित्तं **बन्धूकः** । 'बन्ध बन्धने' (क्र्या.प.अ.), उलूकादित्वादूकः, तत्र । २ बन्धुतुल्यपुष्पत्वाद्[18] बन्धुभिर्जीवति वर्तते **बन्धुजीवकः** । ['बन्ध बन्धने'(क्र्या.प.अ.)], ण्वुल् । जीवयति[19] जीवं जलम्, तद्बध्नाति[20]। केचित्तु ''तदाश्रयत्वाद् ([21]बन्धुरिव जीवमस्येति) बन्धुजीवकः''[[22]] । [23]बिपोहरीयानाम्नी द्वे ॥

## करुणे मल्लिकापुष्पः

१ कीर्यते **करुणः** । 'कॄ विक्षेपे'(तु.प.से.), 'कृवृतृदारिभ्यः उनन्[24]'(उणा-३३३), तत्र । २ मल्लिकाया इव पुष्पमस्य **मल्लिकापुष्पः** । करुणानाम्नी द्वे ॥

## जम्बीरे जम्भ-जम्भलौ ॥११४९॥

---

१. द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-११८, पृ.१६१॥ २. '-मिति' इति१.३, '-मपि' इति२॥ ३. 'मलि मल्लि' इति३॥ ४. '-नि' इति३॥ ५. 'ले-' इति४.५॥ ६. 'विचि-' इति१, विश्वप्रकाशकोशे च, पृ.१६०॥ ७. 'केवडा-' इति३॥ ८. तुलनीयोऽमरकोषः २।४।७२॥ ९. 'ला दाने' इति१.२.४.५प्रतिषु न दृश्यते॥ १०. 'नवाः' इति२.४.५॥ ११. '-माला-' इति३, '-पाला-' इति४॥ १२. '-काः' इति४॥ १३. 'वृषा-' इति१॥ १४. द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-११७, पृ.१६०॥, तत्र ''यौतीति 'यूथादयश्च'(चान्द्र उ.२।५९)इति यौतेः थकन् दीर्घत्वे ङीषादौ च (पा.४।१।४१, ५।३।७५, ७।४।१३)यूथिका इत्यन्ये'' इति दृश्यते ॥ १५. '-काः' इति५॥ १६. इतोऽग्रे ३प्रतौ 'हेमपुष्पिका' इति दृश्यते ॥ १७. '-को' इति२.५॥ १८. '-पुष्पाद्' इति१॥ १९. 'जीवति' इति३, '-तीति' इति४॥ २०. '-ध्नाति' इति३॥ २१. कोष्ठान्तर्गतपाठः ४प्रतौ नास्ति ॥ २२. द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-११९, पृ.१६२॥ २३. 'विषहुरि-' इति१.२॥ २४. 'उणन्' इति४.५, 'कृवृदारिभ्य उनन्' इत्युणादिगणे ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ जम्यते अद्यते **जम्बीरः** । 'जमु अदने'(भ्वा. प.से.), 'गम्भीरादयश्च'(चान्द्रोणा-३।२९॥)इति ईरन्, बुगागमश्च, तत्र । २ जम्भयत्यत्यम्लत्वान्मुखव्यादानं[१] कारयति **जम्भः**, पुंक्ली. । 'जभ जृभी(जृभि) गात्रविनामे' (भ्वा.आ.से.), पचाद्यच्, 'रधिजभोरचि'७।१।६१॥ इति नुम् । जम्यते जम्भीरः, जम्बीरवत् । "जम्भेर्मोहनार्थस्यैतानि रूपाणि"[अम.क्षीर.२।४।२४॥]इति क्षीरस्वामी । ३ जम्भेरेव वृषादित्वात् कलचि **जम्भलः** । जम्भान् दन्तान् लात्यम्लत्वाद् वा । जम्बीरीनामानि त्रीणि ॥११४९॥

## मातुलिङ्गो बीजपूरः

१ मया[२] श्रिया कृत्वा तोल्यते **मातुलिङ्गः**, पृषोदरादिः, एकपञ्चमस्वरमध्यः । 'मातुलुङ्गः[३]' इति द्विपञ्चमस्वरमध्योऽपि । २ बीजैः पूर्यते **बीजपूरः** । 'पूरी आप्यायने' (दि.आ.से.), कर्मणि[४] घञ् । द्वे बीजपूरस्य ॥

## करीरक्रकरौ समौ ।

१ करिणं[५] ईरयति कण्टकैरिति **करीरः** । 'ईर गतौ क्षेपणे च[६]'(चु.उ.से.), 'इगुपधः-'३।१।१३५॥ इति कः । किरति श्लेष्माणं वा । 'कॄ विक्षेपे'(तु.प.से.), 'कॄशॄपॄ(पृ)कटिपटिशौटिभ्य ईरन्'(उणा-४७०), अस्त्रियाम् । २ 'क्र' इति करोति तीक्ष्णकण्टकत्वादिति **क्रकरः** । पचाद्यच् । कइरनाम्नी[७] द्वे ॥

## पञ्चाङ्गुलः स्यादेरण्डे

१ पत्रात्मके हस्ते पञ्च अङ्गुलयोऽस्य **पञ्चाङ्गुलः** । 'अङ्गुलेर्दारुणि'५।४।११४॥ इति षच्[८] । अङ्गुलिसदृशपञ्चपत्रावयवत्वात्[९] । २ ईरयति वातम् **एरण्डः** । '-कृसृभृ-'(उणा-१२६)इत्यादिना बाहुलकादण्डन्, तत्र । एरण्डनाम्नी द्वे ॥

## धातक्यां धातुपुष्पिका ॥११५०॥

१ दधाति **धातकी**। बाहुलकात् तकन्[१०], गौरादिः । "धातुरक्ता[११] धातुकी"[अम.क्षीर.२।४।१२५॥]इति क्षीरस्वामी । २ धातुवद् रक्तानि पुष्पाण्यस्या धातुपुष्पी । स्वार्थे कनि, 'केऽणः'७।४।१३॥, **धातुपुष्पिका** । धाहडीनाम्नी द्वे ॥११५०॥

## कपिकच्छूरात्मगुप्ता

१ कपीन् कषति **कपिकच्छूः**, स्त्रीलिङ्गः । 'कष हिंसायाम्'(भ्वा.प.से.), 'कषेश्छ च(-छश्च)'(उणा-८४)इत्यूः । २ आत्मनो[१२] गुप्ता **आत्मगुप्ता**[१३] । 'कर्तृकरणे कृता-'२।१।३२॥इति समासः । स्पर्शाविषयत्वात्[१४] । कऊछिनाम्नी[१५] द्वे ॥

## धत्तूरः कनकाह्वयः ।

१ धयति धातून् **धत्तूरः**[१६] । 'धेट् पाने'(भ्वा. प.अ.), सिन्दूरवदूरे निपात्यते । धात्तूरो[१६] दीर्घादिरपि । "धयति, धातून्[१७] धेटो बाहुलकादुरच्, तुट् च, पृषोदरादित्वादाकारस्य ह्रस्वत्वम्, बाहुलकाद् धाञ ऊर[१८]जुरचौ अन्त्यस्याकारस्य उस्तऊस्तावादेशौ[१९] धुस्तुरो[२०] धूस्तूरश्च[२१]"[ ]इति मधुमाधवी[२२] । धूसति[२३] कान्तिं करोति[२४] धूः । 'धूस कान्तिकरणे'(चु.उ.से.), क्विप् । तूरति[२५] (तूर्यते) तूरः हिंसकः । 'इगुपध-'३।१।१३५॥ इति कः, द्वयोः कर्मधारये[२६] वा । "अव्युत्पन्नावेतौ"[[२२]]इत्यन्ये । "धूस्तूरस्तु[२७] पुण्डरीशो धुस्तुरः[२८] कनकाह्वयः"[[२२]]इति[२९] शब्दार्णवः । २ **कनकाह्वयः**, सुवर्णपर्यायनामक इत्यर्थः, भुक्ते ह्यस्मिन् हेमवर्णपृथ्वीदर्शनात्[३०] । द्वे धत्तूरस्य[३१] ॥

## कपित्थस्तु दधिफलः

१. '-ख्यानं' इति४॥ २. 'माया' इति३.४॥ ३. '-लिङ्गः' इति३॥ ४. '-ण्यणि' इति४॥ ५. 'करिणि' इति१॥ ६. 'ईर गतौ' 'ईर गतौ कम्पने च' इत्यदादौ, 'ईर क्षेपे' इति चुरादौ क्षीरतरङ्गिण्यादयः ॥ ७. 'केर-' इति३॥ ८. 'खच्' इति३॥ ९. '-शं' इति५॥ १०. '-च्' इति३॥ ११. 'धातुकी-' इति५॥ १२. '-नो' इति३॥ १३. २.४.५प्रतिषु नास्ति ॥ १४. 'स्पर्श-' इति ४.५॥ १५. 'कोठ-' इति३॥ १६. 'धतू-' इति३.४॥ १७. १प्रतौ नास्ति ॥ १८. 'ऊरजा-' इति३, 'ऊरजू-' इति५॥ १९. '-तादेशौ' इति३॥ २०. '-रोऽपि' इति३॥ २१. 'धु-' इति३॥ २२. द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-१२३, पृ.१६७-१६८॥, तत्र "धयति धातून् । धेटो बाहुलकाद् ऊरच् तुट् च । पृषोदरादित्वाद् (पा.६।३।१०९॥) आकारस्य ह्रस्वत्वम् । 'धत्तूरः' । बाहुलकाद् धाञः ऊरज्-उरचौ, अन्त्यस्याकारस्य उस्तोस्तावादेशौ। धुस्तूरः धुस्तुरश्च- इति मधुमाधवी ।" इति दृश्यते ॥ २३. अनित्यण्यन्तत्वादत्र णिजभावः ॥ २४. 'करोति कान्तिं' इति१॥ २५. 'तूरयति' इति३.५॥ २६. '-यो' इति३.५॥ २७. 'धु-' इति४॥ २८. 'ध-' इति५॥ २९. द्र. टीकासर्वस्वम्, भा-२, २।४।७८॥, पृ.१३२॥, तत्र "धूस्तुरस्तु पुरीसोहा (?) धूस्तूरः कनकाह्वयः । धूस्तूरो मातुलश्चास्य फले मातुलपुत्रकः।" इति दृश्यते॥, रामाश्रमी २।४।७७॥, पृ.१९८॥ ३०. 'है-' इति५॥ ३१. 'धतू-' इति१.३.५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ प्रायेण कपयस्तिष्ठन्त्यत्र, कपिरिव तिष्ठतीति वा **कपित्थः**, उभयत्र पृषोदरादित्वात् । अमरमालायां पवर्गतृतीयमध्योऽपि 'कबित्थः' इति । २ दधिवदम्लं मधुरं फलमस्य **दधिफलः** । द्वे कपित्थस्य ॥

**नालिकेरस्तु लाङ्गली[१] ॥११५१॥**

१ नालिकान् नालियुक्तान् पुष्पादीनीरयति **नालिकेरः** । 'ईर गत्यादौ[२]'(चु.उ.से.), 'इगुपध-'३।१।१३५॥ इति कः । तृतीयस्वरान्तोऽपि 'नालिकेरि[३]:' इति । ''नालिकेरिरिदन्तोऽपि तथा[४] दीर्घद्वितीयकः''[ ]इति शब्दप्रभेदः[५]। २ हलाकारपत्त्रशाखत्वात् **लाङ्गली,** इन्नन्तः । द्वे नालियरतरो[६]: ॥११५१॥

**आम्रातको वर्षपाकी**

१ आम्रमतति **आम्रातकः** । 'अत सातत्यगमने' (भ्वा.प.से.), ण्वुल् । आम्रमाम्रफलं फलैरतति[७] गच्छत्यनुकरोति । कृञादिभ्यः [संज्ञायां] वुनि[८] वा[९] । ह्रस्वादिरपि, ''कपिचूतोऽम्रातकोऽस्य[१०] फले पशुहरीतकी''[त्रिकाण्डशेषः२।४।९॥]इति त्रिकाण्डशेषात् । २ वर्षेण पाकोऽस्य **वर्षपाकी,** इन्नन्तः । द्वे अम्बाडवृक्षस्य ॥

**केतकः क्रकचच्छदः ।**

१ केतति वने **केतकः**, पुंस्त्री। 'कित[११] निवासे[१२]' (भ्वा.प.से.), ण्वुल् । २ क्रकचाकाराणि च्छदान्यस्य **क्रकचच्छदः** । केवडानाम्नी द्वे ॥

**कोविदारो युगपत्त्रः[१३]**

१ ''कोर्भूमेरवदारणात् **कोविदारः**''[अम.क्षीर.२।४।२२॥]इति स्वामी । कुं भूमिं विदारयति, कर्मणि, पृषोदरादित्वादौत्वं च । हरिवंशे प्रोक्तम्-

''कोऽप्ययं दारुरित्याहु[१४]रजानन्तो यतो जनाः ।
कोविदार इति[१५] ख्यातस्ततः स तरुपुङ्गवः ॥१॥''[[१६]]

इति। पृषोदरादित्वात् साधुः । २ युगं यमलं पत्त्रमस्य **युगपत्त्रः[१७]**। द्वे कोविदारस्य । 'कोइलार[१८] कचनार[१९][२०]' इति भाषा ॥

**सल्लकीव तु गजप्रिया ॥११५२॥**

१ सलति[२१] **सल्लकी,** पुंस्त्री । 'सल गतौ'(भ्वा.प.से.), दन्त्यादिः, 'कृञादिभ्यः [संज्ञायां] वुन्[२२]'(उणा-७१३), गौरादित्वात् ङीषि[२३], निपातनाल्लकारस्य[२४] द्वित्वम् । सत्कृत्य लक्ष्यते आस्वाद्यते गजैरिति वा । ''श्वाविद्द्रुभेदौ शल्लक्यौ शीका[२५]ञाशवितर्कयोः''[[२६]]इति तालव्यादौ रभसात् तालव्यादिरप्ययम् । ''सिल्लकी तृतीयस्वरादिरपि''[ ]इत्येके । ([२७]देशी प्रयोगोऽयम्[२८]), '''सल्लकी सिल्लकी ह्लादा'[[२९]]इति रुद्रः''[[२६]]इति स्वामी[३०] । २ गजानां प्रिया **गजप्रिया** । सालरिनाम्नी द्वे ॥११५२॥

**वंशो वेणुर्यवफलस्त्वचिसारस्तृणध्वजः ।**
**मस्करः शतपर्वा च**

१ वमति उद्गिरति करीरमिति **वंशः** । टुवम् (टुवम) उद्गिरणे'(भ्वा.प.से.), 'वृभृवमिकुभ्यः शक्' (चान्द्रोणा-३।५५॥, सरस्व.कण्ठा.२।३।१४०॥)इति शक् । २ वणति शब्दायते **वेणुः**, पुंसि । 'वण शब्दे'(भ्वा.प.से.), मृगय्वादित्वात् कुः, एत्वं चोपधायाः । [३१]वेणति गृह्णाति कामं जनयति वा[३२] । 'वेणृ गतिज्ञान[चिन्तानिशामनवादित्र]ग्रहणेषु'(भ्वा.उ.से.), बाहुलकादुः । ''वयति[३३] (वेति) शोभते[३४] स्वनेनेति । 'वी गत्यादौ'(अ.प.अ.), 'धेन्वादयश्च'(चान्द्रोणा-१।३१)इति नुः, णत्वं च''[[३५]]इति सुभूतिः। ३ यवाकारं फलमस्य **यवफलः**। ४ त्वचि सार

---

१. तुलनीयोऽमरकोषः२।४।१६८॥ २. चुरादौ 'ईर क्षेपे' इति क्षीरतरङ्गिण्यादयः ॥ ३. '-रः' इति५॥ ४. 'यथा' इति४॥ ५. शब्दभेदप्रकाशे तु न दृश्यते ॥ ६. '-केरतरोः' इति३॥ ७. 'आम्रमाम्रफलैरतति' इति.३॥ ८. 'वुञि' इति३॥ ९. 'वुन् इति वा' इति१॥ १०. '-स्याः' इति३, '-स्या' इति५॥ ११. 'किति' इति१.३.५॥ १२. 'निवासगत्योः' इति३, 'कित निवासे रोगापनयने च' इति क्षीरतरङ्गिण्यादयः ॥ १३. '-पत्रः' इति१.५॥ १४. '-हुः' इति४.५॥ १५. 'हीति' इति४॥ १६. द्र. टीकासर्वस्वम्, भा-२, २।४।२२॥, पृ.७६॥, तत्र 'कोविदारस्त्विति' इति दृश्यते ॥, पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-६८, पृ.९७॥ १७. '-पत्रः' इति४.५॥ १८. 'कोवि-' इति४॥ १९. 'कां-' इति१, 'का-' इति२, 'कं-' इति३॥ २०. '-नार' इति३.५॥ २१. 'सल्लति' इति१.२॥ २२. 'वुञ्' इति३.५॥ २३. 'ङीष्' इति१.२॥ २४. '-लस्य' इति४॥ २५. 'शा-' इति३॥ २६. द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-२७०, पृ.१२०॥ २७. कोष्ठान्तर्गतपाठः १प्रतौ नास्ति ॥ २८. '-ऽयम्' इति ३प्रतौ नास्ति ॥ २९. द्र. रामाश्रमी२।४।१२४॥, पृ.२१९॥ ३०. 'रुद्रस्वामी' इति पदचन्द्रिकायाम् ॥ ३१. 'व-' इति४.५॥ ३२. १प्रतौ न दृश्यते ॥ ३३. '-ते' इति४॥ ३४. 'ति' इति५॥ ३५. द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-२०७, पृ.२६४॥, तत्र ''वियन्ति शोभन्ते स्वनेन । वीधातो'धेन्वादयश्च''(चान्द्र उ.१।३१)इति नुः, णत्वं च । वेणुः''-इति सुभूतिः ।'' इति दृश्यते ॥, रामाश्रमी२।४।१६१॥, पृ.२३४॥, तत्र-''वयन्ति शोभन्ते स्वनेन । 'वी' धातोः 'धेन्वादयश्च' इति नुः, णत्वं च-इति सुभूतिः तत्र । उक्तसूत्राभावात् । वीधातोरादादिकत्वेन 'वयति' इति रूपाभावाच्च ॥'' इति दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उत्कृष्टो दृढत्वात् **त्वचिसारः** । 'सृ स्थिरे'३।३।१७॥ इति घञ्, 'हलदन्तात्-'६।३।९॥ इत्यलुक् । सप्तमीलुकि त्वक्सारोऽपि । ५ तृणानां ध्वजो मुख्यः **तृणध्वजः** । ६ मा क्रियते वार्यतेऽनेनेति **मस्करः** । 'पुंसि संज्ञायाम्-'३।३।११८॥ इति घः, 'मस्करमस्करिणौ-'६।१।१५४॥इत्यादिना[1] साधुत्वम्[2] । ७ शतं बहूनि पर्वाण्यस्येति **शतपर्वा,** नकारान्तः[3] । सप्त वंशस्य ॥

## स्वनन् वातात् स कीचकः[1] ॥११५३॥

१ स वंशः वाताद्धेतोः स्वनन् शब्दायमानः चीक्यते समीरणेन स्पृश्यते **कीचकः** । 'शीकृ चीकृ आमर्शने[4]'(चु.उ.से.), 'कृञादिभ्यः [संज्ञायां] वुन्[5]'(उणा-७१३), आद्यन्तविपर्ययः पृषोदरादित्वात् । अस्वनन्तोऽपि योग्यतया कीचकाः प्रोच्यन्ते, यथा 'अपठन्तोऽपि पाठकाः' इति[6] । एकं कीटकादिकृतरन्ध्रोपयुक्तवंशस्य ॥११५३॥

## तुकाक्षीरी[1] वंशक्षीरी[2] त्वक्क्षीरी[3] वंशरोचना[4] ।

१ क्षीरस्य त्वगिव **तुकाक्षीरी,** पृषोदरादिः । २ वंशस्य क्षीरमस्यां **वंशक्षीरी** । ३ त्वचि क्षीरमस्यां **त्वक्क्षीरी,** स्त्रीक्ली[7]० । ४ वंशोत्था रोचना **वंशरोचना** । तवषीरनामानि वंशरोचनानामानि चाऽभेदेन चत्वारि । अन्ये तु-

"तुकाक्षीरी वंशक्षीरी त्वक्क्षीरी क्षीरिका[9] शुभा ।
तुकाक्षीर्यपरा वांशी वंशजा वंशरोचना ॥"
वंशक्षीरी तुका शुभ्रा[10] वंश्या[11] वंशविवर्धनी। []इति

भिन्दन्ति । ततस्तेन तवक्षीरनामानि वंशरोचनानामानि च पृथगाहुः ॥

## पूगे[1] क्रमुक[2]गूवाकौ[3]

१ पवते **पूगः** । 'पूङ्[12] पवने'(भ्वा.आ.से.), 'छो-(छा)पूखडी-'(उणा-१२१)इति गः (गन्), तत्र । २ क्रामति **क्रमुकः** । क्रमेर्बाहुलकादुकः, 'क्वुन् शिल्पिसंज्ञयोः' (उणा-१९०)इति क्वुन् वा । ३ गुवन्त्यनेन स्रंसकत्वात् **गूवाकः** । 'गु पुरीषोत्सर्गे'(तु.प.अ.), 'पिनाकादयश्च'(उणा-४५५)इत्याके साधुः । 'गुवतेरुवङि'( )इत्युवङि । गुवाको ह्रस्वादिरपि । 'गुङ् अव्यक्ते शब्दे'(भ्वा.आ.अ.), पिनाकादित्वादाकप्रत्यये गवाकः, आद्यस्वरादिरपि । त्रीणि पूगस्य॥

## तस्योद्वेगं[1] पुनः फलम् ॥११५४॥

१ तस्य पूगस्य फलं उद्गतो वेगोऽस्मादिति **उद्वेगम्,** स्रंसकत्वात् । एकं पूगफलस्य ॥११५४॥

## ताम्बूलवल्ली[1] ताम्बूली[2] नागपर्यायवल्ल्यपि[3] ।

१ ताम्यति[13] चण्डायते । तमेः 'पिञ्जादित्वादूलच्[14]'(उणा-५३०)इत्यूलच्, बुक्, वृद्धिश्च । ताम्बूलाख्या वल्ली **ताम्बूलवल्ली** । ताम्बूलं पूगपर्णचूर्णसंयोगास्तद्धेतुर्वल्ली ताम्बूलवल्लीति वा । २ ङीषि **ताम्बूली** । ३ नागपर्यायेभ्यः सर्पादिभ्यो वल्ली, नागस्य वल्ली पातालानीतत्वाद् **नागवल्ली,** सर्पवल्ली, फणिलतेत्यादि । नागरवेलिनामानि त्रीणि[15] ॥

## तुम्ब्य[1]लाबू[2]:

१ तुम्बति **तुम्बी** । 'लबि (लुबि) तुबि अर्दने[16]'(चु.उ.से.), पचाद्यच्, गौरादिः ।

"अलाबूस्तु पिण्डफला तुम्बिस्तुम्बी महाफला ।
तुम्बा तु वर्तुलाला[17]ऽबूर्निम्बचूर्णा[18] तु लाबुका ॥१॥"

[[19]]इति वाचस्पतिः । "अलाबूस्तुम्बकः प्रोक्तः"[[19]]इति चन्द्रः[20] । "शिवाधिबाणास्तुम्बै[21]स्तु"[ ]इति सुश्रुतोक्तेः तुम्बोऽपि । २ जलेऽपि न लम्बते निमज्जति **अलाबूः** । 'लबि अवस्रंसने[22]'(भ्वा.आ.से.), 'नञि लम्बेर्नलोपश्च'(उणा-८७)इत्यूप्रत्ययो णित्नलोपश्च, णित्त्वाद् वृद्धिः । स्त्रीक्लीबयोरेतौ । अमरस्तु-"तुम्ब्यलाबूरुभे समे"[अमरकोषः२।४।१५६॥]इति स्त्रियामाह । तुम्बावेलिनाम्नी द्वे ॥

## कृष्णला[1] तु गुञ्जा[2]

१. '-त्यादि-' इति१॥ २. '-त्वात्' इति४.५॥ ३. 'नान्तः' इति४॥ ४. 'शीक आमर्षणे' इत्येव क्षीरतरङ्गिणी, 'शीक मर्षणे' 'चीक च' इति धातुप्रदीप-मा.धातुवृत्ती ॥ ५. 'वुञ्' इति३॥ ६. ३प्रतौ नास्ति ॥ ७. '-क्लीबं' इति३॥ ८. १.४प्रत्योर्नास्ति ९. 'त्वक्क्षीरीका' इति३॥ १०. 'शुभा' इति३॥ ११. 'वंश्य-' इति५॥ १२. 'पूञ्' इति४॥ १३. '-ते' इति३॥ १४. 'खर्जिपिञ्जादिभ्य ऊरोलचौ'(उणा-५३०) इत्युणादिगणसूत्रम् ॥ १५. 'त्रीणि नागरवेलिनामानि' इति४॥ १६. स्वामिसम्मतोऽयं धातुपाठः, 'लुबि तुबि तुपि अर्दने' इति मैत्रेयः, 'लुबि तुबि अदर्शने' इति सायणः ॥ १७. 'वर्त-' इति३.४.५॥ १८. '-चूर्णे' इति४.५॥ १९. द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-२०२, पृ.२५८॥, रामाश्रमी२।४।१५६॥, पृ.२३२॥, तत्र 'अलाबुस्तु' इति पदचन्द्रिका, 'अलाम्बुस्तु' इति रामाश्रमी ॥ २०. 'हट्टचन्द्रः' इति४॥ २१. '-णस्तु-' इति२॥ २२. 'अस्रं-' इति१, 'अविस्रं-' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ कृष्णं[१] प्रान्तं लाति **कृष्णाला** । २ गुञ्जति शिम्ब्यां **गुञ्जा** । 'गुजि [अव्यक्ते] शब्दे[२]'(भ्वा.प.से.), पचाद्यचि टाप् । चिणोठीलिनाम्नी द्वे ॥

**[1]द्राक्षा तु [2]गोस्तनी ॥११५५॥**

**[3]मृद्वीका [4]हारहूरा च**

१ द्राङ्क्ष्यते काङ्क्ष्यते[३] **द्राक्षा** । 'द्राक्षि ध्राक्षि ध्वाक्षि[४] घोरवासिते च[५]'(भ्वा.प.से.), चात् काङ्क्षायाम्, कर्मणि घञ्, द्राक्षाशब्दस्याऽनुनासिकलोपो यवादिपाठात् । रस्यते द्राक्षा, पृषोदरादिर्वा । द्राक् क्षरति[६] क्षीयते क्षिपति क्षिणोति वा, डप्रत्यये[७] साधुः । २ गोस्तनाकारत्वात्[८] **गोस्तनी** ॥११५५॥ ३ मृद्यते **मृद्वीका** । '[९]मृद क्षोदे' (क्र्या.प.से.), 'मृदेर्वोऽन्तश्च'(हैमोणा-४९)इति किदीकः । ३ हरति पित्तं **हारहूरा**, पृषोदरादिः । चत्वारि द्राक्षायाः ॥

**[1]गोक्षुरस्तु [2]त्रिकण्टकः ।**

**[3]श्वदंष्ट्रा [4]स्थलशृङ्गाटः**

१ गाः क्षुरति[१०] व्यथते[११] **गोक्षुरः** । 'क्षुर[१२] छेदने[१३]'(तु.प.से.), 'कर्मण्यण्'३।२।१॥ । २ त्रयः कण्टका अस्य **त्रिकण्टकः** । 'उरःप्रभृतिभ्यः कप्'५।४।१५१॥ । ३ शुनो दंष्ट्रे **श्वदंष्ट्रा**, संज्ञाशब्दत्वात् । 'शुनो दन्तदंष्ट्रा-'(वा- ) इत्यादिना दीर्घः । ४ स्थस्य शृङ्गाट इव **स्थलशृङ्गाटः** । [१४]गोखरूनामानि चत्वारि ॥

**[1]गिरिकर्ण्य[2]पराजिता ॥११५६॥**

१ गिरिरश्मेव कर्णोऽस्या[१५] **गिरिकर्णी** । गिरिर्वीरमूषिका, तत्कर्णतुल्यपत्रात्मकः पर्णोऽस्या वा । 'पाककर्ण-'४।१।६४॥ इत्यादिना ङीष् । २ न पराजिता **अपराजिता** । गिरिणईनाम्नी द्वे ॥११५६॥

**[1]व्याघ्री [2]निदिग्धिका[१६] [3]कण्टकारिका स्यात्**

१ व्याजिघ्रति उपसर्गबलाद् हिनस्ति कण्टकित्वात् **व्याघ्री** । 'घ्रा गन्धोपादाने'(भ्वा.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥, गौरादिः । २ गुणैः कण्टकैर्वा निदिह्यते स्म उपचिता [१७]निदिग्धा । 'दिह उपचये'(अ.उ.अ.), निष्ठा, स्वार्थे कनि, 'प्रत्ययस्थात्-'७।३।४४॥ इतीत्वे [१८]**निदिग्धिका** । ३ कण्टकानियर्त्ति कण्टकारी । कर्मण्यणि, 'टिड्ढाणञ्-'४।१।१५॥ इति ङीष् (ङीप्), ततः कनि, 'केऽणः'७।४।१३॥ इति ह्रस्वत्वे **कण्टकारिका** । रींगणीनामानि त्रीणि ॥

**अथा[1]ऽमृता ।**

**[2]वत्सादनी [3]गुडूची च**

१ नास्ति मृतं मरणमस्या **अमृता,** छिन्नप्ररोहित्वात् । २ वत्सैरद्यते **वत्सादनी** । कर्मणि ल्युट् । ३ गुडति रक्षति रोगादिति[१८] **गुडूची** । 'गुड रक्षणे[१९]'(तु.प.से.), 'गुडेरू[ट]च् (गुडेरुटच्)'(हैमोणा-१२०)इत्यूच् । [२०]गिलोनामानि त्रीणि ॥

**[1]विशाला त्विन्द्र[2]वारिणी[२१] ॥११५७॥**

१ **विशाला** महाफलत्वात् । २ इन्द्रवदक्षिभिर्वृणोति **इन्द्रवारिणी,** तृतीयस्वरमध्यः । 'वृञ् वरणे'(स्वा.उ.से.), ग्रहादित्वाण्णिनिः, 'ऋन्नेभ्यो ङीप्'४।१।५॥ । द्वे इन्द्रवारिण्याः[२२] ॥११५७॥

**[1]उशीरं [२३][2]वीरणीमूले**

१ उश्यते **उशीरम्,** पुंक्लीं[२४] । 'वश कान्तौ' (अ.प.से.), 'वशेः कित्'(उणा-४७१)इतीरन् औणादिकः, किरवात् सम्प्रसारणम् । २ वीरणी तृणविशेषः, तस्या मूलं **वीरणीमूलम्,** तत्र । उशीरनाम्नी द्वे । [२५]वीरणजटेत्यर्थः । यदमरः- ''मूलेऽस्योशीरमस्त्रियाम्''[अमरकोषः२।४।१६४॥] । [२६]अभयमपि, यद्धन्वन्तरिः-

---

१. 'कृष्ण-' इति३॥ २. 'अव्यक्तशब्दे' इति मैत्रेयः ॥ ३. 'द्राक्ष्यन्ते काक्ष्यते' इति१॥ ४ ३प्रतौ नास्ति ॥ ५ 'द्राक्षि ध्राक्षि घोरनिवाशिते च । ध्वाक्षि चेति दुर्गः' इति क्षीरतरङ्गिणी, पृ.९८॥, 'द्राक्षि ध्राक्षि ध्वाक्षि घोरवासिते च' इति मैत्रेयसायणौ ॥ ६.'क्षारति' इति३.४॥ ७. 'ङ-' इति४॥ ८ 'गाः स्त-' इति१.२.४॥ ९ 'मृदेविति-' इति३॥ १०. 'क्षरति' इति३.४.५॥ ११. १प्रतौ नास्ति ॥ १२. 'छुर' इति४॥ १३. 'छुर क्षुर छेदने' इति३.५॥, 'क्षुर खुर विलेखने' इति स्वामी, 'क्षुर विलेखने' इति मैत्रेयसायणौ ॥ १४ 'गोखरु-' इति३॥ १५. '-र्णेस्या' इति४.५॥ १६. 'निर्दि-' इति३, मुद्रितमूले स्वोपज्ञटीकायां च 'निर्दिग्धिका' इति दृश्यते ॥ १७ 'निर्दि-' इति३॥ १८. ४प्रतौ नास्ति ॥ १९. 'रक्षायाम्' इति क्षीरतरङ्गिण्यादयः ॥ २०. 'गिलोइ-' इति३, 'गिलोय-' इति४॥ २१. '-रुणी' इति२.४॥ २२. '-रुण्याः' इति३, '-रुण्यः' इति४॥ २३. 'वारु-' इति५॥ २४ '-क्लीबं' इति४॥ २५. 'वीरणी-' इति५॥ २६. 'उभ-' इति३.५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

''उशीरममृणालं स्यादभयं समगन्धिकम् ।
रणप्रियं वीरतरं(-तरु) वीरं वीरणमूलिका[1] ॥''

[धन्वन्तरिनिघण्टुः, चन्दनादिस्तृतीयवर्गः, श्लो-१३]इति ॥

**ह्रीबेरे वालकं जलम् ।**

१ ह्रीयुक्तं बेरं मूलरूपं शरीरमस्य सङ्कोचात् **ह्रीबेरम्** । ह्रीयुक्तं बेरं कुङ्कुममस्मादिति वा, तत्र । ''वेरं कलेवरे क्लीबं वार्तायां कुङ्कुमेऽपि च''[मेदिनीकोशः, रान्तवर्गः, श्लो-८५]इति मेदिनिः । २ वल्यते संव्रियते गन्धान्तरमनेनेति **वालकम्** । 'वल संवरणे'[3](भ्वा.आ.से.), करणे घञ्, ततः कन् । वाडते वालम्। 'वाडृ आप्लाव्ये'[5](भ्वा.आ.से.), अच्, ततः कन् वा । ३ जडति **जलम्**। अच्। यद्वा अस्य केशसदृशत्वात् तद्घ्नत्वाच्च वालजलपर्यायवाच्यत्वं च । यदमरः- ''वालं ह्रीबेरबर्हिष्टौ(-ष्ठो-)दीच्यं केशाम्बुनाम च''[अमरकोषः २।४।१२२॥]इति । धन्वन्तरिश्च-

''वालकं वारि तोयं च ह्रीबेरं जलमम्बु च ।
केश्यं[6] वज्रमुदीच्यं च पिङ्गमावपनं(-चमनं) कचम् ॥१॥''

[धन्वन्तरिनिघण्टुः, गुडूच्यादिः प्रथमो वर्गः, श्लो-४७]इति । त्रीणि वालकस्य ॥

**प्रपुन्नाटस्त्वेडगजो दद्रुघ्नश्चक्रमर्दकः ॥११५८॥**

१ प्रपुणति[9] प्रपुनाति वा **प्रपुन्नाटः**, पृषोदरादिः, चतुर्थवर्गपञ्चमद्वितीयस्वरमध्यः । प्रपुनटस्त्वाद्यस्वरमध्योऽपि । यदाह-''प्रपुन्नाटः प्रपुनटश्चक्री त्वावर्तकः स च'' [ ]इति । प्रकर्षेण पुमांसं नालयति सुरभयति । 'णल गन्धे'(भ्वा.प.से.), ण्यन्तात् 'कर्मण्यण्'३।२।१॥, संयोगान्तलोपः[8], मकारस्य परसवर्णत्वेन नकारः, डलयोरेकत्वेन 'प्रपुन्नाडः' इति द्विनकारमध्यः, तृतीयवर्गतृतीयान्तश्च । ''प्रपुनाति प्रपुनाडः एकनकारः''[ ]इत्यन्ये''[ ]इति मिश्राः। २ एडवद् मेषवत् फलद्वारेण गजति शब्दायते **एडगजः** । 'गज शब्दे'[10](भ्वा.प.से), अच् । मेषाकृतित्वादेडवद् गज्यते शब्द्यत इति वा । ३ दद्रुं हन्तीति अमनुष्यके टकि **दद्रुघ्नः**, क्षुभ्नादित्वान्न णत्वम् । ४ चक्राकारत्वाच्चक्रं दद्रुं मर्दयति **चक्रमर्दकः** । 'मृद क्षोदे'(क्र्या.प.से.), ण्वुल् । पमाडनामानि चत्वारि ॥११५८॥

**लट्वायां महारजनं कुसुम्भं कमलोत्तरम् ।**

१ लटति **लट्वा** । 'लट बाल्ये'(भ्वा.प.से.), 'अशुप्रुषिलटिकटिकणिखटिविशिभ्यः क्वन्'(उणा-१४९), अजादित्वाट्टाप्, तत्र । २ रज्यतेऽनेन रजनम् । करणे ल्युट् । महच्च तद् रजनं च **महारजनम्** । ३ कुस्यति **कुसुम्भम्**, अस्त्रियाम्[11] । 'कुस श्लेषे'[12](दि.प.से.), 'कुसे-[13]रुम्भोम-'(उणा-५४६)इत्युम्भः । कौ सुम्भ्यते निकुट्यते वा । सुम्भिः[14] सौत्रः, घञ् । ४ कमलेभ्य उत्तरं श्रेष्ठं वर्णाधिक्यात् **कमलोत्तरम्** । चत्वारि कुसुम्भस्य ॥

**लोध्रे तु गालवो रोध्र-तिल्व-शाबर-मार्जनाः ॥११५९॥**

१ रुणद्धि व्रणमिति **लोध्रः** । 'रुधिर् आवरणे' (रु.उ.अ.), 'शूद्रादयः'(कातन्त्रोणा-२।७७॥)इति रुधे रन्प्रत्ययः, गुणः, कपिरिकादित्वाल्लत्वम्, तत्र । २ गालवाद्दषेः प्रभवति, शेषेऽणि **गालवः** । गलतेर्घञि गालं गलनम्, नेत्र[15]स्रावं[16] वाति । 'उवै शोषणे'[17](अ.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥ इति[18] कः । ''गालवः''[ ]इति माधवः[19] । ३ रुणद्धि व्रणं **रोध्रः** । प्राग्वत्, लत्वाभावो विशेषः । भिरुको भीलुकवदिति[-वत्]। लोध्रो रोध्रश्च । ४ तिलति स्निह्यति[20] अङ्गमनेनेति तिलः[21] । 'तिल स्नेहने' (तु.प.से.), तत उल्वादित्वाद् वः [**तिल्वः**]। ५ शबराणामयं वृक्षः **शाबरः**, तालव्यादिः, दन्त्यादिश्च। ''साबराख्यापराधे च

१. '-मूलकम्' इति मुद्रितधन्वन्तरिनिघण्टौ, पृ.१४०, श्लो-१३॥ २. '-बे' इति३॥ ३. 'वल वल्ल संवरणे सञ्चरणे च' इति सायणः ॥ ४. ४प्रतौ नास्ति ॥ ५. '-प्लवे' इति३॥ ६. 'कै-' इति१.२.३॥ ७. तुलनीयोऽमरकोषः२।४।१४७॥ ८. '-न्तस्य लोपः' इति३॥ ९. इतोऽग्रे १.२.४.५प्रतिषु 'प्रपुन्नाति वा' इति दृश्यते ॥ १०. 'गज गजि गृज गृजि मुज('मज' इति स्वामी) 'मुजि' शब्दार्थाः' इति, 'गज मदने च' इति च स्वाम्यादयः॥ ११. ४प्रतौ नास्ति ॥ १२. 'कुश संश्लेषणे' इति१, 'कुसे संश्लेषे' इति२.५॥ १३. 'कुसेरु-' इति१.२.४.५॥ १४. 'सुंभिः' इति२॥ १५. 'नेत्रं' इति४.५॥ १६. '-श्रावं' इति३॥ १७ 'पै ओवै शोषणे' इति क्षीरतरङ्गिण्यादयः।, ''काशकृत्स्नधातुपाठे तु 'पै उ वै शोषणे' इत्येवं त्रयो धातवः पठ्यन्ते 'उ' इत्ययम् 'अवति शुष्यति' इत्येवं व्याख्यायते । द्र. का. धातुव्याख्यानम् १।३३६, पृष्ठ.५२। तदनुसारमिहापि 'ओ' पृथग्धातुः सम्भवति ॥'' इति क्षीरतरङ्गिणीटिप्पणी, पृ.१४१॥ १८. '-सर्गेति' इति ४.५॥ १९. द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-७९, पृ.११०॥, तत्र-''गलतेर्घञि (पा.३।३।१८) गालः । गालं गलनं नेत्रस्रावं वायति शोषयति । पै ओ वै शोषणे । ''आत'' (पा.३।२।३)इत्यनेन कप्रत्ययः। 'गालवः'-इति तु मधुमाधवी ॥'' इति दृश्यते ॥ २०. '-ते' इति३॥ २१. 'तिल्वः' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लोध्रे पापे च पठ्यते''[ ]इति दन्त्यादावजयः । ६ मार्ष्टि उद्वर्त्तयत्यङ्गमनेन **मार्जनः** । करणे ल्युट्, नन्द्यादिल्युर्वा,[2] 'मृजेर्वृद्धिः'७।२।११४॥ । षट् लोध्रस्य ॥११५९॥

अथ पद्मिन्यधिकारः-

**मृणालिनी पुटकिनी नलिनी पङ्कजिन्यपि ।**

१-२ मृणालमस्त्यस्यां **मृणालिनी** । पुटकमस्त्यस्यां **पुटकिनी** । उभयत्र पुष्करादित्वादिनिः । समूहार्थे तु 'खलादिभ्यः इनिः'(वा-४।२।५१॥)इतीनिः, 'ऋन्नेभ्यो ङीप् (ङाप्)'४।१।५॥ इति ङीष् (ङीप्) । ३ ''नलिनमत्रास्तीति, अर्शआद्यचि, गौरादिङीषि **नलिनी**'' [ ]इति कलिङ्गः । ''पुष्करादिषु नडशब्दस्य पाठाद् डलयोरेकत्वस्मरणाद् लत्वे नलिनी''[ ]इति सोमनन्दी । वयं तु ''नली मनःशिलायां तु नलिने (मलिने) तु नलं मतम्''[विश्वप्रकाशकोशः, लान्तवर्गः, श्लो-६]इति विश्वप्रकाशात् पद्मवचनात् नलशब्दात् पुष्करादित्वादिनौ, [समूहार्थे] 'खलादिभ्यः'(वा-४।२।५१॥)इनौ वा नलिनी'' [ ]इत्याचक्ष्महे''[ ]इति मिश्राः । ४ एवं **पङ्कजिनी** । यौगिकत्वात् कमलिनीपद्मिनीविसिनीत्यादयः । कुमुदिनीपद्मिनीत्यादयः कुमुदसमूहे पद्मसमूहे[6] च वर्तन्ते[7] । तथा च-''सुरगज इव बिभ्रत् पद्मिनीं[8] दन्तलग्नाम्''[कुमारसंभवम् ३।७६॥]इत्यादयश्च प्रयोगाः[9] । ''पद्मिनी पद्मसंहतिः[10] स्त्रीविशेषे सरोऽम्बुजे[11]''[मेदिनीकोशः, नान्तवर्गः, श्लो-८६]इति मेदिनिः[12] । पोइणिनामानि[13] चत्वारि ॥

**कमलं नलिनं पद्ममरविन्दं कुशेशयम् ॥११६०॥**

**परं शत-सहस्राभ्यां पत्रं राजीव-पुष्करे ।**

**विसप्रसूनं[15] नालीकं तामरसं महोत्पलम् ॥११६१॥**

**तज्जलात् सरसः पङ्कात् परै रुट्-रुह-जन्म-जैः ।**

१ कं जलमलति भूषयति । 'अली भूषणादौ[16]' (भ्वा.प.से.), मूलविभूजादित्वात् कः **कमलम्** । काम्यत इति वा । कमेर्वृषादिभ्यः कलच्[17] । ''केन मल्यत इति कमलम् । 'मल मल्ल धारणे'(भ्वा.आ.से.), 'घञर्थे कविधानम्'(वा- )इति कः, 'कर्तृकरणे कृता बहुलम्' २।१।३२॥ इति समासः''[मा.धातुवृत्तिः, भ्वादिः, धातुसं-३२३]इति[18] माधवः । कमला लक्ष्मीस्तदाश्रयत्वाद् वा कमलम् । २ नलति बध्नाति सौरभमिति **नलिनम्** । 'णल[19] गन्धे'(भ्वा.प.से.), 'द्रुदक्षिभ्यामिनन्'(उणा-२०८)इति बाहुलकादस्मादपीनन् । नलं नालमत्रास्तीति, 'फलबर्हाभ्यामिनन्(च्)'(वा-५।२।१२२॥ काशिका)इति चकारादतोऽपि इनचि नलिनम्''[ ]इति तु पञ्जिका । ३ पद्यते लक्ष्मीरत्रेति **पद्मम्** । 'पद गतौ'(दि.आ.अ.), 'अर्त्तिस्तुसुहृ(हु)शृ(सृ)धृक्षि-'(उणा-१३७)इत्यादिना मन् । एते पुंक्लीबलिङ्गाः । ४ अरं शीघ्रं विन्दति **अरविन्दः(-न्दम्)** । विदधातोः 'गवादिषु विदेः(विन्देः)संज्ञायाम्'(वा-३।१।३८॥)इति शप्रत्ययः[21], 'शे मुचादीनाम्'७।१।५९॥ इति नुम्, अरविन्दम् । ''अरं वातं[22] विन्दति[23]''[ ]इत्यन्ये । ५ कुशे जले शेत इति **कुशेशयम्** । 'अधिकरणे शेते'३।२।१५॥ इत्यच्, 'शयवासवासिष्वकालात्'६।३।१८॥ इति सप्तम्यलुक् । ''शेतिरत्र स्थितिवचनः, तथा (यथा) जलाशयः'' [ ]इति सर्वधरः ॥११६०॥ ६-७ शतसहस्रशब्दाभ्यामग्रे पत्रं योज्यते, शतसहस्रे बहूपलक्षणम्, तेन शतं बहूनि पत्राण्यस्य **शतपत्रम्, सहस्रपत्रम्** । ''शतपत्रसहस्रपत्रयोर्भिन्नत्वेऽपि[25] पद्मत्वेन रूपेणैकत्वम्''[ ]इति मिश्राः । ८ केसरै[26] राजतेऽस्य[27] **राजीवम्** । 'अन्येभ्योऽप्युपसङ्ख्यानम्'(वा-५।२।१०९॥)इति वः । ९ पुष्करं जलमाश्रयत्वेनाऽस्याऽस्तीति[28] **पुष्करम्** । अर्शआदिभ्योऽच्[29] । पुष्यति जले पुष्करं वा । 'पुषेः(पुषः) कित्'(उणा-४४४)इति

---

१. द्र. टीकासर्वस्वम्, भा-२, २।४।३३॥, पृ.८८॥, पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-७९, पृ.११०॥, रामाश्रमी२।४।३३॥, पृ.१७८॥ २. '-दिल्युर्वा' इति१. ' दित्वाल्ल्युर्वा' इति१॥ ३. इतोऽग्रे ३प्रतौ 'नामानि' इति दृश्यते ॥ ४. 'पद्म-' इति३.४॥ ५. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२६६, पृ.३१८ ३१९॥ ६. १प्रतौ नास्ति ॥ ७. 'वर्तते' इति३.४॥ ८. '-नी' इति३॥ ९. 'इत्यादिप्रयोगाः' इति४॥ १०. '-संततिः' इति१, '-सङ्घाते' इति मेदिनीकोशे, पृ.८९॥ ११. 'सरोरुहे' इति मेदिनीकोशे, पृ.८९॥ १२. '-नी' इति३॥ १३. 'पोइण-' इति३॥ १४. 'विश-' इति३.५॥ १५. '-नं' इति१.५॥ १६. क्षीरतरङ्गिण्यामस्य धातोष्टिप्पणी द्रष्टव्या, पृ.८१, धातुसं-३४६॥ १७. 'वृषादिभ्यश्चित्'(उणा-१०६)इत्युणादिगणसूत्रम् ॥ १८. ''केन मल्यते इति कमलम्-'घञर्थे कविधानम्' इति कः, 'कर्तृकरणे कृता' इति समासः'' इति मा.धातुवृत्तौ, भ्वादिः, धातुसं-३२३, पृ.१४१॥ १९. 'नल' इति१॥ २०. 'शत्र-' इति३॥ २१. इतोऽग्रे १.२.४.५प्रतिषु 'तुदादिभ्यः शः' इति दृश्यते ॥ २२. 'वान्तं' इति१.२.३॥ २३. इतोऽग्रे ३प्रतौ 'अरविन्दं' इति दृश्यते ॥ २४. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२६७, पृ.३२०॥ २५. '-त्वे' इति१.४॥ २६. 'केश-' इति५॥ २७. 'केसरराज्यः सन्त्यस्य' इति१.२॥ २८. '-नाऽस्ति' इति१, '-नाऽस्तीति' इति४॥ २९. 'आद्यच्' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

करन् । १० विसात् प्रसूतं **विसप्रसूतम्,** चतुर्थवर्गाद्यान्तः। ''स स्नुः पयः पपुरनेनिजुरम्बराणि जक्षुर्विशं धृतविकासिविसप्रसूताः''[1][शिशुपालवधम्, सर्गः-५, श्लो-२८]इति माघः। तुर्यवर्गपञ्चमान्तोऽप्ययम्, विसप्रसूनमिति । विसं मृणालम्, तस्य प्रसूनं पुष्पं विसप्रसूनमिति । ११ नलति **नालीकम्,** अस्त्रियाम् । गौडस्तु ''शराब्जयोः''[ ]इति पुंस्याह। १२ ''तामरं घृतमम्बु च''[2]इति रुद्रः। तत्र सस्ति तिष्ठतीति **तामरसम्**। 'षस स्वप्ने'(अ.प.से.), 'अन्येभ्योऽपि (अन्येष्वपि)-'३।२।१०१॥इति डः। ''दुर्जन इव तामरसः''[ ]इति वासवदत्तायां वसन्तवर्णनायाम्[3]। तामः सप्रकर्षो रसोऽस्येति[4] वा । तामः प्रकर्षार्थस्तारतम्यवदिति, ताम्यद्भिर्भृङ्गै रस्यते इति पृषोदरादिर्वा । १३ महच्च तदुत्पलं च **महोत्पलम्** ॥११६१॥ १४-२५ तत् कमलं जलशब्दात् सरःशब्दात् पङ्कशब्दाच्च परैः रुट्१-रुह२जन्म३जैः४ उच्यते, **जलरुट्,** जलरुही, जलरूहीत्यादि, **जलरुहम्, जलजन्म,** नकारान्तः, **जलजम्** । एवं **सरोरुट्, सरोरुहम्, सरोजन्म, सरोजम्, पङ्करुट्, पङ्करुहम्, पङ्कजन्म, पङ्कजम्** । एवमेतानि द्वादशपूर्वैस्त्रयोदशभिर्मीलितानि पञ्चविंशतिनामानि ॥

अथ पद्मविशेषानाह-

## पुण्डरीकं सिताम्भोजम्[5]

१ पुण्डयति भूषयति जलमिति **पुण्डरीकम्** । 'पुडि भूषायाम्' 'पुंडि च'('मडि भूषायाम्' 'पुडि च') (भ्वा.प.से.), '[6]फर्फरीकादयश्च'(उणा-४६०)इत्यरीकः (-कन्) । पुणति मङ्गल्यत्वाद् वा । 'पुण[7] कर्मणि शुभे च[8]'(तु.प.से.), 'पुणेर्डीरक् मुगागमश्च'( )इतीकन् । २ सितं शुक्लमम्भोजं **सिताम्भोजम्** । द्वे धवलकमलस्य ॥

## अथ रक्तसरोरुहे[5] ॥११६२॥

## रक्तोत्पलं कोकनदम्

१ अथेत्यनन्तरम्[9]। रक्तं च तत् सरोरुहं च **रक्तसरोरुहम्,** तत्र ॥११६२॥ २ रक्तं शोणमुत्पलं **रक्तोत्पलम्** । ३ कोकांश्चक्रवाकान् नादयति **कोकनदम्**[10] । नदेरन्तर्भावितण्यर्थात् पचाद्यच्, पृषोदरादित्वाद् ह्रस्वत्वम् । त्रीणि रक्तकमलस्य ॥

एतानि मृणालिनीत्यादीनि कोकनदान्तानि सूर्यविकासीनि, अथ चन्द्रविकासिन आह-

## कैरविण्यां कुमुद्वती ।

१ कैरवाणि सन्त्यस्यां **कैरविणी**। 'अत इनिठनौ'५।२।११५॥ इतीनिः, 'ऋन्नेभ्यो ङीप्[11]'४।१।५॥, तस्याम्[12]। २ कुमुदानि सन्त्यस्यां **कुमुद्वती** । 'कुमुदनड-'४।२।८७॥ इति डिन्मतुप्, 'उगितश्च'४।१।६॥ इति ङीष्[13] (ङीप्)। कुमुदिति व्यञ्जनान्ताद्[14] वा । 'तदस्या-' ५।२।९४॥ इति मतुप् । द्वे चन्द्रविकासिकमलस्य ॥

## उत्पलं स्यात् कुवलयं कुवेलं कुवलं कुवम् ॥११६३॥

१ उत्पलति उद्गच्छति **उत्पलम्,** पुंक्ली. । 'पल गतौ'(भ्वा.प.से.), अच् । २ कौ पृथिव्यां वलते **कुवलयम्** । 'वल वल्ल संवरणे[15]'(भ्वा.आ.से.), 'वलिमलि-'(उणा-५३९)इति कयन् । ''कोर्वलयमिव शोभाकरत्वात्''[16]इति स्वामी[17] । कौ वलति प्राणितीति वा । 'वलेः कयन्'( )इति बाहुलकादतोऽपि कयन्। ''कुत्सितो बहिर्वलयः पत्रवेष्टनमस्य''[18]इति श्रीभोजः। ३ कौ वेलति **कुवेलम्**। 'वेलृ गतौ[19]'(भ्वा.प.से.), अच्। ४ कवते भृङ्गारावैरिति वा[20] **[कुवलम्]** । 'कुङ्[21] शब्दे'(भ्वा.आ.अ.), 'कोर्वा'(हैमोणा-४६९)इति किदलः, पुंनपुंसकोऽयम् । गौडस्तु ''कुवलो बदरोत्पले''[ ]इति पुंस्याह । ५ कौ पृथिव्यां वाति[22], कुत्सितं वातीति वा **कुवम्** । 'वा गतिगन्धनयोः' (अ.प.अ.), 'अन्येभ्योऽपि-'(वा-३।२।१०१॥)इति डः ।

---

१. '-सूनाः' इति मुद्रितशिशुपालवधे, पृ.१२५॥ २. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२६८, पृ.३२०॥, रामाश्रमी१।१०।५०॥, पृ.१३७॥, तयोः ''तामरं घृणमर्णश्च'' इति दृश्यते ॥ ३. '-नम्' इति१.२॥ ४. '-स्त्यस्येति' इति४॥ ५. तुलनीयोऽमरकोषः१।१०।४१-४२॥ ६. 'पर्फ-' इति१, 'पर्प-' इति३.५॥ ७. 'पुणे' इति१॥ ८. 'पुण कर्मणि शुभे' इति मैत्रेयसायणौ ॥ ९. '-त्यानन्तर्ये' इति४॥ १०. '-नन्दनम्' इति४॥ ११. 'ङीष्' इति४.५॥ १२. १.२प्रत्योर्नास्ति ॥ १३. 'ङीषि' इति३॥ १४. '-न्तत्वाद्' इति३॥ १५. 'वल वल्ल संवरणे सञ्चरणे च' इति सायणः ॥ १६. स्वामिकृताऽमरकोशटीकायां न दृश्यते ॥ १७. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२६४, पृ.३१६॥, १प्रतौ 'स्वामी' इत्यस्य स्थाने 'वा' इति दृश्यते ॥ १८. द्र. अम.क्षीर.१।९।३७॥, पृ.६८॥ १९. वेलृइत्यादिदण्डकोऽयं धातुर्मैत्रेयसायणसम्मतश्चलनार्थकः ॥ २०. अधिकोऽयं प्रतिभाति ॥ २१. 'कु' इति१॥, 'घुङ् कुङ् उङ् शब्दे' इति स्वामी, 'घुङ् कुङ् उङ् ङुङ् शब्दे' इति मैत्रेयः, 'कुङ् घुङ् उङ् ङुङ् शब्दे' इति सायणः॥ २२. 'वान्ति' इति१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्रोत्पलशब्दस्य सामान्येन पद्मकुमुदादिषु वृत्तिः, अत एव महोत्पलमिति पद्मस्य संज्ञा । अत एव सामान्यवृत्तित्वान्नीलाब्जेऽप्येतयोर्वृत्तिर्निर्दिश्यते । तथा च "इन्दीवरे मांसशून्ये[१] उत्पलं कुष्टभूरुहे"[[२]]इति रभसः । श्याम (श्यामं) शितिकण्ठनीलं कुवलयमिन्दीवरं च नीलाब्जम्"[[२]]इति नाममाला [च । ननु यद्येवं कथमुत्पलमित्युक्ते नीलोत्पलादिष्वेव बुद्धिर्जायते न पद्मादौ ? इति चेत्, उच्यते । यथा सामान्येऽपि धान्यार्थे धान्यमित्युक्ते कमलादिषु] एवं[३] बुद्धिर्भवति, न कुमुदादावेवमिहापि इत्यदोषः"[[४]]इति स्वामिसर्वधरादयः । पञ्च चन्द्रविकासिकमलस्य ॥११६३॥

एतद्विशेषानाह-

**श्वेते तु तत्र कुमुदं कैरवं गर्दभाह्वयम् ।**

१ तत्र श्वेतोत्पले, कौ मोदत इति **कुमुदम्**, अस्त्रियाम् । मूलविभुजादित्वात् कः । काम्यत इति वा । 'कमु कान्तौ'(भ्वा.प.से.), बाहुलकादुदः । कुमुद् दकारान्तोऽपि । २ के जले रौतीति । 'रु शब्दे'(अ.प.से.), अच्, 'तत्पुरुषे कृति-'६।३।१४॥ इति सप्तम्यलुक्, [५]कैरवो हंसः, तस्येदं प्रियमिति **कैरवम्** । करोति सुखं वा,[६] पृषोदरादिः । ३ गर्दभस्याऽऽह्वयोऽस्य **गर्दभाह्वयम्** । "कैरवं गतकान्तं[७] च गर्दभं कुमुदं कुमुत्"[[८]]इति माधवः । त्रीणि श्वेतोत्पलस्य ॥

**नीले तु स्यादिन्दीवरम्**

१ नीले उत्पले, इन्दति परमैश्वर्येण योजयति इन्दिर्लक्ष्मीः । 'इदि परमैश्वर्ये'(भ्वा.प.से.), 'अच इः' (उणा-५७८), 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि इन्दी, तस्या वरमिष्टम् **इन्दीवरम्** । "इन्द्रियमावृणोति सौरभ्यातिशयादिति, पृषोदरादिर्वा"[[९]]इति स्वामी[१०] । एकं नीलोत्पलस्य ॥

**हल्लकं रक्तसन्ध्यके ॥११६४॥**

१ हल्लति[११] घूर्णते **हल्लकम्** । 'हल्ल भ्रमणे[१२]' ( ), क्वुन् । "ह्लादयतीति, पृषोदरादित्वादीत्वे हल्लीसकमपि"[ ]इति मिश्राः । २ सन्ध्येव रक्तं **रक्तसन्ध्यकम्** । इवार्थे कन्, 'केऽणः'७।४।१३॥ इति ह्रस्वत्वम्, 'वाहिताग्न्यादिषु'२।२।३७॥ इति "रक्तान्[१३] सन्धीनकति गच्छति व्याप्नोतीति रक्तसन्ध्यकम् । 'अक अग कुटिलायां गतौ'(भ्वा.प.से.), मूलविभुजादित्वात् कः"[[१४]] इति पञ्जिका । तत्र । द्वे रक्तोत्पलस्य ॥११६४॥

**सौगन्धिकं तु कह्लारम्[१५]**

१ सुगन्ध्येव **सौगन्धिकम्** । स्वार्थे 'विनयादिभ्यष्ठक्'५।४।३४॥ इति ठक् । "शोभनो गन्धः सुगन्धः, स[१६] शीलमस्येति, 'शीलम्' इति ठक्"[[१४]]इति तु सर्वानन्दः । "शोभनो गन्धः प्रयोजनमस्येति, 'प्रयोजनम्'५।१।१०९॥ इति ठक्"[[१४]]इत्यन्ये । यथा "सरस्सु राजहंसाभसौगन्धिकसुगन्धिषु"[[१७]]इति । "ससौगन्धिकप्रसारा विराजन्तेऽन्तर्विपणयो बहिश्च सलिलाश्रयाः"[ ]इति चम्पूगद्यम् । २ "कस्य जलस्य हार इव शोभाकरत्वात्, पृषोदरादित्वात् **कल्हारः**"[[१८]]इति स्वामी[१९] । "के जले ह्लादते सुखं तिष्ठतीति नैरुक्ते दकारस्य रेफे कह्लारम्"[[१८]]इति तु पञ्जिकादयः । शारदं शुक्लं[२०] चैतत् । उत्पलविशेषोऽयम् । कैरविण्यादीनि कह्लारान्तानि चन्द्रविकासीनि ॥

**बीजकोशो वराटकः ।**

**कर्णिका**

१ बीजस्य कोश आधारः **बीजकोशः** । "बीजस्य कोषः[२१] पात्रमाधारो बीजकोषः[२२]"[ ]इति मिश्राः ।

१. इतोऽग्रे ३प्रतौ 'तु' इति दृश्यते ॥ २. द्र. टीकासर्वस्वम्, भा-१, १।१०।३६॥, पृ.२०२॥, पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२६४, पृ.३१६॥, रामाश्रमी १।१०।३७॥, पृ.१३६॥ ३. इतोऽग्रे ३प्रतौ 'वा' इति दृश्यते ॥ ४. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२६४, पृ.३१६॥ ५. 'कै-' इति४॥ ६. इतोऽग्रे १प्रतौ 'कैरवम्' इति दृश्यते ॥ ७. 'गर्धभान्तं' इति३॥ ८. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२६५, पृ.३१७॥, तत्र 'गतकान्तं' इत्यस्य स्थाने 'गन्धकान्तं' इति दृश्यते ॥, रामाश्रमी१।१०।३७॥, पृ.१३६॥, तत्र 'गतकान्तं' 'कुमुत्' इत्यस्य स्थाने क्रमेण 'चन्द्रकान्तं' 'कुमुदे' इति दृश्यते ॥ ९. स्वामिकृतामरकोशटीकायां न दृश्यते ॥ १०. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२६५, पृ.३१७॥, तत्र-"इन्द्रियमावृणोतीति पृषोदरादित्वाद् (पा.६।३।१०९॥)इन्दीवरम्" इति स्वामी" इति दृश्यते ॥ ११. '-ते' इति३.४.५॥ १२. क्षीरतरङ्गिण्यादावयं धातुर्न दृश्यते ॥ १३. इतोऽग्रे ३प्रतौ 'वा' इति दृश्यते ॥ १४. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२६४, पृ.३१५-३१६॥ १५. तुलनीयोऽमरकोषः२।१०।३६॥ १६. 'सु-' इति३॥ १७. द्र. अनेकार्थकैरवाकरकौमुदीटीका, भा-२, ४।४२॥, पृ.३२८॥ १८. स्वामिकृतामरकोशटीकायाम्-"के ह्लादते कह्लारं, शारदं शुक्लं चैतत् ।" इत्येव दृश्यते, १।९।३७॥, पृ.६७॥ १९. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२६४ पृ.३१५॥ २०. 'शुल्क्ये' इति५॥ २१. इतोऽग्रे ५प्रतौ "बीजकोषः" इति दृश्यते ॥ २२. '-षम्' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

''कोषोऽस्त्री कुड्मले पात्रे''[मेदिनीकोश:, षान्तवर्ग:, श्लो-१०]इति मेदिनि:। २ व्रियते दलैरिति विराट: । 'वृञ् वरणे' (स्वा.उ.से.), बाहुलकादाटच्, तत: स्वार्थे कनि **वराटक:**। वरमटतीति, ण्वुलि वा । वरं दलानां वृत्तिमटति व्याप्नोतीति, संज्ञायां क्वुन् वा । ३ असत्यपि कर्णभवत्वे रूढशब्दत्वात् कर्णे भवा **कर्णिका** । 'कर्णललाटात्-'४।३।६५॥ इतीकन् (इति ख:)। त्रीणि कमलकर्णिकाया: ॥

## पद्मनालं तु मृणालं तन्तुलं विसम् ॥११६५॥

१ पद्मस्य नालं **पद्मनालम्** । २ मृण्यते हिंस्यते भक्षणाद्यर्थं **मृणालम्,** त्रिलिङ्ग:। 'मृण हिंसायाम्'(तु.प.से.), 'तिमि(तमि)विशिविडिमृणि-'(उणा-११५)इत्यादिना कालन्। ''मृणालीति स्वल्पा मृणालजाति:, गौरादि:'' [ ]इति सर्वधर:। ''मृणालमस्त्रियाम्''[अमरकोष:१।१०।४२॥]इति त्वमर:। ''सान्द्रं चन्दनमङ्गको वलयिता पाणौ मृणालीतता''[ ]इति राजशेखर:। ३ तन्तून् लातीति **तन्तुलम्**। ४ विस्यते प्रेर्यते **विसम्** । 'विस प्रेरणे'(दि.प.से.), घञर्थे क:। विसति (विस्यति) उत्कण्ठयति ग्रहणार्थमिति। 'इगुपध-'३।१।१३५॥इति को वा। वेतीति वा। 'वी गत्यादौ'(अ.प.अ.), 'पटिवीभ्याम्-'(हैमोणा-५७९)इति सक्। दन्त्यान्तोऽयम्। तथा च ''हंसपङ्क्तिरिव विसंवादिनी'' [ ]इति वासवदत्ताश्लेष:। ''विसिनीकन्दाभिधायि विसम्'' [ ]इत्यूष्मविवेक:। ''मृणाले तु विसं विशम्''[ ]इति द्विरूपकोषात् तालव्यान्तमपि। चत्वारि पद्मनालस्य॥११६५॥

## किञ्जल्कं केसरम्

१ किञ्चिज्जलत्यपवारयति **किञ्जल्कम्** । 'जल अपवारणे'(चु.प.से.), पुंक्लीबलिङ्गोऽयम् । २ के जले सरति **केसरम्,** पुंक्ली. । ''केसरोऽस्त्रियाम्''[अमरकोष:१।१०।४३॥]इत्यमर: । 'सृ गतौ'(भ्वा.प.अ.), अच्, 'हलदन्तात्-'६।३।९॥ इत्यलुक् । दन्त्यमध्योऽयम्, ''सवितृकिसलयकेसरसभा:''[ ]इति सभेदात् । ''आन्दोलकुसुमकेशरसरोजमुखी''[ ]इति इति वासवदत्तायां तालव्यमध्योऽपि दृश्यते। तत्र के जले शीर्यत इति व्युत्पाद्यम्। द्वे कमलकेसरस्य ॥

## संवर्त्तिका तु स्यान्नवं दलम् ।

१ सम्यग् वर्त्तते वर्धत इति **संवर्त्तिका** । 'वृतु वर्त्तने'(भ्वा.आ.से.), ण्वुल् । ''संवर्त्तयति वेष्टयति'' [अम.क्षीर.१।१०।४४॥]इति भट्ट: । संवर्तिरपि, ''संवर्त्तिर्नवपत्रिका''[ ]इति वोपालितात् । ''पद्मादीनां नवोद्भिन्नं दलं सरयन्त्रिकाख्यम्''[अभि.स्वोपज्ञटीका८।११६३॥,(अम.क्षीर.१।१०।४३॥)]इति मूलटीका । यदाह-''नव्यदले संवर्त्तिका भवेत्''[ ]इति । ''संवर्त्तिका शैवलपल्लिचित्रा'' [नैषधीयचरितम्, सर्ग:-८, श्लो-७६]इति श्रीहर्ष: । एकं कमलनवपत्रस्य ॥

## करहाट: शिफा च स्यात् कन्दे सलिलजन्मनाम् ॥११६६॥

१ करान् हस्तान् हाटयति दीपयति **करहाट:** । 'हट दीप्तौ'(भ्वा.प.से.), णिजन्त:, 'कर्मण्यण्'३।२।१॥ । कं जलं रहयति त्यजति करहं पद्मम्, तत अटति बहिर्गच्छति करहाट इति वा । केन जलेन रह्यते, 'रह त्यागे'(भ्वा.प.से.), घञर्थे क:, करहो मरुस्तमटति, 'कर्मण्यण्'३।२।१॥, स्वार्थे कनि करहाटक इति वा । २ शेते **शिफा,** शीङ: फक् ह्रस्वश्च बाहुलकात् । शीयते ज्ञायते वा । 'शिञ् निशाने' (स्वा.उ.अ.), 'हलश्च'( )इति चात् फक्। शिफा तालव्यादि: । ३ कनति **कन्द:,** पुंक्ली. । ''पयोधरे सस्यमूले सूरणे कन्दमस्त्रियाम्''[ ]इति गौड: । ''कन्दोऽस्त्री''[अम.क्षीर.१।१०।४३॥]इति क्षीरस्वामी च । 'कन् दीप्तौ'(भ्वा.प.से.), 'शाशपिभ्यां दन्-'(उणा-५३७)इति बाहुलकादतोऽपि दन् । सलिलजन्मनां पद्मादीनां कन्दे मूले। कन्दशब्द: सामान्येन सर्वेषां मूलपर्याय: । तथा च हैमानेकार्थ: ''कन्दोऽब्दे सूरणे सस्यमूले''[अनेकार्थसङ्ग्रह:२।२२१॥]इति ।

---

१. 'त्रत-' इति१, 'त्रात-' इति४.५॥ २. 'प्राप्नो-' इति५॥ ३. 'कर्णे-' इति३.४॥ ४. द्र. पदचन्द्रिका, भा १, वारिवर्ग:, श्लो २७०, पृ.३२१॥ ५. ''अथास्त्रियाम् । मृणालं विसम्'' इत्यमरकोषे ॥ ६. 'विश' इति१.३.५॥ ७ 'विश' इति१.३॥ ८. 'विसयति' इति१॥ ९. 'वेति एति' इति४॥ १०. द्र. पदचन्द्रिका, भा १, वारिवर्ग:, श्लो-२७०, पृ.३२२॥ ११. 'विशं' इति१.२.३॥ १२. 'विसम्' इति१॥ १३. 'मृणालस्य' इति३॥ १४. '-न्त्य' इति४॥ १५. ' र:' इति४॥ १६. द्र. रामाश्रमी१।१०।४३॥, पृ.१३९॥ १७ 'आदो-' इति१.४, 'अंको-' इति३॥ १८. द्र. पदचन्द्रिका, भा १, वारिवर्ग:, श्लो २७०, पृ.३२३॥, तत्र-''आन्दोलकुसुमकेशररेणुमुखी'' इति दृश्यते ॥ १९. '-ते' इति१॥ २०. द्र. टीकासर्वस्वम्, भा-१, १।१०।४२॥, पृ.२०६॥ २१. '-जले' इति१॥ २२. १प्रतौ नास्ति ॥ २३. 'त्यजयति' इति१॥ २४. 'निशामने' इति२.३.४.५॥ २५. 'क्विप्' इति१॥ २६. 'पायो-' इति४, 'पाथो-' इति५॥ २७ 'कनी दीप्तिकान्तिगतिषु' इति क्षीरतरङ्गिण्यादय: ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत एते कमलमृणनाम्नी[1] एवेति कन्दाद्भेदः । यन्महेश्वरः- ''करहाटोऽब्जकन्दे स्यात् पुष्पवृक्षप्रभेदयोः''[विश्वप्रकाशकोशः, टान्तवर्गः, श्लो-६१]इति। द्वे कमलकन्दस्य ॥११६६॥

**उत्पलानां तु शालूकम्**

१ उत्पलानां चन्द्रविकासिकमलानां कन्दे शलति (शलते[2]) चलति स्वस्थानात् संव्रियते वा **शालूकम्**, क्लीबे । 'शल चल संवरणे[3]'(भ्वा.आ.से.), 'शलिमण्डिभ्यामूकण्[4]'(उणा-४८२), णित्त्वाद् वृद्धिः। धन्वन्तरिस्तु- ''पद्ममूलं तु शालूकं शकलं करहाटकम् ।
शालीनां (शालीनं[5]) पद्मकन्दं तु[6] जलालूकं निगद्यते ॥१॥''
[धन्वन्तरिनिघण्टुः, करवीरादिश्चतुर्थो वर्गः, श्लो-१४४]इत्यभेदेनाह । [एकं चन्द्रविकासकन्दस्य] ॥

**नील्यां शैवाल-शेवले ।**
**शैवालं शैवलं शेपालं जलाच्छूक-नीलिके ॥११६७॥**

१ नीलति **नीली**। 'णील[7] वर्णे[8]'(भ्वा.प.से.), अच्, गौरादिः। नीली वर्णेन वा, तस्याम् । २-४ शेते तिष्ठत्यम्भसि **शैवालम्, शेवलम्, शेवालम्** । 'शीङो वालञ् (वलञ्) वलन् वालनं[9]'(सर.कण्ठा.२।३।१३१॥)इति वाल(वल-)आदिप्रत्ययाः । ५ शेवलमेव[11] **शैवलम्** । स्वार्थेऽण् । शैवालं शैवलमिति द्वयं द्राविडापेक्षया । ६ जपादित्वाद् वस्य पत्वे **शेपालं** च । ''शेपालो जलनीलिका''[ ]इति वाचस्पतिः[12] । ७-८ जलशब्दादग्रे शूकनीलिके योज्येते[13], जलस्य शूकमिव **जलशूकम्** । नीलत्वात् जलं नीलयति जलनीली[14] । 'कर्मण्यण्'३।२।१॥, ततो ङीष्[15] (ङीप्), ततः कन्[**जलनीलिका**] । शैवलाद्याः षडपि पुंनपुंसकाः । अष्टौ शैवालस्य[16] ॥११६७॥

**धान्यं तु सस्यं सीत्यं च व्रीहिः स्तम्बकरिश्च तत् ।**

१ धन्यते **धान्यम्** । 'धन धान्ये'(जु.प.से.), 'ऋहलोर्ण्यत्'३।१।१२४॥, दधाति सत्त्वानिति वा । दधातेर्यत् तुट् च, क्लीबेऽयम् । ''धान्ये[17] पुंसि''[ ]इति बुद्धिसागराचार्याः[18] । २ सस्यन्ते सुखमनेनेति **सस्यम्** । 'षस स्वप्ने[19]'(अ.प.से.), 'माच्छाससिसूभ्यो[20] यः'(उणा-५४९)इति यः। 'तकिससि(शसि)चति-'(वा-३।१।९७॥)इत्यादिनोपसङ्ख्यानात् कपि (क्यपि) वा । सस्यं द्विदन्त्यम्, ''स्रंसनं सीसकं [सस्यं] स्रस्तं साध्वसाध्वसम्''[ ]इत्यूष्मविवेकात् । ''शसु हिंसायाम्'(भ्वा.प.से.)इत्यस्य तालव्यादिरपि''[ ]इति वर्णदेशना[21]। ३ सीतया सङ्गतं **सीत्यम्** । 'नौवयोधर्म-'४।४।९१॥ इति यत् । ४ वर्हत्युपचयं[22] गच्छति **व्रीहिः** । 'वृहि वृद्धौ'(भ्वा.प.से.), 'इगुपधात्[23] कित्'(उणा-५५९)इतीन्, नैरुक्तो व्रीभावश्च । व्रीणाति व्रीयते वा । 'व्री[24] वरणे[25]'(क्र्या.प.अ.), 'व्रियो(व्रीयो) हिक्'(हैमोणा-७१०)इति हिक् । ५ स्तम्बं करोति **स्तम्बकरिः** । 'स्तम्बशकृतोरिन्'३।२।२४॥ इतीन् । पुंस्येतौ । पञ्च सामान्येन धान्यस्य । तानि च सप्तदश । यदाहुः-

''व्रीहि१र्यवो२ मसूरो३ गोधूमो४-
मुद्ग५माष६तिल७चणकाः८ ।
अणवः[26]९ प्रियङ्गु१०कोद्रव११-
मकुष्टकाः१२ शालि१३राढक्यः१४ ॥१॥
किञ्च कु(क)लाय१५कुलत्थौ१६
शण१७सप्तदशानि धान्यानि ।''[27]इति ॥

अथ धान्यविशेषानाह-

**आशुः स्यात् पाटलो व्रीहिः**

१ अश्नुते व्याप्नोतीति **आशुः**, पुंलिङ्गः। 'अशूङ् व्याप्तौ[28]'(स्वा.आ.से.), 'कृवापाजिमिस्वदिसाध्यशु(-शू-)भ्य उण्'(उणा-१)इत्युण् । ''आशुव्रीहौ[29] पाटलोऽन्यः श्वेतरक्तो-

१. इतोऽग्रे २.४प्रत्योः 'द्वे' इति दृश्यते ॥ २. 'वल' इति३.४॥ ३. 'शल चलनसंवरणयोः' इति क्षीरतरङ्गिण्यादयः ॥ ४. '-मडि-' इति३.४॥ ५. 'शीलानं' इति१, 'शालादीनां' इति३॥ ६. 'च' इति धन्वन्तरिनिघण्टौ, पृ.२२०॥ ७. 'नील' इति३.४.५॥ ८. ५प्रतौ नास्ति ॥ ९. '-वलज्वालज्' इति३.४॥ १०. 'शीङो धुक्लक्वलज्वालनः'(उणा-४७८)इत्युणादिगणसूत्रम् ॥ ११. 'शैवा-' इति५॥ १२. 'शैवलो जलनीलिका' इति वाचस्पतिः'' इति पदचन्द्रिकारामाश्रम्योः, क्रमेण भा-१, वारिवर्गः, श्लो-२६६, पृ.३१८॥, १।१०।३८॥, पृ.१३७॥ १३. 'योज्यौ' इति३, 'योज्यते' इति५॥ १४. '-नीलिका' इति१॥ १५. 'ङीषि' इति५॥ १६. 'शै-' इति५, 'से-' इति१.४॥ १७. '-न्ये' इति३॥ १८. 'बुद्धिसागरः' इति४॥ १९. 'षस स्वप्ने' इति १प्रतौ नास्ति॥, 'षस स्वने' इति स्वामी, 'षस षस्ति स्वप्ने' इति मैत्रेयः, '-स्वप्ने' इति सायणः ॥ २०. 'ससिभ्यो' इत्युणादिगणे॥ २१. द्र. टीकासर्वस्वम्, भा-२, २।४।१५॥, पृ.६६॥, तत्र-'-दिरपि' इत्यस्य स्थाने '-द्यपि' इति दृश्यते ॥, पदचन्द्रिका, भा २, वनौषधिवर्गः, श्लो-६१, पृ.८७॥ २२. 'वृं-' इति३.४.५॥ २३. '-त्वात्' इति१.२.५॥ २४. 'व्रीञ्' इति५॥ २५. 'भ-' इति१.२॥ २६. '-वाः' इति२॥ २७. अम.क्षीर.२।९।१५॥, पृ.२०९॥, स्वोपज्ञटीका४।११६८॥, पृ.२६२॥ २८. 'अशू व्याप्तौ' इति स्वामी, 'अशू व्याप्तौ सङ्घाते च' इति मैत्रेयसायणौ ॥ २९. '-व्रीहौ' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऽन्यलिङ्गवान्''[ [1] ]इति रुद्रः। ''तृणबीजे तु [2]श्यामाको व्रीहिराशु च[3] पाटलः''[ [4] ]इति पर्याये क्लीबलिङ्गमाशु । तथानेकार्थेषु ''आशु स्याद् व्रीहिशीघ्रयोः''[ [6] ]इति रत्नमाला[5]माधवेन क्लीबं पठितम् । ''पाटलो व्रीहिराशु च''[ [4] ]इति तन्त्रान्तरं च । २ पाटलवर्णयोगात् **पाटलः** । ३ बर्हति उपचयं गच्छति **व्रीहिः**[3] । 'वृहि वृद्धौ'(भ्वा.प.से.), 'इगुपधात्[7] कित्' (उणा-५५९)इतीन्, निरुक्तो व्रीभावश्च । सामान्यतो व्रीहिनामानि आशुरित्यादीनि त्रीणि । 'चोखा' इति भाषा ॥

षष्टिकादिधान्यविशेषनामान्यमूनि, तान्येव स्पष्टयति-

**गर्भपाकी तु षष्टिकः[8] ॥११६८॥**

१ गर्भे पच्यते स्वयमेवेत्येवंशीलो **गर्भपाकी** । णिनिः[9], न्यङ्क्वादित्वात् कुत्वम् । गर्भपाकिणौ, गर्भपाकिणः इत्यादि । २ षष्टिरात्रेण पच्यत इति **षष्टिकः,** आद्यस्वरादिः । 'यवयवकषष्टिकाद् यत्'५।२।३॥ इति निर्देशात् साधुः । स्थलजोऽयम् । साठीचोखानाम्नी द्वे[10] ॥११६८॥

**शालयः कलमाद्याः स्युः**

१ शलन्ति[11] **शालयः,** पुंलिङ्गः। 'शल गतौ[12]'(भ्वा.प.से.), 'कमिवमि-'(हैमोणा-६१८)इति णिदिः । कलम आद्यो येषां ते कलमाद्याः शालय उच्यन्ते । ''शालिस्तु गन्धमार्जारे[13] कमलमादिषु च स्मृतः''[विश्वप्रकाशकोशः, लान्तवर्गः, श्लो-४९]इति महेश्वरः ॥

तान् स्पष्टयन्नाह-

**कलमस्तु कलामकः ।**

१ कडति[14] माद्यत्यनेनेति **कलमः**। 'कड मदे'(भ्वा.प.से.), 'कर्दिकडोरमः'( )इत्यमः । २ कलां कला-(ल)नाममति[15] **कलामकः**। ण्वुल्। कलमशालिनाम्नी द्वे ॥

**लोहितो रक्तशालिः स्यात्[16]**

१ **लोहितः** वर्णेन । [रक्तशालिनामैकम्] ॥

**महाशालिः सुगन्धिकः ॥११६९॥**

१ महांश्चासौ शालिश्च[17] **महाशालिः** । २ शोभनो गन्धोऽस्य सुगन्धिः। 'गन्धस्येदुत्पूतिसुसुरभिभ्यः'५।४।१३५॥ इतीन्, के **सुगन्धिकः** । स्वार्थिककाभावे सुगन्धिः, तृतीयस्वरान्तोऽपि गिरिशब्दवद् रूपैः [ज्ञेयः] । राजशालिरपि, [18]'रायभोग' अथवा 'देवजीर' इत्यादिभाषा। एते कलमाद्या जलजाः 'चावल' इति प्रसिद्धस्य जातयः। यदमरः- ''शालयः कलमाद्याश्च षष्टिकाद्याश्च पुंस्यमी''[अमरकोषः २।९।२४॥]इति । तथा च क्षीरस्वामी ''कलमाद्याः, इहादिशब्दाद् राजशाल्याद्याः जलजाः, षष्टिकाद्याः, इहादिशब्दात् कट्फलाद्याः[19] (कक्कोलाद्याः) स्थलजाः[20]''[अम.क्षीर.२।९।२४॥]इति। महाशालिनाम्नी द्वे ॥११६९॥

**यवो हयप्रियस्तीक्ष्णशूकः**

१ यौतीति **यवः** । 'यु मिश्रणे'(अ.प.से.), पचादित्वादच्[21]। २ हयानां प्रियः **हयप्रियः** । ३ तीक्ष्णः शूकः [22]किंशारुरस्य **तीक्ष्णशूकः** । [23]यवनामानि त्रीणि ॥

**तोक्मस्त्वसौ हरित् ।**

१ असौ यवः हरिन्नीलः, [24]तुज्यत इति **तोक्मः,** कवर्गाद्यपञ्चमवर्गपञ्चमान्तः । 'तुजि हिंसार्थः'(भ्वा.प.से.), बाहुलकान्मन्, गुणे कुत्वे च । ''तुज्यते[25] तोकमः[26]'' [अम.क्षीर.२।९।१६॥]इति स्वामी । नीलायवनामैकम् ॥

---

१. द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-५८८, पृ.६६८॥, तत्र-''पाटलो ना'' इति दृश्यते ॥ २. '-जं' इति२, '-जेपु श्या-' इति३॥ ३. इतोऽग्रे ३.५प्रत्योः ''इति तन्त्रान्तरं च पाटलवर्णयोगात् पाटलाः, बर्हति उपचयं गच्छति, 'वृहि वृद्धौ''' इति पाठो दृश्यते ॥ ४. द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-५८८, पृ.६६९॥, रामाश्रमी२।९।१५॥, पृ.४०४॥ ५. '-लां' इति१, '-लायां' इति२॥ ६. २.३.४प्रतिषु नास्ति ॥ ७. '-धत्वात्' इति१.२.४.५॥ ८. '-काः' इति५॥ ९. 'णिनिः' इति३॥ १०. १.२.४.५प्रतिषु नास्ति ॥ ११. ' ति' इति४॥ १२. 'शल गतौ' इति १.२.५प्रतिषु नास्ति, 'शल हुल पत्लृ गतौ' इति क्षीरतरङ्गिण्यादयः ॥ १३. '-रः' इति५॥ १४. 'कलति' इति३, 'कच्छति' इति५, अत्र डलयोरैक्यं बोध्यम् ॥ १५. 'कलामकति' इति३॥ १६. सर्वादर्शेष्वितोऽग्रे श्लोकस्याऽर्धचरणं दृश्यते, तस्य विभागं कृत्वा स्वोपज्ञटीकासम्मतपाठानुरोधेन स्थापितोऽत्राऽस्माभिः ॥ १७. 'च' इति ४प्रतौ न दृश्यते ॥ १८. 'राज-' इति३॥ १९. 'कलमाद्याः' इति१॥ २०. स्वामिकृतामरकोषटीकायाम्-''शाल्यते शालिः । कल्यते कलमः । आद्यशब्दाद् राजशाल्याद्या जलजाः । षष्टिकाः षष्टिरात्रेण पच्यन्ते । आद्यशब्दात् कक्कोलाद्याः स्थलजाः । अमी इति पुंलिङ्गनिर्देशान्माषाद्याः शाल्यन्ताः पुंसि'' इति दृश्यते, २।९।२४॥, पृ.२०५॥, तथा त्रिवेन्द्रंसंस्करणे 'आद्य-' इत्यस्य, 'कक्कोलाद्याः' इत्यस्य च स्थाने क्रमेण 'आदि-' इति, 'कजटाद्याः' इति च दृश्यते, भा-३, २।९।२४॥, पृ.१७०॥ २१. 'पचाद्यच्' इति३.४॥ २२. 'किंसा-' इति३॥ २३. 'यवा-' इति१॥ २४. 'तुक्य-' इति४॥ २५. इतोऽग्रे ५प्रतौ 'इति' इति दृश्यते ॥ २६. '-नः' इति१.२॥, ''तुज्यते तोक्मः, तुजिर्हिंसार्थः'' इति अम.क्षीरस्वामिटीकायाम् , २।९।१६॥, पृ.२०३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मङ्गल्यको मसूरः स्यात्**

१ मङ्गले साधुः । 'तत्र साधुः'४।४।९८॥ इति यत्, ततः स्वार्थे कन् **मङ्गल्यकः** । अहविष्यत्वादमङ्गल्यत्वेऽपि मङ्गलवत् मङ्गल्यकः । २ मस्यति परिणमते **मसूरः**, पुंक्लीबलिङ्गः[1]। 'मसी परिणामे[2]'(दि.प.से.), 'खर्जिपिञ्जादिभ्य ऊरोलचौ[3]'(उणा-५३०)इत्यूरः। मसूरो दीर्घमध्यः। ह्रस्वमध्यश्च । 'मसेरुरन्'(उणा-६८१)इत्युरन्[4]।

''वेश्यायां व्रीहिभेदे च मसूरा मसुरा स्त्रियाम् ।
मसूरमसुरौ[5] पुंसि द्वावेतावपि चैतयोः ॥१॥''

[[6]]इति रभसः। मसूरनाम्नी द्वे ॥

**कलायस्तु सतीनकः ॥११७०॥**

**हरेणुः खण्डिकश्च**

१ कं वातं लाति । 'आतः-'३।२।३॥ इति कः, 'आतः-'७।३।३३॥ इति युक्[7] **कलायः** । कलामतीसारमयते वा । २ सीदन्त्यनेन **सतीनकः** । पृषोदरादिः। ''सातीनकश्च[8]''[ ]इति माधवी । ''सन् जीवी, वातप्रकोपकत्वात् सति इनः सतीनो वायुः । संज्ञायां समासः, 'हलदन्तात्-'६।३।९॥ इति सप्तम्यलुक् । सतीनो वायुस्तं कायति बोधयति सतीनकः''[[9]]इति व्याख्यामृतम् ॥११७०॥ ३ हरति चेतो **हरेणुः**। 'हृञ् हरणे'(भ्वा.उ.अ.), 'कृहृभ्यामेणुः'(उणा-१५८)इति एणुः, पुंलिङ्गः[10]। ४ खण्डनं खण्डो विदारणम् । 'खडि विदारणे'(भ्वा.आ.से.[11]), 'खडि भेदे[12]'(चु.उ.से.) वा, घञ्, तद्योगात् ठनि **खण्डिकः**[13]।

''कलायस्त्रिकटः प्रोक्तः सतीनो वर्तुलो मतः । हरेणुरङ्कुटो ज्ञेयः[14]''[ ]इति[15] व्याडिः । ''हरेणुः स्त्री रेणुकायां स तु पुंसि सतीनकः''[[16]]इति रभसाद् हरेणुः पुंसि''[[16]]इति मिश्राः। त्रीणि कलायस्य। 'तिउडा' इत्यादिभाषा[17]॥

**अथ चणको हरिमन्थकः ।**

१ चण्यते अश्वादिभ्यो दीयते **चणकः** । 'चण दाने'(भ्वा.प.से.), '-शिल्पिसंज्ञयोः-'(उणा-१९०)इति क्वुन्। २ हरिभिरश्वैर्मथ्यते हरिमन्थः । 'मन्थ विलोडने'(क्र्या.प.से.), कर्मणि घञ्, स्वार्थे कनि **हरिमन्थकः** । ''हरयोऽश्वास्तेषां मन्थो विलोडनं जनयतीति । 'अन्येष्वपि-'३।२।१०१॥ इति डप्रत्यये[18] हरिमन्थज इति चवर्गतृतीयोपधोऽयम्''[ ]इति मिश्राः । चैणानाम्नी[19] द्वे ॥

**माषस्तु मदनो नन्दी वृष्यो बीजवरो बली ॥११७१॥**

१ मीयते **माषः**, पुंक्लीबलिङ्गः[20] । 'मा माने'(अ.प.अ.), सप्रत्ययः[21], सुषामादित्वात् षत्वम् । २ मदयति **मदनः**। 'मदी हर्षे'(दि.प.से.), णिजन्तः, नन्द्यादित्वाल्ल्युः । ३ नन्दयत्यवश्यं **नन्दी** । 'टुनदिँ[22] समृद्धौ'(भ्वा.प.से.), आवश्यके णिनिः । नन्दिनावित्यादि[23] । ४ वृषाय मैथुनाय हितो **वृष्यः** । 'खलयवमाषतिलवृष-'५।१।७॥ इति यत्। वृष्यते तैलादिनेति वा । 'वृषु सेचने'(भ्वा.प.से.), 'विभाषा कृवृषोः'३।१।१२०॥ इति क्यप् । ५ बीजेषु वरो **बीजवरः** । बीजं शुक्रं वृणोतीति वा । 'वृ[24] वरणे'(स्वा.उ.से.), पचाद्यच् । ६ बरं रेतोऽस्त्यत्रेति बरी । 'अत इनिठनौ'५।२।११५॥ इतीनिः, रलयोरैक्ये **बली** । षड् माषस्य, 'उडदं[25]' इति भाषा ॥११७१॥

**मुद्गस्तु प्रथनो लोभ्यो बलाटो हरितो हरिः ।**

१ मोदतेऽनेनेति **मुद्गः** । 'मुद हर्षे'(भ्वा.आ.से.), 'गन् गम्यादेः(गम्यद्योः)'(उणा-१२०)इति गन् । २ प्रथते **प्रथनः**। 'प्रथ विस्तारे[26]'(भ्वा.आ.से.), नन्द्यादित्वाल्ल्युः । ३ लुभ्यति[27] **लोभ्यः** । 'लुभ लोभे[28]'(दि.प.से.), 'ऋहलोर्ण्यत्'३।१।१२४॥। ४ बलमटति **बलाटः** । 'अट गतौ'

---

१. 'पुंक्ली.' इति३.४॥ २. स्वामिसम्मतोऽयं धात्वर्थः, 'मसी प्रमाणे' इति मैत्रेयः, 'मसी परिमाणे' इति सायणः ॥ ३. 'ऊरु-' इति३॥ ४ वस्तुतस्त्वत्र प्रमादो दृश्यते, उणादिगणे 'मसेरूरन्'(उणा-६८१)इत्यनेन दीर्घादिरूरन्प्रत्ययस्य विधानत्वात् ॥ ५. 'मा-' इति४.५॥ ६. द्र. पदचन्द्रिका, भा २, वैश्यवर्गः, श्लो-५९०, पृ.६७०॥, रामाश्रमी२।९।१७॥, पृ.४०४॥ ७ ञित्त्वणित्त्वाभावाद् युगागमो विचारणीयः॥ ८ 'स-' इति३॥ ९ द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-५८९, पृ.६७९॥ १०. १प्रतौ नास्ति ॥ ११. 'खडि मन्थे' इति भ्वादौ क्षीरतरङ्गिण्यादयः ॥ १२. 'खड खडि भेदे' इति स्वामी, 'खड खडि कडि भेदने' इति मैत्रेयसायणौ॥ १३. '-ण्डकः' इति३.५॥ १४. 'ज्ञेया' इति५॥ १५. द्र. टीकासर्वस्वम्, भा-३, २।९।१६॥, पृ.१६३॥, तत्र-''हरेणुरङ्कुटा ज्ञेया'' इति दृश्यते, पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-५८९, पृ.६७०॥, रामाश्रमी२।९।१६॥, पृ.४०४॥ १६. द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-५८९, पृ.६७०॥, रामाश्रमी२।९।१६॥, पृ४०४॥ १७. 'इति भाषा' इति३॥ १८. '-यः' इति४॥ १९. 'चि-' इति३.४॥ २०. 'पुंक्ली.' इति३.४॥ २१. '-ये' इति१॥ २२. 'टुणदि' इति२.३.४.५॥ २३. 'नन्द-' इति५॥ २४. 'वृञ्' इति१॥ २५. 'उटुद' इति२॥ २६. 'प्रथ प्रख्याने' इति क्षीरतरङ्गिण्यादयः ॥ २७. '-ते' इति१.२॥ २८. 'लुभ गार्ध्ये' इति क्षीरतरङ्गिण्यादयः ॥

(भ्वा.प.से.), 'कर्मण्यण्'३।२।१॥ । ५ **हरितः** नीलः। ६ हरति रोगं **हरिः**, पुंसि । षट् सामान्येन मुद्गस्य ॥

अथ मुद्गविशेषानाह-

**पीतेऽस्मिन् वसु-खण्डीर-प्रवेल-जय-शारदाः ॥११७२॥**

१ अस्मिन् मुद्गे पीते[2] पीतवर्णे, वसति चित्ते **वसुः**, पुंसि। 'वस निवासे'(भ्वा.प.से.), 'मृस्वृ(शृस्वृ)-स्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च'(उणा-१०) [इति] उः। २ खण्ड्यते[2] **खण्डीरः**। 'खडि भेदने'(चु.उ.से.), बाहुलकात् 'कृशृपृकटि-'(उणा-४७०)इति ईरन् । ३ प्रवेलति **प्रवेलः** । वेलृधातोः पचाद्यच् । ४ जीयते[3]-ऽनेन **जयः** । 'जि अभिभवे'(भ्वा.प.अ.), 'एरच्'३।३।५६॥ इत्यच् । ५ शरदि भवः **शारदः** । 'तत्र भवः' ४।३।५३॥ इत्यण् । पञ्च पीतमुद्गस्य[4] ॥११७२॥

**कृष्णे प्रवर-वासन्त-हरिमन्थज-शिम्बिकाः।**

१ कृष्णे श्यामे मुद्गे, प्रव्रियते **प्रवरः** । 'वृञ् वरणे' (स्वा.उ.से.), 'ग्रहवृदृ-'३।३।५८॥ इत्यप् । २ वसन्ते भवो **वासन्तः**। 'तत्र भवः'४।३।५३॥ इत्यण् । ३ हरिमन्थाज्जायते **हरिमन्थजः** । 'जनी प्रादुर्भावे'(दि.आ.से.), 'पञ्चम्यामजातौ' ३।२।९८॥इति डः। ४ शिम्बाऽस्त्यस्य **शिम्बिकः**। 'व्रीह्यादिभ्यश्च'५।२।११६॥ इति ठन् । चत्वारि कृष्णमुद्गस्य ॥

**वनमुद्गे तुवरक-निगूढक-कुलीनकाः ॥११७३॥**
**खण्डी च**

१ वनस्य मुद्गो वनमुद्गः, तत्र । तुवरः कषायः, स एव **तुवरकः**। २ [निगूहति स्म] **निगूढकः** । ३ कौ लीयते **कुलीनकः** ॥११७३॥ ४ खण्डोऽस्त्यस्य **खण्डी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः । चत्वारि वनमुद्गस्य ॥

**राजमुद्गे तु मकुष्टक-मयुष्टकौ ।**

१ मुद्गानां राजा[5] प्रधानत्वाद् **राजमुद्गः** । 'राजदन्तादिषु परम्'२।२।३१॥, तत्र । २-३ मङ्क्यतेऽनेन मकुष्टः । मीयतेऽसौ मयुष्टः । उभावपि पृषोदरादौ[6] स्वार्थे कनि **मकुष्टक-मयुष्टकौ** । "मोदनं[7] मुत् । 'मुद[8] हर्षे' (भ्वा.आ.से.), सम्पदादित्वात् क्विप् । सा भ्रष्टा बहिर्गताऽस्मादिति कथा (कप्) । नैरुक्तो वर्णविकारः, मुद्गष्टकः। मयति (मयते) मयः । 'मय गतौ'(भ्वा.आ.से.), 'पुंसि संज्ञायाम्-'३।३।११८॥इति घः । यो गतं (गन्ता), तस्य स्तकः प्रतिबन्धकः मयस्तकः"[9] [ ]इति मिश्राः[10] । त्रीणि राजमुद्गस्य । 'मउठ[11]' इति भाषा ॥

**गोधूमे[12] सुमनः**

१ गुध्यति परिवेष्टयति **गोधूमः** । 'गुध परिवेष्टने[13]' (दि.प.से.), 'गुधेरूमः'(उणा-६८०), [तत्र] । २ सुष्ठु मन्यते **सुमनः** । 'मन ज्ञाने'(दि.आ.अ.), पचाद्यच् । "गोधूमसुमनौ समौ"[[14]]इति रभसः । अत एव रूपकृतं साम्यं दर्शयितुं 'समौ' इत्युक्तम् । गोधूमनाम्नी द्वे ॥

**वल्ले निष्पावः सितशिम्बिकः ॥११७४॥**

१ वल्लते **वल्लः** । 'वल्ल संवरणे[15]'(भ्वा.आ.से.), अच्, तत्र । २ निःपूयते **निष्पावः** । 'पूङ्[16] पवने'(भ्वा.आ.से.), 'निरभेः पूल्वोः'(हैमसू-५।३।२१॥)इति घञ् । ३ सिता शिम्बिरस्य **सितशिम्बिकः**, दन्त्यादिः । वालनामानि त्रीणि ॥११७४॥

**कुलत्थस्तु कालवृन्तः**

१ कुले तिष्ठति **कुलत्थः** । डित्थकपित्थादिवत्, पृषोदरादिः। २ कालं[17] वृन्तमस्य **कालवृन्तः**। कुलत्थस्य द्वे॥

**ताम्रवृन्ता कुलत्थिका ।**

१ ताम्रं[18] वृन्तमस्या **ताम्रवृन्ता** । २ ह्रस्वा कुलत्था **कुलत्थिका** । 'प्रत्ययस्थात्-'७।३।४४॥इतीत्त्वम् । द्वे लघुकुलत्थिकायाः ॥

---

१. ५प्रतौ नास्ति ॥ २. 'खड्य-' इति४.५॥ ३. 'जा-' इति३.४॥ ४. 'पीतमुद्गस्य पञ्च' इति४॥ ५. 'राज-' इति१॥ ६. 'दित्वादिति' इति४॥ ७. 'मौ-' इति३.५॥ ८. 'मद' इति४॥ ९. द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-५९०, पृ.६७॥ १०. "मुकुटग्न्[?] मयति । 'मय गतौ'(भ्वा.प.से.)। 'पुंसि-'(३।३।११८॥)इति घः। मयो गन्ता । तस्य स्तकः प्रतिबन्धकः । 'ष्टक प्रतिघाते'(भ्वा.प.से.) । पचाद्यच् (३।१।१३४॥), मयस्य स्तको मयष्ठकः । नैरुक्तो वर्णविकारः-इत्याह । तत्र, मयते इत्युदितत्वात् । घः (३।३।११८॥)अप्ययुक्तः। तस्य कर्तर्यविधानात् ॥" इति रामाश्रमीकारः२।९।१७॥, पृ.४०५॥ ११. 'पुन' इति१, 'मुठ' इति२, 'मूठ' इति५॥ १२. '-मः' इति१.४.५॥ १३. अयं धातुपाठः ४प्रतौ न दृश्यते ॥ १४. द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-५९१, पृ.६२७॥, रामाश्रमी २।९।१८॥, पृ.४०५॥ १५. मैत्रेयसम्मतोऽयं धातुपाठः, 'वल वल्ल संवरणे सञ्चरणे च' इति सायणः ॥ १६. 'पूञ्' इति३॥ १७. '-ल-' इति१.३॥ १८. '-म्र-' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**आढकी तुवरी वर्णा स्यात्**

१ आढौक्यते **आढकी** । पृषोदरादिः । २ तूयते **तुवरी**। पृषोदरादिः। ३ वर्ण्यते **वर्णा**। 'वर्ण वर्णक्रियादौ' (चु.उ.से.), कर्मणि घञ् । तूअरि[१]नामानि त्रीणि ॥

**कुल्मासस्तु यावकः ॥११७५॥**

१ कुलं सजातीयगणमस्यति[२] **कुल्मासः,** दन्त्यसान्तः । 'मसी परिणामे'(दि.प.से.), 'कर्मण्यण्'३।२।१॥, नैरुक्तः[३] कुलशब्दाऽकारलोपः । मूर्धन्यान्तोऽपि 'कुल्माषः' इति। ''कुत्सितो माषः कुल्माषः''[टीकासर्वस्वम्२।९।१८॥]इति सर्वस्वादिः । ''कुलमाषो यावकः पुंसि''[[४]] इति मूर्धन्यान्तेषु रभसः। २ यौति मिश्रीभवति जनेनेति[५] **यावकः** । 'यु मिश्रणे'(अ.प.से.), 'ण्वुल्तृचौ'३।१।१३३॥ इति ण्वुल् । सामान्येन अर्धस्विन्नमाषादिनाम्नी द्वे । ''स्याद् यावकस्तु कुल्माषः''[अमरकोषः२।९।१८॥] इत्यमरः । ''अर्धस्विन्नो यवादिः[६], धान्यविशेष इत्येके'' [अम.क्षीर.२।९।१८॥]इति क्षीरस्वामी । तेन माषमुद्गाद्यास्तुवरीपर्यन्ताः[७] सर्वे कुल्मासशब्देनोच्यन्ते, यवादयश्चणकपर्यन्ता अपि, ततो माषमुद्गादीनामर्द्धस्विन्नानां 'बाकुला' इत्यादिभाषा । यवादीनामर्द्धस्विन्नानां घूघरीत्यादिभाषा । यथा-''भ्रमन्नासादयामास कुल्माषान् कुत्रचिद्गृहे''[] ''कुल्माषोऽर्द्धस्विन्नो यवादिः''[[८]]इति स्वाम्यादिः[९] । ''चोरधान्ये रूढः''[ ]इति यवकादिसूत्रे रक्षितः, सुभूति[१०]सर्वस्वादयश्च ॥११७५॥

अथ तृणधान्यान्याह[११]-

**नीवारस्तु वनव्रीहिः**

१ निव्रियते **नीवारः** । 'वृञ् वरणे'(स्वा.उ.से.), स्वादिः, 'नौ वृ धान्ये'३।३।४८॥ इति घञि[१२], 'उपसर्गस्य घञ्यमनुष्ये-'६।३।१२२॥ इति नित्यं[१३] दीर्घः । अथान्ये निवरः । 'गृहवृदृनिश्चि-'३।३।५८॥ इत्यादिनाऽप् । ''स्त्रियामपि क्तिनं बाधित्वाऽयमेव भवति''[ ]इति हर[१४]दत्तस्तेन 'निवरा कन्या' इति भवति[१५]। वनस्य व्रीहिर्वनव्रीहिः । एकं सामान्येन तृणधान्यस्य। ''तृणधान्यानि नीवाराः''[अमरकोषः२।९।२५॥]इत्यमरः ॥

अथ विशेषत आह-

**श्यामाक-श्यामकौ समौ ।**

१ श्यायते **श्यामाकः**। 'श्यैङ् गतौ'(भ्वा.आ.अ.), 'मका(वा)कश्यामाक-'(हैमोणा-३७)इत्याके निपात्यते । २ 'कीचक-'(हैमोणा-३३)इत्यके निपातनात् **श्यामकः**, ह्रस्वाकारमध्यः । सामानाम्नी द्वे॥

**कङ्गुस्तु कङ्गुनी क्वङ्गुः प्रियङ्गुः पीततण्डुला[१६] ॥११७६॥**

१ कायति **कङ्गुः** । 'कै शब्दे'(भ्वा.प.अ.), पृषोदरादिः । २ कङ्गति **कङ्गुनी** । 'दिननग्न-'(हैमोणा-२६८)इति उने (ने) निपात्यते । ३ कुत्सितमगति **क्वङ्गुः** । 'अगि गतौ'(भ्वा.प.से.), बाहुलकादुः। ४ प्रीणाति **प्रियङ्गुः**। 'प्रीञ् तर्पणे कान्तौ च[१७]'(स्वा.उ.अ.)। ५ पीतास्तण्डुला अस्याः **पीततण्डुला**[१६] । अर्शआदित्वादच्[१८] । एते स्त्रीलिङ्गाः। पञ्च कङ्गोः ॥११७६॥

अथ[१९] तद्विशेषानाह-

**सा कृष्णा मधुका**

१ सा कङ्गुः[२०] कृष्णा कृष्णवर्णा मद्यते(मच्यते) कल्क्यते[२१] **मधुका** । एकं कृष्णकङ्गोः ।

**रक्ता शोधिका**

---

१. 'तूअर-' इति३.५॥ २. '-स्येति' इति४.५॥ ३. 'नि-' इति३॥ ४. द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-५९१, पृ.६७३॥, रामाश्रमी २।९।१८॥, पृ.४०५॥ ५. 'जनोनेनेति' इति३॥ ६. इतोऽग्रे ५प्रतौ 'इति स्वाम्यादिः' इति दृश्यते ॥ ७. '-न्तं' इति५॥ ८. द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-५९१, पृ.६७३॥, ''-कुल्माषोऽर्धस्विन्नो यवादिः- इति स्वामी । -शूकशून्यो यवादिः-इति रक्षितादयः'' इति रामाश्रमीकारः, २।९।१८॥, पृ.४०५॥ ९. 'स्वामी' इति३॥ १०. '-तिः' इति१॥ ११. '-नाह' इति१.३॥ १२. '-ञ्' इति१॥ १३. १प्रतौ नास्ति ॥ १४. हरदत्तकृतपदमञ्जर्याम्- ''निवरा कन्येति । 'ग्रहवृदृनिश्चिगमश्च' इत्यप् कर्मण्येव । ननु च स्त्रियां भवितव्यम् 'अजब्भ्यां स्त्रीखलनाः स्त्रियाः खलनौ विप्रतिषेधेन' इति वचनात् ? सत्यम् 'कृत्यल्युटो बहुलम्' इति बहुलवचनात् क्वचित् क्तिनादिविषयेऽप्यच् भवति, प्रवरा सेना, प्रवरा गौरितिवत् । एवं च 'घञबन्ताः पुंसि' इति प्रायिकं द्रष्टव्यम् ॥'' इति दृश्यते, भा-३, ३।३।४८॥, पृ.४६॥ १५. द्र. मा.धातुवृत्तिः, स्वादिः, धातुसं-८, पृ.४४९॥ १६. '-तंदुला' इति१.३॥ १७. 'प्रीञ् तर्पणे' इत्येव मैत्रेयः ॥ १८. 'आदिभ्योऽच्' इति१.२॥ १९. 'अथै-' इति१.२॥ २०. 'क्वङ्गुः' इति४॥ २१. 'कल्कते' इति५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ रक्तवर्णा कङ्गुः, शोधयति **शोधिका** । 'शुध[१] शुद्धौ[२]'(दि.प.अ.), ण्वुल् । एकं रक्तकङ्गोः ॥

**मुसटी सिता ।**

१ सिता श्वेतवर्णा कङ्गुः, मुस्यते खण्डयते **मुसटी,** दन्त्यमध्या । 'मुस खण्डने'(दि.प.से.), 'शकादिभ्योऽटन्' (उणा-५२१)। एकं सितकङ्गोः ॥

**पीता माधवी**

१ पीतवर्णा[३] कङ्गुः, मधुन इयम्, तद्वर्णत्वात् **माधवी**[४]। 'तस्येदम्'४।३।१२०॥ इत्यण्, 'ओर्गुणः'६।४।१४६॥, 'टिड्ढाणञ्-'४।१।१५॥ इति ङीप्[५]। एकं पीतकङ्गोः॥

**अथोद्दालः कोद्रवः कोरदूषकः ॥११७७॥**

१ उद्दल्यते **उद्दालः** । 'दल विशरणे'(भ्वा.प.से.), घञ् । २ केन अम्भसा उनत्ति क्लिद्यते **कोद्रवः** । 'भैरव-कैरव[६]-'(हैमोणा-५१९)इत्यवे[७] साधुः । ३ कोरं भक्तं दूषयति **कोरदूषकः** । 'दुष वैकृत्ये'(दि.प.अ.), ण्वुल् । त्रीणि कोद्रवस्य ॥११७७॥

**चीनकस्तु काककङ्गुः**

१ चीयते चीनः । 'दिननग्न-'(हैमोणा-२६८)इति नें[८] निपात्यते । स्वार्थे कनि **चीनकः** । २ काकप्रिया कङ्गुः **काककङ्गुः,** स्त्रीलिङ्गः । चीणानम्नी[९] द्वे । श्यामाकादयोऽष्टौ कङ्गुभेदाः ॥

**यवनालस्तु योनलः ।**

**जूर्णाह्वयो देवधान्यं जोन्नाला बीजपुष्पिका ॥११७८॥**

१ यवस्येव नालमस्य **यवनालः** । २ यूयते **योनलः** । 'मुरुल-'(हैमोणा-४७४)इत्युले निपात्यते । 'जूरैच् जरायाम्[१०]'(दि.आ.से.), निष्ठा, नत्वं[११] च जूर्णः । जूर्ण इत्याह्वयोऽस्य **जूर्णाह्वयः** । ३ देवप्रियं धान्यं **देवधान्यम्** । ४ जुनद्[१२] नालमस्या[१३] **जोन्नाला** । पृषोदरादित्वात् साधुः । ५ बीजाकारं पुष्पमस्या बीजपुष्पा, स्वार्थे कनि **बीजपुष्पिका** । ज्वारिनामानि[१४] षट् ॥११७८॥

**शणं भङ्गा मातुलानी स्यात्**

१ शणति **शणम्** । 'शण भङ्गे[१५]'(भ्वा.प.से.), पचाद्यच् । २ भज्यते **भङ्गा** । 'भञ्जो आमर्दने'(रु.प.अ.), कर्मणि घञ्, 'अजाद्यतष्टाप्'४।१।४॥ । ''तरङ्गभेदयोर्भङ्गा (भङ्गो) भङ्गा[१६] शस्यं शणाह्वये''[[१७]]इति रुद्रः । ३ मायाः[१८] श्रियस्तुलया अनिति **मातुलानी** । 'अन प्राणने'(अ.प.से.), पचाद्यचि[१९], गौरादिः । सणनामानि[२०] त्रीणि ॥

**उमा तु क्षुमाऽतसी ।**

१ 'उङ् शब्दे'(भ्वा.आ.अ.), धूमवत् मक्प्रत्ययः, **उमा** । 'विभाषा तिलमाषोमा-'५।२।४॥ इति निर्देशादेव वा[२१] साधुः । अव्यते वा उमा । 'अव रक्षणादौ' (अ.प.से.), 'अवतेर्मक्'( )इति मक्, 'ज्वरत्वर-'[२२] ६।४।२०॥ इत्यूट् (इत्यूठ्)। उदुन्नता मा शोभाऽस्या इति वा। नैरुक्तत्वा[द्] दन्त्यलोपः । २ क्षौत्यनया भुक्तयेति **क्षुमा** । 'टुक्षु शब्दे'(अ.प.अ.), 'क्षुहिभ्यां च(वा)' (हैमोणा-३४१)इति मक्। '' 'अर्तिस्तु-'(उणा-१३७)इत्यादिना मन्, बाहुलकादगुणत्वम्[२३]''[मा.धातुवृत्तिः, अदादिः, धातुसं-३१]इति माधवः । ३ अतत्यनया **अतसी** । 'अत सातत्यगमने'(भ्वा.प.से.), पनसवदसच्, गौरादित्वाद् ङीष् । न तस्यतीति वा । अलसीनामानि त्रीणि ॥

**गवेधुका गवेधुः स्यात्**

१ गूयते **गवेधुका, गवेधुः** । 'गुङ् शब्दे[२४]'(भ्वा.आ.अ.), 'गुङ् इधुधुक्-एधुकौ'(हैमोणा-७४)। गवीधु-

---

१. 'शुंध-' इति४॥ २. 'शुध शौचे' इति क्षीरतरङ्गिण्यादयः ॥ ३. '-र्णाः' इति४॥ ४. १प्रतौ नास्ति॥ ५. 'ङीप' इति२.३.४.५॥ ६. 'कैरवभैरव-' इति मुद्रितहैमोणादिगणे ॥ ७. 'इत्येव' इति१॥ ८. १प्रतौ नास्ति ॥ ९. 'भेदाः' इति१॥ १०. 'धुरङ् जूरैचि जरायाम्' इति हैमधातुपाठः, 'घूरी जूरी हिंसावयोहान्योः' इति क्षीरतरङ्गिण्यादयः ॥ ११. 'श्वीदितो निष्ठायाम्'७।२।१४॥ इति निष्ठानत्वम् ॥ १२. 'जुवन्' इति३॥ १३. 'जा-' इति१॥ १४. 'ज्वार-' इति३॥ १५. 'चण श्रण दाने' इत्यत्र स्वामिनोक्तम्- ''शण इत्यपि दुर्गः'' इति, क्षीर. पृ.११५॥, 'चण शण श्रण दाने' इति मैत्रेयः, 'चण शण श्रण दाने च' इति सायणः ॥ १६. 'भंभा' इति४॥ १७. द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-५९३, पृ.६७५॥, रामाश्रमी२।९।२०॥, पृ.४०६॥, तयोः 'शस्यं' इत्यस्य स्थाने 'शस्य-' इति दृश्यते॥ १८. 'माया' इति१.४॥ १९. '-च्' इति३॥ २०. 'सणा-' इति५॥ २१. १.३प्रत्योर्नास्ति ॥ २२. 'अर्तिज्व-' इति३॥ २३. ''बाहुलकान्न गुणः'' इति मा.धातुवृत्तौ, पृ.३४४॥ २४. 'गुङ् अव्यक्ते शब्दे' इति क्षीरतरङ्गिण्यादयः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

काऽपि । २ गवा अम्भसा[१] एधते **गवेधुः**, स्त्रीलिङ्गः । 'एध वृद्धौ'(भ्वा.आ.से.), 'भृसृन्-(भृमृतॄ-)'(हैमोणा-७६)इति बहुलवचनादुः । बर्बटीत्यपि । "बर्बटी गणिकायां स्यात् व्रीहिभेदेऽपि बर्बटी"[विश्वलोचनकोशः, टान्तवर्गः, श्लो-५१]इति श्रीधरः । यथा- "मरौ चर्वन्ति[३] बर्बटीम्"[ ]इति। बरटीनाम्नी द्वे ॥

**जर्त्तिलोऽण्यजस्तिलः ॥११७९॥**

१ जायते **जर्त्तिलः** । पृषोदरादिः । एकम् अडकतिलस्य ॥११७९॥

**षण्ढतिले तिलपिञ्जस्तिलपेजः**

१ षण्ढो निष्फलस्तिलः **षण्ढतिलः**, तत्र। निष्फलस्तिलः **तिलपिञ्जः**, **तिलपेजः** । 'निःफले (निष्फले) तिले पिञ्जपेजौ वक्तव्यौ[४]'(वा-४।२।३६॥)इति पिञ्जपेजौ प्रत्ययौ । त्रीणि [५]निष्फलतिलस्य ॥

**अथ सर्षपः ।**

**कदम्बकस्तन्तुभः**

१ सरति स्नेहोऽस्मादिति **सर्षपः** । 'सृ गतौ' (भ्वा.प.अ.), 'सर्त्तेरपः षुक् च'(उणा-४२१)इत्यपः[६], षुगागमश्च। सरिषपोऽपि । "सर्षपः स्यात् सरिषपः कटुस्नेहश्च तन्तुभः"[त्रिकाण्डशेषः२।९।३॥]इति त्रिकाण्डशेषः । २ कदति[७] (कन्दति) हिनस्ति कण्डूरोगादिकमिति कदम्बः[८] । 'कदि हिंसायाम्[९]'( ), अम्बच्प्रत्ययः, ततः स्वार्थे कन् **[कदम्बकः]**। कन्दयति रोदयत्यश्रुजनकस्नेहत्वादिति वा । 'कदि क्रदि[१०] रोदने[११] आह्वाने च[१२]'(भ्वा.प.से.), ततः अम्बच्, ततः कन् । कुत्सितमम्बत इति वा । ३ तोतुभ्यते[१३] **तन्तुभः**[१४] । 'णभि तुभि हिंसायाम्'(भ्वा.आ.से.,दि.प.से.), भ्वादौ द्युतादिः, दिवादिः, क्र्यादिर्वा, पृषोदरादित्वात् सिद्धिः। त्रीणि सर्षपस्य॥

**अथ सिद्धार्थः श्वेतसर्षपः ॥११८०॥**

१ [१५]सिद्धोऽर्थो रक्षोहननादिप्रयोजनमस्मादिति **सिद्धार्थः** । "सरिषपः सिते तस्मिन् रक्षोघ्नो भूतनाशनः[१६]"[[१७]]इति रभसात् । एकं श्वेतसर्षपस्य । इह प्रस्तावादनुक्तान्यप्यमूनि[१८] त्रीणि[१९] तिलनामानि, यथा-"तिलः पूत-(तिलपुष्प)स्तैलफलः[२०]"[मदनपालनिघण्टुः, धान्यगुणवर्णनं नाम दशमो वर्गः, श्लो-४७]इति मदनपालः ॥११८०॥

**माषादयः शमीधान्यम्**

१ माष आदिर्येषां मुद्गादीनां ते माषादयः, शमीशिम्बा, तत्प्रधानं धान्यं **शमीधान्यम्** । [२१]फलीथीनिष्पन्नधान्यस्यैकम् ॥

**शूकधान्यं[२२] यवादयः[२३] ।**

१ शूकप्रधानं[२४] धान्यं **शुकधान्यम्**। यथा[२५] यव आदिर्येषां गोधूमादीनां ते यवादयः । एकम् [२६]उम्बीनिष्पन्नधान्यस्य॥

**स्यात् सस्यशूकं किंशारुः**

१ 'शो तनूकरणे'(दि.प.अ.), 'उलूकादयश्च' (उणा-४८१)इति निपातनादूकः, आल्लोपः शूकः[२७] । "शूकोऽनुग्रह( )शुङ्गयोः(शुकोऽनुक्रोशशृङ्गयोः)"[विश्वप्रकाशकोशः, कान्तवर्गः, श्लो-३६]इति विश्वः । सस्यं धान्यम्, तस्य शूकं **सस्यशूकम्**। २ कुत्सितं शृणाति **किंशारुः**, तालव्यमध्यः, पुंक्लीबलिङ्गः[२८] । 'शॄ हिंसायाम्'(क्र्या.प.से.), 'किञ्जरयोः श्रिणः'(उणा-४)इति उक्प्रत्ययः (ञुण्प्रत्ययः)। "किंशारुः सस्यशूकेऽपि[२९] विशिखे कङ्कपक्षिणि"[विश्वप्रकाशकोशः, रान्तवर्गः, श्लो-१९७]इति महेश्वरः । यथा- "चकाशे शालिकिंशारुकपिशाशामुखाशरद्"[[३०]]इति महेश्वरः । धान्य[३१]ऊ[३२]म्बीनाम्नी द्वे॥

**कणिशं सस्यशीर्षकम् ॥११८१॥**

१ कणति वातेनेति **कणिशम्**, पुंक्ली. । 'कण

१. 'गवोंभसा' इति१॥ २ 'बा-' इति४.५॥ ३ 'चर्वति' इति३॥ ४ "तिलान्निष्फलात् पिञ्जपेजौ" इति वार्तिकस्वरूपं दृश्यते ॥ ५. 'निष्प-' इति४.५॥ ६ '-पः' इति३॥ ७ 'दहति' इति३॥ ८ '-म्बकः' इति१॥ ९. हिंसार्थकोऽयं धातुः क्षीरतरङ्गिण्यादौ न दृश्यते ॥ १०. ३प्रतौ नास्ति॥ ११. 'रोधने' इति२॥ १२. 'कदि क्रदि क्लदि, आह्वाने रोदने च' इति क्षीरतरङ्गिण्यादयः ॥ १३ 'तोभ्यते' इति२.३.४.५॥ १४ 'तुन्तुभः' इति१॥ १५. 'सिद्धा-' इति१.३॥ १६. '-ना' इति१॥ १७ द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-५९१, पृ.६७२॥ १८. '-क्तादप्य-' इति१॥ १९. १प्रतौ नास्ति ॥ २०. '-पूलः' इति४.५॥ २१. 'फलाद्या-' इति४॥ २२. 'शूकं' इति५॥ २३. 'ज-' इति५॥ २४ '-न-' इति१, '-न्यं-' इति३.५॥ २५. इतोऽग्रे ३.४.५प्रतिषु 'यथा' इति दृश्यते ॥ २६. 'ऊ-' इति१.२॥ २७ ३प्रतौ नास्ति॥ २८. 'पुंक्लीः' इति३॥ २९. '-कोऽपि' इति५॥ ३०. द्र. अनेकार्थकैरवाकरकौमुदीटीका, भा-२, श्लो-५३१, पृ.२२७॥ ३१. 'धाना-' इति५, 'धान्यऊ-' इति१॥ ३२. 'उ-' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शब्दे'(भ्वा.प.से.), 'कुलिकलि(कनि)-' (हैमोणा-५२५) इति किशः । कणिः पयःकणः सन्त्यस्येति (कणयः कणाः सन्त्यस्येति), लोमादित्वाच्छो वा । कं शिरो निश्यति[1] (नेशति) समाधत्त इति कनिशम्, तुर्यवर्गपञ्चममध्योऽपि । 'निश्(णिश) समाधौ'(भ्वा.प.से.)इत्यतो मूलविभुजादित्वात् कः। नैरुक्तो नस्य णो वा । ''कणिशो धान्यशीर्षके''[ [2] ]इति तालव्यान्ते रत्नकोषः । सस्यमयं शीर्षमिव सस्यशीर्षकम्, सस्यमञ्जरीत्यर्थः । ''कणिशं सस्यमञ्जरी''[अमरकोषः २।९।२१॥]इत्यमरः । धान्यशिरानामैकम् ॥११८१॥

**स्तम्बस्तु**[1] **गुत्सो**[2][3] **धान्यादेः**

१-२ धान्यादेर्यः **स्तम्बः**, स नालं **गुत्सः**[4] । यं प्रति स्तम्बोऽप्रसिद्धस्तं प्रत्यन्यथा विध्यनुवादौ कार्यौ, एवं सर्वत्रोन्नेयम् । ''स्तम्बो गुत्सस्तृणादिनः''[अमरकोषः२।९।२१॥]इत्यमरः । ''स्तम्ब आलानगुल्मयोः व्रीह्यादीनां प्रकाण्डे च''[अनेकार्थसङ्ग्रहः२।३०१॥]इति हैमानेकार्थः । ''अमी पृथुस्तम्बभृतः पिसं गतां[5] गता विपाकेन फलस्य शालयः''[किरातार्जुनीयम्, सर्गः-४, श्लो-२६]इति भारविः[6] । गुत्सः गुध्यति[7] परिवेष्टयतीति । 'गुध परिवेष्टने'(दि.प.से.), 'वदि-'( )इति त्सः । ''गुत्सः स्तम्बे हारभेदे स्तबके ग्रन्थिपर्णके''[विश्वप्रकाशकोशः, सान्तवर्गः, श्लो-६]इति महेश्वरः । यथा ''वत्सो जिघत्सति बलादपि शालिगुच्छम्(-गुत्सम्)''[ ]। गुच्छ इति द्वितीयवर्गप्रथमद्वितीयान्तोऽपि । ''स्याद् गुच्छः[8] स्तबके स्तम्बे हारभेदकलापयोः''[विश्वप्रकाशकोशः, छान्तवर्गः, श्लो-३]इति महेश्वरः । द्वे धान्यादीनां मूलविस्तारस्य । 'थुड-गूढ' इति भाषा ॥

**नालं**[1] **काण्डः**[2]

१ नलति **नालम्**, त्रिलिङ्गः, अर्थाद् गुत्सस्य[9]। 'णल बन्धे[10]'(भ्वा.प.से.), ज्वलादित्वाण्णः । २ कणति शब्दायते[11] भज्यमानः **काण्डः**, पुंक्ली. । 'कण शब्दे'(भ्वा.प.से.), 'अमन्ताड्डः'(उणा-१११)। द्वे गुत्सकायस्य[12](-काण्डस्य), 'डोका' इति भाषा ॥

**अफलस्तु सः** ।

**पलः**[1] **पलालः**[2]

१ स एव तृणादिकाण्डः गृहीतफलत्वान्निष्फलः सन् पलति **पलः** । 'पल गतौ'(भ्वा.प.से.), अच् । २ पल्यते रक्ष्यते **पलालः**। 'पल गतौ'(भ्वा.प.से.), चुरादिः[13], 'कनि-(कुणि)पीभ्यां कालन्[14]'(चान्द्रोणा-३।५०)बाहुलकात् पलेरपि कालन् । द्वे पलालस्य ॥

**धान्यत्वक् तुषः**[1]

१ धान्यस्य त्वक्, तुष्यति[15] दर्शनेनाऽस्य **तुषः** । 'तुष तुष्टौ'(दि.प.अ.), घञर्थे कः, 'इगुपध-'(उणा-५५९)इति को वा । तुसनाम एकम् ॥

**बुसे**[1] **कडङ्गरः**[2] ॥११८२॥

१ बुस्यते[16] क्षिप्यते **बुसम्**, पुंक्ली.। 'बुस उत्सर्गे' (दि.प.से.), घञर्थे कः । ''दन्त्यसकारवानयम्''[ ]इति धातुप्रदीपः[17] । ''बुषवेषतुषारतोषाः''[ ]इति मूर्धन्यान्ते[18] स(ष)भेदाद् मूर्धन्यान्तमपि बुषमिति, तत्र । २ कडन्ति[19] माद्यन्त्यनेन[20] पशव[21] इति **कडङ्गरः** । 'कड मदे'(भ्वा.प.से.), भद्रादित्वाद्[22] रक्, अङ्गजागमश्च । माधवस्तु कृधातोः 'कडङ्करः'[मा. धातुवृत्तिः, तनादिः, धातुसं-१२, (पृ.५१५)]इत्याह । '[23]कंर(कड)[ङ्गर]दक्षिणाच्छ च'

१. 'नश्यति' इति१, 'निश्यते' इति५ ॥ २. द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-५९४, पृ.६७६॥, रामाश्रमी२।९।२१॥, पृ.४०६॥ ३. 'गुच्छो' इति१.२.३.५॥ ४. 'गुच्छः' इति१॥ ५. 'पिशगतं' इति५॥ ६. '-तिः' इति३॥ ७. '-ते' इति३॥ ८. 'गुत्सः' इति१.२॥ ९. 'गुल्मः' इति३॥ १०. 'बन्धने' इति१, 'गन्धे' इति क्षीरतरङ्गिण्यादयः ॥ ११. '-ति' इति१॥ १२. 'गुत्सस्य' इति३.४.५॥ १३. क्षीरतरङ्गिणीधातुप्रदीपयोश्चुरादिगणे 'पल रक्षणे' इति दृश्यते, अत्र 'पल्यते रक्ष्यते' इति विगृहीतत्वात् स एव युक्तः ॥ १४. 'तमिविशिविडिमृणिकुलिकपिपलिपञ्चिभ्यः कालन्'(उणा-११५)इति पाणिनीयसम्मतोणादिगणे ॥ १५. '-न्ति' इति१.२.३॥ १६. '-ति' इति१॥ १७. द्र. टीकासर्वस्वम्, भा-२, २।९।२२॥, पृ.१६८॥, पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-५९५, पृ.६७८॥, रामाश्रमी२।९।२२॥, पृ.४०७॥ १८. १.३प्रत्योर्नास्ति ॥ १९. 'कडति' इति४.५, 'कड्यन्ते' इति३॥ २०. 'माद्यन्ते' इति३॥ २१. 'त्रिप-' इति३॥ २२. 'भद्राद्' इति३॥ २३. 'कडङ्गर-' इति काशिकासम्मतपाठः॥, ''कडङ्गरदक्षिणाशब्दाभ्यां छः प्रत्ययो भवति, चकाराद्यच्च 'तदर्हति' इत्येतस्मिन् विषये । ठकोऽपवादः । कडङ्गरमर्हति कडङ्गरीयो गौः । कडङ्गर्यः ।'' इति काशिकावृत्तिः, भा-४, ५।१।६९॥, पृ.७१॥, ''कडङ्करदक्षिणाच्छ च'५।१।६९॥ चाद्यत् । कडं करोतीति विग्रहे अत एव निपानात् खच् । कडङ्करं माषमुद्गादिकाष्ठमर्हतीति कडङ्करीयो गौः । कडङ्कर्यः ।'' इति सिद्धान्तकौमुदी, तद्धितेष्वार्हीयाः, पृ.३४०॥, अत्रत्या तत्त्वबोधिनी-''कडङ्गर-' इति पाठस्तूपेक्ष्य इति ध्वनयति-कडं करोतीति । 'कड मदे' कडतीति कडः । माषमुद्गादिकाष्ठमिति । अमरश्चाह-'कडंकरो बुसं क्लीबे' इति ॥ गौरिति । 'नीवारपाकादिकडंकरीयैः' इति रघुः'' इति, पृ.३४०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

५।१।६९॥ इति सूत्रे वर(हर)दत्तोऽप्येवम्[1] । भुसनाम्नी द्वे । 'ढूंढा'[2] इति भाषान्तरम् ॥११८२॥

## धान्यमावसितं रिद्धम्

१ धान्यं व्रीह्यादि, आ अवसितं निष्पन्नम् । ''रक्षार्थमाच्छादितमावसितम्''[ [3] ]इत्यन्ये । आ समन्तादवसितमवसानं प्राप्तम् । स्यतेरवपूर्वात् क्तः । राध्यति स्म **रिद्धम्** । 'राध संसिद्धौ'(स्वा.प.अ.), पृषोदरादित्वादित्वम्[4] । ''ऋधु वृद्धौ'(दि.प.से.), क्ते, सप्तमस्वरादिरपि । एकं निष्पन्नधान्यस्य । अथवा ढांकियानाम[5] एकम् ॥

## तत्पूतं निर्बुसीकृतम् ।

१ तद् धान्यं निर्बुसीकृतं सत् **पूतम्** इत्युच्यते । पूयते स्मेति पूतम् । 'पूञ् पवने'(क्र्या.उ.से.), क्तः । एकं तृणरहितधान्यस्य । '[6]ऊपणिउं[7]धान्य' इत्यादिभाषा॥

॥ **पूर्णो धान्याधिकारः** ॥

अथ शाकाधिकारः-

## मूलपत्रकरीराग्रफलकाण्डाविरूढकाः ॥११८३॥
## त्वक् पुष्पं कवकं शाकं दशधा शिग्रुकं च तत् ।

१ तत् शाकं दशधा दशविधं **मूलं** मूलकं बिशादेः[9]१, **पत्रं** निम्बादेः२, **करीरं** वंशादेरङ्कुरः, **अग्रं** करीरवृक्षादेः४, **फलं** वार्ताक्यादेः५, **काण्डम्** एरण्डवंशादेः[10]६, **विरूढाः** '[11]विरुहा' इति प्रसिद्धाः, क्षेत्रोद्धृतस्य फलमूलादेः स्वेदा[12]न्नवोद्भिन्ना अङ्कुराः । ''[13]अंकारप्रश्रेषादविरूढकं[14] तालास्थिमज्जा''[ [15] ]इति गौडाः ॥११८३॥ **त्वक्** कदल्यादेः८, **पुष्पं** करीरवृक्षादेः९, **कवकं** छत्रकाख्यभूकन्दविशेषः१०, एवमेतद् दशधा **शाकम्** । शक्यतेऽनेन भोक्तुमिति शाकम् । 'शक्लृ शक्तौ'(स्वा.प.अ.), करणे घञ् । श्यति तनूकरोति सौहित्यं वा । 'शो तनूकरणे' (दि.प.अ.), बाहुलकादौणादिकः कन्, 'आदेचः-'६।१।४५॥ इत्यात्वम् । महच्छाकं शाकसमाहारो वा शाकी, गौरादित्वाद् ङीष् । २ शिनोति **शिग्रुकम्**, पुंक्लीबलिङ्गावेतौ । मूलपत्रादीनां दशानां सामान्येन नाम्नी द्वे । शाकं चतुर्धाऽपीत्यन्ये । यन्मदनपालः ''शाकं चतुर्धा तत्पुष्पं१ छद२कन्द३फलैः स्मृतम्''[मदनपालनिघण्टुः, शाकवर्गः, श्लो-२]इति । आत्रेयोऽपि-

''शाकं चतुर्विधं प्रोक्तं पत्रं पुष्पं फलं तथा ।
कन्दा अन्ये समुद्दिष्टा वक्ष्याम्येतान् पृथक् पृथक् ॥१॥''

[ ]इति॥

अथ शाकभेदानाह-

## तण्डुलीयस्तण्डुलेरो मेघनादोऽल्पमारिषः ॥११८४॥

१ [16]तण्डुलाकृतिबीजस्तण्डुलः[17], तज्जनकत्वेन तस्मै हितमित्यर्थे 'प्राक् क्रीताच्छः'५।१।१॥, 'आयनेयी-'७।१।२॥ इति छस्य ईयादेशः [**तण्डुलीयः**]। २ तण्डुलानीरयति द्रावकत्वादिति **तण्डुलेरः** । 'ईर गतिकम्पनयोः'(चु.उ.से.), णिजन्तः, 'कर्मण्यण्'३।२।१॥ । द्वावपि पञ्चमाज्मध्यौ । ३ मेघस्येव[18] नादोऽस्माद् **मेघनादः** । ४ मारिषः शाकभेदः, क्षुद्रकाण्डपत्रत्वाद् अल्पश्चासौ मारिषश्च **अल्पमारिषः** । अल्पं मृणाति हिनस्तीति वा । 'मृश्[19] हिंसायाम्'(क्र्या.प.से.), 'अमिमृशिभ्यां[20] णित्'(हैमोणा-५४९)इतीषः । [21]तन्दलेजानामानि चत्वारि ॥११८४॥

## बिम्बी रक्तफला पीलुपर्णी स्यात् तुण्डिकेरिका ।

१ बिम्बं [22]बिम्बिकाफलम्[23], तदाचष्टे प्रकाशयति ण्यन्तादचि ङीषि **बिम्बी** । २ रक्तं फलमस्या **रक्तफला** । अजादिपाठात् 'पाककर्ण-'४।१।६४॥ इत्यादिना न[24] ङीष् । ३ पीलोरिव पर्णमस्याः **पीलुपर्णी** । 'पाककर्ण-'४।१।६४॥

---

१. ''कडङ्करदक्षिणाच्छ च ॥ 'कड मदे' कडतीति कडः, कडं करोतीत्यत एव निपातनात् खच्, कडङ्करं माषमुद्गादिकाष्ठमुच्यते ।'' इति पदमञ्जरी, काशिकावृत्तिः, भा-४, ५।१।६९॥, पृ.७१॥ २ 'ढं-' इति३॥ ३. द्र. स्वोपज्ञटीका४।११८३॥, पृ.२६५॥ ४ '-रादित्वम्' इति३॥ ५. 'ढा-' इति१, 'ढो-' इति३॥ ६ 'ऊफणिउं' इति२, 'उपणीयो' इति३॥ ७ '-ऊं' इति४॥ ८ अम.क्षीर.२।४।१३६॥, पृ.११५॥, टीकासर्वस्वम्, भा-२. २।४।१३६॥, पृ.१८१॥, पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-१८२, पृ.२३५॥, रामाश्रमी२।४।१३६॥, पृ.२२४॥ ९. 'बिसा-' इति१.२॥ १०. '-वृक्षादेः' इति३॥ ११. 'विरू-' इति१.३॥ १२. 'स्वेदो-' इति४.५॥ १३. 'आ-' इति३॥ १४ '-कां' इति५॥ १५ द्र. स्वोपज्ञटीका४।११८३॥, पृ.२६५॥ १६. 'तण्डुली-' इति४.५॥ १७ '-ला' इति४॥ १८. '-स्यैव' इति५॥ १९. 'मृण्' इति३, हैममते क्र्यादेः शानुबन्धः ॥ २०. '-मृङ्भ्यां' इति२.३, '-मृभ्यां' इत्युणादिगणे ॥ २१. 'चं-' इति४.५॥ २२. 'बिम्ब-' इति३.५॥ २३. '-ले' इति३.४.५॥ २४ १.२.४.५प्रतिषु नास्ति ॥, अथवा '-दिनाऽङीष्' इति बोध्यम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति ङीष्[1] । ४ तुण्डिकान् चञ्चुमत ईरयति प्रेरयति भक्षणार्थमिति, कर्मण्यण्[2], ङीषि[3] तुण्डिकेरी[4], ततः कन्, 'केऽणः' ७।४।१३॥ इति ह्रस्वत्वे **तुण्डिकेरिका** । "तुण्डं मुखम्, तदेकदेशत्वादोष्ठोऽपि तुण्डम्[5], ततः प्रशंसायां कनि तुण्डकम्, औपम्यात् तदीर्त्ते गच्छति, कर्मण्यणि तुण्डकेरीति पाठः"[[7]]इत्यन्ये । चत्वारि बिम्ब्याः । 'तोंडूरी'[8] इति भाषा॥

## जीवन्ती जीवनी जीवा जीवनीया मधुस्त्रवा[9] ॥११८५॥

१ जीवन्त्यनया, जीव्याज्जनोऽनयेति वा **जीवन्ती** । 'जीव प्राणधारणे'(भ्वा.प.से.), 'रुहिनन्दिजीविप्राणिभ्यः[10] किदा-(षिदा-)शिषि'(उणा-४०७)इति झच्, 'झोऽन्तः'७।१।३॥ । २ करणे ल्युटि **जीवनी** । ३ जीव्यतेऽनया[11] **जीवा** । करणे 'हलश्च'३।३।१२१॥ इति घञ्। ण्यन्तादचि वा । ४ जीवनाय हिता **जीवनीया** । 'प्राक् क्रीताच्छः'५।१।१॥ । ५ मन्यन्ते[12] साधुत्वेन इमां जना इति मधु[13] । 'मन[14] ज्ञाने'(दि.आ.अ.), 'फलिपाटि'(उणा-१९)इत्यादिना उः, धश्चान्तादेशः । ([15]स्त्रवतीति स्त्रवा । एतन्नामद्वयमिति केचित्) । मधु स्त्रवति **मधुस्त्रवा**, दन्त्यरेफाद्यमध्या । 'स्रु गतौ'(भ्वा.प.से.), अच् । डोडीनामानि पञ्च ॥११८५॥

## वास्तुकं तु क्षारपत्रम्

१ वासयतीति **वास्तुकम्**। 'वस निवासे'(भ्वा.प.अ.), णिजन्तः, 'उलूकादयश्च'(उणा-४८१)इति वसेरुकन्(-कञ्), तुट् च । वास्तुभवत्वाद् वा वास्तुकम् । ह्रस्वमध्यं दीर्घमध्यं च । "रम्या वास्तववास्तुकस्तवकिता"[[16]]इति प्रयोगात्। २ क्षारं पत्रमस्य **क्षारपत्रम्** । [17]वथूआनाम्नी द्वे ॥

## पालक्या मधुसूदनी ।

१ पालके साधुः **पालक्या** । 'तत्र साधुः'४।४।९८॥ इति यत् । पाल्यत इति वा । 'शिक्यास्याढ्य-' (हैमोणा-३६४)इति ये निपात्यते । २ मधु माधुर्यं सूदते **मधुसूदनी** । नन्द्यादित्वाल्ल्युः । द्वे पालङ्कस्य ॥

## रसोनो लशुनोऽरिष्टो म्लेच्छकन्दो महौषधम् ॥११८६॥ महाकन्दः

१ [18]अम्लेन रसेन ऊनः **रसोनः** । यद् व्याडिः "ऊनोऽम्लेन रसेन[19] रसोनस्तेन कीर्तितः"[[20]]इति । २ अश्नाति रोगमिति **लशुनः** । 'अश भोजने'(क्र्या.प.से.) 'अशेर्लश्च[21]'(उणा-३३७)इत्युनन्, आदेर्लादेशश्च । लष्यतेऽभिलष्यत इति वा । 'लष कान्तौ'(भ्वा.उ.से.), 'लषेः श च'(हैमोणा-२८९)इत्युनन्। पुंक्लीबलिङ्गावेतौ। "क्रोशक्लेशविनाशलेशलशुनप्रश्नांशुशीतांशवः"[[22]]इत्यूष्मविवेकात् तालव्यमध्यः । ३ न रिष्यत इति **अरिष्टः** । 'रिष हिंसायाम्'(भ्वा.प.से.,दि.प.से.), [23]क्तप्रत्ययः । ४ म्लेच्छानां प्रियः[24] कन्दो **म्लेच्छकन्दः** । ५ **महौषधम्** रोगजित्त्वात् ॥११८६॥ ६ महांश्चासौ कन्दश्च **महाकन्दः** । ल्हसणनामानि षट् ॥

## रसोनोऽन्यो गृञ्जनो दीर्घपत्रकः ।

१ अन्यो द्वितीयो रसोनः, गृञ्जति कुत्सितं शब्दायते, गृञ्जयति कुत्सितं[25] शब्दं जनयति, गृञ्ज्यते कुत्सितं शब्दायते वा **गृञ्जनः** । 'गजि गृजि शब्दार्थाः[26]'(भ्वा.प.से.), नन्द्यादित्वाल्ल्युः, पुंक्ली. । २ दीर्घं पत्रमस्य **दीर्घपत्रकः** । प्याजनाम्नी द्वे ॥

## भृङ्गराजो भृङ्गरजो मार्कवः केशरञ्जनः ॥११८७॥

१ द्रवद्वारेण भृङ्गवत् केशकृष्णीकरणाद् भृङ्गवद् राजते **भृङ्गराजः**, अदन्तः । "स्यान्मार्कवो भृङ्गराजः[27]

---

१. 'ङीप्' इति३॥ २. '-ण्' इति४.५॥ ३. 'ङीपि' इति३॥ ४ 'तुण्ड-' इति४.५॥ ५ 'तुण्ड-' इति४॥ ६ 'कः' इति३॥ ७ द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-१८५, पृ.२३८॥ ८ 'तौडू-' इति३.५॥ ९ '-श्रवा-' इति१.३.५॥, तुलनीयोऽमरकोषः१।४।१४२॥ १०. 'रुह-' इति१॥ ११. '-येति' इति४॥ १२. 'मन्यते' इति१.३॥ १३. इतोऽग्रे ४प्रतौ "स्त्रीलिङ्गः, स्याज्जीवन्त्या तु योषितीति वचनात्" इति दृश्यते ॥ १४ 'मनु' इति२.३.४.५॥ १५. कोष्ठान्तर्गतपाठः ४प्रतावेव दृश्यते ॥ १६. द्र. टीकासर्वस्वम्, भा-२, २।४।१५८॥, पृ.२०१॥, तत्र-'रम्या वास्तुकवास्तववस्तवकिका' इति दृश्यते ॥, पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-२०४, पृ.२६१॥ १७. 'वथूया-' इति२, 'बथुआ-' इति३॥ १८. 'आ-' इति३॥ १९. '-नेति' इति३॥ २०. द्र. स्वोपज्ञटीका४।११८६॥, पृ.२६६॥ २१. 'अशेर्लशश्च'( ) इत्युणादिगणे, 'अश भोजने' अस्मादुनन्, धातोर्लशादेशश्चेत्यर्थः ॥ २२. द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-१९४, पृ.२४९॥ २३. 'क्तः प्र-' इति२॥ २४. '-यक-' इति१॥ २५. '-तश-' इति४.५॥ २६. 'गज गजि गृज गृजि मुज ('मज' इति क्षीरतर.) मुजि शब्दार्थाः' इति क्षीरतरङ्गिण्यादयः ॥ २७ ५प्रतौ नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भृङ्गराजः सुजागरः''[[१]]इति रभसात् । २ घञर्थे के **भृङ्गरजः**, अदन्तः । ''ये मासमेकं तु [२]पिबन्ति चूर्णं दिने दिने भृङ्गरजः[३] समुत्थम्''[[४]]इति वैद्यकात् [५]सन्तोऽपि[६] । ३ मङ्क्यते मण्ड्यते केशादिरनेनेति **मार्कवः** । 'मकि मण्डने'(भ्वा.आ.से.), पृषोदरादिः । ४ केशान् रञ्जयति[७] **केशरञ्जनः** । [८]रञ्जेर्णिजन्तान्नन्द्यादित्वाल्ल्युः । चत्वारि भृङ्गराजस्य ॥११८७॥

## काकमाची[1] वायसी[2] स्यात्

१ काकं माचति[९] (मञ्चते) फलाशनेन काकधारणात् **काकमाची** । 'मचि धारणोच्छ्रायपूजनेषु'(भ्वा.आ.से.), 'कर्मण्यण्'३।२।१॥, 'टिड्ढाणञ्-'४।१।१५॥ इति ङीष् । काकवन्मचति(मञ्चते) वर्णेन सम्पृच्यत इति वा । २ अत एव वायससंयोगादणि **वायसी**। कमाइनाम्नी द्वे॥

## कारवेल्लः[1] कटिल्लकः[2][१०] ।

१ [११]कारेण निश्चयेन[१२] वेल्लति[१३] वालयति **कारवेल्लः**। कस्य मुखस्य आरो गमनम्, तं वेल्लयति[१३] । 'वेल्ल वलने(चलने)'(भ्वा.प.से.), 'कर्मण्यण्'३।२।१॥ । स हि तिक्तत्वाद् मुखगन्धं निरस्यति । २ कटिं लाति कटिल्लः । कटत्यावृणोति वा । ''पृषोदरादि[१४]द् द्विलत्वम्'' []इति स्वामी[१५] । कनि **कटिल्लकः**। ''बाहुलकात् कटेरिल्लः''[[१४]]इत्यन्ये । [१६]कारेलानाम्नी द्वे ॥

## कूष्माण्डकस्तु[1] कर्कारुः[2][१७]

१ कुत्सित ऊष्मा अण्डेषु बीजेष्वस्य पित्तकारित्वात् कूष्माण्डः, कनि **कूष्माण्डकः**, दीर्घादिः । ''कोरूष्मणा अनिति प्राणितीति । अमन्ताड्डुः[१८](उणा-१११), [१९]नैरुक्ते ह्रस्वत्वे कुष्माण्डो ह्रस्वादिः''[]इति मिश्राः । २ कर्कं वर्णमियर्त्ति **कर्कारुः**, पुंसि । 'ऋ गतौ'(भ्वा.प.अ.), बाहुलकात् 'कृवापाजिमि-'(उणा-१)इत्युणि[२०] । यद्वा करोति तृप्तिं कर्कः, इयर्ति अरुः बस्तिशोधनः [२१]रसत्वात्, कर्कश्चासावरुश्चेति कर्कारुः । द्वे कोहलाख्यस्य ॥

## कोशातकी[1] पटोलिका[2] ॥११८८॥

१ कुश्यति **कोशातकी**। 'कुश श्लेषणे[२२]'(दि.प.से.), ['श्लेष्मातक-'(हैमोणा-८३)इति निपात्यते] । कोशाकाराणि फलान्यतति[२३] वा । २ पटति पटोली । 'पट गतौ[२४]'(भ्वा.प.से.), '[२५]पट विस्तारे[२६]'( )वा[१२] 'कटिपटि[२७]-'(हैमोणा-४९३) इत्योलः पटोलः, पुंस्त्रीलिङ्गः ।

''पटोले तु पाण्डुफलः कुलकः कर्कशच्छदः ।
राजीफलः कफहरो राजमान्योऽमृताफलः[२८] ॥१॥''

[निघण्टुशेषः, चतुर्थः शाककाण्डः, श्लो-२२४५(२५)]इति हैमनिघण्टुशेषः । स्वार्थे कनि **पटोलिका** । कोशातकीशब्दः [२९]तोरईनामापि[३०] । यन्मदनपालः-

''कोशातकी कृतछिद्रा (शतच्छिद्रा) जालिनी कृतवेधना ।
मृदङ्गफलिका क्ष्वेडा (ज्वेरा) घण्टाली
(घोटाकी) कर्कशच्छदा ॥२॥''

[मदनपालनिघण्टुः, शाकवर्गः, श्लो-१८]इति । द्वे पटोलस्य । 'भूतला[३१]' इति भाषान्तरम् ॥११८८॥

## चिर्भिटी[1] कर्कटी[2] वालुङ्क्येर्वारुस्त्रपुसी[3][4][5] च सा ।

१ [चिरिः स्वादौ चिरणोति **चिर्भिटी**]। 'चिरेरिटो भ् च'(हैमोणा-१४९)इति साधुः। २ कर्कं वर्णमटति प्राप्नोति, शकन्ध्वादिः, कर्कटः, गौरादि[३२]ङीषि **कर्कटी**। ३ वलति (वलते) **वालुङ्की** । 'वल वल्ल संवरणे[३३]' (भ्वा.आ.से.), 'कञ्चुक-'(हैमोणा-५७)इत्यादिना उकप्रत्यये निपात्यते । ४ [३४]ऊर्वति हिनस्ति [३५]अर्त्तिम् **एर्वारुः**, पुंस्त्री.। '[३६]उर्व(उर्वी) हिंसायाम्[३७]'(भ्वा.प.से.), 'उर्वेरादेरूदेतौ च' (हैमोणा-८१४)इत्यारुः । ''अर्त्तेरुण् आरुः, रलयोरेकत्र

१. द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-१९७, पृ.२५२॥, रामाश्रमी२।४।१५१॥, पृ.२३०॥ २. 'प्रपि-' इति१.२॥ ३. '-राजः' इति१॥ ४. द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-१९७, पृ.२५२॥ ५. 'सा-' इति३॥ ६. १प्रतौ नास्ति ॥ ७. 'रञ्जति' इति५॥ ८. 'रजेर्णिजन्तः' इति३॥ ९. 'माचयति' इति५॥ १०. तुलनीयोऽमरकोषः१।४।१५४॥ ११. 'क-' इति३.४.५॥ १२. १प्रतौ नास्ति ॥ १३. '-ते' इति३॥ १४. '-दित्वाद्' इति२॥ १५. द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-२००, पृ.२५५॥ १६. 'क-' इति३, 'कारेली-' इति१.२॥ १७. तुलनीयोऽमरकोषः१।४।१५५॥ १८. '-ड्डुः' इति३॥ १९. 'नि-' इति१॥ २०. '-ण्' इति३॥ २१. 'रसक-' इति४.५॥ २२. दुर्गसम्मतोऽयं धातुः॥ २३. '-नि पतति' इति२.३॥ २४. 'अट पट गतौ' इति क्षीरतरङ्गिण्यादयः ॥ २५. 'पटि' इति१॥ २६. विस्तारार्थकपटधातुः क्षीरतरङ्गिण्यादौ न दृश्यते ॥ २७. 'कपिगडिगण्डिकटिपटिभ्यः कोलच्' इति पाणिनीयसम्मतोणादिगणसूत्रम् ॥ २८. 'राजिमानमृताफलः' इति निघण्टुशेषे, श्लो-२२४५, पृ.२८२॥ २९. 'तोरी-' इति१॥ ३०. '-मानि' इति१.३॥ ३१. '-ताला' इति५॥ ३२. '-दिः' इति३.५॥ ३३. 'वल संवरणे' इति स्वामी, 'वल वल्ल संवरणे' इति मैत्रेयः, 'वल वल्ल संवरणे सञ्चरणे च' इति सायणः ॥ ३४ 'उ-' इति१.३.४॥ ३५. 'आ-' इति१.२॥ ३६. 'ऊ ' इति२.४.५॥ ३७. 'उर्वी तुर्वी दुर्वी धुर्वी हिंसार्थाः' इति स्वामी, 'उर्वी तुर्वी थुर्वी दुर्वी धुर्वी हिंसायाम्('हिंसार्थाः' इति सायणः)' इति मैत्रेयसायणौ ॥

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

स्मृतेरालुश्च । इरुं बीजं प्रचक्षते । इरोः बीजस्यारुर्व्यापक इत्यर्थः''[ ]इति शबरस्वामी तृतीयस्वरादिमाह । ''तुर्यस्वरादिरीर्वारुः कर्कट्या पठ्यते बुधैः''[ ]इति शाब्दिकाः । ''उर्वारुः कर्कटिः स्यात्''[ ]इति पुंस्काण्डे रत्नकोषः । नैरुक्ते इकारस्योत्वे उर्वारुरिति वा[1] । ''ऊर्वारुः(हैमोणादिस्वोपज्ञगणसूत्रविवरणम्-८१४)इति षट्स्वरादिरपीति हैमोणादिः । ५ त्रपत इति **त्रपुसी** । 'त्रपूष् लज्जायाम्'(भ्वा.आ.वे.), 'त्रपेरुसः'(हैमोणा-५७८)इत्युसः, गौरादिः । पञ्च [2]चिर्भिट्याः । काकडीति भाषा ॥

## अर्शोघ्नः सूरणः (शूरणः) कन्दः[3]

१ अर्शांसि हन्ति **अर्शोघ्नः** । 'हन्(हन) हिंसागत्योः'(अ.प.अ.), 'अमनुष्यकर्तृके च'३।२।५३॥ इति टक्, कित्त्वाद् 'गमहन-'६।४।९८॥ इत्युपधालोपः, 'हो हन्तेः-'७।३।५४॥ इति कुत्वम् । २ शूरति(शूर्यते) हिनस्त्यर्शांसि **शूरणः**, तालव्यादिः। 'शूरी हिंसायाम्'(दि.आ.से.), 'बहुलमन्यत्रापि'(उणा-२०७)इति युच् । ''श्योनाकः शूरणः श्रोणिः[4] शिक्षा श्यामा च [5]शेवधिः''[ ]इति शभेदात् । ''सूयते[6] प्रेर्यते सूरणः''[अम.क्षीर.२।४।१५७॥] दन्त्यादिरपीति स्वामी । 'षू प्रेरणे'(तु.प.से.), बाहुलकात् क्युन्, रुक् चागमश्च । ३ कन्द्यतेऽन्विष्यते, कन्दयति रोदयति वा । घञि अचि वा **कन्दः** । त्रीणि [7]शूरणस्य ॥

## शृङ्गबेरकमार्द्रकम् ॥११८९॥

१ [8](शृणोति[9] कफं **शृङ्गबेरकम्**, पृषोदरादिः । शृङ्गोपलक्षितं बेरं देहोऽस्य वा । २ आर्द्रमेव **आर्द्रकम्**)। द्वे शृङ्गबेरस्य । [10](‘आदो’ इति भाषा) ॥११८९॥

## कर्कोटकः किलासघ्नस्तिक्तपत्रः सुगन्धकः ।

१ करोति किलासहिंसां कर्कोटः । 'कर्कोट-(कपोट)बकोट-'(हैमोणा-१६१)इत्यादिना [ओ]टे निपात्यते, स्वार्थे कनि **कर्कोटकः** । २ किलासं हन्ति **किलासघ्नः** । 'अमनुष्यकर्तृके च'३।२।५३॥ इति टक् । ३ तिक्तं पत्रमस्य[11] **तिक्तपत्रः**[12] । ४ सुष्ठु गन्धयते **सुगन्धकः** । 'गन्ध हिंसायाम्'[13](चु.आ.से.), णिजन्तः, ण्वुल् । चत्वारि कंकोडाख्यस्य ॥

## मूलकं तु हरिपर्णं सेकिमं हस्तिदन्तकम् ॥११९०॥

१ मूलति प्रकर्षेण तिष्ठति **मूलकम्** । 'मूल प्रतिष्ठायाम्'(भ्वा.प.से.), 'कृञादिभ्यः [संज्ञायां] वुन्'(उणा-७१३)। '''मूल रोहणे'(चु.उ.से.), चुरादिः, पचाद्यच्, ततः 'स्थूलादिभ्यः प्रकारवचने कन्'५।४।३॥''[ [14]]इति सर्वधरः। २ हरि नीलं पर्णमस्य **हरिपर्णम्**। ३ सेकेन [15]निर्वृत्तं **सेकिमम्** । 'भावप्रययान्तान्निवृत्तेऽर्थे इमन्वाच्यः[16]'(वा-४।४।२०॥)। ४ हस्तिदन्तप्रतिकृति **हस्तिदन्तकम्**। 'इवे प्रतिकृतौ'५।३।९६॥इति कन्[17] । चत्वारि मूलाह्वस्य ॥११९०॥

॥ समाप्तः शाकाधिकारः ॥

## तृणं नडादि नीवारादि च

१ तृण्यते अद्यते पशुभिरिति **तृणम्** । 'तृणु[18] अदने'(त.उ.से.), घञर्थे कः । तृणं तृणजातीयमित्यर्थः । नडादि नडप्रकारं[19] नीवारादि नीवारप्रकारमित्यर्थः । सामान्येन नडप्रकारस्य नीवारप्रकारस्य च नाम एकम् ॥

## शष्पं तु तन्नवम् ।

१ तत् तृणं नवं नवोद्भिन्नम्, बालमिति यावत्, शुष्यत्यातपेनेति **शष्पम्** । ''शुष शोषणे'(दि.प.अ.), बाष्पादित्वात् पः, उकारस्यात्वं च''[ [20]]इति सुभूतिः । [21]शस्यते, 'शसु हिंसायाम्'(भ्वा.प.से.), 'नीपादयः'(कातन्त्रोणा-२।११६)इति पः । ''शस्यम्''[ ]इति टिप्पनी । एकं नवतृणस्य ॥

## सौगन्धिकं देवजग्धं पौरं कत्तृणरौहिषे ॥११९१॥

१ शोभनो गन्धः प्रयोजनमस्य **सौगन्धिकम्** । 'तदस्य प्रयोजनम्'[22]५।१।१०९॥इति ढक्, 'किति च'७।२।

---

१. द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-२०१, पृ.२५७॥, तत्र- ''इर्वेति । पूर्ववदर्तेः उण् (उ.१।१)। आरुः । रलयोरेकत्र स्मृते आलुश्च । इरुं बीजं प्रचक्षते । इरोर्बीजस्य आरुर्व्यापक इत्यर्थः। इति शवरस्वामी । ह्रस्वादिरयम् । तुर्यस्वरादिरीर्वारु कर्कट्यां पठ्यते बुधै''रिति शाब्दिकाः । 'इर्वारु' ह्रस्वादिः स्त्रियां पुंसि च। ''उन्मत्तो धुस्तर इर्वारुः कर्कटिः स्या''दिति पुंस्काण्डे रत्नकोषात् । नैरुक्ते इकारस्योत्वे 'उर्वारुः' इति च।'' इति दृश्यते॥ २. 'चिर्भ-' इति४.५॥ ३. तुलनीयोऽमरकोषः२।४।१५७॥ ४. 'शा-' इति३॥ ५. 'स-' इति१, 'से-' इति३॥ ६. 'सूर्यते' इति१, तथा अम.क्षीर.टीकायाम् ॥ ७. 'सू-' इति२.४.५॥ ८. कोष्ठान्तर्गतपाठः ३प्रतौ न दृश्यते ॥ ९. '-णाति' इति१॥ १०. कोष्ठान्तर्गतपाठः १.२.४.५प्रतिषु नास्ति ॥ ११. '-स्येति' इति१॥ १२. '-त्रकः' इति१॥ १३. 'बस्त गन्ध अर्दने' इति क्षीरतरङ्गिण्यादयः १४. द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-२०३, पृ.२६०॥ १५. 'निवृ-' इति३॥ १६. भावप्रत्ययान्तादिमप् वक्तव्यः' इति वार्तिकस्वरूपं दृश्यते ॥ १७. 'कः' इति१.२॥ १८. 'तृण' इति३.४.५॥ १९. '-प्रा-' इति४.५॥ २०. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-२१३, पृ.२७१॥ २१. 'शा-' इति३॥ २२. 'प्रयोजनम्' इत्येवाष्टाध्याय्याम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

११८॥ इति वृद्धिः । २ देवैर्जग्धमिव जर्जरत्वात् **देवजग्धम्** । देवेन गमेण जग्धं वा । ३ पुरे भवं **पौरम्** । 'तत्र भवः'४।३।५३॥ इत्यण् । ४ कुत्सितं तृणं **कत्तृणम्** । 'तृणे च जातौ'६।३।१०३॥ इति कोः कदादेशः । ५ रोहन्ति यत्र तत्रेति **रौहिषम्** । 'रुह बीजजन्मनि प्रादुर्भावे'(भ्वा.प.अ.), 'रुहेर्वृद्धिश्च'(उणा-४७)इति टिषच्, पुंक्लीबलिङ्गोऽयम् । ''कत्तृणे रौहिषं क्लीबं पुंल्लिङ्गो हरिणान्तरे''[ [3] ]इति मूर्धन्यान्ते रभसः । [4]रोहींसनामानि पञ्च ॥११९१॥

## दर्भः कुशः कुथो बर्हिः पवित्रम्

१ दृणाति पारुष्याद्, दृभ्यते वा **दर्भः** । 'दृ हिंसायाम्'(स्वा.प.अ.), बाहुलकाद् भः[5] । 'दृभि (दृभी) ग्रन्थे'(तु.प.से.), भावे घञ् । २ कौ शेत इति **कुशः**, पुंक्ली. । 'शीङ् स्वप्ने'(अ.आ.से.), 'अन्येभ्योऽपि-'(वा-३।२।१०१॥)इति डः । ३ कुथ्नाति **कुथः** । 'कुथ पूतीभावे'(भ्वा.प.से.) 'इगुपध-'३।१।१३५॥ इति कः । ४ बृंहते **बर्हिः**, पुंक्ली. । 'बृहि वृद्धौ'(भ्वा.प.से.), '[6]बृहेर्नलुक् च[7]'(उणा-२६६)इतीस् । ५ पूयतेऽनेन, पुनात्यनेन वा **पवित्रम्** । 'पूञ् पवने'(क्र्या.उ.से.), 'पुवः संज्ञायाम्' ३।२।१८५॥ इति करणे इत्रः[8] । पञ्च दर्भस्य ॥

## अथ तेजनः ।

## गुन्द्रो मुञ्जः शरः

१ [तेजयति शिनोति वा **तेजनः** । 'तिज निशाने'(चु.उ.से.), ण्वुल्, क्वुन् वा] । २ गुणैः कृत्वा दोषा द्रान्त्यस्मिन् **गुन्द्रः** । पृषोदरादिः, 'गुद क्रीडायाम्'(भ्वा.आ.से.), बाहुलकात् 'स्फायितञ्चि-'(उणा-१७०)इति रक्, नुडागमश्चेति वा । ३ मुञ्जति वायुना **मुञ्जः** । 'मुजि गतौ[9]'(भ्वा.प.से.), अच् । ४ शृणाति हिनस्ति **शरः** । 'शॄ हिंसायाम्'(क्र्या.प.से.), अच् । सरो दन्त्यादिरपि, 'सृ गतौ'(भ्वा.प.से.)इत्यस्य । ''सरस्तु मुञ्जो[10] बाणाख्यौ[11] गुन्द्रस्तेजनकः शरः''[ [12] ]इति वाचस्पतिः । चत्वारि मुञ्जस्य ॥

## दूर्वा त्वनन्ता शतपर्विका ॥११९२॥

## हरिताली रुहा

१ दूर्व्यते हिंस्यते पशुभिः, दूर्वति हिनस्ति दुर्निमित्तं वा **दूर्वा** । 'दूर्वी हिंसायाम्[13]'(भ्वा.प.से.), कर्मणि घञ्, पचाद्यचि वा[14], 'उपधायां च[15]'८।२।७८॥ इति दीर्घत्वम्, टाप् । दूरे वातीति, पृषोदरादित्वाद् वा । २ **अनन्ता**, दूरप्रसरणात् । ३ शतं बहूनि पर्वाण्यस्याः **शतपर्विका** । ऋन्नेभ्यो ङीषि(ङीपि), स्वार्थे कन्[16], 'केऽणः'७।४।१३॥ इति ह्रस्वत्वम् ॥११९२॥ ४ हरितां[17] नीलत्वमलति **हरिताली** । 'अलञ् भूषणादौ[18]'(भ्वा.प.से.), अचि, गौरादिः । ५ पादाघातादिना [19]क्षोदेऽपि पुनः [20]रोहति **रुहा** । 'रुह [21]बीजजन्मनि'(भ्वा.प.अ.), 'इगुपध-'३।१।१३५॥ इति कः, टाप् । पञ्च दूर्वायाः ॥

## पोटगलस्तु धमनो नडः ।

१ पोटेन [22]वायुसंश्लेषेण गलति **पोटगलः** । 'गल गलने[23]'(भ्वा.प.से.), पचाद्यच् । २ धमत्यनेनाऽन्तःशुषिरं **धमनः** । धमेः [24]सौत्रधातोर्नन्द्यादित्वाल्ल्युः । धमत्यनेनाऽग्निबन्धो वा । 'ध्मा धमने[25]'(भ्वा.प.अ.), '-धमश्च'(उणा-१९३)इत्यनप्रत्ययो धमादेशश्च[26] । ३ नडति गहनं करोति **नडः** । 'नड गहने'( ), पचाद्यच् । 'णल गन्धे'(भ्वा.प.से.), पचाद्यच्, नडः । ''डलयोरेकत्वस्मरणाद् नडोऽव्युत्पन्नं प्रातिपदिकम्''[ [27] ]इति हरदत्तः । त्रीणि नडस्य ॥

## कुरुविन्दो मेघनामा मुस्ता

---

१. 'प्र' इति४॥ २. '-शे' इति१॥ ३. द्र. टीकासर्वस्वम्, भा-२, २।४।१६६॥, पृ.२०९॥, पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-२१२, पृ.२७०॥ ४. 'रोही ' इति३.५, 'रौही-' इति४॥ ५. 'सः' इति४.५॥ ६. 'बृहि-' इति२.५॥ ७. 'बृहेर्नलोपश्च' इत्युणादिगणे ॥ ८. '-त्र' इति१, '-त्रन्' इति३, '-त्रं' इति४.५॥ ९. 'गज गजि गृज गृजि मुज ('मज' इति स्वामिमते अधिकः) मुजि शब्दार्थाः' इति क्षीरतरङ्गिण्यादयः ॥ १०. 'मुञ्जौ' इति३॥ ११. '-ख्यौ' इति३॥ १२. द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-२०८, पृ.२६५॥, रामाश्रमी२।४।१६२॥ पृ.२३५॥ १३. उर्वी इत्यादिदण्डकोऽयं धातुः ॥ १४. ५प्रतौ नास्ति ॥ १५. '-याश्च' इति४.५॥ १६. 'कनि' इति१.३॥ १७. '-तं' इति२.३.४.५॥ १८. 'अलं भूषणपर्याप्तिनिवारणेषु' इति स्वामी, 'अलं वारणपर्याप्तिभूषणेषु' इति मैत्रेयः, 'अल भूषणपर्याप्तिवारणेषु' इति सायणः ॥ १९. 'क्षौ-' इति३॥ २०. 'तिरो-' इति१॥ २१. 'बीज-' इति १प्रतौ नास्ति॥, स्वामिसम्मतोऽयं धातुपाठः, 'रुह जन्मनि प्रादुर्भावे' इति मैत्रेयः, 'रुह बीजजन्मनि प्रादुर्भावे च' इति सायणः॥ २२. 'वायुना-' इति३॥ २३. 'भक्षणे' इति२, १.३प्रत्योर्नास्ति ॥ २४. 'सौत्रो धातुः' इति१॥ २५. 'ध्मा शब्दाग्निसंयोगयोः' इति क्षीरतरङ्गिण्यादयः ॥ २६. 'ध्मो ध्म च' इत्युणादिगणसूत्रम्, क्वुन् स्यात् धातोर्धमादेशश्चेत्यर्थः ॥ २७. द्र. मा.धातुवृत्तिः, भ्वादिः, धातुसं-५६५, पृ.२०७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ कुरुदेशं विन्दति[1] प्रायेण लभते **कुरुविन्दः**, तत्र प्रायोभवत्वात्[2] । 'विद्लृ लाभे'(तु.उ.अ.), 'अनुपसर्गाल्लिम्पविन्द-'३।१।१३८॥ इति शः । २ **मेघनामा** मेघपर्यायनामक इत्यर्थः । ३ मुस्यति खण्डयति रोगम्, मुस्यते खण्ड्यते वा **मुस्ता** । 'मुस खण्डने'(दि.प.से.), आगमानित्यत्वादिडभावे बाहुलकात् तप्रत्यये[3], त्रिलिङ्गोऽयम् । संज्ञायां कनि, 'केऽणः'७।४।१३॥ इति ह्रस्वत्वे मुस्तकः मुस्तकं च । सामान्येन त्रीणि मुस्तायाः ॥

अथ तद्विशेषानाह-

## गुन्द्रा तु सोत्तमा ॥११९३॥

१ सा मुस्ता उत्तमा, गोदन्ते[4]ऽनया **गुन्द्रा** । 'गुद क्रीडायाम्'[5](भ्वा.आ.से.), बाहुलकात् 'स्फायितञ्चि-'(उणा-१७०)इति रक्, नुट् च । गुणैर्दोषा द्रान्त्यस्यामिति वा, पृषोदरादित्वात् । एकं सुगन्धमुस्तायाः ॥११९३॥

## वल्वजा उलपः

१ वलते शुचं (भुवं) वेष्टयति[6] वल्वः । 'वल संवरणे'[7](भ्वा.आ.से.), उल्वादित्वाद् वप्रत्यये वल्वः पर्वतः, तत्र जाता **वल्वजाः** । 'सप्तम्यां जनेर्डः'३।२।९७॥ । वलत इति वा वल्, क्विप्, वजति वजः, ततः[8] कर्मधारयः, स्वभावाद् वल्वजाः, बहुत्वे पुंसि । "एको वल्वजः" [१।२।४५॥]इति भाष्यकारवचनादेकत्वमपि[9] । २ वलते **उलपः** । 'विष्टपोलप-'(हैमोणा-३०७)इति साधुः । द्वे वल्वजस्य[10] । तृणविशेषोऽयम् ॥

## अथेक्षुः स्याद् रसालोऽसिपत्त्रकः ।

१ इष्यते अभिलष्यते **इक्षुः**, पुंसि । 'इषु[11] इच्छायाम्'(तु.प.से.), 'इषेः क्सुः'(उणा-४३७)इति क्सुः । ईक्ष्यते वा[12] । 'ईक्ष दर्शनाङ्कनयोः'[13](भ्वा.आ.से.), बाहुलकादुः, पृषोदरादित्वाद्[14] ह्रस्वत्वम् । २ रसमलति **रसालः** । 'अलञ् भूषणादौ'[15](भ्वा.प.से.), अच् । रसं लाति ददातीति वा । 'ला दाने'(अ.प.अ.), 'आतः-'३।२।३॥ इति कः, 'अन्येषामपि-'६।३।१३७॥ इति दीर्घत्वम् । ३ अस्याकाराणि पत्त्राण्यस्य **असिपत्त्रकः** । त्रीणि ईक्षोः ॥

तद्भेदानाह-

## भेदाः कान्तार-पुण्ड्राद्यास्तस्य

१ तस्य ईक्षोः भेदा जातय एकादश, काम्यते **कान्तारः** । पृषोदरादिः । कान्तमूषमियर्तीति वा । 'ऋ गतौ' (भ्वा.प.अ.), 'कर्मण्यण्'३।२।१॥ । कान्ता अरा भागा अस्येति वा, कान्तं रसमियर्तीति वा, 'कर्मण्यण्'३।२।१॥ । २ पुण्ड्यते खण्ड्यते **पुण्ड्रः** । 'पुडि खण्डने'(भ्वा.प.से.), 'स्फाटितञ्चि-'[16](उणा-१७०) । प्रज्ञाद्यणि पौण्ड्रो[17]ऽपि[18] । कान्तारश्च पुण्ड्रश्च तौ आद्यौ येषां ते तथा । आद्यशब्दात् कोषकाराद्याः । यद् वाचस्पतिः-

"पुण्ड्रेक्षौ[19] पुण्ड्रकः[20] सेव्यः पौण्ड्रकोऽतिरसो मधुः ।
श्वेतकाण्डो१ भीरुकस्तु हरितो मधुरो महान्२ ॥१॥
शून्येश्वरस्तु कान्तारः३ कोषकारस्तु वंशकः४ ।
शतघो[21]रस्त्वीषत्क्षारः५ पीतच्छायोऽथ तापसः६ ॥२॥
[22]सितनीलोऽथ नेपालो वंशप्रायो महाबलः७ ।
अन्वर्थस्तु दीर्घपत्त्रो दीर्घपर्वा कषायवान्८ ॥३॥
काष्ठेक्षुस्तु स्वल्प[23-1]काण्डो घनग्रन्थिर्वनोद्भवः९ ।
[24]नीलघोरस्तु सुरसो नीलपीतलराजिवान् ॥४॥
अनूपसम्भवः प्रायः१० खटिनी[23-2] त्विक्षुवालिका ।
करङ्कशालिः शाकेक्षुः[23-3] सूचिपत्त्रो गुडेक्षुकः[23-4]११ ॥५॥"
[[25]] इत्येवमेते नामसहिता इक्षुभेदाः ॥

## मूलं तु मोरटम् ॥११९४॥

१ इक्षोर्मूलम्, मुरति संवेष्टयति **मोरटम्** । 'मुर संवेष्टने'[26](तु.प.से.), 'शकादिभ्योऽटन्'(उणा-५२७) ।

---

१. '-न्ति' इति४॥ २. इतोऽग्रे ३प्रतौ 'वा' इति दृश्यते ॥ ३. '-ये' इति४.५॥ ४. 'गोविन्दते-' इति१॥ ५. 'कुर्द खुर्द गुद क्रीडायामेव' इति क्षीरतरङ्गिण्यादयः ॥ ६. '-न्ति' इति३॥ ७. 'वल संवरणे' इति स्वामी, 'वल वल्ल संवरणे' इति मैत्रेयः, 'वल वल्ल संवरणे सञ्चरणे च' इति सायणः ॥ ८. 'तत्र' इति१॥ ९. द्र. पदचन्द्रिका, भा-२, वनौषधिवर्गः, श्लो-२०९, पृ.२६६॥ १०. 'वलजस्य' इति२.५, 'जलस्य' इति३॥ ११. 'इष' इति सायणमते ॥ १२. १प्रतौ नास्ति ॥ १३. 'ईक्ष दर्शने' इति क्षीरतरङ्गिण्यादयः ॥ १४. '-दिह-' इति४॥ १५. 'अलं भूषणपर्याप्तिनिवारणेषु' इति स्वामी, 'अलं वारणपर्याप्तिभूषणेषु' इचि मैत्रेयः, 'अल भूषणपर्याप्तिवारणेषु' इति सायणः ॥ १६. '-तञ्चि-' इति १.२प्रत्योर्नास्ति ॥ १७. 'पो-' इति१॥ १८. '-न्द्रोऽपि' इति२.३॥ १९. '-क्षो' इति५, 'पुण्ड्रे' इति मुद्रितस्वोपज्ञटीकायाम्, ४।११९४॥, पृ.२६८॥ २०. '-न्द्रकः' इति३॥ २१. '-घोष-' इति३॥ २२. 'शि-' इति३॥ २३-१. 'ह्रस्वका-' इति, २३-२. खर्नटी ('खनटी' इति२.४ 'खट-' इति५)इति, २३-३. '-केक्षुः' इति, २३-४. '-क्षवः' इति च स्वोपज्ञटीकायाम्४।११९४॥, पृ.२६८॥ २४. 'नीर-' इति३॥ २५. द्र. स्वोपज्ञटीका४।११९४॥, पृ.२६८॥ २६. स्वामिमैत्रेयसम्मतोऽयं धात्वर्थः, 'परिवेष्टने' इति सायणः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदाह श्रीधरः ''मोरटं त्विक्षुमूले स्यादङ्कोठ(ट)कुसुमेऽपि च''[विश्वलोचनकोशः, टान्तवर्गः, श्लो-५६]इति । एकमिक्षुमूलस्य ॥११९४॥

### काशः[1]स्त्विषीका[2]

१ काशते **काशः**, पुंक्ली. । 'काशृ[१] दीप्तौ'(भ्वा.आ.से.), अच्। २ इष्यते **इषीका** । 'इषं[२] इच्छायाम्[३]'(तु.प.से.), 'इषेः(ईषेः) किदध्रस्वश्च'(उणा-४६७)इतीकन् । [४]कासनाम्नी द्वे ॥

### घासः[1]स्तु यवसम्[2]

१ घस्यते अद्यते पशुभिरिति **घासः** । 'घस्लृ अदने'(भ्वा.प.अ.), 'जनिघसिभ्याम्-'(उणा-५६९)इत्यण् । अद्यत इति वा । 'अद भक्षणे'(अ.प.अ.), 'अकर्तरि च कारके-'३।३।१९॥ इति घञ्, 'घञपोश्च'२।४।३८॥ इति घस्लृ आदेशः । २ यौति मिश्रीभवति दन्तैरिति **यवसम्** । 'यु मिश्रणामिश्रणयोः[५]'(अ.प.से.), 'ऋतन्यञ्जि-'(उणा-४४२)इत्यादिनाऽसप्रत्ययः[६] । द्वे घासस्य ॥

### तृणम्[1]अर्जुनम्[2] ।

१ तृण्यतेऽद्यते पशुभिरिति **तृणम्** । 'तृणु[७] अदने'(त.उ.से.), घञर्थे कः । तृह्यते गवादिभिर्वा । 'तृह[८] हिंसायाम्'(रु.प.से.), 'तृंहेर्नक्[९] नलोपश्च(तृहेः क्नो हलोपश्च)' (उणा-६८६)इति नक्(क्न)हकारलोपौ । २ अर्जयति **अर्जुनम्** । 'अर्ज सर्ज[१०] अर्जने'(भ्वा.प.से.), णिजन्तः, 'अर्जेर्णिलुक् च'(उणा-३३८), ['तृणाख्यायां च'(उणा-३३९)]इत्युनन्। ''सर्वं च तृणमर्जुनम्''[ [११] ] इति भागुरिः । [१२]खटोऽपि । द्वे तृणस्य ॥

॥ **समाप्तस्तृणाधिकारः** ॥

### विषः[1] क्ष्वेडो[2] रसः[4]स्तीक्ष्णं गरलः[5]

१ 'विष [वि]प्रयोगे'(क्र्या.उ.से.), विष्णाति[१३] 'इगुपध-'३।१।१३५॥ इति कः, **विषम्**, मूर्धन्यान्तम् । ''गरले विषमम्भसि च''[ [१४] ]इत्यूष्मविवेकात् । वेवेष्टि व्याप्नोत्यङ्गं [१५]वा । 'विष्लृ व्याप्तौ'(जु.उ.अ.), 'इगुपध-'३।१।१३५॥ इति कः । पुंक्लीबलिङ्गोऽयम् । स च द्वेधा स्थावरजङ्गमभेदात्, [यदाह-]

''कन्दजं[१६] कालकूटादि पुष्पजं दालवादिकम् ।
फालमङ्केल्लसारादि दंष्ट्रादिजं तु जङ्गमम् ॥१॥''

[ [१७] ]इति । २ क्ष्वेडते[१८] मोहयति **क्ष्वेडः**। क्ष्विडः[१९] सौत्रो मोहे, पचाद्यच् । 'वेलृ केलृ खेलृ क्ष्वेलृ[२०] वेल्ल चलने[२१]'(भ्वा.प.से.), । ''संज्ञायां घञि[२२] क्ष्वेलम्''[ ]इति माधवः । ''क्ष्विद्यन्ति प्राणान् [२३]मुञ्चन्त्यनेनेति । 'ञिक्ष्विदा स्नेहनमोहनयोः[२४]'(दि.प.से.), 'पुंसि-'३।३।११८॥इति घः, पृषोदरादित्वाड्डत्वम्''[ ]इति मिश्राः । ३ रसयति **रसः**, पुंक्ली. । 'रस स्वादे[२५]'(चु.उ.से.), णिजन्तः, अच् । ४ तेजयति **तीक्ष्णम्** । 'तिज निशाने'(चु.उ.से.), '[२६]तिजेर्दीर्घश्च'(उणा-२९८)इति क्स्नः । ५ गीर्यते रोगिभिः **गरलः**, पुंक्ली. । 'गॄ निगरणे'(त.प.से.), वृषादित्वात् कलचि, बाहुलकाद् गुणः । गरं लातीति वा । सामान्यतः पञ्च विषस्य ॥

### अथ हलाहलः[1] ॥११९५॥

**वत्सनाभः[2] कालकूटो[3] ब्रह्मपुत्रः[4] प्रदीपनः[5] ।**
**सौराष्ट्रिकः[6] शौल्किकेयः[7] काकोलो[8] दारदोऽपि[9] च ॥११९६॥**
**अहिच्छत्रो[10] मेषशृङ्गः[11] कुष्ट[12]-वालूक[13]-नन्दनाः[14] ।**
**कैराटको[15] हैमवतो[16] मर्कटः[17] करवीरकः[18] ॥११९७॥**
**सर्षपो[19] मूलको[20] गौरार्द्रकः[21] सक्तुक[22]-कर्दमौ[23] ।**
**अङ्कोल्लसारः[24] कालिङ्गः[25] शृङ्गिको[26] मधुसिक्थकः[27] ॥११९८॥**

---

१. 'कासृ-' इति२.३.५॥ २. 'इषु' इति३॥ ३. 'ईष उञ्छे'(भ्वा.प.से.), 'ईष गतिहिंसादानेषु'(भ्वा.आ.से.)इति वा पाठ्यम् ॥ ४. 'कंश-' इति१, 'कांस-' इति२॥ ५. सायणसम्मतोऽयं धातुपाठः, 'यु मिश्रणे' इति स्वामिमैत्रेयौ ॥ ६. वस्तुतः-'ऋतन्यञ्जि-'(४४२)इत्यादिना यौतेरासः प्रत्ययो भवति, न त्वसः, तेनाऽत्र 'वहियुभ्यां णित्'(उणा-३९९)इत्यसच्, बोध्यः, संज्ञापूर्वकत्वान्न वृद्धिः ॥ ७. 'तृण' इति३॥ ८. 'तृहिं' इति३॥ ९. इतोऽग्रे ५प्रतौ 'तृहेः' इति दृश्यते ॥ १०. 'षर्ज' इति मैत्रेयसायणौ ॥ ११. द्र. अम.क्षीर.२।४।१६८॥, पृ.१२३॥ १२. 'खे-' इति१॥ १३. ४.५प्रतिषु नास्ति ॥ १४. द्र. पदचन्द्रिका, भा-१, पातालभोगिवर्गः, श्लो-२२३, पृ.२६४॥, रामाश्रमी१।८।९॥, पृ.११६॥ १५. इतोऽग्रे ३प्रतौ 'विषः' इति दृश्यते ॥ १६. '-लं' इति३॥ १७. द्र. स्वोपज्ञटीका४।११९५॥, पृ.२६८॥ १८. '-डयति' इति१॥ १९. '-डि' इति३॥ २०. 'वेल्लृ' इति२.४.५॥ २१. 'वेल्लृ चेलृ केलृ खेलृ क्ष्वेलृ चलने' इति स्वामी, 'वेलृ चेलृ केलृ खेलृ क्ष्वेलृ वेल्ल चेल्ल चलने' इति मैत्रेयः, 'वेलृ चेलृ केलृ खेलृ क्ष्वेलृ वेल्ल चलने' इति सायणः ॥ २२. 'क्षेल-' इति३, 'क्ष्वि-' इति४॥ २३. 'मुञ्चत्य-' इति४.५॥ २४. '-मोचनयोः' इति१.३, मैत्रेयसायणौ च॥ २५. 'आस्वादस्नेहनयोः' इति क्षीरतरङ्गिण्यादयः ॥ २६. 'तिजि-' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**इन्द्रो[28] लाङ्गलिको[29] विस्फुलिङ्ग[30]-पिङ्गल[31]-गौतमाः[32] ।**

**मुस्तको[33] दालवश्चेति[34] स्थावरा विषजातयः ॥११९९॥**

१ हलमिव आ समन्ताद् हलति **हलाहलः** । आङ्पूर्वो 'हल विलेखने'(भ्वा.प.से.), अच् । हालहलमपि, हालाहलमपि[१] । "गोनासगोनसौ[२] हालाहलं हालहलं विषम्"[त्रिकाण्डशेषः१।९।५॥]इति त्रिकाण्डशेषः । यथा-"स्निग्धं भवत्यमृतकल्पमहो हालाहलं विषमिव(-वा-)प्रगुणं तदेव[३]"[काव्यालङ्कारसू. वृ.।V.27]। यथा च "काममपायि मयेन्द्रियकुण्डैर्यद्यपि दुष्कृतहालहलौघः"[ ]। एते पुंक्लीबलिङ्गाः ॥११९५॥ २ वत्सस्येव नाभिरस्य **वत्सनाभः** । 'नाभेः संज्ञायाम्' (वा- )इत्यच्[४] । प्रायेण वत्सान् नभ्नाति हिनस्तीति । 'णभ तुभ[५] हिंसायाम्'(क्र्या.उ.से.), 'कर्मण्यण्'३।२।१॥ वा । ३ कालस्य वर्णस्य कुटोऽत्र **कालकूटः,** पुंक्ली.। कालसम्बन्धी कालकूटो व्याजो वा । कालं यममपि कूटयति । 'कूट परिदाहे[६]'(चु.उ.से.), चुरादिः, 'कर्मण्यण्'३।२।१॥ इति वा । "कालस्य मृत्योः कूटं शिखरं कालकूटम्"[[७]]इति तु[८] पञ्जिका । ४ ब्रह्मणः पुत्रो **ब्रह्मपुत्रः** । यद् याज्ञवल्क्यः-"त्वं विष[९]! ब्रह्मणः पुत्रः सत्ये धर्मे व्यवस्थितः"[याज्ञवल्क्यस्मृतिः, व्यवहाराध्यायः, श्लो-११०] । ५ प्रदीपयति **प्रदीपनः** । 'दीपी दीप्तौ'(दि.आ.से.), नन्द्यादित्वाल्ल्युः । तदुक्तम्[१०]-

"ब्रह्मपुत्रस्तु कपिलो[११] मलयाद्रिभवः खरः ।

प्रदीपनस्तु दहनो रक्तवर्णोऽ(-ञ्ज-)नाद्रिजः ॥१॥"

[[१२]]इति ६ सुराष्ट्रदेशे[१३] भवः **सौराष्ट्रिकः**। अध्यात्मादित्वाद् ठञ्। ७ शुल्किकादेशे भवः **शौल्किकेयः** । 'स्त्रीभ्यो ढक्'४।१।१२०॥इति ढक् । "भृति(इति) कुक्षि-' ४।३।५३॥इति योगविभागाद् ढञ्"[ ]इति मिश्राः । ८ ईषत् कोलति संस्त्यायति[१४] **काकोलः,** पुंक्ली.। 'ईषदर्थे च[१५]'६।३।१०५॥ इति कोः कादेशः । काकोलो द्रोणकाकस्तद्वन्मेचको वा । ९ दरदे सिन्धुदेशे[१६] भवो **दारदः** । 'तत्र भवः'४।३।५३॥ इत्यण् ॥११९६॥ १० अहिच्छत्रदेशे भवत्वाद् **अहिच्छत्रः** । ११ मेषशृङ्गाकारत्वात् **मेषशृङ्गः** । यद् वाचस्पतिः- "मेषशृङ्गं त्वविशृङ्गाकृतिः[१७]" []। १२ कुष्णाति, कुष्टसदृक्त्वाद्[१८] वा[१९] **कुष्टम्** । यदाह-"कुष्टं तु कुष्टसदृशमुग्रगन्धं[२०] भ्रमिप्रदम्"[[२१]] । १३ वालूकाभो[२२] **वालूकः** । १४ नन्दयति **नन्दनः** । १५ किराटके म्लेच्छदेशे भवः **कैराटकः** । १६ हिमवति भवो **हैमवतः**। १७ मर्कटाभो **मर्कटः** । १८ करवीरमूलजत्वात् करवीरः, (कनि[२३] **करवीरकः**)। यदाह-"करवीरं त्वश्व-मारमूलजं सर्वतो भवम्[२४]"[[२२]]॥११९७॥ १९ सर्षपवत् पीतवर्णः **सर्षपः**। २० मूलकाभो **मूलकः**। २१ गौरश्चार्द्रकाभश्च **गौरार्द्रकः**। २२ सक्तुप्रतिकृतिः **सक्तुकः** । 'इवे प्रतिकृतौ'५।३।९६॥ इति कः[२५] । सक्तुवच्चूर्णीभवनत्वात्। २३ कर्दमसम्भवात् **कर्दमः** । २४ अङ्कोल (अङ्कोल्ल)फलाभः **अङ्कोल्लसारः** । पृषोदरादिः। २५ कलिङ्गदेशे भवः **कालिङ्गः** । २६ अजस्तनाकृतित्वात् **शृङ्गिकः** । यदाह-"शृङ्गिकं[२६] तु कृष्णवर्णमजस्तनसमाकृतिः"[[२२]] । २७ मधुसिक्थं मधूच्छिष्टम्, तत्सदृशत्वात् **मधुसिक्थकः**॥११९८॥ २८ इन्दति **इन्द्रः** । इन्द्रशैलभवत्वाद् वा । २९ लाङ्गलीप्रयोजनमस्य **लाङ्गलिकः** । यदाह-"लाङ्गलिकं तूपविषं लाङ्गलीमूलमेव तत्"[[२७]]। ३० विरुद्धाः स्फुलिङ्गा अस्य **विस्फुलिङ्गः** । ३१ बहिरन्तश्च पिङ्गलत्वात् **पिङ्गलः** । ३२ गोतमस्यायं **गौतमः** । ३३ मुस्तकाभो **मुस्तकः** । मुस्यति खण्डयति प्राणानिति वा। 'मुस खण्डने'(दि.प.से.), औणादिकस्तन्प्रत्ययः, ततः संज्ञायां कन् । ३४ दलति **दालवः** । 'कैरवभैरव-' (उणा-५१९)इत्यवे निपात्यते। एते सर्वेऽपि स्थावरवनस्पतिभवत्वात् **स्थावराः,** विषस्य जातयो भेदा इति । "एते सर्वेऽपि पुंक्लीबलिङ्गाः"[[२७]]इति मिश्राः। अमरश्च-

१. ३प्रतौ नास्ति ॥ २. गोनासगोनसशब्दौ सर्पार्थवाचकतया न प्रकृतोपयोगिनौ प्रतीयेते ॥ ३. द्र. अम.क्षीर.१।७।१०॥, पृ.५९॥, स्वोपज्ञटीका४।११९५॥, पृ.२६८॥ ४. '-प्' इति३॥ ५. 'तुभि' इति१॥ ६. मैत्रेयसम्मतोऽयं धात्वर्थः, 'दाहे' इति१, स्वामी च, 'परितापे' इति सायणः ॥ ७. द्र. पदचन्द्रिका, भा-१, भोगिवर्गः, श्लो-२२४, पृ.२६४॥, तत्र-'शिखरं' इत्यस्य स्थाने 'राशिरिव' इति दृश्यते ॥ ८. ३प्रतौ नास्ति ॥ ९. 'विषः' इति३॥ १०. 'य-' इति१॥ ११. '-लौ' इति१॥ १२. द्र. टीकासर्वस्वम्, भा-१, १।८।११॥, पृ.१७२॥ १३. '-ष्ट्रे दे-' इति१.२॥ १४. '-ते' इति३॥ १५. 'तु' इति५॥, 'च' इत्यष्टाध्याय्यां न दृश्यते ॥ १६. '-शभ-' इति१, '-देश-' इति ३प्रतौ नास्ति ॥ १७. '-तं' इति३॥ १८. 'कुष्टं' इति३॥ १९. ३प्रतौ नास्ति ॥ २०. '-ग्रं गन्ध-' इति१॥ २१. द्र. स्वोपज्ञटीका४।११९७-११९८॥, पृ.२६९॥ २२. 'वालु-' इति२.४॥ २३. कोष्ठान्तर्गतपाठः १.३.४प्रतिषु न दृश्यते ॥ २४. 'भवः' इति१॥ २५. 'कन्' इति३॥ २६. 'शृङ्-' इति४॥ २७. द्र. स्वोपज्ञटीका४।११९९॥, पृ.२६९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"पुंसि क्लीबे च काकोलकालकूटहलाहल[1]: ।
सौराष्ट्रिक: शौल्किकेय: ब्रह्मपुत्र: प्रदीपन: ॥१॥
दारदो वत्सनाभश्च विषभेदा अमी नव ।"

[अमरकोष:१।८।१०-११]इत्याह । चतुस्त्रिंशत् स्थावर-विषभेदस्य ॥११९९॥

**कुरण्टाद्या अग्रबीजा:**

१ अग्रभागो बीजमुत्पत्तिकारणमेषामग्रबीजा:, आद्य-शब्दात् पारिभद्रादय: ॥

**मूलजास्तूत्पलादय: ।**

१ मूलत: कन्दाज्जायन्त इति मूलजा:, आदि-शब्दात् सूरणादय: ॥

**पर्वयोनय इक्ष्वाद्या:**

१ पर्वति पूरयति, 'पर्व पूरणे'(भ्वा.प.से.), बाहुलकात् '-वृषितक्षि-[2]'(उणा-१५४)इति कनिन्[3], पर्व योनिरेषां पर्वयोनय:, आदिशब्दात् तृणवंशाद्या: ॥

**स्कन्धजा: सल्लकीमुखा: ॥१२००॥**

१ स्कन्धाज्जायन्त इति स्कन्धजा:, मुखग्रहणाद् वटाद्या: ॥१२००॥

**शाल्यादयो बीहरुहा:**

१ बीजात् सस्याद् [4]रोहन्ति बीजरुहा:, आदिग्रहणात् षष्टिकमुद्गाद्या: ॥

**सम्मूर्च्छजास्तृणादय: ।**

१ सम्मूर्च्छनाज्जायन्त इति सम्मूर्च्छजा:, आदिग्रहणाद् भूच्छत्राद्या: ॥

सङ्ग्रहमाह-

**स्युर्वनस्पतिकायस्य षडेता मूलजातय: ॥१२०१॥**

वनस्पतिकायस्य एता: षड् मूलजातय: स्युर्भवेयु-रिति ॥१२०१॥

॥ **समाप्तो वनस्पतिकाय:** ॥

# ॥ द्वीन्द्रिया: ॥

पृथिव्यादीनेकेन्द्रियानभिधायाऽथ[5] द्वीन्द्रियानाह-

**नीलङ्गु:[1] कृमिरन्तर्ज:[2]**

१ शरीरस्याऽन्तर्भव: **कृमि:**, [6]क्रिमिरित्यपि, क-वर्गाद्यरेफतृतीयस्वरादि: । यथा[7]-'क्रमु पादविक्षेपे'(भ्वा. प.से.), 'क्रमिगमिनमिस्तम्भाम च इच्च(क्रमितमिशति-स्तम्भामत इच्च'(उणा-५६१)इतीन्प्रत्ययोऽकारस्य चेकार: । २ नीलति **नीलङ्गु:**, पुंसि । 'णील(नील) वर्णे'(भ्वा. प.से.), 'प्रीकैपै-'(हैमोणा-७६१) इत्यङ्गुक्[8] । द्वे सामान्येन शरीरस्याऽन्तर्जातजीवस्य । 'सुरमियां[9]' इति भाषा ॥

**क्षुद्र: कीटो[1] बहिर्भव: ।**

१ क्षुद्रो ह्रस्व: कृमि:, कीटयति **कीट:**, पुंस्त्री[10] । स्त्रियां गौरीवत् । सामान्येन 'लटकीडा' इत्यादीनां नामैकम्॥

**पुलकास्तूभयोऽपि[1] स्यु:**

१ उभयेऽन्तर्भवा बहिर्भवाश्च कृमय:, पोलन्ति **पुलक:** । 'पुल महत्त्वे'(भ्वा.प.से.), [संज्ञायां क्वुन्]। "पुलक: कृमिभेदे स्यात्"[विश्वलोचनकोश:, कान्तवर्ग:, श्लो-११६]इति श्रीधर: । "वर्त्मनां पुलकवृश्चिकस्पृशाम्" [अनेकार्थकैरवाकरकौमुदीटीका३।६१॥]इत्यनेकार्थटीका । 'सरमियां[11] कीडां[12]' इत्यादय: [13]पुलकशब्देनोच्यन्त इत्यर्थ: ॥

**कीकसा:[1] कृमयोऽणव: ॥१२०२॥**

१ अणव: सूक्ष्मा: कृमय:, कुत्सितं कसन्ति[13] **कीकसा:** । पृषोदरादित्वात् । एकं लघुकृमे: ॥१२०२॥

**काष्ठकीटो[1] घुण:[2]**

१ काष्ठोद्भव: कीट: **काष्ठकीट:** । २ घुणन्ति काष्ठान्तर्भ्रमति **घुण:** । 'घुण भ्रमणे'(त.प.से.), 'इगु-पध-'३।१।१३५॥ इति क: । द्वे [14]घुणस्य ॥

**गण्डूपद:[1] किञ्चुलक:[2] कुसू:[3] ।**

**भूलता[4]**

१ गण्ड्वो ग्रन्थय: पदान्यस्य **गण्डूपद:** । २

१. '-कूटहला:' इति३.४॥ २. '-वृक्षि-' इति३॥ ३. '-नीन्' इति३॥ ४. 'रु-' इति३.४॥ ५. 'अथ' इति ३प्रतौ नास्ति ॥ ६. 'क्र-' इति२.३॥ ७. अधिकोऽयं प्रतिभाति ॥ ८. अत्र-'खरुशङ्कुपायुनीलङ्गुलिगु'(उणा-३६)इति सूत्रसत्त्वादिदं विचारणीयम् ॥ ९. '-मीया' इति३॥ १०. 'पुंसि' इति४॥ ११. 'क्रीडा' इति१॥ १२. 'पुलकै-' इति१, 'पुलका-' इति३॥ १३. 'कसति' इति१॥ १४. 'घ' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किञ्चित् चुलुपन्ति **किञ्चुलकः** । 'कीचक-'(हैमोणा-३३) इत्यके निपात्यते । किञ्चुलुक उकारद्वयवानपि । ३ कोर्भूमेः सूते **कुसूः** । कुं मृदं सूते वा, मृदुत्सर्गात् । ४ भुवो लतेव **भूलता** । "महालता[1] किञ्चुलकौ[2] भूस्थो गण्डूपदो मतः"[ ] इति पथ्यापथ्यः । अलसियानामानि चत्वारि ॥

**गण्डूपदी तु शिली**

१ गण्डूः पदान्यस्याः **गण्डूपदी** । २ शिलति **शिली** । शिल्याकृतिर्वा । "शिली गण्डूपदी च"[ ]इति पथ्यापथ्यः । यथा–"शिलीकलकलैः[3] कलां कलयते बलात्[4] पल्वलम्"[[5] ]इति । लघुपातलाअलसिया नामैकम् ॥

**अस्त्रपा जलौकसः ॥१२०३॥**

**जलालोका जलूका च जलौका जलसर्पिणी ।**

१ अस्रं पिबति[6] **अस्रपा** । 'पा पाने'(भ्वा.प.अ.), 'आतो मनिन्क्वनिप्वनिपश्च'३।२।७४॥ इति चकाराद् विच्, सोमपावत् स्त्रीलिङ्गे रूपाणि । " 'आतोऽनुपसर्गे कः' ३।२।३॥ इति कप्रत्ययान्तोऽयम्"[ ]इत्यन्ये । तदा गङ्गावत्[7] । ([8]२ जलमोक आसां **जलौकसः** । स्त्रियां वा बहुवचनान्तोऽयम् ) ॥१२०३॥ ३ जलो (जले) आलोक्यते **जलालोका**[9] । 'लोकृ दर्शने'(भ्वा.आ.से.), घञ् । ([10]जले आलोकोऽस्या इति वा । ४ जलति **जलूका** । 'जल धान्ये[11]'(भ्वा.प.से.), 'मृमन्यञ्जि-'(हैमोणा-५८) इत्यूकः । ५ जले ओकः स्थानमस्याः, जलमोकोऽस्या वा **जलौका** । 'ओक उचः के'७।३।६४॥ इति निपातनादोकोऽदन्तस्ततः टाप् )। ६ जले सर्पति **जलसर्पिणी** । 'सृप्लृ गतौ'(भ्वा.प.अ.), नन्द्यादित्वाल्ल्युः ('सुप्यजातौ णिनिस्ताच्छील्ये'३।२।७८॥ इति णिनिः, 'टिड्ढाणञ्-' ४।१।१५॥ इति ङीप्)। [12]जलौनामानि षट् ।

**मुक्तास्फोटोऽब्धिमण्डूकी शुक्तिः**

१ मुक्ताः स्फुटन्त्यत्र **मुक्तास्फोटः** । ([13]'स्फुट विकसने'(तु.प.से.), 'हलश्च'३।३।१२१॥ इति घञ्)। २ अब्धेर्मण्डूकीव **अब्धिमण्डूकी** । ३ शोचति[14] **शुक्तिः**, स्त्रीलिङ्गः । 'शुच शोके'(भ्वा.प.से.), 'दृमुषि-'(हैमोणा-६५१) इति कित् तिः । यद्वा शुच्यति मुक्तां प्रसूते[15] । 'शुच्यी अभिषवे'(भ्वा.प.से.), 'स्त्रियां क्तिन्'३।३।९४॥, 'लोपो व्योर्वलि' ६।१।६६॥, 'तितुत्र-'७।२।९॥ इतीण्निषेधः । यद्वा शुच्यते[16] शुक्तिः । '[ई]शुचिर् पूतिभावे'(दि.उ.से.), 'स्त्रियां क्तिन्' ३।३।९४॥, 'तितुत्र-'७।२।९॥ इतीण्निषेधः । त्रीणि शुक्तेः ॥

**कम्बुस्तु वारिजः ॥१२०४॥**

**त्रिरेखः षोडशावर्त शङ्खः**

१ काम्यते **कम्बुः**, पुंक्ली. । 'कमु कान्तौ'(भ्वा. आ.से.), 'कम्यमिभ्याम्-'(उणा-७९९)इति बुः । २ वारिणो[17] जातो **वारिजः** ॥१२०४॥ ३ तिस्रो रेखा अस्य **त्रिरेखः** । ४ षोडश आवर्ता अस्य **षोडशावर्तः** । ५ शाम्यत्यशुभमनेनेति **शङ्खः**, पुंक्ली. । 'शमु उपशमे'(दि.प.से.), ['शमेः खः'(उणा-१०५)इति] खप्रत्ययः । शं सुखं श्रेयो वा खनति जनयतीति वा[18] । 'खन खनने[19]'(भ्वा.उ.से.), 'अन्येभ्यो(ष्व)पि-'३।२।१०१॥ इति डः । पञ्च शङ्खस्य ॥

**अथ क्षुद्रकम्बवः ।**

**शङ्खनकाः क्षुल्लकाश्च**

१ क्षुद्राः कम्बवः **क्षुद्रकम्बवः**, सूक्ष्मा नद्यादिजाः कृमयः । २ शं खनन्ति[20] **शङ्खनकाः** । संज्ञायां क्वुन् । ३ क्षुद्यन्ते **क्षुल्लकाः** । अकप्रत्यये साधुः । त्रीणि लघुशङ्खस्य ॥

**शम्बूकास्त्वम्बुमात्रजाः ॥१२०५॥**

---

१. 'मही-' इति१.२॥ २. '-लुको' इति१॥ ३. '-लौ' इति५, इतोऽग्रे ३प्रतौ 'कलां कलैः' इति दृश्यते ॥ ४. 'बा ' इति३॥ ५. द्र. अनेकार्थकैरवाकरकौमुदीटीका, भा-१, २।५०१॥, पृ.२८५॥ ६. '-न्ति' इति३॥ ७. 'गङ्गावत् तदा' इति१॥ ८. कोष्ठान्तर्गतपाठस्थाने २प्रतौ- "जलमोको गृहमस्या इति जलौकसः । शब्दशक्तिस्वाभाव्यादेकत्वेऽपि बहुत्वम् । एकवचनान्तोऽपि अदन्त एवेत्यन्ये (इतः २प्रतावेव बहिर्भागे) 'जलौरगी जलौका तु जलौका तु जलौकसि'[ ]इति संसारावर्ते । 'जलौकसेनेव रक्ताकृष्टिनिपुणेति वासवदत्तायाम् । जलं च तदौकश्चेति जलोकस्ततोऽर्शआद्यचि, एकवचनमदन्तत्वं चोपपाद्यम् ॥" इति दृश्यते । अत्र पदचन्द्रिका तुलनीया, भा-१, वारिवर्गः, श्लो-२५०, पृ.२९९॥ ९. 'जलौका' इति१॥ १०. कोष्ठान्तर्गतपाठः २प्रतावेव बहिर्भागे दृश्यते ॥ ११. मैत्रेयसम्मतोऽयं धातुपाठः, 'जल घात्ये' इति स्वामी, 'जल घातने' इति सायणः ॥ १२. 'जलोक-' इति३॥ १३. कोष्ठान्तर्गतपाठः १.३.४.५प्रतिषु नास्ति ॥ १४. 'शोचयति' इति५॥ १५. 'मुक्तां प्रसूते' इति १.३.४.५प्रतिषु नास्ति ॥ १६. '-ति' इति१.५॥ १७. '-तो' इति३॥ १८. १प्रतौ नास्ति ॥ १९. 'खनु अवदारणे' इति क्षीरतरङ्गिण्यादयः ॥ २०. '-नति' इति१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ शाम्यन्ति[1] **शम्बूकाः** । 'शम्बूक-'(हैमोणा-६९)इत्यूके निपात्यते । शम्बुको ह्रस्वमध्योऽपि । २ अम्बुमात्रे जले एव जायन्ते **अम्बुमात्रजाः**। "मात्रं त्वधृतौ स्वार्थे कात्स्र्न्ये[2]"[अनेकार्थसङ्ग्रहः२।४३६॥]इति[3] । एकं जलशङ्खस्य ॥१२०५॥

**कपर्दस्तु हिरण्यः स्यात् पणास्थिक-वराटकौ ।**

१ **कपर्दः** महादेवजटाबन्धनामनि(अभिधान-श्लो-२।२००॥)व्युत्पादितः । २ **हिरण्यः** सुवर्णनामसु (अभिधान-श्लो-४।१०४४॥), पुंक्लीबलिङ्गोऽयम्। ३ पणाय व्यवहाराया ऽस्थ्यस्य **पणास्थिकः** । ४ वरं प्रशस्यमटति वराटः । अच्, स्वार्थे कन् [ **वराटकः** ] । "श्वेतः"[शेषनाममाला ४।१७४॥]इति शैषिकम् । त्रीणि 'कोडा[4]' इति ख्यातस्य॥

**दुर्नामा तु दीर्घकोशा[5]**

१ दुर्दुष्टो नामो नमनमस्या **दुर्नामा**, टाबन्तो गङ्गावत् । व्यञ्जनान्तोऽप्ययम् । "दुर्नामा पङ्कशुक्तौ स्त्री दुर्नाम क्लीबमर्शसि"[विश्वलोचनकोशः, नान्तवर्गः, श्लो-१८२]इति श्रीधरः । २ [दीर्घः कोशोऽस्या जलूकाकारत्वाद् **दीर्घकोशा** । दीर्घा कुश्यतीति वा] । जलौकाकारो जलजन्तुरयम्, तस्य द्वे । 'घिरोली' इति भाषा॥

॥ उक्ता द्वीन्द्रियाः ॥

## ॥ त्रीन्द्रियाः ॥

अथ त्रीन्द्रियानाह-

**पिपीलकस्तु पीलकः ॥१२०६॥**

१ पीलति **पिपीलकः[6]** । 'पील प्रतिष्टम्भे'(भ्वा. प.से.), पृषोदरादिः । २ पीलति **पीलकः** । ण्वुल् । मण्डोकानाम्नी द्वे ॥१२०६॥

**पिपीलिका तु हीनाङ्गी**

१ पीलति **पिपीलिका** । पृषोदरादिः। २ हीनमङ्गमस्या **हीनाङ्गी** । कीडीनाम्नी द्वे ॥

**ब्राह्मणी स्थूलशीर्षिका ।**

१ बृंहति **ब्राह्मणी**। अणप्रत्यये साधुः। २ स्थूलं शीर्षमस्याः स्थूलशीर्षी । गौरादिः, ततः कनि 'केऽणः' ७।४।१३॥ इति ह्रस्वत्वम्[7] [ **स्थूलशीर्षिका** ] । मोटामाथानीकीडीनाम्नी द्वे ॥

**घृतेली पिङ्गकपिशा**

१ घृतेन ईर्यते प्रेर्यते **घृतेली** । 'ईर गतिकम्पनयोः' (अ.अ.से.), '-प्रेरणे[8]'( ) वा, घञन्तः, गौरादिः । २ पिङ्गं ह्रीबेरम्, तद्वत् कपिशा **पिङ्गकपिशा** । घीवेलनाम्नी[9] द्वे ॥

**अथोपजिह्वोपदेहिका ॥१२०७॥**

**वम्र्युपदीका**

१ उपलेढि **उपजिह्वा** । 'लिह आस्वादने'(अ. उ.अ.), 'लिहेर्जिह् च'( )इति वः। २ उपदिह्यते मृदया **उपदेहिका[10]** । 'दिह उपलेपे[11]'(अ.उ.अ.), बाहुलकात् करणे ण्वुल्[12], 'प्रत्ययस्थात्-'७।३।४४॥ इतीत्वम् ॥१२०७॥ ३ वमति मृदं **वम्री** । 'टुवम उद्गिरणे'(अ. प.से.), बाहुलकाद् रः, गौरादिः । ४ उप समीपे ददाति **उपदीका** । पृषोदरादिः । उदेहीनामानि[13] चत्वारि॥

**रिक्षा तु लिक्षा**

१ रेषति **रिक्षा[14]**। 'रिष गतौ[15]'(भ्वा.प.से.), 'ऋषिरिषि-'(हैमोणा-५६७)इति कित् सः । २ लत्वे **लिक्षा**। लेढि रसमिति वा। 'लिह आस्वादने'(अ.उ.अ.), बाहुलकात् क्सः। लिश्यतेऽल्पीभवति वा। 'लिश अल्पीभावे'(दि.आ.अ.), बाहुलकात् क्सः । लीखनाम्नी द्वे ॥

**यूका तु षट्पदी ।**

१ यौति मिश्रीभवति कायेन **यूका** । 'यु मिश्रणामिश्रणयोः[16]'(अ.प.से.), 'अजियुधिनीङ्भ्यो(-नीभ्यो) दीर्घश्च'(उणा-३२७)इति कन्, दीर्घत्वं च । २ षट् पादा अस्याः[17] **षट्पदी** । द्वे षट्पद्याः । 'जूं' इति भाषा[18] ॥

१. 'शाम्यति' इति१॥ २. 'कात्स्र्न्ये' इति१.३॥ ३. १.३.४प्रतिषु नास्ति॥ ४ 'कुडा' इति२, 'कवडा' इति२॥ ५. सर्वादर्शेषु दीर्घकोशाशब्दस्य व्युत्पत्तेरभावादत्र चतुष्कोणे स्वोपज्ञटीकायाः पाठः स्थापितः ॥ ६. '-का' इति३.४॥ ७ '-त्वे' इति४.५॥ ८ '-णयोः' इति३॥ ९. '-लि-' इति१॥ १०. 'उपदेहा' इति५॥ ११. 'उपदेहे' इति३, 'दिह उपचये' इति स्वामिसायणौ, 'दिह उपतापे' इति मैत्रेयः॥ १२. 'ल्युट्' इति१॥ १३. 'ऊ-' इति२॥ १४. 'रेषति रिक्षा' इति १.३.४.५प्रतिषु नास्ति ॥ १५. क्षीरतरङ्गिण्यादौ 'कष' इत्यादिदण्डकोऽयं रिषधातुर्हिंसायामर्थे दृश्यते ॥ १६. 'यु मिश्रणे' इति स्वामिमैत्रेयौ ॥ १७ 'अस्य' इति१.२.४.५॥ १८. ''जूं' इति भाषा' इति १.२.४.५प्रतिषु नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**गोपालिका महाभीरुः**

१ गां पलति गच्छति गोपाली । 'पल गतौ' (भ्वा.प.से.), 'कर्मण्यण्'३।२।१॥, 'टिड्ढाणञ्-'४।१।१५॥ इति ङीप्[1], कनि, 'केऽणः'७।४।१३॥ इति ह्रस्वत्वम्, [ **गोपालिका** ] । २ अतिशयेन भीरुः **महाभीरुः** । चींचडीनाम्नी[2] द्वे ॥

**गोमयोत्था तु गर्दभी ॥१२०८॥**

१ गोमयादुत्तिष्ठति **गोमयोत्था** । 'ष्ठा गतिनिवृत्तौ'(अ.प.अ.), 'उदः स्थास्तम्भोः पूर्वस्य'८।४।६१॥, ['झरो झरि सवर्णे'८।४।६५॥, 'खरि च'८।४।५५॥] । २ गर्दभवर्णत्वात् **गर्दभी**। ''गर्दभी[3] क्षुद्ररोगजन्तुविशेषयोः'' [विश्वप्रकाशकोशः, भान्तवर्गः, श्लो-३५]इति महेश्वरः । द्वे गोमयोत्पन्नकीटस्य[4] ॥१२०८॥

**मत्कुणस्तु कोलकुण उद्दंशः किटिभोत्कुणौ ।**

१ माद्यति शोणितेन **मत्कुणः** । 'मदी हर्षे'(दि.प.से.), 'भ्रूणतृण-'(हैमोणा-१८६)इत्यादिना साधुः । २ कोल इव कुणति विदारयति **कोलकुणः**। 'कुण विदारणे[5]'(तु.प.से.), 'इगुपध-'३।१।१३५॥ इति कः। ३ उद्दशति **उद्दंशः** । 'दंश दशने'(भ्वा.प.अ.), अच् । ४ केटति उत्त्रासयति **किटिभः**। 'किट उत्त्रासे'(भ्वा.प.से.), बाहुलकादिभच् । किटिं त्रासं बिभर्तीति वा । 'अन्येभ्योऽ(प्य)पि-'३।२।१०१॥इति डः। ५ उत्कुणति **उत्कुणः** । कुणधातोः 'इगुपध-'३।१।१३५॥ इति कः । 'उत्कण' इत्यकारमध्योऽपि । मांकणनामानि[6] पञ्च ॥

**इन्द्रगोपस्त्वग्निरजो वैराटस्तितिभोऽग्निकः ।१२०९।**

१ इन्द्रेण गुप्यते **इन्द्रगोपः** । 'गुपू रक्षणे'(भ्वा.प.से.), कर्मणि घञ् । २ अग्निवद् रज्यति[7] **अग्निरजः** । पृषोदरादित्वात् । ३ वैरेणाऽटति **वैराटः** । पचाद्यच् । ४ तितीवद् भाति **तितिभः**। 'भा दीप्तौ'(अ.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥, 'ङ्यापोः संज्ञाछन्दसोः-'६।३।६३॥ इति ह्रस्वः। ५ अग्निप्रतिकृतिः **अग्निकः**। 'इवे प्रतिकृतौ' ५।३।९६॥ इति कः । पञ्च इन्द्रगोपस्य ॥१२०९॥

॥ उक्तास्त्रीन्द्रियाः ॥

# ॥ चतुरिन्द्रियाः ॥

अथ चतुरिन्द्रियानाह-

**ऊर्णनाभस्तन्तुवायो[8] जालिको जालकारकः ।**
**कृमिर्मर्कटको लूता लालास्त्रावोऽष्टपाच्च सः ॥१२१०॥**

१ ऊर्णा नाभावस्य **ऊर्णनाभः**। 'अच्'५।४।७५॥ इति योगविभागादच्समासान्तः, 'ङ्यापोः संज्ञाछन्दसोः-' ६।३।६३॥ इति ह्रस्वः । २ तन्तून् वयति **तन्तुवायः** । 'वेञ् तन्तुसन्ताने'(भ्वा.उ.अ.), 'ह्वावामश्च'३।२।३॥ इत्यण्, 'आतो युक्-'७।३।३३॥ । ३ जालमस्त्यस्य **जालिकः** । 'अत इनिठनौ'५।२।११५॥ इति ठन् । ४ जालं करोति **जालकारकः**। ण्वुल्। ५ करोति जालं **कृमिः**। 'कृभूभ्यां कित्[9]'(हैमोणा-६९०)इति मिः। क्रिमिरपि । ६ मर्कटइवाऽऽरोहावरोहाद् **मर्कटकः** । ७ लूयते **लूता** । 'लूम्रोर्वा[10]'(हैमोणा-२०२)इति कित् तः । ८ लालां स्रवति **लालास्रवः**। 'स्रु प्रस्रवणे[11]'(भ्वा.प.अ.), 'कर्मण्यण्' ३।२।१॥ । ९ अष्टौ पादा अस्य **अष्टपाद्** । 'सङ्ख्यासुपूर्वस्य'५।४।१४०॥इति पादान्तलोपः । नव ऊर्णनाभस्य । 'कोलियावडा'[12] इति भाषा ॥१२१०॥

**कर्णजलौका[13-1]( -जलूका ) तु**
**कर्णकीटी[13-2] शतपदी च सा।**

१ कर्णस्य[14] जलूकेव[15] **कर्णजलूका,** टाबन्तः । २ कर्णं कीटयति **कर्णकीटी**। 'कीट वर्णने[16]'(चु.उ.से.), बन्ध इत्यन्ये, चुरादियम्, 'कर्मण्यण्'३।२।१॥, 'टिड्ढाणञ्-'४।१।१५॥ इति ङीप्[17] । ३ शतं बहवः पादा अस्य **शतपदी**। 'कुम्भपद्यादिषु (कुम्भपदीषु) च'५।४।१३९॥

---

१. 'ङीष्' इति१.२.४.५॥ २. 'ची-' इति१.४, 'चींव-' इति२॥ ३. ३.४प्रत्योर्नास्ति ॥ ४ '-ट्रस्य' इति१॥ ५. क्षीरतरङ्गिण्यादौ विदारणेऽर्थे कुणधातुर्न दृश्यते ॥ ६. 'मा-' इति४॥ ७ '-ते' इति३॥ ८ 'तन्त्रवायः' इति मुद्रिताभिधानचिन्तामणौ, स्वोपज्ञटीकाऽपि तमाश्रित्यैव ॥ ९. '-टा' इति१॥ १०. 'हसिमृग्रि-'(उणा-३६६)इत्यादिना तनि, संज्ञापूर्वकत्वाद् गुणाभावे 'लूता' इति सिद्धेऽस्योल्लेखः प्रमादमूलकः प्रतिभाति ॥ ११. '-श्रवणे' इति२.३.४, क्षीरतरङ्गिण्यादौ स्रुधातुर्गतावर्थे दृश्यते ॥ १२. 'कोली-' इति३॥ १३-१. 'कर्णजलौका' इति, १३-२. 'कर्णकीटा' इति च मुद्रिताभिधानचिन्तामणौ, स्वोपज्ञटीकाऽपि तमाश्रित्यैव ॥ १४ 'कर्णज-' इति१॥ १५. '-कैव' इति४॥ १६. 'कीट वरणे' इति स्वामी, 'कीट बन्धने' इति मैत्रेयः, 'कीट वर्णे' इति सायणः ॥ १७ 'ङीष्' इति१.२.४.५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति पादस्याऽन्तलोपो ङीष्[1] च। त्रीणि कान[2]सीयालीति ख्याताया: । अत्र हि सूत्रे[3] मूलटीकायां च पाठविपर्यासो लेखकदोषात् सम्भाव्यते, स च पाठो न शिष्टसम्मत:, यत: कर्णजलौकायास्त्रीन्द्रियत्वसद्भावात् प्रज्ञापनादिभि: सह विरोधात्, तथा च प्रज्ञापनासूत्रप्रथमपदे[4]त्रीन्द्रिया[5]धिकार: ''[6]गोमी (गोम्ही) हत्थिसोंडा''[श्रीप्रज्ञापनोपाङ्गम्, त्रीन्द्रिय-प्रज्ञापना, सू-२८]इत्यादि, ''गोमी (गोम्ही) कर्णशृङ्गा[7]-लिका, जे यावण्णे[8] तहप्पगारा, ये चाऽपि चान्ये तथा प्रकारास्ते सर्वे त्रीन्द्रिया ज्ञातव्या इति शेष:''[श्रीमलयगिर्याचार्यविरचितविवरणम्, पृ.४२]इति तद्वृत्ति[9]: ॥

## वृश्चिको[1] द्रुण[2] आल्या[3]लि[4]:

१ वृश्चतीति **वृश्चिक:** । [ओ]व्रश्चूं[10] छेदने'(तु.प.से.), 'पापुलि '(हैमोणा-४१)इति किदिक:, पुंस्त्रीलिङ्गोऽयम् । २ द्रुणति **द्रुण:** । 'द्रुण हिंसायाम्[11]'(तु.प.से.), 'इगुपध-'३।१।१३५॥ इति क: । द्रुतोऽपि । ३ आलमनाथोंऽऽत्राऽस्ति **आली**। 'अत इनिठनौ'५।२।११५॥ इतीनि:। ''आलं स्यादर्थहरि[12]तालयो:''[अनेकार्थसङ्ग्रह:,२।४६३॥] इत्यनेकार्थ: । ४ अलति **आलि:** । 'अलञ् भूषणादौ'(भ्वा.प.से.), 'कृशृकुटि '(हैमोणा-६१९)इति णिदि: । आली, आलय: इत्यादि हरिवत् । त्रीणि वृश्चिकस्य ॥

## अलं[1] तत्पुच्छकण्टक: ॥१२११॥

१ अलति **अलम्** । पचाद्यच् । तस्य वृश्चिकस्य पुच्छकण्टकस्तत्पुच्छकण्टक: । एकं वृश्चिककण्टकस्य[14] ॥१२११॥

## भ्रमरो[1] मधुकृद्[2] भृङ्ग[3]श्चञ्चरीक[4]: शिलीमुख[5]: इन्दिन्दिरो[6]ऽली[7] रोलम्बो[8] द्विरेफ[9]:

१ प्रतिपुष्पं भ्रमतीति **भ्रमर:**। 'भ्रमु चलने'(भ्वा.प.से.), वासरवदरप्रत्यय: । भ्रमन् रौतीति, पृषोदरादिर्वा । २ मधु करोति[15] **मधुकृत्** । क्विपि, 'ह्रस्वस्य-'६।१।७१॥ इति तुक्। अत्र मधुशब्दो भ्रमरै: कृतस्य मधुन: पर्याय: । यद्वाचस्पति:-

''पौत्तिकं१ भ्रामरं२ क्षौद्रं३ दालौ४द्दालक५माक्षिकम्६।
अर्घ्यं७ छात्रक८मित्यष्टौ जातयोऽस्य पृथग्गुण: ॥१॥
तत्र पौत्तिमुत्तप्तघृताभं विषकीटजं१।
भ्रामरं तु भ्रमरजं पाण्डुरं गुरुशीतलम्२ ॥२॥
[क्षौद्रं तु कपिलं दाहि क्षुद्रानीतं मलावहम् ।
लालं तु दलजं सेव्यं दुर्लभं रूक्षवालकम् ॥३॥
उद्दालकं तु शालाकं विषजिद् मधुराम्लकम् ।
माक्षिकं तु मधु ज्येष्ठं विरूक्षं तैलवर्णकम् ॥४॥
अर्घ्यं तु पूज्यमापाण्डु मनाक् तिक्तं सवालकम् ।
छात्रं त्वेकान्तमधुरं सर्वार्घ्यं राजसेवितम् ॥५॥]''

[[16]]इति । मधुकरोऽपि नाम्नि । ३ द्वौ रेफौ बिभर्त्ति **भृङ्ग:** । [यद्वा] भृज: (बिभर्त्ति) मधु । 'शृङ्गाङ्गभृङ्गा[17]:' (चान्द्रोणा-२।२०॥)इति भृञो गन् नुट् च । ४ चञ्चति, चञ्चूर्यते वा **चञ्चरीक:** । 'शृ(सृ)णीक-'(हैमोणा-५०) इतीके निपात्यते । ५ शिली शल्यं मुखेऽस्य **शिलीमुख:** । शिलीव मुखमस्येति वा । ६ इन्दति कुसुमै: **इन्दिन्दिर:**। 'इदि परमैश्वर्ये'(भ्वा.प.से.), 'स्थविर'(हैमोणा-४१७)इतीरे निपात्यते । ७ अलति अलि: । 'अलञ्[18] भूषणादौ'(भ्वा.प.से.), 'इन् सर्वधातुभ्य:'(उणा-५५७) इतीन्, हरिशब्दवत् । ''मरुति वाति विलासिभिरुन्मद-भ्रमदलौ मदमलौल्यमुपाददे''[शिशुपालवधम्, सर्ग:-६, श्लो-२३]इति माघ: । व्यञ्जनान्तोऽयम्, तत्र अलति भूषयति पुष्पमिति **अली** । 'अलञ्[18] भूषणादौ'(भ्वा.प.से.), बाहुलकात् 'पथिमथिभ्यामिन्(-मिनि:)'(चान्द्रोणा-३।८४) इतीन् (इतीनि:)। अलिनौ, अलिन: इत्यादि। ''मलिनिमालिनि माधवयोषिताम्''[शिशुपालवधम्, सर्ग:-६, श्लो-४]इति माघ:। ८ रुवन्[19] लम्बते **रोलम्ब:** । 'लबि अविस्रंसने [च]'(भ्वा.आ.से.), पृषोदरादि:। ९ द्वौ रेफौ 'भ्रमर' इति नाम्नि अस्य **द्विरेफ:** । एते पुंस्त्रीलिङ्गा:। भसलो[20] देश्याम्, संस्कृतेऽपि। नव द्विरेफस्य ॥

## अस्य षडंह्रय: ॥१२१२॥

१ अस्य भ्रमरस्य षड् अंह्रयश्चरणा:, तत: षडंह्रि:, षट् पद:, षट्चरण इत्यादि सिद्धम् ॥१२१२॥

---

१. 'ङीष्' इति१.३.५॥ २. '-सिलाया-' इति३, '-सिलायीति' इति५॥ ३. इतोऽग्रे १प्रतौ 'च' इति दृश्यते॥ ४ '-प्रथमपद-' इति१.२ विना ॥ ५. '-तृतीया ' इति३॥ ६. 'गा-' इति४.५॥ ७. '-शृगा-' इति४॥ ८. 'वन्ने' इति४॥ ९. 'वृत्ति:' इति३॥, ''गोम्ही-कर्मसियालिया, 'ये यावन्ने तहप्पगारा' येऽपि चान्ये तथाप्रकारास्ते ते सर्वे त्रीन्द्रिया ज्ञातव्या इति शेष:'' इति विवरणे दृश्यते, पृ.४२॥ १०. '-श्चूञ्' इति१॥ ११. 'हिंसागतिकौटिल्येषु' इति क्षीरतरङ्गिण्यादय: ॥ १२. '-हर-' इति५॥ १३. 'सर्वधातुभ्य इन्'(उणा-५५७)इत्यनेनाऽपि सिद्धिर्भवत्येव ॥ १४. '-कण्टस्य' इति१॥ १५. '-तीति' इति१॥ १६. द्र. स्वोपज्ञटीका४।१२१४॥, पृ.२७२॥ १७. 'भृञ: किन्नुट् च'(उणा-१२२)इति पाणिनीयसम्मतोणादिगण ॥ १८. 'अलॉं' इति स्वामी, 'अलॅं' इति मैत्रेय:, 'अल' इति सायण:॥ १९. 'रुदन्' इति३॥ २०. 'भसदलो' इति२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**भोज्यं तु पुष्प-मधुनी**

१ अस्येत्यत्राऽपि सम्बन्धनीयम्, अस्य भ्रमरस्य भोज्यं **पुष्पम्, मधु** च, तेन पुष्पलिट्, पुष्पन्धयः, मधुलिट्, मधुपः, मधुव्रत इत्यादि सिद्धम् ॥

**खद्योतो ज्योतिरिङ्गणः ।**

१ खे द्योतत इति **खद्योतः**। 'द्युत दीप्तौ'(भ्वा.आ.से.), अच् । खं द्योतयतीति । 'कर्मण्यण्'३।२।१॥ वा। २ ज्योतिस्तारका, तद्वदिङ्गति चलति, ज्योतिर्युक्तमिङ्गतीति वा **ज्योतिरिङ्गणः** । 'इगि गतौ'(भ्वा.प.से.), 'चलनशब्दार्थात्-'३।२।१४८॥इति युच् । खजूआनाम्नी[१] द्वे॥

''खद्योते तु कीटमणिर्ज्योतिर्माली तमोमणिः ।
परार्बुदो निमेषद्युत् ध्वानभित्[२] ॥'' [शेषनाममाला-४।१७५॥]इति शेषः[३] ॥

**पतङ्गः शलभः**

१ पतति वह्नाविति **पतङ्गः** । 'पत्लृ पतने'[४](भ्वा.प.से.), '[५]पतेरङ्गच्-'(उणा-११६)। २ शलते[६] **शलभः** । 'शल चलनसंवरणयोः'(भ्वा.आ.से.), भौ[७] आत्मनेपदी, 'कृशृशलिकलिगर्दिभ्योऽभच्'(उणा-४०२)। द्वे पतङ्गस्य । शलभशब्दः तिड्डुपर्यायोऽपि । यद्देशीसूत्रम्-'तिड्डौ सलहपिसल्ला'( )इति, 'शलभः पिशाचश्च'[ ]इति तट्टीका । शलभच्छायमित्यत्र तिड्डानां छायेत्यर्थः । पुनर्यथा-

''अतिवृष्टिरनावृष्टिर्मूषकाः शलभाः शुकाः ।
अत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः[८] ॥१॥''
[मा.भा. ५।२०]इति ॥

**क्षुद्रा सरघा मधुमक्षिका ॥१२१३॥**

१ क्षुणत्यङ्गं **क्षुद्रा** । 'क्षुदिर् संपेषणे'[९](रु.उ.अ.), 'स्फायि-'(उणा-१७०)इति रक्, टाप् । २ सरन्तीं, वा घातयति **सरघा** । ण्यन्ताद् हन्तेर्डः, 'सुप् सुपा'२।१।४॥ इति समासे, पृषोदरादित्वात् साधुता । 'मक्ष सङ्घाते'(भ्वा.प.से.), 'क्वुन् शिल्पिसंज्ञयोः'(उणा-१९०)इति क्वुनि, टापि, 'प्रत्ययस्थात्-'७।३।४४॥ इतीत्वे मक्षिका, मधुकारिणी, मधुवर्णा वा मक्षिका **मधुमक्षिका** । मधुपू[१०]डामाखीनामानि त्रीणि ॥१२१३॥

**माक्षिकादि तु मधु स्यात्**

१ मक्षिकाभिः कृतं **माक्षिकम्** । 'नाम्नि मक्षिकादिभ्यः[११]'(हैमसू-६।३।१९३॥)इत्यण् । आदिग्रहणात् पौत्तिकादि । २ मन्यतेऽभिलष्यते **मधु**, क्लीबे । पुंस्यपि वैजयन्ती, यदाह-''मधूलं तु मधुर्न स्त्री मधुकं तत्पुरातनम्'' [वैजन्तीकोषः३।८।१३४॥]इति । एकं माक्षिकादिमधुनः[१२] ॥

**मधूच्छिष्टं तु सिक्थकम्[१३] ।**

१ मधुनः उच्छिष्टं कल्कः **मधूच्छिष्टम्** । २ सिच्यते सिक्थम् । 'षिचिर्[१४] क्षरणे'(तु.उ.अ.), 'नीभू-(नू)रमि'(हैमोणा-२२७)इति कित् थः, कनि **सिक्थकम्** । कन्नभावे सिक्थम् । मदनोऽपि । ''मदनः स्मर[१५]धत्तूरवसन्तद्रुमसिक्थके''[विश्वलोचनकोशः, नान्तवर्गः, श्लो-१०४]इति श्रीधरः । [१६]मीणनाम्नी द्वे ॥

**वर्वणा मक्षिका नीला**

१ वणति शब्दायते वणा । 'वण अण रण वण भण शब्दार्थाः[१७]'(भ्वा.प.से.), अचि, टाप् । वृणीते पूतिद्रव्यं भजत इति वर् । 'वृञ् वरणे'(स्वा.उ.से.), विच्प्रत्ययः, ततः कर्मधारये **वर्वणा** । वर्वतीति वा वर्वणा । नन्द्यादित्वाल्ल्युः । २ मक्षति **मक्षिका** । 'म्रक्ष सङ्घाते' (भ्वा.प.अ.)इत्यत्र [१८]मक्षमपि केचित् पठन्ति, ततः कृञादिभ्यो वृनि, टापि[१९] । ''नीला काचवर्णा । नीलेति मक्षिकाविशेषणम्, अत एव 'नीलात् प्राण्यौ(ण्यो)षध्योः' (चान्द्र-सू-२।३।३९॥)इति नित्यं[२०] ङीष्प्राप्तेः नीलेति टाबन्तपाठो

---

१. '-या-' इति२॥ २. 'ध्वान्तचित्रः' इति१.२, शेषनाममालास्वोपज्ञटीकयोः ३. 'इति शेषः' इति १.३.४.५प्रतिषु नास्ति ॥ ४ 'शल हुल पत्लृ गतौ' इति क्षीरतरङ्गिण्यादयः ॥ ५. 'पतते-' इति१.२.४.५॥ ६. '-ति' इति३॥ ७ 'भ्वादी' इति २, 'भौवादिकः' इति४॥ ८ द्र. अम.क्षीर.३।३।६८॥, पृ.२८६॥ ९. 'संप्रे-' इति३॥ १०. '-पु-' इति३॥ ११. पाणिनीये 'संज्ञायाम्'४।३।११७॥ इत्यनेनाऽण् बोध्यः ॥ १२. इतोऽग्रे सर्वादर्शेषु 'मधु इति' इति दृश्यते, तत्त्वधिकः प्रतिभाति ॥ १३. तुलनीयोऽमरकोषः२।९।१०७॥ १४. 'षिच' इति क्षीरतरङ्गिण्यादयः ॥ १५. 'स्मरधत्तूरः' इति१.३॥ १६. 'मैण-' इति३, 'मणी-' इति५॥ १७ 'अण रण वण भण मण कण क्वण व्रण भ्रण ध्वण शब्दार्थाः' इति सायणः, तत्र 'भण' इति स्वामिना, 'ध्वण' इति मैत्रेयेण च नोक्तः ॥ १८. 'मा-' इति३॥ १९. 'टापि' इति४.५॥ २०. १प्रतौ नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लेखकप्रमादजः''[[1]]इति सुभूत्यादयः। ''नील्या रक्तेव नीला। '-अन्'(वा-४।२।२॥)इत्यन् । अत एव ''कुवलयदलनीला कोकिला''[[1]]इति प्रयोगः, अतो न ङीषिति[2] समाधेयम् । यदा तु नामत्रयं तदा 'वा संज्ञायाम्'(वा-४।१।४२॥)इति [3]ङीषन्ताच्च पक्षे युक्त एव टाप्''[[1]]इति मिश्राः । नीलीमाखीनाम एकम् ॥

## पुत्तिका[1] तु पतङ्गिका[2] ॥१२१४॥

१ पुदिति शब्दं तनोति पुत्ता । 'अन्येभ्यो(ष्व)-पि-'३।२।१०१॥ इति डः, टाप्, कनि, 'प्रत्ययस्थात्-' ७।३।४४॥ इतीत्वम्। पूता (पूना?) यवा इतिवत् पूञो विनाशार्थे, पुनाति वेधनेन विनाशयति, 'अन्येभ्योऽपि-' ३।२।१७८॥ इति[4] क्विप्, दृशिग्रहणाद् ह्रस्वत्वे तुक् [पुत्]। पूतमतीतं तोकते याति । ककिवकिमकीत्यादिना दण्डकपठिताद् गत्यर्थाद् 'इगुपध-'३।१।१५॥ इति कः, 'सुप्सुपा'( )इति कर्मधारये वा **पुत्तिका** । २ पतेति, [पतति। 'पतेरङ्गच्'(उणा-११६)इत्यङ्गच्] । इवार्थेऽल्पार्थे कुत्सार्थे वा[5] कनि के वा **पतङ्गिका** । पूतिनाम्नी द्वे। ''मधुमक्षिकाभेदोऽयम्''[अम.क्षीर.२।५।२८॥]इति क्षीरस्वामी । यत्तिभिः-

''माक्षिकं तैलवर्णं स्यात् घृतवर्णं तु पौत्तिकम् ।
भ्रामरं तु भवेच्छुक्लं क्षौद्रं च कपिलं भवेत् ॥१॥''
[[8]]इति। इह प्रस्तावादनुक्तेऽपि मक्षिकानाम्नी इमे ''मक्षिका१ भम्भराली२ स्यात्''। हारावली, पादावधिः, श्लो-२४(१२४)] इति हारावली[1] ॥१२१४॥

## वनमक्षिका तु दंशः[1]

१ वनस्य मक्षिका वनमक्षिका । दशति **दंशः** । अच्। ''दंशवंशमशकेशपाशकाः''[[10]]इति शभेदात् तालव्यान्तः । एकं दंशस्य ॥

## दंशी[1] तज्जातिरल्पिका ।

१ दशति **दंशी** । अपचयविवक्षायां 'जातेः-' ४।१।६३॥ इति ङीप् । तज्जातिर्दंशजातीया, अल्पिका लघुः । कुन्तीनाम एकम् ॥

## तैलाटी[1] वरटा[2] गन्धोली[3] स्यात्

१ तैलमटति **तैलाटी**। 'कर्मण्यण्'३।२।१॥, 'टिड्ढाणञ्-'४।१।१५॥ इति ङीप् (ङीप्) । २ वृणीते **वरटा**, पुंस्त्री । 'वृङ् संभक्तौ'(क्र्या.उ.से.), 'शकादिभ्योऽटन्'(उणा-५२१)। ङीषि वरट्यपि । ३ गन्धयत्यर्दयति **गन्धोली** । 'गन्ध अर्दने'(चु.आ.से.), बाहुलकात् पटोलवदोलच्, गौरादित्वाद् ङीष् । गन्धमालाति, 'आतः-'३।२।३॥ इति योगविभागात् कः, ङीषि । ''गन्धालीत्येके''[अम.क्षीर. २।५।२८॥]इति स्वामी । पीलीभमरीनामानि त्रीणि ।

## चीरी[1] तु चीरुका[2] ॥१२१५॥

## झिल्लीका[3] झिल्लिका[4] वर्षकरी[5] भृङ्गारिका[6] च सा ।

१ चिनोति कटुशब्दं **चीरी** । 'चिञ् चयने'(स्वा.उ.आ.), शुषिचिञ्भ्यां रक्(क्रन्)दीर्घत्वे,[12] गौरादित्वाद् ङीष् । 'ची' इति [13]रिणातीति[14] वा, रिधातोः 'क्वचिड्डः'(हैमसू-५।१।१७१॥)इति डः। २ चीति रौति **चीरुः**। 'रु शब्दे' (अ.प.अ.), मित्रय्वादित्वात् कुः, कनि **चीरुका**। ''झीति रौतीति झीरुका''[पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२४३]इति मिश्राः ॥१२१५॥ ३ झिल्ली वाद्यभेदस्तद्वत् कायति[15] शब्दायत इति[16] **झिल्लीका** । 'कै शब्दे' (भ्वा.प.अ.), बाहुलकाड्डुः । ४ बाहुलकाद् ह्रस्वत्वे **झिल्लिका** । ''झिल्ली वाद्यभेदः, तत्तुल्यशब्दाद् झिल्लीव । कनि, 'केऽणः'७।४।१३॥ इति ह्रस्वत्वे [टाप्] झिल्लिका'' [पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२४३]इति मिश्राः। झिल्लीत्यपि ।

''दूती विद्युदुपासिता सहचरी रात्रिः सहस्थायिनी ।
दैवज्ञो दिशति स्वनेन जलदः प्रस्थानवेलां शुभाम् ।
वाचं माङ्गलिकीं तनोति तिमिरस्तोमोऽपि झिल्लीरवैर्जातोऽयं दयिताभिसारसमयो मुग्धे! विमुञ्च त्रपाम् ॥१॥''
[ ]इति भानुदत्तः[17]। ५ वर्षं वृष्टिं करोति **वर्षकरी**। 'कृञो हेतु-'३।२।२०॥ इति टः। ६ आकृत्या भृङ्गमियर्ति **भृङ्गारिका** । तिमिरीनामानि षट् ॥

॥ उक्ताश्चतुरिन्द्रियाः ॥

१. द्र. पदचन्द्रिका, भा २, सिंहादिवर्गः, श्लो-२४१, पृ.३११-३१२॥ २. 'ङीति' इति२, 'ङीबिति' इति३॥ ३. 'ङीब-' इति३॥ ४. इतोऽग्रे ५प्रतौ 'डः' इति दृश्यते ॥ ५. १प्रतौ नास्ति ॥ ६. 'यत्त्रिभिः' इति क्षीरस्वामिटीकायाम् ॥ ७. 'रौ-' इति१॥ ८. द्र. अम.क्षीर.२।५।२८॥, पृ.१३०॥ ९. '-लीकाः' इति३॥ १०. द्र. पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२४२, पृ.३१३॥ ११. '-शी-' इति४.५॥ १२. '-त्वं' इति५, 'शुसिचिमीनां दीर्घश्च'(उणा-१८२)इत्युणादिगणसूत्रम् ॥ १३. 'री-' इति१॥ १४. 'रिणाति' इति४.५॥ १५. '-ते' इति१॥ १६. १.२प्रत्योर्नास्ति ॥ १७. 'भागुरिः दत्तः' इति५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥ पञ्चेन्द्रियाः, तत्र स्थलचरपञ्चेन्द्रियाः ॥

अथ पञ्चेन्द्रियान् स्थलचर-खचर-जलचरभेदभिन्नान् क्रमेणाह-

**पशुस्तिर्यङ् चरिः**

१ पश्यति पाशदण्डाभ्यां हिताहितमिति **पशुः**। 'दृशिर् प्रेक्षणे'(भ्वा.प.अ.), 'अर्जिदृशि-'(उणा-२७) इत्युः[1] प्रत्ययः, पशादेशश्च (पशिरादेशश्च)। "पशेः सौत्रधातोः 'अपष्ट्वादयः'(कातन्त्रोणा-१।१६)इति कुः[2]"[ ] इति सुभूतिः। २ तिरोऽञ्चति **तिर्यङ्** । 'ऋत्विक्-' ३।२।५९॥ आदिना क्विन्[3], 'तिरसस्तिर्यलोपे'६।३।९४॥ इति तिरिआदेशः । तिर्यञ्चौ, तिर्यञ्चः इत्यादि । ३ चरति **चरिः**। 'चर गतौ'(भ्वा.प.से.), 'इन् सर्वधातुभ्यः[4]'(उणा-५५७), हरिवत् । सामान्येन त्रीणि पशोः ॥

**हिंस्रेऽस्मिन् व्यालः श्वापदोऽपि च ॥१२१६॥**

१ अस्मिन् पशौ व्याघ्रादिके हिंस्रे हिंसनशीले, विशेषेण आ समन्तादडति उद्यमं करोति व्याडः । विआङ्पूर्वः 'अड उद्यमे'(भ्वा.प.से.), अच्, डलयोरेकत्वस्मरणाद् **व्यालः** । विविधमालमनर्थोऽस्माद्वा[5] । विशेषेण आलातीति वा । 'दा दाने'(अ.प.अ.), 'आतश्चोपसर्गे कः[6]'३।१।१३६॥ इति कः। २ शुनः पदमिव पदमस्य **श्वापदः** । 'शुनो दन्तदंष्ट्रा-'(वा-६।३।१३०॥)इति दीर्घत्वम् । द्वे सामान्येन हिंस्रपशोः ॥१२१६॥

॥ हस्तिवर्गः ॥

**हस्ती मतङ्गज-गज-द्विप-कर्य-ऽनेकपा**
**मातङ्ग-वारण-महामृग-सामयोनयः ।**
**स्तम्बेरम-द्विरद-सिन्धुर-नाग-दन्तिनो**
**दन्तावलः करटि-कुञ्जर-कुम्भि-पीलवः ॥१२१७॥**
**इभः करेणुर्गर्जैः**

१ हस्तकार्यकरणात् शुण्डोऽपि हस्तः[7] करः, तद्योगाद् **हस्ती** । 'हस्ताज्जातौ'५।२।१३३॥ इतीनिः । २ मतङ्गाद्दृषेर्जातो **मतङ्गजः** । 'जनी प्रादुर्भावे'(दि.आ.से.), 'पञ्चम्यामजातौ'३।२।९८॥ इति डः । ३ गजति माद्यति **गजः**। 'गज मदे[9]'(भ्वा.प.से.), अच्। गजति गर्जतीति[10] वा । 'गज गर्जने[11]'(भ्वा.प.से.), अच् । ४ द्वाभ्यां पिबति **द्विपः**। 'पा पाने'(भ्वा.प.अ.), 'सुपि-'३।२।४॥ इति योगविभागात् कः । ५ करोऽस्याऽस्ति **करी**। 'अत इनिठनौ'५।२।११५॥ इतीनिः । ६ करेण मुखेन च पानात्र एकेन पिबति **अनेकपः** । 'सुपि-'३।२।४॥ इति कः। ७ मन्यतेऽसौ **मातङ्गः** । 'मनु(मन) ज्ञाने'(दि.आ.अ.), 'मनेर्मत्-मातौ च'(हैमोणा-१००)इत्यङ्गः । मतङ्ग एव वा, स्वार्थेऽण् । ८ वारयति परबलं **वारणः** । 'वर निवारणे'( ), णिजन्तः, नन्द्यादित्वाल्ल्युः । ९ महांश्चासौ मृगश्च **महामृगः** । १० साम वेदो योनिः कारणमस्य **सामयोनिः**, हरिवत् । ११ स्तम्बे तृणादिगुच्छे रमते **स्तम्बेरमः** । 'रमु क्रीडायाम्'(भ्वा.आ.अ.), 'स्तम्बकर्णयो रमिजपोः'३।२।१३॥ इत्यच्, 'हल[द]न्तात्'६।३।९॥ इत्यलुक् । १२ द्वौ रदौ दृश्यमानावस्य **द्विरदः** । १३ स्यन्दते मदेन **सिन्धुरः** । 'स्यन्दू प्रश्रवणे[12]'(भ्वा.आ.वे.), 'श्वशुर-'(हैमोणा-४२६)इत्युरे साधुः । सिन्धुर्मदोऽस्यास्तीति वा सिन्धुरः[13]। मध्वादित्वाद् 'ऊषशुषि-'( )इति रः। १४ नगो वृक्षः, स इव दृश्यत इति शैषिकेऽणि **नागः** । नगे पर्वते भवो वा । 'तत्र भवः'४।३।५३॥ इत्यण् । १५ प्रशस्तदन्तयोगाद् **दन्ती** । 'अत इनिठनौ' ५।२।११५॥ इतीनिः। १६ प्रशस्तौ दन्तावस्य स्त इति **दन्तावलः** । 'दन्तशिखात् संज्ञायाम्'५।२।११३॥ इति वलच्, 'वले'६।३।११८॥ इति दीर्घे वलच्यपि[14] । १७ करटः कपोलोऽस्त्यस्य **करटी** । 'अत इनिठनौ'५।२।११५॥। १८ कुञ्जो दन्तो हस्तिहनुश्च[15], तद्योगात्, '-खनखमुखकुञ्जेभ्यश्च[16]-'(वा-५।२।१०७॥)इति रः, [**कुञ्जरः**],

---

१. '-त्युप्र-' इति२ ॥ २. 'इति कुः' इति १प्रतौ नास्ति ॥, द्र, पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२२६, पृ.२९०॥, तत्र इतोऽग्रे "शकन्ध्वादित्वात् (वा-६।१।९४॥)कुः" इत्यधिकं दृश्यते ॥ ३. '-प्' इति३.५॥ ४. 'सर्वधातुभ्य इन्'(उणा-५५७)इत्युणादिगणसूत्रम् ॥ ५. '-द् व्यालः' इति१.३॥ ६. 'कः' इत्यष्टाध्याय्यां न दृश्यते ॥ ७. १प्रतौ नास्ति ॥ ८. '-स्तक-' इति१.३॥ ९. 'मदने च' इति क्षीरतरङ्गिण्यादयः ॥ १०. '-यतीति' इति२॥ ११. 'गज गर्जने' इति १प्रतौ नास्ति ॥ १२. '-स्रवणे' इति स्वमामिमैत्रेयौ, 'प्रस्रवणे' इति सायणः ॥ १३. १.२प्रत्योर्नास्ति ॥ १४. वलच्यपित्रादेः'३।२।८२॥इति दीर्घत्वे हैमसम्मतसूत्रम् ॥ १५. '-नखश्च' इति१॥ १६. 'रप्रकरणे खमुखकुञ्जेभ्य उपसंख्यानम' इति वार्तिकस्वरूपम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुंक्लीबलिङ्गः । कौ जीर्यतीति पृषोदरादित्वाद् वा। **१९** कुम्भावस्य स्तः **कुम्भी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः । **२०** पीयते दृशा **पीलुः** । 'पीङ् पाने' (दि.आ.अ.), 'पीङः कित्'(हैमोणा-८२१)इति लुः ॥१२१७॥ **२१** एति परबलाभिमुखमिति **इभः** । 'इण् गतौ'(अ.प.अ.), 'इणः कित्'(उणा-४३३)इति भः । **२२** करोति प्रमोदं **करेणुः,** पुंस्त्री । 'कृहभूः'(हैमोणा-७७२)इत्येणुः । के मस्तके रेणुः सिन्दूररजोऽस्येति वा । **२३** गर्जति **गर्जः** । 'गर्ज गर्जने'(भ्वा.प.से.), अच् । सामान्येन त्रयोविंशतिर्हस्तिनः ॥

शेषश्चात्र-

"अथ कुञ्जरे ।
पेचकी[१] पुष्करी पद्मी[२] पिचिलः[३] सूचिकाधरः ।
विलोमजिह्वोऽन्तःस्वेदो महाकायो महामदः ॥१॥
सूर्पकर्णो जलाकाङ्क्षो जटी[४] च षष्टिहायनः ।
असुरो दीर्घपवनः शुण्डालः कपिरित्यपि ॥२॥"
[शेषनाममाला४।१७५-१७७॥] ॥

## अस्य स्त्री धेनुका वशाऽपि[५] च ।

१ अस्य हस्तिनः स्त्री, हस्तिनीत्यर्थः, धेनुरिव सुखसाधनाद् **धेनुका** । 'इवे प्रतिकृतौ'५।३।९६॥ इति कः (कन्)। २ उश्यते काम्यते[६] **वशा** । 'वश कान्तौ' (आ.प.से.), 'वशिकरण्योश्च(वशिरण्योश्च)' (वा-३।३। ५८॥)इत्यप् । वष्टि कामयते, पचाद्यचि वा । 'वशा वन्ध्यासुता[७] ज्योत्स्ना स्त्री गवी[८] करिणी ध्रुवा[९]"[विश्वप्रकाशकोशः, शान्तवर्गः, श्लो-१]इति तालव्यान्तेषु विश्वात् । द्वे हस्तिन्याः । शेषश्चात्र-"वशायां वासिता[१०] कर्णधारिणी गणिकाऽपि च"[शेषनाममाला४।१७७]इति ॥

## भद्रो मन्दो मृगो मिश्रश्चतस्रो गजजातयः ॥१२१८॥

१ **भद्रः** सर्वलक्षणकल्याणत्वात्[११] । २ **मन्दः** मन्दत्वात् । ३ **मृगः** मृग इव हीनसत्त्वात् । ४ **मिश्रः** सङ्कीर्णजातिः । चतसृणां गजजातीनां प्रत्येकं नाम ॥१२१८॥

## कालेऽप्यजातदन्तश्च स्वल्पाङ्गश्चापि मत्कुणौ ।

१ कालेऽपि प्रभूतवयस्यपि योऽनुत्पन्नदन्तः, खर्वाङ्गश्चाऽपि यः, तौ **मत्कुणौ** । माद्यन् कुणति मत्कुणः । पृषोदरादिः । द्वयोरेकशेषे मत्कुणौ ॥

## पञ्चवर्षो गजो बालः

१ बलति दुःसाध्य[१२]कार्याच्चलति **बालः** । बलू खलू कामधेनू[१३] । अच् । एकं पञ्चवर्षहस्तिनः । 'छावडु'[१४] इति[१५] भाषा ॥

## स्यात् पोतो दशवर्षकः ॥१२१९॥

१ पूयते पुनाति वा **पोतः** । 'पूञ् पवने'(क्र्या. उ.से.), 'हसिमृग्रिण्-'(उणा-३६६)इति बाहुलकात् तन्[१६] । एकं दशवर्षहस्तिनः ॥१२१९॥

## विक्को विंशतिवर्षः स्यात्

१ विक्के[१७]ऽवयववान् **विक्कः** । 'विचिर् पृथग्भावे' (रु.उ.अ.), 'विचिपुषि[१८]-'(हैमोणा-२२)इति कित् कः । पिक्कोऽपि । एकं विंशतिवर्षहस्तिनः ॥

## कलभस्त्रिंशदब्दकः ।

१ कीर्यते क्षिप्यते **कलभः** । 'कॄ विक्षेपे'(तु. प.से.), 'कृशृशलि[१९]कलिगर्दिभ्योऽभच्[२०]'(उणा-४०२) । 'कल शब्दसङ्ख्यानयोः'(भ्वा.आ.से.) अतो वाऽभच् । एकं त्रिंशद्वर्षभस्य ॥

## यूथनाथो यूथपतिः

१ वनकरिणां यूथस्य वृन्दस्य यो नाथ ईश्वरः [**यूथनाथः**] । २ महाबलवत्त्वात् स **यूथपतिः** । द्वे यूथपतिहस्तिनः ॥

## मत्ते प्रभिन्न-गर्जितौ ॥१२२०॥

१ माद्यति स्म **मत्तः** । 'मदी हर्षे'(दि.प.से.), क्तः, तत्र । २ प्रकर्षेण भिन्नो मदेन सङ्गतः **प्रभिन्नः** । प्रभिद्यते स्म गण्डपाल्यामिति वा[२१] । ३ गर्जा सञ्जाताऽस्य

१. 'पेचि-' इति३॥ २ '-द्मा' इति५॥ ३. 'पिच-' इति३, 'पेचिलः' इति शेषनाममालास्वोपज्ञटीकयोः ॥ ४ '-डी' इति१॥ ५. 'वसा-' इति१.३॥ ६. 'क-' इति४.५॥ ७. '-तो' इति४॥ ८. '-वा' इति४.५॥ ९. 'ध्रुवा' इति१.३॥, "वशा वन्ध्यासुतायोषास्त्रीगवीकरिणीषु च" इति विश्वप्रकाशकोशे दृश्यते. पृ.१६७॥ १०. 'वाशि-' इति२.५॥ ११. '-कत्वात्' इति३॥ १२. '-ध्यं' इति२॥ १३. धातुपाठोऽयं प्रतिभाति ॥ १४. '-डौ' इति३, '-डुं' इति४, '-उं' इति५॥ १५. 'इत्यादि' इति३॥ १६. '-ञ्' इति४.५॥ १७. 'विविक्ते' इति१.२, 'वेवेक्ति' इति४.५॥ १८. '-युषि' इति१.२.४.५॥ १९. '-शालि-' इति३॥ २०. 'कृशृशलिकलिगर्दिभ्योऽभच्'(४०२)इत्युणादिगणसूत्रम् ॥ २१. ३.४.५प्रतिषु नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**गर्जितः** । 'तदस्य सञ्जातम्[१]-'५।२।३६॥ इतीतच् । गर्जति स्मेति वा । 'गर्ज शब्दे'(भ्वा.प.से.), क्तः । लग्नोऽपि । ''लग्नः प्रभिन्नो मत्तः स्यात्''[हलायुधकोशः२।२२०॥]इति हलायुधः । त्रीणि मत्तेभस्य[२] ॥१२२०॥

## मदोत्कटो मदकलः

१ मदेन दानाम्बुनोत्कटः **मदोत्कटः**[३] । २ मदेन कलो मनोज्ञः **मदकलः** । मदवहतो[४] हस्तिनो द्वे ॥

## समावुद्भ्रान्तनिर्मदौ ।

१ उद्भ्रमति स्म मदम् **उद्भ्रान्तः** । २ निर्गतो मदाद् **निर्मदः**। उपात्त इत्यपि । ''उपात्तो मदवर्जितः''[हलायुधकोशः२।२२०]इति हलायुधः । द्वे मदरहितेभस्य ॥

## सज्जितः कल्पितः

१ युद्धाय सज्ज्यते प्रगुणीक्रियते स्म **सज्जितः**[७] । 'षस्ज गतौ[८]'(भ्वा.उ.से.), 'निष्ठा'३।२।१०२॥ इति क्तः । २ कल्प्यते[९] स्म **कल्पितः** । 'कृपू सामर्थ्ये'(भ्वा.आ.वे.)। द्वे आरोहणाय [१०]सज्जितेभस्य ॥

## तिर्यग्घाती परिणतो गजः ॥१२२१॥

१ तिर्यग्घातीति तिर्यग्दत्तप्रहारः, परिणमति स्म **परिणतः** । एकं तिर्यग्दत्तप्रहारेभस्य ॥१२२१॥

## व्यालो दुष्टगजः

१ विविधमालमनर्थोऽस्मादिति **व्यालः** । २ दुष्टश्चासौ गजश्च **दुष्टगजः** । द्वे दुष्टगजहस्तिनः ॥

## गम्भीरवेद्यवमताङ्कुशः ।

१ गाम्भीर्येण वेदयति **गम्भीरवेदी** । विदेर्णिजन्ताद् ग्रहादित्वाण्णिनिः । यदुक्तम्-

''त्वग्भेदाच्छोणितस्रावादामांसव्यथनादपि ।
संज्ञां न लभते यस्तु गजो गम्भीरवेद्यसौ ॥१॥''

[[११]]इति[१२] । २ अवमतमवगणितम[१३]ङ्कुशमनेन **अवमताङ्कुशः** । द्वे मदभि[१४]न्नाहस्तिनः ॥

## राजवाह्यस्तूपवाह्यः

१ राज्ञा वाह्यते आरोहणयोग्यत्वाद् **राजवाह्यः** । २ उप समीपे वाह्यते **उपवाह्यः** । वहेर्णिजन्ताद् 'ऋहलोर्ण्यत्'३।१।१२४॥ । 'औपवाह्य' इत्यन्ये । ''औ[१५]पवाह्यो राजवाह्यः''[हलायुधकोशः२।२२४॥]इति हलायुधः । ''द्वौ समौ, वाह्यानां समीपे भव औपवाह्यः''[ ]इति तट्टीका । द्वे रा[१६]जयोग्यहस्तिनः ॥

## [१७]सन्नाह्यः समरोचितः ॥१२२२॥

१ सन्नाह्यते **सन्नाह्यः** । 'ऋहलोर्ण्यत्'३।१।१२४॥ । सन्नाहे साधुर्वा । समरे सङ्ग्रामे उचितः **समरोचितः** । द्वे [१८]रणार्हहस्तिनः ॥१२२२॥

## उदग्रदन्नीषादन्तः

१ उदग्रौ दीर्घौ दन्तावस्य **उदग्रदन्** । 'अग्रान्तशुद्धशुभ्र-'५।४।१४५॥ इति दन्तस्य दत्रादेशः । २ ईषाकारौ दन्तावस्य **ईषादन्तः**। ''ईषादन्तैः[१९] कुञ्जरं शात्रवीयम्'' [शिशुपालवधम्, सर्गः-१८, श्लो-३८]इति माघः । द्वे लम्बदन्तेभस्य ॥

## बहूनां घटना घटा ।

१ बहूनां हस्तिनां घटना रचना, 'घट चेष्टायाम्' (भ्वा.आ.से.), 'घटिवन्दि-'( )इति युच् । घट्यते **घटा** । घञर्थे कः । एकं गजघटायाः ॥

## मदो दानं प्रवृत्तिश्च

१ माद्य[२०]त्यनेन **मदः** । 'मदी हर्षे'(दि.प.से.), '**मदो**ऽनुपसर्गे'३।३।६७॥ इत्यप् । मदयतीति पचाद्यचि वा। ''व्यधि(व्यध)जपोरनुपसर्गे'३।३।६१॥ इत्यत्रै[२१]व मदिग्रहणे कर्तव्ये पृथक्सूत्रकरणान्माद इत्यपि घञ्''[ ]इति[२२] ।

---

१. '-ता-' इति५॥ २. १प्रतौ नास्ति ॥ ३. तुलनीयोऽमरकोषः २।८।३५-३६॥ ४ '-न' इति३॥ ५. '-दो' इति५॥ ६. 'सर्जितः' इति१॥ ७. 'सर्जितः' इति३॥ ८. १.५प्रत्योर्नास्ति, 'सर्पणे' इति२, 'सङ्गे' इति३, 'गुञ्ज षस्ज गतौ' इति क्षीरतरङ्गिण्यादयः॥ ९. 'कल्पते' इति१.३॥ १०. 'सर्जि-' इति१॥ ११. द्र. स्वोपज्ञटीका४।१२२२॥, पृ.२७४॥ १२. १.३.४.५प्रतिषु नास्ति॥ १३. '-गु-' इति१.२.४.५॥ १४. '-ल-' इति१.२॥ १५. 'उ-' इति४.५॥ १६. 'राज्य-' इति५॥ १७. 'संवा-' इति१॥ १८. 'रणार्हे-' इति१॥ १९. ४प्रतौ नास्ति ॥ २०. '-तेऽ-' इति१.४.५॥ २१. '-त्रि वा' इति३॥ २२. '''व्यधजपोरनुपसर्गे' इत्यत्रैव मदिग्रहणेऽपि कर्तव्ये पृथक्सूत्रारम्भाद् उन्मादः इति घञपि'' इति न्यासः'' इति मा.धातुवृत्तिः, दिवादिः, धातुसं-१०६, पृ.४३६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

२ द्यति खण्डयत्यनेन **दानम्** । 'दोऽवखण्डने'(दि.प.अ.), करणे ल्युट्। ३ प्रवर्ततेऽनया **प्रवृत्तिः**। 'वृतु वर्तने'(भ्वा. आ.से.), 'स्त्रियां क्तिन्'३।३।९४॥, त्रीणि हस्तिमदस्य ॥

## वमथुः[1] करशीकरः[2][१][२] ॥१२२३॥

१ वम्यते उद्गीर्यते **वमथुः** । 'टुवमु[३] उद्गिरणे'(भ्वा.प.से.), 'ट्वितोऽथुच्'३।३।८९॥ । २ करस्य शीकरोऽम्बुकणः **करशीकरः** । एकं शुण्डा[४]फूत्[५]कारजलकणस्य ॥१२२३॥

## हस्तिनासा[1] करः[2] शुण्डा[3] हस्तः[4]

१ हस्तिनो नासा **हस्तिनासा**। २ किरत्यनेन **करः**। 'कृ विक्षेपे'(तु.प.से.), 'ॠदोरप्'३।३।५७॥ । ३ शुनत्यनया[६] **शुण्डा** । 'शुन गत्याम्'(तु.प.से.), 'कुगुहु-'(हैमोणा-१७०) इति किड्डः[७]। ४ **हस्तः** हस्तक्रियाकारित्वात् । चत्वारि हस्तिशुण्डायाः ॥

## अग्रं त्वस्य पुष्करम्[1] ।

१ अस्य करस्याऽग्रमग्रभागः, पुष्यत्यनेन **पुष्करम्**, व्योमनामसु (अभि.श्लो-१६३)। ''अन्योन्येषां पुष्करैरामृशन्तः''[शिशुपालवधम्, सर्गः-१८, श्लो-३२]इति माघः। एकं शुण्डाग्रभागस्य । 'पोगर' इति भाषा ॥

## अङ्गुलिः[1] कर्णिका

१ गजस्याऽऽङ्गुलिः, किरत्यनया **कर्णिका** । 'कृ विक्षेपे'(तु.प.से.), 'कुशिक[९]-'(हैमोणा-४५)इतीके निपात्यते । असत्यपि कर्णभवत्वे रूढिशब्दत्वात् कर्णे भवा कर्णिका । 'कर्णललाटात्-'४।३।६५॥ इतीकन् (इति कन्)। द्वे (एकं) शुण्डाङ्गुल्याः ॥

## दन्तौ विषाणौ[1]

१ हस्तिदन्तौ वेवेष्टि आभ्यां **विषाणौ**, त्रिलिङ्गः। 'विष्लृ व्याप्तौ'(जु.उ.अ.), 'कृ[१०]पिविषि[११]-'(हैमोणा-१९१)इत्याणक् । द्वे (एकं) हस्तिदन्तस्य ॥

## स्कन्ध आसनम्[1] ॥१२२४॥

१ हस्तिनः स्कन्धः, आस्यतेऽस्मिन्निति **आसनम्** । 'करणाधिकरणयोः-'३।३।११७॥ इत्यधिकरणे ल्युट् । द्वे (एकं) हस्तिस्कन्धस्य ॥१२२४॥

## कर्णमूलं चूलिका[1] स्यात्

१ गजस्य कर्णमूलम्, चूल्यते **चूलिका** । 'चूल समुच्छ्राये'(चु.उ.से.), 'संज्ञायाम्'३।३।१०९॥ इति ण्वुल् । चोद्यते पार्श्वगमनेनाऽङ्कुशेनाऽस्यामिति वा । भिदादित्वादङि पृषोदरादित्वाड्डुत्वमिति वा । एकं हस्तिकर्णमूलस्य । 'कनवाली' इति भाषा ॥

## ईषिका[1] त्वक्षिकूटकम् ।

१ ''ईषा लाङ्गल[१२]कीलिका, सा इवेति, इवार्थे कन्, **ईषिका**''[अम.क्षीर.२।८।३९॥]इति[१३] स्वामी[१४] । ''ईष गतौ'(भ्वा.आ.से.), अतो धातोर्ण्वुल्''[[१५]]इति शाब्दिकाः । दीर्घादि[१६]र्ह्रस्वमध्येयम् । ''इषीका, ह्रस्वादिर्दीर्घमध्या''[ ] इति सर्वस्वम्[१७] । ''तस्मिन्नस्यदिषीकास्त्रं वामो वामाविरोधितः[१८] (रामो रामावबोधितः)''[रघुवंशम्, सर्गः-१२, श्लो-२३]इति रघुरपि । ''ईष्यते महति देहे[१९] निमग्नत्वात् प्रयत्नेन लभ्यते । 'ईष उञ्छे'(भ्वा.प.से.), 'ईष गतिहिंसादानेषु[२०]'(भ्वा.आ.से.), बाहुलकादिकन्निति प्रकृते 'ईषेः[२१] किद्ध्रस्वश्च'(उणा-४६१)इतीकन्प्रत्ययो धातोर्ह्रस्वत्वं च, इषीका[२२], ह्रस्वादिर्दीर्घमध्या''[पदचन्द्रिका, भा-२, क्षत्त्रवर्गः, श्लो-४९२]इति मिश्राः । अक्ष्णः कूटमक्षिकूटम् । एकं गजनेत्रोपरिभागस्य । 'पलक[२३]' इति भाषा ॥

## अपाङ्गदेशो[1] निर्याणम्[२४]

१. '-सी' इति१॥ २. तुलनीयोऽमरकोषः२।८।३७॥ ३. '-मुद्गि-' इति३.५, 'टुवम' इति क्षीरतरङ्गिण्यादयः ॥ ४. 'शू-' इति३॥ ५. '-थू-' इति४॥ ६. 'शुनय-' इति१.२.३॥ ७. १.३.४.५प्रतिषु नास्ति ॥ ८. 'हस्तिनो' इति३॥ ९. 'कुशी-' इति१, 'कुसि-' इति३॥ १०. 'कृषि-' इति३॥ ११. 'कृषिवृषि-' इति४॥ १२. '-लि-' इति५॥ १३. अम.क्षीरस्वामिकृतटीकायाम्-''ईषा लाङ्गलकीलैव ईषिका'' इति दृश्यते, पृ.१८३॥ १४. द्र. पदचन्द्रिका, भा-२, क्षात्त्रवर्गः, श्लो-४९२, पृ.५७७॥ १५. द्र. पदचन्द्रिका, भा-२, क्षत्त्रवर्गः, श्लो-४९२, पृ.५७७॥, तत्र-''ईष गतीत्यादिधातोः (गतावित्यादिधातोः) ण्वुल् (पा.३।१।१३३॥)इति शाब्दिकाः'' इति दृश्यते ॥ १६. '-दिदी-' इति३.५॥ १७. टीकासर्वस्वे-''उणादौ तु 'ईषेः किद्ध्रस्वश्च'(उ.४.२१)इतीकनि धातोर्ह्रस्वत्वे ह्रस्वादि दीर्घमध्यं च'' इति दृश्यते, भा-३, २।८।३८॥, पृ.८३॥ १८. '-वामे वामाविरोधितः' इति३॥ १९. '-ह' इति१, '-हि' इति४.५॥ २०. '-दर्शनेषु' इति स्वामिसायणौ ॥ २१. '-षः' इति४, '-षिः' इति५॥ २२. 'इषि-' इति१॥ २३. 'पेच-' इति३॥ २४. तुलनीयोऽमरकोषः२।८।३८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ अपाङ्गस्य देशोऽपाङ्गदेशः, निर्यात्यनेनाऽश्रु, मदजलं वा **निर्याणम्** । 'या प्रापणे'(अ.प.अ.), करणे ल्युट् 'कृत्यचः'८।४।२८॥ इति णत्वम् । "प्रत्यन्यदन्ति निशिताङ्कुशदूरभिन्ननिर्याणनिर्यदसृजं चलितं निषादी"[शिशुपालवधम्, सर्गः-५, श्लो-४१]इति माघः । एकं गजनेत्रयोरपाङ्गदेशस्य॥

**गण्डस्तु करटः कटः ॥१२२५॥**

१ **गण्डः** प्राग्वत्, (अभि-, श्लो-४६६, ५८२)। २ करोति मदं **करटः** । 'शकादिभ्योऽटन्'(उणा-५२१)। ३ कटति वर्षति मदजलमिति **कटः**। 'कटे वर्षावरणयोः' (भ्वा.प.से.), अच् । त्रीणि गजगल्लस्य[1] ॥१२२५॥

**अवग्रहो ललाटं स्यात्**[2]

१ अवगृह्यते[3] अङ्कुशेन **अवग्रहः** । 'ग्रह उपादाने' (क्र्या.उ.से.), 'ग्रहवृदृ-'३।३।५८॥ इत्यप् । "गजालिके[4] दृष्टिबन्धे प्रतिबन्धेऽप्यवग्रहः"[[5]]इति रुद्रः । "अवगृह्यतेऽङ्कुशादिनाऽस्वतन्त्रोऽप्यत्रेति। 'हलश्च'३।३।१२१॥इति घञि, अवग्राहो[6] वृद्धिमान्"[]इति व्याख्यामृतम्[7]। एकमिभललाटस्य॥

**आरक्षः कुम्भयोरधः ।**

१ आरक्ष्यते[8] **आरक्षः** । 'रक्ष पालने'(भ्वा.प.से.), घञ् । एकमिभकुम्भाधोभागस्य ॥

**कुम्भौ तु शिरसः पिण्डौ**

१ करिशिरसोऽवमतौ(-ऽवयवौ) पिण्डाविवोन्नतभागौ **कुम्भ**शब्दवाच्यौ। केन मदजलेन उम्भ्यते (उभ्यते) पूर्यते कुम्भः । 'उम्भ पूरणे[9]'(तु.प.से.), कर्मणि घञ्, शकन्ध्वादित्वात् पररूपम् । कुम्भश्च कुम्भश्च कुम्भौ एकशेषे । पिण्डते संहितो भवति पिण्डः । 'पिडि सङ्घाते' (भ्वा.आ.से.), अच् । एकं कुम्भस्थस्य ॥

**कुम्भयोरन्तरं विदुः ॥१२२६॥**

१ वेत्त्यङ्कुशाघातमत्र, विद्यतेऽङ्कुशाघातेन भिद्यते वा **विदुः**, पुंसि । 'विद सत्तायाम्'(दि.आ.अ.), 'विद विभेदने[10]'(अ.प.से.) वा, आभ्यामौणादिकः कुः । वेत्ति संज्ञास्थानमस्मादङ्कुशस्थानाद् विदुः । यत्पालकाप्यः-
"तत्रारक्षविताने द्वे विदू द्वौ श्रवणे गतौ ।
प्राक् च पश्चाच्च तिर्यक् च षड्भेदाङ्कुशवारणाः ॥१॥"[[11]]।
एकं कुम्भमध्यभागस्य । 'माली' इति भाषा ॥१२२६॥

**वातकुम्भस्तु तस्याऽधः**

१ तस्य विदोरधोभागः वातपूर्णकुम्भ इव **वातकुम्भः**। एकं विदोरधोभागस्य । 'टीकं[12]' इति भाषा ॥

**वाहित्थं तु ततोऽप्यधः ।**

१ ततोऽपि वातकुम्भादप्यधोभागस्तन्नामैकं **वाहित्थम्** इति । 'हित्थ भावकरणे'( ), भावे[13] घञ् । हित्थो विलासः, पृषोदरादिः[14], मदं चाऽवश्यं वहति, आवश्यके णिनौ वाही, तत्र तिष्ठतीति, नैरुक्तः सस्यः तः वाहित्थमिति वा । '[15]पीतवा' इति भाषा ॥

**वाहित्थाधः प्रतिमानम्**

१ वाहित्थस्याऽधोभागो दन्तमध्यम्, तन्नामैकं **प्रतिमानम्** इति । प्रतिमीयतेऽनेन प्रतिमानम् । 'डुमिञ् प्रक्षेपणे'(स्वा.उ.अ.), करणे ल्युट्[16], 'मिनातिमीनोति-'६।१।५०॥ इत्यात्वम् । देशनियमात् मानं प्रतिगतं प्रतिमानमिति वा । "प्रतिमानं प्रतिच्छाया गजदन्तान्तरालयोः"[[17]] इति रुद्रः । "दन्तयोरुभयोर्मध्यं प्रतिमानं प्रचक्षते"[हलायुधकोशः२।२१८॥]इति हलायुधः । 'भसुंड' इति भाषा॥

**पुच्छमूलं तु पेचकः ॥१२२७॥**

१ पच्यते घातेनेति **पेचकः**, पृषोदरादिः । एकमिभपुच्छमूलस्य ॥१२२७॥

**दन्तभागः पुरोभागः**

१ दन्तयोर्भागो **दन्तभागः** । यद्वाऽग्रतो यो

---

१. '-म-' इति१, '-स-' इति५॥ २ तुलनीयोऽमरकोषः२।८।३८॥ ३ '-न्ते' इति४.५॥ ४ 'जांग-' इति१, 'गं ' इति२.४.५॥ ५. द्र. टीकासर्वस्वम्, भा-३, २।८।३८॥, पृ.८३॥, पदचन्द्रिका, भा-२, क्षत्रवर्गः, श्लो-४९२, पृ.५७७॥, रामाश्रमी२।८।३८॥, पृ.३६२॥ तासु 'दृष्टिबन्धे' इत्यस्य स्थाने 'वृष्टिरोधे' इति दृश्यते॥ ६ '-ग्रहो' इति१॥ ७ द्र. पदचन्द्रिका, भा-२, क्षत्रवर्गः, श्लो-४९२, पृ.५७७॥ ८ '-क्षते' इति५॥ ९ 'उभ उन्भ पूरणे' इति क्षीरतरङ्गिण्यादयः॥ १०. 'भेदने' इति३, विभेदनार्थकविदधातुर्मृग्यः ॥ ११. द्र. अम.क्षीर.२।८।३८॥, पृ.१८३॥, तत्र 'तत्रा-' इत्यस्य स्थाने 'तत्र' इति दृश्यते॥, स्वोपज्ञटीका४।१२२६॥, पृ.२७५॥ १२. '-का' इति३॥ १३. १प्रतौ नास्ति ॥ १४ '-दित्वात् सिद्धिः' इति२॥ १५ 'पीति-' इति३, 'पा-' इति४॥ १६. '-टि' इति१.२॥ १७ द्र. पदचन्द्रिका, भा-२, क्षत्रवर्गः, श्लो-४९३, पृ.५७८॥, रामाश्रमी२।८।३९॥, पृ.३६३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भाग:, स दन्तसंहितो[1] मुखस्य भागो दन्तभाग:, शाकपार्थिवादि: । मुखत: स्कन्धपर्यन्तो योऽग्रभाग:, स दन्तसन्निहितत्वाद् दन्तस्य भागो दन्तभाग[2] इति विग्रह: । पुरोभागोऽग्रिमो भाग इत्यर्थ: । एकमिभाग्रप्रदेशस्य ॥

**पक्षभागस्तु पार्श्वकः ।**

१ पक्षयोर्भाग: **पक्षभाग:**, गजपार्श्वप्रदेश: । एकं 'हस्तिपसवाडो[4]' इत्याख्यस्य ॥

**पूर्वस्तु जङ्घादिदेशो गात्रं स्यात्**

१ हस्तिन: पूर्व: पादजङ्घादिभाग:, गच्छत्यनेन **गात्रम्,** स्त्रीक्ली. । स्त्रियां टाबन्त:, यथा-''गात्रावरे पूर्वपश्चात्पादयो: परिभाषिते''[ ]इति भागुरि: । ''आपस्कारात्लूनगात्रस्य भूमिम्''[शिशुपालवधम्, सर्ग:-१८, श्लो-४६]इति माघ: । ''लूनगात्रस्य छिन्नपूर्वकायस्य, आपस्कारादाजङ्घामूलापस्कारं यावच्छिन्नस्येत्यर्थ:''[ ]इति तट्टीका । एकमिभपूर्वकायभागस्य ॥

**पश्चिमोऽपरा ॥१२२८॥**

१ गजस्य पश्चाद्भाग:, अपरभागत्वाद् **अपरा,** स्त्रीक्लीबलिङ्ग:[6] । जपादित्वाद् वत्वे अवराऽपि । ''अपरं तूत्तरार्थे[7] स्यात् पश्चाद्गात्रे च दन्तिनाम्''[विश्वप्रकाशकोश:, रान्तवर्ग:, श्लो-९५]इति विश्व: । ''बद्धापराणि परितो निगडान्यलावीत्''[शिशुपालवधम्, सर्ग:-५, श्लो-४८]इति माघ: । एकं गजपश्चाद्भागस्य । केचितु-''अष्ठीवद्भागादूर्ध्वमवरमधस्तु गात्रम्''[ ]इत्याहु: ॥१२२८॥

**बिन्दुजालं पुनः पद्मम्**

१ बिन्दूनां[9] जालं बिन्दुजालम्, तारुण्ये हि गजदेहे[10] रक्तबिन्दव: स्युरिति, पद्ममिव **पद्मम्,** रक्तत्वात् । एकं बिन्दुजालस्य ॥

**शृङ्खलो निगडोऽन्दुकः ।**

**हिञ्जीरश्च पादपाशः**

१ शिञ्जानो[12]: स्खलन्त्यनेन, सिञ्जान: स्खलति वा **शृङ्खल:,** त्रिलिङ्ग:, पृषोदरादि: । ''शृङ्खला पुंस्कटीस्त्रीवस्त्रबन्धे[13] च निगडे त्रिषु''[मेदिनीकोश:, लान्तवर्ग:, श्लो-१४१]इति मेदिनि: । तालव्यादि: । २ निगडति बध्नाति **निगड:** । 'गड सेचने'(भ्वा.प.से.), पचाद्यच् । ३ अन्द्यते बध्यतेऽनेन **अन्दुक:** । 'अदि बन्धने'(भ्वा. आ.से.), 'अन्दूदृम्भू[जम्बूकफेलू]कर्कन्धूदिधिषू:''(उणा-९३)इति कुप्रत्यय:[14], स्वार्थे कनि, 'केऽण:'७।४।१३॥ इति[15] ह्रस्वत्वम् । ४ हिनस्ति **हिञ्जीर:** । 'जम्बीर-'(हैमोणा-४२२)इत्यादिना साधु: । निगडादय: पुंनपुंसकलिङ्गा: । ५ पादस्य पाशो बन्धनं **पादपाश:** । पञ्च शृङ्खलस्य ॥

**वारिस्तु गजबन्धभूः ॥१२२९॥**

१ वारयति गजान्, वार्यन्ते[16] गजा अनयेति वा **वारि:** । 'वर निवारणे'( ), णिजन्त:, 'वसिवदिवजिध्वजिसहितनिवासिवादिवारिभ्य[17] इञ्[18]'(उणा-५३४)इति इञ् । 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि वारीत्यपि । ''वारी स्याद् गजबन्धन्यां कलभ्यामपि(कलस्यामपि) योषिति। वारिर्वाग्गजबन्धिन्यो:[19] स्त्री क्लीबेऽम्बुनि बालके[20] ॥१॥'' [मेदिनीकोश:, रान्तवर्ग:, श्लो-६६-६७]इति मेदिनि: । गजानां बन्धाय[21] ग्रहणाय भूर्गर्ता[22] गजबन्धभू:[23] । एकं गजग्रहणभूमे: ॥१२२९॥

**त्रिपदी गात्रयोर्बन्ध एकस्मिन्नपरेऽपि च ।**

१ त्रय: पादा अस्यां **त्रिपदी,** गात्रयोरिति द्वयो: पूर्वजङ्घयो:[24], एकस्मिन् अपरे इति एकस्यां पश्चिमजङ्घायां च, गजस्य बन्धो बन्धनम्, तस्यैकं त्रिपदीति । ''नाऽस्रंसत् करिणां ग्रैवं त्रिपदीच्छेदिनामपि''[रघुवंशम्, सर्ग:-४, श्लो-४८]इति रघु: । अपरशब्दस्य क्लीबत्वादपर इत्यत्र सप्तम्येकवचनम् ॥

१. 'दन्तसहि-' इति१, 'दन्तनिहि-' इति३॥ २. ४प्रतौ नास्ति ॥ ३. '-त:' इति३.४.५॥ ४. '-डां' इति१.२॥ ५. द्र. पदचन्द्रिका, भा-२, क्षत्रवर्ग:, श्लो-४९४, पृ.५७९॥, रामाश्रमी२।८।४०॥, पृ.३६३॥ ६. 'क्लीब:' इति३॥ ७. 'त्वधुनार्थे' इति विश्वप्रकाशकोशे, पृ.१३३॥ ८. द्र. पदचन्द्रिका, भा-२, क्षत्रवर्ग:, श्लो-४९४, पृ.५७९॥ ९. '-ना' इति३॥ १०. 'गजे' इति१॥ ११. '-शे' इति३॥ १२. '-न:' इति३॥ १३. 'स्त्री' इति मेदिनीकोशे न दृश्यते, पृ.१५५॥, स युक्त एव, अन्यथा छन्दोभङ्गापत्ते: ॥ १४. 'कु:' इति१॥ १५. १प्रतौ नास्ति ॥ १६. '-न्ते' इति१॥ १७. '-वादिवासि-' इति४.५॥ १८. 'वसिवपियजिराजिव्रजिसदिहनिवाशिवादिवारिभ्य इञ्'(उणा-५६४)इत्युणादिगणसूत्रम् ॥ १९. '-बन्धन्यो:' इति३, मेदिनीकोशे च, पृ.१२७॥ २०. 'चो-' इति३.५॥ २१. '-न्धनाय' इति३॥ २२. 'भूगर्ता' इति३.५॥ २३. '-न्ध: भू:' इति३॥ २४. '-ङ्घाया' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**तोत्त्रं वेणुकम्**[1]

१ तुद्यतेऽनेन **तोत्त्रम्** । २ 'तुद व्यथने'(तु. उ.अ.), 'दाम्नीशसु(शस)-'३।२।१८२॥ इति ष्ट्रन् । २ वेणुना निर्वृत्तं **वेणुकम्** । '-अक्षद्युतादिभ्यः-'४।४।१९॥ इति ठक्(ष्ठन्), 'इसुसुक्तान्तात् कः'७।३।५१॥, संज्ञा-पूर्वकत्वाद् वृद्ध्यभावः । ''वृद्धिपक्षे[2] वैणुकमपि''[ ] इति मिश्राः । गण्डानाम्नी[3] द्वे । ''गजवशीकरणाय यद् त्रिशूलाकारवंशदण्डहस्त्यारिका[4]''[ ]इति पर्यायः[5] ॥

**आलानं बन्धस्तम्भः**[6]

१ आलाति बध्नात्यनेन[7], अत्र वा **आलानम्**। करणे[8], अधिकरणे वा ल्युट् । गजस्य बन्धनाय[6] स्तम्भो बन्धस्तम्भः । ''आलानं स्तम्भ उच्यते''[हलायुधकोशः २।२२१॥]इति हलायुधः । ''द्वौ समौ''[ ]इति तट्टीका । द्वे गजबन्धनस्तम्भस्य ॥

**अङ्कुशः सृणिः ॥१२३०॥**

१ अङ्क्यते[9] गम्यतेऽनेन **अङ्कुशः**, पुंक्ली. । 'अकि लक्षणे'(भ्वा.आ.से.), 'वानसिपर्णसि (सानसि-वर्णसि-)'(उणा-५४७)इत्यादिना उशः । ''काशाकाश-कुशाङ्कुशाः''[[10] ]इति शभेदात्[11] तालव्यान्तः । २ सरति मर्मस्थानं गच्छति **सृणिः** । 'सृ गतौ'(भ्वा.प.अ.), 'सृपृषि (वृषि)भ्यां कित्'(उणा-४८९)इति निः । दन्त्यादिरयम् । 'शॄ हिंसायाम्'(क्र्या.प.से.), 'शृणिवेणिवृष्णिपार्ष्णिचूर्णयः[12]' (उणा-४९२)इति [साधुः], अगुणत्वं च [13](इति शृणि-स्तालव्यादिश्च)। पुंस्त्रीलिङ्गः । द्वे अङ्कुशस्य **॥१२३०॥**

**अपष्ठं त्वङ्कुशस्याऽग्रम्**

१ अपकृष्टं तिष्ठति **अपष्ठम्**[14] । 'अम्बाम्बगो-भूमि-'८।३।९३॥इत्यादिना षत्वम् । अङ्कुशस्याऽग्रमग्रभागो वक्राकृतिस्तीक्ष्णस्तस्य[15] नामैकम्[16] । 'वाघ' इति भाषा ॥

**यातमङ्कुशवारणम्** । 

१ यततेऽनेन गन्तुमिति **यातम्** । 'यती प्रयत्ने' (भ्वा.आ.से.), करणे घञ् । यात्यनेन वा । 'या प्रापणे' (अ.प.अ.), 'हसि-'(उणा-३६६)इति बाहुलकात् तः । एकमङ्कुशवारणस्य । 'टेक' इति भाषा ॥

**निषादिनां पादकर्म यतम्**

१ पादयोः कर्म पादकर्म पादसंज्ञा, यमनं **यतम्**। 'यमु नियमने[17]'(भ्वा.प.अ.), क्तः, 'अनुदात्तोपदेश-'६।४।३७॥ इति म्लोपः । 'सइण' इति भाषा ॥

**वीतं तु तद्द्वयम् ॥१२३१॥**

१ तद्द्वयं यातं[18] यतं च, एतदुभयं **वीतम्** उच्यत इत्यर्थः । अजन्ति[19] प्रेरयन्त्यत्र वीतम् । 'अज गतौ क्षेपणे च[20]'(भ्वा.प.से.), क्तप्रत्ययः, 'अजेर्व्यघञपोः'२।४।५६॥ इति वीभावः । विशिष्टमितं गमनमत्रेति वीतं वा **॥१२३१॥**

**कक्ष्या दूष्या वरत्रा स्यात्**

१ कक्षायां[21] मध्यप्रदेशे भवा **कक्ष्या** । 'शरीरा-वयवाच्च'४।३।५५॥इति यत् । यकरोपधाऽयम् । यन्महे-श्वरः-''कक्ष्या बृहतिकायां[22] स्यात् वाज्यां मध्येभबन्धने[23]'' [विश्वप्रकाशकोशः, यान्तवर्गः, श्लो-५६]इति । यकार-रहितोऽपि । यथा[24]-''कक्षोद्[25]ग्राहणिकाकाञ्चीप्रकोष्ठगज-रज्जुषु''[विश्वप्रकाशकोशः, क्षान्तवर्गः, श्लो-१०]इति । २ दूष्यते दूयतेऽनया **दूष्या** । 'दुष वैकृत्ये'(दि.प.अ.), बाहुलकात् करणेऽपि घ्यण् । ३ व्रियतेऽनया **वरत्रा** । 'वृञ् वरणे'(स्वा.उ.से.), 'वृञश्चित्'(उणा-३८७)इत्यत्रन् । त्रीणि नाडीति ख्यातायाः ॥

**कण्ठबन्धः कलापकः** ।

१ कण्ठो बध्यतेऽनेन **कण्ठबन्धः**। 'बन्ध बन्धने' (क्र्या.प.अ.), करणे घञ् । २ कल्पते कलापः, कनि

---

१. तुलनीयोऽमरकोषः२।८।४१॥ २. 'वृद्ध-' इति१॥ ३. 'गंड-' इति१॥ ४ '-रं' इति४.५॥ ५. 'विप-' इति१॥ ६. 'बन्धन-' इति१॥ ७ 'आलान्ति बध्नत्यनेन' इति१.२॥ ८ '-णा-' इति३.४.५॥ ९ 'अक्यते' इति२.३॥ १०. द्र. पदचन्द्रिका, भा २, क्षत्त्रवर्गः, श्लो-४९५, पृ.५८०॥ ११. 'भेदात्' इति४.५॥ १२. 'घृणिपृश्निपार्ष्णिचूर्णिभूर्णि'(उणा-४९२)इत्युणादिगणसूत्रम् ॥ १३. कोष्ठान्तर्गतपाठः २प्रतावेव दृश्यते॥ १४ 'अपतिष्ठत्यनेनेत्यपष्टम्' इति१॥ १५. 'वक्षा-' इति१॥ १६. '-स्यैकम्' इति१.२॥ १७ 'यम उपरमे' इति क्षीरतरङ्गिण्यादयः॥ १८ इतोऽग्रे ३प्रतौ 'यातं' इति दृश्यते ॥ १९ 'अजति' इति४, 'अञ्जति' इति५॥ २०. 'गतिक्षेपणयोः' इति क्षीरतरङ्गिण्यादयः ॥ २१. '-या' इति१.२॥ २२. 'बृं-' इति२॥ २३. 'कक्ष्या बृहन्तिकायां स्यात् कक्ष्या मध्येभबन्धने' इति विश्वप्रकाशकोशे, पृ.११९॥ २४ ३प्रतौ नास्ति ॥ २५. 'कक्षा-' इति५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**कलापकः** । कलामाप्नोतीति वा । 'आप्लृ व्याप्तौ'(अ.प.अ.), अचि, स्वार्थे कन् । द्वे हस्तिकण्ठबन्धस्य । 'कलाउ' इति भाषा ॥

॥ इति हस्तिवर्गः ॥

॥ अश्ववर्गः ॥

**घोटकस्तुरगस्तार्क्ष्यस्तुरङ्गोऽश्वस्तुरङ्गमः ॥१२३२॥**
**गन्धर्वोऽर्वा सप्तिर्वीती वाहो वाजी हयो हरिः ।**

१ घोटते परिवृत्य लुठति घोटः । 'घुट परिवर्तने' (भ्वा.आ.से.), पचाद्यच्, स्वार्थे कनि **घोटकः** । ण्वुलि वा । घुटतीति वा । 'घुट प्रतीघाते'[1](तु.प.से.), तुदादिः, ण्वुल् । घोट इत्यपि । "घोटसैन्धवगन्धर्वा हयवाजितुरङ्गमाः"[2] ]इति व्यासः । २-४-६ तुरति तुरः । 'तुर त्वरणे'(जु.प.से.), 'इगुपध-'३।१।१३५॥ इति कः, तुरः त्वरावान् गच्छति **तुरगः**, भुजङ्गवत् **तुरङ्गः**, **तुरङ्गमः** । ३ तूर्णमश्नुते गन्तव्यं स्तीर्णे विस्तीर्णेऽन्तरिक्षे क्षयतीति **तार्क्ष्यः** । तूर्णशब्दाद् वा पूर्वपदम्, अश्नोतेः क्षीयतेर्वोत्तरपदम्, पृषोदरादिः । यद्वा वेगेन तार्क्ष्यसादृश्यात् तार्क्ष्य इत्युच्यते । "तुरङ्गगरुडौ[3] तार्क्ष्यौ"[अमरकोषः३।३।१४५॥]इत्यत्र "तृक्षस्याऽपत्यं तार्क्ष्यः, गर्गादित्वाद्[4] यञ्[5]"[अम.क्षीर. ३।३।१४५॥]इति क्षीरस्वामी । ५ वेगवत्त्वादश्नुते बहुभूभागं व्याप्नोति **अश्वः** । 'अशूङ्(अशू) व्याप्तौ[6]'(स्वा.आ.से.), 'अशुप्रुषिलटिकटिकणिखटिविशिभ्यः क्वन्'(उणा-१४९) । "अश्नाति घासादिकम्"[7] ]इत्यन्ये ॥१२३२॥ ७ गन्धनं गन्धो हिंसा । 'गन्ध गन्धने[8]'(चु.आ.से.), अच् । गन्धाय, गन्धं वा अर्वति गच्छति **गन्धर्वः** । 'अर्व गतौ'(भ्वा.प.से.), पचाद्यच्, कर्मण्यण् वा । शकन्ध्वादिः । ८ ऋच्छतीति[9] **अर्वा** । 'ऋ गतौ'(भ्वा.प.से.), '-पच्यर्त्तिशृशकिभ्यो(-पद्यर्त्तिपृशकिभ्यो)[10] वनिप्'(उणा-५५२) । "अर्वति गच्छति वा । 'अर्व गतौ'(भ्वा.प.से.), बाहुलकाद् वनिप्, 'राल्लोपः'६।४।२१॥, अर्वा"[11] ]इति तु सुभूतिः । अर्वन्तौ, अर्वन्तः इत्यादि । पक्षे अर्वाणौ, अर्वाणः इत्यादि । ९ सपति सङ्ग्रामेषु सहसा समवैति **सप्तिः** । 'षप समवाये'(भ्वा.प.से.), 'विनसिवसिरपिपदिभ्यस्तिप्'( )इति श्रीभोजदेवः । 'सृप्लृ गतौ[12]'(भ्वा.प.अ.), अस्माद् वा तिप्रत्यये गुणे, रेफलोपो[13] बाहुलकात्, सर्पतीति सप्तिः, हरिवत् । १० वेति गच्छति **वीतिः** । 'वी गत्यादौ'(अ.प.अ.), 'दमुषि-'(हैमोणा-६५१)इति बाहुलकात् कित् तिन् । विशिष्टा ईतिरस्येति वा । वीतिः हरिवत् । सप्तिश्च वीतिश्चेतीतरेतरयोगे 'सप्तिवीती'[14] । मिश्रास्तु "पिबतेः 'क्तिच्क्तौ (क्तिच्क्तौ) च'३।३।१७४॥ इति क्तिचि पीतिः । "पीतिर्नाश्वे स्त्रियां याने(पाने)" [मेदिनीकोशः, तान्तवर्गः, श्लो-३३]इति मेदिनिः । पीतिः (पीतं) पानं घृतादिद्रवद्रव्याभ्यवहारः, तद्योगादिनौ पीतीति नान्तोऽपि"[पदचन्द्रिका, भा-२, क्षत्त्रवर्गः, श्लो-४९८॥] इत्याख्यन् । ११ वाह्यते **वाहः** । वहेर्ण्यन्तादेरच् । 'वाहृ(वाह) प्रयत्ने'(भ्वा.आ.से.), 'वाहृ (वाह) विलोडने'( ) वा, आभ्यामच्चि कर्मणि घञ् वा । १२ वजत्यवश्यं **वाजी** । 'वज गतौ' (भ्वा.प.से.), आवश्यके णिनिः । **वाजः** पक्षः, तद्योगाद् 'अत इनिठनौ'५।२।११५॥ इतीनौ वा वाजी । "पूर्वमश्वाः सपक्षाः आसन्, ततो देवाभ्यर्थितेन शालिहोत्रेण मुनिना प्रेरितेनेन्द्रेण वज्रेण कृत्वा पक्षाश्छिन्नाः"[15] ]इत्यागमः । १३ 'हय गतिविक्रान्त्योः[16]'(भ्वा.प.से.), पचाद्यच् [ **हयः** ]। हयति गच्छत्यध्वानं विक्रमते वा । "अश्वादीनां गतिविशेषो विक्रमणम्"[ ]इति वृत्तिः । स्त्रियां 'गवयहय-(हयगवय)-'(वा-४।१।६३॥)इत्यादिना ङीषि हयीति । १४ हरति देशान्तरं प्रापयति **हरिः** । 'हृञ् हरणे'(भ्वा.उ.अ.), 'अच इः'(उणा-५७८) । एते सर्वेऽपि पुंसि । चतुर्दशाऽश्वस्य । शेषश्चात्र-

"अश्वे तु क्रमणः कुण्डी प्रोथी हेषी प्रकीर्णकः ।
पालकः परुलः किण्वी कुटरः[17] सिंहविक्रमः[18] ॥१॥

१. '-नि' इति४.५॥ २. '-ओ' इति१.४॥ ३. 'प्रति-' इति५॥ ४. मैत्रेयसायणसम्मतोऽयम्, 'गुड प्रतिघाते' इति क्षीरतरङ्गिणी ॥ ५. द्र. पदचन्द्रिका, भा-२, श्लो-४९७, पृ.५८३॥, रामाश्रमी२।८।४३॥, पृ.३६५॥ ६. '-तौ' इति३॥ ७. अम.क्षीरस्वामिकृतटीकायां न दृश्यते, पृ.३०५॥ ८. 'अशू व्याप्तौ सङ्घाते च' इति मैत्रेयसायणौ ॥ ९. '-कटि-' इत्युणादिगणसूत्रे नास्ति ॥ १०. द्र. पदचन्द्रिका, भा-२, श्लो-४९७-४९८, पृ.५८३-५८४॥ ११. 'बस्त गन्ध अर्दने' इति क्षीरतरङ्गिण्यादयः ॥ १२. इतोऽग्रे ४.५प्रत्योः 'वा' इति दृश्यते ॥ १३. '-शृ-' इति५॥ १४. 'गम्लृ सृप्लृ गतौ' इति क्षीरतरङ्गिण्यादयः ॥ १५. 'पौ वा' इति३॥ १६. '-तिः' इति१.३॥ १७. द्र. पदचन्द्रिका, भा-२, क्षत्त्रवर्गः, श्लो-४९७, पृ.५८३॥ १८. 'हय गतिकान्त्योः' इति स्वामी, 'हय गतौ' इति मैत्रेयसायणौ ॥ १९. 'कुरटः' इति३॥ २०. '-वीक्रमः' इति५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

माषाशी [1]केसरी हंसो मुहुर्भुग् ग्रहभोजनः[2-1] ।
वासुदेवः शालिहोत्रो लक्ष्मीपुत्रो मरुद्रथः ॥२॥
चामर्येकशिफौऽपि[2-2][3] स्यात्''[शेषनाममाला४।१७८-१८०॥]इति[4]॥

### [1]वडवाऽ[2]श्वा [3]प्रसू[4]र्वामी

१ वडति[5] गर्भं **वडवा** । 'वड आग्रहणे'( ), सौत्रः, 'वडिवटि-'(हैमोणा-५१५)इत्यवः । स्त्रीत्वेऽपि बलं सामर्थ्यमतिशयितमत्रास्तीति । 'वप्रकरणे अन्येभ्योऽपि[6] दृश्यते'(वा-५।२।१०९॥)इति वः, डलयोरेकत्वस्मृतेः बडवा । बलं सैन्यं वाति गच्छतीति वा । 'वा गति-गन्धनयोः'(अ.प.अ.), 'आतः-'३।२।३॥ इति कः । बलेन सामर्थ्येन अर्वतीति, पृषोदरादिर्वा । २ अश्नुतेऽध्वानम् **अश्वा** । अजादित्वाट्टाप् । ३ प्रसूते **प्रसूः,** स्त्रीलिङ्गः । 'षूङ् प्राणिगर्भविमोचने'(अ.आ.से.), 'सत्सूद्विष-'३।२।६१॥ इति क्विप्। ४ वमति गर्भं **वामी**। 'टुवमुं उद्गिरणे[7]'(भ्वा. प.से.), ज्वलादित्वाण्णः । वाम्यते[8] गर्भमिति ण्यन्ताद् घञ्[9], गौरादिर्वा[10] । चत्वारि अश्वायाः । ''अर्वती''[शेषनाममाला४।१८०॥]इति शैषिकम् ॥

### [1]किशोरोऽल्पवया हयः ॥१२३३॥

१ किश्यत इति **किशोरः** । किंपूर्वादश्नातेः [वा], 'कंठिचकिभ्यामोरः'(द.पा.८।२९)इत्योरः, नैरुक्तोऽम्लोपः। ''काशते शोभते वा । 'काशृ दीप्तौ'(भ्वा.आ.से.), 'किशोरादयः'(उणा-६५)इति सूत्रेण साधुः'' [ ]इत्यन्ये[11] । कृश्यति वयसा, कशति हेषते वा, प्राक्सूत्रेणैव[12] साधुः । अल्पं वयो यस्याऽसौ[13] अल्पवयाः । वछेरानाम एकम् ॥१२३३॥

### जवाधिकस्तु [1]जवनः

१ जवेन वेगेनाधिकः श्रेष्ठः जवाधिकः, जवतीत्येवंशीलो **जवनः** । 'जु' इति सौत्रो धातुर्वेगार्थो गत्यर्थश्च, 'जुचङ्क्रम्य-'३।२।१५०॥ इति युच् । ''तमश्ववारा जवनाश्वयायिनम्''[नैषधीयचरितम्, सर्गः-१, श्लो-६५]इति श्रीहर्षः । एकं वेगवद्घोटकस्य ॥

### [1]रथ्यो वोढा रथस्य यः[14] ।

१ रथं वहति **रथ्यः** । 'तद्वहति रथयुगप्रासङ्गम्' ४।४।७६॥ इति यत् । वहिलिया[15] घोडा नाम[16] एकम् ॥

### [1]आजानेयः कुलीनः स्यात्

१ कुलीनो गुरुशस्त्रप्रहारक्षतोऽपि[17] सङ्ग्रामे सादिनं यो न जहाति, सोऽतिसुखवाह्यत्वादजावन्नेयत्वाद् **आजानेयः** । ''पृषोदरादिः''[[18]]इति माधवी[19]। अजनमाजो गतिः(क्षेपः)। 'अज गतिक्षेपणयोः'(भ्वा. प.से.), घञ् । आजेन क्षेपेण आनेयः प्रापणीयः आजानेयः । ''आजेन क्षेपेण[20] नेयः आजानेयः । 'अन्येषामपि-'६।३।१३७॥ इति दीर्घत्वम्''[[21]]इति सर्वस्वादयः । आ अभिव्याप्त्या जवेन वोढारं पन्थानं नयति प्रापयति । पृषोदरादिर्वा । ''अश्वं कुलीनमाजानेयं शारं(शावं) किशोरकं ब्रुवते''[[22]]इति[18] नाममालायामार्यापाठाच्च दीर्घादिः ।

''शक्तिभिर्भिन्नहृदयाः स्खलन्तश्च पदे पदे ।
आजानन्ति[23] यतः संज्ञामाजानेयास्ततः स्मृताः[24] ॥१॥''

[[25]]इत्यश्वशास्त्रम् । एकं जात्यश्वस्य ॥

### तत्तद्देशास्तु [1]सैन्धवाः ॥१२३४॥

### [1]वानायुजाः [1]पारसीकाः [1]काम्बोजाः [1]वाल्हिकादयः ।

१ स स देशो जन्मभूमिरेषामिति तत्तद्देशाः । ''सिन्धोरदूरभवत्वाद् देशेऽणि सिन्धुः । 'अदूरभवश्च'४।२।४०॥ इत्यण्, 'वरणादिभ्यश्च'४।२।८२॥ इति लुक्(लुप्) ।

---

१. 'केश-' इति३.४.५॥ २-१. 'मृद्भुग् गूढ('गूह' स्वोपज्ञटीकायाम्)भोजनः' इति २-२. '-शफो-' इति च शेषनाममालास्वोपज्ञटीकयोः ॥ ३. १.२.३.४प्रतिषु नास्ति ॥ ४. 'गृह्णाति' इति १प्रतेष्टिप्पणी ॥ ५. '-पीति' इति१॥ ६. '-मुद्गि-' इति२.३.४.५॥ ७. 'टुवम उद्गिरणे' इति क्षीरतरङ्गिण्यादयः ॥ ८. '-मते' इति३॥ ९. '-ञ्' इति१॥ १०. 'वा' इति ३प्रतौ नास्ति ॥ ११. द्र. पदचन्द्रिका, भा-२, क्षत्रवर्गः, श्लो-५००, पृ.५८७॥, तत्र-''किश्यते किंपूर्वादश्नोतेर्वा ''कठिचकिभ्यामोरः''(द.प.८।२९)इत्योरः । नैरुक्तवर्णलोपे किशोरः । काशते शोभते । 'किशोरादयः'(उ.१।६६)इत्योरन्प्रत्यये उपधाया इत्वे च निपात्यते''-इत्यन्ये'' इति दृश्यते ॥ १२. 'प्राक्प्रत्ययेनैव' इति३॥ १३. 'यस्य स' इति३॥ १४. तुलनीयोऽमरकोषः२।८।४६॥ १५. 'वह-' इति१, 'वहिली-' इति३॥ १६. '-नामघोडा-' इति१॥ १७. '-कृ-' इति४॥ १८. द्र. पदचन्द्रिका, भा-२, क्षत्त्रवर्गः, श्लो-४९८, पृ.५८४-५८५॥ १९. '-वः' इति४.५॥ २०. 'क्षेपणेन' इति३॥ २१. सर्वानन्दकृतटीकासर्वस्वे तु-''अजावन्नेया अजानेयाः । पृषोदरादित्वादादिदीर्घत्वमिति हड्डचन्द्रः'' इति दृश्यते, भा-३, २।८।४५॥, पृ.८८॥ २२. द्र. टीकासर्वस्वम्, भा-३, २।८।४५॥, पृ.८८॥, तत्र-''शावकं किशोरकं ब्रूते'' इति दृश्यते ॥, रामाश्रमी२।८।४४॥, पृ.३६६॥ २३. '-न्ते' इति३॥ २४. '-तः' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततः 'तत्र भवः'४।३।५३॥ इत्यण् **सैन्धवाः** । "सिन्धूनामदूरभवो जनपदः सिन्धुः, ततो भवार्थे[1] 'कच्छादिभ्यश्च' ४।२।१३३॥ इत्यणि सैन्धवाः"[ ]इति पूर्वटीकाकारः[2]"[[3]] इति मिश्राः। १ वनायुवानायुसंज्ञौ देशभेदौ, तत्र जाता इति[4], 'सप्तम्यां जनेर्डः'३।२।९७॥, वनायुजाः, प्रज्ञाद्यणि **वानायुजाः** । "निद्रां विहाय वनमाक्ष[5] वनायुजास्ते[6]" [रघुवंशम्, सर्गः-५, श्लो-७३]इति रघुः । "आजानेयः कुलजो वायुजः पारसीक उक्तः"[[7]]इति रत्नकोषेऽपि ह्रस्वादिः । १ परसीक[8]देशे भवाः **पारसीकाः** । 'कोपधाच्च'४।३।१३७॥इत्यण् । "पारसीकदेशे भवाः"[ ]इत्यपरे । १ कम्बोजेषु जनपदेषु भवाः, 'कच्छाद्यण्'४।३।१३७॥, 'कम्बोजाद्लुक् (-जाल्लुक्)'४।१।१७५॥ इति चानन्तर्याद् 'जनपदशब्दात् क्षत्रियादञ्'४।१।१६८॥ इत्यञ्, एवं लुगिति **काम्बोजाः** दीर्घादिरेव । १ एवं वल्हिकेषु जनपदेषु भवाः, 'कोपधाच्च'४।३।१३७॥ इत्यणि **वाल्हिकाः** । "वाल्हीकं वाल्हिकं धीरहिङ्गुनोर्नाश्वदेशयोः"[त्रिकाण्डशेषः३।३।४३॥] इति त्रिकाण्डशेषाद् दीर्घमध्यश्च । आदेस्तुषारादयः। यथाक्रमं सिन्धुजवनायुजपारसीककाम्बोजवाल्हिकदेशोद्भवाश्वानां प्रत्येकं नाम । "वनायुजाः पारसीकाः काम्बोजा वाल्हिका हयाः"[अमरकोषः२।८।४५॥] इत्यमरः । "वनाय्वादि(युजादि)देशेष्वेते जाता हयविशेषाः"[अम.क्षीर.२।८।४६]इति क्षीरस्वामी । हलायुधस्तु-"पारसीका वनायुजाः"[हलायुधकोशः२।४३९॥] । "द्वौ समौ"[ ]इति तट्टीका । "कम्बोजा वाल्हिकाः प्रोक्ताः"[हलायुधकोशः२।४३९॥] । "द्वौ समौ"[ ]इति तट्टीकेति द्वौ द्वावेकार्थावाह ॥१२३४॥

### विनीतस्तु[1] साधुवाही

१ विनीयते स्म **विनीतः** । णीञः क्तः । २ साधु सुखं[11] वा वहति **साधुवाही** । 'वह प्रापणे'(भ्वा. उ.अ.), 'साधुकारिणि च'(वा-३।२।७८॥)इति णिनिः । एकं विनीताश्वस्य । '[12]भलुंसीखविउं[13]' इति भाषा ॥

### दुर्विनीतस्तु शूकलः[1] ॥१२३५॥

१ दुर्विनीतोऽनात्तशिक्षः, शक्नोति स्वेच्छया **शूकलः** । 'शक्लृ शक्तौ'(स्वा.प.अ.), पृषोदरादिः । एकं दुर्विनीताश्वस्य ॥१२३५॥

### [1]कश्यः कशार्हः

१ [14]कशामर्हति **कश्यः**। दण्डादित्वाद् यः । एकं कशाताडनार्हाश्वस्य ॥

### हृद्वक्त्रावर्ती श्रीवत्सकी[1] हयः ।

१ हृदि वक्त्रे च आवर्ता रोमावर्ता, [15]भ्रमरा इति प्रसिद्धाः[16], सन्त्यस्य हृद्वक्त्रावर्ती । 'अत इनिठनौ'५।२।११५॥ इतीनिः । श्रीवत्सको रोमावर्तोऽस्त्यस्य **श्रीवत्सकी**। 'अत इनिठनौ'५।२।११५॥ । "श्रीवत्सकी स विज्ञेयः श्रीवत्सो यस्य लाञ्छनम्"[ ]इति ।

"निगालस्थो य आवर्तः स हि देवमणिर्मतः ।
तथा वक्षसि वाहस्य श्रीवत्सकं[17] उदाहृतः ॥१॥"

[हारावली, अर्धश्लोकावधिः, श्लो-१८(११८)]इति हारावली । "श्रीवत्सकी[18] पुरुषकोन्नमिताग्रकायः"[शिशुपालवधम्, सर्गः-५, श्लो-५६]इति माघः ।

"उरःस्था यस्य चत्वार आवर्तास्तु प्रदक्षिणाः ।
एतैः श्रीवत्सकी नामा हयः सर्वार्थसाधकः ॥२॥"

[ ]इति शालिहोत्रः। एकं हृदये मुखे च रोमावर्तयुताश्वस्य॥

### [1]पञ्चभद्रस्तु हृत्पृष्ठमुखपार्श्वेषु पुष्पितः ॥१२३६॥

१ हृत्पृष्ठमुखपार्श्वेषु पुष्पितो धवलो योऽश्वस्तस्यैकम्, पञ्च हृदयादीनि श्वेतानि भद्राणि कल्याणहेतवोऽस्य **पञ्चभद्रः** ॥१२३६॥

### पुच्छोरःखुरकेशास्यैः सितैः स्यादष्टमङ्गलः[1] ।

१ अत्र द्वन्द्वगर्भे द्वन्द्वे[19] प्राण्यङ्गसमुदायस्याऽप्राण्यङ्गत्वादितरेतरयोगः, पुच्छाद्यैरष्टभिः सितैः मङ्गलः कल्याणः **अष्टमङ्गलः** ॥

---

१. '-वोऽर्थे' इति२॥ २. '-रः' इति१॥ ३. द्र. पदचन्द्रिका, भा-२, क्षत्रवर्गः, श्लो-४९८, पृ.५८४-५८५॥ ४. '-विति' इति४॥ ५. 'वनाक्षः' इति२.५॥ ६. 'वनायुदेश्यास्ते' इति१, 'वनायुदेश्याः' इति रघुवंशे, पृ.१३३॥, तत्र-'वनायुजास्ते' इति पाठान्तरेण दृश्यते ॥ ७. द्र. पदचन्द्रिका, भा-२, क्षत्रवर्गः, श्लो-४९९, पृ.५८५॥, रामाश्रमी२।८।४५॥, पृ.३६६॥ ८. '-शी-' ४.५॥ ९. '-शी-' इति४॥ १०. 'वनायुजादिषु' इति अम. क्षीरस्वामिटीकायाम्, पृ.१८५॥ ११. इतोऽग्रे २प्रतौ 'शोभनं' इति दृश्यते ॥ १२. 'भलु-' इति२॥ १३. '-उ' इति२, 'भलौ सीखवीयो' इति३, 'भलौ सीखायौ' इति४॥ १४. 'कश-' इति३॥ १५. 'भ्रा-' इति१.४॥ १६. '-द्धः' इति३॥ १७. 'श्रीवृक्षकः' इति हारावल्याम्, पृ.४०२॥ १८. 'श्रीवृक्षकी' इति शिशुपालवधे, पृ.१३६॥ १९. १.२.३प्रतिषु नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सिते तु कर्क[1]-कोका[2]हौ**

१ सिते श्वेतवर्णेऽश्वे, करोति शोभां प्रमोदं वा **कर्कः** । कृञः[1] 'कृदाधार्त्तिकनिभ्यः(-र्चिकलिभ्यः) कः' (उणा-३२०)इति कः । २ कोकवदाहन्ति भुवमिति **कोकाहः** । 'अन्येभ्यो(ष्व)पि-'३।२।१०१॥ इति डः । हंसलाघोडानाम्नी द्वे ॥

**खोङ्गा[1]हः श्वेतपिङ्गले ॥१२३७॥**

१ खमाकाशमुद्गाहते **खोङ्गाहः** । पृषोदरादिः । श्वेतश्चासौ पिङ्गलश्च श्वेतपिङ्गलः, तत्र । त्रिवर्णोऽयम्, पीतरक्तस्तु पिञ्जरः कपिलः पिङ्गल इति । एकं श्वेतपीतरक्ता[3]श्वस्य ॥१२३७॥

**पीयूषवर्णे सेरा[1]हः**

१ पीयूषममृतं दुग्धं वा, तद्वर्णोऽस्य[4] पीयूषवर्णः, तत्र । सीरवदाहन्ति भुवं **सेराहः** । पृषोदरादिः । एकं दुग्धवर्णाश्वस्य ॥

**पीते तु हरि[1]यो हये ।**

१ पीते पीतवर्णे हयेऽश्वे[5], हरिवर्णं याति **हरियः** । 'सुपि-'३।२।४॥ इति कः । एकं पीतवर्णाश्वस्य ॥

**कृष्णवर्णे तु खुङ्गा[1]हः**

१ खु[6]रैर्गाहते भुवं **खुङ्गाहः**। पृषोदरादिः। हेमोऽपि। ''हेमश्च कृष्णवर्णोऽश्वः''[हलायुधकोशः२।४३७॥] इति हलायुधः । एकं कृष्णवर्णाश्वस्य ॥

**क्रिया[1]हो लोहितो हयः ॥१२३८॥**

१ क्रियां न जहाति **क्रियाहः** । पृषोदरादिः । एकं रक्ताश्वस्य ॥१२३८॥

**आनीलस्तु नील[1]कः**

१ आनीलः सामस्त्येन नीलः, नील एव **नीलकः**। स्वार्थे कन् । एकं नीलाश्वस्य ॥

**अथ त्रियू[1]हः कपिलो हयः ।**

१ त्रीन् यूषति **त्रियूहः** । पृषोदरादिः । कपिलः पीतरक्त[7]वर्णोऽश्वस्तस्यैकम् ॥

**वो[1]ल्लाहस्त्वयमेव स्यात् पाण्डुकेश[8]रवालधिः ॥१२३९॥**

१ अयमेव त्रियूह एव व्योम उल्लङ्घते **वोल्लाहः**। पृषोदरादिः । पीतरक्तवर्णो धवलस्कन्धकेशपुच्छश्च योऽश्वस्तस्यैकम् ॥१२३९॥

**उरा[1]हस्तु मनाक् पाण्डुकृष्णजङ्घो भवेद् यदि ।**

१ मनाक् पाण्डुरीषद्धवलो यदि कृष्णजङ्घश्च भवेत्, स **उराहः** प्रोच्यत इत्यन्वयः । उरसाऽऽहन्ति उराहः । पृषोदरादिः । एकमीषद्धवलकृष्णा[9]जङ्घाश्वस्य ॥

**सुरू[1]हको गर्दभाभः**

१ सुखेन रोहति **सुरूहकः**। पृषोदरादिः। गर्दभस्येव आभा वर्णो यस्य स गर्दभाभः । एकं गर्दभवर्णाश्वस्य ॥

**वोरु[1]खानस्तु पाटलः ॥१२४०॥**

१ वैरिणः खनति **वोरुखानः** । पृषोदरादिः । एकं [10]श्वेतरक्तवर्णाश्वस्य ॥१२४०॥

**कु[1]लाहस्तु मनाक् पीतः कृष्णः स्याद् यदि जानुनि।**

१ कुलमाजिहीते **कुलाहः** । मनागीषत् पीतः, शरीरे यदि जानुनि कृष्णः, स कुलाह इत्यर्थः । एकमीषत्पीतवर्णकृष्णजान्वश्वस्य ॥

**उक[1]नाहः पीतरक्तच्छायः**

१ उत्कैर्नह्यत **उकनाहः**, ह्रस्वादिः । पृषोदरादिः[11]। एकं पीतरक्तच्छायाश्वस्य[12] ॥

**स एव तु क्वचित् ॥१२४१॥**

**कृष्णरक्तच्छविः प्रोक्तः**

१ स एव **उकनाह**नामा ॥१२४१॥ कृष्णरक्तच्छायः सन् क्वचिच्छालिहोत्रादौ शास्त्रे, स एव उकनाह एवोच्यत इत्यर्थः ॥

१. 'कृञ्-' इति३॥ २. 'हां-' इति१.२॥ ३. '-रक्तपीता-' इति१॥ ४. '-स्या' इति५॥ ५. '-ऽश्वे' इति ३प्रतौ नास्ति ॥ ६. 'ख-' इति४॥ ७. 'क्तः' इति२॥ ८. '-स-' इति१.२.५॥ ९. '-ष्णा-' इति५॥ १०. 'श्वेतव-' इति३.४॥ ११. २प्रतौ नास्ति ॥ १२. '-च्छव्यश्वस्य' इति१.२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**शोणः[1] कोकनदच्छविः ।**

१ कोकनदच्छविः रक्तोत्पलकमलकान्तिरेतादृग् योऽश्वः, स **शोणः** शोणवर्णः । "रक्तः शोणः[2]"[हलायुधकोशः२।४३७॥]इति हलायुधः । एकं रक्तवर्णाश्वस्य ॥

**हरिकः[1] पीतहरितच्छायः स एव हालकः[2] ॥१२४२॥**

१ हरिरेव (हरिरिव) **हरिकः** । 'इवे प्रतिकृतौ' ५।३।९६॥ कन्। २ हलति क्ष्मां **हालकः**। 'हल विलेखने' (भ्वा.प.से.), ण्वुल् । द्वे पीतनीलाश्वस्य ॥१२४२॥

**पङ्गुलः[1] सितकाचाभः**

१ पङ्गून् लाति **पङ्गुलः** । सितः श्वेतः काचस्तद्वदाभा[3] शरीरकान्तिर्यस्य स, तथा। एकं श्वेतकाचवर्णाश्वस्य॥

**हलाहश्चित्रितो[1] हयः ।**

१ हलवदाहन्ति **हलाहः** । 'अन्येभ्यो(ष्व)पि-' ३।२।१०१॥ इति डः। चित्रितः कर्बुरवर्णः[4] । एकं कर्बुरवर्णाश्वस्य । खोङ्गाहादयः शब्दा देशीप्रायाः । व्युत्पत्तिस्त्वेषां वर्णानुपूर्वीनिश्चयार्थम् । शेषश्चात्र-

"मल्लिकाख्यः(-काक्षः)सितैर्नेत्रैः स्याद् वाजीन्द्रायुधोऽसितैः ।
ककुदी[5] ककुदावर्तो निर्मुक्त(निर्मुष्क)स्त्विन्द्रवृद्धिकः ॥१॥"
[शेषनाममाला ४।१८०-१८१॥] ॥

**ययुरश्वोऽश्वमेधीयः[1][2]**

१ याति स्वेच्छया **ययुः**, पुंसि.। 'या प्रापणे' (अ.प.अ.), 'यो द्वे च'(उणा-२१)इति कुप्रत्ययो द्वित्वं च । २ अश्वमेधाय हितः **अश्वमेधीयः** । 'अश्वमेधाच्छः' (   )इति छः । द्वे अश्वमेधयागार्हस्य ॥

**प्रोथमश्वस्य[1] नासिका ॥१२४३॥**

१ प्रवते **प्रोथः**, पुंक्ली. । 'प्रुङ्[7] गतौ'(भ्वा. आ.अ.), 'वृषि(उषि)कृषि-'(उणा-१६१)इति बाहुलकात् थन् । प्रोथत इति वा । 'प्रोथ पर्याप्तौ'(   ), अच् । 'प्रोथृः(प्रोथृ) पर्याप्तौ'(भ्वा.उ.से.), 'हलश्च' ३।३।१२१॥ इति करणे घञ् वा । "प्रोथो वृत्तौ[8] [9]नासामूलप्रदेशः"[अम.क्षीर.२।८।५०॥]इति स्वामी । "प्रोथैः स्फुरद्भिः स्फुटशब्दमुन्मुखैः"[शिशुपालवधम्, सर्गः-१२, श्लो-७३]इति माघः । एकमश्वनासायाः[10] । '[11]फोरणा' इति भाषा ॥१२४३॥

**मध्यं कश्यम्[1]**

१ 'नीग्वञ्चुस्रंसुध्वंसु-'७।४।८४॥ इत्यत्र कशिः सौत्रो धातुः, यद्वा 'कश गतिशासनयोः[12]'(   ), अदादिः। कशति[13] गमयत्यश्वं कशा । पचाद्यच्, टाप् । कशायै अर्हं **कश्यम्** । दण्डादित्वाद् यः । तत्र कशाघाताधिकारः । एकमश्वमध्यप्रदेशस्य ॥

**निगालस्तु[1] गलोद्देशः**

१ [14]निगिरत्यनेन **निगालः** । 'गॄ निगरणे'(तु.प.से.), 'उन्योर्ग्रः'३।३।२९॥ इति घञ् । [नि]गलत्यनेनेति वा । 'गल अदने'(भ्वा.प.से.), 'हलश्च'३।३।१२१॥ इति घञ्। "घण्टाबन्धसमीपस्थो निगालः कीर्तितो बुधैः" [[15]]इति । गलस्य उद्देशः प्रदेशो देवमणे[16]रावर्तस्थानं गलोद्देशः । एकमश्वगलहृदयस्कन्धस्य सन्धेः[17] ॥

**खुराः[1] शफाः ।**

१ खुरन्ति छिन्दन्ति भुवमिति **खुराः** । 'खुर छेदने[18]'(तु.प.से.), 'इगुपध-'३।१।१३५॥इति कः, कवर्गद्वितीयादिः । "भजेथाः पश्चान्मां वरतनु पुरस्तान् मृगखुरक्षुरप्रत्यालेखस्थपुटितविभागा वन भुवः"[[19]]इति प्रयोगः । २ शमयन्ति पादाघातव्यथाम्, पचाद्यचि, नैरुक्तो मकारस्य फकारः । 'स्फुर स्फुरणे'(तु.प.से.), । फर इत्येके। शं सुखं यथा स्यात् तथा फरन्त्यनेन । घञर्थे के **शफाः**। पृषोदरादित्वाद् वा। पुंक्लीबलिङ्गः[20] । द्वे खुरस्य॥

---

१. २.३प्रत्योर्न दृश्यते ॥ २. 'शोणो रक्तः' इति हलायुकोशे, पृ.५०॥ ३. '-स्तदाभा' इति३.४.५॥ ४. '-रः' इति१॥ ५. १.३.४.५प्रतिषु नास्ति ॥ ६. तुलनीयोऽमरकोषः२।४।८५॥ ७. 'प्लु' इति४॥ ८. '-त्तौ' इति३॥ ९. 'नाशान्तःप्र-' इति अम.क्षीरस्वामिकृतटीकायाम्, पृ.१८६॥ १०. '-शायाः' इति१॥ ११. 'फु-' इति४.५॥ १२. क्षीरतरङ्गिण्यादौ मतान्तरेणाऽयं धातुपाठः ॥ १३. 'कसन्ति' इति३॥ १४. 'निग-' इति३॥ १५. द्र. पदचन्द्रिका, भा-२, क्षत्रवर्गः, श्लो-५०२, पृ.५९०॥, रामाश्रमी२।८।४८॥, पृ.३६८॥ १६. '-रोमावर्त-' इति३.४.५॥ १७. '-हृदयस्कन्धे:' इति३॥ १८. सायणसम्मतोऽयं पाठः, 'क्षुर खुर विलेखने' इति स्वामी, 'खुर च्छेदने खण्डने च' इति मैत्रेयः ॥ १९. द्र. पदचन्द्रिका, भा २. क्षत्रवर्गः, श्लो-५०३, पृ.५९२॥ २०. '-बः' इति३, '-ङ्गाः' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अथ पुच्छं[1] वालहस्तो[2] लाङ्गूलं[3] लूम[4] वालधिः[5] ॥१२४४॥**

१ पवते दंशादीनुत्सारयति **पुच्छम्,** पुंक्ली.। 'पूङ् पवने'[1](भ्वा.आ.से.), 'पूङो ह्रस्वश्च'(हैमोणा-१२५)इति छक्। पुतौ छादयतीति, पृषोदरादिर्वा। 'पुच्छ प्रमादे'[2] (   ), 'इगुपध-'३।१।१३५॥ इति कों[3] वा। २ प्रशस्ता वाला अस्य **वालहस्तः**। वालानां हस्त इव दंशादिवारणाद् वालहस्त इति वा। ''हस्तः पाशः पक्षश्च कलापार्थाः[5]''[अमरकोषः२।६।९८॥]इत्युक्तम्[6]। तेन वालहस्तो वालसमूहो वा। ३ लङ्गति चलति **लाङ्गूलम्,** पुंक्ली.। 'लगि गतौ'(भ्वा.प.से.), 'खर्जिपिञ्जादिभ्य ऊरोलचौ'(उणा-५३०)इत्यूलच्, 'अन्येषामपि-'६।३।१३७॥ इति दीर्घः। ४ लूयत इति **लूम,** पुंक्ली.। '-मन्'(उणा-५८४)इति मन्, बाहुलकाद् गुणाभावः। लूमनी, लूमानि इत्यादि। ''धूमवत्, मकि लूममदन्तम्''[पदचन्द्रिका, भा-२, क्षत्त्रवर्गः, श्लो-५०४]इति[7] मिश्राः। ५ वाला धीयन्तेऽत्र **वालधिः,** पुंसि। 'कर्मण्यधिकरणे च'३।३।९३॥इति किः। पञ्च पुच्छस्य[8] ॥१२४४॥

**अपावृत्त[1]परावृत्त[2]लुठितानि[3] तु वेल्लिते[4]।**

१ अपावर्तनम् **अपावृत्तम्**। २ परावर्तनं **परावृत्तम्**। ३ लुठ्यते स्म **लुठितम्**। ४ वेल्ल्यते स्म **वेल्लितम्**। सर्वत्र निष्ठा, तत्र। अश्वलोटनना[9]मानि चत्वारि॥

**धोरितं[1] वल्गितं[2] प्लुतो[3]त्तेजितो[4]त्तेरितानि[5] च॥१२४५।**

**गतयः पञ्च धाराख्या[1]स्तुरङ्गाणां क्रमादिमाः।**

१ धोरिताद्याः क्रमादनुक्रमेण इमा वक्ष्यमाणास्तुरङ्गाणामश्वानां[10] पञ्च गतयः **धाराख्या** धारानाम्न्यः[11], उच्यन्त इति शेषः। धार्यन्ते गतौ स्थाप्यन्तेऽश्वा अत्रेति धाराः। धृञो ण्यन्ताद् भिदाद्यङि टाप्॥१२४५॥

**तत्र धौरितकं[1] धौर्यं[2] धोरणं[3] धोरितं[4] च तत् ॥१२४६॥**

**बभ्रुकङ्कशिखिक्रोडगतिवत्**

१ तत्रेति गतिपञ्चकमध्ये, 'धोर(धोर्ऋ) गतिचातुर्ये'(भ्वा.प.से.), भ्वादिः, परस्मैपदी, क्तः, स्वार्थे कनि, धोरितकम्। स्वार्थेऽणि वृद्धौ च **धौरितकम्**। २ **धौर्यम्,** 'ऋहलोर्ण्यत्'३।१।१२४॥। ३ नन्द्यादित्वाल्ल्यौ **धोरणम्**। ४ भावे निष्ठायां **धोरितम्** ॥१२४६॥ तच्च नकुलकङ्कमयूरशूकरगतिसदृशमित्यर्थः। ''वर्ध्राबद्धा धोरि[12]तेन प्रयाता''[शिशुपालवधम्, सर्गः-१८, श्लो-५]इति माघः। प्रथमतो लक्षणोपेतधोरितगतिनामानि चत्वार्युक्तानि। इत्यश्वगतेः प्रथमो[13] भेदः॥

**वल्गितं[1] पुनः।**

**अग्रकायसमुल्लासात् कुञ्चितास्यं नतत्रिकम् ॥१२४७॥**

१ वल्गनं **वल्गितम्**। 'वल्ग वल्गने[14]'(भ्वा.प.से.), भावे क्तः। अग्रकायसमुल्लासात्[15] कुञ्चितास्यं वक्रमुखं नतत्रिकं नतपश्चाद्भागम्। ''द्रुतवल्गितपादस्तु तक्ष्यमाणो धुराङ्कुरैः''[ ]इति हरिवंशः। एकं लक्षणोपेतवल्गितगतेः। इत्यश्वगतेर्द्वितीयो भेदः ॥१२४७॥

**प्लुतं[1] तु लङ्घनं[2] पक्षिमृगगत्यनुहारकम्।**

१ 'प्लुङ् गतौ'(भ्वा.आ.अ.), भावे क्तः [**प्लुतम्**]। २ लङ्घ्यते **लङ्घनम्**। 'लघि[16] गतौ'(भ्वा.प.से.), भावे ल्युट्। पक्षिणां मृगाणां च गत्यनुयायि। ''हेषितैः स्पर्धते वायुं[17] प्लुतैर्लङ्घयते नभः''[ ]इति हरिवंशः। द्वे लक्षणोपेतप्लुतगतेः। अश्वगतेस्तृतीयो भेदः॥

**उत्तेजितं[1] रेचितं[2] स्यान्मध्यवेगेन या गतिः॥१२४८॥**

१ उत्तेजनम् **उत्तेजितम्**। 'तिज निशाने'(भ्वा.प.से.), भावे क्तः। २ रेचनं **रेचितम्**। 'रिचिर् विरेचने'(स्वा.उ.अ.), क्तः। मध्यवेगेन या गतिः गमनम्। द्वे लक्षणोपेतोत्तेजितगतेः। अश्वगतेश्चतुर्थो भेदः ॥१२४८॥

**उत्तेरित[1]मुपकण्ठ[2]मास्कन्दितक[3]मित्यपि**

**उत्प्लुत्योत्प्लुत्य गमनं कोपादिवाखिलैः पदैः ॥१२४९॥**

---

१. '-त्र्' इति५॥ २ 'पाने' इति३॥ ३ क्षीरतरङ्गिण्यादावयं धातुर्न दृश्यते॥ ४ अन्तरङ्गत्वात् तुकि सतीगुपधत्वाभावादयं चिन्त्यः॥ ५. 'पाशः पक्षश्च हस्तश्च कलापार्थाः' इत्यमरकोषे॥ ६. अमरकोषे॥ ७ 'अपि' इति३॥ ८ 'गु-' इति३॥ ९.' त्रा-' इति१॥ १०. १.२.४.५प्रतिषु नास्ति॥ ११. '-म्ना' इति४॥ १२. 'धौ-' इति शिशुपालवधे, पृ.४४६॥ १३. '-म-' इति४.५॥ १४ क्षीरतरङ्गिण्यादौ वल्गधातुर्गतावर्थे दृश्यते॥ १५. '-स्यात्' इति३.५॥ १६. 'लगि' इति१॥ १७ '-युः' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ उत्तेरणम् **उत्तेरितम्** । २ उपनतः कण्ठोऽस्मिन् **उपकण्ठम्** । ३ आस्कन्दनम् आस्कन्दितम् । स्वार्थे कनि **आस्कन्दितकम्** । कीदृशम्? कोपादिवाऽखिलैः पदैरित्यखिलैश्चतुर्भिः पदैश्चरणैः उत्प्लुत्य उत्प्लुत्य गमनम् । त्रीणि लक्षणोपेतोत्तेरितगतेः । अश्वगतेः पञ्चमो भेदः ॥१२४९॥

## आश्वीनोऽध्वा स योऽश्वेन दिनेनैकेन गम्यते ।

१ एकेन दिनेन योऽध्वा मार्गोऽश्वेन गम्यते, सोऽध्वा **आश्वीनः** उच्यत इत्यन्वयः। 'अश्वस्यैकाहगमने(-गमः)' ५।२।१९॥ इति खञ् । त्रिलिङ्गः । आश्वीनोऽध्वा, आश्वीनं वर्त्म, आश्वीना पदवी[१] । एकमेकदिनाश्वगम्यमार्गस्य ॥

## कवी खलीनं कविका कवियं मुखयन्त्रणम् ॥१२५०॥ पञ्चाङ्गी

१ कवते दन्तचर्वणात्[२] कविः । 'कुङ् शब्दे'(भ्वा. आ.अ.), 'अच इः'(उणा-५७८), 'कृदिकारात्-'४।१।४५॥ इति ङीषि **कवी,** नदीवत् । २ खे मुखे लीनः **खलीनः** । पृषोदरादित्वाद् ह्रस्वेकारे खलिन इत्यपि । ३ स्वार्थे कनि, 'केऽणः'७।४।१३॥ इति ह्रस्वत्वे[३] **कविका** । ४ कौति **कवियम्,** पुंक्ली. । 'कु शब्दे'(भ्वा.प.अ.), 'कौतेरियः' (हैमोणा-३७५)। ५ मुखं यन्त्र्यतेऽनेन **मुखयन्त्रणम्** । 'यत्रि बन्धने[४]'(चु.उ.से.), करणे ल्युट् ॥१२५०॥ ६ पञ्च अङ्गान्यवया अस्याः **पञ्चाङ्गी** । [५]चउकडानामानि षट् ॥

## वक्त्रपट्टे तु तलिका तलसारकम् ।

१ वक्त्रस्य चर्ममये पट्टे, तलमस्त्यस्याः **तलिका** । 'अत इनिठनौ'५।२।११५॥ इति ठन्[६] । २ तले सरति **तलसारकम्** । 'सृ गतौ'(भ्वा.प.अ.), ण्वुल् । द्वे अश्वस्य[७] चर्ममयमुखपट्टस्य । 'मुहंड' इति भाषा ॥

## दामाञ्चनं पादपाशः

१ दाम्नेव बद्धोऽञ्चत्यनेन **दामाञ्चनम्** । करणे ल्युट् । २ पादयोः पाशः **पादपाशः** । द्वे पादपाशस्य । 'पछाडी' इति भाषा ॥

## प्रक्षरं प्रखरः समौ ॥१२५१॥

१ प्रच्छादितः क्षरति चलत्यनेन **प्रक्षरम्** । 'क्षर चलने[८]'(भ्वा.प.से.), 'पुंसि संज्ञायाम्-'३।३।११८॥ इति बाहुलकाद् घः। २ **प्रखरो**ऽतिकठोरः, आयुधैरभेद्यत्वात् । पुंस्ययम्, क्लीबेऽपि[९] वैजयन्ती, यदाह-''प्रक्षरं प्रखरोऽस्त्रियाम्''[वैजयन्तीकोषः३।७।११५॥]इति । द्वे अश्वसन्नाहस्य । 'पाखर' इति भाषा ॥१२५१॥

## चर्मदण्डे कशा

१ अश्वानां ताडनाय चर्मणो दण्डः **चर्मदण्डः,** तत्र। २ कशति **कशा,** तालव्यान्ता । ''चर्मदण्डः कशा प्रोक्ता'' [हलायुधः२।४४२॥]इति हलायुधः । द्वौ समौ''[ ]इति तट्टीका । ''चर्मपदा[१०]भावेऽपि दण्ड इत्यपि''[ ]इति हलायुधटीका । द्वे चर्मदण्डस्य । 'आगवीसेड' इति भाषा ॥

## रश्मौ वल्गाऽवक्षेपणी कुशा ।

१ अश्नुतेऽनया **रश्मिः,** स्त्रीलिङ्गः । 'अशूङ् (अशू) व्याप्तौ[११]'(स्वा.आ.वे.), 'अशे रश्मादेः (अशोरश्मादिः[१२])'(हैमोणा-६८८)इति मिः, तत्र। २ वल्गत्यनया **वल्गा** । ३ अवक्षिप्यतेऽनया **अवक्षेपणी** । 'क्षिप प्रेरणे'(दि.प.अ., तु.उ.अ.), करणे ल्युट् । ४ कुश्यति[१३] **कुशा** । 'कुश श्लेषे[१४]'(दि.प.से.), 'इगुपध-'३।१।१३५॥ इति कः । चत्वारि कुशायाः । 'वाग' इति भाषा ॥

## पर्याणं तु पल्ययनम्

१ परितोऽश्वपृष्ठमेति[१५] **पर्याणम्** । 'इण् गतौ' (अ.प.अ.), 'कल्याणपर्याणादयः'(हैमोणा-१९३)इति साधुः । २ परितोऽयतेऽनेन **पर्ययनम् (पल्ययनम्)** इति[१६]। 'अय गतौ'(भ्वा.आ.से.), करणे ल्युट्, 'उपसर्गस्यायतौ' ८।२।१९॥ इति लत्वम् । [१७]पलाणनाम्नी द्वे ॥

---

१. इतोऽग्रे ५प्रतौ 'एवं' इति दृश्यते ॥ २. 'चन्द्रदन्तकर्वणात्' इति१, '-चर्चणात्' इति४॥ ३. १प्रतौ नास्ति ॥ ४ 'यत्रि सङ्कोचने' इति क्षीरतरङ्गिण्यादयः ॥ ५. 'चौक-' इति३॥ ६. 'इन्' इति४.५॥ ७ 'अश्वच-' इति३॥ ८ 'प्रचलने' इति१, 'सञ्च-' इति३, क्षीरतरङ्गिण्यादयश्च ॥ ९. '-ऽपि' इति ५प्रतौ नास्ति ॥ १०. '-दण्डा-' इति१॥ ११. 'व्याप्तौ सङ्घाते च' इति मैत्रेयसायणौ ॥ १२. 'अशे रश च'(१।१५॥)इति दशपाद्युणादिगणसूत्रम् ॥ १३. '-ते' इति३॥ १४ 'श्लेषणे' इति३, दुर्गसम्मतोऽयं धातुपाठः ॥ १५. '-मिति' इति१॥ १६. २प्रतौ नास्ति ॥ १७ 'पल्हा-' इति१.२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वीतं[1] फल्गु[2] हयद्विपम् ॥१२५२॥**

१ वीयतेऽसारतया क्षिप्यते **वीतम्**। 'वी गत्यादौ' (अ.प.से.), बाहुलकाद् 'हसिमृग्रिण्-'(उणा-३६६)इत्यादिना तन्। फल्गु असारम्, हयाश्च द्विपाश्च हयद्विपम् । सेनाङ्गत्वादेकवद्भावः। असाराश्च । असारहस्तिनाम एकम्। 'टार' इति भाषा हयानाम्, 'खोरटउं'[2] इति भाषा गजानाम् ॥

**॥ इत्यश्ववर्गः ॥ १२५२॥**

**वेसरो[1]ऽश्वतरो[2] वेगसरश्च[3]**

१ अजन्त्यनेन[3] **वेसरः** । २ अश्वेन अश्वायां[4] जातोऽश्वः, स गर्दभपितृ[क]तया सञ्जातह्रासः **अश्वतरः** । 'वत्सोक्षाश्वर्षभेभ्यश्च-'५।३।९१॥ इति ष्टरच् । अश्वशब्दार्थस्य व्यक्तेस्तनुत्वं प्रवृत्तिनिमित्तजातिद्वारकम्, प्रवृत्तिनिमित्तं चेहाश्वादन्यस्मिन् सदृशजात्यन्तरयोगिनि आरोप्यत इति गौणत्वे तनुत्वम् । ष्टरचः षित्वात् स्त्रियामश्वतरी[5] । ३ वेगेन सरति गच्छति **वेगसरः** । 'सृ गतौ'(भ्वा.प.अ.), अच् । त्रीणि 'खचर' इति ख्यातस्य ॥

**अथ क्रमेलकः[1] ।**

**कुलनाशः[2] शिशुनामा[3] शलो[4] भोलि[5]र्मरुप्रियः[6] ॥१२५३॥**
**मयो[7] महाङ्गो[8] वासन्तो[9] द्विककुद्[10] दुर्गलङ्घनः[11] ।**
**भूतघ्न[12] उष्ट्रो[13] दासेरो[14] (दाशेरो) रवणः[15]**
**कण्टकाशनः[16] ॥१२५४॥**
**दीर्घग्रीवः[17] केलिकीर्णः[18]**

१ क्रामन्ति देशान्तरमनेन **क्रमेलकः**। 'क्रमु पादविक्षेपे'(भ्वा.प.से.) 'क्रमेरेलकः'(हैमोणा-६६)इत्येलकः । क्रमान् पादानेलयति क्रमेलः । 'अल प्रेरणे'(चु.उ.से.), 'इगुपध-'३।१।१३५॥ इति कः, स्वार्थे कनि क्रमेलकः । २ कुलं नाशयति **कुलनाशः** । णशेर्णिजन्तात् 'कर्मण्यण्' ३।२।१॥ । ३ शिशोर्नामाऽस्य **शिशुनामा**, नकारान्तः । ४ शलति **शलः** । 'शल गतौ'(भ्वा.प.से.), अच् । ५ भूरुहान्[6] लेढि **भोलिः**, पृषोदरादिः। ६ मरुर्धन्वा प्रियोऽस्य **मरुप्रियः** ॥१२५३॥ ७ मयते गच्छतीति **मयः** । 'मय गतौ'(भ्वा.आ.से.), अच्। ८ महदङ्गमस्य **महाङ्गः**। ९ वसन्ते भवो **वासन्तः** । 'तत्र भवः'४।३।५३॥ इत्यण् । १० द्वे ककुदी अस्य **द्विककुद्**, दकारान्तः । ११ दुर्गं मार्गं लङ्घयत्यनेन **दुर्गलङ्घनः**। करणे ल्युट् । १२ भूतानि हन्ति **भूतघ्नः**। 'अमनुष्यकर्तृके च'३।२।५३॥ इति टक् । १३ उष्यते दह्यते मराविति **उष्ट्रः** । 'उष दाहे'(भ्वा.प.से.), '-ष्ट्रन्'(उणा-५९८)इति ष्ट्रन्, बाहुलकादगुणत्वम् । १४ दशेरेषु मरुषु भवो **दाशेरः** । 'तत्र भवः' ४।३।५३॥इत्यण् । १५ रौतीत्येवंशीलो **रवणः** । 'चलनशब्दा[र्था]त्-'३।२।१४८॥ इति युच् । १६ कण्टका अशनमस्य **कण्टकाशनः** ॥१२५४॥ १७ दीर्घा ग्रीवाऽस्य **दीर्घग्रीवः** । १८ केल्या कीर्यते स्म **केलिकीर्णः** । 'कॄ विक्षेपे'(तु.प.से.), निष्ठा, 'ॠत इद्धातोः'७।१।१००॥ । सामान्येनाऽष्टादश उष्ट्रस्य ॥

**करभस्तु[1] त्रिहायणः ।**

१ 'कॄ विक्षेपे'(तु.प.से.), कीर्यते **करभः**, 'कॄगॄशृशलिकलि-'(दशपाद्युणा-७।१८॥)इत्यभच् । त्रीणि हायनान्यस्य त्रिहायणः । 'त्रिचतुर्भ्यां हायनस्य'(वा- )इति णत्वम् । एकं त्रिवर्षोष्ट्रस्य । 'करहउं'[8] इति भाषा ॥

**स तु शृङ्खलकः[1] काष्ठमयैः स्यात् पादबन्धनैः ॥१२५५॥**

१ स करभः काष्ठमयैर्दारुनिर्मितैः पादबन्धनैर्युक्तः **शृङ्खलकः** उच्यते इत्यन्वयः । शृङ्खलमस्य बन्धनं[11] शृङ्खलकः । 'शृङ्खलमस्य बन्धनं करभे'५।२।७९॥ इति सूत्रेण शृङ्खलशब्दात् कन्प्रत्ययः । करभाणां काष्ठमयपादबन्धनं शृङ्खलं (वेयः[12] शब्दश्चायं बन्धनं तु भवतु मा वा-भूत्) । "करभाः स्युः शृङ्खलका दारवैः पादबन्धनैः" [अमरकोषः२।९।७५॥]इत्यमरः ॥१२५५॥

**गर्दभस्तु[1] चिरमेही[2] वालेयो[3] रासभः[4] खरः[5] ।**
**चक्रीवान्[6] शङ्कुकर्णः[7]**

१. '-वम्' इति१॥ २. '-टो' इति३॥ ३. '-त्य-' इति१॥ ४ इतोऽग्रे ३प्रतौ 'वा' इति दृश्यते ॥ ५ इतोऽग्रे प्रतौ 'प्रवृत्तिनिमित्तजातिद्वारकं' इति दृश्यते ॥ ६. द्र. मा.धातुवृत्तिः, स्वादिः, धातुसं-१९, पृ.४५६॥ ७ '-ह्यन्' इति४.५॥ ८ १प्रतौ नास्ति॥ ९ '-सन-' इति१॥ १०. '-ओ' इति१, '-हो' इति३, '-हौ' इति४॥ ११. 'बन्धनमस्य' इति३॥ १२. कोष्ठान्तर्गतपाठोऽस्पष्टः प्रतिभाति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ गर्दति शब्दायते **गर्दभः**। 'गर्द शब्दे'[१](भ्वा.प.से.), 'कृगॄशॄशलिगर्दिभ्योऽभच्'(दशपाद्युणा-७।१८॥)। २ चिरं मेहति[२] **चिरमेही** । 'मिह सेचने'(भ्वा.प.अ.), ग्रहादित्वाण्णिनिः । ३ वाडते आप्लवते **वालेयः** । 'वाडृ आप्लाव्ये[३]'(भ्वा.आ.से.), बाहुलकादेयः । बालेभ्यो हित इति वा । 'तस्मै हितम्'२।१।५॥ इति छः । ४ रासते **रासभः**, दन्त्यमध्यः । 'रासृ शब्दे'(भ्वा.आ.से.), 'रासिवल्लिभ्यां च'(उणा-४०५)इत्यभच् । ५ खं कण्ठबिलं महदस्याऽस्ति **खरः** । 'खनखमुखं[४]-'(वा-५।२।१०७॥) इति रः । ६ चक्रं मण्डलं मेहनान्तेऽस्य **चक्रीवान्** । 'चर्मण्(आसन्दी)वदष्ठीवच्चक्रीवत्-'८।२।१२॥ इति मतुपि साधुः । चक्रीवन्तौ इत्यादि । ७ शङ्क्वाकृती कर्णावस्य **शङ्कुकर्णः** । सप्त रासभस्य ॥

॥ गवाधिकारः ॥

**अथ ऋषभो वृषभो वृषः ॥१२५६॥**
**वाडवेयः सौरभेयो[५] भद्रः[६] शक्कर-शाक्करौ ।**
**उक्षाऽनड्वान् ककुद्मान् गौर्बलीवर्दश्च शाङ्करः ॥१२५७॥**

१ ऋषति गच्छति **ऋषभः** । 'ऋषी गतौ' (तु.प.से.), सप्तमस्वरादिः। 'ऋषिवृषिभ्यां कित्'(उणा-४०३)इत्यभच् । २ वर्षति **वृषभः** । 'वृषि(वृषु) सेचने' (भ्वा.प.से.), 'ऋषिवृषिभ्यां कित्[७]'(उणा-४०३) इत्यभच्, उभयत्र बाहुलकाद् गुणाभावः । ३ वर्षति **वृषः** । 'इगुपध-'३।१।१३५॥ इति कः ॥१२५६॥ ४ वडवाया वृषो **वाडवेयः** । 'वाडवेयो वृषे'(हैमसू-६।१। ८५॥)इति ढक् । ५ सुरभेर्धेनोरपत्यं **सौरभेयः** । 'इतश्चानिञः'४।१।१२२॥ इति ढक् । ६ भन्दति(भन्दते) कल्याणं करोति **भद्रः** । 'भदि कल्याणे [सुखे च]'(भ्वा.आ.से.), 'स्फायि-'(उणा-१७०)इति रक् । ७ शक्नोति वोढुं **शक्वरः** । 'तीवर[८]धीवर-'(हैमोणा-४४४)इति वरप्रत्यये साधुः । ८ प्रज्ञादित्वादणि **शाक्करः** । ९ उक्षति[९] सिञ्चति मूत्रेण भुवम् **उक्षा** । 'उक्ष सेचने'(भ्वा.प.से.), 'श्वन्नुक्षन्-'(उणा-१५७)इति साधुः । उक्षाणौ, उक्षाणः इत्यादि । १० अनः शकटं वहति **अनड्वान्** । 'अनसि वहेः क्विबनसो डश्च'(दशपाद्युणा-९।१०७॥)इति, वहेः सम्प्रसारणं च, 'चतुरनडुहोरामुदात्तः'७।१।९८॥, 'सावनडुहः'७।१।८२॥ इति नुम् । ११ ककुदस्याऽस्ति **ककुद्मान्**। 'तदस्याऽस्ति-'५।२।९४॥ इति मतुप् । १२ गच्छति **गौः** । 'गमेर्डोः'(उणा-२२५)इति डोः, पुंस्त्रीलिङ्गः । १३ बलं वर्धयति **बलीवर्दः** । 'वृधु वृद्धौ'(भ्वा.आ.से.), पृषोदरादिः । १४ शङ्करस्याऽयं **शाङ्करः** । सामान्येन चतुर्दश वृषभस्य ॥१२५७॥

अथ तद्विशेषानाह-

**उक्षा तु जातो जातोक्षः**

१ जातो वहनयोग्य उत्पन्नः उक्षा बलीवर्दः, उत्पन्नो भ्रष्टदम्यभावः स्पृष्टबलीवर्दभावो **जातोक्षः** । 'अचतुरविचतुर-'५।४।७७॥इति साधुः, रामशब्दवद् रूपाणि । एकं वहनार्हवृषभस्य ॥

**स्कन्धिकः स्कन्धवाहकः ।**

१ प्रशस्य[१०]ः स्कन्धोऽस्य **स्कन्धिकः** । 'अत इनिठनौ'५।२।११५॥ इति ठन् । २ स्कन्धेन वहति **स्कन्धवाहकः** । ण्वुल् । यस्य थूंभी स्यादथवा स्कन्धेन वहति, तस्य द्वे । 'खांधियुं[११]' इति भाषा ॥

**महोक्षः स्यादुक्षतरः**

१ महांश्चासावुक्षा च **महोक्षः**। 'अचतुरविचतुर-' ५।४।७७॥इति साधुः। २ ह्रस्व उक्षा **उक्षतरः** । 'वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे'५।३।९१॥इति ष्टरच् । द्वे महावृषभस्य॥

**वृद्धोक्षस्तु जरद्गवः[१२] ॥१२५८॥**

१ वृद्धश्चासावुक्षा च **वृद्धोक्षः** । 'अचतुर-'५।४।७७॥इति सूत्रेण साधुः । २ जरन् वृद्धश्चाऽसौ गौश्च **जरद्गवः** । द्वे जरद्वृषभस्य ॥१२५८॥

**षण्ढतोचित आर्षभ्यः**

१ षण्ढतायामण्डाकर्षणे योग्यो वत्सो, ऋ[१३]षभस्य प्र[१४]तिकृतिः **आर्षभ्यः** । 'ऋषभोपानहोर्ञ्यः'५।१।१४॥ इति विकृति[वाचि]न ऋषभशब्दाद् विकृत्यर्थायां प्रकृतौ

१. 'नर्द गर्द शब्दे' इति क्षीरतरङ्गिण्यादयः ॥ २. '-ते' इति१॥ ३. 'आप्लवे' इति३॥ ४. 'रप्रकरणे खमुखकुञ्जेभ्य उपसंख्यानम्' इति वार्तिकम्॥ ५. १.२.३.५प्रतिषु नास्ति ॥ ६. 'पी-' इति३.४.५॥ ७. '-ते' इति३॥ ८. 'उत्पल' इति४.५॥ ९. 'सृ-' इति१, 'स्प-' इति३॥ १०. '-स्य-' इति३॥ ११. '-उं' इति१, '-युं' इति२॥ १२. तुलनीयोऽमरकोषः२।९।६१॥ १३. 'वृ-' इति३॥ १४. 'प्रकृ-' इति१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्यः, अत्र ऋषभावस्था विकृतिः, वत्सावस्था प्रकृतिरिति[१]। ऋषभाया (ऋषभाय) अयमार्षभ्य इति वा । ''आर्षभ्यः स तु[२] विज्ञेयः षण्ढत्वे यस्य योग्यता'' [हलायुधकोशः२।२६४॥]इति हलायुधः । एकं खसीकरणार्हवृषभस्य ॥

## कूटो भग्नविषाणकः।

१ कूट्यतेऽसौ **कूटः** । 'कूट दाहे[३]'(चु.उ.से.), कर्मणि घञ् । २ भग्नं विषाणमस्य भग्नविषाणः, स्वार्थे कनि **भग्नविषाणकः** । ''भग्नशृङ्गस्तु कूटः स्यात्''[हलायुधकोशः२।२६७॥]इति हलायुधः । ''द्वौ समौ''[ ]इति तट्टीका । द्वे भग्नशृङ्गवृषभस्य ॥

## इट्चरो गोपतिः षण्डो गोवृषो मदकोहलः ॥१२५९॥

१ एषणमिट्, 'इषु[४] इच्छायाम्'(तु.प.से.), सम्पदादित्वाद् भावे क्विप् । इषा इच्छया चरति[५] **इट्चरः** । पचाद्यच् । ''इड्वर(इत्वर) इत्येके''[अम.क्षीर.२।९।६२॥]इति स्वामी । २ गवां पतिः **गोपतिः** । ३ सनोति[६] ददाति, गर्भं सनति वा **षण्डः**[७] । 'षणु दाने' (तु.उ.से.), 'ञमन्ताड्डः'(उणा-१११) । षण्डो मूर्धन्यादिः । ''षण्डः पद्मादिसङ्घाते न स्त्री स्याद् गोपतौ पुमान्[८]'' [मेदिनीकोशः, डान्तवर्गः, श्लो-२६]इति मूर्धन्यादौ डान्ते[९] मेदिनिः । शण्ड(शण्ढ ?)स्तालव्यादिरपि । ''षण्डो (शण्डो ? शण्ढो) वर्षवरे[१०] क्लीबे गोपतौ वन्ध्यपूरुषे'' [विश्वप्रकाशकोशः, ढान्तवर्गः, श्लो-३]इति ढान्तवर्गे महेश्वरः । ४ वृषोऽनाकृष्टाण्डः, गौश्चासौ वृषश्च **गोवृषः** । गवां वृषो बीजनिषेक्ता[११]इति वा । गवेन्द्रोऽपि । यद्द्व्याश्रयः-''गवोष्ट्रिभिर्गवेन्द्रांसैर्गवृष्ट्रप्रियवीरुधः''[द्व्याश्रयमहाकाव्यम्, सर्गः-१, श्लो-२६]इति । ''गवामिन्द्रो गवेन्द्रः[१२] शण्डस्तदंशवदंसौ स्कन्धौ येषां ते तथा तैः''[श्री अभयतिलकगणिकृतटीका, १।२६]इति तट्टीका । ''गवेन्द्रो यज्ञचरुः''[ ]इति कृष्णमिश्राः । ५ मदेन कोहलो नट इव **मदकोहलः** । पञ्च शण्डस्य । 'सांड[१३]' इति भाषा ॥१२५९॥

## वत्सः शकृत्करिस्तर्णः

१ वदति मातरं दृष्ट्वा **वत्सः** । 'वद व्यक्तायां वाचि'(भ्वा.प.से.), 'वृ(वॄ)तृवदिहनिकमिकषियुमुचिभ्यः सः'(दशपाद्युणादि-९।२१॥)इति सः । २ शकृत् करोति **शकृत्करिः** । 'स्तम्बशकृतोरिन्'३।२।२४॥, हरिशब्दवत् । ३ तरति **तर्णः**। 'तॄ प्लवनतरणयोः'(भ्वा.प.से.), बाहुलकाद् नः। तृणोति(तृणुते) तृणातीति[१४] वा। 'तृणु अदने' (क्र्या.उ.से.), पचाद्यच् । त्रीणि लघुवत्सस्य ॥

## दम्य-वत्सतरौ समौ[१५] ।

१ दमनार्हो **दम्यः** । 'दमु उपशमे[१६]'(दि.प.से.), 'पोरदुपधात्'३।१।९८॥ इति यत् । दममर्हतीति[१८], दण्डादित्वाद् यो वा । २ हसितो वत्सो **वत्सतरः** । 'वत्सोक्षा-' ५।३।९१॥इति ष्टरच् । ''महोक्षतां वत्सतरः स्पृशन्निव'' [रघुवंशम्, सर्गः-३, श्लो-३२]इति रघुः । ''उत्तीर्यमाणशैशवे वत्से[१९] द्वौ समौ''[ ]इति हलायुधटीका । किल्होडानाम्नी द्वे॥

## नस्योतो नस्तितः

१ नासिकायां भवा विद्यमाना नस्या । 'शरीरावयवाद्-'४।३।५५॥यत्। 'नस् नासिकाया यत्तस्क्षुद्रेषु' (वा-६।१।६३॥)इति नसादेशः । नस्या वृषादिनासारज्जुः, तया उतो **नस्योतः** । ''नस्तायामूतः स्यूतो नस्तोतः'' [[२०]]इति तु शाब्दिकाः । २ नस्तः कृतोऽस्य । 'प्रातिपदिकाद् धात्वर्थे-'(गणसू-, चुरादिः, सं २९६)इति णिच्, ततः कर्मणि क्तः, **नस्तितः** । यद्वा 'णस्(णस) कौटिल्ये'(भ्वा.आ.से.), बाहुलकाद् 'हसिमृग्रिण्-'(उणा-३६६) इति तन्, नस्ता, नासा कृताऽस्य, पूर्ववण्णिजन्तात् क्तः । ''घ्राणे[२१] नलिननालेसोऽहिगौरिव नस्तितः''[ ]इति नेमिचरित्रम् । द्वे नस्तितवृषभस्य ॥

## पष्ठवाट् तु स्याद् युगपार्श्वगः ॥१२६०॥

१ पष्ठं वहति **पष्ठवाट्** । 'वह प्रापणे'(भ्वा.उ.अ.), 'वहेश्च'३।२।६४॥ इति ण्विः । पष्ठवाहौ । शसादावचि 'वाह ऊठ्'६।४।१३२॥, 'गत्येधत्यूठ्सु'६।१।

१. द्र. माधवीयधातुवृत्तिः, तुदादिः, धातुसं-८, पृ.४६३॥ २. 'च' इति हलायुधकोशे, पृ.३२॥ ३. स्वामिसम्मतोऽयं धातुपाठः ॥ ४. 'इष' इति सायणः ॥ ५. '-तीति' इति३॥ ६. इतोऽग्रे १प्रतौ 'गर्भं' इति दृश्यते ॥ ७. '-ढः' इति४॥ ८. '-न्यडा-' इति१, '-न्यान्तौ' इति२, 'न्यान्ते' इति३॥ ९. 'डन्ते' इति३॥ १०. '-धरे' इति विश्वप्रकाशकोशे, पृ.४६॥ ११. '-षि-' इति३॥ १२. '-वीन्द्रः' इति३॥ १३. '-ढ' इति२॥ १४. 'तृणानीति' इति१.२॥ १५. तुलनीयोऽमरकोषः२।९।६२॥ १६. '-समे' इति२.३.५॥ १७. 'वो-' इति३॥ १८. 'मद-' इति३॥ १९. '-त्सौ' इति३॥ २०. द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-६३५, पृ.७२६॥ २१. '-णो' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

८९ ॥ इति वृद्धिः पष्ठौहः, पष्ठौहा इत्यादि । ''प्रष्ठमग्रगामिनं वहति प्रष्ठवाट्''[ ][१]इति सरेफं पकारं सुभूत्यादयः पेठुः। परं नीरेफपाठ एव सर्वसम्मतः। २ युगस्य स्कन्धकाष्ठस्य पार्श्वं गच्छति **युगपार्श्वगः** । 'अन्येष्वपि दृश्यते'३।२।१०१ ॥ इति गमेर्डः । हलवोढाऽयमित्यर्थः । ''दमनाय योजितोऽयम्''[ ][२]इत्येके । द्वे हलवाहकवृषभस्य[३] ॥१२६०॥

## युगादीनां तु वोढारो युग्य-प्रासङ्ग्य-शाकटाः[४] ।

१ युगं वहति **युग्यः** । 'तद्वहति रथयुगप्रासङ्गम्'[५] ४।४।७६॥ इति यत् । एकं धूर्वाहकवृषभस्य । 'झूंसरवहई[६]' इति भाषा । १ यत्काष्ठं वृषभानां दमनकाले स्कन्धे आरोप्यते तत्प्रासङ्गस्तं वहतीति **प्रासङ्ग्यः** । 'तद्वहति-'४।४।७६॥ इति यत् । पंजाली वहइ जे वृषभ, तस्यैकम् । १ शकटं वहति **शाकटः** । 'शकटादण्'[७] ४।४।८०॥ इत्यण् । एकं शकटवाहकवृषभस्य ॥

## स तु सर्वधुरीणः स्यात् सर्वां वहति यो धुरम् ॥१२६१॥

१ यो वृषभः सर्वां रथादिसम्बन्धिनीं हलादिसम्बन्धिनीं च धुरं वहति स **सर्वधुरीणः** । 'खः सर्वधुरात्'४।४।७८॥ इति खः ॥१२६१॥

## एकधुरीणैकधुरावुभावेकधुरावहे ।

१ एका चासौ धूश्च एकधुरा । 'ऋक्पूरब्धूः-' ५।४।७४॥ इत्यः समासान्तः । तां वहतीति, 'एकधुराल्लुक् च'४।४।७९॥ इति खः, खस्येनादेश **एकधुरीणः** । २ लुक्पक्षे 'लुक् तद्धितलुकि'१।२।४९॥ इति टापो निवृत्तौ **एकधुरः**। ३ एका एकस्य वा धूरेकधुरा । 'ऋक्पूः-' ५।४।७४॥ इत्यः समासान्तः । तां वहतीति **एकधुरावहः**। 'कर्मण्यण्'३।२।१॥, तत्र । उभावित्युक्तेः त्रयाणामेकार्थदार्ढ्यं ज्ञेयम् । एवमत्र वामधुरीणः, 'डावि आल' इति भाषा, दक्षिणधुरीणः, 'जीमणी आल' इति भाषा, उत्तरधुरीणः, 'आगि आल' इति भाषा। '''खः-'४।४।७८॥ इति योगविभागाद् दक्षिणधुरीणः, उत्तरधुरीणः''[ ][१०][११]इति वृत्तिः । एकधुरं[१२] वहति[१३] एकस्य धुरं वा वहति, तस्य त्रीणि ॥

## धुरीण-धुर्य-धौरेय-धौरेयक-धुरन्धराः ॥१२६२॥ धूर्वहे

१ धुरं वहति **धुरीणः** । 'खः सर्वधुरात्'४।४।७८॥ इति योगविभागात् खः[१४] । २-३ धुरं वहति **धुर्यः**, **धौरेयः** । उभयत्र 'धुरो यड्ढकौ'४।४।७७॥ इति यड्ढकौ । ४ स्वार्थे कनि **धौरेयकः** । ५ धुरं धरति **धुरन्धरः** । 'धृञ् धारणे'[१५](भ्वा.उ.अ.), 'संज्ञायां भृतॄवृजि-'३।२।४६॥ इत्यादिना खच्, 'वाचंयमपुरन्दरौ च'६।३।६९॥ इति चकारस्याऽनुक्तसमुच्चयार्थत्वान्नुम् ॥१२६२॥ ६ धुरं वहति **धूर्वहः** । पचाद्यच् । षट् सामान्येन[१६] धौरीति[१७] ख्यातस्य ॥

## अथ गलिर्दुष्टवृषः शक्तोऽप्यधूर्वहः ।

१ शक्तोऽपि क्षमोऽपि सन् न धूर्वहोऽधूर्वहः दुष्टवृषः, स **गलिः** उच्यते। गलति भक्षयत्येव, न तु धुरं वहति[१८] गलिः । 'गल अदने'(भ्वा.प.से.), 'इन् सर्वधातुभ्यः'[१९](उणा-५५७)इतीन्, हरिशब्दवद् रूपाणि । एकं गलिवृषस्य[२०] ॥

## स्थौरी पृष्ठ्यः पृष्ठवाह्यः

१ स्थूराणां पश्चाज्जङ्घानामिदं स्थौरं बलम्, तदस्यास्ति **स्थौरी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः । स्थूरी षष्ठस्वरादिरपि[२१] । २ पृष्ठे साधुः **पृष्ठ्यः** । 'तत्र साधुः'४।४।९८॥ इति यत् । ३ पृष्ठेन वाह्यः **पृष्ठवाह्यः** । पोठियानामानि[२२] त्रीणि ॥

## द्विदन् षोडन् द्वि-षड्-रदौ ॥१२६३॥

१ द्वौ दन्तावस्य **द्विदन्** । 'वयसि दन्तस्य दतृ' ५।४।१४१॥ इति दन्तस्य दत्रादेशः, 'उगिदचाम्-'७।१।७०॥ इति नुम्। द्विदन्तौ, द्विदन्तः इत्यादि। प्रज्ञादित्वादणि

---

१. द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-६३५, पृ.७२६॥ २. द्र. अम.क्षीर.२।९।६३॥, पृ.२१४॥, स्वोपज्ञटीका ४।१२६०॥, पृ.२८२॥, तयोः '-ऽयम्' इति न दृश्यते ॥ ३. '-वृषस्य' इति२॥ ४. तुलनीयोऽमरकोषः२।९।६४॥ ५. '-ङ्ग्यम्' इति१.२.४.५॥ ६. '-है' इति३॥ ७. 'शा-' इति१॥ ८. 'शा-' इति४.५॥ ९. 'या-' इति३॥ १०. ३प्रतौ नास्ति ॥ ११. '''खः' इति योगविभागः कर्तव्य इष्टसंग्रहार्थः। उत्तरधुरीणः । दक्षिणधुरीणः ।'' इति काशिकावृत्तिः, भा-३, ४।४।७८॥, पृ.७७६॥ १२. 'एकं' इति१.३॥ १३. '-तीति' इति३॥ १४. 'कः' इति३॥ १५. 'ध-' इति७॥ १६. 'सामान्येन षट्' इति३॥ १७. 'धौ-' इति२.५॥ १८. '-तीति' इति४.५॥ १९. 'सर्वधातुभ्य इन्' इत्युणादिगणे ॥ २०. '-भस्य' इति३॥ २१. 'अपि' इति ४.५प्रत्योर्नास्ति ॥ २२. 'पोठी-' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वैदन्तोऽपि[1] । २ द्विशब्दात् षष्शब्दाच्च रदशब्दो योज्यः, तेन **द्विरदः** । बिदन्तावृषभस्य द्वे । 'दुगउ' इति भाषा । १ 'षह मर्षणे'(भ्वा.आ.से.), 'सहेः षष् लुक् च'( ) इति सहेः षषादेशः, क्विनश्च लुक् । षट्[2] दन्ता यस्येति **षोडन्** । 'वयसि दन्तस्य-'५।४।१४१॥ इति[3] दत्रादेशः, 'षष उत्वं दतृदश-'(वा- )इत्युत्वष्टुत्वे । षोडन्तौ, षोडन्तः इत्यादि । स्त्रियां षोडती । "अन्ये तु-"दन्तस्य दत्रादेशे कृते षोडन्निति शब्दान्तरं नकारान्तम्[4], राजन्शब्दवत्"[तत्त्वप्रकाशिकाटीका (बृहद्वृत्तिः) ३।२।९१॥]इति तत्त्वप्रकाशिका । तथा षोडा, षोडानौ, षोडानः इति। प्रज्ञाद्यणि षौडतः, रामशब्दवत् ।

"इष्ट[5]षौडतमेधाविसाधुसाधारण[6]द्वये ।
लङ्केशयौधायै वा स्मै हिता चैकीर्षती क्रिया ॥१॥"

[ ]इति गणरत्नमहोदधिटीका। २ **षड्रदः**। द्वे षड्दन्तवृषभस्य । 'छगउ[7]' इति भाषा ॥१२६३॥

**वहः स्कन्धः**

१ वृषस्य[8] **स्कन्धः** । २ वहत्यनेन **वहः**। 'गोचरसञ्चर-'३।३।११९॥ इति साधुः । द्वे वृषभस्कन्धस्य ॥

**[9]अंसकूटं तु ककुदम्**

१ अंसयोरुपरिभागः कूटं शिखरम् **अंसकूटम्** । २ [10]कंकते **ककुदम्**, पुंक्ली. । 'कक लौल्ये'(भ्वा.आ.से.), 'ककेर्णिद्वा'(हैमोणा-२४३)इत्युदः । ककुरपि[11], ककुदपि (ककुत्कुकुदावपि । "अंसकूटस्तु ककुदम्"[हलायुधकोशः २।२६६॥]इति हलायुधः । वृषभखूंभीनाम्नी द्वे ॥

**नैचिकं शिरः ।**

१ नीचैश्चरति **नैचिकम्**, पृषोदरादिः । नैचिकीत्यन्ये । "नैचिकी[12] च शिरोदेशः"[हलायुधकोशः२।२६७॥] इति हलायुधः । एकं वृषभशिरसः[13] ॥

**विषाणं कूणिका शृङ्गम्**

१ वेवेष्टि **विषाणम्**, त्रिलिङ्गः । 'विप्लृ व्याप्तौ' (जु.उ.अ.), 'कृपिविषि-'(हैमोणा-१९१)इत्याणक् । २ कूणयति कूणिः[14] । 'इन् सर्वधातुभ्यः[15]'(उणा-५५७)इतीन्, गौरादिः, स्वार्थे कनि, 'केऽणः'७।४।१३॥ इति ह्रस्वत्वे **कूणिका** । ३ शृणाति हिनस्त्यनेन **शृङ्गम्** । 'शॄ[16] हिंसायाम्'(क्र्या.प.से.), 'शृणातेर्ह्रस्वश्च'(उणा-१२३)इति गन्, कित्त्वम्, नुट् चोपसङ्ख्यानात् । पुंक्लीबलिङ्गो[17]ऽयम् । त्रीणि शृङ्गस्य ॥

**सास्ना तु गलकम्बलः[18] ॥१२६४॥**

१ सस्ति स्वपिति सदा लम्बमानत्वात्[19] **सास्ना** । 'षस स्वप्ने'(अ.प.से.), 'रास्नासास्ना '(उणा-२९५) इत्यादिना साधुः । २ गलस्य कम्बलो **गलकम्बलः** । 'कम्बले नागराजे स्यात् सास्नाप्रावारयोः क्रिमौ (कृमौ)" [विश्वप्रकाशकोशः, लान्तवर्गः, श्लो-७५]इति विश्वः । द्वे गलकम्बलस्य ॥१२६४॥

**गौः सौरभेयी माहेयी माहा सुरभिरर्जुनी ।**
**उस्राऽघ्न्या रोहिणी शृङ्गिण्यनड्वाह्यनडुह्युषा ॥१२६५॥**
**तम्पा निलिम्पिका तंवा**

१ गच्छति **गौः**, पुंस्त्रीलिङ्गः। 'गम्लृ गतौ'(भ्वा.प.अ.), 'गमेर्डोः'(उणा-२२५)इति डोः । २ सुरभ्या अपत्यं **सौरभेयी**। 'स्त्रीभ्यो ढक्'४।१।१२०॥ ३ "गौरुस्रा प्रिया इला मही"[ ]इति निरुक्तम् । मह्या गोरपत्यं **माहेयी** । 'स्त्रीभ्यो ढक्'४।१।१२०॥ इति ढक् । "मह्यते पूज्यते महा । 'मह पूजायाम्'(भ्वा.उ.से.), घञर्थे कः[20] । महाया अपत्यं माहेयी"[अम.क्षीर.२।९।६६॥] इति तु स्वामी[21] । मह्यां भवा वा[22] माहेयी । 'नद्यादिभ्यो ढक्'४।२।९७॥ । ४ 'माहङ्[23] माने'(भ्वा.उ.से.), भ्वादिरुभयपदी । "मानं वर्तनम्"[हेमचन्द्राचार्यकृतधातुपारायणम्,

---

१. 'द्वै-' इति३॥ २. इतोऽग्रे १.२प्रत्योः 'षट्' इति दृश्यते ॥ ३. १.३.४.५प्रतिषु नास्ति ॥ ४. '-न्तः' इति३॥ ५. 'इष्टः' इति३॥ ६. '-णे' इति१॥ ७. '-ओ' इति१, '-गो'इति३॥ ८. '-भस्य' इति३॥ ९. 'अंश-' इति मुद्रिताभिधानचिन्तामणिनाममालायाम्, स्वोपज्ञटीकाऽपि तमाश्रित्यैव ॥ १०. 'कं-' इति३॥ ११. '-रोऽपि' इति३॥ १२. 'नीचकी' इति हलायुधकोशे, पृ.३२॥ १३. '-सि ' इति३.५॥ १४. '-णिका' इति३॥ १५. 'सर्वधातुभ्य इन्' इत्युणादिगणे ॥ १६. 'शृ' इति३॥ १७. 'पुंक्लीबः' इति३॥ १८. तुलनीयोऽमरकोषः२।९।६३॥ १९. '-ना-' इति३॥ २०. 'घञर्थे कः' इति १प्रतौ नास्ति ॥ २१. अम.क्षीरस्वामिकृतटीकायाम्-"मह्यते पूज्यते महा । तस्या अपत्यं माहेयी ।" इत्येव दृश्यते, पृ.२१४॥ २२. १.३प्रत्योर्नास्ति ॥ २३. पाणिनीयमते ङकारानुबन्धोऽनावश्यकः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भ्वादिः, धातुसं-९८४]इति धातुपारायणम् । अचि **माहा**। ५ सुष्ठु रभते **सुरभिः** । 'रभ राभस्ये'(भ्वा.आ.अ.), 'इन् सर्वधातुभ्यः'[1](उणा-५५७), आगमस्याऽनित्यत्वाद् 'रभेरशब्लिटोः'७।१।६३॥ इति नुमभावः । ''इमामनूनां सुरभेरवेहि[2]''[रघुवशम्, सर्गः-२, श्लो-५४]इति रघुः । ङीषि सुरभी नदीवत् । [६ अर्जुनवर्णयोगाद् **अर्जुनी** । 'अन्यतो ङीष्'४।१।१४०॥ इति ङीष् । ] ७ वसति[3] क्षीरमस्याम् **उस्त्रा**, पञ्चमस्वरादिः । 'वस निवासे'(भ्वा.प.अ.), 'स्फायितञ्चि-'(उणा-१७०)इति रक्, सम्प्रसारणम्, टाप् । ८ न हन्यत इति **अघ्न्या** । हन्तेः 'अघ्न्यादयश्च' (उणा-५५१)इति यकि रूपम् । १० शृङ्गमस्त्यस्याः **शृङ्गिणी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः, 'ऋन्नेभ्यो ङीष् (ङीप्)'४।१।५॥ । शृङ्गिण्यादयः सामान्या अपि विशेषे वर्तन्ते । ९ रोहति जायते प्रादुर्भवत्यवश्यं **रोहिणी** । 'रुह बीजजन्मनि[4], प्रादुर्भावे च[5]'(भ्वा.प.अ.), आवश्यके णिनिः, 'ऋन्नेभ्यः-'४।१।५॥इति ङीप्[6] । ११-१२ अनड्वान् वृषभस्ततो गौरादिङीषि, '-स्त्रियां च(वा[7])' (वा-७।१।९८॥)इत्यामि[8] **अनड्वाही, अनड्ही**[9] च । १३ ओषत्यशिवम् **उषा** । 'उष दाहे'(भ्वा.प.से.), ह्रस्वादिः, 'इगुपध-'३।१।१३५॥ इति कः ॥१२६५॥ १४ ताम्यति **तम्या** । 'तमु ग्लानौ[10]'(दि.प.से.), 'पम्पाशिल्पादयः' (हैमोणा-३००)इति निपातनात् पः । १५ निलिम्पति निलिम्पा । 'लिप उपदेहे'(तु.उ.अ.), 'नौ लिम्पेर्वाच्यम्[11]' (वा-३।१।१३८॥)इति खच्, स्वार्थे कनि, 'प्रत्ययस्थात्-'७।३।४४॥ इतीत्वे **निलिम्पिका** । १६ जपादित्वाद् वत्वे **तंवा** । षोडश सामान्येन धेनोः ॥

## सा तु वर्णैरनेकधा ।

१ सा गौः वर्णैः शबलादिभिरनेकधाऽनेकभेदा भवन्ति, यथा शबलीधवलेत्यादि । यदमरः-''वर्णादिभेदात् संज्ञाः स्युः''[अमरकोषः२।९।६७॥], तद्व्याख्यानमिदम्-''वर्णादीत्यादिना प्रमाणावयवभेदग्रहः । शबलीधवलादयः संज्ञानामानि स्युः । शबलीत्यत्र 'अन्यतो ङीष्'४।१।४०॥, अर्शआद्यचि । ''शबला''[ ]इति तु सुभूतिः । [शबलीति तु मुख्यः पाठः । धवली च शबलीवत्] तथा प्रमाणभेदात् दीर्घा वामनी इत्यादिप्रयोगः । अवयवभेदाद् लम्बकर्णी, वक्रशृङ्गीत्यादयः । वामनेन-''सुष्ठुस्थितगोवर्गः, शबलेति टाबन्तप्रयोगोऽपिशब्दः''[ ]इत्युक्तम् ।'' [पदचन्द्रिका, भा-२, काण्डः-२, वैश्यवर्गः, श्लो-६३९]॥

## पष्ठौही[12] गर्भिणी

१ पष्ठं वहति **पष्ठौही** । 'वह प्रापणे'(भ्वा.उ.अ.), 'वहश्च'३।२।६४॥ इति ण्विः[13], 'वाहः'४।१।६१॥ इति ङीष् (ङीप्), 'वाह ऊठ्'६।४।१३२॥ इत्यूठ्, 'एत्येधत्यूठ्सु'६।१।८९॥ इति वृद्धिः । ''पष्ठौही बालगर्भिणी[14]''[अमरकोषः२।९।७०॥]इत्यमरः । एकं सगर्भाया गौः[15] । अमरस्तु पष्ठौही बालगर्भिणी प्रथमगर्भामाह ॥

## वन्ध्या वशा

१ बध्नाति प्रसूतं वन्ध्या । अघ्न्यादित्वाद् यक्, उपधालोपाभावश्च । उश्यते काम्यते वृषैः[16], वष्टि वृषभं वा **वशा** । 'वश कान्तौ'(अ.प.से.), 'वशिव(र)ण्योश्च' (वा-३।३।५८॥)इत्यप् । एकं वन्ध्यगोः ॥

## वेहद् वृषोपगा ॥१२६६॥

१ वेहते[17] गच्छति वृषं **वेहत्**, स्त्रीलिङ्गः । 'वेहृ जेहृ बाहृ प्रयत्ने'(भ्वा.आ.से.), ''शश्वत्वृहत्-वेहत्(संश्चत्तृपद्वेहत्)'(उणा-२४२)इति क्विपि निपातितः''[ ]इति माधवी । वेहतौ, वेहतः इत्यादि । वृषं बलीवर्दं रन्तुमुपगच्छति वृषोपगा । 'अन्येभ्योऽपि(-घ्वपि)' ३।२।१०१॥ इति डः । ''वेहद् वृषभोपगता[18]''[हलायुधकोशः२।२।६९॥]इति हलायुधः । ''रन्तुं वृषभमागता वेहदुच्यते''[ ]इति तट्टीका । ''वेहद् गर्भोपघातिनी''[अमरकोषः२।९।६९॥]इत्यमरः । ''अनृतौ वृषोपगमाद् यस्या गर्भपातः स्यात् सा वेहदिति, विहन्ति गर्भमिति व्युत्पत्तिः'' [ ]इति तट्टीका । चहरलगाइनाम[19] एकम् ॥१२६६॥

---

१. 'सर्वधातुभ्य इन्' इत्युणादिगणे ॥ २. '-वैहि' इति५॥ ३. इतोऽग्रे ३प्रतौ 'तत्' इति दृश्यते ॥ ४. 'जन्मनि' इति२.३.५. ॥ ५. सायणमतेऽयम्, 'रुह बीजजन्मनि' इति स्वामी, 'रुह जन्मनि प्रादुर्भावे' इति मैत्रेयः ॥ ६. '-ष्' इति१.२.४.५॥ ७. 'अनडुहः स्त्रियां वेति वक्तव्यम्' इति काशिकास्थवार्तिकपाठः ॥ ८. '-मिः' इति४॥ ९. 'अनु-' इति२.५॥ १०. 'काङ्क्षायाम्' इति क्षीरतरङ्गिण्यादयः ॥ ११. '-च्यमानम्' इति४.५॥ १२. 'प्रष्ठौही' मुद्रिताभिधानचिन्तामणिनाममालायाम् ॥ १३. 'णिनिः' इति३॥ १४. टी.गणपतिशास्त्रिसंशोधितक्षीरस्वामिकृतटीकासम्मतोऽयं पाठः॥, भा-३, पृ.२१०-२११॥ १५. 'गौः' इति१.४.५॥ १६. 'वृषभैः' इति३॥ १७. '-ति' इति१.३.४.५॥ १८. 'वृषोप-' इति१.४॥ १९. '-गोनाम' इति२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अवतो[1]का स्रवद्गर्भा**

१ अवगलितं तोकमपत्यं यस्याः सा **अवतोका** । ''अपतोकेत्यपि''[ ]इति हलायुधटीका । स्रवन् स्रुतिं प्राप्तो गर्भो यस्याः सा [१]स्रवद्गर्भा । 'वर्तमानसामीप्ये वर्तमानवद्वा'३।३।१३१॥ इति लट्[२] । मालाकारस्तु-''मृतवत्सा [३]स्रवद्गर्भा''[[४] ]इत्याह । [५]त्रूईगाई[६] नाम एकम् ॥

**वृषाक्रन्ता तु सन्धि[1]नी ।**

१ औचित्याद्दतुमती वृषेणा[७]ऽऽक्रान्ता निष्पादित[८]मैथुना वृषाक्रान्ता । सन्धानं सन्धा गर्भग्रहणमस्त्यस्याः **सन्धिनी** । शिखादित्वादिनिः । लग्नगर्भेयम् । ''[अ]दुग्धा [१०]दोहकाले तु सन्धिनी''[[९] ]इति कात्यः । ''सन्धिन्यकालदुग्धा गौर्वृषाक्रान्ता च सन्धिनी''[शाश्वतकोशः, श्लो-५२८]इति शाश्वतः । यथा-''आविकं सन्धिनी[११] क्षीरं न भोक्तव्यं द्विजन्मभिः''[[१२] ]इति । एकं वृषभारूढाया गोः ॥

**प्रौढवत्सा वष्क[1]यिणी**

१ प्रौढो वत्सोऽस्याः प्रौढवत्सा, चिरप्रसूतेत्यर्थः । वष्कति परिक्रामति वष्कयः । वष्कधातोरौणादिकोऽयप्रत्ययः । तद्योगाच्छिखादित्वादिनि[१३]:, ऋन्नेभ्यो ङीपि[१४] **वष्कयिणी**। 'पूर्वपदात् संज्ञायाम्'८।४।३॥ इति णत्वम् । 'वष्कयस्त्वेकहायनो वत्सः'(    )इति शाकटायनः । ''वष्कयेन(-ण) नीयते । सम्पदादित्वात् क्विपि, ततः 'सर्वतोऽक्तिन्नर्थात्'(गणसू-४।१।४५॥)इति ङीषि वष्कयणी''[ ]इति तृतीयस्वरमध्याभावं केचित् पेठुः । एकं बाखडीति ख्याताया: ॥

**धे[1]नुस्तु नवसूतिका ॥१२६७॥**

१ धयन्त्येनामिति **धेनुः** । 'धेट् पाने'(भ्वा.प.से.), 'धेन्वादयश्च'(चान्द्रोणा-१।३१॥)इति निपातितः । नवा प्रत्यग्रा सूतिः प्रसूतिरस्या नवसूतिका । 'उरः-प्रभृतिभ्यः कप्'५।४।१५४॥। नवमचिरं सूता प्रसूता नवसूता[१५], स्वार्थे कनि, 'प्रत्ययस्थात्-'७।३।४४॥ इतीत्वे नवसूतिका[१६] । एकं सूआवडीति ख्याताया: गोः[१७] ॥१२६७॥

**परे[1]ष्टुर्बहुसूतिः स्यात्**

१ परमिच्छति **परेष्टुः**, पृषोदरादिः । बह्वी सूतिः प्रसूतिरस्याः बहुसूतिः । ''परेष्टुका च प्रचुरप्रसूतिः''[हलायुधकोशः२।२७२॥]इति हलायुधः । एकं बहुशः प्रसूतगोः[१८]॥

**गृ[1]ष्टिः सकृत्प्रसूतिका ।**

१ गिरति **गृष्टिः** । 'गॄ[१९] निगरणे'(तु.प.से.), 'ग्रो गृष् च'(हैमोणा-६४९)इति तिः । एकमेकवारप्रसूतगोः ॥

**प्रजने का[1]ल्योपसर्या[2]**

१ प्रजने गर्भग्रहणे, औचितयद्दतुयोगानन्तरं प्राप्तः[२०] कालोऽस्याः **काल्या** । 'कालाद् यत्'५।१।१०७॥ इति यत्। ऋतुमती या वृषभेणोपसरणीया, सा **उपसर्या** । 'सृ गतौ'(भ्वा.प.अ.), 'उपसर्या काल्या प्रजनने (प्रजने)'३।१।१०४॥ इति यदन्तो निपातितः । ''काल्योपसर्या प्रजने''[हलायुधकोशः२।२७२॥]इति हलायुधः । ''प्रजने गर्भग्रहणे प्रसिद्धायां द्वौ''[ ]इति तट्टीका। प्रजने गर्भग्रहणे या प्रसिद्धा, तस्या द्वे । 'सूभरि' इति भाषा ॥

**सुखदोह्या तु सुव्रता ॥१२६८॥**

१ सुखेन [२१]दुह्यते सुखदोह्या । 'शंसिगुहिदुहि(दुहिगुहि)भ्यो वा'(वा-३।१।१०९॥)इति पक्षे ण्यत् । शोभनं व्रतमस्याः **सुव्रता**, सुशीलेत्यर्थः। एकं सुखदोह्याया गोः[२२] ॥१२६८॥

**दुःखदोह्या तु करटा[1]**

१ करोति खेदं **करटा** । कृञः 'शकादिभ्योऽटन्'(उणा-५२१), टाप् । दुःशीलेत्यर्थः । एकं दुःखदोह्या[२३]गोः । '[२४]खांट' इति भाषा ॥

**बहुदुग्धा तु वञ्जु[1]ला ।**

१ बहु प्रचुरं दुग्धमस्याः बहुदुग्धा । वञ्जति **वञ्जुला** । 'मुकुल(कुमुल)-'(हैमोणा-४८७)इत्युले निपात्यते । द्वे (एकं) बहुदुग्धाया गोः ॥

---

१. 'श्र-' इति३॥ २ 'लुट्' इति३॥ ३ 'श्र-' इति१.३॥ ४ द्र. अम.क्षीर.२।९।६९॥, पृ.२१५॥, स्वोपज्ञटीका४।१२६९॥, पृ.२८३॥ ५ 'तू-' इति३.४॥ ६ '-य-' इति३॥ ७ '-ण' इति१॥ ८. '-तः' इति३॥ ९ 'सम्बन्धिनी' इति१॥ १०. 'दोहद-' इति१.३॥ ११. '-नीं' इति३॥ १२. द्र. अनेकार्थकैरवाकरकौमुदीटीका, भा-२, ३।४२४॥, पृ.१८७॥ १३. '-नि' इति२.३.५॥ १४ '-षि' इति१.२.४.५॥ १५. '-प्रसूता' इति१.३॥ १६. '-प्रसूतिका' इति१.३॥ १७ 'गौः' इति१.३॥ १८ '-गौः' इति३॥ १९. 'गृ' इति३॥ २०. '-प्तका-' इति१॥ २१. 'दो-' इति३॥ २२. '-ह्यागोः' इति३॥ २३. '-ह्या-' इति३.४॥ २४ 'खा-' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## द्रोणदुग्धा[1] द्रोणदुघा[2]

१ द्रोणं मानभेदस्तत्परिमितं दुग्धमस्याः **द्रोणदुग्धा** । २ द्रोणपरिमितं दुग्धं दोग्धि क्षरति । 'दुहेः-(दुहः) कप् घश्च'३।२।७०॥ इति कप्, घश्चान्तादेशः, **द्रोणदुघा** । "द्रोणदुघा[2] प्रचुरदुग्धा च"[हलायुधकोशः २।२७१॥]इति हलायुधः। द्रोणशब्देन 'सेई' इति ज्ञेया[3] । द्वे सेई[4]प्रमाणदाया गोः ॥

## पीनोध्नी पीवरस्तनी[5] ॥१२६९॥

१ पीनं स्थूलमूधोऽस्या **पीनोध्नी** । 'ऊधसोऽनङ्'५।४।१३१॥, 'बहुव्रीहेरूधसो ङीष्'४।१।२५॥ । पीवराः पुष्टाः स्तना अस्याः पीवरस्तनी । 'स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्'४।१।५४॥ इति ङीष् । मोटा ऊहाडानामनी[6] गाइ नाम एकम् ॥१२६९॥

## पीतदुग्धा तु धेनुष्या संस्थिता दुग्धबन्धके ।

१ पीतं दुग्धमस्याः **पीतदुग्धा** । २ धेनुरेव **धेनुष्या** । अत्र यत्प्रत्ययः षुगागमश्च[7] निपात्यते[8] । दुग्धस्य बन्धकः 'गाहाणउं[9] अथवा अडाणउं[10]' इति भाषाप्रसिद्धस्तत्र संस्थिता। ऋणशुद्धिं यावदधमर्णेन उत्तमर्णस्य बन्धे स्थापितेत्यर्थः । अडाणीदीधीगोनाम्नी द्वे ॥

## नैचिकी तूत्तमा गोषु

१ गोषूत्तमा शुभलक्षणत्वादुत्कृष्टा, नीचैश्चरति **नैचिकी** । "नीचैः 'चरति'४।४।८॥ इति ठक्, 'अव्ययानां भमात्रे टिलोपः'(वा-६।४।१४४॥) । "निचिकर्णशरौदिशेः[11] (निचिकं तु शिरोदेशे)"[12]इति रभसः । तत्प्रशस्तमस्या अस्तीति, 'ज्योत्स्ना-'(वा-५।२।१०३॥)इत्यादिनाऽणि वा । "उत्तमा तु निचिकी"[13]इति नाममालोक्तौ संज्ञापूर्वकत्वाद् वृद्ध्यभावो वा'[]इति मिश्राः । एकमुत्तमगोः ॥

## पलिक्नी[1] बालगर्भिणी ॥१२७०॥

१ पलति गर्भं गच्छति पलिता, सैव **पलिक्नी** । '-क्नमित्येके[14]'(वा-४।१।३९॥) । "पलिक्नी बालगर्भिणी"[15]इति माला । "असिक्नी[16] बालगर्भिणी"[17]इति भागुरिः । अमरस्तु-"पष्ठौही[18] बालगर्भिणी"[अमरकोषः २।९।७०॥]इत्याह । एकं बालगर्भिण्या[19] गोः ॥१२७०॥

## समांसमीना[1] तु सा या प्रतिवर्षं विजायते ।

१ समां समां विजायते **समांसमीना** । समायां समायां वर्षेषु वर्षेषु (वर्षे वर्षे) विजायत इत्यर्थे 'समां समां विजायते'५।२।१२॥ इति खः । "पूर्वपदे सुपोऽलुग् वाच्यः[20]"[भाषावृत्तिः५।२।१२॥]इति भाषावृत्तिः । वर्षवियाइणीगोरेकं[21] ॥

## स्यादचण्डी[1] तु सुकरा[22]

१ न चण्डी अचण्डी, अकोपनेत्यर्थः, सुखेन क्रियते **सुकरा** । 'ईषद्दुःसुषु-'३।३।१२६॥ इति खल् । एकं सुशीलाया गोः ॥

## वत्सकामा[1] तु वत्सला[2] ॥१२७१॥

१ वत्सं स्नेहात् कामयते **वत्सकामा** । २ वत्सं लाति **वत्सला** । वत्सोऽस्या अस्तीति[23], सिध्मादित्वाल्लज्वा। द्वे वत्सस्नेहपराया गोः[24] ॥१२७१॥

## चतुस्त्रेर्हायणी द्व्येकाद् हायन्येकादिवर्षिका ।

१-२ चतुःशब्दात् त्रिशब्दाच्च हायनीशब्दो योज्यते,

---

१. 'क्षु-' इति१॥ २. '-ग्धा' इति१.३.५, ४प्रतौ नास्ति ॥ ३. 'सइ इति विज्ञेया' इति३॥ ४ 'सइ-' इति३॥ ५. तुलनीयोऽमरकोषः२।९।७१॥ ६. 'उहाडानी गाइ' इति३॥ ७ '-श्चेति' इति१॥ ८. 'संज्ञायां धेनुष्या'४।४।८९॥ इत्यनेन निपातनम् ॥ ९. '-णौ' इति३.४॥ १०. '-णौ' इति४॥ ११. '-रोदेशः' इति३॥ १२. द्र. टीकासर्वस्वम्, भा-३, २।९।६७॥, पृ.२०८॥, पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-६३९, पृ.७२९॥, रामाश्रमी२।९।६७॥, पृ.४३०॥, तासु 'कर्णशिरोदेशे' इति दृश्यते ॥ १३. द्र. टीकासर्वस्वम्, भा-३, २।९।६७॥, पृ.२०८॥, पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-६३९, पृ.७२९॥, तयोः-"गौरुत्तमा तु निचिकी" इति दृश्यते ॥, रामाश्रमी२।९।६७॥, पृ.४३१॥, तस्याम्-"नैचिकी गौरुत्तमा नीचिकी सा प्रकीर्तिता" इति दृश्यते ॥ १४. 'क्रमेके' इति२.३.४.५॥ १५. द्र.अम.क्षीर.२।९।७०॥, पृ.२१५॥, स्वोपज्ञटीका४।१२७०॥, पृ.२८४॥, टी.गणपतिशास्त्रिसंशोधितक्षीरस्वामीटीका-स्वोपज्ञटीकायोः-'पलिक्नी' इत्यस्य स्थाने 'मलिनी' इति दृश्यते ॥ १६. 'आ-' इति२॥ १७. अम.क्षीर.२।९।७०॥, पृ.२१५॥ १८. 'ष-' इति४.५॥ १९. '-ण्यां' इति३.५॥ २०. 'वक्तव्यः' इति भाषावृत्तौ, ५।२।१२॥, पृ.२२०॥ २१. '-याणि-' इति१, '-याणी-' इति३, '-वणी-' इति४॥ २२. तुलनीयोऽमरकोषः२।९।७०॥ २३. 'वत्सं अस्ती ' इति३, 'वत्सोऽस्ती-' इति५॥ २४. 'गौः' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चत्वारः त्रयश्च हायना वयःप्रमाणमस्याः **चतुर्हायणी** चतुर्वर्षा गौः, **त्रिहायनी** त्रिवर्षा गौः । उभयत्र '-हायनान्ताद् (हायनाद्) वयसि'[1](हैमसू-२।४।९॥)इति ङीष्, णत्वं च 'त्रिचतुर्भ्यां हायनस्य'(वा- )इत्यनेन । १-२ द्विशब्दादेकशब्दाच्च हायनीति योज्यते, तेन द्वे हायने वयःप्रमाणमस्याः इत्यार्हीयस्य ठञः 'अध्यर्धपर्वाद् द्विगोः-'५।१।२८॥ इति लुक्, 'दामहायनान्ताच्च'४।१।२७॥इति ङीप्[2] **द्विहायनी** द्विवर्षा, एवं[3] **एकहायनी** एकवर्षा गौः । एकादीनि वर्षाण्यस्या एकादिवर्षिका । अत्रैकवर्षादयश्चतुर्हायण्यादीनां प्रातिलोम्येन यथासङ्ख्यं पर्याया लभ्यन्ते ॥

## आपीनमूधः

१ आप्यायते स्म **आपीनं**[4], पुंक्लीबलिङ्गः[5] । 'ओप्यायी वृद्धौ'(भ्वा.आ.से.), निष्ठा, 'प्यायः पी'६।१।२८॥, निष्ठायां 'आङ्पूर्वस्यान्धूधसोः स्यादेव'(वा-६।१।२८॥)इति [पीभावः], 'ओदितश्च'८।२।४५॥ इति निष्ठानत्वम्। २ उह्यते गवा, वहति क्षीरं वा **ऊधः,** क्लीबे । 'श्वः(श्वेः) सम्प्रसारणं च'(उणा-६३२)इत्यनुवृत्तौ 'वहेर्धो दीर्घश्च'( )इत्यसुन्, दीर्घत्वं च । ऊधसी, ऊधांसि इत्यादि । द्वे ऊधसः ॥

## गोविट् गोमयं भूमिलेपनम् ॥१२७२॥

१ गवां विट् विष्टा **गोविट्,** मूर्धन्यान्तस्तालव्यान्तश्च । २ गोः पुरीषं **गोमयम्** । 'गोर्मयट् पुरीषे'[6] ४।३।१४५॥ इति मयट् । ३ भूमिर्लिप्यतेऽनेनं[7] **भूमिलेपनम्** । 'लिप उपदेहे'(तु.उ.अ.), करणे ल्युट् । गोबरनामानि त्रीणि ॥१२७२॥

## शुष्के तु तत्र गोग्रन्थिः करीष-छगणे अपि ।

१ तत्र गोमये शुष्के गोः पुरीषस्य ग्रन्थिः **गोग्रन्थिः**। २ कीर्यते विक्षिप्यतेऽग्नौ **करीषम्**। 'कृ विक्षेपे' (तु.प.से.), 'कॄगॄ(तॄ)भ्यामीषन्'(उणा-४६६)इतीषन् । ३ छाद्यते वह्निरनेनेति **छगणम्,** पृषोदरादिः । त्रीणि 'छाणां'[8] इति ख्यातस्य ॥

## गवां सर्वं गव्यम्

१ सर्वं क्षीरादि, गोरिदम्, गवि भवं वा[9] **गव्यम्,** 'गोपयसोर्यत्'४।३।१६०॥ इति यत् । ''गव्यं गोसम्भवं सर्वम्''[हलायुधकोशः२।२७३॥]इति हलायुधः । सामान्येन एकं गोसम्भववस्तुनः ॥

## व्रजे गोकुलं गोधनं धनम् ॥१२७३॥

१ व्रजन्त्यस्मिन्निति **व्रजः,** पुंक्ली.। 'गोचरसञ्चरवह-'३।३।११९॥ इति साधुः, तत्र । २ गवां कुलं समूहः **गोकुलम्** । ३ गवां धनः (धनं) समूहः, गोशब्दात् परो धनशब्दः समूहवाची, **गोधनम्** । ''गोकुले धनगोधने''[[10]]इति व्याडिः । ४ धनति **धनम्** । 'धन शब्दे'[11]( ), पचाद्यच्[12] । चत्वारि गोधनस्य ॥१२७३॥

## प्रजने स्यादुपसरः

१ प्रायतेऽस्मिन्[13] **प्रजनः,** पशूनां गर्भग्रहणकालः । 'जनी प्रादुर्भावे'(दि.आ.से.), अधिकरणे [घञ्], 'न जनेः[14]-'(हैमसू-४।३।५४॥)इति वृद्ध्यभावः, तत्र । २ स्त्रीषु पुंसां[15] प्रथममुपसरणम् **उपसरः** । 'सृ गतौ'(भ्वा.प.अ.), 'प्रजने सर्तेः'३।३।७१॥ इत्यप्। द्वे पशूनां गर्भग्रहणकालस्य॥

## कीलः पुष्पलकः (पुष्कलकः[16]) शिवः ।

१ कील्यते रज्वा बध्यतेऽस्मिन् **कीलः,** पुंस्त्रीलिङ्गः[17] । 'कील बन्धने[18]'(भ्वा.प.से.), अधिकरणे घञ् । २ पुष्पति पुष्पलः(पुष्कलः[16]) मूर्धन्यान्तस्थाद्यमध्यः[19], पृषोदरादिः, स्वार्थे कनि **पुष्पलकः (पुष्कलकः[16][20])**। ''पुष्पलको (पुष्कलको) गन्धमृगे कीलके कृपणेऽपि च'' [विश्वलोचनकोशः, कान्तवर्गः, श्लो-२०३]इति श्रीधरः। तथा च-''सीम्नि पुष्पलकौ[21] (पुष्कलकौ[16]) हतः''[[22]] इति । ३ शेते भुवि **शिवः,** हरनामसु(श्लो-१९७)। खूंटानामानि त्रीणि ॥

---

१. 'दामहायनान्ताच्च'४।१।२७॥ इति पाणीनीयसूत्रम् ॥ २. 'ङीष्' इति१.२.४.५॥ ३. 'एकं' इति५॥ ४. '-नम्' इति१॥ ५. '-क्लीः' इति३॥ ६. 'गोश्च पुरीषे'४।३।१४५॥ इति सूत्रम् ॥ ७. '-ऽनेन' इति १प्रतौ नास्ति ॥ ८. 'छाणा' इति३, 'छांणा' इति५॥ ९. १प्रतौ नास्ति॥ १०. द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-६३१, पृ.७२२॥, रामाश्रमी२।९।५८॥, पृ.४२७॥ ११. क्षीरतरङ्गिण्यादौ शब्दार्थकधनधातुर्न दृश्यते॥ १२. '-चि' इति३.५॥ १३. '-न्ते' इति३॥ १४. 'जनिवध्योश्च'७।३।३५॥इति पाणिनीयसूत्रम् ॥ १५. '-सा' इति१॥ १६. कोष्ठान्तर्गतपाठः ३प्रतिस्थः ॥ १७. 'पुंस्त्री' इति३॥ १८. 'बन्धे' इति स्वामिमैत्रेयौ ॥ १९. अस्याऽत्राऽसङ्गतिः प्रतिभाति ॥ २०. विश्वलोचनकोशेऽप्येवमेव दृश्यते ॥ २१. इतोऽग्रे १प्रतौ 'गन्धमृग-' इति दृश्यते ॥ २२. द्र. अनेकार्थकैरवाकरकौमुदीटीका, भा-२, ४।२१॥, पृ.३२२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**बन्धनं दाम सन्दानम्**

१ बध्यतेऽनेन **बन्धनम्** । 'बन्ध बन्धने'(क्र्या.प.अ.), करणे ल्युट् । २ दीयते रक्ष्यतेऽनेन, द्यति वा **दाम,** स्त्रीक्ली.। '-मन्(-मनिन्)'(उणा-५८४)इति मन्(मनिन्) । स्त्रियां दामा[१], दामानौ इत्यादि । क्लीबे दाम, दामनी इत्यादि । ३ सन्दीयते रक्ष्यते[२]ऽनेन **सन्दानम्**[३] । 'देङ् पालने[४]'(भ्वा.आ.अ.), करणे ल्युट् । त्रीणि बन्धनरज्जोः ॥

**पशुरज्जुस्तु दामनी[५]** ॥१२७४॥

१ पशूनां बन्धनाय रज्जुः पशुरज्जुः[६], द्यति **दामनी,** पृषोदरादिः। ङीबन्तो नदीवत् । '''नित्यं संज्ञाच्छन्दसोः'४।१।२९॥[इति] ङीष्''[अम.क्षीर.२।९।७३॥] इति क्षीरस्वामी । ''सन्दानं दामनी दाम पशूनां बन्धनम्''[हलायुधकोशः२।२७७॥]इति हलायुधः । ''पशुबन्धनरज्जौ[७] त्रयः''[ ]इति तट्टीका चाऽभेदेनाऽऽह । एकं पशुबन्धनरज्जोः ॥१२७४॥

॥ **इति गवाधिकारः** ॥

**अजः स्याच्छगलः छागश्छगो वस्तः स्तभः पशुः।**

१ अजति गच्छति प्रायेणोन्नतप्रदेशमिति **अजः** । 'अज गतौ क्षेपणे च[८]'(भ्वा.प.से.), पचाद्यच्, 'अजाद्यतः-'४।१।४॥ इति निर्देशान्न वीभावः । २ छ्यते[९] (छायते) छिद्यतेऽसौ **छगलः** । 'छो छेदने'(दि.प.से.), 'छो गुग्ध्रस्वश्च'(उणा-११०)इति गुक् गलच् (कलच्) धातोर्ह्रस्वत्वं च[१०]। ३ छ्यति पत्रादिकमिति **छागः** । 'छो छेदने'(दि.प.अ.), '[११]छापूखडिभ्यो गक् (कित्)'(उणा-१२१)इति गक् (गन्), 'गन् गम्यादेः (गम्यद्योः)'(उणा-१२०) अनेन गन् वा । [४ 'शृङ्गशार्ङ्ग-'(हैमोणा-९६)इति गे निपातनात् **छगः**]। ६ स्तभ्नोति **स्तभः** । 'स्तम्भु रोधने'(सौत्रः३।१।८२॥), अच् । '''णभ तुभ हिंसायाम्'(भ्वा.आ.से.), इगुपधत्वात् के तुभः''[टीकासर्वस्वम् २।९।७६॥]इति सर्वस्वम्[१२]। ''शुभः[१३]''[अमरकोषः २।९।७६॥]इत्यमरस्तालव्यादिमाह । ५ 'गन्ध वस्त (बस्त गन्ध) अर्दने'(भ्वा.आ.से.), चुरादिर्णिजन्तः[१४], 'एरच्' ३।३।५६॥, **वस्तः** । ७ स्पृशतीति **पशुः**, प्रागुक्तः (श्लो-१२१६)। सप्त अजस्य[१५] ॥

**अजा तु छागिका मञ्झा सर्वभक्षा गलस्तनी**

॥१२७५॥

१ अजति गच्छति[१६] प्रायेणोन्नतप्रदेशमिति **अजा** । 'अजाद्यतष्टाप्[१७]'४।१।४॥ । २ छ्यति पत्रादिकमिति छागी। 'जातेरस्त्री-'४।१।६३॥ इति ङीष्, स्वार्थे कनि[१८], 'केऽणः' ७।४।१३॥इति ह्रस्वत्वे **छागिका**। ३ मञ्झति **मञ्झा** । मञ्झिः सौत्रः, अच् । ४ सर्वं कटुतिक्तप्रायमर्कपत्रादि भक्षयति **सर्वभक्षा**। 'भक्ष अदने'(चु.उ.से.), णिजन्तः, अच्। ५ गले स्तनावस्याः **गलस्तनी,** गौरादिः। पञ्च अजायाः ॥१२७५॥

**युवाऽजो वर्करः**

१ तरुणः पशुः, व्रियतेऽसौ **वर्करः**। 'वृञ् वरणे' (स्वा.उ.से.), 'कृ(कि)शृवृभ्यः करः'(हैमोणा-४३५) । यद्वा '[१९]कुक वृक आदाने'(भ्वा.आ.से.), बाहुलकादरच् । ''वर्करः कथ्यते सद्भिः सर्वोऽपि तरुणः पशुः''[हलायुधकोशः२।२७८॥]इति हलायुधः । ''सर्वस्मिन् तरुणे पशौ वर्करः''[ ]इति तट्टीका च । बाकरनाम एकम् ॥

**अवौ तु मेषो-र्णायु-हुडो-रणाः ।**

**उरभ्रो मेंढको वृष्णिरेडको रोमशो हुडुः** ॥१२७६॥

**संफालः शृङ्गिणो भेडः**

१ अव्यत इति **अविः** । 'अव रक्षणादौ[२०]' (भ्वा.प.से.), 'इन् सर्वधातुभ्यः[२१]'(उणा-५५७)इतीन्, तत्र । २ मीनाति हिनस्ति **मेषः**, पुंक्ली.। 'मीञ्[२२] हिंसायाम्' (क्र्या.उ.अ.), 'वृकृ[तृ]मी-'(हैमोणा-५४०)इति षः । मिषति स्पर्धति[२३](स्पर्धते) इति, 'मिष स्पर्धायाम्'(तु.प.से.), पचाद्यचि वा । ३ ऊर्णाऽस्त्यस्य **ऊर्णायुः** । 'ऊर्णाया

१. ५प्रतौ नास्ति ॥ २. 'रक्ष-' इति३॥ ३. 'सम्प्रदानम्' इति१॥ ४ 'देङ् रक्षणे' इति क्षीरतरङ्गिण्यादयः ॥ ५. तुलनीयोऽमरकोषः २।९।७३॥ ६. १प्रतौ नास्ति ॥ ७. '-ज्जो' इति३.५॥ ८. 'अज गतिक्षेपणयोः' इति क्षीरतरङ्गिण्यादयः ॥ ९. '-ति' इति१॥ १०. १.२.४.५प्रतिषु नास्ति ॥ ११. 'छो-' इति३॥ १२. टीकासर्वस्वे- '''णभ तुभ हिंसायाम्' । इगुपधलक्षणः कः । तुभः ।'' इति दृश्यते, भा-३, पृ.२१६॥, द्र. पदचन्द्रिका, भा-२, वैश्यवर्गः, श्लो-६४८, पृ.७३७॥ १३. अम. क्षीरस्वामिकृतटीकासम्मतः पाठः ॥ १४ '-न्ताद्' इति३॥ १५. 'अजस्य सप्त' इति३॥ १६. १.२.४प्रतिषु नास्ति ॥ १७ 'अजादित्वाट्टाप्' इति३॥ १८. '-न्' इति३॥ १९. 'तु-' इति२॥ '-णे' इति३॥ २१. 'सर्वधातुभ्य इन्' इत्युणादिगणे ॥ २२. 'मिञ्' इति३, 'मीङ्' इति सायणः ॥ २३. '-यति' इति४.५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

युस्'५।२।१२३॥, भानुवत् । ४ हूयते **हुडः**। 'हु दानादनयोः'(जु.प.अ.), औणादिको डक् । होडति गच्छतीति वा । 'हुड(हुड्ड) गतौ'(भ्वा.प.से.), 'इगुपध-'३।१।१३५॥ इति कः । ५ ऋच्छति **उरणः**, पञ्चमस्वरादिः । 'ऋ गतौ'[1](भ्वा.प.अ.), 'अर्तेर्युजुच्च'[2]( )इति युच्, उच्चाऽस्यादेशः । यद्वा उरणः कण्ड्वादौ, उरण्यति प्रीणाति देवता इत्युरणः । उच्चैः रणोऽस्येति वा । उः स्वरप्रतिरूपकमव्ययम् । ६ उरु भ्राम्यति[3] **उरभ्रः**, पञ्चमस्वरादिः । 'भ्रमु अनवस्थाने'(दि.प.से.), 'अन्येभ्योऽपि(-ष्वपि)-'३।२।१०१॥ इति डः, नैरुक्त उकारलोपः । उच्चै रम्भत इति, पृषोदरादिः । ७ मेहति मेंढः, सानुस्वारादिः, [स्वार्थे कनि **मेंढकः**]। 'मिह सेचने'(भ्वा.प.अ.), पृषोदरादिः। ८ वर्षति सिञ्चति **वृष्णिः**। 'पृषु वृषु [मृषु] सेचने'(भ्वा.प.से.), 'सृणिवेणिवृष्णिपृष्णिपार्ष्णिचूर्णयः'[4]( )इति [5]निः प्रत्ययो गुणाभावश्च निपात्यते, हरिवत् । ९ ईड्यते[6] देवता अनेनेति **एडकः**। 'ईड स्तुतौ'(अ.आ.से.), 'कीचक-'(हैमोणा-३३)इत्यके निपात्यते । इलति उत्क्षिपति एलः । 'इल स्वप्नोत्क्षेपणयोः'[7](तु.प.से.), पचाद्यच्, डलयोरेकत्वस्मरणाद् एडः, ततः स्वार्थे कन्[8] एडकः । १० रोमाणि सन्त्यस्य **रोमशः**। लोमादित्वात् शः । ११ होडति **हुडुः** । हुडधातोः '[9]पृकाहृषि-'(हैमोणा-७२९)इति किदुः, भानुवत् ॥१२७६॥ १२ संफलति **संफालः** । ज्वलादित्वाण्णः । १३ शृङ्गमस्त्यस्य **शृङ्गिणः**। 'फलबर्हा[10]भ्यामिनन्'(वा-५।२।१२२॥)बाहुलकात्[11] । शृङ्गिणौ, शृङ्गिणः इत्यादि रामवत्। १४ भिलेः सौत्रात् पचाद्यचि, डलयोरैक्याद्[12] **भेडः**। चतुर्दश मींढाख्यस्य ॥

**मेषी तु कुररी रुजा । जालकिन्यविला वेणी**

१ मिषति स्पर्धते **मेषी** । 'मिष स्पर्धायाम्'(तु.प.से.), तुदादिः । यद्वा 'मिषु सेचने'(भ्वा.प.से.), भौवादिकः[13], मेषति सिञ्चति । उभयत्र मेषडिति[14] पचादिषु दर्शनादचि टित्त्वात् स्त्रियां ङीप्[15] । २ कुरति शब्दायते **कुररी** । 'कुरत्[16] [शब्दे]'(तु.प.से.), बाहुलकादरन्, गौरादिः । कवति[17] कौति वा । 'कुङ् शब्दे'(तु.आ.से.) वा, 'कुवः क्ररन्'(उणा-४१३)इति क्ररन्, कित्त्वाद् गुणाभावः, गौरादिः । ३ रुजति **रुजा** । 'रुजो भङ्गे'(तु.प.अ.), 'इगुपध-'३।१।१३५॥ इति के टाप् । ४ जालकं रोमगुच्छो[18]ऽस्त्यस्या **जालकिनी** । ५ न विडति भिनत्ति अविडा । 'विड भेदने'[19]( ), 'इगुपध-'३।१।१३५॥ इति कः । अवीन् लाति[20] **अविला**, डलयोरैक्यात् । ६ वेणति **वेणी** । 'वेणृ गतौ'[21](भ्वा.उ.से.), अचि, गौरादिः । षड् 'गाडर' इत्याख्यस्य[22] ॥

**अथेडिक्कः शिशुवाहकः ॥१२७७॥**
**पृष्ठशृङ्गो वनाजः स्यात्**

१ ईड्यते कौतुकाद् **ईडिक्कः**, तृतीयस्वरादिः[23] । 'ईड स्तुतौ'(अ.आ.से.), 'निष्कतुरुष्क-'(हैमोणा-२६)इति के निपात्यते । २ शिशुं वहति **शिशुवाहकः** । 'वह प्रापणे'(भ्वा.उ.अ.), ण्वुल् ॥१२७७॥ ३ पृष्ठे शृङ्गोऽस्य **पृष्ठशृङ्गः** । ४ वनस्याऽजो **वनाजः** । चत्वारि वनाजस्य ॥

**अविदुग्धे त्ववेः परम् ।**
**सोढं दूसं मरीसं च**

१ अविशब्दात् परे सोढादयः प्रयुक्ता अविदुग्धवाचकाः स्युः। यथा अवेर्दुग्धं **[अविदुग्धम्], अविसोढम्, अविदूसम्, अविमरीसम्**। चत्वारि गड्डरिकादुग्धस्य ॥

**कुक्कुरो वक्रवालधिः ॥१२७८॥**
**अस्थिभुग् भषणः सारमेयः कौलेयकः शुनः ।**
**शुनिः श्वानो गृहमृगः कुर्कुरो रात्रिजागरः १२७९**

---

१. 'गतिप्रापणयोः' इति क्षीरतरङ्गिण्यादयः ॥ २. 'अर्तेः क्युरुच्च'(उणा ६९५)इत्युणादिगणे, 'ऋ गतौ' अस्मात् क्युप्रत्ययः, धातोरुकारादेशश्चेत्यर्थः ॥, 'अर्ते क्युन् उच्च'(५।६३)इति दशपाद्याम् ॥ ३. '-ते' इति५॥ ४. 'घृणिपृश्निपार्ष्णिचूर्णिभूर्णि'(उणा-४९२)इत्युणादिगणसूत्रम्, तत्र वृष्णिशब्दो न दृश्यते, अथ च 'सुवृषिभ्यां कित्'(उणा-४८९)इत्यनेन निप्रत्ययो बोध्यः ॥ ५. 'निप्र-' इति१.४॥ ६. '-डते' इति४.५॥ ७. '-पयोः' इति१.२.३, 'स्वप्नक्षेपणयोः' इति क्षीरतरङ्गिण्यादयः ॥ ८. '-नि' इति१.२॥ ९. 'घृ ' इति१.४.५॥ १०. ' र्हि-' इति५॥ ११. १प्रतौ नास्ति ॥ १२. ' क्यवत्' इति३॥ १३. 'भौ' इति१.४.५, ३प्रतौ नास्ति ॥ १४. '-षीरिति' इति३.४.५॥ १५. 'ङीष्' इति१.२.४.५॥ १६. हैममते तुदादेस्तकारानुबन्धः ॥ १७. '-ति' इति१॥ १८. '-त्सो' इति३॥ १९. क्षीरतरङ्गिण्यादौ भेदनार्थकविडधातुर्न दृश्यते ॥ २०. '-तीति' इति१॥ २१. 'वेणृ गतिज्ञानचिन्तानिशामनवादित्रग्रहणेषु' इति क्षीरतरङ्गिण्यादयः ॥ २२. 'ख्यातस्य' इति१.५॥ ''षड् जालिकिन्या, 'गाडर' इति भाषा'' इति३॥ २३. आचार्यश्रीहेमचन्द्राचार्यमते तृतीयस्वरादिः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**रसना[13]लिड् रतपरा: कील[14]-शायि[15]-व्रणा[16]-ऽन्दुका[17]: ।**
**शाला[18]वृको मृगदं[19]श: श्वा[20]**

१ कोकतेऽस्थ्यादिकमादत्ते **कुक्कुर:** । 'कुक आदाने[1]'(भ्वा.आ.से.), पृषोदरादि: । यद्वा कुगिति कुरति शब्दायते कुक्कुर: । 'कुरत्[2] शब्दे'(तु.प.से.), 'इगुपध-' ३।१।१३५॥ इति क: । २ वक्रो वालधिरस्य **वक्रवालधि:** ॥१२७८॥ ३ अस्थीनि भुनक्ति **अस्थिभुक्** । 'भुज पालनाभ्यवहारयो:'(रु.प.अ.), सम्पदादित्वात्[3] क्विप् । ४ भषति[4] कुत्सितं वाशते[5] (वाश्यते) **भषण:** । 'भष भर्त्सने' (भ्वा.प.से.), नन्द्यादित्वाल्ल्यु: । क्वुनि भषकोऽपि । ५ सरमाया अपत्यं **सारमेय:** । 'स्त्रीभ्यो ढक्'४।१।१२०॥ । ६ कुले गृहे भव: **कौलेयक:**[6] । 'कुलकुक्षि-'४।२।९६॥ इति ढकञ्[7] । ७ शुनति गच्छति **शुन:** । 'शुन गतौ'(तु.प.से.), 'इगुपध-'३।१।१३५॥ इति क: । ८ **शुनि:**, 'इगुपधात् कित्'(उणा-५५९)इतीन्, हरिवत् । ९ शोभन आन: प्राणोऽस्य **श्वान:**, तालव्यादिरकारान्त: । १० गृहस्य मृगो **गृहमृग:** । ११ किरत्यस्थीनि **कुर्कुर:**, पञ्चमस्वरद्वय:, पृषोदरादि:, व्यञ्जनरेफककवर्गाद्यद्वयमध्य: । १२ रात्रिं जागर्ति **रात्रिजागर:** । 'कर्मण्यण्'३।२।१॥, 'जाग्रो विचिण्-'[8] ७।३।८५॥ इति गुण: ॥१२७९॥ १३ रसनया लेढि **रसनालिट्** । सम्पदादित्वात् क्विप् । १४-१७ रतशब्दात् परा: कीलादय:, यथा रतेन कील्यते बध्यते **रतकील:** । 'कील बन्धने'(भ्वा.प.से.), कर्मणि घञ् । रते कीलोऽस्येति वा । रते शेते **रतशायी** । ग्रहादित्वाण्णिनि: । रतेन व्रणमस्य **रतव्रण:** । रतमेवाऽन्दुको बन्धनमस्य **रतान्दुक:** । १८ शालायां गृहे वृक: **शालावृक:** । १९ मृगान् दशति **मृगदंश:** । अच् । २० श्वयति वर्त्मनि **श्वा** । 'टुओश्वि गतिवृद्ध्यो:'(भ्वा.प.से.), 'श्वन्नुक्षन्पूषन्प्लीहन्क्लेदन्स्नेहन्मूर्धन्मज्जन्नर्यमविश्वप्सन्परिज्मन्मातरिश्वन्मघवन्निति[9]'(उणा-१५७) कनि साधव:[10] । श्वानौ, श्वान इत्यादि । विंशति: श्वानस्य ।

शेषश्चात्र-

"शुनि:[11] क्रोधी रसापायी शिवारि: सूचको रुरु:[12] ।
वनन्तप: स्वजातिद्विट् कृतज्ञो[13] भल्लहश्च स: ॥१॥
दीर्घनाद: पुरोगामी स्यादिन्द्र[14]महकामुक: ।
मण्डल: कपिलो ग्राममृगश्चन्द्रमहोऽपि च ॥२॥"
[शेषनाममाला १८१-१८३॥] ॥

**अलर्क[1]स्तु स रोगित: ॥१२८०॥**

१ अल्यते वार्यते दशनभयाद् **अलर्क:** । 'अलञ्[15] भूषणादौ'(भ्वा.प.से.), 'निष्कतुरुष्क-'(हैमोणा-२६)इति साधु: । सञ्जातगरादिप्रयोगत्वाद् यक्ष्मादिरोग: सञ्जातोऽस्य रोगित: । तारकादित्वादितच् । एकं हडकिया[16]श्वानस्य ॥१२८०॥

**विश्वकद्रु[1]स्तु कुशलो मृगव्ये**

१ विश्वं कत् कुत्सितं द्रवति **विश्वकद्रु:** । 'द्रु गतौ' (भ्वा.प.अ.), 'मितद्र्वादिभ्यश्च'(वा-३।२।१८०॥)इति डु: । मृगव्ये आखेटके कुशलो निपुण: । सिकारीश्वानस्यैकम् ॥

**सरमा[1] शुनी[2] ।**

१ 'प्रथेरमच्'(उणा-७४६)इति बाहुलकात् सर्त्तेरपि, ततष्टाप् **[सरमा]** । २ **देवशुनी** इति विशेषवृत्तिरप्यसौ सामान्येष्वभिधानात् । द्वे शुन्या: ॥

**विट्[1]चर: शूकरे ग्राम्ये**

१ विशं चरत्यत्ति **विट्चर:** । 'चरेष्ट:'३।२।१६॥ । शूकरे ग्राम्ये, ग्रामीणे शूकर[17] इत्यर्थ: । एकम् ॥

**महि[1]षो यमवा[2]हन: ॥१२८१॥**

**रज[3]स्वलो वाह[4]द्रिपु[5]र्लुला[6]य: सैरि[7]भो मह: ।**
**धीर[8]स्कन्ध: कृष्ण[9]शृङ्गो[10] जरन्तो[11] दंशभीरुक: ॥१२८२॥**
**रक्ता[12]क्ष: कासरो[13] हंस[14]कालीतनय[15]लालिकौ ।**

१ महन्ति पूजयन्त्यनेन, (मह्यते[18] वा) **महिष:** ।

---

१. 'कुक वृक आदाने' इति क्षीरतरङ्गिण्यादय: ॥ २ तकारानुबन्धो हैममते ॥ ३ १प्रतौ नास्ति ॥ ४ इतोऽग्रे ३प्रतौ 'वा' इति दृश्यते॥ ५ 'भासते' इति१, 'वाशेते' इति३ ॥ ६. '-य:' इति३ ॥ ७ '-न्' इति३ ॥ ८ '-नाया' इति३ ॥ ९ 'श्वन्नुक्षन्निति' इति३.४.५ ॥ १०. 'साधु:' इति३ ॥ ११. 'शुनि' इति३ ॥ १२. 'रुद्र:' इति१ ॥ १३. 'कृतभग्नो' इति१ ॥ १४ 'स्यादिण्ड-' इति१.४.५ ॥ १५ '-न्' इति३ ॥, अत्र युधिष्ठिरमीमांसकमहोदयकृतटिप्पणी द्रष्टव्या, भ्वादि:, धातुसं-३४६, पृ.८१ ॥ १६ '-की-' इति३ ॥ १७ 'सू-' इति३ ॥ १८ कोष्ठान्तर्गतपाठ: ४.५प्रत्योर्नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'मह पूजायाम्'(भ्वा.प.से.), 'अविमह्योष्टिषच्'(उणा-४५) इति टिषच्, स्त्रियां टित्त्वाद् ङीषि (ङीपि) महिषी । मह्यां शेत इति वा, पृषोदरादित्वात् । २ यमेन वाह्यते **यमवाहनः** । वहेर्णिजन्तान्नन्द्यादित्वाद् ल्युः । यमरथोऽपि ॥१२८१॥ ३ रजोऽस्त्यस्य **रजस्वलः**। 'रजःकृष्यासुतिपरिषदो वलच्'५।२।११२॥ । ४ वाहानां रिपुः **वाहरिपुः**। ''वाहेषु रिपुरिति । 'सप्तमी'२।१।४०॥ इति योगविभागात् समासः''[१]इत्यन्ये । ५ अप्सु लुलति **लुलायः**[२] । 'लुल विलोलने'[३](तु.प.से.), लुलिः सौत्रो वा । लोलति पङ्के वा लुलायः, अन्तस्थाद्यान्तः । '[कुलि]कुलिकलिकषिभ्य आयः'(हैमोणा-३७२)इत्यायः । 'लुल विलोलने'( ), 'इगुपध-'३।१।१३५॥ इति कः । '' 'ऋक्पूरब्धूः-'५।४।७४॥ इत्यादिना अः, राजदन्तादित्वादपशब्दस्य परनिपातः, पृषोदरादित्वाद् वा लुलापः''[४]इति पञ्चमवर्गाद्योपधो[५] मिश्राः । ६ सीरो लाङ्गलम्, तद्योगात् सीरी[६] गृहस्थः, तं बहूपकारकरणाद् भजति[७] सेवते सीरिभः । भजेः 'अन्येभ्योऽपि(अन्येष्वपि)-'३।२।१०१॥ इति डः, डिति, 'टेः' ६।४।१४३॥, प्रज्ञाद्यणि **सैरिभः** । सीरिणो भा शोभा सीरिभा, सा अत्राऽस्तीति। ज्योत्स्नाद्यणि वा। सीयते बध्यते वा। 'षिञ् बन्धने'(स्वा.उ.अ.), 'सिटिकिभ्यामिभः सैरिटिट्टौ च'(हैमोणा-३३२)इति साधुः । सीरिभिर्दन्तैर्भाति सीरिभः कुटुम्बी[९], तस्याऽयमिति वा । ७ महति पूजयतीति[१०] **महः** । 'मह पूजायाम्'(भ्वा.उ.से.), पचाद्यच्। ८ धीरः स्थिरः स्कन्धोऽस्य **धीरस्कन्धः** । ९ कृष्णं शृङ्गमस्य **कृष्णशृङ्गः**। १० जीर्यति[११] **जरन्तः** । 'जॄ(जॄष्) वयोहानौ'[१२](दि.प.से.), 'जॄविशिभ्यां झच्'(उणा-४०६), 'झोऽन्तः'७।१।३॥ । ११ दंशेभ्यो भीरुर्दंशभीरुः[१३], ततः स्वार्थे कनि **दंशभीरुकः** ॥१२८२॥ १२ रक्ते अक्षिणी अस्य **रक्ताक्षः**। 'बहुव्रीहौ सक्थ्यक्ष्णोः-'५।४।११३॥ इति षच् । १३ घर्मार्तः सन् कं जलमासरति **कासरः**[१४] । 'सृ गतौ'(भ्वा.प.अ.), आङ्पूर्वः, अच्। के जले सरतीति, पचाद्यचि, 'अन्येषामपि-'६।३।१३७॥इति दीर्घत्वे वा । कासत इति वा । 'कासृ शब्दकुत्सायाम्'(भ्वा.आ.से.), बाहुलकादरन्निति वा। कं जलम्, आ ईषत् सरति [महा]कायत्वादिति वा। १४ हंसकाल्यास्तनयो **हंसकालीतनयः**, सप्ताक्षरोऽखण्डः । १५ लालाः सन्त्यस्य **लालिकः** । व्रीह्यादित्वाट्ठक् । पञ्चदश महिषस्य । शेषश्चात्र-''महिषे कलुषः पिङ्गः कटाहो गद्गदस्वरः[१५] । हेरम्बः[१६] स्कन्धः शृङ्गी च[१७]''[शेषनाममाला४।१८३-१८४॥]इति ॥

**अरण्यजेऽस्मिन् गवलः[1]**

१ अस्मिन् महिषेऽरण्यसम्भवे, गवते शब्दायते[१८] **गवलः** । 'गुङ् शब्दे'(भ्वा.आ.अ.), 'कम्बलादयश्च'(दशपाद्युणा-८।११४॥)इति साधुः । एकमरण्योत्पन्नमहिषस्य ॥

**सिंहः[1] कण्ठीरवो[2] हरिः[3] ॥१२८३॥**

**हर्यक्षः[4] केसरी[१९][5] भारिः[6] पञ्चास्यो[7] नखरायुधः[8] ।**

**महानादः[9] पञ्चशिखः[10] पारिन्द्रः[२०][11] पत्यरी[12] मृगात्[13] ॥१२८४॥**

**श्वेतपिङ्गोऽपि[14]**

१ हिनस्ति गजान् मृगांश्चेति **सिंहः** । 'हिसि हिंसायाम्'(रु.प.से.), पचाद्यच्, पृषोदरादित्वाद् वर्णविपर्ययः । २ कण्ठे रवो ध्वनिरस्य **कण्ठीरवः** । पृषोदरादिः । ३ हरति मृगान् **हरिः** । 'अच इः'(उणा-५७८) इति इः ॥१२८३॥ ४ हरिणी विमले पिङ्गले वाऽक्षिणी यस्य **हर्यक्षः**। 'बहुव्रीहौ सक्थ्यक्ष्णोः-'५।४।११३॥ इति षच् । ५ के शिरसि सरन्ति केसराः[२१] स्कन्धदेशस्थसटाः

१. द्र. पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२१९, पृ.२८१॥, तत्र-''वाहे अश्वे वा द्विषन् शत्रुः । 'वाहद्विपन' । ''सप्तमी''ति (पा.२।१।४०॥)योगविभागात् समासः-इत्यन्ये'' इति दृश्यते॥ २. १.२.४.५प्रतिषु नास्ति ॥ ३ '-डने' इति१, विग्रहे लुलतीति तुदादेर्ग्रहणादत्र संश्लेषणार्थकलुडधातुर्युक्तः, तथा च डलयोरैक्यं बोध्यम् ॥ ४ द्र. पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२१९, पृ.२८१॥ तत्र-''लुलेति । अप्सु लुलति । लुल विलोठने । ''इगुपधत्वात्''(पा.३।१।१३५॥) कः । लुलश्चासावापश्च । ''ऋक्पुर्''(पा.५।४।७४॥)इत्यादिना अच् (अः) । ''राजदन्तादित्वात्''(पा.२।२।३१॥)परनिपातः, पृषोदरादित्वाद् वा (पा.६।३।१०९॥) । 'लुलापः' ।'' इति दृश्यते ॥ ५. '-धात्' इति१॥ ६. 'सा-' इति४.५॥ ७ '-ते' इति१.३॥ ८ '-द' इति१॥ ९ 'कुट' इति१.५॥ १०. '-र्यति' इति१.२.३॥ ११. '-ते' इति३॥ १२. '-हीनौ' इति१॥ १३. '-रुकः' इति१.४.५॥ १४ '-सारः' इति३.४.५॥ १५. '-दः' इति३॥ १६. '-म्बस्क-' इति१.२.४.५॥ १७ 'स्कन्धशृङ्गश्च' इति शेषनाममालास्वोपज्ञटीकयोः ॥ १८. 'शब्दते' इति१॥ १९. 'केश-' इति३.५॥ २०. 'पारी-' इति१.३.४.५॥ २१. '-शराः' इति४.५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सन्त्यस्य **केसरी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः । "सवितृकिसलयकेसरसभा'[ ][1]इति सभेदाद् दन्त्यमध्यः । "केशं लातीति ग्लयोरेकत्वस्मृतेस्तालव्यमध्यश्चाऽयम्"[ ][1] इत्यन्ये । ६ इभानामरिः **इभारिः** । ७ पञ्च्यते विस्तार्यत इदं पञ्चम् । 'पचि विस्तारे'(भ्वा.आ.से.), कर्मणि घञर्थे[2] कः, भावे घञि अर्शआद्यचि, पञ्चं विस्तारयुक्तमास्यमस्य **पञ्चास्यः** । मुखम्, तत्पादाश्चत्वारः, एते पञ्च करिकुम्भदारणक्षमत्वात् पञ्च आस्यानीव[3] यस्येति वा । ८ नखरा नखमायुधमस्य **नखरायुधः**। ९ महान् नादोऽस्य **महानादः**। १० पञ्च शिखा अस्य **पञ्चशिखः**। ११ पारिषु शक्तेष्विन्द्रः **पारिन्द्रः**, तृतीयस्वरमध्यः । पृषोदरादित्वात् पारीन्द्र इति तुर्यस्वरमध्योऽपि । १२-१३ मृगशब्दात् पुरः पतिररिश्च योज्यते, तेन वन्याः पशवो मृगास्तेषां पतिः **मृगपतिः** । मृगाणामरिः **मृगारिः** ॥१२८४॥ १४ श्वेतश्चासौ पिङ्गश्च **श्वेतपिङ्गः** । चतुर्दश सिंहस्य । शेषश्चात्र-

"सिंहे तु स्यात् पलङ्कषः ।
[4]शैलाटो वनराजश्च नभःक्रान्तो गणेश्वरः ।
शृङ्गोष्णीषो रक्तजिह्वो व्यादीर्णास्यः सुगन्धिकः ॥१॥"

[शेषनाममाला४।१८४-१८५॥] ॥

## अथ व्याघ्रो द्वीपी शार्दूलचित्रकौ । चित्रकायः पुण्डरीकः

१ व्याजिघ्रति **व्याघ्रः** । व्याङ्पूर्वो 'घ्रा गन्धोपादाने'(भ्वा.प.अ.), 'न संज्ञायाम्'[5](वा-३।१।१३७॥) इति निषेधात् 'पाघ्राध्मा-'३।१।१३७॥ इति शप्रत्ययाभावे, 'आतश्चोपसर्गे'३।१।१३६॥ कः । २ द्वीपं चर्म, तद्योगाद् **द्वीपी**। द्वीपं जलमध्यस्थलमाश्रयत्वेनाऽस्त्यस्येति वा । 'अत इनिठनौ'५।२।११५॥ इतीनौ द्वीपी । ३ शृणाति हिनस्ति प्राणिनः **शार्दूलः** । 'शॄ हिंसायाम्'(क्र्या.प.से.), 'खर्जिपिञ्जादिभ्य ऊरोलचौ'(उणा-५३०)इत्यूलप्रत्ययो बाहुलकाद् दुगागमो णित्त्वं च वृद्धिः[6]। ४ **चित्रकः** चित्रवर्णत्वात् । ५ चित्रः कायोऽस्य **चित्रकायः** । ५ **पुण्डरीकः** पद्मनामसु (अभि. श्लो-४।११६२)। केचित्तु चित्राल्पानल्पत्वकृतं द्वीपिव्याघ्रयोर्भेदमाहुः, तत्राऽल्पचित्रको व्याघ्रभेदो द्वीपी स्यात्[7], तथा च महाभारतम्- "द्वीपी व्याघ्रत्वमागतः"[ ][7]इति । षट् व्याघ्रस्य ॥

## तरक्षुस्तु मृगादनः ॥१२८५॥

१ तरं मार्गं क्षुणोति(क्षिणोति) रुणद्धि, तरेणोत्फालेन क्षुणत्ति वा **तरक्षुः** । 'क्षुदिर् संपेषणे'[8](रु.उ.अ.), मितद्र्वादित्वात्[9] । तरन् प्लवमानः क्षिणोति क्षौति वा व्युत्पत्तिः, भानुवत् । २ मृगमत्तीति **मृगादनः** । नन्द्यादित्वाद् ल्युः । द्वे 'जरख' इति ख्यातस्य[10] ॥१२८५॥

## शरभः कुञ्जरारातिरुत्पादकोऽष्टपादपि ।

१ शृणाति हिनस्ति हस्तिनं[11] **शरभः** । 'शॄ हिंसायाम्'(क्र्या.उ.से.) 'कृगृशृशलिकलिगर्दिभ्योऽभच्'(उणा-४०२, दशपाद्युणा-७।१८॥)। २ कुञ्जराणामरातिः **कुञ्जराराति**। ३ उदूर्ध्वाः पादा[12] अस्य उत्पादः, स्वार्थे कनि **उत्पादकः**। ४ अष्टौ पादा अस्य **अष्टपाद्**[13] । 'सङ्ख्यासुपूर्वस्य' ५।४।१४०॥ इति पद्भावः । अष्टापदोऽपि-

"अष्टापदो महाशृङ्गी शरभश्चतुरूर्ध्वपात् ।
उष्ट्रप्रमाणो द्विरदारातिश्चैव महामृगः ॥१॥"[ ]इति

पथ्यापथ्यकारः । स काश्मीरे प्रसिद्धः ॥

## गवयः स्याद् वनगवो गोसदृक्षोऽश्ववारणः ॥१२८६॥

१ गवते **गवयः** । 'गुङ् शब्दे'[14](भ्वा.आ.अ.), [बाहुलकादयः] । २ वनस्य गौः **वनगवः** । ३ गोः सदृशो **गोसदृक्षः** । दृशेः 'क्सश्च'(वा-३।२।६०॥)इति क्सः[15] । ४ अश्वान् वारयति **अश्ववारणः** । नन्द्यादित्वाद् ल्युः । [16]रोझनामानि चत्वारि ॥१२८६॥

## खड्गी वाध्रीणसः खड्गो गण्डकः

१. द्र. पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२१६, पृ.२७६॥ २. '-ज्यर्थे' इति३॥ ३. 'आस्या वा' इति४.५॥ ४. 'श-' इति४.५॥ ५. 'पाघ्राध्मा-'३।१।१३७॥ इत्यत्र भट्टोजिदीक्षितेन-"घ्रः संज्ञायां न, व्याघ्रादिभिरिति निर्देशात्" इत्युक्तम्, सिद्धान्तकौमुदी, कृदन्तप्रकरणम्, कृत्यप्रक्रिया, पृ.५६४॥ ६. 'शृणातेर्दुग्वृद्धिश्च' इति गणसूत्रेण वृद्धिर्दुगागमो बोध्यः ॥ ७ द्र. पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२१६, पृ.२७७॥ ८. '-प्रेषणे' इति४॥ ९. '-त्' इति१.२.३॥ १०. 'आख्या-' इति१॥ ११. ४.५प्रत्योर्नास्ति ॥ १२. 'प-' इति३॥ १३. '-दः' इति२॥ १४. 'शक्ते' इति१, 'अव्यक्ते शब्दे' इति क्षीरतरङ्गिण्यादयः ॥ १५. 'क्सः' इति४.५॥, 'दृक्षे चेति वक्तव्यम्' इत्यनेन समानस्य सभावः ॥ १६. 'रोज ' इति४.२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ खड्गः शृङ्गोऽस्य **खड्गी** । 'अत इनिठनौ' ५।२।११५॥ इतीनिः । २ वाध्रीव[1] नासिकाऽस्य **वाध्रीणसः** । 'अञ् नासिकायाः संज्ञायां[2] नसं चाऽस्थूलात्' ५।४।११८॥ इति नासिकान्तबहुव्रीहेः[3] संज्ञायामच्समासान्तः, नासिकायाश्च नसादेशः । ३ खडति भिनत्ति **खड्गः** । 'खड खडि भेदने'[4](चु.प.से.), 'छापू[ञ्]खडिभ्यो गक्'[5] (उणा-१२१, दशपाद्युणा-३।६९॥)इति गक् । ४ गच्छतीति गण्डः । गमेः 'जमन्ताड्डः'(उणा-१११), स्वार्थे कनि **गण्डकः** । गडिधातोः कृञादिभ्यो वुनि वा । गण्डा[6]सावजनामानि चत्वारि[7] ॥

### अथ किरः[1] किरिः[2] ।

**भूदारः[3] सूकरः[4] कोलो[5] वराहः[6] क्रोड[7]पोत्रिणौ[8]॥१२८७॥**
**घोणी[9] घृष्टिः[10] स्तब्धरोमा[11] दंष्ट्री[12] किट्या[13]स्यलाङ्गलौ[14]।**
**आखनिकः[15] शिरोमर्मा[16] स्थूलनासो[17] बहुप्रजः[18]॥१२८८॥**

१ किरति भुवं **किरः** । 'कॄ विक्षेपे'(तु.प.से.), 'इगुपध-'३।१।१३५॥ इति कः। २ **किरिः** इत्यत्र बाहुलकाद् 'अच इः'(उणा-५७८) । किरेः स्त्री किर्याणी[8] । ३ भुवं दारयति **भूदारः** । 'दॄ विदारणे'(क्र्या.प.से.), 'कर्मण्यण्'३।२।१॥ । ४ सूदिति शब्दं करोति **सूकरः** । पृषोदरादिः । सूयते प्रेर्यते वा । 'षू प्रेरणे'(तु.प.से.), 'सूपुषिभ्यां[9] कित्'(हैमोणा-४३६)इति करः। शुचं करोति । अच्, पृषोदरादित्वाद् वर्णलोपे 'अन्येषामपि-'(वा-६।३।१३७॥)इति दीर्घत्वे शूकरस्तालव्यादिरपि । ''तालव्या अपि दन्त्याश्च शम्बशूकरपांशवः''[10]इति शभेदात् । ५ कोलति संस्त्यायति पीनत्वादिति **कोलः** । 'कुल संस्त्याने' (भ्वा.प.से.), पचाद्यच् । ६ वृणोति **वराहः** । 'वृञ् वरणे' (स्वा.उ.से.), 'वृकटि-'(हैमोणा-५९१)इत्याह । वरमाहन्तीति, 'अन्येभ्योऽपि(अन्येष्वपि)-'३।२।१०१॥ इति डो वा । वर आहारोऽस्येति, पृषोदरादित्वाद् वा । ७ क्रोडति[11] **क्रोडः** । 'क्रुड घनत्वे'[12](तु.प.से.), पचाद्यच् । केन जलेन रोडत्युन्मादयतीति, 'रोडृ[13] उन्मादे'(भ्वा.प.से.), अचि, पृषोदरादिर्वा । ८ मुखाग्रमस्य पोत्रम्, तद्योगादिनौ[14] **पोत्री,** पोत्रिणावित्यादि ॥१२८७॥ ९ घोणाऽस्त्यस्य **घोणी**। व्रीह्यादित्वादिनिः । १० घर्षति घोणां दंष्ट्रां वा **घृष्टिः**। 'घृष(घृषु) सङ्घर्षे'[15](भ्वा.प.से.), कर्तरि 'क्तिच्क्तौ च-'३।३।१७४॥इति क्तिच् । ''बाहुलकात् क्तिन्प्रत्यये घृष्टिः''[16]इत्यन्ये । घृष्यादिति घृष्टिरिति, 'क्तिच्क्तौ च संज्ञायाम्'३।३।१७४॥ इति आशिषि क्तिज्वा पुंसि। ११ स्तब्धं रोमाऽस्य **स्तब्धरोमा,** नकारान्तः। १२ दंष्ट्राऽस्याऽस्ति[17] **दंष्ट्री,** इन्नन्तः । १३ केटति **किटिः** । 'किट खिट उत्त्रासे'[18](भ्वा.प.से.), 'इगुपधात्-'[19](उणा-५५९)इति किः(इन्), हरिवत् । १४ आस्यं दारकत्वाल्लाङ्गलमिवाऽस्येति **आस्यलाङ्गलः** । १५ आखनति **आखनिकः** । 'खनु अवदारणे'(भ्वा.उ.से.), 'आङि पणिपनिखनिभ्य इकन्'[20](उणा२०३)इतीकन् । आखनः[21] खातकविशेषः, सोऽस्यास्तीतीनौ आखनी, ततः स्वार्थे कनि वा । १६ शिरसि मर्माऽस्य **शिरोमर्मा,** नकारान्तः । १७ स्थूला[22] नासा[23]ऽस्य **स्थूलनासः**[24]। १८ बहव्यः प्रजा अस्य **बहुप्रजः**। अष्टादश शूकरस्य । शेषश्चात्र-

''सूकरे कुमुखः कामरूपी च सलिलप्रियः ।
तलेक्षणो वक्रदंष्ट्रः पङ्क्रीडनकोऽपि[25] च ॥१॥''

[शेषनाममाला ४।१८५-१८६॥] ॥१२८८॥

### भाल्लूके[1] भालूक[2]-र्क्षा[3]-ऽच्छभल्ल[4]-भल्लूक[5]-भल्लुकाः[6] ।

१ भल्लति (भल्लते) हिनस्ति **भाल्लूकः**[26] । 'भल्ल[27] परिभाषणहिंसादानेषु'(भ्वा.आ.से.) 'उलूकादयश्च'

१. 'व-' इति४.५॥ २. '-याः' इति३॥ ३. '-हिः' इति३॥ ४. '-भेदे' इति स्वामी, 'खड खडि कडि भेदने' इति मैत्रेयसायणौ ॥ ५. 'कित्' इति पञ्चपाद्याम् ॥ ६. 'गा ' इति१.२.३॥ ७. 'त्रीणि' इति१.३.४.५॥ ८. 'की-' इति१.२.५॥ ९. '-पू ' इति१॥ १०. द्र. टीकासर्वस्वम्, भा-२, २।५।२॥, पृ.२१५॥, पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२१७, पृ.२७७॥, रामाश्रमी२।५।२॥ ११. ४प्रतौ नास्ति ॥ १२. 'क्रुड निमज्जने' इति मैत्रेयः ॥, स्वामिसायणाभ्यां साक्षाद् न स्वीकृतोऽयं धातुपाठः ॥ १३. '-ड' इति३॥ १४. '-नि' इति१॥ १५. '-र्षणे' इति१.२.३॥ १६. द्र. पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२१७, पृ.२७८॥ १७. '-स्तीति' इति३॥ १८. 'किटि खिटि-' इति१, 'खिट त्रासे' इत्येव स्वामी, '-त्रासे' इति मैत्रेयसायणौ ॥ १९. इतोऽग्रे ३प्रतौ 'कित्' इति दृश्यते ॥ २०. २प्रतौ, उणादिगणे च न दृश्यते ॥ २१. 'खातवि-' इति१.२॥ २२. '-ल-' इति१॥ २३. 'नाशा-' इति३॥ २४. '-शः' इति३.४॥ २५. 'पङ्कः' इति३.४.५॥ २६. इतोऽग्रे ४प्रतौ 'भल्लूकः' इति दृश्यते ॥ २७. 'भल भल्ल' इति क्षीरतरङ्गिण्यादयः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(उणा-४८१)इत्यूकप्रत्ययान्तो निपातितः, ततः 'प्रज्ञादिभ्यश्च'५।४।३८॥ इत्यणि, 'तद्धितेष्वचामादेः'७।२।११७॥ इति वृद्धिः। २ भालयति (भालयते) तिर्यक् प्रेक्षते **भालूकः**। भलधातोः 'उलूकादयश्च'(चान्द्रोणा-२।२) इत्यूकन्, अन्तस्थातृतीयैकषष्ठस्वरमध्योऽयम्। ३ ऋक्ष्णोति हिनस्ति **ऋक्षः**। 'ऋक्ष हिंसायाम्'(स्वा.प.से.), पचाद्यच्। ऋषति गच्छतीति वा। 'ऋषी गतौ'(तु.प.से.), बाहुलकात् 'सक्'( )इति वा। ४ अच्छेत्याभिमुख्येऽव्ययम्, अच्छ आभिमुख्येन भल्लति (भल्लते) हिनस्ति **अच्छभल्लः**। पचाद्यच्, सङ्घातविगृहीतश्चायम्। अच्छ इति, भल्ल इति वा।

"अच्छः स्फटिकभल्लूकनिर्मलेष्वच्छमव्ययम्।
आभिमुख्येऽ[१]र्थ कच्छः स्यात्"[मेदिनीकोशः, छान्तवर्गः, श्लो-१-२]इति मेदिनिः। "अच्छभल्लपरि[२]षद्विहरति" [ ]इत्यभिनन्[३]दः। ५ भल्लति (भल्लते) हिनस्ति **भल्लूकः**, दीर्घमध्यः। 'उलूकादयश्च'(उणा-४८१)इत्यूकन्। ६ भल्लति (भल्लते) **भ[४]ल्लुकः**, ह्रस्वमध्यः। 'मू(यू)कादयश्च'(चान्द्रोणा-२।२)इति कन्प्रत्ययो धातोर्भल्लुरित्यादेशश्च। रींछनामानि षट्॥

**सृगालो[1] जम्बुकः[2] फेरुः[3] फेरण्डः[4] फेरवः[5] शिवा[6] ॥१२८९॥**

**घोरवासी[7] भूरिमायो[8] गोमायुर्[9]मृगधूर्तकः[10]।**

**हूरवो[11] भरुजः[12] क्रोष्टा[13]**

१ सृजति मायां **सृगालः**। 'सृज विसर्गे'(तु.प.अ.), 'तमि[विशि]विडि-'(उणा-११५)इति बाहुलकात् कालन्, न्यङ्क्वादित्वात् कुत्वम्। असृगालीयते, असृग् गिलतीति, पृषोदरादित्वाद् [६]वा, दन्त्यादिरयम्। शृ[७]ङ्गं न लातीति शृगालः, तालव्यादिरपि। "शृगालो वञ्चके[८] दैत्ये" [विश्वप्रकाशकोशः, लान्तवर्गः, श्लो-१०७]इति विश्वः।

"तालव्या अपि दन्त्याश्च शम्बशम्बलशूकराः।
र[९]शनाऽपि[१०] च जिह्वायां शृ[११]गालः कलशोऽपि च ॥१॥"
[[१२]]इति शभेदात्। २ जमत्यत्ति मांसादिकमिति **जम्बुकः**। 'जमु अदने'(भ्वा.प.से.), मित्रद्र्वादित्वादुः (मितद्र्वादित्वाद् डुः), बुक् च, ततः कन्[१३]। उलूकादित्वादूकनि 'जम्बूक' इति दीर्घमध्योऽपि। "खरोष्ट्रपिकजम्बुकवायसा ज[१४]म्बूको यमः"[[१५]]इति वाचस्पतिः। ३ 'फे' इत्यव्यक्तं रौति, मित्रद्र्वादित्वाद् डुः **फेरुः**। 'फे' इति रौति[१६] फेरुः, पृषोदरादित्वात्[१६]। ४ 'फे' इति रणति **फेरण्डः**। 'र[१७]ण शब्दे'(भ्वा.प.से.), 'जमन्ताड्डः'(उणा-१११)। ५ 'फे' इति रवोऽस्य **फेरवः**।

"गुहारूपं वृषभेरुः फेरवस्तारवः शिवा।
शूकरोऽतिरुजः फेरः(फेरुः)श्वभीरुर्मण्डलाहितः ॥२॥"
[[१२]]इति साहसाङ्कः। ६ शेते दिवा **शिवा[१८]**, रुद्रनामसु (श्लो-१९७)। शिवा दुर्गा तत्प्रियत्वाद् वा शिवा[१९]। सृ[२०]गालेऽप्ययं नित्यस्त्रीलिङ्गः। यच्छाश्वतः "शिवः कीलः शिवा क्रोष्टा भवेदामलकी शिवा"[शाश्वतकोशः, श्लो-१(८)]इति ॥१२८९॥ ७ घोरं वाश्यते **घोरवाशी**, तालव्यान्तमध्य[२१]ः। 'वाशृ[२२] शब्दे'(दि.आ.से.), दिवादिरात्मनेपदी, ग्रहादित्वाण्णिनिः, घोरवाशिनावित्यादि। ८ भूरयो माया अस्य **भूरिमायः**। ९ गां विकृतां वाचं मिनोति प्रक्षिपति **गोमायुः**। 'डुमिञ् प्रक्षेपणे'(स्वा.उ.से.), 'कृवापाजिमिस्वदि-'(उणा-१)इत्युण्, 'मीनातिमिनोति-' ६।१।५०॥ इत्यात्वम्, 'आतो युक् चिण्कृतोः'७।३।३३॥ इति युक्, भानुशब्दवत्। १० मृगेषु वन्यपशुषु धूर्तो मृगधूर्तः, ततः कनि **मृगधूर्तकः**। मृगान् धूर्वतीति वा। 'धूर्वी हिंसायाम्[२३]'(भ्वा.प.से.), 'हसिमृग्रि-'(उणा-३६६)इति बाहुलकात् तन्, ततः स्वार्थे कन्। ११ 'हू' इति रवोऽस्य **हूरवः**। १२ बिभर्ति **भरुजः**। 'उटजादयः'(हैमोणा-१३४)इति साधुः। १३ क्रुशति **क्रोष्टा**। 'क्रुश आह्वाने[२४]'

---

१. '-खेऽथ' इतिर, '-ख्योऽथ' इति५॥ २. '-री-' इति३॥ ३. द्र. पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२१९, पृ.२८०॥, तत्र- "-न्तीति अभिनन्दः" इति दृश्यते॥ ४ 'भल्लू-' इति३.५॥ ५. 'ति-' इत४॥ ६ '-दिर्वा' इति१॥ ७ 'शृङ्ग-' इति४.५॥ ८ 'जम्बुके' इति विश्वप्रकाशकोशे, पृ.१५७॥ ९. 'रास-' इति१, 'रस-' इति२॥ १०. '-नोऽपि' इति५॥ ११. 'शृङ्ग-' इति५॥ १२. द्र. पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२२०, पृ.२८२॥, रामाश्रमी२।५।५॥, पृ.२४१॥, तत्र-'शम्बल-' इत्यस्य स्थाने '-शम्बर-' इति दृश्यते॥ १३. डित्वाट्टिलोपप्रङ्गाद् बुकोऽप्रसङ्गाच्चेदं विचारणीयम्॥ १४ 'जम्बु-' १.२.४॥ १५. १.३.४.५प्रतिषु नास्ति॥ १६. '-दिर्वा' इति१॥ १७. 'अण रण-' इत्यादिदण्डकोऽयं धातुः॥ १८. ३.४.५प्रतिषु नास्ति॥ १९. ४प्रतौ नास्ति॥ २०. 'शृ-' इति३॥ २१. '-न्तः' इतिर॥ २२. '-सृ' इति३॥ २३. 'उर्वी-' इत्यादिदण्डकोऽयं धातुः॥ २४ 'आह्वाने रोदने च' इति क्षीरतरङ्गिण्यादयः॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(भ्वा.प.से.) 'सितनिगमि-'(उणा-६७)इति तुन्[१], [ष्टुत्वम्], 'तृज्वत् क्रोष्टुः'७।१।९५॥ इति तृजन्तवद् रूपातिदेशः। स्त्रियां क्रोष्ट्रीति । सामान्येन त्रयोदश शृगालस्य ॥

**शिवा भेदेऽल्पके किखिः[1] ॥१२९०॥**

१ अल्पके शिवाभेदे, लघीयस्यां सृगालजाता[२]वित्यर्थः, कौति **किखिः** । 'कु शब्दे'(अ.प.अ.), अदादिः, 'कोर्डिखिः'(हैमोणा-६२६), स्त्रीलिङ्गोऽयम् । एकं लघुशृगालस्य[३] ॥१२९०॥

**पृथौ गुण्डिव[1]लोपाकौ[2]**

१ महति शिवाभेदे, गृणाति **गुण्डिवः** । 'गृ(गॄ) शब्दे'(क्र्या.प.से.), 'प्रह्वाह्वा-'(हैमोणा-५१४)इति वे[४] निपात्यते । २ लुम्पति **लोपाकः** । 'लुम्प लोपे[५]'( ), निपातनात् साधुः । लूंकडीनाम्नी[६] द्वे ॥

**कोकस्[1]त्वीहामृगो[2] वृकः[3] ।**
**अरण्यश्वा[4]**

१ कोकते मेषादीनाऽऽदत्ते **कोकः** । 'कुक वृक आदाने'(भ्वा.आ.से.), पचाद्यच् । २ ईहां चेष्टां मृगयते[७] **ईहामृगः**। 'मृग अन्वेषणे'(चु.आ.से.), चुरादिः, 'कर्मण्यण्' ३।२।१॥, यद्वा मृगानीहते । 'कर्मण्यण्'३।२।१॥ राजदन्तादित्वात् परनिपातः, 'अन्येषामपि-'६।३।१३७॥इति दीर्घत्वम्। ''मृगस्येवेहाऽस्येति, पृषोदरादित्वादीहामृगः'' [अम.क्षीर.२।५।७॥]इति तु स्वामी[८] । ३ वर्कते[९] गृह्णाति **वृकः** । 'वृक आदाने[१०]'(भ्वा.आ.से.), 'इगुपध-'३।१।१३५॥ इति कः । वृणाति गृह्णातीति वा । 'सुदृभूषिसुषिभ्यः कनि (सृवृभूशुषिमुषिभ्यः कक्)'(उणा-३२१) वृकः इत्युणादौ । ४ अरण्यस्य श्वा **अरण्यश्वा**। अरण्यश्वानावित्यादि । चत्वारि वृकस्य[११] ॥

**मर्कटस्[1]तु कपिः[2] कीशः[3] प्लवङ्गमः[4] ॥१२९१॥**
**प्लवङ्गः[5] प्लवगः[6] शाखामृगो[7] हरिर्[8]बलीमुखः[9] ।**
**वनौका[10] वानरः[11]**

१ मर्कति मर्कः । मर्कैः सौत्राद् गत्यर्थाच्चुरादित्वाद्[१२] विकल्पितणिचः, 'शकादिभ्योऽटन्'(उणा-५२१) इत्यटन्[**मर्कटः**]। ''म्रियत इति, 'मृङ् प्राणत्यागे' (तु.आ.अ.), 'जटमर्कटौ'(कातन्त्रोणा-३।१९०॥) इत्यटन्, ककारश्चान्तादेशः[१३], गुणः, मर्कटः''[[१४]]इत्यन्ये। २ कम्पते वृक्षाद् वृक्षान्तरं चलति **कपिः** । 'कपि चलने' (भ्वा.आ.से.), 'अहिकम्प्योर्नलोपश्च[१५]' (चान्द्रोणा-१।५५)इतीन् । ३ केति जानाति, बाहुल्यात् कीधातोः (किधातोः) शः **कीशः** । ''को वातस्तस्याऽपत्यं किर्हनुमान्[१६], स एवेशोऽस्य''[[१४]] इति तु सुभूतिः। ४ प्लवेन[१७] गच्छति **प्लवङ्गमः**। 'गमश्च' ३।२।४७॥ इति खच्, खित्त्वाद् मुम् ॥१२९१॥ ५ प्लवेन गच्छति **प्लवङ्गः** । गमः खच्, 'गमे खच् डिच्च[१८]' (वा-३।२।३८॥)इति[१९] खच्, डित्त्वाट्टिलोपः । ६ 'अन्येष्वपि-'(वा-३।२।४८॥)इति डे **प्लवगः** । ७ शाखासञ्चारी मृगः पशुः **शाखामृगः**। वृत्तौ गतार्थत्वात् सञ्चारिशब्दस्याऽप्रयोगः । ८ हरति पत्रादिकमिति[२०] **हरिः**। 'अच इः'(उणा-५७८)। ९ वली श्लथं चर्म, तद्योगाद् मुखमपि[२१] वली । वलं (वली) मुखमस्य **वलीमुखः** । १० वनमोको गृहमस्य **वनौकाः**, सकारान्तः । वने ओकोऽस्येति वा । ११ वने रमते वनरः, तस्याऽयं **वानरः** । वा इवाऽर्थे, नर इव वानर इति वा । ''वानं वनभवं[२२] फलं[२३] लाति, रलयोरेकत्वस्मृतेर्वानरः''[[१४]] इत्यन्ये । एकादश सामन्यतो वानरस्य ॥

अथ तद्विशेषानाह-

**अथाऽसौ गोलाङ्गूलोऽसितानन[1]ः ॥१२९२॥**

१ असौ वानरः, असिताननः कृष्णास्यः, गोरिव लम्बं लाङ्गूलमस्य **गोलाङ्गूलः** । गां लङ्गते[२४] उल्लङ्गते वा, पृषोदरादिः । एकं कृष्णमुखवानरस्य ॥१२९२॥

---

१. 'वुन्' इति४, 'वुञ्' इति५॥ २. 'शृ-' इति१.३॥ ३. '-सृ-' इति२॥ ४ 'ह्वे' इति२.४.५॥ ५. 'लुप लोपने' इति१॥ ६. 'लू-' इति१, 'लु-' ति२.३॥ ७ '-ति' इति१.२.४॥ ८ अम.क्षीरस्वामिटीकायाम्-''ईहा मृगस्येवास्य ईहामृगः, ईहां मृग्यते वा ।'' इति दृश्यते, पृ.१२६॥, द्र. पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२२२, पृ.२८५॥ ९ 'वृकते' इति३॥ १०. 'कुक वृक आदाने' इति क्षीरतरङ्गिण्यादयः॥ ११. ''नाहर इति भाषा'' इति २प्रतेष्टिप्पणी ॥ १२. क्षीरतरङ्गिण्यादौ मर्कधातोश्चुरादित्वं न दृश्यते ॥ १३. 'का-' इति५॥ १४ द्र. पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२१८, पृ.२७९॥ १५. 'कुडिकम्प्योर्नलोपश्च'(उणा-५८३)इत्युणादिगणसूत्रम् ॥ १६. '-नू-' इति१.२.३॥ १७ '-वने' इति५॥ १८. 'खच्च डिद्वा वाच्यः' इति वार्तिकस्वरूपम् ॥ १९. ४.५प्रत्योर्नास्ति ॥ २०. 'इति' इति १.२.३प्रतिषु नास्ति ॥ २१. '-पीति' इति४.५॥ २२. '-भव-' इति४॥ २३. '-भवफलः' इति५॥ २४ '-ति' इति५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मृगः कुरङ्गः सारङ्गो वातायुहरिणावपि ।**

१ मृग्यतेऽन्विष्यते **मृगः** । 'मृग अन्वेषणे'(चु. आ.से.), घञर्थे कः । २ कुं भुवं रञ्जयति **कुरङ्गः** । रञ्जेर्णिजन्तात् 'कर्मण्यण्'३।२।१॥, न्यङ्क्वादित्वात् कुत्वम् । कौ पृथिव्यां रङ्गतीति वा । 'अगि रगि लगि गत्यर्थाः'[२] (भ्वा.प.से.), पचाद्यच् । कौ भुवि रङ्गो विशिष्टा गतिरस्येति वा । कुरति मार्यमाण इति वा । 'कुर शब्दे'(तु. प.से.), 'विडिविलि-'(हैमोणा-१०१)इति किदङ्गः । ३ सारं गच्छतीति **सारङ्गः** । 'अन्येभ्योऽपि(अन्येष्वपि)-' ३।२।१०१॥ इति डः । सारमङ्गमस्येति वा[३], शकन्ध्वादिः। सरति गच्छति वा । 'सृ गतौ'(भ्वा.प.अ.), 'सृवृञो-र्वृद्धिश्च(सृवृञोर्वृद्धिश्च)'(उणा-१०१)इत्यङ्गः । ४ वातमयते[४] **वातायुः**। 'अय गतौ'(भ्वा.आ.से.), बाहुलकात् 'कृवापा-'(उणा-१)इत्युण् । ५ हरति मनो **हरिणः**। 'श्यास्त्याहृञ्विभ्य इनन् (इनच्)'(उणा-२०४)। गीतेन हरत्यमुमिति वा। पञ्च सामान्येन हरिणस्य । शेषश्चात्र-''मृगे त्वजिनयोनिः स्यात्''[शेषनाममाला ४।१८६॥]इति ॥

**मृगभेदा रुरु-न्यङ्कु-रङ्कु-गोकर्ण-शम्बराः ॥१२९३॥**
**चमूरु-चीन-चमराः समूरै-णर्श्य-रौहिषाः ।**
**कदली कन्दली कृष्णसारः पृषत-रोहितौ ॥१२९४॥**

१ मृगाणां भेदाः, सप्तदश जातय इति यावत्, रौति **रुरुः**। 'जत्र्वादयश्च'(उणा-५४२)इति रुः । रुरुर्महाकृष्णसारः १। २ नियतमञ्चति **न्यङ्कुः**। 'नावञ्चेः'(उणा-१७)इति कुः, न्यङ्क्वादित्वात् कुत्वम्, त्रिकेण विपुलोन्नतः, शम्बराकृतिश्चाऽयम् २। ३ रमतेर्बाहुलकात् कुः **रङ्कुः**[६]। रङ्कति गच्छति[७] [वा] । 'रकि गतौ'[८]( ), 'कृवापाजिमि-'(उणा-१)इत्युण् ३। ४ गौरिव[९] कर्णोऽस्य[१०] **गोकर्णः** ४। ५ शं[११] वृणोति **शम्बरः**[१२] । पचाद्यच्, अल्पो हरिणः ५। ॥१२९३॥ ६ चमति खादति[१३] तृणादिकमिति **चमूरुः** । 'चमु अदने'(भ्वा.प.से.), खर्जूरादित्वादूरच्, महाग्रीवो धवलकेसरवालधिरयम् । ''चित्रलमृगः''[ ]इत्यपरे। यदाह-''चमूरुश्चित्रले मृगे''[ ]इत्यपरे । ''चकासितं(-सतं) चारुचमूरुचर्मणा''[शिशुपालवधम्, सर्गः-१, श्लो-८]इति माघः। ''चमूरवश्चित्रलमृगास्तेषां[१४] चर्मणा''[ ]इति । तट्टीका[१५] ६। ७ चिनोति सौन्दर्यं **चीनः** । 'चिञ् चयने'(स्वा. उ.अ.), चिञो बाहुलकान्नग्दीर्घौ । श्यामवक्षा अयम् ७। ८ चमति **चमरः** गोविशेषः ८। ९ समीहते सम्यक् शोभनावूरू अस्येति **समूरः** । पृषोदरादिः ९। १० एति **एणः**। 'इणुर्विश-'(हैमोणा-१८२)इति णक्, १०। ११ ऋश्यते **ऋश्यः** । 'ऋशिजनि-'(हैमोणा-३६१)इति किद्[१६] यः, सप्तमस्वरादिः हरिणप्रायो मृदुशृङ्गः, स्त्रियां गौरादित्वाद् ऋश्यी ११। १२ रौहिषं तृणभेदमत्तीति **रौहिषः** । शैषिकोऽण् । 'रुह बीजजन्मनि प्रादुर्भावे च[१७](भ्वा.प.अ.), 'रुहेर्वृद्धिश्च'(उणा-४७)इति टिषच्, रौहिषीति स्त्रियाम्, रौहिट् हलन्तोऽपि। ''स एव रौहिषां मध्ये चरति''[उत्तररामचरितम्, ]इति भवभूतिः[१८]। ''रुणद्धि कश्चित् क्लमसुप्तरौहिषि''[ ]इत्यभिनन्दः[१८] । रौहिषः रोहित[१९]श्वेतराजीयुक्तः १२। १३ कं जलं दलति **कदली** । गौरादिः । '''कन्देर्नलोपश्च'( )इत्यरप्रत्ययः, गौरादित्वाद् ङीष्[२०], रलयोरैक्यात् कदली''[२१]]इत्युणादौ । स्त्रीलिङ्गोऽयम्[२२]। यदाह-

''कदली तु बिले शेते मृदुभक्ष्यार्थं[२३] कर्बुरैः ।
नीलाग्रै रोमभिर्युक्ता सा विंशत्यङ्गुलायता ॥१॥''[[२४]]इति।

---

१. 'भ-' इति४॥ २. 'उख उखि वख वखि मख मखि नख णख णखि रख रखि लख लखि इख ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः' इति स्वामी, 'उख नख वख मख रख लख वखि लखि इखि ईखि वल्ग रगि वगि लगि अगि मगि तगि त्वगि त्रगि श्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः' इति मैत्रेयः, 'उख उखि वख वखि मख मखि णख णखि रख रखि लख लखि इख इखि ईखि वल्गि रगि लगि अगि वगि मग तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः' इति सायणः॥ ३. ३प्रतौ नास्ति ॥ ४. '-ति' इति१॥ ५. '-शारः' इति१.२.३॥ ६. ३प्रतौ नास्ति ॥ ७. इतोऽग्रे ३प्रतौ 'रङ्कुः' इति दृश्यते ॥ ८. क्षीरतरङ्गिण्यादावयं धातुपाठो न दृश्यते ॥ ९. 'गौ-' इति४.५॥ १०. '-र्णावस्य' इति३॥ ११. 'सं' इति१.३॥ १२. 'स-' इति१॥ १३. '-यति' इति३॥ १४. 'चमूरुश्च-' इति३॥ १५. मल्लिनाथसूरिकृतसर्वंकषाख्याटीकायाम्-''चारुणा मनोहरेण चमूरुचर्मणा मृगत्वचा'' इति दृश्यते, पृ५॥ १६. '-ति' इति४.५॥ १७. १.२प्रत्योर्न दृश्यते॥, सायणमतेऽयं धातुपाठः, '-बीजजन्मनि' इति स्वामी, '-जन्मनि प्रादुर्भावे' इति मैत्रेयः॥ १८. द्र. पदचन्द्रिका, सिंहादिवर्गः, श्लो-२२५, पृ.२८९॥ १९. 'रौहितः' इति४, 'रौ-' इति५॥ २०. '-प्' इति३॥ २१. द्र. पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो २२४, पृ.२८७॥ २२. '-ऽयम्' ३प्रतौ नास्ति ॥ २३. '-क्षार्थ' इति३॥ २४. द्र. स्वोपज्ञटीका४।१२९४॥, पृ.२८९॥, तत्र-'-क्ष्याथ' इत्यस्य स्थाने '-क्षैव' इति दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निरनुस्वाराऽपि कदली १३। १४ कन्दे सस्यमूले लीयते **कन्दली**, सानुस्वारादिः, त्रिलिङ्गोऽयम् । ''श्यामवर्णा हस्तायामा महोदरी''[1]इति तल्लक्षणम्[2] । स्वामी त्वेताविन्नन्तावाह । कदेः सौत्रात्, 'कदि क्लदि आह्वाने[3]'(भ्वा.प.से.)इत्यतो वा, 'कदि क्रदि[4] क्लदि वैक्लव्ये[5]'(भ्वा.आ.से.) अतो वा, वृषादित्वात् कलच्, गौरादित्वाद् ङीष् । ''कदलीकन्दली स्त्रियामेव, इन्नन्ताविति तु न युक्तम्'' [पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२२४]इति तु मिश्राः १४। १५ कृष्णेन वर्णेन सारः श्रेष्ठः **कृष्णसारः**, दन्त्यमध्यः । कृष्णेन वर्णेन शारः शबलः कृष्णशारः[6] । ''शारः शबलवातयोः''[7]इति तालव्यादौ रभसः । कृष्णः शारो[8] वर्णोऽस्येति वा कृष्णशारः[9], तालव्यमध्यः । शृणातेः '-वायुवर्णनिवृतेषु'(वा-३।३।२१।।)इति घञि शारः[10] १५। १६ पृषता बिन्दवः सन्त्यस्य **पृषतः** । अर्शआदित्वादच्[11] । 'पृषु सेचने[12]'(भ्वा.प.से.), 'पृषिरञ्जिभ्यां कित्'(उणा-३९१)इत्यतचि कित्त्वे च पृषत इति वा । पृषत् हलन्तोऽपि । ''पृषो(मृगो) बिन्दुः पृषंश्चैव पृषतश्च प्रकीर्तितः''[13]इति व्याडिः १६। १७ **रोहितः** रोहितवर्णः १७। एते सप्तदश मृगभेदाः ।।१२९४।।

### दक्षिणेर्मा[1] तु स मृगो यो व्याधैर्दक्षिणे क्षतः ।

१ दक्षिणमङ्गमीर्मं कृतव्रणमस्य **दक्षिणेर्मा** । दक्षिणेऽङ्गे[14] ईर्ममस्येति वा । 'दक्षिणेर्मा[15] लुब्धयोगे' ५।४।१२६।। इति साधुः । दक्षिणेर्माणावित्यादि ।

### वातप्रमीर्[1]वातमृगः

१ वातशब्दे उपपदे 'माङ् माने'(जु.आ.अ.)इत्यतो वातं प्रमिमीते, वाताभिमुखं धावति, वातवत् प्रयाति प्रक्षिपति, वातेन प्रमीयते प्रक्षिप्यते वा । निपातनादीकारः । वातमृगसाहचर्याद् ''वातप्रमीर्वातमृगः[16]''[17]इति[18] पुंस्काण्डे[19] रत्नमालोक्तेश्च **वातप्रमीः** पुंलिङ्गः । वातप्रम्यौ, वातप्रम्यः, वातप्रमीम्, वातप्रम्यौ, वातप्रमीन्, ङौ तु सवर्णे दीर्घे वातप्रमी, शेषं ग्रामणीवद् रूपम् । ''योषिति वातप्रमी समीरमृगः''[18] इति[19] वोपालितात् स्त्रीत्वमप्यस्य, अत एव ङ्यन्तत्वात् ''सुपो लुक्, 'कृदिकारात्-'(गणसू-४।१।४५।।)इति ङीषि तु वातप्रमीयमिति भवति''[18] इति मैत्रेयः । तदा शसि वातप्रमीरिति, ङौ तु नदीत्वादामि वातप्रम्यामिति । ''स्त्रियां तु लक्ष्मीशब्दवत्''[18]इति पुरुषोत्तमदेवेनोणादिवृत्तावुदाहृतम् । वातवद् वेगी मृगो वातमृग इति मध्यपदलोपी समासः । ''वातप्रमी स्त्रीपुंसयोः[20]''[ ]इति सुभूतिः । एकं वाताभिमुखगामिमृगस्य ।।

### शशस्तु[1] मृदुलोमकः[2] ।।१२९५।।

### शूलिको[3] लोमकर्णः[4]

१ शशति[21] प्लवते **शशः** । 'शश प्लुतगतौ[22]'(भ्वा.प.से.), अच् । २ मृदूनि लोमान्यस्य मृदुलोमा, स्वार्थे कनि **मृदुलोमकः** ।।१२९५।। ३ शूलमस्त्यस्य **शूलिकः** । 'अत इनिठनौ'५।२।११५।। इति ठन् । ४ लोमकर्णोऽस्य **लोमकर्णः** । चत्वारि शशकस्य ।।

### अथ शल्ये[1] शललशल्यकौ[2][3] ।

### श्वाविच्च[4]

१ शलत्याशु चलतीति **शल्यः**, अन्तस्थाद्योपधः । 'शल शल्ल आशुगतौ[23]'(भ्वा.प.से.), वृषादित्वाद् यप्रत्ययः, तालव्यादिः । ''श्रद्धाशीलितशार्दूलश्येनशक्रशल्यानि''[18]इत्यूष्मभेदात्, तत्र । २ वृषादित्वात् कलचि **शललः** । 'शल चलनसंवरणयोः[24]'(भ्वा.आ.से.), '''कलतृ[25](स्तृ)पश्च'(उणा-१०४)इत्यत्र प्रत्ययस्य पूर्वनिर्देशस्य धात्वन्तरादप्ययं भवतीति सूचनार्थत्वात् कुण्डलादिवत् कलप्रत्ययः''[मा.धातुवृत्तिः, भ्वादिः, धातुसं-३२१]

---

१. द्र. स्वोपज्ञटीका४।१२९४।।, पृ.२८९।। २. २प्रतौ नास्ति ।। ३. 'कदि क्रदि क्लदि आह्वाने रोदने च' इति क्षीरतरङ्गिण्यादयः ।। ४. ४प्रतौ नास्ति ।। ५. स्वामिसायणसम्मतोऽयं पाठः, 'कदि क्रदि क्रद क्लद वैक्लव्ये' इति मैत्रेयः ।। ६. '-सारः' इति१.५।। ७. द्र. पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२२५, पृ.२८८।।, रामाश्रमी२।५।१०।।, पृ.२४३।। ८. 'सा-' इति३.५।। ९. '-सारः' इति१.२.३.५।। १०. 'सा-' इति१.३।। ११. '-चि' इति३।। १२. 'पृषु वृषु मृषु सेचने' इति क्षीरतरङ्गिण्यादयः ।। १३. द्र. पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२२५, पृ.२८९।।, रामाश्रमी२।५।१०।।, पृ.२४४।। १४. '-णाङ्गे' इति३।। १५. '-र्म' इति१.३.४.५।। १६. '-तः' इति४.५।। १७. द्र. टीकासर्वस्वम्, भा-२, २।५।७।।, पृ.२२१।। १८. द्र. पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२२२, पृ.२८४-२८५।। १९. रामाश्रमी२।५।७।।, पृ.२४३।। २०. '-पुंसोः' इति३।। २१. '-ते' इति१।। २२. 'प्लव-' इति१।। २३. '-श्वल्ल आशुगमने' इति स्वामी, 'श्वल श्वल्ल आशुगमने' इति मैत्रेयसायणौ ।। २४. '-सरणयोः' इति१।। २५. '-त्र-' इति१.३.४.५।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति माधवः । ३ शल्यानि किरति विक्षिपति[१] **शल्यकः**, पुंस्त्रीलिङ्गः[२], अन्तस्थाद्यमध्यः[३] । 'कॄ विक्षेपे'(तु.प.से.), 'अन्येभ्योऽपि(अन्येष्वपि) दृश्यते'३।२।१०१॥ इति डः । ४ श्वानं विध्यति[४] **श्वावित्** । 'व्यध ताडने'(भ्वा.प.अ.), सम्पादित्वात् क्विप्, 'नहिवृति[वृषि]व्यधिरुचि-'६।३।११६॥ इति दीर्घः । श्वाविधौ, श्वाविध इत्यादि । सेहला-[५]नामानि चत्वारि ॥

## तच्छलाकायां शललं शलमित्यपि ॥१२९६॥

१ तस्य श्वाविधो लोमशलाकायाम्, शलति **शललम्**, त्रिलिङ्गः । 'शल गतौ'(भ्वा.प.से.), वृषादित्वात् कलच्, स्त्रियां गौरादित्वाद् ङीषि[६] शलली । मिश्रास्तु-''शललस्तु नृशण्ढयोः[७]''[ ]इत्यमरमालोक्तेरुभयलिङ्गता-[८]माहुः । ([९]२ शलति **शलम्** । 'शल गतौ'(भ्वा.प.से.), पचाद्यच्।) सीसोलीया[१०][११]नाम्नी द्वे ॥१२९६॥

## गोधा निहाका

१ गुध्यति परिवेष्टयति **गोधा** । 'गुध परिवेष्टने'(दि.प.से.), पचाद्यच्, टाप् । ''भिदादित्वादङि गुणे गोधा[१२]''[मा.धातुवृत्तिः, दिवादिः, धातुसं-१३]इति माधवः । २ नितरां जहाति **निहाका** । 'ओहाक् त्यागे'(जु.प.अ.), 'इण्भीकापा-'(उणा-३२३)इत्यादिना बाहुलकात् कः । एतौ पुंध्वजेऽपि । स्त्रीलिङ्गावेव । गोहनाम्नी द्वे ॥

## गौधेरगौधारौ दुष्टतत्सुते ।

१ गोधाया[१३] दुष्टमपत्यं **गौधेरः** । 'गोधाया ढ्रक्' ४।१।१२९॥, 'किति च'७।२।११८॥ इति वृद्धिः । २ गोधाया दुष्टमपत्यं **गौधारः** । 'आरगुदीचाम्'४।१।१३०॥ इत्यारक्, 'किति च'७।२।११८॥ इति वृद्धिः । तस्या गोधायाः सुतस्तत्सुतः, दुष्टश्चासौ तत्सुतश्च दुष्टतत्सुतः, तत्र । द्वे गोधाया दुष्टापत्यस्य ॥

## गौधेयोऽन्यत्र

१ दुष्टादन्यत्र गोधाया अपत्यं **गौधेयः** । शुभ्रादित्वाद् ढक्, 'आयनेयी-[१४]'७।१।२॥ इति ढस्य एयादेशः । ([१५]दुष्टादन्यस्मिन् गोधासुते शोभने 'गौधेयः' इति नामैकम्)॥

## मुसली गोधिकागोलिके गृहात् ॥१२९७॥
## माणिक्या भित्तिका पल्ली कुड्यमत्स्यो गृहोलिका ।

१ मुस्यति संशयं खण्डयति शुभाशुभसूचकत्वाद् **मुसली** । 'मुस खण्डने'(दि.प.से.), वृषादित्वात् कलच्, 'जातेर[स्त्रीविषयाद]योपधात्'४।१।६३॥ इति ङीष् । ''मुषली मूर्धन्यमध्याऽपि[१६]''[ ]इति वर्णदेशना[१७] । **२-३** गृहाद् गृहशब्दाद् गोधिकागोलिके योज्यते[१८], तेन गृहस्य गोधेव **गृहगोधिका** । इवार्थे कन्, 'प्रत्ययस्थात्-'७।२।४४॥इतीत्वम् । गृहं गुडति **गृहगोलिका** । गुडधातोः 'ण्वुल्-तृचौ'३।१।१३३॥ इति ण्वुल् ॥१२९७॥ ४ माणिक्यमस्त्यस्या **माणिक्या** । अर्शआदित्वादच् । शिरोमणियुक्तत्वात् । ५ भित्तौ कायति[१९] शब्दायते **भित्तिका** । 'कै शब्दे'(भ्वा.प.अ.), 'अन्येभ्योऽपि(अन्येष्वपि)-'३।२।१०१॥ इति डः । ६ पल्लति[२०] गच्छति **पल्ली** । 'पल्ल गतौ'( ), अच्, गौरादिः । ७ कुड्ये मत्स्य इव **कुड्यमत्स्यः** । ८ गृह्णाति क्षुद्रजन्तून् गृहोली । 'गृह्यादिभ्यः (ग्रह्यादिभ्यः) कित्'(हैमोणा-४९४) इत्योलः, स्वार्थे कनि **गृहोलिका** । घिरोली[२१]नामान्यष्टौ ॥

## स्यादञ्जनाधिका हालिन्यञ्जनिका हलाहलः ॥१२९८॥

१ अञ्जनेनाऽधिका **अञ्जनाधिका** । २ हलत्यवश्यं **हालिनी** । 'हल विलेखने'(भ्वा.प.से.), आवश्यके णिनिः । ३ अञ्जयत्यञ्जनी । 'अञ्जू व्यक्त्यादौ'(रु.प.वे.), नन्द्यादित्वाल्ल्युः, स्वार्थे कनि **अञ्जनिका** । ४ हलति न हलति च[२२] **हलाहलः** । आंजणीनामानि चत्वारि ॥१२९८॥

---

१. '-प्यति' इति३॥ २ इतोऽग्रे १.२.४प्रतिषु 'कॄ विक्षेपे' इति दृश्यते ॥ ३ ५प्रतौ नास्ति ॥ ४ '-ते' इति३॥ ५ 'साठना-' इति२॥ ६ '-षु' इति३॥ ७ द्र.पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२२२, पृ.२८४॥ ८ द्र. रामाश्रमी२।५।७॥, पृ.२४२॥ ९ कोष्ठान्तर्गतपाठः १.३.४.५प्रतिषु नास्ति ॥ १०. 'सि-' इति४॥ ११. '-लीया-' इति१.३॥ १२. ''गोधा-भिदादिपाठाद् अङि गुणः'' इति मा.धातुवृत्तौ, पृ.४०५॥ १३. '-य' इति१॥ १४ 'आयि-' इति२.४.५॥ १५. कोष्ठान्तर्गतपाठः १.२.४.५प्रतिषु नास्ति॥ १६. '-ध्योऽपि' इति३॥ १७ द्र. टीकासर्वस्वम्, भा-२, २।५।१२॥, पृ.२२६॥, तत्र-''वर्णदेशनायां 'मूर्धन्यमध्योऽपि मुषलो दृश्यत' इत्युक्तम्'' इति दृश्यते॥, पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२२७, पृ.२९२॥, तत्र-''मूषली मूर्धन्यमध्या च इति वर्णदेशना'' इति दृश्यते ॥ १८. '-ज्यते' इति१॥ १९. '-ते' इति१॥ २०. 'पलति' इति३॥ २१. इतोऽग्रे ४प्रतौ, ५प्रतेष्टिप्पण्यां च 'गिलोई' इति दृश्यते ॥ २२. ४.५प्रत्योर्नास्ति॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**स्थूलाञ्जनाधिकायां तु ब्राह्मणी रक्तपुच्छिका ।**

१ स्थूला या अञ्जनाधिका स्थूलाञ्जनाधिका[१], तत्र । बृंहति **ब्राह्मणी,** विप्रनामसु(श्लो-८११) । २ रक्तं पुच्छमस्या रक्तपुच्छी । 'पुच्छाच्च'(वा-४।१।५५॥)इति ङीष्, स्वार्थे कनि **रक्तपुच्छिका** । द्वे ब्राह्मण्याः । ([२] 'बांभणी गिलोई' इति भाषा) ॥

**कृकलासस्तु सरटः प्रतिसूर्यः शयानकः ॥१२९९॥**

१ कृकं शिरोग्रीवां[३] कण्ठं वा लासयति कम्पयति **कृकलासः**। [४]लसेर्धातोः 'कर्मण्यण्'३।२।१॥, प्रथमद्वितीयस्वरमध्यः । ''पञ्चमस्वरमध्योऽयम्''[ ]इति भट्टः[५] । २ सरत्यूर्ध्वं **सरटः**। 'सृ गतौ'(भ्वा.प.अ.), 'शकादिभ्योऽटन्'(उणा-५२१), दन्त्यादिरयम्, ''सवितासर्पसणसिक्थकसेनासरटाश्च [६]सैरिभः सरितम्''[[७] ]इति सभेदात् । ३ सूर्यस्य प्रतीपः **प्रतिसूर्यः**। ४ शेत आदित्याभिमुखं **शयानकः** । 'आनकः शीङ्भियः (शीङ्भियोः)' (उणा-३६२)इत्यानकः । स्वमते नामद्वयम् । प्रतिसूर्यं शेते 'प्रतिसूर्यशयानकः' इत्यखण्डमष्टाक्षरात्मकमित्यन्ये । [८]यदुपदेशमालाकर्णिका-'तं प्रत्यथोपदुद्राव प्रतिसूर्यशयानकः'[ ] इति । चत्वारि [९]कृकलासस्य ॥१२९९॥

**मूषिको मूषको वज्रदशनः खनकोन्दुरौ ।**
**उन्दुरुर्वृष आखुश्च सूच्यास्यो वृषलोचने[१०] ॥१३००॥**

१ मुष्णाति गृहं **मूषिकः,** पुंक्ली । 'मुष स्तेये' (क्र्या.प.से.), 'व्रश्चिकृषोः(वृश्चिकृष्योः) किकन्'(उणा-१९८)इत्यधिकारे 'मुष्णातेर्दीर्घश्च[११]'(उणा-२००)इति किकन्, दीर्घश्च । २ 'मूष स्तेये'(भ्वा.प.से.), दीर्घोपधः, [१२]मूषति **मूषकः** । ण्वुल् । ''भद्रमूषिक[१३]मासन्दी कुन्दुरुन्दुरुरुन्दरः[१४] । मूषको वज्रदशनः क्रमः काण्डो विशेषः(बिलेशयः) ॥१॥'' [[१५] ]इति वाचस्पतिः । मूषीति च । ''हन्ति कीटविषं सर्वं तथा मूषीविषं च यत्''[[१६] ]इति शालिहोत्रे । ३ वज्रवद् दशना अस्य **वज्रदशनः** । ४ खनति **खनकः** । 'क्रमादिभ्यो वुन्[१७]'४।२।६१॥, 'युवोरनाकौ'७।१।७॥ । ५ उनत्ति **उन्दुरः[१८],** पञ्चमस्वरमध्यः। 'उन्दी क्लेदने'(रु.प.से.), बाहुलकादुरः । ६ अत एव धातोर्बाहुलकादुरुः **उन्दुरुः[१९],** पञ्चमस्वरत्रिकवान् । 'उन्दर' इति प्रथमस्वरद्वयोऽपि । ७ वर्षति **वृषः** । 'वृषु सेचने'(भ्वा.प.से.), 'इगुपध-'३।१।१३५॥ इति कः । ८ आखनति भूमिम् **आखुः,** पुंस्त्रीलिङ्गः । 'आङि खनिशृभ्यां डित्[२०]-'(उणा-३३)इति उप्रत्यये (कुप्रत्यये) डित्त्वाट्टिलोपः । ९ शूच्याका[२१]रमुखमस्य **शूच्यास्यः** । १० वृषस्येव लोचनेऽस्य **वृषलोचनः,** [२२]तत्र । दश मूषकस्य ॥१३००॥

**छुछुन्दरी गन्धमूष्याम्**

१ 'छुछु' इति शब्देनोपलक्षिता उन्दरी **छुछुन्दरी,** द्विपञ्चमस्वरः[२३] । पृषोदरादित्वात् । २ गन्धप्रधाना मूषी **गन्धमूषी,** तस्याम्[२४] । द्वे नाम्नी ॥

**गिरिका बालमूषिका ।**

१ गिरति तन्दुलादिकं **गिरिका** । 'गृ निगरणे[२५]'(तु.प.से.), 'कृगृपृभ्य[२६] इः'( )इति इः, स च कित्[२७], 'ऋत इद्धातोः'७।१।१००॥, ततः कनि, टाप् । २ मूषति मूषिका, तृतीयस्वरमध्यः । 'मूष स्तेये'(भ्वा.प.से.), संज्ञायां [२८]क्वुन्, अजादिपाठाद् जातिलक्षणं ङीषं बाधित्वा टाप् । क्षुद्रत्वाद् बालेव बाला । ततः कर्मधारये **बालमूषिका** । ''खेटाखुर्बालमूषिका''[ ]इति हुग्गः । लघून्दरीनाम्नी द्वे ॥

**विडाल ओतुर्मार्जारो ह्रीकुश्च वृषदंशकः ॥१३०१॥**

---

१. ३प्रतौ नास्ति ॥ २. कोष्ठान्तर्गतपाठः १.२.४.५प्रतिषु नास्ति ॥ ३. '-वं' इति३॥ ४ 'लस-' इति१.२॥ ५. द्र. पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२२७, पृ.२९२॥, तत्र-'' 'कृकिलास' इकारमध्य इति भट्टः'' इति दृश्यते ॥ ६. 'सौ-' इति४॥ ७ द्र. पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२२७, पृ.२९२॥, तत्र-'सवितासर्पसण-' इत्यस्य स्थाने 'सचि समीरण-' इति दृश्यते ॥ ८. 'यद्यु-' इति३॥ ९. 'काकिडा' इति४, 'काकिंडा' इति५ च टिप्पणी ॥ १०. '-नः' इति१.४.५॥ ११. 'मुषेर्दीर्घश्च' इत्युणादिगणसूत्रम् ॥ १२. 'मु-' इति१.२॥ १३. '-का-' इति५॥ १४. '-न्दुरः' इति१॥ १५. द्र. पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२२७, पृ.२९१॥, रामाश्रमी२।५।१२॥, पृ.२४५॥, तयोः-''भद्रमूषिकमासन्दी'' इत्यस्य स्थाने ''भद्रमूषिक आसन्दी'' इति दृश्यते ॥ १६. द्र. पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२२७, पृ.२९१॥ १७. '-ञ्' इति३॥ १८. '-न्दरः' इति१॥ १९. '-रः' इति३॥ २०. 'आङ्परयोः खनिशृभ्यां डिच्च'(उणा-३३)इत्युणादिगणसूत्रम् ॥ २१. '-रं' इति३॥ २२. १.२.४.५प्रतिषु नास्ति ॥ २३. '-रमध्यः' इति४॥ २४. '-स्याः' इति४.५॥ २५. 'कृ निक्षेपे' इति१.२, '-विक्षेपे' इति३॥ २६. 'कृगॄशॄपॄकुटिभिदिछिदिभ्यश्च'(उणा-५८२)इत्युणादिगणसूत्रम् ॥ २७ 'डित्' इति३॥ २८. 'कन्' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ विडालात आक्रुश्यते **विडालः** । 'विड भेदने'[1] ( ), 'विड शब्दे'(भ्वा.प.से.) वा, 'तिमिविडिभ्यां कित्' ( )इत्यालः । बिलं दारयति वा । विशन्नालाति आखूनिति वा, पृषोदरादित्वात्। बिलानि अलति पर्याप्नोति वा। विरुद्धं लाल्यते[2] वा । विड् आलमस्येति वाऽशुचित्वात् । २ अवति तृप्यत्याखुभिरिति **ओतुः**, पुंस्त्रीलिङ्गः । 'अव रक्षणादौ'(भ्वा.प.से.), 'सितनिगमिमसि-'(उणा-६९)इति तुन्, 'ज्वरत्वर-'[3]६।४।२०॥ इत्यूठ्, 'अदेङ् गुणः'१।१।२॥। ३ भुक्त्वा मार्ष्टि मुखमिति **मार्जारः** । 'मृजूष्[4] शुद्धौ'(अ.प.वे.), 'कञ्जिमृजिभ्यां चित्'(उणा-४१७)इत्यारन्, 'मृजेर्वृद्धिः'७।२।११४॥ । ४ जिह्रेतीव [5]आखुवधसङ्कोचेनेति **ह्रीकुः** । 'ह्री लज्जायाम्'(जु.प.अ.), 'ह्रियः कित्'(हैमोणा-७५०)इति कुः । ह्रीकू, ह्रीकव इत्यादि भानुवत् । ५ वृषानाखून् दशति **वृषदंशकः**। 'दंश दशने'(भ्वा.प.अ.), ण्वुल्। पचाद्यचि दंशः, ततः कन् वा । पञ्च विडालस्य ([6]'विलाव' इति भाषा) ॥१३०१॥

**जाहको[1] गात्रसङ्कोची[2] मण्डली[3]**

१ जहाति सर्पादिभयं **जाहकः** । 'ओहाक् त्यागे'(जु.प.अ.) 'कीचक-'(हैमोणा-३३)इत्यादिनाऽके[7] साधुः । २ गात्रं सङ्कोचयति **गात्रसङ्कोची** । ग्रहादित्वाण्णिनिः । ३ मण्डलाकृतिरस्त्यस्य **मण्डली** । 'अत इनिठनौ'५।२।११५॥ इतीनिः । सेहलानामानि त्रीणि ॥

**नकुलः[1] पुनः ।**
**पिङ्गलः[2] सर्पहा[3] बभ्रुः[4]**

१ नाऽस्य कुलमस्ति[8] **नकुलः** । 'नभ्राण्नपात्-'६।३।७५॥ इत्यादिना नञ्प्रकृत्या । २ ([9]पिङ्गलवर्णत्वात् **पिङ्गलः**) । ३ सर्पान् हन्तीति **सर्पहा** । 'इन्हन्पूषार्यम्णाम्-'६।४।१२॥ इति सौ दीर्घः । सर्पहणौ, सर्पहण इत्यादि। ४ बिभर्ति भरति तेजो **बभ्रुः**। 'कुभ्रश्च(कुर्भ्रश्च)' इति भृञः कुः, द्वित्वं च । चत्वारि नकुलस्य ॥

**सर्पो[1]ऽहिः[2] पवनाशनः[3] ॥१३०२॥**
**भोगी[4] भुजङ्ग[5]-भुजगावुरगो[6][7] द्विजिह्व[8]-**
**व्यालौ[9] भुजङ्गम[10]-सरीसृप[11]-दीर्घजिह्वाः[12] ।**
**काकोदरो[13] विषधरः[14] फणभृत्[15] पृदाकु[16]-**
**र्दृक्कर्ण[17]-कुण्डलि[18]-बिलेशय[19]-दन्दशूकाः[20] ॥१३०३॥**
**दर्वीकरः[21] कञ्चुकि[22]-चक्रि[23]-गूढ[24]-**
**पात्-पन्नगा[25] जिह्मग[26]-लेलिहानौ[27] ।**
**कुम्भीनसा[28]-ऽऽशीविष[29]-दीर्घपृष्ठाः[30]**

१ सर्पति **सर्पः** । 'सृप्लृ गतौ'(भ्वा.प.से.), पचाद्यच्। ''भूमिस्पृशा देहेन गमनं सर्पणं सर्पः, तद्योगादर्शआद्यपि सर्पः''[10]इति तु कलिङ्गः । २ आहन्ति प्राणिन इति **अहिः**। 'हन्(हन) हिंसागत्योः'(अ.प.अ.), 'आङि श्रिहनिभ्यां ह्रस्वश्च'(उणा-५७७)इतीन्, आङो ह्रस्वत्वं च। अही, अहय इत्यादि पुंस्त्रीलिङ्गोऽयम् । ३ पवनमश्नाति **पवनाशनः** । नन्द्यादित्वाल्ल्युः ॥१३०२॥ ४ भोगः सर्पदेहः फणः कुटिला गतिर्वाऽस्त्यस्य **भोगी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः । ५ भुजति भुजः । 'भुजो कौटिल्ये'(तु.प.अ.), 'इगुपध-'३।१।१३५॥ इति कः । भुजः कुटिलः सन् गच्छति, भुजन् कुटिलीभवन् वा गच्छतीति पृषोदरादित्वात् तलोपे **भुजङ्गः** । 'गमेः खच् डिद् वक्तव्यः'[11](वा-३।२।३८॥)इति खचि डित्त्वाट्टिलोपश्च । ६ एवं **भुजगः** । डप्रकरणे 'अन्यत्राऽपि दृश्यते'(वा-३।२।४८॥)इति डः । १० 'गमेश्च'[12]३।२।४७॥ इति खचि **भुजङ्गमः**। ७ उरसा गच्छति **उरगः**। 'उरसः सलोपश्च(उरसो लोपश्च)'(वा-३।२।४८॥)इति डः । उरङ्गमोऽपीति केचित्। ८ द्वे जिह्वेऽस्य **द्विजिह्वः**। ९ विविधमालमनर्थोऽस्मादिति **व्यालः** । व्यडनं हन्तुमुद्यमोऽस्याऽस्तीति वा । विशेषेण आलातीति वा । 'आतश्च-'३।१।१३६॥ इति कः । ([13]११ कुटिलं सर्पतीति सृपेर्यङन्तादचि यङो लुकि **सरीसृपः**, द्विदन्त्यः । ''संसारसारससरीसृपसस्यसास्ना''[ ]इति द्विदन्त्ये ऊष्मविवेकात् । १२ दीर्घा जिह्वाऽस्य **दीर्घजिह्वः**)। १३ काकस्येवोदरमस्य **काकोदरः** । काकोलं[14] विषमुदरेऽस्येति, पृषोदरादित्वाद्

---

१. 'बिट बिड आक्रोशे' इति धातुप्रदीपः ॥ २. '-ते' इति३॥ ३. '-त्वरज्वर-' इति४॥ ४. षकारानुबन्धः स्वामिमते ॥ ५. 'आखुः' इति१.३॥ ६. कोष्ठान्तर्गतपाठः १.२.४.५प्रतिषु नास्ति ॥ ७. '-ऽके' इति ३प्रतौ नास्ति ॥ ८. 'नास्ति नकुलमस्य' इति३॥ ९. कोष्ठान्तर्गतपाठः १.३.४.५प्रतिषु नास्ति ॥ १०. द्र. पदचन्द्रिका, भा-२, भोगिवर्गः, श्लो-२२०, पृ.२६०॥ ११. 'खच्च डिद्वा वाच्यः' इति वार्तिकम् ॥ १२. 'गमे-' इति१.२.४॥ १३. कोष्ठान्तर्गतपाठः १.३.४.५प्रतिषु नास्ति ॥ १४. 'काको' इति४.५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वा। १४ विषं धरति **विषधरः**। पचाद्यच् । १५ [फणं बिभर्ति **फणभृत्**] । १६ पर्दति (पर्दते) कुत्सितं शब्दं करोति **पृदाकुः** । " 'पर्द कुत्सिते शब्दे'(भ्वा.आ.से.), 'पर्देर्नित्यं (पर्देर्नित्) सम्प्रसारणमलोपश्च'(उणा-३६०)इति काकुप्रत्यये पृदाकुः"[टीकासर्वस्वम्१।८।६।।]इति सर्वानन्दः[1] । "पिपर्ति स्वं पवनेन 'पिपर्तेर्दाकुर्ह्रस्वश्च'( )इति दाकुह्रस्वयोः पृदाकुः"[2]इति पञ्जिका । १७ दृशावेव कर्णावस्य **दृक्कर्णः**। १८ कुण्डलमिव वपुरस्य **कुण्डली,** इन्नन्तः । "कुण्डलमनुकरोतीति कुण्डलशब्दात् प्रातिपदिकाद् धात्वर्थणिजन्ताद् घञर्थे के कुण्डलं कुण्डलानुकरणम्, तद्योगादिनि कुण्डली"[पदचन्द्रिका, भा-१, भोगिवर्गः,श्लो-२२०]इति मिश्राः। १९ बिले शेते **बिलेशयः** । 'अधिकरणे शेतेः'३।२।१५।।, 'शयवासवासिष्वकालात्'६।३।१८।। इति सप्तम्यलुक् । २० गर्हितं दशतीत्येवंशीलो **दन्दशूकः** । दंशेः 'लुपसद-'३।१।२४।। इत्यादिना यङन्ताद् 'यजजप-'३।२।१६६।। इत्यादिनोकः, 'यस्य हलः'६।४।४९।। इति यलोपः **।।१३०३।।** २१ दर्वी फण एव करो हस्तोऽस्य प्रहारदाने[3] **दर्वीकरः** । २२ कञ्चुकोऽस्त्यस्य **कञ्चुकी,** इन्नन्तः । २३ शिरसि चक्रयोगात् **चक्री,** इन्नन्तः। २४ गूढा अलक्ष्याः पादा अस्य **गूढपात्** । पृषोदरादित्वादकारलोपः । 'पादस्य लोपः-'५।४।१३८।। इतीह नास्ति, तत्र 'उपमानात्-' इत्युनुवृत्तेः । शसादावजादौ(-चादौ) गूढपद इत्यादि । प्रथमैकवचनेऽपि 'गूढपदः' इति कौमुदी । सर्पविषये "पादानामपि विज्ञेया द्वे शते द्वे च विंशती"[4][5]इत्यागमात् [सपादत्वम्] । "पादसमानार्थः पाच्छब्दोऽप्यस्ति" [स्वोपज्ञटीका४।१३०४।।]इत्याचार्याः । २५ पद्भ्यां[6] न गच्छतीति **पन्नगः** । 'नभ्राण्नपात्-'६।३।७५।। इत्यादिना नञः प्रकृतिभावः । पथः पतितो न गच्छति पन्नम्, तथा यथा स्यात् तथा गच्छतीति पन्नगः । सर्वत्र पन्नयोरुपसङ्ख्यानाद् गमेर्डः । २६ जिह्मं कुटिलं गच्छति **जिह्मगः** । 'अन्यत्राऽपि(अन्येष्वपि) दृश्यते'(वा-३।२।१०१।।)इति डः । २७ भृशं लेढीत्येवंशीलो **लेलिहानः** । २८ कुम्भीव नासिकाऽस्य **कुम्भीनसः** । 'अस्थूलाच्च-'[7] (हैमसू-७।३।१६१।।)इति नसादेशः । २९ आशीस्तालुगता दंष्ट्रा, तस्यां विषमस्याऽस्ति **आशीविषः** । पृषोदरादित्वात् सलोपः । "ईकारान्तेन आशीशब्देन वा समासः । "आशीमिव कलामिन्दोः"[8]इति राजशेखरः । "आशी तालुगता दंष्ट्रा, तया विद्धो न जीवति"[ ]इति[9] च । ३० आपुच्छायतत्वाद् दीर्घं पृष्ठमस्य **दीर्घपृष्ठः**। त्रिंशत् सामान्येन सर्पस्य ।।

**स्याद् राजसर्प(सर्पराज)स्तु भुजङ्गभोजी ।।१३०४।।**

१ सर्पाणां राजा **सर्पराजः** । 'राजाहःसखिभ्यष्टच्' ५।४।९१।। इति टच्, 'नस्तद्धिते'६।४।१४४।। इति टिलोपः । २ भुजङ्गान् भुङ्क्ते इति **भुजङ्गभोजी** । 'भुज पालनाभ्यवहारयोः'(रु.प.अ.), ताच्छील्ये णिनिः । द्वे राजसर्पस्य । 'वोघी' इति भाषा । "अहीरणी द्विमुखश्च"[शेषनाममाला ४।१८७।।]इति शैषिके **।।१३०४।।**

**चक्रमण्डल्यजगरः पारीन्द्रो[10] वाहसः शयुः।**

१ चक्राकारमण्डलमस्य **चक्रमण्डली,** इन्नन्तः। २ अजं[11] छागमपि गिलति **अजगरः** । 'गॄ निगरणे'(तु.प.से.), अच्, वृत्तौ गतार्थत्वादपिशब्दस्याऽप्रयोगः । अजो नित्यो गरोऽस्येति वा। अजति क्षिपतीति वा । 'अज गतौ क्षेपणे च'[12](भ्वा.प.से.), बाहुलकादरन् गुक् च[13] । ३ पारिणि इन्द्रः **पारीन्द्रः** । ४ वहति विषधरानिति **वाहसः,** दन्त्यसवान् । 'वहिसहि(यु)भ्यां णित्'(उणा-३९९)इत्यसच् । "वाहं गतिं[14] स्यति"[अम.क्षीर.१।७।५।।]इति स्वामी । ५ शेतेऽत्यर्थं **शयुः**। 'भृमृशीतृचरित्सरि[तनिध]निमिमस्जिभ्य उः'(उणा-७)इत्युः । पञ्च अजगरस्य ।।

**अलगर्दो जलव्यालः[15]**

१ न लगन्नर्दयति **अलगर्दः,** निर्विषत्वात् । अर्देर्हिंसार्थाण्णिजन्तात् पचाद्यच् । "अलीव गर्दत्यलिगर्दः"[16] इत्यन्ये । तृतीयवर्गतृतीयान्तोऽयम् । मिश्रास्तु-"न भूमौ

---

१. सर्वानन्दकृतटीकासर्वस्वे-"पर्द कुत्सिते शब्दे । 'पर्देर्नित् सम्प्रसारणमल्लोपश्च'(उ.३।८०)इति काकुप्रत्ययः रेफस्य सम्प्रसारणमकारस्य लोपश्च" इति दृश्यते, भा-१, १।८।६।।, पृ.१७०।। २. द्र. पदचन्द्रिका, भा-१, भोगिवर्गः, श्लो-२२०, पृ.२६०।। ३. '-नंन' इति३।। ४. द्र. टीकासर्वस्वम्, भा-१, १।८।७।।, पृ.१७०।। ५. द्र. पदचन्द्रिका, भा-१, भोगिवर्गः, श्लो-२२१, पृ.२६१-२६२।।, रामाश्रमी१।८।७।।, पृ.११५।। ६. 'पा-' इति३।। ७. 'अञ् नासिकायाः-'५।४।११८।। इति पाणिनीयसूत्रम् ।। ८. ४.५प्रत्योर्नास्ति ।। ९. '-णो' इति३।। १०. '-रि-' इति३।। ११. कर्मण्यणः प्रसङ्गादिदं विचारणीयम् ।। १२. 'गतिक्षेपणयोः' इति क्षीरतरङ्गिण्यादयः ।। १३. 'गुक् च' इति ५प्रतौ नास्ति ।। १४. '-तौ' इति३।। १५. तुलनीयोऽमरकोषः१।८।५।। १६. द्र. अम.क्षीर.१।७।५।।, पृ.५८।।, स्वोपज्ञटीका४।१३०५।।, पृ.२९२।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लगते, नञि क्विप अलक् अर्धमस्य फणधारणे, पूर्वार्धस्य भूमेरुच्छ्रितत्वादलगर्धः, अलं गृध्यतीति [वा] पचाद्यचि पृषोदरादित्वाद् मलोपः, गर्धति गृद्धः(गर्धः), 'गृधु अभिकाङ्क्षायाम्'(दि.प.से.), पचाद्यच्, अरः शीघ्रश्चासौ गर्धश्चेति रलयोरे[१]कत्वस्मरणादलगर्धः''[ ]इति तुर्यवर्गतुर्योपधमाख्यन्[२] । २ जलस्य व्यालो **जलव्यालः** । द्वे जलसर्पस्य ॥

**समौ राजिलदुन्दुभौ[३] ॥१३०५॥**

१ राजिर्लेखा पृष्ठेऽस्याऽस्तीति **राजिलः**। सिध्मादित्वाल्लच् । ''राजति सनिकल्पनीति बाहुलकादतोऽपीलचि राजिलः''[[४]]इत्यन्ये। २ दाम्यति **दुन्दुभः**, द्विपञ्चमस्वरः। 'भा दीप्तौ'(अ.प.अ.), 'दमेर्दुण्ड्[५] च (दमो दुण्ड् च)'(हैमोणा-३३५)इत्युभः । तुर्यवर्गद्वयोऽयम् । 'डुडि तुडि निमज्जने'( ), डुण्डनं डुण्डा, भावे घञ्, डुण्डा निमज्जनम्, तेन भाति डुण्डुभः[६] । 'भा दीप्तौ'(अ.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥, 'कर्तृकरणे कृता-'२।१।३२॥ इति समासः, पृषोदरादित्वाद् डुण्डशब्दाकारस्योकारे डुण्डुभ[७] इति तृतीयवर्गतृतीयद्वयोऽपि, अत एव 'दो डो दो लश्च'( )इति शाब्दिकाः । तथा-

''अहीरणी[८] तु द्विमुखो राजिलो डुण्डुभस्तथा ।
दुण्डुभो[९] निर्विषो ज्ञेयो राजसर्पो भुजङ्गभुक् ॥१॥''

[ ]इति पथ्यापथ्यकारः। अत्र हि '[१०]दुण्डुभो निर्विषो ज्ञेयः' इत्यनेन राजिलस्य लक्षणमुक्तम्, 'राजसर्पो भुजङ्गभुक्' इत्यनेन 'अहीरणी तु द्विमुखः' इत्यस्य लक्षणमुक्तम् । द्वे राजिलसर्पस्य ॥१३०५॥

**भवेत् तिलित्सो गोनासो गोनसो घोणसोऽपि ।**

१ तिलनं तिलिः । 'इक्कृष्यादिभ्यः'(वा-३।३।१०८॥)इतीक्, गतिं स्यति स्थाद्राति ('सुपि-'३।२।४॥) इति) कः, पृषोदरादिः । तिलति स्निग्धो भवति स्निग्धभूयिष्ठत्वात् । 'तिल स्नेहने'(तु.प.से.), 'तिल इट् च' ( )इति सप्रत्ययः, इदुगागमश्च, **तिलित्सो** दन्त्यसवान् । २ गोरिव [११]नासाऽस्य **गोनासः** । ३ गोरिव नासिकाऽस्य **गोनसः** । 'अञ्नासिकायाः संज्ञायां नसं चाऽस्थूलात्'५।४।११८॥ इत्यच्समासान्तः, नसादेशः । ''गोनासगोनसौ''[त्रिकाण्डशेषः१।८।५॥]इति त्रिकाण्डशेषः । ''गोनासाय नियोजिताङ्गदरजाः''[[१२]]इति राजशेखरः । ४ गोरिव नासिकाऽस्य **घोणसः** । 'अञ्नासिकायाः संज्ञायाम्-'५।४।११८॥ इत्यच्, नसादेशः, पृषोदरादित्वाद् घत्वणत्वे[१३]। घोणतेऽनेन दष्टो वा। 'घुण भ्रमणे'(भ्वा.आ.से.), बाहुलकादसच् । चत्वारि गोणसर्पस्य । निष्फणोऽयम् ॥

**कुक्कुटाहिः कुक्कुटाभो वर्णेन च रवेण च ॥१३०६॥**

१ कुक्कुटावयवयोगात् कुक्कुटः, अह्यवयवयोगादहिः, कुक्कुटश्चासौ अहिश्च[१४] **कुक्कुटाहिः** । २ कुक्कुटस्येवाऽऽभा यस्य स **कुक्कुटाभः** । द्वे कूकडसर्पस्य ॥१३०६॥

**नागाः पुनः [१५]कार्द्रवेयाः**

१ नगे गिरौ चन्दनतरौ वा भवा विद्यमाना वा, शेषेऽणि **नागाः** । न गच्छन्तीत्यगाः, न अगाः नागाः । निषेधवाचिना नञ्शब्देन(नशब्देन) 'सुप्सुपा[१६]'२।१।४॥ इति समासः । अनञ्त्वान्न 'नलोपः-'६।३।७३॥ इति वा । २ कद्र्वा अपत्यानि **[१७]कार्द्रवेयाः** । ऊङन्तात् कर्द्रु(कर्द्रू)शब्दात् कश्यपस्त्रीवचनादपत्येऽर्थे शुभ्रादि[१८]ढकि ढे लोपे कर्द्रवा इति टिलोपाभावे ओर्गुणे [१७]क्रार्द्रवेयाः । सर्पेभ्योऽन्ये देवयोनयोऽमी । द्वे सामान्येन नागस्य[१९] ॥

**तेषां भोगावती पुरी ।**

१ तेषां नागानां पुरी, भोगाः सन्त्यस्यां **भोगावती** । 'तदस्यास्ति-'५।२।९४॥इति मतुप्, 'मतौ बह्वचोऽनजिरादीनाम्'६।३।११९॥इति दीर्घत्वम्[२०] । एकं नागपुर्याः ॥

**शेषो नागाधिपोऽनन्तो द्विसहस्त्राक्ष आलुकः ॥१३०७॥**

---

१. '-रैक्य-' इति३॥ २. '-त्' इति१॥ ३. '-दुण्डुभौ' इति मुद्रिताभिधानचिन्तामणिनाममालायाम्, स्वोपज्ञटीकाऽपि तमाश्रित्यैव ॥ ४ द्र. पदचन्द्रिका, भा-१, भोगिवर्गः, श्लो-२१९, पृ.२५९॥ ५ '-र्दुड्' इति१.४.५॥ ६ '-डभः' इति२.४.५॥ ७ '-डभः' इति२.३.४॥ ८. '-रिणी' इति५॥ ९. '-डभो' इति१.३॥ १०. 'डु-' इति४.५, 'दुंदु-' इति१॥ ११. 'नाशा-' इति१॥ १२. द्र. टीकासर्वस्वम्, भा-१, १।८।५॥, १६९॥, पदचन्द्रिका, भा-१, भोगिवर्गः, श्लो-२१८, पृ.२५८॥, तयोः '-तागदरजाः' इति दृश्यते ॥ १३. 'णत्वघत्वे' इति१॥ १४. '-श्चेति' इति३॥ १५. 'काद्र-' इति२.३.४॥ १६. 'सह सुपा'२।१।४॥ इति युक्तम् ॥ १७ 'काद्र-' इति३॥ १८. '-दित्वाद्' इति३॥ १९. इतोऽग्रे ३प्रतौ 'नाम्नी' इति दृश्यते ॥ २०. '-त्वे' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ श्लिष्यत्यस्मिन् धात्रीति **शेषः** । 'श्लिष आलिङ्गने'(दि.प.अ.), 'श्लिषेः शे च'(हैमोणा-५४३)इति षः । शिष्यत इति वा । 'शिष्लृ विशेषणे'(रु.प.अ.), भावे घञ् । ''शेतेऽस्मिन् हरिः''[ ]इत्यन्ये । २ नागानामधिपो **नागाधिपः** । ३ नास्त्यन्तोऽस्येति **अनन्तः** । ४ द्वे सहस्रेऽक्ष्णामस्य **द्विसहस्राक्षः** । 'बहुव्रीहौ सक्थ्यक्ष्णोः [स्वाङ्गात्] षच्'५।४।११३॥ । ५ अलति पातालम् **आलुकः** । 'अलज् भूषणादौ'(भ्वा.प.से.), बाहुलकादुकञ् । पञ्च शेषस्य ॥१३०७॥

अथ तद्वर्णविशेषमाह-

**स च श्यामोऽथवा शुक्लः सितपङ्कजलाञ्छनः ।**

स्पष्टम् ॥

**वासुकिस्तु सर्पराजः श्वेतो नीलसरोजवान् ॥१३०८॥**

१ वसु रत्नं के मस्तकेऽस्य वसुकः, तस्याऽपत्यं **वासुकिः** । 'अत इञ्'४।१।९५॥ । २ सर्पाणां राजा **सर्पराजः** । 'राजाहःसखिभ्यष्टच्'५।४।९१॥, 'राजदन्तादिषु परम्'२।२।३१॥ । श्वेतो वर्णेन, नीलोत्पललाञ्छनश्चाऽयम् । द्वे वासुकिसर्पस्य ॥१३०८॥

**तक्षकस्तु लोहिताङ्गः स्वस्तिकाङ्कितमस्तकः ।**

१ तक्ष्णोति रिपून् **तक्षकः** । 'तक्ष त्वक्ष (तक्षू त्वक्षू) तनूकरणे'(भ्वा.प.वे.), 'ण्वुल्तृचौ'३।१।१३३॥ इति ण्वुल् । स्वस्तिकलाञ्छनोऽयम् । एकं तक्षकनागस्य ॥

**महापद्मस्त्वतिशुक्लो दशबिन्दुकमस्तकः ॥१३०९॥**

१ महान्ति पद्मान्यस्य **महापद्मः** । अर्शआदित्वादच् । एकं महापद्मनागस्य ॥१३०९॥

**शङ्खस्तु पीतो बिभ्राणो रेखामिन्दुसितां गले ।**

१ पीतो वर्णेन, गले कण्ठे इन्दुसितां चन्द्रोज्ज्वलां रेखां बिभ्राणो दधानः । एकं शङ्खनागस्य ॥

**कुलिकोऽर्धचन्द्रमौलिर्ज्वालाधूमसमप्रभः ॥१३१०॥**

१ प्रशस्यं कुलमस्य **कुलिकः** । एकं कुलिकनागस्य ॥१३१०॥

**अथ कम्बलाऽश्वतरधृतराष्ट्रबलाहकाः ।**

१ काम्यते **कम्बलः** । २ अश्ववत् तरति **अश्वतरः** । ३ धृतं राष्ट्रमनेन **धृतराष्ट्रः** । ४ बलते **बलाहकः** । एवं नामानश्चत्वारो नागाः ॥

**इत्यादयोऽपरे नागास्तत्तत्कुलसमुद्भवाः ॥१३११॥**

आदिग्रहणाद् महानीलादयः । [यदाह]-

''महानीलः कुहरश्च पुष्पदन्तश्च दुर्मुखः ।
कपिलो वामनः शङ्कुरोमां च करवीरकः ॥१॥
एलापत्रः शुक्तिकर्णो हस्तिभद्रो धनञ्जयः ।
दधिमुखः समानासौत्तंसकौ दधिपूरणः ॥२॥
हारिद्रको दधिकर्णो मणिः शृङ्गारपिण्डकः ।
कालियः शङ्खकूटश्च चित्रकः शङ्खचूडकः ॥३॥
इत्यादयोऽपरे नागास्तत्तत्कुलप्रसूतयः ॥''[ ]इति ॥१३११॥

**निर्मुक्तो मुक्तनिर्मोक्तः**

१ निर्मुच्यते स्म **निर्मुक्तः** । मुचेः कर्मकर्तृविषयत्वात् कर्तरि क्तः । मुक्तो निर्मोको देहत्वगनेन मुक्तनिर्मोकः । निर्मुच्यत इति निर्मोकः 'मुच्लृ मोक्षणे'(तु.उ.अ.), कर्मणि घञ्, 'चुजोः कु घिण्ण्यतोः'७।३।५२॥ इति कुत्वम् । एकं कञ्चुकरहितसर्पस्य ॥

उपसंहारमाह-

**सविषा निर्विषाश्च ते ।**

ते सर्पाः सविषा नागादयः, निर्विषा अजगरादयः ॥

**नागाः स्युर्दृग्विषाः**

दृशि विषमेषां दृग्विषाः ॥

प्रसङ्गादन्येषामपि सविषत्वं ज्ञापयन्नाह-

**लूमविषास्तु वृश्चिकादयः ॥१३१२॥**

लूमं पुच्छकण्टकम्, तत्र विषमेषां लूमविषाः ॥१३१२॥

**व्याघ्रादयो लोमविषाः नखविषा नरादयः ।**
**लालाविषास्तु लूताद्याः कालान्तरविषाः पुनः ॥१३१३॥**

१. द्र. स्वोपज्ञटीका४।१३०७॥, पृ.२९२॥ २. '-न्' इति३॥ ३. '-नागस्य' इति३॥ ४. '-जः' इति३॥ ५. 'त-' इति३॥ ६. 'तक्षना-' इति१॥ ७. '-स्तकु-' इति१, '-स्तं' इति३॥ ८. 'कुहा-' इति४.५॥ ९. 'सौं-' इति४.५॥ १०. '-टकः' इति३॥ ११. द्र. स्वोपज्ञटीका ४।१३११॥, पृ.२९२॥ १२. 'तद्' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मूषिकाद्याः**

स्पष्टम् ॥१३१३॥

**दूषीविषं[1] त्ववीर्यमौषधादिभिः ।**

१ दूष्यते दूषी, दूषीलक्षणं विषं **दूषीविषम्**, औषधादिभिरौषधमन्त्रप्रयोगैरवीर्यं वीर्यरहितीकृतम् । एकमौषधादिना वीर्यरहितविषस्य ॥

**कृत्रिमं तु विषं चारं[1] गरश्चोपविषं[2] च तत्[3] ॥१३१४॥**

१ कृत्रिममौषधादियोगजनितं विषम्, चार्यते **चारम्**। २ गिरति[1] **गरः** । 'गॄ निगरणे'(तु.प.से.), अच् । ३ उपगतं विशेषेण **उपविषम्**। त्रीणि कृत्रिमविषस्य ॥१३१४॥

**भोगोऽहिकायः**

१ भुजति कुटिलीभवत्यनेनाऽस्मिन् वा **भोगः** । अधिकरणे घञ् । एकं सर्पशरीरस्य ॥

**दंष्ट्राऽऽशीः**

१ अहेर्दंष्ट्रा, आशास्यते हिंस्यतेऽनया **आशीः** । आङ्पूर्वः 'शास् इच्छायाम्'(अ.आ.से.), क्विपि, 'शास[2] आशासश्च क्वावुपधाया इत्त्वं वाच्यम्'(वा-६।४।३४॥)। आशिषौ, आशिषः इत्यादि । स्त्रियां ''ङ्यन्तोऽयम्''[ ] इत्यन्ये । आशी, आश्यौ, आश्यः इत्यादि नदीवत् । एकं सर्पदंष्ट्रायाः ॥

**दर्वी[1] भोगः[2] फटः[3] स्फटः[4] । फणः[5]**

१ दृणात्यनया दर्विः । 'दॄ विदारणे'(क्र्या.प.से.), 'वृदृभ्यां विन्'(उणा-४९३), 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि **दर्वी** । २ भुनक्ति भुङ्क्ते वाऽनेनेति **भोगः** । 'भुज पालनाभ्यवहारयोः'(रु.प.अ.), 'हलश्च' ३।३।१२१॥ इति संज्ञायां घञ्, 'चजोः कु घिण्ण्यतोः' ७।३।५२॥ इति कुत्वम् । ३ स्फायते **फटः** । पृषोदरादिः । ४ स्फटति[3] विशीर्यते **स्फटः** । मिश्रास्तु-''स्फुट [स्फट] विकसने'(चु.प.से.), चुरादिः, पचाद्यचि स्फुटा (स्फटा)'' [पदचन्द्रिका, भा-१, भोगिवर्गः, श्लो-२२२] इत्याचख्युः । ''पृषोदरादित्वात् सकारलोपे फुटा''[ ] फकारादिरपीति स्वामी । ५ फणति विस्तारं गच्छति **फणः**[4] । 'फण गतौ'(भ्वा.प.से.), ''फटादयस्त्रयः पुंस्त्रीलिङ्गाः[5], फणं नपुंसकम्''[[6]]इति चान्द्राः । पुंसि रामवत्, स्त्रियां रमावत् । पञ्च सर्पफणस्य ॥

**अहिकोशे तु निर्ल्वयनी[1]निर्मोक[2]कञ्चुकाः[3] ॥१३१५॥**

१ अहेः कोश इव अहिकोशोऽहित्वक्, तत्र । नितरां लूयते **निर्ल्वयनी**[7] । पृषोदरादिः । ''नितरां लीयते निर्लयनी''[[6]]इत्यन्ये । २ निश्चयेन मुच्यते । कर्मणि घञि[8] **निर्मोकः**। ३ कञ्चते **कञ्चुकः**, पुंक्ली.। 'कचि[9] दीप्तिबन्धनयोः[10]'(भ्वा.आ.से.), 'शमिकमि-'(उणा- ) इत्यादिना बाहुलकादुकन् । कञ्चुक इव कञ्चुक इति वा। चत्वारि सर्पकञ्चुकस्य । (काँचलीति[11] भाषा) ॥१३१५॥

॥ उक्ताः स्थलचरपञ्चेन्द्रियाः ॥

## ॥ खचरपञ्चेन्द्रियाः ॥

अथ खचरानाह-

**विहगो[1] विहङ्गम[2]-खगौ[3] पतगो[4] विहङ्गः[5]**
**शकुनिः[6] शकुन्ति[7]-शकुनौ[8] वि[9]-वयः[10]-शकुन्ताः[11]**
**नभसङ्गमो[12] विकिर[13]-पत्ररथौ[14] विहायो[15]-**
**द्विज[16]-पक्षि[17]-विष्किर[18]-पतत्रि[19]-पतत्[20]-पतङ्गाः[21] ।१३१६।**
**पित्सन्[22] नीडा[23]-ऽण्डजो[24]ऽगौकाः[25]**

१ विहायसा गच्छति **विहगः**। 'गमेश्च(गमश्च)' ३।२।४७॥ इति डः (खच्)। २, ५ विहायसा गच्छति[12] [**विहङ्गः**], **विहङ्गमः**। 'विहायसो विह च'(वा-३।२।३८॥), 'डश्च(डे च)'(वा-३।२।३८॥), 'खच्च डिच्च (डिद् वा)' (वा-३।२।३८॥)इति वार्तिकात् [डित्त्वाभावपक्षे टिलोपाभावः] । ३ खे गच्छति **खगः** । 'अन्येभ्योऽपि(अन्यत्राऽपि)-'(वा-३।२।४८॥)इति डः। ४ पतत्यनेन पतः पक्षः । 'पत्लृ पतने[13]'(भ्वा.प.से.), 'पुंसि-' ३।३।११८॥ इति घः । तेन गच्छति **पतगः** । 'अन्ये-

---

१. 'गीर्यते' इति३॥ २. वार्तिके न दृश्यते ॥ ३ 'स्फु' इति१॥ ४ 'अधोभागे' इति ३प्रतेष्टिप्पणी ॥ ५ '-ङ्गौ' इति३, '-ङ्गः' इति४॥ ६. द्र. स्वोपज्ञटीका४।१३१५॥, पृ.२९३॥ ७ '-नीति' इति३॥ ८ '-ञिति' इति१॥ ९. स्वामिमैत्रेयसम्मतोऽयं धातुपाठः, 'कचि काचि-' इति सायणः ॥ १०. '-देवनयोः' इति१॥ ११. कोष्ठान्तर्गतपाठः १.२.४.५प्रतिषु न दृश्यते ॥ १२. '-न्ति' इति३॥ १३. 'शल हुल पत्लृ गतौ' इति क्षीरतरङ्गिण्यादयः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भ्योऽपि(अन्यत्राऽपि)-' (वा-३।२।४८॥)इति डः । ६ शक्नोत्यूर्ध्वं गन्तुमनेन **शकुनिः** । 'शकेरुन्युन्तोन्तिः(शकेरुनोन्तोन्त्युनयः)' (उणा-३२९)इत्युनिप्रत्यये शकुनिः[1] । ७ उन्ति प्रत्यये **शकुन्तिः** । उन्तप्रत्यये शकुन्तः। ८ उनप्रत्यये **शकुनः** । १० वयति पक्षौ विस्तारयति **विः** । 'वेञ् तन्तुसन्ताने'(भ्वा.उ.अ.), 'वेञो डित्[2]-'(उणा-५१२)इतीन्, डित्त्वाट्टिलोपः । ''स्त्रियां 'वी''[ ]इति सुभूतिः[3] । ९ वयते गच्छति **वयः**। 'वय गतौ'(भ्वा.आ.से.), '-असुन्'(उणा-६२८)इत्यसुन् । वयसी, वयांसि इत्यादि क्लीबे । यदाह-''क्लीबं[4] पक्षिणि बाल्यादौ वयो यौवनमात्रके''[विश्वप्रकाशकोशः, सान्तवर्गः, श्लो-३२]इति । ११ शक्नोत्यूर्ध्वं गन्तुं **शकुन्तः** । १२ ''नभसं ख-(खं) मेघवर्त्म विहायसम्''[5]इति निगमाद् नभसमदन्तं च । 'अत्यविचमितमिनमिरभिलभिनभितपिपतिपनिपणिमहिभ्योऽसच्[6]'(उणा-३९७)इत्युणादिसूत्रे 'नभसं खम्'[ ] इति पुरुषोत्तमः । नभसेन गच्छति **नभसङ्गमः** । 'गमश्च[7]' ३।२।४७॥ इति खच् । ''नभःपर्यायोऽकारान्तो नभस[शब्दः]''[स्वोपज्ञटीकौ४।१३१६॥]इत्याचार्याः । १३ विकिरति विक्षिपति पक्षान् भक्ष्यं[8] वा **विकिरः**। कीटादिभक्षणार्थं भुवं विकिरति वा । 'कॄ विक्षेपे'(तु.प.से.), 'इगुपध-'३।१।१३५॥ इति कः[9], विकिरः''[10]इति सुभूतिः । १४ पत्त्राणि पक्षा रथोऽस्य **पत्त्ररथः** । १५ विजिहीते **विहायाः,** पुंसि । 'विहायस्सुमनस्-'(हैमोणा-९७६) इत्यसि निपात्यते । विहायसौ, विहायसः इत्यादि । १६ द्वाभ्यां मातृगर्भाण्डाभ्यां जातो **द्विजः** । 'जनी प्रादुर्भावे' (दि.आ.से.), 'अन्येष्वपि दृश्यते'३।२।१०१॥ इति डः । १७ पक्षाः सन्त्यस्य **पक्षी,** इन्नन्तः । १८ विकिरति **विष्किरः** । विपूर्वः 'कॄ विक्षेपे'(तु.प.से.), 'इगुपध-' ३।१।१३५॥ इति कः, 'ॠत इद्धातोः'७।१।१००॥, 'शकुनिर्विकिरो वा (विष्किरः शकुनौ वा)'६।१।१५०॥ इति सुट्, 'परिनिविभ्यः'८।३।७०॥ इति षत्वम् । तृतीयस्वरमध्योऽयम् । १९ पतति **पतत्री** । 'पतेरत्रिन्'(हैमोणा-९३०) । पतत्रिणावित्यादि । पतत्राणि सन्त्यस्येति वा । 'अत इनिठनौ'५।२।११५॥ इतीनिः । पतत्रिरिति इकारान्तोऽप्ययम्, तत्र 'पतेरत्रिः(-त्रिन्)'(उणा-५०९)इत्यत्रिः। २० पतति **पतन्** । शतृप्रत्ययः । पतन्तौ, पतन्तः इत्यादि । २१ पतति **पतङ्गः** । 'पतेरङ्गच् पक्षिणि'(उणा-११६) इत्यङ्गच् । सप्तभिर्द्वन्द्वः ॥१३१६॥ २२ पतितुमिच्छति **पित्सन्** । '-रभलभशकपतपदाम्-'७।४।५४॥ इतीस्, ततः शतृप्रत्ययः । पित्सन्तौ, पित्सन्तः इत्यादि । २३-२४ नीडाज्जातो **नीडजः** । अण्डाज्जातः **अण्डजः** । उभयत्र 'पञ्चम्यामजातौ'३।२।९८॥ इति डः । २५ अगो वृक्ष ओकोऽस्त्यस्य **अगौकाः,** सकारान्तः। पञ्चत्रिंशत् (पञ्चविंशतिः) पक्षिणाम् । शेषश्चात्र-

''भवेत् पक्षिणि चञ्चुमान् ।
कण्ठाग्निः कीकसमुखो लोमकी रसनारदः[11]॥
[12]वारङ्गिनाडीचरणौ''[शेषनाममाला ४।१८७-१८८]॥

**चञ्चुश्चञ्चूः सृपाटिका ।**
**त्रोटिश्च**

१ चञ्चति भक्ष्यद्रव्यं[13] याति प्राप्नोति **चञ्चुः** । 'चञ्चु गतौ'(भ्वा.प.से.), मित्रय्वादौ निपातितः । ''अपष्ठादित्वात्'' [14]इत्यन्ये । २ एवं 'कृषिचमितनिधनिसर्जिखर्जिभ्य ऊः'(उणा-८१)इत्यूः बाहुलकात् **चञ्चूः** । ३ सर्पति[15] चलति सृपाटी । 'सृप्लृ गतौ'(भ्वा.प.अ.), '[सृ]सृपेः कित्' (हैमोणा-१४६)इत्याटः, गौरादित्वाद् ङीष्, ततः कनि, 'केऽणः'७।४।१३॥ इति ह्रस्वत्वे **सृपाटिका** । ४ त्रोटत्यनया (त्रोटयत्यनया) **त्रोटिः** । त्रुटेर्णिजन्ताद् बाहुलकाद् 'हृपिशिरुहिभ्य इन्[16]'(उणा-५५८)इतीन् । स्त्रियां ङीषि[17] त्रोटी च । एते स्त्रीलिङ्गाः । चांचनामानि चत्वारि ॥

**पत्त्रं पतत्त्रं पिच्छं वाजस्तनूरुहम्** ॥१३१७॥

**पक्षो गरुच्छदश्चाऽपि**

१. '-न्तिः' इति१.३.४॥ २. ईचिप्रत्ययप्रकरणेऽस्य सूत्रस्य पाठादस्योल्लेखो विचारणीयः, अथ च 'वातेर्डिच्च'(उणा-५७३)इत्यनेन समाधेयम् ॥ ३. द्र. पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२४८, पृ.३१९॥ ४. विश्वप्रकाशकोशे 'क्लीबं' इत्यस्य स्थाने 'वयः' इति दृश्यते, पृ.१७६॥ ५. द्र. पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२४९, पृ.३२०॥, रामाश्रमी२।५।३४॥, पृ.२५५॥ ६. '-तसच्' इति१.४.५॥ ७. '-मेश्च' इति२॥ ८. '-क्षं' इति३॥ ९. 'के' इति१.३॥ १०. ४.५प्रत्योर्नास्ति ॥ ११. 'रदः' इति१.४.५॥ १२. 'वारङ्ग' इति शेषनाममालास्वोपज्ञटीकयोः ॥ १३. 'भक्ष-' इति३॥ १४. द्र. पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२५१, पृ.३२४॥, रामाश्रमी२।५।३६॥, पृ.२५७॥ १५. 'सृपति' इति३॥ १६. 'हृपिषिरुहिवृतिविदिछिदिकीर्तिभ्यश्च'(उणा-५५८)इत्युणादिगणसूत्रम् ॥ १७. '-ष्' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ पतत्यनेन **पत्रम्** । 'पत्लृ पतने[1]'(भ्वा.प.से.), 'दाम्नीशसु(शस)युयुज-'३।२।८२॥ इत्यादिना ष्ट्रन् । २ पतन्तं[2] त्रायते **पतत्रम्**, तुर्यवर्गाद्यद्वयरेफसंयोगवान् । बाहुलकात् [पतेः] 'अमिनक्षि[3]कलिभ्योऽत्रन्'(चान्द्रोणा-३।३८॥) इत्यत्रन् पतत्रमिति एकतकाररेफसंयोगवानपि । ३ पीयते **पिच्छम्** । 'पीङ् पाने'(दि.आ.अ.), '**पीपूङोः ह्रस्वश्च**'(हैमोणा-१२५)इति छक्[4] । पिञ्छमपि । ४ वजत्यनेन **वाजः** । 'वज गतौ'(भ्वा.प.से.), करणे घञ् । ५ तन्वां रोहति **तनूरुहम्**, पुंक्ली. । 'रुह बीजजन्मनि[5] प्रादुर्भावे[6]' (भ्वा.प.अ.), 'इगुपध-'३।१।१३५॥ इति कः ॥१३१७॥

६ पच्यते कालेन **पक्षः**, पुंसि । 'डुपचष् पाके'(भ्वा.उ.अ.), 'वृतृवदिहनि-'(उणा-३४२)इत्यादिना बाहुलकात् सः । पक्ष्यते परिगृह्यते वा[7] । 'पक्ष परिग्रहे'(चु.प.से.), कर्मणि घञ् । असुनि प्रत्यये पक्षः, सकारान्तमपि । ''पक्षसा (पक्षसी) च स्मृतौ पक्षौ''[[8]]इति शुभाङ्कः । ७ गिरति खमनेन, गृणाति शब्दायते वा **गरुत्**, पुंक्ली. । 'गॄ निगरणे'(तु.प.से.), 'गॄ शब्दे'(क्र्या.प.से.) वा, 'मृग्रोरुतिः'(उणा-९४)इत्युतिः । गरुतौ, गरुतः इत्यादि पुंसि । गरुती, गरुन्ति इत्यादि क्लीबे । ८ छाद्यतेऽनेन **छदः** । 'छद अपवारणे'(चु.उ.से.), णिजन्तः, ततो घञर्थे कः । पुंक्लीबलिङ्गावेतौ[9] । अष्टौ पक्षस्य ॥

**पक्षमूलं तु पक्षतिः[1] ।**

१ पक्षस्य मूलं पक्षमूलम्, 'पक्षात् तिः'५।२।२५॥ इति तिः **पक्षतिः**, स्त्रीलिङ्गः ॥

## [1]प्रडीनो[2]ड्डीनसण्डीनडयनानि नभोगतौ ॥१३१८॥

१ प्रड्यनं **प्रडीनम्** । 'डीङ्[10] विहायसा[11] गतौ' (भ्वा.आ.से., दि.आ.से.), भावे नपुंसके क्तः । २-३ एवम् **उड्डीनम्**, **सण्डीनम्** । स्वादिषु पाठसामर्थ्यादनिट्त्वम्, निष्ठायाः 'ओदितश्च'८।२।४५॥ इति सर्वत्र निष्ठानत्वम् । [४ डीयते **डयनम्** । 'डीङ् विहायसां गतौ'(भ्वा.दि.आ.से.), ल्युट् ]। ५ ''नभसि[12] गमनं **नभोगतिस्तस्याम्**''[स्वोपज्ञटीका४।१३१८]इत्याचार्याः । ''प्रथमं डीनं प्रडीनम्, भावे क्तः, उड्डयनाय क्रमबन्धः, ऊर्ध्वं डीनमुड्डीनं वियद्गमनम्, संङ्गतं[13] डीनं सण्डीनं वृक्षादौ पतनम्''[[14]]इति सुभूत्यादयः । ''प्रडीनं तिर्यग्गमनम्[15], उड्डीनमूर्ध्वगमनम्, सण्डीनं सङ्गतगमनम्''[[14]]इति त्वन्ये । पञ्च आकाशगतिनामानि ॥

## पेशीकोशो[1]ऽण्डे[2]

१ 'पिश अवयवे'(तु.पसे.), पचाद्यजन्ताद् गौरादित्वाद् ङीष् पेशी, पेशीनां मांसखण्डानां कोशः सङ्घातः **पेशीकोशः** । अमति निस्सरत्यस्माच्छावक इति **अण्डम्**, पुंक्लीबलिङ्गः। 'अम्(अम) गतौ[16]'(भ्वा.प.से.), 'ञमन्ताड्डः'(उणा-१११)इति डः । 'अण शब्दे'(भ्वा.प.से.) अतो वा 'ञमन्ताड्डः'(उणा-१११)इति डः, बाहुलकाद् डकारस्य नेत्त्वम्, तत्र । 'आण्ड' इति द्वितीयस्वरादिरपि । ''तिस्रः संज्ञा एताः''[]इति गौडः[17] । ''अण्डे[18] पेशी च कोशश्च''[]इति, तदा 'पिश अवयवे'(तु.प.से.), तालव्यान्तः, 'ह्रपिशिरुहि-'(उणा-५५८)इतीन्, 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि पेशी । ''पेशी सुपक्व[19]कणिके[20] मास्यां खड्गपिधानके, मांसपिण्ड्यामण्डभेदे[21]''[मेदिनीकोशः, शान्तवर्गः, श्लो-१२] इति मेदिनिः । पेशिरिति तृतीयस्वरान्तोऽपि । कुश्यति[22] श्लिष्यति[22] शावकोऽत्रेति कोशः । 'कुश श्लेषे[23]'(दि.प.से.), बाहुलकादधिकरणेऽच् । कोषो मूर्धन्यान्तोऽपि । कुष्यति निःक्रामति शावकोऽस्मादिति कोषः। 'कुष निष्कोषणे[24]'(क्र्या.प.से.), 'अकर्तरि च कारके-'३।३।१९॥ इति घञ्।

''कोषोऽस्त्री कुड्मले पात्रे[25] [दिव्ये खड्गपिधानके ।
जातिकोषेऽर्थसङ्घाते] पेश्यां शब्दादिसङ्ग्रहे ॥१॥''

[मेदिनीकोशः, षान्तवर्गः, श्लो-१०]इति मेदिनिः । [26]ईडा-नाम्नी द्वे ॥

---

१. 'शल हुल पत्लृ गतौ' इति क्षीरतरङ्गिण्यादयः ॥ २. '-ततं' इति५॥ ३. '-भ' इति४, '-त-' इति५॥ ४. 'तुक्' इति१॥ ५. 'जन्मनि' इति१॥ ६. इतोऽग्रे १प्रतौ, मा.धातुवृत्तौ च 'च' इति दृश्यते, 'रुह बीजजन्मनि' इति स्वामी, 'रुह जन्मनि प्रादुर्भावे' इति मैत्रेयः॥ ७. इतोऽग्रे ३प्रतौ 'पक्षः' इति दृश्यते ॥ ८. द्र. पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२५१, पृ.३२३॥, रामाश्रमी२।५।३६॥, पृ.२५६॥ ९. '-विमौ' इति३॥ १०. '-ञ्' इति३॥ ११. '-सां' इति१.२.३, स्वामी च॥ १२. '-सी' इति५॥ १३. 'सन्त-' इति३.४॥ १४. द्र. पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो २५२, पृ.३२५॥ १५. '-मिनम्' इति५॥ १६. 'गत्यादिषु' इति क्षीरतरङ्गिण्यादयः ॥ १७. द्र. अम.क्षीर.२।५।३८॥, पृ.१३२॥, स्वोपज्ञटीका४।१३१९॥, पृ.२९४॥, तयोः 'एता' इति न दृश्यते ॥ १८. '-ड-' इति३॥ १९. '-क्वः' इति३॥ २०. '-लिके' इति मेदिनीकोशे, पृ.१६३॥ २१. '-दा' इति३.५॥ २२. '-ते' इति३॥ २३. दुर्गसम्मतोऽयं धातुपाठः, द्र. क्षीरतरङ्गिणी, दिवादिः, धातुसं-११२, पृ.२२९॥ २४. 'निष्कर्षे' इति क्षीरतरङ्गिण्यादयः ॥ २५. 'प-' इति१॥ २६. 'इ-' इति२, 'ई-' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**कुलायो नीडे (कुलाये नीडः)**[1]

१ कोलन्त्यत्र **कुलायः** । 'कुल संस्त्याने[2]'(भ्वा.प.से.), 'कुलिलुलि-'(हैमोणा-३७२)इत्यायः । कुलमेति वा । 'इण् गतौ'(अ.प.अ.), 'कर्मण्यण्'३।२।१॥, तत्र । २ नीयन्त एनम्[3], पदार्थानयति सुखं वा **नीडः** । 'णीञ् प्रापणे'(भ्वा.उ.अ.), 'याडनीडक्रोडकुहोडोदग्र-'(उणा- ) इत्युडच्प्रत्ययः, प्रत्ययादेर्लोपो गुणाभावश्च निपात्यते । नीडः पुंसि, नीडी स्त्रियाम्, नीडं क्लीबे । मालानाम्नी द्वे ॥

**केकी तु सर्पभुक् ।**

**मयूर-बर्हिणौ नीलकण्ठो मेघसुहृच्छिखी ॥१३१९॥**

**शुक्लापाङ्गः**

१ केका मयूरवाक्, साऽस्याऽस्तीति **केकी** । व्रीह्यादित्वादिनिः । २ सर्पं भुङ्क्ते **सर्पभुक्** । 'भुज पालनाभ्यवहारयोः'(रु.प.अ.), क्विप् । ३ मीनाति हिनस्ति, मयतेऽहीनिति वा **मयूरः** । 'मीञ् हिंसायाम्'(क्र्या.उ.अ.), 'मय गतौ'(भ्वा.आ.से.) वा, 'खर्जिपिञ्जादिभ्य ऊरोलचौ' (उणा-५३०)इत्यूरः[4] । मह्यां रौतीति पृषोदरादिर्वा । ४ बर्हं पुच्छम्, तद्योगात्[5] 'फलबर्हाभ्यामिनन्'(वा-५।२।१२२) **बर्हिणः**, अकारान्तः । ५ नीलः कण्ठोऽस्य **नीलकण्ठः** । ६ मेघस्य सुहृत्, मेघः सुहृदस्येति वा **मेघसुहृत्**, दकारान्तः । ७ शिखाऽस्त्यस्य **शिखी** । व्रीह्यादित्वादिनिः[6] । यौगिकत्वात् शिखाबलः ॥१३१९॥ ७ शुक्लावपाङ्गावस्य **शुक्लापाङ्गः** । अष्टौ मयूरस्य । शेषश्चात्र-

"मयूरे चित्रपिङ्गलः ।
नृत्यप्रियः स्थिरमदः खिलखिल्लो गरव्रतः ।
मार्जारकण्ठो मरुको (मरूको) मेघनादानुलासकः ॥१॥
मयूको[8] बहुलग्रीवो नगावासश्च चन्द्रकी ।"

[शेषनाममाला४।१८८-१८९]॥

**अस्य वाक् केका**

१ अस्य मयूरस्य वाग् वाणी, 'के' इति शब्दं कायति व्यनक्ति **केका** । 'कै शब्दे'(भ्वा.प.अ.), मृगविभुजादित्वात् कः । के मूर्ध्नि कायतीति वा[9] । एकं मयूरवाण्याः ॥

**पिच्छं बर्हं शिखण्डकः ।**

**प्रचलाकः कलापश्च**

१ मयूरस्य पिच्छम्, अपि छ्यति छिनत्ति विषं **पिच्छम्** । 'छो छेदने'(दि.प.अ.), कप्रत्ययः । 'वष्टि भागुरिः-' [भागुरिकृतकारिका]इत्यपेरकारलोपः । २ बर्हते नृत्येनोर्ध्वीभवति[10], वर्धते वा **बर्हम्**, पुंक्लीबे । 'वृहू उद्यमे' (तु.प.वे.), 'बृह वृद्धौ'(भ्वा.प.से.) वा, पचाद्यच् । ""बर्ह बल्ह प्राधान्ये'(भ्वा.आ.से.), बर्हते सर्वेष्ववयवेषु प्रधानं भवति बर्हम् । पचाद्यच् । वर्हते आच्छादयत्यनेनेति वा । 'वर्ह वल्ह परिभाषणहिंसाच्छादनेषु[11]'(भ्वा.आ.से.), घञ्" [[12]]इति माधवः । ३ शिखण्डिनम्(शिखिनम्) मयूरममति शिखण्डः । 'अम्(अम) गत्यादिषु'(भ्वा.प.से.), 'जमन्ताड्डः' (उणा-१११), शकन्ध्वादित्वात् पररूपत्वम्, ततः स्वार्थे कनि **शिखण्डकः**, तालव्यादिः । "शङ्कुशिखण्डौ शम्याश्रमणे[13]"[[14]]इत्यूष्मभेदात् । ४ प्रचलति **प्रचलाकः** । बाहुलकादाकः । प्रचलमकत्यनेनेति वा । ५ कलां पाति **कलापः** । 'पा रक्षणे'(अ.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥ । चत्वारि मयूरपक्षस्य । 'कलाइआ' इति भाषा ॥

**मेचकश्चन्द्रकः समौ ॥१३२०॥**

१ **मेचकः** कृष्णवर्णाधिक्याद् मिश्रवर्णत्वाद् वा । यत्कात्यः-"बर्हिकण्ठसमं[15] वर्णं[16] मेचकं ब्रुवते बुधाः"[[17]] इति । २ चन्द्रप्रतिकृतिः **चन्द्रकः** । 'इवे प्रतिकृतौ' ५।३।९६॥ इति कः । चांदलानाम्नी द्वे ॥१३२०॥

**वनप्रियः परभृतस्ताम्राक्षः कोकिलः पिकः ।**

**कलकण्ठः काकपुष्टः**

---

१. कोष्ठान्तर्गतपाठः टीकाकृत्सम्मतः, कुलायशब्दव्युत्पत्त्यन्ते सप्तम्यर्थस्य 'तत्र' इत्यनेन व्याख्यानात् ॥ २. 'कुल संस्त्याने' ('सन्ताने' इति मैत्रेयः) बन्धुषु च' इति क्षीरतरङ्गिण्यादयः ॥ ३. ३प्रतौ नास्ति ॥ ४. '-डम्' इति१.२.४.५॥ ५. 'मीनातेरूरन्'(उणा-६७)इत्यनेनाऽपि मयूरशब्दसिद्धिः ॥ ६. इतोऽग्रे ३प्रतौ 'बर्ही' इति दृश्यते ॥ ७. '-नि' इति२॥ ८. 'मयुको' इति शेषनाममालास्वोपज्ञटीकयोः ९. ३.४.५प्रतिषु नास्ति ॥ १०. '-भवति' इति ४.५प्रत्योर्नास्ति ॥ ११. 'परिभाषणहिंसादानेषु' इति क्षीरतरङ्गिण्यादयः ॥ १२. माधवीयधातुवृत्तौ- 'बर्ह बल्ह प्राधान्ये' इत्यत्र- "बर्हते सर्वेष्ववयवेषु प्रधानं भवतीति बर्हम्" इति, 'वर्ह वल्ह परिभाषणहिंसादानेषु' इत्यत्र-" 'छादयत्यनेनेति वर्हः घञ्' इति वदन् शाकटायनोऽप्यत्रैवानुकूलः" इति च दृश्यते, भ्वादिः, धातुसं-४१३-४१५, पृ.१६६॥ १३. '-णम्' इति४.५॥ १४. द्र. पदचन्द्रिका, भा २, सिंहादिवर्गः, श्लो-२४५, पृ.३१७॥ १५. 'र्ह-' इति२.५, 'र्हः' इति४, '-र्हिणं' इति३॥ १६. '-र्ण-' इति२.४॥ १७. द्र.अम.क्षीर.२।५।३२॥, पृ.१३०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ वनं[1] प्रियमस्य **वनप्रियः** । २ परेण काकेन भृतः पुष्टः **परभृतः** । अन्यभृतपरपुष्टावपि। ३ ताम्रेऽक्षिणी अस्य **ताम्राक्षः** । 'बहुव्रीहौ सक्थ्यक्ष्णोः-'५।४।११३॥ इति षच् । ४ कोकते चित्तं गृह्णाति **कोकिलः** । 'कुक वृक आदाने'(भ्वा.आ.से.), 'अजिरादयश्च'(कातन्त्रोणा-१।२६) इति किरः, बाहुलकाद् गुणः, कपिरि(कपिलि)कादित्वाल्लत्वम्, 'शलि(सलि)कलि-'(उणा-५४)इत्यादिना इलचि वा। जातिलक्षणं ङीपं बाधित्वा स्त्रियामजादित्वाट्टाप् । ५ अपिरन्तर्धौ, अपिहितः कायति **पिकः** । 'कै शब्दे'(भ्वा.प.अ.), 'आतश्चोपसर्गे कः'३।१।१३६॥, 'वष्टि भागुरिरल्लोपम्-'[भागुरिकृतकारिका]इत्यकारलोपः। पिबति चूतरसं वा । 'पा पाने'(भ्वा.प.अ.), 'पापुलि-'(हैमोणा-४१)इति किदिकः । ६ कलो मनोज्ञः कण्ठोऽस्य **कलकण्ठः** । ७ काकेन पुष्यते **काकपुष्टः** । 'पुष पुष्टौ' (दि.आ.अ.), क्तः । सप्त कोकिलस्य । शेषश्चात्र-

"कोकिले तु मदो[2]ल्लापी[3] काकजातो रतोद्वहः ।
मधुघोषो[4] मधुकण्ठः सुधाकण्ठः [5]कुहूमुखः[6] ॥१॥
घोषयित्नुः पोषयित्नुः कामतालः कुनालिकः ॥"
[शेषनाममाला-४।१९०-१९१]॥

**काको[1]ऽरिष्टः[2] सकृत्प्रजः[3] ॥१३२१॥**

**आत्म[4]घोषश्चि[5]रजीवी घू[6]कारिः कर[7]टो द्वि[8]कः ।**
**एक[9]दृग् बलि[10]भूक् ध्वा[11]ङ्क्षो मौकु[12]लि(मोकुलि)-**
**वा[13]यसोऽन्य[14]भृत् ॥१३२२॥**

१ 'का' इति शब्दं कायति **काकः** । 'कै शब्दे' (भ्वा.प.से.), 'आतोऽनुपसर्गे कः'३।२।३॥ । काकयति लौल्यं जनयति वा । 'कक लौल्ये'(भ्वा.आ.से.), णिजन्तः, अच्[8] । २ नास्ति रिष्टं मरणमस्य **अरिष्टः**, अमृतभुक्त्वादिति। ३ सकृ[9]देकवारं प्रजायते **सकृत्प्रजः** । सकृत् प्रजाऽपत्यमस्य वा ॥१३२१॥ ४ 'काका' इति शब्देनाऽऽत्मानं घोषयति **आत्मघोषः** । 'घुष स्तुतौ[10]'( ), णिजन्तात् 'कर्मण्यण्'३।२।१॥ । ५ चिरं जीवति **चिरजीवी** । ग्रहादित्वाण्णिनिः[11] । ६ घूकानामरिः **घूकारिः** । ७ करोति बलिदातुर्हितं **करटः** । 'शकादिभ्योऽटन्'(उणा-५२१) । कमात्मानं रटति वा । ८ द्वौ ककारौ नाम्न्यस्य **द्विकः** । ९ एका दृगस्य **एकदृक्** । रामेण काणीकृतत्वात् । १० बलिं भुङ्क्ते **बलिभुक्**, वैश्वदे[12]वभागार्हत्वात् । 'भुज पालनादौ'(रु.प.अ.), सम्पदादित्वात् क्विप् । बलिपुष्टोऽपि । ११ ध्वाङ्क्षति घोरं शब्दायते, काङ्क्षति वा **ध्वाङ्क्षः** । 'ध्वाङ्क्षि घोरवासिते[13] च[14]'(भ्वा.प.से.), चकारात् काङ्क्षायाम्, पचाद्यच् । १२ माति [15]**मोकुलिः** । 'मा माने'(अ.प.अ.), 'माशालिभ्यामोकुलिमली'(हैमोणा-७०३)इत्योकुलिः । १३ वयति (वयते) प्रतिगृहं **वायसः** । 'वय गतौ'(भ्वा.आ.से.), 'वयः-'(उणा-४००)इत्यसच्, स च णित् । वया एव वायसः, प्रज्ञाद्यण् वा । १४ अन्यान् पिकान् बिभर्ति **अन्यभृत्** । अन्यभृतौ, अन्यभृतः इत्यादि । चर्तुदश काकस्य ॥१३२२॥

**वृद्ध[1]-द्रोण[2]-दग्ध[3]-कृष्ण[4]-पर्वतेभ्य[5]स्त्वसौ परः ।**
**वनाश्र[6]यश्च काको[7]लः**

१ वृद्धादिभ्यः परोऽसौ काकशब्दो योज्यते, तेन **वृद्धकाकः** । २ द्रुणति विशेषेण हिनस्ति द्रोणः । 'द्रुण हिंसायाम्[16]'(तु.प.से.), अच् । द्रोणनामा काको **द्रोणकाकः** । द्रोणोऽपि । "द्रोणो ना [17]दग्धकाके स्यादश्वत्थाम्नो[18] गुरावपि" [[19]]इति रुद्रः । ३ [**दग्धकाकः**], ४ **कृष्णकाकः**[20], ५ **पर्वतकाकः** । ६ वनमाश्रयोऽस्य **वनाश्रयः** । ७ कायति **काकोलः** । 'कै शब्दे'(भ्वा.प.अ.), 'कपिपिडिभ्यामोलन्[21]' ( )इति बाहुलकादतोऽपि[22] । ईषत् कोलतीति वा । 'कुल संस्त्याने[23]'(भ्वा.प.से.), अच्। सप्त पर्वतीयकाकस्य ॥

१. '-न-' इति१॥ २. 'महे-' इति४॥ ३. '-ल्लीपि' इति५॥ ४ '-पोषो' इति४.५॥ ५ 'कुहु-' इति१॥ ६. '-मखः' इति४॥ ७. '-र्ं-' इति३.५॥ ८. 'पचाद्यच्' इति१॥ ९. '-कृत्वा-' इति३॥ १०. क्षीरतरङ्गिण्यादौ स्तुत्यर्थकघुषधातुर्न दृश्यते ॥ ११. '-नि' इति१॥ १२. '-देवता-' इति३॥ १३. '-शिते' इति२.५॥ १४ 'द्राक्षि ध्राक्षि घोरनिवाशिते च' इति स्वामी, 'द्राक्षि ध्राक्षि ध्वाक्षि घोरवाशिते ('-वासिते' इति सायणः) च' इति मैत्रेयसायणौ॥ १५. 'मौ-' इति२.३॥ १६. 'गतिहिंसाकौटिल्येषु' इति क्षीरतरङ्गिण्यादयः ॥ १७. 'वृद्ध-' इति३॥ १८. '-त्थामा' इति३॥ १९. द्र. पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२३६, पृ.३०३॥, रामाश्रमी२।५।२१॥, पृ.२४९॥ २०. '-गः' इति३॥ २१. '-लः' इति३॥ २२. कैधातुना काकोलशब्दसिद्धिर्विचारणीया । न च 'कपिगण्डि-'(उणा-६६)इत्यादिना कोलच्प्रत्यये सिद्धिरिति वाच्यम्, प्रत्ययादेः ककारस्येत्त्वात् तस्य लोपात् । अथ च काकयति काकोलः । स्वार्थण्यन्तात् 'कपिगण्डि-' (उणा-६६)इत्यादिना बाहुलकादतोऽपि कोलचिति समाधेयम् ॥ २३. 'संस्त्याने ('सन्ताने' इति मैत्रेयः) बन्धुषु च' इति क्षीरतरङ्गिण्यादयः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मद्गुस्तु जलवायसः ॥१३२३॥**

१ मज्जति जले **मद्गुः** । 'टुमस्जो शुद्धौ'(तु.प.अ.), बाहुलकादुः[१], न्यङ्क्वादित्वात् कुत्वम् । जलचारी वायसो जलवायसः । एकं जलवायसस्य ॥१३२३॥

**घूके निशाटः काकारिः कौशिको-लूक-पेचकाः ।**
**दिवान्धः**

१ घवते शब्दायते **घूकः** । 'घुङ् शब्दे'[२](भ्वा.आ.अ.), 'घुयुहि-'(हैमोणा-२४)इति को दीर्घत्वं च । 'घू' इति शब्देन कायति वा । 'कै शब्दे'(भ्वा.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥, तत्र । २ निशायामटति **निशाटः**। 'अट गतौ'(भ्वा.प.से.), पचाद्यच् । ३ काकानामरिः **काकारिः** । ४ कोशः प्रयोजनमस्य **कौशिकः** । 'तदस्य प्रयोजनम्[३]'५।१।१०९॥ इति ठक् । कुशिकस्याऽपत्यमिति वा । कौ शेत इति वा । पृषोदरादिर्वा । ५ ''उल्लमप्य चक्षुषा (ऊर्ध्वमप्यस्य चक्षुषी) लोकत **उलूकः** । पृषोदरादिः''[ ][४]इति स्वामी । ''ऊर्ध्वौ कर्णावस्य उलूकः । पृषोदरादिः''[ ][५]इति सुभूतिः । उचति समवैति कोटरे वा। 'उलूकादयश्च'(उणा-४८१)इति निपातितः । ६ पचति सन्तपति दुःखेनेति **पेचकः**। पचेः 'कृञादिभ्यः [संज्ञायां] वुन्'(उणा-७१३), पृषोदरादित्वादत एत्वम् । ७ दिवा अह्नि अन्धो **दिवान्धः**। सप्त घूकस्य ॥

**अथ निशावेदी कुक्कुटश्चरणायुधः ॥१३२४॥**
**कृकवाकुस्ताम्रचूडो विवृत्ताक्षः शिखण्डिकः ।**

१ निशां वेदयति ज्ञापयति **निशावेदी** । 'विद ज्ञाने'(अ.प.से.), णिजन्तः, ग्रहादित्वाण्णिनिः । २ कोकानां[६] क्षुद्रजन्तूनां कुक् । 'कुक वृक आदाने'(भ्वा.आ.से.), सम्पदादित्वात् क्विप् । कुटतीति कुटः । 'इगुपध-'३।१।१३५॥इति कः । कुका कुटः **कुक्कुटः**, द्विककारसंयोगमध्यः । 'कर्तृकरणे कृता बहुलम्'२।१।३२॥इति समासः। पादैः कुं पृथिवीं कुटतीति । इगुपधत्वात् के पृषोदरादिर्वा । ३ चरणावेवाऽऽयुधमस्य **चरणायुधः**, पादयोधित्वात् ॥१३२४॥ ४ कृकेण शिरोग्रीवेण कृकमव्यक्तं वा वक्ति **कृकवाकुः** । 'कृके वचः[७] कश्च'(उणा-६)इत्युण् । ५ ताम्रा चूडाऽस्य **ताम्रचूडः** । ६ विवृत्तेऽक्षिणी अस्य **विवृत्ताक्षः** । 'बहुव्रीहौ सक्थ्यक्ष्णोः-'५।४।११३॥ इति षच् । ७ शिखण्डोऽस्त्यस्य **शिखण्डिकः** । 'अत इनिठनौ'५।२।११५॥ । सप्त कुक्कुटस्य । शेषश्चात्र–

''कुक्कुटे तु दीर्घनादश्चर्मचूडो नखायुधः ।
मयूरचटकः शौण्डो रणेच्छुश्च[८] कलाधिकः ॥१॥
आरणी विष्किरो[९] बोधिर्नन्दीकः पुष्टिवर्धनः[१०] ।
चित्रवाजो[११] महायोगी स्वस्तिको मणिकण्ठकः ॥२॥
उषाकीलो विशोकश्च व्राजस्तु ग्रामकुक्कुटः[१२] ॥''
[शेषनाममाला ४।१९१-१९३॥]॥

**हंसाश्चक्राङ्ग-वक्राङ्ग-मानसौकः-सितच्छदाः ॥१३२५॥**

१ घ्नन्ति वर्षासु मानसं गच्छन्ति **हंसाः** । 'हन् (हन) हिंसागत्योः'(अ.प.अ.), 'वृ(वॄ)तृवदिहनिकमि-'(उणा-३४२)इत्यादिना सः । २ चक्राकारमङ्गमेषां वृत्त[१३]त्वात् **चक्राङ्गः** । ''चक्रस्येवाऽङ्गानि वृत्तत्वादिनाऽस्य चक्राङ्गः''[ ]इति स्वीकारात् । ३ वक्रमङ्गमेषां **वक्राङ्गः**[१४] । ४ मानसाख्यं[१५] देवसर ओको गृहमेषां **मानसौकसः** । ५ सिताः श्वेताश्छदा एषां **सितच्छदाः** । चतुर्भिर्द्वन्द्वः । पञ्च सामान्येन हंसस्य । 'मरालाः'[शेषनाममाला४।१९३॥]इति शैषिकम् ॥१३२५॥

**राजहंसास्त्वमी चञ्चुचरणैरतिलोहितैः ।**

१ अमी हंसा अतिलोहितैरत्यन्तरक्तैश्चञ्चुचरणैर्मुखपादैः 'राजहंसाः' उच्यन्ते । जातिश्रेष्ठत्वाद् हंसानां राजानो **राजहंसाः** । राजदन्तादित्वात् परनिपातः । चञ्चुसहितैश्चरणैरिति समासः ॥

**मल्लिकाक्षास्तु मलिनैः**[१६]

---

१. 'भृमृशीतृचरित्सरितनिधनिमिमस्जिभ्य उः'(उणा-७)इत्युः, न्यङ्क्वादित्वात् कुत्वम्, जश्त्वेन सकारस्य दत्वमित्यपि बोध्यम् ॥ २. 'घुङ् कुङ् उङ् शब्दे' इति स्वामी, 'घुङ् कुङ् उङ ङुङ् शब्दे' इति मैत्रेयसायणौ ॥ ३. 'प्रयोजनम्' इत्येवाऽष्टाध्याय्याम ॥ ४. अम.क्षीरस्वामिटीकायाम्-''उलति नेत्राभ्यां वहत्युलूकः । ऊर्ध्वोल्लोकनादिति निरुक्तम्'' इति दृश्यते, २।५।१५॥, पृ.१२७॥, द्र. पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२३०, पृ.२९६॥ ५. द्र. पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२३०, पृ.२९६॥ ६. '-कनं' इति१.२॥ ७. '-र्व-' इति४.५॥ ८. '-च्छश्च' इति४॥ ९. '-ष्करो' इति३॥ १०. 'पृ-' इति३॥ ११. '-जी' इति३, '-जे' इति५॥ १२. '-क्कटः' इति५॥ १३. 'वृत-' इति३॥ १४. '-ङ्गीः' इति३॥ १५. '-सोख्यं' इति३॥ १६. '-ख्या-' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ चञ्चुचरणैरित्यधिकारः, मल्लिकाकारेऽक्षिणी एषां **मल्लिकाक्षाः** । शुक्लापाङ्गत्वात् । 'बहुव्रीहौ-'५।४।११३॥ इति षच् ॥

**धार्तराष्ट्राः सितेतरैः ॥१३२६॥**

१ कृष्णैश्चञ्चुचरणैः, धृतराष्ट्रेऽमात्ये भवा **धार्तराष्ट्राः**। धृतराष्ट्रा एव वा । प्रज्ञादित्वादण् । राजहंसेभ्यो न्यूनत्वात् ॥१३२६॥

**कादम्बास्तु कलहंसाः पक्षैः स्युरतिधूसरैः ।**

१ कन्दन्ते[१] प्रावृषि [२]विक्लवन्ते **कादम्बाः** । 'कदि वैक्लव्ये[३]'(भ्वा.आ.से.), सौत्रः, 'कदेर्णिद्वा[४]' (हैमोणा-३२२)इत्यम्बः । कदम्बस्य मेघस्येमे वा मेघसञ्चारित्वात् । २ कलध्वनयोर्हंसाः **कलहंसाः** । धूसरशब्देनेषत्पाण्डुवर्णः । ''पक्षैराधूसरैर्हंसाः कलहंसा इति स्मृताः''[हलायुधकोशः२।२५३॥]इति हलायुधः ॥

**वारला वरला[५] हंसी वारटा वरटा च सा ॥१३२७॥**

१ व्रियते **वारला** । 'वृञ् वरणे'(स्वा.उ.से.), 'मुरल-'(हैमोणा-४७४)इत्युले (इत्यले) निपात्यते । वाः पानीयमलतीति वा । 'अलञ्[६] भूषणादौ'(भ्वा.प.से.), अच् । २ वरं लाति **वरला** । ३ हंसस्य स्त्री **हंसी** । ४ वारि सलिलेऽटति **वारटा** । 'अट गतौ'(भ्वा.प.से.), पचाद्यच् । ५ वृणीते सरः सेवते[७] **वरटा** । 'वृङ् सम्भक्तौ' (क्र्या.आ.से.), 'शकादिभ्योऽटन्'(उणा-५२१) । ''गौरादौ जयादित्येन वरटाशब्दः पठितः, ततो ङीषि वरटी च'' [ ]इति माधवः[८] । पंच हंसस्त्रियाः ॥१३२७॥

**दार्वाघाटः शतपत्रः**

१ दारु आहन्ति **दार्वाघाटः** । 'हन हिंसागत्योः' (अ.प.अ.), 'कर्मण्यण्'३।२।१॥, पृषोदरादित्वाट्टत्वम् । ''दार्वाहनोऽणन्तस्य (दारावाहनोऽणन्तस्य) च टः संज्ञायाम्' (वा-३।२।४९॥)इत्याङ्पूर्वाद्धन्तेः कर्तर्यण्, नस्य च टः[९]'' [मा. धातुवृत्तिः, अदादिः, धातुसं-२]इति माधवः । दारु आघटते वा । 'घट चेष्टायाम्'(भ्वा.आ.से.), 'कर्मण्यण्' ३।२।१॥ । २ शतं बहूनि पत्राणि पक्षा अस्य **शतपत्रः**।

''दार्वाघाटः पुष्कराह्वः[१०] कुर्कर[११]श्चित्रकन्धरः ।
दीर्घचञ्चुशिराः काष्ठकुट्टकः शतपत्रकः ॥१॥''

[ ] । ''सू[१२]खोटाकाठकूट'' इति पथ्यापथ्ये भाषान्तरम्[१३] । सूतारि[१४]यानाम्नी द्वे ॥

**खञ्जरीटस्तु खञ्जनः[१५] ।**

१ खञ्जन्नटति **खञ्जरीटः** । 'खडि गतिवैकल्ये' (भ्वा.प.से.), पृषोदरादिः । २ नन्द्यादित्वाल्ल्यौ **खञ्जनः** । गंगेटीयानाम्नी द्वे ॥

**सारसस्तु लक्ष्मणः स्यात् पुष्कराख्यः कुरङ्करः ॥१३२८॥**

१ सरति **सारसः** । 'सृ गतौ'(भ्वा.प.अ.), 'सर्त्तेर्णित्'(उणा- )इत्यसच् । सरसि भवो वा । 'तत्र भवः'४।२।५३॥ इत्यण् । २ लक्ष्मीरस्याऽस्ति **लक्ष्मणः**। धनिनामसु (अभि-श्लो-३५७) । ३ पुष्करस्य पद्मस्याऽऽख्याऽस्य **पुष्कराख्यः** । ४ कुरमिति शब्दं करोति **कुरङ्करः** । चत्वारि सारसस्य । शेषश्चात्र-

''सारसे दीर्घजानुकः ।
गोनर्दो मैथुनी कामी श्येनाक्षो[१६] रक्तमस्तकः ॥''

[शेषनाममाला४।१९४॥] ॥१३२८॥

**सारसी लक्ष्मणा**

१ सारसस्य स्त्री **सारसी** । २ लक्ष्मीरस्त्या[१७]ऽस्ति **लक्ष्मणा** । 'लक्ष्म मुट् च(लक्ष्म्या अच्च)' (गणसू-५।२।१०॥)इति नप्रत्ययोऽकारश्चाऽन्तादेशो णत्वं च । लक्ष्मणा मकारमध्या । ''[सारस्यां] लक्ष्मणा ना तु सौमित्रौ श्रीमति त्रिषु''[[१८]]इति रौद्रः[१९](रुद्रः)। निर्मकारोऽप्ययम्, ''लक्षणश्चैव सारसे''[[१८]]इत्यमरमालोक्तेः[१९] । ''महापुरुषमिव प्रकटमीनशङ्खलक्षणम्''[[१८]]इति कादम्बरीश्लेषश्च । ''पुंयोगलक्षणे ङीषि लक्ष्मणी''[[१८]]इति स्वाम्यादयः । द्वे सारस्याः ॥

---

१. 'कद-' इति१.४.५॥ २. 'क्ल-' इति४.५॥ ३. 'कदि क्रदि क्लदि वैक्लव्ये' इति स्वामिसायणौ, 'कदि क्रदि क्रद क्लद वैक्लव्ये' इति मैत्रेयः॥ ४ 'कदेर्णित पक्षिणि'(उणा-५२३)इति पाणिनीयसम्मतोणादिगणसूत्रम् ॥ ५. 'व-' इति४.५॥ ६. अकारानुबन्धो विचारणीयः ॥ ७. '-न्ते' इति४.५॥ ८. द्र. पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२४०, पृ.३१०॥, तत्र 'माधवः' इत्यस्य स्थाने 'मधुमाधवी' इति दृश्यते ॥ ९. मा.धातुवृत्तौ- 'नग्य च टः' इत्यस्य स्थाने 'नकारस्य च टकारः' इति दृश्यते, पृ.३१५॥ १०. '-रोह्वः' इति२॥ ११. 'कुर्कु-' इति१.३॥ १२. 'सू-' इति३॥ १३. 'भाषा' इति३॥ १४ '-री-' इति५॥ १५. तुलनीयोऽमरकोषः२।५।१५॥ १६. '-ख्यो' इति१.२.४.५॥ १७ '-स्या-' इति४.५॥ १८. द्र. पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२४०, पृ.३१०॥ १९. रामाश्रमी२।५।२५॥, पृ.२५२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## अथ क्रुङ् क्रौंचे

१ क्रुञ्चति **क्रुङ्** । 'क्रुञ्च गतौ[1]'(भ्वा.प.से.), '-कौटिल्याल्पीभावयोः[2]'(भ्वा.प.से.)इत्यपरे, 'ऋत्विक्-' ३।२।५९॥ आदिना केवलात् क्विन्, 'क्रुञ्चे न्लोपाभावश्च निपात्यते'( )इत्युक्तेः 'अनिदिताम्-'६।४।२४॥ इति न्लोपो न भवति, क्विन्नन्तत्वात् कुत्वम् । २ प्रज्ञाद्यणि **क्रौञ्चः,** तत्र । व्यञ्जनान्तात् स्त्रियामजादित्वाट्टापि क्रुञ्चा । द्वे [3]क्रौञ्चस्य ॥

## चाषे किकीदिविः।

१ चष्यते भक्ष्यते श्येनेनेति **चाषः**। 'चष भक्षणे' (भ्वा.उ.से.), कर्मणि[4] घञ् । चाषयतीति, चषेर्ण्यन्तात् पचाद्यचि वा । तद्दर्शनेन बहुप्रशस्तलक्षणलाभात् ।

उक्तं च-

''यत्र यत्र कुरुश्रेष्ठ[5]! चापं दृष्ट्वा नमस्कुरु ।
न हि वैडूर्यवर्णस्य दर्शनं निष्फलं भवेत् ॥१॥''[6]इति।

'चासः' इति दन्त्यान्तोऽपि । ''इक्षुपक्षिभिदोश्चासः''[7]इति दन्त्यान्तेषु रभसः। २ किकीति शब्देन दीव्यति क्रीडति **किकीदिविः** । 'कृविपृवि(घृष्वि)छविस्थविकिकीदिविः' (उणा-४९६)इति निपातितः । किकीदिविरिति मध्यकवर्गाद्यस्य चतुर्थस्वरः, शेषास्तृतीयस्वरोपेताः । वोपालितस्तु ''किकिदिविसंज्ञश्चाषः''[ ]इति सर्वे तृतीयस्वरा इत्याह । रक्षितस्तु ''किकिपूर्वस्य दिवेरिकारस्य दीर्घं कृत्वा किकिदीविः''[ ]इत्याह । ''चाषो दिविः किकिः स्मृतः''[8]इति व्याडिः । ''द्वे नाम्नी''[9]इति स्वामी । नीलचं[10]सनाम्नी द्वे॥

## चातकः स्तोककको वप्पीहः सारङ्गो नभोम्बुपः ॥१३२९॥

१ चतते याचते मेघान् जलार्थमिति **चातकः** । 'चते[11] याचने'(भ्वा.प.से.), ण्वुल् । २ स्तोकमल्पं कं जलमपेक्षत्वेन यस्याऽस्ति स **स्तोककः** । अर्शआदित्वादच् । स्तोकं कायति वाश्यते[12] वा । 'कै शब्दे'(भ्वा. प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥ । ३ नभोऽम्बुपानाद्[13] वाः पानीयमीहते[14] **वप्पीहः** । पृषोदरादित्वात् । ४ सरति ऊर्ध्वं गच्छति **सारङ्गः** । सर्तेरङ्गच्, स च णित् । सह आरङ्गति वा, यूथचारित्वात् । ''दन्त्यादिरयम्''[15]इति स्वामी[16] । ''चातके हरणे पुंसि सारङ्गः शबले त्रिषु''[16]इति[17] दन्त्यादौ रभसात् । अथ[18] शारयति हिंसयत्यातपादिना आत्मानमिति शारङ्गः । 'शृ हिंसायाम्'(क्र्या.प.से.), णिजन्तादस्मात् 'शारेरङ्गच्'( )इत्यङ्गच्, तालव्यादिरपि । ''शारङ्गश्चातके ख्यातः शबले हरिणेऽपि च''[19]इति तालव्यादावजयात् । ५ नभस्यम्बु पिबति **नभोम्बुपः** । पञ्च बप्पीहस्य ॥१३२९॥

## चक्रवाको रथाङ्गाह्वः कोको द्वन्द्वचरोऽपि च ।

१ चकति चक्रः । 'चक तृप्तौ'(भ्वा.आ.से.), 'स्फायितञ्चि-'(उणा-१७०)इत्यादिना रक् । क्रियते निशया[20] वियोगी इति । घञर्थे कः, 'के कृञादीनां द्वे च'(वा-६।१।१२॥)इति द्वित्वे चक्र इति वा[21] । चक्रेण चक्रशब्देनोच्यते, कर्मणि घञ् **चक्रवाकः** । २ रथाङ्गं चक्रम्, तस्याऽऽह्वा नामाऽस्य **रथाङ्गाह्वः**। तेन रथाङ्गः, चक्र इत्यादि। ३ कवते वाशते **कोकः** । 'कुङ् शब्दे'(भ्वा.आ.अ.), बाहुलकात् कः । कोकते विच्छेदमादत्त इति वा । 'कुक वृक आदाने'(भ्वा.आ.से.), अच् । ४ द्वन्द्वेन मिथुनेन चरति **द्वन्द्वचरः** । चत्वारि चक्रवाकस्य ॥

## टिट्टिभस्तु कटुक्काण उत्पादशयनश्च सः ॥१३३०॥

१ टेकते **टिट्टिभः** । 'टिकि[22](टिक्) गतौ[23]'(भ्वा. आ.से.), '[24]सिटिकिभ्याम्-'(उणा-३३२)इतीभः, [25]टिकः टिट्टादेशश्च। टिट्टीति भाषते वा । भाषेः 'अन्येभ्योऽपि-' ३।२।१०१॥ इति डः । २ कटुः क्काणोऽस्य **कटुक्काणः**, ककारवकारसंयोगमध्यः । ३ उत्पादं शेते **उत्पादशयनः** । नन्द्यादित्वाल्ल्युः । टींटोडीनामानि त्रीणि ॥१३३०॥

---

१. स्वामिसम्मतोऽयं धातुपाठः ॥ २. मैत्रेयसायणसम्मतोऽयं पाठः, 'गतिकौटि-' इति स्वामी ॥ ३. 'क्रुं-' इति३॥ ४ '-ण्यणि' इति३॥ ५ '-क्षेत्रं' इति३॥ ६ द्र. पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२३१, पृ.२९८॥ ७ द्र. रामाश्रमी२।५।१६॥, पृ.२४७॥ ८ द्र. टीकासर्वस्वम्, भा-२, २।५।१६॥, पृ.२३०॥ ९ अम.क्षीरस्वामिटीकायाम्-'द्वे नामनी इत्येके' इति दृश्यते, २।५।१६॥, पृ.१२७॥, द्र. स्वोपज्ञटीका४।१३१९॥, पृ.२९७॥ १०. '-चां-' इति३.५॥ ११. '-त' इति१.३॥ १२. १प्रतौ नास्ति ॥ १३. 'न्' इति३॥ १४. इतोऽग्रे १प्रतौ 'वा' इति दृश्यते ॥ १५. अम.क्षीर. न दृश्यते ॥ १६. द्र. पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२३२, पृ.२९९॥ १७. द्र. रामाश्रमी२।५।१७॥, पृ.२४८॥ १८. 'अथवा' इति३॥ १९. द्र. पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो २३२, पृ.२९९॥, रामाश्रमी२।५।१७॥, पृ.२४८॥ २०. '-शाया' इति१॥ २१. ३प्रतौ नास्ति ॥ २२. '-क' इति३॥ २३. ककीत्यादिदण्डान्मकोऽयं धातुः ॥ २४. 'सिटिटिकि-' इति१.२.३.५॥ २५. 'टिः' इति१.२.४.५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**चटको गृहबलिभुक् कलविङ्कः कुलिङ्ककः ।**

१ चटति भिनत्ति धान्यादिकं **चटकः** । 'चट भेदने'(भ्वा.प.से.), 'क्वुन् शिल्पिसंज्ञयोः'(उणा-१९०)इति क्वुन् । २ गृहबलि भुङ्क्ते **गृहबलिभुक्** । 'भुज पालनादौ' (रु.प.अ.), सम्पदादित्वात् क्विप् । ३ इन्वति प्रीणयति । 'इवि[1] प्रीणने'[2](भ्वा.प.से.), 'कृदाधारार्चिकलिभ्यः कः' (उणा-३२०)इति बाहुलकादतोऽपि के, पृषोदरादित्वा-दाद्यन्तवर्णविपर्यये इदित्वान्नुमि विङ्कः । कलेनाऽव्यक्त-मधुरध्वनेन[3] विङ्कः **कलविङ्कः** । ४ कोलति कुलिङ्कः[4] । 'कुल संस्त्याने'[5](भ्वा.प.से.), 'कुलचरि(चिरि)भ्यामिङ्कक्' (हैमोणा-६४), स्वार्थे कनि **कुलिङ्ककः** । कुलिङ्गोऽपि । चत्वारि चटकस्य ॥

**योषित्तु तस्य चटका**

१ तस्य चटकस्य योषित् **चटका** । अजादित्वा-ट्टाप्, क्षिपकादित्वादित्वाभावः । चिडीनाम एकम् ॥

**स्त्र्यपत्ये चटका तयोः ॥१३३१॥**

१ तयोर्द्वयोः स्त्रीलक्षणेऽपत्ये वाच्ये, स्त्री च तदपत्यं चेति स्त्र्यपत्यम्, तत्र । चटकायाश्चटकस्य वा स्त्र्यपत्यं **चटका** । [ऐरक्प्रत्ययः], 'स्त्रियामपत्ये लुग् वाच्यः'(वा-४।१।२८॥)इत्यैरको लुक्, 'लुक् तद्धितलुकि' १।२।४९॥इति टापो निवृत्तौ स्त्रीत्वात् पुनष्टाप् ॥१३३१॥

**पुमपत्ये चाटकैरः**

१ चटकायाश्चटकस्य वा पुंलक्षणेऽपत्येऽभिधेये **चाटकैरः** । 'चटकाया ऐरक्'४।१।१२८॥ ।

**दात्यूहे कालकण्टकः ।**

**जलरङ्कुर्जलरङ्कः**

१ 'दाप् लवने'(अ.प.अ.), क्तिच्, दातिः । [दातिं] छेदमूहतेऽत्यभ्यस्यति **दात्यूहः** । 'ऊह वितर्के' (भ्वा.आ.से.), 'कर्मण्यण्'३।२।१॥ । अस्य हि ध्वनावन्तरान्तराविच्छेदरूपखण्डनात् । 'दा' इति शब्दमत्यूहतेऽत्यभ्यस्यतीति दात्यूहो वा । षष्ठस्वरमध्योऽयम् । "दात्यूहः कणति क्वणत्यविरतं श्वेतच्छदानां गणः"[ ]इति हलायुधकाव्यम् । "दात्यूहो जलरङ्कुः, 'दाउड[6]' इति गौड-देशे प्रसिद्धः"[ ]इति तट्टीका । "दित्यवाहोऽपत्यमित्यणि, 'देविका-'७।३।१॥ आदिनाऽऽत्वे वाह ऊठि 'एत्येध-त्यूठ्सु'६।१।८९॥ इति वृद्धौ दात्यौहः"[7]इति स्वामी, तत्र । २ कालाः कण्टका रोमोद्भेदा अस्य **कालकण्टकः** । काले वर्षाकाले कण्ठो ध्वनिरस्य कालकण्ठः" [8]इत्यन्ये । "कण्ठः स्वरेऽन्तिके गले"[9]इति रुद्रः । कल एव कालः । स्वार्थेऽण् । कालोऽव्यक्तमधुरध्वनिः कण्ठेऽस्येति वा ।

"नील(काल)कण्ठस्तु दात्यूहे कलविङ्के च खञ्जने ।
सितापाङ्गे हरे पीत(पीते) सारके नीलकण्ठवत् ॥१॥"

[विश्वप्रकाशकोशः, ठान्तवर्गः, श्लो-१९]इति महेश्वरः । ३ जले रमते **जलरङ्कुः** । 'रमु क्रीडायाम्'(भ्वा.आ.अ.), कुप्रत्ययः । "यदुपनगरस्रोतस्विन्यां रते मदकामिनी मणि-तमधुरं क्नूयन्ते च क्वचिज्जलरङ्कवः"[ ]इति हलायुध-काव्यम् । "'क्नूयी शब्दे'(भ्वा.आ.से.), भ्वादौ, जल-काका मधुरं ध्वनन्ति"[ ]इति तट्टीका । "जलरङ्कुः स्कन्धकाको दात्यूहः[10] कालकण्ठकः"[ ]इति उडाउवा" [ ]इति पथ्यापथ्ये भाषा । ४ जलेन रज्यते[11] **जलरङ्कः** । अच् । चत्वारि कालकण्ठस्य ॥

**वके कह्वो वकोटवत् ॥१३३२॥**

१ वक्तीति **वकः** । 'वच परिभाषणे'(अ.प.अ.), पचाद्यच्, न्यङ्क्वादित्वात् कुत्वम् । ककतीति वा । 'कक लौल्ये[12]'(स्वा.आ.से.), पचाद्यच्, पृषोदरादित्वात् कस्य वः, तत्र । २ 'के' इति शब्दम्, के जले वा ह्वयते शब्दायते **कह्वः** । 'ह्वेञ् स्पर्धायां शब्दे च'(भ्वा. उ.अ.)इति धातोः 'आतोऽनुपसर्गे कः'३।२।३॥ इति के, आलोपः । ३ वक्तीति **वकोटः** । 'कपोटवकोट-'(हैमोणा-१६१)इति निपात्यते । वकोट इवेति वकोटवत् । अस्य

१. '-व' इति३॥ २. इविजीवीति दण्डात्मकोऽयं धातुपाठः स्वामिसम्मतः ॥ ३. 'ध्वानेन' इति१, 'ध्वातेन' इति२॥ ४. 'कुलविङ्कः' इति१॥ ५. 'कुल संस्त्याने ('सन्ताने' इति मैत्रेयः) बन्धुषु च' इति क्षीरतरङ्गिण्यादयः ॥ ६. '-डओ' इति१॥ ७. अम.क्षीरस्वामिकृतटीकायाम्- "द्वितीयं तृतीयं वा रूपं वहति दित्यवाट्, तस्यापत्यं दात्यूहः, देविकाशिंशपेत्यात्वम्(७।३।१॥) ।" इति दृश्यते, २।५।२२॥, पृ.१२८॥ ८. द्र. पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२३६, पृ.३०४॥ ९. द्र. रामाश्रमी२।५।२१॥, पृ.२५०॥ १०. '-हाः' इति५॥ ११. 'रज्ज्यति' इति१, 'रज्यति' इति२॥ १२. 'कौटिल्ये' इति१.२.३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रसिद्धिं विवक्षितत्वोपमानमुक्तम् । यथा वकोटशब्दो वकवाचकः, तथा वककह्वावपीत्यर्थः । त्रीणि वकस्य ॥

''दीर्घजङ्घोऽतिशौण्डः स्याद् वकोटः शुक्लवायसः ।
कङ्केरुर्दारुबलिभुक् शिखी चन्द्रविहङ्गमः ॥१॥''

[त्रिकाण्डशेषः२।५।२३॥]इत्यादयो ग्रन्थान्तरोक्ता इहैव ज्ञेयाः ॥१३३२॥

## बलाहकः स्याद् बलाकः

१ वलति **बलाहकः** । 'वल संवरणे[1]'(भ्वा.आ.से.), 'बलिबिलि-'(हैमोणा-८१)इत्याहकः। २ वलति **बलाकः**[2] । 'वल वल्ल संवरणे[1]'(भ्वा.आ.से.), 'बलाकादयश्च'(उणा-४५४)इत्याकन्नन्तो निपातितः । पुंस्ययम्, यद्वाचस्पतिः-''बलाकस्तु बलाहकः''[[4]] । ''पुंध्वजेऽपि स्त्रीलिङ्ग एवाऽयम्''[[4]]इति लिङ्गानुशासनकृतः। द्वे बलाहकपक्षिणः, बकविशेषोऽयम् ॥

## बलाका विसकण्ठिका ।

१ बलेन शक्त्या दूरमूर्ध्वमकति **बलाका**। 'अक अग कुटिलायां गतौ'(भ्वा.प.से.), अच्। 'वल वल्ल संवरणे[3]'(भ्वा.आ.से.), 'बलाकादयश्च'(उणा-४५४)इत्याकनि वा । आविष्टलिङ्गत्वात् पुंसि स्त्रियां च बलाका । २ विसं मृणालमिव कण्ठोऽस्याः[7] **विसकण्ठिका**[8] । जातिलक्षणं ङीषं बाधित्वा टाप्, अजादित्वाद् वा, ततः स्वार्थे कनि 'प्रत्ययस्थात्-'७।३।४४॥ इतीत्वम् । ''[9]विसकण्टिका''[[4]]इत्यन्ये । बकेरुकाऽपि । द्वे बकपत्न्याः ॥

## भृङ्गः कलिङ्गो धूम्याटः

१ बिभर्ति कलां **भृङ्गः** । 'भृञो गन् नुक् च[10]' (उणा-१२२)इति गन्नुकौ । २ के मूर्ध्नि लिङ्गं चूडारूपं चिह्नमस्य **कलिङ्गः** । कलिलं गहनं गच्छतीति, पृषोदरादिर्वा । कलिं कलहं गच्छतीति वा । स हि गच्छतां केशान् लुञ्चति । ३ धूम्या धूमसमूहः । 'पाशादिभ्यो यः' ४।२।४९॥ । तामटति **धूम्याटः** । 'कर्मण्यण्'३।२।१॥ । ''धूम्या स्याद् धूमसंहतिः''[हलायुधकोशः१।६६॥]इति हलायुधः । त्रीणि धूम्याटस्य ॥

## कङ्कस्तु कमनच्छदः ॥१३३३॥
## लोहपृष्ठो दीर्घपादः कर्कटः स्कन्धमल्लकः ।

१ कङ्कते गच्छति **कङ्कः** । ककिवकीत्यादिना गत्यर्थः, 'ककि लौल्ये'(भ्वा.आ.से.) वा, पचाद्यच् । २ कमनः कान्तश्छदोऽस्य **कमनच्छदः** ॥१३३३॥ ३ दृढत्वाद् लोहवर्णत्वाद् वा लोहपृष्ठमिव पृष्ठमस्य **लोहपृष्ठः** । ४ दीर्घौ[11] पादावस्य **दीर्घपादः** । ५ कर्कति **कर्कटः**। कर्कि[12] सौत्रः[13], 'शकादिभ्योऽटन्'(उणा-५२१)। ६ स्कन्धेन मल्लः समर्थः स्कन्धमल्लः । स्वार्थे कनि **स्कन्धमल्लकः** । षट् कङ्कपक्षिणः ॥

## चिल्लः शकुनिरातापी

१ चिल्लति वातेन शिथिलीभवति **चिल्लः** । 'चिल्ल शैथिल्ये हावकरणे च[14]'(भ्वा.प.से.), 'इगुपध-' ३।१।१३५॥ इति कः[15] । २ शक्नोति[16] **शकुनिः** । पक्षिनामसु (अभि-,श्लो-१३१६) । ३ आतपति **आतापी** । ग्रहादित्वाण्णिनिः[17] । मिश्रास्तु-''आतायते संतनोति पालयति वा पक्षप्रसारणेनाऽऽत्मानमिति । 'तायृ सन्तापनपालनयोः'(भ्वा.आ.से.), आवश्यके णिनिरातायी''[पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-?३६]इति पठन्ति स्वमते । ''त्रयः पुंसि''[ ]इति हलायुधटीका[18] तु चिल्लः, स्त्रीभ्रोः(?) चिल्ला, आतापिरिदन्तोऽपि, स्त्रियां ङीषि आतापी, शकुनिका च चिल्ली च, सर्वेऽपि स्त्रीलिङ्गाः'' [ ]इत्यन्ये। चील्हनामानि त्रीणि ॥

## श्येनः पत्री शशादनः ॥१३३४॥

१ [19]श्यायते पक्षिघातायाऽत्यर्थं गच्छति **श्येनः**। 'श्यैङ् गतौ'(भ्वा.आ.अ.), 'श्यास्त्यात्(हृ)विभ्य इनच्'

---

१. स्वामिमतेऽयं पाठः, 'वल वल्ल संवरणे' इति मैत्रेयः, 'वल वल्ल सञ्चरणे च' इति सायणः ॥ २. '-हकः' इति१.४.५॥ ३. मैत्रेयसम्मतोऽयं धातुपाठः ४. द्र. स्वोपज्ञटीका४।१३३३॥, पृ.२९८॥ ५. 'विश-' इति१.३॥ ६. तुलनीयोऽमरकोषः२।५।२५॥ ७. '-स्य' इति३.४.५॥ ८. '-कण्ठा' इति१.२.३॥ ९. 'विश-' इति३॥ १०. 'भृञः किन्नुट् च' इत्युणादिगणसूत्रम् ॥ ११. '-र्घे-' इति१.३॥ १२. '-र्कि-' इति१, '-र्कः' इति३॥ १३. इतोऽग्रे ३प्रतौ 'धातुः' इति दृश्यते ॥ १४. 'चिल्ल शैथिल्ये' इति स्वामी, 'चिल्ल शैथिल्ये भावकरणे च' मैत्रेयसायणौ ॥ १५. इगुपधत्वाभावादिदं विचारणीयम्, अथ च पचाद्यच् ॥ १६. इतोऽग्रे १प्रतौ 'वा' इति दृश्यते ॥ १७. '-नि' इति३॥ १८. '-यां' इति१॥ १९. 'शा-' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(उणा-२०४) । २ पत्रं पक्षस्तद्योगात् **पत्री** । प्रशंसायामिनिः। पत्री सामान्योऽपि विशेषे वर्तते । यच्छाश्वतः-"श्येनाख्यो विहगः पत्री पत्रिणौ शरपक्षिणौ"[शाश्वतकोशः, श्लो-२२३]इति । ३ शशमत्ति **शशादनः** । 'अद भक्षणे'(अ.प.अ.), नन्द्यादित्वाल्ल्युः। 'कर्तरि ल्युट्(कृत्यल्युटः)-'३।३।११३॥ इति कर्तरि ल्युड् वा । सींचाणानामानि त्रीणि ॥१३३४॥

## दाक्षाय्यो दूरदृग् गृध्रः

१ दक्षते विशेषेण वर्धते, शीघ्रो भवति **दाक्षाय्यः** । 'दक्ष [वृद्धौ] शीघ्रार्थे च'(भ्वा.आ.से.), 'श्रुदक्षिस्पृहिगृहि-'(उणा-३७६)इत्याय्यः, 'प्रज्ञादिभ्यश्च'५।४।३८॥ इत्यण् । २ दूरात् पश्यति **दूरदृक्** । दृशेः क्विप्[1] । ३ गर्धते (गृध्यति) अभिकाङ्क्षति मांसादिकमिति **गृध्रः** । 'गृधु अभिकाङ्क्षायाम्'(दि.प.से.), 'सुसूधाञ्(धा)गृधिभ्यः क्रन्'(उणा-१८२)। "'स्फायितञ्चि-'(उणा-१७०) इत्यादिना रक्"[ ]इत्यन्ये । "गृध्रः सुदृष्टिः शकुनी वक्रचञ्चुश्च दूरदृक्"[ ]इति मदनपालः । त्रीणि गृध्रस्य । शेषश्चात्र-

"गृध्रे तु पुरुषव्याघ्रः कामायुः कूणितेक्षणः ।
सुदर्शनः शकुन्याजौ"[शेषनाममाला४।१९५॥] ॥

## अथोत्क्रोशो मत्स्यनाशनः ।
## कुररः

१ उत्क्राशति उच्चमुच्चैर्वा क्रोशति **उत्क्रोशः** । 'क्रुश आह्वाने[3]'(भ्वा.प.से.), पचाद्यच् । २ मत्स्यान् नाशयति **मत्स्यनाशनः** । णशेर्णिजन्तान्नन्द्यादित्वाल्ल्युः । ३ 'कुर' इति शब्दं राति **कुररः** । 'रा दाने'(अ.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥ । यद्वा कुरति करुणध्वनिना धैर्यं छिनत्ति कुररः । 'कुर छेदने'(तु.प.से.), बाहुलकादरक् । स्त्रियां कुररी । "उत्क्रोशः कुररो[4] मतः"[हलायुधकोशः२।२४९॥]इति हलायुधः । त्रीणि उत्क्रोशस्य ॥

## कीरस्तु शुको रक्ततुण्डः फलादनः ॥१३३५॥

१ कीति शब्दमीरयति **कीरः** । 'ईर प्रेरणे'(चु.उ.से.), 'इगुपध-'३।१।१३५॥ इति कः । यद्वा[5] कीति शब्दं रायति कीरः । 'रै शब्दे'(भ्वा.प.अ.), 'सुपि स्थः' ३।२।४॥ इत्यत्र सुपीति योगविभागात् कः[6] । २ शोकति गच्छति **शुकः** । 'शुक गतौ'(भ्वा.प.से.), 'इगुपध-' ३।१।१३५॥ इति कः । शोभत इति शुको वा । 'शुभ दीप्तौ'(भ्वा.आ.से.), 'शुकवल्कोल्काः'(उणा-३२२)इति कक्प्रत्ययेऽन्त्यलोपे[7] चौणादौ शुक इति निपातनात् । माधवस्तु शुकशब्दं 'शुभ दीप्तौ'(भ्वा.आ.से.)इत्यस्यैव[8] निपातं मन्यते, तथाहि-"यदि 'शुक गतौ'(भ्वा.प.से.)इत्ययं धातुरार्षस्तदा शुके रग्विधानेनाऽपि शुकशब्दसिद्धे[9] 'ऋज्रेन्द्रा-'(उणा-१८६)आदिसूत्रे शुचेर्निपातमनमर्थकं स्यादित्यस्य धातोः पाठोऽनार्ष इतीव प्रतीयते"[10][ ]इत्याह । ३ रक्तं तुण्डं चञ्चुरस्य **रक्ततुण्डः**। ४ फलान्यत्ति **फलादनः**। नन्द्यादित्वाल्ल्युः । मेधाव्यपि । चत्वारि शुकस्य। शेषश्चात्र-"शुके तु प्रियदर्शनः, श्रीमान् मेधातिथिर्वाग्मी[11]" [शेषनाममाला४।१९५-१९६॥] ॥१३३५॥

## शारिका तु पीतपादा गोराटी गोकिराटिका ।

१ शृणाति फलं **शारिका** । 'शॄ हिंसायाम्'(क्र्या.प.से.), ण्वुल्, टाप्, 'प्रत्ययस्थात्-'७।३।४४॥ इतीत्वम् । २ पीतौ पादावस्याः[12] **पीतपादा** । ३ गां रटति **गोराटी** । 'रट शब्दे'(भ्वा.प.से.), 'कर्मण्यण्'३।२।१॥, गौरादित्वाद् ङीष् । ४ गां किरति गोकिराटी[13] । पृषोदरादिः, ततः स्वार्थे कनि, 'केऽणः'७।४।१३॥ इति ह्रस्वत्वम्, [**गोकिराटिका**] । चत्वारि शारिकायाः । 'सारो[14]'इति भाषा॥

## स्याच्चर्मचटकायां तु जतुकाऽजिनपत्रिका ॥१३३६॥

१ चर्ममयी चटका **चर्मचटका,** निर्लोमत्वात्, तत्र। २ आश्रये दृढश्लेषात् कृष्णपिङ्गलत्वाच्च जत्विवेति

१. '-ते' इति१॥ २. द्र. पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२३६, पृ.३०५॥ ३. '-आह्वाने रोदने च' इति क्षीरतरङ्गिण्यादयः ॥ ४. 'कुरु-' इति४.५॥ ५. इतोऽग्रे १.३.४.५प्रतिषु 'रै शब्दे' इति दृश्यते ॥ ६. इतोऽग्रे ३प्रतौ 'वा' इति दृश्यते ॥ ७. '-न्त-' इति३॥ ८. '-वं' इति१॥ ९. 'प्रसिद्धे' इति३॥ १०. 'तकि कृच्छ्रजीवने'(भ्वादिः, धातुसं-८६)इत्यत्र सायणेन-"अस्यानन्तरं मैत्रेयः शुक गताविति पठित्वा 'शोकति शुकः शुक्र' इत्युदाजहार, अस्मिन् हि सति 'शुकवल्कोल्काः' इति शुभेः कनि भलोपे शुकशब्दनिपातनमनर्थकं स्यात्, इगुपधलक्षणेन कप्रत्ययेनैव सिद्धत्वात् । तथा शुके रग्विधानेनाऽपि शुक्रशब्दसिद्धे 'ऋज्रेन्द्र' इत्यादौ शुचेर्निपातनमनर्थकं स्यादित्यस्य पाठोऽनार्ष इव प्रतीयते" इत्युक्तम्, पृ.८१॥ ११. 'मेधाविर्वा-' इति४.५॥ १२. '-स्य' इति१.४.५॥ १३. '-टीः' इति४॥ १४. '-रौ' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**जतुका** । 'इवे प्रतिकृतौ'५।३।९६॥ इति कः । "रामवै (रामठे) जतुकं[1] चर्मपत्राजतुकृतोः[2] स्त्रियाम्"[ ]इति चवर्गतृतीयादौ रभसाच्चवर्गतृतीयादिः । जतूका दीर्घ-मध्याऽपि । "निशाशश्वद्व्यापिस्थितघनजतूकापटलकम्" [ ]इति[3] पूर्वकविप्रयोगात्। ३ अजिनं[3] पत्त्रं पक्षोऽस्याऽस्ति[4] **अजिनपत्त्रिका** । त्रीणि चमचेडीति[5] ख्याताया: ॥१३३६॥

## वल्गुलिका मुखविष्टा परोष्णी तैलपायिका ।

१ वल्गु लाति वल्गुली, के **वल्गुलिका**[6] । २ मुखेन विष्टा अस्य **मुखविष्टा** । ३ परः शत्रुरुष्णः स्पर्शोऽस्यास्ततो विद्रवात् **परोष्णी** । 'जातेः-'४।१।६३॥ इति ङीष् । ४ तैलं पिबति **तैलपायिका** । 'पा पाने' (भ्वा.प.अ.), ण्वुल् । 'आतो युक्-'७।३।२३॥ । संज्ञा-शब्दानां यथाकथञ्चिद् व्युत्पत्तिः कार्या ॥

"तनुक्रमिस्त्विन्द्रगोपः परोष्णी तैलपायिका ।
तैलाभ्यक्त(-क्ता) खलाधारा हीरा पिप्पलिका स्त्रियाम् ॥१॥"

[ ]इति रभसः । [निशाटन्यपि] । वागुलिनामानि[8] चत्वारि।

## कर्करेटुः करेटुः स्यात् करटुः कर्कराटुकः ॥१३३७।

१ कर्कशं रेटति, मृगय्वादित्वात् कुः, निपातना-च्छलोपः **कर्करेटुः** । 'कर्क' इति शब्दं रेटतीति वा । 'रेट[9] (रेटृ) परिभाषणे'(भ्वा.उ.से.), अच् , 'अपष्ठ्वादयश्च'(कात-न्त्रोणा-१।१६॥)इति निपातनात् कर्करेटुः । २ के वायौ जले वा रेटति वा । कुत्सितं रेटतीति वा । निपातनात् कोः कादेशः **[ करेटुः ]** । ३ पूर्ववत् कुः करेटुः, **करटुः** । ४ कर्कति कर्कराटुः । 'केवयुभुरणु-'(हैमोणा-७४६)इति निपात्यते, [स्वार्थे कनि **कर्कराटुकः**] । "करेटुः कर्करेटुः स्यात् करटुः कर्कराटुकः" [10]इति रभसात् द्वयं चतुष्कम् (रूपचतुष्कम्)। "द्विचतुः-षट्पदोरगाः"[लिङ्गादि-४७०]इति द्विपदत्वादेषां स्त्रीपुंस्त्वम्। करेवानामानि चत्वारि ॥१३३७॥

## आटिरातिः शरारिः स्यात्

१ आ समन्तादटति **आटिः** । 'अट गतौ'(भ्वा. प.से.), '-इन्'(उणा-५५७)इतीन् । टवर्गतृतीयान्त-श्चायमाडिरिति, जलादडति[11] उद्गच्छतीति[12] व्युत्पत्तिः । 'अड उद्यमे'(भ्वा.प.से.), 'अक्ष्यडिभ्यामिण्'( )इतीण् । २ अततीति **आतिः** । 'अत सातत्यगमने'(भ्वा.प.से.), 'पादाच्चात्यजिभ्याम्[13]'(हैमोणा-६२०)इति णिदिः । ३ शरं नाराचमियर्ति **शरारिः** । 'ऋ गतौ'(भ्वा.प.अ.), 'अच इः'(उणा-५७८)। शृणातेर्बाहुलकादारिर्वा शरारिः । शराति-रपि । शरमतति । 'अत सातत्यगमने'(भ्वा.प.से.), 'इञ-जादिभ्यः(इणजादिभ्यः)' (वा-३।३।१०८॥)इतीञ्[14] (इतीण्)। पक्षे कपिरि(कपिलि)कादित्वाल्लत्वे शरालि-रपि । एते शब्दाः स्त्रीलिङ्गाः । "आडिः शरालिर्वराटी-(वरटी) गन्धोली वानरिः कपी"[15]इति स्त्रीलिङ्गकाण्डे रत्नकोषात् । "त्रयः शब्दा आविष्टलिङ्गाः"[16]इति मधुमाधवी । "ङीषि आटी आती शरारी[17]"[ ]इति हलायुधटीका । आडिनामानि त्रीणि[18] ॥

## कृकण-क्रकरौ समौ[19] ।

१ कृकेण कण्ठेनाऽणति शब्दायते **कृकणः** । 'अण शब्दे[20]'(भ्वा.प.से.), अच्, शकन्ध्वादित्वात् पररूपत्वम् । 'कृ' इति कणति वा। 'कण शब्दे[20]'(भ्वा.प.से.), अच् । कृकं नयतीति वा । २ 'क्र' इति[21] शब्दं करोति **क्रकरः**। पचाद्यच् । द्वे क्रकरस्य ॥

## भासे शकुन्तः

१ भासते **भासः** । 'भासृ दीप्तौ'(भ्वा.आ.से.), अच्, तत्र । २ **शकुन्तः** सामान्योऽपि विशेषे[22] वर्तते । यदाह पथ्यापथ्यकारः-

"भासः शकुन्तो भासन्तः शिखावान् गोष्टकुर्कुटः[23] ।
गृध्राकारो भस्मवर्णो विज्ञेयो गोष्टगोचरः ॥१॥"

[ ]इति । "शकुन्तो भास उच्यते"[हलायुधकोशः

---

१. द्र. टीकासर्वस्वम्, भा-२, २।५।२६॥, पृ.२४१॥ २. द्र. पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२४१, पृ.३१०॥, रामाश्रमीर।५।२६॥, पृ.२५२॥ ३ 'अज्ज-' इति४॥ ४ '-ऽस्ति' इति १.२.३प्रतिषु नास्ति ॥ ५ 'चमा-' इति१.२॥ ६ '-ड' इति३॥ ७ '-लिनिका' इति५॥ ८ '-लिका-' इति३॥ ९ 'रट रेट' इति३॥ १०. द्र. पदचन्द्रिका. भा-२, सिंहादिवर्गः, श्लो-२३४, पृ.३०१॥, रामाश्रमीर।५।१९॥, पृ.२४८॥ ११. '-टति' इति१॥ १२. '-च्छति' इति४.५॥ १३. 'अज्यतिभ्यां च'(उणा-५७०)इति पाणिनीयसम्मतोणादिगणसूत्रम् ॥ १४. '-न्' इति३॥ १५ द्र. पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२४०, पृ.३०९॥ १६. रामाश्रमीर।५।२५॥, पृ.२५२॥ १७ 'शरारातिः' इति३॥ १८. 'चत्वारि' इति३॥ १९. तुलनीयोऽमरकोषः२।५।१९॥ २०. अणेत्यादिदण्डात्मकोऽयं धातुः ॥ २१. इतोऽग्रे ४.५प्रत्योः 'वा' इति दृश्यते ॥ २२. '-षो' इति३॥ २३. '-कुक्कुटः' इति१.२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

२।२४७॥]इति हलायुधः । ''द्वौ समौ''[ ]इति तट्टीका । भाषो मूर्धन्यान्तोऽपि तत्रैव । द्वे भासस्य ॥

### कोयष्टिः शिखरी जलकुक्कुभः ॥१३३८॥

१ कवते शब्दायते **कोयष्टिः** । 'कुङ् शब्दे' (भ्वा.आ.अ.), 'कोर्यषादिः'(हैमोणा-६४८)इति तिः, तं जलमालम्बनत्वाद् यष्टिरिवाऽस्येति वा । पूर्वपदाकारस्य नैरुक्त ओकारः, नत्र । हरिशब्दवद् रूपाणि । ''कर्णाटीसुरतस्वरानुकरणैः कोयष्टिकः कूजति''[ ]इति हलायुधकाव्यम् । ''कोयष्टिकः शिखरी, 'मेण्टो'[1] इति गौडदेशे प्रसिद्धः''[ ]इति तट्टीका च । २ शिखरं चूडाऽस्त्यस्य **शिखरी** । 'अत इनिठनौ'५।२।११५॥इतीनिः । ३ कोकते कुक् । 'कुक आदाने'(भ्वा.आ.से.), क्विबन्तः । कुक् कुभ्नाति (स्कुभ्नाति) कुक्कुभः । स्कुभिः सौत्रः, 'इगुपध-'३।१।१३५॥ इति कः । कुगित्यव्यक्तानुकरणम्, तत् कौति । 'इणः कित्'(उणा-४३३)इति बाहुलकात् कौतेरपि, भनि कुत्वे व कुक्कुभः । जलचारी[2] कुक्कुभो **जलकुक्कुभः** । ''कुक्कुभो वनकुक्कुटः[3]''[ ]इति मिश्राः । ''अत्र[4] कुक्कुभशब्दः कुम्भकारकुक्कुटपर्यायः''[ ]इत्यन्ये । कोसीटानामानि त्रीणि ॥१३३८॥

### पारापतः कलरवः कपोतो रक्तलोचनः ।

१ पार्यते कर्म कर्तुमनेनेति । घञि[5] पारो बलम् । पारेण बलेनाऽऽपतति **पारापतः** । 'पत्लृ पतने'(भ्वा.प.से.), पचाद्यच् । जपादित्वाद् वत्वे पारावतोऽपि[6] । २ कलो मधुरो रवो ध्वनिरस्य **कलरवः**। ३ कस्य मयूरस्य चित्रवर्णत्वात् पोत इव **कपोतः** । ''कस्य वायोः पोत इवेत्यागमः[7]''[अम.क्षीर.२।५।१५॥]इति तु स्वामी । ''पारापतः कपोतः स्यात् कपोतो विहगान्तरे''[ ]इति विश्वः[8] । ४ रक्ते लोचनेऽस्य **रक्तलोचनः** । ''पारापतो गृहकपोतः, कपोत आरण्यः''[अम.क्षीर. ]इति क्षीरस्वामी[9] इति सत्यपि भेदेऽमरानुगतमभेदं मन्यन्त आचार्याः । चत्वारि पारापतस्य ॥

### ज्योत्स्नाप्रिये चलचञ्चु-चकोर-विषसूचकाः ॥१३३९॥

१ ज्योत्स्ना प्रिया अस्य **ज्योत्स्नाप्रियः**, तत्र । २ चला चञ्चुरस्य **चलचञ्चुः** । ३ चकति(चकते) [10]चन्द्रामृतपत्वाद् विषं प्रतिहन्ति **चकोरः** । 'चक तृप्तौ [11]प्रतीघाते च'(भ्वा.आ.से.), 'चकिकठिभ्यामोरच्[12]'(उणा-६४)। चकते ज्योत्स्नया तृप्यति[13] वा । अत्र ज्योत्स्नाशब्दश्चन्द्रातपपर्यायः । ४ विषं सूचयति **विषसूचकः**। 'सूच[14] पैशुन्ये' (चु.उ.से.), ण्वुल्[15] । ''चकोरस्य विरज्येते नयने विषदर्शनात्''[[16] ]इत्युक्तेः । चत्वारि चकोरस्य ॥१३३९॥

### जीवंजीवस्तु गुन्द्रालो विषदर्शनमृत्युकः ।

१ जीवेन सहचरेण सह जीवति **जीवंजीवः** । 'जीव प्राणधारणे'(भ्वा.प.से.), बाहुलकात् खच्, खित्त्वाद् मुम् । तद्दर्शनेन विघ्ननाशाद्[17](विषनाशाद्) जीवं प्राणिनं जीवयत इति कर्मण्यणि[18] वा, 'तत्पुरुषे कृति-'६।३।१४॥ इति द्वितीयाया अलुक् । ''जीवंजीवो जीवजीवः''[[19] ]इति निरनुस्वारमध्योऽपि शुभाङ्के । २ गुन्द्रामलति **गुन्द्रालः** । 'अलञ् भूषणादौ[21]'(भ्वा.प.से.), अच् । ३ विषदर्शनेन मृत्युरस्य[22] **विषदर्शनमृत्युकः**, अष्टाक्षरम् । ''विषसन्दर्शनग्लानि[23]र्जीवञ्जीवकः''[ ]इत्यपीति पथ्यापथ्यकारः । ''स च मयूरप्रमाणचित्रपक्षो द्वन्द्वचरः[24] स्वनाम्ना ख्यातो दक्षिणापथादौ जायते''[[20] ]इति मिश्राः । जीवकुनामानि त्रीणि ॥

### व्याघ्रटस्तु भरद्वाजः

१ व्याजिघ्रन्नटति **व्याघ्राटः** । अचि, पृषोदरादिः ।

---

१. 'मेटा' इति१.३॥ २. '-जारी' इति५॥ ३. '-तः' इति३, '-डः' इति४॥ ४ इतोऽग्रे ४.५प्रत्योः 'तु' इति दृश्यते ॥ ५ '-ञिति' इति१॥ ६ '-प-' इति२॥ ७ 'इव' इति टीकायां नास्ति ॥ ८ विश्वलोचनविश्वप्रकाशकोशयोस्तु-''पारावतः कलरवे शैले मर्कटतिन्दुके'' इति दृश्यते, क्रमेण नान्तवर्गः, श्लो-२२३, श्लो-२१७, पृ.१५६, पृ.७४॥ ९. अम.क्षीरस्वामिकृतटीकायाम्-''केन पवते । कस्य वायोः पोतः इत्यागमः । आरण्डोऽयम् । आद्यस्तु गृहकपोतः । अयं त्वभेदं मन्यते ।'' इति दृश्यते, २।५।१५॥, पृ.१२७॥ १०. 'चन्द्रात-' इति४.५॥ ११. 'प्रति-' इति४॥ १२. 'कठिचकिभ्यामोरन्' इत्युणादिगणसूत्रम् ॥ १३. 'तृप-' इति३॥ १४ '-ची' इति१.२॥ १५. ४प्रतौ नास्ति ॥ १६. द्र. स्वोपज्ञटीका।१३३९॥, पृ.२९९॥ १७ '-न्' इति४॥ १८. '-ण्' इति४॥ १९. द्र. टीकासर्वस्वम्, भा-२, २।५।३५॥, पृ.२४८॥ २०. द्र. पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२५०, पृ.३२२॥ २१. अत्र मीमांसकमहोदयकृतटीप्पणी द्रष्टव्या, क्षीरतरङ्गिणी, पृ.८१॥ २२. 'विषमृत्युदर्श-' इति१॥ २३. '-ने' इति१॥ २४ 'द्वन्द्वे' इति४.५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्याघ्रमटति कर्मण्यणि वा । व्याघ्र इवाऽटतीति, पचाद्यचि वा । २ भरन्तः पूरयन्तो वाजाः पक्षा अस्य **भरद्वाजः** । ''भारद्वाज इति दीर्घादिरपि''[ ]इति हलायुधटीका । ''भारद्वाजः क्रकराटो[1] व्याघ्राटो हिक्कटः[2] परः परटुवा''[ ] इति मदनपालः । ''चाटुकैराख्यः[3]''[अम.क्षीर.२।५।१६॥] इति क्षीरस्वामी[4] । परटुवानाम्नी द्वे ॥

## प्लवस्तु गात्रसंप्लवः ॥१३४०॥

प्लवते **प्लवः** । 'प्लुङ्[5] गतौ'(भ्वा.आ.अ.), अच् । २ गात्रेण संप्लवते **गात्रसंप्लवः** । अच् । द्वे प्लवस्य । प्लवशब्दो ह्यनेकार्थेषु कारण्डजलकाकयोः पर्याय उक्तः, इह तु ''मद्गुस्तु जलवायसः''[अभि-, श्लो-१३२३]इति प्रागुक्तः, ''कारण्डवस्तु मरुलः''[अभि-, श्लो-१३४१]इति कारण्डवं त्वग्रे[6] ग्रन्थकृदेव व्याख्यास्यतीति, ताभ्यामन्यः कश्चित् पक्षिविशेषोऽसौ । यदमरः-

''तेषां विशेषा हारीतो मद्गुः कारण्डवः प्लवः ।
तित्तिरिः कुक्कुटो लावो जीवंजीवश्चकोरकः ॥१॥
([7]कोयष्टिष्टिट्टिभः कोकः क्रकरो वर्तिकादयः।)''
[अमरकोषः२।५।३४-३५॥]इति ॥१३४०॥

## तित्तिरिस्तु खरकोणः

१ तरत्यम्भसि **तित्तिरिः,** तृतीयस्वरत्रयः। 'उणादयो बहुलम्[8]'३।३।१॥इति 'तरतेः सन्वत् तुक् चाऽभ्यासस्य'(स.क.२।१।१५८॥)इतीन्, द्विर्वचनमभ्यासस्य च तुक्, 'ॠत इद्धतोः'७।१।१००॥ इतीत्त्वम्, रपरत्वं च । तित्तिरोऽदन्तोऽपि । ''कपोतो[9](कपोत)लावतित्तिराः''[[10]] इति वाचस्पतिः । २ खरं कोणति शब्दायते **खरकोणः** । 'कुण शब्दे[11]'(तु.प.से.), अच् । तीतरनाम्नी द्वे ॥

## हारीतस्तु मृदङ्कुरः ।

१ हारि मनोहरमितं[12] गमनमस्य **हारीतः** । हरिद्वर्णयोगाद् ज्योत्स्नाद्यणि, 'अन्येषामपि-'६।३।१३७॥ इति दीर्घत्वे हारीत इति वा । हरति जीवानिति । 'हृञ् हरणे' (भ्वा.उ.अ.), बाहुलकादीतण्। २ मृदमङ्कुरयति **मृदङ्कुरः** । पचाद्यच् । द्वे हारीतस्य ॥

## कारण्डवस्तु मरुलः

१ करण्डे भवं कारण्डं जलम्, तत्र वाति गच्छति **कारण्डवः**। 'वा गतिगन्धनयोः'(अ.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥ । आरमणमारण्डः, आरमतेः 'अमन्ताड्डः' (उणा-१११)। के जले आरण्डः कारण्ड इति, 'कर्तृकरणे कृता बहुलम्'२।१।३२॥ इति समासः । सोऽस्याऽस्तीति, 'अन्येभ्योऽपि दृश्यते'(वा-५।२।१०९॥)इति वप्रत्यये वा । २ मरुं लाति[13] **मरुलः** । 'ला दाने'(अ.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥ । द्वे कारण्डवस्य॥

## सुगृहश्चञ्चुसूचिकः ॥१३४१॥

१ शोभनं गृहमस्य **सुगृहः**। २ चञ्चुरेव सूचिरस्य नीडवाने[14] **चञ्चुसूचिकः** । ''सुगृहः पीनमस्तकः''[ ]इति पथ्यापथ्यकारः । सुघरीनाम्नी[15] द्वे ॥१३४१॥

## कुम्भकारकुक्कुटस्तु कुक्कुभः कुहकस्वनः ।

१ 'कुम्भ' इति शब्दं करोति कुम्भकारः, स कुक्कुट इव **कुम्भकारकुक्कुटः,** सप्ताक्षरम् । २ कुगित्यव्यक्तानुकरणम्, तत् कौति **कुक्कुभः** । 'इणः कित्'(उणा-४३३)इति बाहुलकात् कौतेरपि भकि[16] कुत्वम् । कुक्कुशब्देन भातीति वा । ३ 'कुहक' इति स्वनोऽस्य[17] **कुहकस्वनः** । ''नीलच्छविः कृष्णगल्लः स्याद् ग्रामचटकाकृतिः । कुक्कुभः कुक्कुटारवः[18] स्थलजो रक्तचर्मकः ॥१॥''[ ]इति कुक्कुभलक्षणानि पथ्यापथ्ये । कूकडकुंभार[19]नामानि त्रीणि ॥

## पक्षिणा येन गृह्यन्ते पक्षिणोऽन्ये स दीपकः ॥१३४२॥

१ दीप्यते कोपाग्निना **दीपकः** । 'दीपी दीप्तौ' (दि.आ.से.), ण्वुल् । एकं श्येनसीञ्चानकादेः ॥१३४२॥

## छेका गृह्याश्च ते गेहासक्ता ये मृगपक्षिणः ।

१ छ्यन्ति वैमनस्यं **छेकाः** । 'छो छेदने'(दि.

---

१. '-रोटो' इति१ ॥ २. 'हिक-' इति१, 'क-' इति३ ॥ ३. 'चाट-' इति१.२ ॥ ४. अम.क्षीरस्वामिकृतटीकायाम्-''चाटकेराख्यः'' इति दृश्यते, पृ.१२७॥ ५. '-ञ्' इति३ ॥ ६. '-ग्र-' इति२ ॥ ७. कोष्ठान्तर्गतपाठः क्षीरस्वामिसम्मतः ॥ पदचन्द्रिका-रामाश्रमीकारमते-''कोयष्टिकष्टिट्टिभको वर्तको वर्तिकादयः'' इति॥ ८. 'बाहुलकम्' इति४.५ ॥ ९. 'का-' इति३ ॥ १०. द्र. पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२५०, पृ.३२१ ॥, रामाश्रमी २।५।३५॥, पृ.२५६ ॥ ११. 'शब्दोपकरणयोः' इति क्षीरतरङ्गिण्यादयः॥ १२. '-हरति' इति१ ॥ १३. '-तीति' इति१ ॥ १४. 'नीडा-' इति३.४.५ ॥ १५. 'सू-' इति१.२ ॥ १६. '-किः' इति४ ॥ १७. 'स्वरो-' इति५ ॥ १८. '-रावः' इति१.४.५ ॥ १९. '-कूं-' इति२.५ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प.अ.), 'अलीकादयश्च'(उणा-४६५)इति ईकन्नन्तो निपातनात्। "छेकस्त्रिषु विदग्धेषु गृहासक्तमृगाण्डजे"[ ]इति चवर्गादौ रभसः। २ गृह्यन्तेऽस्वतन्त्रीक्रियन्त इति **गृह्याः**। 'पदास्वैरिबाह्यापक्षेषु(-पक्ष्येषु) च'३।१।११९॥ इति क्यप्। क्रीडार्थं पोषणादिना ये मृगपक्षिणो गृहासक्ता गृहमाश्रितास्ते छेका गृह्याश्च प्रोच्यन्त इत्यर्थः॥

॥ उक्ताः खचरपञ्चेन्द्रियाः ॥

## ॥ जलचरपञ्चेन्द्रियाः ॥

अथ जलचरानाह

**मत्स्यो मीनः पृथुरोमा झषो वैसारिणोऽण्डजः ॥१३४३॥**

**सङ्घचारी स्थिरजिह्व आत्माशी स्वकुलक्षयः।**

**विसारः शकली शल्की शंवरोऽनिमिषस्तिमिः ॥१३४४॥**

१ माद्यन्ति जलेन **मत्स्यः**। 'मदी हर्षे'(दि.प.से.), 'ऋतन्यञ्जि-'(उणा-४४२)इति स्यन्। मत्सोऽपि। स्त्रियां 'गवयहयमुकय-'(वा-४।१।६३॥)इत्यादिना ङीषि, 'सूर्यतिष्य-'६।४।१४९॥ इत्यादौ 'मत्स्यस्य ङ्यामेव' (वा-६।४।१४९॥)इति यलोपे मत्सी। २ मीयते हिंस्यते **मीनः**। 'मीङ् हिंसायाम्'(दि.आ.अ.), नप्रत्ययः। ३ पृथु रोम अस्य **पृथुरोमा,** नकारान्तः। रोमशब्देनाऽत्र पक्षः, मुखप्रदेशे पृथूनि महान्ति रोमाण्यस्येति [वा] पृथुरोमा। "मत्स्यत्वाविशेषाल्लोमकेऽपि वृत्तिरस्य"[ ]इति कलिङ्गः। "पृथु रोम वल्कलमस्य"[ ]इति सर्वधरः। ४ झष्यते **झषः**। 'झष शष सिर्ष जिष सष रुष हिंसार्थाः'(भ्वा.प.से.)इति झषेर्हिंसार्थाद् गत्यर्थाद् वा, 'पुंसि संज्ञायाम्-' ३।३।११८॥ इति घः। "पाणिनिप्रत्याहार इव महाप्राणसमाश्लिष्टो झषालिङ्गितश्च समुद्रः"[ ]इत्याश्चर्यमञ्जरी, अतो मूर्धन्यान्तः। ५ विविधं सरति विसारी। 'सृ गतौ'(भ्वा.प.अ.), ग्रहादित्वाण्णिनिः। विसार्येव **वैसारिणः**। 'विसारिणो मत्स्ये'(५।४।१६॥, हैमसू-७।३।५९॥)इति स्वार्थेऽण्, 'इनण्यनपत्ये'६।४।१६४॥ इति प्रकृतिभावः, अस्मादेव 'विसारिणः' इति निर्देशादण्, तत्सन्नियोगेन णिनिः। "ग्रहादित्वाण्णिनिः"[ ]इत्यात्रेयः। रामशब्दवद् रूपाणि। ६ अण्डाज्जातः **अण्डजः**। ('जनी प्रादुर्भावे') (दि.आ.से.), 'पञ्चम्यामजातौ'३।२।९८॥ इति डः। ॥१३४३॥ ७ सङ्घेन चरति **सङ्घचारी**। ग्रहादित्वाण्णिनिः। ८ स्थिरा जिह्वा अस्य **स्थिरजिह्वः,** कण्टकजिह्वत्वात्। ९ आत्मा इव आत्मा मत्स्यजातिस्तामश्नाति **आत्माशी**। 'अश भोजने' (क्र्या.प.से.), णिन्नन्तः। १० स्वकुलस्य क्षयोऽस्मात् **स्वकुलक्षयः**। ११ विशेषेण सरति **विसारः**। 'सृ गतौ' (भ्वा.प.अ.), सर्तेः 'व्याधिमत्स्यबलेषु-'(वा-३।३।१७॥) इति घञ्। १२ शकलं वल्कलम्, तद्योगात् **शकली**। 'अत इनिठनौ'५।२।११५॥ इतीनिः। मत्स्यत्वाविशेषादशकलिन्यपि मत्स्ये। "शकलं वल्कलेऽर्धे च"[ ]इति तालव्यादावजयकोषात् तालव्यादिरयम्। १३ शल्कमस्याऽस्ति **शल्की**। 'अत इनिठनौ'५।२।११५॥ इतीनिः। १४ शं वृणोति **शंवरः**। 'वृञ् वरणे'(स्वा.उ.से.), अच्। १५ न निमिषतो लोचनेऽस्य **अनिमिषः**। १६ तिम्यति स्थले **तिमिः**। 'तिम ष्टिम ष्टीम आर्द्रीभावे'(दि.प.से.), 'इगुपधाच्च'(उणा-५५९)इतीन्प्रत्ययः। सामान्येन षोडश मत्स्यस्य। शेषश्चात्र-"मत्स्ये तु जलपिप्पिकः, मूको जलाशयः शेवः"[शेषनाममाला४।१९६॥] ॥१३४४॥

अथ मत्स्यविशेषानाह-

**सहस्रदंष्ट्रे वादालः**

१ सहस्रं बह्व्यो दंष्ट्रा अस्य **सहस्रदंष्ट्रः,** तत्र।

१. द्र. पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२५८, पृ.३३१॥, रामाश्रमी२।५।४३॥, पृ.२६०॥ २. '-ते' इति३॥ ३. 'योपधप्रतिषेधे हयगवयमुकयमनुष्यमत्स्यानामप्रतिषेधः' इति वार्तिकम्॥ ४. 'इत्यादिना' इति१॥ ५. 'फेनमीनौ'(उणा-२८३)इत्युणादिगणसूत्रेण॥ ६. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो २४४, पृ.२९१-२९२॥ ७. 'झषते' इति५॥ ८. १.२.३.५प्रतिषु नास्ति॥ ९. 'कष शिष जष झष शष वष मष ('मुषः' इत्यधिकः स्वामिमते) रुष रिष हिंसार्थाः' इति स्वामिमैत्रेयो, 'कष खष शिष जष झष शष वष मष रुष रिष हिंसार्थाः' इति सायणः॥ १०. द्र. टीकासर्वस्वम्, भा-१, १।१०।१६॥, पृ.१८६-१८७॥ ११. '-गे' इति १॥ १२. द्र. मा.धातुवृत्तिः, भ्वादिः, धातुसं-६५६, पृ.२५६-२५७॥ १३. कोष्ठान्तर्गतपाठः १.२.३प्रतिषु नास्ति॥ १४. द्र. रामाश्रमी१।१०।१७॥, पृ.१२७॥ १५. '-ते' इति४॥ १६. '-षलोचनः' इति१.४.५॥ १७. मैत्रेयसम्मतोऽयं पाठः॥ १८. 'इगुपधात् कित्' इत्युणादिगणसूत्रम्॥ १९. '-प्पकः' इति३, शेषनाममालास्वोपज्ञटीकयोश्च॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

२ वदति **वादालः** । 'वद व्यक्तायां वाचि'(भ्वा.प.से.), कालन्प्रत्ययः । "सहदंष्ट्रस्तु महापीनश्चे महाशिराः पाठीनभेदः"[ ]इति पथ्यापथ्ये लक्षणम् । "सहस्रदंष्ट्रः पाठीनः" [अमरकोषः१।१०।१८॥]इत्यमरः । "सहस्रदंष्ट्रो वादालो नाम मत्स्यः, पाठीनश्चित्रवल्लिः[२], बहुदंष्ट्रत्वात्[३] पाठयतीति[४], भक्ष्यत्वेन पठ्यते वा, एतौ सादृश्यात् पर्यायौ"[अम.क्षीर. १।९।१८॥]इति क्षीरस्वामी । द्वे सहस्रदंष्ट्रमीनस्य । शेषश्चात्र-"सहस्रदंष्ट्रस्त्वेतनः जलवालो वदालः"[शेषनाममाला४।१९६-१९७॥] ॥

## पाठीने[1] चित्रवल्लिकः[2] ।

१ पाठिं[५] पृष्ठिं नमयतीति **पाठीनः**। नमेः 'अन्येभ्योऽपि दृश्यते'३।२।१०१॥ इति डः, 'अन्येषामपि-' ६।३।१३७॥ इति दीर्घः, तत्र । २ चित्रा वल्लयोऽस्य चित्रवल्लिः, तत[७]: स्वार्थे के[८] **चित्रवल्लिकः** ।

"रूप्यवर्णो दरो दीर्घः कृष्णवर्णो महाशिराः ।
पाठीनो मत्स्यभेदः[९] स्यादेककण्टकमञ्जरिः ॥१॥"

[ ]इति पथ्यापथ्ये लक्षणम् । द्वे पाठीनस्य । "मृदुपाठकः"[शेषनाममाला४।१९७॥]इति शैषिकम् ॥

## शकुले[1] स्यात् कलकः[2]

१ शक्नोति वेगेन गन्तुं **शकुलः**। 'शक्लृ शक्तौ' (स्वा.प.अ.), 'हृषेरुलच्[१०]'(उणा-९६)इति बाहुलकादुलच्, तत्र । २ कलयति **कलकः** । 'कल सङ्ख्याने[११]'(चु.उ.से.), 'कृञादिभ्यः [संज्ञायां] वुन्'(उणा-७१३)। कलं कायति वा ।

"कृष्णमत्स्यस्तु शकुलो बहुकण्टकसंयुतः[१२] ।
कषायवर्णो रक्ताक्षः कथितो मत्स्यवेदिभिः[१३] ॥१॥"[ ]

इति 'कासमत्स्यः' इति पथ्यापथ्ये । द्वे शकुलमत्स्यस्य ॥

## अथ गडकः[१४][1] शकुलार्भकः[2] ॥१३४५॥

१ गडति पुच्छाच्छोटात् सिञ्चति **गडकः**[१५] । 'गड सेचने'(भ्वा.प.से.), 'क्वुन्[१६] शिल्पिसंज्ञयोः'(उणा-१९०)इति क्वुन् । २ शकुलस्याऽर्भकः **शकुलार्भकः** । "शकुलोऽत्र मत्स्यमात्रे"[अम.क्षीर.१।९।१७॥]इति क्षीरस्वामी । ततो मत्स्यबालकस्[१७]तत्रामैकम् ॥१३४५॥

## उलूपी[१८][1] शिशुके[2]

१ ऊर्ध्वं लुम्पति भ्राम्यति **उलूपी** । 'लुप्लृ छेदने'(तु.उ.अ.), उत्पूर्वादावश्यके णिनि[१९]:, पृषोदरादित्वाद् दलोपदीर्घौ । २ चाञ्चल्यात् शिशुरिव **शिशुकः**, तत्र । "द्वे डुंडु[२०]आलस्य"[ ]इति सोमनन्दी पञ्जिका च । कलिङ्गजातरूपौ तु-" "शिशुमाराकृतिर्मत्स्यभेद उलूपी"[ ]। त्रिकाण्डेऽपि "उलूपी शिशुकः स्मृतः"[[२१]]इति पाठः । स च शिशुमार एवोच्यते । रत्नकोषादौ "शिशुमारे उलूपी[२२] स्यात्"[ ] [इत्युक्तम्]"[ ]इत्याहतुः । "'शिशु' इति ख्यातस्य मत्स्यविशेषस्य"[ ]इति कोक्कटादयः[२३] । द्वे शिशुमारमत्स्यसदृग्मत्स्यस्य ॥

## प्रोष्ठीसफरौ[1][2][२४] श्वेतकोलके[3] ।

१ प्रकृष्ट ओष्ठोऽस्याः **प्रोष्ठी** । 'ओष्ठोत्वोर्वा' (वा-६।१।९४॥)इति पररूपत्वम्, 'नासिकारो(रौ)-ष्ठ-'४।१।५५॥ इत्यादिना ङीष् । प्रकर्षेणोषति दहति विकारित्वात् । 'उषिकुषि-'(उणा-१६१)इत्यादिना थन्, गुणः, 'एङि पररूपम्'६।१।९४॥, 'जातेः-'४।१।६३॥ इति ङीष् प्रोष्ठी । २ शयाना[२५] स्फुरति पार्श्वेन गच्छति शफरी । पृषोदरादिः । "शोणितशफरीभ्याशकटशिला" [[२३]]इत्यूष्मभेदात् तालव्यादिः । [**सफरः** च] । पुंस्त्रीलिङ्गावेतौ । प्रोष्ठीशफरावत्रेतरद्वन्द्वः । ३ श्वेतः कोल उत्सङ्गोऽस्य श्वेतकोलः । ततः स्वार्थे के[२६] **श्वेतकोलकः**, तत्र । त्रीणि मत्स्याः[२७] ॥

## नलमीनश्चिलिचिमः[1][2][२८] :

१ प्रायेण नलवने तिष्ठति **नलमीनः** । नलचारी मीन इति वा, शुषिरतृणान्तश्चारित्वात्, नडाभो मीन इति

१. '-तश्च' इति४॥ २. '-ल्हिः' इति३॥ ३. '-ष्ट्रा-' इति५॥ ४ 'पाट-' इति अम.क्षीर.टीकायाम्, पृ.६४॥ ५. 'पक्ष-' इति३.४॥ ६. '-ठीं' इति४.५॥ ७ 'तत्र' इति३॥ ८. 'कनि' इति१॥ ९ '-दाः' इति३॥ १०. 'शके-' इति३.५॥ ११. 'संस्त्याने' इति३.४.५, 'कल गतौ सङ्ख्याने च' इति स्वामिसायणौ, 'कल सङ्ख्याने गतौ च' इति मैत्रेयः ॥ १२. 'बा-' इति४.५॥ १३. 'वा-' इति१॥ १४. 'गण्ड-' इति१, 'गडु-' इति४॥ १५. 'गडु-' इति४॥ १६. 'ण्वुल्' इति१॥ १७ 'बाल-' इति१.३॥ १८. 'उल्लू-' इति३॥ १९. '-नि' इति३॥ २०. 'डं-' इति३॥ २१. त्रिकाण्डशेषे न दृश्यते ॥ २२. 'उल्लू-' इति३॥ २३. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२४५-२४६, पृ.२९३-२४९॥ २४ '-रः' इति मुद्रिताभिधानचिन्तामणिनाममालायाम् २५. 'शयो-' इति२.३॥ २६. 'कनि' इति१॥ २७ मत्स्या विशेषा इत्यर्थः ॥ २८. तुलनीयोऽमरकोषः१।१०।१८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वा । २ 'चिल [1]विलसने[2]'(तु.प.से.), 'चिले चिदुक्' (उणा- )इति इमः, कित्, इदुगागमश्च **चिलिचिमः** । "इकारत्रयवानदन्तः"[ ]इति पञ्जिकादय[3]: । तथा च रत्नमालायाम्-"नलमीनश्चिलि[4]चिमो बृहन्मीनोऽब्धिजस्तिमिः"[[5]] इत्यदन्तो [दृश्यते"[ ]इत्याहुः] । सर्वधरस्तु "लक्ष्मणा सारसी क्रौञ्ची नलमीनश्चिलीचिमिः"[[6]]इति वोपालितदर्शनाच्चतुरिकारवान्, मध्यदीर्घ इदन्त इति मन्यते । "उभयमपि भवति"[[7]]इति कौमुदी । "[8]चिलिचीमस्त्रिदोषकृत्"[ ]इति वैद्याः । द्वे नलमीनस्य ॥

## मत्स्यराजस्तु रोहितः ॥१३४६॥

१ मत्स्यानां राजा **मत्स्यराजः** । 'राजाहःसखिभ्यष्टच्'५।४।९१॥ 'नस्तद्धिते'६।४।१४४॥ इति टिलोपः । २ रोहतीति **रोहितः** । रक्तवर्णत्वाद् वा । रोहिदिति व्यञ्जनान्तोऽपि । 'कृ(रु)सुरुहियुषिभ्य इत् (इति)' (उणा-९७)इतीत् । "रक्तोदरो रक्तमुखो रोहितो रक्तपुङ्गव" [ ]इति मदनपालः ।

"रक्तोदरो रक्तमुखो रक्ताक्षो रक्तपक्ष्मभ[9]: ।
कृष्णपक्षः सर्वमत्स्यश्रेष्ठो रोहितसंज्ञकः ॥१॥"

"रोही"[ ]इति पथ्यापथ्यकारः । द्वे रोहीमत्स्यस्य ॥१३४६॥

## मद्गुरस्तु राजशृङ्गः

१ मज्जति **मद्गुरः** । 'टुमस्जो शुद्धौ'(तु.प.अ.), 'मद्गुरादयश्च'(उणा ४१)इति कुरच्प्रत्यये[10] निपात्यते । मद्गून् रातीति वा । अदन्तो रामवत् । २ शृङ्गेण राजते **राजशृङ्गः** । राजदन्तादित्वात् परनिपात[11]: । एकं मद्गुरस्य ॥

## शृङ्गी तु मद्गुरप्रिया ।

१ मद्गुरस्य प्रिया **शृङ्गी** उच्यते । शृणाति शृङ्गी । 'शृणातेर्ह्रस्वश्च'(उणा १२३)इति गन्, ह्रस्वत्वं[12] कित्वं [13]नुडागमश्चेति शृङ्गम् । गौरादित्वाद् ङीष्, मद्गुरीपर्यायोऽयम् । "शृङ्गीति प्रदर्शनार्थं 'मद्गुरस्य प्रिया'[अमरकोषः१।१०।२५॥]इत्युक्तम्"[[14]]इति कलिङ्गः । "योग्यतया 'मद्गुर[स्य] प्रिया'[अमरकोषः१।१०।२५॥]इत्युक्तम्"[[15]]इति पञ्जिका । अन्ये त्वाहुः-"ननु मद्गुरो भिन्नजातिः, शृङ्गी भिन्नजातिः, तत् कथं प्रियात्वमस्याः ? सादृश्यादिति, तत्र (तन्न), अन्यत्राऽप्येवं कल्पानपत्तेः । उच्यते-'मद्गुरसी अप्रिया शृङ्गी' इति नामत्रयमेव शृङ्ग्या' इति, एतच्चाऽसम्यक्, ईदृक् प्रयोगादर्शनात्, सादृश्याच्च, 'गडु[15]कः (गडकः) शकुलार्भकः"[अमरकोषः१।१०।१७॥]इति प्रयो[16]गदर्शनानाद्, "भार्या भेकस्य बह्वी (वर्षाभ्वी) शृङ्गी स्यात् मद्गुरस्य तु[17] । शिली गादु(गण्डु)पदस्याऽपि डुलिः स्यात् कमठस्य तु[18] ॥१॥" [[13]][19]इत्थममरमालादर्शनाच्च"[[13]] ॥

## क्षुद्राण्डमत्स्यजातं तु पोताधानं जलाणुकम् ॥१३४७॥

१ क्षुद्राश्च अण्डान्निःसृताश्च मत्स्याः क्षुद्राण्डमत्स्यास्तेषां जात[20]: सङ्घातः क्षुद्राण्डमत्स्यजातम् । "क्षुद्राण्डो मत्स्यसङ्घातः"[[21]]इत्येके । पोता आधीयन्तेऽत्र **पोताधानम्** । धाञोऽधिकरणे ल्युट् । २ जलेऽणति **जलाणुकम्** । 'अण गतौ[22]'(भ्वा.प.से.), 'कण्यणेः'(हैमोणा-५६)[इति] रिदु[23]कः (णिदुकः) । द्वे लघुमत्स्यसमूहस्य ॥१३४७॥

## महामत्स्यास्तु [24]चीरिल्लि-तिमिङ्गिलगिलादयः ।

१ महान्तश्च[25] ते[26] मत्स्याश्च महामत्स्याः । चिरं लीयते [27]चीरिल्लि[28]: । पृषोदरादिः । १ ताम्यतीति तिमिः । 'तमु काङ्क्षायाम्'(दि.प.से.), 'कमितमिगमि(क्रमितमिशति)स्तम्भामत इत्-'(उणा-५६१), उपधायाश्चेत्वम् । तिमिं गिलतीति । 'गॄ निगरणे'(तु.प.से.), मूलविभुजादित्वात् कः, 'अचि विभाषा'८।२।२१॥इति लत्वम्, 'गिले परेऽगिलस्य पूर्वस्य मुमागमो वक्तव्यः'(वा-६।३।७०॥),

---

१. 'विला-' इति३॥ २. 'वसने' इति स्वामिमैत्रेयौ, 'निवसने' इति सायणः ॥ ३. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२४५-२४६, पृ.२९३-२४९॥ ४. 'ल-' इति३.४.५॥ ५. द्र. टीकासर्वस्वम्, भा-१, १।१०।१७॥, पृ.१८८॥, रामाश्रमी१।१०।१८॥, पृ.१२७॥ ६. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो २४६, पृ.२९४॥ ७. 'चिली-' इति५॥ ८. द्र. अम.क्षीर.१।१।१८॥, पृ.६८॥, स्वोपज्ञटीका४।१३४६॥, पृ.३०१॥ ९. '-द्माभः' इति२.३॥ १०. 'कुरन्प्रत्ययो' इति३॥ ११. '-प्रयोगः' इति१.२॥ १२. इतोऽग्रे ४.५प्रत्योः 'च' इति दृश्यते ॥ १३. 'नुगा-' इति१॥ १४. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२५२, पृ.३०२॥ १५. '-काः' इति१.२.३॥ १६. '-गा-' इति१.३.५॥ १७. 'शृङ्गी तु मुद्गुरस्य स्यात्' इति१॥ १८. द्र. रामाश्रमी१।१०।२५॥, पृ.१३१॥ १९. 'इति त्व-' इति१, 'इत्य-' इति३॥ २०. '-तं' इति१.२॥ २१. द्र. स्वोपज्ञटीका४।१३४७॥, पृ.३०१॥ २२. अणरणेत्यादिदण्डात्मकोऽयं धातुः शब्दार्थकः॥ २३. '-क्' इति४.५॥ २४. 'चीर-' इति२.४.५॥ २५. 'महांश्च' इति४॥ २६. 'ये' इति३॥ २७. 'चीर-' इति३.४॥ २८. 'चीरमल्लिः' इति५॥ २९. 'गिलेऽगिलस्य' इति वार्तिकम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**तिमिङ्गिलगिलः** । आदिशब्दान्नन्द्यावर्तादयः । एकं महामत्स्यस्य चीरल्लिरिति[1] ।

**अथ यादांसि नक्राद्या हिंसका जलजन्तवः ॥१३४८॥**

१ यान्ति वेगेन **यादांसि** । 'या प्रापणे'(अ.प.अ.), यातेरसुन्[2], बाहुलकाद् दुगागमश्च । नक्राद्या वक्ष्यमाणा हिंसका जलचराः ॥१३४८॥

अथ तद्विशेषानाह-

**नक्रः कुम्भीर आलास्यः कुम्भी महामुखोऽपि च ।**
**तालजिह्वः शङ्कुमुखो गोमुखो जलशूकरः[3] ॥१३४९॥**

१ न क्रामति **नक्रः** । 'क्रमु पादविक्षेपे'(भ्वा.प.से.), 'नञः क्रमिगमि-'(हैमोणा-४)इति डिदः । "रज्वाकारस्तु[4] नक्रः स्यात्"[ ]इति पथ्यापथ्यः । २ स्कुभ्नाति **कुम्भीरः** । ईरप्रत्यये पृषोदरादित्वात् । कुम्भिन ईरयतीति, पचाद्यचि, वा । ३ आलमनर्थहेतुरास्यमस्य **आलास्यः** । ४ कुम्भाकारताऽस्य **कुम्भी** । ५ महन्मुखमस्य **महामुखः** । ६ तालुनि जिह्वाऽस्य **तालुजिह्वः**[5] । ७ शङ्कुस्येव मुखमस्य **शङ्कुमुखः** । शङ्कुमुखोऽपि । ८ गोमुखमिव[6] मुखमस्येति **गोमुखः** । ९ जलचारी शूकरो **जलशूकरः** । नव नक्रस्य ॥१३४९॥

**शिशुमारस्त्वम्बुकूर्म उष्णवीर्यो महावसः ।**

१ शिशून् मारयति **शिशुमारः** । 'मृङ् प्राणत्यागे'(तु.आ.अ.), 'कर्मण्यण्'३।२।१॥, जलकपिः । २ अम्बुनः कूर्मः **अम्बुकूर्मः** । ३ उष्णं वीर्यमस्य **उष्णवीर्यः** । ४ महती वसाऽस्य **महावसः** ।

"हत्याकारोऽन्तर्वक्रश्च बहिर्निश्वासमुक्[7] सदा[8] ।
शिशुमारस्तु शिशुकः शिशुघ्रान्या[9] तु चूलिका ॥१॥"[ ] ।

'सूसूआर' इति पथ्यापथ्ये । सूसूआरनामानि[10] चत्वारि ॥

**उद्रस्तु जलमार्जारः पानीयनकुलो वसी ॥१३५०॥**

१ उनत्ति **उद्रः** । 'उन्दी क्लेदने'(रु.प.से.), 'स्फायि-'(उणा-१७०)इति रक् । २ जलस्य मार्जारो **जलमार्जारः** । ३ पानीयस्य नकुलः **पानीयनकुलः** । ४ वसाऽस्त्यस्य **वसी** । 'अत इनिठनौ'५।२।११५॥ इतीनिः । चत्वारि उद्रस्य ॥१३५०॥

**ग्राहे तन्तुस्तन्तुनागोऽवहारो नाग-तन्तुणौ ।**

१ गृह्णाति[11] **ग्राहः** । 'ग्रह उपादाने'(क्र्या.उ.से.), 'ग्रह णो वा(विभाषा ग्रहः)'३।१।१४३॥ इति णः, तत्र । २ तनोति **तन्तुः** । 'तनु विस्तारे'(तु.उ.से.), 'सितनिगमि-'(उणा-६९)इति तुन् । ३ तन्तुरूपो नागः सर्पः **तन्तुनागः** । ४ अवहरति **अवहारः** । 'हृञ् हरणे'(भ्वा.उ.अ.), 'श्याद्व्यधास्रु(स्रु)संस्रु-'३।१।१४१॥ इति णः । ५ **नागः** जलसर्पः । ६ तन्तुवत् तुणति कुटिलीभवति **तन्तुणः** । पृषोदरादिः । वरुणपाशोऽपि । तन्तुमत्स्यस्य षट्॥

सङ्ग्रहमाह-

**अन्येऽपि यादोभेदाः स्युर्बहवो मकरादयः ॥१३५१॥**

१ प्राणिग्रासाय मुखं किरति **मकरः** । मा कुर्यात् किञ्चिदिति त्रस्यन्त्यस्माद् वा, पृषोदरादित्वात् । "मकरस्त्वसिदंष्ट्रकः"[ ]इति पथ्यापथ्यकारः । आदेः शङ्कुफणि[12]प्रभृतयोऽपि ज्ञेयाः ॥१३५१॥

**कुलीरः कर्कटः पिङ्गचक्षुः पार्श्वोदरप्रियः ।**
**द्विधागतिः षोडशांह्रिः कुरचिल्लो[13] बहिश्चरः ॥१३५२॥**

१ कोलति **कुलीरः,** पुंक्ली. । 'कुल संस्त्याने'(भ्वा.प.से.), 'घसिवसि(वशि)-'(हैमोणा-४१९)इति किदीरः । कुलिनमीरयतीति, पचाद्यचि वा । जनकभक्षकत्वात् । यत्कौटिल्यः-"कर्कटसधर्माणो हि राजपुत्रा जनकभक्ष्याः[14]"[कौटिलीयमर्थशास्त्रम्, अधिकारः-१, प्रकरणम्-१२, अध्यायः-१६]इति । २ कर्कति **कर्कटः** । कर्किः सौत्रो गत्यर्थः, 'शकादिभ्योऽटन्'(उणा-५२१) । ३ पिङ्गे चक्षुषी अस्य **पिङ्गचक्षुः** । ४ पार्श्वोदरं प्रियमस्य **पार्श्वोदरप्रियः** । ५ द्विधा अग्रतः पश्चाच्च गतिरस्य **द्विधा-**

---

१. 'चिरि-' इति१.२॥ २. 'सर्वधातुभ्योऽसुन्'(उणा-६२८)इत्यादिना बोध्यम् ॥ ३ '-सूकरः' इति मुद्रितमूलम्, स्वोपज्ञटीकाऽपि तमाश्रित्यैव॥ ४ 'रक्ता-' इति३॥ ५ '-ह्वा' इति१॥ ६ 'गोर्मु-' इति३॥ ७ 'निःश्वा-' इति२.३॥ ८ 'यदा' इति४, 'यदाह' इति५॥ ९ '-घ्रात्या' इति१॥ १०. 'सूआर-' इति३॥ ११. '-तीति' इति२॥ १२. '-ण-' इति३॥ १३. 'कुरु-' इति१.२.३॥ १४ कौटिलीयेऽर्थशास्त्रे "कर्कटकसधर्माणो हि जनकभक्षा राजपुत्राः" इति दृश्यते, पृ.५३॥, द्र.अम.क्षीर.१।९।२१॥, पृ.६५॥, स्वोपज्ञटीका४।४३५२॥, पृ.३०२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गतिः। ६ षोडश अंह्रयोऽस्य **षोडशांह्रिः**। ७ कुरन् शब्दायमानश्चिल्लति **कुरचिल्लः**[1]। 'चिल्ल[2] शैथिल्ये'[3] (भ्वा.प.से.), अच्। कुरति कुरः। ([4]'इगुपध-'३।१।१३५॥ इति कः)। कुरश्चिल्लतीति वा ॥

''कर्कटः[5] कुरचिल्लः स्यात् कुलीरः परिभाषितः।
बहिश्चरः षोडशांह्निः कुरचिल्लो द्विधागतिः ॥१॥''[ ]।

'किरचिलु' इति पथ्यापथ्यकारः। ८ जलाद् बहिश्चरति तरीतुमनभिज्ञत्वाद् **बहिश्चरः**। अष्टौ कुलीरस्य ॥१३५२॥

**कच्छपः कमठः कूर्मः क्रोडपादश्चतुर्गतिः।**
**पञ्चाङ्गगुप्तदौलेयौ जीवथः**

१ कच्छोऽनूपप्रायः, कूर्मपादो वा, तं पाति **कच्छपः**। 'पा पाने'(भ्वा.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥। कत् कुत्सितं शपतीति वा। अच्। २ काम्यते यज्ञार्थं **कमठः**। 'कमु कान्तौ'(भ्वा.आ.से.), बाहुलकादठन्। के मठति[6] निवसतीति वा। 'मठ निवासे'[7](भ्वा.प.से.), अच्। ३ किरति कुरति वा **कूर्मः**। 'रुक्मग्रीष्म-'(हैमोणा-३४६) इति मप्रत्यये निपात्यते। ४ क्रोडे पादोऽस्य **क्रोडपादः**। ५ चतुर्धा अग्रतः पश्चात् पार्श्वयोश्च गतिरस्य **चतुर्गतिः**। ६ पञ्चाङ्गेन गुप्तः **पञ्चाङ्गगुप्तः**। ७ दुल्या अपत्यं **दौलेयः**। 'स्त्रीभ्यो ढक्'४।१।१२०॥। ८ जीवति **जीवथः**। 'जीव प्राणधारणे'(भ्वा.प.से.), अथप्रत्ययः। उहारो देश्याम्, संस्कृतेऽपि। अष्टौ कच्छपस्य ॥

**कच्छपी दुली ॥१३५३॥**

१ [कच्छं कच्छं वा पिबति **कच्छपी**। कच्छेन पाति वा। 'सुपि-'३।२।४॥ इति कः। 'जातेः-'४।१।६३॥ इति ङीष्]। २ दोलयति उत्क्षिपति[9] जलमिति **दुली**। 'दुल[10] उत्क्षेपणे'[11](चु.प.से.), णिजन्तः, 'इगुपधात्-'(उणा-५५९) इति किदिः, 'बहुलमन्यत्राऽपि संज्ञाच्छन्दसोः'( )इति णिलुक्, 'कृदिकारात्-'(वा-४।१।४५॥)इति ङीषि दुली। ''दुडिः[12]''[[13]]इति पञ्जिका। द्वे कच्छप्याः ॥१३५३।

**मण्डूके हरि-शालूर-प्लव-भेक-प्लवङ्गमाः।**
**वर्षाभूः प्लवगः शालुरजिह्व-व्यङ्ग-दर्दुराः ।१३५४**

१ मण्डयति भूषयति[14] जलाशयं **मण्डूकः**। 'मडि भूषायाम्'(भ्वा.प.से.), '[15]शलिमण्डिभ्यामूकण्'(उणा-४८२), तत्र। २ ह्रियते सर्पेण **हरिः**। 'हृञ् हरणे'(भ्वा.उ.अ.), 'अच इः'(उणा-५७८)। ३ शलति **शालूरः**। 'शल गतौ'(भ्वा.प.से.), '[16]खर्जिपिञ्जादिभ्य ऊरोलचौ'(उणा-५३०)इत्यूरः, ''बाहुलकाद् वृद्धिः''[[17]] इति स्वामी[18]। ''अन्येषामपि दृश्यते''६।३।१३७॥ इति दीर्घत्वम्''[[19]]इति सर्वधरः[19]। तालव्यादिरयम्। ''परिसरकृकलासस्वेदसालूर-''[ ]इत्यूष्मभेदाद् दन्त्यादिरपि''[[20]]इति पञ्जिकासर्वधरौ। ४ प्लवते **प्लवः**। 'प्लुङ् गतौ'(भ्वा.आ.अ.), पचाद्यच्। ५ बिभेति **भेकः**। 'ञिभी भये'(जु.प.अ.), 'इण्भीकापाशल्यतिमर्चिभ्यः[21] कन्'(उणा-३२३)। ६, ८ प्लवेन गच्छति **प्लवङ्गमः, [प्लवगः]**। गमेः खच्। ७ वर्षासु भवति **वर्षाभूः**, पुंसि। स्त्रियां वर्षाभ्वीत्यसाधुः, स्त्रीप्रत्ययलक्षणाभावात्[22]। स्त्रियामपि वर्षाभूरित्येव भवति। अमरमालायां भागुरौ च वर्षाभ्वीत्येव दृश्यते। तन्मूलं चिन्त्यम्। स्वामी तु-'''भुवश्च'४।१।४७॥ इति छान्दससूत्रेण ङीष्[23]''[अम.क्षीर. १।९।२४॥]इत्याह, तदयुक्तम्, 'वोतो गुणवचनात्'४।१।४४॥ इत्यत 'उत' इत्यनुवृत्तेः। तथा च तत्र वृत्तिः- बह्वी, प्रह्वी, इह कस्मान्न भवति स्वयम्भूरिति, 'उत' इति तपरकरणमनुवर्तते, [ह्र]स्वादेवेयं पञ्चमी 'भुवः' इति। अन्ये तु मित्रय्वादिड्डुप्रत्ययान्ताद् वर्षाभुशब्दाद् ङीषि प्रयोगमिच्छन्ति। पुंसि त्वनभिधानमेव। ९ शृणाति **शालुः**। 'शॄ हिंसायाम्'(क्र्या.प.से.), 'कृशॄतॄ(ऋतॄ-शॄ)-'(हैमोणा-७२७)इति णिदुर्लत्वं च रेफस्य। १० नास्ति जिह्वाऽस्य **अजिह्वः**। ईषदर्थेऽत्र नञ्। ११ विशिष्टमङ्गमस्य **व्यङ्गः**। १२ दीर्यते **दर्दुरः**[24]। 'दॄ विदारणे'(क्र्या.प.से.), पृषोदरादिः। दर्दुरिति शब्दं रातीति[25] शब्दं रातीति वा। द्वादश भेकस्य ॥१३५४॥

**स्थले नरादयो ये तु ते जले जलपूर्वकाः।**

---

१. 'कुरु-' इति१.३॥ २. 'चिल्लि' इति१॥ ३. स्वामिसम्मतोऽयं पाठः, 'चिल्ल शैथिल्ये भावकरणे च,' इति मैत्रेयसायणौ ॥ ४. कोष्ठान्तर्गतपाठः १.३प्रत्योर्नास्ति ॥ ५. 'कर्कु-' इति४.५॥ ६. 'व-' इति१॥ ७. 'मदनिवासयोः' इति क्षीरतरङ्गिण्यादयः ॥ ८. ४.५ प्रत्योर्नास्ति ॥ ९. 'पयति' इति१॥ १०. 'दुलत्' इति३॥ ११. 'उत्क्षेपे' इति१.२, क्षीरतरङ्गिण्यादयश्च ॥ १२. '-डी' इति५॥ १३. द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२५२, पृ.३०१॥ १४ 'मण्डति भूषति' इति३॥ १५. 'शा-' इति५॥ १६. 'खर्ज-' इति४.५॥ १७ द्र. पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२५१, पृ.३००॥ १८. अम.क्षीरस्वामिटीकायां न दृश्यते ॥ १९. 'श्रीधरः' इति५॥ २०. द्र. टीकासर्वस्वम्, भा-१, १।१०।२३॥ पृ.१९३॥, पदचन्द्रिका, भा-१, वारिवर्गः, श्लो-२५२, पृ.३०१॥, रामाश्रमी१।१०।२४॥, पृ.१३॥ २१. '-शा-' इति२॥ २२. '-या-' इति३॥ २३. '-ब्' इति३॥ २४. 'दु-' इति५॥ २५. 'करोतीति' इति२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यावन्तो नरकरितुरगादयः, स्थल इति स्थलचरा जीवास्तावन्तो जलशब्दपूर्वा जले जलचरा अपि स्युः । यथा जलनरः, जलहस्ती, जलतुरग इत्यादि ॥

अथ सर्वजीवानामुत्पत्तिस्थानभेदानाह[२]–

**अण्डजाः[1] पक्षिसर्पाद्याः**

आदेर्गोधाकृकलासादयः ॥

**पोतजाः[1] कुञ्जरादयः ॥१३५५॥**

१ पोतो जरायुरहितो गर्भः, पोताज्जायन्ते **पोतजाः** कुञ्जरादयः । आदेः श्वावित्शशप्रभृतयः ॥१३५५॥

**रसजा[1] मद्यकीटाद्याः**

१ रसाज्जायन्ते **रसजाः** मद्यकीटाद्याः । आदेर्घृतकीटादयः ॥

**नृगवाद्या जरायुजाः[३] ।**

१ जरायुर्गर्भशय्या, ततो जाता **जरायुजाः**। आदेर्महिषशूकरादयः ॥

**यूकाद्याः स्वेदजाः[1]**

१ स्वेदाद् घर्माज्जायन्ते **स्वेदजाः** । आदेर्मत्कुणमशकादयः ॥

**मत्स्यादयः संमूर्च्छनोद्भवाः[1] ॥१३५६॥**

१ संमूर्च्छनादुद्भव उत्पत्तिर्येषां ते **संमूर्च्छनोद्भवाः,** संमूर्च्छजा इत्यर्थः । 'मूर्च्छा मोहसमुच्छ्राययोः'(भ्वा.प.से.), भ्वादिः, परस्मैपदी, संपूर्वः, ल्युटि संमूर्च्छनम् । गर्भोपपातव्यतिरेकेण प्राणिनामेवमेवोत्पाद इति भावः । आदेः सर्पादयः ॥१३५६॥

**खञ्जानास्तूद्भिदः[1]**

१ उद्भिन्दन्ति भुवमिति **उद्भिदः** उच्यन्ते । 'भिदिर् विदारणे'(रु.उ.अ.), क्विप्। बहुवचनादन्येऽपि शलभादयः ॥

**अथोपपादुका[1] देव-नारकाः ।**

१ उपपद्यन्ते[४] स्वयमित्येवंशीला **उपपादुकाः**। 'पद गतौ'(दि.आ.अ.), 'लषपतपद-'३।२।१५४॥ इत्युकञ्[५] ।

उपसंहारमाह–

**त्रसयोनय इत्यष्टौ**

१ त्रसानां जीवानां योनय उत्पत्तिस्थानानि [**त्रसयोनयः**], इतिशब्दः परिसमाप्तौ, अष्टावेवेत्यर्थः[६] ॥

**उद्भिदुद्भिज्जमुद्भिदम्[७] ॥१३५७॥**

१ उद्भिनत्ति भुवमिति **उद्भित्** । 'भिदिर् विदारणे'(रु.उ.अ.), सम्पदादित्वात् क्विप् । उद्भिद्, उद्भिदौ, उद्भिदः इत्यादि । २ उद्भिद् उद्भेदनम्, ततो जायते **उद्भिज्जं,** चवर्गतृतीयद्वयसंयोगोपधः। ''उद्भिजमिति चवर्गतृतीयैकान्तोऽयम्, पृषोदरादित्वाद् दलोपः''[ ]इति शीलाङ्काचार्यकृताचाराङ्गटीका[९] । ३ उद्भिनत्ति भुवमिति **उद्भिदम्** । 'इगुपधज्ञाप्रीकिरः कः'३।१।१३५॥ इति कः[१०] ।

''अथ सर्वोद्भिदासत्तिपूरणाय स[११] रोपितम् ।

बिभीतकं ददर्शैकं कुण्ठं(कुटं) धर्मेऽप्यकर्मठम् ॥१॥''

[नैषधचरितमहाकाव्यम्, सर्गः-१७, श्लो-२११]इति । ''उद्भिदास्तरुगुल्माद्याः''[अमरकोषः३।१।५१॥]इति नरहरिः[१२]।

''उद्भिद्भिरचितावासः[१३] कपोतादिव तत्र सः ।

राज्ञः साग्नेर्द्विजादस्मात् संत्रासं प्राप दीक्षितात् ॥२॥''

[नैषधचरितमहाकाव्यम्, सर्गः-१७, श्लो-२१५]इति श्रीहर्षः। ''उद्भिद्भिरचितावास उद्भिदि तरौ[१४] कृतस्थितिः''[ ]इति तट्टीका । सामान्येन ये[१५] भुवं भित्त्वोत्पद्यन्ते. तन्नामानि त्रीणि ॥१३५७॥

**॥ ([१६]इत्याचार्यश्रीहेमचन्द्रविरचितायामभिधानचिन्तामणौ नाममालायां तिर्यक्काण्डः चतुर्थः)॥**

सर्वाङ्गीणकलाविलासनिलयः कल्पद्रुमाभः कलौ[१७]
जाग्रत्सर्वजनीनमञ्जुमहिमो मित्रप्रतापोदयः ।
श्रीमच्छ्रीविधिपक्षगच्छगणभृद् भूभृन्नतांह्रिद्वयः
**श्रीकल्याणसमुद्रसूरिसुगुरुः** सूरीन्द्रचूडामणिः ॥१॥
तन्निर्देशविधायिवाचकवरश्रेणीकिरीटोपमा
भास्वत्साधुगुणौघशालि**विनया**च्चन्द्राभिधावाचकाः ।
तच्छिष्या **'रविचन्द्र'** इत्यभिधया तेषां विनेयो व्यधादेनं
वाचक**देवसागर**गणिर्व्युत्पत्तिरत्नाकरम्[१८] ॥२॥

**॥ इति श्रीवाचकवरदेवसागरविरचितायामभिधानचिन्तामणिनाममालायां व्युत्पत्तिरत्नाकरटीकायां तिर्यक्काण्डश्चतुर्थः ॥**

---

१. ३प्रतौ नास्ति॥ २. '-नमाह' इति४॥ ३. तुलनीयोऽमरकोषः३।१।५०॥ ४. '-न्ति' इति३॥ ५. '-ण्' इति३, '-न्' इति५॥ ६. 'अष्टावित्यर्थः' इति३॥ ७. तुलनीयोऽमरकोषः३।१।५१॥ ८. 'भ-' इति४॥ ९. '-दीपिका' इति३॥ १०. 'इति कः' इति ४.५प्रत्योर्नास्ति ॥ ११. 'वा' इति३, 'ता' इति५॥ १२. '-रः' इति४.५॥ १३. '-साः' इति५॥ १४. इतोऽग्रे ३प्रतौ 'कृतौ' इति दृश्यते ॥ १५. ४.५प्रत्योर्नास्ति ॥ १६. कोष्ठान्तर्गतपाठः ३प्रतौ नास्ति ॥ १७. 'किल' इति४.५॥ १८. इतोऽग्रे ३प्रतौ-''इत्याचार्यैर्हेमचन्द्रैरुदारैरेषा भव्या नाममाला व्यधायि । तस्यां काण्डोऽभूत् तूरीयः प्रपूर्णाः (प्रपूर्णः) शास्त्रज्ञानां कोविदानां मनोज्ञः ॥१॥ इति तुर्यः काण्डः सम्पूर्णः कृतः पयाशारूपार्णवेन'' इति दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥ पञ्चमो नारककाण्डः ॥

व्याख्यातं चतुर्थं[1] तिर्यक्काण्डमथ नारककाण्ड-व्याख्यानं प्रारभ्यते-

**स्युर्नारकास्तु परेत-प्रेत-यात्या-तिवाहिकाः ।**

१ नरके भवा **नारकाः** । 'तत्र भवः'४।३।५३॥ इत्यण् । नरकस्थाः सत्त्वा जन्तवो नारका इति शैषिकोऽण् वा । यौगिकत्वान्नारकिक-नैरयिक-नारकीत्यादयः । २ कर्मणां परावृत्त्या इता[2]: **परेताः**[3] । ३ प्रकर्षेण इता[3]: **प्रेताः**[3] । "नारका जन्तवः प्रेता नदी वैतरणी मता" [ ]इति त्रिकाण्डशेषः[4] । ४ यात्यन्ते पीडां विषाद्यन्ते[5] (विषाद्यन्ते) **यात्याः**, अन्तस्थाद्योपधः । ५ अतिवाह्यन्त **अतिवाहिकाः** । पृषोदरादित्वात् । पञ्च नारकस्य । 'नारकी' इति भाषा ॥

**आजूर्विष्टिः**

१ आजायत **आजूः** । आङ्पूर्वाद् 'जनी प्रादुर्भावे'(दि.आ.से.)अस्माद् 'भ्रमेश्च डूः'(उणा-२२६)इति बाहुलकाड्डूः । चमूशब्दवद् रूपाणि । २ विष्यते **विष्टिः** । 'विष्लृ व्याप्तौ'(जु.उ.अ.), 'स्त्रियां क्तिन्'३।३।९४॥, विष्टिः । द्वावपि स्त्रीलिङ्गौ । "विष्टिराजूः"[अमरकोषः१।९।३॥]इत्यमरः । "आजूर्वेतनयोर्विष्टिः कर्मकृत्कर्मणोरपि"[शाश्वतकोशः, श्लो-५०७]इति शाश्वतः । "वृष्टिरिति सप्तमस्वरादिरपि"[ ]इत्यभिधानरत्नाकरः । नरके हठात् क्षेपनाम्नी द्वे ॥

**यातना तु कारणा तीव्रवेदना ॥१३५८॥**

१ यात्यते प्रयत्नं कार्यते[6] निधनायाऽनयेति **यातना** । 'यती प्रयत्ने'(भ्वा.आ.से.), णिजन्तः, 'ण्यासश्रन्थोः-'३।३।१०७॥ इति युच्, स च स्त्रियाम् । २ कार्यतेऽनया **कारणा** । कृञो णिजन्ताद् 'ण्यासश्रन्थोः-'३।३।१०७॥ इति युच् । ३ तीव्रा चाऽसौ वेदना च **तीव्रवेदना** । यथा-

"अङ्गानां शतयातना नयनयोः कोऽपि क्रमो[7] रौरवः ।
कुम्भीपाकपराभवश्च मनसो युक्तं त्वयि प्रस्थिते ॥१॥"

[ ]इति भानुदत्तः । "कारणा निरयवह्निषु स्थिता"[8] [ ]इति च । द्वे नरकवेदनायाः ॥१३५८॥

**नरकस्तु नारकः स्यान्निरयो दुर्गतिश्च सः ।**

१ नरान् कायति[9] **नरकः** । 'कै शब्दे'(भ्वा.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥ । नरतीति वा । 'नॄ नये'(क्र्या.प.से.), 'कृञादिभ्यः [संज्ञायां] वुन्'[10] (उणा-७१३) । "नराः कायन्त्यत्रेति, मूलविभुजादित्वात् कः[11]"[अम.क्षीर.१।९।१॥]इति स्वामी । २ 'अन्येषामपि दृश्यते'६।३।१३७॥इति दीर्घत्वे **नारकः** । प्रज्ञाद्यणि वा । ३ निर्गतोऽयाच्छुभावहविधेः **निरयः** । ४ दुःखेन गतिरस्यां[12] **दुर्गतिः**, स्त्रीलिङ्गः । सामान्येन चत्वारि नरकस्य ॥

अथ तद्विशेषानाह-

**घनोदधि-घनवात-तनुवात-नभःस्थिताः ॥१३५९॥**
**रत्न-शर्करा-वालुका-पङ्क-धूम-तमःप्रभा ।**
**महातमःप्रभा चेत्यदोऽधो नरकभूमयः ॥१३६०॥**
**क्रमात् पृथुतराः सप्ताऽथ त्रिंशत् पञ्चविंशतिः ।**
**पञ्चदश दश त्रीणि लक्षाण्यूनं च पञ्चभिः ॥१३६१॥**
**लक्षं पञ्च च नरकावासाः सीमन्तकादयः ।**
**एतासु स्युः क्रमेण**

---

१. ४.५प्रत्योर्नास्ति ॥ २. '-तः' इति३.४.५॥ ३. '-तः' इति३॥ ४. त्रिकाण्डशेषे न दृश्यते ॥ ५. 'विगा-' इति३, 'विष-' इति४, 'विष्या-' इति५॥ ६. 'क्रियते' इति१॥ ७. '-मोऽपि' इति१॥ ८. द्र. अनेकार्थकैरवाकरकौमुदीटीका, भा-२, ३।९८७॥, पृ.८३॥ ९. '-ते' इति३॥ १०. '-ञ्' इति३॥ ११. अम.क्षीरस्वामिकृतटीकायाम्- "नराः कायन्त्यस्मिन् नरकः" इत्येव दृश्यते, पृ.६०॥, द्र. पदचन्द्रिका, भा-१, नरकवर्गः, श्लो-२२५, पृ.२६७॥ १२. '-स्या' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ सप्तनरकभूमिनामानि रत्नादिभ्य: षड्भ्य: परा प्रभा योज्यते, तेन **रत्नप्रभा १, शर्कराप्रभा[१] २, वालुकप्रभा ( वालुकाप्रभा ) ३, पङ्कप्रभा ४, धूमप्रभा ५, तम:प्रभा ६, महातम:प्रभा ७** चेति । कीदृशा एता: ?, घनो निबिडो न तु द्रवरूप उदधि: **घनोदधि:,** एवं घनश्चासौ वातश्च **घनवात:** निबिडवात:, तनुश्चासौ वातश्च **तनुवात:, नभ:** व्योम, तेषु प्रत्येकं स्थिता:, प्रतिष्ठिता इत्यर्थ: । पुन: कीदृशा: ?, क्रमात् क्रमेण पृथुतरा: । अधोऽधो नरकभूमयो भवन्ति । रत्नप्रभादिसप्तनरकपृथिवीषु नरकावाससङ्ख्यामाह- अथेति, रत्नप्रभायां त्रिंशल्लक्षाणि नरकावासा: १, शर्कराप्रभायां[१] पञ्चविंशतिलक्षाणि २, वालुकाप्रभायां[२] पञ्चदशलक्षाणि ३, पङ्कप्रभायां दशलक्षाणि ४, धूमप्रभायां त्रीणि लक्षाणि ५, तम:प्रभायां पञ्चोनमेकं लक्षम् ६, सप्तम्यां महातम:प्रभायां तु पञ्च एव नरकावासा भवन्तीति ७ । आदिग्रहणाद् रौद्र१हाहारव२घातनादयो ग्राह्या: ।

[ शेषश्चात्र-

''अथ रत्नप्रभा घर्मा वंशा तु शर्कराप्रभा ।
स्याद् वालुकाप्रभा शैला भवेत् पङ्कप्रभाऽञ्जना ॥१॥
धूमप्रभा पुना रिष्टा माधव्या तु तम:प्रभा ।
महातम:प्रभा माधव्येवं नरकभूमय: ॥२॥''
[शेषनाममाला ४।१९७-१९९॥] ] ॥१३५९-१३६१॥

**अथ पातालं[1] वडवामुखम्[2] ॥१३६२॥**
**बलिवेश्मा[3]ऽधोभुवनं[4] नागलोको[5] रसातलम्[6] ।**

१ पतन्त्यत्र पापादिति[३] **पातालम्** । 'पत्लृ पतने[४]' (भ्वा.प.से.), 'पतिचण्डिभ्यामालञ्'(उणा-११४) । २ वडवाया मुखमिव **वडवामुखम् ॥१३६२॥ ३** बलेर्वेश्म गृहं **बलिवेश्म,** नकारान्त:, क्लीबलिङ्ग: । ४ अधश्च तद्भुवनं च **अधोभुवनम्,** पवर्गचतुर्थपञ्चमस्वरमध्य: । अध इत्यपि, ''अधोऽव्ययं स्यात् पाताले''[त्रिकाण्डशेष: १।८।१॥]इति त्रिकाण्डशेषात् । ५ नागानां लोको भुवनं **नागलोक:** । यौगिकत्वादधोलोकफणिभृद्भवनादयोऽपि[५] ज्ञेया: । ६ रसाया: पृथिव्यास्तलमध: **रसातलम्** । ''तलमध:-स्वरूपयो:[६]''[ ]इत्यनेकार्थ: । षट् पातालस्य ॥

**रन्ध्रं[1][७] बिलं[2] निर्व्यथनं[3] कुहरं[4] शुषिरं[5] शुषि:[6] ॥१३६३॥**
**छिद्रं[7] रोपं[8] विवरं[9] च निम्नं[10] रोकं[11] वपा[12]ऽन्तरम्[13] ।**

१ रन्ध्यति हिनस्ति **रन्ध्रम्** । 'रध हिंसायाम्[८]' (दि.प.से.), णिजन्त:, 'स्फायितञ्चि-'(उणा-१७०)इत्यादिना बाहुलकाद् रकि[९] । ''रिणाति(रणति) रन्ध्रम्, पृषोदरादि:''[अम.क्षीर.१।७।२॥]इति स्वामी[१०] । ''रमन्ते सर्पादयोऽत्रेति शुभ्रादय इति । 'रमु क्रीडायाम्'(भ्वा.आ.अ.), अस्माद्धातो: रक्धुकौ''[[११]]इति सर्वधर: । २ बिलति भिनत्ति विदारयति **बिलम्** । 'विड भेदने'(तु.प.से.), 'इगुपधज्ञाप्रीकिर: क:'३।१।१३५॥ इति क:, डलयोरेकत्वस्मरणम् । ३ निश्चयेन व्यथनं भयमत्रेति **निर्व्यथनम्** । 'व्यथ भयचलनयो:[१२]'(भ्वा.आ.से.), अधिकरणे ल्युट् । ४ कुं मही हरति **कुहरम्** । 'हृञ् हरणे'(भ्वा.उ.अ.), 'हरतेरनुद्यमनेऽच्'३।२।९॥ इति कर्मण्यच् । यद्वा[१३] 'कुह विस्मापने'(चु.आ.से.), 'इगुपध-'३।१।१३५॥ इति क:, कित्त्वाद् गुणाभाव: कुह:, तं रातीति । 'आतोऽनुपसर्गे क:'३।२।३॥ 'आतो लोप इटि च'६।४।६४॥ इत्यालोप: । ५ शुष्यत्यनेन **शुषिरम्** । 'शुष शोषणे'(दि. प.अ.), तालव्यादि:, 'इषिमदि-'(उणा-५१)इत्यादिना बाहुलकात् किरच्, कित्त्वाद् गुणाभाव: । यद्वा शुषेरिगुपधत्वात्[१४][१५] कि: शुषि:, 'ऊष[१६]-शुषि[१७]-'५।२।१०७॥ इत्यादिना र: । वाच्यलिङ्गोऽयम् । ६ 'इगुपधात् कि: (कित्)'(उणा-५५९)इति [१८]किप्रत्यये **शुषि:** । 'कृदिकारादक्तिन:[१९]'(वा-४।१।४५॥)इति ङीषि शुषीत्यपि । सुषिरिति दन्त्यादिरपि, ''[विवराभिधायिनि शुषिरादौ] शास्त्रेषु दन्त्यताल्व्येषु (दन्त्यतालव्यौ)''

---

१. 'शर्कर-' इति३.४.५॥ २. 'वालुक-' इति३.४.५॥ ३. 'पाता-' इति४॥ ४. 'शल हुल पत्लृ गतौ' इति क्षीरतरङ्गिण्यादय: ॥ ५. '-ऽपि' ४.५प्रत्योर्नास्ति॥ ६. ''अध:स्वरूपयोरस्त्री तलम्'' इत्यमरकोष:३।३।२०२॥ ७. 'रन्ध्रे' इति३॥ ८. 'रध हिंसासंराद्ध्यो:' इति क्षीरतरङ्गिण्यादय:॥ ९. '-क्' इति१.२॥ १०. अम.क्षीरस्वामिकृतटीकायाम्-''रणति रन्ध्रम्'' इत्येव दृश्यते, पृ.५७॥ ११. द्र. पदचन्द्रिका, भा-१, पातालभोगिवर्ग:, श्लो-२१५, पृ.२५५॥, तत्र-''रमन्ते अत्र शुम्भादय इति रक्, धुक् चागम:'' इति दृश्यते ॥ १२. 'भयसञ्च-' इति४.५, मा.धातुवृत्तिश्च ॥ १३. ४.५प्रत्योर्नास्ति॥ १४. 'शुषि-' इति१॥ १५. '-धात्' इति४.५॥ १६. 'उषि-' इति३॥ १७. '-सुषि-' इति त्वष्टाध्याय्याम् ॥ १८. 'इन्' इत्यस्याऽनुवृत्तित्वादिन्प्रत्ययो भवति, स च कित् ॥ १९. '-न्' इति५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[ ][1] [इति] ऊष्मविवेकात् ॥१३६३॥ ७ छिद्र्यते **छिद्रम्** । 'छिद्र भेदने'[2](चु.उ.से.), चुरादिः (चुरादिण्यन्ताद्), 'एरच्'३।३।५६॥ इत्यच् । 'छिदिर् द्वैधीकरणे' (रु.उ.अ.), 'स्फायितञ्चि-'(उणा-१७०)इत्यादिना रक्प्रत्यये वा । ८ रोप्यते निखन्यते **रोपम्** । 'रोप रोपणे'( ), घञ् । ९ विवृणोति **विवरम्** । 'वृञ् वरणे'(स्वा. उ.से.), पचाद्यच्[3] । विगतो वरो वारणमत्रेति वा । १० निकृष्टो म्ना अभ्यासः सलिलस्याऽत्रेति **निम्नम्** । नीचभावमभ्यस्यतीति वा। 'म्ना अभ्यासे'(भ्वा.प.अ.), घञर्थे कः। ११ रोचते प्रकाशते[4] **रोकम्** । 'रुच दीप्तौ' (भ्वा.आ.से.) बाहुलकात् कर्तरि घञ्, कुत्वम् । "रोकमिति लोकाश्रयत्वाल्लिङ्गस्येति क्लीबत्वम्"[ ][5]इति सुभूतिः । १२ उप्यतेऽत्रेति **वपा** । वपेर्भिदादिपाठाद्दङ्, टाप्, गङ्गावत् । १३ अनिति **अन्तरम्**, पुंक्ली.। 'अन प्राणने'(अ.प.से.), 'अनिकाभ्यां तरः'(हैमोणा-४३७) । त्रयोदश बिलस्य ॥

**गर्त-श्वभ्रा-ऽवटा-ऽगाध-दरास्तु विवरे भुवः ॥१३६४॥**

१ गिरति पतद्द्रव्यमिति **गर्तः** । 'गॄ निगरणे' (तु.प.से.), 'हसि-'(उणा-३६६)इति तन्, पुंक्लीबलिङ्गोऽयम् । गर्ता टाबन्ताऽपि । 'षट् कृशरगर्तकगर्ता' [ ][5]इति स्त्रीनपुंसकप्रकरणे रभसात् । २ शोभनमभ्रमाकाशमत्र **श्वभ्रम्** । शोभनवाची शुः शब्दस्तालव्यान्तोऽपि(-व्योऽपि) । अन्ये तु- 'श्वभ्र गत्याम्'(चु.उ.से.) इत्यतोऽचि साधयन्ति । "शुभ्रं श्वानं बिभर्ति, मूलविभुजादित्वात् के, श्वभ्रम्"[ ][6]इत्यन्ये । "श्वभ्रकाश्मीरशिल्पम्"[ ][7]इत्यूष्मविवेकात् तालव्यादिरयम् । "सुष्ठु अभ्रमत्रेति स्वभ्रं दन्त्याद्यपि[8]"[ ][9]इति पञ्जिका । ३ अवन्त्यात्मानमस्मादिति **अवटः** । 'अव रक्षणादौ'(भ्वा. प.से.), 'शकादिभ्योऽटन्'(उणा-५२१) । अवटिरिति तृतीयस्वरान्तोऽपि । ४ नास्ति गाधः प्रतिष्ठाऽत्रेति **अगाधम्** । 'गाधृ प्रतिष्ठालिप्सयोः'(भ्वा.आ.से.), अचि वा । ५ **दरः** भयनामसु(अभि.,श्लो-३०१,) त्रिलिङ्गोऽयम् । भुवो विवरे पृथिव्याश्छिद्रे । "श्वभ्रगर्तावटागाध(-धा) भुवो विवरवाचकाः"[ ][6]इति कात्यः ॥१३६४॥

**॥ ([10]इत्याचार्यश्रीहेमचन्द्रविरचितायामभिधानचिन्तामणौ नाममालायां नारककाण्डः पञ्चमः)॥**

([11]सर्वाङ्गीणकलाविलासनिलयः कल्पद्रुमाभः कलौ
जाग्रत्सर्वजनीनमञ्जुमहिमो मित्रप्रतापोदयः ।
श्रीमच्छ्रीविधिपक्षगणभृद् भूभृन्नतांह्रिद्वयः
**श्रीकल्याणसमुद्रसूरिसुगुरुः** सूरीन्द्रचूडामणिः ॥१॥
([12]तन्निर्देशविधायिवाचकवरश्रेणीकिरीटोपमा
भास्वत्साधुगुणौघशालि**विनया**च्चन्द्राभिधा वाचकाः ।
तच्छिष्या '**रविचन्द्र**' इत्यभिधया तेषां विनेयो व्यधा-
देनं वाचक**देवसागर**गणिर्व्युत्पत्तिरत्नाकरम् ॥२॥)

**॥ इति श्रीवाचकवरदेवसागरविरचितायामभिधानचिन्तामणिनाममालायां व्युत्पत्तिरत्नाकरटीकायां नारककाण्डः पञ्चमः ॥**

---

१. द्र. पदचन्द्रिका, भा-१, पातालभोगिवर्गः, श्लो-२१५, पृ.२५५-२५६॥ २. 'छिद कर्ण भेदे ('भेदने' इति मैत्रेयः)' इति स्वामिमैत्रेयौ, 'छिद्र कर्णभेदने' इति सायणः॥ ३. '-चि' इति४॥ ४ '-स्ते' इति२.३.४॥ ५ द्र. टीकासर्वस्वम्, भा-१, १।८।२॥, पृ.१६७॥, तत्र-"रभसेन तु 'ज्वालासन्तारभसगर्तकगर्तृशृङ्गाः' इत्यनेन स्त्रीत्वमुक्तम्" इति दृश्यते॥, पदचन्द्रिका, भा-१, पातालभोगिवर्गः, श्लो-२१६, पृ.२५६॥, तत्र-"शरटकृसरवर्तकगर्तशृङ्गा" इति स्त्रीपुंसप्रकरणे रभसात्" इति दृश्यते ॥ रामाश्रमी१।८।२॥, पृ.११२, तत्र-" 'शरट-कृसर-गर्त-शृङ्गाः' इति स्त्रीपुंसप्रकरणे रभसात्" इति दृश्यते ॥ ६. द्र. पदचन्द्रिका, भा-१, पातालभोगिवर्गः, श्लो-२१५, पृ.२५५॥ ७ 'श्वभ्रं' इति१॥ ८ '-दिरपि' इति१॥ ९. द्र. अम.क्षीर. १।७।२॥, पृ.५७॥ १०. कोष्ठान्तर्गतपाठस्थाने ३प्रतौ-"इति श्रीहेमचन्द्रेण हैमकोषं वरं कृतम् । तत्राऽगात् पञ्चमकाण्डः पूर्णतां शब्दसंयुतः ॥" इति दृश्यते ॥ ११. कोष्ठान्तर्गतपाठः ३.४.५प्रतिषु न दृश्यते ॥ १२. कोष्ठन्तर्गतपाठः २प्रतौ नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥ षष्ठः सामान्यकाण्डः ॥

उक्ता देवाधिदेवादयो मुक्ताः संसारिणश्च सुरा मनुजास्तिर्यञ्चो नारकाश्च क्रमशोऽसाधारणाङ्गसहिताः[३] पञ्चभिः काण्डैः, इदानीं तत्साधारणनामाभिधायि षष्ठं सामान्यकाण्डं [१]विव्रियते[२] -

### स्याल्लोको विष्टपं विश्वं भुवनं जगती जगत् ।

१ लोक्यतेऽवलोक्यते केवलज्ञानिभिरिति **लोकः** । 'लोकृ दर्शने'(भ्वा.आ.से.), कर्मणि घञ् । ''लोकतेऽवलोकतेऽनन्तज्ञानो[३] भगवानस्मिन्''[[४]]इति मिश्राः । २ विशन्त्यस्मिन् जीवादयः पदार्था इति **विष्टपम्**, पुंक्ली. । ''भुवनं विष्टपः पुमान्''[ ]इति वोपालितः पुंस्येवाऽऽह । 'विश प्रवेशने'(तु.प.अ.), 'विटपविष्टपविशिपोलपाः'(उणा-४२५)कपचि साधवः(इति साधुः)[५]। ३ विशन्ति सर्वे पदार्था अत्रेति **विश्वम्** । विशेः 'अशुप्रुषिलटिकटिकणिखटिविशिभ्यः क्वन्'(उणा-१४९) । ४ भवन्ति विद्यन्ते भूतान्यत्रेति **भुवनम्**, पुंक्ली. । 'भू सत्तायाम्'(भ्वा.प.से.), 'भूसूधूभ्रस्जिभ्यः-'(उणा-२३८)क्युन्[६], 'युवोरनाकौ'७।१।१॥, 'अचि श्नुधातु-'६।४।७७॥ इत्युवङ् । ५ गच्छन्त्यस्यां **जगती** । 'गम्लृ गतौ'(भ्वा.प.अ.), 'वर्तमाने पृषद्बृहन्महज्जगत्सरसां शतृवच्च[७]'(उणा-२४१)इति शतृवद्भावाद् 'ऋन्नेभ्यः-'४।१।५॥ इति ङीप् । ६ गच्छतीत्यवंशीलं **जगत्**, क्लीबे । 'गम्लृ गतौ'(भ्वा.प.अ.), 'द्युतिगमिजुहोतीनां द्वे च'(वा-३।२।१७८॥)इति क्विप्, 'गमः क्वौ'६।४।४०॥ इत्यनुनासिकलोपः, 'ह्रस्वस्य-'६।१।७१॥ इति तुक् । षड् लोकस्य ॥

### जीवाजीवाधारक्षेत्रं लोकः

१ जीवाः प्राणिन एकेन्द्रियादयस्तेभ्योऽन्येऽजीवा धर्मास्तिकायादयस्तेषामाधारभूतं क्षेत्रं जीवाजीवाधारक्षेत्रम्, तस्य नामैकं **लोकः** इति[८] ॥

### अलोकस्ततोऽन्यथा ॥१३६५॥

१ ततस्तस्माल्लोकादन्यथाऽन्यस्वरूपः केवलाकाशरूप **अलोकः** इत्युच्यते ॥१३६५॥

### क्षेत्रज्ञ आत्मा पुरुषश्चेतनः

१ क्षेत्रं देहमात्रं जानाति चेतयते[९] शरीरप्रमाणत्वात् **क्षेत्रज्ञः** । ''ज्ञानस्य शरीरात्मसंयोगासमवायिकारणकत्वात्'' [[१०]]इति कौमुदी । तथा च गीता-

''इदं शरीरं कौन्तेय! क्षेत्रमित्यभिधीयते ।
एतद् यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥१॥''

[भगवद्गीता, अध्यायः-१३, श्लो-१]इति[११] । क्षेत्रे शरीरे जानातीति क्षेत्रज्ञ इति[१२] वा । २ अतति देहाद् देहान्तरं सञ्चरति **आत्मा**, पुंसि । 'अत सातत्यगमने'(भ्वा.प.से.), 'सातिभ्यां मन्मनिनौ (मनिन्मनिणौ)'(उणा-५९२)इति मनिन् । ३ पुरि(पुरे) शेते **पुरुषः** । पृषोदरादिः ।

''अव्यक्तं मन इत्याहुः शरीरं पुरमुच्यते ।
अव्यक्तके पुरे शेते पुरुषस्तेन चोच्यते[१२] ॥२॥''[[१०]]इत्युक्तेः[११][१३]।

''पुनात्यनेन पुरुषः''[[१०]]इत्यन्ये । ४ चेतयते **चेतनः** । 'चिती संज्ञाने'(भ्वा.प.से.), णिजन्तः, नन्द्यादित्वाल्ल्युः । जीवोऽपि । चत्वारि जीवस्य[१४] ॥

### स पुनर्भवी[१५] ।

### जीवः स्यादसुमान् सत्त्वं देहभृज्जन्यु-जन्तवः ॥१३६६॥

१ स आत्मा, भवोऽस्त्यस्य भवी । 'अत इनिठनौ'५।२।११५॥इतीनिः । १ जीवति प्राणान् धारयति[१६] **जीवः** । 'जीव प्राणधारणे'(भ्वा.प.से.), पचाद्यच् । २ असवः प्राणाः सन्त्यस्य **असुमान्** । 'तदस्यास्ति-'५।२।९४॥इति मतुप्, 'उगिदचाम्-'७।१।७०॥ इति नुम्[१७]। प्राणीत्यपि । ३ सीदति **सत्त्वम्**, पुंक्ली. । 'षद्लृ विशरणादौ'(भ्वा.तु.प.अ.), वप्रत्ययः । ४ देहं बिभर्ति **देहभृत्** । 'डुभृञ् धारणादौ'(जु.उ.अ.), क्विप्, 'ह्रस्वस्य-

---

१. 'विवृ-' इति१ ॥ २. '-न्ते' इति४ ॥ ३. '-निभिः' इति१ ॥ ४ द्र. पदचन्द्रिका, भा-२, भूमिवर्गः, श्लो-६, पृ.८ ॥, रामाश्रमी२।१।६ ॥, पृ.१४३ ॥ ५. कोष्ठान्तर्गतपाठोऽनावश्यकः ॥ ६. 'क्वुन्' इति३ ॥ ७ '-जगच्छतृवच्च' इत्युणादिगणसूत्रे ॥ ८. 'लोकर्मिति नामैकम्' इति३ ॥ ९ 'चेत् तन्मते' इति१ ॥ १०. द्र. पदचन्द्रिका, भा-१, कालवर्गः, श्लो-१३१, पृ.१६७ ॥ ११. द्र. टीकासर्वस्वम्, भा-१, १।४।२९ ॥, पृ९९ ॥ १२. 'वो-' इति३.४ ॥ १३. '-क्तः' इति४ ॥ १४ 'परमात्माना नाम' इति १प्रतेष्टिप्पणी ॥ १५. 'संसारी जीव नाम' इति १प्रतेष्टिप्पणी ॥ १६. '-तीति' इति४ ॥ १७ 'मुम्' इति१ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

' ६।१।७१॥इति तुक् । यौगिकत्वाद् देहभाक्, शरीरीत्यादयः । ५ जायत उत्पद्यते **जन्युः**। 'जनी प्रादुर्भावे' (दि.आ.से.), 'जनि(यजि)मनि-'(उणा-३००)इति युच्, बाहुलकाद्, 'युवोरनाकौ'७।१।१॥ इत्यस्याऽप्राप्तिः। ६ जायत उत्पद्यते जन्तुः । 'जनी प्रादुर्भावे'[1](दि.आ.से.), 'कमिमनिजनिगापाभायावाहिभ्यश्च'[2](उणा-७२)इति तुः, पुंनपुंसकलिङ्गोऽयम्, शेषाः पञ्च पुंलिङ्गाः । षट् संसारिजीवस्य ॥१३६६॥

**उत्पत्तिर्जन्म-जनुषी जननं जनिरुद्भवः ।**

१ उत्पदनम् **उत्पत्तिः** । उत्पूर्वः 'पद गतौ'(दि.आ.अ.), 'स्त्रियां क्तिन्'३।३।९४॥ । २ जननं **जन्म,** क्लीबे । 'जनी प्रादुर्भावे'(दि.आ.से.), '-मनिन्'(उणा-५८४)इति मनिन् । अदन्तोऽपि जन्मशब्दः[3], कुलवत् । ३ जननं **जनुः,** क्लीबे । 'धनर्ति(रुद्यर्ति-)-' (हैमोणा-९९७)इत्युस्[4] । ४ जन्यते **जननम्** । ल्युट् । ५ जन्यते **जनिः,** स्त्रीलिङ्गः, मतिशब्दवत् । ६ उद्भवनम् **उद्भवः** । 'ऋदोरप्'३।३।५७॥ । षड् जन्मनः ॥

**जीवेऽसुजीवितप्राणाः**

१ जीव्यते **जीवः,** त्रिलिङ्गः। पचाद्यच्, 'हलश्च' ३।३।१२१॥ इत्यधिकरणे घञ् वा । २ अस्यन्ते **असवः,** पुंलिङ्गः, बहुवचनान्त एव । 'असु क्षेपणे'(दि.प.से.), 'मृ(शॄ)स्वृस्निहित्रप्यसिवसिहनिक्लिदि- '(उणा-१०)इत्यादिना उप्रत्ययः । ३ जीव्यतेऽत्रेति **जीवितम्** । बाहुलकादितच् । जीवातुरपि । ''जीवे जीवनभेषजे जीवातुः पुंनपुंसके''[ ]इति गौडः । ४ प्राण्यत एभिः **प्राणाः,** पुंसि, बहुवचनान्तः । प्रपूर्वः 'अन प्राणने'(अ.प.से.), करणे घञ् । चत्वारि प्राणस्य ॥

**जीवातुर्जीवनौषधम् ॥१३६७॥**

१ येन म्रियमाणो जीवति, तदौषधम्, जीवत्यनेन[5] **जीवातुः,** पुंक्ली.। 'जीवेरातुः'(उणा-७९)इत्यातुः। २ जीवनायौषधम् **जीवनौषधम्** । द्वे[6] जीवरक्षोपायस्य ॥१३६७॥

**श्वासस्तु श्वसितम्**

१ श्वसनं **श्वासः** । 'श्वस प्राणने'(अ.प.से.), भावे घञ् । श्वसितीति, 'श्याद्व्यधा-'३।१।१४१॥ इति णो वा । २ श्वस्यते स्म **श्वसितम्**। भावे क्तः । द्वे सामान्येन श्वासस्य॥

**सोऽन्तर्मुख उच्छ्वास आहरः । आनः**

१ स श्वासोऽन्तर्मुखो मुखमध्यवृत्तिः, उच्छ्वसित्यनेन **उच्छ्वासः** । करणे घञ् । २ आहरत्यनेन **आहरः** । 'ऋदोरप्'३।३।५७॥। ३ अनित्यनेन **आनः**। 'अन प्राणने' (अ.प.से.), घञ् । त्रीणि 'ऊसास'[7] इति ख्यातस्य॥

**बहिर्मुखस्तु स्यान्निःश्वासः पान एतनः ॥१३६८॥**

१ बहिर्मुखो बहिरङ्गवृत्तिः, निःश्वसित्यनेन **निःश्वासः**। करणे घञ्। २ पीयतेऽनेन **पानः** । 'पा पाने' (भ्वा.प.अ.), करणे ल्युट् । ३ एति **एतनः** । 'इण् गतौ'(अ.प.अ.), 'अणस्तनन्'( )इति तनन् । त्रीणि निःश्वासस्य ॥१३६८॥

**आयुर्जीवितकालः**

१ एति जन्मान्तरमनेनेति **आयुः,** क्लीबे। 'एतेर्णिच्च'(उणा-२७५)इत्युसिप्रत्ययः, णित्त्वाद् वृद्धिः। बाहुलकात् 'कृवापाजि-'(उणा-१)इत्यादिना उणि आयुरुकारान्तोऽपि भानुवत् । ''विन्द्यादायुं तथाऽऽयुषा''[पुरुषोत्तमदेवकृतः शब्दभेदप्रकाशः, श्लो-१५]इति द्विरूपकोषः । २ जीवितेनाऽवच्छिन्नः कालः **जीवितकालः**। द्वे आयुषः॥

**अन्तःकरणं मानसं मनः ।**

**हृच्चेतो हृदयं चित्तं स्वान्तं गूढपथोच्चले॥१३६९॥**

१ अन्तर्गतं करणानामिति **अन्तःकरणम्** । ''आत्मा मनश्च तद्विज्ञैरन्तःकरणमुच्यते''[ ]इति कामन्दकिः[8] । ''मनो बुद्धिरहङ्कार इत्यन्तःकरणं त्रिधा''[ ]इत्यन्ये[9]। २ मन एव **मानसम्** । 'प्रज्ञादिभ्यश्च'५।४।३८॥ इति स्वार्थेऽण् । ३ मनुते जानाति पदार्थानिति **मनः** । मन्यत इति वा । 'मनु अवबोधने'(त.आ.से.), 'मनु (मन) ज्ञाने'(दि.आ.अ.), '-असुन्'(उणा-६२८)इति सूत्रेणाऽसुन्। ''सर्वार्थग्रहणं मनः''[प्रमाणमीमांसा, अध्या-१, आह्नि-१, सू-२४]इति तार्किकाः[10] । ४ ह्रियते विषयै-

१. 'जनी प्रादुर्भावे' इति १.२.३.५प्रतिषु नास्ति॥ २. '-वा-' इत्युणादिगणे नास्ति॥ ३. 'इषियुधीन्धि-'(उणा-१४२)इत्यादिना मकि साधुः ॥ ४ 'जनेरुसिः'(उणा २७२)इत्यनेनाऽप्युस् ॥ ५. तुलनीयोऽमरकोषः२।८।१२०॥ ६ 'जीव्य-' इति४.५॥ ७ 'एकं' इति३॥ ८. 'उ-' इति१.३॥ ९. तुलनीयोऽमरकोषः२।८।१२०॥ १०. द्र. स्वोपज्ञटीका ६।१३६९॥, पृ.३०७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

र्गिति **हृद्** । हरतेः क्विपि तुकि, वर्णव्यत्ययात् तकारस्य दत्वम् । तथा च "हृदि प्राणः"[अमरकोषः१।१।६४॥] इति प्रयोगः । "दान्तं प्रकृत्यन्तरमस्ति"[अम.क्षीर.१।३।३१॥]इति स्वामी । ५ चेतति **चेतः**, क्लीबे । 'चिती संज्ञाने'(भ्वा.प.से.), '-असुन्'(उणा-६२८)। ६ ह्रियते विषयैः **हृदयम्** । 'हृञ् हरणे'(भ्वा.उ.अ.), 'घृञ्हृञोः (वृह्रोः) षुग्दुकौ च'(उणा-५४०)इति कयप्रत्ययो (कयन्प्रत्ययो) दुक् चाऽऽगमः । ७ चेतति **चित्तम्** । 'चिती संज्ञाने'(भ्वा.प.से.), 'मतिबुद्धिपूजार्थेभ्यश्च'३।२।१८८॥ इति वर्तमाने क्तः । ८ स्वनति **स्वान्तम्** । 'स्वन शब्दे' (भ्वा.प.से.), 'क्षुब्धस्वान्तध्वान्त-'७।२।१८॥ इति साधुः । मनोऽभिधानं चैतदन्यत्र स्वनितो मृदङ्गः । "विषयेष्वनाकुलं मनः स्वान्तम्"[[1]]इत्यन्ये । ९ गूढः पन्था अस्य **गूढपथम्** । 'ऋक्पूरब्धू-'५।४।७४॥ इत्यप्रत्ययः, 'नस्तद्धिते'६।४।१४४॥ इति टिलोपः। **१०** उद् अत्यर्थं चलति **उच्चलम्** । 'चल चलने[2]'(भ्वा.प.से.), अच् । अनिन्द्रियमपि । दश मनसः ॥१३६९॥

## मनसः कर्म सङ्कल्पः स्यात्

१ इदमहं कुर्यामिति मनसो व्यापारः, सङ्कल्पनं **सङ्कल्पः** । 'कृपू सामर्थ्ये'(भ्वा.आ.वे.), भावे घञ्, 'कृपो रो लः'८।२।१८॥इति लत्वम् । विकल्पोऽपि । एकं मनोव्यापारस्य ॥

## अथो शर्म निर्वृतिः ।
## सातं सौख्यं सुखम्

१ शृणाति दुःखं **शर्म,** क्लीबे । 'शॄ हिंसायाम्'(क्र्या.प.से.), 'सर्वधातुभ्यो मन्(मनिन्)'(उणा-५८४)इति मन्(मनिन्)। शर्ममदन्तमपि । २ निर्वरणं **निर्वृतिः** । [3]निर्पूर्वो 'वृञ् वरणे'(स्वा.उ.से.), 'स्त्रियां क्तिन्'३।३।९४॥ । ३ सन्यते **सातम्**। 'षणु[4] दाने'(तु.उ.से.), [क्तः], 'जनसन-'६।४।४२॥ इत्यात्वम् । सिनोत्यशुभं वा । 'हसिमृग्रिण्-'(उणा-३६६)इत्यादिना तनन् (तन्), बाहुलकादात्वम् । स्यति दुःखमिति वा । 'षोऽन्तकर्मणि'(दि.प.अ.), [अम.क्षीर.१।३।२५॥]इति स्वामी[5]। दन्त्यादिरयम् । "शतेः(श्यतेः) तालव्यादेः शातमिति तालव्यादिरपि"[ ]इति कौमुदी[6] । ४ सुखमेव **सौख्यम्**। 'चतुर्वर्णादीनां स्वार्थे ष्यञ् वाच्यः[7]'(वा-५।१।१२४॥ )। सुखस्य भाव इति, 'गुणवचनब्राह्मण-'(वा-५।१।१२४॥) इत्यादिना ष्यञ् वा। ५ शोभनानि खानीन्द्रियाण्यनेनेति[8] **सुखम्** । सुष्ठु खनत्यशुभमिति वा। 'खन खनने[9]'(भ्वा.उ.से.), 'अन्येभ्योऽपि (अन्येष्वपि)-'३।२।१०१॥ इति डः । 'जातिकालसुखादिभ्योऽनाच्छादनात्'६।२।१७०॥ इति स्वरसूत्रेण सुपूर्वात् खनो डच् वा। शं जोषं चाऽव्ययेषु (अभि-, श्लो-१५३५,१५२८)वक्ष्यते । पञ्च सुखस्य ॥

## दुःखं त्वसुखं वेदना व्यथा ॥१३७०॥
## पीडा बाधाऽऽर्तिराभीलं कृच्छ्रं कष्टं प्रसूतिजम् ।
## आमनस्यं प्रगाढं च

१ दुःखयति **दुःखम्** । 'सुख दुःख तत्क्रियायाम्'(चु.उ.से.), णिजन्तः, अच् । दुष्टानि खानीन्द्रियाण्यत्रेति वा । दुर्निन्द्यं खनति शरीरमिति वा । 'खन खनने'(भ्वा.उ.से.), 'अन्येभ्योऽपि(अन्येष्वपि)-'३।२।१०१॥इति डः । "सविसर्गं[10] दुःखम्"[ ]इति चान्द्राः, कालापाश्च । यथा-

"[11]काले तडिल्लताजालमेघमण्डलमण्डिते ।
कान्तः सर्वगुणोपेतो बालेन्दुः खे न लभ्यते ॥१॥"

[[12]]इति । **२** न सुखम् **असुखम्** । ३ वेदनं[13] **वेदना**। 'ण्यासश्रन्थोः-'३।३।१०७॥ इति युच् । ४ व्यथनं **व्यथा**। 'व्यथ दुःखसञ्चलनयोः[14]'(भ्वा.आ.से.), 'षिद्भिदादिभ्योऽङ्'३।३।१०४॥ ॥१३७०॥ ५ पीडनं **पीडा** । 'पीड

---

१. द्र. स्वोपज्ञटीका६।१३६९॥, पृ.३०७॥ २. क्षीरतरङ्गिण्यादावयमर्थो न दृश्यते ॥ ३. 'निपू-' इति१.२॥ ४ '-ण' इति३॥ ५. अम.क्षीरस्वामिकृतटीकायाम्-"श्यति दुःखं शातं, शो तनूकरणे, तन्" इति दृश्यते, पृ.३७॥, द्र. पदचन्द्रिका, भा-१, कालवर्गः, श्लो-१२७, पृ१६२॥ ६. द्र. पदचन्द्रिका, भा-१, कालवर्गः, श्लो-१२७, पृ.१६२॥ तत्र-"श्यतेः सौत्रात् तालव्यादीत्यपर" इति तु कौमुदी" इति दृश्यते॥ ७ 'चतुर्वर्णादीनां स्वार्थ उपसङ्ख्यानम्' इति वार्तिकं दृश्यते ॥ ८ '-ण्यत्रेति' इति३॥ ९ 'खनु अवदारणे' इति क्षीरतरङ्गिण्यादयः ॥ १०. '-र्गं' इति५॥ ११. 'क-' इति२.५॥ १२. द्र. टीकासर्वस्वम्, भा-१, १।९।३॥, पृ.१७५॥ पदचन्द्रिका, भा-१, नरकवर्गः, श्लो-२२८, पृ२६९॥ १३. ५प्रतौ नास्ति ॥ १४ 'भयचलनयोः' इति स्वामिमैत्रेयौ, 'भयसञ्चलनयोः' इति सायणः ॥ स्वामिना दुर्गमतमुट्टङ्क्य-"दुःख चलनयोरिति दुर्गः" इत्युक्तम्, क्षीरतरङ्गिणी, भ्वादिः, धातुसं-५११, पृ.१११॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अवगाहे[1]'(चु.प.से.), चुरादिः, भिदादित्वादङ्[2] । ६ एवं बाधनं **बाधा** । 'बाधृ लोडने[3]'(भ्वा.आ.से.), भिदादित्वादङ् । 'बाधः' इत्यदन्तोऽपि । ७ अर्दनम् **अर्तिः** । 'अर्द हिंसापीडनयोः[4]'(चु.उ.से.), 'स्त्रियां क्तिन्'३।३।९४॥, 'खरि च'८।४।५५॥ इति चर्त्वम्। ८ आ समन्ताद् भियं लाति[5] **आभीलम्** । 'ला दाने'(अ.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥, 'आतो लोपः-'६।४।६४॥ । '' 'इल स्वप्ने[6]'(तु.प.से.), अभिपूर्वः, 'इगुपध-'३।१।१३५॥ इति कः, 'अन्येषामपि-'६।३।१३७॥ इति दीर्घत्वे आभीलः (आभीलम्)''[7][ ]इति सर्वधरः । ९ कृन्तति **कृच्छ्रम्** । 'कृती छेदने'(तु.प.से.), 'कृतेश्छः क्रू च'(उणा-१७८)इति रक्, छान्तादेशः । १० कषति हिनस्ति **कष्टम्** । 'कष हिंसायाम्'(भ्वा.प.से.), वर्तमाने क्तः, 'कृच्छ्रगहनयोः कषः'७।२।२२॥ इतीडभावः । ११ प्रसूतेर्जातं **प्रसूतिजम्,** उपचारात् सामान्येऽपि[8] । १२ मानसाय हितम्, मानसे साध्विति वा । 'तस्मै हितम्'२।१।५॥, 'तत्र साधुः' ४।४।९८॥ इति सूत्रेण वा यति मानस्यम्, न मानस्यम् **अमानस्यम्** इति ह्रस्वादिः । ''प्रसूतिजममानस्यं कृच्छ्रं कष्टम्''[9][ ]इति वाचस्पतिः । '' 'अन्येषामपि-'६।३।१३७॥ इति दीर्घत्वे आमानस्यं[10] द्विदीर्घमपि''[9][ ]इति सुभूतिः। १३ प्रगाढमारब्धं **प्रगाढम्**। त्रयोदश दुःखस्य ॥

### स्यादाधिर्मानसी व्यथा[11] ॥१३७१॥

१ आधीयतेऽनेति **आधिः,** पुंसि। धाञः 'उपसर्गे घोः किः'३।३।९२॥ इति किः । मनसि भवा मानसी । 'तत्र भवः'४।३।५३॥ इत्यण्, 'टिड्ढाणञ्-'४।१।१५॥ इति ङीष्(ङीप्)। एकं मनःपीडायाः ॥१३७१॥

### सपत्त्राकृति-निष्पत्त्राकृती त्वत्यन्तपीडने ।

१-२ पत्त्रं शरः, सह पत्त्रमनेन सपत्त्रः कायनिक्षिप्तशरः, निर्गतं पत्त्रमस्मान्निष्पत्त्रः, शरीरान्तर्निर्गतबाणो हरिणादिः, सपत्त्रस्य करणं **सपत्त्राकृतिः,** निष्पत्त्रस्य करणं **निष्पत्त्राकृतिः** । 'सपत्त्रनिष्पत्त्रादतिव्यथने'५।४।६१॥ इति डाच् । स्त्रीलिङ्गावेतौ, उपचारादत्यन्तपीडनमात्रवाचकावपि । द्वे शरीरान्तरुत्पन्नमहाव्यथायाः ॥

### क्षुज्जाठराग्निजा पीडा

१ क्षुध्यत्यनया[12] **क्षुत्** । 'क्षुध बुभुक्षायाम्'(दि.प.अ.), क्विप् । क्षुधौ, क्षुधः इत्यादि, स्त्रीलिङ्गः । जठरे भवो जाठरः, स चाऽसावग्निश्च जाठराग्निस्तस्माज्जाता[13] जाठराग्निजा एतादृशी पीडा । एकं जाठराग्निपीडायाः ॥

### व्यापादो द्रोहचिन्तनम्[14] ॥१३७२॥

१ विरुद्धमापादनं **व्यापादः** । व्याङ्पूर्वः 'पद गतौ'(दि.आ.अ.), णिजन्तः, ततो भावे घञ् । २ द्रोहस्य चिन्तनं **द्रोहचिन्तनम्** । बाहुलकाल्ल्युट् । द्वे द्रोहचिन्तनस्य ॥१३७२॥

### उपज्ञा ज्ञानमाद्यं स्यात्[15]

१ स्वाधारत्वादुप समीपं ज्ञानम् **उपज्ञा** । 'आतश्चोपसर्गे'३।३।१०६॥ इत्यङ् । विनोपदेशेन प्रथमज्ञानमुपज्ञेत्यर्थः । यथा-वाल्मीकेः श्लोकनिर्माणे ज्ञानम्, पाणिनेरुपज्ञा पाणिन्युपज्ञं[16] व्याकरणम्, पाणिनिना आदौ कृतमित्यर्थः । एकं प्रथमज्ञानस्य ॥

### चर्चा सङ्ख्या विचारणा[17] ।

१ चर्चनं **चर्चा** । 'चर्च अध्ययने'(चु.उ.से.), चुरादिण्यन्ताद् भावे 'चिन्तिपूजिकथिकुम्बिचर्चश्च'३।३।१०५॥ इत्यङ् टाप् । चर्च इत्यदन्तोऽपि । २ सङ्ख्यानं **सङ्ख्या** । 'ख्या प्रकथने'(अ.प.अ.), सम्पूर्वः, 'आतश्चोपसर्गे'३।३।१०६॥ इत्यङ् । ३ विचारणं **विचारणा** । 'चर[18] असंशये[19]'(चु.उ.से.), चुरादिः, 'ण्यासश्रन्थोः-'३।३।१०७॥ इति युच्। त्रयोऽपि स्त्रीलिङ्गाः । ''त्रयं[20] प्रमाणैरर्थपरीक्षायाः''[21][ ]इत्येके । ''[22]विमर्शमात्रस्य''[21][ ]इत्यन्ये।

---

१. 'गहने' इति स्वामी, 'अवगाहने' इति मैत्रेयसायणौ ॥ २. '-दे:' इति३॥ ३. मैत्रेयसायणसम्मतोऽयं पाठः, '-रोटने' इति स्वामी॥ ४. 'अर्द हिसि हिंसायाम्' इति स्वामिमैत्रेयो, सायणमते पृथक् पृथक् ॥ ५. '-तीति' इति४.५॥ ६. 'व्याप्ते' इति३, 'स्वप्नक्षेपणयोः' इति क्षीरतरङ्गिण्यादयः॥ ७. द्र. पदचन्द्रिका, भा-१, नरकवर्गः, श्लो-२२८, पृ.२७०॥ ८. '-न्यतोऽपि' इति१॥ ९. रामाश्रमी१।१०।३॥, पृ.११८॥ १०. '-म-' इति१.३.४.५॥ ११. तुलनीयोऽमरकोषः१।७।२८॥ १२. '-तेऽन-' इति१॥ १३. '-ग्निभव-' इति१.२॥ १४. तुलनीयोऽमरकोषः १।५।४॥ १५. तुलनीयोऽमरकोषः२।७।१३॥ १६. '-ज्ञ-' इति३॥ १७. तुलनीयोऽमरकोषः१।५।२॥ १८. इतोऽग्रे ३प्रतौ 'अति' इति दृश्यते ॥ १९. दुर्गसम्मतोऽयं धात्वर्थः, द्र. क्षीरतरङ्गिणी, चुरादिः, धातुसं-१८३, पृ.३१४॥ २०. '-य-' इति१.५, '-यः' इति४॥ २१. द्र. पदचन्द्रिका, भा-१, धीवर्गः, श्लो १३५, पृ.१७३॥ २२. 'विमर्शन-' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वासना भावना संस्कारोऽनुभूताद्यविस्मृतिः ॥१३७३॥**

१-२ वास्यतेऽनया **वासना** । भाव्यतेऽनया **भावना** । उभयत्र करणे ल्युट्, स्त्रीलिङ्गावेतौ । ३ संस्क्रियतेऽनेन **संस्कारः** । करणे घञ्, पुंस्ययम् । "निसर्गसंस्कारविनीत इत्यसौ"[रघुवंशम्, सर्गः-३, श्लो-३५]इति रघुः । अनुभूतादेरविस्मृतिः अनुभूताद्यविस्मृतिः । आदेः श्रुतस्य दृष्टस्य वाऽविस्मरणमित्यर्थः । त्रीणि अविस्मरणस्य॥

**निर्णयो निश्चयोऽन्तः**

१ निर्णयनं **निर्णयः** । [1]निर्पूर्वः 'णीञ् प्रापणे' (भ्वा.उ.अ.), 'एरच्'३।३।५६॥, 'उपसर्गादसमासेऽपि-' ८।४।१४॥ इति णत्वम् । यदा तु निरुपसर्गरूपत्वम्, तदा न णत्वम्, निर्नय[2] इति । २ निश्चयनं **निश्चयः** । [3]निर्पूर्वः 'चिञ् चयने'(स्वा.उ.अ.), 'ग्रहवृदृ-'३।३।५८॥ इत्यप् । ३ अमति सन्देहाभावम् **अन्तः** । 'अम गतौ[4]'(भ्वा.प.से.), 'हसिमृग्रिण्वामिदमि-'(उणा-३६६)इत्यादिना तन् । अन्तौ, अन्ताः इत्यादि रामवत् । "अन्तः स्वरूपे निकटे प्रान्ते निश्चयनाशयोः"[अनेकार्थसङ्ग्रहः२।१५५॥]इत्यनेकार्थः । त्रीणि निश्चयस्य ॥

**सम्प्रधारणा समर्थनम् ।**

१ सम्प्रधार्यतेऽनया **सम्प्रधारणा** । धारेर्ण्यन्ताद् 'ण्यासश्रन्थोः-'३।३।१०७॥ इति युच् । २ समर्थ्यते **समर्थनम्** । 'अर्थ उपयाच्ञायाम्'(चु.उ.से.), ल्युट् । समर्थनाऽपि । द्वे युक्तायुक्तपरीक्षायाः ॥

**अविद्याऽहंमत्यज्ञाने**

१ विरुद्ध[5] वेदनम् **अविद्या** । अधर्माऽनर्थवद् विपर्ययेऽत्र नञ् । 'विद ज्ञाने'(अ.प.से.), 'संज्ञायां समजनिषद-'३।३।९९॥ इत्यादिना क्यप् । यदुक्तम्-"अनित्याशुचिदुःखात्मसु नित्यशुचिसुखात्मख्याति[6]रविद्या"[पातञ्जलयोगसूत्रम् २-५] । २ अहमिति निपातोऽहङ्कारे, तत्प्रधाना मतिः **अहंमतिः** । अहमा 'सुप् सुपा'२।१।४॥ इति समासः । अनात्मन्यात्माभिमान इत्यर्थः । "अहमिति विभक्त्यन्तप्रतिरूपकमव्ययम्"[स्वोपज्ञटीका ६।१३७४॥] इत्याचार्याः[7]। ३ विरुद्धं ज्ञानम् **अज्ञानम्**। विरोधेऽत्र नञ् ।

"तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ।
[9]अप्राशस्त्यं विरोधश्च[10] नञर्थाः षट् प्रकीर्तिताः ॥१॥"

[ ]इत्युक्तेः । त्रीण्यविद्यायाः ॥

**भ्रान्तिर्मिथ्यामतिर्भ्रमः[11] ॥१३७४॥**

१ अतस्मिंस्तदिति ज्ञानं **भ्रान्तिः** । 'भ्रमु चलने' (भ्वा.प.से.), '-अनवस्थाने'( ) वा. 'स्त्रियां क्तिन्' ३।३।९४॥, 'अनुनासिकस्य[12]-'६।४।१५॥ इति दीर्घः । २ अतस्मिंस्तदिति ज्ञानं मिथ्याऽव्ययम् । मिथ्या मननं **मिथ्यामतिः** । 'मनु(मन) ज्ञाने'(दि.आ.अ.), 'स्त्रियां क्तिन्'३।३।९४॥, 'अनुदात्तोपदेश-'६।४।३७॥ इति न्लोपः । ३ भ्रमणं **भ्रमः** । 'भ्रमु अनवस्थाने'(दि.प.से.), भावे घञि[13], 'नोदात्तोपदेश-'७।३।३४॥ इति वृद्धिनिषेधः । त्रीणि भ्रान्तेः ॥१३७४॥

**सन्देहद्वापराऽऽरेका विचिकित्सा च संशयः ।**

१ सन्देहनं **सन्देहः**। 'दिह उपचये'(अ.उ.अ.), अत्र नानार्थसंशब्दे उपपदे भावे घञ् । २ द्वौ पक्षौ स्थाणुर्वा पुरुषो वेत्येवंरूपौ परावात्मीयौ प्रधानभूतावंशावत्रेति **द्वापरः**, पुंक्ली.। 'सर्वनामसङ्ख्ययोः[14]-'(वा-२।२।३५॥)इति सङ्ख्यायाः पूर्वनिपातः, पृषोदरादित्वादात्वम् । ३ आरेचनम् **आरेकः** । 'रिचिर् विरेचने'(रु.उ.अ.), भावे घञ्, 'चजोः कु घिण्ण्यतोः-'७।३।५२॥ इति कुत्वम् । ४ विचिकित्सनं **विचिकित्सा** । 'कित निवासे रोगापनयने संशये च[15]'(भ्वा.प.से.), स्वार्थे 'गुप्तिज्-'३।१।५॥ इति सन्प्रत्ययः, 'सन्यङोः'६।१।९॥ इति द्वित्वम्[16], 'अः (अ) प्रत्ययात्'३।३।१०२॥ इति स्त्रियामप्रत्ययः । ५ संशयनं **संशयः** । 'शीङ् स्वप्ने'(अ.आ.से.), 'एरच्' ३।३।५६॥ । समन्ततः शेते आत्मा अत्रेति वा । अधिकरणे घञ् । पुंस्ययम्, मालाकारास्तु-"द्वापरसंशये युगे" [ ]इति क्लीबे प्राह । पञ्च सन्देहस्य ॥

---

१. 'निपू-' इति१, 'निःपू-' इति३॥ २. 'निर्ण-' इति१.३.५॥ ३. 'निःपू-' इति३, 'निपू-' इति४.५॥ ४. 'गत्यादिषु' इति क्षीरतरङ्गिण्यादयः ॥ ५. '-द्ध-' इति१॥ ६. '-त्मकाख्या-' इति१॥ ७. '-धान' इति३॥ ८. स्वोपज्ञटीकायाम्-"अहं विभक्त्यन्तप्रतिरूपकमत्राऽव्ययम्" इति दृश्यते, ६।१३७४॥, पृ.३०८॥ ९. 'अप्र-' इति५॥ १०. 'प्रकाशं च' इति१॥ ११. तुलनीयोऽमरकोषः१।५।४॥ १२. '-श्च-' इति१॥ १३. '-ञ्' इति१॥ १४. '-याः' इति३॥ १५. 'कित निवासे रोगापनयने च' इति क्षीरतरङ्गिण्यादयः ॥ १६. 'कुत्वम्' इति१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**परभागो गुणोत्कर्षः**

१ परस्य भजनं **परभागः** । 'भज सेवायाम्' (भ्वा.उ.अ.), भावे घञ् । २ गुणानामुत्कर्षो **गुणोत्कर्षः**। द्वे गुणोत्कर्षस्य ॥

**दोषे त्वादीनवाऽऽस्त्रवौ ॥१३७५॥**

१ दुष्यति चेतोऽनेन **दोषः** । 'दुष वैकृत्ये' (दि.प.अ.), करणे घञ्, तत्र । २ आ समन्ताद् दीयन्ते क्षीयन्ते गुणा अत्रेति **आदीनवः** । 'दीङ् क्षये'(दि.आ.अ.), पृषोदरादिः । ३ आस्त्रवन्ति गुणा अत्र **आस्त्रवः** । 'श्रु(स्रु) प्रस्त्रवणे[1]'(भ्वा.प.अ.), '-समुपनिविषु च'३।३।६३॥ इत्यप् । "आदीनवाश्र(स्त्र)वौ क्लेशे"[अमरकोषः३।२।२९॥]इत्यमरः । "यज्जैनागमः-'जीवाजीवाश्र-(स्त्र)वसंवरानिर्जरबन्धमुक्तयः सप्त पदार्थाः"[अम.क्षीर.३।२।२९॥]इति क्षीरस्वामी । त्रीणि दोषस्य ॥१३७५॥

**स्वाद् रूपं लक्षणं भावश्चात्मप्रकृतिरीतयः ।**
**सहजो रूपतत्त्वं च धर्मः सर्गो निसर्गवत् ।१३७६।**
**शीलं सतत्त्वं संसिद्धिः**

१-३ स्वादिति स्वशब्दाद् रूपलक्षणभावा एते त्रयो योज्यन्ते, तेन स्वस्य रूपं लक्षणं भावश्च **स्वरूपम्**, **स्वलक्षणम्**, **स्वभावः** । ४ अतत्यनेन **आत्मा** । 'अत सातत्यगमने[3]'(भ्वा.प.से.), 'सातिभ्यां मन्मनिनौ(-णौ)' (उणा-५९२)इति मन् । ५ प्रक्रियतेऽनया **प्रकृतिः** । 'स्त्रियां क्तिन्'३।३।९४॥ । ६ रीयतेऽनया **रीतिः** । 'री गत्यादौ' (क्र्या.प.अ.), क्तिन् । ७ सह जातः **सहजः** । 'अन्येष्वपि दृश्यते'३।२।१०१॥ इति डः । ८ रूपस्य वस्तुनस्तद्भावो **रूपतत्त्वम्** । ९ धरति [4]स्वरतां **धर्मः**, पुंक्ली. । "धर्मस्तु नरषण्ढयोः"[ ]इति माला । १० सृज्यतेऽनेन **सर्गः** । 'सृज विसर्गे'(तु.प.अ.), करणे घञ् । ११ **निसर्गः** अप्येवम् ॥१३७६॥ १२ शील्यते धार्यते **शीलम्**, पुंक्ली. । 'शील समाधौ'(भ्वा.प.से.), घञ्, इगुपधलक्षणः को वा । यद्वा 'शीङ् स्वप्ने'(अ.आ.से.), शीङो धुक्लक्वलञ्वालन्-प्रत्ययाः[5] । १३ सह तद्भावेन वर्तते **सतत्त्वम्** । १४ संसिद्ध्यत्यनया **संसिद्धिः** । 'षिधू(षिधु) संराद्धौ'(दि.प.अ.), 'षिधू शास्त्रे माङ्गल्ये च'(भ्वा.प.वे.)इति वा, 'स्त्रियां क्तिन्'३।३।९४॥ चतुर्दश सहजस्य ॥

**अवस्था तु दशा स्थितिः ।**

१ अवस्थानम् **अवस्था** । 'आतश्चोपसर्गे'३।३।१०६॥ इत्यङ् । २ दश्यतेऽनया **दशा** । 'दंश दशने' (भ्वा.प.अ.), स्थादित्वात् कः । ३ तिष्ठत्यनया **स्थितिः** । 'ष्ठा गतिनिवृत्तौ'(भ्वा.प.अ.), 'स्त्रियां क्तिन्'३।३।९४॥, 'द्यतिस्यतिमास्थामित्ति किति'७।४।४०॥ इतीत्त्वम् । त्रीण्यवस्थायाः ॥

**स्नेहः प्रीतिः प्रेम हार्दे**

१ स्नेहनं **स्नेहः**, पुंक्ली. । 'ष्णिह प्रीतौ'(दि.प.से.), भावे घञ् । २ प्रीयते **प्रीतिः** । 'प्रीङ् प्रीतौ' (दि.आ.अ.), 'स्त्रियां क्तिन्'३।३।९४॥ । ३ प्रीयतेऽनेनेति **प्रेम** । 'प्रीङ् प्रीतौ'(दि.आ.अ.), प्रियो[6] '-मनिन्'(उणा-५८४)इति मनिन् । पुंक्लीबलिङ्गोऽयम् । "प्रेम स्त्रीस्नेह-नर्मणोः[7](प्रेमाऽस्त्री स्नेहनर्मणोः)"[[8]]इति गौडः । प्रियस्य भावः कर्म[9] वा । 'प्रियस्थिर-'६।४।१५७॥ इत्यादिना प्रादेशः । ४ हृदये भवं **हार्दम्** । प्राग्दीव्यतोऽण्, 'हाय-नान्तयुवादिभ्योऽण्'५।१।१३०॥ इति युवादित्वादण् वा[10], तत्र । चत्वारि प्रीतेः ॥

**दाक्षिण्यं त्वनुकूलता ॥१३७७॥**

१ दक्षिणस्य सरलस्य भावो **दाक्षिण्यम्** । २ अनुकूलस्य भावः **अनुकूलता** । भावे तल्, तलन्तं स्त्री-लिङ्गम् । द्वे दाक्षिण्यस्य ॥१३७७॥

**विप्रतिसारोऽनुशयः पश्चात्तापोऽनुतापश्च ।**

१ वैपरीत्येन प्रतिसरणं[11] **विप्रतिसारः** । 'सृ गतौ' (भ्वा.प.अ.), घञ् । 'उपसर्गस्य घञ्यमनुष्ये बहुलम्'६।३।१२२॥इति पाक्षिके दीर्घे विप्रतीसारोऽपि । २ अनुशयनम् **अनुशयः** । 'शीङ् स्वप्ने[12]'(अ.आ.से.), 'एरच्'३।३।५६॥।

---

१. 'गतौ' इति क्षीरतरङ्गिण्यादयः ॥ २. 'ॠदोरप्'३।३।५७॥ इत्यप् युक्तः ॥ ३. '-लक्षणे' इति१॥ ४. 'स्वै-' इति२॥ ५. 'शीङो धुक्लक्वलञ्वालनः'(उणा-४७८)इत्युणादिगणसूत्रम् ॥ ६. '-यौ' इति३॥ ७. '-धर्म-' इति३.४.५॥ ८. द्र. मेदिनीकोशः, नान्तवर्गः, श्लो१४॥ ९. 'कर्म भावो' इति१॥ १०. ४.५प्रत्योर्नास्ति ॥ ११. '-स्मरणं' इति१, '-शरणं' इति५॥ १२. १.२.४.५प्रतिषु नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

३ पश्चात् तपनं **पश्चात्तापः** । भावे घञ् । ४ अनुपश्चात् तपनम् **अनुतापः** । चत्वारि '[१]पछतावडे[२]' इति ख्यातस्य ॥

**अवधानसमाधानप्रणिधानानि तु समाधौ स्युः ॥१३७८॥**

१ अवधीयते **अवधानम्** । ल्युट् । ''इन्द्रस्य दूत्यां रचय प्रसादं विज्ञापयन्त्यामवधानदानैः''[नैषधीयचरितम्, सर्गः-६, श्लो-७७]इति श्रीहर्षः । २ सम्यगाधीयते स्थाप्यते चित्तमत्रेति **समाधानम्** । अधिकरणे ल्युट् । ३ एवं **प्रणिधानम्** । ४ समाधानं **समाधिः** । 'उपसर्गे घोः किः'३।३।९२॥इति किः, 'आतो लोपः-' ६।४।६४॥, तत्र। त्रयः क्लीबे, समाधिः पुंसि । ''प्रणिधानं समाधानं समाधिश्च समास्त्रयः''[हलायुधकोशः १।१२८॥]इति हलायुधः । ''देवादिध्याने त्रयः समाः'' []इति तट्टीका । चत्वारि चित्तैकाग्र्यस्य[३] ॥

**धर्मः पुण्यं वृषः श्रेयः सुकृते**

१ धरति स्थापयति सुगताविति **धर्मः**, पुंक्ली.। ''स्याद्धर्ममस्त्रियाम्''[अमरकोषः१।४।२४॥]इत्यमरः । 'धृञ् धारणे'(भ्वा.उ.से.), 'अर्तिस्तुसुहुसृधृक्षिक्षुभायापदियक्षिनीभ्यो[४] मन्'(उणा-१३७)। २ पुनाति पवित्रीकरोति जनमिति[५] **पुण्यम्** । 'पूञ् पवने'(क्र्या.उ.से.), 'पूञो [य]ण्णुट् ह्रस्वश्च'[६](दशपाद्युणा-८।१६॥)इति यण्णुडागमह्रस्वत्वानि। पुणति शोभते वा। 'पुण शुभे[७]'(तु.प.से.), अघ्न्यादित्वाद् यत् । ३ वर्षति कामितपदार्थानिति **वृषः**। 'वृषु सेचने[८]'(भ्वा.प.से.), 'इगुपध-'(उणा-५५९)इति कः। ४ अतिशयेन प्रशस्यं **श्रेयः** । इदमनयोरतिशयेन प्रशस्यमिति वा । 'द्विवचनविभज्योपपदे तरबीयसुनौ'५।३।५७॥ इतीयसुन्, 'प्रशस्यस्य श्रः'५।३।६०॥ इति श्रादेशः। श्रेयसी, श्रेयांसि इत्यादि क्लीबे । ५ शोभनं कृतं कर्म **सुकृतम्** । विशेषणसमासः, तत्र। पञ्च पुण्यस्य ॥

**नियतौ विधिः। ३०**

**दैवं भाग्यं भागधेयं दिष्टं च**

१ नियम्यतेऽनया **नियतिः**। 'यमु नियमने'( ), 'स्त्रियां क्तिन्'३।३।९४॥, 'अनुदात्तोपदेश-'६।४।३७॥ इत्यादिना न्लोपः, तस्याम् । २ विधीयतेऽनेन[९] **विधिः** । 'डुधाञ् धारणादौ[१०]'(जु.उ.अ.), 'उपसर्गे घोः किः'३।३।९२॥इति किः । ३ देवस्य आत्मन इदं पूर्वकर्म **दैवम्**। 'तस्येदम्'४।३।१२०॥ इत्यण्, पुंक्लीबलिङ्गः । ''दित्यदित्यादित्य[११]-'४।१।८५॥ इत्यत्र 'देवस्य यञञौ'(वा-४।१।८५॥)इति प्राग्दीव्यतीयेष्वर्थेषु यञञौ[१२], तेन देवस्याऽपत्यादि दैव्यं दैवम्''[मा.धातुवृत्तिः, दिवादिः, धातुसं-१]इति माधवः[१३] । ४ भज्यते **भाग्यम्** । 'भज सेवायाम्'(भ्वा.उ.अ.), 'ऋहलोर्ण्यत्'३।१।१२४॥, 'चजोः कु घिण्ण्यतोः' ७।३।५२॥ इति कुत्वम् । भागोऽपि । ''भाग्यैकदेशयोर्भागः''[[१४]]इति रुद्रकोषः । ५ भाग एव **भागधेयम्** । 'भागरूपनामभ्यो धेयः'(वा-५।४।३५॥)इति धेयः। ६ दिश्यते स्म **दिष्टम्**। 'दिश अतिसर्जने'(तु.उ.अ.), 'निष्ठा' ३।२।१०२॥ इति क्तः[१५] । षड् भवान्तरकृतशुभाशुभकर्मणः॥

**अयस्तु तच्छुभम् ॥१३७९॥**

१ तदिति दैवम्, शुभमेति अयः । 'इण् गतौ' (अ.प.अ.), अच् । 'अय वय पय[१६] मय चय तय णय[१७] गतौ'(भ्वा.अ.से.) अस्माद् वा, पचाद्यच् । ''चलनार्थत्वेऽपि नाऽस्य युजस्स्ति[१८] 'न यः'३।२।१५२॥ इति यान्तानां तन्निषेधादिति अयः''[मा.धातुवृत्तिः, भ्वादिः, धातुसं-३१२]इति माधवः । अयौ, अयाः इत्यादि रामवत्। ''इष्टानिष्टफलं प्राज्ञैः स्मृतं दैवमयोनयम्(-नयः)'' [हलायुधकोशः१।१२६॥]इति हलायुधः । ''दैवे इष्टफले अयः पुंसि, अनिष्टफले अनयः पुंसि, दैवं प्राक्तनं कर्म'' []इति तट्टीका । एकं शुभदैवस्य ॥१३७९॥

---

१. 'पछि-' इति१॥ २. '-वौ' इति३॥ ३. '-ग्रस्य' इति१.३॥ ४. '-क्षीभ्यो' इति३॥ ५. 'जन्मेति' इति३॥ ६. 'ण्युट्' इति५॥ ७. 'पुण कर्मणि शब्दे च' इति स्वामी, 'पुण कर्मणि शुभे' इति मैत्रेयसायणौ ॥ ८. 'पृषु वृषु मृषु सेचने' इति क्षीरतरङ्गिण्यादयः ॥ ९. '-नेति' इति१.२.३॥ १०. धातुपाठः १.२.४.५प्रतिषु नास्ति॥, इतोऽग्रे १.२.४.५प्रतिषु 'धाञ्' इति दृश्यते ॥ ११. 'दित्यादित्य-' इति ३.४.५॥ १२. 'घ-' इति५॥ १३. मा.धातुवृत्तौ- ''देवस्यापत्यादि दैव्यम्, दैवम्-'दित्यदित्यादित्युत्तर' इत्यत्र 'देवस्य यञञौ' इति प्राग्दीव्यतीयेष्वर्थेषु यञञौ'' इति दृश्यते, पृ.४००॥ १४. द्र. टीकासर्वस्वम्, भा-१, १।४।२८॥, पृ.९८॥, पदचन्द्रिका. भा-१, कालवर्गः, श्लो-१३०, पृ.१६६॥, रामाश्रमी१।४।२८॥, पृ.६९॥ १५. 'क्ते प्रत्ययः' इति४॥ १६. 'यय' इति मैत्रेयः ॥ १७. 'नय' इति स्वामी ॥ १८. '-जिस्ति' इति१, '-स्ते' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अलक्ष्मीनिर्ऋतिः कालकर्णिका स्यात्**

१ विरुद्धा लक्ष्मीः **अलक्ष्मीः** । २ निश्चितमर्यते **निर्ऋतिः** । 'ऋ गतौ'(तु.प.अ.) निर्पूर्वः, कर्मणि क्तिन् "निश्चिता ऋतिः पीडा अत्र निर्ऋतिः"[१]इति पञ्जिका । "ऋतिः कुतौ घृणायां च स्पर्धायां च शुभेऽपि च"[१] इति रभसः । "निर्गता ऋतेः शुभादिति निर्ऋतिः"[१] इति केचित् । ३ कालस्य यमस्य कर्णिका कर्णाभरणमिव **कालकर्णिका** । त्रयोऽपि स्त्रीलिङ्गाः । त्रीणि 'अलाछि' इति ख्यातायाः ॥

## अथाऽशुभम् ।

**दुष्कृतं दुरितं पापमेनः पाप्मा च पातकम्**
**॥१३८०॥**
**किल्बिषं कलुषं किण्वं कल्मषं वृजिनं तमः ।**
**अंहः कल्कमघं पङ्कः**

१ न शुभम् **अशुभम्** । २ दुर् निन्दितं कृतं कर्माऽस्य **दुष्कृतम्** । 'इदुदुपधस्य-'८।३।४१॥ इत्यादिना षत्वम् । ३ दुरेति स्मेति **दुरितम्** । दुर्पूर्वादिणो भावे क्तः। ४ पान्त्यस्मादात्मानमिति **पापम्** । पिबति जनं वा । 'पा रक्षणे'(अ.प.अ.), 'पा पाने'(भ्वा.प.अ.) वा, 'पानीविशि(विषि)भ्यः पः'(उणा-३०३)इति पः । ५ एति प्राप्नोति दुर्गतिमनेन **एनः,** क्लीबे । 'इण् गतौ' (अ.प.अ.), 'इण आगसि'(उणा-६३७)इत्यसुन्, नुट् च । एनसी, एनांसि इत्यादि । ६ पातयति दुर्गताविति, प्राप्नोति व्याप्नोति वा **पाप्मा,** नकारान्तः, पवर्गाद्यपञ्चममध्यः[३] । 'नामन्सामन्-'(दशपाद्युणा-६।७९॥, पञ्चपाद्युणा-५९०)आदि सूत्रे निपातितः । ७ पातयति दुर्गतौ **पातकम्** । पतेर्णिजन्ताद् ण्वुल्[४] **॥१३८०॥** ८ किलति शितीकोरति कृष्णवर्णं विदधाति **किल्बिषम्** । 'किल श्वैत्यक्रीडनयोः[५]'(तु.प.से.), 'किलेर्बुक् च'(उणा-५०)इति डिषच् (टिषच्), बुगागमश्च । ९ बाहुलकाद् 'ऋनहि[६]भ्यामुषच्'( )इत्युषचि **कलुषम्** । कलयतीति वा। 'पृ(पॄ)नहिकलिभ्य उषच्'(उणा-५१५)। १० किण्यते **किण्वम्** । '[७]किण निमीलने'(चु.उ.से.), 'अशि(अशु)-प्रुषि-'(उणा-१४९)इति वः (क्वन्) । ११ कर्म शुभं श्यति तनूकरोति **कल्मषम्**[८] । 'पषोदरादिः । कलयतीति वा । 'कलेर्मषः'(हैमोणा-५६२)। १२ वृज्यते **वृजिनम्** । 'वृजी वर्जने'(रु.प.से.,चु.उ.से.), 'वृजेः किच्च'(उणा-२०५)इतीनच् । १३ ताम्यत्यनेन **तमः** । 'तमु ग्लानौ[९]'(दि.प.से.), असुन् । तमः अदन्तोऽपि । १४ अमन्ति यान्त्यधोऽनेनेति **अंहः** । 'अम्(अम) गत्यादिषु'(भ्वा.प.से.), 'अमेर्हुक् च'(उणा-६५२)इत्यसुन् हुगागमश्च । 'अंहः' इति ऊष्मोया(पा)न्तसान्त[म्]। "शीघ्रमंहोविघातम्"[सूर्यशतकम्, श्लो-७५]इत्यनुस्वार-[परो]यकारो यकार (हकारो घकार) इव श्रूयत इत्यक्षरभेदेऽप्येकत्ववृत्ते(बुद्धे)र्नागरानुप्रासमात्रम् । तदुक्तम्-

"एकत्वं वृद्धिकल्पभेदेऽपि तत्त्वैकत्वेऽपि निह्नवः[१०] ।
(एकत्वं बुद्धिभेदेऽपि तत्त्वेऽप्येकत्वनिह्नवः ।)
जायते यत्र वर्णानामनुप्रासः स उच्यते[११] ॥१॥"

[सरस्वतीकण्ठाभरणम्, ]इति[११] । अंहसी, अंहांसि इत्यादि क्लीबे । " 'अहि गतौ'(भ्वा.प.से.)इत्यतोऽसुना 'अंहः' इति सिद्धे 'अघिरषि(रधि)लघि-'( )इत्यतोऽसुन्भ्रान्तिनिरासार्थम् 'अमेर्हुक् च'(उणा-६५२)इति सूत्रम्" [१२]इति भीमः। उपाध्यायसर्वस्वे[१३] तु-"अंहते(अंघते)-रप्यसुन् मतभेदात्"[१२]इति कौमुदी । १५ कल्यते **कल्कम्** । 'कल सङ्ख्याने'(चु.उ.से.), 'कृदाधारचिकलिभ्यः कः'(उणा-३२०)इति कः। १६ न हन्ति धन्यमिति **अघम्** । 'हन् (हन) हिंसागत्योः'(अ.प.अ.), 'अन्येभ्योऽपि(अन्येष्वपि)-'३।२।१०१॥ इति डः, न्यङ्क्वादित्वात् कुत्वम् । १७ पच्यतेऽनेन[१४] **पङ्कः,** पुंक्ली. । 'पचि व्यक्तीकरणे'(भ्वा.आ.से.), 'पचि विस्तारे[१५]'(चु.उ.से.) वा । 'अकर्तरि च कारके-'३।३।१९॥ इति घञ्, कुत्वं च[१६] । सप्तदश पापस्य ॥

---

१. द्र. पदचन्द्रिका, भा-१, नरकवर्गः, श्लो-२२७, पृ.२६८॥ २. द्र. रामाश्रमी१।९।२॥, पृ.११७॥ ३. '-ध्यमः' इति३॥ ४ 'पा-' इति३॥ ५ स्वामिमैत्रेयसम्मतोऽयं पाठः, 'श्वैत्ये' इति सायणः ॥ ६. '-तनि-' इति३॥ ७ 'क-' इति४॥ ८. '-ष:' इति१॥ ९. 'काङ्क्षायाम्' इति क्षीरतरङ्गिण्यादयः ॥ १०. 'ह्रस्वः' इति३॥ ११. द्र. टीकासर्वस्वम्, भा-१, १।४।२६॥, पृ.९३॥ १२. पदचन्द्रिका, भा-१, कालवर्गः, श्लो-१२६, पृ.१६१॥ १३. '-यः' इति४॥ १४ '-नेति' इति१.२.३.॥ १५. 'विस्तारवचने' इति स्वामिसायणौ, 'विस्तारे वचने' इति मैत्रेयः ॥ १६. १.२.४.५प्रतिषु नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**उपाधिर्धर्मचिन्तनम् ॥१३८१॥**

१ उपाधीयत **उपाधिः**, पुंसि । धाञः[1] 'उपसर्गे घोः किः' ३।३।९२॥ इति किः । २ धर्मस्य चिन्तनं **धर्मचिन्तनम्** । द्वे धर्मचिन्तायाः ॥१३८१॥

**त्रिवर्गो धर्मकामार्थाः**

१ त्रयाणां धर्मार्थकामानामेकोक्त्या नामैकं **त्रिवर्गः** इति । ''स्वहस्तवास्तव्य इति त्रिवर्गः''[ ] इति हर्षः ।

**चतुर्वर्गः समोक्षकाः ।**

१ चतुर्णां धर्मार्थकाममोक्षाणामेकोक्त्या नामैकं **चतुर्वर्गः** । समोक्षका मोक्षसहिताः, धर्मार्थकामा इति वा ।

**बलतुर्याश्चतुर्भद्रम्**

१ चतुर्णां धर्मार्थकामबलानामेकोक्त्या नामैकं **चतुर्भद्रम्** इति । बलं तुर्यं चतुर्थं येषां ते बलतुर्याः, बलसहिता धर्मार्थकामा इत्येव ॥

**प्रमादोऽनवधानता ॥१३८२॥**

१ प्रमदनं **प्रमादः** । 'मदी हर्षे'(दि.प.से.), भावे घञ् । २ अवधानं चित्तैकाग्र्यम् । नाऽवधानम् अनवधानम्, तस्य भावः **अनवधानता**, अनवहितत्वम्, कार्येष्वतात्पर्यम्[3] । द्वे प्रमादस्य ॥१३८२॥

**छन्दोऽभिप्राय आकूतं मतभावाशया अपि ।**

१ चन्दत्याह्लादयति **छन्दः** । 'चदि आह्लादनदीप्त्योः'[4](दि.प.से.), पचाद्यच्, पृषोदरादित्वाच्चस्य छत्वम्, अदन्तोऽयं रामवत् । ''अभिप्रायवशौ[5] छन्दौ''[अमरकोषः ३।३।८८॥]इत्यमरः । २ आभिमुख्येन प्रयन्त्यनेन **अभिप्रायः** । अभिप्रपूर्वः 'इण् गतौ'(अ.प.अ.), करणे घञ् । ३ आकूयते[6] **आकूतम्**, आङ्पूर्वः 'कूङ् शब्दे'(तु.आ.से.), 'निष्ठा'३।२।१०२॥ इति क्तः । ४ मन्यते **मतम्** । 'मनु अवबोधने'(त.आ.से.), 'मनु(मन) ज्ञाने'(दि.आ.अ.) वा, 'मतिबुद्धिपूजार्थेभ्यश्च'३।२।१८८॥ इति वर्तमाने[7] क्तः, 'अनुदात्तोपदेश-'६।४।३७॥ इत्यनुनासिकलोपः । ५ भवत्यस्मिन् **भावः**, पुंक्लीः । अमरस्तु-''भावः सत्तास्वभावाभिप्राय[8]-''[अमरकोषः३।३।२०७॥] इति पुंस्याह । अधिकरणे घञ् । ६ आशेरतेऽस्मिन् **आशयः** । घञ् । षडभिप्रायस्य ॥

**हृषीकमक्षं करणं स्रोतः[9] खं विषयीन्द्रियम् ॥१३८३॥**

१ हृष्यन्त्यनेन[10] **हृषीकम्** । 'हृष तुष्टौ'(दि.प.से.), 'अलीकादयश्च'(उणा-४६५)इति साधुः । '' 'हृषु अलीके'(भ्वा.प.से.), मूर्धन्यवान्, 'अलि(अनि)हृषिभ्यां कित्'(उणा-४५७)इतीकन्''[ ]इति मिश्राः । २ अक्ष्णोति व्याप्नोति **अक्षम्** । 'अक्ष(अक्षू) व्याप्तौ सङ्घाते च[11]'(भ्वा.प.वे.), अच् । ३ क्रियतेऽनेन **करणम्** । करणे ल्युट् । ४ स्रवत्यस्माद् मलमिति **स्रोतः**, क्लीबे, दन्त्यादिः । 'स्रु गतौ'(भ्वा.प.अ.), 'स्रुरीभ्याम्-'(उणा-६४१)इति तस् (इत्यसुन् तुट् च) । ५ अश्नुते व्याप्नोति **खम्** । 'अशूङ् (अशू) व्याप्तौ[12]'(स्वा.आ.वे.), 'अशेर्डित्'(हैमोणा-८७)इति खः । ६ विषयो ग्राह्यत्वेनाऽस्याऽस्ति **विषयि** । 'अत इनिठनौ'५।२।११५॥ इतीनिः । विषयिणी[13], विषयीणीत्यादि, नकारान्तः, क्लीबे । ७ '**इन्द्रियमिन्द्र**लिङ्ग[मिन्द्रदृष्ट] मिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तम्' ५।२।९३॥ इति सूत्रेण घञ्प्रत्ययान्तो निपात्यते । इन्द्रः परमैश्वर्ययुक्त उच्यते । अत्र षष्ठीसमर्थाल्लिङ्गार्थे घः[14] । इन्द्रस्याऽऽत्मानो लिङ्गमिति । यद्वा इन्द्र आत्मा, तेन सृष्टं आत्मकृतशुभाशुभकर्मणोत्पन्नमिति कृत्वा । इन्द्रजुष्टं वा आत्मना सेवितम्, तद्द्वारेण भोगोत्पत्तेः । इन्द्रदत्तम्, इन्द्रेण पूर्वकर्मणा दत्तम् । सृष्टजुष्टदत्तार्थेषु तृतीयासमर्थाद्[15] घः । सप्त इन्द्रियस्य ॥१३८३॥

**बुद्धीन्द्रियं स्पर्शनादि**

१ बुद्धिहेतुरिन्द्रियं **बुद्धीन्द्रियम्** । स्पृश्यतेऽनेन स्पर्शनम् । 'स्पृश संस्पर्शने[16]'(तु.प.अ.), करणे ल्युट् । आदेः रसनघ्राणचक्षुःश्रोत्राणि गृह्यन्ते । यत्प्रमाणमीमांसायाम्-''स्पर्शरसगन्धरूपशब्दग्रहणानि(-ग्रहणलक्षणानि)

---

१. '-ञ्' इति१॥ २. तुलनीयोऽमरकोषः१।७।३०॥ ३. '-र्ये' इति३॥ ४ 'आह्लादने दीप्तौ च' इति क्षीरतरङ्गिण्यादयः ॥ ५. '-वंशौ' इति३॥ ६. ५प्रतौ नास्ति ॥ ७ १.३प्रत्योर्नास्ति ॥ ८. '-धेय-' इति१॥ ९. 'श्रो-' इति१.३.४.५॥ १०. 'हृष्यत्य-' इति१॥ ११. स्वामिमैत्रेयमतेऽयं पाठः, 'अक्षू व्याप्तौ' इति सायणः ॥ १२. स्वामिमतेऽयम्, 'अशू व्याप्तौ संघाते च' इति मैत्रेयसायणौ ॥ १३. २प्रतौ नास्ति ॥ १४ 'यः' इति४.५॥ १५. '-र्थत्वाद्' इति१॥ १६. '-र्शे' इति स्वामिमैत्रेयौ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्पर्शनरसघ्राणचक्षुःश्रोत्राणीन्द्रियाणि द्रव्यभावभेदानि'' [प्रमाणमीमांसा, अध्या-१, आह्नि-१, सू-२१]इति । मिश्रास्तु-''मनोनेत्रादीनि धीन्द्रियानि, धीर्ज्ञानम्, तन्निमित्तमिन्द्रियम् । तथा [च]-''

''मनःकर्णौ तथा नेत्रे रसना च त्वचा सह ।
नासिका चेति षट् तानि धीन्द्रियाणि प्रचक्षते ॥१॥''[[1]]

[पदचन्द्रिका, भा १, धीवर्गः, श्लो-१४१]इति व्याचक्षते ॥

## पाण्यादि तु क्रियेन्द्रियम्[1] ।

१ पाणिरादिर्यस्य तत् पाण्यादि, क्रिया व्यापार आदानादिः, क्रियाहेतुरिन्द्रियं **क्रियेन्द्रियम्** । [यदाह]-''उत्सर्गानन्दनादानगत्यालापाश्च तत्क्रियाः''[[2]]इति । आदिग्रहणाद् वाक्पादपायूपस्था गृह्यन्ते । मिश्रास्तु-''पाय्वादि कर्मेन्द्रियमुच्यते, कर्मसाधकमिन्द्रियं कर्मेन्द्रियम्, पायुर्गुदम् । आदिना उपस्थादिग्रहः । तथा कामन्दकीये-

''पायूपस्थं[3]पाणिपादौ वाक् चेतीन्द्रियसङ्ग्रहः ।
उत्सर्गानन्दनादानगत्यालापाश्च तत्क्रिया ॥१॥''[]

[पदचन्द्रिका, भा १, धीवर्गः, श्लो-१४०]इत्याख्यन्[4] । एकं क्रियेन्द्रियस्य ॥

## स्पर्शादयस्त्विन्द्रियार्था[1] विषया[2] गोचरा[3] अपि ॥१३८४॥

१ स्पर्शनं स्पर्शः । 'स्पृश संस्पर्शे'(तु.प.अ.), भावे घञ् । '' 'अकर्तरि च कारके संज्ञायाम्'३।३।१९॥ इति घञ्''[]इत्यन्ये । आदेः रसगन्धरूपशब्दा गृह्यन्ते । 'रस आस्वादने[5]'(चु.उ.से.), चुरादिः, 'एरच्'३।३।५६॥, रसः । 'गन्ध अर्दने[6]'(चु.आ.से.), अच्, गन्धः । 'खष्पशिल्पशष्पबाष्परूपपल्प(पर्प)तल्पाः'(उणा-३०८)इति रौतेः रूपमिति निपात्यते । शपत्याक्रोशति जिह्वामिति शब्दः । 'शप आक्रोशे'(भ्वा.उ.अ.), 'शाशपिभ्यां ददनौ'(उणा-५३७)इति दन् । इन्द्रियैरर्थ्यन्ते **इन्द्रियार्थाः** । 'अर्थ उपयाच्ञायाम्'(चु.आ.से.), 'अकर्तरि च-'३।३।१९॥ इति घञ् । २ विशेषेण सिन्वन्ति बध्नन्ति इन्द्रियाणीति **विषयाः** । 'षिञ् बन्धने'(स्वा.उ.अ.), अच्, 'परिनिविभ्यः सेव-सित-सय-सिवु-सह-सुट्-स्तु-स्वञ्जाम्'८।३।७०॥ इति षत्वम् । ३ गाव इन्द्रियाणि चरन्त्येष्विति[7] **गोचराः** । 'चर गतिभक्षणयोः'(भ्वा.प.से.), 'गोचरसञ्चर-'३।३।११९॥ इति साधुः । पञ्चेन्द्रियाणां पञ्चस्पर्शनादिनामानि त्रीणि ॥१३८४॥

## शीते[1] तुषारः[2] शिशिरः[3] सुशीमः[4] शीतलो[5] जडः[6] । हिमः[7]

१ शेतेऽनेन **शीतः** । 'शीङ् गतौ'( ), बाहुलकात् 'हसिमृग्रिण्-'(उणा-३६६)इत्यादिना तन् । यद्वा 'श्यैङ् गतौ'(भ्वा.आ.अ.), भावे क्तः, 'द्रवमूर्तिस्पर्शयोः श्यः'६।१।२४॥ इति सम्प्रसारणम्, 'सम्प्रसारणाच्च'६।१।१०८॥ इति पर(पूर्व)रूपत्वम्[9], 'हलः'६।४।२॥ इति दीर्घः, 'श्योऽस्पर्शे'८।२।४७॥ इति निषेधात् तस्य न नत्वम्[10] । गुणे स्पर्शविशेषे शीतमिति क्लीबम्, रूपभेदात्। तथा च 'देवदत्तस्य शीतं वर्तते' इति प्रयोगः । तदुक्तम्-

''उपैत्यन्यज्जहात्यन्यद् दृष्टो द्रव्यान्तरेष्वपि ।
वाचकः[11] सर्वलिङ्गानां द्रव्यादन्यो गुणो मतः ॥१॥''

[[12]]इति, तत्र । २ तोषयति **तुषारः** । 'तुष तुष्टौ'(दि.प.अ.)अतोऽन्तर्भावितण्यर्थात् 'कमेः कि[दु]च्चोपधायाः'(उणा-४१८)इत्यनुवृत्तौ 'तुषारादयश्च'(उणा-४१९)इत्यारन्, किच्च । ३ शशत्यनेन **शिशिरः,** द्वितृतीयस्वरः । 'शश प्लुतगतौ'(भ्वा.प.से.), 'अजिरशिशिरशिथिलस्थिरस्फिरस्थविरखदिराः'(उणा-५३)इति किरचि साधुः । ''शश्वच्छशाङ्कशिशिराण्यपि शूकशिम्बिः''[[13]]इति तालव्यशद्वयवान् । ''शिनोत्यर्थं श्यायते वाऽनेनेति[14] शिशिरः''[अम.क्षीर.१।२।२०॥]इति तु स्वामी । ४ सुष्ठु श्यायते[15] **सुशीमः** । 'श्यैङ् गतौ'(भ्वा.आ.अ.), 'इषुयुधि-'(उणा-१४२)इति मक्, सम्प्रसारणम् । 'सुषमादिषु च'८।३।९८॥ इति षत्वे सुषीमोऽपि । वाच्यलिङ्गोऽयम्, सुषीमो वायुः, सुषीमं

---

१. द्र. टीकासर्वस्वम्, भा-१, १।५।८॥, पृ.१०६॥, रामाश्रमी१।५।८॥, पृ.७५॥ २. द्र. स्वोपज्ञटीका६।१३८४॥, पृ.३१०॥, पदचन्द्रिका, भा-१, धीवर्गः, श्लो १४१, पृ.१७९॥, रामाश्रमी१।५।८॥, पृ.७५॥ ३. '-स्थं' इति२॥ ४. '-तृ' इति१.४.५॥ ५. 'आस्वादनस्नेहनयोः' इति क्षीरतरङ्गिण्यादयः ॥ ६ 'बस्त गन्ध अर्दने' इति क्षीरतरङ्गिण्यादयः ॥ ७ '-शयि-' इति४.५॥ ८ '-न्त्यस्मिन्' इति४.५॥ ९. '-त्वे' इति३॥ १०. इतोऽग्रे १.३.४.५प्रतिषु 'तन्त्रं' इति दृश्यते ॥ ११. '-काः' इति४.५॥ १२. द्र. टीकासर्वस्वम्, भा-१, १।३।१८॥, पृ.६२॥, पदचन्द्रिका, भा-१, दिग्वर्गः, श्लो-८६, पृ.११२॥ १३. टीकासर्वस्वम्, भा-१, १।३।१९॥, पृ.६३॥, पदचन्द्रिका, भा-१, दिग्वर्गः, श्लो-८६, पृ.११३॥, रामाश्रमी१।३।१९॥, पृ.४६॥ १४ '-ऽनेनेति' इति अम.क्षीर. नास्ति॥ १५. '-ति' इति१.३.४.५॥

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

जलम्, सुषीमां भीरिति । मिश्रास्तु-''सुष्ठु श्यायते सुशीम इति स्वामी तालव्यमध्यमाह, तदयुक्तम्, 'सुषीमश्च सुषेणश्च सुषन्धिः सर्षपोऽपि च'[ ]इति दन्त्यमूर्धन्यमध्य [ऊष्म]-विवेकात्''[पदचन्द्रिका, भा-१, दिग्वर्गः, श्लो-८६]इति व्याख्यन्[1] । ५ शीतं गुणोऽस्याऽस्तीति **शीतलः** । सिध्मादित्वाल्लच् । शीतं लाति वा । ६ जलति घनीभवति जलम् । 'जल धान्ये'(भ्वा.प.से.), अच्, डलयोरैक्यत्वस्मरणाद्[2] **जडः** । ७ हिनोति वर्धते **हिमम्** । 'हि गतौ वृद्धौ च'(स्वा.प.अ.), हिनोतेर्मक् । हन्ति उष्णत्वमिति वा । 'हन्तेर्हिश्च (हि च)'(उणा-१४४)इति मक्, धातोश्च ह्यादेश इति वा । एते सप्ताऽपि गुणे पुंसि, तद्वति वाच्यलिङ्गाः । सप्त शीतस्य ॥

## अथोष्णो[1] तिग्मस्[2]तीव्रस्[3]तीक्ष्णश्[4]चण्डः[5] खरः[6] पटुः[7] ॥१३८५॥

१ ओषति दहति **उष्णः** । 'उष दाहे'(भ्वा.प.से.), 'इण्षिञ्दीङुषविभ्यो नक् (इण्सिञ्जिदीङुष्यविभ्यो नक्)'(उणा-२८२)इति नक्, 'रषाभ्याम्-'८।४।१॥ इति णत्वम्, तत्र । २ तेजयति **तिग्मः** । 'तिज निशाने'(भ्वा.प.से.), 'अजिरुजि(युजिरुचि)तिजां कुश्च' (उणा-१४३)इति मक्, कवर्गश्चान्तादेशः । ३ तीव्यते **तीव्रः** । 'तीव स्थौल्ये[3]'(भ्वा.प.से.), 'ऋज्रेन्द्राग्रवज्रवप्र-(विप्र)-' (उणा-१८६)इत्यादिना साधुः । ४ तेजयति **तीक्ष्णः** । 'तिजेर्दीर्घश्च'(उणा-२९८)इति स्नक्प्रत्ययः (क्स्नप्रत्ययः), दीर्घत्वं कुत्वं च । ५ चण्डति **चण्डः** । 'चडि कोपे'(भ्वा.अ.से.), पचाद्यच् । चणत्यनेनेति वा । 'चण शब्दे[4]'( ), 'अमन्ताड्डः'(उणा-१११)इति डः । ६ खमिन्द्रियं राति **खरः** । 'रा दाने'(अ.प.अ.), 'आतोऽनुपसर्गे कः'३।२।३॥ । '' 'खड कड भेदे[5]'(चु.उ.से.), पृषोदरादित्वाड्डस्य रः''[[6] ]इत्यन्ये । ७ पाटयति उष्णतां **पटुः** । 'पट विस्तारे[7]'( ), ण्यादस्मात् 'फलिपाटिनमि'(उणा-१८)इत्यादिना उः । एते सप्ताऽपि गुणे पुंसि, तद्वति त्रिलिङ्गाः । ''गुणे क्लीबलिङ्गास्तद्वति त्रिलिङ्गाः''[ ]इति तु मिश्राः । सप्त अत्युष्णस्य । अन्यत्र तूपचारात्, यथा तीक्ष्णोऽसिः ॥१३८५॥

## कोष्णः[1] कवोष्णः[2] कदुष्णो[3] मन्दोष्णश्[4]चेषदुष्णवत्[5] ।

१-३ ईषदुष्णः **कोष्णः, कवोष्णः, कदुष्णः** । 'कवं चोष्णे'६।३।१०७॥ इति कोः कवादेशः, चात् कदुष्णम्, कोष्णम् । ४ मन्दमुष्णो **मन्दोष्णः** इति कर्मधारयः । ५ अल्पमुष्णः **ईषदुष्णः** । एते पञ्चाऽपि गुणे पुंसि, तद्वति वाच्यलिङ्गाः । ''गुणे क्लीबलिङ्गाः''[ ]इति तु मिश्राः । पञ्च ईषदुष्णस्य ॥

## निष्ठुरः[1] कक्खटः[2][8] क्रूरः[3] परुषः[4] कर्कशः[5] खरः[6] ॥१३८६॥

## दृढः[7] कठोरः[8] कठिनो[9] जरठः[10]

१ नियतं तिष्ठति **निष्ठुरः** । 'ष्ठा गतिनिवृत्तौ' (भ्वा.प.अ.), उरचि प्रत्यये साधुः । २ कक्खते(कक्खति) **कक्खटः** । 'कक्ख हसने[9]'(भ्वा.प.से.), 'शकादिभ्योऽटन्'(उणा-५२१) । ''खक्कटः''[ ]इत्यन्ये । ३ कृन्तति **क्रूरः** । 'कृती छेदने'(त.प.से.), 'कृतेश्छः क्रूश्च (क्रू च)' (उणा-१७८)इति रक् । ४ पृणाति[11] **परुषः** । 'पृ पालनादौ'(क्र्या.प.से.), 'पृकलिभ्यामुषच्(पृनहिकलिभ्य उषच्)' (उणा-५१५) । ५ कर्कोऽग्निरुपमानमस्य **कर्कशः** । लोमादित्वात् शः[12] । ६ खनति **खरः** । पृषोदरादिः ॥१३८६॥ ७ दृंहति **दृढः** । 'दृहि वृद्धौ[13]' (भ्वा.प.से.), 'दृढः स्थूलबलयोः'७।२।२०॥ इति साधुः । ८ कठति **कठोरः** । 'कठ कृच्छ्रजीवने'(भ्वा.प.से.), 'कठिचकिभ्यामोरच्(-मोरन्)' (उणा-६४) । ९ 'बहुलमन्यत्राऽपि'(उणा-२०७)इतीनचि **कठिनम्** । १० जीर्यति **जरठः** । 'जॄ वयोहानौ[14]'(दि.प.से.), बाहुलकात् 'कमेरठः' (उणा-१००)इत्यठः । 'जरट' इत्यपि । दश कठोरस्य ॥

---

१. '-त्' इति५॥ २. '-रेकत्व-' इति१.२॥ ३. 'पीव मीव नीव तीव ('तीव णीव' इति मैत्रेयसायणौ) स्थौल्ये' इति क्षीरतरङ्गिण्यादयः ॥ ४. क्षीरतरङ्गिण्यादौ शब्दार्थकचणधातुर्न दृश्यते ॥ ५. 'खड खडि भेदे' इति स्वामी, 'कडि इत्येके' इति तत्र व्याख्याने, 'खड खडि भेदने' इति मैत्रेयसायणौ॥ ६. द्र. पदचन्द्रिका, भा-१, दिग्वर्गः, श्लो-१०३, पृ.१३४॥ ७. क्षीरतरङ्गिण्यादौ विस्तारार्थकपटधातुर्न दृश्यते॥ ८. 'कर्कटः' इति५॥ ९. मैत्रेयसम्मतोऽयं धातुपाठः॥ १०. द्र. स्वोपज्ञटीका६।१३८६॥, पृ.३११॥ ११. 'पृणो-' इति४.५॥ १२. ४प्रतौ नास्ति॥ १३. 'दृह दृहि बृह बृहि वृद्धौ' इति स्वामिसायणौ, 'तृह तृहि दृह दृहि वृह वृहि वृद्धौ' इति मैत्रेयः ॥ १४. 'जॄष् झॄष् वयोहानौ' इति क्षीरतरङ्गिण्यादयः ॥

कोमलः[1] पुनः ।

मृदुलो[2] मृदुसोमालसुकुमारा[3,4,5] अकर्कशः[6] ॥१३८७॥

१ काम्यते **कोमलः**। 'कमु कान्तौ'(भ्वा.आ.से.), पृषोदरादिः । कौतीति वा । 'कु शब्दे'(अ.प.अ.), 'कुठि(कुटि)कशि-'(गणसू- )इति क्मलन् । २ मृदुगुणयुतो **मृदुलः** । सिध्मादित्वाल्लच् । ३ मृद्यते **मृदुः**। 'मृदं क्षोदे'(क्र्या.प.से.), बाहुलकादुः । यद्वा '[2]म्रद क्षोदे'(भ्वा.आ.से.), 'प्रथिम्रदि-'(उणा-२८)इत्यादिना कुप्रत्ययः सम्प्रसारणं च । ४ सोमं सोमत्वमालाति **सोमालः**। ५ सुष्ठु कुत्सितं म्रियते म्लायति **सुकुमारः** । 'मृङ् प्राणत्यागे'(तु.आ.अ.), घञ् । यद्वा 'शृङ्गारभृङ्गारकुञ्जाराः[3]' ( )इति बाहुलकात् कमेरार अत उत्वं च । शोभनो[4] कुमारः (कुमारा) कान्तिरस्य सुकुमार इति वा । ६ न कर्कशः **अकर्कशः** । षट् कोमलस्य ॥१३८७॥

मधुरस्तु[1] रसज्येष्ठो[2] गुल्यः[3] स्वादुर्मधूलकः[4,5] ।

१ मधु माधुर्यमस्त्यस्य **मधुरः** । '[5]उषशुषि-(सुषि)-'५।२।१०७॥ इत्यादिना मध्वादित्वाद् रः । ''इह मधुरशब्दो (मधुशब्दो) रसनाग्राह्ये माधुर्याख्ये रसे वर्तते, तेन मधुरं मध्वित्यपि भवति, इह च न भवति, मध्वस्मिन् घटे[6]ऽस्तीति मधुरो घटः''[मा.धातुवृत्तिः, दिवादिः, धातुसं-७१]इति धातुवृत्तिः । माद्यतेऽनेनेति वा, पृषोदरादिः । २ रसेषु ज्येष्ठो **रसज्येष्ठः** । ३ गुडे[7] साधुः **गुल्यः** । 'तत्र साधुः'३।३।४९॥ इति यत् । ३ स्वदते **स्वादुः**। 'स्वद(ष्वद) आस्वादने[8]'(भ्वा.आ.से.), 'कृवापाजिमिस्वदि-'(उणा-१)इत्यादिना उण् । ४ माद्यत्यनेन मधूलः, पृषोदरादिः, ततः स्वार्थे कनि **मधूलकः** । मृष्ट इत्यपि । पञ्च मधुरस्य । 'मीठुं[9]' इति भाषा ॥

अम्लस्तु[1] पाचनो[2] दन्तशठः[3]

१ अमति **अम्लः** । 'अम गतौ[10]'(भ्वा.प.से.), बाहुलकाद् '[11]मूशक्यविभ्यः क्लः'(उणा-५४८)इति क्लः । 'अम्ब्ल' इति मबलसंयोगवानपि। 'लबि रबि[12] अबि शब्दे'(भ्वा.आ.से.), 'शू(मू)शक्यविभ्यः क्लः'(उणा-५४८) । २ पाचयति भुक्तमन्नं **पाचनः** । पचेर्ण्यन्ताद् नन्द्यादित्वाद् ल्युः । ३ दन्तेषु शठो **दन्तशठः** । त्रीणि अम्लस्य । 'खाटउं[13]' इति भाषा ॥

अथ लवणः[1] सरः[2] ॥१३८८॥

सर्वरसः[3]

१ लुनाति जाड्यं **लवणः** । 'लूञ् छेदने'(क्र्या.उ.से.), नन्द्यादित्वाद् ल्युः, 'लवणाल्लुक्'४।४।२४॥ इति निपातनाण्णत्वं । २ सरत्यनेनेति **सरः** । 'सृ गतौ'(भ्वा.प.अ.), 'पुंसि संज्ञायाम्-'३।३।११८॥ इति घः ॥१३८८॥ ३ सर्वे रसा अत्र **सर्वरसः** । त्रीणि लवणस्य । 'खारउं[14]' इति भाषा ॥

अथ कटुः[1] स्यादोषणो[2] मुखशोधनः[3] ।

१ कटत्यावृणोति तीक्ष्णत्वेन मुखमिति **कटुः** । 'कटे वर्षावरणयोः'(भ्वा.प.से.), 'वटिकटि(कटिवटि)भ्यां च[15]'(उणा-८)इत्युः । ''बाहुलकादुः[16]''[मा.धातुवृत्तिः, भ्वादिः, धातुसं-१९५]इति माधवः । २ ([17]ओषति **ओषणः**) । ३ मुखं शोधयति **मुखशोधनः** । 'शुन्ध शुद्धौ'(भ्वा.प.से.), णिजन्तः, नन्द्यादित्वाद् ल्युः । त्रीणि कटुरसस्य ॥

वक्त्रभेदी[1] तु तिक्तः[2]

१ वक्त्रं मुखं भिनत्ति **वक्त्रभेदी** । 'भिदिर् विदारणे'(रु.उ.अ.), ग्रहादित्वाण्णिनिः । २ [18]तेजयति **तिक्तः** । 'तिज निशाने[19]'(भ्वा.प.से.), बाहुलकाद् 'अञ्जिघृषि(सि)भ्यः क्तः'(उणा-३६९)। द्वे तिक्तस्य ॥

अथ कषायस्तुवरो[1] रसः[20] ॥१३८९॥

१ कषति कण्ठमिति **कषायः[21]** । '[22]कष हिंसायाम्'(भ्वा.प.से.), [बाहुलकादयः] ।२'[23]तु'इति सौत्रो धातुर्धारणार्थः, तत औणादिकः'छित्वरचत्वर(छत्वर)-'(उणा-२८१) इत्यादिना त्वरच्(ष्वरच्), **तुवरः**। ह्रस्वादिः, दीर्घादिश्च । तथा च[23]-

१. '-दु' इति२.३.४.५.॥ २. 'मृ-' इति१.३.४॥ ३. '-ञ्जराः' इति१.२.३॥ ४. '-नः' इति२॥ ५. 'ऊ-' इति२, 'ऊषि-' इति४॥ ६. 'प-' इति४.५॥ ७. '-ले' इति३॥ ८. '-स्वादे' इति२.३.५॥ ९. '-ठउं' इति१.२, '-ठउ' इति३॥ १०. 'गत्यादिषु' इति क्षीरतरङ्गिण्यादयः ॥ ११. 'शू-' इति४॥ १२. 'रबि लबि-' इति क्षीरतरङ्गिण्यादयः ॥ १३. '-टौ' इति३, '-टौं' इति५॥ १४. '-रउ' इति३, '-रौ' इति४॥ १५. 'अणश्च'(उणा-८)इत्यत्र चात् कटिवटिभ्यामित्युर्बोध्यम् ॥ १६. '-दुप्रत्ययः' इति मा.धातुवृत्तौ, पृ.१७०॥ १७. कोष्ठान्तर्गतपाठः १प्रतावेव बहिर्भागे टीप्पणीरूपेण दृश्यते ॥ १८. 'ति-' इति२॥ १९. 'तिज निशाने क्षमायां च' इति क्षीरतरङ्गिण्यादयः ॥ २०. 'रसः' इति१.३.४.५.॥ २१. '-याः' इति४.५॥ २२. कषेत्यादिदण्डात्मकोऽयं धातुः ॥ २३. १प्रतौ नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"नरेऽश्मश्रुणि शृङ्गाभ्यां रहिते गवि तूबरः ।
काले प्राप्ते कषाये च रसे पुंव्यञ्जनोच्यते (-ने च्युते) ॥१॥"

[[1]]इत्युत्पलिनी । बहुपुस्तकेषु ह्रस्वादिपाठ एव । पुंक्लीबलिङ्गावेतौ । "कुत्सितो वरः कुवरः, ह्रस्वादिः, कवर्गादिश्च । कुवरस्तु कषायोऽस्त्रीत्येके[2] पठन्ति"[टीकासर्वस्वम् १।५।९॥]इति सर्वानन्दादयः[3] । द्वे कषायस्य । रसा इति, रस्यन्त इति रसाः । 'रस स्वादे[4]'(चु.उ.से.), घञर्थे कः । ते पूर्वोक्ताः षडपि रसा इत्यर्थः । यन्महेश्वरः "रसो गन्धे रसे स्वादे तिक्तादौ[5]"[विश्वप्रकाशकोशः, सान्तवर्गः, श्लो-१]इति । यथा च-"षड्रसाः किल वैद्येषु भरतेऽष्टौ नवाऽपि च[6]"[[7]]इति । मधुरादीनां षण्णां सामान्येनैकं 'रसा' इति ॥१३८९॥

## गन्धो[1] जनमनोहारी[2] सुरभिर्[3]घ्राणतर्पणः[4] ।
## समाकर्षी[5] निर्हारी[6] च

१ गन्ध्यते **गन्धः** । 'गन्ध अर्दने[8]'(चु.आ.से.), चुरादिः, पचाद्यच् । सामान्यतो गन्धनामैकं गन्धः घ्राणग्राह्यो गुणः । अत्र 'स' इति पदमध्याहार्यम्, ततोऽयमर्थः, २ स गन्धो **जनमनोहारी**, जनानां मनोहरणशीलः सुरभिरुच्यत इत्यन्वयः । ३ **सुरभिः** उक्तो वसन्तनामसु (अभि.२।१५६)। ४ घ्राणं घ्राणेन्द्रियं तर्पयति[9] **घ्राणतर्पणः** । 'तृप हर्षणे[10]'(   ), णिजन्तः, नन्द्यादित्वाल्ल्युः । ५ समाकर्षत्यवश्यं मनः **समाकर्षी** । 'कृष विलेखने'(तु.उ.अ.), आवश्यके णिनिः । ६ एवं निहरत्यवशंय **निर्हारी** । आवश्यके णिनिः । अत्र यो गन्धो यं प्रति प्रसिद्धस्तदनुवादेनाऽन्यस्य विधिः कार्यः, एवमन्यत्राऽपि । परिमलोऽपि । यद्गौडः-"स्याद् विमर्दे परिमलो गन्धे जनमनोहरे"[ ]इति ॥

## स आमोदो[1] विदूरगः[2] ॥१३९०॥

१ स सुरभिर्गन्धो विदूरगोऽतिदूरव्यापी **आमोदः**, उच्यत इत्यन्वयः । आ समन्ताद् मोदतेऽनेनेति आमोदः । 'मुद हर्षे'(भ्वा.आ.से.), करणे घञ् ॥१३९०॥

## विमर्दोत्थः परिमलः[1]

१ रतविकसद्देहाङ्गरागपरिम्[11]लनसमुद्भूतो यो गन्धस्तन्नामैकं **परिमलः** इति । परिमलते धारयति जनमनांसि परिमलः । 'मल धारणे[12]'(भ्वा.आ.से.), अच्, घञि वा, संज्ञापूर्वकत्वाद् वृद्ध्यभावः । विमर्दाद् रतविकसद्देहाङ्गरागपरिमलनादुत्तिष्ठतीति विमर्दोत्थः । यद्गौडः-

"स्याद् विमर्दे परिमले गन्धे जनमनोहरे ।
रतोपमर्दविकसद्देहरागादिसौरभः ॥१॥"[ ]इति ॥

## अथाऽऽमोदी[1] मुखवासनः[2] ।
## इष्टगन्धः[3] सुगन्धिश्च[4]

१ आमोदोऽस्त्यस्य **आमोदी** । 'अत इनिठनौ' ५।२।११५॥ इतीनिः । २ मुखं वासयति **मुखवासनः** । वसेर्णिजन्ताद् नन्द्यादित्वाल्ल्युः । 'शुभवासनः' इति क्वचित् पाठः । "तत्र च शुभं मनोहरं वासनं[13] वासो यस्येति बहुव्रीहिः"[[14]]इति सर्वधरः । ३ इष्टो गन्धोऽस्य **इष्टगन्धः** । ४ शोभनो गन्धोऽस्य **सुगन्धिः** । 'गन्धस्ये-दुत्पूतिसुसुरभि-'५।४।१३५॥ इतीदन्तादेशः । चत्वारि इष्टगन्धस्य । "द्वौ द्वौ भिन्नार्थौ"[[15]]इत्यन्ये, तदा आद्यद्वयं मुखवासनवटिकादेः ॥

## दुर्गन्धः[1] पूतिगन्धिकः[2] ॥१३९१॥

१ दुष्टो गन्धोऽस्य **दुर्गन्धः** । 'गन्धस्येदुत्पूति-'५।४।१३५॥ इत्यादौ दुरीभावाद् (दूरोऽभावाद्) [16]नेत्त्वमत एव काव्यादर्शे वामनः-"दुर्गन्धिमदादिषु पदेषु[17] इत्समासान्तो दुर्लभः, '[गन्धस्येद्]उत्पूति-'५।४।१३५॥ इत्यादिषु दुःशब्दस्य [अ]पाठात्"[[14]] [इति] । केचित्तु-"मत्वर्थीयमिनिं कृत्वा दुर्गन्धीतीदन्तम् ('दुर्गन्धी' इति नान्तम्)"[[14]] आहुः । तददर्शनात्, "कर्मधारयमत्वर्थीयाभ्यां बहुव्रीहिरेवेष्टो लाघवात्"[ ]इति कात्यायनोक्तेः ।

१. द्र. टीकासर्वस्वम्, भा-१, १।५।९॥, पृ.१०७॥, पदचन्द्रिका, भा-१, धीवर्गः, श्लो-१४२, पृ.१७९॥, रामाश्रमी१।५।९॥, पृ.७५॥ २. 'वेत्येके' इति४, 'चेत्येके' इति५॥ ३. सर्वानन्दकृतटीकासर्वस्वे-"कुत्सितो वरः कुवरः । ह्रस्वादिः कवर्गादिश्चेत्यन्यः" इति दृश्यते, भा-१, पृ.१०७॥, द्र. पदचन्द्रिका, भा-१, धीवर्गः, श्लो-१४२, पृ.१७९॥ ४. 'आस्वादनस्नेहनयोः' इति क्षीरतरङ्गिण्यादयः ॥ ५. महेश्वरकृतविश्वप्रकाशकोशे-"रसो गन्धरसे स्वादे चित्तादौ विषरागयोः" इति दृश्यते, पृ.१७३॥ ६. 'वा' इति३॥ ७. द्र. अनेकार्थकैरवाकरकौमुदीटीका, भा-१, २।५७४॥, पृ.३२७॥ ८. 'बस्त गन्ध अर्दने' इति क्षीरतरङ्गिण्यादयः ॥ ९. '-न्ति' इति५॥ १०. क्षीरतरङ्गिण्यादौ हर्षणार्थकतृपधातुर्न दृश्यते॥ ११. '-मललसत्समु-' इति१॥ १२. 'मल मल्ल धारणे' इति क्षीरतरङ्गिण्यादयः ॥ १३. ४प्रतौ नास्ति ॥ १४. द्र. पदचन्द्रिका, भा-१, धीवर्गः, श्लो-१४४, पृ.१८१॥ १५. द्र. स्वोपज्ञटीका६।१३९१॥, पृ.३१२-३१३॥ १६. 'नै-' इति४.५॥ १७. '-षूपपदेषु' इति१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

केचित्तु लाघवमनादृत्य इच्छन्त्येव[1] मत्वर्थीयम् । "किसलयच्छेदपाथेयवन्तः"[ मेघदूतम्, पूर्वमेघः, श्लो-११ ]इतिवत् प्रयोगश्चाऽयम् । "यद् दुर्गन्धि मदाविलं मलशतैर्यत् पूतिनाडीमयम्"[ ]इति शृङ्गारप्रकाशे[2] । पूतिर्विस्रः, पूतेरिव गन्धोऽस्य पूतिगन्धिः । 'गन्धस्येदुत्पूति-'५।४।१३५॥ इत्यादिना इदन्तादेशः, ततः स्वार्थे कन् [ **पूतिगन्धिकः** ] । द्वे दुर्गन्धस्य ॥१३९१॥

## आमगन्धि[1] तु विस्रं[2] स्यात्

१ आमोऽपक्वो मलस्तस्येव गन्धोऽस्येति **आमगन्धिः** । 'उपमानाच्च'५।४।१३७॥ इतीत्समासान्तः । २ 'विस प्रेरणे'(दि.प.से.), दन्त्यान्तः, बाहुलकात् 'स्फायि-'(उणा-१७०)इत्यादिना रक् । "विस उत्सर्गे"[अम.क्षीर. १।४।१२॥]इति तु भट्टः, [**विस्रम्**] । एते आमोदाद्या विस्रमित्यन्तास्त्रिलिङ्गाः । द्वे विस्रगन्धस्य । शब्दार्णवे तु[3]-

"कस्तूरिकायामामोदः कर्पूरे[4] मुखवासनः ।
बकुले स्यात् परिमलश्चम्पके सुरभिस्तथा ॥१॥
गन्धादिषड्भिरप्येते गुणिवृत्तौ त्रिलिङ्गकाः ॥"

[[5]][6]इति । "सुरभ्यादिभ्यः 'कृदिकारादक्तिनः'(वा-४।१।४५॥), 'सर्वतोऽक्तिन्नर्थादित्यके'(वा-४।१।४५॥)"[ ]इति तु स्वामी। पक्षे ङीष्, सुरभी, सुगन्धी"[[5]]इति कौमुदी॥

## वर्णाः[1] श्वेतादिका अमी ।

१ अमी वक्ष्यमाणाः श्वेतादयो **वर्णाः** उच्यन्ते । व्रियन्ते वर्णाः, पुंक्ती.। 'वृञ् वरणे'(स्वा.उ.से.), 'ऋज्रेन्द्र-'(उणा-१८५)आदौ रन्प्रत्ययान्ताद् रेफस्य णत्वे निपात्यते ॥

## श्वेतः[1] श्येतः[2] सितः[3] शुक्लो[4] हरिणो[5] विशदः[6] शुचिः[7] ॥१३९२॥

## अवदात[8]गौर[9]शुभ्र[10]वलक्ष[11]धवला[12]र्जुनाः[13] ।

## पाण्डुरः[14] पाण्डरः[15] पाण्डुः[16]

१ श्वेतते **श्वेतः** । 'श्विताङ्[7] वर्णे'(भ्वा.आ.से.), 'अकर्तरि च कारके संज्ञायाम्'३।३।१९॥ इति कर्तरि घञ् । तालव्यादिरयम्, "श्वेतो धावति"[ ]इति श्लेषात्। २ श्यायते **श्येतः**, तालव्यादिः । 'श्यैङ् गतौ'(भ्वा.आ.अ.), 'हृश्याभ्यामितच्(-न्)'(उणा-३७३)। ३ सिनोति बध्नाति मनः **सितः** । 'षिञ् बन्धने'(स्वा.उ.अ.), 'अञ्जिघृषि(सि)भ्यः क्तः[8]'(उणा-३६९)इति संज्ञायां क्तः । ४ शोकयति मनोऽस्मिन्निति **शुक्लः**। 'शुक गतौ'(भ्वा.प.से.), 'ऋज्रेन्द्र-'(उणा-१८६)इत्यादिना निपातः । ५ हरति मनो **हरिणः** । 'हृञ् हरणे'(भ्वा.उ.अ.), 'श्यास्त्याहृञ्विभ्य इनच्[9]'(उणा-२०४)। ६ विशीयते **विशदः** । 'शद्लृ शातने'(भ्वा.तु.प.अ.), अच्, तालव्यादिरयम् । "विशदा विशदामत्तसारसे सारसे जले"[काव्यादर्शः, परिच्छेदः-३, श्लो-१४]इति दण्डियमकात्[10] । ७ शुच्यते निर्मलीभवति **शुचिः** । 'शुचिर् पूतीभावे'(दि.अ.से.), 'इगुपधात् कित्'(उणा-५५९)इतीन्, स च कित् ॥१३९२॥ ८ अवदीयते (अवदायते) शोध्यते[11] **अवदातः** । 'दैप् शोधने'(भ्वा.प.अ.), क्तः। ९ गोरति (गोरते) मनोऽस्मिन् **गौरः** । 'गुरी उद्यमे'(तु.आ.से.), 'ऋज्रेन्द्र-'(उणा-१८६)इति साधुः । १० शोभते **शुभ्रः** । 'शुभ शुंभ शोभार्थौ(शोभार्थे)' (तु.प.से.), 'स्फायि-'(उणा-१७०) इति रक् । ११ अवलक्षते(अवलक्ष्यते) इति **वलक्षः** । 'लक्ष दर्शनाङ्कनयोः'(चु.उ.से.), अवपूर्वः, घञन्तः, पृषोदरादिर्वा । वलते वा । 'वलेरक्षः'(उणा- ) इत्यक्षः। "रूढिशब्दत्वान्नित्यो वष्टि भागुरिरल्लोपः"[[12-1]] इति स्वाम्यादयः[13]। वलतेः क्विप्, वल् अक्षन्त्यस्मिन्, पूर्ववद् घञि वा। कषसंयोगवानयम्। "अथ स वलक्षो भानां पतिरिव"[ ]इति वृन्दावनयमकात्"[ ]इति कौमुद्यादय[12-2] ।

१. '-वं' इति१॥ २. "दुष्टो गन्धोऽस्येति दुर्गन्धः । उत्पूत्यादिष्वसन्निवेशादिकारः समासान्तोऽत्र नास्ति । तथा च काव्या(दर्शे? लङ्कारे) वामनः-"दुर्गन्धिमदादिषु पदेषु इत् समासान्तो दुर्लभः, उत्पूत्यादिषु दुश्शब्दस्यापाठात् ।" केचिद् दुर्गन्धशब्दाद् मत्वर्थीयमिनिं कृत्वा दुर्गन्धीति नान्तं पठन्ति । तदयुक्तम्। यदाह कात्यायनः-'बहुव्रीहिमत्वर्थीययोर्बहुव्रीहिरेवेष्टो लाघवाद्' इति । अन्ये पुनर्लाघवं नाद्रियन्ते । तथा च विभाकरवर्मा-"यद् दुर्गन्धि मदाविलं मलशतैर्यत् पूतिनाडीमयम्" इति । शृङ्गारप्रकाशे तूक्तं-"द्विविधो हि वाच्यधर्मः लघुर्गुरुश्च । तत्र कर्मधारयमत्वर्थीयाद् बहुव्रीहिणा लघुः । बहुव्रीहेः कर्मधारयमत्वर्थीयेन च गुरुः । तत्राद्यो यथा-"यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु, स्निग्धच्छायातरुषु वसतिं राम-गिर्याश्रमेषु ॥" (मेघूदूतम्, पूर्वमे. श्लो-१), अन्तिमो यथा-"बिसकिसलयच्छेदपाथेयवन्तः" इति ॥" इति टीकासर्वस्वम्, भा-१, १।५।१२॥, पृ.१०८-१०९॥ ३. १प्रतौ नास्ति ॥ ४ 'कपू-' इति१.३.४.५॥ ५ द्र. पदचन्द्रिका, भा-१, धीवर्गः, श्लो-१४५, पृ.१८२॥ ६ द्र. रामाश्रमी१।५।१२॥, पृ.७७॥ ७ क्षीरतरङ्गिण्यादौ ङकारानुबन्धो न दृश्यते ॥ ८ ३.४.५प्रतिषु नास्ति॥ ९ 'हृश्याभ्यामितच्' इति१.३.४.५॥ १०. 'च-' इति१॥ ११. '-तेऽनेन' इति३॥ १२-१. द्र. पदचन्द्रिका, भा-१, धीवर्गः, श्लो-१४६, पृ.१८३॥, १२-२. तत्र-"अथ स वलक्षो भानां पतिरिव कर्तारमरिबलक्षोभानाम्" इति वृन्दावनाद् इति कौमुद्यादयः" इति दृश्यते ॥ १३. अम.क्षीरस्वामिकृतटीकायाम्-"अवलक्ष्यते वलक्षः" इत्येव दृश्यते, १।४।१३॥, पृ.४१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१२ धावति मनोऽत्र **धवलः** । 'धावु गतिशुद्ध्योः' (भ्वा.उ.से.), वृषादित्वात् कलच्[2], बाहुलकाद् ह्रस्वत्वम् । "'वापो (धावो) ह्रस्वश्च'( )इति कलच्ह्रस्वौ"[ ]इति श्रीभोजराजः[3]। **१३** अर्ज्यत इति **अर्जुनः**। 'अर्ज सर्ज[4] अर्जने' (भ्वा.प.से.), णिजन्तः, '[5]अर्जेर्णिलुक् च'(उणा-३३८) इत्युनन् । **१४** पाण्डुगुणयोगात् **पाण्डुरः**, पञ्चमस्वरमध्यः । 'नगपाण्ड्वादिभ्यश्चोपसङ्ख्यानम्[6]'(वा-५।२। १०७॥)इति रः । अस्या-ऽनार्षत्वात् 'पाण्डुरोऽसाधुः'[ ] इति भाषावृत्तिकृतो दुर्ज्ञानं जयादित्यं प्रति वाम्यमात्रं च जनितम् । भाष्यविरुद्धं हि चेदम्, न त्वयुक्तम्, वृत्त्यन्तरोक्तानामन्येषामपि ग्राह्यत्वात्, भाष्यानुक्तानां भट्टिकोक्तानामन्यथाऽप्रामाण्यापत्तेः । अयं च शब्दार्णवादिभिरपि परमशिष्टैरनुशिष्टः, यथा-

"पाण्डुरस्तु पीतरक्तभागी प्रत्यूषचन्द्रवत् ।
पाण्डुः स्त्रीपीतभोगार्थः केतकी धूलिसन्निभः ॥१॥
पाण्डुरः पाण्डरे कैश्चित् कैश्चित् पाण्डौ प्रवेशितः ।"

[[7]]इत्युक्तत्वात् । **१५** पण्डयते याति मनोऽस्मिन्निति **पाण्डरः** । 'पडि गतौ'(भ्वा.आ.से.), णिजन्तादस्मात् 'पण्डेर्दीर्घश्च'( )इति रः । **१६** पन्यते स्तूयते **पाण्डुः** । 'पन व्यवहारे स्तुतौ च[8]'(भ्वा.आ.से.), पनेर्दीर्घश्च' (हैमोणा-७६६)इति डुः । अत्र यद्यपि शब्दार्णवे भेदः-

"श्येतस्तु(श्वेतस्तु) समपीतोऽसौ रक्तेतरजवारुचिः ।
वलक्षस्तु सितः श्यावः कदलीकुसुमोपमः ॥१॥
अर्जुनस्तु सितः कृष्णलेशवान् कुमुदच्छविः ।"[[9]]इति

तथाऽप्यस्तु भेदानदरणादिह पर्यायिता। षोडश धवलवर्णस्य[9]॥

## ईषत्पाण्डुस्तु धूसरः[10] ॥१३९३॥

१ ([11]सिते पीतसमायोगः पाण्डुवर्णः प्रकीर्तितः)। ईषच्छब्दोऽव्यक्तपरः, ईषदव्यक्तः पाण्डुः श्वेत ईषत्पाण्डुः धूनोति चेतो **धूसरः** । 'धूञ् विधूनने(कम्पने)' (स्वा. आ.से.), 'कृधूमदिभ्यः-'(उणा-३५३)सरन्, बाहुलकादषत्वं च । यद्वा 'धूस कान्तिकरणे'(चु.उ.से.), धूसयति धूसरः । बाहुलकादरप्रत्ययः । "महिषधूसरितः सरितस्तटः"[जानकीहरणम्, ११।७१॥]इति जानकीहरणम् । "धूसरस्तु सितः पीतलेशवान् बहुलच्छविः"[[12]]इति शब्दार्णवः । एकं धूसरवर्णस्य ॥१३९३॥

## कापोतस्तु कपोताभः

१ कपोतस्याऽयं **कापोतः** । 'तस्येदम्'४।३। १२०॥ इत्यण् । २ कपोतस्येव आभा अस्य **कपोताभः** । द्वे कपोतवर्णस्य ॥

## पीतस्तु सितरञ्जनः ।
## हारिद्रः पीतलो गौरः

१ पिबति वर्णानिति, (पायति (पीयेते) वर्णानिति) वा **पीतः** । 'पा पाने'(भ्वा.प.अ.), बाहुलकाद् 'अञ्जिघृषि(घृसि)भ्यः क्तः'(उणा-३६९), 'घुमास्था-'६।४। ६६॥ इतीत्वम्, 'पीङ् पाने'(दि.आ.अ.) अतो बाहुलकात् तन् वा । २ सितं रञ्जयति **सितरञ्जनः** । 'रञ्ज रागे'(भ्वा. उ.अ.), नन्द्यादित्वाल्ल्युः। ३ हरिद्राया अयं **हारिद्रः** । ४ पीतं पीतत्वं लाति **पीतलः**। 'आतोऽनुपसर्गे कः'३।२।३॥। ५ गूयते **गौरः** । 'गुङ् गतौ[13]( )इत्यस्य 'ऋज्रेन्द्र-' (उणा-१८६)इति[14] निपातितः । पञ्च पीतवर्णस्य ॥

## पीतनीलः पुनर्हरित् ॥१३९४॥
## पालाशो हरितस्तालकाभः

१ पीतश्चासौ नीलश्च[15] **पीतनीलः** । २ हरति चित्तं **हरित्** । 'हृञ् हरणे'(भ्वा.उ.अ.), 'हृसृरुहियुषिभ्य इतिः'(उणा-९७)॥**१३९४**॥ ३ पलाशस्य पर्णस्याऽयं वर्ण इति **पालाशः**, दीर्घादिः । पलाशं पत्रम्, तत्तुल्यवर्णतायां पलाशः । "पत्त्रं पलाशं मा (ना) रक्षःशटीहरितकिंशुकः"[[16]]इति तालव्यान्ते[17] रुद्रभसावतो ह्रस्वादिरपि, पुंस्ययम् । ४ हरति चित्तं **हरितः**, अदन्तः । 'हृश्याभ्यामितच्'(उणा-३७३)इतीतच् । ५ तालकं हरितालम्, तस्येवाऽऽभा अस्य **तालकाभः** । पञ्च पीतनीलवर्णस्य ॥

---

१. 'पृषोदरादि-' इति४.५॥ २. '-चि' इति३॥ ३. द्र. पदचन्द्रिका, भा-१, धीवर्गः, श्लो-१४६, पृ.१८३॥ ४. 'षर्ज' इति मैत्रेयसायणौ ॥ ५. 'अजे-' इति३.४॥ ६. 'नगपांसुपाण्डुभ्यश्च' इति वार्तिकस्वरूपं दृश्यते ॥ ७. द्र. पदचन्द्रिका, भा-१, धीवर्गः, श्लो-१४६, पृ.१८४॥, रामाश्रमी१।५।१३॥, पृ.७७-७८॥ ८. १प्रतौ नास्ति ॥ ९. 'वर्णस्य' इति४॥ १०. तुलनीयोऽमरकोषः१।५।१३॥ ११. कोष्ठान्तर्गतपाठः पाण्डुशब्दव्याख्यानेऽपि युक्तः ॥ १२. द्र. पदचन्द्रिका, भा-१, धीवर्गः, श्लो-१४६, पृ.१८४॥, रामाश्रमी१।५।१३॥ १३. क्षीरतरङ्गिण्यादौ गत्यर्थकगुङ्धातुर्न दृश्यते ॥ १४. 'इत्यादिना' इति४॥ १५. '-लकश्च' इति३॥ १६. द्र. टीकासर्वस्वम्, भा-१, १।५।१४॥, पृ.१११॥, पदचन्द्रिका, भा-१, धीवर्गः, श्लो-१४७, पृ.१८५॥, रामाश्रमी१।५।१४॥, पृ.७८॥ १७. '-न्तः' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रक्तस्तु[1] रोहितः[2] ।
माञ्जिष्ठो[3] लोहितः[4] शोणः[5]

१ रज्यति[१] **रक्तः** । 'रञ्ज रागे'(भ्वा.दि.उ.अ.), निष्ठा । २-४ रोहति **रोहितः** । 'रुह बीजजन्मनि प्रादुर्भावे च[२]'(भ्वा.प.अ.), 'रुहे रश्च लो वा'(उणा-३७४) इतीतच्, लत्वपक्षे[३] **लोहितः** । ३ मञ्जिष्ठाया[४] अयं **माञ्जिष्ठः** । ४ शोणति **शोणः** । 'शोणृ वर्णगत्योः[५]' (भ्वा.प.से.), अच् । पञ्च रक्तवर्णस्य ॥

श्वेतरक्तस्तु पाटलः[1][६] ॥१३९५॥

१ श्वेतश्चासौ रक्तश्च श्वेतरक्तः । पाटलाकुसुमारूपः **पाटलः** । पाटयति[७] वा[८], 'अट पट गतौ'(भ्वा.प.से.), णिजन्तः, वृषादित्वात् कलच् । ''पटेर्ण्यन्तादलच्, बाहुलकात्''[९]इति तु भट्टः[१०] । एकं श्वेतरक्तमिश्रितस्य ॥१३९५॥

अरुणो[1] बालसन्ध्याभः

१ इयर्ति **अरुणः** । 'ऋ गतौ'(भ्वा.प.अ.), 'अर्तेश्च'(उणा-३४०)इत्युनन् । अव्यक्तरागः किञ्चिल्लोहितोऽरुणः। यथा- दरमत्तस्य (मदमत्तस्य) चक्षूरागः[११] । ''अरुणः कृष्णलोहितः''[१२]इत्यमरमाला । बालसन्ध्याया इवाऽऽभा अस्य बालसन्ध्याभः । एकं नूतनसन्ध्यावर्णसदृग्वर्णस्य ॥

पीतरक्तस्तु[1] पिञ्जरः[2] ।
कपिलः[3] पिङ्गलः[4] श्यावः[5] पिशङ्गः[6] कपिशो[7] हरिः[8] ॥१३९६॥
बभ्रुः[9] कद्रुः[10] कडारश्च[11] पिङ्गे[12]

१ पीतश्चासौ रक्तश्च **पीतरक्तः** । २ पिञ्जयति **पिञ्जरः** । 'पिजि वर्णे[१३]'(भ्वा.आ.से.), णिजन्तः, बाहुलकादरः । ३ कवत इति **कपिलः** । 'कबृ वर्णे'(भ्वा.आ.से.), 'कबेः पश्च[१४]'(उणा-५५)इतीलच्, पश्चान्तादेशः । कपिवर्णं लातीति वा । 'आतोऽनुपसर्गे कः' ३।२।३॥ । '' 'कपि चलने'(भ्वा.आ.से.), 'कम्पेश्च[१५]'( ) इतीलच्, बाहुलकादत एव निर्देशाद् वा नलोपः''[मा.धातुवृत्तिः, भ्वादिः, धातुसं-२५६]इति माधवः[१६] । ४ ([१७]पिञ्ज्यते **पिङ्गलः**) । 'पिजि वर्णे[१३]'(अ.आ.से.), वृषादित्वात् कलच्, न्यङ्क्वादित्वात् कुत्वे पिङ्गलः । ''पिङ्गं लाति''[अम.क्षीर.१।४।१६॥]इति स्वामी । पिङ्गत्वमस्याऽस्ति[१८] पिङ्गलः । सिध्मादित्वाल्लज्वा । ५ श्यायते **श्यावः** । 'श्यैङ् गतौ'(भ्वा.आ.अ.), बाहुलकाद् वः । ६ पिशते(पिंशति) **पिशङ्गः** । 'पिश अवयवे' (तु.प.से.), 'विडादिभ्यः कित्'(उणा-११८)इत्यङ्गच् । तालव्यमध्योऽयम्[१९], तथा च माघः-''परिपाकपिशङ्गलतारजसा रोधश्चकास्ति कपिशं गलता''[शिशुपालवधम्, सर्गः-४, श्लो-४८]इति । ७ कपिर्मर्कटवर्णोऽस्त्यस्य **कपिशः** । लोमादित्वात् शो वा । ८ हरति मनो **हरिः** । 'अच इः'(उणा-५७८)इतीन् (इतीः) ॥१३९६॥ ९ बिभर्ति **बभ्रुः** । भृञः 'कुर्भ्रश्च (कुर्भ्रश्च)'(उणा-२२)इति कुर्द्वित्वं च । १० कत् कुत्सितं द्रवति **कद्रुः**, तुर्यवर्गतृतीयद्वयरेफसंयोगमध्यः[२०] । 'द्रु गतौ'(भ्वा.प.अ.), मितद्र्वादित्वाद् डुः । '' 'कमु कान्तौ'(भ्वा.आ.से.), 'मितद्र्व्यादयश्च(-द्र्वादिभ्यश्च)'(वा-३।२।१८०॥)इति डुन्, रुडागमः, टिलोपाभावश्च निपात्यते दकारश्चान्तादेशे कद्रुः, एकदकारवान्''[२१]इति मिश्राः । ११ गडति[२२] **कडारः** । 'गड सेचने[२३]'(भ्वा.प.से.), 'गडेः कड् च'(उणा-४१५)इत्यारन्[२४], कडादेशश्च[२५] कडारः । १२ पिञ्जयति **पिङ्गः** । 'पिजि वर्णे[१३]'(भ्वा.आ.से.), 'अकर्तरि च-'३।३।१९॥

---

१ '-ते' इति५॥ २ २.३.४.५प्रतिषु नास्ति, सायणमतेऽयं पाठः, 'बीजजन्मनि' इति स्वामी, 'जन्मनि प्रादुर्भावे' इति मैत्रेयः॥ ३. 'लत्वे' इति४.५॥ ४ '-यां' इति१॥ ५ 'वर्णे' इति१.२.४.५॥ ६ तुलनीयोऽमरकोषः१।५।१५॥ ७ "-तीति' इति१॥ ८ ४.५प्रत्योर्नास्ति॥ ९ अम.क्षीरस्वामिकृतटीकायाम्- ''पाटलवर्णः (पाटलः), पाटेरलज् वा'' इति दृश्यते, १।४।१५॥, पृ.४१॥ १०. 'भेदः' इति५॥ ११. 'चक्षु-' इति२॥ १२. द्र. टीकासर्वस्वम्, भा-१, १।५।१५॥, पृ.११२॥, पदचन्द्रिका, भा-१, धीवर्गः, श्लो-१४८, पृ.१८६॥, रामाश्रमी १।५।१५॥, पृ.७९॥ १३. मैत्रेयसायणसम्मतोऽयं पाठः ॥ १४ 'कमेः पश्च' इत्युणादिगणसूत्रम् ॥ १५ 'कपि-' इति३, 'कपे-' इति५॥ १६. मा.धातुवृत्तौ- ''कपिलः- 'कपेश्च' इतीलच्प्रत्ययः, बाहुलकादत एव निर्देशाद्वा नलोपः'' इति दृश्यते ॥ १७ कोष्ठान्तर्गतपाठः १प्रतौ न दृश्यते ॥ १८ '-स्तीति' इति१.३॥ १९. '-ध्ये-' इति३॥ २०. '-ध्याः' इति३॥ २१. पदचन्द्रिकायामन्यथा पाठो दृश्यते, भा-१, पृ१८७॥ २२. '-न्ति' इति४.५॥ २३. अयं धातुपाठः ३.४.५प्रतिषु न दृश्यते ॥ २४ '-क्' इति२॥ २५. १.३.४.५प्रतिषु नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति घञ्, कुत्वम्, तत्र । द्वादश पीतरक्तवर्णस्य । शब्दार्णवे तु भेदः-

"सितपीतहरिद्रक्तः कडारस्तृणवह्निवत् ।
अयं तद्रक्तपीताङ्गः कपिलाङ्गो विभीषणः ॥१॥
हरितांशे हिनो (हीनो?) सोऽपि पिशङ्गः पद्मधूलिवत् ।
पिशङ्गत्वशि[१]तावैश्यान् पिङ्गो दीपशिखादिषु ॥२॥
पिङ्गलस्तु परच्छायः पिङ्गे शुक्लाङ्गखण्डवत् ।"[ [२] ]इति॥

## कृष्णास्तु[1] मेचकः[2] ।
## स्याद् रामः[3] श्यामलः[4] श्यामः[5] कालो[6] नीलो[7]ऽसितः[8] शितिः[9] ॥१३९७॥

१ कर्षति मनः **कृष्णः** । 'कृष विलेखने'(भ्वा.प.अ.), 'कृषेर्वर्णे'(उणा-२८४)इति नक् । २ मचति[३] (मचते) मिश्रीभवति वर्णान्तरेणेति **मेचकः** । 'मच[४] मुचि कल्कने'(भ्वा.आ.से.), क्वुन्, 'गमिपचिमचीनाम्[५]'( ) इत्येत्वम्, पुंनपुंसकलिङ्गोऽयम् । "मेचकः शिखिकण्ठाभः" [ [६] ]इति दुर्गः[७] । ३ रमते मनोऽत्रेति **रामः** । 'रमु क्रीडायाम्'(भ्वा.आ.अ.), ज्वलादित्वाण्णः । ४ श्यामं श्यामत्वं लाति[८] **श्यामलः** । ५ श्यायतेऽस्मात् **श्यामः** । 'श्यैङ् गतौ'(भ्वा.आ.अ.), 'इषियुधीन्धिदसिश्याधूसूभ्यो मक्' (उणा-१४२)इति मक्, 'आदेचः-'६।१।४५॥ इत्यात्वम् । ६ कलयति मनः **कालः** । 'कल सङ्ख्याने[९]'(चु.उ.से.), ज्वलादित्वाण्णः । ७ नीलति **नीलः** । '[१०]णील वर्णे' (भ्वा.प.से.), 'इगुपध-'३।१।१३५॥ इति कः । ८ सितविरुद्धः **असितः** । ९ शिनोति **शितिः** । '[११]शिङ् (शिञ्) निशाने'(स्वा.उ.अ.), क्तिच् । "मेचकः कृष्णनीलः स्यादतसीपुष्पसन्निभः"[ [१२] ]इति शब्दार्णवे भेदः । नव कृष्णवर्णस्य[१३] ॥१३९७॥

## रक्तश्यामे[1] पुनर्धूम्र[2]धूमलौ[3]

१ रक्तश्चासौ श्यामश्च **रक्तश्यामः**, तत्र । २ धूमं राति **धूम्रः** । 'रा दाने'(अ.प.अ.), पृषोदरादित्वादाकारलोपः । ३ धूमवर्णं लाति **धूमलः** । त्रीणि रक्तकृष्णवर्णस्य ॥

## अथ कर्बुरः[1] ।
## किर्मीर[2] एतः[3] शबल[4]श्चित्र[5]कल्माष[6]चित्रलाः[7] ॥१३९८॥

१ " 'कबृ वर्णे[१४]'(भ्वा.आ.से.), बाहुलकादुरप्रत्ययो रेफोपसृष्टः[१५]"[मा.धातुवृत्तिः, भ्वादिः, धातुसं-२५९] इति माधवः । " 'कर्व[१६] गतौ'(भ्वा.प.से.), अस्माद् 'उरादयश्च'( )इत्युरच्"[ ]इत्युज्ज्वलदत्तः, [**कर्बुरः**] । २ कीर्यते **किर्मीरः** । 'कॄ विक्षेपे'(तु.प.से.), 'गम्भीरादयश्च'( )इति किरतेरीरन्, मुँ[१७]डागमश्च । ३ एति वर्णानिति **एतः** । 'इण् गतौ'(अ.प.अ.), 'हसिमृग्रिण्-'(उणा-३६६)इति तन् । ४ शपत्याक्रोशति वर्णमिति **शबलः** । 'शप आक्रोशे'(भ्वा.प.अ.), 'शपेर्बश्च'(उणा-१०५)इति कलः, तालव्यादिरयम् । "शकुनिपताकाशबलं घनवृन्दं चक्षुषा पताऽऽकाशबलम्"[ ]इति वृन्दावनात्[१८] । ५ चीयते **चित्रम्** । 'चिञ् चयने'(स्वा.उ.अ.), 'अमिचिमिदि-'(उणा-६०३) इत्यादिना क्त्रः[१९], कित्त्वाद् गुणाभावः । मिश्रास्तु- "गुणे शुक्लादयः पुंसि"[अमरकोषः१।५।१७॥]इति वचनादतो नानार्थपुं[२०]स्काण्डे निबन्धनाच्चित्रमिति पाठो लिपिदोषः, तस्मात् चित्रकिर्मीरेति[२१] समस्तं वाच्यमित्येके । क्लीबनिर्देशस्तद्वति गु[२२]णिलिङ्गत्वेन कामचारादित्यन्ये । प्रक्रान्त[२३] समासं विहाय चित्रमिति पृथग् रूपभेदप्रदर्शनमत्रोच्यते- "गुणे शुक्लादयः पुंसि"[अमरकोषः१।५।१७॥]इत्यस्य बाधनार्थमिति तु वयम् । तथा च शब्दार्णवे क्लीबत्वं दृश्यते । मेदिनीकारोऽपि विस्पष्टमेव- "तिलकालेख्ययोः क्लीबं कर्बुराद्भुतयोरपि"[मेदिनीकोशः, रान्तवर्गः, श्लो-३५]इति । "एवं चेत् तत् कथं चित्रभेदे च नाकुतः" [ ]इति धर्मकीर्तिवार्तिकं च । नामानुशासने तु कथं

---

१ '-सि-' इति१.२॥ २ द्र. पदचन्द्रिका, भा-१, धीवर्गः, श्लो-१४९, पृ.१८७॥ ३ 'चमते' इति३॥ ४ 'मचि' इति४॥ ५. 'पचिमच्योरिच्चोपधायाः'(उणा-७१५)इत्युणादिगणसूत्रम् ॥ ६. द्र. अम.क्षीर.१।४।१४॥, पृ.४१॥, स्वोपज्ञटीका६।१३९७॥, पृ.३१३॥ ७ 'दुग्रः' इति१.३.४.५॥ ८ '-तीति' इति४.५॥ ९. 'गतौ सङ्ख्याने च' इति स्वामिसायणौ, 'सङ्ख्याने गतौ च' इति मैत्रेयः ॥ १०. 'नी-' इति१.३.४॥ ११. 'शी-' इति३॥ १२. द्र. पदचन्द्रिका, भा-१, धीवर्गः, श्लो-१४७, पृ.१८५॥, रामाश्रमी१।५।१४॥, पृ.७८॥ १३. '-वर्णभेदस्य' इति३॥ १४ 'वरणे' इति१॥ १५. अस्य स्थाने मा.धातुवृत्तौ- 'रेफोजनश्च' इति दृश्यते ॥ १६. 'पर्प' इत्यादिदण्डात्मकोऽयं धातुः ॥ १७ 'म-' इति४॥ १८. '-वनयमकात्' इति३॥ १९. 'त्रः' इति३॥ २०. '-र्थः' इति१॥ २१. '-रिति' इति३॥ २२. 'गुणे' इति१॥ २३. '-न्त' इति१॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुंस्त्वमिति न विद्मः"[पदचन्द्रिका, भा-१, धीवर्गः, श्लो-१५०]इति व्याख्यन्[1]। ६ कलयति वर्णान् **कल्माषः**। 'कल सङ्ख्याने'(चु.उ.से.), 'कलेर्माषक् (कुलेश्च माषक्)'(हैमोणा ५६३)। "कल्माषः कर्बुरः कृष्णः (कर्बुरे कृष्णे)"[ ]इति मूर्धन्यान्ते रभसः[4]। ७ चित्रान् वर्णान् लाति **चित्रलः**। सप्त कर्बुरवर्णस्य । "गुणे वर्णमात्रे वर्तमानाः शुक्लादयः कर्बुरान्ताः पुंसि । यथा-पटस्य शुक्लो गुणः, तद्वति द्रव्ये वर्तमाना अभेदोपचाराद् गुणिलिङ्गा वाच्यलिङ्गाः, ततः स्त्रियां शुचिः, शुची । 'वर्णात्-'४।१।३९॥ इत्यादिना ङीष् (ङीप्) नकारो वा । श्येता, श्येनी, हरिता, हरिणी, लोहिता, लोहिनी, रोहिता, रोहिणी, एता, एनी। ङीषि गौरी, हरिणी, अर्जुनी, धूसरी, पलाशी, कडारी, किर्मीरी, कल्माषी, शबली। 'खरुसंयोगोपधप्रतिषेधो वक्तव्यः'(वा-४।१।४४॥)इति, पाण्डुः[6], कद्रुः। 'नीलात् प्राण्यौषध्योः[7]'(वा-४।१।४२॥), नीली वडवा, नीली औषधिः। 'वा संज्ञायाम्'(वा-४।१।४२॥), नीली, नीला । "कुवलयदलनीला कोकिला बालचूले" [ ]इत्यपपाठः"[ ]इति वामनः । 'जानपद-'४।१।४२॥ इत्यादिना वर्णे ङीष्। 'शोणात् प्राचाम्'४।१।४३॥ इति पक्षे शोणी, शोणा। 'पिशङ्गादुपसङ्ख्यानम्'(वा- ), पिशङ्गी । "भ्रामरोत्कटकल्माषाः कुसुमानां समृद्धयः"[ ] इति [टाबन्तदर्शनात् कल्माषेति टाबन्तमपि । "शबलेति ] टाबन्तमसाधु"[ ]इति बाणभट्टः अर्शआद्यचि तु टाप् क्रियते"[3]इति मिश्राः ॥१३९८॥

**शब्दो निनादो निर्घोषः स्वानो ध्वानः स्वरो ध्वनिः।**
**निह्रादो निनदो ह्रादो निस्वानो निस्वनः[10] स्वनः ॥१३९९॥**
**रवो नादः स्वनिर्घोषः संव्याङ्भ्यो राव आरवः।**
**क्वणनं निक्वणः क्वाणो निक्वाणश्च क्वणो रणः ॥१४००॥**

१ शपति कूटोच्चारकं[11] **शब्दः** । 'शप आक्रोशे'(भ्वा.उ.अ.), 'शाशपिभ्यां ददनौ'(उणा-५३७)इति दन्, तः (नः) स्वरार्थः । शब्द्यत इति वा । 'शब्द शब्दने[12]'(चु.उ.से.), घञन्तः, 'शब्दवैर-'३।१।१७॥ इति निर्देशाद् वा सिद्धिः। २ निनदनं **निनादः** । '[13]णद अव्यक्ते शब्दे'(भ्वा.प.से.), घञ्, 'णो नः'६।१।६५॥, 'अत उपधायाः' ७।२।११६॥ । ३ निर्घोषणं **निर्घोषः** । 'घुष घुष्टौ'(भ्वा.उ.से.), भावे घञ् । ४ स्वननं **स्वानः**। 'स्वन शब्दे[14]'(भ्वा.प.से), भावे घञ्[15]। ५ ध्वननं **ध्वानः** । 'ध्वन शब्दे[14]'(भ्वा.प.से.), भावे घञ् । ६ स्वरति **स्वरः**। 'स्वृ शब्दोपतापयोः'(भ्वा.प.वे.), पचाद्यच्। ७ ध्वननं **ध्वनिः** । 'ध्वन शब्दे[14]'(भ्वा.प.से.), 'खनिकष्यज्यसिवनिग्रथि[16]-'(उणा-५७९)इत्यादिना इः। ८ निह्रदनं **निह्रादः**। 'ह्राद अव्यक्ते शब्दे'(भ्वा.आ.से.), घञ्। ९ निनदनं **निनदः** । 'णद अव्यक्ते शब्दे'(भ्वा.प.से.), 'नौ गदनदप[17]चस्वनः[18]' ३।३।६४॥ इत्यप्। १० ह्रदनं **ह्रादः** । भावे घञ्। ११ निस्वननं **निस्वानः** । 'स्वन शब्दे[14]'(भ्वा.प.से.), भावे घञ् । १२ निस्वननं **निस्वनः** । 'नौ गदनदपचस्वनः[18]' ३।३।६४॥इति वाऽप् । १३ 'स्वन शब्दे[14]'(भ्वा.प.से.), 'स्वनहसोर्वा'३।३।६२॥ इत्यप् । स्वननं **स्वनः** ॥१३९९॥ १४ रवणं **रवः** । 'रु शब्दे'(अ.प.से.), 'ऋदोरप्'३।३।५७॥, 'विभाषाऽऽङि रुप्लुवोः'३।३।५०॥ इत्यप् [घञ्] वा। १५ नदनं **नादः** । भावे घञ् । १६ स्वननं **स्वनिः** । 'स्वन शब्दे[14]'(भ्वा.प.से.), '[19]खनिकष्यज्यसिवसिवनि-'(उणा-५७९)इत्यादिना इः । १७ घोषणं **घोषः** । 'घुष घुष्टौ[20]'(भ्वा.उ.से.), भावे घञ् । १८-२१ संव्याङ्भ्यः[21] उपसर्गेभ्यः परो रावः, संरवणं **संरावः**, विरवणं **विरावः**, आरवणम् **आरावः**[22] । 'रु शब्दे'(अ.प.से.), 'विभाषाऽऽङि रुप्लुवोः'३।३।५०॥ इति

१. '-तृ' इति१.३.४॥ २. 'गतौ सङ्ख्याने च' इति स्वामिसायणौ, 'संख्याने गतौ च' इति मैत्रेयः ॥ ३. द्र. पदचन्द्रिका, भा-१, धीवर्गः, श्लो-१५०, पृ.१८८॥ ४ रामाश्रमी१।५।१७॥, पृ.८०॥ ५ 'वर्णादिना' इति३॥ ६. '-ड्डु' इति३, '-डः' इति४॥ ७ 'नीलादोषधौ, प्राणिनि च' इति काशिकावृत्तिः, भा-३, ४।१।४२॥, पृ.३३७॥, "नीलादौषधौ ॥ नीली॥ प्राणिनि च ॥ नीली गौः ॥" इति सिद्धान्तकौमुदी, पृ.१४८॥ ८ '-ला' इति३.४॥ ९. १प्रतौ नास्ति ॥ १०. 'निःस्वानो निःस्वनः' इति मूलम्, स्वोपज्ञटीकाऽपि तमाश्रित्यैव ॥ ११. '-च्चारमिति' इति१, '-चारणं' इति४॥ १२. 'शब्द उपसर्गादाविष्कारे' इति स्वामी, 'शब्द शब्दक्रियायाम्' इति मैत्रेयः, सायणमते न दृश्यते ॥ १३. 'न-' इति२॥ १४. 'स्यमु स्वन ('स्तन' इति स्वामिमतेऽधिकः) ध्वन शब्दे' इति क्षीरतरङ्गिण्यादयः ॥ १५. १.४प्रत्योर्नास्ति ॥ १६. 'खनिकष्यज्यसिवसिवनिसनिध्वनिग्रन्थिचलिभ्यश्च' इत्युणादिगणसूत्रम् ॥ १७ '-पचस्वनः' इति२॥ १८. 'नौ गदनदपठस्वनः' इत्यष्टाध्याय्याम् ॥ १९. 'खनि-' इत्युणादिगणे ॥ २०. 'तुष्टौ' इति३, 'घुष्टे' इति४.५॥ २१. '-व्याङ् उ-' इति४.५॥ २२. 'आरवः' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

घञि, तदभावेऽपि **आरवः** इति भवति । चान्द्रे तु बाहुलकाद् घञ्। **२२** क्वण्यते **क्वणनम्** । 'क्वण शब्दोपकरणयोः'[1](भ्वा.प.से.), ल्युट् । **२३** निक्वणनं **निक्वणः**। 'नौ गदनदपचस्वनः'[2]३।३।६४॥ इत्यप् । **२४-२५**। क्वणनं **क्वाणः, निक्वाणः** । उभयत्र भावे घञ् । **२६** क्वणनं **क्वणः** । 'अण रण वण भण मण कण क्वण व्रण भ्रण[3] ध्वन शब्दार्थाः[4]'(भ्वा.प.से.), 'क्वणो वीणायां च'३।३।६५॥, अनुपसृष्टाद् निपूर्वाद् वीणाविषयाच्च क्वणेर्वाऽप्प्रत्ययः । सप्तस्वपि शब्देषु नीरेफो न्युपसर्गः । निग्रहणं न्युपसर्गनियमार्थम् । **२७** [रणनं **रणः** । अप्] । सामान्येन सप्तविंशतिः शब्दस्य ॥१४००॥

**षड्ज[1]-ऋषभ[2]-गान्धारा[3] मध्यमः[4] पञ्चमस्तथा[5] ।**
**धैवतो[6] निषधः[7] सप्त तन्त्रीकण्ठोद्भवाः स्वराः ॥१४०१॥**

**१** षड्भ्यो जायते **षड्जः** । 'जनी प्रादुर्भावे' (दि.आ.से.), 'पञ्चम्यामजातौ'३।२।९८॥ इति डः ।

''कण्ठादुत्तिष्ठते व्यक्तं षड्जः षडभ्यस्तु जायते ।
कण्ठोरस्तालुनासाभ्यो जिह्वाया दशनादपि ॥१॥''[5]इति

व्याडिः। **२** ऋषति गच्छति उच्चैस्त्वम् **ऋषभः** । 'ऋष (ऋषी) गतौ'(तु.प.से.), 'ऋषिवृषिभ्यां कित्'(उणा-४०३) इत्यभच् । गोरुतसंवादित्वाद् ऋषभः । यदुक्तम्-

''वायुः समुद्गतो नाभेः कण्ठशीर्षसमाहतः[6] ।
नदत्यृषभवद् यस्मात् तेनैष ऋषभः स्मृतः ॥२॥''[ ]।

**३** गन्धमियर्ति **गान्धारः** । 'ऋ गतौ'(जु.प.अ.), 'कर्मण्यण्'३।२।१॥, पृषोदरादित्वाद् दीर्घत्वम् । यद्वा गान्धारोऽभिजनोऽस्य । 'सिन्धुतक्षशिलादिभ्योऽण्-'४।३।९३॥ ।

''वायुः समुद्गतो नाभेः कण्ठशीर्षसमाहतः[7] ।
नानागन्धवहः पुण्यो गान्धारस्तेन हेतुना ॥३॥''[ ]इति ।

**४** मध्ये भवो **मध्यमः** । 'मध्यान्मः'४।३।८॥ इति मः ।

''तद्वदेवोत्थितो वायुरुरःकण्ठसमाहतः[8] ।
नाभिप्राप्तो महानादो मध्यमस्तेन कीर्तितः ॥४॥''[ ]इति ।

**५** पञ्चमस्थानभवत्वाद् **पञ्चमः** । 'नान्तादसङ्ख्यादेर्मट्' ५।२।४९॥ ।

''वायुः समुत्थितो नाभेरुरोहृत्कण्ठमूर्धसु ।
विचरन् पञ्चमस्थानप्राप्त्या[9] पञ्चम उच्यते ॥५॥''[ ]इति।

**६** धीमद्भिर्धीयत इति **धैवतः** । पृषोदरादिः । दधाति संधत्ते स्वरानिति वा ।

''अभिसन्धीयते यस्मात् स्वरांस्तेनैष धैवतः ।
स तु भावप्रधानत्वाल्ललाटे व्यवतिष्ठते ॥६॥''[ ] ।

**७** निषीदन्ति स्वरा अत्रेति **निषधः**[10] । निषादोऽपि । 'षद्लृ[11] विशरणादौ'(भ्वा.तु.प.अ.), सदेः 'अकर्तरि च-' ३।३।१९॥ इति घञ्, 'सदेरप्रतेः'८।३।६६॥ इति षत्वम् ।

''निषीदन्ति स्वरा अस्मिन्[12] निषादस्तेन हेतुना ।
अशेषसन्धिविषयं स हि व्याप्यावतिष्ठति(-ते[13])॥७॥''[ ]।

''षड्जं रौति मयूरस्तु[14] गावो नर्दन्ति[15] चर्षभम् ।
अजाविकौ च गान्धारं[16] क्रौञ्चो[17] नदति मध्यमम् ॥८॥[ ]।
पुष्पसाधारणे काले कोकिलो रौति पञ्चमम् ।
अश्वस्तु धैवतं रौति निषादं रौति कुञ्जरः ॥९॥''[18]।

एते च समदाः पञ्चमं गायन्ति । तथा च शाखिनः-

''अश्वस्तु धैवतं सोऽपि मत्तः पञ्चमसंज्ञितम् ।
निषादं तु गजो गर्जत्युन्मदोऽसौ तु पञ्चमम् ॥१०॥''[18]इति ।

कीदृशा एते सप्त[19] स्वराः ? तन्त्रीकण्ठोद्भवाः । ([20]द्विधा हि वीणा शारीरी दारुजा चेति, तत्र दारुजायां वीणायां तन्त्रीतः, शारीर्यां वीणायां कण्ठादिति तन्त्रीकण्ठोद्भवाः) । वंशमुरजायदयस्तु स्वरानुकारमात्रकारित्वात् स्वरहेतुत्वेन नेहोक्ताः । वीणातन्त्रीशरीरकण्ठोत्पन्नसप्तस्वरनामानि ॥१४०१॥

**ते मन्द्र[1]मध्य[2]तारा[3]ः स्युरुरःकण्ठशिरोभवाः ।**

---

१. क्षीरतरङ्गिण्यादौ अणेत्यादिदण्डात्मकोऽयं क्वणधातुः शब्दार्थको दृश्यते ॥ २. 'नौ गदनदपठस्वनः' इत्यष्टाध्याय्याम् ॥ ३. 'भण' इति३.४॥ ४. क्षीरतरङ्गिण्यादौ द्रष्टव्यम्॥ ५. द्र. स्वोपज्ञटीका६।१४०१॥, पृ.३१४॥, टीकासर्वस्वम्, भा-१, १।७।१॥, पृ.१३४॥, पदचन्द्रिका, भा-१, नाट्यवर्गः, श्लो-१७६, पृ.२१५॥ ६. '-हितः' इति१.२.४॥ ७. '-हितः' इति१॥ ८. '-मध्यात्' इति१॥ ९. '-ति' इति५॥ १०. '-षेधः' इति१.२, '-षिधः' इति५॥ ११. 'विस-' इति१॥ १२. 'तस्मिन्' इति१.२.४.५॥ १३. 'समवप्रविभ्यः स्थः'१।३।२२॥ इत्यात्मनेपदम्॥ १४. '-रास्तु' इति१॥ १५. 'नदन्ति' इति३॥ १६. 'गं-' इति३॥ १७. 'क्रों-' इति२.३॥ १८. द्र. टीकासर्वस्वम्, भा-१, १।७।१॥, पृ.१३३॥, पदचन्द्रिका, भा-१, नाट्यवर्गः, श्लो-१७६, पृ.२१४॥ १९. ४.५प्रत्योर्नास्ति ॥ २०. कोष्ठान्तर्गतपाठः ४प्रतौ न दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१-३ ते ऋषभादयः सप्तस्वराः प्रत्येकमुरः-प्रभृतिस्थानभेदेन **मन्द्रतां मध्यतां तारतां** चाऽवलम्बन्ते[2]। यद्दन्तिलः-

''नृणामुरसि मन्द्रस्तु द्वाविंशतिविधो ध्वनिः ।
स एव कण्ठो(कण्ठे) मध्यः स्यात् तारः शिरसि गीयते ॥१॥''
[ [3] ]इति । सप्तस्वराणां भेदत्रयनामानि ॥

## रुदितं[1] क्रन्दितं[2] क्रुष्टम्[3]

१ रोदनं **रुदितम्** । क्तप्रत्ययः । २ क्रन्दनं **क्रन्दितम्** । क्तप्रत्ययः। ३ क्रोशनं **क्रुष्टम्**। 'क्रुश आह्वाने [रोदने च]'(भ्वा.प.से.), क्तः । त्रीणि रुदितस्य ॥

## तदपुष्टं तु गह्वरः[1] ॥१४०२॥

१ तद् रुदितमपुष्टं [4]गद्गदस्वरत्वादजातोच्चपूत्का-रम्, तन्नामैकं **गह्वरः** इति । गाहते हृदयान्तर्वर्तित्वादिति[5] । 'गाहू विलोडने'(भ्वा.आ.से.), 'छित्वर-चत्वर(छत्वर)-'(उणा-२८१)इति साधुः ॥१४०२॥

## शब्दो गुणानुरागोत्थः प्रणादः[1] सीत्कृतं[2] नृणाम् ।

१ प्रणदनं **प्रणादः**, पुंसि । भावे घञ् । २ सीत्करणं **सीत्कृतम्**, क्लीबे[6] दन्त्यादि । नृणां नराणां गुणानुरागोत्थः गुणानुरागाभ्यां [7]यातः शब्दः प्रणाद उच्यत इत्यन्वयः । द्वे सीत्कारस्य ॥

## पर्दनं[1] गुदजे शब्दे

१ [8]पर्द्यते **पर्दनम्** । 'पर्द कुत्सिते शब्दे'(भ्वा.आ.से.), ल्युट्। गुदाज्जातो गुदजः शब्दः, तत्र। एकं पर्दनस्य।

## कर्दनं[1] कुक्षिसम्भवे ॥१४०३॥

१ [9]कर्द्यते **कर्दनम्** । 'कर्द कुत्सिते शब्दे'(भ्वा.प.से.), ल्युट् । कुक्षिसम्भवे उदरसम्भवे । एकं 'गड-गडाट' इति ख्यातस्य ॥१४०३॥

## क्ष्वेडा[1] तु सिंहनादोत्थः[2]

१ क्ष्वेदनं[10] **क्ष्वेडा** । 'ञिक्ष्विदा अव्यक्ते शब्दे'(भ्वा.प.से.), 'कृत्यल्युटो बहुलम्'३।३।११३॥ इति बाहुलकात् स्त्रियां घञ्, टाप्, पृषोदरादित्वाद् [11]दस्य डत्वम् । गजयूथदर्शनात् तद्भङ्गदर्शनाय यथा सिंहस्य नादो गर्जितम्, तथा परबलभङ्गाय स्वोत्साहवृद्धये च यो रावो[12] नादः स सिंहस्येव नादः सिंहनादः, [13](तत उत्तिष्ठति[14] **सिंहनादोत्थः** । द्वे भटानां सिंहनादस्य) ॥

## क्रन्दनं[1] सुभटध्वनिः ।

१ प्रतिसुभटम् 'आगच्छ, मया सह संयुध्यस्व' इत्याक्रोशपूर्वकमाह्वानं **क्रन्दनम्** । 'क्रदि आह्वाने[15]'(भ्वा.प.से.), ल्युट् । सुभटानां ध्वनिराकरणशब्दः सुभटध्वनिः। एकं प्रतिभटाह्वानस्य ॥

## कोलाहलः[1] कलकलः[2][16]

१ 'कुल संस्त्याने[17]'(भ्वा.प.से.), कोलनं कोलः, भावे घञ् । कोल एकीभावः, तमाहलयतीति(आहलतीति) । 'हल विलोठने[18]'(भ्वा.प.से.), अच्, **कोलाहलः** । कोलं वराहमप्याहलयति[14](आहलति) त्रासयति वा, पुंक्लीबलिङ्गः । २ 'कल शब्दसङ्ख्यानयोः'(भ्वा.आ.से.), 'गोचर-'३।३।११९॥ इत्यादिना चकारस्याऽनुक्तसमुच्चयार्थत्वाद् घविषये (घप्रत्यये) 'नित्यवीप्सयोः' ८।१।४॥इति द्वित्वं **कलकलः** । द्वे कोलाहलस्य ॥

## तुमुलो[1] व्याकुलो रवः ॥१४०४॥

१ ताम्यन्ति कातरजना अत्रेति **तुमुलः**, द्विपञ्चमस्वरः । '[19]तमु ग्लानौ[20]'(दि.प.से.), बाहुलकादुलच्, नैरुक्त उकारः । यद्वा ''तुरिति सौत्रो धातुर्गत्यर्थः, ततो घञर्थे कः, आगमानित्यत्वान्न तुक् । मुरति संवेष्टयतीति । इगुपधात् कः । तोर्मुरस्तुमुरः, कपिरि(लि)कादिः''[ ] इत्यन्ये । एकं व्याकुलशब्दस्य ॥१४०४॥

## मर्मरो वस्त्रपत्रादेः

१ मृणाति **मर्मरः** । 'मृश(मृ) हिंसायाम्[21]'(क्र्या.प.से.), 'मृङ् प्राणत्यागे'(तु.आ.अ.) वा, 'हो हृदयश्च

---

१. 'वा-' इति४.५॥ २. '-ते' इति१.२॥ ३. द्र. स्वोपज्ञटीका ६।१४०२॥, पृ.३१४॥ ४. 'गद्गदः' इति३॥ ५. इतोऽग्रे ३प्रतौ 'गह्वरः' इति दृश्यते ॥ ६. '-बं' इति३॥ ७. 'जा-' इति१.२॥ ८. 'पद्य-' इति१.५॥ ९. 'कद्य-' इति३.४.५॥ १०. '-डनं' इति३॥ ११. 'ड-' इति४॥ १२. 'रवः' इति४॥ १३. कोष्ठान्तर्गतपाठः १.२प्रत्योर्नास्ति ॥ १४. '-तीति' इति३॥ १५. 'कदि क्रदि क्लदि आह्वाने रोदने च' इति क्षीरतरङ्गिण्यादयः ॥ १६. तुलनीयोऽमरकोषः १।६।२५॥ १७. 'कुल संस्त्याने ('सन्ताने' इति मैत्रेयः) बन्धुषु च' इति क्षीरतरङ्गिण्यादयः ॥ १८. 'विलेखने' इति क्षीरतरङ्गिण्यादयः ॥ १९. 'तम' इति३॥ २०. 'काङ्क्षायाम्' इति क्षीरतरङ्गिण्यादयः ॥ २१. सायणसम्मतमिदं सूत्रम्॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(कृदरादयश्च)'(उणा-७१९)इत्यरन्मुमागमौ । ''मर्मत्वं राति मर्मरः''[[1]]इति तु कौमुदी। ''भूर्जेषु मर्मरीभूताः कीचकध्वनिहेतवः''[रघुवंशम्, सर्गः-४, श्लो-७३]इति रघुः । वस्त्राणां पत्राणां शब्दनामैकम् ॥

**भूषणानां तु शिञ्जितम् ।**

१ भूषणानां वलयनूपुरादीनां रवः **शिञ्जितम्** । 'शिजि अव्यक्ते शब्दे'(अ.आ.से.), तालव्यादिः, भावे क्तः । 'गुरुश्चो-'३।३।१०३॥ इत्यकारे ''शिञ्जाऽपि''[अम. क्षीर.१।५।२६॥]इति तु स्वामी[2] । एकं भूषणशब्दस्य ॥

**हेषा ह्रेषा तुरङ्गाणाम्**

१ 'रवः' इति सर्वत्राऽनुसम्बध्यते, 'हेषृ[3] अव्यक्ते शब्दे[4]'(भ्वा.आ.से.), 'गुरोश्च-'३।३।१०३॥ इत्यकारः, टाप्, [हेषा]। २ ह्रेषणं **ह्रेषा**। 'ह्रेषृ[5] अव्यक्ते शब्दे[6]'(भ्वा.आ.से.), 'गुरोश्च-'३।३।१०३॥ इत्यकारः । द्वे अश्वशब्दस्य ॥

**गजानां गर्जबृंहिते ॥१४०५॥**

१ गर्जनं **गर्जः** । घञर्थे कः । गर्जाऽपि । २ बृंहणं **बृंहितम्** । 'बृंह शब्दे'(भ्वा.प.से.), क्तः भावे[7]। द्वे हस्तिरवस्य । 'गलगर्ज्ज[8]' इति भाषा ॥१४०५॥

**विस्फारो धनुषाम्**

१ [वि]स्फुरणं[9] **[वि] स्फारः** । विपूर्वः 'स्फुर सञ्चलने[10]' (तु.प.से.), भावे घञ्, 'स्फुरतिस्फुलत्योर्घञि' ६।१।४७॥ इत्यात्वम् । ''स्फुरति स्फुलत्योर्निर्निविभ्यः' ८।३।७६॥ इति विकल्पेन षत्वाद् दन्त्यसवान्''[[11]]इति सुभूत्यादयः । एकं धनुष्टङ्काररवस्य ॥

**हम्भारम्भे गोः**

१ अहमित्यम्भते शब्दायते **हम्भा** । पृषोदरादिः । हम्भेत्यनुकरणं वा । २ रम्भणं **रम्भा** । 'रभि शब्दे[12]' (भ्वा.आ.से.), भिदादित्वादङ् । द्वे गोर्ध्वनेः शब्दस्य ॥

**जलदस्य तु ।**
**स्तनितं गर्जितं गर्जिः स्वनितं रसितादि च**
**॥१४०६॥**

१ स्तन्यते स्म **स्तनितम्** । 'ष्टन स्तन(वन), शब्दे'(भ्वा.प.से.), भावे क्तः । २ गजनं **गर्जितम्** । 'गर्ज शब्दे'(भ्वा.प.से.), भावे क्तः । ३ गर्जनं **गर्जिः**, पुंसि । 'गर्ज शब्दे'(भ्वा.प.से.), 'इन् सर्वधातुभ्यः[13]' (उणा-५५७)इतीन्। ४ स्वननं **स्वनितम्** । 'स्वन शब्दे[14]' (भ्वा.प.से.), भावे क्तः। ५ रसनं **रसितम्** । 'रस शब्दे' (भ्वा.प.से.), भावे क्तः । आदेर्ध्वनितादयः । पञ्च जलदस्य मेघस्य ध्वनेः ॥१४०६॥

**कूजितं स्याद् विहङ्गानाम्**

१ कूजनं **कूजितम्** । 'कूज अव्यक्ते शब्दे' (भ्वा.प.से.), भावे क्तः । विहङ्गानां पक्षिणां शब्दस्यैकम्॥

**तिरश्चां रुतवाशिते[15] ।**

१ तिरश्चां मृगपक्षिणां ध्वनिः रवणं **रुतम्** । 'रु शब्दे'(अ.प.से.), भावे क्तः । २ वाशनं[16] **वाशितम्** । 'वाशृ[17] शब्दे'(भ्वा.आ.से.), तालव्यान्तः, भावे क्तः । ''सहोपशल्याशनवाशिताश्विनैः''[[19]]इति तालव्यमध्येषूष्मविवेकात् । द्वे तिरश्चां ध्वनेः ॥

**वृकस्य रेषणं रेषा**

१-२ रेष्यते **रेषणम्**, रेषणं **रेषा**। 'रेषृङ् अव्यक्ते शब्दे[20]'(भ्वा.आ.से.), एकत्र ल्युट्, अन्यत्र 'गुरुश्चो-'३।३।१०३॥ इत्यकारः । वृकस्य 'नाहर' इति ख्यातस्य ध्वनेर्द्वे[21] ॥

**बुक्कनं[22] भषणं शुनः ॥१४०७॥**

---

१. द्र. पदचन्द्रिका, भा-१, शब्दवर्गः, श्लो-१७३-१७४, पृ.२१२॥ २. तुलनीयोऽमरकोषः१।६।२४॥ ३. 'हेष' इति१.२.३.४॥ ४ स्वामिमतेऽयं पाठः, 'रेषृ हेषृ अव्यक्तशब्दे' इति मैत्रेयसायणौ ॥ ५. '-ष्' इति३॥ ६. 'जेषृ णेसृ एषृ ह्रेषृ गतौ' इति स्वामिमैत्रेयौ ॥ ७ 'भावे क्तः' इति३॥ ८. '-र्ज्ज' इति२.३॥ ९. '-णां' इति३॥ १०. 'स्फर स्फुर स्फल स्फुल चलने' इति स्वामी, 'स्फुर स्फुरणे सञ्चलने दीप्तौ च' इति मैत्रेयः, 'स्फुर स्फुल संचलने' इति सायणः ॥ ११. द्र. पदचन्द्रिका, भा-२, क्षत्रवर्गः, श्लो-५५२, पृ.६४४॥ १२. स्वामिना 'रेभृ शब्दे' इत्यत्र दुर्गमतमुट्टङ्क्य ''अभि रभि शब्दे इति दुर्गः'' इत्युक्तम्, क्षीर पृ.६५॥ १३. 'सर्वधातुभ्य इन्' इत्युणादिगणसूत्रम् ॥ १४. 'स्यमु स्वन ( 'स्तन' इति स्वामिमतेऽधिकः) ध्वन शब्दे' इति क्षीरतरङ्गिण्यादयः ॥ १५. '-सिते' इति१.३.४॥ १६. '-सनं' इति१.४॥ १७. '-सृ' इति३॥ १८. '-न्तात्' इति४.५॥ १९. द्र. पदचन्द्रिका, भा-१, शब्दवर्गः, श्लो-१७६, पृ.२१३॥ २०. 'रेषृ (स्वामिमते न) हेषृ अव्यक्ते शब्दे' इति क्षीरतरङ्गिण्यादयः ॥ २१. '-र्थे' इति४.५॥ २२. '-णं' इति४.५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ बुक्क्यते **बुक्कनं** । 'बुक्क भषणे'(चु.उ.से.), ल्युट् । २ भष्यते **भषणम्** । 'भष भर्त्सने'(भ्वा.प.से.), ल्युट् । द्वे शुनः शब्दस्य ॥१४०७॥

**पीडितानां तु कणितम्[1]**

१ व्याधिप्रहारादिभिः पीडितानां शब्दः कणनं **कणितम्** । 'कण आर्तस्वरे[2]'(भ्वा.प.से.), भावे क्तः ॥

**मणितं[1] रतकूजितम् ।**

१ रते सम्भोगे जम्पतीनां कूजितमव्यक्तशब्दो[3] मणनं **मणितम्** । 'मण शब्दे[2]'(भ्वा.प.से.), भावे क्तः ॥

**प्रक्वाणः[1] प्रक्वणस्तन्त्र्याः[2]**

१ तन्त्री वीणास्नायुः, तस्या रवः, प्रक्वणनं **प्रक्वाणः** । 'क्वण शब्दे'(भ्वा.प.से.), भावे घञ् । २ प्रक्वणनं **प्रक्वणः** । 'क्वणो वीणायां च'३।३।६५॥ इत्यप् । तत्र वीणाग्रहणस्यैतदेव प्रयोजनं वीणादिविषयेऽन्योपसर्गाद् यथा स्यादिति । द्वे तन्त्रीशब्दस्य ॥

**मर्दलस्य तु गुन्दलः[1] ॥१४०८॥**

१ 'गुन्द' इति शब्दं लाति **गुन्दलः**। एकं मर्दलध्वनेः ॥१४०८॥

**क्षीजनं[1] तु कीचकानाम्**

१ क्षीज्यते **क्षीजनम्** । 'क्षीज अव्यक्ते शब्दे'(भ्वा.प.से.), ल्युट् । एकं कीचकानां सच्छिद्रवंशानां ध्वनेः ॥

**भेर्या नादस्तु दर्दुरः[1] ।**

१ दर्दुरिति शब्दं राति[4] **दर्दुरः**, रेफमध्यः । एकं भेरीध्वनेः ॥

**तारो[1]ऽत्युच्चैर्ध्वनिः**

१ तारयति स्वरं स्थानेभ्यः स्थानान्तरं नयति **तारः**। तरतेर्ण्यन्तात् पचाद्यच् । अतिशयेनोच्चैः शब्दस्यैकम् ॥

**मन्द्रो[1] गम्भीरः**

१ मन्द्यते[5] मध्यताराभ्यां **मन्द्रः** । 'मदि स्तुत्यादौ' (भ्वा.आ.से.), 'स्फायि-'(उणा-१७०)इति रक् । मद्रो निरनुस्वारोऽपि । एकं गम्भीरध्वनेः ॥

**मधुरः कलः[1] ॥१४०९॥**

१ कं सुखं लाति **कलः** । कलत इति वा । 'कल शब्दसङ्ख्यानयोः'(भ्वा.आ.से.), अच् । "कलस्तु मधुरोऽव्यक्तः"[हलायुधकोशः १।१४०]इति हलायुधः "अव्यक्ते मधुरे शब्दे"[ ]इति तट्टीका । एकं मधुरध्वनेः ॥१४०९॥

**काकली[1] तु कलः सूक्ष्मः**

१ "कु ईषत् कलोऽस्यां **काकली** । 'ईषदर्थे च'६।३।१०५॥ इति कोः कादेशः, गौरादित्वाद् ङीष्"[[6]] इति स्वामी[7]। कलीवत्, कलिः[8] शब्द ईषदत्रेति काकलिः । 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि काकली । "ओषधिपद्धतिपक्षतिपङ्क्तिर्वर्तनिवासिवितर्दिपुरन्ध्रिः अङ्गुलिकाकलिशाविशरवारिस्तुन्दितुरीयुधिदीधितिवर्तिः[9]"[[10]]इति शबरस्वामी । "साधूदितं काकलिभिः कुलीना"[ ]इत्यभिनन्दः[11] । "तस्मात् काकलीति गौरादिरिति स्वामिकलिङ्गादीनां[12] प्रमादः"[ ]इति तु[13] कौमुदी । तृतीयस्वरान्तोऽपि काकलिर्बुद्धिवत् । यदाह-"निषादः काकलीसंज्ञो द्विःश्रुत्युत्कर्षणाद् भवेत्"[[14]]। "शुष्काङ्गी घनचार्वाङ्ग्याः सुवाचः काकली स्वरा"[ ]इति त्रिविक्रमः । कलो मधुरः सूक्ष्मोऽव्यक्तो यः शब्दः, तस्यैकम् ॥

**एकतालो[1] लयानुगः[2] ।**

१ एकः समस्तालो मानमस्य **एकतालः** । "तालः कालक्रियामानम्"[अमरकोषः१।७।९॥]इत्यमरः । अभिन्नकालमानमित्यर्थः । २ लयोऽन्यूनाधिक्येन श्लिष्टतालयो द्रुतादिर्वाद्यादीनामन्योन्यं सामर्थ्यमिति यावत्, सोऽनुगोऽस्य **लयानुगः**, समन्वितलय इत्यर्थः । "समन्वितलयस्त्वेकतालः"[अमरकोषः१।७।३॥]इत्यमरः। "सम-

---

१. 'भा-' इति३॥ २. अणेत्यादिदण्डात्मकोऽयं धातुः शब्दार्थकः ॥ ३. '-क्ते शब्दे' इति४.५, '-क्तं शब्दं' इति३॥ ४ '-तीति' इति१॥ ५. 'मद्यते' इति३॥ ६. द्र. पदचन्द्रिका, भा-१, नाट्यवर्गः, श्लो-१७७, पृ.२१६॥ ७. स्वामिकृतामरकोशटीकायाम्- "ध्वनावित्येव, मधुरेऽल्पे शब्दे काकली, ईषत्कलोऽस्याम् । कलति कलयतीति वा कलः ।" इत्येव दृश्यते, १।६।२॥, पृ.४८ ॥ ८ 'कलीः' इति३, 'कलिश-' इति४॥ ९. '-ङ्क्तिव-' इति१.३॥ १०. '-स्क-' इति१.३॥ ११. द्र. रामाश्रमी१।७।२॥, पृ.९२॥ १२. 'स्वामी-' इति४.५॥ १३. ५प्रतौ न दृश्यते॥ १४. द्र. स्वोपज्ञटीका६।१४१०॥, पृ.३१६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न्वितोऽनुगतो लयो द्रुतादिर्यत्र, एकः समस्तालो मानमस्यैकतालः, अभिन्नकालमान इत्यर्थः । [एकं तननमस्यैकतानो वा] । 'एकतानमनाकुलः'[ ]इति दुर्गः''[अम. क्षीर.१।६।३॥]इति क्षीरस्वामी। द्वेऽभिन्नकालमानशब्दस्य ॥

**काकुर्ध्वनिविकारः स्यात्**

१ कायत्यर्थान्तरं **काकुः,** अस्त्रीलिङ्गः । 'कै शब्दे'(भ्वा.प.अ.), पृषोदरादिः । यद्वा कानं काः शब्दः। काक्यते (कक्यते) इति कक् । 'कक लौल्योपतापयोः' (भ्वा.आ.से.), बाहुलकात् 'कृवापाजिमि-'(उणा-१)इत्यादिना उण् । हृदयस्थवस्तुप्रतीतेरीषद्भूमिर्वा, काकुर्जिह्वा, तद्व्यापारसम्पाद्यत्वाद् वा । ध्वनेर्विकारोऽन्यथापत्तिर्ध्वनिविकारः । ''भिन्नकण्ठो ध्वनिर्धीरैः काकुरित्यभिधीयते'' [हलायुधकोशः१।१४३॥]इति हलायुधः । ''शोकभीत्यादिभिः शोषितकण्ठो ध्वनिः काकुः''[ ]इति तट्टीका । एकं ध्वनिविकारस्य ॥

**प्रतिश्रुत् तु प्रतिध्वनिः ॥१४१०॥**

१ प्रतिरूपः श्रूयते **प्रतिश्रुत्,** स्त्रीलिङ्गः । 'श्रु श्रवणे'(भ्वा.प.से.), सम्पदादित्वात् क्विप् । २ प्रतिरूपो ध्वनिः **प्रतिध्वनिः,** प्रतिशब्दः । द्वे 'पडिच्छंदा' इति ख्यातस्य ॥१४१०॥

**सङ्घाते प्रकरौ-घ-वार-निकर-व्यूहाः समूहश्चयः,**
**सन्दोहः समुदाय-राशि-विसर-व्राताः कलापो व्रजः ।**
**कूटं मण्डल-चक्रवाल-पटल-स्तोमा गणः पेटकं,**
**वृन्दं चक्र-कदम्बके समुदयः पुञ्जोत्करौ संहतिः ॥१४११॥**
**समवायो निकुरुम्बं जालं निवह-सञ्चयौ ।**
**जातम्**

१ संहन्यते निविडीक्रियतेऽनेनेति **सङ्घातः** । 'हन हिंसागत्योः'(अ.प.से.), करणे घञ्, 'हनस्तोऽचिण्णलोः' ७।३।३२॥ इति नकारस्य तकारः, 'हो हन्तेः-'७।३।५४॥ इति कुत्वम्, 'अचोऽञ्णिति'७।२।११५॥ इति वृद्धिः । आत्रेयस्तु हन्त्यर्थाश्चेति चुरादिपाठाण्णावेवाऽचि सङ्घातशब्दमाह, तत्र । २ प्रकीर्यते **प्रकरः** । 'कॄ विक्षेपे'(तु. प.से.), 'ॠदोरप्'३।३।५७॥ । ३ उह्यत **ओघः** । 'वह प्रापणे'(भ्वा.उ.अ.), घञ्, न्यङ्क्वादित्वात् कुत्वम् । यद्वा 'उच समवाये'(दि.प.से), घञि न्यङ्क्वादित्वात् कुत्वम्। आ ऊह्यत इति घञि न्यङ्क्वादित्वात् कुत्वेन हस्य घत्वे वा। ४ व्रियत आच्छाद्यतेऽनेनेति **वारः** । 'वृञ् आच्छा-दने'(स्वा.उ.से.), करणे घञ् । वारयतीति णिजन्तात् पचाद्यचि वा, पुंक्ली। ५ निकीर्यते **निकरः**। 'कॄ विक्षेपे' (तु.प.से.), 'ॠदोरप्'३।३।५७॥, आकरोऽपि। ६ विशेषेण ऊह्यते **व्यूहः** । विपूर्वः 'ऊह वितर्के'(भ्वा.आ.से.), घञ् । ७ सम्यग् विशेषेण ऊह्यते बहुत्वात् पुञ्जीभूत- त्वेन । 'हलश्च'३।३।१२१॥ इति घञि **समूहः** । ८ चीयते **चयः** । 'चिञ् चयने'(स्वा.उ.अ.), 'एरच्'३।३।५६॥ । ९ सन्दुह्यते प्रपूर्यतेऽनेन **सन्दोहः**। सम्पूर्वः 'दुह प्रपूरणे'(अ.उ.अ.), घञ् । १० समुदयनं **समुदायः** । समुद्पूर्वः 'अय गतौ'(भ्वा.आ.से.), घञ् । ११ राश्यते **राशिः,** पुंसि । 'राशृ दीप्तौ'( ), 'इन् सर्वधातुभ्यः' (उणा-५५७)इतीन् । अश्नुते वा राशिः। 'अशूङ् (अशू) व्याप्तौ'(स्वा.आ.वे.), ['अशिपणा-' (उणा-५७२)इतीण्, रुडागमश्च]। १२ विशेषेण स्रियते गम्यतेऽनेनेति **विसरः** । 'सृ गतौ'(भ्वा.प.अ.), 'ॠदोरप्' ३।३।५७॥ । १३ व्रत्यते नियम्यतेऽनेनेति **व्रातः**। 'व्रत नियमने'( ), करणे घञ् । १४ कल्यते **कलापः** । 'कल सङ्ख्याने'( ), 'कलेरापः'(हैमोणा-३०८)इत्यापः । १५ व्रजन्त्यस्मिन् **व्रजः**। 'व्रज गतौ'(भ्वा.प.से.), 'गोचरसञ्चर-'३।३।११९॥ इति साधुः । १६ कूट्यते **कूटम्,** पुंक्लीबलिङ्गावेतौ । 'कूट अप्रसादने'( ), 'कूट दाहे'( )अस्माद् वा, घञ् । १७ मण्ड्यते **मण्डलम्,** त्रिलिङ्गम् । 'मडि भूषायाम्'(भ्वा.प.से.),

१. 'पुं-' इति३॥ २. १.३प्रत्योर्नास्ति ॥ ३. '-शर-' इति३.४.५॥ ४ '-रम्बं' इति४.५॥ ५. '-कारः' इति५॥ ६. '-च्' इति५॥ ७. 'बा-' इति१॥ ८ 'सर्वधातुभ्य इन्' इत्युणादिगणसूत्रम् ॥ ''अत्राह भट्टोजिदीक्षितः- इह इन् इत्येव सूत्रं सर्वधातुभ्य इति तु प्रक्षिप्तं व्यर्थं च । अत एव दशपाद्यां 'इन्' इत्येव सूत्रं पठितमिति दिक्' इति [प्रौ. मनो. पृ.७९६] । तत्त्वबोधिनीकारोऽपीत्थमेवाह [पृ.५५५]। श्वेतवनवासी त्वाह- धात्वधिकाराद् धातुविशेषानुपादनाद् धातुमात्रपरिग्रहे सिद्धे सर्वग्रहणं विस्पष्टार्थम्' इति [पृ.१७१] व्युत्पत्तिसारनामिकायामुणादिवृत्तौ तु 'धातोरिः' इति सूत्रं दृश्यते ।'' इति दशपाद्युणादिवृत्तिसंग्रहः, भा-१, पृ.१९, टि-२॥ ९. स्वामिमतेऽयम्, 'अशू व्याप्तौ सङ्घाते च' इति मैत्रेयसायणौ ॥ १०. अत्र क्षीरतरङ्गिण्यादिर्द्रष्टव्या॥ ११. १.२.३प्रतिषु नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृषादित्वात्[1] कलच् । मण्डं भूषां लातीति[2] 'आतोऽनुसर्गे कः'३।२।३॥, वा । १८ चक्राकारेण वलनमस्य **चक्रवालः** । यद्वा 'वल संवरणे'(भ्वा.आ.से.), भावे घञि[3] वालः । चक्रस्यैव[4] वालः संवरणमस्येति वा । चक्राकारेण वाडते वा । 'वाडृ आप्लाव्ये[5]'(भ्वा.आ.से.), अच् । कौमुदीकारादयस्तु डान्तमेवाऽमुं पठित्वा-''डलयोरेकत्वस्मरणाल्लान्तमपि''[6][ ]इत्याहुः । १९ पटति **पटलम्,** स्त्रीक्ली. । 'पट गतौ'(भ्वा.प.से.), वृषादित्वात् कलच् । २० स्तूयते **स्तोमः** । 'ष्टुञ् स्तुतौ'(अ.उ.अ.), 'अर्तिस्तु-'(उणा-१३७)इत्यादिना मन्प्रत्ययः । स्तोम्यत इति वा । 'स्तोम सङ्घाते[7]'(भ्वा.उ.से.), भावे घञ् । २१ गण्यते **गणः** । 'गण सङ्ख्याने'(भ्वा.उ.से.), घञर्थे कः । २२ पेटति पेटः । 'पिट सङ्घाते[8]'(भ्वा.प.से.), अच्, ततः स्वार्थे कनि **पेटकम्,** पुंक्लीबलिङ्गः[9] । ''पेटकस्त्रिषु''[ ]इत्यमरटीका । २३ वृणोत्यावृणोति **वृन्दम्** । 'वृञ् वरणे'(स्वा.उ.से.), '[10]अब्दादयश्च'( )इति साधुः । २४ क्रियते **चक्रम्,** पुंक्ली. । घञर्थे कः, 'कृञादीनां के द्वे स्तः' (वा-६।१।१२॥) । २५ कद्यते **कदम्बम्** । कदिः सौत्रः, 'कदेर्णिच्चे[11]'(उणा-५२३)इत्यम्बच्, ततः स्वार्थे कनि **कदम्बकम्** । कुत्सितमम्बते वा । 'अबि गतौ[12]'(भ्वा.आ.से.), ण्वुल् । २६ समुदयनं **समुदयः**[13] । समुद्पूर्वः 'इण् गतौ'(अ.प.अ.), 'एरच्'३।३।५६॥ इत्यच् । २७ [14]पुञ्ज्यते **पुञ्जः** । 'पुजि गतौ'( ), घञ् । २८ उत्कीर्यत **उत्करः** । 'कॄ विक्षेपे'(तु.प.से.), 'ॠदोरप्'३।३।५७॥ इत्यप् । २९ संहननं **संहतिः** । 'हन हिंसागत्योः'(अ.प.अ.), 'स्त्रियां क्तिन्'३।३।९४॥, 'अनुदात्तोपदेश-'६।४।३७॥ इति न्लोपः ॥१४११॥ ३० समवेयते **समवायः** । समवपूर्वः 'इण् गतौ'(अ.प.अ.), भावे घञ् । ३१ निकुरति **निकुरुम्बम्**[15] । 'कुर छेदने'(भ्वा.प.से.), बाहुलकात् 'स्व (स्थः) स्तोऽम्बजबकौ'(उणा-५३६)इत्यम्बच्, अकारस्योत्वं च, द्विपञ्चमस्वरमध्योऽयम् । ३२ जलति **जालम्,** स्त्रीक्लीबलिङ्गः । 'जल अपवारणे'(चु.उ.से.), ज्वलादित्वाण्णः । ३३ निःशेषेणोह्यतेऽनेनेति **निवहः** । 'पुंसि संज्ञायाम्-'३।३।११८॥ इति घः । ३४ सञ्चीयते **सञ्चयः** । 'चिञ् चयने'(स्वा.उ.अ.), 'एरच्'३।३।५६॥ । ३५ जायते स्म **जातम्** । 'जनी प्रादुर्भावे'(दि.आ.से.),'निष्ठा'३।२।१०२॥ इति क्तः, 'जनसन-'६।४।४२॥ इत्यात्वम् । पञ्चत्रिंशत् समूहस्य ॥

## तिरश्चां तद् यूथम्

१ तदिति वृन्दम्, तिरश्चां पशूनां युवन्त्यत्र **यूथम्**[16], पुंक्ली. । 'तिथपृथ(पृष्ठ)गूथयूथप्रोथाः'(उणा-१६९)साधवः । यथा- मृगयूथः । एकं पशुसमूहस्य ॥

## सङ्घसार्थौ तु देहिनाम् ॥१४१२॥

१ संहन्यते परिच्छिद्यतेऽनेनेति **सङ्घः** । 'हन हिंसागत्योः'(अ.प.अ.), 'सङ्घोद्घौ गुणप्रशस्तयोः (गणप्रशंसयोः)'३।३।८६॥ इति, समुद्भ्यां हनोऽपि टिलोपो घत्वं च [17]गणेऽभिधेये प्रशंसायां च गम्यमानायाम् । हनो गत्यर्थत्वाद् 'गत्यर्था बुद्ध्यर्थाः' इति, 'उत्कटं हन्यते [उत्कर्षेण] ज्ञायते' इति व्युत्पत्त्या प्रशंसावगतिः । इह गणशब्देन 'प्राणिनां गणः' प्रोच्यते । सङ्घशब्दस्य तत्रैव प्रसिद्धेः, तेनाऽन्यत्र समूहे 'सङ्घातः' इति भवति । 'ब्राह्मणसङ्घातः' इत्यादौ प्राणिविषयत्वं शब्दान्तरकृतम्, न तु स्वाभाविकमित्यदोषः[18] । यथा- श्रमणादिश्चतुर्विधः सङ्घः । मेघसङ्घादिस्तूपचारात् । २ सरति **सार्थः** । 'सृ गतौ' (भ्वा.प.अ.), 'यूथादयश्च'(चान्द्रोणा-२।५९)इति सर्तेस्थक्, आत्वं रपरत्वं च । 'सर्तेर्णिच्च'(उणा-१६३)इति [19]थन्प्रत्ययो (स्थन्प्रत्ययो) णित्त्वाद् वृद्धिरिति वा । यथा- पान्थसार्थः । [20]सजातीयानां विजातीयानां च जन्तूनां वृन्दे सङ्घसार्थौ स्याताम् । यथा- भिक्षुसङ्घः, वणिक्सार्थः[21] इति । द्वे प्राणिवृन्दस्य ॥१४१२॥

## कुलं तेषां सजातीनाम्

---

१. '-भ्यः' इति३॥ २. 'लाति' इति१॥ ३. '-ञ्' इति१॥ ४. '-स्यैव' इति४.५॥ ५. 'आप्लवे' इति३॥ ६. द्र. पदचन्द्रिका, भा-१, दिग्वर्गः, श्लो-७३, पृ.९९॥ ७. 'स्तोम श्लाघायाम्' इति क्षीरतरङ्गिण्यादयः ॥ ८. 'पिट शब्दसङ्घातयोः' इति क्षीरतरङ्गिण्यादयः ॥ ९. '-ङ्गम्' इति३॥ १०. 'श-' इति४.५॥ ११. '-द्वा' इति३॥ १२. 'कदेर्णित् पक्षिणि' इत्युणादिगणसूत्रम्, पक्षिण्यभिधेयेऽम्बच्, अत्राऽतथात्वाद् बाहुलकादम्बच् ॥ १२. 'रबि लबि अबि शब्दे' इति क्षीरतरङ्गिण्यादयः ॥ १३. '-दायः' इति५॥ १४. 'पुञ्ज-' इति३॥ १५. '-रम्बम्' इति१.३॥ १६. इतोऽग्रे २प्रतौ 'यु मिश्रणे' इति दृश्यते ॥ १७ 'गु-' इति४॥ १८. द्र. मा.धातुवृत्तिः, अदादिः, धातुसं-२, पृ.३१८॥ १९. 'घञ्प्र-' इति३, 'घप्र-' इति५॥ २०. 'सज्जा-' इति५॥ २१. '-कार्थ' इति४.५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ तेषां देहिनां सजातीनां सजातीयानां[1] समूहः **कुलम्** इत्यन्वयः । कोलति कुलम्, 'कुल संस्त्याने' (भ्वा.प.से.), 'इगुपध-'३।१।१३५॥ इति कः । यथा- विप्रकुलम्, मृगकुलम् । "कुलं जनपदे गृहे सजातीयगणे[2]" [विश्वप्रकाशकोशः, लान्तवर्गः, श्लो-१०-११]इति महेश्वरः॥

**निकायस्तु सधर्मणाम् ।**

१ समानो धर्मो येषां ते सधर्माणः । 'धर्मादनिच् केवलात्'५।४।१२४॥ इत्यनिच्, समानस्य सभावः, तेषां सधर्मणां[3] समानशीलवतां वृन्दस्यैकं **निकायः** इति। निचीयते निकायः । निपूर्वः 'चिञ् चयने'(स्वा.उ.अ.), 'सङ्घे चानौत्तराधर्ये'३।३।४२॥ इति घञ्, आदेश्च कः । यथा- वैयाकरणनिकायः[4], चत्वारो देवनिकाया इति च ॥

**वर्गस्तु सदृशाम्**

१ सदृशां सदृशानां[5] सजातीयानां प्राणिनां च वृन्दस्यैकं **वर्गः** इति। वृज्यते पृथक् क्रियते विजातीयेभ्य इति वर्गः । 'वृजी वर्जने'(अ.आ.से.), कर्मणि घञ्[6], कुत्वम् । यथा- ब्राह्मणवर्गः, त्रिवर्ग इति । "जात्या संस्थानादिना वा प्राणिभिरप्राणिभिर्वा समैस्तुल्यैरुपलक्षितं वृन्दं वर्गः"[पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२५६]इति मिश्राः ॥

**स्कन्धो नरकुञ्जरवाजिनाम् ॥१४१३॥**

१ स्कन्द्यते **स्कन्धः**। 'स्कन्दिर् गतिशोषणयोः' (भ्वा.प.अ.) । एकं नरकुञ्जरवाजिवृन्दस्य ॥१४१३॥

**ग्रामो विषयशब्दास्त्रभूतेन्द्रियगुणाद् व्रजे ।**

१ विषयादिभ्यः षड्भ्योऽग्रे ग्रामशब्दः, सामर्थ्याद् विषयवृन्दे वर्तते । यथा- विषयवृन्दनामैकं **विषयग्रामः** । शब्दवृन्दस्यैकं **शब्दग्रामः** । आयुधवृन्दस्यैकम् **अस्त्रग्रामः** । भूतवृन्दस्यैकं **भूतग्रामः** । इन्द्रियवृन्दस्यैकम् **इन्द्रियग्रामः** । गुणवृन्दस्यैकं **गुणग्रामः** । यन्महेश्वरः-"ग्रामः स्वरे संवसथे वृन्दे शब्दादिपूर्वके"[विश्वप्रकाशकोशः, मान्तवर्गः, श्लो-१४]। "ग्रामशब्दो वृन्दे समूहे वर्तते । आदिशब्दाद् विषयास्त्रभूतेन्द्रियगुणादिग्रहः"[ ]इति तट्टीका ॥

**समजस्तु पशूनां स्यात्**

१ संवीयते **समजः** । 'अज गतौ क्षेपणे च' (भ्वा.प.से.), 'समुदोरजः पशुषु'३।३।६९॥ इत्यप्, '-अघञपोः'२।४।५६॥ इत्युक्तेर्वीभावो न । एकं पशुसङ्घातस्य ॥

**समाजस्त्वन्यदेहिनाम् ॥१४१४॥**

१ संवीयते **समाजः** । 'अज गतौ क्षेपणे च' (भ्वा.प.से.), घञ् भावे । यथा- क्षोत्रियसमाजः । अन्यदेहिनां पशुभ्योऽन्येषां प्राणिनां वृन्दस्यैकम् ॥१४१४॥

**शुकादीनां गणे शौकमायूरतैत्तिरादयः ।**

१ शुकादीनां गणे वृन्दे शुकानां समूहः **शौकम्**। 'तस्य समूहः'४।२।३७॥ इत्यण् । १ मयूराणां[8] समूहो **मायूरम्** । १ तित्तिराणां समूहः **तैत्तिरम्** । कपोत-(शुक)मयूरतित्तिरिभ्यः 'अनुदात्तादेरञ्'४।२।४४॥ इत्यञ् । आदेः काकवर्तकोलूककादम्बादिग्रहः । एकैकं शुकमयू[9]रतित्तिरवृन्दस्य पृथक् पृथक्[10] ॥

**भिक्षादेर्भैक्षसाहस्रगार्भिणयौवतादयः ॥१४१५॥**

१ भिक्षाणां समूहो **भैक्षम्** । १ सहस्राणां समूहः **साहस्रम्** । 'भिक्षादिभ्योऽण्'४।२।३८॥ १ गर्भिणीनां समूहो **गार्भिणम्** इति । शालिक्षेत्रपङ्क्तिसमूहस्य नामेदं गर्भिण्या क्षेत्रपङ्क्त्यादिवाचकत्वाद् 'अचित्तहस्ति-'४।२।४७॥ इत्यादिना ठकि प्राप्ते तद्बाधकः 'भिक्षादिभ्योऽण्'४।२।३८॥ इत्यण्, पुंवद्भावे[11] । 'संयोगादिश्च' ६।४।१६६॥ इत्यन्प्रकृत्या गर्भवतीस्त्रीवचनात् तु ठको प्राप्तेरौत्सर्गिक एवाऽण्"[ ]इति न्यासकारः[12] । अतो गर्भवतीनां स्त्रीणां वृन्दस्याऽपि नाम गार्भिणमिति । १

१. इतोऽग्रे १प्रतौ 'च' इति दृश्यते ॥ २. '-ये' इति३॥ ३. '-र्माणां' इति१.३॥ ४. '-याः' इति३॥ ५. '-शीनां' इति३॥ ६. 'अण्' इति१॥ ७. '-हाः' इति३॥ ८. '-रीणां' इति५॥ ९. 'शू-' इति५॥ १०. ४.५प्रत्योर्नास्ति ॥ ११. 'भस्याऽढे तद्धिते'(वा-६।३।३५॥) इत्यनेन ॥ १२. "गर्भिणीनां समूहो 'भस्याऽढे तद्धिते' । 'सिद्धत्वात् प्रत्ययविधौ' इति पुंवद्भावेन स्त्रीप्रत्ययनिवृत्तिः, ततोऽण्, तस्मिन् 'नस्तद्धिते' इति टिलोपः प्राप्तः, 'इनण्यनपत्ये' इति प्रकृतिभावान्न भवति ।" इति न्यासः, भा-३, ४।२।३८॥, पृ.५३४॥

''युवतिशब्दात् 'तस्य समूहः'४।२।३७॥ इत्यणि सिद्धे भिक्षादिषु अञ्बाधनार्थं[1] युवतिशब्दपाठसामर्थ्याद् 'भस्याढे तद्धिते'(वा-६।३।३५॥)इति पुंवद्भावाभावे युवतीनां समूहो **यौवतम्**''[2][ ]इति जयादित्यः[3]। प्रत्ययोत्पत्तेः प्रागेव पुंवद्भावेन तिप्रत्ययनिवृत्तौ नास्त्युदात्तादित्वमित्यञो[4] बाधकस्याभावे 'तस्य समूहः'४।२।३७॥ इत्येव सिद्धोऽणिति नार्थो भिक्षादिषु पाठेन । तदुक्तम्- ''भिक्षादिषु युवतिशब्दपाठोऽनर्थकः, पुंवद्भावस्य सिद्धत्वात्[5]''(वा-४।२।३८॥)। पुंवद्भावश्च (पुंवद्भावस्य च) 'भस्याढे तद्धिते'(वा-६।३।३५॥)इति विषयसप्तमीत्वादिति युवतिशब्दादणि यौवनमिति । अत एव- ''कलाकुशलयौवनम्[6][ ]इति प्रयोगः'' [ ]इति भागवृत्तिः । एवं चैतन्मते भिक्षादिषु पाठो नास्त्येव । कुतः सामर्थ्यात् पुंवद्भावाभावकल्पना, अतः पुंवत्त्वेऽपि यौवनमित्येव, एवं युवितशब्दस्य भिक्षादिषु पाठाङ्गीकारकृतो मतभेदः । अत्राऽऽदिशब्दादन्येऽपि भिक्षादिगणोक्ता[7] ज्ञेयाः ॥१४१५॥

**गोत्रार्थप्रत्यान्तानां स्युरौपगवकादयः[1] ।**

१ अपत्यं पौत्रप्रभृति 'गोत्रम्[8]'(४।२।३९॥)इति सूत्रसंज्ञितं गोत्रम्, तस्मिन्नर्थे विहिता येऽणादयः प्रत्ययास्तेऽन्ते येषां ते गोत्रार्थप्रत्ययान्ताः, तेषाम् । उपगोर्गोत्रापत्यानि औपगवाः, तद्वृन्दनाम एकम् **औपगवकम्** । 'गोत्रोक्षोष्ट्रोरभ्र-'४।२।३९॥ इत्यादिना वुञ्, 'युवोरनाकौ' ७।१।१॥। आदिशब्दाद् गर्गस्य गोत्रापत्यसमूहो गार्गकमित्यादयः ॥

**उक्षादेरौक्षकं[1] मानुष्यकं[1] वार्धकमौष्ट्रकम्[1] ।१४१६।**

**स्याद् राजपुत्रकं[1] राजन्यकं[1] राजकमाजकम्[1] ।**

**वात्सकौरभ्रके[1]**

१ उक्ष्णां समूह **औक्षकम्** । 'गोत्रोक्षोष्ट्र-'४।२।३९॥ इत्यादिना वुञ्, 'युवोरनाकौ'७।१।१॥, 'नस्तद्धिते' ६।४।१४४॥ इति टिलोपः । १ एवं मनुष्याणां समूहो **मानुष्यकम्** । 'गोत्रोक्षोष्ट्र-'४।२।३९॥ इत्यादिना वुञ् । १ वृद्धानां समूहो **वार्धकम्**[10]। 'वृद्धाच्च'(वा-४।२।३९॥)इति वुञ् । १ उष्ट्राणां समूहः **औष्ट्रकम्** ॥१४१६॥ १ राजपुत्राणां समूहो **राजपुत्रकम्** । १ राजन्यानां क्षत्रियाणां समूहो **राजन्यकम्** । सर्वत्र 'गोत्रोक्षोष्ट्र-'४।२।३९॥ इत्यादिना वुञ्, 'अके राजन्यमनुष्ययुवानः प्रकृत्या भवन्तीति वाच्यम्[11]'(वा-४।२।३९॥), तेन न यकारलोपः । १ राज्ञां समूहो **राजकम्** । अजानां समूहो **आजकम्** । १ वत्सानां समूहो **वात्सकम्** । १ उरभ्राणां समूहः **औरभ्रकम्** । सर्वत्र 'गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्समनुष्याजाद्[12] वुञ्'४।२।३९॥ इति वुञ्, 'युवोरनाकौ'७।१।१॥ इत्यकादेशः ॥

**कावचिकं[1] कवचिनामपि ॥१४१७॥**

१ कवचिनां सन्नाहयुक्तानां समूहः **कावचिकम्** । कवचिन्शब्दात् 'ठञ्[13] कवचिनश्च'४।२।४१॥ इति ठञ्[13], 'ठस्येकः'७।३।५०॥, 'नस्तद्धिते'६।४।१४४॥ इति टिलोपः, 'तद्धितेष्वचामादेः'७।२।११७॥ इत्यादिवृद्धिः ॥१४१७॥

**हास्तिकं[1] तु हस्तिनां स्यात्**

१ हस्तिनां समूहः, प्रातिपदिकग्रहणे लिङ्गविशिष्टस्याऽपि ग्रहणाद् हस्तिनीनां समूहो वा **हास्तिकम्** । 'अचित्तहस्तिधेनोष्ठक्'४।२।४७॥ इति ठक्, 'ठस्येकः'७।३।५०॥, 'किति च'७।२।११८॥ इत्यादिवृद्धिः, 'नस्तद्धिते'६।४।१४४॥ इति टिलोपः ॥

**आपूपिकाद्यचेतसाम्[1] ।**

१ अचेतसामचित्तवस्तूनामपूपानां समूह **आपूपिकम्** । 'अचित्तहस्तिधेनोष्ठक्'४।२।४७॥, 'ठस्येकः'७।३।५०॥, 'किति च'७।२।११८॥ इति वृद्धिः । आदिग्रहणात् शाष्कुलिकमित्यादयः । ''आपूपिकं शाष्कुलिकमेवमाद्यमचेतसाम्''[अमरकोषः३।२।४०॥]इत्यमरः ॥

---

१. 'अनुदात्तादेरञ्'४।२।४४॥ इत्यञि प्राप्ते ॥ २. ''युवतिशब्दोऽत्र पठ्यते, तस्य ग्रहणसामर्थ्याद् पुंवद्भवो न भवति- 'भस्याऽढे तद्धिते' इति । युवतीनां समूहो यौवतम् ।'' इति जयादित्यकृतकाशिकावृत्तिः, भा-३, ४।२।३८॥, पृ.५३४॥ ३. द्र. पदचन्द्रिका, भा-२, मनुष्यवर्गः, श्लो-२८०, पृ.३५६॥ ४. 'अनुदात्तादेरञ्'४।२।४४॥ इत्यस्य ॥ ५. ''भिक्षादिषु युवितग्रहणानर्थक्यं पुंवद्भावस्य सिद्धत्वात्'' इति वार्तिकपाठः ॥ ६. '-तम्' इति३॥ ७. 'गणोक्ता' इत्येव१॥ ८. ''अपत्याधिकारादन्यत्र लौकिकमेव गोत्रं गृह्यते, न तु पारिभाषिकं गोत्रमिष्यते'' इति 'स्त्री-पुंसाभ्याम्' इत्यादिसूत्रभाष्ये सिद्धान्तम् ॥ ९. '-न्' इति४॥ १०. '-र्धिकम्' इति५॥ ११. 'प्रकृत्याऽके राजन्यमनुष्ययुवानः' इति वार्तिकस्वरूपं दृश्यते ॥ १२. '-ष्याणां' इति५॥ १३. 'ठन्' इति३.४.५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**धेनूनां धैनुकम्**

१ धेनूनां समूहो **धैनुकम्** । 'अचित्तहस्ति-'४।२।४७॥ इति ठक्, 'इसुसुक्तान्तात् कः'७।३।५१॥ इति ठस्य कः[1], 'किति च'७।२।११८॥ इति वृद्धिः ॥

**धेन्वन्तानां गौधेनुकादयः ॥१४१८॥**

१ धेनुशब्दोऽन्ते येषां ते धेन्वन्ताः, तेषां धेन्वन्तानाम्, गोधेनुवृन्दनामैकं **गौधेनुकम्**। गोशब्दोऽत्र बलीवर्दपर्यायः, अथवा सामान्येन सौरभेयीपर्यायः । धेनुशब्दश्च नवसूतिकायाः गोः पर्यायः, "धेनुस्तु नवसूतिका"[४।१२-६७॥]इति गोविशेषनामत्वात् । गावश्च धेनवश्च गोधेनवः[4], गोधेनूनां समूहो गोधेनुकम् (गौधेनुकम्) । 'अचित्त-' ४।२।४७॥ इत्यादिना ठक्, 'इसुसुक्तान्तात् कः'७।३।५१॥, 'किति च'७।२।११८॥ इत्यादिवृद्धिः ॥१४१८॥

**कैदारकं कैदारिकं कैदार्यमपि तद्गणे ।**

१ केदाराणां समूहः **कैदारकम्** । 'केदाराद् यञ् च'४।२।४०॥ इति सूत्रे चकारग्रहणाद् वुञ्[7] । २ केदाराणां समूहः **कैदारिकम्** । 'ठञ् कवचिनश्च'४।२।४१॥ इति ठञ्[8], 'ठस्येकः'७।३।५०॥ । ३ केदाराणां समूहः **कैदार्यम्** । 'केदाराद् यञ् च'४।२।४०॥ इति यञ् । त्रीणि 'क्यारा' इति ख्यातस्य वृन्दस्य ॥

**ब्राह्मणादेर्ब्राह्मण्यं माणव्यं वाडव्यमित्यपि ॥१४१९॥**

१ ब्राह्मणानां माणवानां वाडवानां समूहः **ब्राह्मण्यम्**। 'ब्राह्मणमाणव-'४।२।४२॥ इत्यादिना यत्[9] । २-३ मनोरपत्यानि मानवाः । मनुष्या अप्यपत्यत्वारोपेण मानवा इत्युच्यन्ते । यदा मानवस्य कुत्सादि विवक्ष्यते तदा-

"अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः स्मृतः ।
नकारः स च मूर्धन्यस्तेन सिद्ध्यति माणवः ॥१॥"

[काशिका४।१।१६१॥]इति नकारस्य णत्वम् । माणवानां समूहः, वाडवानां समूहो **माणव्यम्, वाडव्यम्** । उभयत्र 'ब्राह्मणमाणव-'४।२।४२॥ इति यत् । अमरस्तु माणव्यं पृथगाह ।

"माणवानां तु माणव्यं सहायानां सहायता ।
हल्या हलानां ब्राह्मण्यवाडव्ये तु द्विजन्मनाम् ॥१॥"

[अमरकोषः३।२।४०-४१॥]इति, स्वमते तु सामान्यविशेषयोरभेदोपचारात् त्रयोऽप्येकार्था इति । ब्राह्मणादेरित्यत्राऽऽदिशब्दग्रहणाद् मानववाडवयोरेव ग्रहणम्, नाऽन्येषाम्, 'ब्राह्मणमाणववाडवाद् यद्'४।२।४२॥ इति सूत्रे त्रयाणामेव ग्रहणात् । त्रीणि विप्रसमूहस्य ॥१४१९॥

**गणिकानां तु गाणिक्यम्**

१ गणिकानां समूहो **गाणिक्यम्** । 'गणिकाया यञ् वाच्यः'(वा-४।२।४०॥)इति यञ् । एकं गणिकासमूहस्य ॥

**केशानां कैश्यकैशिके ।**

१ केशानां समूहः **कैश्यम्** । 'केशाश्वाभ्यां यञ्छौ-'४।२।४८॥ इति यञ्[10] । २ पक्षे ठञि (ठकि) **कैशिकम्** । द्वे [11]केशसमूहस्य ॥

**अश्वानामाश्वमश्वीयम्**

१-२ अश्वानां समूह **आश्वम्, अश्वीयं** च । 'केशाश्वाभ्यां छ च(यञ्छौ)-'४।२।४८॥ इति छः, छस्येयादेशः, अन्यतरस्यां ग्रहणादणि आश्वम् । द्वे अश्वसमूहस्य ॥

**पर्शूनां पार्श्वमपि**

१ पर्शूनां समूहः **पार्श्वम्** । 'पर्शोरण्[12]'( )इत्यण्[13] समूहेऽर्थे । "पार्श्व[14] कक्षाधरे चक्रोपाय(चक्रोपान्ते) पर्शुगणेऽपि च"[विश्वप्रकाशकोशः, वान्तवर्गः, श्लो-२०]इति महेश्वरः । एकं पर्शूनां फरसीति ख्यातानां वृन्दस्य ॥

**अथ ॥१४२०॥**

**वातूलवात्ये वातानाम्**

१ वातानां समूहो **वातूलः**, पुंसि । 'वातादूलोऽपि[15]'(वा-५।२।१२२॥)इत्यूलः। २ वातानां समूहो **वात्या** । 'पाशादिभ्यो यः'४।२।४९॥ । द्वे वायुसमूहस्य ॥१४२०॥

---

१. 'ठस्येकः' इति१.२.३॥ २. 'गो-' इति१.२.३.५॥ ३. 'गो-' इति१.३॥ ४ 'धेनवः' इत्येव४.५॥ ५ '-रिकं' इति४.५॥ ६ '-रकं' इति४.५॥ ७ '-न्' इति४.५॥ ८ '-न्' इति१॥ ९ '-ङ्' इति३॥ १०. '-त्' इति२॥ ११. 'केस्य-' इति३॥ १२. 'पर्श्वा णस् वक्तव्यः'(वा-४।२।४३॥)इति वार्तिकं दृश्यते ॥ १३. '-न्' इति५॥ १४ '-र्श्वे' इति५॥ १५. द्र. काशिकावृत्तिः४।२।४२॥, भा-३, पृ.५३७॥, 'वातात् समूहे च'(वा-५।२।१२२)इति वार्तिकस्वरूपं दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**गव्या[1]गोत्रे[2] पुनर्गवाम् ।**

१ गवां समूहो **गव्या** । 'खलगोरथात्'४।२।५०॥ इति यत् । २ गवां समूहो **गोत्रा** । 'इनित्रकट्य[1]चश्च'४।२।५१॥ इति त्रः, अजादित्वाट्टाप् । द्वावपि स्त्रियाम् । द्वे गोवृन्दस्य ॥

**पाश्या[1]खल्या[2]दि पाशादेः**

१ पाशानां समूहः **पाश्या,** स्त्रीलिङ्गः । 'पाशादिभ्यो यः'४।२।४९॥ । एकं पाशसमूहस्य । १ खलानां समूहः **खल्या,** स्त्रीलिङ्गः । 'खलगोरथात्' ४।२।५०॥इति यत् । एकं 'खलानु[2] समूह' इति ख्यातस्य । आदेस्तृण्याधूम्यादयः ॥

**खलादेः खलि[1]नीनिभाः ॥१४२१॥**

१ खलानां समूहः **खलिनी,** स्त्रीलिङ्गः । 'इनित्रकट्य[1]चश्च'४।२।५१॥ इतीनिः[3], 'ऋन्नेभ्यो ङीष्(ङीप्)'४।१।५॥ । निभग्रहणादन्येऽपि कुन्दुमिनी(कुटुम्बिनी)प्रभृतयः ॥१४२१॥

**जनता[1] बन्धुता[2] ग्रामता[3] गजता[4] सहायता[5] । जनादीनाम्**

१ जनानां समूहो **जनता**। १ बन्धूनां समूहो **बन्धुता**। १ ग्रामाणां समूहो **ग्रामता** । १ गजानां समूहो **गजता** । १ सहायानां समूहः **सहायता** । 'ग्रामजनबन्धुसहायेभ्यस्तल्[4]'४।२।४३॥ इति तल्, तलन्तं स्त्रीलिङ्गम् । एते पञ्च गङ्गावत् ॥

**रथानां तु स्याद् रथ्या[1] रथकड्यया[2](-ट्यया) ॥१४२२॥**

१ रथानां समूहो **रथ्या** । 'खलगोरथात्'४।२।५०॥ इति यत्, टाप् । २ रथानां समूहो **रथकड्या (-ट्या),** तृतीयवर्गतृतीया(प्रथमा)न्तस्थाद्यान्तः । 'इनित्रकड्य(-ट्य-)चश्च'४।२।५१॥ इति कड्यच्(कट्यच्) । द्वावपि स्त्रियाम् । द्वे रथसमूहस्य ॥१४२२॥

**राजि[1]र्लेखा[2] तति[3]र्वीथी[4]माला[5]ल्या[6]वलि[7]पङ्क्तयः[8] । धोरणी[9] श्रेणी[10]**

१ राजते **राजिः,** स्त्रीलिङ्गः । 'राजृ दीप्तौ'(भ्वा.उ.से.), 'वसिवपि[5]वदिराजिव्रजिध्वजिसदिहनिकमिकषिवाशिवारिभ्य इन् (इञ्)'(उणा-५६४), स च णित्[6]। राजृधातोः 'इञ(इण)जादिभ्यः'(वा-३।३।१०८॥)इतीञ्[7](-ण्) वा । २ लिख्यतेऽनया **लेखा** । 'लिख अक्षरविन्यासे'(तु.प.से.), भिदादित्वादङ्, बाहुलकाद् गुणः । ३ तन्यतेऽनया **ततिः** । 'तनु विस्तारे'(त.उ.से.), 'स्त्रियां क्तिन्'३।३।९४॥, 'अनुदात्तोपदेश-'६।४।३७॥ इति न्लोपः, 'तितुत्र-'७।२।९॥इतीण्निषेधः। ४ वीयते **वीथिः** । पृषोदरादिः, 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि **वीथी** । ५ मीयते **माला** । मलति (मल्यते) वा। 'मल मल्ल धारणे'(भ्वा.आ.से.), ज्वलादित्वाण्णः, टाप् । ६ आ अलति **आलिः** । 'अलञ् भूषणादौ'(भ्वा.प.से.), आङ्पूर्वः 'आङि इः'( )इति इः । ७ आवलति **आवलिः** । 'वल संवरणे[9]'(भ्वा.आ.से.), 'इन् सर्वधातुभ्यः[10]'(उणा-५५७)इतीन्, स्त्रीलिङ्गौ[11] । ८ पञ्च्यते **पङ्क्तिः** । 'पचि विस्तारे'( ), 'स्त्रियां क्तिन्'३।३।९४॥ । ९ धोरन्त्यस्यां **धोरणी** । 'धोर(धोर्ऋ) गतिचातुर्ये'(भ्वा.प.से.), 'करणाधिकरणयोश्च'३।३।११७॥ इत्यधिकरणे ल्युट्, गौरादिः । १० श्रीयते **श्रेणिः,** पुंस्त्रीलिङ्गः, पुंसि हरिवत्, स्त्रियां बुद्धिवत् । 'श्रिञ् सेवायाम्'(भ्वा.उ.से.), '-श्रियुहात्वरिभ्यो निः[12]'(पञ्चपाद्यु-४९१, **दशपाद्यु**-१।२१॥) इति निः, 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि **श्रेणी** । अत्र सान्तराला पङ्क्तिः, यथा- तरुपङ्क्तिः, सौधपङ्क्तिः, निरन्तराला राजिः, यथा- तृणराजिः, रोमराजिरिति भेदोऽत्र नाऽऽश्रितः । दश पङ्क्तेः ॥

**उभौ[1] तु द्वौ[2]**

१ उ[13]भतः पूरयतो द्वित्वमिति **उभौ, [ द्वौ ]** । 'उभ उम्भ पूरणे'(तु.प.से.), तुदादिपरस्मैपदिनौ, 'इगुपध-'३।१।१३५॥ इति कः, त्रिलिङ्गो द्विवचनान्तश्च ।

---

१. '-ड्य-' इति२.३.४॥ २ '-नउ' इति३॥ ३ '-नि' इति३॥ ४ काशिकावृत्तिसम्मतपाठः, 'गजसहायाभ्यां चेति वक्तव्यम्'(वा-४।२।४३॥)इति वार्तिकस्वरूपम् ॥ ५. '-वदिवपि-' इति३.४.५॥ ६. अनुपयुक्तः प्रतिभाति ॥ ७ '-न्' इति३॥ ८. '-पि' इति३॥ ९. स्वामिमतेऽयं पाठः, 'वल वल्ल संवरणे ('सञ्चरणे च' इत्यधिकः सायणमते)' इति मैत्रेयसायणौ ॥ १०. 'सर्वधातुभ्य इन्' इत्युणादिगणसूत्रम् ॥ ११. '-ङ्गोऽयम्' इति३॥ १२. 'वहिश्रिश्रुयुग्लाहात्वरिभ्यो नित्' इति पञ्चपाद्याम्, 'वहिश्रियुश्रुग्लाहात्वरिभ्यो नित्' इति दशपाद्याम् ॥ १३. 'उम्भ-' इति१.२.४.५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'उभेर्द्वश्च'(दशपाद्युणा-१।६९)इति सूत्रेण उभेरिप्रत्ययः, धातोश्च 'द्व' इत्यादेशः, द्विशब्दो नित्यद्विवचनान्तः, त्रिलिङ्गः । द्विनाम्नी द्वे ॥

**युगलं द्वितयं द्वयम् ॥१४२३॥**

**युगं द्वैतं यमं द्वन्द्वं युग्मं यमलयामले ।**

१ युज्यते **युगलम्** । 'युजिर् योगे'(रु.उ.अ.), वृषादित्वात् कलच्, न्यङ्क्वादित्वात् कुत्वम् । "युगं लाति युगलम्"[ ]इति धर्मवृत्तिः । २-३ द्वौ अवयवावस्य **द्वितयम्** । 'सङ्ख्याया अवयवे तयप्'५।२।४२॥, 'द्वित्रिभ्यां तयस्यायज् वा'५।२।४३॥ इति तयपोऽयजादेशे **द्वयम्** । यत्काशिका- "तयप्ग्रहणं स्थानिनिर्देशार्थम्, अन्यथा प्रत्ययान्तरमप्ययज् विज्ञायेत, तत्र को दोषः, त्रयी गतिरिति तयप्निबन्धन ईकारो न स्यात्"[काशिकावृत्तिः, भा-४, ५।२।४३॥]। एते त्रयः स्त्रीक्लीबलिङ्गाः ॥१४२३॥ ४ युज्यते **युगम्** । 'युजिर् योगे'(रु.उ.अ.), घञर्थे कः, न्यङ्क्वादित्वात् कुत्वम् । ५ द्वयोर्भावो द्विता, द्वितैव **द्वैतम्** । प्रज्ञादित्वादण् । ६ यच्छति **यमम्** । 'यमु नियमने'( ), अच् । ७ वन्द्यते **द्वन्द्वम्** । 'द्वन्द्वं रहस्यमर्यादावचन-'८।१।१५॥ इति साधुः । स्वामी तु- मिथुनद्वन्द्वयोः पर्यायमाह । दन्द्वमित्यपि । यद्गौडः- "युगलद्वन्द्वदन्द्वानि"[ ]इति, "द्वन्द्व दन्द्वम्"[ ]इति शब्दप्रभेदश्च । ८ युज्यते **युग्मम्** । 'युजिर् योगे'(रु.उ.अ.), 'युजिरुचि-'(उणा-१४३)इति मक्, युजेः कुत्वं च । ९ यच्छति **यमलम्** । वृषादित्वात् कलच् । यमं लातीति वा । १० यमलमेव **यामलम्** । प्रज्ञादित्वादण् । जकुटमपि । दश युगलस्य ॥

**पशुभ्यो गोयुगं युग्मे परम्**

१ पशुनामभ्यः परं युग्मे द्वित्वे वाच्ये **गोयुगं** प्रयुज्यते । यथा- गवोर्द्वित्वं गोगोयुगम्, धेन्वोरथवा वृषयोर्द्वित्वमित्यर्थः, एवमश्वयोर्द्वित्वमश्वगोयुगम् । 'द्वित्वे गोयुगच्' (वा-५।२।२९॥)इति गोयुगप्रत्ययः । एवमोष्ट्रगोयुगमित्यादि ॥

**षट्त्वे तु षड्गवम् ॥१४२४॥**

१ पशुनामभ्यः परं षट्त्वे वाच्ये **षड्गवम्** इति प्रयुज्यते । यथा- हस्तिनां षट्त्वं हस्तिषड्गवम् । 'षट्त्वे षड्गवच्'(वा-५।२।२९॥)इति षड्गवच्प्रत्ययः । एवमश्वषड्गवमिति । 'छ हाथी' इति भाषा ॥१४२४॥

**परः शताद्यास्ते येषां परा सङ्ख्या शतादिकात् ।**

१ येषां सङ्ख्येयानां शतादिकात् शतात् सहस्राच्च परा उत्तरा सङ्ख्या ते परःशताः, आद्येन परःसहस्राः (परःसहस्रादयः) । 'पञ्चमी'२।१।३७॥ इति योगविभागात् समासः, राजदन्तादित्वाच्छतसहस्रयोः परनिपातः, पारस्करादित्वात् सुट्, सुटोऽभक्तत्वान्न विसर्जनीयः । "परःसहस्राः शरदस्तपांसि"[उत्तररामचरितम् १।१५॥]इति भवभूतिः । वाच्यलिङ्गश्चायमिति विशेष्यनिघ्ने निबद्धः । सङ्ख्यानमात्रेऽपि परःशतादिशब्दो वर्तत इति परःशतं परःसहस्रं गवामिति भवति ॥

**प्राज्यं प्रभूतं प्रचुरं बहुलं बहु पुष्कलम् ॥१४२५॥**

**भूयिष्ठं पुरुहं भूयो भूर्यदभ्रं पुरु स्फिरम् ।**

१ प्राज्यते प्रकर्षेण काम्यते **प्राज्यम्** । 'अज गतौ क्षेपणे च'(भ्वा.प.से.), प्राङ्पूर्वः, क्यपि साधुः । २ प्रभवति स्म **प्रभूतम्** । ३ प्रकर्षेण चीयते **प्रचुरम्** । पृषोदरादिः । प्रपूर्वाच्चोरयतेरचि वा । प्रगता चुरा अस्माद् वा । ४ 'बृंहतेर्नलोपश्च'(उणा-२६६)इत्युलचि पृथुलवद् **बहुलम्** । बहूनर्थान् लातीति वा । ५ बंहति **बहु** । 'लङ्घिबंह्योर्नलोपश्च'(उणा-२९)इति कुः । ६ पुष्णाति पुष्यति वा **पुष्कलम्** । 'पुष पुष्टौ'(भ्वा.प.से., दि.प.अ., क्र्या.प.से.), 'पुषेः(पुषः) कलन्-'(दशपाद्युणा-८।११८॥), स च कित् ॥१४२५॥ ७ अतिशयेन बहु **भूयिष्ठम्** । बहुशब्दादतिशयेऽर्थे इष्ठन्, 'इष्ठस्य यिट् च'६।४।१५९॥

१. 'उभौ द्वि च' इति१॥ २. 'द्वि' इति३॥ ३. द्र. अम.क्षीर.२।५।३९॥, पृ.१३२॥, स्वोपज्ञटीका६।१४२३॥, पृ.३१८॥ ४ काशिकावृत्तौ 'तयप्' इत्यस्य स्थाने 'तय-' इति दृश्यते ॥ ५. '-यते' इति३॥ ६. द्र. पदचन्द्रिका, भा-२, सिंहादिवर्गः, श्लो-२५३, पृ.३२७॥ ७ 'द्व-' इति४.५॥ ८ तुलनीयोऽमरकोषः३।१।६४॥ ९ '-टि' इति३॥ १०. '-तः' इति३॥ ११. 'क्षेपणे च' इति २.३.४.५प्रतिषु नास्ति ॥, 'अज गतिक्षेपणयोः' इति क्षीरतरङ्गिण्यादयः ॥ १२. '-च्चोरचि' इति५॥ १३. 'बृंहेर्नलोपश्च' इत्युणादिगणसूत्रम् ॥ वस्तुतोऽनेनेसिः, न त्वुलच्, अथ च 'स्थावङ्कि-'(हैमोणा-४८६)इत्युलो नलुक् चेति समाधेयम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति बहोर्भूरादेशः, इष्ठस्याऽऽदेर्लोपः, तस्य यिडागमश्च । ८ पूर्वति (पुरु इति) हूयते **पुरुहम्** । 'ह्वेञ् स्पर्धायां शब्दे च'(भ्वा.उ.अ.), 'क्वचिड्डः'(    )इति डः, पृषोदरादिः । पुरु[1] जिहीते वा । 'ओहाङ् गतौ'(जु.आ.अ.), 'अन्येभ्यो(अन्यत्रा)ऽपि-'(वा-३।२।४८॥)इति डः । ९ अतिशयेन बहु **भूयः**, सकारान्तः। बहुशब्दादीयसुन्प्रत्ययः, 'बहोर्लोपो भू च बहोः'६।४।१५८॥ इति बहोर्भूरादेशः, ईयसुन आदेर्लोपः । १० भवतीति **भूरि** । 'अदिशुभिभूभ्यः क्रिः[2]'(उणा-५०५)इति क्रिः । ११ न दभ्रम् **अदभ्रम्** । १२ पूर्यते **पुरु**[3] । 'पॄ पालनपूरणयोः'(जु.प.से), 'पॄ[4]भिदिव्यधिगृधिधृषिहृषिभ्यः कुः'(दशपाद्युणा-१।१०८॥)इति कुः[5], 'उदोष्ठ्यपूर्वस्य'७।१।१०२॥ इति ॠत उत्वम्[6], 'उरण् रपरः'१।१।५१॥ । 'पूरी आप्यायने'(चु.उ.से), अस्माद्वा, बाहुलकादुण्, ह्रस्वत्वं चेति वा[7] । १३ स्फायते **स्फिरम्** । 'स्फायी वृद्धौ'(भ्वा.आ.से.), 'अजिरशिशिर-'(उणा-५३)इत्यादिना साधुः । ''तरप्तमपौ घः' १।१।२२॥ इत्यत्र स्वार्थे तरबस्तीति सामान्येन ज्ञापकात् स्वार्थेऽपि तरबादयो भवन्ति, तेन बहुतरं भूयः, भूयिष्ठम्, एतेषु तरबादयः स्वार्थ एव, अन्यथाऽतिशायनस्याऽऽधिक्यात् पर्यायता न स्यात्''[पदचन्द्रिका, भा-३, विशेष्यनिघ्नवर्गः), श्लो-६३]इति मिश्राः । त्रयोदश प्रचुरस्य ॥

## स्तोकं क्षुल्लं तुच्छमल्पं दभ्राणुतलिनानि च ॥१४२६॥ तनु क्षुद्रं कृशम्

१ स्तूयते **स्तोकम्**। बाहुलकाद् 'इण्भीकापा-'(उणा-३२३)इति कन् । 'ष्टुच प्रसादे'(भ्वा.आ.से.), घञि, 'चजोः-'७।३।५२॥ इति कुत्वं वा । २ क्षुधं लाति **क्षुल्लम्** । 'आतोऽनुपसर्गे कः'३।२।३॥ । ३ तुदति **तुच्छम्** । बाहुलकात् छः । ४ अल्यते वारयितुं शक्यते **अल्पम्** । 'अलञ् भूषणादौ'(भ्वा.प.से.), 'खष्पशिल्पशल्य(शष्प)-'(उणा-३०८)आदिसूत्रे बाहुलकात् पम्प्रावन्निपातनात् साधुः । ५ दभ्यते **दभ्रम्** । 'दम्भु दम्भने'(स्वा.प.से.), 'स्फायितञ्चि-'(उणा-१७०) इत्यादिना रक् । ६ अणति **अणुः** । अणरणेत्यादयो धातवः शब्दार्थाः (भ्वा.प.से.), 'अणश्च'(उणा-८)इत्युः। ७ तल्यते **तलिनम्** । 'तल प्रतिष्ठायाम्'(चु.उ.से.), बाहुलकात् तुहिनवदिनन् ॥१४२६॥ ८ तन्यते **तनु**[10] । 'तनु विस्तारे'(त.उ.से.), 'भृमृशीतॄ-'(उणा-७)इत्यादिना उप्रत्ययः । ९ क्षुद्यते **क्षुद्रम्** । 'क्षुद सञ्चूर्णने[11]'(    ), '-सम्पेषणे[11]'(रु.उ.अ.) वा, 'स्फायि[12]तञ्चि-'(उणा-१७०) इत्यादिना रक्[13] । १० कृश्यति **कृशम्** । 'कृश तनूकरणे'(दि.प.से.), 'अनुपसर्गात् फुल्लक्षीब-'८।२।५५॥ इति साधुः । सामान्येन दश स्तोकस्य ॥

## सूक्ष्मं पुनः श्लक्ष्णं च पेलवम् ।

१ सूच्यते **सूक्ष्मम्** । 'सूच पैशुन्ये'(चु.प.से.), 'सूचेः स्मन्[14]'(उणा-६१६)इति स्मन् । सुष्ठु उक्ष्यते वा। 'उक्ष सेचने'(भ्वा.प.से.), घञ् । ''सायं सूक्ष्मं[15] मसृणमसकृत्''[[16]]इति दन्त्यादावूष्मविवेकात् । २ श्लिष्यते **श्लक्ष्णम्** । 'श्लिष आलिङ्गने'(दि.प.अ.), 'श्लिषेरच्चोपधायाः'(उणा-२९९)इति क्स्नः, उपधायाश्चाऽऽत्वम् । ३ पेल्यते [17]क्षिप्यते **पेलवम्** । 'पिल प्रेरणे[18]'(    ) । त्रीणि अतिस्तोकस्य[19] ॥

## तुटौ[20] मात्रा लवो लेशः कणः

१ तु[21]ट्यति **तु[21]टिः**, स्त्रियाम् । 'तु[21]ट तोडने[22]'(तु.प.से.), '-इन्'(उणा-५५७)इतीन्, 'इगुपधात् किः'(उणा-५५९)इति कि[23]र्वा, तुर्यवर्गाद्यपञ्चमस्वरादिरयम्, तत्र । 'त्रुटिः'[अम.क्षीर.३।१।६२॥]इति स्वामी । २ मीयतेऽल्पत्वाद् **मात्रा** । 'माङ् माने'(दि.आ.अ.), ष्ट्रन्, स्त्री-

---

१. 'पुरं' इति४.५॥ २. 'अदिशदिभूशुभिभ्यः क्रिन्' इत्युणादिगणसूत्रम् ॥ ३. '-रुः' इति३॥ ४ 'पृ-' इति१.२॥ ५. दशपाद्युणादिगणसूत्रे 'कुः' इति न दृश्यते ॥ ६ 'ऊ-' इति५॥ ७ अनुपयुक्तः प्रतिभाति, 'अस्माद्वा' इत्यत्रोक्तत्वात् ॥ ८ '-शयेनास्या-' इति१॥ ९. बाहुलकत्वादेव ककारस्येत्संज्ञा न॥ १०. '-नुः' इति१.३॥ ११. 'क्षुदिर् सम्पेषणे ('संपेषे' इति स्वामी)' इति क्षीरतरङ्गिण्यादयः ॥ १२. '-यी-' इति१.२.४.५॥ १३. '-च्' इति१॥ १४ 'स्मान्' इति४.५॥ १५. '-क्ष्म' इति४.५॥ १६. द्र. पदचन्द्रिका, भा-३, प्राणिवर्गः, श्लो-६१, पृ.६०॥ १७ 'क्षे-' इति३॥ १८. १.रप्रत्योर्नास्ति, अयं धातुपाठः क्षीरतरङ्गिण्यादौ न दृश्यते ॥ १९. 'अतिसूक्ष्मस्य' इति१॥ २०. 'त्रु-' इति इति१.४॥, 'त्रुटौ' इति मूलं स्वोपज्ञटीका च ॥ २१. 'त्रु-' इति१॥ २२. 'तुट कलहकर्मणि' इति क्षीरतरङ्गिण्यादयः॥ २३. इगुपधादित्यनेनेन्प्रत्ययस्य विधानम्, स च किदिति सम्यक् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लिङ्गः । ३ लूयते **लवः** । 'लूञ् छेदने'(क्र्या.उ.से.), 'ऋदोरप्'३।३।५७॥ इत्यप् । ४ लिश्यते[1] **लेशः** । 'लिश अल्पीभावे'(दि.आ.अ.), तालव्यान्तः, पचाद्यच् । ५ कणति निमीलति **कणः,** पुंस्त्रीलिङ्गः । 'कण निमीलने'(चु.उ.से.), अच् । पञ्च लवस्य । मात्रात्रु[2]टिलव-लेशकणाणव एते षडाविष्टलिङ्गाः, लवादित्रयं धर्ममात्रेऽपि वाच्यलिङ्गं वा (च)। ''छिद्रमात्रेऽप्यरेर्मखम्(र्मुखम्?)'' [[3]]इति दृश्यते, लवादित्रयं विकृष्टे धर्ममात्रेऽपि दृश्यते। कवयस्तेषां त्रिलिङ्गत्वमिच्छन्ति[4] । ''कुशलवमनेन प्राप्य लोकोत्तरत्वम्''[[3]]इति विक्रमार्कप्रयोगः।''[पदचन्द्रिका, भा-३, विशेष्यनिघ्नवर्गः, श्लो-६२]इति मिश्राः ॥

### ह्रस्वं पुनर्लघु[5] ॥१४२७॥

१ ह्रसति हीयते दीर्घापेक्षया **ह्रस्वम्**[6] । 'ह्रस शब्दे'(भ्वा.प.से.), बाहुलकात् 'ह्रस्वं लघु'१।४।१०॥ इति निर्देशाद् वा वप्रत्ययः, 'उल्वादयश्च'(उणा-५३५)इति वा साधुः । २ लङ्घ्यते **लघु** । 'लघि गतौ'(भ्वा.आ.से.), 'लङ्घिबंह्योर्नलोपश्च'(उणा-२९)इति कुः । सामान्येन द्वे लघोः ॥१४२७॥

### अत्यल्पेऽल्पिष्ठमल्पीयः कनीयोऽणीय इत्यपि[7] ।

१ अर्ति[8] अतिशयेनाऽल्पम् **अत्यल्पम्,** तत्र । २-३ अतिशयेनाऽल्पः **अल्पिष्ठः, अल्पीयः** । यथाक्रममतिशयेऽर्थे इष्ठन्नीयसुनौ । ४ अतिशयेनाऽल्पं **कनीयः** । अतिशयेऽर्थे ईयसुनि, 'युवाल्पयोः कनन्यतरस्याम्'५।३।६४॥ इति कनादेशः । कनिष्ठमपि । ५ अतिशयेनाऽणु **अणीयः** । अणशब्दादतिशयेऽर्थे ईयसुनि टिलोपः । एते त्रयोऽपि सकारान्ताः । पञ्चाऽतिलघोः ॥

### दीर्घायते समे

१ दृणाति ह्रस्वभावमिति **दीर्घम्** । 'दॄ विदारणे'(क्र्या.प.से.), 'दृणातेर्घक्'(दशपाद्युणा-३।७१॥)इति घक्, 'ॠत इद्धातोः'७।१।१००॥ इतीकारो[9]ऽन्तादेशः, 'उरण् रपरः'१।१।५१॥, 'र्वोरुपधायाः-'८।२।७६॥ इति दीर्घः। २ आयच्छति स्मेति **आयतम्** । 'यमु नियमने'(भ्वा.प.अ.), 'निष्ठा'३।२।१०२॥ इति क्तः, 'अनुदात्तोपदेश-'६।४।३७॥ इति म्लोपः । द्वे 'लांबा' इति ख्यातस्य ॥

### तुङ्गमुच्चमुन्नतमुद्धुरम्[10] ॥१४२८॥
### प्रांशूच्छ्रितमुदग्रं च

१ तुज्यते (तुञ्ज्यते) हिंस्यते **तुङ्गम्** । 'तुजि हिंसायाम्'(भ्वा.प.से.), 'तुजि पालने'(भ्वा.प.से.), वा, अस्माद् घञि, 'चजोः-'७।३।५२॥ इति कुत्वम्, वार्तिककारमते तु न्यङ्क्वादित्वात् कुत्वम् । २ उच्चिनोति **उच्चम्** । उत्पूर्वात् चिनोतेः 'अन्येभ्योऽपि-'३।२।१०१॥ इति डः । उच्चैस्त्वमत्राऽस्तीति, अर्शआदित्वादचि वा 'अव्ययानां भमात्रे टिलोपः'(वा-७।३।४॥)। ३ ऊर्ध्वं नतं नमनमस्य **उन्नतम्** । ४ उद्गता धूरस्य **उद्धुरम्** । 'ऋक्पूरब्धूः-'५।४।७४॥ इत्यप् ॥१४२८॥ ५ प्रकृष्टा अंशु[11]र्दीप्तिरस्य **प्रांशु** । ६ उदूर्ध्वं श्रितम् **उच्छ्रितम्** । ७ उद्गतमग्रमस्य **उदग्रम्** । सप्त उच्चस्य॥

### न्यग् नीचं ह्रस्वमन्थरे ।
### खर्वं कुब्जं वामनं च

१ न्यञ्चतीति[12] **न्यक्** । 'अञ्चु गतिपूजनयोः'(भ्वा.प.से.), 'ऋत्विग्-'३।२।५९॥ आदिना क्विन्[13], 'क्विन्प्रत्ययस्य कुः'८।२।६२॥। न्यञ्चौ, न्यञ्चः इत्यादि पुंसि, 'अनिदिताम्-'६।४।२४॥ इति न्लोपे, [14]('अचः'६।४।१३८॥ इत्यकारलोपे), 'चौ'७।४।२६॥ इति दीर्घत्वे, नीची, नीच्यौ इत्यादि नदीवत् । न्यक्-न्यग्, नीची, न्यञ्चि इत्यादि क्लीबे । [[15]२ न्यञ्चति न्यग्भवति, निकृष्टं चिनोति वा **नीचम्** । 'अन्येषामपि-'६।३।१३७॥ इति दीर्घः । यद्वा अञ्चेः क्विन्, तत ऊर्णनाभवदच्, 'अचः'६।४।१३८॥ इत्यकारलोपः, 'चौ'७।४।२६॥ इति दीर्घः]। ३ ह्रसति **ह्रस्वम्** । 'ह्रस शब्दे'(भ्वा.प.से.), बाहुलकात्, 'ह्रस्वं लघु'१।४।१०॥ इति निर्देशाद् वा वप्रत्ययः । ४ मथ्नाति **मन्थरम्** । 'मन्थ विलोडने'(क्र्या.प.से.), बाहुलकाद्

---

१. '-ति' इति२.४.५॥ २. '-त्रु-' इति१.३॥ ३. द्र. पदचन्द्रिका, भा-३, प्राणिवर्गः, श्लो-६२, पृ.६१॥, तत्र- ''छिद्रमण्वप्यरेर्मुखम्'' इति दृश्यते ॥ ४ '-न्ति' इति४.५॥ ५. '-घुः' इति३.४॥ ६. '-त्वम्' इति१॥ ७. तुलनीयोऽमरकोषः३।१।६२॥ ८. ३.४.५प्रतिषु नास्ति ॥ ९. '-रा-' इति१॥ १०. '-द्धरम्' इति१.३.४॥ ११. '-शु' इति१.२.४.५॥ १२. 'नियतमञ्चतीति' इति३॥ १३. '-प' इति४.५॥ १४. कोष्ठान्तर्गतपाठः २प्रतौ नास्ति ॥ १५. सर्वादर्शेषु नीचशब्दस्य व्युत्पत्तिर्न दृश्यते, अथ च कोष्ठान्तर्गतपाठोऽस्माभिः स्थापितः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'अर्तिकमिभ्रमि-'(उणा-४१२)इत्यादिनाऽरन् । ५ खर्वति **खर्वम्** । 'खर्व गतौ'(भ्वा.प.से.), अच् । ६ कूयते **कुब्जम्** । पृषोदरादिः । ७ वामं[1] ह्रस्वत्वमस्य **वामनम्**। पामादित्वान्नः । सप्त नीचस्य ॥

**विशालं तु निशङ्कटम् ॥१४२९॥**
**पृथूरु पृथुलं व्यूढं विकटं विपुलं बृहत् ।**
**स्फारं वरिष्ठं विस्तीर्णं ततं बहु महद् गुरु[2] ॥१४३०॥**

१-२ विस्तृतं **विशालम्, विशङ्कटम्** । 'वेः शालच्छङ्कटचौ'५।२।२८॥ इति सूत्रेण साधू[3], द्वे अपि तालव्यशे ॥१४२९॥ ३ प्रथते **पृथु** । 'प्रथ प्रख्याने'(भ्वा.आ.से.), 'प्रथिम्रदिभ्रस्जां सम्प्रसारणं सलोपश्च'(उणा-२८)इति कुः । ४ इयर्ति **उरुः(उरु)**, पञ्चमस्वरादिः । 'ऋ गतौ'(जु.प.अ.), 'अर्ते रुर्वा[4]'( ) इत्युः, उं[5] च धातोरादेशः। ५ पृथुत्वयोगात्[6] **पृथुलम्** । सिध्मादित्वाल्लः(लच्)। ६ विवहति स्मेति **व्यूढम्** । विपूर्वः 'वह प्रापणे'(भ्वा.उ.अ.), 'निष्ठा'३।२।१०२॥ इति क्तः, 'हो ढः'८।२।३१॥, 'झषस्तथोः-'८।२।४०॥ इति धत्वम्, ष्टुत्वम्, 'ढो ढे लोपः'८।३।१३॥, 'ढ्रलोपे पूर्वस्य दीर्घोऽणः'६।३।१११॥, 'इको यणचि'६।१।७७॥ । ७ विस्तृतं **विकटम्** । "'वेः [शालच्छङ्]कटच्' इति [शङ्]कटच्, 'सम्प्रोदश्च-'५।२।२९॥ इति चात् कटच्" [ ]इत्यन्ये । ८ विशेषेण पोलयति[7] **विपुलम्** । 'पुल महत्त्वे'(भ्वा.प.से.), 'इगुपध-'३।१।१३५॥ इति कः । ९ बृंहति **बृहत्**। 'बृहि वृद्धौ[8]'(भ्वा.प.से.), 'वर्तमाने पृषद्बृहन्महत्-'(उणा २४१)इति साधुः, वाच्यलिङ्गत्वात्, बृहन्तौ, बृहन्तः इत्यादि पुंसि, बृहती, बृहत्यौ इत्यादि स्त्रियाम्, बृहत्, बृहती, बृहन्ति इत्यादि क्लीबे । १० स्फायते **स्फारम्** । 'स्फायी वृद्धौ'(भ्वा.आ.से.), '[9]स्फायितञ्चि-'(उणा-१७०)इति रक्, 'लोपो व्योर्वलि' ६।१।६६॥ इति यलोपः । ११ अतिशयेन उरु **वरिष्ठम्** । उरुशब्दादतिशयेऽर्थे इष्ठन्प्रत्ययः, 'प्रियस्थिरस्फिरोरु-'६।४।१५७॥ इत्यादिना उरुशब्दस्य[10] वरादेशः । १२ विस्तृणाति स्म **विस्तीर्णम्** । 'स्तृञ् आच्छादने'(स्वा.उ.अ.), 'निष्ठा'३।२।१०२॥, 'ॠत इद्धातोः'७।१।१००॥, 'उरण् रपरः'१।१।५१॥, 'रदाभ्याम्-'८।२।४२॥ इति नत्वम्, 'र्वोरुपधायाः-'८।२।७६॥ इति दीर्घः । १३ तन्यते **ततम्** । 'तनु विस्तारे'(तु.उ.से.), 'निष्ठा'३।२।१०२॥ इति क्तः, 'अनुदात्तोपदेश-'६।४।३७॥ इत्यनुनासिकलोपः । १४ बंहति **बहु** । 'बृंहि (बहि) वृद्धौ'(भ्वा.प.से.), 'लङ्घिबंह्योर्नलोपश्च'(उणा-२९)इति कुः। १५ महते **महत्**, वाच्यलिङ्गः[11]। 'मह पूजायाम्'(भ्वा.प.से.), 'वर्तमाने पृषद्बृहन्महत्-'(उणा-२४१)इत्यादिना निपातः । १६ गिरति **गुरुः** । 'गॄ निगरणे'(तु.प.से.), 'कृग्रोरुच्च'(उणा-२४)इति कुः, उकारश्चान्तादेशः । षोडश विस्तीर्णस्य ॥१४३०॥

**दैर्घ्यमायाम आनाहः[12]**

१ दीर्घस्य भावो **दैर्घ्यम्** । 'गुणवचन-'५।१।१२४॥ इत्यादिना ष्यञ् । २ आयति **आयामम्(आयामः)**। आङ्पूर्वो 'यमु नियमने'( ), भावे घञ् । ३ आनह्यतेऽनेन **आनाहः** । 'नह(णह) बन्धने'(दि.उ.अ.), करणे घञ् । त्रीणि 'लांबपणउं[13]' इति ख्यातस्य॥

**आरोहस्तु समुच्छ्रयः ।**
**उत्सेध उदयोच्छ्रायौ**

१ आरोहणम् **आरोहः** । आङ्पूर्वः 'रुह प्ररोहे'(भ्वा.प.अ.), भावे घञ् । २ समुच्छ्रयणं **समुच्छ्रयः** । 'श्रिञ् सेवायाम्'(भ्वा.उ.से.), 'एरच्'३।३।५६॥ । ५ 'उदि श्रयतियौतिपूद्रुवः'३।३।४९॥ इति घञि पक्षे **उच्छ्रायः** । समुच्छ्रये[14] इत्यत्र "यद्यपि 'उदि श्रि(श्र)-'३।३।४९॥ इत्यादिना नित्यो घञ्[15] प्राप्तस्तथाऽपि 'विभाषाऽऽङि रुप्लुवोः'३।३।५०॥ इत्यतः सिंहावलोकितन्यायेन विभाषा-

---

१. '-म' इति१.३॥ २. '-रुः' इति१.३.४.५॥ ३. '-धुः' इति१॥ ४ 'महति ह्रस्वश्च'(उणा-३१)इत्युणादिगणसूत्रम्, ऊर्णुञ्धातोर्लक्ष्मीकृत्य कुप्रत्ययविधानं भवति ॥, 'अर्तेरुच्च'(चान्द्र. उ. १।१६)इति चान्द्रोणादिगणे ॥ ५ 'उच्च' इति१.२॥ ६ 'पृथुयो-' इति१॥ ७. 'पोलति' इति५॥ ८ 'दृह दृहि बृह बृहि वृद्धौ' इति स्वामिसायणौ, 'तृह तृहि दृह दृहि वृह वृहि वृद्धौ' इति मैत्रेयः ॥ ९. 'स्फायी-' इति१.२॥ १०. 'उर-' इति५॥ ११. '-ङ्गाः' इति२॥ १२. तुलनीयोऽमरकोषः२।६।११४॥ १३. '-णुं' इति१, '-णौ' इति४, '-उं' इति५॥ १४ '-च्छ्राय' इति४.५॥ १५. '-ञि' इति१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नुवृत्तिः, पक्षेऽच्''[काशिकावृत्तिः३।३।४९॥]इति जयादित्यः[1]। ४ उत्सेधनम् **उत्सेधः,** पुंक्ली. । 'षिधू शास्त्रे माङ्गल्ये च'(भ्वा.प.से.), भावे घञ् । ५ उदयते[2] **उदयः** । उद्पूर्वः 'अय गतौ'(भ्वा.आ.से.), अच् । पञ्च 'उंचपणउं[3]' इति ख्यातस्य ॥

**परिणाहो विशालता[4] ॥१४३१॥**

१ परिनह्यतेऽनेन **परिणाहः**। 'नह(णह) बन्धने' (दि.उ.अ.), परिपूर्वः, करणे घञ् । २ विशालस्य भावो **विशालता** । द्वे परिणाहस्य । 'पहिलपणउं[5]' इति भाषा[6] ॥१४३१॥

**प्रपञ्चाभोगविस्तारव्यासाः**

१ प्रपञ्चनं **प्रपञ्चः** । 'पचि[7] विस्तारे[8]'(चु.उ.से.), भावे घञर्थे कः । २ आभुज्यतेऽनेन **आभोग** । ['भुज पालनाभ्यवहारयोः'(रु.प.अ.)], करणे घञ्, 'चजोः-' ७।३।५२॥ इत्यादिना कुत्वम् । ३ विस्तरणं **विस्तारः** । घञ् 'प्रथने वावशब्दे'३।३।३३॥ इत्यनेन, 'अचोऽञ्णिति' ७।२।११५॥ इति वृद्धिः, 'उरण् रपरः'१।१।५१॥ । ४ व्यस्यते[9] **व्यासः** । व्याङ्पूर्वः, 'असु क्षेपणे'(दि.प.से.), घञ् । चत्वारि विस्तारस्य ॥

**शब्दे स विस्तरः[10] ।**

१ स प्रपञ्चः शब्दे[11] शब्दविषये[12] विस्तीर्यते **विस्तरः** । 'प्रथने वावशब्दे'३।३।३३॥ अत्र सूत्रे 'अवशब्दे (अशब्दे)' इत्युक्त्वाच्छब्दविषये प्रपञ्चे 'ॠदोरप्'३।३।५७॥ इत्यप् । एकं शब्दविस्तरस्य ॥

**समासस्तु समाहारः संक्षेपः सङ्ग्रहोऽपि च ॥१४३२॥**

१ समसनं **समासः** । सम्पूर्वः[13] 'असु क्षेपणे' (दि.प.से.), घञ्। २ समाहरणं **समाहारः** । भावे घञ्। ३ [संक्षेपणं **संक्षेपः** । भावे घञ्]। ४ सङ्ग्रहणं **सङ्ग्रहः** । समो (सम्पूर्वः 'ग्रह उपादाने' (क्र्या.उ.से.) ), 'ग्रहवृदृ-'३।३।५८॥ इत्यादिनाऽप्प्रत्ययः । चत्वारि संक्षेपस्य ॥१४३२॥

**सर्वं समस्तमन्यूनं समग्रं सकलं समम् ।**
**विश्वाशेषाखण्डकृत्स्नन्यक्षाणि निखिलाखिले ॥१४३३॥**

१ सरति **सर्वम्**। 'सृ गतौ'(भ्वा.प.से.), 'सर्तेर्वः' ( )इति वः । यद्वा सर्तेः 'सर्वनिघृष्वरिष्वलिष्व-(लॅष्व[14])शिवपद्वप्रह्वेष्वा अतन्त्रे'(उणा-१५१)इति साधुः । 'अर्व शर्व[15] षर्व[16] हिंसायाम्'(भ्वा.प.से.), पचाद्यचि वा । २ समस्यत एकीक्रियते **समस्तम्** । सम्पूर्वाद् 'असु[17] क्षेपणे' (दि.प.से.), अस्माद् भावे क्तः । ३ नास्ति न्यूनमस्य **अन्यूनम्** । अनूनमपि। 'ऊन परिहाणे'(चु.उ.से.), चुरादिः, ऊनयति[18] ऊनम्, पचाद्यच्, न ऊनमनूनम् । ४ सङ्गतमग्रमस्य **समग्रम्** । समं ग्रसत इति वा । 'अन्येभ्योऽपि-' (वा-३।२।४८॥)इति डः। ५ सह कलाभिर्भागैर्वर्तते **सकलम्**। ६ समति **समम्**। 'षम ष्टम वैक्लव्ये[19]'(भ्वा.प.से.), अच् । अयं सर्वविश्वशब्दवत् सर्वादिः । यथा[20]- ''सूर्यः समेषां समः''[स.कं.१।११२॥]इत्यादिप्रयोगः । ७ विशति **विश्वम्** । 'विश प्रवेशने'(तु.प.अ.), 'अशूप्रुषि-लटिकटिखणिखटिविशिभ्यः क्वन्[21]'(उणा-१४९)। ८ न विद्यते शेषोऽस्य **अशेषम्** । निर्गतं शेषाद् निःशेषमपि । ९ न खण्डम् **अखण्डम्** । १० कीर्त्यते वेष्ट्यतेऽनेन **कृत्स्नम्** । 'कृती वेष्टने'(रु.प.से.), 'कृती छेदने'(तु.प.से.) वा, 'कृत्यशि(शू)भ्यां क्सन्(क्स्नः)'(उणा-२९७)इति क्सन्(क्स्नः), बाहुलकादिडभावश्च । ११ न्यक्ष्णोति व्याप्नोति **न्यक्षम्** । निपूर्वः 'अक्ष (अक्षू) व्याप्तौ सङ्घाते च[22]'(भ्वा.प.से.), पचाद्यच् । १२ खं लाति खिलम् । पृषोदरादित्वादकारस्येकारः । खिलं शून्यम्, निर्वृत्तं[23] खिलमस्माद् **निखिलम्** । १३ अविद्यमानं खिलमत्र **अखिलम्** । त्रयोदश सर्वस्य ॥१४३३॥

---

१. ''कथं 'पतनान्ताः समुच्छ्रयाः'? वक्ष्यमाणं विभाषाग्रहणमिह सिंहावलोकितन्यायेन सम्बध्यते'' इति काशिकावृत्तौ, भा-३. ३।३।४९॥, पृ.४६॥ २. '-ति' इति३॥ ३. '-उं' इति१.२, '-णौ' इति४॥ ४. तुलनीयोऽमरकोषः२।६।११४॥ ५. 'पिहणपणउ' इति३, '-णौ' इति४, '-णुं' इति५॥ ६. 'ख्यातस्य' इति१॥ ७. '-च' इति५॥ ८. 'पचि विस्तारवचने' इति स्वामिसायणौ, 'पचि विस्तारे वचने' इति मैत्रेयः॥ ९. '-सते' इति३॥ १०. '-स्तारः' इति३॥ ११. १.२.४.५प्रतिषु नास्ति ॥ १२. '-यः' इति१॥ १३. 'सम-' इति३॥ १४. कोष्ठान्तर्गतपाठः ३प्रतिस्थः पञ्चपाद्युणादिगणस्थश्च ॥ १५. 'खर्व' इति१, 'सर्व' इति३॥ १६. 'श-' इति१, क्षीरतरङ्गिण्यां न दृश्यते ॥ १७. 'अशु' इति३.४.५॥ १८. '-यन्ति' इति५॥ १९. 'अवैक्लव्ये' इति स्वामी ॥ २०. '-दा' इति२॥ २१. 'अशूप्रुषिलटिकणिखटिविशिभ्यः क्वन्' इति पञ्चपाद्याम्, 'अशूप्रुषिप्लुषिलटिकणिखटिविशिभ्यः क्वन्'(८।१२५॥)इति दशपादाद्याम् ॥ २२. 'अक्षू व्याप्तौ' इत्येव सायणः ॥ २३. 'निर्वृ-' इति१.२.४.५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**खण्डेऽर्धशकले भित्तं नेमशल्कदलानि च ।**

१ खण्ड्यते **खण्डः** । 'खडि भेदने[1]'(चु.प.से.), कर्मणि घञ्, पुंक्ली., तत्र । खण्डलमपि । २ ऋध्नोति समुदायोऽनेनेति[2] **अर्धः** । 'ऋधु वृद्धौ'(स्वा.प.से.), करणे 'हलश्च'३।३।१२१॥ इति घञ्। आविष्टलिङ्गोऽयम् । यथा- ग्रामार्धः, अर्धः पटी, अर्धो नगरम् । ''वाच्यलिङ्गः'' [ ]इत्येके । यट्टीका[3]- ''खण्डमात्रवृत्तितायां त्वभिधेय- लिङ्गः''[4][ ]इति । 'अर्धं नपुंसकम्'२।२।२॥ इति समांश[5]- वाच्यर्धशब्दः क्लीबे, यथा- अर्धं पिप्पल्या अर्धपिप्पली । ३ शक्यते भेत्तुं **शकलम्**, पुंक्ली. । 'शक्लृ शक्तौ'(स्वा. प.अ.), 'शकिशम्योर्नित्'(उणा-१०९)इति कलच् । ४ भिद्यते स्म **भित्तम्** । 'भिदिर् विदारणे'(रु.उ.अ.), 'निष्ठा' ३।२।१०२॥ इति क्तः, 'भित्तं शकलम्'८।२।५९॥ इति निपातनाद् निष्ठानत्वाभावः[6] । ५ नीयते **नेमः** । 'णीञ् प्रापणे' (भ्वा.उ.अ.), 'अर्तिस्तुसुहु[7]सृधृक्षिक्षुभायावापदियक्षिनी[8]भ्यो मन्'((उणा-१३७) । ६ शल्यते भेत्तुं **शल्कम्** । 'इण्भी- कापा-'(उणा-३२३)इत्यादिना कप्रत्ययः[9] । ७ दलति विशीर्यते **दलम्** । 'दल विशरणे[10]'(भ्वा.प.से.), अच् । सप्त खण्डस्य ॥

**अंशो भागश्च वण्टः स्यात्**

१ अंश्यते **अंशः** । भावे घञ् । 'अम गतौ[11]' (भ्वा.प.से.), अतो वा बाहुलकात् शः । २ भज्यते **भागः** । 'भज सेवायाम्'(भ्वा.उ.अ.), कर्मणि घञ् । ३ वण्ट्यते विभज्यते **वण्टः** । 'वटि विभाजने'(चु.उ.से.), घञ् । त्रीणि भागस्य । 'वांटउ' इति भाषा ॥

**पादस्तु स तुरीयकः ॥१४३४॥**

१ पद्यतेऽसौ **पादः** । 'पद गतौ'(दि.आ.अ.), 'पदरुजविश[12]स्पृशो घञ्'३।३।१६॥ । स वण्टस्तुरीय- कश्चतुर्थकः[13] सन् पाद उच्यत इत्यन्वयः । 'चउथौ[14] भाग' इति भाषा ॥१४३४॥

**मलिनं कच्चरं म्लानं कश्मलं मलीमसम् ।**

१. ५. मलोऽस्त्यस्य **मलिनम्, मलीमसं** च । 'ज्योत्स्नातमिस्रा-'५।२।११४॥ इत्यादिना मत्वर्थे[15] ईमसच्[16], इनच्च । २ कुत्सितं चरति **कच्चरम्** । 'चर गतौ'(भ्वा. पा.से.), अच्, 'रथवदयोश्च'६।३।१०२॥ इति चकारात् कोः कदादेशः । ३ म्लायति स्म **म्लानम्** । 'म्लै हर्षक्षये' (भ्वा.प.अ.), 'निष्ठा'३।२।१०२॥ इति क्तः, 'संयोगादेरातो धातोर्यण्वतः'८।२।४३॥ इति निष्ठातस्य[17] नत्वम् । ४ कशति **कश्मलम्** । 'कश हिंसायाम्[18]'( ), 'कुटिकशि-[19]'(उणा- १०६)इति क्मलन् । कल्मषमपि । पञ्च मलिनस्य ॥

**पवित्रं पावनं पूतं पुण्यं मेध्यम्**

१ पवते पुनाति वा[20] **पवित्रम्**, पुंक्ली. । 'पूङ् पवने'(भ्वा.आ.से.), ['पूञ् पवने'(क्र्या.उ.से.) वा], 'कर्तरि च ऋषिदेवनयोः(चर्षिदेवतयोः)'३।२।१८६॥ इती- त्रन्[21] (इतीत्रः) । ''वाच्यलिङ्गोऽयम्''[22][ ]इत्यन्ये । ब्रह्म- वर्गे तु-''पवित्रः प्रयतः पूतः''[अमरकोषः२।७।४५॥] इति प्राणिविषयमात्र इत्युक्तम्, इह त्वप्राणिद्रव्ये''[पद- चन्द्रिका, भा-३, विशेष्यनिघ्नवर्गः, श्लो-५५]इति मिश्राः । २ पावयति **पावनम्** । 'पूङ् पवने'(भ्वा.आ.से.) अतो णिजन्तान्नन्द्यादित्वाल्ल्युः । ३ पूयते स्म **पूतम्** । पूङः क्तः, पूङः क्त्वानिष्ठयोरितीड् विकल्पः[23] । ४ पुनाति **पुण्यम्**[24] । धर्मनामसु व्युत्पादितम् (श्लो-६।१३७९) । ५ मेधनीयं सङ्गतमनार्हं **मेध्यम्** । 'मेधृ सङ्गमे [च]'(भ्वा. उ.से.), 'ऋहलोर्ण्यत्'३।१।१२४॥ । पञ्च पवित्रस्य ॥

**अथोज्ज्वलम् ॥१४३५॥**

**विमलं विशदं वीध्रमवदातमनाविलम् ।**

**विशुद्धं शुचि[25]**

---

१. 'खड खडि भेदे' इति स्वामी, 'खड खडि कडि भेदने' इति मैत्रेयसायणौ ॥ २. 'इति' इति ३प्रतौ नास्ति ॥ ३. '-कायाम्' इति४.५॥ ४ द्र. अम.क्षीर.१।२।१६॥, पृ.२६॥, स्वोपज्ञटीका६।१४३४॥, पृ.३२१॥ ५. 'सा-' इति ३.४.५॥ ६. 'नत्त्वा-' इति५॥ ७. '-ह्-' इति४.५॥ ८ '-नी-' इति ३प्रतौ नास्ति ॥ ९ 'कः प्र-' इति५॥ १०. भ्वादौ मैत्रेयमते 'दल विदारणे' इति॥ ११. 'अम गत्यादिषु' इति क्षीरतरङ्गिण्यादयः ॥ १२. '-विस-' इति४॥ १३. '-र्थः' इति१.२॥ १४. 'चुथुं' इति१, 'चुथु' इति२, 'चौ-' इति४, '-थउ' इति५॥ १५. 'इ-' इति१.३॥, १६. '-सिच्' इति३॥ १७ 'निष्ठान्तस्य' इति४.५॥ १८. द्र. क्षीर., भ्वादिः, धातुसं-४७९, पृ.१०३, मा.धातुवृत्तिः, अदादिः, धातुसं-१७, पृ.३३४॥ १९. 'कुटिकशिकौतिभ्यः प्रत्ययस्य मुट् च' इत्युणादिगणे 'वृषादिभ्यश्चित्'(उणा-१०६)इत्यत्र गणसूत्रम् ॥ २०. ३प्रतौ नास्ति ॥ २१. '-त्वन्' इति५॥ २२. द्र. स्वोपज्ञटीका६।१४३५॥, पृ.३२१॥ २३. 'पूङश्च'७।२।५१॥ इति क्त्वानिष्ठयोर्वेडागमः, 'पूङः क्त्वा च'१।२।२२॥ इति सेटोः क्त्वानिष्ठयोर्नित्यमकित्त्वम् ॥ २४ '-न्यम्' इति१.२.४.५॥ २५. '-चिः' इति५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ उज्ज्वलति **उज्ज्वलम्** । 'ज्वल दीप्तौ' (भ्वा.प.से.), पचाद्यच् ॥१४३५॥ २ विगतो मलोऽस्माद् **विमलम्** । ३ विशीयते **विशदम्** । 'शद्लृ शताने'(भ्वा. तु.अ.से.प.), घञर्थे कः । ४ विशेषेण इन्धे **वीध्रम्** । 'ञिइन्धी दीप्तौ'(रु.आ.से.), 'स्फायितञ्चि-'(उणा-१७०) इति रक्, [यद्वा] '-इन्धेः'(उणा-१८४)इति रक्यनुनासिकलोपः । ५ अवदीयते **अवदातम्** । 'दैप् शोधने' (भ्वा.प.अ.), 'निष्ठा'३।२।१०२॥, आङ्पूर्वः । ६ 'विल संवरणे'(तु.प.से.), 'इगुपध-'३।१।१३५॥ इति कः आविलम्, न आविलम् **अनाविलम्** । ७ विशुद्धयति स्म **विशुद्धम्** । 'शुन्ध[1] शुद्धौ'(भ्वा.प.से.), 'निष्ठा'३।२।१०२॥ इति क्तः । ८ शोचति निर्मलीभवति **शुचि[2]** । शुचिनैर्मल्यार्थोऽत्र । 'इगुपधात् कित्'(उणा-५५९)इतीन् । अष्टौ स्वभावनिर्मलवस्तुनः ॥

## चोक्षं तु निःशोध्यमनवस्करम् ॥१४३६॥

१ चुक्ष्यते **चोक्षम्**। चुक्षधातोर्घञ्। २ निष्क्रान्तं शोध्यं क्षालनीयमस्माद् **निःशोध्यम्** । ३ नास्त्यवस्करो मलमत्रेति **अनवस्करम्**। त्रीणि 'चोखउं[3] वस्तु' इति भाषायां[4] ॥१४३६॥

## निर्णिक्तं शोधितं मृष्टं धौतं क्षालितमित्यपि ।

१ निर्णिज्यते स्म **निर्णिक्तम्**। 'णिजिर् शौचपृथग्भावयोः[5]'(जु.उ.अ.), निर्पूर्वः[6], 'निष्ठा'३।२।१०२॥ इति क्तः, 'उपसर्गात्-'८।४।१४॥ इति णत्वम् । २ शुद्धयते स्म **शोधितम्** । 'शुन्ध[1] शुद्धौ'(भ्वा.प.से.), 'निष्ठा'३।२।१०२॥ इति क्तः । ३ मृज्यते स्म **मृष्टम्**। 'मृजूष् शुद्धौ'(अ.प.से.), 'निष्ठा'३।२।१०२॥, 'व्रश्चभ्रस्ज-'८।२।३६॥ इति षत्वम्। ४ धाव्यते स्म **धौतम्**। 'धावु गतिशुद्धयोः'(भ्वा.उ.से.), 'निष्ठा' ३।२।१०२॥, 'उदितो वा'७।३।५६॥ इतीड्विकल्पितत्वाद् 'यस्य विभाषा'७।२।१५॥ इत्यनिट्त्वम्, 'च्छ्वोः शूट्-' ६।४।१९॥ इत्यूठ्, 'एत्येधत्यूठ्सु'६।१।८९॥ इति वृद्धिः । ५ क्षाल्यते स्म **क्षालितम्**। 'क्षल शौचकर्मणि'(चु.उ.से.), णिजन्तः, 'निष्ठा'३।२।१०२॥ । पञ्च धौतस्य ॥

## सम्मुखीनमभिमुखम्

१ सम्मुखं दृश्यतेऽस्मिन् **सम्मुखीनम्**, आदर्शादिः, अन्यत्र तूपचारात्, यथा- "रुरोध सम्मुखीनो हि जयो रन्ध्रप्रहारिणाम्" [रघुवंशम्, सर्गः-१५, श्लो-१७]इति। २ अभिव्याप्तं मुखेन **अभिमुखम्** । यथा- "व्याघ्रानभीरभिमुखोत्पतितान् गुहाभ्यः" [रघुवंशम्, सर्गः-९, श्लो-६३]इति रघुः । द्वे सम्मुखस्य ॥

## पराचीनं पराङ्मुखम् ॥१४३७॥

१ पराञ्चति पराक्, परागेव **पराचीनम्**। 'विभाषाञ्चेरदिक्स्त्रियाम्'५।४।८॥ इति स्वार्थे खः । २ पराङ्मुखमस्य **पराङ्मुखम्** । "मर्त्येष्वास्थापराङ्मुखः" [रघुवंशम्, सर्गः-१०, श्लो-४३]। द्वे पराङ्मुखस्य । 'ऊंधा'[6] इति भाषा ॥१४३७॥

## मुख्यं प्रकृष्टं प्रमुखं प्रबर्हं
## वर्य्यं वरेण्यं प्रवरं पुरोगम् ।
## अनुत्तरं प्राग्रहरं प्रवेकं
## प्रधानमग्रेसरमुत्तमाग्रे ॥१४३८॥
## ग्रामण्यग्रण्यग्रिमजात्याऽग्र्यानुत्तमान्यनवरार्ध्यवरे ।
## प्रष्ठपरार्ध्यपराणि

१ मुखमिव प्रधानभूतं[9] **मुख्यम्** । शाखादित्वाद् यत् । २ प्रकृष्यते स्म **प्रकृष्टम्** । प्रपूर्वः 'कृष विलेखने' (भ्वा.प.अ., तु.उ.अ.), 'निष्ठा'३।२।१०२॥ इति क्तः । प्रकृष्टं मुखमारम्भोऽस्य **प्रमुखम्** । ४ प्रकृष्टो बर्हः परिच्छदोऽ[10]स्य **प्रबर्हम्**। प्रबर्हत इति वा। 'बर्ह बल्ह प्राधान्ये' (भ्वा.आ.से.), पचाद्यच्[11] । ५ वरणीयं **वर्य्यम्** । 'वर ईप्सायाम्'(चु.उ.से.), चुरादावदन्तः, 'अचो यत्'३।१।९७॥ इति यत् । प्रायेणाऽयमुत्तरपदस्थ एव दृश्यते । ६ व्रियते **वरेण्यम्** । 'वृङ् सम्भक्तौ'(क्र्या.उ.से.), क्र्यादिः, 'वृञे[12]

---

१. 'शुद्ध' इति१, 'शुध्' इति२.३, 'शुध' इति५॥ २. '-चिः' इति१.२.३॥ ३. '-उं' इति१.२.५॥ ४. 'ख्यातस्य' इति१.२, 'भाषा' इति४.५॥ ५. 'णिजिर् ('निजिर्' इति मैत्रेयमते) शौचपोषणयोः' क्षीरतरङ्गिण्यादयः ॥ ६. 'निपू-' इति१.३॥ ७. '-णीम्' इति३॥ ८. 'उंधउ' इति३॥ ९. इतोऽग्रे २प्रतौ 'मुखं' इति दृश्यते ॥ १०. '-न्दो-' इति५॥ ११. १प्रतौ न दृश्यते ॥ १२. '-ङ' इति२.३, '-ङ्' इति५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एण्यः'(उणा-३७८)इत्येण्यः । ७ प्रव्रियते **प्रवरम्** । प्रपूर्वः 'वृञ् वरणे'(स्वा.उ.से.), 'ॠदोरप्'३।३।५७॥ । ८ पुरो गच्छति **पुरोगम्** । 'गम्लृ गतौ'(भ्वा.प.अ.), 'अन्यत्राऽपि दृश्यते'(वा-३।२।४८॥)इति डः । ९ नास्त्युत्तरमस्माद् **अनुत्तरम्** । १० प्रकृष्टमग्रं हरति **प्राग्रहरम्** । पचाद्यच् । ११ प्रकृष्टो वेकः पृथक्त्वमस्य **प्रवेकम्** । १२ प्रकृष्टं धानं[1] धारणस्थानमस्य **प्रधानम्** । आविष्टलिङ्गम्, अजहत्क्लीबलिङ्गमित्यर्थः । यथा- "दूत्याय दैत्यारिपतेः प्रवृत्तौ[2] द्विषां निषेद्धा निषेधप्रधानम्"[नैषधीयचरितम्, सर्गः-६, श्लो-१]इति श्रीहर्षः । १३ अग्रे सरति **अग्रेसरम्**[4] । 'सृ गतौ'(भ्वा.प.अ.), 'पुरोऽग्रतोऽग्रेषु सर्तेः'३।२।१८॥ इति टः । १४ अतिशयेनोत्प्रकाशं ताम्यत्याकाङ्क्षति **उत्तमम्**[5] । उत्पूर्वः 'तमु काङ्क्षायाम्'(दि.प.से.), पचाद्यच् । अतिशयेनोद्गतमिति वा । प्रकृष्टे तमप् । १५ अगति **अग्रम्** । 'अग[6] गतौ[7]'(भ्वा.प.से.), 'ऋज्रेन्द्रा-'(उणा-१८६) इति साधुः ॥१४३८॥ १६ ग्रामं नयति **ग्रामणीः**[8] । 'णीञ् प्रापणे'(भ्वा.उ.अ.), 'सत्सूद्विष-'३।२।६१॥ इत्यादिना क्विप् । १७ एवम् **अग्रणीः** । एतौ सेनानीवत् । १८ अग्रे भवम् **अग्रिमम्** । 'अग्रपश्चादिमन्(-डिमच्[9])'(वा-४।३।२३॥)। १९ जातौ साधु **जात्यम्** । 'तत्र साधुः' ४।४।९८॥ इति यत् । २० अग्रे साधु **अग्र्यम्** । 'तत्र साधु[:]'४।४।९८॥ इति यत् । २१ नाऽस्त्युत्तमः श्रेष्ठोऽस्माद् **अनुत्तमम्** । २२ अनवरार्धे मुख्यभागे भवम् **अनवरार्ध्यम्** । यद्वाऽवरस्मिन्नर्धे भागे भवोऽवरार्ध्यो जघन्यः, ततो नञ्समासेऽनवरार्ध्यम् । 'परावर-'४।३।५॥ इति यत् । २३ व्रियते **वरम्**, पुंक्ली. । अन्ये तु वरं वाच्यलिङ्गमाहुः । 'वृञ् वरणे'(स्वा.उ.से.), 'ॠदोरप्' ३।३।५७॥ । २४ प्रतिष्ठते **प्रष्ठम्** । 'ष्ठा गतिनिवृत्तौ' (भ्वा.प.अ.), 'प्रष्ठोऽग्रगामिनि'८।३।९२॥ इति षः । २५ परार्धे भवं **परार्ध्यम्** । 'परावर-'४।३।५॥ इति यत् । २६ पिपर्ति **परम्** । 'पृ पालनपूरणयोः'(जु.प.से.), पचाद्यच् । एते वाच्यलिङ्गाः । षड्विंशतिर्मुख्यस्य[10] ॥

**श्रेयसि तु श्रेष्ठसत्तमे पुष्कलवत् ॥१४३९॥**

१ अतिशयेन प्रशस्यं **श्रेयः** । अतिशायने[11] ईयसुन्, 'प्रशस्यस्य श्रः'५।३।६०॥ इति श्रादेशः, तत्र । २ अतिशयेन प्रशस्यं **श्रेष्ठम्** । इष्ठनि, प्रशस्यस्य श्रः । ३ अतिशयेन सत् **सत्तमम्** । अतिशायिने(-यने) तमप् । ४ पुष्णाति **पुष्कलम्** । 'पुषः[12] कलन्-'(दशपाद्युणा-८।११८॥)इति कलन् । एते चत्वारोऽपि वाच्यलिङ्गाः । चत्वारि अतिश्रेष्ठस्य ॥१४३९॥

**स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः ।**
**सिंहशार्दूलनागाद्यास्तल्लजश्च मतल्लिका ॥१४४०॥**
**मचर्चिका प्रकाण्डोद्घौ प्रशस्यार्थप्रकाशकाः ।**

१-१२ व्याघ्रादयः शब्दा उत्तरपदे प्रयुज्यमानाः प्रशस्यस्याऽर्थस्य प्रकाशकाः प्रशंसाद्योतकाः स्युरित्यर्थः । यथा- पुरुषो व्याघ्र इव पुरुषव्याघ्रः । 'उपमितं व्याघ्रादिभिः-'२।१।५६॥ इति समासः । एवं पुरुषपुङ्गवः । "गौर्वृषः, पुमांश्चासौ गौश्चेति । 'गोरतद्धितलुकि'५।४।९२॥ इति टच्, पुङ्गवः, पुरुषवृषभ इत्यर्थः"[पदचन्द्रिका, भा-३, विशेष्यनिघ्नवर्गः, श्लो-५९]इति मिश्राः । पुरुषर्षभः, पुरुषसिंहः, पुरुषशार्दूलः । सर्वत्र 'उपमितं व्याघ्रादिभिः-'२।१।५६॥ इति समासः । अश्वश्चासौ कुञ्जरश्च अश्वकुञ्जरः, गौश्चासौ[13] नागश्च गोनागः, आदेर्गोवृन्दारकः । एषु 'वृन्दारकनागकुञ्जरैः'२।१।६२॥ इति समासः । गौश्चासौ तल्लजश्च गोतल्लजः, गोमतल्लिकेत्यादि । एषु 'पोटायुवति-' २।१।६५॥ इत्यादिना प्रशंसारूढत्वात् समासः । तल्ले अखात[14]सरसि जातस्तल्लजः । 'सप्तम्यां जनेर्डः'३।२।९७॥ इति डः । 'इवे प्रतिकृतौ'५।३।९६॥ इति कनि तल्लजकोऽपि । तल्लज्ज इति द्विजकार[15]वानपि, तदा लज्जते[16] इति लज्जः । 'ओलस्जी व्रीडने'(तु.आ.से.), अच् । ण्वुलि लज्जकोऽपि । मया लक्ष्म्या तल्लातीति मतल्लिका । 'कुशिक-'( )इतीके निपात्यते ॥१४४०॥

१. 'धान्यं' इति४.५॥ २. '-त्तौ' इति३.५॥ ३. '-धः' इति३.५॥ ४. '-रः' इति३॥ ५. '-मः' इति३॥ ६. 'अगि' इति३॥ ७. 'अक अग कुटिलायां गतौ' इति क्षीरतरङ्गिण्यादयः ॥ ८. '-णिः' इति५॥ ९. 'अग्रपश्चाड्डिमच्' इति काशिकास्थपाठः, 'अग्रादिपश्चाड्डिमच्' इति सि.कौमुदीस्थः ॥ १०. '-तिमु-' इति३.४.५॥ ११. '-यिने' इति२.३.४.५॥ १२. '-षेः' इति३॥ १३. 'गो-' इति३.४॥ १४. 'आ-' इति४॥ १५. 'द्वित' इति३॥ १६. '-ज्जित' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मां लक्ष्मीं चर्चयति **मचर्चिका**[1] । 'चर्च अध्ययने'(चु. उ.से.), चुरादिः, ण्वुल् । एतौ स्त्रीलिङ्गौ । **प्रकाण्डं** पुंक्लीबलिङ्गम्[2] । ''अस्त्री प्रकाण्डो विटपे तरुस्कन्ध-प्रशस्तयोः''[ ]इति मेदिनिः । तल्लज्जादय आविष्ट-लिङ्गकाः, आविष्टमगृहीतमपरित्यक्तं स्वलिङ्गं यैस्ते आविष्टलिङ्गकाः, लिङ्गान्तरसम्बन्धेऽपि न विशेष्यलिङ्गका इति भावः । यथा- कुमारीतल्लजः, अश्वमतल्लिका । ''अरिर्मधौ[3]रैक्षत गोमतल्लिकाम्''[शिशुपालवधम्, सर्गः-१२, श्लो-४१]इति माघः । गोप्रकाण्डमिति, ''दण्डकान-ध्यवात्तां यौ वीर! रक्षःप्रकाण्डकौ''[भट्टिकाव्यम्, सर्गः-५, श्लो-६]इति भट्टिः[4] । ''अत एव मतल्लिकादीनां रूढि-शब्दत्वात् 'प्रशंसावचनैश्च'२।१।६६॥इति समासः।'' [पद-चन्द्रिका, भा-१, कालवर्गः, श्लो-१२९]इति मिश्राः । उपलक्षणत्वादाविष्टवचनाश्च[5], यथा- तातश्च ते पादाश्च तातपादा इत्याद्यपि सिद्धं ज्ञेयम् ॥

**गुणोपसर्जनोपाग्राण्यप्रधाने**

१ गुण्यते **गुणः** । 'गुण अभ्यासे[6]'(चु.उ.से.), घञर्थे कः । २ उपसृज्यते नियुज्यते **उपसर्जनम्** । 'सृज विसर्गे'(दि.आ.अ., तु.प.अ.), ल्युट् । आविष्टलिङ्गं[7] नपुंस-कम्[8], यथा- उपसर्जनं भार्या। ३ उपरुद्धमग्रमस्य **उपाग्रम्**। ४ न प्रधानम् **अप्रधानम्**, तत्र । चत्वारि अमुख्यस्य ॥

**अधमं पुनः ॥१४४१॥**

**निकृष्टमणकं गर्ह्यमवद्यं काण्डकुत्सिते ।**
**अपकृष्टं प्रतिकृष्टं याप्यं रेफोऽवमं ब्रुवम्**
**॥१४४२॥**
**खेटं पापमपशदं कुपूयं चेलमर्वं च ।**

१ न दधाति न पोषयति **अधमम्** । 'डुधाञ् धारणादौ'(जु.उ.अ.), नञ्पूर्वः, 'धर्म(घर्म)ग्रीष्मावमाधमाः' ( )इति निपातनात् साधुः ॥१४४१॥ २ निकृष्यते निन्द्यते स्म **निकृष्टम्** । 'कृष विलेखने'(भ्वा.प.अ., तु. उ.अ.), क्तः । ३ अणति रटति अणम् । 'अण कुत्सिते शब्दे[10]'(भ्वा.प.से.), अच् । कुत्सितमणम् **अणकम्** । कुत्सितेऽर्थे कन् । ४ गर्हणार्हं **गर्ह्यम्** । 'गर्ह कुत्सायाम्' (भ्वा.आ.से.), 'ऋहलोर्ण्यत्'३।१।१२४॥ । ५ अवद-नीयमकीर्तनार्हम् **अवद्यम्** । 'वद व्यक्तायां वाचि'(भ्वा. प.से.), 'अवद्यपण्यवर्ह्या(वर्या) गर्ह्यपणितव्यानिरोधेषु'३।१। १०१॥ इति साधुः। ६ कणति **काण्डम्**, पुंक्ली. । 'कण शब्दे'(भ्वा.प.से.), डप्रत्ययः । ७ कुत्सा सञ्जाताऽस्य **कुत्सितम्** । तारकादित्वादितच् । ८-९ अपकृष्यते **अप-कृष्टम्**, प्रतिकृष्यते **प्रतिकृष्टम्** । 'कृष विलेखने'(भ्वा. प.अ., तु.उ.अ.), 'निष्ठा'३।२।१०२॥ इति क्तः । १० यापनीयं निरसनीयं **याप्यम्** । 'या प्रापणे'(अ.प.अ.), अस्माण्णिजन्ताद् 'अचो यत्'३।१।९७॥ । जपादित्वाद् वत्वे याव्यमपि । ११ रिफति[11] **रेफः** । 'रिफ कत्थन-युद्धहिंसादानेषु[12]'(तु.प.से.), 'अकर्तरि च-'३।३।१९॥ इति घञ् । रेफौ, रेफाः इत्यादि रामवत् । ''रेफो रवेन(रवर्णे) पुंसि स्यात् कुत्सिते वाच्यवत् पुनः[13]''[विश्वप्रकाशकोशः, फान्तवर्गः, श्लो-१]इति विश्वः । रीणातीति, 'री गति-हिंसनयोः[14]'(क्र्या.प.अ.), ''रेः रयणं (रेषणं?) हिंसा, पप्रत्यये रेपः''[[15]]इति गोवर्धनः। ''रेपः[16] स्यान्निन्दिते क्रूरे'' [विश्वप्रकाशकोशः, पान्तवर्गः, श्लो-२]इति विश्वः । (रेपः सकारान्तेऽपि[17] क्लीबे । 'वृङ्शी[18][ङ्]भ्यां [रूपस्वाङ्गयोः] पुट् च'(पञ्चपाद्युणा-६४०, दशपाद्युणा-९।६१॥)इति रूपस्वाङ्गयोर्बाहुलकाद् रा(री)धातोरपि [असुन्] पुट् [च] । ''प्राप्तरूपी पुराऽरेपाः[19]''[शिशुपालवधम्, सर्गः-१९, श्लो-९४]इति माघस्य द्व्यक्षरयमकम्[20]) । १२ अवत्य-स्मागात्मानमिति **अवमम्** । 'अव रक्षणादौ'(भ्वा.प.से.), 'धर्मग्रीष्माऽवमाधमाः'( )इति निपातः । अवशब्दाद्

१. '-काः' इति३॥ २. '-ङ्गः' इति४.५॥ ३. '-धौ-' इति१॥ ४. '-ट्टीः' इति५॥ ५. '-नश्च' इति४॥ ६. 'कुण गुण चामन्त्रणे' इति स्वामी, 'केत ग्राम कुण गुण चामन्त्रणे' इति मैत्रेयः, 'सङ्केत ग्राम कुण गुण चामन्त्रणे' इति सायणः । ७. '-ङ्ग-' इति१, 'ङ्गो' इति३॥ ८. '-कः' इति३॥ ९. 'अवद्याऽवमाऽधमार्व रेफाः कुत्सिते'(उणा-७३२)इत्युणादिगणे ॥ १०. अणेत्यादिदण्डात्मकोऽयं शब्दार्थकः ॥ ११. '-ते' इति१॥ १२. मैत्रेयमतेऽयं पाठः, 'रिफ कत्थनयुद्धनिन्दाहिंसादानेषु' इति सायणः, स्वामिमते न ॥ १३. 'वाच्यवस्तुनि:' इति१॥ १४. '-हिंसादानयोः' इति५, 'री गतिरेषणयोः' इति क्षीरतरङ्गिण्यादयः ॥ १५. द्र. पदचन्द्रिका, भा-२, प्राणिवर्गः, श्लो-५४, पृ.५१॥ १६. '-फः' इति१.३, '-पाः' इति३॥ १७. '-न्तः' इति३.४.५॥ १८. 'वृञ्-' इति३.४.५॥ १९. '-फाः' इति१.३, '-पः' इति५॥, 'प्राये रूपी पराऽरेपाः' इति शिशुपालवधे, पृ.४९०॥ २०. कोष्ठान्तर्गतपाठस्थाने शुद्धोऽचलः पाठो मृग्यः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अध:शब्दाच्च 'अवाधसोर्लोपश्च'[१] इति मक्, सलोपश्च । ''अवमाधमौ''[टीकासर्वस्वम्, १।१।५२॥]इति सर्वस्वम् । अवे भवमवममिति वा । 'अवाच्च'( )इति मप्रत्ययः। १३ ब्रूते[२] ब्रुवम् । 'ब्रूञ् व्यक्तायां वाचि'(अ.उ.अ.), ॥१४४२॥ १४ खेटयति त्रस्यति खेटम् । 'खिट उत्त्रासे'[३] (भ्वा.प.से.), 'हलश्च'३।३।१२१॥ इति संज्ञायां घञ्। १५ पायते पापम्, पापनामसु (श्लो-६।१३८०॥) । १६ अपशीयते अपशदम् । 'शद्लृ शातने'(भ्वा.प.अ.), घजर्थे कः। १७ कुत्सितं पूयते[५] कूपूयम्। 'पूयी विशरणे दुर्गन्धे च'(भ्वा.आ.से.), अच् । १८ चेलति चेलम्[६] । 'चिल वसने'[७](भ्वा.प.से.), अच्। १९ अर्वति अर्वा, नकारान्तः, अश्वनामसु (श्लो-४।१२३२॥) साधितः। ''अर्वा तुरङ्गमे पुंसि कुत्सिते वाच्यलिङ्गवत्''[८][मेदिनीकोशः, नान्तवर्गः, श्लो-३६]इति मेदिनिः। एते सर्वेऽप्यधमादयो वाच्यलिङ्गाः रेफवर्जमिति । एकोनविंशतिरधमस्य ॥

## तदासेचनकं यस्य दर्शनाद् दृग् न तृप्यति ॥१४४३॥

१ यस्य दर्शनाद् दृग् दृष्टिर्न तृप्यति न तृप्तिं गच्छति, तद् आसेचनकम् उच्यत इत्यन्वयः । आसिच्येते[९] आप्यायेते[१०] दृक्चित्तेऽनेन[११] आसेचनम् । 'षिचिर् क्षरणे' (तु.उ.अ.), ल्युट्, ततः स्वार्थे कन् आसेचनकम् । ह्रस्वादिपाठोऽपि तत्र, एवं न सिच्येते[१२] न क्षर्येते दृग्मनसी अत्रेति ल्युटि असेचनम्, ततः कनि असेचनकम्। यद्बहुशो दृष्टमप्यधिकां[१३] प्रीतिं जनयति, तन्नामैकम् ॥१४४३॥

## चारु हारि रुचिरं मनोहरं
## वल्गु कान्तमभिरामबन्धुरे ।
## वामरुच्यसुषमाणि शोभनं
## मञ्जुमञ्जुलमनोरमाणि च ॥१४४४॥

## साधुरम्यमनोज्ञानि पेशलं[१४] हृद्यसुन्दरे ।
## काम्यं कम्रं कमनीयं सौम्यं च मधुरं प्रियम् ॥१४४५॥

१ चरति मनोऽत्र चारु[१५]। 'चर गतौ'(भ्वा.प.से.), 'दृसनिजनि-'(उणा-३)इत्युण् । २ हरति मनो हारि । 'हृञ् हरणे'(भ्वा.उ.अ.), ग्रहादित्वाण्णिनिः । ३ रोचते रुचिरम् । 'रुच कान्तौ[१६]'(भ्वा.आ.से.), 'इषिमदिमुदिखिदिच्छिदिभिदि-'(उणा-५१)इत्यादिना किरच् । रुचिमभिलाषं रातीति वा। 'आतोऽनुपसर्गे कः'३।२।३॥। ४ मनो हरति मनोहरम् । 'हरतेरनुद्यमनेऽच्'३।२।९॥ । ५ वलते वल्गु । 'वल वल्ल संवरणे च[१७]'(भ्वा.आ.से.), 'वलतेर्गुक् च[१८]'(उणा-१९)इत्युः, गुंगागमश्च[१९] । ६ काम्यते कान्तम् । 'कमु कान्तौ'(भ्वा.आ.से.), 'मतिबुद्धिपूजार्थेभ्यश्च'३।२।१८८॥ इति चकारात् क्तः। ७ अभिरमते मनोऽत्रेति अभिरामम्। 'रमु क्रीडायाम्'(भ्वा.आ.अ.), ज्वलादित्वाणः । ८ बध्नाति बन्धुरम् । 'बन्ध बन्धने'(क्र्या.उ.से.), बाहुलकाद् 'मन्दिवाशिमथि-'(उणा-३८)इत्यादिना उरच् । ९ वाति मनोऽत्र वामम्[२०] । 'वा गतिगन्धनयोः' (भ्वा.प.अ.), बाहुलकाद् 'अर्तिस्तुसुहुसृधृ-'(उणा-१३७) इत्यादिना मन् । १० रोचते रुच्यम् । 'रुच् (रुच) दीप्तौ[२१]'(भ्वा.आ.से.), 'राजसूय-'३।१।११४॥ इत्यादिना क्यपि निपातितः(-तम्) । ११ सुष्ठु समं सुषमम्। शोभना समाऽत्रेति वा । 'सुविनिर्दुर्भ्यः-'८।३।८८॥ इति षत्वम् । १२ शोभते (शुभति) शोभनम् । 'शुभ शुंभ (शुम्भ) शोभायाम्[२२]'(तु.प.से.), 'अनुदात्तादेश्च(-त्तेतश्च)'३।२।१४९॥ इति युच् । १३ मञ्जति मञ्जुः । मञ्जेः सौत्राद् बाहुलकादुः । १४ मञ्जुरस्याऽस्ति मञ्जुलम् । सिध्मादित्वाल्लः। मञ्जुत्वं लातीति वा । 'आतोऽनुपसर्गे कः'३।२।३॥ । १५ मनो रमयति, मनसि रमते वा[२३] मनोरमम् । पचाद्यच्

१. 'अवद्याऽवमाऽधमार्व रेफाः कुत्सिते'(उणा-७३२)इत्युणादिगणे ॥ २. 'ब्रु-' इति५॥ ३ 'खिट उत्त्रासे' इति स्वामी, 'किट खिट त्रासे' इति मैत्रेयसायणौ ॥ ४ '-शब्दम्' इति४.५॥ ५ 'पूयं' इति४॥ ६ '-लः' इति४॥ ७ 'विलसने' इति३॥ ८ '-लिङ्गकः' इति मेदिनीकोशे, पृ.८५॥ ९ '-च्यते' इति१.३॥ १०. '-यते' इति३॥ ११. 'दृगनेन' इति३॥ १२. '-च्यते' इति४॥ १३ 'दृष्टा-' इति३॥ १४ '-ने' इति५॥ १५. '-रुः' इति३॥ 'रुच दीप्तावभिप्रीतौ च' इति स्वामिसायणौ, 'रुच दीप्तौ' इति मैत्रेयः ॥ १७ 'च' इति ३प्रतौ नास्ति, 'वल संवरणे' इति स्वामी, 'वल वल्ल संवरणे' ('सञ्चरणे च' इत्यधिकः सायणमते)' इति मैत्रेयसायणौ ॥ १८. 'वलेर्गुक् च' इत्युणादिगणे ॥ १९. 'उगा-' इति१, 'गुमा-' इति४.५॥ २०. '-मः' इति१, '-म' इति४॥ २१. 'रुच दीप्तावभिप्रीतौ च' इति स्वामिसायणौ ॥ २२. 'शुभ शुम्भ शोभार्थे' इति तुदादौ क्षीरतरङ्गिण्यादयः ॥ २३. १प्रतौ नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥१४४४॥ १६ साध्नोत्यर्थमिति **साधु** । 'साध संसद्धौ' (स्वा.प.अ.), 'कृवापाजिमि–'(उणा–१)इत्यादिना उण् । १४ रमयति मनः, रम्यते[2] वा **रम्यम्** । 'रमु क्रीडायाम्' (भ्वा.आ.से.) । १८ मनसा ज्ञायत इति, मूलविभुजादित्वात् के **मनोज्ञम्** । 'सुप्सुपा'२।१।४॥ इति समासः[3] । १९ पिंशति **पेशलम्** । 'पिशँ[4] अवयवे'(तु.प.से.), वृषादित्वात् कलच् । २० हृदयस्य प्रियं **हृद्यम्**। 'हृदयस्य प्रियः'४।४।९५॥ इति षष्ठ्यन्ताद् यत्, हृदयस्य च हृदादेशः। २१ सुष्ठु आद्रियते, सुष्ठु नन्दयतीति वा **सुन्दरम्**, पृषोदरादिः। यद्वा सुन्दति सुन्दरम् । सुन्दः सौत्रः, बाहुलकादरन्, स्त्रियां ङीष् । २२ काम्यते **काम्यम्** । 'कमु कान्तौ'(भ्वा.आ.से.), 'ऋहलोर्ण्यत्'३।१।१२४॥ । २३ कम्यते[5] **कम्रम्**। 'नमिकम्पिस्म्यजस–'३।२।१६७॥ इति रः । २४ बाहुलकात् कर्मण्यपि **कमनीयम्** । 'तव्यत्तव्यानीयरः'३।१।९६॥ इत्यनीयर्। २५ सोममेव **सौम्यम्** । भेषजादित्वात्ष्यण् । २६ माद्यत्यनेन[6] **मधुरम्** । 'मदी हर्षे'(दि.प.से.)[7] । मधु माधुर्यमस्त्यस्येति वा । '[8]ऊषशुषि(सुषि)–'५।२।१०७॥ इति[9] रः। २७ प्रीणाति **प्रियम्** । 'प्रीञ् तर्पणे कान्तौ च'(क्र्या.उ.से.), 'इगुपध–'३।१।१३५॥ इति कः, 'अचि श्नुधातु–'६।४।७७॥ इतीयङ् । यद्वा 'प्रीङ् प्रीतौ'(दि.आ.अ.), दिवादौ[10], 'इगुपध–'३।१।१३५॥ इति कः। एते वाच्यलिङ्गाः। लडहो देश्याम्, संस्कृतेऽपि । यद्गौडः– ''मनोज्ञं मञ्जु मञ्जुलं लडहं रमणीयं च''[[11]]इति । सप्तविंशतिर्मनोहरस्य ॥१४४५॥

## व्युष्टिः[1][12] फलम्[2]

१ विशेषेण उश्यते काम्यते **व्युष्टिः** । विपूर्वः 'वश कान्तौ'(अ.प.से.)[13], 'स्त्रियां क्तिन्'३।३।९४॥, सम्प्रसारणम्, 'व्रश्चभ्रस्ज–'८।२।३६॥ इति षत्वम् । २ फलति **फलम्** । 'फल निष्पत्तौ'(भ्वा.प.से.), अच् । द्वे फलस्य । प्रयोजनमिति भाषा । एतौ नियमादिफलपर्यायावपि । ''व्युष्टिः[14] स्तुतिफलर्द्धिषु''[अनेकार्थसङ्ग्रहः२।९७] इत्यनेकार्थः । ''फलं नियमादेः''[ ]इति तट्टीका । यथा– ''व्युष्टिं[15] विशिष्टां तपसो गृणन्ति[16]''[[17]] । ''फलं हेतुसमुत्थे स्यात् फलके व्युष्टिलाभयोः''[विश्वप्रकाशकोशः, लान्तवर्गः, श्लो–२]इति महेश्वरः। ''व्युष्टिर्नियमादिफलम्'' [ ]इति तट्टीका ॥

## असारं[1] तु फल्गु[2]

१ नास्ति सारं स्थिरांशोऽत्रेति[18] **असारम्** । २ फलति विशीर्यते[19] **फल्गु** । 'ञिफला विशरणे'(भ्वा.प.से.), 'फलिपाटि–'(उणा–१८)इत्यादिना उः, गुक् च । ''निष्फले फल्गुवाच्यवत्''[विश्वलोचनकोशः, गान्तवर्गः, श्लो–१३]इति श्रीधरः । निष्फलं निरर्थकमिति पर्यायः । ''निस्सारे फल्गु वाच्यवत्[20]''[विश्वप्रकाशकोशः, गान्तवर्गः, श्लो–२७]इति महेश्वरः । द्वे असारस्य ॥

## शून्यं[1] तु रिक्तकम्[2] ।
## शुन्यं[21][3] तुच्छं[4] वशिकं[5][22] च

१ शुने हितं **शून्यम्** । 'उगवादिभ्यो यत्' ५।१।२॥, 'शुनः[23] सम्प्रसारणं च[24] वा(वा च) दीर्घः' (गणसू–५।१।२॥)। २ रिच्यते रिक्तम् । 'रिचिर् विरेचने' (रु.उ.अ.), '–तुदि–'(उणा–१६४)इत्यादिना क्तः[25], ततः स्वार्थे कनि **रिक्तकम्**। ३ शुने हितं **शुन्यम्**, पञ्चमस्वरादिः । उगवादिभ्यो यति[26], 'शुनः सम्प्रसारणं च वा (वा च) दीर्घः'(गणसू–५।१।२॥)इति दीर्घाभावपक्षे । ४

---

१. '–धुः' इति१.३॥ २ 'रमते' इति३॥ ३ ''मनसा जानाति । 'इगुपध–'(३।१।१३५॥)इति कः । निर्वृ (प्रेषणोऽत्र जानाति। –मूलविभुजादित्वात् (वा.३।२।५॥) कः इति मुकुटः । तन्न। तस्यापि कर्तरि विहितत्वेन 'ज्ञायते' इति विग्रहप्रदर्शनस्य विरुद्धत्वात् । यदपि– 'सुप्सुपा–'(२।१।४॥)इति समासः– इति । तदपि न । 'कर्तृकरणे–'(२।१।३२)इति तत्पुरुषविधायकस्य सत्त्वात् ॥'' इति रामाश्रमीटीकाकारः, ३।१।५३॥, पृ.४९५॥ ४ 'पिशि' इति२.४.५॥ ५ 'का–' इति२॥ ६ 'माद्यतेऽ–' इति१॥ ७ ''माद्यत्यनेन मधुरं 'श्वशुर–''॥ (उणा–४२६)इत्युरे निपात्यते ॥''(६।१४४५)स्वोपज्ञटीकायामुक्तम्, तत्तु विचारणीयम्–''श्वशुर–''(उणा–४२६)इत्यत्र स्वोपज्ञोणादिगणसूत्रविवरणे ''आदिग्रहणान्मन्यतेर्धश्च,, मधुरः–रसविशेष इत्यादि'' इत्युक्तत्वात्, अथवा आदिग्रहणाद् माद्यतेर्धश्चैवं समाधेयम्॥ ८ 'अपि–' इति१, 'उ–' इति३॥ ९. इतोऽग्रे ४प्रतौ 'वा' इति दृश्यते ॥ १०. '–दिः' इति१.२॥ ११. द्र. स्वोपज्ञटीका६।१४४५॥, पृ.३२३॥ १२. '–ष्टि' इति३.५॥ १३. इतोऽग्रे ३प्रतौ 'इगुपधात्' इति दृश्यते॥ १४ '–ष्टि' इति५॥ १५ '–ष्टि' इति३॥ १६. 'गृण्हन्ति(गृह्णन्ति)' इति३॥ १७ द्र. अनेकार्थकैरवाकरकौमुदीटीका, भा–१, २।९७॥, पृ.६२॥ १८. '–ऽस्येति' इति३.४.५॥ १९. 'विस्तो–' इति५॥ २०. 'वाच्य–' इति२.३.४.५॥ २१. 'शू–' इति३.५॥ २२. '–सिकं' इति३.५॥ २३. 'शुन्यः' इति५॥ २४. १प्रतौ नास्ति॥ २५. 'पातृ–' (उणा–१६?)इत्यादिना थक्प्रत्ययो भवति, न तु क्तः, अथ च 'निष्ठा'३।२।१०२॥ इति क्तः॥ २६. 'शू–' इति२.३॥ २७ '–तिः' इति१.४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तुदति[१] चेतः तुच्छम् । 'तुद व्यथने'(तु.उ.अ.), 'पातृतुदि-'(उणा-१६४)इति छक्[२]। ५ वशः स्वाच्छन्द्यमस्त्यस्य अनावृतत्त्वा[३]दिति वशिकम् । 'अत इनिठनौ'५।२।११५॥ इति ठन् । पञ्च शून्यस्य[४]। 'ठालु[५]' इति भाषा॥

## निबिडं तु निरन्तरम् ॥१४४६॥

## निबिरीसं घनं सान्द्रं नीरन्ध्रं बहलं[६] दृढम् । गाढमविरलं च

१-३ नारन्ध्रे 'नेर्बिडबिरीसौ(नेर्बिडज्बिरीसचौ)' ५।२।३२॥ इति साधू **निबिडम्, निबिरीसं** । २ निर्गतमन्तरं व्यवधानमत्र **निरन्तरम्** ॥१४४६॥ ४ हन्यते **घनम्**। 'हन हिंसागत्योः'(अ.प.अ.), 'मूर्तौ घनः'३।३।७७॥ इति साधुः। ५ सीदन्त्यत्र **सान्द्रम्** । 'षद्लृ विशरणादौ'(भ्वा.प.अ., तु.प.से.), पृषोदरादित्वात् साधुः । ६ निर्गतं रन्ध्रमत्र **नीरन्ध्रम्** । ७ वहति **वहलम्** । 'वह प्रापणे'(भ्वा.उ.अ.), वृषादित्वात् कलच् । ८ दृंहति **दृढम्** । 'दृहि वृद्धौ[७]'(भ्वा.प.से.), 'दृढः स्थूलबलयोः' ७।२।२०॥ इति साधुः । ९ गाह्यते स्म **गाढम्** । 'गाहू विलोडने'(भ्वा.आ.से.), 'निष्ठा'३।२।१०२॥, 'हो ढः' ८।२।३१॥, 'झषस्तथोः-'८।२।४०॥ इति धत्वम्, 'ष्टुना ष्टुः'८।४।४१॥, 'ढ्रलोपे पूर्वस्य-'६।३।१११॥ इति दीर्घत्वम् । १० न विरलम् **अविरलम्** । दश निबिडस्य ॥

## अथ विरलं तनु पेलवम् ॥१४४७॥

१ विरमति, विरात्यन्तरं वा **विरलम्**। कलप्रत्यये पृषोदरादिः । २ तन्यते **तनु** । 'तनु विस्तारे'(त.उ.से.), 'भृमृशीतृ-'(उणा ७)इत्यादिना उः । ३ पेलति **पेलवम्**। 'पेलृ[८] गतौ'(भ्वा.प.से.) । त्रीणि विरलस्य । 'छदरुं[९]' इति भाषा ॥१४४७॥

## नवं नवीनं सद्यस्कं प्रत्यग्रं नूत्ननूतने । नव्यं चाऽभिनवे

१ नूयते **नवम्** । 'णुञ्[१०] स्तुतौ'(अ.प.अ.), 'ऋदोरप्'३।३।५७॥ । २ नवमेव **नवीनम्** । 'नवस्य नू आदेशः त्नप्तनप्खश्च(-प्खाश्च) प्रत्यया वक्तव्याः'(वा-५।४।२५॥)इति खप्रत्ययः, खस्य इनादेशः। ३ सद्यो भवं **सद्यस्कम्** । पृषोदरादित्वात्। ४ प्रतिगतमग्रमनेन **प्रत्यग्रम्**। ५ नूयते **नूत्नम्** । 'णु स्तुतौ'(अ.प.अ.), 'शस्नासाम्नासुमवद्युम्न-'( )इत्यादिना त्नप्रत्ययो दीर्घत्वं च निपात्यते[११]। ६ नवमेव नूत्नम्, **नूतनं** च । 'नवस्य नू आदेशः त्नप्तनप्खश्च(-प्खाश्च) प्रत्यया वक्तव्याः'(वा-५।४।३०॥)इति त्नप्तनपौ यथाक्रमं[१२] प्रत्ययौ ज्ञेयौ । ७ नवमेव **नव्यम्**। 'पादार्घाभ्यां च'५।४।२५॥ इति सूत्रे चकारोऽनुक्तसमुच्चयार्थः, तेन नवसूरमर्तयविष्ठेभ्योऽपि[१३] यत्प्रत्ययः। नवमेव वा स्वार्थे यत् । यद्वा नौतेरेव, अचो यति, 'वान्तो यि प्रत्यये'६।१।७९॥ नव्यम् । ८ अभिनूयते **अभिनवम्**। 'ऋदोरप्'३।३।५७॥, तत्र । अष्टौ नूतनस्य[१४]॥

## जीर्णं पुरातनं चिरन्तनम्[१५] ॥१४४८॥

## पुराणं प्रतनं प्रत्नं जरन्

१ जीर्यते स्म **जीर्णम्** । 'जॄ वयोहानौ'(क्र्या.प.से.), 'निष्ठा'३।२।१०२॥, 'ॠत इद्धातोः'७।१।१००॥, 'उरण् रपरः'१।१।५१॥, 'रदाभ्याम्-'८।२।४२॥ इति नत्वम्, 'हलि च'८।२।७७॥ इति दीर्घः, तत्र । २ पुरा भवं **पुरातनम्** । 'सायंचिरंप्राह्णेप्रगे[१६]ऽव्ययेभ्यष्ट्युट्युलौ तुट् च'४।३।२३॥, 'अबाधकान्यपि निपातनानि भवन्ति'( ) इति तुट्[१७]। ३ चिरं चिरे वा भवं **चिरन्तनम्** । 'सायंचिरम्[१८]-'४।३।२३॥ इति सूत्रे निपातनाद् मान्तत्वं चिरशब्दस्य ॥१४४८॥ ४ पुरा भवं **पुराणम्** । 'सायंचिरम्[१८]-' ४।३।२३॥ इत्यादिना ट्युः, तुडनित्यः, 'पूर्वकालैकसर्वजरत्पुराण-'२।१।४९॥ इति ज्ञापकात् । स्त्रीलिङ्गे तु बह्वादित्वाद् वा ङीप् (ङीप्) पुराणी, पुराणा इति, अजाद्यतष्टापि । ५-६ प्रगतं कालेन **प्रतनम्, प्रत्नम्** । 'त्नश्च-

---

१. इतोऽग्रे ३प्रतौ 'तुद्यते वा' इति दृश्यते ॥ २. 'पातृतुदि-'(उणा-१६४)इत्यादिना थक्, न तु छक्, अथ च 'तुदि-मदि-'(हैमोणा-१२४)इत्यादिना छक् बोध्यः ॥ ३. '-त्त-' इति३॥ ४. 'शु-' इति३॥ ५. '-लउं' इति१, '-लाउ' इति३॥ ६. 'बहुलं' इति१.४.५॥ ७. 'दृहि दृहि बृह बृहि वृद्धौ' इकि स्वामिसायणौ, 'तृह तृहि दृह दृहि वृह वृहि वृद्धौ' इति मैत्रेयः ॥ ८. 'पिलृ' इति१.४.५॥ ९. 'छीदौ' इति४॥ १०. जकारानुबन्धोऽनावश्यकः ॥ ११. 'नवस्य नू आदेशः-'(वा-५।४।२५॥)इत्यादिनाऽपि बोध्यम् ॥ १२. '-मौ' इति१॥ १३. अपिना 'वसु अयस' इत्यादि बोध्यम् ॥ १४. 'नूतस्य' इति४॥ १५. 'चिरातनम्' इति४॥ १६. '-ह्णे-' इति२.३.४.५॥ १७. 'अबाधकान्यपि निपातनानि' इत्यस्य नागेशभट्टेन परिभाषेन्दुशेखरे भाष्यविरुद्धत्वोक्त्याऽत्र 'पुराण'शब्देन 'पुरातन'शब्दस्य प्राप्तोऽपि बाधः पृषोदरादित्वान्नेति शिवदत्तशर्मणः ॥ १८. इतोऽग्रे ४प्रतौ '-प्रा-' इति दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(नश्च) पुराणे प्रात्'(वा-५।४।३०॥)इति प्रशब्दात् त्नः[१], चकारात् तनश्च[२]। ७ जीर्यते[३] जरन्। 'जॄ वयोहानौ'(क्र्या. प.से.), 'जीर्यतेरतृन्'३।२।१०४॥। जरन्तौ, जरन्तः इत्यादि पुंसि। जरती, जरत्यौ, जरत्यः इत्यादि स्त्रियाम्। जरत्, जरती, जरती, जरन्ति इत्यादि क्लीबे। "जरत्तृणानीव वियन् निनाय"[किरातार्जुनीयम्, सर्गः-१६, श्लो-४४]इति भारविः। सप्त पुराणस्य। 'जूनुं[४]' इति भाषा॥

**मूर्तं तु मूर्तिमत्।**

१ मूर्च्छति स्म **मूर्तम्**। 'मूर्च्छा मोहसमुच्छ्राययोः'(भ्वा.प.से.), 'निष्ठा'३।२।१०२॥ इति क्तः, 'न ध्याख्यापृमूर्च्छिमदाम्'८।२।५७॥ इति निष्ठातस्य[५] नत्वप्रतिषेधः, 'राल्लोपः'६।४।२१॥ इति छलोपः। २ मूर्तिरस्याऽस्ति[६] **मूर्तिमत्**, त्रिलिङ्गः। अत्र मूर्तिशब्दः कायपर्यायः। यच्छ्रीधरः- "मूर्तिः कायेऽपि काठिन्येऽपि"[विश्वलोचनकोशः, तान्तवर्गः, श्लो-४४]इति। द्वे मूर्तिमतः॥

**उच्चावचं नैकभेदम्[७]**

१ उन्नतं चाऽवनतं च उदक् चाऽवाक् च वा **उच्चावचम्**। मयूरव्यंसकादिः। २ न एको भेदोऽत्रेति [८]**नैकभेदम्**। त्रिपदो बहुव्रीहिः, तेनोत्तरपदत्वाभावान्नलोपाभावः, तत्र हि '-उत्तरपदे-'६।३।१॥ इत्यनुवर्तते, 'सर्वान्तमुत्तरपदम्' इति तत्र व्याख्यातम्[९]। न शब्देन समासः। द्वे अनेकप्रकारस्य। 'ऊंचानीचा' इति भाषा॥

**अतिरिक्ताधिके समे ॥१४४९॥**

१ अतिरिच्यते स्म **अतिरिक्तम्**। 'रिचिर् विरेचने'(रु.उ.अ.), निष्ठा। २ अध्यारूढम् **अधिकम्**। ['अधिकम्'५।२।७३॥]इति सूत्रेण निपात्यते, अध्यारूढस्योत्तरपदलोपश्च निपात्यते, कश्च प्रत्ययः। द्वे अधिकस्य ॥१४४९॥

**पार्श्वं समीपं सविधं ससीमा-**
**भ्याशं सवेशाऽन्तिकसन्निकर्षाः।**
**सदेशमभ्यग्रसनीडसन्नि-**
**धानान्युपान्तं निकटोपकण्ठे ॥१४५०॥**
**सन्निकृष्टसमर्यादाभ्यर्णान्यासन्नसन्निधी।**

१ स्पृश्यते **पार्श्वम्**। 'स्पृश संस्पर्शने'(तु.प.अ.), 'स्पृशेः श्वः पार्[१०] च'(हैमोणा-५२३)इति साधुः। २ सङ्गता आपोऽत्रेत्युपचारात् **समीपम्**। 'ऋक्पूरब्धूः-'५।४।७४॥ इत्यादिना अप्रत्ययः, 'द्व्यन्तरुपसर्गेभ्योऽप ईत्'६।३।९७॥। ३ समाना विधा मर्यादा अस्य **सविधम्**। ४ समाना सीमा अस्य **ससीमम्**। ५ अभ्यस्यते[११] (अभ्यश्यते) व्याप्यते **अभ्याशम्**। अभिपूर्वः 'अशूङ्[१२] (अशू) व्याप्तौ[१३]'(स्वा.आ.से.), घञ्, तालव्यान्तोऽयम्। "ऊर्वश्यभ्याशशितिः"[ ]इत्यूष्मविवेकात्। अभ्यस्यत[१४] इति अभ्यास इति। 'असु क्षेपणे'(दि.प.से.), घञि, दन्त्यान्तोऽपि। यद्गौडः-"अभ्यासस्तु समीपे स्यात् पुमानभ्यसनेऽपि च"[ ]इति पुंस्ययम्। ६ समानो वेशोऽस्य **सवेशम्[१५]**। ७ अन्तोऽस्त्यस्य **अन्तिकम्**। 'अत इनिठनौ' ५।२।११५॥ इति ठन्। ८ सन्निकृष्यते **सन्निकर्षः**। 'कृष विलेखने'(भ्वा.प.अ., तु.उ.अ.), घञ्। ९ समानो देशोऽस्य **सदेशम्**। १० अभिमुखमग्रमस्य **अभ्यग्रम्**। ११ समानं नीडं वासस्थानमस्य[१६] **सनीडम्**। १२ सन्निधीयतेऽत्र **सन्निधानम्**। अधिकरणे ल्युट्। १३ उप समीपेऽन्तोऽस्य **उपान्तम्**। १४ निबध्नाति **निकटम्**, पुंक्ली.। 'सम्प्रोदश्च'५।२।२९॥ इति चकारात् कटच्। १५ कण्ठस्य समीपमुपगतं[१७] **उपकण्ठम्** ॥१४५०॥ १६ सन्निकृष्यते स्म **सन्निकृष्टम्**। १७ समाना मर्यादा अस्य **समर्यादम्**। सविध[ससीम]सनीडसवेशसदेशसमर्यादेषु लक्षणया सामीप्यम्[१८]। १८ अभ्यर्द्यते **अभ्यर्णम्**। अभिपूर्वः 'अर्द गतौ'(भ्वा.प.से.), क्तः, 'रदाभ्यां निष्ठातो नः पूर्वस्य च दः'८।२।४२॥ इति निष्ठाक्तस्य (निष्ठातस्य) नत्वम्, 'अभेश्चाविदूर्ये'७।२।२५॥ इतीडभावः। १९ आसीदति स्म **आसन्नम्**। 'षद्लृ विशरणादौ'(भ्वा.प.अ., तु.प.से.), क्तः। २० सन्निधीयतेऽस्मिन्निति **सन्निधिः**, पुंसि। 'उपसर्गे घोः किः'३।३।९२॥ इति किः। एते पार्श्वाद्याः सन्निकर्षनिकटसन्निधिवर्जाः सर्वे क्लीबलिङ्गाः। सामान्येन विंशतिः समीपस्य॥

---

१. 'तन्' इति३॥ २. 'त्नश्च' इति३॥ ३. इतोऽग्रे ३प्रतौ 'स्म' इति दृश्यते॥ ४. '-नूं' इति३, '-नउ' इति३, '-नू' इति४॥ ५. '-न्तस्य' इति४॥ ६. '-स्तीति' इति१॥ ७. तुलनीयोऽमरकोषः३।१।८३॥ ८. 'अनेक-' इति१॥ ९. 'व्याख्या' इति१॥ १०. 'स्पृशेः श्वण्शुनौ पृ च'(उणा-७०५) इति पाणिनीयसम्मतोणादिगणे॥ ११. '-सम्' इति१.४.५॥ १२. 'असुङ्' इति३.५॥ १३. 'अशू व्याप्तौ सङ्घाते च' इति मैत्रेयसायणौ॥ १४. '-श्यत' इति५॥ १५. '-शः' इति३, '-सम्' इति५॥ १६. 'वासं' इति४॥ १७. ४प्रतौ नास्ति॥ १८. 'समीप्यम्' इति३.५, 'समीपां' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अव्यवहितेऽनन्तरं संसक्तमपटान्तरम् ॥१४५१॥**

१ न व्यवधीयते स्म **अव्यवहितम्** । 'डुधाञ् धारणादौ'(जु.उ.अ.), 'निष्ठा'३।२।१०२॥ इति क्तः, 'दधातेर्हिः'७।४।४२॥, तत्र । २ नास्त्यन्तरमत्र **अनन्तरम्**। ३ संसज्यते[१] स्म **संसक्तम्**। 'षञ्ज सङ्गे'(भ्वा.प.अ.), 'निष्ठा' ३।२।१०२॥ इति क्तः। ४ नास्ति पटेन तिरस्करिण्यान्तरं[२] व्यवधानमत्र **अपटान्तरम्** । अपदान्तरमित्यपि पाठः, तत्र नास्ति पदस्याऽप्यन्तरमवकाशोऽत्रेत्यपदान्तरमिति व्याख्या । चत्वारि अन्तररहितस्य ॥१४५१॥

**नेदिष्ठमन्तिकतमम्**

१ अतिशयेनाऽन्तिकं **नेदिष्ठम्** । अतिशायने[४] इष्ठन्, 'अन्तिकबाढयोर्नेदसाधौ[५]'५।३।६३॥ । नेदीयोऽपि[६] । २ अन्तिकात् तमपि 'तमे तादेश्च लोपो बहुलम्' इति न तादिलोपः, अथवा छन्दसि तल्लोपवचनम्[७], [**अन्तिकतमम्**]। अन्त[म]मित्यपि भवति । ''अन्तिकतमोऽन्तिसन्निधे(धि)रन्तिकमदन्तमोऽन्तिमः''[ [८] ]इनि रत्नकोषः । द्वे अतिनिकटस्य ॥

**विप्रकृष्टपरे पुनः ।**
**दूरे**

१ विप्रकृष्यते स्म **विप्रकृष्टम्**। २ पिपर्ति **परम्**। 'पृ पालनपूरणयोः'(जु.प.से.), पचाद्यच् । ३ दुनोति मनो **दूरम्** । 'दूङ् (टुदु) उपतापे'(स्वा.प.अ.), [९]ऊणादिको रक् । यद्वा दुःखेन ईयते गम्यतेऽत्रेति दूरम् । दुर्पूर्वः 'इण् गतौ' (अ.प.अ.), 'दुरिणो(दुरीणो) लोपश्च'(उणा-१७७)इति दुर्पूर्वादिणो रक्प्रत्ययः, धातोर्लोपश्च, तत्र । त्रयोऽपि वाच्यलिङ्गाः। आरादव्ययेषु वक्ष्यते[१०]। सामान्येन त्रीणि दूरस्य ॥

**अतिदूरे दविष्ठं दवीयः**

१ अतिशयेन दूरं **दविष्ठम्** । दूरशब्दादतिशयेऽर्थे इष्ठनि, 'स्थूलदूर-'६।४।१५६॥ इत्यादिना रेफलोपः, गुणश्च। २ एवं **दवीयः** । त्रीणि अतिदूरस्य ॥

**अथ सनातनम् ॥१४५२॥**
**शाश्वतानश्वरे नित्यं ध्रुवम्**

१ सना[११] सर्वदा भवं **सनातनम्** । सनेत्यव्ययम्, 'सायंचिरंप्राह्णेप्रगे[१२]ऽव्ययेभ्यः-'४।३।२३॥ इति ट्युः, तुडागमश्च। सदातनमपि ॥१४५२॥ २ शश्वत् त्रैकाल्ये भवं **शाश्वतम्**। शैषिकोऽण्, 'अव्ययानां भमात्रे टिलोपः'(वा-७।३।४)इति टिलोपोऽनित्यः, 'शाश्वतिकः'२।४।९॥ इति निर्देशात्। शाश्वतिकमपि। ३ न नश्वरम् **अनश्वरम्**, तालव्यमध्यम्। ४ नियतं भवं **नित्यम्**। 'त्यब् [१३]नेर्ध्रुवे'(वा-४।२।१०४॥)इति त्यप् । ५ ध्रुवति **ध्रुवम्** । 'ध्रुव गतौ स्थैर्ये[१४] च[१५](तु.प.अ.), 'इगुपध-'३।१।१३५॥ इति कः। 'ध्रु स्थैर्ये'(तु.प.अ.), अस्मात् पचाद्यचि, कुटादित्वाद् गुणाभावे[१६] 'अचि स्नुधातु-'६।४।७७॥ इत्युवङि वा । एते त्रिलिङ्गाः । सामान्येन पञ्च सदातनस्य ॥

**[१७]स्थेयस्त्वतिस्थिरम् ।**
**स्थास्नु स्थेष्ठम्**

१ अतिशयेन स्थिरं **स्थेयः[१८]** । अतिशयेऽर्थे ईयसुन्, ततः 'प्रियस्थिर-'६।४।१५७॥ इत्यादिना स्थिरस्य स्थादेशः, सकारान्तोऽयम् । २ अति अत्यर्थं स्थिरम् **अतिस्थिरम्** । ३ तिष्ठतीत्येवंशीलं **स्थास्नु** । 'ग्लाजिस्थश्च[१९] ग्स्नुः'३।२।१३९॥ । ४ अतिशयेन स्थिरं **स्थेष्ठम्** । इष्ठनि 'प्रियस्थिर-'६।४।१५७॥ इत्यादिना स्थादेशः । चत्वारि अतिस्थिरस्य ॥

**तत्कूटस्थं कालव्याप्येकरूपतः ॥१४५३॥**

१ तदिति अतिस्थिरं निरवधिकालं व्याप्नोति स्थिरत्वात् कालव्यापि, [एक]रूपतो निर्विकारतयेत्यर्थः,

---

१. '-ज्यति' इति१.४, '-जिति' इति४॥ २. '-ऽन्तरं' इत्यस्य स्थाने १.२.४.५प्रतिषु '-ऽपि' इति दृश्यते ॥ ३. तुलनीयोऽमरकोषः ३।१।६८॥ ४. ' ग्नि' इति३॥ ५. '-सधौ' इति४.५॥ ६. '-येऽपि' इति४.५॥ ७. अन्तिकतमशब्दव्युत्पत्तिर्मृग्या ॥, टीकासर्वस्वे- ''अतिशायने तमपि अन्तिकतमम् । ननु च 'अन्तिकस्य तमपि कादिलोपः, आद्युदात्तत्वं च' इत्यनुवृत्तौ 'तमे तादेश्च' इति तमप्रत्यये 'अन्तिकस्य तकाद्योः' तकारादेः ककारादेश्च लोपो भवति । तत्र तादिलोपे अन्तिकं, कादिलोपे अन्तिमं वा प्राप्नोति । कथमन्तिकतमम् । उच्यते । 'कादिलोपे बहुलम्' इति वचनात् पक्षे लोपः । अन्तिकस्य तम इव सदि वा तादेर्लोपवचनम् । ''अन्तिकतमोऽतिसन्निधिरन्तिसदन्तिकसदन्तमोऽन्तिकमः'' इति रत्नकोषः ॥'' इति, भा-४, ३।१।६६॥, पृ.३२॥ ८. द्र. पदचन्द्रिका, भा-३, विशेष्यनिघ्नवर्गः, श्लो-६८, पृ.६७॥ ९. 'उ-' इति३.५॥ १०. इदमयुक्तं प्रतिभाति, ग्रन्थे आरात्शब्दस्याऽभावात् ॥ ११. 'सदा भवं' इति१॥ १२. '-ह्णे-' इति१.२.४.५॥ १३. 'ने ध्रु-' इति १.३.४.५॥ १४. 'गतिस्थैर्ये' इति१॥ १५. 'ध्रु गतिस्थैर्ययोः' इत्यत्र सायणेनोक्तम्- ''अत्र स्वाम्यादयः 'ध्रुव' इति वकारान्तं धातुं पठन्ति ।'' इति, तुदादिः, धातुसं-१०२, पृ.४७९॥ १६. '-वः' इति१॥ १७. 'स्थैर्यं' इति५॥ १८. '-यम्' इति३॥ १९. 'स्थाग्लाजिभ्यस्थश्च' इति१.३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**कूटस्थम्** उच्यत इत्यन्वयः, आत्माकाशादिः । "एकेनैव स्वभावेन निरवधिकालस्य व्यापक आत्माकाशादिः कूटो निश्चलः सन् तिष्ठतीति कूटस्थम् । 'सुपि स्थः' ३।२।४॥ इति कः"[पदचन्द्रिका, भा-३, विशेष्यनिघ्नवर्गः, श्लो-७३]इति मिश्राः । "कूटोऽस्त्री निश्चले राशौ"[मेदिनीकोशः, टान्तवर्गः, श्लो-७]इति मेदिनिः ॥१४५३॥

**स्थावरं तु जङ्गमान्यत्**

१ तिष्ठतीत्येवंशीलं **स्थावरम्** । 'ष्ठा गतिनिवृत्तौ' (भ्वा.प.अ.), 'स्थेशभास-'३।२।१७५॥ इति वरच् । जङ्गमात् त्रसाद् द्वीन्द्रियादेरन्यद् जङ्गमान्यत् ॥

**जङ्गमं तु त्रसं चरम् ।**
**चराचरं जगदिङ्गं[१] चरिष्णु च**

१ भृशं गच्छति **जङ्गमम्** । अकौटिल्येऽप्यभिधानाद् यङ्, तदन्तात् पचाद्यच्। २ त्रस्यति **त्रसम्**। 'त्रसी उद्वेगे'(दि.प.से.), पचाद्यच्। ३ चरति **चरम्**। 'चर गतौ' (भ्वा.प.से.), पचाद्यच्। ४ चरति **चराचरम्**। 'चरिचलिपतिवदीनां द्वित्वमच्याक् चाभ्यासस्य-'(वा-६।१।१२॥)इत्यचि, पक्षे द्विर्वचनम्, अभ्यासस्यागागमः[२], आगमसामर्थ्याद् न हलादिशेषः, अन्यथादेशमेव[३] कुर्यात् । दीर्घोच्चारणसामर्थ्याद् न ह्रस्वत्वम्[४]। ५ गच्छति **जगत्** । 'गम्लृ गतौ'(भ्वा.प.अ.), 'द्युतिगमिजुहोतीनां द्वे च'(वा-३।२।१७८॥)इति क्विप्[५], द्वित्वम्, 'अनुदात्तोपदेश[६]-'६।४।३७॥ इत्यनुनासिकलोपः, 'ह्रस्वस्य पिति-'६।१।७१॥ इति तुक् । जगच्छब्दो वाच्यलिङ्गः । जगन्, जगन्तौ इत्यादि पुंसि । [७](जगती, जगत्यौ इत्यादि) स्त्रियां । जगत्, जगती, जगन्ति इत्यादि क्लीबे। ६ इङ्गति **इङ्गम्**। 'इगि गतौ[८]'(भ्वा.प.से.), पचाद्यच् । ७ चरणशीलं **चरिष्णु** । 'चर गतौ'(भ्वा.प.से.), 'अलङ्कृञ्निराकृञ्-'३।२।१३६॥ इत्यादिना इष्णुच्। सप्त जङ्गमस्य । 'खिसइ चालइ' इति लोकभाषा ॥

**अथ चञ्चलम् ॥१४५४॥**

**तरलं कम्पनं कम्प्रं परिप्लव-चलाचले ।**
**चटुलं चपलं लोलं चलं पारिप्लवाऽस्थिरे[१२]**
**॥१४५५॥**

१ चञ्चति **चञ्चलम्** । 'चञ्चु गतौ'(भ्वा.प.से.), वृषादित्वात् कलच् ॥१४५४॥ २ तरति (इति) चक्षुरत्रेति **तरलम्** । 'तॄ प्लवनतरणयोः'(भ्वा.प.से.), बाहुलकाद् 'मङ्गेरलच्'(उणा-७४८)इत्यलच् । ३ कम्पनशीलं **कम्पनम्**। 'कपि चलने'(भ्वा.आ.से.), 'चलनशब्दार्थादकर्मकाद् युच्'३।२।१४८॥ इति युच् । ४ कम्पनशीलं **कम्प्रम्** । 'नमिकम्पिस्म्यजस-'३।२।१६७॥ इत्यादिना रः । ५ परिप्लवते **परिप्लवम्** । 'प्लुङ्[१०] गतौ'(भ्वा.आ.से.), पचाद्यच् । ६ चलति **चलाचलम्** । 'चल विलसने[११]' (तु.प.से.), 'चरिचलिपतिवदीनां द्वित्वमच्याक् चाभ्यासस्य-'(वा-६।१।१२॥)इत्यच् । ७ चटति **चटुलम्** । 'चट[१२] भेदने'(चु.उ.से.), बाहुलकाद् 'हृषेरुलच्'(उणा-९६) इत्युलच् । ८ चपति **चपलम्** । 'चप सान्त्वने'(भ्वा.प.से.), बाहुलकाद् 'मङ्गेरलच्'(उणा-७४८)इत्यलच् । ९ लोलति **लोलम्** । 'लुल विलसने[१३]'( ), पचाद्यच् । १० चलति **चलम्** । 'चल कम्पने'(भ्वा.प.से.), पचाद्यच् । ११ परिप्लवमेव **पारिप्लवम्** । प्रज्ञादित्वादण् । १२ न स्थिरम् **अस्थिरम्** । द्वादश चपलस्य ॥१४५५॥

**ऋजावजिह्मप्रगुणौ[१४]**

१ अर्जयति यश **ऋजुः** । 'अर्ज सर्ज[१५] अर्जने' (भ्वा.प.से.), 'अर्जिदृशिकम्यमिपशिबाधामृजिपशितुग्धुग्-दीर्घो(-दीर्घ-)हकारश्च'(उणा-२७)इति कुः, तत्र । २ न जिह्मः **अजिह्मः** । ३ प्रकृष्टो गुणोऽस्य **प्रगुणः** । प्रोऽत्र सादृश्यते, तेन सदृशो गुणेन मौर्व्या च । त्रीणि ऋजोः । 'सरल' इति भाषा ॥

**अवाग्रेऽवनतानते[१६] ।**

१ अवनताग्रमस्य **अवाग्रम्**, अधोमुखमित्यर्थः,

१. '-दिगं' इति३, '-दिङ्कं' इति४, '-दिकं' इति५॥ २ '-स्यागमः' इति१॥ ३ '-थादेवमेव' इति३॥ ४ तुलनीया मा.धातुवृत्तिः, भ्वादिः, धातुसं ३६४, पृ.१५२॥ ५ 'न्' इति२॥ ६ '-शस्य' इति१.२.४.५॥ ७ कोष्ठान्तर्गतपाठः ४.५प्रत्योर्नास्ति ॥ ८. उखेत्यादिदण्डात्मकोऽयं धातुः॥ ९ 'गणुः' इति१.२.३॥ १०. 'प्लूङ्' इति३॥ ११. 'चल विकम्पने' इति मैत्रेयः॥ १२. 'चले' इति४॥ १३. 'लुट विलोटने' इत्यत्र स्वामिनोक्तम्- "लुड इति द्रमिडाः-आलोडितः, व्यालोलः।" इति, क्षीर. पृ.५६, धातुसं-२१३. 'लुड इत्येके' इति मैत्रेयः, "भूसूत्रे सुधाकरः- "लुल विलोडने" इति लान्तोऽपि दृश्यते, 'लोलद्भुजाकारबृहत्तरङ्गम्'[शिशु.३।७२]इति माघः। डलयोरेकत्वस्मरणमिति वा प्रतिविधेयम् "इति" इति सायणः, मा.धातुवृत्तिः, पृ.१११, धातुसं-२११॥ १४ तुलनीयोऽमरकोषः३।१।७२॥ १५. 'षर्ज' इति मैत्रेयसायणौ ॥ १६. तुलनीयोऽमरकोषः३।१।७०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र । २ अवनमति स्म **अवनतम्** । "तं वाहनादवनतोत्तरकायमीषत्"[ रघुवंशम्, सर्गः-९, श्लो-६०]इति रघुः। ३ आनमति स्म **आनतम्** । निष्ठा। त्रीण्यधोमुखस्य ॥

**कुञ्चितं नतमाविद्धं कुटिलं वक्रवेल्लिते ।१४५६।**
**वृजिनं भङ्गुरं भुग्नमरालं जिह्ममूर्मिमत् ।**

१ कुञ्च्यते स्म **कुञ्चितम्** । 'कुञ्च गतौ'(भ्वा.प.से.), निष्ठा । २ नमति स्म **नतम्** । ३ आविध्यति स्म **आविद्धम्** । 'व्यध ताडने'(दि.प.अ.), निष्ठा, सम्प्रसारणम् । ४ कुटेः 'इगुपधात् कित्'(उणा-५५९) इति कौ(इनि) कुटिं लाति **कुटिलम्** । यद्वा 'कुट कौटिल्ये'(तु.प.से.) अस्माद् वा बाहुलकादिलच् । ५ वञ्चति **वक्रम्** । 'वञ्चु गतौ'(भ्वा.प.से.), 'स्फायितञ्चि-'(उणा-१७०)इत्यादिना रक्, 'अनिदिताम्-'६।४।२४॥ इति न्लोपः । ६ वेल्लति[1] स्म **वेल्लितम्** । 'वेल्ल चलने'[2] (भ्वा.प.से.), निष्ठा ॥१४५६॥ ७ वृज्यते[3] **वृजिनम्**। 'वृजी वर्जने'(अ.आ.से.), 'वृजेः किच्च'(उणा-२०५) इतीनन्(-च्) । ८ भज्यत इत्येवंशीलं **भङ्गुरम्** । 'भञ्जू (भञ्जो) आमर्दने'(रु.प.अ.), 'भञ्जभासमिदो[4] घुरच्' ३।२।१६१॥, 'चजोः-'७।३।५२॥ इति कुत्वम् । ९ भुजति[5] स्म **भुग्नम्**। 'भुजो कौटिल्ये'(तु.प.से.), क्तः, 'ओदितश्च' ८।२।४५॥ इति नत्वम् । १० इयर्ति अरः । 'ऋ गतौ'(भ्वा.प.अ.), पचाद्यच् । अरं गच्छन्तमालाति **अरालम्**[6] । ११ जहाति जिहीते वा **जिह्मम्** । पृषोदरादिः । १२ ऊर्मिर्भङ्गोऽस्याऽस्ति **ऊर्मिमत्** । 'तदस्याऽस्त्यस्मिन्निति मतुप्'५।२।९४॥ । ऊर्मिरिति प्रकृते, "प्रकाशे वेगभङ्गयोः"[मेदिनीकोशः, मान्तवर्गः, श्लो-३]इति मेदिनिः । द्वादश वक्रस्य ॥

**अनुगेऽनुपदान्वक्षान्वञ्चि**

१ अनु पश्चाद् गच्छति **अनुगः**। 'अन्येभ्योऽपि (अन्येष्वपि)-'(वा-३।२।४८॥)इति डः, तत्र । २ पदस्य चरणस्याऽनु पश्चाद् **अनुपदम्** । 'अव्ययं विभक्तिसमीप-' २।१।६॥ इत्यादिनाऽव्ययीभावः । ३ अनुगतमक्षमिन्द्रियम् **अन्वक्षम्** । अक्षस्य पश्चादन्वक्षमिति वा । ४ अनु पश्चादञ्चति **अन्वक्**। 'अञ्चु गतिपूजनयोः'(भ्वा.प.से.), 'ऋत्विक्-'३।२।५९॥ इत्यादिना क्विन् । अनूची, अन्वञ्चि इत्यादि । क्लीबोऽयम् । अनुपदादीनां त्रयाणां समाहारद्वन्द्वे प्रथमाबहुवचनम् अनुपदान्वक्षान्वञ्चि[10] । "अन्वगन्वाक्षमनुगेऽनुपदं क्लीबमव्ययम्"[अमरकोषः३।१।७८॥] इत्यमरः। "अन्वञ्चत्यन्वक्, कान्तोऽप्यव्ययत्वात् प्रागादिवत् । अक्षस्य पश्चादन्वक्षम्, अक्षेण रथो लक्ष्यते । पदस्य क्रमस्य पश्चादनुपदम् । पश्चादर्थे[11]ऽव्ययीभावः। अनुगच्छति अनुगः, डः । तत्रैतत्त्रयमव्ययं वर्तते, क्लीबत्वं तु द्वयोः"[अम.क्षीर.३।१।७९॥]इति क्षीरस्वामी । 'केडइ वांसइ पाछलि[12]' इत्यादिभाषानामानि त्रीणि (चत्वारि)॥

**एकाक्येक[13] एककः[14] ॥१४५७॥**

१ एक एव **एकाकी** । 'एकादाकिन्वा(च्चा)-ऽसहाये'५।३।५२॥ इत्याकिन् (इत्याकिनिच्) । एकाकिनौ, एकाकिनः इत्यादि । २ एति सङ्ख्याप्राधान्यमिति **एकः**। 'इण् गतौ'(अ.प.अ.), 'इणभीकापाशल्यतिमर्चिभ्यः कन्[15]'(दशपाद्युणा-३।२१॥, उणा-३२१)। एकः सर्वादित्वात् सर्वशब्दवद् रूपैर्ज्ञेयः । यदमरः- "एके[16] मुख्यान्यकेवलाः[17]"[अमरकोषः३।३।१६॥]इति । अत्र मुख्यार्थान्यार्थकेवलार्थप्रतिपादकादेकशब्दात् सर्वा विभक्तयो भवन्तीति। तथा चोक्तम्- "देवेवस्यादौ एकशब्दः कैश्चित् सर्ववचनान्त एव प्रयुक्तस्तदा सर्वशब्दवद् ज्ञेयः"[ ]इति । ३ एक एव **एककः** । 'एकादाकिच्च[18]-'५।३।५२॥ इति सूत्रे चकारात् पक्षे कन् । "एककस्य शमने परं पुनः" [नैषधीयचरितम्, सर्गः-१८, श्लो-८८]इति श्रीहर्षः । त्रीणि एकाकिनः ॥१४५७॥

**एकात् तानायनसर्गाग्राण्यैकाग्रं च तद्गतम् ।**

---

१. '-ते' इति४॥ २. 'वेलृ (स्वामिमते 'वेल्लृ' इति)' इत्यादिदण्डात्मकोऽयं धातुः ॥ ३. इतोऽग्रे २.४प्रत्योः 'स्म' इति दृश्यते ॥ ४. 'भञ्जिभासि-' इति१.२.३॥ ५. '-भासि-' इति५॥ ६. '-ज्य-' इति२.३.४॥ ७. 'आ-' इति३.४.५॥ ८. '-म्हम्' इति४.५॥ ९. '-बेऽयम्' इति३॥ १०. 'आ ' इति४.५॥ ११. '-दत्यर्थे' इति१॥ १२. 'वा-' इति४, 'पाछिलि' इति५॥ १३. '-क्यैक' इति३॥ १४. एकलशब्दोऽपि दृश्यते, तत्प्रयोगो यथा श्रीमद्भागवते- "तस्मिन् वावकिल स एकलः पुलहाश्रमोपवने विविधकुसुमकिसलयतुलसिकाम्बुभिः"(५।७।११)इति । अन्यश्च- "जायेत नैकलः प्राणी प्रलीयते तथैकलः । एकलः सुकृतं भुङ्क्तेऽश्नीयाद् दुष्कृतमेकलः ॥" इति ॥ १५. 'कक्' इति पञ्चपाद्युणादिगणसम्मतपाठः ॥ १६. 'एको' इति३.४.५॥ १७. '-ले' इति३॥ १८. '-न्वा-' इति२.३.४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अनन्यवृत्त्य[7]ेकायनगत[8]ं च**

१ एकशब्दात् तानाद्याश्चत्वारो योज्यन्ते, एकं तानयति श्रद्दधाति[१] **एकतानः** । 'तनु श्रद्धोपतापयोः[२]' (चु.उ.से.), चुरादिः, पचाद्यच् । ''तननं तानः श्रद्धा, एकस्मिंस्तानोऽस्य एकतानः''[[३]]इत्यन्यः। एकस्तानोऽविच्छिन्नोऽस्य एकतान इति वा । २ एकमयनं गतिरस्य **एकायनम्** । ३ एकः सर्गो निश्चयोऽस्य **एकसर्गम्** । ४ एकमग्रं पुरोगतमस्य **एकाग्रम्** । मिश्रास्तु- '' 'अग्राद् यत्'४।४।११६॥, अग्र्यम्[४], एकमग्र्यं मानसं **कर्म** अस्य एकाग्र्यम्''[पदचन्द्रिका, भा-३, विशेष्यनिघ्नवर्गः, श्लो-८०]इत्याचख्युः[५] । ५ एकाग्रमेव **ऐकाग्रम्** । प्रज्ञादित्वादण् । ६ तत्र गतं **तद्गतम्** । ७ अनन्या एकरूपा[६] वृत्तिरस्य **अनन्यवृत्ति** । ८ एकमयनं गतम् **एकायनगतम्** । एते वाच्यलिङ्गाः । अष्टावग्रस्थितज्ञातव्यस्य[७] । 'सन्मुखस्थवस्तुजहेनई[८] जाणवा जोग्य[९]' इति भाषा ॥

**अथाऽऽद्य[1]मादि[2]मम् ॥१४५८॥**

**पौरस्त्य[3]ं प्रथम[4]ं पूर्व[5]मादि[6]रग्र[7]म्**

१ आदौ भवम् **आद्यम्**। दिगादित्वाद् यत् । २ आदौ भवम् **आदिमम्** । 'आदेश्च[१०] मः'(वा-४।३।८॥) इति मः । ३ पुरो भवं **पौरस्त्यम्** । 'दक्षिणापश्चात्पुरसस्त्यक्[११]'४।२।९८॥ इति त्यक्, 'किति च'७।२।११८॥ इत्यादिवृद्धिः ॥१४५८॥ ४ प्रथतेऽनेन **प्रथमम्** । 'प्रथ प्रख्याने'(भ्वा.आ.से.), 'प्रथिचरेरमः'(चान्द्रोणा-२।९९॥)इत्यमः[१२] । ५ पूर्वति पूरयति **पूर्वम्** । 'पूर्व पर्व पूरणे[१३]'(भ्वा.प.से.), पचाद्यच् । ६ आदीयते प्रथमतया गृह्यत इति **आदिः** । आङ्पूर्वः 'डुदाञ् दाने'(जु.उ.अ.), 'उपसर्गे घोः किः'३।३।९२॥ इति किः । पुंस्ययम् । धर्मवृत्तित्वेऽप्यजहल्लिङ्गः, यथा- आदिर्गर्ग[१४]कुलम् । ७ अङ्गति **अग्रम्** । 'अगि गतौ[१५]'(भ्वा.प.से.), 'ऋज्रेन्द्राग्र-'(उणा-१८६)इत्यादिना[१६] साधुः । प्रागपि । सप्त आद्यस्य । 'पहिलो[१७]' इति भाषा ॥

**अथाऽन्तिमम्[1] ।**

**जघन्य[2]मन्त्य[3]ं चरम[4]मन्तः[5] पाश्चात्त्य[6]पश्चिमे[7] ॥१४५९॥**

१ 'अति अदि बन्धने'(भ्वा.प.से.) भौवादिकः[१८], घञ्, अच् वा । '' 'अन्तिमं चेति (अन्ताच्चेति) वक्तव्यम्'(वा-४।३।२३॥)इति शैषिको डिमच्''[मा.धातुवृत्तिः, भ्वादिः, धातुसं-५२]इति माधवः । ''अन्ते भवमन्तिमम्, 'अन्ताच्च-'(वा-४।३।२३॥)इतीमन्, 'यस्येति च'६।४।१४८॥ इत्यकारलोपः''[]इति रामचन्द्राचार्याः । २ जघने पश्चाद् भागे भवम्, जघनेऽधस्ताद् भवं वा **जघन्यम्** । दिगादित्वाद् यत्, 'शरीरावयवाच्च'४।३।५३॥ इति यद्वा। ३ अन्ते भवम् **अन्त्यम्** । दिगादित्वाद् यत् । ४ चरति करोत्यन्यतो व्यवच्छेदमिति **चरमम्** । 'चर गतौ' (भ्वा.प.से.), 'प्रथिचरेरमः[१९]'(चान्द्रोणा-२।९९)। चरिः करोत्यर्थोऽपि। यथा- धर्मं चरति धार्मिकः, यथा च[२०]- तच्चरति 'महानाम्न्यादिभ्यः-'(वा-५।१।९४॥)इत्यत्र महानाम्नीव्रतं चरति, आदित्यादिव्रतं चरति महानाम्निकः, आदित्यव्रतिकः[२१] । ५ अमति **अन्तः** । 'अम गतौ'(भ्वा.प.से.), 'हसिमृग्रिण्-'(उणा-३६६)इत्यादिना तन्[२२] । धर्मिवृत्तित्वेऽप्ययमस्त्रीलिङ्गः, यथा- ''कुलस्याऽन्तः प्रभुस्त्रियः'' [[२३]]इति। ६ पश्चाद् भवं **पाश्चात्त्यम्[२४]** । 'दक्षिणापश्चात्-'४।२।९८॥ इत्यादिना त्यक्, 'किति च'७।२।११८॥ ७ पश्चाद् भवं **पश्चिमम्** । 'अग्रा[दि]पश्चाड्डिमन्(-च्)' (वा-४।३।२३॥), 'अव्ययानां भमात्रे टिलोपः'(वा-७।३।४॥) । सप्त पाश्चात्त्यस्य[२५] । 'पाछिलो[२६]' इति भाषा ॥१४५९॥

**मध्यम[1]ं माध्यम[2]ं मध्यमीय[3]ं माध्यन्दिन[4]ं च तत् ।**

१ मध्ये भवं **मध्यमम्[२७]** । 'मध्यान्मः'४।३।८॥ इति मः । २ मध्यममेव **माध्यमम्** । प्रज्ञादित्वादण् । ३-४

---

१. 'श्रद्धानयति' इति३॥ २ 'तनु श्रद्धोपकरणयोः' इति क्षीरतरङ्गिण्यादयः ॥ ३ द्र. पदचन्द्रिका, भा-३, विशेष्यनिघ्नवर्गः, श्लो-७९, पृ७९॥ ४ 'अग्रम्' इति४.५॥ ५ '-त्याचचख्युः' इति१.२.४॥ ६ 'एका' इति१॥ ७ 'अष्टोऽग्र-' इति५॥ ८ ' नै' इति३, '-नइ' इति४, '-नैं' इति५॥ ९ 'यो-' इति१.२॥ १०. 'आदेश्चेति वक्तव्यम्' इति काशिकास्थपाठः, 'अग्रादिपश्चाड्डिमच्' इति सिद्धान्तकौमुद्याम् ॥ ११. '-त्यम्' इति५॥ १२. '-मरः' इति१॥ १३. 'पूर्व पर्व मर्व पूरणे' इति स्वामी, 'पुर्व पर्व मर्व पूर्तौ' इति मैत्रेयः 'पुर्व पर्व फर्व मर्व पूरणे' इति सायणः ॥ १४. 'आदिग-' इति१॥ १५. उखेत्यादिदण्डात्मकोऽयं धातुः ॥ १६. 'इति' इति१.३॥ १७. '-लउ' इति२.३, '-लौ' इति४॥ १८. 'भौ' इति१.२, इतोऽग्रे ३प्रतौ 'अतो' इति दृश्यते ॥ १९. 'चरेश्च'(उणा-७४७)इत्यत्रोणादिगणे ॥ २०. 'वा' इति१.२.३॥ २१. '-तीकः' इति३॥ २२. 'तत्' इति१॥ २३. द्र. अम.क्षीर.३।१।८१॥, पृ.२५३॥, स्वोपज्ञटीका ६।१४५९॥, पृ.३२६॥ २४ '-त्यम्' इति१.३.४॥ २५. '-त्यस्य' इति१.३॥ २६. '-लउ' इति२.३, '-लौ' इति४॥ २७ '-मः' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मध्यमीयम्**, **माध्यन्दिनम्** च । आध्यात्मादेराकृतिगणत्वात् साधू । चत्वारि मध्यमस्य । 'मांहिलउं'[३] इति भाषा ॥

## अभ्यन्तरमन्तरालं विचाले

१ अभ्यधिकमन्तरम् **अभ्यन्तरम्**। अन्तरं मध्यावकाशः, अभिगतमन्तरमभ्यन्तरं वा । २ अन्तरं लाति **अन्तरालम्** । कप्रत्यये, 'अन्येषामपि-'६।३।१३७॥ इति दीर्घः । यद्वा अन्तरमलत्यालाति वा । ३ विङ्क्ते[३] **विचालम्** । 'विचिर् पृथग्भावे'[४](रु.उ.अ.), ['चात्वाल-'(हैमोणा-४८०)इत्याले निपात्यते], तत्र । त्रीणि अभ्यन्तरस्य । 'विचाले'[५] इति भाषा ॥

## मध्यमन्तरे ॥१४६०॥

१ मव्यते **मध्यम्** । 'मव बन्धने'(भ्वा.प.से.), 'शिक्यास्य-'(हैमोणा-३६४)इति ये साधुः । २ अनिति **अन्तरम्**, पुंक्ली. । 'अन प्राणने'(अ.प.से.), 'अनिकाभ्यां तरः'(हैमोणा-४३७), तत्र । मध्यार्थोऽन्तरशब्दोऽत्र न सर्वादिकार्यभाक् । "तदन्तरे सा विरराज धेनुर्दिनक्षपामध्यगतेव सन्ध्या"[रघुवंशम्, सर्गः-२, श्लो-२०]इति रघुः । 'मांहि' इत्यादिभाषाया द्वे ॥१४६०॥

## तुल्यः समानः सदृक्षः सरूपः सदृशः समः । साधारणसधर्माणौ सवर्णः सन्निभः सदृक् ॥१४६१॥

१ 'तुल उन्माने'(चु.उ.से.), णिजन्तः, ततो भिदादित्वादङि, टापि, तुला । तुलया सम्मितः[६] **तुल्यः** । 'नौवयः-'४।४।९१॥ इति यत् । तुल्या सम्मितमिति व्युत्पत्तिमात्रं रूढशब्दस्त्वयं सदृशपर्यायः । २ समानं तुल्यं मानमस्य **समानः** । ३ समान इव दृश्यत इति **सदृक्षः** । 'दृशेः क्सः'(वा ३।२।६०॥)इति क्सः । ४ समानं रूपमस्य **सरूपः** । '-रूपनामगोत्र-'[९]६।३।८५॥ इत्यादिना समानस्य सादेशः । ५ समान इव दृश्यते[१०] **सदृशः** । 'त्यदादिषु दृशोऽनालोचने कञ्च'३।२।६०॥ । ६ समति **समः** । 'षम ष्टम वैक्लव्ये'[११](भ्वा.प.से.), पचाद्यचि[१२] । ७ समानमाधारणमस्य **साधारणम्** । सह आधारणेन वर्तत इति वा । 'वोपसर्जनस्य'६।३।८२॥ इति व्यवस्थितविभाषा[त्वात् सभावः] । ८ समानो धर्मोऽस्य **सधर्मा** । 'धर्मादनिच् केवलात्'५।४।१२४॥, 'रूपनामगोत्रस्थानवचनधर्मजातीयेषु वेति केचित्'( )इति समानस्य सादेशः[१३] । ९ समानो वर्णोऽस्य **सवर्णः** । १० सन्निभाति **सन्निभः** । ११ समान इव दृश्यत इति **सदृक्** । 'त्यदादिषु-'३।२।६०॥ इत्यादिना क्विन्, 'दृग्दृशवतुषु'६।३।८९॥ इत्यादिना सभावः । एकादश सदृशस्य ॥१४६१॥

## स्युरुत्तरपदे प्रख्यः प्रकारः प्रतिमो निभः । भूतरूपोपमाः काशः सं-नी-प्र-प्रतितः परः ॥१४६२॥

१ उत्तरपदे परपदे सति[१४] प्रख्याद्या एकादशशब्दाः सदृशस्य वाचकाः स्युरित्यन्वयः । प्रख्याति **प्रख्यः** । प्रपूर्वः 'ख्या प्रकथने'(अ.प.अ.), 'आतश्चोपसर्गे'३।१।१३६॥ इति कः । यथा- 'चन्द्रप्रख्यं मुखम्'[१५]इत्यादि[१६] । २ प्रकरणं **प्रकारः**[१७] । भावे घञ् । ३ प्रतिमाति **प्रतिमः** । 'मा माने'(अ.प.से.) । ४ नियतं भाति **निभः** । निपूर्वः 'भा दीप्तौ'(अ.प.अ.), उभयत्र 'आतश्चोपसर्गे कः'३।१।१३६॥ । ५ भवति स्म **भूतः** । ६ रूपयति **रूपम्** । 'रूप दर्शने'[१८](चु.उ.से.), चुरादिः, पचाद्यच् । ७ उपमीयतेऽनया[१९] **उपमा** । 'गुरोश्च हलः'३।३।१०३॥ इत्यङ् । ८-११ समादिभ्यश्चतुर्भ्य उपसर्गेभ्यः परः काशशब्दो योज्यः, तेन संकाशते **संकाशः** । 'काशृ शब्दे'[२०]( ), तालव्यान्तः, पचाद्यच् । संशब्दः समानार्थोऽत्र । नितरां काशते **नीकाशः** । 'इकः काशे'६।३।१२३॥ इति दीर्घः । प्रकाशते **प्रकाशः** । प्रतिकाशते **प्रतिकाशः** । 'इकः काशे'६।३।१२३॥ इति दीर्घः । चन्द्रेण प्रख्य इत्यादि व्यस्तं न भवति, समास एवोत्तरपदत्वस्य रूढेः । प्रख्यादय उत्तरपदस्था एव वाच्यलिङ्गाः स्युरिति पूर्वस्माद् विशेषः, यथा- पितृनिभः पुत्रः, मातृनिभा कन्या, [२१]दैवनिभं पापमिति ॥१४६२॥

---

१. 'मा-' इति१.२॥ २. '-लौ' इति४, '-लो' इति५॥ ३. 'विक्ते' इति३.४॥ ४ '-गे' इति५॥ ५ '-लइ' इति१.२, '-लः' इति३॥ ६. 'समितिः' इति३॥ ७ 'संमिति' इति१, 'समित-' इति४.५॥ ८ तुलनीया मा.धातुवृत्तिः, चुरादिः, धातुसं-५४, पृ.५४४॥ ९. '-नामगोत्ररूप-' इत्यष्टाध्याय्याम् ॥ १०. इतोऽग्रे १.२प्रत्योः 'इव' इति दृश्यते ॥ ११. 'अवैक्लव्ये' इति स्वामी ॥ १२. '-च्' इति१.२॥ १३. 'समानस्य-'६।३।८४॥ इति योगविभागेनाऽपि भाव्यम् ॥ १४ 'सन्तः' इति२॥ १५. द्र. स्वोपज्ञटीका६।१४६२॥, पृ.३२७॥ १६. 'इति' इति३॥ १७ 'प्रा-' इति१॥ १८. 'रूप रूपक्रियायाम्' इति क्षीरतरङ्गिण्यादयः ॥ १९. '-ऽनया' इति १प्रतौ नास्ति ॥ २०. शब्दार्थककाशृधातुः क्षीरतरङ्गिण्यादौ न दृश्यते ॥ २१. 'दे-' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**औपम्यमनुकारोऽनुहारः साम्यं तुलोपमा ।**

**कक्षोपमानम्**

१ उपमैव **औपम्यम्** । भेषजादित्वात्ष्यण्[1] । २ अनुकरणम् **अनुकारः** । ३ अनुहरणम् **अनुहारः** । ४ समस्य भावः **साम्यम्** । ५ तोलनं **तुला** । 'तुल उन्माने' (चु.उ.से.), भिदादित्वादङ् । ६ उपमानम् **उपमा** । 'गुरोश्च-'३।३।१०३॥ इत्यङ् । ७ कक्षणं **कक्षा**[2] । 'कक्ष-' ( ), भिदादित्वादङ् । ८ उपमितिः **उपमानम्** । 'मा माने'(अ.प.से.), भावे ल्युट् । अष्ट उपमायाः ॥

**अर्चा तु प्रतेर्मा यातना निधिः ॥१४६३॥**

**छाया छन्दः कायो रूपं बिम्बं मानकृती अपि ।**

१ अर्च्यतेऽसौ **अर्चा** । 'अर्च पूजायाम्'(भ्वा.प.से.), 'गुरोश्च-'३।३।१०३॥ इत्यकारः । **२-११** प्रतिशब्दात् परे माप्रभृतयः कृतिपर्यन्ता दशशब्दा योज्याः, तेन प्रतिमीयतेऽनया **प्रतिमा** । 'मा माने'(अ.प.से.), 'आतश्चोपसर्गे'[3]३।३।१०६॥ इत्यङ् । प्रतियात्यत उपस्क्रियते **प्रतियातना** । 'यत निकारोपस्कारयोः'[4](चु.उ.से.)इति चुरादिण्यन्ताद् युच्। एते त्रयः स्त्रीलिङ्गाः । प्रतिनिधीयते **प्रतिनिधिः,** पुंसि । 'उपसर्गे घोः किः'३।३।९२॥इति किः । मुख्यसदृशोऽर्थः ॥१४६३॥ प्रतिक्रियस्य छाया सादृश्यमत्र **प्रतिच्छाया** । प्रतिच्छन्द्यते[5] स्म **प्रतिच्छन्दः**। 'छदि संवरणे'(चु.उ.से.), णिजन्तः, घञ् । प्रतिरूपश्छन्दः प्रतिच्छन्द इति वा । प्रतिरूपः कायः **प्रतिकायः**। रूपेण सदृशं **प्रतिरूपम्** । सादृश्येऽर्थेऽव्ययीभावः । प्रतिनिधिबिम्बस्य **प्रतिबिम्बम्** । प्रतिबिम्ब्यत इति वा । प्रतिपूर्वः 'बिम्ब प्रतिमाने'[6]( ), घञ् । प्रतिमीयते सदृशीक्रियतेऽनेन **प्रतिमानम्** । करणे ल्युट् । प्रतिरूपं क्रियते **प्रतिकृतिः** । 'स्त्रियां क्तिन्'३।३।९४॥ । एकादश 'प्रतिबिम्ब' इति ख्यातस्य । "इमानि मूर्तिसदृशशिलादिप्रतिनिर्मितप्रतिरूपकस्य"[पदचन्द्रिका, भा-२, शूद्रवर्गः, श्लो-७१९]इति मिश्राः ॥

**सूर्मी स्थूणाऽयःप्रतिमा**[9]

१ सरति **सूर्मिः** । 'सृ गतौ'(भ्वा.प.अ.), 'सर्तेरूच्च-'(हैमोणा-६८९)इति मिः[10], 'कृदिकारात्-'(गणसू-४।१।४५॥)इति ङीषि **सूर्मी**[11] । तालव्यादिरप्ययम् । 'शॄ[12] गतौ'( ), 'ग्रीष्मजाल्मशूर्म-'[13]( )इति मप्रत्यये शूरादेशे च गौरादिङीषि[14] शूर्मी । शूर्मश्च (शूर्मिश्च) । "यामिगोसुरभिशूर्मयः"[15][ ]इति । शूर्मो[16]ऽदन्तोऽपीत्येके । "गौरादिपाठादेव निपातः"[ ]इत्यरुणदत्तः । २ तिष्ठति **स्थूणा** । 'रास्नासास्नास्थूणा-'(उणा-२९०)इति निपातनाद् णत्वोत्वे । "स्थूणा स्तम्भेऽथ(च) सूर्म्यां[18] च"[शाश्वतकोशः, श्लो-७२२]इति शाश्वतः । ३ अयोमयी प्रतिमा **अयःप्रतिमा** । त्रीणि लोहप्रतिमायाः ॥

**हरिणी स्याद्धिरण्मयी ॥१४६४॥**

१ हरति[19] मनो **हरिणी**। 'हृञ् हरणे'(भ्वा.उ.अ.), 'श्यास्त्याहृञ्विभ्य इनच्'(उणा-२०४)इतीनच्, 'जातेरस्त्रीविषयात्-'४।१।६३॥ इति ङीष्[20] । २ हिरण्यस्य विकारो **हिरण्मयी** । 'दाण्डिनायनहास्तिनायन-'६।४।१७४॥ इति साधुः, टित्त्वाद् ङीष्[20] । द्वे स्वर्णप्रतिमायाः ॥१४६४॥

**प्रतिकूलं तु विलोममपसव्यमपष्ठुरम् ।**

**वामं प्रसव्यं प्रतीपं प्रतिलोममपष्ठु च ॥१४६५॥**

१ प्रतीपं कूलात्[21] **प्रतिकूलम्** । २ लोमानि विपर्यस्यति विलोमयति, 'सत्यापपाश-'३।१।२५॥ इत्यादिना णिच्, विलोमयति **विलोमम्** । पचाद्यच् । ३ अपगतं[22] सव्याद् **अपसव्यम्** । ४ वमति[23] **वामम्** । 'टुवम[24] उद्गिरणे'(भ्वा.प.से.), ज्वलादित्वाण्णः, 'नोदात्तोपदेशस्य[25]-'७।३।३४॥ इति वृद्धिनिषेधस्य 'आचमि(अनाचमि) कमिवमीनाम्-'(वा-७।३।३४॥)इति निषेधः[26] । (सव्यशब्दो हि दूरान्तिकार्थाराच्छब्दवद्[27] वामदक्षिणार्थः[28])। ४ अपावृत्य तिष्ठति **अपष्ठुरम्** । पृषोदरादिः । अपष्ठुत्वं रातीति वा । 'आतोऽनुपसर्गे कः'३।२।३॥ । ५ प्रगतं[29] सव्यात्

---

१. '-दण्' इति४.५॥, हैममतेऽयं प्रतिभाति, पाणिनीयमते 'चतुर्वर्णादीनां स्वार्थ उपसङ्ख्यानम्'५।१।१२४॥ इति वार्तिकेन ष्यञ्प्रत्ययः ॥ २. 'कक्षणा' इति३॥ ३. इतोऽग्रे १प्रतौ 'क' इति दृश्यते ॥ ४. '-पतापयोः' इति३॥ ५. '-ति' इति५॥ ६. ४प्रतौ नास्ति ॥ ७. १.२.५प्रतिषु नास्ति॥ ८. पदचन्द्रिकायाम् 'इमानि' इत्यस्य स्थाने 'अष्टौ' इति दृश्यते ॥ ९. तुलनीयोऽमरकोषः२।१०।३५॥ १०. 'निः' इति३॥ ११. '-र्मीः' इति३॥ १२. 'सृ' इति२॥ १३. '-सूर्म-' इति५॥ १४. '-पि' इति३॥ १५. '-सू-' इति१.३॥ १६. द्र. पदचन्द्रिका, भा-२, शूद्रवर्गः, श्लो-७१८, पृ.८०८॥ १७. 'सू-' इति३॥ १८. 'शू-' इति३॥ १९. '-ते' इति४॥ २०. '-प्' इति३॥ २१. 'प्रतिकूलात्' इति३॥ २२. '-मतं' इति४॥ २३. 'वा-' इति१.२॥ २४. '-मु' इति१.४॥ २५. '-स्य-' इति ३प्रतौ नास्ति ॥ २६. वामशब्दस्य व्युत्पत्तिरपष्ठुरशब्दात् पश्चाद् युक्ता ॥ २७ 'शब्दाद्' इति४.५॥ २८. कोष्ठान्तर्गतपाठोऽपसव्यशब्दे युक्तः ॥, पाठश्चलितो वा ॥ २९. '-ते' इति१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**प्रसव्यम्** । ७ प्रत्यावृत्ता[१] आपोऽत्र **प्रतीपम्** । 'ऋक्पूरब्धू-'५।४।७४॥ इत्यः, 'द्व्यन्तरुपसर्गेभ्योऽप ईत्'६।३।९७॥ । ८ प्रतीपं लोमाऽत्र **प्रतिलोमम्** । '-प्रत्यव(न्व)पूर्वात् सामलोम्नः' ५।४।७५॥ इत्यच् । ९ अपतिष्ठति **अपष्ठु** । 'ष्ठा गतिनिवृत्तौ'(भ्वा.प.अ.), औणादिको डुन्प्रत्यः, [२]सुषामादित्वात् षत्वम् । एते सर्वेऽपि वाच्यलिङ्गाः । नव प्रतिकूलस्य । 'उपराठउ[३]' इति भाषा **॥१४६५॥**

## वामं[1] शरीरेऽङ्गं सव्यम्[2]

१ वम्यते **वामम्**। 'टुवम[४] उद्गिरणे'(भ्वा.प.से.), घञ् । २ सूयते **सव्यम्** । 'षू प्रसवे[५]'(तु.प.से.), 'अचो यत्'३।१।९७॥ इति यत् । "वामं सव्ये प्रतीपे च" [विश्वप्रकाशकोशः, मान्तवर्गः, श्लो-२२]इति महेश्वरः । द्वे वामाङ्गस्य[७] । 'डावों अंग' इति भाषा ॥

## अपसव्यं[1] तु दक्षिणम्[2] ।

१ शरीरेऽङ्गमित्येव, अपक्रान्तं सव्यम् **अपसव्यम्**। २ दक्षते **दक्षिणम्** । 'दक्ष शैघ्र्ये[९]'(भ्वा.आ.से.), 'द्रुदक्षिभ्यामिनन्[१०]'(उणा-२०८) । द्वे दक्षिणाङ्गस्य ॥

## अबाधोच्छृङ्खलोद्दामान्ययन्त्रितमनर्गलम् ॥१४६६॥

## निरङ्कुशे

१ नास्ति बाधा निषेधोऽस्त्यस्य[११] **अबाधम्** । २ उत्क्रान्तं शृङ्खलाद् **उच्छृङ्खलम्** । ३ उत्क्रान्तं दामाया **उद्दामम्** । अत्र दामाशब्दः स्त्रियां टाबन्तः, उभयत्र 'निरादयो निष्क्रान्ताद्यर्थे(क्रान्ताद्यर्थे) पञ्चम्या'(वा-२।२।१८॥)इति समासः । ४ [१२](न यन्त्रितम् **अयन्त्रितम्**) । 'यत्र बन्धने[१३]'(चु.उ.से.), क्तः, ततो नञा समासः । ५ नास्ति अर्गलाऽस्य **अनर्गलम्** । निरर्गलमपि । अर्गलाशब्दोऽत्र प्रतिरोधकार्थः[१४] **॥१४६६॥** ६ निष्क्रान्तमङ्कुशाद् **निरङ्कुशम्** । 'निरादयो निःक्रान्ताद्यर्थे(क्रान्ताद्यर्थे) पञ्चम्या'(वा-२।२।१८॥)इति समासः, तत्र । षडुच्छृङ्खलस्य । 'निर्मर्यादे[१५]' इति भाषा ॥

## स्फुटे[1] स्पष्टं[2] प्रकाशं[3] प्रकटोल्बणे[4][5] ।

## व्यक्तम्[6]

१ स्फुटति बहिःप्रकाशते[१६] **स्फुटम्** । 'स्फुट प्रकाशने[१७]'(तु.प.से.), 'इगुपध-'३।१।१३५॥ इति कः, तत्र । २ स्पश्यते[१८] गृह्यते **स्पष्टम्** । 'स्पश ग्रहण-श्लेषणयोः'(चु.आ.से.), क्तः। [१९]स्पास्यते वा स्पष्टः । 'स्पश बाधनस्पर्शनयोः'(भ्वा.उ.से.), णिजन्तः, क्तः, 'मितां ह्रस्वः'६।४।९२॥, 'निष्ठायां सेटि'६।४।५२॥ इति णिलोपः, 'वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः'७।२।२७॥ इति निपातः[२०] । ३ प्रकाशते **प्रकाशम्** । 'काशृ[२१] दीप्तौ'(भ्वा.आ.से.), पचाद्यच्। ४ **प्रकटम्**, 'सम्प्रोदश्च-'५।२।२९॥ इति कटच् । ५ उल्लीयते श्लिष्यति[२२] सम्बध्यते वा **उल्वणम्** । 'लीङ् श्लेषणे'(दि.आ.अ.), 'उल्वादयश्च' (उणा-५३५)इति वन्प्रत्यये निपातितम् । ६ व्यज्यते[२३] स्म **व्यक्तम्** । विपूर्वः 'अञ्जू म्रक्षणादौ'(रु.प.वे.), निष्ठा, 'चोः कुः'८।२।३०॥ । षट् **प्रकटस्य** ॥

## वर्तुलं[1] तु वृत्तं[2] निस्तलं[3] परिमण्डलम्[4] ॥१४६७॥

१ वर्तते भ्रमति **वर्तुलम्** । 'वृतु वर्तने'(भ्वा.आ.से.), बाहुलकाद् 'हृषेरुलच्'(उणा-९६)इत्युलच् । २ वर्तते **वृत्तम्,** पुंक्लीबलिङ्गः । वाच्यलिङ्गोऽयमित्यन्ये । ३ 'तल प्रतिष्ठायाम्'(चु.उ.से.), णिजन्तः, पचाद्यच्, 'संज्ञापूर्वको विधिरनित्यः'(परिभाषा-९५)इति वृद्ध्यभावः, तलम् । निर्गतं तलं प्रतिष्ठाऽस्य **निस्तलम्** । ४ परितः समन्ताद् मण्डलाकृतिरस्य **परिमण्डलम्** । चत्वारि वर्तुलस्य । 'गोल' इति भाषा **॥१४६७॥**

## बन्धुरं[1] तून्नतानतम्[2][२४]

१ बध्नाति गतिं **बन्धुरम्** । 'बन्ध बन्धने'(क्र्या.प.अ.), 'बन्धु(मद्गु)रादयश्च'(उणा-४१)इत्युरन्, 'मन्दिवाशि[२५]-'(उणा-३८)इत्यादिना बाहुलकादुरज् वा। "कण्ठ-

---

१. '-त्त्या' इति४॥ २. 'सुष-' इति१.२.४.५॥ ३. 'ऊ-' इति४॥ ४ '-ठ' इति३, '-ठौ' इति४॥ ५ '-मु' इति१.४॥ ६ 'प्रेरणे' इति क्षीरतरङ्गिण्यादयः ॥ ७ इतोऽग्रे १प्रतौ 'द्वे' वामाङ्ग' इति दृश्यते ॥ ८. '-वउं' इति२.५, '-वौ' इति४॥ ९ 'दक्ष वृद्धौ शीघ्रार्थे च' इति क्षीरतरङ्गिण्यादयः ॥ १०. '-मिन्' इति४.५॥ ११. '-धोऽस्य' इति१.२॥ १२. कोष्ठान्तर्गतपाठः १.४.५प्रतिषु नास्ति ॥ १३. 'यत्रि सङ्कोचे ('सङ्कोचने' इति मैत्रेयसायणौ)' इति क्षीरतरङ्गिण्यादयः ॥ १४ '-कोऽर्थः' इति३॥ १५. '-दा' इति५॥ १६. '-श्यते' इति४.५॥ १७. 'विकसने' इति क्षीरतरङ्गिण्यादयः ॥ १८. '-शते' इति१.४.५॥ १९. 'स्प-' इति३॥ २०. '-तितः' इति३॥ २१. 'कासृ' इति१.४॥ २२. '-षति' इति१.२.४.५॥ २३. '-जते' इति३॥ २४ तुलनीयोऽमरकोषः३।१।६९॥ २५. '-सि-' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्य तस्याः स्तनबन्धुरस्य मुक्ताकलापस्य च निस्तलस्य'' [कुमारसम्भवम्, सर्गः-१, श्लो-४२]इति कुमारसम्भवः । ''बन्धूरबन्धुरौ रम्ये नम्ने (नम्रे) हंसे तु बन्धुरः''[[१]]इति रभसः । २ उन्नतं च तदुपाधिवशादीषन्नतम् **उन्नतानतम्** । द्वे उन्नतानतस्य । 'ढाल' इति भाषा ॥

**स्थपुटं विषमोन्नतम् ।**

१ तिष्ठति **स्थपुटम्**, पृषोदरादिः । २ विषमं च तदुन्नतं च **विषमोन्नतम्** । ''निष्कन्दामरविन्दिनीं[2] स्थपुटितोद्देशाङ्कशेरुस्थलीम्''[ ]इति खण्डप्रशस्तिः । द्वे 'अखडवखडा' इति ख्यातस्य ॥

**अन्यदन्यतरद् भिन्नं त्वमेकमितरश्च तत् ॥१४६८॥**

१ अनिति **अन्यत्**। २ बहूनां मध्येऽन्यद् **अन्यतरत्** । ३ भिद्यते **भिन्नम्** । निष्ठान्तः । ४ त्वक्षति[3] **त्वम्** । 'त्वक्ष (त्वक्षू) तनूकरणे[4]'(भ्वा.प.वे.), 'अन्येभ्योऽपि-'( )इति डः। वृत्तौ त्वत्वच्छब्दौ सर्वादिष्वन्यार्थौ । ५ एति **एकम्**। 'इण् गतौ'(अ.प.अ.), 'इण्भीका-'(उणा-३२३)इत्यादिना कन् । यथा- ''इत्येके मन्यन्ते[5]''[कौ. सू.२१७]इति । ''प्रधानान्यासहायेषु सङ्ख्यायां चैक इष्यते''[[५]]इति कात्यः । ६ एति **इतरः**[6]। 'इण् गतौ'(अ.प.अ.), 'इण्पूभ्यां कित्'(हैमोणा-४३८) इति तरः[7], 'अद्ड् डतरादिभ्यः पञ्चभ्यः'७।१।२५॥ इत्यद्ड् । एते भिन्नादन्ये सर्वनामसंज्ञाः वाच्यलिङ्गाः । षडन्यस्य । 'अनेरा' इति भाषा ॥१४६८॥

**करम्बः कबरो मिश्रः सम्पृक्तः खचितः समाः[8] ।**

१ क्रियते **करम्बः** । 'डुकृञ् करणे'(त.उ.अ.), 'कृ अश्च'(दशपाद्युणा-७।१७॥)इत्यम्बच् । २ कूयते **कबरः** । ३ मिश्यते **मिश्रः** । 'मिश शब्दे[9]'(भ्वा.प.से.), 'स्फायितञ्चि-'(उणा-१७०)इति बाहुलकाद् रक् । ४ सम्पृच्यते **सम्पृक्तः** । 'पृची सम्पर्के'(रु.प.से.), क्तः । ५ खच्यते **खचितः** । 'खच बन्धने[10]'(भ्वा.आ.से.), कवर्गद्वितीयादिः, 'निष्ठा'३।२।१०२॥ इति क्तः । पञ्च मिश्रस्य । 'भेलउ[11]' इति भाषा ॥

**विविधस्तु बहुविधो नानारूपः पृथग्विधः[12] ॥१४६९॥**

१ विचित्रो विधः प्रकारोऽस्य **विविधिः** । २ बहु पृथक् च[13] विधोऽस्य **बहुविधः** । ३ नाना अनेकप्रकारं रूपमस्त्यस्य[14] **नानारूपः**। ४ पृथग् विधोऽस्य **पृथग्विधः** । बहुरूप-पृथग्रूप-नानाविधा अपि । चत्वारि बहुविधस्य ॥१४६९॥

**त्वरितं सत्वरं तूर्णं शीघ्रं क्षिप्रं द्रुतं लघु ।**

**चपलाविलम्बिते च**

१ त्वरते स्म **त्वरितम्** । 'ञित्वरा सम्भ्रमे'(भ्वा. प.से.), क्तः । २ सह त्वरया वर्तते **सत्वरम्** । ३ त्वरते **तूर्णम्** । 'ञित्वरा सम्भ्रमे'(भ्वा.प.से.), 'निष्ठा' ३।२।१०२॥ इति क्तः, 'रुष्यमत्वरसंघुषास्वनाम्'७।२। २८॥ इतीडभावः, 'ज्वरत्वरस्रि[15]व्यविमवामुपधायाश्च'६।४।२०॥ इति वकारस्योठ्, 'रदाभ्याम्-'८।२।४२॥ इति नत्वम्, [16]('रषाभ्याम्-'८।४।१॥ इति णत्वम्) । ४ शिङ्घति व्याप्नोति **शीघ्रम्** । 'शिघि आघ्राणे'(भ्वा.प.से.), 'शीघ्रादयश्च'( )इति रक्। ५ क्षिपति **क्षिप्रम्** । 'क्षिप प्रेरणे' (तु.उ.अ.), 'स्फायितञ्चि-'(उणा-१७०)इत्यादिना रक्, 'ऋज्रेन्द्र-'(उणा-१८६)इत्यादिना वा रक् । ६ द्रवति **द्रुतम्** । 'द्रु गतौ' (भ्वा.प.अ.), निष्ठा। ७ लङ्घते **लघु** । 'लघि गतौ[17]'(भ्वा.आ.से.), 'लङ्घिबंह्योर्नलोपश्च' (उणा-२९)इति कुः। ८ चपति **चपलम्**। 'चप सान्त्वने' (भ्वा.प.से.), वृषादित्वात् कलच् । 'चुप मन्दायां गतौ' (भ्वा.प.से.), 'चुपेरच्चोपधायाः'(उणा-१०८)इति कलप्रत्यये वा। ९ न विलम्बितम् **अविलम्बितम्** । एते धर्ममात्रे

---

१. द्र. टीकासर्वस्वम्, भा-४, ३।१।६७॥, पृ.३३॥, तत्र-''बन्धुरं बन्धुरे रम्ये नदे हंसे तु बन्धु(रम्? रः)'' इति दृश्यते ॥, पदचन्द्रिका, भा-३, विशेष्यनिघ्नवर्गः, श्लो-६९, पृ.६९॥, रामाश्रमी३।१।६९॥, पृ.५०२॥ २. '-न्दनी' इति१, '-न्दनीं' इति३॥ ३. '-क्षिति' इति५॥ ४. 'तक्षू त्वक्षू तनूकरणे' इति क्षीरतरङ्गिण्यादयः ॥ ५. द्र. अम.क्षीर.३।१।८३॥, पृ.२५३॥, स्वोपज्ञटीका६।१४६८॥, पृ.३२८॥ ६. '-रत्' इति३॥ ७. 'इतरः' इति३॥ ८. '-माम्' इति४॥ ९. 'मिश मश शब्दे रोषकृते च' इति क्षीरतरङ्गिण्यादयः ॥ १०. 'कच बन्धने' इत्यत्र स्वामिनोक्तम्- ''खच इति लौकिकोऽस्ति'' इति, क्षीर. पृ.३७॥ ११. '-लौ' इति३.४॥ १२. तुलनीयोऽमरकोषः३।१।९३॥ १३. ५प्रतौ नास्ति ॥ १४. '-मस्य' इति इति१.२॥ १५. '-श्रि-' इति१.२.४.५॥ १६. कोष्ठान्तर्गतपाठः २प्रतौ नास्ति ॥ १७. 'ककि' इत्यादिदण्डात्मकोऽयं धातुः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्लीबे गुणवृत्तौ वाच्यलिङ्गाः। अरमाशु मङ्क्षु चाऽव्ययकाण्डे वक्ष्यते (श्लो-६।१५३०) । नव त्वरितस्य[१] । '[२]ऊतावलि' इति भाषा॥

**झम्पा सम्पातपाटवम् ॥१४७०॥**

१ झर्मति[३] **झम्पा** । 'झमु अदने'(भ्वा.प.से.), बाहुलकात् पः, स्त्रीलिङ्गोऽयम्, "पुंस्यपि"[ ]इत्यन्ये[४] । यदाहुः- "झम्पः सम्पातपाटवम्"[[५]]इति । २ सम्पतनं सम्पातः । सम्पाते पाटवं **सम्पातपाटवम्** । द्वे उच्चान्नीचैः पतनस्य । 'झांप' इति भाषा ॥१४७०॥

**अनारतं त्वविरतं संसक्तं सततानिशे ।**
**नित्यानवरताजस्त्रासक्ताश्रान्तानि सन्ततम् ।१४७१।**

१ आङ्पूर्वो [६]रमिर्विरामे वर्तते । तदुक्तम्- "आरतविरताऽवरतशब्दा [७]विरामार्थाः"[[८]] । अविद्यमानमारतमस्मिन्निति **अनारतम्** । २ नास्ति [९]विरतमस्येति **अविरतम्**। ३ [१०]संसजति स्म **संसक्तम्** । 'षञ्ज सङ्गे' (भ्वा.प.अ.), क्तः । ४.११ संतन्यत इति **सततम्** । सम्पूर्वः 'तनु विस्तारे'(त.उ.से.), भावे क्तः, 'अनुदात्तोपदेशस्य-'६।४।३७॥ इति न्लोपः, 'समो वा हिततयोः' (वा-६।१।१४४॥)इति वा [१०]म्लोपः । [१०]म्लोपाभावपक्षे **सन्ततम्** अपि । ५ निशाव्यापारशून्यत्वमुपचारात्, तद्रहितम् **अनिशम्** । "नास्ति निशाप्रायो व्यवच्छेदकः[११] कालोऽस्येत्यनिशम्"[टीकासर्वस्वम् १।१।६५॥]इति तु[१२] सर्वानन्दः[१३]। ६ नियो भवमित्यर्थे नियतार्थाद् निशब्दात् 'त्यब्नेर्ध्रुवः'(वा-४।२।१०४॥)इति त्यप्, [**नित्यम्**]। ७ नाऽस्त्यवरतमस्य **अनवरतम्**। ८ न जस्यतीत्येवंशीलम् **अजस्त्रम्** । 'जसु हिंसायाम्[१४]'(दि.प.से.), दन्त्यसः, 'नमिकम्पि' ३।२।१६७॥ इत्यादिना रः । सततमजस्त्र[१५]शब्दावव्ययावपि नित्यपर्यायौ स्तः । "शश्वदभीक्ष्णं नित्यं सदा सततमजस्त्रमिति सातत्ये"[ ]इत्यव्ययप्रकरणे आपिशलेः । ९ न सजति स्म **असक्तम्** । १० न श्राम्यति स्म **अश्रान्तम्** । 'श्रमु तपसि खेदे च'(दि.प.से.), निष्ठा, 'अनुनासिकस्य'६।४।१५॥ इति दीर्घः । एकादश निरन्तरक्रियाकरणस्य ॥१४७१॥

**साधारणं तु सामान्यम्[१६]**

१ समानमाधारणेन वर्तते **साधारणम्** । 'अन्येषामपि-'६।३।१३७॥ इति दीर्घत्वे[१७] वा । पूर्वं 'सदृक्, साधारणम्'(श्लो-६।१४६१॥)इत्युक्तम्[१८], इदानीं तु यदेकमनेकसम्बन्धि, तत् साधारणशब्देनोच्यते । बह्वादित्वाद् ङीषि साधारणी साधारणा च । २ समानमेव **सामान्यम्** । स्वार्थे ष्यञ्। जातौ तु भावकर्मणोः ष्यञि सामान्यम्, क्लीबमेव । द्वे साधारणस्य ॥

**दृढसन्धिस्तु संहतम्[१९] ।**

१ दृढः सन्धिः सन्धानं संघट्टनमस्य **दृढसन्धिः**। २ संहन्यते स्म **संहतम्** । 'हन्(हन) हिंसागत्योः'(अ.प.अ.), क्तः । "[२०]संहतमच्छिद्रम्[२१]"[अम.क्षीर.३।१।७६॥] इति क्षीरस्वामी । वाच्यलिङ्गौ द्वावपि । द्वे दृढसन्धिवस्तुनः । '[२२]छेक रहित' इति भाषा ॥

**कलिलं गहने**

१ कल्यते क्षिप्यतेऽत्राऽन्यत् **कलिलम्** । 'कल उत्क्षेपे'( ), 'कल शब्दसङ्ख्यानयोः'(भ्वा.आ.से.), वा, 'सलिकलि-'(उणा-५४)इतीलच् । २ दुष्प्रवेशत्वाद् दुरधिगमान्तःपातं[२३] **गहनम्** । यथा- "गहनं शास्त्रम्, दुरधिगमार्थमित्यर्थः, तत्र । गहनं गह्वरे दुःखे विपिने कलिलेऽपि च"[विश्वप्रकाशकोशः, नान्तवर्गः श्लो-३३]इति महेश्वरः । "कलिलमाकीर्णम्, तत्र, यथा- 'शार्दूलगहनं वनम्'[ ]" इति तट्टीका । द्वे गहनस्य ॥

**सङ्कीर्णं तु सङ्कुलमाकुलम् ॥१४७२॥**
**कीर्णमाकीर्णं च**

---

१. 'तत्परस्य' इति३॥ २. 'उ-' इति३॥ ३. 'झम्पति' इति४.५॥ ४. 'झम्पा' इति१॥ ५. द्र. स्वोपज्ञटीका६।१४७०॥, पृ.३२९॥ ६. 'रमितिर्वि-' इति३॥ ७ 'विर-' इति४॥ ८ द्र. अम.क्षीर.१।१।६५॥, पृ.२०॥ ९ 'विरति-' इति३.४॥ १०. 'म-' इति३॥ ११. '-करः' इति टीकासर्वस्वे, १।१।६५॥, पृ.४८॥ १२. १प्रतौ नास्ति ॥ १३. द्र. पदचन्द्रिका, भा-१, श्लो-६०, पृ.८६॥ १४ 'जसु मोक्षणे' इति क्षीरतरङ्गिण्यादयः ॥ १५. '-स्त्र-' इति३॥ १६. तुलनीयोऽमरकोषः३।१।८२॥ १७ '-त्वं' इति१.२.३॥ १८. '-क्तः' इति३॥ १९. तुलनीयोऽमरकोषः३।१।७५॥ २०. 'संहि-' इति३, 'संहन-' इति५॥ २१. मुद्रितामरकोशक्षीरस्वामिकृतटीकायाम्- "संहतोऽच्छिद्रः" इति दृश्यते॥ २२. 'वेझ' इति१.२॥ २३. '-न्तपातं' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ सङ्कीर्यते स्म **सङ्कीर्णम्** । 'कॄ विक्षेपे'(तु.प.से.), निष्ठा, 'ॠत इद्धातोः'७।१।१००॥, 'उरण् रपरः' १।१।५१॥, 'हलि च'८।२।७७॥ इति दीर्घः, 'रदाभ्याम्-' ८।२।४२॥ इति नत्वम्, तत्र। २ सङ्कोलति निरन्तरीभवति **सङ्कुलम्** । 'कुल संस्त्याने'[1](भ्वा.प.से.), इगुपधत्वात्[2] कः । ''शकिधातोरुलचि शङ्कुलम्, तालव्यादि''[ ]इति स्वामी । [३ आकोलति **आकुलम्**] ॥१४७२॥ ४-५ कीर्यते **कीर्णम्,** आकीर्यते **आकीर्णम्** । उभयत्र 'कॄ विक्षेपे'(तु.प.से.), निष्ठा, 'श्र्युकः किति'७।२।११॥ इतीण्निषेधादित्वरपरत्वदीर्घत्वेषु च निष्ठानत्वम्[3] । ''एते पञ्च कलिलगहनाभ्यामेकार्थाः''[ ]इत्येके[4] । पञ्च सङ्कीर्णस्य । 'निरन्तर व्याप्त' इति भाषा ॥

**पूर्णे त्वाचितं छन्नपूरिते ।**
**भरितं निचितं व्याप्तम्**

१ पूर्यते स्म **पूर्णम्** । 'पूरी आप्यायने'(दि.आ.से.), णिच्, क्तः, 'वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः' ७।२।२७॥ इति साधुः, तत्र । २ आचीयते स्म **आचितम्**। 'चिञ् चयने'(स्वा.उ.अ.), क्तः। ३ छाद्यते स्म **छन्नम्**। 'छद अपवारणे'(चु.उ.से.), 'वा दान्तशान्त-' ७।२।२७॥ इत्यादिना साधुः । छादितमपि। ४ पूर्यते स्म **पूरितम्** । 'पूरी आप्यायने'(दि.आ.से.), क्तः, 'आर्धधातुकस्य-'७।२।३५॥ इतीट् । ५ भरः सञ्जातोऽस्य **भरितम्**। तारकादित्वादितच् । ६ निचीयते स्म **निचितम्** । ७ व्याप्यते स्म **व्याप्तम्** । व्याङ्पूर्वः 'आप्लृ व्याप्तौ'(स्वा.प.अ.), क्तः । सप्त पूर्णस्य । 'भरिउं[5]' इति भाषा ॥

**प्रत्याख्याते निराकृतम् ॥१४७३॥**
**प्रत्यादिष्टं प्रतिक्षिप्तमपविद्धं निरस्तवत् ।**

१ प्रत्याख्यायते स्म **प्रत्याख्यातम्**[6] । प्रत्याङ्पूर्वः 'ख्या प्रकथने'(अ.प.अ.), क्तः, तत्र । २ निराक्रियते स्म **निराकृतम्** ॥१४७३॥ ३ प्रत्यादिश्यते स्म **प्रत्यादिष्टम्** । 'दिश अतिसर्जने'(तु.उ.अ.), क्तः, व्रश्चादिना षत्वम्, ष्टुत्वम्[7] । ४ प्रतिक्षिप्यते स्म **प्रतिक्षिप्तम्** । ''प्रतिक्षिप्तं प्रतिहते प्रेषिते च निराकृते''[विश्वप्रकाशकोशः, तान्तवर्गः, श्लो-२०५]इति महेश्वरः । प्रतिहते निराकृते च, यथा- ''प्रतिक्षिप्तोऽपि हि खलो न शान्तिमवलम्बते''[8][ ]इति । ५ अपविध्यते स्म **अपविद्धम्** । अपपूर्वः 'व्यध ताडने'(दि.प.अ.), 'ग्रहिज्यावयिव्यधिवष्टि-'६।१।१६॥ इत्यादिना सम्प्रसारणम्, 'झषस्तथोः-' ८।२।४०॥ इति धत्वम्, 'झलां जश् झशि'८।४।५३॥ । निरस्यते स्म **निरस्तम्** । 'असु क्षेपणे'(दि.प.से.), क्तः । षड् निराकृतस्य । 'निषेधियाँ[9]' इति भाषा ॥

**परिक्षिप्ते वलयितं निवृतं[10] परिवेष्टितम् ॥१४७४॥**
**परिष्कृतं परीतं च**

१ परिक्षिप्यते समन्ताद् द्वेष्ट्यते स्म **परिक्षिप्तम्,** तत्र । २ वलयः सञ्जातोऽस्य **वलयितम्** । तारकादित्वादितच्[11] । ३ नितरां व्रियते स्म **निवृतम्**[10] । [12]निपूर्वः 'वृञ् वरणे'(स्वा.उ.से.), क्तः, अत्र रेफवर्जितो न्युपसर्गः । ४ परिवेष्ट्यते स्म **परिवेष्टितम्** । 'वेष्ट वेष्टने'(भ्वा.आ.से.), चुरादिः, णिजन्तः, क्तः, 'आर्धधातुकस्य-'७।२।३५॥ इतीट् ॥१४७४॥ ५ परिक्रियते स्म **परिष्कृतम्** । 'सम्पर्युपेभ्यः[13] करोतेर्भूषणे (करोतौ भूषणे)'६।१।१३७॥ सुट् । ६ पर्येति **परीतम्** । परिपूर्वः 'इण् गतौ'(अ.प.अ.), क्तः । षड् वेष्टितस्य । 'वींटिउं[14]' इति भाषा ॥

**त्यक्तं तूच्छिष्टमुज्झितम् ।**
**धूतं हीनं विधूतं च**

१ त्यज्यते स्म **त्यक्तम्** । 'त्यज हानौ'(भ्वा.प.अ.), क्तः, 'चोः कुः'८।२।३०॥ । २ उच्छिश्यते स्म **उच्छिष्टम्** । उत्पूर्वः 'शिष्लृ विशेषणे'(रु.प.अ.), क्तः । उत्सृष्टम्, दन्त्यसमध्यमपि, तदा 'सृज वसर्गे'(दि.आ.अ., तु.प.अ.), क्तः। ३ उज्झ्यते[15] स्म **उज्झितम्,** पञ्चमस्वरादिः । 'उज्झ हानौ[16]'(तु.प.से.), क्तः । ४ धूयते स्म **धूतम्** । 'धूञ् कम्पने'(स्वा.उ.अ.), क्तः । ५ हायते

---

१. 'कुल संस्त्याने('सन्ताने') बन्धुषु च' इति क्षीरतरङ्गिण्यादयः ॥ २. '-धात्' इति३.५॥ ३.'-णत्वम्' इति३॥ ४ १प्रतौ नास्ति ॥ ५. '-उ' इति१.३, '-यौ' इति४॥ ६ 'प्रख्या-' इति४॥ ७ इतोऽग्रे १प्रतौ 'च' इति दृश्यते ॥ ८. द्र. अनेकार्थकैरवाकरकौमुदीटीका, भा-२, ४।११५॥, पृ.३४९॥ ९. '-धीया' इति३॥ १०. '-त्तं' इति३.५॥ ११. 'तारकत्वा-' इति३॥ १२. 'निर्पू-' इति५॥ १३. काशिकासम्मतपाठः, भाष्यवार्तिकानुसारेण 'सम्परिभ्याम्-' इति॥ १४. '-उं' इति५, '-यौ' इति४॥ १५. '-झते' इति१.३॥ १६. 'उज्झ उत्सर्गे' क्षीरतरङ्गिण्यादयः॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्म **हीनम्**। 'ओहाक् त्यागे'(जु.प.अ.), क्तः, 'घुमास्थागापाजहातिसां हलि'६।४।६६॥ इतीत्वम् । ६ धुः सौत्रः, विधूयते **विधुतम्**, पञ्चमस्वरमध्यम् । षट् त्यक्तस्य ॥

**विन्नं वित्तं विचारिते ॥१४७५॥**

१-२ विद्यते **विन्नम्** । 'विद विचारणे'(रु.आ.अ.), क्तः, 'नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम्'८।२।५५॥ इति वैकल्पिको दः(नः)। दत्वाभावे (नत्वाभावे) **वित्तम्**। ३ विचार्यते **विचारितम्**। 'चर गतौ'(भ्वा.प.से.), णिजन्तः, क्तः, तत्र। त्रीणि विचारितस्य ॥१४७५॥

**अवकीर्णे त्ववध्वस्तम्**

१ अवकीर्यते स्म **अवकीर्णम्** । अवपूर्वः 'कॄ विक्षेपे'(तु.प.से.), 'ॠत इद्धातोः'७।१।१००॥, 'हलि च' ८।२।७७॥ इति दीर्घः, 'रदाभ्याम्-'८।२।४२॥ इति नत्वम्, तत्र। २ अवध्वस्यते स्म **अवध्वस्तम्**। अवपूर्वः 'ध्वंसु अधःपतने[1]'(भ्वा.आ.से.), क्तः, 'अनिदिताम्-'६।४।२४॥ इति न्लोपः । द्वे 'विखेरिया' इति ख्यातस्य ॥

**संवीते रुद्धमावृतम् ।**
**संवृतं पिहितं छन्नं स्थगितं चा[2]ऽपवारितम्॥१४७६।**
**अन्तर्हितं तिरोहितम्**

१ संवीयते स्म **संवीतम्** । संपूर्वः 'व्येञ् संवरणे[3]'(भ्वा.उ.अ.), क्तः, 'ग्रहिज्या-'६।१।१६॥ इति सम्प्रसारणम्, तत्र । २ रुध्यते स्म **रुद्धम्** । रुधेः क्तः । ३ आव्रियते स्म **आवृतम्** । 'वृञ् वरणे'(स्वा.उ.से.), क्तः । ४ एवं **संवृतम्**। ५ अपिधीयते स्म **पिहितम्** । अपिपूर्वाद् दधातेः क्तः, 'दधातेर्हिः'७।४।४२॥, 'वष्टि भागुरिः' [ ]अनेनाऽपेरकारलोपः । ६ छाद्यते **छन्नम्** । 'छद अपवारणे'(चु.उ.से.), णिजन्तः, 'वा दान्तशान्त-'७।२।२७॥ इत्यादिना साधुः । पक्षे छादितमपि । ७ स्थग्यते **स्थगितम्** । 'स्थग अपवारणे[4]'( ), क्तः । ८ अपवार्यते **अपवारितम्** । 'वृञ् आच्छादने[5]'(चु.उ.से.), णिजन्तः[6], ततः क्तः॥१४७६॥ ९ अन्तर्धत्ते स्म **अन्तर्हितम्** । धाञः क्तः, 'दधातेर्हिः'७।४।४२॥ इति हिः। १० एवं तिरोधत्ते स्म **तिरोहितम्**। दश संवीतस्य । 'ढांकिउं[7]' इति भाषा॥

**अन्तर्धिस्त्वपवारणम् ।**
**छदनं व्यवधान्तर्धापिधानस्थगनानि च ॥१४७७॥**
**व्यवधानं तिरोधानम्**

१ अन्तर्धानम् **अन्तर्धिः**, पुंसि । अन्तर्पूर्वः[8] 'डुधाञ् धारणे'(जु.उ.अ.), 'उपसर्गे घोः किः'३।३।९२॥, 'आतो लोप इटि च'६।४।६४॥ इत्यालोपः, 'अन्तरपरिग्रह'१।४।६५॥ इति गतित्वे 'कुगतिप्रादयः'२।२।१८॥ इति समासः । २ अपवार्यते **अपवारणम्** । 'वृञ् आच्छादने[9]'(चु.उ.से.), चुरादिणिजन्ताद् ल्युट् । ३ छाद्यते **छदनम्** । 'छद अपवारणे'(चु.उ.से.), णिजन्तः, ल्युट्, 'छादेर्घेऽद्व्युपसर्गस्य'६।४।९६॥ इति [योगविभागाद्] ह्रस्वत्वम् । ४ व्यवधानं **व्यवधा** । व्यवपूर्वाद् दधातेः 'आतश्चोपसर्गे'३।३।१०६॥ इत्यङ्, [टाप्] । ५ एवं [**अन्तर्धा** । अङ्, टाप् । ६ पिधीयते **पिधानम्** । ७ स्थग्यते **स्थगनम्** ॥१४७७॥ ८ व्यवधीयते **व्यवधानम्** । सर्वत्र ल्युट्]। ९ तिरोधीयते **तिरोधानम्** । नव अन्तर्धेः । 'ढांकण' इति भाषा ॥

**दर्शितं तु प्रकाशितम् ।**
**आविष्कृतं प्रकटितम्**

१ दर्श्यते स्म **दर्शितम्** । दृशेर्णिजन्तात् क्तः । २ प्रकाश्यते स्म **प्रकाशितम्** । 'काशृ दीप्तौ'(भ्वा.दि.आ.से.), णिजन्तः, क्तः । ३ आविष्क्रियते स्म **आविष्कृतम्** । प्रादुष्कृतमपि । ४ प्रकट्यते स्म **प्रकटितम्** । 'कटे वर्षावरणयोः'(भ्वा.प.से.), क्तः । चत्वारि प्रकटीकृतस्य ॥

**उच्चण्डं त्ववलम्बितम् ॥१४७८॥**

१ उच्चण्डते **उच्चण्डम्** । 'चण्ड बहिःकोपे[10]' ( ), पचाद्यच् । केचित्तु- "उच्चण्डं जानुलम्बि च"[[11]]

१. 'स्रन्सु ध्वन्सु भ्रन्शु अवस्रंशने' इति स्वामी, 'स्रन्सु भ्रन्शु ध्वन्सु अधःपतने, अवस्रंसने च' इति मैत्रेयः, 'स्रंसु ध्वंसु भ्रंसु अवस्रंसने' इति सायणः॥ २. 'चापि-' इति४॥ ३ 'सम्प्रसारणे' इति१॥ ४ 'ह्वगे ह्लगे ष्ठगे स्थगे संवरणे' इति स्वामी, 'ह्वगे ह्लगे षगे ष्ठगे ('ष्टगे' इति सायणमते) संवरणे' इति मैत्रेयसायणौ ॥ ५ 'आवरणे' इति क्षीरतरङ्गिण्यादयः ॥ ६ इतोऽग्रे १.२.४प्रतिषु 'वा' इति दृश्यते ॥ ७. '-उ' इति१, '-यउ' इति३॥ ८ 'अन्तःपू-' इति५॥ ९ इतोऽग्रे ४.५प्रत्योः 'वृञ् वरणे' इति दृश्यते ॥ १०. 'चडि कोपे' इति क्षीरतरङ्गिण्यादयः॥ ११. द्र. अम.क्षीर.३।१।८३॥, पृ.२५३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति पेठुः । २ अवलम्बते[1] स्म **अवलम्बितम्** । 'लबि अवस्रंसने'[2] (भ्वा.आ.से.), क्तः । "अवलम्बनम्" [अम. क्षीर.३।१।८३॥] इति स्वामी । "केचित्तु- अविलम्बित- मित्याशुकार्यमाहुः । "उच्चण्डमुत्तालमिति हि सभ्याः" [अम.क्षीर.३।१।८३॥] इति क्षीरस्वामी । द्वे शीघ्रकार्यकरण- स्य ॥१४७८॥

**अनादृतमवाद् [1]ज्ञातं [2]मानितं [3]गणितं [4]मतम् [5]।**

१ न आद्रियते स्म **अनादृतम्**। आङ्पूर्वः 'दृ (दृङ्) आदरे'(तु.आ.अ.), क्तः । २-५ अवशब्दात् परे ज्ञातादयश्चत्वारः[4], तेन अवज्ञायते स्म **अवज्ञातम्** । अव- मान्यते स्म **अवमानितम्**[5] । अवगण्यते **अवगणितम्**। 'गण सङ्ख्याने'(चु.उ.से.), चुरादिः । अवमन्यते **अव- मतम्** 'मनु(मन) ज्ञाने'(दि.आ.अ.), निष्ठा, 'अनुदात्तो- पदेश-'६।४।३७॥ इत्यनुनासिकलोपः । पञ्च अनादृतस्य । 'अवगणिउ'[6] इति भाषा ॥

**[1]रीढा[2]ऽवज्ञा[3]ऽवहेलान्य[4]सूर्क्षणं चाऽप्य[5]नादरे॥१४७९॥**

१ रेहणं **रीढा** । 'रिह कत्थनादौ'[7](तु.प.से.), निष्ठा, 'हो ढः'८।२।३१॥, 'झषस्तथो:-'८।२।४०॥ इति धत्वम्, 'ढो ढे लोपः'८।३।१३॥, 'ढ्रलोपे-'६।३।१११॥ इति दीर्घत्वम्, स्त्रीत्वं लोकात् । २ अवज्ञानम् **अवज्ञा** । 'आतश्चोपसर्गे'३।३।१०६॥ इत्यङ् । ३ अवहेलनम् **अव- हेला (अवहेलम्)** । 'हेडृ अनादरे'(भ्वा.आ.से.), घञर्थे कः, डलयोरेकत्वस्मरणम्, त्रिलिङ्गोऽयम् । ४ न सूर्क्ष्यते **असूर्क्षणम्** । 'सूर्क्ष आदरे'[8](भ्वा.प.से.), ल्युट्, रेफ- मध्योऽयम् । न[9] सुष्ठु उक्षणमसूक्षणमिति लक्षणया- ऽवज्ञा गम्यते । यद्वा धातूनामनेकार्थत्वादसूनामुक्षणं तापो यत्र तदसूक्षणम्, नीरेफम्, दन्त्यसम्, दीर्घमध्यमपि । "न विद्यते शोभनः क्षणो यस्मात् तदसुक्षणम्, ह्रस्वमध्यमपि" [[10]] इति पञ्जिका । "सुर्क्ष[11] अनादरे[12]"(भ्वा.प.से.), ह्रस्वो- कारात् परोऽत्र रेफः, सो दन्त्यः, ततः सम्पूर्वाद् ल्युट् । "संसुर्क्षणमनादरे[13]"[ ]इति त्रिकाण्डे च"[ ]इति धातुप्रदीपः[14]। एवं चाऽकारादित्वम् इह प्रमादः"[ ]इत्यादुः, तत्तु (तत्र), "रीढावज्ञयोषित्यसूर्क्षणं(-सूक्षणं) शर्णुके(?) तिरस्कारः" इति रत्नकोशादावपि दर्शनात् । हट्टचन्द्र[स्वरसस्तु] अका- रादिक एवेति । "एवं चेह पृष्टापृष्टवन्नञः प्रकृत्यर्थम्" [[10]] इति तु कौमुदी[15] । [५ न आदरः **अनादरः**, तत्र]। पञ्च रीढायाः । 'अवहेला' इति भाषा ॥१४७९॥

**[1]उन्मूलितमा[2]वर्हितं स्यादु[3]त्पाटितमु[4]द्धृतम् ।**

१ उन्मूल्यते स्म **उन्मूलितम्** । 'मूल प्रतिष्ठा- याम्'(भ्वा.प.से.), क्तः । २ आवर्ह्यते[16] स्म **आवर्हितम्**। 'बर्ह बल्ह प्राधान्ये[17]'(भ्वा.आ.से.), क्तः । ३ उत्पाट्यते स्म **उत्पाटितम्** । 'पट विस्तारे'( ), णिजन्तात् क्तः। ४ उद् ऊर्ध्वं ध्रियते स्म **उद्धृतम्**। उद्पूर्वः(उत्पूर्वः) 'धृञ् धारणे' (भ्वा.उ.अ.), क्तः । चत्वारि उन्मूलितस्य॥

**[1]प्रेङ्खोलितं [2]तरलितं [3]लुलितं [4]प्रेङ्खितं [5]धुतम्[18] ।१४८०।**

**[6]चलितं [7]कम्पितं [8]धूतं [9]वेल्लिता[10]न्दोलिते अपि ।**

१ प्रेङ्खोल्यते[19] **प्रेङ्खोलितम्** । 'प्रेङ्खोल दोलने[20]' ( ), चुरादिः, क्तः । २ तरलं क्रियते स्म **तरलितम्** । तरलशब्दात् 'तत्करोति तदाचष्टे'(गणसू-३।१।२५)इति णिजन्तात् क्तः । ३ लुल्यते स्म **लुलितम्** । 'लुल विलोलने'(भ्वा.प.से.), क्तः। ४ प्रेङ्ख्यते स्म **प्रेङ्खितम्**। प्रपूर्वः 'इखिं[21] गतौ'(भ्वा.प.से.), दण्डकधातुः, ततः क्तः । ५ धूयते **धुतम्**[22] । 'धूञ् कम्पने'(स्वा.उ.से.), पञ्चम-

---

१. '-म्ब्यते' इति३॥ २. 'अवि-' इति४॥ ३. 'माणि-' इति३.५॥ ४ इतोऽग्रे ३प्रतौ 'योज्याः' इति दृश्यते ॥ ५. '-माणि-' इति५॥ ६. '-वौ' इति३॥ ७ 'ऋह कत्थनयुद्धहिंसादानेषु' इत्यत्र स्वामिनोक्तम्- "रिह इति द्रमिडाः- रिहति, रेहयति" इति, क्षीर. पृ.२४८॥ ८. 'अनादरे' इति४.५॥, 'सूर्क्ष्य अनादरे' इति स्वामी, 'षूर्क्ष अनादरे' इति मैत्रेयः, 'षूर्क्ष आदरे' सायणः । अत्र भट्टोजिः- "अनादरे इति तु क्वाचित्कोऽपपाठः" इति । अवज्ञावहेलनमसूर्क्षणमित्यमरः । सूर्क्षणमादरः ॥ ९. ४.५प्रत्योर्नास्ति ॥ १०. द्र. पदचन्द्रिका, भा-१, नाट्यवर्गः, श्लो-१९८, पृ.२३६॥ ११. 'सू-' इति३॥ १२. अत्राऽपि पूर्वोक्तं बोध्यम् ॥ १३. 'संमुक्षण-' इति१, 'संसू-' इति३॥ १४. धातुप्रदीपे वचनमिदं न दृश्यते ॥ १५. "सुक्षणमिति । 'सुर्क्ष अनादरे' । रेफवान् । ल्युट् । नैरुक्तौ रेफलोपः । दीर्घत्वे सूक्षणमिति । राजश्रीधातुवृत्तिः । 'अवहलेमसूक्षणम्' इति पाठान्तरम् । हट्टचन्द्रश्च- "अवहेलस्य घञन्तत्वान्नपुंसकत्वाभावात् सोऽसाधुरिति केचित् । तथा चामरमाला- "क्षेपोऽवहेलो निर्वादः परिभावोऽप्यनादरः । निकारः सूक्षणं षण्डे हेलावज्ञे स्त्रियौ मते ॥" इति । असुर्क्षणोऽपि नामानुशासने पुंस्काण्डे दृश्यते । 'परिभावोऽसुर्क्षणः परीभावः क्षेपः' इत्यादि । तथा चाविद्यमानः सुर्क्षणः सुहर्षोऽस्येति व्युत्पत्तिः ॥" इति टीकासर्वस्वम्, भा-१, १।७।२३॥, पृ.१५३॥ १६. '-वहति' इति१॥ १७. अत्र वबयोरैक्यं बोध्यम् ॥ १८. 'धुवम्' इति५॥ १९. '-न्ते' इति३॥ २०. "आन्दोलयति, प्रेङ्खोलयति, वीजयत्येते लोकात्" इति स्वामी, क्षीर. पृ.२९७॥ २१. 'इगि' इति२, 'इणु' इति५॥ २२. 'धू-' इति२.५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वरवान्, क्तः ॥१४८०॥ ६ चल्यते **चलितम्** । 'चल चलने'[1](भ्वा.प.से.), क्तः। ७ कम्प्यते **कम्पितम्** । 'कपि चलने'(भ्वा.आ.से.), क्तः, 'इदितो नुम् धातोः'७।१।५८॥। ८ 'धू विधूनने'[2](तु.प.से.), 'धूञ् कम्पने'(क्र्या.चु.उ.से.), वा, दीर्घादी, क्तः, [**धूतम्**]। ९ वेल्ल्यते **वेल्लितम्** । 'वेल्लृ चलने'[3](भ्वा.प.से.), क्तः। १० अन्दोल्यते स्म **अन्दोलितम्** । 'अन्दोल अवज्ञायाम्'[4]( ), चुरादिः, क्तः। दश प्रेङ्खोलितस्य । 'धूणिउ हालिउ कंपिउ[5]' इति भाषा ॥

## दोला प्रेङ्खोलनं प्रेङ्खा ।

१ दोलयति उत्क्षिपति **दोला** । 'दुल उत्क्षेपे[6]' (चु.उ.से.), पचाद्यच्, भिदादेराकृतिगणत्वादङ् वा । २ प्रेङ्खोल्यते **प्रेङ्खोलनम्** । 'प्रेङ्खोल दोलने[7]'( ), चुरादिः, ल्युट् । ३ प्रेङ्ख्यते प्रेर्यते **प्रेङ्खा** । प्रपूर्वः 'इखि गतौ' (भ्वा.प.से.), 'गुरोश्च हलः'३।३।१९॥ इत्यकारः, टापि । अन्दोलनमपि, आद्यस्वरादिः । त्रीणि दोलायाः । 'हींचोलणौ[8] हलावणो[9]' इति भाषा ॥

## फाण्टं कृतमयत्नतः ॥१४८१॥

१ फणति **फाण्टम्** । 'फण गतौ'(भ्वा.प.से.), क्तः, 'क्षुब्धस्वान्त-'७।२।१८॥ इति साधुः । अयत्नतः प्रयासं विना कृतं विहितं यदश्रपितमपिष्टमुदकसम्पर्कमात्राद् विभक्तरसमौषधं[10] कषायादि, तत् फाण्टमुच्यते । अग्निना तप्तं यदीपदुष्णं फाण्टमित्येके । यथा- "फाण्टाभिरद्भिराचमेत्"[ ]इति कदुष्णाभिरित्यनायासो व्यज्यते, अनायासः पुरुषोऽन्यो वा फाण्टशब्देनाऽभिधीयते"[ ] इत्यन्ये । यथा- "फाण्टाश्चित्रास्त्रपाणयः"[भट्टिकाव्यम्, सर्गः-९, श्लो-१७]इति । "अनायासकृतं[11] फाण्टम्" [अमरकोषः३।१।९४॥]इत्यमरः । "यत् सद्य एव जलमज्जनमात्रेण निर्गतनिर्यासमपनीतौषधं कषायद्रव्यात्मकं तत् फाण्टमुच्यते"[पदचन्द्रिका, भा-३, विशेष्यनिघ्नवर्गः, श्लो-९४]इति मिश्राः ॥१४८१॥

## अधःक्षिप्तं न्यञ्चितं स्यात्

१ अधःक्षिप्यते स्म **अधःक्षिप्तम्** । 'क्षिप प्रेरणे' (तु.उ.अ.), क्तः । २ न्यच्यते[12] स्म **न्यञ्चितम्** । निपूर्वः 'अञ्चु गतिपूजनयोः'(भ्वा.प.से.), क्तः । द्वे न्यञ्चितस्य । 'छाडियो[13]' इति भाषा ॥

## ऊर्ध्वक्षिप्तमुदञ्चितम् ।

१ ऊर्ध्वं क्षिप्यते स्म **ऊर्ध्वक्षिप्तम्**। २ उदञ्च्यते स्म **उदञ्चितम्** । उत्पूर्वः, 'अञ्चु गतिपूजनयोः'(भ्वा.प.से.), क्तः । द्वे उदञ्चितस्य । 'ऊछालिउ[14][15]' इति भाषा॥

## नुन्ननुत्तास्तनिष्ठ्यूतान्याविद्धं क्षिप्तमीरितम् ।१४८२।

१-२ नुद्यते स्म **नुन्नम्, [नुत्तम्]**। 'णुद प्रेरणे' (तु.उ.अ.), क्तः, 'नुदविदोन्दत्राघ्राह्रीभ्यो[16]ऽन्यतरस्याम्' ८।२।५६॥ इति क्तस्य वा नत्वम् । ३ अस्यते स्म **अस्तम्** । 'असु क्षेपणे'(दि.प.से.), निष्ठा। ४ निष्ठीव्यते स्म **निष्ठ्यूतम्**। 'ष्ठिवु निरसने'(भ्वा.प.से.), क्तः, 'च्छ्वोः शूडनुनासिके च'६।४।१९॥ इति वस्योठ्, 'इको यणचि' ६।१।७७॥ । ५ आविध्यते स्म **आविद्धम्** । 'व्यध ताडने'(दि.प.अ.), क्तः, 'ग्रहिज्यावयिव्यधि-'६।१।१६॥ इति सम्प्रसारणम्, 'झषस्तथोः-'८।२।४०॥ इति धत्वं, 'झलां जश्-'८।४।५३॥ इति पूर्वधकारस्य[18] दत्वम्। "आविद्धो वाच्यवद् ज्ञेयः कुलिले[19] (कुटिले) च पराहते"[विश्वप्रकाशकोशः, धान्तवर्गः, श्लो-२६]इति **महेश्वरः** । "आविद्धः क्षिप्तवक्रयोः[20]"[अनेकार्थसङ्ग्रहः३।३३४॥]इति हैमानेकार्थः । "पयोधिमाविद्धचलज्जलाविलां[21] विलङ्घ्य लङ्कां निकषा हनिष्यति[22]"[शिशुपालवधम्, सर्गः-१, श्लो-६८]इति प्रयोगः । ६ क्षिप्यते स्म **क्षिप्तम्** । 'क्षिप प्रेरणे'(तु.उ.अ.), क्तः । ७ ईर्यते स्म **ईरितम्** । 'ईर प्रेरणे[23]'(चु.उ.से.), चुरादिः, क्तः, तत्र । सप्त प्रेरितस्य ॥१४८२॥

## समे दिग्धलिप्ते

---

१. 'चल कम्पने' इति क्षीरतरङ्गिण्यादयः ॥ २. 'धूञ्' इति१॥ ३. दण्डात्मकोऽयं धातुः ॥ ४ '-यौ' इति४॥ ५. १प्रतौ नास्ति ॥ ६ '-पणे' इति४.५॥ ७ पूर्वोक्तमनुसन्धेयम् ॥ ८ '-णउ' इति१.२, '-णो' इति५॥ ९ '-ण' इति२॥ १०. '-क्तः' इति३॥ ११. '-साकृतं' इति४.५॥ १२. 'न्यज्च्य-' इति१, 'नाच्य-' इति२, 'न्यञ्च-' इति३॥ १३. '-डिउ' इति२, '-डियौ' इति४, '-डिवुं' इति५॥ १४. 'ऊं-' इति१॥ १५. '-यो' इति३, ' यौ' इति४॥ १६. '-त्रं' इति३॥ १७ 'निष्ठा-' इत्यधिकम् ॥ १८. 'पूर्वद-' इति४॥ १९. 'कुलिल्वे' इति४.५॥ २०. '-चक्रयोः' इति३॥ २१. '-ला' इति२॥ २२. द्र. अनेकार्थकैरवाकरकौमुदीटीका, भा-२, ३।३३४॥, पृ.१४८॥ २३. 'ईर क्षेपे' इति क्षीरतरङ्गिण्यादयः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ दिह्यते स्म **दिग्धम्** । 'दिह उपलेपे'[1](अ.उ.अ.), क्तः, 'दादेर्धातोर्घः'८।२।३२॥, 'झषस्तथोः-'८।२।४०॥ इति धत्वम्, जश्त्वम् । २ लिप्यते स्म **लिप्तम्** । 'लिप उपदेहे'(तु.उ.अ.), क्तः । द्वे दिग्धस्य । 'लिपिउं'[3] इति भाषा ॥

## रुग्णभुग्ने

१-२ अत्राऽपि 'समे' इति सम्बध्यते । रुजति स्म **रुग्णम्**, कवर्गतृतीयटवर्गपञ्चमान्तः । भुजति स्म **भुग्नम्** । 'रुजो भङ्गे'(तु.प.अ.), 'भुजो[4] कौटिल्ये'(तु.प.अ.), तुदादी परस्मैपदिनौ, उभयत्र क्तः, 'ओदितश्च'८।२।४५॥ इति निष्ठानत्वम्, 'चोः कुः'८।२।३०॥ । द्वे वक्रीभूतस्य ॥

## रूषितगुण्डिते ।

१ अत्राऽपि 'समे' इति सम्बध्यते । रूष्यते **रूषितम्** । रूषिर्भौवादिरपरिसमाप्तौ, रूषिर्गुण्डनार्थो द्रष्टव्यः, क्तः । "रूषिर्लौकिको व्याप्त्यर्थः"[अभि.स्वोपज्ञटीका ६।१४८३॥]इत्याचार्याः । यथा- "पदातिरन्तर्गिरिरेणुरूषितः"[किरातार्जुनीयम्, सर्गः-१, श्लो-३४]इति किरातः[5] । "'लूष रूष भूषायाम्'(  )इति सुधाकरः"[मा.धातुवृत्तिः, भ्वादिः, धातुसं-४४०] । २ गुण्ड्यते स्म **गुण्डितम्** । 'गुडि वेष्टने'[6](चु.उ.से.), चुरादिः, क्तः । 'गुठण् वेष्टने'(चु.उ.से.), तृतीयवर्गद्वितीयान्तश्चुरादिः, तस्य गुण्ठितमिति । द्वे रूषितस्य । 'लूषउं[7] भूषरुं[8]' इति भाषा ॥

## गूढगुप्ते च

१ अत्राऽपि 'समे' इति सम्बन्धनीयम् । गुह्यते स्म **गूढम्** । 'गुहू संवरणे'(भ्वा.उ.से.), क्तः, 'हो ढः'८।२।३१॥, 'झषस्तथोः-'८।२।४०॥ इति धत्वम्, ष्टुत्वम्, 'ढो ढे लोपः'८।३।१३॥ । २ गुप्यते स्म **गुप्तम्** । 'गुपू रक्षणे'(भ्वा.प.से.), क्तः, 'स्वरतिसूति-'७।२।४४॥ इति नेट्। द्वे गुप्तस्य॥

## मुषितमूषिते[2]

१ अत्राऽपि 'समे' इति सम्बन्धनीयम् । मुष्यते स्म **मुषितम्** । 'मुष स्तेये'(क्र्या.प.से.), ह्रस्वादिः, क्तः । २ मूष्यते स्म **मूषितम्**[9] । 'मूष स्तेये'[10](भ्वा.प.से.), षष्ठस्वरादिः, क्तः । द्वे मुषितस्य । 'मुसिउं'[11] इति भाषा॥

## गुणिताहते[12] ॥१४८३॥

१ 'समे' इत्यत्राऽपि सम्बध्यम् । गुण्यते **गुणितम्** । 'कुण गुण केत आमन्त्रणे'[13](चु.उ.से.), आमन्त्रणं गूढोक्तिः । 'गुण अभ्यासे'[13](चु.उ.से.)इत्यन्यः, कर्मणि क्तः । २ आहन्यते स्म **आहतम्** । धातूनामनेकार्थत्वादाङ्पूर्वो हनिर्गुणने वर्तते, क्तः, 'अनुदात्तोपदेश-'६।४।३७॥ इति ल्लोपः[14] । "आहतं गुणितेऽपि स्यात् ताडिते[15] नाणके(नामिते)ऽपि च[16]"[विश्वप्रकाशकोशः, तान्तवर्गः, श्लो-७७]इति महेश्वरः । "पञ्चाहतैश्चतुर्भिर्वराटकैः काकणी चैका"[[17]]इति । यथा- "अभ्यस्तस्य वेदादेरिमे नाम्नी[18]"[अमरपदविवृतिटीका३।१।८८॥]इति लिङ्गयसूरिः । "सङ्ख्याते[19] गणितम्[20]"[अमरकोषः३।१।६४॥]इत्यमरः । द्वे गुणितस्य ॥१४८३॥

## स्यान्निशातं[21] शितं शातं निशितं तेजितं क्ष्णुतम् ।

१-४. निशायते[22] स्म **निशातम्**, **निशितम्** । उभयत्र 'शो तनूकरणे'(दि.प.अ.), [क्तः], 'शाच्छोरन्यतरस्याम्'७।४।४१॥ इतीत्वविकल्पः । २-३ एवं **शितम्**, **शातम्** । ५ तेज्यते स्म **तेजितम्** । 'तिज निशाने'(चु.उ.से.), चुरादिः, क्तः । ६ क्ष्णूयते **क्ष्णुतम्** । 'क्ष्णु तेजने'(अ.प.से.), क्तः । षट् तेजितस्य[23] । 'तीखाकरियां[24]' इति भाषा ॥

## वृते तु वृत्तवावृत्तौ[25][26]

१ क्रियते **वृतः** । 'वृङ् (वृञ्) वरणे'(स्वा.

---

१. '-चये' इति१, स्वामिसायणौ च, 'दिह उपतापे' इति मैत्रेयः ॥ २. इतोऽग्रे १प्रतौ 'च' इति दृश्यते ॥ ३. 'लींपिउं' इति२, '-उं' इति५॥ ४. '-ज' इति३॥ ५. 'भारविः' इति३॥ ६. 'गुठि वेष्ठने' इति चुरादौ स्वामी ॥ ७. '-उ' इति३, '-षौ' इति४॥ ८. 'भूं-' इति२॥ ९. 'मू-' इति३.४.५॥ १०. इतोऽग्रे ३प्रतौ 'ह्रस्वादिः' इति दृश्यते ॥ ११. '-उं' इति१, '-यउ' इति३, 'याँ' इति४॥ १२. तुलनीयोऽमरकोषः३।१।८८॥ १३. 'कुण गुण चामन्त्रणे' इति स्वामी, 'केत ('सङ्केत' इति सायणः) ग्राम कुण गुण चामन्त्रणे' इति मैत्रेयसायणौ ॥ १४. 'न-' इति३॥ १५. 'त-' इति४.५॥ १६. २प्रतौ नास्ति ॥ १७. द्र. अनेकार्थकैरवाकरकौमुदीटीका, भा-२, ३।२३६॥, पृ.१०४॥ १८. लिङ्गयसूरिकृतटीकायाम्- "अभ्यस्तवेदादेर्नामनी" इति दृश्यते, भा-२, ३।१।८८, पृ.१२२॥ १९. स्वामिसम्मतपाठः, 'संख्यातं' इति रामाश्रम्याम् ॥ २०. 'गु-' इति३॥ २१. '-शान्तं' इति५॥ २२. 'निशी-' इति४.५॥ २३. 'तेजिन्यः' इति३॥ २४. '-रीया' इति२.३॥ २५. '-व्या-' इति३.४॥ २६. तुलनीयोऽमरकोषः३।१।९२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उ.से.), दिवादिः(स्वादिः), ततः क्तः, तत्र । २ वृत्यते **वृत्तः** । 'वृतु वर्तने'(भ्वा.आ.से.), क्तः । ३ 'तप ऐश्वर्ये'(दि.आ.अ.)इत्येतदनन्तरं 'वावृतु वरणे'(दि.आ.से.)इति दिवादौ पठ्यते[1] । यद् भट्टिप्रयोगः-''ततो वावृत्यमानाऽसौ[2] रामशालां न्यविक्षत''[भट्टिकाव्यम्, सर्गः-४, श्लो-२८] इति[3] । अत्र रामं वृण्वतीत्यर्थः, ततः क्ते वा **वा [वृत्तः]** । अन्ये तु-'' 'तप ऐश्वर्ये वा'(दि.आ.अ.)इति विकल्पार्थवाग्रहणम्''[[4]]इत्याहुः । दिवादिकार्यं श्यनं विकल्पेन भजत इत्यर्थः, तन्मते व्यावृत्तः[5] । त्रीणि वृतस्य । 'वरिया[6]' इति भाषा ॥

### ह्रीतह्रीणौ तु लज्जिते[7] ॥१४८४॥

१ जिह्रेति स्म **ह्रीतः, ह्रीणः** । 'ह्री लज्जायाम्'(जु.प.अ.), क्तः, 'नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम्'८।२।५६॥ इति वा निष्ठानत्वम् । २ लज्जा सञ्जाताऽस्य **लज्जितः** । तारकादित्वादितच्[8], तत्र । त्रीणि लज्जितस्य ॥१४८४॥

### संगूढः स्यात् सङ्कलिते[9]

१ संगुह्यते स्म **संगूढः** । 'गुहू संवरणे'(भ्वा.उ.से.), क्तः । २ सङ्कल्यते स्म **सङ्कलितः** । 'कल सङ्ख्याने'(चु.उ.से.). चुरादावदन्तः, क्तः, तत्र । द्वे सङ्कलितस्य । 'सांकलिउँ[10]' इति भाषा ॥

### संयोजित उपाहिते[11] ।

१ संयोज्यते स्म **संयोजितः** । संपूर्वः 'युजिर् योगे'(रु.उ.अ.), णिजन्तः, क्तः । २ उपाधीयते स्म **उपाहितः** । उपाङ्पूर्वाद् दधातेः क्तः, 'दधातेर्हिः' ७।४।४२॥, तत्र । ''उपाहितां[12] वक्षसि पीवरस्तने[13]'' [किरातार्जुनीयम्, सर्गः-८, श्लो-३७]इति भारविः । ''उपाहितोऽनलोत्पात आरोपित उपाहितः (आहिते चाप्युपाहितः)'' [विश्वप्रकाशकोशः, तान्तवर्गः, श्लो-१८०]इति महेश्वरः । आरोपिते वाच्यलिङ्गः, यथा-''उष्ट्रोपाहितदिव्यरत्ननिचयो यातः स देशान्तरम्''[[14]]इति । द्वे उपाहितस्य । 'जोडिया' इति भाषा ॥

### पक्वे परिणतम्

१ पच्यते स्म **पक्वम्** । 'डुपचष् पाके'(भ्वा.उ.अ.), क्तः, 'पचो वः'८।२।५२॥ इति निष्ठावत्वम्, 'चोः कुः'८।२।३०॥, तत्र । २ परिणम्यते स्म **परिणतम्** । परिपूर्वः, 'णम प्रह्वत्वे शब्दे च[15]'(भ्वा.प.अ.), क्तः, 'अनुदात्तोपदेश-'६।४।३७॥ इति म्लोपः । ''त्वय्यासन्ने परिणतफलश्यामजम्बूवनान्ताः''[मेघदूतम्, पूर्वमेघः, श्लो-२३]इति मेघः[16] । द्वे पक्वस्य । 'पाका' इति भाषा ॥

### पाके क्षीराज्यहविषां शृतम्[17] ॥१४८५॥

१ क्षीराज्यहविषां पाके दुग्धघृतहोतव्यद्रव्याणां पाकनामैकं **शृतम्** इति । श्रायते स्म शृतम् । 'श्रा पाके'(अ.प.अ.), क्तः, 'शृतं पाके'६।१।२७॥ इति साधुः ॥१४८५॥

### निष्पक्वं क्वथिते[17]

१ निःशेषेण पक्वं **निष्पक्वम्** । क्वथ्यते स्म **क्वथितम्** । 'क्वथ पाके[18]'(भ्वा.प.से.), क्तः, तत्र । द्वे निष्पक्वस्य । 'ऊ[19]कालिया[20]' इति भाषा ॥

### प्लुष्टप्रुष्टदग्धोषिताः समाः ।

१ प्लुष्यते स्म **प्लुष्टः** । 'प्लुष दाहे[20]'(भ्वा.प.से.), क्तः । २ 'प्रुष दाहे[21]'(भ्वा.प.से.), क्तः[22], **प्रुष्टः** । ३ दह्यते स्म **दग्धः** । 'दह भस्मीकरणे'(भ्वा.प.अ.), क्तः । ४ उष्यते **उषितः** । 'उष दाहे'(भ्वा.प.से.), क्तः । चत्वारि दग्धस्य ॥

### तनूकृते त्वष्टतष्टौ

१ अतनुः तनुः क्रियते स्म **तनूकृतः**, तत्र । २

---

१. '-ठ्येते' इति२.४.५॥ २. '-मानोऽसौ' इति२.४.५॥ ३. द्र. क्षीर., धातुसं-४९, पृ.२१७॥, धातुप्रदीपः, धातुसं-४७, पृ.९५॥, मा.धातुवृत्तिः, धातुसं-५१, पृ.४१८॥ ४ द्र. पदचन्द्रिका, भा-३, विशेष्यनिघ्नवर्गः, श्लो-९२, पृ.९३॥ ५ '-त्तं' इति१, '-तः' इति३॥ ६ '-रीया' इति३॥ ७ तुलनीयोऽमरकोषः३।१।९१॥ ८ '-नच्' इति१॥ ९. तुलनीयोऽमरकोषः३।१।९३॥ १०. '-यो' इति३, '-यौ' इति४, '-उं' इति५॥ ११. तुलनीयोऽमरकोषः३।१।९२॥ १२. '-तं' इति३॥ १३. '-नः' इति५.४॥ १४ द्र. अनेकार्थकैरवाकरकौमुदीटीका, भा-२, ४।१००॥, पृ.३४४॥ १५. मैत्रेयमतेऽयम्, 'णम प्रह्वत्वे' इति स्वामी, 'णम प्रह्वत्वे शब्दे' इति सायणः ॥ १६. 'मेघदूतः' इति३॥ १७ द्र. क्षीरस्वामिसम्मतामरकोशः३।१।९६॥, पृ.२५६॥ १८ 'क्वथे निष्पाके' इति क्षीरतरङ्गिण्यादयः ॥ १९. 'उ-' इति१.३॥ २०. '-लीया' इति३॥ २१. 'श्रिषु श्लिषु प्रुषु प्लुषु दाहे' इति क्षीरतरङ्गिण्यादयः भ्वादौ ॥ २२. १.२.३प्रतिषु नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वक्ष्यते स्म **त्वष्टः** । 'त्वक्ष(त्वक्षू) तनूकरणे[१]'(भ्वा.प.से.), क्तः, संयोगान्तलोपः । ३ तक्ष्यते स्म **तष्टः** । 'तक्ष(तक्षू) तनूकरणे[१]'(भ्वा.प.से.), क्तः, संयोगान्तलोपः । त्रीणि त्वष्टस्य । 'छोलिउं[२]' इति भाषा ॥

**विद्धे छिद्रितवेधितौ ॥१४८६॥**

१ विध्यते स्म **विद्धः** । 'व्यध ताडने'(दि.प.अ.), क्तः, 'ग्रहिज्या-'६।१।१६॥ इति सम्प्रसारणम्, तत्र । २ छिद्र्यते स्म **छिद्रितम्** । छिद्रधातोः (चु.उ.से.), क्तः । छिद्रं सञ्जातमस्येति वा । ३ [३]वेध्यते स्म [४]**वेधितम्** । 'विध विधाने'(तु.प.से.), णिजन्तः, क्तः । त्रीणि वेधितस्य ॥१४८६॥

**सिद्धे निर्वृत्तनिष्पन्नौ[५]**

१ सिद्ध्यति स्म **सिद्धम्** । 'षिधू शास्त्रे माङ्गल्ये च'(भ्वा.प.से.), क्तः, तत्र । २ निर्वर्तते स्म **निर्वृत्तम्** । निर्पूर्वः 'वृतु वर्तने'(भ्वा.आ.से.), क्तः । ३ निष्पद्यते स्म **निष्पन्नः** । 'पद गतौ'(दि.आ.अ.), क्तः। त्रीणि निष्पन्नस्य ॥

**विलीने द्रुतविद्रुतौ ।**

१ विलीयते स्म **विलीनम्** । 'ली[६] द्रवीकरणे[७]' (चु.उ.से.), क्तः[८], 'स्वादय ओदितः'(गणसू-८।२।४५॥) इति निष्ठानत्वम्, तत्र । २-३ द्रवति स्म **द्रुतः** । [९](विद्रवति स्म **विद्रुतः**) । 'द्रु गतौ'(भ्वा.प.अ.), क्तः[१०] । त्रीणि विद्रुतस्य घृतादेः ॥

**उतं प्रोते**

१ ऊयते स्म **उतम्**, पञ्चमस्वरादिः । 'वेञ् तन्तुसन्ताने'(भ्वा.प.अ.), क्तः, 'ग्रहिज्या-'६।१।१६॥ इति सम्प्रसारणम्। "'[११]ऊयी तन्तुसन्ताने'(भ्वा.आ.से.), अस्मात् क्तः। '[११]ऊदि(ईदि)त्वान्निष्ठायामनिट्त्वम्''[मा.धातुवृत्तिः, भ्वादिः, धातुसं-३१५]इति माधवः षष्ठस्वरादिमाह । २ प्रोयते स्म **प्रोतम्** । प्रपूर्वः 'वेञ् तन्तुसन्ताने'(भ्वा.प.अ.), क्तः, तत्र । द्वे 'प्रोया' इति ख्यातस्य ॥

**स्यूतमूतमुतं च तन्तुसन्तते[१२] ॥१४८७॥**

१ सीव्यते स्म **स्यूतम्** । 'षिवु तन्तुसन्ताने'(दि.प.से.), क्तः, 'च्छ्वो शूड्-'६।४।१९॥ इत्यूठ्, वलि लोपः । २ ऊय्यते स्म **ऊतम्**। 'ऊयी तन्तुसन्ताने'(भ्वा.आ.से.), क्तः, वलि लोपः । ३ ऊयते स्म **उतम्**, पञ्चमस्वरादिः । 'वेञ् तन्तुसन्ताने'(भ्वा.प.अ.), क्तः, 'ग्रहिज्या-'६।१।१६॥ इति सम्प्रसारणम् । ४ तन्तुभिः सन्ततं विस्तृतम् **तन्तुसन्ततम्**, तत्र । चत्वारि स्यूतस्य । 'सीविउं[१३]' इति भाषा ॥१४८७॥

**पाटितं दारितं भिन्ने[१४]**

१ पाट्यते स्म[१५] **पाटितम्**। 'पट विस्तारे'( ), णिजन्तः, क्तः । २ दार्यते स्म **दारितम्** । 'दॄ विदारणे'(क्र्या.प.से.), ण्यन्तात् क्तः । ३ भिद्यते स्म **भिन्नम्** । 'भिदिर् विदारणे'(रु.उ.अ.), क्तः, 'रदाभ्याम्-'८।२।४२॥ इति नत्वम्, तत्र । त्रीणि पाटितस्य ॥

**विदरः स्फुटनं भिदा ।**

१ विदारणं **विदरः** । 'दॄ विदारणे'(क्र्या.प.से.), 'ॠदोरप्'३।३।५७॥ । २ स्फुट्यते **स्फुटनम्** । 'स्फुट विकसने'(तु.प.से.), ल्युट्, कुटादित्वाद् गुणाभावः । ३ भेदनं **भिदा** । 'षिद्भिदादिभ्योऽङ्'३।३।१०४॥ । त्रीणि [१६]विदरस्य । 'फाडणउं[१७]' इति भाषा ॥

**अङ्गीकृतं प्रतिज्ञातमूरीकृतोरुरीकृते ॥१४८८॥**
**संश्रुतमभ्युपगतमुररीकृतमाश्रुतम् ।**
**सङ्गीर्णं प्रतिश्रुतं च**

१ अनङ्गमङ्गं क्रियते स्म **अङ्गीकृतम्** । कक्षीकृत-स्वीकृते अपि । २ प्रतिज्ञायते स्म **प्रतिज्ञातम्** । ३ ऊरीक्रियते स्म **ऊरीकृतम्**, दीर्घादि[१८] । ४ एवम् [१९]**उरुरीकृतम्**, ह्रस्वादि[२०]र्ह्रस्वोकारमध्यश्च । ७ **उररीकृतम्**,

---

१. 'तक्षू त्वक्षू तनूकरणे' इति क्षीरतरङ्गिण्यादयः ॥ २. '-उ' इति१, 'छोली' इति३॥ ३. 'वि-' इति१.३॥ ४. 'वि-' इति१.२.३॥ ५. तुलनीयोऽमरकोषः३।१।१००॥ ६. 'लि' इति५॥ ७. 'लिङ् विलयने' इति३॥, 'लीङ् श्लेषणे'(दि.आ.अ.)इति युक्तः ॥ ८. इतोऽग्रे ३प्रतौ 'निर्वृत्तं' इति दृश्यते॥ ९. कोष्ठान्तर्गतपाठः १.३.४.५प्रतिषु नास्ति ॥ १०. इतोऽग्रे ३प्रतौ 'एवं विद्रुतः' इति दृश्यते ॥ ११. 'उ-' इति१.३॥ १२. '-ने' इति३॥ १३. '-यो' इति१, '-उ' इति३, '-यौ' इति४॥ १४. '-न्नं' इति१.४.५॥ १५. १प्रतौ नास्ति॥ १६. 'विदा-' इति१॥ १७. '-णो' इति३, 'फाडणौ' इति४, '-णौं' इति५॥ १८. '-दिः' इति१.३.५॥ १९. 'उर-' इति१.५॥ २०. '-दिह्र-' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ह्रस्वादिरकारमध्यमश्च । ऊर्यादीनां त्रयाणां 'ऊर्यादिच्विडाचश्च'१।४।६१॥ इति गतिसंज्ञा, ततः 'कुगतिप्रादयः' २।२।१८॥ इति तत्पुरुषः ॥१४८८॥ ५ संश्रूयते स्म **संश्रुतम्** । संपूर्वः 'श्रु श्रवणे'(भ्वा.प.अ.), क्तः । ८ आङ्पूर्वः शृणोतिरङ्गीकारार्थः, आश्रूयते स्म **आश्रुतम्** । १० एवं **प्रतिश्रुतं** च । ६ अभ्युपगम्यते स्म **अभ्युपगतम्** । अभ्युपपूर्वो गमिरङ्गीकारार्थः । ९ सङ्गीर्यते स्म **सङ्गीर्णम्** । सम्पूर्वः 'गॄ निगरणे'(तु.प.से.), अङ्गीकारार्थः । दश अङ्गीकृतस्य ॥

### छिन्ने[1] लूनं[2] छितं[3] दितम्[4] ॥१४८९॥
### छेदितं[5] खण्डितं[6] वृक्णं[7] कृत्तम्[8]

१ छिद्यते स्म **छिन्नम्** । 'छिदिर् द्वैधीकरणे'(रु.उ.से.), क्तः, 'रदाभ्याम्-'८।२।४२॥ इति निष्ठानत्वम्, तत्र[1]। २ लूयते स्म **लूनम्** । 'लूञ् छेदने'(क्र्या.उ.से.), क्तः, 'ल्वादिभ्यश्च'८।२।४४॥ इति निष्ठानत्वम् । ३ छायते स्म **छितम्** । 'छो छेदने'(दि.प.अ.), क्तः, 'शाच्छोरन्यतरस्याम्'७।४।४१॥ इतीकारः । छातमपि । ४ दीयते **दितम्** । 'दोऽवखण्डने'(दि.प.अ.), क्तः, 'द्यतिस्यतिमास्थाम्-'७।४।४०॥ इतीकारोऽन्तादेशः ॥१४८९॥ ५ छेद्यते स्म **छेदितम्**। 'छिदिर् द्वैधीकरणे'(रु.उ.से.), णिजन्तात् क्तः । ६ खण्ड्यते **खण्डितम्** । 'खडि भेदने[2]'(चु.उ.से.), क्तः । ७ वृश्च्यते **वृक्णम्** । 'ओव्रश्चू छेदने' (तु.प.से.), क्तः, तस्य पूर्वत्राऽसिद्धत्वाद् झल्परत्वेन 'स्कोः-'८।२।२९॥ इति सलोपः, 'चोः कुः'८।२।३०॥ इति कुत्वं च । 'निष्ठादेशः षत्वस्वरेड्विधिषु सिद्धो वक्तव्यः[3]'( )इति व्रश्चादिषत्वे निष्ठादेशस्य सिद्धत्वाद् झल्परत्वाभावान्न षत्वम्[4] । 'ओदितश्च'८।२।४५॥ इति निष्ठानत्वम्, 'यस्य विभाषा'७।२।१५॥ इत्यनिट्त्वम्, 'यस्य विभाषा'७।२।१५॥ इत्यनिट्त्वम्, 'ग्रहिज्या-'६।१।१६॥ इति सम्प्रसारणम्, 'ऋवर्णान्नस्य णत्वं वाच्यम्'(वा-८।४।१॥)। ८ कृत्यते **कृत्तम्** । 'कृती छेदने'(तु.प.से.), क्तः । अष्ट छेदितस्य ॥

### प्राप्तं[1] तु भावितम्[2] ।
### लब्धम्[3] आसादितं[4] भूतम्[5]

१ प्राप्यते स्म **प्राप्तम्** । प्रपूर्वः । 'आप्लृ व्याप्तौ' (भ्वा.प.अ.), क्तः । २ 'भू प्राप्तौ'(चु.आ.से.), चुरादिः, [5]क्तप्रत्यये **भावितम्** । ५ 'आधृषाद् वा'(गण-सू- )इति णिज्विकल्पे **भूतम्** । ३ लभ्यते स्म **लब्धम्** । 'डुलभष् प्राप्तौ'(भ्वा.आ.अ.), कर्मणि क्तः, 'झषस्थोः-'८।२।४०॥ इति धत्वम्, 'झलां जश् झशि'८।४।५३॥ इति जश्त्वम्। ५ आसाद्यते स्म **आसादितम्**। आङ्पूर्वात् सदेर्ण्यन्तात् क्तः । वित्तमपि । पञ्च प्राप्तस्य ॥

### पतिते[1] गलितं[1] च्युतम्[3] ॥१४९०॥
### स्रस्तं[4] भ्रष्टं[5] स्कन्नं[6] पन्ने[7]

१ पतति स्म **पतितम्** । 'पत्लृ पतने[6]'(भ्वा.प.से.), क्तः, तत्र। २ गलति स्म **गलितम्**। 'गड सेचने' (भ्वा.प.से.), क्तः, डलयोरेकत्वस्मरणम्। ३ च्यवते **च्युतम्** । 'च्युङ् गतौ'(भ्वा.आ.अ.), क्तः ॥१४९०॥ ४ स्रंसते स्म **स्रस्तम्** । 'स्रंसु ध्वंसु अधःपतने[7]'(भ्वा.आ.से.), क्तः, 'अनिदिताम्-'६।४।२४॥ इति न्लोपः । ५ भ्रंशते स्म **भ्रष्टम्**। 'भ्रंश (भ्रंशु) अधःपतने'(भ्वा.आ.से.), क्तः, 'व्रश्च-'८।२।३६॥ इति षत्वम्, ष्टुत्वम् । ६ स्कन्दति स्म **स्कन्नम्** । 'स्कन्दिर् गतिशोषणयोः[8]'(भ्वा.प.से.), क्तः, 'अनिदिताम्-'६।४।२४॥ इति न्लोपः[9] । ७ पद्यते स्म **पन्नम्**। 'पद गतौ'(दि.आ.अ.), क्तः । सप्त पतितस्य ॥

### शंसितं[1] तु सुनिश्चितम्[2] ।

१ शंस्यते स्म **शंसितम्** । 'शंस(शंशु) स्तुतौ' (भ्वा.प.से.), क्तः, तालव्यादिर्दन्त्यान्तः । २ सुष्ठु निश्चिनोति स्म **सुनिश्चितम्** । सुनिर्पूर्वः 'चिञ् चयने'(स्वा.उ.अ.), क्तः। सुष्ठु निश्चितमस्येति वा। द्वे निश्चयीकृतस्य॥

### मृगितं[1] मार्गितान्[2] विष्टान्[3] वेषितानि[4] गवेषिते[5]॥१४९१॥

१ मृग्यते[10] **मृगितम्** । 'मृग अन्वेषणे'(चु.आ.से.),

---

१. १प्रतौ नास्ति ॥ २. 'खड खडि भेदे' इति स्वामी, 'खड खडि कडि भेदने' इति मैत्रेयसायणौ ॥ ३. 'निष्ठादेशः षत्वस्वरप्रत्ययेड्विधिषु सिद्धो वाच्यः' इति वार्तिकस्वरूपं दृश्यते ॥ ४ द्र. मा.धातुवृत्तिः, तुदादिः, धातुसं-१४, पृ.४६५॥ ५. 'क्तः प्र-' इति५॥ ६. 'शल हुल पत्लृ गतौ' इति क्षीरतरङ्गिण्यादयः॥ ७. 'स्रंसु ध्वंसु भ्रंसु अवस्रंसने' इति स्वामिसायणौ, 'स्रन्सु भ्रन्शु ध्वन्सु अधःपतने, अवस्रंसने च' इति मैत्रेयः॥ ८. मैत्रेयसायणसम्मतोऽयं पाठः, 'स्कन्दिर् शोषणे' इति स्वामी ॥ ९. 'लोपः' इति५॥ १०. इतोऽग्रे १प्रतौ 'स्म' इति दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्तः । २ मार्ग्यते **मार्गितम्** । 'मार्ग अन्वेषणे'(चु.उ.से.), चुरादिः, क्तः । ३ अन्विष्यते **अन्विष्टम्** । अनुपूर्वः 'इषु इच्छायाम्'(तु.प.से.), क्तः । ४ अन्वेष्यते **अन्वेषितम्** । 'एष गतौ'(भ्वा.आ.से.), क्तः । ५ गवेष्यते स्म **गवेषितम्** । 'गवेष मार्गणे'(चु.उ.से.), चुरादिः, क्तः । पञ्च मृगितस्य । 'जोयुं[१] दीठउं[२]' इति भाषा ॥१४९१॥

**तिमिते स्तिमितक्लिन्नसार्द्रार्द्रोन्नाः समुन्नवत्[३] ।**

१ तिम्यति स्म **तिमितः** । 'तिम ष्टिम आर्द्रीभावे[४]'(दि.प.से.), क्तः, तत्र । २ स्तिम्यति स्म **स्तिमितः** । 'ष्टिम आर्द्रीभावे[४]'(दि.प.से.), भावे क्तः, 'धात्वादेः षः सः'६।१।६४॥ । ''स्तिमितस्तरले क्लिन्ने'' [[५]]इति रुद्रः । तत्राऽतरले(तत्र तरले?) स्तिमिताक्षः । ३ क्लिद्यति[६] स्म **क्लिन्नः** । 'क्लिदुं[७] (क्लिदू) आर्द्रीभावे[८]'(दि.प.से.), क्तः, 'रदाभ्याम्-'८।२।४२॥ इति निष्ठानत्वम् । ४ सह आर्द्रेण गुणेन वर्तते **सार्द्रः** । ५ आङ्पूर्वाद् 'द्रा कुत्सायां गतौ'(अ.प.अ.), अस्माद् 'अन्येभ्योऽपि-' ३।२।१०१॥ इति डः, नैरुक्तो रेफागमः । आ अर्द्यत इति वा । आङ्पूर्वः 'अर्द गतौ'(भ्वा.प.से.), अस्मात् 'स्फायितञ्चि-'(उणा-१७०)इत्यादिना रकि वा **आर्द्रः** । ५-६ उनत्ति[९] स्म **उन्नः** । 'उन्दी क्लेदने'(रु.प.से.), क्तः । सम्पूर्वः **समुन्नः**[१०] । उभयत्र 'नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम्' ८।२।५६॥ इति निष्ठानत्वम् । नत्वाभावपक्षे समुत्तः[११] । सप्त आर्द्रस्य । 'भीनुं[१२]' इति भाषा ॥

**प्रस्थापितं प्रतिशिष्टं प्रहितप्रेषिते अपि ॥१४९२॥**

१ प्रस्थाप्यते स्म **प्रस्थापितम्** । प्रपूर्वः 'ष्ठा गतिनिवृत्तौ'(भ्वा.प.अ.), णिच्, 'अर्तिह्री-'७।३।३६॥ इति पुक्[१३], क्तः । २ प्रतिशिष्यते स्म **प्रतिशिष्टम्**[१४] । प्रतिपूर्वः 'शिष्लृ विशेषणे'(रु.प.अ.), क्तः । ३ प्रहीयते स्म **प्रहितम्** । 'हि गतौ वृद्धौ च'(स्वा.प.अ.), क्तः । ४ प्रेष्यते स्म **प्रेषितम्** । 'इष गतौ'(दि.प.से.), क्तः । चत्वारि प्रस्थापितस्य । 'चलाविउं[१५]' इति भाषा ॥१४९२॥

**ख्याते प्रतीतप्रज्ञातवित्तप्रथितविश्रुताः ।**

१ ख्यायते स्म **ख्यातः** । 'ख्या प्रकथने'(अ.प.अ.), क्तः, तत्र । २ प्रतीयते स्म **प्रतीतः** । प्रतिपूर्वः 'इण् गतौ'(अ.प.अ.), क्तः । ३ प्रज्ञायते स्म **प्रज्ञातः** । ४ विद्यते उपलभ्यते **वित्तः** । 'विद्लृ लाभे'(तु.उ.अ.), क्तः, 'वित्तो भोगप्रत्यययोः[१६]'८।२।५८॥ इति निपातः । ५ प्रथ्यते **प्रथितः** । 'प्रथ प्रख्याने'(भ्वा.आ.से.), क्तः । ६ विश्रूयते स्म **विश्रुतः** । षड् विख्यातस्य ॥

**तप्ते सन्तापितो दूनो धूपायितश्च धूपितः ॥१४९३॥**

१ तप्यते स्म **तप्तः** । 'तप सन्तापे'(भ्वा.प.अ.), क्तः, तत्र[१७] । २ 'बहुलमेतन्निदर्शनम्'(चुरादिगणसू-३२५) इति चुरादित्वात् स्वार्थे णिचि **सन्तापितः** । ३ दूयते स्म **दूनः** । 'दूङ् परितापे[१८]'(दि.आ.से.), परितापः खेदः, क्तः, 'दुग्वोर्दीर्घश्च'(वा-८।४।४४॥)इति निष्ठानत्वदीर्घत्वे । ४-५ 'धूप सन्तापे'(भ्वा.प.से.), क्तः, 'गुपूधूप-[१९]'३।१।२८॥ इत्यादिनाऽय[२०]प्रत्यये[२१] **धूपायितः** । तदभावे **धूपितः** । पञ्च तप्तस्य ॥१४९३॥

**शीने स्त्यानम्**

१ श्यायते स्म **शीनम्** । 'श्यैङ् गतौ'(भ्वा.आ.अ.), क्तः, 'श्योऽस्पर्शे'८।२।४७॥ इति निष्ठानत्वम्, तत्र । २ स्त्यायति स्म **स्त्यानम्** । 'ष्ट्यै स्त्यै शब्दसङ्घातयोः'(भ्वा.प.अ.), क्तः, 'संयोगादेरातो धातोर्यण्वतः' ८।२।४३॥ इति निष्ठानत्वे[२२] । द्वे स्त्यानस्य । 'थीणउं[२३]' इति भाषा ॥

**उपनतस्तूपसन्न उपस्थितः[२४] ।**

---

१. '-यउ' इति३॥ २ '-ठुं' इति१, '-उ' इति३, '-ठौ' इति४॥ ३ 'समुत्तवत्' इति मुद्रितमूले ॥ ४ 'तिम तीम ष्टिम ष्टीम आर्द्रीभावे' इति स्वामी, 'तिम ष्टिम ष्टीम आर्द्रीभावे' इति मैत्रेयः, 'तिम स्तिम ष्टीम आर्द्रीभावे' इति सायणः ॥ ५. द्र. पदचन्द्रिका, भा-३, विशेष्यनिघ्नवर्गः, श्लो-१०६, पृ.१०८॥, रामाश्रमी३।१।१०५॥, पृ.५१९॥ ६ '-ते' इति१.३॥ ७ 'क्लिद' इति३.४.५॥ ८ 'आर्द्रभावे' इति स्वामी॥ ९ 'उन्नति' इति१.३.४॥ १०. '-न्नतः' इति५॥ ११. '-त्रः' इति१.४.५॥ १२. 'भीनउ' इति३, '-नुं' इति४॥ १३. '-कि' इति३॥ १४ '-ष्टः' इति३॥ १५. '-यो' इति३, '-यौ' इति४॥ १६. '-प्रतीययोः' इति३.४॥ १७ १प्रतौ नास्ति, 'ततः' इति५॥ १८. 'दु द्रु गतौ' इति युक्तः, 'दुग्वोर्दीर्घश्च'(वा-८।४।४४॥)इत्यत्र कौमुद्यां दीक्षितेन- ''दु गतौ दूनः । टुदु उपतापे इत्ययं तु न गृह्यते, सानुबन्धकत्वात् । मृदुतया दुतयेति माघः ।'' इत्युक्तत्वात् ॥ १९ '-प-' इति१.४॥ २०. '-यः' इति१.२॥ २१. '-यः' इति१॥ २२. '-त्वं' इति१.२॥ २३. '-उं' इति२, '-णौ' इति४॥ २४ '-तिः' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ उपनमति स्म **उपनतः** । २ उपसीदति स्म **उपसन्नः** । उभयत्र क्तः । ३ उपतिष्ठते स्म **उपस्थितः** । 'ष्ठा गतिनिवृत्तौ'(भ्वा.प.अ.), क्तः, 'घुमास्था-'६।४।६६॥ इतीत्वम् । त्रीणि उपनतस्य । 'हाजरि[1] थयुं[2]' इति भाषा ॥

## निर्वातस्तु गते वाते

१ निर्वाति स्म **निर्वातः** । 'वा गतिगन्धनयोः' (अ.प.अ.), क्तः । "निर्वात[3]निष्कम्पमिव प्रदीपम्"[कुमारसम्भवम्, सर्गः-३, श्लो-४८]इति कुमारसम्भवः । गते वाते वायौ । एकं निर्वातस्य । 'निवायुं' इति भाषा ॥

## निर्वाणः पावकादिषु ॥१४९४॥

१ निर्वाति शाम्यति स्म **निर्वाणः** । 'निर्वाणोऽवाते'८।२।५०॥ इति साधुः । पावकोऽग्निः, आदेः निर्वाणो मुनिः, निर्वाणम्, मुक्तिः, निर्वृत्तिश्च[4] । ([5]यथा- "प्रिय(प्रिया)दर्शनमेवाऽस्तु, किमन्यैर्दर्शनान्तरैः ।
निर्वाणमाप्यते येन, सरागेणाऽपि चेतसा[6] ॥१॥"[सु.भा. ४५७-१]इति) । एकं 'उल्हाणा' इति ख्यातस्य ॥१४९४॥

## प्रवृद्धमेधितं प्रौढम्

१ प्रवर्धते स्म[7] **प्रवृद्धम्** । 'वृधु वृद्धौ'(भ्वा.आ.से.), क्तः । २ एधते[8] स्म **एधितम्** । ३ प्रवहति स्म **प्रौढम्** । 'वह प्रापणे'(भ्वा.उ.अ.), प्रपूर्वः, क्तः, 'ग्रहिज्या-'६।१।१६॥ इति सम्प्रसारणम्, 'हो ढः'८।२।३१॥, 'झषस्तथोः'८।२।४०॥ इति धत्वम्, ष्टुत्वम्, 'ढो ढे लोपः'८।३।१३॥, 'ढ्रलोपे-'६।३।१११॥ इति दीर्घः, 'प्रादूहोढोढ्ये-'(वा-६।१।८९॥)इत्यादिना वृद्धिः । त्रीणि प्रवृद्धस्य । 'बाधिउं[9]' इति भाषा ॥

## विस्मृतान्तर्गते समे ।

१ विस्मर्यते स्म **विस्मृतम्** । 'स्मृ चिन्तायाम्' (भ्वा.प.अ.), [विपूर्वः], क्तः । प्रस्मृतमपि । यथा- "प्रस्मृतः किमथवा पठितोऽपि[10]"[ ]इति श्रीहर्षः । २ अन्तर्गच्छति स्म **अन्तर्गतम्** । 'गम्लृ गतौ'(भ्वा.प.अ.), क्तः । "अन्तर्गतं विस्मृते स्यात् प्राप्तमध्येऽपि[11] कथ्यते" [विश्वप्रकाशकोशः, तान्तवर्गः, श्लो-१७८]इति महेश्वरः । यथा- "अन्तर्गतानि शास्त्राणि दौर्गत्येन गरीयसा"[[12]] इति । द्वे विस्मृतस्य ॥

## उद्वान्तमुद्गते[13]

१ उद्वमति स्म **उद्वान्तम्** । 'टुवमु[14] उद्गिरणे'(भ्वा.प.से.), 'अनुनासिकस्य-'६।४।१५॥ इति निष्ठायां परतो दीर्घः । "उद्वान्तो निर्मदगजे समुद्गीर्णे च वाच्यवत्" [विश्वप्रकाशकोशः, तान्तवर्गः, श्लो-१३४]इति महेश्वरः । २ उद्गच्छति स्म **उद्गतम्** । उत्पूर्वो गमिरुद्वमनार्थः, तत्र । "उत्पूर्वस्यौहाङः[15] क्तप्रत्यये नत्वे च, 'झयो होऽन्यतरस्याम्'८।४।६२॥ इति धत्वे उद्धानमित्यपि पाठः"[[16]]इति सोमनन्दी । "उद्वानमिति च क्वचित् पाठे 'ओवै शोषणे' (भ्वा.प.अ.)इत्यस्मात् क्ते 'ओदितश्च'८।२।४५॥ इति नत्वे रूपम्"[[16]]इति केचित् । द्वे वमनस्य ॥

## गूनं हन्नं[17]

१ गूयते **गूनम्** । 'गु पुरीषोत्सर्गे'(तु.प.अ.), क्तः, 'दुग्वोर्दीर्घश्च'(वा-८।२।४४॥) । २ हद्यते स्म **हन्नम्** । 'हद पुरीषत्सर्गे'(भ्वा.आ.अ.), क्तः, तत्र । द्वे गूनस्य ॥

## मीढं तु मूत्रिते[17] ॥१४९५॥

१ मिह्यते स्म **मीढम्** । 'मिह सेचने'(भ्वा.प.अ.), क्तः, 'हो ढः'८।२।३१॥, 'झषस्तथोः-'८।२।४०॥ इति धत्वम्, ष्टुत्वम्, 'ढो ढे लोपः'८।३।१३॥, 'ढ्रलोपे-'६।३।१११॥ इति दीर्घः[18] । २ मूत्र्यते स्म **मूत्रितम्** । 'मूत्र प्रस्रवणे[19]'(चु.उ.से.), क्तः, तत्र । द्वे मूत्रितस्य[20] ॥१४९५॥

## विदितं बुधितं बुद्धं ज्ञातं सितगते अवात् । मनितं प्रतिपन्नं च

---

१. 'हादरि' इति१.२.३॥ २ '-यु' इति२, '-यो' इति३, '-यौं' इति४॥ ३ '-तः' इति४, '-वान्त-' इति५॥, कुमारसम्भवे-'निवात-' इति दृश्यते, ३।४८॥, पृ.४८॥ ४. '-तिश्च' इति१.४॥ ५ कोष्ठान्तर्गतपाठः ३प्रतावेव दृश्यते॥ ६. अम.क्षीर.३।१।९६॥, पृ.२५६॥, स्वोपज्ञटीका६।१४९४॥, पृ.३३३॥ ७. १प्रतौ नास्ति ॥ ८ '-ति' इति३.४॥ ९ '-उ' इति१.२, '-यो' इति३॥ १०. 'पति-' इति३॥ ११. '-ऽपि' इत्यस्य स्थाने मुद्रिते 'च' इति दृश्यते ॥ १२. द्र. अनेकार्थकैरवाकरकौमुदीटीका, भा-२, ४।९६॥, पृ.३४३॥ १३. तुलनीयोऽमरकोषः३।१।९७॥ १४ '-मु' इति१.४॥ १५. '-ङ्' इति३॥ १६. द्र. पदचन्द्रिका, भा-३, विशेष्यनिघ्नवर्गः, श्लो-९७, पृ.९९॥ १७ तुलनीयोऽमरकोषः३।१।९६॥ १८ '-र्घत्वं' इति१॥ १९ 'प्रस्र-' इति१.२.३॥ २०. 'मूत्रस्य' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ विद्यते **विदितम्**[1] । 'विद ज्ञाने'(अ.प.से.), 'मतिबुद्धिपूजार्थेभ्यश्च'३।२।१८८॥ इति वर्तमाने क्तः । २ बुध्यते[2] **बुधितम्** । 'बुध अवगमने'(दि.आ.अ.), 'मति-बुद्धि-'३।२।१८८॥ इति क्तः । ३ बुध्यते **बुद्धम्** । 'बुध अवगमने'(दि.आ.अ.), क्तः, 'यस्य विभाषा'७।२।१५॥ इतीण्निषेधः । [४ ज्ञायते **ज्ञातम्** । 'ज्ञा अवबोधने' (क्र्या.प.से.), क्तः] । ५-६ अवोपसर्गात् परे सितगते योज्ये, अवसीयते स्म **अवसितम्** । अवपूर्वः[3] 'षोऽन्त-कर्मणि'(दि.प.अ.), ज्ञानार्थः, क्तः, 'आदेचः-'६।१।४५॥ इत्यात्वम्[4], 'घुमास्था-'६।४।६६॥ इतीत्वम्[5] । अवगम्यते **अवगतम्** । ७ मन्यते **मनितम्** । 'मनु अवबोधने' (त.आ.से.), क्तः । 'मान पूजायाम्'(भ्वा.आ.से., चु.उ.से.)इत्यस्य स्थाने 'मन[6] पूजायाम्'( )इति धातुं केचित् पठन्ति तस्य वा । ८ प्रतिपद्यते[7] **प्रतिपन्नम्** । 'पद गतौ'(दि.आ.अ.), क्तः, 'मतिबुद्धि-'३।२।१८८॥ इत्यादिना क्तः। अष्ट विदितस्य ॥

## स्यन्नं रीणं स्नुतं स्नुतम् ॥१४९६॥

१ स्यदन्ते स्म **स्यन्नम्** । 'स्यदि किञ्चिच्चलने[8]' ( ), 'स्यन्दू प्र[9]स्रवणे[10]'(भ्वा.आ.से.), क्तः, 'रदा-भ्याम्-'८।२।४२॥ इति नत्वम्, 'अनिदिताम्-'६।४।२४॥ इति न्लोपः, तत्र। २ रीयते स्म **रीणम्** । 'रीङ्[11] स्रवणे' (दि.आ.अ.), क्तः[12], 'स्वादय ओदितः'(दिवादिगणसू- ) इति निष्ठानत्वम् । ३ स्नौति स्म **स्नुतम्** । 'ष्णु प्र[13]स्र-वणे'(अ.प.से.), क्तः, 'धात्वादेः षः सः'६।१।६४॥ । ४ स्रवति स्म **स्नुतम्**[14] । 'स्रु गतौ'(भ्वा.प.अ.), क्तः । चत्वारि स्यन्नस्य । 'स्रविउं[15]' इति भाषा ॥१४९६॥

## गुप्तगोपायितत्राताऽवितत्राणानि रक्षिते ।

१ गुप्यते **गुप्तम्**। 'गुपू रक्षणे'(भ्वा.प.से.), क्तः, 'स्वरतिसूति-'७।२।४४॥ इति नेट् । २ 'गुपूधूपविच्छि-[16] पणिपनिभ्य[17] आयः'३।१।२८॥ इत्यायप्रत्यये **गोपायितम्** । ३-५ त्रायते **त्रातम्** । 'त्रैङ्[18] पालने'(भ्वा.आ.अ.), क्तः, 'आदेचः-'६।१।४५॥ इत्यात्वम्, 'नुदविदोन्दत्राघ्राह्री-'८।२।५५॥ इति निष्ठानत्वे **त्राणम्** । ४ अव्यते स्म **अवितम्**। 'अव रक्षणादौ'(भ्वा.प.से.), क्तः । ६ रक्ष्यते[19] **रक्षितम्**। 'रक्ष पालने'(भ्वा.प.से.), 'मतिबुद्धिपूजार्थेभ्यश्च'३।२।१८८॥ इति चकारादन्यत्राऽपीति वर्तमाने क्तः । षड् रक्षितस्य ॥

## कर्म क्रिया विधा

१ क्रियते **कर्म,** पुंक्ली.। 'डुकृञ् करणे'(त.उ.अ.), '-मन्'(उणा-५८४)इति भावे कर्मणि वा मन् । कर्मा, कर्माणौ इत्यादि पुंसि । कर्म, कर्मणी, कर्माणि इत्यादि क्लीबे। २ क्रियते **क्रिया** । 'कृञः श च'३।३।१०॥ इति शः, शित्त्वाद् भावे यक्[20], 'रिङ्शयग्लिङ्क्षु' ७।४।२८॥ रिङादेशः, [यद्वा 'अचि श्नु-'६।४।७७॥ इतीयङ्]। ३ विधीयते **विधा** । विपूर्वः 'डुधाञ् धार-णादौ'(जु.उ.अ.), 'आतश्चोपसर्गे'३।३।१०६॥ इत्यङ् । स्त्रियामेतौ । त्रीणि कर्मणः । 'कामं[21]' इति भाषा ॥

## हेतुशून्या त्वास्या विलक्षणम्[22] ॥१४९७॥

१ हेतुशून्या कारणरहिता आस्या स्थितिः **विल-क्षणम्** इत्यन्वयः । विगतं लक्षणमालोचनमत्रेति विल-क्षणम्, अप्रतिपत्तिरित्यर्थः । "विलक्षणं मतं स्थानं तद्भवे निष्प्रयोजनम्"[[23]]इति भागुरिः । एकं विलक्षणस्य । 'नीषणियामू[24][25]' इति भाषा ॥१४९७॥

## कार्मणं मूलकर्म

१ सन्दिष्टं कर्मैव **कार्मणम्** । वृद्ध[26]परम्परोपदेशात् 'कर्मणः सन्दिष्टे'(हैमसू-७।२।१६७॥)इति स्वार्थिकोऽण्,

---

१. 'स्म वित्तम्' इति१॥ २. इतोऽग्रे १प्रतौ 'स्म' इति दृश्यते ॥ ३. '-र्वं' इति३॥ ४. '-त्वे' इति३॥ ५. इदं विचारणीयम्, 'द्यति-स्यति-'७।४।४०॥ इत्यादिनैवेत्त्वं भवति, 'घुमास्था-'६।४।६६॥ इत्यनेन तु ईत्वे 'अवसीतम्' इति भवेत् ॥ ६. 'मनिण्' इति४॥ ८. इतोऽग्रे १.३प्रत्योः 'स्म' इति दृश्यते ॥ ८. अयं धातुपाठः ५प्रतौ नास्ति॥, क्षीरतरङ्गिण्यादावपि न दृश्यते ॥ ९. 'प्रश्र-' इति३॥ १०. अयं धातुपाठः ४.५ प्रत्योर्न दृश्यते॥, 'स्यन्दू स्रवणे' इति स्वामिमैत्रेयौ ॥ ११. 'श्रवणे' इति२, मैत्रेयश्च, 'प्रश्र-' इति३॥ १२. १प्रतौ नास्ति॥ १३. 'प्रश्र-' इति१.२.३.५॥ १४. 'श्रु-' इति२॥ १५. 'श्र-' इति३, '-यौ' इति४॥ १६. 'गुप-' इति३.४॥ १७. '-पनि-पणि-' इति२.४.५॥ १८. 'त्रे-' इति१.२॥ १९. '-क्षते' इति५॥ २०. 'यङ्' इति३॥ २१. '-मण' इति३॥ २२. तुलनीयोऽमरकोषः३।२।२॥ २३. द्र. पदचन्द्रिका, भा-३, संकीर्णवर्गः, श्लो-११४, पृ.११९, रामाश्रमी३।२।२॥, पृ.५२५॥ २४. 'नीं-' इति१.४, 'नीषि-' इति५॥ २५. '-मुं' इति३.५, '-मू' इति४॥ २६. 'वृद्धं' इति५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'अन्'६।४।१६७॥ इति प्रकृतिभावः । २ मूलैरौषधादिभि-र्युद्ध[१]त्रासनोच्चाटनस्तम्भनवशीकरणादिकरणं[२] **मूलकर्म[३],** नकारान्तः । द्वे 'कामण' इति ख्यातस्य ॥

## अथ संवननं वशक्रिया ।

१ संवन्यते **संवननम्** । 'वन षन संभक्तौ' (भ्वा.प.से.), ल्युट् । संवदनमपि, सम्पूर्वो वदिर्वशीकरणार्थः । यथा- ''जयश्रियः संवदनं[४] यतस्तत्'' [रघुवंशम्, सर्गः-१६, श्लो-७४]इति मणौ[५] रघुः । २ वशकरणं **वशक्रिया** । द्वे वशीकरणस्य ॥

## प्रतिबन्धे प्रतिष्टम्भः

१ प्रतिबन्धनं **प्रतिबन्धः** । 'बन्ध बन्धने'(क्र्या.प.से.), घञ्, तत्र। २ प्रतिस्तम्भनं **प्रतिष्टम्भः** । 'स्तम्भु रोधने'(    ), घञ्, 'प्रतेश्च'६।१।२५॥ इति षत्वम्, 'ष्टुना ष्टुः'८।४।४१॥ । ''[६]बाहुप्रतिष्टम्भविवृद्धमन्युः'' [रघुवंशम्, सर्गः-२, श्लो-३२]इति रघुः । द्वे रोधस्य॥

## स्यादास्यास्थासना स्थितिः ॥१४९८॥

१ आसनम् **आस्या** । 'आस उपवेशने'(अ.आ.से.), 'परिचर्यापरिसर्यामृगयाटाट्यादयश्च[७]'(वा-३।३।१०१॥)इति साधुः। २ आस्थानम् **आस्था** । 'आतश्चोपसर्गे'३।३।१०६॥ इत्यङ् । ३ आसनम् **आसना**। 'आस उपवेशने'(अ.आ.से.), 'ण्यासश्रन्थोः-'३।३।१०६॥ इति युच्, स च स्त्रियाम् । ४ स्थानं **स्थितिः** । 'स्त्रियां क्तिन्'३।३।९४॥, 'घुमास्था-'६।४।६६॥ इतीत्त्वम् । चत्वारोऽपि स्त्रीलिङ्गाः । चत्वारि आस्यायाः[८] । 'बइसवउ[९]' इति भाषा ॥१४९८॥

## परस्परं स्यादन्योऽन्यमितरेतरमित्यपि ।

१ परं परमिति **परस्परम्** । कर्मव्यतिहारे 'सर्वनाम्नो द्वे स्तः'(    )इति वार्तिककारवचनाद् द्वितीयान्तस्य परशब्दस्य द्विर्वचने कृते समासवच्च बहुलम्, यदा न समासवत् तदा प्रथमैकवचनम्, पूर्वपदस्य द्वितीयाद्येकवचनान्तत्वम्, परपदस्येति पूर्वपदस्य द्वितीयाद्येकवचनस्थाने[१०] सुरेव स्यात्, रुत्वविसर्गौ, ततः कस्कादित्वात् सः, परपदस्य द्वितीयाद्येकवचनान्तैव, परस्परेणेत्यादि, एवम् **अन्योन्यम्,** बहुलोक्तेरेतयोर्नित्यं न समासवत् । इतरशब्दस्य नित्यं समासवदिति, तेन **इतरेतरम्,** स्त्रीनपुंसकयोरुत्तरपदस्य वाम्भावो वाच्यः । आमन्तत्वादव्ययत्वम्, परस्परम्[११-१], अन्योन्यम्[११-२], इतरेतरां[११-१] वा इमाः स्त्रियो भोजयन्ति, कुलानि वा । आमभावपक्षे परस्परमित्यादि पुंवदेव । त्रीणि परस्परस्य ॥

## आवेशाटोपौ संरम्भे

१ आवेशनम् **आवेशः** । 'विश प्रवेशने'(तु.प.अ.), घञ् । २ आटोपनम् **आटोपः** । टुपः सौत्रः, घञ् । ३ संरम्भणं **संरम्भः** । 'रभ राभस्ये'(भ्वा.आ.अ.), घञ्, 'रभेरशिब्लिटोः'७।१।६३॥ इति नुम्, तत्र । ''अवृष्टिसंरम्भमिवाम्बुवाहम्''[कुमारसम्भवम्, सर्गः-३, श्लो-४८]इति कुमारसम्भवः । आडम्बरोऽपि । ''आडम्बरः स्यात् संरम्भे गजगर्जिततूर्ययोः''[विश्वप्रकाशकोशः, रान्तवर्गः, श्लो-२३८]इति महेश्वरः । त्रीणि आडम्बरस्य । 'उद्धतवेष' इति भाषा ॥

## निवेशो रचना स्थितौ ॥१४९९॥

१ निवेशनं **निवेशः**। घञ् । २ रच्यते **रचना** । 'रच प्रतियत्ने'(चु.उ.से.), ल्युट् । ३ तिष्ठत्यस्याम्[१२] **स्थितिः** । 'ष्ठा गतिनिवृत्तौ'(भ्वा.प.अ.), 'स्त्रियां क्तिन्'३।३।९४॥, 'घुमास्था-'६।४।६६॥ इतीत्त्वम् । सामान्येन त्रीणि रचनायाः ॥१४९९॥

## निर्बन्धोऽभिनिवेशः स्यात्

१ निर्बन्धनं **निर्बन्धः**। २ अभिनिवेशनम् **अभिनिवेशः** । ''अथाऽनुरूपाभिनिवेशतोषिणा कृताभ्यनुज्ञा गुरुणा गरीयसा''[कुमारसम्भवम्, सर्गः-५, श्लो-७]इति कुमारसम्भवः । 'मीनहिवा[१३]' नाम्नी द्वे ॥

## प्रवेशोऽन्तर्विगाहनम् ।

१ प्रवेशनं **प्रवेशः** । प्रपूर्वो 'विश प्रवेशने'(तु.

---

१. '-श-' इति४.५॥ २. '-कारणं' इति१, इतोऽग्रे १प्रतौ 'मूलकरणं' इति दृश्यते ॥ ३. '-र्मा' इति३॥ ४ रघुवंशे 'संवननं' इत्येव दृश्यते, 'संजननम्' इति तत्र पाठान्तरम्, १६।७४॥, पृ.४२१॥ ५. मूलं मृग्यम् ॥ ६. 'बाहुः-' इति४॥ ७ '-टाट्यानामुपसंख्यानम्' इति वार्तिकस्वरूपं दृश्यते ॥ ८ 'आस्याया[:] चत्वारि' इति३॥ ९ '-वंउं' इति२, 'वैसवो' इति३, '-उं' इति५॥ १०. '-द्येकवचने' इति३॥ ११-१. '-रम्', ११-२. '-न्यं' इति३॥ १२. '-न्त्यस्यां' इति४॥ १३. 'मीनति' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प.अ.), 'पदरुजविश[श]स्पृशो घञ्'३।३।१६॥। २ पदार्था-[1] नामन्तर्मध्यस्य विगाहनम् **अन्तर्विगाहनम्** । द्वे प्रवेशस्य ॥

**गतौ वीङ्खा विहारेर्यापरिसर्पपरिक्रमाः ॥१५००॥**

१ गमनं **गतिः** । 'स्त्रियां क्तिन्'३।३।९४॥, तत्र । २ वीङ्खनं[2] **वीङ्खा**[3] । विपूर्वः 'इखि गतौ[4]'(भ्वा.प.से.), घञ् । ३ विहरणं **विहारः** । घञन्तः । ४ ईरणम् **ईर्या** । 'ईर गतिकम्पनयोः[5]'(अ.आ.से.), तुर्यस्वरादिः, भावे यक्[6], भिदादित्वादङ् । ५ परिसर्पणं **परिसर्पः** । 'सृप्लृ गतौ'(भ्वा.प.अ.), घञ् । ६ परिक्रमणं **परिक्रमः** । घञ् । सामान्येन षड् गतेः ॥१५००॥

**व्रज्याटाट्या पर्यटनम्**[7]

१ व्रजनं **व्रज्या** । 'वज्र गतौ'(भ्वा.प.से.), 'व्रज-यजोर्भावे क्यप्'३।३।९८॥, स्त्रीलिङ्गः । २ कुटिलमटनम् **अटाट्या** । 'अट गतौ'(भ्वा.प.से.), यङन्तः, 'परि-चर्यापरिसर्यामृगयाटाट्यादयश्च[8]'(वा-३।३।१०१॥)इति साधुः । अटाटाऽपि । आट्याऽपि । यन्मनुः- "तौर्यत्रिकं वृषाट्या च कामजो दशको गणः"[मनुस्मृतिः, अध्या-७, श्लो-४७]इति । "अटा पर्यटनं भ्रमः"[[9]]इति रत्नकोषादटा-ऽपि । ३ पर्यट्यते **पर्यटनम्** । त्रीणि वक्रगतेः ॥

**चर्या त्वीर्यापथस्थितिः**[17] **।**

१ चरणं **चर्या**, क्यबन्तः । २ ईर्यते गुरोः शास्त्रोपासनया ज्ञायत ईर्या । 'ईर गतौ याचने च' (अ.आ.से.), 'ऋहलोर्ण्यत्'३।१।१२४॥ । तस्याः पन्था उपायः । 'ऋक्पूरब्धू-'५।४।७४॥ इत्यादिना अः । ईर्या-पथः साध्वाचारः । यदुक्तम्- "ईर्यापथो ध्यानमौना-दिकं भिक्षुव्रतम्"[[10]]। तत्र स्थितिः **ईर्यापथस्थितिः** । ईर्याऽपि, यन्मुनिः-"चर्यां त्वीर्यां विदुर्बुधाः"[[11]]इति । द्वे साधुगतिनाम्नी ॥

**व्यत्यासस्तु विपर्यासो वैपरीत्यं विपर्ययः ।१५०१।**
**व्यत्यये**

१ व्यतिक्रम्याऽऽसनं **व्यत्यासः** । 'आस उप-वेशने'(अ.आ.से.), घञ्। २ विपर्यसनं **विपर्यासः**। विपरिपूर्वः 'असु क्षेपणे'(दि.प.से.), घञ् । ३ विपरीत-स्य भावो **वैपरीत्यम्** । ४ विपर्ययनं **विपर्ययः**। विपरि-पूर्वः 'इण् गतौ'(अ.प.अ.), 'एरच्'३।३।५६॥ इत्यच् ॥१५०१॥ ५ व्यत्ययनं **व्यत्ययः** । व्यतिपूर्वः 'इण् गतौ'(अ.प.अ.), 'एरच्'३।३।५६॥ इत्यच् । पञ्च विपर्यासस्य । 'पालटणउं[12]' इति भाषा ॥

**अथ स्फातिर्वृद्धौ**

१ स्फायनं **स्फातिः** । 'स्फायी वृद्धौ'(भ्वा. आ.से.), 'स्त्रियां क्तिन्'३।३।९४॥, 'लोपो व्योः-'६।१।६६॥ इति यलोपः। २ वर्धनं **वृद्धिः**। 'वृधु वृद्धौ'(भ्वा. आ.से.), 'स्त्रियां क्तिन्'३।३।९४॥, तत्र । द्वे वृद्धेः ॥

**प्रीणनेऽवनतर्पणे ।**

१ प्रीण्यते **प्रीणनम्**। 'प्रीञ् तर्पणे[13]'(क्र्या.उ.अ.), णिजन्तः, 'धूञ्प्रीञोर्नुक्'(वा-७।३।३७॥), ल्युट्, तत्र । २ अव्यत **अवनम्** । 'अव रक्षणादौ'(भ्वा.प.से.), ल्युट्। ३ तृप्यते[14] **तर्पणम्** । 'तृप प्रीणने'(दि.प.अ.), ल्युट् । त्रीणि प्रीतिकरणस्य ॥

**परित्राणं तु पर्याप्तिर्हस्तधारणमित्यपि ॥१५०२॥**

१ परित्रायते **परित्राणम्** । '[15]त्रैङ् पालने'(भ्वा. आ.अ.), ल्युट् । २ पर्यापणं **पर्याप्तिः** । परिपूर्वः 'आप्लृ व्याप्तौ'(स्वा.प.अ.), त्राणार्थः, 'स्त्रियां क्तिन्' ३।३।९४॥ । ३ हस्तस्य धारणं रोधो **हस्तधारणम्** । रक्षणीयस्य पृष्ठे हस्तस्थापनं वा । हस्तवारणमित्यपि । ""हस्तेन वधकस्य वारणम्'[[16]]इति सुभूतिः । प्रजि-हीर्षातो हस्तस्य वारणं रोधः हस्तयोरुन्नोलनवधात्[17] त्राणं हस्तवारणम्"[पदचन्द्रिका, भा-३, सङ्कीर्णवर्गः, श्लो-११७] इति मिश्राः । त्रीणि मारणोद्यतनरहस्तग्रहणस्य ॥१५०२॥

**प्रणतिः प्रणिपातोऽनुनये**

१. 'पदार्थात् पदान्तर्म-' इति४.५॥ २. 'वीख-' इति३.४॥ ३. 'वीख-' इति१.३.४॥ ४ उखेत्यादिदण्डात्मकोऽयं धातुः ॥ ५. 'ईर गतौ' इति स्वामी, 'ईर गतौ कम्पने च' इति मैत्रेयसायणौ । ६. 'युक्' इति३॥ ७ तुलनीयोऽमरकोषः२।७।३५॥ ८. '-टाट्यानामुपसंख्यानम्' इति वार्तिकस्वरूपं दृश्यते ॥ ९. द्र. पदचन्द्रिका, भा-२, ब्रह्मवर्गः, श्लो-४३२, पृ.५२०॥, रामाश्रमी२।७।३५॥, पृ.३३८॥ १०. द्र. स्वोपज्ञटीका६।१५०१॥, पृ.३३५॥ ११. द्र. अम.क्षीर.२।७।३५॥, पृ.१७०॥, स्वोपज्ञटीका६।१५०१॥, पृ.३३५॥ १२. '-णो' इति३, '-णौ' इति४॥ १३. मैत्रेयमतेऽयं पाठः, 'प्रीञ् तर्पणे कान्तौ च' इति स्वामिसायणौ ॥ १४. 'तर्प्य-' इति३.४॥ १५. 'त्रै-' इति१.२.५॥ १६. द्र. पदचन्द्रिका, भा-३, संकीर्णवर्गः, श्लो-११७, पृ.१२२॥ १७ '-नेन' इति पदचन्द्रिकायाम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ प्रणमनं **प्रणतिः** । प्रपूर्वः[१] 'णमु(णम) प्रह्वत्वे शब्दे च'[२](भ्वा.प.अ.). 'स्त्रियां क्तिन्'३।३।९४॥, 'अनुदात्तोपदेश-'६।४।३७॥ इति म्लोपः[३] । २ प्रणिपतनं **प्रणिपातः** । 'पत्लृ पतने'[४](भ्वा.प.से.), भावे घञ् । ३ अनुनयनम् **अनुनयः** । 'णीञ् प्रापणे'(भ्वा.उ.अ.), 'एरच्'३।३।५६॥ इत्यच्, तत्र । त्रीणि 'मनावणउं'[५] इति ख्यातस्य[६] ॥

**अथ शयने क्रमात् ।**

**विशाय उपशायश्च**

१-२ क्रमात् पर्यायेण प्राहरिकादीनां शयने विशयनं **विशायः** । उपशयनम् **उपशायः** । व्युपपूर्वात् 'शीङ् स्वप्ने'(अ.आ.से.), 'श्नाद्व्युपयोः(व्युपयोः) शेतेः-'३।३।३९॥ इति घञ् । द्वे यामिकादीनामनुक्रमेण शयनस्य ॥

**पर्यायोऽनुक्रमः क्रमः ॥१५०३॥**

**परिपाट्यानुपूर्व्यावृत्**

१ पर्ययणं **पर्यायः** । परिपूर्वाद् 'इण् गतौ'(अ.प.अ.) अस्मात् 'परावनुपात्यय इणः'३।३।३८॥ इति घञ् । २ अनुक्रमणम् **अनुक्रमः** । 'क्रमु पादविक्षेपे'(भ्वा.प.से.), भावे घञ्, 'नोदात्तोपदेश-'७।३।३४॥ इति न वृद्धिः । अनुगतः क्रमोऽनुक्रमः । प्रादिसमासो वा । ३ एवं क्रमणं **क्रमः** ॥१५०३॥ ४ परिपाटनं परिपाटिः, स्त्रीलिङ्गः । 'पट गतौ'(भ्वा.प.से.), णिजन्तः, 'अच इः'(उणा-५७८)इति इः । 'कृदिकारात्-'(गणसू-४।१।४५॥) इति ङीषि **परिपाटी** । "कृता लङ्काभर्तुर्वदनपरिपाटीषु घटना"[[७]]इति पूर्वकविप्रयोगः । तृतीयस्वरान्तोऽप्ययम् । ५ पूर्वं[८] पूर्वमनु अनुपूर्वम् । वीप्सायामव्ययीभावः । अनुपूर्वस्य भावः कर्म वा आनुपूर्व्यम् । दृढादित्वात् ष्यञ्, 'षिद्गौरादिभ्यश्च'४।१।४१॥ इति ङीष्, 'हलस्तद्धितस्य' ६।४।१५०॥ इति यलोपः **आनुपूर्वी,** स्त्रीक्लीबलिङ्गः । क्लीबे आनुपूर्व्यम् । ६ आवर्तनम् **आवृत्** । आवर्तते व्यापारोऽस्यामिति वा । 'वृतु वर्तने'(भ्वा.आ.से.), सम्पदादित्वात् क्विप् । आवृतौ, आवृतः इत्यादि । स्त्रीलिङ्गोऽयम् । षडनुक्रमस्य ॥

**अतिपातस्त्वतिक्रमः ।**

**उपात्ययः पर्ययश्च**

१ अतीत्य पतनं गतिः **अतिपातः** । अतिपूर्वात् 'पत्लृ पतने'[९](भ्वा.प.से.) अस्माद् भावे घञ् । २ अतिक्रमणम् **अतिक्रमः** । ३ उपपन्नस्याऽत्ययोऽतिक्रमणम् **उपात्ययः** । उपातिपूर्वः 'इण् गतौ'(अ.प.अ.), 'एरच्-' ३।३।५६॥ इत्यच् । ४ परित्यज्याऽयनं **पर्ययः**[१०] । 'इण् गतौ' (अ.प.अ.), 'परावनुपात्ययः-'३।३।३८॥ इति घञभावे 'एरच्'३।३।५६॥ । चत्वारि अतिक्रमणस्य । 'उल्लंघनम्' इति भाषा ॥

**समौ सम्बाधसङ्कटौ ॥१५०४॥**

१ सम्बाध्यते **सम्बाधः** । करणे घञ् । २ **सङ्कटम्** । 'सम्प्रोदश्च-'५।२।९२॥ इति कटच् । "सङ्कटं ना तु[११] सम्बाधः"[अमरकोषः३।१।८५॥]इत्यमरः । द्वे सम्बाधस्य । 'सांकडुं'[१२] इति भाषा ॥१५०४॥

**कामं प्रकामं पर्याप्तं निकामेष्टे यथेप्सिते ।**

१-२ काम्यते **कामम्,** प्रकाम्यते **प्रकामम्** । उभयत्र घञ् । ३ पर्याप्यते स्म **पर्याप्तम्** । 'आप्लृ व्याप्तौ'(स्वा.प.अ.), क्तः । ४ निकाम्यते **निकामम्,** घञन्तम्[१३] । एते चत्वारोऽप्यकारान्ता अनव्ययाः । यथा (यत्) शाश्वतः- "कामे निकामे कामाख्या"[शाश्वतकोशः, श्लो-१०३]इति । अव्ययास्तु मकारान्ता अव्ययेषु ज्ञातव्याः । ५ इष्यते **इष्टम्** । 'इष गतौ'(दि.प.से.), निष्ठा । ६ ईप्सितमनतिक्रम्य **यथेप्सितम्** । प्रायः क्रियाविशेषणान्येतानि । [पर्याप्तमपि], यथा- "पर्याप्तमाप्ताः प्रविशं तु मध्यः"[[१४]]इति । एवमन्येऽपि । षड् यथेप्सितस्य । '[१५]जिउं इच्छा' इति भाषा ॥

**अत्यर्थे गाढमुद्गाढं बाढं तीव्रं भृशं दृढम्**
**॥१५०५॥**

**अतिमात्रातिमर्यादनितान्तोत्कर्षनिर्भराः ।**

**भरैकान्तातिवेलातिशयाः**

---

१. 'परि-' इति१.४.५॥ २. 'णम प्रह्वत्वे' इत्येव स्वामी ॥ ३ 'न्लो-' इति४.५॥ ४ 'शल हुल पत्लृ गतौ' इति क्षीरतरङ्गिण्यादयः ॥ ५ '-णुं' इति१, '-णौ' इति३.४॥ ६. 'भाषायाः' इति३॥ ७ द्र. पदचन्द्रिका, भा-२, ब्रह्मवर्गः, श्लो-४३३, पृ.५२१॥ ८ ३प्रतौ नास्ति॥ ९ 'शल हुल पत्लृ गतौ' इति क्षीरतरङ्गिण्यादयः ॥ १०. '-र्यायः' इति३.४.५॥ ११. 'नु' इति३.४.५॥ १२. '-डूं' इति१, '-डौ' इति३॥ १३. '-न्तः' इति४॥ १४ द्र. अनेकार्थकैरवाकरकौमुदीटीका, भा-२, ३।२६७॥, पृ.११८॥ १५. 'जे-' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ अर्थो निवृत्तिर्विषयो वा, तमतिक्रान्तम् **अत्यर्थम्** । 'अत्यादयोऽतिक्रान्ताद्यर्थे-[1]'(वा-२।२।१८॥)इति समासः, तत्र । २ गाहते स्म **गाढम्** । 'गाहू विलोडने' (भ्वा.आ.अ.), ([2]धत्वढत्वादि । ३ उद्गाहते स्म **उद्गाढम्** । उद्पूर्वः 'गाहू विलोडने'(भ्वा.आ.से.), क्तः) । 'हो ढः'८।२।३१॥, 'इषस्तथोः-'८।२।४०॥ इति धत्वम्, ष्टुत्वम्, 'ढो ढे लोपः'८।३।१३॥ । ४ बाहते **बाढम्** । 'वेहृ जेहृ बाहृ प्रयत्ने'(भ्वा.आ.से.), 'क्षुब्धस्वान्त-'७।२।१८॥ इति साधुः । भृशार्थेऽयम्, अन्यत्र वाहितः । ५ तीवति **तीव्रम्** । 'तीव स्थौल्ये[3]'(भ्वा.प.से.), बाहुलकात् 'स्फायितञ्चि-'(उणा-१७०)इति रक् । " 'ऋज्रेन्द्राग्र-' (उणा-१८६)इत्यत्र बहुलवचनात् 'तिज निशाने'(भ्वा.आ.से.) अतोऽपि रन्, दीर्घत्वं च, जकारस्य च वत्वम्" []इत्युणादौ। ६ 'भृशु भ्रंशु अधःपतने'(दि.प.से.), धातूनामनेकार्थत्वाद् 'इगुपध-'३।१।१३५॥ इति कः **भृशम्**, तालव्यशम् । बिभर्तीति वा। भृञो बाहुलकात् कित् शः । ७ दर्हति **दृढम्**। 'दृढः स्थूलबलयोः'७।२।२०॥ इति साधुः ॥१५०५॥ ८-९ अतिक्रान्तं मात्रां मर्यादां च **अतिमात्रम्, अतिमर्यादम्** । १० नितम्यति स्म **नितान्तम्** । 'तमु काङ्क्षायाम्'(दि.प.से.), क्तः, 'अनुनासिकस्य क्विझलोः-'६।४।१५॥ इति दीर्घः । ११ उत्कृष्यतेऽनेन **उत्कर्षः** । 'कृष विलेखने'(भ्वा.प.अ., तु.उ.अ.), करणे घञ् । १२ निःशेषेण भरोऽत्र **निर्भरः** । १३ भ्रियतेऽनेन **भरः** । 'भृ भर्त्सने'(क्र्या.प.से.), 'ऋदोरप्'३।३।५७॥ इति करणेऽप् । १४ एकोऽन्तो निश्चयोऽत्रेति **एकान्तम्** । १५ अतिक्रान्तो वेलां मर्यादाम् **अतिवेलम्** । 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया'(वा-२।२।१८॥)इति समासः, 'गोस्त्रियोरुपसर्जनस्य'१।२।४८॥ इति ह्रस्वः। १६ अतिशेते जयत्यनेन **अतिशयः** । अतिपूर्वः 'शीङ् स्वप्ने'(अ.आ.से.), 'एरच्'३।३।५६॥ इत्यच्। एते षोडशाऽपि क्रियाविशेषणत्वादद्रव्ये वर्तमानाः क्लीबलिङ्गाः । यथा- "नितान्तं पठति[4]"। यत् तेषां मध्ये द्रव्यवाचि, तत् त्रिषु वाच्यलिङ्गमित्यर्थः । यथा- "दृढः कम्बलः, दृढा पटी, दृढं वस्त्रम्"[ ]इति । षोडशात्यन्तस्य ॥

**जृम्भा[1] तु जृम्भणम्[2] ॥१५०६॥**

१ जृम्भते **जृम्भा,** त्रिलिङ्गः[5]। २ जृम्भ्यते **जृम्भणम्** । 'जृभी गात्रविनामे'(भ्वा.आ.से.), ल्युट् । द्वे जृम्भायाः । '[6]बगाई' इति भाषा ॥१५०६॥

**आलिङ्गनं[1] परिष्वङ्गः[2] संश्लेष[3] उपगूहनम्[4] ।**
**अङ्कपाली[5] परीरम्भः[6] क्रोडीकृतिः[7]**

१ आलिङ्ग्यते **आलिङ्गनम्** । 'लिगि विचित्रीकरणे[7]'(चु.उ.से.), ल्युट् । २ परिष्वञ्जनं **परिष्वङ्गः** । 'ष्वञ्ज परिष्वङ्गे'(भ्वा.आ.अ.), घञ्, 'उपसर्गात् सुनोति-सुवति-'८।३।६५॥ इत्यादिना षत्वम्, 'चजोः कु घिण्ण्यतोः'७।३।५२॥ इति कुत्वम् । ३ संश्लेषणं **संश्लेषः**। 'श्लिष आलिङ्गने'(दि.प.अ.), घञ् । ४ उपगूह्यते **उपगूहनम्** । 'गुहू संवरणे'(भ्वा.उ.से.), ल्युट्, '-उपधाया गोहः'६।४।८९॥ इति दीर्घः। ५ अङ्के पाल्यते अङ्कपालिः । चुरादिः, णिजन्तः, 'अच इः'(उणा-५७८)इति इः, 'कृदिकारात्-' (गणसू-४।१।४५॥)इति ङीषि **अङ्कपाली** । तृतीयस्वरान्तोऽप्ययम् । ६ परिरम्भणं **परिरम्भः** । 'रभ राभस्ये' (भ्वा.आ.अ.), घञ्, 'रभेरशब्लिटोः'७।१।६३॥ इति नुम् । 'उपसर्गस्य घञ्यमनुष्ये बहुलम्'६।३।१२२॥ इति दीर्घत्वे [8]परीरम्भोऽपि। ७ क्रोडीकरणं **क्रोडीकृतिः**। 'स्त्रियां क्तिन्' ३।३।९४॥ । सप्त आलिङ्गनस्य ॥

**अथोत्सवे[1] ॥१५०७॥**
**महक्षणोद्धवोद्धर्षाः[2,3,4,5]**

१ उदत्यर्थे[9] सूते सुखमिति **उत्सवः** । उत्पूर्वः 'षु प्रसवे[10]'( ), पचाद्यच्, तत्र ॥१५०७॥ २ मह्यते पूज्यतेऽनेनेति **महः**। 'मह पूजायाम्'(भ्वा.प.से., चु.उ.से.), 'पुंसि संज्ञायाम्-'३।३।११८॥ इति घः, अदन्तोऽयम् । "महमसाविति बन्धुतयोदितैः"[शिशुपालवधम्, सर्गः-६, श्लो-१९]इति माघात् सकारान्तोऽपि । "महस्तूत्सवतेजसोः"[अमरकोषः३।३।२३१॥]इत्यनेकार्थश्च । ३ क्षणुते दुःखमिति **क्षणः** । 'क्षणु हिंसायाम्'(त.उ.से.), तनादिः,

१. 'अत्यादय क्रान्ताद्यर्थे द्वितीयया' इति वार्तिकस्वरूपं दृश्यते ॥ २ कोष्ठान्तर्गतपाठः ३.४प्रत्योर्नास्ति ॥ ३ 'लौल्ये' इति४.५, 'पीव मीव नीव तीव स्थौल्ये' इति स्वामी, 'पीव मीव तीव णीव स्थौल्ये' इति मैत्रेयसायणौ ॥ ४ '-न्ति' इति१॥ ५ '-ङ्गाः' इति५॥ ६. 'बा-' इति२॥ ७ 'चित्रीकरणे' इति क्षीरतरङ्गिण्यादयः॥ ८. 'परि-' इति३.५॥ ९ '-र्थे' इति३॥ १०. व्युत्पत्त्यां 'सूते' इति व्युत्पत्तित्वात् 'षूङ् प्राणिगर्भविमोचने'(अ.आ.से.)इति युक्तः प्रतिभाति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पचाद्यच् । ४ उद्धुनाति दुःखं **उद्धवः** । 'धूञ् कम्पने' (क्र्या.उ.से.), अच् । ५ उदुच्चैर्हर्षयति **उद्धर्षः** । 'हर्ष तुष्टौ'[1]( ), णिजन्तादच् । पञ्च उत्सवस्य ॥

**मेलके सङ्गसङ्गमौ ।**

१ मेलनं मेलः । 'मेल श्लेषणे'(तु.प.से.), तुदादिः, भावे घञ्, स्वार्थे कनि **मेलकः**, तत्र। २ सञ्जनं **सङ्गः**। 'षञ्ज सङ्गे'(भ्वा.प.अ.), भावे घञ्, 'चजोः-' ७।३।५२॥ इति कुत्वम् । ३ सङ्गमनं **सङ्गमः**, पुंक्ली.। 'गम्लृ गतौ'(भ्वा.प.अ.), भावे घञि, 'नोदात्तोपदेश-' ७।३।३४॥ इति न वृद्धिः । त्रीणि मेलस्य ॥

**अनुग्रहोऽभ्युपपत्तिः**

१ अनुग्रहणम् **अनुग्रहः** । २ अभ्युपपदनम् **अभ्युपपत्तिः**। 'पद गतौ'(दि.आ.अ., चु.आ.से.), 'स्त्रियां क्तिन्'३।३।९४॥ । द्वे अनुग्रहस्य । 'प्रसादं' इति भाषा॥

**समौ निरोधनिग्रहौ ॥१५०८॥**

१ निरोधनं **निरोधः**। 'रुधिर्[2] आवरणे'(रु.उ.अ.), घञ् । "अन्तश्चराणां मरुतां निरोधात्"[कुमारसम्भवम्, सर्गः-३, श्लो-४८ ]इति कुमारसम्भवः । २ निग्रहणं **निग्रहः** । 'ग्रहवृद-'३।३।५८॥ इत्यप् । द्वे निग्रहस्य[3] । 'रूंधवउं[4][5]' इति भाषा ॥१५०८॥

**विघ्नोऽन्तरायप्रत्यूहव्यवायाः**

१ विहन्यते साध्यमनेनेति **विघ्नः** । विपूर्वः 'हन हिंसागत्योः'(भ्वा.प.अ.), घञर्थे कः, 'गमहनजन-'६।४।९८॥ इत्यादिनाऽकारलोपः, 'हो हन्तेः-'७।३।५४॥ इति कुत्वम्, तत्र। २ कार्यसिद्धिमन्तरं व्यवधानमाययति **अन्तरायम्**। इणो ण्यन्तात् 'कर्मण्यण्'३।२।१॥ । ३ प्रतीपमूहनं **प्रत्यूहः** । 'ऊह वितर्के'(भ्वा.आ.से.)। ४ व्यवधाय[6] अयनं **व्यवायः** । व्यवपूर्वः 'इण् गतौ'(अ.प.अ.), घञ् भावे । चत्वारि विघ्नस्य ॥

**समये क्षणः ।**

**वेलावारावसरः प्रस्तावः प्रक्रमोऽन्तरम् ।१५०९।**

१ समेति **समयः** । सम्पूर्वः 'इण् गतौ'(अ.प.अ.), अच्, तत्र । २ क्षणुते मासादिकं **क्षणः** । 'क्षणु हिंसायाम्'(त.उ.से.), तनादिः, पचाद्यच् । ३ वेलयति कालमुपदिशति **वेला** । 'वेलृ गतौ'[7]( ), चुरादिः[8], कर्मणि घञ्, अज् वा । 'वेलृ केलृ चेलृ चलने[9]'(भ्वा.प.से.), 'गुरोश्च-'३।३।१०३॥ इत्यकारः । यद्वा 'कल विल क्षेपे'(चु.उ.से.), चुरादिः, ततोऽच् । ४ व्रियते **वारः**, पुंक्लीबलिङ्गः । 'वृञ् वरणे'(स्वा.उ.से.), बाहुलकात् कर्मणि घञ् । यद्वा 'वल वल्ल संवरणे च[10]'(भ्वा.आ.से.), 'हलश्च'३।३।१२१॥ इति करणे घञ्। 'वारमूल-'()इति पक्षे रः। [५ अवसरति **अवसरः**]। ६ प्रसङ्गेन स्तूयते **प्रस्तावः**। प्रपूर्वः, 'प्रात् स्तुद्रुस्तोः[11]' (हैमसू-५।३।६७॥)इति घञ्।७ प्रक्रम्यते **प्रक्रमः** । ८ अनिति[12] **अन्तरम्**, पुंक्लीबलिङ्गः। अष्टौ समयस्य ।१५०९।

**अभ्यादानमुपोद्घातः आरम्भः प्रोपतः क्रमः ।**

१ अभिमुखेना[13]ऽऽदानम् **अभ्यादानम्** । उपोद्हननम् **उपोद्घातः** । भावे घञ् । यथोक्तम्- "चिन्तां[14] प्रकृतसिद्ध्यर्थामुपोद्घातं प्रचक्षते"[[15]]इति। उद्घातोऽपि । "उद्घातो प्रणवो यासाम्"[कुमारसम्भवम्, सर्गः-२, श्लो-१२]इति रघुः(कुमारसम्भवः) । ३ आरम्भणम् **आरम्भः**। 'रभ राभस्ये'(भ्वा.आ.अ.), भ्वादिरात्मनेपदी। "राभस्यं कार्योपक्रमः[16]"[मा.धातुवृत्तिः, भ्वादिः, धातुसं-२९३]इति धातुवृत्तिः । घञ्, 'रभेरशब्लिटोः'७।१।६३॥ इति नुम् । ४.५ प्रोपतः क्रमः, प्रोपाभ्यामुपसर्गाभ्यां परः क्रमशब्दो योज्यः[17]। प्रक्रमणं **प्रक्रमः** । उपक्रमणम् **उपक्रमः**। उभयत्र 'क्रमु पादविक्षेपे'(भ्वा.प.से.), भावे घञ्[18], 'नोदात्तोपदेश-'७।३।३४॥ इति वृद्ध्यभावः । पञ्च आदिकर्मणः । 'कार्य प्रारंभ' इति भाषा ॥

१. क्षीरतरङ्गिण्यादौ न दृश्यते ॥ २ '-दि' इति३॥ ३ 'निरोधस्य' इति३॥ ४ 'रुं-' इति३॥ ५ '-उ' इति१, '-वौ' इति३॥ ६. '-धा' इति३॥ ७ 'वेल कालोपदेशे' इति चुरादौ क्षीरतरङ्गिण्यादयः ॥ ८ 'वे-' इति१.२.५॥, 'वेल्लृ चेलृ केलृ खेलृ क्ष्वेलृ चलने' इति स्वामी, 'वेलृ चेलृ केलृ खेलृ क्ष्वेलृ वेल्ल ('चेल्ल' इत्यधिको मैत्रेयमते) चलने' इति मैत्रेयसायणौ ॥ ९ 'अच्' इत्येव १प्रतौ॥ १०. 'च' इति १प्रतौ नास्ति॥, 'वल संवरणे' इति स्वामी, 'वल वल्ल संवरणे ('सञ्चरणे च' इत्यधिकः सायणमते)' इति मैत्रेयसायणौ॥ ११. 'प्रे द्रुस्तुस्रुवः'३।३।२७॥ इति पाणिनीयसम्मतसूत्रम् ॥ १२. १.२.५प्रतिषु नास्ति ॥ १३. '-ख्ये-' इति३॥ १४ 'चिता' इति१॥ १५ द्र. अम.क्षीर.३।२।२६॥, पृ.२६६॥, पदचन्द्रिका, भा-३, संकीर्णवर्गः, श्लो-१३८, पृ.१४५॥ १६. मा.धातुवृत्तौ- "राभस्यमुपक्रमः" इति दृश्यते, पृ.२७२॥ १७ '-पयोज्यते' इति३॥ १८. '-ञि' इति१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**प्रत्युत्क्रमः प्रयोगः[१] स्यात्**

१ प्रत्युत्क्रमणं **प्रत्युत्क्रमः** । २ कर्मारम्भे प्रथमं प्रयुक्तिः **प्रयोगः** । "प्रयोगः कार्मणे पुंसि प्रयुक्तौ च निदर्शने"[विश्वलोचनकोशः, गान्तवर्गः, श्लो-४९]इति श्रीधरः । प्रयुक्तिर्व्यापारः, तत्र यथा- "मुग्धत्वादविदितकैतवप्रयोगा गच्छन्त्यः सपदि पराजयं तरुण्यः"[[२]]इति । द्वे कर्मारम्भे प्रथमव्यापारस्य ॥

**आरोहणं त्वभिक्रमः ॥१५१०॥**

१ आरुह्यते **आरोहणम्** । आङ्पूर्वः 'रुह प्ररोहे[४]' (भ्वा.प.अ.), ल्युट् । "आरोहणं स्यात् सोपाने समारोहे प्ररोहणे"[विश्वप्रकाशकोशः, णान्तवर्गः, श्लो-८४]इति महेश्वरः । समारोहे यथा- "आरोहणार्थं नवयौवनेन कामस्य सोपानमिव प्रयुक्तम्"[कुमारसम्भवम्, सर्गः-१, श्लो-३९]इति कुमारसम्भवः । २ अभिमुखं क्रमणम् **अभिक्रमः** । द्वे 'चढवउं[५]' इति ख्यातस्य[६] ॥१५१०॥

**आक्रमेऽधिक्रमक्रान्ती**

१ आक्रमणम् **आक्रमः**, तत्र । २ अधिक्रमणम् **अधिक्रमः** । ३ क्रमणं **क्रान्तिः** । 'क्रमु पादविक्षेपे' (भ्वा.प.से.), 'स्त्रियां क्तिन्'३।३।९४॥, 'अनुनासिकस्य क्विझलोः-'६।४।१५॥ इति दीर्घः। अधिक्रमश्च क्रान्तिश्च अधिक्रमक्रान्ती । त्रीणि आक्रमस्य[७] । ग्रहणमिति भाषा ॥

**व्युत्क्रमस्तूत्क्रमोऽक्रमः ।**

१ व्युत्क्रमणं **व्युत्क्रमः**। २ उत्क्रमणम् **उत्क्रमः** । ३ न क्रमः **अक्रमः** । त्रीणि अक्रमस्य । 'आघा पाछा' इति भाषा ॥

**विप्रलम्भो विप्रयोगो वियोगो विरहः समाः ॥१५११॥**

१ विप्रलम्भो **विप्रलम्भः**। 'डुलभष् प्राप्तौ'(भ्वा.आ.अ.), घञि, 'लभेश्च'७।१।६४॥ इति नुम् । २ विप्रयोजनं **विप्रयोगः** । 'युजिर् योगे'(रु.उ.अ.), घञि, 'चजोः-'७।३।५२॥ इति कुत्वम् । ३ एवं वियोजनं **वियोगः** । ४ विरहणं **विरहः** । 'रह त्यागे'(चु.उ.से.), चुरादिः, अदन्तः, ततो घञ् । चत्वारि विरहस्य ॥१५११॥

**आभा राढा विभूषा श्रीरभिख्याकान्तिविभ्रमाः ।**
**लक्ष्मीश्छाया च शोभायाम्**

१ आभानम् **आभा,** स्त्रियाम्[८] । आङ्पूर्वः[९] 'भा दीप्तौ'(भ्वा.प.अ.), 'आतश्चोपसर्गे'३।३।१०६॥ इत्यङ् । २ राजत्यनया **राढा** । 'राजृ दीप्तौ'(भ्वा.उ.से.), भिदादित्वादङि निपात्यते । ३ [वि]भूष्यतेऽनया [**वि**]**भूषा** । 'भूष अलङ्कारे'(भ्वा.प.से., चु.उ.से.), 'गुरोश्च हलः'३।३।१०३॥ इत्यङ्, टाप् । ४ श्रीयते आश्रीयते सर्वैरिति **श्रीः**, स्त्रीलिङ्गः । 'श्रिञ् सेवायाम्'(भ्वा.उ.से.), सम्पदादित्वात् 'क्विप् वचिप्रच्छ्यायतस्तुकट-'(वा-३।२।१७८॥) इत्यादिना क्विप् दीर्घश्च । ५ अभिख्यायतेऽनया **अभिख्या** । 'ख्या प्रकथने'(अ.प.अ.), 'आतश्चोपसर्गे'३।३।१०६॥ इत्यङ् । ६ काम्यतेऽनया **कान्तिः** । 'कमु कान्तौ'(भ्वा.आ.से.), 'स्त्रियां क्तिन्'३।३।९४॥, 'अनुनासिकस्य-'६।४।१५॥ इति दीर्घः । ७ विभ्रमत्यनेन **विभ्रमः** । 'भ्रमु अनवस्थाने'(दि.प.से.), करणे घञ्, 'नोदात्तोपदेश-'७।३।३४॥ इति न वृद्धिः । ८ लक्ष्यते ज्ञायतेऽनया[१०] **लक्ष्मीः** । 'लक्ष दर्शनाङ्कनयोः'(चु.उ.से.), 'लक्षेर्मुट् च' (उणा-४४०)इतीकारप्रत्ययो मुडागमश्च । ९ छ्यति वैरूप्यं **छाया** । 'छो छेदने'(दि.प.अ.), 'माच्छाससिसूभ्यो[११] यः' (दशपाद्युणा-८।१२॥, उणा-५४९)इति यः । १० शोभन्ते[१२]ऽनया **शोभा** । 'शुभ शुम्भ[१३] शोभार्थौ'(तु.प.से.)इति निर्देशाद् 'गुरोश्च हलः'३।३।१०३॥ इत्यप्रत्ययः । "किं 'शोभ' उत 'शोभा' इति सन्देहात् शोभेति दुर्ज्ञानमिति 'गुरोश्च हलः'३।३।१०३॥ इति[१४] चकारादप्रत्ययः"[पदचन्द्रिका, भा-१, दिग्वर्गः, श्लो-८५]इति मिश्राः । शोभेति भिदादिराकृतिगणत्वादङि, 'शुभ शुम्भ शोभार्थौ'(तु.प.से.) इति ज्ञापकाद् गुणनिषेधाभावः । यद्यप्यत्र शोभनं शोभेति घञि निष्पादयितुं शक्यते, तथाऽप्याचार्योपदेश[१५]प्रसिद्धेः[१६], तदाह वामनः- "शोभेति निपातनात्"[ ]इति माधवः, तत्र । दश सामान्येन[१७] शोभायाः ॥

---

१. '-गं' इति३॥ २. ४प्रतौ नास्ति ॥ ३. द्र. अनेकार्थकैरवाकरकौमुदीटीका, भा-२, ३।११७॥, पृ.५२॥ ४. 'रुह बीजजन्मनि' इति स्वामी, 'रुह जन्मनि प्रादुर्भावे' इति मैत्रेयः, 'रुह बीजजन्मनि प्रादुर्भावे च' इति सायणः ॥ ५. '-वौ' इति३.४॥ ६. 'भाषा' इति५॥ ७. '-म्यस्य' इति१, '-मणस्य' इति३॥ ८. ३प्रतौ नास्ति ॥ ९. १.२.४.५प्रतिषु नास्ति ॥ १०. १प्रतौ नास्ति ॥ ११. पञ्चपाद्यां नास्ति ॥ १२. '-ते' इति३॥ १३. 'शुभं शुभ' इति१॥ १४. 'इकङ्(इत्यङ्)' इति१॥ १५. '-शे' इति३॥ १६. '-द्धिः' इति२॥ १७. 'सामान्येन दश' इति३॥

**सुषमा सातिशायिनी ॥१५१२॥**

१ सा शोभाऽतिशायिनी अतिशयवती **सुषमा** उच्यत इत्यन्वयः। 'सुविनिर्दुर्भ्यः-'८।३।८८॥ इति षत्वम् । एकं परमशोभायाः ॥१५१२॥

**संस्तवः स्यात् परिचयः**

१ संस्तवनं **संस्तवः** । 'ष्टुञ् स्तुतौ'(अ.उ.अ.), 'ऋदोरप्'३।३।५७॥ । २ परितः समन्ताच्चयनं **परिचयः**। 'चिञ् चयने'(स्वा.उ.अ.), 'एरच्'३।३।५६॥ । द्वे परिचयस्य ॥

**आकारस्त्विङ्ग इङ्गितम् ।**

१ आकृतिः **आकारः**। भावे घञ् । २ इङ्गनम् **इङ्गः**। 'इगि गतौ'(भ्वा.प.से.), भावे घञि, इदित्त्वान्नुम् । यथा- ''इङ्गो न ज्ञायते मुनेः''[ [2]]इति । ३ इङ्ग्यते स्म **इङ्गितम्** । 'इगि गतौ'(भ्वा.प.से.), निष्ठा । 'इङ्गिताकाराभ्यां भावज्ञानम्'[ [3]]इत्यादौ गोबलीवर्दन्यायेन । ''इङ्गितं चेष्टितम्, आकृतिग्रहणम् १, आकारो मुखरागादिः[4]''[ [3]]इति २ कौटिल्यो व्याकरोत् । ''तस्य संवृतमन्त्रस्य गूढाकारेङ्गितस्य च''[ ]इत्यत्राकारशब्दौ[5] वैवर्ण्यादिपर्यायः, इङ्गितशब्दश्चेष्टापर्यायो गमनपर्यायश्च । ''आकाराविङ्गिताकृती'' [अमरकोषः३।३।१६२॥]इत्यमरः। ''आकृतिर्वैवर्ण्यादिः'' [ ]इति तट्टीका । ''इङ्गितं गतिचेष्टयोः''[विश्वप्रकाशकोशः, तान्तवर्गः, श्लो-९२]इति महेश्वरः । आचार्यास्त्वाकारेङ्गितयोराशयज्ञापकत्वादैक्यमाहुः । तथा चाऽमरोऽपि- ''आकारस्त्विङ्ग इङ्गितम्''[अमरकोषः३।२।१५॥]इति । त्रीणि भावसूचकचेष्टितस्य । 'अङ्गचेष्टा' इति भाषा ॥

**निमित्ते कारणं हेतुर्बीजं योनिर्निबन्धनम् ।१५१३।**

**निदानम्**

१ निमिनोति **निमित्तम्**। 'डुमिञ् प्रक्षेपणे' (स्वा.उ.अ.), पृषोदरादित्वात् साधुः, तत्र । २ करोति कार्यमिति **कारणम्** । 'कारणम्'(हैमसू-५।३।१२७॥) इत्यौणादिकसूत्रेण[6] साधुः । ३ हिनोति व्याप्नोति[7] कार्यं प्रतीति **हेतुः**। 'हि गतौ वृद्धौ च'(स्वा.प.अ.), 'कमिमनिजनिगाभायावाहिभ्यश्च[8]'(उणा-७२)इति तुः, पुंस्ययम् । ४ विशेषेण जायते उत्पद्यते कार्यमनेनेति **बीजम्** । विपूर्वः 'जनी प्रादुर्भावे'(दि.आ.से.), 'उपसर्गे च संज्ञायाम्'३।२।९९॥ इति डः, 'अन्येषामपि-'६।३।१३७॥ इति दीर्घः । '''वी गत्यादौ'(अ.प.अ)इत्यस्माद्धातोर्जक्प्रत्ययः'' [ ]इति भाष्यम् । ५ यौति **योनिः**, स्त्रियां पुंसि च । 'यु मिश्रणे'(अ.प.से.), 'वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित्'(उणा-४९१)इति निः प्रत्ययः । ६ निबध्नाति **निबन्धनम्** । 'बन्ध बन्धने'(क्र्या.प.अ.), नन्द्यादित्वाल्ल्युः[9] ॥१५१३॥ ७ निदीयते जन्यतेऽनेनेति **निदानम्**[10] । दाञः करणे ल्युट्, 'बहुलमन्यत्राऽपि'(उणा-२३६)इति युज् वा। सप्ताऽप्येते धर्मवृत्तित्वेऽप्यजहल्लिङ्गाः। सप्त कारणस्य ॥

**अथ कार्यं स्यादर्थः कृत्यं प्रयोजनम् ।**

१ क्रियते तत् **कार्यम्** । 'डुकृञ् करणे'(त.उ.अ.), 'ऋहलोर्ण्यत्'३।१।१२४॥ । २ अर्थ्यते[11] **अर्थः** । 'अर्थ याच्ञायाम्'(चु.आ.से.), घञ् । ३ क्रियते **कृत्यम्** । 'विभाषा कृवृषोः'३।१।१२०॥ इति क्यपि, 'ह्रस्वस्य पिति-'६।१।७१॥ इति तुक् । ४ प्रयोजयति प्रवर्तयति **प्रयोजनम्** । 'युजिर् योगे'(रु.उ.अ.), णिजन्तः, नन्द्यादित्वाल्ल्युः[9] । चत्वारि कार्यस्य ॥

**निष्ठानिर्वहणे तुल्ये**

१ निष्ठानं **निष्ठा** । 'आतश्चोपसर्गे'३।३।१०६॥ इत्यङ् । नियतं स्थानं निष्ठेति वा । ''निष्ठा निष्पत्तिनाशान्तोत्कर्ष[12]निर्वहणेषु च''[विश्वप्रकाशकोशः, ठान्तवर्गः, श्लो-९]इति महेश्वरः । २ नितरामुह्यते **निर्वहणम्**[13] । 'वह प्रापणे'(भ्वा.उ.अ.), ल्युट् । ''निर्वहणं तु निष्ठा स्त्री संहारश्च समापनः''[ [14]]इति शब्दार्णवः । निर्वाहोऽपि । द्वे निर्वाहस्य ॥

**प्रवहो गमनं बहिः ॥१५१४॥**

१ प्रवहनं[15] **प्रवहः** । प्रवहेर्बाहुलकादप् । प्रवह-

१. तुलनीयोऽमरकोषः३।२।१५॥ २. द्र. अनेकार्थकैरवाकरकौमुदीटीका, भा-१, २।३०॥, पृ.२७॥ ३. द्र. अम.क्षीर.३।२।१५॥, पृ.२६३॥, स्वोपज्ञटीका ६।१५१३॥, पृ.३३७॥ ४. '-दे:' इति३॥ ५. '-ब्दौ' इति१.५॥ ६. औणादिकसूत्रं मृग्यम् ॥ ७. 'प्राप्नोति' इति३.४॥ ८. '-वा-' इत्युणादिगणे नास्ति ॥ ९. '-दिल्युः' इति१॥ १०. इतोऽग्रे ३प्रतौ 'डुदाञ् दाने' इति दृश्यते ॥ ११. '-र्थते' इति३॥ १२. '-उत्कर्ष-' इत्यस्य स्थाने मुद्रिते '-याच्ञा-' इति दृश्यते ॥ १३. 'निर्वा-' इति५॥ १४. द्र. पदचन्द्रिका, भा-१, नाट्यवर्गः, श्लो-१९१, पृ.२२८॥, रामाश्रमी१।७।१५॥, पृ.९९॥ १५. 'प्रवा-' इति१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न्त्यनेनेति वा । 'गोचरसञ्चर-'३।३।११९॥ इति साधुः । "प्रवहस्तु बहिर्यात्रा(त्र)मतविश्व(मातरिश्व)प्रभेदयोः" [मेदिनीकोशः,[१] हान्तवर्गः, श्लो-२०]इति मेदिनिः । "प्रवहो वायुभेदे स्याद् वायुमात्रे बहिर्गतौ"[अनेकार्थसङ्ग्रहः३।७६२॥]इत्यनेकार्थः । प्रवासोऽपि । एकं गृहनगरादेर्बहिर्गमनस्य ॥१५१४॥

## जातिः सामान्यम्

१ जायतेऽस्यां **जातिः** । 'जनी प्रादुर्भावे' (दि.आ.से.), 'स्त्रियां क्तिन्'३।३।९४॥, 'अनुनासिकस्य-'६।४।१५॥इति दीर्घः । गौरयं गौरयमित्यादिसद्दशाभिलापज्ञानहेतुर्जातिरित्यर्थः । यदुक्तम्- "आकृतिग्रहणाजातिर्लिङ्गानां च न सर्वभाक्"[काशिका४।१।६३॥]इति । जातमित्यकारान्तोऽपि क्लीबे । "जात्यं जात्योघजन्मसु" [विश्वप्रकाशकोशः, तान्तवर्गः, श्लो-१४]इति महेश्वरः । "जातिः सामान्यम्"[]इति तट्टीका । २ समानस्य भावः **सामान्यम्** । भावे ष्यञ्[२] । द्वे जातेः ॥

## व्यक्तिस्तु विशेषः पृथगात्मिका ।

१ व्यज्यते[३]ऽनया **व्यक्तिः** । 'अञ्जू व्यक्त्यादौ' (रु.प.वे.), 'स्त्रियां क्तिन्'३।३।९४॥, 'अनिदितां हल उपधायाः-'६।४।२४॥ इति [४]नलोपः । २ विशिष्यतेऽनेन **विशेषः** । 'शिष्लृ विशेषणे'(रु.प.अ.), करणे घञ् । ३ पृथग् भिन्न आत्मा यस्याः सा **पृथगात्मिका**, भिन्नस्वरूपेत्यर्थः । त्रीणि व्यक्तेः । 'विशेष' इति भाषा ॥

## तिर्यक् साचिः

१ तिरोऽञ्चति **तिर्यक्** । 'अञ्चु गतिपूजनयोः' (भ्वा.प.से.), [५]तिरःपूर्वः, 'ऋत्विग्दधृक्-'३।२।५९॥ इत्यादिना क्विन्[६], 'तिरसस्तिर्यलोपे'६।३।९४॥ इति तिर्यादेशः, तिरश्ची, तिर्यञ्चि इत्यादि क्लीबे । २ सचते समवैति **साचिः**[७] । 'षच समवाये'(भ्वा.प.से.), बाहुलकात् 'कम्यमि-'( )इति णिदिः । साचीत्यव्ययमपि । द्वे[८] 'तिरछा' इति ख्यातस्य[९] ॥

## संहर्षस्तु स्पर्धा

१ संहर्षणं **संहर्षः** । 'हृषु अलीके'(भ्वा.प.से.), भावे घञ् । सङ्घर्षोऽपि । २ स्पर्धनं **स्पर्धा** । 'स्पर्ध सङ्घर्षे'(भ्वा.आ.से.), भिदादित्वादङ् । द्वे स्पर्धायाः । 'पराभिभवेच्छा' इति भाषा ॥

## द्रोहस्त्वपक्रिया ॥१५१५॥

१ द्रोहणं **द्रोहः** । 'द्रुह जिघांसायाम्'(दि.प.से.), घञ् । २ अपकरणम् **अपक्रिया** । 'कृञः श च'३।३।१००॥ इति शः । द्वे द्रोहस्य ॥१५१५॥

## बन्ध्ये मोघाऽफलमुधाः

१ बध्नाति **बन्ध्यम्** । 'बन्ध बन्धने'(क्र्या.प.अ.), 'अघ्न्यादयश्च'(उणा-५५१)इति साधुः, तत्र । २ मुह्यतेऽत्रेति **मोघम्** । 'मुह वैचित्ये'(दि.प.वे.), घञ्, न्यङ्क्वादित्वात् कुत्वम् । ३ न फलति **अफलम्** । 'फल निष्पत्तौ'(भ्वा.प.से.), अच् । ४ मुह्यत्यनया **मुधा** । 'मुह वैचित्ये'(दि.प.वे.), भिदाद्यङ् । मुधेत्यव्ययमपि । चत्वारि निष्फलस्य ॥

## अन्तर्गडु निरर्थकम् ।

१ अन्तर्गडति **अन्तर्गडु** । 'गड सेचने'(भ्वा.प.से.), 'भृमृशी-'(उणा-७)इत्यादिना उः । २ निर्गतमर्थात् प्रयोजनाद् निरर्थम्[१०], स्वार्थे कनि **निरर्थकम्** । द्वे निष्प्रयोजनस्य ॥

## संस्थानं सन्निवेशः स्यात्

१ संस्थीयतेऽत्रेति **संस्थानम्** । अधिकरणे ल्युट् । २ सन्निवेशनं **सन्निवेशः** । 'विश प्रवेशने'(तु.प.अ.), भावे घञ् । "अथ चतुष्पथे सन्निवेशे च संस्थानम्"[अमरकोषः३।३।१२४॥]इत्यमरः । "सन्निवेशो रचना"[अम.क्षीर.३।३।१२४॥]इति क्षीरस्वामी । यथा- "मालाकार इव स्रजां स[११] विदधे संस्थानमुच्चैर्द्विषाम्"[[१२]]इति । "इह द्विषां संस्थानं मृतिम्[१३], द्वितीयपक्षे स्रजां संस्थानं रचनाम्" [ ]इति । द्वे संस्थानस्य । 'भली रचना' इति भाषा ॥

## अर्थस्याऽपगमे व्ययः ॥१५१६॥

१ अर्थस्य द्रव्यस्याऽपगमे समुत्सर्गे व्ययनं

---

१. '-दः' इति४.५॥ २. '-न्' इति५॥ ३. '-जते' इति३.५॥ ४. 'न-' इति३॥ ५. 'तिरपू-' इति२, 'तिर्पू-' इति३॥ ६. '-प्' इति१॥ ७. '-चीः' इति३॥ ८. ३.४.५प्रतिषु नास्ति ॥ ९. इतोऽग्रे ३प्रतौ 'द्वे' इति दृश्यते ॥ १०. '-र्थकम्' इति५॥ ११. 'सं-' इति४॥ १२. द्र. अनेकार्थकैरवाकरकौमुदीटीका, भा-२, श्लो-४२३, पृ.१८६॥ १३. '-तिः' इति५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**व्ययः**। 'व्यय वित्तसमुत्सर्गे'[१](चु.उ.से.), अदन्तः । एकं व्ययस्य ॥१५१६॥

## संमूर्च्छनं त्वभिव्याप्तिः

१ संमूर्च्छ्यते **संमूर्च्छनम्** । 'मूर्च्छा मोहसमुच्छ्राययोः'(भ्वा.प.से.), ल्युट् । २ अभिव्यापनम् **अभिव्याप्तिः**। 'आप्लृ व्याप्तौ'(स्वा.प.अ.), 'स्त्रियां क्तिन्'३।३।९४॥ । द्वे सर्वतो वृत्तेः[२]। 'सघलईं[३] व्यापईं[४]' इति भाषा॥

## भ्रेषो भ्रंशो यथोचितात् ।

१ यथोचिताद् रूपाद् भ्रंशोऽधःपातस्तन्नामैकं **भ्रेषः** इति । भ्रेषणं भ्रेषः। 'भ्रेषृ चलने च[५]'(भ्वा.उ.से.), चकाराद् भये, भ्वादिरात्मनेपदी[६], भावे घञ् ॥

## अभावो नाशे

१ भवनं भावः सत्ता, न भावः **अभावः**। २ नशनं **नाशः**। 'णश अदर्शने'(दि.प.वे.), भावे घञ्, तत्र॥

## संक्रामसंक्रमौ दुर्गसञ्चरे ॥१५१७॥

१-२ संक्रामन्त्यनेनेति **संक्रामः**। बाहुलकाद् वृद्धिः। वृद्ध्यभावपक्षे **संक्रमः**, पुंनपुंसकावेतौ । ३ दुर्गे सञ्चरन्त्यनेन **दुर्गसञ्चरः** । 'चर गतिभक्षणयोः'(भ्वा.प.से.), 'गोचरसञ्चर-'३।३।११९॥ इति साधुः । ''संक्रामो दुर्गसञ्चरः'' [अमरकोषः३।२।२५॥]इत्यमरः । ''संक्रामन्त्यनेन संक्रामः, संक्रम इत्येके, सेत्वादिः''[अम.क्षीर.३।२।२५॥]इति क्षीरस्वामी। यत्कौटिल्यः- ''मुखसमः संक्रमः''[ ]इति। उच्चत्वाद् दुरारोहत्वाद् मुखतुल्य इत्यर्थः । दुर्गं दुर्गमं सञ्चरन्त्यनेन दुर्गसञ्चर इति व्युत्पत्तिः । ''दुर्गः स्यात् दुर्गमे दुर्गा गौरीनीलिकयोः''[विश्वप्रकाशकोशः, गान्तवर्गः, श्लो-२४]इति महेश्वरः। त्रीणि सेतुप्रभृतिविषमस्थानगमनस्य ॥१५१७॥

## नीवाकस्तु प्रयामः स्यात्[८]

१ नियतं वचनं **नीवाकः** । निपूर्वः 'वच परिभाषणे'(अ.प.अ.), घञ्, 'चजोः कु घिण्यतोः'७।३।५२॥ इति कुत्वम्, 'उपसर्गस्य घञि-'६।३।१२२॥ इति नेर्दीर्घः । २ प्रयमनं **प्रयामः** । 'यमु(यम) नियमने' ( ), भावे घञ् । तुलाधृताऽन्यूनाधिकनाम्नी द्वे । 'बराबरि' इति भाषा । अथवा क्रिया(क्रया)दरनाम्नी द्वे । ''नीवाकस्तुलाधृताऽन्यूनाधिकम्, क्रिया(क्रया)दरो वा[९]'' [अम.क्षीर.३।२।२३॥]इति क्षीरस्वामी । तथैवाऽऽचार्यव्याख्याऽपि । ''न्यूनाधिकरहितप्रमाणवचनस्य द्वे[१०]''[लिङ्गयसूरिकृतामरपदविवृतिटीका३।२।३३॥]इति लिङ्गसूरिः ॥

## अवेक्षा प्रतिजागरः[११] ।

१ अवेक्षणम् **अवेक्षा** । 'ईक्ष दर्शनाङ्कनयोः[१२]' (भ्वा.आ.से.), 'गुरोश्च हलः'३।३।१०३॥ इत्यङ्, टाप् । २ प्रतिजागरणं **प्रतिजागरः** । 'जागृ निद्राक्षये'(अ.प.से.), 'एरच्'३।३।५६॥ इत्यच् । द्वे अवेक्षायाः । 'सावचेताई' इति भाषा ॥

## समौ विश्रम्भविश्वासौ[१३]

१ विश्रम्भणं **विश्रम्भः** । 'श्रम्भु विश्वासे[१४]'(भ्वा.आ.से.)। २ विश्वसनं **विश्वासः**। 'श्वस प्राणने'(अ.प.से.), घञ्, 'अत उपधायाः'७।२।११६॥ । द्वे विश्वासस्य ॥

## परिणामस्तु विक्रिया ॥१५१८॥

१ परिणमनं **परिणामः** । 'णमु प्रह्वत्वे शब्दे च' (भ्वा.प.अ.), भावे घञ्। २ विक्रियते **विक्रिया** । 'डुकृञ् करणे'(त.उ.अ.), 'कृञः श च'३।३।१००॥ इति शः, 'रिङ् शयग्लिङ्क्षु'७।४।२८॥, टाप् । विकारविकृती अपि । यदमरः- ''परिणामो विकारो द्वे समे विकृतिविक्रिये''[अमरकोषः३।२।१५॥]इति । ''विकारेऽर्थे त्रयो वर्तन्ते, द्वयोस्तु साम्यम्, स्त्रीत्वात्''[अम.क्षीर.३।२।१५॥] इति क्षीरस्वामी । द्वे विकारस्य ॥१५१८॥

## चक्रावर्तो भ्रमो भ्रान्तिर्भ्रमिर्घूर्णिश्च घूर्णने ।

१ चक्रेणाऽऽवर्तनं **चक्रावर्तः**। २ भ्रमणं **भ्रमः**।

---

१. मैत्रेयसायणसम्मतोऽयं पाठः, 'व्यय गतौ' इति 'वित्त समुत्सर्गे' इति च स्वामी ॥ २. 'व्याप्तस्य' इति३॥ ३. '-लैं' इति१, '-लै' इति४॥ ४ '-पै' इति४॥ ५. स्वामिमतेऽयम्, 'भ्रेषृ भ्लेषृ चलने' इति मैत्रेयः, 'भ्रेषृ गतौ' इति सायणः ॥ ६. आत्मनेपदित्वं विचारणीयम् ॥ ७ '-ना-' इति४.५॥ ८. तुलनीयोऽमरकोषः३।२।२३॥ ९. अम.क्षीरस्वामिकृतटीकायाम्- ''नियतं वचनं नीवाकः, तुलाकृतं न्यूनाधिक्यं क्रयादरो वा'' इति दृश्यते, अम.क्षीर.३।२।२३॥; पृ.२६५॥ १०. अस्य स्थाने टीकायाम्- ''नामनी'' इति दृश्यते, भा-२, पृ.१९३॥ ११. तुलनीयोऽमरकोषः३।२।२८॥ १२. 'ईक्ष दर्शने' इति क्षीरतरङ्गिण्यादयः ॥ १३. तुलनीयोऽमरकोषः२।८।२३॥ १४. 'विश्रम्भे' इति३, 'श्रम्भु प्रमादे' इति सायणमत एव ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'भ्रमु चलने'(भ्वा.प.से.), भावे घञ्, 'नोदात्तोपदेश-' ७।३।३४॥ इति न वृद्धिः । ३ भ्रमणं **भ्रान्तिः** । 'स्त्रियां क्तिन्'३।३।९४॥, 'अनुनासिकस्य क्विझलोः-'६।४।१५॥ इति दीर्घः । ४ भ्रमणं **भ्रमिः**। 'इक् कृष्यादिभ्यः'३।३।१०८॥ इतीक्, स्त्रीत्वविवक्षायां 'कृदिकारात्-'(गणसू-४।१।४५॥) इति ङीषि भ्रमी, तृतीयस्वरान्तोऽपि स्त्रियाम् । ५ घूर्णनं **घूर्णिः** । 'घूर्ण भ्रमणे[१]'(भ्वा.आ.से., तु.प.से.), 'इक् कृष्यादिभ्यः'३।३।१०८॥ इतीक्, स्त्रीलिङ्गः। ६ घूर्ण्यते **घूर्णनम्**। 'घूर्ण घूर्णने (भ्रमणे)' (भ्वा.आ.से., तु.प.से.), ल्युट्, तत्र। षड् भ्रमस्य । 'भमलि[२]' इति भाषा[३] ॥

## विप्रलम्भो विसंवादः[४]

१ विप्रलम्भनं **विप्रलम्भः** । 'डुलभष् प्राप्तौ' (भ्वा.आ.अ.), भावे घञ्, 'उपसर्गात् खल्घञोः'७।१।६७॥ इति नुम् । 'लभेश्च'७।१।६४॥ इति सिद्धे वचनमिदं नियमार्थम्- 'खल्घञोरजाद्योर्यदि भवति उपसर्गात् परस्यैव' इति नियमात् तेन 'ईषल्लाभोऽलाभः (ईषल्लभः, लाभः)' इत्यत्र नुम् न भवति । 'सुलभः, दुर्लभः, सुलाभः, दुर्लाभः' इत्यत्र तूपसर्गात् परत्वे 'न सुदुर्भ्यां केवलाभ्याम्'७।१।६८॥ इति नुम्निषेधः । २ विसंवदनं **विसंवादः**, विरुद्धं संवदनमित्यर्थः । 'वद व्यक्तायां वाचि' (भ्वा.प.से.), भावे घञ् । द्वे विसंवादस्य । व्यभिचारः, विघटनमिति भाषा ॥

## विलम्भस्त्वतिसर्जनम्[६] ॥१५१९॥

१ विलम्भनं **विलम्भः** । लभेर्धातोर्भावे घञ्, 'उपसर्गात् खल्घञोः'७।१।६७॥ इति नुम् । २ अतिसृज्यते **अतिसर्जनम्** । 'सृज विसर्गे'(दि.आ.अ., तु.प.अ.), ल्युट् । ''विलम्भस्त्वतिसर्जनम्''[अमरकोषः३।२।२८॥] इत्यमरः । ''दानार्थौ''[ ]इति तट्टीका । द्वे समर्पणस्य । 'सुंपणउं[७]' इति भाषा ॥१५१९॥

## उपलम्भस्त्वनुभवः[८]

१ उपलम्भनम् **उपलम्भः** । लभेर्भावे घञ्, 'उपसर्गात् खल्घञोः-'७।१।६७॥ इति नुम्, ''जातो (ज्ञातौ) सुख(सुत)स्पर्शसुखोपलम्भात्''[रघुवंशम्, सर्गः-१४, श्लो-२]इति रघुः । २ अनुभवनम् **अनुभवः** । 'ऋदोरप्'३।३।५७॥ । द्वे उपलम्भस्य । 'पामिवउं[१०]' इति भाषा ॥

## प्रतिलम्भस्तु लम्भनम् ।

१ प्रतिलम्भनं **प्रतिलम्भः** । ''एकतो हि धिगमूमगुणज्ञामन्यतः कथमदःप्रतिलम्भः''[नैषधीयचरितम्, सर्गः-५, श्लो-६९]इति श्रीहर्षः । २ लभ्यते **लम्भनम्** । 'डुलभष् प्राप्तौ'(भ्वा.आ.अ.), ल्युट्, 'लभेश्च'७।१।६४॥ इति नुम् । द्वे लम्भनस्य । 'लहणउं[११]' इति भाषा ॥

## नियोगे विधिसम्प्रैषौ

१ नियोजनं **नियोगः** । 'युजिर् योगे'(रु.उ.अ.), घञ्, 'चजोः कु घिण्ण्यतोः'७।३।५२॥ इति कुत्वम्, तत्र। २ विधीयते **विधिः**, पुंसि । धाञः 'उपसर्गे घोः किः' ३।३।९२॥ इति किः । ३ सम्प्रेषणं **सम्प्रैषः**, द्वादशस्वरमध्यः । 'इष गतौ'(दि.प.से.), दैवादिकः, 'इषु इच्छायाम्'(तु.प.से.), तौदादिकः, 'इष आभीक्ष्ण्ये'(क्र्या.प.से.), क्र्यादिः, एभ्यो घञि, 'पुगन्तलघूपधस्य-'७।३।८६॥ इति गुणे एषः, ततः 'प्रादूहोढो-'(वा-६।१।८९॥)इति वृद्धिः । यद्द्व्याश्रयः-

''उपस्थिते प्रभोः कार्ये गुणोचैर्धौतवृत्तयः ।
प्रैष प्रौढा इह प्रैष्याः प्रौहप्रौढिं न कुर्वते ॥१॥''

[द्व्याश्रयमहाकाव्यम्, सर्गः-१, श्लो-१७]इति। ''प्रैष इदमेवं कार्यमिति स्वामिनियोगे प्रौढाः प्रगल्भाः, दुष्करस्याऽपि स्वाम्यादेशस्य तत्क्षणादेव कारका इत्यर्थः''[अभयतिलकगणिकृतटीका१।१७॥]। यस्तु- 'ईष उञ्छे'( ), भ्वादिः, 'ईषँ[१२] गतिहिंसादर्शनेषु'(भ्वा.आ.से.)इत्येतौ दीर्घादी परस्मैपद्यात्मनेपदिनौ भ्वादी, आभ्यां[१३] घञि, अलघूपधत्वाद् गुणाभावे ईष इति दीर्घादिरेव रूपम्, तत्र 'आद् गुणः' ६।१।८७॥ इति गुणे 'प्रेषः' इत्येकादशस्वरादिरेव भवति। इदमेवं कार्यमित्यादिभाषायास्त्रीणि। 'हुकम' इति भाषा ॥

## विनियोगोऽर्पणं फले ॥१५२०॥

१ विनियोजनं **विनियोगः** । अपोऽपवादो भावे

---

१. 'घुण घूर्ण भ्रमणे' इति भ्वादौ तुदादौ च क्षीरतरङ्गिण्यादयः ॥ २. '-मालि' इति५॥ ३. 'घूमणा भमलि इत्यादिभाषा' इति३॥ ४. तुलनीयोऽमरकोषः१।७।३६॥ ५. द्र. मा.धातुवृत्तिः, भ्वादिः, धातुसं-६९४, पृ.२७३॥ ६. तुलनीयोऽमरकोषः३।२।२८॥ ७. '-उ' इति१, '-णो' इति३, '-णौ' इति४॥ ८. '-भावः' इति५, तुलनीयोऽमरकोषः३।२।२८॥ ९. 'लं-' इति१॥ १०. '-उ' इति३॥ ११. '-णुं' इति१, '-उ' इति३.४॥ १२. 'इ-' इति१, '-षि' इति२॥ १३. ४.५प्रत्योर्नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

घञ् । फले फलविषये अर्पणम् । एकं कृतस्वाम्या-देशस्य ॥१५२०॥

## लवोऽभिलावो लवनम्

१ लवनं **लवः** । 'लूञ् छेदने'(क्र्या.उ.से.), 'ॠदोरप्'३।३।५७॥ । २ अभिलवनम् **अभिलावः** । 'निरभ्योः पूल्वोः'३।३।२८॥ इति घञ् । ३ लूयते **लवनम्** । ल्युट् । त्रीणि लवनस्य ॥

## निष्पावः पवनं पवः ।

१ निष्पूयते **निष्पावः** । निर्पूर्वः 'पूञ् पवने' (क्र्या.उ.से.), 'निरभ्योः पूल्वोः'३।३।२८॥ इति घञ् । २ पूयते **पवनम्**। ल्युट्। ३ पवनं **पवः** । 'ॠदोरप्'३।३।५७॥ । त्रीणि 'ऊपणवउं'[१] इति ख्यातस्य ॥

## निष्ठीव[२]-ष्ठीवन-ष्ठ्यूत-ष्ठेवनानि तु थूत्कृते॥१५२१॥

१ निष्ठीवनं **निष्ठीवः**, पुंक्ली. । 'ष्ठिवु निरसने' (दि.प.से.), दिवादिः, भ्वादिश्च, घञ्, 'उपसर्गस्य घञि-'६।३।१२२॥ इति दीर्घः । २ ष्ठीव्यते **ष्ठीवनम्** । ल्युटि, पृषोदरादित्वाद् दीर्घत्वम् । तथा च चन्द्रसूत्रम्-'ष्ठिवुषिवोर्दीर्घश्च'( )इति। ३ ष्ठीव्यते स्म **ष्ठ्यूतम्** । भावे क्तः, 'च्छ्वोः शूडनुनासिके च'६।४।१९॥ इत्यूठ्। निष्ठ्यूतिरपि । ४ ष्ठीव्यते[३] **ष्ठेवनम्** । ल्युटि, 'पुगन्तलघूपधस्य-'७।३।८६॥ इति गुणः । ५ थूत्क्रियते स्म **थूत्कृतम्**, तत्र। पञ्च निष्ठीवनस्य ॥१५२१॥

## निवृत्तिः स्यादुपरमो व्यवोपाङ्भ्यः परा रतिः ।

१ निवर्तनं **निवृत्तिः** । अत्र[४] नीरेफो न्युपसर्गः, 'वृतु वर्तने'(भ्वा.आ.से.), 'स्त्रियां क्तिन्'३।३।९४॥ । २ उपरमणम् **उपरमः**। 'यम उपरमे[५]'(भ्वा.प.अ.)इति निर्देशाद् वृद्ध्यभावः । उपरामोऽपि । ''उपरमै[६]र्घञ्, अनुदात्तोपदेशत्वाद् 'नोदात्तोपदेश-'७।३।३४॥ इत्यादिना वृद्धिनिषेधाभावः''[पदचन्द्रिका, भा-३, संकीर्णवर्गः, श्लो-१४९]इति मिश्राः । ३-६ व्यवोपाङ्भ्यश्चतुर्भ्यः परा अग्रे रतिर्योज्यते, तेन **विरतिः, अवरतिः, उपरतिः, आरतिः** । षड् निवृत्तेः । 'नीवडणुं[७]' इति भाषा ॥

## विधूननं विधुवनम्[८]

१ 'धूञ् कम्पने'(चु.उ.से), चुरादिः, ल्युटि, 'धूञ्प्रीञोर्नुग् वक्तव्यः'(वा-७।३।३७॥)इति विधून्यते **विधूननम्** । २ 'धू विधूनने'(तु.प.से.)इत्यस्माद् ल्युट्[९] कुटादित्वाद् गुणाभावे उवङि **विधुवनम्** । द्वे विधूननस्य । 'धूणवउं[१०]' इति भाषा ॥

## रिङ्खणं स्खलनं समे[११] ॥१५२२॥

१ रिङ्ख्यते **रिङ्खणम्** । 'रिखि गतौ'( ), ल्युट्[९], 'इदितो नुम्-'७।१।५८॥ । २ स्खल्यते **स्खलनम्** । 'स्खल चलने[१२]'(भ्वा.प.से.), ल्युट्। ''बालानां हस्तपादाभ्यां चलने रिङ्खणम्, स्खलनं तु[१३] पिच्छिलादौ पतनमिति भेदः, तथाऽप्यभेदोपचारेण 'समे' इत्युक्तम्''[ ]इति पञ्जिका[१४] । द्वे रिङ्खणस्य ॥१५२२॥

## रक्षणस्त्राणे

१ रक्षणं **रक्षणः** । 'रक्ष पालने'(भ्वा.प.से.), 'यजयाचयतविच्छप्रच्छरक्षो नङ्'३।३।९०॥ । २ त्रायते **त्राणम्**। 'त्रैङ्[१५] पालने'(भ्वा.आ.अ.), ल्युट्, 'आदेचः-' ६।१।४५॥ इत्यात्वम्, तत्र । द्वे त्राणस्य ॥

## ग्रहो ग्राहे

१-२ ग्रहणं **ग्रहः** । 'ग्रह उपादाने'(क्र्या.उ.से.), 'विभाषा ग्रहः'३।१।१४३॥ इति, पक्षे **ग्राहः** । घञ्, तत्र[१६]। ग्रहस्य[१७] ॥

## व्यधो वेधे[१८]

१ व्यधनं **व्यधः** । 'व्यध ताडने'(दि.प.अ.), 'व्यधजपोः-'३।३।६१॥ इत्यादिनाऽप् । २ वेधनं **वेधः** । 'विध विधाने'(तु.प.से.), अयमनेकार्थत्वाद् वेधे वर्तते, ततो घञ्, तत्र[१९] । द्वे वेधस्य । 'वींधवउं[२०][२१]' इति भाषा ॥

## क्षये क्षिया[२२] ।

---

१. '-वौ' इति१.४, '-णउं' इति२॥ २. 'निष्ठेव-' इति मुद्रितमूलम् ॥ ३. '-ति' इति४॥ ४. 'अव' इति१, 'अच्' इति३.४.५॥ ५. 'यमु नियमने' इति४.५॥ ६. ' ग्मः' इति३॥ ७. '-णउं' इति१.३॥ ८. तुलनीयोऽमरकोषः३।२।४॥ ९. '-टि' इति१॥ १०. '-उं' इति३, '-वौ' इति४॥ ११. तुलनीयोऽमरकोषः१।७।३६॥ १२. स्वामिमतेऽयम्, 'खल स्खल सञ्चलने' इति मैत्रेयः, 'स्खल सञ्चलने' इति सायणः ॥ १३. ३प्रतौ नास्ति ॥ १४. द्र. पदचन्द्रिका, भा-१, नाट्यवर्गः, श्लो-१११, पृ.२५०॥ १५. 'त्रै-' इति१.२.३.५॥ १६. १.२.४.५प्रतिषु नास्ति ॥ १७. '-णस्य' इति२.३॥ १८. तुलनीयोऽमरकोषः३।२।८॥ १९. ३प्रतौ नास्ति ॥ २०. 'वी-' इति३॥ २१. '-उ' इति४॥ २२. तुलनीयोऽमरकोषः३।२।७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१ क्षयणं **क्षयः**। 'क्षि क्षये'(भ्वा.प.अ.), 'एरच्' ३।३।५६॥, तत्र । २ क्षयणं **क्षिया** । 'क्षि हिंसायाम्'(स्वा.प.से.), भिदादित्वादङ्, 'अचि श्नु-'६।४।७७॥ इतीयङ्, टाप्। यद्वा 'क्षीष् हिंसायाम्'(क्र्या.प.अ.), षित्त्वादङ्, 'अचि श्नु-'६।४।७७॥ इतीयङ् । द्वे क्षयस्य॥

### स्फरणं[1] स्फुरणे[2]

१ स्फर्यते **स्फरणम्** । 'स्फर[२] स्फुरणे[३]'(तु.प.से.), अदुपधः, ल्युट् । २ स्फूर्तिः **स्फुरणम्** । 'स्फुर स्फुरणे'(तु.प.से.), उदुपधा(-धः), ल्युट् । तत्र । द्वे [४]स्फरणस्य । '[५]फरकवौ[६]' इति भाषा ॥

### ज्यानिजीर्णी[1][2][७]

१ ज्यानं **ज्यानिः**। 'ज्या वयोहानौ'(क्र्या.प.अ.), 'ग्लाग्लाज्याहात्वरिभ्यो निः[८]'(वा-३।३।९४॥) । २ जरणं **जीर्णिः**। 'जॄ(जृष्) वयोहानौ'(दि.प.से.), 'स्त्रियां क्तिन्' ३।३।९४॥, 'ॠल्वादिभ्यः क्तिन्निष्ठावद् ज्ञेयः'(वा-८।२।४४॥), 'ॠत इद्धातोः'७।१।१००॥, 'उरण् रपरः'१।१।५१॥, निष्ठावत्त्वाद् 'रदाभ्याम्-'८।२।४२॥ इति णत्वम् (नत्वम्), तत्र । द्वे ज्यानेः । 'हानि' इति भाषा ॥

### अथ वरो[1] वृतौ[2][९] ॥१५२३॥

१ वरणं **वरः**। 'वृञ् वरणे'(स्वा.उ.से.),'ॠदोरप्' ३।३।५७॥ । व्रियतेऽसाविति कर्मणि वाऽप् । यत्कात्यः- "तपोभिरिष्यते यस्तु [१०]देवेभ्यः स वरो मतः"[[११]]इति । २ वरणं **वृतिः**[१२] । 'स्त्रियां क्तिन्'३।३।९४॥, तत्र । द्वे देवादिभ्यो वाञ्छितयाचनस्य[१३] ॥१५२३॥

### समुच्चयः[1] समाहारः[2]

१ समुच्चयनं **समुच्चयः** । 'चिञ्'(स्वा.उ.अ.), 'एरच्'३।३।५६॥ । २ समाहरणं **समाहारः** । भावे घञ् । "समाहारस्तु संक्षेप एकत्र करणेऽपि च"[अनेकार्थसङ्ग्रहः ४।२८४॥]इत्यनेकार्थः । "अनेकस्यैकत्राऽध्यावापः"[अम. क्षीर.३।२।१६॥]इति क्षीरस्वामी । द्वे 'एकठांकरण[१४]' इत्याह्वस्य॥

### अपहारापचयौ समौ । 

१ अपहरणम् **अपहारः** । [१५]("अपपूर्वः 'हृञ् हरणे'(भ्वा.उ.अ.), ) घञ् । २ अपचयनम् **अपचयः**। 'एरच्' ३।३।५६॥, उपसर्गविशेषादर्थवैचित्र्यम् । द्वेऽपचयस्य ॥

### प्रत्याहार[1] उपा[१६]दानम्[2][१७]

१ [१८]प्रत्याह्रियन्ते संक्षिप्यन्ते वर्णा अत्रेति **प्रत्याहारः** । बाहुलकादधिकरणे घञ्, अण्[१९] इण् यणादिः । "[अन्नादिक]विषयेभ्यः इन्द्रियाणामाकर्षणं च"[अम. क्षीर.३।२।१६॥]इति क्षीरस्वामी अर्थद्वयं प्राह[२०] । इह त्वाचार्याभिप्रायेणाऽद्य एवार्थो ज्ञातव्यः, अपरस्य तु- "प्रत्याहारस्त्विन्द्रियाणां विषयेभ्यः समाहृतिः"[अभि., श्लो-८३] इत्यनेन प्रागेव व्याख्यानात्[२१] । २ उपादीयते **उपादानम्** । ल्युट् । द्वे एकत्र ढौकनस्य ॥

### बुद्धिशक्तिस्तु निष्क्रमः[1] ॥१५२४॥

१ बुद्धेः शक्तिः सामर्थ्यं बुद्धिशक्तिः, सा चाऽष्टधा- 'शुश्रूषा श्रवणं चैव'[अभि.,श्लो-३१०]इत्यादिका प्रागुक्ता । बुद्धिशक्तिः प्रज्ञासामर्थ्यम् । निष्क्रमणं **निष्क्रमः** । भावे घञ् । "निष्क्रमो बुद्धिसम्पत्तौ निर्गमे दुष्कुलेऽपि च"[विश्वप्रकाशकोशः, मान्तवर्गः, श्लो-३८]इति महेश्वरः । "निष्क्रमो निर्गमे ख्यातो बुद्धिसम्पदि निष्क्रमः"[[२२]]इति रुद्रः । एकं बुद्धिशक्तेः[२३] ॥१५२४॥

सङ्ग्रहमाह- सङ्कलय्यार्थकथनं सङ्ग्रहस्तम्-

**इत्यादयः क्रियाशब्दा लक्ष्या धातुषु लक्षणम् ।**

इत्यादयः एवं प्रकाराः सिद्धाः क्रियाशब्दा अन्येऽप्युक्तव्यतिरिक्ता[२४] अपि लक्ष्या लक्षणीया ज्ञेया इत्यर्थः । तेषां तु लक्षणं प्रकृतिप्रत्ययविभागरूपा प्रतिपत्तिर्धातुषु धातुपाठवृत्तिमाधव्यादेरवसेयमित्यर्थः ॥

---

**१.** 'स्फुर' इति१.२.३.५॥ **२.** 'स्फर स्फुर स्फल स्फुल चलने' इति स्वामी, 'स्फर इत्येके' इति मैत्रेयः ॥ **३.** 'स्फर स्फुर स्फल स्फुल चलने' इति स्वामी, 'स्फुर स्फुरणे सञ्चलने दीप्तौ च' इति मैत्रेयः, 'स्फुर स्फुल संचलने' इति सायणः ॥ **४.** 'स्फु-' इति१.३॥ **५.** 'फु-' इति३॥ **६.** '-वउं' इति१.२, '-वौं' इति५॥ **७.** तुलनीयोऽमरकोषः३।२।९॥ **८.** 'ग्लाम्लाज्याहाभ्यो निः' इति वार्तिकस्वरूपम् ॥ 'वीज्याज्वरिभ्यो निः'(उणा-४८८, दशपाद्युणा-१।१८)इत्युणादिगणसूत्रम् ॥ **९.** तुलनीयोऽमरकोषः३।२।८॥ **१०.** 'दै-' इति३॥ **११.** द्र. अम.क्षीर.३।२।८॥, पृ.२६२॥, स्वोपज्ञटीका ६।१५२३॥, पृ.३४१॥, रामाश्रमी३।२।८॥, पृ.५२८॥ **१२.** '-त्तिः' इति३.५॥ **१३.** '-जनस्य' इति१॥ **१४.** '-ठां' इति१.२॥ **१५.** कोष्ठान्तर्गतपाठः १.२.४.५प्रतिषु नास्ति ॥ **१६.** '-हारमुपा-' इति१.३॥ **१७.** तुलनीयोऽमरकोषः३।२।१६॥ **१८.** 'संप्र-' इति४.५॥ **१९.** 'इअण्' इति१.२.४.५॥ **२०.** "(प्रत्याहारः) एकत्र ढौकनम्" इति तत्र प्रथमोऽर्थः, ३।२।१६॥, पृ.२६४॥ **२१.** '-तत्वात्' इति१॥ **२२.** द्र. पदचन्द्रिका, भा-३, संकीर्णवर्गः, श्लो-१३७, पृ.१४४॥, रामाश्रमी३।२।२५॥, पृ.५३५॥ **२३.** १प्रतौ नास्ति ॥ **२४.** '-रेको क्ता' इति१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥ अव्ययानि ॥

## अथाऽव्ययानि वक्ष्यन्ते[1]

(१.२प्रतिपाठः) १ अथ ततोऽनन्तरम्, न वियन्ति लिङ्गकारकनानारूपतां प्रतिपद्यन्त इति पचादित्वादचि[2]। अव्ययानि स्वरादीनि । यदुक्तं महाभाष्ये-

"सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥१॥"

[काशिका१।१।३७॥]। अत एवाऽलिङ्गानि द्वित्वादिसङ्ख्यारहितानि च[3] । यदुक्तम्- "ष्णान्तसङ्ख्याकत्यव्यययुष्मदस्मदोऽलिङ्गाः ।" पुंनपुंसकोऽयमव्ययशब्दः । एषु च केचिद् द्योतकाः, ([4]अपरे वाचकाः) । यदाह-

"चादयो द्योतका ज्ञेया वाचकास्तु स्वरादयः ।
द्व्यर्थाः स्तुत्याश्च निन्दाद्या मास्माद्याः सम्भूय वाचकाः ॥२॥"

(३.४.५प्रतिपाठः) १ अथेति साधारणशब्दकथनान्तरम्, न वियन्ति लिङ्गकारकनानात्वेऽपि नानारूपतां न प्रतिपद्यन्त इति **अव्ययानि** । नविपूर्वः 'इण् गतौ'(अ.प.अ.), पचाद्यच् । अव्ययानि स्वरादीनि । यदुक्तम्-

"सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥१॥"

[काशिका१।१।३७॥]इति ॥

### स्वः[1] स्वर्गे

(१.२प्रतिपाठः) १ **'स्वर्'** इत्यव्ययं स्वर्गार्थे । यथा- "एहि जाये स्वरारोहाव :"[वाजसनेयी संहिता] । एवमग्रे योजना कार्या । उदाहरणानि वक्ष्यन्ते ॥

(३.४.५प्रतिपाठः) १ "अवश्यमेव संज्ञाशब्दानां सदसदर्थेन यथाकथञ्चिद् व्युत्पत्तिः कार्या, तैलपायिकावत्"[[6]]इति भाष्यम्, एवमन्यत्राऽप्युन्नेयम् । 'स्वृ[7] शब्दोपतापयोः'(भ्वा.प.अ.), स्वरति शब्दायते । 'अन्येऽपि दृश्यन्ते[8]'३।२।७५॥ इति विच्, गुणो रपरत्वं च, स्वरादित्वादव्ययत्वम्[9], 'अव्ययादाप्सुपः'२।४।८२॥ इति सुप्लुक् । स्वःशब्दस्य रेफान्तत्वादुत्वं न भवति, 'अतो रोरप्लुतात्-'६।१।११३॥ इत्यत्र रुसम्बन्धिनो रेफस्योत्वविधानात् । अव्ययाधिकारादव्ययमिदम् । अव्ययं चाऽव्यक्तलिङ्गम् । तदुक्तम्- "सदृशं त्रिषु लिङ्गेषु"[काशिका१।१।३७॥] इत्यादि । कथं तर्हि 'रम्यं स्वः'[ ]इति तद्विशेषणस्य क्लीबत्वम्, तथा च सनातनं(-नः)- "स्वरपि मे मनोहरं त्रसत्पृषल्लोचनया हितं तया[10]"[[10]]इति, उच्यते, अत्र 'लोकाश्रयत्वाल्लिङ्गस्य'[ ]इति । तथा च वामनः- "द्विगुरपि पात्राद्यन्तः, क्रियाव्ययविशेषणं चैकः"[ ]इति । स्वरिति व्यञ्जनरेफान्तः । यथा- "छायेव या स्वर्जलधेर्जलेषु"[ ]। स्वरिति शब्दोऽपि हलन्तः, क्लीबलिङ्गः । स्वः, स्वरी, स्वांरि इत्यादिरूपाणि । यथोक्तं काव्यादर्शे- "माधवधवविश्लेषाच्छस्त्रविशेषान्मृतामृतामृवाहं मदनाजौ प्रगता स्वरि भवतो ध्यानं न हास्यामि"[ ]इति । तथा च निघण्टुः-"स्वः क्लीबे स्वर्ग आहूतौ भाषणे च प्ररोहणे"[ ]इति । तथा च-

"अव्ययं स्वर्गनाकौ च त्रिदिवत्रिदशालयौ ।
सुरलोकस्वरी चाऽपि द्योद्यौरव्ययमित्यपि ॥१॥"[ ]इति

शब्दरूपदर्शनात् स्वरिति शब्दोऽपि सिद्धः ॥

### भूः[1] रसातले ॥१५२५॥

(१.२प्रतिपाठः) १ यथा- "भूर्लोकः"[ ] ॥

(३.४.५प्रतिपाठः) १ **भूः** व्यञ्जनदन्त्यान्तः । यथा- "भूर्लोकः"[ ] । एकं रसातलस्य ॥१५२५॥

### भुवो[1] विहायसा[2] व्योम्नि

(१.२प्रतिपाठः) १ व्योम्नि आकाशे । यथा- "भूर्**भुवः**स्वस्त्रयी"[ ] । २ "**विहायसा** रम्यमितो विभति"[ ]॥

(३.४.५प्रतिपाठः) १ **भुवः** व्यञ्जनदन्त्यान्तः ।

---

१. इतोऽव्ययव्युत्पत्त्यां १.२प्रत्योः, ३.४.५प्रतीनां च पाठोऽन्यथा दृश्यते, अत्र प्रतिसङ्ख्यानिर्देशेन विभागीकृत्य स्थापितः ॥ २. 'पचाद्यचि' इति१॥ ३. १प्रतौ नास्ति ॥ ४. कोष्ठान्तर्गतपाठः २प्रतौ नास्ति ॥ ५. व्युत्पत्तिरत्नाकरटीकायां निर्दिष्टान्युदाहरणानि प्रायोऽमरकोषनानार्थवर्गाव्ययवर्गक्षीरस्वामिकृतटीकायां स्वोपज्ञटीकायां च दृश्यते ॥ ६. द्र. पदचन्द्रिका, भा-१, स्वर्गवर्गः, श्लो-१, पृ.९॥ ७. 'स्वृ' इति४॥ ८. '-ते' इति३॥ ९. ' यम्' इति४.५॥ १०. द्र. टीकासर्वस्वम्, भा-१, १।१।६॥, पृ.६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथा- ''भूभुर्वःस्वस्त्रयीवीरः स एष दशकन्धरः''[ ] इति । २ **विहायसा** द्वितीयस्वरान्तः । यथा- ''विहायसा रम्यमितो विभाति''[ ]द्वे आकाशस्य ॥

**द्यावाभूम्योस्तु रोदसी ।**

**( १.२प्रतिपाठः )** १ **'रोदसी'** इति विभक्त्यन्तप्रतिरूपकमव्ययम्[1] । यथा- ''रवः श्रवणभैरवः स्थगितरोदसीकन्धरः(-न्दरः)''[वेणीसंहारम्, अङ्कः-३, श्लो-४] ॥

**( ३.४.५प्रतिपाठः )** १ **'रोदसी'** इति विभक्त्यन्तप्रतिरूपकमव्ययम् । यथा- ''रवः श्रवणभैरवः स्थगितरोदसीकन्दरः[2]''[वेणीसंहारम्, अङ्कः-३, श्लो-४]इति । एकं स्वर्गभूम्योर्युगपन्नाम ॥

**उपरिष्टादुपर्यूर्ध्वे**

**( १.२प्रतिपाठः )** १-२ ऊर्ध्वदेशे **उपरिष्टात्, उपरि** अव्यये। यथा- ''अद्रेरुपरिष्टात्''[ ]। ''अद्रेरुपरि''[ ]॥

**( ३.४.५प्रतिपाठः )** १ 'उपर्युपरिष्टात्'५।३।३१॥ इति सूत्रेण ऊर्ध्वशब्दस्यैतौ निपातौ, **'उपरिष्टाद्'** इति मूर्धन्यतृतीयवर्गाद्यमध्यः । यथा- ''गिरेरुपरिष्टात्''[ ] । २ **उपरि** । यथा- ''गृहोपरि''[ ] । द्वावपि पञ्चमस्वरादी । ऊर्ध्वे उपरिष्टादर्थे इत्यर्थः। ''ऊर्ध्वं स्यादुत्थिते(-दुच्छ्रिते) तुङ्गे चोपरिष्टादपि स्मृतम्''[विश्वप्रकाशकोशः, वान्तवर्गः, श्लो-२२]इति महेश्वरः। उपरिनाम्नी द्वे ॥

**स्यादधस्तादधोऽप्यवाक् ॥१५२६॥**

**( १.२प्रतिपाठः )** १-२ अधोदेशे **अधस्तात्, अधः**। यथा- ''अद्रेरधस्तात्''[ ] । ''अद्रेरधः''[ ] ॥

**( ३.४.५प्रतिपाठः )** १ अधरस्यामधरस्या अधरा वा दिक् **अधस्तात्** । 'दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः'५।३।२७॥, 'पूर्वापरा(धरा)-वराणाम्-'५।३।३९॥ इति अधरस्याऽधादेशः । २ **'अधः'** इति व्यञ्जनसकारान्तः । अवाक्, व्यञ्जनचान्तः, क्लीबलिङ्गः, नीचैरर्थे शब्दः । अवाची[3], अवाञ्चि इत्यादि । 'हेठइं' इत्यादिभाषानाम्नी द्वे ॥१५२६॥

**वर्जने त्वन्तरेणर्ते हिरुग् नाना पृथग् विना ।**

**( १.२प्रतिपाठः )** १ **'अन्तरेण'** इति तृतीयाप्रतिरूपकम् । यथा- ''अन्तरेण पुरुषकारं न किञ्चित् सिध्यति''[ ] । २ **'ऋते'** सप्तम्यन्तप्रतिरूपकम् । यथा- ''ऋते कृशानोर्नहि मन्त्रपूतम्''[कुमारसम्भवम्, सर्गः-१, श्लो-५१]। ३ ''**हिरुक्** कर्मणां मोक्षः''[गणरत्न. पृ.३९], कर्मक्षये मोक्ष इत्यर्थः । ४ ''**नाना** नारीर्निष्फला लोकयात्रा''[वोपदेवः]। ५ ''त्वत्तः **पृथग्** नास्ति बन्धुः''[ ]। ६ ''**विना** वातम्[4]''[ ]॥

**( ३.४.५प्रतिपाठः )** १ **'अन्तरेण'** इति तृतीयान्तप्रतिरूपकम् । यथा- ''त्वामन्तरेण नहि सम्प्रति कश्चिदीशः''[ ]इति । २ **'ऋते'** इति सप्तम्यन्तप्रतिरूपकमव्ययम् । यथा- ''ऋते कृशानोर्नहि मन्त्रपूतम्'' [कुमारसम्भवम्, सर्गः-१, श्लो-५१]इति । ३ ([5]हिनोति **हिरुक्**। यथा-) ''हिरुक् कर्माणां मोक्षः''[गणरत्नमहोदधिः पृ.३९] । कर्माणि वर्जयित्वेत्यर्थः । ४ **'नाना'** इति। यथा- ''नाना नारीर्निष्फला लोकयात्रा''[वोपदेवः] । ५ **'पृथग्'** इति । यथा- ''त्वत्तः पृथग् नास्ति बन्धुः'' [ ]इति । ६ **'विना'** इति । यथा- ''विना वातं विना वर्षम्''[ ]इति। **'वरजीनइं छांडीनइं'** इत्यादिभाषायाः षट् ॥

**साकं सत्रा समं सार्धममा सह**

**( १.२प्रतिपाठः )** १ ''पुत्रेण **साकं** याति'' [ ] । २ ''**सत्रा** कलत्रैर्गार्हस्थ्यम्''[ ]। ३ ''भ्रात्रा **समं** युध्यते'' [ ]। ४ ''**सार्धं** धनैर्मदात् (महान्)''[ ]। ५ ''ज्योत्स्न्योऽमाऽह्ना-''[द्व्याश्रयमहाकाव्यम्, सर्गः-३, श्लो-११]। ६ ''पुत्रैः **सहास्ते**''[ ] । एतेऽव्ययाः सहार्थाः[6] ॥

**( ३.४.५प्रतिपाठः )** १-६ 'साथइ' इति भाषानामानि षट् ॥

**कृतं त्वलम् ॥१५२७॥**

**भवत्वस्तु च किं तुल्याः**

**( १.२प्रतिपाठः )** १ **कृतम्, भवतु, अस्तु** च त्रयोऽव्ययाः सुप्तिङन्तप्रतिरूपकाः ।

''गोत्रेण पुष्करावर्त ! किं त्वया गर्जितैः कृतम् ।
विद्युताऽलं भवत्वद्भिर्हंसा ऊचुस्तिवदं (ऊचुर्न्विदं) घनम्॥१॥''
[द्व्याश्रयमहाकाव्यम्, सर्गः-३, श्लो-१६]इति द्व्याश्रये । एतेऽव्ययाः परस्परं तुल्यार्थाः ॥

१. '-त्तमव्ययम्' इति२॥ २. '-न्धरः' इति३॥ ३. ३प्रतौ नास्ति ॥ ४ '-ठ' इति३॥ ५. कोष्ठान्तर्गतपाठः ५प्रतौ नास्ति ॥ ६. ''पुलिनानि सह क्षोमैः सरांसि नभसा समम् । ज्यौत्स्न्योमाह्नामिषन्मेधाः साकं कैलाससानुभिः ॥१॥'' इति द्व्याश्रये, भा-१, सर्गः-३, श्लो-११, पृ.२१६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

( ३.४.५प्रतिपाठः ) १-५ पञ्च 'सरिखं'[1] इत्यादि-भाषानामानि ॥१५२७॥

**प्रेत्यामुत्र भवान्तरे**[2] **।**

( १.२प्रतिपाठः ) १ "अन्यो धनं **प्रेत्य** गतस्य भुङ्क्ते"[ ]। २ "**अमुत्र** भविता यत् ते तच्चिन्तय शुभाशुभम्"[ ]॥

( ३.४.५प्रतिपाठः ) १ "अन्यो धनं[3] **प्रेत्य** गतस्य भुङ्क्ते"[ ]। २ [4](अमुष्मिन् **अमुत्र**) । यथा- "अमुत्र भविता यत् ते तत् चिन्तय शुभाशुभम्"[ ] इति । भवान्तरेनाम्नी द्वे॥

**तूष्णीं तूष्णीकां जोषं च मौने**

( १.२प्रतिपाठः ) १ "मुनिस्**तूष्णी**मास्ते"[ ]। मौनमात्रे इदम् । 'अकप्रकरणे (अकच्प्रकरणे) तूष्णीमः कां वक्तव्यः'(वा-५।३।७१॥)इति । अज्ञातार्थादिविशिष्टे मौने। २-३ "**तूष्णिकां जोष**मास्ते"[ ]एते मौनार्थाः ॥

( ३.४.५प्रतिपाठः ) १ **तूष्णी**मित्यादित्रयोऽपि मकारान्ताः । यथा- "तूष्णीमास्ते[5] मुनिः"[ ] । २ '**तूष्णीकाम्**' इति तु कुत्सितादिविशिष्टे मौने वर्तते । यथा- "मुनिस्तूष्णीकामास्ते"[ ]। ३ **जोषम्** इति सुख-मौनयोः। यथा- "जोषमास्ते जितेन्द्रियः"[स.कं. पृ.५९]। "ज्योषम्"[ ]चवर्गतृतीयान्तस्थाद्यत्रयोदशस्वरादिरपीति शाकटायनः । त्रीणि मौनस्य ॥

**दिष्ट्या तु सम्मदे ॥१५२८॥**

( १.२प्रतिपाठः ) १ "**दिष्ट्या** पुत्रो जातः"[ ]। समुपजोषं च । आनन्देऽव्ययः ॥

( ३.४.५प्रतिपाठः ) १ यथा- "**दिष्ट्या** पुत्रो जातः"[ ]। समुपजोषमपि । उपजोषमित्यन्ये । एकं हर्षस्य ॥१५२८॥

**परितः सर्वतो विष्वक् समन्ताच्च समन्ततः ।**

( १.२प्रतिपाठः ) १ "**परितः** प्रपतन्ति दुष्कृतां विपदः"[ ]। २ "**सर्वतः** सम्पदः सताम्"[ ]। ३ विष्वगञ्चति '**विष्वग्**' इति शब्दप्रतिरूपकम् । यथा- "विष्वग् व्याप्य स्थितो महीम्"[ ] । ४ '**समन्ताद्**' इति पञ्चम्यन्तप्रतिरूपकम् । "समन्ताद् वाति मारुतः"[ ] । ५ समन्ताद् भवः सामन्तः (**समन्ततः**)। "समन्ततो धावन्ति"[ ]। एते सर्वतो दिग्भागेऽव्ययाः ॥

( ३.४.५प्रतिपाठः ) १ **परितः**, **सर्वतः** एतौ द्वौ व्यञ्जनदन्त्यान्तौ । यथा- "परितो ग्रामम्"[ ], "सर्वतो ग्रामम्"[ ] । ३ '**विष्वग्**' इति व्यञ्जनचवर्गाद्यन्तः । यथा- "विष्वग् व्याप्य स्थितो महीम्"[ ]इति । ४ '**समन्ताद्**' इति, पञ्चम्यन्तप्रतिरूपकमव्ययम् । यथा- "समन्ताद् वाति मारुतः"[ ]। ५ '**समन्ततः**' इति व्यञ्जनदन्त्यान्तः । यथा-"येन चक्रे समन्ततः"[ ]इति ॥

**पुरः पुरस्तात् पुरतोऽग्रतः**

( १.२प्रतिपाठः ) १ "एते पुरस्सराः"[ ]। २ "**पुरस्ताद्** गच्छति[6]"[ ]। ३ "नासीरमूर्ध्नि धवलाः **पुरतः** प्रयान्ति"[ ]। ४ "**अग्रतो** धावति श्रीः"[ ]। एतेऽग्रार्थाः॥

( ३.४.५प्रतिपाठः ) १ पूर्वस्यां पूर्वस्याः पूर्वा वा दिक् **पुरः**, व्यञ्जनदन्त्यान्तः । २-३ **पुरस्तात्**, **पुरतः** इति व्यञ्जनदन्त्यान्तः । ४ **अग्रतः** व्यञ्जनदन्त्यान्तः । एते परस्परं पर्यायाः ॥ यथा- पुरस्सरः, पुरस्ताद् गच्छति, पुरतो गच्छति, अग्रतः सरः इत्यादि । 'आगलि' नामानि चत्वारि ॥

**प्रायस्तु भूमनि ॥१५२९॥**

( १.२प्रतिपाठः ) १ "सन्तः **प्रायो** विवेकारः" [ ]। भूमनि बाहुल्यार्थेऽव्ययम् ॥

( ३.४.५प्रतिपाठः ) १ '**प्रायः**' इति व्यञ्जनद-न्त्यान्तः । यथा- "प्रायः प्रत्ययमाधत्ते स्वगुणेषूत्तमादरः" [कुमारसम्भवम्, सर्गः-६, श्लो-२०]इति । बहुलपणा-नामैकम् ॥१५२९॥

**साम्प्रतमधुनेदानीं सम्प्रत्येतर्हि**

( १.२प्रतिपाठः ) १ सम्प्रत्येव **साम्प्रतम्**। स्वार्थेऽण्, एतद्विभक्तिप्रतिरूपकम् । यथा[9]- "साम्प्रतं नहि"[ ]। २-४-५ **अधुना, इदानीम्, एतर्हि**। 'इदमो र्हिल्'५।३।१६॥, 'एतेतौ रथोः'५।३।४॥ इत्येतादेशः । "अधुना तस्य

---

१. '-खां' इति४॥ २. तुलनीयोऽमरकोषः३।४।८॥ ३. '-न्यं' इति५॥ ४. कोष्ठान्तर्गतपाठः ५प्रतौ नास्ति ॥ ५. '-रि-' इति३॥ ६. '-कामास्ते' इति३॥ ७. '-दिरिति' इति५॥ ८. '-न्ति' इति१॥ ९. १प्रतौ नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विस्तीर्णविभवान्धस्य के वयम्?''[]। ''इदानीं सन्धिः'' [] । ''भवन्तमेतर्हि मनश्वि(स्वि)गर्हिते विवर्तमानं नरदेव! वर्त्मनि''[किरातार्जुनीयम्, सर्गः-१, श्लो-३२]। ४ ''**सम्प्रत्य**साम्प्रतं वक्तुम्''[शिशुपालवधम्, सर्गः-२, श्लो-७०]। इदानीमयोग्यमित्यर्थः। अस्मिन् कालेऽर्थेऽव्ययाः ॥

**(३.४.५प्रतिपाठः)** १ **'साम्प्रतम्'** इति मान्तं विभक्त्यन्तप्रतिरूपकमव्ययम् । यथा- ''भीमामार्जुनव्यतिकरः साम्प्रतं वर्तते तयोः''[]इति । २ **'अधुना'** इति । यथा- ''अधुना तस्य विस्तीर्णविभवान्धस्य के वयम्?'' []इति । ३ **'इदानीम्'** इति मान्तम् । [यथा- ''इदानीं त्वं नाथः''[]इति । ४ **'सम्प्रति'** इति तृतीयस्वरान्तः । यथा- ''सम्प्रत्यसाम्प्रतं वक्तुम्''[शिशुपालवधम्, सर्गः-२, श्लो-७०]। ५ **एतर्हि** तृतीयस्वरान्तम् । यथा- ''भवन्तमेतर्हि मनस्विगर्हिते''[किरातार्जुनीयम्, सर्गः-१, श्लो-३२]इति । पञ्च 'हिवणां' इति भाषायां[1] ॥

**अथाऽञ्जसा ।**
**द्राक् स्त्रागरं झटित्याशु मङ्क्ष्वह्नाय च सत्वरम्**
**॥१५३०॥**

**(१.२प्रतिपाठः)** १ **'अञ्जसा'** इति तृतीयान्तप्रतिरूपकोऽव्ययः । यथा- ''यद्वा(यज्वा)ऽञ्जसा जयति ब्रह्मलोकम्''[] । २ ''**द्राग्** विद्रुतं कातरैः''[] । ३ ''**स्राक्** सरन्त्यभिसारिकाः''[गणरत्न.पृ.३६]। ४ ''**अरं** याति तुरङ्गमः''[]। ५ ''आनीय **झटिति** घटयति विधिरभिमतमभिमुखीभूतः''[रत्नावलि.१.५]। ६ ''**आश्व**पेहि- मम शीधु(सीधु)भाजनात्''[काव्यालं०, सू. वृ. ३।२।८॥] । ७ ''**मङ्क्षू**दपाति पुरतः (परितः) पटलैरलीनाम्''[शिशुपालवधम्, सर्गः-५, श्लो-३७] । ''**अह्नाय** तावदरुणेन तमो निरस्तम्''[रघुवंशम्, सर्गः-५, श्लो-७१]। ९ ''सत्वरं गच्छ''[ ]। झगितिसपदितरसादि च । एते शीघ्रार्थेऽव्ययाः ॥

**(३.४.५प्रतिपाठः)** १ **अञ्जसा** द्वितीयस्वरान्तः, तृतीयान्तप्रतिरूपम् । २-२ **द्राक्, स्त्राक्**, एतौ द्वौ व्यञ्जनकवर्गाद्यान्तौ । यथा- ''द्राग् विद्रुतं कातरैः''[] इति । ''स्त्राक् सरन्त्यभिसारिकाः''[गणरत्न. पृ.३६]। ४ **'अरम्'** इति मान्तम् । ''अरं याति तुरङ्गमः''[] । ५ **'झटिति'** तृतीयस्वरद्वयोऽयम् । ''आनीय झटिति घटयति विधिरभिमुखमभिमुखीभूतः''[रत्नावली१.५]। ६ **'आशु'** इति । यथा- ''आशु एहि (आश्वपेहि) मम शीधु(सीधु) भाजनात्''[काव्यलं०, सू. वृ. ३।२।८।]इति । ७ यथा- ''**मङ्क्षू**दयादि पुरतः[2](परितः) पटलैरलीनाम्''[शिशुपालवधम्, सर्गः-५, श्लो-३७]इति । ८ **'अह्नाय'** इति चतुर्थ्यन्तप्रतिरूपकम् । यथा- ''अह्नाय तावदरुणेन तमो निरस्तम्''[रघुवंशम्, सर्गः-५, श्लो- ७१]इति। [९ **सत्वरम्**] '[3]ऊतावलि' नामान्यष्टौ ॥१५३०॥

**सदा सनाऽनिशं शश्वत्**

**(१.२प्रतिपाठः)** १ सर्वस्मिन् काले **सदा** । 'सर्वैकान्यकिंयत्तदः काले दा'५।३।१५॥, 'सर्वस्य सोऽन्यतरस्यां दि'५।३।६॥ इति साधुः । ''सदा कुरु''[]। सर्वदाऽपि । २ **सनातनः** । सनत् सनाच्च । यथा- ''सनत्कुमारः''[अमरकोषः१।१।५१॥, अभि.६९३]। ३ ''ये नमन्त्य**निशं** जिनम्[4]''[]। ४ ''**शश्वद्** याति''[]। ''सदम्''[]इति शिलोञ्छः । एते [5]सदार्थाः ॥

**(३.४.५प्रतिपाठः)** १ यथा[6]-''**सदा** पुरोडाशपवित्रताधरे''[]इति। सर्वदा इत्यपि । २ **'सना'**, [यथा- ''सनातनः''[]। सनदित्यपि । यथा- ''सनत्कुमारः'' [अमरकोषः१।१।५१॥, अभि.६९३]। सनादिति द्वितीयस्वरमध्यमपि । ३ **'अनिशम्'** इति मान्तम् । यथा- ''ये नमन्त्यनिशं जिनेश्वरम्''[]इति । ४ **'शश्वद्'** इति चतुर्थवर्गाद्यान्तः । यथा- ''शश्वत् पठति[7] छात्रः''[]इति । दिहाडीनामानि चत्वारि ॥

**भूयोऽभीक्ष्णं पुनःपुनः ।**
**असकृन्मुहुः**

**(१.२प्रतिपाठः)** १ ''जगाद **भूयो** जगदेकनाथः''[]। २ ''**अभीक्ष्णं** वक्ति''[]। ३ ''**पुनःपुन**र्वारि पिबेदभूरि''[अष्टाङ्गहृदयम्] । ४ ''**असकृद्** ध्येयो जिनैः[8] सद्भिः''[] । ५ ''कान्ता (कान्तां) मुहुर्ध्यायति'' []। एते पुनःपुनरर्थाः ॥

---

१. 'भाषा' इति३॥ २. 'पुरुतः' इति३॥ ३. 'उ-' इति३॥ ४. १प्रतौ नास्ति ॥ ५ 'सद-' इति१॥ ६ ४.५प्रत्योर्नास्ति ॥ ७ '-न्ति' इति५॥ ८ '-तः' इति१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(३.४.५प्रतिपाठः) १ **भूयः** सकारान्तः । २ '**पुनःपुनः**' इति चतुरक्षरोऽखण्डः । ३ '**असकृद्**' इति व्यञ्जनचतुर्थवर्गाद्यान्तः । '**मुहुः**' सकारान्तः । वलीवलीनामानि पञ्च ॥

## सायं[1] तु दिनान्ते

(१.२प्रतिपाठः) १ "**सायंतनो** वायुः"[ ] । सन्ध्यार्थोऽयम् ॥

(३.४.५प्रतिपाठः) १ '**सायम्**' इति मान्तम् । दिनान्ते दिवसावसाने । उसूरनामैकम् ॥

## दिवसे दिवा[1] ॥१५३१॥

(१.२प्रतिपाठः) १ दिनार्थोऽयम् ।

(३.४.५प्रतिपाठः) १ एकं दिनस्य, **दिवा** द्वितीयस्वरान्तः ॥१५३१॥

## सहसैकपदे सद्योऽकस्मात् सपदि तत्क्षणे ।

(१.२प्रतिपाठः) १ [**सहसा**] तृतीयान्तप्रतिरूपकम् । "**सहसा** विदधीत न क्रियाम्"[किरातार्जुनीयम्, सर्गः-२, श्लो-३०] । २ '**एकपदे**' इतीदं विभक्त्यन्तप्रतिरूपकम् । "अयमेकपदे तया वियोगः"[विक्रमोर्वशीयम्, अङ्कः-४, श्लो-१०] । ३ समानेऽहनि **सद्यः** । यथा- "सद्यः पतति मांसेन"[ ] । ४ '**अकस्माद्**' इति विभक्त्यन्तप्रतिरूपकम् । यथा- "अकस्मादायातः"[ ] । ५ "**सपदि**प्रवहत्युपेक्षितोऽग्निः[1]"[ ] । एते तत्क्षणार्थाः ॥

(३.४.५प्रतिपाठः) १ **सहसा** द्वितीयस्वरान्तः, विभक्त्यन्तप्रतिरूपको वा । यथा- "सहसा विदधीत न क्रिया (क्रियाम्)"[किरातार्जुनीयम्, सर्गः-२, श्लो-३०] इति । २ '**एकपदे**' इति विभक्त्यन्तप्रतिरूपकमेकादशस्वरादिः । यथा- "अयमेकपदे तया वियोगः"[विक्रमोर्वशीयम्, अङ्कः-४, श्लो-१०]इति । ३ '**सद्यः**' सकारान्तः । ४ '**अकस्माद्**' इति विभक्त्यन्तप्रतिरूपकम् । ५ '**सपदि**' इति तृतीयस्वरान्तः । तत्कालननामानि पञ्च । 'तिवारेंहींजे[2]' इति भाषा ॥

## चिराय[1] चिररात्राय[2] चिरस्य[3] च चिराच्चिरम्[4,5] ॥१५३२॥

## चिरेण[6] दीर्घकालार्थे

(१.२प्रतिपाठः) १ "**चिराय** निर्धनो भूत्वा भवत्यह्ना(-ह्ना) महाधनः"[स.कं.पृ.३८] । २ "हविर्य**च्चिररात्राय** प्रत्यपद्यत"[ ] । ३ "**चिरस्य** यत् पुनः" [ ] । ४ "**चिराद्** दृष्टोऽसि"[ ] । ५ "**चिरं** जीवी" [ ] ॥१५३२॥ ६ "**चिरेण** सञ्चितं पापं प्रणश्यति जिनार्चनात्"[ ] । एते दीर्घकालार्थाः ॥

(३.४.५प्रतिपाठः) १ '**चिराय**' इति । यथा- "नैषधेन समशायि चिराय"[ ] । [२ "**चिररात्राय** यजते"] । ३ '**चिरस्य**' इति । यथा- "निर्जितस्मर ! चिरस्य निरस्य"[ ]इति । [४ "**चिराद्** दृष्टोऽसि"[ ] । ५ **चिरन्तन**मिदं वृत्तं बलीषु तस्याः स्खलिताः"[ ] ] ॥१५३२॥ ६ **चिरेण** । यथा- "चिरेण तन्मध्यममुञ्चताऽस्य[3]"[ ]इति । एते षडपि विभक्त्यन्तप्रतिरूपकाः । चिरकालनामानि षट् ॥

## कदाचिज्जातु कर्हिचित्[1,2,3] ।

(१.२प्रतिपाठः) १ "**कदाचि**च्छूरतां याति मरणे कृतनिश्चयः"[ ] । २ "न **जातु** कामः कामानामुपभोगेन शाम्यति"[मनुस्मृतिः, अध्या-२, श्लो-९४] । ३ "**कर्हिचिद्** भवति"[ ] । एते कदाचिदर्थाः ॥

(३.४.५प्रतिपाठः) १ यथा- "**कदाचि**दस्यायुवधेर्य्यलोपिनम्[4]"[ ]इति । कदाचिन्नामानि त्रीणि ॥

## दोषा[1] नक्त[2]मुषा[3] रात्रौ

(१.२प्रतिपाठः) १ "**दोषा**मन्यमहः"[ ] । २ "**नक्त**ञ्चरः"[ ] । ३ "**उषा**तनो वायुः"[ ] । एते रात्र्यर्थाः ॥

(३.४.५प्रतिपाठः) १ **उषा,** मूर्धन्यमध्यः । त्रीणि रात्रेः ॥

## प्रगे[1] प्रातरहर्मुखे[2] ॥१५३३॥

(१.२प्रतिपाठः) १ '**प्रगे**' इति विभक्त्यन्तप्रतिरूपकम् । यथा- "प्रगेतनो वायुः"[ ] । २ "**प्रात**रेव समुत्थाय"[ ] । एतौ प्रभातार्थौ ॥

(३.४.५प्रतिपाठः) १ '**प्रगे**' इति सप्तम्यन्तप्रतिरूपकम् । द्वे प्रभातस्य ॥१५३३॥

---

१. '-स्ति' इति१ ॥ २. 'तिवारइजइ' इति३, 'तिवारैंज' इति५ ॥ ३. '-त्यस्य' इति३ ॥ ४. '-पनम्' इति४ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**तिर्यगर्थे तिरः[1] साचि[2]**

(१.२प्रतिपाठः) १ "तिरः काष्ठं कुरु"[सं. कं. पृ.५९]। परिभूतेऽन्तर्ध्युपचारात् । यथा- "तिरस्कृतोऽरिः"[]। २ "साचि लोचनयुगं नमयन्ती"[किरातार्जुनीयम्, सर्गः-९, श्लो-४४] । एतौ तिर्यगर्थे ॥

(३.४.५प्रतिपाठः) १ तिरस् दन्त्यान्तः । तिरछानाम्नी द्वे ॥

**निष्फले तु वृथा[1] मुधा[2] ।**

(१.२प्रतिपाठः) १ "वृथा दुग्धोऽनड्वान्"[]। २ "मुग्धे! (तृष्णे!) मुधा ताम्यसि"[मुद्राराक्षसम्, अङ्कः-३, श्लो-१]। एतौ निष्फलार्थे ॥

(३.४.५प्रतिपाठः) १ "वृथा दुग्धोऽनड्वान्" []। २ यथा-"मुग्धे! (तृष्णे!) मुधा ताम्यसि"[मुद्राराक्षसम्, अङ्कः-३, श्लो-१]। द्वे निष्फलस्य । 'फोक' इति भाषा ॥

**मृषा[1] मिथ्याऽनृते[2]**

(१.२प्रतिपाठः) १ "मृषा वदति"[]। "मृषोद्यम्"[उत्तररामचरितम्, अङ्कः-४, श्लो-१७ अधः, पृ.११४]। २ "मिथ्यावादी"[] । एतौ मृषार्थे ॥

(३.४.५प्रतिपाठः) १ कूडनाम्नी द्वे ॥

**अभ्यर्णे समया[1] निकषा[2] हिरुक्[3] ॥१५३४॥**

(१.२प्रतिपाठः) १ "मित्रं समयाऽऽस्ते"[]। २ "विलङ्घ्य लङ्कां निकषा हनिष्यति"[शिशुपालवधम्, सर्गः-१, श्लो-६८]। ३ "मह्या हिरुक्"[] । एते समीपार्थे ॥

(३.४.५प्रतिपाठः) १-३ 'हिरुग्' इति कवर्गाद्यान्तः । त्रीणि अभ्यर्णस्य समीपस्य ॥१५३४॥

**शं[1] सुखे**

(१.२प्रतिपाठः) १ "शम्भुः"[]॥

(३.४.५प्रतिपाठः) १ जोषमपि[1]। एकं सुखस्य॥

**बलवत्[1] सुष्ठु[2] किमुता[3]तीव[4] निर्भरे ।**

(१.२प्रतिपाठः) १ "बलवत् पिपासितोऽस्मि" []। २ "सुष्ठु खल्विदमुच्यते"[]। ३ "किमुत ब्रह्मवित्तमः(-त्रिभिः)"[] । अव्ययसमुदायो वा । ४ "अतीव क्षुत्पिपासितः"[]। स्वती च । यथा- "सुसिक्त आम्रः फलति"[], अतिसिक्तः । एते निर्भरार्थे ॥

(३.४.५प्रतिपाठः) १ 'बलवद्' इति तकारान्तः। २ सुष्ठु मूर्धन्यतृतीयवर्गद्वितीयः[2] पञ्चमस्वरान्तः । ३-४ अतीव, किमुत । स्वती अपि । यथा- "सुसिक्त आम्रः फलति"[], अतिसिक्त इति । निर्भरेऽत्यर्थे । अत्यर्थनामानि चत्वारि ॥

**प्राक्[1] पुरा[2] प्रथमे**

(१.२प्रतिपाठः) १ [प्राक् कृतम्], प्रथमं कृतमित्यर्थः । २ "पुरा कृतम्"[]। एतौ प्रथमार्थे ॥

(३.४.५प्रतिपाठः) १ 'प्राग्' इति व्यञ्जनचवर्गाद्यान्तः । २ पुरा द्वितीयस्वरान्तः । प्रथमे आदौ । पहिलानाम्नी द्वे ॥

**संवद्[1] वर्षे**

(१.२प्रतिपाठः) १ "संवत् तृतीये"[]। इदं वर्षे॥

(३.४.५प्रतिपाठः) १ ['संवत्' इति] तकारान्तः । वर्षनामैकम् ॥

**परस्परे मिथः[1] ॥१५३५॥**

(१.२प्रतिपाठः) १ "मिथः प्रहरतः"[] ।

(३.४.५प्रतिपाठः) १ 'मिथः' इति सकारान्तः। मांहोमाहिनामैकम् ॥१५३५॥

**उषा[1] निशान्ते**

(१.२प्रतिपाठः) १ "उषातनो वायुः"[]। रात्र्यन्ते इदम् ॥

(३.४.५प्रतिपाठः) १ मूर्धन्यद्वितीयस्वरान्त उषाशब्दः। एकं निशान्तस्य । 'पाछिली राति' इति भाषा ॥

**अल्पे किञ्चि[1]न्मना[2]गीष[3]च्च किञ्चन[4] ।**

(१.२प्रतिपाठः) १ "किञ्चित् कुञ्चिमूर्धजः" []। २ "ब्रूते मनाग् मार्दवम्"[]। ३ "ईषद् गौरः" []। ४ "प्राचीमङ्कुरयति किञ्चने[3] रुचो राजीवजीवातवः" []। एतेऽल्पार्थाः ॥

---

१. द्र. अमरकोषः३।३।२५१॥ २. '-य-' इति३॥ ३. '-ञ्चित्' इति१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(३.४.५प्रतिपाठः) १ अल्पे स्तोके '**मनाक्**' इति व्यञ्जनकवर्गाद्यान्तः । ४ '**किञ्चन**' इति अखण्डस्त्र्यक्षरः । चत्वारि स्तोकस्य ॥

## आहो[1] उताहो किमुत वितर्के किं किमूत च[2] ॥१५३६॥

(१.२प्रतिपाठः) १ "अयं स्थाणु**राहो** पुरुषः" [स.कं. पृ.३५, गणरत्न.पृ.१०] । २ "**उताहो**स्विद् भवेद् राजा नलः परपुरञ्जयः" [म.भा.नलो.] । ३ '**किमुत**' इत्यव्ययसमुदायम् । यथा- "किमुत रज्जुः, किमुत सर्पः[3]" []। ४ "**किं** रज्जुः, किं सर्पः" []। ५-६ 'किमूत' इत्यव्ययसमुदायो वा। "खेदयेत् **किमु** मारयेत् (मानयेत्)" []। "एकमेव वरं पुंसा**मुत** राज्यमुताश्रमः" []। "किमूत सर्पः" []। एते वितर्को विकल्पः[4] पक्षान्तरम्, तत्राऽव्ययाः ॥

(३.४.५प्रतिपाठः) १ वितर्के विकल्पः पक्षान्तरम्, तत्र । **आहो** द्वितीयस्वरादिः । २ **उताहो** पञ्चमस्वरादिः । द्वावपि त्रयोदशस्वरान्तौ । यथा- "अयं स्थाणुराहो[5] पुरुषः" [स.कं. पृ.३५, गणरत्नः, पृ.१०], "गौरयमुताहो गवयः" []इति । ३ **किमुत** त्र्यक्षरोऽखण्डः । यथा- "किमुत रज्जुः, किमुत सर्पः" []। ४ '**किम्**' इति मान्तम्। ५ '**किमु**' इति पञ्चमस्वरान्तम् । [६ **उत** पञ्चमस्वरादिः]। षट् पक्षान्तरस्य ॥१५३६॥

## इतिह स्यात् सम्प्रदाये

(१.२प्रतिपाठः) १ [6]यथा-"**इतिह** स्माऽऽहुराचार्याः" []॥

(३.४.५प्रतिपाठः) १ सम्प्रदायो गुरुशिष्यप्रशिष्यादिकुलम्, उपदेशश्च, तत्र । एकं गुरुपरम्परावचनस्य । **इतिह** अखण्डस्त्र्यक्षरः । यथा- "इतिह स्माऽऽहुराचार्याः" []इति ॥

## हेतौ यत् तद् यतस्ततः ।

(१.२प्रतिपाठः) १-२ "**यत्** सभासु प्रगल्भस्**तत्** पूज्योऽसि" []। ३-४ '**यतः, ततः**' इत्येतौ विभक्त्यन्तप्रतिरूपकौ । "यतो विद्वांस्ततः सभ्यः" []। येनतेनावपि[7], "येन दाता तेन श्लाघ्यः" []। एते हेतौ ॥

(३.४.५प्रतिपाठः) १-२ हेतौ कारणे **यद् तद्** एतौ दकारान्तौ । ३-४ **यतः ततः** एतौ विभक्त्यन्तप्रतिरूपकौ । येन तेन एतौ तृतीयाविभक्त्यन्तप्रतिरूपकावपि । चत्वारि कारणस्य ॥

## सम्बोधनेऽङ्ग भोः प्याट् पाट् हे[8] है हंहो अरेऽयि[9] रे[10] ॥१५३७॥

(१.२प्रतिपाठः) १ "**अङ्गा**नङ्ग !" []। २ "**भो !** भार्गव !" []। ३ "**प्याट् !** पाठक !" []। ४ "**पाट्** ! पान्थ !" []। ५ "**हे !** महावीर !" []। ६ "**है** ! वातूल !" []। ७ "**हंहो** ! कौमार !" []। ८ "**अरे** ! चौर !" []। ९ "**अयि** ! प्रिये !" []। १० "**रे** ! शूद्र !" []। अंहो (अहो) अरेरे इत्यादयश्च । एते सम्बोधनार्थाः ॥

(३.४.५प्रतिपाठः) १ '**अङ्ग**' इत्यकारान्तः । २ '**भोस्**' इति सकारान्तः । ३ '**प्याट्**' इति पवर्गाद्यान्तस्थाद्यद्वितीयस्वरादिः । ४ **पाट्** द्वितीयस्वरादिः । अहो अरेरे इत्यादयोऽपि । दश सम्बोधनस्य ॥१५३७॥

## श्रौषड् वौषड् वषट् स्वाहा स्वधा देवहविर्हुतौ।

(१.२प्रतिपाठः) १ "अस्तु **श्रौषट्**" [तै.सं. १.६.११]। २ "व्रीही **वौषट्**" [ऐ.ब्रा.३.५]। ३ "**वष**डिन्द्राय" [तै.सं.३.५.४.६] । ४ "**स्वाहा** देवेभ्यः" []। ५ "**स्वधा** पितृभ्यः" [वाज.सं.२-७]। एते देवहविर्दाने ॥

(३.४.५प्रतिपाठः) १ देवेभ्यो हविषो दाने इत्यर्थः । देवहोतव्यद्रव्यसम्प्रदाननामानि पञ्च ॥

## रहस्युपांशु

(१.२प्रतिपाठः) १ "कथ**मुपांशु** वधः" []। अप्रकाशोच्चारणेऽपि । यथा- "जपतः सदा जपमपांशु" [] इदमेकान्ते ॥

(३.४.५प्रतिपाठः) १ यथा- "तेषामुपांशु वधं कुर्वीत" []इति । एकमेकान्तस्य॥

## मध्येऽन्तरन्तरेणाऽन्तरेऽन्तरा ॥१५३८॥

---

१. "अहो धिगर्थ आश्चर्ये विषादकरुणार्थयोः" इति नानार्थमाला(२६-२०)वचनाद् 'अहो' ह्रस्वादिरपि ॥ २. तुलनीयोऽमरकोषः३।४।५॥ ३. '-मुत' इति१॥ ४ '-ल्पाः' इति१॥ ५ '-रुताहो' इति३॥ ६ इतः पूर्वे १प्रतौ 'अव्ययसमुदायो वा' इति दृश्यते ॥ ७ '-नाऽपि च' इति१॥ ८. 'हे' इति१॥ ९ 'अयि रे' इति४.५॥ १०. 'माधवः' इति१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**(१.२प्रतिपाठः)** १ "**अन्तर्बा**ष्पः"[मेघदूतम्, पूर्वमेघः, श्लो-३]। २ '**अन्तरेण**' इति तृतीयाप्रतिरूपकम् । "भवन्तमन्तरेणाऽन्यथाभूपतिर्ग्राहितः"[], भवन्मध्य इत्यर्थः । ३ '**अन्तरे**' सप्तम्यन्तप्रतिरूपकम् । "आवयोरन्तरे पर्वतः (पर्वताः) सरितो द्रुमाः"[महानाटक.५.२५]। ४ "**अन्तरा** त्वां च मां च भगवान्" [सर.कण्ठा. पृ.५८] । एते मध्यार्थाः ॥

**(३.४.५प्रतिपाठः)** २ '**अन्तरेण**' इति तृतीयान्तप्रतिरूपकम् । ३ '**अन्तरे**' इति सप्तम्यन्तप्रतिरूपकम् । मध्यनामानि चत्वारि ॥१५३८॥

## प्रादुराविः[1,2] प्रकाशे स्यात्

**(१.२प्रतिपाठः)** १ "**प्रादुरासीत्**"[रघुवंशम्, सर्गः-१५, श्लो-८३]। २ "**आविर्भूत**-"[मेघदूतम्, पूर्वमेघः, श्लो-२१]। एतौ प्रकाशे ॥

**(३.४.५प्रतिपाठः)** १ **प्रादुस्** उसन्तः । २ **आविस्** इसन्तः[1] । प्रकाशे प्रकटे । द्वे प्रकटस्य ॥

## अभावे त्व[1] न[2] नो[3] नहि[4] ।

**(१.२प्रतिपाठः)** १ "अविप्र इव भाषसे"[], विप्रवत्र ब्रूष इत्यर्थः । २ "नैकः सुप्तेषु जागृयात्" []। ३ "**नो** जानीमः"[] । ४ "**नहि** प्रेम प्रयोजनापेक्षम्"[] । अव्ययसमुदायो वा । एतेऽभावेऽव्ययाः ॥

**(३.४.५प्रतिपाठः)** १ अभावेऽसत्तायाम्, **अ** आद्यस्वरः । यथा- "अविप्र इव भाषसे"[]। विप्रवत्र भाषस इत्यर्थः । ३ **नो** त्रयोदशस्वरान्तः । यथा- "नो जानीमः किमत्र विधास्यति"[]। ४ **नहि** इत्यखण्ड[2]द्वयक्षरम् । 'नही[3]' इति भाषायाश्चत्वारि ॥

## हठे प्रसह्य[1]

**(१.२प्रतिपाठः)** १ "**प्रसह्य** वित्तानि हरन्ति चौराः"[नी.श. २-५४]।

**(३.४.५प्रतिपाठः)** १ एकं हठस्य ॥

## मा[1] मास्म[2] वारणे

**(१.२प्रतिपाठः)** १ "**मा** कार्षीत् कोऽपि पापानि"[]। २ '**मास्म**' इत्यव्ययसमुदायः । "मास्म करोत्"[]। अलं च । "अलं बाले! रोदनेन"[] । एते (एतौ) वारणार्थे ॥

**(३.४.५प्रतिपाठः)** १ द्वे वारणस्य । २ '**मास्म**' इत्यखण्ड[4]द्वयक्षरम् ॥

## अस्तमदर्शने[1] ॥१५३९॥

**(१.२प्रतिपाठः)** १ "**अस्तं**गतः"[]॥

**(३.४.५प्रतिपाठः)** १ एकमदर्शनस्य ॥१५३९॥

## अकामानुमतौ कामम्[1]

**(१.२प्रतिपाठः)** १ "**कामं** करोमि"[] । आदावनिच्छायाम्, पश्चादङ्गीकारेऽव्ययम् ॥

**(३.४.५प्रतिपाठः)** १ आदावनिच्छायां पश्चादङ्गीकार इत्यर्थः । '**कामम्**' इति मकारान्तम्। एकमनिच्छाङ्गीकारस्य ॥

## स्यादों[1] आं[2] परमं[3] मते ।

**(१.२प्रतिपाठः)** १ "**ओं** कुरु"[]। २ "**आं** कुर्मः"[]। ३ **परमं** विभक्त्यन्तप्रतिरूपकम्। "परमं तत्राऽवसन्"[] । एवं च । "एवं कुरु"[]। मतमङ्गीकारः, तत्रैतेऽव्ययाः ॥

**(३.४.५प्रतिपाठः)** १ **ओम्** त्रयोदशस्वरादिः, मान्तम् । २ **आम्** द्वितीयस्वरादि[5], मकारान्तम् । ३ '**परमम्**' इति विभक्त्यन्तप्रतिरूपकम् । मतमभ्युपगमः, तत्र। त्रीणि अङ्गीकारस्य ॥

## कच्चिदिष्टपरिप्रश्ने[1]

**(१.२प्रतिपाठः)** १ "**कच्चिद्** जीवति ते पिता"[]॥

**(३.४.५प्रतिपाठः)** १ एकम् ॥

## अवश्यं[1] नूनं[2] च निश्चये ॥१५४०॥

**(१.२प्रतिपाठः)** १ "**अवश्यं** धर्मतः सौख्यम्" []। २ "**नूनं** पापात् सुदुःखं स्यात्"[]। एतौ निश्चयार्थौ ॥

**(३.४.५प्रतिपाठः)** १ उभावपि मान्तौ । द्वे निश्चयस्य ॥१५४०॥

## बहिर्बहिर्भवे[1]

**(१.२प्रतिपाठः)** १ "**बहि**र्भूतः"[]॥

**(३.४.५प्रतिपाठः)** १ **बहिः** इसन्तः । बाहिरनामैकम् ॥

## ह्यः[1] स्यादतीतेऽह्नि

---

१. 'इरान्तः' इति४.५॥ २. '-ण्डः' इति४॥ ३. '-हीं' इति४॥ ४. '-ण्डं' इति३॥ ५. '-दिः' इति४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(१.२प्रतिपाठः) १ "ह्यस्तनः"[ ]। अनन्तरातीतदिने ॥

(३.४.५प्रतिपाठः) १ **ह्यस्** सकारान्तः । अतीते गतेऽह्नि दिवसे । एकम् ॥

**श्व[1] एष्यति ।**

(१.२प्रतिपाठः) १ अह्नीत्येव । "श्वो गन्ता" [ ], श्वस्तनः । अनन्तरागामिदिने ॥

(३.४.५प्रतिपाठः) १ एष्यति, 'अह्नि' इति पूर्वस्थमत्राऽपि योज्यम् । एकम् ॥

**नीचैरल्पे[1]**

(१.२प्रतिपाठः) १ "नीचैर्मरुतो वाति"[ ]।

(३.४.५प्रतिपाठः) १ **नीचैस्** सकारान्तः । अल्पे स्तोके । एकम्[1][2] ॥

**महत्युच्चैः**

(१.२प्रतिपाठः) १ "उच्चैरुच्चरतु चिरम्"[ ]। एते चत्वारः सान्ता अन्तोदात्ताः ॥

(३.४.५प्रतिपाठः) १ **उच्चैस्** सकारान्तः । नीचा उच्चा एतौ द्वितीयस्वरान्तावेतावपि । 'न्युद्भ्यामञ्चेः ककाकैसष्टावच्चे[2]'(हैमोणा-१००३)इति सूत्रेण न्युद्भ्यां पराद् 'अञ्चू[3] गतौ'( )अस्माद्धातोः अ आ ऐस् एते त्रयः कितः प्रत्यया भवन्ति, ते च टावत् टायामिवैतेषु कार्यं भवतीत्यर्थः । यथा तृतीयैकवचने 'अच्च् प्राग् दीर्घश्च'(हैमसू-२।१।१०४॥)इति सूत्रेणाऽच्, चकारमात्रं भवति, तथाऽत्राऽपि अचश्चकारसद्भावे पूर्वस्वरस्य दीर्घत्वे नीचम्, उच्चम्, नीचा, उच्चा, नीचैः, उच्चैः एवमेते साधवः[4] । उच्चम्, उच्चा, उच्चैः एते व्यञ्जनान्तत्वाद् दीर्घाभावे पञ्चमस्वराद्या एव ॥

**सत्त्वेऽस्ति[1]**

(१.२प्रतिपाठः) १ '**अस्ति**' इत्यव्ययस्तिङन्तप्रतिरूपकम्। यथा- "अस्तिक्षीरा स्त्री"[ ]। सत्त्वे सत्तायाम् ॥

(३.४.५प्रतिपाठः) १ सत्त्वे सत्तायाम्, '**अस्ति**' इति तिङन्तप्रतिरूपकम् । 'छतां[5]' इति भाषा ॥

**दुष्ठु[1][6] निन्दने ॥१५४१॥**

(१.२प्रतिपाठः) १ "**दुष्ठु**वादी खलः"[ ]॥

(३.४.५प्रतिपाठः) १ '**दुष्ठु**' इति मूर्धन्यतृतीयवर्गद्वितीयान्तः पञ्चमस्वरद्वयः । निन्दने निन्दायाम् ॥१५४१॥

**ननुच[1] स्याद् विरोधोक्तौ**

(१.२प्रतिपाठः) १ '**ननुच**' इत्यव्ययसमुदायः । "ननुच कः शब्दः"[ ] ॥

(३.४.५प्रतिपाठः) १ '**ननुच**' इत्यखण्डः त्र्यक्षरात्मकः । एकं विरोधवचनस्य ॥

**पक्षान्तरे तु चेद्[1] यदि[2] ।**

(१.२प्रतिपाठः) १ "लोभश्चेदगुणेन किम् । २ पिशुनता यद्यस्ति किं पातकैः"[नीतिशतकम्, श्लो-५५ ]॥

(३.४.५प्रतिपाठः) १ द्वे पक्षान्तरस्य । 'जड' इति भाषा ॥

**शनैर्मन्दे[1]**

(१.२प्रतिपाठः) १ "**शनै**र्याति पिपीलकः"[सु. भा.२५४]। अन्तोदात्तोऽयमशीघ्रार्थे ॥

(३.४.५प्रतिपाठः) १ **शनैः** सान्तः ॥

**अवरे त्वर्वाक्[1]**

(१.२प्रतिपाठः) १ "वर्षात् षोडशाद**र्वाक्**"[ ]। अर्वाक्कालीनः । अवरः परादन्यस्तत्र, अव्ययोऽयम् ॥

(३.४.५प्रतिपाठः) १ **अर्वाक्[7]** चकारान्तः[8] । 'उरहा' इति भाषाया एकम् ॥

**रोषोक्तावुम्[1]**

(१.२प्रतिपाठः) १ "उं सैवाऽस्मि तव प्रिया" [ ]। कोपोक्तौ ॥

(३.४.५प्रतिपाठः) १ '**उम्**' इति मान्तम्, पञ्चमस्वरादिः ॥

**नतौ नमः ॥१५४२॥**

(१.२प्रतिपाठः) १ "**नमः** श्रीशान्तिनाथाय" [ ]। नमःशब्दश्चायं ग्रन्थान्ते मङ्गलार्थः[9] । यतो-"मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते" [महाभाष्यम् १।३।१॥]इति ॥

---

१. तुलनीयोऽमरकोषः३।४।१७॥ २. '-शब्दाच्च' इति३॥ ३.'-ञ्चु' इति३॥ ४ "न्युद्भ्यां परादञ्चू गतौ, इत्यस्मात् कितः अ आ ऐस् इत्येते प्रत्यया भवन्ति, ते च टावत्, टायामिव एषु कार्यं भवतीत्यर्थः । तेन 'अच्च् प्राग्दीर्घश्च' इति भवति । नीचम्, उच्चम् । नीचा, उच्चा । नीचैः, उच्चैः प्रसिद्धार्था एते । लाघवार्थं सन्ताधिकारेऽप्यकारआकारप्रत्ययविधानम्"(हैमोणा-१००३)इति स्वोपज्ञोणादिगणसूत्रविवरणम्, भा-२, पृ.४७८॥ ५. '-ताई' इति३॥ ६ '-ष्ठ' इति१॥ ७ ३.४प्रत्योर्नास्ति ॥ ८. '-न्तम्' इति३॥ ९ 'ग्रन्थावशा(सा)नमङ्गलार्थः' इति३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(३.४.५प्रतिपाठः) १ नमः शब्दोऽत्र मङ्गलार्थः[1] ॥

(१.२प्रतिपाठः) "आनुकूल्यार्थकं प्राध्वम्" [अमरकोषः३।४।४॥, शेषनाममाला ६।१९९॥]॥

यथा[2]- "प्राध्वं कुरुध्वं बुधाः"[स.कं.पृ.५४]। 'प्राध्वं बन्धने'१।४।७८॥ इति गतिसंज्ञकः[3] । प्राध्वंकृत्य ॥

"असाकल्ये तु चित् चन"[अमरकोषः३।४।३॥, शेषनाममाला ६।१९९॥]॥

यथा- "किञ्चिद् रूयन्ते"[]। "पद्ध्यते यति (पद्ध्यां याति) कुतश्चन"[]।

"तु हि च स्मै (स्म) ह वै पादपूरणे"[अमरकोषः ३।४।३॥, शेषनाममाला ६।२००॥] ॥

"आख्यास्यामि तु तत्त्वं ते[4]"[]। "न हि भुवि महिमानं प्राप्य तृप्यन्ति भूपाः"[]। "भीमः पार्थस्तथैव च"[]। ["इति ह स्माऽऽहुराचार्याः"[स.कं.पृ.३७]]। "यो वै युवाऽप्यधीयानः"[मनुस्मृतिः, अध्या-२, श्लो-१५६]। खल्वादयोऽपि । "अहो नु खलु भोः"[स. कं. पृ.३३]। एते पादपूर्तौ ॥

"पूजने स्वती[5]"[अमरकोषः३।४।५॥, शेषनाममाला ६।२००॥]॥

"सुस्तुतम्"[]। "अतिस्तुतम्"[]॥

"वद् वा यथा तथैवैवं साम्ये"[अमरकोषः३।४।९॥, शेषनाममाला ६।२००॥]॥

यथा-"युवतिवत्"[] । "पद्मिनीं वाऽन्यरूपाम्" [मेघदूतम्, उत्तरमेघः, श्लो-२०] । यथा- "चैत्रस्तथा मैत्रः"[]। "शारदाभ्रमिव पेलवमायुः"[] । "यथाऽर्क एवं वर्णः[6] (कर्णः)"[]। एते साम्ये ॥

"अहो हीति च विस्मये"[अमरकोषः३।४।९॥, शेषनाममाला ६।२००॥] ॥

"अहो आश्चर्यम्"[]।"हतविधिललितानां (-लसितानां) ही[7] विचित्रो विपाकः"[शिशुपालवधम्, सर्गः-११, श्लो-६४]॥

"स्युरेवं तु पुनर् वै वेत्यवधारणवाचकाः"[अमरकोषः३।४।१५॥, शेषनाममाला ६।२०१॥]॥

यथा- "एवमेतत्"[]। "आत्मा सर्वं तु पश्यति" []। "यतिः पुनः पूज्यः"[]। "गुरुर्वा वक्ति भीष्मो वा"[]। "त्वमेव देव! जानासि"[]। एतेऽवधारणे॥

"ऊ(ऊं) पृच्छायाम्"[शेषनाममाला ६।२०१॥]। [यथा-"ऊं न जानासि स्वार्थम्"[]]॥

"अतीते प्राक्"[शेषनाममाला ६।२०१॥]॥

"प्राक् कृतम्"[]॥

"निश्चयेऽद्धाऽञ्जसा द्वयम्"[अमरकोषः३।४।१२॥, शेषनाममाला ६।२०१॥]॥

यथा-"अरे अद्धा पुरुषः"[]। "अञ्जसा वक्ति साधुः"[स.कं. पृ.५२]॥

"अतो हेतौ"[शेषनाममाला ६।२०२॥]॥

"महः प्रत्यारम्भे"[शेषनाममाला ६।२०२॥]॥

"स्वयमात्मनि"[शेषनाममाला ६।२०२॥]॥

"स्वयम्भूः"[]॥

"प्रशंसने तु सुष्ठु स्यात्"[शेषनाममाला ६।२०२॥]॥

"सुष्ठूक्तम्"[]॥

"परश्वस्तु(श्वः)परेऽहनि"[शेषनाममाला ६।२०२॥]॥

श्वो दिनात् परमहः परश्वः । पारस्करादित्वात् परःसहस्रादिवत् सुट् ॥

"अद्याऽत्राऽह्नि"[अमरकोषः३।४।२०॥, शेषनाममाला ६।२०३॥]॥

अस्मिन् अहनि अद्य, वर्तमानमात्रेऽप्याहुः । "नरो लोकेऽद्य दुर्लभः (दुर्बलः)"[]॥

"अथ पूर्वेऽह्नीत्यादौ पूर्वेद्युरादयः"[शेषनाममाला ६।२०३॥]॥

पूर्वेऽह्नि पूर्वेद्युः । आदिशब्दाद् उत्तरेद्युः, अपरेद्युः, अधरेद्युः, अन्येद्युः, अन्यतरेद्युः, इतरेद्युः । "द्युर्दिनम्"[] इति भोजः। यथा- "द्युश्चन्द्रो द्योतते कथम्"[]॥

"समानेऽहनि सद्यः स्यात्"[शेषनाममाला ६।२०३॥]। []॥

"परे त्वह्नि परेद्यवि"[अमरकोषः३।४।२१॥, शेषनाममाला ६।२०३॥]।

यथा- "तं हन्ताऽस्मि परेद्यवि"[]॥

"उभयद्युश्चोभयेद्युः"[अमरकोषः३।४।२१॥, शेषनाममाला ६।२०४॥]॥

उभयेऽह्नीत्यर्थः ॥

"समे[8] युगपदेकदा"[शेषनाममाला ६।२०४॥]। यथा- "युगपत् प्राप्ताः"[]। एकस्मिन् काले- "एकदा मिलन्ति"[]। एतौ तुल्यकालार्थौ ॥

---

१ '-र्थाः' इति२॥ २. २प्रतौ नास्ति ॥ ३. '-ज्ञः' इति१॥ ४ १प्रतौ नास्ति॥ ५. '-ति' इत्यमरकोषे ॥ ६. '-र्णा' इति१॥ ७ 'हि' इति२॥ ८ 'समये' इति२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"स्यात् तदानीं तदा तर्हि"[शेषनाममाला ६।२०४॥] ॥

तस्मिन् काले तदा । 'तदो दा च'५।३।१९॥ इति दानीं च ॥

"यदा यर्हि"[शेषनाममाला ६।२०४॥] ॥

यस्मिन् कालेऽर्थे । "अन्यदैकदा"[ ]। 'सर्वै-कान्य-'५।३।१५॥ इति दा ॥

"परुत्[1] परार्यैषमोऽब्दे पूर्वे पूर्वतरेऽत्र च"[अमरकोष:३।४।२०॥, शेषनाममाला ६।२०५॥] ॥

पूर्ववर्षे परुत् । पूर्वतरे वर्षे परारि । अत्र वर्तमाने वर्षे[2] ऐषमः । 'सद्यःपरुत्परारि-'५।३।२२॥ इति साधवः ॥

"प्रकारेऽन्यथेतरथा कथमित्थं यथा तथा"[शेषनाममाला ६।२०५॥] ॥

'प्रकारवचने थाल्'५।३।२३॥, 'इदमस्थमुः'५।३।२४॥ इति साधवः ॥

"द्विधा द्वेधा त्रिधा त्रेधा चतुर्धा द्वैधमादि च" [शेषनाममाला ६।२०६॥] ॥

'सङ्ख्याया विधार्थे धा'५।३।४२॥, 'द्वित्र्योश्च धमुञ्'५।३।४५॥, 'एधाच्च'५।३।४६॥ इति साधवः ॥

"द्विस्त्रिश्चतुः पञ्चकृत्व इत्याद्यावर्तने कृते ।
दिग्देशकाले पूर्वादौ प्रागुदक्प्रत्यगादयः ॥"
[शेषनाममाला ६।२०६-७॥ (अमरकोष:३।४।२३॥)] ॥

प्राच्यां दिशि प्राचि देशे काले वा- [प्राग]वसति । प्राच्यां दिशि[3] प्राचो देशात् कालाद् वा- प्रागागतः । प्राची दिक् प्राक् (प्राङ्) देशः कालो वा प्राग्रम्यम्। 'दिक्शब्देभ्यः सप्तमीप्रथमान्तेभ्यो (सप्तमीपञ्चमीप्रथमाभ्यो) दिग्देशकालेष्वस्तातिः'५।३।२७॥, 'अञ्चेर्लुक्'५।३।३०॥ । आदिशब्दादवागादि । एवं पूर्वादिभ्यः पुरस्तादधस्तादादि ।

(इतः सर्वप्रतिषु समानपाठः) (शैषिका[4] अन्येऽप्यव्ययाः) प्रयोगवशाद् ज्ञेयाः । अव्ययानामनन्तत्वाद् दिङ्मात्रमत्रे[5] दर्शितम् । यतः-

"इयन्त इति सङ्ख्यानं[6] निपातानां न विद्यते ।
प्रयोजनवशादेते निपात्यन्ते पदे पदे ॥१॥"[[7]] ।
अर्थकथनं चैषामुपलक्षणं ज्ञेयम् । तथा चोक्तम्-
"निपाताश्चोपसर्गाश्च धातवश्चेति ते[8] त्रयः ।
अनेकार्थाः स्मृताः सर्वे पाठस्तेषां निदर्शनम् ॥२॥"[ ]इति।

॥ इत्यव्ययानि[9] ॥

॥ इति व्युत्पत्तिरत्नाकरः[10]॥

**॥ इत्याचार्यश्रीहेमचन्द्रविरचितायामभिधानचिन्तामणौ नाममालायां सामान्यकाण्डः षष्ठः[11] ॥**

सर्वाङ्गीणकलाविलासनिलयः कल्पद्रुमाभः कलौ,
जाग्रत्सर्वजनीनमञ्जुमहिमो मित्रप्रतापोदयः ।
श्रीमच्छ्रीविधिपक्षगच्छगणभृद् भूभृन्नातांह्रिद्वयः
**श्रीकल्याणसमुद्रसूरि**सुगुरुः सूरीन्द्रचूडामणिः ॥१॥
तन्निर्देशविधायिवाचकवरश्रेणीकिरीटोपमा ।
भास्वत्साधुगुणौघशालि**विनयाच्चन्द्रा**भिधावाचकाः ।
तच्छिष्यो[12] '**रविचन्द्र**' इत्यभिधयाते[13]षां विनेयो व्यधा-
देनं वाचक**देवसागरगणिर्व्युत्पत्तिरत्नाकरम्**[14] ॥२॥

---

१. इतो ग्रन्थश्चलितः प्रतिभाति, यथायोग्यं स्थापितोऽस्माभिः ॥ २. 'ए-' इति१॥ ३. '-ग्' इति१॥ ४. 'कोष्ठान्तर्गतपाठस्थाने १.२प्रत्योः 'एते शैषिका अव्यया अन्येऽपि' इति दृश्यते ॥ ५. 'अत्र' इति १.२प्रत्योर्न दृश्यते ॥ ६. 'प्रद-' इति१.२॥ ७. '-नः' इति४.५॥ ८. द्र. स्वोपज्ञ-टीका३।१५४२॥, पृ.३४६॥ ९. ४प्रतौ नास्ति॥ १०. १.२प्रत्योर्नास्ति॥ ११. इतोऽग्रे ३प्रतौ 'समाप्तः' इति दृश्यते ॥ १२. '-ष्यो' इति२॥ १३. '-धियास्ते-' इति४, '-धयास्ते-' इति५॥ १४. इतोऽग्रे १प्रतौ-"इति श्रीव्युत्पत्तिरत्नाकरस्सम्पूर्णतामबीभजत्, संवति १८०२ वर्षे कार्तिकवदि ८ अष्टम्यां बुधे ॥ भट्टारकेन्द्रः श्री ७ श्रीकनककुशलानां शिष्यैर्लिखितं पुस्तकमदः स्ववाचनार्थम्॥ ॥श्रीः॥श्रीः॥श्रीः॥श्रीः॥श्रीः॥श्रीः।छः।छः।छः॥ ॥छः॥छः॥ अदृश्यभावान्मतिविभ्रमाद् वा, पदादिहीनं लिखितं मया यत्। तत्सर्वमार्यैः परिशोधनीयं, कोपो न कार्यः खलु लेखकस्य ॥१॥ स ब्रह्मा चतुराननः स भगवानीशोऽपि पञ्चाननः, स स्कन्दश्च षडाननः स फणिनामीशः सहस्राननः । यत्पद्यार्थविशेषवर्णनविधौ नेशा वयं तत्र के ?, यद् व्याख्यायि तथाऽपि किञ्चिदखिलं तच्चापलं केवलम् ॥२॥ ॥श्रीः॥श्रीः॥श्रीः॥ श्रीः" इति दृश्यते ॥ ३प्रतौ-"श्रीहेमचन्द्रैर्गुणवृन्दधुर्यैर्वरा कृताऽसावभिधानमाला । तस्यां समाप्तौ वरषष्ठकाण्डः, प्रकाण्डशब्दैर्निचितोऽतिरम्यः ॥१॥ इति रहस्यम् । अदृष्टिदोषात् प्रतिविभ्रमाच्च, यदर्थहीनं लिखितं मयाऽत्र । तत्साधुमुख्यैः परिशोधनीयं कोपो न कार्यः खलु लेखकाय ॥१॥ यावद् गङ्गातटे भाति पुरं श्रीपट्टनायकम् । यावद् जैनकथा लोके तावत् तिष्ठति पुस्तकम् ॥२॥ यावद् धराधरो मेरुर्यावच्चन्द्रदिवाकरौ । यावदेषां फलं दद्यात् पाठकेभ्यः सुधामिव ॥३॥ यादृशं पुस्तकं दृष्ट्वा (दृष्टं) तादृशं लिखितं मया । यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥४॥ इति वचनाद् वाच्यमानं चिरं जीयात् । मास २ दिने ९ मध्ये लिपि-कृतम् । श्रीमन्महावीरजीप्रसादात् । भट्टारकपुरन्दरभट्टारकश्री १०००९१५ श्रीविजयक्षमासूरीश्वरजीविजयराज्ये संवत् १७८० वर्षे मिति पोसवदि २ दिने पूर्णं कृतम् ॥ श्री...॥ साहजीकुंभजी सेठ भेवानीदाजीसहाय्येन पुस्तकं लिपिकृतम् । महाराजाश्रीसवाईजैसिंघजीराज्यै ॥१७०८०॥ श्रीरस्तु ॥ विद्या न विद्या विदुषा न हेया, निरक्षरं वीक्ष्य धनाधिकत्वम्। रत्नावतंसां कुलटां समीक्ष्य, किमार्यनार्यः कुलटा भवन्ति ॥१॥ सकलपण्डित-शिरोमणिपण्डितश्री१०८श्री...सागरजी तच्छिष्यपण्डितशिरोमणि पं. श्री१०८श्री...सागरजी तच्छिष्यपण्डितशिरोमणि पं. श्री१०८श्री...सागरजी तच्छिष्यपण्डितप्रधानपण्डितश्री१०८श्री...सागरजी तच्छिष्यपण्डितप्रधानपण्डितश्री१०८श्री...सागरजी तच्छिष्यपण्डितप्रवर...सागरजी तच्छिष्यपं...लेखि । भग्नपृष्टिकटिग्रीवास्तसवर्णरधो(?)मुखं कष्टेन लिखितं शास्त्रं यत्नेन परिपालयेत् ॥१॥" इति दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# अथ प्रशस्तिः

(४.५प्रतिपाठः)

आसीद् **वीर**विभोवि(र्वि)भोद्धरभृतः, स्थानेऽवदानस्थिरः,
स्थाने लब्ध्युपलब्धिमान् गणधरः, स्वामी **सुधर्मो**दयी ।
तद्वंशे वशिनोऽग्र्यमौक्तिकसमा, मान्या मुनिश्रेयसां,
जाताः सूरय '**आर्यरक्षित**' इति ख्याताः क्षितावक्षता[१]: ॥ १ ॥ (शार्दूल०)

ये क्षेत्रेऽत्र कलौ निरस्तकुहना[:] स्वात्मार्थिनो नाग्रहाः,
सिद्धान्तादवबुद्ध्य शुद्धपरमार्थं ख्यापयन्तोऽक्षरम् ।
कुर्वन्तश्च तपो वपुष्यपि निरापेक्षा विपक्षक्षय-
क्षेपिष्टा विधिपक्षमुख्यबिरुदं, प्रापुः प्रतापोत्कटाः ॥ २ ॥ (शार्दूल०)

तत्पट्टानुक्रमेऽभूत् सुविहितमहितः शासनौन्नत्यकारी,
विद्यासिद्धः प्रसिद्धोऽवनिधवनिवहैर्वन्दितांह्रिर्महौजाः ।
तत्तच्चाञ्चच्चारित्रैर्धवलितभुवनो वर्ण्यलावण्यपूर्णः,
सूरिः **श्रीमेरुतुङ्गः** प्रवरपरिकरोद्भासिताभ्यासदेवाः(-वः) ॥ ३ ॥ (स्रग्धरा)

तदन्तवनिविश्रुताः श्रुतसरस्वदन्तस्पृशः, प्रशान्तमनसः सदा सदवधानधन्यर्द्धयः ।
सुशिष्टजनसेविताः प्रकटदे[२]वताधिष्ठता, बभूवुरतिविन्दवो **गुणनिधानसूरी**न्दवः ॥४॥ (पृथ्वी)

तत्पट्टाम्भोजभास्वद्रविरचितप्रवाक् सत्क्रियोद्धारकर्ता,
प्रेष्टव्युत्पन्नपर्षत्धृतधृतिद्रढिमा दानशौण्डः प्रकाण्डः ।
व्योदव्युद्ग्राहिमेधामुषिमुखरमुखम्लानिकृत् साधुसन्धो[३],
ध्याप्तोक्तिव्यक्तभक्ति[४]: समजनि शमवान् सूरिराट् **धर्ममूर्तिः** ॥ ५ ॥ (स्रग्धरा)

तैः स्वस्थानाभिषिक्ताः क्षितितलतिलका[५]: ग्रन्थगूढार्थसार्थो-
द्गातारस्तारवाचा प्रसरकरधुतध्वान्तधाराप्रचाराः ।
प्राज्यप्रौढप्रतिष्ठाप्रभृतिसुकृतसंसाक्षिणः क्षान्तिमन्तः,
**श्रीकल्याणाब्धिसूरी[६]श्वर**वरगुरवो ज्योग्[७] युगाग्र्याः जयन्ति ॥ ६ ॥ (स्रग्धरा)

---

१. '-माः' इति५॥ २ '-दै ' इति५॥ ३ साध्वी सन्धा यस्य सः ॥ ४ धी-धीग्राह्या आप्तोक्तिः, तत्र व्यक्ता भक्तिः यस्य सः ॥ ५ '-लिका' इति४॥ ६ '-रि-' इति५। ७ '-क-' इति५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इतश्च–

शिष्यां[1] **श्रीगुणसेवधे**र्गणपतेः[2], ये गच्छधूर्धारणे,
दध्रुः सर्वधुरीणतां धुरि सतां, स्तुत्याः स्थितिस्थापकाः ।
स वक्तुर्गणनायका अपि वचो, येषां सतीर्थ्यत्वतो,
भास्वन्तो भुवि वाचकास्समभवन्, **श्रीपुण्यचन्द्रा**ह्वयाः ॥ ७॥ (शार्दूल०)

तच्छिष्याः क्षमवाचकाग्रिमतमा, **माणिक्यचन्द्रा**स्ततो,
गीतार्था गणिसम्मतायतिततेस्तथ्यक्रियाकारकाः ।
धीराः स्वध्वनिवाचकाः[3] **विनयतश्चन्द्रा**भिधास्सन्ति तत्,
तच्छिष्यो[4] **रविचन्द्र**पण्डितवरो जज्ञे गुणग्रामणीः ॥ ८॥ (शार्दूल०)

तद्दीक्षितो वाचक**देवसागरो**ऽहं लब्धवान् ज्ञानलवं गुरोस्तथा[5] ।
**श्रीनाममालां** प्रभु**हेम**निर्मितां, प्रतीय तालीं[6] समवाङ्मयौकसः[7] ॥ ९ ॥ (इन्द्रवंशा)

वर्षे षड्वसुतर्कनिक्पतिमिते( **१६८६ ), हाल्लार**देशे नृपे,
**लाखा**ख्ये सति भव्य**नव्य**नगरे, चैत्यावलीशालिनि[8] ।
**लक्ष्मीचन्द्र**बुधस्य मद्गुरुगुरुभ्रातु**र्जयाब्धे**र्मुनेः
शिष्यस्यो**त्तमचन्द्र**शिष्य**सहज**स्यात्यन्तनिर्बन्धतः ॥ १० ॥ (शार्दूल०)

सूत्रैः **पाणिनि**सूत्रितैर्बहुविधग्रन्थांश्च सङ्ख्यावतैः[9],
साक्षीकृत्य यथामति व्यरचयं, **व्युत्पत्तिरत्नाकरम्** ।
छाद्मस्थ्याल्लिखितं यदत्र वितथं स्यात् सूरिभिस्सूरतैः[10]
संशोध्यं करुणां विधाय मयि तन्मात्सर्यमुत्सार्य च ॥ ११ ॥ (शार्दूल०)

त्रिभिर्विशेषिकम् ॥

असौ [11]सूर्येन्द्वक्षोर्भगणखरसारीन् परिणयन्,
दिशा सार्धं कालेऽम्बरमरकताष्टापदपदे ।
न यावत् प्रक्रीडन्नुपरमति तावद् बुधजनै-
रधीयाना वृत्तिर्जगति गतदोषा विजयताम् ॥ १२ ॥ (शिखरिणी)

**॥ इति श्रीव्युत्पत्तिरत्नाकरग्रन्थः[12] समाप्तः ॥**

**॥ ग्रन्थाग्रम्–१८००० प्रमाणम् ॥**

**॥ शुभं भवतु ॥**

---

१. शासितुं योग्याम् ॥ २. सेवधिः निधिः निधानम्, श्रीगुणनिधानसूरेः ॥ ३. स्वनामध्वनिवाचकाः विनयवन्तः ॥ ४ '-ष्याभृत्' इति५ ॥ ५ '-तः' इति५ ॥ ६. ताली 'कूंची' इति भाषान्तरम् ॥ ७. सर्ववाङ्मयगृहस्य ॥ ८. '-नी' इति५ ॥ ९. अनेकान् ॥ १०. दयालुभिः ॥ ११. 'सूर्यो-' इति४ ॥ १२. इतोऽग्रे ५प्रतौ- ''संवत् १८०९ वर्षे मिती माह सुदि १२ इदं पुस्तिका पण्डित मयाचंद लिखतम्. श्रीवीकानेरमध्ये ॥ श्रीः ॥'' इति दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## ॥ अथाऽस्य प्रशस्तिः ॥

(२ प्रतिपाठः)

श्री**वीर**क्रम **आर्यरक्षित**गुरुः सन्मार्गसंस्थापक-
स्तत्पट्टे **जयसिंहसूरि**रभवच्छ्री**धर्मघोष**स्ततः ।
तत्पट्टेऽथ **महेन्द्रसिंह**सुगुरुः सुरीन्द्र**सिंहप्रभ**-
स्तत्पट्टेऽ**जितसिंहसूरि**रभवद् **देवेन्द्रसिंह**स्ततः ॥ १ ॥ (शार्दूल०)
श्री**धर्मप्रभसूरिसिंहतिलक**श्रीमन्**महेन्द्रप्रभा**-
स्तेभ्यः साधुप**मेरुतुङ्ग**सुगुरुर्हं सोपमस्तत्पदे ।
श्रीमच्छ्री**जयकीर्तिसूरि**रभवत् तस्मा**ज्जयात् केसरी**,
श्री**सिद्धान्तसमुद्रसूरि**रमुतः श्री**भावसिन्धु**र्गुरुः ॥ २ ॥ (शार्दूल०)
सूरिः श्री**गुणसेवधिः** समभवत् प्राज्यप्रतापोदय-
स्तत्पट्टाम्बुजराजहंससदृशः सूरीश्वरानुत्तरः ।
संसाराम्बुधिपारलम्भनमहाबेडोपमः सद्गुणः,
शास्ता सूरिशिरोवतंसकनिभः श्री**धर्ममूर्ति**र्गुरुः ॥ ३ ॥ (शार्दूल०)
तत्पट्टपूर्वगिरिराजशिरःपतङ्गाः,
श्रीजैनशासनमहोन्नतिकारतन्त्राः ।
निःशेषसाधुगुणसूरिशिरोवतंसाः,
श्री**क्षेमसागर**जगद्गुरवो जयन्ति ॥ ४ ॥ (वसन्त०)
भास्वद्गुणनिधानानां, प्रस्तुतानां मनीषिणाम् ।
शिष्या हि **पुण्यचन्द्रा**ह्वा, वाचकाः शोभिरे शुभाः ॥ ५ ॥ (अनुष्टुप्)
तेषां **माणिक्यचन्द्रा**ख्यः, शिष्योऽभूद् वाचकाग्रणीः ।
श्रीमद्**विनयचन्द्रा**ह्वस्तिच्छिष्यो **रविचन्द्रकः** ॥ ६ ॥ (अनुष्टुप्)
तत्पादपङ्कजासक्तद्विरेफो **देवसागरः** ।
एनां वृत्तिं शुभां चक्रे, शिष्यवर्गप्रसत्तये ॥ ७ ॥ (अनुष्टुप्)
संवद्रसाष्टषट्चन्द्रै**१६८६**र्मिते वर्षे स(श)रद्दतौ ।
आश्विनार्जुनसप्तम्यां, स्तम्भतीर्थाभिधे पुरि ॥ ८ ॥ (अनुष्टुप्)युग्मम् ॥
विलोक्य विविधान् ग्रन्थान्, **पाणिनि**प्रवरोक्तिभिः ।
निर्मितेयं मया टीका, **लक्ष्मीचन्द्र**वराग्रहात् ॥ ९ ॥ (अनुष्टुप्)
असूयारहितैः सद्भिः, परोपकृतिनिष्ठितैः ।
शोधनीया प्रयत्नेन, बुद्धिव(म)द्भिः कृपापरैः ॥ १० ॥ (अनुष्टुप्)
अनाभोगात् तथा भ्रान्त्या. लिखितं मयकाऽनृतम् ।
न्यूनाधिकं च यत्किञ्चित्, क्षन्तव्यं विबुधैश्च तत् ॥ ११ ॥ (अनुष्टुप्)

**॥ इति प्रशस्तिः[१] ॥**

१. इतोऽग्रे २प्रतौ-''श्रीश्रेयश्चाऽस्तु, सं-१८७९ना वर्षे, शाके १७४५ प्रवर्तमान्यै प्रथमचैत्रविद १० शनौ रात्रगत घटी ४ समे सम्पूर्णम् ॥ श्रीभुजनगरे चतुर्माशकृतं लिंखतं मुनि मोहनसुंदर श्रीचिंतामणपार्श्वनाथप्रशादात् ॥ श्रीरस्तु ॥ कल्याणमस्तु ॥श्री ॥श्री ॥ श्री ॥ श्री ॥ छ ॥'' इति दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

।। श्रीशङ्खेश्वरपार्श्वनाथाय नमः ।।

।। अनन्तलब्धिनिधानश्रीगौतमस्वामिने नमः ।।

।। परमोपास्यश्रीनेमि-विज्ञान-कस्तूर-चन्द्रोदय-अशोक-सोमचन्द्रसूरीश्वरसद्गुरुभ्यो नमः ।।

कलिकालसर्वज्ञश्रीहेमचन्द्राचार्यविरचिता

वाचकश्रीदेवसागरगणिकृतव्युत्पत्तिरत्नाकरकलिता

# ।। अभिधानचिन्तामणिनाममाला ।।

# ।। सार्थशब्दानुक्रमणिका ।।

### —: अ :—

| शब्दः | अर्थः | श्लो. | पृ. | पं. |
|---|---|---|---|---|
| अ | અભાવ | १५३९ | ७०६ | २२ |
| अंश | ભાગ, હિસ્સો | १४३४ | ६५९ | २१ |
| अंशु | સૂર્ય | ९५ | २७ | ५९ |
| ,, | કિરણ | ९९ | ३१ | १४ |
| अंशुक | વસ્ત્ર | ६६६ | २९५ | ७ |
| अंशुपति | સૂર્ય | १३-प. | ५ | ४८ |
| अंशुमत् | ,, | १३-प. | ५ | ४९ |
| ( ,, ) | ,, | ९८ | ३० | ३८ |
| अंशुमालिन् | ,, | १३-प[1] | ५ | ४६ |
| ( ,, )[2] | ,, | ९८ | ३० | ३८ |
| अंशुहस्त | ,, | ९६ | २९ | २७ |
| अंस | ખભો | ५८८ | २६० | १८ |
| अंसकूट | બળદની ખુંધ | १२६४ | ५८२ | २० |
| अंसल | બળવાન | ४४८ | १९६ | ३५ |
| अंहति | દાન, ત્યાગ | ३८७ | १७१ | २५ |
| अंहस् | પાપ, અશુભ | १३८१ | ६३३ | ४० |
| अंह्रि | પગ, વૃક્ષનું મૂળ | ६१६ | २७२ | ३४ |
| अंह्रिनामन् | નીચેના ભાગ, વૃક્ષનું મૂળ | ११२१ | ५१४ | ४७ |
| अंह्रिप | ઝાડ | १११४ | ५१० | ४५ |
| अंह्रिस्कन्ध | અંગૂઠા અને આંગળી-ઓનો અગ્રભાગ | ६१७ | २७३ | १२ |
| अकम्पित | આઠમાં ગણધરનું નામ | ३२ | ११ | २४ |
| अकर्कश | કોમળ | १३८७ | ६३७ | १४ |
| अकर्ण | બહેરો | ४५४ | १९९ | १८ |
| अकल्कन | સરળ | ४९० | २१६ | ३ |
| अकस्मात् | તત્કાલ, એકદમ | १५३२ | ७०३ | २० |
| अकिञ्चन | નિર્ધન | ३५८ | १६१ | ७ |
| अकिञ्चनता | અપરિગ્રહ | ८१ | २१ | २८ |
| अकुप्य | સોનું અગર રૂપાના સિક્કા | १०४५ | ४७२ | ३७ |
| अकूपार | સમુદ્ર | १०७३ | ४८५ | ३१ |
| (अकृश) | જાડું | १७-प. | ६ | २३ |
| (अकोपना) | શાન્ત સ્વભાવવાળી ગાય | १२७१ | ५८५ | ४१ |
| अक्रम | ક્રમ વિનાનો | १५११ | ६९२ | २४ |
| अक्ष | જુગાર રમવાના પાસા | ४८६ | २१४ | २३ |
| ,, | જુગાર | ७३८ | ३२५ | ८ |
| ,, | સોળ માસા પ્રમાણ સુવર્ણાદિ | ८८४ | ३८९ | २७ |
| ,, | સંચળ | ९४३ | ४१९ | १९ |
| ,, | ઇન્દ્રિય | १३८३ | ६३४ | ४२ |
| अक्षज | વિષ્ણુ | २१९-शे[3] | १०३ | ७ |
| अक्षत | ચોખા | ४०१ | १७८ | ११ |
| अक्षतस्वन | શંકર | २००-शे. | ८९ | ९ |
| अक्षदर्शक | ન્યાયાધીશ | ७२० | ३१५ | ४९ |
| अक्षदेविन् | પાસા વડે જુગાર રમનાર | ४८५ | २१४ | ७ |
| अक्षधूर्त | ,, ,, ,, | ४८५ | २१४ | ५ |
| (अक्षपण) | બાજી ઊપર હોડમાં મૂકેલી રકમ | ४८६ | २१४ | ३१ |

१. ग्रन्थारम्भे श्लोक २ तः २३ पर्यन्तनिर्दिष्टपरिभाषादौ सूचितः शब्दः ।। २. मूलानुक्तोऽपि व्युत्पत्तिरत्नाकरटीकायां निरूपितः शब्दः ।।
३. व्युत्पत्तिरत्नाकरटीकायां हेमचन्द्राचार्यरचितशेषनाममालागतशब्दानां 'शेषश्चात्र' इति 'शैषिकाणि' इति 'शेषाश्च' इति वा निर्देशेन सङ्गृहीतः शब्दः ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| शब्दः | अर्थः | श्लो. | पृ. | पं. |
|---|---|---|---|---|
| अक्षमाला | વસિષ્ઠની પત્ની અરુંધતી | ૮૪૧ | ३७५ | २० |
| अक्षर | મોક્ષ | ७५ | १८ | ५० |
| ,, | તરવાર | ७८२-शे. | ३४५ | ५१ |
| अक्षरचञ्चु | લેખક | ४८३ | २१३ | २ |
| अक्षरचण | ,, | ४८३ | २१२ | ६७ |
| अक्षरजीवक | ,, | ४८३ | २१३ | १ |
| अक्षरन्यास | લખાણ, લિપિ | ४८४ | २१३ | ९ |
| अक्षवती | જુગાર | ४८६ | २१४ | १५ |
| अक्षाग्रकील | ધરીનો ખીલો | ७५६ | ३३३ | २८ |
| अक्षवाट | અખાડો | ८०१ | ३५५ | १२ |
| अक्षान्ति | ઈર્ષ્યા | ३११ | १७३ | ७ |
| अक्षि | આઁખ | ५७५ | २५४ | २२ |
| अक्षिकूटक | હાથીની આઁખનો ગોળો, આઁખનો ડોળો | १२२५ | ५६७ | ५२ |
| अक्षिगत | દ્વેષપાત્ર | ४४८ | १९६ | २८ |
| अक्षिविकूणित | કટાક્ષ | ५७८ | २५५ | ३१ |
| अक्षीव | સમુદ્રનું મીઠું. | ९४१ | ४१८ | ३७ |
| ,, | સરગવો | ११३४ | ५२२ | ३१ |
| अक्षौहिणी | દશ અનીકિની પ્રમાણ સૈન્ય, જેમાં ૨૧૮૭૦ હાથી, તેટલા જ રથ, ૬૫૬૧૦ અશ્વ, ૧૦૯૩૫૦ પાયદલ સૈન્ય હોય તે. | ७४९ | ३२९ | ४८ |
| अखण्ड | સમસ્ત, બધું | १४३३ | ६५८ | ५१ |
| अखात | અકૃત્રિમ તળાવ | १०९४ | ४९७ | ५४ |
| अखिल | સમસ્ત | १४३३ | ६५८ | ५१ |
| अखेदित्व | થાક વિનાની (તીર્થંકરની વાણીનો ગુણ) | ७१ | १७ | ३५ |
| अग | વૃક્ષ | १११४ | ५१० | ९ |
| (,,) | પર્વત | १०२७ | ४६२ | ११ |
| अगद | ઔષધ | ४७३ | २०८ | ४६ |
| अगदङ्कार | ,, | ४७२ | २०८ | ३३ |
| अगम | વૃક્ષ | १११४ | ५१० | ५८ |
| अगरु | અગર [ચતુઃસમ પૈકીની એક વસ્તુ] | ६३९ | १८३ | १५ |
| ,, | અગર | ६४० | २८३ | २३ |
| अगस्ति | અગસ્ત્ય ઋષિ | १२२ | ४३ | २३ |
| अगस्तिपूता | દક્ષિણ | १५-प. | ५ | ६१ |
| अगस्त्य | ઋષિનું નામ | १२२ | ४३ | १६ |

| शब्दः | अर्थः | श्लो. | पृ. | पं. |
|---|---|---|---|---|
| अगाध | અત્યંત ઊંડું | ૧૦૭૦ | ४८४ | १८ |
| ,, | ખોડો | १३६४ | ६२५ | ३१ |
| अगाधजल | ઊંડું સરોવર | १०९१ | ४९६ | २६ |
| अगार | ઘર | ९९२ | ४४२ | २८ |
| अगुरु | અગર, યક્ષકર્દમમાંની એક વસ્તુ | ૬૩૮ | ૨૮૨ | ૪૮ |
| ,, | અગર | ૬૪૦ | ૨૮૩ | ૨૧ |
| अगूढगन्ध | હીંગ | ४२२-शे. | १८६ | ५० |
| अगौकस् | પક્ષી | १३१७ | ६०४ | ४३ |
| अग्नायी | સ્વાહા, અગ્નિની પ્રિયા | ११०० | ५०३ | २१ |
| अग्नि | આગ્નેયી દિશાનો સ્વામી | १६९ | ६८ | १८ |
| ,, | અગ્નિ | १०९९ | ५०३ | ६ |
| अग्निक | ઇન્દ્રગોપ, ચોમાસાના કીડા | १२०९ | ५६० | ५५ |
| अग्निकण | અગ્નિના તણખા | ११०३ | ५०४ | ५६ |
| अग्निकारिका | અગ્નિહોમનું સ્થાન | ८१४ | ३६० | ५१ |
| अग्निकार्य | ,, ,, ,, | ८१४ | ३६० | ५३ |
| अग्निकुमार | પાંચમા ભવનપતિ દેવ | ९० | २६ | ३५ |
| अग्निचित् | અગ્નહોત્રી | ८३५ | ३७० | ९ |
| (अग्निजन्मन्) | કાર્તિકેય | २०९ | ९५ | ११ |
| (अग्निद) | વધ કરવા તૈયાર થયેલો | ३७२ | १६६ | ३३ |
| अग्निदेवा | કૃત્તિકા નક્ષત્ર | १०९ | ३७ | २१ |
| अग्निभू | શંકરનો પુત્ર | २०९ | ९५ | १ |
| अग्निभूति | બીજા ગણધરનું નામ | ३१ | ११ | ११ |
| अग्निरक्षण | મંત્રપૂર્વક અગ્નિનું સ્થાપન | ८३५ | ३७० | १५ |
| अग्निरज | ગોકળ ગાય | १२०९ | ५६० | ४१ |
| अग्निरेचक | પિત્ત | ४६२-शे. | २०२ | ५५ |
| अग्निवल्लभ | રાળ | ६४७ | २८६ | ५३ |
| अग्निवाह | ધૂમાડો | ११०३ | ५०५ | १५ |
| अग्निसम्भव | રસધાતુ | ६२० | २७३ | ४६ |
| अग्निसिंहनन्दन | સાતમા વાસુદેવનું નામ | ६९६ | ६९६ | ३२ |
| अग्निहोत्र | મંત્રપૂર્વક અગ્નિનું સ્થાપન | ८३६ | ३७० | १७ |
| अग्निहोत्रिन् | અગ્નિહોત્રી | ८३५ | ३७० | ८ |
| अग्नीन्धन | હવિષ્ વગેરે આપી અગ્નિ સળગાવવો તે. | ८१४ | ३६० | ५१ |
| अग्न्याधान | અગ્નિહોત્ર | ८३६ | ३७० | १६ |
| (अग्न्याहित) | અગ્નિહોત્રી | ८३५ | ३७० | ११ |
| अग्र | ટોચ | ११२१ | ५१४ | ३२ |
| ,, | કેરડાનો અગ્રભાગ | ११८३ | ५४९ | ११ |
| ,, | પ્રધાન, શ્રેષ્ઠ | १४३८ | ६६१ | १५ |

| शब्दः | अर्थः | श्लो. | पृ. | पं. |
|---|---|---|---|---|
| अग्र | પહેલું | १४५९ | ६७० | १९ |
| अग्रज | કુટુંબી વાચક શબ્દ બનાવવા વપરાતો શબ્દ | ९-प. | ४ | ६४ |
| ,, | મોટા ભાઈ | ५५१ | २४४ | १३ |
| ,, | બ્રાહ્મણ | ८१२ | ३५९ | ४९ |
| अग्रजङ्घा | જંઘાનો અગ્રભાગ | ६१५ | २७२ | ७ |
| अग्रजन्मम् | બ્રાહ્મણ | ८१२ | ३५९ | ४९ |
| अग्रजाति | .. | ८१२ | ३५९ | ४८ |
| अग्रणी | પ્રધાન, મુખ્ય | १४३९ | ६६१ | १८ |
| अग्रतःसर | નાયક | ४९८ | २१९ | १३ |
| अग्रतस् | આગળ | १५२९ | ७०१ | ५० |
| अग्रबीज | વનસ્પતિના છ પ્રકાર પૈકીનો એક પ્રકાર | १२०० | ५५७ | ७ |
| (अग्रमांस) | હૃદયની અંદરનો કમલ આકારનો માંસપિંડ, હૃદય | ६२३ | २७५ | २२ |
| अग्रयान | મોખરાનું લશ્કર | ८०० | ३५४ | ४३ |
| अग्रायणीय | બીજા પૂર્વનું નામ | २४७ | ११५ | २८ |
| अग्रिम | પ્રધાન | १४३९ | ६६१ | १९ |
| ( ,, ) | મોટા ભાઈ | ५५१-शि. | २४४ | १३ |
| अग्रेदिधीषू | પુનર્લગ્ન કરેલ સ્ત્રીનો બ્રાહ્મણ પતિ | ५२५ | २३२ | ४९ |
| अग्रेसर | આગળ ચાલનાર, નાયક | ४९७ | २१९ | १३ |
| ,, | પ્રધાન | १४३८ | ६६१ | १० |
| अग्र्य | .. | १४३९ | ६६१ | २१ |
| अघ | પાપ | १३८१ | ६३३ | ५७ |
| अघमर्षण | સર્વ પાપનો નાશ કરનાર જાપ | ८४४ | ३७३ | ४१ |
| अघ्न्या | ગાય | १२६५ | ५८३ | १० |
| अङ्क | ધાર્યવાચી શબ્દથી લગાડાતો શબ્દ. જેમકે वृषाङ्क | ६-प. | ३ | ७३ |
| ,, | ચિહ્ન | १०६ | ३५ | ५७ |
| ,, | નાટ્ય પ્રબન્ધનો પ્રકાર | २८४ | १३० | ५४ |
| ,, | ખોળો | ६०२ | २६५ | ३५ |
| (,,) | ગ્રન્થનો અમુક ભાગ | २५७ | ११९ | ९ |
| अङ्कति | પવન | ११०७-शे. | ५०७ | ३१ |
| (अङ्कपालि) | આલિંગન | १५०७ | ६९० | ५० |
| ,, | ,, | १५०७ | ६९० | ५० |
| अङ्किन् | ખોળામાં રાખી વગાડાય તેવું મૃદંગ | २९३ | १३३ | ५६ |
| अङ्कुट | ચાવી | १००५ | ४४९ | १४ |
| अङ्कुर | ફણગો | १११८ | ५१३ | १२ |

| शब्दः | अर्थः | श्लो. | पृ. | पं. |
|---|---|---|---|---|
| ,, | પાણી | १०७०-शे. | ४८३ | ४९ |
| अङ्कुश | હાથીને વશમાં લાવવાનું શસ્ત્ર | १२३० | ५७० | १६ |
| अङ्कुशा | શ્રી અનંતનાથ ભ. ની શાસનદેવી | ४५ | १३ | ३५ |
| अङ्कूर | ફણગો | १११८ | ५१३ | १३ |
| अङ्कोल्लसार | વિષ, ઝેર | ११९८ | ५५६ | ४६ |
| (अङ्क्य) | ખોળામાં રાખી વગાડાય તેવું મૃદંગ | २९३ | १३४ | २ |
| अङ्ग | શિક્ષાદિક અંગ | २५१ | ११७ | ९ |
| ,, | શરીર | ५६३ | २४८ | ३८ |
| ,, | શરીરાવયવ | ५६६ | २५० | १४ |
| ,, | બિહાર દેશ | ९५७ | ४२५ | ६ |
| ,, | હે !, સંબોધનના અર્થમાં | १५३७ | ७०५ | ४१ |
| अङ्गज | કામદેવ | २२७ | १०७ | ३३ |
| ,, | પુત્ર | ५४२ | २४० | २२ |
| (अङ्गजा) | પુત્રી | ५४२ | २४० | ४४ |
| (अङ्गण) | આંગણું | १००४ | ४४८ | २५ |
| अङ्गद | બાજુબંધ, કડું | ६६२ | २९२ | ३४ |
| (अङ्गन) | આંગણું | १००४ | ४४८ | २६ |
| अङ्गना | સુંદરી | ५०५ | २२२ | ४४ |
| अङ्गमर्द | અંગમર્દન કરનાર | ४९२ | २१६ | ३८ |
| अङ्गरक्षणी | લોઢાનું બખ્તર | ७६९ | ३३९ | १७ |
| अङ्गराग | વિલેપન | ६३५ | २८१ | ३५ |
| अङ्गराज् | કર્ણ | ७११ | ३१२ | ४९ |
| (अङ्गरुह) | રોમ, રુંવાટાં | ६३० | २७८ | १० |
| अङ्गविक्षेप | હાવભાવ પૂર્વકનું નૃત્ય | २८२ | १३० | १७ |
| अङ्गहार | નાટકમા અંગ મરડવું | २८२ | १३० | ११ |
| अङ्गारक | મંગલ ગ્રહ | ११६ | ४० | ५६ |
| अङ्गारधानी | સગડી | १०२० | ४५७ | ५१ |
| अङ्गारपात्री | ,, | १०२० | ४५७ | ५१ |
| अङ्गारशकटी | ,, | १०२० | ४५७ | ५१ |
| अङ्गिका | ચોળી, કાંચળી | ६७४ | २९९ | २४ |
| (अङ्गिरम्) | સપ્તર્ષિ પૈકી એક ઋષિનુ નામ | १२४ | ४३ | ६४ |
| अङ्गीकार | સ્વીકાર | २७८ | १२८ | ३३ |
| अङ्गीकृत | સ્વીકાર કરેલું | १४८८ | ६८२ | ५६ |
| अङ्गुरी | આંગળિઓ | ५९२ | २६२ | १५ |
| अङ्गुरी | ,, | ५९२ | २९२ | १५ |
| अङ्गुल | અંગૂઠો | ५९२ | २९२ | १९ |
| ,, | વાત્સ્યાયન મુનિ | ८५४ | ३७६ | ४२ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

| शब्दः | अर्थः | श्लो. | पृ. | पं. |
|---|---|---|---|---|
| अङ्गुलि | આંગળી | ५९२ | २६२ | १० |
| अङ्गुलिमुद्रा | નામાક્ષરવાળી વીંટી | ६६४ | २९३ | २० |
| (अङ्गुली) | આંગળી | ५९२ | २६२ | १५ |
| अङ्गुलीयक | વીંટી | ६६३ | २९३ | १३ |
| अङ्गुष्ठ | અંગૂઠો | ५९२ | २६२ | २१ |
| (अङ्घ्रि) | પગ | ६१६ | २७२ | ३७ |
| अचण्डी | શાન્ત સ્વભાવવાળી ગાય | १२७१ | ५८५ | ४१ |
| अचल | પહેલા વાસુદેવના મોટાભાઈ બલદેવ | ६९८ | ३०८ | ५० |
| ,, | પર્વત | १०२७ | ४६१ | ५१ |
| अचलभ्रातृ | નવમા ગણધરનું નામ | ३२ | ११ | २६ |
| अचला | પૃથ્વી | ९३६ | ४१६ | १० |
| अचिरप्रभा | વિજળી | ११०४ | ५०५ | ३९ |
| अचिरा | ૧૬ માં તીર્થંકરની માતા | ४० | १२ | ४० |
| अचेष्टता | મૂર્ચ્છા | ३०७ | १४० | २४ |
| अच्छ | પ્રસન્ન, નિર્મલ | १०७१ | ४८४ | ३९ |
| अच्छभल्ल | રીંછ | १२८९ | ५९३ | १० |
| अच्छुप्ता | ચૌદમી વિદ્યાદેવી | २४० | ११२ | ४४ |
| अच्युत | વિષ્ણુ | २१४ | ९८ | २४ |
| अच्युतज | બારમા દેવલોકમાં ઉત્પન્ન થયેલ દેવ | ९३ | २७ | ९ |
| (अच्युतदेवी) | શ્રી પદ્મપ્રભસ્વામીની ઉપાસિકા યક્ષિણી | ४४ | १३ | २६ |
| अच्युताग्रज | ઇન્દ્ર | १७१ | ६९ | ९ |
| ,, | બળદેવ | २२५ | १०६ | १ |
| अज | બ્રહ્મા | २११ | ९६ | ३९ |
| ,, | વિષ્ણુ | २१४ | ९९ | ७ |
| ,, | બકરો | १२७५ | ५८७ | १८ |
| अजकाव | શંકરનું ધનુષ્ય | २०१ | ८९ | ४६ |
| अजगर | અજગર | १३०५ | ६०० | ५१ |
| (अजगव) | શંકરનું ધનુષ્ય | २०१ | ८९ | ४९ |
| अजजीविक | ભરવાડ | ८८९ | ३९२ | ४२ |
| अजदेवता | પૂર્વાભાદ્રપદ | ११४ | ३९ | ५३ |
| अजनामक | માક્ષિક ધાતુ | १०५४ | ४७६ | १५ |
| अजन्य | અકસ્માત્, ઉપદ્રવ | १२६ | ४४ | ४५ |
| अजप | ખોટા જાપ કરનાર | ८५७ | ३७७ | ६० |
| अजमीढ | યુધિષ્ઠિર | ७०७ | ३११ | २५ |
| अजर्य | મિત્રતા | ७३१ | ३२१ | १३ |
| अजस्र | નિરંતર | १४७१ | ६७५ | २५ |
| अजा | બકરી | १२७५ | ५८७ | ३७ |

| शब्दः | अर्थः | श्लो. | पृ. | पं. |
|---|---|---|---|---|
| अजाजी | જીરું | ४२२ | १८६ | २७ |
| अजातशत्रु | યુધિષ્ઠિર | ७०७ | ३११ | १८ |
| अजित | વર્તમાન બીજા તીર્થંકર | २६ | ९ | ३ |
| ,, | નવમા તીર્થંકરના યક્ષ | ४२ | १२ | ६४ |
| ,, | વિષ્ણુ | २१९-शे. | १०३ | २ |
| अजीतबला | શ્રી અજિતનાથ ભ. ની યક્ષિણી | ४४ | १३ | २० |
| (अजिता) | શ્રી અજિતનાથ ભ. ની યક્ષિણી | ४४ | १३ | २२ |
| अजिन | ચામડી | ६३० | २७८ | ३३ |
| अजिनपत्रिका | ચામાચીડીયું | १३३६ | ६१४ | ६ |
| अजिनयोनि | હરણ | १२९३-शे. | ५९५ | १७ |
| अजिर | આંગણું | १००४ | ४४८ | २२ |
| अजिह्म | સરળ | १४५६ | ६६८ | ५६ |
| अजिह्मग | બાણ | ७७८ | ३४३ | १४ |
| अजिह्व | દેડકો | १३५४ | ६२१ | ५८ |
| अज्जुका | ગણિકા | ३३४ | १४९ | ४९ |
| अज्ञ | મૂર્ખ | ३५२ | १५८ | ४९ |
| अज्ञान | તીર્થંકરમાં ન હોય તે ૧૮ દોષ પૈકી ૧૪મોં દોષ | ७३ | १८ | १८ |
| ,, | અજ્ઞાન | १३७४ | ६३० | ३४ |
| अञ्चल | વસ્ત્રનો છેડો | ६६७ | २९५ | ४१ |
| अञ्चति | અગ્નિ | ११००-शे. | ५०३ | १५ |
| अञ्चित | પૂજાયેલ | ४४७ | १९५ | ३७ |
| अञ्जन | પાંચમી દિશાના દિગ્ગજ | १७० | ६८ | ३७ |
| ,, | કાજળ | ६८६ | ३०४ | ४६ |
| ( ,, ) | સુરમો | १०५१ | ४७५ | १९ |
| ,, | મોરથુથુ | १०५३ | ४७५ | ४८ |
| अञ्जना | ચોથી નારક | १३६१-शे. | ६२४ | १९ |
| अञ्जनाधिका | આંજણી-ગરોળીની જાત | १२९८ | ५९७ | ५२ |
| अञ्जनिका | ,, ,, ,, | १२९८ | ५९७ | ५५ |
| अञ्जलि | ખોબો | ५९८ | ३६४ | १४ |
| अञ्जलिकारिका | પૂતળી | १०१४ | ४५४ | ३२ |
| अञ्जस | સરળ | ३७५ | १६७ | २६ |
| अञ्जसा | જલ્દી | १५३० | ७०२ | ३१ |
| ,, | નિશ્ચય | १५४२-शे. | ७०८ | ४१ |
| (अटनि) | ધનુષ્યનો અગ્રભાગ | ७७५ | ३४१ | ३१ |
| अटनी | ધનુષ્યનો છેડો | ७७५ | ३४१ | ३४ |
| अटवी | જંગલ | १११० | ५०८ | २२ |
| (अटरुषक) | અરડુશી | ११४० | ५२६ | ३३ |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| शब्दः | अर्थः | श्लो. | पृ. | पं. |
|---|---|---|---|---|
| (अटरूष) | અરડુશી | ११४० | ५२६ | ३३ |
| (अटरूषक) | ,, | ११४० | ५२६ | ३३ |
| अटा | પર્યટન | १५०१ | ६८८ | १८ |
| (अटाटा) | ફરવું | १५०१ | ६८८ | १६ |
| अटाट्या | પર્યટન | १५०१ | ६८८ | १४ |
| अट्ट | ઉપલો માળ | ९८१ | ४३५ | ४४ |
| ,, | દુકાન | १००२ | ४४७ | ५ |
| अट्टहास | જોરથી હસવું તે | २९७ | १३७ | २ |
| अट्टहासिन् | શંકર | १९७ | ८७ | १७ |
| अट्टालक | મેડી | ९८१ | ४३५ | ४९ |
| अड्डन | ઢાળ | ७८३ | ३४६ | १८ |
| अणक | અધર્મ | १४४२ | ६६२ | ३२ |
| अणव्य | કાંગનું ખેતર | ९६६ | ४२८ | ५० |
| अणि | ધરીનો ખીલો | ७५६ | ३३३ | ३२ |
| ,, | ખૂણો | १०१३ | ४५३ | ४६ |
| अणिमन् | અત્યંત નાના થવાની સિદ્ધિ | २०२ | ९० | ४८ |
| अणीयस् | અત્યંત નાનું | १४२८ | ६५६ | २५ |
| अणु | નાનું | १४२६ | ६५५ | ३४ |
| अण्ड | અંડકોશ | ६११ | २७० | ३१ |
| ,, | ઈંડું | १३१९ | ६०५ | ४१ |
| अण्डक | અંડકોશ | ६११ | २७० | ३६ |
| अण्डकोश | ,, | ६१२ | २७० | ४० |
| अण्डज | પક્ષી | १३१७ | ६०४ | ४१ |
| ,, | માછલું | १३४३ | ६१७ | ३७ |
| ,, | ઈંડામાંથી ઉત્પન્ન થનાર સાપ, પક્ષી વિ. | १३५५ | ६२२ | ५ |
| अण्डवर्धन | અંડકોશની વૃદ્ધિ | ४७० | २०७ | ३ |
| अतट | પર્વતનું ઊંચું સ્થાન | १०३२ | ४६४ | ४० |
| अतल | મહાદેવ | २००-शे. | ८९ | १६ |
| अतलस्पृश् | અત્યંત ઊંડું | १०७० | ४८४ | २१ |
| अतस् | એ માટે | १५४२-शे. | ७०८ | ४५ |
| अतसी | અળસી | ११७९ | ५४६ | ४९ |
| अति | શ્રેષ્ઠવાચક શબ્દ | १५४२-शे. | ७०८ | १८ |
| (,,) | અતિશય | १५३५ | ७०४ | ३५ |
| अतिकुत्सित | અત્યંત ખરાબ | ३५० | १५७ | ५५ |
| अतिक्रम | ક્રમનું ઉલ્લંઘન | १५०४ | ६८९ | ३७ |
| अतिजव | અતિશય વેગ | ४९४ | २१७ | २२ |
| अतिथि | મહેમાન | ४९९ | २१९ | ४२ |
| अतिथिपूजन | અતિથિસત્કાર | ८२२ | ३६४ | ४३ |
| (अतिथी) | મહેમાન | ४९९ | २१७ | ४७ |

| शब्दः | अर्थः | श्लो. | पृ. | पं. |
|---|---|---|---|---|
| अतिपथिन् | સારો માર્ગ | ९८४ | ४३८ | ९ |
| अतिपात | ઉલ્લંઘન | १५०४ | ६८९ | ३५ |
| अतिभी | વજ્રની જ્વાલા | १८१ | ७५ | २९ |
| अतिमर्याद | અતિશય | १५०६ | ६९० | १९ |
| अतिमात्र | ,, | १५०६ | ६९० | १८ |
| अतिमुक्तक | માધવી લતા | ११४७ | ५३० | ३४ |
| अतिरिक्त | અધિક | १४४९ | ६६६ | २४ |
| अतिवाहिक | નારકી | १३५८ | ६२३ | ११ |
| अतिवृष्टि | અતિશય વર્ષા ન થાય એવો ભગવાનનો અતિશય | ६० | १६ | २८ |
| अतिवेल | ઘણું | १५०६ | ६९० | २६ |
| अतिशय | ,, | १५०६ | ६९० | २९ |
| अतिसन्धान | ઠગવું | ३७९ | १६८ | ५७ |
| अतिसर्जन | અતિશય દાન | १५१९ | ६९६ | २६ |
| अतिसारकिन् | અતિસારનો રોગી | ४६० | २०२ | ३ |
| अतिस्थिर | અત્યંત સ્થિર | १४५३ | ६६७ | ४९ |
| अतिस्निग्ध-मधुरत्व | અત્યંત મીઠાસ અને સ્નેહવાળી વાણી (પ્રભુની વાણીનો ગુણ) | ६८ | १७ | ५२ |
| अतिहास | મોટેથી હસવું તે | २९८ | १३७ | ६ |
| अतीव | અતિશય | १५३५ | ७०४ | ३९ |
| अतीसारकीन् | અતિસારના રોગવાળો | ४६० | २०२ | ५ |
| अत्तिका | મોટી બહેન | ३३५ | १५० | ५ |
| अत्यन्तीन | ઘણું ચાલનાર | ४९५ | २१८ | १० |
| अत्यय | મરણ, નાશ | ३२३ | १४६ | १९ |
| अत्यर्थ | ઘણું | १५०५ | ६९० | १ |
| अत्यल्प | અત્યંત થોડું | १४२८ | ६५६ | २० |
| अत्याकार | પરાભવ | ४४२ | १९३ | ४१ |
| अत्युग्र | હીંગ | ४२२-शे. | १८६ | ५० |
| अत्रभवान् | પૂજ્યવાચક નામ પછી લગાડાતો શબ્દ | ३३६ | १५० | ४४ |
| (अत्रि) | સપ્તર્ષિ પૈકી એકનું નામ | १२४ | ४३ | ६४ |
| अत्रिदृग्ज | ચન્દ્રમા | १०५ | ३५ | २ |
| (अत्रिनयन-समुत्थज्योतिस् | ,, | १५-प. | ५ | ६५ |
| अथर्वन् | ત્રણ વેદમાંથી ઉદ્ધૃત વેદ | २४९ | ११६ | २८ |
| अदन | ભોજન | ४२४ | १८७ | २७ |
| अदभ्र | ઘણું | १४२६ | ६५५ | १० |
| अदान | નહિં આપવું તે | ७३८ | ३२५ | ११ |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| शब्दः | अर्थः | श्लो. | पृ. | पं. |
|---|---|---|---|---|
| अदृष्ट | અગ્નિ પાણી વિ.થી થતો ભય | ३०२ | १३८ | २४ |
| अद्धा | યથાર્થ અર્થ જણાવનાર શબ્દ | १५४२-शे. | ७०८ | ४१ |
| अद्भुत | આઠમો રસ | २९५ | १३५ | ४६ |
| ,, | અદ્ભુત રસનો સ્થાયી ભાવ, આશ્ચર્ય | ३०३ | १३८ | ६१ |
| अद्मर | ખાનાર | ३९४ | १७४ | १८ |
| अद्य | આજ | १५४२-शे. | ७०८ | ५४ |
| अद्रि | ઇન્દ્રનો શત્રુ | १७४ | ७१ | ४३ |
| ,, | પર્વત | १०२७ | ४६१ | ३५ |
| ,, | વૃક્ષ | १११४ | ५१० | १४ |
| अद्रिजा | પાર્વતી | २०४ | ९२ | ८ |
| अद्रिराज् | હિમાલય | १०२७ | ४६२ | ३० |
| (अद्रिद्विष्) | ઇન્દ્ર | १७५ | ७१ | ५४ |
| अद्रुतत्व | આશ્ચર્યકારી | ७० | १७ | ६१ |
| अद्वय | બુદ્ધ | २३४ | १११ | ५ |
| अधम | ખરાબ, હલકું | १४४१ | ६६२ | २७ |
| अधमर्ण | દેવાદાર | ८८२ | ३८८ | ५ |
| अधर | ઓછું બોલનાર | ३४७ | १५६ | ५४ |
| ,, | હોઠ | ५८१ | २५६ | ४३ |
| अधरेद्युस् | ગઈ કાલે, પેલેદિવસે | १५४२-शे. | ७०८ | ६१ |
| अधस् | નીચે, હેઠળ | १५२६ | ७०० | २८ |
| अधस्तात् | ,, ,, | १५२६ | ७०० | २६ |
| अध:क्षिप्त | નીચે ફેંકેલું | १४८२ | ६७९ | ३२ |
| अधि | રજસ્વલા સ્ત્રી | ५३५ | २३७ | २९ |
| अधिक | વધારે | १४४९ | ६६६ | २५ |
| अधिकरण | અધિકાર | २५५ | ११८ | ३० |
| अधिकर्मिक | દાન લેવા નીમાયેલા અધિકારી | ७२५ | ३१८ | १६ |
| अधिकाङ्ग | કેડે બાંધવાનો કમર પટ્ટો | ७६७ | ३३८ | ४३ |
| अधिकार | વ્યવસ્થા કરવી | ७४४ | ३२७ | ३ |
| अधिकृत | અધિકારી | ७२२ | ३१६ | ५३ |
| अधिक्रम | આક્રમણ | १५११ | ६९२ | १८ |
| अधिक्षिप्त | તિરસ્કાર પામેલો | ४४० | १९३ | ८ |
| अधित्यका | પર્વતની ઊપરની જગ્યા | १०३५ | ४६५ | ५६ |
| अधिप | સ્વામી, નાયક | ३५८ | १६१ | १२ |
| अधिभू | ,, ,, | ३५८ | १६१ | १८ |
| (अधियाङ्ग) | કમરપટ્ટો | ७६७ | ३३८ | ४५ |
| अधिरोहणी | નિસરણી | १०१३ | ४५४ | ७ |
| अधिवासन | ધૂપ વિ. થી સંસ્કાર કરવો તે | ६३७ | २८२ | ३० |
| अधिविन्ना | પહેલી પરણેલી સ્ત્રી | ५२७ | २३३ | ३८ |
| अधिश्रयणी | ચૂલો | १०१८ | ४५६ | ४४ |
| अधिष्ठान | નગર | ९७२ | ४३२ | १० |
| अधीन | પરવશ | ३५६-शे. | १६० | १४ |
| अधीश्वर | અરિહંત, તીર્થંકર | २४ | २८ | १४ |
| ,, | ચક્રવર્તી | ६९१-शे. | ३०६ | ५६ |
| अधुना | હમણાં | १५३० | ७०२ | ८ |
| अधृष्ट | સરળ | ४३३ | १९१ | १ |
| अधोंशुक | નીચે પહેરવાનું વસ્ત્ર | ६७२ | २९८ | २४ |
| अधोक्षज | કૃષ્ણ | २१४ | १०० | ६ |
| अधोभुवन | પાતાલ | १३६३ | ६२४ | २९ |
| अधोमर्मन् | ગુદા | ६१२ | २७० | ५९ |
| अधोमुख | નીચા મુખવાળો | ४५७ | २०० | ४९ |
| ,, | વિષ્ણુ | २१९-शे. | १०३ | १३ |
| (अधोलोक) | પાતલ, નાગલોક | १३६३ | ६२४ | ३२ |
| अध्यक्ष | અધિકારી | ७२२ | ३१६ | ५० |
| अध्ययन | વેદનું અધ્યયન | ८२१ | ३६४ | १५ |
| अध्यवसाय | ઉત્સાહ | ३०० | १३७ | ६० |
| अध्याहार | વિચારણા | ३२३ | १४५ | ६० |
| अध्यूढा | પ્રથમ પરણેલી સ્ત્રી | ५२७ | २३३ | ३५ |
| अध्येषण | માંગણી, યાચના | ३८८ | १७२ | ३ |
| अध्वग | મુસાફર | ४९३ | २१६ | ६३ |
| अध्वन् | માર્ગ | ९८३ | ४३७ | ५० |
| अध्वनीन | મુસાફર | ४९३ | २१६ | ६० |
| अध्वन्य | ,, | ४९३ | २१७ | १ |
| अध्वर | યજ્ઞ | ८२० | ३६४ | ११ |
| अध्वरथ | મુસાફરીનો રથ | ७५२ | ३३२ | ७ |
| अध्वर्यु | યજુર્વેદ જાણનાર ઋત્વિજ | ८१९ | ३६३ | २३ |
| अनक्षर | ન બોલવા લાયક વચન | २६६ | १२३ | ५४ |
| अनक्षि | વિકારવાળી આંખ | ५७६ | २५५ | ५ |
| अनगार | સાધુ, મુનિ | ७६ | १९ | १० |
| अनङ्ग | કામદેવ | २२७ | १०७ | २० |
| अनङ्गासुहृद् | શંકર | २०० | ८८ | ४८ |
| अनच्छ | મલિન | १०७१ | ४८४ | ४६ |
| अनडुह् | બળદ | १२५७ | ५७९ | ३४ |
| अनडुही | ગાય | १२६५ | ५८३ | १८ |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| शब्दः | अर्थः | श्लो. | पृ. | पं. |
|---|---|---|---|---|
| अनड्वाही | ગાય | १२६५ | ५८३ | १८ |
| अनतिविल-म्बिता | વિલંબ વિનાની | ७० | १७ | ६२ |
| अनधीनक | સ્વતંત્ર સુથાર | ९१८ | ४०५ | ३१ |
| अनन्त | ૧૪માં ભગવાનનું નામ | २७ | ९ | ४३ |
| ,, | ,, ,, ,, | २९ | १० | ४० |
| ,, | આકાશ | १६३ | ६३ | ३९ |
| ,, | બલદેવ | २२४ | १०५ | ४४ |
| ,, | શેષનાગ | १३०७ | ६०२ | ५ |
| अनन्तक | પુદ્‌ગલ, અનંત પદાર્થો | ८७५ | ३८४ | ५६ |
| अनन्तजित् | ૧૪માં ભગવાનનું નામ | २९ | १० | ३४ |
| अनन्ततीर्थकृत् | ,, ,, ,, | २७ | ९ | ४७ |
| अनन्तवीर्य | ભાવી ચોવીશીના ૨૩માં ભગવાનનું નામ | ५६ | १५ | १० |
| अनन्तर | આંતરા રહિત | १४५१ | ६६७ | ४ |
| अनन्ता | ભૂમિ | ९३६ | ४१५ | १३ |
| ,, | ધરો | ११९२ | ५५३ | ३८ |
| ,, | પાર્વતી | २०५-शे. | ९२ | २८ |
| अनन्यज | કામદેવ | २२७ | १०७ | ३० |
| अनन्यवृत्ति | એકાગ્ર | १४५८ | ६७० | १३ |
| अनर्गल | અંકુશરહિત | १४६६ | ६७३ | २६ |
| अनल | અગ્નિ | १०९९ | ५०३ | ४ |
| अनवधानता | અસાવધાનપણું | १३८२ | ६३४ | १८ |
